
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय
हस्तलिखित संग्रह

दाखल क्र. M2057 विषय पुराण

नांव श्रीमद्भागवत

लेखक / लिपीकार —

पृष्ठ 1059 काळ — पूर्ण / अपूर्ण

॥श्री॥

॥श्रीकृष्ण॥

॥श्रीकृष्ण॥श्रीकृष्ण॥श्रीकृष्ण॥

॥श्रीमद्भागवतस्येदंपुस्तकंशोभनंमतं॥

॥श्रीकृष्ण॥श्रीकृष्ण॥श्रीकृष्ण॥

॥श्रीकृष्ण॥

॥श्री॥

भा॰ प्र
१

श्रीगणेशाय नमः ॥ ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय ॥ १ ॥ वागीशा य
स्य वदने लक्ष्मीर्यस्य च वक्षसि यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ॥ १ ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं ॥ श्रीकृष्णाख्यं परं धा
म जगद्धाम नमामि तत् ॥ १ ॥ माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ ॥ वंदे परस्परात्मानौ परस्परनुतिप्रियौ ॥ २ ॥ संप्रदायानुरोधेन पौ
र्वापर्यानुसारतः ॥ श्रीभागवतभावार्थदीपिकेयं वितन्यते ॥ ४ ॥ क्वाहं मंदमतिः क्वेदं मंथनं क्षीरवारिधेः ॥ किं तत्र परमाणुर्वै यत्र मज्जति
मंदरः ॥ ५ ॥ मूकं करोति वाचालं पंगुं लंघयते गिरिं ॥ यत्कृपा तमहं वंदे परमानंदमाधवं ॥ ६ ॥ श्रीमद्भागवताभिधः सुरतरुस्तारांकुरः स

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति यत्सूरयः ॥ तेजोवारिमृ
दां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

ज्जनिः स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः ॥ द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्टदशेष्ट
दोतिसुलभो वर्वर्ति सर्वोपरि ॥ ७ ॥ अथ नानापुराणशास्त्रप्रबंधैश्चित्तप्रशांतिमलभमानस्तत्र तत्रापरितुष्यन्नारदोपदेशतः ॥ श्रीमद्भा
वद्गुणवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्यपरदेवतानुस्मरणमंगलमाचरति जन्माद्यस्येति ॥ परं परमेश्वरं धीम
हीति ध्यायतेर्लिङि छांदसं ध्यायेमेत्यर्थः ॥ बहुवचनं शिष्याभिप्रायं ॥ तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति ॥ तत्र स्वरूपलक्ष

राम
१

णं सत्यमिति सिद्धत्वादहेतुः ॥ यत्र यस्मिन्न त्रयाणां गुणानां तमोरजसत्वानां सर्गो भूतेंद्रियदेवतारूपः अमृषा सत्यः ॥ यत्सत्यतया मिथ्या
सर्गो विसत्यवत्प्रतीयते तं परं सत्यमित्यर्थः ॥ अत्र दृष्टांतः ॥ तेजोवारिमृदां यथा विनिमयो व्यत्ययः अन्यस्मिन्नन्यावभासः तद्यथा
धिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः ॥ तत्र तेजसि वारिबुद्धिर्मरीचितोये प्रसिद्धा ॥ मृदि च काचादौ वारिबुद्धिरित्यादि यथायथमूह्यं ॥ तस्यै
व परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं ॥ यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति यत्रेत्यनेन प्रतीतस्योपाधिसंबंधो वा
यति ॥ स्वेनैव धाम्ना सदा निरस्तं कुहकं कपटं यस्मिन्स्तं ॥ तत्स्थूलरूपणमाह जन्मादीति ॥ अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति
तं धीमहीति ॥ तत्र हेतुः ॥ अन्वयादितरतश्चार्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् ॥ अकार्येभ्यश्च खपुष्पादिभ्यस्तद्व्यतिरेकात्
पक्षा ॥ अन्वयशब्देनानुवृत्तिः ॥ इतरशब्देन व्यावृत्तिः ॥ अनुवृत्तत्वात्सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत् ॥ व्यावृत्तत्वाद्विश्वं कार्यं घटकु
ण्डलादिवदित्यर्थः ॥ यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति संबंधः ॥ तथा च श्रुतिः ॥ यतो वा इमानि भू
तानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्याद्या ॥ स्मृतिश्च ॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्र
लयं यांति पुनरेव युगक्षये इत्याद्या ॥ तर्हि किं प्रधानं जगत्कारणं त्वयाभिप्रेतं नेत्याह ॥ अभिज्ञो यत्स ईक्षत लोकान्नु सृजा
इति स इमांल्लोकानसृजतेति श्रुतेः ॥ ईक्षतेर्नाशब्दमिति न्यायाच्च ॥ तर्हि जीवः स्यान्नेत्याह स्वराट् ॥ स्वेनैव राजते यस्तं ॥ स्वतः सिद्धज्ञा
नवानित्यर्थः ॥ तर्हि किं ब्रह्मा ॥ हिरण्यगर्भः समवर्त्ततांग्रे भूतस्य जातः पतिरेक आसीदिति श्रुतेः नेत्याह तेन इति ॥ आदिकवये ब्र

भा०प्र०
१

श्रीगणेशाय नमः ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय १ वागीशा य-
स्य वदने लक्ष्मीर्यस्य च वक्षसि यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे १ विश्वसर्गविसर्गादिनवलक्षणलक्षितं श्रीकृष्णाख्यं परं धा-
म जगद्धाम नमामि तत् २ माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ वंदे परस्परात्मानौ परस्परनुतिप्रियौ ३ संप्रदायानुरोधेन पौ-
र्वापर्यानुसारतः श्रीभागवतभावार्थदीपिकेयं वितन्यते ४ क्वाहं मंदमतिः क्वेदं मथनं क्षीरवारिधेः किं तत्र परमाणुर्वै यत्र मज्जति
मंदरः ५ मूकं करोति वाचालं पंगुं लंघयते गिरिं यत्कृपा तमहं वंदे परमानंदमाधवं ६ श्रीमद्भागवताभिधः सुरतरुस्तारांकुरः स-

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति यत्सूरयः तेजोवारिमृ-
दां यथा विनिमयो यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि १

ज्जनिः स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्टदशेष्ट-
दोतिसुलभो वर्वर्त्ति सर्वोपरि ७ अथ नानापुराणशास्त्रप्रबंधैश्चित्तप्रसादमलभमानस्तत्र तत्रापरितोषन्नारदोपदेशतः श्रीमद्भा-
वद्गुणवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्यपरदेवतानुस्मरणमंगलमाचरति जन्माद्यस्येति परं परमेश्वरं धीम-
हीति ध्यायतेर्लिङि छांदसं ध्यायेमेत्यर्थः बहुवचनं शिष्याभिप्रायं तमेव स्वरूपतस्तटस्थलक्षणाभ्यामुपलक्षयति तत्र स्वरूपलक्ष-

राम
१

ण्यं सत्यमिति सत्यत्वे हेतुः ॥ यत्र यस्मिन् त्रयाणां गुणानां तमोरजःसत्त्वानां सर्गो भूतेंद्रियदेवतारूपः अमृषा सत्यः ॥ यत्सत्यतया मिथ्या
सर्गोपि सत्यवत्प्रतीयते ॥ तं परं सत्यमित्यर्थः ॥ अत्र दृष्टांतः ॥ तेजोवारिमृदां यथा विनिमयो व्यत्ययः ॥ अन्यस्मिन्नन्यावभासः ॥ स यथा
धिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः ॥ तत्र तेजसि वारिबुद्धिर्मरीचितोये प्रसिद्धा ॥ मृदि काचादौ वारिबुद्धिर्वारिणि च काचादिबुद्धिरित्यादि यथायथमूह्यं ॥ तस्ये
व परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं ॥ यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति यत्रेत्यनेन प्रतीतमुपाधिसंबंधं वार
यति ॥ स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं यस्मिन् तं ॥ तत्र हेतुं लक्षणमाह जन्मादीति ॥ अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति
तं धीमहीति ॥ तत्र हेतुः ॥ अन्वयादितरतश्चार्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् ॥ अकार्येभ्यश्च खपुष्पादिभ्यो व्यतिरेकात्
यद्वा ॥ अन्वयशब्देनानुवृत्तिः ॥ इतरशब्देन व्यावृत्तिः ॥ अनुवृत्तत्वात्पंचब्रह्मकारणं मृत्सुवर्णादिवत् ॥ व्यावृत्तत्वाद्विश्वं कार्यं घटकु
ण्डलादिवदित्यर्थः ॥ यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति संबंधः ॥ तथा च श्रुतिः ॥ यतो वा इमानि भू
तानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्याद्या ॥ स्मृतिश्च ॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्र
लयं यांति पुनरेव युगक्षये इत्याद्या ॥ तर्हि किं प्रधानं जगत्कारणत्वाद्ध्येयमभिप्रेतं नेत्याह ॥ अभिज्ञो यः स ऐक्षत लोकान्नु सृजा
इति ॥ स इमाल्लोकानसृजतेति श्रुतेः ॥ ईक्षतेर्नाशब्दमिति न्यायाच्च ॥ तर्हि जीवः स्यात्नेत्याह ॥ स्वराट् ॥ स्वेनैव राजते यस्तं ॥ स्वतः सिद्धज्ञा
नवानित्यर्थः ॥ तर्हि किं ब्रह्मा ॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीदिति श्रुतेः ॥ नेत्याह ॥ तेन इति ॥ आदिकवये ब्र

भा॰पु॰
१

वेदं यस्तेने प्रकाशितवान् ॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं
प्रपद्ये इति श्रुतेः ॥ ननु ब्रह्मणोन्यतो वेदाध्ययनमप्रसिद्धं ॥ सत्यं ॥ तत्तु हृदा मनसैव तेने ॥ अनेन बुद्धिवृत्तिप्रवर्तकत्वेन गायत्र्यर्थो
दर्शितः ॥ वक्ष्यति हि ॥ प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि ॥ स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषी
णामृषभः प्रसीदतामिति ॥ ननु च ब्रह्मा स्वयमेव प्रतिभाभ्यासेन वेदं लभतां नेत्याह ॥ यत्र यस्मिन् ब्रह्मणि सूरयोपि
मुह्यंतीति ॥ तस्मात् ब्रह्मणोपि पराधीनज्ञानत्वात् स्वतः सिद्धज्ञानः परमेश्वर एव जगत्कारणं ॥ अत एव सत्यः ॥ अतः सत्या
त्सत्वाच्च परमार्थसत्यः ॥ सर्वज्ञत्वेन च निरस्तकुहकः ॥ तं धीमहीति गायत्र्या प्रारंभेण च गायत्र्याख्यब्रह्मविद्यारूपमेतत्पु
राणमिति दर्शितं ॥ यथोक्तं मत्स्यपुराणे ॥ भागवतलक्षणं ॥ यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥ वृत्रासुरवधोपेतं तद्भा
गवतमिष्यते ॥ लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितं ॥ प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदं ॥ अष्टादशसहस्राणि पुरा
णं तत्प्रकीर्तितमिति ॥ पुराणांतरे च ॥ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥
गायत्र्या च समारंभस्तद्वै भागवतं विदुरिति ॥ पद्मपुराणे अंबरीषं प्रति गौतमवचनं ॥ अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु ॥
पठस्व स्वमुखेनापि यदीच्छसि भवक्षयमिति ॥ अत एव भागवतं नामान्यदित्यपि न शंकनीयं ॥ १ ॥

राम
२

१ ॥ नीयश्रोतृप्रवर्त्तनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति धर्म इति ॥ अत्र श्रीमति सुंदरे भागवते परमो
धर्मो निरूप्यते ॥ परमत्वे हेतुः प्रकर्षेणोज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन्सः प्रशब्देन मोक्षाभिसंधेरपि निरस्तत्वात्
केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति ॥ अधिकारितोपि धर्मस्य परमत्वमाह ॥ निर्मत्सराणां ॥ परोत्कर्षासहनं मत्सरः
तद्रहितानां सतां भूतानुकंपिनां ॥ एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं ॥ ज्ञानकांडविषयेभ्योपि श्रैष्ठ्यमाह ॥ वेद्यमिति वास्त
वं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादिवद्द्रव्यगुणादिरूपं ॥ यद्वा वास्तवशब्देन वस्तुनोंशो जीवः वस्तुनः शक्तिर्माया च ॥ वस्तुनः

धर्म्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं ॥ श्रीमद्भा
गवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥

कार्यं जगच्च ॥ तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यं सुपठत्वेनैव ज्ञातुं शक्यमित्यर्थः ततः किमत आह शिवदं परमसुखदं किं च आध्या
त्मिकादितापत्रयोन्मूलनं च ॥ अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं कर्त्ततोपि श्रैष्ठ्यमाह महामुनिः श्रीनारायणः तेन प्रथमं संक्षे
पतः कृते ॥ देवताकांडविषयात्तं श्रैष्ठ्यमाह ॥ परैः शास्त्रैस्तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एवावरुध्यते स्थिरीक्रियते ॥ वा शब्दः का
क्वे ॥ किंतु विलंबेन कथंचिदेव ॥ अत्र तु शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादवरुध्यते ॥ इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्राह ॥ कृति
भिरिति ॥ प्रवणेच्छा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः ॥ तस्मात्कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं अत

भा॰प्र
३

इदानीन्तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते । अपि तु सर्वशास्त्रफलरूपमिदमतः परमादरेण सेव्यमित्याह । निगमेति
निगमः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् । तस्य फलमिदं भागवतं नाम । तच्च वैकुंठगतं नारदेनानीय मह्यं दत्तं । मया च शुकस्य
मुखे निहितं । तच्च तन्मुखाद्भुवि गलितं । शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णं न तूच्चनिपातेन स्फुटितमित्यर्थः । एत
च्चैभविष्यदपि भूतवन्निर्दिष्टं । अनागताख्यानेनैवास्य शास्त्रस्य प्रवर्त्तनैः । अत एवामृतरूपेण द्रवेण संयुतं । लोके हि शुकमुखस्पृष्टं फलम
मृतमिव स्वादु भवतीति प्रसिद्धं । अत्र शुकः मुनिः अमृतं परमानंदः स एव द्रवो रसः । रसो वै सः । रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः । अ
लौरसिकाः हे रसज्ञाः । तत्रापि भावुकाः । हे रसविशेषभावनाचतुराः । अहो भुवि गलितमिदं सुलभं लब्ध्वा मोहात् । इदं भागवतं नाम फलं मुहुः

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं । पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

पिबत ननु त्वगष्ट्यादिकं विहाय फलाद्रसः पीयते कथं फलमेव पातव्यमत आह । रसं रसरूपं । अतस्त्वगष्ट्यादेर्हेयांशस्याभावात्फलमेव कृत्स्नं पिबत
अत्र च रसतादात्म्यविवक्षया रसं वस्त्वस्याविवक्षितत्वात् द्रव्यगुणवचनेपि रसशब्दे मतुपः प्राप्त्यभावात्तेन विनैव रसं फलमिति सामानाधिक
रण्यं । ननु फलमित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तं । रसमित्युक्ते विगलितस्य रसस्य पातुमशक्यत्वा
त्फलमिति द्रष्टव्यं । न च भागवतामृतपानं मोक्षेपि त्याज्यमित्याह । आलयं लयो मोक्षः अभिविधावाकारः लयमभिव्याप्य नहीदं स्व
र्गादिसुखवन्मुक्तैरुपेक्ष्यते । किंतु सेव्यत एव । वक्ष्यति हि । आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे । कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरि
रिति ॥ ३ ॥

राम
३

तदेवमनेनश्लोकत्रयेणविशिष्टेष्टदेवतानुस्मरणपूर्वकंप्रारिप्सितस्यशास्त्रस्यविषयप्रयोजनादिवैशिष्ट्येनस्त्रावेत्यपत्वेनवश्रोतनभि
मुखीकृत्यशास्त्रमारभतेनैमिशइति ॥ ब्रह्मणाविसृष्टचक्रस्यनेमिःशीर्यतेकुंठीभवतियत्रतन्नैमिशं ॥ नैमिशमेवनैमिशं ॥ तथाचवाय
वीये ॥ एतन्मनोमयंचक्रंमयासृष्टंविसृज्यतेयत्रास्यशीर्यतेनेमिःसदेशस्तपसःशुभः इत्युक्त्वासूर्यसंकाशंचक्रंसृष्ट्वामनोमयंप्रणिपत्य
महादेवंविससर्जपितामहः ॥ तेपिहृष्टतराविप्राःप्रणम्यजगतांप्रभुं ॥ प्रययुस्तस्यचक्रस्ययत्रनेमिर्व्यशीर्यत ॥ तद्वनंतेनविख्यातंनैमिशं
मुनिपूजितमिति ॥ नैमिषइतिपाठेवाराहपुराणोक्तंद्रष्टव्यं ॥ गौरमुखमृषिंप्रतिभगवद्वाक्यं ॥ एवंकृत्वाततोदेवोमुनिंगौरमुखंतदा उवाच

व्यासउवाच ॥ नैमिषेऽनिमिषक्षेत्रेऋषयःशौनकादयः ॥ सत्रंस्वर्गायलोकायसहस्रसममासत ॥ ४ ॥
तएकदातुमुनयःप्रातर्हुतहुताग्नयः ॥ सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात् ॥ ५ ॥

निमिषेणेदंनिहतंदानवंबलं अरण्येस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं ॥ भविष्यतियथार्थंवैब्राह्मणानांविशेषकमिति अनिमिषः
श्रीविष्णुः अत्रमिहंष्टित्वात्तस्यक्षेत्रे ॥ तथाचात्रैवशौनकादिवचने ॥ क्षेत्रेस्मिन्वैष्णवेवयमिति ॥ स्वःस्वर्गोगीयतइतिस्वर्गायोहरिःसएवलो
कःभक्तानांनिवासस्थानंतस्मै ॥ तत्प्राप्तयइत्यर्थः ॥ सहस्रसमाःसंवत्सराअनुष्ठानकालोयस्यतत् ॥ सत्रंसत्रसंज्ञितंकर्मोद्दिश्यआसतउप
विविशुः ॥ यद्वाआसतअनुष्ठितवन्तइत्यर्थः ॥ आस्तभतनिर्वपति ॥ उपयंतीत्यादिवत् ॥ ग्रन्थयोरारणामात्रार्थत्वेनआपधात्वर्थस्याविवक्षितत्वात्
॥ ४ ॥ प्रातःकालेहुताहुताःअग्नयोयेषांते ॥ अनेननित्यनैमित्तिकहोमसाकल्यंदर्शितं ॥ इदंवक्ष्यमाणमादरात्पप्रच्छुः ॥ ५ ॥

भा०प्र
३

इदानीं न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते अपितु सर्वशास्त्रफलरूपमिदम् अतः परमादरेण सेव्यमित्याह निगमेति
निगमः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिदं भागवतं नाम तच्च वैकुंठगतं नारदेनानीय मह्यं दत्तं मया च शुकस्य
मुखे निहितं तच्च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णं न तूच्चनिपातेन स्फुटितमित्यर्थः एत
द्यमविघ्नदपि भूतवन्निर्दिष्टं अनागताख्याने नैवास्य शास्त्रस्य प्रवर्त्तेः अत एवामृतद्रवेण संयुतं लोके हि शुकमुखस्पृष्टं फलम
मृतमिव स्वादु भवतीति प्रसिद्धं अत्र शुको मुनिः अमृतं परमानंदः स एव द्रवो रसः रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः अ
तो रसिकाः हे रसज्ञाः तत्रापि भावुकाः हे रसविशेषभावनाचतुराः अहो भुवि गलितमिदं फलमलभ्यलाभोक्तिः इदं भागवतं नाम फलं मुहुः

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ३

पिबत ननु त्वगष्ठ्यादिकं विहाय फलाद्रसः पीयते कथं फलमेव पातव्यं तत्राह रसं रसरूपं अतस्त्वगष्ठ्यादेर्हेयांशस्याभावात्फलमेव कृत्स्नं पिबत
अत्र च रसतादात्म्यविवक्षया रसवत्त्वस्याविवक्षितत्वाद्गुणवचनेभ्यो मतुपः लोप्यभावात्तेन विनैव रसं फलमिति सामानाधिक
रण्यं तत्र फलमित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्निरस्यार्थं रसमित्युक्तं रसमित्युक्ते विगलितस्य रसस्य पातुमशक्यत्वा
त्फलमिति द्रष्टव्यं न च भागवतामृतपानं मोक्षेपि त्याज्यमित्याह आलयं लयो मोक्षः अभिविधावाकारः लयमभिव्याप्य न हीदं स्व
र्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतु सेव्यत एव वक्ष्यति हि आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरि
रिति ३

राम
३

नेदं यदनेन श्लोकत्रयेण विशिष्टेष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिवैशिष्ट्येन प्ररोचनं तेन श्रोतॄनभि
मुखीकृत्य शास्त्रमारभते नैमिश इति ॥ ब्रह्मणा विसृष्टस्य चक्रस्य नेमिः शीर्यते कुंठीभवति यत्र तन्नैमिशं ॥ नैमिशमेव नैमिशं ॥ तथा च वाय
वीये ॥ एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ॥ यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं प्रणिपत्य
महादेवं विससर्ज पितामहः ॥ तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं ॥ प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ तद्वनं तेन विख्यातं नैमिशं
मुनिपूजितमिति ॥ नैमिष इति पाठे वाराहपुराणोक्तं द्रष्टव्यं ॥ गौरमुखं प्रति भगवद्वाक्यं ॥ एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा उवाच

व्यास उवाच ॥ नैमिषे निमिषक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥
त एकदा तु मुनयः प्रातर्हुतहुताग्नयः ॥ सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥

निमिषेणेदं निहितं दानवं बलं ॥ अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं ॥ भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति ॥ अनिमिषः
श्रीविष्णुः अनिमिषहितत्वात्तस्य क्षेत्रे ॥ तथा वा शौनकादिवचनं ॥ क्षेत्रेऽस्मिन्वैष्णवे वयमिति ॥ स्वः स्वर्गो गीयत इति स्वर्गायो हरिः ॥ स एव लो
कः भक्तानां निवासस्थानं तस्मै ॥ तत्प्राप्तये इत्यर्थः ॥ सहस्रं समाः संवत्सरा अनुष्ठानकालो यस्य तत् ॥ सत्रमत्र संतिष्ठंते कर्माणीति सत्रं आसत उप
विविशुः ॥ यद्वा आसत अन्वर्वतंत इत्यर्थः ॥ आसन् मत निर्वपतीति ॥ उपयंतीत्यादिवत् ॥ प्रत्ययोच्चारणमात्रार्थत्वेन आसधात्वर्थस्याविवक्षितत्वात्
॥ ४ ॥ प्रातःकाले हुता अहुता वा अग्नयो यैस्ते ॥ अनेन नित्यनैमित्तिकहोमसाकल्यं दर्शितं ॥ इदं वक्ष्यमाणमादरात्पप्रच्छुः ॥ ५ ॥

भा॰प्र॰ ४ ३

विविदिषितानर्थान्स्पष्टं प्रष्टुं तस्य सर्वशास्त्रज्ञतामाह ॥ त्वयेति त्रिभिः श्लोकैः इतिहासो महाभारतादिस्तत्सहितानि न केवलमधी
तानि किंतु व्याख्यातान्यपि व्याख्यातानि च उत अपि यानि धर्मशास्त्राणि तान्यपि ६ किंच यानीत्यादि विदां विदुषां मध्ये श्रेष्ठो व्या
सः यानि वेद परावरे सगुणनिर्गुणे ब्रह्मणी विदंतीति तथा ७ वेत्थ जानासि सौम्य हे साधो तेषामनुग्रहात् तत्त्वतो जानासि हेतुमाह ब्रू
युरिति स्निग्धस्य स्नेहवतः उत एव रहस्यमपि ब्रूयुरेव ८ अञ्जसा यथार्जवेन एकांततः श्रेयः अव्यभिचारि श्रेयः साधनं ९ अन्ये

ऋषय ऊचुः त्वया खलु पुराणानि सेतिहासानि चानघ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ६ यानि वेद
विदां श्रेष्ठो भगवान्बादरायणः अन्ये च मुनयः सूत परावरविदो विदुः ७ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात्
ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ८ तत्र तत्रांजसायुष्मन्भवता यद्विनिश्चितं पुंसामेकांततः श्रेयस्तन्नः
शंसितुमर्हसि ९ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे जनाः मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः भूरीणि
भूरिकर्माणि श्रोतव्यानि विभागशः १० अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ब्रूहि नः श्रद्दधानानां येनात्मा सु
प्रसीदति ११

पि बहुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चितुं शक्यं नेत्याह प्रायेणेति हे सभ्य हे साधो अस्मिन्युगे कलौ अ
ल्पायुषो जनाः तथापि मंदाः अलसाः तत्रापि सुमंदमतयः तत्रापि मंदभाग्याः विघ्नाकुलाः तत्राप्युपद्रुता रोगादिभिः न च बहुशास्त्रश्र
वणोपि तावतैव फलसिद्धिरित्याह भूरीणि कर्माण्यनुष्ठेयानि येषु तानि १० समुद्धृत्य पृथक्कृत्य येनोद्धृतवचनेनात्मा बुद्धिः

राम
४

[illegible] ...यञ्जान्तरस्तत्रजानाम्नासीत्तिपञ्चभिः ॥ मद्वन्तरस्योत्तरकृप्रेनाशीर्वादः भगवांस्त्रिरतिशयैश्वर्यादिगुणाः सा
त्वताम्सन्दृष्टेन सत्रमूर्त्तिभगवांस्तत्रोपास्यतया विद्यते षाम्इतिसत्वतां भक्ताः स्वार्थे अण् एतत्सर्वायमारिष्वत ॥ तस्यचाश्ववर्णनाथ
तदेवं प्राप्तं तदितिभवति ॥ तेषांपतिः पालकः यस्यार्थं विरोधस्यचिकीर्षया वत्सरदेवस्यभार्यायांदेववत्यांजातः ॥ १ ॥ अंशहेतुम
न ॥ तन्त्रो वर्णयितुमर्हसि ॥ साम्प्रतन्तावद्यस्यावताराभूतानां क्षेमायपालनायभवायसमुद्भवे ॥ २ ॥ तस्यभावमनुवर्णयितन

सत्रजानाम्नासिमन्वन्तरेभगवान्सात्वतांपतिः देवकीवत्सरदेवस्यजातोयस्यचिकीर्षया ॥ १ ॥ तत्रः शुश्रूषमाणा
नाम् अर्हस्यगाउवर्णितुं ॥ यस्यावताराभूतानां क्षेमायचभवायच ॥ २ ॥ आपन्नः संसृतिंघोरांयन्नामविवशो
गृणन् ॥ ततः सद्योविमुच्येतयद्बिभेतिस्वयंभयं ॥ ३ ॥ यत्पादसंश्रयाः सूतमुनयः प्रशमायनाः ॥ सद्यःपुन
न्त्युपस्पृष्टाः स्वर्द्धुन्यापोनुसेवया ॥ ५ ॥ कोवाभगवतस्तस्यपुण्यश्लोकेड्यकर्मणः ॥ शुद्धिकामोनशृणुयाद्य
शः कलिमलापहं ॥ ६ ॥ तस्यकर्माण्युदाराणिपरिगीतानिसूरिभिः ॥ ब्रूहिनः श्रद्दधानानांलीलयादधतः कलाः ॥ ७ ॥

घरः श्रवणोत्सुकानामाविःकुर्वतिआपन्नइतित्रिभिः संसृतिमापन्नः प्राप्तः विवशोपिततःसंसृतेः तन्त्रहेतुः यद्यतोनाम्नः
भयमपिस्वयमेवबिभेति ॥ ३ ॥ किंचयस्यपादः संश्रयोयेषां ॥ अतएवप्रशमोयनंवर्त्मआश्रयोवायेषां तेमुनयउपस्पृष्टाः सन्निधिमात्रेण
सेविताः सद्यः पुनन्ति ॥ स्वर्द्धुनीगंगातस्याआपस्तत्पादात्त्रिःसृताः नचगतदेवतिष्ठतिसूतः तस्यंवधैनेवपुनन्त्यापुत्रसेवयापुनन्ति नचपुनः

भा.प्र
५

अथेति प्रश्नान्तरे अवतारकथाः स्थित्यर्थमेव तत्तद्युगे येमे त्वाद्यवताराः कथाः हरेर्लीलाः कुर्वतः श्रीकृष्णावतारप्रयोजनप्रश्नेनैव तच्च
रितप्रश्नोपि ज्ञातएव १७ अथोक्तकथनेन पुनरवितृप्ताः तान्येव श्रोतुमिच्छन्तः तत्रात्मनो तृष्णाभावमाविष्कुर्वन्ति वयं त्विति योगयागादिष्वतृप्ताः
स्म उत्तमश्लोकस्तस्मात् तत उत्तमः तथाभूतः श्लोको यशो यस्य तस्य विक्रमे तु विशेषेण न तृप्यामः अलमिति न मन्यामहे तत्र हेतुः यच्छृ
ण्वतां यद्वा अन्ये तृप्यन्तु नाम वयं तु नेति रसस्यानुभवः अपवर्गः वैधाध्यलं वृद्धिर्भवति उदरादिभरणेन वा रसज्ञानेन वा स्वादु वि

अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः लीलाविदधतः स्वैरमीश्वरस्यात्ममायया १८ वयंतु न वितृप्याम उत्तमश्लोकवि
क्रमे यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे १९ कृतवान्किल वीर्याणि सह रामेण केशवः अतिमर्त्यानि भगवान्गूढः
कपटमानुषः २० कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं आसीना दीर्घसत्रेण कथायां सक्षणा हरेः २१ त्वं नः सं
दर्शितो धात्रा दुस्तरं निस्तितीर्षतां कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवं २२

४ न:

शेषाभावाद्वा तत्र शृण्वतामित्यनेन श्रोत्रस्याकाशत्वाद्भरणमित्युक्तं रसज्ञानामित्यनेन च ज्ञानतः पशुवत्तृप्तिर्निराकृता इक्षुभक्षण
वद्रसान्तराभावेन तृप्तिं निराकरोति पदेपदे प्रतिक्षणं स्वादुतो विशेषाः १९ अतः श्रीकृष्णचरितानि कथयेत्याह कृतवानिति अतिम
र्त्यानि मर्त्यानतिक्रान्तानि गोवर्धनोद्धरणादीनि मनुष्येषु असंभावितानीत्यर्थः २० ननु याजनाध्यापनादिव्यग्राणां कुतः एतच्छ्रवणावकाशः
तत्राह कलिमागतं ज्ञात्वा तद्भयाद्विष्णुपदं गन्तुकामाः दीर्घसत्रेण निमित्तेनासीनाः हरेः कथायां सक्षणाः लब्धावसराः २१ अस्मिंश्च
समये त्वद्दर्शनमीश्वरेणैव संपादितमित्यभिनन्दति त्वमिति कलिं निस्तर्तुमिच्छतां अर्णवं तितीर्षतां कर्णधारो नाविक इव २२

प्र
५

नः ॥ अथांतरं ब्रूहि इति ॥ धर्मस्य वर्माणि कवचवद्रक्षके स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः ॥ अस्य चोत्तरं कलौ स्वधामोपगते धर्मस्त्राता नादिभिः सहेत्य
पद्योक्तः ॥ २२ ॥ इति श्री भा प्रथमे प्रथमः ॥ तदेवं प्रथमाध्याये षट्प्रश्नाः शौनकादिभिः कृताः ॥ द्वितीये तु तेषां सूतस्तूत्तरं वर्ण्यमाह तेषु प्रथ ॥ १ ॥ विप्राणां इति एवं भूतैः
सम्यक्प्रश्नैः सम्यक्हृष्टो रोमहर्षणस्य पुत्र उग्रश्रवाः ॥ तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपचक्रमे ॥ उपक्रान्तवान् ॥ १ ॥ प्रवचनस्योपक्रमो
नाम गुरुदेवतानमस्कारः इति तमाह त्रिभिः ॥ यमिति ॥ तत्र स्वगुरोः शुकस्य सर्वेश्वरूपत्वेनैव द्योतयन्नाह ॥ यं प्रव्रजन्तं ॥ सन्न्यासाय गच्छन्तं अनु

मू ॥

ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥ इति श्रीभागवते महापुराणे प्रथम
स्कंधे नैमिषीयोपाख्याने प्रथमोऽध्यायः ॥ व्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः ॥ प्रतिपूज्य वचस्तेषां प्रव
क्तुमुपचक्रमे ॥ १ ॥ सूत उवाच ॥ यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥ पुत्रेति तन्मयतया तरवोऽभि
नेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि

पेतमनुपनयत्वेनोपनयनार्थमनुपसन्नं यद्वा केनाप्यनुपेतमननुगतं एकाकिनमित्यर्थः ॥ तत्र हेतुः
अपेतकृत्यमनुष्ठेयं कर्ममार्गः प्रवर्त्तमानैरैष्टिकत्वात् ॥ द्वैपायनो व्यासः विरहकातरो भीतः पुत्र इति पुत्रेत्याजुहाव आहूतवान् ॥ तदा तदा स्थाने
शुकेनैव तत्त्वपि संधितार्थः ॥ तदा तन्मयतया शुकरूपतया तरवोऽभिनेदुः प्रत्युत्तरमुक्तवन्तः ॥ पितुः स्नेहानुबंधपरिहाराय योगेश्वररूपेणोत्तरं दत्तवानित्यर्थः ॥
तं मुनिमानतोऽस्मि ॥ ननु तन्मयतयोपपादनाय विशेषणं ॥ सर्वभूतानां हृदयमात्मा ॥ अत एव योगबलेन प्रविशतीति सर्वभूतहृदयस्तं ॥ २ ॥

भा०स्क०
६

तत्कथामृतं दर्शयन्नाह य इति । अंधं गाढं तमः संसाराख्यं अतितर्त्तुमिच्छतां पुराणानां मध्ये गुह्यं गोप्यं तत्र हेतुत्वेन चत्वारि विशेषणानि स्वः नि
जः असाधारणः अनुभावः प्रभावो यस्य तत्स्वानुभावं अखिलश्रुतीनां सारं एकमद्वितीयं अनुपममित्यर्थः आत्मानं कार्यकारणसंघात
मधिकृत्य वर्त्तमानमात्मतत्त्वमध्यात्मं तस्य दीपं प्रकाशकारकं । उपयामि शरणं व्रजामि ३ एवं द्वाभ्यां गुरुं नमस्कृत्य देवं प्रणमति । जयत्यनेन
संसारविजितिजयो ग्रंथः तं उदीरयेदिति । स्वयं तथोदीरयन्यान्मोगाणि कानुपरिहृयति ४ तेषां वचः प्रतिपूज्यैति यदुक्तं तत्प्रतिपूजनं करोति हे
मुनयः साधुपृष्टो भवति तथाहं सूतः यतो लोकानां मंगलमेतत् यद्यतः कृष्णविषयः प्रश्नः कृतः सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापि कृष्णपर्यव

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धं । संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनु
मुपयामि गुरुं मुनीनां ३ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ४ मुनयः साधु पृष्टो
हं भवद्भिर्लोकमंगलं यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति ५ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे अहैतुक्यप्रति
हता ययात्मा संप्रसीदति ६ वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकं ७

सानादेव उक्तं ४ तत्र यत्स्वयमंपृष्टं सर्वशास्त्रसारमेकांतिकं श्रेयो ब्रूहीति तत्रोत्तरं स वै पुंसामिति अयमर्थः धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्ति
लक्षणश्च तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षणः सोऽपरः यतस्तु धर्मात् श्रवणादिलक्षणा भक्तिर्भवति स परो धर्मः स एवैकांतिकं श्रेय इति कथंभूता
अहैतुकी हेतुः फलानुसंधानं तद्रहितां अप्रतिहता विघ्नैरनभिभूता ६ न तु तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेने
त्यादिश्रुतिभ्यो धर्मस्य ज्ञानांगत्वं प्रसिद्धं तत्कथं भक्तिहेतुत्वमुच्यते तत्र तत्र भक्तिद्वारेण त्याह वासुदेव इति अहैतुकं शुष्कतर्काद्यगोचरं औपनिषदमित्यर्थः ७

राम
६

व्यतिरेकमाह धर्म इति । यो धर्म इति प्रसिद्धः स यदि विष्वक्सेनस्य कथासु रतिं नोत्पादयेत्तर्हि स्वनुष्ठितोऽपि स श्रम एव । ननु मोक्षार्थ
स्यापि धर्मस्य श्रमत्वमस्त्येवात आह केवलं । विफलश्रम इत्यर्थः । नन्वस्ति तत्रापि स्वर्गादिफलमित्याशङ्क्यैवकारेण निराकरोति क्षयि
ष्णुत्वात्तत्फलमित्यर्थः । न च अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिश्रुतेर्न तत्फलस्य क्षयिष्णुत्वमित्याशङ्क्याह हिशब्देन बा
धयति तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति तर्कानुगृहीतया श्रुत्या क्षयिष्णुत्व[illegible]श्रुतिपाद
नात् ॥ ८ ॥ तदेवं हरिभक्तिहेतुत्वादितरवैराग्यात्मज्ञानापर्यन्तः परो धर्म इत्युक्तं । अन्ये तु मन्यन्ते धर्मस्यार्थः फलं । तस्य च कामः फलं । तस्य चेन्द्रि

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलं ॥ ८ ॥ धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायो
पकल्पते । नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥ ९ ॥ कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता । जीवस्य तत्त्वजि

यप्रीतिः तत्प्रीतेश्च पुनरपि धर्मार्थादिपरंपरेति । यथाहुः धर्मादर्थश्च कामश्च स किमर्थं न सेव्यत इत्यादि । तान् ज्ञासा नार्थो यश्चेह कर्मभिः
निराकरोति धर्मस्येति द्वाभ्यां । आपवर्ग्यस्योक्तन्यायेनापवर्गपर्यन्तस्यार्थायफलत्वाय अर्थो नोपकल्पते योग्यो न भवति । न चार्थस्याप्ये
वंभूतधर्माव्यभिचारिणः कामो लाभाय फलत्वाय न हि स्मृतो मुनिभिः ॥ ९ ॥ कामस्य च विषयभोगस्येन्द्रियप्रीतिः लाभः फलं न भवति किं तु
यावता जीवेत तावानेव कामस्य लाभः जीवनपर्याप्त एव कामः सेव्य इत्यर्थः । जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारेण कर्मभिर्य इह
प्रसिद्धः स्वर्गादिः सोऽर्थो न भवति । किं तु तत्त्वजिज्ञासैवेति ॥ १० ॥ एमकस्म

ननु तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित्तत्राह । तत्त्वविदस्तु तदेव तत्त्वं वदंति । किं तत् । ज्ञानं नाम अद्वयमिति क्षणिकविज्ञा
नपक्षं व्यावर्तयति । ननु तत्त्वविदोपि विगीतवचना एव मैवं । तस्यैव तत्त्वस्य नामांतरैरभिधानादित्याह । औपनिषदैर्ब्रह्मेति । हैरण्यगर्भैः परमा
त्मेति सात्वतैर्भगवानित्यभिधीयते ॥ नन्वेतत्तत्त्वमपरिकरस्य भक्तैव प्राप्यत इत्याह । तच्चेत्यत्रयः ज्ञानवैराग्ययुक्तयेत्यत्र ज्ञानपरोक्षं । तच्च तत्त्व
मात्मनि क्षेत्रज्ञे पश्यंति । किं तत् आत्मानं परमात्मानं श्रुतेन वेदांतादिश्रवणेन गृहीतया प्राप्तयेति भक्तेर्दीर्घ्यमुक्तं ॥१२॥ धर्मस्य फलं भक्तिर्न
र्थकामादिकमिति पूर्वमर्थमुपपाद्योपसंहरति । अत इति हे द्विजश्रेष्ठाः हरितोषणं हरेराराधनमेव संसिद्धिः फलं ॥१३॥ यस्माच्च भक्तिहीनो धर्मः के

वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥११॥ तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया । पश्यंत्या
त्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥१२॥ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः । स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं ॥१३॥
तस्मादेकेन मनसा भगवान्सात्वतां पतिः । श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥१४॥ यदनुध्यासिना युक्ताः कर्मग्रंथिनि
बंधनं । छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिं ॥१५॥ शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः । स्यान्महत्सेवया विप्राः पुण्यती
र्थनिषेवणात् ॥१६॥

वलं श्रम एव । तस्माद्भक्तिप्रधान एव धर्मोऽनुष्ठेय इत्याह । तस्मादिति । एकेन एकाग्रेण मनसा ॥१४॥ भक्तिरहितो धर्मः केवलं
श्रम एवेति प्रपंचितं । इदानीं भक्तेर्मुक्तिफलत्वं प्रपंचयति यदिति । यस्यानुध्यानमेवासिः खड्गस्तेन युक्ता विवेकिनः ग्रंथिमहंकारं
निबध्नाति यत्कर्म तत् छिंदंति । तस्य कथायां रतिं को न कुर्यात् ॥१५॥ ननु सत्यमेवं कर्मनिर्मूलनी हरिकथारतिस्तथापि तस्यां रुचिः नोत्पद्यते किं
कुर्मस्तत्राह । शुश्रूषोरिति । पुण्यतीर्थनिषेवणादिभिः निःपापस्य महत्सेवया स्यात् । तया च श्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥१६॥

तत्रश्च शृण्वतामिति ॥ पुण्ये श्रवणकीर्त्तने यस्य सः सतां सुहृत् हितकारी ॥ हृदि स्थान्यभद्राणि कामादिवासनाः तानि ॥ अंतस्थः हृदयस्थः सन् ॥ १७
ततश्च नष्टप्रायेष्विति ॥ सर्वाभद्रनाशस्य तत्तानोत्तरकालत्वात्प्रायग्रहणं ॥ भागवतानां भागवतशास्त्रस्य वा सेवया ॥ नैष्ठिकी निश्चला विक्षेपका
भावात् ॥ १८ ॥ रजश्च तमश्च एतन्मयाः भावा भावाः कामादयः ॥ एतैरनाविद्धं अनभिभूतं प्रसीदति उपशाम्यति ॥ १९ ॥ भगवद्भक्तियोगतः प्रसन्नम
नसः अत एव मुक्तसंगस्य ॥ २० ॥ ज्ञानफलमाह भिद्यत इति ॥ हृदयमेव ग्रंथिः चिज्जडग्रथनरूपोऽहंकारः अत एव सर्वे संशयाः असंभावनादि

शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्त्तनः ॥ हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतां ॥ १७ ॥ नष्टप्रायेष्वभद्रेषु नित्यं भागवत
सेवया ॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥ १८ ॥ तदा रजस्तमोभावाः कामलोभादयश्च ये ॥ चेत एतैरनाविद्धं स्थितं सत्त्वे
प्रसीदति ॥ १९ ॥ एवं प्रसन्नमनसो भगवद्भक्तियोगतः ॥ भगवत्तत्त्वविज्ञानं मुक्तसंगस्य जायते ॥ २० ॥ भिद्यते हृदयग्रंथिश्छिद्यं
ते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ २१ ॥ अतो वै कवयो नित्यं भक्तिं परमया मुदा ॥ वासुदेवे भगवति कु
र्वंत्यात्मप्रसादनीं ॥ २२ ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ २३ ॥

रूपाः कर्माण्यनारब्धफलानि आत्मनि स्वरूपभूते ईश्वरे दृष्टे ॥ एवकारेण ज्ञानानंतरमेवेति दर्शयति ॥ श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ २२
तत्र सदाचारं दर्शयन्नुपसंहरति अत इति ॥ आत्मनः प्रसादनीं मनः शोधनीं वासुदेवे भक्तिं कुर्वंतीति भजनीयविशेषो दर्शितः ॥ २२ ॥ तदेवोपपा
दयितुं ब्रह्मादीनां त्रयाणामेकात्मत्वेपि वासुदेवस्याधिक्यमाह सत्त्वमिति ॥ इह यद्यप्येक एव परः पुमानस्य विश्वस्य स्थित्यादये स्थिति पालनार्थं
संज्ञाः केवलं भिन्नाः धत्ते ॥ हरिविरिंचिहर इति वक्ष्यमाणसंज्ञाः ॥ तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः ॥ २३ ॥

उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टांतमाह पार्थिवादिति प्रवृत्तिप्रकाशरहिताद्दारुणः काष्ठात्सकाशाद्धूमः प्रवृत्तिस्वभावः त्रयीमयः वेदोक्तकर्मप्रवर्तकः यज्ञकर्मप्रत्यासत्तेः तस्मादप्यग्निः त्रयीमयः साक्षात्कर्मसाधनत्वात् एवं तमसः सकाशाद्रजो ब्रह्मदर्शनं ब्रह्मप्रकाशकं तच्छब्देन लयात्मकात्तमसः सकाशाद्रजसः सोपाधिकत्वात् हेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा तत्प्रकाशकत्वं विक्षेपकत्वात् यत्सत्त्वं तत्साक्षाद्ब्रह्मदर्शनं अतस्तद्गुणोपाधीनां ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति भावः २४ वासुदेवभक्तौ पूर्वाचारं प्रमाणयति भेजिर इति अथ अतो हेतोः अग्रे पूर्वं विशुद्धसत्त्वमूर्तिं भगवंतमधोक्षजं अतो ये ताननुवर्तंते ते इह संसारे क्षेमाय कल्पंते २५ ननु अन्यान्

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनं २४ भेजिरे मुनयोऽथाग्रे भगवंतमधोक्षजं सत्त्वं विशुद्धं क्षेमाय कल्पंते येऽनु तानिह २५ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ नारायणकलाः शांता भजंति ह्यनसूयवः २६ रजस्तमःप्रकृतयः समशीला भजंति वै पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः २७ वासुदेवपरा वेदा वासुदेवपरा मखाः वासुदेवपरा योगा वासुदेवपराः क्रियाः २८

पि केचिद्भजंतो दृश्यंते सत्यं मुमुक्षवस्तु अन्यान्न भजंति किंतु सकामा एवेत्याह मुमुक्षव इति द्वाभ्यां भूतपतीनिति पितृप्रजेशादीनामुपलक्षणं अनसूयवः देवतांतराण्यनिंदंतः २६ रजस्तमसी प्रकृतिः स्वभावो येषां ते अत एव पितृभूतादिभिः समं शीलं येषां श्रियामहैश्वर्यप्रजाश्च ईप्संतीति तथा २७ मोक्षपरत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां वासुदेवः परः तात्पर्यगोचरो येषां ते ननु वेदा मखपरा दृश्यंते इत्याशंक्य तेऽपि तदाराधनार्थत्वात्तत्परा एवेत्युक्तं योगा योगशास्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्य तासामपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तं २८

ज्ञानंज्ञानशास्त्रं॥ ननुचतत्तज्ज्ञानपरमेवेत्याशंक्यज्ञानस्यापितत्परत्वमुक्तं॥ तपोत्रज्ञानंधर्मोधर्मशास्त्रं दानव्रतादिविषयं॥ ननुतत्तत्स्वर्गपरमि
त्याशंक्यागम्यत इतिगतिः स्वर्गादिफलं॥ तदपितदानंदांशरूपत्वात्तत्परमेवेत्युक्तं॥ यद्वा॥ वेदा इत्यनेनैवतन्मूलत्वात्सर्वाण्यपिवासुदेवपराणी
त्युक्तं॥ तत्रननुतेषांमखयोगक्रियादीनांनानार्थपरत्वात्तत्रैकपरत्वमित्याशंक्यमखादीनामपितत्परत्वोपपत्तिरुक्तमितिद्रष्टव्यं॥ २८॥ ननुज
गत्सर्गप्रवेशनियमनादिविलासस्यैकवस्तुनिष्ठत्वात्सर्वशास्त्रसमन्वयोदृश्यतेकथंवासुदेवपरत्वंसर्वस्येत्यत आह॥ स एवेतिचतुर्भिः॥ एतेरेवश्लोकै

वासुदेवपरंज्ञानंवासुदेवपरंतपः॥ वासुदेवपरोधर्मोवासुदेवपरागतिः॥ २९॥ स एवेदंससर्जाग्रेभगवानात्ममायया
सदसद्रूपयाचासौगुणमय्यागुणोविभुः॥ ३०॥ तयाविलसितेष्वेषुगुणेषुगुणवानिव॥ अंतःप्रविष्ट आभातिविज्ञानेन
विजृंभितः॥ ३१॥ यथाह्यवहितोवह्निर्दारुष्वेकः स्वयोनिषु॥ नानेवभातिविश्वात्माभूतेषुचतथापुमान्॥ ३२॥

तस्यकर्माण्युदाराणिब्रूहीतिप्रश्नस्योत्तरं॥ सदसद्रूपयाकार्यकारणात्मिकया॥ अगुणश्चेत्यव्ययः॥ स्वतोनिर्गुणोपिसन्नित्यर्थः॥ ३०॥ भगवतो
जगत्कारणत्वमुक्तं॥ प्रवेशनियमनलक्षणांलीलामाहतयेति॥ विलसितेषुउद्भूतेष्वाकाशादिष्वंतःप्रविष्टः सन्गुणवानिवमदधीना
एतेगुणाइत्यभिमानवानिव॥ नतुवस्तुतस्तथा॥ यतोविज्ञानेनचिच्छक्त्याविजृंभितः अनुस्फूर्जितः॥ ३१॥ बहुरूपत्वलीलामाह॥ यथेति॥ स्वयो
निषुस्वाभिव्यंजकेषु॥ अवहितोनिहितः विश्वात्मापुमान्परमेश्वरोभूतेषुप्राणिषु॥ अंतर्यामिणोपिप्रतियोनिनानात्वमिवोच्यतेएवंतद्रूपे
णावा॥ ३२॥

भा॰प्र
८

भोगरूपांलीलामाह ॥ असौहरिः भूतसूक्ष्माणिचइंद्रियाणिचात्मामनश्चैतैः ॥ स्वयंनिर्मितेषुभूतेषु चतुर्विधेषुविष्टेति भोगेसुतान्तंअंशेनोत्पते तद्गु
णान्‌तत्तद्देहरूपान्विषयानित्युपाभुंक्ते ॥ भोजयतीतिजर्थोवाहेयः पालयतीतिवा तदात्वात्मनेपरमार्थं भुंजानवनइतिस्मरणात् ॥ ३३ ॥ इदानी
सर्वज्ञानामीतिप्रश्नोत्तरमाह ॥ भावयतिपालयति एतत्तुसर्वावतारसाधारणंप्रयोजनं ॥ विशेषतः कस्मावतारस्यकंतीलानोवक्ष्यते ॥ लोक
भावनः लोककर्त्ता देवादिषुयेलीलावतारास्तेषुअनुरतोनुरक्तः ॥ ३४ ॥ इतिप्रथमेटीकायां ॥ अवतारकथाप्रश्नेतृतीयेतत्रराणिधौ ॥ पुरुषा
द्यवतारान्यातत्रचारित्रवर्णनैः ॥ षड्वंशत्याअथाख्याहिहरेर्धीमन्नवतारकथाः शुभाः इतितत्तदुत्तरत्वेनावतारानानुक्रमिष्यन् ॥ प्रथमंपुरुषा

असौगुणमयैर्भावैः भूतसूक्ष्मेंद्रियात्मभिः स्वनिर्मितेषुनिर्विष्टोभुंक्तेभूतेषुतद्गुणान् ॥ ३३ ॥ भावयत्येषसत्त्वेनलोकान्वैलो
कभावनः ॥ लीलावतारानुरतोदेवतिर्यङ्नरादिषु ॥ ३४ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेद्वितीयोध्यायः ॥ सू
उवाच ॥ जगृहेपौरुषंरूपंभगवान्महदादिभिः ॥ संभूतंषोडशकलमादौलोकसिसृक्षया ॥ १ ॥ यस्यांभसिशयानस्यायो
गनिद्रांवितन्वतः ॥ नाभिह्रदांबुजादासीद्ब्रह्माविश्वसृजांपतिः ॥ २ ॥

वतारो [illegible] माह जगृहेइतिपंचभिः महदादिभिः महदहं
कारपंचतन्मात्रैः एकादशेंद्रियाणि पंचमहाभूतानीतिषोडशकलाअंशायस्मिन् ॥ ननुयद्यपिभगवद्विग्रहोनैवंभूतस्तथापिविराड्जीवांतर्या
मिणोभगवतोविराड्रूपेणोपासनार्थमिवमुक्तमितिद्रष्टव्यं ॥ १ ॥ कोसौभगवानित्यपेक्षायांतंविशिनष्टि यस्येतित्रिभिः एकार्णवेशयानस्यवि
श्रांतस्यतत्रचयोगःसमाधिस्तद्रूपांनिद्राविस्तारयतोनाभिवद्ध्रदः तस्मिन्यदंबुजं तस्मात्मकाशाद्ब्रह्माअभवत् ॥ अभूत्तथायत्रैकाप्यपौरुषा
पंजरहे ॥ २ ॥

राम
८

कीदृशं रूपं तदाह यस्येति । ननु कीदृशो विग्रहः सहस्रपादादिविशिष्टस्तत्राह तच्च भगवतो रूपं विशुद्धं रजआद्यसंमिश्रं सत्त्वमेवोर्जितं निरति
शयं सत्त्वं ॥३॥ एतच्च योगिनां प्रत्यक्षमित्याह । पश्यन्तीति । अदभ्रमनल्पं ज्ञानात्मकं चक्षुस्तेन सहस्रमपरिमितानि पादादीनि यस्मिंस्तेनाद्भुतं
सहस्राणि मूर्द्धादयो यस्मिंस्तत् । सहस्राणि मौल्यादीनि तैरुल्लसच्छोभमानं ॥४॥ एतन्नैकरूपं नानावतारबीजमाविर्भावतिरोभावधुरित्याह एतन
आदिनारायणाख्यं रूपं निधीयते अस्मिन्निति निधानं कार्योपधानं प्रवेशस्थानमित्यर्थः बीजमुद्गमस्थानं बीजत्वेपि नान्यबीजवत्क्षयः किं त्वव्ययं
न केवलं भवताराणामेव बीजं । किं तु सर्वप्राणिनामपीत्याह । यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तैः ॥५॥ स एव कौमाराद्यवतारांस्तच्चरितं चाह

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः । तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितं ॥३॥ पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपा
दोरुभुजाननाद्भुतं । सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्लसत् ॥४॥ एतन्नानावताराणां निधानं बीज
मव्ययं । यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥५॥ स एव प्रथमं देवः कौमारं सर्गमाश्रितः । चचार दुश्चरं ब्रह्मा ब्रह्मचर्यम
खंडितं ॥६॥ द्वितीयं तु भवायास्य रसातलगतां महीं । उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥७॥ तृतीयमृषिसर्गं वै देवर्षित्वमुपे

स एवेति कौमारब्राह्मप्राजापत्यमानवस्त्वादीनि सर्गविशेषनामानि । यः पौरुषं रूपं ज त्य सः । तंत्रं सात्वतमाचष्ट नैःकर्म्यं कर्मणां यतः ॥८॥
गृहे स एव कौमाराख्यं सर्गमाश्रितः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार । प्रथमद्वितीयादिशब्दो निर्देशमात्रापेक्षया ॥६॥ अस्य विश्वस्य भवाय
उद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः एवं सर्वत्रावतारेषु तत्कर्मचोक्तमित्युत्प्रेक्ष्यं ॥७॥ नारदावतारमाह तृतीयमिति । ऋषिसर्गमुपेत्य तत्रापि देवर्षित्व
मुपेत्येत्यर्थः सात्वतं वैष्णवं तंत्रं पंचरात्रागमं आचष्ट उक्तवान् यतस्तत्रज्ञात् निर्गतं कर्मबंधहेतुत्वं येभ्यस्तानि नैःकर्म्याणि तेषां भावो नैःकर्म्यं कर्मणां

भा॰प्र॰ तुर्येचतुर्थेवतारेधर्मस्यकलांशःभार्येत्यर्थः अर्द्धोवाएषआत्मनोयत्पत्नीतिश्रुतेः तस्याः सर्गेऋषीभूत्वेत्येकावतारत्वंदर्शयति ९ कपिला
१० वतारमाह आसुरयेतन्नाम्नेब्राह्मणायतत्वानांग्रामस्यसंघस्यनिर्णयोयस्मिंस्तत्सांख्यं १० दत्तात्रेयावतारमाह षष्ठइति अत्रेरपत्यत्वंवृतेनैव
वृतःसन्प्राप्तः अत्रेरपत्यमभिकांक्षतआहतुष्टइतिवक्ष्यमाणत्वात् कथंप्राप्तः अनसूययामत्सदृशापत्यमितिवरेणमामेवापत्यंवृतवानितिदत्तो
षद्दृषिमज्ञार्वत्रित्यर्थः आन्वीक्षिकींआत्मविद्यांप्रह्लादादिभ्यश्च ११ यज्ञावतारमाह सप्तमः यामाद्यैः स्वस्यैवपुत्रायामानामदेवाः तद्यैः
सहस्वायंभुवंमन्वंतरंपालितवान् तदास्वयमिंद्रोभूदित्यर्थः १२ ऋषभावतारमाह सर्वाश्रमनमस्कृतं अत्याश्रमंपारमहंस्यंवर्त्मधीरा

तुर्येधर्मकलासर्गेनरनारायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरंतपः ९ पंचमःकपिलोनामसिद्धेशःकालविप्लुतं प्रोवा
चासुरयेसांख्यंतत्वग्रामविनिर्णयं १० षष्ठमत्रेरपत्यत्वंवृतःप्राप्तोनसूयया आन्वीक्षिकीमलर्कायप्रह्लादादिभ्यऊचिवान् ११
ततःसप्तमआकूत्यांरुचेर्यज्ञोभ्यजायत सयामाद्यैःसुरगणैरपात्स्वायंभुवांतरं १२ अष्टमेमेरुदेव्यांतुनाभेर्जातउरुक्रमः दर्शयन्
वर्त्मधीराणांसर्वाश्रमनमस्कृतं १३ ऋषिभिर्याचितोभेजेनवमंपार्थिवंवपुः दुग्धेमामोषधीर्विप्रास्तेनायंसउशत्तमः १४ रूपंस
जगृहेमात्स्यंचाक्षुषोदधिसंप्लवे नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुं १५

णांदर्शयन्नाभेराग्नीध्रपुत्रादृषभोजातः १३ पृथो
रवतारमाह पार्थिवंवपुःराजदेहंपृथुरूपं पाठांतरे पृथोरिदंपार्थिवं ओषधीरित्युपलक्षणं इमांपृथिवींसर्वाणिवस्तूनिदुग्धवान् अतएवअयंउशत्
मामावत्स्यार्षः हेविप्राः तेनपृथ्वीदोहनेनसोयमवतारउशत्तमः कमनीयतमः वशकांतावित्यस्मात् १४ मत्स्यावतारमाह चाक्षुषमन्वंतरे राम
यउदधीनांसंप्लवः संश्लेषः तस्मिन् यद्यपिमन्वंतरावसानेप्रलयोनास्तितथापिकेनचित्कौतुकेनसत्यव्रतायमायादर्शिता यथाकांडेमार्कंडे १०
यायेतिद्रष्टव्यं महीमय्यांनावि नौकारूपायांमय्यामित्यर्थः अपात्ररक्षितवान् वैवस्वतमितिभाविसंज्ञा १५

कूर्मावतारमाह कमठः कूर्मः तद्रूपेणैकादशोऽवतारो विभुर्दध्रे धृतवान् ॥ १६ ॥ धन्वन्तर्यवतारमाह । धान्वन्तरं धन्वन्तरिरूपं द्वादशमादिग्रयोगात्वार्षः
त्रयोदशममेव रूपं तच्चरितेन सह दर्शयति । अपाययदित्यत्रामृतमित्यध्याहारः । मोहिन्या स्त्रिया तद्रूपेण । अन्यानसुरान्मोहयन् धन्व-
न्तरिरूपेणाहृतममृतं मोहिन्यापाययदित्यर्थः ॥ १७ ॥ नृसिंहावतारमाह । नारसिंहरूपं बिभ्रत् एरकां तृणविशेषं कटकृद्यथा ॥ १८ ॥ वामनावतारमाह ।
उद्यानामपि स्वं वामयतीति वामनकं रूपं कृत्वा । प्रत्यादित्सुः तस्मात् छित्वा गृहीतुमिच्छुः ॥ १९ ॥ परशुरामावतारमाह । अवतार इति त्रिः त्रिगुणाः

सुरासुराणामुदधिं मथ्नतां मन्दराचलं । दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥ १६ ॥ धान्वन्तरं द्वादशमं त्रयोदशममेव च । अपाययत्
सुरानन्यान्मोहिन्या मोहयन् स्त्रिया ॥ १७ ॥ चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितं । ददार करजैरूरावेरकां कटकृद्यथा ॥ १८ ॥ पञ्चदशं
वामनकं कृत्वागादध्वरं बलेः । पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं ॥ १९ ॥ अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् । त्रिः
सप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं ॥ २० ॥ ततः सप्तदशे जातः सत्यवत्यां पराशरात् । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्प-
मेधसः ॥ २१ ॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया । समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं ॥ २२ ॥ एकोनविंशे विंशतिमे वृ-
ष्णिषु प्राप्य जन्मनी । रामकृष्णाविति भुवो भगवानहरद्भरं ॥ २३ ॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां । बुद्धो नाम्नाञ्जनसुतः
कीकटेषु भविष्यति ॥ २४ ॥

यावन्ति तथा सप्तकृत्वः सप्तवारान् एकविंशतिवारानित्यर्थः ॥ २० ॥ व्यासावतारमाह । अल्पमेधसः अल्पप्रज्ञान्
पुंसो दृष्ट्वा तदनुग्रहार्थं शाखा चक्रे ॥ २१ ॥ रामावतारमाह । नरदेवत्वं राघवरूपेणाप्राप्तः सन् अतः परं अष्टादशे ॥ २२ ॥ रामकृष्णावतारमाह । विंशति
तमे इति वक्तव्ये तकारलोपश्छान्दसः । रामकृष्णाविति वनामनी जन्मनी प्राप्य ॥ २३ ॥ अञ्जनस्य सुतः जिनसुत इति पाठे जिनोऽपि स एव कीक

भा॰प्र ॥

कल्क्यावतारमाह ॥ युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात्तत्सकाशाज्जनिता निष्यते ॥२५॥ अन्यत्सर्वसंग्रहार्थमाह अवतारा इति ॥ असंख्ये-
यत्वे दृष्टांतः यथेति ॥ अविदासिनः उपक्षयशून्यात् ह्रद उपक्षयपरस्मात् ॥ सरसः सकाशात्कुल्याः क्षुद्रप्रवाहाः ॥ विभूतिरा हक्षयपद-
ति ॥२६॥ तत्र विशेषमाह ॥ एते चेति ॥ पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाः विभूतयश्च ॥ तत्रामत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्ति-
त्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्कारः ॥ कुमारनारदादिष्वाधिकारिकेषु यथोपयोगमंशकलावेशः ॥ पृथ्वादिषु शक्त्यावेशः कृ-

अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥२५॥ अवतारा ह्यसंख्येया हरेः स-
त्वनिधेर्द्विजाः ॥ यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥२६॥ ऋषयो मनवो देवा मनुपुत्रा महौजसः ॥ कलाः
सर्वे हरेरेव सप्रजापतयस्तथा ॥२७॥ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं ॥ इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे
॥२८॥ जन्म गुह्यं भगवतो य एतत्प्रयतो नरः ॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥२९॥ एतद्रूपं भगवतो ह्यरूपस्य चि-
दात्मनः ॥ मायागुणैर्विरचितं महदादिभिरात्मनि ॥३०॥

ष्णस्तु भगवान्साक्षान्नारायण एव ॥ आविर्भूतसर्वशक्तित्वात् ॥ सर्वेषां प्रयोजनमाह ॥
इन्द्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयन्ति सुखिनं कुर्वन्तीति ॥२८॥ एतत्कीर्तनफलमाह जन्मेति ॥ गुह्यं अतिरहस्यं जन्म ॥ प्रयतः शुचिः स-
न् दुःखग्रामात्संसारात् ॥२९॥ विमुच्यत इति यदुक्तं तत्र कथं देहद्वयसंबंधे सति तद्विमुक्तिरित्याशंक्य देहद्वयसंबंधस्य भगवन्मायोत्थावि-
द्याविलसितत्वात्तत्त्वज्ञानाज्जनितविद्यया तन्निवृत्तिरुपपद्यत इत्याशयेनाह ॥ एतदिति पंचभिः ॥ अरूपस्य चिदेकरसस्यात्मनो जीवस्य
एतत्स्थूलं रूपं शरीरं भगवतो मायायास्तस्याः गुणैर्महदादिरूपैर्विरचितं ॥ आत्मनि आत्मस्थाने शरीरं कृतमित्यर्थः ॥३०॥

१७ ॥

कथमित्यपेक्षायामाह रूपावरणेन तदध्यासत इति सदृष्टांतमाह ॥ यथा न भवतीति यथा वाय्वाश्रितो मेघौघो न भवति आकाशे अबुद्धिभिरेतैरा
रोपितः ॥ यथा वा पार्थिवो रेणुः मरुतं धूम्रत्वाद्यनिले ॥ एवं द्रष्टरि आत्मनि देहात्वे दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः ॥३१॥ किंच अ
तः स्थूलाद्रूपात्परं अन्यदपि रूपमारोपितमित्यत्राह ॥ कथंभूतं तत ॥ यत अव्यक्तं सूक्ष्मं ॥ तत्र हेतुः अव्यूढगुणबृंहितं ॥ अव्यूढः करचरणा
दिपरिणामः तथा अपरिणता अव्यूढा ये गुणास्तैर्बृंहितं रचितं ॥ आकारविशेषरहितत्वादव्यक्तमित्यर्थः ॥ एतदेवोपपादयन्नाह ॥ अदृष्टश्रु
तवस्तुत्वात ॥ आकारविशेषवत्त्वमोक्तं ॥ यस्माकारविशेषवद्वस्तु तदस्मदादिभिर्दृश्यते ॥ श्रूयते च इदं तु ॥ इदं तत्त्वेन तथा ॥ तर्हि तस्य

यथा नभसि मेघौघो रेणुर्वा पार्थिवोनिले ॥ एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥३१॥ अतः परं यदव्यक्तमव्यूढगुणबृं
हितं ॥ अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ॥३२॥ यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ॥ अविद्ययात्मनि कृते इति तद्ब्र
ह्मदर्शनं ॥३३॥

सत्त्वे किं प्रमाणं तत्राह स जीवः जीवोपाधिः जीवो जीवेन निर्दिष्टः जीवो जीवं विहायेत्यादौ जीवोपाधौ लिंगशरीरे हि
जीवशब्दप्रयोगात ॥ जीवोपाधित्वेन यत्कल्प्यते इत्यर्थः ननु स्थूलमेव भोगायतनत्वाज्जीवस्योपाधिरस्तु किमन्यकल्पनयेत्यत आह
यद्यस्मात्तस्मात्पुनर्भवः पुनः पुनर्जन्म ॥ उत्क्रांतिगत्यागतीनां तेन विना असंभवादिति भावः ॥३२॥ तदेवमुपाधिद्वयमुक्त्वा तदपवादे
न जीवस्य ब्रह्मतामाह ॥ यत्र यदा इमे स्थूलसूक्ष्मे रूपे स्वसंविदा स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः ज्ञानेन प्रतिषिद्धौ हि तत्त्वेन भवत
इत्याह ॥ अविद्ययात्मनि कृते कल्पिते इति हेतोः ॥ तद्ब्रह्मतया जीवो ब्रह्मैव भवतीत्यर्थः कथंभूते दर्शनं ज्ञानेकात्मरूप ॥३३॥

भा० प्र
१२

तथापि भगवन्मायायाः संसृतिकारणभूताया विद्यमानत्वात्कथं ब्रह्मता तत्राह यदीति । अस्मरेहे संदेहवचनं परिवेशः प्रमाणेस्व
रितितद्वृत्तवैशारदी विशारदः सर्वज्ञ ईश्वरस्तदीया । देवी संसारचक्रेण क्रीडतीति । एषा माया यद्युपरता भवति । किमितः परतो भवे
त्तत्राह मतिः विद्या । अयं भावः । यावदविद्यात्मनावरणविक्षेपौ करोति तावन्नोपरमति । यदा त्वसैव विद्यारूपेण परिणता तदा सदसद्रूप
जीवोपाधिद्वयं दग्ध्वा निरिंधनाग्निवत्स्वयमेवोपरमेदिति । तदा संपन्नः ब्रह्मस्वरूपं प्राप्त एवेति । विदुस्तत्त्वज्ञाः । किमितोपि ध्येयं । स्वे महिम्नि प
रमानंदस्वरूपे महीपते पूज्यते विराजत ३४ यथा जीवस्य जन्मादि मायया एवमीश्वरस्यापि जन्मादि मायेत्याह । एवमिति । अकर्तृकर्माणि

यद्येषोपरता देवी माया वैशारदी मतिः । संपन्न एवेति विदुर्महिम्नि स्वे महीयते ३४ एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य
च । वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ३५ स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् । भूतेषु चा
न्तर्हित आत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ३६ न चास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः । नामानि

अजनस्य जन्मानि हृत्पतेरन्तर्यामिणः नहि जीवादीश्वरस्य को विशेषः रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः ३७
स्यात् अयमेव विशेष इत्याह स वा इति । षाड्वर्गिकं इंद्रियषड्वर्गविषयं जिघ्रति हरादेवगंधवद्गृह्णाति । न तु सज्जत इत्यर्थः । यतः षड्गुणेशः षडि
न्द्रियनियंता ३६ ननु किमीश्वरस्य सृष्ट्यादिकर्मपि विषयभोगो वा तत्राह न चेति धातुर्जगद्विधातुरीश्वरस्य ऊतीर्जगल्लीलाः कुमनीषः
कुबुद्धिः निपुणेन तर्कादिकौशलेन नावैति न जानाति । मनसा रूपाणि वाचा च नामानि संतन्वतः सम्यग्विस्तारयतः वचोभिरिति बहुत्व

राम
१२

भक्ता स्वकथं विज्ञानातीत्याह ॥ तवैवेति ॥ अप्राप्यप्राप्त्युत्कलिकाभावेन ॥ सततयानिरंतरया ॥ अनुवर्तत्याअनुकूल्येन भजेत ॥ २० ॥ भक्तिमार्गे प्रवृत्ता
न्दृष्टीन्नमिनेत्रे इति अन्वयेति ॥ यतो भक्ता एव भगवत्तत्त्वं जानाति ॥ अथ अतः भागवतः सर्वताः भवतो धन्याः कृतार्थाः ॥ ततः यतः यस्मादिलु
प्तश्रीविष्ट्वेवात्मभावं मनोवृत्तिर्भवेति ॥ सर्वात्मकं यत्र यस्मिन् भावे सति भूयः परिवर्त्तो जन्ममरणाद्यावर्त्तो न भवति ॥ २१ ॥ सतः किमे

तद्वैरभावः परं वीरपरमद्भुतं तद्वीर्यस्यार्थांगपालेः ॥ योमाययायानिततयानुवृद्दृश्यामभजेतत्यारमतो जगंधं ॥ २२ ॥ अ
धेहं धन्याः भागवत इत्युक्तं प्रह्लादः देवं विलोकनाथे ॥ कुर्वतिसर्वात्मकमात्मभावं नयत्र भूयः परिवर्त्त उग्रः ॥ २३ ॥
इदं भागवतं नाम पुराणं ब्रह्मसंमितं ॥ अत्र मस्त्राकचारितं चकार भगवानृषि ॥ ४ ॥ निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं
महत ॥ तदिदं ग्राहयामास सुतमात्मवतां वरं ॥ सर्ववेदेतिहासानां सारं समुद्धृतं ॥ ४ ॥ स तु संश्रावयामास महाराजं परी
क्षितं ॥ प्रायोपविष्टं गंगायां परीतं परमर्षिभिः ॥ ४२ ॥ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥ कलौ नष्टदृशामेष पुरा
णार्कोधुनोदितः ॥ ४३ ॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥ अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात ॥ सोहं वः श्रा
वयिष्यामि यथाधीतं यथामति ॥ ४४ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे तृतीयोध्यायः ॥

तच्छ्रावणमपूर्वं कथयामि तत्राह इदमिति ॥ ब्रह्मसंमितं सर्ववेदतुल्यं ॥ अत्र मस्त्रोकस्य चरितं यस्मिन् ततः ऋषिर्व्यासः ॥ ४० ॥ तत्सुतः ग्राहयद्दत्तं निमाहतरि
मिति ॥ तमेवाह वं ॥ ४१ ॥ प्रायेणामृत्युपर्यंतमनाशकेनोपविशमिति ॥ परमंवेदाणगोक्तिः ॥ ४२ ॥ ४३ ॥ हे विप्राः विप्रर्षेः सकाशादध्यगमं ज्ञातवानस्मि ॥ तत्र की
र्तयतः तत्र निविष्ट इति चात्वयः पेरान्नत्र पराशन्निरदोषः ॥ यथाधीतं न तु स्वमतिविलसितं तत्रापि यथामति स्वमरस्य सारेणा संक्षेपतः कथितं तवि

× सम्यक्‌ 3

भा०प्र
१३

तदेवं भागवतारंभकारणत्वेन वर्ण्यते ॥ व्यासस्यापरितोषो ब्रह्मणस्तपः प्रवचनादिभिः ॥ इति एवं प्रसन्नेन तया श्रावयिष्यामीति ब्रुवाणं मुनीनां ब-
हूनां मध्ये एकेन बह्वृचेनाग्र्यो वृद्धः ॥ वृद्धेष्वपि वडूश्रेयः कुलपतिः गणमुख्यः ॥ तेष्वपि वडूश्रेयो बह्वृचः ऋग्वेदी तेन बह्वृच्यः ॥ अत एव भ-
क्त्या शौनकोऽब्रवीत् ॥ यत्तया कथया प्राह ॥ २ ॥ कस्मिन्न्वा स्थाने केन हेतुनेति महाभारतादि धर्मशास्त्राणि कृतवतः पुनरेतत्संहिताकरणे कि-
कारणमित्यर्थः कुत इति भावे विभक्तिकत्वात् ॥ केन प्रवर्तितः इत्यर्थः ॥ कृष्णो व्यासः ॥ ३ ॥ यदुक्तं सत्वं संश्रावयामासेति ॥ तत्र शुकस्य व्या-
स्यानारिकं कथं घटितमिति प्रष्टुं तस्याधिगोदासीनतामाह द्वाभ्यां तस्येति समदृक् समं ब्रह्म पश्यति ॥ अतो निर्विकल्पकः त्वार्थेकः नि-

व्यास उवाच ॥ इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणां ॥ वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् ॥ १ ॥ शौनक उवाच ॥
सूत सूत महाभाग वद नो वदतां वर ॥ कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः ॥ १ ॥ कस्मिन्युगे प्रवृत्तेयं स्थाने
वा केन हेतुना ॥ कुतः संचोदितः कृष्णः कृतवान्संहितां मुनिः ॥ ३ ॥ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः ॥ ए-
कांतमतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥ दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं ॥ तद्वीक्ष्य

त्नभेदः किंच एकस्मिन्नेव वस्तुनः समाप्तिर्यस्याः तथाप्युन्मत्तवदिति पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ५
धीस्तस्य: यतः उन्निद्रः मायाशयनादुद्बुद्धः यानि भूतानि सर्वभूतानां तस्यां जागर्ति संयमीति स्मृतेः अत एव गूढः अप्रकटः मूढ इव प्रतीयते ४
निर्विकल्पकत्वं प्रपंचयति दृष्ट्वेति ॥ आत्मजं शुकं प्रव्रजंतं अनुयांतमनुगच्छंतमृषिं व्यासं अनग्नमपि दृष्ट्वा जले क्रीडंत्यो देव्यः अप्सरसः ह्रि-
या लज्जया वस्त्रपरिधानं कृतवत्यः अनग्नमपीत्यनेनायमर्थस्तत्तो नग्नः तत्पुत्रं नग्नमप्यग्रतो गतः सुतस्य ह्रिया न परिदधुः ॥ तच्चित्रं वीक्ष्य
इत्यन्वयः पप्रच्छ मानिनीनिर्भिदा भेदस्तवास्ति विविक्ता पृथक् ताद्दृष्टिर्यस्य ॥ ५ ॥

एम
१३

एवंभूतोसोकथंपालक्षितःजातः ॥ कुरुवोजांगलाख्येदेशविशेषात् अन्यत्रसंप्राप्तः प्रथमं ततो गजसाह्वये विचरन् । गजेन सहितं आह्वयो नाम य
स्य तस्मिन् हस्तिनापुरे हस्तीनाम राजा तेन निर्मितत्वात् ॥ ६ ॥ एवंभूतेन मुनिना सह यत्र संवाद एषा सात्वती भागवती श्रुतिः संहिता ॥ ७ ॥ एत
द्व्याख्यानं वेदकालावस्थानापेक्षं तस्य त्वेकत्रावस्थानं दुर्लभमित्याह स इति ॥ गोदोहनमात्रं कालं गृहीतीकृते ॥ तदपि न भिक्षार्थं किं तु तेषामाश्रम
गृहं तीर्थीकुर्वन् पवित्रीकुर्वन् ॥ ८ ॥ तस्मादेवंभूतो त्वयक्ते त्यक्ताश्रये ॥ आत्महत्यचरितमतीवाश्चर्यं प्रायोपवेशनं यतः अतः कथयेत्याह अभिम

कथं पालक्षितः पौरैः संप्राप्तः कुरुजांगलान् । उन्मत्तमूकजडवद्विचरन् गजसाह्वये ॥ ६ ॥ कथं वा पांडवेयस्य राजर्षेर्मुनिना सह
संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ॥ ७ ॥ स गोदोहनमात्रं हि गृहेषु गृहमेधिनां । अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमं ॥ ८ ॥
अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं । तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥ ९ ॥ स सम्राट् कस्य वा हेतोः पांडूनां मानव
र्द्धनः । [illegible] प्रायोपविष्टो गंगायामनादृत्याधिराट् श्रियं ॥ १० ॥ नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रव
वः । कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ॥ ११ ॥ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा

न्युसुतमिति पंचभिः ॥ गृणीहि कथय ॥ ९ ॥ सम्राट् चक्रवर्ती वेति विन ॥ जनाः जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरं ॥
कै कस्य वा हेतोः कस्मात्कारणात् ॥ अधिराट् श्रियं अधिराज्ञां श्रियं सपदमनादृत्य ॥ १० ॥ यस्य पादनिकेतं चरणपीठं ॥ हस्कुर ॥ धनान्यानीय
दत्वा शत्रवो नमंति ॥ अगहे सून ॥ युवा न हरणाय ॥ एतत्रैच्छत ॥ उत्स्रष्टुमात्मनेपदं ॥ असुभिः प्राणैः सह ॥ ११ ॥ विरक्तस्य किं धनादिभिरिति चे
न्नत्राह लोकस्य शिवाय सुखाय ॥ भवाय समृद्धये ॥ भूतये ऐश्वर्याय च ॥ ते जीवंति न त्वात्मार्थं ॥ एवं सत्यसौ राजा निर्विद्य विरज्यापि परेषामाश्रयं कले
वरं कुतो हेतोर्मुमोच ॥ न हि परोपजीवनं त्वयं त्यक्तुं प्रवर्तितमित्यर्थः ॥ १२ ॥

यत्किंचनशिष्टेसितत्सर्वंनोस्मभ्यंसमाचक्ष्वयद्यस्मात्वांवाचांविषयेगिरांगोचरेर्थेस्नातंपारंगतंत्वांमन्ये छांदसादन्यत्रवैदिकव्यतिरेकेण
श्रौत्रैवर्णिकत्वात् १३ कस्मिन्युगइत्यादिप्रश्नानांव्यासजन्मकथनपूर्वकमुत्तरमाह द्वापरेसमनुप्राप्तेकदेत्यपेक्षायामाह तृतीयेयु
गस्यपर्ययेपरिवर्ते वासव्यांउपरिचरस्यवसोर्वीर्याज्जातायांसत्यवत्यांयोगीज्ञानीव्यासोजातः १४ जलमुपस्पृश्यजलेस्नात्वानारिक्तंक
त्वेत्यर्थः आसीनोबभूवेतिशेषः विविक्तेदेशइत्यादिविविक्तेकाश्यार्थमुक्तं अनेनैवबदरिकाश्रमस्थानंसूचितं १५ तत्रचसंस्मृतियुग

तत्सर्वंनःसमाचक्ष्वपृष्टोयदिहकिंचन मन्येत्वांविषयेवाचांस्नातमन्यत्रछांदसात् १३ सूत उवाच द्वापरेसमनुप्राप्तेतृती
येयुगपर्यये जातःपराशराद्योगीवासव्यांकलयाहरेः १४ सकदाचित्सरस्वत्याउपस्पृश्यजलंशुचिः विविक्तएकआसीन
उदितेरविमंडले १५ परावरज्ञःसऋषिःकालेनाव्यक्तरंहसा युगधर्मव्यतिकरंप्राप्तंभुवियुगेयुगे १६ भौतिकाना
चभावानांशक्तिह्रासंचतत्कृतं अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः १७ दुर्भगांश्चजनान्वीक्ष्यमुनिर्दिव्ये
नचक्षुषा सर्ववर्णाश्रमाणांयद्दध्यौहितममोघदृक् १८ चातुर्होत्रंकर्मशुद्धंप्रजानांवीक्ष्यवैदिकं व्यदधाद्यज्ञसंतत्यैवेदमे

धर्मव्यतिकरादिकंवीक्ष्यसर्ववर्णाश्रमाणांयद्धितंतद्ध्यावितितृतीयेनान्वयः परावरज्ञःअतीतानागतवित् अ कंचतुर्विधं १९
अव्यक्तंरंहोवेगोयस्यतेनकालेनयुगधर्माणांव्यतिकरंसांकर्यंप्राप्तंवीक्ष्यतथायुगेयुगे १६ भौतिकादीनांशरीरादीनांतत्कृतंकालकृतं
निःसत्वान्धैर्यशून्यान् दुर्मेधान्मंदमतीन् १७ तत्रहोत्रोपलक्षिताश्चत्वारऋत्विजश्चतुर्होतारस्तैरनुष्ठेयंकर्मचातुर्होत्रं शुद्धं
शुद्धिकरं यज्ञसंतत्यैयज्ञानामविच्छेदाय १९

सात्त्विं विध्यमेवाह ऋगिति उद्धृताः पृथक्कृताः ॥ २०॥ २१॥ दारुणः अथर्वोक्ताभिचारादिप्रवक्ता ॥ २२॥ व्यस्यन् विभक्तवंतः ॥ २३॥ वेदविभागप्र
योजनमाह ॥ त एवेति ये पूर्वं मतिमेधाविभिर्धार्यंते स्म त एव ॥ २४॥ किंच स्त्रीशूद्रेति द्विजबंधवः त्रैवर्णिकेष्वधमाः तेषां कर्मश्रेयसि

ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ॥ इतिहासपुराणं च पंचमो वेद उच्यते ॥ २०॥ तत्रर्ग्वेदधरः पैलः सामगो जै
मिनिः कविः ॥ वैशंपायन एवैको निष्णातो यजुषामुत ॥ २१॥ अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः ॥ इतिहासपुरा
णानां पिता मे रोमहर्षणः ॥ २२॥ त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा ॥ शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनो भवन्
त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा ॥ एवं चकार भगवान्व्यासः कृपणवत्सलः ॥ २४॥ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगो
चरा ॥ कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥ इति भारतमाख्यानं कृपया मुनिना कृतं ॥ २५॥ एवं प्रवृत्तस्य सदा भूतानां श्रेय
सि द्विजाः ॥ सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः ॥ २६॥ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥ वितर्कयन्विविक्तस्थ इदं
प्रोवाच धर्मवित् ॥ २७॥ धृतव्रतेन हि मया छंदांसि गुरवोऽग्नयः ॥ मानिता निर्व्यलीकेन गृहीतं चानुशासनं ॥ २८॥ भारतव्यप
देशेन ह्याम्नायार्थश्च दर्शितः ॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥ २९॥

श्रेयः साधने एवं भवेत् अनेनैव प्रकारेण भवत्विति ॥ अत एव ते
षां कृपया भारताख्यानं मुनिना कृतं ॥ २५॥ भूतानां श्रेयसि हिते सर्वात्मकेनापि कर्मणा ॥ २६॥ न अतिप्रसीदत् हृदयं यस्य सः ॥ २७॥ चिंताप्रसंगे
हेतुं वितर्कयन् त्रिः दृष्टवाच स्वगतं मानिताः पूजिताः ॥ २८॥ २९॥

भा०ब देह्यः देहे भवः आत्माजीवः वस्तुतो विभुः परिपूर्ण एव । आत्मना ह्येन रूपेणोपपन्नः तादात्म्यमप्राप्त इवाभाति । तत्र ब्रह्मवर्चसं वेदाध्ययना

१५ ध्यापनोत्कर्षजं तेजः तत्र साधवो ब्रह्मवर्चस्याः तेषु सत्तमः श्रुतिश्रेष्ठोपि यद्वा । न केवलमसंपन्न इवाभाति । यस्तु तद्ब्रह्मवर्चसं यो ब्रह्मवर्चस्यः स वा

न विशुद्धसत्तम इवाभाति । पाठांतरे कमनीयतमोपीति ॥ २० ॥ असंपन्नत्वे हेतुत्वयमेवाशंकते किंचेति प्रायेणानुपपत्त्वेन । हि यस्मात्तत्रैव धर्माः स्मृ

तस्य प्रियाः ॥ २१ ॥ खिलमपूर्णं विद्यतः खेदं प्राप्तवतः कृष्णस्य व्यासस्य आश्रमं प्रागुदाहृतं सरस्वतीतीरस्थं ॥ २२ ॥ तं नारदमागतमभिताप स

अथापि वतमेदेह्यो ह्यात्मा चैवात्मना विभुः असंपन्न इवाभाति ब्रह्मवर्चस्य सत्तमः ॥ २० ॥ किंवा भागवता धर्मा न प्रायेणानि

रूपिताः प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ २१ ॥ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदोभ्या

गादाश्रमं प्रागुदाहृतं ॥ २२ ॥ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः ॥ पूजयामास विधिवन्नारदं सुरपूजितं ॥ २३ ॥ इति श्री

भागवते महापुराणे प्रथमस्कंधे चतुर्थोध्यायः ॥ सूत उवाच ॥ अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः ॥ देवर्षिः प्राह विप्र

र्षिं वीणापाणिः स्मयन्निव ॥ १ ॥ ना र उवाच ॥ पाराशर्य महाभाग भवतः कच्चिदात्मना ॥ परितुष्यति शारीर आत्मा मा

हसा प्रत्युत्थाय विधिवत्पूजयामासेति ॥ २३ ॥ इति प्रथमे चतुर्थः ॥ पंचमे सर्वधर्मेभ्यो हरिकीर्तनगौरवं ॥ आह वित्तप्रसादाय नारदो व्यास ॥ नस एव वा ॥ २

रदेनोपरि स्पते । उपसमीपे आसीनं विप्रर्षिं व्यासं । बृहच्छ्रवाः महायशाः स्मयन्निव ईषद्धसन्निवेत्यनेन तद्वैश्वप्रसन्नता द्योत्यते । इवेत्यनधिका राम

एवं अहो महानपि स्त्रियतीति स्मयमानः ॥ १ ॥ शारीरः शरीराभिमानी आत्मा ॥ आत्मनैतेन शरीरेण कच्चित् किं परितुष्यति मानस आत्मा म १५

नोभिमानी तेन मनसा परितुष्यति कच्चिन्नो वेति ॥ २ ॥

ना २

ने जिज्ञासितं ज्ञातुमिष्टं धर्मादि यत्तत्सर्वं हि संपन्नं सम्यक्‌ज्ञातं । अपि शास्त्रात् अनुष्ठितं चेत्यर्थः । अधीतमिति पाठे संबोधने हि संपन्नत्वे हेतुः महद
द्भुतमित्यादि । एवंभूतैरर्थैर्धर्मादिभिः परिबृंहितं परिपूर्णं ॥ ३ ॥ किंच यत्सनातनं नित्यं परब्रह्म तच्च त्वया जिज्ञासितं विचारितं । अधीतं अधि
गतं प्राप्तं चेत्यर्थः । अथापि शोचसि तत्किमर्थमिति शेषः ॥ ४ ॥ आत्मा शारीरो मानसश्च । तन्मूलं तस्यापरितोषस्य कारणं । अव्यक्तं अस्फुटं हे
नारद त्वां आपृच्छामः । आत्मभवो ब्रह्मा तस्यात्मनो देहादुद्भूतं । अत एवागाधबोधं अतिगंभीरो बोधो यस्य तं त्वां ॥ ५ ॥ अगाधबोधतामेव प्रपंचयन्नाह

जिज्ञासितं हि संपन्नमपि ते महदद्भुतं । कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितं ॥ ३ ॥ जिज्ञासितमधीतं च यत्तद्ब्रह्म सनातनं ।
अथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥ व्यास उवाच ॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे । तन्मू
लमव्यक्तमगाधबोधं पृच्छामहे त्वात्मभवात्मभूतं ॥ ५ ॥ स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः । परावरेशो
मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ॥ ६ ॥ त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी । परावरे ब्रह्मणि ध
र्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥ ७ ॥

स वा इति द्वाभ्यां । सर्वगुह्यज्ञाने हेतुः यद्यस्मात् पुराणः पुरुषः उपासितस्त्वया कथंभू
तः परावरेशः कार्यकारणनियंता । मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजतीत्यादि ॥ ६ ॥ किंच त्वं त्रिलोकीं पर्यटन् अर्क इव सर्वदर्शी योग
बलेन प्राणवायुरिव सर्वप्राणिनामंतश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिः । अतः परे ब्रह्मणि धर्मतो योगेन निष्णातस्य । तदुक्तं याज्ञवल्क्येन । इज्या
चारदमाहिंसादानस्वाध्यायकर्मणां । अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति । अवरे च ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमैः निष्णातस्य मे

अनुदितप्रायमनुक्तकल्पं भगवद्यशो विमलं विना येनैव धर्मादिज्ञानेनासौ भगवान्न तुष्येत तदेव दर्शनं ज्ञानं खिलं न्यूनं मन्ये अहं ॥ ८ ॥ ननु
भगवद्यश एव तत्र तत्रानुवर्णितं तत्राह यथेति । वराहादिर्धर्मादिसाधनानि च । तथा धर्मादिवत्प्राधान्येन वासुदेवस्य महिमा न ह्युक्त इ-
त्यर्थः ॥ ९ ॥ वासुदेवव्यतिरिक्तान्यविषयत्वाज्ञानवद्वेदान्यविषयं वाक्चातुर्यं खिलमेवेत्याह । नेति । चित्रपदमपि यद्वचो हरेर्यशो न प्रगृ-

नारद उवाच ॥ भवतानुदितप्रायं यशो भगवतोऽमलं । येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं ॥ ८ ॥
यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः । न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥ ९ ॥ न यद्वचश्चित्र-
पदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशि-
क्क्षयाः ॥ १० ॥

णीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशंति मन्यंते । कुतः मानसाः सत्वप्रधानमनसि वर्तमानाः
हंसा यतयो यत्र न निरमंति कर्हिचिदपि नितरां न रमंते । उशिक्क्षयाः उशिक् कमनीयं ब्रह्म क्षयो निवासो येषां ते । यथा प्रसिद्धा हंसा मा-
नसे सरसि चरंतः कमनीयपद्मखंडनिवासा आत्यंतिकविचित्रान्नादियुक्तेऽप्युच्छिष्टगर्ते काकक्रीडास्थानेन न निरमंते इति शेषः ॥ १० ॥

विनापिपरयाचारमर्थभगवद्यशःप्रधानंवचःपवित्रमित्याह॥ तद्वाग्विसर्गःसचासौवाग्विसर्गःवाचःप्रयोगः॥ जनानांसमूहोजनतातस्याअघं
विप्लावयतिनाशयतीतितथासः॥ यस्मिन्वाग्विसर्गेअबद्धवत्यपिअपशब्दादियुक्तेपिप्रतिश्लोकंअनंतस्ययशसांकितानिनामानिभवंति
तत्रहेतुः यत्यानिनामानिसाधवोमहांतोवक्तरिसतिशृण्वंति श्रोतरिसतिगृणंति॥ अन्यदातद्वयमेवगायंतिकीर्त्तयंतीति॥११॥ भक्तिहीन
कर्मशून्यमेवेतिकैमुत्यन्यायेनदर्शयति॥ नैःकर्म्यमिति॥ नैष्कर्म्यंब्रह्मतदेकाकारत्वान्निःकर्मतारूपंनैःकर्म्यंअज्यते॥ अनेनेत्यञ्जनमुपाधिः
तन्निवर्त्तकंनिरंजनं॥ एवंभूतमपिज्ञानंअच्युतेभावोभक्तिस्तेनवर्जितंचेदलमत्यर्थंनशोभतेसम्यगपरोक्षायनकल्पतइत्यर्थः॥ तदाशश्वत्साधन

तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि॥ नामान्यनंतस्ययशोंकितानियत्शृण्वंतिगायंतिगृणंतिसा
धवः॥११॥ नैःकर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनं॥ कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यका
रणं॥१२॥ अथोमहाभागभवानमोघदृक्शुचिश्रवाःसत्यरतोधृतव्रतः॥ उरुक्रमस्याखिलबंधमुक्तयेसमाधिनानुस्मरतद्वि
चेष्टितं॥१३॥

कालेवाभद्रंदुःखरूपंयत्काम्यंकर्मयदप्यकारणंअकाम्यंतच्चेतिचकारस्यान्वयः॥ तदपिकर्मईश्वरेनार्पितंचेत्कुतःपुनःशोभते
बहिर्मुखत्वेनसत्वशोधकत्वाभावात्॥१२॥ तदेवंभक्तिशून्यानिज्ञानवाक्यातुर्यकर्मकौशलानिव्यर्थान्येवअतः अतोहरेश्चरितमेवानुवर्णयेत्याह
अथोअतःकारणात्॥ अमोघायथार्थादृग्दर्शनंयस्य॥ शुचिशुद्धंश्रवोयशोयस्य॥ सत्यरतःधृतानिव्रतानियेनसभवानेवमहागुणत्वात्॥ अतः
उरुक्रमस्यविविधंचेष्टितंलीलासमाधिनाचित्तैकाग्र्येणअखिलस्यबंधमुक्तयेत्वमनुस्मर॥ स्मृत्वावर्णयेत्यर्थः एतद्वचवाक्यांतरमितिमध्यमपुरुषप्र
योगनानुपपन्न॥ १३॥

भा०३
१७

विपक्षे दोषांतरमाह ॥ ततउरुक्रमविचेष्टितात्पृथग्दृशः ॥ अतएवान्यथाप्रकारांतरेणापत्तिं किंचिद्यांतरं विवक्षितः ततो विवक्षया कैतेः ॥ स्फुरितैः रूपैः नामभिश्च वक्तव्यत्वेनोपस्थितैः दुःस्थिता अनवस्थिता मतीमतिः कदाचित्क्वापि विषये स्वास्पदं स्थानं न लभेत ॥ वातेन हता स्वाघूर्णिता नौरिव तदुक्तं गीतासु ॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन ॥ बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनामित्यादि ॥ १४ ॥ नरेंद्रं हरियशो विना भारतादिषूक्तं धर्मादिवर्णनमपि किंचित्करमित्युक्तं प्रत्युत विरुद्धमेव जातमित्याह ॥ जुगुप्सितं निंद्यं काम्यकर्मादि स्वभावत एव रक्तस्य तत्रानुरागिणः पुरुषस्य ध

ततोन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः ॥ न कुत्रचित्क्वापि च दुःस्थिता मतिर्लभेत
वाताहतनौरिवास्पदं ॥ १४ ॥ जुगुप्सितं धर्मकृतेनुशासतः स्वभावरक्तस्य महान्व्यतिक्रमः ॥ यद्वाक्य
तो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥ १५ ॥

र्मकृते धर्मार्थमनुशासतस्तव महानयं व्यतिक्रमः अन्यायः ॥ कुतः तस्य तत्राह यस्य वाक्यतो यमेव मुख्यो धर्म इति स्थितः इतरः प्राकृतो जनः तस्य काम्यकर्मादिः रम्येन तत्त्वेन क्रियमाणं निवारणं स्वयमेव त्वया क्रियमाणं ॥ यद्वा न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्या दिश्रुत्या क्रियमाणं निवारणं यथार्थमेव तदिति न मन्यते ॥ किंतु प्रवृत्तिमार्गानधिकृतविषयं तदिति कल्पयति ॥ तदुक्तं मतांतरोपन्यासे भट्टैः ॥ न तेवं शाक्यते वक्तुं येषां धर्माद्यनंगवारयो नराः ॥ रहस्यत्वेन राज्ञा तिवन्दे तेषामनधिविधिः नैष्ठिकब्रह्मचर्येवा परिव्राजकता पि वा ॥ तेरवश्यं गृहीतव्या तेनादावेतदुच्यते इत्यादि ॥ १५ ॥

राम
१७

नतुयद्येवंप्रवृत्तिमार्गोनिंद्यस्तेतर्हिनिवृत्तिमार्गेसर्वक्रियात्यागेनैवपारमेश्वरस्वरूपानुभूतेः किंतद्यशः कथनेनापितत्राह
विचक्षणोस्येति निपुणः कश्चिदेवनिवृत्तितः सर्वक्रियानिवृत्त्यास्यविभोः सुखंनिर्विकल्पकसुखात्मकंस्वरूपंवेदितुंतात्त्वर्हतीति नपुन
रविचक्षणः प्रवृत्तिस्वभावः॥ विभुत्वेहेतुः॥ अनंतः कालतः पारंवदेशतोयस्यतस्यविभोःस्थितिततः कारणानहेविभोश्च अनात्मनोदेहा
द्यभिमानिनः अतएवगुणैः सत्वादिभिः प्रवृत्तमानस्यजनस्यप्रदर्शयभवानितिस्वमित्यर्थः पाठांतरेहेभवद्भिरितिसंबोधनं॥१६॥ एवंताव
त्काम्यधर्मादेरनर्थहेतुत्वात्तंविहायहरेर्लीलैववर्णनीयेत्युक्तं॥ इदानींतुनित्यनैमित्तिकस्वधर्मनिष्ठामप्यनादृत्यकेवलंहरिभक्तिरेवो

विचक्षणोस्यार्हतिवेदितुंविभोरनंतपारस्यनिवृत्तितः सुखं॥ प्रवर्त्तमानस्यगुणैरनात्मनस्ततोभवान्दर्शयचेष्टितंवि
भो॥१६॥ त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोथपतेत्ततोयदि॥ यत्रक्ववाभद्रमभूदमुष्यकिंकोवार्थआप्तोभजतां

परेष्टाप्येत्याशयेनाह त्यक्त्वेति॥ ननुस्वधर्मत्यागेनभजन्भक्तिपरिपाकेनयदिकृतार्थोभवेत्तदानकाचिच्चिंता॥ य॥ स्वधर्मतः॥१७॥
दिपुनरपक्वएवम्रियेततदातोभ्रश्येत्तदातदास्वधर्मत्यागनिमित्तोनर्थः स्यादित्याशंक्याह॥ ततोभजनात्कथंचित्पतनेनभ्रश्येतम्रियेतवाय
दितदापिभक्तिरसिकस्यकर्मानधिकारात्रानर्थशंका॥ अंगीकृत्याह॥ वाशब्दः कटाक्षे॥ यत्रक्ववानीचयोनावपिअमुष्यभक्तिरसिक
स्याभद्रंभूत्किंनाभूदेवेत्यर्थः॥ भक्तिवासनासद्भावादितिभावः अभजद्भिस्तुकेवलंस्वधर्मतः कोवाअर्थः आप्तः प्राप्तः नकोपीत्यर्थः
अभजतामितिषष्ठीवाएवंविधमात्रविवक्षया॥१७॥

नत्वस्वधर्ममात्रादपिकर्मणापितृलोकइतिश्रुतेःपितृलोकप्राप्तिफलमस्त्येवतत्राह ।। तस्यैवहेतोः तदेवयत्नंकुर्यात ।। यत्तदुपरिब्रह्मपर्यंतमध धःस्थावरपर्यंतंचभ्रमद्भिर्जीवैर्नलभ्यते ।। कृष्णपूर्ववत ।। तत्त्वविषयसुखंस्यान्यतएवप्राचीनकर्मणासर्वत्रनरकादिपिलभ्यते ।। दुःखवत ।। यथाऽदुःखमप्रयत्नेविनापिलभ्यते ।। तद्वत ।। तदुक्तं सुखार्थितानिदुःखानिपथ्येवायान्तिदेहिनां ।। दुःखान्यपितथामन्येस्वप्रयत्नातिरिच्यतेइति ।।१८।। यदुक्तंयत्र क्ववाऽभद्रमभूदमुष्यकिंइतितदुपादयतिनवाइति ।। मुकुंदसेवीजनोजातुकदाचितकथंचनकुयोनिंगतोपिसंसृतिंनावृजेतनाविशेत ।। अन्यवद्धोस्यन वतकेवलकर्मनिष्ठवदितिवैधर्म्यदृष्टांतः ।। कुतइत्यतआह ।। मुकुंदांघ्र्युपगूहनमालिंगनंपुनःस्मरन्विहातुंनेच्छति

तस्यैवहेतोःप्रयतेतकोविदोनलभ्यतेयद्भ्रमतामुपर्यधः ।। तल्लभ्यतेदुःखवदन्यतःसुखंकालेनसर्वत्रगभीररंहसा ।।१८।।
नवैजनोजातुकथंचनाव्रजेन्मुकुंदसेव्यन्यवदंगसंसृतिं ।। स्मरन्मुकुंदांघ्र्युपगूहनंपुनर्विहातुमिच्छेन्नरसग्रहोयतः ।।१९।।
इदंहिविश्वंभगवानिवेतरोयतोजगत्स्थाननिरोधसंभवाः ।। तद्धिस्वयंवेदभवांस्तथापितेप्रादेशमात्रंभवतःप्रद

यतोऽयंजनोरसग्रहः रसेनरसनीयेनगृह्यतेवशीक्रियतेयद्वारसनीयेग्रहआग्रहोयस्य ।। तदुक्तंभगवता यततेवततोभूयःसंसिद्धौकुरुनंदन ।। पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसइति ।।१९।। तदेवंभगवल्लीलाप्राधान्येनवर्णयितव्यं ।। तत्रकोभगवान्कीदृशंतस्यलीलाइत्यपेक्षायामाह इदंविश्वंभगवानेवासतद्भिन्नस्माद्विश्वस्मादितरः ।। इश्वरात्प्रपंचोनदृश्यक ।। इश्वरस्तुप्रपंचात्स्वयमितरत्वर्थः तत्रहेतुर्यतोभगवतोहेतोर्जगतःस्थित्यादयोभवंति ।। अनेनैवलीलाअपिदर्शिताः यद्वाइदंविश्वंभगवान् ।। इतरइवयःसंजीवोपिभग वानेवतन्नाचेतनःप्रपंचस्तद्व्यतिरेकेणनास्ति ।। तत्रहेतुस्तत्त्वमित्यर्थः हियस्मादेनंसर्वविश्वंब्रह्मसत्यादिप्रमाणप्रसिद्धं ।। तद्धिस्वयमेवभवा

नचतवाचार्यपेक्षाईश्वरावतारत्वादित्याहत्वमितिद्दे अमोघदृक् ॥ त्वमात्मनात्मानमजमेवसृतंजगतःशिवायप्रजातमेवेदि
क्षतःपरस्यपुंसःकलांशभूतं ॥ तत्रस्मात्महानुभावस्यहरेरभ्युदयःपराक्रमः अधिअधिकंगण्यतांनिरूपितां ॥ २१ ॥ अनेनैवतपश्चा
दिसर्वंतवसफलंस्यादित्याह ॥ इदंहीति ॥ पुंसस्तपसोभावेनिष्ठा ॥ इदमेवहितपःश्रवणादेरविस्मृतोनित्योर्थःफलं ॥ किंतत ॥ उत्तमश्लोकस्यगुण
नुवर्णनमितियत ॥ २२ ॥ स्वस्यगतोहरिकथाश्रवणादिफलत्वंदर्शयंस्तेनप्रपंचयति ॥ अहंपुरापूर्वकल्पेअतीतभवेपूर्वजन्मनिवेदवादिनांदा

त्वमात्मनात्मानमवेह्यमोघदृक्परस्यपुंसःपरमात्मनःकलां ॥ अजंप्रजातंजगतःशिवायतन्महानुभावाभ्युदयोधिग
ण्यतां ॥ २१ ॥ इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः ॥ अविच्युतोर्थःकविभिर्निरूपितोयदुत्तमश्लो
कगुणानुवर्णनं ॥ २२ ॥ अहंपुरातीतभवेभवंमुनेदास्यास्तुकस्याश्चनवेदवादिनां ॥ निरूपितोबालकएवयोगिनां
शुश्रूषणेप्रावृषिनिर्विविक्षतां ॥ २३ ॥ तेमय्यपेताखिलचापलेर्भकेदांतेधृतक्रीडनकेनुवर्तिनि ॥ चक्रुःकृपांयद्यपि
तुल्यदर्शनाःशुश्रूषमाणेमुनयोल्पभाषिणि ॥ २४ ॥ उच्छिष्टलेपाननुमोदितोद्विजैःसकृत्स्मभुंजेतदपास्तकिल्बिषः
॥ एवंप्रवृत्तस्यविशुद्धचेतसस्तद्धर्मएवात्मरुचिःप्रजायते ॥ २५ ॥

स्याःसकाशादहंजातोस्मि निरूपितःनिरूपितःनियुक्तःकयोगि ॥
नांशुश्रूषणे ॥ प्रावृषिवर्षोपलक्षितेचातुर्मास्येनिर्विविक्षतांनिर्वेशएकत्रवासंकर्तुमिच्छतां ॥ २३ ॥ अपेतान्यखिलानिचापलानियस्मात्त
स्मिन्निष्पतेंद्रिये ॥ अधृतं ॥ क्रीडनकं ॥ यस्यक्रीडासाधनेअनुवर्तिनिअनुकूले ॥ २४ ॥ उच्छिष्टस्यलेपान्पात्रलग्नान्तैर्द्विजैरनुज्ञातःसकृद्भुंजे
स्म ॥ तेनभोजनेनापास्तकिल्बिषोजातोस्मि ॥ तेषांधर्मेपरमेश्वरभजनेएवात्मनोमनसोरुचिःप्रजायते तेस्मिन्ननुभगः ॥ २५ ॥

भा०प्र
१७

अशृणवं श्रुतवानस्मि । मे श्रद्धया ममैवावहितः सिद्धया न त्वन्येन बलाज्जनितया । अतो मम मत्प्रसादो न तत्कृपा ॥२६॥ प्रियं श्रवो यशो यस्य
तस्मिन्भगवति लब्धरुचेर्ममास्खलिताऽप्रतिहता मतिरभवदित्यनुषङ्गः । यया मत्या परे ब्रह्मस्वरूपे मयि सदसत्स्थूलसू
क्ष्मं चेतच्छरीरं मायया अविद्यया कल्पितं न तु वस्तुतोऽस्तीति तत्त्वतः पश्यामीति ॥२७॥ एवं शुद्धत्वंपदार्थे ज्ञाते देहादिकतावि क्षेप

तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः । ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यङ्ग ममाभव
द्रुचिः ॥२६॥ तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम । ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्म
णि कल्पितं परे ॥२७॥ इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलं । सङ्कीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः
प्रवृत्तात्मरजस्तमोपहा ॥२८॥ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः । श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च ॥२९॥
ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं । अन्ववोचन्गमिष्यन्तः कृपया दीनवत्सलाः ॥३०॥ येनैवाहं भगवतो वासुदेवस्य

निवृत्तेः तत्कारणभूतरजस्तमोनिवर्त्तिका दृढा भक्तिर्जातेत्याह । इत्थमिति । हरेर्य । वेधसः मायानुभावमविदं येन गच्छन्ति तत्पदं ॥३१॥
शः अनुसवं त्रिकालं ॥२८॥ तस्येति शुद्धत्वंपदार्थस्य दृढभक्तिमतो मे प्रश्रितस्य विनीतस्य ॥२९॥ गुह्यतममिति । साधनभूतधर्मतत्त्वज्ञानं
गुह्यं । तस्माद्याविविक्तात्मज्ञानं गुह्यतरं । तस्मादपि ब्रह्मज्ञानं गुह्यतमं भगवतोदितं भागवतशास्त्रमन्ववोचन्नुपदिष्टवन्तः ॥३०॥ तदे
वज्ञानमपूर्वोक्तंत्वंपदार्थज्ञानाद्विवेकेन दर्शयति येनैवेति । अविदं ज्ञातवानहं ॥३१॥

पप
१७

तत्साधनधर्मो रहस्यं च सहानुभवितमित्याह एतदिति । तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्त्तकं सत्वशोधकमिति यावत् वितत । भगवति
भावितं समर्पितं यत्कर्म तत् किंभूते भगवतीश्वरे । सर्वनियंतरि । एवमपि विब्रह्मणि । ब्रह्मच्युतस्वरूपे ॥ ३२ ॥ ननु संसारहेतोः कर्मणः कथं ता
पत्रयनिवर्त्तकत्वं सामग्रीभेदे न द्वारतरंतरगतिरिति दृष्टांतमाह द्वाभ्यां । यश्चामयो रोगः येन धृतादिना जायते तदेव केवलमामयकारणं भूतं द्रव्यं त
मामयं न पुनाति न निवर्त्तयतीत्यर्थः । किं तु चिकित्सितं द्रव्यांतरैर्भावितं सत् पुनात्येव यथा ॥ ३३ ॥ आत्मविनाशाय कर्मनिवृत्तये । कल्पंते सम
र्था भवंति । परे ईश्वरे कल्पिताः अर्पिताः संतः अत्र च प्रथमं महत्सेवा ततस्तद्दया । ततस्तद्धर्मश्रद्धा । ततो भगवत्कथाश्रवणं ततो भगव

एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितं । यदीश्वरे भगवति कर्म ब्रह्मणि भावितं ॥ ३२ ॥ आमयो यश्च भूतानां जायते येन सुव्र
त । तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितं ॥ ३३ ॥ एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवात्मविनाशाय कल्प
ंते कल्पिताः परे ॥ ३४ ॥ यदत्र क्रियते कर्म भगवत्परितोषणं । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितं ॥ ३५ ॥ कुर्वाणा य
त्र कर्माणि भगवच्छिक्षयासकृत । गृणंति गुणनामानि कृष्णस्यानुस्मरंति च ॥ ३६ ॥

तिरतिः । तथा च देहद्वयविवेकात्मज्ञानं ततो दृढा भक्तिः ततो भगवत्तत्वज्ञानं । ततस्तत्कृपया सर्वज्ञत्वादि भगवद्गुणाविर्भाव इति क्रमो दर्शि
तः ॥ ३४ ॥ ननु च ज्ञानेनाज्ञाननाशात्कर्मनाशात् ज्ञानं भक्तियोगाद्भवति । कथं कर्मणा कर्मनाशः स्यादित्यत आह । यदत्रेति ॥ ३५ ॥ भगवदर्पणेन क्रि
यमाणं कर्म भक्तियोगं जनयतीति सदाचारेणाद्रढयति । यत्रेति यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणा भवंति । तदा श्रीकृष्णस्य गुणानामानि गृ
णंति । अनुस्मरंति च कृष्णमित्यर्थः । इयं भगवच्छिक्षा । यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति ॥ ३६ ॥

भा॰ ष
१०

कीर्त्तनस्मरणादिरूपभक्तिहेतुत्वमुक्तं ॥ ज्ञानहेतुत्वमाह द्वाभ्यां ॥ नम इति नमो धीमहि मननं ध्यानं मननं वा धीमहि ॥३॥ अमूर्त्तिकं मंत्रो व्यक्ता ति
रिक्तमूर्त्तिममूर्त्तिं ॥ यजते पूजयति ॥ स एव मानुषः सम्यग्दर्शनो भवति ॥२८॥ एवं चैकत्रवतिमयि हरिः स्वदर्शनं ज्ञानादि विंदन्स्त्वरो नित्याह ॥ इमं स्व
निगमं वेदोपदेशं मयानुष्ठितं श्रुवेत्यत्त्यात्मा भावं श्रीतिं च ॥२९॥ अन्तत्वमप्येवं ज्ञाविंत्याह त्वमिति ॥ अदभ्रमनल्पश्रुतं पश्येद्देवश्रुत्युत ॥
विभोर्विस्मृतपरः प्राप्याख्याहि कथय ॥ येन विस्मृतेन ज्ञानेन विदां विदुषां बुभुत्सितं बोद्धुमिच्छा समाप्यते ॥ यतो दुःखैः पीडितानामसक्ते
नमो भगवते तुभ्यं वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥३७॥ इति मूर्त्त्यभिधानेन मंत्रमूर्त्ति
ममूर्त्तिकं ॥ यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥३८॥ इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितं ॥ अदान्मे ज्ञानमैश्वर्यं स्वस्मि
न्भावं च केशवः ॥३९॥ त्वमप्यदभ्रश्रुतविश्रुतं विभोः ॥ समाप्यते येन विदां बुभुत्सितं ॥ आख्याहि दुःखैर्मुहुर
र्दितात्मनां संक्लेशनिर्वाणमुशन्ति नान्यथा ॥४०॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे व्यासनारदसंवादे पंचमोऽध्या
यः ॥ ५ ॥ सूत उवाच ॥ एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च ॥ भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः ॥१॥ व्यास उवाच ॥
भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव ॥ वर्त्तमानो वयस्याद्ये ततः किमकरोद्भवान् ॥२॥ स्वायंभुव कया वृत्त्या वर्त्तितं ते परं

राशांतिप्रकाणं तेरणानमन्यंते ॥४०॥ इति षष्ठे पंचमः ॥ व्यासस्य प्रत्ययार्थं वषष्ठे प्राग्जन्मसंभवं ॥ वयः ॥ कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरं
त्वं भागपनारदः प्राह कल्पसंकथनोद्भव ॥१॥ वयः प्रविनष्टा विविकीर्षर्ग्रहपदेशानंतरं भाविनश्चरितं पृच्छति ॥ भिक्षुभिरिति ॥ विप्रवसिते हरदेश
गमने कृते सति विज्ञानस्यादेष्टृभिः ॥२॥ परं वयः उत्तरमायुः ते त्वया वर्त्तितं नीतं ॥ इदमिति राशीप्रपत्रभूतं ॥ कलेवरं उदस्राक्षी उत्सृष्टवानसि ॥

एम
१०

एष कल्पांतलक्षणः कालः ते स्मृतिं कथं न व्यवधात् न खंडितवान् ॥ अडागमाभावस्त्वार्षः हि यतः एष सर्वस्य निराकृतिरूपं लोपो यस्मा
त्सः ॥ ४ ॥ अकारषं कृतवान् अहं रेफषकारयोर्विश्लेषश्छंदोनुरोधेन ॥ ५ ॥ न च तावत्कंचित्कालं तत्रैव मातस्नेहयंत्रितोन्यवसमित्याह द्वि
भिः ॥ एक एवाहमात्मजो यस्याः सा ॥ योषिदिति मूढेति च स्नेहानुबंधहेतुः ॥ ६ ॥ किंकरीत्यस्यार्थं प्रपंचयति ॥ अस्वतंत्रा सास्वतंत्रा न कल्पा न स
मर्था आसीत् ॥ दारुमयी योषित्पुत्तलिका पारवश्ये दृष्टांतः ॥ ७ ॥ तदेवं मातृस्नेहं वर्त्ये अहं चरिगादिघ्न पित्तो अत्र तत्रैव न्यवसमित्याह ॥ अहं च त

प्राक्कल्पविषयामेतां स्मृतिं ते हरसत्तम ॥ न त्येष व्यवधात्काल एष सर्वनिराकृतिः ॥ ४ ॥ नारद उवाच ॥ भिक्षुभिर्विप्रवसि
ते विज्ञानादेष्टृभिर्मम ॥ वर्त्तमानो वयस्याद्ये तत एतदकारषं ॥ ५ ॥ एकात्मजा मे जननी योषिन्मूढा च किंकरी ॥ मय्यात्म
जेऽनन्यगतौ चक्रे स्नेहानुबंधनं ॥ ६ ॥ सास्वतंत्रा न कल्पासीद्योगक्षेमं ममेच्छती ॥ ईशस्य हि वशे लोको योषा दारुमयी
यथा ॥ ७ ॥ अहं च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया ॥ दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ॥ ८ ॥ एकदा निर्गतां गेहात्
दुहंतीं निशि गां पथि ॥ सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः ॥ ९ ॥ तदा तदहमीशस्य भक्तानां शमभीप्सतः ॥ अनुग्रहं

स्मिन्ब्रह्मकुले तस्यमातृस्नेहानुबंधस्य अपेक्षया कदाचिदिमे रितिष्यतीत्यपेक्षयेत्यर्थः ॥ ऊषिवान् वासं कृतवान् मन्यमानः प्रातिष्ठं दिशमुत्तरां ॥ १० ॥
न ॥ पंचहायनः पंचवर्षः ॥ ८ ॥ गेहान्निर्गतां तां दुहंतीं हेतौ शतृप्रत्ययः दोग्धुं निर्गतामित्यर्थः ॥ पदा पादेनाक्रांतः स्पृष्टः ॥ अदशदाक्रांतः ॥ अहं तस्य
स्वादृत ॥ ९ ॥ तत मातुर्मरणात् शं कल्याणमभीप्सतः ईशस्यानुग्रहं मन्यमानः प्रातिष्ठमगच्छं तोस्मि ॥ १० ॥

भा.स्व.
३१

स्फीतान्जनपदानिति ॥ यातः सन् अहं हद्विपिनमद्राक्षमिति वक्ष्यमाणेनान्वयः ॥ जनपदादिषु नानागुणदोषयुक्तेषु समदृष्टिः सन् गतोऽहमिति तात्पर्यार्थः ॥ स्फीतान् समृद्धान् ॥ जनपदान् देशान् ॥ तत्र तस्यां दिशि ॥ ग्रामपत्तनाकरान् ॥ तत्र पत्तनं राजधानी ॥ ग्रामाः प्रसिद्धाः ॥ विप्राश्च विप्रभृत्याश्च यत्र चैव वसंति ते स तु ग्राम इति प्रोक्तः शूद्राणां वास एव वेति ॥ व्रजा गोकुलानि ॥ आकरा रत्नाद्युत्पत्तिस्थानानि तान् ॥ खेटाः कर्षकग्रामाः खर्वटा गिरितटग्रामाः प्रसिद्धा वा ॥ एकतो यत्र ग्रामो नगरं चैकतः स्थितं ॥ मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयमिति वा ॥ वाटीः पूगपुष्पवाटीर्नारिकेलादिकास्ताः ॥ वनानि स्वतः सिद्धवृक्षाणां समूहाः ॥ उपवनानि रोपितवृक्षाणां समूहास्तानि च ॥११॥ विचित्रधातुभिः स्वर्ण-

स्फीतान्जनपदांस्तत्र ग्रामपत्तनाकरान् ॥ खेटखर्वटवाटीश्च वनान्युपवनानि च ॥११॥ विचित्रधातुविचित्राद्रीनिभभ-
ग्नभुजद्रुमान् ॥ जलाशयांश्छिवजलान्नलिनीः सरसेविताः ॥१२॥ विचित्रस्वनैः पत्ररथैः बिभ्रमद्भ्रमरश्रियः ॥ नलवेणु-
शरस्तम्बकुशकीचकगह्वरे ॥१३॥ एक एवातियातोऽहमद्राक्षं विपिनं महत् ॥ घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं ॥१४॥

रजताद्यैः विचित्रानद्रींश्च ॥ इभैर्भग्ना भुजाः शाखा येषां ते द्रुमा येषु तान् ॥ शिवानि भद्राणि जलानि येषां तान् ॥ नलिनीः सरसीः ॥१२॥ विचित्राः स्वनाः येषां तैः ॥ पत्ररथैः पक्षिभिः तत्रादरप्रवृत्तैरित्यर्थः ॥ विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः नलिनीः ॥ अतियातः अतिक्रम्य यातः सन् अहं हद्विपिनमद्राक्षं कीदृशं नलवेणुशराणां स्तम्बैः कुशैः कीचकैश्च गह्वरं दुर्गमं ॥ तत्र वेणुजातय एव विपुलांतरालगर्भाः कीचकाः ॥१३॥ घोरं दुःसहं ॥ प्रतिभयाकारं भयंकररूपं ॥ व्यालादीनामजिरं क्रीडास्थानं ॥१४॥

परिश्रांतानीन्द्रियाणि आत्मा देहश्च यस्य तृषा परीतो व्याप्तः उपस्पृष्टः आचान्तः ॥१५॥ पिप्पलोपस्थे अश्वत्थमूले आश्रितः उपविश्य आत्म
नाबुद्ध्या । आत्मस्थं हृदिस्थं । आत्मानं परमात्मानं ॥१६॥ भावेन भक्त्या निर्जितं वशीकृतं चेतो येन तेन । औत्कंठ्येन अश्रुकलाभ्यां व्याप्ते अक्षिणी
यस्य ॥१७॥ प्रेम्णामतिभरेण निर्भिन्नानि पुलकितान्यंगानि यस्य । आनंदस्य संप्लवे महापूरे परमानंदे । उभयं आत्मानं परं च ॥१८॥ मनसः कांतम
भीष्टं शुचा शोकः तामपहंतीति तथा तेन । उत्तस्थे उत्थितोस्मि ॥१९॥ हृदि मनः प्रणिधाय स्थिरीकृत्य अवितृप्तो हमात्र रइवो भवामि

परिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः ॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥१५॥ तस्मिन्निर्मनुजेरण्ये पिप्पलोप
स्थ आश्रितः ॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयं ॥१६॥ ध्यायतश्चरणांभोजं भावनिर्जितचेतसा ॥ औत्कंठ्याश्रु
कलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥१७॥ प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः ॥ आनंदसंप्लवे लीनो नापश्यमुभयं मुने
॥१८॥ रूपं भगवतो यत्तन्मनःकांतं शुचापहं ॥ अपश्यन्सहसोत्तस्थे वैक्लव्याद्दुर्मना इव ॥१९॥ दिदृक्षुस्तदहं भूयः प्रणिधा
य मनो हृदि ॥ वीक्षमाणोपि नापश्यमवितृप्त इवातुरः ॥२०॥ एवं यतंतं विजने मामाहागोचरो गिरां ॥ गंभीरश्लक्ष्णया वाचा शु
चः प्रशमयन्निव ॥२१॥ हंतास्मिन्जन्मनि भवान्मा मां द्रष्टुमिहार्हति ॥ अविपक्वकषायाणां दुर्दर्शोहं कुयोगिनां ॥२२॥ सकृद्यद्

निरोधः ॥२०॥ गिरामगोचरः सर्वेश्वरः शब्दाविषयभूत ईश्वरः ॥ दर्शितं रूपमेतत्कामाय तेनघ ॥ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान्
हंतेति खेदे उक्तं प्रबोधने ॥ मा इति मां द्रष्टुं नार्हसि ॥ यतः न विपक्वाः दग्धाः कषायाः मलाः कामादयो येषां तेषां कुयोगिनां अनिष्पन्नयोगानां
॥२२॥ तर्हि किं दर्शितं तत्राह ॥ सकृद्दर्शितं मयेति यत् एतत्कामाय मय्युत्पन्नाय ॥ त्वत्कामेन किमित्यत आह ॥ मत्कामः उभान्हृच्छयान्कामान्

भा॰ष
१२

अदीर्घयापि सतां सेवया ॥ अवद्यं निंद्यं ॥ लोकदेहं मज्जनतां मत्पार्षदतां गतासि ॥ १४ ॥ प्रजानां सर्गे सृष्टौ निरोधे संहारेपि ॥ प्रजासर्गस्य निरोध
इति वा ॥ १५ ॥ तस्मात्सिद्धं महद्भुतं ॥ अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदोऽयादि श्रुतेः कीदृशं अस्वरं सर्वनियंतृ न भवति लिंगमूर्तिर्यस्य
तत्र भो लिंगा ॥ सन्निहितमपि न तल्लिंग्यत इति अलिंगं ॥ तस्मै अदृष्टायावनामं प्रणामं विदधे ॥ कृतवानहं ॥ तेनानुकंपितः सन् ॥ १६ ॥
स्तत्रपः त्यक्तलज्जः विमत्सरो जातोस्मीति शेषः ॥ १७ ॥ कालेद्वावसरे ॥ कालो मृत्युः प्रादुरभूदाविर्बभूव ॥ अकस्मात्प्रादुर्भावे दृष्टांतः

सत्सेवयाऽदीर्घयापि जाता मयि दृढा मतिः ॥ हित्वाऽवद्यमिमं लोकं गंता मज्जनतामसि ॥ १४ ॥ मतिर्मयि निबद्धेयं न विप
द्येत कर्हिचित ॥ प्रजासर्गनिरोधेपि स्मृतिश्च मदनुग्रहात् ॥ १५ ॥ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिंगमलिंगमी
श्वरं ॥ अहं च तस्मै महतां महीयसे शीर्ष्णावनामं विदधेनुकंपितः ॥ १६ ॥ नामान्यनंतस्य हतत्रपः पठन् गुह्यानि भद्रा
णि कृतानि च स्मरन् ॥ गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः ॥ १७ ॥ एवं कृष्णमतेर्ब्रह्मन्नसक्त
स्यामलात्मनः ॥ कालः प्रादुरभूत्काले विद्युत्सौदामिनी यथा ॥ १८ ॥

विद्युदिवेति ॥ सौदामिनीति विशेषणं स्फुरत्वप्रदर्शनार्थं ॥ सुदामा माला तत्र भवा सौदामिनी ॥ मालाकारेत्यर्थः ॥ यद्वा सुदामा पर्वतः ॥ तेन ने
कारितिमुत्रेण ॥ स्फटिकादिमयपर्वतप्रांते भवा हि विद्युदतिस्फुरा भवति तद्वदित्यर्थः ॥ यद्वा तडिदंतिकमित्यर्थः ॥ तडिदित्यंतिकवं
धयोरिति नैरुक्तस्मरणात ॥ १८ ॥ गोपालकृष्णसहाय ॥ एमचंद्रायनमः ॥ एम

एम
१२

प्रयुज्यमाने मयि तामित्यस्यायमर्थः हित्वावद्यमिमं लोकं गंता मज्जनतामसीति या भागवती भगवत्पार्षदरूपा शुद्धा तनुर्मयि तत्वेन प्रतिश्रुता तां
प्रति भगवता मयि प्रयुज्यमाने नीयमाने आरब्धं यत्कर्म तत्त्रिर्वाणं समाप्तं यस्य ॥ आरब्धकर्मणो निर्वाणमेव वा निर्वाणाय स्यादिति वा ॥ सपंचभूता
त्मको देहो न्यपतत् अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं नित्यत्वमित्यादि सूचितं भवति ॥२८॥ इदं त्रैलोक्यमादाय उपसंहृत्य उदन्वतः
कारणविस्तारेऽम्भसि शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोः विभोः ब्रह्मणोऽन्तः मध्ये अनुप्राणं निःश्वासेन सह विविशे प्रवि
ष्टोऽहं ॥ ततोऽवतीर्य विश्वात्मा देहमाविश्य वज्रिणः अवापवैस्वतीं निद्रामेकीभूयाथ विष्णुनेति कौर्मोक्तेः स्वापनेऽम्भसीति पाठे स्वापनेऽ

प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुं ॥ आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः ॥२९॥ कल्पांत इदमादाय शयानेऽम्भस्युद
न्वतः ॥ शिशयिषोरनुप्राणं विविशेंतरहं विभोः ॥३०॥ सहस्रयुगपर्यंत उत्थायेदं सिसृक्षतः ॥ मरीचिमिश्रा ऋषयः प्राणे
भ्योऽहं च जज्ञिरे ॥३१॥ अंतर्बहिश्च लोकांस्त्रीन्पर्येम्यस्कंदितव्रतः ॥ अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ॥३२॥
देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां ॥ मूर्छयित्वा हरिकथां गायमानश्चराम्यहं ॥३३॥

स्वापनेऽम्भसि शिशयिषोर्ब्रह्मणः इति श्रीनारायणेनाभेदविवक्षयोक्तमिति गमयितव्यं ॥३०॥ प्राणेभ्य इंद्रियेभ्यः अहं मरीचिमिश्राः तन्मुख्याः
ऋषयश्च जज्ञिरे ॥३१॥ ये कर्मिणस्ते बहिर्न यांति न च ऋषयो मरीचिमिर्ब्रह्मलोकं गतास्तेंऽतर्न यांति ॥ अहं तु महाविष्णोरनुग्रहात् अस्खलितब्रह्मचर्यव्रतः
सन् अंतर्बहिश्च पर्येमि पर्यटामि ॥ क्वचिदप्यविघाताऽप्रतिहता गतिर्यस्य सः ॥३२॥ किमिति पर्यटसि इत्यत आह हरिकथाया लोकमंगलार्थमित्याह चतुर्भिः देवे
वेनेश्वरेण दत्ता ॥ स्वराः निषादर्षभगांधारषड्जमध्यमधैवतपंचमाः इति सप्त त एव ब्रह्म स्वब्रह्माभिव्यंजकत्वात् तेन विभूषितां ॥ स्वतः सिद्धसप्तस्व

भा०प्र
१३

स्वप्रयोजनमाह प्रगायत इति ॥३४॥ परप्रयोजनमाह एतद्धीति । मात्रा विषयास्तेषां स्पर्शाः भोगास्तेषामिच्छयातुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनं प्लवः । एतदेव भवसिंधोः प्लवः पोतः । न केवलं श्रुतिप्रमाणेन । किं त्वनुभवसिद्धमित्याह दृष्ट एवेत्यर्थः ॥३५॥ एतदेवेत्युक्तमवधारणमनुभवेन द्रढयति यमादिभिरित्यात्मा न शाम्यति । यद्वन्मुकुंदसेवया अद्धा साक्षादात्मा मनः शाम्यति । कथंचिन्मुकुंदसे

प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः । आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥३४॥ एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः ॥ भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं ॥३५॥ यमादिभिर्योगपथैः कामलोभहतो मुहुः । मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ॥३६॥ सर्वं तदिदमाख्यातं यत्पृष्टोहं त्वयानघ ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ॥३७॥ सूत उवाच ॥ एवं संभाष्य भगवान्नारदो वासवीसुतं ॥ आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ॥३८॥ अहो देवर्षिर्धन्योयं यत्कीर्त्तिं शार्ङ्गधन्वनः ॥ गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ॥३९॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे व्यासनारदसंवादे षष्ठोध्यायः ॥ शौनक उवाच ॥ निर्गते नारदे सूत भगवान्बादरायणः ॥ श्रुतवांस्तदभिप्रेत

वामात्रेण शाम्यति ॥ किं पुनस्तद्गुणवर्णनेनेति भावः ॥३६॥ भवतो मनःपरितोषकं चाख्यातं ॥३७॥ आमंत्र्य । ततः किमकरोद्विभुः ॥१॥ अनुज्ञाप्य यादृच्छिकः स्वप्रयोजनसंकल्पशून्यः ॥३८॥ हरिकथागायकं मां प्रश्लाघते अहो इति ॥ माद्यन् हृष्यन् ॥ तंत्र्या वीणया ॥३९॥ इति प्रथमे षष्ठः ॥ अथ भागवतश्रोतृजन्म वक्तुं परीक्षितः ॥ द्रौणिबालवधाद्द्रौणेर्दंडः सप्तम उच्यते ॥१॥ तस्मिन्नारदस्याभिप्रेतं श्रुतवान्सन् ॥१॥

राम
१३

६४

ब्रह्मनद्यां ब्रह्मदैवत्यायां ब्राह्मणैराश्रितायां वा। सत्रं कर्म वर्द्धयतीति तथा॥२॥ बदरीणां षण्डेन समूहेन मंडिते मनः प्रणिदध्यौ स्थिरीचकार। समाधिना उत्तमस्मरत्तद्विचेष्टितमिति नारदोपदिष्टं ध्यानं कृतवानित्यर्थः॥३॥ प्रणिहिते निश्चले। अत्र हेतुः भक्तियोगेनामले पूर्वं प्रथमं पुरुषमीश्वरं अपश्यत्। पूर्णमिति वा पाठः तदपाश्रयां स्वरूपाश्रयां तदधीनां मायां चापश्यत्॥४॥ ईशमायाकृतां च जीवानां संसृतिमपश्यदित्याह॥ ययासंमोहितः स्वरूपावरणेन विक्षिप्तः परोपि गुणत्रयाद्व्यतिरिक्तोपि तत्कृतं गुणत्रयाभिमानकृतमनर्थं च कर्तृत्वादिकं प्राप्नोति॥५॥ अनर्थोपशममुपशमयतीति योऽधोक्षजे साक्षाद्भक्तियोगः तं चापश्यत्। एतत्सर्वं स्वयं दृष्ट्वा एवमजानतो लोकस्यार्थे सात्वतसंहितां

स॥उ॥च॥ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे। शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्द्धनः॥२॥ तस्मिन्स्व आश्रमे व्यासो बदरीखंडमंडिते। आसीनोप उपस्पृश्य प्रणिदध्यौ मनः स्वयं॥३॥ भक्तियोगेन मनसि सम्यक्प्रणिहितेमले। अपश्यत्पुरुषं पूर्वं मायां च तदपाश्रयां॥४॥ यया संमोहितो जीव आत्मानं त्रिगुणात्मकं। परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते॥५॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे। लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां॥६॥

श्रीभागवताख्यां चक्रे। तदनेन श्लोकत्रयेण भागवतार्थः संक्षेपतो दर्शितः। एतदुक्तं भवति। विद्याशक्त्या मायया नियंता नित्याविर्भूतपरमानंदस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः तन्मायया संमोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्मा जीवः तस्य चेश्वरभक्त्या लब्धज्ञानेन मोक्ष इति। तदुक्तं विष्णुस्वामिना। ह्लादिन्या संविदाश्लिष्टः सच्चिदानंद ईश्वरः। स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः। तथा स ईशो यद्वशे माया स जीवो यस्तयार्दितः। स्वाविर्भूतपरानंदः स्वाविर्भूतसुदुःखभूः। स्वादृगुत्थविपर्यासभवभेदजभीशुचः। यन्मायया जुषन्नास्ते तमिमं नृहरिं नुमः इत्यादि॥६॥

भा०प्र
१४

संहितायामनर्थोपशमकत्वं दर्शयति यस्यामिति यस्यां श्रूयमाणायामेव किं पुनः श्रुतायामित्यर्थः ॥७॥ अनुक्रम्य शोधयित्वा ॥८॥ कस्य वा हेतोर्बृहतीं विततां ॥९॥ निर्ग्रंथाः ग्रंथेभ्यो निर्गताः ननूक्तं गीतासु यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति यद्वा निरन्नः क्रोधाहंकाररूपो ग्रंथिर्येषां ते ग्रंथिरेव ग्रंथः निर्गतहृदयग्रंथय इत्यर्थः ननु मुक्तानां किं भक्त्येत्याशंक्य सर्वाक्षेपपरिहारार्थमाह इत्थंभूतगुण इति ॥१०॥ भक्तिं कुर्वंतु नाम एतच्छास्त्राभ्यासे तु कस्य किं कारणमित्यत आह हरेरिति अध्यगात् अधीतवान् ॥

यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥७॥ स संहितां भागवतीं कृत्वा अनुक्रम्य चात्मजं शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥ शौनक उवाच ॥ स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ॥९॥ सूत उवाच ॥ आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥१०॥ हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥११॥ परीक्षितोथ राजर्षेर्जन्मकर्मविलापनं संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥१२॥

विष्णुजनाः प्रियाः यस्येति व्याख्यानादिप्रसंगेन तत्संगातिकाम इति भावः ॥ एतेन तस्य प्रश्नो महायोगीत्यादिना शुकस्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तं ॥११॥ यदन्यत्पृष्टं परीक्षितः प्रायोपवेशनेन श्रवणं कथमिति तस्य जन्म महत्कर्म यमित्यादिना तस्योत्तरं वक्तुमाह परीक्षित इति विलापनं मुक्तिं मृत्युं वा संस्थां महाप्रस्थानं श्रीकृष्णकथानामुदयो यस्यां भवति तथा ॥१२॥

राम
१४

तत्र परीक्षितो जन्म निरूपयिष्यन्नादौ तावद्गर्भस्थ एवास्य ब्रह्मास्त्रात् कृष्णेन रक्षित इति वक्तुं कथां प्रस्तौति ॥ यदा द्रौणिरि-
त्यश्वत्थामा कृष्णासुतानां द्रौपदीपुत्राणां शिरांसि उपाहरत ॥ तदा तन्माता अरुदत ॥ तां च सान्त्वयन् किरीटमाली अर्जुन आहेति तृ-
तीयेनान्वयः किमिति बालानां शिरांस्यानीतवानित्यपेक्षायामाह ॥ मृधे युद्धे यद्यपि पांडवा अपि कौरवा एव ॥ तथापि विहस्तं जयपदं राजो-
धृष्टद्युम्नः पांडवानां सेनापतिरिति सृञ्जयानामित्युक्तं ॥ वीरगतिं स्वर्गं ॥ अथानन्तरं ॥ वृकोदरेणाविद्धा या गदा तस्या अभि-
मर्शेन घातेन भग्न ऊरुदंडो यस्य तथाभूते धृतराष्ट्रपुत्रे दुर्योधने पतिते ॥ १२ ॥ भर्तुर्दुर्योधनस्य प्रियमिति वितर्क्य ॥ इति एवं प्रियं स्यादिति

यदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु । वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे ॥ १३ ॥ भर्तुः
प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि ॥ उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति
॥ १४ ॥ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना ॥ तदारुदद्बाष्पकलाकुलाक्षी तां सान्त्वय-
न्नाह किरीटमाली ॥ १५ ॥ तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबन्धोः शिर आततायिनः ॥ गांडीवमुक्तैर्विशिखैरुपाहरे त्वा-

पश्यन् ॥ तस्य तु हि विप्रियमेवेति वाक्यान्तरं विप्रियत्वे हेतुः जुगुप्सितमिति ॥ १४ ॥ घोरं दुःसहं यथा भवति तथा क्रम्य पतन्नास्य विदीर्ण पुत्रा ॥ १६ ॥
तथा ॥ बाष्पस्य कलाभिर्बिन्दुभिराकुले अक्षिणी यस्याः सा ॥ किरीटस्यैकत्वेन रत्नानामावृत्त्वात् किरीटमालीत्युक्तः ॥ १५ ॥ शुचः शोका-
श्रूणि प्रमार्जयामि ॥ परिमार्जयामि ॥ यत यदा ब्रह्मबन्धोर्ब्राह्मणाधमस्याततायिन इति ॥ अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहर-
श्चैव षडेते ह्याततायिन इति स्मरणात् ॥ आततायी शीघ्रपातिः ॥ तेन वधार्हत्वं लक्ष्यते ॥ गांडीवधनुषो मुक्तैर्विशिखैरुपाहरे त्वाक्रम्य

भा॰प्र॰
१५

वलाकोत्थाविविचित्राजल्पाः भाषणानि तैः ॥ सुश्रुतर्जनः श्रुत एव मित्रं सूतस्त्वयस्य ॥ दंशितः वद्धकवचः उग्रधन्वा आपयस्य ॥ कपिहनु
मानध्वजे यस्य सः गुरोः पुत्रं रथेन अन्वाद्रवत अनुधावत ॥१७ आपतंतं आधावंतं ॥ सद्रौणिः कुमारहा ॥ बालघाती ॥ उद्विग्नमनाः कं
पितहृदयः प्राणपरीप्सुः प्राणान् लब्धुमिच्छुः ॥ ततः कीर्तिं यावद्गमं यावद्गन्तुं शक्यं तावत् उर्व्यां पराद्रवत् पलायत यतः कः अहं अभ्युद्गो
त्वा हन्ता यद्भुप्यतः स्यन्दनं रुद्रस्य भयाद्यथा पलायते स्म ॥ अर्क इति पाठे वामनपुराणे कथा सूचिता ॥ तथाहि ॥ विद्युन्मालीना

इति प्रियां वल्गुविचित्रजल्पैः स सांत्वयित्वाच्युतमित्रसूतः ॥ अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन ॥१७॥
तमापतंतं स विलक्ष्य दूरात्कुमारहोद्विग्नमना रथेन ॥ पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्कः ॥१८॥
यदाशरणमात्मानमैक्षत श्रांतवाजिनं ॥ अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥१९॥ अथोपस्पृश्य सलिलं
संदधे तत्समाहितः ॥ अजानन्नुपसंहारं प्राणकृच्छ्र उपस्थिते ॥२०॥ ततः प्रादुःकृतं तेजः प्रचंडं सर्वतो दिशं ॥ प्राणा
पदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥२१॥

मकच्छिद्रात्मजो माहेश्वरः तस्मै रुद्रेण सौवर्णं विमानं दत्तं ततोऽसावर्कस्य पृष्ठतो
भ्राम्यन् विमानाद्रीप्त्या रात्रिं विलोपितवान् ततोऽर्केण निजतेजोभिर्द्रावयित्वा तद्विमानं पातितं तत् क्रुद्धो कुपितेन रुद्रेण भयादर्कः पर्यद्रवत्
ततो रुद्रक्रूरदृष्ट्या दह्यमानः पतन् वाराणस्यां पुनस्तोलोलार्क नाम्ना विख्यात इति ॥ अशरणं रक्षकरहितं ॥ तत्र पलायनमेव रक्षकमस्ति
न तस्यापि कुंठितत्वात् इत्याह ॥ श्रांतवाजिनमायस्तं ॥ ब्रह्मशिरो ब्रह्मास्त्रं ॥ द्विजात्मजः स्वरक्षकं शितमाह ॥ तद्दस्त्रं समाहितः कृत एम
न तस्यापि कुंठितत्वात् इत्याह ॥ ... ध्यानः उपसंहारमजानतो विसंधाने हेतुः प्राणकृच्छ्र इति ॥२०॥ ततः अस्त्रात्सर्वतो दिशं प्रादुःकृतं प्रकटीभूतं तेजो विवीक्ष्य ततः प्राणा

वै

प्रकृतंविज्ञापयिष्यन्प्रथमंस्तौति कृष्णेतिचतुर्भिः संसृतेर्हेतोर्दह्यमानानांतस्याअपवर्गोऽपवर्जयितानाशक इत्यर्थः २२ यतस्त्व
मीश्वरःसाक्षात् अतः यतः प्रकृतेः परः पुरुषः तत्रहेतुः यतः आद्यः कारणं कारणत्वेप्यविकारितामाह मायांव्युदस्यअभिभूय
कैवल्यरूपेआत्मन्येवस्थितइति २३ त्रिवर्गदातापित्वमेवेत्याह सइति यस्त्वंमायामभिभूयस्थितः सएवमायाभिभूतस्यजनस्यध
र्मादिफलमुपासितःसन्विधत्से वीर्येणप्रभावेण २४ तथाचानेनावतारेणतवप्रायोभक्तपालनंलक्ष्यतइत्याह तथेति किंभूभारह

अर्जुनउवाच कृष्णकृष्णमहाबाहोभक्तानामभयंकर त्वमेकोदह्यमानानामपवर्गोसिसंसृतेः २२ त्वमाद्यःपुरुषः
साक्षादीश्वरःप्रकृतेःपरः मायांव्युदस्यचिच्छक्त्याकैवल्येस्थितआत्मनि २३ सएवजीवलोकस्यमायामोहित
चेतसः विधत्सेस्वेनवीर्येणश्रेयोधर्मादिलक्षणं २४ तथायंचावतारस्तेभुवोभारजिहीर्षया स्वानांचानन्य
भावानामनुध्यानायचासकृत् २५ किमिदंस्वित्कुतोवेतिदेवदेवनवेद्म्यहं सर्वतोमुखमायातितेजःपरमदारु
णं २६ श्रीभगवानुवाच वेत्थेदंद्रोणपुत्रस्यब्राह्ममस्त्रंप्रदर्शितं नैवासौवेदसंहारंप्राणबाधउपस्थिते २७ नह्य
स्यान्यतमंकिंचिदस्त्रंप्रत्यवकर्शनं जह्यस्त्रतेजउन्नद्धमस्त्रज्ञोह्यस्त्रतेजसा २८

रणंमदिच्छामात्रेणानभवतितत्राह स्वानां
नातीनांभक्तानामनुध्यानायच तथाः नन्यभावानां एकांतभक्तानां एवंस्तुत्वाप्रकृतं एवंस्तुत्वाप्रकृतंविज्ञापयति किमात्मकमिदंकु
तोवाऽऽयातीतिस्वित्वितर्के २६ इदंद्रोणपुत्रस्यब्राह्ममस्त्रंतेनचप्राणबाधेप्राप्तेप्रदर्शितंकेवलंनतुतस्योपसंहारे उपाय इत्यर्थः यतोसाउ
संहारंनवेद एतत्त्वंतुवेत्थजानासि २७ प्रत्यवकर्शनंकर्शकंनिवर्तकमित्यर्थः अतस्त्वमस्त्रतेजः उन्नद्धंउत्कटंब्रह्मास्त्रतेजसैवजहि यो

भा॰ २ पदेरोत्रवहस्तएवनीएत्ताहुहं तीतितथाफाल्गुनोऽर्जुनः । नृपः सएष्टास्त्रावप्य ॥ तमस्त्राकल्पपरिक्रम्यप्रदक्षिणीकृत्य ब्राह्मायब्रह्मास्त्रंवि
२६ वर्त्तयितं ॥ २७ ॥ ततस्तउभयोः ब्रह्मास्त्रयोस्तेजसी शरैः संवृते संवृते तं संवेष्टिते परस्परं मिलित्वा वर्द्धोते अवर्द्धतां ॥ किं कृत्वा ॥ एरसीयायाशरथिवो
खेतारिकं व्याप्तवत्य ॥ यथायुगलयेसंकर्षणामुखाग्निः उपरिस्थितो कैश्चसेत्यवर्द्धेते तद्वत् ॥ २० ॥ तयोर्ज्वालिफाल्गुनयोः तेन दह्यमानाः सांवर्तक
प्रलयाग्निशङ्कमेनतमेनिरे ॥ २१ ॥ लोकानांव्यतिकरं व्यत्ययं नाशमित्यर्थः ॥ वाहदेवस्यमतचालकृष्णब्रह्मास्त्रं द्वयमुपसंहृतवान् ॥ २२ ॥ गौतमवरा

सूत उवाच ॥ श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा ॥ स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मंब्राह्मायसंदधे ॥ २७ ॥ संहत्यान्योन्यमुभ
योस्तेजसी शरसंवृते ॥ आवृत्य रोदसी खंचववृधातेऽर्कवह्निवत् ॥ २० ॥ दृष्ट्वास्त्रतेजस्तुतयोस्त्रीन् लोकान् प्रदहन्महत् ॥ दह्य
मानाः प्रजाः सर्वाः सांवर्तकममंसत ॥ २१ ॥ प्रजोपद्रवमालक्ष्य लोकव्यतिकरं च तं ॥ मतं च वासुदेवस्य संजहारार्जुनो
द्वयं ॥ २२ ॥ तत आसाद्य तरसा दारुणं गौतमीसुतं ॥ बबंधामर्षताम्राक्षः पशुं रशनया यथा ॥ २३ ॥ शिबिराय निनीषंतं दाम्ना
५७ बध्वा रिपुं बलात् ॥ प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः ॥ २४ ॥ मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि ॥ योसावनाग
जागौतमीकृपीतस्याः सुतं अमर्षेणाकोपेन ताम्रेक्षिणी यस्यसः निःकृपत्वे दृष्टांतः पशुं ॥ सः हस्तानवधीत् त्रिरिबालकान् ॥ २५ ॥
यद्येति ॥ तस्यबंधनं धर्म इत्यत्र वादृष्टांतः यथायाज्ञिकः पशुमिति रशनयारज्वा ॥ २३ ॥ शोकरोषादिभिर्नास्याप्यर्जुनस्य धर्मनिश्चयोप ५७
पनायश्रीकृष्णवाक्यं ॥ तदाहद्वयभ्द्धिः शिबिरायराजनिवेशाय नेतुमिच्छन्तं प्रकुपितइवेति ॥ २४ ॥ स्वनागमो निरपराधान् ॥ २५ ॥ २६

रिपोरपि त्वपत्यस्य बालस्य च वधो न धर्म इत्यन्यायेदर्शयति पतन्तं खड्गादिना अपतन्तं अनवहितं उन्मत्तं ग्रहवातादिना जडं अनुद्यमं अप
त्रं शरणागतं विरथं पग्नरथं ३६ तद्वधो दंडरूपत्वेन श्रेयः अनपायार्थः यद्यतो दंडप्रायश्चित्तरहितो दोषात्तु पापं न द्यायाती ति
तथा च स्मरंति राजभिर्धृतदंडास्तु कृत्वा पापानि मानवाः विधूतकल्मषा यान्ति स्वर्गं सुकृतिनो यथेति ३७ ३९ यद्यपि चोदित

पतन्तः अपतन्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं अपत्रं विरथं भीतं न रिपुं हन्ति धर्मवित् ३६ स्वप्राणान्यः परप्राणैः प्र
पुष्णात्यघृणः खलः तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ३७ प्रतिश्रुतं च भवता पांचाल्यै श्रृण्वतो मम
आहरिष्ये शिरस्तस्य यस्त्वामानितवद्ग्रहा ३८ तदसौ वध्यतां पाप आततायात्मबंधुहा भर्तुश्च विप्रियं वीर कृतवा
न्कुलपांसनः ३९ एवं परीक्षिता धर्मं पार्थः कृष्णेन चोदितः नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान् ४० अथोपेत्य
स्वशिबिरं गोविंदप्रियसारथिः न्यवेदयत्तं प्रियायै शोचन्त्यै आत्मजान्हतान् ४१ तथाहृतं पशुवत्पाशबद्धमवाङ्मुखं
कर्मजुगुप्सितेन निरीक्ष्य कृष्णा पकृतं गुरोः सुतं वामस्वभावा कृपया ननाम ४२ उवाच चासहन्त्यस्य बंधनानयनं सती
मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ४३ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ४४

त्वयापि हंतुं नैच्छत् आत्महनं अत्र हंतारं मपि पतो महान् ४० गोविंदः प्रियः सारथिर्यस्य सः आत्मजान्शोचंत्यै ४१ तथापरि भवेनाहृतं
मानीतं कर्मणा जुगुप्सितेन दोषेणावाङ्मुखं अपकृतं अपकारिणं कृपया निरीक्ष्य वामः शोभनः स्वभावो यस्याः सा ननाम च ४२ उवाच चेति
कारुण्यांतरं अमः सहितः बंधनेनानयनं असहमाना ४३ सरहस्यः गोप्यमंत्रसहितः विसर्गोऽस्त्रप्रयोगः उपसंयमो उपसंहारः ताभ्यां सहितो ग्रामसमूहः

किंच तस्य द्रोणस्यात्मा देहस्तस्याहं ह्यपीत्याह । अर्द्धं त्विहेत्यः पत्नी । अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । जायापती अग्निमादधीयातामिति
श्रुतेः दम्पत्योरेककार्यकर्तृत्वावगमाच्च । ननु पत्न्यां मृतायां कथं जीवति तत्राह । नात्यगाद्भर्तारं पतोवीरसूः पुत्रवती ॥४५॥ तन्नस्यात्मौरवं गुरोः कु
लभवद्भिकर्तृं भिर्वृजिनं दुःखं प्राप्तुं नार्हति । किंत । प्रज्ञं वंद्यं च मृतवशा मृतपुत्रा ॥४७॥ विपद्दे दोषमाह ये रितितेषां राजन्यानां कुलधर्मं क
थं भृतं स्यात् वंधं सपरिवारं । शुचा शोकेनार्पितं व्याप्तं च त्वत्सकुलं कर्तृ प्रदहतीति ॥४८॥ धर्म्यमित्याद्ययोवत्वचः षड्गुणाः । पूर्वश्लोकषट्के द्रष्टव्याः

स एष भगवान्द्रोणः प्रज्ञारूपेण वर्तते । तस्यात्मनोऽर्द्धं पत्न्यास्ते नात्यगाद्वीरसूः कृपी ॥४५॥ तद्धर्मतत्त्वं महाभाग भवद्भिर्गौरवं कुलं
वृजिनं नार्हति प्राज्ञं पूज्यं वंद्यं मनीषिणः ॥४६॥ मारोदीदस्य जननी गौतमी पतिदेवता । यथाहं मृतवत्सार्त्ता रोदिम्यश्रुमुखी
मुहुः ॥४७॥ यैः कोपितं त्वं सकुलं राजन्मेरकृतात्मभिः । तत्कुलं प्रदहत्याशु समूलं वंधवं त्वचार्पितं ॥४८॥ सूत उवाच ॥ धर्म्यं न्या
य्यं सकरुणं निर्व्यलीकं समं महत् । राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः ॥४९॥ नकुलः सहदेवश्च युयुधानो धनंजयः
भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ॥५०॥ तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः । न भर्तुर्नात्मनश्चार्थे यो हन्तु

तत्र धर्म्यं धर्मादनपेतं । युच्यतां युज्यतामिति । न्याय्यं न्यायादनपेतं मारोदीदस्येत्यादिसकरुणां तस्यात्मनोऽर्द्धमिति । निर्व्य । ख्याच्छिशून्वृथा ॥५१॥
लीकं निःकपटं तद्धर्म्यं तेति । समं पक्षपातशून्यं मारोदीदिति । दुःखसाम्योक्तेः । महत् यैः कोपितमिति । निःशुरान्याहितोपदेशात् । एवंभू
तं राज्ञ्याः वचः हे द्विजाः प्रत्यनंदत् अनुमोदितवान् ॥४९॥ नकुलादयश्च प्रत्यनंदत् युयुधानः सात्यकिः ॥५०॥ तस्य तथाविधस्य द्रोणो
र्वध एव श्रेष्ठः अन्यथास्य नरकपातप्रसंगात् । तदाह न भर्तुरिति । अहन् जघान ॥५१॥

वत्सर्जुनोक्तेरयं भावः ॥ भीमेन हंतुं प्रवृत्ते द्रौपद्या च सहसा तन्निवारणे प्रवृत्तायां उभयोः संवारणोपायविः ज्ञातवानर्जुन इति ॥ संदिहा
नस्य सख्युरर्जुनस्य ॥ ५२ ॥ वधार्हणः वधार्हः मयैव शास्त्रकृता ब्राह्मणो न हंतव्यः तथा वध्य आततायिनं मायांतमपि वेदांतगं पारगं ॥ जिघांस
तं जिघांसीयात् न तेन ब्रह्महा भवेत् इति वदता ॥ तदुभयमप्यनुशासनं परिपालय ॥ ५३ ॥ तव च प्रतिज्ञा पूर्यतेत्याह प्रियायाः सांत्वयता ॥ त्वया

निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः ॥ आलोक्य वदनं सख्युरिदमाह हसन्निव ॥ ५२ ॥ श्री भ उ वाच ॥ ब्रह्मबंधुर्न हंतव्य आ
ततायि वधार्हणः ॥ मयैवोभयमाम्नातं परिपाह्यनुशासनं ॥ ५३ ॥ कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां ॥ प्रियं च भीमस
सेनस्य पांचाल्या मह्यमेव च ॥ ५४ ॥ सूत उवाच ॥ अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना ॥ मणिं जहार मूर्द्धन्यं द्विजस्य
सहमूर्द्धजं ॥ ५५ ॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभं ॥ तेजसा मणिना हीनं शिबिरान्निरयापयत् ॥ ५६ ॥ वपनं द्रवि
णादानं स्थानान्निर्यापणं तथा ॥ एष हि ब्रह्मबंधूनां वधो नान्योस्ति दैहिकः ॥ ५७ ॥ पुत्रशोकातुराः सर्वे पांडवाः सहकृ
ष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ॥ ५८ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्रौणिनिग्रहो नाम सप्तमोध्यायः ॥

यत्प्रतिश्रुतं हननं तत्कुरु प्रियं च कुरु सत्यं मम तत्र वधे भीमस्य प्रियं भवति अवधे द्रौपद्याः द्वयोः श्रीकृष्णस्य ॥ ५४ ॥ हार्दमभिप्रायं अज्ञाय ज्ञात्वा
न त्वराकां उभयं विदध्यादतो यममभिप्रायस्तं ज्ञात्वेत्यर्थः ॥ असिना खड्गेन मूर्द्धन्यं मूर्द्धनि जातं सह मूर्द्धजैः केशैः ॥ ५५ ॥ मणिना च हीनं निरयापयत्
निःसारितवान् ॥ ५६ ॥ अनेन श्रीकृष्णोक्तं सर्वं संपादितमित्याह वपनमिति ॥ ५७ ॥ निर्हरणं दाहाद्यं नयनं ॥ ५८ ॥ इति प्रथमे सप्तमः ॥

भा॰ स्त्री
१८

अथ प्रेक्षुपितं द्रोणोर्स्त्वाऽद्रवापराश्रितः॥ श्रीकृष्णेन हितः कृत्या एतः शोकश्च कीर्त्यते॥ ते पांडवाः संपरेतानां मृतानां गंगायामुदकं राजसकलाः श्रीकृष्णेन सहिताः स्त्रियः उदकं तस्य अग्रतः कृत्वा॥ तस्मिन् कार्ये द्वादशः सार्द्ध विधानात्॥१॥ निनीय दत्वा हरिपादाद्भु रजोभिः पूताया सरितो गंगायास्तस्या जलेन सर्वे हतानां दारा वधिता इति गम्यते॥२॥ कुरुपतिं युधिष्ठिरं॥ सहानुजभीमादिभिः सहितं

सूत उवाच॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां॥ रात्र सकलगंगायां उदकं तस्य प्रयुः स्त्रियः॥१॥ ते निनीयोदकं सर्वे विलप्य च भरतोत्तमः॥ आप्लुता हरिपादाब्जरजःपूतसरिज्जले॥२॥ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं॥ गांधारीं पुत्रशोकार्त्तां पृथां कृष्णां च माधवः॥३॥ सांत्वयामास मुनिभिर्हतबंधूञ्छुचार्पितान्॥ भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियां॥४॥ साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतं॥ घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः॥५॥ याजयित्वाश्वमेधैस्त्रिभिरुत्तमकल्पकैः॥ तद्यशः पावनं दिक्षु शतमन्योरिवातनोत्॥६॥ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः॥७॥ गंतुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः॥ उपलेभेऽभिधावंतीमुत्तरां भयविह्वलां॥८॥

॥१॥ मुनिभिः सहितः सांत्वयामास॥ किं कुर्वन् अप्रतिक्रियां कालस्य गतिं दर्शयन्॥४॥ कितवैर्द्यूतैर्दुर्योधनादिभिः॥ द्रौपद्याः कचग्रहणेन आयुः नष्टप्रायं येषां तान्॥५॥ याजयित्वेत्यादि भाविकथा प्रसंगेनः॥ शतमन्योः शतक्रतोरिव॥६॥ शैनेयः सात्यकिस्तेन चोद्धवेन च संयुतः॥७॥ रथमास्थितः सन् उत्तरां परीक्षिन्मातरं अभिधावंतीमुपलेभे ददर्श॥८॥

राम
१८

उत्तरा श्रीकृष्णं प्रार्थयते पाहीति द्वाभ्यां अस्मत्प्रार्थनायोग्यो नान्योस्तीत्याह त्वत्तस्त्वत्तः अन्यं अभयं अभयप्रदं हितं न पश्यामि यत्र लोके परस्परं मृत्युर्भवति ९ प्रकृतं भयं निवेदयति अभिद्रवतीति अभिमुखमायाति तप्तायसः लोहमयशल्यं यस्य सः अतिकार्पण्ये माहकाममिति कामं यथेष्टं १० यदा भवेनातिकृपितस्तदा द्रौणेः अपांडवं पांडवशून्यं इदं विश्वं कर्तुं प्रयुक्तं ब्रह्मास्त्रं अबुध्यत ॥

पाहि पाहि महायोगिन् देवदेव जगत्पते नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ९ अभिद्रवति मामीश शरस्तप्तायसो विभो कामं दहतु मां नाथ मा मे गर्भो निपात्यतां १० सूत उवाच उपधार्य वचस्तस्या भगवान्भक्तवत्सलः अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥ तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंच सायकान् आत्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः ॥ १२ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः १३ अंतस्थः सर्वभूतानामात्मा योगेश्वरो हरिः स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंतवे १४ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह १५ मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते य इदं मायया देव्या सृजत्यवति हंत्यजः १६ ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती १७

अत एव बुद्ध्वा प्रवृत्तं तदा गतमित्याह तर्ह्येवेति १२ ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्त्यत्वात्स्वबुद्धः परिहरं व्यसनं वीक्ष्येत्यनन्यविषय आत्मा येषां स्वैकनिष्ठानामित्यर्थः १३ वैराट्याः उत्तरायाः अंतस्थः सन् गर्भमावृतवान् तत्र हेतुः यत आत्मा अंतर्यामी योगेश्वर इति बहिः स्थितस्यापि प्रवेशे घटनार्थं कुरूणां तंतवे संतानाय पांडवानामपि ब्रह्मास्त्रं राजत्वादेवमुक्तं १४ अमोघमप्रतिक्रियं च सममशाम्यत समातमासीत १५ एतत् ब्रह्मास्त्रस्य समनं आश्चर्यं

भा॰प्र
१९

त्वात्वां नमस्येन नमस्करोमि। ननु कनिष्ठं मां कथं नमस्करोषि तत्राह। आद्यं पुरुषं भूतः प्रकृतेः परं। तत्कुतः ईश्वरं प्रकृतेरपि नियंतारं। अ
तएव सर्वभूतानामंतर्बहिश्च पूर्णत्वेनावस्थितं। तथाप्यलक्ष्यं। १८। तत्र हेतुः मायैव जवनिका तिरस्करणी तयाच्छन्नं प्रतिच्छन्नं। अतो
हमल्पा भक्तियोगानभिज्ञा केवलं नमस्यामि। अधः अक्षजं इंद्रियजं ज्ञानं यस्मात्तं अव्ययं अपरिच्छिन्नं। तत्र पश्यवः मूढदृशा देहाभि
मानिना पुंसा त्वं न लक्ष्यसे। १९। किंच परमहंसानामात्मानात्मविवेकिनां ततो मुनीनां मननशीलानामपि। ततश्चामला

कुंत्युवाच। नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं। अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं। १८। मायाजवनि
काच्छन्नमज्ञाधोक्षजमव्ययं। न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा। १९। तथा परमहंसानां मुनीनाम
लात्मनां। भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः। २०। कृष्णाय वासुदेवाय देवकीनंदनाय च। नं
दगोपकुमाराय गोविंदाय नमो नमः। २१। नमः पंकजनाभाय नमः पंकजमालिने। नमः पंकजनेत्राय

त्मनां निवृत्तरागादीनामपि। तथा तेन निजमहिम्ना न लक्ष्यसे। अतो भक्तियोगं विधातुं त्वां वयं हि नमस्ते पंकजांघ्रये। २२।
पश्येम। यद्वा परमहंसादीनामपि भक्तियोगविधानार्थं त्वमात्मारामाणामप्याविर्भवसि निजनोऽत्र कथं भक्तियोगविधा
नं कारयितुमवतीर्णोऽसीत्यर्थः। २०। ज्ञानभक्तोऽराणां कांत्वं पुत्रत्वाच्चनः केवलं नमस्करोति कृष्णायेति द्वाभ्यां। २१। पंकजं नाभौ य
स्य। पंकजानां माला अस्ति यस्य पंकजवत्प्रसन्ने नेत्रे यस्य पंकजांकितावंघ्री यस्य तस्मै। २२।

एम
१९

नमस्कृतोपकारणेन त्वं स्मरतीति यथेति द्वाभ्यां अयमर्थः मातृतो पि मय्यधिका तव प्रीतिः तथा हे हृषीकेश यथा देवकी कंसेन रुद्धा त्वया विमो-
चिता अहं च तथैव किं विमोचितेत्याकांक्षा महाविशेषमाह तदर्शयति सातिचिरं रुद्धा सती तस्मादेव सकृद्विमोचिता तथा शुचार्पिता
च सती न च तस्याः पुत्रा रक्षिताः अत्र तु वाक्यो नाथवत्यास्तस्याः अहं तु विपद्गणात् तत्रापि मुहुः शीघ्रं च सात्मजा च त्वयैव च नाथेनेति २३ विप-
द्गणमेव दर्शयति विषात् भीमस्य विषमोदकदानात् महाग्नेः जतुगृहदाहात् पुरुषादा हिडिंबादयो राक्षसास्तेषां दर्शनात् असत्सभाया

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणा-
त २३ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः मृधे मृधेनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरे-
भिरक्षिताः २४ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं २५ जन्मैश्वर्यश्रुतश्रीभिरे-
धमानमदः पुमान् २५ नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं २६ नमो किंचनवित्ताय निवृत्तगुणवृत्तये आत्मारामाय
शांताय कैवल्यपतये नमः २७

द्यूतस्थानात् अपितो रक्षिताः आस्म अभवाम २४ यत्र याभिर्विपद्भिः कीदृशं दर्शनं नास्ति पुनरपि भवद-
र्शनं यस्मात् २५ संपदस्तु अप्रेपः परिपंथिन्य इत्याह जन्मसत्कुले जन्मादिभिरेधमानो मदो यस्य सः अभिधातुं श्रीकृष्ण गोविंदेति वक्तुम-
पि अकिंचनानां गोचरं विषयभूतं २६ अतस्त्वमनारब्धशरणाय शरणमसि अकिंचना भक्तास्त एव वित्तं सर्वस्वं यस्य तस्मै ततः किं निवृत्ता गुणा-
वृत्तयो धर्मार्थकामविषया यस्मात्तस्मै अत एव आत्मारामाय तत एव शांताय रागादिरहिताय किं च कैवल्यपतये कैवल्यं दातुं समर्थाय २७

मो २

भा०१
१०

ननुदेवकीपुत्रं माकथमेवं स्तौषितत्राह ॥ मन्ये त्वां कालं ननु देवकीपुत्रत्वं तत्राह हे तव ईशानं नियंतारं ॥ अनादिनिधनं आद्यंतशून्यं विभुं व्यापकं अत एव सर्वत्र समं चरंतं ॥ ननु पार्थसार्थः कथं समः स्यां तत्राह ॥ यत यतः त्वत्तो निमित्तभूतात् भूतानामेव मिथः कलिः कलहो भवति ॥ न तु त्वयि वैषम्यं ॥२८॥ ननु निग्रहानुग्रहरूपं मयि प्रसिद्धं वैषम्यमत आह ॥ न वेदेति ॥ नृणां विडंबनं मनुष्यकारणमीहमानस्य कुर्वतः ॥ यस्मिन् त्वयि विषमा मतिः अनुग्रहनिग्रहरूपा भवति ॥२९॥ अजस्य जन्म अकर्तुः कर्म तिर्यक्षु वराहादिरूपेण नृषु रामादिरूपेण

मन्ये त्वां कालमीशानमनादिनिधनं विभुं ॥ समं चरंतं सर्वत्र भूतानां यन्मिथः कलिः ॥२८॥ न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं ॥ न यस्य कश्चिद्दयितोस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणां ॥२९॥ जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः ॥ तिर्यङ्नृषिषु यादस्सु तदत्यंतविडंबनं ॥३०॥ गोप्याददे त्वयि कृतागसि दाम तावद्यातेदशाश्रुकलिलांजनसंभ्रमाक्षं ॥ वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ॥३१॥

मा २

ऋषिषु वामनादिरूपेण यादस्सु मत्स्यादिरूपेण ॥३०॥ नरविडंबनमत्याश्चर्यमित्याह ॥ गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोटनं कृतवति यावद्दाम रज्जुं आददे जग्राह ॥ तावन्न तत्क्षणमेव या ते दशा अवस्था सा मां विमोहयति किंभूतस्य अश्रुभिः कलिलं व्याप्तं अंजनं ययोः ते च ते संभ्रमेण व्याकुले च अक्षिणी यस्मिन् तद्वक्त्रं निनीय अधः कृत्वा ताडयिष्यतीति भयस्य भावनया स्थितस्य ॥ यत यतः त्वत्तः भीरपि स्वयं बिभेति तद्दशा ॥३१॥

राम
१०

अतएवजगन्मोहनतयादुर्ज्ञेयत्वात्तवजन्मादिबहुधावर्णयंतीत्याह केचिदितिचतुर्भिः पुण्यश्लोकस्यप्रियस्ययुधिष्ठिरस्यकीर्त्तयेयदोरेवकी
र्त्तयेइतिवा मलयस्यकीर्त्तयेवंशेवाचंदनं ३२ तथावसुदेवस्यप्रार्थितःदेवक्यांअजएवत्वमभ्यगातउत्पन्नवानितिशेषः ब्रथमउहषत्वा
र्षः अभवत्वमितिपाठः सुगमः ॥ ताभ्यामेवपूर्वंहृतयःप्रश्निरूपाभ्यांयाचितःसन्अस्यजगतःक्षेमाय ३३ आत्मभुवेतिब्रह्मणाप्रार्थितःसन्यथा
धान्यविवक्षया ३४ भवेतांतरं परमानंदस्वरूपाज्ञानमविद्या ततोदेहाद्यभिमानात्कामः ततःकर्माणितैःक्लिश्यमानानांतत्रिवृत्तयेश्र

केचिदाहुरजंजातंपुण्यश्लोकस्यकीर्त्तये ॥ यदोःप्रियस्यान्ववायेमलयस्येवचंदनं ३२ अपरेवसुदेवस्यदेवक्यांयाचितोऽभ्य
गात ॥ अजस्त्वमस्यक्षेमायवधायचसुरद्विषां ३३ भारावतारणायान्येभुवोनावइवोदधौ ॥ सीदंत्याभूरिभारेणजातोह्यात्मभु
वार्थितः ३४ भवेस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः ॥ श्रवणस्मरणार्हाणिकरिष्यन्नितिकेचन ३५ शृण्वंतिगायं
तिगृणंत्यभीक्ष्णशःस्मरंतिनंदंतितवेहितंजनाः ॥ तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजं ३६ अप्यद्यनस्त्वंस्व
कृतेहितप्रभोजिहाससिस्वित्सुहृदोनुजीविनः ॥ येषांनचान्यद्भवतःपदांबुजात्परायणंराजसुयोजितांहसां ३७

वणाद्यर्हाणिकर्माणिकरिष्यन् ३५ अस्यपक्षस्यसिद्धांततामभिप्रेत्यश्रवणादिफलमाह शृण्वंतीति नंदंतिअन्यैःकीर्त्यमानमभिनंदंति
येजनाःईहितंचरितंतावकंत्वदीयंपदांबुजंतएवपश्यंत्येव अचिरेणैवेतिचएवकारावधारणं कीदृशंभवप्रवाहस्यजन्मपरंपरायाउपरमोय
स्मिन्तत ३६ इदानींतवास्मत्परित्यागोनुचितइत्याशयेनाह अपीतिचतुर्भिः हेप्रभोसुहृदोनुजीविनश्चनोद्यअपिस्वित्किंस्वित्त्वंजिहास
सियेषामस्माकमन्यत्परायणंनैवास्ति कुतःराजसुयोजितमंहोद्रोहः यैस्तेषां त्वानांकृतमीहितमपेक्षितंयेनतस्यसंबोधनं विसर्गांतपाठे

भा॰प्र ननु ते वयं धवो यादवाः पुत्राश्च पांडवाः शूराः समर्थाश्च तत्किं कार्यमपेक्षसे अत आह केवयमिति ॥ यर्हि भवतो दर्शनं यदा त्वमस्मान्न
२१ पश्यसि ॥ तदा नाम्ना विख्यात्या रूपेण सम्पदा च यदुभिः सहिताः पांडवा नाम के वयं न के पि तुच्छा इत्यर्थः ॥ हृषीकाणां प्राणशून्यजीवस्या
दर्शने यथा न किंचिन्नाम रूपं वा तद्वत् ॥ ३८ ॥ किंच यथेदानीमियमस्मत्पालिता भूमिः त्वदसाधारणैर्वज्राङ्कुशादिभिर्लक्षणैर्वि
लक्षितैस्त्वच्चिह्नितैस्त्वत्पदैरङ्किता सती भाति ॥ तत्र तदा त्वयि निर्गते सति न शोभिष्यते ॥ ३९ ॥ अपि च इमे जनपदा देशाः स्वृद्धाः सुसमृद्धाः सु

के वयं नामरूपाभ्यां यदुभिः सह पांडवाः ॥ भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ३८ ॥ नेयं शोभिष्यते तत्र यथेदा
नीं गदाधर ॥ त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ॥ ३९ ॥ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः ॥ वनाद्रिन
द्युदन्वन्तो ह्येधन्ते तव वीक्षितैः ॥ ४० ॥ अथ विश्वेश विश्वात्मन्विश्वमूर्ते स्वकेषु मे ॥ स्नेहपाशमिमं छिन्धि दृढं पांडुषु वृष्णिषु
॥ ४१ ॥ त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ॥ रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ॥ ४२ ॥

तः ॥ ४० ॥ गमनेन पांडवानामकुशलं आगमनेन यादवानामिति उभयतो व्याकुलचित्ता सती तेषु स्नेहनिवृत्तिं प्रार्थयते अथेति विश्वे
शेत्यादिसंबोधनानि स्नेहच्छेदे सामर्थ्यख्यापनाय दृढं सतं ॥ ४१ ॥ ततः किमत आह त्वयीति अनन्यविषया सती मे मतिः र रम
तिमुद्वहतात् ॥ अनवच्छिन्नां प्रीतिं करोत्वित्यर्थः ॥ ओघं पूरं यथा गंगा प्रतिबंधनगणयति एवं मतिरपि विघ्नाननागणयत्विति भावः २१

एवमप्यपर्याप्तगुणः प्रणमति हे श्रीकृष्णेति नमः उपकारानन्तस्मरन्ती बन्धुधा संबोधयति कृष्णसखेत्यर्जुनस्य सखे वृष्णीनामृषभ श्रेष्ठ अवनौ ध्रुक् द्रुह्यन्ति ये राजन्यास्तेषां वंशस्य दहन एवमप्यनपवर्गवीर्य अक्षीणप्रभाव गोविन्द प्राप्तकामधेन्वैश्वर्य गोद्विजसुराणामार्तिहरोऽवतारो यस्येति ४२ कृष्णानि मधुराणि पदानि येषु तैर्वाक्यैः परिणुतोऽखिलस्योदयो महिमा यस्य सः एवं कुन्त्या विनयस्मात् परिणुतेति वक्ष्यमाणदीर्घच्छन्दोऽवधानं मन्दमीषत् तथा हासं एवं मायया वक्ष्यतीति हि हासो जनोन्मादकरी च मायेति ४३ त्वयि मेऽनन्यविषया मतिरिति यत्प्रार्थितं तद्दत्तमिति अङ्गीकृत्य रथस्थानाद्गजाह्वयमागत्य पश्चात्ताश्चान्याश्च सुभद्रादयस्त्वोः स्त्रियः उपामन्त्र्य तासां स्वपुरं यास्यन्नत्रागतानां युधिष्ठिरेण प्रेम्णा अत्रैव

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविन्द गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ४२ सूत उवाच पृथयेत्थं कलपदैः परिणूताखिलोदयः मंदं जहास वैकुंठो मोहयन्निव मायया ४३ तां बाढमित्युपामंत्र्य प्रविश्य गजसाह्वयं स्त्रियश्च स्वपुरं यास्यन्प्रेम्णा राज्ञा निवारितः ४५ व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा

किंचित्कालं निवसेति संप्रार्थ्य निवारितः ४५ अथ भीष्मनिर्याणोत्सवं वक्तुमुपोद्घातं कथां प्रस्तौति प्रबोधितोऽपीतिहासैर्नाबुध्यत शुचार्पितः ४६ व्यासाद्यैः प्रबोधितोऽपि शुचा व्याप्तः सन्नाबुध्यत विवेकं न प्राप राजेत्यध्याहर्तव्यं कुतः ईश्वरेहायामज्ञैः स्वयं तु भीष्मनिर्याणमोहोत्सवा यत्ता कुरुक्षेत्रं गंतव्यं तत्र तत्सुखेनैवायं प्रबोधनीय इति ईश्वराभिप्रायः कार्यद्वयविधायकत्वमजानद्भिरित्यर्थः श्रीकृष्णेनापि प्रबोधितो नाबुध्यत तत्र हेतुः अद्भुतकर्मणेति यथा कुरुपाण्डवसेनानाशमीयतोऽपि यथोचितमेव वरदस्त्वपि विग्रहमेव दर्शितवान् एवमत्रापि प्रबोधयन्नप्रबोधमेव दर्शितवान् इत्यर्थः ४६

भा॰प्र
३१

अबोधमेव प्रपंचयति आहेति षड्भिः प्राकृतेनाविवेकव्याप्तेन । आत्मनाचित्तेन । हे विप्राः ॥ ४७ ॥ पारक्यस्य स्वस्य शृगालाद्याहारस्यार्थे मे मया अक्षौ
हिणीः अक्षौहिण्यः अक्षौहिण्याः प्रमाणं तु व्यासेनोक्तं ॥ अक्षौहिण्यां प्रसंख्याता रथानां द्विजसत्तमाः संख्यागणिततत्वज्ञैः सहस्राण्येकविंश
तिः शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः गजानां तु परीमाणमेतदेव प्रकीर्तितं ॥ ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु ॥ नराणामपि पं
चाशच्छतानि त्रीणि चैव हि ॥ पंचषष्टिसहस्राणि तथाश्वानां शतानि च ॥ दशोत्तराणि षट्प्राहुः संख्यातत्वविदो जनाः ॥ एतामक्षौहिणीं

आह राजा धर्मसुतश्चिंतयन् सुहृदां वधं । प्राकृतेनात्मना विप्राः स्नेहमोहवशंगतः ॥ ४७ ॥ अहो मे पश्यताज्ञानं हृदि रूढं दुरा
त्मनः । पारक्यस्यैव देहस्य बह्व्यो मेक्षौहिणीर्हताः ॥ ४८ ॥ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ न मे स्यान्निरयान्मोक्षो ह्यपि
वर्षायुतायुतैः ॥ ४९ ॥ नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषां ॥ इति मे न तु बोधाय कल्पते शासनं वचः ॥ ५० ॥ स्त्रीणां मद्ध
तबंधूनां द्रोहो योसाविहोत्थितः ॥ कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ॥ ५१ ॥

प्राहुर्यथावदिह संख्ययेति ॥ ४८ ॥ द्रुहः संबंधिनः मित्राणि सखायः पितृव्याः ॥ ४९ ॥ द्विषां वधः एनः पापं न भवति एतच्छासनं शिक्षारूपं वचः
श्रुतो न कल्पते ॥ एतत्तु वचः प्रजाभर्तुरेव ॥ अयं भावः स्वप्रजानामन्यतो बाधे प्रसक्ते तद्वधो हंतातः दुर्योधनेन प्रजायां रक्ष्यमाणायां मया
केवलं राज्यलोभेनैव हतत्वात्पापमेवेत्यपीति ॥ ५० ॥ किंच युद्धे पुंसां वधो भवतु नाम अधर्मः स्त्रीणां तु मया हतबंधवो यासां तासां यो सौ द्रोहो होउद्दिश्ये
प्युत्थितः ॥ तं व्यपोहितुं अपाकर्तुं कल्पः समर्थो नाहं ॥ गृहमेधीयैः गृहाश्रमविहितैः ॥ ५१ ॥

राम
३१

नचैव सर्वपाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेति श्रुतेः॥ पापमश्वमेधेन नश्यदेवेत्याशंक्याश्वविवेकविज्ञमिति
हेतुवादमाश्रित्य निराकरोति॥ यथा पंकेन पंकाम्भो न मृज्यते॥ यथा वा सुरया सुराकृतमपावित्र्यं वा सुरया न मृज्यते॥ तथैव भूतहत्यामेकां प्रमार
तो जातां बुद्धिपूर्वहिंसायां यद्यपि तैर्मार्ष्टुं शोधयितुं नार्हसीति॥ ५२॥ इति श्री ... मेष्टमः॥ युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणं॥ कल्मषानि तिष्ठन्ति

यथा पंकेन पंकाम्भः सुरया वा सुराकृतं॥ भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हसि॥ ५२॥ इति श्रीमहाभारते महापुराणे ... ध्याय॥ युधि
ष्ठिरानुतापोऽष्टमो॥ वै॥ उवाच॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया॥ ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत्॥ १॥
तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः॥ अन्वगच्छंस्तथैवैते विप्राः व्यासधौम्यादयस्तथा॥ २॥ भगवानपि विप्रर्षे रथेनैकेन ज
यः॥ सतेजा व्यरोचत नृपः कुबेर इव गुह्यकैः॥ ३॥ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं॥ प्रणेमुः पाण्डवा भीष्मं सानुगाः सह च
क्रिणा॥ ४॥ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम॥ राजर्षयश्च तत्रासन्द्रष्टुं भरतपुंगवं॥ ५॥ पर्वतो नारदो धौम्यो भगवा
न्बादरायणः॥ बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः॥ ६॥ वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः॥ कक्षीवानौतमोः

श्वनवमेतस्य वार्यते॥ यदर्थं तस्या विवेकः श्रीकृष्णेन संवर्द्धितस्तद्दर्शयतीति॥ सर्वेषां धर्माणां विवित्सया॥ त्रिश्च कौशिको यस्य दर्शनः
वेदितुमिच्छया विनशनं कुरुक्षेत्रं॥ देवव्रतो भीष्मः॥ १॥ सतः श्रेष्ठाः अश्वा येषु तैः रथैः॥ १॥ ४॥ तत्र तदा तत्रासन्॥ तत्र एवागता इत्यर्थः॥ भरत
पुंगवं भीष्मं॥ ५॥ रेणुकासुतः परशुरामः॥ ६॥

भा०१
२२

ब्रह्मरातः शुकः आङ्गिरसो बृहस्पतिः ॥८॥ वसूत्तमो भीष्मः देशकालविभागविदिति उत्थातुमशक्यत्वात् शयान एव मनसा वाचा पूजयामासेत्यभिप्रायः ॥९॥ हृदिस्थं सन्तं प्रत्यक्षं आसीनं पूजयामास ॥१०॥ उपासीनान् समीपे उपविष्टान् प्रश्रयो विनयः प्रेम स्नेहः ताभ्यां संगतानुपसन्तान् । पाठान्तरे तान् अभ्याचष्ट वदन्तान् अभ्यवष्टं अभ्यभाषत । अनुरागाश्रुभिः अन्धीभूतेन चक्षुषा उपलक्षितः २२ शी तिवा ॥११॥ अभिभाषणमाह अहो इत्येकादशभिः हे धर्मनन्दनाः क्लिष्टं यथा भवत्येवं जीवितुं नार्हथ यद्यूयमिति यत् एतत् अहो कष्ट

अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः । शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः ॥८॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः । पूजयामास धर्मज्ञो देशकालविभागवित् ॥९॥ कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरं । हृदिस्थं पूजयामास माययोपात्तविग्रहं ॥१०॥ पाण्डुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् । अभ्याचष्टानुरागाश्रैरन्धीभूतेन चक्षुषा ॥११॥ अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनन्दनाः । जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥१२॥ संस्थितेऽतिरथे पाण्डौ पृथा बालप्रजा वधूः । युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः ॥ सर्वं कालकृतं मन्ये भवतां च यदप्रियं । सपालो यद्वशे लोको वायोरिव घनावलिः ॥१४॥ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः । कृष्णोऽस्त्री गाण्डिवं चापं सुहृत्कृष्णस्ततो विपत् ॥१५॥

द्भुतं अहो अन्याय्यं चैतत् यतो यूयं विप्राः धर्मोऽच्युतश्चाश्रयो येषां ते ॥१२॥ किं च संस्थिते मृते बालाः प्रजाः पुत्रा यस्याः सा वधूः स्वैति दैन्यं शरीरं तोकान्यपत्यानि तद्वती अपत्यैः सह क्लेशान्प्राप्तेत्यर्थः ॥१३॥ कालकृतत्वेन शोकं वारयति सर्वमिति द्वाभ्यां ॥ भवतामप्रियं सपालो वशवर्ती ॥१४॥ अहो दुर्घटं नापद्धेतुः काल इत्याह यत्रेति कृष्णोऽर्जुनः अस्त्री धन्वी ततः तत्रापि विपत् ॥ धृएपशारीरखलाश्वेनेधए

राम
२२

ननु कथं कालो तिक्रामेदित्यपेक्षायामाह । नह्यस्य श्रीकृष्णस्येत्थंभूतस्यानिर्दिशति विधित्सितं कर्तुमिष्टं । यस्य विधित्सितस्य
जिज्ञासया ॥ १६ ॥ इदं हि यतो दैवतंत्रमीश्वराधीनं व्यवस्य निश्चित्य । तस्येश्वरस्यानुविहितः अनुवर्ती सन् कर्तारिक्तः हे नाथ अनाल
परं प्रयोगतस्त्वातिन्र प्रभो सम्यर्थ अनाथाः प्रजाः पाहि ॥ १७ ॥ अनुविधेयः परमेश्वरः श्रीकृष्ण एवेत्याह । एष एव भगवान्सर्वेश्वरः यत
आद्यः पुमान् । तत्र कुतः यतो नारायणः साक्षात् ॥ १८ ॥ तदुपपादयति अस्येति । अनुभावं प्रभावं ॥ १९ ॥ त्वमज्ञानात् यमेवं मन्यसे मातुलेयं देव

नह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितं । यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोपिहि ॥ १६ ॥ तस्मादिदं दैवतंत्रं व्यवस्य भर
तर्षभ । तस्यानुविहितोनाथा नाथ पाहि प्रजाः प्रभो ॥ १७ ॥ एष वै भगवान्साक्षादाद्यो नारायणः पुमान् । मोहयन्मायया
लोकं गूढश्चरति वृष्णिषु ॥ १८ ॥ अस्यानुभावं भगवान्वेद गुह्यतमं शिवः । देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥ १९ ॥ यं
मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमं । अकरोः सचिवं दूतं सौहृदादथ सारथिं ॥ २० ॥ सर्वात्मनः समदृशोह्यद्वयस्यानहंकृतेः ।
तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित ॥ २१ ॥ तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं । यन्मेसूंस्त्यजतः साक्षात्कृष्णोद

क्ताः स्तुतं । प्रियं प्रीतिविषयं मित्रं प्रीतिकर्तारं । सुहृत्तमं उपकारानपेक्षोपकारकं च । सौहृदात्स्नेहात्सारथिं । अकरोः कृतवान । र्शनमागतः
पि सचिवं मंत्रिणं ॥ २० ॥ न चैतावता श्रीकृष्णस्य नीचे सारथ्यादौ प्रवृत्तेः तत्राह सर्वेति । तत्कृतं नीचोकर्मकृतं मम योग्यमयोग्यमिति मतिवैषम्यं क्वापि
रपि नास्ति । कुतः निरवद्यस्य रागादिशून्यस्य । तत्कुतः अनहंकृतेः । तत्कुतः अद्वयस्य । तदपि कुतः समदृशः । तत्रापि हेतुः सर्वस्यात्मनः प्रत्ये
वाहं तस्य तदभावः ॥ २१ ॥ तथापि समत्वेपि अनुकंपितं अनुकंपां ॥ २२ ॥

भा०१ इदानीं स्वदेहत्यागपर्यंतं श्रीकृष्णस्यावस्थानं प्रार्थयते भक्त्येति द्वाभ्यां ॥ २३ ॥ यावदिति विलंबं द्योतयति ॥ अहं हिनोमि त्यजामीति त्वातेऽ ॥ इद-
३४ मित्यनात्मत्वेन ज्ञातं ॥ प्रसन्नहासेनारुणालोचनाभ्यां च उल्लसन्मुखांबुजं यस्य ध्यानस्य पंथाः विषयः ॥ योऽन्यैश्चिंत्यते केवलं मोक्ष-
तः स्थितः स मां प्रतीक्षतामित्यर्थः ॥ २४ ॥ तत साउक्तं प वाक्यमाकर्ण्य ॥ २५ ॥ पुरुषस्वभावेन विहितान् त्रर जातिसाधारणान् वर्णाश्रमासेति त-
तीयेनान्वयः ॥ यथावर्णं वर्णधर्मान् ॥ यथाश्रमं आश्रमधर्मांश्च वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं

भक्त्यावेश्य मनो यस्मिन्वाचा यन्नामकीर्त्तयन् ॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ २३ ॥ स देवदेवो भगवान्प्रतीक्षतां
कलेवरं यावदिदं हिनोम्यहं ॥ प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भुजः ॥ २४ ॥ सूत उवाच ॥ युधिष्ठिर-
स्तदाकर्ण्य शयानं शरपंजरे ॥ अपृच्छद्विविधान्धर्मानृषीणां चानुशृण्वतां ॥ २५ ॥ पुरुषस्वभावविहितान्यथावर्णं यथाश्रमं
वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६ ॥ दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः ॥ स्त्रीधर्मान्भगवद्धर्मान्स-
मासव्यासयोगतः ॥ २७ ॥ धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने ॥ नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ २८ ॥ धर्मं

त १ येषां तान् ॥ २६ ॥ पुनस्तत्रैव विशेषमाह दानेति ॥ प्रवदतस्तस्य स कालः प्रत्युपस्थितः ॥ यो योगिनः छंदमृत्योर्वांछितस्तूत्तरायणः ॥ २९ ॥
ति मोक्षधर्मान् शमदमादीन् ॥ भगवद्धर्मान् हरितोषणान् द्वादश्यादिनियमरूपान् ॥ समासव्यासयोगतः संक्षेपविस्तराभ्यां ॥ तावेव योगो उपायो ततः ॥ त- राम
भ्यां ॥ २७ ॥ धर्मादीश्च यथाधिकारं प्रतिनियतोपायसहितान् ॥ यथा यथावत् ॥ नानाख्यानेषु येऽतिहासास्तेषु यथा संति तथा वर्णयामासेति ३४
छंदेनेच्छया मृत्युर्यस्य ॥ २९ ॥

सहस्वणीर्युद्धे समीपस्थान्सहस्रं रथिनो नयति पालयतीति सहस्वणीर्भीष्मः । सहस्रिणीरिति पाठे सहस्रार्थवतीर्गिरः । लसन्तौ पीतौ पटौ यस्य तस्मिन् । अमीलितदृगेव मनो व्यधारयत् ॥ ३० ॥ अनयैव विशुद्धया धारणया हतमशुभं येन सः । तस्य श्रीकृष्णस्य ईक्षया एव दृष्ट्यैव गतआयुधश्रमो यस्य सः । अत एव निवृत्तः सर्वेन्द्रियवृत्तीनां विभ्रमः विविधं भ्रमणं यस्मात्तः जन्यं देहं ॥ ३१ ॥ परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतमर्पयति । इति नानाधर्माद्युपायैर्मतिर्मनोधारणालक्षणा उपकल्पिता समर्पिता । कस्मै सात्वतानां पुंगवे श्रेष्ठे भगव

तदोपसंहृत्य गिरः सहस्वणीर्विमुक्तसंगं मन आदिपूरुषे । कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थितेमीलितदृग्व्यधारयत् ॥ ३० ॥ विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधश्रमः । निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनं ॥ ३१ ॥ भीष्म उवाच ॥ इति मतिरुपकलिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि ॥ स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ३२ ॥

तिवितृष्णा निःकामा । अवितृष्णेति वा च्छेदः । अवितृष्णेत्यर्थः । विगतो भूमा यस्मात्तस्मिन् । यमपेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः । तदेव परमैश्वर्यमाह । स्वसुखं विहाररूपमूर्तं परमानन्दं उपगते प्राप्तवत्येव । ननु कथं विहर्तुं स्वसुखमुपगतो विषयसुखेच्छया शोऽप्रमार्यापरिग्रहादित्यत्राह क्वचिदित्यादि मायया रूपं गृहीतवतीत्यर्थः । क्वचित्कदाचिद्विहर्तुं क्रीडितुं प्रकृतिमुपेयुषि स्वीकृतवति । ननु स्वरूपतिरोधानेन जीववत्संसारन आपन्नेत्यर्थः । विहर्तुमिति यदुक्तं तत्स्पष्टयति । यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति ॥ ३२ ॥

भा०प्र
२५

इदानीं श्रीकृष्णमूर्त्तिं वर्णयन् रतिं प्रार्थयते ॥ त्रिभुवनं वा मनं त्रिलोक्या मेकमेव कमनीयं यस्य तद्वपुर्दधाने रतिर्मेस्त्वि ॥ कथंभूतं वपुः तमालव
न्नीलो वर्णो यस्य तत् ॥ प्रातःकालीनारवेः करैरेव ह्वत एव गौरे पीते वरे निर्मले अंबरे यस्मिन् तत् ॥ अलककुलेः पर्यावृत माननाब्जं यस्मि
न्तत् ॥ विजयसखे पार्थसारथौ ॥ अनवद्या अहैतुकी फलाभिसंधिरहिता रतिरस्तु ॥ ३३ ॥ विजयसखित्वमेवानुवर्णयन् रतिं प्रार्थयते ॥ युधि
युद्धे तुरगाणां खुरैरुज्जन्यरगोरजः तेन विधूम्रा धूसरा तेन च ते विष्वक् इतस्ततश्चलिताः कचाः कुंतला तैरुल्लसितं विकीर्णं श्रमवारिस्वेदविंदुरूप
तेन च अलंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे मम आत्मा मनोस्तु रमतामित्यर्थः ॥ पुनः किंभूते मदीयैर्निशितैस्तीक्ष्णैः

त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने ॥ वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेनवद्या ॥
युधितुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ॥ मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेस्तु
कृष्ण आत्मा ॥ ३४ ॥ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ॥ स्थितवति परसैनिकायुरक्ष्णा हृतवति

शरैः विभिद्यमाना त्वक् यस्य तस्मिन् ॥ शरैरेव विलसत् उल्लसत्कवचं यस्य तस्मिन् ॥ ३४ ॥ किंच सपदीति येन पार्थसखे रतिर्ममास्तु ॥ ३५ ॥
योरुभयोर्मध्ये रथं स्थापय मेच्युत ॥ यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् इति ॥ सख्युरर्जुनस्य वचो निशम्य ॥ सपदि तत्क्षणमेव उभ
परबलयोः सैन्ययोर्मध्ये स्थिते पार्थसखे रतिरस्तु ॥ तत्र स्थित्वा कृतं सख्यं दर्शयति ॥ परस्य दुर्योधनस्य सैनिकानामायुः अक्ष्णा कालदृष्ट्या
हृतवति ॥ असौ भीष्मः असौ द्रोणः असौ कर्ण इति तत्तत्प्रदर्शनव्याजेन दृष्ट्यैव सर्वेषामायुराकृष्यार्जुनस्य जयं कृतवतीति ॥ ३५ ॥

न केवलमर्जुनस्यैव सपत्नायुर्हरणेनैव जयमावहत् । किं तु विद्याहरणेनापीत्याह । व्यवहिताद्दूरेऽवस्थितायाः पृतनानीकस्य मुखमिव मुखं अ
ग्रे स्थितान् भीष्मादीन् निरीक्ष्येत्यर्थः स्वजनवधाद्विमुखस्य निवृत्तस्य । तदज्ञानमाह । एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् । विसृज्य
सशरं चापं शोकसंविग्नमानस इति । कुमतिमहरदित्यादि कुबुद्धिं ॥३६॥ मम तत्प्रतिज्ञातमन्यथाहं कृतवानित्याह । स्वनिगमं अशस्त्र एवा
हं साहाय्यमात्रं करिष्यामीत्येवंरूपां तामात्मप्रतिज्ञां हित्वा । श्रीकृष्णं शस्त्रं ग्राहयिष्यामीत्येवंरूपां मत्प्रतिज्ञां ऋतं सत्यं यथा भवति तथा अ
धिकर्तुं अधिकां कर्तुं रथोपस्थः सन् अवप्लुतः सहसैवावतीर्णः अवप्लुतः सन् यो ऽभ्ययात् अभिमुखमधावत् इभं हन्तुं हरिः सिंह इव किंभूतः

व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या । कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य
मेऽस्तु ॥३६॥ स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः । धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं ग
तोत्तरीयः ॥३७॥ शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे । प्रसभमभिससार मद्वधार्थं स भवतु मे भ

धृतो रथचरणः चक्रं येन सः । तदा वधार्थं वेगेनागमनात् उष्णनाद्य विस्मृते हृदि सर्वं भूतं भुवनं भारेणाक्रान्तिपदं चल । गवान्गतिर्मुकुन्दः ॥३८॥
द्गुः चलन्ती गौः पृथिवी यस्मात्सः । तेनैव वधार्थं वेगेनापतितं गतं पतितमुत्तरीयं वस्त्रं यस्य सः इदं हृदो मे गतिर्भवत्वित्युत्तरेणान्वयः ॥३७॥ एवं परमा भ
यातं तदा स्वमपमानं स्मारयति आततायिनो मे शितैर्निशितैः विशिखैर्हतः अत एव विशीर्णदंशः विच्छिन्नकवचः क्षतजेन रुधिरेण परिप्लुतः व्याप्तः सन् प्रस
भं बलाद्धठात् यत् अर्जुनमप्यतिक्रम्य मद्वधार्थमभिससार अभिमुखमाजगाम । एवं यो लोकवतीत्यार्जुनपक्षपाती बलक्षितः वहत्तत्कर्म मान्य
हं कृतवान् । यन्मत्कृते नोक्तं वचो मा वृथा भूदिति स भगवान्मे गतिर्भवत्वित्यर्थः ॥३८॥

गी॰ टी॰
२६

तदेव प्रन्मोपैरविभ्रमपरस्ताव्यप्रेक्षमेरति माशास्त्वे ॥ विजयोर्थैनतमरथ एव कुञ्जं वञ्जकतैरपिरक्रमणीयोयमेतस्मिन्नाश्लिष्टतोत्रप्रतोदोपे
नतस्मिन् ॥ ध्वतश्चुनेहयामांरागमयः प्रग्रहालेर्हतियमेतस्मिन् ॥ वीद्यादिस्पश्चेत्यनकारांतादपिरस्मिशाद्वादिनिः ॥ तद्विपातयामारथ्य
श्रियारत्रणीयेशोभमानेषु पूषोर्मत्रं पिंछोः नन्वत्रमायेवर्त्तिनिकिमितिरतिः प्रार्थ्यतेअत आह ॥ भगवतिअचिंत्यैश्वर्यैतदाह ॥ इहकुञ्जे
हताः सर्वयंनिरीक्ष्य स्वरूपंतत्त्समानंहृप्तांताप्राप्ताइति ॥ १७ दिव्यदर्शापशपत्राह ॥ तत्त्वधर्मेणाप्रध्यमानातत्स्वरूपंप्राप्तास्त्येतत्रविन्न
यतोमदाधाअपिप्राप्ताउरित्याह ॥ ललितगतिश्चूणादिः मंजुगत्यादिभिः आत्मीयैस्तदीयैर्वाकल्पितउहमानः पूज्यायामानाः ॥ अतउक्तं

विजयरथकुञ्जं वज्रान्ततो वेधतह परश्मिनितच्छ्रिये रूमणीये ॥ भगवतिरतिरक्तप्रेमपूर्वोर्यमिहनिरीक्ष्यहतागताःस्वरूपं ॥ १७
ललितगतिविलासवल्गुहासप्रणयनिरीक्षणाकल्पितोरुमानाः ॥ कृतमनुकृतवत्यउन्मदान्धाः प्रकृतिमगन्किलयं
स्यगोपवध्वः ॥ ४ ॥ मुनिगणान्रुपवर्ग्यसंकुलेतः सदसिमुधिष्ठिरराजसूयएव ॥ अर्हणमुपयेदईक्षणीयोमम दृशिगोचरएष

रेनमदेनांधाविवशाः ॥ अतएवतदेकचित्तत्वेनतस्यकृतंकर्मगोवर्द्धनोद्धरणादिकमनुकृतवत्योगोपवध्वो ॥ प्रख्याविरात्मा ॥ ४ ॥
यस्यप्रकृतिंस्वरूपंअगनअगमन ॥ मकारलोपोहप्त्वार्थः किल ॥ अतिद्वतस्मिन्नरनिरस्यितिपूर्वतोवान्वयः ॥ ४ ॥ जगात्मस्वतामनुस्मर
न्नाह ॥ मुनिगणान्रुपवर्य्यसंकुलेर्न्यग्रेअंतःसदसिसभामध्येमुधिष्ठिरस्यराजसूये ॥ एषांमुनिगणादीनांईक्षणीयः अहो रूपमहोम
हिमेत्येवमाश्चर्येणविलोकनीयः सन्नउपपेदेप्राप ॥ एषजगतामात्मामममदृशिगोचरः दृष्टिविषयः सन्नाविःप्रकटोवर्त्तते अहोमेभाग्य
मितिभावः ॥ ४ ॥

गी॰ टी॰
२६

सोहंकृतार्थोस्मीत्याह ॥ तमिममजं समधिगतः प्राप्तोस्मि समयकत्वमाह ॥ विधूतभेदमोहः तदर्थमेवास्योपाधिकत्वमाह ॥ आत्मकल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि प्रतिहृदयं धिष्ठितं अकारलोपश्छान्दसः नैकधा अनेकधा ॥ अधिष्ठानभेदादनेकधा भातमित्यर्थः अत्र दृष्टांतमाह सर्वप्राणिनां दृशं दृशं प्रति एकमर्कमनेकधा प्रतीतमिवेति ॥ ४२ ॥ मनोवाग्दृष्टीनां वृत्तिभिः परमात्..

तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां ॥ प्रतिदृशमिव नैकधार्कमेकं समधिगतोस्मि विधूतभेदमोहः ॥ ४२ ॥ सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावेश्य सोन्तःश्वास उपारमत ॥ ४३ ॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निःकले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ४४ ॥ तत्र दुंदुभयो नेदुर्देवमानववादिताः ॥ शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५ ॥ तस्य निर्हरणादीनि संपरेतस्य भार्गव ॥ युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोभवत् ॥ ४६ ॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ४७ ॥ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयं ॥ पितरं सांत्वयामास गांधारीं च तपस्विनीं ॥ ४८ ॥ पित्रा चानुमतो राजा वासुदेवानुमोदितः ॥ चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥ ४९ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरराज्यप्रलंभो नाम नवमोध्यायः ॥

त्मनि श्रीकृष्णे अंतर्विलीनः श्वासो यस्य सः ॥ ४३ ॥ निःकले निरुपाधौ संपद्यमानं मिलितं आज्ञाय आलक्ष्य ॥ ४४ ॥ देवैर्मानवैश्च वादिताः ॥ राज्ञां मध्ये साधवः अनमस्यन् ॥ ४५ ॥ निर्हरणादीनि संस्कारादीनि संपरेतस्य मृतस्यापीत्यर्थः ॥ ४६ ॥ ४७ ॥ पितरं धृतराष्ट्रं तपस्विनीं संतापवतीं ॥ ४८ ॥

भा०प्र
३७

हृशापेक्षितकार्यस्य हस्तिनापुरतो हरेः ॥ द्वाभिः सत्वुयमानस्य च प्रपिते द्वारकागमः ॥ राज्यं प्रचकारेत्युक्तं तत्र पृच्छति हत्वेति ॥ स्वरिक्थं धने स्पर्द्ध न्ते स्पर्द्धन्ते तथा ॥ यद्वा स्वरिक्थपस्पृक् संग्रामो येषां ॥ अत एव धनादिहरणादाततायिनः तान् हत्वा ॥ प्रत्यवरुद्धभोजनः वंधुवधदुःखेन संकोचितभोगः ॥ राज्यफलाभेनुप्राप्तभोगो वा ॥ कथं राज्ये प्रवृत्तः ॥ प्रवृत्तो वा ततः किमकार्षीत ॥१॥ राज्यप्रवृत्तेः श्रीकृष्णस्य प्रीतिपर्यालोच्य प्रवृत्तेरित्याशयेनोत्तरमाह ॥ वंशं कुरोः संरोहयित्वा परीक्षिद्रूपेण संरोह्य अंकुरितं कृत्वा ॥ कथंभूतं ॥ वंशदवाग्निनिर्हृतं वंश एव दवो वनं तस्मा

शौनक उवाच ॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ॥ सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकार्षीत्ततः ॥१॥ सूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः ॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतिमना बभूव ह ॥२॥ निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः ॥ शशास गामिंद्र इवाजिताश्रयः परिध्युपान्तामनुजानुवर्तितः ॥३॥ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ॥ सिषिचुः स्म व्रजान्गावः पयसोधस्वतीर्मुदा ॥४॥

दद्दतो यः क्रोधरूपोऽग्निः ॥ तेन निर्हृतं दग्धं निजराज्ये निवेश्य च ॥२॥ प्रवृत्तो हि त्वमुक्त्वा किमकार्षीदित्यपेक्षायामुत्तरमाह ॥ निशम्येति ॥ प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगत्तत्त्वं तेन च भीत्यैवंभूतं तेन विधूतो ॥ विभ्रमोऽहंकर्तृत्वेवंभूतो मोहो यस्य सः ॥ अनुजैरनुवर्तितः सेवितः सन् ॥ अजितः श्रीकृष्ण एवाश्रयो यस्य सः ॥ परिधिः समुद्रस्तत्पर्यन्तां गां पृथ्वीं पालयामास ॥३॥ तस्य राज्यसमृद्धं वर्णयति काममभितमिति त्रिभिः ॥ मही सर्वकामदोग्ध्री बभूव ॥ व्रजान् गोष्ठानि ऊधस्वतीः ॥ ऊधस्वत्यः ऊधः क्षीराशयः स्थूलो यासां ता इत्यर्थः ॥ सिषिचुः अभ्यषिंचन् ॥४॥

राम
३७

अमृतत्वं कृतार्थतो ५ आधयो मनोव्यथाः व्याधयो रोगाः क्लेशाः शीतोष्णादिकृताः दैवं च भूतानि च आत्मा च हेतवो येषां आधिदैविकादीनां ते जंतूनां नाभवन् ६ इदानीं द्वारकागमनं निरूपयितुमाह उषित्वेति हस्तिनपुरे मासा ७ तं प्रवधिसिरं ८ युयुत्सुः धृतराष्ट्राद्वैश्यायां जातः गौतमः कृपः यमौ नकुलसहदेवौ ९ अन्याश्च स्त्रियः मत्स्यसुता उत्तरा तस्याः उत्तरगर्भे हत्या गर्भरक्षक रक्ष

नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै ५ नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः अजातशत्रावभवन् जंतूनां राज्ञि कर्हिचित् ६ उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ७ आमंत्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तं आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ८ सुभद्रा द्रौपदी कुंती विराटतनया तथा गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ९ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः १० सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं ११ तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथं दर्शनस्पर्शसंलापशयनास

विरहे मोहाधिक्यात् यद्वा मत्स्यसुता सत्यवती १० तेषां कृष्णविरहासहनं कैमुत्यन्यायेनाह सत्संगादिति द्वाभ्यां सतां नभोजनैः १२
सत्संगाद्धेतोर्मुक्तः दुष्टादिविषयो दुःसंगो येन सः सद्भिः कीर्त्यमानं हरिविक्रमं यस्य यशः सकृदप्याकर्ण्य सत्संगात्यक्तुं न शक्नोति ११ दर्शनादि
भिस्तस्मिन् श्रीकृष्णे न्यस्ता धीर्येषां ते १२

ध३

भा.० १
२८

अत एवानिमिषैर्नेत्रैः तमेव वीक्षमाणा स्तुत्वा चाहं लानपनाद्यर्थं चलंति स्म ॥ यतः स्नेहेन सम्प्लुताः ॥ अत एव तन्मन्ददृता निश्चेतना अपि प्रेषिताः ॥ १३ ॥ आगारात् त्रिर्यांति निर्गच्छंति स्मेति ॥ श्लोकद्वयहेतोः उद्गलितत्वात्तत्वाप्यश्रुत्यरूपाच ॥ नेत्रैः पिबंतीमिव तत्पदः ॥ तत्र हेतुः अपद्र नोद्यात् ॥ अपंगलमामूदित्येतदर्थं ॥ १४ ॥ मृदंगादयो दशवाद्यभेदाः ॥ १५ ॥ प्रेमव्रीडास्मितपूर्वकमीक्षणं यासां ताः ॥ १६ ॥ गुडाकानिद्रा तस्य

सर्वेतेनिमिषैरक्षैस्तमद्भुतचेतसः ॥ वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह ॥ १२ ॥ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकी सुते ॥ निर्यात्यगारान्नोभद्रमिति स्याद्बांधवस्त्रियः ॥ १४ ॥ मृदंगशंखभेर्यश्च वीणापणवगोमुखाः ॥ धुंधुर्यानकघंटा द्यानेदुर्दुंदुभयस्तथा ॥ १५ ॥ प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ॥ ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥ १६ ॥ सि तातपत्रं जग्राह मुक्तादामविभूषितं ॥ रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह ॥ १७ ॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते विकीर्यमाणाः कुसुमैरेजे मधुपतिः पथि ॥ १८ ॥ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजेरिताः ॥ नानुरूपानुरूपाश्च निर्गुण स्य गुणात्मनः ॥ १९ ॥ अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां ॥ कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥ २० ॥

ईशः जितनिद्रोऽर्जुनः ॥ १७ ॥ व्यजने चामरे जगृहतुः मधुपतिः श्रीकृष्णः ॥ १८ ॥ सत्याः श्रीकृष्णे तासामव्यभिचारात् ॥ किं तु नानुरूपाश्च नानुरूपाश्च ॥ निर्गुणस्य परमानंदस्वरूपस्याभिव्यक्तत्वादयो नानुरूपाः गुणात्मनो मायानुप्रनाद्यावतारे तु अनुरूपाश्चेत्यर्थः संधिरार्षः ॥ १९ ॥ सर्वासां श्रुतीनां मनोहरः ॥ उपनिषदोपि मूर्तिमत्यः सत्यस्तं संजल्पमभ्यनंदन्नित्यर्थः ॥ २० ॥

राम
२८

तत्रतेजःक्षोर्दर्याद्यतिशयेनविस्मिताभ्यः सावित्र्योन्याः स्त्रियः कथयंति नात्रविस्मयः कार्यः साक्षादीश्वरत्वादस्येति सर्वाइतिच
तुर्भिः वैष्णवाःकिलेतिप्रसिद्धौप्रमाणद्योतकः यएकएवाद्वितीयः पुरुषआसीत् सर्वाःप्रजाःकृत्स्नःकृत्वासीत् अविशेषेआत्मनिनिः
प्रपंचेनिजरूपे कदा अग्रेगुणेभ्यःगुणक्षोभात्पूर्वं तथानिशिप्रलयेच तस्यलक्षणं जगतामात्मनिजीवेनिमीलितात्मन्निति सुप्तसप्तम्यं
तंपदं जातावेकवचनं ईश्वरेलीनरूपेषुजीवेषुसत्स्वित्यर्थः ननुजीवानांब्रह्मत्वात्कथंलयस्तत्राह सुप्तासुप्तशक्तिषुसतीषुजीवोपाधिभूतस

सवैकिलायंपुरुषःपुरातनोयएकआसीदविशेषआत्मनि अग्रेगुणेभ्योजगदात्मनीश्वरेनिमीलितात्मन्निशि
सुप्तशक्तिषु २१ सएवभूयोनिजवीर्यचोदितांस्वजीवमायांप्रकृतिंसिसृक्षतीं अनामरूपात्मनिरूपनामनी
विधित्समानोनुससारशास्त्रकृत्

त्वादिशक्तिलयएवजीवलयइत्यर्थः २१ तदेवंसृष्टेरादौप्रलयानंतरंचनिःप्रपंचावस्थानमुक्त्वासृ
ष्टिप्रलययोर्मध्येसप्रपंचावस्थानमाह सएवाच्युतस्वरूपस्थितिरेवप्रकृतिमनुससार अधिष्ठितवान् भूयःपुनःसृष्टिप्रवाहस्याना
दित्वात् कीदृशीं निजवीर्यचोदितां स्वकालशक्तिप्रेरितां स्वांशभूतानांजीवानांमायां मोहिनीं अतएवसिसृक्षतीं स्रष्टुमिच्छंतीं किमर्थं
मनुससार अनामरूपेआत्मनिजीवेरूपनामनीविधातुमिच्छन् उपाधिसृष्ट्याजीवानांभोगायेत्यर्थः कर्माणिचविधातुंवेदान्कृतवानि
त्याह शास्त्रकृदिति २२

भा॰३
३९

अप्रदर्शनमतिदुर्लभमस्माभिर्लब्धमित्याह ॥ स वै अयं ॥ अयस्य परस्वरूपं अङ्गीकृत्वा ॥ निर्जितो मातरिश्वा प्राणो यैः ॥ इत्युक्तत्वमार्ष ॥ ते स्वरूपमेव प-
श्यन्ति ॥ येन भक्त्या उत्कलितं उत्कंठितः अमलो यस्य आत्मा बुद्धिस्तेन ॥ दृश्यते त्वय्यया उद्भोतिस्मातेः ॥ बुद्धिवैमल्यस्याप्ययमेव हेतुरित्याह ॥ ननु हे स-
वि ॥ एष एव सत्त्वं बुद्धिं परिमार्ष्टुं सम्यक् शोधयितुमर्हति ॥ न तु योगादय इत्यर्थः ॥ यद्वा नन्वहो ॥ एष सत्त्वं ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमनेना-
प्यदर्शीभवितुं नार्हति ॥ किं त्वनेन सदैवास्माभिर्गतव्यमित्यर्थः ॥ ३३ ॥ पुण्यश्लोकतामाह ॥ स सा वि ॥ यो वेदेषु रहस्यागमेषु च रहस्यानि रूपेके

स वा अयं यत्पदमत्र सूरयो जितेन्द्रियाणि निर्जितमातरिश्वनः ॥ पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टु-
मर्हति ॥ ३३ ॥ स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ॥ य एक ईशो जगदात्मलीलया सृजत्यव-
त्यत्ति न तत्र सज्जते ॥ ३४ ॥ यद्वाक्यधर्मेण तमो धियो नृपा जीवन्ति तत्रैष हि सत्त्वतः किल ॥ धत्ते भगं सत्यमृतं द-
यां यशो भवाय रूपाणि दधद्युगे युगे ॥ ३५ ॥

नुगीतसत्कथः अनुगीताः सत्यः कथा यस्य स एवायं ॥ ज्ञानप्रकारमाह ॥ य एक ईश इत्यादि ॥ ३४ ॥ एवंभूतस्य नानावतारे कारणमाह ॥
यद्वाहीति ॥ तमो व्याप्ता धीर्येषां ते नृपा यद्वाक्यधर्मेण जीवन्ति ॥ केवलं प्राणान् रक्षन्ति ॥ तत्र तदा एष एव भवाय स्थित्यै सत्त्वतः ॥ वि-
शुद्धसत्त्वेन रूपाणि दधत् ॥ भगादीनि धत्ते प्रकटयति ॥ युगे युगे तत्तदवसरे ॥ भगं ऐश्वर्यं ॥ सत्यं सत्यप्रतिज्ञत्वं ॥ ऋतं यथार्थोपदेशकत्वं
दयां भक्तकृपां ॥ यशः अद्भुतकर्मत्वं ॥ ३५ ॥

राम
३९

विशेषतः श्रीकृष्णावतारसौभाग्यं वर्णयंति अहो इति पंचभिः || यत यस्मादेष पुरुषोत्तमः || श्रियः श्रियः पतिः स्वजन्मना यदोः कुलं अंचति पूजय
ति सत्करोति || अतः श्लाघ्यतमं तत || चंक्रमणेन च मधोर्वनं मथुरां सत्करोति || अतस्तन्मधुपत्तनमिति तमवर्ण्यस्याप्यं त्यंतातिशयेन श्ल
घ्यमिति || तत्रापि आश्चर्यं अहो इत्यनेन || १६ || अहो बत अत्याश्चर्यं || किं तत || कुशस्थली द्वारका स्वर्गउत्लाघ इति यत्र यशस्तस्यातिरस्करी परिभवक
त्री || ७ वस्तुतः पुण्ययशः कर्त्री भवति || यद्यतः || यत्रत्याः सर्वाः प्रजाः स्वानुग्रहेण ईक्षितं प्रेक्षितं यस्मितं तत्स्मितं तत्पूर्वावलोकाय स्पृतं || यदा अतुग्रह

अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं || यदेष पुंसामृषभः श्रियःप्रियतिः स्वजन्मना चंक्रमणेन
चांचति || १६ || अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः || पश्यंति नित्यं यदनुग्रहेषितं स्मितावलो
कं स्वपतिं स्म यत्प्रजाः || १७ || नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः || पिबंति याः सख्यधरामृतं मुहु
र्व्रजस्त्रियः संमुमुहुर्यदाशयाः || १८ || यावीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान्हि शुष्मिणः || प्रद्युम्नसांबांबसुता
दयोपराः याश्चाहृता भौमवधे सहस्रशः

थमिषंतं रुष्टं || स्वस्यात्मनः पतिं श्रीकृष्णं नत्वपित्रादिवदेहमात्रपतिं नित्यं पश्यंति स्म || उषितमिति पाठे ||
स्वानुग्रहार्थमुषितं || कृतनिवासं || नैतत्स्वर्गोः स्तीत्यर्थः || १७ || हे सखि || अस्य गृहीतपाणिभिः पत्नीभिरीश्वरोयमेवं नूनं जन्मांतरेषु समर्चितः यस्मि
न्नेव धरामृते आशयः पक्षिमत्यासां ताः संमोहं प्राप्ताः इति मनोहरत्वमुक्तं || १८ || एतत्प्रपंचः या इति द्वाभ्यां || वीर्यप्रभाव एव शुल्कं मूल्यं तेन || शुष्मिणो ब
लिष्ठान् || प्रद्युम्नः सांबश्च अंबश्च सुता यासां हृक्मिणी जांबवती नाग्नजितीनां ताः अपरा यास्ताः सत्यभामादीनां ताः || याश्चापराः अस्य श्लोकस्योत्तर
श्लोकेनान्वयः || १९

भा०प्र
५०

एताः स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते । किंभूतं स्त्रीत्वं अपास्तं गतं पेशलं भद्रं स्वातंत्र्यं यस्मात्तत् । निरस्तं शौचं शुचित्वं यस्मात्तथाभूतमपि जातु कदाचिदपि नापैति न निर्गच्छति । आहृतिभिः व्याहारैः यद्वा पारिजातादि प्रियवस्त्वाहरणैः हृदि स्पृशन् आनंदयन् ॥ ३० ॥ एवंविधाः विचित्रा गिरः सस्मितेन निरीक्षणेनाभिनंदन् स्वसहार्दयो ॥ ३१ ॥ मधुद्विषो गोपीथाय रक्षणाय स्नेहात्परेभ्यः शंकितः सन् प्रायुंक्त । हस्त्यश्वरथपदातयो नांगान्यस्यास्तां चतुर्विधामित्येवं चतुरंगिणीमित्यनेन सेना ॥ ३२ ॥ पांडोः कुरुवंशजत्वात्पांडवा अपि कौरवा एव तान् । प्रियैः सुहृद्बांधवादिभिः सह ॥ ३३ ॥ कुरुक्षेत्र

एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते । यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिः हृदि स्पृशन् ॥ ३० ॥ एवंविधा गदंतीनां स गिरः पुरयोषितां । निरीक्षणेनाभिनंदन् सस्मितेन ययौ हरिः ॥ ३१ ॥ अजातशत्रुः पृतनां गोपीथाय मधुद्विषः । परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीं ॥ ३२ ॥ अथ दूरागतान् शौरिः कौरवान्विरहातुरान् । संनिवर्त्य दृढं स्निग्धान्प्रायात्स्वनगरीं प्रियैः ॥ ३३ ॥ कुरुजांगलपांचालान् शूरसेनान्सयामुनान् । ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतान्नथा ॥ ३४ ॥ मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् । आनर्तान्भार्गवोपागाच्छ्रांतवाहो मनाग्विभुः ॥ ३५ ॥ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः । सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥ ३६ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे दशमोऽध्यायः ॥

कुरुदेशांतर्गतमेव । क्रमोऽत्र न विवक्षितः ॥ ३४ ॥ मरुर्निर्जलदेशः धन्वोल्पोदकः स विशेषः उपागात्प्राप्तः हे भार्गव मनाक् ईषत् श्रांता वाहा यस्य सः ॥ तत्र तत्र देशे । तत्रत्यैर्जनैः प्रत्युद्यतानि निवेदितानि अर्हणानि उपायनानि यस्मै सः ॥ सायं अपराह्णे । पश्चाद्दिशां पश्चिमां दिशं भेजे प्राप्तः तदा गविष्ठः स्वर्गस्थः सूर्यः गां उदकं गतः प्रविष्टः अस्तंगत इत्यर्थः । अद्भ्यो वा एषः प्रातरुदेत्यपः सायं प्रविशतीति श्रुतेः । यद्वा तरसायं काले ज्ञाने ध्यानरतोऽयं गविष्ठो भूमौ स्थितः ततो गां जलाशयं गतः सन्पश्चाद्दिशं सायं संध्यां भेजे उपासितवानित्यर्थः ॥ ३६ ॥ इति प्रथमे दशमः ॥

राम
५०

आनंदैः स्तूयमानस्य गुणान्निर्विश्य बंधुभिः एकादशे रतिः सम्यग्द्वारकौकस्य वर्ण्यते॥ उत्सवे हस्तचलत्तोरणं बहुजनतोरणं॥ उत्तमसद्गतरीपालिस्वपुरमनु-
प्राविशत्॥ स्वृद्धान्समृद्धान्॥ दरवरं पांचजन्यं शंखवरं दध्मौ वादितवान्॥१॥ दरः शंखः उच्चकाशे॥ धवलं उदरं यस्य सः॥ उरुक्रमस्याधरस्य शोणिम्ना शो-
नशोणिमा यस्य सः॥ कथं उच्चकाशे अब्जखंडे राजकमलसमूहे कलहंसो राजहंसः उच्चकाशे तद्वत्॥२॥ जगतो भयस्यापि भयावहं॥ प्रत्युद्ययुः प्रत्युज्जग्मुः भ-
र्तृदर्शने लालसं औत्सुक्यं यासां ताः॥३॥ तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिता बलयः उपायनानि याभिस्ताः निरपेक्षेऽपि तस्मिन्नादरेण समर्पणे दृ-

सू० उ० च॥ आनर्त्तान्सउपव्रज्य स्वृद्धाञ्जनपदान्स्वकान्॥ दध्मौ दरवरं तेषां विषादं शमयन्निव॥१॥ स उच्चकाशे धवलोदरो
दरोप्युरुक्रमस्याधरशोणशोणिमा॥ दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः॥२॥ तमुपश्रुत्य निनदं जगद्भ-
यभयावहं॥ प्रत्युद्ययुः प्रजाः सर्वाः भर्तृदर्शनलालसाः॥३॥ तत्रोपनीतबलयो रवेर्दीपमिवादृताः॥ आत्मारामं पूर्णकामं
निजलाभेन नित्यदा॥४॥ प्रीत्युत्फुल्लमुखाः प्रोचुः हर्षगद्गदया गिरा॥ पितरं सर्वसुहृदमवितारमिवार्भकाः॥५॥ नताः स्मते ना-
थ सदांघ्रिपंकजं विरिंचिवैरिंच्यसुरेंद्रवंदितं॥ परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः॥६॥ भवाय नस्त्वं भव विश्व-
भावन त्वमेव माताथ सुहृत्पतिः पिता॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम॥७॥

ष्टांतः रवेर्दीपमिवेति पितरं सुतार्भकाः इव तं सर्वसुहृदमवितारं रक्षितारं स्वरक्षणे नोदयः॥४॥ सुहृत्त्वेनैवावितारं न तु कामेन अत्र हेतुः आत्मारामा तत्रापि हेतुः परम-
नरनिजसुखरूपलाभेनैव पूर्णकामं॥५॥ किमूचुरित्याह नताः स्मेति॥ विरिंच्यो ब्रह्मा वैरिंच्याः सनकादयः सुरेंद्राः इंद्रादयः परं क्षेममिच्छतां परायणं परमं शरणं कुतः
परेषां ब्रह्मादीनां नियंतुरपि कालो यत्र प्रभुर्न भवेत्॥६॥ अतो भवाय उद्भवाय नोऽस्माकं त्वं भव हे विश्वभावन॥ कृतिनः कृतार्थाः बभूविम जाता वयं॥७॥

कथं वयं नाथ चिरोषिते त्वयि प्रपन्न तृष्णा स्खलिता तापतोषणी ॥ जीवेम ते सुंदर हास शोभितं अपश्यमाना वदनं मनोहरं ॥५०॥ टीका ॥ प्रपन्ना तृष्णारूपो योऽस्खलितापः तस्य तोषणी नाशकेति प्रपन्नानां तृष्णासंभवात् ॥५०॥

भा॰श्र
४१

कृतार्थत्वमेवाह ॥ अहो भवता वयं सनाथाः स्म यद्यस्मात्त्वद्रूपं पश्येम त्रैविष्टपानामपि दूरे दर्शनं यस्य तत् देवानामपि दुर्लभमित्यर्थः प्रेम्णा यत्स्मितं तेन तद्युक्तं स्निग्धं निरीक्षणं यस्मिन् ॥ तदाननं यस्मिन् तद्रूपं सर्वेषु चांगेषु सौभगं यस्मिन् तत् ॥८॥ अर्भका इव सकरुणमाह ॥ यर्हि यदा भो अंबुजाक्ष नो भवानिति पाठे नः अस्मान् रक्षेति ॥ अस्मान् अनादृत्य अपससार अपहाय जगाम ॥ कुरून् हस्तिनापुरं ॥ मधून् मथुरां वा ॥ तत्र तदा ॥ रविं विना अक्ष्णोर्यथा ॥ एवं तव नत्विरीयानां अस्माकमपीत्यर्थः ॥९॥ इति च एवंविधाः अन्याश्चोच्चारिता वाचः ॥ अ एव

अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं ॥ प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगं ॥८॥ यर्ह्यंबुजाक्षापससार भो भवान् कुरून्मधून्वाथ सुहृद्दिदृक्षया ॥ तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाच्युत ॥९॥ इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ॥ शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीं ॥१०॥ मधुभोजदशार्हार्हकुकुरांधकवृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥११॥ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियं ॥१२॥

नः दृष्ट्या सामिनंदावलोकनेनानुग्रहं कुर्वन् ॥ पुरीं द्वारकां प्राविशत् ॥१०॥ तां द्वारकां विशिनष्टि पंचभिः ॥ आत्मतुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षिता ॥११॥ सर्वर्तुषु सर्वे विभवाः पुष्पादिसंपदो येषां ते पुण्यवृक्षाः लताश्च मालतीमंडपाश्च येषु ते तथा उद्यानादिभिः वृता ये पद्माकराः सरांसि तैः श्रीः शोभा यस्यां तां ॥ उद्यानं फलप्रधानं ॥ उपवनं पुष्पप्रधानं ॥ आरामः क्रीडार्थं वनं ॥१२॥

एम
४१

गोपुरं पुरद्वारं ॥ द्वारं गृहद्वारं कृतानि कौतुकेनोत्सवेन तोरणानि यस्यां तां ॥ गृहद्वारि चिह्नांकिता ध्वजाः जयपत्रप्रत्रांकिताः पताकाः चित्राणां
ध्वजपताकानामग्रैरंतः प्रतिहत आतपो यस्यां तां ॥१३॥ संमार्जितानि निःसारितरजस्कानि महामार्गा यस्यां तां ॥ महामार्गाः राजमार्गाः
रथ्या इतरमार्गाः ॥ आपणकाः पण्यवीथयः ॥ वस्त्राण्युपकरणानि ॥ फलादिभिर्हृद्यां ॥ अवकीर्णां ॥१४॥ १५॥ प्रवेष्टुं तत्रात्मानं आयातं निशम्य श्रु

गोपुरद्वारमार्गेषु कृतकौतुकतोरणां ॥ चित्रध्वजपताकाग्रैरंतः प्रतिहतातपां ॥१३॥ संमार्जितमहामार्गरथ्यापणकचत्वरां
सिक्तां गंधजलैरुप्तां फलपुष्पाक्षतांकुरैः ॥१४॥ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ॥ अलंकृतां पूर्णकुंभैर्बलिभिर्धूपदी-
पकैः ॥१५॥ निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१६॥ प्रद्युम्नश्चारुदेष्णश्च सांबो
जांबवतीसुतः ॥ प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ॥१७॥ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः ॥ शंखतूर्यनिना-
देन ब्रह्मघोषेण चादृताः ॥१८॥ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥ वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥१९॥
लसत्कुंडलनिर्भातवदनाश्रियः ॥२०॥ कपोल

त्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः ॥१६॥ प्रहर्षवेगेन उच्छ्वसितानि उल्लंघितानि
निशयनादीनि यैस्ते शशाङ्कुतगतै ॥१७॥ वारणेंद्रं मंगलार्थं पुरतः कृत्वा ॥ ससुमंगलैः सुमंगलपुष्पादियुक्तपाणिभिः ब्रह्मघोषो मंत्रपाठः प्रणयेन स्ने-
हेन आगतं साध्वसं संभ्रमो येषां ते ॥१८॥ वारमुख्या नगरयोषितः प्रत्युज्जग्मुः लसत्कुंडलैर्निर्भातानि दीप्तानि कपोलानि तैर्वदनेषु श्रीर्यासां ताः वारमुख्या न-
र्नकोवेश्याः इति यावत ॥१९॥२०॥

अद्भुतानि चेति चकारस्य वंदिनश्चेत्यन्वयः ॥ नरा नवरसाभिनयचतुराः ॥ तालाद्यनुसारेण नृत्यंतो नर्त्तकाः ॥ गंधर्वा गायकाः ॥ सूताः पौराणिकाः प्रोक्ताः मागधा वंशशंसकाः ॥ वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ ते सर्वे गायंति चेति चकारस्यान्वयः ॥ २० ॥ यथाविधि यैः सह यथोचितं तेन तेषामुपसंगमं कृत्वा सर्वेषां मानं कृतवानित्यर्थः ॥ २१ ॥ नराह प्रह्वेति ॥ प्रह्वत्वं शिरसा नतिः ॥ अभिवादनं वाचा नतिः ॥ आश्वास्याभयं दत्वा श्वपाकानप्यभि

नरनर्त्तकगंधर्वाः सूतमागधवंदिनः ॥ गायंति चोत्तमश्लोकचरितान्यद्भुतानि च ॥ २० ॥ भगवांस्तत्र बंधूनां पौराणामनुवर्त्तिनां ॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे ॥ २१ ॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ॥ आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैः प्रभुः ॥ २२ ॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥ आशीर्भिर्युज्यमानोन्यैर्वंदिभिश्चाविशत्पुरं ॥ २३ ॥ [illegible] राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ॥ हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥ २४ ॥ नित्यं निरीक्षमाणानां यदपि द्वारकौकसां ॥ न वितृप्यंति हि दृशः श्रियो धामांगमच्युतं ॥ २५ ॥ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशां ॥ बाहवो लोकपालानां सारंगाणां पदांबुजं ॥ २६ ॥

व्याप्य वैरैरभीष्टदानैश्च मानं कृतवान् ॥ २२ ॥ अन्यैश्च वंदिभिश्च ॥ २३ ॥ तदीक्षणेन महानुत्सवो यासां ताः ॥ २४ ॥ यत यस्मात् नित्यं सदा अच्युतं निरीक्षमाणानामपि दृशो नैव तृप्यंति ॥ अतः आरुरुहुः ॥ कथंभूतं श्रियः शोभायाः धाम स्थानं अंगं यस्य तं ॥ २५ ॥ एतदेवाभिनयेनाह ॥ श्रियो लक्ष्म्याः यस्योरः वक्षः निवासः ॥ यस्य मुखं सर्वप्राणिनां दृशां नेत्राणां सौंदर्यामृतपानाय पात्रं ॥ यस्य बाहवो लोकपालानां निवासः ॥ सारंगाः श्रीकृष्णं संगायंतीति सारंगा भक्ताः ॥ तेषां यस्य पादांबुजं निवासः ॥ तं निरीक्षमाणानां दृश इति पूर्वेणान्वयः ॥ २६ ॥

सितैशतपात्रव्यजनैरुपस्कृतोमंडितः अर्कश्च उडुपोनक्षत्रसहितश्चंद्रश्च चापमिंद्रधनुश्च । वैद्युतं विद्युत्तेजश्चतैः । अर्कः छत्रस्योपमानं नक्ष-
त्राणि पुष्पवृष्टेः । चंद्रः परिभ्रम[illegible]कृतमंडलाकारयोश्चामरव्यजनयोः चापं वनमालायाः विद्युत्तेजः पिशंगवाससोः । अभ्रं तूपमेयं य-
द्घनस्योपरि सूर्यबिंबं उभयतश्चंद्रो सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं । स्थिरं विद्युत्तेजश्च यदि भवेत्तर्हि स मेघो यथा भाति तथा ह-
रिर्बभावित्यर्थः ॥ २७ ॥ देवकीप्रमुखाः सप्त ववंद इति मातृगौरवविशेषख्यापनार्थमुक्तं । अष्टादशापि वसुदेवस्य भार्या मातरस्तथाप्यत्र
मस्कता एव ॥ २८ ॥ २९ ॥ सहस्राणि षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञेयं ॥ ३० ॥ प्रोष्य दशांते उषित्वा आगतं दूरादेव विलोक्य । संजा-

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि । पिशंगवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ॥ २७ ॥
प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः । ववंदे शिरसा सप्त देवकीप्रमुखा मुदा ॥ २८ ॥ ताः पुत्रमंकमारोप्य स्नेहस्नुत-
पयोधराः । हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥ २९ ॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमं । प्रासादा यत्र पत्नीनां
सहस्राणि च षोडश ॥ ३० ॥ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः । उत्तस्थुरारात्सहसासनाशयात्साकं व्रतै-

तो मनसि महोत्सवो यासां ताः । आसनादाशयाच्च । आसनाद्देहेनोत्तस्थुः । आशयोंतःकरणं तस्माद्धृदयात्मना उत्तस्थुः ॥ व्रीडितलोचनाननाः ॥ ३१ ॥
श्रीकृष्णेनात्मनः संश्लेषेतः करणाव्यवधानमपि नासहंतेत्यर्थः । व्रीडितानि लोचनान्याननानि च यासां ताः । अपांगैरेव वीक्षणात् व्रीडितलोचनाः । अवन-
तमुखत्वात् व्रीडिताननाः । साकं व्रतैरिति हास्यक्रीडावर्जनादिनियमाः अर्पिताभ्यः उत्तस्थुरित्यर्थः । धृतव्रता एवोत्तस्थुरिति वा । उतानिर्यत्नवत्यो याः कानि की-

आयांतं तं पतिं दर्शनात्पूर्वमात्मनाऽभ्यापरिरेभिरे ततो दृष्टिभिः ततः समीपमागतमात्मजैः पुत्रैः गृहीतकंठमालिंगयत्पश्चाद्वपुषमालिंगि
तवत्य इत्यर्थः अत्र हेतुः दुरंतभावा गंभीराभिप्रायाः तदा च ताभ्यां नेत्रयोः निरुद्धमप्यश्रु बाष्पं वैलक्ष्यात् वेवशपादाभ्यां वर्तिष्यत्वेत्यव अ
न एव धैर्यहान्या विलज्जतीनां हे भृगुवर्य विवेकप्राप्तवति २१ पार्श्वगतः समीपस्थः तत्रापि रहोगतः एकांते प्रवर्तते स्म परे परे प्रति क्षणान्न

तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं ॥ निरुद्धमप्यास्रवदंभु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्ल
वात् ॥ २१ ॥ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं ॥ परे परे का विरमेत तत्पदाच्चलापि
यच्छ्रीर्न जहाति कर्हिचित् ॥ २२ ॥ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां ॥ विधा
य वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥ २४ ॥ स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया ॥ रे
मे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ॥ २५ ॥

वं नवमेव ॥ अत्र केउत्यन्यायः का विरमेतेति चला चंचला स्वभावापि ॥ २२ ॥ उक्तं श्रीकृष्णचरितं संक्षिप्याह एवमिति द्वाभ्यां ॥ क्षितेर्भाराय ज
न्म येषां ॥ अक्षौहिणीभिः कृत्वा परिवृतं सर्वतः प्रसृतं तेजः प्रभावो येषां ॥ श्वसनो वायुर्वेणूनामन्योन्यसंघर्षणानलं विधाय मिथो द्रोहे
न यथोपशममेति तद्वत् ॥ २४ ॥ स्त्रीरत्नकूटस्थः उत्तमस्त्रीकदंबस्थः ॥ २५ ॥

नन्वेवं बह्वीभिरगारादिभिः संसारिणीतीतः कथं भगवाननवतीर्ण इत्युच्यते॥ तत्राह उद्दामेति द्वाभ्यां यासामुद्दामो गम्भीरो यो भावो ऽभिप्रायः तस्य
पिशुनः सूचकोमलो वल्गुः सुंदरो हासः व्रीडावलोकश्च ताभ्यां निहितः॥ अपि मदनः श्रीमहादेवोपि तं मुत्यलज्जया चापं पिनाकं जहात
एवायं प्रभावान्नायाः स्त्रियस्त्वेतावद्विवर्हितं॥ यद्वा भगवतो मोहिनीरूपेण महेशोऽपि मोहित एव॥ एताश्च तादृग्विलासा एवेति तथोक्तं.
ताः कुहकैः कपटैः विभ्रमैर्यस्येन्द्रियं मनः विमथितुं क्षोभयितुं न शेकुः॥ २६॥ तं प्राकृतमस्मत्प्रायं प्राकृतो लोकः॥ आत्मौपम्येन स्वसादृश्येन मं

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासां॥ संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्ये-
न्द्रियं विमथितुं कुहकैर्न शेकुः॥ २६॥ तमयं मन्यते लोको ह्यसंगमपि संगिनं॥ आत्मौपम्येन मनुजं व्यापृण्वानं
यतोऽबुधः॥ २७॥ एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः॥ न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया॥ २८॥

गिनं मनुजं मन्यते॥ अत्र हेतुः व्यापृण्वानं व्याप्रियमाणं॥ यतोऽयमबुधः अतत्त्ववित्॥ २७॥ कुत इत्यपेक्षायामैश्वर्यलक्षणमाह एतदिति
ईशस्य ईशनमैश्वर्यं नामैतदेव॥ किं तत्॥ प्रकृतिस्थोऽपि तस्याः गुणैः सुखदुःखादिभिः सदैव न युज्यत इति यत्॥ यथा आत्मस्थैरानंदा
दिभिरात्माश्रयापि बुद्धिर्न युज्यते तद्वत्॥ वैधर्म्ये दृष्टान्तो वा॥ आत्मस्थैः सत्त्वप्रकाशादिभिर्यथा बुद्धिर्युज्यत इति एवं वा॥ अस्मदादेर्देहः
तत्रस्थैर्गुणैः तदाश्रया बुद्धिः तदुपाधिर्जीवो यथा युज्यते एवं प्रकृतिस्थोऽपि तद्गुणैर्न युज्यत इति यत् एतदीशनमीशस्येति॥ २८॥

भा॰प्र
४४

तत्त्वतस्त्वयोपि तत्त्वं न जानन्तीत्याह। तं स्त्रैणं आत्मवश्यं रहः एकान्ते अनुव्रतं अनुगतं च मेनिरे भर्तुरीश्वरं अप्रमाणविदः प्रमाणमियत्तां महिमानमजानन्त्य इत्यर्थः।
ईश्वरं ईशमुक्तं मतयः अहंकारवृत्तयो यथात्माधीनं स्वधर्मयोगिनं मन्यन्ते तद्वत्॥ यद्वा यथा यथार्थतामप्राप्ताः मतयः कल्पनाः तथा तथा तमीश्वरं स्त्रैणादिरूपं
मेनिरे इत्यर्थः॥३८॥ इति प्रथमे एकादशः॥ ततो जन्म पुत्रमृगयायां द्रौणिरंडादि विस्तरेण तु। द्वादशे तत्तथैवाथ परीक्षिज्जन्म वर्ण्यते॥ परीक्षितोऽथ राजर्षेर्जन्मकर्म
विलापनं॥ संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयमिति प्रतिज्ञातं यत्पांडवानां राज्यस्थितिः परीक्षितो जन्म तदुपाख्यानप्रसंगं तत्र माध्यायमपि निरूपिता इत्य
मोपोद्घातिकमुक्त्वा तद्वार्तापूर्वकं पृच्छति॥ अश्वत्थाम्नेति उपसृष्टेन विसृष्टेन॥ तस्य जन्मेत्यादेः ब्रूहि नः इत्यनेनान्वयः सपरीक्षित् अत्यदेहं त्यक्त्वा॥२॥ यात्येव

तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः। अप्रमाणविदो भर्तुरीश्वरं मतयो यथा॥३९॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे श्रीकृष्णद्वारका
प्रवेशो नामैकादशोऽध्यायः॥ शौनक उवाच॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा। उत्तराया हतो गर्भ ईशेनाजीवितः पुनः॥१॥
तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः। निधनं च यथैवासीत्स प्रेत्य गतवान्यथा॥२॥ तदिदं श्रोतुमिच्छामो गदितुं यदि मन्यसे। ब्रूहि नः
श्रद्दधानानां यस्य ज्ञानमदाच्छुकः॥३॥ सूत उवाच॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः। निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसे
वया॥४॥ संपदः क्रतवो लोकाः महिषी भ्रातरो मही। जंबूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतं॥५॥ किं ते कामाः सुरस्पार्हाः मुकुंदमनसो द्विजाः।
अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे॥६॥

न त्वा तापयामीत्याह। गदितुं यदि मन्यसे अनुग्रहेण तर्हि ब्रूहीति॥ यस्य ज्ञानमदाच्छुक इति श्रवणेच्छायां
कारणं॥३॥ निःस्पृहस्यापि राज्ञः श्रीकृष्णानुग्रहात् तत्तादृक् पौत्रः संपन्न इति वक्तुं तस्य कृष्णभक्त्यादिकमाह। अपीपलदिति त्रिभिः। पितृवदपीपलत् पाल
यामास॥४॥ क्रतवस्तदुपार्जिता लोकाश्च॥५॥ सुरस्पार्हाः सुराणां स्पृहणीया अपि ते संपदादयः कामा विषया राज्ञः किं मुदं प्रीतिं अधिजह्रुः न कृतवंत इत्यर्थः। त
त्र हेतुः मुकुंद एव मनो यस्येति॥ क्षुधितस्य अन्नं विना इतरे स्रक्चंदनादयो यथा न कुर्वंति तद्वत्॥६॥

राम
४४

प्रतीतमाहमातुरिति ७ ॥ पुरटं हेमवर्णं स्फुरत्पुरटमौलिर्यस्य तं ॥ व्रीह्यादिभ्यश्चेति इति प्रत्ययः अपीच्यं सुन्दरं दृश्यत इति दर्शनं रूपं य
स्य तं ॥ तडिद्वद्वाससी यस्येति श्याममिति च पदद्वयाभ्यां विद्युद्युक्तमेघोपमाकृतिता ॥ अच्युतं अविकारं ८ ॥ तप्तं हाटकोत्तीर्णं यत्कांचनं तन्मये कुंडले
यस्य तं ॥ क्षतजाक्षं संरंभाद्रक्तनेत्रं ॥ अहो मदङ्गं मा विगर्भोऽपीडेति क्रोधेनेति भावः ॥ ९ ॥ अस्त्रतेजो विधमन्तं विनाशयन्तं ॥ नीहारं हिमं गो

मातुर्गर्भगतो वीरः स तदा भृगुनंदन ॥ ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ॥ ७ ॥ अंगुष्ठमात्रममलं स्फुरत्पुरटमौ
लिनं ॥ अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं ॥ ८ ॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं ॥ क्षतजाक्षं गदापा
णिमात्मनः सर्वतो दिशं ॥ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः ॥ ९ ॥ अस्त्रतेजः स्वगदया नीहारमिव गोप
तिः ॥ विधमंतं सन्निकर्षे पर्यैक्षत क इत्यसौ ॥ १० ॥ विधूय तदमेयात्मा भगवान्धर्मगुब्विभुः ॥ मिषतो दशमास
स्य तत्रैवांतर्दधे हरिः ॥ ११ ॥ ततः सर्वगुणोदर्के सानुकूलग्रहोदये ॥ जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा ॥ १२ ॥

पतिः सूर्य इव सन्निकर्षे समीपे ददर्श दृष्ट्वा चासौ क इति पर्यैक्षत वितर्कितवान् १० ॥ अमेयात्मा कथं तद्विधूतवानित्यवितर्क्यरूपः ॥ धर्मं गोपाय
तीति धर्मगुप् ॥ दशमासस्य परिच्छेद्यस्य तस्य मिषतः पश्यतः ॥ तत्रैव दृष्टस्तत्रैवांतर्हितः न त्वन्यत्रागतः ॥ यतो विभुः सर्वगः ॥ ११ ॥ उदर्क उत्तरफलं सर्व
गुणानामुत्तरोत्तराधिक्यमुदर्के लग्ने ॥ तत्र हेतुरनुकूलैरन्यैर्ग्रहैः सहितानां शुभग्रहाणामुदयो यस्मिन् ॥ १२ ॥

जातकं जातकर्म । मंगलं पुण्याहं ॥१३॥ वरान् श्रेष्ठान् । स्वन्नं शोभनमन्नं च । तीर्थवित् दानकालज्ञः । यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं
छिन्ने नाले ततः पश्चात् सूतकं तु विधीयत इति वचनात् ततः पूर्वं प्रादात् आमान्नं वा । प्रजातीर्थे पुत्रोत्पत्तिपुण्यकाले । पुत्रे जाते व्यती-
पाते दत्तं भवति चाक्षयमिति स्मृतेः । देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां । आयांति हि नृपश्रेष्ठ पुण्याहमिति चाब्रुवन्निति च ॥१४॥
हे पौरवर्षभ कुरूणां कुरुवंश्यानां ॥१५॥ शुक्ले शुद्धे अस्मिन् प्रजातंतौ दैवेन कथंभूतेन । अप्रतिघातेन दुर्वारेण संस्थां नाशं उपेयुषि

तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः । जातकं कारयामास वाचयित्वा च मंगलं ॥१३॥ हिरण्यं गां महीं ग्रामान् ह
स्त्यश्वान्नृपतिर्वरान् । प्रादात्स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥१४॥ तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितं ।
एष ह्यस्मिन्प्रजातंतौ कुरूणां पौरवर्षभ ॥१५॥ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि । रातो वोऽनुग्रहार्थाय विष्णुना प्र
भविष्णुना ॥१६॥ तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः । भविष्यति न संदेहो महाभागवतो महान् ॥१७॥ श्रीराजोवाच ॥
अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः । अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥१८॥

गते सति । रातो दत्तः अनुग्रहार्थाय यस्मात् प्रभवनशीलेन श्रीविष्णुना रातो दत्तः ॥१६॥ तस्माल्लोके विष्णुरात इति नाम्ना भविष्यति । महाभागवतश्च गुणैश्च
महान् भविष्यति नात्र संदेह इति तं राजानं ब्राह्मणा ऊचुरिति त्रयाणामन्वयः ॥१७॥ महाभागवतो भविष्यतीत्युक्ते हृष्टः पृच्छति । अपि स्विदिति
किं स्वित् साधुवादेन हेतुना यशसा पूर्वजाननुवर्तिता भविष्यतीति पूर्वेषामेवातः परमप्यनुषंगः ॥१८॥

प्रजानामविता रक्षकः ॥ मानवः मनोः पुत्रः ॥ ब्रह्मण्योऽभिहितं सत्यप्रतिज्ञस्त्वं श्रीरामो यथा ॥ ९ ॥ उशीनरदेशाधिपतिः शिबिः येन स्वमांसं श्येनाय
दत्त्वा शरणागतः कपोतो रक्षितः ॥ स्वानां ज्ञातीनां ॥ यज्वानां च यशो विस्तारका दौष्यंतिर्भरत इव ॥ १० ॥ अर्जुनयोः पार्थकार्त्तवीर्ययोः ॥ ११ ॥ हिमवानि
व सततं निषेव्यः ॥ अनन्यगतिकत्वेन वसुधेव तितिक्षुः क्षंता ॥ धात्र्या मात्रा पितराविव मया हितेच्छुः ॥ १२ ॥ पितामहो ब्रह्मा तेन समः साम्ये समत्वे

ब्राह्मणाज्ञतुः ॥ पार्थ प्रजाविता सम्राडिक्ष्वाकुरिव मानवः ॥ ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा ॥ ९ ॥ एष दाता शरण्य
श्च यथा ह्यौशीनरः शिबिः ॥ यशो वितनिता स्वानां दौष्यंतिरिव यज्वनां ॥ १० ॥ धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः ॥ हुता
शइव दुर्धर्षः समुद्र इव दुस्तरः ॥ ११ ॥ मृगेन्द्र इव विक्रांतो निषेव्यो हिमवानिव ॥ तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ॥ १२ ॥
पितामहसमः साम्ये प्रसादे गिरिशोपमः ॥ आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥ १३ ॥ सर्वसद्गुणमाहात्म्ये एष कृ
ष्णमनुव्रतः ॥ रंतिदेव इवोदारो ययातिरिव धार्मिकः ॥ १४ ॥ धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः ॥ आहर्तैषोऽश्वमे
धानां वृद्धानां पर्युपासकः ॥ १५ ॥ राजर्षीणां जनयिता शास्ता चोत्पथगामिनां ॥ निगृहीता कलेरेष भुवो धर्मस्य कारणात
तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात ॥ प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः ॥ १७ ॥

रमाश्रयो हरिः ॥ १३ ॥ सर्वसद्गुणमाहात्म्ये एतस्मि
स्मिन् श्रीकृष्णमनुव्रतः ॥ १४ ॥ धृत्या धैर्येण सत्सु सद्ग्रहोऽभिनिवेशो यस्य सः ॥ आहर्ता कर्ता ॥ १५ ॥ राजर्षीणां जनयिता जनयिता ... ॥ १६ ॥ द्विजपुत्रेण प्रेरिता
त्तक्षकात् आत्मनो मृत्युमुपश्रुत्य हरेः पदं प्रपत्स्यते भजिष्यति ॥ १७ ॥

आहूतो भगवान्राज्ञा याजयित्वा द्विजैर्नृपं ॥ उवास कतिचिन्मासान्सुहृदः प्रियकाम्यया ॥३५॥ ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बंधुभिः ॥ ययौ द्वारवतीं ब्रह्मन्सार्जुनो यदुभिर्वृतः ॥३६॥

ततश्च जिज्ञासितमात्मनो याथात्म्यं येन सः इदं शरीरं गंगायामाहित्वा अकुतोभयं पदं यास्यति २८ लब्धा उपचितिः पूजा यैस्ते २९ परीक्षिदिति नामनिर्वक्ति स एष इति यद्यस्मात्प्रभुः समर्थः सन् गर्भे दृष्टं पुरुषमनुध्यायन् इह दृश्यमानेषु नरेषु मध्ये सर्वमपि नरं परीक्षेत अयमसौ भवेदिति नो वेति विचारयेदतः परीक्षिदिति विख्यातः पूर्वं दृष्टमिति वा पाठः ३० शुक्ले शुक्लपक्षे स प्रसिद्ध उडुपो चन्द्रः यथा काष्ठाभिः पंचदश कलाभिरापूर्यमाणो वर्द्धते एवं पितृभिः युधिष्ठिरादिभिः कामैश्चानुदिवसं कलाभिश्चापूर्यमाणो ववृधे ३१ पूर्वं मयप्रकृष्णोक्तानश्वमेधान्त्वा

जिज्ञासितात्मयाथात्म्यो मुनेर्व्यासस्य तादसो ॥ हित्वेदं नृप गंगायां यास्यत्यद्धाऽकुतोभयं ॥२८॥ इति राज्ञ उपादिश्य विप्रा जातककोविदाः ॥ लब्धोपचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ॥२९॥ स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः ॥ गर्भे दृष्टमनुध्यायन्परीक्षेत नरेष्विह ॥३०॥ स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः ॥ आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहं ॥३१॥ यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया ॥ राजा लब्धधनो दध्यौ नान्यत्र करदंडयोः ॥३२॥ तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः ॥ धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः ॥३३॥ तेन संभृतसंभारो धर्मपुत्रो युधिष्ठिरः ॥ वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिं ॥३४॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे परीक्षिज्जन्माद्युत्कर्षो नाम द्वादशोऽध्यायः ॥१२॥

वक्ष्यमाणप्रकारं कथयति ज्ञातिद्रोहस्य हानेच्छया यक्ष्यमाणः करदंडयोरन्यत्र ताभ्यां विना न लब्धधनो दध्यौ चिंतयामास करदंडस्य परिजनभरणमात्रोपक्षीणत्वात् ३२ प्रहीणं मरुत्तस्य यज्ञे त्यक्तं सुवर्णपात्रादिकमानीतवंतः ३३ संभृतसंभारः संपादितयज्ञोपकरणः भीतेन ज्ञातिद्रोहात् ३४ इति प्रथमे द्वादशः ॥१२॥

निर्गमो धृतराष्ट्रस्य विदुरोक्त्या त्रयोदशे । उक्तः पौत्राभिषेकेण वनं राज्ञो महोदयं ॥ इदानीं परीक्षितः कलिनिग्रहादिकर्माणि कथयिष्यन् विदुरागमनेन धृतराष्ट्रप्रस्थानं ततोऽर्जुनागमनं ततः कृष्णान्तर्धानं ततः पाण्डवप्रस्थानं च निरूपयति त्रिभिरध्यायैः ॥ गतिं हरितयात्मगत्या वाप्तविवित्सितं ज्ञातुमिष्टं येन ॥ १ ॥ तदेवाह यावतः कर्मयोगभक्त्यादिविषयान् प्रश्नान्प्रथमं कृतवान् ॥ कौषारव

सूत उवाच ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं ॥ ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः ॥ १ ॥ यावतः कृतवान्प्रश्नान्क्षत्ता कौषारवाग्रतः ॥ जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह ॥ २ ॥ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः ॥ धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥ ३ ॥ गांधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी ॥ अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः ॥ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं ॥ ४ ॥ अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः ॥ मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यकातराः ॥ ५ ॥

स्य मैत्रेयस्याग्रतः पश्चात्तद्विवक्षुरप्रश्नार्थज्ञानमात्रेण गोविंदे जातैकांतभक्तिः कृतार्थः सन् तेभ्यः प्रश्नेभ्यः उपरराम ततः परं न विजिज्ञासितवान् ॥ २ ॥ सूतः संजयः शारद्वतः कृपः ॥ ३ ॥ कृपी द्रोणभार्या ॥ जामयः ज्ञातिभार्याः अन्याश्च ज्ञातिस्त्रियः प्राणं तन्व इवेति ज्ञातश्चिरं मूर्छितदोषतः प्राणे समागते सति तन्वः करचरणाद्या यथा निश्चेष्टा भवंति ॥ उत्तिष्ठन्ति ॥ चिरात्स्पंदिताः विभूतेषु यथा ॥ निष्ठन्ति तद्वत् ॥ ४ ॥ विरहेण यदौत्कंठ्यं तेन कातराः विवशाः ॥ ५ ॥

भा०प्र
५७

ई पक्षिणो ह्यपत्यानि पश्यन्ति स्नेहेन पक्षच्छायया वर्द्धयंति तद्वत् ॥ युष्मत्पक्षपातच्छायया समेधितान्नोस्मान् किं स्मरथ ॥ समेधितत्वमेवाह
विपद्गणाद्यस्मान्मोचिताः स्म ॥ ७ ॥ वो युष्माभिः कया वृत्त्या वर्त्तितं देहवृत्तिः कृता ॥ कानि वा तीर्थादीनि सेवितानीति ॥ ८ ॥ भवतां वा तीर्थाटनं

राजा तमर्हयांचक्रे कृतासनपरिग्रहं ॥ तं भुक्तवंतमासीनं विश्रांतं सुखमासने ॥ प्रश्रयावनतो राजा प्राह तेषां च शृण्वतां ॥
युधिष्ठिर उवाच ॥ अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् ॥ विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ॥ ७ ॥ कया वृ-
त्त्या वर्त्तितं वश्चरद्भिः क्षितिमंडलं ॥ तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥ ८ ॥ भवद्विधा भागवतास्तीर्थभूताः स्वयं
विभो ॥ तीर्थीकुर्वंति तीर्थानि स्वांतःस्थेन गदाभृता ॥ ९ ॥ अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः ॥ दृष्टाः श्रुता वा य-
दवः स्वपुर्यां सुखमासते ॥ १० ॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् ॥ यथानुभूतं क्रमशो विना यदुकुलक्षयं ॥ ११ ॥
नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं ॥ नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ १२ ॥ किंचित्कालमथावात्सीत्

नत्स्वार्थं कृतं किं तु तीर्थानुग्रहार्थमित्याह भवद्विधेति सत्कृतो देववत्सुखं ॥ भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥ १३ ॥
मलिनजनसंपर्केण तीर्थानि मलिनानि भवंति संतः पुनः स्वयं तीर्थं कुर्वंति ॥ स्वांतं मनः तत्रस्थेन स्वस्यांतःस्थितेनेति वा ॥ ९ ॥ अपि किं
सुखमासते भवद्भिः क्वापि दृष्टाः श्रुता वा ॥ १० ॥ ११ ॥ यदुकुलक्षयावर्णने कारणमाह नन्विति ॥ १२ ॥ श्रेयस्कृत् तत्त्वमुपदिशन् ॥ १३ ॥

राम
५७

ननु शूद्रोऽसौ कथमुपदिशेत् । न त्वसौ शूद्रः किं तु यमस्तद्रूपेणासीत् । किं तत्र कारणं । यमेवात्रागते अणुत्रकोदंडधरः इत्यपेक्षायामा
ह । अबिभ्रदिति । धृतवानित्यर्थः । मांडव्यस्य शापात् । तथाहि । छ्याविद्वेषाद्राज्ञ अनुधावतो राजभटा मांडव्यस्य ऋषेस्तपस्विनः समा
पेते तान् सग्राह्य तेन सह निबध्यानीय राज्ञे निवेदयत राजा तस्यापि सर्वान् शूलमारोपयामास । ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्र
सादयामास । ततोऽसौ निर्यमं गत्वा कुपित उवाच । कस्मादहं शूलमारोपित इति । तेनोक्तं त्वं बाल्ये शलभं कुशाग्रेण विध्य क्रीडित

अबिभ्रदर्यमा दंडं यथावदघकारिषु । यावद्धार शूद्रत्वं शापाद्वर्षशतं यमः ॥ १४ ॥ युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं
कुलंधरं । भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥ १५ ॥ एवं गृहेषु सक्तानां प्रमत्तानां तदीहया । अत्य
क्रामदविज्ञातः कालः परमदुस्तरः ॥ १६ ॥ विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत । राजन्निर्गम्यतां शीघ्रं प
श्येदं भयमागतं ॥ १७ ॥ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो । स एष भगवान्कालः सर्वेषां नः समागतः ॥ १८ ॥

वानिति । तच्छ्रुत्वा मांडव्यस्तं शशाप । बाल्येऽज्ञानतो मे महांतं दंडं यतस्त्वं कारितवान् अतः शूद्रो भवेति ॥ १४ ॥ इदानीं राज्यापकर्षं निरूपयितु
मुत्कर्षं निरूपयति युधिष्ठिर इति । कुलंधरं वंशधरं ॥ १५ ॥ तदीहया गृहव्यापारेण प्रसक्तानां अत्यक्रामत् । आयुः कालः अतिक्रांतः प
ह्यतामनभिभवदित्यर्थः ॥ १६ ॥ अभिप्रेत्य ज्ञात्वा ॥ १७ ॥ तत्प्रतीकारः क्रियतां किं निर्गमनेनेति तत्राह प्रतिक्रियेति सर्वेषामपि तिष्ठेः प्रतिक
र्तव्यं तेषामपीत्यर्थः ॥ १८ ॥

भा० १
४८

कथं धनादिवियोगः सोढुं शक्यः अत आह येनचेति अभिपन्नः अभिग्रस्तः १९ तत्रावस्थानमतिदैन्यमिति दर्शयंस्तेषां परमसुखत्वमादयति पितृमा
त्रिति सप्तभिः आत्मा वदेहः २० येन सुत्राहृतास्तेन दत्तं पिंडं अन्नं गृहपाल इव गृहपालः श्वा २१ निसृष्टः प्रक्षिप्तः गरो विषं दूषिताः अवमताः
नदैन्यैरन्यादिभिर्लेशैरसुभिः कियत्प्रयोजनं किंचिदित्यर्थः २२ तस्यापि एवंवैरत्यमस्तु भवतोपि परैतिज्ञीयते २३ गतस्वार्थं यशो धर्मादि स्मृतं

येनैवैवाभिपन्नोयं प्राणैः प्रियतमैरपि जनः सद्यो वियुज्येत किमुतान्यैरहारिभिः १९ पितृमातृसुहृद्भ्रातृदाराः हृतास्ते वि
गतवयः आत्मा च जरया ग्रस्तः परगेहमुपाससे २० अहो महीयसी जंतोर्जीविताशा यया भवान् भीमेनावर्जितं पिंड
मादत्ते गृहपालवत् २१ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् २२ तस्या
पि तव देहोयं कृपणस्य जिजीविषोः परैत्यनिच्छतो जीर्णो जरया वाससी इव २३ गतस्वार्थमिमं देहं विरक्तो मुक्तबंध
नः अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः २४ यः स्वकात्परतो वेह जातनिर्वेद आत्मवान् हृदि कृत्वा हरिं गेहात्प्र
व्रजेत्स नरोत्तमः २५ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् इतोर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः २६

मुक्तबंधनः त्यक्ताभिमानः अज्ञातः अविज्ञाता गतिर्यस्य सः धीरः प्राज्ञः स्वस्माद्वा परस्माद्वा येन सहनेन मुक्तिः प्राप्नोतिः २४ नरोत्तमस्ततः प्रागेवक
तप्रतीकारः स्वकात्स्वत एव परतः परोपदेशतो वा २५ स्वैरज्ञातगतिर्भवान् अतः इदानीं धीरो भवेत्याह अथेति अर्वाक्अर्वा
चीनः एष्यतीत्यर्थः गुणान् धैर्यादीन्विकर्षति आछिनत्तीति तथा २६

एम
४८

आजमीढः अजमीढवंशजः प्रज्ञाचक्षुरंधः एवं बोधितः सन् हृदि प्रविविक्तदार्ढ्यात् भ्रात्रा संदर्शितः ॥ अध्वा वनमोक्षयोर्मार्गो यस्य सः ॥ १७ ॥ सु-
बलस्य पुत्री गांधारी साध्वी सुशीला हिमालयं प्रयांतं पतिमनुजगाम ॥ कथं सा तत्कुमारी हिमाद्रिः सुखं हिमवंतं गतान्मृते आह ॥
न्यस्तदंडानां प्रहर्षो यस्मिन् तं ॥ दुःखदमपि केषांचित्प्रहर्षहेतुर्भवतीत्यत्र दृष्टांतः ॥ मनस्विनां शूराणां युद्धे सत्तीव्रः प्रहारो यथा ॥ पाठांतरे स-

एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो ह्याजमीढः ॥ छित्त्वा स्वेषु स्नेहपाशान् द्रढिम्नो निश्चक्राम भ्रात्रा संदर्शिताध्वा ॥ १७ ॥
पतिं प्रयांतं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी ॥ हिमालयं न्यस्तदंडप्रहर्षं मनस्विनामिव सत्संप्रहारं ॥ १८ ॥
अजातशत्रुः कृतमैत्रोऽहुताग्निः विप्रान्नत्वा तिलगोभूमिरुक्मैः ॥ गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौबलीं
च ॥ १९ ॥ तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः ॥ गावल्गणे क्व नु तातो वृद्धो हीनश्च नेत्रयोः ॥ २० ॥ अम्बा च हतपु-
त्रार्ता पितृव्यः क्व गतः सुहृत् ॥ अपि मय्यकृतप्रज्ञे हतबंधुः सभार्यया ॥ आशंसमानः शमलं गंगायां दुःखितो-
ऽपतत् ॥ २१ ॥ पितर्युपरते पांडौ सर्वान्नः सुहृदः शिशून् ॥ अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥ २२ ॥ सूत उवा-
च ॥ कृपया स्नेहवैक्लव्यात्सूतो विरहकर्षितः ॥ आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥ २३ ॥

न्संप्रहारं युद्धं यथेति ॥ १८ ॥ कृतमैत्रं मित्रैरेव तत्संध्यावंदनं येन ॥ नत्वा संपूज्य पितरौ विदुरधृतराष्ट्रौ ॥ १९ ॥ हे गावल्गणे गवल्गणस्य पुत्र संजय
॥ २० ॥ अकृतप्रज्ञे मंदमतौ शमलं अपराधं आशंसमानः आशंकमानः भार्यया सह ॥ २१ ॥ यौ अरक्षतां तौ इतः स्थानात् ॥ २२ ॥ कृपया स्नेहवैक्ल-
व्यात् चातिपीडितः ॥ आत्मेश्वरं धृतराष्ट्रं अपश्यन् ॥ विरहकर्षितश्च सूतः संजयो न प्रत्युत्तरमाह ॥ २३ ॥

आत्मनादृष्ट्वात्मानं मनो विष्टभ्य धैर्येणोक्तं कृत्वा ॥ प्रमोधतराश्रुमुखो गांधार्यास्तु पारावतस्मरन् प्रत्यवेऊवाच ॥ ३४ ॥ व्यवसितं निश्चितं ॥ यतो मुषितः वंचि
तोस्मीति ॥ एवं कवित्वालेशोच्चतिं तस्मिन् ॥ ३५ ॥ अथ नारद आजगाम अत्रात्रिद्विवित्सुत्वके पाठांतरं ॥ तद्गुह्यं यथा संप्रदायं व्याख्यायते ॥ शोकवेग
दर्भचर्ययात्रिवाहराजा नत्वाभ्यर्चयत ॥ ३६ ॥ नाहं वेद वेधि ॥ तपस्विनीः ॥ खड्क्रोत्रपारे शोकार्णवे भगवान् त्वमेव पारदर्शकः ॥ अतो ब्रूहीति शेषः ॥ ३७
आराधयथावदन्नकथने शोकेन मूर्छितः ॥ पतेदिति तथ्यमंतावच्छोकमुपशमयति ॥ मा कंचन शुचः मा शोचः ॥ नैकं वलं ता नैव यद्यस्माद्दीश्वर

विसृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातशत्रुः प्रत्यूचे प्रभोः पादावनुस्मरन् ॥ ३४ ॥ युधिष्ठिर उवाच ॥ नाहं वेद व्यवसितं
पित्रोर्वः कुलनंदन ॥ गांधार्या वा महाबाहो मुषितोऽस्मि महात्मभिः ॥ ३५ ॥ अथाजगाम भगवान्नारदः सहतुंबुरुः ॥ प्रत्युत्था
याभिवाद्याह सानुजोऽभ्यर्चयन्निव ॥ ३६ ॥ युधिष्ठिर उवाच ॥ नाहं वेद गतिं पित्रोर्भगवन् क्व गतावितः ॥ अंबा वा हतपुत्रार्ता क्व गता
व तपस्विनी ॥ कर्णधार इवापारे भगवान् पारदर्शकः ॥ ३७ ॥ अथाबभाषे भगवान्नारदो मुनिसत्तमः ॥ मा कंचन शुचो राजन्यदी
श्वरवशं जगत् ॥ ३८ ॥ लोकाः सपाला यस्येमे वहंति बलिमीशितुः ॥ स संयुनक्ति भूतानि स एव वियुनक्ति च ॥ ३९ ॥ यथा गावो न
सि प्रोतास्तंत्यां बद्धाः स्वदामभिः ॥ वाक्तंत्यां नामभिर्बद्धा वहंति बलिमीशितुः ॥ ४० ॥ यथा क्रीडोपस्कराणां संयोगविगमाविह

धीनं जगत् ॥ ३८ ॥ तदेवाह लोका इति ॥ संयुनक्ति संयोजयति वियुनक्ति वियोजयति ॥ ३९ ॥ गावो वा इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ॥ ४१ ॥
लिबद्धाः तंत्यादीर्घतंत्यां बद्धाः स्वदामभिः नासिकायां प्रोताः स्वामिनो बलिं वहंति यथा एवं वाक्तंत्यां वर्णाश्रमादिविधायक वेदलक्षणायां नामभि
ब्राह्मण ब्रह्मचारी त्यादिभिर्नामलक्षणैर्बद्धाः परमेश्वरस्य बलिं वहंतीत्यर्थः ॥ ४० ॥ स्वतंत्रो परतंत्र उक्तौ संयोगवियोगयोरप्याह ॥ यथेति क्रीडो
पस्कराणां क्रीडासाधनानां ॥ ४१ ॥

ईश्वराधीनत्वान्न शोकः कार्य इत्युक्तं लोकतत्त्वे विविचार्यमाणे निर्विषयोऽयं शोक इत्याह यद्यपि लोकं जनं ध्रुवं जीवरूपेण अध्रुवं देहरूपेण नवेति न ध्रुवं नाप्यध्रुवं शुद्धब्रह्मस्वरूपेण अनिर्वचनीयत्वेन वा उभयं वा चिज्जडांशतः सर्वथापि पक्षेषु ते पित्रादयो न शोच्याः स्नेहादन्यत्र स्नेह एव केवलं शोकहेतुः स चाज्ञानमूल इत्यर्थः ४१ तस्मान्मां विना कथं ते वर्तेरन्निति मनसा वैक्लव्यं व्याकुलता तात्पर्यं ४२ ननु तद्देहे तत्तेषां वृत्तिस्तावन्मयाप्तीत्याह कालो गुणक्षोभकः कर्म जन्मनिमित्तं गुणा उपादानं तदधीनः पाञ्चभौतिकः जडः तद्विभागेनावशं वाच्य सर्पग्रस्तः अजगरेण गिलितो यथान्यं न रक्षति तद्वत् ४४ ईश्वरेण विहिता वृत्तिश्च सर्वतः सुलभैवेत्याह अहस्तानि

यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयं सर्वथा न हि शोच्यास्ते स्नेहादन्यत्र मोहजात ४२ तस्माज्जह्यंग वैक्लव्यम ज्ञानकृतमात्मनः कथं त्वनाथाः कृपणा वर्तेरंस्ते च मां विना ४३ कालकर्मगुणाधीनो देहोऽयं पांचभौतिकः कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परं ४४ अहस्तानि सहस्तानामपदानि चतुष्पदां फल्गूनि तत्र महतां जीवो जीवस्य जीवनं ४५ तदिदं भगवान्राजन्नेक आत्मात्मनां स्वदृक् अन्तरोऽनन्तरो भाति पश्य तं माययोरुधा

पश्वादीनि अपदानि तृणादीनि तत्र तेष्वहस्तादिष्वपि फल्गूनि सूक्ष्माणि एवं जीवः सर्वोऽपि जीवस्य सर्वस्य जीवनं जीविका एतेनैव सर्वतोऽपि तस्याप्तत्वं वोक्तं ४५ मोहनिवृत्त्यर्थं द्वैतस्यावस्तुत्वमाह तदिदं अहस्तसहस्तादिरूपं जगत् स्वदृक् भगवानेव न ततः पृथक् स एवैक एव नाना ननु सजातीयविजातीयभेदे सत्त्वे कुत एकत्वमाह आत्मनां भोक्तॄणां आत्मा स्वरूपं अतो न सजातीयभेदः अन्तरोऽनन्तरः अन्तर्बहिश्च भोक्तृभोग्यरूपश्च भाति अतो न विजातीयभेदोऽपि एकः कथं तथा प्रतीयते अत आह मायया उरुधा तं पश्यति ४६ ॥

क्वासावद्य दीदृशो महाभागावीदस्वरकायमित्याह सोयमिति अस्यां भूम्यां अभवायनाशाय ॥४७॥ तर्हि श्रीकृष्णोऽत्रास्ति तत्रैवास्माभिः कथा इत्य
ह तद्देवानां कार्यं तेन निःपादितं केवलमवशेषं प्रतीक्षते यदुकुलक्षयमिति हृदिस्थं ततो निजधाम यास्यति ततो यूयमपि गच्छतेत्य
र्थः न च भूतमपि विदुरस्व दैवेनावर्णमिति ॥४८॥ तदेवं शोकमपास्थाय च निवार्य जिज्ञासवे तस्मै यथावन्नैकथ्यपति ॥ धृतराष्ट्र इति षड्भिः हिम
वतो दक्षिणे भागे ॥४९॥ या वै प्रसिद्धा स्वर्धुनी सा आत्मानं यत्र सप्तधा व्यधात ॥ किमर्थं नानानां पृथक् सप्तभिः स्रोतोभिः प्रवाहैः सप्तानां

सोयमद्य महाराज भगवान्भूतभावनः ॥ कालरूपोवतीर्णोस्यामभवाय सुरद्विषां ॥४७॥ निष्पादितं देवकृत्यमवशेषं
प्रतीक्षते ॥ तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ॥४८॥ धृतराष्ट्रः सहभ्रात्रा गांधार्या च स्वभार्यया ॥ दक्षिणेन हिमवत
ऋषीणामाश्रमं गतः ॥४९॥ स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात ॥ सप्तानां प्रीतये नानासप्तस्रोतः प्रचक्ष
ते ॥५०॥ स्नात्वानुसवनं तस्मिन्हुत्वा चाग्नीन्यथाविधि ॥ अब्भक्ष उपशांतात्मा स आस्ते विगतैषणः ॥५१॥ जितास
नो जितश्वासः प्रत्याहृतषडिंद्रियः ॥ हरिभावनया ध्वस्तरजः सत्वतमोमलः ॥५२॥

मृषीणां प्रीतये अत एव तत्तीर्थं सप्तस्रोतो वदंति ॥५०॥ तेन कृतमष्टांगयोगमाह स्नात्वेति वह्निभिः तत्र स्नानं होमो अब्भक्षणं चेति नियमा उ
क्ताः मह्नस्थाने अपां भक्षा अब्भक्षः उपशांतः आत्मा यस्य सः विगताः पुत्राद्येषणा यस्मादिति यमा उक्ताः ॥५१॥ जितासन इत्यादिना आस
नप्राणायामप्रत्याहारा उक्ताः ॥ हरिभावनयेति धारणोक्ता ध्वस्तो रजः सत्वतमोरूपो मलो यस्मादिति फलतो ध्यानमुक्तं ॥५२॥

समाधिमाह विज्ञानेति द्वाभ्यां आत्मानं अहंकारास्पदं स्थूलदेहाद्वियोज्य । विज्ञानात्मनि बुद्धौ संयोज्य एकीकृत्य तं विज्ञानात्मानं दृश्यांशाद्वियोज्य
क्षेत्रज्ञे द्रष्टरि प्रविलाप्य । तं च क्षेत्रज्ञं द्रष्टृंशाद्वियोज्य आधारे आश्रये ब्रह्मणि प्रविलाप्य । घटाम्बरे घटोपाधेर्वियोज्य यथा महाकाशे प्रविलाप्य
ते तद्वत् ॥ ५२ ॥ ब्रह्मस्थाना भावमाह । ध्वस्तेति । अन्तर्गुणक्षोभाद्वा बहिरिन्द्रियविक्षेपाद्वा ब्रह्मस्थानं भवेत् । तदुभयं तस्य नास्ति । यतो ध्वस्तो मायागुणा
नामुदर्कः उत्तरं फलं वासनारूपं यस्य सः । निरुद्धानि करणानि चक्षुरादीनि आशयो मनश्च यस्य सः । अत एव विनिवर्तित अखिल आहारो भोग्यं
इन्द्रियैर्विषयाहरणं वा येन सः । स्थाणुरिव निश्चलः आस्ते ॥ ५४ ॥ तथाभूतमप्यानेतुमुद्यतं प्रत्याह । तस्येति । अन्तरायो विघ्नः मैवाभूः रित्यडागमः छा

विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तं । ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ॥ ५३ ॥ ध्वस्तमायागुणोदर्को निरुद्धकरणा
शयः । निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः ॥ ५४ ॥ तस्यांतरायो मैवाभूः संन्यस्ताखिलकर्मणः ॥ ५५ ॥ स वा अद्यत
नाद्राजन्परतः पंचमेहनि । कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति ॥ ५६ ॥ दह्यमानेग्निभिर्देहे पत्युः पत्नी सहोटजे । ब
हिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥ ५७ ॥ विदुरस्तु तदाश्चर्यं निशाम्य कुरुनंदन । हर्षशोकयुतस्तस्माद्गंता तीर्थनिषे
वकः ॥ ५८ ॥ इत्युक्त्वाथारुहत्स्वर्गं नारदः सहतुंबुरुः । युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः ॥ ५९ ॥ इति श्रीभागवते महापुराणे प्र
थमस्कंधे धृतराष्ट्रस्वगृहप्रस्थानं नाम त्रयोदशोध्यायः ॥

दसः ॥ ५४ ॥ दर्शनमपि तावत्कर्पामित्युद्यतं प्रत्याह स वै अद्यतनादूर्ध्वं । त्वद्वाधीनं त
र्हि दाहार्थं गमिष्यामि इत्याह । दह्येति ॥ ५६ ॥ तर्हि तां धार्यानयनाय गमिष्यामि इत्याह । पत्युर्देहे सहोटजे पर्णशालासहिते योगाग्निना सह दह्यमाने पत्यादिभिर्दह्य
माने तस्य पत्नी बहिः स्थिता सती तं पतिमनु अग्निं वेक्ष्यति प्रवेक्ष्यति ॥ ५७ ॥ तर्हि विदुरानयनार्थं गंतव्यमेव नेत्याह । विदुरस्त्विति । तन्निशाम्य दृष्ट्वा प्राप्तः हगत्याहर्षः न
न्नस्तनाशोकं श्रुत्वा भ्रातृशोकः । तस्मात्तस्थानात्तीर्थानि निषेवितुं गंता गमिष्यति ॥ ५८ ॥ शुचः शोकान् ॥ ५९ ॥ इति प्रथमे त्रयोदशः ॥

भा॰ १ ५१

चखईशेत्वरिष्टानिदृष्ट्वाराजाविशंकितः भ्रष्ट्राणोर्ज्जुनात्कृष्णतिरोधानमितीर्यते ॥ श्रीकृष्णस्यवेतिचकारेणमिश्राणंवृत्तातं ॥ कतिचि त्समतदाकालातिक्रमेपि ॥ ततः द्वारकातः नयातनागत ॥ निमित्तानिउत्पातान्कुरूद्वहोयुधिष्ठिरः १ रौद्रांघोरां ॥ तदेवाह विपर्य स्तऋतुधर्मायस्मिन्नतस्यवार्त्तांजीविकांक्रोधलोभानृतैर्युक्तः ॥ आत्मायेषांते २ जिह्मप्रायंकपटबहुलं ॥ व्यवहृतंव्यवहारं ॥ शाठ्यंवचन

सूत उवाच ॥ संप्रस्थितेद्वारकायांजिष्णौबंधुदिदृक्षया ॥ ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितं ॥ १ ॥ व्यतीताःकति चिन्मासास्तदानायात्ततोर्ज्जुनः ॥ ददर्शघोररूपाणिनिमित्तानिकुरूद्वहः ॥ २ ॥ कालस्यचगतिंरौद्रांविपर्यस्तर्तुधर्मि णः ॥ पापीयसींनृणांवार्त्तांक्रोधलोभानृतात्मनां ॥ ३ ॥ जिह्मप्रायंव्यवहृतंशाठ्यमिश्रंचसौहृदं ॥ पितृमातृसुहृ द्भ्रातृदंपतीनांचकल्कनं ॥ ४ ॥ निमित्तान्यत्यरिष्टानिकालेत्वनुगतेनृणां ॥ लोभाद्यधर्मप्रकृतिंदृष्ट्वोवाचानुजंनृपः ॥ युधिष्ठिर उवाच ॥ संप्रेषितोद्वारकायांजिष्णुर्बंधुदिदृक्षया ॥ ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितं ॥ ६ ॥ गताःसप्ता धुनामासाःभीमसेनतवानुजः ॥ नायातिकस्यवाहेतोर्नाहंवेदेदमंजसा ॥ ७ ॥ अपिदेवर्षिणादिष्टःसकालोयमुप स्थितः ॥ यदात्मनोंगमाक्रीडंभगवानुत्सिसृक्षति ॥ ८ ॥

तन्मिश्रंसौहृदंसख्यं ॥ पित्रादीनांचप्रतियोगिभिः कल्कनंकलहादि ४ अत्य रिष्टानिअत्यंतमशुभानिदृष्ट्वानृणांलोभाद्यधर्मप्रकृतिंचदृष्ट्वा ॥ अनुजंभीमं ॥ ५ ॥ वेतिवितर्केकस्माद्धेतोर्नायातीत्यहंनवेद्मि ७ अपि त्विं ॥ यदा ॥ आत्मनः आक्रीडंक्रीडासाधनंअंगमनुष्यनाट्यंउत्स्रष्टुमिच्छतिसकालः किंप्राप्तः ॥ ८ ॥

१ा॰प ५१

अस्माकं सर्वपुरुषार्थहेतुः श्रीकृष्णः अतस्तद्वियोगं विना निष्टन स्यादित्याशयेनाह । यस्मात श्रीकृष्णहेतोः एतद्योपरिष्टाद्दर्शनः । स्पष्टीक
रिष्यति । लोकास्त्रयस्त्वत्कारणात् उपायस्यानुग्रहात् ॥ ९ ॥ अहमात्मनि निहितं नोऽस्माकमाशंसतः उत्पातान् ॥ १० ॥ रेहिकानाह । ऊर्ध्वेति ऊर्ध्वा दक्षिणा वा
माः स्फुरंति । वेपथुः कंपस्त्वद्धृदयेऽवर्त्तते । एतेभयं त्रासं निहितविप्रियं दास्यति ॥ ११ ॥ भौमानाह सार्द्धैस्त्रिभिः शिवा क्रोष्ट्री आदित्यमभिरौति
उद्यत्सूर्यमभिमुखं क्रोशति । अनलाननाः अग्निं मुखेन वमंती । अंगहे भीप । मामभिलसत्सारमेयः श्वाः भिरौति भगवत भषति । अभिहवतनिः

यस्मात्त्वः संपरो राज्यं दाराः प्राणाः कुलं प्रजाः । आसन्सपत्नीविजयो लोकास्त्रयस्त्वदनुग्रहात् ॥ ९ ॥ पश्योत्पातान्नरव्याघ्र दि
व्यान् भौमान्सदेहिकान् । दारुणान्शंसतो दूरात् भयं नो बुद्धिमोहनं ॥ १० ॥ ऊर्वेहि वाहवो मह्यं स्फुरंत्यग पुनः पुनः । वेपथुश्चा
पि हृदये आराद्दास्यति विप्रियं ॥ ११ ॥ शिवैषोद्यंतमादित्यमभिरौत्यनलानना । मामंग सारमेयोयमभिरौति अभीरुवत्
॥ १२ ॥ शस्ताः कुर्वंति मां सव्यं दक्षिणं पशवोऽपरे । वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥ १३ ॥ मृत्युदूतः कपोतोयमुलूकः कं
पयन्मनः । प्रत्युलूकश्च कुह्वानैर्विश्वं वै शून्यमिच्छतः ॥ १४ ॥ धूम्रा दिशः परिधयः कंपते भूः सहाद्रिभिः । निर्घातश्च महांस्ता
त साकं च स्तनयित्नुभिः ॥ १५ ॥ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः । असृग्वर्षति जलदा बीभत्समिव सर्वतः ॥ १६ ॥

शंसं ॥ १२ ॥ शस्ताः गवादयो मां सव्यं वामं कुर्वंति । अपरे गर्दभाद्याः प्रदक्षिणं कुर्वंति । वाहान् अश्वान् ॥ १३ ॥ अयं कपोतो मृत्युदूतः मृत्युसूचकः उलूको घूकः
प्रत्युलूकः । तत्प्रतिपक्षो घूकः काको वा कुह्वानैः कुत्सितशब्दैः विश्वं शून्यं इच्छतः ॥ १४ ॥ धूम्रा धूसरा दिशः परिधयो ग्निमिव लोकमावृण्वंति । दिव्यानाह
सार्द्धाभ्यां निर्घातो निरभ्रवज्रपातः स्तनयित्नवो गर्जितानि तैः सह ॥ १५ ॥ तमः विशेषेण सृजन् । असृक् रक्तं ॥ १६ ॥

ग्रहाणां मर्दं युद्धं मूलाद्द्रान्तु च तारे तेषां गणैः संकुलैर्व्याप्तिभिः प्राणिभिः सहितैः रोदसी द्यावापृथिव्यौ ज्वलिते प्रदीप्ते इव च पश्येति
॥१७॥ उनर्भौमानाहं नद्य इति ह्रादैर्ह्रदिभिः प्राणिनां मनांसि च ॥१८॥ दुह्यंतीति कर्मकर्तरि प्रयोगः न प्रस्नुवंतीत्यर्थः ॥१९॥ दैवतानि प्रतिमाः
अघं दुःखं ॥२०॥ एतैः कृत्वा ॥ न विद्यतेऽन्येषु पुरुषेषु श्रीर्वज्रांकुशादिरेखा भाग्य येषां तैर्भगवतः पदैर्हीना भूरित्यहं मन्ये ॥२१॥ तस्यानतः

सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ॥ ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी ॥१७॥ नद्यो नदाश्च क्षुभिताः सरांसि च
मनांसि च ॥ न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ॥१८॥ न पिबंति स्तनं वत्सा न दुह्यंति च मातरः ॥ रुदंत्यश्रुमु
खा गावो न हृष्यंत्यृषभा व्रजे ॥१९॥ दैवतानि रुदंतीव स्विद्यंति ह्युच्चलंति च ॥ इमे जनपदा ग्रामाः पुरोद्यानाकराश्र
माः ॥ भ्रष्टश्रियो निरानंदाः किमघं दर्शयंति नः ॥२०॥ मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः ॥ अनन्यपुरुषश्रीभिर्हीना भू
र्हतसौभगा ॥२१॥ इति चिंतयतस्तस्य दृष्टारिष्टेन चेतसा ॥ राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः ॥२२॥ तं पादयोर्नि
पतितमयथापूर्वमातुरं ॥ अधोवदनमब्बिंदून्सृजंतं नयनाब्जयोः ॥२३॥ विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः ॥ पृच्छति
स्म सुहृन्मध्ये संस्मरन्नारदेरितं ॥२४॥ युधिष्ठिर उवाच ॥ कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते ॥ मधुभोजदशार्हार्ह

रतिः एवं दृष्टान्यरिष्टानि येन तेन चेतसा चिंतयतस्तस्य ॥२२॥ अयथापूर्वं निपतितं तदेवाह आतुरमित्यादि ॥ सात्वतांधकवृष्णयः ॥२५॥
अपां बिंदून् अश्रूणि नेत्राभ्यां विसृजंतमित्यर्थः ॥२३॥ उद्विग्नं कंपितं हृदयं यस्य सः विच्छायं विगतकांतिं ॥२४॥ स्वजना बांधवाः ॥२५॥

किंवक्ष्यतीति शंकया व्यवहितक्रमेणाह श्रुतिश्रूर इत्यादिना ॥ मारिषः मान्यो मातामहः आनकदुंदुभिर्वसुदेवः २६ स्वसारः परस्परं व
सुदेवक्रमेण तासामपि ज्येष्ठं श्रेष्ठमेव तथापि श्रेष्ठ्यापि श्रेष्ठश्रुति स्वयमिति २७ ॥ आहुकः उग्रसेनः अस्य तत्रोत्पस्य ॥ अत एव जीवनमा
त्रमेव श्रेष्ठं ॥ अग्रजस्तु देवकः ॥ हृदीकसुतः कृतवर्मा जयतादयः कस्य भ्रातरः ॥ २८ ॥ २९ ॥ सर्ववृष्णीनां मध्ये महारथः ॥ गंभीररयः उ

ग्रसेनो मातामहः कश्चित्स्वस्त्यास्ते वाथ मारिषः ॥ मातुलः सानुजः कश्चित्कुशल्यानकदुंदुभिः २६ ॥ सप्त स्वसारस्तत्प
त्न्यो मातुलान्यः सहात्मजाः ॥ आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं २७ ॥ कच्चिद्राजाहुको जीवत्यसत्पुत्रोस्य चानुजः
हृदीकः ससुतो क्रूरो जयंतगदसारणाः २८ आसते कुशलं कच्चिद्ये च शत्रुजिदादयः ॥ कच्चिदास्ते सुखं रामो भगवान्सात्व
तां प्रभुः ॥ २९ ॥ प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः ॥ गंभीररयोनिरुद्धो वर्द्धते भगवानुत ३० ॥ सुषेणश्चारुदेष्णश्च सांबो
जांबवतीसुतः ॥ अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ३१ तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः ॥ सुनंदनंदशीर्षण्याः ये
चान्ये सात्वतर्षभाः ॥ ३२ ॥ अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः ॥ अपि स्मरंति कुशलमस्माकं बद्धसौहृदाः ॥ ३३ ॥ भगवानपि
गोविंदो ब्रह्मण्यो भक्तवत्सलः ॥ कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ३४ मंगलाय च लोकानां क्षेमाय च भवाय च ॥ आस्ते यदु

द्धमहावेगः वर्द्धते मोदते इत्यर्थः ३० कृष्णस्यापत्यानि कार्ष्णयः तेषु प्रवराः ३१ सुनंदनंदशीर्षण्याः प्रमुख्याः ॥ कुलांभोधावाद्योनंतसखः पुमान्
येषां ते ३३ भगवानेव सुखमास्ते इति प्रश्नस्यानौचित्यमाशंक्याह ३४ इत्यादि ३४ भगवतो त्राव स्थाने हि लोकानां मंगलं नान्यथेत्याशयेनाह च
त्रिभिः ॥ मंगलाय स्वभाय क्षेमाय पालनाय भवाय उद्भवाय ॥ अनंतसखः बलभद्रसहायः ॥ ३५

भा०प्र
५२

अर्चिताः सर्वैः पूजिताः परमानंदं यथा भवति तथा ॥ महापौरुषिकाः वैकुंठनाथानुचराः ॥ ३६ ॥ यस्य पादशुश्रूषणमेव मुख्यं तपः अरिभ्यः स्वं
पत्न्कर्म तेन सत्यभामादयः संख्ये युद्धे त्रिदशान्देवान्बलेन निर्जित्य तदाशिषः देवभोगान्पारिजातादीन् ॥ वज्रायुधस्य वल्लभा शची तस्या उचिताः
॥ ३७ ॥ यद्बाहुदंडप्रभावोपजीविनः सुधर्मां सभामंघ्रिभिराधिक्रामंति सुरगोविंदः सुखमास्ते इति तत्र पंचमश्लोकेनान्वयः ॥ ३८ ॥ इदानीं तस्यैव कु
शलं पृच्छति ॥ कच्चिदिति षड्भिः अनामयं आरोग्यं ॥ नलब्धो मानो येन बंधुभ्यः सकाशात ॥ किं वा तैः प्रभुतः अवज्ञातः तिरस्कृतः ॥ यतः चि

यद्बाहुदंडगुप्तायां स्वपुर्यां यदवोर्चिताः क्रीडंति परमानंदं महापौरुषिका इव ॥ ३६ ॥ यत्पादशुश्रूषणमुख्यकर्मणा सत्या
द्योद्व्यष्टसहस्रयोषितः ॥ निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरंति वज्रायुधवल्लभोचिताः ॥ ३७ ॥ यद्बाहुदंडाभ्युदयानुजी
विनो यदुप्रवीरा ह्यकुतोभया मुहुः ॥ अधिक्रमंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमोचितां ॥ ३८ ॥ कच्चित्तेनामयं ता
त भ्रष्टतेजा विभासि मे ॥ अलब्धमानोवज्ञातः किं वा तात चिरोषितः ॥ ३९ ॥ कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमंगलैः ॥ न
दत्तमुक्तमर्थिभ्यः आशया यत्प्रतिश्रुतं ॥ ४० ॥ कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं ॥ शरणोपसृतं सत्वं नात्याक्षीः श
रणप्रदः ॥ ४१ ॥ कच्चित्त्वं नागमोऽगम्यां गम्यां वासत्कृतां स्त्रियं ॥ पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि ॥ ४२ ॥

रोषितः बहुकालं तत्र स्थितः ॥ ३९ ॥ अभावैरिति हेतुः प्रेमशून्यैः अमंगलैः परुषैः शब्दादिभिर्नाभिहतः नताडितोसि किं ॥ यद्वा अर्थिभ्यः किमपि द
स्यामीति नोक्तं किं ॥ यद्वा आशया सह यथा आशा भवति तथा दास्यामीति प्रतिश्रुतं तत्तत्त्वं न दत्तं किं ॥ ४० ॥ अन्यद्वा शरणागतं सत्वं प्राणिमात्रं त्य
क्तवानसि किं [illegible] यतः पूर्वं शरणप्रदः आश्रयप्रदः ॥ ४१ ॥ अगम्यामिति हेतुः न निंदितां स्त्रियामागमः किं न गतवानसि ॥ असत्कृतां म
लिनवस्त्रादिना गमः ॥ किं नोत्तमैः अधमैः समैरित्यर्थः ॥ असमैरधमैर्वा किं न पराजितोसीत्यर्थः ॥ ४२ ॥

राम
५२

संभोजनार्हान्वृद्धान्बालकांश्च किं स्वित् पर्यभुंक्थाः त्यक्त्वा भुक्तवानसि ॥ जुगुप्सितं कर्म मयोग्यं यत्तत्कृतवानसि किं ॥ ४२ ॥ नित्यं सदा प्रेष्ठतमेन हृदयेनात्मनोंतरंगेणात्मबंधुना श्रीकृष्णेन रहिताः शून्योस्मीति मन्यसे ॥ अन्यथा ते रुक्मनः पीडा न घटेत ॥ ४४ ॥ इति प्रथमे चतुर्दशः ॥ कलिप्रवेशमालक्ष्य धर्मस्य परीक्षिति ॥ आहरोहं नृपः स्वर्गमिति पंचदशोब्रवीत् ॥ कृष्णोर्जुनः अविकल्पितः इतिच्छेदः नानाशंकास्पदं रूपमालक्ष्य विकल्पितः इत्यर्थः प्रतिभाषितुं नाशक्नोदिति दूरेणान्वयः ॥ तत्र हेतवः ॥ कृष्णविश्लेषेण कर्शितः कृशः कृतः ॥ १ ॥

अपि स्वित्पर्यभुंक्थास्त्वं संभोज्यान्वृद्धबालकान् ॥ जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमं ॥ ४३ ॥ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबंधुना ॥ शून्योस्मि रहितो नित्यं मन्यसे तेन्यथा न रुक् ॥ ४४ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरवितर्को नाम चतुर्दशोध्यायः ॥ सूत उवाच ॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ॥ नानाशंकास्पदं रूपं कृष्णविश्लेषकर्शितः ॥ १ ॥ शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः ॥ विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं ॥ २ ॥ कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य नेत्रयोः ॥ परोक्षेण समुन्नद्धप्रणयौत्कंठ्यकातरः ॥ ३ ॥ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् ॥ नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥ ४ ॥

शोकेन हेतुना वदनं च हृच्च तदेव सरोजे शुष्यती वदनहृत्सरोजे यस्य सः ॥ हता प्रभा तेजो यस्य सः ॥ १ ॥ २ ॥ शुचः शोकाश्रूणि पाणिना मृज्य दूरीकृत्य तितानि नेत्रयोरेव सततिप्रगलितानि च पाणिना आमृज्य परोक्षेण अदर्शनागोचरेण श्रीकृष्णेन हेतुना समुन्नद्धमाधिक्यं प्राप्तः प्रेमा औत्कंठ्यं तेन कातरः व्याकुलः नृपमित्याहेत्युत्तरेणान्वयः ॥ ३ ॥ सख्यं हितैषिता मैत्री उपकारिता सौहृदं स्नेहबंधित्वं बाष्पेण कंठावरोधतो गद्गदया ॥ ४ ॥

भा॰मौ॰
५४

येन मां वंचयता देवान विस्मापयतीयत ॥५॥ यस्य स्वरूपेण वियोगेन त्यारिपञ्चरात्ना तेनाहमद्य मुषितः इति सव्यसाचिशोकस्तेन नष्टेनेन संबंधः प्रियस्याप्रियत्वे दृष्टांतः ॥ उक्त्वेन त्राणेन एष पिताहि ॥६॥ श्रीकृष्णोपकारान्स्मरति ॥ यत्तेश्च यादिति दशभिः ॥ यस्य संश्रयात्वला तस्य रेणाकामेन दुर्मदानाम मतिमत्तानां तेजः प्रभावः हतं धनुर्ग्रहणेनैव ॥ पश्चात्तद्व्यतुः सज्जीकृतं च तेन च मत्तो पंचापरीक्षमनु विद्धः ते न ताज्त्रिजित्य द्रौपदीशाप्ना च ॥७॥ उ इति विस्मये ॥ खांडवं इंद्रस्य वनं सुरादत्तवानस्मि ॥ खांडवदाहे रक्षितेन कृतावसभा लब्धा ॥ अर्जुन

अर्जुन उवाच । वंचितोहं महाराज हरिणा बंधुरूपिणा ॥ येन मे पश्यतां तेजोरेव विस्मापनं महत ॥५॥ यस्य रूपाणि वियोगेन लोकोप्यप्रियदर्शनः ॥ उक्तेन रहितो ह्येष मृतकः प्रोच्यते पृथा ॥६॥ यत्संश्रयात् द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां ॥ तेजो हृतं खलु मया निहितश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ॥७॥ यत्सन्निधावहमु खांडवमग्रयेदामिंद्रं च सामरगणं तरसा विजित्य ॥ लब्धा सभा मयकृता द्भुतशिल्पमाया दिग्भ्यो हरन्नृपतयो बलिमध्वरे ते ॥८॥ यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थं आर्यो नुजस्तव गजायुतसत्ववीर्यः ॥ तेनाहृताः प्रमथनाथ मखाय भूपा यन्मोचितास्तदनयन्बलिमध्वरे ते ॥९॥ शिल्पकृपामायायस्यां सा ॥ ते अध्वरे यागे राजसूये ॥ ८ ॥ अनंतरं श्लोको विगीतस्तथापि व्याख्यायते ॥ नृपतिशिरःस्वङ्घ्रिर्यस्य तं जरासंधं हतवान् जो भीमः मखार्थं महत्वहतवान् ॥ तत्रिजयं विना राजसूयमखानुपपत्तेः ॥ गजायुतस्येव सत्व मुत्साहः शक्तिर्वीर्यं बलं च यस्य तं हत्वा ॥ प्रमथनाथो महाभैरवः तस्य मखाय यज्ञाय जरासंधेनाहृताः ते यद्यस्मान्मोचिताः तत्तस्मात्ते ध्वरे बलिमानीतवंतः ॥९॥ राम
५४

येः कितवैर्दुःशासनादिभिः भवपत्न्याः कवरी विकीर्य उन्मुच्य स्पृष्टं आकृष्टं तेषां त्वद्वियोगे हतेशाः अत एव वैधव्यादिविप्रकीर्णकेशाः। अकृत च कारः
कथंभूतं कबरं। अधिमखे राजसूयमधिकृत्य ज्ञस्य प्रोक्षितो यो महाभिषेकस्तेन श्लाघ्यतमं। चाहरम्यं यन्नमरणात्तदानीमेव स्नानस्यास्त्रीकरसा
स्नानमने पादयोः पतितान्यश्रूणि प्लवोत्तमस्याः पत्न्याः परशोरस्यापेक्षस्या विपतितशारृस्याश्रुपदेन समासो नित्यसापेक्षितत्वात् ॥१०॥ शि
ष्याणामध्ये तस्याग्रे तत्वेनोक्तो धौम्यः तस्मात् उर्वीसमोहेतोः अरिगणं विचिंतयतु रतं कश्चूरापलक्षणांतस्मात् काशात्रो अस्मात्वनेन एतत् गोप्रवि
शत्वा शाकमेवान्नं तस्मिन्नेव पात्रे वशिष्ठ उपयुज्यते ॥ यत उपयोगात्सलिले विनिमग्नो मुनीनां समूहः त्रिलोकीतृप्तामंमंस्त एवं हि भारते
कथा केशविदुर्वासमोदुर्योधनेनातिथ्यं कृतं तेन च परितुष्टेन वरं वृणीष्वेत्युक्तो दुर्वाससः शापात्पांडवानश्यंतु इति मनसि विधाय दुर्योधने

पत्न्यास्त्वाधिप्रावृषेण्यमहाभिषेकस्नानविशिष्टचारुकवरं कितवैः सभायां स्पृष्टं विकीर्य परयोः पतितास्त्रामुख्यास्पत्न्या त्वद्वियोगकृतह
तेशविप्रकीर्णकेशाः ॥१०॥ यो नो जगोपवनमेत्य दुरंतकष्टात् दुर्वाससोऽरिविहितादयुताग्रशिष्यः शाकान्नशिष्टमुपयुज्य यतस्त्रिलो
कीतृप्तामसंत सलिले विनिमग्नसंघः ॥११॥

नोक्तं युधिष्ठिरेः समस्तलब्धव्योः ततस्याग्निमयतेवमेवशिष्याग्रतसहितेनातिथिना भवितव्यं
मिति द्वैपदी यथा क्षुधा नापीरे न स्थात तस्यां भुक्तवत्यां तद्गृहे गंतव्यमिति ततस्तत्रैव दुर्वाससा शिष्यप्रेषणमारोगणयुधिष्ठिरान्मध्याह्निकं कृत्वा
आगमिष्यामीति चिंतापितो भुक्तं निःसंघोघमर्षणोपजलेनिमग्नस्तत्र चिंतातुरया द्रौपद्या स्मृतमात्रः श्रीकृष्णस्तत्क्षणमेव भक्तवत्सलतया चा
गतः तया चावेदितेवृत्तांते भगवतोक्तं हे द्रौपदि हे क्षुधितोस्मि अथ मां भोजयेति तया चातिलज्जयोक्तं हा मित्र मद्भोजनपर्यंत मक्षयमन्नं सूर्यस्तत्स्था
ल्या मम पांडवानां सर्वेषां भोज्यं भुक्तं ॥ भुक्तो नाद्यन्नमिति तथाप्यतिनिर्बंधेन स्थालीमानाय्य तत्कंठलग्नं किंचिच्छाकान्नं ग्रासयोक्तं अनेन विश्वात्मा भगवान्प्रीयतां

भा॰प्र॰
५५

गिरिजासहितो विस्मापितः सन्नुनिजं पाशुपतमस्त्रं ॥ अन्येपि लोकपालाः निजान्यस्त्राणि शुद्धः अन्यदप्याश्चर्यमाह ॥ अमुनैवेति महतं इंद्रस्यास
नार्द्धं ॥१२॥ तत्रैव स्वर्गे क्रीडतः गांडीवं लक्षणं यस्य तेन ॥ अरातयो निवातकवचादैत्यास्तेषां वधार्थं आश्रितवतः ॥ येनानुवितं प्रभावयुक्तं ॥ कृत
हे आजमीढ युधिष्ठिर ॥ तेन मुषितः वंचितोस्मि ॥ कथंभूतेन भूम्ना निजमहिमावस्थानेन ॥१३॥ यद्बांधव इत्यादि श्लोकत्रयस्यापि तेन मुषितो
हमिति पूर्वेणैव संबंधः श्रीकृष्णबांधव एक एवाहं कौरवसैन्याब्धिं ॥ नास्त्यंतो गांभीर्येण पारं च देशतो यस्य तं ततरे तीर्णवान् ॥ उत्तरगोग्रहे

यत्तेजसाथ भगवान्युधि शूलपाणिर्विस्मापितः सगिरिजोस्त्रमदान्निजं मे ॥ अन्येपि चाहममुनैव कलेवरेण प्राप्तो म
हेंद्रभवने महदासनार्द्धं ॥१२॥ तत्रैव मे विहरतो भुजदंडयुग्मं गांडीवलक्षणमरातिवधाय देवाः ॥ सेंद्राः श्रिताः यदनुभा
वितमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना ॥१३॥ यद्बांधवः कुरुबलाब्धिमनंतपारमेको रथेन ततरे हमतीर्यसत्त्वं ॥
प्रत्याहृतं बहुधनं च मया परेषां तेजोस्पदं मणिमयं च हृतं शिरोभ्यः ॥१४॥ यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्य
रथमंडलमंडितासु ॥ अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आर्छत ॥१५॥

अतीर्याणि दुस्तराणि सत्त्वानि तिमिंगिलादीनि भीष्मादिरूपाणि यस्मिन् ॥ परैर्नीतं गोधनं प्रत्याहृतं ॥ परेषां च शिरोभ्यः सकाशात् तेजोस्पदं
प्रभावस्यास्पदं ॥ उष्णीषरूपं मणिमयं मुकुटरत्नरूपं च बहुधनं ॥ तान्मोहनास्त्रेण मोहित्वाहृतं यद्बांधवेन मया ॥१४॥ अदभ्राश्चानल्पाये राज
न्यवर्याः तेषां रथमंडलैर्मंडितासु भीष्मादीनां च मूषु सेनासु मम अग्रेचरः सन् ॥ हे विभो तेषां रथयूथपानामायुरादीनि यो दृशा दृष्ट्यैव आर्छत
हृतवान् ॥ मनांसि उत्साहादिशक्तिं ॥ सहो बलं ॥ ओजः इंद्रियकौशलं ॥१५॥

राम
५५

यस्य दोर्भुजे भ्रमामाग्रणिहितं स्थापितं तेनैव । गुर्वादिभिर्निरूपितानि अप्रयुक्तान्यस्त्राणि न स्पृशंति स्म । गुरुद्रोणः । त्रिगर्त्तस्त्रिगर्त्तदे
शाधिपतिः सुशर्मा । शल्यः । सैंधवः सिंधुदेशाधिपतिर्जयद्रथः । वाह्लिकः शंतनोर्भ्राता । अमोघोपमहिमायेषां तथाभूतान्यपि । पार्थात्ते
पि स एवार्थः सर्वतीकारणकारणोप्यस्पर्शे दृष्टांतः । नरहरिहरसंप्रह्लादमिवेति ॥१६॥ त्वापराधमनुस्मरन्नहं तत्पमानस्याह । सोत्येसारथ्येकु
मतिनामेमयाहृतः । कपितित्वमेवाहमात्मदर्ष्यारिनामभवायमोक्षाय । भव्याः क्रोशाः शांतावाहाश्वा यस्य तं मां जयद्रथवधे

यद्दोःषु भ्रमाग्रणिहितं गुरुभीष्मकर्णद्रोणत्रिगर्त्तशल्यसैंधववाह्लिकाद्यैः । अस्त्राण्यमोघमहिमानि निरूपितानि
नोपस्पृशुर्नृहरिदासमिवासुराणि ॥१६॥ सोत्येवकृतः कुमतिनात्मदर्ष्यसारोत्ये यत्पादपद्ममभवाय भजंति भव्याः
मां श्रांतवाहमरयो रथिनो भुविष्ठं न प्राहरन्यदनुभावनिरस्तचित्ताः ॥१७॥ नर्माण्युदारहविरस्मितशोभिता
नि हे पार्थ हे र्जुन सखे कुरुनंदनेति । संजल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठंति हृदयं मम माधवस्य ॥१८॥

हि जलपानं विनाश्वाः श्रांताः तदा रथादवतीर्य वाणोर्ध्वं भित्वा जलं संपारितं मया तदा यस्यानुभावेन निरस्ता चित्ता अरयो मां न प्रहृत
वंतः । सोत्येवकृत इति कुमतिना त्वं ॥१७॥ हे नरदेव उदारगंभीरहविरं यस्मिन् तेन शोभितानि नर्माणि परिहासवाक्यानि । तथा कार्ये प्र
हृत्वा वेषु हे पार्थेत्यादिनि मधुराणि संजल्पितानि च हृदिस्पृशानि मनोहराणि माधवस्य यान्येतानि इदानीं स्मर्तुर्मम हृदयं लुठंति । लोठ
यंति क्षोभयंति णिजभावश्चार्षः ॥१८॥

भा०प्र
५६

विकत्थनंश्लाघनमादिशब्दात्परिहासैक्यात् ॥ अव्यतिरेकाद्धेतोः कदाचिद्भ्रमितवान् हे वयस्य ऋतवान् सत्यप्रतिज्ञोसि त्वमिति वक्रोक्त्या वि
प्रलब्धस्तिरस्कृतो विरूध्यमानिति पाठे रूधवो देवाः सेवकाः सति यस्य अत्येमहानपि मयायाच्यस्य इति मत्वा विप्रलब्धस्तिरस्कृत इत्यर्थः ॥ ऋध्ववा
निति पाठे वत्स्यभाव आर्षः ॥ मे अघं अपराधं असहत ॥ महितया महत्त्वेन ॥ एकपदे अतिमहत्वेनेत्यर्थः ॥ सख्युरघं सखेव तनयस्याघं पिते
व ॥ १९ ॥ त्वयाशंकितंपराजयंचाविघ्राग्रोहमित्याह ॥ तेनसख्यारहितः ॥ अतोहृदयेनशून्यः ॥ अंगहेराजन् ॥ उरुक्रमस्यपरिग्रहंषोडश

शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्यऋतवानितिविप्रलब्धः सख्युःसखेवपितृवत्तनयस्यसर्वंसे
हेमहान्महितयाकुमतेरघंमे ॥ १९ ॥ सोहंनृपेंद्ररहितःपुरुषोत्तमेनसख्याप्रियेणसुहृदाहृदयेनशून्यः ॥ अध्वन्यु
रुक्रमपरिग्रहमंगरक्षन्गोपैरसद्भिरबलेवविनिर्जितोस्मि ॥ २० ॥ तद्वैधनुस्तइषवःसरथोहयास्तेसोहंरथीनृपत
योयतआनमंति ॥ सर्वंक्षणेनतदभूदसदीशरिक्तंभस्मन्हुतंकुहकराद्धमिवोप्तमूष्यां ॥ २१ ॥ राजंस्त्वया
नुपृष्टानांसुहृदांनःसुहृत्पुरे ॥ विप्रशापविमूढानांनिघ्नतांमुष्टिभिर्मिथः ॥ २२ ॥

सहस्रस्त्रीलक्षणंअसद्भिर्नीचैः ॥ अबलायोषेव ॥ २० ॥ श्रीकृष्णवियोगएवात्रहेतुर्नान्यइत्याह तद्वैइतियतःयेभ्यः ईशेनरिक्तंशून्यंअसत्कार्य
क्षमंसम्पन्नंविधानैरपिभस्मनिहुतमिव ॥ अतिप्रीतात्पिकुहकात्मायाविनःसकाशात्राद्धंलब्धंयथा ॥ सम्पन्नोप्राणारिनाप्यूषरभूमौ
उप्तंबीजमिव ॥ २१ ॥ सुहृत्पुरेत्वयापृष्टानांनःसुहृदांमध्येचत्वारःपंचवावशेषिताः ॥ तत्रहेतुः विप्रशापेत्यादिना ॥ २२ ॥

एम
५६

वारुणीं सुरामयीं । अजानतामिवान्योन्यं एरकामुष्टिभिर्निघ्नतां ॥ २३ ॥ अवशेषिताः इत्यनेनोक्तं हेतुं कर्तारमाह । प्रायेणेति भावयंति पा
लयंति ॥ २४ ॥ जलौकसां मत्स्यादीनां मध्ये महांतः स्थूलाः अणीयसः सूक्ष्मान् यथा भक्षयंति ॥ २५ ॥ एवं बलिष्ठैर्महद्भिः पांडवैर्यौध
नजरासंधादीन्नृपान् उभिरितरान् शाल्वादींश्च हत्वा यदून्यदुभिरन्योन्यं निहत्य भगवान् भुवो भारभूतान् संहृतवान् ॥ २६ ॥ अतः पांचज्ञ
न्यशक्तोमीति सूचयन्नाह देशकालेति अर्थयुक्तानि मनःपीडोपशमकराणि च ॥ गोविंदस्य वचनानि स्मरतो मे मम चित्तं हरंति स्म

वारुणीं मदिरां पीत्वा मदोन्मथितचेतसां । अजानतामिवान्योन्यं चतुःपंचावशेषिताः ॥ २३ ॥ प्रायेणैतद्भगवत
ईश्वरस्य विचेष्टितं । मिथो निघ्नंति भूतानि भावयंति च यन्मिथः ॥ २४ ॥ जलौकसां जले यद्वन्महांतोदंत्यणी
यसः । दुर्बलान्बलिनो राजन्महांतो बलिनो मिथः ॥ २५ ॥ एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः । यदून्यदुभिर
न्योन्यं भूभारान्संजहार ह ॥ २६ ॥ देशकालार्थयुक्तानि हृत्तापोपशमानि च । हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे
॥ २७ ॥ एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं । सौहार्देनातिगाढेन शांतासीद्विमला मतिः ॥ २८ ॥ वासुदेवांघ्र्यनुध्यानपरिबृं
हितरंहसा । भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥ २९ ॥ गीतं भगवता ज्ञानं यत्तत्संग्राममूर्धनि । कालकर्मतमो
रुद्धं पुनरध्यगमद्विभुः ॥ ३० ॥

कर्षति ॥ २७ ॥ एवमिति सौहृतोक्तिः अतिदृढेन स्नेहेन चिंतयतो मतिः शांता विशोका विमला विरक्ता वासीत् ॥ २८ ॥
मतिवैमल्ये फलमाह । वासुदेवांघ्र्यनुध्यानेन परिबृंहितो रंहो वेगो यस्याः तया निर्मथिता उन्मूलिता अशेषाः कषायाः कामादयो यस्याः साधि
षणा बुद्धिर्यस्य सः ज्ञानं पुनरध्यगमदित्युत्तरेणान्वयः ॥ २९ ॥ कालेन कर्मभिः तमसा भोगाभिनिवेशेन च रुद्धं आवृतं सत् पुनः प्राप ॥ ३० ॥

भा०१
५८

ज्ञानफलमाह विशोक इति । एतदेव शोकहेत्वभावेनोपपादयति । शोकस्य हि हेतुरस्मादद्वैतभ्रमः तस्य देहः तस्य लिंगं तस्य गुणाः तेषां अविद्या । तत्र ब्रह्मसंपत्त्या ब्रह्माहमिति ज्ञानेन लीना प्रकृतिरविद्या यस्मिन् । तेन नैर्गुण्यं भवति । न तु तत्प्रलययोरविद्याविद्याशेषः तस्मान्नैर्गुण्यात्कारणकार्यलिंगनाशः । अलिंगत्वाच्चासंभवः । सम्यक् भोगाय भवति जन्म पुनरिति संभवः स्थूलदेहः तद्रहितः । ततश्च तत्परिच्छेदाभावात्संछिन्नो द्वैतलक्षणः संशयो भ्रमो यस्य स विशोको जात इति ॥ ३१ ॥ भगवतो मार्गमालक्ष्य यदुकुलस्य संस्थानाशं

विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः । लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ॥ ३१ ॥ निशम्य भगवान्मार्गं संस्थां यदुकुलस्य च । स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ॥ ३२ ॥ पृथाप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च तां । एकांतभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः ॥ ३३ ॥ ययाऽहरद्भुवो भारं तां तनुं विजहावजः । कंटकं कंटकेनेव द्वयं चापीशितुः समं ॥ ३४ ॥

ज्ञात्वा नारदोक्तं वानुस्मृत्य स्वःपथाय स्वर्गमार्गाय निभृतात्मा निश्चितचित्तः ॥ ३२ ॥ तां दुर्विज्ञेयां वक्ष्यति हि सौदामिन्या यथाकाशे यान्त्या हित्वाभ्रमंडलं । गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैरिति । संसृतेरुपरराम जीवन्मुक्ताबभूव देहं जहाविति वा ॥ ३३ ॥ तदेवमुक्तमपि यादवेभ्यो भगवतो वैलक्षण्यं मन्दधियां तत्साम्यं वदतो मंदमतीन्प्रति वैलक्षण्यं स्पष्टयति द्वाभ्यां । यया यादवरूपया तन्वा भुवो भारं कंटकेन कंटकमिवाहरत् । यादवतनुः भूभारतनुश्चेति द्वयमपीश्वरस्य संहार्यत्वेन सममेव ॥ ३४ ॥

राम
५८

श्रीकृष्णमूर्त्तेर्विशेषमाह यथेति ॥ तान्यपि यथा धत्ते जहाति च ॥ नटइव ॥ यथा नटो निजरूपेणावस्थितो रूपान्तराणि धत्ते मुंचति चैव ॥ तथा तद
पि कलेवरं जहौ ॥ अंतर्धानादित्यर्थः ॥ ३५ ॥ युधिष्ठिरस्य स्वर्गारोहणप्रसंगाय कलिप्रवेशमाह ॥ स्वतन्वा जहौ ॥ स्वतनोरेव वैकुंठारोहात ॥ श्र
वणीया सती कथा यस्य ॥ तदा यदहस्तस्मिन्नेव ॥ अहरिति लुप्तसप्तम्यन्तं पदं ॥ अप्रतिबुद्धचेतसामिति ॥ विवेकिनां तु न ॥ न प्रभवतीत्युक्तं ॥
अन्ववर्त्ततेति पूर्वमेवांशेन प्रविष्टस्य तेन रूपेणानुवृत्तिरुक्ता ॥ २६ ॥ बुधो युधिष्ठिरः तस्य कलेः परिसर्पणं प्रसरणं विलोक्याकर्ण्य

यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः ॥ भूभारः क्षपितो येन जहौ तच्च कलेवरं ॥ ३५ ॥ यदा मुकुंदो भगवानिमां महीं
जहौ स्वतन्वा श्रवणीयसत्कथः ॥ तदाहरेवाप्रतिबुद्धचेतसामधर्महेतुः कलिरन्ववर्त्तत ॥ ३६ ॥ युधिष्ठिरस्तत्परिस
र्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि ॥ विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥ ३७ ॥ स्वराट् पौ
त्रं विनयिनमात्मनः सुसमं गुणैः ॥ तोयनीव्याः पतिं भूमेरभ्यषिंचद्गजाह्वये ॥ ३८ ॥ मथुरायां तथा वज्रं शूरसेनपतिं
ततः ॥ प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ॥ ३९ ॥ विसृज्य तत्र तत्सर्वं दुकूलवलयादिकं ॥ निर्ममो निरहंकारः
संछिन्नाशेषबंधनः ॥ ४० ॥

तं ॥ लोभाद्यधर्मचक्रं यस्मिन् ॥ जिह्मं कौटिल्यं ॥ पर्यधात् तदुचितं परिधानमकरोत ॥ ३७ ॥ आत्मनः सुसमं गुणैः
सुसमं अतिसदृशं ॥ तोयं सर्वतः स्थितं समुद्रोदकमेव नीविः परिधानविशेषो यस्याः तस्याः भूमेः पतित्वेनाभिषिक्तवान् ॥ ३८ ॥ वज्रं अनिरु
द्धस्य ॥ इष्टिं निरूप्य कृत्वेत्यर्थः ॥ अपिबत् आत्मन्यारोपयामास ॥ ईश्वरः समर्थः ॥ ३९ ॥ संछिन्नान्यशेषाणि बंधनानि उपाधयो येन ॥ ४० ॥

तदेवदर्शयति द्वाभ्यां वाचमित्युपलक्षणं सर्वेंद्रियाणि मनसि प्रविलापितवानित्यर्थः तच्च मनः प्राणे प्राणाधीनत्वात् तं च प्राणं
इतरे अपाने तेनाकर्षणात् अपानं च मायां उत्सर्गः तत्सहितमपानं मृत्यौ तदधिष्ठातरि देवतायां अनेनैव वागादि प्रविलापितानि तत्कर्मसहितं
तेषां तं मृत्युं पंचत्वे पंचभूतानामैक्ये देहे देहसंबन्धत्वानि तस्मिन्निति भावितवानित्यर्थः अजो हवीरिति पंचत्वं तत्तु डि॰ अपि ४१ त्रिवृत्त्वे
गुणत्रये तच्च त्रित्वं एकत्वे अविद्यायां सर्वं सर्वारोपहेतुमविद्यां आत्मनि जीवे अजो हवीरिति वक्ष्यमाणं अजो हवीरित्यार्ष एवं शोधितमा

वाचं जुहाव मनसि तत्प्राण इतरे च तं मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्यजोहवीत् ४१ त्रित्वे हुत्वाथ पंचत्वं तच्चैक
त्वे जुहोन्मुनिः सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ४२ वीरवासा निराहारो बद्धवाङ्मुक्तमूर्धजः दर्शयन्ना
त्मनो रूपं जडोन्मत्तपिशाचवत् ४३ अनवेक्षमाणो निरगादश्रृण्वन्बधिरो यथा उदीचीं प्रविवेशाशां गतपूर्वां महा
त्मभिः हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः ४४ सर्वे तमनु निर्जग्मुः भ्रातरः कृतनिश्चयाः कलिनाधर्ममित्रेण दृष्ट्वा
स्पृष्टाः प्रजा भुवि ४५ ते साधुकृतसर्वार्था ज्ञात्वात्यंतिकमात्मनः मनसा धारयामासुर्वैकुंठचरणांबुजं ४६ त
द्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे तस्मिन्नारायणपदे एकांतमतयो गति ४७

त्मानं ब्रह्मणि अव्यये क्षयहेतुरहिते न तस्यान्यत्र लय इत्यर्थः ४२ तदेवमात्मप्रतिपत्तिमुक्त्वा वाह्यस्थितिमाह वीरवासा इति द्वाभ्यां बद्धवाक् मौनी
अनवेक्षमाणः अन्यजनादिप्रतीक्षामकुर्वन् आशां दिशं गतपूर्वां पूर्वप्रविष्टां यतः प्रविष्टो ४४ अधर्मो मित्रं यस्य तेन ४५ साधु कृताः सर्वे
अर्था धर्मादयो यैः अत एव वैकुंठस्य चरणांबुजमेव आत्यंतिकं शरणं ज्ञात्वा ४६

कथंभूते परे। विधूतकल्मषाणां आस्थानं यत्र यस्मिन् विरजेनात्मनैव गतिं प्राप्ताः। न तु षोडशकलेन लिंगेन गतेर्वा विशेषणं वि
रजेनात्मनैवावस्थानरूपां गतिं ते विधूतकल्मषाः प्राप्ता इति ॥४८॥ तां [illegible] प्रभासे श्रीकृष्णावेशेन कृष्णे विलीनभावे परे देहं
परित्यज्य तच्चित्तः [illegible] पितृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ ॥४९॥ आत्मानं प्रति अनपेक्षतां तेन [illegible]

अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः। विधूतकल्मषस्थानं विरजेनात्मनैव हि ॥४८॥ विदुरोऽपि परित्यज्य प्रभासे दे
हमात्मवान्। कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥४९॥ द्रौपदी च तदाज्ञाय पतीनामनपेक्षताम्। वासुदेवे भ
गवति ह्येकान्तमतिराप तम् ॥५०॥ यः श्रद्धयैतद्भगवत्प्रियाणां पाण्डोः सुतानामिति संप्रयाणम्। शृणोत्यलं स्वस्त्ययनं प
वित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिम् ॥५१॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे स्वर्गारोहणं नाम पञ्चदशोऽध्यायः ॥ सूत
उवाच ॥ ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह। यथा हि सूत्यामभिजातकोविदाः समादिशन्वि
प्र महद्गुणस्तथा ॥१॥ स उत्तरस्य तनयामुपयेम इरावतीम्। जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् ॥२॥ आजहाराश्वमे
धांस्त्रीन् गंगायां भूरिदक्षिणान्। शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ॥३॥

त्वा तमाप ॥५०॥ इति एवं यत्तत्संप्रयाणं अलमतिशयेन स्वस्त्ययनं मंग
लास्पदं अलं पवित्रं च ॥५१॥ इति श्री[illegible] ततः षोडशे भूमिधर्मयोः कलिनिग्रहयोः संवादे वर्ण्यते प्राप्तिः पालकस्य परीक्षितः द्विजवर्या
णां शिक्षया तत्त्वां जन्मनि अभिजातकोविदाः जातकर्मविदः हे विप्र महत्ता गुणा यस्मिन् सः ॥१॥ जनमेजयादीनित्यत्र अधिकं [illegible] ॥२॥ आजहा
रकृतवानित्यर्थः शारद्वतं कृपं यत्र येषु अश्वमेधेषु

भा०१ निजग्राह निगृहीतवान् । कलिमेव निर्दिशति नृपेति ॥४॥ कस्य हेतोरिति अयमर्थः कलिं कस्माद्धेतोः केवलं निजग्राह न तु हतवान् । यतोसौ
५९ शूद्रकः अतिकुत्सितः यो गां पदाहनत् अहत्विति ॥५॥ अस्य विष्णोः पदांभोजयोर्मकरंदः तं लिहंति आस्वादयंतीति ये तेषां सतां महता
वा कथा अथ यमिति समासात्रिष्ठष्टस्यानुषंगः । तर्हि कथ्यतां नोचेत् किमन्यैरसद्भिरालापैः यतः यैः आयुषो वृथाक्षयः ॥६॥ अस्मा
कमयं सत्रप्रयत्नोपि हरिकथामृतपानार्थ एवेत्याह सार्द्धाभ्यां क्षुद्रमल्पमायुर्येषां । अतो मर्त्यानां मरणधर्मवतां । तथापि कृतमत्य

निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् । नृपलिंगधरं शूद्रं घ्नंतं गोमिथुनं पदा ॥४॥ शौनक उवाच ॥ कस्य हेतोर्नि
जग्राह कलिं दिग्विजये नृपः । नृदेवचिह्नधृक् शूद्रः कोसौ गां यः पदाहनत् ॥५॥ तत्कथ्यतां महाभाग यदि कृष्ण
कथाश्रयं । अथवास्य पदांभोजमकरंदलिहां सतां । किमन्यैरसदालापैरायुषो यदसद्व्ययः ॥६॥ क्षुद्रायुषां नृणामंग
मर्त्यानामृतमिच्छतां । इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ॥७॥ न कश्चिन्म्रियते तावद्यावदास्त इहां
तकः । एतदर्थं हि भगवानाहूतः परमर्षिभिः । अहो नृलोके पीयेत हरिलीलामृतं वचः ॥८॥ मंदस्य मंदप्रज्ञस्य व
यो मंदायुषश्च वै । निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥९॥

मोक्षमिच्छतां । यो मृत्युः स इह सत्रे शामित्रे हिंसा शामित्रं कर्म पशुहिंसा
न तदर्थं उपहूतः ॥७॥ ततः किमत आह न कश्चिदिति । ततोपि किमत आह अहो नृलोके हरिलीलामृतं वचः पीयेतेत्येतदर्थं । हरिलीलैवामृ
मृतं यस्मिन् तत ॥८॥ तदभावे वृथैव जीवनमित्याह मंदस्य अलसस्य नक्तं एवं यद्वयः आयुः तत् निद्रया ह्रियते दिवा अपि च व्यर्थव्ययः । तद्यथा ५९
कर्मभिरपह्रियते ॥९॥

तत्र तावत्कलिनिग्रहप्रसंगमाह यदा निजचक्रवर्त्तित्वे स्वसेनया पालिते देशे कलिं प्रविष्टं शुश्राव तदा तां प्रनतिप्रियां वार्त्तां किंचित्प्रियां च युद्धकौतुकसंपन्नैः तां निशम्य ततः शरासनं दुष्टनिग्रहार्थमाददे संयुगे शौंडीर्यं युद्धप्रागल्भ्यं यस्य युद्धे शौरिकल्पः १० ततश्च दिग्विजयाय निर्गतः ११ भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरतः सुमेरुदलप्रान्तवर्षाणि मेरोः सर्वतः इलावृतं ततउत्तरतो रम्यकं हिरण्मयं च दक्षिणतो हरिव

सूत उवाच यदा परीक्षित्कुरुजांगले वसन् कलिं प्रविष्टं निजचक्रवर्त्तिते निशम्य वार्त्तामनतिप्रियां ततः शरासनं संयुगशौंडिराददे १० स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेंद्रध्वजमाश्रितः पुरात् वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ११ भद्राश्वं केतुमालं च भारतं चोत्तरान्कुरून् किंपुरुषादीनि वर्षाणि विजित्य जगृहे बलिं १२ तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनां प्रगीयमानं च यशः कृष्णमाहात्म्यसूचकं १३ आत्मानं च परित्रातमश्वत्थाम्नोस्त्रतेजसः स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे १४ तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः महाधनानि वासांसि ददौ हारान्महामनाः १५ सारथ्यपार्षदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामान् स्निग्धेषु पांडुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणारविंदे १६

र्षं किंपुरुषं च तानि विजित्य १२ प्रगीयमानं यशः यदाश्वादीनि शृण्वन् तेभ्योददाविति तृतीयेनान्वयः १३ १५ किंच स्निग्धेषु पांडवेषु विष्णोर्यानि सारथ्यादीनि कर्माणि तानि शृण्वन् तथा विष्णोर्जगत्कर्तृकां प्रणतिं च शृण्वन् नृपतिः परीक्षित् विष्णोश्चरणारविंदे भक्तिं करोति स्म पार्षदमिति रेफपकारयोर्विश्लेषश्छांदसः तत्र पार्षदं सभापतित्वं सेवनं विनोदवृत्तिः वीरासनं रात्रौ खड्गहस्तस्यातिष्ठतो जागरणं १६

भा॰पु॰
६॰

वृत्तिमव्ययं वर्तमानस्य सतः नातिदूरे शीघ्रमेव ॥ १७ ॥ धर्मो वृषरूपः विच्छायां हतप्रभां गां गोरूपां पृथ्वीं विवत्सां नष्टापत्यां ॥ १८ ॥ तेऽश्रुकलनोरे
हस्य ॥ यद्यपि विवर्हितामयो न लक्ष्यते तथापि त्वं तर्मध्ये आधिः पीडा यस्यास्तां त्वां आलक्षये केन यतो विच्छायासि ॥ श्रुतोऽपवत्नापपादवैच
र्थ्यं भजतात्तत्वेन लिंगेन ॥ तत्र कारणानि कल्पयन् पृच्छति ॥ दूरे वंधुमित्यादि पंचभिः ॥ दूरे स्थितं वंधुं ॥ १९ ॥ त्रिभिः पादैस्त्यक्तं ॥ श्रुत एवैकपादं मा
मां वृषलैः शूद्रैः भोक्ष्यमाणां ॥ उत्सवमात्मपदं विशेषत्वात् ॥ हताः यज्ञभागा येषां तान् ॥ यज्ञाय करणात् ॥ २१ ॥ देवर्षिद्वि स्विन्मघवत्यभिर

तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिमव्ययं ॥ नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे ॥ १७ ॥ धर्मः पदैकेन चरन्विच्छायामुपल
भ्य गां पृच्छति स्माश्रुवदनां विवत्सामिव मातरं ॥ १८ ॥ कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन ॥ आ
लक्षये भवतीमन्तराधिं दूरे वंधुं शोचसि कंचनांब ॥ १९ ॥ पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमा
णं आहो सुरादीन्हृतयज्ञभागान्प्रजा उत स्विन्मघवत्यवर्षति ॥ २० ॥ अरक्ष्यमाणाः स्त्रिय उर्वि बालान् शोचस्यथो पुरुषा
दैरिवार्तान् ॥ वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥ २१ ॥ किं क्षत्रबंधून्कलिनोपसृष्टान्रा
ष्ट्राणि वा तैरवरोपितानि ॥ इतस्ततो वाशनपानवासःस्नानव्यवायोन्मुखजीवलोकं ॥ २२ ॥

रक्ष्यमाणाः स्त्रियः पतिभिः रक्ष्यमाणा बालान् पुरुषादैरिव निर्दयैरार्तान् क्लिष्टान् ॥ वाचं देवीं सरस्वतीं कुकर्मणि उपचारे
स्थितां ॥ कुलाग्र्यान् ब्राह्मणोत्तमान् सेवकान् ॥ २१ ॥ उपसृष्टान् व्याप्तान् ॥ अवरोपितानि उद्वासितानि ॥ व्यवायो मैथुनं ॥ इतस्ततः नि
षेधानादरेण सर्वतः शनादिषु उन्मुखं प्रवर्तमानं जीवलोकं वा ॥ २२ ॥

राम
६॰

हे अंब मातः धरित्रि ते तव यो भूरिभारः तस्यावतारणार्थं कृतावतारस्य कर्माणि स्मरंती तेन विसृष्टा सती शोचसि निर्वाणं विलंबितं
आश्रितं येषु तानि ॥ पाठांतरे निर्वाणं विडंबितं उपहसितं यैः मोक्षादप्यधिकसुखानीत्यर्थः ॥ २२ ॥ हे अंब वते सौभाग्यं कालेन वा हृतं
॥ २४ ॥ भवान् जानात्येव तथापि वक्ष्यामीत्याह ॥ येन हेतुभूतेन त्वं चतुर्भिः पादैर्वर्तसे ॥ यत्र सत्यादयो गुणा न विद्यंते न क्षीयंते तेन
श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः ॥ २५ ॥ सत्यं यथार्थभाषणं ॥ शौचं शुद्धत्वं ॥ दया परदुःखासहं ॥ क्षांतिः क्रोध

यद्वांब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ॥ अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलंबितानि ॥ २२ ॥

न इदं ममाचक्ष्व तवाधिमूलं वसुंधरे येन विकर्शितासि ॥ कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमं

ब सौभगं ॥ २४ ॥ धरण्युवाच ॥ भवान् हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि ॥ चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥

सत्यं शौचं दया क्षांतिस्त्यागः संतोष आर्जवं ॥ शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतं ॥ २६ ॥ ज्ञानं विरक्तिरैश्वर्यं

प्राप्तौ चित्तसंयमनं ॥ त्यागः अर्थिषु मुक्तहस्तता ॥ संतोषः
शौर्यं तेजो बलं स्मृतिः स्वातंत्र्यं कौशलं कांतिर्धैर्यं मार्दवमेव च ॥ २७ ॥

अलंबुद्धिः ॥ आर्जवं अवक्रता ॥ शमो मनो नैश्चल्यं ॥ दमो बाह्येंद्रियनैश्चल्यं ॥ तपः स्वधर्मः ॥ साम्यं अरिमित्राद्यभावः ॥ तितिक्षा परापराधसहनं
उपरतिः लाभप्राप्तौ औदासीन्यं ॥ श्रुतं शास्त्रविचारः ॥ २६ ॥ ज्ञानमात्मविषयं ॥ विरक्तिर्वैतृष्ण्यं ॥ ऐश्वर्यं नियंतृत्वं ॥ शौर्यं संग्रामोत्साहः ॥ तेजः प्रभावः
बलं दक्षत्वं ॥ स्मृतिः कर्तव्यार्थानुसंधानं ॥ स्वातंत्र्यमपराधीनता ॥ कौशलं क्रियानिपुणता ॥ कांतिः सौंदर्यं ॥ धैर्यं अव्याकुलता ॥ मार्दवं चित्ता
काठिन्यं ॥ २७ ॥

भा०१
टी

प्रागल्भ्यं प्रतिभातिशयः प्रश्रयो विनयः शीलं सुस्वभावः सहओजोबलानि मनसः ज्ञानेंद्रियाणां कर्मेंद्रियाणां च पाटवानि भगः भोगास्पदत्वं गांभीर्यम् अक्षोभ्यत्वं स्थैर्यम् अचलता आस्तिक्यं श्रद्धा कीर्तिर्यशः मानः पूज्यत्वं अनहंकृतिः गर्वाभावः २८ एते एकोनचत्वारिंशत् अन्ये च ब्रह्मण्यत्वशरण्यत्वादयो महांतो गुणाः प्रार्थ्याः नित्याः सहजाः न वियंति न क्षीयंते स्म २९ तेन गुणपात्रेण गुणालयेन पाप्मना पापहेतुना ३०।३१ तस्य विरहो दुःसह इत्याह चतुर्भिः ब्रह्मादयो यस्याः श्रियः अपांगमो

प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः गांभीर्यं स्थैर्यम् आस्तिक्यं कीर्तिर्मानोऽनहंकृतिः २८ एते चान्ये च भगवन्नित्या यत्र महागुणाः प्रार्थ्या महत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचित् २९ तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं शोचामि रहितं लोकं पाप्मना कलिनेक्षितं ३० आत्मानं चानुशोचामि भवंतं चामरोत्तमं देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमान् ३१ ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपः समचरन्भगवत्प्रपन्नाः सा श्रीः स्ववासमरविंदवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता ३२ तस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी त्रीनत्यरोच उपलभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं तदंते ३३

क्षः स्वस्मिन्दृष्टिपातः तत्कामाः संतः बहुतिथं बहुकालं तपः समचरन् सम्यक् चरंति स्म भगवद्भिः तन्मेः प्रपन्ना आश्रिता अपि सा श्रीः यस्य पादसौभगं अलमत्यर्थं अनुरक्ता सती भजते ३२ तस्य भगवतः श्रीमद्भिः पादैः केतवो ध्वजाः अब्जादयः केता चिह्नानि येषां तैः यद्वा अ... अब्जादिनामाश्रयैः सम्यगलंकृतम् अंगं यस्याः साहं ततो विभूतिं संपद उपलभ्य प्राप्य त्रीन् लोकान् अत्यरोचं अतिशोभितवत्यस्मि पश्चात्तदंते यस्य

टी

किं च यो वै। आसुरो वंशो येषां तेषां राज्ञां अक्षौहिणीशतरूपं ममातिभारं अपनीतवान्। त्वां च ऊनपदं त्वां दुःस्थं संतं पौरुषेण उद्यमप्रकारेण आत्मनि स्वस्मिन्नेव पूर्णपदं सुस्थं संपादयन्। लक्षणहेत्वोः क्रियायाः इति हेतौ शतृप्रत्ययः। संपादयितुमित्यर्थः। अबिभ्रत् धृतवान् नित्यस्थैः॥३४॥ तस्य विरहं का वा सहेत। प्रेमावलोकश्च रुचिरस्मितं च वल्गुजल्पश्च तैः। मधुमानिनीनां सत्यभामादीनां समानं गर्वसहितं स्थैर्यं धैर्यं च अहरत्। यस्याङ्घ्रिणा ध्वजरेखाङ्कितेन विटंकितायाः अलंकृतायाः सत्याः विशेषेण मम रोमोत्सवो भवति॥३५॥ कथयतोः सतोः प्राचीं पूर्ववा

यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतंत्रः। त्वां दुस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमबिभ्रदंगं॥३४॥ का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः। स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो मम यदंघ्रिविटंकितायाः॥३५॥ तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा॥ परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीं॥३६॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे पृथ्वीधर्मसंवादो नाम षोडशोऽध्यायः॥ सूत उवाच॥ तत्र गोमिथुनं राजा हन्यमानमनाथवत्॥ दंडहस्तं च वृषलं ददृशे नृपलांछनं॥१॥ वृषं मृणालधवलं मेहंतमिव बिभ्यतं॥ वेपमानं पदैकेन सीदंतं शूद्रताडितं॥२॥ गां च धर्मदुघां दीनां भृशं शूद्रपदाहतां॥ विवत्सामाश्रुवदनां क्षामां यवसमिच्छतीं॥३॥

हिनीं कुरुक्षेत्रे॥३६॥ इति प्रथमे षोडशः॥ ततः सप्तदशे राज्ञा कलेर्निग्रह उच्यते॥ तस्यैवं वीर्यभाजोऽपि वैराग्यं वक्ष्यतेऽद्भुतं॥ हन्यमानं ताड्यमानं॥१॥ मृणालं पद्मकंदः तद्वद्धवलं। भयान्मेहंतं मूत्रयंतं इवेत्यनेन पादावशेषो धर्मो भयान्मूत्रयतीव प्रतीतो ग्लायमानः। तस्य पादान्तरविहीनत्वं कंपमानत्वं इवेति दर्शितं॥२॥ धर्मदुघां हविर्दोग्ध्रीं। क्षामां कृशां। यवसं तृणं। सत्रापि सत्यादिव्रतवत्सदुर्भाग्याद्विवत्सेव। यज्ञाद्यभावात्कृशा। अत एव यज्ञभागमिच्छंतीं पृथ्वीति सूचितं॥३॥

भा॰ ३
६२

कान्तेश्वरच्छवर्णितत्वेनः परिच्छदः परिकरो यस्य तथाभूतो निबद्धमित्यर्थः सज्जीकृतकार्मुकः ४ हन्मि घातयामि राजाहमिति वेत्त त्राहनरः ढ्वेषमात्रेण नरदेवो ऽसि । कर्मणा तु अद्विजः शूद्रः ५ अशोच्यान् निरपराधान् हंसि त्वं प्रहरन् प्रहरसि शोच्यः सापराधो ऽसि अतो वध्यमर्हसि ६ । वृषवत्याह । त्वं वाकः स्वयमेव संभावयति । किं कश्चिद्देवो वृषरूपेणास्मान् परिखेदयन् वर्तसे ७ दोर्दण्डैः परिरंभितवत्त्वरसि

पप्रच्छ रथमारूढः कान्तेश्वरपरिच्छदः । मेघगम्भीरया वाचा समारोपितकार्मुकः ४ कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान् बली । नरदेवो ऽसि वेषेण नटवत्कर्मणा ऽद्विजः ५ कस्त्वं कृष्णे गते दूरं सह गाण्डीवधन्वना । शोच्यो ऽस्यशोच्यान् रहसि प्रहरन् वधमर्हसि ६ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् । वृषरूपेण किं कश्चिद्देवो नः परिखेदयन् ७ न जातु कौरवेन्द्राणां दोर्दण्डपरिरंभिते । भूतले ऽनुपतन्त्यस्मिन् विना ते प्राणिनां शुचः ८ मा सौरभेयात्र शुचो व्येतु ते वृषलाद्भयम् । मा रोदीरम्ब भद्रं ते खलानां मयि शास्तरि ९ यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यन्ते साध्व्यसाधुभिः । तस्य मत्तस्य नश्यन्ति कीर्तिरायुर्भगो गतिः १० एष राज्ञां परो धर्मो ह्यार्तानामार्तिनिग्रहः । अत एनं वधिष्यामि भूतद्रुहमसत्तमम् ॥ ११ ॥

ते । ते शुचः शोकाः त्वां विना अन्येषां प्राणिनां नानुपतन्तीति खेदहेतुत्वं दर्शितं ८ एवमुक्त्वा पुनरपि शोचन्तं प्रत्याह मा सौरभेय अत्र मा शुचः शोकं मा कुरु । व्येतु अपयातु गां प्रत्याह अम्ब मातः शास्तरि मयि जीवति सति ते भद्रमेव अतो मा रोदीः ९ त्वद्धितार्थमेवैनं हनिष्यामि न तु वा पकारयेत्यर्थः यस्येति द्वाभ्यां हे साध्वि सर्वाः याः काश्चिदपीत्यर्थः असाधुभिस्त्रस्यन्ते पीड्यन्ते इत्यर्थः भगो भाग्यं गतिः परलोकः १० ११

६२

पुनरतिशोचंतं वृषं प्रत्याह । कः अवृश्चत् चिच्छेद । त्वादृशाः त्वद्विधाः दुःखिताः ॥ १२ ॥ वो भद्रमस्तु । आत्मनस्तव पादच्छेदेनैव वैरूप्यं कृतवंतं कीर्त्तिं
दूषयतीति तथा तं । आख्याहि ॥ १३ ॥ ननु तदाख्यानेन कृतेन कथं भद्रं स्यादित्यत आह । यस्मादनागसि जने यः अघं दुःखं युंजन् कर्त्ता भवति अ
स्य एवंभूतस्य मत्तः प्रकाशात्सर्वत्रापि भयं भवति । ततः साधूनां भद्रं भवेदेवेति ॥ १४ ॥ एतस्य दंडे अहमसमर्थ इति मा शंकीरित्याह । अनागःस्वि

कोऽवृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्पदः । माभूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्त्तिनां ॥ १२ ॥ आख्याहि वृष भद्रं वः साधूनामकृ
तागसां । आत्मवैरूप्यकर्त्तारं पार्थानां कीर्त्तिदूषणं ॥ १३ ॥ जनेऽनागस्यघं युंजन्सर्वतोऽस्य च मद्भयं । साधूनां भद्रमेव स्यादसा
धुदमने कृते ॥ १४ ॥ अनागःस्विह भूतेषु य आगस्कृन्निरंकुशः । आहर्त्तास्मि भुजं साक्षादमर्त्यस्यापि सांगदं ॥ १५ ॥ राज्ञो हि प
रमो धर्मः स्वधर्मस्थानुपालनं । शासतोऽन्यान्यथाशास्त्रमनापद्युत्पथानिह ॥ १६ ॥ धर्म उवाच ॥ एतद्वः पांडवे
यानां युक्तमार्त्ताभयं वचः । येषां गुणगणैः कृष्णो दौत्यादौ भगवान्कृतः ॥ १७ ॥ न वयं क्लेशबीजानि यतः स्युः पु
रुषर्षभ ॥ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥ १८ ॥

ति । आगस्कृत् अपराधकर्त्ता । तस्यामर्त्यस्य देवस्यापि भुजं आहर्त्तास्मि आहरिष्यामि । सांगदं इत्यनेन मूलत उत्पाट्याहरिष्यामीति दर्शितं ॥ १५ ॥ नन्वे
कस्य निग्रहेणान्यस्यानुग्रहे तव किं प्रयोजनं तत्राह । राज्ञो हीति । अन्यानधर्मिष्ठान् शासतः दंडयतः ॥ १६ ॥ आर्त्तानामभयं यस्मात्तद्वो वो युक्तं उचित
मेव ॥ १७ ॥ वयं तु यतः पुरुषात्प्राणिनां क्लेशहेतवो भवेयुः । तं पुरुषं न विजानीमः । यतः वादिनां वाक्यभेदैर्विमोहिताः ॥ १८ ॥

भा॰प्र
६२

वाचामभेदानेवाह विकल्पमेदं वमतेञाच्छादयंतियोगिनः तेञात्मानमेवात्मनः प्रभुं सुखदुःखप्रमाहुः तदुक्तं आत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्मनः इति यद्वा विकल्पैः कुतर्कैः प्राकृताः नास्तिकाः एवंहितेवदंति नतावदैवतादीनांप्रभुत्वंकर्माधीनत्वात नचकर्मणः स्वाधीनत्वात अतः स्वयमेवप्रभुर्नचान्यः कश्चिदिति अन्येदैवज्ञाः दैवंग्रहादिरूपंदैवतंपरेतुमीमांसकाः कर्म अपरेलोकायतिकाः स्वभावं १८ तेष्वपिनेश्वरेष्वपीतिदुर्लभत्वंदर्शितं निश्चयइतिसिद्धांतत्वं अप्रतर्क्यातमनोगोचरातअनिर्देश्यातवचनागोचरातपरमेश्वरात्सर्वंभवतीतिविमृशवि

केविद्विकल्पवसनाआहुरात्मानमात्मनः दैवमन्येपरेकर्मस्वभावमपरेप्रभुं १८ अप्रतर्क्यादनिर्देश्यादितिकेष्वपिनिश्चयः अत्रानुरूपंराजर्षेविमृशस्वमनीषया १९ एवंधर्मेप्रवदतिससम्राड्द्विजसत्तम समाहितेनमनसाविखेदः पर्यचष्टतं २० धर्मंब्रवीषिधर्मज्ञधर्मोसिवृषरूपधृक् यदधर्मकृतः स्थानंसूचकस्यापितद्भवेत २१ अथवादेवमायायानूनंगतिगोचरा चेतसोवचसश्चापिभूतानामितिनिश्चयः २२ तपःशौचंदयासत्यमितिपादाः प्रकीर्तिताः अधर्मांशैस्त्रयोभग्नाः स्मयसंगमदैस्तव २३

वारयस्वबुद्ध्या १९ विखेदः गतमोहः पर्यचष्टप्रत्यभाषतज्ञातवानितिवा २० अनिर्द्धारितमिवब्रुवंतंघातकंजानन्नपिनसूचयेइत्येवंरूपंधर्मंब्रवीषि अतोधर्मोसि सूचनेकोदोषइत्यतआह यदिति स्थानंनरकादि २१ यद्वा अज्ञानादप्यकथनंभवतीत्याह अथवेतिदेवस्यमायायागतिर्वध्यघातकलक्षणावृत्तिर्भूतानांचेतसोवचसश्चगोचरोनहितेषांज्ञानंभवतीतिनिश्चयः २२ धर्मोसाक्षादितिज्ञात्वातस्यपादान्स्ववादेनव्यवस्थामाह तपइतिद्वाभ्यां अधर्मपादैस्त्रिभिरंशैस्तवत्रयः पादाः भग्नाः स्मयोविस्मयः २३

धर्म
६२

इदानीं कलौ हे धर्म ते पादः चतुर्थांशः तत्रापि सत्यमेवास्ति यतः सत्यात् भवानात्मानं निवर्त्तयेत् कथंचिद्धारयेत् पक्षाभक्षव्यक्त्यां सा
धयेत् नमविपादं अनृतेन संवर्द्धितः कलिरूपोऽयमधर्मो गृहीतुमिच्छति तत्रेयं स्थितिः कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्मः त्रेतायां च
तुर्णां मविपादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया अनृतेन सत्यमित्येवं चतुर्थांशो हीयते द्वापरे त्वर्द्धं कलौ चतुर्थांशो ऽव
शिष्यते सोऽप्यंते न स्यातीति ॥२४॥ न्यासितः अन्योन्यद्वारेणावतारितः उरुर्भरो भारो यया सा कृतकौतुकं मंगलं यस्याः सा ॥२५॥ अश्रुकणिक

इदानीं धर्म पादस्ते सत्यं निर्वर्त्तयेद्यतः ॥ तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ॥२४॥ इयं च भूर्भगवता न्यासितोरु
भरा सती ॥ श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥२५॥ शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता धुना ॥ अब्रह्मण्या
नृपव्याजाः शूद्रा भोक्ष्यंति मामिति ॥२६॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः ॥ निशातमाददे खड्गं कलयेऽधर्महेत
वे ॥२७॥ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं ॥ तत्पादमूलं शिरसा समगाद्भयविह्वलः ॥२८॥ पतितं पादयोर्वीरः कृपया दी
नवत्सलः ॥ शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥२९॥ राजोवाच ॥ न ते गुडाकेशयशोधराणां बद्धांजलेर्वै भयम

ल्पयति स्रुवतीत्यश्रुकला तेन तत्पन्नाम सती शूद्रा भोक्ष्यंति मामि स्ति किंचित् न वर्त्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबंधुः ॥३०॥
तिशोचति ॥२६॥ निशातं निशितं अधर्मस्य हेतवे कलिं हंतुमित्यर्थः ॥२७॥ अभिप्रेत्य ज्ञात्वा ॥२८॥ शरण्य आश्रयार्हः श्लोक्यः सत्कीर्त्यर्हः
॥२९॥ गुडाकेशोऽर्जुनः तस्य यशोधराणां तेषां तान्प्रति बद्धोऽञ्जलिर्येन तस्य ते ॥ किंतु कथंचन केनाप्यंशेन न वर्त्तितव्यं यस्मात्त्वमधर्म
बंधुः ॥३०॥

तदेवाह ॥ राजदेहेष्ववर्त्तमानं त्वा मत्तः प्रवर्तितः प्रवृत्तः ॥ अनार्यं दौर्जन्यं अंहः स्वधर्मत्यागः ॥ ज्येष्ठा अलक्ष्मीः मायाकपटं ॥ ३१ ॥ ततस्तस्मात् वर्त्तितव्यं वर्त्तितुमर्हे ब्रह्मावर्त्ते देशे ॥ यज्ञस्य वितानं विस्तारः ॥ तस्य विज्ञाः निपुणाः ॥ ३२ ॥ इज्यायागस्तद्रूपा मूर्त्तिर्यस्य स इज्यात्मा कामांश्च ॥ नन्वे-ङ्गारयो देवा इज्यन्ते न तु हरिस्तत्राह ॥ एष स्थावरादीनामात्मेति ॥ तथापि जीववत्तत्परिच्छिन्नं इत्याह ॥ अन्तर्बहिरिति यथा वायुः प्राणरूपेण

त्वां वर्त्तमानं नरदेव देहेष्वनुप्रवृत्तोयमधर्मपूगः ॥ लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः ॥ ३१ ॥ न वर्त्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्त्तितव्ये ॥ ब्रह्मावर्त्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥ ३२ ॥ यस्मिन्हरिर्भगवानिज्यमान इज्यात्ममूर्त्तिर्यजतां शं तनोति ॥ कामानमोघान्स्थिरजंगमानामंतर्बहिर्वायुरिवैष आत्मा ॥ ३३ ॥ सूत उवाच ॥ परीक्षितैवमादिष्टः स कलिर्जातवेपथुः ॥ तमुद्यतासिमाहेदं दंडपाणिमिवोद्यतं ॥ ३४ ॥ यत्र क्वाचन वत्स्यामि सार्वभौम तवाज्ञया ॥ लक्षये तत्र तत्रापि त्वामात्तेषुशरासनं ॥ ३५ ॥ तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ॥ यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनं ॥ ३६ ॥

तत्स्थोपि वहिरप्यस्तीति तद्वत्सर्वांतर्यामीश्वरोपीति ॥ ३३ ॥ उद्यतासिं उद्धृतखड्गं ॥ दंडपाणिं यमं ॥ उद्यतं उद्युक्तं ॥ ३४ ॥ अत्र न वत्स्यामीति या तवाज्ञा तया यत्र क्वापि वत्स्यामि किं तु तत्र तत्रापि आत्तः गृहीतः इषुः शरः शरासनं च येन तं त्वामेव लक्षये ॥ ३५ ॥ तत्तस्मान्नियतो निश्चलो वत्स्यामि ॥ ३६ ॥

पानं मद्यादेः सूनाः प्राणिवधः द्यूते अनृतं पाने मदः पूर्वं मदो दयानाशकत्वेनोक्तः अत्र तु गर्वद्वारा तपोनाशकत्वेन स्त्रीषु संगः हिंसायां क्रौ
र्यं दयानाशकमिति ज्ञेयं यद्यपि सर्वं सर्वत्र संभवति तथापि प्राधान्येनानृतादीनां द्यूतादिषु यथासंख्यं ज्ञेयं द्वादशाब्दं धेनु सत्यं दयात
पोदानमिति पादा विमोऽनृते त्यत्र दानशब्देन शौचमेवोक्तं मनःशुद्धिरूपत्वात् तामपहास्त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः अध
र्मपादैरनृतहिंसासंतोषविग्रहैः इत्यत्र च असंतोषशब्देन च तत्स्पृहेति गर्वो लक्ष्यते विग्रहशब्देन च तद्धेतुः स्त्रीसंगस्त्वविशेषः ३८ चतुर्विधस्या

सूत उवाच अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ३७ पुनश्च याचमानाय जा
तरूपमदात्प्रभुः ततोऽनृतं मदं कामं रजो वैरं च पंचमं ३८ अमूनि पंच स्थानानि ह्यधर्मप्रभवः कलिः औत्तरेयेण दत्तानि
न्यवसत्तन्निदेशकृत ३९ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ४०
वृषस्य नष्टांस्त्रीन्पादान्तपः शौचं दयामिति प्रतिसंदध आश्वास्य महीं च समवर्द्धयत ४१ स एष एतर्ह्यध्या
स्त आसनं पार्थिवोचितं पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ४२

प्येकत्रैवावस्थानं देहीति पुनर्याचमानाय जातरूपं सुवर्णं दत्तवान् ततः सुवर्णदानात् अनृतं मदं कामं इति स्त्रीषु संगं रज इति रजोमूलां हिंसां
एतानि चत्वारि पंचमं वैरं चादित् ३९ अमूनि अमूनि स्थानानि भजन्नवसदित्यर्थः ४० अथ इति हेतोः बुभूषुः उद्भवितुमिच्छुः स्त्रीसुवर्णयोः सेवनं तु
मतयोरसासक्तिः ४१ एवं कलिनिग्रहं कृत्वा वृषस्य पादान् प्रतिसंदधे तपआदीनि प्रवर्तितवानित्यर्थः ४२ वृष्णरीयसत्त्व प्रश्न निरूपितं तत्प्रभावेऽनेत्याह
त्रिभिः एतर्हि इदानीं युधिष्ठिरेणारण्यं प्रवेष्टुमिच्छता उपन्यस्तं समर्पितं आसनमध्यास्ते ४३

अधुनापालयत इति च वर्त्तमाननिर्द्दिशः ॥ स्मेत्यध्याहारो वा ॥४२॥ सत्राय सत्रं कर्त्तुं दीक्षिताः दीक्षां प्राप्तवंतः ॥४४॥ इति श्र
यमे १ स म २ १ः ॥ एतत्त्वष्टादशे तस्य ब्रह्मशापो निरूप्यते ॥ स चानुग्रह एवास्य जातो वैराग्यभावहन् ॥ परीक्षितो निर्याणमत्याश्चर्यं वक्ष्यंस्तत्ते
भावनाय जन्माद्यं यमनुस्मारयति ॥ यो वा इति ॥ विस्तृतो निर्द्दिष्टः पूर्व १ ब्रह्मकोपाडुत्थितादुत् तक्षकात् यः प्राणविप्लवः प्राणनाशः तस्मा

अन्ते धुना स राजर्षिः कौरवेंद्रश्रियोल्लसन् ॥ गजाह्वये महाभागश्चक्रवर्त्ती बृहच्छ्रवाः ॥४२॥ इत्थंभूतानुभावोयमभि
मन्युसुतो नृपः ॥ यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः ॥४४॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे कलिनिग्रहो
नाम सप्तदशोध्यायः ॥ सूत उवाच ॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ॥ अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः
ब्रह्मकोपोत्थिताद्यस्तु तक्षकात् प्राणविप्लवात् ॥ न संमुमोहोरुभयाद्भगवत्यर्पिताशयः ॥१॥ उत्सृज्य सर्वतः संगं विज्ञाता
जितसंस्थितिः ॥ वैयासकेर्जहौ शिष्यो गंगायां स्वकलेवरं ॥३॥ नोत्तमश्लोकवार्त्तानां जुषतां तत्कथामृतं ॥ स्यात्संभ्रमोंत
कालेपि स्मरतां तत्पदांबुजं ॥४॥ तावत्कलिर्न प्रभवेत् प्रविष्टोपीह सर्वशः ॥ यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥५॥

न संमुमोह ॥ अत्र हेतुः ॥ भगवत्येवार्पिताशय इति ॥१॥ किंतु उत्सृज्येति ॥ वैयासकेः शुकस्य शिष्यः सन् विज्ञाता अजितस्य हरेः संस्थि
तिस्तत्त्वं येन सः ॥३॥ न चैतच्चित्रमित्याह उत्तमश्लोकस्यैव वार्त्ता येषु ॥ अत एव नित्यं तत्कथारूपममृतं जुषतां संभ्रमो न स्यात् ॥४॥ तस्मिन्नरा
ज्ञि हते तत्र चित्रमित्याशये नाह तावदिति ॥ आभिमन्योः पुत्रः ॥ एकराट् चक्रवर्त्ती ॥ ईशः पतिः तावत् ॥५॥

नन्वेतदा कलेः प्रवेश एवास्तु प्रविष्टोपि न प्रभवेदिति ज्ञातं तत्राह यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीमनुवृत्तः प्रविष्टः
अधर्मस्य प्रभवो यस्मिन् ॥ ६ ॥ नन्वधर्महेतुं कलिं सर्वथा किं न हतवांस्तत्राह नानुद्वेष्टीति सारंगो भ्रमर इव सारग्राही ॥ सारभाक् यद्य-
स्मिन् कुशलानि पुण्यानि आशु संकल्पमात्रेण फलंति इतराणि पापानि आशु न सिध्यंति यतस्तानि कृतान्येव सिध्यंति न तु संक-
ल्पितमात्राणीति ॥ ७ ॥ ननु दोषाधिक्यात् द्वेष एव युक्तः न धीरेषु तस्य किंचित्करत्वादित्याह ॥ किं नु तेन भवेत् ॥ बालेष्वधीरेष्व

यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां ॥ तदैवेहानुवृत्तोसावधर्मप्रभवः कलिः ॥ ६ ॥ नानुद्वेष्टि कलिं सम्राट् सारंग इव
सारभुक् ॥ कुशलान्याशु सिध्यंति नेतराणि कृतानि यत् ॥ ७ ॥ किं नु बालेषु शूरेण कलिना धीरभीरुणा ॥ अप्रमत्तः प्र-
मत्तेषु यो वृको नृषु वर्त्तते ॥ ८ ॥ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया ॥ वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥ ९ ॥

कथा

या याः भगवतः कथनीयोरुकर्मणः ॥ [illegible] गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः ॥ १० ॥ ऋषय ऊचुः ॥
सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः ॥ यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ॥ ११ ॥

प्रमत्तः अवहितः सन् यो वृक इव वर्त्तते ॥ ८ ॥ पारीक्षितमाख्यानं अपृच्छत यूयं ॥ ९ ॥ किं बहुना नैरेतावदेव कर्त्तव्यमिति सर्वशास्त्रार्थ-
सारं कथयति ॥ या या इति कथनीयान्युरूणि कर्माणि यस्य तस्य गुणकर्मविषयाः ॥ बुभूषुभिः सद्भावमिच्छद्भिः ॥ १० ॥ पुनर्विस्तरेण कथना-
र्थं सूतोक्तिप्रसंगं चाभिनंदति ॥ सूतेति त्रिभिः शाश्वतीः समाः अनंतान्वत्सरान् जीव ॥ अत्यंतसंयोगे द्वितीया ॥ विशदं यशः कीर्त्तयसि नः अ-
स्माकं मर्त्यानाममृतं मरणनिवर्त्तकं ॥ ११ ॥

भा० प्र
६६

किंच अस्मिन्कर्मणि सत्रे अनाश्वासे अविश्वसनीये वैगुण्यबाहुल्येन फलनिश्चयाभावात् धूमेन धूम्रः विवर्ण आत्मा शरीरं येषां तानस्मा
न् कर्मणि षष्ठी । आसवं मकरंदं मधु मधुरं ॥१२॥ भगवत्संगिनो विष्णुभक्तास्तेषां संगस्य यो लवः अत्यल्पः कालस्तेनापि स्वर्गं न तुलयामः
समं न पश्यामः । न चापवर्गं संभावनायां लोट् मर्त्यानां तुच्छा आशिषो राज्याद्यास्तेन तुलयामेति किमु वक्तव्यं ॥१३॥ एवं सत्संगमभिनंद्य श्रवणे
उत्कंठामाविः कुर्वंति कोनामेति रसवित् रसज्ञः महत्तमानामेकांतेन परं अयनं आश्रयो यः तस्य कथायां अगुणस्य प्राकृतगुणरहितस्य

कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् । आपाययति गोविंदपादपद्मासवं मधु ॥१२॥ तुलयाम लवेनापि न स्व
र्गं न पुनर्भवं । भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥१३॥ को नाम तृप्येद्रसवित्कथायां महत्तमैकांतपरायण
स्य । नांतं गुणानामगुणस्य जग्मुः योगेश्वरा ये भवपाद्ममुख्याः ॥१४॥ तन्नो भवान्वै भगवत्प्रधानो महत्तमैकांतपरा
यणस्य हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् ॥१५॥ स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमद
भ्रबुद्धिः ॥ ज्ञानेन वैयासकिशब्दितेन भेजे खगेंद्रध्वजपादमूलं ॥१६॥

कल्याणगुणानामंतं ये योगेश्वरास्तेपि न जग्मुः एतावंत इति न परिगणयांचक्रुः भवः शिवः पाद्मो ब्रह्मा च मुख्यो येषां ते ॥१४॥ नोस्माकं म
ध्ये भगवान्प्रधानः सेव्यो यस्य स भवान्नः शुश्रूषतां हरिश्चरित्रं विस्तारयतु ॥१५॥ तच्च शुकपरीक्षित्संवादेन कथयेत्याह स वा इति द्वा
भ्यां वैयासकिना शब्दितेन कथितेन येन ज्ञानेन ज्ञानसाधनेन अपवर्ग इत्याख्या यस्य तत्तत्खगेंद्रध्वजस्य हरेः पादमूलं स्वरूपं भेजे ॥१६॥

राम
६६

ततः संवृतार्थं यथा तथाख्याहि । तदेव निर्दिशति । परीक्षिते कथितं पारीक्षितं आख्यानं श्रीभागवतं पुराणं परं पुण्यं सत्वशो-
धकं । अद्भुते योगे निष्ठा यस्य । अनंतस्याचरितैरुपपन्नं युक्तं । अत एव भागवतानामभिरामं प्रियं । एतैर्विशेषणैः कर्मज्ञानभक्तियो-
गप्रकाशकत्वं दर्शितं ॥ १७ ॥ श्रीभागवतव्याख्यानेन लब्धप्रसंगं महतामादरपात्रमात्मानं श्लाघते द्वाभ्यां । अहो इत्याश्चर्ये । ह इति हर्षे वा
यमिति बहुवचनं श्लाघायां । प्रतिलोमजा अपि वयं अद्य जन्मभृतः सफलजन्मानः आस्म जाताः । वृद्धानामनुवृत्त्या आदरेण ज्ञानवृद्धैः

तत्रः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं । आख्याह्यनंताचरितोपपन्नं पारीक्षितं भागवताभिरामं ॥ १७ ॥
सूत उवाच । अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः । दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्त-
मानामभिधानयोगः ॥ १८ ॥ कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य । योऽनंतशक्तिर्भगवाननंतो म-
हद्गुणत्वाद्यमनंतमाहुः ॥ १९ ॥

भृतः । तस्य सेवयेति वा । यतो दुःकुलत्वं तन्निमित्तमाधिं मनःपीडां महत्तमानामभिधानयोगः
लौकिकोपि संभाषणलक्षणः संबंधः विधुनोति अपनयति ॥ १८ ॥ कुतः पुनः किं पुनर्वक्तव्यं । तस्यानंतस्य नाम गृणतः पुंसो मह-
त्तमानामभिधानयोगो दौःकुल्यं विधुनोति यद्वा नाम गृणतः कुतः पुनः दौःकुल्यमिति यद्वा गृणतः पुण्यं तस्य नाम दौःकुल्यं वि-
धुनोतीति किं वक्तव्यमिति । कैमुत्यमेवाह अनंताः शक्तयो यस्य स्थितोऽप्यनंतः । किंच महत्सु गुणा यस्य स महद्गुणः तस्य भावः त-
स्मात् यं गुणतोऽप्यनंतमाहुः ॥ १९ ॥

भा०अ
६०

एतत्प्रपंचयति त्रिभिः एतावतेति तस्य परसाम्यं अनतिशयनं च गुणैः तत्साम्यं तदाधिक्यं चान्यस्य नास्तीत्यस्यार्थस्य ज्ञानं एतावतावता सूचि-
तेन अलं पर्याप्तं कस्तद्गुणानितरो वक्तुं शक्नोति तदेवाह इतरान् ब्रह्मादीन् प्रार्थयमानान् हित्वा विभूतिर्लक्ष्मीः अनभीप्सोरपि यस्यांघ्रिरेणुं
सेवत इति २० अथेत्यर्थांतरे यस्य पादनखावसृष्टं निःसृतमपि विरिंच्येनोपहृतं समर्पितं अर्हणांभः अर्घोदकं ईशसहितं जगत्पुनाति वि-
रिंच्योपहृतं शेषमिति च तयोः पूज्यपावकत्वमुक्तं तस्मान्मुकुंदव्यतिरिक्तः को नाम भगवत्पदस्यार्थः सर्वेश्वर इत्यर्थः २१ धीराः संतः उदंधन्तं

एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य हित्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुषतेऽनभीप्सोः २०
अथापि यत्पादनखावसृष्टं जगद्विरिंच्योपहृतार्हणांभः सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः २१
यत्रानुरक्ताः सहसैव धीराः व्यपोह्य देहादिषु संगमूढं व्रजंति तत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः २२
अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान् नभः पतंत्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विप-
श्चितः २३ एकदा धनुरुद्यम्य विचरन्मृगयां वने मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं २४

अंत्यं परमकाष्ठापन्नं तदाह यस्मिन्न् अहिंसा उपशमश्च स्वाभाविको धर्मः २२ एवं स्वभाग्यमपि नंद्यपारीक्षितोपाख्यानं वक्तुमाह अहं ही-
ति अर्यमणः हे सूर्याः त्रयीमूर्तयः अत्र यावानात्मावगमः मम ज्ञानं तावदाचक्षे प्रवक्ष्यामि तथाहि यथा पक्षिणो नभ आत्मसमं स्व-
शक्त्यनुरूपमेवोत्पतंति नकृत्स्नं तथा विपश्चितोपि विष्णोर्गतिं लीलासमं स्वमत्यनुरूपमेव वदंतीत्यर्थः २३ २४

राम
६०

सुपक्षाणः अपश्यन् ॥ तं प्रसिद्धमाश्रमं तस्मिंश्च मुनिं शमीकं ॥ २५ ॥ प्रतिरुद्धाः प्रत्याहृताः इंद्रियादयो येन तं अत एवोपरतं स्थानत्रयात्
जाग्रदादिलक्षणात् ॥ परं तुरीयपदं प्राप्तं ॥ अत एव ब्रह्मभूतत्वादविक्रियं ॥ २६ ॥ प्रविकीर्णाभिर्जटाभिराछन्नं ॥ रुरुर्मृगविशेषः तस्य चर्म
णाच्छन्नं ॥ विशेषेणाशुष्यन्ताल्वङ्ग यस्य सः ॥ तथाभूतं मुनिं ॥ २७ ॥ नलब्धं तृणेन तृणासनं भूमिरुपवेशनस्थानं च येन सः संप्राप्तः अर्घः

जलाशयमचक्षाणः प्रविवेश तमाश्रमं ददर्श मुनिमासीनं शांतं मीलितलोचनं ॥ २५ ॥ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपार
तं ॥ स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियं ॥ २६ ॥ विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च ॥ विशुष्यत्तालुरुदकं तथा
भूतमयाचत ॥ २७ ॥ अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः ॥ अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥ २८ ॥ अभूतपूर्व
सहसा क्षुत्तृड्भ्यामर्दितात्मनः ॥ ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च ॥ २९ ॥ स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा ॥ वि
निर्गच्छन्धनुष्कोट्या निधाय पुरमागमत् ॥ ३० ॥ एष किं निभृताशेषकरणो मीलितेक्षणः ॥ मृषासमाधिराहोस्वित्किं नु
स्यात्क्षत्रबंधुभिः ॥ ३१ ॥ तस्य पुत्रोऽतितेजस्वी विहरन्बालकोऽर्भकैः ॥ राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ॥ ३२ ॥

सूनृतं प्रियवचनं येन सः ॥ २८ ॥ मत्सरः स्वोत्कर्षासहनं ॥ २९ ॥ गतासुं मृतं ॥ धनुष्कोट्या चापाग्रेण ॥ ३० ॥ सर्पनिधाने राज्ञोभिप्रायमाह
एष किं प्रत्याहृतसर्वेंद्रियः सन् ॥ मीलितेक्षणः स्थितः यद्वा ॥ क्षत्रबंधुभिरागतैर्वा किं नु स्यादित्यवज्ञया मृषासमाधिः सन्निमीलि
ताक्ष एवेत्यर्थः ॥ ३१ ॥ तस्य पुत्रः शृंगी नाम अखंडः खेलन्नर्भकमध्ये ॥ ३२ ॥

भा०ग्र
६८

पालानांएहानां पीद्राप्तष्टानां अधर्ममेवनिर्दिशति । स्वामिनिरामाणांपरद्घपापाचरणं । वलिभुजांकाकानामिवस्तुनापिववेति २३
दामत्वंदर्शयति । ब्राह्मणोरिति । सभांडभांडेएवस्थितं २४ ततस्तदनंतरं अहंशास्मिदंडयामि २५ इतिवयस्यान्तुक्त्वा रोषेणांतःप्र
शुष्णिणीयस्यसः । कौशिकीनदीतस्याः अपःस्पृशिस्यैः । वागवज्रशापइति २६ एवंमधेनिर्जपरांदस्पति भक्षयिष्यति । धन्य

अहोअधर्मःपालानांपीड्रांवलिभुजामिव । स्वामिन्यघंपरामानांहारपानामनुनामिव २३ ब्राह्मणोःकृतवंधुर्हिद्वारपा
लोनिरूपितः । सकथंतद्देहेदाह्यःसभांडभोक्तुमर्हति २४ कलैगतेभगवतिशास्ताम्यस्यथगामिनां । तद्धित्रसेतन
याहंशास्मिपश्यतमेवसं २५ इत्युक्त्वारोषताम्राक्षोवयस्यान्विषिवालकान् । कौशिक्यापउपस्पृश्यवागवज्रंविमस
र्जह २६ इतिलंघितमर्यादंतरुकःसप्तमेहनि । दस्यतिसप्तकुलागारंचोदितोमेततडूहं २७ ततोःस्पेत्याश्रमेवालाग
लेसर्पकलेवरं । पितरंवीक्ष्यडुःखान्नोमुक्तकंठोरुरोदह २८ सवाग्रांगिरसोवृस्लन्क्रुत्वाश्रुतविलापनं । उन्मील्यशन
कैर्नेत्रेदृष्ट्वाह्वाशमृतोरगं २९ विसृज्यपुत्रेपप्रच्छवत्सकस्माद्धिरोदिषि । केनवातेप्रतिकृतमित्युक्तःसन्यवेदयत ४०
निशम्यराघ्रमतदहंनेदंसद्राह्मणानामिजमभ्यनंदत । अहोवतांहोमहदस्मांतेकृतंत्वल्पीय

तीति । पाठांतरेभस्मीकरिष्यति । स्पमेति ।
पारपूरांणो । कुलस्यागारतुल्यं । मेमया ततोतिकृत्वमार्थ ३७ गलेसर्पकलेवरंयस्येत्यल्तकृमिसमाप्तः । मुक्तकंठंउच्चैरित्यर्थः २८ तसर्पं
विसृज्यकेनापकारकृतः २९ अनमिनंदनवाक्यंअहोइत्यादि वतकष्टेतेत्वयामहत्पापकृतंद्रोहेअपराधेदमोदंडः ॥ ४१ ॥

राम
६८

पः॥ विष्णुरित्याख्यातिर्यस्य तं नरदेवं नृभिः समानमसमं दृष्टुं ४२ अलक्ष्यमाणे अदृश्यमाने अविवरूथवत् मेषसंघवत् ४३ नष्टो नाथो
यस्य लोकस्य तस्य वसोः वहतो धनस्य विलुंपकात् परहर्तुश्चौरात् हेतोर्यत्पापं प्रविष्यति तत् अस्मन्निमित्तत्वात् अस्मानुपैष्यति अनन्वय
संबंधशून्यमेव । तदेव पापं दर्शयति परस्परमिति । शपंति परुषं वदंति । पश्वादीन् वृंजते अपहरंतीति पुरुदस्यवश्चौरा बहुलाः ४४ आर्यधर्मः
सदाचारः । शुनां कपीनामिव अर्थकामयोरेवाभिनिवेशितचित्तानां ४५ एवं राजमात्रस्य शापानर्हत्वमुक्त्वा प्रस्तुते विशेषमाह । धर्मपाल

नवै नृभिर्नरदेवं पराख्यं संमातुमर्हस्यविपक्वबुद्धे यत्तेजसा दुर्विषहेण गुप्ता विंदंति भद्राण्यकुतोभयाः प्रजाः ४२ अलक्ष्यमाणे
नरदेवनाम्नि रथांगपाणावयमंग लोकः । तदा हि चौरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात् ४३ तदद्य नः पापमु
पैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात् । परस्परं घ्नंति शपंति वृंजते पशून् स्त्रियोऽर्थान् पुरुदस्यवो जनाः ४४ तदार्यधर्मः प्र
विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः । ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसंकरः ४५ धर्मपालो
नरपतिः स तु सम्राड् बृहच्छ्रवाः । साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् । क्षुत्तृट्श्रमयुतो दीनो नैवास्मच्छापमर्हति ४६ अपापे
षु स्वभृत्येषु बालेनापक्वबुद्धिना । पापं कृतं तद्भगवान् सर्वात्मा क्षंतुमर्हति ४७ तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि । ना
स्य तत्प्रति कुर्वंति तद्भक्ताः प्रभवोऽपि हि ४८

इति सार्द्धेन । हयमेधयाट् अश्वमेधयाजी ४६ अस्य महापापस्यान्यत्राप्रायश्चित्तमदृष्ट्वा पापप्रभावे
दयनं भगवंतं प्रार्थयते अपापेष्विति ४७ राजा चेत्प्रतिशापं दद्यात्तर्हि किमिति भवेद्दयितत्वेन न संभवति तस्य महाभागवतत्वादित्याह । तिरस्कृताः
निंदिताः विप्रलब्धा वंचिताः क्षिप्ताः अवज्ञाताः हताः ताडिताः अस्य तिरस्कारादिकर्तुः न तत्प्रतीकारं कुर्वंति तद्भक्ताः प्रभवः समर्था अपि ४८

भा.प्र
९०

विप्रकृतः अपकृतः । अघं अपराधं ४९ उक्तं चैतदित्याह प्रायश इति । द्वंद्वेषु ब्रह्मविड्ः ब्राह्मिष्ठ अगणोश्रयः ब्रह्मविड्ः ब्राह्माश्रयो न भवति प.
इ प्र मे २ः प्रायोपविष्टे गंगायां वृतियोगिजनावृते । शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके । विकृतं तत्कर्म पुनि स्वं धेमर्पप्रश्नो पराङ्गर्ह्य
निद्यं विचिंतयन्नुहुडुर्मनाजातः । चिंतामेवाह साद्धीभ्यां अहो इति नीचं पापं अमीव इति पाठे स एवार्थः । ब्रह्मणि ब्राह्मण गूढं गूढतेजोयस्मिन् १
कृतं यद्देवहेलनं ईश्वर एवत्तायाय मित्यर्थः । तस्मान्मे व्यसनं भविष्यति । तत्त्वमातिदीर्घात्कालात् अचिरादेवास्तु । तत्रापि अद्वासाक्षात्तनघत्रा

इति उक्तकृताघेन मेः न तन्नो महाउनिः स्वयं विप्रकृतो राज्ञा नैवाद्यं तदचिंतयत ४९ प्रायशः साधवो लोके परैर्द्वंद्वेषु यो
जिताः । न व्यथंति न हृष्यंति यत आत्मागुणाश्रयः । प. इ श्री भा ग व ते हा प प्र थ म स्कं धे विप्रशापोपलंभनं नामाष्टा
द ध्याः ॥ स्क ३ च महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः । अहो मया नीचमनार्यवत्कृतं निराग
सि ब्रह्मणि गूढतेजसि ॥ १ ॥ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात् । तदस्तु कामं त्वघनिः कृताय मे य
था न कुर्यां पुनरेवमद्धा ॥ २ ॥ अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे । दहत्वभद्रस्य पुनर्न मे भूत्पापीयसी
धीर्द्विजदेवगोभ्यः ॥ ३ ॥

रिह्वारेणेति प्रार्थना । कामं अस्तं कोवतः । एवं प्रार्थनायाः प्रयोजनं अघस्य निःकृताय प्रायश्चित्ताय । यथा पुन
रेवं न कुर्यामिति च ॥ २ ॥ एवं साक्षात्स्वस्यैव व्यसनं संप्रार्थ्य तत्रागेवा किंचित्प्रार्थयते अद्यैव मे राज्यादि दहतु । प्रकोपितं ब्रह्मकुल
मेवानलः पुनर्द्विजातीन्पीडयितुं धीर्मे माभूत् न भवेदित्यर्थः ॥ ३ ॥

राम
९०

ऽसंचिंतयन्नश्रृणोद्यथा मुनेः सुतेनोक्तः सप्तमेऽहनि निर्ऋतिर्मृत्युरूपो यथा भविष्यति तथा अशृणोत शमीकप्रेषितशिष्यात् श्रुत्वा च स तक्ष-
कस्य विषाग्निं साधु मेने। यतो विषयेषु प्रसक्तस्य विरक्तिकारणं ४ अथो अनंतरं उभौ लोकौ पुरस्तात् प्रागप्यमध्य एव हेयतया विचारितौ तौ
विहाय प्रश्रीकृष्णांघ्रिसेवामेवाधिमन्यमानः सर्वपुरुषार्थाधिकां जानन् प्रायमनशनं तस्मिन्नित्यर्थः। तत्संकल्पेनोपाविशदितिया-
वत्। यद्वा प्रायं प्रकृष्टमयनं शरणं यथा भवति तथा ५ अमर्त्यनद्यामिति विशेषणस्य फलमाह। या गंगा लसंती श्रीर्यस्यास्तुलस्या

स चिंतयन्नित्थमथाश्रृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः। स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्ति-
कारणं ४ अथो विहायेममुं च लोकं विमर्शितौ हेयतया पुरस्तात्। कृष्णांघ्रिसेवामधिमन्यमान उपाविशत्प्रायम-
मर्त्यनद्यां ५ या वै लसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री। पुनाति लोकानुभयत्र सेशान्कस्तां न से-
वेत मरिष्यमाणः ६ इति व्यवच्छिद्य स पांडवेयः प्रायोपवेशं प्रति विष्णुपद्यां। दधौ मुकुंदांघ्रिमनन्यभावो मुनिव्र-
तो मुक्तसमस्तसंगः ७

त्या विमिश्रा या कृष्णांघ्रिरेणवस्तैरभ्यधिकं सर्वोत्कृष्टं पदं तत्तस्य नेत्री नद्या हि नी। उभयत्र अंतर्बहिश्च सेशान्
लोकपालैः सहितान् लोकान्पुनाति। मरिष्यमाणः अवश्यं मरणे मरणस्यानियतकालत्वात् सर्वोपि तथा अतस्तां को न सेवेत ६
इति एवं विष्णुपद्यां गंगायां प्रायोपवेशं प्रति व्यवच्छिद्य निश्चित्य पांडवेयः इति तत्कुलौचित्यं दर्शयति। नान्यस्मिन्भावो यस्य सः व्रतः मु-
निव्रतः उपशांतः तत्कृतः मुक्तः समस्तसंगो येन सः ७

भा॰१ तत्र तदा तद्दर्शनार्थं मुनय उपागताः । न तु तीर्थस्नानार्थं कृतार्थत्वात् । न तु तादृशानामपि तीर्थयात्रादृश्यते तत्राह । प्रायेणेति तीर्थया-
७॰ त्राव्याजेन ॥ ८ ॥ ९ ॥ अरुणादयः कांडर्षित्वविशेषेण पृथक् निर्दिष्टाः । नानागोत्राण्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान् श्रेष्ठानृषी-
न्सर्वान् समेतान् शिरसा ववंदे ॥ ११ ॥ विज्ञापनार्थं पुनः कृतप्रणामः । विविक्तचेतास्स्वच्छचेतास्तथा अभिगृहीतौ संयोजितौ पाणी येन सः । स्वचिकी-
र्षितं प्रायोपवेशनादि पुनरन्यदपि तत्त्वं विज्ञापयामास ॥ १२ ॥ अनुग्रहे निमित्तमाह ग्रहमालक्ष्यात्मानं श्लाघते अहो इति । नृपाणां मध्ये मह-

तत्रोपजग्मुर्भुवनं पुनानाः महानुभावा मुनयः सशिष्याः । प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनंति संतः ॥ ८ ॥ अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च । पराशरो गाधिसुतोऽथ राम उतथ्य इंद्रप्रमदेध्मवाहौ ॥ ९ ॥ मेधा-
तिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः । मैत्रेय और्वः कवषः कुंभयोनिर्द्वैपायनो भगवान्नारदश्च ॥ १० ॥ अ-
न्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च । नानार्षेयप्रवरान्समेतानभ्यर्च्य राजा शिरसा ववंदे ॥ ११ ॥ सुखोपवि-
ष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् । विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः ॥ १२ ॥ रा-
जोवाच । अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः । राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत गर्ह्यकर्म ॥ १३ ॥

त्तमैरनुग्रहणीयं शीलं वृत्तं येषां ते । एतच्च राज्ञामतिदुर्लभमित्याह ब्राह्मणानां पादशौचात् पादप्रक्षालनोदकात् दूराद्विसृष्टं विण्मूत्रप-
दं मलमिव त्यज्यते इति स्मृतेः । दूरे हि तेन विसृज्यते ततो हि दूरादेव तद्विसृष्टं हि यतस्तत्रापि स्थिताः मयोग्यमित्यर्थः । गर्ह्यं कर्म यस्य तत्तादृशं
कुलमहो इति पातकं ॥ १३ ॥ एप
७॰

अत्रांतावरनुग्रहः ब्रह्मशापोपि भगवत्प्रसादादेव जात इत्याह तस्यैव गर्ह्यकर्मण एव अतः अघस्य पापात्मनो गृहेष्वासक्तचित्तस्य मे एव प्राप्नोपेपरावराणां मीश एव द्विजशापरूपतया वभूव यत्र यस्मिन् शापे सति गृहेषु प्रसक्तो भयं धत्ते निर्विण्णो भवति यतो निर्वेदमूलः निर्वेदो वैराग्यं प्रमूलं प्राप्तिकारणं यस्मिन् इत्यस्य वैराग्यप्राप्यत्वात्तस्य च भयमूलत्वात्तद्दर्शयन् द्विजशापं कारितवानित्यर्थः

तस्यैवमेघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णं निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते तं मोपयातं प्रतियंतु विप्रा गंगा च देवी धृतचित्तमीशे द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः १५ पुनश्च भूयाद्भगवत्यनंते रतिः प्रसंगश्च तदाश्रयेषु महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः १६ इति स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः १७ एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः प्रशस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुंदुभयश्च नेदुः

१४ तान्प्रार्थयते तमिति द्वाभ्यां तं मामुपयांतं शरणागतं प्रतियंतु जानंतु देवी देवतारूपा गंगा च प्रत्येतु वा शरः प्रतिक्रियानादरेण गाथाः कथाः १५ स अनंतः आश्रयो येषां तेषु प्रसंगः संगो भूयात् तस्मात्तस्मात्सृष्टौ जन्मनि १६ अध्यवसायो निश्चयः प्रागग्रेषु कुशेषु आस्ते स्म स्वसुते न्यस्तं राज्यं येन सः १७ मुदा व्यकिरन् देवसंघैर्वादिता नेदुः

१८

भा·प्र
७१

प्रजानुग्रहे शीलं स्वभावः सारो बलं च येषां उत्तमश्लोकगुणैरभिरूपं हरेरपि च १९ भवत्सु पांडोर्वंशजेषु येजन्मुर्युधिष्ठिराद्यपित्रायेण २०
परस्परं समं तत्र यं ते सर्वं इति परं श्रेष्ठं लोकं तत्र हेतुः विरजस्कं निर्मायं विशोकं च यास्यतीति कृतस्तत्राह स्वयमिति २१ आश्रुत्य आक
र्ण्य समं पक्षपातशून्यं मधुच्युत अमृतस्रावि गुरु गंभीरार्थं अव्यलीकं सत्यं २२ त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके वेदा यथा मू

महर्षयो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपं १९
न वा इदं राजर्षिवर्यचित्रं भवत्सु कृष्णं समनुव्रतेषु येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः २०
सर्वे वयं तावदिहास्महेऽथ कलेवरं यावदसौ विहाय लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः २१
आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकं आभाषतैनानभिनंद्य युक्तान् शुश्रूषमाणश्चरितानि
विष्णोः २२ समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे नेहाथवामुत्र च कश्चनार्थ ऋते परानुग्रहमात्म
शीलं २३ ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इति कृत्यतायां सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृश

र्तिधरा भवंति तत्तुल्याः ज्ञानातिशयत्वात् कृपालुतामाह नेहेति भवतां प्रयोजनं परानुग्रहं विना नास्ति तर्हि स एव ताभियुक्ताः २४
स्वार्थः स्यात् न आत्मशीलं हि स्वभावं २३ पृच्छ्यं प्रष्टव्यं विश्रभ्य विश्वासं कृत्वा एवं कर्तव्यमित्यस्य भावः इति कृत्यतायां तस्मिन्विषये सर्वात्मना
सर्वावस्थासु यत्कृत्यं विशेषतश्च म्रियमाणैः तच्च शुद्धं पापसंपर्करहितं आमृशत विचारयत २४

राम
७१

तत्र तेषु यागयोतपोदानादिभिर्विविधस्मानेषु पदं दृष्ट्वा यागां पर्यटन् व्यासपुत्रः तत्र शुभवतप्राप्तः ॥ न लक्ष्यमाणं मात्रमादिलिंगं यस्य
अवधूतः अवज्ञया जनैस्त्यक्तो यः तस्यैव वेषो यस्य सः ॥ १५ ॥ तस्मिन्नित्यादिनां प्रत्युत्थिता इति तृतीयश्लोकेनान्वयः ॥ द्विगुणान्यष्टौ वर्षा
णि यस्य ॥ ह्रस्वकुमारौ पादौ करौ ऊरू बाहू अंसौ कपोलौ गात्रं च यस्य ॥ चारुणी आयते अक्षिणी यस्मिन् ॥ उत्तानानासा यस्मिन् तुल्यत्वं ह्रस्वादि
वैषम्यं विना तुल्यौ कर्णौ यस्मिन् ॥ शोभने भ्रुवौ यस्मिन् ॥ एवंभूतं आननं यस्य कंबुवद्रेखात्रयांकितः सुष्ठु जातः कंठो यस्य ॥ १६ ॥ कंठस्या

तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ॥ अलक्ष्यलिंगो निजलाभतुष्टो वृतः स्त्रीबालैरवधूतवेषः ॥
१५ ॥ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रं ॥ चार्वायताक्षोन्नसतुल्यकर्णं सुभ्र्वाननं कंबुसुजातकं
ठं ॥ १६ ॥ निगूढजत्रुं पृथुतुंगवक्षसं आवर्तनाभिं वलिवल्गूदरं च ॥ दिगंबरं वक्त्रविकीर्णकेशं प्रलंबबाहुं स्वमरोत्त
माभं ॥ १७ ॥ श्यामं सदापीच्यवयोंगलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन ॥ प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षण
ज्ञा अपि गूढवर्चसं ॥ १८ ॥

धोभागयोः स्थिते अस्थिनी जत्रुणी ॥ मांसेन निगूढे जत्रुणी यस्य ॥ पृथु विस्तीर्णं तुंगमुन्नतं वक्षो यस्य ॥ आ
वर्तवन्नाभिर्यस्य ॥ वलिभिस्तिर्यक् निम्नरेखाभिर्वल्गु रम्यमुदरं यस्य ॥ दिश एव अंबरं यस्य ॥ वक्त्रे विकीर्णाः केशा यस्य ॥ प्रलंबौ बाहू यस्य ॥ स्वमरे
षु श्रेष्ठेषु देवेषु उत्तमो हरिः ॥ तद्वत्तेजसा भा यस्य तं ॥ १७ ॥ सदा अपीच्यं सुन्दरं यद्वयो यौवनं तेन या अंगलक्ष्मीर्देहकांतिस्तया ॥ रुचिरस्मितेन च गूढ
वर्चसमपि प्रत्युत्थिताः ॥ तं दृष्ट्वा प्रत्युत्थानमकृतवंत इत्यर्थः ॥ १८ ॥

भा॰१ शिरसैव सपर्यामाजहार आत्मनिवेदनं कृतवान् ॥ तेन सहागताश्च अपत्यादयो निवृत्ताः स चोपविवेश संघ्रिणर्षः ॥ २९ ॥ स भगवान् ब्रह्म
७२ र्षिसंघैः संवृतः सन् अत्यलं व्यरोचत ग्रहाः शुक्रादयः ऋक्षाणि अश्विन्यादीनि अन्यास्ताराः ॥ ३० ॥ अकुंठा सर्वार्थेषु मेधा यस्य तं प्रश्नार्थं भुनने

स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाजहार ॥ ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश
पूजितः ॥ २९ ॥ स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः ॥ व्यरोचतालं भगवान्यथेंदुर्ग्रहर्क्षतारानिक
रैः परीतः ॥ ३० ॥ प्रशांतमासीनमकुंठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य ॥ प्रणम्य मूर्ध्नावहितः कृतांजलिः नत्वा गि
रा सूनृतयान्वपृच्छत ॥ ३१ ॥ अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबंधवः ॥ कृपयातिथिरूपेण भवद्भिस्तीर्थकाः कृ
ताः ॥ ३२ ॥ येषां संस्मरणात्पुंसां सद्यः शुद्ध्यंति वै गृहाः ॥ किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥ ३३ ॥ सांनिध्या
त्ते महायोगिन् पातकानि महांत्यपि ॥ सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः ॥ ३४ ॥ अपि मे भगवान्प्रीतः कृष्णः

त्वा ॥ ३१ ॥ सूनृतां गिरमाह अहो इति पंचभिः संतासेव्या जाताः ॥ यतः पांडुसुतप्रियः ॥ पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः ॥ ३५ ॥
अतिथिरूपेण हेतुना तीर्थकाः योग्याः कृताः ॥ ३१ ॥ ३२ ॥ विष्णोः सान्निध्यात् सुरेतरा दैत्या इव ॥ ३४ ॥ पांडुसुतानां प्रियः कृष्णः अद्य मे प्रस राम
न्नो जातः ॥ अतस्तेषां पैतृष्वस्रेयाणां प्रीत्यर्थं तद्गोत्रस्य मे आत्तं स्वीकृतं बांधवं बंधुकृत्यं येन सः ॥ ३५ ॥ श्रीरामचंद्रधर्मावतारस्वायनमः ७२

अन्यथा श्रीकृष्णप्रसादं विना अव्यक्तागतेर्यस्य तव दर्शनं कथमस्मादृशानां तत्रापि नितरां म्रियमाणानां स्यात् वनयितायां वयिता वन
यितृतमो वनीयान् तस्य अहो राततया मां यावद्धि इति प्रवर्त्तकस्येत्यर्थः ३६ सम्यक्सिद्धिर्यस्मात्तत् यत्कार्यं कर्त्तव्यं योऽयं कर्त्तव्यं तच्छ्रावय
कमिति भेदः अत एव सर्वथा म्रियमाणस्य पुरुषस्य यस्मिन्कृते सम्यक्सिद्धिर्मोक्षलक्षणा सिद्धिर्भवति त्वं योगिनां गुरुः पृच्छामि ३७ ३८ यच्छ्रो
तव्यं यज्जाप्यं यत्कर्त्तव्यं यदाराध्यं तद्ब्रूहि विपर्ययं च अश्रोतव्यादि ३९ तव दर्शनस्य दुर्लभत्वादिदानीमेव कथनीयमित्याशयेनाह नूनं

अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणां । नितरां म्रियमाणानां संसिद्धस्य वनीयसः ३७ अतः पृच्छामि संसिद्धिं योगि
नां परमं गुरुं । पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ३८ यच्छ्रोतव्यमथो जप्यं यत्कर्त्तव्यं नृभिः प्रभो । स्मर्त्तव्यं भ
जनीयं वा ब्रूहि यद्वा विपर्ययं ३९ नूनं भगवतो ब्रह्मन्गृहेषु गृहमेधिनां । न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्व
चित् ४० सूत उवाच एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा । प्रत्यभाषत धर्मज्ञो भगवान्बादरायणिः ४१ इ
ति श्रीभागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे शुकागमनं नाम एकोनविंशोऽध्यायः १९

मिति गोदोहनमात्रकालमपि ४० एवं भो इत्यादि कथया श्लक्ष्णया मधुरया गिरा आभाषितः अपि संबोधितः पृष्टश्च ४१ आर्यधर्मजमाहता
दिमवनीं कृत्वा परीक्षित्पदं सम्यक् त्यक्त्वा तत्र च परिरक्षितं कलिजयख्यातं वक्तत्वाय विज्ञेयः शुकरूपतः द्वापरमज्ञानोपदेशेन तं शापादवसदनमानाम
मि परमानंदाकृतिं माधवं ॥ १ ॥ इति श्रीमद्भागवते भावार्थदीपिकायां श्रीधरस्वामिविरचितायां प्रथमस्कंधे एकोनविंशतितमोऽध्यायः ॥ १९ ॥

भा० द्वि
१

श्रीगणेशाय नमः ॥ द्वितीये तु दशाध्याये श्रीभागवतमादितः । उद्देशलक्षणेनैतत्संक्षेपेणोपवर्ण्यते ॥ १ ॥ तत्र तु प्रथमेऽध्याये कीर्तन
श्रवणादिभिः । हृदि विष्णोर्भगवद्रूपमनसो धारणोच्यते ॥ २ ॥ यन्नामकीर्त्तनेर्दानतपोयोगादिसत्फलं । तं नित्यपरमानंदं हरिं नरहरिं नमस्ये
॥ ३ ॥ अथ द्वितीयस्कंधव्याख्या । उक्तः पूर्वस्कंधे उपोद्घातः सप्रसंगः शुकागमः । एतावता दृष्टं नृणां कृत्यमथाह शुकसन्मुनिः ॥ ४ ॥ राज्ञः प्र
श्नमभिनंदति वरीयानिति । ते त्वया पृष्टाः श्रोतव्यादिषु मध्ये यः परः श्रेष्ठगोचरः । प्रश्नः कृतः एष वरीयान् । यतो लोकहितमेतत

ॐ नमो भगवते श्रीवासुदेवाय ॥ श्रीशुक उवाच ॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप । आत्मवित्सं
मतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥ श्रोतव्यादीनि राजेंद्र नृणां संति सहस्रशः । अपश्यतामात्मतत्त्वं
गृहेषु गृहमेधिनां ॥ २ ॥ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः । दिवा चार्थेहया राजन्कुटुंबभरणेन वा ॥ ३ ॥

द्वयः

मोक्षहेतुत्वात् आत्मविदां सत्तानां च संमतो यतः ॥ १ ॥ तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन्नुहियद्वाविपर्ययमित्यसो
त्तरमाह श्रोतव्यादीनीति त्रिभिः । गृहेषु सक्तानां अत एव गृहमेधिनां तत्कृतपंचसूनापराणां । संभवंति हि सार्थः ॥ १ ॥ तेषु वृथैवायुर्व्य
यो भवतीत्याह । नक्तं रात्रौ यद्वयः आयुः तत् निद्रया व्यवायेन रत्या वा ह्रियते । दिवा ऽपि ह्रियते वयः तदर्थेहया अर्थार्थमुद्यमेन सिद्धेऽर्थे तु
कुटुंबपोषणेन वा । चकारा एव तत्र समुच्चयार्थौ ॥ ३ ॥

राम
१

ननु न स्वकुटुंबाद्यर्थं कथमात्मार्थं यत्नं कुर्यादित्यत आह | देहादिष्वात्मनः सैन्येषु परिकरेष्वसत्सु मिथ्याभूतेष्वपि प्रमत्तः प्रसक्तः तेषां पित्रादिदृ
ष्टांतेन नाशं पश्यन्नपि नानुसंधत्ते ॥४॥ एवं विपर्ययप्रसक्तान्नरानुक्त्वा श्रोतव्यादिप्रसक्तोत्तरमाह तस्मादिति | हे भारत वंश सर्वात्मेति श्रेष्ठत्वमाह
भगवानिति सौंदर्यं ईश्वर इत्यावश्यकत्वं | हरिरिति बंधहारित्वं | अभयं मोक्षमिच्छता ॥५॥ अतः परमन्यच्छ्रेयो नास्तीत्याह | एतावानेव जन्मनो
लाभः फलं | तमाह | नारायणस्मृतिरिति | सांख्यादिभिः साध्यत इति तेषां त्वावांतरलाभत्वं वारयति | सांख्यमात्मानात्मविवेकः यस्मा

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि | तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥४॥ तस्माद्भारत सर्वात्मा भगवानीश्वरो हरिः |
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयं ॥५॥ एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया | जन्मलाभः परः पुंसा
मंते नारायणस्मृतिः ॥६॥ प्रायेण मुनयो राजन्निवृत्ता विधिनिषेधतः | नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ॥७॥ इदं भा
गवतं नाम पुराणं ब्रह्मसंमितं | अधीतवान्द्वापरादौ पितुर्द्वैपायनादहं ॥८॥ परिनिष्ठितोपि नैर्गुण्य उत्तमश्लोकलीलया |
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥९॥

त्स्वाभाविकक्रियास्त्वनर्थावहाः तस्मात्तच्छ्रुतेन स्मृतिः परो लाभः न तन्महिमा वक्तुं शक्य
इत्यर्थः ॥६॥ तत्र सदाचारं प्रमाणयति प्रायेणेति | विधिनिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि स्म प्रसिद्धं
॥७॥ किमिदमपूर्वं कथयसि | सत्यमपूर्वमेवेदमित्याह | इदं भगवत्प्रोक्तं | तत्रापि एकप्रधानं पुराणं ब्रह्मसंमितं सर्ववेदतुल्यं | यद्वा ब्र
ह्म सम्यक् मितं येन | ज्ञाततत्वमात्रप्रमतमत आह अधीतवानिति ॥८॥ सिद्धस्य तव कुतोऽध्ययने प्रवृत्तिः तत्राह परिनिष्ठितोपीति | गृही

भा॰ टि॰
२

महाप्रभुरूपो विष्णुः तदीयः पदस्य यस्मिन् अग्र्याः भावतां सतीः अहो तत्कौ ॥१॥ साधकानां सिद्धानां च नातः परमन्यच्छ्रेयो ज्ञात्वा । ह एतदिति इच्छतां कामिनां तत्तत्फलसाधनमेतदेव ॥ निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव । योगिनां ज्ञानिनां फलं चैतदेव निर्णीतं नात्र प्रमाणं वक्तव्यमित्यर्थः ॥११॥ अल्पमेवायुरवशिष्टं किमहं साधयेयमिति मा शुचः इत्याह किमिति द्विभिः । परोक्षैरज्ञितैर्हायनैर्वर्षैर्विदितं ज्ञातं यावती तिज्ज्ञातं । यतो येन ज्ञातेन श्रेयसे यत्नं कुर्यात् ॥१२॥ खट्वाङ्गो हि देवपक्षे स्थित्वा दैत्यान् जयत् । ततः प्रसन्नैर्देवैर्वरं

तदहं तेऽभिधास्यामि महापौरुषिको भवान् । यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ॥१०॥ एतन्निर्विद्यमानानामिच्छतामकुतोभयं । योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनं ॥११॥ किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह । वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥१२॥ खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः । मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिं ॥१३॥ तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः । उपकल्पय तत्सर्वं तावद्यत्साम्परायिकं ॥१४॥ अन्तकाले तु पुरुष आगते गतसाध्वसः । छिन्द्यादसङ्गशस्त्रेण

वृणीष्वेत्युक्तो तत्तैर्नोक्तं प्रथमं तावन्ममायुः कथ्यतामिति । ततो देवैर्मुहूर्तं तन्मुहूर्तमात्रमस्तीति । ततोऽशी- स्पृहां देहेऽनु ये च तं ॥१५॥

घ्रविमानेन मागत्य हरिं शरणागत इति । यतः स्वयं स्वर्गभूमी रजोधिका कर्मभूमिः पृथ्वी ॥१३॥ तव तु एतर्हि इदानीमपि तावदस्तीति तावता कालेन साम्परायिकं पारलौकिकं साधनं संपादय ॥१४॥ तत्र वैराग्यं तावदाह अन्तकाल इति । गतसाध्वसः मृत्युभयशून्यः असङ्गो नाम अनासक्तिः । तेन शस्त्रेण स्पृहां देहे अनु ये च तं देहमनु जे पुत्रकलत्रादयः तेष्वपि स्पृहां छिन्द्यात् ॥१५॥

किंच गृहात् प्रव्रजितः निर्गतः ॥ गृहे स्थितस्य तु नरस्यासन्निसमवात ॥ तत्राष्टांगयोगमाह धीर इति ब्रह्मचर्यादियमोपलक्षणं ॥ आपनी
र्थैति त्र्यानारि नियमोपलक्षणं ॥ आसनमाह स्वचाविति ॥ विविक्ते एकांते ॥ विधिवत ॥ कुशाजिनचैलैः क्रमेण निर्मिते ॥ १६ ॥ जपप्रा
णायामं वक्तुं जपमाह ॥ त्रिवृत त्रिभिरकारादिभिर्वर्णैर्निर्मितं ग्रंथितं ॥ ब्रह्माक्षरं प्रणवं मनसा अभ्यसेत् आवर्त्तयेत ॥ मनसा इंद्रियप्रत्याहारं वक्तुं प्रा
णायामेन मनो नियमनमाह मनो यच्छेत ॥ वशीकुर्यात ॥ ब्रह्मबीजं प्रणवमविस्मरन्नेव जितश्वासः सन् ॥ १७ ॥ प्रत्याहारमाह नियच्छेत स्व

गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ॥ शुचौ विविक्त आसीनो विधिवत्कल्पितासने ॥ १६ ॥ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्र
ह्माक्षरं परं ॥ मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥ १७ ॥ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ॥ मनः कर्मभि
राक्षिप्तं शुभार्थे धारयेद्धिया ॥ १८ ॥ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ॥ मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत ॥ प
दं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥ १९ ॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ॥ यच्छेद्धारणया धीरो हंति या तत्कृतं मलं ॥

क्षान् इंद्रियाणि निश्चयात्मिका बुद्धिः सारथिर्यस्य सः ॥ धारणामाह मन इति ॥ मनश्च कर्मभिः तद्वासनाभिराक्षिप्तं आकृष्टं शुभार्थे भगवद्रूपे ॥ १८ ॥
ध्यानमाह तत्रेति ॥ एकमेकं पादादिवयवं ॥ अव्युच्छिन्नेन समग्ररूपाद्विच्छिन्ने न आस्यविशेषसामान्यतश्चिन्तास्थिरीकरणं धारणा ॥ एवमवयव
विभावनयात्तदैर्यं ध्यानमिति भेदः ॥ समाधिमाह ॥ निर्विषयं मनो युक्त्वा समाधाय स्थिरीभूते मनसि विस्मरेत् परमानंदमात्राकारेणैकत्वेनत्यर्थः ॥ प्रसी
दति उपशाम्यति ॥ १९ ॥ एतावतान्तरविक्षेपो भवति धारणामेव स्थिरीकर्त्तुं रीत्याह रजसाक्षिप्तं तमसा विमूढं स्वीयं मनो निरुंध्यात तत्कृतं

भा॰टि॰
३

यतः यत्प्राक्क्षिप्यमाणायां ॥ मंङ्गलरूपात्मकं ॥ स्वाश्रयं विषयं पश्यतः ॥ तत्रैव प्रीतिर्भवति ॥ २१ ॥ यथा यत्र यादृशीति चेति कर्त्तव्यता विषयतत्त्वाद्विशे
षणोनाश्रयाः ॥ २२ ॥ यथेत्यस्योत्तरं ॥ जितासन इति ॥ विषयमाह स्थूल इति सार्द्धेन ॥ २३ ॥ विशेषो विराड्देहः श्रुतिस्थूलानामपि स्थूलतरः ॥
सत्कार्यमात्रं ॥ २४ ॥ अस्य चोपलक्षणत्वेन विषयत्वं ॥ वस्तुतस्तु विराड्जीवनियंता भगवानेव विषय इत्याह ॥ अंडकोशात वर्त्रिकुराह
एवं स्थूलावरणं ॥ तत्र च पतेजोवाय्वाकाशाहंकारमहत्तत्वानीति सप्त ॥ २५ ॥ विराड्देहतज्जीवतदंतर्यामिणामभेदरूपाणि ध्येयोपासनेन कर्त्ते

यतः संधार्यमाणायां योगिनो भक्तिलक्षणः ॥ आशु संपद्यते योग आश्रयं भद्रमीक्षतः ॥ २१ ॥ ए वाच ॥ यथा संधार्यते ब्रह्मन्
धारणा यत्र संमता ॥ यादृशी वा हरेदाशु पुरुषस्य मनोमलं ॥ २२ ॥ श्री उ च ॥ जितासनो जितश्वासो जितसंगो जितेंद्रियः
स्थूले भगवतो रूपे मनः संधारयेद्धिया ॥ २३ ॥ विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां ॥ यत्रेदं दृश्यते विश्वं भूतं भव्यं भव
च्च सत् ॥ २४ ॥ अंडकोशे शरीरेस्मिन् सप्तावरणसंयुते ॥ वैराजः पुरुषो योसौ भगवान् धारणाश्रयः ॥ २५ ॥ पातालमेतस्य हि पा
दमूलं पठंति पार्ष्णिप्रपदे रसातलं ॥ महातलं विश्वसृजोथ गुल्फौ तलातलं वै पुरुषस्य जंघे ॥ २६ ॥ द्वे जानुनी सुतलं विश्वमूर्त्ते
रूरुद्वयं वितलं चातलं च ॥ महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणंति ॥ २७ ॥

ध्यानमित्याशयेनाह पातालं पादमूलं पादस्याधोभागं पातालादीनां तत्स्वरूपवत्ता विधीयते ॥ पातालादीनां तलानि तानि गुह्यस्थानाराध्यस्य
भूमिविवराणि पठंति गृणंतीत्यारभ्य माणदर्शनं ॥ पार्ष्णिप्रपदे पादस्य पश्चाद्भागाग्रभागौ ॥ २६ ॥ ऊरुद्वयं तस्य अधोभागे वितलं उत्तरभागे अतल
मितिज्ञेयं ॥ नाभिरेव सरः ॥ २७ ॥

राम
३

ज्योतिरनीकं ज्योतिषां समूहं स्वर्गं ॥ महर्लोकं ग्रीवेति शृणोति ॥ तपोलोकं रराटीं ललाटं ॥ सत्यं सत्यलोकं ॥ १८ ॥ उस्रा देवाः ॥ तेजोमयशरीरत्वात्
ते वा हव इत्याहुः ॥ दिशः अस्मदादिश्रोत्राधिष्ठात्र्यो देवताः कर्णौ श्रोत्रस्याधिष्ठानं ॥ शब्दः श्रोत्रविषयः स तस्य श्रोत्रेंद्रियं ॥ एवं नासिकाश्वि
नौ ॥ नासत्यदस्रौ अश्विनौ ॥ नासे नासापुटे ॥ इद्धः दीप्तः ॥ १९ ॥ द्यौरंतरिक्षं अक्षिणी नेत्रगोलके चक्षुरिंद्रियं ॥ पतंगः सूर्यः ॥ अहनी एव अह

उरः स्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य ॥ तपो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥ १८ ॥
इंद्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ॥ नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गंधो मुखमग्निरिद्धः ॥
द्यौरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि विष्णोरहनी उभे च ॥ तद्भ्रूविजृंभः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥ २० ॥
छंदांस्यनंतस्य शिरो गृणंति दंष्ट्रा यमः स्नेहकला द्विजानि ॥ हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमोक्षः ॥ २१ ॥
व्रीडोत्तरोष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठः ॥ कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसंघाः ॥ २२ ॥
नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनो नृपेंद्र ॥ अनंतवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः ॥ २३ ॥

नी ॥ परमेष्ठिधिष्ण्यं ब्रह्मपदं ॥ तालुः अधिष्ठानं ॥ जिह्वा इंद्रियं ॥ २० ॥ छंदांसि वेदाः शिरो ब्रह्मरंध्रः ॥ स्नेहकलाः प्रजादिस्नेहलेशाः ॥ द्विजानि दंताः षरत्व
मार्गः ॥ दुरंतः अपारः सर्ग इति यत्तस्य कटाक्षः ॥ २१ ॥ अधर्ममार्गोऽस्य पृष्ठभागः ॥ कः प्रजापतिः ॥ मित्रौ मित्रावरुणौ ॥ २२ ॥ अनंतवीर्यस्य अस्य श्वसितं वयः का
लः तस्य गमनं ॥ गुणप्रवाहः प्राणिनां संसारः कर्म तस्य क्रीडा ॥ २३ ॥

पूरुषः विभोः अव्यक्तं प्रधानं यस्य प्रसिद्धः चंद्रमाः ॥ तदीयं मनः ॥ सर्वेषां विकाराणां कोशः ईश्वराश्रयभूतं ॥ २४ ॥ विज्ञानशक्तिं चित्तं महिं महत्तत्त्व
भूतः करणं अहंकारं गिरित्रं श्रीरुद्रं ॥ गर्दभादश्वायां उत्पन्ना अश्वतरी ॥ २५ ॥ वयांसि पक्षिणः ॥ तस्य व्याकरणं ॥ नाम रूपे व्याकरवाणीति
श्रुत्युक्तं शिल्पनैपुण्यं ॥ यथाहुः ॥ येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ॥ मयूराश्चित्रिता येन स तिवृत्तिं विधास्यतीति ॥ मनुः स्वायं
भुवः मनीषा बुद्धिः ॥ मनुजः पुरुषः निवासस्याश्रयः पुरुषत्वे वाविर्भावमात्मेति श्रुतेः ॥ गंधर्वादीनां द्वंद्वैकवं ॥ गंधर्वादयः स्वरस्मृतीः

ईशस्य केशान् विदुरंबुवाहान्वासस्तु संध्यां कुरुवर्य भूम्नः ॥ अव्यक्तमाहुर्हृदयं मनश्च स चंद्रमाः सर्वविकारकोशः ॥ २४ ॥
विज्ञानशक्तिं महिमामनंति सर्वात्मनोंतःकरणं गिरित्रं ॥ अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे
२५ ॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः ॥ गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीक
वीर्यः ॥ २६ ॥ ब्रह्माननं क्षत्रभुजो महात्मा विडूरुरंघ्रिश्रितकृष्णवर्णः ॥ नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः क
र्म वितानयोगः ॥ २७ ॥

षड्जादिस्वरस्मृतयः इत्यर्थः ॥ असुरानीकं वीर्यं यस्य सः ॥ स्वरः स्मृतिरसुरानीकवीर्य इति पाठे गंधर्वादयः ॥ ॥ विट् वैश्यः ऊरू यस्य ॥ अंघ्रिश्रि
स्वरः ॥ असुरस्वरूपः श्रेष्ठः उद्धारः स्मृतिर्लक्षणेति ॥ २६ ॥ ब्रह्म विप्रत्वस्याननं मुखं ॥ क्षत्रं क्षत्रियो भुजो यस्य ॥ विट् वैश्यः ऊरू यस्य ॥ अंघ्रिश्रि
तः ॥ कृष्णवर्णः शूद्रो यस्य ॥ नानाभिधानानि नामानि येषां ते च ते अभिज्याश्चेवास्तेषां गणो वहद्वारादिभिरुपपन्नो युक्तः द्रव्यात्मको हविः सा
ध्यः ॥ वितानयोगः ॥ यज्ञप्रयोगः ॥ तस्य कर्म कार्यः ॥ आवश्यकोभिप्रेत इत्यर्थः ॥ २७ ॥

ध्यानं एतावान् संनिवेशः । अवयवसंस्थानं । अस्मिन् स्वबुद्ध्या मनः संधार्यते सुसूक्ष्मैः यतो व्यतिरिक्तं किंचिन्नास्ति तस्मिन् । ३८
न्तरे वं चिन्तस्थे पीठे विराट्देहजीवेश्वराणां । अभेदेनोपासनमुक्तं । तत्र तद्देहजीवावीश्वरे प्रविलाप्य एव ध्येय इति निर्धारयति स
इति ॥ सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन । स एक एव । सर्वान्तरात्मा । तमेव सत्यं भजेत । अन्यत्रोपलक्षणेन सज्जेत यत आत्मगतः आत्म
नः पातः संसारो भवति । एकस्य तन्नरदिंद्रियैः सर्वानुभूतो दृष्टांतः स्वप्नजनानामीक्षिता यथेति । स्वप्ने हि कश्चिद्बहून् देहान् प्रकल्प्य जा

इयानसावीश्वरविग्रहस्य यः संनिवेशः कथितो मया ते । संधार्यतेऽस्मिन् वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति
किंचित् ॥ ३८ ॥ स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः । तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद्यत
आत्मपातः ॥ ३९ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे महापुरुषसंस्थानुवर्णने प्रथमोऽध्यायः ॥ श्रीशुक उवाच ॥ एवं पु
रा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् । तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राक् व्यवसायबुद्धिः ॥ १ ॥

वत्तन्नरदिंद्रियैः सर्वपरपतितद्वत् । ईश्वरस्याविद्याशक्तित्वान्न बंधः ॥ ३९ ॥ इति द्वितीये प्रथमोऽध्यायः ॥ द्वितीये तु ततः स्थूलधारणातो जितमनः
सर्वसाक्षिणि सर्वेशे विलीनो धार्यते इतीर्यते ॥ १ ॥ इह पालनं वनमूपेवयुक्तं वैराजधारणा ॥ इहोच्यते तत्साध्या सर्वान्तरयोगिधारणा ॥ २ ॥ तत्र ता
वत्पूर्वोक्तधारणायाः अवान्तरफलमाह ॥ एवं पुरा धारणया तथा तुष्टात् हरेः ॥ पुरा प्रलयसमये नष्टां सृष्टिस्मृतिं प्रत्यवरुध्य लब्ध्वा ॥ अमोघा अप्रतिहता दृष्टि
यथा लीनं तथा ससर्ज व्यवसायात्मिका बुद्धिर्यस्य अतएव अमोघा दृष्टिर्यस्य स इति स्तुतं तया धारणया विष्णुदृष्टिः सामर्थ्यं भवति ॥ १ ॥ एम

भा॰ द्वि॰
५

उपासनाफलादपि विरक्तस्य मुमुक्षोरात्मधारणायामधिकारः ॥ अतो वैराग्यार्थं सर्वं कर्मफलं निंदति ॥ शाहृशा इमपयन्नस्यवेदः तस्य एष पंथाः
कर्मफलबोधनप्रकारः ॥ कोसौ अर्थशून्यैरेव स्वर्गादिनामभिः ॥ साधकस्य धीर्ध्यायति ॥ तत्तदिच्छां करोतीति यतः अपार्थत्वमेवाह ॥ तत्र
मायामये पथि दृष्टत्वमिति वासनया शयानः स्वप्नान् परपत्रिव परिभ्रमन्नर्थान्न विंदति ॥ तत्र लोकं प्राप्तोपि निरर्थं दृष्टत्वेन लभत इ
त्यर्थः ॥२॥ तर्हि सर्वथा कर्मफलत्यागे सत्येव देहपातः स्यादित्याशंक्याह अतः कविर्नाममात्रेषु भोग्येषु यावतार्थेन अर्थी देहनिर्वा
होपस्यतथाभूतः स्यात ॥ अप्रमत्तः तावन्मात्रेष्वनासक्तः ॥ व्यवसायबुद्धिर्नेदं सुखमिति निश्चयवान् ॥ तदापि तस्मिन्नर्थे न्यायेन वर्तिदे

शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः ॥ परिभ्रमंस्तत्र न विंदतेर्थान्मायामये वासनया शयानः ॥ २ ॥
अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ॥ सिद्धेन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥
सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किं ॥ सत्यंजलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं
दुकूलैः ॥ ४ ॥ चीराणि किं न पथि संति दिशंति भिक्षां नैवांघ्रिपाः परभृतः सरितोप्यशुष्यन् ॥ रुद्धा गुहाः किमजितोऽवति

सतितत्रयत्ने परिश्रमं पश्यं न यतेत ॥ ३ ॥ अन्यथा सिद्धिमाह द्वाभ्यां नोपसन्नान कस्माद्भजंति कवयो धनदुर्मदांधान् ॥ ५ ॥ ॥
सत्यामिति ॥ कशिपोः शय्यायाः स्वतः सिद्धे बाहौ सति उपबर्हणैः ॥ उपधानैः पुरुधा बहुप्रकारया अन्नपात्र्या भोजनपात्रेण ॥४॥ नन्वेवं रि
कुसङ्गाद्वा नामनग्नत्वमेव ॥ वल्कलमप्यत्रेतो यदि वासः स्थानं च याच्याशयपतनं विना कथं प्राप्येत तत्राह ॥ चीराणीति वस्त्रखंडानि ॥ परान् बिभ्रतीति परभृतः ॥ एम
तिफलाशिनि ये गुहाः गिरिदर्यः ॥ नन्वेवंदाविशेषामलाभे किं कार्यं तत्राह ॥ अजितो हरिः उपासमानाञ्शरणागतान्किं न रक्षति न रक्षति किं

राम
५

तदा तेन किं कर्त्तव्यं हरिमेव स्मरेत्याह ॥ एवं विरक्तः सन्तं भजेत भजनीयत्वे हेतवः ॥ स्वचित्ते स्वत एव सिद्धः यत आत्मा अत एव प्रियः प्रियत्वे
च सेवा सुखरूपैव स्वअर्थः सत्यः ॥ न त्वनात्मवन्मिथ्या ॥ भगवान् भजनीयगुणोऽस्त्यनन्तस्तनित्यः यदेवंभूतस्तं भजेत ॥ नियतार्थो निश्चित
स्वरूपः तदनु भवानन्देन निर्वृतः सन्निति स्वतः सुखात्मत्वं दर्शितं ॥ किंच यत्र यस्मिन् भजने सति संसारहेतोरविद्यायाउपरमो नाशो भव
ति ॥ एतदेवान्यचिन्तानिरयाइवउपालिका इति ॥ तां तथाभूतां परस्य हरेरनुचिन्तां धारणामनादृत्य पश्यन्कर्मजडान्विनाशयापस्रेवं सरेवा
नामिति स्मृतेः ॥ असती विषयचिन्तां को नाम कुर्यात ॥ तथा चितयावैतरण्यां पतितं तत्र च स्वकर्मजानाध्यात्मिकादिक्लेशान् सेवमानेन जनं

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः ॥ तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ६ ॥ कस्तां
त्वनादृत्य परानुचिन्तामृते पशूनसतीं नाम कुर्यात ॥ पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान्परितापान् जुषाणं ॥ ७ ॥ के
चित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तं ॥ चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंति ॥ ८ ॥ प्रसन्नवक्त्रं
नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससं ॥ लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलं ॥ ९ ॥

पश्यन् वैतरणी यमद्वारस्था नदी तत्तुल्यत्वात्संसृतिर्वैतरणी ॥ ७ ॥ तामेव धारणां सविशेषणामाह ॥ केचिदिति षड्भिः ॥ स्वदेहस्यान्तर्मध्ये यत् हृद
यं तत्र योऽवकाशस्तस्मिन्नु वसन्तं ॥ प्रादेशः तर्जन्यंगुष्ठयोर्विस्तारः एवमात्रप्रमाणं यस्येति हृदयपरिमाणतत्रोपचर्यते ॥ कंजं पद्मं रथांगं चक्रं
नलिनं पद्मं तद्वत्प्रसन्ने आयते दीर्घे ईक्षणे यस्य ॥ कदंबकुसुमस्य किंजल्कः केसरः तद्वत्पिशंगे पीते वाससी यस्य ॥ लसंति महारत्नानि येषु तानि

उन्निद्रं विकसितं यत् हृत्पंकजं तस्य कर्णिकैवालयः स्थानं तस्मिन् योगेश्वरैः स्थापितौ पादपल्लवौ यस्य ॥ श्रीरेव लक्ष्म चिह्नं तद्युक्तं ॥ पापादि विहितो पत्वथीयोः नघरत्नयः ॥ कौस्तुभरत्नं कंधरायां यस्य अम्लाना लक्ष्मीः शोभा यस्याः तया वनमालया आचितं व्याप्तं ॥१०॥ स्निग्धत्वादिविशिष्टैः कुंतलैः विरोचमानेनाननेन यो हासः तेन पेशलं सुंदरं ॥११॥ अदीनमुदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन्नुल्लसंतो ये भ्रूभंगाः भ्रूविक्षेपातैः संसूचितो भूरिरनुग्रहो येन चिंतामयं चिंतयाविर्भूतं ॥१२॥ अथैवं ध्यानमाह एकैकश इति ॥ अनुभावयेत् ध्यायेत ॥ यद्यज्जितं अयत्नतः स्फुरति पादगुल्फादिस्थानं

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरस्थापितपादपल्लवं ॥ श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालयाचितं ॥१०॥ विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ॥ स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं ॥११॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते ॥१२॥ एकैकशोंगानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः ॥ जितं जितं स्थानमपोह्य धारयेत्परं परं शुध्यति धीर्यथा यथा ॥१३॥ यावन्न जायेत परावरेस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ॥ तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥१४॥

अवयवः तत्तद्रूपो ह्यस्पष्टत्वात्परं परं जघनाद्यावारि धारयेत ध्यायेत ॥ शुध्यति तस्मिन् निश्चला भवति ॥१३॥ पूर्वोक्ते वैराजधारणायाः तद्धारणांगत्वमाह यावदिति ॥ परे ब्रह्मादेः परस्य अवरे यस्मात् ततः विश्वेश्वरे द्रष्टरि न तु दृश्यरूपे चैतन्यघनत्वात् भक्तियोगः प्रेमलक्षणः क्रियावसाने आवश्यककर्मानुष्ठानानंतरं ॥ अनेन कर्मापि भक्तियोगपर्यंतमेवेत्युक्तं ॥१४॥

रामचंद्राय नमः ॥ ॥ ॥

एवं तावदासन्नमृत्योः पुंसः कृत्यमुक्तं ॥ इदानीं तस्यैव बहुवर्षं देहं त्यक्तुमिच्छतः कृत्यमाह स्थिरमिति सार्धैश्चतुर्भिः ॥ अंग हे राजन्भूतो यति
र्यदा इमं लोकं देहं जिहासुः हातुमिच्छति तदा देशे पुण्ये क्षेत्रे काले च उत्तरायणादौ मनो न सज्जयेत् ॥ न देशकालौ योगिनः सिद्धिहेतू
किं तु योग एवेति दृढनिश्चयो भूत्वा स्थिरं सुखं करं चासनमास्थितः प्राणान्नियच्छेदित्यर्थः ॥ १५ ॥ एतां बुद्धिं क्षेत्रज्ञे तेऽभ्यादिदृश्यानि निनये
त् ॥ प्रविलापयेत् ॥ तं च क्षेत्रज्ञं आत्मनि शुद्धे तं च शुद्धमात्मानं आत्मेवाहमिति आत्मनि शुद्धे ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशा

स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममंग लोकं ॥ काले च देशे च मनो न सज्जयेत्प्राणान्नियच्छेन्मनसा जि
तासुः ॥ १५ ॥ मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि ॥ आत्मानमात्मन्यवरुध्य धीरो लब्धो
पशान्तिर्विरमेत कृत्यात् ॥ १६ ॥ न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ॥ न यत्र सत्त्वं न रजस्त
मश्च न वै विकारो न महान्प्रधानं ॥ ॥ ७ एमकृष्णायनमः ॥

न्तिः प्राप्तनिर्वृत्तिः सन् कृत्याद्विरमेत ततः परं प्राप्याभावात् ॥ १६ ॥ तदेवाह न यत्रेति ॥ यत्रात्मस्वरूपे कालोऽपि न प्रभुः किमपि कर्तुं न समर्थः
अत एव देवाः न प्रभव इत्याह ॥ अनिमिषां देवानां परः प्रभुः कालोऽपि यत्र न प्रभुः ॥ तत्र कुतो नु देवाः प्रभवेयुः ॥ देव नियम्यानां जगतां
प्राणिनां का वार्त्तेत्याह जगतामिति कुतो न प्रभवन्तीत्यपेक्षायां निरूपाधित्वादित्याह न यत्रेति ॥ यद्वा जगत्कारणान्यपि न यस्मिन् सत्त्वाद्यारोप
भवन्तीत्याह न यत्रेति ॥ विकारोऽहंकारः ॥ १७ ॥

भा॰ द्वि॰ ७

निरुपाधित्वं ज्ञातं इत्यत आह परमिति । यद्यस्मात् अतत् अनात्मव्यतिरिक्तं नेति नेतीत्येन उत्स्रष्टुमिच्छवो दौरात्म्यं देहाद्यात्मकत्वं विसृज्य अर्हस्य पूज्यस्य श्रीविष्णोः परं पदे पदे क्षणे क्षणे हृदा उपगुह्य आश्लिष्य नान्यस्मिन् सौहृदं येषां तथाभूताः संतः तद्वैष्णवं पदं अत एव परं सर्वतः श्रेष्ठमामनंतीत्यन्वयः ॥१८॥ तस्मादित्थं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत तत्र शब्देन यदिंद्रियाणामुपरतिरिति वक्ष्यमाणात्सकामाद्विशेष उक्तः तमाह ॥ विज्ञायतेऽनेनेति विज्ञानं शास्त्रं तेन जाता दृक् ज्ञानं तस्य वीर्यं बलं तेन सुरंधिताः विहिंसिताः आशया विषयवासना यस्य सः ॥ इदानीं तस्य

परं पदं वैष्णवमामनंति तत् यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे ॥१८॥ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः ॥ स्वपार्ष्णिनापीड्य गुदं ततोनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥१९॥ नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः ॥ ततोनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत्ततः ॥२०॥ तस्माद्भ्रुवोरंतरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः ॥ स्थित्वा मुहूर्तार्द्धमकुंठदृष्टिर्निर्भिद्य मूर्धन्वि- सृजेत्परं गतः ॥२१॥

देहत्यागप्रकारमाह सार्धाभ्यां स्वपार्ष्णिना पादमूलेन गुदं मूलाधारमापीड्य निरुध्य अनिलं प्राणं उन्नमयेत् ऊर्ध्वं नयेत । जितः क्लमो येन । षट्सु स्थानेषु नाभ्यादिषु ॥१९॥ नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे अधिरोप्य उरसि कंठादधोदेशे स्थिते विशुद्धिचक्रे मनस्वी जितचित्तः स्वतालुमूलं तस्यैव चक्रस्याग्रदेशं ततो बुद्ध्यागमनं संभवात् शनकैरित्युक्तं ॥२०॥ तस्माद्भ्रुवोरंतरं आज्ञाचक्रं निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेति एवं सप्तायतनानि प्राणमार्गा येन सः । अनपेक्षः स्वेतरं ब्रह्म गतः सन् मूर्द्धन् मूर्द्धनि ब्रह्मरंध्रे निर्भिद्य देहमिंद्रियाणि च विसृजेत ॥२१॥

एम
७

सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति दशभिः यदि त्वं पारमेष्ठ्यं पदं प्रयास्यन् भवति वैहायसानां खेचराणां सिद्धानां यद्विहारं क्रीडास्थानं
कीदृशं ॥ अष्टाधिपत्यानि अष्टैश्वर्याणि यस्मिन् तत् यदि प्रयास्यन् ॥ तत् ॥ गुणसन्निवाये गुणसंघातरूपे ब्रह्माण्डे सर्वत्रेत्यर्थः ॥ तर्हि देह
त्यागावसरे मनसेन्द्रियाणि च न त्यजेत् किं तु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत् ॥ २२ ॥ यतः कर्मगतिवत् योगगतिः परिच्छिन्नेत्याह ॥ यो
गेश्वराणां त्रिलोक्या अन्तर्बहिश्च महर्लोकादिषु ब्रह्माण्डाद्बहिश्च गतिमाहुः ॥ अत्र हेतुः पवनस्यान्तः ॥ आत्मा लिङ्गशरीरं येषामिति ॥ विद्या

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं ॥ अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥ २२ ॥
योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनां ॥ न कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोग
समाधिभाजां ॥ २३ ॥ वैश्वानरं याति विहायसा गतः सुषुम्नया ब्रह्मपथेन शोचिषा ॥ विधूतकल्कोऽथ हरेरुद
स्तात् प्रयाति चक्रं नृप शैशुमारं ॥ २४ ॥

उपासना ॥ तपो भगवद्धर्मः ॥ योगोऽष्टाङ्गः ॥ समाधिर्ज्ञानं तान् ये भजन्ति तेषां या गतिस्तां ॥ २३ ॥ नाम
ह ॥ वैश्वानरमित्यष्टभिः ॥ विहायसा आकाशेन तत्रापि च ब्रह्मलोकपथेन गतः सन् प्रथमं वैश्वानरं अग्न्यभिमानिनीं देवतां याति केनोपायेन
सुषुम्नया नाड्या सा च देहाद्बहिरपि वितता अस्तीत्याह ॥ शोचिषा ज्योतिर्मय्या ॥ विधूतः त्यक्तः कल्को मलं येन सः ॥ क्वाप्यसज्जमान इत्यर्थः ॥ उद
स्तात् उपरिष्टात् हरेः संबन्धिना तद्रूपेण नारायणेनाधिष्ठितमित्यर्थः ॥ शैशुमारं चक्रं पञ्चमस्कन्धे वक्ष्यमाणं शिशुमाराकारं ज्योतिश्चक्रं
नक्षत्रस्थानानि आदित्यादिध्रुवान्तानि पदानि प्रयातीत्यर्थः ॥ २४ ॥

भा॰ द्वि
८

तद्विष्णोश्चक्रं विश्वस्य नाभिं सूर्य्याख्यं अपूर्त्तं आविष्टलिंगत्वात्राभिशार्वस्य नष्टत्वं अतिवर्त्य अतिक्रम्य ॥ परतः स्वर्गिणागत्यभावादेक
एव निर्म्मलेन लिंगशरीरेण ब्रह्मविदां स्थानं अन्यैर्नमस्कृतं महर्ल्लोकं उपैति यद्यस्मिन् विबुधा महाकल्पायुषो भृग्वादयः ॥ २५ ॥ अथो अ
नंतं कल्पांते स विश्वं त्रैलोक्यं अतिशयेन दह्यमानं निरीक्ष्य तत्राप्यूष्मणा पीडितः ॥ यत् द्विपरार्द्धस्थायि तत्पारमेष्ठ्यं पदं प्रति निर्याति सिद्धेश्वरैर्जुष्टा
नि धिष्ण्यानि विमानानि यस्मिन् तत् ॥ उ इति श्रैष्ठ्यं सूचितं ॥ २६ ॥ तदेवाह न यत्रेति ॥ आर्त्तिः दुःखं उद्वेगो भयं ॥ चित्तविचित्तहेतोः यद्दुःखं अदः कृते त

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ॥ नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमंते
अथो अनंतस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं ॥ निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्द्ध्यं तदु पारमेष्ठ्यं ॥ २६ ॥
न यत्र शोको न जरा न मृत्युर्नार्त्तिर्न चोद्वेग ऋते कुतश्चित् ॥ यच्चित्ततोऽदः कृपयानिदंविदां दुरंतदुःखप्रभवानुदर्शनात् २७

रेवं विना तत्कृतो भवति अनिदंविदां अदं भगवतो ध्यानं अजानतां प्राणिनां दुरंतदुःखो यः प्रभवो जन्म तस्यानुदर्शनात् ॥ देवांकृपया ॥ य
द्वा चित्ततो दो मनः पीडेति यत् तत् विनाकृतं नश्चिदपि यत्र शोकादयो न संतीति ॥ तत्र ब्रह्मलोकं गतानां त्रिविधा गतिः ॥ ये पुण्योत्कर्षेण गताः ते क
ल्पांतरे पुण्यतारतम्येनाधिकारिका भवंति ॥ ये तु हिरण्यगर्भोपासनाबलेन गताः ॥ ते ब्रह्मणा सह मुच्यंते ये तु भगवदुपासकाः ॥ ते
स्वेच्छया ब्रह्मांडं भित्वा वैष्णवं परमारोहंति ॥ ॥ २८ ॥ श्रीरामचंद्राय नमः ॥ ॥ ॥

राम
८

तत्र प्रसक्ते तस्य भगवद्ब्रह्मस्य ब्रह्मांडभेदेन प्रकारमाह ततइत्यादिना ॥ तत्रैवं प्रक्रिया ॥ ईश्वराधिष्ठितायाः प्रकृतेः केनचिदंशेन महत्तत्वं
भवति ॥ तस्यांशेनाहंकारः तस्यांशेन शब्दतन्मात्रद्वारा नभः तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः तस्यांशेन रूपतन्मात्रद्वारा तेजः ॥
तस्यांशेन तन्मात्राद्वारा आपः तदंशेन गंधतन्मात्रद्वारा पृथ्वी ॥ तैश्च मिलितैः स्वतदंशभुवनात्मकं विराट्शरीरं तस्य च पंचाशत्कोटि
योजनविशालस्य पृथिवीब्रह्मांडकटाहं विशेषशब्दवाच्यं कोटियोजनविशालं पृथ्व्यावरणं ॥ पंचाशत्कोटिविशालमित्येके ततश्च
वारीणां ये परिणता अंशाः ॥ तान्येवोत्तरोत्तरदशगुणान्यावरणानि स्पृष्टमंतःप्रकृत्यावरणं व्यापकमेव तदेवं स्थिते पृथिव्याद्यावरण

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोनलमूर्तिरत्वरन् ॥ ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदा
त्मलिंगं ॥ २८ ॥ घ्राणेन गंधं रसनेन वै रसं रूपं च दृष्ट्या श्वसनं त्वचैव ॥ श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपै

भेदप्रकारः कथ्यते ॥ ततो विशेषं प्रतिपद्यालिंगदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः ॥ एवमुत्तरत्रापि द्रष्टव्यं ॥ निर्भयः ॥ कथं — ति योगी ॥ २९ ॥
प्राप्स्यामीति शंकाशून्यः तेनात्मना पृथ्वीरूपेणान्तस्त्रिरंतराप्सु पः प्रतिपद्य अत्वरन् त्वरामकुर्वन् तत्तदात्मत्वेन क्लेशदाहादिशंकाभावाद्य
थेष्टं भोगानभुंजान इत्यर्थः ॥ एवं ज्योतिर्मयः सन् काले भोगावसाने व्यूहत आत्मनो लिंगं परमात्ममूर्तिस्तेनोपाधिनेत्युक्तं ॥ यद्वा वेदशब्दा
त्मना तस्य प्रमापकमिति ॥ २८ ॥ इंद्रियार्थानां भूतसूक्ष्माणामतिक्रममाह घ्राणेनाधिष्ठितेन गंधमुपेत्य ॥ श्वसनं ॥ नभोगुणत्वं शब्दात्मतां
प्राणेन तत्तत्कर्मेंद्रियेणाकूतिं तत्तत्क्रियां ॥ २९ ॥

तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्तिमाह स योगी विकार्यं संसाद्य विज्ञानतत्त्वं याति विविधं कार्यम
स्येति विकार्योऽहंकारः ॥ स त्रिविधः ॥ तामसो राजसः सात्त्विक इति ॥ तत्र तामसात्सूक्ष्मभूतानि जायंते राजसात् बहिर्मुखानि दशेंद्रियाणि
सात्त्विकान्मनः इंद्रियदेवताश्च तेषां लयश्च तत्तदहंकारे ॥ तत्र भूतसूक्ष्माणामिंद्रियाणां च यः संनिकर्षः लयस्थानं तामसं राजसं च मनोमयं देवमयं च
सात्त्विकं प्राप्य ॥ गत्या एवं गमनेन तेनाहंकारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति ॥ ततः गुणानां संनिरोधो लयो यस्मिन् तत्प्रधानं याति ॥ ३० ॥ ते
नात्मना प्रधानरूपेणानंदमयः सन्नुपाधीनामवसाने शांतमविकृतमानंदं परमात्मानमुपैति न विषज्जते नावर्त्तत इत्यर्थः ॥ ३१ ॥ सृती मार्गौ उ

स भूतसूक्ष्मेंद्रियसंनिकर्षं मनोमयं देवमयं विकार्यं ॥ संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधं ॥ ३० ॥ तेनात्म
नात्मानमुपैति शांतमानंदमानंदमयोऽवसाने ॥ एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेंग ॥ ३१ ॥ एते सृती ते नृप
वेदगीते त्वयाभिपृष्टे च सनातने च ॥ ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः ॥ ३२ ॥

कारावित्यर्थः ॥ हे नृप अनपेक्षो निर्भिद्य मूर्धं विसृजेत् परं गतः इति या सद्योमुक्तिरेका सृतिः यदि प्रयास्यन्नित्यादिना क्रममुक्तिश्च द्वितीया सृतिः एते
सृती वेदेन गीते उक्ते ॥ न ह्यतोन्यश्रिते ॥ तत्र यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति सद्योमुक्तिः ॥ ते
र्चिषमभिसंभवंतीत्यादिना क्रममुक्तिश्च वेदेनोक्ता ॥ यद्वा ॥ न कर्मभिस्त्वां गतिमाप्नुवंतीति दक्षिणमार्गस्यापि सृति विततत्वादेते सृती इति द्विवचनं
त्वयाभिपृष्टे यद्वा तत्त्वमित्यादिप्रश्नेनार्थान्मुक्तिविषये द्वे अपि सृती पृष्टे ॥ ब्रूहि ॥ यद्वा विपर्ययमिति दक्षिणमार्गोप्यर्थात्पृष्टः एवं त्वयावपृष्टे
एते सृती त्यन्वयः ॥ ३२ ॥

संतं संसरतः पुंसो बहवो मोक्षमार्गास्तपोयोगादयः सम्यीचीनत्वयमेवेत्याह नहीति ॥ यतोऽनुष्ठिताद्भक्तियोगो भवेत् अतोऽन्यः शिवः सुख
रूपो निर्विघ्नश्च नास्त्येव ॥३३॥ ज्ञत एतदत आह भगवान् ब्रह्मा ॥ कूटस्थः निर्विकारः एकाग्रचित्तः सन्नित्यर्थः ॥ त्रिस्त्रीन्वारान् कार्त्स्न्येन ॥
साकल्येन ॥ ब्रह्म वेदं अन्वीक्ष्य विचार्य यत आत्मनि हरौ रतिर्भवेत् ॥ तदेव मनीषया अध्यवस्यत निश्चितवान् ॥३४॥ नन्वनुभूते एव रतिर्भव
ति अननुभूते भगवति कथं रतिः स्यात्तत्राह ॥ भगवानिति ॥ लक्षितः दृष्टः कथं स्वात्मनाहं इत्यन्तर्यामितया वै दृश्यैः बुद्ध्यादिभिः ॥ तदेवं द्वेधा

नह्यतोऽन्यः शिवः पंथा विशतः संसृताविह ॥ वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥३३॥ भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वी
क्ष्य मनीषया ॥ तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥३४॥ भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्या
दिभिर्द्रष्टा लक्षणैरनुमापकैः ॥३५॥ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भग
वान्नृणां ॥३६॥ पिबंति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं ॥ पुनंति ते विषयविदूषिताशयं व्रजंति तच्च
रणसरोरुहांतिकं ॥३७॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे द्वितीयोऽध्यायः ॥२॥

दर्शयति ॥ दृश्यानां जडानां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुपपत्तिमुखेन ॥ लक्षणैः स्वप्रकाशान्तर्यामिलक्षणैः तथा बुद्ध्यादीनि कर्तृ
प्रयोज्यानि करणत्वाद्वास्यादिवदिति व्याप्तिमुखेनानुमापकैः स्वतंत्रश्च कर्त्तैवं स्वामीश्वरसिद्धिः ॥३५॥ यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंह
रति तस्मादिति ॥ श्रवणादिफलमपि नयेनाह पिबंतीति सतामात्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृतं विषयैर्विदूषितं मलिनीकृतमा
शयं पुनंति शोधयंति ते तस्य चरणांपयांतिकं श्रीविष्णुपदं व्रजंति ॥३७॥ इति द्वितीये द्वितीयः ॥२॥

भा॰ द्वि
१०

तृतीये विस्तुमन्त्रोक्तं वैशिष्ट्यं स्तु एवतोष्ठनेः ॥ भक्त्युद्रेकेण तत्कर्म श्रवणादरईर्यते ॥ १ ॥ इदानीमन्यदेवताभजनस्यापि तुच्छादिभजनवदेवतत्तुच्छ
फलत्वेन हेयत्वं वक्तुं पूर्वोक्तमनुवदति ॥ एवमिति ॥ ममेति मां ॥ कदाचिद्दैवयोगेन मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणस्तेषां तत्रापि ये म्रिय
माणास्तेषां विशेषत एवमेतद्धरिकथाश्रवणादिकं निगदितं विहितमित्यर्थः ॥ १० ॥ ब्रह्मणस्पतिं ब्रह्माणं ॥ इंद्रियपाटवकामा त्विंद्रं प्रजा

श्रीशुक उवाच ॥ एवमेतन्निगदितं पृष्टवान्यद्भवान्मम ॥ नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां ॥ १ ॥ ब्रह्मवर्चस
कामस्तु यजेत ब्रह्मणस्पतिं ॥ इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ २ ॥ देवीं मायां तु श्रीकामस्तेजस्कामो
विभावसुं ॥ वसुकामो वसून्रुद्रान्वीर्यकामोथ वीर्यवान् ॥ ३ ॥ अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान्
विश्वान्देवान्राज्यकामः साध्यान्संसाधको विशां ॥ ४ ॥ आयुःकामोश्विनौ देवौ पुष्टिकाम इलां यजेत ॥ प्रति
ष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥ ५ ॥ रूपाभिकामो गंधर्वान्स्त्रीकामोऽप्सर उर्वशीं ॥ आधिपत्यकामः सर्वेषां
यजेत परमेष्ठिनं ॥ ६ ॥

पतीन्दक्षादीन् ॥ २ ॥ मायां दुर्गां विभावसुमग्निं ॥ वसुकामः धनार्थी ॥ वीर्यप्रभावः तत्कामो वीर्यवान्
सन्रुद्रान्यजेत ॥ ३ ॥ अन्नाद्यं भोज्यं भक्ष्यं च ॥ अदितेः सुतान्द्वादशादित्यान् ॥ विशां देशस्य प्रजानां स्वाधीनतामिच्छन्साध्यान
यजेत ॥ ४ ॥ इलां पृथ्वीं प्रतिष्ठा स्थानार्थस्मृतिः रोदसी द्यावाभूमी ॥ ५ ॥ अप्सरः श्रेष्ठामुर्वशीं च तां ॥ ६ ॥ राम ॥ ॥

राम
१०

यत्तं यत्तोपाधिनिर्दिष्टं ॥ कोसौ वदत्स्वेवच्यः ब्रह्मकाम इत्यत्र धनमात्रमिति भेदः ॥ दांपत्यमन्योन्यप्रीतिः तदेवार्थो यस्य सः ॥ ७ ॥ ध
र्मार्थः धर्मकामः ॥ उत्तमश्लोको पाधिविशिष्टं ॥ तंतुं तत्तत्संतानवृद्धिमविच्छिन्नं ॥ रक्षा बाधानिवृत्तिः तत्कामः पुण्यजनान्यक्षान्
सुजनो बलं तत्कामः ॥ मरुद्गणान् रुद्रान् ॥ ८ ॥ राज्यं राजत्वं तत्कामो मनून्देवान्मन्वंतरपालान् एत्तः कर्मराज्यं तत्कामो विष्णून्देवा
निति विशेषः ॥ अभिचरन् शत्रुमरणमिच्छन् निर्ऋतिं राक्षसं ॥ कामकामः भोगेच्छुः ॥ अकामः वैराग्यकामः पुरुषं परं प्रकृतिव्यतिरेकी

यत्तं यजेद्यशस्कामः कोशकामः प्रचेतसं ॥ विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सती ॥ ७ ॥ धर्मार्थ उत्तमश्लोकं तंतुं
तन्वन्पितॄन्यजेत ॥ रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥ ८ ॥ राज्यकामो मनून्देवान्निर्ऋतिं त्वभिच
रन्यजेत ॥ कामकामो यजेत्सोमम् अकामः पुरुषं परं ॥ ९ ॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भ
क्तियोगेन यजेत पुरुषं परं ॥ १० ॥ एतावानेव यजतामिह निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसंगतः ॥ ११ ॥

पाधिमीश्वरं ॥ ९ ॥ अकाम एकांतभक्तः ॥ उक्तानुक्तसर्वकामो वा पुरुषं पूर्णं निरुपाधिं ॥ १० ॥ पूर्वोक्तनानादेवतायजनस्यापि संयोगपृथ
क्त्वेन भक्तियोगफलत्वमाह एतावानिति ॥ इंद्रादीनपि यजतां इह तत्तद्यजनेन भागवतानां संगतो भगवत्यचलो भावो भक्तिर्भवतीति
यत् एतावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयः लाभः अन्यत्तु सर्वं तुच्छमित्यर्थः ॥ ११ ॥

भा॰ द्वि
११

भागवतसंगात् इत्यनेन सूचितां हरिकथारतिं हेतोति ॥ तानमिति । यत्तया हरिकथया हृत्तानं भवति कीदृशं आ सर्वतः प्रतिनिवृत्तं उपरतं गु-
णोर्मीनां रागादीनां चक्रं समूहो यस्मात्तत् उत अनंतरं तद्धेतु आत्मप्रसादः स्वयं तत्र याह मनुः प्रसादहेतुः गुणेषु विषयेषु असंगो वैराग्यं च
उभयत्रेति पाठे इहामुत्र च गुणेषु असंगः ॥ कैवल्यमित्येवं संमतः पंथा यो भक्तियोगः निर्वृतः श्रवणादिभिः अन्यत्रानिर्वृत इति वा ना-
हरिकथासु को रतिं न कुर्यात् ॥ १२ ॥ अभिव्याहृतमुक्तं ॥ ऋषिं ॥ परब्रह्मदर्शिनं कविं शरद्ब्रह्मनिष्णातं ॥ १२ ॥ श्रवणेच्छायां हेतुः ॥ हरिकथा-

तानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उभयत्र गुणेष्वसंगः ॥ कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिक-
थासु रतिं न कुर्यात् ॥ ११ ॥ शौनक उवाच ॥ इत्यभिव्याहृतं राजा निशम्य भरतर्षभः ॥ किमन्यत्पृष्टवान् भूयो वैयासकिमृषिं कविं
॥ १२ ॥ एतच्छुश्रूषतां विद्वन् सूत नोऽर्हसि भाषितुं ॥ कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवं ॥ १४ ॥ स वै भागवतो राजा पांडवेयो
महारथः ॥ बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे ॥ १५ ॥ वैयासकिश्च भगवान् वासुदेवपरायणः ॥ उरुगायगुणोदाराः
सतां स्युर्हि समागमे ॥ १६ ॥ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ॥ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ॥ १७ ॥

एव उदर्कः उत्तरफलं यासां ताः कथाः सतां भागवतानां सदसि सभायां स्युः ॥ १४ ॥ एतत्सपंचवयतिसवाशनिद्वाभ्यां कृष्णपूजादिरूपां क्रीडां यः
स्वीकृतवान् ॥ १५ ॥ उरुगायस्य गुणोरुदाराः महत्यः कथाः स्युः ॥ १६ ॥ किंच इत्थं वर्ज्यमानमायुर्हरिकथया सफलं कर्तव्यमाशयेनाह त्रिभिः ॥ आय
आयुरिति ॥ असौ सूर्यः उद्यन् उद्गच्छन् अस्तमदर्शनं वा यन् गच्छन् यत्तया येन क्षणो नीतः तस्यायुः ऋते वर्जयित्वा सर्वस्यैव हरति ॥ १७ ॥

११

ननुजीवनमेवतेषामायुष्यः फलमस्तितत्राह ॥ तरवइति ॥ ननुतेषांश्वासोनास्तितर्हि भस्त्राः चर्मकोशाः ॥ ननुतासामहारादिकंनास्तितत्राह
नखादंतिनाश्नंतिनमेहंतिरेतः सेकंमेहनंननकुर्वन्ति किंतुअपिनराकारंपशुमत्वाह ॥ अपरइति ॥१८॥ नरदेवाहश्वादिभिः संस्तुतः सदृशो
निरूपितः ॥ यस्यकर्णपथंकदाचिदपिनागतः सः अवक्तास्परत्वात्शवभिः ॥ कश्मलविषयासक्तत्वाद्विड्वराहैर्ग्राममसूकरैः कंटकवड्डः खरैर्वि
षयासक्तत्वात् ॥ उष्ट्रैः ॥ भारवाहित्वात्खरैरेकत्वस्येत्यर्थः ॥१९॥ तस्यांगानिवनिष्फलानीत्याह ॥ बिलइतिपंचभिः वतेतिखेदेनशृएवतः श्रु

तरवः किंनजीवंतिभस्त्राः किंनश्वसंत्युत ॥ नखादंतिनमेहंतिकिंग्रामेपशवोपरे ॥१८॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः
नयत्कर्णपथोपेतोजातुनामगदाग्रजः ॥१९॥ बिलेबतोरुक्रमविक्रमान्येनशृएवतः कर्णपुटेनरस्य ॥ जिह्वासतीदार्दुरिकेव
सूतनचोपगायत्युरुगायगाथाः ॥२०॥ भारः परंपट्टकिरीटजुष्टमप्युत्तमांगंननमेन्मुकुंदं ॥ शावौकरौनोकुरुतः सपर्यांहरे
र्लसत्कांचनकंकणौवा ॥२१॥ बर्हायितेतेनयनेनराणांलिंगानिविष्णोर्ननिरीक्षतोये ॥ पादौनृणांतौद्रुमजन्मभाजौक्षेत्राणि
नानुव्रजतोहरेर्यौ ॥२२॥ जीवञ्छवोभागवतांघ्रिरेणुंनजातुमर्त्योभिलभेतयस्तु ॥ श्रीविष्णुपद्यामनुजस्तुलस्याः श्वसञ्छवो

शृएवतोनरस्ययेकर्णपुटेबिलेवृथारंध्रे ॥ नचेदुपगायतितस्याजिह्वाअसतीदुष्टादर्दुरीभेकस्तदीयाजिह्वेव ॥२०॥ परव ॥ यस्तुनवेदगंधं ॥२३॥
उष्णीषेणकिरीटेनवजुष्टमपिशिरोयदिननमेत्तर्हिकेवलंभारएवशावोमृतकः तत्करतल्यौ ॥ लसतीकांचनकंकणेययोस्तौअपर्थैर्वारावः ॥२१॥
येनयनेविष्णोर्मूर्तीर्ननिरीक्षेते तेबर्हायितेमयूरपिच्छनेत्रतुल्ये द्रुमवज्जन्मभजंतइतितथा द्रुमजन्मतुल्यावित्यर्थः ॥२२॥ नाभिलभेत अभितोनस्पृशेत्
नधारयेत ॥ श्रीविष्णुपद्याः श्रीविष्णुपरतुलस्याः नवेदेतिअवघ्रायनाभिनंदेदित्यर्थः ॥२३॥

भा॰द्वि
१२

ऽश्मसारो ऽवलंकारिन्यं यस्य विक्रियालक्षणमाह ॥ अथेति ॥ गात्ररुहेषु रोमहर्षः उद्गमः ॥ २४ ॥ यस्मात् अरमन्नास्य सर्वमेतन्मर्थं ॥ मनसोऽनुकूलं
च प्रियं तत्रैव अथ अतः साधुपृष्टः तत्र वैयासकिः नृपतिं प्रति यदाह तदभिधेहीति ॥ २५ ॥ इति भावार्थदीपिकायां द्वितीयस्कंधे तृतीयोऽध्यायः ॥ त्रैवं
परीक्षिता पृष्टस्तथा आदिहरिर्वेष्टितां अङ्के नवज्ञस्य तत्त्वं सत्वारेनोपवर्ण्यते ॥ १ ॥ एतत्तः पृष्टं कथयितेति तस्य पश्चात्कृतनीच्छितिमाह चतुर्भिः ॥ वै

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ॥ न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥ अथाभि
धेह्यंग मनोऽनुकूलं प्रभाषसे भागवतप्रधानः ॥ यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधुपृष्टः ॥ २५ ॥ इति श्री
भागवते महापुराणे द्वितीयस्कंधे तृतीयोऽध्यायः ॥ सूत उवाच ॥ वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः ॥ उपधार्य मतिं
कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ राज्ये चाविकले नित्यं निरूढां ममतां जहौ
पप्रछ चेममेवार्थं यन्मां पृछथ सत्तमाः ॥ कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ ॥ संस्थां विज्ञाय संन्यस्य कर्म त्रै
वर्गिकं च यत् ॥ वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥ राजोवाच ॥ समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ ॥ तमो विशी

यासकेः शुकस्य ॥ इति एवंभूतं आत्मनस्तत्त्वस्य निश्चयो यस्मात् तद्वच उपधार्य आकल्प सतीं कृष्णमेव वि| र्यते मह्यं हरेः कथयतः कथां ॥ ५
व्यः नाम्नः इत्येवंभूता ॥ १ ॥ आत्मा देहपरा वोगजादयः ॥ २ ॥ इममेवार्थं हरिलीलालक्षणं ॥ ३ ॥ संस्थां मृत्युं त्रैवर्गिकं धर्मार्थकामप्रधानं संन्यस्य
त्यक्त्वा आत्मभावं परमप्रेमाणं भगवदात्मत्वं गतः प्राप्तः सन् पप्रछ ॥ ४ ॥ मह्यं मम तमोऽज्ञानं नश्यति ॥ तव कथयतः सतः अतः समीचीनं ॥ ५

राम
१२

पुनश्च वेदितुमिच्छामि इदं दुर्विभाव्यं अवितर्क्यं विश्वं यथा सृजति ॥ ६ ॥ गोपायति पालयति ॥ संयच्छते संहरते ॥ पुरुशक्तिः बहुशक्तिमान्
क्रीडन् यथा करोति ॥ आत्मानं ब्रह्मादिरूपिणं क्रीडयन् विकरोति विविधं करोति ॥ ७ ॥ ८ ॥ एकः पुरुषरूपेण युगपज्जन्मभिः ब्रह्माद्यव
तारैः क्रमशो वा यथा प्रकृतेर्गुणान् गृह्णाति ॥ ९ ॥ विचिकित्सितं संदिग्धं शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिंस्त्वनुभवेन ॥ १० ॥ उपामं

भूय एव विवित्सामि भगवानात्ममायया ॥ यथेदं सृजते विश्वं दुर्विभाव्यमनीश्वरैः ॥ ६ ॥ यथा गोपायति विभुर्यथा संयच्छ
ते पुनः ॥ यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥ आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च ॥ ७ ॥ नूनं भगवतो
ब्रह्मन् हरेरद्भुतकर्मणः ॥ दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं ॥ ८ ॥ यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोपि वा ॥ बि
भर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ॥ ९ ॥ विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा ॥ शाब्दे ब्रह्मणि निष्णातः
परस्मिंश्च भवान् खलु ॥ १० ॥ सूत उवाच ॥ इत्युपामंत्रितो राज्ञा गुणानुकथने हरेः ॥ हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥
शुक उवाच ॥ नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ॥ गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपलक्ष्य वर्त्मने ॥ १२ ॥

त्रितः प्रार्थितः ॥ उपचक्रमेरेवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥ तदेवाह त्रयोदशभिः परस्मै सर्वोत्तमाय
तत्र हेतुः ॥ भूयसे अपरिमितमहिम्ने तद्दर्शयति सतः प्रपंचस्योद्भवादिषु निमित्तभूतया लीलया गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं
येन तस्मै अंतर्भवाय अंतर्यामिणे अत एव सर्वान्तरत्वादनुपलक्ष्यं वर्त्म यस्य ॥ १२ ॥

भा॰टि॰
१२

विविक्तफलदातृत्वमनुस्मरन्प्रणमति ॥ भूयः पुनश्च नमः ॥ सतां धर्मवर्त्तिनां वृजिनच्छिदे दुःखहंत्रे असतां अधर्मशीलानां अप्रभावाय
तद्वधहेतवे ॥ अखिलसत्वमूर्त्तये तत्तद्देवादिरूपेण तत्तत्फलदायेत्यर्थः ॥ समग्रसत्वमूर्त्तये इति वा पुनर्विपूर्वोक्तो भयवैलक्षण्यमाह ॥ पार
मह्ंसे प्रत्यक्निष्ठरूपे आश्रमे व्यवस्थितानां एतामनुमृग्यमृतत्रिरसनेन पुनः पुनर्मृग्यपदात्मतत्वं तस्मै दाशुषे दात्रे ॥ १३ ॥ सात्वतां भ
क्तानां ऋषभाय पालकाय ॥ कुयोगिनां भक्तिहीनानां विदूरकाष्ठाय पिपस्पर्द्धेत्यायेत्यर्थः ॥ तदेवं वैषम्यं प्रतीतावपि निर्दोषत्वायाचि

भूयो नमः सद्वृजिनच्छिदे सतामसंभवायाखिलसत्वमूर्त्तये ॥ पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्य
दाशुषे ॥ १३ ॥ नमो नमस्ते ऋषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां ॥ निरस्तसाम्यातिशयेन राधसा स्वधामनि
ब्रह्मणि रंस्यते नमः ॥ १४ ॥ यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं ॥ लोकस्य सद्यो विधुनोति कल्मषं
तस्मै सुभद्रश्रवसे नमो नमः ॥ १५ ॥ विचक्षणा यच्चरणोपसादनात्संगं व्युदस्योभयतोंतरात्मनः ॥ विंदंति हि ब्रह्मगतिं ग

त्मनैश्वर्यमाह निरस्तसाम्यं अतिशयश्च यस्य ॥ परापेक्षया अन्यसमसाम्यमतिशयश्च ॥ तेज्ञमा तस्मै सुभद्रश्रवसे नमो नमः ॥ १६ ॥
नास्ति ॥ तेन राधसा ऐश्वर्येण स्वधामनि स्वस्वरूपे ब्रह्मणि रममाणाय ॥ १४ ॥ सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन् प्रणमति ॥ यत्कीर्त्तन
मिति द्वाभ्यां ॥ अर्हणं पूजनं सुभद्रं मंगलं श्रवः यशो यस्य तस्मै ॥ १५ ॥ विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनात् उपसत्तेर्भजना
त् अंतरात्मनो मनसः उभयत्र इह च परत्र च संगं व्युदस्य निरस्य गतक्लमाः श्रमरहिताः ॥ ॥ १६ ॥ ॥ एवं च शयनमः ॥

एम
१२

भक्तिशून्यानां सर्वसाधनवैफल्यं दर्शयन्नमति ॥ तपस्विन इति ॥ मनस्विनो योगिनः सुमंगलाः सदाचाराः यस्मिंस्तपआद्यर्पणं वि-
नाह सुभद्रश्रवस इति सुष्ठु भद्रन्निर्यशः श्रवणादेः प्राधान्यज्ञापनाय ॥१७॥ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह ॥ किरातादयो ये पा-
पजातयः ॥ अन्ये च ये कर्मतः पापरूपास्ते यदपाश्रयाः भागवताः तदाश्रयाः सन्तः शुध्यंति शुद्धेः भावनाशकापरिहरति प्रभविष्ण-
वे प्रभवनशीलायेति ॥१८॥ सर्वोपास्यत्वमनुस्मरन्प्रार्थयते ॥ स एष आत्मवताधीश्वराणां आत्मत्वेनोपास्य इत्यर्थः ॥ त्रयीमयत्वा-

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः ॥ क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे न-
मो नमः ॥१७॥ किरातहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः खसादयः ॥ येन्ये च पापा यदपाश्रयाश्रयाः शु-
ध्यंति तस्मै प्रभविष्णवे नमः ॥१८॥ स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः ॥ गतव्यलीकैर-
जशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां ॥१९॥ श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः
पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतांपतिः ॥२०॥ यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यंति

दिविशेषणैः तत्तन्मार्गैर्गणोपास्यत्वं विवक्षितं ॥ हि तत्त्वमात्मनः ॥ वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदतां ॥२१॥
गतव्यलीकैर्निष्कपटैः भक्तैर्वितर्क्यं श्रुत्या स्वैश्वर्येणावीक्षणीयं लिंगं मूर्तिर्यस्य स प्रसीदतु ॥१९॥ सर्वपालकत्वमनुस्मरन्नाह ॥ श्रिय इति ॥ गति-
स्सर्वापद्रक्षकः ॥२०॥ ज्ञानप्रदत्वमनुस्मरन्नाह द्वाभ्यां ॥ यदंघ्र्योरनुध्यानमेव समाधिः तेन धौतया शोधितया ॥ यथारुचं स्वस्वानुसारेण
सगुणनिर्गुणादिभेदैः यद्वा ॥ रुक्प्रतिभा यथामतीत्यर्थः ॥२१॥

भा० द्वि
१४

किंच॥ पुरा कल्पादौ अजस्य हृदि सतीं स्मृतिं विषयां स्मृतिं वितन्वता येन प्रचोदिता सरस्वती आस्यतः मुखतः किल प्रादुर्भूता स्वाविर्भूता किंभूता स्वल
धारणानि लक्षणानि शिक्षादिभूतानि यस्याः सा॥ ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः॥२२॥ इदानीं स्ववाचः॥ श्रोतृजनानां हरिमीश्रगा
रकेहणादिशोभां प्रार्थयते॥ भूतैरिति॥ स मे वचांसि अलंकृषीष्ट अलंकरोतु॥ अन्यस्येव वसामान्येनालंकारं सं भव माश कयतस्यांतर्या
मितामाविष्करोति॥ यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु धैतर्यामितया शेते वसति॥ अत्र पुरुषसमाख्यां प्रमाणयति यद्यस्मा

प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि॥ स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः
प्रसीदतां॥२२॥ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः॥ भुंक्ते गुणान्षोडश षोडशात्मकः॥ सोलं
कृषीष्ट भगवान्वचांसि मे॥२३॥ नमस्तस्मै भगवते वासुदेवाय वेधसे॥ पपुर्ज्ञानमयं सौम्या यन्मुखांबुरुहा
सवं॥२४॥ एतदेवात्मभू राजन्नारदाय विपृच्छते॥ वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः॥२५॥ ॥इति श्री भागव
ते महापुराणे द्वितीयस्कंधे चतुर्थोध्यायः॥ ॥ ॥४

पुरुष इति श्रुत एव यः एकादशेंद्रियपंचभूतरूपान्षोडशगुणानक
लाः भुंक्ते प्रकाशयति पालयतीति वा॥ तदात्मात्मने परमार्थ॥ अत्र हेतुः यतः षोडशानामात्मा चेतयिता ह्यार्थकः न त्वत्र जीववत्तद्
व्यते प्रार्थनाविरोधात्॥२३॥ श्रीव्यासं नमस्करोतीति सौम्याः॥ भक्ताः यस्य मुखांबुरुहे आसवो मकरंदः तं॥२४॥ इदानीं प्रश्नोत्तरतया ब्रह्म
नारदसंवादं प्रस्तौति॥ उत्पत्तिसमय एव वेदाः गर्भे यस्य साक्षाद्धरिर्यदाह॥२५॥ द्वितीये चतुर्थः॥ ४ ॥

राम
१४

पंचमे नारदेनाथ पृष्टः स्रष्टाऽरिविकल्पनः ॥ हरेर्लीलावतारस्य सृष्टिकालकर्मादिशक्तिभिः ॥ १ ॥ नारदाय विशिष्टं ते वेदगर्भोऽभ्यधादिति तदुक्तं तत्र ना-
रदः प्रश्नमाह ॥ देवदेवेति ॥ हे भूतभावन अत एव सर्वेषां पूर्वज अनादे ॥ ज्ञायते अनेनेति ज्ञानं तत्साधनं यत् तद्विजानीहि विशेषेण ज्ञापयेत्य-
र्थः ॥ कथंभूतं आत्मतत्त्वं नितरां दृश्यते येन तत् ॥ १ ॥ उपलक्षणमेतत् विश्वमेवात्मज्ञानसाधनं अतस्तद्विशेषं पृच्छति ॥ यद्रूपं येन रूप्यते प्रका-
श्यते ॥ यदधिष्ठानं यदाश्रयं ॥ यतः येन सृष्टं ॥ यत्संस्थं यस्मिन् लीयते यत्परं यदधीनं यच्चेति यदात्मकं त्वितः तत्कारणतो वेत्स्यर्थः ॥ तस्मात्त्वं

नारद उवाच ॥ देवदेव नमस्तेस्तु भूतभावन पूर्वज ॥ तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनं ॥ १ ॥ यद्रूपं यदधिष्ठानं यतः सृष्ट-
मिदं प्रभो ॥ यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः ॥ २ ॥ सर्वं ह्येतद्भवान् वेद भूतभव्यभवत्प्रभुः ॥ करामलकवद्विश्वं विज्ञा-
नावसितं तव ॥ ३ ॥ यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः ॥ एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥ आत्मन्
भावयसे तानि न पराभावयन्स्वयं ॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥

याथार्थ्यतस्त्वत्तो वेद ॥ २ ॥ न जानामीति न च वक्तव्यमित्याह सर्वमिति ॥ भूतं जातं भव्यं जनिष्यमाणं भवत् जायमानं तेषां प्रभुः यतः अतो
विशिष्टेन ज्ञानेनावसितं निश्चितं ॥ ३ ॥ आज्ञाभिरिदं आरोतावत्त्वामेव कथयेत्याह ॥ यतो विज्ञानं यस्य कर्तृत्व विज्ञानद इत्यर्थः ॥ यदाधारः क-
र्तृत्वाश्रयः यत्परः यदधीनः यदात्मकः यत्स्वरूपः ममत्वमेव ब्रूहि तेत्रः परमेश्वर इति बुद्धिः तव तपश्चरणेन तु परशंकयाऽऽशंकामीत्याह
सार्धैश्चतुर्भिः एकस्सहायः ॥ ४ ॥ आत्मनि भावयसे पालयसि स्वयमेव पराभवमप्राप्यन् ॥ अक्लमः श्रमरहितः यथोर्णनाभिरात्मना एव
शक्तिमवष्टभ्य सृजति तद्वत् ॥ ५ ॥

भा॰ द्वि
१५

तस्मात्स्वर्गं तत्र अस्मिन् विश्वस्मिन् परं उत्तमं ॥ अपरं अधमं मध्यमं वा ॥ तत्रापि नामरूपादि रूपं द्विपदचतुष्पादि ॥ एताः सृष्टाः तादि तैर्भाव्यं
माध्यमं तत्रापि स्थूलं सूक्ष्मं वा ॥ किंचिदप्यन्यतो न वेद ॥ किं तत्त्वत्त एव सर्वं भवतीति मन्ये ६ ॥ स तथाविधोपि भवान् तपोचरदिति यत
तेन नो अस्मान् खेदयसे मोहयसि ॥ यतः पराशंकां स्वगतशंकां अपयच्छसि ७ ॥ यथैवाहं त्वया तु शासितः शिक्षितः स न वृद्धो वृद्धो यत
था विशेषेणाज्ञापय ॥ ८ ॥ ब्रह्म प्रभाषिनं दति ॥ हे वत्स पुत्र न वेदं विचिकित्सितं परं देहः ॥ तत्पूर्वकः ॥ ब्रह्मोयं प्रभाषितमित्यर्थः ॥ यतः कारणं

नाहं वेद परं ह्यस्मिन् नापरं न समं विभो ॥ नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ६ ॥ स भवान् चरद्घोरं यत्तपः सुस
माहितः ॥ तेन खेदयसे नस्त्वं पराशंकां प्रयच्छसि ॥ ७ ॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर ॥ विजानीहि यथैवेद
महं बुद्ध्येनुशासितः ॥ ८ ॥ ब्रह्मोवाच ॥ सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितं ॥ यदहं चोदितः सौम्य भगवद्वीर्य
दर्शने ॥ ९ ॥ नानृतं तव तच्चापि यथा मां प्रब्रवीषि भो ॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥ ॥ ॥

कारुण्यतवायं प्रश्नः अत्र हेतुः यद्यतः परमधर्मं भगवद्वीर्यप्रकाशने प्रवर्तितो स्मि अतस्त्वं जिज्ञासुरपि मयि करुणामेव कृतवानित्यर्थः
॥ ९ ॥ नन्वत्त्वमेव भगवानित्युक्तं त्वया एकः सृजसि भूतानीत्यादिना सत्यं यथा मां मामीश्वरत्वेन प्रभाषसे तदपि तव भाषणं नात्यंतमनृ
तं ॥ यतः कारणात् एतावत्त्वं प्रभावस्य भावः ॥ एतावत्त्वं मे अस्ति किं तु मत्तः परमीश्वरमविज्ञाय पृष्ठत्वेन अतः ॥ सादरं पापं न वेद श्रोतिः ॥ न तद्व
द्धिपूर्वमनृतमित्यर्थः ॥ यतः स्वरूपात्मसमय एतावत्त्वं तमविज्ञायेति वाक्यपः ॥ १० ॥

दाम
१५

तर्हि कोसावीश्वर इत्यपेक्षायामस्मानमस्कुर्वन्नेव तं कथयति त्रिभिः॥ येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयामि सृष्ट्यादिभिर्व्यक्तं क
रोमि॥ यथार्कोग्निश्चैतन्मयप्रकाश्यमेव प्रकाशयति॥ तथा च श्रुतिः॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः॥ तमे
व भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति॥ ११॥ तस्मै नमो धीमहि यस्य मायया मोहिताः संतो दुष्प्रदारया मां जगद्गुरुं जगत्क
र्तारं वदंति तस्मै॥ १२॥ यन्माययेति मायया हं वेधोन्निः॥ तस्याउर्जयत्वोतेस्थातस्यापि किमस्ति संसारः॥ नैवेत्याह मत्कपरमेसो जानातीति

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं॥ यथार्कोग्निर्यथा सोमो यथर्क्षग्रहतारकाः॥ ११॥ तस्मै नमो भगवते वासुदे
वाय धीमहि॥ यन्मायया दुर्जयया मां वदंति जगद्गुरुं॥ १२॥ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया॥ विमोहि
ता विकत्थंते ममाहमिति दुर्धियः॥ १३॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च॥ वासुदेवात्परो ब्रह्मन्न चान्यो
र्थोस्ति तत्त्वतः॥ १४

यस्य दृष्टिपथे स्थातुं विलज्जमानयेव तस्मिन्स्वकार्यमकुर्वत्यामुया मायया विमोहिता अस्मदादयो दुर्धियः
अविद्यावृतत्वाना एव केवलं विकत्थंते श्लाघंते॥ अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति॥ १३॥ न रेवं तर्हि स्मोदत्तं परमेश्वरं नि
रूप्येदानीं यदधिष्ठानमित्यादि तव प्रश्नानां स एवाधिष्ठानादिकं सर्वमिति सूत्तरं वक्तुं तद्व्यतिरेकेणान्यस्याभावमाह द्रव्यमिति॥ द्रव्यं
महाभूतानि उपादानरूपाणि कर्म जन्मनिमित्तं॥ कालस्तत्क्षोभकः॥ स्वभावस्तत्परिणामहेतुः॥ जीवो भोक्ता॥ वासुदेवात्परोऽन्योर्थो
नास्ति॥ कारणव्यतिरेकात्कार्यस्य॥ १४॥

भा.द्वि.
१६

तत्प्रपंचयति द्वाभ्यां ॥ नारायणः परः कारणं येषां ते ॥ अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्वं तत्त्वादिकं चोक्तं देवा अपि तदंगाज्जा-
ताः ॥ अतो न तद्व्यतिरिक्ताः ॥ लोकाः स्वर्गादयस्तदानंदांशाः ॥ मखास्तत्साधनभूताः ॥ १५ ॥ योगः प्राणायामादिः ॥ तपः ॥ ज्ञानं तत्साध्यं विविक्तेकाग्र-
त्वानं तत्साध्यं ॥ गतिस्तत्फलं ॥ अनेनैव सर्वं तदधीनमित्युक्तं ॥ १६ ॥ तर्हि त्वं किं करोषीत्यपेक्षायामाह ॥ तस्यासृज्यमपि तेन सृष्टोहं सृजामि
ईक्षया कटाक्षेण ॥ तत्र हेतवः द्रष्टुरित्यादयः ॥ १७ ॥ ननु कुतोयं जीवेश्वरविभागः यतस्त्वं प्रेर्यः सर्वप्रेरकः स्यादित्यपेक्षायां जीवेश्वरवि-
भागहेतुमाह त्रिभिः सत्त्वमिति ॥ निर्गुणस्यापीश्वरस्यैते त्रयो गुणा वध्नंतीत्यंतरेणान्वयः ॥ कथंभूताः ॥ तेनैव स्वातंत्र्येण स्थित्याद्यर्थं

नारायणपरा वेदा देवा नारायणांगजाः ॥ नारायणपरा लोका नारायणपरा मखाः ॥ १ ॥ नारायणपरो योगो नाराय-
णपरं तपः ॥ नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥ तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ॥ सृज्यं सृ-
जामि सृष्टोहमीक्षयैवाभिचोदितः ॥ १७ ॥ सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ॥ स्थितिसर्गनिरोधेषु गृहीता
मायया विभोः ॥ १८ ॥ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ॥ बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥ स एष
भगवान् लिंगैस्त्रिभिरेभिरधोक्षजः ॥ स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः ॥ २० ॥

मायया गृहीताः ॥ १८ ॥ बद्धकतः सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नंति ॥ क्व ॥ कार्यमधिभूतं ॥ कारणमध्यात्मं कर्ताधिदैवं तं तेषा-
भावस्तत्त्वं तस्मिन् द्रव्यं महाभूतानि ज्ञानशब्देन देवताः ॥ क्रियाइंद्रियाणि तदाश्रयाः ॥ तेषां कारणभूताः तत्तदभिमानेन बध्नंति ॥ १९ ॥ अतः स एष
चरमायः एभिर्गुणैर्लिंगैः जीवानामावरकैरुपाधिभिः ॥ स्वदुरलक्षितगतिस्त्वं यस्य सः ॥ तैर्भक्तैरेव लक्षिता गतिर्यस्येति वा ॥ २० ॥

एम
१६

तस्य सृष्टिप्रकारमाह कालमिति । कर्म जीवादृष्टं । विबुभूषुः विविधं भवितुमिच्छन् ॥ २१ ॥ गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः प
रिणामो रूपान्तरापत्तिः पुरुष ईश्वरस्तेनाधिष्ठितत्वं त्रयाणां विशेषणं । महतः महत्तत्त्वस्य ॥ २२ ॥ विकुर्वाणात् विक्रियमाणात् । तस्य क्रिया
ज्ञानशक्तित्वात् त्रिगुणत्वेऽपि रजःसत्त्वाभ्यामुपबृंहितत्वं । अहंकारस्य त्वावरकत्वात्तमःप्रधानत्वं अत एवाहंकारकार्येषु तामसमाकाशा
दिकं बहु राजसं स्तोकं सात्त्विकं चाल्पं । एवं तदुपाधिकेषु जीवेष्वपि तथैव तामसाधिक्यं ॥ २३ ॥ स च विकुर्वन् रूपान्तरं गच्छन् त्रैविध्यमेवाह वैकारि
कः सात्त्विकः तैजसो राजसः । यद्भिदा यस्य भेदः । द्रव्यशक्तिरित्यादिना प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्ये क्रियाशक्तिर्महाभूतात्मे

कालं कर्म स्वभावं च मायेशो मायया स्वया । आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥ २१ ॥ कालाद्गुणव्यतिकरः परिणामः स्व
भावतः । कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥ २२ ॥ महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात् । तमःप्रधानस्त्व
भवद्द्रव्यज्ञानक्रियात्मकः ॥ २३ ॥ सोऽहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा । वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा । द्रव्य
शक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥ २४ ॥ तामसादपि भूतादेर्विकुर्वाणादभून्नभः । तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्य

शक्तिर्यस्य । क्रियाहमिन्द्रियेषु शक्तिर्यस्य ज्ञानेषु देवेषु शक्तिर्यस्य । हे प्रभो वाहुं शक्तं ॥ २४ ॥ भूतादेरिति तामसस्य विशेषणं । नक्तं तामसा योः ॥ २५
अथ यं शब्दो भवतीति प्रसिद्धं । सत्यं । सतस्तस्य नभसो मात्रा सूक्ष्मरूपं गुणश्चासाधारणः व्यावर्त्तको धर्मः शब्दद्वारेण नभ उत्पद्यत इत्यर्थः । एव
मेव स्पर्शादिष्वपि द्रष्टव्यं । शब्दस्य लक्षणं । लिंगमिति । कुड्याद्यंतरितेन केनचिद्द्रष्टुर्गतोऽज्ञातस्तत्स्वरूपो योगजं दृष्टापद्यतेन दृश्यो गतः तयोर्लिंगं बो
धकं लिंगं विशेषणत्वात् तत्पदस्य षंढत्वं ॥ २५ ॥

भा॰टि॰ १८

परस्मान्नभसः कारणत्वेनान्वयाच्छब्दवांश्च वायुः ॥ तस्यैव लक्षणं प्राणो देहधारणं ॥ ओजः सहोबलानि इंद्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः ॥ २६ ॥ स्वातो रूपवत्तेजः वायुनभसोः कारणभूतयोरन्वयात्स्पर्शशब्दवच्च ॥ एवमंभसः पृथिव्याश्च परान्वयाधिक्यात् गुणाधिक्यं ॥ २७ ॥ घोषः शब्दः ॥ २८ ॥ विशेषः पृथ्वी ॥ पृथिव्याश्च परान्वयाधिक्यात् गुणाधिक्यं ॥ २९ ॥ मनः शरैनैवृत्तरधिष्ठातावंद्रोपि द्रष्टव्यः ॥ अन्येवरशरेवावैकारिकाः सात्विकाहंकारकार्याः तानाह ॥ दिशश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च ॥ एतेपंचश्रोत्रत्व

नभसोथविकुर्वाणाद्भूतस्पर्शगुणोनिलः ॥ परान्वयाच्छब्दवांश्च प्राणओजः सहोबलं ॥ २६ ॥ वायोरपि विकुर्वाणात्काल कर्मस्वभावतः ॥ उदपद्यततेजोवैरूपवत्स्पर्शशब्दवत् ॥ २७ ॥ तेजसस्तु विकुर्वाणादासीदंभोरसात्मकं ॥ रूपवत्स्पर्शवच्चांभोघोषवच्चपरान्वयात् ॥ २८ ॥ विशेषस्तु विकुर्वाणादंभसोगंधवानभूत ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥ २९ ॥ वैकारिकान्मनोजज्ञेदेवावैकारिकादश ॥ दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ॥ ३० ॥ तैजसात्तुविकुर्वाणादिंद्रियाणि दशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ ॥ श्रोत्रंत्वग्घ्राणदृग्जिह्वावाग्दोर्मेंढ्रांघ्रिपायवः ॥ ३१ ॥

कत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः ॥ वह्निश्च इंद्रश्च उपेंद्रश्च मित्रश्च कश्च प्रजापतिः ॥ एतेपंचवाक्पाणिपादपायूपस्थानां ॥ ३० ॥ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहंकारकार्यौ ॥ अतो ज्ञानक्रियाविशेषरूपाणींद्रियाण्यपि तैजसादभवन्नित्यर्थः ॥ तान्याह श्रोत्रमिति दोः पाणिः मेढ्रं उपस्थः क्रमस्त्वत्र न विवक्षितः ॥ ३१ ॥

राम १८

एवं कारणावस्थामुक्त्वा कार्यावस्थामाह ॥ एते यदा असंगताः अमिलिताः आसन् अत एव यदा आयतनस्य शरीरस्य निर्माणे न शेकुः ॥ ३१ ॥ तदा सदसत्त्वं प्रधानगुणभावं उपादाय व्यष्टीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरं ॥ ३२ ॥ कालकर्मस्वभावानधिष्ठाय स्थितः ॥ जीवयतीति जीवः परमात्मा अजीवमचेतनं अजीवयत् चेतयति स्म ॥ ३३ ॥ निर्भिद्य स्वव्यष्ट्युपाधितः स्थित इत्यर्थः ॥ ३४ ॥ तदवयवैर्लोकरचनामाह ॥ यस्येति ॥ कटिरित्ह मूलयोः पश्चाद्भागः ॥ जघनं पुरोभागः अधः सप्तलोकान् अतलादीन् ऊर्ध्वं भूरादीन् सप्त ॥ ३५ ॥ वर्णानां तत उत्पत्तिं दर्शयति पुरुषस्येति ब्रह्म

यदैते संगता भावा भूतेन्द्रियमनोगुणाः ॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥ ३१ ॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः ॥ सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ॥ ३२ ॥ वर्षपूगसहस्रान्ते तदण्डमुदके शयं ॥ कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ॥ ३३ ॥ स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ॥ सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान् ॥ ३४ ॥ यस्येहावयवैर्लोकान्कल्पयन्ति मनीषिणः ॥ कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥ ३५ ॥ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत ॥ ३६ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥ हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥ ३७ ॥ ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात् ॥ मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ॥ ३८ ॥

ब्राह्मणः मुखमिति कार्यकारणयोरभेदविवक्षयोक्तं ॥ बाहव इति च क्षत्रं क्षत्रियः ॥ ३६ ॥ इदानीमुपासनार्थं लोककल्पनाभेदानाह दर्शयन् सप्तलोकपक्षमाह द्वाभ्यां ॥ भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यन्ताभ्यां ॥ ३७ ॥ स्तनद्वयादिति उपासनार्थत्वादूर्ध्वाधोभावविपर्ययेन दोषः ॥ यद्वा स्तनतटादूर्ध्वं तपोलोकस्तस्मादित्यर्थः ॥ ब्रह्मलोकः वैकुण्ठाख्यः सनातनः नित्यः न तु सृज्यप्रपंचान्तर्वर्तीत्यर्थः ॥ ३८ ॥

भा॰टी॰ इदानीं चतुर्दशलोकपक्षं दर्शयति ॥ तत्र जंघनादिभिर्भूरादयः पूर्वोक्ता एवात्र कट्यादिभिरधः सप्तलोकानाह तलकट्यामिति द्वाभ्यां शुद्धं हरिभ
१८ क्तेनिवासत्वात ॥ ३९ ॥ ४० ॥ त्रिलोकपक्षमाह भूर्लोकः पातालादिसहिताः ॥ ४१ ॥ इति द्वितीये पंचमः ॥ षष्ठे विराड्विभूतिस्त्वग्रोक्ताध्यात्मादिभेदतः ॥
इदानीं तत्पूर्वोक्तं सर्वं पुरुषसूक्तं ततः ॥ १ ॥ इदानीं वैराजस्य विभूतिः सप्रपंचमनुवर्णयते ॥ वाचां श्रुत्स्मृत्यादि वागिन्द्रियाणां तदधिष्ठातृवह्नेश्च उत्
पत्तिस्थानं क्षेत्रं उत्पत्तिस्थानं ॥ छंदसां गायत्र्यादीनां सप्तानां तस्य सप्त धातवः ॥ त्वगादयः क्षेत्रं हव्यं देवानामन्नं ॥ कव्यं पितॄणां अमृतं तद्भय

तलं कट्यां च वितलं जानुभ्यां वितलं विभोः ॥ जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं ॥ ३९ ॥ महातलं तु गुल्फाभ्यां प्रपदाभ्यां
रसातलं ॥ पातालं पादतलत इति लोकमयः पुमान् ॥ ४० ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥ स्वर्लोकः कल्पितो मू
र्ध्ना इति वा लोककल्पना ॥ ४२ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे पंचमोऽध्यायः ॥ ब्रह्मोवाच ॥ वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्त
धातवः ॥ हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥ सर्वासूनां च वायोश्च तन्नासे परमायने ॥ अश्विनोरोषधीनां च घ्रा
णो मोदप्रमोदयोः ॥ २ ॥ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी ॥ कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥ तद्गा
त्रं वस्तुसाराणां सौभगस्य च भाजनं ॥ ३ ॥

शेषो मनुष्याणां तेषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य च कारणं रसमदादि रसनेन्द्रिय
स्य तदधिष्ठातुर्वरुणस्य च एतस्य जिह्वा क्षेत्रं उत्पत्तिस्थानं ॥ एवं सर्वत्रानुक्रमं ज्ञेयं ॥ सर्वासूनां अस्मदादिप्राणानां तस्य नासे नासापुटे पर
मायने उत्तमक्षेत्रे मोदप्रमोदयोः सामान्यविशेषयोर्गंधयोर्घ्राणः घ्राणेन्द्रियं परमायनं ॥ २ ॥ रूपाणां तेजसां रूपप्रकाशानां चक्षुरिन्द्रियं अक्षि
णी नेत्रगोलके सर्वत्र षष्ठ्यंतानां प्रथमांतं क्षेत्रं द्रष्टव्यं ॥ कर्णौ श्रोत्राधिष्ठाने श्रोत्रमिन्द्रियं ॥ तस्य गात्रं शरीरं वस्तूनां ये साराः तेषां भाजनस्थानं ॥ ३ ॥ १८

अस्य त्वक् स्पर्शस्य वायोश्चोत्पत्तिः ॥ सर्वस्य मेघस्य पतस्य उद्भिज्जजातीनां सर्ववृक्षाणां यैः वृक्षैः यत्तः सम्यक् साधितः तेषामेव वा ॥ ४ ॥ केशमेघा
नां शेत्रे पूर्वं तथोक्तः श्मश्रूणि विद्युतां ॥ पारकारनखानि शिलालोहानामिति सादृश्याद्बुध्ये ॥ क्षेमकर्मणा पालनकर्तृणां ॥ विक्रमः पारम्या
सो भूरादिलोकानां आस्परमाश्रयः ॥ मृणादिशरानामसवत्वात ॥ षष्ठ्यास्तु वा ॥ क्षेमो लब्धरक्षणां ॥ शरणं भयाद्रक्षणं सर्वेषां कामानां वरस्य वर
णस्यापि हरेरंघ्रिन्यासं ॥ ६ ॥ वीर्यस्य शुक्रस्य शिश्नोधिष्ठानं ॥ उपस्थस्त्विन्द्रियं ॥ प्रजात्यानंदः संतानार्थं संभोगः ॥ तेन निर्वृतिः ॥ तापहानिस्तस्याः

त्वगस्य स्पर्शं वायोश्च सर्वमेघस्यैव वह्निः ॥ रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु संभृतः ॥ ४ ॥ केशश्मश्रुनखान्यस्य शिलालो
हाभ्रविद्युतां ॥ बाहवो लोकपालानां प्रायशः क्षेमकर्मणां ॥ ५ ॥ विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च ॥ सर्वकाम
वरस्यापि हरेश्चरण आस्पदं ॥ ६ ॥ अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः ॥ पुंसः शिश्न उपस्थस्तु प्रजात्यानंदनिर्वृतेः ॥ ७
पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ॥ हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥ ८ ॥ पराभूतेरधर्मस्य तमसश्चापि प
श्चिमः ॥ नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥ ९ ॥ अव्यक्तरससिन्धूनां भूतानां निधनस्य च ॥ उदरं विदितं पुंसो हृ
दयं मनसः पदं ॥ १० ॥ धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ॥ विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणं ॥ ११ ॥

७ ॥ परिमोक्षस्य मलत्यागस्य पायुरिन्द्रियं गुदः स्थानं निर्ऋतेरलक्ष्म्याः ॥ ८ ॥ तमसो ज्ञानस्य पश्चिमः पृष्ठभागः ॥ गोत्राणां गिरीणां अस्थिसंघातः ॥ ९
अव्यक्तं प्रधानं रसः अन्नादिसारः सिंधवः समुद्रास्तेषां निधनस्य लयस्य ॥ उदरं परं स्थानं विदितं तानि भिः मनसः अस्मदादिलिंगशरीरस्य ॥ १०
हृदयं तव कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं परमायनं ॥ ११ ॥

भा॰ द्वि
१७

एवं तावत्परमेश्वराज्जातं विश्वं ततो न भिन्नं ॥ यथार्कमंडलं तद्वर्णोत्सृ पृथक्सत् सर्वनियंता सर्वप्रकाशको नित्यमुक्तः इत्यर्थाद्युक्तं ॥ एतदेव सुहृष
ष्टांतार्थं कथनेन द्रढयति ॥ तत्र सहस्रशीर्षात्यर्धं च सप्तद्वालसर्णोस्यस्तु खमासीदित्यादेश्च ऋक्त्रयस्यार्थः पूर्वाध्याय एव दर्शितः ॥ सुहृष एवेदं
सर्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्धत्रिभिः ॥ ते अग्रजाः मे सनकादयः मरीच्यादयश्च ॥ १२ ॥ १३ ॥ जलं च स्थलं च नभश्चौकांसि ये
षां तेन भोकसः इति संधिरार्षः ॥ १४ ॥ सर्वं सुहृष एव न ततः पृथगित्यर्थः ॥ एवं चेन तस्यापारिच्छेदं वक्तुं सभूमित्यस्यार्थमाह ॥ तेन सुहृषेणावि
श्वमिति भूमिपदस्यार्थः ॥ वितस्तिमिति दशांगुलपदस्यार्थः धीत्यतिराव स्यमेव वितस्तिमधिकं व्याप्य तिष्ठतीति आधिक्यमात्रं विवक्षितं

अहं भवान्न च वक्षैव तऽमे सनयोग्रजाः ॥ सुरासुरनरानागाः खगा मृगसरीसृपाः ॥ १२ ॥ गंधर्वाप्सरसो यक्षा रक्षोभूतग
णोरगाः ॥ पशवः पितरः सिद्धा विद्याधाश्चारणाद्रुमाः ॥ १३ ॥ अन्ये च विविधा जीवा जलस्थलनभोकसः ॥ ग्रहर्क्षकें
तवस्तारास्तडितस्तनयित्नवः ॥ १४ ॥ सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ॥ तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥ १५ ॥
स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतपत्यसौ ॥ एवं विराजं प्रतपंस्तपत्यंतर्बहिः पुमान् ॥ सोमृतस्याभयस्येशो मर्त्यमन्नं
यदत्यगात् ॥ १६ ॥

न प्रमाणं ॥ अनुपयोगादपरिच्छिन्नत्वाच्च ॥ १५ ॥ एतत्सदृष्टांतमाह असौ प्राणो आदित्यः असौ वा आदित्यः प्राण इति ॥
श्रुतेः ॥ स्वधिष्ण्यं मंडलं प्रकाशयन्यथा बहिश्च प्रकाशयति एवं विराजं देहं प्रकाशयन् ब्रह्मांडमंतर्बहिश्च प्रकाशयति ॥ नित्यमुक्तत्व
दर्शितं तु तदमृतत्वस्येशेत्यस्यार्थमाह स इति ॥ अभयस्येति मंत्रगतामृतपद व्याख्या अन्नेनेति परं विभज्यान्वयेन व्याचष्टे ॥ मर्त्यमराणाध
मिकं अन्नं कर्मफलं यस्मादत्यगात् ॥ अतिक्रांतवान् अतो न केवलं सर्वात्मकः किं तु अमृतत्वस्य निजानंदस्यापीश्वर इत्यर्थः ॥ १६ ॥ ॥

राम
१७

प्रपंचात्मकस्य कृत्स्नो नित्यमुक्तत्वमित्याशंक्य न तस्य परिहारायैतावानस्येत्यस्यार्थमाह महिमेति प्रपंचात्मकस्याप्यमृतेशत्वमित्येष महिमा
डुत्यपः । अपारः प्रपंचानभिभूतत्वादिति भावः । मंत्रेण च एतावानस्य महिमा विभूतिः सलज्ज्यायान्महत्तरः इति वदतः यमेवार्थ उक्तः तं
देवमीश्वरो नित्यमुक्तः स्वकं । तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थापयेति दर्शयन् पादोस्य विश्वा भूतानीत्यस्यार्थमाह पादेष्विति तिष्ठं
त्यत्रेति स्थितयो भूरादिलोकाः ते पादाः अंशा यस्य सः स्थितिपात तस्य पादेष्वंशभूतेषु लोकेषु सर्वान् जीवान् विदुः मंत्रे तु पादोस्य विश्वा भूता
नीति सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरविवक्षया । पादः स्येकवचनेन सामान्याभिप्रायेणोतिव्याप्यातं भवति ॥ १७ ॥ भूतेषु फलवैचित्र्यं
दर्शन्त्रिपादस्यामृतं दिवीत्यस्यार्थमाह । अस्येश्वरस्य संबंधि त्रिपादमृतं नित्यमुखं दिवि ऊर्ध्वलोकेषु न त्रिलोक्यामित्यर्थः । तदेव त्रिपाद्

महिमैष ततो ब्रह्मन्पुरुषस्य ह्युत्यपः । पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ॥ १७ ॥ अमृतं क्षेममभयं त्रिमूर्ध्नोधायि मूर्द्धसु

दोक्तं त्रैविध्यं दर्शयन्नाह त्रयाणां लोकानां मूर्द्धा महर्लोकस्तस्य मूर्द्धानस्तदुपरितना लोकास्ते पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ॥ १८
ष्वधायि कर्मं अमृतादिकं अधायि निहितं । तच्च त्रिलोक्यां नश्वरमेव स्यात् । महर्लोकस्य क्रममुक्तिस्थानत्वेपि कल्पान्ते तत्रत्यानां स्थानत्याग
त्वाविनाशित्वं । जनलोके त्वमृतमविनाशित्वं । यावज्जीवस्य स्थानापरित्यागात् । किंच महर्लोकवासिनां कल्पान्ते त्रिलोकदाहोष्म
पीडितानां तदा तत्र गमनाद्दृश्योमदर्शनमस्ति तपोलोके तस्याभावात् । क्षेममेव । वस्तुतस्तु त्रिलोक्यां दृश्यमानानां घोराणां संकर्षणाग्निना या
नूष्मणा महर्लोकाज्जनं प्रगच्छतां दृश्योर्दिता इति सत्यलोके त्वभयं मोक्षः । तस्मात्ततः एतदेव वैचित्र्यमाधिकारिभेदेनो पादयन् त्रिपादूर्ध्व इत्यस्या
र्थमाह न प्रजा यं तेषु त्वादिहस्थे णेति अप्रजाः । नैष्ठिकब्रह्मचारी वानप्रस्थयतयस्तेषामाश्रमास्त्रिलोक्या बहिरासन् ॥ १८ ॥

भा॰ द्वि॰
१०

गृहमेधस्त्वतः यस्मादबृहद्व्रतः ब्रह्मचर्यव्रतरहितः ॥ ॥ अयं चाधिकारभेदेनैकस्यैवावस्थाभेदेन नत्वन्यं तमपि त्रिविषय इति दर्शयंस्ततो विष्वङि-
त्यस्यार्थमाह विविधं सृष्ट्वा अंचतीति विष्वङ् । पुरुषः क्षेत्रज्ञः सृती मार्गौ रश्मिणोन्नतौ ॥ विचक्रमे चलति स्म कथंभूते सृती साशनानशने भो-
गापवर्गसाध्ये तत्साधनभूते अत्र हेतुत्वेन पुनर्विशेषणं ॥ यद्यतः अविद्या कर्मरूपा एका विद्या च तत्साधनोपासनारूपा अन्या ॥१९॥ तदेवं वि-
राडंतर्वर्तिनां फलैवं विश्वमुक्त्वा तत्कारणोऽस्य रस्यतत्तैलक्षणं रूपं दर्शयितुं तस्माद्विराडजायतेत्यस्यार्थमाह ॥ यस्मादंडं जज्ञे तत्र च भूतेंद्रिय-
गुणात्मको विराट् जज्ञे रागश्चूरः ॥ तद्विश्वं विराट्देहद्रव्यं अंडं च अतिक्रान्तवान् सूर्य इवेति पूर्वोक्त एव दृष्टांतः ॥२०॥ नन्वेवं पुरुष एव वै

अंतस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः ॥१८॥ सृती विचक्रमे विष्वङ् साशनानशने उभे ॥ यदविद्या च विद्या च पुरुषस्तूभ-
याश्रयः ॥१९॥ यस्मादंडं विराड् जज्ञे भूतेंद्रियगुणात्मकः ॥ तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् ॥२०॥ यदास्य नाभ्यान्न-
लिनादहमासं महात्मनः ॥ नाविदं यज्ञसंभारान् पुरुषावयवादृते ॥२१॥ तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः ॥
इदं च देवयजनं कालश्चोरुगुणान्वितः ॥२२॥ वस्तून्योषधयः स्नेहा रसलोहमृदो जलं ॥२३॥ ॥ ॥

त्वर्वंतर्हि यज्ञस्य तत्साधनानां च पृथक्त्वाभावाद्यत्तैः पुरुषाराधनं न सिध्येदित्याशंक्य तत्परिहाराय यज्ञस्य पुरुषेणाहविषेत्यादिमंत्रार्थं संग्र-
हृ दर्शयति ॥ यदेत्यादि नाभ्यस्येति विराडंतर्यामिन उक्तस्यैव प्रकृतत्वात् ॥ नाभेर्भवं नाभ्यं तस्मात् यज्ञस्य संभारान् साधनानि नापश्यं ॥२१॥
तदा तेषु संभारेषु मध्ये यज्ञस्य पुरुषावयवैः एते संभाराः संभृता इति च तदर्थं नाम्नपः ॥ वनस्पतयो यूपाः देवयजनं यज्ञभूमिः इदं चेति वक्ष्य-
मानयज्ञार्हस्थानेऽपविष्टः कथयतीति गम्यते ॥ बहुगुणान्वितो वसंतादिकालः ॥२२॥ वस्तूनि पात्रादीनि ओषधयो व्रीह्यादयः स्नेहा घृतादि

एम
१०

चातुर्होत्रं होत्रादिकर्म॥२३॥नामधेयानि ज्योतिष्टोमादीनि ऋगादीनामुक्तत्वात् मंत्रा इति स्वाहाकारादयः॥देवतानामनुक्रम उ
द्देशः॥कल्पो बोधायनादिकर्मपद्धतिग्रंथः॥अनेनाहं यक्ष्य इति संकल्पः॥तंत्रमनुष्ठानप्रकारः॥२४॥गतयो विष्णुक्रमाद्याः मत
यो देवताध्यानानि कृतस्य भगवति समर्पणं॥२५॥संभृताः संपादिताः संभारा येन सोऽहं तेनैव यत्तेनैव अनेन यत्तमयजं तेनेति मे

ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम॥२३॥नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च॥देवतानुक्रमः कल्पः सं
कल्पस्तंत्रमेव च॥२४॥गतयो मतयश्चैव प्रायश्चित्तं समर्पणं॥पुरुषावयवैरेते संभाराः संभृता मया॥२५॥इति
संभृतसंभारः पुरुषावयवैरहं॥तमेव पुरुषं यज्ञं तेनैवायजमीश्वरं॥२६॥ततस्ते भ्रातर इमे प्रजानां पतयो नव
अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः॥२७॥ततश्च मनवः काले ईजिरे ऋषयोऽपरे॥पितरो विबुधा दैत्या मनु
ष्याः क्रतुभिर्विभुं॥२८॥नारायणे भगवति तदिदं विश्वमाहितं॥गृहीतमायोरुगुणः सर्गादावगुणः स्वतः॥२९

त्रार्थः सूचितः॥२६॥तेन देवा अयजन्त इत्यस्यार्थं सप्रपंचं दर्शयति॥तत इति द्वाभ्यां॥व्यक्तमिंद्रादिरूपेण अव्यक्तं स्वतः अनेन पुरुषयज्ञानां तम
ग्रत इत्यस्यार्थो दर्शितः॥२७॥काले स्वस्वावसरे॥२८॥यदधिष्ठानमित्येतस्य श्रोत्रार्थमुपसंहरति॥नारायण इति॥आहितं अधिष्ठितं भग
वत्वे हेतुः॥यतः स्वतोऽगुणः सर्गादौ गृहीतमायया उरवो गुणा येन तस्मिन्॥२९॥

भा॰ द्वि॰
११

यत्परं त्वमित्येतत्स्पष्टयति सोऽनन्तं यदुक्तं स एष भगवान् सर्वेषां मम चेश्वर इति तदुपसंहरति सृजामीति पालनं तु स्वयमेव करोतीत्याह विश्वमिति पुरुषरूपेण विष्णुरूपेण त्रिशक्तिर्मायां तां धरतीति तथा सः ॥ ३० ॥ यच्चोक्तं विश्वं यदात्मकं तत्त्वमित्येवमादि सर्वज्ञस्यानां सामान्योक्तं यदुक्तं वा हरेर्वा स्वरूपेण स्वतश्चान्यो नार्थोऽस्तीति तत्त्वत इति पुरुष एवेदं सर्वमिति श्रुत्या तथा च यदुदीरितं तदुपसंहरति इतीति कार्यकारणात्मकं भाव्यं सत्त्वं भगवतः सकाशादन्यत्पृथक् न भवतीत्यभिहितं ॥ ३१ ॥ यदुक्तं मे तावत्त्वं यतो हि मे तन्मम विज्ञाताय मामीश्वरं ब्रवीषि तदुप

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ॥ विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ ३० ॥ इति तेऽभिहितं तात यथेदमनुपृच्छसि ॥ नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकं ॥ ३१ ॥ न भारती मेऽंग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ॥ न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः ॥ ३२ ॥ सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवंदितः ॥ पतिः आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसंभवः ॥ ३३ ॥

पाद्योपसंहरति ॥ न भारतीति ॥ यत् यस्मात् मे मया औत्कंठ्यभक्त्युद्रेकः तद्युक्तेन हृदा हरिर्धृतः ध्यातः ॥ अंग हे नारद अतः मे वाङ्मनइंद्रियाणां वृत्तयः सत्यार्थाः न त्वसत्स्वभावेनेत्यर्थः ॥ ३२ ॥ स्वत्र त्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्यां ॥ सोऽहं समाम्नायादिभिः सर्वोत्कृष्टोऽपि योगमास्थितोऽपि यतस्तु आत्मनो मम संभवो जन्म तमेव न ज्ञातवान् किमुतान्यस्य वार्ता ॥ एतच्च तृतीयस्कंधे पद्मोद्भवे वक्ष्यते ॥ ३३ ॥

राम
११

तदा समीयुषां शरणागतानां संसारनिवर्त्तकं ॥ मंगलानां वहं सुसेव्यं च ॥ तस्य चरणं नतोस्मि ॥ ततो ऽचिंत्यमहिमत्वेन ज्ञातवानस्मीति वै २
मुत्यन्यायेनाह यो हीति ॥ स्वमायाविस्तारं यः स्वयमपि पर्यगात् ॥ परिः शब्दो निषेधे ॥ एतावानिति न ज्ञातवानित्यर्थः ॥ अपरे कुतो ज्ञानीयुः
तस्य चरणं नतोस्मीति पूर्वेणान्वयः ॥ ननु सर्वज्ञः कथं न जानातीत्यनंतत्वाभावादिति दृष्टांतेनाह ॥ यथा स्वस्यांतं न भो नाप्नोति न हि खपुष्पा
दर्शनं सार्वज्ञं विहंतीति भावः ॥ तथा च वक्ष्यति ॥ द्युपतय एव ते न ययुरंतमनंततयात्वमपि यदंतरांडनिचया ननु सावरणा इत्यादि ॥ अ

नतोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं ॥ यो ह्यात्ममायाविभवं स्म पर्यगाद्यथा नभः स्वांतमथा
परे कुतः ॥ ३४ ॥ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः ॥ तन्मायया मोहितबुद्धयस्त्विदं विनिर्मि
तं चात्मसमं विचक्ष्महे ॥ ३५ ॥ यस्यावतारकर्माणि गायंति ह्यस्मदादयः ॥ न यं विदंति तत्त्वेन तस्मै भगवते नमः ॥
३६ ॥ स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः ॥ आत्मात्मन्यात्मनात्मानं स यच्छति च पाति च ॥ ३७ ॥ ॥ ॥

तिश्च ॥ यो ऽस्याध्यक्षः परमे व्योमन्सो अंग वेद यदि वा न वेदेति ॥ ३४ ॥ एतत्प्रपंचयति नाहमिति द्वाभ्यां ॥ वामदेवो हरः ॥ यस्य ऋतां गतिं परमा
र्थस्वरूपं ॥ किं त्विदं प्रपंचरूपं तस्य मायाविनिर्मितं विचक्ष्महे विमृशामः ॥ तदप्यात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नं ॥ मोहितबुद्धयस्त्वयं तत्र
ज्ञाने प्रपंचात्मा ने च हेतुः ॥ ३५ ॥ न तु सर्वैर्वर्णितं वर्ण्यं तत्तो दर्शयति तत्राह यस्येति ॥ ३६ ॥ अवतारकर्माणि संक्षेपतो दर्शयति स एव आद्यो भगवा
न्यः पुरुषावतारः सन् सृष्ट्यादि करोति ॥ आत्मात्मन्यात्मनात्मानमिति कर्त्रधिकरणसाधनकर्म च स्वयमेवेत्यर्थः पुरुषावतारः

भा॰द्वि
११

तत्स्वं विदंति तत्त्वेनेत्युक्तं ॥ किं तत्तत्त्वमित्यपेक्षायामाह ॥ ज्ञानं केवलं स्वरूपं तत्त्वं ॥ घटाद्याकारवृत्तिज्ञानव्यवच्छेदार्थं विशेषणानि विशुद्धं वि
षयाकारशून्यं ॥ यतः प्रत्यक् सर्वांतरं ॥ अत एव सम्यक् ॥ देहादिरहितं ॥ अवस्थितं स्थिरं यतो निर्गुणं ॥ तथा कार्यं हि गुणव्यतिकरेणैव
केवलं भवति यद्यपि वृत्तिज्ञानमपि विद्वद्रूपज्ञानमेवेति न चाचल्यादिदोषयुक्तं तथाप्यंतःकरणवृत्तिदोषेण तथा भवतीति व्यवच्छि
द्यते ॥ एभिरेव विशेषणैः सत्यत्वमपि समर्थितं ॥ किंच ॥ षड्विकारवत्तत्त्वं दृष्टं ॥ नचास्य जन्मादयः षड्विकाराः संतीत्याह ॥ अ

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं ॥ सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयं ॥ ३८ ॥ ऋषे विदंति मु
नयः प्रशांतात्मेंद्रियाशयाः ॥ यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतं ॥ ॥ ३९ ॥ ॥ ॥ ॥

नाद्यंतं जन्मनाशरहितं ॥ अत एव जन्मानंतरमस्तित्वलक्षणोपि विकारो नास्ति वृद्धिविपरिणामापक्षयाश्च न संति ॥ यतः पूर्णः स
र्वत्र हेतुः नित्यमद्वयं नित्यं सर्वदा द्वैतप्रतीतिसमयेपि परमार्थतोऽद्वयमिति ॥ ३८ ॥ अत्र विद्वदनुभवं प्रमाणयति हे ऋषे ना
रद प्रशांतात्मेंद्रियाशयाः ॥ प्रसन्नदेहेंद्रियमनसो यदा भवंति ॥ तदा विदंति ॥ अन्यदा तदज्ञाने कारणमाह यदा तु तदेव प्रका
शमानमेवाऽसत्तर्कैः विप्लुतं स्यात्तदा तिरोधीयेतेति ॥ ३९ ॥

पाद
११

णावतारान्विस्तरेणाह आद्य इत्यादि यावत्समाप्ति ॥ परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आ-
द्योवतारः वक्ष्यति हि ॥ भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् । स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आ-
दिदेवः ॥ यथोक्तं ॥ विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ॥ प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं ॥ तृतीयं सर्वभूतस्थं ता-
नि ज्ञात्वा विमुच्यते इति ॥ यद्यपि सर्वेषामविशेषेणावतारत्वमुच्यते तथापि कालस्वभावस्सदसदिति कार्यकारणात्मिका प्र-

आद्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ॥ द्रव्यं विकारो गुण इंद्रियाणि विराट् स्वराट् स्थास्नु
चरिष्णु भूम्नः ॥ ४० ॥ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ॥ स्वर्लोकपालाः खगलोकपाला नृलो
कपालास्तललोकपालाः ॥ ४१ ॥ गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ॥ ये वा ऋषीणामृ
षभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ॥ ४२ ॥ अन्ये च ये प्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः ॥ ४२ ॥

कृतिश्च एताः शक्तयः ॥ मन आदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभूतय इति विवेक्तव्यं ॥ मनश्च महत्तत्त्वं द्रव्यं म-
हाभूतानि क्रमोत्र न विवक्षितः ॥ विकारोहंकारः गुणाः सत्वादयः ॥ विराट् समष्टिशरीरं ॥ स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जं-
गमं च व्यष्टिशरीरं ॥ ४० ॥ अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादयो ये इमे प्रजेशाः ॥ तललोकपालाः पातालाधिपतयः ॥ ४१ ॥ गंधर्वा-
दीनामीशाः यक्षादीनां नाथाः ॥ रक्षोरगेति संधिरार्षः ऋषीणां च पितॄणां च श्रेष्ठाः प्रेतादीनामधीशाः ॥ ४२ ॥

किंबहुना यत्किंचिद्भगवद्धारितत्सर्वं परमेव तत्त्वमित्यन्वयः ॥ भगवदैश्वर्यमुक्तं महस्वत्तेजोयुक्तं ओजः सहमिंद्रियमनःशक्ति
रुक्ता ॥ बलं शरीरं श्रीः शोभा ॥ ह्रीः कर्मजुगुप्सा ॥ विभूतिः संपत्तिः ॥ आत्मा बुद्धिः तद्युक्तं ॥ अर्णो वर्णः ॥ अद्भुतार्णं ॥ आश्चर्यव
र्णमित्यर्थः रूपमेव स्वरूपं रूपवत् अरूपं च यत् तत्सर्वं परं तत्त्वं ॥ न हि भूतिरित्यर्थः ॥ ४ ॥ अद्भुतत्वावतारान्वक्तुमाह ॥ प्राधान्य

यत्किंच लोके भगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूप
वदस्वरूपं ॥ ४४ ॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः ॥ आपीयतां कर्णकषायशो
षानन्नुक्रमिष्ये त इमान्सुपेशान् ॥ ४५ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे षष्ठोऽध्यायः ॥ ब्रह्मोवाच
यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनंतः ॥ अंतर्महार्णव उपागतमादिदै

त्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १ ॥

तइति अत्र सत्कथाश्रवणैर्ये कर्णयोः कषायाः मलाः तान् शोषयंतीति तथा तान् ॥ सुपे
शान् सुंदरान् मकारलोपश्छांदसः ॥ हे ऋषे ते तुभ्यं अनुक्रमिष्ये तदनुक्रमणाश्रवणं त्वया आपीयतामित्यर्थः ॥ यद्वा आपीयतामिति शात्रंतं ॥ आ
पिबतां कर्णकषायशोषानित्यर्थः ॥ ४५ ॥ इति द्वितीये षष्ठः ॥ प्रथमे भगवल्लीलावतारा ब्रह्मणेरिताः ॥ नारदाय तत्र तत्कर्मप्रयोजने
गुणैः सह ॥ १ ॥ यत्र यदा क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत् उद्यतोऽनंतः तदा अंतर्महार्णवे हिरण्याक्षं दंष्ट्रया ददार ॥ १ ॥

यज्ञावतारमाहरुचेःप्रजापतेःसकाशात्तद्भार्यायाआकूतेःसुयज्ञोनामजातःसचस्वभार्यायांदक्षिणायांसुयमान्देवानजनयत्
सएवेंद्रःसन्नुपद्राआर्तिमहरत्ततःस्वायंभुवमनुःस्वनप्तापिअनुपश्चान्मातामहेनहरिरित्युक्तः॥अनेनेंद्रोत्पादनंलोकत्रयार्तिहरणं
चतस्यकर्मदर्शितंएवंसर्वत्रावतारत्वंकर्मचवक्तव्यं॥२॥कपिलावतारमाह॥कर्दमस्यप्रजापतेर्गृहेतद्भार्यायांदेवहूत्यांजज्ञेनवभिःस्त्रीभि
र्भगिनीभिःसहसचस्वमात्रेआत्मगतिंब्रह्मविद्यांउक्तवान्॥ययात्मगत्यासाआत्मनःशमलंमलिनीकरणंगुणसंगरूपंपंकंअस्मिन्नेव
जन्मनिविधूयकपिलस्यगतिंमुक्तिंप्राप्तवती॥३॥दत्तात्रेयावतारमाह॥मयाऽहमेवतुभ्यंदत्तइतियद्यतआहततःसनाम्नादत्तोजातः

जातोरुचेरजनयत्सुयमान्सुयज्ञआकूतिसूनुरमरानथदक्षिणायां॥लोकत्रयस्यमहतीमहरद्यदार्तिंस्वायंभुवेनम
नुनाहरिरित्यनूक्तः॥२॥जज्ञेचकर्दमगृहेद्विजदेवहूत्यांस्त्रीभिःसमंनवभिरात्मगतिंस्वमात्रे॥ऊचेययात्मशमलं
गुणसंगपंकमस्मिन्विधूयकपिलस्यगतिंप्रपेदे॥३॥अत्रेरपत्यमभिकांक्षतआहतुष्टोदत्तोमयाहमितियद्भग
वान्सदत्तः॥यत्पादपंकजपरागपवित्रदेहायोगर्धिमापुरुभयींयदुहैहयाद्याः॥४॥तप्तंतपोविविधलोकसिसृक्षया
मेआदौसनात्स्वतपसःसचतुःसनोऽभूत्॥प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वंसम्यग्जगादमुनयोयदचक्षतात्मन्॥५॥

स्वमते।ऽल्पोयोगैश्वर्यंदानंतच्चपरितःदर्शयतियस्यपादपंकजयोःपरागःतेनपवित्राःदेहायेषांतेऽमपीऐहिकींआमुष्मिकींचभुक्तिमुक्तिरूपांवा॥४॥कुमा
रावतारमाह॥मेमयाआदौयत्तपस्तप्तंतस्मात्स्वतपसःमन्त्ररूपाद्धेतोःसहरिःचतुःसनोऽभूत्॥सनत्कुमारःसनकःसनंदनःसनातनइतिचत्वारः
सनशब्दानाम्नियस्यसःकथंभूतात्स्वतपसःसनात्अखंडितात्॥यद्वा॥स्वतपसःसनातशब्दात्समर्पणादित्यर्थः॥प्रलयानेसचपूर्वकल्पस्यसंप्लवेप्रलये
विनष्टंअपिस्वप्रदायंआत्मतत्वंइहअस्मिन्कल्पेसम्यग्जगादउक्तवान्॥सम्यक्त्वंदर्शयतियद्दृशितमात्रमेवमुनयःआत्मन्मनसिअचक्षतसाक्षात्प

नरनारायणावतारमाह धर्मस्य पत्न्यां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन जातः कथंभूतः स्वः असाधारणं तपःप्रभावो यस्य नरेशावाह ॥ अनंगस्य पृतना देव्योऽप्सरसः भगवतः एकादात्मनः स्वप्रतिरूपा उर्वश्याद्याः ह्रीर्ईशूतस्य नियमावलोपं भङ्गं घटयितुं साधयितुं न शेकुः ॥ यद्वा आत्मनः स्वस्य योनिरूपः तपोनाशनरूपः तस्यावलोपं तत्र दृष्ट्वा भगवतस्तं घटयितुं न शेकुरिति एतच्चाख्यानमेकादशे भविष्यति ॥ ६ ॥ यत्र कामविजयी क्रोधो बिभेति तत्र कामो न भवतीति किं वक्तव्यमित्याह ॥ काम

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ॥ ६ ॥ कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमुत ते न दहंत्यसह्यं ॥ सोयं यदंतरमलं प्रविशन्बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥ ७ ॥ विद्धः सपत्न्युदितपत्रिभिरंति राज्ञो बालोपि सन्नुपगतस्तपसे वनानि ॥ तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवंति मुनयो यदुपर्यधस्तात् ॥ ८ ॥

मिति ॥ कृतिनः श्रीरुद्रप्रमुखाः रोषदृष्ट्या कामं दहंति रोषं त्वात्मानं दहंतमपि ते न दहंति क्रोधेनाभिभूयंत इत्यर्थः ननु अहो रोषोयं रोषो यदंतरं यन्मध्यं प्रविशन्नलं बिभेति यद्वा यस्यांतर्मनः कथंभूतं अमलं निर्मलं प्रविशन्निति ॥ ७ ॥ चरित्रेणोक्तकमप्य ... एम वतारं सूचयति ॥ मातुः सपत्न्या उदितान्युक्तानि वाक्यान्येव पत्रिणो बाणास्तैर्विद्धो ध्रुवः एतत्पत्रान्नपारोति समीपे तपसे तपस्तप्तुं ... ध्रुवगतिं ध्रुवपदं यत उपरि स्थिताः अधस्तात्स्थिताः दिव्याः भवादिवाः सप्तर्षयः स्तुवंति ॥ यद्वा उपरि स्थिता भृग्वादयः ऋषयः अधस्तात्सप्तर्षयः स्तुवंति ॥ ८ ॥

पृथ्ववतारमाह ॥ यद्यदा ऋषिभिरर्थितः प्रार्थितः तदा वेनं त्रात्वा ... र्थितस्तत्पुत्र इति पदं नाम लेभे ॥ पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ॥ तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति हि पुत्रपदप्रवृत्तिनिः ॥ कथंभूतं ॥ द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगमैश्वर्यं च यस्य तं चरित्रांतरमाह ॥ येन च जगति जगदर्थं वसूनि निखिलान्यादिद्रव्याणि दुग्धानि ॥ ९ ॥ ऋषभावतारमाह ॥ असौ हरिर्नाभेराग्नीध्रपुत्रात्सुदेव्याः सुतः ऋषभ आस ॥ नाभेर्भार्यायां मेरुदेव्यामेव सुदेवीत्यपि संज्ञा ॥ जडवद्योगेन नित्यसमाधिना चर्यां यदिति या तत्र हेतुः समदृक् तत्र हेतुः ॥ स्वस्थः स्वरूपेऽवस्थितः यतः प्रशा

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतंतं ॥ त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन ॥ ९ ॥ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जडयोगचर्यां ॥ यत्पारहंस्यमृषयः पदमामनंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः ॥ १० ॥ सत्रे ममास भगवान् हयशीर्षाथो साक्षात्स यज्ञपुरुषस्तपनीयवर्णः ॥ छंदोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥ ११ ॥ मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ॥ विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥

न्तेंद्रियः तत्कुतः परिमुक्तसंगः ॥ १० ॥ हयग्रीवावतारमाह सत्र इति अथो इत्यर्थांतरे स एव साक्षाद्भगवान्मम ब्रह्मणः सत्रे यज्ञे हयशीर्षाख्य आस त पनीयं सुवर्णं तद्वद्वर्णो यस्य छंदोमयो वेदमयः तद्विधेया ये मखाः तन्मयः अमृतमय इति वा पाठः ॥ अखिलदेवतानामात्मा वाचो बभू श्वसतः श्वासं कुर्वतः नस्तः नासापुटात् ॥ उशतीः उशन्त्यः कमनीया वेदलक्षणा वाचो बभूवुः ॥ ११ ॥ मत्स्यावतारमाह ॥ मत्स्यो भाविना वैवस्वतेन मनुना युगांते उपलब्धः क्षोणीमयः पृथ्वीप्रधानः ॥ नराश्रय इत्यर्थः अत एव निखिलजीवनिकायानामाश्रयः मे मुखाद्विस्रंसितान् गलितान् वेदमार्गान् वेदानादाय तत्र युगा

भा.द्वि
२५

कूर्मावतारमाह । क्षीरोदधौ कच्छपवपुः सन् गोत्रं मंथनार्थं मंदरगिरिं पृष्ठेन विधृतवान् । कदा अमृतलब्धये क्षीरोदधिमुन्मथ्नतां सतां निद्रायाः क्षणाः अवसरस्तद्वद्वो यस्य सः । निद्रावसरः कृतनिद्रः सन् अद्रेः परिवर्तैः परिभ्रमैः कषाणैः कषणैर्धर्षणैरपगतकंडूरोपस्योसाक डूर्यस्य सः । यद्वा अद्रिपरिवर्त एव कषः कषणं तेन आ समंतात् अपयातीति कषाणा कंडूर्यस्य ॥१३॥ श्रीनृसिंहावतारमाह । त्रैविष्टपा देवाः ते

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः । पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिपरिवर्तकषाणकंडूः ॥१३॥ त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रं । दैत्येंद्रमाशु गदयाभिपतंतमारादूरौ निपात्य विददार नखैः स्फुरंतं ॥१४॥ अंतःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्तः । आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगलनामधेय ॥१५॥ श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः । चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥१६॥

षामुरुभयं हंतीति तथा स भगवान् । कथंभूतं भ्रमंत्यौ भृकुट्यौ दंष्ट्राश्च यस्मिन् तत्करालं वक्त्रं यस्मिंस्तत् दैत्येंद्रं स्फुरंतं आरात् समीप एव गदया उपलक्षितं अभिपतंतं नखैर्विददार ॥१४॥ हरिसंज्ञकावतारमाह । अंतरिति उरुबलेन गजः यूथस्य पतिः । तीर्थरूपं श्रवो यशो यस्य स तीर्थश्रवाः हे तीर्थश्रवः श्रवणेनैव मंगलं नामधेयं यस्य ॥१५॥ तद्वचनं श्रुत्वा शरणार्थिनं तं हस्ते प्रगृह्य ... नक्रस्य ग्राहस्य वदनं विनिष्पाद्य विदार्य तस्मादुद्दनात् ॥१६॥

राम
१५

वामनावतारमाह ॥ अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायान् श्रेष्ठः गुणानेवाह
यद्यतः इमाँल्लोकान् विचक्रमे पदन्यासैः क्रान्तवान् ॥ अथ प्रतिश्रुतानन्तरमेव तत्र हेतुः ॥ बलेः क्ष्मां वामनरूपेण जगृहे ॥ ननु ईश्वरः स्वयं किमिति
तथा वक्रेत्याह ॥ याच्ञां विना धर्ममार्गे प्रवर्त्तमानो न चाल्यः ऐश्वर्यात्प्रभ्रंशनीय इति ॥ १७ ॥ ननु तर्हि याच्ञयापि चालनं कृत्वा वितमेवेत्याशंक्य
ततोधिकं स्वहालोक्यादिसामीप्यादिनाशयेन दत्तवानित्याह ॥ नार्थ इति ॥ यद्विबुधाधिपत्यं इदानीं बलाद्याव अग्रे प्राप्स्यमानं च अयं बलेः पुरुषा
र्थो न भवति ॥ कुतः तत्राह अयं इति छेदः उरुक्रमस्य पादशौचं चरणक्षालनरूपा अपः ॥ आपवतो धृतवतः ॥ शिरसि शिखायां मूर्ध्नि

ज्यायान् गुणैरवरजोप्यदितेः सुतानां लोकान् विचक्रम इमान् यदथाधियज्ञः ॥ क्ष्मां वामनेन जगृहे त्रिपदछलेन याच्ञा
मृते पथि चरन् प्रभुभिर्न चाल्यः ॥ १७ ॥ नार्थो बलेरयमुरुक्रमपादशौचमापः शिखाधृतवतो विबुधाधिपत्यं ॥ यो वै प्र
तिश्रुतमृते न चिकीर्षदन्यदात्मानमंग शिरसा हरयेभिमेने ॥ १८ ॥ तुभ्यं च नारद भृशं भगवान् विवृद्धभावेन साधु
परितुष्ट उवाच योगं ॥ ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव ॥ १९ ॥

त्यर्थः ॥ किं च गुरुणा वारितः शप्तोपि अंग हे नारद प्रतिश्रुतं विना अन्यत् न चिकीर्षत ॥ कर्त्तुं नैच्छत यत्तृतीयपादपूरणार्थं हरये आत्मानं देहमपि
अभिमेने अंगीकृतवान् ॥ एवं सदेहं त्रैलोक्यं श्रद्धया ददतो विबुधाधिपत्यमर्थो न भवतीत्यर्थः ॥ १८ ॥ हंसावतारमाह तुभ्यमिति ॥ भृशं
विवृद्धेन भावेन अस्मद्विषयया भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा तथा उवाच ज्ञानं चेति ज्ञानसाधनं ॥ किं तत् भागवतं नाम ॥ कथंभू
तं तत्त्वमेव सतत्त्वं आत्मतत्त्वदीपकं विवृद्धभावेनेति विशेषणस्य फलमाह यदिति ॥ १९ ॥

भा०द्वि
९६

तत्तन्मन्वंतरावतारमाह ॥ चक्रमिति स्वतेजः निजं प्रभावमेव चक्रं सुदर्शनं बिभर्त्ति चक्रवदप्रतिहतप्रभावं बिभर्त्तीत्यर्थः ॥ तदेवाह मनुवंश-
पालकः सन् त्रयाणां लोकानां त्रिपृष्ठे उपरि स्थिते सत्यलोकेपि कमनीयां च कीर्त्तिं विस्तारयन् राजसु दंडं विधत्ते ॥२०॥ धन्वंतर्यवतारमाह ॥
लोके अवतीर्य धन्वंतरिः सन् पुरुरुजां महारोगिणां स्वनाम्नैव रुजः रोगान् हंति स्वयमेव कीर्त्तिः इति कीर्त्यते ॥ शापोक्तिः ॥ अमृतं परमायुश्च
न्समायुर्यस्मात् सः ॥ अवसत्रं पूर्वं दैत्यैः प्रतिरुद्धं यज्ञे भागं च अवरुंधे लभते अवापरुद्धमिति पाठे अयमेवार्थः ॥ आयुर्विषयं वेदं चानुशा-

चक्रं च दिक्ष्वविहितं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्त्ति ॥ दुष्टेषु राजसु दमं व्यदधात्स्वकीर्त्तिं सत्ये त्रिपृष्ठ उश-
तीं प्रथयंश्चरित्रैः ॥२०॥ धन्वंतरिश्च भगवान्स्वयमेव कीर्त्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हंति ॥ यज्ञे च भागममृतायु-
रवापरुद्धमायुष्यवेदमनुशास्त्यवतीर्य लोके ॥२१॥ क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्त्ति-
लिप्सु ॥ उद्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥२२॥ अस्मत्प्रसादसुमुखः कलया कलेश
इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ॥ तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकंधर आर्त्तिमार्छत ॥२३॥

स्ति प्रवर्त्तयति ॥२१॥ परशुरामावतारमाह ॥ जगतः क्षयाय विधिना दैवेन उपभृतं संवर्धितं मृत्यवे समर्पितमिति वा ब्राह्मणेभ्यो द्रुह्यतीति तथा अत्र
न उज्झितः पंथा वेदमार्गो येन अत एव नरकार्त्तिं लिप्सतीव एवंभूतमवनेः कंटकं क्षत्रमसौ महात्मा हरिः उद्धंति उत्सारयति दीर्घतीक्ष्ण-
धारेण परशुना ॥२२॥ रामावतारं त्रिभिः ॥ अस्मदिति अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलया भरतादिरूपया सह कलानामंशानामी-
ईशः ॥ गुरोर्दशरथस्याज्ञायां तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश यस्मिन् विरोधं कृत्वा रावणो नाशं प्राप्तः ॥२३॥

राम
९६

यस्मैरामायउदधिर्मार्गंददौ ॥ कथंभूतउदधिःसपदिशीघ्रं ॥ हरोयथात्रिपुरंदिधक्षुः तद्वद्दशिरलंकादग्धुमिच्छोः ॥ षष्ठीचतुर्थ्यर्थे ॥ यद्वाप
चमीय ॥ दिधक्षोरामात्‌ऊरंप्राप्तंयद्भयंतेनअंगेवेपःकंपोयस्य ॥ अत्रहेतुः दूरेवर्तमानाभुजंगात्तीनातद्यानिमित्तभूतपापस्थितेः
ऋपितोशेषः ॥ तेनहरेणोणाअस्यहरणाद्दृष्टिज्वालयाःत्यजंतंतप्यमानंमकराणांभुजगानांनक्राणांचचक्रंयस्मिन् ॥१४॥ किंच ॥ शुद्धेरा
वणास्यवक्षःस्थलस्पर्शेनहरणात्भग्नायेमहेड्वाहस्यऐरावतस्यदंतास्तैर्विडंबिताः स्वधवलिमाधवलीकृताः तेनदिक्पाति

यस्मादस्त्रादुदधिरुद्भयांगवेपोमार्गंसपद्यत्रिपुरंहरवद्दिधक्षोः ॥ हरोरहन्मथितरोषहशोणदृष्या
तातप्यमानमकरोरगनक्रचक्रः ॥१४॥ वक्षःस्थलस्पर्शरुगणमहेड्वाहदंतैर्विडंबितककुप्पहृद्दहा
सं ॥ सद्योभिः सहविनेष्यतिदारहर्तुर्विस्फूर्जितैर्धनुषउद्धरतोधिसैन्ये ॥ ॥१५॥

तैः ॥ प्रकाशितादृत्यर्थः ॥ याएवंभूताःककुभोदिशःताःजयतेसेवतेपालयतीतितदातस्यदारहर्तुः ॥ रावणस्यअहोमत्समः ॥ को
न्योस्तीतिमहागर्वेणऊरंप्राप्तंग्रहासंस्रुघृभिप्राणैः सहसद्यः शीघ्रंविनेष्यतीकेधनुषोविस्फूर्जितैः ॥ टंकारघोषैरेवकथंभूत
स्यास्त्रधिसैन्येद्विपरसैन्यमध्येउद्धरतः ॥ उत्कर्षेणविचरतः ककुप्रजयमहद्दहामसमितिपाठेदंतैहृज्वलितानांककुभांयोजयः ॥ तेनहृद
हासः संजातोगर्वः तमपनेष्यतीत्यर्थः ॥१५॥

भा॰ द्वि॰
२७

श्रीकृष्णावतारमाह भूमेरिति त्रिभिः ॥ सुरेतराः असुरांशभूताः राजानस्तेषां वरूथैः सैन्यैः विमर्दितायाः भारेणापीडितायाः कलयारा
मेण सह जातः सन् ॥ कोसौ जातः सितकृष्णौ केशौ यस्य भगवतः स एव साक्षात् सितकृष्णकेशत्वं शोभैव न तु वयः परिणामकृतं अवि
कारित्वात् ॥ यन्नुक्तं विष्णुपुराणे ॥ उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥ उक्तं च भारते ॥ स चापि केशौ हरिरुच्चकर्त्त एकं शुक्लमपरं चा
पि कृष्णं ॥ तौ चापि केशावाविशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च ॥ तयोरेको बलभद्रो बभूव यो सौ श्वेतस्तस्य देवस्य केशः कृष्णो
द्वितीयः केशवः संबभूव ॥ केशो यो सौ वर्णतः कृष्ण उक्त इति तत्र न केशमात्रावतारणाभिप्रायं ॥ किंतु भूभारावतरणरूपं कार्यं कियदे

भूमेः सुरेतरवरूथविमर्दितायाः ॥ क्लेशव्ययाय कलया सितकृष्णकेशः ॥ जातः करिष्यति जनानुपलक्ष्यमार्गः
कर्माणि चात्ममहिमोपनिबंधनानि ॥ २६ ॥ तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोपवृ
त्तः ॥ यद्रिंगतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यं ॥ २७ ॥

ततमत्केशावेव तत्कर्त्तुं शक्ताविति द्योतनार्थं न मत्कृष्णयोर्वर्णसूचनार्थं च केशोद्धरणमिति गम्यते ॥ अन्यथा तत्रैव पूर्वापरविरोधा
पत्तेः ॥ कृष्णस्तु भगवान् स्वयमित्येतद्विरोधाच्च कथंभूतः ॥ परमेश्वरतया जनैः अनुपलक्ष्यो मार्गो यस्य तर्हि ईश्वरत्वे किं प्रमाणं अ
तिमानुषकर्मान्यथानुपपत्तिरेवेत्याह ॥ आत्मनो महिमा उपनिबध्यते अभिव्यज्यते येषु तानि ॥ २६ ॥ एतदेव प्रपंचयति ॥ तोकेन
त्यादिना ॥ बालेन सता तनामा जीवहरणं ॥ यत् रिंगता जानुभ्यां गच्छता अंतरगतेन मध्यं प्राप्तेन दिविस्पृशोरत्युच्चयोः इतरथा अनी
श्वरत्वे तन्न भवितव्यं ॥ २७ ॥

एम
२७

विषतोयपीथान् विषमयतोयस्य पीथं पानं येषां ॥ पालान्गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यतीति यमुनायां क्रीडन्नुरगं कालि
यं उच्चाटयिष्यति तच्छुद्धये तस्याह्रदिन्या निर्विषत्वाय अतिविषवीर्येण विलोला चंचला जिह्वा यस्य ॥ १८ ॥ दिव्यमलौकिकं ॥ इवेति लो
कोक्तिः ॥ उन्नेष्यति उद्धरिष्यति ॥ अचिरेणाश्वः ॥ तत्संबंधिनि वने अस्वच्छ इत्यर्थः ॥ अतो दावाग्नेर्हेतोरवसितो निश्चितो तत्कालोपस्थितस
वलः ॥ सरामः अनधिगम्यं दुर्जेयं वीर्यं यस्य तत्र निशि निः ॥ शयानमिति कालियदमनेन श्रांतं यमुनातीरे नेत्रे पिधाप्य पिहिते कार

यद्देव्रजे व्रजपशूंश्च विषतोयपीथान्पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या ॥ तच्छुद्धयेतिविषवीर्यविलोलजिह्वमुच्चाटयि
ष्यदुरगं विहरन्ह्रदिन्यां ॥ १८ ॥ तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने ॥ उन्नेष्यति
व्रजमतोऽवसितान्तकालं नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्यः ॥ १९ ॥ गृह्णीत यद्यदुपबंधममुष्य माता शुल्वं
सुतस्य न तु तत्तदमुष्य माति ॥ यज्जृंभतोस्य वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ॥ २० ॥
नंदं विमोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान्बिलेषु पिहितान्मयसूनुना च ॥ अह्न्याहृतं निशि शयानमतिश्रमेण लोकं

पित्वेति पुंजारव्यामिति ज्ञेयं ॥ १९ ॥ उपबध्यते अनेनेति उपबंधं तत्साधनं शुल्वं दाम अमुष्य माता यशोदा विकुंठं उपनेष्यति गोकुलं स्म ॥ २ ॥
अगृहीत अमुष्य न माति बंधनसमितं भवती न पूर्यत इत्यर्थः ॥ गोपी यशोदा संवीक्ष्य दृष्ट्वा प्रतिबोधिता निजैश्वर्यं तस्याः पिता आसीदिति यत्
तच्च कर्म दिव्यमिवेति सर्वत्र पूर्वेणान्वयः ॥ २० ॥ वरुणस्य पाशात् यद्रूपं तस्मान्मोचयिष्यति मयसूनुना व्योमाख्येन आहृतं व्याप्तं निशि शयान
मिति व वैकुंठप्राप्तिसाधनानुष्ठानाभावो दर्शितः ॥ उपनेष्यति प्रापयिष्यति ॥ गोकुलवासिनं जनं स्मेत्याश्चर्ये ॥ २१ ॥

देवेंद्रे पशून् रिरक्षुः रिरक्षिषुरित्यर्थः ॥ अनघे अपराहिते एकस्मिन्नेव करे सलीलं यथा तथा महीध्रं गोवर्द्धनं धर्त्ता धारयिष्यति उच्छिलि-
ध्रं उत्कृत्तं छत्राकमिव सप्त वर्षाणि च यो पसमः ॥ २१ ॥ निशिरात्रौ निशाकररश्मिभिः गौर्यां धवलायां वने क्रीडन् कलानि मंजुलानि पद-
नि यस्मिन् तद्यथा तथा आयतं दीर्घं मूर्छितं आलापविशेषयुक्तं गीतं तेन उद्दीपितः स्मर एव रुक् पीडा यासां तासां गोपीनां हर्त्तुः शंखचूडस्य
शिरो हरिष्यति ॥ २२ ॥ ये च प्रलंबादयः ते सर्वे हरिणा हे ब्रह्मन् तेन तदीयं निलयं अदर्शनं दर्शनाभावं वैकुंठं अलं यास्यंति तत्र ते रणात्ययः

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून् कृपया रिरक्षुः ॥ धर्त्तोच्छिलिंध्रमिव सप्तदिनानि सप्तवर्षो महीध्रमन-
घैककरे सलीलं ॥ २१ ॥ क्रीडन् वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्छितेन ॥ उद्दीपितस्मररुजां व्र-
जभृद्वधूनां हर्त्तुर्हरिष्यति शिरो धनदानुगस्य ॥ २३ ॥ ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः
अन्ये च शाल्वकपिबल्वलदंतवक्त्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः ॥ २४ ॥ ये वा मृधे समितिशालिन आत्तचापाः कांबो-
जमत्स्यकुरुकैकयसृंजयाद्याः ॥ यास्यंत्यदर्शनमलं बलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयं ॥ २५ ॥

खरो धेनुकः दर्दुरः बकः इभः कुवलयापीडः कपिर्द्विविदः भौमो नरकः ॥ २४ ॥ ये च मृधे आत्तचापाः समितिशालिनः समिति संग्रामे शालंते श्ला-
घंते समितिशालिनः ॥ तत्र प्रलंबखरकपिबल्वलमुख्याः बलभद्रेण हताः कांबोजादयश्च भीमार्जुनादिभिः शंबरः प्रद्युम्नेन ॥ यव-
नो मुचुकुंदेन न तु हरिणा तत्राह ॥ बलो भीमः पार्थ इत्यादयो व्याजाह्वयाः कपटनामानि येषां तेन सर्वोऽप्यन्यो हरिणा हता ते नरप्रमिताः ॥ कालांतरे
येयास्यंतीति भावः ॥ एतेषां सर्वमपि कर्म हरिव्याप्त्या अन्यथा न भाव्यमिति पूर्वेणैव संबंधः ॥ २५ ॥

व्यासावतारमाह॥ अनुयुगं मीलिता संकुचिता धीर्येषां॥ स्तोकमल्पमायुर्येषां स्वनिगमः स्वकृतो वेदराशिः वत अहो दूरेपारं यस्येति दुर्गम
इत्यवमृश्य सत्यवत्यामाविर्भूतः सन् स एव हरिः विटपशः शाखाभेदेन ॥३६॥ बुद्धावतारमाह ॥ देवद्विषां निष्ठितानां नितरां स्थितानां
तद्बलेन च पूर्भिः पुरीभिः॥ अदृश्यतूर्भिः॥ अलक्ष्यवेगाभिर्मतेर्विमोहः॥ योगपतात्यागो यस्मान्मतेः प्रलोभश्च अत्र छन्नो स्वीकारो यस्मात्तं पा
षंडवेषं विधाय तेन औपधर्म्यं पाषंडधर्मं [illegible] बहु भाषिष्यत इत्यर्थः ॥३७॥ कल्क्यवतारमाह यर्हि यदा सतामप्यालयेषु गृहेषु त्रै

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो वत दूरपारः॥ आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं
विटपशो विभजिष्यति स्म ॥३६॥ देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः॥ लोकान्घ्नतां
मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यं ॥३७॥ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाषंडिनो
द्विजजना वृषला नृदेवाः॥ स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान्युगांते ॥३८॥ सर्गे तपो
हमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः॥ अंते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः ३

वर्णिकाः पाषंडिनः स्युः शूद्राश्च राजानः स्युः तदा कल्किरूपेण कलेः शास्ता भविष्यति ॥ अत्र च ब्रह्मनारदसंवादात्प्राक् शान्तिराजः ॥२९
कृ भाविनो वराहादयः मन्वंतरावतारास्तु भूता भाविनश्च ॥ धन्वंतरिपरशुरामौ तदा वर्तेते ॥ श्रीरामादयश्च भाविनः ॥ तत्र तत्र तु कालविद्ग्दृत्या इति निर्दे
शः कृतं स्यादिति द्रष्टव्यं ॥३८॥ सृष्ट्यादिकार्यभेदेन मायागुणावतारमाह विभूतय इह सर्ग इति स्थाने स्थितौ मन्वादयो विष्णुः धर्मश्च मखश्च मनवश्च
अमराश्चावनीशाश्च अंते संहारे हरो रुद्रः मन्युवशाः सर्पाः बहुशक्तिधारिणो भगवत एता विभूतयः ॥३९॥

इदंमयाग्रेरूपेणोक्तंविस्तरेणवक्तुंनकोपिसमर्थइत्याह॥पृथिव्याःपरमाणूनपियोविममेगणितवान्तादृशोपिकोपिविष्णोर्वीर्यगणनांतु
कर्तुंनार्हति॥कथंभूतस्ययोविष्णुःत्रिपृष्ठंसत्यलोकंचस्कंभधृतवान्विभितिचस्कंभयस्मात्त्रिविक्रमेअस्खलताप्रतिघातशून्येनरंहसास्वपा
दवेगेनत्रिसाम्यरूपंसदनमधिष्ठानंप्रधानंतस्मादारभ्यउरुअधिकंकंपयानंकंपेनयानंयस्यतद्वाअतःकारणाच्चस्कंभ॥अथत्रिपृष्ठमितिवा
छेदः॥सत्यलोकमपिव्याप्ययःसर्वंधृतवानित्यर्थः॥तथाचमंत्रः॥विष्णोर्नुवीर्याणिकंप्रवोचंकःप्रावोचदित्यर्थःयःपार्थिवानिरजांसिवि
ममेसोपि॥योविष्णुस्त्रेधाविचक्रमाणःत्रिविक्रमंकुर्वन्उत्तरंलोकंअस्कंभयतअवष्टब्धवान्॥कथंभूतंसधस्थं॥सहसर्वाधारेणतिष्ठंती

विष्णोर्नुवीर्यगणनांकतमोर्हतीहयःपार्थिवान्यपिकविर्विममेरजांसि॥चस्कंभयःस्वरंहसास्खलतात्रिपृष्ठंयस्मा
त्त्रिसाम्यसदनादुरुकंपयानं॥४०॥नांतंविदाम्यहममीमुनयोग्रजास्तेमायाबलस्यपुरुषस्यकुतोपरेये॥गायन्गुणा
न्दशशताननआदिदेवःशेषोधुनापिसमवस्यतिनास्यपारं॥४१॥येषांसएवभगवान्दययेदनंतःसर्वात्मनाश्रित
पदोयदिनिर्व्यलीकं॥तेदुस्तरामतितरंतिचदेवमायांनैषांममाहमितिधीःश्वसृगालभक्ष्ये॥४२॥

निष्ठाःतत्रस्थैर्देवैःसहवर्तमानेइत्यर्थः॥४०॥एतत्प्रपंचयतिनांतमिति॥पुरुषस्ययन्मायायाःबलंतस्यांतंनविदामिनवेद्मि॥दशशताान्यान
नानियस्यसोपिअस्यगुणान्गायन्पारंनसमवस्यतिनप्राप्नोति॥४१॥यदिनकोपिविंदतितर्हिकथंप्यचोरन्तत्प्राप्येवेत्याह॥येषामिति॥द
ययेद्दयांकुर्यात्तेचेन्नयादिनिष्कपटंआश्रितचरणाभवंतितेदुस्तरांदेवमायांअतितरंति॥चकारात्मायावैभवंविदंतिच॥अन्यथेति
वापाठः॥प्रत्युतममेवतेषांमायातरणमित्याहनैषामिति॥श्वसृगालानांभक्ष्येदेहे॥४२॥

अंतर्त्तनाभावेपिमायेयमितितानतत्कृपयाबहूनामहेत्याह ॥ वेदाहमितित्रिभिः ॥ यूयमितिसनकादीनांतत्रभव्यबहुत्वं ॥ दैत्यव
र्यः प्रह्लादः मनुः स्वायंभुवः तस्यपत्नीच ॥ तदात्मजाः पुत्राःकन्याश्चप्राचीनबर्हिषोविसर्गलोपश्छांदसः ॥४३॥ शतधनुः अ
ऽश्वमधिपर्षः ॥ रंतिदेवइतिपाठः हगमः ॥ एकपद्येएतैःसहितोदेवव्रतइत्यर्थः ॥४४॥ उपेंद्रदत्तः शुकः विभीषणादयोवर्या

वेदाहमंगपरमस्यहियोगमायांयूयंभवश्चभगवानथदैत्यवर्यः ॥ पत्नीमनोःसचमनुश्चतदात्मजाश्च
प्राचीनबर्हिरृभुरंगउतध्रुवश्च ॥४३॥ इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरागयनाहुषाद्याः
मांधात्रलर्कशतधन्वनुरंतिदेवादेवव्रतोबलिरमूर्त्तरयोदिलीपः ॥४४॥ सौभर्युतंकशिबिदेवलपिप्प
लादाःसारस्वतोद्धवपराशरभूरिषेणाः ॥ येन्येविभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेवव
र्याः ॥४५॥ तेवैविदंत्यतितरंतिचदेवमायांस्त्रीशूद्रहूणशबराअपिपापजीवाः यद्यद्भुतक्रमपरायणशील
शिक्षास्तिर्यग्जनाअपिकिमुश्रुतधारणाये

मुख्यायेषांते ॥४५॥ किंबहुनासत्संगेनसर्वेपिविदंतीत्याहतेवाइति ॥ अद्भुतः क्रमःपादवि
न्यासोयस्यहरेस्तत्परायणास्तद्भक्ताः ॥ तेषांशीलेशिक्षायेषांतेतथायदिभवंतितर्हितेपिविदंतीत्यर्थः ॥ श्रुतेभगवतोरूपेधारणाम
नोनियमनंयेषांविदंतीतिकिमुवक्तव्यं ॥४६॥

भा० द्वि०
३०

किं तद्भगवतः स्वरूपं यस्मिन् मनोधारणां विधाय मायां तरतीत्यपेक्षायामाह शश्वदिति द्वाभ्यां । यद्ब्रह्मेति विदुः मुनयः तद्वै भगवतः स्वरूपं किं तद्ब्रह्म तत्
राह । अजस्रं नित्यं च तत्सुखं च विशोकं चेति अजस्रसुखत्वे हेतुः शश्वत्सदा प्रशान्तं अतो नित्यसुखरूपं । विशोकत्वे हेतुः अभयं ततः यतः समं भे
दशून्यं । अतो भयं द्वितीयाद्वै भयं भवतीति श्रुतेः । सत्त्वं ततः यतः प्रतिबोधमात्रं ज्ञानैकरसं । ननु ज्ञानस्यापि नीलपीताद्याकारेण चक्षुरादिकरण
भेदेन च भेदो दृश्यते । न । शुद्धं निर्मलं । न च रञ्जितो विषयकरणोपरागरूपो मलः इत्यत आह सदसतः परं विषयकरणसंगशून्यं । तर्हि तत्तदुपा
रागेण सत्ता न स्यादिति भावः । न च तथापि ज्ञातृज्ञानयोः भेदः स्यात् । न । आत्मतत्त्वं । आत्मनो ज्ञानं स्वरूपमेव तत् न ततो भिन्नं । ननु च तत्त्वोपनिषदं पुरु
षं पृच्छामीति शब्दबोध्यत्वप्रतीतेः कुतो बोधैकरूपत्वं तत्राह शब्दो न यत्रेति । शब्दोपि तन्निष्ठत्वावेदनशक्त्यैव व्यापारेण न तद्बोधयतीत्यर्थः । ननु च भवत
नाम निरस्तभेदज्ञानरूपत्वाद्विशोकत्वं । सुखरूपत्वं तु नानाकारकसाध्यक्रियाफलत्वाल्लोकवदजस्रसुखत्वं न सिध्यतीत्यत आह यत्र पुरुकारकवा

शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं । शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च वि
लज्जमाना ॥ ४७ ॥ तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं । सध्र्यङ् नियम्य यतयो यमकर्त्तहेतिं जह्युः स्व

न्यः क्रियार्थः उत्पाद्यादि चतुर्विधः उत्पाद्याप्यविकार्यसंस्कार्यरूपचतुर्विधक्रियाफलं च नास्ति इंद्रिये राडिव निपानखनित्रमिंद्रः ४ ॥ ४८ ॥
ज्ञानां प्राप्तिश्चाभिव्यक्तिरेव क्रियाभिः आनंदांशाभिव्यक्तिमात्रं क्रियते नोत्पत्त्यादिकमिति भावः । ननूत्पत्त्याद्यभावेपि मायामलापकरणेन विकार्यत्वं स्या
देव ब्रीहितुषाणामिव तद्घापाकरणेनेत्याशंक्याह । माया अभिमुखे स्थातुं विलज्जमानेव यस्मात्परैति दूरतो पसरतीति ॥ ४७ ॥ तस्मादेवंभूते भगवति नियमत
मनसा नान्यत्किमपि कल्पमहीत्याह । तद्वावतीति सध्र्यक् सह अञ्चतीति सध्र्यक् मनः यत्प्रति नियम्य यस्मिन् शुद्धिः शिक्षाकृत्यपतयोऽपि न त्वशीलाः । कर्त्रो भेदः तत्क्रियाः कर्त्रः तत्र
हेतिं साधनं जह्युः त्यजेयुः अनुपयोगात्तन्नत्वाद्दिव्यतत्त्वादित्यर्थः । उपयोगाभावेन साधनानां त्यागे दृष्टांतः । निपीयते अस्मिन्निति निपानं कूपः तस्य खनित्रं खननसाधनं यथा
यथा स्वाराट् स्वयमेव पर्जन्यरूपेण विराजमानः इंद्रो नारब्धेन तद्धरिति । यद्वा स्वैनैव राजत इति स्वराट् हरिः । सध्र्यङ् सम्यगनुकर्मकारभगवद्गृहीतनिपा

३०

एवं तावदजत्वहत्वे विशोकत्वं त्वहेव भगवतः स्वरूपं तत्प्राप्त्यानां च न प्राप्यं कृत्यं वा किंचिदस्तीत्युक्तं ॥ इदानीं ततः प्राकृतस्य एव सर्वफलदाता स
र्वकर्मप्रवर्त्तकश्चेत्याह ॥ स एव श्रेयसां फलानां विभुः दाता पितत्र हेतुः ॥ भावानां ब्रह्मादीनां स्वभावैः शमदमादिभिर्विशेषणैर्विहितस्य
सतः शुभस्य कर्मणो यतः प्रवर्त्तकात्प्रसिद्धिः यद्वा भावानां महदादीनां स्वभावेन परिणामेन विहितस्य सतः कार्यस्य प्रसिद्धिः स्वर्गा
दीनां दातेत्यर्थः ॥ नन्वेवं कर्मकर्त्तुर्मृतस्य कथं स्वर्गादिफलं स्यात्तत्राह ॥ स्वारंभकधातूनां भूतानां विगमे वियोगे सति गूढं च ऽनुविशीर्यमाणे

स श्रेयसामपि विभुर्भगवान्यतोस्य भावस्वभावविहितस्य सतः प्रसिद्धिः देहे स्वधातुविगमेऽनुविशीर्यमाणे व्यो
मेव तत्र पुरुषो न विशीर्यतेऽजः ॥ ४९ ॥ सोयं तेभिहितस्तात भगवान् विश्वभावनः ॥ समासेन हरेर्नान्यदन्यस्मात्सद
सच्च यत् ॥ ५० ॥ इदं भागवतं नाम यन्मे भगवतोदितं ॥ संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु ॥ ५१ ॥ यथा हरौ भगव
ति नृणां भक्तिर्भविष्यति ॥ सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय ॥ ५२ ॥ मायां वर्णयतोमुष्य ईश्वरस्यानुमोदतः
शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ॥ ५३ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे ब्रह्मनारदसंवादे सप्तमो

ऽपि देहे तत्रस्थं व्योमेव यत्तेन सह न विशीर्यते ॥ यतः अजः तेन सह न जातः तस्य उत्कर्षस्य श्रेयसां प्रभुरित्यर्थः ॥ ४९ ॥ अध्यायत्रय ध्यायः ॥
स्यार्थमुपसंहरति ॥ सोयं ते समासेन संक्षेपेणाभिहितः तमेवाह सदसत्कार्यकारणं च हरेरन्यन्न भवति ॥ ननु हरेस्तद्व्यतिरेके तद्गतविकारप्र
संगः स्यात् ॥ न अन्यस्मात्कारणभूतो हरिः कार्यव्यतिरिक्त इत्यर्थः ॥ ५० ॥ अयं च विभूतीनां संग्रहरूप इति ॥ ५१ ॥ यथा वर्णितेन नृणां भक्तिर्भविष्यति तथैव
संकल्प्य संचिंत्य तथा हरिलीलाप्राधान्येन श्रीभागवते वर्णयन् तत्र भक्तिरसविघातेन केवलं तत्त्वमित्यर्थः ॥ ५२ ॥ ननु लीलामायाप्रपंचः किं तद्वा

भा॰द्वि
३१

अष्टमेदेहसंबंधमाक्षिपन्श्रीशजीवयोः॥ वहून्परीक्षिदाप्रक्षच्छ्रवणार्थानुभुत्सितान्॥१॥ त्वमेतद्विपुलीकुर्वित्युक्तं॥ तदेवविपुलीकरणाय पृ
छतिब्रह्मणेतित्रिभिः॥ अगुणस्यगुणातीतस्यापि॥ देववत्तद्दर्शनंयस्यसः॥१॥ ॥२॥ निःसंगंमनःश्रीकृष्णेनिवेश्येतित्वियपत्नीरशरी
तः॥३॥ सोपिशृद्धयाशृण्वतोनावश्यकइत्याह॥ शृण्वतइति॥ त्वियत्नंविनाभगवान्स्वयमेवहृदिविशति॥४॥ भावसरोरुहंहृदयं
कमलंप्रविष्टः॥ तद्गतंसर्वंमलंधुनोतिसलिलस्येति॥ इदंयातरव्यामिश्रेणादिनाक्तंपंकछेजलेशोधितेतदेवकेवलंस्थ्यापति॥ नतुनदीनतराका

रणेवाव॥ ब्रह्मणाचोदितोब्रह्मन्गुणाख्यानेऽगुणस्यच॥ यस्मैयस्मैयथाप्राहनारदोदेवदर्शनः॥१॥ एतद्वेदितुमिच्छा
मितत्वंवेदविदांवर॥ हरेरद्भुतवीर्यस्यकथालोकसुमंगलाः॥२॥ कथयस्वमहाभागयथाहमखिलात्मनि॥ कृष्णे
निवेश्यनिःसंगंमनस्त्यक्ष्येकलेवरं॥३॥ शृण्वतःश्रद्धयानित्यंगृणतश्चस्वचेष्टितं॥ कालेननातिदीर्घेणभगवा
न्विशतेहृदि॥४॥ प्रविष्टःकर्णरंध्रेणस्वानांभावसरोरुहं॥ धुनोतिशमलंकृष्णःसलिलस्ययथाशरत॥५॥
धौतात्मापुरुषःकृष्णपादमूलंनमुंचति॥ मुक्तसर्वपरिक्लेशःपांथःस्वशरणंयथा॥६॥

रिणतंसत्वमलःकुंभस्थंतत्रिष्टत्येवनतुसर्वथाविलीयते॥ अतएवकिंचिच्चलनेनपुनःक्षुभ्यतिच॥ एवंतपोदानादिप्रायश्चित्तैर्नसर्वथाप
वैषांसर्वपापंधुनोतिकिंतुसावशेषंतच्चकस्यचिदेवकिंचिदेवहृदिप्रविष्टमात्रस्तुश्रीकृष्णःसर्वेषांसर्वपापंनिःशेषंहरतीत्यनेनद
र्शितेनोक्तंसलिलस्यमलंयथाशरदिति॥५॥ ततश्चकृतार्थोभवतीत्याहधौतात्मानिष्पापःमुक्ताःसर्वेरागद्वेषादयःपरिक्लेशायेनपांथःप्र
वासादागतःस्वशरणंगृहंयथानमुंचति॥तद्वत॥६॥

राम
३१

तदेवंभगवतोऽनुकामाविःकृत्यसंदिग्धानर्थान्पृच्छति॥ यद्धातुमतः धातवो भूतानि॥ तत्त्वंवधभूतस्य त्रुस्यालौकिकस्यात्मनः॥ धातुभिर्दे
हारंभ इति यत एतत् किं यदृच्छया निनिर्मित्तं हेतुना वा कर्मादिना भवंतो यथावज्जानंति अतः कथयंत्विति शेषः॥७॥ यस्यानाभीभूः सो
प्येतत्तल्पदेहवान्प्रोक्तोऽयुतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति सार्द्धेन॥ लोकानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य
तत्पद्मं यस्योदरादासीत्तस्य नाभीभूतः॥ इयत्ताद्युक्तैः त्वपरिमितैरवयवैर्यं लौकिकः पुरुषो यावान्यत्प्रमाणोऽवयवैरुक्तस्तावानप्रो
क्तः संस्थावानवयववानिव प्रोक्तः॥ अतः को विशेषस्तस्येति॥८॥ अवशयं च विशेषो वाच्य इत्याह॥ अजो ब्रह्मा भूतानां व्यष्टिरूपाधी

यद्धातुमतो ब्रह्मन्देहारंभोऽस्य धातुभिः॥ यदृच्छया हेतुना वा भवंतो जानते यथा॥७॥ आसीद्यदुदरात्पद्मं लोकसंस्था
नलक्षणं॥ यावानयं वै पुरुष इयत्तावयवैः पृथक्॥ तावानसाविति प्रोक्तः संस्थावयववानिव॥८॥ अजः सृजति
भूतानि भूतात्मा यदनुग्रहात्॥ ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः॥९॥ स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः॥
मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः॥१०॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः॥ लोकैरमुष्यावयवाः

नामात्मानियंतासमष्टिरूपाधित्वात्॥ येन वा तदनुग्रहकृतात् स्व तद्रूपं ददर्श दृष्टवान् एतच्च तस्यापि द्रष्टुरीशस्य कुत्र स्थ सपालैरिति स्फुटमः॥
स्याखिलात्मनः सृजं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः इत्यादिना वोक्तमनूद्यते अग्रे तु स्पष्टं भविष्यति॥९॥ प्रश्नांतरमाह॥ स चापीति॥ यत्र शेते
येन रूपेणावतिष्ठते॥ विश्वस्य स्थित्यादयो यस्मात्॥ एवमादिप्रश्नानां तत्त्वतोऽर्हसूदाहर्तुमिति सर्वांते क्रियायाः संबंधः॥१०॥ प्रश्नांतरमाह॥ पुरुष
स्यावयवैः॥ पूर्वकल्पिताः यस्येहावयवैर्लोकान्कल्पयंतीत्यादौ लोकैश्चामुष्यावयवाः इति पातालमेतस्य हि पादमूलमित्यादौ च तन्मेवाच्य

भा॰द्वि
३१

एवं स्वदेहविपर्ययाभ्यां पृष्टमिदानीमज्ञातान् बहूनर्थान् पृच्छति यावा नित्यादिना कल्पो महान् विकल्पो ऽवांतरः ॥ भूतादिशब्दो यस्मात् ॥
यस्य वा वक इति वा ॥ यतः स्थूलदेहाभिमानिनो मनुष्यपितृदेवतादेरायुषः प्रमाणं अनुमानप्रकारः ॥ विशेषं पृच्छति कालस्येति ॥ अ
नुगतिः प्रवृत्तिः कर्मगतयः कर्मप्राप्तानिष्टानानियादृशीः यादृशपः ॥ ११ ॥ गुणानां सत्वादीनां परिणामं देवादिरूपमिच्छतां गुणिनां
जीवानाम् ध्येयस्मिन् परिणामे कर्मणां पुण्यपापानां समवायः ॥ केन कर्मसमुदायेन कथं कृतेन कोधिकारी देवतादिभावं प्राप्नोति

यावा कल्पो विकल्पो वा यथा कालोनुमीयते ॥ भूतभव्यभवत्सु ह्रस्वमायुर्मानं च यत्स्मृतः ॥ १२ ॥ कालस्यानुगतिर्यात्वल्ले
क्ष्यते एवी वृहत्यपि ॥ यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम ॥ १३ ॥ यस्मिन् कर्मसमावायो यथा येनोपगृह्यते ॥ गुणा
नां गुणिनां चैव परिणाममभीप्सतां ॥ १४ ॥ भूपातालककुब्व्योमग्रहनक्षत्रभूभृतां ॥ सरित्समुद्रद्वीपानां संभवश्चैत
दोकसां ॥ १५ ॥ प्रमाणमंडकोशस्य बाह्याभ्यंतरभेदतः ॥ महतां चानुचरितं वर्णाश्रमविनिश्चयः ॥ १६ ॥ अवतारा
नुचरितं यदाश्चर्यतमं हरेः ॥ युगानि युगमानं च धर्मो यश्च युगे युगे ॥ १७ ॥ नृणां साधारणो धर्मः सविशेषश्च यादृशः
श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवतां ॥ १८

त्यर्थः ॥ १४ ॥ भूरादीनां संभवं एतानि स्वोकांसि येषां प्राणिनां तेषां च संभवः यद्येति
सर्वत्रानुषंगः ॥ १५ ॥ वर्णानामाश्रमाणां च विनिश्चयः ॥ तत्तत्स्वभावेन निर्देशः ॥ १६ ॥ युगे युगे प्रतियुगं यो धर्मः यश्च हरेरवतारानुचरि
तं ॥ १७ ॥ सविशेषवर्णाश्रमनिबंधनः ॥ श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहारनियमलक्षणो धर्मः ॥ राजर्षीणां प्रजापालना
धिकारिणां कृच्छ्रेष्वापत्सु जीवतां ॥ १८ ॥

राम
३१

सर्वेषां तत्वानां प्रकृत्यादीनां परिसंख्यानं संख्या लक्षणं स्वरूपं हेतुतो लक्षणं तत्तत्कार्यहेतुत्वेन च लक्षणमित्यर्थः । पुरुषाराधनस्य विधिः देवपूजाप्रकारः । अष्टांगयोगस्य च विधिः ॥१०॥ योगेश्वराणामैश्वर्यगतिरणिमादिनार्चिरादिगतिः । लिंगशरीरस्य भंगः प्रलयः । वेदा ऋग्वेदादयः उपवेदा आयुर्वेदादयः धर्माधर्मशास्त्राणि तेषां इतिहासपुराणयोश्च गतिः स्वरूपं ॥१०॥ संप्लवः अवांतरप्रलयः ॥ यद्वा सम्यक्प्लवनमुद्भवः । विक्रमः स्थितिः प्रतिसंक्रमो महाप्रलयः ॥ इष्टं वैदिकं कर्म ॥ पूर्तं स्मार्तं वापीकूपतडागादिदेवतायतनानि च ॥ अन्नप्रदानमारामः पूर्तमि

तत्वानां परिसंख्यानं लक्षणं हेतुलक्षणं ॥ पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च ॥१०॥ योगेश्वरैश्वर्यगतिर्लिंगभंगस्तु योगिनां ॥ वेदोपवेदधर्माणामितिहासपुराणयोः ॥१०॥ संप्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः ॥ इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥११॥ यच्चानुशायिनां सर्गः पाषंडस्य च संभवः ॥ आत्मनो बंधमोक्षौ च व्यवस्थानं स्वरूपतः ॥११॥ यथात्मतंत्रो भगवान्विक्रीडत्यात्ममायया ॥ विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः ॥१२॥ सर्वमेतच्च भगवान्पृच्छते मेनुपूर्वशः ॥ तत्वतोर्हस्युदाहर्तुं प्रपन्नाय महामुने ॥१४॥ अत्र प्रमाणं हि भवान्परमेष्ठी यथात्मभूः ॥ परे चेहानुतिष्ठंति पूर्वेषां पूर्वजैः कृतं ॥१५॥ न मेसवः परायंति ब्रह्मन्ननशनादमी ॥ पिवतोच्युतपीयूषमन्यत्र कुपिताद्द्विजात् ॥१६॥

त्यभिधीयत इति ॥ तत्र काम्यानां यथाग्निहोत्रादीनां विधिः अविरोधप्रकारः ॥११॥ अनुशायिनां लीनोपाधीनां जीवानां च आत्मनो जीवस्य व्यवस्थानां बंधमोक्षातिरिक्तस्वरूपेणावस्थानं ॥११॥ उदास्ते प्रलये ॥१२॥ वशादरपृष्टमपि ॥१४॥ प्रमाणं सम्यक्कृतानां यतस्तव ब्रह्मनारदव्यासक्रमेण संप्रदायोस्तीति सामान्यन्यायेनाह ॥ परे चेति ॥ यद्वा त्वदन्यत्राप्रयोगतानुगतिका एवं न तु तत्वविद इत्याह ॥ परे चेति ॥१५॥ ननु तवानशनद्विजकोपाभ्यां व्याकुलस्य कुतः श्रवणं तत्राह नेति न परायंति नापगच्छंति न व्याकुली भवंतीत्यर्थः ॥ अच्युतकीर्त्तिपीयूषं पिवतः ॥१६॥

भा॰टी॰ उपामंत्रितः पृष्टः ॥ संस्थायां सोम इति श्रुतस्य ॥ २७ ॥ ब्रह्मकल्पेऽस्मिन् पाद्मकल्पे भागवताख्यानेनैव प्रश्नानामुत्तरं दास्यन्नुपक्रान्तवानित्यर्थः ॥ २८ ॥
३३ पांडूनामृषभः श्रेष्ठः ॥ आनुपूर्व्येणेति प्रश्नानां क्रमोऽत्र विवक्षितः न प्रश्नक्रमः ॥ २९ ॥ इति द्वितीये ऽष्टमः ॥ राजप्रश्नोत्तरं सूत्रं ब्रह्मणे हरिणोदि
तं ॥ कथं यामास नवमे श्लोकैर्भागवतं गुणैः ॥ तत्र प्रश्नावष्टकं ॥ यदधातुमतो ब्रह्मन् देहस्त्वेतेन जीवस्य कथं देहसंबंध इति तत्रोत्तरमाह ॥ आत्मनो दे
हेनमायामृते रेणात्मभवरूपस्यात्मनः ॥ अर्थेन दृश्येत देहादिना संबंधः अंजसा तत्त्वतो न घटेत ॥ अत्र हेतुः परस्येति ॥ स्वप्नद्रष्टुः यथा

सूत उवाच ॥ स उपामंत्रितो राज्ञा कथायामिति सत्पतेः ॥ ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥ २७ ॥ प्राह भागवतं नाम
पुराणं ब्रह्मसंमितं ॥ ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥ २८ ॥ यद्यत्परीक्षिदृषभः पांडूनामनुपृच्छति ॥ आनुपू
र्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥ २९ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे प्रश्नविधिर्नामाष्टमोऽध्यायः ॥
शुक उवाच ॥ आत्ममायामृते राजन् परस्यानुभवात्मनः ॥ न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा ॥ १ ॥ बहुरूप इ
वाभाति मायया बहुरूपया ॥ रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥ २ ॥ यर्हि वाव महिम्नि स्वे परस्मिन् कालमा
यायोः ॥ रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयं ॥ ३ ॥
स्वप्नदेहसंबंधो न घटते तद्वत् ॥ १ ॥ संसारोऽपि मायया एवेत्याह बहुरूपवालया ।
वा दिरूपः देवनरादिरूपश्च आभाति गुणेषु देहादिषु ॥ २ ॥ अत एव भक्तियोगेन तत्त्विरस्तत्ते मोक्षोऽपि घटत इत्याह यर्हीति ॥ वाव शब्द एवार्थे
स्व एव महिम्नि परात्मनि तत्त्वे रमेत ॥ कालमाययोः उभयोः प्रकृत्योः मरस्मिन्तरात्मयं अहं ममेति च त्यक्त्वा उदास्ते पूर्वं स्वरूपेणावतिष्ठते ॥ नन्वेतावन्
मात्रं ॥ यथा संमोहितो जीव आत्मानं त्रिगुणात्मकं ॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ॥ लोकस्याजा

३३

यद्यात्मनः परमेश्वरस्यापि देहसंवंधाविशेषात्कथं तद्वन्मायामोहः स्यादिति आशंक्य उत्तरमित्यादिना तत्राह ॥ आत्मनो जीवस्य तत्त्वविशु
द्ध्यर्थं तत्त्वज्ञानार्थं तद्वचनं च किं तत् ॥ यत्तपआदिना भजनं भगवान् ब्रह्मणे आह ॥ किं कुर्वन् ऋतं सत्यं विद्धि नेह रूपं दर्शयन् दर्शने हेतुः अव्य
लीकेन व्रतेन तपसा आदृतः सेवितः सन् ॥ अयं भावः ॥ जीवस्याविद्यया मिथ्याभूतदेहसंवंधः ईश्वरस्य तु योगमायया विद्धि न स्ती लीलाविग्र
हाविर्भावः इति महान् विशेषः ॥ अतस्तद्भजनान्मोहो नोपपद्यत इति ॥४॥ भगवद्वचनादेव तत्त्वज्ञानमित्येतत्प्रपंचयिष्यन् ब्रह्मणोपि तत्त्वज्ञानं त
न्मात्रादेवेति दर्शयितुमितिहासमाह ॥ स इत्यादिना परो गुरुः भक्तिरस्योपदेष्टा स्वधिष्ण्यं पद्मं आस्थाय अधिष्ठाय तस्य अधिष्ठानान्वेषणाय

आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतं ॥ ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः ॥४॥ स आदिदेवो जगतां
परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ॥ तां नाध्यगच्छद्दृशमत्र संमतां प्रपंचनिर्माणविधिर्यया भवेत् ॥५॥
स चिंतयन् द्व्यक्षरमेकदांभस्युपाशृणोत् द्विर्गदितं वचो विभुः ॥ स्पर्शेषु यत्षोडशमेकविंशं निष्किंचनानां नृप य
द्धनं विदुः ॥६॥

यत्पूर्वं जले निमग्नः पद्मान्निर्गत्य स्वधिष्ण्ये स्थित्वेत्यर्थः ॥ ऐक्षत ॥ तत्कथं स्रष्टव्यमित्यालोचितवान् तां दृशं प्रज्ञां अत्र सृष्टिविषये सं
मतां ॥ अव्यभिचारिणीं विधिः प्रकारः ॥५॥ सृष्टिं चिंतयन् कदाचित् द्व्यक्षरं वचः ॥ अंभसि उपाशृणोत् ॥ उपसमीपे श्रुतवान् ॥ ते अक्षरे दर्श
यति ॥ कादयो मावसानाः स्पर्शाः तेषु यत् षोडशं तकारः ॥ पश्चैकविंशं पकारः एवं तपो निर्दिशार्थं तदर्थमाह हे नृप निष्किंचनानां त्यक्तधनानां यद्धनं
विदुः ॥ येन तपोधना इति प्रसिद्धाः तच्च द्विर्गदितं तप तपेति लोके मध्यमपुरुषैकवचनं तस्य वीप्सा सा च विधिरूपा भगवत आज्ञेत्यर्थः ॥६॥

भा०द्वि
३४

एवं निशम्य तस्या वचसो वक्तुरिदिदृक्षया ॥ ततः प्रचलितः सन् दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केन चित्तं त्वयङ्गं निषण्ण इव तदात्मनो हितं
विमृश्य तपसि मनो धृतवानित्यर्थः ॥७॥ ततस्सहस्रः अखिलानां लोकानां तापनं प्रकाशकं तपः अतप्यत कृतवान् तपतपेत्येतस्य वचसोऽर्थ
अमोघं दर्शनं यस्य तस्य ॥ जितः अनिलः आत्मा मनश्च येन ॥ विजितानि उभयेन्द्रियाणि ज्ञानकर्मात्मकानि येन तपतां तपस्विनां मध्ये तपी
यान् अतिशयेन तपस्वी ॥८॥ तस्मै ब्रह्मणे स्वलोकं वैकुण्ठाख्यं परं श्रेष्ठं न यत्परं यतः परमुत्कृष्टमन्यन्नास्ति ॥ तमेव लोकमनुवर्णयति पंच

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः ॥ स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः
॥७॥ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः ॥ अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तप
तां समाहितः ॥८॥ तस्मै स्वलोकं भगवान्सभाजितः संदर्शयामास परं न यत्परं ॥ व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टव
द्भिर्विबुधैरभिष्टुतं ॥९॥ प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः ॥ न यत्र माया किमुतापरे हरेरनुव्रता
यत्र सुरासुरार्चिताः ॥१०॥ श्यामावदाताः शतपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपेशसः ॥ सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेक
निष्काभरणाः सुवर्चसः ॥

भिः व्यपेताः संक्लेशादयो यस्मात् स्वदृष्टवद्भिः सततप्राप्तवद्भिः यद्वा स्वस्य दृष्टं दर्शनं यस्मिन्नित्येषां आत्मवद्भिरित्य
र्थः ॥९॥ तयोः ताभ्यां मिश्रं सत्त्वं च न प्रवर्तते किंतु शुद्धमेव सत्त्वं कालविक्रमो नाशः ॥ अपरे रागलोभादयो न सन्तीति किमु वक्तव्यं अनुव्रताः
पार्षदाः ॥१०॥ श्यामाश्च ते अवदाताश्च पद्मनेत्राः पीताम्बराः सुरुचः अतिकमनीयाः सुपेशसः ॥ अतिसुकुमाराः उन्मिषन्तः स्वप्रभावन्तो म
णिप्रवेका मणिश्रेष्ठा येषु तानि निष्कानि पदकानि आभरणानि येषां ते सुवर्चसः ॥ अतितेजस्विनः ॥११॥

राम
३४

प्रवालादिवत् वर्चो वर्णो येषां ते ॥ परिस्फुरंति कुंडलानि मौलयो मालाश्च संति येषां ॥ ११ ॥ पार्षदानन्तु वर्णं पुनरपि लोकमन्तु वर्णयति ॥ भ्राजिष्णु
भिर्देदीप्यमानाभिः प्रमदोत्तमानां रुचः कांतयः ॥ ताभिः विद्योतमानाः सह विद्युद्भिः वर्त्तमानाः सविद्युतः ॥ ताभिरभ्रावलीभिः ॥ तत्र विद्यु
त्त्विषः अभ्रपंक्तयः इव विमानानि नभःस्वलोकः ॥ १२ ॥ श्रीः संपद्रूपिणी मूर्त्तिमती ॥ मानं पूजां विभूतिभिर्नानाविभवैः ॥ प्रेंखं आदोलं सं
श्रिता कुसुमाकरो वसंतस्तदनुगाः ॥ भ्रमरास्तैर्विविधं गीयमाना स्वयं तु प्रियस्य हरेः ॥ कर्म गायती भवतीति ॥ १३ ॥ यद्वधूतो लोकः

प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः ॥ ११ ॥ भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभि
र्महात्मनां ॥ विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः ॥ १२ ॥ श्रीर्यत्र रूपिण्युरुगायपाद
योः करोति मानं बहुधा विभूतिभिः ॥ प्रेंखं श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती ॥ १३ ॥ दद
र्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिं ॥ सुनंदनंदप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परि
सेवितं विभुः ॥ १४ ॥ भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननं ॥ किरीटिनं कुंडलिनं चतुर्भुजं पी
तांबरं वक्षसि लक्षितं श्रियाः ॥ १५ ॥ अध्यर्हणीयासनमास्थितं परं वृतं चतुःषोडशपंचशक्तिभिः ॥ १६ ॥

तत्र तस्मिन् ॥ १४ ॥ भृत्यानां प्रसादे अभिमुखं दृगेव आसवः स्वादुष्टूणां हर्षकारी यस्य तं ॥ प्रहसत्र हासः सहणालोचनं आननं यस्य ॥ वक्षसि स्थित
या च श्रिया लक्षितं अलंकृतमित्यर्थः ॥ १५ ॥ अध्यर्हणीयं वरिष्ठं सिंहासनं वृतः चतुः प्रकृतिपुरुषमहदहंकाररूपाः षोडशेंद्रियमहाभूताख्याः
पंचतन्मात्रारूपाः शक्तयस्ताभिर्वृतं ॥ १६ ॥

भा॰दि
२५

त्वैर्भगैः स्वाभाविकैः ऐश्वर्यादिभिः इतरयोगिषु असुलभैः स्वागतैः साधारणैरित्यर्थः ॥ एवं तत्पितृत्वे एव धामन्नु त्वत्स्वरूपे एव रममानं स्तुत ए-
वईश्वरः ॥१६॥ तस्य दर्शनेन प्रश्नोद्गारः तेन परिप्लुतं व्याप्तं अंतरं मनः करणं यस्य ॥ हृष्यंती रोमाविर्तांतन्नर्यस्य प्रेम भरोगाश्रुप्लुतलोचने यस्य
स ॥ विश्वसृक् ब्रह्मा ॥ पारमहंस्येन पथा ज्ञानमार्गेण ॥१७॥ तं ब्रह्माणं भगवान् अभाषे प्रजाविसर्गकार्ये निजशासनार्हणां त्वन्नियोगार्हं प्रजा-
विसर्गसमुपस्थितमिति वा व्ययः ॥ ईषत्स्मितेन रोचिर्दीप्तिः शोभा यस्यास्तया गिरा ॥१८॥ सिसृक्षया हेतुना चिरं संभृतेन तपसाः हे सध्रकू

युक्तं भगैः स्वैरितरत्र चाध्रुवैः त्वय्येव धामन्रममाणमीश्वरं ॥१६॥ तद्दर्शनाह्लादपरिप्लुतांतरो हृष्यत्तनुः प्रेमभराश्रु-
लोचनः । ननाम पादांबुजमस्य विश्वसृक् यत्पारमहंस्येन पथाधिगम्यते ॥१७॥ तं प्रीयमाणं समुपस्थितं तदा
प्रजाविसर्गे निजशासनार्हणं । बभाष ईषत्स्मितरोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥१८॥ श्रीभग-
वानुवाच ॥ त्वयाहं तोषितः सध्रक् वेदगर्भ सिसृक्षया । चिरं भृतेन तपसा दुस्तोषः कूटयोगिनां ॥१९॥ वरं वरय भ-
द्रं ते वरेशं माभिवांछितं । ब्रह्मञ्छ्रेयः परिश्रामः पुंसो मद्दर्शनावधिः ॥२०॥ मनीषितानुभावोयं मम लोकावलोकनं
यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥ ॥२१॥

तोषितः दुस्तोषः तोषयितुमशक्यः ॥१९॥ मा इति मां श्रेयसां फलानां परिश्रामः परिश्रमः
साधनप्रयासः मद्दर्शनमवधिर्यस्य सः तथा अतो धिकं तत्पुनः श्रमफलं नास्तीत्यर्थः ॥२०॥ एतच्च मत्कृपयैव त्वया प्राप्तमित्याह मनीषि-
तमित्यादि त्वध्यमिदं दातव्यमिति या ममेच्छा तस्यानुभावोयं ॥ कोसौ तमाह मम लोकस्यावलोकनं यत् तत् वैभवमेव तपोबलेन प्राप्तमिति त्वा तन्न
मन्यस्व ॥ तत्स्वत्रत्रोपि मल्लोकनत्वादित्याह ॥ रहसि तपसे इति यदुपश्रुत्य परमं तपश्चकर्थः कृतवानसि ॥ ॥२१॥

एम
२५

तदपि त्वाप्रति मयैवादिष्टमुपदिष्टं ॥ कदा तत्र तदाह सृष्ट्यारंभे त्वयि कर्मणि कार्ये ऽर्थे विमोहिते सति ॥ किंच ॥ तपो नाम ममैव शक्तिरित्याह ॥ तपो मे हृ
दयं मूर्तं रंगा शक्तिः आत्मा स्वरूपं ॥ यस्य ज्ञानमयं तप इति श्रुते ॥ २१ ॥ ग्रसामि संहरामि ॥ बिभर्मि पालयामि ॥ वीर्यं शक्तिः ॥ २२ ॥ अध्यक्षः अधिष्ठा
ता ॥ गुहायां बुद्धाववस्थितः यद्यपि वेद तथापि त्वत्प्रेरणा स्वपः ॥ २४ ॥ नाथमानस्य याचमानस्य उपतप्यमानस्येति वा हे नाथ ॥ नाथय प्रआशा
राय ॥ प्रयच्छ नाथितं याचितं ॥ नाथनं याच्ञोपतापैश्वर्याशीःषु ॥ नाथितमेवाह परं स्थूलं अवरं सूक्ष्मं च ते रूपे यथा जानीयां ॥ २५ ॥ यथा

यत्पारिष्टं मया तत्र त्वयि कर्मविमोहिते ॥ तपो मे हृदयं साक्षादात्माहं तपसोऽनघ ॥ २१ ॥ सृजामि तपसैवेदं ग्रसामि त
पसा पुनः ॥ बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ॥ २२ ॥ ब्रह्मोवाच ॥ भगवन् सर्वभूतानामध्यक्षोऽवस्थितो गुहां
वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितं ॥ २४ ॥ तथापि नाथमानस्य नाथ नाथय नाथितं ॥ परावरे यथा रूपे जानी
यां ते त्वरूपिणः ॥ २५ ॥ यथात्ममायायोगेन नानाशक्त्युपबृंहितं ॥ विलुंपन् विसृजन् गृह्णन् बिभ्रदात्मानमात्म
ना ॥ २६ ॥ क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते ॥ तथा तद्विषयां धेहि मनीषां मयि माधव ॥ २७ ॥ भगवच्छिक्षितम
हं करवाणि ह्यतंद्रितः ॥ नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥ २८ ॥

चतव क्रीडसि तथा त्वद्विषयां मनीषां मयि धेहि स्वत्प्रेरणा स्वपः ॥ ना
नाशक्त्युपबृंहितं विश्वं विलुंपन् संहरन् विविधं सृजन् बिभ्रत्पालयन् आत्मना स्वयमेव आत्मानं ब्रह्मादिरूपं गृह्णन् अनुगृह्णन् क्रीडसि ॥ २६ ॥ ऊर्णुते तंत
भिः आत्मानं आच्छादयति ॥ २७ ॥ नत्विं सृष्टे सृष्टिस्म एव तत्त्वज्ञानं प्रार्थयसे नेत्याह ॥ भगवता त्वया शिक्षितं अनुशिष्टं अतंद्रितः अनलसः सन् करिष्यामि
तर्हि किमनेन तत्त्वज्ञानेन तत्राह ॥ यस्मादेवं भूतात्तवानुग्रहात् प्रजासर्गमीहमानः कुर्वंत्रपि अहंकारादिभिर्वंधेन न बध्येयमिति ॥ २८ ॥

भा॰द्वि॰
३६

अवश्यं च मदो भविता ॥ ततः किं तत्कालमाभूदिति प्रार्थयते ॥ यावदिति ॥ भो ईश ॥ नेत्यथालौकिकस्य सख्युः सखेवाहं कृतः करस्पर्शनादिनास
मत्वेन सम्मानितः सन् प्रजासर्गरूपेण तव परिकर्मणि सेवायां स्थितः ॥ विक्लवः व्याकुल एव यावज्जनं विभजामि उत्तममध्यमादिभेदेन ह
जामि तावत्त्वत्तो मानादहमप्यजः ॥ ह्यजं तत्र इति मानिनो मे समुन्नद्धः उत्कटो मदो मा भूत् ॥ यद्वा मदो मा समुन्नद्धमा समुन्नद्धतां उद्रिक्तो न भवे
दित्यर्थः ॥२९॥ ज्ञानं शास्त्रोत्थं विज्ञानं अनुभवः रहस्यं भक्तिः तद्गोप्यमपि वक्ष्यामीत्यादि निर्देशात्तस्यांगं साधनं ॥३०॥ यावानस्वरूपतः प

यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनं ॥ अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धम-
दोऽजमानिनः ॥२९॥ श्रीभगवानुवाच ॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं ॥ सरहस्यं तदंगं च गृहाण गदितं
मया ॥३०॥ यावानहं यथाभावो यद्रूपगुणकर्मकः ॥ तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥३१॥ अहमे-
वासमेवाग्रे नान्यद्यत्सदसत्परं ॥ पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहं ॥३२॥

यथाभावः यादृक्सत्तावान् यानि रूपाणि गुणाः कर्माणि च यस्य ॥३१॥ एतदेव समग्रं परिशिनष्टि यावानित्यस्यार्थं स्फुटयति ॥ अहमेवा
ग्रे सृष्टेः पूर्वमासं ॥ स्थितः ॥ नान्यत्किंचित् ॥ यत्सत् स्थूलं असत् सूक्ष्मं परं तयोः कारणं प्रधानं ॥ तस्याप्यंतर्मुखतया तदा मय्येव ली
नत्वात् ॥ अहं च तदा आसमेव केवलं न चाकरकार्यो ॥ पश्चात्सृष्टेरनंतरमप्यहमेवास्मि यदेतद्विश्वं तदप्यहमस्मि प्रलये योऽवशिष्ये
त सोऽप्यहमेव अनेन चानाद्यनंतत्वादद्वितीयत्वाच्च परिपूर्णोऽहमित्युक्तं भवति ॥३२॥

राम
३६

यथात्ममायायोगेनेत्यनेन मायायाश्रपिदृष्टत्वाद्रूपमाणोपयोगित्वाच्च मायां निरूपयति ऋतेर्थं विनापि वास्तवमर्थं यद्यतः किमप्य-
निरूक्तं आत्मन्यधिष्ठाने प्रतीयेत । सदपि न प्रतीयेत तत् आत्मनो मम मायां विद्याद्यथाः भासो द्विचंद्रादिः तिर्थं विना प्रतीतौ
दृष्टांतः यथा नमः इति सतोपि प्रतीतौ तमो राहुर्यथा ग्रहमंडले स्थितोपि न दृश्यते ३३ यथा भावरूपेण तत्स्पष्टयति । यथा महाभूतानि भौ-
तिकेषु उच्चावचेषु अनुप्रविष्टानि न तानि । प्रविष्टानि तेषूपलभ्यमानत्वात् । अप्रविष्टानि च प्रागेव कारणरूपेण विद्यमानत्वात् । तथा तेषु भूतभौतिके-
ष्वहं न च तेष्वहं । एवंभूतानाममनमन्नेत्यर्थः ३४ साधनमाह । आत्मनस्तत्वजिज्ञासुनाएतावत्वमेव जिज्ञास्यं विचार्यं तदेवाह । अन्व-

ऋतेर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथाभासो यथा तमः ३३ यथा महांति भूतानि
भूतेषूच्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ३४ एतावदेव जिज्ञास्यं तत्वजिज्ञासुनात्मनः
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ३५ एतन्मतं समातिष्ठ परमेण समाधिना । भवान्कल्प-
विकल्पेषु न विमुह्यति कर्हिचित् ३६ श्रीशुक उवाच । संप्रदिश्यैवमजनो जनानां परमेष्ठिनं । पश्यतस्तस्य

यः कार्येषु कारणत्वेनानुवृत्तिः कारणावस्थायां च तेभ्यो व्यतिरेकः तथा जाग्रदादिष्ववस्थासु तत्तदात्मा तद्रूपमात्मनो न्यरुणद्धरिः
स्थितयान्वयः व्यतिरेकश्च समाध्यादौ । एवमन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा च तदेवात्मेति ३५ यत्स्वार्थितेनेहमानः प्रजासर्गमिति तत्र
साह्यं करोति । एतन्मतं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण । कल्पेषु विकल्पाः विविधाः सृष्टयस्तेषु विमोहं कर्तृत्वाभिनिवेशं यास्यती-
ति ३६ एवं संप्रदिश्य उपदिश्य जनानां परमेष्ठिनं परमे आधिपत्ये स्थितं ब्रह्माणं आत्मानं तद्रूपं न्यरुणत् अंतर्हितवान् ३७

अंतर्हितेइंद्रियार्थः प्रत्यक्षरूपो येन तस्मै बद्धांजलिः सन् ॥३८॥ तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः ॥ प्रवृत्त इत्याह प्रजापतिरिति पंचभिः ॥ प्र
जानां भद्रमन्विच्छन् विमृशन् ॥ स्वेव स्वार्थकाम्या स्वप्रयोजनेच्छा तया यमनियमानन्वतिष्ठत ॥३९॥ रिक्थादानां पुत्राणां मध्ये प्रियतमः
तं पितरं सेव्यमानः शीलादिना परितोषयामास ॥४०॥ किमिच्छन् विष्णोर्मायां विविदिषन् ॥४१॥ निशाम्य दृष्ट्वा तत्त्वेत्यर्थः ॥ पप्रच्छ ॥४२
भगवता चतुःश्लोक्यां संक्षेपेण प्रोक्तं विस्तरेण प्राह दशलक्षणं निलक्षणीयाश्चर्था विद्यंते यस्मिन् तत् ॥४३॥ तस्मै प्रदाय ततो भागवतं

अंतर्हितेंद्रियार्थाय हरये विहितांजलिः ॥ सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥३८॥ प्रजापतिर्धर्मपतिरेकदा नि
यमान्यमान् ॥ भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ॥३९॥ तं नारदः प्रियतमो रिक्थादानामनुव्रतः
शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥४०॥ मायां विविदिषन्विष्णोर्मायेशस्य महामुनिः ॥ महाभागवतो राजन्पि
तरं पर्यतोषयत् ॥४१॥ तुष्टं निशाम्य पितरं लोकानां प्रपितामहं ॥ देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ॥४२॥ तस्मा इदं
भागवतं पुराणं दशलक्षणं ॥ प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥४३॥ नारदः प्राह मुनये सरस्वत्यास्तटे नृप ॥ ध्याय
ते ब्रह्म परमं व्यासायामिततेजसे ॥४४॥ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं ॥ यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च

मध्यात्तातमित्याशयेनाह नारद इति ॥४४॥ भागव — कृत्स्नशः ॥४५॥ इति श्री भागवते महापुराणे द्वितीयस्कंधे नवमोऽध्यायः ॥९॥
तव्याख्यानेनैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह यदुतेति ॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ॥ इत्यादि वैराजात्पुरुषादिदं वि
श्वं कथमासीदिति यदहं त्वया पृष्टः तद्यथावदुपाख्यास्यामि कृत्स्नश इति ॥४५॥ इति द्वितीये नवमः ॥ ॥ ॥

ततोभागवतंव्याख्योह्यौर्वदशमेस्कंधे एवंप्रश्नोत्तरंवक्ष्यमाणमेवाद्यायपणिः ॥१॥ दशलक्षणपुराणमाहेत्युक्तानि दशलक्षणानि दर्शय
तिस्कुवेति ॥ मन्वंतराणि ईशानुकथाश्चेति द्वंद्वैकवत् सर्गादयोत्र दशार्था लक्ष्यंते ॥१॥ नन्वेवमर्थभेदाद्भाव्यपेदः स्यादित्याह ॥ दशमस्याश्रयस्य वि
शुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपं ॥ एकस्यैव प्राधान्यात्तात्पर्यरोषस्त्यर्थः ॥ तत्त्वत्रैनैवं प्रतीयते श्रुतश्राह ॥ श्रुतेन श्रुत्यैव वक्तं तद्यादि स्थि
नेषु स्तुतं न्यायाकाराद्वर्णयंति ॥ अर्थेन तात्पर्यवृत्त्या च तत्तद्व्याख्यानेषु ॥२॥ सर्गादीनां प्रत्येकं लक्षणमाह ॥ भूतानां आकाशादीनि मात्राणि च
शब्दादीनि इंद्रियाणि च ॥ धीशब्देन महदहंकारौ गुणानां वैषम्यात्परिणामात् ॥ ब्रह्मणः परमेश्वरात्कर्तृभूतादीनां यद्विराड्रूपेण विरूपत

श्रीशुक उवाच ॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः ॥१॥ दशमस्य
विशुद्ध्यर्थं नवानामिह लक्षणं ॥ वर्णयंति महात्मानः श्रुतेनार्थेन चांजसा ॥२॥ भूतमात्रेंद्रियधियां जन्म
सर्ग उदाहृतः ॥ ब्रह्मणो गुणवैषम्यात् विसर्गः पौरुषः स्मृतः ॥३॥ स्थितिर्वैकुंठविजयः पोषणं तदनुग्रहः ॥
मन्वंतराणि सद्धर्म ऊतयः कर्मवासनाः ॥४॥ अवतारानुचरितं हरेरस्यानुवर्तिनां ॥ पुंसामीशकथाः प्रोक्ता

ध्यजन्म सर्गः ॥ पुरुषो वैराजः तत्कृतः पौरुषः ॥ चराचरसर्गो विसर्ग इत्यर्थः ॥३॥ वैकुंठस्य भगवतो विजयेनानाख्यानोपबृंहिता ॥५
यः ॥ सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानं ॥ स्वभक्तेषु तस्यानुग्रहः पोषणं ॥ तदनुगृहीतानां सतां मन्वंतराधिपतीनां धर्मः क
र्मणां वासनाः ॥ वेत्रैवसंताने ॥ ऊयंते कर्मभिः संतन्यंते इत्यूतयः ॥ यद्वा ॥ वृध्यर्थात् तस्येषार्थाद्भावयते धीतो रिद्धरूपं ऊयंते कर्मभिर्धीयंते संश्लिष्यं
त इति वा ऊतय इत्यर्थः ॥४॥ हरेरवतारानुचरितं अस्यानुवर्तिनां च सत्कथा ईशानुकथाः प्रोक्ता इत्यर्थः ॥५॥

अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चात्तच्छक्तिभिस्त्वोपाधिभिः सह शयनं लयः निरोधः ॥ अन्यथारूपं अविद्ययाध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ॥ ६ ॥ आभासः सृष्टिः ॥ निरोधो लयश्च यतो भवति ॥ अध्यवसीयते ॥ प्रकाशते च स ब्रह्मेति परमात्मेति च प्रसिद्ध आश्रयः कथ्यते ॥ ७ ॥ आश्रयस्य स्वरूपमपरोक्षानुभवेन स्पष्टं दर्शयितुमध्यात्मादिविभागमाह ॥ योऽयमध्यात्मिकः पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः ॥ स एवाधिदैविकः चक्षुराद्यधिष्ठाता सूर्यादिः ॥ तत्रैकस्मिन्नेवोभयोर्द्विरूपो विच्छेदो यस्मात्स आधिभौतिकः ॥ चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः ॥ स हि पुरुष इति पुरुषस्य जीवस्योपाधिः स वा एष पुरुषोऽन्नरसमय इत्यादिश्रुतेः ॥ ८ ॥ एकमेकतराभावे इत्येतेषामन्योन्यसापेक्षसिद्धित्वेनाना

निरोधोस्यानुशयनमात्मनः सह शक्तिभिः ॥ मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥ आभासश्च निरोधश्च यतश्चाध्यवसीयते ॥ स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ७ ॥ योऽध्यात्मिकोयं पुरुषः सोसावेवाधिदैविकः ॥ यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः ॥ ८ ॥ एकमेकतराभावे यदा नोपलभामहे त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥

त्मत्वं दर्शयति ॥ तथा हि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति नापि द्रष्टा न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः ॥ न च तं विना करणं प्रवर्तते ॥ न च तद्विना दृश्यमित्येवमेकतरस्याभावे एकं नोपलभामहे ॥ तत्र तदा तत्त्रितयमालोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः ॥ तेषामपि परस्पराश्रयत्वमस्त्येवेति तद्व्यवच्छेदार्थं विशेषणं स्वाश्रयः अनन्याश्रयः स्वाभावेन्येषामाश्रयश्चेति ॥ तथा च भगवान्वक्ष्यति ॥ दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिध्यति यः स्वतः खे ॥ आत्मा यदेषामपरो य आद्यः स्वयानुभूत्याखिलसिद्धसिद्धिरिति ॥ एतेनैव व्यभिचारित्वात्तेषां मायामयत्वमप्युक्तं ॥ अत एव पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः लोकैरस्यावयवाः

उक्तमेवाध्यात्मादिविभागं प्रपंचयन् यदुक्तं हत्वयाष्टौ वैराजात्पुरुषादिदं ॥ यथासीत्तदुपाख्यास्ये इति यत् प्रतिज्ञातं तदुत्पत्तिप्रकारमाह पुरुष इत्यादिना ॥ पुरुषो वैराजः अंडं विनिर्भिद्य पृथक्कृत्य विनिर्गतः पृथक्स्थित इत्यर्थः ॥ अयनं स्थानं अन्विच्छन् विमृशन् यतः शुचिः स्वयं मतः शुचीः शुद्धाः अपः गर्भोदकसंज्ञाः अस्राक्षीत् असृजत् ॥ १० ॥ अप्स्ववात्सीन्नारायणो नाम निरुक्त्या प्रसिद्ध्यति ॥ तेन अप्स्ववासेन यद्यस्मात् पुरुषो नरः तस्मादुद्भवो यासां ताः नाराः आपो यस्य नमस्येति नारायण इत्यर्थः तदुक्तं आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः

पुरुषोंडं विनिर्भिद्य यदासौ स विनिर्गतः ॥ आत्मनोयनमन्विच्छन्नपोस्राक्षीच्छुचिः शुचीः ॥ १० ॥ तास्ववात्सीत्स्वसृष्टासु सहस्रपरिवत्सरान् ॥ तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ यदनुग्रहतः संति न संति यदुपेक्षया ॥ १२ ॥ एको नानात्वमन्विच्छन् योगतल्पात्समुत्थितः ॥ वीर्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा ॥ १३ ॥ अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः ॥ अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु ॥ १४ ॥ अंतः शरीर आकाशात्पुरुषस्य विचेष्टतः ॥ ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥ १५ ॥

पूर्वं तेन नारायणः स्मृत इति ॥ ११ ॥ तस्य प्रभावमाह द्रव्यमुपादानं कर्मादीनि निमित्तानि जीवो भोक्ता यस्यानुग्रहात् संति कार्यक्षमा भवंतीत्यर्थः ॥ १२ ॥ योग एव तल्पं शय्या तस्मात् वीर्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलं ॥ १३ ॥ तस्यैव प्रपंचः अथेत्यादिना ॥ १४ ॥ अंतः शरीरे य आकाशः तस्मात् क्रियाशक्त्यात् विविधं चेष्टमानस्य सतः ॥ ओजः इंद्रियशक्तिः बलं देहशक्तिः ततः क्रियाशक्त्यात्मकात् सूक्ष्माद्रूपात् प्राणः सूत्रात्मा महान् मुख्यः असुः प्राणः सर्वेषां ॥ १५ ॥

महत्वंदर्शयति ॥ प्राणाइंद्रियाणिप्राणांतंचेष्टांकुर्वंतंअनुपश्चात्प्राणानिचेष्टांकुर्वंति अपानंतंचेष्टांत्यजंतमनुपानंतिचेष्टांत्यजंतिराजानमनुभृत्या
इव ॥१६॥ क्षिपताचालयतानिर्भिन्नेनरुन्नेडादिकं ॥ विराट्जीवाभेदेनोपासनार्थमुक्तं ॥ अजायतेत्यस्य ॥ ततःजक्षतः भक्तुंपिपासितुमिच्छतइत्यर्थः ॥ प्राक्
प्रथमंनिरभिद्यतविभक्तमभूत ॥१७॥ तालुअधिष्ठानं ॥ जिह्वाइंद्रियंनानारसोविषयः ॥ वरुणश्चदेवताज्ञातव्याएवंसर्वत्रअधिष्ठानमिंद्रियदेव
ताविषयइत्येतद्द्रष्टव्यमनुक्तमप्यूह्यं ॥१८॥ विवक्षोः वक्तुमिच्छोः ॥ मुखतएववह्निर्देवतावाक्इंद्रियंव्याहृतंभाषणंतयोः ॥ इतिइंद्रियदेवताधीन

अनुप्राणंतियंप्राणाः प्राणंतंसर्वजंतवः ॥ अपानंतमपानंतिनरदेवमिवानुगाः ॥१६॥ प्राणेनाक्षिपताक्षुत्तृडंतराजा
यतेप्रभोः ॥ पिपासतोजक्षतश्चप्राङ्मुखंनिरभिद्यत ॥१७॥ मुखतस्तालुनिर्भिन्नंजिह्वातत्रोपजायते ॥ ततोनानारसोजज्ञे
जिह्वायायोऽधिगम्यते ॥१८॥ विवक्षोर्मुखतोभूम्नोवह्निर्वाग्व्याहृतंतयोः ॥१९॥ जलेचैतस्यसुचिरंनिरोधःसमजायते
नासिकेनिरभिद्येतांदोधूयतिनभस्वति ॥ तत्रवायुर्गंधवहोघ्राणोनसिजिघृक्षतः ॥२०॥ यदात्मनिनिरालोकमात्मानं
चदिदृक्षतः ॥ निर्भिन्नेह्यक्षिणीतस्यज्योतिश्चक्षुर्गुणग्रहः ॥२१॥ बोध्यमानस्यऋषिभिरात्मनस्तज्जिघृक्षतः ॥ कर्णौचनिर
भिद्येतांदिशःश्रोत्रंगुणग्रहः ॥२२॥

त्वंकर्मणोदर्शयति ॥१९॥ नभस्वतिप्राणवायौदोधूयतिदोधूयमानेत्यंतंप्रचलतिसतितत्रचनासिका
यंवायुर्देवतागंधंवहतीतितथाअनेनगंधोविषयोदर्शितः ॥ घ्राणइंद्रियंजिघृक्षतः गंधग्रहीतुमिच्छतः ॥२०॥ निरालोकंप्रकाशशून्यंआ
सीदितिशेषः ॥ निर्मक्षिकमितिवदव्ययीभावः तदाआत्मानंदेहंचकारादन्यच्चवस्त्वादिदिदृक्षतः ॥ अक्षिणीस्थानंज्योतिरादित्योदेवताचक्षुर्व राप
रिंद्रियं ॥ ततोगुणस्यरूपस्यग्रहः ग्रहणंअनेनरूपंविषयोदर्शितः ॥२१॥ ऋषिभिर्वैबोध्यमानस्याततआत्मनःप्रबोधनंग्रहीतुमिच्छतः ततोगुण ३९
ग्रहःशब्दग्रहणं ॥२२॥

मृदुत्वंच कािन्यं चलघुत्वं च गुरुत्वं च स्नाउष्णत्वं ईषदुष्णत्वं च शीतता चेत्यर्थः ॥ यद्यप्युष्णत्वमपीन्द्रियविषय एव तथापि तस्य जिघृक्षाभावान्नो
ष्णमित्युक्तं गुर्वुष्णेति पाठे ॥ यत्तादेशः ॥ छांदसः वक्तुर्न एतान् धर्मान् जिघृक्षतः त्वक् निर्भिन्ना ॥ त्वगिन्द्रियाधिष्ठानं चर्म जातमित्यर्थः ॥ तस्यां
प्राणिं इन्द्रियं ॥ महीरुहाश्च देवता जाताः ॥ वक्तुर्निर्हस्तेनानालितेलघुत्वगुरुत्वयोर्हानानत्वयोरपि त्वगिन्द्रियविषयत्वमिति पौराणिकाः ॥ तत्र त्वचि
श्रुतं वहिश्च वातो ऽस्तिः श्रोत्रत्वास्थितः कर्णयोर्निशाकर्थभूतः त्वग्बालस्त्रोत्राः स्पर्शोपेनगृह्यमर्थः ॥ त्वगिन्द्रियमेव बहिः कंडतिस्तिहितं स्पर्शं गृह्ण
न ॥ लोमशरे नोच्यते ॥ तत्र महीरुहाणां देवत्वं श्रुतं वहिश्च स्पर्शं गृह्णन् रतरेव त्वक्शरे नोच्यते तत्र वातो देवता ॥ तथाच तत्तीयेवक्ष्यति ॥ त्वचमस्य
विनिर्भिन्ना विविशुर्धिष्ण्यमोषधीः अंशेन लोमभिः कंडूं यैरसौ प्रतिपद्यते ॥ निर्भिन्नान्यस्य चर्माणि लोकपालो निलो विशत् ॥ घ्राणो नाशेन स्पे

वक्तुर्नो मृदुकािन्यलघुगुर्वोष्णशीततां ॥ जिघृक्षतस्त्वङ्निर्भिन्ना तस्यां रोम महीरुहाः ॥ तत्र चान्तर्बहिर्वातस्त्व
चा लब्धगुणो वृतः ॥ १३ ॥ हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया ॥ तयोस्तु बलवानिन्द्र आदानमुभयाश्रयं ॥ १४ ॥
गतिं जिगीषतः पादौ रुरुहाते ऽभिकामिका ॥ पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः ॥ १५ ॥

स्पर्शायेना ऽसौ प्रतिपद्यत इति ॥ तत्र चर्माणीति चर्मोपलक्षितां त्वगित्यर्थः ॥ घ्राणो नाशेनेति घ्राणो वायुर्व्याप्नेन त्वगिन्द्रियेणेत्यर्थः ॥ वद्धवस्त्र
तौ त्वकेव एवाशो निर्दिष्टः त्वङ्भिर्घ्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयः इति ॥ १३ ॥ रुरुहतुर्निर्भिन्नौ बलमिन्द्रियं इन्द्रो देवता तदुभया
श्रयं आदानं कर्म उक्तं ॥ १४ ॥ अभिकामिकां अभीष्टां विहितामित्यर्थः ॥ पद्भ्यां सह यज्ञो विष्णुर्देव हव्यं तदधिष्ठानरूपेणास्थितः ॥ कर्मभिरतिम
त्यात्योकर्मशक्तिरिन्द्रियं ॥ उक्तं हव्यं क्रियत इति गतिप्राप्यं यत्तार्थं द्रव्यं विशेषयन् उक्तं ॥ नृभिरिति व्याजिजीवेषपि इयमेव रीतिरिति दर्शयन् नरा
धिकारत्वं यत्तादीनां दर्शयति ॥ १५ ॥

मा॰ द्वि
५०

प्रजाअपत्यं आनंदो रतिः अमृतं स्वर्गादि तदार्थिनः शिश्नः अधिष्ठानं उपस्थइंद्रियं प्रजापतिश्चासीदिति ज्ञेयं तदुभयाश्रयं कामानां स्त्री
संभोगानां एवं विधि प्रियं सुखं वा ॥ २६ ॥ धातुमलं मुक्तान्नादीनां मलपरिशंत्यक्तमिच्छोः गुदं पायु मित्रोत्सर्गः ॥ अधिष्ठानेंद्रियदेवताविषयाः
॥ २७ ॥ पुर्याद्देहात्परः देहांतराणि आसिसृप्सोः सर्वतो गंतुमिच्छोः निरभिद्यत त्वक्तु स्पर्शः ॥ अपानतः अपगच्छतः पृथक्त्वं मरणं ॥
नाभ्यादीन्यधिष्ठानादीनि ताभ्यां हि प्राणापानयोर्बंधविश्लेषं मृत्युरिति प्रसिद्धं ॥ २८ ॥ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षि

निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः ॥ उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयं ॥ २६ ॥ उत्सिसृक्षोर्धातु
मलं निरभिद्यत वै गुदं ॥ ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥ २७ ॥ आसिसृप्सोः पुरः पुर्या नाभिद्वारम
पानतः ॥ तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयं ॥ २८ ॥ आदित्सोरन्नपानानामासन्कुक्ष्यन्त्रनाडयः ॥
नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ॥ २९ ॥ निदिध्यासोरात्ममायां हृदयं ततो मनस्ततश्चंद्रः संकल्पः

निरभिद्यत ॥

श्च सूत्राणि च नाड्यश्चासन् ॥ तत्र कुक्षिरधिष्ठानं अंत्राण्यन्नसंग्रहे करणमिंद्रियस्थानीयं नाड्यस्तु पान कामएवच ॥ २० ॥
संग्रहे ॥ तयोर्नाड्यन्त्रवर्गयोः क्रमेणानद्यः समुद्राश्च देवते तुष्टिः हृदरंभरणं पुष्टिः स्वार्थपरिणामतः ॥ स्थौल्यं तदाश्रये तदुभयनि
मित्ते तत्रान्नसंग्रहेच्छोः कुक्ष्यन्त्रसमुद्रतुष्टय इति च तुष्ट्यं ॥ पेयसंग्रहेच्छोः कुक्षिनाडीनदीपुष्टय इति विवेकः ॥ २९ ॥ निदिध्यासो
र्नितरां चिंतयितुमिच्छोः कामोभिलाषः ॥ हृदयं मनश्चंद्रः संकल्पाः अधिष्ठानादयः ॥ ३० ॥

एम
५०

तदेवमधिदैवादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्यां ॥ त्वक् स्थूलं चर्म तदुपरिस्थितं सूक्ष्मं त्वगार
घोक्षिताः ॥ द्वंद्वैकवद्भावेन निर्देशः सप्त धातवः ते भूम्यप्तेजोमयाः तेषां पंचभौतिकत्वेपि बाह्याकाशयोगाद्धारादिरूपेण संव
र्धकत्वाभावादेवमुक्तं ॥२१॥ गुणात्मकानि गुणाः शब्दादयो ग्राह्या येषां ॥ विषयाभिमुखस्वभावानीत्यर्थः ॥ गुणाः शब्दादयः भू
तादिरहंकारः ततः प्रकर्षेण भवंतीति तथा ॥ अहंकारकल्पितशोभनस्वभावाः न वस्तुतस्तथेत्यर्थः ॥ अत्र हेतुः ॥ यतो मन एवे

त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ॥ भूम्यप्तेजोमयाः सप्त प्राणो व्योमांबुवायुभिः ॥२॥ गुणात्मकानी
न्द्रियाणि भूतादिप्रभवा गुणाः ॥ मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥२१॥ एतद्भगवतो रूपं स्थूलं ते
व्याहृतं मया ॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ॥२२॥ अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणं ॥ अना
दिमध्यनिधनं नित्यं वाङ्मनसः परं ॥२४॥ अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते ॥ उभे अपि न गृह्णंति माया
सृष्टे विपश्चितः ॥२५॥

सर्वविकाराणामात्मा स्वरूपं बुद्धिस्तु तथाभूतार्थविज्ञानरूपिणी न तु परमार्थग्राहिणीति वैराग्यार्थमुक्तं ॥ अनेनै
व बुद्धिमनसोः स्वरूपं चोक्तं ॥२२॥ उपसंहरति एतदिति ॥ प्रकृत्या महदादिभिः ॥२२॥ स्थूलमुक्त्वा सूक्ष्मं समष्टिलिंगशरीरमाह ॥ अतः परं अस्य
कारणभूतं सूक्ष्ममतीन्द्रियं ॥ यतः अव्यक्तं ॥ तत्कुतः यतो निर्विशेषणं ॥ तत्कुतः अनादिमध्यनिधनं उत्पत्तिस्थितिलयशून्यं ॥ नित्यं सदैक
रूपं अपरं पारिशून्यमित्यर्थः ॥ अत एव वाङ्मनश्श्रुतिदूरं देकांतस्मात्परं ॥२४॥ उपासनार्थं भगवत्यारोपितं रूपद्वयमपवदति अमुनीति न

भा॰ द्वि
४१

यद्रूपेणाकर्मकइतियदुक्तंभगवताब्रह्मणांप्रतितत्प्रपंचयतिब्रह्मादिरूपाणितत्कर्माणिचाह ॥ सइत्यादिना ॥ इत्थंभावेनेयंतः शाक्तनेने नग्रंथेन ॥ सभगवान्ब्रह्मरूपधृक सन्वाच्यवाचकतयानामानिवाच्यतयारूपाणिक्रियाश्चधत्तेसृजतीत्यर्थः ॥ मायया सकर्मा सव्यापारः सन्वस्तुतत्वकर्मकः ॥ २६ ॥ एतत्प्रपंचयंतिप्रजापतीनितिसार्धैस्त्रिभिः द्वितीयांतानांधत्तेइत्यनेनान्वयः ॥ तत्रप्रजापत्यादीनिनामानितद्वाच्यानिरूपाणितत्तत्कर्माणिचतेषामिति ॥ पृथक्तत्तदवांतरभेदेन ॥ २७ ॥ २८ ॥ गिरीनित्यस्यानंतरंनृपेतिसंबोधनं ॥ २९ ॥ द्विविधाः स्थावरजंग

सवाच्यवाचकतयाभगवान्ब्रह्मरूपधृक ॥ नामरूपक्रियाधत्तेसकर्माकर्मकः परः ॥ २६ ॥ प्रजापतीन्मनून्देवानृषीन्पितृगणान्पृथक् ॥ सिद्धचारणगंधर्वांश्चविद्याध्रासुरगुह्यकान् ॥ २७ ॥ किंनराप्सरसोनागान्सर्पान्किंपुरुषोरगान् ॥ मातृरक्षः पिशाचांश्चप्रेतभूतविनायकान् ॥ २८ ॥ कूष्मांडोन्मादवेतालान्यातुधानान्ग्रहानपि ॥ खगान्मृगान्पशून्वृक्षान्गिरीन्नृपसरीसृपान् ॥ २९ ॥ द्विविधाश्चतुर्विधायेन्येजलस्थलनभौकसः ॥ कुशलाकुशलामिश्राः कर्मणांगतयस्त्विमाः ॥ ४० ॥ सत्वंरजस्तमइतितिस्रः सुरनृनारकाः ॥ तत्राप्येकैकशोराजन्भिद्यंतेगतयस्त्रिधा ॥ य

मरूपेण ॥ चतुर्विधाः जरायुजांडजस्वेदजोद्भिज्जरूपेण ॥ जलस्थलनभांसिओकांसि ॥ यदैकैकतरोन्याभ्यांस्वभावउपहन्यते ॥ ४१ ॥ येषांतान्यपिधत्तेइतिपूर्वेणान्वयः ॥ यद्वएतांशृणुयावत्यः कर्मगतयोयादृशीद्विजसत्तमेतितस्याविप्रसंगादनेनेवोत्तरमाह ॥ कुशलाउत्तमाः शुभाकुशलानीचाः मिश्राइतिपरांतरंमिश्राः मध्यमाः कर्मणांपुण्यपापमिश्राणांगतयः फलानि ॥ ४० ॥ सत्वादिभेदेनकर्मगतीर्विविच्यप्रपंचयति सत्वमितिसार्धेन ॥ सत्वादयस्तिस्रोगतयः सुरादिरूपाः अपारीनामत्रुपलक्षणार्थाः ॥ अन्याभ्यांगुणाभ्यांस्वभावोगुणः उपहन्यतेअभिभूयते ॥ ४१ ॥

ब्रह्मरूपेण सृष्टत्वमुक्त्वा विष्णुरूपेण पालकत्वमाह ॥ एष एव भगवान् तिर्यगाद्यवतारैरिदं विश्वं स्थापयन् पालयन् धर्मरूपेण पुष्णाति भोगैः संवर्धयति ॥ ४१ ॥ रुद्ररूपेण संहर्तृत्वमाह तत इति आत्मनः सकाशाद्यदिदं सृष्टं तदन्ते नियच्छति संहरति ॥ ४२ कर्तृत्वाद्यपवादेन स्वरूपमस्य स्तुवन्निमाह ॥ इत्थंभावेन सृष्टत्वादिरूपेण तस्माद्वा एतस्मादात्मन आकाशः संभूतः सोकामयत ॥ बहु स्यां प्रजायेयेत्यादिश्रुत्युपपत्त्या कथितः ॥ स्वरूपं तु परं केवलमेवंरूपेणैव द्रष्टुं नार्हति ॥ ४४ ॥ तत्किं यतः अस्य वि

एवं वेदं जगद्धर्ता भगवान् धर्मरूपधृक् । पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ॥ ४१ ॥ ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः । संनियच्छति कालेन घनानीकमिवानिलः ॥ ४२ ॥ इत्थं भावेन कथितो भगवान् भगवत्तमः । नेत्थंभावेन हि परं द्रष्टुमर्हति सूरयः ॥ ४४ ॥ नास्य कर्मणि जन्मादौ परस्यानुविधीयते । कर्तृत्वप्रतिषेधार्थं मायया रोपितं हि तत् ॥ ४५ ॥

अस्य जन्मादिकर्मणि परमेश्वरस्य इत्थंभावः कर्तृत्वं नास्ति श्रुत्यापि तात्पर्येण न प्रतिपाद्यते किं तु अनुविधीयते अनुवदिते ॥ किमर्थं कर्तृत्वप्रतिषेधार्थं हि यतो मायया तदारोपितं प्रकाशितं तथा च श्रुतिः ॥ निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनं ॥ इन्द्रो मायाभिः पुरुरूप ईयत इत्याद्याः ॥ ४५ ॥

भा॰टि॰
४२

उक्तमर्थमुपसंहरति ॥ अयं त्विति ॥ ब्रह्मणः संबंधी कल्पो महाकल्पः ॥ विकल्पो वांतरः तत्सहित उदाहृतः उदाहरणत्वेन संक्षेपत उक्तः
कथंभूतः ॥ यत्र महाकल्पे प्राकृताः महदादिसर्गाः अवांतरकल्पे च वैकृताः ॥ स्थावरादिसर्गाः ॥ इत्ययं विधिः ॥ प्रकारः ॥ अन्यैर्महाक
ल्पादिभिः साधारणः ॥४६॥ वक्ष्यमाणं विस्तारं प्रतिजानीते परिमाणं स्थूलं सूक्ष्मं च कल्पस्य लक्षणं व्याख्यास्य एवं रूप इति ॥ तद्विग्रहं च

अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः ॥ विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥४६॥ परिमाणं च
कालस्य कल्पलक्षणविग्रहं ॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ॥४७॥ शौनक उवाच ॥ यदाह नो
भवान्सूत क्षत्ता भागवतोत्तमः ॥ चचार तीर्थानि भुवस्त्यक्त्वा बंधून्सुदुस्त्यजान् ॥४८॥ क्षत्तुः कौशारवेस्त
स्य संवादोध्यात्मसंश्रितः ॥ यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ॥४९॥ ब्रूहि नस्तदिदं सौम्य विदुर
स्य विचेष्टितं ॥ बंधुत्यागनिमित्तं च तथैवागतवान्पुनः ॥ ॥५०॥

वांतरकल्पमन्वंतरादिरूपं विभागं च यथावद्विस्तरेण पुरस्तात् तृतीयस्कंधे व्याख्यास्यामि ॥ तत्र पाद्मं कल्पं अथो इति ॥ कार्त्स्न्येन नर
व्याप्यमानं शृणु ॥४७॥ पद्मस्थे सृष्ट्यादिनिरूपणं तदेव प्रासंगिकं श्रोतुकामः कथांतरं पृच्छति ॥ यदाहेति ॥ भुवः संबंधीनि तीर्थानि यद्वा राम
भुवः क्षेत्राणि चेति ॥४८॥ कौशारवेर्मैत्रेयस्य तस्य क्षत्तुश्च अध्यात्मज्ञानसंश्रितः संवादः ॥४९॥ पुनरागतवान् तत्र च निमित्तं ब्रूहि ॥५०॥ ४२

भा॰ द्वि
४२

एतावत्पृष्टइति ॥ अयमर्थः ॥ यत्त्वयं पृष्टस्तथ्य इत्थमेव राजापि शुकं पृष्टवान् ॥ शुकोपि विदुरमैत्रेयसंवादं पुरस्कृत्य येपूर्वं राज्ञा कृताः प्रश्नास्तदनुसारेणा सर्वं पुराणार्थमवोचत् तदेवाहं वोऽभिधास्यामिति थैव श्रावणेनेति ॥ ५ ॥ ॥ ॥ इति श्रीभागवतदीपिका

सूत उवाच ॥ एतावत्परीक्षिता पृष्टो यद्वोचन्महामुनिः ॥ तद्वोभिधास्ये शृणुत रा
ज्ञः प्रश्नानुसारतः ॥ ॥ ५ ॥ इति श्रीभागवते महापुराणेऽ ष्ट द स
हस्रांसंहितायां द्वितीयस्कंधे दशमोऽध्यायः ॥ १० ॥ श्रीरामचंद्राय नमः ॥ राम

यां द्वितीयस्कंधे दशमोऽध्यायः ॥ १० ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ गोपीनाथाय नमः ॥ ॥ गोविंदाय नमो नमः ॥ राम

राम
४२

श्रीगणेशाय नमः ॥ तृतीये तत्र षत्रिंशदध्यायैः सर्गवर्णनं ॥ ईशोकृपया गुणाक्षोभात्सर्गो ब्रह्माण्डसम्भवः १ ॥
तत्र तत्र प्रथमेऽध्याये वक्ष्ये हित्वा गतागुषः ॥ निर्गतस्योद्धवेनादौ संवादः कृन्हस्य च्युते १ ॥ अथ तृतीय
त्तिं ध्व्याख्या ॥ भगवद्दुत्तसंक्षेपोक्तं संक्षिप्तं वर्णितं पुरा ॥ प्राह भगवतं शेषप्रोक्तं विस्तरतः पुनः २
द्वेधा हि श्रीभागवतसंप्रदायप्रवृत्तिः ॥ एकतः संक्षेपतः श्रीनारायणब्रह्मनारदादिद्वारेण
अन्यतस्तु विस्तरतः शेषसनत्कुमारसांख्यायनादिद्वारेण ॥ तत्र द्वितीये श्रीनारायणब्रह्म
संवादेन संक्षेपतः चतुःश्लोक्या श्रीभागवतनिरूपितं ॥ तदेव ब्रह्मनारदसंवादेन दशलक्षणात
याकिंचिद्विस्तरेणोक्तं ॥ तदेव शेषोक्तमतिविस्तरतो वक्तुं तृतीयाद्यारंभः ॥ तत्र तृतीये प्रथमे ज्ञात्रे मैत्रेय

त्रेयसंगमश्चतुर्भिरध्यायैः ॥ ततोऽष्टभिः सविसर्गः सर्गप्रपंचः ततो विसर्गप्रस्तावेन सप्तभिर्वराहावतारः ॥ तत एकेन विसर्गसमाहारः त
स्यांशेन चतुर्भिः कपिलावतारः ॥ ततो नवभिः कपिलाख्यानमिति त्रयस्त्रिंशताध्यायैः तृतीयस्कंधसंगतिः ॥ तत्र द्वितीये यांते परिमाणं
च कालस्य कल्पलक्षणविग्रहं ॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु इति प्रतिज्ञातमर्थं विस्तरेण निरूपयितुं इतिहासं प्रस्तौति ॥

ॐ नमो भगवते श्रीवासुदेवाय ॥ सू क उ वा च ॥ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल ॥ क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृह
मृद्धिमत् ॥ १ ॥ यद्वा अयं मंत्रकृद्वो भगवानखिलेश्वरः ॥ पौरवेंद्रगृहं हित्वा प्रविवेशात्मसात्कृतं ॥ २ ॥ राजोवाच ॥ कुत्र क्षत्तुर्भ
गवता मैत्रेयेणास संगमः ॥ कदा वा सह संवाद एतद्वर्णय नः प्रभो ॥ ३ ॥ न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः ॥ तस्मिन्व
रीयसि प्रश्नः साधुवादोपबृंहितः ॥ ४ ॥ सू त उ वा च ॥ स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता ॥ प्रत्याह तं सुबहुवित्प्रीता

एवमिति द्वाभ्यां ॥ ऋद्धिमत् सर्वसंपद्भिः संपूर्णं ॥ १ ॥ किं वक्तुमित्याशंक्य त्यागानर्हमित्याह ॥ यद्वेति ॥ स्वगृहं वः पांडवानां मंत्र मास्रूयतामिति ॥ ५
कृतवरोत्यक्तानानुरूपं श्रीकृष्णः उद्धिसनिधानादयमिति निर्देशः ॥ पौरवेंद्रो दुर्योधनः तस्य गृहं हित्वा अनाहूत एव प्रविवेश ॥ तत्र हेतुः आत्मसात्कृ
तं स्वात्मीयत्वेन गृहीतं ॥ २ ॥ कुत्र भगवमस्यास्वभूव ॥ ३ ॥ वरीयसि श्रेष्ठे ॥ अल्पस्वार्थस्योदयो यस्मात्तथाभूतो न भवति साधुवादेन सतामनुमोदनेन उ
पबृंहितः संवर्द्धितः ॥ यद्वा साधो मैत्रेयस्य वादेन उत्तरेणाप्यायित इत्यर्थः ॥ ४ ॥ ५ ॥

भा० तृ
१

त्यागान्नर्हस्यापिगृहस्यत्यागेहेतुत्वेनकौरवापराधानाह यदेत्येकादशभिः एतेषांचनरानस्त्वाश्रयादित्येकादशेक्रियासंबंधः यविष्ठस्यकनिष्ठस्यपा
ण्डोः विबंधून्पितृहीनान् ॥ ६ ॥ कुरुदेवस्ययुधिष्ठिरस्यदेव्याः द्रौपद्याः आत्मनः स्नुषायाः स्वास्रैः स्वाश्रुभिः स्तनवक्षःकुंकुमानि ॥ शुभ्राणांवानद्धिते वधे
नहरंत्याः ॥ ७ ॥ सत्यावलंबस्यसत्याश्रयस्यवनात्प्रत्यागतस्य समयेनपूर्वकृतेनदायंयाचमानस्ययत्तदायंनप्रदातनरदेवो ॥ तमोमोहंजुषाणाः पुत्रंसेव
मानः अविवेकंवा ॥ ८ ॥ यानिवचनानिभीष्मादीनाममृतायनानिअमृतस्रावी ॥ राजाधृतराष्ट्रः दुर्योधनोवाउरुबहुनमेने ॥ क्षतोनष्टः पुण्यले

शुक उवाच ॥ यदातुराजास्वसुतानसाधून्पुष्णन्नधर्मेणविनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्यसुतान्विबंधून्प्रवेश्यलाक्षाभवनेददाह ॥ ६ ॥
यदासभायांकुरुदेवदेव्याः केशाभिमर्शंसुतकर्मगर्ह्यं ॥ नवारयामासनृपः स्नुषायाः स्वास्रैर्हरंत्याः कुचकुंकुमानि ॥ ७ ॥ द्यूतेत्व
धर्मेणजितस्यसाधोः सत्यावलंबस्यवनंगतस्य ॥ नयाचतोऽदात्समयेनदायंतमोजुषाणोयदजातशत्रोः ॥ ८ ॥ यदाचपार्थप्रहि
तः सभायांजगद्गुरुर्यानिजगादकृष्णः ॥ नतानिपुंसाममृतायनानिराजोरुमेनेक्षतपुण्यलेशः ॥ ९ ॥ यदोपहूतोभवनंप्रवि
ष्टोमंत्रायपृष्टः किलपूर्वजेन ॥ अथाहतन्मंत्रदृशांवरीयान्यन्मंत्रिणोवैदुरिकंवदंति ॥ १० ॥ राम राम

शोकस्यसः नतुस्वकीर्तिधर्मादिहेतुः किंतुराज्यप्राप्तिमात्रहेतुः ॥ पुण्यलेशएवासीत्तस्यापिनष्टत्वात्अनादृतवानित्यर्थः ॥ ९ ॥ इदानींविदुरस्यैव राम
कृतंपराभवंदर्शयतिषड्भिः यदापूर्वजेनमंत्रायचोपहूतोतएवगृहंप्रविष्टोमंत्रंपृष्टः सन्अथअनंतरंयदाहकिंमंत्रिणोऽद्यापियद्वैदुरिकंविदुरवाक्य १
मितिप्रसिद्धंवदंति ॥ १० ॥

तदेवाह । अजातशत्रोरिति त्रिभिः नवज्यागः अपराधं सहमानस्य दायं प्रतियच्छ देहि । यत्रापराधेऽप्यजेजैः सह वर्त्तमानो वृकोदरस्तूपोहिः क्रोधेन स्ववशत्व
नैते । यतयस्मात्त्वमत्यर्थं विभेषि ॥ ११ ॥ नत्वमभतादृशाः पुत्राः वहवः सन्तीति गर्वमाकृथा इत्याह । पार्थात्तमुर्व्वद्रञ्जात्मीयत्वेन गृहीतवान् सचदेवः त
त्रापि भगवान्नन्तप्राकृतः किंच । सहृत्त्विति देवविप्रैर्वैश्वेन्द्रादिभिर्वर्त्तमानः यतो सोऽतत्रैव विप्राः देवाश्चेत्यर्थः तस्य यामेव तत्र भावमात्रेन न त्वन्यत्र गतः किं
च । पटुदेवानां देवः पूज्यः यतो सोऽतत्रैव यदुप्रवीरः इत्यर्थः ॥ किंच । नृदेवेषु मण्डलेश्वरेषु दीव्यति प्रकाशत इति नृदेवदेवा राजानः विनिर्जिता अशेषा

अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः । सहानुजो यत्र वृकोदरो हि स्ववसनूहृषाय त्वमलं बिभेषि ॥ ११ ॥ पार्थात्त
देवो भगवान्मुकुन्दो गृहीतवान्सात्त्विति देवदेवः । आस्ते त्वदुर्व्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः ॥ १२ ॥ सएष दोषः
पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यमत्या । पुष्णासि कृष्णाद्विमुखो गतश्रीः त्यजाश्वशैवं कुलकौशलाय ॥ १३ ॥ इत्यूचिवां
स्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण । असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन ॥ १४ ॥

देवदेवाये न यतो सोऽतत्रैव सर्वे राजानः अतः पार्थानां दायं देहीति ॥ १२ ॥ दुर्योधनस्तं न मन्यत इति चेत्तत्राह । सएष भर्तृदोष एव गृहान्प्रविष्टआस्ते सो
षत्वं हेतुः पुरुषद्विट् श्रीकृष्णद्वेषकोऽसौ यं त्वमपत्यमत्या पुष्णासि न त्वपत्यमसौ । न पतत्यस्मादिति त्वपत्यं पुत्रः गताः श्रीर्यस्मात् सत्वमित्याक्रोशति
अतएनं अशैवममङ्गलं आशु त्यज । कथं पुत्रत्यागः तत्राह कुलस्य कौशलाय । त्यजेदेकं कुलस्यार्थे इति हि न्यायः ॥ १३ ॥ इत्यूचिवान् एवमुक्तवान् असौ
क्षत्ता सतां स्पृहणीयं शीलं यस्य सः । कर्णदुःशासनशकुनिसहितेन दुर्योधनेन असत्कृतः ॥ १४ ॥

भा॰ त
२

तिरस्कारमाह । क इति । दास्याः सुतो ऽत्र आह्वानानर्हः जिह्मः कुटिलः जिह्मतामाह यस्य बलिनान्नेन पुष्टस्तस्मिन्नेव प्रतीपः प्रतिकूलः परेषां कार्यं वर्त्तते अतः पुरान्निर्वास्यतां श्वसमानः ।
पुरान्निर्वास्यतां श्वसन्नु जीवमात्रशेष इत्यर्थः । पाठांतरे समसानवदमंगलः ।१५। अत्युल्बणैः कर्णघोरैर्बाणैर्वचोविशिखैः परुषवाक्यैर्मर्मसु ताडितोपि गतव्यथः । तत्र हेतुः मायां उरु बहुमानयन् अहो भगवन्मायाया माहात्म्यमिति तामेव तत्र हेतुं मन्यमानः तन्निःसारणात् पूर्वं स्वयमेव आयात ।

क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः । तस्मिन्प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः ।१५।
स इत्थमत्युल्बणकर्णबाणैः भ्रातुः पुरो मर्मसु ताडितोपि । स्वयं धनुर्द्वारि निधाय मायां गतव्यथो ऽयादुरु मानयानः ।१६।
स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि । अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यामधिष्ठितो यानि सहस्रमूर्त्तिः ।१७।
पुरेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्सरस्सु । अनंतलिंगैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः ।१८।

निर्जगाम । किं कृत्वा एते नूनं मारिष्यंतीति किं धनुषेति तस्य द्वारि धनुर्निधाय । यद्वा भीमादिभिः संगत्य अस्मानपि योत्स्यतीति माशंकीति धनुर्निधानं ।१६। ततो निर्गतस्य तीर्थाटनप्रकारमाह । स इत्यष्टभिः । गजाह्वयान्निर्गतः सन् । तीर्थं पादो यस्य तस्य हरेः पदानि क्षेत्राणि पुण्यचिकीर्षया अन्वाक्रमत प्रत्यपद्यत । कौरवाणां पुण्येन लब्ध इति तेषां भाग्यमेव तेन रूपेणागतमिति सूचितं । उर्व्यां सहस्रमूर्त्तिर्ब्रह्मरुद्राद्यनेकमूर्त्तिः सन् तीर्थपात् यानि अधिष्ठाय स्थितः ।१७। पुण्यानि यान्युपवनादीनि तेषु कुंजं लतादिगूढस्थानं अपंकानि तोयानि येषां तेषु सरित्सरस्सु च । तीर्थेषु आयतनेषु च क्षेत्रेषु

राम
२

किंच गां पर्यटन् व्रतानि चेरे ॥ अचरत् ॥ मेध्या पवित्रा विविक्ता असंकीर्णा वृत्तिर्जीविका यस्य स दाप्लुतः प्रतितीर्थं स्नातः अधःशयनं यस्य अवधूतः
असंस्कृतदेहः अवधूतवेषो वल्कलादिधारी ॥ अत एवान्यैरलक्षितः ॥ १९ ॥ एकस्यैव चक्रं सैन्यं यस्यां एकमेव राजचिह्नं श्वेतातपत्रं यस्यां तां ॥ अजिते
न श्रीकृष्णेन सहायेन ॥ २० ॥ तत्र प्रभासे परस्परस्पर्धया निमित्तभूतया सुहृदां कौरवाणां विनष्टिं विनाशं अशृणोत परस्परनाशे दृष्टांतः ॥ वेणुजं व

गां पर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतोधःशयनोऽवधूतः अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि ॥ १९ ॥ ६
इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवान्प्रभासं ॥ तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥ २० ॥
तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयं ॥ संस्पर्द्धया दग्धमथानुशोचन्सरस्वतीं प्रत्यगियाय तूष्णीं ॥ २१ ॥
तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः ॥ तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे ॥ २२ ॥
अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः ॥ प्रत्यंगमुख्यांकितमंदिराणि यद्दर्शनात्कृष्णमनुस्मरंति ॥ २३ ॥
ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च ॥ कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श ॥ २४ ॥

ह्निं संश्रयते यद्वनं तद्यथा स्वधर्षं भवति तथा प्रत्यक् उदङ्मामिमुखं ॥ २१ ॥ त्रितादीनामेकादश तीर्थानि तत्तन्नाम्ना प्रसिद्धानि आसेवितवान् ॥ २२ ॥ द्विजदेवैर्ब्रह्मर्षि
भिर्देवैश्च कृतानि ॥ अंगमंगं प्रति वर्त्तंते इति प्रत्यंगानि आयुधानि तेषु मुख्यं चक्रं तेनांकितानि मूर्द्धन्यहेमकुंभेषु चिह्नितानि मंदिराणि येषु तानि नानावि
धानि विष्णोरायतनानि क्षेत्राणि तीर्थानि च आसिषेवे ॥ येषां चक्रांकितमंदिरदर्शनात् ॥ २३ ॥ अतिव्रज्य अतिक्रम्य यावदुद्धवः प्राप्तस्तावत्स्वयमपि यमुना

भा॰तृ
४

स विदुरः प्राक्तनयं पूर्वं शिष्यं नीतिशास्त्रे पाठांतरे प्राक्प्रोनयो नीतिशास्त्रे येन तं प्रख्यातं स्वानां ज्ञातीनां भद्रं अपृच्छत प्रश्ने हेतुः भगवतः प्रजानां पोष्याणां ॥ २५ ॥ प्रथमं तावद्रामकृष्णयोः कुशलं पृच्छति कच्चिदिति द्वाभ्यां स्वनाभो पद्मः स्वनाभ्यः पाद्मो ब्रह्मा तस्यानुवृत्त्या प्रार्थनया इहावतीर्णौ कुशल मासाते वर्तेते ॥ कृतः क्षणोत्सवो यैस्ते सर्वेषां कृतोत्सवौ वा वितिवा तयोर्नित्यकुशलत्वेपि उक्तविशेषणविशिष्टे शूरसेनस्य गृहे कच्चिदासाते इति प्रश्नः

स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतः ॥ आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजानां ॥ २५ ॥ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ ॥ आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ॥ २६ ॥ कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः ॥ यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन ॥ २७ ॥ कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः ॥ यं रुक्मिणी भगवतोभिलेभे आराध्य विप्रान्स्मरमादिसर्गे ॥ २८ ॥ कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते ॥ यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् ॥ २९ ॥ कच्चिद्धरेः सौम्य सुतः सदृक्षः आस्तेग्रणी रथिनां साधु सांबः ॥ असूत यं जांबवती व्रताढ्या देवं गुहं यो विकया धृतोग्रे ॥ ३० ॥

यदूनां कुशलं पृच्छति नवभिः भामः श्वशुरः शौरिर्वसुदेवः यद्वा भामो भगिनी भर्ता कुंती वसुदेवस्य भगिनी अतो देवकी पांडो भगिनीति लोकव्यवहारः वरानर्थान् ॥ वदान्यः अत्युदारः वराणां तत्पतीनां तर्पणेन संतोषणेन सह ॥ २७ ॥ वरूथाधिपतिः सेनानीः आदिसर्गे पूर्वजन्मनि स्मरं कामं संतं अभिलेभे पुत्रं लब्धवती ॥ २८ ॥ सात्वतादीनामधिपः उग्रसेनः शतपत्रनेत्रः श्रीकृष्णः नृपासनाशां राज्याभिलाषं परिहृत्य प्राणभयेन दूरात्स्थितमित्यर्थः ॥ २९ ॥ हे सौम्य हरेः सुतस्तेन सदृक्षः सदृशः साधु सुखमास्ते गुहं स्वामिकार्तिकेयं अग्रे पूर्वजन्मनि यो भवान्या गर्भे धृतः तं ॥ ३० ॥

राम
४

रामसहाय

युयुधानः सात्यकिः इमं कुशलमास्ते फाल्गुनादर्जुनाल्लब्धं धनुर्वेदरहस्यं येन तदीयां अधोक्षजसंबंधिनीं ॥ ३१ ॥ श्वफल्कपुत्रो अक्रूरः बुधो विद्वान्
अनेन भगवंतं प्रपन्नः अनुरतः अत एवानमीवो निष्पापः भक्तोलिंगं यः चेष्टतल्लुठत् ॥ प्रेम्णा विभिन्नं विदीर्णं धैर्यं यस्य सः स्वस्ति इति शेषः
ते ॥ ३२ ॥ देवकनाम्ना यो भोजनृपस्तस्य पुत्र्या देवक्या विष्णुः प्रजा पुत्रो यस्याः तस्याः देवमातुरदितेरिव कच्चिच्छिवं ॥ यज्ञवितानरूपमर्थं त्रयी यथा यथा प्र
काशकतया विभर्त्ति तथा यं दधार ॥ ३३ ॥ सात्वतानामुपासकानां कामान् ऋध्यते पूरयतीति कामदुघः ॥ भगवत्त्वे हेतुः ॥ यं शब्दस्य शास्त्रस्य योनिं कारणं

> इमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः । लेभेंजसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापां ॥ ३१ ॥ कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः ॥ यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ॥ ३२ ॥ कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः ॥ या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थं ॥ ३३ ॥ अपिस्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः ॥ यमामनंति स्म ह शब्दयोनिं मनोमयं सत्वतुरीयतत्त्वं ॥ ३४ ॥

आमनंति वेदाः कुतः मनोमयं मनसः प्रवर्तकं ॥ तत्कुतः सत्वस्यांतःकरणस्य चतुर्विधस्य तुरीयं तत्त्वं चतुर्थमाधिदैवं चित्ताहंकारबुद्धिमनसां अंतः
करणभेदानां क्रमेण वासुदेवसंकर्षणप्रद्युम्नानिरुद्धा अधिष्ठातारः मनसश्चानिरुद्धो योनित्वं प्रसिद्धं ॥ मनः पूर्वरूपं वागुत्तररूपमिति तथा अन्योंतर आत्मा म
नोमय इति ऋक्तत्तस्य यजुरेव शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्षः इत्यादि श्रुतेस्तथा वर्णिकायां ॥ आत्मा बुध्या समेत्यार्थान्मनो युंक्ते विवक्षया ॥ मनः का
याग्निमाहंत्य स प्रेरयति मारुतं ॥ मारुतस्तूरसि चरन्मंद्रं जनयति स्वरमित्यादि ॥ ३४ ॥

भा॰द
५

अपिपित्वितकिंचित्त अन्येचत्वत्तिवरंतिनिजस्पदेहारिव्यतिरिक्तस्यात्मनोरैवंअभीकामंअनन्यवृत्त्याएकांतभक्तिभावेनयेसम्यगनुप्रवृत्ताः अनुरक्ताः हरी
कस्मत्पभामायाआत्मजाश्चचाहरेहमस्यगरस्मादिर्येषांतेपि ॥ २५ ॥ इदानींकृतहेतुतिषड्भिः अपिकिं ॥ त्वरोभ्यांह्ववाऊवतवर्नमानाभ्यांविजयाच्युता
भ्यांअर्जुनकृष्णाभ्यांधर्ममार्गेणधर्मोयुधिष्ठिरः सततंधर्ममर्यादांपरिपाति ॥ यस्यसभायांविजयानुवृत्त्याजयपरंपरयाअर्जुनस्यसेवयेतिवाएवंभूतंतय
सैश्वर्यमित्यर्थः ॥ २६ ॥ कृतागेषुकृतापराधेषुत्वकर्तृकमप्यंरीवृतमवऊकालानुचितितंअहिवरत्यमर्षीभीमः किंव्यमुंचत्रोवा ॥ गदयाविचित्रंविविधं

अपिस्विदन्येचनिजात्मदैवमनन्यवृत्त्यासमनुव्रताये हरीकपत्यात्मजचाहदेष्णगदादयः स्वस्तिचरंतिसौम्य ॥ २५ ॥ अपिस्व
दोर्भ्यांविजयाच्युताभ्यांधर्मेणधर्मः परिपातिसेतुं ॥ दुर्योधनोतप्यतयत्सभायांसाम्राज्यलक्ष्म्याविजयानुवृत्त्या ॥ २६ ॥ किंवा
कृताघेष्वघमत्यमर्षीभीमोहिवद्दीर्घतमंव्यमुंचत ॥ यस्यांघ्रिपातंरणभूर्नसेहेमार्गंगदायाश्चरतोविचित्रं ॥ २७ ॥ कच्चिद्यशोधारथयू
थपानांगांडीवधन्वोपरतारिरास्ते ॥ अलक्षितोयच्छरकूटगूढोमायाकिरातोगिरिशस्तुतोष ॥ २८ ॥ यमावुतः स्वित्तनयौपृथायाः
पार्थैर्वृतौपक्ष्मभिरक्षिणीव ॥ रेमातउद्दायमृधेस्वरिक्थंपरात्सुपर्णाविववज्रिवक्त्रात् ॥ २९ ॥

मार्गंचरतः ॥ २७ ॥ रथयूथपानांमध्येयशोधाः कीर्त्तिधारीयद्वास्वीयानांतेषांकीर्त्तिप्रदः उपरताअरयोयस्मात्यस्यशरकूटेनवाणसमूहेनगूढः आच्छन्नः
॥ २८ ॥ उतस्वित् ॥ किंस्वित् ॥ यमौनकुलसहदेवौरेमातेक्रीडेतइत्यर्थः माद्र्याः सुतावपिपृथायास्तनयौपृथायाः पुत्रैर्वृतौसुपर्णाविवरेमाते ॥ किंकृत्वापरात् दम
दुर्योधनात्स्वरिक्थंस्वीयराज्यंउद्दायआछिद्य ॥ वृत्रिवक्त्रात्इंद्रस्यमुखात्स्वरिक्थंअमृतंगरुडइवेति ॥ यद्वासुपर्णाविवेति ॥ यदिद्वौगरुडौअमृतमानयेतां
तर्हितद्वत् ॥ अक्षिणीवेतिपक्ष्माणिवारिगणात्वात्मधिः ॥ २९ ॥

५

पृथायाः किं तु कुशलं पृच्छ्येयत स्तस्याः पांडुना विना प्राणधारणमेवाश्चर्यमित्याह ॥ अहो इति ॥ म्रियते जीवति ॥ न चात्याश्चर्यं यतो ऽर्भकार्थे म्रि
यते ॥ न भोगार्थं तथापित्वाश्चर्यमेवेत्याह तेन न तथाभूतेन विना ॥ तदेवाह ॥ यस्त्विति धनुर्द्वितीयं सहायो यस्य ॥ ४० ॥ पृथा अर्भकार्थे जीवती
तियुक्तमेवेत्याह ॥ हे सौम्य तं धृतराष्ट्रं जीवंतमनुशोचामि ॥ तत्किमधः पतंतं तत्र हेतुः ॥ परेताय मृताय भ्रात्रे ॥ पांडवे तस्य द्रोहेण यो विदुद्रु

अहो पृथापि म्रियते ऽर्भकार्थे राजर्षिवर्येण विनापि तेन ॥ यस्त्वेकवीरोधिरथो विजिग्ये धनुर्द्वितीयः ककु
भश्चतस्रः ॥ ४० ॥ सोस्मानुशोचे तमधः पतंतं भ्रात्रे परेताय विदुद्रुहे यः ॥ निर्यापितो येन सुहृत्स्वपुर्या अहं
स्वपुत्रान्समनुव्रतेन ॥ ४१ ॥ सोहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः ॥ नान्योपलक्ष्यः पदवीं
प्रसादाच्चरामि पश्यन्गतविस्मयोत्र ॥ ४२ ॥

हे द्रोहं कृतवान् ॥ किंच जीवतोपि भ्रातुर्गर्भमापहृतवानित्याह येन सुहृत् भ्राता अहं स्व
पुर्याः सकाशान्निर्यापितः विवासितः ॥ ४१ ॥ अहो खल्वविस्मयो जानतोपि तस्यैवंविधं चेष्टितं यतस्त्वं साधुरपि दुःखं प्रापितोसीत्यत आह ॥ सोहं ह
रेः प्रसादात्तस्य पदवीं माहात्म्यं पश्यन्गतविस्मयः ॥ अत एव तेनान्योपलक्ष्यः गूढः सन्नहमेवं विचरामि ॥ कथंभूतस्य मर्त्यविडंबनेन नरवपुश्चर्या
च्छादकेन मायावेषानुकरणेन नृणां दृशश्चित्तवृत्तीः चालयतः भ्रामयतः ॥ ४२ ॥

ननु हरेः किमेवं लीलया येन स्वभक्तानां वनवासादिक्लेशो भवति स्वस्य च वैरोत्थे वधने द्यमादिपरो भवः तद्दूरं तेषां अपराधानन्तरमेव हननं नापरा
धोपेक्षेत्यत आह नूनं निश्चितं त्रिभिर्मदैः उत्पथानां मुहुश्चालयतां वधाद्धेतोः प्रपन्नानामार्तिं जिहीर्षया ईशः अघं समयप्रवृत्तं समर्थोपि कुरूणामघ
मुपेक्षत तदानीमेव तेषां वधे सर्वदुष्टराजवधो न स्यादित्याशयेनेत्यर्थः विद्यामदो धनमदः तथैवाभिजनो मदः एते मदा मदांधानां त एव हि
सतां दमाः इति त्रयो मदाः ४३ सर्वदुष्टवधार्थमेव भगवतो जन्मकर्माणि नान्यथेति कैमुत्यन्यायेनाह अजस्यापि जन्म अकर्तुरपि क

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः ॥ वधात्प्रपन्नार्तिजिहीर्षयेशोऽप्युपैक्षताघं भगवान्कुरूणां ॥ ४३ ॥
अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां ॥ नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतंत्रं ॥ ४४ ॥ तस्य
प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे ॥ अर्थाय जातस्य यदुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ॥ ४५ ॥ इति
श्रीभागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे प्रथमोऽध्यायः ॥ १ ॥

र्माणि पुंसां ग्रहणाय कर्मसु प्रवृत्तये अन्यथा न चेदेवं तर्हि भगवतो जन्मादिकथा तावदास्तां को वान्योपि गुणानां परो गुणातीतो देहयोगं क
र्मविस्तारं वार्हतीति ॥ ४४ ॥ तस्मादेवंभूतानित्यमायाविनोदकस्य कथां कथयेत्याह ॥ तस्य प्रपन्ना ये अखिललोकपालाः तेषां मन्येषां च स्वीये
अनुशासने स्थितानां अर्थाय प्रयोजनाय यदुषु यातस्य तीर्थं संसारतारणी कीर्तिर्यस्येति ॥ ४५ ॥ इति तृतीयस्कंधे प्रथमोऽध्यायः ॥ १ ॥

द्वितीये कृष्णविश्लेषात्तु शोचन्नथोद्धवः ॥ कृष्णबालचरित्राणि कृष्णस्यावर्णयत्स्फुटम् ॥ १ ॥ तदेवं विदुरवार्त्तां पृष्टस्योद्धवस्य श्रीकृष्णविरहोत्कंठ्या वेशेन प्रतिवचनासामर्थ्यमाह ॥ षड्भिः इतीति ॥ स्मारितः स्वरूपेयस्य ॥ १ ॥ एतदेव कैमुत्यन्यायेन प्रपंचयति द्वाभ्यां ॥ यः पंचवर्षोपि बाललीलयैवेति रहस्मकं वित्परिकल्प्य कल्पितैरेव साधनैः परिचर्यार्थं दृष्टमात्रा प्रातर्भोजनार्थं प्रार्थितोपि तद्भोजनं नैच्छत ॥ २ ॥ जरसं वृद्धत्वं गतः प्राप्तः ॥ ३ ॥ श्रीकृ

शुक उवाच ॥ इति भागवतः पृष्टः क्षत्त्रा वार्त्तां प्रियाश्रयां ॥ प्रतिवक्तुं न चोत्सेहे औत्कंठ्यात्स्मारितेश्वरः ॥ १ ॥ यः पंचहायनो मात्रा प्रातराशाय याचितः ॥ तन्नैच्छद्रचयन्यस्य सपर्यां बाललीलया ॥ २ ॥ स कथं सेवया तस्य कालेन जरसं गतः ॥ पृष्टो वार्त्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन् ॥ ३ ॥ स मुहूर्त्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं ॥ तीव्रेण भक्तियोगेन निमग्नः साधु निर्वृतः ॥ ४ ॥ पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः ॥ पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ॥ ५ ॥ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः ॥ विमृज्य नेत्रे विदुरं प्रीत्याहोद्धव उत्स्मयन् ॥ ६ ॥

ष्णांघ्रिसुधया साधु निर्वृतः तस्यामेव तीव्रेण विवशत्वापादकेन भक्तियोगेन भृशं निमग्नश्च ॥ ४ ॥ पुलकैरुद्भिन्नानि उत्थितानि सर्वाण्यंगानि यस्य मीलंत्या दृशा शुचः अश्रूणि मुंचन् तेन विदुरेण पूर्णार्थः कृतार्थो लक्षितः यतो भगवति यः स्नेहः तस्य प्रसरः पूरः तस्मिन् संप्लुतो निमग्नः ॥ ५ ॥ भगवानेव लोकः तस्मात् नृलोकं देहानुसंधानं उत्स्मयन् यदुकुलसंहारादि भगवच्चार्यस्मरणेन विस्मयं प्राप्नुवन् ॥ ६ ॥

भा॰ तृ॰
७

श्रीकृष्णविरहेण संतप्यमानः प्रत्याह श्रीकृष्ण एव द्युमणिः सूर्यः तस्य निम्लोचेऽस्तमये सति अजगरेण कालमहासर्पेण गीर्णेषु गिलितेषु नो गृहेषु तत्तृष्णानुबंधनात्किं तु ब्रूयां ।७। अनुशोचन्नाह दुर्भगो भाग्यहीनः ये संवसंतोऽपि श्रीहरिं यमिति न विदुः यथा क्षीरसमुद्रे जातमुडुपं तदा तत्रस्थमीनाः केवलं कमनीयः कश्चिज्जलचर इत्येवं विदुः न त्वमृतमय इति तद्वत् यद्वा जले प्रतिबिंबितं उडुपं यथेति ।८। भाग्यहीनत्वादेव न विदुः न तु ज्ञानसामग्र्यभावादित्याह इंगितं चित्तस्थं जानंतीतीति तथा पुरुत्वातिशयेन प्रौढा निपुणाः एकस्मिन्नेव स्थाने आरमंतीति तथा एवंभूता अपि भ

उद्धव उवाच
कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह । किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहं ।७। दुर्भगो बत लोकोऽयं यदवो नितरामपि । ये संवसंतो न विदुर्हरिं मीना इवोडुपं ।८। इंगितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः । सात्वतामृषभं सर्वे भूतावासममंसत ।९। देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः । भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ ।१०। प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणां । आदायांतरधाद्यस्तु स्वबिंबं लोकलोचनं ॥११॥

तानामावासं सर्वेश्वरं संतं सात्वतानामृषभं सात्वतश्रेष्ठं अमन्यत ।९। ये यादवास्ते देवमायया व्याप्ताः यादवोऽयमस्मद्बंधुरिति वदंति ये च शिशुपालादयः परे वान्यदसदाश्रिताः निंदंति तेषां वाक्येन आत्मनि हरौ उप्तात्मनो निक्षिप्तचित्तस्य मादृशस्य बुद्धिर्न भ्राम्यते मोहं न प्राप्यते अन्ये तु मूढा एवेत्यर्थः । कोऽसौ हरिरित्यपेक्षायामाह प्रदर्श्येति न तप्तं तपो यैः अतो वितृप्ता दृशो येषां तेषां स्वबिंबं मूर्तिं एतावंतं कालं दर्शयित्वा यो अंतर्हितवान् लोकस्य लोचनमादाय आच्छिद्य तादृशस्यान्यस्य विलोकनीयस्याभावात् ॥११॥

राम
७

तदेव विंबं वर्णयति त्रिभिः यन्मर्त्यलीलास्वौपयिकं योग्यं स्वस्यापि विस्मयजनकं यतः सौभगर्द्धेः सौभाग्यातिशयस्य परं पदं परा काष्ठा ॥ भूष
णानां भूषणान्यंगानि यस्मिन् ॥१२॥ दृशां स्वस्त्ययनं परमानंदकरं ॥ त्रिभुवनस्थो लोकः प्राणिमात्रं अयमिदानीमिह विवेऽर्वाक्सृतौ अर्वाचीन
संसारनिर्माणे मनुष्यनिर्माणे वा यत्कौशलं नैपुण्यं तत्कार्त्स्न्येन गतमुपसंहृतं नातः परं तस्य कौशलमस्तीत्येवं मेने तन्मूर्तेर्विधातुः सृज्यत्वा
भावेपि लोकस्य दृष्टिरियमुक्ता ॥१३॥ अनुरागेण प्लुतो व्याप्तः हासः रासो विनोदः लीलावलोकश्चतैः स्वकृतसम्मानाद्येनंतरं प्रतिलब्धो मानो याभि

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं ॥ विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गम् ॥१२॥ यद्धर्म
सूनोर्वत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः ॥ कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत ॥१३॥
यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः ॥ व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः ॥१४॥
स्वशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा ॥ परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान्यथाग्निः ॥१५॥

स्ताः दृग्भिः सह अनुप्रवृत्ता गच्छंतं तमेवानुगता धियो यासां ताः कृत्यशेषा यासां ताः असमापितकृत्या एव तस्थुः ॥१४॥ एवंभूतविंबप्रदर्शने कारणमा
ह ॥ स्वीयान्येव शांतान्यशांतानि च रूपाणि तत्र शांतरूपेषु इतरैः पीड्यमानेषु अनुकंपितः कृतानुकंपः आत्मा यस्य अजोपि जात आविर्भूतः महार
तद्रूपेणानित्यसिद्ध एव वाग्निर्यथा काष्ठेष्वाविर्भवति तद्वत् ॥ अजस्य जन्मनि हेतुः महांश्चासौ महत्तत्त्वमंशः कार्यलेशो यस्य व्यक्तस्य तन्महदंशेन युक्त इति ॥१५॥

भा॰त्री
४

नन्वकृतोसौ परावराणामीशः पारतंत्र्यमनुभवतीत्याशंक्याह द्वाभ्यां मामप्येतद्दुर्वितर्क्यं दुर्घटं च खेदयति तदेवाह वसुदेवगेहे बंधनागारे यज्जन्म तद्विडंबनं अनुकरणं ननु च किमिह खेदकारणं तत्राह यस्मात्तत्राविर्भावः कंसभयादिव निलीय व्रजे वासश्च कालयवनादिरिपुभयादिव पुरात् स्वस्थानान्निरगमः तत् पलायनं ॥१६॥ एतच्च हरेश्चरितं स्मरतो मम चेतः कर्मभूतं दुनोति व्यथयति तदेव दर्शयति यदाहेति हे तात हे अंब वसुदेव देवकी प्रसीदतं प्रसादं कुरुतं न कृता निष्कृ

मां खेदयत्येतदजस्य जन्मविडंबनं यद्वसुदेवगेहे ॥ व्रजे च वासोऽरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनंतवीर्यः ॥१६॥ दुनोति चेतः स्मरतो ममैतत् यदाह पादावभिवंद्य पित्रोः ॥ तातांब कंसादुरुशंकितानां प्रसीदतं नोऽकृतनिष्कृतीनां ॥१७॥ को वा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान्विजिघ्रन् ॥ यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार ॥१८॥ दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोपि सिद्धिः ॥ यां योगिनः संस्पृहयंति सम्यक् योगेन कस्तद्विरहं सहेत ॥१९॥ तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविंदं ॥ नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य ॥२०॥

तिः शुश्रूषणादिभिः तेषां नोऽस्माकमिति वक्तुं वचनं तदा नामाद्यमभिप्रायं ॥१७॥ ननु तर्ह्ययमीश्वर एव किं न स्यात् तत्र तु श्रद्धामात्रमेतत् तत्राह त्रिभिः को वा अमुष्यांघ्रिसरोजयो रेणुं तमपि विजिघ्रन् सेवमानः विस्मर्तुमीशीत शक्नुयात् । विस्फुरन् भ्रूविटपः भ्रूलता स एव कृतांतस्तेन ॥१८॥ ननु तस्येश्वरत्वं साधनीयं भवद्भिरपि दृष्टमित्याह दृष्टेति ॥ यां सिद्धिं सम्यक् योगेन प्राप्तुमिच्छंति ॥१९॥ आहवे युद्धे पार्थस्यास्त्रैः पूताः निःपापाः संतः ॥२०॥

राम
४

तदेवं परमैश्वर्यमत्यपि यदुग्रसेनानुवर्तित्वं तन्नु नरस्मानन्त्यं तं मथयतीत्याह ॥ त्वयिमत्र यएवंभूतस्य तत्तत्कैंकर्यं नो स्माह्विग्लापयतीति उ
न्नैरेणान्वयः ॥ न साम्यातिशयो यस्य यमपेक्ष्यान्यस्य साम्यमपि तिशयश्च नास्तीत्यर्थः ॥ तत्र हेतवः त्र्यधीशां गुहेपाराणामीशः स्वाराज्यलक्ष्म्या
परमानंद स्वरूपसंपत्यैव प्राप्तसमस्तभोगः बलिं करं अर्हणं वा ॥ हरद्भिः समर्प्यद्भिः चिरकालीनैर्लोकपालैः किरीटाग्रेणोरडितं स्तात
पादपीठं यस्य प्रणमतां किरीटस्पर्शनघृष्टिरेव यत्र तत्त्वेनोत्तेम्नते ॥ ११ ॥ आग विदुर भृत्यान् मत्वान् ॥ उग्रसेने यत्किंकरत्वं तदेवाह परमेष्ठि

त्वयं न साम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ॥ बलिं हरद्भिश्चिरलोकपालैः किरीटकोघ-
डितपादपीठः ॥ ११ ॥ तत्तस्य कैंकर्यमलं भृतान्नो विग्लापयत्यंग यदुग्रसेनं ॥ तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोध-
यद्देव निधारयेति ॥ १२ ॥ अहो बकीयं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ॥ लेभे गतिं धात्र्युचितां ततोऽ-
न्यं कं वा दयालुं शरणं व्रजेम ॥ १३ ॥

धिष्ण्ये राजासने निषण्णं आसीनं स्वयं तिष्ठन् हे देव अवधारयेति न्यबोधयत् विज्ञापितवान् ॥ १२ ॥
एवमनुवृत्तिः कृपयैवेति सर्वं च प्रकारिष्वपि तस्य कृपालुतां दर्शयन्नाह ॥ अहो आश्चर्यं कृपालुतायाः हंतुमिच्छया पिप्पलनयोः संभृतं कालकूटं
विषयमपाययत ॥ बकी पूतना असाध्वी दुष्टापि धात्र्याय शोदायाः उचितां गतिं लेभे भक्तवेषमात्रेणापि सद्गतिं दत्तवानित्यर्थः ततोऽन्यं कं वा भजेम ॥ १३ ॥

भा॰तृ॰
९

नच भागवतानेव भगवाननुगृह्णातीति नियम इति सत्यं अहमन्यानप्यहं भागवतानेव मन्ये। यतो भागवता एव ते विभावव्यानाभिनिवेशेन भगवंतमपरोक्षं पश्यंतीत्याह॥ संरंभः क्रोधावेशः तेन मार्गेणाभिनिविष्टं चित्तं येषां तान्॥ अत एव ये संयुगे संग्रामे तार्क्ष्यः कश्यपः तस्य पुत्रं गरुडं अंसे स्कंधे सुनाभायुधं चक्रायुधो हरिर्यस्य तं॥ अचक्षत ददृशुः॥ तस्मात्तेषामनुग्रहो युक्त एवेत्यर्थः विज्ञातिच॥ तस्मात्केनाप्युपायेन म

मन्येऽसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान्॥ ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमापतंतं॥ २४॥ वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने॥ चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः॥ २५॥ ततो नंदव्रजमितः पित्रा कंसाद्विबिभ्यता॥ एकादश समास्तत्र गूढार्चिः सबलोऽवसत्॥ २६॥ परीतो वत्सपैर्वत्सांश्चारयन्व्याहरद्विभुः॥ यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे॥ २७॥ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसां॥ रुदन्निव हसन्मुग्धबालसिंहावलोकनः॥ २८॥

मनः कृष्णे निवेशयेत इति॥ २४॥ इदानीं तस्यांतर्धानप्रकारं वक्तुमादित आरभ्य तच्चरितं संक्षेपतः कथयति॥ वसुदेवस्य भार्यायां जातः भोजेंद्रः कंसः तस्य बंधनागारे अस्याः पृथिव्याः शं सुखं चिकीर्षुः॥ अजेन ब्रह्मणा याचितः सन्॥ २५॥ पित्रा हेतुभूतेन नंदव्रजं इतः गतः संवत्सरान्॥ गूढार्चिर्गुप्ततेजाः॥ २६॥ व्याहरत् आक्रीडत्॥ कूजद्भिर्द्विजैः पक्षिभिः संकुलिता व्याप्ता अंघ्रिपा यस्मिन्॥ २७॥ रुदन्निवेति इवशब्दस्य यथायोग्यं सर्वत्राप्यन्वयः॥ मुग्धो बालश्च यः सिंहः तद्वदवलोकनं यस्य॥ २८॥

रम
९

ष एवाधिकं वयः प्राप्तः स तु लक्ष्म्याः शोभाविशिष्टं परं निकेतनं ॥ सितागो वृषाद्यस्मिन् नानावर्णा गोसंघा रेणुना शरं कर्दमेन् वेगात् यस्य च
रिरमत रमया मया ॥ १९ ॥ व्यमुञ्चत् जघान ॥ क्रीडनकान् तरणारी निर्मिताः शक्तिहारी न् यथा ॥ २० ॥ विपन्नान् मृतान् गोपान् गावः इति ताश्च

ष एव गोधनं लक्ष्म्या निकेतं सितगोवृषं ॥ चारयन् अनुगान् गोपान् रणद्वेणुर रीरमत ॥ १९ ॥ प्रयुक्तान् भोजरा
जेन मायिनः कामरूपिणः ॥ लीलया व्यमुञ्चत् तांस्तान् बालः क्रीडनकानिव ॥ २० ॥ विपन्नान् विषपानेन
निगृह्य भुजगाधिपं ॥ उत्थाप्यापाययद्गावस्तत्तोयं प्रकृतिस्थितं ॥ २१ ॥ अयाजयद्गोसवेन गोपराजं द्विजोत्त
मैः ॥ वित्तस्य चोरुभारस्य चिकीर्षन् सद्व्ययं विभुः ॥ २२ ॥ वर्षतीन्द्रे व्रजः कोपाद्भग्नमानेति विह्वलः ॥ गोत्रली
लातपत्रेण त्रातो भद्रानुगृह्णता ॥ २३ ॥ शरच्छशिकरैर्मृष्टं मानयन् रजनीमुखं ॥ गायन् कलपदं रेमे स्त्री
णां मंडलमंडनः ॥ २४ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे द्वितीयोऽध्यायः ॥ २ ॥ ॥ एम एम

त्याप्यतरे वतोयं प्रकृतिस्थितं निर्विषं ॥ २१ ॥ इंद्रपूजाभंगेन कृता गवां पूजैव गोसवस्तेन गोपराजं नंदं वित्तस्य चेति चकारादिंद्रस्य मा
नभंगं कर्तुं वित्तस्य उरुभारस्य अतिसमृद्धस्य ॥ २२ ॥ कोपाद्वर्षति गोत्रः पर्वत एव लीलातपत्रं तेन हे भद्र ॥ २३ ॥ मृष्टमुज्ज्वलं स्त्रीणां मंडयतीति तथा ॥ २४ ॥
इति द्वितीयः

भा॰ त
१०

तृतीये मथुरामेत्य व्रजाद्रामस्य धारिकं ॥ यत्र तद्द्वारकायां च कृष्णेन तत्स्ववर्ण्यत ॥ १ ॥ शमित्यव यपित्रोः सुखस्य विकीर्षयेत्यर्थः तुंगान राजमवा
त ॥ रिपुयूथानानाथंकं संव्यापारं विनिष्कर्षणं पित्रोः सुखार्थं ॥ १ ॥ ब्रह्मवेदं सविस्तरं षडंगादिसहितं ॥ पंचजनोदरविदारणाद्वारा पुत्रमानीयेत्य
र्थः ॥ २ ॥ भीष्मककन्याया रुक्मिण्या ये राजानः समाहूताः कृत्वमार्षे ॥ समाहूता इतिपाठे आकृष्टा इत्यर्थः ॥ केन साधनेन श्रियो लक्ष्म्याः सव
र्णेन समानेन रूपेण ॥ यद्यपि तया केवलं श्रीकृष्ण एवाहूतः न सर्वे तथापि तस्यालावण्यं तेषामागमने हेतुरिति ते येवाहूता इत्युच्यते ॥ एषांमि

उ॰ ॥ वक्तु ॥ च ॥ ततः सच्चागत्य पुरं स्वपित्रोः विकीर्षया शं बलदेवसंयुतः ॥ निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमो
जसोर्व्यां ॥ १ ॥ सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरं ॥ तस्मै प्रादाद्वरं पुत्रं मृतं पंचजनोदरात ॥ १ ॥ समाहूता भीष्मक
कन्यया ये श्रियः सवर्णेन बुभूषयैषां ॥ गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ॥ २ ॥

षतां पश्यतां मूर्ध्नि पदं दधत् तया सह गांधर्ववृत्त्या परस्परसमयरूपया बुभूषया भवितुमिच्छया जहार कथं भूतां स्वभागं लक्ष्म्या अंशत्वात्तया त्वा
त्मनोर्पितत्वाच्च सुपर्णः सुपतनः यद्वा सुपर्णो रवत्स्वभागं सुधामित्यर्थः ॥ यद्वा श्रियः रुक्मिण्याः समानं वर्णं रूपवाचकं यस्य सः श्रियः सवर्णो
रुक्मी तेन समाहूताः शिशुपालादयः किमर्थं भीष्मककन्यायाः सह तेषां बुभूषया भूतिं भवत्वित्येतदर्थं तत्र शिशुपालस्याद्यानं वरत्वेन बुभूष
या जरासंधादीनां तद्विवाहोत्सवेन शेषं पूर्ववत ॥ २ ॥

रा॰ प
१०

क्रमतो वृषभान् अविद्धनासिकान् विद्धनासिकान्कृत्वेति वा तैर्वृषभैः तद्धनेन नवभग्नो मानो येषां तथापितां गृध्यतः कामयमानान् अत
एवातान् शत्रून् अमतोऽगतः तच्छ्रैरकृत एव जघान ॥ ४ ॥ मदान्धुरितात्याः कुंडलेशा तं स्वर्गागत स्वराजघ्नः स्वतत्रोपि ग्रामाः स्वीपरतं ग्रहेव प्रियायाः
सत्यभामायाः प्रियं विधातुमिच्छुः द्युतरुं पारिजातमानीतवान् पदस्थैर्यं पत्रिमिन्नं तं श्रीकृष्णं वज्री स्त्रीप्रेरितः योद्धुमभ्यधावत् स्वकार्यसाधके नयु

क्रमतो विद्धनसोऽरमित्वा स्वयंवरे नाग्नजितीमुवाह ॥ तद्ग्रमानानपि गृध्यतोऽमानत्रजघ्ने कृतः शार्ङ्गधृतः स्वशौर्यैः ॥ ४ ॥ प्रियं
प्रभुर्ग्रामस्य च प्रियाया विधित्सुरार्च्छत्तरुं पदस्थैः ॥ वज्राङ्घवन्नं खगराणोरुषांधः क्रीडामृगो नमयं वधूनो ॥ ५ ॥ हतेऽथ
लवसुधायां स्वतंत्रस्त्वाहवेनाभौमं स्थितं धरित्र्या ॥ आमंत्रितस्तन्ननयायशेषं स्वात्रादतः प्रमाविवेश ॥ ६ ॥ तत्राहृतास्तान
देवकन्याः कुजेन दृष्ट्वा हरिमार्गं वेडुं ॥ उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ॥ ७ ॥ आलोक्य इत्येक
स्मिन्नानागारेषु योषितां ॥ सविधि जगृहे पाणीन्तत्र नृपः स्वमायया ॥ ८ ॥

ह्रोतेन धमह्रत्सवधुन्ना एवेत्याह ॥ क्रीडामृग इति अनुपवज्री ॥ ५ ॥ हतेनाथेन वसुधाभौमस्थितं हतं हत्वा भौमं दृष्ट्वा ततस्मान्मात्राधरित्र्या आभुम्य्या आमंत्रितः प्राथि
तः सन्तुतस्तेन नयाय भगदत्ताय दत्तशेषं राज्यं दत्वा ॥ ६ ॥ तत्रातः प्रोक्तेन भौमेन याश्चाहृताः स्ताः प्रहर्षश्च व्रीडा च अनुरागश्च तैः प्रहिताः प्रेरिताः ये
वलोकास्तैः जगृहुः स्वीकृतवत्यः ॥ ७ ॥ आलोक्योषितां पाणीन् तत्रच्छतत्र नृपः सदस्सविधि विवाहोचितप्रकारसहितं यथा भवति ॥ ८ ॥

भा०न ॥

सर्वतः सर्वैर्गुणैः स्वतुल्यानि प्रकृतेर्मायाया विविधं भवनं विलासः तदिच्छया यद्वा प्रकृतेरीहतो विविधं भवितुमिच्छया ९ कालः कालयवनः रुंध
तस्य आवृण्वतः मुकुंदः भीमादिभिर्निमित्तमात्रैः स्वयमेव अजीघनत ॥ घातितवान् तेषां तेन स्वयं हतानां तेजः प्रभावं कीर्तिं वा रक्षन्वा ॥ १० ॥ शंवरद्वि
विदवल्वलानन्यानपि कांश्चित् प्रद्युम्नरामादिभिर्घातयत अघातयत ॥ घातयदिति वा पाठः ॥ दंतवक्त्रादीन् स्वयमवधीत ॥ नृपान्घातयदिति

तावपत्यान्यजनयदात्मतुल्यानि सर्वतः ॥ एकैकशस्ता दश दश प्रकृतेर्विबुभूषया ॥ ९ ॥ कालमागधशाल्वादीननीकैः रुंधतः पु
रं ॥ अजीघनत्स्वयं दिव्यं स्वपुंसां तेज आदिशन् ॥ १० ॥ शंवरं द्विविदं बाणं मुरं वल्वलमेव च ॥ अन्यांश्च दंतवक्त्रादीनवधीत्कां
श्च घातयत् ॥ ११ ॥ अथ ते भ्रातृपुत्राणां पक्षयोः पतिता नृपाः ॥ चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥ १२ ॥ सकर्णदुःशासन
सौबलानां कुमंत्रपाकेन हतश्रियायुषं ॥ सुयोधनं सानुचरं शयानं भग्नोरुमूर्व्यां न ननंद पश्यन् ॥ १३ ॥ कियान्भुवोयं क्षपितो
रुभारो यद्द्रोणभीष्मार्जुनभीममूलैः ॥ अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनां ॥ १४ ॥

नृपाः कथंभूताः कुरुक्षेत्रमापततां आगच्छतां येषां बलैः सैन्यैर्भूः सर्वापि चचाल चकंपे ॥ १२ ॥ सकर्णेत्यादि हताश्रीः आयुश्च यस्य ॥ भग्नोरुं भग्नः ऊरुर्यस्य तं उर्व्यां
शयानं पश्यन्नपि न ननंद संतोषं न प्राप ॥ १३ ॥ अननंदने प्रकारमेवाह ॥ कियानिति द्रोणादिभिर्मूलैः कारणभूतैः यद्यपि अष्टादशाक्षौहिणी
युक्तः उरुभारो क्षपितः उरुभारो भुवः अयं कियान् अत्यल्प इत्यर्थः ॥ यस्मान्मदंशैः प्रद्युम्नादिभिर्मदंशभूतैः दुर्विषहं बलमास्ते ॥ १४ ॥

एम ॥

नचाप्यन्यउपायः प्रभवति ॥ किंतु मधुना यस्मात्परः सर्वतोपरः तेन तस्मात् तत्र विलोचनानामेषां विवादो यदा भविष्यति तदा इत्याने वैषां वधोपायः श्रुतोऽस्त्यन्यो नास्ति ॥ एकात्मानोपि सम्पद्यन्ते यतिस्वयमेव विवादेनातईधीरत्वित्यर्थः ॥१५॥ एवं श्लोकद्वयेनोक्तं क्रमेणाभवित त्वात्तस्योपायपित्वा ॥१६॥ धृतः रक्षितः ॥१७॥ अनुजैः सह ॥१८॥ सांख्यं प्रकृतिपुरुषविवेकं ॥१९॥ स्निग्धोपः स्मितसहितो । कलोकात्तेन

मिथ्यापदेशैषां भविता विवादो मध्यामरा तात्र विलोचनानां ॥ नेषां वधोपाय इयानतोन्यो मप्पुद्यते तर्दधते स्वयं स्म ॥१५॥ एवं प्रचिन्त्य भगवान् स्वराज्ये स्थाप्य धर्मजं ॥ नंदयामास सुहृदः साधूनां वर्त्म दर्शयन् ॥१६॥ उत्तरायां धृतः पूर्वैर्वंशः साधुभिमन्युना ॥ स वै द्रोणपुत्रास्त्रसंछिन्नः पुनर्भगवता धृतः ॥१७॥ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः ॥ सोपि क्ष्मामनुजै रक्षन् रेमे कृष्णमनुव्रतः ॥१८॥ भगवानपि विश्वात्मा लोकवेदपथानुगः ॥ कामान् सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः ॥१९॥ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया ॥ चरित्रेणानवद्येन श्रीनिकेतेन चात्मना ॥२०॥ इमं लोकममुं चैव रमयन् सुतरां यदून् ॥ रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः ॥२१॥ तस्यैवं रममाणस्य संवत्सरगणान् बहून्

पीयूषकल्पया सुधातुल्यया ॥ पाठांतरे सुधाप्रवाहरूपया आत्मना देहेन ॥२०॥ क्षणदार गृहमेधेषु योगेषु विरागः समजायत ॥२२॥ यया दत्तः क्षणः उत्सवः उत्सवो यासां ताः स्त्रियः तासां क्षणैः सौहृदं यस्य सः ॥२१॥ गृहमेधेषु गृहधर्मेषु योगेषु कामभोगोपायेषु विरागो

यदात्वाधीनेष्वपि भगवतो विरागः तदा दैवाधीनेषु को विश्रमेत विश्वासं प्रीतिं वा कुर्यात् ॥ योगेन चेत योगेश्वरं श्रीकृष्णमनुव्रतः ॥ १३ ॥ शेपुः
शापं ददुः भगवतो मते अभिप्राये कोविदा अभिज्ञाः ॥ १४ ॥ ५ वयःशीलादिबहुगुणोपेताः याः गावः ताः ॥ १६ ॥ कन्याश्च वृत्तिकरीं जीविका

दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् ॥ को विश्रम्भेत योगेन योगेश्वरमनुव्रतः ॥ १३ ॥ पुर्यां कदाचित्क्रीडद्भिर्यदुभो-
जकुमारकैः ॥ कोपिता मुनयः शेपुर्भगवन्मतकोविदाः ॥ १४ ॥ ततः कतिपयैर्मासैर्वृष्णिभोजान्धकादयः ॥ ययुः प्रभास-
संहृष्टा रथैर्देवविमोहिताः ॥ १५ ॥ तत्र स्नात्वा पितॄन्देवानृषींश्चैव तदम्भसा ॥ तर्पयित्वाथ विप्रेभ्यो गावो बहुगु-
णा ददुः ॥ १६ ॥ हिरण्यं रजतं शय्यां वासांस्यजिनकंबलान् ॥ यानं रथानिभान्कन्या धरां वृत्तिकरीमपि ॥ १७ ॥ अन्नं चो-
रुरसं तेभ्यो दत्वा भगवदर्पणं ॥ गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः ॥ १८ ॥ इति श्रीभागवते महापुरा-
णे तृतीयस्कंधे विदुरोद्धवसंवादे तृतीयोऽध्यायः ॥ ३ ॥ उद्धव उवाच ॥ अथ ते तदनुज्ञाता भुक्त्वा पीत्वाथ वारुणीं

पर्याप्तं ॥ १७ ॥ भगवदर्पणं यथा भवति गोविप्रार्था असवो येषां ॥ १८ ॥ इति श्रीभा० गोर्थ ॥ तथा विप्रेरितज्ञानादुद्धवेनैर्मर्मपस्पृशः ॥ १ ॥
दीपिकायां तृतीयस्कंधे तृतीयोऽध्यायः ॥ चतुर्थे वंशनिधनं श्रुत्वा मत्तानलब्धपे ॥ उद्धवस्योपदेशेन ज्ञानं मैत्रेयमागमन् ॥ ते ब्राह्म-
•णैरनुज्ञाताः वारुणी पैष्टी मदिरा ॥ १

वाहण्ये वमैरेयं तस्य दोषेण निम्लोचति अस्तं गच्छति सति मर्द्दनं कदनं ॥ २ ॥ उपस्पृश्य सरस्वत्यां आचम्य ॥ ३ ॥ अहं चोक्तः पूर्वमेव द्वारका-
यां ॥ ४ ॥ तदभिप्रेतं कुलसंहारादिकं ॥ ५ ॥ कृतकेतं कृतावासं ॥ अकेतनं अनाश्रयं ॥ ६ ॥ विरजं विरजस्कं शुद्धसत्वमयं विदितं लक्षितं कौ-
शं कौशेयं ॥ ७ ॥ अधिश्रित्य उपरि स्थापयित्वा अपाश्रितः पृष्ठतो वष्टब्धः अर्भकः बालः कोमलो श्वत्थो येन तं ॥ त्यक्तं पिप्पलं विषयसुखं ये-

तेषां मैरेयदोषेण विषमीकृतचेतसां ॥ निम्लोचति रवावासीद्वेणूनामिव मर्द्दनं ॥ १ ॥ भगवान्स्वात्ममायाया गतिं तामवलो-
लोकय सः ॥ सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ॥ २ ॥ अहं चोक्तो भगवता प्रपन्नार्त्तिहरेण ह ॥ वदरीं त्वं प्रयाहीति स्वकुलं
संजिहीर्षुणा ॥ ४ ॥ अथापि तदभिप्रेतं जानन्नहमरिंदम ॥ पृष्ठतो न्वगमं भर्त्तुः पादविश्लेषणाक्षमः ॥ ५ ॥ अद्राक्षमेकमासीनं
विचिन्वन्दयितं पतिं ॥ श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनं ॥ ६ ॥ श्यामावदातं विरजं प्रशांतारुणलोचनं ॥ दोर्भिश्चतुर्भि-
र्विदितं पीतकौशांबरेण च ॥ ७ ॥ वाम ऊरावधिश्रित्य दक्षिणांघ्रिसरोरुहं ॥ अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलं ॥ ८ ॥ त-
स्मिन्महाभागवतो द्वैपायनसुहृत्सखः ॥ लोकाननुचरन्सिद्ध आससाद यदृच्छया ॥ ९ ॥ तस्यानुरक्तस्य मुनेर्मुकुंदः प्रमोद-
भावानतकंधरस्य ॥ आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच ॥ १० ॥

रामकृष्ण

येन तथापि अकृशं आनंदपूर्णं ॥ ८ ॥ द्वैपायनः सुहृत्सखा वयस्यः सुहृद्गुरुपुत्रत्वात् पराशरशिष्यो मैत्रेयः सत्यर्थः ॥ ९ ॥ प्रमोदेन भावेन चावनता कं-

तमेनमीप्सितमहं अंतःस्थितो वेद वेदरे वेधिरानेहेतुः विश्वसृजां वसूनां च मिलितानां सत्रे हे वसो इति पुरा पूर्वजन्मनि त्वं वसुरभूः तदा मत्प्राप्तिकामेन त्वया इष्टः पूजितः अतः तत्साधनं ददामि दास्यामि अन्यैर्मत्प्राप्त्युखैर्दुःप्राप्यं ॥ तस्य भावमभिनंदति स एष भावो जन्मांते भावानां मध्ये च रमः यद्यस्मिन् मदनुग्रहः आसादितः लब्धः यत्तु नमीरह एकांते विशदानुकृत्या एकांतभक्त्या ददृश्वान् दृष्टवानसि ॥ एतद्दिष्ट्या महज्ज्ञातमित्य

श्रीभगवानुवाच ॥ वेदाहमंतर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः ॥ सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः ॥११॥ स एष भावः चरमो भवानामासादितस्ते मदनुग्रहो यत् ॥ यन्मां नृलोकान् रह उत्सृजंतं दिष्ट्या ददृश्वान्विशदानुवृत्त्या ॥१२॥ पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ॥ ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदंति ॥१३॥ इत्यादृतोक्तः परमस्य पुंसः प्रतीक्षणानुग्रहभाजनोहं ॥ स्नेहोत्थरोमा स्खलिताक्षरस्तं मुंचन् शुचः प्रांजलिराबभाषे ॥१४॥ को न्वीश ते पादसरोजभाजां सुदुर्लभोर्थेषु चतुर्ष्वपीह ॥ तथापि नाहं प्रवृणोमि भूमन् भवत्पदांभोजनिषेवणोत्सुकः ॥१५॥

र्थः नृलोकान् नरशरीरेण जीवतः तेषां लोकान् उत्सृजंतं वैकुंठं गच्छंतमित्यर्थः ॥१२॥ ददामीति यदुक्तं तदेव निर्दिशति पुरा पूर्वस्मिन् पाद्मे कल्पे आदिसर्गे सर्गोपक्रमे मम महिमा लीला अवभास्यते येन तत् ॥१३॥ इत्येवमादृतम् उक्तः आदृतोक्तः अहं प्रतीक्षणं कृपावलोक एवानुग्रहः तस्य भाजनं पात्रभूतः पाठांतरे प्रतिक्षणमनुग्रहस्य पात्रमिति ॥ शुचः शोकान् मुंचन् त्यजन् आबभाषे उक्तवानस्मि ॥१४॥ नहि त्वत्तो ज्ञाननिरतिमात्रकामोहं किंतु त्वन्निषेवणो ॥ एव त्सुकः त्वयि चाधरमानाचरणात् हस्ता मे मोहो भवति ॥ अतस्त्वत्तत्त्वज्ञानं देहीति प्रार्थयितुमाह कोन्विति चतुर्षु धर्मादिषु तथापि ज्ञानं हे न प्रवृणोमि

अद्यरमानावरणं दर्शयति कर्माण्यपनीहस्यनिस्पृहस्यनिः क्रियस्यवा ॥ अभवस्यच जन्मनो भवो जन्म कालात्मनस्तववारिभयात् दुर्गाश्रयः प
लायनं च ॥ त्वात्मनिरतिर्यस्यतस्यवह्वीभिः स्त्रीभिः गृहस्थाश्रमइतियत् ॥ इहास्मिन् विषयेविदुषामपिधीः संशयेनखिद्यति ॥ १६ ॥ किं च यन्मन्त्रे
ष्वप्रसक्तेषुसत्स्वमामाहूयवेश्महोरछेः अपरछेः अकुंठितः कालादिना ॥ अखंडः संततः सदात्मा संशयादिरहितो बोधो विद्याशक्तिर्यस्यग्रुध
वतत्रत्वत ॥ अप्रमत्तः अवहितः सन् ॥ १७ ॥ त्वात्मनस्तवरहः रहस्यं तत्वं तस्य प्रकाशकं ॥ कस्मै ब्रह्मणे पूर्वं नाम त्वमापि ॥ नोऽस्माकं ग्रहणाय अ

कर्माण्यपनीहस्यभवोऽभवस्यते दुर्गाश्रयोऽथारिभयात्पलायनं ॥ कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः खिद्यति धीर्वि
दामिह ॥ मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः ॥ पृच्छेः प्रभो मुग्ध इवाप्रमत्तः तन्नो मनो मोहयतीव देव ॥ १७ ॥
ज्ञानं परं स्वात्मरहः प्रकाशं प्रोवाच कस्मै भगवान् समग्रं ॥ अपि स्मनो ग्रहणाय भर्तर्वद सांजसा यद्वृजिनं तरेम ॥ १८ ॥ इत्यावेदि
तहार्दाय मह्यं स भगवान्परः ॥ आदिदेशारविंदाक्ष आत्मनः परमां स्थितिं ॥ १९ ॥ स एवमाराधितपादतीर्थादधीततत्त्वात्मवि
बोधमार्गः ॥ प्रणम्य पादौ परिवृत्य देवमिहागतोऽहं विरहातुरात्मा ॥ २० ॥ सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभो ॥ गमिष्ये दयि

पिहं मयादि योग्यं तर्हि वद भर्तः स्वामिन् यतः यतः वृजिनं संसारदुःखं अंजसा यासेन तरिष्यामः ॥ १८ ॥ आवेदितो हा तं तस्य वरदस्याश्रममंडलं ॥ २१ ॥
र्दो हृदि स्थितो मि प्रायो येन तस्मै ॥ १९ ॥ आराधितपादो भगवान् स एव तीर्थं गुरुस्तस्मात् अधीतः अधिगतः तत्वात्मविबोधस्य परमार्थात्मज्ञानस्य
मार्गो येन ॥ देवं परिवृत्य प्रदक्षिणीकृत्य ॥ २० ॥ तस्य दर्शने नाह्लादो वियोगे नार्तिस्ताभ्यां युतो वदर्याश्रमस्थानं गमिष्यामि ॥ २१ ॥

मृदु परोपद्रवशून्यं तीव्रं दुस्सहं दीर्घं आकल्पान्तं तेपाते तपश्चेरतुरित्यर्थः ॥ लोकभावनौ लोकानुग्रहकारकौ ॥२२॥ ज्ञानेन विवेकेन ॥२३॥ विश्रम्भात् विश्वासा
त् ॥२४॥ यद्यस्मात् हि भृत्यप्रयोजनसाधकाः सन्तश्चरन्ति न हि कृतार्थानामन्यत् कृत्यमस्तीत्यर्थः ॥२५॥ तत्त्वसंराध्य इति । अयं भावः भगवतैव स्मरण
मात्रेणानेवापि तत्त्वमुपदिष्टं अयं केवलमस्मद्भावनादि निरपेक्षाणि कश्चिदाराध्यः स च तत्त्वाराध्यः मैत्रेयः न त्वहं ममापि तिक एव गुरूपदेशेन

यत्र नारायणो देवो नरश्च भगवानृषिः मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ ॥२२॥ श्रीशुक उवाच ॥ इत्युद्धवादुपाकर्ण्य सुहृदां दुःस
हं वधं ॥ ज्ञानेनाशमयत् क्षत्ता शोकमुत्पतितं बुधः ॥२३॥ स तं महाभागवतं व्रजन्तं कौरवर्षभः ॥ विश्रम्भादभ्यधत्तेदं मुख्यं कृष्णप
रिग्रहे ॥२४॥ विदुर उवाच ॥ ज्ञानं परं स्वात्मरहःप्रकाशं यदाह योगेश्वर ईश्वरस्ते ॥ वक्तुं भवान्नोऽर्हति यद्धि विष्णोर्भृत्याः स्वभृत्या
र्थकृतश्चरन्ति ॥२५॥ उद्धव उवाच ॥ ननु ते तत्त्वसंराध्य ऋषिः कौषारवोऽन्तिके ॥ साक्षाद्भगवतादिष्टो मर्त्यलोकं जिहास
ता ॥२६॥ श्रीशुक उवाच ॥ इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः ॥ क्षणमिव पुलिने यमस्वसुस्तां
समुषित औपगविर्निशां ततोऽगात् ॥२७॥ राजोवाच ॥ निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः ॥ स तु क
थमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः ॥२८॥ श्रीशुक उवाच ॥ ब्रह्मशापापदेशेन कालेनामोघवाञ्छितः ॥ संहृत्य

साक्षादादिष्टत्वादिति ॥२६॥ प्लावितः अपनीतः उरुस्तापो यस्य ॥ यमस्वसुर्यमुनायाः पुलिने तीरे तां । स्वकुलं स्फीतं त्यक्ष्यन् देहमचिंतयत् ॥२९॥
निशां क्षणमिव समुषितः औपगविरुद्धवः ॥२७॥ ब्रह्मशापेन निधनं प्राप्तेषु यद्यस्मात् त्रयाणां ब्रह्मादीनामीशो हरिरपि आकृतिं मनुष्याकारम
त्यजत्तावान् ॥२८॥ ब्रह्मशापः अपदेशो मिषं यस्य तेन कालेन स्वशक्तिरूपेण ॥ अमोघं वाञ्छितं यस्य ॥ न त्वत्र शापः प्रभुः किं तु भगवदिच्छैवेत्यर्थः ॥२९॥ १४

मयिउपरतेसतितज्ज्ञानमर्हतिज्ञानयोग्योभवति॥ ३०॥ मत्तः सकाशादीषदपिन्यूनोनभवतियतयस्मात् गुणैर्विषयैर्नक्षोभितः मद्वयुनंमद्विषयं
ज्ञानंलोकस्योपदिशन्॥ ३१॥ एवमनेनादिष्टायेनशब्दयोनिनावेदकर्त्रा ईजेपूजयामास॥ ३२॥ ३॥ पशुतुल्यानांविक्लवात्मनांअधीरचित्तानां
॥ ३४॥ मनसेक्षितंचिंतितं॥ ३५॥ कालिंद्याः सकाशात्सिद्धएवविदुरः कतिपयैर्दिनैः स्वः सरितंगंगांप्रापद्यतप्राप्तः॥ ३६॥ इतिदीपिकायांच

अस्माल्लोकादुपरतेमयिज्ञानंमदाश्रयं॥ अर्हत्युद्धवएवाद्धासंप्रत्यात्मवतांवरः॥ ३०॥ नोद्धवोण्वपिमन्न्यूनोयद्गुणैर्नार्दितः
प्रभुः॥ अतोमद्वयुनंलोकंग्राहयन्निहतिष्ठतु॥ ३१॥ एवंत्रिलोकगुरुणासंदिष्टः शब्दयोनिना॥ बदर्याश्रममासाद्यहरिमीजे
समाधिना॥ ३२॥ विदुरोप्युद्धवाच्छ्रुत्वाकृष्णस्यपरमात्मनः॥ क्रीडयोपात्तदेहस्यकर्माणिश्लाघितानिच॥ ३३॥ देहन्यासंचतस्यै
वंधीराणांधैर्यवर्धनं॥ अन्येषांदुष्करतरंपशूनांविक्लवात्मनां॥ ३४॥ आत्मानंचकुरुश्रेष्ठकृष्णेनमनसेक्षितं॥ ध्यायन्गते
भागवतेरुरोदप्रेमविह्वलः॥ ३५॥ कालिंद्याः कतिभिः सिद्धअहोभिर्भरतर्षभः॥ प्रापद्यतस्वः सरितंयत्रमित्रासुतो
मुनिः॥ ३६॥ इति श्रीभागवतेमहापुराणेतृतीयस्कंधेविदुरोद्धवसंवादेचतुर्थोध्यायः॥ श्रीकृ[illegible]॥ च॥ द्वारिद्युनद्याऋषभः
कुरूणांमैत्रेयमासीनमगाधबोधं॥ क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छसौशील्यगुणाभितृप्तः॥ १॥

तुर्थोध्यायः॥ पंचमेभगवल्लीलांकृत्वाश्रेष्ठोमहामुनिः॥ प्रोवाचमहदादीनांसर्गतैःस्वहरेस्तुतिं॥ १॥ उक्तश्चतुर्भिरध्यायैः क्षत्तुर्मैत्रेयसंगमः॥ सं
वादस्तुतयोःस्वाधद्वयेनाथनिगद्यते॥ २॥ द्युनद्याः गंगायाः द्वारिहरिद्वारेआसीनंनित्यकर्मव्यग्रंतत्रहेतुः अगाधः अपरिछिन्नोबोधोयस्येति मैत्रे

भा०तृ
१५

प्रश्नानेवाह । सुखायेति पंचदशभिः तैः कर्मभिः सुखं वान्यद्दुःखस्योपशमं वेत्यर्थः । अथवान्यद्वा न विंदेत किं तर्हीत्यपेक्षायां तस्यैव निर्देशः उपारमं चेति । ततस्तैः कर्मभिः भूयः पुनः पुनः दुःखमेव विंदेत । अत्र एवंविधे संसारे नोऽस्माकं यत् युक्तं कर्तुं योग्यं तत्सर्वं भवान्वदेत निरूपयतु १ दैवात्प्राचीनकर्मणो निमित्तभूतात्कृष्णात् विमुखस्य अतः अधर्मशीलस्य अतः सुदुःखितस्य जनस्यानुग्रहाय भव्यानि मंगलानि भवंतः परोपकारस्वभावा एवेत्यर्थः २ तत्तस्मात् हे साधुवर्य शं सुखं नः अपवर्त्मनः आदिश कथय येन वर्त्मना संराधितो हृदि स्थितः सन् तत्त्वाधिगमः

विदुर उवाच । सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा । विंदेत भूयस्तत एव दुःखं यदत्र युक्तं भगवान्वदेन्नः १
जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य । अनुग्रहायेह चरंति नूनं भूतानि भव्यानि जनार्दनस्य २ तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसां । हृदि स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणं ४ करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः । यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ५ यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः । योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथासीत् ६ क्रीडन्विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः

आत्मा परोक्षं तत्सहितं पुराणं अनादि वेदप्रमाणानां ४ करोति कर्माणीत्यादीनां वर्णयेति पंचमश्लोके क्रियासंबंधः यथा येन प्रकारेण पुरुषरूपेण कृतावतारः सन् त्र्यधीशः त्रिगुणमायानियंता अतः स्वतंत्र एव यानि कर्माणि करोति कर्माण्येव विशेषः प्रवृत्ति यथेत्यादिना । निरीहः निष्क्रियः निःस्पृहो वा संस्थाप्य स्थितिं कृत्वा वृत्तिं जीविकां ५ स्वे स्वीये खे हृदयाकाशे निवेश्य स्थापयित्वा निवृत्तवृत्तेर्या यस्य गुहायां योगमायायां । बहुधा ब्रह्मादिरूपेण ६ मत्स्याद्यवतारभेदैः क्रीडन्यानि यथा कर्माणि विधत्ते

राम
१५

पुनर्विशेषं प्रष्टुमौत्सुक्यमाविः करोति मनइति सुश्लोकाः उत्तमकीर्त्तयस्तेषां मौलिरिवाधिको नोपरि विराजमानस्येत्यर्थः ॥ ७ ॥ अधिलोकनाथः लो-
कनाथाधिपतिः अलोकान् लोकालोकपर्वतात् बहिर्भागान् अचीक्लृपत कल्पयामास ॥ यत्र येषु सर्गेषु यानि सत्त्वानि तेषां निकायास्तेषां भेदः अधि-
कृतः तत्तत्कर्माधिकारी आश्रित इति वा ॥ ८ ॥ उत अपि च ॥ येन प्रकारेण जीवानां आत्मस्वभावः तत्कृतं कर्म तत्कृतं रूपं तत्कृता अभिधाः नामभेदं

मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ॥ ७ ॥ यत्तत्त्वभेदैरधिलोकनाथो लोकानलोकान्सह लोकपाला-
न् ॥ अचीक्लृपद्यत्र हि सर्वसत्त्वनिकायभेदोऽधिकृतः प्रतीतः ॥ ८ ॥ येन प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त
नारायणो विश्वसृगात्मयोनिरेतच्च नो वर्णय विप्रवर्य ॥ ९ ॥ परावरेषां भगवन्व्रतानि श्रुतानि मे व्यासमुखादभीक्ष्णं
अतृप्नुमः क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात् ॥ १० ॥ कस्तृप्नुयात्तीर्थपदोऽभिधानात्सत्रेषु वः सूरिभिरी-
ड्यमानात् ॥ यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ॥ ११ ॥ गोपालकृष्णाय नमः ॥ राम

कृतवान् ॥ विश्वसृष्टा ॥ स्वयं आत्मयोनिः स्वतः सिद्धः ॥ ९ ॥ मन्तुमहाभारते त्वया सर्वं श्रुतमेव तत्राह ॥ परे त्रैवर्णिकाः अवरे शूद्रादयः तेषां व्रतानि
धर्माः मे मया अभीक्ष्णं पुनः पुनः तेषां श्रवणेन अतृप्नुम तृप्ता न स्मः ॥ तेषां तुच्छसुखावहत्वात् ॥ यत्तात् तत्र कृष्णकथामृतौघः स्थितस्तस्मा-
त् ॥ ऋते ॥ तत्र त्वलवबुद्धिर्नास्तीत्यर्थः ॥ १० ॥ तत्र हेतुः क इति तीर्थपदः कृष्णस्य अभिधानात् कथामृतात् सत्रेषु समाजेषु सूरिभिर्नारदादिभिः ॥ ११

भा०तृ
१६

महाभारतस्याप्येवं तात्पर्यमित्याह ॥ मुनिः श्रीकृष्णो वेदव्यासो भगवद्गुणान् मोक्षधर्मान्ते नारायणीयाख्याने वक्तुमिच्छुः सन् अर्थकामादिवर्णनं तु
हरिकथायां मतिप्रवेशार्थमेवेत्याह यस्मिन्निति ॥ नृणां मतिर्ग्राम्यसुखानुवादेन द्वारभूतेन तु निश्चितं हरेः कथायां गृहीतानीता ॥ तदुक्तमितिहासस
मुच्चये ॥ कामिनो वर्णयन् कामान् लोभं लुब्धस्य वर्णयन् ॥ नरः किं फलमाप्नोति कूपेऽन्धमिव पातयन् ॥ लोकचिन्तावतारार्थं वर्णयित्वा ततोऽन्ततो इति
हासैः पवित्रार्थैः पुनरेवैव निंदितौ ॥ अन्यथा घोरसंसारबंधहेतू जनस्य तौ ॥ वर्णयन्स कथं विद्वान् महाकारुणिको मुनिरिति ॥ १२ ॥ श्रीहरिकथाम

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः ॥ यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायां ॥ १२ ॥ सा श्र
द्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः ॥ हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु धत्ते ॥ १३ ॥ तान् शोच्य
शोच्यानविदोऽनुशोचे हरेः कथायां विमुखानघेन ॥ क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनां ॥ १४ ॥ तद
स्य कौषारव शर्मदातुः हरेः कथामेव कथासु सारं ॥ उद्धृत्य पुष्पेभ्य इवार्त्तबंधो शिवाय नः कीर्त्तय तीर्थकीर्त्तेः ॥ १५ ॥

तिप्रवेशस्य फलमाह ॥ सा कथा मतिर्वा अन्यत्र ग्राम्यसुखे ततः किमत आह ॥ हरेरिति ॥ १३ ॥ एवंभूतायां कथायां ये न रमंते तान् शोचंति शोच्याये तेषा
मपि शोच्यांश्च ॥ तत्राविदो भारततात्पर्यानभिज्ञान् शोच्यान् येपितान्वा हरेः कथायां विमुखान् अघात् तेषामपि शोच्यानिति योज्यं ॥ अनिमिषः कालो ये
षामायुः क्षिपति ॥ अत्र हेतुः वृथैव वाग्गतिस्मृतयो वाग्देहमनोव्यापाराः येषां ॥ १४ ॥ तत्तस्मात् हे कौषारव अस्य विश्वस्य शिवाय कथासु सारभूतां
हरेः कथामेवोद्धृत्य नः कीर्त्तय ॥ यथा ॥ पुष्पेभ्यो मधु मधुप उद्धरति तद्वदुद्धृत्य ॥ १५ ॥

राम
१६

विशेषतः श्रीकृष्णकथाकथनीयेत्याशयेनाह सइति योविश्वसर्गाद्यर्थंपूर्वंगृहीतशक्तिः सएवपुरुषेषुकृतावतारः सन्पुरुषानतिक्र
म्यवर्त्तमानानियानिचकार १६ पुंसांनिःश्रेयसमेवार्थः प्रयोजनंतेनहेतुनापृष्टः १७ बहुमानमेवाह साध्विति पंचभिः अधोक्षजए
वात्मामनोयस्य तस्यात्मनः स्वस्यकीर्त्तिंचप्रसंगाद्वितन्वता १८ हरिर्यद्गृहीतः एतच्चित्रंनभवति यतः बादरायणवीर्यजे १९ तर्हि

सविश्वजन्मस्थितिसंयमार्थेकृतावतारः प्रगृहीतशक्तिः चकारकर्माण्यतिपूरुषाणि यानीश्वरः कीर्त्तयतानि मह्यं १६
शुक उवाच सएवंभगवान्पृष्टः क्षत्त्राकौषारविर्मुनिः पुंसांनिःश्रेयसार्थेन तमाहबहुमानयन् १७ मैत्रेय उवाच
साधुपृष्टंत्वयासाधोलोकान्साध्वनुगृह्णता कीर्त्तिंवितन्वतालोकेआत्मनोऽधोक्षजात्मनः १८ नैतच्चित्रंत्वयिक्ष
त्तर्बादरायणवीर्यजे गृहीतोऽनन्यभावेनयत्त्वयाहरिरीश्वरः १९ मांडव्यशापाद्भगवान्प्रजासंयमनोयमः भ्रा
तुः क्षेत्रेभुजिष्यायांजातः सत्यवतीसुतात् २० भवान्भगवतोनित्यंसंमतः सानुगस्यच यस्यज्ञानोपदेशायमादिशद्भ
गवान्व्रजन् २१ अथतेभगवल्लीलायोगमायोपबृंहिताः विश्वस्थित्युद्भवान्तार्थावर्णयाम्यनुपूर्वशः २२

कथंभूतस्त्वं कथंचलोकानन्वग्राह कस्त्वंतत्राह मांडव्यशापादिति भ्रातुर्विचित्रवीर्यस्यक्षेत्रेक्षेत्रत्वेनस्वीकृतायांभुजिष्यायांदास्यांयमएवत्वंजा
तोसि २० किंचभवानिति अतः यस्यतवज्ञानोपदेशायमामादिष्टवान् चकारात्त्वयमपिस्मर्त्तव्योवोपदिष्टवानिति २१ विश्वस्थित्यादयः
अर्थोविषयोयासांताः २२

भा॰त॰ ८

तत्र सृष्टिलीलां वर्णयिष्यंस्ततः पूर्वावस्थामाह। इदं विश्वं अग्रे सृष्टेः पूर्वं परमात्मा भगवानेक एव आस आसीत्। आत्मनां जीवानां आत्मा स्व
यं विभुः स्वामी च। नान्यत् द्रष्टृदृश्यात्मकं किंचिदासीत् कारणात्मना सत्त्वेपि पृथक्प्रतीत्यभावादित्याह। अनानामत्युपलक्षणः। नाना द्रष्टृदृ
श्यादिमतिभिर्नोपलक्ष्यत इति तथा। यद्वास्य कारप्रश्नोत्तरमिति वायमर्थः। यः सृष्टौ नानामतिभिरुपलक्ष्यते स तदा एक एवासीदिति कुत आत्मे
च्छामायायां तस्यामनुगतौ लयं प्राप्तेति। यद्वा आत्मन एकाकीत्वेन अवस्थाने इच्छायामनुवृत्तायामित्यर्थः। २३। तत्र प्रथमं मायोद्भवप्रकारमाह
द्वाभ्यां। स वै द्रष्टा सन् दृश्यं नापश्यत्। यतः स एकराट्। एक एव तदा प्रकाशते। असंतमिव मेने दृश्याभावे द्रष्टृत्वाभावात्। तदाह सुप्तश

भगवानेक आसेदमग्र आत्मात्मनां विभुः। आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः। २३। स वा एष तदा द्रष्टा नापश्यद्दृश्य
मेकराट्। मेनेसंतमिवात्मानं सुप्तशक्तिरसुप्तदृक्। २४। सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका। माया नाम महाभाग
ययेदं निर्ममे विभुः। २५। कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः। पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्। २६।

क्तयः शक्तयो यस्य सः। न त्वसंतमेव मेने। यतः असुप्ता दृक् चिच्छक्तिर्यस्येति। २४। सा वै द्रष्टृदृश्यानुसंधानरूपा। सदसदात्मिका कार्यकारण
रूपा। यद्वा सत् दृश्यं असत् अदृश्यं आत्मस्वरूपं च तयोरात्मा यस्याः तदुभयानुसंधानरूपत्वात्। २५। कालवृत्त्या कालशक्त्या गुणमय्यां क्षु
भितगुणायां। अधोक्षजः परमात्मा आत्मभूतेन पुरुषेणांशेनाधिष्ठातृरूपेण वीर्यं चिदाभासमाधत्त। वीर्यवान् चिच्छक्तियुक्तः। २६।

राम ८

कालप्रेरितादव्यक्तान्मायातः तत्त्वं परं परित्यज्य महत्तो लक्षणं ॥ अतः पुलिंगनिर्देशो विज्ञानात्मेति सत्त्वप्रधानत्वात् स्वदेहस्थं विश्वं सूक्ष्मत
वीजगतमंकुरादिरूपं स्वरूपमिव व्यंजयन् व्यंजयत् प्रकाशयत् ॥ यतोऽत एव तमोनुदः तदुक्तं सात्वततंत्रे ॥ विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो
विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति २७ अहंकारोत्पत्तिमाह ॥ सार्धाभ्यां ॥ सोपीति
अंशश्चिदाभासो निर्मितं गुणा उपादानं कालः क्षोभकः तदात्मा तदधीनः भगवान् सर्वाध्यक्षः तद्दृष्टिगोचरः सन् स्वयमात्मानं व्यकरोत्

ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात् ॥ विज्ञानात्मात्मदेहस्थं विश्वं व्यंजत्तमोनुदं ॥ २७ सोप्यंशगुणकालात्मा
भगवद्दृष्टिगोचरः ॥ आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया ॥ २८ महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत
कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः ॥ २९ ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ अहंतत्त्वाद्विकुर्वाणा

रूपांतरमनयत् ॥ २८ ॥ अहंकारस्य लक्षणमाह ॥ कार्यमधिभू न्मनो वैकारिकादभूत् ॥ वैकारिकाश्च ये देवा अर्थाभिव्यंजनं यतः ॥ ३० ॥
तं कारणमध्यात्मं कर्तृ अधिदैवं ॥ तेषामात्मा आश्रयः ॥ अत्र हेतुः भूतेंद्रियमनोमयः तद्विकारवान् ॥ मन इति देवानामप्युपलक्षणं ॥ २९ ॥
एतदेव विभागतः प्रपंचयति ॥ वैकारिक इत्यादिना ॥ वैकारिकः सात्विकः तैजसो राजसः देवाश्च वैकारिकाः कार्यभूता इत्यर्थः ॥ यतः येभ्यः
इंद्रियाधिष्ठातृभ्यः अर्थाभिव्यंजनं शब्दादिप्रकाशो भवति ॥ ३० ॥

भा०टी
१८

तैजसोन्येवेत्यन्वयः ॥ तानसयानां सात्विकत्वशंकामाभूदित्येवकारः तामसोभूतसूक्ष्मस्य शब्दस्यादिः कारणं ॥ यतः शब्दात् खं आकाशो भवति
आत्मनो लिंगं स्वगुणः शब्दरूपेण प्रकाशकं द्रष्टव्याकाशते यावान् ॥ यद्वा ॥ लिंगं शरीरं आकाशशरीरं ब्रह्मेति श्रुतेः ॥ २१ ॥ नभसः स्वस्मात् अनुसृतं तउद्
तस्पर्शं विकुर्वत् तद्रूपांतरं नयत एवं सर्वत्र तन्मात्रद्वारा भूतोत्पत्तिरिति ॥ ज्ञातव्यं ॥ २२ ॥ नभसा सहितः स्वपंचोरुबलान्वितः ततो ज्योतिस्तेजः लोचनं
प्रकाशकं ॥ २३ ॥ ५ ॥ हे भव्य विदुर पाठांतरे भाव्यं कार्यं यस्य स एवरभवरं कार्यं तेषां कार्याणां परैः कारणैः उत्समर्गात्तदनुव्रयात यथाक्रमसूत्रेरी

तैजसानींद्रियाण्येव ज्ञानकर्ममयानि च ॥ तामसो भूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ॥ २१ ॥ कालमायांशयोगेन भगव
द्वीक्षितं नभः ॥ नभसोनुसृतं स्पर्शं विकुर्वन्निर्ममेनिलं ॥ २२ ॥ अनिलोपि विकुर्वाणो नभसोरुबलान्वितः ॥ ससर्ज रूपत
न्मात्रं ज्योतिर्लोकस्य लोचनं ॥ २३ ॥ अनिलेनान्वितं ज्योतिर्विकुर्वत् परवीक्षितं ॥ आधत्तांभो रसमयं कालमायांशयोगतः ॥ २४ ॥
ज्योतिषांभोनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितं ॥ महीं गंधगुणामाधात् कालमायांशयोगतः ॥ २५ ॥ भूतानां नभआदीनां यद्यद्भव्या
वरावरं ॥ तेषां परानुसंसर्गात् यथासंख्यं गुणान् विदुः ॥ २६ ॥ एते देवाः कला विष्णोः कालमायांशलिंगिनः ॥ नानात्वात् स्वक्रियानी
शाः प्रोचुः प्रांजलयो विभुं ॥ २७ ॥

तरं अधिकान् गुणान् विदुः तथाहि ॥ नभसः शब्द एव गुणः अन्यास्त्वभावात वायोस्तु स्पर्शः आकाशान्वया
तशब्दश्च ॥ एवं तेजस्तोयं चत्रूपं च ॥ अंभसस्तान् निरसश्च ॥ मत्याः सर्वे ॥ २६ ॥ रेवमहदाद्यभिमानिनः विष्णोः कलाअंशाः काललिंग विक्षोभः मायालिं
विक्षेपः अंशालिंगं चेतनाः तानि विद्यंते येषु ॥ अतः समत्वेन नानात्वात् परस्परासंबंधात् स्वक्रिया याव ब्रह्मांडरचनायां अनीशाः अशक्ताः सन्तो विभुं
परमेश्वरं प्रोचुः ॥ २७ ॥

राम
१८

मिथः स्पर्धिष्णवो रेवानमिलंतः परस्परं ॥ विश्वकर्मणे पनीशाना निर्विण्णा हरिमीडिरे ॥ प्रपन्नानां तापोपशमे आतपत्रं छत्रं ॥ तत्र हेतुः य
स्य पदारविंदस्य मूलं तलं केतनं आश्रयो येषां ते संसारदुःखं बहिर्हरत उत्क्षिपंति परित्यजंति ॥ यथा पांथाः स्वगृहप्राप्त्या मार्गश्रममिव ॥ ३८
श्रमं विनिवेदयंत आहुः ॥ हे धातः पितः यद्यस्मात् भवे संसारे आत्मन् ॥ आत्मनि संबोधनं वा ॥ शर्म सुखं ॥ अतेयदिति पाठे यस्मात् भजनं विना
शर्म न लभंते ॥ न उत्तानादत्तानं तत्तापो निवर्त्तते किं मदंघ्रिच्छायाश्रयणेन ॥ तत्राहुः सविद्यां तदाश्रयणमेव विद्याप्रापकमित्यर्थः ॥ ३९

देवा ऊचुः ॥ नमाम ते देव पदारविंदं प्रपन्नतापोपशमातपत्रं ॥ यन्मूलकेता यतयोञ्जसोरुसंसारदुःखं बहिरुत्क्षिपंति
॥ ३८ धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणोपहता न शर्म ॥ आत्मँल्लभंते भगवंस्तवांघ्रिच्छायां सविद्यामत आश्र
येम ॥ ३९ ॥ मार्गंति यत्ते मुखपद्मनीडैः छंदःसुपर्णैरृषयो विविक्ते ॥ यस्याघमर्षोदसरिद्वरायाः पदं पदं ती
र्थपदः प्रपन्नाः ॥ ४०

अतः तस्याश्रयणीयोगात् ज्ञानसाधनमाहुः ॥ मार्गंति अन्वेषयंति यत्तीर्थपदस्तव पदं वयं प्रपन्नाः के मार्गंति छंदःसु ॥
पर्णैः वेदपक्षिभिः तवैव मुखपद्मं नीडं येषां यथा पक्षिणो नीडादुत्पतंति ततः परिभ्रम्य पुनस्तत्रैव विशंति तथा वेदा अपि त्वत्त उत्पतात्व
य्येव पर्यवस्यंति अतो वेदानां श्रितत्वात्त्वत्पदं मृगयंत इति विविक्ते असंगमनसि किं च ॥ अघमर्षमघनाशकं उदकं यस्याः सा सरितां वरा तस्याः गं
गायाः पदं उद्गमस्थानं ॥ अतो गंगामज्जनेनैव मानवा अपि तदुद्गमस्थानं त्वत्पदं प्राप्नुवंतीत्यर्थः ॥ ४० ॥

तत्र विषयाकृष्टचित्तानां कथं तत्त्वेषणं तत्राहुः ॥ यच्छ्रद्धयाहृदये अवधाय ध्यात्वा वैराग्यबलं यस्य तेन ज्ञानेन धीरा भवन्ति मरागे चित्ते ध्यानमेव कृतः ॥ श्रद्धया श्रवणपूर्विकया भक्त्या च संमृज्यमाने शोध्यमाने ॥ ४१ ॥ भक्तानुग्रहं स्मरंतस्त्वाहुः विश्वस्येति ॥ ४२ ॥ अतयोगितयानित्यं सन्निहितेपि अनर्थकं भजत इत्याशंक्याहुः ॥ यदिति ॥ सानुबंधे सोपकरणे असति तुच्छे पुर्यां शरीरे एवं वसतोपि यत्सुदूरं दुःप्राप्यं ॥ ४३ ॥ ननु यदि हरिः सर्वापि पदाब्जे केषांचित्तमहरं तर्हि अन्येषामपि तत्रैव स्यात् ॥ अविशेषादित्याशंक्याहुः तानिति ॥ असद्वृत्तिभिर्विषयैर्मुखैः अक्षिभिरि-

यच्छ्रद्धयाश्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधाय ॥ ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेऽङ्घ्रिसरोजपीठं ॥ ४१ ॥ विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदाम्बुजं ते ॥ व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसां ॥ ४२ ॥ यत्सानुबंधेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणां ॥ पुंसां सुदूरं वसतोपि पुर्यां भजेम तत्ते भगवन्पदाब्जं ॥ ४३ ॥ तान्वै असद्वृत्तिभिरक्षिभिर्ये पराहृतान्तर्मनसः परेश ॥ अथो न पश्यन्त्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥ ४४ ॥

न्द्रियैः पराहृतं हृतमपहृतं अन्तःस्थं मनो येषां ते अथो अत एतेन नूनं तान्न पश्यन्ति वै प्रसिद्धं कुतः एतत्तेषां तत्संगः स्यात् ॥ का ते तव पदन्यासो गमनं तस्य विलासो विभ्रमः ॥ तस्य लक्ष्मीः शोभा तस्याः ये त्वल्लीलाकथाभिः शोभमानास्तान्त्वत्कथाज्ञानिनस्त्यर्थः ॥ पदन्यासेति लक्ष्म्यानिति च पाठे त्वत्पदन्यासविलासलक्ष्मीर्येषां तान् ॥ पदन्यासमार्गभूतान्सतः भागीरथ्यां श्रवणादीन्न पश्यन्तीत्यर्थः ॥ यद्वा ये एवंभूता भागवताः ते तान् असत्त्वा नैव पश्यन्तीति अन्वयः ॥ सत्संगाभावेन हरिकथाश्रवणाभावाद्धरिस्थितमपि तेषां सुदूरमिति भावः ॥ ४४ ॥

एतदेव स्फुरयति पानेनेति द्वाभ्यां ॥ वैराग्यसारो बलं यस्य बोधस्य तं लब्ध्वा अन्वीयुः प्राप्नुयुः अकुंठधिष्ण्यं वैकुंठलोकं ॥ ४५ ॥ आत्मनि समाधिर्मनःस्थै-
र्यम् एव योग उपायः तस्य बलेन ज्ञानयोगतः श्रमेणाभाक्तः ॥ तत्स्वगतः त्वत्कथाश्रवणादिना त्वनायासेनैव ॥ अहंममताविष्टानां तु न कथंचिदिति
भावः ॥ ४६ ॥ तदेवं स्तुत्वा प्रार्थयंते वतत्रिभिः तत्तस्मात् हे आद्य ते त्वदीया वयं यस्माल्लोकानां सिसृक्षया त्वयाऽनुसृष्टाः क्रमेणोत्पादिताः त्रिभिरात्मभिः
सत्वादिस्वभावैः तत एव विरुद्धस्वभावत्वात् वियुक्ताः संतः परस्परमसृष्टाः तत्स्वविहारतंत्रं त्वत्क्रीडोपकरणं ब्रह्मांडं ते तत्संप्रति हर्त्तुं नैव प्रतिहर्त्तुं समर्थाः

पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ॥ वैराग्यसारं प्रतिलभ्य बोधं यथांजसान्वीयुरकुंठधिष्ण्यं ॥ ४५ ॥ तथापरे चात्मस-
माधियोगबलेन जित्वा प्रकृतिं बलिष्ठां ॥ त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवया ते ॥ ४६ ॥ तत्ते वयं लोकसिसृक्षयाद्य त्व-
यानुसृष्टास्त्रिभिरात्मभिः स्म ॥ सर्वे वियुक्ताः स्वविहारतंत्रं न शक्नुमस्तत्प्रतिहर्तवे ते ॥ ४७ ॥ यावद्बलिं तेऽज हराम काले यथा वयं
चान्नमदाम यत्र ॥ यथोभयेषां त इमे हि लोका बलिं हरंतोऽन्नमदंत्यनूहाः ॥ ४८ ॥

यितुं न शक्नुमः ॥ अतस्त्वं नः स्वचक्षुः परिदेहीति त्रयाणां श्लोकानां वक्तव्यर्थे नान्वयः ॥ ४७ ॥ अस्मासामर्थ्यमेव प्रपंचयितुं कार्यस्याति वैचित्र्यमाह ॥ भो अज काले तत्त-
रवसरे बलिं भोगं यावत् यस्मात्कल्पेन ते तुभ्यं हराम समर्पयाम यथा येन प्रकारेण अन्नमदाम भक्षयाम तस्मिन्नेनान्नमात्रं चास्माकं ऐश्वर्येण तु भोगस्त्वेवैवेत्युक्तं ॥ उभये
तव चास्माकं च यत्र स्थितास्त इमे जीवाः अनूहाः अप्रत्यूहाः निर्विघ्नाः यद्वा अनूहाः अवितर्काः निःसंशया इत्यर्थः ॥ तथा च श्रुतिः ता एनमब्रुवन्नायतनं नः
प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति ॥ ४८ ॥

भा॰त॰
१०

अवश्यं च त्वयास्माकमेषां च कार्योपाधीनां जीवानां वृत्तिः परिकल्पनीया ॥ जनकत्वादित्याहुः नोऽस्माकं प्राण्वयानां कार्याणां यद्वा ॥ अत्रेतीत्यच्च यः कारणात्त्व
हितानां त्वमेवाद्यः कारणं अत्र हेतवः कूटस्थः अविक्रियः ॥ पुरुषः अधिष्ठाता ॥ प्राणः प्राणनः एतदुपपादयंति त्वमिति ॥ हे देव अज एव त्वं गुणानां सत्वा
दीनां कर्मणां जन्मादीनां च योनौ कारणभूतायां शक्त्यां मायायां आप्रथमे रेतः आदधे निहितवानसीत्यर्थः कीदृशं कविं सर्वज्ञं महत्तत्वरूपं ॥४९॥ ततः हे आत्मन्
देव सत्वप्रमुखा महदादयो वयं यदर्थं बभूविम तत्किं ते कार्यं करवाम ॥ सृष्टिमिति चेत्तत्राहुः तर्हि नोऽस्माकं त्वं स्वचक्षुः द्वितीयं ज्ञानं शक्त्या सह परिदेहि प्रयच्छ

त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः ॥ त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ॥४९॥
ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन् करवाम किं ते ॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणां
इति श्रीभागवते महापुराणे तृतीयस्कंधे पंचमोऽध्यायः ॥ ऋषिरुवाच ॥ इति तासां स्वशक्तीनां सतीनामसमेत्य सः
प्रसुप्तलोकतंत्राणां निशाम्य गतिमीश्वरः ॥१॥ कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ॥ त्रयोविंशतितत्वानां ग

यस्मात्त्वं न एवानुग्रहो येषां ते यदनुग्रहाः तेषामस्माकं क्रियार्थं इयानेव एतावानेवानुग्रहो येषामित्येकं वा पदं ॥ त्वदीय णं युगपदाविशत् ॥२॥
ज्ञानक्रियाशक्तिभ्यामेव वयं सृष्टौ क्षमा नान्यथेत्यर्थः ॥५०॥ इति तृतीये पंचमः ॥ षष्ठे तु ईश्वराविष्टैः सृष्टिमाह विराट्तनोः ॥ अधिदैवादिभेदं च तत्त्वै
च भगवत्कृतं ॥ स्वशक्तीनां महदादीनामसमेत्य अमिलित्वा सतीनां स्थितानां प्रसुप्तं लोकतंत्रं विश्वरचना यासां ॥ यद्वा प्रसुप्तजीवोपकरणानां ग एम
तिं स्थितिं दृष्ट्वा आविशदित्युत्तरेणान्वयः ॥१॥ कालेन संज्ञा उद्बोधो यस्याः कालयति क्षोभयति त्वं कार्याणीति वा ॥ कालसंज्ञा प्रकृतिः तां शक्तिं प्रकृत्या १०
सह प्रवेशात् ॥ त्रयोविंशतितत्वानामिति अंतर्यामितया आविशत् ॥२॥

चेष्टारूपेण क्रियाशक्त्या ॥ कर्म तेषां क्रियां जीवानामदृष्टं वा ३ प्रबुद्धं कर्म क्रियाशक्तिर्यस्य सत्रयोविंशतेर्गणः दैवेनेश्वरेण प्रेरितः मात्राभिः
अंशैः अधिपूरुषं विराड्देहं ॥४॥ जननमेवाह परेणेश्वरेण विश्वसृजां तत्त्वानां गणः मात्रयाउक्षोभपरिणतः न सर्वात्मना यस्मिन्लोकाः
स्थिताः ॥५॥ सपुरुषो योधिपुरुषइत्युक्तः अंडकोशे ब्रह्मांडमध्ये सत्त्वैः सत्त्वैरुपशयितैर्जीवैः सहितः ॥६॥ गर्भः कार्यरूपो विराट् ॥ देवशक्तिर्ज्ञा

सोनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणं ॥ भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥३॥ प्रबुद्धकर्मा दैवेन त्रयोविंश
तिको गणः ॥ प्रेरितोजनयत्स्वाभिर्मात्राभिरधिपूरुषं ॥४॥ परेण विशता स्वस्मिन्मात्रया विश्वसृग्गणः ॥ चुक्षो
भान्योन्यमासाद्य यस्मिन्लोकाश्चराचराः ॥५॥ हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् ॥ अंडकोश उवासाप्सु
सर्वसत्त्वोपबृंहितः ॥६॥ स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् ॥ विबभाजात्मनात्मानमेकधा दशधा त्रिधा
॥७॥ एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः ॥ आद्योवतारो यत्रासौ भूतग्रामो विभाव्यते ॥८॥

नशक्तिस्तया एकधा हृदयावच्छिन्नचैतन्यरूपेण कर्मशक्तिः क्रियाशक्तिः तया दशधा प्राणरूपेण प्राणादयः पंच नागः कूर्मश्च कृकलो देवदत्तो
धनंजयः इत्येते पंचैवं वृत्तिभेदेन दशविधः प्राणः आत्मशक्तिर्भोक्तृशक्तिस्तया आध्यात्मादिभेदेन त्रिधा आत्मानं विभक्तं कृतवान् ॥७॥ एवं विभा
गमात्मनोऽवतारस्योत्कर्षमाह ॥ एष हीति ॥ अशेषाणां सत्त्वानां प्राणिनामात्मा व्यष्टीनां तदंशत्वात् तदंशो जीवः अवतारत्वोक्तिः तस्मिन्नारायणावि
र्भावाभिप्रायेण ॥८॥

भा॰टी॰
२१

पूर्वश्लोकार्थं विवृणोति । साध्यात्मः अध्यात्मानीन्द्रियाणि तत्सहितः विराडिति सर्वत्र ९ अध्यात्मादिभेदं प्रपञ्चयितुमाह । स्मरन्निति विज्ञापि-
तं यावद्गुणितैः जहामीत्यादि । स्वेन तेजसा विष्ण्वात्मा अतपत् एवं करिष्यामीत्यालोचितवान् यस्य ज्ञानमयं तप इति श्रुतेः विवृत्तये विविध-
वृत्तिलाभाय १० मे गदतः शृणु ११ आयतनान्येवाह । तस्याग्निरित्यादिचतुर्दशभिः आस्यं निर्भिन्नं पृथक् जातं पदं स्वस्थानं स्वांशेन स्वशक्त्या

साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा । विराट् प्राणो दशविध एकधा हृदयेन च ९ स्मरन् विश्वसृजामीशो विज्ञापि-
तमधोक्षजः । विराजमतपत्स्वेन तेजसैषां विवृत्तये १० अथ तस्याभितप्तस्य कतिचायतनानि ह । निरभिद्यन्त देवानां ता-
नि मे गदतः शृणु ११ तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत्पदं । वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते १२ निर्भिन्ने
तालुनी वरुणो लोकपालोऽविशद्धरेः । जिह्वयांशेन च रसं ययासौ प्रतिपद्यते १३ निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदं । घ्रा शेन
णेनांशेन गन्धस्य प्रतिपत्तिर्यतो भवेत् १४ निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशद्विभोः । चक्षुषांशेन रूपाणां प्रतिपत्ति-
र्यतो भवेत् १५ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् । प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते १६ कर्णावस्य
विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः । श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते १७

वाचा सहाविशत् असौ जीवः वक्तव्यं प्रतिपद्यते शब्दं
उच्चारयतीत्यर्थः सर्वत्रायं निर्भिन्नं तद्धिष्ठानं अग्न्यादि प्रथमान्तमधिदैवं वागादीन्द्रियं तृतीयान्तमध्यात्मं प्रतिपत्तव्यमधिभूतं १२ हरेः विरा-
जः १३ १४ त्वष्टा आदित्यः १५ प्राणेनेति प्राणवद्देहव्यापिना त्वगिन्द्रियेणेत्यर्थः १६ शब्दस्य सिद्धिं ज्ञानं १७

राम
२१

त्वचं चर्मं ॐषधीः ॐषधयः त्वगिंद्रियस्यैव स्थानमभेदेन विषयद्वयं कंडूः स्पर्शश्च तच्चायं नामभेदो देवतामेरस्त्वेति द्वितीयत्वं वायुरेव वा
त्वोतं १८ कः प्रजापतिः १९ २० स्वः पतिः स्वर्गस्य पतिः वार्त्तयाक्रयविक्रयादिरूपया वृत्तिजीविकां २१ २ विक्रियां स्तकल्पादि

त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः अंशेन रोमभिः कंडूं येरसौ प्रतिपद्यते १८ मेढ्रं तस्य विनिर्भिन्नं स्व
धिष्ण्यं क उपाविशत् रेतसांशेन येनासावानंदं प्रतिपद्यते १९ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत्
पायुनांशेन येनासौ विसर्गं प्रतिपद्यते २० हस्तावस्य विनिर्भिन्नाविंद्रः स्वःपतिराविशत् वार्त्तयांशेन पुरुषो य
यावृत्तिं प्रपद्यते २१ पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते २२
हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमाविशत् मनसांशेन येनासौ विक्रियां प्रतिपद्यते २३ आत्मानं चास्य नि
र्भिन्नमभिमानो विशत्पदं कर्मणांशेन येनासौ कर्त्तव्यं प्रतिपद्यते २४ सत्त्वं चास्य विनिर्भिन्नं महान्
धिष्ण्यमुपाविशत् चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते २५

रूपां २२ आत्मानमहंकारं अभिमन्यतेऽनेनेत्यभिमानोऽहंकारः कर्मणाऽहं कृत्वा कर्तव्यमिति क्रिया २४ सत्त्वमिति बुद्धिचित्तयोरभेदेन
निर्देशः महानिति ब्रह्मा चित्तेन चेतनया २५

भा०टी०
११

त्रिलोकोत्पत्तिमाह ॥ शीर्ष्णोइति ॥ वृत्तयः परिणामाः ॥ २६ ॥ एतदेव प्रपंचयति द्वाभ्यां आत्यंतिकेन ऊर्जितेन ॥ पणाव्यवहारे पणं ते ये गणादिनाव्यवह
रंतीति पणयो मनुष्याः तान् अनु ये तदुपकरणभूताः येगवादयस्तेपि धरां प्रपेदिरे ॥ २७ ॥ तृतीयं तमः तदीयेन स्वभावेन उभयोर्धरादिवोरंतरम
ध्यं व्योम अंतरिक्षं तदेव भगवतो नाभिः तामाश्रिताः रुद्रपार्षदाः रुद्रस्य पार्षदाः नानाभूतादीनां गणाः ॥ २८ ॥ अवर्तत प्रवृत्तं ॥ ब्रह्म वेदः यस्तु उन्मुख
त्वात् उद्भवत्वात् वर्णानां मुख्यः मुखमिव प्रथमः ॥ गुरुश्चाभूत ॥ सोपि मुखतो वर्ततेत्यनुषंगः ॥ अध्यापनादिना ब्राह्मणस्य वेदोक्तिः त

शीर्ष्णोस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत ॥ गुणानां वृत्तयो येषु प्रतीयंते सुरादयः ॥ २६ ॥ आत्यंतिकेन सत्त्वेन दिवं दे
वाः प्रपेदिरे ॥ धरां रजःस्वभावेन पणयो ये च ताननु ॥ २७ ॥ तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः ॥ उभयोरंतरं व्यो
म ये रुद्रपार्षदां गणाः ॥ २८ ॥ मुखतोवर्तत ब्रह्म पुरुषस्य कुरूद्वह ॥ यस्तून्मुखत्वाद्वर्णानां मुख्योभूद्ब्राह्मणो गुरुः ॥ २९ ॥
बाहुभ्योवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः ॥ यो जातस्त्रायते वर्णान् पौरुषः कंटकक्षतात् ॥ ३० ॥ विशोवर्तंत तस्योर्वोर्लो

याद्गुरुत्वात्स ब्राह्मणो मुखतो जात इत्यर्थः एवमुत्तरत्र वर्णत्रयेपि ज्ञातव्यं ॥ २९ ॥ वृत्तिकरीर्विभोः ॥ वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्तयत्
क्षत्रं पालनं त्राणवृत्तिः तदनुव्रतः अनुसृतः क्षत्रियोपि बाहुभ्यो वर्ततेत्यर्थः तस्य त्राणत्वमेवाह ॥ य इति पौरुषः पुरुषस्य विभोरंशः कं
टकाश्चौरादयस्तेभ्यः यत्क्षतं उपद्रवस्तस्मात्त्रायते रक्षति ॥ ३० ॥ विशः कृष्यादिव्यवहाराः लोकस्य वृत्तिकरीः जीविकाहेतवः तस्य विभोरू
र्वोः प्रवृत्ताः तदुद्भवः ऊरुजः वार्ताजीविकार्थः स्वहस्त्यासंपादितवान् ॥ ३१ ॥

राम
११

तस्यां निमित्तभूतायां यस्य वृत्त्या हरिः स्वयमेव तुष्यते ।।३१।। यद्यस्माज्जाताः शूद्रत्वाज्जनकत्वात्तद्वृत्तिपरत्वाच्च हरेराराधनं तेषां परो धर्म इत्य
र्थः ।।३३।। क्षत्रं दैवकर्मात्मरूपिणः कालकर्मस्वभावशक्तिमतः भगवतो योगमायाबलेनोज्जृंभितमेतद्विराड्रूपमुपाकर्तुं साकल्ये

पद्भ्यां भगवतो यज्ञे शुश्रूषा धर्मसिद्धये ।। तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ।।३१।। एते वर्णाः
स्वधर्मेण यजंते स्वगुरुं हरिं ।। श्रद्धयात्मविशुद्ध्यर्थं यज्जाताः सह वृत्तिभिः ।।३३।। एतत्क्षत्रं भग
वतो दैवकर्मात्मरूपिणः ।। कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयं ।।३४।। अथापि की
र्तयाम्यंग यथामति यथाश्रुतं ।। कीर्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधासतीं ।।३५।।

न निरूपयितुं कः श्रद्दध्यात् ।। इच्छेत् ।। इच्छाप्यशक्या निरूपणं तद्रूपं तत इत्यर्थः ।।३४।। अंग विदुर ।। अथापि हरेः कीर्तिं कीर्तयामि यथाश्रु
तं गुरुमुखात् तदपि न सर्वात्मना किंतु यथामति स्वमतमनुसारेण अन्याभिधा हरिव्यतिरिक्तार्थाभिधानं तया असतीं मलिनां स्वीयां वाचं
सत्कर्तुं पवित्रीकर्तुं ।।३५।।

भा॰त॰
१२

अज्ञात्वापि यथामति कीर्तने श्रवणे वा आवश्यकं केवलमित्याह एकान्तत इति लाभं सुनिश्चितमाहुः श्रुतेः श्रोत्रस्य उपाकृतायां निरूपितायां उ
पसंप्रयोगं सन्निधावर्पणं ॥३६॥ न चातीव ज्ञानेन निर्बन्धः कर्तव्यः ब्रह्मणोपि दुर्ज्ञेयत्वादित्याह आत्मन इति हरेर्महिमा योगविपक्वयापि संवत्सरसह
सहस्रान्तेपि आदिकविना ब्रह्मणापि किमवसित इति काकुः न ज्ञात एतावानिति निर्णीत एवेत्यर्थः ॥३७॥ यद्यस्मात् स्वयमपि आत्मा हरिः आत्मवर्त्म

एकान्तलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगं ॥३६॥
आत्मनोऽवसितो वत्स महिमा कविनादिना ॥ संवत्सरसहस्रान्ते धिया योगविपक्वया ॥३७॥ अतो भगवतो माया
मायिनामपि मोहिनी ॥ यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ॥३८॥ यतोऽप्राप्य न्यवर्तन्त वाचश्च मनसा सह ॥ अ
हं चान्य इमे देवास्तस्मै भगवते नमः ॥३९॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे षष्ठोऽध्यायः ॥६॥

स्वमायागतिं एतावदिति न वेद अनन्तत्वात् ॥३८॥ अतो दुर्ज्ञेयत्वात् केवलं नमस्करोति यत इति यमप्राप्तानामप्रवृत्ता वाचोपि मनसा सह त
मप्राप्यैव न्यवर्तन्त दुर्ज्ञेयत्वात् ॥ न केवलं वाङ्मनसी अहं अहंकारस्याधिष्ठाता रुद्रोपि इमे इंद्रियाधिष्ठातारो देवाश्च नो विदुः ॥३९॥ तृ षे ६ः

राम
१२

सप्तमेसंशयच्छेदिश्रुतिमैत्रेयमुनेर्वचः ॥ पुनः शंकाकृतानानाप्रश्नाः सम्यगुदीरिताः ॥ १ ॥ श्रूयते भगवल्लीलायोगमायोपबृंहिता इत्यादिना माया-
गुणैः लीलया भगवान्सृष्ट्यादि करोतीत्येवं ब्रुवाणं ॥ भारत्या प्रार्थनारूपया प्रीणयन्निवेति अभिप्रायाज्ञानेनाक्षेपात ॥ १ ॥ निर्विकारस्य क्रिया
निर्गुणस्य च गुणाः कथं लीलयेत्युक्तिः प्रयोजनाभावं परिहरति न च बल्लाविरोधमिति भावः ॥ २ ॥ अर्भकवल्लीलापि न युज्यते वेषम्यादित्याह ३
उद्यमयति प्रवर्त्तयतीति उद्यमः अर्भकस्य क्रीडायां प्रवृत्तिहेतुः कामो हि ॥ अन्यतस्तु क्वचित्खेलनकेन वा बालांतरप्रवर्त्तनेन वा तस्य क्रीडेच्छा भवति ॥ ३ ॥

श्रीशुक उवाच ॥ एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ॥ प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥ १ ॥ विदुर उवाच ॥ ब्रह्मन्कथं भगवतश्चिन्मात्रस्याविकारिणः ॥ लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः ॥ २ ॥ क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषान्यतः ॥ स्वतस्तृप्तस्य च कथं निवृत्तस्य सदान्यतः ॥ ३ ॥ अस्राक्षीद्भगवान्विश्वं गुणमय्यात्ममायया ॥ तया संस्थापयत्येतद्भूयः प्रत्यपिधास्यति ॥ ४ ॥

स्वतस्तृप्तत्वेन तस्य कथं कामः अन्यतः सदा निवृत्तस्य च असंगात् इति यस्य च कथमन्यतश्चिक्रीडिषेत्यर्थः ॥ ३ ॥ पद्योक्तं स्मरन् विश्वसृजामीशो
विनाविप्रतमथोरुजन् इत्यादिना अविद्योपाधेर्जीवस्य भोगार्थमीश्वरः सृष्ट्यादि करोतीति तद्व्याक्षेपमनुवदति अस्राक्षीदिति ॥ गुणमय्या आत्मनो जी-
वस्य कर्तृत्वभोक्तृत्वादिमोहो यया तादृशया मायया तया सृष्टवान् ॥ तदुक्तं प्रथमे ॥ यया संमोहितो जीव आत्मानं त्रिगुणात्मकं ॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभि-
पद्यते इत्यादिना ॥ अत एव श्रुतौ भागवती माया मामपि नाम विमोहिनीति ॥ संस्थापयति पालयति ॥ प्रत्यपिधास्यति प्रातिलोम्येन तिरोहितं करिष्यति पा-

भा॰त॰
२४

एतच्च जीवस्याविद्याश्रयत्वे द्रष्टव्यं न तत्संभवतीत्याह देशत इति यो ऽसौ देशादिभिरविलुप्तावबोध आत्मा जीवः ब्रह्मस्वरूपत्वात् स कथमजयाऽविद्यया युज्येत तत्र देशतो ऽपरिच्छिन्नाद्भायाः स्वलोपो नास्ति सर्वगतत्वात् न कालतो विद्युत इव नित्यत्वात् नावस्थातः स्मृतिवत् अविक्रियत्वात् न स्वतः स्वप्नवत् सत्यत्वात् नान्यतः घटादिवत् अद्वितीयत्वात् एवमेतस्यावबोधो न लुप्यते स कथमजया युज्येत अजा चात्राविद्यैव न माया तस्याश्चावबोधे न विरोधाभावात् ५ किंच ब्रह्मस्वरूपत्वादेव जीवस्य संसारोऽपि न विद्यत इत्याक्षिपति सर्वक्षेत्रेष्ववस्थितो भोक्तापि वस्तुतो भगवानेव चिद्रूपत्वेन

देशतः कालतो यो ऽसाववस्थातः स्वतो ऽन्यतः अविलुप्तावबोधात्मा स युज्येताजया कथं ५ भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ६ एतस्मिन्मे मनो विद्वन् खिद्यते ऽज्ञानसंकटे तन्नः पराणुद विभो कश्मलं मानसं महत् ७ श्रीशुक उवाच स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ८ मैत्रेय उवाच सेयं भगवतो माया यन्नयेन विरुध्यते ईश्वरस्य विमुक्तस्य कार्पण्यमुत बंधनं ९ यदर्थेन विना ऽमुष्य पुंस आत्मविपर्ययः प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः १०

तद्व्यतिरेकाभावात् एवं च सति अमुष्य जीवस्य दुर्भगत्वं आनंदादिभ्रंशः कर्मसंबंधाभावात् अन्यथा ईश्वरस्यापि तत्प्रसंगः स्यादिति भावः ६ अज्ञानमेव संकटं दुर्गं तस्मिन् खिन्नमानसं कश्मलं मोहं परानुद अपाकुरु ७ चोदितः आक्षिप्तः स्मयन्निव संशयबीजं आविष्कुर्वन्निव कृतार्थत्वात् गतस्मयः ८ भगवतश्चित्शक्तेरीश्वरस्य सेयं माया यन्नयेन तर्केण विरुध्यते नियतं एवं तर्कविरोधमेवानुवदति विमुक्तस्य स्वतःसिद्धमोक्षस्य विद्यया बंधनं कार्पण्यं चेति ९ अत्रोदाहरणमाह यद्यथात्र अर्थेन शिरश्छेदादिना विनापि उपद्रष्टुः स्व- २४
प्रत्यक्षिणः मम इदं मम मे शिरः छिन्नमित्यात्मविपर्ययः केवलं स्वप्न एव प्रतीयते तद्वत् १०

तर्हीश्वरस्यापि किं न प्रतीयेत तत्राह ॥ यथा जले प्रतिबिंबस्यैव चंद्रमसो जलोपाधिकृतः कंपादिधर्मो दृश्यते न त्वाकाशे स्थितस्य तथाऽनात्म
नो देहादेर्धर्मः असत्त्वपि तदभिमानिनो जीवस्यैव न त्वीश्वरस्येत्यर्थः ॥११॥ तन्निवृत्त्युपायमाह स वै इति अनात्मनो गुणः निवृत्तिधर्मेण वासुदेवानुकं
पात यावत् तस्मिन् भक्तियोगः तेन तिरोधत्ते अदृश्यो भवति ॥ शनैरित्यनेन साधनानुसारेणोक्तं ॥१२॥ तर्हि सर्वानर्थनिवृत्तिः कदेत्यपेक्षायामाह यदे
न्द्रियाणामुपरामो नैश्चल्यं द्रष्टर्यात्मनि अंतर्यामिरूपेऽथ अनंतरमेव ॥ कृत्स्नक्लेशविलयमात्रे दृष्टांतः संसुप्तस्येवेति ॥ नतु पुनरुत्थाने ॥१३॥ भक्ति

यथा जले चंद्रमसः कंपादिस्तत्कृतो गुणः ॥ दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ॥११॥ स वै निवृत्तिधर्मेण वासुदेवानुकं
पया ॥ भगवद्भक्तियोगेन तिरोधत्ते शनैरिह ॥१२॥ यदेंद्रियोपरामोऽथ द्रष्ट्रात्मनि परे हरौ ॥ विलीयंते तदा क्लेशाः संसुप्तस्येव
कृत्स्नशः ॥१३॥ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः ॥ कुतः पुनस्तच्चरणारविंदपरागसेवारतिरात्मल
ब्धा ॥१४॥ विदुर उवाच ॥ संछिन्नः संशयो मह्यं तव सूक्तासिना विभो ॥ उभयत्रापि भगवन्मनो मे संप्रधावति ॥१५॥

योगेन क्लेशनिवृत्तिं दर्शयति अशेषेति ॥ गुणानामनुवादस्य श्रवणं च आत्मनि मनसि लब्धा श्रवणकीर्तनापेक्षया सेवया ध्यानेन किं पुनर्न्यायोक्तिः ॥१४
उक्तमभिनंदन्नात्मनः कृतार्थतामाविः करोति ॥ संछिन्न इति षड्भिः चिद्रूपत्वाविशेषेपि कथमीश्वरस्य जगत्कर्तृत्वादि कथं वा जीवस्य संसार इति
यः संशयो मामासीत् ॥ स त्वत्सूक्तं सोपपत्तिकं वाक्यमेवासिः खड्गस्तेन संछिन्नः अत इदानीं मे मनः उभयत्रापि ईश्वरत्वात्ते जीवस्य पारतंत्र्ये च सं
प्रधावति सम्यक् प्रविशति ॥ एवं चास्य विलुप्तावबोधरूपस्यात्मनः कथमविद्यया बंधः कुतो वा तन्निवृत्तिरिति संशयः उभयत्रेति बंधमोक्षे चेत्यर्थः ॥१५

यस्मात्त्वया साधु व्याहृतं ‖ किं तत् हरेः शक्तिर्या आत्ममाया जीवविषया तदयनं तदाश्रयमेतत् तदुपरिगत्वादिकं भातीति ‖ यद्यस्मात्त्वाशिरःछेदा
दिवदपार्थमवस्तुभूतमूलशून्यंच ‖ यस्मादस्य विश्वस्य मूलं त्वाज्ञानं विनावहिर्नास्ति ‖१६‖ अल्पत्वात्पूर्वमममसंशयो जातइत्याह ‖ यश्चेति
मूढतमो देहाद्यासक्तः बुद्धेः प्रकृतेः परमीश्वरं प्राप्तस्तौ सुखं यथा भवति तथा एधेते जीवतइत्यर्थः संशयक्लेशाभावात् ‖ यस्तु दुःखोत्त
संधानेन प्रपंचं जिहासति तस्यानंदसंवेदनाभावाद्द्वैतं नशक्नोति सत्त्वक्लिश्यतीत्यर्थः ‖१७‖ इदानीं कृतार्थोस्मि ‖ यतस्त्वया संशयच्छि

साध्वेतद्व्याहृतं विद्वन्नात्ममायायनं हरेः ‖ आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः ‖१६‖ यश्च मूढतमो लो
के यश्च बुद्धेः परं गतः ‖ तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ‖१७‖ अर्थाभावं विनिश्चित्य प्रतीतस्यापि
नात्मनः ‖ तां चापि युष्मच्चरणसेवयाहं पराणुदे ‖१८‖ यत्सेवया भगवतः कूटस्थस्य मधुद्विषः ‖ रतिरासो भवेत्ती
व्रः पादयोर्व्यसनार्दनः ‖१९‖ दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु ‖ यत्रोपगीयते नित्यं देवदेवो जनार्दनः ‖२०‖

न्नः केवलं बाधितानुवृत्तिरेवावशिष्टा साऽपि युष्मत्प्रसादान्निवर्तिष्यतइत्याह ‖ नात्मनः अनात्मनः प्रपंचस्य प्रतीतस्यापि त्वर्थाभावं अर्थोत्र ना
स्ति किंतु प्रतीतिमात्रं युष्मच्चरणसेवया निश्चित्य तां प्रतीतिमप्यहं पराणुदे अपनेष्यामीत्यर्थः ‖१८‖ मधुद्विषः पादयोरतिरासः प्रेमोत्सवस्ती
व्रउद्वोरः स्वाभाविकः व्यसनं संसारमर्दयतीति तथा ‖१९‖ अहो दुर्लभमेतत् प्रार्थ्यमेतत्याह ‖ दुरापा दुर्लभा वैकुंठस्य विष्णोः तद्भक्तस्य वा वर्त्मसु मार्गे
ष्वतेषु महत्सु एवयेषु महत्सु सेवया हरिकथाश्रवणं ततो हरौ प्रेम तेन च देहाद्यनुसंधानमपि निवर्तते इति तात्पर्यं ‖२०‖

अर्थान्तरं पृष्टं तदुक्तमनुवदति त्रिभिः सृष्ट्वेति विकारैरिंद्रियादिभिः सहितानि उद्धृत्य तदंशैर्विराजं सृष्ट्वा २१ प्रविष्टस्य स्वरूपमाह यमिति विराजं वि-
शिनष्टि यत्रेति ॥ तेऽमे विश्वे सर्वे लोकाः सविकाशं स्वसंकोचेन ॥ २२ ॥ प्राणादयः पंच नागादयः पंचेति एवं दशविधः इंद्रियाणि च अर्थाश्च इंद्रियाणि
चेति त्रिवृत्त्वं तस्यैवं विलक्षणायां ॥ तत्सहितः सर्वोपबृंहकत्वात् प्राणस्य तत्साहित्यं ॥ एवं त्रिवृत् त्रिविधः प्राणस्त्वयेरितः उक्तः तस्य विभूतिर्

सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् ॥ तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः ॥ २१ ॥ यमाहुराद्यं पुरुषं सहस्राङ्घ्र्यूरुबाहुकं
यत्र विश्व इमे लोकाः सविकाशं त आसते ॥ २२ ॥ यस्मिन्दशविधः प्राणः सेन्द्रियार्थेन्द्रियस्त्रिवृत् ॥ त्वयेरितो यतो वर्णास्तद्विभू-
प ३२ तीर्वदस्व नः ॥ २३ ॥ पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः ॥ प्रजा विचित्राकृतयः आसन्याभिरिदं ततं ॥ २४ ॥ प्रजापतीनां स पति-
श्चक्लृपे कान्प्रजापतीन् ॥ सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराधिपान् ॥ २५ ॥ एतेषामपि वंशांश्च वंश्यानुचरितानि च ॥ उपर्य-
धश्च ये लोका भूमेर्मित्रात्मजासते ॥ २६ ॥ तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय ॥ तिर्यङ्मानुषदेवानां सरीसृपपतत्रिणां
वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदां ॥ २७ ॥ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयं ॥ सृजतः श्रीनिवासस्य व्याचक्ष्वोदार-

स्थायाः विसर्गा इत्याद्याः ॥ २२ ॥ यत्र याभिरिदं विश्वं ततं व्याप्तं ॥ २४ ॥ एवमेतत्सु राष्ट्रेष्वमे येयो भगवान् किं चेति परीक्षित्प्रश्नोत्तरतया विदु विक्रमं ॥ २८ ॥
रमेत्येषु संवादः प्रस्तावितः अतस्तानेव विदुरेण कृतान्प्रश्नानाह ॥ यावत्समाप्ति प्रजापतीनां पतिर्ब्रह्मा तेन कर्तृभूतादीनां वर्णयेति वक्ष्यमाणेनान्वयः चिक्लृपे
अकल्पयत सर्गान्नवविधान् अनुसर्गान् तद्दरान् ॥ २५ ॥ हे मित्रायाः आत्मज ॥ २६ ॥ संस्थां संनिवेशं सर्गाणां संव्यूहं सृष्टिविभागं गार्भस्वेदद्विजोद्भिदां गार्भज

तमेव विशिनष्टि ॥ त्वामेव धिष्ण्यं त्वीमाश्रयं वासुदेवं संतं परमानंदरूपं ध्यानपथेषु सूर्यवद्वर्धमानं यतं सर्वोत्कर्षेण पूजयंतं प्रत्यग्धृतं मत्संमुखीकृतं नेत्राम्बुजकोशं किंचिदुन्मीलयंतं कृपावलोकेन सनत्कुमारादीनामभ्युदयार्थं ॥४॥ स्वर्धुनीनां विशेषणमाधेन स्वर्धुन्या उदकेनार्द्रैः इति श्रीभागवतश्रवणार्थं सत्यलोकात्पातालपर्यंतमवतरंतो निरंतरं गंगामध्यत एवावतीर्णा इति भावः चरणोपधीयते यस्मिंस्तत्पद्मं तदुपस्पृशंतो नमंतः ॥ कथंभूतं तदाह ॥ यत्पद्मं प्रेमसहितं यथा भवत्येवं नानोपहारैः पूजयंति वरार्थ्याः पतिकामाः ॥५॥ कृतानि कर्माणि गृणंतः के

त्वामेव धिष्ण्यं वर्द्धमानं यत्तं पवासुदेवाभिधमामनंति ॥ प्रत्यग्धृताक्षांबुजकोशमीषदुन्मीलयंतं विबुधोदयाय ॥४॥ स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानं ॥ पद्मं यदर्चंत्यहिराजकन्याः सप्रेमनानाबलिभिर्वरार्थाः ॥५॥ मुहुर्गृणंतो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः ॥ किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रं ॥६॥ प्रोक्तं किलैतद्भगवत्तमेन निवृत्तधर्माभिरताय तेन ॥ सनत्कुमाराय स चाह पृष्टः सांख्यायनायांग धृतव्रताय ॥७॥ सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः ॥ जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाथ बृहस्पतेश्च ॥८॥

नानुरागेण स्खलंति पदानि यस्मिंस्तेन वचसा तानि जानंतीति तज्ज्ञाः सहस्रमेव साहस्रं किरीटानां साहस्रं तेषु मणिप्रवेकाः रत्नोत्तमाः तैः प्रद्योतितं उद्दामफणानां सहस्रं यस्य तं ॥ षष्ठ्यंतमिति पूर्वेणान्वयः ॥६॥ तेन संकर्षणेन सनत्कुमाराय प्रोक्तं ॥७॥ पारमहंस्यो धर्मस्तत्र मुख्यः विवक्षमाणः इत्यात्मनेपदं ब्रुवादेशस्य वचेरुभयपदित्वात् ॥ अन्विताय अनुगताय ॥८॥

पुलस्त्येनोक्तः इत्येवमाख्यायिका ॥ पितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षससत्रे प्रवृत्तो वसिष्ठवचनान्निवृत्तस्ततः पुलस्त्येन त्वसंततिरक्ष
णान्तुष्टेन वरो दत्तः पुराणप्रवक्ता भविष्यसीति ॥ ७ ॥ तदेवं संकर्षणात्संप्रदायप्रवृत्तिं प्रदर्श्य विभूतिकथनाय पद्मोद्भवं वक्तुमाह ॥ उदाप्लु
तं एकार्णवोदके निमग्नं यत्तदा यदा अमीलितदृक् श्रुतिरोहितविच्छक्तिरेव श्रीनारायणो नेत्रे निमीलितवानित्यर्थः ॥ मायाविनोदं परित्यज्य स्वा
त्मरतो स्वरूपानन्देनैव कृतोत्सवः अत एव निरीहः यः क्रियः सन् ॥ १० ॥ कालशक्तेः प्रेरणात्मनः स्वप्नवसरे प्रबोधनार्थं स्वे पदे अधिशेने वाहितं इत्यभा

प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं ॥ सोहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ॥ ७ ॥ उदाप्लुतं वि
श्वमिदं तदासीद्यन्निद्रयामीलितदृङ्न्यमीलयत् ॥ अहीन्द्रतल्पेधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः ॥ १० ॥ सोन्तः
शरीरेर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः ॥ उवास तस्मिन्सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः ॥ ११ ॥ च
तुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या ॥ कालाख्ययासादितकर्मतन्त्रो लोकानपीतान्ददृशे स्वदेहे ॥ १२ ॥ तस्यार्थ
सूक्ष्माभिनिविष्टदृष्टेरंतर्गतोर्थो रजसा तनीयान् ॥ गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् ॥ १३ ॥

वे दृष्टांतः यथानल इति ॥ ११ ॥ स्वया विच्छक्त्या सह वर्त्तमान एव योगनिद्रया स्वपन् पूर्वमेव बोधनार्थं नियुक्तया स्वकालशक्त्या आसादितं प्रापितं कर्मतंत्र
क्रियाकलापो यस्य सः ॥ अपीतान् लीनान् ददर्श ॥ १२ ॥ लोकसृष्ट्यर्थं अर्थसूक्ष्मेऽभिनिविष्टदृष्टिर्यस्य कालानुसारिणा रजोगुणेन विद्धः संक्षोभितः सन् त
नीयान् निम्नोऽर्थः सूष्यन् प्रसोष्यन् उद्भविष्यन् नाभिदेशादुद्भूत इत्यर्थः ॥ १३ ॥

भा०त्
१८

सः तन्नीयानर्थः पद्मकोशः समुदतिष्ठत् । कर्माण्याजीवाद्दृष्टानि प्रतिबोधयतीति यः कालस्तेन । आत्मा श्रीविष्णुर्योनिर्यस्य ॥ १४ ॥ ततो लोकात्मकं पद्मं
सर्वान्गुणान्जीवभोग्यानर्थानवभासयतीति तथा । तत पद्मात्तज्जातस्स एव विष्णुः उ इति संबोधने प्राविविशत् । एवकर्षणात्स्वप्नशक्तिरेवांतर्या
मितया विवेश । तस्मिन्विष्णुनाधिष्ठिते पद्मे विधाता ब्रह्माऽभूत् कथंभूतः स्वयमेव वेदमयः न त्वध्ययनेन प्राप्तवेदः कोसौ अत्र इष्टपित
त्वेन यं स्वयंभुवं वदंति सः प्राक्कल्पांते नारायणेन सह निद्रायैकीभूत आसीत् । तस्मिन्स्वप्रबुद्धे तत एव प्राक्कल्पे महदारणापिव्यक्तिं प्राप्त इत्यर्थः

सपद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधनेन । स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः ॥ १४ ॥ त
ल्लोकपद्मं स उ एव विष्णुः प्राविविशत्सर्वगुणावभासं । तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यस्म वदंति सोऽभूत् ॥ १५ ॥ तस्यां
स चांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः । परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥ १६ ॥
तस्माद्युगांतश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढं । उपाश्रितः कंजमु लोकतत्वं नात्मानमद्धाऽविददादिदेवः ॥ १७ ॥

१५ ॥ स च तस्मिन्कल्पे चतुर्मुखोऽभूदित्याह तस्यामिति । परिक्रमतस्तत्रस्थस्यैव ग्रीवां चालयतो लोकनिरीक्षणार्थं विवृत्ते विचलिते नेत्रे यस्य ॥ १६ ॥
तस्य च श्रीनारायणोपासनयैवाविर्भूततत्तानाक्रियाशक्तेर्लोककर्तृत्वेन स्वतंत्र इति वक्तुं प्रथमं तस्य विमोहमाह । तस्मात्सलिलात् । विरूढं उद्गतं कंज
मुपाश्रितोऽपि प्राक्कल्पेन तत्कंजं लोकतत्वं चात्मानं च साक्षाज्ज्ञातवान् । उ इति विस्मये कथंभूतात् युगांतश्वसनः प्रलयवायुः तेनावघूर्णितं चत
च्चप्रकंपितं जलं तस्मात्तस्यैव ऊर्मिचक्रं यस्मिन् ॥ १७ ॥

राम
१८

आविर्बुभूषत्स्य वितर्कमाह ‖ कोसावहमब्जपृष्ठे एष कः अनन्यत् एकमेवैतदब्जं कुतो वा जातं यद्वै तेन तदधिष्ठितं तेन अधस्तात् सतावश्यं भाव्यमानेन
निश्चितं भाव्यं सः इत्थमुद्वीक्ष्य तन्नारेणाम्बुपः तथाच श्रुतिः सोपश्यत्पुष्करपर्णं तिष्ठत् सोमन्यत अस्ति वै तत् यस्मिन्निदमधितिष्ठतीति ‖१८‖ तस्य
चवाहि दुरवगत्वात् महतापि कालेन तद्दृष्टमित्याह ‖ स इति द्वाभ्यां तस्य अब्जस्य यन्नालं तस्य नाडीभिः रंध्रैः तस्य खरं नालं यस्य पद्मस्य यन्नालं तस्य

क एष योऽसावहमब्जपृष्ठे एतत्कुतो वाऽब्जमनन्यदप्सु ‖ अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता नु भाव्यं ‖१८‖ सइ
त्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश ‖ नार्वाग्गतस्तत्खरनालनालनाभिं विचिन्वंस्तदविंदताजः ‖१९‖
तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभूत्सुमहांस्त्रिणेमिः ‖ यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः ‖२०‖
ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः ‖ शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः ‖२१‖

नाभिमधिष्ठानं विचिन्वन्नर्वाग्गतोपि तन्नरानाविंदत ‖१९‖ आत्मसर्गस्य कारणं ‖ त्रिणेमिः कालः अजस्य विष्णोः हेतिः सुदर्शनरूपं शस्त्रं ‖ देहभा
जां जनानां भयमुत्पादयन् त्रितिसंवत्सरात्मा अतिक्रांतमभिसन्नो भवति ‖२०‖ अनंतपुरवत्याब्ज भगवंतं दृष्ट्वा निवृत्त आह ‖ द्वाभ्यां ततः अन्वेषणान्निवृत्तः
न प्रतिलब्धः कामो मनोरथो येन स्वधिष्ण्यं पद्मं ‖ जितेन श्वासेन निवृत्तं संयतं चित्तं यस्य ‖ अत एव आरूढः आश्रितः समाधियोगो येन तथाभूतः
सन् न्यषीदत् उपविवेश ‖२१‖

ग्ग२

भा० त्
२७

पुरुषायुषा संवत्सरशतेन कालेन अभिप्रवृत्तः हृन्निष्क्रान्तो योगस्तेन विरूढः उत्पन्नो बोधो यस्य सः पूर्वं विचिन्वन्नपि नापश्यत् तत् स्वयमेवांतर्हृदये अवभातमपश्यत् ॥ २२ ॥ यदपश्यत् तद्दर्शयति मृणालेति त्रिभिः नवबिसपरिपारितस्येवानुपेतः मृणालवद्गौरश्चासावायतश्च यः शेषस्य भोगो देहः स एव पर्यंकः तस्मिन् कृतस्थितिं पर्यंके फणा एवातपत्राण्ययुतानि सर्वतो धृतानि येषु मूर्धानः तेषां रत्नानि किरीटस्थानि तेषां द्युभिः प्रभाभिर्हतं ध्वान्तं युगान्ततोये ॥ २३ ॥ कथंभूतं पुरुषं हरितोपलाद्रेर्मरकतशिलामयपर्वतस्य प्रेक्षां शोभां क्षिपंतं स्वलावण्यातिशयेनातिर

कालेन सोऽजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः ॥ स्वयं तदंतर्हृदयेऽवभातमपश्यतापश्यत यन्न पूर्वं ॥ २२ ॥ मृणालगौरायतशेषभोगपर्यंक एकं पुरुषं शयानं ॥ फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वांतयुगांततोये ॥ २३ ॥ प्रेक्षां क्षिपंतं हरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्ध्नः ॥ रत्नोदधारौषधिसौमनस्यवनस्रजो वेणुभुजांघ्रिपांघ्रेः ॥ २४ ॥

स्कुर्वंतं संध्याभ्रं नीवी परिधानं यस्य तस्य शोभां पीतांबरेणाक्षिपंतं उरुरुक्ममूर्ध्नः अनेकसुवर्णशिखरस्य स्वकिरीटैः रत्नानि उदधाराश्च औषधयश्च सौमनस्यानि च पुष्पसमूहाः एतन्मनस एव वानेषा वनस्रजः वनमाला यस्य ॥ वेणव एव भुजा यस्य अंघ्रिपा एवांघ्रयो यस्य स चासौ स च तस्य ॥ अयमर्थः यदि तस्मिन्नमालादिव स्थिता रत्नादयो भवंति वेणवश्च भुजा इव ॥ वृक्षाश्च पादा इव ॥ तर्हि तस्य शोभां त्वीपरस्त्वेन कौस्तुभपादास्मभिः ॥ उज्जैरादिभिः क्षिपंतमिति ॥ २४ ॥

राम
२७

किंच आयामवतो दैर्घ्येण विस्तारवता स्थूलमानेन देहेन प्रीयते अनेनेति प्रमानं उपमाशोभनं स्वाभाविकमानो निरूपमो देहः तेन यद्वा सुष्ठु प्रमानः
अपरिछिन्नत्वेन । यद्वा नाभ्यां त्वा उरूपप्रमाणेन अत एव लोकत्रयं संगृह्यते यस्मिन् तथा विचित्राणि नानाविधानि दिव्यान्यपूर्वाणि चाभ
रणान्यंशुकानि च तेषां कृता आसमंतात् श्रीः शोभा येन तेन देहेन विशिष्टं एवंभूतं एवं चातिरम्यत्वे विभुपाश्रितवेषः स्वीकृतालंकारो देहो य
स्य तं प्रपद्यत । यद्वा केन प्रेक्षाक्षिप्तं नास्ति यत्प्रेक्षायामेवंभूतेन देहेनेति संबंधः ॥ १५ ॥ त्वामिलषितफलाय विविक्तैर्मार्गैः षड्भिर्वेदोक्तैर्मार्गैरभ्यर्च

आयामवतो विस्तृततः स्वमानदेहेन लोकत्रयसंग्रहेण । विचित्रदिव्याभरणांशुकानां कृतश्रियापाश्रितवेषदेहं ॥ १५ ॥ प्रभा
त्विकामाय विविक्तमार्गैरभ्यर्चतां कामदुघांघ्रिपद्मं । प्रदर्शयंतं कृपया नखेन्दुमयूखभिन्नांगुलिचारुपत्रं ॥ १६ ॥ मुखेन लो
कार्त्तिहरस्मितेन परिस्फुरत्कुंडलमंडितेन । शोणायितेनाधरबिंबभासा प्रत्यर्हयंतं सुनसेन सुभ्र्वा ॥ १७ ॥ कदंबकिंजल्क
पिशंगवाससा स्वलंकृतं मेखलया नितंबे । हारेण चानंतधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन ॥ १८ ॥

तां सतां कामदुघमांघ्रिपद्मं प्रदर्शयंतं किंचिदुन्नमय्य समर्पयंतं । नखा एव इंदवस्तेषां मयूखा रश्मयः तैर्भिन्नाः संभिन्ना अंगुलय एव चारूणि प
त्राणि यस्य तं ॥ १६ ॥ लोकार्त्तिहरं स्मितं यस्मिन् तेन । परिस्फुरद्भ्यां कुंडलाभ्यां मंडितेन अधरबिंबस्य भासा शोणवर्णीकृतेन शोभनेन नासायुक्तेन
सुभ्र्वा शोभनेन भ्रूयुक्तेन वा । प्रत्यर्हयंतं पूजकान् प्रतिपूजयंतं संमानयंतं ॥ १७ ॥ कदंबकिंजल्कवत् पिशंगं यद्वासस्तेन मेखलया च नितंबे स्वलंकृतं । दे
वत्स श्रीवत्सचिह्नं यद्वक्षःस्थलं तस्य वल्लभेन वक्षस्यनर्घेण हारेण स्वलंकृतमित्यर्थः ॥ १८ ॥

भा०टी
३०

महाचंदनवृक्षरूपकेण निरूपयितुं तं विशिनष्टि । पराद्ध्यानि श्रेष्ठानि केयूराणि अंगदानि मणिप्रवेकाः श्रेष्ठमणयस्तैः पर्यस्ता व्याप्ता दोर्दंडा
एव सहस्रं अनंताः शाखा यस्य चंदनवृक्षोपि केयूरादितुल्यैः फलपुष्पादिभिर्व्याप्तशाखो भवति अव्यक्तं प्रधानं मूलमधोभागो यस्य । यद्वा अव्यक्तं
ब्रह्म मूलं यस्य ब्रह्मापि अव्यक्तिरूपत्वात् वृक्षस्यापि मूलमव्यक्तं । भुवनात्मकमंघ्रिपेंद्रं अहींद्रस्यानंतस्य भोगैः फणैः देहावयवैर्वा अधिवीताः
संवेष्टिताः स्कंधावल्शाः स्कंधा यस्य । वनस्पते शतवल्शो विरोहेति श्रुतेः सोपि सर्पैर्वेष्टितो भवति ॥ २९ ॥ पेंद्रांघ्रिपत्वमित्यत्रैव पर्वतरूपे
ण निरूपितमपि विशेषणांतरैः पुनर्निरूपयति । भगवानेव महीध्रस्तं । चराचराणामोकः स्थानं सोपि तथा अहींद्रः स्वबंधुः सोपि अहींद्रो

पराद्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं । अव्यक्तमूलं भुवनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शं ॥ २९ ॥ चराचरौ
को भगवन्महीध्रमहींद्रबंधुं सलिलोपगूढं । किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भं ॥ ३० ॥ निवीतमाम्नाय
मधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिं । सूर्येंदुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदं ॥ ३१ ॥

स्वबंधुः सोपि तेषां बंधुः सलिलेनोपगूढमावृतं । पर्वतोपि मैनाकादिस्तथा किरीटसाहस्रमेव हिरण्यशृंगाणि यस्य । सोपि मेर्वादिस्तथा यथाप्य
ेतस्य गर्भे रत्नविद्रत्नमाविर्भवति तथा आविर्भवत्प्रकटं दृश्यमानं कौस्तुभरत्नं गर्भे मूर्तिमध्ये यस्य तं ॥ ३० ॥ किंच वनमालया निवीतं कंठलंबि
न्याव्याप्तं । आम्नाया वेदा एव मधुव्रतास्तैः श्रीर्यस्यास्तया । हरिमिति पर्वतादिरूपं परपक्षे हरिस्तु वितिज्ञातवानित्यर्थः सूर्यादिभिरगम्यं ज्ञानमध्ये । एष
व्यापारेण कलयितुमशक्यमित्यर्थः किंच त्रिष्वपि लोकेषु धामसु ज्योतिर्षु तैः रक्षणार्थं परिक्रामद्भिः परितो धावद्भिः प्राधनिकैः प्रधनं संग्रामः २०
तस्य योजनैः स्वदर्शनादिभिर्दैत्यभूतैर्दुरासदं दुःप्राप ॥ ३१ ॥

यदैवं हृदि अपश्यत् तदैव तं तदेवं लोकविसर्गदृष्टिः सन्न तस्य नाभिसरसि सरोजं स्वमात्मानं जलं पवनं वायुं वियत् आकाशं च ददर्श ॥ ३२ ॥ कर्मबीजं लो
कसृष्टेः कारणं उपरक्तः रजोगुणेनोपयुक्तः अतः प्रजाः स्रष्टुमिच्छुः इयदेव नाभिसरोजादिकं पंचकमेव विसर्गाभिमुखः सन्नविन्नः
अव्यक्तवर्त्मनि भगवति निवेशितचित्तः ॥ ३३ ॥ तृतीये अष्टमः ॥ नवमे तपसा तुष्टं दृष्ट्वा नारायणं त्वजः ॥ अस्तौदेकार्णवे सीदन्न् लोकसर्ग

तर्ह्येव तन्नाभिसरः सरोजमात्मानमंभः श्वसनं वियच्च ॥ ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ॥ ३२ ॥
स कर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा ॥ अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशिता
त्मा ॥ ३३ ॥ इति श्री भागवते महापुराणे तृतीयस्कंधे अष्टमोध्यायः ॥ ब्रह्मोवाच ॥ ज्ञातोसि मेद्य सुचिरान्ननु देह
भाजां न ज्ञायते भगवतो गतिरित्यवद्यं ॥ नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि ॥ १ ॥

चिकीर्षया ॥ १ ॥ भगवज्ज्ञानेनात्मनः कृतार्थतामाविः कुर्वन्नज्ञताप्रशोचन्नाह ॥ ज्ञातोसीति सुचिरात् बहुकालोपासनेन अद्य मेमया ज्ञातोसि
ननु अहो देहभाजामेतदेवावद्यं दोषः किं तत् यद्भगवतस्तत्त्वगतिः तत्त्वं न ज्ञायत इति ॥ यतस्त्वमेव ज्ञातव्योसि सत्यत्वात् ॥ नान्यत् अस्त्यसत्वात् इत्याह
त्वत्तत्त्वतो न्यन्नास्ति यदस्त्यपीति प्रतिभाति तदपि शुद्धं सत्यं न भवति कथमसतः प्रतीतिस्तत्राह यद्यतः मायागुणक्षोभात् एव उरुः बहुरूपो वि
त भासि ॥

भा॰ तृ
३१

नन्वत्वमपि सम्यङ्न जानामि यत्त्वया दृश्यरूपमेतदपि गुणात्मकमेव निर्गुणं ब्रह्मैव तत्सत्यं तत्राह रूपमिति द्वाभ्यां अवबोधरसोदयेन विच्छुरत्या
विर्भावेन शश्वन्निवृत्तं तमो यस्मात्तस्य वपुरेतद्रूपं त्वयैव स्वात्तं अणिमतामुपासकानामनुग्रहाय गृहीतमाविः कृतं अवतारशतस्य मुख्यस्य
त्वात्मकस्य परेकं बीजं मूलं तत्त्वदर्शनार्थं गुणावतारबीजत्वं दर्शयति यन्नाभीति ॥१॥ हे परम अविद्धवर्चः अनावृतप्रकाशं अतः अविकल्पं
निर्भेदं अत एवानंदमात्रं भूतं यद्भवतः स्वरूपं तत्त्वतो रूपान्तरं भिन्नं न पश्यामि किंतर्हि इदमेव तत् ॥ अतः कारणात् तेनैव अरः इदं रूपं उपाश्रितोस्मि

रूपंयदेतदवबोधरसोदयेनशश्वन्निवृत्ततमसः सदनुग्रहाय ॥ आदौगृहीतमवतारशतैकबीजंयन्नाभिपद्मभवनादहमाविरासं ॥१॥ नातःपरंपरमयद्भवतःस्वरूपमानंदमात्रमविकल्पमविद्धवर्चः ॥ पश्यामिविश्वसृजमेकमविश्वमात्मन्भूतेंद्रियात्मकमदस्तउपाश्रितोस्मि ॥२॥ तद्वाइदंभुवनमंगलमंगलायध्यानेस्मनोदर्शितंतउपासकानां ॥ तस्मैनमोभगवतेनुविधेमतुभ्यंयोनादृतोनरकभाग्भिरसत्प्रसंगैः ॥४॥

मंगल ३

योगपत्त्वादपीत्याह एकं उपास्येषु मुख्यं यतः विश्वसृजं अत एव अविश्वं विश्वस्मादन्यत् ॥ किंच भूतेंद्रियात्मकं भूतानामिंद्रियाणां चात्मा
नं कारणमित्यर्थः ॥२॥ नन्वेवमपि सोपाधिकमेतदर्वाचीनमेवेत्याशंक्याह ॥ तद्वै तदेवेदं भुवनमंगल यतः ते त्वया नोस्माकमुपासकानां मं
गलाय ध्याने दर्शितं ॥ नत्वव्यक्तवर्त्माभिनिवेशितचित्तानां अस्माकं त्वया सोपाधिकदर्शनं युक्तमिति भावः अतस्तस्मै नमो अनुविधेम अनुवर्ते
त्वाकरवाम तर्हि किमिति केचिन्नाद्रियंते तत्राह ॥ योनादृत इति असत्प्रसंगैः निरीश्वरकुतर्कनिष्ठैः ॥४॥

एम
३१

आदरेण त्वां भजंतः कृतार्था इत्याह ॥ येषामिति ॥ श्रुतिर्वेदः स एव वातः तेन नीतं प्रापितं नापैषि नापयासि ये त्वत्कथाश्रवणमत्यादरेणाकु
र्वंति तेषां हृदि नित्यप्रकाश इत्यर्थः ॥५॥ ततः किमत आह ॥ तावदिति ॥ द्रविणादौ विद्यमाने भयं ॥ गते शोकः पुनस्तत्स्पृहा ॥ ततः परिभवः ॥
तथापि विपुलो लोभः तस्मात्पुनः कथंचित्प्राप्ते ममेत्यसदाग्रहः आर्त्तिमूलं भयशोकादेः कारणं न प्रवृणीत नाश्रयेत ॥ त्वत्पादाश्रयणमा

येषां त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतं ॥ भक्त्या गृहीतचरणः परया च तेषां नापैषि
नाथ हृदयांबुरुहात्स्वपुंसां ॥५॥ तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः ॥ ताव
न्ममेत्यसदवग्रह आर्त्तिमूलं यावन्न तेंघ्रिमभयं प्रवृणीत लोकः ॥६॥ दैवेन ते हतधियो भवतः प्रसंगात्सर्वाशु
भोपशमनाद्विमुखेंद्रिया ये ॥ कुर्वंति कामसुखलेशलवाय दीना लोभाभिभूतमनसोऽकुशलानि शश्वत् ॥७॥

त्रेण भयादिनिवृत्तिः किंपुनस्त्वत्साक्षात्कारो भवतीति भावः ॥६॥ ये निष्कामा अपि संतस्त्वां नाद्रियंते ते नरकभाज इत्युक्तं ॥ ये तु त्वत्कथाश्रवणादिवि
मुखाः संतः काम्यकर्मपरास्ते नितरां दीना इत्याह ॥ दैवेनेति ॥ हतधियो नष्टमतयः प्रसंगात् श्रवणकीर्त्तनादिरूपात्सर्वदुःखनिवर्त्तकात् ॥ विमु
खानींद्रियाणि येषां ॥ अकुशलानि अशुभकर्माणि ॥७॥

अकुशलत्वमेव दर्शयति क्षुत्तृट्च त्रिधातवश्च वातपित्तश्लेष्माणस्तैः इमाः प्रजाः सुदुर्भरेण दुःसहेन कामाग्निनाच्युत रुषा च विच्छिन्नक्रोधेन च पीड्यमानाः संपश्यतो मे मनः सीदति ॥ ८ ॥ ननु चैवंभूतायाः संसृतेः परमार्थत्वान्निमर्थविषादः क्रियते तत्राह यावदिति आत्मन इदं पृथक्त्वं देहादिभावं भगवतस्तव इंद्रियार्थरूपाया मायाया बलमाधिक्यं यस्मात्तत् नपश्यति संक्रमेत नोपरमेत दुःखसमूहं प्रापयतीति क्रियाणामर्थः फलं यस्याः ॥ ९ ॥ भगवत्स्वेवमविवेकिनां विवेकवतस्तु कृतार्था एवेति किं तेषां भजनाप्रै ~~वमिति किं तेषां भजना~~ कृतमत आह अह्नि आपृतानि व्यापृतानि

क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च । कामाग्निनाच्युत रुषा च सुदुर्भरेण संपश्यतो मन उरुक्रम सीदते मे ॥ ८ ॥ यावत्पृथक्त्वमिदमात्मन इंद्रियार्थमायाबलं भगवतो जन ईश पश्येत् । तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थापि दुःखनिवहं वहती क्रियार्था ॥ ९ ॥ अह्न्यापृतार्त्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः । दैवाहतार्थरचना ऋषयोपि देव युष्मत्प्रसंगविमुखा इह संसरंति ॥ १० ॥ त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसां । यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ॥ ११ ॥

च तानि आर्त्तानि क्लिष्टानि करणानींद्रियाणि येषां । एवं विषयसुखलवोपिनास्ति यतो निशि निःशयानाः स्वप्नदर्शनेन च क्षणे क्षणे भग्ननिद्राः दैवेनाहताः सर्वतः प्रतिहताः अर्थरचना अर्थार्थोद्यमा येषां ॥ १० ॥ तदेवमभक्तानां संसारान्निवृत्तिमुक्त्वा भक्तानां तन्निवृत्तिमाह त्वमिति भक्तियोगेन समाधिते हृत्सरोजे आस्से तिष्ठसि श्रुतेन श्रवणेनेक्षितः पंथा यस्य किं च श्रवणादिना विनापि त्वद्भक्ता मननमात्रेण यद्यत्तव वपुः रूपं स्वेच्छया ध्यायंति तत्तत्तत्प्रण

भक्तानां च निष्कामानां त्वमतिसुलभो नेतरेषामित्याह नेति उपचितैः उपचारैः पुष्पोपहारादिभिः यत्तथा असतामभक्तानामलभ्यया दयया
प्रियत्वे हेतुः एक इत्यादि ॥१२॥ यतः सकामानां भवान्नातिप्रसीदति अतः कामप्सुभिः क्रियाणां पुष्कलं फलं न भवति । किं तु त्वत्प्रीणनमेव
कामं सयोगान्तमवान्तरफलेन प्ररोचनार्थमित्याह पुंसामिति ॥ भगवतस्तवाराधनमेव संस्थापोक्तिक्रियार्थं सुश्रेष्ठं क्रियाफलं श्रेष्ठं त्वं हि
तोः ॥ यत्र त्वय्यर्पितो धर्मो न कदाचिद्ध्रियते न नश्यति कामार्थितो धर्मः कामं दत्त्वा न परपततीत्यर्थः ॥१३॥ अतस्त्वामेव वयं नताः स्म इत्याह शश्व
त्स्वैरात्स्वरूपचैतन्येनैव निरस्तभेदभ्रमाय पुनः स्वबोध एव धिषणा विद्याशक्तिर्यस्य यद्वा बोध एव धिषणा प्रज्ञा यस्य अत एव परस्मै

नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः ॥ यत्सर्वभूतदयया सदलभ्ययैको नानाजनेष्ववहितः
सुहृदन्तरात्मा ॥१२॥ पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च ॥ आराधनं भगवतस्तव सत्क्रियार्थो
धर्मोऽर्पितः कर्हिचिद्ध्रियते न यत्र ॥१३॥ शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै ॥ विश्वोद्भवस्थि
तिलयेषु निमित्तलीलारासाय ते नम इदं चकृमेश्वराय ॥१४॥ यस्यावतारगुणक[illegible]विडम्बनानि नामानि येऽसुविगमे विवशा

त्र हेतुः विश्वोद्भवादिनिमित्तं या माया जातं तस्या लीला विलासः ॥ गृणन्ति ॥ ते नैकजन्मशमलं सहसैव हित्वा संयान्त्यपावृतमृतं तमजं प्रपद्ये ॥१५॥
तया रासः क्रीडा यस्य तस्मै इदं नमः नमनं चकृम कृतवन्तो वयं ॥१४॥ नामग्रहणमात्रतः कैवल्यप्रदत्वेन सर्वपूज्यत्वं नमस्करोति ॥ यस्येति ॥ अवतारा
दीनां विडम्बनमनुकरणं मनुष्येषु ॥ तत्रावतारविडम्बनानि देवकीनन्दनेत्यादीनि गुणविडम्बनानि सर्वज्ञो भक्तवत्सल इत्यादीनि कर्मविडम्बनानि गोव
र्द्धनोद्धरणः कंसारातिरित्यादीनि ॥ असुविगमेपि विवशा अपि गृणन्ति उच्चारयन्ति ते केवलं शमलं पापं अपावृते निरस्तावरणे अनन्तं ब्रह्म प्राप्नुवन्ति ॥१५॥

भा॰त॰
३३

तत्र गुणावतारकर्माणि दर्शयन् प्रणमति ॥ यो वै एकः त्रिपात् त्रयो ब्रह्मादयः पादाः स्कंधा यस्य प्रत्येकं च उरवः प्ररोहाः शाखोपशाखा मरीच्यादिम
न्वादिरूपा यस्य तथाभूतः सन् ववृधे ॥ तस्मै भुवनाकाराय द्रुमाय नमः किं कृत्वा ववृधे आत्मा त्वमेव मूलमधिष्ठानं यस्य तत् प्रधानं भित्त्वा गुणत्रय
रूपेण विभज्य त्रिपात्त्वमेवाह ॥ अहं ब्रह्मा गिरिशश्च स्वयं विभुः विष्णुश्चेति स्थित्युद्भवप्रलयहेतवो ये वयं एवं त्रिपाद् त्वा यो ववृधे तस्मै इत्यर्थः ॥ १६ ॥ एवं गु
णावतारकर्मविडंबनं कृत्वा तेष्वेव कालाख्यं रूपं तत्कर्म च दर्शयन् प्रणमति ॥ लोक इति द्वाभ्यां ॥ विकर्मनिरतः विरुद्धकर्मनिष्ठः कुशले हिते स्वे आत्मी

यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलं ॥ भित्त्वा त्रिपाद्ववृध एक उरुप्ररोहः तस्मै नमो भग
वते भुवनद्रुमाय ॥ १६ ॥ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्तावदस्य बलवानिह
जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोस्तु तस्मै ॥ १७ ॥ यस्माद्बिभेम्यहमपि द्विपरार्धधिष्ण्यमध्यासितः सकललोकन
मस्कृतं यत् ॥ तेपे तपो बहुसवोऽवरुरुत्समानः तस्मै नमो भगवतेऽधिमखाय तुभ्यं ॥ १८ ॥

ये त्वदुदिते त्वयैवमाज्ञापिते भवदर्चनरूपे कर्मणि ॥ उक्तं हि गीतासु ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्प
णमिति ॥ तस्मिन् प्रमत्तः अरक्षितो यावद्दर्शने तावदस्य लोकस्य अनिमिषाय कालाय ॥ १७ ॥ आस्तां तावदयं लोको वा मम कथा ॥ यस्मात्कालाख्यात्त्वत्तः य
द्विपरार्धावस्थाविधि यस्य स्थानं तदारूढोऽपि बिभेमि ॥ भीतश्च यत्त्वामेव अवरुरुत्समानः प्राप्तुमिच्छन् तपस्तप्तवान् कथंभूतः बहुसवः बहवः सवाः
यागाः संवत्सरा वा यस्य बहून् संवत्सरान् वा तपस्तप्तवानित्यर्थः ॥ अधिमखाय मखाधिष्ठात्रे ॥ १८ ॥

राम
३३

इदानीं तत्र कालभाविलीलावतारकर्माणि दर्शयन्नाह तिर्यगादिषु जीवयोनिषु स्वेच्छयाङ्गीकृतमूर्त्तिः सन् स्वकृतधर्ममर्यादापालनेच्छया रेमे ॥ वस्तुतः स्वानंदानुभवेन निरस्तविषयसुखोपि यः तत्र इपाधिधर्मान्न संस्पृशति ॥ तदुक्तं गीतासु ॥ यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः इति ॥१७॥ इदानीं दृश्यमानामेव मूर्त्तिं प्रणमति ॥ यो विग्रहेति द्वाभ्यां ॥ दशार्धाः पंच दृश्यन्ते यस्याः तया आविग्रहया निद्रादेहभूतया नरनिभृतोपि यो निद्राप्रवाहतस्मै तेन मत्स्यत्नेरणात्वय्यः जठरीकृता उदरे प्रविलापिता लोक

तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः ॥ रेमे निरस्तरतिरप्यवरुद्धदेहः तस्मै नमो भगव-
ते पुरुषोत्तमाय ॥१८॥ यो विग्रहात्तपरितोपि दशार्धवृत्त्या निद्राप्रवाहजठरीकृतलोकयात्रः ॥ अन्तर्जले हि कशिपुस्पर्शा-
नुकूलां भीमोर्मिमालिनि जनस्सुखविविशावत् ॥१०॥ यत्राभिपद्यभवनादहमानमाद्यलोकत्रयोपकरणो यदनुग्र-
हेण ॥ तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानविकसन्नलिनेक्षणाय ॥११॥

यात्रा लोकस्थितिर्येन अहिरेव कशिपुः शय्या तस्याः स्पर्शोऽनुकूलो यस्याः तां निद्रां ॥ भीमानामूर्मीणां माला विद्यते यस्मिन् अन्तर्जले निद्राणस्य विवेकिनो जनस्य निद्रासुखमीदृगिति विवृणावन् दर्शयन्नुपहसन्निवेत्यर्थः अत एवान्तर्जलादि विशेषणानि ॥१०॥ किंच यस्य नाभिपद्म एव भवनं तस्मात् लोकत्रयस्योपकरणं यस्य स तद्वा लोकत्रयस्य स्रष्टादि द्वारेणोपकरोतीति तथा तादृशोऽहं यदनुग्रहेण स उदरे स्थितः भवः संसार

भा०त

३४

एवं स्तुत्वा प्रार्थयते ॥ सोऽयमिति चतुर्भिः यत् येन सत्त्वेन ज्ञानेन भगेनैश्वर्येण च मृडयते सुखयति विश्वं दृशं प्रज्ञामनुस्पृशतात् प्रयोजयतु ॥ यथा-
हं स्रष्टुं क्षमो भविष्यामि ॥ यतः प्रणतप्रियोसौ अहं च प्रणतः न चान्यः प्रार्थनीयोस्ति ॥ यतः भगवान् समस्तजगतां सुहृत् ॥ यतोसावेको-
ऽनुस्यूत आत्मा अन्तर्यामी ॥ २२ ॥ आत्मशक्त्या रमया सह यद्यत्कर्म करिष्यति स्वविक्रमं विश्वसृष्टिरेव विक्रमः प्रभावो यस्मिन्न तदिदं विश्वं तदा

सोऽयं समस्तजगतां सुहृदेक आत्मा सत्त्वेन यन्मृडयते भगवान् भगेन ॥ तेनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदि-
दं प्रणतप्रियोसौ ॥ २२ ॥ एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः ॥ तस्मिन्स्वविक्रममिदं सृ-
जतोपि चेतो युञ्जीत कर्मशमलं च यथा विजह्यां ॥ २३ ॥ नाभिह्रदादिह सतोम्भसि यस्य पुंसो विज्ञानशक्तिरहमासमन-
न्तशक्तेः ॥ रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरिषीष्ट निगमस्य गिरां विसर्गः ॥ २४ ॥ सोसावदभ्रकरुणो भगवान्विवृ-
द्धप्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् ॥ उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिरापनयतात्पुरुषः पुराणः ॥ २५ ॥

तथा सृजतोपि मे चेतः स एव युञ्जीत प्रवर्तयतु ॥ कर्मशमलं कर्तृत्वशमलं चैव वैषम्यादिपापं यथा विजह्यां त्यजामि ॥ २३ ॥ अम्भसि सतो यस्य ना-
भिह्रदादिहासं विज्ञानशक्तिर्यस्य महत्तत्त्वात्मकस्य विज्ञस्य तदभिमानी अस्य रूपमिदं विश्वं विस्तारयतो मे निगमस्यावयवभूतानां गिरां विसर्गः
गिरामुच्चारणं मा रीरिषीष्ट ॥ हलन्तेभ्यः सर्वधातुभ्य इति न्यायेन मा लुप्यतामित्यर्थः ॥ २४ ॥ विवृद्धप्रेम्णा स्मितेन विजृम्भयन् विश्वस्य विजयाय उद्भवा-
य उद्भवाय च कार्यस्मरणोत्साहाय चोत्थाय ॥ २५ ॥

३४

त्वमस्यैतं भवे यस्मात् तपः शरीरं विद्या उपासना समाधिर्वैकाग्र्यं तैर्निशाम्य दृष्ट्वा यथाशक्ति स्तोतुं प्रातिवद्धिरराम २९ आत्मनो लोकसंस्था
नविज्ञाने परिखिद्यतो ब्रह्मणोऽभिप्रेतमालक्ष्य तमाहेति द्वयोरन्वयः तेन प्रलयोदकेन विषण्णचेतसम् ३० कश्मलं मोहं इवेति समस्तं मोहा
शमनं दर्शयति ३१ हे वेदगर्भ तन्द्रीं विषादकृतमालस्यं मागाः तेनैव मे दरामत उपरशतादित्यादि धिपत्यार्थयते तदग्रे पूर्वमेव संपादितं ३२ नाहि
कथमहं ज्ञास्यामीत्यत आह भूय इति ३३ भक्तियुक्तः समाहितस्त्वं सन् आत्मनि स्वस्मिन् लोके च मामततं व्याप्य स्थितं द्रक्ष्यसि द्रष्टासि आत्मनोऽज्ञा

मे यत्र च त्वमभवं निशाम्यैवं तपो विद्या समाधिभिः यावन्मनो वचः स्तुत्वा विरराम स खिन्नवत् २९ अथाभिप्रेतमन्वी
क्ष्य ब्रह्मणो मधुसूदनः विषण्णचेतसं तेन कल्पव्यतिकराम्भसा ३० लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः तमाहागा
धया वाचा कश्मलं शमयन्निव ३१ श्रीभगवानुवाच मा वेदगर्भ गास्तन्द्रीं सर्ग उद्यममावह तन्मयापादितं ह्यग्रे यन्मां प्रा
र्थयते भवान् ३२ भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयां ताभ्यामन्तर्हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान् ३३ तत आत्म
नि लोके च भक्तियुक्तः समाहितः द्रष्टासि मां ततं ब्रह्मन् मयि लोकांस्त्वमात्मनः ३४ यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितं
प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलं ३५ यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति ३६

वांछ्य ३४ सर्वत्र मद्दर्शने मोहो निवर्तेतेत्याह यदा त्विति प्रतिचक्षीत परिपश्येत ३५ यदा चाभिध्यातात्मानं निरस्तो मुच्यत इत्याह यदेति भूतादिभिर्विरहितं आ
त्मानं जीवं शुद्धं त्वं परार्थं रूपेण स्वस्यात्मभूतेन मया तत्परार्थेन उपेतमेकीभूतं पश्यन् भवति तदा स्वाराज्यं मोक्षं प्राप्नोति ३६

यतः वषीयान् वृद्धतरः अत्यधिकोस्तीत्यर्थः ॥ ३४ ॥ अनुग्रहमेवाह ऋषिमिति चतुर्भिः यद्यस्मात्त्वया मनो मयि निर्बद्धं ॥ ३५ ॥ यद्यस्माद्भूतेंद्रियैर्गुणैः स
त्वादिभिरात्मनोः हंकारेण वायुक्तं मन्यसे ॥ ३६ ॥ तुभ्यं तव नालेन मार्गेण पुष्करस्य मूलमधिष्ठानं सलिले विचिन्वतो मयि विचिकित्सायां भवितव्य
मसामर्थ्येणानवहेशयनेततोस्ति नास्तीति संदेहे सति आत्मा स्वरूपं मे मया अवहिरंतर्हृदि दर्शितः ॥ ३७ ॥ अंग हे ब्रह्मन् यच्चकर्थ कृतवानसि ॥ मत्क

नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः ॥ नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ॥ ३४ ॥ ऋषिमाद्यं न बध्नाति पापीयां
स्त्वां रजोगुणः ॥ यन्मनो मयि निर्बद्धं प्रजाः संसृजतोपि ते ॥ ३५ ॥ ज्ञातोहं भवता त्वद्य दुर्विज्ञेयोपि देहिनां ॥ यन्मां त्वं मन्यसे यु
क्तं भूतेंद्रियगुणात्मभिः ॥ ३६ ॥ तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितो वहिः ॥ नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥ ३७ ॥
यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्युदयांकितं ॥ यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ॥ ३८ ॥ प्रीतोहमस्तु भद्रं ते लोकानां विजयेच्छ
या ॥ यदस्तोषीर्गुणमयं निर्गुणं मानुवर्णयन् ॥ ३९ ॥ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत ॥ तस्याशु संप्रसीदेयं
सर्वकामवरेश्वरः ॥ ४० ॥ पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना ॥ राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतं ॥ ४१ ॥

थैवाभ्युदयस्तेनांकितं स एष बंधाभावः मयि मनो निर्बंधः मत्तत्त्वज्ञानं मद्रूपस्य हृदि दर्शनं मत्स्तुतिः तपो निष्ठा चेति यत एष सर्वोपि मदनुग्रहः
॥ ३८ ॥ गुणमयत्वेन प्रतीयमानमपि निर्गुणमेवानुवर्णयन् ॥ ३९ ॥ तवघीत इति किं वक्तव्यमित्याह य इति ॥ ४० ॥ न च मत्प्रीतेरप्यधिकं किंचि
दस्तीत्याह पूर्तादिभिः राद्धं सिद्धं यत् निःश्रेयसं फलं तत् मत्प्रीतिरेवेति तत्त्वविदां मतं ॥ ४१ ॥

अत्र हेतुमाह अहमिति । अहंकारोपाधीनां जीवानामात्मा । अतः प्रेयसां अपि प्रियाणामपि मध्ये प्रेष्ठः प्रियतमः सन् निरवद्यः यत्कृते प्र-
॥४१॥ अतस्त्वं कृतार्थ एव तथापि मत्प्रियार्थं सृष्टिं कुर्वित्याह सर्वेति । आत्मा त्वं इदं त्रैलोक्यं या मय्यनुशेरते ताः प्रजाः स्वात्मज्ञानेन आत्म-
नैवान्यनिरपेक्षेण तत्र ज्ञापकापेक्षाभावमाह सर्ववेदमयेनेति । आत्मा अहं योनिः कारणं यस्येति ज्ञानक्रियाशक्त्यतिशयं सूचयति

अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि । अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ॥४२॥ सर्ववेदमयेनेदमात्मनात्मा-
त्मयोनिना । प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ॥४३॥ मैत्रेय उवाच । तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्वरः । व्यज्येदं
स्वेन रूपेण कंजनाभस्तिरोदधे ॥४४॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे विदुरमैत्रेयसंवादे नवमोऽध्यायः ॥ विदु-
र उवाच । अन्तर्हिते भगवति ब्रह्मा लोकपितामहः । प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः ॥१॥ ये च मे भगवन् पृ-
ष्टास्त्वय्यर्था बहुवित्तम । तान्वदस्वानुपूर्व्येण छिन्धि नः सर्वसंशयान् ॥२॥

यथापूर्वमिति तदा त्राभ्यासतो प्रतीत्युक्तं मय्यनुशेरत इति स्थितानामभिव्यक्तिमात्रमेव कर्तव्यमिति मनायासत्वमुक्तं ॥४३॥ इदं स्वरूपं प्रका-
शयन् पद्मनाभः श्रीनारायणरूपेण तिरोदधेऽदृश्यो बभूव ॥४४॥ त । येनैवमः दशमे कालसंख्यया प्रतिवक्तव्यतदुद्भवः । प्रकृतादिविभागेन सर्ग-
स्तत्र दशधोच्यते ॥१॥ मे मया वदस्व वर भासयस्वेति वा ॥२॥

संचोदितः प्रार्थितः हृदिस्थानेवाह ॥ नत्वं ते प्रश्नास्तेन विस्मृता इत्यर्थः ॥ २ ॥ आत्मनि श्रीनारायणे आत्मानं मन आवेश्य ॥ ४ ॥ अब्जसंभूतो ब्रह्मा य
दधिशय स्थितः कर्तरिक्तः तत्पद्मं अम्भश्च विलोक्य ॥ कथंभूतं पद्ममम्भश्च ॥ तेन प्रलयकालेन कृतं वीर्यं यस्य तेन वायुना कंपितं ॥ न्यपात् स्वतेरणा
वेपः ॥ ५ ॥ विवृद्धं विज्ञानं बलं च यस्य ॥ न्यपात् सर्वं निपीतवान् ॥ ६ ॥ पुष्करं पद्मं प्राक् लीनान् त्रीन् लोकान् कल्पितास्मि स्रक्ष्यामि ॥ ७ ॥ भगवता रक्षाप

सूत उवाच ॥ एवं संचोदितस्तेन क्षत्त्रा कौषारविर्मुनिः ॥ प्रीतः प्रत्याह तान् प्रश्नान् हृदिस्थानथ भार्गव ॥ ३ ॥ मैत्रेय उवाच ॥ विरि
ञ्चोऽपि तथा चक्रे दिव्यं वर्षशतं तपः ॥ आत्मन्यात्मानमावेश्य यथाह भगवानजः ॥ ४ ॥ तद्विलोक्याब्जसंभूतो वायुना यदधि
ष्ठितः ॥ पद्ममम्भश्च तत्कालकृतवीर्येण कंपितं ॥ ५ ॥ तपसा ह्येधमानेन विद्यया चात्मसंस्थया ॥ विवृद्धविज्ञानबलो न्य
पाद्वायुं सहाम्भसा ॥ ६ ॥ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितं ॥ अनेन लोकान् प्राग्लीनान् कल्पितास्मीत्यचिंतयत् ॥ ७ ॥
पद्मकोशं तदाविश्य भगवत्कर्मचोदितः ॥ एकं व्यभाङ्क्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ॥ ८ ॥

कारणीये कर्मणि चोदितो नियुक्तः सन् तदा पद्मकोशं प्रविश्य तमेकमेव त्रिधा लोकत्रयरूपेण व्यभाङ्क्षीत् ॥ विभागमाह ॥ एकेन कमलमुकुले
न कथं लोकत्रयसृष्टिरित्यत आह ॥ भावनां वा रूपितं तस्य विशालतामाह ॥ द्विसप्तधा चतुर्दशलोकरूपेण ॥ उरुधा ततोपि बहुप्रकारेण भाव्यं भा
वयितुं योग्यं ॥ अतो न तेन त्रिलोकीकरणं चित्रमित्यर्थः ॥ ८ ॥

त्रिलोकीरूपेणैव विभागे हेतुमाह । एतावानिति त्रिलोकीरूपो जीवलोकस्य जीवानां भोगस्थानस्य संस्थाभेदो रचनाविशेष उक्तः । न तु परमेष्ठिने
विज्ञीवत्वाविशेषाद्ब्रह्मलोकस्यापि प्रसक्तिः किमिति न भवति । तत्राह । हि यस्मात् अनिमित्तस्य निःकामस्य धर्मस्य विपाकः फलरूपोऽसौ
उपलक्षणमेतत् । सत्यलोकस्य महःप्रभृतिलोकानां तद्वासिनां च त्रैलोक्यस्य काम्यकर्मफलत्वात्प्रतिकल्पमुत्पत्तिर्विनाशो भवतः । महःप्रभृ
तीनां उपासनासंभावितनिष्कामधर्मफलत्वात् द्विपरार्द्धपर्यंतः न नाशः । तत्रस्थानां च ततः परं प्रायेणामुक्तिरिति भावः ॥ ९ ॥ कालभेदेन लोकसृ
ष्टिभेदं श्रुत्वा तमेव कालं जिज्ञासुः पृच्छति । यत्कालाख्यं लक्षणं स्वरूपं त्वयान्यच्च ब्रवीः कथं कालः कल्प्यते किं वा तस्य सूक्ष्मं स्थूलं च रूपमिति यथा

एतावान्जीवलोकस्य संस्थाभेदः समाहृतः । धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ ॥ ९ ॥ वि ॥ २३ ॥ च यदात्थ बहुरूप
स्य हरेरद्भुतकर्मणः । कालाख्यं लक्षणं ब्रह्मन्यथा वर्णय नः प्रभो ॥ १० ॥ मै ॥ २३ ॥ च गुणव्यतिकराकारो निर्विशे
षः प्रतिष्ठितः । पुरुषस्तदुपादानमात्मानं लीलयासृजत् ॥ ११ ॥ श्रीरामकृष्णसहाय

वर्णयेत्यर्थः ॥ १० ॥ तत्र सामान्यतः कालस्य स्वरूपमत्रोच्यते । उत्तराध्यायेन विशेषतः गुणानां व्यतिकरो महदादिः परिणामः तेनैव व्यक्रियते यः स का
लः इति शेषः वक्ष्यते वैकारिको गुणव्यतिकरः कालः स्वभावः स्मृतमेव चेति । स्वतस्तु निर्विशेषः अप्रतिष्ठितः अनाद्यपर्यवसितः अनाद्यंत इत्यर्थः
एतदेवं दर्शयितुं ईश्वरः सृष्ट्यादि तेन निमित्तेन करोतीत्याह । पुरुष इति उपादीयते निमित्तं तया स्वीक्रियते इत्युपादानं । निमित्तं यस्मिन् तं आत्मानमे
व विश्वरूपेणासृजत् स्वव्यतिरेकेणासृज्यस्याभावात् । एतच्च वक्तृकथनमात्रं कालेन निमित्तेन नासृजदित्येतावदेव विवक्षितं ॥ ११ ॥

भा॰त॰
३७

त्वव्यतिरिक्तास्तज्ज्ञाभावं दर्शयन् कालस्य सृष्टिनिमित्ततां दर्शयति विश्वमिति विष्णुमायया संस्थितं संहृतं ब्रह्मतन्मात्रं स्वद्विश्वरीश्वरेण कर्त्रा का
लेन निमित्तेन परिच्छिन्नं पृथक्प्रकाशितं ॥ अव्यक्ता मूर्त्तिः स्वरूपं यस्येति स्वतो निर्विशेषता दर्शिता ॥११॥ अप्रतिष्ठितं त्वं दर्शयितुं तत्कार्यविश्व
प्रवाहस्याप्रतिशमाह ॥ यथेदानीमस्ति तथाग्रे पूर्वमप्यासीत् पश्चादपि भविष्यति ॥ एवं सामान्यतः कालं निरूप्य विशेषतो निरूपयिष्यन् त
न्निमित्तस्य सर्गस्य पूर्वोक्तानेव भेदाननुवदति ॥ सर्ग इति ॥ यस्तु प्राकृतो वैकृतस्तस्य प्रशमः ॥१२॥ तन्निमित्तमेव यस्त्रिविधं प्रलयमाह का

विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ॥ ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना ॥११॥ यथेदानीं तथाग्रे च पश्चादप्येतदी
दृशं ॥ सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः ॥१२॥ कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः ॥ आद्यस्तु महतः सर्गो गुणवै
षम्यमात्मनः ॥१४॥ द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः ॥ भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् ॥१५॥ चतुर्थ ऐंद्रियः
सर्गो यस्तु ज्ञानक्रियात्मकः ॥ वैकारिको देवसर्गः पंचमो यन्मयं मनः ॥१६॥ षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः ॥ षडिमे प्रा

लेनैव केवलेन नित्यः प्रलयः द्रव्येण संकर्षणाग्न्यादिना (कृताः सर्गा वैकृतानपि मे शृणु ॥१७॥ रजोभाजो भगवतो लीलेयं हरिमेधसः
नैमित्तिकः ॥ गुणैः स्वस्वकार्यग्रसद्भिः प्राकृतिकः तानेव सर्गान् प्रपंचयति आद्यस्त्वित्यादिना यावदध्यायसमाप्ति महतो लक्षणं आत्मनो ह
रेः सकाशात् गुणानां वैषम्यमिति ॥ अहमः अहंकारस्य तस्य लक्षणं यत्रेति द्रव्यस्योवेक्ष्यमाणस्त्रयः सर्गाः ॥१४॥ तन्मात्रो भूतसर्गः भूतसूक्ष्मसर्गाणम
इत्यर्थः द्रव्यशक्तिमान् महाभूतोत्पादकः ज्ञानकर्मेंद्रियात्मकश्चतुर्थः ॥१५॥१६॥ तमसः पंचपर्वा विद्यायाः अबुद्धिर्जीवानामावरणं विक्षेपश्च तां क
रोतीति अबुद्धिकृत् ततस्पमिमतः शृणु ॥१७॥

३७

अन्तर्हितेन श्रोतव्यमाह। यद्विधया मे धाम समारोहतीति तस्य हरेर्लीला यद्वा इयमिति तमस्या रिसर्गरूपा राजो भाजः इति ब्रह्मत्वरूपस्येत्यर्थः॥ अस्मिन्‌ पद्मे
अब्जत्विकृतः इति प्रथमं तत्रानवधानकृत इत्यर्थः॥१७॥ मुख्यामिव प्रथमं कृता मुख्यसर्गः तस्थुषां स्थावराणां॥ षड्विधत्वमेवाह॥ ये पुष्पं विना फलं निते
वनस्पतयः औषधयः फलपाकान्ताः लता आरोहणापेक्षाः त्वक्सारा वेणवादयः लता एव काठिन्येनारोहणानपेक्षा वीरुधः ये पुष्पैः फलंति ते द्रुमाः
॥१८॥ तेषां साधारणलक्षणमाह। उर्द्ध्वश्रोतः आहारसंचारो येषां तमः प्रायाः अव्यक्तचैतन्याः अंतः स्पर्शाः स्पर्शमेव जानंति नान्यत्॥ तरंशंतेरेव न बहिः
विशेषिणः अव्यवस्थितपरिणामाः अनेकभेदवन्तः॥१९॥ तिर्यक्स्रोतसां सर्गमाह तिरश्चामिति स च अष्टाविंशतिभेदः तिरश्चां लक्षणं॥ अविदः स्मृतिनाशि

सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां चयः॥ वनस्पत्योषधिलतात्वक्सारावीरुधो द्रुमाः॥१८॥ उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः॥
१९॥ तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः॥ अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः॥२०॥ गौरजो महिषः कृष्णः सूकरो गवयो रु
रुः॥ द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम॥ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा॥२१॥ एते चैकशफाः क्षत्तः शृणु पंच नखान्पशू
न्॥ श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्लिकौ॥२२॥ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः॥ कंकगृध्रवटश्येनभासभल्लूक

तानस्मृत्याः भूरितमसः आहारादिमात्रनिष्ठाः घ्राणेनैवेष्टं जानंति हृदि अवेदिनः दीर्घा वर्हिणः॥२३॥ हंससारसचक्रांगकाकोलूकादयः खगाः॥२४॥
नसंधानशून्याः तथा च श्रुतिः अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न विज्ञानं वदंति न विज्ञानं पश्यंति न विदुः श्वस्तनं न लोकालोकाविति॥१९॥ अष्टावि
शतिभेदानेवाह॥ गवादयः उष्ट्रांताः द्विशफाः द्विखुराः नव॥२०॥ खरादय एकशफाः षट्॥२१॥ श्वादयो गोधांताः पंचनखाः द्वादश एवमेते चन्धराः सप्तविंशतिः मक
रादयो जलचराः कंकादयश्च खगाः अनेकवर्णत्वेनैकीकृत्य गृहीतास्तदेवमष्टाविंशतिभेदा भवंति॥ तेषु कस्मकृत्गोगजगविशेषः अन्येषामपि तिर्यक्कुप्राणिनां प

॥ ३६ ॥ श्रीभागवतटीकास्कं० ३

अपवहारः संचारो यस्य सोऽर्वाक्स्रोताः इत्यन्वयः हे मार्ष ॥ नृणां सर्गः नृणां लक्षणं ॥ रजोऽधिकं येषु ॥ २५ ॥ एते त्रयो वैकृता एव ॥ नकौमारस्तूभयात्मकाः देवसर्ग
श्च वैकृत इत्यनुषंगः ॥ वैकारिकस्तु देवसर्गः प्राकृतेषु पूर्वमेव प्रोक्तः अयं तु ततोऽन्यत्वात् वैकृतः देवसर्गत्वात् वैकारिकः तु भूतग्रामसनत्कुमारादीनां सर्गस्तु प्रा
कृतो वैकृतश्च ॥ देवत्वेन मनुष्यत्वेन चोभयात्मक इत्यर्थः ॥ २६ ॥ वैकृतत्वादेवसर्गोऽष्टविधः तत्र विबुधादय स्त्रयो भेदाः गंधर्वाप्सरस एकः यक्षरक्षांस्येकः ॥ २७
भूतप्रेतपिशाचा एकः सिद्धचारणविद्याधरा एकः आदिशब्दात्किंपुरुषाश्च इत्यादयः एतद्विशेषाध्याये स्पष्टं भविष्यति ॥ २८ ॥ तृतीये दशमोध्यायः ॥ ततए

अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणां ॥ रजोधिकाः कर्मपरा दुःखे च सुखमानिनः ॥ २५ ॥ वैकृतास्त्रय एवैते देवसर्गश्च सत्तम
वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः ॥ २६ ॥ देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः ॥ गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि
चारणाः ॥ २७ ॥ भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः ॥ दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः ॥ २८ ॥ अतः परं प्रवक्ष्या
मि वंशान्मन्वंतराणि च एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः ॥ २९ ॥ सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना ॥ ३० ॥
इति श्रीभागवते महापुराणे तृतीयस्कंधे दशमोध्यायः ॥ मैत्रेय उवाच ॥ चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ॥ परमाणुः

कारशे कालपरमाण्वादिलक्षणैः युगमन्वंतरादिभिः कल्पमानादि वर्ण्यते ॥ १ ॥ तदेवं सामान्यतः का ॥ स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ १ ॥
लस्योपलक्षणभूतं गुणव्यतिकरं दर्शयितुं विधानं इदानीं तस्यैव विशेषं निरूपयितुं तत्परिच्छेदेन बलं लक्षयति ॥ द्वाभ्यां सतः कार्यस्य विशेषाणामंशानां
यश्चरमः अन्त्यः यस्यांशो नास्ति अनेकः कार्यावस्थामप्राप्तः असंयुतः समुदायावस्थां चाप्राप्तः अत एव सदा कार्यसमुदायावस्थायोग्यत्वेनास्ति सः
परमाणुर्ज्ञेयः किं तत्र प्रमाणमत आह यतः येभ्यः समुदितेभ्यः नृणामयं देहः नृणामेकत्वभ्रमः अवयवबुद्धिः तथाचायं चमः अवयविनिराकरणे च भवति यदंश
मूहेन कृतोऽविशेष इति कार्यानुपपत्त्या कल्प्यत इति भावः ॥ १ ॥ श्रीराम

त्सूक्ष्मश्चक्राणस्थूलमाह सतएवेति ॥ यस्य परमोंऽशः परमाणुस्तस्यैव सतः कार्यमात्रस्य स्वरूपावस्थितस्य परिणामान्तरप्राप्तस्य यत्कैवल्यं ए
कत्वं स परममहानेष महत्त्वं च परमाणुत्वं तिर्यग्गत्वात् । न तु नानाविशेषवान् परस्परं भिन्नश्च तदवयवैः पदार्थैः कथमेकत्वं तस्येत्यत आह अविशेष
विशेषविवक्षारहितः निरंतरः भेदविवक्षारहितश्च सर्वोपि प्रपंचः परममहानित्यर्थः यथा सूक्ष्मः स्थूलश्चापि पदार्थः एवं कालोपि सूक्ष्मोऽनुमितः
न कारान्तस्य भावस्यागत्यते । संस्थानं परमाण्वाद्यवस्थानं तस्य भुक्तिः व्याप्तिस्तया । भगवानिति हरेः शक्तेः स्वतोऽव्यक्तः व्यक्तं भुंक्ते व्याप्नोतीति प
रिच्छिन्नत्वं निरस्तं तथा ॥ विभुर्महत्तत्वादि[illegible]रूतः ॥ ३ ॥ तदेव प्रपंचयति स इत्यादिना ॥ ततः प्रपंचस्य परमाणुतां परमाण्ववस्थायां भुंक्ते स कालः प

सतएवपदार्थस्य स्वरूपावस्थितस्य यत् ॥ कैवल्यं परममहानविशेषो निरंतरः ॥ २ ॥ एवं कालोप्यनुमितः सौक्ष्म्ये स्थौल्ये च
सत्तम ॥ संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ॥ ३ ॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुतां ॥ सतोविशेषभुग्यस्तु
स कालः परमो महान् ॥ ४ ॥ अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः ॥ जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥ ५ ॥

माणुः तस्यैवावशेषं सा कालं प्रपंचं यो भुंक्ते स परमो महान् । अस्य मध्ये ग्रहर्क्षताराचक्रस्थ इत्यादिना यत्स्वरूपं पर्यटनं वक्ष्यते । तत्र सूर्यो यावता परमाणुदेशम
तिक्रमते तावान् कालः परमाणुः । यावता च द्वादशराश्यात्मकं सर्वं भुवनकोशम् अतिक्रमति स परममहान् ॥ संवत्सरात्मकः कालः । तस्यैवावृत्त्या
युगमन्वंतरादिः क्रमेण द्विपरार्धं तत्त्वं इति तथा च प्रपंचमेस्वरूपेण स्यैव कालादिविभागं वक्ष्यते ॥ ४ ॥ इदानीं परमाणुकादिलक्षणपूर्वकं मध्यमकालं कल्पोक्तं कथयति
द्वौ परमाणू अणुः स्यात् त्रयोऽणवस्त्रसरेणुः स त च त्रसरेणुः इत्याह जालवैतिगवाक्षे प्रविष्टेऽर्करश्मिभिरवगतः कोऽसौ योऽतिलघुत्वेन खमेवानुपतन्नगा
त् । गतः ॥ पाठांतरे खमेवानुपतन्नपगातः ॥ न तु गां पृथ्वी ॥ ५ ॥ एम एम

भो॰न्न शतेभागाह्वुरिरूपाः वस्मिन् सवेधः तैर्वेधैः ६ तेनिमेषाह्वयः त्रुटि ३ त्यग्रातः काष्ठापंचदशएवंलवः ७ नाडिकाः षष्टसप्तवा प्रहरः

३८ एवयामोरिनस्यात्रेश्वरवर्थीभागः ङ्कामेषष्टवृद्धोमस्त्र संध्याशपुहूतैदयविनेनितानतव्य तत्रापिनिमेषमार्थीवाशरदः ष्टत्यहंतड्रेशनांगणाधि

ठपशक्यत्वात् १८ नाडिकायाउन्मानमाह उन्मीयतेअनेनेतउन्मानंपात्रं षट्पलताम्रविरचितं पंचगंजोमाषः तेअष्टभिश्चतुरंगुलायाम

शलाकारूपेणरचितैः कृतमूलछिद्रंतेनछिद्रणयावत्यस्थपरिमितंजलंप्रविशतितेनचपूर्णं निमग्नंभवतितावान्कालोनाडि

अस्तेरात्रिकंभ्नेयः कालःसत्रुटिःस्मृतः शतभागस्तुवेधःस्यात्तेत्रिभिस्तुलवःस्मृतः ६ निमेषस्त्रिलवोज्ञेयस्त्र

म्नातास्तेत्रयःक्षणाः क्षणान्पंचविदुःकाष्ठांलघुतादशपंचच ७ लघूनिवैसमाम्नातादशपंचचनाडिका तेद्वेमुहूर्त्तःप

हरःषड्यामःसप्तवानृणाम् ८ द्वादशार्द्धपलोन्मानंचतुर्भिश्चतुरंगुलैः स्वर्णमाषैःकृतछिद्रंयावत्प्रस्थजलप्लुतं ९ यामा

श्चत्वारश्चत्वारोमर्त्यानामहनीउभे पंचपक्षदशाहानिश्चक्लःकृष्णश्चमानद १० तयोःसमुच्चयोमासःपितृणांतदहर्निशं

द्वौतावृतुःषडयनंदक्षिणंचोत्तरंदिवि ११ अयनेचाहनीप्राहुर्वत्सरोद्वादशःस्मृतः संवत्सरशतंनृणांपरमायुर्निरूपितं

ग्रहर्क्षताराचक्रस्थःपरमाण्वादिनाजगत् संवत्सरावसानेनपर्येत्यनिमिषोविभुः १२

का अत्रपलछिद्रयोरधिकोशीघ्रंनिमज्जेत अल्पत्वेचविलंबेनेतिपलशलीकयोर्ग्रहणं ९ अहोअहनीअहोरात्रे १०।११ षण्मासाअयनं देवीत्यत्सोत्र रामा

रेणाद्वयःदेवानामहोरात्रेप्रागुः द्वादशमासाः १२ अनेनक्रमेणसोमूर्द्धानित्यमायुःक्षिपतीत्याह ग्रहाश्वद्वादशयः राश्याणमश्विन्यादीनि ताराअन्यानि नक्ष ३८

त्राणितद्रूपतक्रितंयत्कालचक्रंतत्रस्थितःअनिमिषःकालात्माविभुरीश्वरःसूर्यःजगतद्वादशराश्यात्मकंभुवनकोशपर्येतिपर्यरति १२

त्रिंशता दिनैः सावनः। सूर्यस्य संक्रमात् संक्रांतिः सौरः। पक्षद्वयेन चांद्रः। अश्विन्यादि रेवत्यांतनक्षत्रपरिवर्तनेन नाक्षत्रः॥

संवत्सरादि भेदः सौरवार्हस्पत्यसावनचांद्रमासनाक्षत्रमासभेदेन द्वादश्याः केचित्पुनरेवमाहुः पराक्षत्रपक्षपूर्णिमापरि संक्रांतिर्भवति तदा सौर चांद्रमासयोः सगपद्युपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षड्दिनानि वर्द्धते चांद्रमानेन वर्षे षड् दिनानि न्यूनानीति द्वादश दिन व्यवधानाद्भयोरप्युपक्षाद्रावो भवति एवं व्यवधानतारतम्येन पंचवर्षाणि गच्छति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः संवत्सरो भवतीति १४ एवंभूतः कालात्मा नित्यं प्रयत्नेन पूजनीय इत्याह यस्तिमज्यः कार्यमक्लादि तद्विषयावीजादीनां शान्तिकाकारपयावृशक्त्या

संवत्सरः परिवत्सर इडावत्सर एव च अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते १४ यः सृज्य शक्तिमुरुहयोद्भवयस्त्व शक्त्या पृथग्भोऽभ्रमायादि विधावति भूतभेदः कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय वि २३ च पितृदेवमनुष्याणामायुः परमिदं स्मृतं परेषां गतिमाचष्टे स्वयेषु यैः कालादूर्ध्वं विदः १६ भगवान् वेदकाकस्यागतिं भगवतो नेत्र १८ विश्वं वि वकृते धीरा योगाद्येन चक्षुषा

वड्धा गच्छन्यन्नकार्याभिप्रावीक्षणेनरिविश्चं तदिन्धाधावति कोऽसौ भूतभेदः महाभूतभेदः महाभूत विशेषस्तेजोमंडलरूपी सूर्यः किमर्थं धावति पृथः गुरुष्यस्त्रश्चमायश्च मोमोहः तानिरूपेये आद्यादिस्वयेन विषयाशक्तिं विवृत्तये त्रित्यर्थः सकामानां तत्र गुणमयं यज्ञादिकं लञ्जु भिर्वितन्वन् यस्तस्मै संवत्सरपंचकाय वर्तकाय पूजा कुरुत १५ इदं त्वस्ममानेन वर्षाणां गणितमायुर्मानः प्रत्यहं कल्प्यते मुच्यत इति कल्पः लोको तस्मात वाच्यतः विरोत्ता

द्वादशभिर्वर्षसहस्रैरित्युत्तरश्लोके सामर्थ्यात्तत्तत्र अवधीयत इत्यवधानं संध्यावांशश्च तत्सहितं कृतयुगे चत्वारि सहस्राणि संध्या
शयोश्चत्वारि चत्वारि शतानि च एवं त्रेतादिष्वपि योज्यं ॥१८॥ युगस्यादौ संध्या अंते संध्यांशस्तौ च शतानि संख्यायायोः तयोरंतरेण म
ध्ये युगं तस्य विशेषमाह यत्रेति यत्र काले भादिधर्मविशेषो यत्र विधीयत इत्यर्थः साधारणधर्मस्तु संध्यांशयोरप्यस्त्येव ॥२०॥ चतुष्पात्
संपूर्णः त्रेतादिषु पादेन व्येति ह्रसति पादेन पादेन वर्द्धमानेनाधर्मेणेहेत्यनेन एतद्वाक्यस्वरूपकथनमात्रं वैराग्यार्थं न तु धर्मसंकोचार्थः

मे त्रे यउ ग च कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं ॥ दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितं ॥१८॥ चत्वारि त्रीणि द्वे चैकं कृ
तादिषु यथाक्रमं ॥ संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥१९॥ संध्यांशयोरंतरेण यः कालः शतसंख्ययोः ॥ तमे
वाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते ॥२०॥ धर्मः चतुष्पान्मनुजान्कृते समनुवर्त्तते ॥ स एवान्येष्वधर्मेण व्येति पादेन वर्द्धता
॥२१॥ त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनं ॥ तावत्येव निशा तात यन्निमीलति विश्वसृक् ॥२२॥ निशावसान आरब्धो लो
ककल्पोऽनुवर्त्तते ॥ यावद्दिनं भगवतो मनून्भुंजंश्चतुर्दश ॥२३॥ स्वं स्वं कालं मनुर्भुंक्ते साधिकां ह्येकसप्ततिं ॥ मन्वंतरेषु म

॥२१॥ त्रिलोक्या बहिर्महर्लोकप्रभृतिर्ब्रह्मलोकमभिव्याप्य चतुर्युगस।नवत्तद्दशाक्रमयः स्रगाः भवंति चैव युगपतसहस्रेणाश्रयाउपेवतात्र ॥२४॥
इत्यमेकं दिनं यतयस्यां विश्वसृक् ब्रह्मा निमीलति स्वपिति ॥२२॥ तत्र दिनस्थितिमहानिशावसान इत्यादि सार्द्धश्लोकाभ्यां चतुर्दश मनून्भुंजन्
व्याप्नुवन्नित्यर्थः ॥२३॥ किंचिदधिकां युगानामेकसप्ततिं मनुर्वंशः पृथ्वीपालकः क्रमेण भवति स च तत्र विश्वंभरतया तत्तद्युगपतः सकालमेव भ

त्रैलोक्यं वर्द्धयतीति तथा ॥२५॥ स्वमूर्त्तिभिः मन्वंतरावतारैर्मन्वादिभिर्द्वारभूतैराविष्कृतपौरुषप्रकारः सन् विश्वं रक्षति ॥२६॥ रात्रिगतां स्थितिमा
ह पंचभिः ॥ तमसो मात्रां लेशं ॥ प्रतिसंरुद्धः प्रत्याहृतो विक्रमो येन ॥ अनुगतमनुप्रविष्टमशेषं यस्मिन् ॥२७॥ तदेव स्पष्टयति तमेवेति अपि
धीयंत इति कर्मकर्त्तरि प्रयोगः तिरोहिता भवंतीत्यर्थः ॥ कथं निर्मुक्तः रहितः शशी भास्करश्च यथा भवति तथा ॥२८॥ भगवच्छक्तिरूपेय:

एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्द्धनः ॥ तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः ॥२५॥ मन्वंतरेषु भगवान् बिभ्रत्सत्वं स्व
मूर्त्तिभिः ॥ मन्वादिभिरिदं विश्वमवत्युदितपौरुषः ॥२६॥ तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः ॥ कालेनानुगताशेष आ
स्ते तूष्णीं दिनात्यये ॥२७॥ तमेवान्वपि धीयंते लोका भूरादयस्त्रयः ॥ निशायामनुवृत्तायां निर्मुक्तशशिभास्करं ॥२८॥ त्रिलो
क्यां दह्यमानायां शक्त्या संकर्षणाग्निना ॥ यात्यूष्मणा महर्लोकाज्जनं भृग्वादयोर्दिताः ॥२९॥ तावत्त्रिभुवनं सद्यः कल्पांतैधि
तसिंधवः ॥ प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ॥३०॥ अंतः स तस्मिन्सलिल आस्तेनंतासनो हरिः ॥ योगनिद्रानिमीलाक्षः
स्तूयमानो जनालयैः ॥३१॥

संकर्षणमुखाग्निस्तेन ऊष्मणा अर्दिताः संतः जनलोकं यांति ॥३०॥ कल्पांतेन एधिताः सिंधवः समुद्राः उत्कट
आटोपः क्षोभो येषां ते च ते चंडवातेरितोर्मयश्च ॥३१॥ जनलोकस्थालयो येषां ते महर्लोकाज्जनलोकं गतानां भन्येषां च तैः ॥३१॥

भा॰त
४१

वैराग्यार्थमाह एवंविधैरहोरात्रैर्वर्षशतं सर्वेषां प्राणिनामायुषः परमधिकं अस्य ब्रह्मणो यदायुस्तदप्यपक्षितं अपक्षीणमिवेति लोकोक्तिः
गतप्रायमित्यर्थः २१ तदेवाह यदिति २२ पूर्वस्य परार्द्धस्यादाविति त्रिभिर्वह्निकथनमात्रं २४ पाद्मे त्वहेतुः यदिति २५ अयं तु द्वितीयस्या

एवंविधैरहोरात्रैः कालगत्योपलक्षितैः अपक्षितमिवास्यापि परमायुर्वयःशतं २१ यदर्द्धमायुषस्तस्य परार्द्धमभिधी
यते पूर्वः परार्द्धोपक्रान्तो ह्यपरोद्य प्रवर्त्तते २२ पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत् कल्पो यत्राभवद्ब्रह्मा श
ब्दब्रह्मेति यं विदुः २४ तस्यैव चान्ते कल्पोभूद्यं पाद्ममभिचक्षते यद्धरेर्नाभिसरस आसील्लोकसरोरुहं २५ अयं तु क
थितः कल्पो द्वितीयस्यापि भारत वाराह इति विख्यातो यत्रासीच्छूकरो हरिः २६ कालोयं द्विपरार्द्धाख्यो निमेष उप
चर्यते अव्याकृतस्यानंतस्य अनादेर्जगदात्मनः २७ कालोयं परमाण्वादिर्द्विपरार्द्धांत ईश्वरः नैवेशितुं प्रभु

दौ कथित २६ तदेवं कालेनानिमित्तेन सृज्यानामायुः परिमाणमुक्त्वा कालपरिच्छेदरहितं तत्त्वमाह र्भूम्न ईश्वरो धाममानिनां २८
कालोयमिति पंचभिः उपचर्यते केवलं न तत्त्वतो नापि क्रमेणायुर्गणनं तस्येत्याह अव्याकृतकार्योपाधिशून्यस्य अत एवानंतस्य अना
देरस्य जगदात्मनो जगत्कारणस्य २७ तत्परिच्छेदे कालस्यासामर्थ्यमित्याह कालोयमनीश्वरः असमर्थो विभुः प्रभुः परिपूर्णस्येशितुं नैव
प्रभुः समर्थः यतो धाममानिनां देहगेहाभिमानिनामेवेश्वरः २८

राम
४१

स्वस्वरूपज्ञानं तत्प्रपंचयन्नाह । विकारैः षोडशभिर्युक्तैः अष्टप्रकृतिसंयुक्तैः सहितं तदाश्रयभूतमित्यर्थः अयमंडकोशः यत्र प्रविष्टः परमाणुवल्ल
क्ष्यते तस्यान्तरेणान्वयः कीदृशः अंतः पंचाशत्कोटियोजनविस्तारतः बहिश्च विशेषादिभिः पृथिव्यादिभिः सप्तभिरावृतः कीदृशैः अंडको
शप्रमाणाद्दशगुणमुत्तरोत्तराधिकैः तैरावृतैः नन्वेव- मयमेक एव अपितु अन्येपि लक्ष्यन्ते । सर्वेषां कारणानां कारणं धाम महद्रूपं त
नीयएकादशः । द्वादशोत्तमभारादिभिमनः सर्गाभिमेधनात् । कार्यैर्देहेनयोनह्लिमद्गतसर्गोन्तर्वर्णिते । अथ इति त्रयस्त्रिंशस्यैषोऽध्यायप्रथमविद्याव

विकारैः सहितो युक्तैर्विशेषादिभिरावृतः । अंडकोशो बहिरयं पंचाशत्कोटिविस्तृतः ॥ ३९ ॥ दशोत्तराधिकैर्यत्र प्रविष्टः परमा
णुवत् । लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यंडराशयः ॥ तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् । विष्णोर्धाम परं साक्षात्पुरुष
स्य महात्मनः ॥ ४१ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे एकादशोऽध्यायः ॥ मैत्रेय उवाच ॥ इति ते वर्णितः क्षत्तः काला
ख्यः परमात्मनः ॥ महिमा वेदगर्भोऽथ यथास्राक्षीन्निबोध मे ॥ ससर्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् ॥ महामोहं च मोहं च
तमश्चाज्ञानवृत्तयः ॥ २

न्नाः ससर्जेत्यत्र तमो नाम स्वरूपाप्रकाशः मोहो देहाद्यहंबुद्धिः महामोहो भोगेच्छा तामिस्रं प्रतिघाते क्रोधः अंधतामिस्रं
तन्नाशेऽहमेव मृतोऽस्मीति बुद्धिः तदेवोक्तं विष्णुपुराणे । तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा । मरणं
त्वंधतामिस्रं तामिस्रः क्रोध उच्यते । अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः इति पातंजलेप्येते पंचक्लेशा अविद्यास्मितारागद्वेषाभिनिवेशाः पंचक्ले
शा इति । श्रीविष्णुस्वामिप्रोक्तवाक्यं अज्ञानविपर्यासभेदभयशोकाः तदुक्तं स्वारस्यज्ञविपर्ययेत्यादि ॥ २

भा॰त
४२

नवह्वमन्यत नाभ्यनन्दत ॥ यद्यपि प्रतिकल्पं सनकादिसृष्टिर्नास्ति तथापि ब्राह्मसर्गत्वादिहोच्यते ॥ वस्तुतस्तु कौमारसर्गादय एव प्रतिकल्पं भवं
ति ॥ सनकादयस्तु ब्राह्मकल्पसृष्टा एवानुवर्तन्ते ॥ स्वभूर्ब्रह्मा ॥ अवध्यातः ॥ अवज्ञातः ॥ प्रत्याख्यातमनुशासनं यैः ॥ स चासौ मन्युश्च तन्म

दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत ॥ भगवद्ध्यानपूतेन मनसान्यां ततोऽसृजत् ॥ २ ॥ सनकं च सनंदं च सनातनमथात्मभूः ॥
सनत्कुमारं च मुनीन्निःक्रियानूर्द्ध्वरेतसः ॥ ३ ॥ तान्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्रकाः ॥ तन्नैच्छन्मोक्षधर्माणो वासुदेव
परायणाः ॥ ४ ॥ सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः ॥ क्रोधं दुर्विषहं जातं नियंतुमुपचक्रमे ॥ ५ ॥ धिया निगृह्यमाणो
पि भ्रुवोर्मध्यात्प्रजापतेः ॥ सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ॥ ६ ॥ स वै रुरोद देवानां पूर्वजो भगवान्भवः ॥ नामानि कुरु
मे धातः स्थानानि च जगद्गुरो ॥ ७ ॥ इति तस्य वचः पाद्मो भगवान्परिपालयन् ॥ अभ्यधाद्भद्रया वाचा मा रोदीस्तत्करोमि ते
॥ ८ ॥ यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः ॥ ततस्त्वामभिधास्यंति नाम्ना रुद्र इति प्रजाः ॥ ९ ॥ हृदिंद्रियाण्यसुर्व्योम वायुरग्निर्ज
लं मही ॥ सूर्यश्चंद्रस्तपश्चैव स्थानान्यग्रे कृतानि ते ॥ मन्युर्मनुर्महिनसो महाञ्छिव ऋतध्वजः ॥ उग्ररेता भवः कालो वामदेवो धृत
व्रतः ॥ ११ ॥ धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलांबिका ॥ इरावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः ॥ १२ ॥ गृहाणैतानि नामानि स्थानानि च

न्युः बालकस्वत्स्वग्रे पूर्वमेव मया कृतानि ॥ सयोषणः सस्त्रीकः एभिस्थानैर्नामानि च सयोषणः ॥ एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः
समभिस्वयुक्तः ॥ १३ ॥

राम
४२

सत्त्वबलं आकृतिर्नीललोहितता स्वभावः स्वाज्ञता तेन ॥ १५ ॥ रुद्राणां पृथगनिर्दिष्टा अशाकतत्त्वास्तथाग्नः स्वेष्टास्वस्याने ॥ १६ ॥ अ...

इत्यादिष्टः स गुरुणा भगवान्नीललोहितः ॥ सत्त्वाकृतिः स्वभावेन ससर्जात्मसमाः प्रजाः ॥ १५ ॥ रुद्राणां रुद्रसृष्टानां समन्तादावृतं जगत् ॥ निशाम्यासंख्यशो यूथान् प्रजापतिरशंकत ॥ १६ ॥ अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम ॥ मया सह दहन्तीभिः दिशश्चक्षुर्भिरुल्बणैः ॥ १७ ॥ तप आतिष्ठ भद्रं ते सर्वभूतसुखावह ॥ तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥ १८ ॥ तपसैव परं ज्योति भगवन्तमधोक्षजं ॥ सर्वभूतगुहावासमञ्जसा विन्दते पुमान् ॥ १९ ॥ मै ॥ पु ॥ उवा ॥ च ॥ एवमात्मभुवादिष्टः परिक्रम्य गिरांपतिं बाढमित्यमुमामंत्र्य विवेश तपसे वनं ॥ २० ॥ अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्य लोकसन्तानहेतवः ॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ॥ २१ ॥ उत्संगान्नारदो जज्ञे दक्षोऽङ्गुष्ठात्स्वयंभुवः ॥ प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः ॥ २२ ॥ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोर्ऋषिः ॥ अंगिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् ॥ २४ ॥ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयं ॥ अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः ॥ २५ ॥ हृदि कामो भ्रुवः क्रोधः लोभश्चाधरदच्छदात् ॥ आस्याद्वाक्सिन्धवो मेढ्रान्निर्ऋतिः पायोरघाश्रयः ॥ २६ ॥ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः ॥ मनसो देहतश्चैव जज्ञे विश्वकृतो जगत् ॥ २७ ॥

धरदच्छदात् ॥ अधरोष्ठात् ॥ २६ ॥ ॥ २७ ॥

भा०त
४३

देहान्तरेण कृतं सर्गं वक्तुं तद्देहत्यागे कारणमाह वाचमित्यादिना ॥ त्वतत्वैनौपे पूर्वं ब्रह्मा स्वयोन्येवैतेरे तत्प्रकृतं भृगत्ककामं ॥ २८ ॥ तेजीयसा-
मतितेजस्विनामपि सुश्लोक्यं सत्कीर्त्तिदं न भवति ॥ येषां तेजीयसां वृत्तं ॥ ३१ ॥ नन्वेतच्चे ॥ ३३ ॥ कथं स्रक्ष्यामीत्यभिध्यायतः स्रष्टुर्ब्रह्मणः चतुःसंख्या-
मुखान्मुखतो वेदा आसन् ॥ समवेतान् सहंगतान् ॥ ३४ ॥ चातुर्होत्रं होत्रादीनां चतुर्णां कर्म कर्मतन्त्रं यज्ञविस्तारः उपवेदैः न्यायैः स्वसह ॥ आश्रमाणां वृत्तं

वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः ॥ अकामां चकमे क्षत्तः सकाम इति नः श्रुतं ॥ २८ ॥ तमधर्मे कृतमतिं विलोक्य पितरं सुताः ॥ म-
रीचिमुख्या मुनयो विश्रम्भात्प्रत्यबोधयन् ॥ २९ ॥ नैतत्पूर्वैः कृतं त्वद्ये न करिष्यंति चापरे ॥ यत्त्वं दुहितरं गच्छेरनिगृह्याङ्गजं प्रभुः ॥
तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ॥ यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते ॥ ३० ॥ तस्मै नमो भगवते य इदं स्वेन रोचिषा ॥
आत्मस्थं व्यंजयामास स धर्मं पातुमर्हति ॥ ३१ ॥ स इत्थं गृणतः पुत्रान्पुरो दृष्ट्वा प्रजापतीन् ॥ प्रजापतिपतिस्तन्वं तत्याज व्रीडि-
तस्तदा ॥ ३२ ॥ तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः ॥ कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥ कथं स्रक्ष्याम्यहं लोका-
न्समवेतान्यथा पुरा ॥ ३४ ॥ चातुर्होत्रं कर्मतन्त्रमुपवेदनयैः सह ॥ धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥ ३५ ॥ विदुर उ-
वाच ॥ स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥ ३६ ॥ मैत्रेय उवाच ॥ ऋग्यजुःसामाथ-
र्वाख्यान्वेदान्पूर्वादिभिर्मुखैः ॥ शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥ ३७ ॥ आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः ॥

यद्वा आसन् ॥ ३५ ॥ मुखतः मुखेभ्यः चातुर्होत्रप्रवर्त्तनक्रममाह ॥ शस्त्रमप्रगीतमन्त्रस्तोत्रं होतुः कर्म इज्यामध्वर्योः ॥ स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः
द्गर्योः कर्म स्तुतिस्तोमः स्तुतिः प्रगीतस्तोमं तदर्थं समुदाय त्रिवृत्स्तोमो भवतीत्यादिविहितसमाप्त्ये चौद्गात्रं प्रायश्चित्तं ब्रह्मणः ॥ ३७ ॥ उपवेदक्रममाह आ

[illegible] ॥ २८ ॥ [illegible]

राम
४३

कर्मतंत्रक्रममाह ॥ शोडसकर्माणीति ॥ उपोषीचयनं ॥ आग्निष्टुतत्अग्निष्टोमः ॥ ४० ॥ विद्येति शौचं देहे चतस्रो स्नानाद्भिः शुद्धिः परमात्मेतेति स्मृतेः दान
मिति दया ॥ भूतादिषु दानस्य कलांनार्हन्ति शोडशीमिति वचनात् ॥ एवंचत प्रशौचं दयासत्यमिति पाठः ॥ कृते कृता इति प्रथम हंसो धोने र विरोधः
४१ ॥ सावित्रं ब्रह्मचर्यं उपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रं प्राजापत्यं ॥ व्रतान्याचरतः संवत्सरं ब्राह्मवेदग्रहणांतं ॥ ग्रहस्थैः त्रिविधैः कें वार्त्ता
अनिषिद्धकृष्यादिवृत्तिः ॥ संचयो याजनादिवृत्तिः शालीनः अयाचितवृत्तिः शिलोछ्छनं पतितकणशाकणवृत्तिः एकवचनमार्षं इत्येताः गृहे वत्

इतिहासपुराणानि पंचमं वेदमीश्वरः ॥ सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ ४० ॥ शोडस्युक्थौ पूर्ववक्त्रात्पुरीष्याग्निष्टुता
वथाप्तोर्यामातिरात्रौ च वाजपेयं सगोसवं ॥ ४१ ॥ विद्या दानं तपः सत्यं धर्मस्येति पदानि च ॥ आश्रमांश्च यथासंख्यम
सृजत्सह वृत्तिभिः ॥ ४२ ॥ सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा ॥ वार्त्तासंचयशालीनशिलोछ इति वै गृहे ॥
वैखानसा वालखिल्यौदुंबराः फेनपा वने ॥ न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिःक्रियो ॥ ४४ ॥

घ इति यद्वा शिलोछ इति द्वंद्वैकवद्भावः सप्तमी ॥ एवं वृत्तिभेदं सति गृहे स्थिता भवंतीत्यर्थः ॥ ४३ ॥ वने स्थिताश्चत्वारः तत्र वैखानसाः अकृष्टपच्यं च न यः का
लखिल्याः नवे अन्ने लब्धे पूर्वसंचितान्त्यागिनः औदुंबराः प्रातरुत्थाय यां दिशं प्रथमं पश्यंति ततः आहृतैः कलादिभिर्जीवंतः फेनपाः स्वयंपति
तकलादिभिर्जीवंतः कुटीचकः स्वाश्रमकर्मप्रधानः बहूदः कर्मोपसर्जनीकृत्य ज्ञानप्रधानः हंसो ज्ञानाभ्यासनिष्ठः निःक्रियः प्राप्ततत्वः
एतेष सर्वे यथोत्तरश्रेष्ठाः ॥ ४४ ॥

भा॰त
५५

न्यायादीनापूर्वादिक्रमेणोत्पत्तिमाह आन्वीक्षिकीतिआन्वीक्षिकाद्यामोक्षधर्मकामार्थविद्याः भूर्भुवः स्वरितिव्याहृतास्तिस्रः समस्ताश्चतुर्थी
यथाह आश्वलायनः एवंव्याहृतयः प्रोक्ताव्यस्ताः समस्ताइतियद्वा महइतिचतुर्थीतथाचश्रुतिः भूर्भुवः स्ववरितिवाएतास्तिस्रोव्याहृतयः
तासामुह स्मैतांचतुर्थीमाहाचमस्यः प्रवेदयतेमहइतीतिहृत्त्वतः हृदयाकाशात ५४ स्वतः स्फोटः अनुष्टुप्स्तोवानीतिस्मृतेः ५५ महो
कल्पेब्रह्मः शब्दब्रह्मरूपोभवदित्यन्वयः तदेवदर्शयन्वर्णानामुत्पत्तिमाह स्पर्शइतिस्पार्शेनस्पर्शाः कादिवर्गपंचकंस्वराः अकारादि ५६ ऊष्मा

आन्वीक्षिकीत्रयीवार्त्तादंडनीतिस्तथैवच एवंव्याहृतयश्चासन्प्रणवोस्यदहृत्वतः ५४ तस्योष्णिगासील्लोमभ्योगायत्रीच
त्वचोविभोः त्रिष्टुम्मांसात्स्नुतोनुष्टुब्जगत्यस्थ्नःप्रजापतेः ५५ मज्जायाःपंक्तिरुत्पन्नाबृहतीप्राणतोभवत स्पर्शस्त
स्याभवज्जीवःस्वरोदेहउदाहृतः ५६ ऊष्माणमिंद्रियाण्याहुरंतस्थाबलमात्मनः स्वराःसप्तविहारेणभवंतिस्मप्रजाप
ते शब्दब्रह्मात्मनस्तस्यव्यक्ताव्यक्तात्मनःपरं ब्रह्माविभातिविततोनानाशक्त्युपबृंहितः ५८ ततोपराम्रुपादायसवर्गायम

पाराणसहस्रवत्यर्धंसृतःस्थापरलवाःसप्तस्वराःषड्जादयःविहारेणक्रीडया ५६ श्रुतएवशब्दतत्त्वात्मब्रह्मणःपरमे नोदधे
स्वरेतिनित्यंप्रकाशतेइत्याहव्यक्तावैखरीअव्यक्तःप्रणवस्तदात्मनेतस्यब्रह्मणःपरःपरमेश्वरः आभातिकीदृशः ब्रह्मपरिपूर्णः तत्राव्य
क्तात्मनोब्रह्मरूपोविततोभवति व्यक्तात्मनोनानाशक्त्युपबृंहितःइंद्रादिरूपोवभाति ५७ यापूर्वेविशिष्टासतीनिहारंतमोभवत ततः

राम
५५

तद्द्वैतग्रहणे कारणमाह ऋषीणामित्यादिना ॥ ४९ ॥ ५० ॥ युक्तकृतः यथोचितं कुर्वतः अत एव कस्य ब्रह्मणः इदं द्विधा भूतमित्याश्चर्यं तत्कायमभिचक्षते ॥ ५१ ॥ २ ॥ या स्त्री सा अस्य महिष्यासीत् ॥ एधां बभूविरे वृद्धिं प्राप्ताः ॥ ५२ ॥ तदेवाह ॥ स चापीति ॥ ५४ ॥ यतः याभ्यां

ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतं ॥ ज्ञात्वा तद्धृदये भूयश्चिंतयामास कौरव ॥ ४९ ॥ अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा ॥ नह्येधंते प्रजा नूनं दैवमत्र विघातकं ॥ ५० ॥ एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा ॥ कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते ॥ ५१ ॥ ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत ॥ यस्तु तत्र पुमान्सोभून्मनुः स्वायंभुवः स्वराट् ॥ ५२ ॥ स्त्री यासीच्छतरूपाख्या महिष्यस्य महात्मनः ॥ तदा मिथुनधर्मेण प्रजा ह्येधां बभूविरे ॥ ५३ ॥ स चापि शतरूपायां पंचापत्यान्यजीजनत् ॥ प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ॥ ५४ ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ॥ आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमां ॥ दक्षायादात्प्रसूतिं च यत आपूरितं जगत् ॥ ५५ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे द्वादशोध्यायः ॥ श्रीशुक उवाच ॥ निशम्य वाचं वदतो मुनेः पुण्यतमां नृप ॥ भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥ १ ॥ विदुर उवाच ॥ स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः ॥ प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने ॥ २ ॥

संततिभिः ॥ ५५ ॥ इति भावार्थदीपिकायां द्वादशः ॥ त्रयोदशे मनोर्याचनया रसायामग्नां कामिकाच्युतां धरामुद्धरन् दंष्ट्रयाद्भुतः क्रोडो दैत्यं जघान तं ॥ १ ॥ स्वायंभुवः

भा० त्री
४५

विष्वक्सेनो हरिरेवाश्रयो यस्य ॥ २ ॥ श्रुतस्य तस्य चरितं श्रोतव्यमित्याह । सुचिरं श्रमो यस्मिंस्तस्य पुंसां श्रुतस्य अंजसा सम्यक्त्वेनायमेवार्थ ईडितस्तमाह । मुकुंदपादारविंदं येषां हृदयेषु तिष्ठति तेषां भागवतानां गुणानुश्रवणं ॥ ४ ॥ सहस्रशीर्ष्णो श्रीकृष्णस्य चरणोपधानायते यस्मिन्शय्याकल्पः प्रीत्या यस्यांतिके चरणौ प्रसारयतीत्यर्थः । तमभ्यचष्ट अभ्यभाषत प्रणीयमानः तेन त्वरं प्रवर्त्यमानः ॥ ५ ॥ ६ ॥ त्वमेवैकः

चरितं तस्य राजर्षेरादिराजस्य सत्तम । ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ ॥ ३ ॥ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोर्थः । तत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषां ॥ ४ ॥ श्रीशुक उवाच । इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानं । प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ॥ ५ ॥ मैत्रेय उवाच । यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः । प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ॥ ६ ॥ त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता । अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ॥ ७ ॥ तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु । यत्कृत्वेह यशो विष्वगमुत्र च भवेद्गतिः ॥ ८ ॥ ब्रह्मोवाच । प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर । यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितं ॥ ९ ॥

पिता सर्वेषां यतो जन्मकृत् वृत्तिदः पोषकश्च त्वमेव अतस्तव यद्यप्यन्यापेक्षा नास्ति तथाप्यस्माकं ते शुश्रूषा केन कर्मणा भवेत् तद्विधेहीत्युत्तरेणान्वयः ॥ ७ ॥ हे ईड्य आत्मशक्तिषु अस्मच्छक्येषु कर्मसु मध्ये केन कर्मणा भवेत् तद्विधेहि इदं कर्तव्यमिति कथय । यत्कृत्वा यस्मिन्कृते सति विष्वक् सर्वतः ॥ ८ ॥ वां युवाभ्यां स्वस्ति भद्रं स्तात् भूयात् यद्यतः मां मां शाधि अनुशाधि इति आत्मना स्वयमेवार्पितं निवेदितं

राम
४५

अपचितिः पूजा गत्येन आज्ञेति शेषः सनकादयो न जानन्ति किमिति करिष्याम इति एवंभूतो गतो मत्सरो येभ्यः १० गांशास्य शाधिपालये
त्यर्थः ११ प्रजापालकस्य तेन तुष्टो भविष्यति १२ यत्तलिंगः यत्तमूर्त्तिः अपगतो र्थो यस्मात् केवलं अप्रमायेवेत्यर्थः यद्यस्मा दात्मैव त्वयं
नादृतः तस्मिन्नतुष्टे स्वार्थसेवा सिद्धेः सर्वात्मत्वाद्धनतस्य १३ वन्नेयवन्निष्ठे अमीवद्धनपापनाशन अजुत्तानीहि अत्रक्ष्यात व्यमित्य

एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः १० सत्वमस्यामपत्यानि सदृशान्यात्मनो गु
णैः उत्पाद्य शासधर्मेण गां यज्ञैः पुरुषं यज ११ परंस्रूषणमत्य स्याः प्रजारक्षया नृप भगवांस्ते प्रजाभर्त्तुर्हृषीकेशो
नुतुष्यति १२ येषां न तुष्टो भगवान् यज्ञलिंगो जनार्दनः तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयं १२ म हु च
आदेशेहं भगवतो वर्त्तेयाः मीवसूदन स्थानं त्विह अनुजानीहि प्रजानां मम सुव्रतो १४ यदोकः सर्वे सत्वानां महीम
न्नमहाभाति अस्या उद्धरणो यत्नो देव देव्या विधीयतां १५ मैत्रेय उवाच परमेष्ठीत्वपां मध्ये तथा सन्नामवेक्ष्य गां कथ
मेनामहं मग्नेष्टा इति दध्यौ धिया चिरं १६ सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः

उत्तां देहि १४ महीति चेद्रत आह यदोकः स्थानं सा मही हे देव अस्याः देवीः १५ पूर्वं पाने कृते पिशुन रक्षाउ एवोद्धृता नाम पापामध्ये सन्नाम
वसन्नां निमग्नां समुन्नेष्ये उद्धरिष्यामि १६ चिंतामेवाह सृजतः सतः वार्भिः रद्भिः रसां रसातलं ईश्वरेण सर्गे नियुक्तैः १७

भा०त
४६

मेऽङ्गुष्ठेयं स एव विरिंच्यास्यमपारयत ॥१८॥ खस्थः आकाशे स्थितः सन् ॥१९॥ चित्रधा अनेकधा ॥२०॥२१॥ पूर्वमङ्गुष्ठाग्रप्रमाणो दृष्टः गण्डशिला
स्थूलपाषाणः तत्समः यज्ञो विष्णुः निजरूपतिरोधानेन मे मनः खेदयत् ॥२२॥ इति मीमांसमानस्य सतः जगर्ज अगर्जीत गिरीन्द्रवत्स्वः
गर्जनप्रयोजनमाह ब्रह्माणमिति ॥२४॥ घर्घरितं तत्तज्जात्यनुकरणध्वनिं श्रुत्वा स्वखेदस्तस्य क्षयिष्णु नाशकं ॥ ते इति पन्नस्तुतिः

इत्यभिध्यायतो नासाविवरात्सहसानघ ॥ वराहतोको निरगादङ्गुष्ठपरिमाणकः ॥१८॥
तस्याभिपश्यतः खस्थः क्षणेन किल भारत ॥ गजमात्रः प्रववृधे तदद्भुतमभून्महत् ॥१९॥ मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना
सह ॥ दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा ॥२०॥ किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितं ॥ अहो बताश्चर्यमिदं नासाया
मे विनिःसृतं ॥२१॥ दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद्गण्डशिलासमः ॥ अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः ॥२२॥ इति मीमांसत
स्तस्य ब्रह्मणः सह सूनुभिः ॥ भगवान्यज्ञपुरुषो जगर्जागेन्द्रसन्निभः ॥२३॥ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् ॥
स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः ॥२४॥ निशम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपःसत्यनि
वासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म ॥२५॥ तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादं ॥ विनद्य भूयो विबुधो दयाय

प्रसिद्धिख्यापनार्थं ॥ त्रिभिः पवित्रैः ऋग्यजुःसामभेदैर्मन्त्रैः ॥२५॥ वेदैर्वितन्यते स्तूयते मूर्तिर्यस्य
सः अत एवात्मनो गुणानुवादं तथा तेषां ब्रह्मोच्चारितं वेदमवधार्य ज्ञात्वा ॥२६॥

(दयाय) गजेन्द्रलीलो जलमाविवेश ॥२६॥

४६

कथंभूतः सन् आविवेश त्यपेक्षायामाह द्वाभ्यां ॥ उच्चैः क्षिप्तो वालः पुच्छं येन खचरः आकाशचारी । कठोरः कठिनः सटाः स्कंधवालाः खराणि
तीक्ष्णानि रोमाणि यस्य सः सा त्वग्यस्य ॥ खुरैराहतानि अभ्राणि येन सितदंष्ट्रः श्वेतदंष्ट्रः ईक्षणाग्निरणमेव ज्योतिरालोको यस्य तस्य घ
ध्वांतस्याभावात् । वभासे शोभते महीध्रः पृथिव्या उद्धर्ता ॥ १७ ॥ क्रोडापदेशः वराहछद्मा स्वयमध्वरांगो विपक्षैरिव घ्राणेन विजिघ्रन् गृणतः स्तो
तॄन् विप्रान् उद्वीक्ष्य उद्धर्वीक्ष्य कं जलमाविशत् ॥ १८ ॥ तदानीतनं समुद्रध्वनिमुत्प्रेक्षते स वज्रकूटांगेति वज्रस्य कूटः शृंगं तद्वत् अंगं तस्य निपातेन भ
मापाहि मामवेत्येवं चुक्रोश आर्तत्वाद् श्यमाह उत्सृष्टाः प्रसारिताः दीर्घा ऊर्मयएव भुजास्तैर्विशिष्टः आर्त इव हे ईश वज्रकूटो वज्रमयः पर्वतः

उत्क्षिप्तवालः खचरः कठोरः सटाविधुन्वन्खररोमसत्वक् । खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः ॥ १७ ॥
घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्क्रोडापदेशः स्वयमध्वरांगः । करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान्गृणतोऽविशत्कं
॥ १८ ॥ स वज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् । उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चुक्रोश यज्ञेश्वर पाहि मेति ॥ १९ ॥
खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायां । ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ॥ २० ॥

तद्वद्रंगं यस्य भगवतः तस्य निपातवेगेन विशीर्णा कुक्षिर्यस्य ॥ १९ ॥ तदा रसायां रसातले गां पृथ्वीं ददर्श कः त्रिपरुः त्रीणि पर्वाणि सवनात्मकानि पर्वाणि य
स्य यज्ञमूर्त्तिरित्यर्थः किं कुर्वन् क्षुरप्रा आयताग्राः क्षुरास्तैस्तद्वद्वा तीक्ष्णैः खुरैरपो दरयन् कथं उत्पारपारं उत्पाराणां अपाराणामप्यपारं अन्तं यथा
भवति तथा विदारयन् कथंभूतां अग्रे प्रलयसमये तत्र तां सुषुप्सुः शिशयिषुः सन् जीवाधीयन्ते यस्यां सर्वे जीवा धाराः भूतां यां स्वयमभ्यध
त्त आभिमुख्येन तदधाः जठरे धृतवानित्यर्थः अनेन तद्द्वारणः मायां प्रद्योतयति ॥ २० ॥

भा॰ते
४७

रसायाः सकाशादुत्थितः सहृदयैः सम्यगशोभत । तत्रापि शृंगारे रागमुद्यम्य प्रागच्छत् । रुधानं प्रतिघुतं तेन सत्यः सहृदना । नहीं विक्रमोप
प्यातं दैत्यहना मंचक्रे तद्दंतैर्दीपितः नीत्रोमस्तुर्यस्य । यद्दामधिविद्यमाने किमितिपरिभवं सहस्रइतिहना मेनसंदीपितत्तीव्रमन्युः
सभगवान्नृसिंहो गजमिवलीलया जघान ॥ २१ ॥ गजेंद्रो जगतीं क्रीडया विदारयन् गैरिकयाय यथाश्रुसुगांगडतुंडो भवति तथा तस्य

रुधिरं दंष्ट्रयोद्धृत्य महीनिमग्नां सउत्थितः संहृदयैः रसायाः ॥ तत्रापि दैत्यं गदया पतंतं हिमाभसंदीपिततीव्रमन्युः ॥ जघान
रुधानमसत्यविक्रमं सलीलया यं मृगराडिवांभसि ॥ २१ ॥ तद्रक्तपंकांकितगंडतुंडो यथा गजेंद्रो जगतीं विभिंदन् ॥ २२ ॥
तमालनीलं सितदंतकोट्यात्स्मापादुत । क्षिपंतगजलीलयांग ॥ प्रत्तायवद्धांजलयोन्नवाकैर्विरंचिमुख्या उपतस्थुरी
शं ॥ २२ ॥ ऋ म प उ वुः ॥ जितं जितं ते जितयज्ञभावन त्रयींतनुं त्वा परिधुन्वते नमः ॥ यद्रोमगर्तेषु विलिल्युरध्वराः त

क्रमेव पंकं तेमांकितौ गंडौ तुंडं च यस्य सः जघानेति पूर्वेणान्वयः ॥ २२ ॥ प्रत्तायवद्धालन्त्याश्रुत्वा ॥ स्मै नमः कारणसूकरायते ॥ २४ ॥
कोवैरिकं स्त्रनं तत्सह शैर्वा कैरुक्तस्तुवुः ॥ २२ ॥ भो अजित ते त्वया जितं जितं जितमिति संभ्रमे वीप्सा यज्ञैर्भाव्यते आक्रियते इति तथा त्रयीवेद राम
मयी निलिल्युः लीनप्रायाः कारणं पृथिव्युद्धरणं तेन सूकराय ॥ २४ ॥ राम राम राम राम राम राम ४७

यज्ञात्मकत्वप्रपंचयतः स्तुवंति ॥ रूपमित्यादिचतुर्भिः छंदांसि गायत्र्यादीनि यस्य त्वग्भूतं हृष्यत्रायत्तवारेन भगवद्वपुषता विधीयते
बर्हिः शरैर्दीर्घाभावस्त्वार्षः दृशि चक्षुषि ॥ चातुर्होत्रं होत्रादिकर्म चरणेषु यं ॥ ३५ ॥ स्रुक् तुंडे ॥ तंडे मुखाग्रे स्रुवो नासिकयोः इडा भक्ष-
णपात्रं चमसाः पात्रग्रहाः सोमपात्राणि ॥ प्राशित्रं ब्रह्मभागपात्रं ग्रसने ते नैनेति ग्रसने मुखांतर्वर्तिछिद्रे ॥ चर्वणं भक्षणं ॥ ३६ ॥ दीक्षा दीक्षणी-
येष्टिः अनुजन्म वारं वारमभिव्यक्तिः उपसदस्तिस्रः इष्टयः शिरोधरं ग्रीवा ॥ प्रायणीया दीक्षानंतरेष्टिः उदयनीया समाप्तीष्टिः ते एव दं-

नो

रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं ॥ छंदांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रं ॥ ३५ ॥
स्रुक् तुंड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरंध्रे ॥ प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्न-
ग्निहोत्रं ॥ ३६ ॥ दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः ॥ जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्याव-
सथ्यं चितयोऽसवो हि ते ॥ ३७ ॥ सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः ॥ सत्राणि सर्वाणि शरी-

ष्ट्रे यस्य प्रवर्ग्यो महावीरः प्रत्युपसदं प्रवर्ग्यः क्रियते सभ्यो होमरहितोऽग्निः आवसथ्यो औपासनाग्निः ते ॥ रसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः ॥ ३८
योऽहं देवं यत्तत्तव क्रतो रूपस्य शीर्षकं शिरः ॥ चितयः इष्टिका चयनानि पंच असवः प्राणाः ॥ ३७ ॥ प्रातः सवनादि त्रित्रयं अवस्थितिः आसनं बाल्याद्यवस्था वा अग्नि-
ष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त संस्थाविभेदाः त्वङ्मांसादिसप्तधातवः सत्राणि द्वादशाहादीनि बहुयागसंघा-
तरूपाणि अहर्गणायत्ताः ससोमाः क्रतवः तद्रूपस्त्वं इष्टिर्यजनमनुष्ठानं तदेव बंधनं यस्य सः ॥ ३८

भा०त्री
५८

पूर्वोक्तमेव समपरिकरं कीर्तयंतः प्रणमंति ॥ नमो नमस्ते इति ॥ अखिलमंत्रादिरूपाय क्रियात्मने सामान्यव्यापाररूपाय ॥ किंच वैराग्ययुक्तकर्मसाध्या सत्वशुद्धिः ततो भक्तिः ततश्चात्मजयः चित्तस्थैर्यं तेन अनुभावितं साक्षात्कृतं यज्ज्ञानं तस्मै ॥ एवंभूतत्त्वानप्रदाय गुरवे ॥ ३९ ॥ हे भूधर सपर्वतावनाद् दंष्ट्राग्रकोट्या मतंगजेंद्रस्य रताद् इतेन ॥ ४० ॥ त्वया धृता भूर्विराजते इत्युक्तं ॥ इदानीं भूमंडलेन त्वद्रूपं विराजते इत्याह ॥ त्रयीति ॥ अथ

नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने ॥ वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः ॥ दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा ॥ यथा वनान्निःसरतो दता धृता मतंगजेंद्रस्य सपत्रपद्मिनी ॥ ४० ॥ त्रयीमयं रूपमिदं च सौकरं भूमंडलेनाथ दता धृतेन ते ॥ चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव विभ्रमः ॥ ४१ ॥ संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता ॥ विधेम चास्यै नमसा

त्वर्थांतरे ॥ हे इदं रूपं ते न धृतं यद्भूमंडलं तेन च चकास्ति शोभते ॥ शृंगेण शृंगोणाऊढो ॥ सह त्वया यस्यां स्वतेजोऽग्निमिवारणावधाः ॥ ४२ ॥ धृतो यो घनः तेन भूयसा अतिमहता विभ्रमो विलासः ॥ ४१ ॥ लोकाय वा संस्थानार्थं ते पत्नीं जगतां मातरं ॥ यतस्त्वं पिता असि ॥ एवं सति तत्र स्थिताः संतः त्वया पित्रा सह अस्यै मात्रे नमसा विधेम नमनं करिष्यामः ॥ नमस्कारेण परिचरेमेति वा ॥ स्वतेजः धारणाशक्तिं यस्मिन् का मंथतो अग्निं अरणिविव अधाः निहितवानसि ॥ ४२ ॥

एम
५८

इदं च त्वया श्रुतिदुष्करं कृतमित्याह ॥ क इति हे प्रभो तव त्वया कृतं भुव उद्विबर्हणम् उद्धरणं त्वदन्यः कः श्रद्दधीत संभावयेत श्रद्धावसेदित्यर्थः त्वयि पुनरसौ विस्मयो न भवति यतो विश्वेषां सर्वेषां विस्मयाय यस्मिन्नद्भुतः यो भवान् अतिविस्मयं यथा स्यात्तथा इदं विश्वं क्रियाविशेषणं वा ससृजे सृष्टवान् ॥ ४३ ॥ विस्मयं दर्शयन्तः प्रार्थयन्ते विधुन्वतेति द्वाभ्यां सटानां शिखाभिरग्रैः उद्धूता उच्छलिताः ये शिवा अम्बुबिन्दवः तैः सिंच्यमानाः

कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणं ॥ न विस्मयोऽसौ त्वयि विश्वविस्मये यो मायये दंसृजे तिविस्मयं ॥ विधुन्वता वेदमयं निजं वपुर्जनस्तपः सत्यनिवासिनो वयं ॥ सटाशिखोद्धूतशिवाम्बुबिंदुभिर्विमृज्यमाना भृशमीश पाविताः ॥ स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणां पारमपारकर्मणः ॥ यद्योगमायागुणयोगमोहितं विश्वं समस्तं भगवन्विधेहि शं ॥ ४५ ॥ मैत्रेय उवाच ॥ इत्थमुपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः ॥ सलिले स्वखुराक्रान्त उपाधत्तावितावनिं ॥ ४६ ॥ स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः ॥ रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः ॥ ४७ ॥ य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः ॥ शृण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोऽस्याशु हृदि प्रसीदति ॥ ४८ ॥

वयं पवित्रीकृताः ॥ ४४ ॥ तव कर्मणां पारं य एषते लोकयति ज्ञातुमिच्छतीत्यर्थः यस्मात्तव योगमायाया गुणैः सहयोगस्तेन मोहितं अतो विश्वस्य शं मंगलं विधेहि यथा त्वामविद्यानन्तरादिं ज्ञात्वा भजन्न याति इति गृहाणेत्यर्थः ॥ ४५ ॥ उपस्थीयमानः स्तूयमानः स्वखुराक्रान्त इति जलेपि धारणशक्त्याधानं दर्शयति अविता रक्षकः ॥ ४६-७ ॥ कथनीयानि मायीनि मायावन्ति चरित्राणि यस्य श्रावयेत कृत्वमांश उश

भा॰त॰
४९

यद्यपि सुलभाः तथापि न प्रार्थनीया इत्याह ॥ ताभिराशीभिरलं लवात्मभिः तुच्छाभिः न च तत्र भजनस्यैवैकल्पशंकनीयमित्याह भगव
द्जनव्यतिरेकेण फलांतरदृष्टिं विना भजतां त्वत्पदप्राप्तिस्त्वयमेव विधत्ते ॥ गुहाशयत्वादेतद्वक्तीभक्तिं जानन् ॥ ४९ ॥ अतः को नाम पुरुक

तस्मिन्मुहूर्त्तेऽमकलांशिषांप्रभो किंतु लंपंताभिरलंलवात्मभिः ॥ अनन्यदृष्ट्या भजतां गुहाशयः स्वयं विधत्ते
स्वगतिं परः परां ॥ ४९ ॥ को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधां ॥ आपीय कर्णांजलि
भिर्भवापहामहो विरज्येत विना नरेतरं ॥ ५० ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे स्वकारत्नपानुवर्णने च
यो शो ऽध्यायः ॥ श्रुक उवाच ॥ निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः ॥ पुनः स पप्र
च्छ तमुद्यतांजलिर्न चातितृप्तो विदुरो धृतव्रतः ॥ १ ॥ विदुर उवाच ॥ तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना
आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम ॥ २ ॥ तस्य चोद्धरतः क्षौणीं स्वदंष्ट्राग्रेण लीलया ॥ दैत्यराजस्य च ब्रह्म

थानां पूर्ववृत्तानां मध्ये कथंचिदापीय विरज्येत विरमेत ॥ नरेतरं पशुं विना ॥ ५० ॥ इति तृतीये त्रयोदशः ॥ न कस्माद्धेतोरस्य मृधः २
चतुर्दशे निदानं तु तद्धेवत्स्योच्यते ॥ संध्यायां कश्यपात्कामं संभवः कामतो दितेः ॥ १ ॥ तेनैव येन भूमिरुद्धृता अनुशुश्रुम त्वन्मुखात् शम
॥ १ मृधोद्वंद्वं २ ॥ श्रीराम

४९

साधुत्वे हेतुः यद्यस्मात्त्वं हरेरवतारकथां पृच्छसीति मृत्योः पाशं विशातयति मोचयतीति तथा ॥ ४ ॥ तदेव दर्शयतीति यथा कथया उ
त्तानपदः पुत्रो ध्रुवः मुनिना नारदेन अर्भक एव यदा ध्रुवाय पदं ततो दाशिभिर्विमानमानीतं तत्र सदेहत्यागोपेक्षितः स्यादिति मत्वा
मृत्यावागतेपि देहं न तत्याज किंतु सोपानवत्तस्य मूर्ध्नि पदं दत्वा विमानमारुह्य विष्णुपरमानंदः वद्धपतिहि ॥ परीत्यापवर्गाधिरूढ्या
ग्र कृतत्वं व्याप्यत्वं द्विजैः इत्येष तदध्यष्टांगं विघ्नरूपहिरण्मयमिति ॥ ५ ॥ तयोः संग्रामे हेतुवक्त इति हासं पृच्छतीति अथेति ॥ अथ

मैत्रेय उवाच ॥ साधु वीर त्वया पृष्टमवतारकथां हरेः ॥ यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीं ॥ ४ ॥ यदा उत्तान
पदः पुत्रो मुनिना गीतयार्भकः ॥ मृत्योः कृत्वैव मूर्ध्न्यंघ्रिमारुरोह हरेः पदं ॥ ५ ॥ अथात्रापीतिहासोयं श्रुतो
मे वर्णितः पुरा ॥ ब्रह्मणा देवदेवेन देवानामनुपृच्छतां ॥ ६ ॥ दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिं ॥ अप
त्यकामा चकमे संध्यायां हृच्छयार्दिता ॥ ७ ॥ इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिं ॥ निम्लोचत्यर्क आसीनमग्न्या
गारे समाहितं ॥ ८ ॥

पृच्छतां देवानां ब्रह्मणा वर्णित इतिहासो मया श्रुतः ॥ ६ ॥ देवगर्भप्रहंतावापय प्रथमं हिरण्याक्षहिरण्यकशि
पूत्पत्तिप्रसंगमाह ॥ दितिरिति ॥ दिना यावदस्थाय परिसमाप्ति मरीचेः पुत्रं ॥ हृच्छयः कामः तेनार्दिता ॥ अतः संध्यायामेव कामितवती ॥ ७ ॥
तदेवाग्निहोत्रशालायां ॥ तत्रापि समाहितं ॥ अग्निर्जिह्वा यस्य ॥ यजुषां यज्ञानां पतिं पुरुषं श्रीविष्णुं ॥ ८ ॥

भा०न कृपणां वङ्गभाषिणीमिति वक्ष्यति तत्र एषमामिति द्वाभ्यां कार्य्यमाह मन्नेराति चन्द्रशिश्च वङ्गभाषणान्नर्पते दुनोति पीडयति विक्रम्य

५० शौर्यमाविर्भाव्य रंभा कदली ९ आपुन्नां सर्वतो पुनन्ति समुचुक्र कोऽपि १० मन्नेरि प्राप्नवङ्गमानानां हीरणां आविशते व्याप्नोति प्रज

याऽपत्रत्रूपेण तज्जायाजाया भवति यद्‌स्यां जायते पुनरिति श्रुतेः ॥ ११ ॥ नोऽस्माकं पिता नोऽस्मान् पृथक् पृथक् अपृच्छत अयंभावः त्रयो

दि ... व एषमां त्वत्कृते विद्वनूकामस्त्वान्नशरासनः दुनोति रीनां विक्रमपुरं भामिव मत्तगजः ए तद्गवान् रत्यमानायां

सपत्नीनां समृद्धिभिः प्रजावतीनां भर्इते मध्यां सकामस्त्वयहं १० मन्नेर्या ग्नोहमानानां लोकानाविशते यशः पति

मवद्विधोयामाप्रजयानतु जायते ॥ ११ ॥ पुरा पितानो भगवान् दक्षोऽदुहितृवत्सलः कंदृशीन वरं वत्साइत्यपृच्छत नः

पृथक् ॥ १२ ॥ सविदित्वात्मजानां नो भावं तत्तानमावनः त्रयोदशाददन्नारायाह्निशीलमन्नुव्रताः ॥ १३ ॥ अथमेत्कृतक

ल्याणो कामं कंजविलोचन आर्त्तोपसर्पणं भ्रमत्रमोत्वं हिमहीयसि १४ इति तां धीरमारीचः कृपणां वङ्गभाषिणीं

श्रुत्वा हातनयत्वाचावाप्रहृष्टानेनाकश्मलां १५ एषते हंविधास्यामि प्रियं भीरुयदिच्छसि तस्याः कामं न कः कुर्यात्सिद्धि

द्वैवार्गिकीयतः १६ सर्वाश्रमाउपारायत्वाश्रमेणाकलत्रवान् व्यसनार्णवमत्येति जलयानैर्यथार्णवं ॥ १७ ॥

दशानामप्यस्माकं त्वयि भावसाम्ये वैषम्याचरणं तवानुचितमिति ॥ १२ ॥ मोऽधनभवतिहिमहीयसित्वादृशो महन्मे १४ यद्दृष्टानं गेन कश्मलं मो एप

...यस्यात्तां १५ संध्याकालं वचनायभार्याग्रशंसा एषइति पंचभिः यतः यस्याः सकाशात् १६ सर्वाश्रमाउपारायेति तानप्यत्रादिशनेन कहूतां ५०

आत्मनो रेहस्यार्धकर्मेरुद्धयोः सहाधिकारात ॥ यच्छद्वानांतांत्वामितिततीयश्लोकेनसंबंधः त्वंभरद्दृष्टादृष्टकर्मभारविज्वरः निश्चिंतः ॥ १८ ॥ हेला-
भिर्लीलाभिः जयेमेतिसभार्यस्येंद्रियाणिजायेणाततः ततोनसमर्थइतिभावः ॥ १९ ॥ तामनेकोपकारकर्त्रींत्वांकामस्मिनत्रुटकर्त्रेप्रत्युपकारैः ते-
त्सदृशीभवितुंनप्रभवः नसमर्थाः येवान्येगुणागृध्रवः गुणप्रियालिप्सिनसमर्थाः संपूर्णानाप्याप्नुषा ॥ वाराद्वाज्ञन्मांतैरपिनप्रभवस्तत्कं १०
यद्यपित्वरङ्कारणामशक्यंप्रजात्यैयुग्मोत्पत्त्यैनातिवाचंतिननिंदतिप्रतिपालयप्रतीक्षस्व ॥ ११ ॥ त्वंनिरामगणायंतीभीषयन्श्रीमदमन्त्र

यामाहुरात्मनोन्यूर्ध्वंश्रेयस्कामस्यमानिनि ॥ यस्याद्भुतमध्यमस्यभमांश्वरातिविज्वरः ॥ १८ ॥ यामाश्रित्येंद्रियाणांतीदुर्जया
नितराश्रयैः ॥ वयंजयेमहेलाभिः दस्यूनदुर्गपतिर्यथा ॥ १९ ॥ नैवयंप्रभवस्तांत्वामनुकर्तुंगृहेश्वरि ॥ अप्यायुषावाका
त्स्न्येनयेचान्येगुणगृध्नवः ॥ १० ॥ अथापिकामयेतेतेप्रजात्यैकरवाणयेलं ॥ यथामानातिवोचंतिपुहर्तुंप्रतिपालय ॥ ११ ॥
एषाघोरतमावेलाघोराणांघोरदर्शना ॥ चरंतियस्यांभूतानिभूतेशानुचराणिह ॥ १२ ॥ एतस्यांसाध्विसंध्यायांभगवान्
भूतभावनः ॥ परीतोभूतपर्षद्भिर्वृषेणाटतिभूतराट् ॥ १३ ॥ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः ॥ भस्मा
वगुंठामलरुक्मदेहोदेवस्त्रिभिःपश्यतिदेवरस्ते ॥ १४ ॥
वर्णायति ॥ एषेतिसप्तभिः घोराणामेषावेलाहियंचघोरदर्शना ॥ १२ ॥ भूतपार्षद्भिः
भूतगणैः ॥ १३ ॥ तर्हितत्सन्निधवत्तमांगंवर्जनीयमितिचेत्तत्राह ॥ श्मशानेयश्चक्रानिलः वातमंडलीतस्मिन्याधूलिस्तयाधूम्रः विकीर्णोविक्षिप्तः
विद्योतितोद्युतिमान्जटाकलापोयस्यभस्मनावगुंठः आवृतः अमलः रुक्मदेहोयस्य ॥ सदेवः त्रिभिः सोमार्काग्निनेत्रैः पश्यतीत्यस्योत्तरश्लोकेनान्वयः

भा॰त
५१

नन्वेतत्तथापि मदऽत्वेनादरणीयस्य स्वजनस्य चातत्व सर्वज्ञमेतेवतन्नाह ॥ यस्य स्वजनादिर्नास्ति स मत्वावारीश्वरस्य ऐश्वर्यमेवाह ॥ येन चरणे
नापि विद्धां निर्माल्यवत्त्यक्तां तेन भुक्तभोगामजामायातन्मयीं विभूतिं महाप्रसाद इत्याशास्महे ॥ व्रतैस्तमाराध्य ॥ १५ ॥ अनिविद्धस्त्वे
त्यागादस्मो पिशाचवदत्युपहासो न कार्य इत्याह द्वाभ्यां ॥ यस्य त्वनवद्यं विषयाशक्तिशून्यं आचरितं विमित्सवः मेत्तुमिच्छवः ॥ १६ ॥ समाहितं
अभिप्रेतं लोकशिक्षार्थं पश्य अविदुषः अविद्वांसः यद्वा न विद्वांसो यस्मादिति तस्य सर्वेत्तस्येत्यर्थः ॥ दुर्भगानेवाह ॥ यैरिति स्वभोजनं श्मशानेभो

न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः ॥ वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजां वत भुक्तभोगां
॥ १५ ॥ यस्यानवद्याचरितं मनीषिणो गृणन्त्यविद्यापटलं विभित्सवः ॥ निरस्तसाम्यातिशयोऽपि यत्स्वयं पिशाचचर्या
मचरद्गतिः सतां ॥ १६ ॥ हसन्ति यस्याचरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः समीहितं ॥ यैर्वस्त्रमाल्याभरणानुले
पनैः श्वभोजनं स्वात्मतयोपलालितं ॥ १७ ॥ ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया ॥ आज्ञाकरी त
स्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनं ॥ १८ ॥ मैत्रेय उवाच ॥ एवं स्वविदिते भर्त्री मन्मथोन्मथितेन्द्रिया ॥ जग्रा

×न्नत २

ज्यं शरीरं स्वात्मतया अयमेवात्मेति बुध्या ॥ १७ ॥ अहो अनवद्यं तस्याचरणमित्याह ॥ ब्रह्मादय ॥ ह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा ॥ १९ ॥
यो येन कृतानू सेतव स्वस्वाधिकारान् पालयन्ति यः कारणं यस्य तेन कृतमिदं विश्वं ॥ माया च यस्याज्ञाकारी ॥ विभूम्नः परमेश्वरस्य राम
विडंबनं अनुकरणमिति भावः ॥ १८ ॥ भर्त्री निरूपकेण एवं स्वविदिते ज्ञापितेपि सति वृषलीव वेश्येव ॥ १९ ॥ श्रीराम

विकर्मणि निषिद्धे ॥ दिष्टाय दैवरूपाय उपविवेशेति मैथुनं लक्ष्यते ३० ॥ उपस्पृश्य स्नात्वा भर्गः शर्वं वा ध्यायन् विरजं ज्योतिर्ध्यायन् सनातनं ब्रह्म गायत्रीं प्रणवं वा जजाप ॥ ३१ ॥ कर्मावद्येन कर्मदोषेण ॥ ३२ ॥ मावधीत माहन्नित्यर्थः वधशंकाबीजमाह रुद्र इति अहं समहः अपराधं अकार्यं कृतवत्यस्मि ॥ ३३ ॥ रुतद्रुः स्वतनद्रावयतीति रुद्र इत्यस्मै उग्रायानतिलंघ्याय मीढुषे सर्वकामेभ्य फलसेचनकर्त्रे ॥ निष्कामेभ्य शिवाय

स विदित्वाथ भार्यायास्तं निर्बंधं विकर्मणि ॥ नत्वा दिष्टाय रहसि तयाथोपविवेश ह ॥ ३० ॥ अथोपस्पृश्य सलिलं प्राणा-
नायम्य वाग्यतः ॥ ध्यायन् जजाप विरजं ब्रह्म ज्योतिः सनातनं ॥ ३१ ॥ दितिस्तु व्रीडिता तेन कर्मावद्येन भारत ॥ उप-
संगम्य विप्रर्षिमधोमुख्यभ्यभाषत ॥ ३२ ॥ दितिरुवाच ॥ न मे गर्भमिमं ब्रह्मन् भूतानामृषभोवधीत ॥ रुद्रः पति-
र्हि भूतानां यस्याकरवमंहसं ॥ ३३ ॥ नमो रुद्राय महते देवायोग्राय मीढुषे ॥ शिवाय न्यस्तदंडाय धृतदंडाय मन्यवे ॥ ३४ ॥
स नः प्रसीदतां भामो भगवानुर्वनुग्रहः ॥ व्याधस्याप्यनुकंप्यानां स्त्रीणां देवः सतीपतिः ॥ ३५ ॥ मैत्रेय उवाच ॥
स्वसर्गस्याशिषं लोक्यामाशासानां प्रवेपतीं ॥ निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः ॥ ३६ ॥

वक्तो न्यस्तदंडाय ॥ दुष्टेषु धृतदंडाय संहारे मन्यवे ॥ ३४ ॥ भामो भगिनीभर्ता ॥ उरुः अनुग्रहो यस्य व्याधस्यापि निर्दयस्यापि सतीपतिरित्यनेन न स्त्रीणां स्वभा-
वं त्वयमपि वेत्तीति सूचयति ॥ ३५ ॥ स्वसर्गस्य स्वसंतानस्य आशिषं क्षेमं ॥ लोक्यां लोकद्वयार्हां ॥ संध्यायां यो नियमः स निवृत्तो यस्य ॥ ३६ ॥

भा०तृ
५२

तेऽस्मात्मनश्चित्तस्याप्रायत्यादशुचित्वात मौहूर्त्तिकात् संध्यारूपात उत अपि । मन्निदेशस्याज्ञाया अतिचारेणातिक्रमेण देवानां हेलनादवज्ञानात्
॥३७॥ एतैश्चतुर्भिर्हेतुभिः जाठराधमौ पुत्रापसदौ हे चण्डि कोपने ॥३८॥ हन्यमानानां मत्ता ॥३९॥ शतपर्वधृक् । वज्रधर इन्द्रः ॥४०॥ हे नाभेनोदरा वा

कश्यप उवाच ॥ अप्रायत्यादात्मनस्ते दोषान्मौहूर्त्तिकादुत । मन्निदेशातिचारेण देवानां चातिहेलनात् ॥३७॥ भविष्यतस्तवाभद्रा
वभद्रे जाठराधमौ । लोकान्सपालांस्त्रींश्चण्डि मुहुराक्रन्दयिष्यतः ॥३८॥ प्राणिनां हन्यमानानां दीनानामकृतागसां । स्त्रीणां नि
गृह्यमाणानां कोपितेषु महात्मसु ॥३९॥ तदा विश्वेश्वरः क्रुद्धो भगवान् लोकभावनः । हनिष्यत्यवतीर्यासौ यथाद्रीन् शत
पर्वधृक् ॥४०॥ दितिरुवाच ॥ वधं भगवता साक्षात्सुनाभोदारबाहुना । आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणात्प्रभो ॥४१॥ न ब्रह्म
दंडदग्धस्य न भूतभयदस्य च । नारकाश्चानुगृह्णन्ति यां यां योनिमसौ गतः ॥४२॥ कश्यप उवाच ॥ कृतशोकानुतापेन सद्यः प्रत्यव
मर्शनात् । भगवत्युरुमानाच्च भवे मय्यपि चादरात् ॥४३॥ पुत्रस्यैव च पुत्राणां भवितैकः सतां मतः । गास्यन्ति यद्यशः शुद्धं भगवद्यशसा समं ॥४४॥

दुर्यशः । मत्यंमम । कोपितेषु शङ्कितत्वात् शङ्कितविज्ञापनं प्रार्थयते ब्राह्मणान्मा भूदिति ॥४१॥ नारकाश्च पितरो यां यां योनिमसौ गतो भवति त
त्रस्थोऽपि तं नानुगृह्णन्ति कृपां न कुर्वन्ति ॥४२॥ कृतो योऽपराधस्तेन शोकस्तस्मादनुतापः तेन प्रत्यवमर्शनात् पुत्रापुत्रविचारणात् भगवति हरौ भवे च मम
श्रीरुद्रे एतैः पञ्चभिः कारणैः ॥४३॥ पुत्रस्य हिरण्यकशिपोः पुत्राणां मध्ये एकः सतां मतो भविष्यति तमेव वर्णयति गास्यन्तीति मादैः पञ्चभिः
समं सदृशं वा ॥४४॥

श्री
५२

हीनवर्णं हेम यथा योगैर्दाहादिभिरुपायैः शोध्यते तथायमस्य शीलं स्वभावमनुवर्त्तितुं अनुगंतं प्राप्तुं निर्वैरादिभिर्योगैरात्मानं भावयिष्यति ॥४५॥ वि
स्वप्रसादे हेतुः यदात्मकं स्वदृक् आत्मसाक्षी ॥ यस्यानन्यया भगवानेवसत्यः स्वेवंभूतया दृशा तोष्यते तोषं प्राप्स्यते ॥४६॥ तत्र हेतुः सर्वा इति महा
त्मा अपरिच्छिन्नदृष्टिः महानुभावः महाप्रभावः महतां महिष्ठः अतिशयेन महान् प्रवृद्धया भक्त्या अनुभाविते शोधिते चित्ते वैकुंठं हरिं निवे
श्य देहाद्यभिमानं त्यक्ष्यति ॥४७॥ महाभागवतत्वमाह अलंपट इति ॥ शीलधरः सत्स्वभावः गुणानां धैर्यादीनामाकरः जन्मभूमिः ॥ परेषां समृद्ध्या हृ

योगैर्हेमेव दुर्वर्णं भावयिष्यति साधवः ॥ निर्वैरादिभिरात्मानं यच्छीलमनुवर्त्तितुं ॥४५॥ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकं
स स्वदृक् भगवान् यस्य तोष्यतेनन्यया दृशा ॥४६॥ स वै महाभागवतो महात्मा महानुभावो महतां महिष्ठः ॥ प्रवृद्धभक्त्या ह्यनुभावि
ताशये निवेश्य वैकुंठमिमं विहास्यति ॥४७॥ अलंपटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु ॥ अभूतशत्रुर्जगतः
शोकहर्त्ता नैदाघिकं तापमिवोडुराजः ॥४८॥ अंतर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपं ॥ पौत्रस्तव श्रीललनाललाम
द्रष्टा स्फुरत्कुंडलमंडिताननं ॥४९॥ मै त्रे य उ वा च ॥ श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशं ॥ पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महा
मनाः ॥५०॥ इति श्री भ ग व ते म हा पु रा णे तृ ती य स्कं धे दितिकश्यपसंवादे चतुर्दशः ॥

ष्टः ॥ परेषु दुःखितेषु सत्स्वभूतो जातः शत्रुर्यस्य ॥ निदाघे भवं
तापं चंद्रो यथा हरति ॥ एवं जगतः शोकहर्त्ता भविष्यति ॥४८॥ अपरिच्छिन्नदृष्टित्वमाह अंतरिति स्वपुरुषाणामिच्छया अनुगृहीतानि रूपाणि येन श्री
रेव ललना स्त्री तस्याः ललामं मंडनं द्रष्टा द्रक्ष्यति ॥४९॥ महामनाः सोत्साहविनाहरिणा सह युद्धेन मरणात् पुत्रयोः कीर्त्तिः स्यादिति स्वभवेदिति ॥५०॥ च

हतप्रभैः हरेः सृष्टः प्राह पर्वदृशो विधिः तद्वीजं विप्रशापादि वेत्ता ते विस्मृतस्मयोः तदेवदेवानां ब्रह्मणश्च संवादप्रस्तावस्तत्रेदानींतनं संवादं वक्तुं
प्राह ॥ प्राजापत्यं काश्यपं तेजो वीर्यं परेषां तेजो हंतीति तथा आर्षः स्वपुत्राभ्यां करिष्यते यत्सुराणां अर्द्दनं पीडनं तस्मात् शंकमाना ॥ १ ॥ तेन गर्भ
तेजसा हतालोके निरस्तसूर्यादिप्रकाशे ॥ हतौजसः हतप्रभावाः ॥ ध्वांतेन व्यतिकरं संकरं ॥ २ ॥ वेत्थ जानासि किं विचारयसि ॥ यद्यतो वयं वि
प्राभीताः अव्यक्तमज्ञातं ॥ नस्पृष्टवर्त्मज्ञानप्रचारो यस्य ॥ ३ ॥ ब्रह्माणं परमेश्वरत्वेन स्तुवंतः प्रार्थयंते देवदेवेति द्वाभ्यां लोकनाथानां शिखाम

मैत्रेय उवाच ॥ प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः ॥ दधार वर्षाणि शतं शंकमाना सुरार्दनात् ॥ १ ॥ लोके तेन हतालोके लोक
पाला हतौजसः ॥ न्यवेदयन् विश्वसृजे ध्वांतव्यतिकरं दिशां ॥ २ ॥ देवा ऊचुः ॥ तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशं ॥ न ह्यव्यक्तं भ
गवतः कालेनास्पृष्टवर्त्मनः ॥ ३ ॥ देवदेव जगद्धातर्लोकनाथशिखामणे ॥ परेषामपरेषां त्वं भूतानामसि भाववित् ॥ ४ ॥ नमो विज्ञा
नवीर्याय माययेदमुपेयुषे ॥ गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ॥ ५ ॥ ये त्वानन्येन भावेन भावयंत्यात्मभावनं ॥ आत्मनि प्रोत

णे ॥ भाववित् अभिप्रायज्ञो लिंगेनाभिप्रायेणादितेः गर्भो वर्द्धत इति जानासीत्यर्थः ॥ ४ ॥ विज्ञानं वीर्यं बलं यस्य ॥ भुवनं परं सदसदात्मकं ॥ ६ ॥
इदं ब्रह्मरेदमुपेयुषे प्राप्नुवते ॥ गृहीतो गुणभेदः रजोगुणो येन अव्यक्तस्य प्रधानस्य योनये कारणाय न अव्यक्ताय केनापि प्रमाणेन विज्ञाताय योनिर्यस्येति
वा ॥ ५ ॥ एकांतमतया प्रतिज्ञाणाडुः त्वमनुभवंतो निष्कामभक्त्यानुस्मरंत आरूढाः ये त्वात्मानं अनन्येन निष्कामेन भावेन भक्त्या ध्यायंति आ राम
त्मनो जीवाननु भावयतीति तथा ॥ स्वस्मिन्नुप्रोतानि ग्रथितानि भुवनानि येन ॥ चेतनाचेतनप्रपंचकारणमित्यर्थः ॥ तत्र हेतुः सदसदात्मकं कार्य ५२
कारणरूपं वस्तु तत्त्वात् परं ॥ ६ ॥

जितः श्वासः इंद्रियाणि आत्मा मनश्च यैः अतः हुतपञ्चयोगाः अत एव ग्राम्योद्गुष्मन्यद्वाराः ये तेषां ७ अन्ये तु नित्यं कर्म ज्योतिषि न इत्याहुः य
यस्येति तस्याः शमनाय आयत्ताः आधीनाः शुश्रूषापनियंते प्राणायापायेतिवा तथा च श्रुतिः तस्य वाकृतिः नामानि शमानि इत्यादि ८ तमसा
अहोरात्रविभागाभावेन लुप्तानि कर्माणि येषां आपन्नान् आपत्कृतो न स्मात् ९ आपत्कारणमाह ऐषाणर्भः तस्य विशेषणं अपितंनिहि

तेषां हुतपञ्चयोगानां जितश्वासो जितात्मनां जह्युष्मत्स्वमाराणां न क्षतश्चित्परागवः ७ यस्य वाचा प्रजाः सर्वाः गावस्ते
ये श्चैवं यंत्रिताः हरंति बलिमायत्ताः तस्मै दृष्ट्यात्मने नमः ८ स त्वं विधत्स्व शंभू मन्त्रमयानुष्ठकर्मणां अहन्त्र्यदर्शनादेष्या
आपन्नानहमीशिष्ये ९ एष देवदितेर्गर्भः ओजः काश्यपमर्पितं दिशां तिमिरयन् सर्वा वर्धते ग्निरिवेधसि १० मे य
उ व सप्रहस्य महाबाहो भगवान्शक्रगोचरः यत्या च स्वात्मभूरैवानुपीरणान् हविरयाणिरा ११ व्र वाव मान
सामेहूतास्तुष्मत्पूर्वजाः सनकादयः चेतुर्विहायसालोकाह्लोकेभ्ये विगतस्पृहः १२ त एकदा भगवतो वैकुंठस्याम
लात्मनः ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतं १२ वसंति यत्र पुरुषाः सर्वे वैकुंठमूर्तयः ये ऽनिमित्तनिमित्तेन धर्मेणा

स्तं काश्यपमोजो वीर्यं दिशां तिमिरयन् तमो व्याप्नाः ऊर्ध्वग १० दितेः क्रबेषितं ज्ञात्वा ग्रहस्य देवानां येशरा चिन्नस्पृवाख्यानिरोधयन् हरि १४
तेषां गोचरो विषयभूतः प्रत्यभाषत ११ युष्मत्त्स्य काश्यपात् पूर्वजाताः १२ वैकुंठाख्यं लोकं ययुः १२।१ तं वर्णयति वसंतीत्यादि द्वाद्भिः
वैकुंठस्य हरेः रूपमूर्त्तिर्येषां ते निमित्तं फलं तेन निमित्तेन प्रवर्तकं यस्मिन् निष्कामेन धर्मेणेत्यर्थः आराधयंत आराधितवंतः १४

भा॰तृ
५४

शब्दगोचरः वेदांतैकवेद्यः विरजं सत्त्वं विष्टभ्य स्वीकृत्य वृषो धर्ममूर्त्तिः ॥ स्वानां स्वान् ॥१५॥ तत्रत्यवनं विशिनष्टि यत्रेति चतुर्भिः ॥ सर्वर्त्तुषु प्रवृत्तश्रीः शो-
भादिसंपद्येन ॥१६॥ चरितानि चरित्राणि भर्त्तुः प्रभोः अनुविकसंत्यः मधुमकरंदः तद्युक्ता माधव्यो वासंत्यो लताः यदा अनुविकसन्मधवत्सुमर-
न्मकरंदाः माधव्यः मधुकालीनाः सुमनसः तासां गंधेन खंडिता विघ्निता धीर्येषां तेऽपि तत् अंधपकमनिलं क्षिपंतः तिरस्कुर्वंतो गायंति
अनेन भगवत्पार्षदानां निरतिशयविषयसुखेष्वपि भगवद्भजनानंदासक्तिर्दर्शिता ॥१७॥ अन्यभृताः कोकिलाः दात्यूहश्चातकः अविरमा-

यत्र चाद्यः पुमानास्ते भगवान्शब्दगोचरः ॥ सत्त्वं विष्टभ्य विरजं स्वानां नो मृडयन्वृषः ॥१५॥ यत्र नैःश्रेयसं नाम वनं कामदुघै-
र्द्रुमैः ॥ सर्वर्त्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्त्तिमत् ॥१६॥ वैमानिकाः सललनाश्चरितानि यत्र गायंति लोकशमलक्षपणा-
नि भर्त्तुः ॥ अंतर्जलेऽनुविकसन्मधुमाधवीनां गंधेन खंडितधियोऽप्यनिलं क्षिपंतः ॥१७॥ पारावतान्यभृतसारसचक्रवाक-
दात्यूहहंसशुकतित्तिरिबर्हिणां यः ॥ कोलाहलो विरमतेऽचिरमात्रमुच्चैः भृंगाधिपे हरिकथामिव गायमाने ॥१८॥ मंदारकुं-
दकुरबोत्पलचंपकार्णपुंनागनागबकुलांबुजपारिजाताः ॥ गंधेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहु-

त्रं क्षणमात्रं विरमति अनेन तत्रत्यपक्षिणामपि हरिकथाश्रवणादि परमानंदो दर्शितः ॥१८॥ मंदारपारिजातौ सुरतरुविशे- मानयंति ॥१९॥
षौ ॥ कुरबस्तिलकवृक्षः ॥ उत्पलं रात्रिविकाशि अंबुजं दिनविकाशि नागो नागकेसरः एताः सुमनसः पुष्पजातयः तुलस्या गंधार्पिते तुलसिकाभर- राम
णेन श्रीहरिणा तुलस्या गंधेऽर्चिते सति यस्मिन्वने तस्यास्तपो बहु मानयंति अनेन तत्रत्यानां स्थावराणामपि हरिणा एव न मत्सरी इत्युक्तं एवंभूतं वनं यत्र ५४
नेवैकुंठं यदिति पूर्वेणान्वयः ॥१९॥ राम

सर्त्ति ४१

पुनर्वैकुंठमेव विशिनष्टि तत्संकुलं व्याप्तं भवति कैः हरिपदयोः प्रणतिः प्रणामः तावन्मात्रेण हृष्टैर्भक्तानां विमानैः नवपरिप्राप्यैर्वैडूर्यमारकतै
र्हैममयैश्च विमानैः बृहति कारितटानि यासां स्मितशोभीनि मुखानि यासां ताश्च पिकस्रैश्चात्मारे यां रजः कामं उत्स्मयाद्यैः परिहासादिभिः नश्च
रधुः न जनयामासुः १० श्रीर्लक्ष्मीः स्वरूपिणी मनोहरमूर्तिं धारिणी सती श्रीहरेः सद्मनि संमार्जनं कुर्वतीव यस्मिन्लोके लक्ष्यते चरणारविंद
क्वणयती नूपुरेण शब्दयंती विमुक्तो रोषसूयं चलपयया पद्मदंडेन तेन शेषाधमाप्रासितेन वाङ्नाकीरशोभन्नानि स्फटिकमयानि कुड्यानि यस्मिन्नमध्ये

तत्संकुलं हरिपदानतिमात्रदृष्टैः वैडूर्यमारकतहेममयैर्विमानैः येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रजआर
धुरुत्स्मयाद्यैः ॥ १० ॥ श्रीरूपिणी क्वणयती चरणारविंदं लीलांबुजेन हरिसद्मनि मुक्तदोषा संलक्ष्यते स्फटिककुड्य उपेतहेम्नि
संमार्जतीव यदनुग्रहणोन्ययत्नः ॥ ११ ॥ वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशं अभ्यर्चती स्व
लकमुन्नसमीक्ष्य वक्त्रमुच्छेषितं भगवतेत्यमतांगयच्छ्रीः ॥ १२ ॥

वशोभार्थं उपेतं संयुक्तं हेम यस्मिन् यस्याः अनुग्रहणे श्रीरनुग्रहं करोतु मदर्थं अन्येषां ब्रह्मादीनां यत्नः सा श्रूपभावः यद्यपि तत्र रजो नास्त्येव तथापि हरिणा पद्दि
कावच्छिन्नेभित्तिभागेषु वर्द्धयंती विंचिता सती लीलांबुजं भ्रामयंती विनयभक्तिभ्यां तथा लक्ष्यते इति ११ अंग हे देवाः यद्यस्मिन्लोके श्रीरेवं अप
तत्र अमतत्समेने किंभूतेन विद्रुममयानि तटानि यासां ताः अमलामृततुल्यान्यापो यासां तासु वापीषु निजवने लक्ष्मीवने परिचारिकाभिरन्विता तुलसीभिः
श्रीविष्णुं पूजयंती नरोत्तरके प्रतिबिंबितं शोभनालकं युक्तं उन्नतनासिकायुक्तं च स्ववक्त्रं वीक्ष्य भगवता उच्छेषितं चुंबितमित्यमन्यत अनेन लक्ष्म्या अपि
सौभाग्यमहत्वं भगवदनुग्रहे तौवेति द्योतितं ॥ १२ ॥

पुनः कथंभूतं तत ॥ यदकुंठं न व्रजंति ये ये कुकथाः शृण्वंति ॥ कास्ताः अघभिनत्तीत्यघभित्तस्य हरेः रचनाः सृष्ट्यादिलीलास्तासामनुवादादन्य
विषयाः अर्थकामादिवार्ताः मतिभ्रंशिकाः तेषामव्रजने हेतुः याः तु हतभाग्यैर्नृभिः श्रुताः सत्यः तांस्तान् आत्तहृतसारान् अशरणेषु निराश्रयेषु तमःसु
नरकेषु क्षिपंति ॥ हंत खेदे ॥ कथंभूताः आत्तः सारः श्रोतॄणां पुरुषार्थो याभिस्ताः ॥ २३ ॥ प्रसंगात्तान् शोचति ॥ नोऽस्माभिर्दुस्पाशिभिरप्यभ्यर्थितां नृगतिं म
नुष्यजातिं प्रपन्नाः प्राप्ताः संतोपि हरेराधनं न कुर्वंति कीदृशं रौति यत्र यस्यां धर्मसहितं तत्त्वविज्ञानं भवति तदुभयसाधकत्वात्तस्याः ॥ ते अमुष्य भ

यन्न व्रजंत्यघभिदो रचनानुवादाच्छृण्वंति येऽन्यविषयाः कुकथा मतिघ्नीः ॥ यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान् क्षिपंत्य
शरणेषु तमस्सु हंत ॥ २३ ॥ येऽभ्यर्थितामपि च नो नृगतिं प्रपन्नाः ज्ञानं च तत्त्वविषयं सहधर्म यत्र ॥ नाराधनं भगवतो वितरंत्यमु
ष्य संमोहिता विततया बत मायया ते ॥ २४ ॥ यच्च व्रजंत्यनिमिषामृषभानुवृत्त्या दूरेयमा ह्युपरि नः स्पृहणीयशीलाः ॥ भर्तु
र्मिथः सुयशसः कथनानुरागवैक्लव्यबाष्पकलया पुलकीकृतांगाः ॥ २५ ॥

गवतो विततया मायया ननु संमोहिता बतेति खेदे ॥ यदि चैवं संबंधः न केवलं त एवं व्रजंति किंतु ये भगवदाराधनं न कुर्वंति तेपि तेषां मायामोहित
त्वादिति २४ पुनः कथंभूतं यच्च नः उपरि स्थितं व्रजंति के अनिमिषां देवानां ऋषभः श्रेष्ठो हरिस्तस्यानुवृत्त्या दूरे यमो येषां ॥ यद्वा दूरीकृतयमनि
यमाः पाठांतरे दूरीकृता अहंकारादयस्तैः स्पृहणीयं कल्याणादिशीलं येषां ॥ किंच भर्तुर्हरेः सुयशसः तस्य मिथः कथने योऽनुरागस्तेन वैक्लव्यं तेन
वैवश्यं तेन बाष्पकलया तया पुलकीकृतमंगं येषां ॥ यद्वा नः उपरीति व्रजंतो विहायसां निरहंकारत्वादस्मत्तोपि योऽधिकास्तेपि यद्व्रजंतीत्यर्थः ५५

ततो दारुअपूर्वं विकुंठं अथो अनंतरं उपेत्य मुनयः परां मुदं आपुः अपूर्वत्वे हेतवः विश्वगुरुणा हरिणा अधिकृतं अधिष्ठितं भुवनानां एकं मे
व वंद्यं दिव्यं अलौकिकं ॥ विचित्राणि विबुधाग्र्याणां विमानानि तेषां शोचिर्दीप्तिर्यस्मिन् योगमायाबलेनेति अणिमादियोगप्रभावेनोपेत्य परमेश्वरेण
योगमायेति चिच्छक्तिविलासः इति द्रष्टव्यं ॥ २६ ॥ तस्मिन्निति विकुंठे षट् कक्षाः प्राकारद्वाराणि असज्जमानाः भगवद्दर्शनोत्कंठया तत्रत्यदर्शनआसक्तिं वि
कुर्वाणाः द्वारपालौ देवौ अपश्यन् ॥ समानं वयो ययोः गृहीते गदे याभ्यां ॥ परार्ध्यैः केयूरादिभिः विटंकः सुंदरो वेषो ययोः

तद्विश्वगुर्वधिकृतं भुवनैकवंद्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ॥ आपुः परां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयः तद
थो विकुंठं ॥ २६ ॥ तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायां ॥ देवावचक्षत गृहीतगदौ परार्ध्यके
यूरकुंडलकिरीटविटंकवेषौ ॥ २७ ॥ मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयासितचतुष्टयबाहुमध्ये ॥ वक्त्रं भ्रुवा कुटिलया स्फुटनि
र्गमाभ्यां रक्तेक्षणेन च मनाग्रभसं दधानौ ॥ २८ ॥ द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिका याः ॥ सर्वत्र तेऽविष
मया मुनयः स्वदृष्ट्या विचरंत्यविहता विगताभिशंकाः ॥ २९ ॥

सीतानाथसहाइ

२७ ॥ तावेव वर्णयति मत्तद्विरेफायमानया वनमालया निवीतौ कंठलंबिन्या अलंकृतौ असिताः नीलाः चतुष्टये चतुःसंख्याकाः बाहवस्तेषां मध्ये विन्यस्त
या च मनाग्रभसं किंचित् क्रुद्धं दधानौ ॥ स्फुटौ उत्कटौ निर्गमौ श्वासमार्गौ नासापुटे ताभ्यां ॥ २८ ॥ एतयोर्मिषतोः पश्यतोः तावनादृत्य अपृष्ट्वैव यथा पूर्वाः ष
ड्द्वारः पुरटालंकृतवज्रमय्यः कपाटिका यासु ताः यथा विविशुः तथा सप्तमायामपि द्वारि ते विविशुः अप्रश्ने हेतुः सर्वत्र येऽविहताः अनिवारिताः संचर
न्ति ॥ निःशंकत्वे हेतुः अविषमया समया स्वदृष्ट्येति ॥ २९ ॥

भा॰ त॰
५६

वातरसनान् नग्नान् ॥ वृद्धानपि पंचवर्षबालकवत् प्रतीयमानान् चकारादानतयाव ॥ अस्खलयतां निवारितवंतौ न तत्स्खलनमर्हतीति तथा तान् ॥ अहो अत्रापि धार्ष्ट्यमित्येवं तेषां तेजो विहस्य भगवतो ब्रह्मणप देवस्य प्रतिकूलं शीलं ययोः ॥ ३० ॥ हरेर्द्वारपालपतिभ्यां देवेषु पश्यत्सु वार्यमाणास्तेषु नयः ॥ को वामित्यादि श्लोकत्रयी मूलं ॥ सुहृत्तमः श्रीहरिः तस्य दिदृक्षितं दर्शनेच्छा तस्य भंगो हतिः कामस्यानुजः क्रोधः तेन सहसाः कस्मादेव उपप्लुता

तान् वीक्ष्य वातरशनांश्चतुरः कुमारान् वृद्धान् दशार्धवयसो विदितात्मतत्त्वात ॥ वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ॥ ३० ॥ ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्यां ॥ ऊचुः सुहृत्तमदिदृक्षितभंग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः ॥ ३१ ॥ मुनय ऊचुः को वामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमः स्वभावः ॥ तस्मिन् प्रशांतपुरुषे गतविग्रहे वा को वात्मवत्कुहकयोः परिशंकनीयः ॥ ३२ ॥

निकृमिताम्यक्षीणि येषां ते हृष्टपूज्यतमा अपीति निषेधानर्हत्वे क्रोधानर्हत्वे वा हेतुः ॥ ३१ ॥ उच्चैर्महत्या भगवत्परिचर्यया एत्य प्राप्य इह वैकुंठे निवसतां तद्धर्मिणां भगवद्धर्मिणां समदर्शिनां मध्ये वां युवयोरेव कोयं विषमः स्वभावः कैश्चित्स्वपक्ष्यं कैश्चिच्छत्रुरित्येवंभूतः स्वामिनो रक्षार्थं द्वारपालयोरेष स्वभावो गुण एवेति चेत्तत्राहुः ॥ तस्मिन्निति ॥ कुहकयोः कपटयोः आत्मवत्त्वदृष्टांतेन यथा आवां कपटौ तथान्योपि कश्चित्कपटः प्रवेक्ष्यतीति ॥ अयं भावः न त्वत्र भगवद्भक्तं विना कश्चिदागच्छति ॥ न चेश्वरे प्रशांतत्वादविद्यमानविरोधे भयशंका अतो युवां केवलं धूर्तावेवेति ॥ ३२ ॥

राम
५६

भयशोकाबीजं च भेदः सच कस्याप्यस्मिन्नास्तीत्याह । नहीति ॥ समस्तविश्वकुक्षौ यस्य ॥ यत्र यस्मिन्निह भगवति धीरा विद्वांसः आत्मनोंतरं भेदं न पश्य
ति किंत्वस्मिन्परमात्मनि आत्मानं मेंतर्भूतं पश्यंति महाकाशे घटाकाशमिव तत्र यथान्यस्य राजादेः उदरभेदि उदरभेदयुक्तं ॥ भयं भवति त
थास्य श्रीहरेः तादृग्भयं यतः येन कारणेन हे स्ववेषधारिणोर्युवयोर्विशेषणेनोत्पादितं ॥ तत्किं विचित्रं किंचिदित्यर्थः ॥ २२ ॥ तत्तस्मादमुष्य वैकुंठ
नाथस्य भक्त्या यत्प्रकृष्टं भद्रमेव कर्तुं इहास्मिन्नपराधे यत्नयुक्तं तद्वां महि हि चिंतयेम ॥ तदेवाह अंतरस्य भावः संज्ञातदर्शनेन रतः वैकुंठलोका

नन्वंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः ॥ पश्यंति यत्र युवयोः सुरलिंगिनोः किंव्युत्पादितं
ह्युदरभेदि भयं यतोस्य ॥ २३ ॥ तद्वाममुष्य परमस्य विकुंठभर्तुः कर्तुं प्रकृष्टमिह धीमहि मंदधीभ्यां ॥ लोकानितो व्रजत
मंतरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोस्य यत्र ॥ २४ ॥ तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्र
पूगैः ॥ सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण ॥ २५ ॥ श्रीरामरामहरे

न्व्रजत यत्र येषु लोकेषु अस्य पापीयसोंतरद्विषः इमे कामः क्रोधस्तथा लोभः इति गीतोक्तास्त्रयो रिपवो भवंति इतो वैकुंठात पापीयसो लोकानिति
वा ॥ २४ ॥ इति तेषामीरितं भाषणं घोरमवधार्य तं च ब्रह्मदंडं ब्रह्मशापमवधार्य तं चास्त्रसमूहैरप्यनिवार्यमवधार्य हरेरनुचरौ अतिकातरेण
अतिकातर्येण भयेन तत्पादग्रहणं कार्यं ताविति मत्वा तौ दंडवत्पतितौ ॥ कथंभूतस्य हरेः एवंभूतेभ्योपि निभ्यः तावस्मानपि उरु अधिकं बिभ्यतः भयं प्राप
यतः ॥ २५

अहो अपराद्धमस्माभिरित्यनुतप्यमानान् प्रत्यूचतुः । अद्यो निग्रद्यवति । यउविनोरङुः स एव भगवद्भिरकारि नात्र भवतामपराधः कश्चित् अतो
ह्रीनैरत्राभवद्भिः भूयात् ॥ यः अशेषमपि हरहेलनं ईश्वराज्ञातिक्रमरूपं पापं हरेत् ॥ किं तु युष्माकं यः कृपानिमित्तो नुतापः तस्य लेशेनैनो अधोधो
मूर्तयोनीनां व्रजतोरपि भगवत्स्मृतिप्रतिघातको मोहो न भवेत् ॥ किं तु मोहेऽपि स्मृतिमेव प्रवहतादिति प्रार्थना ॥ २६ ॥ एवं त्वानां महत्त्वे अतिक्रम
पराधं तत्क्षणमेव विबुध्य तस्मिन्नुत्पद्यते तत्र हृद्वालेरं ययोः ॥ आर्याणां हृद्यः मनोज्ञः चरणौ चलयत्विति ॥ अयं भावः मच्चरणादर्शनप्रतिघातं जं को

भूयाद्यः यो नि भगवद्भिरकारि दण्डो यो नौ हरेत सुरहेलनमप्यशेषं यो नु तापकलया भगवत्स्मृतिघ्नो मोहो भवेदि
ह तयोर्नौ व्रजतोरधोधः ॥ २६ ॥ एवं तदैव भगवानरविन्दनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः ॥ तस्मिन्ययो
परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः ॥ २७ ॥ तं त्वागतं प्रतिहृतौपयिकं स्वपिभिस्तेव
हृत्वाक्षिविषयं स्वसमाधिभाग्यं ॥ हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकराम्बु ॥ २८ ॥

धेतोर्दर्शयन् शमयिष्यामीति व्याजेन पद्भ्यामेव ययौ ॥ श्रीसाहित्यं च निकानामपि विभूतिभिः पूरयित्वा क्रमापयितं ॥ २७ ॥ तत्रैते ईदृशं देवमहतवरा
यतिपरिभिः तेनागतं ते अवहृत अपश्यन् ॥ आपं च माद्दिरदेवक्रियापरं ॥ स्वपिभिः शीघ्रं प्रतिहृतं आनीतं ओपयिकं गमनोचितं छत्रपादुका
दि यस्य ॥ कथंभूतं स्वसमाधिनाप्यसंभजनीयफलं यद्दर्शनं तदेवाक्षिविषयं हंसवत्श्रीर्ययोस्तयोः चामरयोश्चलतोर्व्यजनयोर्यः शिवोऽनुकूलो वायुः
तेन लोलं तच्चलितः शुभ्रातपत्रशशिकेसराः शुभ्रं यदातपत्रं तदेव शशी तस्य केसराः मुक्ताहारविलंबाः ते स्रोगलन्ति शीकराम्बूनि
यस्मिन्स्तं ॥ शीकरोदकणाः ॥ २८ ॥

कृत्वस्य हारपालस्य निर्वृतस्य प्रसादे सुमुखं । स्पृहणीयानां गुणानां धाम स्थानं । स्नेहावलोककलया सप्रेमकटाक्षेण हृदि संस्पृशंतं स्वभ-
यति । त्रैलोक्यविवक्षापक्षे मर्त्यलोकपर्यंतः स्वर्गः तस्य चूडामणिवत् स्थितं स्वधिष्ण्यमेव वैकुंठं सुभगयंतं शोभयंतं ॥ ३९ ॥ एवं पुनर्नितंबः आश्रयत्वे-
न विद्यते यस्य तस्मिन् रूपी तां प्रत्येकं अलिभिर्नादितया वनमालया च युक्तं । सुभगयंतमिति पूर्वेणान्वयः । एवं बंधः वल्गु रक्तप्रकोष्ठवलयानि य-
स्य । विन्यस्त एको हस्तो येन । इतरेणान्येन अंबुजं धुनानं भ्रामयंतं विन्यस्येति पाठे च वलितोत्यादि स्तस्य विशेषणं ॥ ४० ॥ स्वकांत्या विद्युतः क्षिपती

कृत्वा प्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशंतं । श्यामे पृथावुरसि शोभितया श्रिया स्वश्चूडामणिं सुभगयंत-
मिवात्मधिष्ण्यं ॥ ३९ ॥ पीतांशुके पृथुनितंबिनि विस्फुरंत्या कांच्यालिभिर्विरुतया वनमालया च । वल्गुप्रकोष्ठवलये विनतासुतांसे वि-
न्यस्तहस्तमितरेण धुनानमब्जं ॥ ४० ॥ विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं मणिमत्किरीटं । दोर्दंडषंडविवरे हर-
ता परार्ध्यहारेण कंधरगतेन च कौस्तुभेन ॥ ४१ ॥ अत्रोपसृष्टमिति चोत्स्मितमिंदिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यं । मह्यं भव-

ये मकराकारे कुंडले ययोर्मंडनस्यार्हे गंडस्थले यस्मिन्नुन्नतमुन्नसं च । स्य भवतां च भजंतमंगं नेत्रैर्निरीक्ष्य न वितृप्तदृशो मुदा कैः ॥ ४२ ॥ एभ
मुखं यस्य मणियुक्तं किरीटं यस्य । दोर्दंडानां षंडं समूहः तस्य विवरे मध्ये स्थितेन हरता मनोहरेण विहरतेति वा परार्ध्यः उत्कृष्टः तेन हारेण कंधरायां स्थिते-
न ॥ ४१ ॥ किंच भूतं इंदिरायाः उत्स्मितं अहमेव सर्वसौंदर्यनिधिरित्यहंकारं भगवत्सौंदर्ये उपसृष्टं अस्तं गतमिति स्वानां भक्तानां धिया रचितं भक्तैः स्वम-
नस्येवं चिंतितमित्यर्थः । भूतः बहुसौष्ठवेन सौंदर्येणाढ्यं युक्तं किंच । मह्यं मम भवस्येश्वरस्य भवतां च बहुतेऽङ्गं भजंतं मूर्तिं प्रकटयंतं अत्र च कृतनिरीक्ष-
च कैः शिरोभिर्मुदा नेतुः नमश्चक्रुः न विशेषेण दृप्ता दृशो नेत्राणि येषां ते ॥ ४२ ॥

स्वरूपानंदादपि तेषां भजनानंदाधिक्यमाह । तस्य पादारविंदकिंजल्कैः केसरैर्मिश्रा या तुलसी तस्या मकरंदेन युक्तो वायुः स्वविवरेण नासा-
छिद्रेणाक्षरजुषां ब्रह्मानंदसेविनामपि संक्षोभं चित्ते तनौ रोमांचं ॥ ४२ ॥ हर्षकारितं संभ्रममाह द्वाभ्यां ते वै किल अमुष्य वदनमेवासित-
पद्मस्य कोशोऽन्तर्भागस्तं असितपद्मकोशमित्यभूतोपमा । सुंदरतरे अधरे अरुणे अधरोष्ठे कुंदवद्धासो यस्मिंस्तं उत ऊर्ध्वं वीक्ष्य लब्धमनोरथाः

तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः । अंतर्गतः स्वविवरेण चकार तेषां संक्षोभ-
मक्षरजुषामपि चित्ततन्वोः ॥ ४३ ॥ ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुंदरतराधरकुंदहासं । लब्धाशिषः पुन-
रवेक्ष्य तदीयमंघ्रिद्वंद्वं नखारुणमणिश्रयणं निदध्युः ॥ ४४ ॥ पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं नय-
नाभिरामं । पौंस्नं वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ॥ ४५ ॥ श्रीराम राम

ततः नखा एवारुणा मणयस्तेषां श्रयणं आश्रयमंघ्रिद्वंद्वं पुनरवेक्ष्य अधोदृष्ट्या वीक्ष्य पुनः पुनरेवं निरीक्ष्य गुणपत्वर्गं गलाविव ग्रहणाशंकितः पश्चा-
त्रिदध्युः ध्यातवंतः ॥ ४४ ॥ योगमार्गैर्गतिं मृगयतां पुंसां ध्यानस्य विषयभूतं बहुमतं अत्यादरणास्पदं बहूनां तत्त्वदर्शीनां संमतमिति वा पौंस्नं पौरुषं वपुर्द-
र्शयंतं अन्येष्वसिद्धैरसाधारणैः औत्पत्तिकैर्नित्यैरणिमाद्यष्टैश्वर्यैर्युतं समगृणन् सम्यगस्तावन् ॥ ४५ ॥ श्रीराधाकृष्ण सहाय

नित्यब्रह्मरूपेण प्रकाशमानेन तद्विचित्रं ॥ इदानीं तु परममंगलविशुद्धसत्त्वश्रीमूर्त्या प्रत्यक्षोसि अहो भाग्यमस्माकमित्याहुः ॥ हे अनंत य
स्त्वं हृदि स्थितोपि दुरात्मनामंतर्हितो न स्फुरसि ॥ स नोस्माकमंतर्हितो न भवसि ॥ नयनमूलं त्वद्यैव राद्धः प्राप्नोसि ॥ अंतर्धानाभावे हेतुः
भवतः सकाशादुद्भवो यस्य तेनास्मत्पित्रा पार्हिय दैवव्रतवर्णितरहाः उपदिष्टरहस्यैः तैरेव नः कर्णमार्गेण गुहां बुद्धिं गतः प्राप्तो
सीति ॥ ४६ ॥ ननु पित्रोपदिष्टं भवतामन्यादृशमदृश्यमात्मतत्त्वमहं त्वन्य एवं स्यादृश्यत्वात ॥ नैवं अस्मत्प्रत्याभिन्नतया भेदनिरासादित्या
हुः ॥ तमिति ॥ हे भगवन् आत्मानं तत्त्वमेव परं तत्त्वाविदामाविद्यः प्रत्यभिजानीमः ॥ ननु निरुपाधेरात्मतत्त्वस्य कथमीदृशमैश्वर्यं स्यात्

श्रीकुमारा ऊचुः ॥ योंतर्हितो हृदिगतोपि दुरात्मनां त्वं सोद्यैव नो नयनमूलमनंत राद्धः ॥ यर्ह्येव कर्णविवरेण गुहां गतो नः
पित्रानुवर्णितरहो भवदुद्भवेन ॥ ४६ ॥ तं त्वा विदाम भगवन्परमात्मतत्त्वं सत्त्वेन संप्रति रतिं रचयंतमेषां ॥ यत्तेनुतापविदि
तैर्दृढभक्तियोगैरुद्ग्रंथयो हृदि विदुर्मुनयो विरागाः ॥ ४७ ॥ नात्यंतिकं विगणयंत्यपि ते प्रसादं किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते

मूर्तेराहुः सत्त्वेन विशुद्धसत्त्वमूर्त्या एषां भक्तानां सम्यक्प्रतिरूपेण ॥ योंग त्वदंघ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः
संप्रति रतिः प्रीतिः तां रचयंतं ॥ आत्मतत्त्वमेवाहुः ॥ ते अनुतापः कृपा तेन विदितैर्ज्ञातैः दृढैर्भक्तियोगैः ग्रंथा रागादिभिर्ग्रंथयो हृदि यद्विदुः कीदृशाः उ
द्ग्रंथयो निरहंमाना अत एव विगतरागाः ॥ ४७ ॥ त्वयमपि भक्तिं प्रार्थयितं भक्तानां स्वाभावोतिशयमाहुः ॥ आत्यंतिकं मोक्षाख्यमपि ते तव प्रसादं ते न गण
यंति नाद्रियंते किमुतान्यत् इंद्रादिपदं ते भ्रुव उन्नयैर्भ्रूभंगैः अर्पितं निहितं भयं यस्मिन् तत् ॥ के ॥ अंग हे भगवन् ये भवतः कथायाः रसज्ञाः कथं भू

भा०त ५७

इदानीं स्वापराधप्रघोतयंतो भक्तिं प्रार्थयंते ॥ काममिति ॥ हे भगवन्नितः पूर्वमस्माकं वृजिनं नाभवत् इदानीं सर्वाण्यपि जातानि यतस्त्वद्भक्तेषु श
मोऽनुचितैः स्ववृजिनैः निरयेषु कामं नोस्माकं भवो जन्मास्तु तत् स्यात् ॥ तु वितर्के यदि नश्चेतस्ते पदयो रमेत अलिर्यथा करके एव विष्णुमा
नोपि तद्वृष्ट्यभ्रमते ॥ तद्वत् ह्रिघ्रानविगाण्यपदयोरमेत तुलसीवयांशोभायामायथा चक्र तुलसी त्वद्गुणानेरपेक्षेणात्वद्व्रीघ्रिसंबंधेनेव शोभते तथा
यदि नो वाचः ॥ शोभेरन् यदि च ते गुणगणैः पूर्यंते ॥ कर्णरंध्रं इत्यल्पस्य पूरणमिव याचकमीत्याप्रार्थयंते अयं तु गूढोभिप्रायः ॥ कर्णरंध्र

कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोलिवद्यदि नु ते पदयो रमेत ॥ वाचश्च नस्तुलसिवद्यदि तेंघ्रिशोभाः पूर्येत ते
गुणगणैर्यदि कर्णरंध्रः ॥ ४९ ॥ प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः ॥ तस्मा इदं भगवते
नम इद्विधेम योऽनात्मनां दुरुदयो भगवान्प्रतीतः ॥ ५० ॥ इति श्री भागवते महापुराणे तृतीयस्कंधे पंचदशोध्यायः ॥ श्री
ब्रह्मोवाच ॥ इति तद्गृणतां तेषां मुनीनां योगधर्मिणां ॥ प्रतिनंद्य जगादेदं विकुंठनिलयो विभुः ॥ १ ॥

स्याकाशत्वात् गुणगणानां वाम्र्तत्वात्र कराविस्तरणमतो नित्यमेव श्रवणफलिष्यतीति ॥ ४९ ॥ अधुना वयं कृतार्थाः स्म इत्याहुः हे पुरुहूत विपुल
कीर्ते यदिदं प्रादुश्चकर्थ प्रकटितवानसि ॥ दृशो नेत्राणि अनात्मनामजितेंद्रियाणां दुरुदयः अप्रकटोपि इतः त्वं यः प्रतीतो विजितस्मै तुभ्य
मिदं नमो विधेम ॥ ५० ॥ तृतीये पंचदशः ॥ हरिणा मानितेर्विप्रैरनुज्ञा नैहत्काषोडशे ॥ तयोरहरभावेपि कृतो नुग्रह ईर्यते ॥ १ ॥ इति गृणतां तेषां तं एम
द्वाक्यं प्रतिनंद्येदं जगाद ॥ एतावित्येकादशभिः ॥ १ ॥ ५७

यद्यस्मात्तयोः करस्थीकृत्य तस्थीकृत्य वद्ध यथा भवति तथा अतिक्रमं वः कृतवंतो ॥ १ ॥ तस्मात्स एव दंडो गीकृतः ॥ २ ॥ हि यस्मात् ब्रह्म ब्राह्मण एव मे परमं दैवतं तत्तस्मादहं वः प्रसादयामि ॥ ततः कोपराध इति चेत्तत्राह ॥ तद्धीति मदीयैः उमिरसत्कृता इति यत्तत्तदात्मकृतमेव मेव ॥ ३ ॥ किं च मम मे वैतान्या अनिष्टकृतमित्याह ॥ यस्य ह्वामिनो नामानि तत्स्यकीर्त्ति आमयो त्वश्वेतकुष्ठं ॥ ४ ॥ यस्य मे अमृतरूपे अमल लेयशासि श्रवणेनावगाहः प्रवेशः श्वपचमपि व्याप्य जगत्सद्यस्तत्क्षणमेव पुनाति ॥ सोहं विकुंठः भवद्भ्यो हेतुभूतेभ्यः उपल

श्रीभगवानुवाच ॥ एतौ तौ पार्षदौ मह्यं जयो विजय एव च ॥ कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमं ॥ १ ॥ यस्त्वेतयोर्धृतो दंडो भव द्भिर्मामनुव्रतैः ॥ स एवानुमतोस्माभिर्मुनयो देवहेलनात् ॥ २ ॥ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे ॥ तद्धीत्यात्मकृतं म न्ये यत्स्वपुंभिरसत्कृताः ॥ ३ ॥ यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि ॥ सोसाधुवादस्तत्कीर्त्तिं हंति त्वचमिवामयः ॥ ४ ॥ यस्यामृतामलयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुंठः ॥ सोहं भवद्भ्य उपलब्धसुतीर्थकीर्त्तिश्छिंद्यां स्वबाहु मपि वः प्रतिकूलवृत्तिं ॥ ५ ॥ यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलं ॥ न श्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थ इतरे नियमान्वहंति ॥ ६ ॥

धारा ग्राम्हे शोभना तीर्थभूता कीर्त्तिर्येन सः त्ववाहुस्थानीयं लोके रवरमपि हन्यां कान्यस्य कथे त्यर्थः ॥ स्वगणान्तर्वर्त्तिनं ब्राह्मणोत्कर्षार्थमेव ॥ ५ ॥ चरणपद्मयोः स्थितः पवित्रो रेणुर्यस्य अत एव क्षतानि निरस्तानि अखिलस्य लोकस्य मलानि येन यद्वा चरणपद्मात्स्वग्रः पवित्रो रेणुर्यस्मिन्निति क्षताः खिलो मलो यस्येति च विग्रहः प्रतिलब्धं प्राप्तं शीलं येन यस्यां सेवया एते गुणा मम अत एव श्रीर्मां न वि

भा.तृ
९६.

किंच ब्राह्मणो मे मैव श्रेष्ठं मुखं यतो मुखमेव तत्परमन्मुखेति रत्नकारएव वदतित्याह ॥ नाहमिति ॥ वितानेयत्ते यजमानस्य हविश्च्युतघृतपुरोडाशा
दिकं हुतभुगग्निस्तेन मुखेन अश्नन् अश्नन्नपि तथा नाश्नामि यथाश्नामि ॥ यद्यथा श्रोततानुग्रहसतो घृतेन प्लुतं विलोडितं पायसादि प्रतिग्रासं रसास्वा
दपूर्वकं चरतो भुंजानस्य तानि तो ब्राह्मणस्य मुखतो श्नामि ॥ मयि समर्पितैः कर्मफलैः तुष्टस्य निष्कामस्येत्यर्थः ॥ ७ ॥ किंच ॥ येषाममलम्
घ्रिरजः अहं किरीटैर्बिभर्मि तान् विप्रान् पञ्चबुद्धेतोः पि को न्योन्यो न विषहेत कथंभूतोहं अखंडा अनवच्छिन्ना विकुंठा अप्रतिहता च योगमा
या विनासंभूता विभूतिर्यस्य ॥ तथा यस्य मम अर्हणांभः पादोदकं चंद्रललामेनेश्वरेण सहितान् लोकान् सद्यः पुनाति एवं परमेश्वरः परम

नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन ॥ यद्ब्राह्मणस्य मुखतश्चरतोनुघासं तुष्टस्य मय्य
वहितैर्निजकर्मपाकैः ॥ ७ ॥ येषां बिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजः किरीटैः ॥ विप्रांस्तु को न विषहे
त यदर्हणांभः सद्यः पुनाति सहचंद्रललामलोकान् ॥ ८ ॥ ये मे तनूर्द्विजवरान्दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्या

पावनोपि सन्नहं बिभर्मीति ॥ ८ ॥ किंच मे तनूः अधिष्ठानानि कास्ताः द्रक्ष्यंत्यघक्षतदृशो ह्यहिमन्यवस्तान्गृध्रा रुषा मम कुशंत्यधिदंडनेतुः
द्विजवरान् दुहतीर्गोधेनूः गाः इत्यर्थः ॥ दुहितॄरिति पाठे विप्रा एव विद्यारूपात्तत्प्रादुत्पन्नत्वात्तत्पुत्र्यः ताश्च गाव इति वचनात् ॥ अलब्धशरणा
नि दीनाकहीनानि भेदबुद्ध्या मदधिष्ठानं न भवतीति दृष्ट्या ये द्रक्ष्यंति अघेन हता नष्टा दृष्टिर्येषां तान् मदीयो धिकृतो दंडनेता यो यमः
तस्य गृध्राः काका ये दूताः ॥ अहिवत् मन्युर्येषां ते रुषा क्रोधेन कुशंति चंचुभिश्छिंदंति ॥ ९ ॥

राम
९६.
राम

एवंभूतान्कामांवशीकुर्वतीत्याह ॥ येऽक्षिपतः पक्षपातमाणानपिब्राह्मणानुद्बोधयति ॥ मपियाधीत्मयावाहेदेवदृष्ट्यासूर्यमर्थयतः एतः त्वष्यद्द
रः श्रीयमाणाचिन्नाः स्मितमेवहृधातयाउक्षितंपमतत्स्पवक्त्रयेषांअनुरागकलयाप्रेमशोभयावावागृणातः त्मावंतः यथाक्कपितमा
त्मजंस्निग्धः पितामहस्तत्राकापितरं ॥ अहमिवमृगेंद्रमुखान्नातैरहमुपाहृतोवशीकृतः ॥१॥ तन्नस्मान्मेवदायमपिप्रायमूलस्माणोऽत्र
जानंतोयुष्मद्यराधोचितांगतिंसद्यःप्राप्यमत्समीपइतंप्राप्तवंतांतदितिसः मेनुग्रहः तमेवाह यतमृतयोः विवाहः अचिरेतः गी

येब्राह्मणान्मयिधियाक्षिपतोर्थयंतः तद्यद्दरः स्मितमुधोक्षितपद्मवक्त्राः वाणाप्रानुरागकलयाः त्मजवद्गृणांतः ए
वोधयंत्यहमिवाहमुपाहृतस्तैः ॥१॥ तस्मोत्वमर्त्येरवमायमलङ्घमाणोयुष्मद्यातिक्रमगतिंप्रतिपद्यसद्यः ॥ भूयोप
मांतिकमिदंतदनुग्रहोमेयत्कल्पतामविरतोमृतयोर्विवाहः ॥१॥ ब्रह्मोवाच ॥ अथतस्योगतीदेवीमृषिकल्पाप्र
रत्वती ॥ नाम्नायमस्यदृष्टांनांतेषामात्माप्यतप्यत ॥२॥ सतीव्याहारायभूरांवंतोलध्वीगवेंर्थंगाढ्करां ॥ विगात्यागाधर्मां भी
ष्टंकल्पतांसंपद्यतांसमाप्यतामिति ॥२॥ उशतीप्रियांदेवीद्योतमानांऋषिकल्पांऋषयोमंत्राात्तद्रूपां ॥ ऋ एंनविडत्नाप्तिकीर्षित १४
विकलयोगणामितिवाप्ररत्वतीवावंग्राप्तावाघतन्माध्र्यप्रमर्पणोप्राप्येणमन्दुनारष्टानामपिकोधविषव्याघ्नानांहि मनोरमान्नमवाभावात
त्रियमाधारणमपिनसहतेतेषांत्रग्रात्मामनः नातप्यतअनुलोमितिनामन्यात ॥२॥ सतीश्रेष्ठाव्याहारायप्रसार्यकरांरत्वेत्यर्थः लघीमितारूणहृ
मिरर्थैर्गंभीकरांउच्चवेगांअगाधामभिप्रायतः गंभीरामर्थतः विगात्यविचार्यापिकिमस्मानमिनंरतिनिरतिवा ॥ श्रेष्ठमन्कतंरंउवाएंकोनयतीतिन
विउः १४

ततश्चापि न रक्षतीति ज्ञात्वा ते प्रहृष्टाः सन्तः प्रोचुः क्षुभिता रोमांचिता त्वक् येषां क्षुपितेति पाठे संजातरोमहर्षयोग्या रोमांचितत्वमेव
न्नं ॥ आरब्धः आविष्कृतः पारमेष्ठ्यस्य परमैश्वर्यस्य महोदयः परमोत्कर्षो येन तं ॥ अधिराजत्वमाविष्कृत्य लोकशिक्षार्थं ब्राह्मणान्मानयतीति
ज्ञात्वेत्यर्थः ॥ १५ ॥ अध्यक्षः सर्वेश्वरः सन्नतद्दीत्वात्मकतं मन्यस इति उक्त्वा मया यापराधः कृत इति तथा तदनुग्रहो मे इत्यादिवचनेन ममानु
ग्रहश्चेति यत्प्रभाषसे तेन यच्चिकीर्षितं तत्र विद्मः ॥ १६ ॥ किलेति लोकशिक्षार्थहृवितं परमार्थमाहुः ॥ विप्राणामिति ॥ देवदेवानां

ते योगमायया रब्धपारमेष्ठ्यमहोदयं ॥ प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः क्षुपितत्वचः ॥ १५ ॥ ऋषय ऊचुः ॥
न वयं भगवन् विद्मः तव देव चिकीर्षितं ॥ कृतो मेनुग्रहश्चेति यदध्यक्षः प्रभाषसे ॥ १६ ॥ ब्रह्मण्यस्य परं दैवं
ब्राह्मणाः किल ते प्रभो ॥ विप्राणां देवदेवानां भगवानात्मदैवतं ॥ १७ ॥ त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्त
व ॥ धर्मस्य परमो गुह्यो निर्विकल्पो भवान्मतः ॥ १८ ॥ तरंति त्वंजसा मृत्युं निवृत्ता यदनुग्रहात् ॥ योगिनः स भवा

देवपूज्यानामपि भगवान् त्वं आत्मा दैवतं च ॥ १७ ॥ लोकशिक्षार्थताप्रपंचः ॥ त्वत्त इत्यष्टभिः धर्म न् किंस्विदनुगृह्येत यत्परैः ॥ १९ ॥
स्त्वत्त एव भवति रक्ष्यते च त्वद्देवतारैः परमः फलरूपः अत एव गुह्यः गोप्यः न च स्वर्गादिफलवद्विकारी किं तु निर्विकारो मतः अत
एवंभूतस्य तव वरं लोकशिक्षामात्रमिति भावः ॥ १८ ॥ विपरीतं चैतदित्याहुः तरंतीति ॥ यस्यानुग्रहादेव निवृत्ताः विरक्ताः योगिनस्त्वं सतो
मृत्युं तरंति स भगवान् परैरनुगृह्येतेति किंस्वित् न किंचिदित्यर्थः ॥ १९ ॥

यच्छ्रीर्नूपयत्नेवयाचरणपद्मपवित्ररेणुः सद्यः कृताखिलमलप्रतिलब्धशीलमित्यादि तदृत्पतमस्मभावितमित्याऊर्द्धाभ्याय यैवं विभूति
लक्ष्मीः अनुवेलमवसरे अवसरे उपयाति सेवते ॥ धृतः पादरेणुर्यस्याः ॥ अन्यैः स्वकृतिभिरर्पितं अंघ्रौ यत्तुलस्याः नवं दाम माला तद्धाम्नः स्थो
नं यस्य तस्य मधुव्रतपतेः भ्रमरश्रेष्ठस्येव लोकं स्थानं अंघ्रिकामयमानेव ॥ १० ॥ विविक्तवर्त्मैर्विकृष्टैः परिवरणैः अनुवर्त्तमाना सेवमाना
मपि यो नात्याद्रियत नातीवादृतवान् ॥ एवंभूतस्त्वं ॥ अयं भावः इत्थं नामातिलंपटतया लक्ष्मीस्त्वां सेवते ॥ कथं ॥ एवं हि सपत्ने ॥ अयं हि मा
रयाही मधुव्रतः चंचलस्वभावां श्रियं गतावलेपसमपरिवारीतिस्थलः सन्नरमते ॥ अतो लीलावापमधिकं स्यात ॥ ततोहं वस्थासि स्थितो

यैवं विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसाधृतपादरेणुः ॥ धन्यार्पितांघ्रितुलसीनवदामधा
म्नो लोकं मधुव्रतपतेरिव कामयाना ॥ १० ॥ यस्माविविक्तरुचिरैर्वितरैरनुवर्त्तमानां नात्याद्रियत्परमभागवतप्र
संगः ॥ स त्वं द्विजानुपथपुण्यरजःपुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वं ॥ ११ ॥

पियोगी जनारिवक्रसेवकसंख्यषसंगी कृत्वापि तल्लक्ष्यासह सापत्न्येनापि वरणोसेविष्यामीति तदेवमत्यात्स्वकोनानुवर्त्तमानापितात्वं
नातीवादृतवान् ॥ यतः परमभागवतेषु प्रसंगः संगो यस्य सः एवं परमेशो भागवतविधिस्त्वं अतो ब्राह्मणाग्राणामादरात्तमां श्रीर्नेविजहातीति अलभ्य
लाभत्वेन निरंतरं सेवते ॥ किंचाहं तव एवं त्वं भगभाजनः भजनीयानां गुणानां भाजनः परमश्रेष्ठः ॥ तत्त्वाद्विजानां अनुपथं पथि
लग्नं यत्पुण्यरजः तयाश्रीवत्सलक्ष्मवक्षसि पुनीतः पवित्रीकृतः ततः किं किमर्थं वा ते उपेक्षणाः स्नाग्नः भूषणात्वेन स्वीकृतवानसि ॥ अतो यन्ते

धर्मपृष्टेस्तेश्रुतवेदस्तुवितमेवेत्याहुः धर्मस्यैतितित्रिभिः त्रिष्वेवयुगेष्वाविर्भवतीतित्रियुगः पद्मात्रीणियुगलानित्रियुगाः षड्गुणाः भगवद्भूर्वाच्याः
सत्यस्येतितित्रियुगः इतित्रियुगाधर्मरूपस्यतवत्रिभिः पद्भिः स्वैरसाधारणैः तपःशौचदयाभिः सत्यस्यधर्मविशेषेपिकलावनुवर्तमानत्वात् त्रि
भिरित्युक्तं॥ भूतंपालितं॥ किंकृत्वानोस्माकंवरदयाप्रसत्वेननतुवातत्वासत्वमूर्त्यातदभिवातितेषांप्राप्ताहानामभिज्ञातकरंजस्वातमश्वानिर
स्यानिराकृत्यद्विजानांदेवतानांचप्रयोजनायपूतनेमंत॥ पद्माहितलोपेरूपंनिरस्येतिअस्माकंतत्रिवर्तयेत्यर्थः॥ २२॥ आत्मगोपंत्वयेवरक्षणी

धर्मस्यतेभगवतस्त्रियुगत्रिभिःस्वैःपद्भिश्चराचरमिदंद्विजदेवतार्थं॥ नूनंभृतंतदभिघातिरजस्तमश्चसत्वेननोवरदयात
नुवानिरस्य॥ २१॥ नत्वंद्विजोत्तमकुलंयदिहात्मगोपंगोप्तावृषःस्वर्हणेनससूनृतेन॥ तर्ह्येवनंक्ष्यतिशिवस्तवदेवपंथा
लोकोग्रहीष्यदृषभस्यहितत्प्रमाणं॥ २२॥ तत्तेननीतमभिवसत्वनिधेर्विधित्सोःक्षेमंजनायनिजशक्तिभिरुद्धृतारेः॥ नैताव
ताञ्यधिपतेर्बतविश्वभर्तुस्तेजःक्षतंत्ववनतस्यसतेविनोद४॥ २४॥

यद्विजोत्तमानांकुलंयदिहस्फारत्वेनगोप्तानरक्षितात्ह्य
लयानतत्वात् नषष्ठीप्रयोगः॥ वृषः श्रेष्ठः हे देव पंथाः वेदमार्गो नंक्ष्यति नाशंयास्यति ऋषभस्य श्रेष्ठस्य हि यस्मात्तत्तत्॥ अनर्हणं असूनृतंवच
ग्रहीष्यत् तदुक्तंगीतासु॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनाः॥ सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते इति॥ २३॥ नस्यपवितिचेन्नेत्याहुः तद्देशाभे
नाशनंदैवेतिलोकोक्तिः सत्वनिधित्वाज्जनायक्षेमंप्रागंविधातुमिच्छोः अतएवनिजशक्तिभिः राजादिभिरुद्धृतारेः तद्धर्मप्रतिपक्षस्य अतस्तेवध्यस्य एष
कृतैवनतिग्मतेवनत्वमहतोन्येषुवनतिहितेजोहानिकरीतन्नेत्याहुः एतावतातेधर्मत्राणप्रयोजनेनअवनतस्यनमनंकृतवतः तवतेजःक्षिपा
वः॥ नक्षतंनक्षीणंयतः सः नमनादिस्तेविनोदः॥ २४॥

शापाग्रहं परित्यज्य विज्ञापयति । यद्वान्यदेव विधास्यति भवान्वृत्तिरत्र अधिकजीविकां वा तत्सर्वं मनुमन्यामहे । येन यन्निरपराधावेतौ किल्बि-
षेण शापेनायुंक्ष्महि योजितवंतः ॥ २५ ॥ मत्कारितत्वाच्छापस्य युष्माकं नापराध इत्याश्वासयन्नाह । एतौ सद्य एवासुरयोनिं प्राप्य भूयो मत्स-
मीपमागमिष्यतः । संरंभेण क्रोधावेशेन संभृतः संवृद्धः यः समाधिः एकाग्रता तेनानुबद्धो दृढीकृतो योगो ययोः । हे विप्राः यो वः शापः
युष्मत्कृतः शापः तदिति सः मयैव निमितः निर्मितः इत्यवेत जानीत ॥ २६ ॥ नेत्रोत्सवजनकं विकुंठं हरिं तन्निवासं च वैकुंठलोकं स्वयंप्रका-
प्रकाशं तदनपेक्षं सत्वपरिणामत्वात् ॥ २७ ॥ अनुमान्यानुज्ञाप्य ॥ २८ ॥ ममैव तन्मतं सम्मतं ॥ २९ ॥ इदमत्र तत्वं । यद्यपि सनकादीनां क्रोधो

यद्वा नयोर्दमम धीश भवान्विधत्ते वृत्तिं नु वा तदनुमन्महि हि निर्व्यलीकं । अस्मासु वा य उचितो ध्रियतां स दंडो येऽनागसौ
वयमयुंक्ष्महि किल्बिषेण ॥ २५ ॥ श्रीभगवानुवाच ॥ एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ । भू-
यः सकाशमुपयास्यत आशु यो वः शापो मयैव निमितः तदवेत विप्राः ॥ २६ ॥ ब्रह्मोवाच ॥ अथ ते मुनयो दृष्ट्वा नयनानंदभा-
जनं । वैकुंठं तदधिष्ठानं विकुंठं च स्वयंप्रभं ॥ २७ ॥ भगवंतं परिक्रम्य प्रणिपत्यानुमान्य च । प्रतिजग्मुः प्रमुदिताः शं-
संतो वैष्णवीं श्रियं ॥ २८ ॥ भगवाननुगावाह यातं मा भैष्टमस्तु शं । ब्रह्मतेजः समर्थोऽपि हंतुं नेच्छे मतं तु मे ॥ २९ ॥

न संभवति न च भगवत्पार्षदयोर्ब्राह्मणाप्रातिकूल्यं न च भगवतः स्वभक्तोपेक्षा न च वैकुंठगतानां पुनर्जन्म तथापि भगवतः सिसृक्षावत्कदा-
चित् युयुत्सा समजनि तदा तेषामनल्पबलत्वात् स्वपार्षदानामनल्पबलत्वेऽपि प्रातिपक्ष्यानुपपत्तेरेतावेव ब्राह्मणानिवारणेन प्रवर्त्य तेषु च क्रोधं
प्रदर्श्य तच्छापव्याजेन प्रतिपक्षौ विधाय युद्धकौतुकं संपादनीयमिति भगवतैवमभवदिति अतः सर्वं संगच्छते न हि इदं सनकादिशापो मयैव निमित इति निमापेष्यामि

भा॰त
६२

प्रत्येष्यतं प्रत्येष्यथः निकाशं समीपं ॥३०॥ इहत्यागते ब्रह्मशापात् ॥ हरिलोकतः पतंतावितिशेषः हरिलोकत एव हतश्रियावभूतामिति वा विगतस्मयौ नष्टगर्वौ च ॥३२॥ विकुंठस्य धिषणात् स्थानात् ॥ पुत्रकाः हे देवाः ॥३३॥ काश्यपं तेजो वीर्यं प्राप्तौ हे देवा गर्भं प्रविष्टौ यमौ ॥३४॥ तयोस्तेजसा वस्तेजश्चाक्षिप्तं तिरस्कृतं ॥ नचात्र प्रतिविधिः शक्यः ॥ यत एतर्हि इदानीं भगवानेव तत्स्वं विधातुमिच्छति ॥ ॥३५॥ तथा

मयि संरंभयोगेन निस्तीर्य ब्रह्महेलनं ॥ प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ॥३०॥ द्वाःस्थावादिश्य भगवान् विमानश्रेणिभूषणं ॥ सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ॥३१॥ तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः ॥ हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ॥३२॥ तदा विकुंठधिषणात्तयोर्निपतमानयोः ॥ हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ॥३३॥ तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः ॥ दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणं ॥३४॥ तयोरसुरयोरद्य तेजसा यमयोर्हि वः ॥ आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ॥३५॥ विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्यययोगमायः ॥ क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थः ॥३६॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे षोडशोऽध्यायः ॥

पि कोऽप्युपायो विचार्यतामिति चेन्नेत्याह ॥ विश्वस्येति ॥ त्रयाणां गुणानामधीशः स एव सत्त्वोत्कर्षकालेन नः क्षेमं विधास्यति
विमृशेन ॥३६॥ इति श्रीभागवते का तृतीयस्कंधे षोडशः ॥

एम
६२

ततः सपत्नस्तोजन्मतयोर्लोकभयंकरं ॥ हिरण्याक्षप्रभावश्च वर्ण्यते दिग्जयेछुतः ॥ १ ॥ इमं विधास्यतीति ब्रह्मवचनानंतरं शोकयात्पत्काः ॥ १ ॥ मह्दारेश्या
तलोकान्नृपपालान्त्रीन्नृचडि मुन्नराक्षं स्थिष्यतस्तिवाक्यात ॥ स्वापत्या भ्याघरिशंकनीरेवोपद्रवशंकमानां ॥ २ ॥ तत्र ततराविपेतः उद्धूतः ॥ ३ ॥
ऋवलैः सहितास्तवः प्रदेशाः केतवश्चउरयंवक्रारितिशेषः ॥ ४ ॥ फूत्कारानितिती व्रयाघश्शाङ्गकरणं ॥ नगपतीन्पमहावृक्षान्वात्याएवऋनीक

मे त्र यउवाच ॥ निशम्याथ सुवागीतं कारणं शंकयोदिताः ॥ ततः सर्वेन्यवर्तन्त त्रिदिवाय दिवौकसः ॥ १ ॥ दितिं च मह्दारे
शास्पत्यपरिशंकिनी ॥ पूर्णा वर्षशतेसाधी प्रत्रोसहसुवे यमौ ॥ उत्पाताश्च महत्वतत्र निपेतुर्जायमानयोः दिवि भुव्यंतरिक्षे वलो
कस्योरुभयावहाः ॥ २ ॥ सहावलाभ्रव श्चेलुर्दिशः सर्वाः प्रजज्वलुः ॥ सोल्काश्चाशनयः पेतुः केतवश्चान्तिहेतवः ॥ ४ ॥ ववौवा
युः सुदुःस्पर्शः फूत्कारानीरयन्मुहुः ॥ उन्मूलयन्नगपतीन्वात्यानीकोरजोध्वजः ॥ ५ ॥ उद्धसन्तद्विरंभोदघेरयानष्टभागणो ॥ व्यो
म्निप्रविष्टतमसा नस्मव्यादृश्यते पद ॥ ६ ॥ चुक्रोश विमना वार्धिरुद्धूर्मिः क्षुभितोदरः ॥ सोदपानाश्च सरितश्चुक्षुभुः शुष्कपंक
जाः ॥ ७ ॥ मुहुः परिधयोभूवन्सराहोः शशिसूर्ययोः ॥ निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे ॥ ८ ॥

यस्य रजः वधजोयस्य स उद्धैरहसन्नुयवतडितो येषुते षांसमुद्रानां व्रदयामसमूहेन न शेभागणः सूर्यादिग्रहसमूहोयस्मिन् ॥ पदस्थाननव्यादृश्यन्दृश
दृश्यनादृश्यत ॥ ६ ॥ वार्धिः समुद्रः विमनाइव उद्भूताऊर्मयोयस्मात ॥ क्षुभितउदरस्थामकारादयोयस्मिन् ॥ उदपानैर्वापिकूपादिभिः सहिताः स्रुष्का
णिपंकजानियासु ॥ ७ ॥ परिधयः परिवेषः सराहोराहुयुतयोः निर्घाताः निरभ्रगर्जिता निरथनिर्ह्रादरथस्यः ध्वनयः विवरेभ्यः गिरिगुहाभ्यः ॥ ८ ॥

सृगालानामुलूकानां टंकारैर्ध्वनिभिः सह ॥ ९ ॥ ग्रामसिंहाः श्वानः ॥ १० ॥ कर्कशैः खुरैर्घ्नंतः खार्कारो गर्दभजातिशब्दस्तस्मिन्रभसः ॥ वरूथशो
येषां वरूथपाः सेनपाः ॥ ११ ॥ रासभत्रस्ताः ॥ १२ ॥ सर्वतः क्रोशतः गावोऽत्रसन् असृग्दोहाः रुधिरस्रवाः देवलिंगानि प्रतिमा व्यरुदन् प्रतिमानां स्र
स्रवाद्बाष्प आसीदित्यर्थः ॥ १३ ॥ पुण्यतमान् गृहान् धारिणः भगणान् वह्निनिक्षत्राणि च अन्ये क्रूरग्रहा भौमादयः ॥ अतिचेरुः अतिक्रम्य जग्मुः

अंतर्ग्रामेषु मुखतो वमंत्यो वह्निमुल्बणं ॥ सृगालोलूकटंकारैः प्रणेदुरशिवं शिवाः ॥ ९ ॥ संगीतवद्रोदनवदुन्नमय्य शिरोधरां
व्यमुंचन्विविधा वाचो ग्रामसिंहास्ततस्ततः ॥ १० ॥ खराश्च कर्कशैः क्षत्तः खुरैर्घ्नंतो धरातलं ॥ खार्काररभसा मत्ताः पर्यधाव
न्वरूथशः ॥ ११ ॥ रुदंतो रासभत्रस्ता नीडादुदपतन्खगाः ॥ घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत ॥ १२ ॥ गावोऽत्रसन्नसृग्दोहा
तोयदाः पूयवर्षिणः ॥ व्यरुदन्देवलिंगानि द्रुमाः पेतुर्विनानिलं ॥ १३ ॥ ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपिताः ॥ अतिचेरुर्व
क्रगत्या युयुधुश्च परस्परं ॥ १४ ॥ दृष्ट्वान्यांश्च महोत्पातानतत्तत्त्वविदः प्रजाः ॥ ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवं ॥ १५ ॥ तावादिदै
त्यौ सहसा व्यज्यमानात्मपौरुषौ ॥ ववृधातेऽश्मसारेण कायेनाद्रिपती इव ॥ १६ ॥ दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदं
गदाभुजौ ॥ गां कंपयंतौ चरणैः पदे पदे कट्या सुकांच्यार्कमतीत्य तस्थतुः ॥ १७ ॥ श्रीगोपालजयति ॥ राम

वक्रगत्या प्रत्यावृत्त्या युयुधुश्च ॥ १४ ॥ ब्रह्मपुत्रानृते विना तेषां विश्वसंप्लवादिज्ञानात् ॥ १५ ॥ व्यज्यमानं आत्मपौरुषं पूर्वसिद्धं तपोरूपं ययोः ॥ १६ ॥ निरु
द्धा व्याप्ताः काष्ठा दिशो याभ्यां ॥ स्फुरंत्यंगदानि येषु ते भुजा ययोः ॥ अंगदेति सवर्णदीर्घ आर्षः शोभना कांची यस्यां तया कट्या ॥ १७ ॥ रामराम

यमयोर्मध्ये यः स्वदेहात्प्रथमं प्रजायत तं यथा हिरण्यकशिपुं विदुः मातेति प्रथमं यं प्रसूतं तं हिरण्याक्षं यथा विदुः तथा नाम प्रकृतत्वान्नित्यर्थः॥ अथ मा
वः॥ यदा हि गर्भाधानसमये योनिं प्रथमं विशति द्वितीयो विविक्तं आदिपश्चाद्भावेन प्रविशति तत्र प्रथमो भवतः तयोश्चापि ततः प्रवेशक्रमविपर्ययेण मान
तः प्रसूति॥ यदा विशतद्विधा मृतं योनिं प्रथमं परिस्फुरत॥ द्वौ तदा भवतो गर्भौ सूतिर्वैशाविपर्ययादिति पिंडासिद्धिस्मरणात॥ अतः स्वदेहात्पूर्वयोजात तस्य

प्रजापतिर्नाम तयोरकार्षीद्यः प्राक् स्वदेहाद्यमयोरजायत॥ तं वै हिरण्यकशिपुं विदुः प्रजायं तं हिरण्याक्षमसूत मायतः॥१८॥ चक्रे
हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च॥ वशे सपालाँल्लोकांस्त्रीन्नकुतोमृत्युरुद्धतः॥१९॥ हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहं॥ गदा
पाणिर्दिवं यातो युयुत्सुर्मृगयन्रणं॥१०॥ तं वीक्ष्य दुःसहजवं रणत्कांचननूपुरं॥ वैजयंत्या स्रजा जुष्टमंसन्यस्तमहागदं॥११॥ मनो
वीर्यवरोत्सिक्तमसृण्यमकुतोभयं॥ भीता निलिल्यिरे देवाः तार्क्ष्यत्रस्ता इवाहयः॥१२॥ स वै तिरोहितान्दृष्ट्वा महसा स्वेन दैत्यराट्
सेन्द्रान्देवगणान्क्षीबानपश्यन्व्यनदद्भृशं॥१३॥ ततो निवृत्तः क्रीडिष्यन्गंभीरं भीमनिःस्वनं॥ विजगाहे महासत्त्वो वार्धिं म
त्तेव द्विपः॥१४॥ तस्मिन्प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियः ससाध्वसाः॥ अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूर
तरं प्रदुद्रुवुः॥१५॥
हिरण्यकशिपुरिति दितेः प्रथमं प्रसूतं हिरण्याक्ष इति नाम कृतवानिति॥१८॥ दोर्भ्यां युद्धतः ब्रह्मवरेण अकुतोमृत्युः॥१९॥ रणं युद्धं
॥१०॥ मनसा शौर्येण वीर्येण बलेन वरेण च उत्सिक्तं गर्वितं असृण्यं निरंकुशं निलिल्यिरे लीना बभूवुः॥१२॥ स्वेन महसा तेजसा तिरोहितान्दृष्ट्वा
॥११॥ क्षीबानित्यपपाठे पाठे यो महाहीनात्॥१३॥१४॥ सन्नाः अवसन्नाधीर्येषां वर्चसा तेजसा प्रधर्षिता अभिभूताः दूरतः॥१५॥

भा॰त॰ ६५

महोर्मीन् ऊर्मीन् अभिजघ्ने मौर्व्या मारयतीति पूर्वं काष्र्णीय तन्मध्या । यद्वा मूर्वा नाम तृणविशेषः तन्मयरज्ज्वादिदृढनिबद्धयेत्यर्थः । विभावरीम् प्रतीच्याम् आसेदिवान् प्राप्तः ॥ २६ ॥ असुराणां लोकः पातालं तत्पालकं ॥ प्रलब्धुं उपहसितुं प्रणिपत्य ॥ २७ ॥ यद्यस्माद्राजसूयेन भवानयजत ॥ २८ ॥

स वर्षपूगानुदधौ महाबलश्चरन्महोर्मीन् श्वसनेरितान्मुहुः ॥ मौर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः ॥ २६ ॥ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसं ॥ स्मयन्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगं ॥ २७ ॥ त्वं लोकपालोधिपतिर्बृहच्छ्रवाः वीर्यापहो दुर्मदवीरमानिनां ॥ विजित्य लोकेऽखिलदैत्यदानवान्यद्राजसूयेन पुरायजत्प्रभो ॥ २८ ॥ स एवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपांपतिः ॥ रोषं समुत्थं शमयन्स्वया धिया व्यवोचदंगोपशमं गता वयं ॥ २९ ॥ पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदं ॥ आराधयिष्यत्यसुरर्षभेहि तं मनस्विनो यं गृणते भवादृशाः ॥ ३० ॥ तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः ॥ यस्त्वद्विधानामसतां प्रशांतये रूपाणि धत्ते सदनुग्रहेच्छया ॥ ३१ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे हिरण्याक्षदिग्विजये सप्तदशोध्यायः ॥ १७ ॥

उपशमं युद्धादिरहितो वयं कोठकाद्युपरमं ॥ २९ ॥ युद्धमार्गनिपुणं त्वां यस्तोषयिष्यति तमिहि गच्छ गृणते स्तुवंति ॥ ३० ॥ आरात् शीघ्रं विस्मयः नष्टगर्वः वीरशये रणांगणे रूपाणि वराहाद्यवतारान् ॥ ३१ ॥ इति तृतीये सप्तदशः ॥ १७ ॥

राम ६५

अष्टादशे हिरण्याक्षवधोद्धर्तवराहयोः ॥ निर्विशेषमहायुद्धं एवं श्रीमिनिरूप्यते १ ॥ प्रतियोद्धारमश्रुत्वा महामनाः ॥ शापिष्यमहइति यदुक्तं तत्र विगणा
प्य मृगाणामिव हा ॥ पततोदुर्मदः १ ॥ अमितोजपतीत्यमिजितं तं श्रीहरिं घ्रकर्षणोर्ध्वं नीयमानामवनिर्येन ॥ अग्रदंष्ट्राग्रेण स्वरुचः हिरण्याक्ष
तेजांसि अरुणश्रियायदुक्तं पतयेन अरुणनेत्रेण मुष्णन्तं तिरस्कुर्वन्तं ॥ अहो चित्रं वनगोचरो मृगः ॥ वारिचरो वराहः २ ॥ एहि आगच्छ ॥ रसौकसां
पातालवासिनां नोस्माकं समर्पिता ॥ अन्यथा पातालावतरणमस्मान्नद्धरत इति भावः ॥ हिरण्याक्षेनाधिक्षेपार्थप्रयुक्तापि भारती वक्त्रेते

मैत्रेय उवाच ॥ तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः ॥ हरेर्विदित्वा गतिमंगनारदाद्रसातलं निर्वि
विशे त्वरान्वितः ॥ १ ॥ ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया ॥ मुष्णन्तमक्ष्णा स्वरुचोरुणश्रिया जहा
सचाहो वनगोचरो मृगः ॥ २ ॥ आहैनमेह्यज्ञ महीं विमुञ्च नो रसौकसां विश्वसृजेयमर्पिता ॥ न स्वस्ति यास्यस्यनया ममेक्ष
तः सुराधमासादितसूकराकृते ॥ ३ ॥

भगवन्तं हसतीति ॥ तथाहि ॥ वनगोचरः जलशयानः श्रीनारायणः स एव योगिभिर्मृग्यते इति शब्दात् सतः मामनादृत्यापि हित्वा मनया मह-
हंतं मृगयत इति मृगः ॥ अज्ञ ॥ नास्ति ज्ञो यस्मात् सर्वज्ञ इत्यर्थः ॥ सुराधमायस्मात् हे सुरोत्तम मम मेरु मोराणस्यापि सतः मामनादृत्यापि हित्वा मनया मह
वर्तमानो नः अस्मदीयं स्वस्ति समस्तं मंगलं राज्यं यस्माद् इति प्राप्स्यसि ॥ नात्र संदेहः ॥ तथाप्यस्मत्कृपया विमुंचेत्यर्थः ॥ आसादिता लीलया स्वीकृता
सूकराकृतिर्येन ॥ ३ ॥

भा०८
६६

अभवाय नाशाय भृतः पुष्टः ॥ वल्कतस्त्वमोज्ञाय भृतो धृतः आश्रित इत्यर्थः ॥ यो भवान् परोक्षेण चौर्येण जयतीति तथा वल्कतस्त्वाहूरत एव
स्थित्वा जयतीति सम्मुखोपस्थाप्य हत्वा ॥ वल्कतस्त्वं योगमायया रूपमविलंब्य वलं यस्य ॥ अल्पं पौरुषं यस्मात् तं त्वा हे मन्मक्ष स्थापयित्वा मन्नग्रास्थित्वाऽहं ते
इत्यर्थः ॥ हे मूढ एव मूढ तान् घातिन आप्यायतीति तथा आपाशत्रौ विति धातुः हृहू दास्तवः संसारे दुःखानि मृत्युं नाशयामि ॥ यतस्त्वं स्मत्तो बाधवान्
विमोचयसीति भावः ॥ ४ ॥ अस्मद्भुजच्युतया गदया शीर्णशीर्षं यस्य तथाभूते त्वयि संस्थिते सति येऽत्र प्रभुं अस्मै बलिं हरन्ति

त्वं नः सपत्नैरभवाय किं भृतो यो मायया हन्त्यसुरान् परोक्षजित् ॥ त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृजे सुहृच्छु-
चः ॥ ४ ॥ त्वयि संस्थिते गदया शीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यं ॥ बलिं हरन्त्यृषयो ये च देवाः स्वयं सर्वे न भविष्यन्त्य-
मूलाः ॥ ५ ॥ स त्वद्यमानोऽरिदुहन्न्नेतामैरैर्दिष्टाग्रगांगामुपलस्यभीता ॥ नोदं मृषत्रिवगारं रुवमध्याज्जहाहेतः सवकारणाय ॥ ६ ॥

नवीना भक्ता ये च पूर्वे भक्ता ऋषयो देवाश्च ते सर्वे स्वयमेव उद्यमं विना वज्रमूलान भविष्यन्ति किं तर्हि मूलाः भविष्यन्तीत्यर्थः ॥ ५ ॥ ६
५ सहीः अरेर्दुहन्नो अवतो मताः शत्रुविशेषाः तैस्तद्यमानोऽभ्यस्यमानः ईष्टाग्रगतोऽपृथ्वीभीता मातास्पृतोऽरिदुहन्नभ्यर्थां सृषन स हम
न एव निर्गतः कोऽत्र हे सन्निनी वल्कतस्त्वां अरिदुहन्न भः अमरैर्निमित्तभूतैः तद्यमानः पश्यत्सु तान् अथ आहिंसा वज्ञारीणां अथां ददृशा अस्त्र
कंपयाभिद्यमान इत्यर्थः ॥ तोरं मृषन् इत्यस्याभ्यायमेवार्थः ॥ ६ ॥

राम
६६

सलिलान्निर्गच्छंतमनुगतः स तु हिरण्यवत्कपिशाः केशाः यस्य दैत्यस्य ॥ सघोमकरः करालदंष्ट्रो यस्य ॥ अशक्तिवत्तिहीनो यस्य ॥ निर्लज्जा
नामसतां किं विगर्हितमस्ति निंदाभयाभावात् ॥ पलायननाशक्तं इत्यर्थः ॥ वक्रतत्कागतद्विषः प्राप्तद्विषः न संतो ये मः तेषां कृपा
लूनां किं विगर्हितं न किंचित् ॥ अतः कृपालुत्वाद्दंष्ट्राग्रितशरणार्थे किंचित्पलायनमपि न निरिक्तमित्यर्थः ॥ यद्वा लोकोपकारायकुंवत्तु
दरतो उद्भवणामत चिंतमन्वानो दैत्यं आत्मानमेवाधिक्षिपति ॥ गतद्विषां हवार्थे कपराणामसतामस्माकं किं विगर्हितगणनास्ति ॥ अपि

तं निःसरंतं सलिलादुदूढो हिरण्यकेशो द्विरदं यथा दष्टः ॥ करालदंष्ट्रोशनिनिःस्वनो ऽब्रवीत् कृतांतकेयं किं त्वसतां विगर्हितं ॥७॥
सगात्मरुद्धात्सलिलस्य गोचरे विन्यस्य तस्मात् सदधात्त्वसत्वं ॥ अपि स्तुतो विश्वसृजाग्रजन्मनेराण्यर्यमाणो विबुधैः प्रपतोरे
पणद्रुधनं तपनीयोपकल्पं महागदं कांचनचित्रदंशं ॥ मर्माण्यभीक्ष्णं प्रतुदंतं दुरुक्तैः प्रचंडमन्युः प्रहसंस्तं बभाषे ॥८॥

तुनाहमेव विधिगस्मानित्यब्रवीदित्यर्थः ॥७॥ स भगवान् विश्वसृजा पितृतो विबुधैश्च प्रसूनेन पूर्यमाणः पाठांतरे विश्वसृजां प्रसूनैर्विबु
धैः अभिष्टुतः इति सलिलस्योदृत्तात् ॥ उपरि अवहारगोचरे देशे गां विन्यस्य स्वसत्वमाधारशक्तिं निहितवान् ॥ अरेरग्रतः एव ॥ प्रपत्कु
रुष्टतो ऽविषक्तं लग्नं तपनीयोपकल्पं हेमवर्णाभरणं कांचनमयं चित्रदंशाः कवचं यस्य तं दैत्यं प्रचंडमन्युः तं स्वाधिक्षेपात् किंचोढकराणि
मात्रैर्दैत्यवाक्यभीतानामयनिरोधनेयं वस्तुतस्त्वनायासः उक्तत्वेन कोपाद्विहेत्वभावात् ॥८॥

भा॰ त॰
६३

ग्रामसिंहान्नतःन प्रतिमुक्तस्य वद्धस्य विकत्थनं श्लाघा १० मात्सहराः निःस्पृहराः द्राविताः पलायनं कारिताः अथापि समर्थाः अपि ति
ष्ठामः तत्किं यतः स्थैर्यं स्थानं त्वमेवास्माभिः तत्किमित्याह कथ्यामः गंतव्यदेशाभावात् ११ यद्वा स्थानोपहतानां ये पृथ्यपालास्तेषां
अधिपः कुबेरः त्वमर्थः अवतात्पये पदानेवार्थे आश्रुत्वर्त्वमतत्त्वञ्जूह्रो निर्विनर्वाः योनाति विपर्निं न पुरुष्यति न पालयति अत्वावह

श्री म ग त उ व तत्त्वं वयं भोवनगोत्रप्रमृगाणुष्महिवान्मृगये ग्रामसिंहान् न मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव
गृह्णत्यमद्दु १० एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविताः ते तिष्ठामहे यापि कथंचिदाजौ स्थैर्यं कथ्यामो वलि
नोत्याघवेर ११ त्वं पदस्थानां किल पृथ्यपाधिपो व्रर्त्वनो वित्तयश्राश्वनूहः सत्याम्बवाग्नानुभस्नजाश्रुत्वकानां पः त्वाप
तिहीनानाति विपर्यसंभ्यः १२ मे ते पउ व सोधिक्षिप्तोभगवतापलब्धश्रूरुणाभरा आजहारोल्बणं क्रोधं क्रीड्यमानो हिर
इव १३ सृजन्नमर्षितः श्वासान् दुरुस्तप्रचलितेन्द्रियः आसाद्यतरसा दैत्यो गदयाभ्यहनद्धरिं १४ भगवांस्तु गदावेगं विसृष्टं रि
पुणारपि अवंचयत्निरश्चीनो योगारूढ इवांतकं १५ पुनर्गदामादाय भ्राजयंतमभीक्षणशः अभ्यधावद्धरिः क्रुद्धः संरंभा
दृष्टदच्छदं १६ ततश्चगदयारातिर्दक्षिणस्यां भ्रुवि प्रभुः आजघ्ने स तु तां सौम्य गदया कोविदो हनत् १७

भ्यः समाघायामनर्हः १२ सोधिक्षिप्तः सम्यक्पमितिस्प्रोकेनहभोप्रलब्धः उपहसितश्च एते वयमिति हाभ्यां क्रीडाकार्यमात्रो हिरण्यमह
र्पद्र इव १३ मस्मनाप्रवलितानिलहुमितानीन्द्रियाणि यस्य १४ अंतकं मृत्यु १५ १ सौम्य विदुर तां गदां श्वगदया मेवाहनत् १७

राम
६३

हर्यक्षो हिरण्याक्षः ॥ १७ स्पृधोः स्पर्द्धमानयोः तिग्माभ्यां गदाभ्यामाहतान्यंगानि ययोः क्षतास्रवतीति क्षतास्रवं रुधिरं तस्याघ्राणम
वघ्राणं तेन विवृद्धो मन्युर्ययोः विचित्रान्मार्गान् गदायुद्धप्रभेदान् चरतोः ॥ तस्यां निमित्तभूतायां शुष्मिणोर्मत्तयोर्वृषभयोः स
क्ताविति इला पृथ्वी तदर्थं वृषभो हि खलु बहूनि दिनानि निग्राह्यते नो द्वंगमंगमत्स्वर्वविदीर्णगलङ्घिरो परस्परापमर्द्दमग्रोग्रं तरं मोक्षम
त्कारितगजन्नेष्य पोयुध्यमानो तिष्ठत इति प्रसिद्धं ॥ १९ ॥ यज्ञाय एवावयवा यस्य तस्यैव ॥ मह्यां महीनिमित्तं द्विषतोः ॥ २० ॥ जगाद नाराय

एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च ॥ जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः ॥ १८ ॥ तयोः स्पृधोस्तिग्मगदाहतांगयोः क्ष
तास्रवघ्राणविवृद्धमन्य्वोः ॥ विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः ॥ १९ ॥ दैत्यस्य यज्ञावय
वस्य मायागृहीतवाराहतनोर्महात्मनः ॥ कौरव्य मह्यां द्विषतोर्विमर्द्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् ॥ २० ॥ आसन्नशौं
डीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमं ॥ विलक्ष्य दैत्यं भगवान् सहस्रणीर्जगाद नारायणमादिसूकरं ॥ २१ ॥ ब्रह्मो
वाच ॥ एष ते देव देवानामंघ्रिमूलमुपेयुषां ॥ विप्राणां सौरभेयीणां भूतानामप्यनागसां ॥ २२ ॥ आगस्कृद्भयकृद्दुष्कृदस्म

णमाह ॥ किं कृत्वा दैत्यं विलक्ष्य कथंभूतं आसन्नं प्राप्तं शौंडीरं शौर्यमदो वा (द्राद्धवरोसुरः ॥ अन्वेषन्नप्रतिरथो लोकानटति कंटकः ॥ २३ ॥
येन अपेतं साध्वसं यस्मात् कृतः प्रतीकारो येन ॥ अहार्यः अप्रतीकार्यो विक्रमो यस्य ॥ सहस्रणीः सहस्राणां ऋषीणां सहस्राणां नेता ॥ २१ ॥ हे देव ते
अंघ्रिमूलं प्राप्तानां वेदादीनां एषो ॥ हरः आगस्कृत् दृश्ये वा पराधारोपकः ॥ तत्परिहाराय प्रवृत्तेभ्यो भयकृत् ततो भीतेभ्यस्त्वाडुः कृत ऋष्यर्थं प्राणादिहर्त्ताश्र

यद्यस्मात् एवंभूतोयं तस्मात् हे देव एनं मा आक्रीडय हे देव यथा उत्थितं क्रुधितं आशीविषं सर्पं बालः पुच्छाकर्षणादिना आक्रीडयति तद्वत् २४ स्वां स्वाम्ना हे
हे देव स्वां मायामास्थाय अघं पापरूपं २५ वेलामेवाह एषेति लोकानां छंबट्करी विनाशकरी छंबडित्यव्ययं विनाशे वर्त्तते २६ अभिजित् नाम मध्या
ह्नः स एव मौहूर्त्तिको योगः तन्मुहूर्त्तः स्वभरः कालः आगात गतप्रायः अतो यावन्मुहूर्त्तशेषोस्ति तावदेव दुस्तरमेनं निस्तर जहि २७

मैनं मायाविनं दृप्तं निरंकुशमसत्तमं ॥ आक्रीड बालवद्देव यथाशीविषमुत्थितं २४ न यावदेष वर्द्धेत स्वां वेलां प्राप्य दारुणः
स्वां देव मायामास्थाय तावज्जह्यघमच्युत ॥ २५ एषा घोरतमा संध्या लोकछंबट्करी प्रभो उपसर्पति सर्वात्मन् सुराणां जय
मावह ॥ २६ अधुनैषोभिजिन्नाम योगो मौहूर्त्तिको ह्यगात् ॥ शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरं ॥ २७ दिष्ट्या त्वां विहितं मृ
त्युमयमासादितः स्वयं ॥ विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि ॥ २८ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे हिरण्या
क्षवधे अष्टादशोध्यायः ॥ मैत्रेय उवाच ॥ अवधार्य विरिंचस्य निर्व्यलीकामृतं वचः ॥ प्रहस्य प्रेमगर्भेण तदपांगेन सोग्रही
त् ॥ १ ॥ ततः सपत्नं मुखतश्चरंतमकुतोभयं ॥ जघानोत्पत्य गदया हनावसुरमक्षजः ॥ २

त्वां मृत्युं त्वयैव शापात् ग्रहकाले विहितं निर्मितं आसादितः प्राप्तः शर्मणि सुखे आधेहि स्थापय २८ त ये श शः ऊनविंशे विरंच्या
दिप्रार्थितेन महामृधे वाराहेण निराशाय वधः श्लाघ्योऽत्र वर्ण्यते १ निर्व्यलीकं च तदमृतं च पाठांतरे निष्कपटामिष्टार्थं वचनं कामं च का
लात्मनोपि सन्मुहूर्त्तमुपदिशतीति प्रहस्य अपांगालोकनेन स्वीकृतवान् १ मुखतः अभिमुखे हनौ कपोलस्याधोभागे अक्षजः ब्रह्मणो

साद्भगरयातेनहतातततोविहताविच्युतामतीविघूर्णितामूत्वाः पततरेजेच ॥ ततभगवच्चक्रात्पतनं ॥ यद्दानतपरस्यावृत्यारेजइत्यनेनापिसंबं
धः ततरेत्यपोहृयरेजरति ॥ २ ॥ लब्धतीर्थालब्धावसरः सचनवबाधेनग्राहरत ॥ समानमूतवभूवेतिवाक्यमेदातइत्यस्यापोनहृत्ये ॥ ४ ॥ ५
व्यग्रंसमभ्रमंवक्त्रंयस्य ॥ विषज्जमानंविशेषेणसंगंप्राप्नुवंतंप्रतितंद्दिशंतत्वभावमजानन्तोऽयासमेतारामसमूहम् ॥ ६ ॥ सरैरत्यः तमात्रंवक्त्रंनिशा
महेतातेनागरयाविहताभगवच्चक्रात ॥ विघूर्णितापतइजेतदद्रुतमिवाभवत ॥ ३ ॥ सततदालब्धतीर्थोपिनवबाधेनिराग्रुधं मानव
नूसमृधेधर्मेविषक्तेनेनप्रकोपयन ॥ ४ ॥ गदायामपविद्धायांहाहाकारेविनिर्गते ॥ मानयामासतद्धर्मज्ञत्वानामंचास्मरद्द्विजः ॥ ५ ॥
तंव्यग्रवक्त्रंदितिजंत्राधमेनत्वपार्षदमुख्येनविषज्जमानं ॥ विज्ञावावोः तद्दिशंखेवरणांतत्रस्मासन्नत्वात्तितेजंजहीति ॥ ६ ॥
सतंनिशाम्यात्तरथांगमग्रतोव्यवस्थितंपद्मपलाशलोचनं ॥ विलोक्यचामर्षपरिप्लुतेंद्रियोरुषास्वदंतच्छदमादशच्छ्वसन् ॥ ७ ॥
करालदंष्ट्रश्चक्षुर्भ्यांसंचक्षाणोदहन्निव ॥ अभिप्लुत्यस्वगदयाहतोसीत्याहनद्धरिं ॥ ८ ॥ पदासव्येनतांसाधोभगवान्यज्ञ
सूकरः ॥ लीलयामिषतोः शत्रोः प्राहरद्वातरंहसं ॥ ९ ॥ आहचायुधमाधत्स्वघटस्वत्वंजिगीषसि ॥ इत्युक्तः सतयाभूयः ताडय
न्व्यनदद्भृशं ॥ १० ॥ तांसआपततीवीक्ष्यभगवान्समवस्थितः ॥ जग्राहलीलयाप्राप्तांगरुत्मानिवपन्नगीं ॥ ११ ॥ स्वपौरुषेप्रति
हतेहतमानोमहासुरः ॥ नैच्छद्गदांदीयमानांहरिणाविगतप्रभः ॥ १२ ॥
म्परक्षा ॥ अग्रतोव्यवस्थितंचविलोक्यअमर्षेणक्रोधेनपरिप्लुता
क्षुभितानीइंद्रियाणियस्यसः आरशनदष्टवान् ॥ ७ ॥ चक्षुर्भ्यांरहन्निवसंचक्षाणः पश्यन्त्रिवेतिवक्ष्यतः क्रोधाभावमोहहतोसित्तातोसानिवा
स्तबोधः ॥ ८ ॥ वातरंहसंवातवेगं ॥ ९ ॥ घटस्वउद्यमंकुरु यततत्वंजेतुमिच्छसि ॥ १० ॥ ११ ॥ हतोमानोगर्वोयस्य ॥ १२

भा॰त
६९

ज्वलन्योज्ज्वलनः तद्धस्तोल्लुपं प्रग्रस्तनव्यग्रं ॥ पतायविस्तृमालस्मग्र कार्यकरत्वेद्दृशांतः विश्वमुद्दिश्यामिवारं जुर्वन्यथा ॥ २ ॥ अंतः खेश्व
काशमध्ये वकाशतत्प्रकाशमानं ॥ उदीर्णोत्करादीधितिरीन्द्रियस्य निशाततेनेमिनानिशितधारेणाहरिरिं द्वोयथातात्संस्पपतत्रेउ
दितं ॥ विद्धेदरेवाद्विनिर्जितामृतकलशांनयतागृहेउ नेद्रप्रयुक्तवज्रास्त्रामोघस्यमानं राजपिद्धमेकंतद्यथा ॥ ३ ॥ अविद्धेदद्विद्धित्रवततप

जग्राहत्रिशिरिखं शूलं ज्वलज्ज्वलनलोलुपं ॥ पतायधृतन्नपापविस्रायामिवरन्यथा ॥ १३ ॥ तदोजसा दैत्यमहाभरार्पितं
चकासदंतः खउदीर्णदीधितिं ॥ चक्रेण चिद्धेदनिशाततेनिमिना हरिर्यथाताक्ष्यपतत्रमुदितं ॥ १४ ॥ वृक्णे स्वशूले बहुधा
रिणा हरेः प्रत्येत्यविस्तीर्णमुरो विभूतिमत् ॥ प्रवृद्धरोषः सकठोरमुष्टिना नदन्प्रहृत्यांतरधीयताम्बरः ॥ १५ ॥ तेनेत्यमा
हतः सत्त्रः भगवानादिसूकरः ॥ नाकंपत मनाक्कापि स्रजा हत इव द्विपः ॥ १६ ॥ अथोरुधासृजन्मायां योगमायेश्वरे हरौ
यां विलोक्य प्रजास्त्रस्ता मेनिरेस्योपसंयमं ॥ १७ ॥ प्रववुर्वायवश्चंडास्तमः पांसवमैरयन् ॥ दिग्भ्यो निपेतुर्ग्रावाणः क्षे
पणप्रहिता इव ॥ १८ ॥ द्यौर्नष्टभगणाभ्रौघैः सविद्युत्स्तनयित्नुभिः ॥ वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि चासकृत
गिरयः प्रत्यदृश्यंत नानायुधमुचो नघ ॥ दिग्वाससो यातुधान्यः शूलिन्यो मुक्तमूर्धजाः ॥ २० ॥

यावेप्रकाशन्नद्धस्यकाशमाननमित्यमिसंधिः ॥ १४ ॥ अरेः हंत्यस्येतिशूरिवक्षं तेनवऊधावज्ञे ऽछित्तेप्रतिप्रत्येत्यअभिमुखमागत्यहरेः
ः वक्षः प्रहत्य ॥ १५ ॥ मनाकूईषदपिक्वाप्यंगे ॥ १६ ॥ अस्रजगतःउपसंयमंप्रलयं ॥ १७ ॥ पाकृकतंतमश्चप्रेरितवंतः क्षेपणोः पंत्रैः ॥ १८ ॥ नष्टोगणम
भगणोनक्षत्रसमूहोयस्यां ॥ अनेनदैत्यबलातिरेकातत्प्रसदनेप्रहृतीतिक्रमोगम्यते ॥ अद्भिर्नक्षत्राणामसंभवात् ॥ १९ ॥ नानायुधानिमुंचं ६९

हिंस्राः छिद्रिभिर्धीत्येवंभूताः अतिवेशद्याआत्तग्रावावउत्सेषाइत्येवैवचाकामसमाप्तिः ॥ २१ ॥ आउः कृतानामिति अकरितायाः मायाः
विनाशयत ॥ विनाशनमितिपाठे यथाश्रुतैवषष्ठी ॥ आतिएवनानिपादायस्यपश्चाद्भिरित्यर्थः ॥ त्रयोऽत्रसपादा इतिश्रुतेः ॥ २२
मन्नोदेशत्वस्त्रयो भगवान्‌ हनिष्यतीत्येवंभूतं ॥ २३ ॥ उपगूहमानः वाक्कोरेतर्निधाप्यसद्वेदयन्‌ ॥ २४ ॥ अहहजप्यानत्वाष्टृवृत्रमहत्य

वज्रिभिर्यज्ञरक्षोभिः पद्मश्वरथत्तंजरैः ॥ आततायिभिरित्वष्टाहिंस्रावावोतिवेशयाः ॥ २१ ॥ आउः कृतानांमायानाञ्च आहरीणां
विनाशन ॥ उद्दर्शनाद्भगवान्‌ आग्नेदपितं विपात ॥ २२ ॥ तेदादितेः समभवत्सह माह्रदिवे पितः ॥ स्मरंत्याभन्नोदेशं
तनाब्राह्मणकृषउत्सुवे ॥ २३ ॥ विनष्टाद्रव्यमायाहृभूपशश्चात्रज्ञकेशव ॥ उपगूहमानो ऽद्दहशोवास्थितं वहिः ॥ २४ ॥ तेऽपि
भिर्विनिघ्नंतंवज्रसारैरधोक्षजः ॥ करेणाकर्णमूलेहत्तेयथा त्वाष्ट्रमरुत्पतिः ॥ २५ ॥ सआहतोविश्वसृजात्यवज्ञया परिभ्रम
द्धौवैककरालदंष्ट्रपरिदष्टदष्टदं ॥ अजादयोवीक्ष्य रोषरागतान्‌ आहोस्मांकोऽतुलमेतंसंस्थितिं ॥ २६ ॥ आतुरयत्ललोचनः वि
कीर्णवाह्वंघ्रिशिरोरुहोपतद्यथानगेंद्रोलुलितो तोनभस्वता ॥ २६ ॥ क्षितौशयानं तमकुंठवर्चसं ॥ २७ ॥ पयोतिनोयोगसमाधिना
रहोध्यायंतिलिंगादसतोमुमुक्षया ॥ तस्यैषदैत्यर्षभः पदा हतोमुखंविपश्यंस्तनुमुत्ससर्जह ॥ २८ ॥ एतौतौपार्षदावस्यशापाद्या
तिरिङ्‌ः ॥ २५ ॥ परितोभ्रमतगात्रेणाऽयस्यउरस्तेवाहिंनिर्गतेलोचनावसहृति ॥ पुनः कतिपयैः स्थानंप्रपत्स्येते हजन्मभिः ॥ २९ ॥
नेयस्य ॥ विशीर्णावाह्वारयोयस्य ॥ नगेंद्रोमहाद्रुमः लुलितः उन्मूलितः नभस्वतावायुना ॥ २६ ॥ संस्थितिंमृत्युं ॥ २७ ॥ असतआरोपितात्‌ लिंगा

भा॰न॰ अखिलयज्ञानां तं तनवे विस्तारणप्रकारणायेति वा ॥ अहृतरः मर्मभेत्ता ॥ २० ॥ सादयित्वा हत्वेत्यर्थः पुष्करविष्टरादिभिः ब्रह्मादिभिः संस्तुतः
७॰ ॥ २१ ॥ यथानूक्तं अनुक्रममनतिक्रम्य मया वादि ॥ तव कथितं ॥ हे सुमित्र ॥ यथा येन प्रकारेण ॥ २२ ॥ हे द्विज शौनक ॥ २३ ॥ कथाः उपश्रुत्य
॥ २४ ॥ भक्तिमात्रेण प्रसन्नानामत एव सुलभः अन्यथा देवानामपि दुर्लभ इति तत्कथाश्रवणे कस्यानंदो न स्यादित्याह य इति द्वाभ्यां ॥ द्
वे ॥ ऊ॰ तु ॥ नमोनमस्तेऽखिलयज्ञतंतवे स्थितौ गृहीतामलसत्त्वमूर्तये ॥ दिष्ट्या हतोऽयं जगतामरुंतुदस्त्वत्पादभक्त्या वयमीश
निर्वृताः ॥ २० ॥ मैत्रेय उवाच ॥ एवं हिरण्याक्षमसह्यविक्रमं स सादयित्वा हरिरादिसूकरः ॥ जगाम लोकं स्वमखंडितोत्स
वं समीडितः पुष्करविष्टरादिभिः ॥ २१ ॥ मया यथानूक्तमवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितं ॥ यथा हिरण्याक्ष उदारवि
क्रमो महामृधे क्रीडनवन्निराकृतः ॥ २२ ॥ सूत उवाच ॥ इति कौषारवाख्यातामाश्रुत्य भगवत्कथां ॥ क्षत्तानंदं परं लेभे म
हाभागवतो द्विज ॥ २३ ॥ अन्येषां पुण्यश्लोकानामुद्दामयशसां सतां ॥ उपश्रुत्य भवेन्मोदः श्रीवत्सांकस्य किं पुनः ॥ यो गजेंद्रं झ
षग्रस्तं ध्यायंतं चरणांबुजं ॥ क्रोशंतीनां करेणूनां कृच्छ्रतोऽमोचयद्द्रुतं ॥ २५ ॥ तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः ॥ कृतज्ञः
को न सेवेत दुराराध्यमसाधुभिः ॥ २६ ॥ यो वै हिरण्याक्षवधं महाद्भुतं विक्रीडितं कारणसूकरात्मनः ॥ शृणोति गायत्यनुमोद
तेंजसा विमुच्यते ब्रह्मवधादपि द्विजाः ॥ २७ ॥ एतन्महापुण्यमलं पवित्रं धन्यं यशस्यं पदमायुराशिषां ॥ प्राणेंद्रियाणां युधि

षो ग्राहः क्रोशंतीनामसतीनामपि तत्कृपालुत्वमुक्तं सकरेणुमोचयत ॥ २५ ॥ २६ ॥ कारणेन शयितु शौर्यवर्धनं नारायणोंते गतिरंग शृण्वतां ॥ २८ ॥
कारणाद्धि नाम सूकरस्वरूपस्य ॥ २७ ॥ एतद्धरेर्विक्रीडितं शृण्वतामंते श्रीनारायणो गतिर्भवति ॥ महापुण्यं स्वर्गादिप्रदं अलं पवित्रं अतिशयेन शोधकं ॥ धन्यं धनप्रदम्
७॰

इति तृतीयस्कंधे एकोनविंशः॥ विंशे वाराहजन्मादि श्रवधानादथादितः॥ सर्गोऽनुस्मार्यते ब्रह्ममनुप्रभृतितो मनोः॥ प्रतिष्ठां स्थानं अध्य
स्य प्राप्य सौते हे सूत स्वायंभुवो मनुः महर्षीणां स्वपुत्राणां अर्वाचीनां जन्म येषां तेषामीश्वरे लीनानां मार्गाय निर्गमाय कानि द्वाराणि कृतवान्
अर्वाचीनानां प्राणिनः के रुपायैः सृष्टवानित्यर्थः॥ १॥ विदुरमैत्रेयसंवादे नैवैतत्तत्त्वास्यात इति तमेव संवादं प्रस्तुमाह क्षत्तेति पंचभिः
श्रीकृष्णस्य सुहृत्त्वेत्यर्थः यस्तत्याज दुर्योधनादिभिः सपुत्रैः सहितमग्रजं धृतराष्ट्रं अघवान् कृतापराध इति हेतोः श्रीकृष्णोक्तमंत्रानादरणात्

शौनक उवाच॥ महीं प्रतिष्ठामध्यस्य सौते स्वायंभुवो मनुः॥ कान्यन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनां॥ १॥ क्षत्ता महाभाग
वतः कृष्णस्यैकांतिकः सुहृत्॥ यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति॥ २॥ द्वैपायनादनवरो महित्वे तस्य देहजः॥ सर्वा
त्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः॥ ३॥ किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थसेवया॥ उपगम्य कुशावर्त्त आसीनं तत्त्ववित्तमं ४
तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः॥ आपो गांगा इवाघघ्नीर्हरेः पादांबुजाश्रयाः॥ ५॥ ता नः कीर्तय भद्रं ते कीर्तन्यो
दारकर्मणः॥ रसज्ञः को नु तृप्येत हरिलीलामृतं पिबन्॥ ६॥ एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः॥ भगवत्यर्पिताध्यात्म

यः तत्याज १ अनवरः अन्यूनः महित्वे महिम्नि ३ कुशावर्ते गंगाद्वारे ४ यत्किमन्वपृच्छत् तत्किं नु वेति चेत् तत्राह हे सूत ता नाह श्रूयतामिति ७
तयोरिति अघघ्नीः अघघ्नाः नूनं कथाः प्रवृत्ताः॥ ५॥ कीर्तन्यानि कीर्तनार्हाणि उदारकर्माणि यस्य हरेः॥ ६॥ एवमिति व्यासेवाक्य उग्रश्र
वाः लोमहर्षणपुत्रः नैमिषमयनमाश्रयो येषां अर्पितमध्यात्मं मनो येन॥ ७॥

गोः उद्धरणं लीला हिरण्याक्षं वा अवज्ञया हतं निशाम्य ॥ भारतो विदुरः ॥८॥ यस्मात्त्वमव्यक्तमार्गवित् ब्रह्मणो वा विशेषणं ॥९॥ एतत् जगत्
अभावयन् उत्पादयामासुः ॥१०॥ सद्वितीयाः सभार्याः स्वतंत्रा भार्यानपेक्षाः कर्मसु प्रजासर्गादिषु ॥ संहताः परस्परापेक्षाः ॥ इदं जगत्
॥११॥ ब्रह्मा किमारभतेति प्रश्नस्य यज्ञादीन् सृष्टवानित्युत्तरं वक्तुं पूर्वोक्तां सृष्टिमनुस्मारयति दैवेनेति सप्तभिः ॥ सत्त्वादिगुणानां न्यूनाध्या

श्रीशुक उवाच ॥ हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात् ॥ लीलां हिरण्याक्षमवज्ञया हतं संजातहर्षो मुनि
माह भारतः ॥८॥ विदुर उवाच ॥ प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् ॥ किमारभत मे ब्रह्मन् प्रब्रूह्यव्यक्तमा
र्गवित् ॥९॥ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः ॥ ते वै ब्रह्मण आदेशात्कथमेतदभावयन् ॥१०॥ सद्वितीयाः
किमसृजन् स्वतंत्रा उत कर्मसु ॥ आहो स्वित्संहताः सर्वे इदं स्म समकल्पयन् ॥११॥ मैत्रेय उवाच ॥ दैवेन दुर्वि
तर्क्येण परेणानिमिषेण च ॥ जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् ॥१२॥

यमारभ्योत्तरं भविष्यति ॥ दुर्वितर्क्येण दैवेन जीवादृष्टेन परेण प्रकृत्यधिष्ठात्रा महापुरुषेण ॥ अनिमिषेण कालेन च हेतुना ॥ भगवतो निर्वि
कारात् जातक्षोभं यद्गुणत्रयं प्रधानं तस्मात् महानासीत् तदुक्तं तंत्रे ॥ विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ॥ प्रथमं महतः स्रष्टृ द्वि
तीयं त्वंडसंस्थितं ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति ॥१२॥

महतो जातो भूतादिरहंकारस्त्रिलिंगस्त्रिगुणः रजः प्रधानादिति । ततः सत्त्वप्रधानस्यापि महतोऽहंकारोत्पत्तिकाले कार्यानुरूपं रजः
प्रधानत्वं भवतीति भावः । पंचशः तन्मात्राणि महाभूतानि तानींद्रियाणि तत्तद्देवताश्चेति पंचपंच समसृजदित्यर्थः ॥१२॥ भौतिकं
समस्तमेकैकशः प्रत्येकं स्रष्टुमसमर्थानि संहत्य समसृजत् ॥१३॥ अन्ववात्सीत् अधिष्ठितवान् ॥१४॥ सहस्रार्ककारणमिवोरुदीधितिर्य
स्मात् तत् ॥ सर्वजीवनिकायानां लोकः स्थानं परमेश्वरः ब्रह्मा ॥१५॥ यः सलिलाशये गर्भोदकस्रोतः शेते तेन भगवता अनुविष्टः अधिष्ठितः

रजःप्रधानान्महतस्त्रिलिंगो दैवचोदितात् । जातः ससर्ज भूतादिर्वियदादीनि पंचशः । तानि चैकैकशः स्रष्टुमसमर्थानि
भौतिकं । संहत्य दैवयोगेन हैममंडमवासृजत् ॥१२॥ सोऽशयिष्टाब्धिसलिले आंडकोशो निरात्मकः । साग्रं वै वर्षसाह
स्रमन्ववात्सीत्तमीश्वरः ॥१४॥ तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधिति । सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् ॥१५॥
सोऽनुविष्टो भगवता यः शेते सलिलाशये । लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया ॥१६॥ ससर्ज छायया विद्यां पंचपर्वा
णमग्रतः । तामिस्रमंधतामिस्रं तमो मोहो महातमः ॥१८॥ विससर्जात्मनः कायं नाभिनंदंस्तमोमयं । जगृहुर्यक्षरक्षांसि
रात्रिं क्षुत्तृट्समुद्भवाम् ॥१९॥

सत्त्वरूपः स्वराट् स्वयं संस्थया नामरूपादिक्रमेण ॥१६॥ छायया अमायया इति योगिनीनयाज्ञानबंधेत्यर्थः पंचस्कंधिकतः(?)
प्रभोरिवकृत्वात् ॥ महातमः इति महामोहः स्वरूपनिर्देशमात्रं विवरूपा मोह इति प्रथमा प्रयोगः ॥१८॥ तदेवं प्रथमोक्तं साधारणसृष्टिमनूद्य
केनचित् ॥ विशेषेण साधारणसृष्टिमाह विससर्जेत्यादिना यावत्समाप्तिं तद्विसृष्टं कायं रात्रिरूपं तत एव जातानि यक्षरक्षांसि जगृहुः क्षुत्तृट्

षोः समुद्रवोपमधानानां मृजव वयाधिसातं न्यासीन्
नामपा हतनमक्रवाक्यान निशाभवदित्यादिसूत्रति
२ चेषधेया १८

उपसृष्टाश्चाभिभूताः जाड्यमन्नं भक्षयितुं पतो वयक्षरक्षोभ्यामर्दिताः अतएवं पितेति कृपया मा रक्षतेत्येके अन्ये तु जक्ष भक्षयतेति ब्रुवंतः
जक्ष भक्षहसनयोरिति धातोः ॥१९॥ देवो ब्रह्मा तं विग्नो भीतः सन् मा मां भक्षयत किं तु रक्षत अहो हे यक्षरक्षांसि यूयं मे प्रजाः इति ता बभू
विथ जाता स्थ एवं सुप्रत्वभावा यक्षा एव जाता इत्यर्थः ॥ तत्र ये पक्षमिति ब्रुवुः ते यक्षाः ये तु मा रक्षतेति ते राक्षसा इति तत्त्वं ॥ एतच्च निर्घृणा
दितामससर्गस्योपलक्षणं ॥२०॥ प्रभया यां दीव्यन् द्योतमानः याया देवताः सृजति स्म ताः सात्विकप्रभां तां प्रभवितः आधाय न्येनासृजत

क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः ॥ मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः ॥१९॥ देवस्तानाह संविग्नो मा मां जक्षत
या रक्षत ॥ अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ ॥२०॥ देवताः प्रभया या या दीव्यन् प्रमुखतोऽसृजत् ॥ ते अहार्षुर्देवयंतो विसृष्टां
तां प्रभामहः ॥२१॥ देवो देवान् जघनतः सृजति स्मातिलोलुपान् ॥ त एनं लोलुपतया मैथुनायाभिपेदिरे ॥२२॥ ततो हसन्
स भगवानसुरैर्निरपत्रपैः ॥ अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् ॥२३॥ स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिं ॥ अनुग्रहा
य भक्तानामनुरूपात्मदर्शनं ॥२४॥ पाहि मां परमात्मंस्ते प्रेषणेनासृजं प्रजाः ॥ ता इमा यभितुं पापा उपाक्रामंति मां प्रभो ॥२५

ते देवाः देवता इति स्त्रीत्वेन निर्दिष्टानामप्यर्थमात्रविवक्षया त इति पुंस्त्वेन प्रतिनिर्देशः एवं यक्षरक्षांसि तत्वत्रापि ते यं ॥ तेन विसृष्टां त्यक्तां प्र
भामहः दिव्यरूपां सतीं देवयंतः क्रीडंतः अहार्षुर्जगृहुः ॥२१॥ असुरेवानि नितंबदेशः सृजद्वनादहाणे न सृजतेति स्मृतेः अतिलोलुपान् स्त्रीलंप
टान् अभिपेदिरे प्राप्ताः ॥२२॥ परापतत् अपलायत ॥२३॥ भक्तानामनुरूपमात्मानं दर्शयतीति तथा तं उपव्रज्य ॥२४॥ पाहीति द्वाभ्यां प्रार्थितवान्

लोकानां जनानां तव अनायासेन अनाश्रितोपायेन त्वां ॥२६॥ विविक्तमनाः दिग्ध अध्यात्मदर्शनपरः विविक्तत्वात् यस्मै हरेः ॥ ध्योऽता कामकरूपमलां
त्वतः अविमुक्तं वेति उक्तवानिति शेषः ॥ रक्ताः अरुत्थानां तेषु विमुमोच ॥ सर्वत्र तत्त्यागो नाम न तत्र मनोभावत्यागो विवक्षितः ग्रहणं च तत्र द्रावा
पन्निरिति द्रष्टव्यं ॥२७॥ सोऽहोरात्रयोः संधिरभवदिति श्रूयते ॥ स्नातेन विमुक्तेषु तेषु सा यतनी संध्या वधूर्वसा च कामोऽद्वै केवलाः अमृतानि गजमल्ला
त्वीलपराः अन्ततः संध्यामेव त्रिविधं कल्पयित्वा तेषु मोहं प्रापयत् [illegible] तामिति त्रिभिः ॥ [illegible] भोजे यस्याः सदैनं विह्वललोचने

त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः ॥ त्वमेकः क्लेशदस्तेषामनाथ[illegible] परा तव ॥२६॥ सोऽवधार्यास्य कार्पण्यं विविक्ता
ध्यात्मदर्शनः ॥ विमुच्यात्मतनुं घोरामित्युक्तो विमुमोच ह ॥२७॥ तां क्वणच्चरणाम्भोजां मदविह्वललोचनां ॥ कांचीकलापविलस
द्दुकूलच्छन्नरोधसं ॥२८॥ अन्योन्याश्लेषयोत्तुंगनिरंतरपयोधरां ॥ सुनासां सुद्विजां स्निग्धहासलीलावलोकनां ॥२९॥ गूहंतीं व्रीड
यात्मानं नीलालकवरूथिनीं ॥ उपलभ्यासुरा धर्म सर्वे संमुमुहुः स्त्रियं ॥३०॥ अहो रूपमहो धैर्यमहो अस्या नवं वयः ॥ मध्ये कामयमा
नामकामेव विसर्पतीं ॥३१॥ वितर्कयंतो बहुधा तां संध्यां प्रमदाकृतिं ॥ अभिसंभाव्य विश्रंभात् पर्यपृच्छन् कुमेधसः ॥३२॥ कासि कस्यासि र
[illegible] भामिनि ॥ रूपद्रविणपण्येन दुर्भगान्नो विबाधसे ॥३३॥

यस्याः कांचीकलापेन विलसद्दुकूलं तेनाच्छन्नरोधः कटितटं यस्याः तां ॥२८॥ अ
न्योन्यं श्लेषया उपमर्दे न हेतुना उत्तुंगौ निरंतरौ पयोधरौ यस्याः सुद्विजा [illegible] स्निग्धहासो लीलावलोकनं च यस्याः ॥२९॥ गूहंतीं व्रीडावलेनात्मानं नी
लानाममलकानां वरूथः [illegible] यस्याः ॥ हे धर्म तां स्त्रियमुपलभ्य सर्वा ॥३०॥ संपूर्णानामभिभावनात् कममाहरहो इति ॥३१॥ अभिसंभाव्य [illegible] विश्रंभात्
कुबुद्धयस्तेतां पप्रच्छुः ॥३२॥ कासीति त्रिभिः ॥ कासि वा जाता कस्य वा कन्या ॥ हे भामिनि कोपने रूपमेव द्रविणं [illegible] ते न ततः [illegible]
वाधसे

भा॰त
७२

किंज्ञातिकुलादिप्रश्नेन याचा काचिद्बालादिर्घ्या रतावद्दृष्टं जातयत्नवरदर्शनं किंतु केवलं नो मनः उत्कनोषि विषमश्वासि २४ कुसुमितचिन्ता
नां वाक्याहे शालिनी स्त्राद्ध्ये एकत्र नजयति नाप्यिरा भवति पक्षाने कत्रश्रू नेकगति विलासे जयति सर्वोत्कर्षेणावर्तते पतत्पतंग
उद्वेलितं कंडुकं वरतोत्कनयोर्भोगाद्गीतं तत्र वक्त्रं यंमध्यं विषाद इति श्रान्यति शांतामथ रेवग्रसर्गनि हरिणीवामपूहः यो मनः केशकला
पहे पाठान्तरे हरिणीवाः शोभनाक्षे शानूत्र वकीयमाणान् सपूर्वद्वधाने तिस्रूत्रच अत्युत्तगच्छनूत्र प्रएव पतत्पतंगः मेघविच्छे

याचा काचित्त्वमवले दृष्ट्यातंरर्शनं तव उत्कनोषीकुमाराणां कंडुकक्रीडया मनः २४ नैकत्र नेजयति शालिनी पारदपसं
घृत्वा गुरुः करतलेन पतत्पतंगं मध्यं विषाद इति हत्कन भार भीनं शांते वरदृष्टीरमला हरिणीवामपूहः २५ इति सायंते
नीतं ध्यास्त्रहरणः प्रमदायंती प्रलोभयंतीजगरुः मत्वा सूरधियः स्त्रियं २६ ग्रहस्य भावगंभीरं जिघ्रंत्या त्मानमात्मना
कांत्या समञ्जै भगवान् गंधर्वीफ्लरसांगरागान् २७ विसमञ्जे तनुं नो वैजयोत्स्नाकांति पतिप्रिया तएव वाहदेः प्रीत्या विस्वा
वहेऽगेगमाः २८ दृष्ट्वा भूत पिशाचाश्च भगवानात्मतं द्विगाः दिव्या वासप्रोघ्नकेशानुवीक्ष्य चामीलयद्दृशौ २९ जगद्गुरुस्त्वांदित
रोमधर्मविषादः तारकानूपादृष्टिः तमएव केशादत्यायुत्कं २५ प्रमदेवा ध्यांतानं भगाणां प्रोतव्यभोः निद्रामिंद्रियविज्ञेदोषयाधूतेपुद्दृश्यते
वंतीस्त्रियं मत्वा जगद्गुरुः २६ ग्रहस्यात्मानमात्मना जिघ्रंत्या कांत्या सोदर्यो णाग्रहस्तनमात्माव ग्राणां च सोदर्याव भावव वाद्य विकारः २७ ज्योत्स्नां रामं
वद्धिकानूपातए वगंधर्वादिगणाः विश्वावहः प्रोगमास्त्वोपेष्ठ २८ आत्मनस्त्वद्विगाः आलक्ष्येन तत्स्त्रघ्नकेशानुवीक्ष्य नेत्रे निमीलितवान् २९ ७२

येनेंद्रियविक्षोदेन हेतुनाउच्छिष्टान्नरान्धर्षयंतिप्रांतानुत्सर्वविनितभूतादिगणाः तमुन्मादंप्रचक्षते । तद्राजंभिकानिद्रोन्मादहेतुत्वेन भूतादीनां तन्नूनं
चवान्तुविधिप्रभुः ॥४०॥ ऊर्जस्वंतंबलवंतं । परोक्षेणाश्रदृश्यरूपेण ॥४१॥ आत्मनः सर्गोयस्मात्तंयत्येनकायेन तेभ्यदानं त्वनिमित्तेनैकवयः क
वयो विप्राः साध्येभ्यः पितृभ्यश्च त्वचितन्तुपेभ्यः वितन्वते श्राद्धादिनाहव्यंकव्यंचदरति ॥४२॥ तिरोधानेनदृश्यत्वेनसतमप्यंतर्धानशक्त्या ॥४३॥ प्रत्या
त्म्येन प्रतिबिंबेन आत्मनात्मानमात्माभासंप्रतिबिंबं आत्मनात्मनोप्रतिबिंबदर्शिनः हृदुरस्यशिरः कपादिचेष्टाश्च तएव तत्स्वषानीम्मिथः समानेननित्य

येनोच्छिष्टान्धर्षयंति तमुन्मादंप्रचक्षते ॥४०॥ ऊर्जस्वंतंमन्यमानआत्मानंभगवानजः साध्यान्गणान्पितृगणान्परोक्षेणासृ
जत्प्रभुः ॥४१॥ तआत्मसर्गंतंकायंपितरःप्रतिपेदिरे ॥ साध्येभ्यश्चपितृभ्यश्चकवयोयद्वितन्वते ॥४२॥ सिद्धान्विद्याधरांश्चैव
तिरोधानेनसोसृजत् ॥ तेभ्योददात्तमात्मानमंतर्धानाख्यमद्भुतं ॥४३॥ सकिंनरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः ॥ मा
नयन्नात्मनात्मानमात्माभासंविलोकयन् ॥४४॥ तेतुतज्जगृहूरूपंत्यक्तंयत्परमेष्ठिना ॥ मिथुनीभूयगायंतस्तमेवोषसि
कर्मभिः ॥४५॥ देहेनवैभोगवताशयानोबहुचिंतया ॥ सर्गेनुपचितेक्रोधादुत्ससर्जहतद्वपुः ॥४६॥ येहीयंतामुतःकेशाअहय

मिथुनीभावः ॥४४॥ तत्प्रतिबिंबरूपं ॥ कर्मभिः तत्पराक्रमाद्युवर्णनैः ॥४५॥ भोगश्चभोगोविस्तारःयो स्तेंगजज्ञिरे ॥ सर्पाःप्रसर्पतःक्रूरानागाभोगोरुकंधराः
शरीरप्रसारणं तद्वता देहेन अनुपचिते वृद्धिमप्राप्ते तत भोगक्रोधादियुक्तं ॥४६॥ अमुतः अमुष्मात् देहात् येकेशाः अहीयंत प्रच्युताः ते अहयो जाताः
प्रसर्पतः पादाद्यांगैर्विनैः प्रचलतो उष्मात् सर्पाः श्रुत एव अगान भवंतीति नागाः अतिवेगवंतः स्यर्थः ॥ भोगवतो जातत्वात् भोगेन फणेन उरुर्वि
स्तीर्णा कंधरा येषां सर्वे च ते ते क्रोधयोगात् क्रूराः ते षामवांतरजातिभेदः सर्पसिद्धांते प्रसिद्धः ॥४७॥

भा॰त॰ यदात्मानं मन्यमानो ऽभूत् तदा मनून् ससर्ज ॥४८॥ तेभ्यः स्वीयं पुरं पुरुषं पुरुषाकारं शरीरं देहं असृजत् तं दृष्ट्वा नाम्नमन् ॥४९॥ ते तस्य प्रकृतं सुकृतं तत्त्वमाहुः
७४ यस्मिन् सुकृते क्रियाः अग्निहोत्राद्याः प्रतिष्ठिताः सर्वे वयं साकं सह । अन्नं हविर्भागादि अदाम भक्षयामः हे ब्रह्मन् ॥५०॥ कार्यसृष्टि-
युक्त्वा ऋषीणां सृष्टिमाह तपसेति । विद्या उपासना । योगो ध्यानासनादिः सुसमाधिः ॥ वैराग्यैश्वर्यादियुक्तः । समाधिः तेन च युक्तः

स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः । तदा मनून् ससर्जान्ते मनसा लोकभावनान् ॥४८॥ तेभ्यः सो-
ऽसृजत्स्वीयं पुरं पुरुषमात्मवान् । तान् दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिं ॥४९॥ अहो एतज्जगत्स्रष्टः सु-
कृतं बत ते कृतं । प्रतिष्ठिताः क्रिया यस्मिन् साकमन्नमदाम हे ॥५०॥ तपसा विद्यया युक्तो योगेन सुसमाधिना
ऋषीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः ॥५१॥ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदादजः । यत्तत्समा-
धियोगर्द्धितपोविद्याविरक्तिमत् ॥५२॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे विंशतितमोऽध्यायः ॥ २० ॥ वि-
दुर उवाच । स्वायंभुवस्य च मनोर्वंशः परमसंमतः । कथ्यतां भगवन् यत्र मैथुनेनैधिरे प्रजाः ॥ १ ॥

हृषीकेशः स्ववशेन्द्रियः सन् ऋषिर्ब्रह्मा ऋषीन् प्रजाः ससर्ज ॥५१॥ किं तत् देहस्यांशमदादित्यत आह यदिति समाधिश्च योगर्द्धिश्च ऐश्वर्यं एभ्यः ७४
तपश्च विद्या च विरक्तिश्च विद्यंते यस्मिन् तत् ॥५२॥ इति टीकायां विंशः ॥ एकविंशे तपोविद्यान्वितेन कर्दमेन विलसिना कर्दमस्य मनोः सुतायाः विवा-
होऽत्र निरूप्यते । एधिरे एधां चक्रिरे ।

धर्ममहीं च यथा जुगुपतुः रक्षतुः तन्मे वदेति तृतीयेनान्वयः ॥ १ ॥ २ ॥ योगलक्षणो वीर्यं माहात्म्यं ... कतिधा वीर्यं ससर्ज कति प्रकारान् उत्पादयामासे-
त्यर्थः ॥ ४ ॥ मनोः कन्यामाकूतिं च प्रसूतिं च भार्यां लब्ध्वा यथा भूतानि ससर्ज तच्च वदेति चकारस्यार्थः ॥ ५ ॥ सहस्राणां समा दश दश सहस्राणि संवत्स-
रानित्यर्थः ॥ ६ ॥ ततस्तस्मिन् सप्रसन्ने क्रियायोगेन पूजाप्रकारेण हरिं प्रपेदे इति शेषः ॥ प्रपन्नः सोऽपि प्रसन्नः सोऽपि वरदानार्थं ॥ ७ ॥ शारेकवेद्यं यद्ब्रह्म तन्मयं वपुर्दधत्

प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै ॥ यथाधर्मं जुगुपतुः सप्तद्वीपवतीं महीं ॥ २ ॥ तस्य वै दुहिता ब्रह्मन् देवहूतीति विश्रुता ॥ पत्नी
प्रजापतेरुक्ता कर्दमस्य त्वयानघ ॥ ३ ॥ तस्यां स वै महायोगी युक्तायां योगलक्षणैः ॥ ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ॥ ४ ॥ रुचि-
र्यो भगवान् ब्रह्मन् दक्षो वा ब्रह्मणः सुतः ॥ यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीं ॥ ५ ॥ मैत्रेय उवाच ॥ प्रजाः सृजेति भगवान् क-
र्दमो ब्रह्मणोदितः ॥ सरस्वत्यां तपस्तेपे सहस्राणां समा दश ॥ ६ ॥ ततः समाधियुक्तेन क्रियायोगेन कर्दमः ॥ संप्रपेदे हरिं भक्त्या
प्रपन्नवरदाशुषं ॥ ७ ॥ तावत्प्रसन्नो भगवान् पुष्कराक्षः कृते युगे ॥ दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ॥ ८ ॥ स तं विरजमर्काभं सि-
तपद्मोत्पलस्रजं ॥ स्निग्धनीलालकव्रातवक्त्राब्जं विरजोंबरं ॥ ९ ॥ किरीटिनं कुंडलिनं शंखचक्रग[illegible]दाधरं ॥ श्वेतोत्पलक्रीडनकं म-
नःस्पर्शस्मितेक्षणं ॥ १० ॥ विन्यस्तचरणांभोजमंसदेशे गरुत्मतः ॥ दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकंधरं ॥ जातहर्षोऽपतन्मूर्ध्ना क्षि-

तं प्रत्यात्मानं दर्शयामास ॥ ९ ॥ स कर्दमस्तं खे अवस्थितं दृष्ट्वा मूर्ध्ना क्षितावपतत् ॥ सोऽलब्धमनोरथः ॥ गीर्भिस्त्वभ्यगृणात् प्रीतिस्वभावात्मा कृताञ्जलिः ॥
गीर्भिस्त्वभ्यगृणादिति वक्ष्यमाणेनान्वयः ॥ पद्मोत्पले दिनरात्रिविकासे ॥ सितानां पद्मानां उत्पलानां च स्रक् यस्य तं ॥ स्निग्धा नीला अलकास्तेषां व्रातो वक्त्राब्जे
यस्य ॥ ९ ॥ श्वेतोत्पलं क्रीडनकं यस्य ॥ मनस्पर्शं मनस्तोषं जनकं स्मितमीक्षणं च यस्य तं ॥ १० ॥ वक्षसि श्रीर्यस्य ॥ कौस्तुभः कंधरायां यस्य ॥ ११ ॥ प्रीतिरेव

स्वभावः स्वतः सिद्धो धर्मो यस्य तथाविध आह्लादनीयस्य ॥ १२ ॥

भा॰ त॰
७५

त्वाप्नुते परमानंदं धिगन्यवरकामुकं ॥ अथापि कृपणं मां गृहाणेति वरं शास्ततः वर्तते तिहर्षे हे ईड्य नोऽस्माभिः समग्रसत्त्वनिधेस्त्वद्दर्शनात् अ
क्ष्णोः सांसिद्ध्यं साफल्यं जुष्टं सेवितं ॥ त्वद्दर्शनमेव महाफलमित्युपपादयति ॥ यस्य तव दर्शनं सद्भिर्हेतुभिर्जन्मभिः सम्पादितं प्रकृष्टैर्जन्मभिः रू
ढयोगा योगिनोऽपि ॥ १२ ॥ एवं कामयमानानप्यहं विगर्हयन्नाह ये इति ॥ हे ईश ये निरयेऽपि स्युः तेषां कामानां लवाय त्वन्मायया नष्टबुद्धयः
तत्त्वं वा उपासते त्वं तेषां तानपि कामान् रासि ददासि ॥ १३ ॥ यः स कामात्रिदशानि ... होऽहमपि तादृश एवेत्याह ॥ तथेति गृहमेधे गृहाश्रमः तत्र धे

श्रीकृ॰ उ॰ जुष्टं बताद्याखिलसत्त्वराशेः सांसिद्ध्यमक्ष्णोस्तव दर्शनान्नः ॥ यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो
रूढयोगाः ॥ १२ ॥ ये मायया ते हतमेधसस्त्वत्पादारविंदं भवसिंधुपोतं ॥ उपासते कामलवाय तेषां रासीश कामान्निर
येऽपि ये स्युः ॥ १३ ॥ तथा स चाहं परिवोढुकामः समानशीलां गृहमेधधेनुं ॥ उपेयिवान्मूलमशेषमूलं दुराशयः काम
दुघाङ्घ्रिपस्य ॥ १४ ॥ प्रजापतेस्ते वचसाधीश तंत्या लोकः किलायं कामहतोऽनुबद्धः ॥ अहं च लोकानुगतो वहामि बलिं च शु

नुं त्रिवर्गदोग्ध्रीं भार्यां परिवोढुकामः परिणेतुमिच्छन् कामदुघाङ्घ्रिपस्य कल्पद्रुमस्य तव मूलमङ्घ्रिमुपेयिवान् उप क्लानिमिषाय तुभ्यं
गतोऽस्मि ॥ ननु कामाद्यर्थमन्यत्किमप्युपास्यतां न यतः अशेषस्य कृत्स्नार्थस्य मूलमेतदेव ॥ १४ ॥ ननु तर्हि मुमुक्षुरेव किं न भजसि अनधि
कारादित्याह ॥ हे अधीश यस्त्वं प्रजापतिः तस्य तव वचसा तंत्या अयं कामहतो लोकः पशुवद्बद्धः ॥ हे शुक्ल धर्ममूर्ते अहं च किल लोकानुगतः शम
शुक्लात्मनेऽपि बलिं हरामि वहामि कर्ममय्या त्वदाज्ञामनुवर्ते अनिमिषाय कालात्मने तदर्थं भार्यादिग्रहणमिति चकारस्यार्थः न केवलं लोकानु
गतो वहामि किं तु आज्ञाया पाकरणार्थमिति केचित् ॥ १५ ॥

७५

अनिमिषायातिश्च अनेन कालात्मकात् त्वत्तो भीतः कर्मकर्मीतन्त्रं। एतन्न भयं त्वद्भक्तानां नास्तीत्याह द्वाभ्यां। लोकान् कामाभिभूतान् तान् अनुसृतान्
पशूंश्च विवेकरहितान् पिशुनः कर्मजडान् मादृशान् हित्वा अनादृत्य एतत्व चरणात् रूपामातपत्रं श्रिताः तानेवाह। त्वद्गुणानां वारः कथा तदेव सीधुपीयूषं तस्मा
द्विस्मारकत्वात्। पीयूषं रुचिकरत्वात् तेन निर्वापिता विलापिता देहधर्माः क्षुत्पिपासादयो यैः एषामित्युत्तरेणान्वयः। १६। तवयत्रिनाभिकालच
क्रतत्जगदाच्छिद्य आकृष्य धावदपि एषां त्वद्भक्तानां मायुराच्छिद्य धावन्न भवति कथंभूतं अजरं उद्धतं भिन्नं अपरं रूपेव निमेषमणां भ्रमदितिवक्तव्ये श्रुति

लोकांश्च लोकादुद्गतान् पशूंश्च हित्वाश्रितास्ते चरणातपत्रं। परस्परं त्वद्गुणवादसीधुपीयूषनिर्वापितदेहधर्माः। १६। न ते
जराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व। षण्नेम्यनंतच्छदि यत्त्रिणाभि करालस्रोतो जगदाच्छिद्य धावत्। १७। एकः स्व
यं सन् जगतः सिसृक्षयाद्वितीययात्मन्नधियोगमायया। सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवान् स्वशक्तिभिः

भ्रमणशीलत्वात् उपचारेणाक्षभ्रमिरित्यभेदनिर्देशः अधिकमासेन सह त्रयोदशमासा आरा यस्य। त्रिशतं षष्टिश्चाहोरात्राः पर्वाणि यस्य। शतशो वि
भक्तोऽपि लवार्धः षड्ऋतवो नेमयो यस्य। अनंताः क्षणलवादयः छदाः पत्राणि पत्राकाराणि धाराः संति यस्य त्रीणि चातुर्मास्यानि नाभयः आधारभूतानि
वलानि यस्य। करालस्रोतः तीव्रवेगं। एतैर्विशेषणैरेवं संवत्सरात्मकं चक्रं उन्नमिति द्रष्टव्यं। १७। ननु निरुपाधिसुदर्शनं मा किं यावद्दैतथापि
मायया विश्वसृष्ट्यादिकर्तृत्वात् त्वमेव याच्य इत्याह। त्वयमेक एव सन्नपि आत्मन्यधिकृतया योगमायया हेतुनायाः स्वीकृताः शक्तयः सत्वाद्याः
ताभिः। अदो विश्वं। स्वव्यतिरिक्तसाधनानपेक्षत्वे दृष्टान्तः यथेति। १८।

भा० तृ०
७६

यद्यपि मायिकत्वात् भक्तेभ्यो विषयसुखं दत्तं तेन तुष्यसि तथाप्यस्मदभिप्रायानुसारेण तत्संपादयेत्याह नैतदिति हे अधीश नोऽस्माकं भजतां भूतसूक्ष्मरूप-
परं शब्दादिविषयसुखं मायया तनुषे विस्तारयसीति यत् एतत्तव यद्यपीप्सितं न भवति तथाप्यस्मदनुग्रहायास्त्विति क्रमेण त्वयापाकरणं नेतरमेवापवर्गाख्य-
भवत्वित्यर्थः ॥ यर्हि यतः मायया परिच्छिन्नस्वलसत्या तुलस्या युक्तः त्वं विलक्षितोऽसि एवंभूतस्य तव दर्शनं यतो भुक्तिमुक्तिप्रदमित्यर्थः ॥ १९ ॥ तं त्वा त्वा
भुक्तिमुक्तिप्रदं नमामि ॥ मुक्तिदत्वे हेतुः अनुभूत्यात्मज्ञानेनोपरतः क्रियार्थः कर्मफलभोगो यस्मिन् भोगदत्वे हेतुः स्वमायया आवर्तितलोकतंत्रं विश्वो

नैतत्कृताधीशपदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मं अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः ॥ १९ ॥ तं त्वानु-
भूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतंत्रं ॥ नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षं ॥ २० ॥ ऋषिरुवाच ॥ इत्यव्यली-
कं प्रणुतोऽब्जनाभस्तमाबभाषे वचसामृतेन ॥ सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः ॥ २१ ॥ श्रीभगवानुवाच
विदित्वा तव चैत्यं मे पुरैव समयोजि तत् ॥ यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः ॥ २२ ॥ न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्ह-
णं ॥ भवद्विधेष्वतितरां मयि संगृभितात्मनां ॥ २३ ॥ प्रजापतिसुतः सम्राण्मनुर्विख्यातमंगलः ॥ ब्रह्मावर्तं योऽधिवसन् शास्ति स-
प्तार्णवां महीं ॥ २४ ॥ स चेह विप्र राजर्षिर्महिष्या शतरूपया ॥ आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः ॥ २५ ॥

प्रकरणार्थेन अतः सकामैर्निष्कामैश्च नमनीयं पादसरोजयुगं यस्य तं तत्र अल्पीयसि सकामेऽपि भजने वा कामान्वर्षतीति तथा तं ॥ २० ॥ अमृतेन सुखकरेण
प्रेमस्मितान्वितोद्वीक्षणेन विभ्रमंती भ्रूर्यस्य ॥ २१ ॥ चैत्यं हार्दं भावं मे मया सम्यग्योजितं घटितं ॥ यदर्थमेवाहं समर्चितः तत् ॥ २२ ॥ मयि संगृभितः संगृहीत एकाग्रीकृ-
त आत्मा चित्तं यैस्तेषामस्मदर्हणं मदाराधनं अतितरां सर्वथा मृषा निष्फलं न स्यात् ॥ २३ ॥ विख्यातं मंगलं शुभं यस्य सः सप्तवारादिलक्षणां यस्य ॥ २४ ॥ हे विप्र महिष्या
सह ॥ २५ ॥

राम
७६

२६ यत्र यस्यां भार्यायां समाहितं अभिसंधानेन स्थितं नृपवधू राजकन्या २७ ते वीर्यं आत्मनि भृतं धृतं या प्रसविष्यति सा भजिष्यति वीर्ये वीर्यप्रसू-
तासु कन्यासु ऋषय आत्मनः पुत्रानाधास्यंति २८ निदेशं आज्ञां उशत्तमः शुद्धसत्वः तीर्थे पात्रे तेन दानेन लब्धे ते मयि समर्पितं सर्वं कर्मफलं
इत्यर्थः २९ मां द्रक्ष्यसे दयां कृत्वा हे नाभयं दत्वा मयि आत्मानं जगत्सह एकीभूतं द्रक्ष्यसि ३० त्वद्वीर्येण सह देवहूत्यां अवतीर्येति शेषः ३१

आत्मजामसितापांगीं वयःशीलगुणान्वितां मृगयंतीं पतिं दास्यत्यनुरूपाय ते प्रभो २६ समाहितं ते हृदयं यत्रेमान् परिवत्सरान् सा
त्वां ब्रह्मन् नृपवधूः काममाशु भजिष्यति २७ या त आत्मभृतं वीर्यं नवधा प्रसविष्यति वीर्ये त्वदीये ऋषय आधास्यंत्यंजसात्मनः
२८ त्वं च सम्यगनुष्ठाय निदेशं म उशत्तमः मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे २९ कृत्वा दयां च जीवेषु दत्वा चाभयमा-
त्मवान् मय्यात्मानं सह जगद्द्रक्ष्यस्यात्मनि चापि मां ३० सहाहं स्वांशकलया त्वद्वीर्येण महामुने तव क्षेत्रे देवहूत्यां प्रणेष्ये
तत्वसंहितां ३१ मैत्रेय उवाच एवं तमनुभाष्याथ भगवान् प्रत्यगक्षजः जगाम बिंदुसरसः सरस्वत्या परिश्रितात् ३२ निरीक्षतस्त-
स्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः आकर्णयन् पत्ररथेंद्रपक्षैरुच्चारितं स्तोममुदीर्णसाम ३३ अथ संप्रस्थिते शुक्ले कर्दमो भ-

त्यग्भूतेष्वक्षेषु जायते आविर्भवतीति प्रत्यगक्षजः सरस्वत्या नद्या परिश्रितात् परिवेष्टितात् । भगवान् ऋषिः आस्ते स्म बिंदुसरसि तं कालं प्रतिपालयन् ३४
त ३२ अशेषैस्तपोमंत्रादिसिद्धेश्वरैः अभिष्टुतः सिद्धमार्गः वैकुंठमार्गो यस्य यद्वा अशेषसिद्धेश्वराभिष्टुतश्चासौ सिद्धैर्मृग्यत इति सिद्धमार्गश्च स यथा ययौ पत्रर-
थेंद्रो गरुडः तस्य पक्षैः उदीर्णसामभिर्व्यक्तं सामाकर्णयन् । बृहद्रथंतरे पक्षाविति श्रुतेः उच्चारितं स्तोमं च सामाधारभूतानां ऋचां समुदायं श्रावयन् स्तोमं आत्मेति श्रुतेः
समासपाठे उच्चारितः स्तोमः स्तोत्रीयसमुदायो यस्य साम्न इति ३३ तं कालं परावरं तु कन्याप्रतीक्षमाणः ॥ ३४ ॥

शातकौंभाः सौवर्णाः परिकरा यस्मिन् ॥ तं रथमास्थाय दुहितरं चारोप्य वनान्वेषणार्थं पर्यटन् ॥ ३६ ॥ हे सुधन्वन् हे विदुर यदाहः ॥ ३७ ॥ तत्प्रवेशमात्रेण परमा-
नंदं प्राप्नुवंतीति दर्शयितुं आश्रमं वर्णयति यस्मिन्नित्यादिभिः सप्तभिः श्लोकैः ॥ प्रपन्ने कर्दमे ॥ ३८ ॥ शिवमारोग्यप्रदममृतवत्स्वादुजलं यस्मिन् ॥ ३९ ॥ कूज-
न्तः पुण्या मृगाः द्विजाश्च येषु तैः पुण्यद्रुमलतानां जालैः सम्यक् वेष्टितं ॥ ४० ॥ घुष्टं नादितं ॥ मत्तभ्रमराणां विभ्रमः विनोदो यस्मिन् ॥ मत्ता बर्हिण एव नटा-

मनुः स्पंदनमास्थाय शातकौंभपरिच्छदं ॥ आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीं ॥ ३६ ॥ तस्मिन्सुधन्वन्नहनि भगवान्यत्समादिशत
उपायादाश्रमपदं मुनेः शांतव्रतस्य तत् ॥ ३७ ॥ यस्मिन्भगवतो नेत्रान्न्यपतन्नश्रुबिंदवः ॥ कृपया संपरीतस्य प्रपन्नेऽर्पितया भृशं ॥ ३८
तद्वै बिंदुसरो नाम सरस्वत्या परिप्लुतं ॥ पुण्यं शिवामृतजलं महर्षिगणसेवितं ॥ ३९ ॥ पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः ॥ सर्व-
र्तुफलपुष्पाढ्यं वनराजिश्रियान्वितं ॥ ४० ॥ मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमं ॥ मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलं ॥ ४१ ॥ कदंबचं-
पकाशोककरंजबकुलासनैः ॥ कुंदमंदारकुटजैश्चूतपोतैरलंकृतं ॥ ४२ ॥ कारंडवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः ॥ सारसैश्चक्रवाकै-
श्चकोरैर्वल्गुकूजितं ॥ ४३ ॥ तथैव हरिणैः क्रोडैः श्वाविद्गवयकुंजरैः ॥ गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतं ॥ ४४

स्तेषां आटोपो नृत्यसंभ्रमो यस्मिन् आह्वयंतः मिथो मत्ताः कोकिला यस्मिन् ॥ ४१ ॥ कदंबादिभिर्वृक्षैरलंकृतं ॥ ४२ ॥ कारंडवादिभिः पक्षिभिः वल्गु यथा
तथा कूजितं ॥ ४३ ॥ हरिणादिभिर्वृतं ॥ तत्र क्रोडः सूकरः ॥ श्वावित् शल्लकः ॥ मर्का मर्कटाः ॥ तद्विशेषा गोपुच्छाः हरिर्वानरः सिंहो वा ॥ नाभिः
कस्तूरीमृगाः ॥ ४४

हुतः हुताशनो ब्रह्मचारिणो योगयोगेन ॥ ४५ ॥ उग्रोग्रकुम्योगोपयस्य तेन वपुषा विद्योतमानं ॥ ४६ ॥ तस्य भगवतो व्याहृतं भाषणमेव अमृतकला अमृ
तमयस्य चंद्रस्य कला तन्मयं पीयूषं तस्य श्रवणेन च नातिक्षाम ॥ तपसा कृशांतं तमप्यकृशं ॥ ४७ ॥ प्रांशुमुन्नतं ॥ उपसंहृत्य समीपं गत्वा मलिन
ददर्शेति पूर्वेण क्रिया ॥ अर्थितेन अनेनेति अर्हणां महार्हरत्नेन तत अर्हसंस्कृतं अनिर्णिक्तं यथा मलिनं दृश्यते तद्वत् ॥ ४८ ॥ उरजं पर्णशालां प्राप्य ॥ इतरः पा
रसमीपे प्रणतं ॥ आशीर्भिरभिनन्द्य सपर्यया पूजया प्रत्यग्रहीत् स्वीकृतवान् ॥ ४९ ॥ ते वक्रमणपर्यरने हि यस्मात् ॥ ५० ॥ मत्तस्थे विद्वस्प्रणमति ॥ य

प्रविश्य तत्तीर्थवरं मादिराजः महात्मजः । ददर्श मुनिमासीनं तस्मिन् हुतहुताशनः ॥ ४५ ॥ विद्योतमानं वपुषा तपसा उग्रयुजा चिरं ॥ ४६ ॥
नातितृप्तं भगवतः स्निग्धापांगावलोकनात् । तस्याहृतामृतकलापीयूषश्रवणेन च ॥ ४७ ॥ प्रांशुपद्मपलाशाक्षं जटिलं चीरवाससं ।
उपसंहृत्य मलिनं यथार्हणमसंस्कृतं ॥ ४८ ॥ अथो रजःपापायान्तं दूरे चं प्रणतं पुरः । सपर्यया पर्यग्रहीत् प्रतिनद्या उरूपया ॥ गृहीता
र्हणमासीनं सपदि प्रणयानुवृत्तिः । स्मरन् भगवदादेशमित्याह स्म हृणया गिरा ॥ ४९ ॥ नूनं वक्रमणींद्रेव सतां हेरक्षणाय ते वधाय वा
सतां यत्त्वं हरेः शक्तिर्हि पालिनी ॥ ५० ॥ योकैकद्वंगीड्वापत्नां यमधर्मप्रचेतसां । रूपाणि स्थानमाधत्से तस्मै शुक्राय ते नमः ॥ ५१ ॥ न यदा र

इति स्थाने तन्न त्वकार्यावसरे शुक्राय विष्णवे ॥ ५१ ॥ न यदेति पंचानामप्यमर्थः यमाख्याय जैत्रमालिगणार्पितं ॥ विसृज्य यद्वदंडकोदंडोरथेन त्रासमयन्नेघारे
यद्यपि धर्मरक्षार्थं सर्वतः पर्यटतस्तव धर्मसंसारस्यागमनं संभवति ॥ तथापि विशेषकार्यं वेद हि तत्कथ्यतामिति जैत्रं जयपूरं ॥ मालिगणाः अर्पिता
यस्मिन् तं रथमाहत्य त्वं यदा भुवो मंडलं न पर्यटसि तदा से तव विजेयोऽस्ति रत्रिति अयाणामदुपः ॥ विसृज जैत्रारं ऊर्ध्व तव दंडकोदंडधनुर्यस्य ॥ ५२ ॥

भा॰ टी॰
७८

त्वं सैन्यस्य वरोणैः कृणं संहरितं ॥ ५२ ॥ वर्णाश्रमाणां निबंधनं यैः कृतस्तु हो ॥ ५५ ॥ निरंकुशैर्नृभिर्निर्मिन्नमर्तैः शायाने निस्थिते ॥ ५५ ॥ निर्व्वली
केन संहर्षेणाप्रतिपद्यामहे त्वीकुर्महे ॥ ५६ ॥ तत्पि . क राः हाविशेकर्दमायाराघ्याः दिशं हि विस्तुना ॥ मत्तउहितं देवहूति मित्सुपव
र्तेपते ॥ १ ॥ एवमाविष्कृत आशेषाणां गुणानां कर्मणां च उरयउत्कर्षायस्स सम्राट् मनुः सव्रीड इव वह्निकीर्त्तिश्रवणात प्रत्याख्यानशंकया वा

त्वं सैन्य वराणक्रुणां वेपयन्मंडलं भुवः ॥ विकर्षन्बृहतीं सेनां पर्यटस्यंशुमानिव ॥ ५३ ॥ तेरेव सेतवः सर्वे वर्णाश्रमनिबंधनाः
भगवद्रचिता राजन् भिद्येरन्बत दस्युभिः ॥ ५४ ॥ अधर्मश्च समेधेत लोलुपैर्व्यंकुशैर्नृभिः ॥ शयाने त्वयि लोकोयं दस्युग्रस्तो वि
नंक्ष्यति ॥ ५५ ॥ अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः ॥ तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ॥ ५६ ॥ इति श्री भगवते महापुराणे
तृतीयस्कंधे एकविंशतितमोऽध्यायः ॥ २१ ॥ मैत्रेय उवाच ॥ एवमाविष्कृताशेषगुणकर्मोदयो मुनिं ॥ सव्रीड इव तं सम्राडुपारतमुवाच ह ॥
मनुरुवाच ॥ ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया ॥ छंदोमयस्तपोविद्यायोगयुक्तानलंपटान् ॥ २ ॥ तत्त्राणायासृजच्चास्मान्
दोःसहस्रात्सहस्रपात् ॥ हृदयं तस्य हि ब्रह्म क्षत्रमंगं प्रचक्षते ॥ ३ ॥ अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः ॥ रक्षति स्माव्ययो देवः स यः

तं मुनिमुवाच उपारतं निरवृत्तिनिरतं ॥ १ ॥ मरीयाकन्यात्वयापरिलेयेतिविज्ञापयिष्यन्युष्मस्मत्संबंधं प्रशस्तावरीश्वरेणपूर्वमेव ॥ सदसदात्मकः ॥ ४
ब्रह्मेत्यादि ब्रह्मेति सार्धैर्भ्यां ॥ आत्मनः परीप्सया पर्याप्तमिच्छया ॥ छंदोमयः स्वात्मनः पर्याप्तिः पालनं वेदप्रवर्त्तनेन तस्येच्छया ॥ ब्रह्मा ब्राह्मणान् तत्त्रा
णाय ब्राह्मणपालनाय ब्रह्म ब्राह्मणजातिः ॥ ३ ॥ एवं सदेव एव रक्षतीत्याह ॥ कोसौ यः सदसदात्मकः सर्वात्मकः तथापि अव्ययो निर्विकारः ॥ ४ ॥

राम
७८

तं वित्तापयितुमेव तद्दर्शनादिकमभिनंदति तन्वेति त्रिभिः ॥ ५ ॥ ६ ॥ अनुग्रहो ह्युशात्मनादिकृपएव ॥ उशतीः उशन्त्यः ७ ॥ वित्तापयति सभवानिति
सप्तभिः ॥ उदितः स्नेहेन परिक्लिष्ट आत्मा यस्य ॥ श्रावितं विज्ञापनं ॥ ८ ॥ प्रियव्रतोत्तानपदोः स्वसेति त्रिकाकारणं शंकानिरस्ता ॥ ममसुतेति
त्वत्रकन्यात्तवयोग्यतिदर्शितं ॥ ९ ॥ १० ॥ प्रतीच्छ स्वीकुरु ॥ ११ ॥ उद्यतस्य स्वितः प्राप्तस्य विषयस्य प्रतिवादः प्रत्याख्यानं ॥ १२ ॥ कीनाशकृपणां

तव संदर्शनादेव छिन्ना मे सर्वसंशयाः ॥ यत्स्वयं भगवान्स्त्रीत्याधर्ममाहरिरक्षिषोः ॥ ५ ॥ दिष्ट्या मे भगवान्दृष्टो दुर्दर्शो योः कृतात्मनां
दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवं ॥ ६ ॥ दिष्ट्या त्वयानुशिष्टोहं कृतश्चानुग्रहो महान् ॥ अपावृतैः कर्णरंध्रैर्जुष्टा दिष्ट्योशती
गिरः ॥ ७ ॥ स भवानुदितस्नेहपरिक्लिष्टात्मनो मम ॥ श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने ॥ ८ ॥ प्रियव्रतोत्तानपदोः स्वसेयं दुहि
ता मम ॥ अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः ॥ ९ ॥ यदा तु भवतः शीलश्रुतरूपवयोगुणान् ॥ अशृणोन्नारदादेषा त्वय्या
सीत्कृतनिश्चया ॥ १० ॥ तत्प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपहृतां मया ॥ सर्वात्मनानुरूपां ते गृहमेधेषु कर्मसु ॥ ११ ॥ उद्यतस्य हि कामस्य प्र
तिवादो न शस्यते ॥ अपि निर्मुक्तसंगस्य कामरक्तस्य किं पुनः ॥ १२ ॥ य उद्यतमनादृत्य कीनाशमभियाचते ॥ क्षीयते तद्यशः स्फीतं मा
नश्चावज्ञया हतः ॥ १३ ॥ अहं त्वाशृणवं विद्वन्विवाहार्थं समुद्यतं ॥ अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे ॥ १४ ॥ ऋ ॥ वि ॥ ह ॥ वा ॥ च ॥ वाद
मुद्वोढुकामोहमप्रत्ता च तवात्मजा ॥ आवयोरनुरूपोसावाद्यो वैवाहिको विधिः ॥ १५ ॥

अवज्ञया पराभवमानेन ॥ १३ ॥ मस्य समावधिब्रह्मचर्यस्य उपकुर्वाणः प्रत्तां मया दत्तां ॥ १४ ॥ अप्रत्ता चेति मय्येव कृतनिश्चयत्वात् कस्मैचित प्रति श्रुता च न भ
वतीत्यर्थः ॥ आद्यः प्रथमः ॥ ततः पूर्वविवाहाभावात् मुख्य इति वा ॥ १५ ॥

भूयात् भवेत् ॥ प्रतीतः गृहस्थाश्रमित्वे सौभगत्वाय गृहस्थाश्रमयापत्येत्यादि मंत्रप्रसिद्धः स्वयांगकांत्यैव श्रियं भूषणानि दिशो भा ॥ १६ ॥ यां विलोक्यान्यपतन्
संमोहेन विमूढं व्याकुलं चेतो यस्य ॥ क्वणदंघ्रिशोभां क्वणद्भ्यां नूपुराभ्यां शोभा यस्याः ॥ १७ ॥ तां ललनानां ललामं भूषणं प्रार्थयंतीं असेविते श्रियश्चरणौ यैस्तैरदृष्टां
उत्तमश्लोकप्राप्तामुच्चपदः उत्तानपादस्य स्वसारं अभियातां स्वयं प्राप्तां ॥ १८ ॥ भजिष्ये स्वीकरिष्ये यावदपत्योत्पत्तिर्भावत्यावत्कालं हि समयः ॥ ततः परं सन्न्यास इति भाषा
धः समयः ॥ तमेवाह ॥ यावत् आत्मनो मम अचते जो गर्भं विभृयात् ॥ यद्वा मम आत्मनो देहात् अनंतं तेजो वीर्यं विभृयादिति ॥ अतः पारमहंस्य

कामः स भूयान्नरदेव तेस्याः पुत्र्याः समाम्नायविधौ प्रतीतः कएव ते तनयां नाद्रियेत स्वयैव कांत्या क्षिपतीमिव श्रियं ॥ १६ ॥ यां
हर्म्यपृष्ठे क्वणदंघ्रिशोभां विक्रीडतीं कंदुकविह्वलाक्षीं विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः ॥ १७ ॥ तां प्रार्थ
यंतीं ललनाललाममसेवितश्रीचरणैरदृष्टां ॥ वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोभियातां ॥ १८ ॥ अतो भजिष्ये समये
न साध्वीं यावत्तेजो विभृयादात्मनो मे ॥ अतो धर्मान्पारमहंस्यमुख्यान् शुक्लप्रोक्तान्बहुमन्येविहिंस्रान् ॥ १९ ॥ यतोभवद्विश्वमिदं
विचित्रं संस्थास्यते यत्र च वावतिष्ठते ॥ प्रजापतीनां पतिरेष मह्यं परं प्रमाणं भगवाननंतः ॥ २० ॥ मैत्रेय उवाच ॥ स उग्रधन्वन्नियदे
वाबभाषे आसीच्च तूष्णीमरविंदनाभं ॥ धियोपगृह्णन्स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः ॥ २१ ॥

नंतास्मिन्नुच्यमानमुख्यान् शुक्लेन विष्णुना साक्षात् प्रकर्षेण उक्तान् ॥ अविहिंस्रान् हिंसारहितान् शमादीन् बहु यथा भवति एवं मन्ये ध्येयान्मन्ये ॥ १९ ॥ न तु
तव पितुः प्रजापतेराज्ञायैव न सन्न्यासे ॥ तत्राह यत इति संस्थास्यते लयं यास्यति वा वतिष्ठते वा अर्थक्रमो याथापाकरणानंतरं सन्न्यास एव मा
ह्यानां भागवतानां स्वार्थः ॥ २० ॥ हे उग्रधन्वन् लुलुभे उत्तमेन स्मितेन प्रलोभ्यते स्म ॥ यद्वा मुखेन प्रलोभितवान् ॥ २१ ॥

तमन्तुः ऋतुऋतुनंतरमहिष्याश्च अवस्थितं निश्चयं ज्ञात्वा ॥ ११ ॥ पारिबर्हान् विवाहकाले प्रदेयान् भूषाः भूषणानि च वासांसि परिच्छदान् गृहोप
करणानि च ॥ १३ ॥ पत्न्या प्रदत्ता सदृक्षाय सदृक्षाय गता व्यथा चिंता यस्य ॥ श्रीत्वं क्वेनोन्मथितः क्षुभितः आशयो यस्य ॥ १४ ॥ तस्या विरहं
सोढुं हे अंब हे वत्से इति ब्रुवन् संधिरार्षः ॥ शिखाः केशान् आसिंचन् ॥ १५ ॥ ई ॥ अभिषिक्तललितायाः उभयोः हृदोः धमोः शोभनतरयोः ॥ ११ ॥ अपि

सोऽनुज्ञात्वा व्यवस्थितं महिष्या दुहितुः स्फुटं ॥ तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः ॥ १२ ॥ शतरूपा महाराज्ञी पारिबर्हान्महाधना
न् ॥ दंपत्योः पर्यदात्प्रीत्या भूषावासः परिच्छदान् ॥ १३ ॥ प्रत्तां दुहितरं सम्राट् सदृक्षाय गतव्यथः ॥ उपगुह्य च बाहुभ्यामौत्कंठ्योन्म
थिताशयः ॥ १४ ॥ अशक्नुवंस्तद्विरहं मुंचन् बाष्पकलां मुहुः ॥ आसिंचदंब वत्सेति नेत्रोदैर्दुहितुः शिखाः ॥ १५ ॥ आमंत्र्य तं मुनिवरं
मनुज्ञातः सहानुगः ॥ प्रत्यस्थाद्रथमारुह्य सभार्यः स्वपुरं नृपः ॥ १६ ॥ उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः ॥ ऋषीणामुप
शांतानां पश्यन्नाश्रमसंपदः ॥ १७ ॥ तमायांतमभिप्रेत्य ब्रह्मावर्तात्प्रजाः पतिं ॥ गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः ॥ १८ ॥
बर्हिष्मती नाम पुरी सर्वसंपत्समन्विता ॥ न्यपतन्यत्र रोमाणि यज्ञस्यांगं विधुन्वतः ॥ १९ ॥ कुशाः काशास्त एवासन् शश्वद्धरितवर्च

सोत्यं ज्ञात्वा ब्रह्मावर्तं देशात्प्रजाः पतिं प्रति उज्जग्मुः ॥ १८ ॥ कोसौ ब्रह्मावर्तं देशस्य पेक्षायामा सः ॥ अभयोर्येः यज्ञभागमयं यज्ञघ्नान् यज्ञमीजिरे ॥ २० ॥
ह ॥ एवं बर्हिष्मती नाम पुरीति समाविष्टत्व यत्र यज्ञस्य यज्ञवराहस्य रोमाणि न्यपतन् निपतितानि पतितानि सर्वं च संबध्यते ॥ १९ ॥ बर्हिष्मती नाम निहितानि च वर
यज्ञमाहेशस्य श्रेष्ठमाहहनाभ्यां ॥ कुशाः काशाश्चासन् ॥ शश्वत् नित्यं हरितं वर्चो वर्णो येषां यज्ञघ्नान् राक्षसादीन् पराभवं नीत्वा यज्ञविष्णुं ॥ २० ॥

भा०त
८०

यत्तद्यज्ञपुरुषं विदुः ॥ यत इति ॥ यत्राऽयजत भुवं स्थानं लब्ध्वेति तत्र यत्प्रयातं लब्धवानुपलभ्यमित्यर्थः यतो लब्धवान् तं यज्ञपुरुषं इति वा स्वर्गादपि भूमिः श्रेष्ठा तत्रापि तत्स्थानं श्रेष्ठमित्युक्तं भवति ३१ ॥ प्रस्तुतमाह यामिति ॥ बर्हिष्मतीनाम पुरीं समावसत पूर्वं यस्यामुषितः तस्यां निर्विश्य भवनं प्रविश्य सन् भोगान् बुभुजे इत्यन्वयः ॥ अन्येषां धर्मादीनामविरोधेन ३२ ॥ प्रत्यूषेष्वनुबद्धेन ॥ संगीयमाना सत्कीर्त्तिर्यस्य तथाविधः सन् हरेरेव कथाः

कुशकाशमयं बर्हिरास्तीर्य भगवान्मनुः ॥ अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवं ३१ ॥ बर्हिष्मतीनाम विभुर्या निर्विश्य समावसत ॥ तस्यां प्रविष्टो भवनं तापत्रयविनाशनं ॥ सभार्यः सप्रजः कामान् बुभुजेऽन्याविरोधतः ॥ ३२ ॥ संगीयमानसत्कीर्त्तिः सस्त्रीभिः सुरगायकैः ॥ प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन् हरेः कथाः ॥ ३३ ॥ निष्णातं योगमायासु मुनिं स्वायंभुवं मनुं ॥ यदाभ्रंशयितुं भोगा न शेकुर्भगवत्परं ॥ ३४ ॥ अयातयामास्तस्यासन् यामाः स्वांतरयापनाः ॥ शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥ ३५ ॥ स एवं स्वान्तरं निन्ये युगानामेकसप्तति ॥ वासुदेवप्रसंगेन परिभूतगतित्रयः ॥ ३६ ॥

शृण्वन्नु भोगान् बुभुजे ३३ योगमायासु ऐहिकभोगरचनासु पद्यतः आभ्रंशयितुं अपि भवितुं ३४ अतः यातो यामो यस्य पदार्थस्यान्नस्य तद्यातयामं भवति यातयाममुच्यते अयातयामाः अगतसाराः आसन् ॥ स्वांतरं स्वीयमन्वंतरं यापयंति नयंतीति येयामाः कालावयवाः कुर्वतः स्ववाक्यैरुपनिवध्नतः ३५ परिभूतं गतित्रयं जाग्रदादि सात्विकादि वा येन ॥ ३६ ॥

एम
८०

दिव्या ह्यांतरिक्षाः ॥ मानुषाः शान्तुभमवाः ॥ भौतिकाः शीतोष्णादिसंभवाः वेद्यास्तेविदुः ॥ ७ ॥ तस्य महात्म्यातिशयमाह यदति ॥ नृणां साधा
रणधर्मान् ॥ २८ ॥ तस्यापरपत्यं देवहूतिः तस्योदयं प्रभावं ॥ २९ ॥ इति श्री वि द्वावि ॥ त्रयोविंशे तपोयोगनिर्मिते सर्वसंपदि ॥ विमाने काप
गे विज्ञातयोरतिहृद्दीयते ॥ १ ॥ आस्थितगमनेकातेशाति ॥ २ ॥ रंभंकपरस्त्रद्वेनिबिद्धावरणे ॥ तेजीयांसमस्पतितेजोह्विनं ॥ ३ ॥ देवाद्गरीयसः

शारीरमानसादिव्यावैद्यास्तेयेवमानुषाः भौतिकाश्च कथं ते शावाधं तेहरीसंश्रयं ॥ २७ ॥ यः श्रेष्ठोऽनिमिः प्राह धर्मान्नानाविधान्
सुधमान् ॥ नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ॥ २८ ॥ एतन्मे आदिराजस्य मनोश्चरितमद्भुतं ॥ वर्णितं वर्णनीयस्य तदपत्यो
दयं शृणु ॥ २९ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे द्वाविंशतितमोऽध्यायः ॥ मैत्रेय उवाच ॥ पितृभ्यां प्रस्थिते साध्वी पतिमि
गितकोविदा ॥ नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुं ॥ १ ॥ विश्रंभेणात्मशौचेन गौरवेण दमेन च ॥ शुश्रूषया सौहृदेन वाचा
मधुरया च भोः ॥ २ ॥ विसृज्य कामं दंभं च द्वेषं लोभमघं मदं ॥ अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् ॥ ३ ॥ स वै देवर्षिवर्यस्तां मान
वीं समनुव्रतां ॥ दैवाद्गरीयसः पत्युराशासानां महाशिषः ॥ ४ ॥ कालेन भूयसा क्षामां कर्शितां व्रतचर्यया ॥ प्रेमगद्गदया वाचा पीडि
तः कृपयाब्रवीत् ॥ ५ ॥ तुष्टोऽहमद्य तव मानवि मानदायाः शुश्रूषया परया च भक्त्या ॥ यो देहिनामयमतीव सुहृत्स देहो ना

देवाद्पि गुरुतरात् ॥ देवमप्यन्यथा कर्तुं समर्थादित्यर्थः ॥ ४ ॥ व्रतचर्यया कर्शितां तत्रापि भूयसा कालेनातितिक्षा वेक्षितः संभावितः कृपितं मर्य्येद
मामित्यर्थः ॥ ५ ॥ हे हृल्लिखियः मर्य्येकृपयितं नावेक्षितः न गणितः संभावितः आत्मनोऽपि मत्तो वा सम्यक्यात्वपेक्षित इत्यर्थः ॥ ६ ॥

तपश्च समाधिश्च विद्या उपासना ताभिर्युक्त आत्मयोगः चित्तैकाग्र्यं तेन विजिताः प्राप्ताः भगवत्प्रसादाः॥ दिव्या भोगाः तानेव ते त्वमवरुद्धान् त्व
यापि वशीकृतान् प्रपश्य॥ ते दिव्यां दृष्टिं वितरामि यया द्रष्टुं शक्ष्यसि॥ ७॥ अन्ये पुनर्भोगाः किं न किमपि॥ अतितुच्छा इत्यर्थः॥ तत्र हेतुः॥ भग
वत उरुक्रमस्य भ्रुवोर्जृंभः तस्या उद्विजृंभः वक्रीभावस्तेन विभ्रंशिता अर्थरचना मनोरथा येषु निजधर्मेण पातिव्रत्येन दुह्यंत इति तथा तान्॥ दुर

येमे स्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसादाः॥ तानेव ते मदनुसेवनयावरु
द्धान् दृष्टिं प्रपश्य वितराम्यभयानशोकान्॥ ७॥ अन्ये पुनर्भगवतो भ्रुव उद्विजृंभविभ्रंशितार्थरचनाः
किमुरुक्रमस्य सिद्धासि भुंक्ष्व विभवान्निजधर्मदोहान् दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः॥ ८॥ एवं ब्रु
वाणमबलाखिलयोगमायाविद्याविचक्षणमवेक्ष्य गताधिरासीत्॥ संप्रश्रयप्रणयविह्वलया गिरे
षद्व्रीडावलोकविलसद्धसिताननाह॥ ९॥

धिगान् दुःप्रापान्॥ नृपा वयमिति या विक्रिया अहंकारस्तद्रोगविकृतधियः ताभिः॥ ८॥ अखिला योगमाया च विद्या च तत्र उपासना ताभ्यां विचक्ष
णं निपुणमेवं ब्रुवाणं पतिमवेक्ष्य गताधिः निश्चिंता जाता॥ संप्रश्रयो विनयः प्रणयः प्रेम ताभ्यां विह्वलया गद्गदया गिरा॥ ईषद्व्रीडासहि
तो यो ऽवलोकस्तेन विलसद्धसितमाननं यस्याः सा आह जगाद॥ ९॥

वतेति हर्षे द्विजवृष द्विजश्रेष्ठ ॥ हे भर्त्तः त्वयि एतत्सर्वं राद्धं सिद्धमेवेतदहमवैमि जानामि किंतु यत्ते त्वया समयोभिहितः स तावद्भूयात् ॥ तत्र हरि तिगर्भं संभवमाअपर्यंतरस्त्यर्थः यस्मात् गरीयसि श्रेष्ठे भर्त्तरि हे तद्भूते स्त्रीणां प्रसवो गुणाः ॥ महानुलाभः ॥ सत्पात्रपाठगा ॥ यत्ति पत्यासति सतीनां यतो गुणा प्रसवः गुणाविल्लायै भवति श्रुतः पुत्रोत्पत्या ममगुणाविल्लारे जाते पश्चात्स्वेडन्नो भवतीति भावः ॥१०॥ अंगसंगार्थं व प्रथ मनिति कर्त्तव्यतां संपादयेति आह ॥ हे ईश तत्र अंगसंग इति कर्त्तव्यं साधनं ॥ यथोपदेशं कामशास्त्रोपदेशात् विगाउपरिज्ञ सज्जानीहि ॥ उपक्रम

देवहूतिरुवाच ॥ राद्धं वत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्त्तः ॥ यस्तेभ्यधायि समयः सकृदंगसंगो भूयाद्गरीयसि गुणः प्रसवः सतीनां ॥१०॥ तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैष मे कर्शितोऽतिरिरंसयात्मा ॥ सिद्ध्येत ते कृतमनोभवधर्षितायाः दीनस्तदीश भवनं सदृशं विचक्ष्व ॥११॥ मैत्रेय उवाच ॥ प्रियायाः प्रियमन्विच्छन् कर्दमो योगमास्थितः ॥ विमानं कामगं क्षत्तः तर्ह्येवाविरचीकरत् ॥१२॥ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितं ॥ सर्वर्द्ध्युपच

येत्यर्थः येन साधनेनाभ्यंगभोजनपानादिना अतीव रंतुमिच्छया कर्शितो दीनश्च मम एष आत्मा देहः सिध्ये ॥ योरक्षेमाणि हन्मेडपस्कृत तरति समर्थो भवेत् ॥ कथंभूतायाः ते त्वयैव कृतः क्षोभितो यो मनोभवस्तेन धर्षितायाः ततः तस्मै तदनुरूपं भवनं विचक्ष्व वितर्कय विचारयेति या वत् ॥११॥ तर्हि तत्क्षणमेव आविरचीकरत् आविर्भावयामास ॥१२॥ तदेव विशिनष्टि सर्वकामदुघामिति नवभिः ॥ सर्वैश्वर्यरत्नादिभिः समन्वितं सर्वर्द्धीनां सर्वसंपदां य उपचयस्तस्य उदर्कः उन्नतिर्यस्मात् मणिस्तंभैरिव ॥ उपस्कृतं शोभितं ॥१३॥

उपकरणं परिकरः पट्टिका अल्पविस्तारपट्टवस्त्रविशेषाः । पताकाः वितताः ताभिः १४ विचित्राणि माल्यानि पुष्पाणि यासु । मंजु यथा भवति
एवं शिंजतः षडंघ्रयो भ्रमरा यासु ताभिः स्रग्भिः १५ उपर्युपरि विरचितगृहेषु कशिपुभिः शय्याभिः कांतं कमनीयं पर्यंकादिभिश्च कांतं १६ । १७ द्वा
स्सु द्वारेषु विद्रुमनिर्मिता देहली उदुंबरस्तया भातं शोभितं । वज्रखचितकपाटयुक्तं इंद्रनीलमयेषु शिखरेषु प्रासादाग्रभागेषु १८ चक्षुष्मत्

दिव्योपकरणोपेतं सर्वकालसुखावहं । पट्टिकाभिः पताकाभिः विचित्राभिरलंकृतं १४ स्रग्भिर्विचित्रमाल्याभिः मंजुशिंजत्
षडंघ्रिभिः । दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितं १५ उपर्युपरि विन्यस्तनिलयेषु पृथक्पृथक् । क्षिप्तैः कशिपुभिः कांतं
पर्यंकव्यजनासनैः १६ तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितं । महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः १७ द्वाःसु विद्रुमदे
हल्या भातं वज्रकपाटवत् । शिखरेष्विंद्रनीलेषु हेमकुंभैरधिश्रितं १८ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः । जुष्टं विचित्रवै
तानैर्महार्हैर्हेमतोरणैः १९ हंसपारावतव्रातैस्तत्र तत्र निकूजितं । कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च २० विहार
स्थानविश्रामसंवेशप्रांगणाजिरैः । यथोपजोषं रचितैर्विस्मापनमिवात्मनः । ईदृग्गृहं तत्पश्यंतीं नातिप्रीतेन चेतसा । सर्वभू-

रवद्यैः पद्मरागाग्र्यैः महाचक्षुष्मद्भिरिवकैः पद्मरागाग्र्यैः । विचित्रैर्वैतानैर्वितानसमूहैः कृत्रिमानपि हं । ताशयाभिज्ञः प्रावोचत्कर्दमः स्वयं २२
सादीन् स्वान् स्वजातीयान् मन्यमानैस्तत्र तत्राधिरुह्य निकूजितं २० विहारस्थाने क्रीडाप्रदेशः विश्रामः शयनगृहं संवेश उपभोगस्थानं प्रांगणं
गृहाद्बहिः अजिरं प्राकारादेर्बहिः यथोपजोषं यथासुखं विश्वात्मनः स्वस्य मायाविनोऽपि विस्मापजनकमिव २१ नातिप्रीतेन मलिनदेहत्वात्परिवारादिक
काभावाच्च २२ ८२

अस्मिन् ह्रदे बिंदुसरसि आह ह्रद अधिरोह स्वज्ञेन विलम्बेनाकृतं आनंदबिंदुनिपातनेन पापकं प्रापकं १३ समादाय आदृत्य सरजं मलिनं १४
शैवलो विवर्णोत्वं नो यस्मिन् तत् सरश्च तत्साः शिवा निर्जलानि आशेरते यस्मिन् शिवा जलाशया जलचरा यस्मिन् इति वा १५ स्नातः त्रिम
ग्नासती विस्मयं दर्शितमाह स्नातः सरसीति दशभिः उत्पलगंधयः १६ स्त्रियः प्रोद्धः नवकर्मकाराः परिचारिका वयस्य स्नात्रं आत्मायेति

निमज्यास्मिन् ह्रदे प्रीह विमानाभिरमा हृह इदं स्नात्रं तीर्थमाशिषा पापकं नृणां १२ स्नातः इत्युक्तः समादाय वचः कवल
येनृणां सरजं विभ्रती वा सा वेणीभूतो अमूर्द्धजान् १४ अंगं च मलपंकेन संछन्नं शवलत्वनं आविवेश सरस्वत्साः सरः शिव
जलाशयं १५ स्नातः सरसि वेश्मस्थाः शतानि दश कन्यकाः सर्वाः किशोरवयसो ददर्शोत्पलगंधयः १६ तां दृष्ट्वा सहसोत्था
यप्रोचुः स्वामिनश्च स्त्रियः वयं कर्मकरी स्त्वाम्यशाधि नः करवाम किं १७ स्नानेनैतां महार्हेण स्नापयित्वा मनस्विनीं उद्वर्तनि
र्मेदे तत्र [illegible] मानराः १८ भूषणानि पराध्यानि वरीयांसि शुभं मतिच अत्रं सर्वगुणोपेतं पानं चैवामृतासवं १९ अथार
रोहमात्मानं [illegible] विरजां वरं विरजं कृतवत्त्वास्यपनं कन्याभिर्वर्त्मानिनं २० स्नातं कृतशिरस्नानं सर्वाभरणभूषितं निष्क

ततश्च स्नानेन स्नानयोग्यतैलादिना २८ पराध्यानि उत्कृष्टानि वरीयांसि [illegible] शाश्रीमतिच पा ग्रीवं वलयिनं कुंडलं कांचनं च २१
नैवेद्यं भूषितं [illegible] एवं मारकं १९ आदर्शो [illegible] आत्मानं [illegible] कृतं स्नपनं [illegible]
समानाधिकरणयान २० विरजमित्यस्य [illegible] स्नानमभ्यागोयेन भूषितत्वमेवाह निष्कं परकं ग्रीवाभरणं यस्य २१

बहूनि यानि यस्यास्तया ॥ रुचकेन मंगलद्रव्येणाङ्गुल्यादिना ॥ तदुक्तं विश्वप्रकाशे ॥ रुचकं मंगलद्रव्ये ग्रीवाभरणदंतयोरिति ॥ २२ ॥ सुदता सुभ्रुवा
च हृष्टेति च जातावेकवचनानि ॥ एतैर्लसत् शोभमानं मुखं यस्याः ॥ कथंभूतेन च चक्षुषा ॥ श्लक्ष्णो मनोहरः स्निग्धोपांगो नेत्रप्रांतो यस्य पद्मकोशेन
स्पर्द्धत इति पद्मकोशस्पृत् तेन ॥ २३ ॥ दयितं च परापतिं सस्मार तदा यत्रासौ तत्रैव वधूयमप्याप्ता ॥ २४ ॥ आत्मानं निशाम्य दृष्ट्वा तां च तस्य योगग

श्रोण्योरध्यस्तया कांच्या कांचन्या बहुरत्नया ॥ हारेण च महार्हेण रुचकेन च भूषितं ॥ २२ ॥ सुदता सुभ्रुवा श्लक्ष्णस्निग्धापांगे
न चक्षुषा ॥ पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखं ॥ २३ ॥ यदा सस्मार ऋषभमृषीणां दयितं पतिं ॥ तत्र चास्ते सह स्त्रीभिर्यत्रा
स्ते स प्रजापतिः ॥ २४ ॥ भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा ॥ निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत ॥ २५ ॥ स तां कृतमलस्ना
नां विभ्राजंतीमपूर्ववत् ॥ आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीं ॥ २६ ॥ विद्याधरीसहस्रेण सेव्यमानां सुवाससं ॥ जातभा
वो विमानं तदारोहयदमित्रहन् ॥ २७ ॥ तस्मिन्नलुप्तमहिमा प्रिययानुरक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने ॥ बभ्राज उ
त्कचकुमुद्गणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः ॥ २८ ॥

तिं योगप्रभावं दृष्ट्वा संशयं किमिदमिति विस्मयं ॥ २५ ॥ स मुनिर्विवाहात्प्राक् यदात्मनो रूपं तदेव छन्नं बिभ्रतीं संवीतौ आवृतौ रुचिरौ स्तनौ यस्याः पा
ठांतरं तद्रूपविशेषणं ॥ २६ ॥ शोभने वाससी यस्याः ॥ जातो भावः प्रेम यस्य ॥ हे अमित्रहन् जितकाम ॥ २७ ॥ तस्मिन्विमाने स निर्वभ्राजे ॥ न लुप्तो महिमा
त्वात्तेजो यस्य ॥ उपचीर्णं भूषितं वपुर्यस्य ॥ विकसितकुमुदगणवान् ॥ अपीच्योऽतिसुंदरः ॥ पूर्णचंद्रवत् उडुभिर्नभस्थविमानं ॥ ताराद्ववनाः ॥ स्त्रियः उडुप

तेन विमानेन त्वष्टलोकपालानां विहारो यस्मिन् कुलाचलेंद्रे मेरौ तस्य द्रोणीषु दरीषु ॥ अनंगस्मरसखो यो मारुतः शीतसुगंधमंदानिलः
तेन सेव्यमानो मार्गो येषां ताः ॥ सिद्धैर्नुतः स्तुतः सन् ॥ द्युधुनिर्गंगा तस्याः पातेन शिवः स्वनो यासां तासु रेमे ॥ ललनावरूथी स्त्रीरत्नस
मूहवान् ॥ ३९ ॥ वैश्रंभकादिषु देवोद्यानेषु मानसे च सरसि रतः प्रीतः सन् ॥ ४० ॥ अत्यशेत अतिक्रम्य स्थितः ॥ ४१ ॥ उद्दामचेतसां धीराणां

तेनाष्टलोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु ॥ सिद्धैर्नुतो द्युधुनिपातशिवस्वनासु रेमे चिरं धनदव
ल्ललनावरूथी ॥ ३९ ॥ वैश्रंभके सुरसने नंदने पुष्पभद्रके ॥ मानसे चैत्ररथ्ये च स रेमे रामया रतः ॥ ४० ॥ भ्राजिष्णुना विमानेन का
मगेन महीयसा ॥ वैमानिकानत्यशेत चरंल्लोकान्यथानिलः ॥ ४१ ॥ किं दुरापादनं तेषां पुंसामुद्दामचेतसां ॥ यैराश्रितस्तीर्थ
पदश्चरणो व्यसनात्ययः ॥ ४२ ॥ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया ॥ बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्तत ॥ ४३ ॥
विभज्य नवधात्मानं मानवीं सुरतोत्सुकां ॥ रामां निरमयन् रेमे वर्षपूगान्मुहूर्तवत् ॥ ४४ ॥ तस्मिन्विमान उत्कृष्टां शय्यां रतिकरीं
श्रिता ॥ न चाबुध्यत तं कालं पत्यापीच्येन संगता ॥ ४५ ॥ एवं योगानुभावेन दंपत्यो रममाणयोः ॥ शतं व्यतीयुः शरदः कामलालस
योर्मनाक् ॥ ४६ ॥

व्यसनं संसारः तस्मात् अत्ययो यस्मात् ॥ ४२ ॥ प्रेक्षयित्वा दर्शयित्वा गोलं मंडलं स्वसंस्थया द्वीपवर्षादिरचनया यावान् तावंतं बह्वा
श्चर्यं यस्मिन् तं ॥ ४३ ॥ विभज्य नवधा नवप्रभेदेन आत्मानं कृत्वा ॥ ४४ ॥ ५ शरदः संवत्सराः मनाक् ईषदिव व्यतीयुः ॥ ४६ ॥

आत्मनात्वेरेहार्द्दरूपेणाश्रितिप्रीत्याभावयन् ॥ नध्यास्तितिस्वदपत्यमवेरिति ॥ नोधानवधा ॥ सर्वसंकल्पविदितस्याः वहुपत्यसंकल्पंजानन्नित्य र्थः विभुस्तथाकर्त्तुंसमर्थश्च आत्मविरितिच ॥ तस्यमनाप्तसक्तत्वात्त्रियोजाताइतिभावः पुमान्पुंसोधिकेशुक्रेस्त्री भवत्यधिकेस्त्रियाः इतिस्मृतेः ॥ ४७ ॥ अतः अनंतरमेवसद्यः एकस्मिन्नेवाहनि ॥ चारूणिसर्वाण्यंगानि यासां ॥ ४८ ॥ प्रव्रजिष्यंतंआलक्ष्यवितर्क्यस्मयमानावहिः अंतस्तुविक्ल

तस्यामाधत्तरेतस्तांभावयन्नात्मनात्मवित ॥ नोधाविधायरूपंस्वंसर्वसंकल्पविद्विभुः ॥ ४७ ॥ अतः साशुषुवेसद्योदेवहूतिःस्त्रियः प्रजाः ॥ सर्वास्ताश्चारुसर्वांग्योलोहितोत्पलगंधयः ॥ ४८ ॥ पतिंसाप्रव्रजिष्यंततदालक्ष्योशतीसती ॥ स्मयमानाविक्लवेनहृ दयेनविदूयता ॥ ४९ ॥ लिखंत्यधोमुखीभूमिंपदानखमणिश्रिया ॥ उवाचललितांवाचंनिरुध्याश्रुकलांशनैः ॥ ५० ॥ सर्वंत द्भगवान्मह्यमुपोवाहप्रतिश्रुतं ॥ अथापिमेप्रपन्नायाः अभयंदातुमर्हसि ॥ ५१ ॥ अमयंदुहितृभिर्मह्यंविमृग्याः पतयः स माः ॥ कश्चित ॥ स्यान्मेविशोकायत्वयिप्रव्रजितेवनं ॥ ५२ ॥ एतावतालंकालेनव्यतिक्रांतेनमेप्रभो ॥ इंद्रियार्थप्रसंगेनपरित्यक्तप रात्मनः ॥ ५३ ॥

वेनव्याकुलेनविदूयतासंतप्यमानेनहृदा ॥ उवाचेत्यन्नेरणान्वयः ॥ ४९ ॥ नखाएवमणयःतैः श्रीः शोभायस्यतेनपदाभुवंलि खंतीतिदुरंतविताननकुर्वाणा ॥ ५० ॥ उपोवाहसंपादितवान् ॥ अभयमितिवादिनोदेहस्यात्मसंसाराद्भयरूपंतन्निवर्तयेत्यर्थः ॥ ५१ ॥ तत्रहेतुंनिवेदयति तस्यंतनयडोहितृभिः स्वयमेवात्मनः समायोग्याः पतयोविमृग्याइतिदेवंसंप्राप्तं ॥ संसारभयहरीकल्याह ॥ कश्चिदिति ॥ विशोकायज्ञानोपदेशाय भिक्षाणाः नपाकरणेनकंचित्कालंत्वद्रवस्थानेनवाअस्मावितस्त्वंकश्चित्तत्रविंस्यादित्यर्थः ॥ ५२ ॥ विषयानुभवःकिंवाअस्माविद्यतेतिचेन्नत्राह एताव

विकृतमनुशोचंत्याह ॥ इंद्रियार्थेष्विति चतुर्भिः ॥ मे मया परं भावं तत्त्वं ब्रह्मविदिति ॥ ५४ ॥ प्रसंगः कथमभयायास्त्वित्यत्राह संग इति त्रिभिः धिया कृतानेन ॥ ५५ ॥ स्वभावतः प्रवृत्तस्य कर्मणो धर्मार्थं न कल्पते धर्मोऽपि सुखं न भवेत् तत्रापि निष्कामधर्मद्वारा विरागाय न कल्पते तदा एव तीर्थपदस्य हरेः सेवार्थं न पर्यवस्येदित्यर्थः ॥ ५६ ॥ न मुमुक्षेय मोक्षमपि नैच्छं न कृतवत्यस्मि ॥ ५७ ॥ इति तृतीये त्रयोविंशः ॥ चतुर्विंशे तु

इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः ॥ अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ॥ ५४ ॥ संगो यः संसृतेर्हेतुरसत्सु विहितो धिया ॥ स एव साधुषु कृतो निःसंगत्वाय कल्पते ॥ ५५ ॥ नेह यत्कर्म धर्माय न विरागाय कल्पते ॥ न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ॥ ५६ ॥ साहं भगवतो नूनं वंचिता मायया दृढं ॥ यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बंधनात् ॥ ५७ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने त्रयोविंशतितमोऽध्यायः ॥ मैत्रेय उवाच ॥ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ॥ दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥ १ ॥ ऋषिरुवाच ॥ मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिंदिते ॥ भगवांस्तेऽक्षरो गर्भमदूरात्संप्रपत्स्यते ॥ २ ॥ धृतव्रतासि भद्रं ते दमेन नियमेन च ॥ तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ॥ ३ ॥ स त्वयाराधितः शुक्लो वितन्वन्मामकं यशः ॥ छेत्ता ते हृदयग्रंथिमौदर्यो ब्रह्मभावनः ॥ ४ ॥

तो जन्म कपिलस्याह तत्र पितुः शुक्लात मनुत्वाप्यक्रमणात्रयवि मोक्षतः ॥ १ ॥ शालिनीं श्लाघ्यां शुक्लेनाभिव्याहृतं सूत्रहारं त्वां दास्यत्यैकलपत्स्यत्यारि ॥ १ ॥ इत्थं मा खिदः खेदं मा कार्षीः आत्मानं प्रति अहं भाग्यहीनेति अक्षरात् गीष्व ॥ २ ॥ दमेनेंद्रियसंयमेन नियमेन स्वधर्मेण तपादिद्रविणदानानि वैतः ॥ ३ ॥ हृदयग्रंथिं चिज्जडात्मकमहंकारलक्षणं वंधं छेत्ता छेत्स्यति औदर्यः

भा॰त्रे
८५

अहायविश्वस ५ वहुतिथेवहुतरेकालेतिक्रांते ६ घनाघनाः स्पेकं परं वर्षंतो मेघाः गायंति स्म नृत्यंति स्म ७ अपवर्जिताशुक्राः ८ परिश्रितवेष्टितं ९ आगत्यकिंकृतवानतआह भगवंतमितिद्वाभ्यां तत्वानां संख्यानंयस्मिन्नतस्यसंख्यस्यविज्ञप्तिर्विशेषेणज्ञापनायभगवंतंजातं विद्वान्अजोब्रह्मास्वेरारूहितः स्थितःनानः १० तमसविचिकीर्षितंसमाजयन्पूजयन्प्रहृष्यमाणैरक्षिभिरिंद्रियेरुपलक्षितः कर्दमश्चेदमभ्यधा

मैत्रेय उवाच देवहूत्यपि संदेशं गौरवेण प्रजापतेः सम्यक्श्रद्धाय पुरुषं कूटस्थमभजद्गुरुं ५ तस्यां बहुतिथे काले भगवान् मधुसूदनः कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ६ अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः गायंति तं स्म गंधर्वाः नृत्यंत्यप्सरसो मुदा ७ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः प्रसेदुश्च दिशः सर्वा अंभांसि च मनांसि च ८ तत्कर्दमाश्रमपदं सरस्वत्या परिश्रितं स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ९ भगवंतं परंब्रह्म सत्त्वेनांशेन शत्रुहन् तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् १० सभाजयन्विशुद्धेन चेतसा तच्चिकीर्षितं प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्यधात् ११ ब्रह्मोवाच त्वया मेऽपचितिस्तात कल्पिता निर्व्यलीकतः यन्मे संजगृहे वाक्यं भवान्मानद मानयन् १२ एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः बाढमित्यनुमन्येत गौरवेण गुरोर्वचः १३ इमा दुहितरः सभ्य तव वत्स सुमध्यमाः सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यंत्यनेकधा १४ अतस्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचि आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि १५

निहूपोत्रयः वक्काणदेवहूतिंच ११ तत्रत्वयेतिपंचभिः कर्दमंप्रत्याह अपचितिः पूजाकृतायद्यस्मात् निष्कपटं सम्यग्गृहीतवान् १२ अनुमन्येतेति यतएतावत्येव १३ अनेकधाप्रभावैः वंशैः बृहयिष्यंतिवर्धयिष्यंति १४ ऋषिमुख्येभ्योमरीच्यादिभ्यः १५

राम
८५

प्रवक्ता सा कारी श्वर इत्याह वेदाहमिति शेवधिनिधिं सर्वार्थोप्सुष्ठं १६ देवहूतिं प्रत्याह त्रिभिः ज्ञानं शास्त्रोक्तं विज्ञानमपरोक्षं वते एव
योग उपायस्तेन कर्मणां जरा: मूलानि वासना उद्धरन् उत्पाटयिष्यन् पदं मुद्रा युक्तं पदाउ जेयस्य १७ हे मानवि अविद्या ग्रन्थिं पाज्ञानं
संशयाः मिथ्याज्ञानानि तन्मयं तेवद्रस्यग्रंथि १८ त्वसंमतः त्वत्पूजितः सन् गताशाप्स्यति १९ कुमारैः सहेति शेषः सह नारदः ना

वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने १६ ज्ञानविज्ञानयोगेन कर्मणामुद्धरन् जटाः हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः १७ एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः अविद्यासंशयग्रंथिं छित्त्वा गां विचरिष्यति १८ अयं सिद्धगणाधीशः सांख्याचार्यैः सुसंमतः लोके कपिल इत्याख्यां गन्ता ते कीर्तिवर्द्धनः १९ मैत्रेय उवाच तावाश्वास्य जगत्स्रष्टा कुमारैः सहनारदः हंसो हंसेन यानेन त्रिधाम परमं ययौ २० गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः यथो [illegible] दितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः २१ मरीचये कलां प्रादादनसूयामथात्रये श्रद्धामंगिरसे यच्छत्पुलस्त्यायहविर्भुवं २२ पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीं ख्यातिं च भृगवे यच्छद्वसिष्ठायाप्यरुंधतीं २३ अथर्वणे ददौ शांतिं यया यज्ञो वितन्यते विप्रर्षभान् कृतोद्वाहान् सदारान् समलालयत्

ततः सहितस्त्वमपी ब्याख्याता विवाहार्थं व्यवस्थाप्य न् २४ ततस्त ऋषयः क्षत्तः कृतदारा निमंत्र्य तं प्रातिष्ठन्नंदिमापन्नाः स्वं स्वमाश्रममंडलं २५
नैष्ठिकैरन्तैः पंचभिः सहितः हंसो ब्रह्मा यया यो त्रिधाम तृतीयं धाम स्वर्गः तस्य पराकाष्ठां सत्यलोकं २० शतधृतौ ब्रह्मणि २१ २२ युक्तां योग्यां अथर्वणे
अङ्गिरसे २३ वितन्यते समृद्धः क्रियते शांत्या दीक्षया त्रीरे वतामित्यर्थः समलालयत् संतोषितवान् २४ निमंत्र्य अभ्युपस्थानरिंहं प्राप्ताः संतः २५

भा.त.
८६

एवं मुनिः त्रिगुणादिभिः संविविक्तो रहसि ॥ पापच्यमानानां भृशं दह्यमानानां निरये संसारे स्वीयैर् अमंगलैः पापैः ॥२७॥ कुतः सर्वा देवताः प्रसन्ना इति तत्रातं शून्यमालाभारित्याह ॥ द्वाभ्यां ॥ बहुजन्मसु विपक्वेन ह्यसिद्धेन सम्यग्योगो भक्तियोगस्तन्निमित्तं समाधिरेकाग्रता तेन शून्यागारेषु विविक्तस्थानेषु ॥ प्रयतन्ते यत्पदं ॥२८॥ हेलनमवज्ञा लाघवं न गणयन् ग्राम्याणां गृहमेधिनां अवितमेव तथैव तन्निरित्याह ॥ पक्षस्वीयानां भक्तानां पक्षं तद्वत्सलो हीति तथा पोषः ॥२९॥ एतेन पचयति द्वाभ्यां ॥ स्वीयमेव वाक्यं अवतीर्णोसि स्ववाक्यं तव पुत्रो भविष्यामीति यत् तत्सत्यं कर्तुं ज्ञानं ज्ञानसाधनं सांख्यं च विकीर्षुः सन् ॥३०॥ यानि तवालौ

तत्त्वावतीर्णं त्रिगुणमात्तापविद्धधर्षमं ॥ विविक्त उपदृष्टगामप्रणाम समभाषत ॥२६॥ अहो पापच्यमानानां निरये स्वैरमंगलैः कालेन भूयसा नूनं प्रसीदन्तीह देवताः ॥२७॥ बहुजन्मविपक्वेन सम्यग्योगसमाधिना ॥ द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदं ॥२८॥ स एव भगवानद्य हेलनं न गणय्य नः ॥ गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः ॥२९॥ स्वीयं वाक्यमृतं कर्तुमवतीर्णोसि मे गृहे चिकीर्षुर्भगवान् ज्ञानं भक्तानां मानवर्धनः ॥३०॥ तान्येव तेभिरूपाणि रूपाणि भगवांस्तव ॥ यानि यानि च रोचंते स्वजनानामरूपिणः ॥३१॥ त्वां सूरिभिस्तत्त्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठं ॥ ऐश्वर्यवैराग्ययशोवबोधवीर्यश्रिया पूर्तमहं प्रपद्ये ॥३२॥ परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालं ॥ आत्मानुभूत्यानुगतप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये ॥३३॥

किं कानि च तत्र अरूपिणो रूपाणि तान्येव ते अभिरूपाणि योग्यानि यानि च स्वजनानां रोचंते मनुष्यमत्स्यरूपाणि तान्यपि ते एवं तत्र तात्पर्यं अरूपिणः प्राकृतरूपरहितस्य ॥३१॥ अभिवादार्हं पादपीठं यस्य हे स्वयं सूरिभिः पूर्णं पूर्णं ॥३२॥ ऐश्वर्यादि किं विशिष्टं आह परं परमेश्वरं तत्र हेतुः स्वच्छंदाः स्वाधीनाः शक्तयो यस्य तं एवाह प्रधानं प्रकृतिं पुरुषं तद्रूपं तदधिष्ठातारं महांतं महत्तत्त्वरूपं ॥ कालं तेषां क्षोभकं त्रिवृतं अहंकाररूपं लोकात्मकं तत्पालात्मकं च तदेवमाययाप्रधाना एप
रिरूपतया स्वच्छंदशक्तिं आह आत्मानुभूत्या विलीना आत्मानुगतः स्वस्मिन्नलीनः प्रपंचो यस्मात् ॥ कविं सर्वज्ञं प्रधानाद्याविर्भावलयसाक्षिणमिति ८६
सार्थः ॥३३॥

संन्यासात्तु तं प्रार्थयते। अस्मान्निरुद्धे पत्निं किं विरमिष्यामीत्यर्थः। त्वया उत्तरेण वतीर्णानि निरुद्धानि कर्माणि नैरेवारिन्द्रमाणि यस्मात्‌ः आत्म
कामस्त्वाहं परिव्रजन्तं संन्यासिनां परवीमार्गमाश्रितः तं न त्वां गन्तं विविधरिष्यामि॥ २४॥ अहं तावज्ज्ञानोपदेशायैव त्वद्गृहे वतीर्णः अतस्त्वत्प्र
हवान् ततोपि मुक्तिः तल्लभेव यद्यव स्पगतव्यमेवे त्याग्रहः तथापि मामेवानुस्मरन् गच्छेत्याशयेनाहमपेतिषाद्धिः सत्यलौकिके वैदिके लौकिके च
कर्त्तव्ये लोकस्य प्रमाणमभिरेशयति यद्यस्मात्तद्भ्यतवशत्रोभविष्यामीत्यवोचं अथ एवन्तत्कार्यतयथा भवति तथा मया जनिजन्मवीकृतं॥ २५॥

अस्मान्निरुद्धे द्य पतिं प्रजानां त्वया वतीर्णार्णे उत्तामकामः परिव्रजतः परवीमास्थितोहं चरिष्ये त्वां हरिण्डं जनं विशोकः॥ २४॥

श्रीभगवानुवाच। मयाप्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके। अथाजनिमया तभ्यं यदेवोचं मृतेऽजने॥ २५॥ एतन्मे जन्मलो
केस्मिन् मुमुक्षूणां दुराशयात्॥ प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने॥ २६॥ एष आत्मपथोव्यक्तो नष्टः कालेन भूयसा
तं प्रवर्तयितुं देहमिमं विद्धि मया भृतं॥ २७॥ गच्छ कामं मयापृष्टो मयि संन्यस्तकर्मणा॥ जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भजे
॥ २८॥ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयं आत्मन्येवात्मना वीक्ष्य विशोको भयमृच्छसि॥ २९॥ मातेत्याध्यात्मिकीं विद्यां शम
नीं सर्वकर्मणां वितरिष्ये यया वासौ भयं वाततितरिष्यति॥

दुराशयात् लिंगात् मुमुक्षूणां मुनीनामात्मदर्शने संमताय तत्त्वानां प्रसंख्यानाय विद्धि तत्र
स्यान्तु बंगाः॥ २६॥ न त्वयमात्मस्तानमार्गः पूर्वं सिद्ध एव नेदानीम पूर्वं वल्मवर्तनीयः कुत्राह एव इति अध्यात्मः तस्मः॥ २७॥ कामं यथेष्टं आपृष्टः अनुज्ञातः य
द्यपथात्वं गंतमोहश्ववान् तथात्राव्वस्थातमयाः पित्वयापृष्ट इत्यर्थः॥ मयि संन्यस्तेन समर्पितेन कर्मणा अविद्यया मृत्युं तीत्वा विद्यया मृतत्वमश्नुते इ
ति श्रुतेः॥ २८॥ ततश्च मां परमं परमात्मानं आत्मनि चिन्तयिन् आत्मनामनसा अनुवीक्षमाणः भयं मोक्षं प्राप्स्यसि॥ २९॥ मातेरेवाहूतैः शमनीं उत्सानिनीं भयं तरिष्यति

भा० ३
८७

समुदितः सम्यगुक्तः सन् तं प्रदक्षिणीकृत्य ॥ ४१ ॥ मुनीनां व्रतं मौनं आत्मा हरिः शरणं यस्य ॥ ४२ ॥ सदसतः परं यत् तस्मिन् ब्रह्मणि गुणावभासके निर्गुणे
एकभक्त्या अव्यभिचारिण्या भक्त्या अनुभाविते अपरोक्षीकृते ॥ ४३ ॥ अतो देहादिष्वहंकारादिरहितः अत एव निर्द्वंद्वः शीतोष्णाद्यनाकुलः समदृक्
भेदाग्राहकः किं तु स्वदृक् स्वमेवपश्यन् प्रत्यक्प्रवणा प्रशांता विक्षेपरहिता धीर्यस्य ॥ ४४ ॥ तदेवंविधकल्पितोपाधिनिवृत्तिमुक्त्वा परमेश्वरपद

मैत्रेय उवाच एवं समुदितस्तेन कपिलेन प्रजापतिः दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ॥ ४१ ॥ व्रतं स आस्थितो मौन
मात्मैकशरणो मुनिः निःसंगो व्यचरत्क्षोणीमनग्निरनिकेतनः ॥ ४२ ॥ मनो ब्रह्मणि युंजानो यत्तत्सदसतः पर
गुणावभासे विगुण एकभक्त्यानुभाविते ॥ ४३ ॥ निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक् स्वदृक् प्रत्यक्प्रशांतधीर्धीरः
प्रशांतोर्मिरिवोदधिः ॥ ४४ ॥ वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ॥ ४५ ॥
आत्मानं सर्वभूतेषु भगवंतमवस्थितं अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ॥ ४६ ॥ इच्छाद्वेषविहीनेन सर्वत्र समचेत
सा भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ॥ ४७ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये चतुर्विंशोऽध्यायः

प्राप्तिमाह वासुदेव इति त्रिभिः प्रतीचो जीवस्यात्मनि लब्ध आत्मा विलीनोपाधिर्येन यतः छिन्नं बंधनमहंकारं यस्य ॥ ४५ ॥ लब्धात्मतामेवाह आत्मानमिति
॥ ४६ ॥ तदेवं तेन भागवती गतिः प्राप्ता पाठांतरे स एवं तां गतिं प्राप इति ॥ ४७ ॥ इति श्री भावार्थदीपिकायां तृतीये चतुर्विंशः

एक
८७

पंचविंशे जनन्यात्मक्लेशबंधविमोचनं ॥ आदावाह परं भक्तिलक्षणं कपिलः स्मृतः ॥१॥ कपिलेनार्पिता मात्रे गूढभावविनिर्मिता ॥ योगमा
लिकामंजूषा स्फुरद्गुह्याद्यतेऽधुना ॥ उक्तानुवादपूर्वकं कापिलं योगं पृच्छति कपिल इति त्रिभिः तत्त्वानां संख्याता गणकः सांख्यप्रवर्तक
इत्यर्थः अज एव ब्रह्मैव जातः आत्मप्रज्ञप्तये आत्मतत्त्वज्ञापनाय ॥१॥ छंदसामध्येव वर्ष्मणः वृद्धस्य उत्तमस्येत्यर्थः सर्वयोगिनां मध्ये वरिम्णः
वा स्वभावो वा रितप्रधानो यं निर्दिशः वा शिष्टस्येत्यर्थः ॥ यद्वा वर्ष्मणः इत्यर्थः विश्रुतौ कीर्त्यां श्रुतदेवस्य इंद्रियाणि भूरि बहुलं न तृप्यंति स्वतेन

शौनक उवाच ॥ कपिलस्तत्त्वसंख्याता भगवानात्ममायया ॥ जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणां ॥१॥ नह्यस्य व
र्ष्मणः पुंसां वरिम्णः सर्वयोगिनां ॥ विश्रुतौ श्रुतदेवस्य भूरि तृप्यंति मेऽसवः ॥२॥ यद्यद्विधत्ते भगवान् स्वच्छंदात्मा
त्ममायया ॥ तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय ॥३॥ सूत उवाच ॥ द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा
प्राहेदं विदुरं प्रीतः आन्वीक्षिक्यां प्रचोदितः ॥ मैत्रेय उवाच ॥ पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया ॥ तस्मिन् बिंदु
सरेऽवात्सीद्भगवान् कपिलः किल ॥५॥ तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनं ॥ स्वसुतं देवहूत्याह धातुः संस्मरती वचः ॥६॥

श्रवणेन ईश्वरीव्याप्तियोतनं इति तथा तस्य ॥ यद्वा भूरिवशाः श्रुतो देवो येन तस्यापि मे असवः इति संबंधः ॥२॥ स्वानां छंदेन इच्छया आत्मा देहोप
स्य सः यद्यत्कर्म विधत्ते तानि कर्माणि कीर्तनार्हाणि अनुकीर्तय ॥३॥ यथा तत्त्वमार्गप्रचोदये एवं प्रचोदितः ॥ सन् तथा तस्य आत्मरूपां आ
न्वीक्षिकीं आत्मविद्यायां ॥४॥ बिंदुसरे बिंदुसरसि ॥५॥ तत्त्वमार्गस्याग्रं पारं दर्शयतीति तथा एवं मानवितेण प्रविष्ट इत्यादि धातुर्वचः ॥६॥

भा०त्री
८८

असतामिंद्रियाणांतर्षणात विषयाभिलाषात || निर्विण्णाश्रांतास्मि || येनसंभाव्यमानेनपूर्वमार्गेण ||७|| पारंगमयतीतिपारगं त्वमे
वसच्चक्षुर्मयालब्धंतवअनुग्रहाज्जन्मनामंतेभाव्यमिति ||८|| तमःपंचयतिय इतिसभगवान्चक्षूरूपउदितःसूर्योयथा || अपाक्रष्टुमपने
तुंकोसौसंमोहः || एतस्मिन्देहादौत्वयैवयोजितोयोहंममेत्यवग्रहः आग्रहः | द्वितीयइतिशब्दः तत्कार्यरागादिग्रहणार्थः ||१०|| अहं

देवहूतिरुवाच || निर्विण्णानितरांभूमन्नसदिंद्रियतर्षणात् | येनसंभाव्यमानेनप्रपन्नांधंतमःप्रभो ||७|| तस्यत्वंतम
सोंधस्यदुःपारस्याद्यपारगं || सच्चक्षुर्जन्मनामंतेलब्धंमेत्वदनुग्रहात् ||८|| यआद्योभगवान्पुंसामीश्वरोवैभवान्किललो
कस्यतमसांधस्यचक्षुःसूर्यइवोदितः ||९|| अथमेदेवसंमोहमपाक्रष्टुंत्वमर्हसि | योवग्रहोहंममेतीत्येतस्मिन्योजितस्त्व
या ||१०|| तंत्वागताहंशरणंशरण्यंस्वभृत्यसंसारतरोःकुठारं || जिज्ञासयाहंप्रकृतेःपुरुषस्यनमामिसद्धर्मविदांवरिष्ठं ||११|| मै
त्रेयउवाच || इतिस्वमातुर्निरवद्यमीप्सितंनिशम्यपुंसामपवर्गवर्धनं || धियाभिनंद्यात्मवतांसतांगतिर्बभाषईषत्स्मित
शोभिताननः ||१२|| श्रीभगवानुवाच || योगआध्यात्मिकःपुंसांमतोनिःश्रेयसायमे || अत्यंतोपरतिर्यत्रदुःखस्यचसुखस्य
च ||१३|| तमिमंतेप्रवक्ष्यामियमवोचंपुरानघे || ऋषीणांश्रोतुकामानांयोगंसर्वांगनैपुणं ||१४|| चेतःखल्वस्यबंधायमुक्तये

तेःपुरुषस्यचजिज्ञासयात्वामहंशरणंगतास्मीतिनमामीत्यन्वयः कुठारंछेत्तारं ||११|| चात्मनोमतं || गुणेषुसक्तंबंधायरतंवापुंसिमुक्तये ||१५
अपवर्गवर्धनंमोक्षेरतिजनकं ईषत्स्मितेनशोभितमाननंयस्य ||१२|| आध्यात्मिकआत्मनिष्ठः यत्रयस्मिन् ||१३||१४|| तत्रसर्वांगनैपुणंपवि
त्रमुपायाधीनमितिशेषः अत्राहचेतइति || अस्यात्मनोजीवस्यगुणेषुविषयेषुपुंसिपरमेश्वरेवाशब्दश्चार्थे ||१५||

राम
८८

यथावद्विज्ञानमयमेव पुरुषार्थसिद्धिस्तद्दर्शयति ॥ अहममेति त्रिभिः मलैर्वीतं विरहितं यदा शुद्धं मनो भवति ॥ मनःशुद्धेस्तत्फलमाह अदुःख
मिति ॥१६॥ निरंतरं निर्भेदं अणिमानं सूक्ष्ममखंडितं मविच्छिन्नं ॥१७॥ हतौजसं क्षीणबलं ॥१८॥ मनःशुद्धौ च भक्तिरेवांतरंगसाधनमित्याह
नेति ॥१९॥ अस्य सर्वस्यापि प्रसंगो मूलमित्याह प्रसंगमिति ॥ अपावृतं निरावरणं ॥२०॥ साधूनां लक्षणमाह तितिक्षव इति षड्भिः साधव

अहं ममाभिमानोत्थैः कामलोभादिभिर्मलैः । वीतं यदा मनः शुद्धमदुःखमसुखं समं ॥१६॥ तदा पुरुष आत्मानं केवलं प्रकृतेः परं
निरंतरं स्वयंज्योतिरणिमानमखंडितं ॥१७॥ ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना । परिपश्यत्युदासीनं प्रकृतिं च हतौजसं ॥१८॥
न युज्यमानया भक्त्या भगवत्यखिलात्मनि । सदृशोऽस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये ॥१९॥ प्रसंगमजरं पाशमात्मनः कवयो वि
दुः ॥ स एव साधुषु कृतो मोक्षद्वारमपावृतं ॥२०॥ तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनां । अजातशत्रवः शांताः साधवः साधु
भूषणाः ॥२१॥ मय्यनन्येन भावेन भक्तिं कुर्वंति ये दृढां । मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः ॥२२॥ मदाश्रयाः कथा मृष्टाः
शृण्वंति कथयंति च । तपंति विविधास्तापा नैतान्मद्गतचेतसः ॥२३॥ त एते साधवः साध्वि सर्वसंगविवर्जिताः । संगस्तेष्वथ ते
प्रार्थ्यः संगदोषहरा हि ते ॥२४॥ सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः । तज्जोषणादाश्वपवर्गवर्त्मनि श्र

नात्रानुवर्त्तिनः साधुस्वभावाः शीलं तदेव भूषणं येषां ॥११॥ एतावत्कलक्षणानुतापात्राध्यात्मिकादयो न तपंति न व्यथ द्धा रतिर्भक्तिरनुक्रमिष्यति ॥२५॥
यंति अतः मत्कृते चेतो येषां तान् ॥२२॥ येनापि तन्निमित्तं प्रसंगते साध्वर्थः ॥२४॥ सत्संगात्प्रसंगता तत्पदमारपति सतामिति वीर्यस्य सम्यक् वेदनं यासु
ताः वीर्यसंविदः हृत्कर्णयोः रसायनाः सुखदाः तासां जोषणात्सेवनात् अपवर्गो विद्यानिवृत्तिः वर्त्म यस्मिन् हरौ ॥ प्रथमं श्रद्धा ततो रतिः ततो भक्तिः

भा॰ तृ॰ ततः किमत आह भक्त्येति मद्रचनया सृष्ट्यादिलीला तस्या अनुचिन्तया भक्त्या ऐन्द्रियात् सुखात् जातविरागः सन् दृष्टश्रुतात् ऐहिकात् ततो यत्न
८९ उद्युक्तः सन् चित्तस्य ग्रहणे यतिष्यति ॥ ऋजुभिः प्रधानत्वात् नायासैः ॥ २६ ॥ तदेवं प्रकृतेर्गुणानामसेवया ज्ञानादिभिश्च प्रत्यंचं वरुं इहैव देहे मामे
वावरुन्धे प्राप्नोति ॥ २७ ॥ काचिदिति काचिदित्यर्थः ॥ उचिता योग्या तत्रापि मम स्त्रियाः कीदृशी गोचरा योग्या निर्वाणं मोक्षात्मकं तव पदं स्वरूपं अञ्जसा

भक्त्या पुमान् जातविराग ऐन्द्रियाद् दृष्टश्रुतान्मद्रचनानुचिन्तया ॥ चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः ॥ २६ ॥
असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृम्भितेन ॥ योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुन्धे ॥ २७ ॥ देवहूतिरु
वाच ॥ काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा ॥ यया पदं ते निर्वाणमञ्जसान्वाश्नवा अहं ॥ २८ ॥ यो योगो भगवद्बाणो निर्वा
णात्मंस्त्वयोदितः ॥ कीदृशः कति चाङ्गानि यतस्तत्त्वावबोधनं ॥ २९ ॥ तदेतन्मे विजानीहि यथाहं मन्दधीर्हरे ॥ सुखं बुद्ध्येय दुर्बोधं यो
षा भवदनुग्रहात् ॥ ३० ॥ मैत्रेय उवाच ॥ विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः ॥ तत्त्वाम्नायं यत्प्रवदन्ति सांख्यं प्रो
वाच वै भक्तिवितानयोगं ॥ ३१ ॥

अन्वाश्नवै अनन्तरमेव सर्वात्मना प्राप्स्यामि ॥ अञ्जसान्विति पाठे अश्नुहं त्विति संबंधः ॥ २८ ॥ भगवद्बाणः यो भगवन्तं लक्ष्यी
करोतीत्यर्थः ॥ यतः यस्मात् ॥ २९ ॥ विजानीहि विशेषेण ज्ञापय ॥ सुखमनायासेन ॥ ३० ॥ इत्थं मातुरर्थं प्रयोजनं विदित्वा जातस्नेहत्वे हेतुः ॥ यत्र य राम
स्मात् तन्वा देहेनाभिव्यक्तः ॥ तत्त्वान्याम्नायन्ते सम्यग्ज्ञायन्ते यस्मिन् तत् यत्सांख्यं प्रवदन्ति तत्प्रोवाच भक्तिवितानं योगं च ॥ ३१ ॥ रामराम ८९

कापि त्वष्टुतिनिर्ता भक्तिरिति रिश्चाप्रत्नयां भक्तिं लक्षयति ॥ गुणाः विषयाः लिंग्यंते ज्ञायंते यैस्तेषां देवानां द्योतनात्मकानामिंद्रियाणां तदधिष्ठातॄणां
वा सत्त्वे सत्त्वमूर्तौ हरावेव या वृत्तिः सा भक्तिः सिद्धेर्मुक्तेरपि गरीयसी श्रेष्ठा तन्नेरेणाच्छ्वघः ॥ कथंभूता अनिमित्ता निष्कामा ॥ स्वाभाविकी अयत्नसिद्धा तै
षामेवंविधत्वे हेतुमाह ज्ञानेहं ज्ञानप्रश्नत्वमश्रवोवेदः तद्विहितमानुश्रविकं तदेव कर्म येषां अत एकं च पम विकृतमनो यस्य स्तस्य
दसत्त्वसेत्यर्थः ॥ ३१ ॥ मुक्तिश्रयाः सगीकी भवत्येवेत्याह ॥ या भक्तिः कोशं लिंगशरीरं जरयति रूपयति त्वशयत्नविनैव यथा हि दृष्टांतः ॥ निगीर्णमन्नमन

श्रीभगवानुवाच ॥ देवानां गुणलिंगानामानुश्रविककर्मणां ॥ सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥ अनिमित्ता भा
गवती भक्तिः सिद्धेर्गरीयसी ॥ ३२ ॥ जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ ३३ ॥ नैकात्मतां मे स्पृहयंति केचिन्मत्पा
दसेवाभिरता मदीहाः ॥ योन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि ॥ ३४ ॥ पश्यंति ते मे रुचिराण्यंब संतः प्रस
न्नवक्त्रारुणलोचनानि ॥ रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदंति ॥ ३५ ॥ तैर्दर्शनीयावयवैरुदारविलासहा
सेक्षितवामसूक्तैः ॥ हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते ॥ ३६ ॥

अनलो जाठरो यथा जरयतीति ॥ ३३ ॥ भक्तेर्गरिष्ठत्वमेवोपपादयति नैकात्मतामिति पंचभिः एकात्मतां सायुज्यमोक्षं मदर्थमीहाः क्रिया येषां प्रस
ज्य आसक्तिं कृत्वा पौरुषाणि वीर्याणि ॥ ३४ ॥ प्रसन्नानि वक्त्राणि प्रहणानि लोचनानि च येषु तेर्यर्दैः साकं स्पृहणीयां परमेश्वरस्तु भवतु एवं भक्तावधि
कमिति भावः ॥ ३५ ॥ आत्मानं सत्त्ववरं प्रभावीत्याह नैरिति दर्शनीया मनोहरा अवयवा ऊरुवदनेत्रादयो येषु तैः हृत आत्मा चित्तं येषां हृताश्च प्रा
णा इंद्रियाणि येषां तान् भजतः अनिच्छत इच्छाहीनानपि अण्वीं सूक्ष्मां गतिं प्रापयति कैः हृतात्मनः उदारैर्विलासहासादिभिः तत्र विलासो लीला वाम

भा॰तृ
९०

विभूत्यादिकं तत्राधिकमित्याह अथो इति अविद्यानिवृत्यनंतरं विभूतिं सत्यलोकादिगतां भोगसंपत्तिं अणिमाद्यष्टांगमैश्वर्यमनुप्रवृत्तं भक्ति-
मनुवृत्तं एव प्राप्तमपि भागवतीं च श्रियं वैकुंठस्थां संपत्तिं अस्पृहयंति ते यद्यपि न स्पृहयंतीत्यर्थः तथापि परलोके वैकुंठे अश्नुवते प्राप्नुवंत्येव
३७ नन्वेवं तर्हि लोकत्वाविशेषात्स्वर्गादिवद्भोक्तृभोग्यानां कदाचिद्विनाशः स्यात् तत्राह हे शांतरूपे यद्वा शांतं रूपं सत्त्वं तदेकरूपे वैकुंठे मत्पराः क-
दाचिदपि न नंक्ष्यंति भोग्यहीना न भवंति अनिमिषो मे हेतिः मदीयं कालचक्रं च नो लेढि तान्न ग्रसति तत्र हेतुर्येषामिति सुतवत् स्नेहविषयः सखे-
व विश्वासास्पदं गुरुरिवोपदेष्टा सुहृदिव हितकारी इष्टं दैवमिव पूज्यः एवं सर्वभावेन मां ये भजंति तान्मदीयं कालचक्रं न ग्रसतीत्यर्थः ३८ एवं

अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तं श्रियं भागवतीं वाऽस्पृहयंति भद्रां परस्य मे तेऽश्नुवते तु लोके ३७ न कर्हि-
चित्मत्पराः शांतरूपे नंक्ष्यंति नो मेऽनिमिषो लेढि हेतिः येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टं ३८ इमं लोकं त-
थैवामुमात्मानमुभयायिनं आत्मानमनु ये चेह ये रायः पशवो गृहाः ३९ विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखं भजंत्यन-
न्यया भक्त्या तान्मृत्योरतिपारये ४० नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ४१ मद्भया-

मुक्तावद्युक्तिं एवं एकांतभक्तेभ्यो ददामीत्याह इममिति द्वाभ्यां द्वाति वातोऽयं सूर्यस्तपति मद्भयात् वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ४२
उभयायिनं लोकद्वयगामिनं आत्मानं सोपाधिकं आत्मानमनु ये च कलत्रादयः ये च पश्वादयः रायः धनानि ३९ अनन्यया अपरिग्रहान्मृत्योः सं-
सारात् अतिपारये इति अतितारयामि ४० अभक्तानां तु न कथंचिदपि मोक्ष इत्याह नेति मद्भगवतोऽन्यत्र भगवतो मत्तो विना सर्वभूतानामात्मनः एम
भगवदादिविशेषणत्रयेण सामर्थ्यं निरपेक्षं हितकारित्वं चोक्तं ४१ ऐश्वर्यं स्फुटयति मद्भयादिति श्रुतिश्च भीषास्माद्वातः पवते भीषोदेति सूर्यः ९०
भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ४२

महज्जनादेव मोक्ष इत्यत्र प्रमाणवाक्यं प्रमाणयति तान्येनेति ॥ ४३ ॥ उपसंहरति एतावानिति मय्यर्पितं सत्मनः स्थिरं भवतीति यत् एतावानेव ४४
इति तन्त्रिये च णः ॥ बहुधेति एवं प्रकृत्यात्मविवेकायोपदेशं पते ॥ सांख्येन सर्वं भावाना जन्मलक्षणं भेदतः ॥ १ ॥ धात्रा उपायपत्योक्तं
त्रेमितास्तेन यत् ॥ मात्रे मात्म तरध्यात्मयोगाध्यान्येनाहं तत्त्ववित ॥ २ ॥ तत्वाप्त्राप्यपत्यत्ववरं तिस्रः सांख्यं भक्तियोग इति त्रयोपदिष्टं ॥ तत्र भक्ति मुक्त्वा
इदानीं नंदात्मप्रमाह ॥ अथेति ॥ १ ॥ अथेति मन्नमुक्तिं एत्यतानादेव न तत्तत्वलक्षणं तानात्मेव विदित्वा तिमत्सपेतीति श्रुतेरत्राह तानपि
तानेवे एपष्टक्ते न भक्तियोगेन योगिनः ॥ रे मायपाद स्थूलं मेश्व विशत्यक्त तो भयं ॥ ४३ ॥ एतावानेवलोके स्मिन् पुंसा नि
श्रेयसोदयः ॥ तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरं ॥ ४४ ॥ इति श्री भ ग व ते म हा पु रा णे त ति य स्कं धे कापिलेयोपा
ख्याने पंचविंशतितमो ध्यायः ॥ श्री भ ग वा नु वा च ॥ अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् ॥ यद्विदित्वा विमुच्येत पु
रुषः प्राकृतैर्गुणैः ॥ १ ॥ ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं ॥ यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनं ॥ २ ॥ अनादिरात्मा
ति आत्मदर्शनं रूपं ज्ञानं अत एव हृदयग्रंथिभेदनं अहंकार पुरुषो निर्गुणः प्रकृतेः परः ॥ प्रत्यक्धामा स्वयंज्योतिर्विश्वं येन समन्वितं ॥ ३ ॥
रनिवर्त्तकं निःश्रेयसप्रयोजनाय यदाहुः तत्ते वर्णयामि तत्त्वलक्षणैर्विविक्तात्मज्ञानं भवतीति भावः ॥ १ ॥ तत्र पुरुषं लक्षयति अनादिरिति
आत्मैव पुरुषः को सावात्मा प्रत्यक् प्रतिलोमं धाम स्फूर्त्तिर्यस्य प्रकृतिकं परं व्यावर्त्तयति ॥ अनादिरिति ॥ समादित्वपरं व्यावर्त्तयति प्रकृतेः परः अ
न्यः अगुणः ॥ ज्ञानादिगुणात्वं वारयति ॥ निर्गुणः ममात्म प्रकाशयामि मतं ज्ञानं विषयं वारयति स्वयंज्योतिः अनेनैव स्वप्रकाशमितं ज्ञानाधार
त्वेन स्फुरणमपि निरस्तं ॥ स्वयंज्योतिष्ट्वे हेतुः विश्वं येन समन्वितं ॥ प्रकाशान्तरनिषेधः ॥ एतैरेव हेतुभिः पुरुषस्य प्रकृतेः परत्वमपि सिद्धं ॥ ३ ॥

आत्रावरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विविधा॥ तत्रावरणशक्त्यैव जीवोपाधिरविद्या विक्षेपशक्त्यैव माया पारमेश्वरी॥ पुरुषश्च जीवेश्व
रस्वरूपेण द्विविधः॥ तत्र यः प्रकृत्यविवेकेन संसरति स जीवः॥ यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स परमेश्वरः॥ तत्र प्रकृत्यविवेकेन जीव
स्य संसारमाह॥ स एष इति पंचभिः॥ सूक्ष्मां अव्यक्तां दैवीं वैष्णवीं विभोः शक्तिं लीलया उपगतां यदृच्छयैवाभ्यपद्यत तत्स्वीयः॥४॥ तस्या लीलामाह
गुणैरिति ज्ञानं गूहति आवृणोतीति ज्ञानगूहा तया तथा च श्रुतिः॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः॥ अजो ह्येको जु

स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः॥ यदृच्छयैवोपगतामभ्यपद्यत लीलया॥४॥ गुणैर्विचित्राः सृजतीं सरू
पाः प्रकृतिं प्रजाः॥ विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया॥५॥ एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान्॥ क
र्मसु क्रियमाणेषु गुणैरात्मनि मन्यते॥६॥ तदस्य संसृतिर्बन्धः पारतंत्र्यं च तत्कृतं॥ भवत्यकर्तुरीशस्य साक्षि
णो निर्वृतात्मनः॥७॥

षमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इति॥ मुमुहे आत्मानं विस्मृतवान्॥५॥ पराभिध्यानं प्रकृत्यध्यासः तेन प्रकृतेर्गुणैः कर्मसु क्रिय
माणेषु कर्तृत्वमात्मनि मन्यते॥६॥ तदिति॥ कर्तृत्वाभिमननमेवास्य संसृतिः संसारः साक्षिमात्रत्वात् अकर्तुरेव सतः कर्मभिर्बन्धः ईशस्यापारतंत्र
स्यैव कर्मबंधकृतं भोगे पारतंत्र्यं॥ आनिर्वृतात्मनः सुखात्मकस्यैव संसृतिर्जन्ममृत्युप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वं भवतीत्यर्थः॥७॥

नन्वचेतनस्य प्रधानस्याधिकरणत्वेनैव कर्तृत्वादि प्रतीतेस्तस्यैव रंगाक्रियतां नेत्याह ॥ कार्यशरीरं कारणमिंद्रियं ॥ कर्त्रादि देवतावर्गः ॥ तद्भावापन्नोऽपुरु
षस्तं प्रकृतिं कारणं विदुः ॥ कूटस्थस्य स्वतो विकाराभावात् ॥ प्रकृतिपरिणामभूतदेहाद्यहंकारकृतमेव कर्तृत्वादिकमित्यर्थः ॥ भोक्तृत्वे पुरुषं
कारणं विदुरित्यस्यायं भावः ॥ यद्यप्यहंकारगतमेव कर्तृत्वादिकं भोक्तृत्ववत्तथापि विकारस्य जडत्वात्प्रधानत्वादुपाधिप्राधान्यं ॥ भोगस्य चिदनवभा
नत्वात्पुरुष हितप्राधान्यमिति ॥ ॥ तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं चज्ञात्वेदानीं जगत्कारणमीश्वरं तत्प्रकृतिं च पश्यति ॥ प्रकृतेरिति ॥ अस्य

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः भोक्तृत्वे पुरुषं वेदुः ॥ वोवतंपुरुषं प्रकृतेः परं ॥ ॥ देव हूती प्रश्न ॥ च ॥ प्रकृतेः पुरु
षस्यापि लक्षणं पुरुषोत्तम ॥ ब्रूहि कारणयोरस्य सदसच्च यदात्मकं ॥ ए ॥ श्री भगवानुवाच ॥ यत्तत्त्रिगुणमव्य
क्तं नित्यं सदसदात्मकं ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ १० ॥ पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा
एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥ ११ ॥ महाभूतानि पंचैव भूरापोऽग्निर्मरुन्नभः ॥ तन्मात्राणि च तावंति गंधादी

विरलस्य सदसच्च स्थूलं सूक्ष्मं च कार्यं तदात्मकं तयोः प्रकृतिपुरुषयोः ॥ ए ॥ तत्र प्रकृतिं लक्षयति ॥ यत्प्रधानं तदेव प्र (निमतानि मे ॥ १२ ॥
कृतिं प्राहुः ॥ किं तत्प्रधानं त्रिगुणं ॥ त्रिगुणं ॥ किं महत्तत्त्वादि ॥ न अव्यक्तं अकार्यं ॥ किं
कालादि न ॥ सदसदात्मकं कार्यकारणरूपं ॥ किं जीवः प्रकृतिः न ॥ नित्यं ॥ १० ॥ अस्यैवं तत्त्वानां लक्षणं वक्तुं तानि गणयति पंचभिरित्यादि संख्या
भेदेन एतच्चतुर्विंशतिकं एतानि चतुर्विंशतिं वा एतानि चतुर्विंशतिर्यस्मिन्गणे तं गणं प्राधानिकं प्रधानकार्यात्मकं ब्रह्म विदुः ॥ ११ ॥ एतदिति ॥

भा॰तृ
८१

॥१३॥ अंतरात्मकमंतःकरणं लक्षणारूपयाख्यवृत्ते(?)दिकया ॥१४॥ यावान्मया प्रोक्तः एतावानेव संख्यातः तत्त्वैः कालंतु पृथगाह ॥ यः कालः
सपंचविंशकः प्रकृतेरेवावस्थाविशेषइत्यर्थः ॥१५॥ एकेतुपौरुषंपुरुषस्येश्वरस्यप्रभावंविक्रममेकालमाहुः ॥ तमेवकालंद्वेधालक्षयति यतो
भयंभवतिकस्यप्रकृतिमीयुषः प्राप्तस्यअतएवदेहेअहंकारेणविमूढस्यकर्तुर्जीवस्यअनेनसंहारकत्वेनलक्षितः ॥१६॥ सृष्टिहेतुत्वेनलक्षय
तिप्रकृतेरिति ॥ १७ ॥ कोसौभगवानित्याह ॥ अंतः सर्वप्राणिनांयः पुरुषरूपेणनियंतृत्वेनसमन्वेतीति ॥ सम्यक्कृतद्धिकाररहितएवातुस्मृतोवृत्ते

इंद्रियाणिदशश्रोत्रंत्वग्दृग्रसननासिकाः ॥ वाक्करौचरणौमेढ्रंपायुर्दशमउच्यते ॥१३॥ मनोबुद्धिरहंकारश्चि
त्तमित्यंतरात्मकं ॥ चतुर्धालक्ष्यतेभेदोवृत्त्यालक्षणरूपया ॥१४॥ एतावानेवसंख्यातोब्रह्मणः सगुणस्यह
सन्निवेशोमयाप्रोक्तोयः कालः पंचविंशकः ॥१५॥ प्रभावंपौरुषंप्राहुः कालमेकेयतोभयं ॥ अहंकारविमूढस्यक
र्तुः प्रकृतिमीयुषः ॥१६॥ प्रकृतेर्गुणसाम्यस्यनिर्विशेषस्यमानवि ॥ चेष्टायतः सभगवान्कालइत्युपलक्षितः ॥१७॥
अंतः पुरुषरूपेणकालरूपेणयोबहिः ॥ समन्वेत्येषसत्वानांभगवानात्ममायया ॥१८॥

बहिश्चकालरूपेणएषभगवान् ॥ यद्वा ॥ यः पुरुषइतिप्रसिद्धः कालः सपंचविंशः एकेतुपुरुषस्यप्रभावंकालमाहुः ॥ प्रभावस्यैवलक्षणंय
तइतिपुरुषस्यैवकालत्वेहेतुः ॥ प्रकृतेरिति ॥ उभयथाविवक्षायांहेतुः ॥ अंतरिति ॥ शेषंसमानं ॥ तदेवंप्र
कृतेश्चतुर्विंशतिभेदाः जीवेश्वरयोरैक्यविवक्षयाअतः ॥ पंचविंशतितत्वानितयोर्भेदविवक्षायांतुषड्विंशतिर्भवंति ॥ १८ ॥

राम
८१

इदानीं तत्त्वानामुत्पत्तिपूर्वकं लक्षणान्याह दैवादित्यादिना । एतान्यसंहत्येतेतः प्राक्तनेन ग्रंथेन तत्त्वविवक्षयोत्पत्तिपूर्वकं लक्षणमाह । चतुर्भिः
दैवात् जीवादृष्टात् । क्षुभिता धर्मिणो गुणा यस्याः योनौ अभिव्यक्तिस्थाने प्रकृतौ वीर्यं चिच्छक्तिं । सा प्रकृतिर्महत्तत्त्वमसूत । महतः स्वरूपमा
ह हिरण्मयं प्रकाशबहुलं ॥ १९ ॥ विश्वमहंकारादिप्रपंचं आत्मगतं स्वस्मिन् सूक्ष्मरूपेण स्थितं व्यंजयन् महान् तमः पिबत । कूटस्थः लयविक्षे
पशून्यः । आत्मानं प्रस्वापयतीति तथा । यत्पूर्वं प्रलयसमये महांतं प्रकृतौ विलापयामासेत्यर्थः ॥ २० ॥ प्रसंगाद्वासुदेवोपासनामाह । यत्तदि

दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् । आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयं ॥ १९ ॥ विश्वमात्मगतं
व्यंजन् कूटस्थो जगदंकुरः । स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः ॥ २० ॥ यत्तत्सत्त्वगुणं स्वच्छं शांतं
भगवतः पदं । यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकं ॥ २१ ॥ स्वच्छत्वमविकारित्वं शांतत्वमिति चेतसः
वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥ २२ ॥

ति सर्वागमप्रसिद्धत्वमाह । स्वच्छं विशदं शांतं रागादिरहितं भगवतः पदमुप
लब्धिस्थानं । अत एव वासुदेवाख्यं यदाहुः । अयमर्थः । अधिभूतरूपेण तत्त्वमेव महानिति संज्ञा । अध्यात्मरूपेण चित्तमिति । उपास्यरूपेण
वासुदेव इति । अधिष्ठाता तस्य क्षेत्रज्ञः । एवमहंकारे संकर्षण उपास्यः । रुद्रोधिष्ठाता । मनस्यनिरुद्ध उपास्यः । चंद्रोधिष्ठाता । बुद्धौ प्रद्युम्न उपा
स्यः । ब्रह्माधिष्ठातेति ज्ञातव्यं ॥ २१ ॥ स्वच्छत्वं भगवद्बिंबग्राहित्वं लयविक्षेपराहित्यं अपां प्रकृतिः फेनतरंगादिरहिता वस्थापरा स्वसंसर्गात्प्राक्तनी सा यथा
मधुरा स्वच्छा शांता च तद्वदित्यर्थः ॥ २२ ॥

अहंकारस्योत्पत्तिपूर्वकं लक्षणमाह महत्तत्त्वादिति त्रिभिः क्रियाशक्तिर्यस्य सः क्रियाशक्तिः २३ त्रैविध्यमाह वैकारिक इति तस्य कार्यमाह य-
तः यस्मात् मनआदीनां भवउत्पत्तिः २४ तस्मिन्नुपास्यव्यूहमाह सहस्रशिरसमिति २५ कर्तृत्वं देवतादिरूपेण करणत्वमिंद्रियरूपेण का-
र्यत्वं भूतरूपेण शांतत्वादिकं तु तत्कारणगुणत्रयरूपेण २६ मनस उत्पत्तिपूर्वकं लक्षणमाह वैकारिकादिति द्वाभ्यां संकल्पश्चिंतनं विकल्पो
विशेषचिंतनं यस्य मनसः संकल्पविकल्पाभ्यां कामसंभवो वर्तत इति कामरूपा वृत्तिर्लक्षणत्वेनोक्ता नत्वत्रोपास्यव्यूहोक्तिः तस्य सं-

महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात् क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत २३ वैकारिकस्तैजसश्च तामसश्च यतो भवः म-
नसश्चेंद्रियाणां च भूतानां महतामपि २४ सहस्रशिरसं साक्षाद्यमनंतं प्रचक्षते संकर्षणाख्यं पुरुषं भूतेंद्रियमनोमयं
२५ कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणं शांतघोरविमूढत्वमिति वा स्यादहंकृतेः २६ वैकारिकाद्विकुर्वाणान्मनस्त-
त्त्वमजायत यत्संकल्पविकल्पाभ्यां वर्तते कामसंभवः २७ यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरं शारदेंदीवरश्यामं
संराध्यं योगिभिः शनैः २८ तैजसात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत्सति द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः २९ संश-
योऽथ विपर्यासो निश्चयः स्मृतिरेव च स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३०

कल्पादिकार्यत्वाभावात् उपास्यव्यूहस्य चानिरुद्धस्योक्तेः २७ शारदं शरत्कालीनं इंदीवरं नीलोत्पलं तद्वदिंदीवरश्यामं यतः शनैः संराध्यं वशीकर्तुं योग्यं
दुर्ग्रहत्वात् २८ बुद्धेरुत्पत्तिपूर्वकं लक्षणमाह तैजसादिति द्वाभ्यां हे सति द्रव्यस्फुरणरूपं विज्ञानमिति विज्ञानमावृत्यर्थमुक्तं इंद्रियाणामनुग्रह इति सा-
विकल्पकत्वात् हृषीकाणामधीश्वरमिति युक्तं तत्त्वनिर्विकल्पनिद्रास्वप्न इति पातंजलोक्तेः ३०

इंद्रियाणामुत्पत्तिमाह ॥ तैजसानि तैजसाहंकारजातानि ॥ तानेंद्रियाणां वैकारिकत्वशंकानिवृत्त्यर्थमेवकारः द्विविधान्यपींद्रियाणि तै
जसान्येवेत्यर्थः ॥ तत्र हेतुः प्राणस्येति ॥ हि यस्मात्प्राणस्य क्रियाशक्तिर्बुद्धेश्च विज्ञानशक्तिता ॥ अतः प्राणस्य तैजसत्वात्तत्क्रियाशक्ति
मत्तामिंद्रियाणां तैजसत्वं तथा बुद्धेस्तैजसान्तरीयत्वात्तज्ज्ञानशक्तिमत्तामपींद्रियाणां तैजसत्वमित्यर्थः ॥ ३१ ॥ तन्मात्रोत्पत्तिपूर्वकं आकाशादिमहाभू
तोत्पत्तिं तल्लक्षणं चाह तामसादिति पंचदशभिः ॥ श्रोत्रं शब्दगमित्यादिभिर्विषयोत्पत्त्यनंतरं तत्संबंधमात्रं कथ्यते न तूत्पत्तिः शब्दे वा तत्र त
न्नाद्वा गच्छति प्राप्नोतीति शब्दगं ॥ ३२ ॥ शब्दस्य लक्षणमाह अर्थाश्रयत्वं अर्थवाचकत्वं द्रष्टुलिंगत्वं कुड्याद्यंतरितस्य वक्तृसूचकत्वं ॥ लक्षणं लिं

तैजसानींद्रियाण्येव क्रियाज्ञानविभागशः ॥ प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ॥ ३१ ॥ तामसाच्च विकुर्वाणाद्भगवद्वीर्यचो
दितात् ॥ शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं च शब्दगं ॥ ३२ ॥ अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिंगत्वमेव च ॥ तन्मात्रत्वं च नभसो लक्षणं कव
यो विदुः ॥ ३३ ॥ भूतानां छिद्रदातृत्वं बहिरंतरमेव च ॥ प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणं ॥ ३४ ॥ नभसः शब्दतन्मात्रात्का
लगत्या विकुर्वतः ॥ स्पर्शोऽभवत्ततो वायुस्त्वक्स्पर्शस्य च संग्रहः ॥ ३५ ॥ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च ॥ एतत्स्पर्शस्य स्पर्शत्वं

यद्द्रष्टुरूपयोरिति ॥ नभसस्तन्मात्रत्वं सूक्ष्मत्वं शब्दस्य लक्षणमित्यन्वयः ॥ ३३ ॥ छिद्रदातृत्वं अवकाशदातृत्वं बहिरंतरमेव ॥ तन्मात्रे तत्त्वं नभ एव ह्यतः ॥ ३६
बहिरंतरं ॥ आत्मा मनः प्राणादीनां धिष्ण्यत्वमाश्रयत्वं नाड्यादिछिद्ररूपेण वृत्तिः कार्यमेव लक्षणं वृत्तिलक्षणं [illegible] एवं उत्तरत्रापि एकेन श्लोके
न तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणं तृतीयेन महाभूतलक्षणमित्यनुसंधेयं ॥ ३४ ॥ कालगत्या विकुर्वतः स्पर्शस्य संग्रहः स्पर्शग्रहणं यया सा त्वक्
नियतलिंगत्वात् ॥ यद्वा स्पर्शस्य संग्रहस्ततो भवतीति शेषः ॥ शब्दतन्मात्रादित्यादि तन्मात्राणामुत्तरोत्तरगुणाधिक्येन ॥ ३५ ॥ स्पर्शत्वं त्वग्रूपलक्षणमित्यर्थः

चालनं वृक्षशाखादेः व्यूहनं मेलनं तृणादेः प्राप्तिः संयोगः द्रव्यस्य गंधवतो घ्राणं प्रति यथा रौत्यादिमतः स्पर्शनं प्रति शब्दस्य श्रोत्रं प्रति नेतृत्वं सर्वे
न्द्रियाणामात्मत्वं स्वरूपोद्बोधकत्वं कर्मणा कार्येणाभिलक्षणं भावे ल्युट् कर्मैवाभिलक्षणमिति विग्रहे तु करणे ३७ ॥ ८ द्रव्याकृतित्वं द्रव्यस्या
कारसमर्पकत्वं गुणता द्रव्योपसर्जनतया प्रतीतिः शब्दस्य तु ह्वातत्रैगौणत्वप्रतीतिः स्पर्शस्य द्रव्यस्य स्पर्शादेरपि ह्वातत्रैगौणत्वप्रतीतिः रूपस्य तेनैव
मिति तस्याथ विशेष उक्तः व्यक्तिसंस्थानं द्रव्यस्य पार्थस्थानं निवेशः सैव संस्थायस्य द्रव्यपरिणामतया प्रतीतिरित्यर्थः तेजस तेजस्त्वं मसाधा
रणत्वं ३९ द्योतनं प्रकाशनं पचनं तंडुलादेः क्षुत्तृष्णा अशनाया पिपासा च तत्तद्द्वारेण पानं अदनं च ४० जिह्वा रसनेन्द्रियं रसो गृह्यते अनयेति रस

चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणं ३७ वायोश्च स्पर्शतन्मात्रात्ततस्तद्रूपदेवे
दितारभूत सम्बुत्थितं ततस्तेजश्च रूपोपलंभनं ३८ द्रव्याकृतित्वं गुणता व्यक्तिसंस्थानमेव च तेजस्त्वं तेजसः साधुरूप
मात्रस्य वर्त्मनः ३९ द्योतनं पचनं पानमदनं हिममर्दनं तेजसो वृत्तयस्त्वेताः शोषणं कृतमेव च ४० रूपमात्राद्विकुर्वाणात्तेजसो
देवचोदितात् रसमात्रमभूत्तस्मादंभो जिह्वा रसग्रहः ४१ कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा भौतिकानां विकाराणां
सएको विभिद्यते ४१ क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोदनं तापापनोदो भूयस्त्वमंभसो वृत्तयस्त्विमाः ४२

ग्रहः यद्वारसग्रहस्ततो भवतीति शेषः ४१ कषायादिषु लवणोपि द्रष्टव्यः भौतिकानां संसर्गि द्रव्याणां ग्रहएको मधुररस एव सत्त्रेव कनेकधाभिद्य
तेस्परस्परत्यर्थः ४२ क्लेदनमार्द्रीकरणं पिंडनं मृदादेः पिंडीकरणं तृप्तिः तृप्तिदातृत्वं प्राणनं जीवनं आपोमयः प्राणइतिश्रुतेः आप्याय
नं तद्वैक्लव्यनिवर्त्तनं उदनं मृदूकरणं उदनमिति पाठेपि सएवार्थः भूयस्त्वं कूपारादुद्धृतस्यापि स्यन्तः पुनरुद्गमः ४२

गंधगः गंधं घ्राप्नोति ॥ ४४ ॥ करंभो मिश्रगंधः पृथाम्बुजनारीनां हिंगवादिसंस्कारेण ॥ पूतिर्गंधः पोरस्य कर्पूरादेः शांतः शतपत्रादेः उग्रो लसु
नादेः सप्तर्षिणां द्व्यावयवानां वैषम्यात् एव विभिद्यते सगंधः इत्यर्थः ॥ ४५ ॥ ब्रह्मणो भावनं प्रतिमारिक्तरूपेण समाकरतापादनं ॥ स्थाल्यजलादि
विलक्षणेन पात्रनेत्ररूपेक्षेणास्थितिः ॥ धारणं जलाद्याधारत्वं ॥ सतामाकाशादीनां विशेषणमवछेदकत्वं सर्वेषां सत्वानां प्राणितद्गुणानां
उपकारीनां उद्भेदः परिणामविशेषैः उपकारीकरणं ॥ ४६ ॥ श्रोत्रादीनां शब्दादिग्राहकत्वं पुत्रं तेषां बलक्षणं तदेवेत्याह पंचभिः श्लोकार्धैः नमस्

समाघ्राह्विकुर्वीणाः भूमौ रेवचोदितात् । गंधमात्रमभूत्तस्मात् पृथ्वी घ्राणस्तु गंधगः ॥ ४४ ॥ करंभपूतिसौरभ्यशांतोग्राम्लादि
भिः पृथक् । द्रव्यावयववैषम्यात् गंध एको विभिद्यते ॥ ४५ ॥ भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणं । सर्वसत्वगुणोद्भेदः पृथि
वीगुणलक्षणं ॥ ४६ ॥ नभोगुणविशेषोऽर्थो यस्य तच्छ्रोत्रमुच्यते ॥ वायोर्गुणविशेषोऽर्थो यस्य तत्स्पर्शनं विदुः ॥ ४७ ॥ तेजोगुणविशेषो
ऽर्थो यस्य तच्चक्षुरुच्यते ॥ अंभोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः ॥ भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते ॥ ४८ ॥ परस्य दृश्यते ध
र्मो ह्यपरस्मिन् समन्वयात् ॥ अतो विशेषो भावानां भूमावेवोपलभ्यते ॥ ४९ ॥ एतान्यसंहत्य यदा महदादीनि सप्त वै ॥ कालकर्मगुणो
पेतो जगदादिरुपाविशत् ॥ ५० ॥

गुणविशेषः शब्दो यस्यार्थो विषयः ॥ ४७ ॥ ४८ ॥ गुणविशेषशब्दव्याख्यावन्नर्थं दर्शयति परस्य कारणस्य धर्मः शब्दादिः अपर
स्मिन् कार्ये वाय्वादौ कारणान्वयात् दृश्यते अतो भावानामाकाशादीनां विशेषो गुणाः सर्वो विशब्दादिः भूमावेवोपलभ्यते च लक्षणं तत्रान्वयात् जलादिष्वप
यान्वयमेव न सर्वः आकाशे त्वन्यान्वयाभावात् एक एवेति ॥ ४९ ॥ एवं कारणोत्पत्तिमुक्त्वा कार्योत्पत्तिमाह सार्द्धैस्त्रिभिः एतान्यसंहत्य अमिलित्वा यदा स्थि
तानि तदा जगदादिरीश्वरः प्राविशत् सप्तेति च प्राधान्याभिप्रायेणोक्तं प्रवेशात् सर्वेषामपि विवक्षित एव ॥ ५० ॥

भा०त० अनुविद्धेभ्यः क्षुभितेभ्यः यस्मादंडादसौ विराट् पुरुष उदतिष्ठत् भगवतोरूपमिति पुरुषाभेदाभिप्रायेण ५१ तस्मिन्नध्यात्मादिविभागमाह
९५ हिरण्मयादिति नवभिः उत्थाय औदासीन्यं विहाय तमाविश्य अधिष्ठाय महाश्चासौ देवश्च खं छिद्रं ५३ वाण्या सह वह्निरभवत् प्राविशत् ना

ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनं उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ५१ एतदंडं विशेषाख्यं क्रमवृद्धैर्दशो
त्तरैः तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः यत्र लोकवितानोयं रूपं भगवतो हरेः ५२ हिरण्मयादंडकोशाद
उत्थाय सलिलेशयात् तमाविश्य महादेवो बहुधा निर्बिभेद खं ५३ निरभिद्यतास्य प्रथमं मुखं वाणी ततोभवत् वा
ण्या वह्निरथो नासे प्राणोतो घ्राण एतयोः ५४ घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः तस्मात्सूर्यो न्यभिद्ये
तां कर्णौ श्रोत्रं ततो दिशः ५५ निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः ततश्चौषधयश्चासन् शिश्नं निर्बिभिदे
ततः ५६ रेतस्तस्मादाप आसन्निरभिद्यत वै गुदं गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ५७ हस्तौ च निरभिद्ये
तां बलं ताभ्यां ततः स्वराट् पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ५८ नाड्योस्य निरभिद्यंत ताभ्यो लोहितमाभृत
नद्यस्ततः समभवन्नुदरं निरभिद्यत क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् ५९

निरभिद्येतां घ्राणौ नासे ततः प्राणो नस्ततः स्मृतः सन् घ्राणः एतयोर्नासिकयोरभवदित्यनुषंगः ५४ घ्राणादनंतरं वायुश्च प्राणोतदिति विशेषणं सर्वेन्द्रियेष्वपि
द्रष्टव्यं न्यभिद्येतां अभ्यभिद्येतामिति पाठद्वयेप्येक एवार्थः ततो दिशः प्राविशत ५५ आदिशब्देन केशाः ५६ ७ स्वराडिंद्रः हरिर्विष्णुः ५८ आभृत ९५

बुद्ध्यादिषु हृदयमेवाधिष्ठानं गिरांपतिर्ब्रह्मा ॥ चैत्यः क्षेत्रज्ञः ॥ ६० ॥ अन्वयव्यतिरेकाभ्यां क्षेत्रज्ञं विवेक्तुं सर्वेषां पुनः प्रवेशमाह एत इति नवभिः ॥ ६९ ॥ विराड्देहस्य व्यष्टिदेहदृष्टान्तत्वं दर्शयन्नाम्नास्तु कथनस्य प्रयोजनमाह यथेति द्वाभ्यां ॥ ७० ॥ प्रथमं परमेश्वरे भक्तिस्त

अथास्य हृदयं भिन्नं हृदयान्मन उत्थितं ॥ मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरांपतिः ॥ अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् ॥ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ॥ ६१ ॥ वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् ॥ ६२ ॥ घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् ॥ अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ॥ ६३ ॥ श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट् ॥ त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ॥ ६४ ॥ रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् ॥ गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ॥ ६५ ॥ हस्ताविन्द्रो बलेनैव नोदतिष्ठत्तदा विराट् ॥ विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ॥ ६६ ॥ नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट् ॥ क्षुत्तृड्भ्यामुदरं सिंधुर्नोदतिष्ठत्तदा विराट् ॥ ६७ ॥ हृदयं मनसा चन्द्रो नोदतिष्ठत्तदा विराट् ॥ बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट् ॥ रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा विराट् ॥ ६८ ॥ चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा ॥ विराट् तदैव पुरुषः सलिलादुदतिष्ठत ॥ ६९ ॥ यथा प्रसुप्तं पुरुषं प्राणेन्द्रियमनोधियः ॥ प्रभवन्ति विना येन नोत्थापयितुमोजसा ॥ ७० ॥ तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया ॥ भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत् ॥ ७१ ॥ इति त [illegible] धे षड्विंशतितमोऽध्यायः ॥ २६ ॥

तोऽन्यत्र विरक्तिः ततो योगप्रवृत्ताधीः एकाग्रचित्तं ततो यत्नज्ञानं तेन प्रत्यगात्मानं क्षेत्रज्ञं अस्मिन्नात्मनि कार्यकारणसंघाते विविच्य चिंतयेत् ॥ ७१ ॥ षड्विंशः

भा॰ त॰
९६

सप्तविंशे ततः सम्यग्बन्धसाधनयोगतः पुंप्रकृत्योर्विवेकेन मोक्षरीतिर्निरूप्यते ॥१॥ विवेकज्ञानेन मोक्षमुपपादयिष्यंस्तदुद्देशेनैव पुरुषस्य पूर्वोक्तं प्रकृत्यविवेकतः संसारमनुस्मारयति ॥ प्रकृतिस्थोपीति त्रिभिः देहस्थोपि नाज्यते न लिप्यते ॥ गुणैः प्राकृतैः सुखदुःखादिभिः निर्गुणत्वात् कर्तृत्वं कुतः विकारित्वं तस्मात् ॥१॥२॥ अनिर्वृतः सन् प्रकृतिं प्राकृतैः सदसन्मिश्रयोनिषु देवतिर्यङ्नरादिषु संसारपदवीं प्राप्नोति ॥३॥ ननु तत्त्वेवात्मन्यवत्वात्संसृतेः किं तन्निवृत्तिप्रयासेन तत्राह अर्थे हीति ॥४॥ यतो विषयध्यानमनर्थहेतुः अतो मनो नियन्तव्यमित्याह

श्रीभगवानुवाच ॥ प्रकृतिस्थोपि पुरुषो नाज्यते प्राकृतैर्गुणैः ॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ॥१॥ स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते ॥ अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते ॥२॥ तेन संसारपदवीमवशोभ्येत्यनिर्वृतः ॥ प्रासङ्गिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ॥३॥ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ॥४॥ अत एव शनैश्चित्तं प्रसक्तमसतां पथि ॥ भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ॥५॥ यमादिभिर्योगपथैरभ्यासञ्छ्रद्धयान्वितः ॥ मयि भावेन सत्येन मत्कथाश्रवणेन च ॥६॥ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः ॥ ब्रह्मचर्येण मौनेन

अत एवेति असतामिन्द्रियाणां पथि विषयमार्गे तीव्रेण दृढेन विरक्त्या च तीव्रया ॥५॥ भक्त्याविरक्तौ हीन्द्रत्वे कारणानि च ॥ स्वधर्मेण बलीयसा ॥ णीयनूज्ञानेन मोक्षप्रकारमाह षड्भिः यमादिभिर्योगमार्गैः चित्तमभ्यसन् पुनः पुनरेकाग्रीकुर्वन् आत्मानमुपलभ्य सर्वानुस्मृते मद्ध्यपरमात्मानं प्रतिपद्यत इति षष्ठेनान्वयः सत्येन निष्कपटेन भावेन प्रेम्णा ॥६॥ अप्रसंगतः संगत्यागेन बलीयसा स्वधर्मे अर्पितेन ॥७॥

९६

विविक्तदेशे एकांतवासी । न अस्य रागद्वेषममता प्रकृतेः पुरुषस्य च दृष्टतत्वं येन तेन ९ निवृत्तानि बुध्यवस्थानानि जाग्रदादीनि यस्य सः अ-
त एव दूरीभूतमन्यदर्शनं यस्य आत्मना अहंकाराविच्छिन्नेन आत्मानं शुद्धमुपलभ्य एकस्यैवावच्छेदानवच्छेदाभ्यां कारणत्वकर्तृत्वे दृष्टांतमाह
चक्षुषा चक्षुरवच्छिन्नेनार्कं गगनस्थमर्कमिव एवमात्मदृक् शुद्धमात्मानं पश्यति १० मुक्तलिंगं निरुपाधिकं अहमिति तथाभूतेः अहंकारस-
दाभासस्वरूपेणाभासमानं ब्रह्म प्राप्नोति शुद्धजीवत्वरूपाद्विशेषमाह सतः कारणस्य प्रधानस्य बंधमधिष्ठानं असतः कार्यस्य चक्षुरिव प्रका-
शकं सर्वेषु कार्यकारणेषु अनुस्यूतं अद्वयं परिपूर्णं ११ अहंकारोपहितेन स्वरूपेण शुद्धब्रह्मप्रतिपत्तिं सदृष्टांतमाह यथेति जले स्थितश्च आभासः सूर्यप्रति-

यदृच्छयोपलब्धेन संतुष्टो मितभुङ्मुनिः विविक्तः शरणः शांतो मैत्रः करुण आत्मवान् न सानुबंधे च देहेस्मिन्नकुर्वन्नसदाग्रहं ज्ञा-
नेन दृष्टतत्वेन प्रकृतेः पुरुषस्य च ९ निवृत्तबुध्यवस्थानो दूरीभूतान्यदर्शनः उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् १०
मुक्तलिंगं सदाभासमसति प्रतिपद्यते सतो बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयं ११ यथा जलस्थ आभासः स्थलस्थेनावदृश्य-
ते स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः १२ एवं त्रिवृदहंकारो भूतेंद्रियमनोमयैः स्वाभासैर्लक्षितोनेन सदाभासेन सत्य-
दृक् १२

बिंबोपरागृहांतर्वर्त्तिभित्तौ स्फुरति तदा गृहकोणस्थितैः पुरुषैर्भित्त्यादौ स्थले स्थितेन स्वाभासेन सूर्यप्रतिबिंबेन यथा प्रथमं जलस्थ
आभासोवदृश्यते गगनस्थस्य गृहमध्ये प्रतिबिंबायोगात् चार्थे तथा शब्दः यथार्थे त्वर्थः यथा च जलस्थेन दिवि स्थितः सूर्यः लक्ष्यते १२ एवं भू-
तेंद्रियमनोमयैः देहेंद्रियमनोभिरवच्छिन्नैः स्वाभासैः एतत्प्रतिबिंबैस्त्रिगुणोहंकारः सतो ब्रह्मण आभासो यस्मिन् तेन रूपेण लक्षितः अहंकारस्य
भासविना विषयाभासात् तत्वैः अनेन वाहंकारेण सदाभासवतामसत्पदं कुपरमार्थतत्वं निरुपं आत्मा लक्षितस्त्वर्थः १३

इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्तिमनुभववतो दर्शयति त्रिभिः॥ भूतादिषु असति असत्तुल्ये अव्याकृते निद्रया लीनेषु सत्सु यस्तत्र तदा
विनिद्रो निरहंक्रियस्तमात्मानं प्रतिपद्यत इति तृतीयेनान्वयः॥१४॥ ननु यदि तदा विनिद्रः सावलितर्हि जाग्रत्स्वप्नयोरिव स्फुरः किं नावम
न्यते तत्राह॥ पूर्वं सद्रष्टा सोऽहंत्वेन सविकल्पकतया स्फुरं प्रतीतः सुषुप्ते तु भूतादेरहंकारविषयस्य लीनत्वात्॥ तद्विषये हंकारे नष्टे सति
स्वयमनष्टोपि मृषैवात्मानं नष्टवन्मन्यमानो यः अन्यस्य नाशेऽन्यस्य नष्टकल्पत्वे दृष्टान्तः नष्टवित्तो यथा आतुरो विवशः नष्टवद्भवतीत्य
र्थः॥१५॥ ननु सुषुप्तो न किंचिदनुभूयते नैवं॥ सुखमहमस्वाप्सं न किंचिदवेदिषमिति विशेषज्ञानं विना केवलस्यात्मनः प्रतिसंधानादि

भूतसूक्ष्मेंद्रियमनोबुध्यादिष्विह निद्रया॥ लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः॥१४॥ मन्यमानस्तदात्मानमन
ष्टो नष्टवन्मृषा॥ नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः॥१५॥ एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते॥ साहंकार
स्य द्रव्यस्य योऽवस्थानमनुग्रहः॥१६॥ उद्धव उवाच॥ पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित्॥ अन्योन्यापाश्र
यत्वाच्च नित्यत्वादनयोः प्रभो॥१७॥ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः॥ अपां रसस्य च यथा तथा बुद्धेः परस्य च

त्याह॥ एवमिति॥ ननु प्रतिसंधाने साहंकारस्य प्रतीतेः कथं निरहंक्रियत्वं तत्राह साहंकारस्य द्रव्यस्य कार्यकारणसंघातस्य अनुग्रहः
प्रकाशकः अवस्थानवद्व्यविशेषणं तया अहंकारस्यापि दृश्यत्वाच्च तद्द्रष्टात्मा न व्यतिरिक्तः तमात्मानमित्यन्वयः॥१६॥ भक्तिविर
क्तिभ्यां सत्यपि विवेके प्रकृतिपुरुषयोः परस्परात्यागाभावात् कथं मुक्तिरिति शङ्कते पुरुषमिति चतुर्भिः॥१७॥ व्यतिरेकाभावयोर्दृष्टान्तः
यथा व्यतिरेकतो भावः सत्ता नास्ति गंधस्य वरौ वा रूपरसादीनां दृष्टान्तान्तरं अपामिति॥ बुद्धेः प्रकृतेः पुरुषस्य परस्य च॥१८॥

ततः किमत आह अकर्तुरिति येन गुणास्त्रयो यस्य सन्ति तेषु प्रकृतेर्गुणेषु सत्सु पुरुषस्य कैवल्यं कथं ॥१८॥ अत एव व्याख्यातं निरञ्ज
प्रायस्यापि संसारभयस्यापि पुनर्हृद्बोधः स्यात् इत्याह क्वचिदिति ॥१०॥ न प्रकृतिसंबंधमात्रं बंधहेतुः किं तु गुणमध्यात्तदासक्तिः
तन्निवृत्तौ सत्यां मोक्षो ऽबद्धः तेन विवृद्धवल्कसाधनवैकल्यात् इत्यभिप्रेत्य साधनातिशयं कथयन् परिहरति त्रिभिः ॥ निमित्तं फल
तन्निमित्तं प्रवर्त्तकं यस्मिन् तन्निष्कामेण धर्मेण गुणमलात्मना निर्मलेन मनसा तु तेन कथाश्रवणेन संभृतया ॥ ॥११॥ इत्यमा

अकर्तुः कर्मबंधोयं पुरुषस्य यदाश्रयः ॥ गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं ॥१८॥ क्वचित्तत्त्वावमर्शेन निवृत्तं
भयमुल्बणं ॥ अनिवृत्तनिमित्तत्वात् पुनः प्रत्यवतिष्ठते ॥१०॥ श्री भ उ व ॥ अनिमित्तनिमित्तेन स्वधर्मेणाम
लात्मना ॥ तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं ॥२१॥ ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा ॥ तपोयुक्तेन योगेन
तीव्रेणात्मसमाधिना ॥२२॥ प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशं ॥ तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥२३॥
भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः ॥ नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च ॥२४॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो
बह्वनर्थभृत ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥२५॥ एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसं ॥ युंजतो नापकुरुते

नाप्यभिभूयमाना तिरोहिता भवति ॥२३॥ एवं च सति पुनर्हृद्बोधो नास्तीत्याह भुक्तभोगा यस्याः अत एव परित्यक्ता ॥ आत्मारामस्य कर्हिचित
हृतीदृक्प्रदास्यापरतंत्रस्य स्वे महिम्नि स्थितस्य ज्ञानं प्राप्तस्य ॥२४॥ अविवेकावस्थायामनर्थहेतुरपि विवेकानन्तरं न भवतीति सदृष्टांतमा

हृदयग्रंथिनिद्राभ्यां प्रस्वापः स्वप्नः बह्वनर्थान्
बिभर्त्ति प्रस्याति प्रतिबुद्धस्य संस्कारवशेन
स्मरतोपि २६

भा॰त॰
५८

उपसंहरति यदैवमिति त्रिभिः बहुभिर्जन्मभिर्यस्मिन्काले ॥२७॥ प्रतिबुद्धार्थः विदितात्मतत्त्वः कैवल्याख्यं स्वसंस्थानं देहादिव्य-
तिरिक्तं स्वरूपं मदाश्रयं निःश्रेयसं निरतिशयानंदं ॥२८॥ स्वदृशात्मज्ञानेन छिन्नाः संशयाः मिथ्याज्ञानानि यस्य लिंगाद्विनिर्गमे
लिंगशरीरनाशे सतीत्यर्थः ॥२९॥ तदा त्वात्यंतिकीमाह यदेति सिद्धयो न तापरूपा भवंति तासु योगेनोपचितासु समृद्धासु न योगादन्यो हेतुः
तासां तासु यदा सिद्धस्य चेतो न विषज्जते अंग हे मातः अथ तदात्यंतिकी गतिः स्यात् यतो योगो हि तत्र स्वेच्छिनी यत्र यस्यां गतौ मृत्योर्हासो

यदैवमध्यात्मरतः कालेन बहुजन्मना ॥ सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः ॥२७॥ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादे-
न भूयसा ॥ निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयं ॥२८॥ प्राप्नोतीहांजसा धीरः स्वदृशाच्छिन्नसंशयः ॥ यद्गत्वा
न निवर्त्तेत योगी लिंगाद्विनिर्गमे ॥२९॥ यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेंग ॥ अनन्यहेतुष्वथ मे ग-
तिः स्यादात्यंतिकी यत्र न मृत्युहासः ॥३०॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे सप्तविंशतितमोऽध्यायः ॥ श्रीभग-
वानुवाच ॥ योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे ॥ मनो येनैव विधिना प्रसन्नं याति सत्पथं ॥१॥ स्वधर्माचरणं श-

न भवति विषक्तोऽत सिद्धोऽपि मया वशीकृत इति मृत्योर्हासो ग क्त्या विधर्माच्च निवर्त्तनं ॥ दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनं
र्वो भवतीत्यर्थः ॥३०॥ इति भावार्थदीपिकायां सप्तविंशोऽध्यायः ॥ अष्टाविंशे ततोऽष्टांगयोगेन ध्यानशोभिना ॥ सर्वोपाधिविनिर्मुक्तचिद्रूप
ज्ञानमीर्यते ॥१॥ भक्तिं संक्षेपतः प्रोच्य सांख्यमाख्याय विस्तृतं ॥ अथाह वैश्वं योगमष्टांगं कपिलो हरिः ॥२॥ सबीजस्यालंबनस्य प्रसन्नं
तं ॥ तत्र यमनियमानाह त्रिभिरष्टादशयाधिकैः शक्त्या स्वधर्माचरणं ॥२

राम
५८

ग्राम्यस्त्रैवर्गिको धर्मः तस्मान्निवृत्तिः क्षितं व्रतं मेध्यस्थं वतस्यारनं तत्र मितं नाम ॥ द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत्
मारुतस्य प्रचारार्थं चतुर्थमवशेषयेदिति स्मृतिप्रसिद्धं ॥ विविक्तं विजनं देशं निर्बाधं तस्य स्थानस्य सेवनं ॥२॥ यावतार्थः प्रयोजनं
तावन्मात्रस्य परिग्रहः ॥४॥ आसनोदासीन्यं गात्रस्य हस्त्रिभिः एतत् आसनस्य जये नैश्चैर्यं ॥५॥ स्वधिष्ण्यानां प्राणानां स्थानानां मूलाधारा
दीनां मध्ये एकस्मिन् देशे मनसा सह प्राणस्य धारणं ॥ आत्मनो मनसः सह समाधानं आत्माकारता ॥६॥ अन्यैश्च व्रततरां नादिभिः

ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनं ॥२॥ अहिंसासत्यमस्तेयं यावदर्थप
रिग्रहः ॥ ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनं ॥४॥ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः ॥ प्रत्याहारश्चेन्द्रियाणां
विषयान्मनसा हृदि ॥५॥ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणं ॥ वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ॥६॥
एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथं ॥ बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ॥ शुचौ देशे प्रतिष्ठाप्य विजितासन आस
नं ॥ तस्मिन् स्वस्ति समासीन ऋजुकायः समभ्यसेत् ॥ प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ॥ प्रतिकूलेन वा चित्तं यथा

पथिभिरुपायैः ॥७॥ आसनादीनि प्रपंचयति शुचाविति यावत्समाप्ति आसनं कुशाजिनचैलोत्तरं प्रतिष्ठाप्य स्वस्तिकासनेनोस्थिरमचंचलं ॥८॥
यथा तथा वेति वा ॥ समभ्यसेत् प्राणमिति शेषः ॥ ऊरुजंघान्तराधाय पादाग्रे जानुमध्यगे योगिनो यदवस्थानं स्वस्तिकं तद्विदो विदुः ॥ ॥ वाह्यवा
योरन्तः प्रवेशनं पूरकः प्रवेशितस्य धारणं कुंभकः धृतस्य वहिर्निःसारणं रेचकः प्रतिकूलेन रेचकपूरककुंभकैः यद्वा इडया पूर्य पिंगलया

ध्मातं तप्तमित्यर्थः ॥ लोहं सुवर्णं यथा मलं त्यजति तथा मनो विरजं स्यात् ततश्च चलनं न स्यादिति भावः ॥१०॥ प्राणायामादीनां सप्पाधौ
हारकार्याण्याह प्राणायामैरिति ॥ दोषान् वातश्लेष्मादीन् संसर्गान् विषयसंसर्गान् अनीश्वरान् गुणान् रागादीन् ॥ वाङ्नासह मनसः स्थिरी
करणं ॥ धारणा स्थिरस्य वृत्तिसंततिर्ध्यानं ॥ वृत्तिनिरोधः समाधिरिति भेदः ॥११॥ सुसमाहितं स्थिरं जातं ॥ काष्ठां कलां मूर्तिमित्यर्थः स्व
नासाग्रे अवलोकनं यस्य एतच्च लयविक्षेपयोः परिहाराय ॥१२॥ ध्येयं हरिमाह सप्तभिः प्रसन्नवदनाम्भोजं यस्मात् तं ध्यायेदिति षष्ठेनान्व

मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः ॥ वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलं ॥१०॥ प्राणायामैर्दहे
द्दोषान् धारणाभिश्च किल्बिषान् ॥ प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥११॥ यदा मनः स्वं विरजं यो
गेन सुसमाहितं ॥ काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः ॥१२॥ प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणं ॥ नीलो
त्पलदलश्यामं शंखचक्रगदाधरं ॥१३॥ लसत्पंकजकिंजल्कपीतकौशेयवाससं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभा
मुक्तकंधरं ॥१४॥ मत्तद्विरेफकलया परीतं वनमालया ॥ परार्ध्यहारवलयकिरीटांगदनूपुरं ॥१५॥ कांचीगुणोल्लसच्छ्रो

यः पद्मगर्भवदरुणे ईक्षणे नेत्रे यस्य नीलोत्पलदलवत् श्यामं ॥१३॥ णिं हृदयाम्भोजविष्टरं ॥ दर्शनीयतमं शान्तं मनोनयनवर्द्धनं ॥ अदि
लसत्पंकजस्य किंजल्कवत् पीतकौशेये वाससी यस्य श्रीवत्सो लाञ्छनं वक्षसि यस्य भ्राजित्कौस्तुभेनामुक्ता संश्लिष्टा कंधरा यस्य ॥१४॥ मत्त
द्विरेफाणां कलो मधुरो ध्वनिर्यस्यां तया परितं व्याप्तं परार्ध्यानि श्रेष्ठानि हारादीनि यस्य ॥१५॥ कांचीगुणेनोल्लसन्ती श्रोणी यस्य ॥ भक्तानां हृदयं

अपीच्यमतिसुंदरं भक्तविषयं दर्शनं यस्य । कैशोरे तारुण्ये वयसि स्थितं भृत्यानामनुग्रहे कातरं व्यग्रं ॥१७॥ कीर्तन्यं कीर्त्तनार्हं तीर्थं
यशो यस्य पुण्यश्लोका बलिप्रमुखाः तेषां यशस्करं । समग्राण्यंगानि यस्मिन् न च्यवते नापयाति न पर्येति ॥१८॥ प्रेक्षणीयमीहितं लीला यस्य
तं एवं समग्रध्यानमुक्त्वा एकैकावयवध्यानमाह । तस्मिन्नुलब्धपदं स्थितिर्येन तत् चित्तं विलक्ष्य विशेषेण लक्षीकृत्य एकत्र एकस्मिन्नंग ह त्य
थें: ॥२०॥ तदेव पादादिक्रमेण ह्वयोरशभिः संचिंतयेत । पादतले रेखात्मकानि वज्रादीनि लांछनानि तैराढ्यं । उत्तुंगाश्च रक्ताश्च वि

अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतं । संतं वयसि कैशोरे भृत्यानुग्रहकातरं ॥१७॥ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्क
रं । ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः ॥१८॥ स्थितं व्रजंतमासीनं शयानं वा गुहाशयं । प्रेक्षणीयेहितं ध्यायेत् शुद्ध
भावेन चेतसा ॥१९॥ तस्मिन्लब्धपदं चित्तं सर्वावयवसंस्थितं । विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः ॥२०॥ संचिंतये
द्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं । उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयां
धकारं ॥२१॥ यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोभूत् । ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्या

लसंतो ये नखाः तेषां चक्रवालं मंडलं । तस्य ज्योत्स्नाभिराहतो महतां ध्यातॄणां हृदयांधकारो येन । एतच्च सर्वमुपायेच्चिरं भगवतश्चरणारविं
दे यावि शेषणं ध्येयत्वेनैवोच्यते ॥२१॥ किंच यस्य शौचेन क्षालनेन निःसृतायाः सरित्प्रवरायाः गंगायाः उदकेन तीर्थेन संसारतारकेण मूर्ध्नि अ
धिकृतेन धृतेन शिवो गिरिशो शिवोभूत् तेजस्वाधिकं ह्वं प्रापेत्यर्थः । ध्यातुर्मनसि यः शमलः शैलः पापपर्वतः तस्मिन्निसृष्टं क्षिप्तं वज्रमिव यत् । यद्वा शम

भा॰टी॰
१००

विमोजानुद्वयं तत्सर्पितं जंघाद्वयं ॥ अखिलस्य विधातुर्ब्रह्मणः जनन्या लक्ष्म्या संलालितं स्पर्शचातुर्येण संसेवितं संसारित्वमिव प्रतीतं वार
यति अभवस्येति ॥ हृदि कुर्वीत ध्यायेत् ॥ १३ ॥ सुपर्णांसभुजयोः स्कंधयोः अधिउपरि ॥ ऊरू सो बलस्य निधी आधारौ अतसिकायाः कुसुमवत्कांत्या अवभा
समानौ ॥ व्यालंबि आगुल्फं लंबमानं यत्पीतांबरं तस्मिन्वर्तमानो यः कांचीकलापः तेन परिरंभः संश्लेषो विद्यते यस्य तत् द्विभो नितंबबिंब
हृदि कुर्वीत इति पूर्वेणान्वयः ॥ १४ ॥ भुवनाहरेर्नाभिहृदं ध्यायेत् ॥ कथंभूतं ॥ भुवनानां कोशस्य समूहस्य गृहा आधिष्ठानं यदुदरं तत्र आस्थितं

जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवंदितया विधातुः ॥ ऊर्वौ निधाय करपल्लवरोचिषा यत्संला
लितं हृदि विभोरभवस्य कुर्यात् ॥ १३ ॥ ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ ॥ व्या
लंबिपीतवरवाससि वर्तमानकांचीकलापपरिरंभि नितंबबिंबं ॥ १४ ॥ नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयो
निधिषणाखिललोकपद्मं ॥ व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरं ॥ १५ ॥ वक्षोधिवास
मृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानं ॥ कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोक

यत्र नाभिह्रदे आत्मयोनेर्ब्रह्मणो धिषणं धिष्ण्यं अखिललोकात्मकं पद्मं व्यूढं उत्थितं ॥ तथा हरिन्मणिवृषोपरकान् नमस्कृतस्य ॥ १६ ॥
तम मणिश्रेष्ठाविव यौ स्तनौ तनयोर्द्वयं ध्यायेत् ॥ विशदहाराणां मयूखैर्गौरं रचितं ॥ १५ ॥ ऋषभस्य श्रेष्ठस्य महाविभूतेर्महालक्ष्म्या अधिवास
स्थानं वक्षः कंठं च मनसि कुर्वीत ॥ कथंभूतं कंठं कौस्तुभमणेरधिभूषणार्थं धृतः तमपि अधिकं भूषणमर्थः ॥ प्रयोजनं यस्य कौस्तुभमणेः मे
वत्सयमनवद्यं त्वनिमित्यर्थः ॥ पुंसां स्मर्तॄणां च मनोनयनानां निर्वृतिमादधानमिति द्वयोर्विशेषणं ॥ १६ ॥

राम
१००

निर्णीतानि उज्ज्वलीकृतानि बाहुवलयानि अंगदानि येषु अधिष्ठिता लोकपाला येषु दशशतारं चक्रं न सहते तेजो यस्य तस्य करसरोरुह
राजहंसमिव १७ आरातयो ये भटा योद्धारस्तेषां शोणितमेव कर्द्दमस्तेन दिग्धां लिप्तां अस्य कंठे मालां मणिं च स्मरेत मधुव्रतानां वरूथस्य
गिरा उपघुष्टां नादितां चेतस्य जीवस्य तत्वं तडजं वेत्स्यवे आत्मानमस्य जगतो निर्लेपमगुणममलं विभाव्य कौस्तुभमणिस्वरूपं भगवान्हरि
रिति १८ भृत्येषु अनुकंपिता कृतानुकंपा या धीः तया गृहीता मूर्तिर्येन तस्य विस्फुरती ये मकरकुंडले तयोर्वलितेन प्रचलनेन विद्योतितौ अ

बाहुस्थमंदरगिरेः परिवर्त्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् संचिंतयेद्दशशतारमसह्यतेजः शंखं च तत्करस
रोरुहराजहंसं १७ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्द्दमेन मालां मधुव्रतवरूथगिरोपघु
ष्टां चैत्यस्य तत्वममलं मणिमस्य कंठे १८ भृत्यानुकंपितधियेह गृहीतमूर्त्तेः संचिंतयेद्भगवतो वदनारविंदं यद्विस्फुर
न्मकरकुंडलवल्गितेन विद्योतितामलकपोलमुदारनासं १९ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुंत
लवृंदजुष्टं मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु २० तस्यावलोकमधिकं कृपयातिघोरतापत्र

मलौ कपोलौ यस्मिन् ततः उदारा उन्नता नासा यस्मिन् ततत १९ योपशमनाय निसृष्टमक्ष्णोः स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं वि
पद्य स्वया भूत्या शोभया अलिभिः परिसेव्यमानं मीनद्वयाश्रयं यच्छ्रीनिकेतनं पद्ममधिक्षिपत् न्यूनं तेन तद्ध्यायेत् तत्र कुंतलैरलीनामधिक्षेपः नेत्र
द्वयेन मीनद्वयस्येति द्रष्टव्यं अतंद्रेरवनेत्रे यस्मिन्स्मितमानानांतरं उल्लसंतो भ्रुवौ यस्मिन् मनोमयं मनसाविर्भवतु २० कृपया अधिकमितार्थः स्मि
तानि स्निग्धं प्रसन्नं स्निग्धस्मितेनानुगुणितं संपन्नं विपुलः प्रसादो यस्मिन् गृहाणां हृदि २१

तापत्रयोपशमनाय निसृष्टमक्ष्णोः

भुवनताये ऽखिललोकाः तेषां तीव्रशोकेन यान्यश्रूणि तेषां सागरं विशोषयतीति तथा तं हरेर्हासं भ्रूमंडलं च ध्यायेत् ॥ कथंभूतं निज
मायया मकरध्वजस्यापि संमोहनाय रचितं मुनिकृते मुनीनामुपकाराय मुनीनां मोहने प्रवृत्तं काममेव मोहयितुमित्यर्थः ॥ ३२ ॥ मंदहासमु
क्तो ध्यानस्फुरद्धासध्यानमाह ॥ विष्णोः प्रहसितं ध्यायेत् कीदृशं ध्यानायनं ॥ अतिहृद्यत्वात् ध्यानस्य विषयभूतं सौंदर्यमेवाह
बहुलया अधिकया अधरोष्ठस्य भासा कांत्या अरुणीभूताः तनवः सूक्ष्मा द्विजा एव कुंदमुकुलानि तेषां पंक्तिः स्फुरति यस्मिन् तत् ॥ स्वदेह
हृदयाकाशे ऽवसितस्य तस्य भक्त्या आर्द्रया तस्मिन्नेवार्पितमनाः सन् पृथक् तद्व्यतिरिक्तं द्रष्टुं नेच्छेत् ॥ न विद्येत विचालयेदित्यर्थः

हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं ॥ संमोहनाय रचितं निजमाययास्य भ्रूमंडलं मु
निकृते मकरध्वजस्य ॥ ३२ ॥ ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति ॥ ध्यायेत्स्वदेहकुहरे
ऽवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमनाः न पृथग्दिदृक्षेत् ॥ ३३ ॥ एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्र
मोदात् ॥ औत्कंठ्यबाष्पकलया मुहुरर्द्यमानः तच्चापि चित्तबडिशं शनकैर्वियुंक्ते ॥ ३४ ॥

समाधिमाह एवमिति द्वाभ्यां ॥ निर्बीजः सबीजश्चेति द्विविधो योगः तत्र निर्बीजयोगे यतो यतो निश्चरति मनश्चंचलमस्थिरं ॥ ततस्ततो नियम्यै
तदात्मन्येव वशं नयेत् ॥ इति गीतायुक्तमार्गेण क्रियमाणोपि दुष्करः समाधिः सबीजेन तु सुकरः तत्र हि परमानंदमूर्तेर्हरेर्ध्यायमाने यत्नत एव
चित्तोपरमो भवति तदुक्तं ॥ हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्त इति अतः स एवोपदिश्यते योगस्य लक्षणं वक्ष्ये सबीजस्येति
तदेवायत्नसिद्धत्वं दर्शयति एवं ध्यानमार्गेण हरौ प्रतिलब्धो भावः प्रेम येन तथा भक्त्या द्रवद्धृदयः स च प्रमोदादुत्पुलकानि पुलकानि यस्य ॥ औत्कंठ्यं प्रेष्ठेनाप्त्य
कलया च मुहुरर्द्यमानः आनंदसंप्लवे निमज्जमानः ॥ दुर्ग्रहस्य भगवतो ग्रहणे बडिशं मत्स्यबंधनमिवोपायभूतं चित्तमपि ध्येयाद्वियुंक्ते तद्व्यापारतो शिथिलय

यर्हियदाएवंनिर्विषयंभवतिअतएवमुक्ताश्रयंवध्येयसंबंधंविनाध्यातर्यवस्थानात्संभवात्नवपूर्ववतशब्दादिर्विषयःस्यातयतस्तत्र
विरक्तंपरमानंदानुभवेनअतोनिर्वाणंलयमृच्छतिवृत्तिरूपतांपरित्यज्यब्रह्माकारेणपरिणमतइत्यर्थः॥यथार्चिर्ज्वालाआश्रयाविष
यापगमेमहाभूततज्योतीरूपेणपरिणमते॥अत्रअस्मिन्दशायांअव्यधानंध्यातृध्येयविभागशून्यमेकमखंडंआत्मानमनुगतमीक्षतेअत्रहेतुः
प्रतिनिवृत्तोःयगतोगुणप्रवाहोदेहाद्युपाधिर्यस्य॥३५॥नचदेहप्रोत्थितस्यपुनःसंसरतीत्याह॥सोपिसएवपुरुषःतस्मिन्महिम्निब्रह्मस्वरूपे

मुक्ताश्रयंयर्हिनिर्विषयंविरक्तंनिर्वाणमृच्छतिमनःसहसायथार्चिः॥आत्मानमत्रपुरुषोव्यवधानमेकमन्वीक्ष
तेप्रतिनिवृत्तगुणप्रवाहः॥३५॥सोप्येतयाचरमयामनसोनिवृत्यातस्मिन्महिम्न्यवसितःसुखदुःखबाह्ये
हेतुत्वमप्यसतिकर्तरिदुःखयोर्यत्स्वात्मन्विधत्तउपलब्धपरात्मकाष्ठः॥३६॥

अवसितःअवसानंनिष्ठांप्राप्तःकयामनसोनिवृत्त्याचरमयाविद्यारहितयेतिसुखदुःखाद्विशेषःततस्त्वविद्यास्तिनत्विदानींअत्रहेतुःएतया
योगाभ्यासकृतयेत्यर्थः॥नत्वेवमपिसुखदुःखयोरात्मधर्मत्वेभूतेतोब्रह्मैक्यंतत्राह॥दुःखयोःसुखदुःखयोर्हेतुत्वभोक्तृत्वंयत्पूर्वमात्म
ततदपिअसतिअविद्याकृतेकर्तरिअहंकारेविधत्तेतत्रैवमेवपश्यतीत्यर्थः॥यतःउपलब्धपरात्मकाष्ठःअपरोक्षीकृतात्मतत्वः॥३६॥

भा॰तृ
१०२

तस्यजीवन्मुक्तिमाह देहंचेति द्वाभ्यां चरमउन्नालक्षणः सिद्धो देहमपि न विपश्यति कुतः तद्वेदः स्वेच्छासनादुत्थितं उत्थाय गतं तत्रैवस्थितं ततस्था
नादपेतं ततो दैववशात् पुनरपि उपेतं वा न विपश्यति यतः स्वरूपं प्राप्तः यतो देहात्स्वरूपमध्यगमत् तं देहमिति वा यतोस्मिन् अनुसंधानेन द
ष्टांतः वासः परिकृतं कटितटे उपरि वेष्टितं स्थितं गतं वा मदिरामदेनांधो यथा न पश्यतीति २७ ननु तर्हि देहस्य कथं प्रवृत्तिनिवृत्ती जीव
न्वा तत्राह देहोपीति दैवं पूर्वं संस्कारः तद्वशेन गच्छन्यावत्स्वारंभकं कर्म तिष्ठति तावत्प्रतीक्षते सप्राणः इंद्रियः ननु तर्हि इंद्रिय
स्थिरः पुनः संगः स्यात्तत्राह तं देहं स्वाप्नदेहादिवत्सप्रपंचं पुत्रादिसहितं पुनर्न भजते अहंममेति नाभिमन्यते आरूढः प्राप्तः समाधि

देहं च तं न चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोध्यगमत्स्वरूपं दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं
मदिरामदांधः २७ देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढसमाधि
योगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः २८ यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः प्रतीयते अप्यात्मत्वेनाभिमताद्देहा
देः पुरुषस्तथा २९ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात् अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात्

पर्यंतो योगो येन अत एवं प्रतिबुद्धं वस्तु आत्मतत्त्वं येन सः २८ प्रतिबोधप्रकारमाह द्वाभ्यां यथेति अतिस्नेहवशादात्मत्वेनाभिमतादपि पुत्रा
देः मर्त्यः पित्रादिः पुरुषो देहादेर्द्रष्टा २९ पृथगवस्थानाभावेपि भेदं सदृष्टांतमाह यथोल्मुकादिदानीं ज्वलतः काष्ठात् स्वसंभवात् अग्नेः सं[illegible]
नात् आत्मत्वेन अग्नेः स्वरूपत्वेनाभिमतादपि अन्यतो विवेकिनो हि धूमेप्यग्न्यभिमानोस्ति उल्मुकात्पूर्वं विस्फुलिंगादपि तद्दाहकः प्रकाशकश्चाग्निः पृथ
गेव ३०

१०२

भूतेर्देहेंद्रियेभ्यस्तेभ्यः पृथक् तस्मात् प्रतिजीवसंज्ञितात् ब्रह्मसंज्ञितः पृथक् । तथा प्रधानादपि तत्प्रवर्त्तको भगवान् पृथगित्यर्थः । उपाधितो
विवेकमुक्त्वा तस्यैक्यमाह । सर्वभूतेष्विति । भूतेषु चेतनेषु विविधेषु तदात्मतां महाभूतात्मतां ॥४२॥ धर्मभेदस्याप्यौपाधिकतां सदृष्टांतमाह
स्वयोनिषु ज्योतिरग्निः गुणवैषम्यात् दीर्घह्रस्वादिभेदात् प्रकृतौ देहे ॥४३॥ स्वांशस्य जीवस्यैवं बंधहेतुं दैवीं देवस्य विष्णोः शक्तिं पराभाव्य त

भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् । आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ॥४१॥ सर्वभूतेषु चात्मानं सर्वभूता
नि चात्मनि । ईक्षेतानन्यभावेन भूतेष्विव तदात्मतां ॥४२॥ स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते । योनीनां गुणवैषम्या
त्तथात्मा प्रकृतौ स्थितः ॥४३॥ तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकां । दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ॥४४॥
इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये साधनानुष्ठाने अष्टाविंशतितमोऽध्यायः ॥२८॥ देवहूतिरुवाच ॥ लक्षणं मह
दादीनां प्रकृतेः पुरुषस्य च । स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकं ॥१॥ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते । भक्ति
योगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो ॥२॥

त्प्रसादेनैव विजित्वा स्वरूपेण ब्रह्मत्वेनावतिष्ठते ॥४४॥ तृतीये ष्टाविंशः ॥ एकोनत्रिंशके भक्तियोग
स्तद्भेदोच्यते । कालस्य च बलं घोरं संसृतिश्च विरक्तये ॥१॥ उक्तानुवादपूर्वकं भक्तिमार्गभेदान्पृच्छति द्वाभ्यां लक्षणं महदादीनां यथा सांख्येषु
कथितं येन लक्षणेन तत्पारमार्थिकं परस्परविभक्तमित्यर्थः ॥१॥ यो भक्तियोगो मूलं प्रयोजनं यस्य तद्यन्मूलं तत्कथितं । तस्य भक्तियोगस्य मार्गं प्र
कारं विस्तरतो मे ब्रूहि ॥२॥

भा०तृ
१०२

येन संसृतीनां आख्यानेन विगतरागो भवेत ॥ २ ॥ ईश्वररूपस्य महाप्रभावस्य तेनृरात्मकस्य यद्धेतोर्यद्भयात् कुशलं पुण्यं कुर्वन्ति ॥ ४ ॥ अचक्षु
षः अतएव मिथ्याभूते देहादावभिमतिरहंकारो यस्य ॥ अतः कर्मस्वनुविद्धया आसक्तया धिया श्रान्तस्य अतएव अनाश्रये अपारे
तमसि संसारे चिरं प्रसुप्तस्य लोकस्य प्रबोधाय त्वं योगप्रकाशको भास्करः किलाविर्भूतोसि ॥ ५ ॥ सञ्ज्ञोदितं ॥ ६ ॥ मार्गाः प्रकार

विरागो येन पुरुषो भगवन्सर्वतो भवेत ॥ आचक्ष्व जीवलोकस्य विविधा मम संसृतीः ॥ ३ ॥ कालस्येश्वररूपस्य परे
षां च परस्य ते ॥ स्वरूपं बत कुर्वन्ति यद्धेतोः कुशलं जनाः ॥ ४ ॥ लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्र
ये ॥ श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः ॥ ५ ॥ मैत्रेय उवाच ॥ इति मातुर्वचः श्लक्ष्णं प्रतिनं
द्य महामुनिः ॥ आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः ॥ ६ ॥ श्रीभगवानुवाच ॥ भक्तियोगो बहुविधो मार्गैर्भामिनि
भाव्यते ॥ स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ॥ ७ ॥ अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा ॥ संरंभी भिन्नदृग्भा
वं मयि कुर्यात्स तामसः ॥ ८ ॥ विषयानभिसंधाय यश ऐश्वर्यमेव वा ॥ अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ॥ ९ ॥

विशेषः तानेवाह स्वभावभूता ये गुणास्तेषां मार्गो यस्त्रिभेदेन भावः अभिप्रायः फलसंकल्पभेदात् भक्तिभेद इत्यर्थः ॥ ७ ॥ अभि
संधाय संकल्प्य हिंसां भीक्रोधी भिन्नदृक् भेददर्शी यो भावं भक्तिं कुर्यात् स त्रिविधोपि तामसः ॥ ८ ॥ पृथग्भावः भेददर्शी ॥ ९ ॥

राम
१०२

कर्मनिर्हारं पापक्षयं परस्मिन् परमेश्वरे तदर्पणं भगवत्प्रीतिमुद्दिश्येत्यर्थः यष्टव्यमिति विधिसिद्धिमुद्दिश्येत्यर्थः भेददर्शित्वं सर्वास
र्वभेवं त्रिष्वपि समानं ॥ तदेवं तामसादिभक्तित्रयस्य त्रयो भेदाः तासु यथोत्तरं श्रैष्ठ्यं एवं श्रवणकीर्तनादयोऽपि नवापि प्रत्येकं नव न
व भेदाः तदेवं सगुणा भक्तिरेकाशीति ॥ ८१ भेदा ॥ १० ॥ निर्गुणां तु भक्तिरेकविधैव तामाह मद्गुणश्रुतिमात्रेणेति द्वाभ्याम् अविच्छिन्ना संतता
॥ ११ ॥ अहैतुकी फलानुसंधानशून्या अव्यवहिता भेददर्शनरहिता च मद्गुणश्रुतिमात्रेण मयि गुहाशये मनोगतिरिति या भक्तिः सा नि

कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणं यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ॥ १० ॥ मद्गुणश्रुतिमात्रेण मयि स
र्वगुहाशये मनोगतिरविच्छिन्ना यथा गंगांभसोऽंबुधौ ॥ ११ ॥ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं अहैतुक्यव्यवहि
ता या भक्तिः पुरुषोत्तमे ॥ १२ ॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥ १३ ॥

र्गुणस्य भक्तियोगस्य लक्षणमित्यन्वयः

स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥ १४ ॥

लक्षणं स्वरूपं ॥ १२ ॥ भक्तानां निष्कामतां कैमुत्यन्यायेनाह सालोक्यं मया सहैकस्मिन् लोके वासः सार्ष्टिः समानैश्वर्यं सामीप्यं निकटव
र्तित्वं सारूप्यं समानरूपत्वं एकत्वं सायुज्यं उत अपि दीयमानमपि न गृह्णन्ति कुतस्तत्कामनेत्यर्थः ॥ १३ ॥ किमिति तर्हि भजन्ते भक्तेरेव परम
फलत्वात् इत्याह स एवेति ननु त्रैगुण्यं हित्वा ब्रह्मप्राप्तिः परमफलं श्रुतिषु सत्यं तत्तु भक्तावानुषंगिकमित्याह येन भक्तियोगेन मद्भावाय
ब्रह्मत्वाय ॥ १४ ॥

भा॰त
१०४

एवंभूतायाभक्तेः साधनान्याह पंचभिः निषेवितेन सम्यगनुष्ठितेन अनिमित्तेन स्वधर्मेण नित्यनैमित्तिकेन महीयसा श्रद्धादियुक्तेन क्रियायोगेन पंचरात्राद्युक्तपूजाप्रकारेण शस्तेन निःकामेन ॥ १५ ॥ मद्धिष्ण्यं मत्प्रतिमादि तस्य दर्शनादिभिः सत्वेन धैर्येण असंगमेन वैराग्येण ॥ १६ ॥ १७ ॥ मद्धर्मणः भगवद्धर्मानुष्ठातुः पुरुषस्याशयश्चित्तं ॥ १९ ॥ प्रयत्नेर्विनैवप्राप्नोतीत्याह यथा वातो रथः प्रापको यस्य गंधस्य स आशया

निषेवितेनानिमित्तेन स्वधर्मेण महीयसा । क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥ १५ ॥ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः ॥ भूतेषु मद्भावनया सत्वेनासंगमेन च ॥ १६ ॥ महतां बहुमानेन दीनानामनुकंपया ॥ मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ॥ १७ ॥ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्च मे ॥ आर्जवेनार्यसंगेन निरहंक्रियया तथा ॥ १८ ॥ मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः ॥ पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि मां ॥ १९ ॥ यथा वातरथो घ्राणमावृंक्ते गंध आशयात् ॥ एवं योगरतं चेत आत्मानमविकारयत् ॥ २० ॥ अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा ॥ तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडंबनं ॥ २१ ॥ यो मां सर्वेषु भूतेषु संतमात्मानमीश्वरं ॥ हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥ द्विषतः परकाये मां मानिनो भिन्नदर्शिनः ॥ भूतेषु बद्धवैरस्य न मनः शांतिमृच्छति ॥ २३ ॥ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे ॥ नैव तुष्येऽर्चितोऽर्चायां भू

तस्थानात् ॥ आवृंक्ते॰ आत्मसात्करोति ॥ अविकारि समं यच्चेतः ॥ २० ॥ चित्तशुद्धिस्तु सर्वभूतात्मदृष्ट्यैव भवतीति वक्तुं केवलं तग्रामावमानिनः २४ प्रतिमादिनिष्ठां निरस्यन्नाह अहमिति त्रिभिः अर्चैव विडंबनमनुकरणं आर्चायां पूजा विडंबनमिति वा ॥ अनुष्ठेयापेक्षाह्येषु भिन्नाः क्रमेण चतुर्भिर्नि

षिध्यंते ॥ २१ ॥ हित्वा उपस्य ॥ २२ ॥ इत्थमहमत्रेयानुक्रियया भूतग्रामावमानिनः तन्निरंकुस ॥ २५ ॥

राम
१०४

तर्हि किमर्चादावर्चनमनर्थकमेव नेत्याह ॥ अर्चादाविति सर्वभूतेष्ववस्थितं मां स्वहृदि यावन्न वेद स्वकर्मकृत् कर्माविरोधेन यथावकाशं अनेन कर्मनिष्ठाया अपि एवावधिरित्युक्तं भवति ॥ २५ ॥ अंतरा अंतरं भेदं उत अपि अरं अल्पं अल्पमपि भेदं यः पश्यतीत्यर्थः ॥ यद्वा अंतरा मध्ये उदरं शरीरं मृत्युरहं तस्य भयं विदधे करोमि ॥ २६ ॥ अथ अतः सर्वभूतेषु कृतालयं कृतावासमत एव हेतोः भूतानामात्मानं अर्हयेन्मैत्र्या अभिन्नेन चक्षुषा समदर्शनेन ॥ २७ ॥ तत्रापि यथोत्तरमानाद्यतिशयः कर्तव्य इति वक्तुं तारतम्यमाह जीवा इति सार्धैः षड्भिः ॥ अजीवानां अचे

अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ॥ यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितं ॥ २५ ॥ आत्मनश्च परस्यापि यः करोत्यंतरोदरं ॥ तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणं ॥ २६ ॥ अथ मां सर्वभूतेषु भूतात्मानं कृतालयं ॥ अर्हयेद्दानमानाभ्यां मैत्र्याऽभिन्नेन चक्षुषा ॥ २७ ॥ जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ॥ ततः सचित्ताः प्रवराः ततश्चेंद्रियवृत्तयः ॥ २८ ॥ तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ॥ तेभ्यो गंधविदः श्रेष्ठास्ततः शब्दविदो वराः ॥ २९ ॥

तनेभ्यः ततस्तेष्वपि प्राणभृतः प्राणवृत्तिमंतः सचित्ताः ज्ञानवंतः इंद्रियाणां वृत्तयो येषु ॥ इंद्रियवृत्तयोऽत्र तरूणामपि स्फुटाः संत्येव ॥ तथा हि महाभारते मोक्षधर्मेषूच्यते ॥ तस्मात्पश्यंति पादपाः ॥ तस्माज्जिघ्रंति पादपाः इत्यादि अतस्तेषु तरूणां स्पर्शनेंद्रियवृत्तिरेव ॥ २८ ॥ अतस्तेभ्यः स्पर्शवेदिभ्यो रसवेदिनो मत्स्यादयः श्रेष्ठाः गंधविदो भ्रमरादयः शब्दविदः सर्पादयः ॥ २९ ॥

भा॰त॰
१०५

रूपभेदविदः काकादयः उभयतोदंतायेषां अपादेभ्यो बहुपादाः तेभ्यश्चतुष्पादाः इत्यर्थः द्विपान्मनुष्यः ३० ततस्तेषु वर्णाः ३१ तेषाम
ष्ठेन्नामीमांसकः ततोपि केवलात्स्वधर्मकृतश्छिन्नसंगफलश्लाघ्यणांआत्मनो धर्ममहोऽन्यानिष्कामइत्यर्थः ३२ अर्पिताशेषाः क्रियाः अर्थी
तत्फलानिआत्मादेहश्चयेनअतएवनिरंतरः अव्यवहितः अकर्तुः कर्तृत्वाभिमानशून्यात ३३ जीवानांकलयापरिकलनेनअंत
र्यामितयाप्रविष्टइतिदृष्टेत्यर्थः ३४ उक्तंभक्तियोगंपूर्वोक्तेनाष्टांगयोगेनसहोपसंहरति भक्तियोगश्चेति द्वेमानवि पृथक्पृथक्परमेश्वरं

रूपभेदविदस्तत्रततश्चोभयतोदतः तेषांबहुपदाःश्रेष्ठाःचतुष्पादस्ततोद्विपात ३० ततोवर्णाश्चत्वारस्तेषांब्राह्मणउत्तमः
ब्राह्मणेष्वपिवेदज्ञोह्यर्थज्ञोभ्यधिकस्ततः ३१ अर्थज्ञात्संशयच्छेत्ताततः श्रेयान्स्वकर्मकृत मुक्तसंगस्ततोभूयानदोग्धा
धर्ममात्मनः तस्मान्मय्यर्पिताशेषक्रियार्थात्मानिरंतरः मय्यर्पितात्मनः पुंसोमयिसंन्यस्तकर्मणः नपश्यामिपरं भू
तमकर्तुः समदर्शनात मनसैतानिभूतानिप्रणमेद्बहुमानयन ईश्वरोजीवकलयाप्रविष्टोभगवानिति ३४ भक्तियो
गश्चयोगश्चमयामानव्युदीरितः ययोरेकतरेणैवपुरुषःपुरुषंव्रजेत ३५ एतद्भगवतोरूपंब्रह्मणःपरमात्मनः परंप्रधा
नपुरुषंदैवंकर्मविचेष्टितं रूपभेदास्पदंदिव्यंकालइत्यभिधीयते ३६
परंनपुरुषंजीवसमष्टीः कालस्यस्वरूपंवाचक्ष्वेतितदाहएतदिति पृथक्पृथक्परंदेवंकर्मविचेष्टितं रूपभेदास्पदंदिव्यंकालइत्यभिधीयते ३६
तिसार्धेन एतत्सर्वंनियंतृभगवतोरूपं ३६ कीदृशंप्रधानपुरुषात्मकंपरंतद्व्यतिरिक्तंच एतदेवदैवमित्यभिधीयते कीदृशंकर्मणोविचे
ष्टितंनानासंसृतिलक्षणंयस्मात्तत दैवप्रेरितकर्मकृताःसंसृतयोविचित्राइत्यर्थः एतदेवभगवतोरूपंकालइतिचाभिधीयतेकीदृशंरूपभेदास्प

राम
१०५

तदेवाह भूतानामिति । यावत्समाप्ति ॥ महदादीनां तत्तदभिमानिनां जीवानां ॥३७॥ भयहेतुत्वमाह यस्येति । भूतैरेव भूतान्यत्ति संहरति । अधियज्ञः
यज्ञफलदाता ॥ कलयतां वशीकुर्वतां ॥३८॥ ४१ ॥ यद्भयात् भीताः यतो भीताः सरितः स्रवंति ॥ इंधे दीप्यते सह गिरिभिर्भूः ॥४१॥ अदः
नभः यन्नियमात् यस्मात् यो महान् महत्तत्त्वं अहंकारात्मकं स्वदेहं लोकत्वेन तनुते विस्तारयति ॥४२॥ गुणाभिमानिनो गुणनियंतारो देवाः

भूतानां महदादीनां यतो भिन्नदृशां भयं ॥३७॥ योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः ॥ स विष्ण्वाख्योऽधियज्ञोऽसौ का-
लः कलयतां प्रभुः ॥३८॥ न चास्य कश्चिद्दयितो न द्वेष्यो न च बांधवः ॥ आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमंतकृत् ॥३९॥ यद्भया-
द्वाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ यद्भयाद्वर्षते देवो भगणो भाति यद्भयात् ॥४०॥ यद्वनस्पतयो भीता लताश्चौषधिभिः
सह ॥ स्वे स्वे कालेऽभिगृह्णंति पुष्पाणि च फलानि च ॥४१॥ स्रवंति सरितो भीता नोत्सर्पत्युदधिर्यतः ॥ अग्निरिंधे सगिरिभिर्भू-
र्न मज्जति यद्भयात् ॥४२॥ नभो ददाति श्वसतां पदं यन्नियमाददः ॥ लोकं स्वदेहं तनुते महान् सप्तभिरावृतं ॥४३॥ गुणाभिमानि-
नो देवाः सर्गादिष्वस्य यद्भयात् ॥ वर्त्तंतेऽनुयुगं येषां वश एतच्चराचरं ॥४४॥ सोऽनंतोऽन्तकरः कालोऽनादिरादिकृदव्ययः ॥ जनं
जनेन जनयन्मारयन्मृत्युनांतकं ॥४५॥ इति श्रीभागवते महापुराणे तृतियस्कंधे एकोनत्रिंशोऽध्यायः ॥

सादयः अस्य विश्वस्य सर्गादिषु वर्त्तंते अनुयुगं वारं वारमित्यर्थः ॥४४॥ जनेन पित्रादिना जनं पुत्रादि जनयन् मृत्वादिकृत मृत्युनांतकमपि मारयन्न-
तकरः स्वयं तु नादिरनंतो अव्ययश्च ॥४५॥ इति तृतिये टीकायां एकोनत्रिंशः ॥

भा॰त॰
१०६

त्रिंशे तु कायिकानां नारीलालनाकुलचेतसां । कामिनां तामसी पापाद्धोगतिर्हदीर्यते ॥१॥ कालप्रभाववर्णनपूर्वकं वैराग्यार्थं विचित्रकर्मकृतां स्व
तिमध्यायत्रयेणाप्रपंचयति । तस्यैतस्य बलिनः कालस्य बलिन इति वा पाठः । काल्यमानः विचाल्यमानोऽपि वायोर्विक्रमं यथा मेघपंक्तिर्न वेद ॥१॥
विक्रममेवाह । यं यमर्थं दुःखेन प्रयासेनोपादत्ते आपादयति तं तं भगवान्कालो धुनोति विनाशयति यत्कृते यन्निमित्तं ॥२॥ शोके हेतुः यद्यस्मात
सानुबंधस्य कलत्रादिसहितस्य देहस्य संबंधीनि गृहादीनि वसूनि ध्रुवाणि मन्यते इत्यर्थः । चकारः ॥२॥ दुर्मतित्वं दर्शयन्नाह जंतुः खेदप्रपञ्चयति

कपिल उवाच ॥ तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमं । काल्यमानोऽपि बलिनो वायोरिव घनावलिः ॥१॥ यं यमर्थमुपा
दत्ते दुःखेन सुखहेतवे । तं तं धुनोति भगवान्पुमान्शोचति यत्कृते ॥२॥ यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः । ध्रुवाणि
मन्यते मोहाद्गृहक्षेत्रवसूनि च ॥३॥ जंतुर्वै भव एतस्मिन्यां यां योनिमनुव्रजेत् । तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ॥४॥ न
रकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति । नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ॥५॥ आत्मजायासुतागारपशुद्रविणबंधुषु
निरूढमूलहृदय आत्मानं बहु मन्यते ॥६॥ संदह्यमानसर्वांग एषामुद्वहनाधिना । करोत्यविरतं मूढो दुरितानि दुराशयः ॥ आ

जंतुरिति वर्तते त्रिभिः ॥४॥ नारक्यां नरकाहारादिभिर्जातायां ॥ क्षिप्तात्मेंद्रियः स्त्रीणामसतीनां च मायया । रहोरचितयालापैः शिशूनां कलभाषिणां ॥८॥
यां ॥५॥ निरूढमूलं प्ररूढमनोरथं हृदयं यस्य । बहु मन्यते कृतार्थोऽहमिति ॥६॥ उद्वहनाधिः पोषणचिंतया ॥७॥ दुराशयत्वमाह आक्षिप्त आत्मा
इंद्रियाणि च यस्य कया । असतीनां स्वलीनामपि रहसि रचितः संभोगादिरूपया मधुरभाषिणां शिशूनामालापैश्च गृहं स्वर्गवन्मन्यत इत्युत्तरेणा
न्वयः ॥८॥

राम
१०६

कूटः पिशुनशाठ्यादिवकुलाधर्मा येषु तेषु दुःखप्रधानेषु ९ येषां पोषणेनाधो याति तान् पुष्णाति शेषभुगिति भोगोपि तस्य दुर्लभ इत्यर्थः १० वार्त्ता
जीविका याभिः सत्त्वः अशक्तः परार्थे परस्वे ११ अकल्पः असमर्थः १२ पूर्वं यथा आद्रियंते तथा आदरं न कुर्वन्ति कीनाशाः कृपणाः कृ
षीवला गोजरं वृद्धं बलीवर्दं १३ भ्रियमाणः पुष्यमाणः १४ अवमत्या अवज्ञया उपन्यस्तं समीपे प्रक्षिप्तं गृहपालः श्वा आहरन् भुंजानः

गृहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रितः कुर्वन्दुःखप्रतीकारं सुखवन्मन्यते गृही ९ अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान्
पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयं १० वार्त्तायां लुप्यमानायामारब्धायां पुनः पुनः लोभाभिभूतो निःसत्त्वः परा
र्थे कुरुते स्पृहां ११ कुटुंबभरणाकल्पो मंदभाग्यो वृथोद्यमः श्रिया विहीनः कृपणो ध्यायंछ्वसिति मूढधीः १२ एवं स्वभर
णाकल्पं तत्कलत्रादयस्तदा नाद्रियंते यथापूर्वं कीनाशा इव गोजरं १३ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयंभृतैः जर
योपात्तवैरूप्यो मरणाभिमुखो गृहे १४ आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन् आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः
वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः काशश्वासकृतायासः कंठे घुरघुरायते १६ शयानः परिशोचद्भिः परिवीतः स्वबं
धुभिः वाच्यमानोपि न ब्रूते कालपाशवशं गतः १७ एवं कुटुंबभरणे व्यापृतात्माऽजितेंद्रियः म्रियते रुदतां स्वानामुरुवेदन

आमयावी रोगी १५ उत्तारो बहिर्निर्गतो नेत्रः कफेन रुद्धा नाड्यो मार्गभूता यस्य काशश्वासाभ्यां कृत आयासो यस्य घुरघुरइ यास्तधीः १८
तिशब्दं करोति १६ परिवीतः परिवेष्टितः वाच्यमानः वंद्यो तातेत्याहूयमानः १७ अस्तधी नष्टमतिः १८

भा॰ते
१०८

मृतस्य ॥ एव पापात्मनां दुर्गतिमाह यमदूताविति यावत्समाप्ति ॥ सरभसे सक्रोधे ईक्षणे ययोस्तौ हृद्या ॥ १९ ॥ आवृत्य निरुध्य ॥ २० ॥
तयोस्तर्जनैर्निर्भिन्नं हृदयं यस्य ॥ आर्त्तैः स्वनूच्चलतातिदुद्धितायेनाद्वयः ॥ २१ ॥ क्षुत्तृड्भ्यां परीतो व्याप्तः तप्ताः वालुकाः यस्मिंश्च निर्गत आश्रमो
विश्रामस्थानमुदकं च यस्मिन् ॥ २२ ॥ यमसादनं नीतो भवति ॥ २३ ॥ तत्रैवं विशेषमाह ॥ अध्वनः संबंधिनां योजनानां नवतिं नव च सहस्रा

यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ ॥ स दृष्ट्वा त्रस्तहृदयः शकन्मूत्रं विमुंचति ॥ १९ ॥ यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात्
नयतो दीर्घमध्वानं दंड्यं राजभटा यथा ॥ २० ॥ तयोर्निर्भिन्नहृदयः तर्जनैर्जातवेपथुः ॥ पथि श्वभिर्भक्ष्यमाणः आर्त्तोघं स्वमनु
स्मरन् ॥ २१ ॥ क्षुत्तृट्परीतोर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके ॥ कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोपि
निराश्रमोदके ॥ २२ ॥ तत्र तत्र पतन् श्रान्तो मूर्छितः पुनरुत्थितः ॥ पथा पापीयसा नीतस्तमसा यमसादनं ॥ २३ ॥ योजनानां सहस्रा
णि नवतिं नव चाध्वनः ॥ त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः ॥ २४ ॥ आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः ॥ आ
त्ममांसादनं क्वापि स्वकृत्तं परतोपि वा ॥ २५ ॥ जीवतश्चान्त्राभ्युद्धारः श्वगृध्रैर्यमसादने ॥ सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं
कृंतनं चावयवशो गजादिभ्यो भिदापनं ॥ पातनं गिरिशृंगेभ्यो रोधनं चाम्बुगर्तयोः ॥ २७ ॥ यास्तामिस्रान्धतामिस्रा रौरवाद्याश्च यातनाः

णि ॥ पापाधिक्ये द्वाभ्यां नीतः स्यात् ॥ २४ ॥ यातनाः संक्षेपतो दर्शयति वेष्टयित्वाग्निभिः ॥ आदीपनं प्र[illegible]नाः ॥ भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः ॥ २८ ॥ राम
[illegible] प्राप्नोति ॥ स्वेन कृत्तं अन्येन वा कृत्तं छित्त्वा यत्स्वमांसभक्षणमित्यर्थः ॥ २५ ॥ आत्मनो वैशसं पीडा ॥ २६ ॥ भिदापनं भेदप्रापणं ॥ २७ ॥

१०८

नैवेतरस्य भाविनं अत्रापि दृश्यमानत्वादित्याह अत्रैवेति ॥ २८ ॥ उभयं कुटुंबं स्वदेहं च ॥ २९ ॥ पापार्जितं धनं भुंजते बहवः कथं एक एव नरकं यातीत्याह एक इति भूतद्रोहेण यद्भृतं तत्तु स्थूलं कलेवरं वा इहैव हित्वा कुशलादितरत् पापं तदेव पाथेयं पथि भोज्यं यस्य ॥ ३० ॥ ननु पापमपि विहाय गच्छतु तत्राह दैवेनेति कुटुंबपोषणस्य शमलं पापं दैवेनेश्वरेण प्रापितं भुंक्ते ॥ ३१ ॥ ननु कुटुंबपोषणं विहितमेव तत्राह केवलेति तमसो नरकस्य चरमं पदं स्थानं ॥ ३२ ॥ पुनर्मनुष्यशरीरप्राप्तिप्रकारमाह नरलोकस्य मनुष्यदेहस्य प्राप्तेरधस्तात् शूकादिषु यावत्यो यातनाः आदिशब्देन श्व

अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते ॥ या यातना वै नारक्यास्ता इहाप्युपलक्षिताः ॥ २८ ॥ एवं कुटुंबं बिभ्राण उदरंभर एव वा ॥ विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशं ॥ ३० ॥ एकः प्रपद्यते ध्वांतं हित्वेदं स्वकलेवरं ॥ कुशलेतरपाथेयो भूतद्रोहेण यद्भृतं ॥ ३१ ॥ दैवेनासादितं तस्य शमलं निरये पुमान् ॥ भुंक्ते कुटुंबपोषस्य हृतवित्त इवातुरः ॥ ३१ ॥ केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः ॥ याति जीवोंधतामिस्रं चरमं तमसः पदं ॥ ३२ ॥ अधस्तान्नरलोकस्य यावतीर्यातनादयः ॥ क्रमशः समनुक्रम्य पुनरत्रावृजेच्छुचिः ॥ ३४ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने कर्मविपाकः त्रिंशत्तमोऽध्यायः ॥ श्रीभगवानुवाच ॥ कर्मणा दैवनेत्रेण जंतुर्देहोपपत्तये ॥ स्त्रियाः प्रविष्ट उदरं पुंसो रेतः कणाश्रयः ॥ १ ॥

शूकरादियोनयश्च याः ताः सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपापः शुचिः सन् पुनरत्रागत्य नरत्वं प्राप्नोतीत्यर्थः ॥ ३४ ॥ इति त ये त्रिंशत्तमः एकत्रिंशे विविधस्थावरप्राणधारणे देहान्तरे मनुष्ययोनिसंप्राप्तिर्वर्ण्यते राजसी गतिः पुनरत्रावृजेदित्युक्तं तदेव विशेषतो दर्शयति कर्मणेति पूर्वकृतेन

भा०त०
१०८

कलिलं शुक्रशोणितमिश्रितं भवति बुद्बुदं वर्तुलाकारं कर्कंधुर्बदरीफलं तदाकारं कठिनं पेशी मांसपिंडाकारं अंडं वायोरंतरं १ बाह्वंघ्र्या
दीनां अंगानां विग्रहो विभागः लिंगं वक्त्रं छिद्राणि च तेषां उद्भवः ३ जठराग्निना गर्भवेष्टनेन वीतः प्रावृतः ४ मातृजग्धेन भक्षितेन अन्नेन पा
नाद्यैश्च एधमाना धातवो यस्य जंतुनाम्नः सर्वेषामस्मिन्नृत स्मिन्नुच्छ्रितमतो गर्भे शेते तथा च मार्कंडेयपुराणे नाडी चाप्यायनी नाम नाभ्यां

कलिलं त्वेकरात्रेण पंचरात्रेण बुद्बुदं दशाहेन तु कर्कंधुः पेश्यंडं वा ततः परं १ मासेन तु शिरो द्वाभ्यां बाह्वंघ्र्याद्यंगविग्रहः
नखलोमास्थिचर्माणि लिंगछिद्रोद्भवस्त्रिभिः २ चतुर्भिर्धातवः सप्त पंचभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्य
ति दक्षिणे ४ सप्तमे जन्मकर्माणि तिर्यगात्मनि संस्मरेत्तेनर्षिः मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते शेते विण्मूत्रयोर्गर्ते स जंतुर्जं
तुसंभवे ५ कृमिभिः क्षतसर्वांगः सौकुमार्यात्प्रतिक्षणं मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ६ कटुतीक्ष्णोष्णलवणरू
क्षाम्लादिभिरुल्बणैः मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ७ उल्बेन संवृतस्तस्मिन्नंत्रैश्च बहिरावृतः आस्ते कृत्वा शिरः कु
क्षौ भग्नपृष्ठशिरोधरः ८ अकल्पः स्वांगचेष्टायां शकुंत इव पंजरे तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवं स्मरन्दीर्घमनुच्छ्वासं शर्म
किं नाम विंदते ९

तस्यां निबध्यते स्त्रीणां तथा त्वृषिरे मानि वद्धोपजायते क्रमेते भुक्तपीतानि स्त्रीणां गर्भोदरे तथा तैराप्यायितदेहोसौ जंतुर्वृद्धिमुपे
ति वर्धति ५ तत्रत्यैः कृमिभिः स्वादद्भिः सौकुमार्यात्कोमलत्वेन क्षतानि सर्वांगानि यस्य ६ उल्बणैः दुःसहैः सर्वांगेषु उत्थिता वेदना यस्य स आस्ते
दग्धैरंत्रैराच्छ्वयः ७ उल्बेन जरायुणा भग्ने कुक्षिरेली भूतं पृष्ठं शिरोधरा ग्रीवा च यस्य ८ दैवात्पूर्वकर्मवशात् लब्धा स्मृतिर्येन सः शर्म दीर्घं उच्छ्वासं
यथा भवति तथा तत्र स्थितः सन्

रा०म
१०८

सूतिर्हेतुर्मिर्वातैर्वेपितः ॥ सोदरः समानोदरजन्मा विष्ठाभूः कृमिरिव ॥१०॥ नाथमानो याचमानः उपतप्य इति वा ऋषिर्देहात्मदर्शी भीतः पुनर्ग
र्भवासात् ॥ सप्तवध्रयो बंधनभूताः धातवो यस्य सः विक्लवया आकुलया ॥११॥ उपसन्नं जगदिच्छया गृहीतनानामूर्तेः भगवतश्च
रणारविंदम् अकुतोभयं सोहं शरणं व्रजामि भुवि चलदिति श्रीकृष्णावताराभिप्रायेण ॥ असतो मेऽनुरूपा योग्या येनेदृशी गर्भवासलक्षणा गति

आरभ्य सप्तमान्मासाल्लब्धबोधोपि वेपितः ॥ नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः ॥१०॥ नाथमान ऋ
षिर्भीतः सप्तवध्रिः कृतांजलिः ॥ स्तुवीत तं विक्लवया वाचा येनोदरेर्पितः ॥११॥ जीव उवाच ॥ तस्योप
सन्नमवितुं जगदिच्छयात्तनानातनोर्भुवि चलच्चरणारविंदं ॥ सोहं व्रजामि शरणं ह्यकुतोभयं मे येने
दृशी गतिरदर्श्यसतोनुरूपा ॥१२॥ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेंद्रियाशयमयीमवलंब्य मायां ॥

दर्शिता तस्य ॥१२॥ ननु कोसौ यं शरणं व्रजसि को वा त्वं तत्र आस्ते विशुद्धमविकारमखंडबोधमातप्यमानहृदये वसितं नमामि
तस्य च विशेषः येन मे त्वमेव कर्तृत्वमित्यपेक्षायामाह ॥ अत्र मातुर्देहे भूतेंद्रियाशयमयीं देहाकारपरिणतां मायामवलंब्य आश्रित्य कर्मभिरा
वृतात्मस्वरूपः बद्ध इव यः आस्ते सोहं यस्तु अत्रैवास्ते तं नमामि ॥ कथंभूतमित्यपेक्षायां श्लोकेन विशेषं दर्शयति ॥ आतप्यमाने हृदये वसितं त्व
तीतं एवमप्यविकारत्वात् विशुद्धं निरुपाधित्वात् अखंडो बोधो यस्य तं ॥१३॥

भा०स्कं
१०९

ननु त्वमपि वक्तृतः शुद्ध एव असंगो ह्ययं पुरुष इत्यादिश्रुतेः ॥ तत्त्वायोस्तवयोः को विशेषः तत्राह ॥ यः पंचभिर्भूतैः रचिते शरीरे अयथा मिथ्यैव छन्नः न वक्त्ये-
तः यतस्तेन शरीरेण रहितः असंगः अतो यं ष्येवं इंद्रियगणार्थश्चिदात्मकः इंद्रियाणि इंद्रियगणाः अर्थाश्च विदाभासस्य तदात्मकः ॥ सोऽहं तव वंदे ॥ कथं भूत
तेन शरीरेण अविकुंठमहिमा यस्य सः ॥ अवकुंठेति पाठे अवसन्नगुंठनमावरणं यस्य स महिमा यस्य स इत्यर्थः ॥ तव हेतुः प्रकृतिपुरुषयोः परं नियंतारं ॥
तः ऋषिभिः सर्वविद्याशक्तिभिरित्यर्थः ॥ विद्याविद्याकृतो विशेष इति भावः ॥ १४ ॥ ननु ज्ञानेनायं बंधो निवर्तिष्यते किं परमेश्वरवंदनेन तत्राह ॥ यस्य मायया
नष्टस्मृतिः सन् संसारे संबंधिनि पथि तदभिश्रमेण तत्कृतेन क्लेशेन वरत्रयं जीवः महतस्तस्य ईश्वरस्यानुग्रहं विना पुनः कयाचिद्युक्त्या लोकं निजं वि-

यः पंचभूतरचितैः रहितः शरीरैः छन्नोऽयथेंद्रियगुणार्थचिदात्मकोऽहं ॥ तेनाविकुंठमहिमानमृषिं तमेनं वंदे परं प्रकृतिपुरुषयोः पुमांसं ॥ १४ ॥ यन्मायया उरुगुणकर्मनिबंधनेऽस्मिन् सांसारिके पथि चरंस्तदभिश्रमेण ॥ नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमंतरेण ॥ १५ ॥ ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः ॥ तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम ॥ १६ ॥

रूपं प्रवृणीत संभजेत ॥ अभिश्रमहेतुत्वेन पंथानं विशिनष्टि ॥ उरुगुणिगुणनिमित्तानि वर्तमाना तापत्रयोपशमनाय वयं भजेम ॥ १६ ॥ ... कर्माणि तैर्निबंधनानि यस्मिन् ईश्वरस्यानुग्रहं विना ज्ञानाभावात्स एव सेव्य इत्यर्थः ॥ १५ ॥ ईश्वर एव ज्ञानद इत्युपपादयन्नाह ॥ यदेतत् त्रैका-
लिकविषयं ज्ञानं तत् ॥ तं विना कतमो यस्य दधात् न कोऽपि किंतु स देवः ईश्वर एव ॥ नेतु अन्यः प्रकृष्टो जीवः दधातु नेत्याह ॥ जीवस्वरूपं कर्मपदवीमनु-
वर्तमाना वयमिति तद्व्यतिरेकेण न कोऽपि समर्थ इत्यर्थः ॥ अन्यस्मात्सर्वस्मिन् भवतु स्यात्तस्मात्स भवमाह ॥ स्थिरेषु चरेषु च अंतर्यामिरूपेणानुवर्तितोंऽशः ॥
शेषेन तं भजेम ॥ १६ ॥

राम
१०९

दुःखं विनिवेदयन्नाह देहीति । अन्यदेहविवरे मातुरुदरे योऽसृग्विण्मूत्रकूपः तस्मिन्पतितः तत्र जठराग्निना भृशं तप्तो देहो यस्य स एव कृपणधीः कुतो विवासात् । विवसितुं निर्गन्तुं इच्छन् स्वमासान् गणयन्न अशोकः कदा नु अहो बहिर्निर्वास्यते । तत्कृतस्योपकारं स्मरन्नाह । येनेदृशीं गतिं तावन्न भवादृशेनेति निरूपमेनेत्यर्थः । स्वकृतेनैव तुष्यतु अञ्जलिमात्रं विना तत्कृतोपकारे प्रत्युपकारं कः कुर्यादित्यर्थः ॥ १८ ॥ ईदृशीं गतिमित्युनेन ज्ञात्वं तत्र विलक्षणं ज्ञानं प्रापितवानित्युक्तं । तदेव वैलक्षण्यमाह पश्यतीति । अयमपरः पश्वादिः सप्तवध्रिर्जीवः स्वदेहे शारीरके शरीरभवे सुखदुःखे केवलं न तु पश्यति अहं तु नयं त्वत्सृष्टया धिषणया यद्दत्तेन विवेकज्ञानेन दमशरीरी दमस्योपलक्षणं शमदमादियुक्तशरीरवान् आत्मसुभवं तमव

देह्यन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः । इच्छन्नितो विवसितुं गणयन्स्वमासान्निर्वास्यते कृपणधीर्भगवन्कदा नु ॥ १७ ॥ येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन । स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनाञ्जलिमस्य कुर्यात् ॥ १८ ॥ पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे । यत्सृष्टयासं तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतं ॥ १९ ॥ सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरंधकू-

वस्तुतोऽनादिसिद्धं पूर्णं बहिश्च हृदि च पश्ये पश्यामीत्यन्वयः । पे यत्रोपयातमुपसर्पति देवमाया मिथ्या मतिर्यदनु संसृतिचक्रमेतत् ॥ २० ॥ कथमपरोक्षतया प्रतीतं चैत्यमिव अहंकारास्पदं भोक्तारमिवेत्यर्थः ॥ १९ ॥ विवेकज्ञानकृतं समाधिसुखं अनुवदन् मोक्षमार्गमेवाध्यवस्यति सोऽहमिति द्वाभ्यां । हे विभो बहुदुःखवासं यथा भवति तथा गर्भे वसन्नपि सोऽहं गर्भाद्बहिर्न निर्जिगमिषामि । तत्र हेतुः अंधकूपप्राये यत्र बहिरुपयातं प्राणिनं देवस्य तव माया उपसर्पति व्याप्नोति यदनु यां मायामनु मिथ्यामतिर्देहे हे ऽहंबुद्धिः संसृतिचक्रं च कलत्रपुत्रादिसंबंधादुपसर्पति ॥ २० ॥

भा॰३
११॰

तस्मादेवं व्यवस्थितोऽपि विगतविक्लवः अव्याकुलः सन् सुहृदा आत्मना सारथिरूपया बुद्ध्यैव आत्मानं तमसः संसाराद् उद्धरिष्यामि अनेकरन्ध्रं नानागर्भवासरूपमेतत् व्यसनं दुःखं यथा मे मा भविष्यत् न भविष्यति तथा ॥ कार्यं तत्र साधनमाह उपसादितो हृदये स्थापितो विष्णोः पादो येन मम सामेः ॥ २१ ॥ दशमासाः परिच्छेदका यस्येति प्रसूतिपूर्वं ज्ञाणोपलब्ध्या स जीवः सद्य एव तत्क्षणमेव अर्वाचीनमवाङ्मुखं प्रसूतिहेतुर्मारुतः क्षिपति नुदति ॥ २२ ॥ अवसृष्टः अधः क्षिप्तः सन् ॥ २३ ॥ रोरूयति रोरूयते ॥ २४ ॥ परस्य छन्दं अभिप्रायमविदुषा अनभिप्रेतं तत्प्रत्याख्याने

तस्मादहं विगतविक्लव उद्धरिष्ये आत्मानमाशु तमसः सुहृदात्मनैव ॥ भूयो यथा व्यसनमेतदनेकरन्ध्रं मा मे भविष्यदुपसादितविष्णुपादः ॥ २१ ॥ कपिल उवाच ॥ एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः ॥ सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः ॥ तेनावसृष्टः सहसा कृत्वावाक् शिर आतुरः ॥ विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः ॥ २३ ॥ पतितो भुव्यसृङ्मिश्रो विष्ठाभूरिव चेष्टते ॥ रोरूयति गते ज्ञाने विपरीतां गतिं गतः ॥ २४ ॥ परच्छन्दं न विदुषा पुष्यमाणो जनेन सः ॥ अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः ॥ २५ ॥ शायितोऽशुचिपर्यंके जंतुः स्वेदजदूषिते ॥ नेशः कंडूयनेंगानामासनोत्थानचेष्टने ॥ २६ ॥ तुदंत्यामत्वचं दंशा मशका मत्कुणादयः ॥ रुदंतं विगतज्ञानं कृमयः कृमिकं यथा ॥ इत्येवं शैशवं भुक्त्वा दुःखं पौगंडमेव च ॥ २७ ॥

उदरव्यथाप्रकल्पानि वा रसपानं उदरव्यथया रोदने स्तनपानमित्यादि ॥ २५ ॥ आसनोत्थानचेष्टने चानीशः सन् रोरूयतीत्यनुषंगः ॥ २६ ॥ आमा कोमला त्वक् यस्य तं विगतं ज्ञानं तज्ज्ञानं यस्य शैशवं पंचवर्षाणि ततः पौगंडं यौवनादर्वाक् तत्र चाध्ययनादि दुःखं ॥ २७ ॥

राम
११॰

यौवनदुःखमाह ॥ सोऽर्द्धैस्त्रिभिः अलब्धाभीप्सितत्वेन मन्युशुचार्पितः व्याप्तः अज्ञानादिद्धो दीप्तो मन्युर्यस्य सः देहेन सहैव वर्धमानेनाभिमा-
नेन मन्युना च विग्रहं विरोधं करोति ॥ आत्मनो नाशाय ॥ १८ ॥ अज्ञानं प्रपंचयति ॥ भूतैरारब्धे देहे सत्यसद्ग्राहो अहं ममेति मतिं करोति ॥
॥ १९ ॥ तदर्थं देहार्थं यत् ॥ येन कर्मणा बद्धः यो देही अनुयाति पुनः पुनर्याति अनुवर्तत इति वा ॥ अतः अविद्याकर्मभ्यां बध्यत इति तथा

अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः ॥ सह देहेन मानेन वर्द्धमानेन मन्युना ॥ करोति विग्रहं कामी कामिष्वंताय चात्मनः
॥ १८ ॥ भूतैः पंचभिरारब्धे देहे देह्यबुधोऽसकृत् ॥ अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिं ॥ १९ ॥ तदर्थं कुरुते कर्म यद्बद्धो याति
संसृतिं ॥ योऽनुयाति ददत्क्लेशमविद्याकर्मबंधनः ॥ २० ॥ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः ॥ आस्थितो रमते जंतुः त-
मो विशति पूर्ववत् ॥ २१ ॥ सत्यं शौचं दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा ॥ शमो दमो भगश्चेति यत्संगाद्याति संक्षयं ॥ २२ ॥ तेष्व-
शांतेषु मूढेषु खंडितात्मस्वसाधुषु ॥ संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥ २३ ॥ न तथास्य भवेन्मोहो बंधश्चान्यप्रसंगतः

२० ॥ यद्यसद्भिरास्थितः अधिष्ठितः सन् तेषां पथि मतेः पथि सन्मार्गे आस्थितोऽपि यद्यसद्भिः ॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः
सह रमत इति वा ॥ यर्हि यातनादेहमारोप्य तत्पूर्वोक्तप्रकारेण नरकं प्रविशति ॥ २१ ॥ असत्संगं निंदति सत्यमिति त्रिभिः ॥ २२ ॥ खंडितात्मसु
देहात्मबुद्धिषु योषितां क्रीडामृगवदधीनेषु ॥ २३ ॥ यथा च योषित्संगिनां संगतो बंधः तथान्यप्रसंगतो न भवेत् ॥ २४ ॥

भा॰रा
।।।

योषित्त्वं गच्छ मर्त्ये हे त्वं तां प्रपञ्चयति प्रजापतिरिति सप्तभिः ऐहिङ्क तां मृगीरूपां सतीं ऋक्षरूपी मृगाकारः समूहतत्रपो निर्लज्जः २५ तेन दृष्ट्वा
स्त्रष्टा मरीच्यादयः तैः सृष्टाः कश्यपादयः तैरपि देवमनुष्यादयः तेषु कोऽत्र पुमान् अखंडितधीः अनाकृष्टमनाः २६ दिशां जयिनः शूरा नापि
२७ प्रतिलब्धः आत्मरूपो लाभो येन अस्य पुंसो योषितः प्रमदाः निरयद्वारं वदंति योगिनः २८ शनैः शुश्रूषादिमिषेणोपयाति या योषि
द्रूपा मायां मृत्युं प्रतिकूलमीक्षेत २९ सुषुप्ते विषयप्रत्यये तदेवाहं यामि तद्धान्यां ऋषभायतीं पुरुषवदाचरन्तीं यां वित्तादिप्रदं पतिं मन्यते

प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः ऐहिङ्क तां सोऽन्वधावदृक्षरूपी हतत्रपः २५ तत्सृष्टसृष्टसृष्टेषु कोऽन्वखंडित
धीः पुमान् ऋषिं नारायणमृते योषिन्मय्येह मायया २६ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशां या करो
ति पदाक्रांतान् भ्रूविजृंभेण केवलं २७ संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः मत्सेवया प्रतिलब्धात्म
लाभो वदंति या निरयद्वारमस्य २८ योपयाति शनैर्माया योषिद्देवविनिर्मिता तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवा
वृतं २९ यां मन्यते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदं ४० तामात्मनो विजानीया
त्पत्यपत्यगृहात्मकं दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ४१

तदा तां पुरुषरूपां मायां मृत्युं विद्यादित्यन्वयः यतः पूर्वज
न्मनि स्त्रियं पुमान् स्त्रीसंगतः अंतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ४० तां पत्यादिरूपं मृत्युं विजानीयात् मृगयोर्लुब्धकस्य गायनं मृगकुलेनेव
प्रतीयमानमपि यथा मृगस्य मृत्युः ४१

राम
।।।

तदेवं जीवस्य संसृतिः प्रपंचिता ॥ तत्र चैतस्य कर्मवशेन लोकाल्लोकांतरगमने जन्ममरणे चोक्ते तदेवं शंक्यते ॥ नन्वव्यापकस्य कथं लोकाल्लोकांतरग-
मनं नित्यस्य च कथं जन्ममरणे ॥ भोगेन कर्मक्षय एव सति जन्ममरणे चेष्यते ॥ तत्क्षये पुनरपि तस्य कर्मसंभव इति तत्र लोकाल्लोकांतरगम-
नं कर्म च संभवतीत्याह देहेनेति ॥ जीवस्योपाधितया भूतेन जीवेन लिंगदेहेन लोकांतरमनुव्रजन्ननुभुविरतं कर्माणि करोतीति कर्मणां समा-
प्तिरुक्ता ॥ ४२ ॥ जन्ममरणे संभवमाह ॥ जीवो जीवोपाधिर्लिंगदेहः ॥ अस्यात्मनः अनुगः अनुवर्त्ती भूतेंद्रियमनोमयः स्थूलभूतादिविकारदेहः भोगा-
यतनं ॥ तयोर्निरोधः कार्यायोग्यता तदस्य जीवस्य मरणमुच्यते ॥ आविर्भावस्तस्य संभवो जन्मोच्यते ॥ ४३ ॥ एतदेव दृष्टांतेन स्पष्टयति द्रव्योपलब्धिस्था-

देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् ॥ भुंजान एव कर्माणि करोत्यविरतं पुमान् ॥ ४२ ॥ जीवो ह्यस्यानुगतो देहो भूतेंद्रियमनोमयः ॥ तन्नि-
रोधोऽस्य मरणमाविर्भावस्तु संभवः ॥ ४३ ॥ द्रव्योपलब्धिस्थानस्य द्रव्येक्षायोग्यता यदा ॥ तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनं ॥ ४४ ॥ यथा-
दृष्ट क्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा ॥ तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ॥ ४५ ॥ तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः ॥ बुद्ध्वा जीव-
गतिं धीरो मुक्तसंगश्चरेदिह ॥ ४६ ॥

नस्य नेत्रगोलकादेर्द्रव्ये ज्ञायां रूपादिदर्शने काचकमलादिदोषेण यदाऽयोग्यता भवति तदैव चक्षुष इंद्रियस्यापि
योग्यता अनयोः स्थानचक्षुषोर्यदाऽयोग्यता तदैव द्रष्टृत्वायोग्यता ॥ एवं स्थूलदेहवैकल्ये लिंगस्य वैकल्ये ॥ तदेव जीवस्य मरणं न त्वतद इत्यर्थः ॥ ४४ ॥
क्वचिदेकः श्लोकः अधिकः पठ्यते ॥ तत्रायमर्थः ॥ द्रव्योपलब्धिस्थानस्य स्थूलशरीरस्य द्रव्ये ज्ञायायां यदाऽयोग्यता तत्पंचत्वं मरणं अहंमानात् इदमेवा-
हमित्यभिमानेन द्रव्यस्य स्थूलशरीरस्य दर्शनमुत्पत्तिः ॥ अक्ष्णोर्गोलकयोः द्रव्यावयवस्य रूपादेर्दर्शने योग्यता ॥ शेषं समानं ॥ ४५ ॥ यस्मादेवं तस्माज्जीव-
स्य जन्ममरणादि तस्मान्मरणात् संत्रासो न कार्यः जीवनेन च कार्पण्यं देहेन्यकार्यसंभ्रमश्च जीवनप्रयत्ने ॥ ४६ ॥

ननु सर्वथा पुत्रक्षेत्रसंगत्वे कथं जीवितमत आह सम्यक् पश्यति विचारयतीति सम्यग्दर्शना तया बुद्ध्या मायाविरचिते लोके कलेवरं न्यस्य निःस्पृ
तस्मिन्नासक्तिं त्यक्त्वा विचरेदित्यर्थः ॥ ४८ ॥ इति तृतीये कविंशः ॥ द्वात्रिंशे सात्विकैर्धर्मैरूर्ध्वगतिर्हरिदर्शिते ॥ तत्वज्ञानविहीनस्य ततस्तस्य पुनराग
तिः ॥ १ ॥ तदेवं पापकर्मणां गतिमुक्त्वा इदानीं काम्यकर्मणां गतिमाह अथेति त्रिभिः ॥ यो गृह एव वसन् स्वान्धर्मान् दोग्धि दोह्यमाह कामम
र्थं च तान् दुग्धान् धर्मान् भूयः पिपर्ति पूरयति अनुतिष्ठति ॥ १ ॥ सोपि भगवद्धर्मात्पराङ्मुखः सन् श्राद्धकर्ता न पितृदेवान्पितॄंश्च यजते ॥ २ ॥

सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया ॥ मायाविरचिते लोके चरेन्न्यस्य कलेवरं ॥ ४८ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापि
लेयोपाख्याने जीवगतिरेकत्रिंशत्तमो ॥ध्यायः॥ कपिल उवाच ॥ अथ यो गृहमेधीयान्धर्मानेवावसन् गृहे ॥ काममर्थं च ध
र्मान्स्वान्दोग्धि भूयः पिपर्ति तान् ॥ १ ॥ स चापि भगवद्धर्मात्काममूढः पराङ्मुखः ॥ यजते क्रतुभिर्देवान्पितॄंश्च श्रद्धयान्वितः ॥ २ ॥ त
च्छ्रद्धयाक्रांतमतिः पितृदेवव्रतः पुमान् ॥ गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यति ॥ ३ ॥ यदा चाहींद्रशय्यायां शेतेऽनंतासनो ह
रिः ॥ तदा लोका लयं यांति त एते गृहमेधिनां ॥ ४ ॥ ये स्वधर्मान्न दुह्यंति धीराः कामार्थहेतवे ॥ निःसंगाः न्यस्तकर्माणः प्रशांताः शुद्धचे

ततः किं तत्राह ॥ तेषां श्रद्धया आक्रांता व्याप्ता मतिर्य ॥ तसः ॥ निवृत्तधर्मनिरता निर्ममा निरहंकृताः ॥ स्वधर्माख्येन सत्वेन परिशुद्धेन चेतसा ॥ ६ ॥
स्य ॥ पितृअर्थं देवार्थं च व्रतं नियमो यस्य ॥ सोमपाः तत्र सोमं पीत्वेत्यर्थः ॥ ३ ॥ लोकेतिष्ठत्यादिः ॥ एवं सत्यानंत्यमुक्त्वा लोकानामपि लयमाह यदा चा एम
हरेः प्रलये ॥ ४ ॥ भगवद्धर्मनिष्ठानां तत्सात्त्विकगतिमाह त्रिभिः ये तु कामार्थप्रयोजनाय स्वधर्मान्न दुह्यंति न हंति न निःसंगाः अनासक्ताः न्यस्तानि
ईश्वरे समर्पितानि कर्माणि यैः ५ ६

विश्वतोमुखं परिपूर्णं पुरुषं यांति तथा च श्रुतिः सूर्यद्वारेण ते विरजाः प्रयांति यत्रामृतः स पुरुषो ह्यव्ययात्मेति ॥ प्रकृतिं उपादानकारणं ॥ उत्पत्त्यं
तभावनं निमित्तकारणं ॥७॥ परमेश्वरदृष्ट्या हिरण्यगर्भोपासकानामपि क्रमेण तत्प्राप्तिमाह ॥ द्विपरार्धावसान इति त्रिभिः ॥ परस्य हिरण्य
गर्भस्य परचिंतकाः परमेश्वरदृष्ट्या हिरण्यगर्भोपासकाः ॥८॥ क्ष्मादीनि पंच महाभूतानि मनश्च इंद्रियाणि चक्षुरर्थाश्च शब्दादयः ॥ भूता
दिश्चाहंकारः एवमादिभिः परिवृतं प्रपंचं ब्रह्मांडं प्रतिसंहर्तुमिच्छुः सन्नव्याकृतमीश्वरं पराख्यं द्विपरार्धलक्षणं कालं ॥९॥ परेत्य दूरं गत्वा

सूर्यद्वारेण ते यांति पुरुषं विश्वतोमुखं ॥ परावरेशं प्रकृतिमस्योत्पत्त्यंतभावनं ॥७॥ द्विपरार्धावसाने यः प्रलयो ब्रह्मण
स्तु ते ॥ तावदध्यासते लोके परस्य परचिंतकाः ॥८॥ क्ष्मांभोनलानिलवियन्मन इंद्रियार्थभूतादिभिः परिवृतं प्रतिसं
जिहीर्षुः ॥ अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयंभूः ॥९॥ एवं परेत्य भगवंतमनुप्रवि
ष्टा ये योगिनो जितमरुन्मनसो विरागाः ॥ तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयांत्यगताभिमानाः ॥१०॥
अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयं ॥ श्रुतानुभावं शरणं व्रज भावेन भामिनि ॥११॥

भगवंतं हिरण्यगर्भमनुप्रविष्टा ये योगिनः अमृतं परमानंदरूपं प्रधानमुत्कृष्टं ब्रह्म तेनैव सहोपयांति ॥ न तु पूर्वं यतस्तदानुगताभिमानाः
तथा च स्मृतिः ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मानः प्रविशंति परं पदमिति ॥१०॥ भगवदुपासकास्तु साक्षाद्देवं प्राप्नुवं
तीति न तु क्रमेण अतस्त्वं साक्षात्तमेव भजेत्याह ॥ अथ तस्माद्भावेन प्रेम्णा ॥११॥

भा॰त
११२

एवंतावद्भगवद्भक्तानांनिरंतरमेवतत्प्राप्तिः भगवद्भेदेनहिरण्यगर्भोपासकानांतुक्रमेणेत्युक्तं भेदेनोपासनेतुब्रह्मादयोप्यावर्तन्तेकिमुता
न्यइत्याह आद्यइतिचतुर्भिः योवेदगर्भः सोपिगुणव्यतिकरेजातेपूर्ववद्यथाब्रह्मपदाधिकृतः सन्प्रजायतेनकेवलंसएवैकः किंतुऋषिभिर्म
रीच्यादिभिः योगेश्वरादिभिश्चसह जन्मनिहेतुद्वयं भेददृष्ट्याभिमानेनकर्तृत्वादितिच यथापूर्वत्वेहेतुः निःसंगेननिष्कामेनकर्मणेति
किंकृत्वात्रजायते ऐश्वर्यंपारमेष्ठ्यमैश्वर्यंनिषेव्यपश्चात्प्रलयेसगुणंगुणाधिष्ठातारंप्रथमावतारंपुरुषंसंसृत्यप्राप्यतेपिऋषिप्रमुखाः स्व
कर्मनिर्मितमैश्वर्यंनिषेव्यपुरुषंचसंसृत्ययथापूर्वंस्वस्वाधिकारेणपुनरायान्तीत्यन्वयः ॥१२॥१५॥ यदाब्रह्मोपासकानामपिभेददर्शि

आद्यः स्थिरचराणांयोवेदगर्भः सहर्षिभिः योगेश्वरैःकुमाराद्यैः सिद्धैर्योगप्रवर्तकैः भेददृष्ट्याभिमानेननिःसंगेनापि
कर्मणा कर्तृत्वात्सगुणंब्रह्मपुरुषंपुरुषर्षभम् ॥१२॥ ससंसृत्यपुनःकालेकालेनेश्वरमूर्तिना जातेगुणव्यतिकरेयथापूर्वंप्र
जायते ॥१४॥ ऐश्वर्यंपारमेष्ठ्यंचतेपिधर्मविनिर्मितं निषेव्यपुनरायांतिगुणव्यतिकरेसति ॥१५॥ येत्विहासक्तमनसः कर्मसुश्रद्ध
यान्विताः कुर्वंत्यप्रतिषिद्धानिनित्यान्यपिचकृत्स्नशः ॥१६॥ रजसाकुंठमनसः कामात्मानोजितेंद्रियाः पितॄन्यजंत्यनुदिनंगृ
हेष्वभिरताशयाः ॥१७॥ त्रैवर्गिकास्तेपुरुषाविमुखाहरिमेधसः कथायांकथनीयोरुविक्रमस्यमधुद्विषः ॥१८॥

नाभिमानाभ्यामेवमावृत्तिस्तदाकाम्यकर्मिणांकिंवक्तव्यमितितान्निंदन्नाहषड्भिः येत्विहकर्मस्वासक्तमनसः संतः अप्रतिषिद्धानिकाम्यानि
नित्यानिचकर्माणिकृत्स्नानिकुर्वन्ति तेअर्यमादिपितृयानपथाधूममार्गेणपितृलोकंगच्छंतीतिपंचमेनान्वयः मधोस्त्रिदशा ७ हरतिसंसारंमेधा
यस्य कथनीयाउरवोविक्रमायस्यतस्यमधुद्विषः कथायांविमुखाः संतोयेत्रैवर्गिकाः ॥१८॥

रम
११२

ये चाच्युतस्य कथासुधां हित्वा असतां गाथाः शृण्वंति ते नूनं दैवेन विहता इत्यन्वयः ॥ १९ ॥ पितृलोकात्पुनः प्रजामनुप्रजादिरूपप्रजायंते गर्भाधानादारभ्य
श्मशानांताः क्रियाः कृतवंतः यथोक्तकारिण इत्यर्थः ॥ २० ॥ कथं प्रजायंते तत्राह ॥ ततस्ते पुनरिमं लोकं प्रतिपतंति विंध्रशितउदयो भोगसाधनं येषां ॥ २१ ॥
परमेष्ठिनं परमेश्वरं प्रीत्या तस्य गुणानामाश्रयेण या भक्तिस्तया ॥ २२ ॥ भजनेनैव ज्ञानवैराग्ये भवत एव भवत इत्याह ॥ वासुदेव इति ॥ २३ ॥ तदेवोपपा
दयति ॥ यदास्य भक्तस्य चित्तं भगवद्गुणानुरागेणात्मस्थितं वनिश्चलं सदिंद्रियवृत्तिभिर्वैषम्यं समर्थेषु न गृह्णाति ॥ २४ ॥ तदेवात्मनात्मानं स्वप्र

नूनं दैवेन विहिता ये चाच्युतकथासुधां ॥ हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः ॥ १९ ॥ दक्षिणेन पथार्यम्णः पितृलो
कं व्रजंति ते ॥ प्रजामनु प्रजायंते श्मशानांतक्रियाकृतः ॥ २० ॥ ततस्ते क्षीणसुकृताः मिमं लोकं पुनः सति ॥ पतंति विवशा
दैवैः सद्यो विभ्रंशितोदयाः ॥ २१ ॥ तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनं ॥ तद्गुणाश्रयया भक्त्या भजनीयपदांबुजं ॥ २२ ॥
वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनं ॥ २३ ॥ यदास्य चित्तमर्थेषु समेष्विंद्रिय
वृत्तिभिः ॥ न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत ॥ २४ ॥ स तदैवात्मनात्मानं निःसंगं समदर्शनं ॥ हेयोपादेयरहितमारूढं
परमीक्षते ॥ २५ ॥ ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् ॥ दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते ॥ २६ ॥

काशमीक्षते कथंभूतं समं वस्तुदर्शनं च ततः कुतः निःसंगं ॥ संगाद्धि वैषम्यं भवति निःसंगत्वे हेतुः हेयोपादेयरहितं ततः परस्मिन्नवस्थितमारूढं
परमानंदोहमिति निश्चयं प्राप्तमित्यर्थः ॥ २५ ॥ समेष्वर्थेष्विति सूचितं ॥ तदेव साम्यं दर्शयति ज्ञानमात्रमेव परं ब्रह्मादिशब्दैः प्रसिद्धं दृश्यादिभिः दृश्यद्रष्टृकर
णरूपेण पृथग्भावैः प्रतीयते ज्ञानमात्रत्वेन समेवस्थितमित्यर्थः ॥ २६ ॥

ननु ज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति किमनेकसाधनेन योगेन प्राप्यते तत्राह एतावानिति । युज्यते प्राप्यते असंगः संगत्यागः स एव यो
गफलमित्यर्थः ॥२७॥ ननु कथं प्रत्यक्षादिप्रतीतः प्रपंचो ब्रह्माद्वितीयं शक्यते प्रतीतेर्भ्रांतित्वादित्याह ॥ ज्ञानमिति पराचीनैः पराङ्मुखैः ॥ शब्दादिधर्मि
यस्य तेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैवावभाति ॥ नत्वर्थः पृथगस्तीत्यर्थः ॥२८॥ अर्थरूपत्वमेवोदाहृत्य प्रदर्शयति ॥ यथेति अहंरूपः अहंकारः
स च त्रिवृत् त्रिगुणात्मकः ॥ पंचभूतरूपेण पंचविधः इंद्रियरूपेण एकादशविधश्च ॥ स्वराट् जीवरूपः ॥ तस्य जीवस्य वपुरंडं जगद्यतो येभ्यो

एतावानेव योगेन समग्रेणेह योगिनः ॥ युज्यतेऽभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः ॥२७॥ ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म नि
र्गुणं ॥ अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा ॥२८॥ यथा महानहंरूपस्त्रिवृत्पंचविधः स्वराट् ॥ एकादशविधस्तस्य व
पुरंडं जगद्यतः ॥२९॥ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः ॥ समाहितात्मा निःसंगो विरक्त्या परिपश्यति ॥३०॥ इत्येत
त्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं ॥ येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च ॥३१॥ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः ॥
द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥३२॥

महदादिरूपः तथावभाति ॥२९॥ ननु तर्हि जनः किमित्येवं न प्रत्येति तत्राह ॥ एतद्वै ॥
३०॥ उक्तमेवार्थं सर्वत्र प्रतिपत्त्यर्थं संक्षेपेणानुवदति इतीति हे गुर्वि पूज्ये ॥३१॥ अनेनैव ज्ञानयोगेन भगवानेव प्राप्यो यथा भक्तियोगेनेत्याह
नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणश्च यो योगः तयोर्द्वयोरप्येक एवार्थः प्रयोजनं कोसौ भगवच्छब्दलक्षणं ज्ञापको यस्य तत् उक्तं गीता
सु ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥ इति ॥३२॥

ननुज्ञानयोगस्यआत्मलाभः फलंशास्त्रेणावगम्यते॥ भक्तियोगस्यतुभजनीयेश्वरप्राप्तिः अतस्तयोरेकार्थत्वमित्याशंक्यदृष्टांतेनोपपादयति
यथावहूनांपरस्परविरोधिनांगुणानामाश्रयोगुडक्षीरादिः॥ एकएवार्थः मार्गभेदप्रवृत्तैरिंद्रियैर्नानाप्रतीयतेचक्षुषाशुक्लइतिरसनेनमधुरइतिस्पर्श
नेनशीतइत्यादितथाभगवानेवतत्तद्रूपेणावगम्यते॥३३॥ शास्त्रमार्गानेवप्रपंचयतिक्रिययेतित्रिभिः क्रिययापूर्त्तेनरूपयाक्रतुभिर्यागैः मर्शनंमीमां

यथेंद्रियैः पृथग्द्वारैरर्थोबहुगुणाश्रयः॥ एकोनानेयतेतद्वत्भगवान्शास्त्रवर्त्मभिः॥३३॥ क्रिययाक्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः
आत्मेंद्रियजयेनापिसंन्यासेनचकर्मणां॥३४॥ योगेनविविधांगेनभक्तियोगेनचैवहि॥ धर्मेणोभयचिह्नेनयः प्रवृत्तिनिवृत्तिमान्॥३५॥
आत्मतत्त्वावबोधेनवैराग्येणदृढेनच॥ इयतेभगवानेभिः सगुणोनिर्गुणः स्वदृक्॥३६॥ प्रावोचंभक्तियोगस्यस्वरूपंतेचतुर्विधं॥ काल
स्यचाव्यक्तगतेर्योंतर्धावतिजंतुषु॥३७॥ जीवस्यसंसृतीर्बह्वीरविद्याकर्मनिर्मिताः॥ यास्वंगप्रविशन्नात्मानवेदगतिमात्मनः॥३८॥
नैतत्खलायोपदिशेन्नाविनीतायकर्हिचित्॥ नस्तब्धायनभिन्नायनैवधर्मध्वजायच॥३९॥ नलोलुपायोपदिशेन्नगृहारूढचेतसे ना
भक्तायचमेजातुनमद्भक्तद्विषामपि॥४०॥ श्रद्दधानायभक्तायविनीतायानसूयवे॥ भूतेषुकृतमैत्रायशुश्रूषाभिरतायच॥४१॥ बहिर्जा
तविरागायशांतचित्तायदीयते॥ निर्मत्सरायशुचयेयस्याहंप्रेयसांप्रियः॥४२॥

सा आत्मेंद्रियजयोनिषिद्धवर्जनं॥३४॥ उभयचिह्नेनसकाम
निष्कामलक्षणेनतमेवाहयइति॥ सकामधर्मप्राप्यंस्वर्गाद्यपिभगवतएवसगुणंस्वरूपमितिभावः॥३५॥ एभिर्वर्त्मभिः स्वदृक्स्वप्रकाशः॥३६॥ तदेवंतत्त्वज्ञा
नयोगमुपसंहृत्यतस्यैवभक्तियोगेनसमानार्थज्ञप्त्यैभक्तियोगाद्युपसंहरतिप्रावोचमितिद्वाभ्यां चतुर्विधंत्रिगुणनिर्गुणभेदेन अंतर्धावतिउत्पत्तिनिधना
दिकरोति॥३७॥ आत्मनः॥३८॥ उपदेशानधिकारिणोदर्शयति॥ नैतदितिद्वाभ्यां॥ खलायपरोद्वेजकाय॥ भिन्नायदुराचाराय॥ धर्मध्वजायदांभिकाय॥

भा०त
११५

एतच्छ्रवणकीर्त्तनपरस्यापि मत्पदप्राप्तिरेव फलमित्याह य इति । अप्यर्थे चकारः सोपि मत्पदवीमेति हि निश्चितं ॥ ४२ ॥ तृतीये त्रयस्त्रिंशः ॥ तु महाविशोक तस्यैव कपिलस्योपदेशतः ॥ ज्ञानभावेन तन्मात्रजीवन्मुक्तिरुदीर्यते ॥ १ ॥ विहाय त्वमोहरूपं परलसमावरणं यस्याः सा तन्मात्रेव विषयः तेनांकिता सिद्धिः सा यस्मिन्ज्ञानं तस्य भूमिकेयं प्रवर्ण्यते ॥ १ ॥ अथेति वाक्यांतरे ॥ अजोपि तत्ववचः केवलं ध्यानतत्त्वं दृष्ट्वा नूत्नं सत्त्वं पमाज्ञातयम्य तत्र जठराज्जातः स भगवानेव विश्वस्य सर्गादिविधत्ते न तत्तत्व सर्गादिकर्त्ता कश्चिदस्ति एवंभूतस्त्वमेव मया कथं जठरेण धृत इति त्वया ज्ञानमच्चयः ॥ कथंभूतं वचः सत्

य इदं शृण्वयात्स्वकृच्छ्रया पुरुषः सकृत् ॥ यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ॥ ४३ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे ह्यरिशोकापः ॥ मैत्रेयउवाच ॥ एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः ॥ विश्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयांकितसिद्धिभूमिं ॥ १ ॥ देवहूतिरुवाच ॥ अथाप्यजोंतःसलिले शयानं भूतेंद्रियार्थात्ममयं वपुस्ते ॥ गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥ स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः ॥ सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ॥ ४२ ॥

यमकः तत्र हेतुः अतः सलिले शयानं वीदृशं भूतानि इंद्रियाणि च अर्थाश्च शब्दादयः आत्मा च मनः एतन्मयं एतैर्व्याप्तमित्यर्थः ॥ अतः गुणानां प्रवाहो यस्मिन् तत् ॥ अतः अशेषस्य कार्यकारणस्य बीजं कारणं २ कथंभूतो भवान् सर्गादिविधत्ते गुणप्रवाहरूपेण विभक्तं वीर्यं शक्तिर्येन सः शक्तिद्वारेण विधत्ते न साक्षादित्यर्थः ॥ यतः अनीहो निष्क्रियः तर्हि कथं शक्तिद्वारेणापि सर्गादि विधत्ते अत आह अवितथाभिसंधिः सत्यसंकल्पः किमर्थं विधत्ते ॥ आत्मनां जीवानामीश्वरः जीवानां भोगार्थमित्यर्थः नन्वेकः कथं विचित्रान्भोगान्दद्यात् एक एव विदध्यात् अतर्क्याः सहस्रमपरिमिताः शक्तयो यस्य ३ ॥

११५

किंच प्रलये यस्योदरे एतद्विश्वमासीत् स त्वं मयाज्जठरेण कथं धृतः ॥ ननु शिशो मयि किमेतदुच्यते तत्राह ॥ वटपत्र इति ॥ अङ्घ्रिपादाङ्गुष्ठं पिबती
त्यङ्घ्रिपानः ॥ इदमपि शिशुत्वं तद्देवमायया इति भावः ॥४॥ अथवा न त्वं मयान्यपत्यान्तरवज्जठरे भृतः किंतु वटपत्रावतारवदिच्छये वासि भू
तोसीत्याह ॥ त्वं देहतंत्रो देहपरिकरः स्वीकृतमूर्तिः शमितपाप्मनां दुष्टानां निदेशभाजां आज्ञाभाजां अवतीर्णोसि विभूतये संपद्भ्ये आत्मपथोपलब्धये ज्ञान
मार्गप्रदर्शनाय ॥५॥ अतस्त्वद्दर्शनादहं कृतार्थोस्मीति किं पुनस्त्वन्याप्येनाह ॥ यन्नामधेयश्रवणानुकीर्तनं न चेतस्मात् ह्रीवित्वादाविदर्पिश्वानमत्ती

स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् ॥ विश्वं युगान्ते वटपत्र एकः शेते स्म मायाशिशुरङ्घ्रिपानः ॥४॥ त्वं दे
हतंत्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये ॥ यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये
यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् ॥ श्वादोपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगव
द्दर्शनात् ॥६॥ अहो बत श्वपचोतो गरीयान्यज्जिह्वाग्रे वर्तते नाम तुभ्यं ॥ तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचु

तिश्वादः श्वपचः सोपि सवनाय सोमयागाय कल्पते योग्यो भवति अनेन पूज्यत्वं लक्ष्यते ॥६॥ तदुपपादयति अहो र्नाम गृणंति ये ते ॥७॥
बतेत्याश्चर्ये यस्य जिह्वाग्रे तव नाम वर्तते स श्वपचोपि अतः अस्मादेव हेतोर्गरीयान् पूज्यः यस्माद्वर्तते अतः इति वा ॥ कुत इत्यत आह ॥ त एव तप
ः कृतवंतः जुहुवुः होमं कृतवंतः सस्नुः तीर्थेषु स्नाताः आर्याः त एव सदाचाराः ब्रह्म वेदमनूचुः अधीतवंतः त्वन्नामकीर्तनेन तपआद्यनुभूति
मतेत्वगुणतमाः इत्यर्थः ॥ यद्वा जन्मान्तरे ते तपो होमादि सर्वं कृतमिति त्वन्नामकीर्तनेन महाभाग्योदयादवगम्यत इत्यर्थः ॥७॥

भा॰तृ ११६

प्रत्यक्स्रोतसि प्रत्याहृते आत्मनि मनसि संविभाव्यं संचिंत्यं वेदगर्भं प्रसमः । न अविक्लवया गंभीरया वाचा ॥ ९ ॥ ते तव सुसेव्येन सुखसेव्येन मेम
यादितेन आस्थितेनानुष्ठितेन परां काष्ठां जीवन्मुक्तिं अवरोत्स्यसि प्राप्स्यसि ॥ १० ॥ यायाः यास्यसि अतद्विदः मन्मतमविद्वांसः ॥ ११ ॥ अनुमतः अ
नुज्ञातः ॥ १२ ॥ सरस्वत्या आपीडे शिरोभूषणवत्स्थले । सरस्वत्या इति पाठे पुष्करे नवसंवेष्टिते विंदुसरसि समाहिता बभूव ॥ १३ ॥ कथंभूता सती समाहिता

तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं । स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेदगर्भं ॥ ८ ॥ मैत्रेय उवाच ॥
ईडितो भगवानेवं कपिलाख्यः परः पुमान् । वाचाविक्लवयेत्याह मातरं मातृवत्सलः ॥ ९ ॥ कपिल उवाच ॥ मार्गेणानेन मातस्ते
सुसेव्येनोदितेन मे । आस्थितेन परां काष्ठामचिरादवरोत्स्यसि ॥ १० ॥ श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः । येन मामभवं याया
मृत्युमृच्छंत्यतद्विदः ॥ ११ ॥ मैत्रेय उवाच ॥ इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिं । स्वमात्रा ब्रह्मवादिन्या कपिलोनुमतो ययौ ॥ १२ ॥
सा चापि तनयोक्तेन योगादेशेन योगयुक् । तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता ॥ १३ ॥ अभीक्ष्णावगाहकपिशान् जटि
लान्कुटिलालकान् । आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशं ॥ १४ ॥ प्रजापतेः कर्दमस्य तपोयोगविजृंभितं । स्वगार्हस्थ्यमनौ

तदाह अभीक्ष्णं त्रिषवणमवगाहः स्नानं तेन कपिशान् लिंगान् पिशंगान् एवं कुटिलान् केशान् तथा आत्मानं देहं । पम्यं प्रार्थ्यं वैमानिकैरपि ॥ १५ ॥
चीरधारिणं कृशं च बिभ्रती सती ॥ १४ ॥ प्रजापतेः कर्दमस्य तपोयोगाभ्यां विजृंभितं भूतिसंपदितं स्वगार्हस्थ्यं हित्वा प्रव्रज्य तेश्वरं विरहातुरा सती वदनं किंचि
रनिर्वाप्यं शोकव्याकुलं चकारेति शेषेनान्वयः ॥ १५ ॥

राम ११६

यत्र गार्हस्थ्ये क्षीरफेननिभाः मृदुशुभ्राः शय्याः आस्तरणानि मांतिरं तत्त्वरितामचकाश्च स्वर्णमयाः परिकराः ॥ आसनानि पूर्णादीनि
सुस्पर्शान्यास्तरणानि येषु ॥१६॥१७॥ बहुभिरमरद्रुमैः रम्यं ॥१८॥ यत्रोद्यानेऽप्रविष्टमात्मानं देवहूतमिति ॥१९॥ आखंडलस्येंद्रस्य या
योषितः तासामपि ईप्सिततमं प्राप्यमिष्टतमं तेत हित्वा तत्राभिमानं त्यक्त्वा ॥२०॥ स्वहृद्वियोगस्य दुःसहतामाह वनमिति नष्टे वत्से वत्सला
गौरिवाभूत ॥२१॥ विरहकृतध्यानफलमाह निस्पृहा निर्वासना ॥ वत्स विदुर ॥२२॥ ततः स्वहृतः कपिलोपदिष्टाह तद्भगवतो रूपं ध्यायतीत राभ्यां

पयःफेननिभाः शय्याः दांता रुक्मपरिच्छदाः ॥ आसनानि च हैमानि सुस्पर्शास्तरणानि च ॥१६॥ स्वच्छस्फटिककुड्येषु महामार
कतेषु च ॥ रत्नप्रदीपा आभांति ललना रत्नसंयुताः ॥१७॥ गृहोद्यानं कुसुमितैः रम्यं बह्वमरद्रुमैः ॥ कूजद्विहंगमिथुनं गायन्म
त्तमधुव्रतं ॥१८॥ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः ॥ वाप्यामुत्पलगंधिन्यां कर्दमेनोपलालितं ॥१९॥ हित्वा तदीप्सिततम
मप्याखंडलयोषितां ॥ किंचिच्चकार वदनं पुत्रविश्लेषणातुरा ॥२०॥ वनं प्रव्रजिते पत्यावपत्यविरहातुरा ॥ ज्ञाततत्त्वाप्यभून्नष्टे
वत्से गौरिव वत्सला ॥२१॥ तमेव ध्यायती देवमपत्यं कपिलं हरिं ॥ बभूवाचिरतो वत्स निस्पृहा तादृशे गृहे ॥२२॥ ध्यायती भगवद्रू
पं यदाह ध्यानगोचरं ॥ सुतः प्रसन्नवदनं समस्तव्यस्तचिंतया ॥२३॥ भक्तिप्रवाहयोगेन वैराग्येण बलीयसा ॥ युक्तानुष्ठानजातेन

त्मानं च विश्वतोमुखं स्वतर्वगतं ध्यायती ब्रह्मण्यवस्थितमतिर्बभूवेति पूर्वस्येवान्वयः ॥ येन ध्यायती विशुद्धेनात्मना मनसा ॥ ज्ञानेन ब्रह्महेतुना ॥२४॥
॥२३॥ विशुद्धौ कारणान्याह भक्तिप्रवाहरूपेण योगेन वैराग्येण च युक्ताचरणेन जातं यज्ज्ञानं तेन च ॥ युक्तानुष्ठानं च गीतामुक्तं ॥ युक्ताहारविहारस्येत्यादि

भा०त
११८

विश्वतोमुखं व्यापकं स्वानुभूत्या स्वरूपप्रकाशेन तिरोभूतं मायागुणैर्विशेषणं परिच्छेदो यस्य ॥२५॥ कथंभूते ब्रह्मणि आत्मनां जीवानां संश्रये भग
वति तस्यां जीवन्मुक्तिमाह सार्धैस्त्रिभिः निवृत्ता जीवापत्तिर्जीवभावो यस्याः तस्याः भावस्तत्त्वं तस्मात् विगतक्लेशा प्राप्तनिर्वृतिश्च सती आ
त्मानं देहं न सस्मार स्वप्ने दृष्टमिव ॥२६॥ ननु तथापि गुणानां विद्यमानत्वात् कथमस्मरणं तत्राह नित्यारूढेति लब्धप्रतिष्ठः समाधिर्यस्याः तस्या

विशुद्धेन तदात्मानं आत्मना विश्वतोमुखं । स्वानुभूत्या तिरोभूतमायागुणविशेषणं ॥२५॥ ब्रह्मण्यवस्थितमतिर्भगवत्या
त्मसंश्रये । निवृत्तजीवापत्तित्वात् क्षीणक्लेशाप्तनिर्वृतिः ॥२६॥ नित्यारूढसमाधित्वात् परावृत्तगुणभ्रमा । न सस्मा
र तदात्मानं स्वप्ने दृष्टमिवोत्थितः ॥२७॥ तद्देहः परतः पोषोप्यकृशश्चाध्यसंभवात् । बभौ मलैरवच्छन्नः सधूम इव
पावकः ॥२८॥ स्वांगं तपोयोगमयं मुक्तकेशं गतांबरं । दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥२९॥ एवं सा कपिलोक्ते
न मार्गेणाचिरतः परं । आत्मानं ब्रह्मनिर्वाणं भगवंतमवाप ह ॥३०॥ तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतं । नाम्ना
सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥३१॥ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् । स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता

ः भावस्तत्त्वं तस्मात् परावृत्तः शांतो गुणनिमित्तो भ्रमो यस्याः ॥२७॥ परतः पराभिरेव कर्दमसृष्टविद्याधरीभिः पोषः पोषणं यस्य आधिर्मनोव्यथा तदभाव
निः तदसंभवात् अकृशः मलैरवच्छन्नो बभौ ॥२८॥ दैवगुप्तं स्वारब्धकर्मपालितं ॥२९॥ निर्वाणं नित्यमुक्तं ॥३०॥ हे वीर विदुर उपेयुषी प्राप्ता ॥३१॥ हे सौ
म्य तस्याः तन्मर्त्यं शरीरं सरिदभूत् कथंभूतं योगेन विधुता विलीना मार्त्या ऐहिका धातुमला यस्य ॥ ॥३२॥

११८

कपिलो यथाविमुक्तं तदेव प्रपंचयति कपिलो पीति त्रिभिः समनुज्ञाप्य अनुज्ञां संप्राप्य ॥३३॥ रत्नमर्हणमर्घं निकेतनं च यस्मै ३४ उपशांत्यर्थं समाहित

कपिलोपि महायोगी भगवान्पितुराश्रमात ॥ मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ॥३३॥ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तूय
मानः समुद्रेण दत्तार्हणनिकेतनः ॥३४॥ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः ॥ त्रयाणामपि लोकानामुपशांत्यै समाहितः ३५
एतन्निगदितं तात यत्पृष्टोहं तवानघ कपिलस्य च संवादो देवहूत्याश्च पावनः ॥ ३६ ॥ य इदमनुशृणोति योभिधत्ते कपिलमुने
र्मतमात्मयोगगुह्यं ॥ भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविंदं ३७ ॥ इति श्रीभागवते महापुराणे तृ
तीयस्कंधे कपिलेयेत्रयस्त्रिंशत्तमोध्यायः ॥ शुभमस्तु ॥ कल्याणमस्तु ॥ गंगाविश्वेश्वरजयति ॥ रामकृष्णायनमः

आस्ते ३५ प्रकरणार्थमुपसंहरति एतदिति तव त्वया ३६ एतच्छ्रवणकीर्तनफलमाह य इति सुपर्णकेतौ गरुडध्वजे उपलभते प्राप्नोति
३७ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे भावार्थदीपिकायां श्रीधरस्वामिविरचितायां त्रिंशत्तमोध्यायः ॥ ३३ ॥ रामरामराम

भा॰च॰
१

श्रीगणेशायनमः ॥ श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनिवासायश्रीरामायनमः ॥ अथैकत्रिंशताध्यायैर्विसर्गस्त्ववर्ण्य
र्यते ॥ विसर्गस्त्वीश्वराधीनैर्ब्रह्मसत्वादिभिः कृतः ॥ १ ॥ तत्रतुप्रथमे ध्यायेमनुकन्यान्वयाः पृथक् ॥ वर्ण्यन्तेयत्रयज्ञादिमूर्तिभिः प्रभवो
हरेः ॥ २ ॥ मनुकन्यान्वयविस्तरेणवक्तुमाह ॥ मनोस्त्विति ॥ एकास्र तेद्वीपत्रेय ॥ ॥ विशवारान्ममतोपिपुत्रलाभः सूचितस्तदर्शयति

मैत्रेय उवाच ॥ मनोस्तुशतरूपायांतिस्रःकन्याश्चज ज्ञिरे ॥ आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रुताः ॥ १ ॥
आकूतिंरुचयेप्रादादपिभ्रातृमतींनृपः ॥ पुत्रिका धर्ममाश्रित्यशतरूपानुमोदितः ॥ २ ॥ प्रजापतिः
सभगवान्रुचिस्तस्यामजीजनत ॥ मिथुनंब्रह्मव र्चस्वीपरमेणसमाधिना ॥ ३ ॥ यस्तयोःपुरु
षःसाक्षाद्विष्णुर्यज्ञस्वरूपधृक् ॥ यास्त्रीसादक्षि णाभूतेरंशभूतानपायनी ॥ ४ ॥

मलंकृतास्यांयोजायतेपुत्रःसममपुत्रोभवेदितिभाषाबंधेनक
माहपुत्रिकाधर्ममाश्रित्येति ॥ भ्रातृमतीमपिसत्यामितमंकन्या तथापिपुत्रवाडूत्यकामस्तथाकृतवानित्याह ॥ भ्रातृमतीमपीति ॥ २ ॥
न्यादानंपुत्रिकाधर्मः सचाभ्रातृकायांकन्यायांपुत्रार्थिनएवप्रसिद्ध ॥ ४ ॥
मिथुनंपरस्परंविप्रंच ॥ समाधिनाहरिध्यानेन ॥ ३ ॥ भूतेर्लक्ष्म्याअंशभूतायत्तस्तयोर्विवाहोनविरुद्धइतिभावः ॥ ४ ॥

राम
१

५ ॥ यजुषायत्तानां मन्त्राणां नाथः पतिर्विभुः ॥ द्वि द्विषट् द्वादश ॥७॥ स्वसर्गात्स्वायंभुवमन्वन्तरगतं षट्कमाह ॥ तुषिता इति द्वाभ्यां ॥ मन्वन्तरं मनुर्देवा मनु-
पुत्राः सुरेश्वराः ॥ ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते इति वक्ष्यति ॥ तत्र स्वायंभुवो मनुः तुषिता देवाः ॥ मरीचिप्रमुखाः सप्तर्षयः ॥ यज्ञो हरेरवतार-
ः स एव सुरगणेश्वर इन्द्रः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ ॥ तदेवं यत्तत्संक्षेपेण षड्विधत्वं ॥ तयोः पुत्रपौत्रनप्तॄणां वंशैरनुवृत्तं

आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषं ॥ स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणां ॥५॥ तां कामयानां भगवानुवाह यजुषांपतिः ॥ तुष्टा-
यां तोषमापन्नोऽजनयद्द्वादशात्मजान् ॥६॥ तोषः प्रतोषः संतोषो भद्रः शान्तिरिडस्पतिः ॥ इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट्
तुषिता नाम ते देवा आसन्स्वायंभुवान्तरे ॥ मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥८॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ ॥ त-
त्पुत्रपौत्रनप्तॄणामनुवृत्तं तदन्तरं ॥ देवहूतिमदात्तात कर्दमायात्मजां मनुः ॥ तत्संबन्धि श्रुतप्रायं भवता गदतो मम ॥१०॥ दक्षाय ब्रह्मपुत्राय प्र-
सूतिं भगवान्मनुः ॥ प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो महान् ॥११॥ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः ॥ तासां प्रसू-
तिप्रसवं प्रोच्यमानं निबोध मे ॥१२॥ पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा ॥ कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥१३॥ पूर्णिमासू-
त विरजं विश्वगं च परंतप ॥ देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः ॥१४॥ अत्रेः पत्न्यनसूया त्रीञ्जज्ञे सुयशसः सुतान् ॥ दत्तं दुर्वाससं सोमम-

व्याप्य पालितं तत्तन्मन्वन्तरं ॥९॥ श्रुतप्रायं वाऽल्पेन श्रुतं ॥ तत्कन्यावंशानामश्रुतत्वात्तदाग्रहणं ॥१०॥११॥ प्रसूतिप्रसवं पुत्रपौत्रादिभिः ॥ लोकशास्त्रसंभवान् ॥१५
विस्तारं ॥१२॥ ययोर्वंशेनापूरितं ॥१३॥ कश्यपस्य वंशं षष्ठे वक्ष्यति ॥ द्वितीयस्य वंशमाह पूर्णिमेति ॥ देवकुल्या नाम कन्या हरेः पादप्रक्षालनाज्जाता या दिवः

किंचित्किंचित् ॥ १६ ॥ ऋक्षं नाम कुलाद्रिं तपसि स्थितः सन् ॥ १७ ॥ तस्मिन्कुलाद्रौ प्रसूनानां स्तबका येषु पलाशाशोकेषु तेषां कानने ॥ निर्विंध्या नाम नदी
तस्याः स्रवद्भिर्वारिभिरुद्घुष्टे नादिते ॥ १८ ॥ १९ ॥ प्राणायाम एव एधः संदीपको यस्य तेन मुनेर्मूर्ध्नो निर्गतेनाग्निना तप्यमानं समीक्ष्य तदाश्रमपदं ययुरित्यन्वयः
॥ २१ ॥ अप्सरःप्रभृतिभिर्वितायमानं विस्तार्यमाणं यशः येषां ते ॥ २२ ॥ तेषां प्रादुर्भावः प्राकट्यं तस्य संयोगः संनिधिः ॥ तेन विद्योतितं मनो यस्य ॥ उत्तिष्ठन् उत्कर्षेण

विदुर उवाच ॥ अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यंतहेतवः ॥ किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो ॥ १६ ॥ मैत्रेय उवाच ॥ ब्रह्मणा चोदितः
स्रष्टावत्रिर्ब्रह्मविदांवरः ॥ सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ॥ १७ ॥ तस्मिन्प्रसूनस्तबकपलाशाशोककानने ॥ वार्भिः स्रवद्भि
रुद्घुष्टे निर्विंध्यायाः समंततः ॥ १८ ॥ प्राणायामेन संयम्य मनो वर्षशतं मुनिः ॥ अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः ॥ १९ ॥ शरणं
तं प्रपद्येहं य एव जगदीश्वरः ॥ प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् ॥ २० ॥ तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना ॥ निर्गतेन
मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥ २१ ॥ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः ॥ वितायमानयशसस्तदाश्रमपदं ययुः ॥ २२ ॥ तत्प्रादुर्भा
वसंयोगविद्योतितमना मुनिः ॥ उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् ॥ २३ ॥ प्रणम्य दंडवद्भूमावुपतस्थेऽर्हणांजलिः ॥ वृषहंससु
पर्णस्थान्स्वैः स्वैः चिह्नैश्च चिह्नितान् ॥ २४ ॥ कृपावलोकेन हसद्वदनेनोपलंभितान् ॥ तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी ॥

तिष्ठन् ॥ २३ ॥ अर्हणां पाद्यादिकं अंजलौ यस्य ॥ उपतस्थे पुनश्चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः ॥ श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः
यामास वृषाद्यारूढान् ॥ स्वैः स्वैश्चिह्नैः त्रिशूलकमंडलुचक्रादिभिः ॥ २४ ॥ कृपया अवलोके यस्मिन् हसच्च तद्वदनं च तेन उपलंभितान् ॥ प्रसन्नत्वेन ज्ञापितान्
तेषां रोचिषा दीप्त्या ॥ २५ ॥ श्लक्ष्णया मधुरया सूक्तया गंभीरार्थया ॥ २६ ॥

अतएव गं कल्पे कल्पे विभज्य गृहीतो देहो यैः ॥ ते ब्रह्मविष्णुगिरिशाः पूर्वं तस्मात् प्रणतोस्मि तेभ्यः सकाशादेक एव मे मया उपहूतः शरणं तं
प्रपद्य इत्येकस्यैव निर्दिष्टत्वात् ॥ एवं च श्लोक इति श्लोकैरेव कथ्यतामित्यर्थः ॥ १७ ॥ अस्य प्रपंचः एक इति त्रिविधैः प्रधानैरुपचारैः विविध
प्रधान इति वा यावत् प्रजननाय उच्चार्यते विभक्तः चित्तैर्नीतः ॥ मनसोपि दूरात् अगोचराः सन्तः कथं तत्र योप्यत्रागतः ॥ १८ ॥ १९ ॥ तेत्वध्याय

अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ॥ ते ब्रह्मविष्णुगिरिशाः प्रणतोस्म्यहं वस्तेभ्यः

म क एव भवतामिहोपहूतः ॥ १७ ॥ एको मयेह भगवान्विविधप्रधानैः चित्तीकृतः प्रजननाय कथं नु यूयं ॥ अत्रागतास्तनुभृतां
मनसोपि दूरात् ब्रूत प्रसीदत महानिह विस्मयो मे ॥ १८ ॥ मैत्रेय उवाच ॥ इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः ॥ प्रत्याहुः श्लक्ष्णया
वाचा प्रहस्य तमृषिं प्रभो ॥ १९ ॥ देवा ऊचुः ॥ यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा ॥ सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते
वयं ॥ २० ॥ अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः ॥ भवितारोङ्ग भद्रं ते विस्रप्स्यन्ति च ते यशः ॥ २१ ॥ एवं कामवरं दत्वा प्रतिज
ग्मुः सुरेश्वराः ॥ सभाजितास्तयोः सम्यग्दंपत्योर्मिषतोस्ततः ॥ २२ ॥ सोमोभूद्ब्रह्मणोंशेन दत्तो विष्णोस्तु योगवित् ॥ दुर्वासाः शंक
रस्यांशो निबोधांगिरसः प्रजाः

यास्मत्कृतः संकल्पस्तेन तथैव भाव्यं नान्यथा ॥ यतः सत्संकल्पस्य ते संकल्पः तर्हि कथमेकस्मिन्ध्यायमाने त्रयः प्रती
तास्तत्राहुः यदेकं जगदीश्वरं त्वं तत्त्वं भवान् ध्यायति ॥ ते एते वयं त्रयोपि तदेवैकं तत्त्वं नोस्माकं भेदोस्तीत्यर्थः ॥ २० ॥ विस्रप्स्यन्ति विस्तारयिष्यन्ति
श्रुतं भूतले जगत्यां यशः सहस्रा गता वित्यहूपं ॥ २१ ॥ ताभ्यां दम्पतीभ्यां सभाजिताः पूजिताः सन्तः ततस्थानात्प्रतिजग्मुः ॥ २२ ॥ निबोध अध्यावि ॥ २३ ॥

भा० ४
२

ताः कन्याः निर्दिशति सिनीवालीति ॥ ३४ ॥ ३५ ॥ पुलस्त्याद्ध हविर्भुवि पत्न्यामित्यन्वयः ॥ दहराग्निर्जठराग्निः विश्रवाश्च पुलस्त्यस्तु तत इति शेषः ॥ ३६ ॥
तस्य विश्रवसः इडविडायां जातः सुतः कुवेरः ॥ अन्यस्यां भार्यायां केशिन्यां रावणादयः त्रयः सुताः ॥ ३७ ॥ ३८ ॥ ज्वलतः प्रकाशमानान् ॥ ३९ ॥ वि

श्रद्धा त्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः ॥ सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥ ३४ ॥ तत्पुत्रावपरावास्तां ख्यातौ
स्वारोचिषेंतरे ॥ उतथ्यो भगवान् साक्षाद्ब्रह्मिष्ठश्च बृहस्पतिः ॥ ३५ ॥ पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि ॥ सोऽन्यजन्मनि द
ह्राग्निर्विश्रवाश्च महातपाः ॥ ३६ ॥ तस्य यक्षपतिर्देवः कुवेरस्त्विलिविलासुतः ॥ रावणः कुंभकर्णश्च तथान्यस्यां विभीष
णः ॥ ३७ ॥ पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान् ॥ कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ॥ ३८ ॥ क्रतोरपि क्रिया भार्या वाल
खिल्यानसूयत ॥ ऋषीन्षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा ॥ ३९ ॥ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप ॥ चित्रकेतुप्रधानास्ते
सप्त ब्रह्मर्षयोऽमलाः ॥ ४० ॥ चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ॥ उल्बणो वसुभृद्यानो द्युमान्शक्त्यादयोऽपरे ॥ ४१ ॥ चित्तिस्त्वथर्वणः
पत्नी लेभे पुत्रं धृतव्रतं ॥ दध्यंचमश्वशिरसं भृगोर्वंशं निबोध मे ॥ ४२ ॥ भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत् ॥ धातारं च वि
धातारं श्रियं च भगवत्परां ॥ ४३ ॥

त्रकेतुप्रधाना इति ॥ तेषां सप्तब्रह्मर्षयो जाताः ॥ ४० ॥ नाम्नैवाह चित्रकेतुरिति वसुभृद्यानो नामैकः ॥
इत्यादयोऽपरे नामसाम्यपुत्राः ॥ ४१ ॥ ४२ ॥ ख्यात्यां पत्न्यां पुत्रान् ॥ तत्र त्रीनेतानेवाह धातारमिति ॥ ४३ ॥

राम
२

तयोर्धातविधात्रो ॥४४॥ कविश्च भार्गवः भृगोः पुत्रः ॥४५॥४६॥ अजात्मजः ब्रह्मपुत्रः ॥४७॥ पुत्रेभ्यः संयतेभ्यः पिलितेभ्योवा ॥४८॥५१॥ सर्वेषांग
णानांपुत्रपौत्रादिर्यस्यांसा ॥५१॥५२॥ उपतस्थुः सेवुः ॥५४॥ निजयामाययायस्मिन्नात्मनिखेगगनेरूपभेदंगंधर्वनगरमिवेदं विश्वं विरचितं

आयतिंनियतिंचैवसुतेमेरुस्तयोरदात् ॥ ताभ्यांतयोरभवतांमृकंडुःप्राणएवच ॥४४॥ मार्कंडेयोमृकंडस्यप्राणाद्वेदशिरामुनिः
कविश्चभार्गवोयस्यभगवानुशनासुतः ॥४५॥ सर्वेतेमुनयःक्षत्तर्लोकान्सर्गैरभावयन् ॥ एषकर्दमदौहित्रसंतानःकथितस्तव
शृण्वतःश्रद्दधानस्यसद्यःपापहरःपरः ॥४६॥ प्रसूतिंमानवींदक्षउपयेमेत्वजात्मजः ॥ तस्यांससर्जदुहितृःषोडशामललोचनाः
त्रयोदशादाद्धर्मायतथैकामग्नयेविभुः ॥ पितृभ्यएकांयुक्तेभ्योभवायैकांभवच्छिदे ॥४८॥ श्रद्धामैत्रीदयाशांतिस्तुष्टिःपुष्टिःक्रियोन्नतिः
बुद्धिर्मेधातितिक्षाह्रीर्मूर्तिर्धर्मस्यपत्नयः ॥४९॥ श्रद्धासूतशुभंमैत्रीप्रसादमभयंदया ॥ शांतिःसुखंमुदंतुष्टिःपुष्टिःस्मयमसूयत
योगंक्रियोन्नतिर्दर्पमर्थंबुद्धिरसूयत ॥ मेधास्मृतिंतितिक्षातुक्षेमंह्रीःप्रश्रयंसुतं ॥५०॥ मूर्तिःसर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ य
योर्जन्मन्यदोविश्वमभ्यनंदत्सुनिर्वृतं ॥५१॥ मनांसिककुभोवाताःप्रसेदुःसरितोद्रयः ॥ दिव्यवाद्यंततूर्याणिपेतुःकुसुमवृष्टयः ॥५२॥
मुनयस्तुष्टुवुस्तुष्टाजगुर्गंधर्वकिन्नराः ॥ नृत्यंतिस्मस्त्रियोदेव्यआसीत्परममंगलं ॥ देवाब्रह्मादयःसर्वेउपतस्थुरभिष्टवैः ॥५४॥ योमाययावि
रचितंनिजयात्मनीदंखेरूपभेदमिवतत्प्रतिचक्षणाय ॥ एतेनधर्मसदनेऋ

स्वस्यात्मनः प्रतिचक्षणाय प्रकाशनाय आत्मानं योऽयं प्रादुश्चकार प्रकटितवान्
तस्मैसहायनमः केनरूपेणप्रादुश्चकार ऋषिमूर्तिनाऋषयेत्यलिन्नतेनैतेनरूपेण ॥५५॥

भा॰ च
४

सोयंनोस्मान्सुरगणान्अनल्पकरुणायुक्तेन विलोकनेन निरीक्षितेन त्रेणाद्दृश्यात् पश्यतु कथंभूतेन ॥ यच्छ्रीनिकेतममलमरविंदं तत्तत्क्षिपता तिरस्कुर्वता कथंभूतः ॥ अनुमेयं शास्त्रतो विचार्यं न त्वस्माकमपरोक्षं तत्त्वं यस्य कथंभूतानस्मान् स्थितेर्जगन्मर्यादाया व्यतिकरोन्यथात्वं तस्योपशमाय सत्त्वेन गुणेन सृष्टान् ॥५६॥ लब्धावलोकैर्यैः सुरगणैः तैरभिष्टुतौ अर्चितौ सन्तौ ययतुः ॥५७॥ भुवो भारस्य व्ययाय नाशाय च कारएकवाक्यत्वार्थः ॥ तौ च सांप्रतमिहागतौ

सोयंस्थितिव्यतिकरोपशमायसृष्टान्सत्त्वेनन‍ःसुरगणाननुमेयतत्त्वः ॥ दृश्यादद्भ्रकरुणेनविलोकनेनयच्छ्रीनिकेतममलं क्षिपतारविंदं ॥५६॥ एवंसुरगणैस्तातभगवंतावभिष्टुतौ ॥ लब्धावलोकैर्ययतुरर्चितौगंधमादनं ॥५७॥ ताविमौवैभगवतोहरेरंशाविहागतौ ॥ भारव्ययायचभुवःकृष्णौयदुकुरूद्वहौ ॥५८॥ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ॥ पावकंपवमानंचशुचिंचहुतभोजनं ॥५९॥ तेभ्योग्नयःसमभवन्चत्वारिंशच्चपंचच ॥ तएवैकोनपंचाशत्साकंपितृपितामहैः ॥६०॥ वैतानिकेकर्मणियन्नामभिर्ब्रह्मवादिभिः ॥ आग्नेय्यइष्टयोयज्ञेनिरूप्यंतेग्नयस्तुते ॥६१॥ अग्निष्वात्ताबर्हिषदःसोम्याःपितरआज्यपाः ॥ साग्नयोनग्नयस्तेषांपत्नीदाक्षायणीस्वधा ॥ ॥६२॥ ॥ ॥ श्रीगोविंदायनमोनमः ॥ ॥

वित्यर्थः ॥ तदुक्तं तत्रैव ॥ अर्जुनेन हरेराविष्टः कृष्णो नारायणात्मकः स्वयमिति ॥ यदू कुरू तद्वहः श्रेष्ठः ॥ कृष्णकुरूद्वहोर्जुनः उभावपि कृष्णनामानौ ॥५८॥ अग्न्यभिमानिनो देवान् स्वाहा नाम तस्य भार्या हुतभोजनमिति त्रयाणां विशेषणं ॥५९॥ पितृस्थानीयः पितामहस्थ एकः तैः साकं सहैः ॥६०॥ वैतानिके वैदिके कर्मणि यन्नामभिरग्निदेवताकाः इष्टयो निरूप्यन्ते क्रियन्ते त एते अग्नयो न लौकिकाः ॥ अतो बहूनां नैव प्राधान्यमिति भावः ॥६१॥ सोम्याः सोमपा येषामग्नौकरणमविहितं ते साग्नयः तद्रहितास्त्वनग्नयः

एम
४

तयोरात्मसंततिर्नाभवत्तजीवन्मुक्तत्वादित्याह ॥ उभे ते इति ॥ ६२ ॥ गुणशीलतः आत्मनः सदृशं देवमनुव्रतापि सती पुत्रं न लेभे ॥ ६४ ॥ तत्र हेतुः स्वे पितरि
हेत्वप्रतिरूपे सदृशं प्रतिकूले सतीत्यर्थः ॥ आत्मना स्वयमेवात्मानं देहमजहात् त्यक्तवती ॥ योगसंयुता योगमार्गमाश्रित्येति ॥ ६५ ॥ इति चतुर्थे प्रथ
मः ॥ द्वितीये प्रथमाध्यायोपक्षिप्तभवदक्षयोः ॥ विद्वेषवर्ण्यते हेतुं विश्वसृट्सत्रसंभवः ॥ सती सती नाम्नी ॥ १ ॥ न चासौ कस्यापि द्वेष्य इत्याह क इति

ते प्योरद्धारकन्ये देवशुनां धारिणी स्वधा ॥ उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥ ६३ ॥ भवस्य पत्नी तु सती भवं देवमनुव्रता ॥ आ
त्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥ ६४ ॥ पितर्यप्रतिरूपे स्वे भवायानागसे रुषा ॥ अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ॥ ६५ ॥
इति श्रीभगवते महापुराणे चतुर्थस्कंधे दाक्षायण्या नाम प्रथमो ध्यायः ॥ विदुर उवाच ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः ॥ विद्वे
षमकरोत्कस्मादनादृत्यात्मजां सती ॥ १ ॥ कस्तं चराचरगुरुं निर्वैरं शांतविग्रहं ॥ आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥ २ ॥ एतदाख्या
हि मे ब्रह्मन् जामातुः श्वशुरस्य च ॥ विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान् सती ॥ ३ ॥ मैत्रेय उवाच ॥ पुरा विश्वसृजां सत्रे समेताः
परमर्षयः ॥ तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः ॥ ४ ॥ तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा ॥ भ्राजमानं वितिमिरं कुर्वं
तं तन्महत्सदः

चराचरगुरुं जगतो दैवतं च तं को द्वेष्टि कथं च निर्वैरं द्वेष्टि ॥ निर्वैरत्वे हेतुः भावोन्नः ॥ शांत शांतिरेव विग्रहो यस्य कुतः आत्मन्येवारा
मो रतिर्यस्य तं ॥ यद्वा कः प्रजापतिर्दक्षः कथं द्वेष्टि ॥ एवंभूते तस्मिन् द्वेषो युक्तो नायुक्त इत्यर्थः ॥ २ ॥ यतो हेतोर्विद्वेषः यतो विद्वेषात् प्राणांस्तत्याज
एतदाख्याहि ॥ ३ ॥ तदेवाख्यातुमितिहासमुपक्षिपति समेता आसन् ॥ ४ ॥ प्रविष्टं दक्षमिति शेषः महत्सदः महतीं सभां ॥ ५ ॥ ॥

ह्वधिस्मेभ्यः ह्वीयामनेभ्यः॥ ६॥ प्राक्त्वोपवेशनात्पूर्वमेवनिषणस्तु पविष्टं मृडं शिवं तरनाहतः तेनाभ्युत्थानादिभिरकृतादरः नामृष्यत नासहत॥
नामंवक्रंयथाभवतितथाः मिवीक्ष्य॥ ८॥ मेवचनेऽर्घ्यंतोऽभ्युत्थानात्मत्सरावनद्धवतः॥ ९॥ त्वद्वेनउचितक्रियापूर्वेननवात्तेनेतिपाठेऽसष्टेन॥ १०॥
तरेवाहएषइति॥ यद्यस्माद्विप्राग्निसमक्षा॥ सावित्रीतेत्वायामेऽडहिहिंचपाणिमग्रहीत॥ ११॥ मृगशावस्सहरिणबालस्यअक्षिणीइवाक्षिणीयस्याः

उरतिष्ठन्नसदस्यात्तेह्वधिस्मेभ्यः सहाग्रयः॥ भ्रतेविरिंच्यंशार्ववतद्वासाक्षिप्रवेतसः॥ ६॥ सदसस्पतिभिर्दक्षोभगवान्प्रभु
भुसत्वातः॥ अजंलोकगुरुंनत्वाविषमाहतरातथा॥ ७॥ प्राड॰ निषण्णंमृडंदृष्ट्वानामृष्यन्नरनादृतः॥ उवाचवामंवक्रभ्यो
मभिवीक्ष्यदहन्निव॥ ८॥ अयतांब्रह्मर्षयोमेसहदेवाः सहाग्रयः॥ साधूनांब्रुवतोवृत्तंनाज्ञानान्नचमत्सरात॥ ९॥ अय
वलोकपालानांयशोघ्नोनिरपत्रपः॥ सद्भिराचरितः पंथाः येनत्वद्धेनदूषितः॥ १०॥ एषमेशिष्यतांप्राप्तोयन्मेऽडहिहिंग्र
हीत॥ पाणिविप्राग्निमध्यतः सावित्र्याइवसाधुवत॥ ११॥ गृहीत्वामृगशावाक्ष्याः पाणिंमर्कटलोचनः॥ प्रत्युत्थानाभिवा
दार्हे वाचाप्यकृतनोचितं॥ १२॥ लुप्तक्रियायाशुचयेमानिनेभिन्नसेतवे॥ अनिच्छन्नप्यदांबालांशूद्रायेवोशतींगिरं॥ १३॥
प्रेतावासेषुघोरेषुप्रेतैर्भूतगणैर्वृतः॥ अटत्युन्मत्तवन्नग्नोव्युप्तकेशोहसन्रुदन्॥ १४॥

प्रत्युत्थानाभिवादार्हे मयिउचितंसन्मानंवाचापिनाकरोत॥ १२॥ अनर्हायकन्यांदत्तेत्यनुतप्यमानआह॥ लुप्तक्रियायेतिसार्धैः चतुर्भिः॥
उशतींवेदलक्षणांगिरं॥ १३॥ प्रेतावासेषुश्मशानेषुव्युप्ताः विकीर्णाः केशाः यस्य॥ १४॥

चिताभस्मनाकृतं स्नानं येन प्रेतानां स्रजो माल्यानि यस्य स प्रेतस्रक् ॥ नृणां मस्थीनि भूषणानि यस्य ॥ शिव इत्यपरे शोनाम मात्रं यस्य तं सोमात्रात्मकः
केवलं तमो हृपः ॥ आत्मा स्वभावो येषां ॥ ५ ॥ उन्मादा भूतविशेषास्तेषां नाथाय ॥ उक्तं देउष्वविन्नाय ॥ वर्तेतिर्वेदे ॥ वाजसनेय्यशुत्यर्थः स्रुग्नाः क्रियायस्मिन्नुप
ब्रह्मरूपत्वात् ॥ अत एव नास्ति क्रियाविधिर्यस्मात् ॥ अमानिने अभिमानरहिताय वे इति छेदः ॥ तस्य परमेश्वरस्य महीयामाउग्रीक न्याकथं योग्यास्यादिति लज्जादिना दोष
मनिच्छुरपितं त्वं बंधलोभेन दत्तवान् ॥ अद्रायेत्यनर्हत्वमात्रे दृष्टांतः ॥ नहीतत्वे ॥ पूर्वापरत्वविवनविरोधापत्तेः ॥ एतदुक्तं भवति ॥ यथा कश्चित्कुद्रायवेदमप्य

चिताभस्मकृतस्नानः प्रेतस्रङ्नृस्थिभूषणः ॥ शिवापदेशोप्यशिवो मत्तोमत्तजनप्रियः ॥ पतिः प्रथमभूतानां तमोमा
त्रात्मकात्मना ॥ ५ ॥ तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे ॥ दत्ता बत मया साध्वी चोदितः परमेष्ठिना ॥ ६ ॥ मैत्रेय उवाच
विनिंद्यैवं सगिरिशमप्रतीपमवस्थितं ॥ दक्षोथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे ॥ ७ ॥ अयं तु देवयजन इंद्रोपेंद्रादिभिर्भवः
सह भागं न लभतां देवैर्देवगणाधमः

लोभेन दत्तवतिति तद्वदिति ॥ प्रेता वायोधिष्ठित्यारि सर्वे विडंबनमात्रमिति त्वमपमेवाह ॥ तस्मादिति ॥ अन्यथा
उन्मत्तइत्येवावश्यात ॥ अशिवः नास्ति शिवो यस्मात् ॥ अमत्तोमत्तजनप्रिय इति वा छेदः ॥ पतिः प्रथमभूतानामिति भक्तवात्सल्यमाह ॥ तमस्तानपि दोष
मपनीय पातीति ॥ नष्टानामपि शौचं च शुद्धिर्यस्मात्तं शिक्षयेतेमयाउक्तं प्याःशतिहृत मनो यस्य एउईतनतस्मै ॥ वर्तेतिर्हर्षे ब्रह्मणो वाक्याल्लज्जाभयादिकं परि
त्यज्य दत्तेत्यर्थः ॥ ६ ॥ अप्रतीपं अप्रतिकूलं यथा भवत्येवं अवस्थितमपि विनिंद्य ॥ ७ ॥ देवानां यजनं यस्मिन्देवैः सह भागं न लभतां किंतु तेभ्यः पूर्वमेव लभ
तां ॥ अप्रयोजित्वात् ॥ यद्वा तेभ्य उक्तं च तस्मिन्लभतां सर्वपोषकत्वात् ॥ अत्र हेतुः देवगणेषु धमो यस्मात्तस्यः ॥ ८ ॥

सदृक्तस्मात्स्थानाद्विनिष्क्रम्य जगाम हे कौरव्य ॥१९॥ गिरिशस्यानुगानामग्रणीर्मुख्यः ॥ रोष एव कषायस्तेन दूषितः आरक्तनेत्र इत्यर्थः ॥ तस्य गिरिश
स्यावाच्यता वचनानर्हता निंदां तामित्यर्थः ॥ तेभ्योपि शापं विससर्ज ॥२०॥ दक्षं शपति सार्द्धैस्त्रिभिः एतन्मर्त्यं दक्षशरीरमुद्दिश्य श्रेष्ठं मत्वा अप्रतिद्रुहि अप्रतिद्रो
हमद्रोग्धरि ईशे यः पृथग्दृष्टिः भेददर्शी तत्त्वतः परमार्थात् ॥२१॥ अतस्तत्त्वमेवाह गृहेष्विति ॥ कर्मतंत्रं कर्मपरिकरं वेदे ये वादाः अर्थवादाः ॥ अक्षय्यं ह वै चातुर्मास्ययाजि

निषिध्यमानः ॥ स सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापं ॥ तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनं ॥१९॥ विज्ञा
य शापं गिरिशानुगाग्रणीर्नंदीश्वरो रोषकषायदूषितः ॥ दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः ॥२०॥ य
एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥२१॥ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छ
या ॥ कर्मतंत्रं वितनुते वेदवादविपन्नधीः ॥२२॥ बुध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः ॥ स्त्रीकामः सोस्त्वतितरां
दक्षो बस्तमुखोऽचिरात् ॥२३॥ विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः ॥ संसरंत्विह ये चामुमनु शर्वावमानिनः ॥२४॥

नः सुकृतं भवतीत्यादि यद्वा हेतुभिर्विपन्ना विनष्टा धीर्यस्य ॥२२॥ परो देहादिः तमेवात्मत्वेनाभितो ध्यातुं शीलं यस्यास्तया बुद्ध्या विस्मृता आत्मनो गतिस्तत्त्वं येन
अतः पशुतुल्यः अतितरां स्त्रीकामोस्त्विति द्वितीयः शापः बस्तस्य मुखमेव मुखं यस्येति तृतीयः शापः ॥२३॥ अयं च शापोऽस्यानुरूप एवेत्याह विद्याबु
द्धिः ॥ यद्यप्येवं तत्त्वविद्येति बुद्धिर्यस्य अतोऽसौ जड एव ॥ द्विजाननुशपति संसरंत्विति सार्द्धैश्वर्यांशं वै भवमन्यत इति तथा नमस्तद्दक्षं ये चानुवर्तंते संसरंतु
जन्ममरणादि यातु भवंतीत्येकः शापः ॥२४॥

श्रुतायाः वेदरूपायाः पुष्पिण्याः पुष्पाणीवार्थवादाः ॥ मनःक्षोभकत्वात् ॥ अर्थवादवत्या इत्यर्थः ॥ मधुगंधः तल्लेशप्रलोभनेन मथ्ना मनःक्षोभकेण उ
न्मथितः आत्मा मनो येषां ते संमुह्यंतु कर्मजडा भवंत्विति द्वितीयः ॥ २५ ॥ सर्वभक्षाः भक्ष्याभक्ष्यविचारशून्याः ॥ वृत्त्यै देहादिपोषणाय धृतानि विद्यातपो
व्रतानि यैः ॥ वित्तादिष्वारामो रतिर्येषां ते याचकाः संतो विचरंत्विति च शापचतुष्टयं ॥ २६ ॥ प्रत्यसृजत प्रत्युदात्तं शापरूपं ब्रह्मदंडं ॥ २७ ॥ सच्छास्त्रस्य परिपंथिनः

गिरः श्रुतायाः पुष्पिण्या मधुगंधेन भूरिणा ॥ मथ्ना चोन्मथितात्मानः संमुह्यंतु हरद्विषः ॥ २५ ॥ सर्वभक्षा द्विजा वृत्त्यै धृतविद्या
तपोव्रताः ॥ वित्तदेहेंद्रियारामा याचका विचरंत्विह ॥ २६ ॥ तस्यैवं वदतः शापं श्रुत्वा द्विजकुलाय वै ॥ भृगुः प्रत्यसृजच्छा
पं ब्रह्मदंडं दुरत्ययं ॥ २७ ॥ भवव्रतधरा ये च ये च तान्समनुव्रताः ॥ पाषंडिनस्ते भवंतु सच्छास्त्रपरिपंथिनः ॥ २८ ॥ नष्टशौ
चा मूढधियो जटाभस्मास्थिधारिणः ॥ विशंतु शिवदीक्षायां यत्र दैवं सुरासवं ॥ २९ ॥ ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ
सेतुं विधारणं पुंसामतः पाषंडमाश्रिताः ॥ ३० ॥ एष एव हि लोकानां शिवः पंथाः सनातनः ॥ यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं ज
नार्दनः ॥ ३१ ॥ तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनं ॥ विगर्ह्य यात पाषंडं दैवं वो यत्र भूतराट् ॥ ३२ ॥

प्रतिकूलाः ॥ २८ ॥ सुरा गौडी पैष्टी माध्वी च ॥ आसवस्तालादिरसभवं मद्यं दैवं देवतात्वं ॥ तद्यत्र दैवं पूज्यं देवतावदादरणीयमिति वा ॥ २९ ॥ ब्रह्म वेदं कथंभूतं सेतुं मर्या
दारूपं तदेवाह ॥ वर्णाश्रमाचारवतां विधारणं धारकं ॥ ३० ॥ सेतुत्वं प्रपंचयति द्वाभ्यां ॥ एष वेदलक्षण एव शिवः पंथाः यं पूर्वे ऋषयः अनुसंतस्थुः आश्रित
वंतः यत्प्रमाणे जनार्दनः प्रमाणमूलं ॥ ३१ ॥ भूतराट् भूतानां तामसानां पतिः ॥ ३२ ॥

भा॰च
७

अन्योन्यशापेनोभयोर्नाशाद्विमनाइवेति ॥ तथापि भगवदनुगृहीतानां नाशो न स्यादिति भावः ॥ २३ ॥ अथ भः सर्वश्रेष्ठो हरिर्यत्रेज्यः पूज्यः ॥ तत्र सत्रं सम्य
विधाय ॥ हे महेष्वास विदुर ॥ २४ ॥ यत्र प्रयागे स्थिता तत्रावभृथस्नानं कृत्वा ततः स्वस्थानात् प्रययुः ॥ २५ ॥ इति चतुर्थे द्वितीयः ॥ तृतीये दक्षसती तात प्रदत्तोत्स
वदिदृक्षया ॥ गमिष्यंति महेशेन वारितानीति हेरुपिः ॥ १ ॥ ध्रियमाणयोः अवतिष्ठमानयोः धृङ् अवस्थाने इत्यस्मात् ॥ १ ॥ यद्यपि सुहृद्विहीनो यद्वन्तो

मैत्रेय उवाच ॥ तस्यैवं वदतः शापं भृगोः स भगवान्भवः ॥ निश्चक्राम ततः किंचिद्विमना इव सानुगः ॥ २ ॥ तेऽपि विश्वसृजः सत्रं
सहस्रपरिवत्सरान् ॥ संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ॥ ३४ आप्लुत्यावभृथं यत्र गंगा यमुनयान्विता ॥ विरजेनात्मना स
र्वे स्वं स्वं धाम ययुस्ततः ॥ ३५ ॥ इति श्री भागवते महापुराणे चतुर्थे स्कंधे दक्षशापो नाम द्वितीयो ॥ ध्यायः ॥ मैत्रेय उवाच ॥
सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः ॥ जामातुः श्वशुरस्यापि सुमहानतिचक्रमे ॥ १ ॥ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमे
ष्ठिना ॥ प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् ॥ २ ॥ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च ॥ बृहस्पतिसवं नाम समार
भे क्रतूत्तमम् ॥ ३ ॥ तस्मिन्ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः ॥ आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ॥ ४ ॥

नात्मैव तथापि दक्षस्य रुद्रपरित्यागो द्वेषाऽनुवर्धत उद्वेषे हेतुकः गर्वहेतुमाह ॥ यदाभिप्रजापतीनामाधिपत्ये अभिषिक्तः तदा तस्य स्मयो गर्वो भवत् ॥ राम
॥ १ ॥ गर्वादेव ब्रह्मनिष्ठानप्यसौ स्वाननभिभूय तिरस्कृत्य ॥ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति श्रुतेः ॥ वाजपेयेनेष्ट्वा समारेभे ॥ ३ ॥ कृतस्वस्त्य ७
यनाः कृतमंगलाः ॥ सभर्तृकाः इति दक्षिणादिभिः ॥ ब्रध्यमर्हितानामपि पत्न्यर्हणोपनर्हणायुक्तं ॥ ४ ॥

तत्र दा खेचराणां प्रजल्पतां सती पितृयज्ञमहोत्सवं श्रुत्वा ॥५॥ तत्र व्रजन्तीरूपदेवानां गंधर्वादीनां वरस्त्रियः स्वस्य निलयस्याभ्याशे समीपे दृष्ट्वा औ॥
त्सुक्यात् पतिमभ्यभाषतेति त्रयाणामन्वयः ॥ कथंभूतास्त्रियो दृष्ट्वा ॥ विमानानि यानानि यासां ताः ॥ प्रेष्ठैः सहिताः ॥ निष्कानि पदकानि कंठेषु यासां ताः शो
भनानि वासांसि यासां ताः ॥६॥ लोलानि चंचलान्यक्षीणि यासां ताः ॥ मृष्टान्युज्ज्वलानि कुंडलानि यासां ताः ॥७॥ निर्यापितः प्रवर्तितः ॥ हे वामशिव ॥ ते यद्य

तदुपश्रुत्य नभसि खेचराणां प्रजल्पतां ॥ सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवं ॥५॥ व्रजंतीः सर्वतो दिग्भ्य उपदेववरस्त्रि
यः ॥ विमानयानाः सप्रेष्ठा निष्ककंठीः सुवाससः ॥६॥ दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः ॥ पतिं भूतपतिं देव
मौत्सुक्यादभ्यभाषत ॥७॥ सत्युवाच ॥ प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल ॥ वयं च तत्राभिसरा
म वाम ते यद्यर्थितामी विबुधा व्रजंति हि ॥८॥ तस्मिन् भगिन्यो मम भर्तृभिः स्वकैः ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः ॥ अहं च त
स्मिन् भवता च कामये सहोपनीतं परिबर्हमर्हितुं ॥९॥ तत्र स्वसॄर्मे ननु भर्तृसंमिता मातृष्वसॄः क्लिन्नधियं च मातरं ॥ द्रक्ष्ये चिरो
त्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजं ॥१०॥

र्थिता इच्छा तर्हि वयं च तत्राभिसराम गच्छाम ॥ न वा यद्यपि योगो निवृत्तिः यतो ऽमी विबुधा व्रजंति ॥८॥
औत्सुक्यं प्रकरयन्नाह ॥ तस्मिन्निति षड्भिः ॥ पित्राभ्युपनीतं दत्तं परिबर्हमलंकारादिद्रव्यं भवता सह अर्हितुं स्वीकर्तुं कामये ॥ अर्हितमिति पाठे सत्कृतं परिबर्हमि
च्छामीति ॥९॥ स्वसॄर्भगिनीः ॥ भर्तृभिः संमिताः सहिताः ॥ क्लिन्नधियं स्नेहार्द्रचित्तां चिरमुत्कंठमुत्कटमनोरथं यस्याः साहं द्रक्ष्यामि ॥ हे मृड ॥ उन्नीयमानं प्रवर्त्यमानं च अध्वरे
ध्वजमिव दर्पश्रेष्ठमध्वरं ॥ यद्वा ॥ उत्क्षिप्यमाणं यज्ञकेतुं पूर्ववत् ॥१०॥

भा०च
८

अहो किं तवाश्चर्यं येन तवैतदौत्सुक्यमपि तिष्ठेत ॥ अतस्त्वमाह त्वयाऽति हे अजस्तद्दिव्यमाश्चर्यं पंचप्येत्वन्मायया रचितं विभाति अतो यद्यपि तव नाश्चर्यं तद्दिव्यत
थाप्यहं योषित उत्सुकत्वमावात तव तत्वं न जानामि अतो दीनाक्षपणामतीहे भव पे भवाह्निति जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ॥११॥ दिदृक्षामेव वेदमुत्तमान्याये
नच्यनतिपश्यतिह्यांहे अभवेतिहृद्दियोगंडः खंत्वेयानाह्वादितिमितिभावः अन्यायोषितः संवंधरहिता अपि प्रयांतीः पश्य कांतसखाः भर्तृसहिताः
वस्त्रधराः वेशधराः कथंभूताः यामाविमानैर्नभोमंडितं ॥ ताः हेशितिकंठ नीलकंठेति पराजग्रहामेत्त्व यविषमपि भक्षितमिति सूचयति ॥१२॥ तदाहेह्यदत्रे ॥

त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकं ॥ अथाप्यहं योषिदतत्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिं ॥११॥ पश्य प्रया
तीरभवान्ययोषितोप्यलंकृताः कांतसखा वरूथशः ॥ यासां व्रजद्भिः शितिकंठ मंडितं नभो विमानैः कलहंसपांडुभिः ॥१२॥ कथं सुता
याः पितृगेह कौतुकं निशम्य देहः सुरवर्य नेंगते ॥ अनाहुता अप्यभियंति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनं ॥१३॥ तन्मे प्रसीदेदममर्त्य वां
छितं कर्तुं भवान्कारुणिको बतार्हति ॥ त्वयात्मनोर्धेः हमदभ्रचक्षुषा निरूपिता माऽनुगृहाण याचितः ॥१४॥ [illegible] च ॥ एवं गिरि
त्रः प्रियया भिभाषितः प्रत्यभ्यधत्त प्रहसन्सुहृत्प्रियः ॥ संस्मारितो मर्मभिदः कुवागिषून्यानाह को विश्वसृजां समक्षतः ॥१५॥

पितृगेह महोत्सवं निशम्य हे तनायाः देहः कथं नेंगते दुःखं न प्रचलति तथाप्यनाहूताः संतः ॥ कथं तत्राह सौहृदं देहः केतनं गृहं तथा भर्तादीनां च गृहं अ
नाहूता अप्यभियंति संतः इत्युभाभ्यां ॥१३॥ हे अमर्त्यतन्मत्प्रसीद इदं मे वांछितं कर्तुं भवानर्हति ॥ कारुणिकस्त्वमवाह ॥ अदभ्रचक्षुषा अनल्पज्ञानेन पितृ एम
या आत्मनो देहस्यार्धे अहं निरूपिता धृता यतोऽर्धं नारीश्वर इति ख्यातोऽसि अतो मामनुगृहाण याचितः सन् ॥१४॥ अभिभाषितो भियाचितः कः द्रष्टुं यानाहं मर्मं

८

अनाहतानुपीति त्वया यदुदितं उक्तं तच्छोचनमेव किं तु अनात्मदेहादावहंकारः ॥ तत्कृतेन मदेन मन्युना च ते वधबोधयज्ञत्वादितदोषदृष्ट्यो भवंति तर्हि
न तु त्वादिते आरोपिते दोषे दृष्टिर्येषां ते ॥ १६ ॥ ननु विद्यादिगुणयुक्तो दक्षः त्वादृशो महत्त्वं कथं दोषदृष्टिमेवेत्यत आह ॥ विद्यादिभिरेव समस्तैः हतानां विवे
कत्ताने नष्टे प्रतिभूय स्मात्महत्त्वमानो धाम तेजो न पश्यंति हि ॥ ननु गुणैः कथं विवेकनाशस्तत्राह सतां गुणैः विवेकहेतुभिरपि त्वसत्त्वमानामितरैः दोषभू
तैः स्नुत एवतैः धृतः भ्रष्टो वाऽहं विद्वान् तापस इत्यादिमानो गर्वस्तेन दुष्टा दृष्टिर्येषां ते ॥ ११ ॥ स्वजनव्यपेक्षया वधदृष्ट्या गृहात्पतीयात् नावलोकयेत्

श्रीभगवानुवाच ॥ त्वयोदितं शोचनमेव शोचनेऽनाहतानुप्यमियं तिवंधुषु ॥ ते यद्यनुत्पादितदोषदृष्टयो बलीयसाऽनात्म्यमदेन मन्यु
ना ॥ १६ ॥ विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः ॥ स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यंति हि धाम भूयसां
॥ १७ ॥ नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनां ॥ येऽभ्यागतान्वक्रधियाऽभिचक्षते आरोपितभ्रूभिरमर्षणाक्षि
भिः ॥ १८ ॥ तथारिभिर्न व्यथते शिलीमुखैः शेतेर्दिताङ्गो हृदयेन दूयता ॥ स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः ॥ १९ ॥
व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रु संमता ॥ अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥ २० ॥

अनवस्थितचित्तत्वमेवाह ये वक्रधिया कुटिलया बुध्या पश्यंति आरोपिताउन्नमिता भ्रूर्येषु तान्यारोपितभ्रूणि तैः आरोपिताभिभ्रूभिरितिवा ॥ १८ ॥ ननु स्वजनानां गृह
स्वदुर्द्धि गंतव्यं ते षां उ । क्तिं सोढव्य ॥ नतस्पद्धः स्वहत्वादित्याह तथेति ॥ अरिभिः शिलीमुखैर्बाणैः अर्दितांगः खंडितगात्रोपि न तथा न व्यथते यतः शेते स्वपिति स्वा
नां दुरुक्तिभिर्मर्मसु ताडितो यथा दूयता व्यथमानेन हृदा दिवानिशं तप्यति ॥ १९ ॥ भवितव्यगतां यांनेयं शंकेति चेत्तत्राह व्यक्तं निश्चितं उत्कृष्टगतेः स्थितिर्यस्य त
स्यात्मजानां कन्यानां मध्ये त्वं प्रियेति मे संमतासि पितुः सकाशात्मानं न लप्स्यसे मदाश्रयात् मत्संबंधात् ॥ २० ॥

नन्व भगवन्त्वया किमिति रहः तिरस्कृतः यतो सौ त्वां द्वेष्टि अत आह । पापच्यमानेन मूलं दह्यमानेन हृदा आतुरेन्द्रियः कामिः पुरुषो जीवस्तत्त्वबुद्धिस्थितं ॥ तत्साक्षिणां निरहंकाराणामित्यर्थः । समृद्धिभिः उत्पत्तिकीर्त्यादिभिः एषां पदं स्थानमैश्वर्यं प्राप्तुमकल्पः अशक्तः सन् परं द्वेष्टि असुरा यथा हरिं केवलं द्वेषं ति ॥२१॥ नन्वत्वया प्रत्युत्थानादि विनयाद्यकरणात् अवज्ञा एवास्यैतत्राह । हे सुमध्यमे जनस्य हि मार्दिकं मिथो जनैर्विधीयते तत्प्रत्यासत्तेः साधु विधीयते । साधु विधीयते । साधुत्वमेवाह । परस्मै श्रीवासुदेवाय गुहाशयाय । अन्तर्यामिन एव । तदुक्तं च सैव परिप्रणीतं तस्मिन् कायिकव्यापारयोगपातं तस्य

पापच्यमानेन हृदातुरेन्द्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणाम् । अकल्प एषामधिरोढुमञ्जसा परं पदं द्वेष्टि यथासुरा हरिं ॥२१॥ प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे । प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥२२॥ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः । सत्त्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे नमसा विधीयते ॥२३॥

तानर्पामिद्दृष्ट्या मनसा सर्वकृतमिति भावः ॥२२॥ किंच । न केवलमभ्यागतेष्वेव वासुदेवदृष्ट्या नमनं क्रियते किंतु नित्यमेव नमनमिति वासुदेवस्थित्यत आह । विशुद्धं सत्त्वमन्तःकरणं । सत्त्वगुणो वा वसुदेवशब्दितं वसुदेवशब्देनोक्तं कुतः । यद्यस्मात्तत्र तस्मिन् सत्त्वे पुमान् वासुदेव ईयते प्रकाशते अपगतमावृत मावरणं यस्मात्तः । अयमर्थः । वासुदेवे भगवति प्रतीयत इति वासुदेवः परमेश्वरः प्रसिद्धः स च विशुद्धे सत्त्वे प्रतीयते अतः प्रत्ययार्थे न प्रसिद्धेन प्रकृत्यर्थो निर्धार्यते । तत्र वासयति देवमिति वसुदेवः सत्त्वात्मिका तस्मिन् त्रितीति वा वासुदेवः दीव्यते द्योतते इति वा व सुभिः उपलेपैः दीव्यति प्रकाशत इति वा वसुदेवशब्दवाच्यं शुद्धं सत्त्वं ततः किमत आह । सत्त्वे च तस्मिन् भगवान् नमसा नमस्कारेणानुविधीयते सेव्यत इत्यर्थः । नमसेति पाठे मनसा विशेषेण विधीयते ध्यायते चिन्त्यत इत्यर्थः । यतः अधोभूतेभ्यस्तान्तैघक्षेभ्यो जायते प्रकाशात्तेरिन्द्रियागोचर इत्यर्थः ॥२३॥

तस्मात्त्वया न निरीक्ष्यः ॥ देहः स्वरूपीति पोषकत्वात् रिपिरीपवारिकापितत्वव्याहृत्यर्थं द्विरुक्तः ॥ तदेवाह ॥ देवरोरुयोदक्षः विश्रुत्सजायत्तगतं मा
निरपराधं तिरोः करोतीति रक्षितवान् ॥ ४४ ॥ विपक्षे दोषमाह ॥ यदीति ॥ मद्वचो विहाय यत्त्वमतिक्रमिष्यसि तर्हि संभावितस्य अवतिष्ठितस्य पराधः पराभवो
भवति तदा अपराभवः तस्य मरणाय कल्पते ॥ ४५ ॥ इति च ... ता ... ॥ वत्सर्थं वपातिं हित्वागतापि त्वमवमानिता ॥ दृष्टानि मेतस्थं तत्यतेज
हो देहमित्यर्थः ॥ १ ॥ उभयत्रानुत्तमाते बलात्रिवारणोनच ॥ दूरस्थितदृक्षः निःक्रामती भवान् परिशंकितापनन्निविशाती च तदा सा सतीद्वि
तन्ने निरीक्षणो नापि तापि देह सुहृत्त्रोमपद्विरः तदस्तुत्वताभ्यपे ॥ यो विश्रुत सकुपत्तगतवरोऽहमापनागासंदुर्वचसा करोति रः ॥ ४६ ॥
यदि त्वं जिष्णुस्यातिहाय मद्वचो मद्भवत्योनततो भविष्यति ॥ संभावितस्य त्वजनात्पराभवो यदा सम्यतो मरणाय कल्पते ॥
श्री ... एतावदुक्त्वा विरराम शंकरः पत्न्यं
गनाशात्... वितयन् ॥ दूरस्थितदृक्षः परिशंकिता भवात्रिष्क्रामती निर्विशती द्विधा सहसा ॥ १ ॥ दूरस्थितदृशा प्रतिघातदुर्म
नातिहाडुरत्यस्रुकलाः तिविह्वला ॥ भवंभवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवेक्षत जातवेपथुः ॥ १ ॥ ततो विनिःश्वस्य सती विहाय तं शोके
धाश्रुरोलितविद्याश्रासवभूव ॥ १ ॥ दूरस्थितदृष्ट्याः प्रतिघातेन दुः नरोपेणाचक्षुपताक्ष्रदा ॥ पित्रोरगातस्त्रैणविमूढधीर्गृहाततेप्रमाणात्मनो यो ईमहात्ततापियः
मनाः ॥ अश्रूणां कलाभिर्लेशैः ॥ अतिविह्वला व्याकुलाश्रुप्रतिपुरुषं स्वसमानपुरुषं तारहितं प्रधक्ष्यतीव भस्मीकरिष्यतीव रुषा जातो वेपथुः ॥ कंपोय
स्याः ॥ १ ॥ ततस्तं विहाय पित्रोर्गृहान् गतान् कथंभूतं यः प्रीत्या तस्मै आत्मनो देहसार्धं महाततत्यागे हेतुः ॥ स्त्रैणं स्त्री स्वभावः तेन विमूढाधीर्यस्याः सा ॥ ३ ॥

भा॰च
१०

द्रुतविक्रमा शीघ्रगच्छंती सह पार्षदैः ॥ यक्षैश्च वर्त्तमानाः मणिमानमदश्च आदिर्येषां ते ॥ पुरः पुरतो वृषेंद्रो येषां ते गतव्यथा निर्भयः हृष्टा तिक्रमेणात ॥
स्यागमनाद्गतव्यथा इति वा ॥ ४ ॥ तां वृषेंद्रमारोप्य सारिकादिभिः ॥ क्रीडोपकरणैः श्वेतातपत्रादिभिश्च महाराजविभूतिभिः ॥ सह विटंकिताः शोभि-
ता ययुः सारिका पठेन निरूपितपक्षिणी गीतायनैर्गीताश्रयैः ॥ ५ ॥ आब्रह्ममंत्राद्यो वेदघोषस्तेनोर्जितं शोभमानं यज्ञस्य वैधिपशुविशसनं यस्मिन् ॥ यद-

तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः ॥ सपार्षदयक्षा मणिमन्मदादयः पुरोवृषेंद्रास्तरसा
गतव्यथाः ॥ ४ ॥ तां सारिकाकंडुकदर्पणांबुजश्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषे-
न्द्रमारोप्य विटंकिता ययुः ॥ ५ ॥ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ॥ मृद्दार्वयःकांचनदर्भचर्म-
भिर्निसृष्टभांडं यजनं समाविशत् ॥ ६ ॥ तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ॥ ऋते स्वसॄर्वै जन-
नीं च सादराः प्रेमाश्रुकंठ्यः परिषस्वजुर्मुदा ॥ ७ ॥ सौदर्यसंप्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्च सादरं ॥ दत्तां सपर्यां

तेनोर्जितं अतिशयितं यज्ञैर्वैशसं परस्परस्पर्धा यस्मिन् तद्यजनं यज्ञस्थानं समाविश ।
वरमासनं च सा नादत्त पित्राऽप्रतिनंदिता सती ॥ ८ ॥
दैवी ॥ विबुधैश्च जुष्टं ॥ मृद्दादिभिर्निसृष्टानि निर्मितानि भाजनानि पात्राणि यस्मिन् ॥ ६ ॥ कश्चन नाद्रियत नादृतवान् ॥ यज्ञकृतो दक्षात भयाद्यतस्मा-
नेतत्र हेतुः ॥ तेन विमानितां ॥ स्वसॄर्जननीं च ऋते विना तां सादराः ॥ परिषस्वजुः ॥ आलिंगितवत्यः प्रेमाश्रुभिः निरुद्धः कंठो यासां ॥ ७ ॥ अप्रतिनं-
दिता पित्रा नादृता सती नादत्त न गृहीतवती ॥ कथंभूतं सौदर्याणां सोदरत्वेन भगिनीनां यः संप्रश्नः ॥ तत्र समर्था योग्या या वार्ता तया सह तां च नादत्त नाभ्युणो-
दित्यर्थः ॥ ८ ॥

राम
१०

नाविद्यते हृद्यस्य मार्गोपमिमिति देवहृद्वेकृतहेलनं अवज्ञा मा भूत् कानाद्यकारणात ॥ ७ ॥ जगाद इति । इति वता अमर्षेण कोपेन विपन्नात्म अज्ञानतया शिवं द्वि
षि शिवद्विषं धूमपथः कर्मपार्गस्तेत्रभ्रमो भ्यामस्तेन स्मयो गर्वो यस्य ॥ ८ ॥ रनवधाय समुत्थितान् भावान् यानि गृह्यानि वार्यः ॥ ९ ॥ निशम्येवाहनय
स्येति त्रयोदशभिः ॥ मुक्तवैरके त्यक्तविरोधे तस्मिन् शिवे भवं तं ज्ञातेविनाकृतमः प्रतीपयेत ॥ प्रतिकूलमाचरेत ॥ वैराभावे हेतवः ॥ यस्य लोके
अतिशायनः अतिशयितो नास्ति तथाप्रियस्त्वाप्रियश्च नास्ति समामपाठे अतिशयेन प्रियो नास्ति देहभृतां प्रियो यमात्मा तस्य समहत्त्वात्मनि

अहृद्यमार्गं तमवेस्य बाधकं पिनाकदेवे कृतहेलनं विभो ॥ अनादृताद्यन्नमदस्य धीश्वरी त्रकोपलोकानिवधस्यतीरुषा
जगाद रुपाः मर्षविपन्नयाशिरा शिवद्विषं धूमपथश्रमस्मयं ॥ द्वितेजमाभूतगणान् समुत्थितान् निगृत्य देवीजगतो
निशम्य एवतः ॥ १० ॥ देव वाच ॥ न यस्य लोके स्मतिशायनः प्रियः तथाप्रियो देहभृतां प्रियात्मनः ॥ तस्मिन् समहात्म
निमुक्तवैरके ज्ञातेभवं तं कतमः प्रतीपयेत ॥ ११ ॥ दोषान् परेषां हि गुणेषु साधवो गृह्णन्ति केचित् भवादृशो द्विज गुणा
कारणाभूते समहत्त्वरूपइतिवा ॥ ११ ॥ तस्य वधतिकूलकरणं द्वेषा ॥ महत्त्वमदो स्वपल्यान् वडूलीकारिस्मवोमहत्त्वमात्येषविरुद्धवानघ ॥ १२ ॥
हेणापाझान्नतद्वोहेणावातत्रपुरुषाणां वा तद्विध्यंवरंतीमहत्त्वमद्वोहमाहदोषातिद्वाभ्यां ॥ हे द्विजेत्यधिक्षेपः ॥ भवादृशाः त्वद्विधाः अयूयकाः परेषां
गुणेषु दोषानेव गृह्णन्ति न तु गुणान् ॥ केचिन्मध्यस्थाः गुणेषु दोषान्न गृह्णन्ति ॥ किं तु यथास्थितान् गुणदोषानविवेकेन गृह्णन्ति ते तु महान्त उच्यन्ते ॥ साधु
वस्तु केवलं गुणानेव गृह्णन्ति न दोषान् ते तु महान्त उच्यन्ते महत्त्वमात्के दोषान गृह्णन्त्येव यस्मात पल्यान् तच्छान विगुणान् वडूलीकुर्वेति कारिस्मवो भव

भा०च ॥

एतच्चद्दुर्जनेषु युक्तमेवेत्याह नेति ॥ जगज्जडशरीरं तदेवात्मेति वदन्ति ये ते षड्ईर्ष्याक्रान्ताः तेषां यथा भवत्येवं महतां विनिन्देति यत एतद्दाम्पत्यं न भवति ॥ तेषां निरस्तं तेजः प्रभावो येषामिति वा ॥ यद्यपि महापुरुषाः विनिन्दां सहन्ते तथापि तत्पादरेणावहन्त्रसहमानाः ॥ तेषां तेजो निरस्यन्तीति च्युतोः शक्रेषु महत्त्रिदशनमेवावितमित्यर्थः ॥ १२ ॥ तदेवं महद्द्रोहफलमुक्त्वा तन्मित्रत्वं वक्तुं तद्द्रोहमाह यदिति द्वाभ्यां ॥ यत यस्य ब्रह्मरन्ध्रमात्रे शिव इति तत्त्वाविद्धं नाम मन्त्राणां सर्वेषां ग्रस्वं यत्सर्वं हन्ति केवलं गिरेर्वेरि तं उच्चारितं न तमनः ॥ एवं कं तद्धत्फलं दर्पिप्रसंगात् रविं तं गिरिवेद्ध्वि ॥ न लंघ्यशासनं मातायस्य सु होरिवेनरः

नास्यर्थमेतद्यरमत्तप्रर्वदामहद्धि निंदाकुरणपात्मवारिषु ॥ तेषां महापुरुषपादपांशुभिर्निरस्तं तेजः प्रसूत देवशोभनं ॥ १३ ॥
यतद्यरं नाम गिरे रितं नृणां सकृत्प्रसंगात्स्वमाधु हंति तत ॥ पवित्रकीर्तिमलंघ्यशासनं भवानहो द्वेष्टि शिवं शिवे
तरः ॥ १४ ॥ यत्ताद पद्मं महतां मनोलिभिर्विषेवितं ब्रह्मरसासवार्थिभिः ॥ लोकस्य यद्वर्षति चाशिषोर्थिनः तस्मै भवान्द्रु
ह्यति विश्वबंधवे ॥ १५ ॥ किंवा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्यजटाः श्मशाने ॥ तन्माल्यभस्मनृकपा

लसंवसत्पिशाचैर्येमूर्द्धभिर्दधति तच्चरणावसृष्टं ॥ १६ ॥

अमंगलरूपः ॥ १४ ॥ पापहरत्वमुक्तं ॥ भक्तिमुक्तिप्रदत्वेन शिवं वर्णयन्नाह ॥ यस्य पादपद्मं महतां मनोलिभिः ब्रह्मरसासवार्थिभिः पद्मार्थिनः सकामस्य लोकस्य ताहाश्रीशिषो वर्षति ॥ १५ ॥ यदुक्तं शिवाप मनाम सेवालयः तेः ब्रह्मलोके ब्रह्मानंदः सएव पदवीमकरंदः तदर्थिभिः पद्मार्थिनः सकाम लोकस्य ताहाश्रीशिषो वर्षति ॥ एप रेशोन्य शिवं इति यच्चोक्तं येनावासेविता दितदाह क्षिप ताह ॥ किंवेति ॥ योजटाः अवकीर्य श्मशाने वसन् वसतिस्मत त्सश्मशानस्य मास्यानि भस्म ॥ निजस्मानि नृकपालानि भूषणत्वेन मतिय संत त्वन्नान्येन विदुः ॥ किं ते विदंत्येवेति चेन्न यासतितेषां तद्दास्यागुपपन्नेरित्याह ॥ तच्चरणावसृष्टं
गलितं निर्माल्यं ये मूर्धभिर्धारयंति ते ॥ १६ ॥

॥

इदानीं देहत्यक्तुकामा धर्मतत्त्वमाह ॥ कर्णावाछाद्य निर्गछेत ॥ यद्यपि मर्तुं मारयितुं वा कल्पो न भवति कदा धर्मावितरि धर्मरक्षके ईशे स्वामिनि असृ-
णिभिर्निरंकुशैर्नृभिरस्यमाने अधिक्षिप्यमाणे प्रभुः ॥ राक्षसे तां रुषतीं अकल्याणवादिनीं प्रसह्य बलात् छिंद्यात ॥ ततो पि स्वयं प्राणान् विसृजेदि-
ति यत् स धर्मः ॥ १७ ॥ तव त्वत्तः उत्पन्नं शितिकंठो नीलकंठः ॥ तन्निंदकात् प्रमादादापन्नस्यापवित्रस्यान्नस्य त्यागं विना न विशुद्धिरिति दृष्टांतेनाह ॥ जग्धस्य
भक्षितस्यान्नस्योद्धरणं वमनमेव शुद्धिं प्रचक्षते ॥ १८ ॥ यदुक्तं लुप्तक्रियायाश्च व्यपदिशति तत्राह ॥ नेति ॥ वेदवादान् विधिनिषेधरूपान् स्व ए-

कर्णौ पिधाय निरियाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने ॥ छिंद्यात्प्रसह्य रुषतीमसतीं प्रभुश्चे-
ज्जिह्वामसूनपि ततो विसृजेत्स धर्मः ॥ १७ ॥ अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकंठगर्हिणः ॥ ज-
ग्धस्य मोहाद्धि विशुद्धिमंधसो जुगुप्सितस्योद्धरणं प्रचक्षते ॥ १८ ॥ न वेदवादाननुवर्त्तते मतिः स्व एव लोके र-
मतो महामुनेः ॥ यथा गतिर्देवमनुष्ययोः पृथक् स्व एव धर्मे न परं क्षिपेत्स्थितः ॥ १९ ॥

व लोके स्वात्मन्येव रममाणस्य महतो मुनेः सम्यक् विरक्तस्य मतिः नानुवर्त्तते निवृत्ताधिकारत्वात् अधिकारभेदे दृष्टांतः ॥ यथा देवानां गतिरा-
काश एव ॥ मनुष्याणां पृथिव्यामेव अतः स्वधर्म एव प्रवृत्तिलक्षणे निवृत्तिलक्षणे वा स्थितः सन् परमन्यं धर्मं प्रवृत्तिरूपं वा न क्षिपेत न निंदेत व्यवस्थि-
ताधिकारत्वेनोभयोः सत्यत्वात् न क्षिपेदेवेति वान्वयः ॥ १९ ॥

भा॰च॰
१२

एतदेवोपपादयन्नाह प्रवृत्तमग्निहोत्रादि निवृत्तं शमदमादि ऋतं सत्यमेव यतः वेदे आश्रितं विहितं ॥ तच्च विविच्य व्यवस्थया आश्रितं न तु विशेषेण ॥ व्य
वस्थामेवाह उभयलिंगं रागवैराग्यलक्षणाभ्यां लिंगाभ्यां चिह्नमधिकारिविशेषणं यस्मिन् तत् ॥ ननु यावज्जीवमग्निहोत्रं जुहोति शान्तो दान्त इत्यादिषु नैवं व्यवस्था
प्रतीयते सत्यं तथाप्युभयोरेकाधिकारविरोधात्तथा पर्यवस्यतीत्याह ॥ युगपद्भावो यौगपद्यं यौगपद्येनैकस्मिन् कर्तरि तत्कर्मद्वयं विरोधि ॥ ननु
तर्हि निवृत्तं कर्म शिवेनापि कर्तव्यमेवेत्याह ॥ ब्रह्मणि परशिवे किंचिदपि कर्म नर्छति न प्राप्नोति अतो यथा प्रवृत्तनिवृत्तयोः परस्परधर्मा
करणे न दोषः तथैवेश्वरे तदुभयधर्माकरणेपीति भावः ॥ १० ॥ किं तावदस्मत्कृते त्वानः तथा न ग्रह इत्यादिना यो भोगाद्यभाव उक्तः तत्राह ॥ हे पितः अ

प्य॰ कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितं ॥ विरोधि तद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्छति ॥ १० ॥ शि
मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः ॥ तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिंगा अवधूत
सेविताः ॥ ११ ॥ नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना ॥ व्रीडा ममाभूत्कुजनप्रसंगतस्तज्जन्म धिग्यो
महतामवद्यकृत् ॥ १२ ॥

स्माभिरास्थिताः आश्रिताः पदव्यः अणिमादिसमृद्धयः ॥ वो युष्माकं मा न सन्तीत्यर्थः ॥ यतो वः पदव्यो यज्ञशालासु
वयं वेत्तितास्तु तदन्नेन यज्ञगतेनान्नेन तृप्तैः ॥ केवलमीडिताः धूमवर्त्मभिश्च भुज्यन्ते या अस्मत्पदव्यस्तास्तु नैवंभूताः किंतु अव्यक्तलिंगाः अव्यक्तं
लिंगं हेतुर्यासां इच्छामात्रप्रभवत्वात् अवधूतैर्ब्रह्मविद्भिः सेविताः अतो हं मायाहंकारादिदृष्टिरिति गर्वमाकार्षीरिति भावः ॥ ११ ॥ किं च उन्नतेन देशा
रत्पद्यामेवेत्याह ॥ द्वाभ्यां ॥ एतेन नालं पूर्यतां किं तु पितृत्वलमेव कथंभूतेन कुजन्मना ॥ तदेवाह हरे कृतागसः अपराधवतस्तव देहादुद्भूतेन न तु स्वास्थ्यायोग्ये देहः कु
यत्यज्यत इत्याह कुजनस्य तव प्रसंगतः संबंधात् मम लज्जाभूत् यतः यो महतामप्रियकर्ता तस्माद्यज्जन्म तद्धिकृत्वेत्तं संबंधादस्मादप्यमित्यर्थः ॥ १२ ॥

राम
१२

किंच परिहासादिषु विनोदे नापि दाक्षायणीति संबोधयन्॥ त्वदीयं त्वत्संबंधवाचकं गोत्रनाम यदा वृषध्वज आह गृह्णाति तदाहं व्यपेतनर्मस्मितं यथा भवत्येवं हृदुर्मना अश्रुतिदुःखिता चिन्नाभवामि॥ तन्नस्मादिति निश्चितं एतत्कुणपं शरीरं उत्स्रक्ष्ये त्यक्ष्यामि॥ १३॥ इदं श्रुत्वा दक्षः कांत्वा शत्रुहरत्यु क्रोधा॥ हरिघातिनी दुद्री चीउदीच्यां दिशि पाठांतरे उदङ्मुखी॥ शांतवाक् गृहीतमौना जलं स्पृष्ट्वा आचम्य इदं कृद्दृशं॥ १४॥ योगमार्गमेवाह कृत्वेति॥ व्यनि

गोत्रं त्वदीयं भगवान् वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः॥ व्यपेतनर्मस्मितमाशु तत्क्षणं त्यक्ष्ये तदंगमेतत्कुणपं त्वदंगजं॥ १३॥

मैत्रेय उवाच॥ इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शांतवाक्॥ स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत्॥ १४॥ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः॥ शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदितानयत्॥ १५॥ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात्॥ जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणां॥ १६॥ ततः स्वभर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती न चापरं॥ ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिनाग्निना॥ १७॥ तत्पश्यतां खे भुवि चाद्भुतं महद्धाहेति वादः सुमहान

लौ प्राणापानौ ऊर्ध्वाधोवृत्तिकौ रोनिरोधेन समानौ एकरूपौ [illegible] जापत॥ हंत प्रियादैवतमस्य देवी जहावसून् केन सती प्रकोपिता॥ १८॥ नाभिचक्रे कृत्वा तत उदानं उत्थाप्य धिया सह हृदि स्थापयित्वा कंठमार्गेण भ्रुवोर्मध्यमनयत्॥ १५॥ महतां पूज्यतमेन॥ १६॥ चरणांबुजे आस वंपजनानंदं भर्तृपदानं ददर्श देहस्त्व सद्यः प्रज्वलितो भूत समाधिना योगाग्नि हेतेन॥ १७॥ खे भुवि च हाहेत्यादिवादः तमेवाह॥ हंतेति वि

भा०व
१२

महद्दानात्मयेशोर्जेन्यं ॥ अस्मत्सर्वत्रतेनेह एवमन्याप्यसत्याऽः ॥ यस्येति ॥ येनविमताश्रुवज्ञाताः ॥ १९ ॥ उमर्षमुत्पत्संहनं दहदयपस्य ॥ लोकेजनमध्येवशारात नवकेव ॥ पद्यतः ह्रीयामंगजा हतोनूपराधतः ह्रावतत्यामृतयेमरणायाद्यतानननिवारितवान् ॥ छकछद्विर् ॥ शिवद्वेषी २० ॥ अद्भुतंदत्वाव ॥ २१ ॥ यत्तघ्र वहतीतियत्तघ्रघ्नेतनअपहतंरज्ञइत्यादिना ॥ २१ ॥ अधर्षणाप्रस्तुणायेतपसासोमंप्राघ्नाञ्चभवोनामदेवाउत्थिताः ॥ २२ ॥ ब्रह्मतेजसाउशान्दिदीप्य

अहोत्वनात्मंमहदस्यपश्यतः प्रजापतेर्यस्यवरावरंप्रजाः ॥ नहावस्तुनूयद्विमताः त्मज्ञासतीमनात्विनीमानमभीज्ञामर्हति ॥ १९ ॥ सोयंउमर्षहृदयोब्रह्मधुकवलोकेः यकीर्तिमहतीमवाप्स्यति ॥ यरगजांह्वावछहषद्विडयतांनशत्यषेधन्मृतयेः पराधतः ॥ २० ॥ वेदत्वे वजनेसत्याहयाः हत्यागमडुत ॥ दक्षतत्यापिंदाहंतमुदतिष्ठनुदाग्रधाः ॥ २१ ॥ तेषांमापततांवेगंनिराप्य भगवान्प्रभुः ॥ यतघ्रघ्ने नयज्ञपादक्षिणाग्नेञ्चहावहे ॥ २२ ॥ अधर्षणाहूयमानेदेवाउत्सिरोजसा ॥ अभवोनामतपसासोमंप्राघ्नाः सहस्रशः ॥ २२ ॥ तेरलाता युधैः सर्वेप्रमथ्याः सहगुह्यकाः ॥ हन्यमानादिशोभेजुराद्विविद्यतेजसा ॥ २४ ॥ इति श्री महाभारते शान्तिपर्वणि मोक्षधर्मे धेसतीदेहोत्सर्ग ष्ठवर्योध्यायः ॥ मे दे यउवा च ॥ भवोभवान्यानिधनंप्रजापतेरसत्कृताया अवगम्यनारदात ॥ स्वपार्षदैसैन्यावतदध्वरंछिदिं विद्रावितं कोधमपारमादधे ॥ १ ॥ क्रुद्धः सदष्टोष्ठपुटः सधूर्जटिः ॥ जटांतडिद्वह्निसटोग्ररोविषं ॥ उत्कृत्यरुद्रः सहसोत्थितोहसन्गंभीरनादोविससर्ज तांभुवि ॥ २ ॥ एम मोने ॥ २४ ॥ चतुर्थेवस्थ ॥ पंचमेतसतीदेहत्यागमाकर्ण्यशंकरः ॥ वीरभद्रंहसोत्पाद्यतेनरक्तमघातयत ॥ प्रजापतेर्हेतोनिधनं ॥ कृतःते जैतांउविव ॥ १२ नासतकृतायाः तस्माध्वरेऽन्नभवोदेवाहितैः ॥ १ ॥ सधूर्जटिः रुद्रः ॥ घोरः सत्त्वराणुत्कृत्योत्पाद्योत्थितः सततांभुविविसर्ज ॥ सदष्टउष्ठपुटोयेन ॥ तडितांवह्नी मांवसटाज्वालास्तद्वदुग्रेविषयस्याः तां ॥ १ ॥

ततोजगयाः सकाशात्तस्मात् अतिकायोवीरभद्रोजात इतिशेषः ॥ ननुवातनादे हे नदिविंस्मृशानस्य अस्तत्व इत्यर्थः ध्वनन्कृष्णवर्णाः ॥ त्रयः सूर्या इव दृशो

यस्य ॥ करालात्तृगात्रः शूयस्य ॥ ज्वलदग्निरिव मूर्धजा यस्य कपालमालायुक्तः ॥ विविधान्युद्यतान्यायुधानि यस्य ॥ २ ॥ हे रुद्रभर युद्धक्रोधानल मद्भ्रातृना

त्वमग्रणीः सनूसपत्तं दक्षं जहि ॥ ब्रह्मतेजो दुर्जयमिति मा मरक्षाः यतः त्वमेव अंशकः ॥ ४ ॥ मन्युना हुडेणापरि चक्रमेव दक्षिणाे चकार ॥ अंशे तगमत्र

ततोतिकायस्तनुवास्पृशन्दिवं सहस्रबाहुर्घनरुक्त्रिसूर्यदृक् ॥ करालदंष्ट्रो ज्वलदग्निमूर्द्धजः ॥ कपालमाली विविधो

द्यतायुधः ॥ २ ॥ तं किं करोमीति गृणन्तमाह बद्धाञ्जलिं भगवान्भूतनाथः ॥ दक्षं सयत्नं जहि मद्भटानां त्वमग्रणी रुद्रभ

टांशको मे ॥ ४ ॥ आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुम् ॥ मेनेतदात्मानमसंगरंहसा महीयसा ता

त सह्यः सहिष्णुम् ॥ ५ ॥ अन्वीयमानः स तु रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवम् ॥ उद्यम्य शूलं जगदन्तकान्तकं सम्प्रा

द्रवद्घोषणभूषणाङ्घ्रिः ॥ ६ ॥ अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुम् ॥ तमः किमेतत्कुत एतद्रजो

भूदिति द्विजा द्विजपत्न्यश्च दध्युः ॥ ७ ॥ वाता न वान्ति न हि सन्ति दस्यवः प्राचीनबर्हिर्जीवति होग्रदण्डः ॥ गावो न काल्यन्त इदं

तिघातं यतरोहो वेगः तेन ॥ मोतात महीयसा वलीयसा मामपि सहः सहिष्णुं वलं सोढुं न संमेने ॥ ५ ॥ जगाम रुद्रतोरजो लोकोधुना किं प्रलयाय कल्पते

तको मृत्युः तस्याप्यन्तकं शूलं घोषयति शब्दं कुर्वन्तीति घोषणानि नूपुराणि निभूषणानि यस्य ॥ तावद्ग्रीवसमः ॥ ६ ॥ ककुभि दिशि तमोन भवति किं रजो

इति ज्ञात्वा ऊः रज एतत्कुतो भूत इति दध्युः चिंतयामासुः ॥ ७ ॥ हे बतेदिसं भवेनोत्याति कं कल्पयंति वाता इति दस्यूनाम भावे हेतुः प्राचीनबर्हिस्तदानीं

भा॰च
१४

प्रसूतिर्दक्षपत्नी सा मिश्राउव्यायां सां विपाकः फलं पश्यती ना मितितस्याडुः खाधिको हेतः ॥ अवरधो अवहातवान् ॥ अनागामनागसं ९
न वैरं हतावृत्तामात्रं किं हत्द्रावत्तातं ॥ अतो नास्य भङ्ग भविष्यतीत्याऊः प्रत्विति हा भ्या ॥ अप्तो विकर्णो जटाकलापो यस्य तस्य श्मलस्य तु त्याग्र
ग्रे अर्पिताः प्रोक्ताः दिग्गजेन्द्रा येन उदिता नि उत्रपिता निःस्रुत्रोत्ति येस्ते दोर्वाहव एव धनाहा त्वितत्व हर्षेण नृत्यति ॥ उच्चः अट्टहासः कठोरो हासस्र
वत्तन यि तुगार्जित तेन भित्रा विदीर्णा दिशो येन सः ॥ १० ॥ अमर्षपित्वा अप्रह नभं कालामन्युग्रतत्रोध्व्याप्तउद्रतः ॥ विश्लिष्टा भागणो नक्षत्रं संधो

अप्रतिमिश्राः त्रिपदद्विग्रचित्राऊत्तुर्विपाकोवृजिनस्येष तस्य ॥ यत्पश्यति नाडुहितृणां प्रजेशः हतां सती मवद ध्यावनागां ॥ ९
पत्वित कालेव्हनजटाकलापः स्विष्मलस्याप्पित दिग्गजेन्द्रः ॥ वितत्यनृत्यत्युदिताप्रदोर्धनात्युच्चाट्टहासस्तनयित्नुभित्रदिक् ॥
अमर्षपित्वात मप्रत्युतेजसं मन्युप्तुतं दुर्विषहं भुकुट्या ॥ करालदंष्ट्राभिरुदस्तभागणां स्यात्त्वाहितिकिं कोपयतो विधातः ॥ ११ ॥ वद्वैव
पुढ्वीग्रटशोच्यमानेजनेनदक्षस्यमुक्तमहात्मनेः ॥ उत्पेतुरुत्पाततमाः सहस्रशो भयावहा दिवि भूमौ च पर्यक् ॥ १२ ॥ तावत्सरुद्राउ
चैरेमवोमहाचत्रानाप्रधैर्वामकेरुद्राउधैः ॥ पिङ्गैः पिशङ्गैर्मकरोदराननैः पर्याद्रवद्भिर्विडुराचरुध्यत ॥ १३ ॥ केचिद्बभञ्जुः प्राग्वंशं पत्नीशालां तथापरे ॥ सद आग्नीध्रशालां च तद्विहारं महानसं ॥ १४ ॥
येन उन्मत्तकोपयतो विधात्रपि किं त्वितिस्यात्र
स्यारेव कान्यस्य कथा ॥ ११ ॥ उद्विग्ना प्रचलिता हृदयस्य जनेन वजुः पथ्या भवत्येव मुच्यमाने ॥ हतिउत्पात तमाः महोत्पाताः उच्छ्रिताः पर्यक् सर्वत
...थ भूता महात्मनो पि दक्षस्य भयावहाः ॥ १२ ॥ नानाप्रायुधानि येषां वामनैर्ह्रस्वैः उद्यतायुधैः पिङ्गैः कपिलैः पिशङ्गैः पीतैः मकरस्येव उदरं मान
नं च येषां तैः परिधावद्भिः रुद्धः ॥ १३ ॥ पत्नीशालायाः पूर्वपश्चिमतत्त्वमयोः अर्पितप्रवं पश्चिमायतं काष्ठं प्राग्वंशः तयत्तशालायाः पश्चिमतः पत्नीशालायाः

रामः
१४

हृत्वाः वसंजुः ॥ उन्नरवेधामेखलाः ॥ सीमास्त्वाणि ॥ ५ ॥ ७ ॥ ग्रावभिरर्दयमानाः ॥ नैकधानेकधा डुडुवुः ॥ ८ ॥ स्रुवो हस्ते यस्य ॥ भवो वीरभद्रः स्रुवं चे
उत्पाटितवान् ॥ ९ ॥ उज्जहार उद्धृतवान् ॥ सदस्थः सभायां स्थितः सन् शापं तेनैव निर्दाहं कुर्वतः ॥ अग्निर्निकोवेतनस्त्र ह्वत ॥ धरितवान् ॥ १० ॥ क
लिंगदेशानस्योः त्रिहृद्धो द्वाहो बलभद्रो यथा पूतेरंतान्यातितवान् ॥ गारिमणीगृहतेरहृद्धनिरमानेरतः ॥ रतान् दर्शयन् ॥ योजहास ॥ पूष्णोरितिपाठे
द्विवचनमेद्रापोस्मश्च ह भवतीत्यवतत्सहितस्यापि पूष्णोदंतपातशाप्यमस्थितवान् ॥ तथाहि ॥ पूषा प्रविष्टभागो दंतको हितदेवान् उद्भवतीति वि

हृत्वार्यन्तपात्राणि तथैकेग्नीन् नाशयन् ॥ अंडेषु सूत्रपत्के ... द्विमिंडुवैरिमेखलाः ॥ ७ ॥ स्रुवाधं तस्तुनीनन्मूषके पत्नीरतर्जे
यन् ॥ अपरे जगृहुर्देवान् प्रत्यासन्नानुपलायितान् ॥ ८ ॥ भगं ववधुमणिमान् वीरभद्रः प्रजापतिं ॥ चंडीशः पूषणो देवं भगं ने
[illegible]हीत ॥ १० ॥ सर्वएवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः ॥ तैरर्दयमानाः [illegible] ग्रावभिर्नैकधाद्रवत ॥ ८ ॥ जुह्वतः स्रुव
हस्तस्य श्मश्रूणि भगवान् भवः ॥ भृगोरुत्तस्थे सदसि यो हसत् श्मश्रु दर्शयन् ॥ ९ ॥ भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि ॥ उ
ज्जहार सदस्थः ॥ स्थो ह्यणायः शापं तमसून् ह्वत ॥ १० ॥ पूष्णो ह्यपातयद्दंतान् कालिंगस्य यथाबलः ॥ शप्यमाने गरिमणि यो हसद्दर्शयन्
रतः ॥ ११ ॥ आक्रम्योरसि दक्षस्य शितधारेण हेतिना ॥ छिंदन्नपि तदुद्धर्तुं नाशक्नोत् त्र्यंबकस्तदा ॥ १२ ॥

हितस्य प्रेषणस्य हि देवत्याभावात्तन्नतस्य दंताः ॥ शंकेति न वक्तव्यं स्यात् ॥ न वैतत्संगच्छते दत्याशंक्य तत्रापि तस्य दंतपातो ॥ वक्ष्यमाणे प्रवृत्ते तद्द्विवचनेन
तार्प्यते ॥ अतस्तेन पूष्णो यद्दंतद्विधावज्ञाति पूषा तु यजमानस्य दद्भिर्भक्षयतु पिष्टं इति केवलं चेतपिष्टभुक् भविष्यति अन्यस्य हि तद्दे यजमानस्य दद्भिर्भ
क्षयिष्यतीत्यर्थः ॥ ११ ॥ छिंदन्नपीत्यत्र शिरस्य परिव्यक्तो भविष्यति यावको वीरभद्रः ॥ १२ ॥

श्रस्त्रान्वितैः मंत्रसहितैः ॥ मनिर्भिन्नात्वकूपस्य तथाभूतं दृष्ट्वेति शेषः ॥ २३ ॥ सपशूनां पतिः मखे संपन्ने योगं कर्तुं निष्पीडनादिरूपं मारणोपायइ॥
त्यात्तेनोपायेनाहरत् ॥ २४ ॥ अन्येषां वाह्मणादीनां तद्विपर्ययः असाधुवादः अभूदिति शेषः ॥ २५ ॥ गुह्यकालयं कैलासं ॥ २६ ॥ इति च तुर्थे पंचमः ॥
षष्ठे तु देवसंघेन सह गत्वा भवं विधिः ॥ सांत्वयामास दक्षादिजीवनायार्थमादरात् ॥ १ ॥ अथ देवगणाः स्वयंभुवे न्यवेदयन्नित्याह द्वितीयेनान्वयः श

शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः ॥ विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरं ॥ २३ ॥ दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे ॥ यजमा
नपशोः कस्य कायात्तेनाहरच्छिरः ॥ २४ ॥ साधुवादस्तदा तेषां कर्म तत्तस्य पश्यतां ॥ भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥ २५ ॥ जु
हावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयं ॥ २६ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे
दक्षयज्ञध्वंसः पंचमोऽध्यायः ॥ ५ ॥ मैत्रेय उवाच ॥ अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः ॥ शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ १ ॥
संछिन्नभिन्नसर्वांगाः सर्त्विक्सभ्या भयाकुलाः ॥ स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन् ॥ २ ॥ उपलभ्य पुरैवैतद्भगवानब्जसंभ
वः ॥ नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥ ३ ॥ तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि ॥ क्षेमाय तत्र सा भूयान्न प्रायेण बुभू
षतां ॥ ४ ॥ अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भागभाजं परादुः ॥ प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मं ॥ ५ ॥

लादिभिः ॥ १ ॥ संछिन्नानि त्रुटितानि भिन्नानि विदीर्णान्यंगानि येषां सह ऋत्विग्भिः सभ्यैश्च वर्तमानाः ॥ २ ॥ कस्य दक्षस्य नेयतुर्न जग्मतुः ॥ ३ ॥ विभुर्ब्रह्मा तेजीयसि
तेजस्विनि महेशे कृतागसि सति पित्रादिरूपे कृतागसां बुभूषतां भूपत्तां अपराधं कर्तुमिच्छतां सा तथा बुभूषा नेषां क्षेमाय न भूयात् ॥ प्रायेणेति लोकोक्तिः न भवेदेवेत्यर्थः
अथापि प्रसादयध्वं शमापयत ॥ ये भवं नो बर्हिषो यज्ञस्य भागभाजं परादुः दूरादेव वर्जितवंतः प्रगृहीतांघ्रिपद्मं पादौ प्रगृह्येत्यर्थः ॥ ५ ॥

अधुरास्यजीवितं पुनः संधानं प्रार्थयमानाः संतः यस्मिन् कुपिते सति सपालो लोकः ॥ न नश्येदित्यर्थः ॥ ६ ॥ वयं तु तेजोगंहं विभिमः त्वमेव किंचिदुपायं विध त्स्वेति वेत् अत आह नेति ॥ एतत्त्वरानी तनं इंद्रः ॥ यस्मात्त्वं बलवीर्ययोः प्रमाणमिय ज्ञातेन विद्रुः ॥ वीर्यपराक्रमः पापमिति पाठे अपराधं ॥ ७ ॥ ८ ॥ कैला सं वर्णयति ॥ जन्मौषधीत्यादि चतुर्दशभिः ॥ नरैः तरैः देवैर्जुष्टं ॥ ९ ॥ शृंगैः रमणीरतिप्रदमित्यत्र रेणत्वयः ॥ कथंभूतैः ॥ नानाधातुभिः ॥ विचित्रैः ॥ नानाद्रुमलता

आत्मात्मा नाजीवितम धुरस्य लोकसपालः कुपिते न यस्मिन् तमाशु देवं प्रियया विहीनं त्र्यमापयध्वं हरि विद्धं ढुहुत्तैः ॥ ६ ॥ नाहं न यत्तोनच पूर्यं मन्ये येदेहभाजो पुन पश्चात्तत्वं ॥ विद्रुः प्रमाणं बलवीर्ययोर्वा यस्मात्मत त्र्यस्य कर्म पायं विधित्सेत ॥ ७ ॥ सदर्लृमा शि यत्रा नु जैस्तैः समवित्तैः वितृभिः सप्रजेशैः ॥ ययौ सुविधिस्मान्त्रिलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः ॥ ८ ॥ जन्मौषधि तपोमंत्रयोग सिद्धैर्नरेतरैः ॥ जुष्टं किन्नरगंधर्वैरप्सरोभिर्वृतं सदा ॥ ९ ॥ नानामणिमयैः शृंगैर्नानाधातुविचित्रितैः ॥ नानाद्रुम लतागुल्मैर्नानामृगगणावृतैः ॥ १० ॥ नानामलप्रस्रवणैर्नानाकंदरसानुभिः ॥ रमणं विहरंतीनां रमणैः सिद्धयोषितां ॥ ११ ॥ म यूरकेकाभिरुतं मदांधालिविमूर्छितं ॥ प्लावितै रक्तकंठानां कूजितैश्च पतत्रिणां ॥ १२ ॥ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुधैर्द्रुमैः ॥ व्रजंतमि व मातंगैर्गृणंतमिव निर्झरैः ॥ १३ ॥ मंदारैः पारिजातैश्च सरलैश्चोपशोभितं ॥ तमालैः शालतालैश्च कोविदारासनार्जुनैः ॥ १४ ॥

गुल्मादिषु ॥ १० ॥ नानामलानि प्रस्रवणानि येषु ॥ नानाकंदराः सानवश्च येषु रमणैः सह क्रीडंतिनां ॥ ११ ॥ मयूराणां केकाभिः स्वनैर्नादितं ॥ मदांधैरलिभिर्विमूर्छितं मूर्छना रागगतिविशेषः ॥ तद्युक्तं कृतं रक्तकंठानां कोकिलानां प्लावितैः ध्रुत स्वनैः ॥ पतत्रिणां च कूजितैः ॥ १२ ॥ उद्धस्तैः उच्चतरशाखैः द्रुमैर्द्विजान्पक्षि ण आह्वयंतमिव ॥ लोके हि हस्तप्रसारित प्रोच्चैः स्वरेण आह्वानमपि संभवति ॥ आदि शब्दोहिसहस्ताकारैः द्रुमैः तेत्रस्यपक्षिस्वनैश्च तथा लक्ष्यत इत्यर्थः ॥ व्रजद्भिर्मा

भा॰च
१६

चूताम्रयोर्नीपकदंबयोश्चांतरजातिभेदः॥ वेणुकीचकयोश्चानीरध्रसंरध्रत्वेन भेदः॥१५॥ वेणुकजातिभिः इत्यत्र वेणुकाएलाजातिर्मालती॥ई॥१७॥
द्रुमजातिभिरित्यत्र जातिरवांतरभेदसामान्यं॥१८॥ कुमुदादिसमृद्धिभिः ईदृग्भिर्नलिनीभृद्भरः छकलं मधुरं यथा भवत्येवं कजातियानि पद्मिनीदृशानि तै
रुपशोभितं॥१९॥ मृगादिभिर्निजस्वैष्टं निषेवितं नाभिः कस्तूरीमृगः॥ एवं मृगगणाः श्रृंगविशेषणत्वेनोक्ताः॥ हरीनां व्यालअश्गोत्यपौनरुक्त्यं॥ २२लेखंडेः श्रंग

चूतैः कदंबनीपैश्च नागपुन्नागचंपकैः॥ पाटलाशोकबकुलैः कुंदैः कुरबकैरपि॥१५॥ स्वर्णार्णशतपत्रैश्च वरवेणुकजातिभिः॥ कद्
वैर्मल्लिकाभिश्च माधवीभिश्च मंडितं॥१६॥ पनसोडुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः॥ भूर्जैरौषधिभिः पूगैराजपूगैश्च जंबुभिः॥१७॥ खर्जू
राम्रातकाम्राद्यैः प्रियालमधुकेंगुदैः॥ द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः॥१८॥ कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः॥ नलि
नीषु कलं कूजत्खगवृंदोपशोभितं॥१९॥ मृगैः शाखामृगैः क्रोडैर्मृगेंद्रैरृक्षशल्यकैः॥ गवयैः शरभैर्व्याघ्रैर्निजस्वैष्टं महिषादिभिः॥
कदलीखंडसंरुद्धनलिनीपुलिनश्रियं॥२०॥ पर्यस्तं नंदया सत्याः स्नानपुण्यतरोदया॥ विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः॥
२१॥ दद्दशुस्तत्र ते रम्यामलकानाम वै पुरीं॥ वनं सौगंधिकं चापि यत्र तन्नाम पंकजं॥२२॥ नंदा चालकनंदा च सरितौ वाह्यतः पुरः॥ तीर्थ
पादपदांभोजरजसातीव पावने॥२३॥ ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिस्न्यतः॥ क्रीडंति पुंसः संचित्यो विगाह्य रतिकर्शिताः॥२४॥

द्रानिश्चाहृतानि नलिनीनां पुलिनानि यैस्तैः श्रीः शोभा यस्मिन्॥२०॥ नंदया गंगया पर्यस्तं परिवेष्टितं सत्याः भवान्याः स्नानेन पुण्यतरमतिसुगंधमुदकं
यस्याः॥२१॥ तत्रागिरौ वनं च ददृशुः यत्र वने तन्नाम सौगंधिकं नाम पंकजं भवति जातावेकवचनं॥२२॥ पुरो वाह्यतश्चेति चतसृभिः सरितो पुण्यत्वा
त्तो भवतः तीर्थपादस्य हरेः पदांभोजरजसा॥२३॥ ययोर्विगाह्य प्रविश्य क्रीडंति॥२४॥

रा॰म
१६

पयो रंमो विगततृषोः पिगजाः पिबंति ॥ तत्र हे ः नामा हर स्त्रीणात्वानेनं भ्रष्टं गालितं यत्नव कुंकुमं तेन पीतवर्णा ॥ गजाः करिणाः ॥ २५ ॥ नारह
प्तारादिमयविमानानां शतैः ॥ संकुलां तडिद्भिः स्त्रीणां घनैर्विमानानां रवेन पूर्यां मा दृश्य ॥ २६ ॥ यत्रेश्वरश्री हित्वा अतिक्रम्य नंदनवनं चर्दे स्थी
नदेवाश्रमाणतहरणं हदं रदं रश्मुरीति चतुर्थेनाद्वयः ॥ कथं भूतं वनं चित्राणि माल्यानि फलानि छुद्राश्च येषु तेषु मेष्टये हृखकरं ॥ २७ ॥ रत्नकंठखगानाम
नीकस्यहैर्मंडिताः षट्पदाः षट्पदस्त्वाः यस्मिन् ॥ कलहंसानां कुलस्यप्रेष्टं ॥ खरदंडानि पद्मानि तेषु कोः जलाशयायस्मिन् ॥ २८ ॥ वनंकुंजैः

पयोत्तत्त्वानविभ्रष्टनवकुंकुमपिंजरं ॥ वितृषो पिपिबंत्यमः पायपंतो गजा गजीः ॥ २५ ॥ नारहेममहारत्नविमानशतसंकुलां
जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडित्स्वनं ॥ २६ ॥ हित्वा यत्रेश्वरश्री वनं सौगंधिकं वततं ॥ इष्टैः काम्य धेहे द्युचित्रमाल्य
फलच्छदैः ॥ २७ ॥ रत्नकंठखगानीकस्वरमंडितषट्पदं ॥ कलहंसकुलप्रेष्ठं खरदंडजलाशयं ॥ २८ ॥ वनकुंजरसंघृष्टहरिचंदन
वायुना ॥ अधिपुण्यजनस्त्रीणां मुहुरुन्मथयन्मनः ॥ २९ ॥ वैडूर्यकृतसोपाना वाप्य उत्पलमालिनीः ॥ प्राप्तं किंपुरुषैर्दृष्ट्वा
तआराद्ददृशुर्वटं ॥ ३० ॥ स योजनशतोत्सेधः पादोनविटपायतः ॥ पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ॥ ३१ ॥ तस्मिन्महा
योगमयैर्मुमुक्षुशरणमासमाः ॥ ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकं ॥ ३२ ॥

सघृष्टायेहरिचंदनद्रुमाः तत्संबंधिना वायुना पुण्यजनस्त्री
णां मनः ॥ अधि अधिकं मुन्मथयत ॥ २९ ॥ यत्र च उत्पलमालिन्यो वाप्यस्ताः किंपुरुषैः प्राप्नं वनं दृष्ट्वा ॥ पाठांतरे किंपुरुषैः प्राप्ता वापीश्च ददृशुरित्यर्थः ॥ ३० ॥
योजनशतमुत्सेधउच्छ्रायो यस्य पादोनैः ॥ सर्वतः पंचसप्तति योजनप्रमाणो विटपैः शाखाभिरायतो विस्तृतः ॥ पर्यक् सर्वतः कृता अचला छाया येन
निर्गतं नीडं यस्मात ॥ ३१ ॥ मुमुक्षूणां शरणं आश्रयं त्यक्तामर्षं अंतकं काल इव ॥ ३२ ॥

भो०च
८

तं विशिनष्टि सनंदनाद्यैरिति पंचभिः संख्यातुकैवैरेण उपास्यमानं ॥२२॥ विद्या उपासनात पश्चिनैकाग्र्यं योगः समाधिः तेषां पंथा नंदवर्त्तनं द्वारा लोकस्य
मंगलं हितं तत यो वा तस्मात तन्नि हारा चरंतं ॥२४॥ संध्याभ्रस्फुवारक्त वर्णीनागेन भस्मादिलिंगं वहुरेखा वा च विभ्रतं ॥२५॥ इति नामासनं दर्शीत सोऽब्रह्मणो
चेतं ॥२६॥ सव्यं पादसमग्रं दक्षिणोरौ कत्वा विन्यस्य जानुनी वसव्ये वाऊं कत्वा दक्षिणा वाऊं प्रकोष्टे मणिवंधस्थाने गृह्य पाली कृत्वा दक्षिणा हस्तेन
तयातर्के मुद्रया उपलक्षितं मामीनमित्यर्थः ॥ तदुक्तं योगशास्त्रे ॥ एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितं ॥ इतरस्मिंस्तथा वाऊं वीरासनमिदं स्मृतं तर्क

सनंदनाद्यैर्महासिद्धैः शांतैः संशांतविग्रहं ॥ उपास्यमानं संख्याचसमंत्रो गुह्यकरश्च संघं ॥२३॥ विद्यातपोयोगपथमास्थितं तमधीश्वरं ॥ वर
तविस्फुरदेवात्सल्यात्लोकमंगलं ॥२४॥ लिंगं च तापसाभीष्टं भस्मरंडजराजिनं ॥ अंगेन संध्याभ्रस्फुवा चंद्रलेखां वा विभ्रतं ॥२५॥ उ
पविष्टं दर्भमध्यादर्शाद्ब्रह्मसनातनं ॥ नारदाय प्रवोचंतं ष्टछते श्रुण्वतां सतां ॥२६॥ कृत्वोरौ दक्षिणे सव्यं पादसग्रं च जानुनि ॥ वाऊं
प्रकोष्ठे कृत्वा लामामीनं तर्कमुद्रया ॥२७॥ तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्यपाश्रितं गिरिशं योगकक्षा ॥ सलोकपालास्तु नयोमस
नामाद्यं मन्तुप्राञ्जलयः प्रणेमुः ॥२८॥ सनूपलभ्यागतमात्मयोनिं हरिहरेश्वरैरभिवंदितांघ्रिः ॥ उत्थाय वक्रेण शिरसा भिवंदनमस
हत्तमः कश्यपश्चैव विश्वाः ॥२९॥ तथापरे सिद्धगणा महर्षिभिर्यैवै समं तादनुनीललोहिताः ॥ नमस्कृताः प्राह शशांकशेखरं ह्वेत

मुद्रा वोक्ता तर्जन्यंगुष्ठयोरग्रे मिथः संयोज्य वांगुली ॥ प्रसार्य वंधनं प्राऊस्तर्कमुद्रेति मात्रिकाः इति ॥२७॥ ब्रह्मनिर्वाणं ब्रह्मानंदः शरणं सप्रहस्त्रिवात्मभूः ५०
तेत्र समाधिरैकाग्र्यमाश्रितं ॥ योगकक्षा योगपदं च वा सजानुद्वरीकरणार्थं विशेषेणोपाश्रितं वैतमननशीलामनवस्तेषामाद्यं प्रणेमुः ॥२८॥ अर्हत्तमो विश्व
र्वा मनसूर्त्तिर्यथा कश्यकश्यपसः ॥२९॥ महर्षिभिः सहिताः येनीललोहितमनुवर्त्तते ते पितस्मिन्वंदनं चक्रुः एवं सर्वैर्नमस्कृतः प्राह ॥ हतः शरणं
मोदैर्वेर्यस्मेतं ५०

राम
८

यद्यपि त्वं नीचवन्मां नमस्करोषि तथापि तवैश्वर्यं महदेवेत्याह ॥ जानऽइति ॥ विश्वस्येशं जाने तत्र हेतुः जगतो योनिर्या शक्तिः प्रकृतिर्बीजं च शिवः पुरु
षः तयोः कारणं तथापि निर्भेदं यद्ब्रह्म निर्विकारं तदेव त्वमिति जाने ॥४१॥ ननु विरुद्धमेतत्तत्राह ॥ त्वमेव सद्रूपयोरविभक्तयोः शिवशक्त्योः क्रीड
न विश्वसृष्ट्यादि करोषि ॥ ऊर्णनाभिरिव ॥ द्विरूपयोरिति पाठे स्वांशयोः श्रुतो न विरोधः ॥४२॥ धर्ममर्थं च दोग्धि या त्रयी तस्यास्त्वमपि पत्तये रक्षणा
य ध्वरस्त्वं सृष्टवानसि ॥ यद्वा ॥ हे धर्मार्थदुघ धर्मोद्यमिपत्तये तस्मान्यये रक्षणहेतोणा निमित्तेन नेतृत्वो वर्णाश्रमपर्यायास्त्वयैव व्यवस्थिताः ॥ निवृद्धाः नि

ब्रूवाच ॥ जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः ॥ शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरंतरं ॥४१॥ त्वमेव भगवन्नेतच्छिवश
क्त्योः सरूपयोः ॥ विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥४२॥ त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथा
ध्वरं ॥ त्वयैव लोकेवसिताश्च सेतवो यान्ब्राह्मणाः श्रद्दधते धृतव्रताः ॥४३॥ त्वं कर्मणां मंगल मंगलानां कर्तुः स्वलोकं
तनुषे स्वः परं वा ॥ अमंगलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित ॥४४॥ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु
सर्वेष्वभिपश्यतां तव ॥ भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोभिभवेद्यथा पशुं ॥४५॥ ॥ श्रीरामसहाय ॥ ॥

णीता इति वा ॥ श्रद्दधते श्रद्धया अनुतिष्ठन्ति ॥४३॥ सर्वकर्मफलदातापि त्वमेवेत्याह ॥ हे मंगल मंगलानां शुभानां कर्मणां कर्तुः स्वर्गं परं मोक्षं वा तनुषे ॥ अमंग
लानामशुभकर्मणां कर्तुश्च तमिस्रं नरकं तनुषे ॥ तत्र केन हेतुना तदेव तत्कर्म क्वचित्कस्यचिद्विपर्ययो भवति ॥४४॥ त्वत्कोपोत्र हेतुरित्यसंभावितमिति कै
मुत्यन्यायेनाह ॥ न वै सतां त्वतः रोषोभिभवेत्तत्वत्त्वाद्दिता यापायेषशीपशुमतं यथा भवति तद्वत ॥४५॥

भा॰४
१८

अतः ये पृथग्धियः भेददृशः अतः कर्मण्येव दृष्टिर्येषां दुष्टआशयो येषां । परेषामुदयेन संपदा अर्पिताहृदि रुजा येषां अरुंतुदा मर्मभेत्तारः दैवेनैव वधो येषां तान् भवद्विधः ॥ निरुपमः साधुर्मा वधीत् न हन्यात् ॥ ४६ ॥ यत्र तु साधूनां तत्त्वमालोक्यानुग्रह एव कर्तुं महंतीत्याह द्वाभ्यां । यस्मिन् देशे यदा काले स्पृष्टधियो मोहितविज्ञाः पृथग्दृशो भवंति । तत्रापराधे साधवो हि अनुकंपया नैतरमेव परं दुःखात् स्वापहिंसितया चित्तग्रहं येन कृपां कुर्वंति । न तु क्रमं क्र

पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशं । परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्दैववधान्भवद्विधः ॥ ४६ ॥ यस्मिन्यदा पुष्करनाभमायया दुरंतया स्पृष्टधियः पृथग्दृशः । कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दैवबलात्कृते क्रमं ॥ ४७ ॥ भवांस्तु पुंसः परमस्य मायया दुरंतयाऽस्पृष्टमतिः समस्तदृक् । तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हसि प्रभो ॥ ४८ ॥ कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वयाऽसमाप्तस्य मनो प्रजापतेः । न यत्र भागं तव भागिनो ददुः कुयाजिनो येन मखो निनीयते ॥ ४९ ॥ जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः । भृगोः श्मश्रूणि रोहंतु पूष्णो दंताश्च पूर्ववत् ॥ ५० ॥ देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः । भवतानुगृहीतानामाशु मन्योऽस्त्वनातुरं ॥ ५१ ॥

तः दैवबलात्कृते अर्थे समेव दैवमेवंभूतं को वापराधः तेषामिति मत्वा हननं न कुर्वंत इत्यर्थः ॥ ४७ ॥ भवांस्तु अस्पृष्टमतिः समस्तदृक् सर्वज्ञः तया मायया हता आत्मानो येषां तेषु अत एव कर्मानुगतचित्तेषु इहापराधे अनुग्रहं कर्तुमर्हसि ॥ ४८ ॥ एवं सामान्येनोक्त्वा प्रकृतमाह । कुर्विति त्रिभिः । त्वया हतस्य अत एवासमाप्तस्य प्रजापतेरध्वरस्य हे मनो यत्राध्वरे कुयाजिकाः भागिनोऽपि भागं न ददुः भागार्हत्वमाह येन त्वया मखो निनीयते फलं प्राप्यते ॥ ४९ ॥ ५० ॥ हे मन्यो अनातुरमारोग्यमस्तु ॥ ५१ ॥

राम
१८

भागाःसन्त्वित्यत आह एष इति हे रुद्र यावदृत्विग्भिर्यथार्थं परित्यज्यते ॥ यज्ञेन कृते यावानुच्छिष्टः अवशिष्टोऽर्थः तावानेष तव भागोऽस्तु हे रुद्र ते भागेनाद्य यज्ञः
कल्पतां सम्पद्यतां ॥ ५३ ॥ चतुर्थे षष्ठः ॥ सप्तमे विश्लिष्टकृद्रुद्रस्तातार्ङ्ग भवादिभिः । यज्ञं प्रवर्तयामास दक्षोऽपीति निरूप्यते ॥ १ ॥ अजेनानुनीतः प्रार्थि-
तो भवस्तेनाभिहितं हे महाबाहो विदुर ॥ १ ॥ अघमपराधं ॥ २ ॥ त्वापराधमपहृत्य तानुत्क्रान्ति ॥ दग्धशीर्षस्य मृतस्य प्रजापतेः ॥ अजस्य छागस्य मुखं यस्मि-

एष ते रुद्र भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै ॥ यज्ञस्ते रुद्र भागेन कल्पतामद्य यज्ञहन् ॥ ५३ ॥ इति श्रीभागवते महापुराणे चतुर्थे षष्ठोऽध्या-
यः रुद्रसान्त्वनं नाम षष्ठोऽध्यायः ॥ मैत्रेय उवाच ॥ इत्यजेनानुनीतेन भवेन परितुष्यता ॥ अभ्यधायि महाबाहो प्रहस्य श्रू-
यतामिति ॥ १ ॥ महादेव उवाच ॥ नाघं प्रजेश बालानां वर्णये नानुचिन्तये ॥ देवमायाभिभूतानां दण्डस्तत्र धृतो मया ॥ २ ॥
प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः ॥ मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः ॥ ३ ॥ पूषा तु यजमानस्य दद्भिर्जक्षतु
पिष्टभुक् देवाः प्रकृतसर्वाङ्गा ये म उच्छेषणं ददुः ॥ ४ ॥ बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः ॥ भवन्त्वध्वर्यवश्चान्ये बस्त-
श्मश्रुर्भृगुर्भवेत् ॥ ५ ॥ मैत्रेय उवाच ॥ तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितं ॥ परितुष्टात्मभिस्तात साधु साध्वित्य

न् तत्तथाभूतं शिरो यस्य तत् बर्हिषः सम्बन्धिनं भागं मित्रनाम्नो देवस्य चक्षुषा ॥ ३ ॥ ततो मीढ्वांसमामन्त्र्य शुनासीराः सहर्षिभिः ॥ भूयस्तद्देवयजनं समीढ्वद्वेधसो यय-
स्य ॥ ४ ॥ प्रकर्षेण कृतानि भग्नानि सर्वाङ्गानि येषां ते भवन्तु ॥ उच्छेषणं यज्ञावशिष्टं ॥ ४ ॥ येषां त्वङ्गानि विनिष्टानि ते तु अश्विनोर्बाहुभ्यां कृतबाहवः पूष्णो हस्ताभ्यां कृ-
तहस्ताश्च भवन्तु ॥ अध्वर्यवः अन्ये च ऋत्विजः बस्तस्य छागस्य श्मश्रूणीव श्मश्रूणि यस्य ॥ ५ ॥ मीढुष्टमः शिवः तेनोक्तं परितुष्टैर्ब्रह्मादिभिः ॥ ६ ॥ मीढ्वांसं शिवं ॥ त्वया गत्य सर्वे कार्यं

भा॰ ४
१९

कार्त्स्न्येन वक्तुं हन्त वाक्यादि इमां धारणां विधाय ॥ ८ ॥ पूर्वं वृषध्वजद्वेषेण कलिलः कलुषीकृत आत्मा यस्य सः तदा शारत्कालीनो ह्रद इवाऽमलोऽभव
त ॥ ९ ॥ ११ ॥ यद्यपि पूर्वमपि विप्रलब्धः परिभूतो मया भवान् तथापि त्वया दंडो भृतः शिक्षा कृता ॥ ननूपेक्षितोऽसि मयैतदित्याह ब्रह्मबंधुषु च वा ब्राह्म
णाधमेष्वपि त्वं अवहेलेति वा युवयोरवज्ञा उपेक्षा नास्ति ॥ १२ ॥ तत्र हेतुमाह ॥ विद्येति ॥ ब्रह्मात्मत्वात् आत्मवाक्यं कुत्र ब्राह्मणाः किमर्थं आत्मतत्त्वमवितुं यद्वा ब्र

विधाय कार्त्स्न्येन च तद्यदाह भगवान्भवः ॥ संदधुः कस्य कायेन सवनीयपशोः शिरः ॥ ८ ॥ संधीयमाने शिरसि दक्षो रुद्राभिवी
क्षितः ॥ सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडं ॥ ९ ॥ तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः ॥ शिवावलोकादभवच्छरद्ध्रद इवा
मलः ॥ १० ॥ भवस्तवाय कृतधीर्नाशक्नोदनुरागतः ॥ औत्कण्ठ्याद्बाष्पकलया संपरेतां सुतां स्मरन् ॥ ११ ॥ कृच्छ्रात्संस्तभ्य च मनः प्रेमवि
ह्वलितः सुधीः ॥ शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः ॥ १२ ॥ दक्ष उवाच ॥ भूयाननुग्रह अहो भवता कृतो मे दंडस्त्वया मयि भृ
तो यदपि प्रलब्धः ॥ न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु ॥ १३ ॥ विद्यातपोव्रतधरान्मुखतः स्म विप्रान्
ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक् ॥ तद्ब्राह्मणान्परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदंडः ॥ १४ ॥ योऽसौ म
याविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन्मां ॥ अर्वाक्पतंतमर्हत्तमनिंदयापाद्दृष्ट्यार्द्रया स भगवान्स्वकृ
तेन तुष्येत ॥ १५ ॥

सर्वदेवं आत्मतत्त्वं च अवितुं संप्रदायप्रवर्तनेन त्रातुं पालयितुमित्यर्थः ॥ तत्तस्मात् हे परम उत्कृष्ट ॥ १४ ॥ अत्र च प्रत्युपकारो नास्तीत्याह
योऽसाविति ॥ अविदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन तद्विगणय्य विस्मृत्य अर्हत्तमस्य निंदया अर्वाग् अधः पतंतं मां अपात् रक्षितवान् ॥ स्वकृतेनैव
परानुग्रहेणैव तुष्येत् न मया प्रतिकर्तुं शक्यमित्यर्थः ॥ १५ ॥

राम
१९

गुरुपंक्तितोऽनुजातः ॥ उपाध्यायसहितैः ऋत्विगादिभिः शुक्लवर्णयामास ॥ ६ ॥ वीणाप्रमथादीनां संसर्गकृतदोषस्य शुद्धये निवृत्यर्थं ॥ ७ ॥ उपा
न्तेह विप्राः स्वधर्मेण सह विशुद्धयानुध्यादध्योहे विशांपते विदुर ॥ ८ ॥ विप्राः प्रयातेषां तेजो शुद्धम्बरूतिरक्तैर्वनेउपानीतः समीपं प्रापितः स्तो
त्रैर्बृहद्रथंतरै वाजोपहीतहता ॥ बृहद्रथंतरे पद्माविनिस्तुतेः ॥ ९ ॥ तमेवानुवर्णयति ॥ श्यामपह इति हेमाभा हिरण्मयवद्धनायस्येति वह्निलसुते ऋक्
ठल्पेन किरीटेन जुष्टः नीलालकाश्च भ्रमराः तैर्मंडितं कुंडलयुक्तमास्यं यस्य केयूरादिभिर्युक्ते मेखलार्थं सग्रैर्हिरण्मये भुजैः शोभितः कर्णिका ॥

मे ॥ पउवाच ॥ श्यामास्येवं समीह्यासवनेणचानुपंक्तितः कर्मसंतानयामास सोपाध्यायर्त्विग्भिभिः ॥ ६ ॥ वेलस्वंयज्ञसंततेस्त्रि
कपालं द्विजोत्तमाः ॥ पुरोडाशं निरवपन वीरसंसर्गशुद्धये ॥ ७ ॥ स्वधर्मेणात्रह विप्रायजमानो विशांपते ॥ धियाविशुद्धयाददृध्यौ
तथा प्रादुरभूद्धरिः ॥ ८ ॥ तथा स्वप्रमयातेषां द्योतयन्त्यादिशो दिश ॥ उद्यमाते जउपानीतस्तोत्रेण स्तोत्रवाजिना ॥ ९ ॥ श्यामो हिरण्य
रशनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः ॥ कंबुब्जचक्रशरचापगदासिचर्मसंयुक्तैर्हिरण्मयभुजैरिवकर्णिकारः ॥ १० ॥
वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलयारमयंश्च विश्वं ॥ पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि
रज्यमानः ॥ ११ ॥ तमुपागतमालक्ष्य सर्वे दर्शनागरयः ॥ प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः ॥ १२ ॥ तत्तेजसाहततरुवः सत्त्रे

श्वरोभमानः ॥ भुजानां हिरण्मयत्वं केयूरकंकणादिकाद्यलंकारैः ॥ १० ॥ वक्षस्यधिश्रि जिह्वाः समाधयाः ॥ शुद्धोधृतांजलिपुटाउपतस्थुरधोक्षजं
मावक्षूर्लक्ष्मी यस्य सः उदारो हासो वलोकस्त्वतयोः कलयालेशेन ॥ पार्श्वे भ्रमन्ती व्यजनं चामरे चामरव्यजने एव राजहंसो यस्मिन् सः रज्यमानः
शोभितिशायनी यमानः ॥ ११ ॥ ब्रह्मेन्द्रत्र्यक्षनायकाः प्रणेमुषेति ॥ १२ ॥ हताः स्वचः तिरस्कृतप्रभाः सत्त्रजिह्वाः गद्गदवाचः समाधयः सोः तन्महिम्नोऽछिमित

भा०८
९०

यस्य महिमहिमानं प्रतितत्त्वर्वागीव वृत्तिर्येषां ते प्रिय यथामति गृणन्ति स्म ग्रस्तत्ववृत्तः प्रकरीकृतोः न्नयहार्थे विग्रहो येन तत्पुष्टस्ते सोऽयं वर्गवृत्तिनिवे
हेतवः ॥ ते तत्र तस्य महिमहिमा ॥ विभूतिमात्ररूपा इत्यर्थः ॥ १४ ॥ अत्र तावत तदनुग्रहं तिप्रकारमाह द्वाभ्यां इति ॥ गृहीत मर्हणामादनो नमयेन तं ॥ ऊनमेपात्रेऽस्मा
गतेः हीनो भूस्मर्पितेषु ॥ धीत्वा सार्हणां पात्रमेव येन गृहीतमित्यर्थः ॥ यद्वा कथं प्रपेदे गृहीतमर्हणामादनो नमं यथा भवति तथा तद्गृहीत्वा प्रपेद इत्यर्थः
गृहीत्वेति पाठः ॥ कागमः गृणान्न त्वव न प्रपेदे राराजिगाम ॥ इत्यब्भ्यां विक्रमः इत्येव भृगवत्स्येद्र योषितः ॥ अथ प्रस्त्वं तथा विद्याय उमानी चलोकपाः ॥
योगित्वं ब्रह्माग्निदेवाश्च त्वं विनिजगदीश्वरं ॥ तथा गंधर्वविद्याधरब्राह्मणाश्च स्तुयथ तेः ॥ १५ ॥ नत्र साक्षात्परमेश्वर एव इह ॥ तस्य त्वमस्य त्रत्वेन जीव वै

अस्यवर्गपृ नन्य यो यस्य महित्वात्मत्ववादयः ॥ तथापि ति गृणन्ति स्म कृतात्र ग्रह विग्रहं ॥ १४ ॥ हरोगृहीतार्हणामादनोनमंयत्नेश्वरं वि
श्वसृजां परं गृहं ॥ एनंद्र नंदाय नुगीर्हितं त्रुदारगृणात्मुपेदे प्रयतः कृतांजलिः ॥ १५ ॥ हरुरुवाच ॥ अहं त्वधात्मपरतां विलबुध्य
स्तुविव्निन्नात्र पेकम भयं प्रतिविध्यमाया ॥ तिष्टत्वेयेव ..... ॥ रूषत्व उपेत्य तस्यामातिम वानपरिस्तुदंर वात्मतंत्रः ॥ १६ ॥

म तु कारमात्रं हंत किमिति त्वयामेदृष्या ॥ सोऽयं वत्सातन इति मां भगवाननाहे पयसीत्या शंका प्रस्तुत त्वत्र पस्य जीव धर्म नाद्यं तत्वेवसंगच्छते नात्मसे
त्वात्मुद्धमिति द्विधा प्रिविवचह्नपेति इन भगवानन्सुद्धं विन्नात्र चैतन्यघनः शुद्धत्वे हेतुः उपरतानित्य निवृत्ताशु विलबुध्यमवन्नोयस्मात ॥ अतः एक मेव
नृत्वंश्र तएवाः भयं ॥ द्वितीयाद्धे भयं भवतीति श्रुतेः ॥ जीवस्यापि वस्तुत एवं भूतत्वात्वाने हेलहणार्थ सनं मायाप्रतिविध्य अभिनूय प्रबलते अ एव सत्त्वतयात्मा
या उरूषत्वमेत्र प्रपत्नायस्य पेततस्यांमायाया तिष्ठन्नपरिसुद्ध इत्वा गारिमानि वालेण मकलायव तारेनयाप्रतीयते भवानित्यर्थः ॥ अन्ये त्वविद्योपाध
यो मायामिभूताः संसरंति अतन्त्वमेवेश्वरो नहर्द्धादय इतिभावः ॥ अतएवमां भेरद्दृष्टि भगवान्चारये स्मि ॥ अहं अस्मावरावस्य जगतः कारणं परमित्यादिनात

रा०प
९०

नत्विज्ञेऽपि तस्यापराधं परिहरतः स्याद्भवति मोऽञ्जन उपाधिमलशून्य यद्यपि त्वमेव रुद्रादिदेवतारूपः ॥ तथापि नरीश्वरशापात्कर्मणि
वद्वग्रहाधिपः संतत्त्वं तत्त्वेन विद्मः किं तु धर्मस्यापूर्वस्य उपलक्षणाभूतं विहित त्रयी इति पाद्यमध्याप्य तत्र रूपमस्माभिर्ज्ञातं कीदृश
यदर्थं यस्य सिद्धये अधिदैवदेवताधिकरणे अदोद्यवस्थाः अपूर्वावस्थाः अत्र एवमेव देवतानामस्येवं भूतानि यमाः इत्यर्थः ॥ यदावा
वस्थाः इत्याख्यातं अङ्गागमाद्य भावभावः यदर्थं अरुद्रं द्वाधाधिदेवत्रपं विशेषणात्स्थितवानसीत्यर्थः ॥ १७ ॥ सदसात्काण्णित्रिश्वरेपिदृक्षाय

अमीजहुः ॥ तत्त्वेन तेवयमनं जनहृष्टशापातकर्मणावग्रहाधियोपगवविहायः ॥ धर्मोपलक्षणामिदं त्रिवृद्ध
णात्मज्ञातं यदर्थमधिदैवमदोव्यवस्थाः ॥ १७ ॥ मू ६ स्या ज वः ॥ उत्पत्यध्वन्यशरणाउहहुरोशडुर्गे ॥ तकोयव्या
लाद्विष्टे विषयमृगतस्मात्मगेहोहभारः ॥ द्वंद्वस्त्रत्रविलमृगभयेशोकदावैः तमार्थः पादोकहलेशरणदक

रेधनलोभेन हस्वप्रवृत्तिमनुचिंत्या उतस्माविरक्तिं प्राशासनाहकवंति ॥ हेशरणद आश्रयप्रद उत्पत्यध्वनि संसाराख्यातिकासोपसृष्टः
रमार्गे वर्तमानोः तानां सार्थः समूहः ॥ तेषामेकः त्वत्पादरूपं निवासकरायास्याति कथंभूते संसारमार्गे अशरणे विश्रामस्थानशून्ये उहहुरोशा
एवदुर्गमस्थानानि यस्मिन् ॥ अंतक एव यो ग्रोव्यालः तेनाविष्टे लक्षीकृते ॥ विषयरूपा मृगतृष्णिका यस्मिन् ॥ आत्मदेहकायस्यदशरीरममता
स्पदं गेहं च स एव उरुभारो यस्मिन् ॥ द्वंद्वानि सुखदुःखादीन्येव श्वभ्राणि गर्ता यस्मिन् ॥ खला एव मृगा व्याघ्रादयः तेभ्यो भयं यस्मिन् शोक एव दा

श्रीरुद्र उक्तपूर्वं मम निंदां दुःसहामपि तदिदानीं तत्तां न गणयामीत्याह तवेति ॥ आशिषा कामेनानुसक्तैर्निःश्रेयसैः प्रवितथधिषणैरभिनिवेशितचित्तमायाम्नू
विद्यः विद्या ही नो लोकः परिभूय पविद्धं जपति आचारभ्रष्टं जल्पमिति तत् जल्पनं तव यः परो ऽनुग्रहः त्वत्पराणां वा यो ऽनुग्रहस्तेन ॥ १९ ॥ भृगुरुक्तस्वभावतत्त्व
त्वत्तान हीनाज्ञो वा ॥ अतः स्वानकृतमपमंडुष्ठो ऽपि स्थितं हे पवेत्याह यन्मायायेति ॥ आत्मनः आत्मनि श्रितं अनुगतं तत्त्व तत्त्वं न विंदति ॥ एतान्नानामात्माव
बुध्य ॥ २० ॥ ब्रह्मादयो न विंदंतीति भृगुणोक्ते तदसहमानो ब्रह्म तत्त्वं तान मा विष्णुर्वत्त्विवाहने तदिति ॥ परार्थं मे स्याहके ऽरिद्विषैः गुणास्य इंद्रियस्य ॥ यहातो

रुद्र उवाच ॥ तव वरद वरांघ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये ॥ यदि रवितथधियः मा विद्यलोकोऽपविद्धं जपति न
गणये तत्त्वत्पराऽनुग्रहेण ॥ १९ ॥ भृगुरुवाच ॥ यन्मायया गहनयापहृतात्मबोधाः ब्रह्मादयस्तनुभृतस्तमसि स्वपंतः ॥ नात्मन् श्रित
तव विदंत्यधुनापि तत्त्वं सोयं प्रसीदतु भवान् प्रणतात्मबंधुः ॥ २० ॥ ब्रह्मोवाच ॥ नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावद्
दीक्षेत ॥ ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वं ॥ २१ ॥ इंद्र उवाच ॥ इदमप्यच्युत विश्वभावनं वपुरानंदकरं मनो
दृशां ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ॥ २२ ॥ पत्न्य ऊचुः ॥ यज्ञोऽयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य

नार्थयोः कारणस्य सत्वादेः ॥ २१ ॥ इंद्र इंद्रियविषयः सर्वोऽरकोपात् ॥ तं नस्त्वं शवशयनाभशांतमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ॥ २३ ॥
पिनिष्ठ्येति ब्रह्मणोक्तमसहमानश्चाह ॥ इदं तव वपुरपि उपपन्नमेव न न त्वप्रपंचवदनिर्वचनीयात यः ऽउपपन्नं ॥ सुराणां विद्विषः क्षपयंतीति तत्क्षपणै
भुजदंडैरुपलक्षितं ॥ २२ ॥ अत्विजां पत्न्य ऊचुरिति ॥ यज्ञोऽयं तव यजनाय पत्न्याः पृष्टं केन ब्रह्मणा सृष्टं विध्वस्तः ॥ हे यज्ञात्मन् तं नो यज्ञं नलिनकांत्या दृशा नेत्रेण
नीहि पवित्रं कुरु ॥ कथंभूतं यज्ञं ॥ शावाः शेरते यस्मिन्निति शवशयनं श्मशानं तद्वद्भातीति तथा तं अस्मत्स्वामिनो शांतमेधस्य उपरतो मेधः ॥ मेधः पाके न पुनीहि

क्रमप्रयुक्तं कर्मणापत्रु तिष्ठं तस्त्वद्रूपेण न तत्फलेन बध्यन्ते भगवति त्वत्तद्भावमालक्ष्य विस्मिता भवंति अनन्विंत अघट मानं यद्यस्मात् आत्मना त्व
यकर्मचरित्रमनुतिष्ठसि न त्वं ज्यसे यतस्त्वमन्यैर्विभूतये सपदेः स्वां लक्ष्मीमुपसेदुषे जंतः॥ यद्वा यत इति ध्यावैविमुक्तिक स्त्रिसिः ध्यामितयर्थः॥ भव
तात्वयमेवानुवर्त्तनं तां न मन्यते नाद्रियते॥२४॥ सिद्धा ऊचुः तत्कथामृतं खमाप्रमिनं दहन्तं भवंति अयं नो मनोगजः त्वत्कथैव मृष्टं सुद्धपीयूषं तन्मय्यां यान
रीतस्यांस्य वगाढः प्रविष्टो दावाग्निदग्धमात्मपतां पन स्मरति स्म॥ न वततो निर्गच्छति ब्रह्मसंपन्नवत् तद्ब्रह्मैक्यं प्राप्त इव॥२४॥ यजमानी इदं पत्नी

ऋषय ऊचुः॥ अनन्वितं ते भगवान्विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे॥ विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्त्ततीं
भवान्॥२४॥ सिद्ध ऊचुः॥ अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः॥ क्लेशदावाग्निदग्धः॥ तृषार्तोऽवगाढो न सस्मार दावं न नि
ष्क्रामति ब्रह्मसंपन्नवन्नः॥२५॥ यजमान्युवाच॥ स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः॥ त्वामृते
धीश नांगैर्मखः शोभते शीर्षहीनः कबंधो यथा पूरुषः॥२६॥ लोकपाला ऊचुः॥ दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते ये
नेदृश्यं॥ माया ह्येषा भवदीया हि भूमन् यस्त्वं षष्ठः पंचभिर्भासि भूतैः॥२७॥

लोति॥ हे स्वागतं ते भद्रमागमनं जातं हे अधीश यथा शिरसा हीनः कबं
धमात्रः पुरुषोंगैः करचरणाद्यवयवैः शोभनैरपि न शोभते तथा त्वां विना केवलं प्रयाजाद्यंगैर्मखो न शोभते॥ श्रिया सह इत्यायत्वितं इति कांतानुकावि
सर्वथः॥२६॥ लोकपालास्त्वीश्वरत्वाभिमानाद्दृष्टा भगवन्तं त्वमपश्यंत ऊचुः॥ दृष्टः किं न दृष्ट इत्यर्थः॥ अतः असद्ग्रहैः पुं त्वमाविष्टलिंगात्वारथ
रूपाभिः दृग्भिरिंद्रियैः॥ अयं भावः॥ मृद्द्विन्नानां त्वं सद्रूपत्वमूर्त्तिं भासि अस्माकं तु बहिरिंद्रियाणामपवृत्तोपलक्षितो जीवविशेषस्त्वावभासि
भूतत्वमस्माकं इंद्रियगोचरो न भवसि धिगस्माकं जीवितमिति॥२७॥

योगेश्वराणां दर्शनेन भजतां अनुग्रहं भाग्यं मन्यमानाः स्वाभिमृत्याभावे न भजतामप्यनुग्रहं प्रार्थयमानाः स्तुवंति द्वाभ्यां प्रेयानिति ॥ विश्वात्मनि परब्रह्मणि त्वयि य आत्मनः ॥ पृथक्त्वं नेक्षेत अमुतः अमुष्मादन्यः ते प्रेष्ठो नास्ति ॥ आत्मनो जीवात् पृथक् द्रष्टुः ईक्षितेति वा वत्सल भक्तप्रिय अन॥ न्यवृत्त्या भक्त्या अव्यभिचारिण्या भक्त्या भजतोऽनुगृहाण त्वमर्थः ॥ ३८ ॥ अव्यभिचारिणी भक्तिः कथं स्यात् भजनीयानां बहुत्वादित्याशंक्याहुः ॥ जगदुद्भवादिनिमित्तेषु दैवतो जीवादृष्टतः बहुधा भिद्यमानगुणाः ॥ यया तया आत्ममायया आत्मनि स्वरूपे रचिता ब्रह्मादिभेदमतिर्येन तस्मै ॥ त्वत्संस्थया केवलस्वरूपावस्थानेन च विनिवर्तितो भेदभ्रमो गुणाश्च तद्धेतवश्च आत्मनि येन तस्मै ॥ ३९ ॥ रादेर्ब्रह्मणोऽतिनम्रत्वेति श्रितं सत्वं केवलं सत्व

योगेश्वरा ऊचुः ॥ प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः ॥ अथापि भक्त्येश तयोपधावतामनन्यवृत्त्यानुगृहाण वत्सल ॥ ३८ ॥ जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया ॥ रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः ॥ ३९ ॥ ब्रह्मोवाच ॥ नमस्ते श्रितसत्वाय धर्मादीनां च सूतये ॥ निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥ ४० ॥ अग्निरुवाच ॥ यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तं ॥ तं यज्ञियं पंचविधं च पंचभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञं ॥ ४१ ॥

येन श्रुतः धर्मादिफलप्रसवित्रे ॥ सत्वगुणत्वं निर्गुणत्वं च कथमित्याशंक्याह ॥ यस्य काष्ठां तत्वं नाहं वेद्मि अपरे ब्रह्मादयश्च न विदुः तस्मै ॥ ४१ ॥ अग्निः क्रतुमूर्तिं प्रणमति ॥ यस्य तेजसा सुष्ठु समिद्धं प्रदीप्तं तेजो यस्य सोऽहं स्वध्वरे शोभनेऽध्वरे हविर्वहामि ॥ तं यज्ञियं यज्ञार्हं यज्ञपालकं यज्ञरूपं तन्मूर्तिं पंचविधत्वमैतरेयके उक्तं स एष यज्ञः पंचविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इति पंचभिर्यजुर्मन्त्रैः स्विष्टं सुपूजितं तेषां च स्तुतिः ॥ आश्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहे इति पंचाक्षरं द्व्यक्षरो वषट्कार इति ॥ स्मृतिस्तु ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पं

देवान्त्वत्तश्चवयमपि देवाः॥ तथापि जगदाद्यं तयोस्त्वमेव नान्यः कश्चिदित्याऊः॥ इति॥ कल्पापाये प्रलये विकृतं कार्यजातमुदरीकृत्य संहृ
त्य त्वमेवाद्यः पुमान् उरगेंद्र इवाधिकं शयनं शय्यां तस्मिन्नुरगेशे शयनं करोषि॥ विद्वद्भिर्जनलोकादिवासिभिः विमृशिता विचिंतिताः ध्यात्म
पद्वी तान मार्गो यस्य स एवं त्वं यदिदानीमज्ञोऽगः पथि चरन् विप्रत्यज्ञो जितेन्द्रियारिरंजसि॥ ४१॥ गंधर्वाप्सरसस्तां वयं भिया केवलं सर्वानपि परम
स्वरत्वेनोपश्लोकयामः॥ त्वमेव परमेश्वरः॥ अन्ये तु त्वद्दासा एवेत्याऊः॥ अंशांशाइति हे विभ्मन्महत्तम क्रीडाभांडं क्रीडोपकरणं विष्णुर्ब्रह्मे

देवा ऊचुः॥ कल्पापाये त्वं कृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उरगेंद्राधिशयने॥ पुमान् शेषे सिद्धै
र्दैवविमृशिताध्यात्मपदविः स एवाद्याङ्घ्र्योर्यः पथि चरति भृत्यानवसि नः॥ ४२॥ गंधर्वा ऊचुः॥ अंशांशास्ते देव मरीच्यादय
एते ब्रह्मेन्द्राद्या देवगणा रुद्रपुरोगाः॥ क्रीडाभांडं विश्वमिदं यस्य विभूमन्तस्मै नित्यं नाथ नमस्ते करवाम॥ ४३॥ विद्याधरा ऊचुः॥
त्वन्मायया ऽर्थमभिपद्य कलेवरे ऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः॥ क्षिप्तोऽप्यसद्विषयलालस आत्ममोहं युष्मत्कथामृत
निषेवक उद्व्युदस्येत॥ ४४॥ ब्राह्मणा ऊचुः॥ त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मन्त्रः समिद्दर्भपात्राणि च॥ त्वं सदस्यर्त्विजो दंपती दे

उपस्थितस्मिते नमनं कुर्मः॥ ४३॥ विद्याधरास्तु केवलविद्याभिः संपदः प्राप्य ते गृहकारादिव्यामोहनिवृत्त्यास्तत्कथाम्
 वता अग्निहोत्रं स्वधा सोम आज्यं पशुः॥
वर्णं विना नान्यत्रेत्याऊः॥ अर्थं गृहदारादिसाधनं कलेवरमभिपद्य प्राप्य त्वन्मायया स्मिन्नस्मिन् ममाहमिति विभिमानं कृत्वा ममात्ममोहं युष्मत्कथामृतनिषेव
कः॥ उद्व्युदस्येत परित्यजेत नान्यः॥ न उत्पथैः पुत्रादिभिराधिक्षिप्तोऽदुःखितः सन् परित्यजेदेवेनेत्याऊः॥ क्षिप्तोऽपि दुर्मतिः असत्सु विषयेषु वलालसा सलालसः
सन्॥ ४४॥ ब्राह्मणास्तु वाति त्वमिति त्रिभिः स्तुवन्ति यज्ञस्य॥ ४५॥ श्रीकमलनारायण वाहदेव कमलाकांत भक्तवत्सल दीनबंधुः॥ ४५॥

भा०च

२२

गां ह्रश्चीर् रसायाः रसातलात् ॥ दंष्ट्रयाऽभ्युज्जहर्थ विशेषेणोद्धृतवानसि योगिभिः स्तूयमानः ॥ हे त्रयीगात्र वेदमूर्ते यज्ञो यागः स एव क्रतुः स्वरूपं यस्य सः ॥ ४६ ॥ तत्त्वमस्माकं त्वद्दर्शनमाकाङ्क्षतां प्रसीद स्वस्य यज्ञस्य [illegible] त्वत्त्वमस्माकं त्वद्दर्शनमाकाङ्क्षतां प्रसीद इत्यर्थः ॥ न चाशक्यं तवेतत् यतस्त्वन्नाम्नि कीर्त्यमान एव यज्ञविघ्नाः क्षयं यान्ति एवंभूताय तुभ्यं नमः ॥ ४७ ॥ इत्यनेन प्रकारेणामलैः कीर्त्यमाने हे भद्र विदुर सन्निन्ये प्रवर्तयामास ॥ ४८ ॥ सर्वात्मतया सर्वभागभोक्तापि भगवांस्त्रिजानन्दः स्वेनैव त्रिकपालपुरोडाशेन प्रीयमाण इव दक्षं बभाषे सम्बोध्य च भाषितवान् ॥

त्वं शरण्याः रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेन्द्रो यथा ॥ स्तूयमानो नदन् लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ॥ ४६ ॥ स प्रसीद त्वमस्माकमाकाङ्क्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम् ॥ कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यान्ति तस्मै नमः ॥ ४७ ॥ मैत्रेय उवाच ॥ इति दक्षः कविर्यज्ञं भद्र रुद्राभिमर्शितम् ॥ कीर्त्यमाने हृषीकेशे सन्निन्ये यज्ञभावने ॥ ४८ ॥ भगवान् स्वेन भागेन सर्वात्मा सर्वभागभुक् ॥ दक्षं बभाष आभाष्य प्रीयमाण इवानघ ॥ ४९ ॥ श्रीभगवानुवाच ॥ अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ॥ आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ॥ ५० ॥ आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज ॥ सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम् ॥ ५१ ॥ तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि ॥ ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥ ५२ ॥

षे ॥ ४९ ॥ योऽहं जगतः कारणं आत्मा ईश्वरश्च उपद्रष्टा साक्षीव स्वयंप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा च सर्वश्चेत्यन्वयः ॥ ५० ॥ कुत इत्यत आह ॥ अहमेवात्ममायां अधिष्ठाय जगत्सृष्ट्यादिकं कुर्वन् स एव स एव सन् सर्वाः क्रियोचिताः संज्ञा धारयामि ॥ ५१ ॥ तस्मिन् केवले अद्वितीये समाना राप समानजातीयभेदरहिते ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि च भेदेनाज्ञः पश्यतीत्यर्थः ॥ ॥ ५२ ॥ श्रीकृष्णाय नमः ॥

१२

विज्ञान्मेदं न पश्यतीति सदृशं तमाह यथेति ॥ ४३ ॥ तस्मादेवमेकं पश्यन्न कृतार्थो भवतीत्याह त्रयाणामेकोभावः स्वरूपयेषां ॥ ४४ ॥ ह्येनकृत्स्ना
त्मिका पालेष्याउभयतः सुगैः अधाने न च ॥ ४५ ॥ ह्येन भागेन पशाविशिष्टेन उद्धवस्यते समाप्यते ते नैव स्वरूप सानं तेन कर्मणा सोमपानितः
न पिउपाधावदित्यन्तु षंगैः ॥ ततश्च उद्धवस्य कर्म समाप्य स्वर्गं वमृष्टश्च पयथा भवति तावाह ॥ ४६ ॥ ह्येनेवान्तु भावेनो न्नाधसे धान्न विद्धेतस्मा

यथा उभानत्यागे भृशिरः पाण्यादिषु क्वचित् ॥ पारक्यबुद्धिं कुरुत एवं भूतेषु मत्परः ॥ ४७ ॥ त्रयाणामेकभावानां योन पश्यति
वैभिदां ॥ सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ॥ ४८ ॥ मैत्र उवाच ॥ एवं भगवतादिष्टः प्रजापतिपतिर्हरिः ॥ अर्चित्वा
क्रतुना ह्येन देवानुभयतो यजत ॥ ४९ ॥ रुद्रं च स्वेन भागेन ह्युपाधावत् समाहितः ॥ कर्मणो दवसानेन सोमपानितरान
नपि ॥ उद्वस्य सह र्त्विग्भिः सस्नावबभृथं ततः ॥ ५० ॥ तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ॥ धर्म एव मतिं दत्वा त्रिद
शास्ते दिवं ययुः ॥ ५१ ॥ एवं दाक्षायणी हित्वा सती पूर्वकलेवरं ॥ जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥ ५२ ॥ तमेव दयितं भूय आ
वृङ्क्ते पतिमम्बिका ॥ अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषं ॥ ५३ ॥ एतद्भगवतः शम्भोः कर्म दक्षाध्वरद्रुहः ॥ श्रुतं भागवताच्छिष्याद
उद्धवान्मे बृहस्पतेः ॥ ५४ ॥ इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणं ॥ यो नित्यदाकर्ण्य नरोनुकीर्त्तयेद् धुनोत्यघं कौरव
भक्तिभावतः ॥ ५५ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे दक्षयज्ञसंधानं नाम सप्तमोध्यायः ॥

सूपि ॥ ५७ ॥ ५८ ॥ आवृङ्क्ते भजते स्म अनन्यभावानामेकैव गतिर्यः तं यथा प्रलयकाले सुप्ता शक्तिरीश्वरमिव ॥ ५३ ॥ बृहस्पतेः शिष्यात् भगवतः ॥ ५४ ॥ परमपवित्रंयश्

भा॰ च
२४

रस्तकन्यान्वयेषाम्नान्वश्रयपन्नकथोदिता ॥ मनुत्रयान्वयेषाम्नाभुववर्यावपचभिः ॥१॥ अष्टमे शुद्धरोत्सिंघेपमत्सरतः पुरात ॥ निर्गतेन ध्रुवेणाह
तपसातोषणं हरेः ॥१॥ एवं तावत् मनुकन्यान्वयोक्तैव सर्गव्यासनां ब्रह्मपुत्राणां वंशाविवर्णिताः ॥ तत्रावशिष्टं किंचिदाह सनकाद्या इति नाप्ते
सन्ताश्रिताः ऊर्ध्वरेतसो नैष्ठिकाः अतस्तेषां वंशो नास्ति ॥ अधर्मो विद्ध्यपत्रः तेषां वंशमाह मृषेति चतुर्भिः ॥ दंभः परप्रतारणं मायायातदेवि

मैत्रेय उवाच ॥ सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ॥ नैते गृहान्ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ॥१॥ मृषा धर्मस्य भार्यासी
द्दंभं मायां च शत्रुहन् ॥ असूत मिथुनं तत्तु निरृतिर्जगृहेऽप्रजाः ॥२॥ तयोः समभवल्लोभो निकृतिश्च महामते ॥ ताभ्यां क्रोधश्च
हिंसा च यद्दुरुक्तिः स्वसा कलिः ॥३॥ दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम ॥ तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ॥४॥ संग्रहे
ण मयाख्यातः प्रतिसर्गस्तवानघ ॥ त्रिः श्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलं ॥५॥ अथातः कीर्तये वंशं पुण्यकीर्तेः
कुरूद्वह ॥ स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ॥६॥ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ ॥ वासुदेवस्य कलया रक्षा
यां जगतः स्थितौ ॥७॥ जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः ॥ सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ॥८॥ एकदा सुरुचेः
पुत्रमंकमारोप्य लालयन् ॥ उत्तमं नारुरुक्षन्तं ध्रुवं राजाभ्यनंदत ॥९॥

तावेव ॥ तयोः सोदरयोरपि दांपत्यमधर्मोपायतयाप्यवद्यपर्यायविशु ॥ ... ॥
प्रजोः अपुत्रः ॥२॥ निकृतिः शठता ॥ यत्तयाप्याकलिश्चतसः स्वसा दुरुक्तिश्च तत्तथा ॥३॥ यातना तीव्रवेदना ॥४॥ प्रतिसर्गोऽत्र सर्गोऽपव ॥ यत्र प्रति
सर्गः प्रलयः अधर्मस्य प्रलयहेतुत्वात् प्रतिसर्गत्वं ॥ एतत्पठतमधर्मवंशं पुण्यमिति वक्तुं न ह्यपुण्यं हेतुत्वात ॥५॥ मनोः पुत्रवंशे ॥ हरेरंशांश
स्यांशस्यायो रहाद्ब्रह्मणो जन्म यस्य ॥६॥ जगतो रक्षायां स्थितौ ॥७॥ सुनीतिः सुरुचिश्च जाये तयोर्मध्ये ॥८॥ तयोः प्रियाप्रियत्वेऽप्रपंचयन्नधावचारित्रमा

राम
२४

ततोऽप्रियाप्रियत्वे ध्रुवप्रवनं ध्रुवचरित्रमाह पंचभिरध्यायैः सुरुचेः पुत्रमुत्तमं तल्लालनं तमप्यहं कारोहं चिकीर्षमाणं १० गर्वोक्तिमेवाह त्रिभिः नृपतेर्धि
ष्ण्यमासनं नृपात्मजोऽपि भवान्नारोढुमर्हति ११ १२ पुरुषमीश्वरं १३ मीषंतं पश्यंतं सन्नवाचं कुंठितवाचं १४ पश्यद्भिः आरोप्यहं श्रुतः पुरजनमुखान्निश्रुत्वा

एकदा सुरुचेः पुत्रमंकमारोप्य लालयन् उत्तमं नारुरुक्षंतं ध्रुवं राजाभ्यनंदत १० तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवं सुरुचिः शृण्व
तो राज्ञः सेर्ष्यमाहातिगर्विता १० न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ११ बालोऽसि बत नात्मा
नमन्यस्त्रीगर्भसंभृतं नूनं वेद भवान्यस्य दुर्लभेऽर्थे मनोरथः तपसाराध्य पुरुषं तस्यैवानुग्रहेण मे गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनं
मैत्रेय उवाच मातुः सपत्न्याः स दुरुक्तिविद्धः श्वसन् रुषा दंडहतो यथाहिः हित्वा मिषंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन्सकाशं १४ तं नि
श्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदूह्य बालं निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सपत्न्याः १५ सोत्सृज्य धैर्यं विललाप शोक
दावाग्निना दावलतेव बाला वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह १६ दीर्घं श्वसंती वृजिनस्य पारमपश्यती बालकमाह बाला मा
मंगलं तात परेषु मंस्था भुंक्ते जनो यत्परदुःखदस्तत् १७ सत्यं सुरुच्याभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वो
ढुमिडस्पतिर्मां १८

१५ शोक एव दावाग्निस्तेन दावाग्निना गते लतेव स्थिते सा बाला विलापं चकार १६ वृजिनस्य दुःखस्य अमंगलमपराधं परेषु मा मंस्थाः यद्यतः परेभ्यो
दुःखदं ददातीयः सः स्वयं तमेव दुःखं भुंक्ते १७ दुर्भगाया मया उदरे गृहीतः तस्या एव स्तन्येन वृद्धश्च दुर्भगत्वमेवाह यां मामिडस्पतिर्भूपतिर्भार्येति वोढुं स्वीकर्तुं विलज्जते
वाशब्दाद्दासीत्यपि १६

भा॰४
२५

पितृभार्य्यत्वेन समासता मातुः सपत्नीतयापि यद्‌उक्तं माराधय पुरुषमित्याह इतत आह इतत आतिष्ठ क्रतु अध्यासनं यदीछसि १९ परिचर्य्य निषेव्य विश्वस्य विभा
वनाय पालनाय आत्तस्वीकृता गुणाभिपत्तिः सत्वगुणाधिष्ठानं येन तस्य जितः आत्मानः श्वसतः प्राणाश्च यैस्तैरभिवंद्यं २० एकमत्या सर्वात्मदर्शिदृष्ट्या २१
मृग्यपदाब्जयोः पद्धतिरिति मार्ग्गा यस्य तमेवाश्रयं प्रश्रवणा व्रजतस्ततो भजस्व नान्यस्मिन् भावो यस्य तस्मिन् निजधर्म्मभाविते शोधिते २२ तमस्यपेन सर्वितं सर्वो

आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकं आराधयाधोक्षजपादपद्मं यदीछसेध्यासनमुत्तमंयथा १९ यस्यांघ्रिपद्मं परिचर्य्य विश्वविभा
वनायात्तगुणाभिपत्तेः अजोध्यतिष्ठत खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवंद्यं २० तथा मनुर्वो भगवान्पितामहो यमेकमत्या पुरुदक्षिणैर्म्मखैः इ
ष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यं २१ तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धति अनन्यभावे निजधर्म्मभाविते
मनस्यवस्थाप्य भजस्व पूरुषं २२ नान्यं ततः पद्मपलाशलोचनात दुःखछिदं ते मृगयामि कंचन यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंग विमृग्य
मानया २३ मैत्रेय उवाच एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः सनियम्यात्मनात्मानं निश्चक्राम पितुः पुरात २४ नारदस्तदुपाकर्ण्य ज्ञात्वा
तस्य चिकीर्षितं स्पृष्ट्वा मूर्द्धन्यघघ्नेन पाणिना प्राह विस्मितः २५ अहो तेजः क्षत्रियाणां मानभंगममृष्यतां बालोप्ययं हृदा धत्ते यत्समातुरसद्वचः २६
नारद उवाच नाधुनाप्यवमानं ते सम्मानं वापि पुत्रकं लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु २७ विकल्पे विद्यमानेपि न ह्यसंतोषहेतवः पुंसो मोह
मृते भिन्ना यल्लोके निजकर्म्मभिः २८

नमत्वं रचयति नान्यमिति हस्तेन गृहीतं दीपवत्पद्मं जया इतरैर्ब्रह्मवादिभिः २३ संजल्पितं विलापं तत्त्वार्थस्यागमो यस्मा
त्तथाभूतं वचश्चाकर्ण्य विस्मितस्य उक्तं तदेवाह अहो तेजः प्रभावः २६ विकल्पे मानापविवेके सत्यपि भिन्ना नमंति किंतु मोहकल्पिता एव इत्यर्थः कुतः यत्सुखं दुःखं वा तत्त्रि राम
जकर्म्मभिरेव भवति यतः २८

२५

उपशमोपदेशेन निवर्त्य परितृष्णो दितिषड्भिः ॥ ६ ॥ ईश्वरगतिवीक्षार्थ ईश्वराणुकूल्यं विनानोद्यमाः फलहेतवः इति ज्ञात्वा ॥ परितृष्णेतः सन्तोषमेव कुर्यात ॥ ५
उद्भवस्थितवसत्त्वद्युमप्यस्याह ॥ अस्थैतिह्वाभ्यां ॥ यस्य प्रसादादहमप्यरोढुं प्राप्तमिच्छामि ॥ २ ॥ निःसंगेन तीव्रयोगेन युक्तेन समाधिना मृगयतो विषयस्य
परवीमार्गनविदुः सदेवोऽप्यणूधाः ॥ २१ ॥ अथ यमाकालेन दृष्टत्वे ॥ २२ ॥ हखण्डः खेयो मे ध्यो ह्व खेसति भाणंपद्धीयत इति द्धः खेसति पापं द्धीयत इत्यात्मानं तोषय

परितृष्णेनं तत्त्वातततावन्मात्रे राणपूरुषः ॥ देवोपमादितं यावद्दोषेश्वरगतिं ऽध्वः ॥ १७ ॥ अथ मात्रोपदिष्टेन योगेनावहृत्य तस्मिन् ॥ यत्त्वमा
दंसवेऽप्ता उणाध्योमतो मम ॥ ३ ॥ पुनः यः परवीयस्पनिःसंगेनाहजन्मनिः ॥ न विदं मृगयं तो पितीव्रयोगसमाधिना ॥ २ ॥ अतो
निवर्त्ततापेषनिर्वधत्तवनिष्फलः ॥ यतिष्यति पवाक्काले अयमात्सु पाञ्चिते ॥ २२ ॥ यस्य यदैव विहितं सतेन हखण्डः खेयोः
आत्मानं तोषयन्तु देहीतमसः पारमिच्छति ॥ २३ ॥ गुणाधिकात्सुदलिप्सेरनुक्रोशाद्गुणाधमात् ॥ मैत्री समानादप्विच्छे नतापैर
भिभूयते ॥ २४ ॥ ध्रु र उ वा च ॥ सोयं समो भगवता हखण्डः खह तात्मनां ॥ दर्शितः कृपया प्सादुर्दशोस्मिद्धिर्वेत्कियः ॥ २५ ॥ अथापि
मेविनीतस्य स्त्राव्रघोर रुपेप्रष ॥ हेहच्याउर्वचोबाणोनैनमित्रे अयते हृदि ॥ २६ ॥ परं त्रिभुवनोत्कर्षं जिगीषोः साधुवर्त्मने ॥ वृत्यस्मायित
मिद्वेन्नन्नानां रघ्ननधिष्ठितं ॥ २७ ॥ नूनं भवान् भगवतो योगजः परमेष्ठिनः ॥ विहरन्नरतेवीणां हितार्थ जगतोकवत ॥ २८ ॥ मैत्र य उ वा च ॥ इत्थु
दाहृतमाकर्ण्य भगवान्नारदस्तदा ॥ प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकंपया ॥ २९ ॥ ना र उ वा च ॥ जनन्याभिहितः पंथाः स वै निःश्रेयसस्य
ते ॥ भगवान्वासुदेवस्तं भजतं तत्प्रणतात्मना ॥ ४ ॥

तमसः पारं मोक्षं प्राप्नोति ॥ २३ ॥ किं च गुणाधिकात्सुद रति लप्स्या पेपंचमीतं द्दष्टा प्रीतिं कुर्यात न त्वसूया
मित्रार्थः ॥ अनुक्रोशं दयालिप्सेत ॥ न हीनतिरस्कारं समानात् मैत्रीं न तु स्पर्धा ॥ २४ ॥ पः ज्ञात्व ह्वभावं सामस्तुतः अतएवाविनीतस्य दुर्वाक्यवाणैर्भिन्न हृदि न श्रयते न तिष्ठति
॥ २६ ॥ अस्मे न धिष्ठितं त्रिभुवनउत्कर्षपदं जेतुमिच्छो मे साधुवर्त्म मार्गं ब्रूहि ॥ २७ ॥ अकजः इति पाठे उत्तमाजातो यो नारदः स भवान्नतत्वलिंगं वितदन्नुवारयन् ॥ हिताय

भा॰४
२६

॥४१॥ मधुवनाख्यं तटं गच्छ यत्र मधुवने ॥४२॥ शुच्यमुनाद्यभावेपि आत्मनउचितानि योग्यानि देवतानमस्कारादीनि कृत्वेति यमनियमाउक्ताः ॥ आसनक
ल्पनेन वज्रशासिभिः स्वस्तिकादिभिस्त्व ॥४३॥ प्राणेंद्रियमनसामलं चांचल्यं व्युदस्येति प्राणायामप्रत्याहारौ धारणामाह ॥ अभिध्यायेदित्यादिषड्भिः ॥
गुरुणा धीरेण मनसा गुरुं श्रीहरिं ॥४४॥ प्रसादाभिमुखं ॥४५॥ रमणीयान्यंगानि यस्य ॥ ओष्ठश्च ईक्षणे चाधरश्चारुणा यस्य अरुणोष्ठेक्षणो धारयतीति तथा
तं अरुणा ओष्ठमीक्षणे च धारयतीति वा ॥ नृम्णं सुखकरं यद्वा नृम्णं धनं सर्वपुरुषार्थनिधिमित्यर्थः ॥४६॥ पुरुषं पुरुषलक्षणयुक्तं ॥४७॥

धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः ॥ एकं ह्येव हरेस्तत्र कारणं पादसेवनं ॥४१॥ तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि पुण्यं म
धुवनं यत्र सान्निध्यं नित्यदा हरेः ॥४२॥ स्नात्वानुसवनं तस्मिन् कालिंद्याः सलिले शिवे ॥ कृत्वोचितानि निवसन्नात्मनः कल्पिता
सनः ॥४३॥ प्राणायामेन त्रिवृता प्राणेंद्रियमनोमलं ॥ शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुं ॥४४॥ प्रसादाभिमुखं शश्वत्प्रसन्नव
दनेक्षणं ॥ सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरं ॥४५॥ तरुणं रमणीयांगमरुणोष्ठेक्षणाधरं ॥ प्रणताश्रयणं नृम्णं शरण्यं करु
णार्णवं ॥४६॥ श्रीवत्सांकं घनश्यामं पुरुषं वनमालिनं ॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजं ॥४७॥ किरीटिनं कुंडलिनं केयूरवल
यान्वितं ॥ कौस्तुभाभरणग्रीवं पीतकौशेयवाससं ॥४८॥ कांचीकलापपर्यस्तं लसत्कांचननूपुरं ॥ दर्शनीयतमं शांतं मनोनयनव
र्धनं ॥४९॥ पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चतां ॥ हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ॥५०॥ स्मयमानमभिध्यायेत्सानुरा

कौस्तुभाभरणं ग्रीवायां यस्य ॥४८॥ कांचीकलापेन पर्यस्तं परिवेष्टितं मनोनय गावलोकनं ॥ नियतेनैकभूतेन मनसा वरदर्षभं ॥५१॥
नयोर्वर्धनं हर्षकरं ॥४९॥ हृत्पद्मकर्णिकाया धिष्ण्यं स्थानं आक्रम्य समर्चतामात्मनि मनसि स्थितं ॥५०॥ ध्यानमाह स्मयमानमिति ॥ निय
तेन नियोगक्रमेण धारणया स्थिरेण अत एकभूतेन एकाग्रेण धारणोक्तानि विशेषणानि ध्यानेपि द्रष्टव्यानि यद्वा यद्येकमात्रमेव नतु क्रमेणादरात्

राम
२६

समाधिमाह एवमिति ॥ तूर्णं शीघ्रं संपन्नं सत् ॥ ५२ ॥ जप्यो मंत्रः ॥ ५३ ॥ ५४ ॥ द्रव्याण्येवाह सलिलैरिति ॥ शस्तैर्दूर्वांकुरैः वन्यैर्वांशुकैः भूर्जत्वगादिभिः ॥ ५५ ॥ क्षित्यादि-
ष्वाह लब्ध्वा संपाद्य द्रव्यमयीं शिलादिभिर्निर्मितां ॥ ध्जामासाकुरणे हेतु नाह सार्धाभ्यां ॥ आभृतात्मा धृतचित्तः मितं वन्यं भुंक्त इति तथा ॥ ५६ ॥ यत्क-
रिष्यतीति ॥ तदानीमवतारप्रादुर्भावाभावात् ॥ ५७ ॥ पूर्वं सेविताः स्ववने कारिताः कार्यत्वेन विहिताः सपर्याः ॥ मंत्रहृदयेन द्वादशाक्षरेण ॥ ५८ ॥ एवं प्रकारे

एवं भगवतो रूपं सुभद्रं ध्यायतो मनः ॥ निर्वृत्या परया तूर्णं संपन्नं न निवर्त्तते ॥ ५२ ॥ जपश्च परमो गुह्यः श्रूयतां मे नृपात्मज ॥ यं सप्तरात्रं
प्रपठन्पुमान्पश्यति खेचरान् ॥ ५३ ॥ ॐ नमो भगवते वासुदेवाय मंत्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः ॥ सपर्यां विविधैर्द्रव्यैर्दे-
शकालविभागवित् ॥ ५४ ॥ सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः ॥ शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुं ॥ ५५ ॥ लब्ध्वा द्रव्यम-
यीमर्चां क्षित्यंब्वादिषु वार्चयेत् ॥ आभृतात्मा मुनिः शांतो यतवाङ्मितवन्यभुक् ॥ ५६ ॥ स्वेच्छावतारचरितैरचिंत्यनिजमायया ॥ करिष्य-
त्युत्तमश्लोकस्तद्ध्यायेत् हृदयंगमं ॥ ५७ ॥ परिचर्या भगवतो यावंत्यः पूर्वसेविताः ॥ ता मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्तये ॥ ५८ ॥ एवं का-
येन मनसा वचसा च मनोगतं ॥ परिचर्यमाणो भगवान्भक्तिमत्परिचर्यया ॥ ५९ ॥ पुंसाममायिनां सम्यग्भजतां भाववर्धनः ॥ श्रेयो
दिशत्यभिमतं तद्धर्मादिषु देहिनां ॥ ६० ॥ विरक्तश्चेंद्रियरतौ भक्तियोगेन भूयसा ॥ तं निरंतरभावेन भजेताद्धा विमुक्तये ॥ ६१ ॥ इत्युक्तस्तं
परिक्रम्य प्रणम्य च नृपार्भकः ॥ ययौ मधुवनं पुण्यं हरेश्चरणचर्चितं ॥ ६२ ॥ तपोवनं गते तस्मिन्प्रविष्टोंतःपुरं मुनिः ॥ अर्हितार्हण-
को राज्ञा सुखासीन उवाच ह ॥ ६३ ॥ नारद उवाच ॥ राजन्किं ध्यायसे दीर्घं मुखेन परिशुष्यता ॥ किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः

त्वा मनोगतं यथा भवति तथा कायादिभिर्भक्तिमत्या परिचर्यया परिचर्यमाणो धर्मार्थकामेषु यदभिमतं तत् तद्दिशतीति द्वयोरन्वयः ॥ ५९ ॥ ६० ॥ विरक्तो भजे-
त किमर्थं विमुक्तये ॥ ६१ ॥ हरेश्चरणाभ्यां चर्चितं मंडितं ॥ ६२ ॥ अर्हितं सत्त्वं यस्य समर्पितं अर्हणं मंचादि यस्मै ॥ ६३ ॥ किं वा न रिष्यते न नश्यतीति सवितर्कप्रश्नः ॥ ६४

भा॰च
१२

मात्रा सह निर्वासित इति तस्याश्रुप्यनादृतत्वात् ॥ ६५ ॥ मास्मादंति किंचिन्न रखवादंतीत्यर्थः ॥ ६६ ॥ ६७ ॥ यस्य प्रभो जगात्यावृङ्क्ते व्याप्नोति ॥ ६८ ॥ विश्व
लपन् विस्तारयन् ॥ ६९ ॥ ७० ॥ श्रुवो मधुवने किमकरोदित्यपेक्षायामाह ॥ तत्रेत्यादिना ॥ अभिषिक्तः स्नातः प्रशांतः । तां ॥ ७१ ॥ कपित्थानि वराणि

राजोवाच ॥ हतो मे बालको ब्रह्मन्नुद्धोगपेनाकरुणात्मना ॥ निर्वासितः पंचवर्षः सह मात्रा महान्कविः ॥ ६५ ॥ अप्यनाथं वने ब्रह्मन्
मास्मादंत्यर्भकं वृकाः ॥ श्रांतं शयानं क्षुधितं परिम्लानमुखांबुजं ॥ ६६ ॥ अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय ॥ यो ऽंकं प्रेम्णारुरुक्षंतं
नाभ्यनंदमसत्तमः ॥ ६७ ॥ नारद उवाच ॥ मा मा शुचः स्वतनयं देवगुप्तं विशांपते ॥ तत्प्रभावमविज्ञाय प्रावृङ्क्ते यद्यशो जगत् ॥ ६८ ॥
सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः ॥ एष्यत्यचिरतो राजन्यशो विपुलयंस्तव ॥ ६९ ॥ मैत्रेय उवाच ॥ इति देवर्षिणा प्रोक्तं वि
श्रुत्य जगतीपतिः ॥ राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत ॥ ७० ॥ तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीं ॥ समाहितः पर्यच
रदृष्यादेशेन पूरुषं ॥ ७१ ॥ त्रिरात्रांते त्रिरात्रांते कपित्थबदराशनः ॥ आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन्हरिं ॥ ७२ ॥ द्वितीयं च त
तो मासं षष्ठे षष्ठेऽर्भको दिने ॥ तृणपर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्चयद्विभुं ॥ ७३ ॥ तृतीयं चानयन्मासं नवमे नवमेऽहनि ॥ अब्भक्ष उत्तम
श्लोकमुपाधावत्समाधिना ॥ ७४ ॥ चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि ॥ वायुभक्षो जितश्वासो ध्यायन्देवमधारयत् ॥ ७५ ॥ पंचमे मास्य
नुप्राप्ते जितश्वासो नृपात्मजः ॥ ध्यायन्ब्रह्मपदैकेन तस्थौ स्थाणुरिवाचलः ॥ ७६ ॥ सर्वतो मन आकृष्य हृदि भूतेंद्रियाशयं ॥ ध्यायन्भगव

नयस्यात्मवृत्तिः देहस्थितिः तदनुसारेण ॥ ७१ ॥ ७२ ॥ तृतीयं चानयन्मासं दिवनयन् उपाधावदित्यन्वयः ॥ प्रतिमासमाहारसंकोचं तपोऽतिरेकं च वक्
तव्यमित्यर्थः ॥ ७५ ॥ ७६ ॥ भूतानि शरीरेंद्रियाणि च आशेरते यस्मिन् तन्मन आकृष्य ब्रह्म ध्यायन् ॥ ७७ ॥

एम
१२

धारयमाणस्य हृतः ॥ तस्य तेजसः सोढुं अशक्नुवंतः कंपिताः ॥७८॥ तस्यांगुष्ठेन निपीडिता आक्रांता सती मही तत्र दाअर्धं न नाम ॥ समेषाके अ॥
अर्धशब्दस्य नपुंसकत्वात् अंशमात्रे मोरभेदेहाद्वैवहामानाधिकरण्यं ॥ इभेंद्रेणाधिष्ठिता तरी नौर्यथा पदे पदे सव्यतो दक्षिणतश्च नमति तद्व
त ॥७९॥ अन्यदप्याश्चर्यमाह ॥ तस्मिन् ध्यायति विश्वं निश्वासात्मकं विष्णुं आत्मनः सकाशात् अनन्यया धिया आत्मभेदेन दृष्ट्या असुं निध्याय तिष्ठति वं

आधारं महदादीनां प्रधानपुरुषेश्वरं ॥ ब्रह्म धारयमाणस्य त्रयो लोकाश्चकंपिता ॥७८॥ यदैकपादेन स पार्थिवार्भकः तस्थौ तदं
गुष्ठनिपीडिता मही ॥ ननाम तत्रार्धमिभेंद्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥७९॥ तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं
निरुध्यासुमनन्यया धिया ॥ लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिं ॥८०॥ देवा ऊचुः ॥ नैवं विदामो भग
वन् प्राणरोधं चराचरस्याखिलसत्वधाम्नः ॥ विधेहि तस्माद्व्यसनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यं ॥८१॥ श्रीभगवानुवाच ॥
मा भैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम ॥ यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥

कृत्वा अभेदं प्राणानां तत् द्वारं च निरुध्य विश्वमात्मन्येकीकृत्य स्वप्राणनि इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवचरिते अष्टमोऽध्यायः ॥
रोधे कृते विश्वस्य प्राणनिरोधो जात इति भावः ॥८०॥ एवं प्राणनिरोधं कदापि न विद्मः ॥ अखिलसत्वधाम्नः सर्वप्राणिशरीरस्य तत्त्वस्माद्व्यसनाद् जिना
त क्लेशात् ॥८१॥ यतो बालात् को सौ बालः कथं च तस्मात् प्राणनिरोधस्तत्राह ॥ औत्तानपादस्तु सोऽमयि विश्वरूपे संगतात्मा एकं प्राप्तो वर्तत इति

इति चतुर्थे अष्टमः

भा॰ ४॰
२८

नवमे तु हरिं स्तुत्वा लब्ध्वा तस्माद्वरं ध्रुवः ॥ प्रत्यागत्याकरोद्राज्यं पित्रा दत्तमितीर्यते १ एवं भगवद्वाक्येन गतभयाः ॥१॥ स वै ध्रुवः ॥ योगवि
पाकेन तीव्रेण निश्चलया गाढया धिया हृदं स्फुरत स्थितमपि यदा तदैव तिरोहितं तदा रहस्योनापश्यत् तदा भगवतैवोक्तः स्वरूपमाकृष्य तिरोहित उपल
क्ष्य बहिः स्थितः एतत् तदवस्थं यादृगंतः स्फुरितं तादृशं ॥२॥ आगतसाध्वसः जातसंभ्रमः विनमय्य आनतं कृत्वा स्वप्रममेवाहृद्दाभ्यां प्रतिवत्रि
व पश्यन्नेव रंत ॥ आस्येन चुंबन्निव भुजाभ्यामाश्लिषन्निवावंदतेत्यर्थः ॥३॥ विवक्षितं तद्गुणान्वक्तुमिच्छंतं ॥ अतद्विदं तत्प्रकारमजान

मैत्रेय उवाच ॥ त एवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपं ॥ सहस्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया
गतः ॥१॥ स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभं ॥ तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श ॥२॥
तद्दर्शनेनागतसाध्वसः क्षितावंदतांगं विनमय्य दंडवत् ॥ दृग्भ्यां प्रपश्यन्प्रपिबन्निवार्भकश्चुंबन्निवास्येन भुजैरिवाश्लिषन् ॥३॥
स तं विवक्षंतमतद्विदं हरिर्ज्ञात्वास्य सर्वस्य च हृद्यवस्थितः ॥ कृतांजलिं ब्रह्ममयेन कंबुना पस्पर्श बालं कृपया कपोले ॥४॥ स वै त
दैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः ॥ तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षितिः ॥५॥ ध्रुव उवाच ॥ यो
ऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ॥ अन्यांश्च हस्तचरणश्रवणत्वगादीन्प्राणान्नमो भगवते पु
रुषाय तुभ्यं ॥६॥

सर्वस्य च हृद्यवस्थितत्वात् ज्ञात्वा ब्रह्ममयेन वेदात्मकेन शंखेन ॥४॥ भगवता प्रतिपादितां गिरं प्रतिपद्य इति शेषः ॥ प्रतिपद्य
गामिनि गाढतां वेदात्मिकां परिज्ञातः परात्मनोरीश्वरजीवयोर्निर्णयो येन सः ॥ अत एव भक्त्या भावः प्रेम यस्य ॥ असत्वरं स्थैर्यं प्राप्य परितः श्रुतं विख्यातं उरु
श्रवः कीर्तिर्यस्य तं ध्रुवक्षितिः स्थानं यस्येति भाविनिर्देशः ॥५॥ हस्तौ चरणौ श्रवणौ त्वगादीन् इंद्रियाणि द्वादशादित्यसंकाशैः श्रीकरैर्हरिः स्तोत्रं ध्रुवः ॥ योमे प्रवि

राम
१८

ननु वागादीन्द्रियशक्तिधरएव ब्रह्मादयः प्रसिद्धा नाहमित्यत आह एक इति अनुविश्य पुरुषोंतर्यामी त्वमेक एव तस्याः मायायाः असत्सु गुणेषु इंद्रिया
दिषु स्थितः सन् तत्तद्देवरूपो नानेव भासि ॥ ननु त्वद्व्यतिरेकेण क्रियाशक्तिधरः कश्चिदस्तीत्यर्थः ॥७॥ अपि च किं वक्तव्यं वागादयो ज्ञानादिशक्तिधरा न
भवंतीति यस्मात् ब्रह्मणोपि ज्ञानं त्वदधीनमेवेत्याह ॥ त्वद्दत्तया वयुनया ज्ञानेन भवंतं शरणं प्रपन्नो ब्रह्मा इदं विश्वं अचष्ट अपश्यत् ॥ कथंभूतः सुप्तः प्र
बुद्धः सन् यथा पश्यति तद्वत् ॥ अत आपवर्ग्यो मुक्तास्तेषामपि शरणं ॥ कृतविदा सर्वेंद्रियजीवनेन तत्कृतमुपकारं जानता ॥ कथं विस्मर्यते एवंभूतं त्वामभ

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषं ॥ सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभा
वसुवद्विभासि ॥७॥ त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः ॥ तस्यापवर्ग्यशरणं तव पादमू
लं विस्मर्यते कृतविदा कथमार्तबंधो ॥८॥ नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चंति
कल्पकतरुं कुणपोपभोग्यमिच्छंति यत्स्पर्शजं निरयेपि नृणां ॥९॥ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रव
णेन वा स्यात् ॥ सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वंतकासिलुलितात्पततां विमानात् ॥१०॥

जंतः कृपालो इत्यर्थः ॥८॥ ये च मादृशाः कामाद्यर्थं भजंति ते ऽतिमूढा इत्याह नूनमिति भवाप्यययोः जन्ममरणयोः तद्विमोक्षहेतुं त्वामन्यहेतोः कामाद्यर्थं भजंति ते
नूनं विमुष्टमतयः वंचितचित्ताः यतस्ते कल्पतरुं त्वामर्चंति ततः कुणपतुल्ये न देहेन उपभोग्यं सुखमिच्छंति न चेच्छायोग्यं तदित्याह ॥ यत्स्पर्शजं विषयसं
बंधजन्यं सुखं तन्नरकेपि भवति ॥९॥ ननु स्वर्गादिसुखं सकामैः प्राप्यते निष्कामभजनेन ततो ऽधिकं स्यादित्यत आह ॥ येति स्वमहिमनि निजानंदरूपेपि मा भूत् तनम
वतीत्यर्थः ॥ अंतकस्यासिना कालेन लुलितात् खंडितात् विमानात् पततां नास्तीति किमु वक्तव्यं ॥१०॥

भा॰च
१९

अतः कथाश्रवणाय सत्संगतिरेवेत्याह ॥ भक्तिं त्वयि प्रवहतां संतत्येन कुर्वतां ॥ ननु मोक्षं किं न याचसे अत आह ॥ येन महत्प्रसंगेन अंजसा अयत्नत ए
व उल्बणं व्यसनानि यस्मिन् तं नेष्ये पारं गमिष्यामि ॥ भवद्गुणकथैवामृतं तस्य पानेन मत्तः सन् ॥ ११ ॥ कथामृतपानस्य मादकत्वमाह ॥ ते अतितरां प्रिय
मपि मर्त्यं देहं न स्मरंति नानुसंदधते ॥ ये च एतदन्वयः अन्वदः मर्त्यमनु संबद्धाः तानपि के ते न स्मरंति ये कृतप्रसंगाः ॥ केषु भवदीयपदारविंदसौगंध्ये लु
ब्धं हृदयं येषां तेषु तत्र हेतुः नान्येषां केवलयोगादिनिष्ठानां देहाभिमानिनां निवृत्तिं दर्शयति ॥ १२ ॥ न चैवं विद्वानपि त्वं किमित्यभिमानं वहसि अत आ
ह ॥ तिर्यगिति ॥ तिर्यङ्॰ नगादिभिः ॥ परिचितं व्याप्तं सतो ॥ सत्स्थूलविशेषो यस्य ॥ महदादीन्यनेकानि कारणानि यस्य हि परमज अजं ते तव रूपं स्थविष्ठं विरा

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानां ॥ येनांजसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणक-
थामृतपानमत्तः ॥ ११ ॥ ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ॥ ये त्वब्जनाभ भवदीयपदारविंद
सौगंध्यलुब्धहृदयेषु कृतप्रसंगाः ॥ १२ ॥ तिर्यङ्॰नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषं ॥ रूपं स्थविष्ठमज
ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः ॥ १३ ॥ कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान् भगावते स्वदृगानंतसख

ड्रूपं केवलं वेद्मि ॥ अतः परमीश्वरं त्वद्रूपं न वेद्मि यत्र स्तदंके ॥ यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान् भगवते प्रणतोस्मि तस्मै ॥ १४ ॥
वादः शास्त्रव्यापारो नास्ति तत् ब्रह्म त्वद्रूपं च न वेद्मि अतोभिमानो न निवर्तत इति भावः ॥ १३ ॥ तदेव भगवद्रूपकं पद्यांतरेणोपदर्शयन् तदीश्वररूपमनुवर्ण
यन् नमस्करोति ॥ कल्पांत इति ॥ एतत् त्रैलोक्यं यः पुमान् शेते ॥ स्वस्मिन्नेव दृक् ज्ञानं बहिर्विषययोगो निद्रा न तु तत्त्वात् अनंतः सखा शेषः सहायः ॥ तदंके शेषोत्संगे
यस्य नाभिरेव सिंधुः समुद्रस्तस्मिन् रोहतीति तथा तस्मिन् कांचनलोकपद्मस्य गर्भे कर्णिकायां द्युमान् तेजस्वी ब्रह्मा भवति तं प्रणतोस्मीत्यर्थः ॥ १४ ॥

राम
१९

ननु ममापि त्वापाद्यवस्थावत्वे को जीवाद्विशेषः इत्यत आह || त्वंतु व्यतिरिक्तः जीवविलक्षण एव आस्से तिष्ठसि || वैलक्षण्यमेवाह त्वं नित्यमुक्तः जीवस्तु तत्संसारानुबध्यते || त्वं परिशुद्धः सतु मलिनः || त्वं विशुद्धः सतु तः || त्वमात्मा सतु जडः || त्वं कूटस्थः सतु विकारी || त्वमादिपुरुषः सतु दिमान् || त्वं तु भगवान् सतु भगहीनः || त्वं त्रयाणां गुणानामधीशः सतु परतंत्रः अतएतद्वैलक्षण्यपद्यतेः बुद्ध्यवस्थितिं बुद्धेर्ज्ञानमवस्था अखंडितया स्वदृष्ट्या चिच्छक्त्या द्रष्टा पश्यसि || द्रष्टेति निरस्तमयांतं अतो बुद्ध्यवस्थितिनिमित्तबंधस्याभावः || तथाभूत एव तत्स्थितौ पालने अधिमखः || यज्ञा

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः || यद्बुध्यवस्थितिमखंडितया स्वदृष्ट्या द्रष्टा स्थिताविधिम
व्यतिरिक्त आस्से ||१५|| यस्मिन्विरुद्धगतयो ह्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्यात || तद्ब्रह्म विश्वभवमेकमन
नंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये ||१६|| सत्याशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः || अप्येव
मार्य भगवान्परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोस्मान ||१७|| मैत्रेय उवाच || अथाभिष्टुत एवं वै सत्संकल्पेन धीमता
भृत्यानुरक्तो भगवान्प्रतिनंद्येदमब्रवीत ||१८||

धिष्ठाता श्रीविष्णुः ||१५|| तमेव ब्रह्मस्वरूपेण स्तुवन् नमस्करोति || यस्मिन्निति | पतंति अकस्मादुद्भवंति विश्वस्य भवो यस्मात एकमखंडं आदिमनादिं ||१६|| सकामभजनादपि मोक्षमाशासान आह || हे भगवन् पुरुषार्थः परमानंदः स एव मूर्तिर्यस्य तस्य तव पादपद्मं आशिषो राज्यादेः सकाशात सत्या आशीः | परमार्थफलं हि निश्चितं कस्य तथा तेन प्रकारेण त्वमेव पुरुषार्थ इत्येवं निष्कामतया अनुभजतः यद्यप्येवं तथापि हे आर्य स्वामिन् दीनान् सकामानप्यस्मान् भगवान् परिपाति संसारभयाद्रक्षत्येव | यतः अनुग्रहे हिताचरणे कातरः परवशः यथा नवप्रसूता वाश्रा धेनुर्वत्सं क्षीरपानमतिरेकादिभ्यो रक्षति तद्वत ||१७||१८||

भा॰च
३॰

व्यवसितं संकल्पितं ।१९। तत्प्रयच्छामीत्युक्तं किं तदित्यपेक्षायामाह नान्यैरिति सार्धाभ्यां ॥ हे भद्र ध्रुवाक्षितिर्निवासो यस्मिंस्तत् आहितमर्पितं ॥२०॥ धान्यक्रमणे यथा स्तम्भमाणानां पशूनां वंधनस्तंभो मेढी तस्यां वलीवर्दसमूहवत् अवांतरकल्पवासिनां परस्तादपि स्थास्नु कल्पलोकत्रयनाशेपि नश्वरं धर्माग्न्यादयो नक्षत्ररूपा वनौकसः सप्तर्षयः तत्प्रदक्षिणीकृत्य भ्रमंतश्चरंति ।२१। एतच्च राज्यानंतरं भविष्यतीत्याह ॥ प्रस्थित इति ॥ तु भूम्यर्थं धारयित्वा वनं प्रस्थिते भावे क्तः

श्रीभगवानुवाच ॥ वेदाहं ते व्यवसितं हृदि राजन्यबालक ॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ।१९। नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षितिः ॥ यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं ॥२०॥ मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनां ॥ धर्मोग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ॥ चरंति दक्षिणीकृत्य भ्रमंतो यत्सतारकाः ॥२१॥ प्रस्थिते तु वनं पित्रा दत्वा गां धर्मसंश्रयः ॥ षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेंद्रियः ॥२२॥ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः ॥ अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति ॥२३॥ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः ॥ भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि ॥२४॥ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतं ॥ उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते यतिः ॥२५॥ मैत्रेय उवाच ॥ इत्यर्चितः स भगवानतिदिश्यात्मनः पदं ॥ बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः ॥ २६ ॥ सोपि संकल्पजं विष्णोः पादसेवोपसादितं ॥ प्राप्य संकल्पनिर्वाणं नातिप्रीतोभ्यगात्पुरं ॥२७॥

वनं प्रति दीर्घगामनेकक्रतेः सतिर्रक्षिष्यसि ।२२। त्वया अनुसंकल्पितमपि मद्भक्तस्य तव द्रोहादेवं भविष्यतीत्याह ॥ त्वद्भ्रातरीति साम्हहचिः प्रवेक्ष्यति ॥२३॥ किंच इष्ट्वा मां यज्ञो हृदयं प्रिया मूर्तिर्यस्य तं ॥२४॥ यतः स्थानात् ॥२५॥ अतिदिश्य परत्वा ॥२६॥ संकल्पाज्जं मनोरथं पादसेवया प्रापितं संकल्पस्य निर्वाणं समाप्तिर्यस्मात् ॥२७॥

एम
३॰

मायाविनः सकाशात् यत्तद्दुर्लभं हरेः पदं तदेकेनैव जन्मना लब्ध्वापि स्वमात्मानमनः असिद्धार्थमप्राप्तमनोरथमिव कथममन्यत इत्यर्थो विदुरपि ॥२८॥२९॥ नाप्रमेवाहं समाधिनेति सार्धैः षड्भिः ॥ नैके अनेके भवा यस्मिन् ॥ बहुजन्माभ्यासेनेत्यर्थः ॥ अपगतो मत्कृत्यादि समयेग हत्वा धिन्नरस्य हरेः पादच्छायां यांछितमात्मानं स्मरत्वादिहच्छायामुपेत्येति ॥ प्रथयति भेददृष्टिः सन् हा कष्टमिति भावः ॥३०॥ अनात्मप्रज्ञात्मन्यत्नं

विदुर उवाच ॥ सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितं ॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानमम न्यतार्थवित् ॥२८॥ मैत्रेय उवाच ॥ मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान् स्मरन् ॥ नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमु पेयिवान् ॥२९॥ ध्रुव उवाच ॥ समाधिना नैकभवेन यत्पदं विदुः सनंदादय ऊर्ध्वरेतसः ॥ मासैरहं षड्भिरमुष्य पादयोश्छाया मुपेत्यापगतः पृथङ्मतिः ॥३०॥ अहो बत ममानात्म्यं मंदभाग्यस्य पश्यत ॥ भवच्छिदः पादमूलं गत्वा याचे यदंतवत् ॥३१॥ मतिर्वि दूषिता देवैः पतद्भिरसहिष्णुभिः ॥ यो नारदवचस्तथ्यं नाग्राहिषमसत्तमः ॥३२॥ दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् ॥ तप्ये द्वि तीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा ॥३३॥ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि ॥ प्रसाद्य जगदात्मानं तपसा दुःप्रसादनं ॥ भवच्छिदमया चेऽहं भवं भाग्यविवर्जितः ॥३४॥

अंतवत् भवच्छेत्तुः पदं तद्वत् तस्याचे याचितवानस्मि ॥३१॥ असत्त्वे कारणं संभावयति मतिरिति ॥ पतद्भिर्मदपेक्षया अधःपा पातवद्भिः असत एवासहनशीलैः नाशुनाम्बपमानेन इत्यादि सत्यमपि नारदस्य वचो यो न गृहीतवानस्मि तस्य मे मतिर्विदूषिता ॥३२॥ किंच दैवीमिति ॥ प्रसु प्तः स्वप्नानिव परस्परवद्द्वितीये असत्यपि भ्रातृव भ्रातृव्यः शत्रुरिति दृष्ट्या हृद्रुजा हृदयशोकेन तप्ये तापमनुभवामि ॥३३॥ किंच मयाप्रसाद्य यत्प्रार्थितं तद्व्यर्थं याचितमाह भवच्छिदमिति ॥३४॥

भा.४
३१

एतदेव दृष्टांतमाह स्वाराज्यं निजानंदं यच्छतः सकाशादभिमानः क्षीणपुण्येन मया भिक्षितः याचितः क्षीणपुण्येनेति वा दृष्टांत एव संबंधः ॥ यथाऽ
धनः ॥ स्वराट्चक्रवर्तिनः फलीकारान् सतुषतंडुलकणान् याचते तद्वत् ॥ ३५ ॥ एवं निःस्पृहत्वं तस्य युक्तमित्याह नेति ॥ तस्य दास्यं विनाऽन्यमर्थमात्म
नो नैव वांछंति ॥ यदृच्छयैव लब्धेन मनसः समृद्धिर्येषां ते ॥ ३६ ॥ प्रकृतमाह आकर्ण्येति ॥ संपरेत्य मृत्वा आगतमाकर्ण्य यथा न श्रद्दधे विस्मयेन च का

स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत ईश्वरात्क्षीणपुण्येन फलीकारानिवाधनः ॥ ३५ ॥ मैत्रेय उवाच ॥ न वै मुकुंदस्य पदारविंद
रजोजुषस्तात भवादृशा जनाः ॥ वांछंति तद्दास्यमृते र्थमात्मनो यदृच्छया लब्धमनःसमृद्धयः ॥ ३६ ॥ आकर्ण्यात्मजमायांतं संपरेत्य य
थागतं ॥ राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम ॥ ३७ ॥ श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः ॥ वार्त्ताहर्त्तुरतिप्रीतो हारं प्रादान्महाधनं
सदश्वं रथमारुह्य कार्त्तस्वरपरिष्कृतं ॥ ब्राह्मणैः कुलवृद्धैश्च पर्यस्तोऽमात्यबंधुभिः ॥ ३९ ॥ शंखदुंदुभिनादेन ब्रह्मघोषेण वेणुभिः
निश्चक्राम पुरात्तूर्णमात्मजाभीक्षणोत्सुकः ॥ ४० ॥ सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते ॥ आरुह्य शिबिकां सार्द्धमुत्तमेनाभिज
ग्मतुः ॥ ४१ ॥ तं दृष्ट्वोपवनाभ्याश आयांतं तरसा रथात् ॥ अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ॥ ४२ ॥ परिरेभेंगजं दोर्भ्यां दीर्घोत्कंठम
नाः श्वसन् ॥ विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनं ॥ ४३ ॥ अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः ॥ स्नापयामास तनयं जातो
द्दाममनोरथः ॥ ४४ ॥ अभिवंद्य पितुः पादावाशीर्भिश्चाभिमंत्रितः ॥ ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥ ४५ ॥ सुरुचिस्तं समु

अभद्रस्य मम भद्रं जातमिति मत्वा ॥ ३७ ॥ एषात्माविरत इति देवर्षेर्वाक्यं श्रद्धाय ॥ ३८ ॥ त्थाप्य पादावनतमर्भकं ॥ परिष्वज्याह जीवेति बाष्पगद्गदया गिरा
ब्राह्मणादिभिः पर्यस्तः परिवृतः ॥ ३९ ॥ ४० ॥ सुस्वराज्ञो महिष्यौ मध्ये उत्तममभिधायैकामेव शिबिकां नाम विमानमारुह्य ॥ ४१ ॥ उपवनस्याभ्याशे समीपे ॥ ४२ ॥ वि
ष्वक्सेनांघ्रिसंस्पर्शेन हतमशेषमघं बंधनं च यस्य ॥ ४३ ॥ जात उद्दामो महान् मनोरथो यस्य ॥ ४४ ॥ अभिमंत्रितः पितुराशीर्भिः सहैतेन कृतसंभाषणः ॥ ४५ ॥

राम
३१

त्तव्याः प्रीतिर्नास्मि भाविते तस्याहं यस्येति न मन्ति अनुस्मरन्ति ॥ आपो यथा त्वयमेव निम्नं देशमवतरन्ति ॥ ४७ ॥ ऊहन्तः स्वधनं ॥ ४७ ॥ ४८ ॥ हे वीर वीरस्त्ववोधु
वमानैः अभिषिच्यमानाभ्यां स्तनाभ्यां पयस्तेनाहस्त्राव ॥ ५० ॥ चिरं नष्टः स्वर्णमसप्राप्तः रक्षितरक्षिष्यति ॥ ५१ ॥ ५२ ॥ एवमिति त्वावहित पित्राहस्तपलालनं
पदप्रयते ॥ ५२ ॥ इंदिरवर्णां यति तत्र तत्रेति चतुर्भिः सवृंदैः फलमंजरीयुक्तैः पूगानां पोतैर्बालवृक्षैः तद्विधैः सवृंदैः ॥ उपस्कृतं प्रतिहारमित्तस्तेन्नेरणोत्त्वयः

यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः ॥ तस्मै नमन्ति भूतानि निम्नमाप इव स्वयं ॥ ४७ ॥ तन्न मस्वस्तुवस्त्रो भावन्योन्यं प्रेमविह्वलौ ॥ अग
स्मगाङ्गुत्पुलकावद्धोध्यप्नुजनहतः ॥ ४८ ॥ सुनीतिरस्य जननी प्राणेभ्योपि प्रियं सुतं ॥ उपगुह्य जहावाधिं तदङ्गस्पर्शनिर्वृता ॥ ४९ ॥ पयः स्त
नाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः ॥ तदाभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः ॥ ५० ॥ तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्त्तिहा ॥ प्रति
लब्धश्चिरं नष्टो रक्षिता मण्डलं भुवः ॥ ५१ ॥ अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्त्तिहा ॥ यदनुध्यायिनो धीरा मृत्युं जिग्युः सुदुर्जयं ॥ ५२ ॥ ला
ल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः ॥ आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरं ॥ ५३ ॥ तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः ॥ सवृन्दैः क
दलीस्तम्भैः पूगपोतैश्च तद्विधैः ॥ ५४ ॥ चूतपल्लववासःस्रङ्मुक्तादामविलम्बिभिः ॥ उपस्कृतं प्रतिद्वारमपां कुम्भैः सदीपकैः ॥ ५५ ॥ प्राका
रैर्गोपुरागारैः शातकुम्भपरिच्छदैः ॥ सर्वतोऽलंकृतं श्रीमद्विमानशिखरद्युभिः ॥ ५६ ॥ मृष्टचत्वररथ्याट्टमार्गं चन्दनचर्चितं ॥ लाजाक्षतैः पुष्पफ
लैस्तण्डुलैर्बलिभिर्युतं ॥ ५७ ॥ ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः ॥ सिद्धार्थाक्षतदध्यम्बुदूर्वापुष्पफलानि च ॥ ५८ ॥

५४ ॥ चूतपल्लवा वासांसि वस्त्राणि स्रजश्च मुक्तादामानि च तैः सविशिष्टं लंबमानैर्येषु तैः कुम्भैः ॥ ५५ ॥ गोपुरैः गोपुरैश्च शातकुम्भपरिच्छदाः परिकरा येषु ॥ विमानानामि
व शिखरैः द्युतिर्येषां ॥ ५६ ॥ चत्वरं प्रांगणं रथ्या महामा[illegible]र्गाः ॥ अट्टउच्चसोपरि निर्मिता भूमिका ॥ मार्गो वांतरः ॥ मृष्टः समार्जिता अत्वारथ्योपस्मिन्

भा०व
२१

उपजह्रुः स्वकीरन्तु सतीः सत्यः ॥ ५७ ॥ २ ॥ यत्र भवनोत्तमे ॥ ६१ ॥ ६२ ॥ उद्यानजातदारुत्रापद्याद्रिमत्सोवाप्यः ॥ ६४ ॥ ६५ ॥ उरवर्यं सत्त्वाग्रयौवनं श्रुतुरत्नाः प्र
जाः पत्निनु ॥ ६६ ॥ प्रवयसं वृद्धं ॥ ६७ ॥ व नु र्थ स्क ध व ॥ दशमे श्रातहं तत्रायद्धानामकरोद्धर्थं ॥ एकएवालकागत्वातस्मविक्रमउच्यते ॥ घोषितारत्नमिवा

उपजह्रुः प्रयुञ्जानाना वात्सल्यादाशिषः सतीः ॥ स्का एवन्तहल्लगीतानि प्रविशद्भवनं पितुः ॥ ५७ ॥ महामणिव्रातमये स तस्मिन्भवनो
त्तमे ॥ लालितो नितरां पित्रा न्यवसद्दिवि देववत् ॥ ६० ॥ पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः ॥ आसनानि महार्हाणि यत्र रौक्मा उपस्कराः
यत्र स्फाटिककुड्येषु महामारकतेषु च ॥ मणिप्रदीपा आभान्ति ललनारत्नसंयुताः ॥ ६२ ॥ उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः ॥ कूजद्विहंग
मिथुनैर्गायन्मत्तमधुव्रतैः ॥ ६३ ॥ वाप्यो वैदूर्यसोपानाः पद्मोत्पलकुमुद्वतीः ॥ हंसकारण्डवकुलैर्जुष्टाः चक्राह्वसारसैः ॥ ६४ ॥ उत्तानपादो रा
जर्षिः प्रभावं तनयस्य तं ॥ श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परं ॥ ६५ ॥ वीक्ष्योढवयसं तं च प्रकृतीनां च संमतं ॥ अनुरक्तप्रजं राजा ध्रुवं
चक्रे भुवः पतिं ॥ ६६ ॥ आत्मानं च प्रवयसमाकलय्य विशांपतिः ॥ वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिं ॥ ६७ ॥ इति श्रीभागवते म
हापुराणे चतुर्थस्कन्धे नवमोऽध्यायः ॥ मैत्रेय उवाच ॥ प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः ॥ उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ
॥ १ ॥ इलायामपि भार्यायां वायोः पुत्र्यां महाबलः ॥ उत्तमं नाम पुत्रं योषिद्रत्नमजीजनत् ॥ २ ॥ उत्तमस्त्वकृतोद्वाहो मृगयायां बली
यसा ॥ हतः पुण्यजनेनाद्रौ तन्माताऽस्य गतिं गता ॥ ३ ॥ ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः ॥ जैत्रं स्यन्दनमास्थाय गतः पुण्य
जनालयं ॥ ४ ॥ गत्वोदीचीं दिशं राजा रुद्रानुचरसेवितां ॥ ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलां ॥ ५ ॥ श्रीराम

तिमनोहरं ॥ कन्यारत्नं वेति वा ॥ २ ॥ पर्वतश्रेण्यां द्रोहिमवति हतः आज्ञावितिपाठे पुत्रे ॥ अस्य गतिं गता मृते त्यर्थः ॥ ३ ॥ कोपामर्षशुचार्पितः द्वैकांतेनार्पितो व्याप्तः
जैत्रं जयहेतुं पुण्यजनालयं अलका ॥ ४ ॥ रुद्रानुचरा भूतादयः ॥ ५ ॥

राम
२१

रक्षोवारितवान्॥ येनशंखनादेन हृद्दृतः उपरेव्योपद्यह्नियः॥६॥ एकैकं त्रिभिस्त्रिभिः इत्येवं सर्वांस्तत्र घोरशायुतानि यद्धानाजुगपरहस्तजघ्वान॥८॥ ततोपित
त्कर्पासहमानाःसुमवविध्यन्॥ द्विगुणं यथा भवति षड्भिः षड्भिः प्रतिकर्त्तुमिच्छतः॥१०॥ चित्रवाजैः चित्रपुंखैः॥११॥ १ बाणासंपातेन छन्नागिरिरिवैनेवरक्षप

रक्षोशांबं वृहद्वाङ्कः खंदिशश्चाप्यवारयन्॥ येनोद्विग्नदृशाः ह्नन्तसपरेव्योः त्रसन्मृशं॥६॥ ततोनिःक्रम्यबलिनः उपरेवमहामराः॥ स्त्र
सहंतस्तन्निनादसमभिपेतुर्हराहुधाः॥७॥ सततानापततो वीरउग्रधन्वामहारथः॥ एकैकंयुगपत्सर्वान्हत्वाणोत्रिभिस्त्रिभिः॥८॥ तैर्वैल
लाइलैर्गेस्तैरिषुभिः सर्वसर्वहि॥ मत्वानिरस्तमात्मानमसांसन्नकर्मतस्पतत॥९॥ तेनवासुमरमृश्यपतः पादस्पर्शमिवोरगाः॥ शैरै
विध्यन्युगपत्द्विगुणंप्रविकीर्षवः॥१०॥ ततः परिघनिस्त्रिंशैः पाशशूलपरश्वधैः॥ शक्त्यृष्टिभिर्भुशुंडीभिश्चित्रवाजैःशरैरपि॥ स्त्र
प्यवर्षन्प्रकुपिताः सरथंसहसारथिं॥ दृष्ट्वातस्यतीकर्त्तुमयुतानांत्रयोदश॥१२॥ श्रीरामानपादिः सततराशस्त्रवर्षेणाधूरिणा॥ उ
३ सं पादृश्यतश्छन्न आसाररेणयथागिरिः॥१३॥ हाहाकारस्ततैर्देवासीतसिद्धानांदिविपश्यतां॥ हतोयंमानवः स्वर्योमग्नः पुण्यपजनार्णवे
॥१४॥ नरक्षेयातुधानेभुजपयकाशिषश्चमृधे॥ उदतिष्ठद्यथतस्मनीहारादिवभास्करः॥१५॥ धनुर्विस्फूर्जयन्नुग्रंद्विषतांखेदमुद्वहन्
स्त्रचोर्घ्यमधमद्बाणैर्घनानीकमिवानिलः॥१६॥ तस्यतैःपापनिर्मुक्तं भित्वावर्माणिरक्षसां॥ कायानाविविशुस्तिग्मरश्मिरिवनशानघो
यथा॥१७॥
ता॥२॥ दूर्यतल्पः॥४॥ यातुधानेषुआक्रमेषुजयकाशिषुजितंजितमितिजयप्रकाशकेषुसत्सु॥५॥ व्यधमत्समहन्यायामास॥१६॥
वर्माणिकवचानि॥१७॥

शिरःप्रभैरेण हताः प्रकीर्णा रेजुरितिद्वयोरन्वयः ॥ १८ ॥ १९ ॥ प्रायः बाहुल्येन विवृक्णाः संछिन्नाअवयवा येषां ॥ २० ॥ आततायिनं शस्त्रपाणिं ॥ २१ ॥ इति ब्रुवन्नित्य
त्रापि मायिनामित्यादेरनुषंगः ॥ चित्ररथो ध्रुवः ॥ यत्तः यत्नवान् ॥ प्रतियोगः पुनरुद्योगः तस्माच्छंकितः न भवन्तो वा योद्धारः ॥ २२ ॥ विस्फुरंत्यो तडितो यस्मिन्
तेन त्रासयंतः स्तनयित्नवोऽशनयो यस्मिन् ॥ २३ ॥ ववृषुः निपेतुरित्यर्थः ॥ न सहजाति शारीरमित्यमृग इह श्लेष्मादिमेदसः पुंस्त्वमार्षमेदापि स्त्र्यग्रतो

भल्लैः संछिद्यमानानां शिरोभिश्चारुकुंडलैः ॥ ऊरुभिर्हेमतालाभैः दोर्भिर्वलयवल्गुभिः ॥ १८ ॥ हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः ॥ आस्तृता
स्ता रणभुवो रेजुर्वीरमनोहराः ॥ १९ ॥ हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसायकैः ॥ प्रायो विवृक्णावयवा विदुद्रुवुर्मृगेंद्रविक्री
डितयूथपा इव ॥ २० ॥ अपश्यमानः स तदाततायिनं महामृधे कंचन मानवोत्तमः ॥ पुरीं दिदृक्षन्नपि नाविशद्द्विषां न मायिनां वेद चिकीर्षि
तं जनः ॥ २१ ॥ इति ब्रुवंश्चित्ररथः स्वसारथिं यत्तः परेषां प्रतियोगशंकितः ॥ २२ ॥ शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोन्वपश्यत
क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः ॥ विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥ २३ ॥ ववृषू रुधिरौघासृक्पूयविण्मूत्रमेदसः ॥ निपेतुर्ग
गनादस्य कबंधान्यग्रतोनघ ॥ २४ ॥ ततः खेदृश्यत गिरिर्निपेतुः सर्वतोदिशं ॥ गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः ॥ २५ ॥ अहयोशनिनिः
श्वासाः वमंतोग्निं रुषाक्षिभिः ॥ अभ्यधावन्गजा मत्ताः सिंहव्याघ्राश्च यूथशः ॥ २६ ॥ समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो भुवं ॥ आससाद महा
ह्रादः कल्पांत इव भीषणः ॥ २७ ॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनां ॥ ससृजुस्तिग्मगतय आसुर्या माययासुराः ॥ २८ ॥ ध्रुवे प्रयुक्तामसु
रैस्तां मायामतिदुस्तरां ॥ निशम्य तस्य मुनयः शमाशंसन्समागताः ॥ २९ ॥ मुनय ऊचुः ॥ औत्तानपाद भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनता
र्तिहरो विपक्षान् ॥ यन्नामधेयमभिधाय निशम्य वाद्धा लोकोंजसा तरति दुस्तरमंग मृत्युं ॥ ३० ॥ इति चतुर्थे स्कंधे दशमोध्यायः ॥

निपेतुः ॥ २४ ॥ साश्मवर्षिणः अश्मसहितं यद्वर्षं तद्वतः ॥ २५ ॥ अशनिवन्निश्वासा येषां त्रासनानि भयंकराणि ॥ २६ ॥ तिग्मा क्रूरा गतिः प्रवृत्तिर्येषां ॥ असुराणामासुरीशक्तेरद
एनरस्त्वेन पक्षा एवोच्यते ॥ तस्य सकल्याणं आशंसन् प्रार्थितवंतः ॥ २९ ॥ तव विपक्षान् शत्रून्नाशयतु ॥ अंजसा अनायासेन स्मरणमात्रेणैव मृत्युं तरति ॥ ३० ॥ चतुर्थे दशमः ॥

एकादशोऽतु यज्ञाणां ह्रयं दृष्ट्वा मनः स्वयं ॥ आगत्य वारयामास क्रुद्धवं तत्त्वोपदेशतः ॥ एवं गरुडं तां वचनमुपदेशमिव निशम्य उप स्पृश्य पयसा नारायणनिर्मितं ना
रायणास्त्रं संदधे ॥ क्लेशारागादयो यथा ॥ किंच ॥ तस्यार्थात्स्त्रं स्रषेनीरायणाड् इतमस्त्रं प्रयुंजतः संदधतः सतः स्वर्णमयाः पुंखाः मूलशंसायेषां ॥ कल
हंसानां वा प्रासाद पङ्क्तयेषां ते शराः विनिः सृता इति द्रष्टव्यं ॥ उपरिष्टाच्छिलीमुखग्रहणात् ॥ ३ ॥ प्रधने युद्धे ॥ उन्नद्धा उच्छ्रिताः फणा येषां ते सर्पाः ॥ ४ ॥ एषक्षे वीतो

मै ॥ यत ॥ वा ॥ निशम्य वदतामेव ऋषीणां प्रवरो षिद्विषः ॥ संदधे स्वमुपस्पृश्य पयसा नारायणनिर्मितं ॥ १ ॥ संधीयमाने एतस्मिन्नस्माद्यमुख्यकनि
र्मिताः ॥ निःप्रविनेशुर्विद्राः क्लेशा ज्ञानोदये यथा ॥ २ ॥ तस्यार्षास्त्रं धनुषि प्रयुंजतः स्वर्णपुंखाः कलहंसवासमः ॥ विनिःसृता आवि
र्बभूवुः षट्पदलं यथावनं भीमरवाः शिखंडिनः ॥ ३ ॥ ते तिग्मधाराः प्रधने शिलीमुखैर्विनिःसृताः उपजना उपद्रुताः ॥ तमभ्यधावन्क्रमिता
उन्नायुधाः स्वपर्णपुंखा उन्नद्धफणा इवाहयः ॥ ४ ॥ स तानूर्ध्वषक्षैरभिधावतो मृधे निकृंतबाहून् हरिशिरोधरो रणे ॥ निनाय लोकं परमर्कमंडलं
भ्रजंतिभिर्भिद्यपमूर्द्धरेतसः ॥ ५ ॥ तान्हन्यमानानपि वीक्ष्य मुख्यकान्न नागमस्त्रिजराध्येनेक्षयमा ॥ क्रोधान्नानपादिं कृपयापिता महोपमत्र्जगा
द्वेपगताः महर्षिभिः ॥ मतु ह ॥ च ॥ स्खलवत्साति रोषेणातमोद्वारेणपाप्मना ॥ येन प्राप्य जनानेतान्नवधीत्स्वमनागसः ॥ ७ ॥ नास्मत्कुलो
चितं मानकर्मैतत्साद्विगर्हितं ॥ वधोपदुपदेवानामारब्धस्तैः कृतेनसां ॥ ८ ॥ नत्वेकस्यापराधेन प्रसंगाद्बहवो हताः ॥ धात्रैर्वधापितप्रेनत्व
यांगप्रातवत्सल ॥ ९ ॥ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनां ॥ यदात्मानं पराग्रह्य पश्चवद्भूतवैशसं ॥ १० ॥
निकृत्ता वाक्कादयो येषां तान् ॥ परलोकं निनाय कथंभूतं ॥ ऊर्द्धरेतसः संन्यासिनोर्कमंडलं निर्भिद्य यं व्रजंति तं ॥ ५ ॥ तानूर्ध्वनागामोनिरपराधान् ॥ ६ ॥ तमसोनरक
स्य द्वारेणयेन रोषेण ॥ ७ ॥ ८ ॥ न उपद्रवात्हंतारः कथमकृतेनसो न स्वा हननं विति ॥ ९ ॥ स्वस्याप्यपराधे वैतद्धचितं न भवतीत्याह नायमिति ॥ पराग्रह्य पराग्भूत देहमात्मा
नं गृहीत्वा परा वा ययाद्देहाभिमानादन्यो न्यं हंति मयाद्भूतानां वैशसहिंसेतिपत ॥ १० ॥

भा॰च
३४

त्वं च बाल्ये साधुः सन्निदानीं कथमन्यथा कृतवानित्याह सर्वभूतात्मभावेति द्वाभ्यां ॥११॥ अनुध्यातः हृदि स्थितः ज्ञातो वा नतु साक्षात् दासानामपि सा
धुत्वेन संमतः ॥१२॥ संमतत्वमेवाह सहस्रेति तितिक्षया नीचेषु करुणया समेषु मैत्र्या अखिलेषु समत्वेन ॥१३॥ ततः कृतार्थो भवतीत्याह संप्रसन्नेम
ति गुणैर्विमुक्तो न एव तत्कार्येण जीवेन लिंगशरीरेण निर्मुक्तः सन् निर्वाणं सुखात्मकं ब्रह्म प्राप्नोति ॥१४॥ भ्रातर्हंत तत्त्वमंगीकृत्योक्तं इदानीं तेनात्म
नो भ्रातृपुत्रादिसंबंधः न वान्योन्यं हंत तत्त्वादिकमपीत्याह दशभिः भूतैः पंचभिरारब्धे देहाद्याकारेण परिणते यो विभिन्नरूपस्य प्रसिद्धः तयोर्व्यवायान्ने

स्व. सर्वभूतात्मभावेन भूतानां स हरिर्भवान् आराध्य यं तु राधं विष्णोस्तत्परमं पदं ॥११॥ सत्त्वं हरेरनुध्यातस्त्वं साधूनामपि संमतः
कथं त्वं वधं कृतवान् अनुशिष्टन संमतो वृतं ॥१२॥ तितिक्षया करुणया मैत्र्या चाखिलजंतुषु समत्वेन च सर्वात्मा भगवान् संप्र
सीदति ॥१३॥ संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति ॥१४॥ भूतैः पंचभिरारब्धैः
यो विभिन्नरूप एव हि तयोर्व्यवायात्संभूतिर्यो विभिन्नरूपयोरिह ॥१५॥ एवं प्रवर्त्तते सर्गः स्थितिः संयम एव च गुणव्यतिकराज्जा
न् मायया परमात्मनः ॥१६॥ निमित्तमात्रे तत्रासीन्निर्गुणः पुरुषर्षभः व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥१७॥

सुनां तस्यासूतिरन्ययोर्यो विभिन्नरूपयोरिह संसारे भवति ॥१५॥ एवं तावत्सर्गः प्रवर्त्तते एवं पालकाकारेण परिणते भूतैरेव स्थितिः हंतृदेहाकारेण परि
णतैः संयमः संघः परमात्मनो मायया गुणानां व्यतिकरेण न तु स्वतः ॥१६॥ ननु जडानां देहादीनां गुणानां वा कथं सर्गादिहेतुत्वं तत्राह निमित्तमात्रे पुरु राम
र्षभ ईश्वरः यत्र यस्मिन्निमित्ते सति कार्यकारणात्मकं विश्वं भ्रमति परिवर्त्तते यथा अयस्कांते निमित्ते सति लोहः परिवर्त्तते तद्वत् ॥ १७ ॥ राम ३४

ननु सर्वेत्रिभिन्नं तर्हि तस्याविशेषाद्गुणप्रवेशवत्सर्गादिरूपं भवेत् अत आह स खल्विति ॥ कालशक्त्या क्रमेण गुणानां प्रवाहः क्षोभः तेन विभक्तं सृष्ट्यादि
विषयं वीर्यं यस्य ननु कालोपि गुणान्नपगपदेवत्क्षोभयतु तत्राह ॥ चेष्टा कालशक्तिः दुर्विभाव्या अचिन्त्या ॥ ८ ॥ ननु पित्रादिः सृजति ॥ पालयति राजा
दिः निहन्ति च चोरादिः न त्वीश्वरः तत्राह स इति ॥ जनेन पित्रादिना जनं पुत्रादिं जनयन्मारादिकृत् ॥ अन्तकं चोरादिकं तन्मृत्युहेतुना मा --- न्तकरः ॥ स्वयं
उक्तनेतानादिश्चाव्ययः अक्षीणशक्तिः ॥ अयं भावः पित्रादयो न्यत उत्पत्त्यादिमत्त्वेन न स्वातन्त्र्येण कारणं ॥ किं त्वीश्वर एव तन्नियन्ता सर्वकारणमिति
॥ ९ ॥ न चैवं कुर्वतोपि वैषम्यप्रशक्तिः पक्षपाताभावादित्याह द्वाभ्यां न वा इति ॥ स्वस्य रूपस्य ॥ सर्वं यथा भवति तथा प्रजाः कर्मभूता विशतः तस्य

स खल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः ॥ करोत्यकर्तैव निहन्त्यहन्ता चेष्टा विभूम्नः खलु दुर्विभाव्या ॥ ८ ॥
सोनन्तोन्तकरः कालोनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनान्तकं ॥ ९ ॥ न वै स्वपक्षोस्य विपक्ष एव वा पर
स्य मृत्योर्विशतः समं प्रजाः ॥ तं धावमानमनुधावन्त्यनीशा यथा रजांस्यनिलं भूतसंघाः ॥ १० ॥ आयुषोपचयं जन्तोस्तथैवोप
चयं विभुः ॥ उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ ॥ ११ ॥

शाप्येपि भूतेषु फलवैषम्यं तत्कर्मतथादिति सदृष्टान्तमाह ॥ तं धावन्तमनुधावन्ति अनीशाः कर्माधीनाः भूतसंघाः धावन्ति अनिलं धावन्ति मनु रजांसी
व तत्र यथा रजांसि तमः प्रकाशजलाग्न्यादिप्रवेशेपि नानिलस्य वैषम्यं ॥ एवमीश्वरस्यापीति भावः ॥ १० ॥ अपचयं अकालमृत्युं उपचयं कालमृत्यो
पि रक्षां ॥ यद्वा अपचयं मशकादेः ॥ उपचयं देवादेः ॥ स्वस्थत्वात् ॥ उपचयापचयाभ्यां रहितोसौ विभुः दुःस्थस्य कर्माधीनस्य विदधाति ॥ ११ ॥

भा॰ च
३५

एवंभूतस्त्वीश्वरः सर्ववादिसम्मतः विवादस्तु नाममात्र इत्याह केचिदिति पुंसः कामं वात्स्यायनादयः श्रुतिश्च कामोकार्षीन्नकामः करोति कामः
कर्त्ता कामः कारयितेत्यादि ११ ननु कर्मादीनां जडत्वादिना स्वरूपतोपि भिन्नत्वात्कथमेकमतं तत्राह अव्यक्तस्य अत एवाप्रमेयस्य तथापि सत्त्वे हेतुः
नानाशक्तीनां महदादीनामुदयो यस्मात् चिकीर्षितमेव तावत्कोपि न वेद अथ स्वसंभवं मूलं यस्मात् तमीश्वरं को वेद न कोपि वेद आद्येति पाठे सो
ज्ञात अनंतत्वेन नानाभावाद्विशेषांशे विवाद इत्यर्थः तथा च श्रुतिः को ह्यद्धा वेद क इह प्रवोचत् कुत आयाता कुत इयं विसृष्टिः अर्वाक् देवा अस्य विसर्ज

केचित्कर्म वदंत्येनं स्वभावमपरे नृप एके कालं परे दैवं पुंसः काममुतापरे ११ अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च नवैचि
कीर्षितं तात को वेदाद्यात्स्वसंभवं १२ नैवैते पुत्रकभ्रातुर्हंतारो धनदानुगाः विसर्गादानयोस्तात पुंसो दैवं हि कारणं १४ स
एव विश्वं सृजति स एवावति हंति च अथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः १५ एवं भूतानि भूतात्मा भूतेशो भूतभावनः स्व
शक्त्या मायया युक्तः सृजत्यत्ति च पाति च १६ तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणं यस्मै बलिं विश्वसृजो हरंति गा
वो यथा वै नसि दामयंत्रिताः १७

नेनाथ को वेद यत आबभूव इत्यादि १२ ईश्वरवादस्य पक्षस्य प्रकृतोपयोगमाह नैवैते भ्रातुर्हंतारः उक्तमेव हेतुमनुव
दति विसर्गादानयोर्मृत्युर्जन्मनोः यद्वा विसर्गः सृष्टिः आदानं संहारः ईश्वर एव हि कारणं १४ तथापि निर्लेपतामाह स एवेति १५ अनहंकार
त्वे हेतुमाह एष इति १६ सत्यमीश्वर एव कर्त्ता तथाप्यहंकारादिमयानेः पंचशक्त्या मिति वदंतं आह तमेवेति चतुर्भिः मृत्युमभक्तानाम् भक्तानां त्वमृतं उपे
हि शरणं गच्छ तमेवेत्यवधारणे हेतुः यस्मै नसि तासिकायां दामभिर्बद्धा गाव इव विश्वसृजोपि नामभिर्यंत्रिता बद्धाः संतो बलिं हरंति तत्कारितं कर्म कुर्वंतीत्यर्थः १७

याम
३५

तदाराधनं च तवहुशाक्यमेवेत्याह ॥ यः पंचवर्षः सन् तपसाराध्य त्रिलोक्याम् ध्रुवं पदस्थानं लेभे लब्धवानसि ॥ इदानीं तमेवाचिंत्य अवलोकयेत्युत्तरेण ॥ ध्रुवः ॥ यत्र विश्रुतानि यस्मिन् ॥ क्रियाविशेषणं वा ॥ २८ ॥ हरिध्यायं तनपत्याह ॥ अगाध्रुवे उक्तविरोधे आत्मनि मनसि व्यापारितं तत्र च विहितं ॥ आत्म दृक्प्रत्यगृष्टिः सन् ॥ अयं भेदो यस्मिन् तदिदं भेदमसदेव विस्तृतं यस्मिन् प्रतीयते ॥ २९ ॥ तदन्वेषणफलमाह ॥ त्वमतदात्र्वेषणकाल एव ॥ ३० ॥

यः पंचवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा ॥ वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः ॥ २८ ॥
तमेव यं गात्मनि मुक्तविग्रहे व्यापारितं निर्गुणमेकमक्षरं ॥ आत्मानमन्विच्छ विमुक्तमात्मदृग्यस्मिन्निदं भेदमसत्प्रतीयते ॥ २९ ॥
त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपपन्नसमस्तशक्तौ ॥ भक्तिं विधाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाहमिति प्ररूढं ॥ ३० ॥
संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परं ॥ श्रुतेन भूयसा राजन्नगदेन यथामयं ॥ ३१ ॥ येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशं ॥ न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः ॥ ३२ ॥
हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतं ॥ यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः ॥ ३३ ॥ तं प्रसादय वत्साशु संनत्या प्रश्रयोक्तिभिः ॥ न यावन्महतां तेजः कुलं नोभिभविष्यति ॥ ३४ ॥ एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवं ॥ तेनाभिवंदितः साकमृषिभिः स्वपुरं ययौ ॥ ३५ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकादशोध्यायः ॥ ११ ॥

उपदेशसारमाह संयच्छेति द्वाभ्यां ॥ प्रतीपं प्रतिकूलं ॥ अगदेनौषधेन यथा रोगं नियच्छति ॥ येनोपसृष्टात् व्याप्तात् ॥ ३१ ॥ ३२ ॥ ३३ ॥ अन्यथा त्वया कार्यमित्याह हेलनमिति द्वाभ्यां ॥ यद्यतः जघ्निवान् हतवान् ॥ ३३ ॥ ॥ ३४ ॥ इति चतुर्थे टीकायामेकादशः ॥ ११ ॥

द्वादशे धनदेनाभिनंदितः ध्रुवः स्वधाम गतः । यतो रिपुं हरेः स्थानं प्राप्तो हेति कीर्त्यते ॥ वैरंप्रवाद्वधान्निवृत्तं ज्ञात्वा ॥ १ ॥ क्षत्रियदायाद क्षत्रियपुत्र । अत्यजः त्य
क्तवानसि ॥ २ ॥ न च वैरस्य कारणमस्तीत्याह न भवानिति । अप्ययभावयोः मृत्युजन्मनोः ॥ ३ ॥ कथं तर्हि अहं हंतेत्यादि बुद्धिस्तत्राह अहं त्वमिति । अ
भातिप्रकाशते जायत इत्यर्थः । अतत् ध्यानात् देहाद्यभिध्यानात् यया धिया बंधः विपर्ययो दुःखादिः ॥ ४ ॥ तत्तस्मात् गच्छ गत्वा च भगवंतं भज । त्वं स्व

मैत्रेय उवाच ॥ ध्रुवं निवृत्तं प्रतिबुध्य वैशसादपेतमन्युं भगवान् धनेश्वरः । तत्रागतश्चारणयक्षकिन्नरैः संस्तूयमानोऽभ्यवदत्कृतांजलिं ॥ १ ॥
धनद उवाच ॥ भो भोः क्षत्रियदायाद परितुष्टोऽस्मि तेऽनघ । यत्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः ॥ २ ॥ न भवानवधीद्यक्षान् न यक्षा भ्रा
तरं तव । काल एव हि भूतानां प्रभुरप्ययभावयोः ॥ ३ ॥ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि । स्वाप्नीवाभात्यतद्ध्यानाद्यया बंधविप
र्ययौ ॥ ४ ॥ तद्गच्छ ध्रुव भद्रं ते भगवंतमधोक्षजं । सर्वभूतात्मभावेन सर्वभूतात्मविग्रहं ॥ ५ ॥ भजस्व भजनीयांघ्रिमभवाय भवच्छिदं । युक्तं विर
हितं शक्त्या गुणमय्यात्ममायया ॥ ६ ॥ वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशंकितः । वरं वरार्होंऽबुजनाभपादयोरनंतरं त्वां
वयमंग शुश्रुम ॥ ७ ॥ मैत्रेय उवाच ॥ स राजराजेन वराय चोदितो ध्रुवो महाभागवतो महामतिः । हरौ स वव्रेऽचलितां स्मृतिं यया तरत्ययत्नेन
दुरत्ययं तमः ॥ ८ ॥ तस्य प्रीतेन मनसा तां दत्त्वैडविडस्ततः । पश्यतोंऽतर्दधे सोऽपि स्वपुरं प्रत्यपद्यत ॥ ९ ॥ अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षि
णैः । द्रव्यक्रियादेवतानां कर्म कर्मफलप्रदं ॥ १० ॥ सर्वात्मन्यच्युतेऽसर्वे तीव्रौघां भक्तिमुद्वहन् । ददर्शात्मनि भूतेषु तमेवावस्थितं विभुं ॥ ११ ॥
तमेवं शीलसंपन्नं ब्रह्मण्यं दीनवत्सलं । गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः ॥ १२ ॥ षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमंडलं । भोगैः पुण्य
क्षयं कुर्वन्नभोगैरशुभक्षयं ॥ १३ ॥

न्नेरणाद्धयः । सर्वभूतात्मको विग्रहो यस्य ॥ ५ ॥ ६ ॥ कामं मनस्संकोचेन । अविशंकितः निर्भयः । अनंतरं अतिनिकटं ॥ ७ ॥ पद्मनाभ
॥ ७ ॥ स्ववराय चोदितस्तस्य ऽवा हरौ पदः द्यग्वाक्य । अतः स वव्रे इति तत्त्वं रस्याणेन हत्वा ॥ ८ ॥ ९ ॥ द्रव्यक्रियादेवतानां कर्मसाध्यं फलं तद्रूपं कर्मफलप्रदं चेत्यर्थः ॥ १० ॥ सर्वस्मा

बहवः सवा यागाः संवत्सरा वा यस्मिन् तं कालं त्रिवर्गसाधकं नीत्वा । अविचलानि संयतानीन्द्रियाणि यस्य । १४ इदं देहादि भगवन्मायया आत्मनि स्वस्मि
न् रचितं मन्यमानः । अत्राविद्या दृष्टिं दृष्टान्तयति । अविद्यारचितेति । १५ आत्मा देहः आत्मादि मायिकमपि पुनः कालेनोपसृष्टमनित्यमाकलय्य वि
चित्य विशालाः बदरिकाश्रमं । १६ तत्र तत्कृतमष्टांगयोगमाह । तस्यां शिवं वा उदकं विगाह्य प्रविश्य पेति स्नानादिनियमा उक्ताः । विशुद्धकरणा इति श
मादयो यमाः । आसनादीनि स्फुटमेवोक्तानि । जितो मरुत् प्राणो येन । आहृतान्यक्षाणि येन । भगवतः प्रतिनिधिभूते स्थूले विराड्रूपे एतन्मनो दधार ॥

एवं बहुसवं कालं महात्माविचलेंद्रियः । त्रिवर्गोपयिकं नीत्वा पुत्रायादान्नृपासनं ।१४ मन्यमान इदं विश्वं मायारचितमात्मनि
अविद्यारचितं स्वप्नगंधर्वनगरोपमं ।१५ आत्मास्त्र्यपत्यसुहृदो बलमृद्धकोशमंतःपुरं परिविहारभुवश्च रम्याः । भूमंडलं जल
धिमेखलमाकलय्य कालोपसृष्टमिति स प्रययौ विशालां ।१६ तस्यां विशुद्धकरणः शिववार्विगाह्य बद्ध्वासनं जितमरुन्मन
साहृताक्षः । स्थूले दधार भगवत्प्रतिरूप एतद्ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ।१७ भक्तिं हरौ भगवति प्रवहन्नजस्रमान
न्दबाष्पकलया मुहुरर्द्यमानः । विक्लिद्यमानहृदयः पुलकाचितांगो नात्मानमस्मरदसाविति मुक्तलिंगः ।१८ स ददर्श विमा
नाग्र्यं नभसोवतरद्ध्रुवः । विभ्राजयद्दश दिशो राकापतिमिवोदितं ।१९ तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणांबुजेक्ष
णौ । स्थिताववष्टभ्य गदां सुवाससौ किरीटहारांगदचारुकुंडलौ ।२०

ध्यायन् अव्यवहितो ध्यानध्येयभेदशून्यः सन् समाधौ स्थितः । ततः स्थूलं व्यसृ
जत् ।१७। एवं मज्जन्निति त्य हरौ भक्तिप्रकर्षेण वहन् मुहुः बाष्पवाहमित्यात्मानेन न सस्मार । यतो मुक्तलिंगः त्यक्तशरीराभिमानः । तदेवाह तेन वः आनंदबाष्पस
कलया बिन्दुप्रवाहेणाभिभूयमानः विक्लिद्यमानं द्रवतहृदयं यस्य पुलकैर्व्याप्तांगः ।१८ अनु अनंतरं देवश्रेष्ठौ ददर्श सनंदनंदौ गदामवष्टभ्य स्थितौ किरीटादि

भा० च
३७

उत्तमगायः उत्तमश्लोकः तस्य किंकरौ तौ विज्ञाय मधुद्विषः पार्षत्प्रधानाविति हेतोः साध्वसेन संभ्रमेण विस्मृतपूजाक्रमः ॥ केवलं तस्य नामानि गृणन्नना म ॥ २१ ॥ २२ ॥ सुभद्रं ते इति शारीरस्येव विष्णुपदारोहाभिप्रायं ॥ अतीतृपत् तर्पितवान् ॥ २३ ॥ आवां तस्य पार्षदौ ॥ २४ ॥ सुदुर्जयत्वे हेतुः ॥ सूरयः सप्तर्षयोऽपि यद प्राप्य केवलमधः स्थिताः पश्यंति ॥ यं चंद्रादयः प्रदक्षिणं यथा भवति एवं परिक्रामंति ॥ तदातिष्ठ ॥ २५ ॥ २६ ॥ आयुष्मन्नित्यपि सशरीरयानाभिप्रायमेव ॥ २७

विज्ञाय ताउत्तमगायकिंकरावभ्युत्थितः ॥ साध्वसविस्मृतक्रमः ॥ ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानाविति संहतांजलिः ॥ २१ ॥ तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरं ॥ सुनंदनंदाउपसृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसंमतौ ॥ २२ ॥ श्रीसुनंदनंदावूचतुः ॥ भो भो राजन्सुभद्रं ते वाचं नोवहितः शृणु ॥ यः पंचवर्षस्तपसा भवान्देवमतीतृपत् ॥ २३ ॥ तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः ॥ पार्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदं ॥ २४ ॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोप्राप्य विचक्षते परं ॥ आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षताराः परियंति दक्षिणं ॥ २५ ॥ अनास्थितं ते पितृभिरन्यैरप्यंग कर्हिचित् ॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदं ॥ २६ ॥ एतद्विमानप्रवरमुत्तमश्लोकमौलिना ॥ उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि ॥ २७ ॥ मैत्रेय उवाच ॥ निशम्य वैकुंठनियोज्यमुख्ययोर्मधुच्युतां वाचमुरुक्रमप्रियः ॥ कृताभिषेकः कृतनित्यमंगलो मुनीन्प्रणम्याशिषमभ्यवादयत् ॥ २८ ॥ परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवंद्य च ॥ इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयं ॥ २९ ॥

मधुच्यवते स्रवतीति मधुच्युतस्तां ॥ पाठांतरे मधुश्च्युतयस्ता नामभूत आविर्भावि इत्यर्थः ॥ कृतं नित्यं कर्म मंगलं चालंकरणं येन ॥ अभ्यवादयत् वादयामास ॥ २८ ॥ तदेव हिरण्मयं बिभ्रत् सन् इयेष एतद्धृतं ॥ २९ ॥

राम
३७

३ ॥ हीनां हित्वाथ गंडुर्गं मत्रिविष्टपं यथा स्यामीत्यनुस्मरन् ॥ २१ ॥ व्यवसितमभिप्रायं व्यवसायं त्वा देवयानेन देवमार्गेण विमानेनेति वा ॥ २२ ॥ मुनीन्
सप्तर्षीनपि ॥ ततः परस्ताद्यद्विष्णोः परं तदभ्यगात् ॥ कृत्यगतिर्यस्य ॥ २४ ॥ यत्र भ्राजमानं सत्तु यस्य स्फुटवा लोका विभ्राजंते ॥ यैः नत्तु ग्रहा निष्कृपाः ते
यत्राव्रजन्न नगा नवत्तः ॥ २५ ॥ अस्मुत त्रियो बांधवो येषां ॥ २६ ॥ ७ ॥ अनिमिषं भ्रूनलं ज्योतिषां चक्रं यस्मिन्नाहितं अर्पितं सद्भ्रमति ॥ मेढ्यामाहितो गंभीरवेगो

तदा दुंदुभयो नेदुर्मृदंगपणवादयः ॥ गंधर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ॥ २० ॥ सच स्वर्लोकमारोहन्सनीतिं जननीं ध्रुवः ॥
अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपं ॥ २१ ॥ इति व्यवसितं तस्य व्यवसायं सुरोत्तमौ ॥ दर्शयामासतुर्देवीं पुरो यानेन गच्छतीं ॥ २२ ॥
तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः स्तवैः ॥ अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान् ॥ २३ ॥ त्रिलोकीं देवयानेन सोतिव्रज्य मुनी
नपि ॥ परस्ताद्यद्ध्रुवगतिर्विष्णोः पदमथाभ्यगात् ॥ २४ ॥ यद्भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनुविभ्राजंत एते ॥ यन्नाव्रजन्नजंतु
ष्वयेननुग्रहाः व्रजंति भद्राणि चरंति येनिशं ॥ २५ ॥ शांताः समदृशः शुद्धाः सर्वभूतानुरंजनाः ॥ यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः ॥
इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः ॥ अभूत्त्रयाणां लोकानां चूडामणिरिवामलः ॥ २६ ॥ गंभीरवेगोऽनिमिषं ज्योतिषां चक्रमर्पितं ॥ य
स्मिन्भ्रमति कौरव्य मेढ्यामिव गवां गणः ॥ २८ ॥ महिमानं विलोक्यास्य नारदो भगवानृषिः ॥ आतोद्यं वितुदञ्श्लोकान्सत्रेऽगायत्प्रचेत
सां ॥ नारद उवाच ॥ नूनं सुनीतेः पतिदेवतायास्तपःप्रभावस्य सुतस्य तां गतिं ॥ दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगंतुं प्रभवंति किं नृपाः

गवां गणाः इव ॥ २७ ॥ आतोद्यं वीणां वितुदन्वादयन् ॥ प्रचेतसां ब्रह्मसत्रे भगवन्माहात्म्यप्रसंगेन ध्रुवमहिमप्रतिपादनपरान् त्रीन् श्लोकान् गायन् ॥
नूनमिति पतिरेव देवता यस्याः तस्याः सुतस्य यत्तपः प्रभावः तस्य तां गतिं फलमधिगंतुं वेदवादनशीला ब्रह्मर्षयोपि नैव प्रभवंति ॥ अभ्युपायानुपायेन

भा०च
२८

तपःप्रभावं गतिं च विशिनष्टि द्वाभ्यां । गुरुदाराः पितृपत्नी सुरुचिस्तस्याः वाक्शरैर्निर्भिन्नेन हृदयेन वनं यातः सन् अजितमपि यो जिगाय । वशीकृतवान् । तस्या
धिरूढेन प्राप्तं पदं यो ध्रुव इति क्षत्रबंधुः क्षत्रियो भवेत्तस्य । तमपि वर्षपूगैरपि अन्वारोढुमिच्छेदपि किं तत् संकल्पोऽप्यशक्यः । दूरत आरोहणमित्यर्थः । कथंभूतं पदं
षट्पंचवर्षाणि यस्य सः । अल्पैरेवाहोभिः वैकुंठं प्रसाद्य यत्पदमवापतत् ॥४१॥४२॥ उद्दामं उत्कृष्टं यशो यस्य ॥४३॥ धन्यादेर्निमित्तं ध्रौव्यं ध्रुवस्था

यः पंचवर्षो गुरुदारवाक्शरैर्भिन्नेन यातो हृदयेन दूयता ॥ वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भक्तगुणैः पराजितं ॥४१॥ यः क्षत्रबंधुर्भुवि
तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः ॥ षट्पंचवर्षो यदहोभिरल्पैः प्रसाद्य वैकुंठमवाप तत्पदं ॥४२॥ मैत्रेय उवाच ॥ एतत्तेऽभिहितं सर्वं य
त्पृष्टोऽहमिह त्वया ॥ ध्रुवस्योद्दामयशसश्चरितं संमतं सतां ॥४३॥ धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् ॥ स्वर्ग्यं ध्रौव्यं सौमनस्यं
प्रशस्यमघमर्षणं ॥४४॥ श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितं ॥ भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ॥४५॥ महत्त्वमिच्छतां
तीर्थं श्रोतुः शीलादयो गुणाः ॥ यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनां ॥४६॥ प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनां ॥ सायं च पु
ण्यश्लोकस्य ध्रुवस्य चरितं महत् ॥४७॥ पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा ॥ दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ॥४८॥ श्रावये
च्छ्रद्दधानानां तीर्थपादपदाश्रयः ॥ नेच्छंस्तत्रात्मनात्मानं संतुष्ट इति सिध्यति ॥४९॥ ज्ञानमज्ञाततत्त्वाय यो दद्यात्सत्पथेऽमृतं ॥ कृपालोर्दी
ननाथस्य देवास्तस्यानुगृह्णते ॥५०॥ इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः ॥ हित्वार्भकः क्रीडनकानि मातुर्गृहं च वि
ष्णुं शरणं यो जगाम ॥५१॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवचरिते द्वादशोऽध्यायः ॥

नकप्रापकं । प्रशस्यं प्रशंसार्हं । अघमर्षणं पापनाशनं ॥४४॥ अच्युतप्रियस्य ध्रुवस्य चेष्टितं श्रुत्वा यो वर्तेत तस्य भक्तिर्भवेत ॥४५॥ तीर्थं महत्त्वावाप्तिस्थानं । गुणाः
यत्र भवंति ॥४६॥ समवाये सभायां ॥४७॥ नेच्छन् निष्कामः तत्र श्रवणे आत्मैवात्मानं प्रति संतुष्टो भवतीति हेतोः सिद्धिमाप्नोति ॥४८॥४९॥ किं च सतां पथे भगवन्मार्गे अमृतरूपं

राम
२८

एवं पंचभिरध्यायैर्ध्रुववर्यान्ववर्णितं॥ अथैकादशभिश्चित्रं पृथुचरित्रमुच्यते॥१॥ तत्रत्रयोदशेवक्ष्ये पृथोर्जन्मध्रुवान्वये॥ अंगोवेनपितापुत्र कौर्यात्तगतईर्यते॥२॥ प्ररूढोभावोभक्तिर्यस्य॥ अन्ववायोवंशः॥१॥ नारदेनप्रचेतसांवर्णिताः कथाः प्रष्टुंतन्महिमानमाहमन्यइति देवस्य दर्शनंयस्य॥ हरेः परिचर्याप्रकारः क्रियायोगप्रपंचरात्रेयेनप्रोक्तं॥३॥ स्वधर्मशीलैः प्रचेतोभिः॥४॥५॥ ध्रुवस्यवंशेतेजाताइतिवक्तुंध्रुव

सूत उवाच॥ निशम्यकौषारविणोपवर्णितंध्रुवस्यवैकुंठपदाधिरोहणं॥ प्ररूढभावोभगवत्यधोक्षजेप्रष्टुंपुनस्तंविदुरः प्रचक्रमे॥ विदुर उवाच॥ केतेप्रचेतसोनामकस्यापत्यानिसुव्रत॥ कस्यान्ववायेप्रख्याताः कुत्रवासत्रमासत॥१॥ मन्येमहाभागवतंनारदंदेवदर्शनं॥ येनप्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः॥२॥ स्वधर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः॥ इज्यमानोभक्तिमतानारदेनेरितः किल॥४॥ यास्तादेवर्षिणातत्रवर्णिताभगवत्कथाः॥ मह्यंशुश्रूषवेब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि॥५॥ मैत्रेय उवाच॥ ध्रुवस्यचोत्कलः पुत्रः पितरिप्रस्थितेवनं॥ सार्वभौमश्रियंनैच्छदधिराजासनंपितुः॥६॥ सजन्मनोपशांतात्मा निःसंगः समदर्शनः॥ ददर्शलोकेविततमात्मानंलोकमात्मनि॥७॥ आत्मानंब्रह्मनिर्वाणंप्रत्यस्तमितविग्रहं॥ अवबोधरसैकात्म्यमानंदमनुसंततं॥८॥ अव्यवछिन्नयोगाग्निदग्धकर्ममलाशयः॥ स्वरूपमवरुंधानोनात्मनोन्यंतदैक्षत॥९॥

स्यवंशमनुक्रामतिध्रुवस्येत्यादिना॥ पितुः सार्वभौमश्रियंनैच्छत अधिराजासनंच॥ अनिच्छायांहेतुमाह सइतिचतुर्भिः॥६॥७॥ आत्मानंस्वरूपभूतंब्रह्मा वरुंधानः आवरज्ञानेन॥ आत्मनोनान्यंतदैक्षत॥ स्वयंतुसर्वस्मादन्यः कथंभूतंब्रह्मनिर्वाणंशांतं॥ अववोधरसेनैकात्म्यंयस्य॥ कथंभूतः अव्यवछिन्नोयोगाग्निः

भा॰च
३८

जडादीनामिवाकृतिर्यस्य तथाभूतो लक्षितः । अतन्मतिः न तेषामिव मतिर्यस्य सर्वज्ञत्वात् प्रशांतान्यर्चींषि ज्वाला यस्यानलस्यानद्ववत् स्थितः १० यवीयांसं
तत्कालानुकनिष्ठं ११ इष्टा प्रिया भार्या १२ निशिथः निशीथः सर्वतेजाः चक्षुः सुतं मनुं सुतमवाप मनोः महिषिनड्वलाविरजान् सुहानप्रसुप्रसूतवान्

जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः । लक्षितः पथि बालानां प्रशांतार्चिरिवानलः ॥ १० ॥ मत्वा तं जडमुन्मत्तं कुलवृद्धाः समंत्रिणः ।
वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतं ॥ ११ ॥ स्ववीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान् । पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयं ॥ पु
ष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः । प्रातर्मध्यंदिनं सायमिति ह्यासन्प्रभासुताः ॥ १३ ॥ प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः ।
व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे ॥ १४ ॥ स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह । मनोरसूत महिषी विरजान्नड्वला सुतान् ॥ १५ ॥ नृ
पुरुं कुत्सं त्रितं द्युम्नं सत्यवंतमृतं व्रतं । अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकं ॥ १६ ॥ उल्मुकोजनयत्पुत्रान्पुष्करिण्यां षडुत्तमान् ।
अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयं ॥ सुनीथांगस्य या पत्नी सुषुवे वेनमुल्बणं । यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पु
रात् ॥ १८ ॥ यमंग शेपुः कुपिताः वाग्वज्रा मुनयः किल । गतासोस्तस्य भूयस्ते ममंथुर्दक्षिणं करं ॥ १९ ॥ अराजके तदा लोके दस्युभिः पी
डिताः प्रजाः । जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः ॥ २० ॥ वि दु र उ वाच ॥ तस्य शीलनिधेः साधोः ब्रह्मण्यस्य महात्मनः । राज्ञः
कथमभूद्दुष्टा प्रजा यद्विमना ययौ ॥ २१ ॥ किं वांहो वेन उद्दिश्य ब्रह्मदंडमयूयुजन् । दंडव्रतधरे राज्ञि मुनयो धर्मकोविदाः ॥ २२ ॥ नावध्ये
यः प्रजापालः प्रजाभिरघवानपि । यदसौ लोकपालानां बिभर्त्योजः स्वतेजसा ॥ २३ ॥

द्वादशसुतानसूत १८ अंग विदुर वागेव वज्रं येषां १९ मथने हेतुः अराजकः इति आद्यः पृथ्व्यादीनां तेन रचितवान् २० यद्यस्याः प्रजायाः हेतोः विमनाः
सन् ययौ २१ किं च अंहः अपराधं वेनं उद्दिश्य ब्रह्मदंडम् २२ यतोयमधर्मी इत्याह नावध्येयः अवज्ञेयोपि न भवति ॥ २३ ॥

राम
३८

परावरविदां मध्ये श्रुतिश्रेष्ठं ॥२३॥ अभावीभूतः काम्यकर्मणा बलाद्दायादितो न हृत्वा यमवेदिति द्योतयन्नंगस्य पुत्रोत्पत्तिक्रममाह अंग इत्यादि-
ना ॥२५॥ अयातयामानि अगतवीर्याणि ॥२८॥ यत्ते गृहीतमौनोपि वा वंद्यमहजन्मपापकं ॥२९॥ आहूता आहूताः ग्रहान्सोमपात्राणि ॥ इह यज्ञे न गृ-
ह्णति ॥३०॥ इह जन्मनि तावन्मनाक् ईषदपि त्वयाघं न स्थितं ॥ कथं विज्ञातमस्याद्य हृदय एव शयश्रीनैः ज्ञालनाः ॥ किं तु प्राक्तनमेकमघमस्तीय

एतद्दायाद्व्याहि मे ब्रह्मन्महनीयात्मजचेष्टितं ॥ अश्रद्दधानाय भक्ताय त्वं परावरवित्तम ॥२३॥ मैत्रेय उवाच ॥ अंगोश्वमेधं राजर्षिरा-
जहार महाक्रतुं ॥ नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिनः ॥२५॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः ॥ हवींषि हूय-
मानानि न ते गृह्णन्ति देवताः ॥२६॥ राजन्हवींष्यदुष्टानि श्रद्धयासादितानि ते ॥ छंदांस्ययातयामानि योजितानि धृतव्रते ॥२७॥ न वि-
दामेह देवानां हेलनं वयमण्वपि ॥ यत्र गृह्णन्ति भागान्स्वान्ये देवाः कर्मसाक्षिणः ॥२८॥ मैत्रेय उवाच ॥ अंगो द्विजवचः श्रुत्वा यज-
मानः सुदुर्मनाः ॥ तत्प्रष्टुं व्यसृजद्वाचं सदस्यास्तदनुज्ञया ॥२९॥ नागच्छंत्याहुता देवा न गृह्णन्ति ग्रहानिह ॥ सदसस्पतयो ब्रूत कि-
मवद्यं मया कृतं ॥३०॥ सदस्यपतय ऊचुः ॥ नरदेवेह भवतो नाघं तावन्मनाक्स्थितं ॥ अस्त्येकं प्राक्तनमघं यदिहेदृक्त्वमप्रजः ॥३१॥
तथा साधय भद्रं ते आत्मानं सुप्रजं नृप ॥ इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् ॥३२॥ तथा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः ॥
यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ॥३३॥

यस्मात् ईदृक् कृपणाधिकोपि त्वं प्रजारहितः ॥३१॥ अतो यथा देवा हविर्गृह्णन्ति तथात्मानं सुप्रजं साध-
य कथं साधनीयः तत्राहुः इष्ट इति ॥३२॥ तथा सति स्वभागान्गृहीष्यन्ति यद्यतो हरिः साक्षाद्वृतः स्यात् ॥ अतस्तेन सह सर्वे देवाः आगमिष्यन्तीत्यर्थः ॥३३॥

नन्वतितुच्छाननुकामानु हरिः कथं दद्यात् तत्राह तांस्तानिति २४ प्रजातये पुत्रोत्पत्तये शिपिविष्टाय पशुषु यज्ञरूपेण प्रविष्टाय तथा च श्रुतिः यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति २५ तस्माच्छितियो पतयाग्रे २६ पत्न्यै प्रादात् २७ पुमांसं सूते येनेति तथा तस्याः पुत्रः सकाशात्तार्क्ष्य मात्रे स्वे अप्रजा सती २८ मातामहं मृत्युं मृत्योर्दुहितरि सुनीथायां २९ मृगयुर्लुब्धकः सन् तं दृष्ट्वा वेनो सावागच्छतीति जनः सर्वोऽप्यरौत्

तांस्तान् कामान् हरिर्दद्याद्यान्यान्कामयते जनः आराधितो यथैवैष तथा पुंसां फलोदयः २४ इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे २५ तस्मात् पुरुष उत्तस्थौ हेममाल्यमलांबरः हिरण्मयेन पात्रेण सिद्धमादाय पायसं २६ स विप्रानुमतो राजा गृहीत्वांजलिनौदनं अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः २७ सा तत्पुंसवनं राज्ञी प्राश्य वै पत्युरादधे गर्भं काल उपावृत्ते कुमारं सुषुवेऽप्रजा २८ स बाल एव पुरुषो मातामहमनुव्रतः अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः २९ स शरासनमुद्यम्य मृगयुर्वनगोचरः हंत्यसाधुर्मृगान्दीनान्वेनोऽसावित्यरौज्जनः ४० आक्रीडे क्रीडतो बालान्वयस्यानतिदारुणः प्रसह्य निरनुक्रोशः पशुमारममारयत् ४१ तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः यदा न शासितुं कल्पो भृशमासीत्सुदुर्मनाः ४२ प्रायेणाभ्यर्चितो देवो येऽप्रजा गृहमेधिनः कदपत्यभृतं दुःखं ये न विंदंति दुर्भरं ४३ यतः पापीयसी कीर्तिरधर्मश्च महान्नृणां यतो विरोधः सर्वेषां यत आधिरनंतकः ४४ कस्तं प्रजापदेशं वै मोहबंधनमात्मनः पंडितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ४५

आक्रीडे क्रीडास्थाने बालान् पशूनिवामारयत् ४१ विचक्ष्य दृष्ट्वा ४२ दुर्मनसं सन्तं स्वकं प्रति निरावाक्यमाह प्रायेणेति त्रिभिः अप्रजा ये तैरभ्यर्चितः तत्र हेतुः कदपत्यैः संभृतं धारयितुमशक्यं दुःखं ये न विंदंति ४३ सर्वेषां वैरं महत् आधिर्मनःपीडा यथा ४४ तं प्रजापदेशं पुत्रव्याजेनात्मनो मोहेन बंधनं यदर्थाः यन्निमित्ताः क्लेशा दारगृहा भवंति ४५

इदानीं निर्वेदहेतुत्वेन कान्तिमत्त्वमेवापत्यमपि नेहरति ॥ कदपत्यमिति ॥ सुचापदात् शोकानां स्थानान् ॥ चरत्वे हेतुः निर्विद्यतेति तदुक्तं ततः यद्यतः क-
दपत्यान् गृहाः क्लेशनिवहाः भवंति ॥ ४६ ॥ महता मुदयाना विभूतिनाम रयो यस्मिन् तस्माद्गृहाद्गतः धावेन सूतेस्तता ॥ ४७ ॥ प्रजाः पुरोहितार-
यश्च ॥ विविक्तुः त्वर्विग्नवंनाशंकादर्शनमित्यर्थः ॥ ४९ ॥ अन्वेषितवतः ॥ तं तत्तत्रैव मतं मपि नापश्यत्रिति दृष्टांतेनाह ॥ यथेति ॥ ४८ ॥ मास्रवः

कदपत्यं वरं मन्ये सदपत्यात् शुचां पदात् ॥ निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ॥ ४६ ॥ एवं सुनिर्विण्णमना नृपो गृहान्नि-
शीथ उत्थाय महोदयोदयात् ॥ अलब्धनिद्रो उपलक्षितो नृभिः हित्वा गतो वेनसुवं प्रसुप्तां ॥ ४७ ॥ विज्ञाय निर्विद्य गतं पतिं प्रजाः
पुरोहितामात्यसुहृद्गणादयः ॥ विचिक्युरुर्व्यामतिशोककातराः यथा निगूढं पुरुषं कुयोगिनः ॥ ४८ ॥ अलक्षयंतः पदवीं प्रजापतेः
हतोद्यमाः प्रत्युपसृत्य ते पुरीं ॥ ऋषीन् समेतानभिवंद्य साश्रवो न्यवेदयन् पौरव भर्तृविप्लवं ॥ ४९ ॥ इति श्रीभागवते महापुराणे चतुर्थे स्कं-
धे त्रयोदशोऽध्यायः ॥ मैत्रेय उवाच ॥ भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः ॥ गोप्तर्यसति वै नृणां पश्यंतः पशुसाम्यतां ॥ १ ॥ वीरमा-
तरमाहूय सुनीथां ब्रह्मवादिनः ॥ प्रकृत्यसंमतं वेनमभ्यषिंचन् पतिं भुवः ॥ २ ॥ श्रुत्वा नृपासनगतं वेनमत्युग्रशासनं ॥ निलिल्युर्दस्य-
वः सद्यः सर्पत्रस्ता इवाखवः ॥ ३ ॥ स आरूढनृपस्थान उन्नद्धोऽष्टविभूतिभिः ॥ अवमेने महाभागान् स्तब्धः संभावितः स्वतः ॥ ४ ॥

हृदं ततः भक्तस्य वेनस्य रोषात्तैर्वधश्च उच्यते ॥ क्षेमदर्शिनः ॥ इति चतुर्थे त्रयोदशः ॥ चतुर्दशे तु दुष्टं वेनं भयात् रोगगते द्विजैः ॥ अभिषिक्तेऽसमवित्तकाः पशुसमा-
नरूपतां पश्यंतः ॥ १ ॥ अमात्यादीनां प्रकृतीनामसंमतमपि पाठांतरेण प्रकृत्या स्वभावेनासंमतं वा ॥ २ ॥ लीना बभूवुः ॥ ३ ॥ आरूढं नृपास्थानं राजासनं ये-

अभिषिक्तस्य वेनस्य रोषात्तैर्वधः

भा०च
५१

पर्द्दे पवित्रिणः मिलिता म्रतः ७ मूलतस्त्वाग्रतश्चैव दीप्ते ज्वलिते काष्ठे तन्मध्यवर्त्तिनां पिपीलिकादीनां यथा उभयतो मरणं ॥ एवं तस्करेभ्यः पालकाद्व
दुःखमित्यर्थः ॥ ८ ॥ तदेवाह ॥ अराजकभयादिति ॥ अतदर्हेणाः राज्यानर्हेः ॥ ९ ॥ अस्माकमप्यनिष्टं जातमित्याह ॥ अहो इत्यादि पयः पोषः ज्ञारेणापोष
णं पोषकस्याप्यनर्थे विमर्त्ति पुष्णाति ॥ तदेवाह ॥ वेन इति ॥ १० ॥ निरूपितः नियुक्तो स्माभिः सांत्वयेमे ॥ उपपत्तिभिः प्रार्थयिष्यामः तस्य पातकं ॥ ११

एवं मदांधिमुच्छिन्नो निरंकुशश्च वह्निपः ॥ पर्यत्र नृत्यमास्थाय कंपयन्निव रोदसी ॥ ५ ॥ नयष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित् ॥ इति न्य
वारयद्धर्मं भेरीघोषेण सर्वतः ॥ ६ ॥ वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितं ॥ विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः ॥ ७ ॥ अहो
उभयतः प्राप्तं लोकस्य व्यसनं महत् ॥ दारुण्युभयतो दीप्ते इव तस्करपालयोः ॥ ८ ॥ अराजकभया देष कृतो राजा तदर्हणः ॥ ततो प्या
सीद्भयं त्वद्य कथं स्यात् स्वस्ति देहिनां ॥ ९ ॥ अहेरिव पयःपोषः पोषकस्याप्यनर्थभृत् ॥ वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः
॥ १० ॥ निरूपितः प्रजापालः स जिघांसति वै प्रजाः ॥ तथापि सांत्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ॥ ११ ॥ तद्विद्वद्भिरसद्वृत्तो वेनो स्मा
भिः कृतो नृपः ॥ सांत्वितो यदि नो वाचं न गृहीष्यत्यधर्मकृत् ॥ १२ ॥ लोक धिक्कारसंदग्धं दहिष्यामः स्वतेजसा ॥ एवमध्यवसायेन
मुनयो गूढमन्यवः ॥ उपव्रज्याब्रुवन्वेनं सांत्वयित्वा च सामभिः ॥ १३ ॥ मुनय ऊचुः ॥ नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भो ॥ आयुः श्रीबल
कीर्त्तीनां तव तात विवर्द्धनं ॥ १४ ॥ धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः ॥ लोकान्विशोकान्वितरत्यथानंत्यमसंगिनां ॥ १५ ॥ स
ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः ॥ यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति ॥ १६ ॥

त्वस्य तस्य पातकस्पर्शो हेतुः तत्पातकात्वविद्वद्भिः ॥ १२ ॥ गूढो मन्युर्येषां ॥ सामभिः प्रियोक्तिभिः ॥ निष्कामानां अनंत्यं मोक्षमपि ॥ १४ ॥ १५ ॥ मा विनशेत मा विनश्यतु

राम
५१

असाधवो येऽमात्यास्तेभ्यः यथा यथा शास्त्रं ॥ १० ॥ सर्वान्लोकांश्च तत्पालान् मराश्च तत्त्वापकान् यत्तांश्च संगृह्णातीति तं ॥ विचित्रैः पृथग्यज्ञादि
भिः ॥ भवाय समृद्धये ॥ स्वदेशान् तद्वासिनो जनान् अनुरोद्धुं अनुवर्तितुं ॥ २१ ॥ युष्मद्विषये त्वद्देशे ॥ हरेः कलाः अंशाः सुराः तेषां सुराणां हेलनमवज्ञां

राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः ॥ रक्षन् यथा बलिं गृह्णन्निह प्रेत्य च मोदते ॥ १७ ॥ यस्य राष्ट्रे पुरे चैव भगवान् यज्ञपूरुषः ॥ इज्यते
स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः ॥ १८ ॥ तस्य राज्ञो महाभाग भगवान् भूतभावनः ॥ परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥ १९ ॥ तस्मिं
स्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे ॥ लोकाः सपाला ह्येतस्मै हरंति बलिमादृताः ॥ २० ॥ तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयं
यज्ञैर्विचित्रैर्यजतो भवाय ते राजन् स्वदेशाननुरोद्धुमर्हसि ॥ २१ ॥ यज्ञेन युष्मद्विषये द्विजातिभि वितायमानेन सुराः कला हरेः ॥ स्विष्टाः
सुतुष्टाः प्रदिशंति वांछितं तद्धेलनं नार्हसि वीर चेष्टितुं ॥ २२ ॥ वेन उवाच ॥ बालिश्या बत यूयं वा अधर्मे धर्ममानिनः ॥ ये वृत्तिदं पतिं हि
त्वा जारं पतिमुपासते ॥ २३ ॥ अवजानंत्यमी मूढा नृपरूपिणमीश्वरं ॥ नानुविंदंति ते भद्रमिह लोके परत्र च ॥ २४ ॥ को यज्ञपुरुषो नाम यत्र
वो भक्तिरीदृशी ॥ भर्तृस्नेहविदूराणां यथा जारे कुयोषितां ॥ २५ ॥ विष्णुर्विरिंच्यो गिरिश इंद्रो वायुर्यमो रविः ॥ पर्जन्यो धनदः सोमः क्षितिरग्नि
रपांपतिः ॥ २६ ॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः ॥ देहे भवंति नृपतेः सर्वदेवमयो नृपः ॥ २७ ॥ तस्मान्मां कर्मभिर्विप्राः यजध्वं गत
मत्सराः ॥ बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक् पुमान् ॥ २८ ॥ मैत्रेय उवाच ॥ इत्थं विपर्ययमतिः पापीयानुत्पथं गतः ॥ अनुनीयमानस्तद्या

॥ १४ ॥ बालिशाः अज्ञाः ॥ वृत्तिदं स्वमात्रादिप्रदं मां हित्वा ॥ २३ ॥ २४ ॥ भर्तृ— स्नेहो विदूरे येषां ॥ २५ ॥ २६ ॥ देहे भवंति नृपतेः अतो नृपतिरे ज्ञां न चक्रे भ्रष्टमंगलः ॥ २९ ॥
वेश्वरः ॥ इतरे तदंशा इति भावः ॥ २७ ॥ बलिं च करादिकं ॥ अग्रभुक् आराध्यः ॥ २८ ॥ ९ ॥

तेनागस्कृताः भग्नायां यात्रायां ॥२०॥ शापरिवह्नीतविनिर्दृत ॥ अश्रुमेवेन विना ॥ कृतघ्नतामाङ्गः यदनुग्रहविषयः सन्नीदृशो मेश्वर्ययः शप्तः ॥२२॥ पूर्वं गृहमन
वः इदानीमहमन्यवः कुरुतैः कुरु कौरव ॥२४॥ स्वाश्रमपदं प्रति ऋषिभिर्गतगमने कृते ॥ विद्यायोगेन मंत्रसहितयायुक्त्या ॥२५॥ एवं ज्ञाव आर्षः
सरस्वत्याः सलिले आप्लुता इत्यर्थः ॥२६॥ तदा नत्या तावीक्ष्य मुखो भद्रं न भवेत्किमिताङ्गरू ॥२७॥ एवं मृषात ऋषयः स्थिताः ॥ तदा धावतां चोरा

इतिते सत्कृतास्तेन द्विजाः पंडितमानिना ॥ भग्नायां भव्ययात्रायां तस्मै विद्रुरुचुर्क्रुधः ॥२०॥ हन्यतां हन्यतामेष पापः प्रकृतिदारुणः
जीवन्जगदसावाशु कुरुते भस्मसान्ध्रुवं ॥२१॥ नायमर्हत्यसद्वृत्तो नरदेववरासनं ॥ योधियज्ञपतिं विष्णुं विनिंद्य नमपत्रपः ॥२१॥
कोवेनं परिवह्नीतवेनमेकमृतेशुभं ॥ पापः स्वदृशोमेश्वर्यं यदनुग्रहभाजनः ॥२२॥ इत्थं व्यवसिता हन्तुमृषयो रूढमन्यवः ॥ निजघ्नुर्हुं
कृतैर्वेनं हतमच्युतनिंदया ॥२४॥ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरं ॥ सुनीथापालयामास विद्यायोगेन शोचती ॥२५॥ एकदा
मुनयस्ते सरस्वत्सलिलाप्लुताः ॥ हुत्वाग्निं सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥२६॥ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंक
रान् ॥ अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥२७॥ एवं मृशंत ऋषयो धावतां सर्वतोदिशं ॥ पांसुः समुत्थितो भूरिश्चोराणामभिलुं
पतां ॥२८॥ तदुपद्रवमाज्ञाय लोकस्य वसु लुंपतां ॥ भर्तर्युपरते तस्मिन्नन्योन्यं च जिघांसतां ॥२९॥ चोरप्रायं जनपदं हीनसत्वमरा
जकं ॥ लोकान्नावारयच्छक्ता अपि तद्दोषदर्शिनः ॥३०॥

णां भूरिः पांसुः समुत्थितः ॥२८॥ ततस्तदा तेषां लोकस्य धनं लुंपतां जिघांसतां चोपद्रव
माज्ञाय ॥२९॥ तथा चोरप्रायमराजकहीनसत्वं जनपदमाज्ञाय शक्ता अप्यवाराणे दोषदर्शिनोपि जनान्लुंपतो लोकान्नावारयन्नित्यन्वयः ॥३०॥

शत्रूणां नाहत्रियाणामवारणो दोष इति किं वक्तव्यं समदृगपि शांतोपि ब्राह्मणोपि परिदीनानां समुपेक्षको भवेत्तर्हि तस्यापि ब्रह्मतपः स्रवति ॥४१॥
अतउपेक्षादोषपरिहाराय नांगस्येत्याह विनिश्चित्य महीपतेरूरुं तरसा ममंथुरित्यन्वयः ॥ संस्थातुं नाशं गंतुं यद्वा अक्षयएव सुपेतो लोकान्त्रावारयन्नक
थभूताः ॥ दुकारोगौ वचनं निवारयितुं शक्तावपि नक्तिं तस्मिन्निवारणेन कारणादि दोषदर्शिनः ॥ नचोरामसनचोरोपद्रुतेरीनोपेक्षायां तपोहानिश्रुतं

ब्राह्मणः समदृक्शांतो दीनानां समुपेक्षकः ॥ स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ॥४१॥ नांगस्य वंशो राजर्षेरेष संस्था
तुमर्हति ॥ अमोघवीर्या हि नृपा वंशेऽस्मिन्केशवाश्रयाः ॥४२॥ विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ॥ ममंथुरूरुं तरसा तत्रा
सीद्बाहुको नरः ॥४३॥ काककृष्णोतिह्रस्वांगो ह्रस्वबाहुर्महाहनुः ॥ ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्द्धजः ॥४४॥ तं तु तेव
नतं दीनं किं करोमीति वादिनं ॥ निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ॥४५॥ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः ॥ ये
नाहरज्जायमानो वेनकल्मषमुल्बणं ॥४६॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे नैषादोत्पत्तिर्नाम चतुर्दशोऽध्यायः ॥ मैत्रेय
उवाच ॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः ॥ बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ॥१॥ तं दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादि
नः ॥ ऊचुः परमसंतुष्टा विदित्वा भगवत्कलां ॥२॥

गात ॥ न वाच्यं तन्निवारकं राजानमकुर्वन् ॥ अंगवंशोच्छेदस्यानर्हत्वात् ॥ अतो वेनस्यैव देहं ममंथुरिति योज्यं
बाहुको वामनः ॥४३॥ तमेवाह ॥ काक इव कृष्णः महत्यौ हनू कपोलप्रान्तौ यस्य ॥ ह्रस्वौ पादौ यस्य ॥४५॥ गिरिः काननं च गोचर आश्रयो न तु पुरादिप्रवेशो येषां ते
तत्र हेतुः कल्मकारणो नाम्नावहरन् ॥ ततस्तस्य वंश्यास्तथाभूताः ॥४६॥ इति चतुर्थे चतुर्दशः ॥ ततः पंचदशे विप्रैः मथनाद्वेनबाहुतः ॥ जातस्य तु पृथोराहुकमभि

किमुत्पुरित्यत आह एष इति चतुर्भिः ॥ लक्ष्म्याः संभूतिः कला ॥ ३ ॥ अयं पुमान् स तु महाराजो भविष्यति ॥ ४ ॥ सुदती शोभमानदंतवती ॥ गुणानां भूषणा-
नां च भूषणानि भूषणा रूपा ॥ अवरुंधती भर्तृत्वेन भजंती भविष्यति ॥ अत्र हेतुः एष इति ॥ लोकस्य रिरक्षया रिरक्षयिषया ॥ ६ ॥ स्वः स्त्रियः अप्सरसो न

अथ व्युः ॥ एष विष्णोर्भगवतः कला भुवनपालिनी ॥ इयं च लक्ष्म्याः संभूतिः पुरुषस्यानपायिनी ॥ ३ ॥ अयं तु प्रथमो राज्ञां पुमान्प्रथ-
यिता यशः ॥ पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः ॥ ४ ॥ इयं च सुदती देवी गुणभूषणभूषणा ॥ अर्चिर्नाम वरारोहा पृथुमेवावरुंध-
ती ॥ ५ ॥ एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ॥ इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥ ६ ॥ प्रशंसंति स्म तं विप्रा गंधर्वप्रवरा ज-
गुः ॥ मुमुचुः सुमनोधाराः सिद्धा नृत्यंति स्वःस्त्रियः ॥ ७ ॥ शंखतूर्यमृदंगाद्या नेदुर्दुंदुभयो दिवि ॥ तत्र सर्व उपाजग्मुर्देवर्षिपितृणां ग-
णाः ॥ ८ ॥ ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः ॥ वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ॥ ९ ॥ पादयोररविंदं च तं वै मेने हरेः क-
लां ॥ यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः ॥ तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः ॥ आभिषेचनिकान्यस्मै आजह्रुः सर्वतो ज-
नाः ॥ ११ ॥ सरित्समुद्रा गिरयो नागा गावः खगा मृगाः ॥ द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनं ॥ १२ ॥ सोऽभिषिक्तो महाराजः सुवासाः
साध्वलंकृतः ॥ पत्न्यार्चिषालंकृतया विरेजेऽग्निरिवापरः ॥ १३ ॥ तस्मै जहार धनदो हैमं वीरवरासनं ॥ वरुणः सलिलस्रावमातपत्रं श-
शिप्रभं ॥ १४ ॥ वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजं ॥ इंद्रः किरीटमुत्कृष्टं दंडं संयमनं यमः ॥ १५ ॥

संपतिस्म ॥ ७ ॥ ८ ॥ देवैः सहासृत्य आगत्य वैन्यस्य पृथोः चिह्नं रेखात्मकं चक्रं ॥ ९ ॥ अप्रतिहतं रेखाभिरभिन्नं चक्रं यस्य चिह्नं स परमेष्ठ्यंशः ॥ १० ॥ आभिषेच-
निकानि अभिषेकसाधनानि ॥ ११ ॥ १२ ॥ हैमं वीरवरासनं उत्तमासनं ॥ सलिलस्रावो वर्षस्राव ॥ १४ ॥ हे वालव्यजने ॥ १५ ॥

ब्रह्ममयं वर्म्म कवचं ॥ तत्पत्नी श्रीः श्रियं संपदं ददसा वंदारकाणां विवानिकोशो यसत्त्वं अभिखेद्ध ॥ शातवंडं वर्म्म नूपावायं अति सुदरं ॥ अजस्र
गोस्त्रं भृंगा ध्यानि निर्म्मितं वापं योगमयो पादस्पर्शमात्रेण भीष्टदेशप्रापिके नाद्यादि कोशलं खेचराः ॥ आत्मजं त्वप्रमवंतं स्तोतुमुपस्थिताः ॥
स्तावकास्तोतुमुद्यताः अभिप्रेत्यत्ता त्वा लोके स्पष्टगुणा समस्ततो मे स्तुतिः स्यात ॥ अधुना किमाश्रये मे स्तवो योज्यतं ॥ अतो वो गिरि इनाम

ब्रह्मा ब्रह्ममयं वर्म्म भारती हारमुत्तमं ॥ हरिः सुदर्शनं चक्रं तत्पत्न्याहरती श्रियं ॥ ददसावंडमसिं रुद्रः शातवंडं तथाम्बिका ॥ सो
मोऽमृतमयानश्वान्त्वष्टा रूपाश्रयं रथं ॥ अग्निराजगवं चापं सूर्यो रश्मिमयानि षून् ॥ भूः पादुके योगमयो द्यौः पुष्पावलिमव
हे ॥ नाट्यं सुगीतवादित्रमतद्धानं च खेचराः ॥ ऋषयस्त्वाशिषः सत्याः समुद्रः शंखमात्मजे ॥ सिंधवः पर्वता नद्यो रथवीथीर्महात्म
नः ॥ सूतोथ मागधो बंदी तं स्तोतुमुपतस्थिरे ॥ स्तावकास्तानभिप्रेत्य पृथुर्वैण्यः प्रतापवान् ॥ मेघनिर्ह्रादया वाचा प्रहसन्निदम
ब्रवीत् ॥ पृथुरुवाच ॥ भोसूत हे मागध सौम्य बंदिन्लोकेधुनास्पष्टगुणस्य मे स्यात ॥ किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वित
थागिरो वः ॥ तस्मात्परोक्षेस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः ॥ सन्तूत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयंति सभ्याः ॥

मिमाभूवन् ॥ यद्वा लोके धुनास्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात ॥ अतएषः क्रियमाणस्तवः मे मदन्यस्य योज्यतां ननु मे वितथा पत्निर्मिमाना
पन्नेरित्यर्थः ॥ तस्मात्परोक्षे कालान्तरे स्पष्टगुणेषु सत्सु अस्माकमुपश्रुतनियशांसि प्रतिस्तोत्रं अलमत्यर्थं करिष्यथ ॥ हे अपीच्यवाचः मधुरगिरः
प्रेरितावद्यं त्वामेव स्तुमः इति चेत्तत्राह ॥ उत्तमश्लोकस्य गुणानुवादे कार्य्ये सति जुगुप्सितमर्वाचीनं न स्तवयंति

भा० च
४४

नतु सभाविते रेव गुणैरात्मानं जन स्तावयतीति चेत्तत्राह ॥ महतो गुणानात्मनि संपादयितुं शक्तोपि असतो गुणान्संभावनामात्रेण कः स्तावयतो यद्वा
आरोपेण सतोपि कः स्तावयतो द्वयमेव प्रत्याख्यातिसिद्धेः असन्तः स्तुतिमिथ्यागुणस्तुतिस्ताद्दी मंद इत्याह ॥ यद्यप्यशास्त्राभ्यामादिभकरिष्यन्निति असतो वि
द्यादयो गुणा अभविष्यन्निति क्रियायादिपद्माविप्रलब्धो जनानामवहासं नवेद ॥ किंच ॥ प्रभवोपि विश्रुता अपि ह्रीमन्तो जुगुप्सितं वेति द्वयं नयथा अतिक्रिय

महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोपि तैः स्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्नवेद ॥ प्रभवो
ह्यात्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः ॥ ह्रीमन्तः परमोदाराः पौरुषं वा विगर्हितं ॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः ॥ कर्म्म

य भिः कथमात्मानं गापयिष्याम बालवत् ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे पृथुचरिते पंचदशो ॥ यः ॥ भैत्र यउवा च ॥
इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः ॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ॥ नालं वयं ते महिमानुवर्णने यो देववर्यो
वततार मायया ॥ वेनांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः ॥

माणयायां विगर्हितं ब्राह्मणएवधारिपौरुषं निंदति तथा अविदितामपि स्तुतिं न सहंत इत्यर्थः वरीमभिरिति दीर्घमार्षं भवति प्रधानस्वार्थनिर्देशः वरिष्ठैः कर्म्म
भिरविदिता इत्यर्थः ॥ १ च थों च शः ॥ षोडशे सर्वलोकेशैः सत्कृतं भाव्ययाश्रुतं ॥ मुनिप्रयुक्ताः सूताद्याः स्तुवंति स्मेति वर्ण्यते ॥ गायकाः सूतादयो
नालं न समर्थाः ॥ यो भवान् अवतारे षण्मध्यादिकमाङ्गः वेनस्यांगाज्जातस्य ते पौरुषाणि प्रति अवितर्क्य नया ब्रह्मादीनामपि धियो बभ्रमुः कुतः पुनर्वयं तद्वर्णने समर्था भवेम ॥

राम
४४

अथापि यथावद्वर्णयितुमसक्ता अपि कथामृते सादराः मुनिभिरुपदेशयोगबलेन हरिप्रकाशानं तरं तनतिक्रम्य वितन्महि हि विस्तारयामः ततो ह्यवरेहे लोक
पालानां तनुर्मूर्त्तीः काले काले विभर्त्ति यथा भागं पालनपोषणादिरंजनादिकार्य्यानुसारेण यज्ञादिप्रवर्त्तनेन स्वर्गसहितं यथा भवति तथा सर्व्वाधारि तनुधार
णमेवाहाष्टभिः ॥ बहुधनाकरादानकाल आदत्ते दुर्भिक्षादिकाले विमुंचतिव ॥ अष्टौ मासान्सूर्य्यो यथा वहुजलमादत्ते विमुंचति वर्षासु तद्वत ॥ समत्वेनापारेन
क्रमतामप्यात्मनो भूतानामतिक्रमं सहिष्यतो ह्नितो हन्तिः ॥ सर्व्वसहनं सहत्रिर्यस्या ह्नितया देवे वर्षत्येव कच्छ्रं गताः प्रजाः स्वयं दृष्टिं कृत्वा रक्षिष्यति ॥ अत्र हे

अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः ॥ यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्म्माणि वयं वितन्महि ॥ एष
धर्म्मभृतां श्रेष्ठो लोकं धर्म्मेनुवर्त्तयन् ॥ गोप्ता च धर्म्मसेतूनां शास्ता तत्परिपंथिनां ॥ एष वै लोकपालानां बिभर्त्त्येकस्तनौ तनूः ॥ काले
काले यथा भागं लोकयोरुभयोर्हितं ॥ वसु काल उपादत्ते काले चायं विमुंचति ॥ समः सर्व्वेषु भूतेषु प्रतपन्सूर्य्यवद्विभुः ॥ तितिक्षत्यक्र
मं वैन्य उपर्य्याक्रमतामपि ॥ भूतानां करुणः शश्वदार्त्तानां क्षितिवृत्तिमान् ॥ देवे वर्षत्यसौ देवो नरदेव वपुर्हरिः ॥ कृच्छ्रप्राणाः प्रजा ह्ये
ष रक्षिष्यत्यंजसेंद्रवत् ॥ आप्याययत्यसौ लोकं वदनामृतमूर्त्तिना ॥ सानुरागावलोकेन विशदस्मितचारुणा ॥ अव्यक्तवर्त्मैष निगूढका
र्य्यो गंभीरवेधा उपगुप्तवित्तः ॥ अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा ॥

तः ॥ असौ नरदेववपुर्हरिरिति वदनमेवामृतं मूर्त्तिश्चंद्रस्तेन ॥ सानुरागावलोको यस्मिन् विशदस्मितं तेन वा चारुणा ॥ अत्र च क्वचिद्वर्त्तमानसामीप्ये वर्त्तमानवद्भ
ति भूतनिर्देशस्तु ॥ असंशयो भूतवद्वेति द्रष्टव्यः ॥ न व्यक्तं वर्त्म प्रवेशनिर्गमे यो मार्गो यस्य निगूढं निष्टतेः पूर्व्वमविज्ञातं कार्य्यं यस्य स तद्व कार्यं गंभीरं किमर्थमेतत्कृ
तमिति परैरज्ञातमभिप्रायं विधत्ते इति तथा उपगुप्तं सुरक्षितं वित्तं यस्य ॥ अनंतमाहात्म्यगुणानामेकं धाम स विस्मर्य्यस्मिन् ॥ अनंतमाहात्म्यो येन तादृग्गुणा एकधामस्थान
यस्येति वा ॥ संवृतात्मा संयतबुद्धिः समुद्रवरत्वेन वरुणस्याप्येते गुणा द्रष्टव्याः ॥

दुरापदः शत्रोर्मनसापि प्राप्तुमशक्यः दुर्विषहः शत्रुभिः सोढुमशक्यः विदूरवर्त्तो दूषणाभिभवितुमशक्यः वेनं एव वारणां तस्मादुत्थितः वारोऽर्ग्निः भूपेः
प्रमत्तपि ह्वक्रीतिर्ज्ञिहारौदासीनः स्ववर्त्तिष्यते यथा देहिनामध्यक्षो विहूतत्रात्मभूतो वायुः प्रनाम्मातद्वत् आत्मद्विषाम्रतमिति मृतग्रहणां स्वात्मज
सामर्थ्यं धर्मपथे यमस्सरन्तः स्थितः वक्रं आत्ता येनावारयस्सवा वक्रं मानमावलमभिव्याप्य प्रवर्त्तते किंपर्यन्तमित्यत आह अर्के रश्मिगणो यावत्

दुरापदो दुर्विषहो ऽप्यन्नोपि विदूरवत् नैवाभिभवितुं शक्यो वेणारण्ड्युत्थितो नलः ॥ अन्तर्बहिश्च भूतानां पश्यन्कर्माणि चारतो ॥
उदासीन इवाध्यक्षो वायुरात्मेव देहिनां नादंड्यं दंडयत्येष हतमात्मद्विषामपि दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः अस्याप्रति
हतं चक्रं पृथ्योमाममावलात् वर्त्तते भगवानर्को यावत्तपति गोगणैः रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः अथापमाङ्कुरा
जानं मनो रंजनकैः प्रजाः दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः शरण्यः सर्वभूतानां मानदो दीनवत्सलः मातृभक्तिः पर
स्त्रीषु पत्न्या सर्द्ध इवात्मनः प्रजा गुपितृवत्स्निग्धः किंकरो ब्रह्मवादिनां देहिनामात्मनेष्टः सुहृदां नन्दिवर्द्धनः मुक्तसंगप्रसं व
गोयं दंडपाणिरसाधुषु अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयावतीर्णः यस्मिन्नविद्यारचितं निरर्थकं पश्यंति नाना
त्वमपि प्रतीतं

त्वं पश्यंति तावत् अथ यस्माद्रंजयिष्यति अथ तस्मान्मनोरंजनैर्हेतुभिर्रंजनात्मानमाङ्कः मनोरंजनकैरिति चेष्टितविशेषणं वा समात्
रीव भक्तिर्भजनं यस्य आत्मनो देहस्यार्द्धइव पत्न्यां प्रतिमान् नंदिसुखं वर्द्धयतीति तथा ऽप्रक्तः संगेषु प्रकृष्टः संगो यस्याः दंडपाणिरिवेत्यपराधानुरूपेन दण्ड
दुष्यते नादंड्यानित्यवधू अपन्नपात भावउक्तः अयं त्विति तदाहेन निरूपत्वं दर्शयति कोसावात्मा नत्राह यस्मिन्प्रतीतमपि नानात्वमर्थं अन्यं पश्यति

आ उदयाद्रेस्तत्पर्यंतं गोप्ता गोपायिष्यति ॥ तदर्थं पर्यस्यते पर्यटिष्यति प्रदक्षिणीकरिष्यतीत्यर्थः ॥ अस्मै तथा प्रदक्षिणीकर्तुं नो मंस्यंते ज्ञास्यंते तस्य
यश उद्धरंत्यः उदाहरंत्यः कीर्त्तयंत्यः इंद्रवज्रादि त्रिपिंटं ॥ लांगूलमुद्यम्य यथा मृगेंद्र इति ॥ तथा धनुर्विस्फूर्ज्य यन्यदा क्ष्मामाचरन् माङ्गभौ विप्रादुर्भूता ॥

अयं भुवो मंडलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः ॥ आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः ॥ अस्मै नृपा
लाः किल तत्र तत्र बलिं हरिष्यंति सलोकपालाः ॥ मंस्यंत एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उद्धरंत्यः ॥ अयं महीं गां
दुदुहेऽधिराजः प्रजापतिर्वृत्तिकरः प्रजानां ॥ यो लीलयाद्रीन्स्वशरासकोट्या भिंदन्समां गामकरोद्यथेंद्रः ॥ विस्फूर्जयन्ना
जगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ ॥ तदा निलिल्युर्दिशि दिश्यसंतो लांगूलमुद्यम्य यथा मृगेंद्रः ॥ एषोऽश्वमेधाञ्छतमा
जहार सरस्वती प्रादुरभावि यत्र ॥ अहार्षीद्यस्य हयं पुरंदरः शतक्रतुश्चरमे वर्त्तमानः ॥ एषः स्वसद्मोपवने समेत्य सनत्कु
मारं भगवंतमेकं ॥ आराध्य भक्त्यालभतामलं तज्ज्ञानं यतो ब्रह्मपरं विदंति ॥ तत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रि
ता गाथाः पृथुः पृथुपराक्रमः ॥ दिशो विजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः ॥ सुरासुरेंद्रैरुपगीयमानमहानुभावो भवि
ता पतिर्भुवः ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे षोडशोऽध्यायः ॥ मैत्रेय उवाच ॥ एवं स भगवान्वैन्यः ख्यापितो गुणकर्मभिः ॥ छंद
यामास तान्कामैः प्रतिपूज्याभिनंद्य च ॥ ॥

कर्म्मकर्त्तरि णिच् ॥ तत्र अहार्षीदिति विक्रमाविक्रम यस्य गाथाः प्रबंधान् उपगीयमानो महानुभावो यस्य ॥ चत्वे
षोडशः ॥ ततः सप्तदशे लोकक्षुधाः प्रशमयन्पृथुः ॥ ग्रस्तवीजां महीं हंतुं यत्तो भीत्या तया स्तुतः ॥ छंदयामास तोषितवान्

रा॰उ॰ ब्राह्मणस्य पुत्रस्य अकालमरणात् ॥ भत्यान्त्रमात्यान्त्रोधमः पुरोहितांश्च श्रेणीः तैलिकतांबूलादिन्योः विशेषान्प्रकृतिर्योगिनः दोहनपात्रं मेध्यं यज्ञार्हं ॥
४६ सवित्सानसपरीक्षत्तानसहितं पूर्वदेहः स्वच्छवतारः ॥ तत्कथाश्रयं श्रावयाः श्रुत्वा ध्यानं दुग्धवान् जनतायाश्च पालः इत्यामंत्रितो निष्क्रांताः ॥ तदा

ब्राह्मणस्य पुत्रस्य अकालमरणान्मृत्यामात्यपुरोधसः पौरान् जानपदान् श्रेणीः प्रकृतिः समपूजयत् ॥ विदूरउवाच ॥ कस्माद्धेतोर्द्रपंथ स्त्रीवङ्गरूपिणी ॥ यो दुर्दोहः स्वस्थस्तेन काव्यस्मान्दोहनं च किं ॥ प्रकृत्या विषमो देवी कृतानेन समाकथं ॥ तस्य मेध्यं हि पदे वः कस्य हेतोरपाहरत ॥ सनत्कुमाराद्गणतो वृत्तान्तं स्त्रः विदुरं समान् ॥ लब्धात्मानं सवित्सानं राजर्षिः कां गतिं गतः ॥ यद्यापि कल्पस्य नवान्माणवकः प्रणो ॥ श्रवः सुश्रवसः पुण्यपूर्वदेहकथाश्रयं ॥ मत्कायमेः त्वरत्काय तव वाधो तेजस्य च ॥ व्यासमुनिः स्वस्तिमित्योद्भवस्य ॥ किमर्हसि योद्गृहेदेवपत्रपेणागामिमां ॥ सूतउवाच ॥ चोदितो विदुरेणैवं वासुदेवकथां प्रति ॥ प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत मैत्रेयउवाच ॥ यदाभिषिक्तः स्वयंराज्ये विप्रैराज्ञं त्रितो जनतायाश्च पालः ॥ प्रजा निरन्नो क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥ वयं राजञ्जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः ॥ त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः ॥ तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेवदेव ॥ यावन्न नश्यामहे उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः ॥ मैत्रेयउवाच ॥ पृथुः प्रजानां करुणं निशम्य परिदेवितं ॥ दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत ॥ निरन्ने क्षितितले सति क्षुधाक्षामः क्षीणदेहा याः सन्ताः राम

प्रजाः एत्य पतिं पृथुमब्रुवन् ॥ जाठरेणाग्निना तप्ताः यः साधितो विप्रैर्मथनेन संपादितस्त्वां शरणं याता स्त्वं नः पाहि ॥ अस्माकं अन्नं रातवे दातुं ईहस्व ॥ ४६
यत्नं कुरु ॥ उज्झितोर्जा त्यक्तान्नाः सन्तः वार्तायाजीविकायाः पतिः परिदेवितं विलापं निमित्तं हेतुं अन्वपद्यत ज्ञातवान् ॥

पृथिव्या ओषधीर्विजानियत्वानीति ॥ व्यवसितो निश्चितवान् ॥ ग्रान्मृगयुना द्रुता अनुगता मृगीवा रोदसी द्यावापृथिव्यौ तयोरन्तरमन्तरिक्षं अनुदृष्टतः उद्य
तमायुधं येन तं योधर्मज्ञ इति मतः ॥ स भवान्योषां मां कथमहनिष्यत् हनिष्यति ॥ अजरां दृढं धास्यसि धारयिष्यसि ॥ बर्हिषि यज्ञे या भवती इ वनात्रूपेण भाग

इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः ॥ संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा ॥ प्रवेपमाना धरणी निशाम्योदायुधं च तं ॥ गौः
सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता ॥ तामन्वधावत्तद्वैन्यः कुपितो त्यरुणेक्षणः ॥ शरं धनुषि संधाय यत्र यत्र पलायते ॥ सा दिशो
विदिशो देवी रोदसी चान्तरं तयोः ॥ धावन्ती तत्र तत्रैनं ददर्शानूद्यतायुधं ॥ लोके नाविंदत त्राणं वैन्यान्मृत्योरिव प्रजाः ॥ त्रस्ता त
दा निववृते हृदयेन विदूयता ॥ उवाच च महाभागं धर्मज्ञापन्नवत्सल ॥ त्राहि मामपि भूतानां पालनेवस्थितो भवान् ॥ स त्वं जिघां
ससे कस्माद्दीनामकृतकिल्बिषां ॥ अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः ॥ प्रहरन्ति न वै स्त्रीषु कृतागःस्वपि जंतवः ॥ किमुत त्वद्वि
धा राजन्करुणा दीनवत्सलाः ॥ मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितं ॥ आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि ॥ पृथुरुवाच ॥
वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीं ॥ भागं बर्हिषि या वृङ्क्ते न तनोति च नो वसु ॥ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः ॥ तस्या
मेवं हि दुष्टायां दंडो नात्र न शस्यते ॥ त्वं खल्वोषधिबीजानि प्राक्सृष्टानि स्वयंभुवा ॥ न मुंचस्यात्मरुद्धानि मामवज्ञाय मंदधीः ॥ अमू
षां क्षुत्परीतानामार्तानां परिदेवितं ॥ शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा ॥

वृङ्क्ते भजते वसुधान्यादिकं गोरूपेण तथ्यवसं तृणां जग्धि अत्तीत्यर्थः पयस्त्विनेव दोग्धि ऊधःस्थं न स्रवति अस्मिन्नपराधे आत्मनि रुद्धानि मद्वधे स्वार्थाने न स्या
दिति चेत अत आह ॥ अमूषां प्रजानां मेदसा मांसेन ॥ ४ ॥ रामरामरामराम ॥ ॥ ॥

भा०च
४७

यदुक्तं योषां कथं हनिष्यसीति तत्राह ॥ पुमानिति ॥ न स वधोऽवध एव ॥ यच्चोक्तं कथं मम सिधास्यतीति तत्राह ॥ त्वामिति ॥ तिलशः तिलप्रमाणानि खंडानि त्वेवं भूतामेव मत्यां नीत्वा मन्युमयीं मूर्त्तिः विभ्रत्वेः कृतान्तं तत्प्रत्यक्षमुच्यते ॥ नन्वकृतान्तत्वमस्य मन्युमयी मूर्त्तिरिति ॥ शुद्धसत्वतनुं देवमकस्मात् कृतिं हरणं वीक्ष्यमाणा ॥ पञ्चभिः पृथ्वी स्तौति कारणैकात्म्योक्तिभिः मायया विन्यस्ता रचिता नानाघोरादितनवो येन गुणात्मने गुणमयात्वेन प्रतीयमानाय च

पुमान्योषिदुत क्लीब आत्मसंभावनोधमः भूतेषु निरनुक्रोशो नृपाणां तद्वधोवधः ॥ त्वां स्तब्धां दुर्म्मदां नीत्वा मायागां तिलशः
नै शरैः ॥ आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥ एवं मन्युमयीं मूर्त्तिं कृतान्तमिव बिभ्रतं ॥ प्रणता प्रांजलिः प्राह मही संजात
वेपथुः ॥ धरोवाच ॥ नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ॥ नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रिया नु
कारकविभ्रमोर्म्मये ॥ येनाहमात्मायतनं विनिर्म्मिता धात्रा यतोयं गुणसर्गसंग्रहः ॥ स एव मां हंतुमुदायुधः स्वराडुपस्थि
तोन्यं शरणं कमाश्रये ॥ य एतदादावसृजच्चराचरं स्वमायया आत्माश्रययाऽवितर्क्यया ॥ तयैव सोयं किल गोप्तुमुद्यतः कथं नु मां
धर्म्मपरो जिघांसति ॥

स्वरूपानुभवेन निर्धूता निरस्ता द्रव्यक्रियाकारकेषु अधिभूताध्यात्माधिदैवेषु विभ्रमोऽहंकारस्तन्निमित्ता ऊर्म्मयो रागद्वेषादयो यस्मिं
यस्मिंस्तस्मै ॥ अहो सर्वजीवाश्रयत्वेन स्रष्टा मां कथं हंतुं प्रवर्त्तत इत्याह ॥ येनेति ॥ विधात्रा आत्मनां जीवानामायतनमहं विनिर्म्मिता यतः यस्मान्मयि गुणसर्ग
स्य चतुर्विधभूतग्रामस्य संग्रहः धारणं स्वराट् स्वतंत्रः सृष्टिसंहारकर्त्तृकोऽहमेवेति चेत्तथापि प्रजापालने प्रवृत्तस्य मद्वधोऽनुचित एवेत्याह ॥ य एतदिति
आत्माश्रयया जीवविषयिण्या ॥ ॥ ४ ॥

राम
४७

अतो दुर्ज्ञेयमीश्वरं वेष्टितमित्याह ॥ नूनमिति ॥ अकृतात्मभिः विक्षिप्तचित्तैः स्वतंत्रः अकारोतं ब्रह्माणं परतः इति तेन ब्रह्मणा वाचां समकारयत ॥ यस्य
स्वतएकः परतो मायया अनेकः तस्मात् दुर्विज्ञेयशक्तये केवलं नमइत्याह ॥ सर्गादिति ॥ स्थितिभंगं अस्य जगतः अनुवर्तिनं करोति ॥ इत्याणि
महाभूतानि क्रियाइंद्रियाणि कारकारेवाः चेतनाबुद्धिः आत्माहंकारस्तैः स्वशक्तिरूपैः समुत्पन्नाः समुत्पन्नयानि ह्रस्वाः शक्तयो यस्य प्राणिनां

नूनं वेत्सि समस्तमीहितं जने त्वं मायया दुर्ज्ञेयया कृतात्मभिः ॥ न लक्ष्यसे यत्सकलैककारणं यद्योनेक एकः परतः
स्वतः स्वयं ॥ सर्गादिस्थित्यंतकरं त्वमेव शक्तिभिरिंद्रियक्रियाकारकचेतनात्मभिः ॥ तस्मै समुत्पन्ननिरुद्धशक्तये नमः
परस्मै पुरुषाय वेधसे ॥ सर्वे भवानात्मविनिर्मितं जगद्भूतेन्द्रियांतःकरणात्मकं विभो ॥ संस्थाप्य पायिष्यसि यस्य सार
सातलादस्पृज्जहारांभसस्त्वादिसूकरः ॥ अपां तु पृष्ठे शयिनाव्यवस्थिताः प्रजा भवानद्य रिरंसुः किल ॥ सवीर
मूर्तिः समभूद्धराधरो योऽमां पयस्युग्रसरोजिह्वां पति ॥

धारणार्थं सारसातलादुद्धृत्य हेरांभोप जारज्ञाणोपवृत्तस्समहद्योनयुक्त इति सकरुणामाहद्वाभ्यां ॥ हे अजयः स्पृष्टवान् सएव भवान् स्वनिर्मितं तव पावर
जगत्समस्तं कल्पापयितं आदिसूकरः सन्नामसस्पृज्जहार सएव धराधरो वाराहो ॥ यत्र अपां तु पत स्पृष्ठउपरि सयिना विश्वाधारभूतायामवस्थिताः प्रजा
रक्षितमिच्छुर्वीरमूर्तिः इच्छारूपः समभूत ॥ यएवंभूतः सत्वं पयाधिनिमित्तेमांजिह्वांसहीतिवित्रमित्यर्थः ॥

तस्मादीश्वरचेष्टितं दुर्ज्ञेयमिति केऽप्यन्यायेनोपसंहरंति ॥ नूनमिति ॥ तस्येश्वरस्य गुणाः सर्वज्ञत्वप्रमुखा मायया मोहितं चित्तमेव वर्त्म निर्येषामिति वा तैर्जनैः ईश्व-
राणां हरिभक्तानामेतावद्विहितं न ज्ञायते ॥ किं तु नूनमस्य परमेश्वरस्यैवाद्भुतः परमेश्वरगुणवृत्ते स्योपि न स एव केवलवीतरागो जितेन्द्रियाणां यशः कर्तीति ॥
येते भ्यः यथा वीतरागाणां यशो वर्द्धते तथा चेष्टतां न तु यथेष्टमिति भावः ॥ इति चतुर्थे सप्तदशः ॥ अष्टादशो महावाक्याद्वन्त्यपात्रादिभेदतः ॥ इत्यादिभिस्तत्कार-

नूनं जैनैराहितमीश्वराणामस्मद्विधैस्तद्गुणमर्जमायया न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ॥ ३६ ॥ इति श्री
भागवते महापुराणे चतुर्थस्कंधे दक्षविजये धात्रीनिग्रहः सप्तदशोऽध्यायः ॥ मैत्रेय उवाच ॥ इत्थं दक्षमभिष्टूय हृष्टपाद्मस्कारितार्धं
पुनराहावनिर्धर्मितामस्तस्मात्मानमात्मना ॥ मे नियच्छामि मोमन्युर्निवोधश्चावितं च मे ॥ सर्वज्ञः सारमादत्ते यथा मधुकरो बुधः
अस्मिंल्लोकेथवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धये ॥ तानातिष्ठति यः सम्यगुपायान्पूर्वदर्शि-
तान् ॥ अवरः श्रद्धयोपेतउपेयान्विंदतेञ्जसा ॥ तानन्नादृत्य योऽविद्वानर्थानारभते स्वयं ॥ तस्य व्यभिचरंत्यर्था आरब्धाश्च पुनः पुनः ॥

यशः प्रावद्बुधा श्विति ध्यति ॥ हे अभिमोत्रमोयद्वामोरेव अभिज्ञ मं यथा भवत्येवं मन्युमनियच्छ ॥ आवितं वित्तापितं न यद्वाक्येन नारदः कर्त्तव्य इत्याह ॥ बुधो
हि सर्वज्ञतः सारमादत्ते न पिञ्जीर्णाश्चोषधीरूपायन गृह्णाति ॥ वक्त उपायेन सर्वं सिद्ध्यति नान्यथेत्याह अस्मिन्निति त्रिभिः पुंसां श्रेयसः पुरुषार्थस्य प्रसिद्ध-
ये यस्मिंल्लोके कथादयः अमुष्मिंश्च लोके अग्निहोत्रादयो योगा उपाया दृष्टाः प्रयुक्ताः ॥ अनुष्ठिताश्च पूर्वैर्दर्शितान् ॥ अवरोऽर्वाचीनः अविद्वान् विद्वान् प्रतिवा व्यामि-
चरंति न सिद्ध्यति

स्पष्टं त्वं कुरु पायमाह ॥ इत्येतैः षड्भिः प्रवाहैरिति ॥ राजप्रामान्यमिप्रायेणानुपालितावाचोराधनिवारणात ॥ अनादृतावयत्नप्रवर्तनाभावात ॥ प्रवृत्तार्थे ॥ अनुप्रतिगिलितवता अन्यथा ध्वनत्वं तैर्भुक्ताः न प्रपोष्यं तेन तत्र प्रयत्नाद्यो न मिथ्योक्तिरिति भावः ॥ क्षीणाः जीर्णाः वत्सदोहनेदोहनपात्रदोग्धारं वोप कल्पय ॥ योऽस्मेव पूरयिष्यामि ॥ कृतानामीप्सितमात्रं ऊर्ज्जस्वितं बलप्रदं ॥ अपगतेपि वर्षेन्नौ यथापि पद्यते वर्त्तेतानुप्रसंगादर्थान्तरमाह ॥ तथेति यथा

उदायसष्टोषधयो व्रजन्त्याविशांपते ॥ भुज्यमानामयाद्दष्टा अप्रद्विरघृतवद्भिः ॥ अपालितानाकृताव प्रवद्विर्हि लोकपालकैः ॥
वीरा भूते यत्लोके हं यत्ता येप्रमपोषधीः ॥ नूनं तावीरुधः क्षीणामपि कालेन भूयसा ॥ तत्र दृष्टे न योगेन भवानादातुमर्हति ॥
वत्सं कल्पय मे वीर येनाहं वत्सलातवा ॥ योऽस्मै क्षीरं मया त्वकामा मा न तु तूपं च दोहनं ॥ दोग्धारं च महाबाहो भूतानां भूतभावन
च अन्नमीप्सितमूर्ज्जस्वितं भगवान्वाञ्छते यदि ॥ समां च कुरु मां राजन्देवहृष्टं यथा पयः ॥ अपगतेष्वपि मेघेषु ते उपावर्तेत मे विभो ॥ इति प्रिय
हितं वाक्यं भुवश्रोत्राय भूपतिः ॥ वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ॥ तथापरे च सर्वत्र सारमादद्दते बुधाः ॥ ततोऽन्ये च यथा
कामं दुदुहुः पृथुभाविताः ॥ ऋषयोऽदुदुहुर्देवीमिन्द्रियेष्वथ सत्तम ॥ वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि ॥ कृत्वा वत्सं सुरगणा
इन्द्रं सोममदूदुहन ॥ हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥

पृथुः ॥ एवं सर्वत्र वाक्यपरेपि सारमादद्दतो ब्रह्मकृतमनुवर्णयति ॥ ततोऽन्ये च प्रख्याद्यः पंचरशदुदुहुः पृथुनाभावितां वशीकृतां वाङ्मनः ॥ अवरोधे
वेदग्रहणादिन्द्रियाणां पात्र त्वं सोमं मनश्च वृक्षती वीर्यमनः शक्तिं ॥ ओजः इन्द्रियशक्तिं बलं देहशक्तिं च तत्रैव पयः ॥ राम ॥ कृष्ण ॥ गोपालकृष्ण ॥

ह्वाश्चामेवं वत्सेनालादि मह्यां मधु वाद्याद्दुग्धमिति सौभगं सौदर्यं तन्महितं कथं पितृणार्यम्णा आमपात्रे यत्नेन मृन्मये । अमुद्धृतं दुदुहुः । संकल्पनामयीं अणि
माद्यष्टसिद्धिं ये विद्याधरास्ते पृथ्वेव वत्समेव वत्सं प्रकल्प्य नभसि च पात्रे खेचरत्वादिरूपां विद्यां दुदुहुः । अन्ये च किंपुरुषादयः । अन्तर्धानेनाद्भुतात्मनां संबोधिनां

दैतेया दानवा वत्सं प्रह्लादमसुरर्षभं । विधायादूदुहन् क्षीरमयःपात्रे सुरासवं । गंधर्वाप्सरसोऽधुक्षन्पात्रे पद्ममये पयः । वत्सं विश्वा
वसुं कृत्वा गांधर्वं मधु सौभगं । वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत । आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः । प्रकल्प्य वत्सं
कपिलं सिद्धाः संकल्पनामयीं । सिद्धिं नभसि विद्यां च ये च विद्याधरादयः । अन्ये च मायिनो मायामंतर्धानाद्भुतात्मनां । मयं प्रकल्प्य व
त्सं ते दुदुहुर्धारणामयीं । यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः । भूतेशवत्सा दुदुहुः कपाले क्षतजासवं । तथाहयो दंदशू
काः सर्पा नागाश्च तक्षकं । विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः । पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषं । अरण्यपात्रे चाधुक्षन्मृ
२दा॰ गेन्द्रेण च दंष्ट्रिणः । क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे । सुपर्णवत्सा विहगाश्चरं चाचरमेव च । वटवत्सा वनस्पतयः पृथ
ग्रसमयं पयः । गिरयो हिमवद्वत्सा नानाधातून्स्वसानुषु । सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक्पयः । सर्वकामदुघां पृथ्वीं दुदुहुः
पृथुभाविताम् । ॥

मायाधारणामयीं संकल्पमात्रप्रभवां । भूतेशो रुद्रः दुदुहुः स एव वत्सो येषां । क्षतजं रुधिरं तदेवासवं । अहयो निष्फणाः । दंदशूकाः वृश्चि
कादयः । सर्पाः सफणाः । एवं कद्रूसंततिजा नागाः । बिलपात्रे मुखे । यवसं तृणं गोवृषं रुद्रवाहनं वृषभं । दंष्ट्रिणो व्याघ्रादयः । क्रव्यं मांसं चरं कीटादि
अचरं फलादि । अनुक्तसंग्रहार्थमाह । सर्वे स्वजातीयोऽत्र मुख्यस्तेन वत्सेन । ॥४॥

उपसंहरति ॥ एवमिति ॥ स्वन्नं अभीष्टमन्नं तमेव क्षीरं मे दुदुहुः ॥ दोहः पात्रादिभेदः पृथ्वीधनुष्कोट्या गिरिशृंगाणि चूर्णयन ॥ राज्ञां राजा राजराट् ॥ ग्रामाः दारैरभिमत्यपत्तनाएवमहत्यः पत्तनानि दुर्गाणि विविधानि यथाहुः स्मृतिः ॥ ग्रोहं कं पार्श्वतं वीक्ष्य परिराधन्नं नंतथेति ॥ घोषान् आभीराणां निवासान् व्रजान् गवां निवासान् ॥ शिबिरं सेनानिवासः संस्थानं तत्सहितान् ॥ आकरान् स्वर्णादिस्थानानि ॥ खेटाः कर्षकग्रामाः ॥ खर्वटाः पर्वतप्रान्तग्रा

एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः ॥ दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ॥ ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः ॥ दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः ॥ चूर्णयन्स्वधनुष्कोट्या गिरिकूटानि राजराट् ॥ भूमंडलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥ अथास्मिन्भगवान्वैन्यः प्रजानां वृत्तिदः पिता निवासान्कल्पयांचक्रे तत्र तत्र यथार्हतः ॥ ग्रामान्पुरः पत्तनानि दुर्गाणि विविधानि च ॥ घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान् ॥ प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना ॥ यथासुखं वसन्ति स्म तत्र तत्राकुतोभयाः ॥ इति श्रीभागवते महापुराणे चतुर्थे स्कंधे पृथुविजये अष्टादशोऽध्यायः ॥ पै ॥ ३ ॥ य३वा व ॥ अथादीक्षत राजा तु हयमेधशतेन सः ॥ ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥ तदभिप्रेत्य भगवान्कर्मातिशयमात्मनः ॥ शतक्रतु[illegible] न ममृषे पृथोर्यज्ञमहोत्सवं

माः तेभ्यः ॥ इति चतुर्थे ऽष्टादशः ॥ ऊनविंशेऽश्वमेधांगहयापहरणात्पृथोः ॥ इंद्रं हंतुं प्रवृत्तस्य धात्रा वारणमुच्यते ॥ हयमेधशतेन निमित्तेन अदीक्षत दीक्षितोऽभूत ॥ शताश्वमेधमकरोदित्यर्थः ॥ ब्रह्मावर्ते सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ आत्मनः स्वस्य कर्मातिशयं येन इति श्रुतिः शतं अभिप्रेत्य ज्ञात्वा तदीक्षितं पृथोर्यज्ञमहोत्सवं न ममृषे न सेहे ॥

अतिशयमेवदर्शयति यत्रेतित्रिभिः साक्षादन्वभूयत प्रत्यक्षेणादृश्यत सिद्धादयस्तं हरिमन्वीयुरित्यन्वयेनान्वयः धर्मदुघा हविर्दोग्ध्री धेनुः सती
उहुर्वहन्तिस्म सर्वरसान् क्षीरं दधि च अन्नं च गोरसांश्च भूरिवर्ष्माणो विततानि वर्ष्माणि शरीराणि येषां ते फलादि प्रासूयंत मधुच्युतः मधुस्राविणः सिंधवश्च
तुर्विधं भक्ष्यभोज्यचोष्यलेह्यं च अधोक्षजेशस्य नाथस्य परमोदयोतिवृद्धिर्यस्मिंस्तत्कर्म असूयन् असहमानः प्रतिघातं विघ्नं चकारेत्यर्थः वैन

यत्र यज्ञपतिः साक्षाद्भगवान्हरिरीश्वरः॥ अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः॥ अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः॥
उपगीयमानो गंधर्वैर्मुनिभिश्चाप्सरोगणैः॥ सिद्धा विद्याधरा दैत्या दानवा गुह्यकादयः॥ सुनंदनंदप्रमुखाः पार्षदप्रवरा हरेः॥ कपि
लो नारदो दत्तो योगेशाः सनकादयः॥ तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः॥ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती॥ दोग्धिस्मा
भीप्सितानर्थान्यजमानस्य भारत॥ ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान्॥ तरवो भूरिवर्ष्माणः प्रासूयंत मधुच्युतः॥ सिंधवो रत्नानि
करान्गिरयोऽन्नं चतुर्विधं॥ उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः॥ इति चाधोक्षजेशस्य पृथोस्तु परमोदयं॥ असूयन्भगवानिंद्रः
प्रतिघातमचीकरत्॥ चरमेणाश्वमेधेन यजमानो यजुःपतिं॥ वैन्ये यज्ञपतिं स्पर्द्धन्नपोवाह तिरोहितः॥ तमत्रिर्भगवानैक्षत्त्वरमाणं
विहायसा॥ आमुक्तमिव पाखंडं योऽधर्मे धर्मविभ्रमः॥

न्ये यजुष्पतिं विष्णुं यजमाने सति स्पर्द्धमान इंद्रस्तिरोहितः सन् यज्ञपशुं हृतवान्॥ त्वरमाणं धावंतं॥
आमुक्तः प्रतिमुक्तं पिनद्धं वत्॥ सन्नद्धो वर्म्मितः सज्ज इत्यमरसिंहः पाखंडवेषं कवचमिव गृहीतवंतमित्यर्थः अधर्मे धर्मविभ्रमः धर्ममपीति भ्रांतिक
रोयः॥ तं॥

नमुच्यतिस्म ॥ हतवेदं हंतव्यपरं हननं यत्तं हंतवतत्तस्मै हित्वा तरर्थ्यमुन्नज्ञा विचक्षणदृष्ट्वा उपसृज्य सृष्ट्वा ॥ तेनेतद्भवः समूवखालोष्टपात्रेनिह्निन्नः काष्टकट ॥
कल्तिडुक्तानूपुपानु ॥ हिरण्यनिर्मितानागानायस्यत ॥ रशःनायाहदत्वेनच्छेदाशक्या रसनायाहितमेवोद्धृत्यपूपात्रान्नीतवानित्यर्थः ॥ विभुः समर्थः

अत्रिणा चोदितो हंतुं पृथुपुत्रो महारथः ॥ अन्वधावत तं क्रुद्धो तिष्ठ तिष्ठेति चाब्रवीत ॥ ततो दृष्टाकृतिं वीर्यमेने धर्मं शरीरिणं.
जटिलं भस्मनाच्छन्नं तस्यैवाननमुच्चति ॥ वधार्त्रिकृतं तं भूयो हंतवेत्रिरवोदयत ॥ जहि जतहं नंतानमहेद्विवृद्धाधर्मं ॥ एव
वैन्यहतः प्रोक्तस्त्वरमाणो विहायसा ॥ अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव ॥ सोऽश्वं रूपं तद्धित्वा तस्थौ अन्तर्हितः स्वराट् ॥ वीरः
स्वपशुमुपादाय पितुर्यज्ञमुपेयिवान् ॥ तत्र स्याद्भुतं कर्म विचक्ष्य परमर्षयः ॥ नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो ॥ उपसृज्य तम
महीव्रजं हाराश्वं पुनरिंद्रिः ॥ चषालयूपतश्छन्नो हिरण्यरसनं विभुः ॥ अत्रिः संदर्शयामास त्वरमाणं विहायसा ॥ कपालखट्वां
गधरं वीरो नैनमभ्यधावत ॥ अत्रिणा चोदितस्तस्मै संदधे विशिखं रुषा ॥ सोऽश्वं रूपं च तद्धित्वा तस्थावन्तर्हितः स्वराट् ॥ वीरस्वपशुमुपादाय
पितृयज्ञमथाव्रजत ॥ तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः ॥ यानि रूपाणि जगृहे इंद्रो हयजिहीर्षया ॥ तानि पापस्य खंडानि लिंगं खंड
मिहोच्यते ॥ एवं मिंद्रे हरत्यश्वं वैण्ययज्ञजिघांसया ॥ तद्गृहीतविसृष्टेषु पाखंडेषु मतिर्नृणाम् ॥ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु ॥ प्राये

णसज्जते भ्रान्त्या पेशलेषु च वाग्मिषु
अवद्यं निंदितं रूपं संदृष्टं ताजगृहुस्ते चपाखंडनामानि कक्ष्यादर्शयतियानीतिवद्भवचनेन चान्यान्यपि गृहीता
नीत्युक्तं ॥ तत्स्वरूपेति पाखंडमार्ज्ञाः पश्चान्नाहत्याह ॥ एवमिति ॥ तेजगृहीतेषु पुनर्विसृष्टेषु नग्नजैनारक्तपटबौद्धजटादिशैवेनकापालिकादयः तेषूपधर्मेषु धर्मो
पमेषु धर्म एवायमिति मतिः ॥ सज्जतइति द्वयोरन्वयः पेशलेषु आपाततो रम्येषु वाग्मिषु हेतुक्तिचतुरेषु

मा॰व
५१

शक्रवधोऽभिसंधितं कृतामित्रायं प्रबोधितात्परोगर्भधारत्वम्पस्य वधस्त्वया न युज्यते तदृधं वयं करिष्याम इत्याहुः वयमिह यत्तनाशकं त्वत्कीर्त्यैव हतप्रभ
पिंड्माङ्क्ष्याम होकैः अजातयामेणातवीर्य्येण द्धानमंत्रैरनंतरं चतेतवाहितं तुङ्क्ष्याम हेष्यामः अस्मद्योः अक्रहस्तेयेषां तान् यमिदं यतेन जिह्वामथ
यज्ञेनेष्टाः सर्वैस्तायमतनवः स्तङ्खोभवतीवधार्हेन भवति यद्यस्मायज्ञोनामायमिंद्रो भगवत्स्तुः अवतारस्ततः सप्तमस्त्राकृ सोरुचेयत्नोप्यजा

तदमिंत्रायमगवान्पृथुः पृथुपराक्रमः इंद्रायकुपितोबाणमादत्तोद्यतकार्मुकः तमृत्विजः शक्रवधाभिसंधितं द्विवन्नडुः
प्रेक्ष्य मसत्य इहसं निवारयामासुरहो महामते न युज्यते त्वान्यवधः प्रबोधितात् वयं मरुत्वंतमिहार्थनाशनं ह्वयामहे त्व
वसाहतत्विषं अयातयामोपहवैस्तमग्रये समुद्याजनन्दुद्रवं मतेहितां इत्यामत्यक्रतुपतिविदुरस्यार्त्विजोऽप्यथा स्तुहस्ता
न्नुङ्क्तोऽप्येताक्ष्वयंधः प्रत्यषेधत नवध्योभवतामिन्द्रायज्ञो भगवत्नतुः तजिह्वामथयज्ञेन यस्येष्टास्तनवः स्व
रा॰ तदिदं परपत महत्तधर्म्मव्यतिकरं द्विजाः इंद्रेनानुष्ठितं राज्ञः कर्मैतद्धि जिह्वामता पृथुकीर्त्तेः पृथोर्भूयात्तद्ये
कोनशतक्रतुः अलंतेक्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ॥ ४ ॥ गोपालसहाइरहना ॥ गोपालो

यतामस्यामार्द्धैः हरणोऽस्मतत्क्वापभुवानरमित्युक्त्वात अतोवलीयमातेन सत्यमेव कर्त्तव्यं अन्यथा भूयः पाखंडधर्मत्ववात्यायेनाह तदिद
मिंद्रेनानुष्ठितामहस्त्वायं पश्यता किमित्यपेक्षायामाह धर्मस्यव्यतिकरं विपर्ययं पाखंडपथं तर्हि किमत्र युक्तमित्यत आह पृथुकीर्त्यैरिति एकेनोन एक
शतं यस्मिन्स्ताहशः क्रतुः प्रयोगः पृथोर्भूयात् पृथुरितिपाठे एकोनशतक्रतवो यस्य तादृशोऽपि इह मेङ्गात्पृथुकीर्तिर्भूपादित्यर्थः तदेवमुक्तजः प्रत्युक्ताः पृथुर्य ५१
स्यैवाहमलमिति ॥

आत्मनेवात्मनेमहेन्द्रोपिशेषंकर्त्तुंनार्हतीतितत्रहेतुः उभावपीति ॥ तथापिक्रातस्मदापिनैवध्यायतेप्रत्याह ॥ आस्मिन्पतविद्वेवितीमास्मरुयाः यद्यस्माद्दे
वंहतेकार्य्यकर्त्तुंध्यायतोमनःतन्निश्चितंअतितुष्टंस्मरंध्यंतमोमोहंविशतिलभते ॥ अतएवतंस्कृत्वविरमत ॥ नविद्वः किंननिवार्य्यतेअतआह ॥ य
तोदेवेषुउग्रग्रहोभवतीति ॥ यत्रकृतोइंद्रुउग्रग्रहाकृतमनर्थयस्येत्याह ॥ एभिरिंद्रेनोपसृष्टेरपिहिनेद्रोविमिवित्वतापकर्षकेपंइंद्रस्तेः स्मृउग्रमातीति

नैवात्मनोमहेंद्रोपशोषमाहन्तुमर्हति ॥ उभावपिहिमद्गंतउग्रमस्त्रोकविग्रहो ॥ मास्मिन्महाराजकृतान्यविवेकं निशा
मयंस्त्वद्वयआहतात्मा ॥ यद्ध्यायतोदेवहंतंतुकर्त्तुंमनोनितिंतुष्टंविशतेतमोधी ॥ कृतोद्विरमतापेयदेवेषुउग्रग्रहः ॥ य
स्मिव्यतिकरोयत्रपाण्डवेंद्रिइंद्रनिर्मितैः ॥ एभिरिंद्रोपसृष्टैःपाण्डवेहरिमिर्जनं ॥ हीयमानंविवहानंयस्तेयस्तंधृग
स्वप्रष्ठ ॥ भवान्यरित्रातुमियावतीर्णोधर्म्मजनानांसमयानुरूपं ॥ वेनापवाराद्द्रवलुप्तमद्यतदेहतोविस्मृकलापिवे
नं ॥ सत्वविसृष्टपासमवेप्रजापतेसंकल्पनंविश्वसृजांपिपीष्टहि ॥ ऐंद्रीचमायायाद्धर्म्ममातारंप्रचंडपाण्डवपथ्यंप्रभोजहि
मे ॥ य ॥ उ ॥ व ॥ इत्थंसलोकगुरुणाममासदिष्टोविशांपतिः ॥ तथाचकत्वावात्सल्यमद्योनापिवसंदधे ॥

प२

तथायज्ञादुद्धृतानितथातेनसृष्टेःततोममकिमितिचेत ॥ तत्राह ॥ भवानितिद्वाभ्यांसाराख्येयोगारिनानाविद्वान्नानुरूपधर्म्मवेनस्यान्यायात ॥ लुप्तंपरित्रा
तुतद्विप्लोःकलेवत्वमवतीर्णोसि ॥ अस्यविश्वस्येयादृवंविवार्य्यपैहत्यादितोमितेषांविश्वसृजांसंकल्पपिपीष्टहिआर्षःप्रयोगः पूरयेत्यर्थःप्रचंडोयःपा
ण्डवमार्ग्गः ॥ ऐवेन्द्रीमायाः धर्म्मजननीतांजहि ॥ तथाकृत्वायज्ञाग्रहंहित्वावात्सल्यंस्नेहंचकृत्वाइंद्रेणसहसंधानंचकृतवान्

कृतमवभृथसंबंधिस्नानं येन तस्मै तु शनावाकां त्वयेति ॥ चतुर्थे एकोनविंशः ॥ विंशे तु विष्णुना प्राज्ञाज्ञात्स्थयोर्विहितेतु शासनं ॥ वरदानप्रसंगेन प्रीतिमात्मनो न्यरूपयत ॥ महत्वं तस्य लोकमिन्द्रेण सह वर्ण्यमानः ॥ आत्मानं त्वां न माकारयतोगुप्त्यापर्हिय स्मात्कलेवरमात्मानं भवति ॥ अतस्तत्र दृष्टिमानेन भूतानि नाभिद्रुह्यंति ॥ अविद्यास्वरूपात्तातः कामः ततः कर्मितेणारब्धं इति विद्वान्त्र तदेव प्रतिबुद्ध आत्मनमात्मस्थितं वानुषज्जते ॥ तथापि पितृत्वादिममत्वेन भूतद्रोहेणव

कृतावभृथस्नानाय पृथवे भूरिकर्मणे ॥ वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥ विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः ॥ आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ॥ त्वयाहूता महाबाहो सर्व एव समागताः पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥ इति श्रीभागवते महापुराणे चतुर्थे स्कंधे पृथुविजये एकोनविंशोध्यायः ॥ मैत्रेय उवाच ॥ भगवानपि वैकुंठः साकं मघवता विभुः ॥ यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक् तमभाषत ॥ श्रीभगवानुवाच ॥ एष तेकार्षीद्भंगं हयमेधशतस्य ह ॥ क्षमापयत आत्मानममुष्य क्षंतुमर्हसि ॥ सुधियः साधवो लोके नरदेव नरोत्तमाः ॥ नाभिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरं ॥ पुरुषा यदि मुह्यंति त्वादृशा देवमायया ॥ श्रम एव परं जातो दीर्घया वृद्धसेवया ॥ अतः कायमिमं विद्वानविद्याकामकर्मभिः ॥ आरब्धं इति नैवास्मिन्प्रतिबुद्धोनुषज्जते ॥ असंसक्तः शरीरेस्मिन्नमुनोत्पादिते गृहे ॥ अपत्ये द्रविणे वापि कः कुर्यान्ममतां बुधः ॥ एकः शुद्धः स्वयंज्योतिर्निर्गुणोसौ गुणाश्रयः ॥ सर्वगोनावृतः साक्षी निरात्मात्मात्मनः परः ॥ य एवं संतमात्मानमात्मस्थं वेद पूरुषः ॥ नाज्यते प्रकृतिस्थोपि तद्गुणैः

संगो भवेत्तत्राह ॥ असंसक्त इति प्रतिबोधक्रमं विवृण्वन्देहे तु संगाभावमाह एक इति द्वाभ्यां ॥ असावात्मनो देहात्परोभिन्नः तत्र न यथा स मयि स्थितः ॥
देहभेदमेवं साधयति ॥ एक इति नवभिः पदैः देहो हि बालयुवादिभेदादनेकाः मलिनश्च जडश्च सगुणश्च विकारणाभूतगुणाश्रितश्च पराछिन्नश्च रहा
श्रितिराहृतश्च दृश्यश्च सात्मा च आत्मा तु नैवं अतो भिन्नः ॥ आत्मस्थं देहस्थमपि देहस्थापि तद्विकारैर्न लिप्यते यतो मयि ब्रह्मणि स्थितः ॥

ऽयमवस्था कस्योत्पद्यत इत्यपेक्षायामाह । यः स्वधर्मेणेति द्वाभ्याम् । यर्हि विशदाशयः प्रसन्नमनाः तदा परित्यक्तगुणः सम्यग्दर्शनो भूत्वा
शान्तिमश्नुते शान्तिमेवाह । मे मम समवस्थानं मन्निष्ठत्वेनावस्थानमेव ब्रह्म तदेव कैवल्यमश्नुते । सम्यग्दर्शनमेवाह । उदासीनमेवात्मानं द्रष्टृत्वेन ज्ञान
क्रियात्मनां देहज्ञानकर्मेन्द्रियमनःप्राणमध्ये तिष्ठन्तमेव स्थितमात्मानं यो वेद । संसारिणः कथं कूटस्थत्वमत आह । भिन्नस्य लिङ्गस्य देहस्य गुणप्र
वाहः संसारः भिन्नत्वे हेतुः द्रव्याद्यात्मकस्यात एव चेतनाविद्वान्सः अतो दृष्टास्वपि आपत्सु हर्षशोकादिभिर्न विक्रियन्ते एवंविधः सूरिः अतः सुखे दुः

यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः । भजते शनकैस्तस्य मनो राजन् प्रसीदति ॥ परित्यक्तगुणः सम्यक् दर्शनो विश
दाशयः । शान्तिं मे समवस्थानं ब्रह्म कैवल्यमश्नुते ॥ उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनां । कूटस्थमिममात्मानं यो वेदा म
प्नोति शोभनं ॥ भिन्नस्य लिङ्गस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः । दृष्टासु संपत्सु विपत्सु सूरयो न विक्रियन्ते
मयि बद्धसौहृदाः ॥ समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेन्द्रियाशयः ॥ मयोपक्लृप्ताखिललोकसंयुतो वि
धत्स्व वीराखिललोकरक्षणं ॥ श्रेयः प्रजापालनमेव राज्ञो यत्सांपराये सुकृतात् षष्ठमंशं । हर्तान्यथा हृतपुण्यः प्रजानामरक्षि
ताकरहारोऽघमत्ति ॥

खे च समः समानाः उत्तममध्यमाधमा यस्य जितानीन्द्रियाणि आशयश्च येन सत्वं अखिललोकरक्षणं विधत्स्व । कथमेकेन म
या कर्तुं शक्यं तत्राह । मयैव स्वरोपक्लृप्ताः संपादिता ये अखिला लोका अमात्यादयस्तैः संयुतैः । ननु राज्ञां दण्डादि पापेत्तं अत एतत्पोषणं न्यायेन करिष्या
मीति चेत्तत्राह श्रेय इति । यद्यस्मात् सांपराये परलोके प्रजाभिः कृतात् सुकृतात् षष्ठमंशं हरति । अराज्ञो दोषमाह । अन्यथा प्रजाभिर्हतपुण्यः सन् प्रजाः
प्रजानामरक्षिता पापं भुङ्क्ते । अन्यथेतस्य विवरणं । करहारः सन्नरक्षिता चेत् ॥

भा० ४
५२

एवं च मोहोऽप्यनायासेन प्रविष्यतीत्याह द्विजाग्र्याणामनुमतस्त्वालोचनानुवृत्तश्च परंपराप्राप्तो यो धर्म्मः स एव प्रधानं अर्थकामादिकोऽन्यस्मात् सांसारिकोऽयस्य अन्यतमः अतिशयेनान्यः धर्म्मादिषु नाशक्त इत्यर्थः एकपद्यपाठे धर्म्मप्रधानानामन्यतमो अर्थकामौ यस्येत्यर्थः अस्याः पृथिव्याः अविता सन् अल्पकालेन गृहागतान्सनकादीन्द्रक्ष्यसि अनुरक्तो लोको यस्मिन्सः मत्तः मन्नः स्वकाशात् किंचित् वरं वृणीष्व गुणाः शमादयः शीलं निर्म्मत्सरत्वादि स्वभावस्तै

एवं द्विजाग्र्यानुमतानुवृत्तधर्म्मप्रधानोऽन्यतमोऽवितास्याः ॥ ह्रस्वेन कालेन गृहोपयातान्द्रष्टासि सिद्धाननुरक्तलोकः ॥ वरं च मत्कंचन मानवेंद्र वृणीष्व तेऽहं गुणशीलयंत्रितः ॥ नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यः समचित्तवर्त्ती ॥ मै ॥ उ ॥ च ॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् ॥ अनुशासित आदेशं शिरसा जगृहे हरेः ॥ स्पृशंतं पादयोः प्रेम्णा व्रीडितं स्वेन कर्म्मणा ॥ शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥ भगवानथ विश्वात्मा पृथुनोपहृतार्हणः ॥ समुज्जिहानया भक्त्या गृहीतचरणांबुजः ॥ प्रस्थानाभिमुखोऽप्येनमनुग्रहविलंबितः ॥ पश्यन्पद्मपलाशाक्षो न प्रतस्थे सुहृत्सतां ॥

रहं यंत्रितः वशीकृतः तत्र हेतुः हि ते सम्यक् मखादिभिर्नाहं सुलभः यतः समं चित्तं येषां तेष्वेव वर्त्ती तंशीलं यस्य सोऽहं तमापयितुं पादयोः स्पृशंतं स्वेन कर्म्मणा स्वापहरणेन व्रीडितं प्रेम्णा परिष्वज्य भगवान्प्रस्थानाभिमुखोऽप्यनुग्रहेण विलंबितः सन् प्रतस्थे प्रयाणं न कृतवानिति द्वयोरन्वयः कथंभूतं उपहृतं अर्हणं यस्मै समुज्जिहानया समुद्गच्छन्त्या वर्द्धमानया भक्त्या गृहीते चरणांबुजे यस्य पद्मपलाशवदक्षिणी यस्य तथाभूतः सन्नपत्रं पृथुं पश्यन् ॥

राम
५२

भगवतस्तत्कृपातिरेकमुक्त्वा तस्य भक्त्युद्रेकमाह स आदिराज इति द्वाभ्यां ॥ बाष्पविक्लवत्वेन तूष्णीमवस्थितः सन्नमुं हरिं हृदोपगूह्याधात धृतवान् ॥ अतृ
प्तयोर्दृशोर्गोचरं विषयभूतं पदा क्षितिं स्पृशन्तमित्यनेन भावः पदाम्बुजं स्पृशति ॥ अतः कृपापरवशोऽनन्तं हरिरात्मानं विस्मृतवानिवेति सूचितम् एवं स्ख
लनपरिहारा एव गाढस्पर्शोऽत्र तेन स्कंधे विन्यस्तहस्ताग्रयेनतं ॥ वरं वृणुष्वेत्युक्ते तदसहमान आह ॥ हे विभो वरदानां ब्रह्मादीनामीश्वरात्तव प्रदान
त्वत्तत्वतः सकाशाद्बुधः कथं वरान् वृणीते कीदृशान् गुणैर्विक्रियत इति गुणविक्रियोऽहंकारः स एवात्मा येषां तेषां ब्रह्मादीनां संबंधिनं देहाभि

स आदिराजो रचिताञ्जलिर्हरिं विलोकितुं नाशकदश्रुलोचनः ॥ न किंचनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः ॥
अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषं ॥ पदा स्पृशन्तं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरङ्गविद्विषः ॥ पृ
थुरुवाच ॥ वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनां ॥ ये नारकाणामपि सन्ति देहिनां तानीश कैवल्यपते वृ
णे न च ॥ न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणाम्बुजासवः ॥ महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥

मानिनं ॥ भोग्यानिति वा तथाचे बुध एव न भवतीत्यर्थः ननु गुणातीतत्वादपीत्याह ॥ ये इति ॥ बुध एवाहमपि न वृणे इत्यनेन निषेधार्थश्चकारः ॥ कैवल्यपत इति
संबोधनं कैवल्यं च दास्यामीति माशंकीत्याह नेति ॥ महत्तमानामन्तर्हृदयान्मुखद्वारेण निर्गतो भगवत्पदाम्भोजमकरन्दोपशः ॥ श्रवणादिसुखं यत्र नास्ति
तादृशं चेत् ॥ कैवल्यं तर्हि तत्क्वापि कदाचिदपि न कामये ॥ तर्हि किं कामयसे तदाह ॥ यदा: श्रवणाय कर्णानामयुतं विधत्स्व न त्वेकोऽप्येवं न वृतवान् ॥
किमन्यत्किं वृणे इत्याह ॥ एष मे वरः ॥

भा॰द

५५

ननुतर्हिकैवल्याभावेरागद्वेषव्याकुलानांभक्तिसुखमपिनस्यादित्याशंक्याह ॥ सइति ॥ भवत्पदांभोजसुधायाःकणोलेशःतन्मात्रंवधीयोनिलः ॥ सए वहूनहपिकिंविद्यशः ॥ श्रवणमात्रमित्यर्थः विस्मृतंतत्ववर्त्मयैःकुयोगिभिस्तेषामपिउभिस्मृतिंआत्मतत्वंवितरति अतोनखलुभक्तानांरागादिसंभवः ॥ अतोनोऽस्माकंसारग्राहिणामन्यैर्वरैरलंभक्तारेवमोक्षादिसर्वसद्भावोमरभावादितित्यर्थः ॥ ननुभक्तिरुक्तिफलेवअतःफलंविहाय साधनेभवतःकोयमाग्रहइत्याशंक्याह ॥ हेइहअत्रवंमंगलकीर्त्तेतेशिवंयशः ॥ सतांसंगमेयःसकृदपियदृच्छयापिउपशृणोतिगुणज्ञश्चेत ॥ सःपशु

सउत्तमश्लोकमहन्मुखच्युतोभवत्पदांभोजसुधाकणानिलः स्मृतिंपुनर्विस्मृततत्ववर्त्मनांकुयोगिनांनोवितरत्यलंवरैः ॥ यशः शिवंसुश्रवआर्यसंगमेयदृच्छयावोपशृणोतितेसकृत ॥ कथंगुणज्ञोविरमेद्विनापशुंश्रीर्यत्प्रवव्रेगुणसंग्रहेच्छया ॥ अथाभजे त्वाखिलपूरुषोत्तमंगुणालयंपद्मकरेवलालसः ॥ अप्यावयोरेकपतिस्पृधोःकलिर्नस्यात्कृतत्वच्चरणैकतानयोः ॥ ॥

विनाऽन्यःकथंविरमेत ॥ गुणातिशयंसूचयति ॥ श्रीर्यत्रयशएवप्रकर्षेणवृतवतीगुणानांसर्वेष्टपुरुषार्थानांसंग्रहस्वस्मिन्समाहारस्तदिच्छयाअतो ॥ लक्ष्मीरिवान्यवरत्यागेनत्वमिवाहंभजेइत्याह ॥ अथेति ॥ लालसःउत्कःसन्कर्मणिक्रियमाणेयथेन्द्रेणसहकलिःएवंभक्तावपिकिंलक्ष्म्यासह ॥ कलिःस्यादितिवितर्कयति ॥ एकस्मिन्पत्यौस्पर्द्धमानयोरावयोरपिकिंकलिर्नस्यादितिकाक्वावितर्कः ॥ नत्वपर्यायेणासेवायांनस्यात ॥ नैवंकृ तत्वच्चरणयोरेवैकतानःमनोविस्तारोययोस्तयोः ॥

राम

५५

भवन्तु वा कलिस्तथापि भजेयमेवेत्याह ॥ जगज्जनन्यां वैषम्यं विरोधः स्यादेव तत्र हेतुः यस्याः कर्म्मिणां नः समीहितं ॥ इत्थं भवति तथापीह विरोधे
सत्यपि मानवस्त्वापि तव पक्षपात एव स्यादित्याह ॥ फल्गुत्वज्ञमपि त्वं वज्रं करोषि ॥ यतो हीनेभ्यवत्सलः त्वे त्वं नूप एव रतस्मात्तया किं प्रयोजनं तानाडि
यम इत्यर्थः यतस्त्वं दीनवत्सलः ॥ अत एव निष्कामास्थ यत्तानात्तरन मपि त्वां भजंति ॥ कथंभूतमायायाः गुणानां विभ्रमो विलासस्तद्वोरयः ॥ कार्य्यमिति
रत्नोयमित्यस्तं ॥ ते किमर्थं भजंतीत्याह ॥ भवत्पदारविन्दस्मरणात् विना त्वमेषां निमित्तं फलेन न विघ्नः वैः प्रलोभनं वक्तृपालो ह्यव्याहतचित्तमित्यर्थयेनाह

जगज्जनन्यां जगदीश्वरे वैषम्यं स्यादेव यत्कर्म्मिणां नः समीहितं ॥ न करोषि फलवत्सुहृद्दीनवत्सलः त्वयेव विधिस्ते मिरतस्य किं तया ॥ भजंत्य
थ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयं ॥ भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥ मन्ये गिरं ते जगतां वि
मोहनीं वरं वृणीष्वेति भजंतमात्थ यत् ॥ वाचा नु तंत्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः ॥ त्वन्मायया ह्यात्मज न ईश पी
स्वयं डितो यदन्यदास्माह्वेस्मतोस्मनोऽधः ॥ यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुं ॥ मै च पर व ॥ इत्यादि राजेनेव
तः सविस्मृदकृतमाह राजन्नपि भक्तिरस्तु ते ॥ दृष्ट्वेदृशी धीर्मयि ते कृता यया मायां मदीयां तरतीति मृदुः स्त्वजा ॥ तत्त्व कृदम्पयादिष्टमय
भक्तः प्रजायते ॥ सदा देशकरो लोकः सर्वत्राप्नोति शोभनं ॥ ४ ॥ गोपाल कृष्णायनमः ॥ एमरकृष्ण

समहत्य इति ॥ तुच्छो होते वाचा तंत्या यादि जनोऽयं अमिताः सुवद्ध स्यात्तर्हि उनः पुनः फले मोहितः सन् कथं कर्म्म करोति ॥ त्वन्माययाखण्डितस्सत्वया उनः ख
ण्डितं न कर्तव्यं किंतु हितं चेष्टितव्यमित्याह ॥ त्वन्माययाऽज्ञातात्मनः त्वत्तः खण्डितः पृथक्कृतः यद्यतो यत्सत्त्रादिकामाशास्ते अतः त्वयं अपि ताप्रिता पितए
व हितं चेष्टितुमर्हसि ॥ ॥ गोविंदकृष्ण

वाग्विनम्राञ्जलिभिर्भक्तितः पूजिताः सन्तः वैकुण्ठं तु गताः । पार्षदाश्च अदृष्टाय लोचनपथिक्रान्ताय सन्दर्शितः तस्मात् आलापेन तस्मै ॥ इति चतुर्थे विंशः ॥ एक
विंशे तु पृथुना यज्ञानामनुशासनं ॥ महात्मने द्रुतादीनां महाप्रश्नमिवर्णयते ॥ भुंजञ्याविशेषकं तत्पुरं मनुवर्णयति ॥ मौक्तिकैरिति द्विभिः ॥ वंदना

मैत्रेय उवाच ॥ इति वैन्यस्य राजर्षेः प्रतिनंद्यार्थवद्वचः ॥ पूजितोऽनुगृहीत्वैनं गंतुं चक्रेऽच्युतो मतिं ॥ देवर्षिपितृगंधर्वसिद्धचारणपन्नगाः ॥ किंनराप्सरसो मर्त्याः खगा भूतान्यनेकशः ॥ यज्ञेश्वरधिया राज्ञा वाग्विनाञ्जलिभक्तितः ॥ सभाजिता ययुः सर्वे वैकुंठमनुगतास्ततः ॥ भगवानपि राजर्षेः सोपाध्यायस्य वाच्युतः ॥ हरन्निव मनोऽमुष्य स्वधाम प्रत्यपद्यत ॥ अदृष्टाय नमस्कृत्य नृपः सन्दर्शितात्मने ॥ अव्यक्ताय च देवानां देवाय स्वपुरं ययौ ॥ इति श्रीभागवते महापुराणे चतुर्थे स्कंधे विंशोऽध्यायः ॥ मैत्रेय उवाच ॥ मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः ॥ महासुरभिभिर्धूपैर्मंडितं तत्र तत्र वै ॥ चंदनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् ॥ पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिर्भिरर्चितं ॥ सवृंदैः कदलीस्तंभैः पूगपोतैः परिष्कृतं ॥ तरुपल्लवमालाभिः सर्वतः समलंकृतं ॥ प्रजास्तं दीपबलिभिः संभृताशेषमंगलैः ॥ अभीयुर्मृष्टकन्याश्च मृष्टकुंडलमंडिताः ॥ शंखदुंदुभिघोषेण ब्रह्मघोषेण चर्त्विजां ॥ विवेश भवनं वीरः स्तूयमानो गतस्मयः ॥ पूजितः पूजयामास तत्र तत्र महायशाः ॥ पौरान् जानपदांस्तांस्तान् प्रीतः प्रियवरप्रदः ॥ स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान्महत्तमः ॥ कुर्वन् शशासावनिमंडलं यशः स्फीतं निधायारुरुहे परं पदं ॥

गन्धैर्हस्तोयैर्नोर्ईरथ्याश्चत्वराणि यत्र तत् ॥ तोकैर्हिरण्मयैः अंकुरैरितिवा ॥ अर्चिर्भिर्दीपैः संभृतानि अशेषाणि मंगलानि दध्यादीनि यैः ॥ सहस्रभिजगुः मृष्टाः
ज्वलाकन्याश्च गतस्मयो निरहंकारः ॥ प्रियान्वरान्ददातीति तथा गुणैर्महान् अत एव महत्तमः पूज्यतमः ॥

गुणौघैर्विजृंभितं जृंभितं गुणौघैः षड्भिः सभाजितं सभ्यैस्तं यशो गृणन्तमर्चयन्प्राह ॥ सदस्पतेरिति ॥ कथं लब्धान्यशेषसुरार्हणानि महिमानि येन सः किमकरो-
दिति शेषः ॥ अत्र वैण्यो स्वकामाविः कुर्वन्प्रार्थयते ॥ कोन्विति ॥ यस्य विक्रमः पृथ्वीदोहनं तस्य ॥ उच्छिष्टमल्पं कामं तत्तस्य कर्म वदेत्याशवीनकर्मभिः प्रा-
रब्धानेव बुभुजे न तु भोगान्प्राप्य कर्माणि करोति ॥ न त्वपि भोगेन पुण्यक्षयं नेच्छया न तु हातुं स्वामज्ञात्वेत्यर्थः ॥ अस्खलितः अप्रतिहत आदेशः आज्ञा यस्य

सूत उवाच ॥ तदादिराजस्य यशो विजृंभितं गुणैरशेषैर्गुणवत्सभाजितं ॥ क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणन्तमर्चयन् ॥ विदुर उवाच ॥ सोभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः ॥ बिभ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदुहे गां ॥ को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः ॥ लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धं ॥ मैत्रेय उवाच ॥ गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन् ॥ आरब्धानेव बुभुजे भोगान्पुण्यजिहासया ॥ सर्वत्रास्खलितादेशः सप्तद्वीपैकदंडधृक् ॥ अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥ एकदासीन्महासत्रदीक्षा तत्र दिवौकसां ॥ समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ॥ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः ॥ उत्थितः सदसो मध्ये ताराणामुडुराडिव ॥ प्रांशुः पीनायतभुजो गौरः कंजारुणेक्षणः ॥ सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ॥

सप्तसु द्वीपेष्वेक एव दंडं धारयतीति तथा सर्वत्रैकित्रेत्याह ॥ ब्रह्मव्यतिरेकेणाच्युतगोत्र-
प्रवर्तकतत्स्वीयेषां वैष्णवानां तद्व्यतिरेकेण च ॥ एकदा तस्य महासत्रदीक्षा आसीत् ॥ तत्र देवानां समाजश्चासीदित्यर्थः ॥ तस्मिन्नर्हत्सु स्वर्चितेषु सत्सु स-
दसो मध्ये उत्थितः सन्समं ततः समेक्ष्यतेति षष्ठश्लोकेनान्वयः ॥ प्रांशुः उन्नतः पीनावायतौ भुजौ यस्य कंजवदरुणे ईक्षणे यस्य शोभनाः द्विजाः स्मितं यस्य

भा॰ब
५६

व्यूढं विस्तीर्णं वक्षो यस्य वलीभिस्त्रिभिर्वल्गु मनोहरं दलवत तत्र्यधोग्रमश्वत्थपत्रमिवोपरि विस्तृतमधस्तात्संकुचितमुदरं यस्य सः आवर्त्तवत्रिस्तानाभिर्य्य
स्य कांचनवदुज्वलावूरू यस्य उरस्रोउत्रताश्रोणी पीना यस्य सः हस्तास्त्रतेव कास्त्रामितास्त्रमूर्द्धजा यस्य सः कंठस्त्रिरेखांकितो कंधरा यस्य सः परिधीयत इति परिधानं तथोपवी
यज्ञोपवीतं कृत्वा नियमेन निमित्तेन न्यस्तानि त्यक्तानि भूषणानि येन सः अत एव तैरनावृतत्वाद्धाजितास्त्र शेषगात्रेषु श्रीस्वाभाविकी शोभा येन कृतानुविताभि

व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः । आवर्त्तनाभिरोजस्वी कांचनोरुरुदग्रपात् । हस्तस्वक्रमितस्निग्धमूर्द्धजः कंबुकंधरः ।
महाधनेदुकूलाग्र्यपरिधीयोपवीयवान् ॥ व्यंजिताशेषगात्रश्रीर्नियमेन्यस्तभूषणः ॥ कृष्णाजिनधरः श्रीमान्कुशपाणिः कृतो
८ वितः ॥ शिशिरस्निग्धताराक्षः समेक्षतसमंततः ॥ उविवानिमुद्दीशः मदः मदर्षयत्रिव ॥ बाहुचित्रपदस्रस्तां मृष्टं गूढमवि
क्लवं ॥ ए जो वाव ॥ सम्प्याः स्रणतमंडवः साधवोयेस्हागताः ॥ सत्स्वजिता स्वभिद्दंसी मावेद्यस्वमनीषितं ॥ अहं दंडुधरोधा
त्रा प्रजानामिहयोजितः ॥ रक्षिता वृत्तिदः स्वेषु सेतषस्थापिता ऽथकु

कृष्णाजिनधरः श्रीमान् ... शिशिरे संतापहरे स्निग्धे वतारे यस्य ये नेत्रे तेः नृणाय सदृशं वक्ष्यमाणं वाक्यमुक्तवी अस्ववानुओत्रप्रियं पवित्राणि पदानि यस्मिन् ॥ अस्तां पत्रशास्त्र
मृष्टं मृदु गूढं गंभीरार्थं अविक्लवं अव्याकुली भाषणो हेतुः ॥ धर्म्मजिता स्वभिः सत्स्वमनीषितं मावेद्यं वक्तव्यं ॥ अतः प्रजानां शाशनमविरोजिता
यैर्क्रियते नतु स्मत्प्रतिधर्म्मप्रवचनमितिभावः ॥ दरानीप्रजाः शिक्षयिष्यन्प्रजामिरक्षणादिकं ममावश्यकमित्याह ॥ अहमिति त्रिभिः ॥ उथकृते भस्थापयिता

राम
५६

इष्टं कृ॥ आर्षकार्म्मसाद्गीः स्त्रुतो यस्त्रनुष्यति॥ तस्य वेदवादिनो मामलोकानाकं प्रजारक्षणाद्यनुष्ठानान्नेलोकामेस्तुः कथंभूताः कामानामसम्यक्
देहः पूर्णायेत॥ अन्यथा तन्निष्ठं स्यादित्याह॥ यइति॥ शमलं पापं॥ भगोमेस्त्वर्ग्यं॥ तत्तस्माद्धे प्रजाः भर्त्ता मममपिंडार्थं पिंडदानवत्परलोकहितार्थं हु
कार्य्यमेव कुरु तद्धर्म्ममेवाऽनुतिष्ठेत अधोक्षमेधीर्य्येषां तादृशाः मंतोवाहरे वार्यणां दृष्टेत्यर्थः॥ अनुग्रहोऽकृतोभवेदितिशेषः शास्त्रैः शिक्षापितुः अ

तस्मान्मे तदनुष्ठानाद्यदाङ्ग ब्रह्मवादिनः॥ लोकाः स्युः कापमेदेहा यस्य तत्रष्यतिविस्रष्टकृ॥ यत उद्धरेत्कारं राजा प्रजा धर्म्मेष्वमिष्कयत
प्रजानां शमलं भुंक्ते भगं च त्वजहातिसः॥ तत्प्रजाभर्त्तिपिंडार्थं स्वार्थमेवानुस्यपवः॥ कृतहताधोक्षजधियायास्त्वर्हिमेनुग्रहः कृतः
यूयं तदनुमोदध्वं पितृदेवर्षयो मलाः॥ कर्त्तुः शास्त्रानुसारात्त्सत्कालंयस्त्रैत्यतत्फलं॥ अस्तियज्ञपतिर्नामकेषां विदर्हसत्तमाः॥ इहा
मुत्र वलङ्घ्यं तेज्योत्स्नावंत्यक्षाविदुवः॥ मनोहत्तानपारस्यक्षवस्यापि महीपते॥ प्रियव्रतस्य राजर्षे रंगस्यास्यात्यितुः पितुः॥ ईदृशा
नमथानेषांअजनस्य च भवस्य च॥ यज्ञांशस्य बलेस्त्वापि कत्यमहिस्त्विगता भृता

नुतान्तरनुमोदितुस्त्वप्रते परलोके यत्फलं तत्त्वल्पं कर्म्मकर्त्तव्यमित्यनुमोदामहे न तु वाह्यदेवर्ष्यणीयमितिवेनारिमिहत्सरनंगीकारादित्येवं वादिनः शौ
ः मंबोधयन्नाह॥ हे अर्ह सत्तमाः यज्ञपतिर्नाम परमेश्वरः केषांचिन्मते नास्ति॥ तथापि विप्रतिपन्नैर्न तन्निहि ह्रित्याशंक्य जगद्वैचित्र्यान्यथानुपपत्ते
माणप्रति॥ इहामुत्र च ज्योत्स्नावत्यः कान्तिमत्यः ध्रुवाभोगासमयाशरीराणिव॥ नविदं कर्म्म वैचित्र्यादेवमेत्स्यति॥ तथापि विद्वद्भिरनुभवेनेश्वरासिद्धिरिता
ह॥ मनोहारितिविभिः॥ अस्मात्पितामहस्यागमस्य कृत्यमस्ति॥ अवश्यं कर्म्मफलदाता भाव्यमितितेषां मतमित्यर्थः॥

मृत्योर्रौहित्यादीन्त्वेनारीत्विनाधर्म्मेविमोहितान् अतः शोच्यान् ननुकर्म्मैवफलंदास्यतिविष्णुरेशगतावदेवताकिंपरमेश्वरेण तत्राह वर्गोः त्रिवर्गः
स्वर्गोधर्मस्यफलं अपवर्गोमोक्षः तेषामेकात्म्येनैककारूप्येणसर्वांशगतेनहेतुनातत्रापिप्रायेणाहेतुनाअयंभावः नतावज्जडस्यकर्मणःफलदातृ
त्वंघटतेनवान्यासांदेवतानांस्वातंत्र्यंअंतर्यामिश्रुतेः नवतदाकर्म्मसाम्येफलतारतम्येज्ञावित्तदस्तिद्वित्वस्यसंभवति अतःस्वतंत्रेणकर्त्तुमकर्त्तुमन्यथा
कर्त्तुंसमर्थेनपरमेश्वरेणभाव्यमितिकिंचजीवानांमोक्षःपरमेश्वरएवनान्यासांदेवतानांतासामपिजीवत्वाविशेषादित्याशयेनाहत्रिभिःयस्यपादयोः से

रोहित्यादीनतेमृत्योः मोच्यान्धर्म्मविमोहितान् वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना । यत्पादसेवाभिरुचिस्तप
स्विनामशेषजन्मोपचितंमलंधियः सद्यःक्षिणोत्यन्वहमेधतीसतीयथापदांगुष्ठविनिःसृतासरित् विनिर्धुताशेषमनो
मलःपुमानसंगविज्ञानविशेषवीर्यवान् यदंघ्रिमूलेकृतकेतनःपुनर्नसंसृतिंक्लेशवहांप्रपद्यते तमेवयूयंभजतात्म केत
वृत्तिभिर्म्मनोवचःकायगुणैःस्वधर्म्मभिः अमायिनःकामदुघांघ्रिपंकजंयथाधिकारावसितार्थसिद्धयः ॥ ॥

वायामभिरुचिर्विविक्तपस्विनांसंसारतप्तानांअशेषैर्जन्मभिःसंवृद्धंधियोमलंसद्यःक्षपयति तमेवाभजतेतितृतीयेनान्वयः कथंभूत अहन्यहनि
वर्द्धमानासतीमाहात्म्यकी तत्पादसंबंधस्यैवेषमहिमेतिदृष्टान्तेनाह यथेतिविनिर्धूताअशेषामनोमलायस्य असंगोवैराग्यंतेनविज्ञानस्यविशेषःसा
क्षात्कारस्तदेववीर्यंयस्यांघ्रिमूलकृताश्रयःसन् आत्मवृत्तिभिरध्यापनादिभिः मनोवचःकायानांगुणैर्ध्यानकीर्तिपरिचर्याभिः अमायिनःनिः एम
कपटाःसन्तः ननुब्रह्मादिभिःसेव्योकिमस्मत्तपोभविष्यतितत्राह यथाधिकारमेवावसितानिश्चितासमाप्तावार्थसिद्धिर्येषां ॥

त्वकर्म्मनिर्य्यातादिभि [illegible] र्भज्यते तु तत् ॥ तत्र ब्रह्मार्पणं ब्रह्मेति विरिति त्वमेव नवैष्णवं गानं गतत्वलेभगवद्ध्यानकर्म कर्त्तव्यं न भिन्न इत्यै
तिवक्ति तेषां भगवद्रूपताम् आह द्वाभ्यां ॥ अहो भगवान् एव स्वरूपतो विशुद्धविज्ञानघनो ऽपि अगुणो निर्व्विशेषणो ऽपि सन् इह कर्म्ममार्गे अनेकगुणः नाना
विशेषणवान् ॥ अध्यवसायतः संपद्यते यतो वै विष्णुरिति श्रुतेः ॥ अनेकगुणात्वमेवाह ॥ इत्थं विधानिद्र्व्यादीनि तैः तत्र द्रव्याणि व्रीह्यादीनि गुणाः अ
रुणादयः क्रियाः अवघातादयः ॥ उक्तायोमन्त्रः ॥ अर्थो यागसाध्य उपकारः ॥ आशयः संकल्पः लिंगपदार्थानां शक्तिः नामज्योतिष्टोमादिः तैः स्वाराज्यं

अस्माद् विज्ञाने कगुणो गुणोध्वरो ऽश्थाविधद्रव्यगुणा क्रियो क्तिभिः ॥ संपद्यते र्थाशयलिंगनामभिर्व्विशुद्धविज्ञानघनः स्व
रूपतः ॥ प्रधानकालाशयधर्म्मसंग्रहे शरीरएषप्रतिपद्य चेतनां ॥ क्रियाफलत्वेन विभुर्व्विभाव्यते यथानलो दा
रुषु तद्गुणात्मकः ॥ अहो ममामी वितरन्त्य् अनुग्रहं हरिं गुरुं यज्ञभुजाम् अधीश्वरं ॥ स्वधर्म्मयोगेन यजन्ति मामका
निरन्तरं क्षोणितले दृढव्रताः

र्थान् संपद्यते यागफलस्यापि भगवद्रूपताम् आह ॥ प्रधानेति ॥ एष विभुः परमात्मा नरोऽपि शरीरे चेतनां विषयाकारां बुद्धिं प्रतिपद्य तदभिव्यञ्जनं दरूपः सन् क्रि
याफलत्वेन प्रतीयते ॥ एतस्मै वा नरस्यान्यानि भूतानि मात्रा उपजीवन्तीति श्रुतेः यथानलो दारुषु स्थितस्तद्गुणात्मकः दाहधर्म्मैर्दैर्घ्यवक्रत्वादिमान्
न दृश्यते ॥ कथंभूते शरीरे प्रधानमव्यक्तं कालः क्षोभकः आशयो वासना धर्म्मादृष्टं तैः संगृह्यते ऽनम्यं तद् इति ॥ तथा तस्मिन् हरिदेवमयज्ञानाद् भगवद्भजनेष्ट
वद्भिर्भावैः यज्ञानां यज्ञभिमपि चैतन्येन दर्शयति ॥ अहो इति वितरन्ति कुर्वन्ति

भा.व.
५८

इदानीं हरिभक्तेरार्थ्याय ब्राह्मणभक्तिं विधत्ते ॥ माजात्विति चतुर्भिः ॥ महत्पश्रुतानां कृद्धपञ्चभूतानामिर्घ्यद्राजकुलस्य तेजः स्तत्र स्मात्मकाशाद्द्विजानां कुले
अजितो देवता येषां वैष्णवानां तेषां कुले माजातु प्रभवेत् ॥ कदाचिदपि प्रभावं न करोतु कथंभूते शमदृद्धिभिर्द्धिनापि स्वयमेव तितिक्षादिभिर्दीप्यमा
नो ब्राह्मणादिस्तत्राह ॥ यच्चरणाभिवंदनाद्धरिर्लक्ष्मीं यशश्चावाप यत्सेवया चेश्वरस्तुष्यति ॥ तदेव ब्रह्मकुलं निषेव्यतामिति ॥ द्वयोरन्वयः ॥ हरेर्लो

मा जातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च ॥ देदीप्यमानेऽजितदेवतानां कुले स्वयं राजकुलाद्द्विजानां ॥ ब्रह्म
ण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवंदनात् ॥ अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥
यत्सेवयाशेषगुहाशयः स्वराड् विप्रप्रियस्तुष्यति काममीश्वरः ॥ तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यतां ॥
पुमांल्लभेतानतिवेलमात्मनः प्रसीदतोऽत्यंतशमं स्वतः स्वयं ॥ यन्नित्यसंबंधनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजां ॥

कसंग्रहनृपो योधर्म्मस्तत्परैर्नेतद्ब्रह्मकुलमेव नित्यं सेव्यमाने सर्वदेवता सुखमूर्तेः ग्रीयन्ता ह्यनुष्ठानं तस्यन्नु चतेन विना चित्तशुद्धिः न च तया विना मोक्षः
स्यादित्याशंक्याह ॥ पुमानिति द्वाभ्यां ॥ यस्य ब्रह्मकुलस्य नित्यं संबंधेन निषेवया पुमान्स्वयमेव ज्ञानध्यानादिकं विनापि अत्यंतं शर्म मोक्षं लभेत ॥
कुतः यत्सेवयात्वत एव अनतिवेलं शीघ्रं प्रसीदतः ॥ अध्यात्म आत्मनश्चिन्नतः परं श्रेष्ठं देवानां किं सुखमस्ति ब्राह्मणमेव येषु यत्ता हविः फलं तानानफला
न्त्यर्द्धं भवतीत्यर्थः ॥

राम
५८

ह्रेरितितदेवपरंत्वमित्याह ॥ अथात्मनीति ॥ इज्यानामभिर्द्वारीनानानामभिर्यस्य तु खेश्रद्धयाकृतं हविरंनंतोयथा ॥ अतितथाचेतनया रहितेकृताशानेकृ
तेनाश्नाति ॥ तत्वकोविदैः सर्वदैवमयश्चैतन्यमूर्तिरनंत इति तत्वविद्भिः कृत एवंभूतो मौनतत्राह ॥ पारमहंस्यज्ञानं तत्पराननैष्ठिनिश्रधिकारीत्निइति पा
रमहंस्यपर्यायैः ज्ञानाबोधाबोधो यस्मिंस्तु परिनिषद्धित्तीनद्यनत्वेनोक्त इत्यर्थः ॥ यद्वा ॥ परमहंसानां ज्ञाननिष्ठानां नागम्यः पारमहंस्य परिनोनगच्छन्निगाबोधा
बोधस्मात्स पर्यायैः ॥ इङ्गिपनिपन्नामसबास्यो सवपारमहंस्य पर्यायैः ज्ञानरूपः सर्वांतर्यामीत्यर्थः ॥ नकेवलं चेतनत्वेन कृताशानाद्विशेषः ॥ किंतु वे

अथात्मनंतः खलु तत्वकोविदैः श्रद्धाकृतं यस्तु खइज्यनामभिः ॥ नवैतथाचेतनया वहिष्कृते कृताशनेपारमहंस्यपर्ययैः
यद्ब्रह्मनित्यं विरजं सनातनं श्रद्धातपोमंगलमौनसंयमैः ॥ समाधिना ॥ विभ्रतिहार्थदृष्टये यचेदमादर्शइवावभा
ते सैं ॥ तेषां महंपारमराजेरेणकम्मार्यावहेयाधिकिरीटमाघ्रः ॥ यंनित्यदाविभ्रतआस्तुपापनश्यनत्युप्रसर्वगुणाम्भजेति
गुणायणांशीलधनं कृतज्ञं वृद्धाश्रयं संवृणते तु संपदः ॥ समीरतां ब्रह्मकुलं गवां च जनार्दनः मासुवरस्वमयह्य ॥

दत्ताना हपीत्याह ॥ यदितव्याप्यं येब्रह्मवेदं नित्यं बिभ्रति तेषांमित्युत्तरेणान्वयः ॥ मंगलंनाम प्रशस्ताचरणं नित्यमप्रमादस्यवर्जनं ॥ एतद्धि मंगलंप्रो
क्तमृषिभिस्तत्वदर्शिभिः मौनमध्ययनविरोधिवार्तात्यागः ॥ समाधिनाचित्तैकाग्र्येण ॥ अर्थदृष्टये वेदार्थमपि ॥ विचारयन्नीत्यर्थः ॥ यत्रवेदे ॥ इदं
विश्वाहेआर्यआआयजावज्रीवंअधिकिरीटं मुकुटस्योपरि वहेयेति प्रार्थना याचिता ॥ यंरेणुं गुणाभजनस्य फलमाह ॥ गुणायनं ॥ ससर्वत्रसंपदः
संवृणते समस्य भजतीति तस्मात् समीरतां प्रमीरतः ॥ गवां चकुलं

भा०च
५९

साधुवादस्साधु ॥ पुत्रेणेतिषड्भिः ॥ यद्यतः वेनो पितृघ्नोपि नरकमतरत् ॥ अतिततार मुकुंदनाथ यस्मात्वत्त्राणत्वमेव मुकुंदनाथत्वे पर्यवसितमित्यर्थः ॥ नवहेतुः ॥ यइति ॥ आजीव्यं नामैवकानां ग्रामनुशासनं प्रजानुरागः प्रकृतिः स्वभावः उपासादितः प्रापितः कर्मभिर्भ्राम्यतां ईश्वरदृष्ट्या विभ्रा

मैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः ॥ तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः ॥ पुत्रेण जयते लोकानिति सत्यवती श्रुतिः ॥ ब्रह्मदंडहतः पापो यद्वेनोत्यतरत्तमः ॥ हिरण्यकशिपुश्चापि भगवन्निंदया तमः ॥ विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः ॥ वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः ॥ यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्त्तरि ॥ अहो वयं ह्यद्य पवित्रकीर्ते त्वयैव नाथेन मुकुंदनाथाः ॥ य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति ॥ नात्यद्भुतमिदं नाथ तवाजीव्यानुशासनं ॥ प्रजानुरागो महतां प्रकृतिः करुणात्मनां ॥ अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो ॥ भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ॥ नमो विवृद्धसत्वाय पुरुषाय महीयसे ॥ यो ब्रह्मक्षत्रमाविश्य बिभर्त्तीदं स्वतेजसा ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकविंशोध्यायः ॥ मैत्रेय उवाच ॥ जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमं ॥ तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः ॥ तांस्तु सिद्धेश्वरान्राजा व्योम्नोवतरतोर्चिषा ॥ लोकानपापान्कुर्वाणान्सानुगोचष्ट लक्षितान् ॥

दयोपि प्रणामंति नमइति ब्रह्मा विप्रं क्षत्रं राज्ञां जातिमधिष्ठाय स्वतेजसा विभर्त्ति क्षत्रं वा विप्रं ब्रह्मा विभर्त्ति तद्भगवद्वा विनाशपदं विष्णुं विभर्त्ति ॥ २ ॥ च र्थे ॥ धे एकविंशः ॥ द्वाविंशे तुपरं ज्ञानं पृथवेहरिशासनात् ॥ सनत्कुमारो भगवान्प्रादिशदिति वर्ण्यते ॥ अर्चिषा लक्षितान् सनकादयइति ताः पितान् अ

भा०च
५९

तेषां दर्शनेनोद्गतान्प्राणान्स्वान्प्राप्तुमिच्छुरिव अयमावः ॥ कई प्राणोत्क्रमणमन्तिम्रूनः स्थविरआयाति ॥ अस्तुत्थानमभिवादनाभ्यां पुनः हान्प्रतिपद्यतइ
तिस्वतेः ॥ प्राणान्हावत्तेजमान्तिप्राप्तान्प्रत्युद्गच्छन्ति ॥ अतः स्वयमेवागच्छतः प्राणाहानिः स्याद्रिति भयादिव स्वस्थेअमः ॥ प्रत्युद्गमनं च कारोति ॥ सह
सरस्येः लुरोगेस्वर्तमानः इंद्रियेषुप्राजीवः प्राणान्नुधारोन्वतिपद्योद्गच्छतीत्योन्कोदृष्टान्तः ॥ पवित्रितो वेशी कृतः गृहीतमध्यंहेणमर्घ्यमासनं च येनतत्ता
दृ ॥ मार्जितं ह्यालितं मलकं वंधनं केशवंधनं जस्पासनमपत्निवस्वयंववारणमवस्थाप्यग्रजत्वेन मन्यामः प्रातः प्राहेत्युक्तं तदेवदशीतिपूर्वकं वचनमाह

तद्दर्शनोद्गतान्प्राणान्प्रत्याहिन्निरिवोत्थितः ॥ समरस्यानुगोविंदन्मर्दिद्रियेषु गोगणानिव ॥ गौरवाद्यंत्रितः सम्यः प्रश्रयानतकंधरः ॥
विधिवत्पूजयांचक्रे गृहीतार्घ्यार्हणासनान् ॥ तत्पादशौचसलिलेमार्जितालकवंधनः ॥ तत्रशीलवतां स्वर्जमावरस्नानमपत्निव
२ हारकासनेआसीनान्विधिवत्सोपविपावकान् ॥ श्रद्धासंयमसंयुक्तः प्रीतः प्राहमवाग्रजान् ॥ पृथुरुवाच ॥ अहोआचरितं किं
मेमंगलंमंगलायनाः ॥ यस्यवोदर्शनंह्यासीदुर्दर्शानांचयोगिभिः ॥ किंतस्यदुर्लभंतरमिहलोकेपरत्रच ॥ यस्यविप्राप्रसीद
न्तिशिवोविष्णुश्चसानुगाः ॥ नैवलक्ष्यतेलोकोलोकान्पर्यटतोपियान् ॥ यथासर्वदृशंसर्वआत्मानंयेस्यहेतवः ॥ अधनाअ
पितेधन्याःसाधवोगृहमेधिनः ॥ यद्गृहाह्यर्हवर्याम्बुतृणभूमीश्वरावराः ॥ ॥

अहो इति दशभिः हे मंगलायनाः मंगलमयनं येषां मयाकिमंगलमाचरितं यस्यमे योगिभिरपिदुर्दर्शानां दुर्दर्शत्वमाह नैवेति सर्वदृशमात्मानं यथा
सर्वदृशमपि न लक्ष्यंते ॥ ये स्यविश्वस्यहेतवो महदादयो महदादयो वा ॥ यद्वा कथंभूतान् येस्य सर्वदृग्आत्मदर्शनस्यहेतवस्तान् ॥ येषां साधूनांगृहा अर्हणा
पूज्यानावर्यावरणीयाः स्वीकारार्हा अम्बुवारयोयेषु तादृशी अंबुवत्तृणव भूमिश्च ईश्वरो गृहस्वामी तत्रवावराभृत्यादयश्च ॥

भा॰च
६॰

व्यालानामालया द्रुमा एवेति ॥ अरिक्ताः पूर्णा अखिलाः संपदो येषु तादृशा अपि यद्गृहास्तीर्थपादीया वैष्णवास्तेषां पादतीर्थेन विवर्जिताः ॥ स्वागतं भद्रमाग
मनं जातं यद्यस्माद्बाला एव भवन्तो वृहंति व्रतानि चरन्ति यद्वा ॥ येषां वो व्रतानि श्रेयस्येव बाला अपि चरन्ति ॥ इंद्रियार्थमेवार्थं ये विदंति तेषां नः व्यसनानामुप्यन्ते यस्मिं
स्तस्मिन्संसारे न तु भवागतो नां कुशलं पृच्छ्यतो लोकेना त्वात्मन स्तेत्राह ॥ भवत्स्विति ॥ तत्तस्मात्कृतविश्रंभं सत्तपस्विनां सततज्ञानां सह देशे पृच्छामि

व्यालालयद्रुमा वै तेष्वरिक्ताखिलसंपदः ॥ यद्गृहा तीर्थपादीयपादतीर्थविवर्जिताः ॥ स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि मुमु
क्षवः ॥ चरन्ति श्रद्धया धीरा बाला एव बृंहति वै ॥ कच्चिन्नः कुशलं नाथा इंद्रियार्थार्थवेदिनां ॥ व्यसनावाप एतस्मिन्पतितानां
स्वकर्मभिः ॥ भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते ॥ कुशलाकुशला यत्र न संति मतिवृत्तयः ॥ तदहं कृतविश्रंभः सु
हृदो वस्तपस्विनां ॥ संपृच्छे भव एतस्मिन्क्षेमः केनांजसा भवेत् ॥ व्यक्तमात्मवतामात्मा भगवानात्मभावनः ॥ स्वानामनुग्रहा
येमां सिद्धरूपी चरत्यजः ॥ मैत्रेय उवाच ॥ पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्टु मितं मधु ॥ स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह
सनत्कुमार उवाच ॥ साधु पृष्टं महाराज सर्वभूतहितात्मना ॥ भवता विदुषा चापि साधूनां मतिरीदृशी ॥

न केवलं न योगिनां ब्रूयं किं त्वस्माकं भगवानेवेत्याह ॥ व्यक्तं निश्चितं ॥ आत्मवतां धीराणामात्मा निष्ठास्य तत्त्वेन प्रकाशमानः आत्मानं भावयति प्रकाश
यतीति तेषामिमां पृथ्वीं चरति ॥ सूक्तं शोभनं वचनं सारं न्याय्यं सुष्टु गंभीरार्थं मितमल्पाक्षरं मधुरं श्रोत्रप्रियं ॥ स्वप्रशस्त्या स्मयमान इव प्रतीयमानः ॥

राम
६

स्वयमपि द्वयोः संगममभिनंदतीति ।। संगम इति । उभयेषां वक्तृश्रोतृणां च येषां भाषणसहितः संप्रश्नः सर्वेषां शं सुखं विस्तारयति ।। तदेव संग
मं प्रश्नं चाभिनंद्योत्तरं स्वेनैव मोक्षसाधनमुपदिशति ।। अस्त्येवेति । गुणानामनुवादने प्रश्नद्वारेणानुवादश्च वर्तते तच्छ्रवणमित्यर्थः ।।
आत्मनो मनसोऽन्तः स्वकामात्मकं विधुनोति ।। कषायं धातुरागवदिति वर्ण्यं चित्तस्थं च वर्धिं वैराग्यमात्मनिरतिश्च भवति ।। न च ततोऽधिकं

सदा २

संगमः खलु साधूनामुभयेषां च संमतः ।। यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शं ।। अस्त्येव राजन्भवतो मधुद्विषः ।। पादा
रविंदस्मरणानुवादने ।। रतिर्दुरापा विधुनोति नैष्ठिकी कामं कषायं मलमंतरात्मनः ।। शास्त्रेष्वियानेव सुनिश्चितो
नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः ।। असंग आत्मव्यतिरिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ।। सा श्रद्धया भग
वद्धर्मचर्यया जिज्ञासयाध्यात्मिकयोगनिष्ठया ।। योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च ।।

का २

साधनमस्ति ।। शास्त्रेषु तयोरेव मोक्षहेतुत्वनिश्चयादित्याह ।। शास्त्रेष्विति ।। सध्र्यग्विमृशेषु सम्यग्विचारवत्सु क्षेमस्य हेतुरेतावानेव सुनिश्चितः को
सावात्मव्यतिरिक्ते असंगो वैराग्यं आत्मनि च रतिः आत्मनो विशेषणानि निर्गुणे ब्रह्मणीति ।। ननु तदेवातिदुर्लभमित्याशंक्यात्र साधिकारिणः श्रवणमा
त्रेण भवति ।। अन्यस्यापि चित्तशुद्ध्यनुसारेण साधनतारतम्यतो वर्द्धमानायामभ्यस्तेत्यभिप्रेत्याह ।। सेति चतुर्भिः सा ब्रह्मणि रतिरसंगश्च श्रद्धादिभिः स्या
दिति चतुर्थेनान्वयः ।। जिज्ञासयात्मतत्त्वविशेषबुभुत्सया । पुण्यश्रवसो यशसः स्वहरेः पुण्यया कथया च ।।

भा० च
६१

अर्थानामर्थनिष्ठास्तामसाः । इंद्रियारामाः कामनिष्ठा राजसाः । तैर्स्सह गोष्ठी तस्यामतृष्णया । तेषां च ये संमता अर्थाः कामाश्च तेषामपरिग्रहेण विविक्ते विजने या रुचिस्तया आत्मन्येव परितोषेण सति स्यात् । किं तु हरेर्गुणपीयूषपानाद्विना न तस्मिन्सतीति विविक्ते तु विजने कार्यो न चात्मनि परितोषः कार्य इत्यर्थः । पारमहंस्यचर्यया उपशमादिप्रधानया । स्मृत्या आत्महितानुसंधानेन । मुकुंदाचरितमेवाग्र्यं सीधु श्रेष्ठममृतं । तच्च रितमस्तीति हि विनेत्यर्थः । मार्जारतरस्मानिंदया निरीहया योगक्षेमार्थक्रियाराहित्येन । शीतोष्णादिद्वंद्वसहनेन । कथयेत्परस्यांकमपि कथयन्न । भक्तावत

श्लो० अर्थेन्द्रियारामसगोष्ठ्य[illegible]तत्संमतानामपरिग्रहेण च । विविक्तरुच्या परितोष आत्मन्विना हरेर्गुणपीयूषपानात् । अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुंदाचरिताग्र्यसीधुना ॥ यमैरकामैर्नियमैश्चाप्यनिंदया निरीहया द्वंद्वतितिक्षया च ॥ हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृंभमाणया ॥ भक्त्या ह्यसंगः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चांजसा रतिः ॥ यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान्ज्ञानविरागरंहसा ॥ दहत्यवीर्यं हृदयं जीवकोशं पंचात्मकं योनिमिवोत्थितोग्निः ॥

रंगत्वेन ऊनहृच्यते । तत्परा हरिभक्तास्तेषां कर्णपूराः कर्णालंकारभूता ये हरेर्गुणास्तेषामभिधानेन । सदसत्कार्यकारणरूपो भवत्यनात्मन्यसंगः आत्मरतिश्च ततः किमत आह । एवं निष्ठां प्राप्ता रतिर्भवति तदा चार्यवान्सन् ज्ञानवैराग्ययोर्वेगेन अवीर्यं निर्द्दग्धमनं जीवस्य कोशमावरकं हृदयं पंचप्रमान्दहति । कथंभूतं प्रधानं यद्वा अविद्यास्थितिनाशहेतुः प्राप्तिवशाः पंचतत्त्वात्मकं । उत्थितं प्रज्वलितोग्निर्योनिमिव स्वमरणिमिव यद्वा यदा रतिरेवाचार्यग्रहश्च तदा ज्ञानवैराग्यवेगेनोत्थितः साक्षात्कारः अवीर्यः पुनः प्ररोहशक्तिरहितं यथा न भवत्येवं हृदयं दहति । शेषं समानं ॥ ॥

रा० म
६१

ततः किमत आह ॥ दग्धज्ञाशयो हृदयमुपाधिर्यस्य ॥ अत एव मुक्ताः समस्तास्तद्गुणाः कर्तृत्वादयो येन आत्मनः सकाशाद्बहिर्घटादिरन्तः सुखदुः
खादि नैव विचष्टे न पश्यत्येव कुत इत्यपेक्षायां द्रष्टृदृश्यप्रतीतेः कारणहेतुत्वादित्याह ॥ परो दृश्यः आत्मा द्रष्टा तयोर्यद्व्यवधानं भेदकं पूर्वमासीत्तस्य
विनाशे सति यथा स्वप्ने प्रजागरमित्याद्यपि तं स्वप्नान्तरे द्रष्टारं दृश्यं च स्वप्नावस्थानो योगेन पश्यति तद्वत् ॥ द्रष्टृदृश्यभेदप्रतीतेरन्तः करणहेतुत्वमन्वयव्यतिरे
काभ्यामुपपादयति आत्मानं द्रष्टारं इन्द्रियार्थं दृश्यं उभयोरात्मयोः परं सम्बन्धहेतुमहङ्कारं च आशये अन्तः करणे सत्येव जाग्रत्स्वप्नयोः पश्यति ॥ अन्यथा सुषुप्तौ

दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरन्तर्विचष्टे ॥ परात्मनोर्यद्व्यवधानं पुरस्तात्स्वप्ने यथा पुरुषस्तद्विनाशे ॥ आ
त्मानमिन्द्रियार्थं च परं यदुभयोरपि ॥ सत्याशय उपाधौ वै पुमान्पश्यति नान्यदा ॥ निमित्ते सति सर्वत्र जलादावपि पूरुषः
आत्मनश्च परस्यापि भिदां पश्यति नान्यदा ॥ इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः ॥ चेतनां हरते बुद्धेः स्तम्बस्तो
यमिव ह्रदात

तदुक्तं दृश्यानुरञ्जितं द्रष्टृदृश्यद्रष्टृत्वानुरञ्जितः अहङ्कारो मुग्धरं क्रीत नाशो द्वैततात्मन इति ॥ एकस्मिन्नात्मनि दृश्यादिभेदद्र
ष्टृतौ पाधिकीति दृष्टान्तेन स्पष्टयति ॥ लोकेऽपि च सर्वत्र जलदर्पणादौ भेदनिमित्ते सत्येव आत्मा नानाविव भूतः सम्प्रतिबिम्बस्य च भेदं पश्यति
न तु जलाद्यभावे तदेवं च बहिर्भिः संगात्मरत्या मोक्षहेतुत्वमुक्तं ॥ इदानीमनात्मरतेः संसारहेतुत्वमाह ॥ इन्द्रियैरिति चतुर्भिः ॥ ध्यायतां गुणानपे
क्ष्य रतां पुंसामिन्द्रियाणि स्वैः स्वैर्विषयैः आकृष्यन्ते तैश्च मन आकृष्यते विषयासक्तिं प्राप्यते तच्च बुद्धेः सकाशात् चेतनामविचारसामर्थ्यं हरति ॥
एतच्चाविवेकं नानलस्यते इति दृष्टान्तेनाह ॥ तीरजः कुशादिः स्तम्बो यथा स्वमूले स्तोकं ह्रदस्य हरति तद्वत् ॥

चित्तं चेतनामनुतस्या मपकृतायाः स्मृतिः पूर्वापरानुसंधानं भ्रश्यति । एवं तद्रोधे ज्ञानभ्रंशस्यात्मन एव हेतोरात्मनोः पह्नवं नाशं प्राहुः । एवं भूतो नाशो भवतु
नाम अस्य स्वप्रियमकृत्वान्यस्य विषयस्य प्रियतमत्वं आत्मनस्तत्कामायत्वं प्रियं भवतीति श्रुतेस्तस्यात्मनः स्वेनैव यो व्यतिक्रमोऽपह्नवः तस्माद्यः स्वार्थ
व्यतिक्रमः स्वार्थनाशो नास्ति । कुत इत्यत आह । अर्थस्याभिध्यानं इंद्रियार्थकामस्तस्याभिध्यानं सर्वार्थनाशः । ज्ञानविज्ञानं च परोक्षापरोक्षं येन ध्यानेन
भ्रंशितः स्थावरतां जनाः स्मरतेऽनर्थहेतुत्वमुक्तमेतस्योपाह । नेति । यद्धस्त्वेध धर्मादीनां विघातकं तस्मिन् संगे तमः संसारं तत्त्ववतित्रिंदिशास्तुरुषार्थ
सामग्रीं तैवाचरति । तत्रापीति । कृतांतः कालः भयं संयुतत्वमेवाह । परे ब्रह्मादयः अवरे स्थावरादयः गुणत्र्यो भावरनुपश्चाद्भवंति ईशः कालस्तेन वि

भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये तद्रोधः कवयः प्राहुरात्मापह्नवमात्मनः ॥ नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः ॥ यदध्य
न्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ॥ अर्थेंद्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणां ॥ भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यतां ॥ न
कुर्यात्कर्हिचित्संगं तमस्तीव्रं तितीरिषुः ॥ धर्मार्थकाममोक्षाणां यदत्यन्तविघातकं ॥ तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते ॥ त्रैवर्ग्यो
र्थो यतो नित्यं कृतांतभयसंयुतः ॥ परेऽवरे च ये भावा गुणव्यतिकरादनु ॥ न तेषां विद्यते क्षेममीशविध्वंसिताशिषां ॥ तत्त्वं नरेंद्र जगतामथ तस्थु
षां च देहेंद्रियासुधिषणात्मभिरावृतानां ॥ यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक्चकास्ति भगवांस्तमवेहि सोऽस्मि ॥

ध्वंसिता नाशिता आशिषो येषां । यस्मादेवं तस्मात्त्वमिति । अर्थं हे नरेंद्र त्वं जगतां जंगमानां तस्थुषां स्थावराणां च देहादिभिरात्माहंकारेणावृतानां हृदि यः क्षेत्रवित्तपतया प्रका
शते तमेवेहि । कथं सोऽस्मीति सोऽहमिति पाठे मम एवैकोऽस्ति ततोऽन्यदन्यदित्यर्थः । ननु जीवो हृदि चकास्ति नान्यस्तत्राह । क्षेत्रविदं जीवं तं सतिनियमयतीति क्षे
त्रवित्तपः तस्य भावस्तत्ता तया चकास्तीत्यर्थः प्रतिरूपेणापहा । क्षेत्रवित्तेऽहं ममेत्यस्य रूपतां तितिक्षेत्रवित्तपः तेन रूपेणा जीवस्तस्य परतंत्र आत्मपाति । ननु कर्मजीवं नियच्छ
ति न आविः प्रत्यक् । नहि बुद्धिः प्रत्यक्प्रतिलोमं च चकास्ति । बुद्धिस्तु पराग्विषयाकारेण । नह्यहंकारः न विश्वक् व्याप्तत्वेन सर्वपरिच्छिन्नः । एवं भूतो यो भग

स्थावरजंगमादीनां हरिचकाद्दीत्युक्ते तेषांमत्वमेवंधारीश्वरसमालिंग्यंवप्रसक्तंविराकर्षंतुद्विज्ञमह्यातंप्रणामति ॥ यस्मिन्निदंविश्वमसदस
दात्मतयाउत्क्रिष्टनिकृष्टभावेनकार्य्यकारणभावेनवामायैवविभातितंप्रपद्येमायात्वेहेतुः ॥ विवेकेनविधुतिर्निराकृतिर्यस्यतत् ॥ त्वञ्जिवे
तिवाशद्वोदृष्टांतेनित्यमुक्तंयतः परिशुद्धंतत्त्वतः विशुद्धंतत्त्वंसत्यंअतएवप्रत्यूढाअभिभूताकर्म्माभिःकलिलामलिनाप्रकृतिर्येनतंतमेवेहो
तिज्ञानमुपदिष्टंतस्यदुःकरमक्तिमुपदिशति ॥ द्वाभ्यांयस्यपदपंकजयोः पलाशानिकुर्यूलघः तेषांविलासः कांतिहतस्यभक्त्यास्मत्वाकर्म्म

यस्मिन्निदंसदसदात्मतयाविभातिमायाविवेकविधुतिस्त्रजिवाहिबुद्धिः ॥ तंनित्यमुक्तपरिशुद्धविशुद्धतत्त्वप्रत्यूढ
विलास कर्म्मकलिलंप्रकृतिंप्रपद्ये ॥ यत्पादपंकजपलाशंभक्त्याकर्म्माशयंग्रथितमुद्ग्रथयंतिसन्तः ॥ तद्वन्नरिक्तमतयोय
तयोपिरुद्धस्रोतोगणास्तमरणंभजवासुदेवं ॥ कृछ्रोमहानिहभवार्णवमप्लवेशांषड्वर्गनक्रमसुखेनतितीर्ष
न्ति ॥ तत्त्वंहरेर्भगवतोभजनीयमंघ्रिंकृत्वोडुपंव्यसनमुत्तरदुस्तरार्णम् ॥

शयंअहंकारनूपंहृदयग्रंथिकर्म्माभिरेवग्रंथितं ॥ रिक्तानिर्व्विषयामतिर्येषां ॥ रुद्धः प्रत्याहृतः स्रोतोगणाइंद्रियवर्गोयैः अरणंशरणंनहृब्रह्मवि
दाप्नोतिपरमितिश्रुतेः कथंयतयोनोद्ग्रथयंतीत्युच्यतेतत्राह ॥ कृछ्रइतिअप्लवेशानप्लवस्तारणहेतुः उडुपोयेषांतेषांमहानिहतरणेकष्टः ज्ञे
शात्त्वेवहिअसुखेनयोगादिनाइंद्रियषड्वर्गग्राहंभवार्णवंतितीर्षन्तितत्मात् ॥ उडुपंप्लवंउत्तरार्णवमित्यर्थः मह ॥ अर्णशद्वेवकारभावश्चार्षः उस्त
रोदकनूपंव्यसनमित्यर्थः ॥ ॥ ५ ॥ एमएम

आत्ममेधसां ब्रह्मविदा दर्शिता आत्मनो गतिस्तत्त्वं यस्मै सः ॥ ब्रह्मन्निति संबोधनं प्राधान्यादेकस्य सर्वरूपमित्युक्तिः सर्वान्प्रति ॥ आत्मना देहेन सह सर्वं राज्यादिकं मदीयं साधूच्छिष्टं साधुभिः ॥ स्वीयं स्वस्य गृहं प्रसादरूपेण दत्तं अतस्तत्र मम स्वत्वाभावात् ॥ गुरुदक्षिणार्थं किं ददे ॥ नहि पित्रा दत्तमोदकादि तस्मै दानरूपेण प्रत्यर्प्यते ॥ निवेदनं तु तदीयस्यैव समर्पणं यथा भृत्योपहितो सेवारूपेण तांबूलादिकं समर्पयति ॥ तथा मयापि सर्वं निवेदितं स्वीकुरुतेत्याह ॥ प्राणा इति ॥ आत्मनः स्वत्वाभावं प्रपंचयति ॥ सेनापत्यं चेति द्वाभ्यां ॥ वस्ते परिधत्ते अन्नमात्रं केवलं भुंजते ननु दाने स्वतंत्राः सत्यपि

मैथि ॥ उवाच ॥ स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा ॥ दर्शितात्मगतिः सम्यक् प्रशस्योवाच तं नृपः ॥ राजोवाच ॥ कृतो मेनुग्रहः पूर्वं हरिणार्त्तानुकंपिना ॥ तमापादयितुं ब्रह्मन्भगवान्यूयमागताः ॥ निष्पादितश्च कार्त्स्न्येन भगवद्भिर्घृणालुभिः ॥ साधूच्छिष्टं हि मे सर्वमात्मना सह किं ददे ॥ प्राणा दाराः सुता ब्रह्मन्गृहाश्च सपरिच्छदाः ॥ राज्यं मही बलं कोश इति सर्वं निवेदितं ॥ सैनापत्यं च राज्यं च दंडनेतृत्वमेव च ॥ सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च ॥ तस्यैवानुग्रहेणान्नं भुंजते क्षत्रियादयः ॥ यैरीदृशी भगवतो गतिरात्मवाद एकांततो निगमिभिः प्रतिपादिता नः ॥ तुष्यंत्वदभ्रकरुणाः स्वकृतेन नित्यं

स्वत्वे सर्वस्वेपि नानुग्रहः प्रत्युपकर्तुं शक्यमित्याह ॥ यैरिति ॥ आत्मवादे अध्यात्मविचारे ॥ एकांततः निश्चयेन निगमिभिर्वेदविद्भिः स्वे नित्यमनल्पकरुणाः स्वकृतेनैव दीनोद्धरणकर्मणा तुष्यंतु ॥ को नाम तत्कृतोपकारं प्रति स्वयमुपकरोति ॥ उदपात्रमंजलिं विना मया जलैरेव तेभ्यो दद्यमित्यर्थः ॥ यद्वा विनोदपात्रं उपहासास्पदं ॥ प्रत्युपकारे प्रवृत्तो जनानामुपहासास्पदं भवेदित्यर्थः ॥

दिवस्वत॥ आकाशमार्गेणोद्गताः धुर्योर्धुरुष्मयोः॥ अध्यात्मशिक्षया संस्थितिरेकाग्रतयात्मन्यवस्थितः सन्नेनेने॥ ब्रह्मप्रात्मकं तं ब्रह्मणापर्पितं यथा
भवति॥ निर्द्विषंगः कर्मस्वनासक्तः कर्माध्यक्षं कर्मसमाहितैर्णसुद्दासीनमस्वानोकरोरितिपूर्वं णोवाच्चयः॥ नामसङ्गैतस्मन्नेरणाच्चयः॥ आविविधा

तमात्मयोगपतयआरिराजेनपूजिताः॥ शीलं तदीयं शांसंतः दिवस्वन्निमिषतां तं रुणां॥ वैमात्मकधुर्योमहतां संस्थित्याध्यात्म
शिक्षया॥ आत्मकामसमिवात्मानं सेन आत्मन्यवस्थितः॥ कर्माणि व यथाकालं यथादेशं यथाबलं॥ यथोवितं यथाचिन्त्यमकरो
द्ब्रह्मसात्कानि॥ फलं ब्रह्मणिविन्यस्य निर्विषंगः समाहितः॥ कर्माध्यक्षं वसत्वानन्यात्मानं प्रवृत्तेः परं॥ यहेष्ववर्त्तमानोपिसम
त्राज्यश्रियान्वितः॥ नामसज्जतेद्रियार्थेषु निरहंमतिरक्तैवत॥ एवमध्यात्मयोगेन कर्माण्यप्रसमाचरन॥ पुत्रान्तुत्पादयामासपंचवि
ध्यात्मसंमतान्॥ विजयाम्बुधमकेशाहर्ष्यकेंद्रविशांवकं॥ सर्वेषांलोकपालानांमद्धारेकपृथकपृणान्॥ गोपीवायजगत्स्रष्टुःका
लेवित्वेत्वियुतात्मकः॥ मनोवाग्दृत्तिभिः सोमर्गंगोः सरजयन्प्रजाः॥ राजेत्यधात्रामधेयं सोमराजइवापरः॥ तृष्णवद्धिसजनन्यु
न्नतपंसृयुवोवह॥ उडुपेस्तेजसवाग्निमहेद्रइवडुर्जयः॥ तितिक्षयाधरित्रीवबेश्चारिवाभीष्टरोनृणां॥ वर्षातिसमयथाकामं पर्जन्यइ
वतर्प्यपत॥ समुद्रइवडुर्बोधः सत्वेनावलराडिव॥ धर्मराडिवशिक्षायामास्वर्ष्येहिमवानिव॥ कुवेरइवकोशाद्योरप्रार्थीवरुणोप
या॥ मातरिश्वेवसर्वात्मावलेनमहसौजसा॥ अविषह्यतयादेवोभगवान्भूतराडिव॥

माधुर्यायां सोमश्रीसोराजामाइव॥ युवोवमधनंगइक्रनृविसंजंश्च
सोमूर्ध्यवत॥ रतः प्रतपनमान्ताकरणं॥ अग्निरिवडुर्द्धषः द्यौः स्वर्गइव॥ समुद्रोयथागंभीर्येणोत्सवानिति॥ नत्प्यतेतथा॥ स्नावमिप्रापतोडुर्बोधः अबलराट्मेहरि
वसर्वात्मासर्वत्रसंसाराणिकिर्वलाशिमिर्मातरिश्वेव॥ भूतराट्श्रीरुद्रः॥ ॥ एमराम

भा०च
६४

अजोब्रह्मेव ॥ आत्मवत्वे जितेंद्रियत्वे मरीच्यादिभिः परार्थ्येद्यमे आत्मनैव तल्पः निरुपाय ॥ ऋभिः सत्कृषैः ॥ रामः सीतापतिर्यथा ॥ सतीकर्णरं ध्रेष्ठवि
ष्टः ॥ ६ ॥ श्री ... वै ... द्धारः ॥ वयोविंशोस भार्य्यास्मवने नित्यसमाधितः ॥ विमानमधिरुह्याथ वैकुंठगतिरीप्सिते ॥ एवयमेत्र इंद्र ह्यातपोवनमगा
दितितलीयेनावपः ॥ स्वकृतोः पुमर्जिः अन्नादिसर्जिः ॥ पुरग्रमादिसर्जः स्व ॥ वर्द्धितः अशेषः स्वानुसर्जो येन ॥ निष्पादितश्चात्र देशः प्रजापाल

कश्चिदेव सोरर्थ्येमनस्तीमृगणाडिव ॥ वात्सल्येमत्तु वन्नृणां प्रकृते भगवानजः ॥ बृहस्पतिर्ब्रह्मवादे आत्मवत्वे स्वयं हरिः ॥ स
म्यागोग्रतविप्रेष्ठविष्वक्सेनोत्त वर्त्तिषु ॥ क्रियाप्रश्रयशीलाभ्यामात्मतल्पः परोद्यमे ॥ कीर्त्यौर्द्ध्वं गीतया भूमिस्वेलोकेषुत्र वतत्र इ
प्रविष्टः कर्णरंध्रेषु स्त्रीणां रामः सतामिव ॥ ६ ॥ श्रीभागवते महापुराणे चतुर्थे स्कंधे पृथुचरिते ह्याविंशो ... यः ॥ मैत्रेय उवाच
दृष्ट्वात्मानं प्रवयसमेकदा वैन्य आत्मवान् ॥ आत्मनावर्द्धिताशेषस्वानुसर्गः प्रजापतिः ॥ जगतस्तस्थुषश्चापि वृत्तिदो धर्म
भृत्सतां ॥ निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान् ॥ आत्मजेष्वात्मजां न्यस्य विरहाद्रुदतीमिवा ॥ प्रजासु विमनःस्वेकः सदारो
गात्तपोवनं ॥ तत्राप्यदाभ्यनियमो वैखानससुसंमते ॥ आरब्ध उग्रतपसि यथा स्वविजये पुरा ॥ कंदमूलफलाहारः शुष्कपर्णा
शनः क्वचित ॥ अब्भक्षः कतिचित्पक्षान्वायुभक्षस्ततः परम् ॥

नादिर्य्येन ॥ जज्ञिवान् ॥ जातः आत्मजां पृथ्वीं विमनः सुदुःखचित्तः ... ॥ सदारः सभार्य्यः आवाभ्यां विद्येः नाशयितुमशक्यानियमां यस्यां वानप्रस्थानां । एव
सुसंमते उग्रे तपसि आरब्धः प्रवृत्तः कर्त्तारिक्तः ॥ स्वस्य धरामंडलस्य विजये पूर्वं यथा महता यत्नेन प्रवृत्तः उग्रं तपो दर्शयति ॥ कंदमूलेति त्रिभिः क्वचित्कदाचित ६४

चतुर्दिक्षु चत्वारोऽग्नयः उपरि सूर्य्य इति पंचाग्नीनां तपः संतापो यस्य पंचतपाः आसारमेव हतस्त्यासारषाट् शिशिरे ऋतौ स्थंडिले शयः भूमिशयनः
सर्व्वदा तेन तपसा क्रमात् सिद्धेन शनैः अभ्यासेन ध्वस्तानि कर्म्माणि यस्मात् अतः कर्ममलस्याशयो यस्य छिन्नाः बंधनानि वासना यस्य परिकर्म्मणा
परिचर्य्यया शुद्धसत्त्व आत्मा मनो यस्य तस्य तत्तानुभूत कीदृशं येन निजम् उपाधि जीवकोशं हृदयग्रंथितं संशयानां आस्पदं भावनादिनापरमाश्र
यविच्छेदः कीदृशेन अनया भक्त्या निशितेन कथंभूतया तस्य भगवतो अनुसंस्मरणानुपूर्त्तिः संपूर्त्तिर्यस्यास्तया निशितेन किंच छिन्नान्यन्या

> ग्रीष्मे पंचतपा वीरो वर्षास्वासारषाण्मुनिः आकंठमग्नः शिशिरे उदके स्थंडिलेशयः तितिक्षुर्जितवाग्दांत ऊर्द्ध्वरेता जितानिलः
> आरिराधयिषुः कृष्णमचरत्तप उत्तमं तेन क्रमानुसिद्धेन ध्वस्तकर्ममलाशयः प्राणायामैः संनिरुद्धषड्वर्गः छिन्नबंधनः
> सनत्कुमारो भगवान्यदाहाध्यात्मिकं परं योगं तेनैव पुरुषमभजत्पुरुषर्षभं भगवद्धर्मिणः साधोः श्रद्धयायततः स
> दा भक्तिर्भवति ब्रह्मण्यनन्यविषया भवत्तु तस्यानया भगवतः परिकर्मशुद्धसत्त्वात्मनस्तदनुसंस्मरणानुपूर्त्या ज्ञानं विर
> क्तिमदभून्निशितेन येन चिच्छेद संशयपदं निजजीवकोशं छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं वयुनेन येन ता
> वन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् एवं स वीरप्रवरः संयोज्यात्मानमात्मनि ब्रह्मभूतो दृढं काले तत्या
> ज स्वं कलेवरं

धीर्ई हात्मबुद्धिर्यस्याः यतोऽधिगता आत्मगतिः अत एव निरीहः प्राप्तासु सिद्धिषु निस्पृहः येन वयुनेन ज्ञानेन इदं संशयपदं चिच्छेद तच्च
तज्ज्ञानं उपक्रमवान् तस्य पश्चात् त्यक्तवान् इत्यर्थः तस्य योगसिद्धिष्वपि निस्पृहत्वं युक्तमेवेत्याह तावन्न अप्रमत्तः किंतु प्रमत्तो भवति

भा० च
६५

देहत्यागप्रकारमाह संपीड्येति पंचभिः पायुं गुदं संपीड्येति मुत्क्रामणं सूचितं संपीड्यापि वनीमूलत्वांगुल्यैनैव तन्मध्यमः सव्येतरक्षिणगुल्फेन मुत्क्रामणमिति रितं मूलाधारादायुमुत्सारयन्नूर्ध्वं नयन्नाभ्यामाध्याय ततः कोष्ठेष्ववस्थाप्य ऊर्ध्वं नयन् हितमुन्नेरणान्वयः कोष्ठान्यवाह हृदादीनां हृदके कंठशीर्षं भ्रूमध्यं तस्मिंस्तु वायुं पाठान्तरे एवमस्मात्स्थानात्तत्सर्प्पयन् क्रमेण मूर्द्धि ब्रह्मरंध्र आविश्य ततो देहारंभकपंचभूतानि स

संपीड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयञ्छनैः नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरःकंठशीर्षणि तं उत्सर्पयन्नस्तु मूर्द्धि
क्रमेणावेश्य निस्पृहः वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत खान्याकाशे द्रवं तोये यथास्थानं
विभागशः क्षितिमंभसि तत्तेजस्यदो वायौ नभस्यमुं

मष्टिभूतेषु विलापितवान् तदाह वायुं वायाविति अयूयुजत एकीकृतवान् कायं देहगतं काठिन्यांशं क्षितौ खानि इंद्रियच्छिद्राणि द्रवीशं तोये ततः एवं राम
देहं प्रविलाप्य द्वितीयात्मप्रतिपन्नार्थं महाभूतानामपि लयमाह क्षितिमंभसि एकीकृतवान् तदंभः अदस्तेजः अमुं वायुं

६५

नदेवं तामसाहंकारकार्य्यस्याकाशपर्य्यन्तं लयमुक्त्वा सात्विकराजसाहंकार्य्याणां लयमाह। इंद्रियेष्विति देवानामप्युपलक्षणं सविकल्पकत्वाने
नेन मनसः इंद्रियेष्वाकर्षणात्तेषु लयाभिधानं न तु कार्य्यत्वात्। तदुक्तं गीतासु इंद्रियाणां हि चरतां यन्मनोऽनुविधीयत इति। इंद्रियैर्विषयाकृष्टै
राक्षिप्तं ध्यायतां मन इति। इंद्रिभ्यो मनः पिधानेप्ययमर्थः तदादीनामनेन मनस्याकृष्य केषांचिल्लयानन्तरं आनुमानिकत्वमतेपीन्द्रियद्यमारोप्यैव। नभो
गुणत्वाच्छब्दः श्रोत्रैः ग्राह्यः अतइंद्रियग्राह्यत्वादिंद्रियेषु नभो विलापितं इति। तानीन्द्रियाणि यथोद्भवं उद्भवोत्पत्तिर्लाभः सच विषयाधीन इति। श्रोत्रा

इंद्रियेषु मनस्तानि तन्मात्रेषु यथोद्भवं। भूतादिनामून्युत्क्षिप्य महत्यात्मनि संदधे। तं सर्वगुणविन्यासं जीवे मायामये
न्यधात्। तं चानुशयमात्मस्थमसावनुशयी पुमान्॥ ज्ञानविज्ञानवीर्य्येण स्वरूपस्थोऽजहात्प्रभुः॥ अर्चिर्नाम म
हाराज्ञी तत्पत्न्यनुगता वनम्॥ सुकुमार्य्यतदर्हा च यत्पद्भ्यां स्पर्शनं भुवः॥ ॥

दीनि विशेषणाशब्दादिषु लयः। यद्वा तन्मात्रकार्य्यत्वेपीन्द्रियाणि मनोप्यर्थविकृतपंचतन्मात्रकार्यं अहंकारकत्वाभिधानं तदभिधानं तदधीनत्व
विवक्षये त्यविरोधः। भूतादिनाहंकारेण प्रागवस्थितं मनः सहितानीन्द्रियाणि उत्कृष्य परतो नीत्वा भूतादौ क्षिप्त्वा ते महत्तत्वे संदधे इत्यर्थः। सर्वे
षां गुणानां कार्य्याणां विन्यासः स्थितिर्यस्मिंस्तं महान्तं मायामये मायोपाधिप्रधाने जीवे तं च अनुशयमुपाधिं पूर्वमनुशयी प्रमान् जीवः अमोहत्वः
ब्रह्मणि स्थितः सन् अजहादित्यर्थः वनप्रवेशमारभ्य राज्ञां कथामाह। अर्चिर्नामेति चतुर्भिः अनुगता अनुजगाम अतदर्हा तदपि नार्हति। यत्पिपद्भ्यां
भुवः स्पर्शनमपि तियत।

भा०च
६६

भर्त्तुर्व्रतं यद्भूमिशयनादि तस्मिन्धर्म्मे या निष्ठा तया ऋषीणामियमार्षी देहयात्रा कंदमूलादिवृत्तिस्तया वन्यान्निर्दुःखेन प्राप्तात्तत्र हेतुः प्रेयस्क-
रेण स्पर्शनेन मानेन च या तास्यां निर्वृतिर्यस्याः पृथिव्याः पत्युर्दुहितृत्वेन स्या देवतारूपेण विपन्नं नष्टमखिलं चेतनादिकं यस्मिंस्तथा भूतं देहमालक्ष्य तं
देहं विना प्राणेऽपयत कृत्यं तत्कालोचितं विधाय ह्रदिन्या जले आप्लुता स्नाता सती भर्त्तुरुदकं दत्वा [illegible] स्थितां त्रिदशांश्च त्वा वह्निं त्रिः प्रदक्षिणी

अतीव भर्त्तुर्व्रतधर्म्मनिष्ठया शुश्रूषयाचारषदेहयात्रया॥ नाविंदतार्त्तिं परिकर्षितापि सा प्रेयस्करस्पर्शनमाननिर्वृति॥ देहं विपन्ना-
खिलचेतनादिकं पत्युः पृथिव्यादयितस्य चात्मनः॥ आलक्ष्य किंचिच्च विलप्य सा सती चितामथारोपयदद्रिसानुनि॥ विधाय कृ-
त्यं ह्रदिनीजलाप्लुता दत्वोदकं भर्त्तुरुदारकर्म्मणः॥ नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्यायभर्त्तृपादं॥ विलोक्यानु-
गतां साध्वीं पृथुं वीरवरं पतिं॥ तुष्टुवुर्वरदा देवैर्देवपत्न्यः सहस्रशः॥ कुर्वत्यः कुसुमासारं तस्मिन्मंदरसानुनि॥ नदत्स्वमरतूर्येषु गृ-
णंति स्म परस्परं॥ दे॰ उवाच॥ अहो इयं वधूर्धन्या या चैवं भूभुजां पतिं॥ सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव॥ सैषा नूनं व्रजत्यूर्ध्वमनु
वैन्यं पतिं सती॥ पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्म्मणा॥ तेषां दुरापं किं त्वन्यन्मर्त्यानां भगवत्पदं॥ भुवि लोलायुषो ये वै नैष्कर्म्यं
साधयन्त्युत॥ स वंचितो बतात्मध्रुक् कृच्छ्रेण महता भुवि॥ लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते॥

कुत्र देवैः सहिताः गृणंति स्म अभाषन्त भगवान्पद्यते गम्यते अनेनेति तथा तं नैष्कर्म्यं ज्ञानं ये एवं चलायुषोऽपि साधयन्ति तेषामन्यदेवादिपदं किं दु-
र्लभमिति किं विशिष्टयः अमर्त्यं शोचंति स विवंचित इति यतस्त्वात्मने द्रुह्यति यो अपवर्गसाधनं मानुष्यं लब्ध्वापि विषयेष्वासक्तिं याति॥

राम
६६

विशापस्त्रारीनांवैश्यादीनांवापतिःस्यात्॥ यद्यपिबहून्यफलानिभवंतितथापिभुक्तान्यसंगएवप्रश्रवणादिकंस्यात्॥ महतोभागवतोमाहात्म्य

मे॥ भगवान्॥ च॥ हत्वावतीश्वमरह्यीशपतिर्लोकंगतावधूः॥ यंचात्मविरहाद्धर्मोवैन्यःपापाच्युताशयः॥ इत्थंभूतानुभावोस्मोपृथुः
सभगवन्नमः॥ कीर्तितंतस्यचरितंउद्दामचरितस्यते॥ यइदंसुमहत्पुण्यंश्रद्धयावहितःपठेत्॥ श्रावयेच्छृणुयाद्वापिसपृथोःप
दवीमियात्॥ ब्राह्मणोब्रह्मवर्च्चस्वीराजन्योजगतीपतिः॥ वैश्यःपठन्विट्पतिःस्याच्छूद्रःसत्तमतामियात्॥ त्रिःकृत्वइदमा
कर्ण्यनरोनार्यथवादृता॥ अप्रजःसुप्रजतमोनिर्धनोधनवत्तमः॥ अस्पष्टकीर्त्तिःसुयशामूर्खोभवतिपंडितः॥ इदंस्वस्त्य
यनंपुंसाममंगल्यनिवारणं॥ धन्यंयशस्यमायुष्यंस्वर्ग्यंकलिमलापहं॥ धर्मार्थकाममोक्षाणांसम्यक्सिद्धिमभीप्सुभिः॥ श्र
द्धयैतदनुश्राव्यंचतुर्णांकारणंपरं॥ विजयाभिमुखोराजाश्रुत्वैतदभियातियान्॥ बलिंतस्मैहरंत्यग्रेराजानःपृथवेयथा॥ मु
क्तान्यसंगोभगवत्यमलांभक्तिमुद्वहन्॥ वैन्यस्यचरितंपुण्यंशृणुयाच्छ्रावयेत्पठेत्॥ वैचित्रवीर्याभिहितंमहन्माहात्म्यसूच
कं॥ अस्मिन्कृतमतिमर्त्यःपार्थिवींगतिमाप्नुयात्॥ अनुदिनमिदमादरेणशृण्वन्पृथुचरितंप्रथयन्विमुक्तसंगः॥ भगवतिभ
वसिंधुपोतपादेसचनिपुणांलभतेरतिंमनुष्यः॥ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेत्रयोविंशोध्यायः॥२३॥

सम्मत्वकं॥ पार्थिवींपृथुसंबंधिनीं॥ पार्थिवीमितिवापाठः अथयत्कीर्त्तयन्भवसिंधोःपोतःपादोयस्य॥ इतिचतुर्थेत्रयोदशोव्याख्यः॥ ॥

भा०च एकादशभिरध्यायैः पृथोश्चरितमीरितं । प्रचेतसामथाष्टाभिस्तन्मध्ये पंचभिस्थितैः । वंशो हविर्धि शे प्रपौत्राच्च पृथोः प्राचीनबर्हिषः । प्रचेतसां ज
९७ निहेम्यो रुद्रगीतं च वर्ण्यते । अधिराजत्वमीशित्वमर्थः । यवीयेभ्यः कनिष्ठेभ्यः काष्ठा दिशः । कुर्यावतुर्थी । राज्ञो मध्यराष्ट्रयोरश्वमेधेऽश्वविजयाव
सरे अपहृतत्वमेवाह पावक इति । उपायः शापस्तस्मात्तन्नृपेषु त्यक्ताः सन्तः योगगतिं अग्नित्वं प्राप्ताः । नभस्वत्यां अनस्यां भार्यायां अन्तर्धान

मैत्रेय उवाच । विजिताश्वोऽधिराजासीत्पृथुपुत्रः पृथुश्रवाः । यवीयोभ्यो ददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः । हर्यक्षायादिशत्प्रा
चीं धूम्रकेशाय दक्षिणां । प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः । अन्तर्धानगतिं शक्राल्लब्ध्वान्तर्धानसंज्ञितः । अपत्य
त्रयमाधत्त शिखण्डिन्यां सुसंमतं । पावकः पवमानश्च शुचिरित्यग्नयः पुरा । वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः । अन्तर्धा
नो नभस्वत्यां हविर्धानमविन्दत । य इन्द्रमश्वहर्तारं विद्वानपि न जघ्निवान् । राज्ञां वृत्तिं करादानदण्डशुल्कादिदारुणां । मन्यमा
नो दीर्घसत्रव्याजेन विससर्ज ह । तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् । यजंस्तल्लोकतामाप कुशलेन समाधिना । हविर्धा श्लो०२
नाद्धविर्धानी विदुरासूत षट्सुतान् । बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतं । बर्हिषत्सुमहाभागो हाविर्धानिः [illegible]
प्रजापतिः । क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह । यस्येदं देवयजनमनुयज्ञं वितन्वतः । प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलं

विशेषणं य इति । एतेन शक्रादन्तर्धानगतिलाभे कारणमुक्तं । तदेवान्तर्धानो राज्ञां वृत्तिं किं करादानादिभिर्दारुणां परपीडात्मिकां मन्यमानो विससर्ज ह इति राम
हंसानां श्रेष्ठमिति हंसः तं पुरुषं पूर्णं कुशलं पुण्यं तद्रूपेण समाधिना हविर्धानिर्हविर्धानस्य योगेषु च प्रावीण्यमाह । क्रियाकाण्डे निष्णातत्वमाह । ९
यस्येति । इदं वसुधातलं देवयजनं यजनवाटं वितन्वतः । यज्ञे क्रमतः तत्समीप एव यज्ञान्तरं कुर्वतः । ततः अत एव प्राचीनबर्हिरित्युच्यते

समुद्रस्य कन्यां देववरेण देवेन ब्रह्मणोपदिष्टां शतद्रुतिनाम्नीं किशोरीं बालां परिक्रमतीमुद्वहन्तीमग्निं गच्छती शुकीमिवेति । एवं ह्याख्यायते सप्तर्षीणां सप्तर्षिभार्या दृष्ट्वा अग्निः कामसन्तप्तो भूत । तं वसिष्ठभार्यावर्ज्या स्वाहा नाम सप्तर्षिभार्यारूपधारिणी सती रमयामास । रमयित्वा च तद्रेतः शुकारूपेण शरस्तम्बे निधाय गच्छत । तं यथा सप्तर्षिभार्याभ्रान्त्याग्निः कामितवान् तद्वदिति शुकीमिवेति पाठे श्लोकद्वयं धारमिवेत्यर्थः । सूर्यया

सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिं । यां वीक्ष्य चारुसर्वांगीं किशोरीं सुष्ठ्वलंकृतां । परिक्रमन्तीमुद्वाहे चकमे गिः शुकीमिव । विबुधासुरगंधर्वमुनिसिद्धनरोरगाः । विजिताः सूर्यया दिक्षु क्वणयन्त्यैव नूपुरैः । प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन् । तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः । पित्रादिष्टाः प्रजासर्गे तपसेऽर्णवमाविशन् । दशवर्षसहस्राणि तपसार्चंस्तपस्पतिं । यदुक्तं पथि दृष्टेन गिरिशेन प्रसीदता । तद्ध्यायन्तो जपन्तश्च पूजयन्तश्च संयताः । विदुर उवाच । प्रचेतसां गिरित्रेण यथासीत्पथि संगमः । यदुताह हरः प्रीतस्तन्नो ब्रह्मन्वदार्थवत् । संगमः खलु विप्रर्षे शिवेनेह शरीरिणां । दुर्लभो मुनयो दध्युरसंगाद्यमभीप्सितं । आत्मारामोपि यस्त्वस्य लोककल्पस्य राधसे । शक्त्या युक्तो विचरति घोरया भगवान्भवः ॥

नवोढयैव विबुधादयो विजिता अभिभूताः तच्च नूपुरैः पादयोः क्वणयन्त्यैव ध्वनिमात्रेणेत्यर्थः । तुल्यं नाम व्रतमाचरणं च येषां धर्मस्नाताः धर्मपारगाः तपसा तपसांपतिं हरिं आर्चन् अपूजयामासुः मुनयोपि संगत्यागेनाभिप्रेतं वस्तु वरं केवलं न सम्यक्प्राप्नुः तेन शिवेना[illegible]मुनिनां किं तथापि नेन घोरत्वादित्याशंक्याह । आत्मारामोपि स्वमायया पालनाय ॥

भा॰व
६८

गृहीत्वा कारिणां शिवदर्शनं भवतु एव भवतीत्याशयेनाह। प्रचेतस इति। समुद्रमुपसमुद्राल्किं चिन्त्यमूनं। उपोधिकेचेति कर्म्मप्रवचनीयः। प्रसन्नासलि लामत्यास्यों यस्मिन्। नीलोत्पलादीनामाकरं जन्मस्थानं। उत्पलं भोजनकह्लारत्रितयं इति निसंख्यादिकाशानि। इंदीवरं नीलोत्पलान्त्ससुदन्हिक्तिः प्रादुर्भूतं प्राप्य नाय्यं हंसादिभिर्निकूजितां मत्तानां भ्रमराणां सोव्येंण दृष्टोभागो लतां प्रियायां यस्मिन्। पद्मकोशरजोदिङ्कु विक्षिपता पवन

मे यत्र व यावेतमः पितुर्वीर्यशिरसाः रायपाधवः। दिशः पतीवीयप्रयपुष्पप्रसादं ततचेतसः। समुद्रमुपविस्तीर्णमपश्यत्ममहत्सरः महन्मनस्व व्यस्तं प्रसन्नसलिलाशयं। नीलरक्तोत्पलांभोजकह्लारेन्दीवराकरं। हंससारसचक्राह्वकारण्डवनिकूजितं। मत्तभ्रमरसोभ्य र्यैर्हृष्टरोमलताद्रुपं। पद्मकोशरजोदिक्षु विक्षिपत्पवनोत्सवं। तत्र गंधर्वमाकर्ण्य दिव्यमार्गमनोहरं। विसिस्मयुराजपुत्रास्ते मृदंगपणवाद्यवत। नर्द्धैव सरसस्तस्मात्रिष्कामत्तमहाहगं उपगीयमानमपरप्रवरं विविधानुगैः। तप्तहेमनिकायाभं शितिकंठं त्रिलोचनं। प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः। सतान्प्रपन्नार्त्तिहरो भगवान्भृत्यवत्सलः। धर्म्मज्ञान्शीलसंपन्नान्प्रीतात्मा प्रीत उवाच ह। रुद्र उवाच। यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितं। अनुग्रहाय भद्रं व एवं मे दर्शनं कृतं। यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात्। भगवन्तं वा

सुदेवं प्रपन्नः स प्रियो हि मे। नेनोत्सवोयस्मिन् तत्र मृदंगपणवादिवाद्यमनुपश्चाद्दिव्यमार्गेनेतदेवेन्मनोहरं। गंधर्वगानमाकर्ण्य विस्मयं प्रापन्नाः। पाठान्तरे मृदंगपणवादिश्रवतरस्त्ततेषां ध्वनिमतिरश्चर्वदित्यर्थः। तप्तत्रिलोचनं वीक्षजातामूर्य्य प्रणेमुरित्यन्वयः। तप्तहेमराशिसदृशाकांतिः शिति नीलकंठो यस्य तं। वेदिषदः वर्हिषदश्चिकीर्षितं भगवदाराधनं विदितं अनुग्रहकारणमाह। यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः। कथंभूतं रहसः

तन्निं ॥ तस्य महत्त्वमत्वादित्याह ॥ स्वधर्मनिष्ठः पुमान्वहुभिर्जन्मभिर्विरिंचितां प्राप्नोति ॥ ततोपि उपपातिशयेन मामेति ॥ भागवतस्त्वत्र्युयं देह
नैः अव्याकृतं प्रपंचातीतं वैष्णवं पदमेति ॥ यथाहं रुद्रो भूत्वा आधिकारिकवर्त्तमानः विबुधा देवा आधिकारिकाः कल्पात्यये अधिकारान्ते
लिंगभंगे मत्त्वेष्यन्ति ॥ अथ भागवतत्वाद्यूयं मे प्रियाः स्थ भवद्भिरपि मयि प्रीतिः कार्येत्याशयेनाह ॥ मदन्यो भागवतानां च प्रेयान्नास्ति ॥
अतः इदं जप्तव्यं श्रूयतामिति ॥ विविक्तमर्मं कीर्णं यथा भवति ॥ हृष्यारो ब्रह्मणा दृष्टा ॥ पुत्रेभ्यः प्रोक्तमिष्टदं ॥ स्तोत्रं प्राह प्रचेतोभ्यः क

स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिंचतामेति ततः परं हि मां ॥ अव्याकृतं भागवतोथ वैष्णवं पदं यथाहं विबुधाः कलात्य
यये ॥ अथ भागवता यूयं प्रियाः स्थ भगवान्यथा ॥ न मद्भागवतानां च प्रेयानन्योस्ति कर्हिचित् ॥ इदं विविक्तं जप्तव्यं पवि
त्रं मंगलं परं ॥ निःश्रेयसकरं चापि श्रूयतां यद्वदामि वः ॥ मैत्रेय उवाच ॥ इत्यनुक्रोशहृदयो भगवानाह तांछिवः ॥ बद्धांजली
न्राजपुत्रान्नारायणपरो वचः ॥ श्रीरुद्र उवाच ॥ जितं ते आत्मविद्धुर्यस्वस्तये स्वस्तिरस्तु मे ॥ भवता राधसा राद्धं सर्वस्मा आ
त्मने नमः ॥

पयाभगवांछिवः ॥ ते जितं तवोत्कर्षः आत्मविद्धुर्याणां स्वस्तये शोभनसत्तायै स्वानंदलाभायेत्यर्थः अतो मे स्वस्तिः स्वानां
दमस्त्वाह ॥ ननु मम मोक्षं धाम द्रष्टुमेव किं न स्यात् तत्राह ॥ भवता राधसा स्वानंदरूपेण राद्धं सिद्धं ॥ स्वपरमानंदरूपेणैव नित्यं स्थित इत्यर्थः ॥ अत एवं भू
तायात्मने तुभ्यं नमः सर्वस्मै सर्वरूपाय च ॥

सर्वरूपत्वप्रपंचयन्प्रणमति ॥ ओं ह्रीं ह्रीं इति ॥ पंकजं लोकात्मकं नाभौ यस्य तस्मै कारणात्मने नमः ॥ कारणत्वाद्देव स्वरूपानां प्राणिनां यत्तु पाध
यः भूतानि सूक्ष्माणि तन्मात्राणि इंद्रियाणि च तेषामात्मने नियंत्रे अनंतः कारणं च तत्र त्वयाधिष्ठातृत्वेन प्रणमति चतुर्भिः श्लोकार्द्धैः ॥ वासुदेवाय
चित्ताधिष्ठात्रे कूटस्थाय निर्विकाराय ॥ चित्तस्यैकरूपत्वात् ॥ संकर्षणाय अहंकाराधिष्ठात्रे सूक्ष्माय अव्यक्ताय दुरंताय अनंताय शेषाय अंतकाय पुरूषा
ग्निना लोकदाहकाय विश्वस्य प्रकाशो बोधो यस्मात् ॥ अंतरात्मने बुद्ध्यधिष्ठात्रे ॥ हृषीकाणामीशाय इंद्रियमनस्तदात्मने ॥ सूर्यरूपेण प्रणा

नमः पंकजनाभाय भूतसूक्ष्मेन्द्रियात्मने ॥ वासुदेवाय शांताय कूटस्थाय स्वरोचिषे ॥ संकर्षणाय सूक्ष्माय दुरंतांतकाय च ॥ नमो
विश्वप्रबोधाय प्रद्युम्नायांतरात्मने ॥ नमो नमोनिरुद्धाय हृषीकेशेन्द्रियात्मने ॥ नमः परमहंसाय पूर्णाय निभृतात्मने ॥ स्वर्गा
पवर्गद्वाराय नित्यं शुचिषदे नमः ॥ नमो हिरण्यवीर्याय चातुर्होत्राय तंतवे ॥ नम ऊर्ज्ज इषे त्रय्याः पतये यज्ञरेतसे ॥ तृप्तिदाय
च जीवाय नमः सर्वरसात्मने ॥ सर्वसत्वात्मदेहाय विशेषाय स्थवीयसे ॥ नमस्त्रैलोक्यपालाय सह ओजोबलाय च ॥ ॥

मति ॥ परमहंसाय सूर्याय पूर्णाय तेजसा विश्वव्यापिने निभृतात्मने सूर्यरूपद्धि सूर्याय स्वर्गापवर्गद्वाराय ॥ शुचिर्यत्तत्र क्षराणो निषीदतीति शुचिषत्तस्मै
हंसः शुचिषदिति श्रुतेः ॥ हिरण्यवीर्याय यस्य तस्मै अग्निरूपाय ॥ चातुर्होत्रं कर्म तस्मै तत्साधनाय तंतवे यज्ञः ऊतः तेन तवेति द्वितीयाकारणकायः सोमत्वमाह ऊर्जे
पितॄणामन्नाय इषे देवानामन्नाय ॥ यज्ञरेतसे सोमाय सहो पितॄणां देवानां चान्न ॥ एकरूपाय त्रय्याः पतये रूपेण नमः सूर्याग्निसोमत्वेनैव तेजस्त्विषन्के जे
लत्वमाह ॥ सर्वरसात्मने जलरूपाय विशेषाय स्थूलरूपाय ॥ सर्वेषां सत्वानां प्राणिनां ये आत्मानस्तेषां देहाय स्थवीयसे ॥ विराड्देहाय च ॥ त्रैलोक्यपालाय वा
यवे ॥ सहसादिरूपाय महिमाणरूपाय त्रैलोक्यपालयति ॥ सहसादि धर्म्मीच ॥

नभसे आकाशाय ॥ अर्थानां लिंगाय तत्प्रकाशाय शब्दगुणत्वात् ॥ अन्तर्बहिरात्मने अन्तर्बहिर्व्यवहारालंबनाय ॥ एवं महाभूतरूपत्वमुक्तं ॥ अमुष्मै ॥ स्वर्गाय भूरिवर्चसे ॥ एष वै ज्योतिष्मन्तं पुण्यं लोकं यातीति श्रुतेः ॥ प्रवृत्ताय निवृत्ताय च कर्मणे पितृदेवाय यथाक्रमं पितृदेवप्राप्तिफलाय ॥ अधर्मफलरूपाय च मृत्यवे ॥ हे ईश आशिषां कारणात्मने सर्वकर्मफलदात्रे मनवे सर्वज्ञाय ॥ मंत्रात्मकायेति वा ॥ विष्णुत्वेन प्रणमति ॥ बृहते धर्माय परमधर्मात्मने कृष्णाय ॥ रुद्ररूपेण प्रणमति ॥ मीढुषे रुद्राय ॥ अहंकृत अहंकारस्तदात्मने सर्वकर्तृ

अर्थलिंगाय नभसे नमोन्तर्बहिरात्मने ॥ नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ॥ प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे ॥ नमोऽधर्मविपाकाय मृत्यवे दुःखदाय च ॥ नमस्त आशिषामीश मनवे कारणात्मने ॥ नमो धर्माय बृहते कृष्णायाकुंठमेधसे ॥ पुरुषाय पुराणाय सांख्ययोगेश्वराय च ॥ शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने ॥ चेत आकूतिरूपाय नमो वाचो विभूतये ॥ दर्शनं नो दिदृक्षूणां देहि भागवतार्चितं ॥ रूपं प्रियतमं स्वानां सर्वेन्द्रियगुणांजनं ॥

कारणं कर्मशक्तित्रयसमेताय तस्मै ॥ ब्रह्मत्वेन प्रणमति ॥ चेतो ज्ञानं आकूतिः क्रिया तद्रूपाय वाचो विविधा भूतिः ऐश्वर्यं यस्मात्तस्मै ॥ एवं नमस्कृत्य दर्शनं प्रार्थयते दर्शनमिति त्रिभिः ॥ भागवतैः सत्कृतं दर्शनं देहीत्यस्य विवरणं ॥ रूपमित्यादि द्वयं दर्शयेत्यन्तं स्वानां भक्तानां प्रियतमं रूपं प्रदर्शयेति नवमेनान्वयः ॥ सर्वेषामिंद्रियाणां ये गुणा विषयास्तेषामंजनं व्यंजकं सर्वेंद्रियविषयी विषयरूपमित्यर्थः सर्वेन्द्रियाणि ॥ स्वगुणैः रंजकं रंजयतीति वा ॥

भा० व०
८०

स्निग्धः प्रावृषि यो घनस्तद्वत् श्यामं सर्व्वेषां सौंदर्याणां संग्रहो यस्मिन् चारवः आयताश्चत्वारो बाहवो यस्मिन् सुजातं यथोचितं सर्व्वावयवं रुचिरमा
ननं यस्मिन् पद्मस्य कोशमध्ये यानि पलाशानि तद्वदक्षिणी यस्य सुकपोलमास्यं यस्मिन् समौ कर्णौ विभूषणं यस्य कुंडलयोरप्येवन्नमा
णत्वात् प्रीत्या प्रहसिता विवापांगो यस्मिन् स्फुरन्ति किरीटादीनि यस्मिन् शंखादिभिः उत्तमर्द्धिर्लक्ष्मीः यद्वा एतैरुत्तमा ऋद्धिः उत्कर्षो यस्मा
त्तिमत् सौभाग्ययुक्ता ग्रीवा येन सिंहस्य स्कंधे परितः प्रसरंतः केसरा एव त्विषः तादृशीः सर्व्वतस्त्विषो विभ्रच्चासौ सौभगग्रीवः कौस्तुभो

स्निग्धप्रावृड्घनश्यामं सर्व्वसौंदर्य्यसंग्रहं चार्व्वायतचतुर्बाहुं सुजातरुचिराननं पद्मकोशपलाशाक्षं सुंदरभ्रु सुनासिकं सु
द्विजं सुकपोलास्यं समकर्णविभूषणं प्रीतिप्रहसितापांगमलकैरूपशोभितं लसत्पंकजकिंजल्कदुकूलं मृष्टकुंडलं स्फुर
त्किरीटवलयहारनूपुरमेखलं शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् सिंहस्कंधत्विषो बिभ्रत्सौभगग्रीवकौस्तुभं श्रियान
पायिन्या क्षिप्तनिकषाश्मोरसोल्लसत् पूररेचकसंविग्नवलिवल्गुदलोदरं प्रतिसंक्रामयद्विश्वं नाभ्यावर्त्तगभीरया श्यामश्रोण्या
धिरोचिष्णुदुकूलस्वर्णमेखलं समचार्व्वंघ्रिजंघोरुनिम्नजानुसुदर्शनं

यस्मिन् यद्वा सिंहस्येव यौ स्कंधौ तयोस्त्विषः कुंडलाहारादिश्रि
स्त्विर्बिभ्रदिति पृथग्विशेषणं सौभगयुक्ता ग्रीवा येन सत्कौस्तुभो यस्मिन् श्रियाहेतुभूतया क्षिप्तः क्षिप्तः स्फुटो निकषाश्मा स्वर्णरेखांकितो निकषपाषाणो
येन तादृशेनोरसा उल्लसच्छोभमानं स्वासोछ्वासाभ्यां संविग्नाश्चंचला वलयः त्रिवलयस्ताभिर्वल्गु दलवदश्वत्थपत्रसदृशमुदरं यस्मिन् प्रतिसंक्रामयत् पुनः स्वतो निर्गतं
तेनैव द्वारेण पुनः प्रवेशयदिव श्यामश्रोण्यामधिकं रोचिष्णुत्वं यस्यास्तं दुकूलं तत्र स्वर्णमयी मेखला यस्मिन् अंघ्री च जंघे च ऊरू च निम्ने अनुन्नते जानुनी च य
मेष्वात्मनिरतैः शोभनं दर्शनं यस्य समाश्चारवोंघ्र्यादयो यस्मिन् निम्ने जानुनी यस्मिन् शोभनं दर्शनं यस्येति पदत्रयं वा ॥

राम
८०

यद्दारीपस्थानीयेन । यद्वा एतेन भूतेन पदोपलक्षितं त्वत्पदं शराणां प्रदर्शयेत्यर्थः । शारदियत्यत्र तस्य पलाशं तद्वद्वो विपर्यस्तेन । नवशरीरनिर्मि-
तमेव मयमत्तानां विध्वस्तताद्वीयं स्वपदं शरणां प्रदर्शय । अपात्प्रद्धादीनां साध्यं स्येयनतत । हे गुरो यतस्त्वमेव तमोऽन्धुषामत्तानां मार्गदर्शी
प्रदर्शीको गुरुश्रुतिर्दुर्लभमिदं मया प्रार्थितमिति त्वोतेवाह । एतद्रूपमत्र ध्येयं ध्यानार्हमेव नत्र प्रयत्नकृतः । प्राप्यमित्यर्थः । तर्हि किं केनापि न प्रा-
प्यते तत्राह । भवानिति । दुर्लभमेवाह । स्वर्ज्जो राज्यस्य तस्याप्यभिमतः स्पृहणीयः किंच । एकान्तेन पश्चात्मवितस्यापि गतिगम्यः । अनन्त

पदाशरत्पत्रपलाशशोविषानपद्युपिनोः तरं हं विध्वस्तता । प्रदर्शयत्वीयमयाप्तसाध्यमपदं गुरो मार्गदर्शस्त्वमोऽन्धुषां । एत-
द्रूपमत्र ध्येयमात्मशुद्धिमभीप्सता । यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठतां । भवान्मल्लिमताल भ्यो दुर्लभः सर्वदेहिनां
स्वाराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः । तं दुराराध्यमाराध्य सतामपि दुरत्यया । एकान्तभक्त्या को वाञ्छेत्पादमूलं वि-
ना बहिः । यत्र निर्विष्टमरणं कृतान्तो नाभिमन्यते । विश्वं विध्वंसयद्वीर्यशौर्यविस्फूर्जितभ्रुवा । क्षणार्द्धेनापि तुलये न स्वर्गं
नापुनर्भवं । भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः

ग्यतिरेकेण न किं विद्वान्वाञ्छामीत्याह । तं त्वामेकान्तभक्त्याऽऽराध्य बहिः स्वार्जीदि स्वर्वा तत्र देवः ।
यत्त्वत्पादमूले शरणां प्रविष्टं कृतान्तः कालो यमराजं वश इति नाभिमानं करोति विकुर्वितवीर्यप्रभावः शौर्यमुत्साहः ताभ्यां विस्फूर्जितया कम्पितया ।
क्त्वा विश्वं विध्वंसयदपि । त्वत्पादमूले प्रविष्टस्य कृतान्त भयाभावः क्रियानयं लाभः यावता त्वद्भक्तसंगस्य एवमकलप्रत्यषार्थ्यश्रेणिशिरस्थिनरीनत्रिंड
त्याह । भगवतस्त्वदंग्रिणां संगस्य क्षणार्द्धेनापि न स्वर्गं तुलयेम मंन गणयामि न चापुनर्भवं मोक्षं । मर्त्यानामाशिषो राज्याद्याः किमुत ।

भा॰च
७१

अथ अतो हेतोः अनघ्योः अघहरयोः एवंभूतयोस्तव कीर्त्तिर्यशः तीर्थं गंगा तयोरंतर्बहिः स्नानाभ्यां विधूतः पाप्मा येषां अत एव भूतेष्वनुक्रोशः कृपा सुसत्त्वं च रागादिरहितं चित्तं शीलं चार्ज्जवादि विद्यते येषां तेषां संगमोऽस्माकं वा एव नस्त्वदनुग्रहः तत्र चित्तानां च तत्त्वज्ञानां संगादेव भवतीत्याह नय स्येति येषां सतां भक्तियोगेनानुगृहीतं शुद्धं सत्त्वं स्यचित्तं बाह्यार्थविवर्जितं तमोरूपायां गुहायां च न विशति येन प्राप्तं तत्र तत्र मुनिस्त्वद्गतिं तत्त्व पश्यति कीदृशं तत्त्वं तदाह यत्रेति अगतः उपादानत्वेन तत्त्वं लक्षितं निमित्तत्वेनापि तदेव लक्षयन्नाह यदिदं विश्वं सदिव परमार्थ [illegible]

अथानघांघ्रेस्तव कीर्त्तितीर्थयोरंतर्बहिः स्नानविधूतपाप्मनां भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात्संगमोऽनुग्रह एष नस्तव ५८
न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् यद्भक्तियोगानुगृहीतमंजसा मुनिर्विचष्टे ननु तत्र ते गतिं यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् तत्त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतं यो मायये दं पुरुरूपयासृजद्बिभर्त्ति भूयः क्षपयत्यविक्रियः यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतंत्रं भगवन्प्रतीमहि क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजंति सिद्धये भूतेंद्रियांतःकरणोपलक्षितं वेदे च तंत्रे च त एव कोविदाः ६०

मिवासृजत् कथंभूतया यथा भेदबुद्धिरन्येषां भवति तथा आत्मनि तत्त्वापि दुस्थया स्वकार्यकर्त्रा समर्थया तं त्वा निरस्तभेदं प्रतीमहि जानीमः प द्यपि त्वमेवातिभेदं ब्रह्म तथापि प्राग्ज्ञं साकारं तं च रूपं येदं प्रजन्ति त एव वेदागमतत्त्वज्ञा इत्याह क्रियाकलापैरिति कर्मयोगिनः प्रजयन्ति त एव कोविदाः नन्वेतदनादरस्य केवलज्ञानपरस्त्वान्तत्वेऽस्मागमे कथं एतमिदं भूतेन्द्रियांतःकरणैः स्वतंत्रैर्यदुपलक्ष्यते नियंतृरूपेण तत्

राम
७१

नन्वभिन्नमपि भेदं कुर्वन्तः ॥ कथं सन्तस्ते को विरा न हि तेषां भेदः क्रियते त्वयैव क्रीडार्थं चेतनाः चेतनात्मको भेदः कृत इत्याह ॥ त्वमिति ॥ आद्यस्त्व
मेक एव ॥ सुप्तनामायाख्यशक्तिर्विस्पष्टा त्वयाशक्तारजः सत्त्वतमसां द्वंद्वं कंपयतो रजस्त्वारे महानहंकारः खंवमहदग्निर्वार्धराश्चवाः ॥ उदकं
हि एषश्च स्मषयश्च भूतगणाश्च एवमिदं जगज्जातो भवति ॥ तर्हि भिद्यत इत्यत्राह ॥ एतद्ध यथा रयति ॥ सृष्टमिति ॥ जरायुजांडजस्वेदजोद्भिज्जरूपेण
चतुर्विधा स्वांशेन प्रविष्टः ॥ अथो रंगे हेतो परस्मात् ॥ सन्तमेषं विराजमं सृष्टिशयनात्पुरुषं विदुः तर्हि किमाख्यमेव संसारिणां विदुः ॥ नेत्या

त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजस्सत्त्वतमो विभिद्यते ॥ महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं
यतः ॥ सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन ॥ अथो विदुस्तं पुरुषं सन्तमन्तर्भुङ्क्ते हृषीकैर्मधु सारं
घं यः ॥ स एष लोकानतिचंडवेगो विकर्षसि त्वं खलु कालयानः ॥ भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाविष
ह्यः ॥

ह ॥ सारघं मधुमक्षिकाकृताभिः ॥ सृष्टं मधुवत्सुखहेतुकं विषयसुखमविद्यावृतः सन् यो भुंक्ते तं विदुः ॥ तथा च श्रुतिः ॥ अनयोरन्यः पि
प्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति निर्गुणं तं च गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यत्र ॥ न च तत्र सर्वनियंतृत्वः कुतः संसार इत्याह ॥ यः
स्वशक्त्येदं सृष्टवान् स एष त्वं खलु भूतैरेव भूतानि मेघपङ्क्तीर्वायुरिव कालयन् विचालयन् लोकान् विकर्षसि संहरसि अनुमेयतत्त्व ॥ अलक्ष्यस्वरूपः

भा० च०
७१

विकर्षणप्रकारमाह॥ प्रमत्तमिति॥ इतिकृत्यं एवमेवमिदंकर्त्तव्यमिति॥ विन्नयोद्वेः प्रमत्तं नवहेतुर्विषयेलालसं॥ अतिकाष्ठकं प्राप्तोपि वि
षयेप्रवृद्धलोभं॥ अतकल्पमपिपद्यसे॥ आक्रामसि॥ ऊधालेलिहानः जिह्वयोष्ठप्रान्तौ स्पृशन्नृर्ण्यां मूषकमिव॥ अतः कस्त्वत्पदाङ्घ्रिं त्यजेत्
पंडितस्त्वेति॥ कथंभूतः यत्त्वावमानोरदरहितेनव्यवमानकेतनंशरीरंयस्य सः॥ परस्माकंगुरुर्ब्रह्मा॥ देतिस्मेतिमर्वेषांस्तोतॄणांवाक्यं वि

प्रमत्तमुच्चैरितिकृत्यचिन्तया प्रवृद्धलोभं विषयेषुलालसं॥ त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोहिरिवाखुमन्त
कः॥ कस्त्वत्पराङ्घ्रिं विजहातिपंडितो यस्तेवमान व्ययमानकेतनः॥ विशंकयास्मद्गुरुरर्च्चति स्म यद्विनोपपत्तिं मनवश्चतु
र्दश॥ अथ त्वमसि नो ब्रह्मन् परमात्मन् विपश्चितां॥ विश्वं रुद्रभयध्वस्तमकुतश्चिद्भयागतिः॥ इदं जपत भद्रं वो विशुद्धा नृपनंद
नाः॥ स्वधर्ममनुतिष्ठन्तो भगवत्यर्पिताशयाः॥ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितं॥ पूजयध्वं गृणंतश्च ध्यायंतश्चासकृद्धरिं॥

योगादेशमुपासाद्य धारयन्तो मुनिव्रताः॥ समाहितधियः सर्वे एतदभ्यसतादृताः॥ इदमाह पुरास्माकं भगवान्विश्वसृक्पतिः॥ भृ
ग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षतां॥ ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः॥ अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः
प्रजाः॥ अथेदं नित्यदा युक्तो जपन्नवहितः पुमान्॥ अचिराच्छ्रेय आप्नोति वासुदेवपरायणः॥

× अध्यायैत ४

शंकमानाशशीकया॥ विनोपपत्तिमितिहेतुंविश्वासेमनवश्चार्चतिस्म॥ उपसंहरति॥ अथेतिहेतुं भयेनध्वस्तं॥ अतः कुतश्चिद्भयंयस्यां तादृशीगति
रसि॥ योगादेशनामैतत्स्तोत्रं उपासाद्यपाठतः॥ प्राप्यमनसाधारयन्तः॥ अभ्यासेनपजतोविश्वसृजोपतिर्ब्रह्मा॥ ससृक्ष्मः स्रष्टवन्तः युक्तः एकाग्रचित्तः

राम
७१

ज्ञानमेव नौर्यस्य ॥ योधीयानो भवति ॥ श्रुतोऽमुष्माद्रुद्रेः श्रुतत्वात् तस्थिरः सम्यग्गीतं स्तोत्रं तेन गीतात् कृतात् ॥ एकएव वल्लभः प्रियः आश्रय
स्तस्मात् ॥ कल्य उषसि उत्थाय परमस्य स्तवं यतो मतस्तेन इप्सितं प्राप्स्यथ ॥ इति चतुर्थे [illegible]शः ॥ प्रचेतः स्तनयस्यात्स्वततत्त्वे नारदोक्तिः ॥ प्राचीनवर्हि
षेध्यात्मयाथात्म्यमाह पंचभिः ॥ पुरंजनकथाव्याजात्यव विंशे तु नारदः ॥ आत्मनो ऽद्धिसंगेन विविधामाह संसृतिः ॥ प्रचेतः स्तनपस्तो

श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परं ॥ सुखं तरति दुःपारं ज्ञाननौर्व्यसनार्णवं ॥ य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवं ॥
अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥ विंदते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरं ॥ मद्गीतगीतात्सुप्रीतात् श्रेयसामेकवल्ल
भात् ॥ इदं यः कल्य उत्थाय प्रांजलिः श्रद्धयान्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः ॥ गीतं मयेदं नरदेवनंदनाः प
रमस्य पुंसः परमात्मनः स्तवं ॥ जपंत एकाग्रधियस्तपो महच्चरध्वमंते तत आप्स्यथेप्सितं ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे रुद्रगीतं
नाम चतुर्विंशो ॥ २४ ॥ मैत्रेय उवाच ॥ इति संदिश्य भगवान् बार्हिषदैरभिपूजितः ॥ पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः ॥ रुद्रगीतं भग
वतः स्तोत्रं सर्वे प्रचेतसः ॥ जपंतस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥ प्राचीनवर्हिषं क्षत्तः कर्मस्वासक्तमानसं ॥ नारदोऽध्यात्मतत्त्वज्ञः कृ
पालुः प्रत्यबोधयत् ॥ श्रेयस्त्वं कतमद्राजन् कर्मणात्मन ईहसे ॥ दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥ राजोवाच ॥ न जानामि महाभाग प
रं कर्मापविद्धधीः ॥ ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥ गेहेषु कूटधर्मेषु पुत्रदारधनार्थधीः ॥ न परं विंदते मूढो भ्राम्यन् संसारवर्त्मसु ॥

डजप्यमानेषु नारदः पुरंजनकथाकूटं आह प्राचीनवर्हिषं प्रचेतः स्तनपश्चरन्सु नारदः प्राचीनवर्हिषं बोधितवान् ॥ अतः प्रचेतसो कथामसमाप्यैव तत्पितुर्वृत्तमा
ह ॥ प्राचीनवर्हिषमिति श्रेयः फलं रहस्योरुक्षमि ॥ इहकर्मणा तदुभयं नेष्यते विचारकः परं श्रेयः मोहं कर्मभिरपि विद्धा विक्षिप्ता धीर्यस्य किं वा गृहेषु स्थितः प्रचारि

भा॰ स्क॰ ७३

कर्म्मफलेषु वैराग्यमुत्पाद्य ब्रह्मविद्यामुपदेष्टुं योगप्रभावेन यज्ञपशून्सत्यङ्गं प्रदर्शयन्नाह ॥ भो भो इति ॥ संज्ञापितान् ॥ एते त्वां संपरेतं मृतं संप्रतीक्षन्ते
वैशसं त्वत्कृतां पीडां स्मरन्तः ॥ ततश्चायः कूटैर्लोहमयैर्मुद्गरैश्छिंदंति छेत्स्यंति ॥ अत्र अस्मिन्प्रकरे विस्तारकम् इतिहासं कथयिष्यामि ॥ तत्र जी
वस्य विषयासक्त्या संसारः स च ईश्वरानुग्रहेण निवर्त्तत इति वक्तुं विपर्य्ययगृहीतस्य स्मात्मज्ञात् बोधयितुम् पर शकेन राजवृत्तान्तमिवाह ॥ आसीदिति
पुरंजनादीन्सर्वयमेवेतपंचमे ध्यायेव्याख्यास्यति ॥ तथापि स्वस्वग्रहणाय यथोपयोगं किंचित्किंचिद्व्याख्यास्यामः ॥ तत्र स्वकर्म्मभिः पुरंजनयती

ना॰ उ॰ ॥ भो भो प्रजापते राजन् पशून्पश्य त्वयाध्वरे संज्ञापितान् जीवसंघान्निर्घृणेन सहस्रशः ॥ एते त्वां संप्रतीक्षन्ते स्म
रन्तो वैशसं तव ॥ संपरेतमयःकूटैः छिंदंत्युत्थितमन्यवः ॥ अत्र ते कथयिष्येऽमुमितिहासं पुरातनं ॥ पुरंजनस्य चरितं
निबोध गदतो मम ॥ आसीत्पुरंजनो नाम राजा राजन्बृहच्छ्रवाः ॥ तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः ॥ सोन्वेषमा
णः शरणं बभ्राम पृथिवीं प्रभुः ॥ नानुरूपं यदाविंददभूत्स विमना इव ॥ न साधु मेने ताः सर्वा भूतले यावतीः पुरः ॥ कामान्का
मयमानोसौ तस्य तस्योपपत्तये ॥ स एकदा हिमवतो दक्षिणेष्वथ सानुषु ॥ ददर्श नवभिर्द्वार्भिः पुरं लक्षितलक्षणाम् ॥

ति पुरंजनो जीवः ॥ न विज्ञातं नाम यस्य न च विज्ञातं चेष्टितं यस्य सः ईश्वरः तस्य सखा ॥ यद्वा विज्ञातं चेष्टितं जीवप्रेरणादिलक्षणं यस्य ॥ जीवपारतंत्र्यः स्वा
तंत्र्येण भवस्थितत्वात् ॥ शरणं भोगायतनं देहं ॥ यावत्यः पुरः ताः तस्य कामस्योपपत्तये पर्याप्ता न साधु मेने ॥ गवादिदेहानामेकैकं हि पारलौकिकभोग्यभोगपर्याप्ता ना
वातं ॥ तथा च श्रुतिः ताभ्यो गामानयत्ता अब्रुवन्नवै नोयमलमिति ताभ्योश्वमानयत्ता अब्रुवन्नवै नोयमलमिति हिमवतो दक्षिणेषु सानुषु कर्म्मक्षेत्रे भा
रतवर्षे भरतखण्डशरीरं लक्षितानि दृष्टानि सर्वाणि लक्षणानि यस्यां ॥ अर्धपिण्डत्वादिदोषरहितामित्यर्थः ॥

राम ७३

तामनुवर्णयति त्रिभिः अत्र च किं विकिंकिं वितस्माद्दृश्यमवलंब्य कथ्यामोदर्थ्यी यत्राकारादीनि वर्णयन्नोपरिरैवैरिति भुह्लमार्षं ॥ अट्टालिगवाक्षाः त्वगादयः ॥ शारीरावयवाः ॥ प्राकारादिरूपावयवत्वेन रूप्यन्ते हवर्णादिशृंगैः ॥ शिखरैरुक्तायेगृहाहैः संकुलमिति ॥ आधारादिचक्राणि गृहाः शृंगाणि च राजमार्गादिरूपभावाविवक्षितानीलादिभिः ॥ क्लृप्ता हर्म्यस्थली यस्याः ॥ अहर्णां माणिक्यस्थलीहृदयं ॥ न ह्योनीलादिभावेन रूप्यन्ते ॥ तत्र हिषयत्वामनावा भोगवतीं नागनगरीमिव ॥ सभा समाजस्थानं ॥ चत्वरं चतुष्पथः ॥ रथ्या राजमार्गः ॥ आक्रीडायतनं द्यूतादिस्थानं ॥ आपहट्टैः ॥ चैत्यं जनानां विश्रामस्थानं ॥ ध्वजेषु पताका ताभिर्युक्तां ॥ अत्र च विषयनिष्ठउद्दियोगेन जीवसंदेहसंबंधेनेति विवक्षया विषयवर्जिता

कारोप

८

प्राँवनाट्टालपरिखै~~...~~रक्षतोरणैः ॥ स्वर्णरौप्यायसैः शृंगैः संकुलां सर्वतो गृहैः ॥ नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः ॥ क्लृप्तहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ॥ सभाचत्वररथ्याभिराक्रीडायतनापणैः ॥ चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः ॥ पुर्यास्तु बाह्योपवने दिव्यद्रुमलताकुले ॥ नदद्विहंगालिकुलकोलाहलजलाशये ॥ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना ॥ चलत्प्रवालविटपनलिनीतटसंपदि ॥ नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः ॥ आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥ यदृच्छयागतां तत्र ददर्श प्रमदोत्तमाम् ॥

लेः

ह्योपवनत्वेन रूपयति ॥ नदद्विशेषान्न्यकृचंदनादीन्नविद्रुमलतादिभावेन शेषः कथालंकारः ॥ बाह्योपवने प्रमदां ददर्शेति ॥ चतुर्थ्यनान्वयः ॥ नदंती विहंगालिकुलानां कोलाहलो येषु ते जलाशया यस्मिन् ॥ हिमनिर्झराणां विप्रुषो ॥ विंदवः तद्वान्ताकुसुमाकरः संबंधिना वायुना चलंतः प्रवालविटपाः शाखाश्च येषां ते वृक्षैर्नलिनीसरसीनीततयेषुसंपत्समृद्धिर्यस्मिन् ॥ अनाबाधे तत्कृतबाधैरहिते ॥ मुनिव्रतैरहिंस्रैः ॥ आत्मानमाहूतं मन्यते यत्र ॥ तत्र प्रमदोत्तमां विवेकवतीं बुद्धिं ददर्श ॥ यदृच्छयागतामिति ॥ तयोः संबंधस्यादुर्निरूपत्वं दर्शयति ॥

भा॰च॰

७४

तमनुवर्णयति सार्द्धैश्चतुर्भिः दशभिर्ज्ञानकर्मेन्द्रियैः एकैकं प्रत्येकं शतं अनंतावृत्तयस्तासां नायकैः पतिभिः सही पाठांतरे नामिकाह्वियोषां
तैः पंचशीर्षाणि वृत्तयो यस्य तेनाहिना प्राणेन प्रतीहारेण पालकेन गुप्तां। अन्वेषमाणमृषभं भर्त्तारं स्वधर्त्तानादि मिडद्धिवयवैः सुनासत्वादि रूप्यते। सुसं
विन्यस्तौ रचितौ कर्णौ ताभ्यां कुंडलश्रीभारधतीं। अन्नमयं ति हि सोम्यमन इति। यत्तक्षं तत्सुस्येत्यादि श्रुत्यनुसारेण उपासामा मित्युक्ता। नूपुरैः कं
णद्भ्यां नूपुरेणपदांगुलीयकानामप्युपलक्षणाद्बहुवचनं व्यंजितं कैशोरं यौवनोपक्रमः याभ्यां। समौ वृत्तौ वा। तामाहेति। तयोः संवादोक्तिः

भृत्यैर्दशभिरायांतीमेकैकशतनायकैः। पंचशीर्षाहिनांगुप्तां प्रतीहारेण सर्वतः। अन्वेषमाणमृषभमप्रौढां कामरूपिणीं। सुनासां
सुदतीं बालां सुकपोलां वराननां। समविन्यस्तकर्णाभ्यां बिभ्रतीं कुंडलश्रियं। पिशंगनीवीं सुश्रोणीं श्यामां कनकमेखलां। पद्भ्यां
क्वणद्भ्यां चलंतीं नूपुरैर्देवतामिव। स्तनौ व्यंजितकैशोरौ समवृत्तौ निरंतरौ। वस्त्रांतेन निगूहंतीं व्रीडया गजगामिनीं। तामाह ल
लितं वीरः सव्रीडस्मितशोभनां। स्निग्धेनापांगपुंखेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा। कात्वं कंजपलाशाक्षि कस्यासीह कुतः सति। इमामुप
पुरीं भीरु किं चिकीर्षसि शंस मे। क एतेनुपथा ये त एकादश महाभटाः। एता वा ललनाः सुभ्रु कोयं तेहिः पुरःसरः।

संवध्वर्द्धायां अपांग एव पुंखो मूलप्रांतो यस्य कटाक्षबाणस्य तेन स्पृष्टो विद्धः प्रेम्णा उद्भ्रमंत्यौ भ्रुवौ यस्याः। धृतस्थानीया यस्मिन्‌ तेनाक्रांतः। पुर्याः समीपस्था
उपपुरी इमां। तामालक्ष्य किं कर्तुमिच्छसीत्यर्थः। अनुपथाः अनुवर्तिन एते के। एकादशो महाभटो हृद्बलत्वेन वक्ष्यमाणो येषु दश ते त उ मे एत

७४

नसः पुत्रपादाननेत्रद्विपरिवारकेऽयमहायतपाते तत्परिवारकत्वविवक्षया।

त्वं ङ्गी किं पतिं धर्म्मं विच्छति अथवा भवानी पतिं शिवं विचच्छति किं वा वाक् सरस्वती पतिं ब्रह्माणं रमा वा पतिं विष्णुं मुनिरिव संतोषं सती कथंभूतं परं त्वं दृष्टिका
मेनेव तत्वं त्वात पानं त्वं दृष्टिकाः नैषेव प्राप्ताः समस्ताः कामयेनतं देवैः ह्यासां मध्ये त्वं मन्यत मानं भवमि यतोऽविस्तृत्तान हि देवा नाऽभुवं स्पृशंति वीरवरेण
मया परं वैकुंठाधस्थान्नवापांगेन विखंडितं सिद्धिं यं मनोयस्यतं प्राप मनो भवो वाधते अथ तस्मात् दन्तगृहाणां सद्वीडं यज्ञावेन प्रेम्णा स्मितं तेन विभ्रमं तीयाऽशूः त

त्वं ङ्गी भवान्यस्याथवा यमा पतिं विविच्छति किं मुनिवद्ध्रोवने त्वं दृष्टिकामाप्नसमस्तकामं क्षपयकोशः पतितः कराग्रात् नास्य
वैरीविन्यत माऽभुविस्तृकुठारी मिमा वीरवरेण साकं अहं स्पर्शं कर्त्तुं मदस्त्रकर्म्मणा लोकंपर श्री खिपन्तपंसा यदेषमा पुंवाविखंडिते
न्द्रियं सद्वीडमाव स्मितविभ्रमं दृष्ट्वा त्वयोपसृष्टो भगवान् मनोभवः प्रबीधते थानुगृह्णाणशोभने त्वमानन सन्नु स्तार लोवनं व्याले
विनिलालकवृंदसंवृत उत्रीयमेदर्शय वल्गु वा वकं यद्वीडपानाभिमुखं सुविस्मिते इत्थं परंजनं नारायणस्य मानमधीरवत अप्यनंदतं
वीरं हमती वीरमोहिताः न विरामवंच समस्य कुकर्त्रां रुणर्षभ आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतं इहाघसंतमात्मानं विरामनन्ततः परं
येनेयं निर्मिता वीर ऽश्रीशरणमात्मनः

याउपसृष्टः प्रेरितः यद्वीडया सम्मुखं न भवति तदाननमुत्रीयमेदर्शय शोभने भुवो यस्मिन् सुतारे शोभनकनीनिके लोचने
यस्मिन् व्यालं विनीये दीर्घो नीलाः सूक्ष्मलका स्तेषां वृंदेन संवृतं वल्गुनि वाव कनिष्ठा वा नियस्मिन् देवीर मायितं दद्वामोहिता सती तमाह यत्त्वं स्पृष्टुकर याभीत्यनेनेनक स्याडत्री
गोत्रं जातिकी त्वमिति वकिनामा साति तत्राह आत्मनो मम परस्य तवापि कर्त्तारं सम्यक् न विद्मः गोत्रं नाम च यत्कृतं भवत्तच न विद्म आत्मनोशरणमियं पुरी येन निर्मिता
तं च न विद्मः

भा० च
७५

यत्पृष्टं कस्त्वं कस्येत्यनुपप्रच्छ इति तत्राह एत इति आग्नीध्रनामगोत्रादि परम्परागतोस्मि एतद्दिष्ट्या मद्यं तावत्या मानं इन्द्रियग्रामार्हान् उद्धरिष्यामि स्वपापरपिष्यामि स्वबन्धुभिः सर्वाभिस्तु समाः संवत्सरान् ॥ मनुष्यदेहप्रवेशाद्धतमित्युक्तं ॥ प्रवृत्तिस्वभाववत्त्वान्निवृत्तिर्निरिह पूर्वं कं तत्संगममिमं रतिं पंचभिः त्वत्तोऽन्यं कं तरमये ॥ अरतिरितरे नैष्ठिकं ॥ अकोविदं अनि मित्तमस्वतत्यागिनां मदाराध्य मत्स्यस्त इनमिमु स्वपरलोकविज्ञाभून्य ॥ अस्वतन्त्र न विंदत्य स्वदर्शकर्त्तत्वमिति इह लोके विज्ञाभून्या पश्यत्वल्पं ॥ अत्रागहस्थाप्रजानरः पुत्रसत्वमम

एते सत्वा यः सर्वो मे नरा नार्य्यश्च मां ते त्वप्नायामय जागर्त्ति नागोपपाल यत्सरी ॥ दिष्ट्यागतास्मि मद्गते ग्राम्यान्कामान् भीप्सये ॥ उद्धरिष्यामि ते स्नेहं स्वबंधुभिररिंदम ॥ इमां त्वम धितिष्ठ स्वपरी नवधुरं वा विभो ॥ मयोपनीतान्गृह्णानः कामभोगान् शतं समाः ॥ कं नु त्वदन्यं रमये तत्त्वरतिज्ञमकोविदं ॥ असंपरायाभिमुखमश्वस्तन विदं पशुं ॥ धर्म्मोह्यत्रार्थकामौ च प्रजानंदो मृतं यशः ॥ लोका विशोका विरजा यान्न केवलिनो विदुः ॥ पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च हक्षेमं वदंति शरणं भव अस्मिन् यद्गृहाश्रमं ॥ का नाम वीर विख्यातं वदान्यं प्रियदर्शनं ॥ न वृणीत पतिं प्राप्तं मादृशी त्वादृशं स्वयं ॥ कस्या मनस्ते भुजयोः भोगयोर्प्रियो न सज्जेद्भुजयोर्महाभुज ॥ यो नाथवर्गाधिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुं ॥ नारद उवाच ॥ इति तौ दंपती तत्र समुद्यसमयं मिथः ॥ तां प्रविश्य पुरीं राजन् मुमुदाते शतं समाः ॥ ॥

तं मोहं ॥ केवलिनो यतयः गृहाश्रम इति ॥ यत एतत्तेमार्हं शरणं माश्रयं वदंति प्रोगभागयोः सर्व्वदेहाकारयो मम भुजयोर्यत्र सज्जेत सर्वं भूतकस्याः स्त्रियाः मनः स्यात् नकस्यापि यो भवान् अनाथवर्गादीन स्वैमामा स्वेषामाधिं अलमत्यर्थं मयो हितुं सर्वत्र चरति ॥ केनायो हितुं घृणायोद्धतः स्मितशालिनोयः स्मितपूर्वकोऽवलोकस्तेनाम समुद्यमसमुद्योर्द्धं हि समाः संवत्सरान् ॥

रम
७५

तत्र जाग्रदवस्थां संक्षेपेणाह उपगीयमान इति स्वप्नावस्थामाह हंसिनीहृदयाकाशात्वापस्थानं सुप्तैवेनिद्रायै इदानीं नवद्वारपुरदर्शनपूर्वकं जाग्रदवस्था प्रपंचयति सप्तेति यावदवस्थापरिसमाप्ति तस्याः पुर उपरि स्थिताः द्वारः सप्त आहृता इति पाठे संवृताः नेत्रे नासिके श्रोत्रे मुखं चेति सप्त अधो द्वौ पायूपस्थलिंगाख्यः कश्चनेति आत्मनः सम्यग्विज्ञानाय इति यत्वात् ता एव सप्त द्वे सप्त द्वे पञ्चद्वारः पौरस्त्याः पूर्वद्वारिभावः खद्योतवदल्पप्रकाशं वामनेत्ररूपा आविः प्रकाशं मुखं यस्याः

द्वार

उपगीयमानो ललितं तत्र तत्र वगायकैः क्रीडन्परिवृतः स्त्रीभिर्हंसिनीमाविशद्विभुः सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः पंचद्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये खद्योताविर्मुखी च प्राग्द्वारावेकत्र निर्मिते विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः नलिनी नालिनी च प्राग्द्वारावेकनिर्मिते अवधूतसखस्ताभ्यां विषयं याति सौरभं मुख्या नाम पुरस्ताद्द्वास्तयापणबहूदनौ विषयौ याति पुरराड् रसज्ञविपणान्वितः

मचक्षुः प्रकाशं दक्षिणनेत्रलक्षणम् तस्माद्दक्षिणोऽर्धं आत्मनो वीर्यवत्तर इति श्रुतेः ह्वास्तुमवाद्युत तत्र प्रकाशाधिक्यं एकत्र संलग्ने विभ्राजितं रूपं द्युमत्सखः चक्षुः सहितः नलनालशब्दे छिद्रवचनौ तद्वती नलिनी वामदक्षिणनासिके अत्रापि सन्नामे द्वे एव कार्य्ये न्यूनाधिक्यं पूर्ववत् ज्ञेयं अवधूतो वायुः अधिष्ठितो घ्राणः सौरभं गन्धं मुख्या प्रधाना आस्यं आपणं भाषणं भाषणं बहूदनं भक्ष्यान्नं बद्धोदनं इत्यन्ये रसज्ञः परान्त्रे वारत्वापार संज्ञा रसनेन्द्रियं विपणो वाग्निघता अन्वितः

भा०च

७६

दक्षिणेनेति वनं ततीया किं तु दक्षिणस्यां दिशि तस्मिन्नर्थे तद्वितीयमेनं प्रत्ययः व्यवहृतः एवमुत्तरेणेति ॥ अयमर्थः पंचानां विषयाणामन्यतोनवागतानां प्रकाशनायालमिति पंचालं शास्त्रं श्रवणकाले च बलाधिक्याद्दक्षिणाकर्णः प्रथमप्रवृत्तत्वाच्छास्त्रे च प्रथमं श्रोतव्यं कर्मकांडमित्यतस्तत्साम्येन प्रवृत्तलक्षणस्य कर्मकांडस्य दक्षिणाकर्णेन श्रवणमिष्यते ततस्तदर्थमनुष्ठाय पितृभिराहृताः पितृलोकप्रापकमिति यानं प्रपद्यते तदनेन प्रकारेण पितॄणामाह्वानं भवतीति पितृहूर्दक्षिणः कर्णः एवं तद्विपरीतत्वान्नोत्तरः कर्णो देवहूतः तथा च व्याख्यास्यति पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः प्रवृत्तं च निवृत्तं च शा

पितृहूर्नृप पुर्याद्वा दक्षिणेन पुरंजनः ॥ राष्ट्रं दक्षिणपंचालं याति श्रुतधरान्वितः ॥ देवहूर्नाम पुर्याद्वा उत्तरेण पुरंजनः ॥ राष्ट्रमुत्तरपंचालं याति श्रुतधरान्वितः ॥ आसुरी नाम पश्चाद्द्वास्तया याति पुरंजनः ॥ ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥ निरृतिर्नाम पश्चाद्द्वास्तया याति पुरंजनः ॥ वैशसं नाम विषयं लुब्धकेन समन्वितः ॥ अंधावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ ॥ अक्षण्वतामधिपतिस्ताभ्यां याति करोति च ॥ स यर्ह्यंतःपुरगतो विषूचीनसमन्वितः ॥ मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवं ॥ श्रुतं पंचालसंज्ञितं पितृयानं देवयानं श्रोत्रजं श्रुतधरः इति

असुराणामिंद्रियाणामाह्वेषामित्यासुरी शिश्नद्वाः ग्रामकं ग्राम्यसुखं नानाकं सुखं व्यवायं दुर्मदः नग उपस्थेन्द्रियेण निरृतिर्नाम गुदः मृत्युद्वारत्वात् वैशसं मलविसर्गं लुब्धकेन पायुना तेने त्यादानमस्य लुब्धकसाम्यं ॥ अमीषां मध्ये निर्वाक्पदं पेशस्कृतौ हस्तपादौ उभावपि चक्षुरिन्द्रियाभावात् अथ तो ज्ञानक्रियाशक्त्यभावाविष्कृतेन एतावदिन्द्रियतां देहानामधिपतिः पुरंजनः त्वगिन्द्रियस्याप्यक्षिः सर्वथा सत्त्वभावात् अतः पुरं हृदयं गतः विषूचीनं सर्वतो मनसा मोहं प्रसादं हर्षं वा तमः सत्त्वरजः कार्याणि जायापत्याद्युद्भवं आत्मजा इन्द्रियपरिणामा इत्यर्थः ॥ ॥

७६

तू

जक्षत्यां भक्षयंत्यां ॥ आसतीं ॥ आसीनां सर्वोप्ययं गत्वादिलक्षणाप्रकृतिस्वभावो वंचितायस्य ॥ सर्वयाप्रकृत्या वंचित इति वा नेछन्निछन्
क्लैव्यात् पारवस्यात् ॥ इति चतुर्थे पंचविंशः ॥ षड्विंशे मृगयाव्याजान्स्वप्नजागरणोक्तितः ॥ संउद्विस्तागयोगाभ्यां संसृतिः संप्रपच्यते ॥ तदेव
मात्मन उपाधिकृतां स्वप्नावस्थां जाग्रदवस्थां वा स्वकरानी स्वप्नावस्थामाह ॥ स एकदेति दशभिः ॥ महानिष्ठा सोपधनुः कर्तृत्वभोक्तृत्वाद्यभि
निवेशो यस्य स रथमाहत्यापंचप्रस्थंवनमगादिति ॥ तत्तो ये नाव्ययः स्थंतरानीमेवविधं तं स्वप्नदेहं ॥ जाग्रद्देहसुपासनं सवन्तमेपमोपपरत्वेनो

२८ एवं कर्म्मसु संसक्तः कामात्मा वंचितोऽबुधः ॥ महिषी यद्यदीहेत तत्तदेवान्ववर्त्तत ॥ क्वचित्पिबंत्यां पिबति मदिरां मदविह्वलः ॥ अश्नंत्यां क्वचि
दश्नाति जक्षत्यां सहजक्षिति ॥ क्वचिद्गायति गायंत्यां रुदंत्यां रुदति क्वचित् ॥ क्वचिद्धसंत्यां हसति जल्पंत्यामनुजल्पति ॥ क्वचिद्धावति धावं
त्यां तिष्ठंत्यामनुतिष्ठति ॥ अनुशेते शयानायामन्वास्ते क्वचिदासतीं ॥ क्वचिच्छृणोति शृण्वंत्यां पश्यंत्यामनुपश्यति ॥ क्वचिज्जिघ्रति जिघ्रंत्यां स्पृश
त्यां स्पृशति क्वचित् ॥ क्वचिच्च शोचतीं जायामनुशोचति दीनवत् ॥ अनुहृष्यति हृष्यंत्यां मुदितामनुमोदते ॥ विप्रलब्धो महिष्यैवं सर्वप्र
कृतिवंचितः ॥ नेछन्ननुकरोत्यज्ञः क्लैव्यात्क्रीडामृगो यथा ॥ इति श्रीभागवते महापुराणे चतुर्थे स्कंधे पुरंजनोपाख्याने पंचविंशोध्यायः ॥ नार
द उवाच ॥ स एकदा महेष्वासो रथं पंचाश्वमाशुगं ॥ द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पंचबंधुरं ॥ १ ॥ एकरश्म्येकदमनमेकनीडं द्विकूबरं ॥ पंचप्रहर
णं सप्तवरूथं पंचविक्रमं ॥

त्वात् ॥ पंचहस्तानेंद्रियाण्यश्वा यस्य ॥ आशुगं शीघ्रगतिं द्वे ईषे अहंताममते ईषदंडिके यस्य ॥ द्वे पुण्यपापे चक्रे यस्य ॥ एकं प्रधानोक्षो यस्य ॥ त्रि
योगुणा वेणवो ध्वजा यस्य ॥ पंचप्राणा बंधुराणि बंधनानि यस्य ॥ एकं मनो रश्मिः प्रग्रहो यस्य ॥ एका बुद्धिर्दमनो नियंता यस्य तं ॥ एकं हृदयं नीडं उपवेशनस्थानं
यस्मिन् ॥ द्वौ शोकमोहौ कूबरौ युगबंधनस्थाने यस्य ॥ पंच शब्दादयो विषयाः प्रक्षिप्यंते प्रक्षिप्यंते यस्मिन् ॥ अस्त्राणि भविष्यंति ॥ पंच द्विपार्श्वप्रक्षेपहाति सप्तधातवो व

तिजिघ्रं

भा० च
७७

हेमोपस्करं सौवर्णाभरणं स्वर्णवर्मा वर्म कवचं रजोगुणावृतः अक्षयेषुधिः इषुधिर्निषंगः अनन्तवासनाऽहंकारोपाधिः एका
दशो मनोऽनुपञ्चचमूनाथः सेनापतिर्यस्य सावाशनामयशरूपमनमः प्रग्रहत्वात्संकल्पविकल्पत्वात्मकस्य इह इह दलत्वे नेवत्स्यपायाग्यव
मूनाथत्वमिति विभागः पंचप्रशब्दादयो विषयाः प्रस्थाः मानवोपस्मिन्तद्वनं भजनीयं देशमगमत् आत्तागृहीताः इषवो बाणा इषुधिश्चापरित्रूपाः
कार्मुकं भोगाद्यभिनिवेशरूपं येन जायाविवेकवतीं बुद्धिं विहाय अतदर्हां त्यागानर्हां त्यागे हेतुः मृगयाऽहनइति मृगा विषयास्तेषु
व्यसनं भोगासक्तिः तेन लालसः निःस्पृहायस्य बाणैरागादिभिर्वनेषु भजनीयविषयात न्यहनत आत्मसात्कृतवान् कथापक्षे तु स्प

हेमोपस्करमारुह्य स्वर्णवर्माक्षयेषुधिः एकादशचमूनाथः पंचप्रस्थमगाद्वनं ॥ चचार मृगयां तत्र दृप्त आत्तेषुका
र्मुकः ॥ विहाय जायामतदर्हां मृगव्यसनलालसः ॥ आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ॥ न्यहनन्निशितैर्बाणैर्व
नेषु वनगोचरान् ॥ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान्पशून्वने ॥ यावदर्थमलं लुब्धो हन्यादिति नियम्यते

ष्टमेव ॥ नन्वासुरीं वृत्तिमाश्रित्येति किमिति मृगया निंदिता ॥ कथापक्षे तावद्राज्ञो विहितैव सा ॥ अध्यात्मपक्षेऽपि जीवस्य विषयभोगो विहितए
वेत्याशंक्याह ॥ तीर्थेष्विति त्रिभिः अयं भावः नहि मृगया विधीयते रागप्राप्तत्वात् किंतु नियम्यते प्रवृत्तिः संकोच्यते नियमो वर्षड्विधं दर्शयति
यद्यलमत्यर्थं लुब्धो रागी सन् हन्यात् तर्हि तीर्थेषु श्राद्धादिषु वनतत्रापि प्रतिदृष्टेषु प्रशस्तेष्वेव न नित्यं श्राद्धादिषु तत्रापि राजैव मेध्याने राम
वचनएवेत्यावदुपयोगमेवेति ॥ एवं जीवस्यापि विषयसेवापि यत्वदुपयोगमनपेक्ष्यमितिनियमनमेवेत्यर्थः ॥

७७

अतोनावश्यकत्वमित्याह॥ यइति॥ एवंनियतंकर्म्मविद्वांस्तेनेत्युपलक्षणं॥ तेनान्येनवाकर्म्मणोवमनुष्ठितेनयत्तत्तानंभवतितेनतत्तानेनहे
तुनामोःअनुष्ठातानलिप्यते॥ अन्यथानियमोल्लंघनेनअन्तःकरणशुद्ध्यभावात्कर्त्तव्यत्वभिमानमात्रेदःकर्म्मभिरनुबध्यते॥ ततश्चगुण
प्रवाहेपतितोऽधोव्रजति॥ षाण्मासिकंपरिसमाप्यपुनर्गृहयामेवानुवर्त्तयति॥ तत्रेति॥ वित्राबाजांपक्षाग्रेषांतैः॥ विस्त्रवोनाशः॥ करुणा
त्माकृपालुःनांउःसहं॥ तदेवंस्वस्त्रावस्थाप्रशितं॥ इदानीपुनरपिविवेकवत्याउद्धारसमाणस्पष्टाहिमततमिष्टपंचयिष्यन्कथयोरव्या

यएवंकर्म्मनियतंविद्वान्कुर्वीतमानवः॥ कर्म्मणातेननाऽऽजेद्दत्तानेनासौलिप्यते॥ अन्यथाकर्म्मकुर्वाणोमानात्रुद्धोनिबध्यते ने
गुणप्रवाहपतितोनष्टप्रज्ञो [illegible] व्रजत्यधः॥ तत्रनिर्भिन्नगात्राणांचित्रवाजैःशिलीमुखैः॥ विस्रवोऽभूत्दुःखितानांदुः
सहःकरुणात्मना॥ शशान्वराहान्महिषान्नावयान्रुरून्शल्यकान्॥ मध्यानन्यांश्चविविधान्निनिघ्नन्नुश्रमसध्यगान्॥ ततः
कृतपरिश्रान्तोनिवृत्तोगृहमेधिवान्॥ कृतस्नानोत्वचिताहारःसंविवेशागतक्लमः॥ आत्मानमर्ह[illegible]यांवत्त्रोध्यपलेपस्त्रगादिभिः
मार्ष्टलंकृततस्याङ्गोमहिष्यामारुरेमनः॥ तस्नोऽभूत्दःसहःश्वकंरव्याकुष्टमानसः॥ नव्यवस्त्रवराहाराग्रहणीगृहमेधिनी॥
अन्नःप्रागाहियाःश्रेष्ठाद्वृमनाऽऽवेरिवत॥ अपिवंकुशलंरामाःसेव्याणांयथापुरा॥ नतथैतार्हिरोवंतेगृहेषुगृहसंपदः॥ यदि
नमाऽऽद्वहेमातापत्नीवापतिदेवता॥ वंगोरथइवप्रान्तःकोनामासीतदीनवत॥

यतस्याःप्राणपङ्कपितायाअनुनयंप्रह्लावमहिनमाह॥ त
नरत्नाप्ययावद्ध्यायमसमाप्ति॥ आपिवानूआगतःकृतस्नानप्रवितआहारश्चयेन॥ संविवेशायशय्यामाश्रितःगृहमेधिनीमात्विकीउद्विग्नमस्यां
उद्ध्यावर्त्तमानोनापरपत॥ हेप्राचीनबर्हिः॥ अन्नःप्रागहियतत्तत्साध्वीःसेव्यानांस्वामिनीसहितानांयथापुरेत्यादि॥ पृथग्वाकाव्यगेवकारादीहीने॥

८

भा०द०
७८

निरवकाशे आस्तरणरहिते अवधूतां त्यक्तदेहाहारां । तत्संगेनोन्मथितं व्याकुलं ज्ञानं यस्याः । प्रेमसंरंभणः प्रणयकोपस्तस्य लिंगं कुटिलदृष्या
दृष्ट्वा स्मितं लब्धवान् । तत्संगमारोप्य लालितं । कृतमार्गो अपराधो येन तेष । आत्महास्यकृत्वा । अप्रसादधीनो यमिति मत्वा शिक्षार्थं दंडनकर्षति
ते भृत्यामंगं भाषणाः । यतः परमोनुग्रहो दंडः । यस्मात् दंडितो विषीदति सोः तत्त्याह । वलशति । वंधुकृत्यशिक्षाकरणं । अमर्षणः क्रोधः हे सुहृदिति

कुर्वंति ते मा लललनामग्नं तं व्यसनार्णवे । याम्याम्पकृते सान्तारी पयत्नी परे परे । रामकृतेषु ॥ नरनाथ न जानीम त्वल्लिंगयां यश्च
वसति । भूतले निरवकाशे शयानां परयागतुवन् । धरंजनः स्वमहिषि निरीक्ष्य वधूतां अवि । तत्संगेनोन्मथितहानो वेक्कं व्यप
रमंघयो । म्रोत्वपरम्परात्रायावावाहरयेनचव्हेयता । प्रेयस्याः स्नेहसंरंभलिंगमात्मनिनाधिगाते । अस्त्रैनिरुः यज्ञानेकेवलि
तनयकोविरः । पनपर्शपारयुगलमाहचोत्संगलालिता । नूनं तव्रुकृतेपणो ततमृत्यायेषीस्वरः अभे ॥ कृतागः स्वात्मामात्क
त्वामिशिक्षार्हदंडं नयुंजते । परमोनुग्रहोहिदंडोधृत्येषुप्रभुणार्पितः । वालोनवेदतत्त्वन्विवंधुकृत्यममर्षणः । मात्वमुखवहरतिहं
धुःउगाणारेव्रीडाविलंवविलम हुत्पितावलोकं । नीलालककालिपिरूपसुकृतेषुत्रंसतनःस्त्वानाप्रदर्शयमनाहिविनिवल्गुवाक्यं । न
क्तिन्दधेरममहृतववीरपतित्वयोन्यत्रभू स्वरकालास्कृतकिल्विषस्त्वापपश्येमवीतभयमस्युरितंत्रिलोक्यामन्यत्रवेमुरारिपोरितंत्रुदासानं ॥

देहं यु । हेमनत्विनि । मात्वं अस्माकं त्वामितिसूनः स्वानां मुखं प्रदर्शय कीदृशं । अधुगणामारेणाव्रीडयायोविलंवो मंथरतातेनविलपहुसितावलोकोयस्मिन् । तम्
नीलान्यलकाएवालयोहेतिरूपस्तत्तभूषितं । असनामितिकंवल्गुवाक्यपस्मिन्स्तत् । हेवीरपतिवीरस्यममभार्यायस्तेकृतापराधस्तस्मिन्नरंडाशाह्मगाकुलादेम
यात्मिन्नुरारिपुसाशारितनत्रवस्मरधैरेडक्कालेमि । किंतनविगतंभयंउत्कुपरितंत्रिलोकांअन्यत्रवैलोकत्रयाद्वहिरपिनपश्यामि । मङ्गुयादेवासोमणिष्यतीत्यर्थः

रा०म
७८

तेवक्त्रंपितः पूर्वंकंकदाचिदपिवितिलकंनपश्यामि॥ संरंभेणकोपावेशेनभीमंभयानकं॥ अविमृष्टंअकुंडलं अपेतरागंस्नेहशून्यं॥ तथातेसुजा
तौशोभनौस्तनावपिशोकाश्रुभिरुपहतौनपश्यामि॥ तथाबिंबफलाकारमधरंचविगतः कुंकुमपंकस्यरागोयस्यतमनेनपूर्वंदर्शनपश्यामि
इदानींकृतएवंजातमितिशेषः॥ पाठांतरेएवंभूतंसुखवत्तनोवपश्यन्संमन्विंदामिन्यन्वयः॥ विगतःकुंकुमरागोयाभ्यामितिस्तनयोर्विशेषणं॥ न
न्नस्मात्कृतकिल्बिषमपराधोयेनतस्यकिल्बिषमेवाह॥ स्वैरंस्वातंत्र्येणत्वांमदृष्ट्वामृगयायांगतस्य॥ द्वितीयेदेवरंक्रीडांतारंतिदर्शतिइतिदेवरःकृतः
नकामवेगेनविस्रस्तंगलितंपौंस्यंपौरुषंधैर्यंयस्यतंउशतीकामयमानाकात्यैकर्तव्येयोगंभूर्ध्यकानभजेत॥ इतिचतुर्थेषड्विंशोऽध्यायः॥ सप्तविंशे

वक्त्रंनतेवितिलकंमलिनंविहर्षंसंरंभभीममविमृष्टमपेतरागं॥ पश्येस्तनावपिशुचोपहतौसुजातौबिंबाधरंविगतकुंकुमपंकरागं॥
स्वे कारागं॥ तन्मेप्रसीदसुहृदःकृतकिल्बिषस्यस्वैरंगतस्यमृगयांव्यसनातुरस्य॥ कादेवरंवशगतंकुसुमास्त्रवेगविस्रस्तपौंस्नम्
उशतीनभजेतकृत्ये॥ इतिश्रीभागवतेमहापुराणेचतुर्थेस्कंधेपुरंजनोपाख्यानेषड्विंशोऽध्यायः॥ नारदउवाच॥ इत्थंपुरंज-
नंसध्र्यग्वशमानीयविभ्रमैः॥ पुरंजनीमहाराजरेमेरमयतीपतिं॥
स्त्रियापुरंजन्याशास्त्राविस्मृतात्मनः कालवशात्पारलोक्यानेर्जरागोगाढ
दार्ष्यते॥ तदेवजीवस्यापुरंजनयादिकथामोहरघ्येणत्यंतउपाधिवशात्वपुत्वान्निमिन्नोसंसारपरंनतरूपयितमाह॥ इत्थमिति॥ अत्रप्रतिपदंकथंवि
दध्यात्मपक्षेयोजयितुंशक्यमेव॥ श्रीनारदेनतुजीवस्यस्त्रीपुरुषवासनाराद्धेनविविधाप्रवृत्तिर्भवतीत्येतावदेवयथाकथंचित्प्रदर्शितं॥ क्वचित्तुमा
न्धेर्श्वियश्रीकरणोमेघमेरधीः॥ देवोमनुष्यस्त्रियस्त्वायथाकर्मोपाणिभवतस्तिवरता॥ तत्रारोपहन्तेनसंसृतिरध्यायत्रयेणोक्ता॥ ततश्चैकेनाध्यायेनस्त्री
त्वेनसंसृतिप्रदर्शनपूर्वरप्रसारलक्षणानेनमोक्षइत्युक्तं॥ ततस्तदेवयथोपयोगंवाख्यातिमितिपंचध्यायारंभः प्रतीयते॥ प्रतिपदंअध्यात्मयोजनातदुदृश्यानिःप्र
योजनाचेतिहृदयोदिप्रव्याख्यानमनादृत्ययथोपयोगमेवव्याख्यास्यामः सध्र्यक्विलमेविभ्रमैः॥

भा॰ च ७९

कृतं स्वस्त्ययनं मंगलं कृतमभिषेकादिभिर्यस्याः उपगूढः परिरब्धः परिरब्धांकं धरातस्यां तेनारहस्येकान्ते शून्ये मंचैः शून्यकूलैः गृह्यमा
षणोः अपकृष्टा चेतना विवेको यस्य कालरहः आगुर्व्याय प्रमरैव परिग्रहो न त्वान्यासाधनं यस्य महार्हतल्पेऽत्यन्तश्लाघ्यायां शय्यानः
महिष्या भुजउपाधिउपधानस्तु शीर्षकं यस्य अविसर्जि पाठे शयनक्रियाविशेषणं तां महिषीमेव परं उत्कृष्टार्थं ममन्यत न तु यथा ज्ञातं रूप

परं

हराजा महिषीं राजन्वतां तां स्वविरामनं कृतस्वस्त्ययनां तस्ययामस्यनं रहउपागतां तयोपगूढः परिरब्धकं धरोरहोऽत्तमं
चैरपकृष्टचेतनः न कालरं होऽत्तं भवेत् तुरत्यपदिवानिशां इति प्रमदापरिग्रहः शय्यानउ अरो महा मनामहार्हतल्पे
महिषीभुजोपधिः तामेव वीरामन्तैतं यत स्वमाभिमतेन निजं परं यत तयेव रममाणस्य कामकरस्य नलचेतसः हुणा
ईमिव राजेन्द्र व्यतीक्रान्तं नवं वयः तस्यामजनयत्पुत्रान्स्वरंजन्याऽपरं जनः यतान्यकारत्राविराडायुषोर्हमथात्यगात उ
हितर्दशो तत्र रातं पितमातयर्मस्करी णीलोदार्यगुणसमेपेताः पौरंजन्यः प्रजापते सर्पावालपतिः पुत्रान्पितवंशाविव
ईनान् शौरैः संयोजयामास हृदूरः सदृशोर्वीरैः

बुद्धतत न ममास्मत्तान्नेनाभिमृतेरयतः पुत्रानिंद्रियपरिणामान् रहूदरंनं रनं नरं बुद्धिवृत्तीः पुत्रसंख्यावबाङुल्यमात्रविवक्षया उ
हित संख्यात पुत्रेभ्यो मृनत्वेनगार्हस्थ्यमेरर्थ्यार्थविराटसंभाराः आयुषोईमित्याद्यपिकथा मोदर्थार्थमेव परंजनकन्यात्वान्योरं
जन्यः हे प्रजापतेरारैः परिणामानंतरं हितहितविज्ञाभिः वैरनविततविषयभोगैः

राम ७९

पुत्राणां पुत्राः कर्माणि । पंचालेषु शब्दादिविषयेषु पुत्रादिषु तेषामपि प्रियैरिक्थहाराः पुत्रास्तेषु च । युक्तेषु आत्महितेषु कर्मस्वनवहितस्य
सर्वैकालः जरामरणभयः चंडवेगः संवत्सरेणावर्तमानेनोपलक्षितः । गंधर्वाधिपः गंधर्वास्त्रयस्त्रिंशच्छतानि षष्टिः मैथुन्यः शिवस्य

पुत्राणां वा भवन् पुत्रा एकैकस्य शतं शतं ॥ यैर्वै पौरंजनो वंशः पंचालेषु समेधितः ॥ तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु ॥ नि
रूढेन ममत्वेन विषयेष्वन्वबध्यत ॥ ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः ॥ देवान्पितॄन्भूतपतीन्नानाकामो यथा भवान् ॥
युक्तेष्वेवं प्रमत्तस्य कुटुंबासक्तचेतसः ॥ आससाद स वै कालो योऽप्रियः प्रिययोषितां ॥ चंडवेग इति ख्यातो गंधर्वाधिपति
र्नृप ॥ गंधर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयं ॥ गंधर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः ॥ परिवृत्त्या विलुंपंति सर्वकामवि
निर्मितां ॥ ते चंडवेगानुचराः पुरंजनपुरं यदा ॥ हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः ॥ स सप्तभिः शतैरेको विंशत्या च शतं समाः ॥
पुरंजनपुराध्यक्षो गंधर्वैर्युयुधे बली ॥ क्षीयमाणे स्वसंबंध एकस्मिन्बहुभिर्युधि ॥ चिंतां परां जगामार्तः सराष्ट्रपुरबांधवः ॥ स
एव पुर्यां मधुभुक्पंचालेषु स्वपार्षदैः ॥ उपनीयबलिं गृह्णन्स्त्रीजितो नाविदद्भयं ॥ कालस्य दुहिता काचित्त्रिलोकीं वरमिच्छती ॥
पर्यटंती न बर्हिष्मन्प्रत्यनंदत कश्चन ॥

मिथुनीभूय स्थिताः सिताश्चासिताश्च शुक्लाः कृष्णाः पक्षरात्रयः परिभ्रमणेन सर्वैः कामैः सह विनिर्मितं पुरीं
पुरंजनपुरं । प्रजागरः प्राणः विंशत्या च सह शतं संवत्सरान् स्वसंबंधिनि प्राणे । स एव मधुभुक् । क्षुद्रसुखभोक्ता स्वपार्षदैरिंद्रियैः नीविं सततालोचितवान् । कालस्य दु

पूरवे वै ययातिपुत्राय तेन दत्ता मतीव रमदात् । ययातिः शुक्रशापाज्जरां प्राप्य पुत्रानुवाच । इमां गृहीतेति तां ज्येष्ठाश्चत्वारो न जगृहुः पूरुस्तु जगृहे । ततो ययाति
स्तस्मै राज्यं ददौ वितिजैर्वा रादित्युक्तं । षत्याख्यातं वदति मयि संरम्य कृते यं कृत्वा नैकत्र स्थातुमर्हसीति शापमदात् । आधयो व्याधयश्च यवनास्तेषामी
श्वरं भयनामानं वव्रे । हे वीर त्वामीप्सितं पतिं वृणो न रिष्यति न नश्यति । लोकतो वेदतश्च यद्युपन्नेन वउपनतं प्राप्तं तद्याच्यमानेनापि न ददाति यश्च

दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा । यातुष्टा राजर्षये तु वृतादात्पूरवे वरं । कदाचिदटमाना सा ब्रह्मलोकान्महीं गतं । वव्रे बृ
हद्व्रतं मां तु जानती काममोहिता । मयि संरभ्य विपुलमदाच्छापं सुदुःसहं । स्थातुमर्हसि नैकत्र मद्याच्ञाविमुखो मुने । ततो विहत
संकल्पा कन्यका यवनेश्वरं । मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिं । ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिं । संकल्पस्त्वयि भूतानां कृ
तः किल न रिष्यति । द्वाविमावनुशोचन्ति बालावसदवग्रहौ । यल्लोकशास्त्रोपनतं न राति न तदिच्छति । अथो भजस्व मां भद्र भजन्तीं मे द
यां कुरु । एतावान्पौरुषो धर्मो यदार्ताननुकंपते । कालकन्योदितवचो निशम्य यवनेश्वरः । चिकीर्षुर्देवगुह्यं स सस्मितं तामभाषत
मया निरूपितस्तुभ्यं पतिरात्मसमाधिना । नाभिनंदति लोकोऽयं त्वामभद्रामसंमतां । त्वमव्यक्तगतिर्भुंक्ष्व लोकं कर्मविनिर्मितं

दीयमानं न यच्छति न गृह्णाति इमौ द्वौ कर्मभूतावनुशोचंति संतः पुरुषेणानुकर्तव्यो धर्मः पौरुषो देवगुह्यं मरणं तद्धि प्राणिनां वैराग्यार्थं पातुरस्याय देवैर्गोप्यते त्व
मं तव आत्मसमाधिना ज्ञानदृष्ट्या याच्यमानोऽयं लोकस्त्वां नेच्छति अतो व्यक्तगतिः कुतः प्राप्तेत्यलक्षितगतिः सती लोकमाक्रम्य भुंक्ष्व एवं सद्योपि लो
कस्तव पतिः स्यादित्यर्थः

नैवेदं त्वया शंकनीयं मां प्रतिकूलां लोको हि निष्यति इति । यस्मात्त्वमेव प्रजानां नाशं करिष्यसीत्याह । याहीति । या मदीयाय यवनानां ईश्वराः तेना
ते यायुक्ताः किंच प्रज्वार इति मारको वैष्णवो ज्वरः माहेश्वरस्य व्याध्यंतः पातित्वात् भीमाः द्वौ ताः सैनिका यस्य इति वतत्थेस प्रदशो भयः
अष्टाविंशते वेदं भ्यो भ्यो नेन ह्यो वि विचिंत्यया । ह्यां त्वं प्राप्त सर्वैर्वेन करा विन्मुक्तिं उव्याते इदानीं पुरंजनस्य देहत्याग प्रकार पूर्वक स्त्रीत्वप्राप्ति

याहि मे ष्टतनायुक्ता प्रजानाशं प्रणेष्यसि । प्रज्वारो यं मम भ्राता त्वं च मे भगिनी भव । वराम्युभाभ्यां लोकेऽस्मिन्नव्यक्तो भीमसैनिकः
इति श्रीभागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने सप्तविंशतितमोऽध्यायः ॥ नारद उवाच ॥ सैनिका भयनाम्नो ये बर्हि
ष्मन्दिष्टकारिणः प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमां ॥ त एकदा तु रभसा पुरंजनपुरीं नृप ॥ रुरुधुर्भौमभोगाढ्यां जरत्
जे
पन्नगपालितां ॥ कालकन्यापि बुभुजे पुरंजनपुरं बलात् । ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ॥ तयोपभुज्यमानां वै
यवनाः सर्वतो दिशं ॥ द्वार्भिः प्रविश्य सुभृशं प्रार्दयन्सकलां पुरीं ॥ तस्यां प्रपीड्यमानायामभिमानी पुरंजनः ॥ अवापोरुविधा
स्तापान्कुटुंबी ममताकुलः ॥ कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः ॥ नष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ॥ विशीर्णां स्व
पुरीं वीक्ष्य प्रतिकूलाननादृतान् ॥ पुत्रान्पौत्रानुगामात्याञ्जायां च गतसौहृदां
कारमाह । सैनिका इत्यादि । राजसिंहस्य वेश्मनीत्यनेनादिष्टैः
वं कुर्वंति सुधिकुर्वंतीति तथा भृत्याः आदेशकारिण इति वज्ज्वरपन्नगेन जीर्णप्राणेन पालितां द्वार्भिः श्रोत्रादि रोगरूपेण प्रविश्य कन्यया जरया
पगूढः सन्नतस्मातिक्रियानलेभ इति ततो येना च यः हृतैश्वर्यत्वानादि श्वशक्तेः प्रतिकूलात् अनपेक्षित विषयप्रापणात् अनादृतान् आरम्भक

भा०च
८१

अरिभिर्विप्रादिभिर्दूषितान् । कालकन्यया हेतुभूतया यातयामान् निःसारानपि कामानभिलषन् । विगता आत्मनो गतिः पारलौकिक ऐहिकः ।
पुत्रादिस्नेहश्च यस्य । स्नेहादिति पाठः । हातुं जीर्णं देहं त्यक्तुं प्रचक्रमे । उपक्रान्तवानिति द्वयोरन्वयः । अनिकामतः अनिच्छयापि । सपरिच्छदः भृत्यव
र्जिसहितः कुटुंबेन दीव्यतीति कौटुंबिकः । कुटुंबिन्या सधर्मिण्या विवक्षितः । सान्वयः पुत्रादिसहितः । यवनैरुपरुद्धान्यायतनानि यस्य सः पुरपालः ।

आत्मानं कन्यया ग्रस्तं पांचालानरिदूषितान् । दुरन्तचिन्तामापन्नो न लेभे तत्प्रतिक्रियां ॥ कामानभिलषन्दीनो यातयामांश्च कन्यया । विग
तात्मगतिः स्नेहः पुत्रदारांश्च लालयन् ॥ गंधर्वयवनाक्रान्तां कालकन्योपमर्दितां । हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥ भयना
म्नोग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः । ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥ तस्यां संदह्यमानायां सपौरः सपरिच्छदः । कौटुं
बिकः कुटुंबिन्या उपातप्यत सान्वयः ॥ यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया । पुर्यां प्रज्वारसंसृष्टः पुरपालोन्वतप्यत ॥ न शे
केसोवितुं तत्र पुरुकृच्छ्रोरुवेपथुः । गंतुमैच्छत्ततो वृक्षकोटरादिव सानलात् ॥ शिथिलावयवो यर्हि गंधर्वैर्हृतपौरुषः । यवनैररिभी

नव

राजन्नुपरुद्धो रुरोद ह ॥ दुहितृः पुत्रपौत्रांश्च जामिजामातृपार्षदान् ॥ स्वत्वावशिष्टं यत्किंचिद्गृहकोशपरिच्छदं ॥ अहं ममेति स्वीकृत्य गृ
हेषु कुमतिर्गृही । दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥ लोकान्तरं गतवति मय्यनाथा कुटुंबिनी । वर्तिष्यते कथं त्वेषा बालकाननु
शोचती ॥ न मय्यनाशिते भुंक्ते नास्नाते स्नाति मत्परा । मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाक् भयात् ॥

पुरुवकृच्छ्रं तेन महान् वेपथुर्यस्य । वृक्षकोटरादिव सानलात् । कंठ उपरुद्धो रुरोद । पुत्रपत्न्युद्धनिं चकार । दुहित्रादीन्ध्यावित्यन्तरेणान्वयः । जामयो भगिन्यः

राम
८१

स्वत्वमात्रेणावशिष्टं भोगहीनं प्राणैर्वक्षीणः । ध्यानमेवाह । अनाशिते अभोजिते । भर्त्सिते भर्त्सने कृते यतवाक् भवति ॥

अविघ्नं अविवेकिनं मां । व्युषितं देशांतरगते । गृहमेधीयं वर्त्म गृहधर्मं अपि किं नेष्यति । अनुवर्त्तयिष्यति । युक्तमेतत् । यतो वीरसूः पुत्रवती किंवा
वामद्विरहमसहमानामरिष्येत्येवेत्यर्थः नविद्यते परमयनमाश्रयो येषां अपरायणाः पुत्राः कन्याश्च । यद्वा पराश्रयाः कन्याः भिन्नानौर्येषां अ

प्रबोधयति मां विघ्नं व्युषिते शोककर्षिता । वर्त्म तद्गृहमेधीयं वीरसूरपि नेष्यति ॥ कथं तद्दारकारीणां हारकीर्वापराय
णाः । वर्त्तिष्यंते मयि गते मित्रेनाथस्वोरधीः ॥ एवं कृपणया वाचा शोचंतं मत्तरेहिणं । अहीनं तु कृतधीरेनमयनामाःभ्य
पद्यत ॥ पशुवद्यत्वनेरेषनीयमानः स्वकं त्वयं । मन्येद्वन्तु पथ्याः शोचंते भृशमातुराः ॥ पुरा विहाय योपगतउपह
द्वो भुजंगमः । यदा तद्दैवानुचरी विशीर्णा प्रकृतिं गता ॥ विघ्नघ्नमाणाः प्रमत्तमयवनेनवलीयसा । नाविंदत्तमसावि
ष्टः सत्वायं स्वहृद्भरः ॥ तं यन्नपशवोनेनमेत्तु प्रायेः दयालुना । कुमारैस्त्रिविच्छिदः कुह्वाः स्मरंतोऽपीवमस्यतत ॥ अनं
तपारेतमसि मिमेग्नानष्टस्मृतिः समाः । शाश्वतीरनुभूयार्त्तिं प्रमरामगहृषितः ॥

तद्देहं गां वस्त्रात् तस्य उद्धत्वात् । एषयदा त्वयं अस्थानं नीयमानस्तदा अनुपयाः प्राणाः इंद्रियाणि च । तथा च श्रुतिः तमुत्क्रामंतं प्राणोनूत्क्रामति
प्राणमनूत्क्रामंतं सर्वे प्राणाः अनूत्क्रामंतीति । प्रकृतिमहाभूतात्मतां नाविंदत्तमसाविष्टः । पूर्वं सत्वाय संततमीप्सं । अदयालुना काम्यकर्मह्रये
संतप्ताः हताः । अमी वै पापं क्रौर्यं । शाश्वतीः समाः अर्त्तिमनुभूय ।

भा०च
८१

अंतकाले तां भार्यामेव मनसा गृह्णन् स्मरन् अनंतरं विदर्भस्य वेश्मनि प्रमदोत्तमा बभूव अतः परस्मिन्प्रकरणे एतावदेव प्रकृतोपयोगि विवक्षितं । स्त्रीध्या-
नेन स्त्रीत्वप्राप्तावपि पतिव्रताध्यानेन पूर्वादृष्टेन च धार्मिकाद्विदर्भाज्जन्माभूत । धार्मिकसंगेन च विशुद्धस्य भागवतेन मलयध्वजेन संयोगोऽभूत ततस्ततो विशु-
भक्तिः ततो वैराग्यं ततस्तमेव भर्तृरूपं गुरुं पातिव्रत्यधर्मेण भजतो भगवत्प्रसादाल्लब्धज्ञानेन मोक्ष इति । अत्यल्पकथालंकारमात्रं तथाप्युपि किंचिद्वृत्तिं मात्रमाख्या-
नेह योजयिष्यामः विदर्भस्य विशिष्टदर्भोपलक्षितस्य कर्मवश्यराजसिंहस्य धर्मेणाहिंसाप्रजापालनेन यत्तादिना च कृतक्रियाराजाते तेषु श्रेष्ठस्य वेश्मनि । मलया-
पलक्षिते दक्षिणादेशो द्रविडदेशो वा दर्शनीयः । स हि श्रीविष्णुभक्तप्रधानो देशः तत्र मुख्यः महाभागवत इत्यर्थः पंडा निश्चयबुद्धिः तामर्हतीति पांड्यः स उपयेमे

तामेव मनसा गृह्णन्ती बभूव प्रमदोत्तमा । अनंतरं विदर्भस्य राजसिंहस्य वेश्मनि ॥ उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः ॥
युधि निर्जित्य राजन्यान् पांड्यः परपुरंजयः ॥ तस्यां स जनयांचक्र आत्मजामसितेक्षणां ॥ यवीयसः सप्त सुतान् सप्त द्र-
विडभूभृतः ॥ एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदं ॥ भोक्ष्यते यद्वंशधरैर्मही मन्वंतरं परं ॥

राजन्नो भागवतसंगप्राप्त इत्यर्थः । आत्मजां श्रीकृष्णमेवाहविंतत्संगेन भगवद्धर्महविरभूदित्यर्थः । असितस्य श्रीकृष्णस्येक्षणं यया तां यवीयसः सप्त सुता-
न् । श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं । अर्चनं वंदनं दास्यमिति भक्तिप्रकारान् । सख्यात्मनिवेदनयोस्त्वपदार्थज्ञानोत्तमकालत्वात् तस्य च भगवते
वोत्तरत्रोपदेक्ष्यमाणत्वादिदानीमनुत्पन्नेः सप्तेत्युक्तं भगवद्धर्मैर्हृद्यानतच्छ्रवणकीर्तनादिकं जातमित्यर्थः । द्रविडभूमिपालकान् । द्रविडभूमिर्हि श्रवणादि
भक्तिभिरेव हि राजिताः स्तीति प्रसिद्धं । अर्बुदमिति श्रवणादीनां प्रत्येकमनेकप्रकारास्तु भवन्नित्यर्थः । तदुक्तं । भक्तियोगो बहुविधो मार्गैर्भाविनि भाव्यत
इति । येषां वंशधरैः यतः प्रवृत्तैः संप्रदायभेदैः कृत्स्नां महीं मन्वंतरं ततः परं च भोक्ष्यते अविद्याकामकर्मभ्यः परिरक्षिष्यते ॥

राम
८१

अगस्त्यः अंगानि निष्क्रियाणि गात्राणि स्तापयति संघातयतीत्यगस्त्यो मनः स इक्ष्वाकुप्रथमं जातां दुहितरं कल्पसेवार्थं विमुपयेमे तस्यामनः कल्पेद्दार
तिवं बंधेत्यर्थः एतानि शमदमादीनि व्रतानि यथा रतिं दृष्टेभ्यः सत्यलोकादिभोगेभ्यः विच्युतस्तद्दुहितः कल्परता विहाय तत्र भोगविरागो जात इत्यर्थः
स एवोपशमात्मकत्वान्मुनिः कथंभूतः इध्मवाहः आत्मजो यस्य सः तद्दिन्नानार्थं संगतमेवाभिगम्यैन समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठामित्यादि श्रु
तिप्रसिद्ध समिद्वहनोपलक्षिता गुरूपसत्तिर्वैराग्यात्तारभ्य इत्यर्थः न ह्यविरक्तस्य गुरूपसत्तिः संभवति कथापदे यथाश्रुतमेव इमा विभज्य तत्रश्रवणा

अगस्त्यः इक्ष्वाकुदुहितरमुपयेमे धृतव्रतां यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः
आरिराधयिषुः कृष्णं सजगाम कुलाचलं हित्वा गृहान्सुतान्भोगान्वैदर्भी मदिरेक्षणा अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरं
तत्र चंद्रवसा नाम ताम्रपर्णी वटोदका तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् कंदाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः
वर्त्तमानः शनैर्गात्रकर्षणं तप आस्थितः शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये सुखदुःखे इति द्वंद्वान्यजयत्स
मदर्शनः तपसा विद्यया पक्वकषायो नियमैर्यमैः युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः

रिभक्तिभेदं व्यवस्थाप्य इदानीं पुरंजनस्य स्त्रीभावं प्राप्तस्य सद्वृत्तेर्विरक्तस्य पतिरेव गुरुः स्त्रीणामिति वचनात्पतिसेवया गुरुसेवाप्रकारं दर्शयति मा
हेत्वेत्यादिना मनोरथैरित्यनेन न ग्रंथेन मदयतीति मदिरे समीक्षणे यस्याः तत्र चंद्रवसाया नद्यस्तासां पुण्यैः सलिलैरुभयत्रांतर्बहिश्चात्मनो मलं क्षालयन् तप
आस्थित इत्युत्तरेणान्वयः अस्यते भूमौ क्षिप्यत इत्यास्थि वीजे विद्यया उपासनया पक्वकषायः दग्धकामादिवासनः युयुजे आत्मना भावयामास अहंब्रह्मणि इ

आस्ते स्मा वर्षशतमिति त्वां न स्पृशः साधनतां दर्शयति अत एव भक्तिकृतवानित्याह वासुदेवे रतिं दृढं वहन् अन्यद्देहादिकं न वेद स एवं प्रवर्त्तमानः
आत्मन्यात्मानं विद्वान् स्पृष्टो ऽपि रराम कथं विद्वान् व्यतिरिक्ततया देहादिव्यतिरिक्तत्वेन अतः व्यापकतया देहादिप्रकाशकत्वेनानन्तदेहाद्या
कोऽपि विमर्शी एतत्प्रकाशयति न तु निराकार आत्मा तत्राह आमस्पर्शादिसाधिनीं अयं भावः विमर्शो नाम मात्रा करणवृत्तिः सा च जडत्वादि

आस्ते स्माणुरिवैकत्र दिव्यवर्षशतं स्थिरः । वासुदेवे भगवति नान्यद्वेदोद्वहन् रतिं ॥ सव्यापकतयात्मानं व्यतिरिक्ततयात्मनि ।
विद्वान्स्वप्न इवामर्शसाधिनीं विरराम ह ॥ साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप । विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखं ॥ प
रे ब्रह्मणि आत्मानं परं ब्रह्म तथात्मनि । ईक्षमाणो विहायेक्षामस्मादुपरराम ह ॥ पतिं परमधर्मज्ञं वैदर्भी मलयध्वजं । प्रेम्णा पर्यचरद्धि
त्वा भोगान्सा पतिदेवता ॥

त्मप्रकाशकास्सि एवेति यथा स्वप्ने मम इदं शिरः छिन्नमित्यादि प्रतीतौ तद्व्यतिरिक्तमात्मानं वेत्ति तद्वत् केन विद्वान् तत्राह साक्षाद्धरिरेव गुरुस्तेनोक्तेन
सर्वतोमुखं यथा तथा स्फुरता अनवच्छिन्नेन ज्ञानेन तदेवाह परे इति ब्रह्मैवाहं न संसारीति ब्रह्मण्यात्मान ईक्षणेन शोकादीनिवृत्तिः अहमेव ब्र
ह्मेत्यात्मविद्ब्रह्मण ईक्षणो ब्रह्मपारोक्ष्यनिवृत्तिः अतो व्यतिहारेणेक्षमाणः अस्मात्संसारादुपरराम न त्वेवमपि जीवन्मुक्तो ब्रह्मभावापत्तिः ईक्षणोस्य
व्यवधायकत्वादित्याशंक्याह ईक्षां विहायापि धनानन्तावज्ञस्याः स्वयमेवोपशान्तेरिति भावः

उपपत्तिं पत्युः समीपो यस्याः । पत्युः किंचिन्मात्रं अजानती तत्समानाय सतीव भावित्यर्थः उपोऽधिके चेति कर्मप्रवचनीयः तद्योगे च द्वितीया प्रा
तमंगात्(?)वपुष्य मनलमुपशांतार्चिः ज्वाला यथा भवति तद्वत् । तदानीमपि त्वं स्थिरमात्मानं यस्याः अत एवाजानती यदा नदाय था पूर्वमसेवतां यत्र
रंध्रिमवेवं घती यदा तस्मिन्नेव घ्राणं नापश्यत् । अबंधुपतिरहितं । असुष्मिरामिति । हेत्रबंधुमः अधार्मिकः क्रियेयम्योपिश्च वर्तेयन्प्रवर्तया
वीरत्वा मादृक्तन्त्वा मा वेणीभूतशिरोरुहा । वभाऽनुपपत्तिं शांतशिखां शांतमिवानलं । अजानती प्रियतमं घरोपरमंगना । त्वं स्थिरात्म न
न मामात्मयथा पूर्वमुपावरत । यदा नोपलभेत द्राणं पत्युरंगेती । आसीत्त्वं विगतहृदया पृथक् कृष्णमृगी यथा । आत्मानं शोच
तीरी नमबंधुविक्रवाक्षमिः । त्वं नावामित्यविपिने सहत्वं प्रवरोरमा । उनिष्ठोत्तिष्ठ राजेर्षे रमामुद्धिमेखला । रक्षस्मः क्रो
अबंधुश्र्योविमृतीं पाहि मद्दे । एवं विलपती बाला विपिने उगतापतिं पतिताधारया मरिकृदश्रयप्यवन्नेयत । वितिदारकमंयोवि
त्वा नस्यापत्युः कलेवरं । आरीप्सुवाहमरणो विलपंतीमनोरथे । तत्र पूर्वतरः कश्चित्सरवोब्राह्मणात्मवीर । मात्वयवल्गुनामाघ्रातामा
हहृदतीप्रभो । कात्वं कस्यासि कोवायं शयानो यस्य शोचसि । जानामि किं मरवोयं मायेनाग्र विचवर्यदह । अपिस्मरसिवात्मानं विज्ञातसखमव
म
मास तस्यानिधाय शुभ्रिरानेनारीप्यव पूर्वतरः अनादिरीश्वरः सखाद्वासुपर्णाविति श्रुतेः सा प्राप्रियवा हित्वा मां परमाविष्टड्डीममभोगरतो मतः
वेन मंवोधयन् यशोवासि अयमसष्टेः पूर्वं विचवर्थ मयिस्थितत्वेन सरव्यमनुभूतवानसि यद्यपि मां न जानासि तथाप्यात्मानं त्वामविज्ञातसखं अविज्ञातः
कश्चिन्मे सखोआसीरिस्येवं किंस्मरसि सारवरातिउं हंसनिर्देशः घाक्रमणं हंसस्मरणाय सारवमस्मारयत त्वं वियोगकृतमनर्थमाह हित्वेति सार्द्धैः षड्भिः

८४

हंसोऽहमिति मानसं हृदयमयनं ययोः कथापक्षे मानससरसि स्थितौ पक्षिणावभूतां जातौ ओको गृहं तदन्तरा विनैव वासः इव एवार्थे सहस्रपरिवत्सरान् महा
प्रलयो यावत् ॥ हे बंधो ग्राम्यस्त्रीं मतिर्यस्य ॥ स्त्रिया मायया ॥ पंचारामा उपवनानि यस्मिन् ॥ नवद्वाराणि द्वाराणि छिद्राणि यस्मिन् ॥ एकः प्राणः पालो यस्मि
न् ॥ त्रीणि पृथिव्यप्तेजांसि कोष्ठानि प्राकारा यस्मिन् ॥ षट्कुलानि अभीष्टविषयसमर्पकाः वणिजो ज्ञानेन्द्रियमनांसि यस्मिन् ॥ पंचविपणा द्वाराः क
र्मेन्द्रियाणि यस्मिन् ॥ पंचभूतानि प्रकृतिः उपादानकारणं यस्य ॥ स्त्री बुद्धिर्वा धवः पतिः स्वामिनी यस्मिन् ॥ स्त्रियमेवं मन्त्रोक्तं व्याचष्टे पंचेन्द्रियार्था इति

हंसावहं च त्वं चार्य सखायौ मानसायनौ ॥ अभूतामन्तरा वौकः सहस्रपरिवत्सरान् ॥ स त्वं विहाय मां बंधो गतो ग्राम्यमतिर्महीम् ॥ विच
रन्पदमद्राक्षीत्कयाचिन्निर्मितं स्त्रिया ॥ पंचारामं नवद्वारमेकपालं त्रिकोष्ठकं ॥ षट्कुलं पंचविपणं पंचप्रकृति स्त्रीधवं ॥ पंचेन्द्रियार्था
आरामा द्वारः प्राणा नव प्रभो ॥ तेजोऽबन्नानि कोष्ठानि कुलमिन्द्रियसंग्रहः ॥ विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया ॥ शक्त्यधीशः पु
मानत्र प्रविष्टो नावबुध्यते ॥ तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः ॥ तत्संगादीदृशीं प्राप्तो दशां पापीयसीं विभो ॥ न त्वं विदर्भदुहिता
नायं वीरः सुहृत्तव ॥ न पतिस्त्वं पुरंजन्या रुद्धो नवमुखे यया ॥ मायाह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीं ॥ मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिं

षट्कुलमिति षट्त्वं च एकपालमिति च स्पष्टत्वान्न व्याख्यातं ॥ भूतान्येव प्रकृतिरुपादानं तस्याः स्त्री भवमित्यस्य व्याख्यानं ॥ शक्त्यधीशस्य यस्य ॥ तद्वशः सन्नित्यर्थः
स्पृष्टः अभिभूतः ॥ अश्रुतो न विद्यते श्रुते ब्रह्मात्मस्मृतिर्यस्य ॥ तत्त्वमुपदिशति न त्वमिति चतुर्भिः ॥ सुहृत्पतिः ॥ नवद्वारे पुरे यया रुद्धोसि तस्याः ॥ उभा मास्मदृश्येनन्याति
रमन्यथाः इदानीं च मत्तो न्येष्टा स्त्रियं यन्मन्यसे एषा माया यत उभयमपि न भवत्तो नास्ति ॥ यद्वा वाहं हंसोस्मद्दे नोत्मावयोर्वस्तुमात्रां गतिं स्वरूपं पश्य

राम
८४

तत्त्वपदार्थयोरभिन्नदृष्ट्यैकत्वमाह ॥ अहमेव भवान् ॥ उपचारं वारयति ॥ न चान्यस्तीति व्याप्तिज्ञानोपदेशः उक्ताभिप्रायं यच्छिद्रमंतरं ॥ तर्हि कथमावयोरन्तत्व
मेवं तत्त्वादिधर्मभेदेन तत्राह ॥ यथेति ॥ आत्मानं देहं आदर्शे निर्मलं महांतं स्थिरं वा ॥ वक्षेत ॥ परस्य चक्षुषि वा तद्विपरीतं ॥ विद्याविद्योपाधिकृतो
धर्मभेद इत्यर्थः ॥ तदभिचारेण ईश्वरवियोगेन ॥ कथामात्रमिति शंकां वारयति ॥ बर्हिष्मन्निति ॥ पारोक्ष्येण राजकथामिषेणात्र हेतुः ॥ यद्यस्मा

अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ॥ न नौ पश्यंति कवयश्छिद्रं जातु मनागपि ॥ यथा पुरुष आत्मानमेकमादर्शच
क्षुषोः ॥ द्विधाभूतमवेक्षेत तथैवांतरमावयोः ॥ एवं स मानसो हंसो हंसेन प्रतिबोधितः ॥ स्वस्थ[स्त]द्व्यभिचारेण नष्टामाप
पुनः स्मृतिं ॥ बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितं ॥ यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ॥ इति श्री भगवते म
हापुराणे चतुर्थे स्कंधेष्टाविंशतितमोऽध्यायः ॥ प्राचीनबर्हिरुवाच ॥ भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते ॥ कवय एत
द्विजानंति न वयं कर्ममोहिताः ॥ नारद उवाच ॥ पुरुषं पुरंजनं विद्याद्यद्व्यनक्त्यात्मनः पुरं ॥ एकद्वित्रिचतुष्पादं बहुपादमपाद
कं ॥ योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः ॥

त ६ च ॥ र्थेऽष्टाविंशतितमो ॥ यः ऊनत्रिंशे परोक्षार्थव्याख्यानेनोपसंहृतं ॥ स्त्रीसंगतो भवस्त्रीशासंगा
न्मुक्तिरिति स्फुटं ॥ कवयः अध्यात्मविदः व्यनक्ति लिंपति चेतनीकरोतीत्यर्थः ॥ यद्वा व्यनक्ति प्रकटयति ॥ ततस्वस्वकर्मणा पुरं जनयतीति पुरंजनः पुरं व्या
प्नोति भवति ॥ एकद्वारयः पादा यस्य ॥ अविज्ञातशब्देन आहृतः व्याहृतः उक्तोसौ ॥ सखेश्वरः ॥

भा०च
८५

अविज्ञातनामा निरूपितः । यद्यस्मात्पुंभिर्नामादियोगेन विज्ञायते तत्र तेषु पुरेषु मध्ये अक्षभिरिंद्रियैः पंचवृत्तिर्वायुविशिराः सर्प इव प्राणाः एका
दश महाभटा इत्यनेनैकादशो महाभटो येनायकं उक्तं मत्स्री यतिवृहद्बलं यस्य तत्कान्तः नवखानि द्वाराणि यस्य पुमात्म स्वरूपादेरर्थं संक्षेपेण
ह यस्त्विंद्रियेंद्रियसंयुतः स आत्मा नामभिर्द्वाभिर्वहिर्यातीति पुरः पूर्वभागे कृताः नेत्रे इति रूपमिति च रूषेति खद्योताविर्मुख्याख्यानं शेषोऽवा

यन्न विज्ञायते पुंभिर्नामभिर्वा क्रियागुणैः । यदाजिघृक्षन्पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान् । नवद्वारं द्विहस्तांघ्रि तत्रामनुत साध्वि
ति । बुद्धिं तु प्रमदां विद्यात् ममाहमिति यत्कृतं । यामधिष्ठाय देहेऽस्मिन्पुमान्भुंक्तेऽक्षभिर्गुणान् । सखाय इंद्रियगणा ज्ञानं
कर्म च यत्कृतं । सख्यस्तद्वृत्तयः प्राणः पंचवृत्तिर्यथोरगः । बृहद्बलं मनो विद्यादुभयेंद्रियनायकं । पांचालाः पंच विषया यन्म
ध्ये नवखं पुरं । अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति । द्वे द्वे द्वारौ बहिर्याति यस्तदिंद्रियसंयुतः । अक्षिणी नासिके चा
स्यमिति पंच पुरः कृताः । दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः । पश्चिमे इत्यधो द्वारौ गुदं शिश्नमिहोच्यते । खद्योताविर्मुखी
चात्र नेत्रे एकत्र निर्मिते । रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः । नलिनी नालिनी नासे गंधः सौरभ उच्यते । घ्राणोऽवधूतो मुख्यास्य

रः ईश्वरः पुरंजनः नासे इति व्याख्यातं अवधूतेनेति त्ववधूतो वायुस्तद्रात्मकेनोद्याणेन सहैकस्थानत्वाद्घ्राणोऽवधूतः । विपणो वाग्रविद्रसः । स
आस्यमिति व्याख्या । रसज्ञविपणान्वित इत्यत्र रसज्ञशब्दनिर्दिष्टस्य रसविदित्यनुवादः रस इति व्याख्या रसनेंद्रियमित्यर्थः विपणो वाग्रसीवद्रस इत्ये
वपाठः आर्षत्वात्रेशेषः ॥

राम
८५

ऽर्थः अत्र ग्रामक मित्यस्यानुवादः ग्रामिणां रतिरिति तस्य व्याख्या समवाय इति विषूचीनपदार्थानुवादो विषूचिरिति तद्गुणेस्मिनो गुणे स्तमः सत्व
रजोभिः महिषी यद्यदीहेतेत्यादेरर्थं संगृह्णाह यथा यथा बुद्धिः स्वप्ने विक्रियते जाग्रति विकरोति वा इन्द्रियाणि परिणामयति तस्माद्गुणैरक्तो लि
ङ्ग आत्मा न तथा न तथा न स्यादि निर्देशान स्पर्शी न स्पर्शी नाद्याः केवलमुपद्रष्टैव सत्वला रक्तकार्यते आशुगामित्येतद्व्याचष्टे संवत्सरस्यैवाप्रतिहतो र
आपणो व्यवहारः त्वविज्ञमधो वहन्न पितृदृष्टिणाः कर्णो उत्तरे देवहू स्मृतः प्रवृत्तं च निवृत्तं च शास्त्रं पंचालसंज्ञिता पितृयानं दे
वयानं श्रोत्रात् श्रुतधराद्व्रजेत आसुरी मेढ्रमर्वाग् द्वार्व्यवायो ग्रामिणां रतिः उपस्थोदुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते वैशसं न
रकं पायुर्लुब्धकोऽन्धौ तु मे शृणु हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च अन्तःपुरं च हृदयं विषूचिर्मन उच्यते तत्र मोहं प्र
सादं वा हर्षं प्राप्नोति तद्गुणैः यथा यथा विक्रियते गुणाक्तो विकरोति वा तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते देहो रथस्त्विन्द्रि

धृ ये

याश्वः संवत्सररयोऽगतिः द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वंद्वकूबरः पंचेन्द्रियार्थप्रक्षेपः सप्तधा
तुवरूथकः आकृतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति एकादशेन्द्रियचमूः पंचसूनाविनोदकृत संवत्सरश्चंडवेगः कालो येनोपलक्षितः
यो वेगः प्रतीति तेनोपस्य संवत्सररयः वस्तुतस्तस्य अगतिः स्वप्नशरीरे ईद्वावेव विहृतत्वेन देशान्तरगत्यभावात पार्षितरे संवत्सरस्त्वृतत्कृतं च यस्य तदा भ्यां
गतिर्यस्येति द्विषमित्यस्य व्याख्या त्रिगुणध्वज इति त्रिवेदोक्तपदव्याख्या पंचबहरणामित्येतद्व्याचष्टे पंचेन्द्रियार्थप्रक्षेप इति पंचेन्द्रियैः सूनाविनोदप्रि
वान्यायेन विषयसेवां करोतीति पंचसूनाविनोदकृत अनेन च वारुणगयांतत्रेत्यादि व्याख्यातं

भा॰ च॰
८६

परिहृत्यापरिक्षमाणो नाम भगिनीत्वेन जगृहे लोकानां क्षयाय यावनाः संचारिणः भूतानामुपसर्गो पीडायां आशुः शीघ्रो मृत्युहेतुः रयो वेगो यस्य
प्रज्वारः प्रेति एवं व्याख्यापाठान्तरे तत्रैव ततः अरयः अनेन वसुरिमित्रैपहृद इत्यादिपदं व्याख्यातं द्विविधः शीतोष्णरूपेण प्रवेशभेदात् एवं पो
हुविनोक्रमर्थं व्याख्याय सर्वकथातात्पर्य्यमाह एवमित्यादि विरमक्रमेणोत्यतेन आधिदैविकादिभिर्दुःखैः क्लिश्यमानो ममाहमिति देहे शेतेव
र्त्तितिशेते वर्त्तत इति द्वयोरन्वयः अन्यत्रापि पापानारीन्नाराधर्म्मान् अध्यस्तारीनिंद्रियधर्म्मा क्षमादीन्मनोधर्म्मा अत्मनिर्गुणोऽप्यात्मन्यध्यस्य कामल

तस्या ह्यानीहरं धर्म्यांगं धर्म्मोऽरवयः स्मृताः हरत्पांडुः परिकांत्याषष्ठ्युत्र शातवयं कालकन्या जरा साक्षात् लोकस्तां नाभिनंदति स्वसारं
जगृहे मृत्युः क्षयाय यवनेश्वरः आधयो व्याधयस्तस्य सैनिका यवनेश्वरः भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः एवं बहुविधैर्दुःखैर्दै
वभूतात्मसंभवैः क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः प्राणेन्द्रियमनोधर्म्मानात्मन्यध्यस्य निर्गुणः शेते कामलवान्ध्यायन्ममाहमिति कर्म्म
कृत यदात्मानमविज्ञाय भगवंतं परं गुरुं पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् गुणाभिमानी स तदा कर्म्माणि कुरुते वशः शुक्लं कृष्णं
लोहितं वा यथा कर्म्माभिजायते शुक्लात्प्रकाशभूयिष्ठान्लोकानाप्नोति कर्हिचित् दुःखोदर्कान्क्रियायासांस्तमःशोकोत्कटान्क्वचित् क्वचित्त

५५

वाङ्विषयं स्वलेशान्ध्यायन् कर्म्मकृत ततः किं अत आह यदेति मानूक विद्यत्वा किवित्रो भयमरधीः देवो मनुष्यस्तिर्य्यग्वा यथा कर्म्मगुणं भवत
द्वाभ्यां स्वदृक् स्वप्रकाशस्वभावोऽपि शुक्लं सात्विकं कृष्णं तामसं लोहितं राजसं यथा कर्म्मतया जायते तदेवाह शुक्लादिति द्वाभ्यां प्रकाशो भूयिष्ठो येषु दुःख
मुदर्कं उत्तरं येषु क्रियया आयासो येषु तान् लोहितान् तमः शोको उत्कटो येषु तान् कल्मादिति तेयं नो भयं नष्टं सकं यथा कर्म्मगुणं कर्म्मगुणानतिक्रम्य

एम
८६

तेषु दैववशेन सुखदुःखे प्राप्नोतीति तत्र दृष्टान्तमाह हस्ताभ्यां क्षुधापरीतो व्यात्तः सारमेयः श्वा दंडदंडेन ताडनं कामयमानस्त्वाशयेयमानन्तर्हि सुख
मनुभवति दुःखस्य प्रतीकारं तु मनुभवात्रैकान्ततो हेयत्वं तत्राह दुःखेष्विति दुःखस्य प्रतीकारस्त्वावश्यं ज्ञातिपापवैतन्यस्य तस्य प्रतिक्रियातथापि त्रि
विधेषु सुखदुःखेषु मध्ये एकान्तेरणापि दुःखेन मम वर्ष्ठे रो वियोगो नास्ति प्रतिक्रियाणामपि दुःखस्यत्वादिति तत्र दृष्टान्तमाह यथाहीति दुःखसमु
त्पन्नानि च कर्माणि प्रतिक्रियाकर्माभिमैवनिवृत्तिरित्याह नैकान्ततः अत्यंतं सर्वात्मनेकेवलं तत्तानरहितं अविद्यायाउपहतं प्राप्त अतो विरोधो
क्षुत्परीतो यथादीनः सारमेयो गृहं गृहं चरन् दिष्टं इति यदि दृष्टं दंडमोरनमेव च तथा कामाशयो जीव उच्चावचपथा भ्रमन् उपर्यधो
वा मध्ये वा याति दिष्टं प्रियाप्रियं दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया यथा
हि पुरुषो भारं शिरसा गुरुमुद्वहन् तं स्कंधेन स आधत्ते तथा सर्वाः प्रतिक्रियाः नैकान्ततः प्रतीकारः कर्मणां कर्म केवलं
द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते मनसा लिंगरूपेण स्वप्ने विचरतो यथा अ
थात्मनोऽर्थभूतस्य यतोऽनर्थपरंपरा संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ॥
न निवर्त्तनिवर्त्तकत्वमिति भावः अत्र दृष्टान्तः स्वप्ने दृष्टः स्वप्नप्रबोधं विना यथा तं स्वप्नमत्यंतं न प्रतीकरोतीत्यर्थः ननु तर्हि अत्तानविलसितत्वेन संसृति
हेतोर्देहादेरयथार्थत्वात्किं तन्निवर्त्तनप्रयासेन तत्राह अर्थेहीति लिंगरूपेणउपाधिमूलेन तदेवं संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह अथ तस्मात्
स्वार्थभूतस्यैवात्मनः यतोऽत्तानान्मनसो वा अनर्थपरंपरारूपा संसृतिर्भवति तस्य मनवच्छेदो गुरुरूपे वासुदेव एव भक्त्यैव

भा०च०
८७

नन्वसमतितिनिवृत्तिर्वैराग्यपूर्विकात तस्तामारेवनन्वभक्त्यातरति ॥ शोकमात्मविदित्यादिश्लोकेनाह ॥ वासुदेवइति सध्रीचीनेन सम्यचीनेन प्रकारेण ॥ नन्वेवं सो
महाफलो भक्तियोगः कथं स्यादित्यत आह ॥ स तु अच्युतस्य कथामाश्रित्य वर्त्तमानोऽचिरात्स्यात् कस्य स्यादित्यत आह ॥ शृण्वतः ॥ अधीयानस्य वा जपतस्तत्र
दाह ॥ यत्रेति भागवतगुणानुकथने श्रवणे च व्यग्रमत्वरं चेतो येषां ते ॥ ननु साधुसंगं विना स्वयमेव हरिकथाचिंतनादिना भक्तिर्भवेदेवेत्याशंक्याह
द्वाभ्यां ॥ तस्मिन्स्थाने महद्भिर्मुखरिताः कीर्तिताः मधुभिदश्चरितमेव पीयूषं तदेव शिष्यत इति शेषो यासां ॥ अशना[illegible]

वासुदेवे भगवति भक्तियोगः समाहितः ॥ सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥ सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः ॥ शृण्व
तः श्रद्दधानस्य नित्यदा स्यादधीयतः ॥ यत्र भागवता राजन्साधवो विशदाशयाः ॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥ त
स्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवंति ॥ ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भय
शोकमोहाः ॥ एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः ॥ न करोति हरेर्नूनं कथामृतनिधौ रतिं ॥ प्रजापतिपतिः साक्षाद्भगवान्गिरिशो
मनुः ॥ दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः

यैः ॥ अवितृषः अलंबुद्धिशून्याः सन्तः गाढैः सावधानैः कर्णैर्यतः ॥ अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः ॥ पश्यन्तोऽपि न पश्यन्ति पश्यन्तं परमेश्वरं ॥
सरितः पिबन्ति सेवन्ते ॥ अशनमशनेन क्षुल्लक्ष्यते ॥ अशनाय ॥ इयत्तात्र सत्त्वादिभक्तिरहितान्बाधन्त इत्यर्थः ॥ सत्संगमंतरेण कथाचिंतनादिना वस्तुतस्मादिनार्हस्वाव
राभावाद्युत्पत्तिपापाद्यभिभूतस्य भक्तिर्नैव संभवतीत्याह ॥ एतैरिति ॥ भगवदनुग्रहमंतरेणान्नत्कस्यापि ज्ञानं संभवतीति कैमुत्यन्यायेनाह ॥ प्रजा
पतिपतिर्ब्रह्मा ॥ मदंताः अहं नारदोऽन्ते येषां ते वाचांपतयः ॥ तपोविद्यासमाधिभिरुपायैः पश्यन्तोऽपि विचिन्वन्तोऽपि पश्यन्तमदृश्यं साक्षिणं न पश्यन्ति ॥

राम
८७

कुत इत्यत आह शाब्दे ब्रह्मणि वेदे उरुविस्तारे यस्य अर्थतोपि पारं दुष्पारं तस्मिन् वर्त्तमानाः मंत्राणां लिंगैर्वज्रहस्तत्वादिगुणकैर्विविधदेव
ताभिधानसामर्थ्यैः परिछिन्नमेव इंद्रादिरूपं तत्तत्कर्मग्रहेण भजंतः परमेश्वरं न विदुः तर्हि तत्र कोनाम कर्माग्रहं हित्वा परमेश्वरमेव भजेदत
आह यदायमनुगृह्णाति अनुग्रहे हेतुः आत्मनि भावितः एतत्तदा लोके लोकव्यवहारे वेदे च कर्ममार्गे परिनिष्ठितां मतिं त्यजति अर्थकाशिषु पर
मार्थत्वेन प्रकाशमानेषु इह मार्थदृष्टिं मा कृथाः रोचनार्थकेवलं श्रोत्रप्रियेषु अस्पृष्टवस्तुषु न तु वेदेन हरिणा हि साधनत्वेनोक्तानि कर्माणीति

शाब्दे ब्रह्मणि दुःपारे चरंतमुरुविस्तरे मंत्रलिंगैर्व्यवछिन्नं भजंतो न विदुः परं यदायमनुगृह्णाति भगवानात्मभावितः स
जहाति मतिं लोके वेदे च परिनिष्ठितां तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु
स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलं
स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परं तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः तत्पा
दमूलं शरणं यतः क्षेमो नृणामिह ॥ ॥

वेदवादिनो वदंति कथमस्पृष्टवस्तुष्विति उच्यते तत्राह धूम्रधियो मलिनबुद्धयः सकर्मकं कर्मपरं वेदमा
हुस्ते अतद्विदः अवेदज्ञाः यतस्ते स्वं स्वरूपभूतं लोकं आत्मतत्त्वं वेदतात्पर्यगोचरं न विदुः यत्र देवो हि तिष्ठति महान्मूर्खोसि इत्याह आस्तीर्येति बृहद्वधात् बहुपशु
वधात् महन्मानी महान् यज्ञोहमित्यहंकारी अतस्तब्धः अविनीतः अतः कर्मणो विधिपरं विद्यास्वरूपं तच्च न वेत्सि सारं स्वयं कृपया तत्तद्दर्शयति हरितोषय
तीति हरितोषं यत्तदेव कर्म यया तस्मिन् हरौ मतिर्भवति सैव विद्या महाफलत्वात् कुत इत्यपेक्षायामाह हरेः परफलत्वादर्शी यत्राह द्वाभ्यां हरिर्देहभृतामात्मा स्वयं स्वेच्छात

भा०व
८८

नचतद्गतेनेऽभ्यन्यमन्तरंवद्दुःखंभयंचत्याह। सइतिइतियोवेदसएवविद्वान्सएवगुरुर्हरिरेवहरिश्च॥ उक्तमुपसंहरतिएवंभगवतःप्रश्नःसंछिन्नःपरिहृतःतदेव
मात्मनोबंधमोक्षप्रकारंकथयन्रूपकेणकथयतोनातिनिर्विण्णचित्तस्यागमनेऽप्रतीक्षमाणस्यततत्त्वज्ञानमेववक्तुमहाभयकंपितसकलमात्रगृहादित्रिवि
धयितुंहरिणारूपकमाह। क्षुद्रमिति। वर्तितोसिवृक्षःपुष्पाणिक्षुद्रमल्पंचरंतीतितथातंलुब्धं। सुमनसांपुष्पाणांशरणेआश्रमेवाटिकायांमिथित्वामिथःपर
स्परंस्त्रियासहमिलित्वातत्रैवरक्तंआसक्तंषट्पदयोऽत्रभ्रमरास्तेषांगणास्तेषांसामसुसंगीतेषुलुब्धौकर्णौयस्यतंपरेषांसहभिर्हितैःस्त्रीयानसूक्तपयं

सवैप्रियतमश्चात्मायतोनभयमण्वपि। इतिवेदसवैविद्वान्योविद्वान्सगुरुर्हरिः॥ना। ५०॥ प्रश्नएवंहिसंछिन्नोभवतःपुरुषर्षभ
अत्रमेवदतोगुह्यंनिशामयसुनिश्चितं। क्षुद्रंचरंसुमनसांशरणेमिथित्वारक्तंषडंघ्रिगणसामसुलुब्धकर्णं। अग्रेवृकानसुतृपोऽवि
गणय्ययान्तंपृष्ठेमृगंमृगयलुब्धकबाणभिन्नं। सुमनःसमधर्मिणांस्त्रीणांशरणआश्रमे पुष्पमधुगन्धवत्क्षुद्रतमंकाम्यकर्मविपाक
जंकामसुखलवंजैह्व्योपस्थ्यादिविचिन्वंतंमिथुनीभूयतदभिनिवेशितमनसंषडंघ्रिगणसामगीतवदतिमनोहरवनितादिजनालापे
ष्वतितरामतिप्रलोभितकर्णमग्रेवृकयूथवदात्मनआयुर्हरतोऽहोरात्रान्तान्कालविशेषानविगणय्यगृहेषुविहरंतंपृष्ठतएवपरोक्षम
नुप्रवृत्तोलुब्धकः। कृतांतोऽन्तःशरेणयमिहपराविध्यतितमिममात्मानमहोराजन्भिन्नहृदयंद्रष्टुमर्हसीति। यथा मृगयुहतं मृगमिति।

तीत्यसुप्रनृपः तानविगणय्यअगणयित्वा। लुब्धकस्यबाणेनभिन्नंमृगंमृगयान्वेषयास्तोकंयन्नाक्तंयोजगतत्याचष्टे। सुमनोभिःसमानोधर्मःपरिणामविरस
त्वंयासांस्त्रीणां। मिथित्वेत्यस्यव्याख्यामिथुनीभूयस्त्रीभिःसहेतिशेषः। रक्तमित्यस्यव्याख्यानंतदभिनिवेशितमनोयेन। अग्रइतिपदस्यव्याख्याआयु
र्हरतइति। यांतमित्यस्यव्याख्याविहरंतमिति। अन्तःनालिकायांगूढेनशरेणपराविध्यतिदूरेवताडयति॥

ताम
८८

उपदेशप्रकारमाह सइति विवक्षाविचार्य अन्तर्हृदिविचिन्त्यकर्णयोर्ध्वनीनरामिववहिर्वृत्तिवृत्तेनियच्छ एतच्चसर्वेन्द्रियोपलक्षणार्थं गृहाश्रमं वजहि कीदृश
अप्रतन्नमानां अतिकाष्ठकानांयानिपृथ्यानितेषांगाथावात्तीर्यस्मिन् जीवानांशरणमीश्वरं एवंक्रमेणसर्वतोविरमात्मार्थान्तरंसष्टु पूर्वोक्तमर्थमनुवदति
श्रुतंगृहीतंविचारितं ब्रह्मनारद एतत्त्वदुक्तमात्मतत्त्वंउपाध्यायाः येममकर्म्मोपदेष्टारः आचार्यास्तेनजानंति अतस्तत्कृतः उपाध्यायकृतः पद्य
अविरोधेनात्मतत्त्वेसंभावनारूपोमहान्संशयः संछिन्नस्त्वया अत्रकश्चित्संशयोवर्त्तते यत्रेन्द्रियवृत्तीनामप्रवृत्तेर्दृश्यते तंसंशयमाह द्वाभ्यां कर्म्मा

त॰१ सत्त्वंविवर्द्धमानंगवेष्टितमात्मनोऽक्षिवृत्तंनियच्छहृदिकर्णयोर्ध्वनिंवविवृत्ते जघ्नं गनाश्चममसत्त्वमयूथगाथंप्रीणीहहंसशरणंवि
रमक्रमेण राजोवाच श्रुतमवीक्षितंब्रह्मन्भगवान्यदभाषत नैतज्ज्ञानंत्युपाध्यायाः किंत्वत्रपुर्विदुर्यदि संशयोत्रतमे
विप्रसंछिन्नस्तत्त्वात्तोमहान् ऋषयोपिहिमुह्यंत्यतियत्रनेन्द्रियवृत्तयः कर्म्माणयारमतेयेनपुमानीहविहायतं अन्यत्रान्यनदे
श्लो हेनयुष्टानिसंस्कृतभुंक्ते इतिवेदविदांवादः श्रूयतेतत्रनत्वह कर्म्मयत्क्रियतेप्रोक्तंपरोक्षंनप्रकाशते नारद उवाच
येनैवारभतेकर्म्मतेनैवामुत्रतत्पुमान् भुंक्ते ह्यव्यवधानेनलिंगेनमनसास्वयम्

णियेनदेहेनकरोतितमेवविहायान्यत्रलोकान्तरेकर्म्मफलंप्राप्यतेनान्येनदेहेनअदृष्टानिउपभुक्तानिजीवोभुंक्तेप्राप्नोतीतिवादः श्रूयते प्राप्तपुण्यक
तांल्लोकान्विति शरीरजैः कर्म्मदोषैर्यातिस्थावरतांनरइति त्वयापिप्रोक्तं शास्त्रंतीरन्तुभूयात्त्रिमिति एतच्चकर्ताभोक्तादेहभेदेनकृतनाशोकृताभ्यागमश्चप्र
गात्रसंगच्छतइतिभावः समाधानमाह प्रोक्तंवेदोक्तंकर्म्मक्रियतेजनैः तच्चनिरंतरंकरणमेवपरोक्षं अदृष्टरूपसत्त्वप्रकाशते अतः कर्म्मणोनश्वरत्वात्तद्भोग
पिदुर्घटइतिभावः प्रथमस्योत्तरं येनैवेति अव्यवधानेनकर्ताभोक्तादेहविच्छेदविनाशेस्थूलदेहनाशेपिमनः प्रधानस्यलिंगदेहस्यानाशात्तेनोक्तदोषप्रसंगइत्यर्थः

लिंगदेहविशिष्टस्य भोक्तृत्वं स्वप्नदृष्टान्तेन स्पष्टयति ॥ शयानमिमं जाग्रद्देहं स्वप्ने तु जीवंतं उत्सृज्य तदभिमानं त्यक्त्वा आत्मनि मनसा स्वप्ने संस्काररूपेण आहितं क
र्म यथा भुंक्ते तादृशेन शयानदेहसदृशेन कर्मोपस्थापितेन देहेनान्येन वा पश्वादिदेहेन तथा लोकान्तरेपीति भावः ॥ ननु भवतु नाम लिंगविशिष्टस्यानेन
दृष्टान्तेन भोक्तृत्वं कर्तृत्वं तु दानप्रतिग्रहादिभिः स्थूलदेहविशिष्टस्यैव दृश्यते तत्राह ॥ ममैते पुत्रादयः अहमेव ब्राह्मण इति ब्रुवन्मनसा यद्यद्देहं गृह्णीयात्तत्त
तो देहात्तत्राद्धं सिद्धं कर्म पुमान् गृह्णीयात् ॥ येन कर्मणा एवमहंकारगृहीतेन पुनर्भवो भवति ॥ अन्यथा न जन्मानुपपत्तेः ॥ अतो अभिमन्तृत्वेन विशिष्ट
स्यैव कर्तृत्वं अभिमानविषयस्य तु देहस्य पुत्रादिदेहवत् द्वारमात्रत्वमिति भावः ॥ यदुक्तं कर्मणो नष्टत्वात्तत्राप्यपूर्व भोग इति तत्राह ॥ यथेति ॥ उभयैर्ज्ञान

शयानमिममुत्सृज्य श्वसंतं पुरुषो यथा ॥ कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा ॥ ममैते मनसा यद्यदसावहमिति ब्रुवन् ॥ गृह्णीया
त्तत्पुमान् राद्धं कर्म येन पुनर्भवः ॥ यथानुमीयते चित्तमुभयैरिंद्रियेहितैः ॥ एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ॥ नानुभूतं क्वचाना
नेन देहेनादृष्टमश्रुतं ॥ कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥ तेनास्य तादृशं राजंल्लिंगिनो देहसंभवं ॥ श्रद्धत्स्वाननुभूतोऽर्थो न मनः न

कर्मेन्द्रियैरिन्द्रियाणामीहितैः कदाचित्कर्मप्रवृत्तिभिश्चित्तमनुमीयते ॥ सत्यपि सर्वेंद्रियविषयसन्निधाने युगपज्ज्ञानानुत्पत्तेः तदुक्तं ॥ स्प्रष्टुमर्हति
पद्मपादेन युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमिति ॥ एवं चित्तवृत्तिभिरपि पूर्वदेहजं कर्म लक्ष्यते तासामपि युगपदनुत्पत्तेः ॥ इतोपि कर्म लक्ष्यत इत्याह
नन्वनुभूतमिति द्वाभ्यां ॥ अनेन वर्तमानेन देहेन क्वचवदपि विशेषयत्रानुभूतमनुपलब्धं अदृष्टं वा श्रुतं यद्रूपं यदात्मकं यादृक् यत्प्रकारं वस्तु कदाचित्स्व
प्ने मनोरथादिषु आत्मनि मनसि उपलभ्यते तेन हेतुना अस्य लिंगिनो वा मनसाश्रयस्य जीवस्य तादृशं तत्र देहसंभवादिपूर्वेक्षं पूर्वदेहसंभवं ॥ श्रद्धत्स्वेति स्वयमेव
मनसा हि वनत्यनुभूतोर्थो मनः स्प्रष्टुं मनसि स्फुरितुमर्हतीति ॥

किं च मनोदृष्टस्यैव पूर्वोक्तरूपाणि भास्वन्ति भिन्नानि शरीराणि तायन्त इत्याह मन एवेति मद्भक्त इति सम्यगवधानार्थमाशिषामि नं इति भविष्यत उद्
विष्यतः नीचत्वं प्राप्स्यतोपि भावानि रूपाणि पश्यति मन एवोदार्थ्यकार्यताणि दिव्यानि भिः पूर्वमपि वा मनः पश्चाद्दृष्ट्यैवमेव भविष्यतीति ज्ञापय
तीत्यर्थः ननु कदाचिद्दृशीनां नर्हमपि स्वप्न प्रतीयते यथा पद्यैतामग्रे मसुडुःदिवानक्षत्राणि स्वप्नः छेद इत्यादि तत्राह अदृष्टमिति अन्यदेशाश्रयं
न दृष्टं चाद्दिकं दिवा स्वप्नगारिक्रियाश्रयं गिरः छेदनाश्रयं निद्रादिदोषेणापि प्रतीयत इत्यनुमंतव्यं परम्पापितदृष्टपपन्नेस्तल्पत्वादिति भावः

मन एव मनुष्यस्य पूर्वरूपाणि शंसति भविष्यतश्च मद्भक्त नैव नभविष्यतः अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते यथा तथानु
गंतव्यं देशकालक्रियाश्रयं सर्वः क्रमानुरोधेन मनसींद्रियगोचराः आयांति वर्जिंशोर्ध्यांति सर्वे समनसो जनाः सत्वैकनिष्ठे
मनसि भगवत्पार्श्ववर्तिनि तमश्चंद्रमसीवेदमुपरज्यावभासते

ननु दृरिद्रः क्वचिदात्मानं महाराजं पश्यति राजा वा क्वचिदात्मानं पश्यति ततः कथं
मंत भावितं संगच्छेतत्राह सर्व इति आयांति भोग्यत्वेन प्राप्नुवंति यांति च भोगानंतरं यदि च कश्चिदमना भवेत्तर्हि एवं न स्यात्तत्वे तदस्तीत्याह सर्वे स
मनस इति अतः सर्वेषां समनस्कत्वान्मनसि च सर्वार्थानां क्रमेणावेशात्तज्ज्ञातीतार्थ इत्यवरः कस्मादपि कस्यचिदर्थो ज्ञात इत्यर्थः नन्वेवं सर्वैरपि सर्वार्थाः
क्रमेणाद्दृश्यन्त इत्युक्तं इदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह सत्वैकनिष्ठे भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसि इदं विश्वमुपरज्य सयोगमि-
वप्राप्याचभासते प्रतीयते नर्हस्यापि कदाचित्सतीतो दृष्टान्तः चंद्रमसि उपरज्यात मः राहुरिव तदिदं सुदृढे मनसि सद्विषयस्फुरणं योगिप्रत्यक्षमिति भावः

भा०व
८०

तदेवं स्थूलदेहनाशेऽपि लिंगस्यानाशात् अन्यः कर्त्ता अन्यो भोक्तेति दोषो नास्तीत्युक्तं ।। तदेवं शंकते न तु लिंगदेहस्य स्थूलदेहद्वारेणैव कर्तृत्व भोक्तृत्वं न तु के
वलस्य तत्रैकदा विस्थूलदेहाभावे जीवस्य कर्तृत्वभोगकृत्वाभावान्मुक्तिः प्रसज्येतेत्याह ।। अहं ममेति ।। भावः स्थूलदेहसंबंधः पुरुषे जीवेन न व्यव
धीयते न विच्छिन्नो भवति ।। किंपर्यंतं उद्धादीनां व्यूहः परिणामो लिंगं यावदस्ति ।। न स्यादिमात्रमनादिः सन् ।। स्वप्नादावहंकाराद्यभावात् तदिदं
दमाशंक्याह ।। द्वाभ्यां ।। स्वप्नादिषु ।। उपतापदृष्टवियोगादिदुःखे तेषु अहंममेति ज्ञानं अहंकारः नेहते न प्रकाशते ।। प्राणापतनानन पिंद्रियाणां वि

नाहं ममेति भावो यं पुरुषे व्यवधीयते ।। यावद्बुद्धिमनोऽक्षार्थगुणव्यूहो ह्यनादिमान् ।। स्वप्ने मूर्छोपतापेषु प्राणायनविघाततः ।।
नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ।। गर्भे बाल्ये ऽप्यपोधकल्पादेकादशविधं तदा ।। लिंगं न दृश्यते यूनः कुह्वां चंद्रमसो य
था ।। अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते ।। ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ।। एवं पंचविधं लिंगं त्रिवृत् षोडशविस्तृतं
एष चेतनया युक्तो जीव इत्यभिधीयते ।। अनेन पुरुषो देहानुपादत्ते विमुंचति ।। हर्षशोकभयं दुःखं सुखं चानेन विंदति ।।

घातात् ।। इंद्रियैरिंद्रियाणामस्य व्यक्तग्रहणेऽप्यहंकारः स्फुरतीत्यन्यथेत्यर्थः ।। अपोधकल्पात् संपूर्णत्वात् ।। प्राणायतनानामिति शेषः ।। स न हृत्स्वरूपणस्य य ऐकादश
विधं एकादशभिरिंद्रियैः स्फुरल्लिंगमहंकरणात्तत्र दृश्यते ।। सतोऽप्यसमभिव्यक्तौ दृष्टांतः कुह्वां अमावास्या ।। यावदंद्रमसो लिंगं रूपमिव ।। तस्मादहंकारास्फुरणस्य स्थूल
देहस्य विच्छेदादव्यक्ता भूतार्था भावेऽपि संसृतिनिवृत्तिर्नास्तीत्याह ।। अर्थे हीति ।। यावल्लिंगं स्थूलदेहाविच्छेदात् संसारनिवृत्तिरित्येतत् प्रपंचयति ।। एवमिति सार्द्धे
द्विभिः पंचविधं पंचतन्मात्रात्मकं त्रिवृत् त्रिगुणं षोडशविकारात्मना विस्तृतं ।।

राम
८०

नन्वेकं देहं विसृज्य देहान्तरप्रवेशात्पूर्वं विदेहता स्यादेवेत्यत आह यथेति नापयाति पूर्वं तृणं स्याग्रागादपयाति च तृणान्तरधारणानंत
यानन्त्यजेत अन्यं देहं कर्मणा प्रारब्धेहारंभकाणामव्यवधानेन विन्देदेव समाप्त्या प्रकरणार्थमुपसंहरति मन एवेति भवभावनं संसारहे
तुः कथमिति तदाह यदेति चरितान् उपभुक्तान् अनुयतः कर्म्माणि आचिनोति नन्वसंगस्य कुतः कर्म्म तत्राह विद्यायां सत्यां अनात्मनो देहाद्यैः कर्म्मणि

यथा तृणजलूकैवं नापयात्यपयाति च न त्यजेन्म्रियमाणोपि प्राग्देहाभिमतिं जनः यावदन्यं न विंदेत व्यवधानेन कर्म्मणां
मन एव मनुष्येंद्र भूतानां भवभावनं यदाक्षैश्चरितान् ध्यायन् कर्माण्याचिनुते सकृत् सति कर्म्मण्यविद्यायां बंधः कर्म्मण्यना
त्मनः अतस्तदपवादार्थं भज सर्व्वात्मना हरिं पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः मैत्रेय उवाच भागवतमुख्यो भग
वान्नारदो हंसयोर्गतिं प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततोगमत् प्राचीनवर्हि राजर्षिः प्रजासर्गाभिरक्षणे आदिश्य पुत्रा
नगमत्तपसे कपिलाश्रमं तत्रैकाग्रमना धीरो गोविंदचरणांबुजं विमुक्तसंगोनुभजन् भक्त्या तत्साम्यतामगात् एतदध्यात्मपारो
क्ष्यं गीतं देवर्षिणानघ यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्य्यमुखनिःसृ
तमात्मशौचं यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबंधः अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतं
एवं स्त्रियाश्रमः पुंसश्छिन्नोमुत्र च संशयः इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकोनत्रिंशोध्यायः ॥ २९ ॥

बंधो भवति विश्वस्थित्यादयो यतो हरेर्भवति हंसयोर्जीवेश्वरयोः पुत्रानादिश्येति पुत्राणां प्रारिरक्षणमग्रे कथयित्वा आत्मशौचं मनःशोध
कं पारमेष्ठ्यं सर्व्वोत्कृष्टफलं स्त्रिया बुद्ध्याधिष्ठितस्य देहस्याश्रमोहंकारः छिन्नो भवति अमुत्र कर्मफलभोगः कथमिति संशयश्च छिन्नः चतुर्थे एकोनत्रिंशः

प्रा॰ द्व
८१

प्रसंगात्संक्षिप्योक्तं वृत्तं प्राचीनबर्हिषः ॥ वर्णयते च तद्दीप्यां प्रपन्नानां प्रचेतसां ॥ तत्र त्रिंशे तपस्तोषितशार्ङ्गिणाल्लब्धवरास्ततः ॥ आगत्य वार्क्षीमु-
द्वाह्य राज्यं चक्रुरितीर्यते ॥ हरिं प्रतोष्य कां सिद्धिमापुः ॥ हे बार्हस्पत्य कस्माद्विद्धि द्यायांयां बृहस्पतेर्मैत्रेयः शिष्य इति ज्ञातव्यं ॥ ते यदृच्छया गिरिशं
प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य पार्श्ववर्तिनस्तदनुगृहीताः सन्तो नूनं परं मोक्षं प्रापुरेव ततः पूर्वं तु इह अत्रैव परत्र किं प्रापुः ॥ रुद्र-
गीतं जपयज्ञेनैव तपसा च पुरंजनं हरिं ॥ तेषां कृच्छ्रं तपःक्लेशं शान्तया कान्त्या शमयन् ॥ शान्तेन मृदुनैव वपुषा आविर्भूतः ॥ सुपर्णस्कंधमारूढ इत्या-

विदुर उवाच ॥ ये त्वयाभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः ॥ ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य कां ॥ किं बार्हस्पत्येह परत्र वाथ कै-
वल्यनाथप्रियपार्श्ववर्तिनः ॥ आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥ मैत्रेय उवाच ॥ प्रचेतसोंतरुदधौ पितुरा-
देशकारिणः ॥ जपयज्ञेन तपसा पुरंजनमतोषयन् ॥ दशवर्षसहस्रान्ते पुरुषस्तु सनातनः ॥ तेषामाविरभूत्कृच्छ्रं शान्तेन शमय-
न् रुचा ॥ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः ॥ पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः ॥ काशिष्णुना कनकवर्णवि-
भूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः ॥ अष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रैरासेवितो गरुडकिन्नरगीतकीर्त्तिः ॥ पीनायताष्ट-
भुजमंडलमध्यलक्ष्म्या स्पर्द्धच्छ्रिया परिवृतो वनमालयाद्यः ॥ बर्हिष्मतः पुरुष आह सुतान्प्रपन्नान्पर्जन्यनादरुतया सघृणाव-
लोकः ॥

दिना बर्हिष्मतः सुतानाह इति तृतीयेनान्वयः ॥ कनकमयेन वर्णविभूषणेन भ्राजमानकपोलं वदनं यस्य ॥ अष्टभिरायुधैः ॥
गरुड एव किन्नरस्तेन पक्षिणैव गीतकीर्त्तिर्यस्य ॥ पीनाश्च ते आयताश्चाष्टौ भुजास्तेषां मंडलस्य समूहस्य मध्ये स्थितया लक्ष्म्या स्पर्द्धमाना श्रीः
शोभा यस्यास्तया वनमालया परिवृत आद्यः पुरुषश्चाह ॥ पर्जन्यस्य नाद इव नादो यस्यास्तया वाचा ॥ सघृणः सावलोको यस्य ॥

राम
८१

यूयं मे मन्त्रोच्चारिणीध्वं सौहार्देन न हेलनात् पृथक्पृथक् धर्मो येषां तेषां ... वः परस्परं सौहृदेन तुष्टोऽहं । न भूतेषु सौहृदं च भविष्यति ॥ ७ ॥ तेभ्यो दा
स्येकिंचन युष्मभ्यमिति शेषः ॥ १० ॥ अग्रहेष्ट गृहीतवंतः अर्थी इति हेतोः लोकाननु लोकेषु भविष्यति यद्वा लोकाननु भविष्यति इत्याति व्याप्य
नीत्यर्थः ॥ ११ ॥ आत्मनो वीर्यगाम्भीर्यतामनेन प्रचार्थमारो भार्यार्थं संपारयति कंडोरिति त्रिभिः तपोनाशार्थमिंद्रप्रेषितया प्रम्लोचया कंडुर्नाम ऋषि
र्बहुकालं रेमे साचततः स्वर्गं गंतुं ती कंडोर्जातं गर्भं वृक्षेषु त्यक्त्वा जगाम तदेतदुक्तं अपविद्धा त्यक्ता सत्राभिद्रो वनस्पतीनां राजा सोमः अ

श्रीभगवानुवाच वरं वृणीध्वमद्भुतं वो यूयं मे नृपनंदनाः सौहार्देनापृथग्धर्मास्तुष्टोऽहं सौहृदेन वः ॥ ८ ॥ योऽनुस्मरति शाम्यायां
युष्मान् तु दिने नरः तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदं ॥ ९ ॥ ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः स्तुवंत्यहं कामवरान्दा
स्ये प्रज्ञां च शोभनां ॥ १० ॥ यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः अथो व उशती कीर्तिर्लोकाननु भविष्यति ॥ ११ ॥ भविता विश्रुतः पुत्रो
नवमो ब्रह्मणो गुणैः य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति ॥ १२ ॥ कंडोः प्रम्लोचया लब्धा कन्या कमललोचना तां चापविद्धां जगृ
हुर्भूरुहा नृपनंदनाः ॥ १३ ॥ क्षुधार्तामायां मुखे राजा सोमः पीयूषवर्षिणीं देशिनीं रोदमानाया निदधे स दयान्वितः प्रजाविसर्ग आ
दिष्टाः पित्रा मामनुवर्तिना तत्र कन्यां वरारोहां तामुद्वहत मा चिरं ॥ १४ ॥ अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा अपृथग्धर्मशी

सृतस्राविणीं देशिनीं हस्तस्या मुखे निदधे अनेनाप्यरोगर्भसंभवेनाप्यमृताहारेणावतस्था लावण्यं क्रमस्त्व लेयं भूयात्पत्न्यर्पिताशया ॥ १६ ॥
दृष्टोर्धास्थिराहितं त्वं वोक्तं ॥ १४ ॥ मामनुवर्तिना नेन पित्रा नियुक्ताः सतः तत्र प्रजासर्गे निमित्तेन तामुद्वहत ॥ १५ ॥ ननु बहूनां कथमेका भार्या स्यात्
तत्राह अपृथक् धर्मः शीलं च येषां तेषां वः पत्नी भूयात् अपितो भवत्वाशायो यया धर्मशीलया औरवत्याः सहाकाद्यन दृष्टादृष्टविरोध इति भावः

भा०व
८१

अहतौजसः अप्रतिहतबलाः सन्तः ॥१७॥ पक्वगुणाशयः दग्धकामादिमलआशयो येषां अतः लोकद्वयभोगाद्विरक्ता यात्रिर्विद्यमतस्थानं प्रा
प्स्यथ ॥१८॥ ननु गृहेष्वाविशतां नाम सम्यक् तदाश्रमविधर्मावस्थानं कृतं तत्र द्विनिर्वेदो वा न तत्राह गृहेष्विति कुशलं मय्यर्पितं कर्म येषां
मद्वार्तया यातो यामः कालो येषां त्वद्वार्ताश्रोतृणां गृहैः संबंध इति कृत मत्राह नव्यवदिति यद्यस्मात् कथाश्रवणात् ततः सर्वज्ञो
हमीश्वरः ब्रह्मवादिभिः प्रवक्तृभिर्निर्मित्तं भूतैः श्रोतृणां हृतं हृदयं नव्यवत् प्रतिपदं नूतनवत् श्रेयः प्राप्नोति ब्रह्मसाक्षात्कारो भवती

दिष्ट्या वर्षसहस्राणां सहस्रमहतौजसः भौमान् भुंक्ष्व भोगान्वै दिव्यांश्चानुग्रहान्मम ॥१७॥ अथ मय्यनपायिन्या भक्त्या पक्व
नि गुणाशयाः उपयास्यथ मद्धाम निर्विद्य निरयादतः ॥१८॥ गृहेष्वाविशतां वापि पुंसां कुशलकर्मणां मद्वार्तायातयामा
नां न बंधाय गृहा मताः ॥१९॥ नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः न मुह्यंति न शोचंति न हृष्यंति यतो गताः मैत्रेय उवा
च एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्रांजलयः प्रचेतसः तद्दर्शनध्वस्ततमोरजोमला गिरागृणन्गद्गदया सुहृत्तमं न२
या प्रचेतस ऊचुः नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः

त्यर्थः ॥ ननु त्वत्कथाश्रवणे कथं ब्रह्मसाक्षात्कारस्तत्राह यो ऽहं एतदेव ब्रह्मज्ञानतत्र हेतुः यतो गताः यं प्राप्ताः सन्तो मोहशोकहर्षात्र प्रा
प्नुवंति अतो मत्कथाश्रवणेनव्यवस्मत्स्वरूपाविर्भावाद्ब्रह्मसाक्षात्कारत्वादुहेतुभवत्तामपि नवंत्यर्थः ॥ पुरुषार्थभाजनं सिप्रवंच
यतीति तथा तं ॥ वेदैः सकलश्रेयःसाधनत्वेन निरूपिता उदाराः गुणाः आह्वयानानामानि यस्य ॥ मनोवचसोर्वेगा इव पुरो अग्रे जवो वे
गो यस्य मनोवचसोरगोचरायेत्यर्थः ॥ अत एव सर्वेषामक्षाणां मार्गैरगतः अनवगतो ऽध्वा यस्य तस्मै ते नमः ॥ ॥२२॥

राम
८१

श्रीनिष्ठया स्वरूपस्थितया शुद्धाय अतः शान्ताय मनसि निमित्तेन सति अपार्थं व्यर्थमेव विलसत् विस्फुरितं द्वयं यस्मिन् गृहीता मायया गौर्विग्रहाः ब्रह्मादिमूर्त्तयो येन १३ स्वतः विशुद्धसत्वरूपाय ममान्तरं हरति मेधा ज्ञानं यस्य तस्मै १४ अयुक्तमेहि कृतवं तावत् यत्त्वं कंवर वृणोषि ध्यमिति तन्मनसि निधायाह नृपमिति ममहतानां क्लेशानां सहन्नेपाया स्मात नः आविष्कृतं प्रकटितं अतो न्यत् किमनुकंपितं अनुकंपाऽयमेवाम्माकं परमानुकंपेत्यर्थः १७ कृतरत्यतत्त्वाह देवं भद्रं धनञ्जय गोपालनाशन त्वया लय योः [illegible] एतावदेव

शुद्धाय शान्ताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय १३
नमो विशुद्धसत्त्वाय हरये हरिमेधसे वासुदेवाय कृष्णाय प्रभवे सर्वसात्वतां १४ नमः कमलनाभाय नमः कमलमालिने नमः कमलपादाय नमस्ते कमलेक्षण १५ नमः कमलकिंजल्कपिशंगामलवाससे सर्वभूतनिवासाय नमो ऽयुंक्ष्महि साक्षिणे १६ रूपं भगवता त्वेतदशेषक्लेशसंक्षयं आविष्कृतं नः क्लिष्टानां किमन्यदनुकम्पितं १७ एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररंधन १८ येनोपशान्तिर्भूतानां क्षुल्लकानामपीहतां अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः १९

दीनेषु वत्सलैः प्रभुभिर्भाव्यं कार्यं किं तत् तदाह यदिति अस्मदीयमत इति [illegible] ध्यायते काले नुस्मर्यत इति यत् त्वया तद्रूपमपि दर्शितमिति भावः १८ येनानुस्मरणेन क्षुद्राणां तेषामुपशान्तिः सुखं भवति किं च क्षुल्लकानामपि भूतानामन्तर्हृदये अन्तर्हितः अन्तर्यामित्वेन स्थितो भवान् ईहतां इच्छतां त्वदुपासकानां नोऽस्माकमाशिषः कस्माद्धेतोर्न वेद जानात्येवेत्यर्थः १९

तथापि वक्तव्यं चेत् तर्हि येषामस्माकं भगवान् प्रसन्नः अयमेव वरः॥ भगवत्प्रसाद एवास्माकमभिप्सितो वर इत्यर्थः अपवर्गगुरुः मोक्षमार्गप्रदर्शी
कः गतिः स्वतः स्वयं पुरुषार्थभूतः ३०॥ यद्यप्येवं अथापि हे नाथ त्वत्त्वतः वरमेकं वृणीमहे कथंभूतात् परतः कारणादपि परात् अन
न्त्यात् परः इति श्रुतेः अतो यद्यपि त्वं दातुं समर्थः न चैषामन्तं त्वद्विभूतीनामतोऽस्ति यतोऽनन्तमिति गीयसे ३१ तथापि यथा सारंगो
भ्रमरः पारिजाते सत्येन लब्धे सति तल्लभमप्यन्यत् न सेवते तथा वयमपि साक्षात्त्वदंघ्रिमूलं प्राप्य किं किं वृणीमहि न किंचिदित्य

अथावेव वरोऽस्माकं प्रीणितो जगतः पते॥ प्रसन्नो भगवान् येषामपवर्गगुरुर्गतिः ३०॥ वरं वृणीमहेऽथापि नाथ त्वत्परतः परात्
न ह्यन्तस्त्वद्विभूतीनां सोऽनन्त इति गीयसे ३१॥ पारिजातेऽञ्जसा लब्धे सारंगोऽन्यन्न सेवते॥ त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणी
२ महि॥ यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः॥ तावद्भवत्प्रसंगानां संगः स्यान्नो भवे भवे॥ तुलयाम लवेनापि न स्वर्गं नापुन
र्भवं॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ३४॥ यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः॥ निर्वैरं यत्र भूतेषु नोद्वेगो यत्र क
श्चन ३५॥ यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः॥ संस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ३६॥ तेषां विचरतां पद्भ्यां तीर्था

र्थः॥ यद्वा किमप्यन्यत्तुच्छं किमर्थं वृणीमहि॥ यद्वा यदि न वृणीमहि तर्हि किं किं वृणीमहे नां पावनेच्छया॥ भीतस्य किं न रोचेत तावकानां समागमः ३७॥
अनंतत्वेन मनोरथानामनवस्थानादित्यर्थः ३२॥ अत एतावदेव प्रार्थयामह इत्याहुः यावदिति स्पृष्टाः व्याप्ताः संगः भगवति प्रसक्तः संयोगो येषां
तेषां संगोऽस्माकं स्यात् ३३॥ न तु राज्यभोगान् स्वर्गापवर्गौ च विहाय किमिदं प्रार्थ्यते तत्राहुः तुलयामेति भगवत्संगिनां संगस्य लवेनापि ३४॥ स
त्संगस्य श्रैष्ठ्यं प्रपंचयति॥ यत्रेति त्रिभिः॥ यत्र येषु यतः यासु कथासु॥ निर्वैरं वैराभावः ३५॥ पद्भ्यां पावनेच्छया संसाराद्भीतस्य ॥ ३७॥

सत्संगमफलमस्माभिरेवानुभूतमित्याहुर्वयं त्विति तव यः प्रियसखा तस्य भवस्य अत्यंतमविकित्स्यस्य भवस्य जन्मनो मृत्योश्च भिषि
क्तमं सद्वैद्यं त्वां गतिं प्राप्ताः ३८ यन्नः स्वधीतं यत्र इति द्वाभ्यां नताः नमस्कृताः ३९ निरंधसां निरन्नानां अदभ्रं बहुकालं तत्ते परितोषणा
य भवत्विति वृणीमहे ४० अस्मानामप्यस्माकं त्वत्स्तुतिर्नोपयुक्तेत्याहुः मनुरिति यस्य तव महिम्नो न दृष्टपारा ये तैरपि त्वां आत्मसमं स्वश

वयं तु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गताः स्म ३८
यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव यन्नः सु
तप्तं तप एतदीश निरंधसां कालमदभ्रमप्सु सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ४० मनुः स्वयंभूर्भगवान्भव
श्च येऽन्ये तपोज्ञानविशुद्धसत्वाः अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीमः ४१ नमः समाय शुद्धाय पुरुषाय प
राय च वासुदेवाय सत्वाय तुभ्यं भगवते नमः ४२ मैत्रेय उवाच इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः
अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ४३ अथ निर्याय सलिलात्प्रचेतस उदन्वतः वीक्ष्याकुप्यन्द्रुमैश्छ
न्नां गां गां रोद्धुमिवोच्छ्रितैः ४४ ततोऽग्निमारुतौ राजन्नमुंचन्मुखतो रुषा महीं निर्वीरुधं कर्त्तुं संवर्त्तक इवात्यये ४५

क्त्यनुरूपं यथा स्तुवंति अथो अतः वयमपि गृणीमः ४१ सत्वमूर्त्तये वासुदेवाय ते ४२ स्वशरणागतानामनिच्छतामपि सतां स्वधाम ययौ अनपवर्गवी
र्यः अकुंठितप्रभावः ४३ उदन्वतः सिंधोः सलिलान्निर्याय निर्जित्य गां स्वर्गं रोद्धुमिव उच्छ्रितैर्द्रुमैर्गां महीमाच्छन्नां वीक्ष्य द्रुमेभ्योऽकुप्यत ततो हि प्राची
नबर्हिषः प्रव्रजितत्वादराजके कर्षणाद्यभावात् द्रुमैर्भूरिच्छन्ना भूत निरस्ता वीरुधो यस्मात्तथाभूतां कर्त्तुं संवर्त्तकः कालाग्निरुद्रः ४५

नैर्येर्युक्तिभिः ४६ उजङ्कुः समर्प्ययामासुः ४७ मारिषीवार्क्षी अजनयो निर्द्दस्मात तस्माज्जातो रक्षो महारेव स्यावत्तानान्मूर्द्धंमजनयो निज्ञो ब्रह्म
पुत्रोः पिसन्नन्त्रिपजतोयस्यामजनिज्ञातः ४८ प्राकृसर्गेजपूर्व्वरेहेनकालेनविद्रुतेगतेदैवेनेश्वरेणचोदितः सस्पृष्टाः प्रजाः ससर्ज्जसदक्ष
इतिप्रसिद्धः ४९ स्वयातुवाप्रसयातेजउपादत्तन्त्र्याछादितवान् पवकर्म्मदाक्ष्यात दक्षमब्रुवन् ५० तमपिषिच्यानादिर्ब्रह्मा प्रजासर्जरक्षा

सम्रमाक्रियमाणांस्तान्तुमाध्वीस्वपितामहः आगतः शमयामासपुत्रान्बर्हिष्मतो नपे ४६ तत्रावशिष्टायेवृक्षामी
ताईहितं तदा उजङ्कस्तेप्रचेतोभ्यउपदिष्टाः स्वयंभुवा ४७ तेचब्रह्मणआदेशान्मारिषामुपयेमिरे यस्यांमहदवज्ञा
नादजन्यजनयोनिजः ४८ चाक्षुषेत्वन्तरेप्राप्तेप्राकूसर्गेकालविद्रुते यः ससर्ज्जप्रजाइष्टाः सदक्षोदैवचोदितः ४९
योजायमानः सर्व्वेषांतेजस्तेजस्विनांरुचा स्वयोपादत्तदाक्ष्याच्चकर्म्मणांदक्षमब्रुवन् ५० तंप्रजासर्जरक्षायामनादिरभि
षिच्यच युयोजयुयुजेन्यांश्चसवैसर्व्वप्रजापतिन् ५१ *इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेत्रिंशोध्यायः मैत्रेयउवाच*
ततउत्पन्नविज्ञानाआश्वधोक्षजभाषितं स्मरन्तआत्मजेभार्य्याविसृज्यप्राव्रजन्गृहात १ दीक्षिताब्रह्मसत्रेणसर्व्वभूतात्ममेधसा

यांयुयोज सवदक्षोअन्यान्मरीच्यादीन् तन्नव्यापारेषुनियुक्तवान् ५१ *इतिचतुर्थेत्रिंशः* एकत्रिंशेतु प्रतीच्यांदिशिवेलायांसिद्धोभूद्यत्रजाजलिः
तेदक्षेधुरंन्यस्यवनेगताः नारदोक्तेनमार्गेणभक्तिरुक्ताप्रचेतसां ततः दिव्यवर्षसहस्राणांसहस्रात्तेउत्पन्नविवेकज्ञानाःस्तेउपयासुरथसमुद्र
मनिविंद्यमिरथाद्तदधोक्षजभाषितंस्मरंतआत्मजाव्रजन् १ ब्रह्मसत्रेणआत्मविमर्शेनदीक्षिताः कृतसंकल्पाविभूतः सर्व्वेष्वात्मेति मेधा
तानंयस्मिंस्तेन स्वावेलायां समुद्रतटे जाजलिर्नाममुनिः २

निर्जिताः प्राणा मनोवचोदृशो यैस्तान् शान्ता उपरताः समाना मूलाधारादारभ्य अजवो विग्रहा येषां ब्रह्मणि योजित आत्मा यैः सुरासुरैरीड्यो दृष्ट
वान् ४ उत्थाय तं प्रणिपत्य यथादेशं यथाविधि पूजयित्वा ४ ५ आदिष्टं उपदिष्टं यदात्मतत्वं तत् प्रायेण विस्मृतं ६ ७ इति प्रचेतोभिः पृष्टः ८ अहो गृ
हप्रसक्ताः हरिसेवां विना सर्व्वं जन्म कर्म्मादि किं व्यर्थं कृतमिति तान् शोचन्नाह तज्जन्मेति चतुर्भिः येन जन्मादिना हरिसेवैव फलं अतस्तद्विहीनं सर्व्वं

तान्निर्जितप्राण मनोवचोदृशो जितासनान् शान्तसमानविग्रहान् । परेऽमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म
नारदः । तमागतं त उत्थाय प्रणिपत्याभिनंद्य च । पूजयित्वा यथादेशं सुखासीनमथाब्रुवन् ४ प्रचेतस ऊचुः स्वागतं ते सुरर्षे
ऽद्य दिष्ट्या नो दर्शनं गतः । तव चंक्रमणं ब्रह्मन्नभयाय यथा रवेः ५ यदादिष्टं भगवता शिवेनाधोक्षजेन च । तद्गृहेषु प्रसक्तानां प्राय
शः क्षपितं प्रभो ६ तन्नः प्रद्योतयाध्यात्मज्ञानं तत्वार्थदर्शनं । येनांजसा तरिष्यामो दुस्तरं भवसागरं ७ मैत्रेय उवाच इति प्रचेतसा
पृष्टो भगवान्नारदो मुनिः । भगवत्युत्तमश्लोक आविष्टात्माऽब्रवीन्नृपान् नारद उवाच तज्जन्म तानि कर्म्माणि तदायुस्तन्मनो वचः ।
नृणां येन हि विश्वात्मा सेव्यते हरिरीश्वरः । किं जन्मभिस्त्रिभिर्वेह शौक्रसावित्रयाज्ञिकैः । कर्म्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधा
युषा १० श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः । बुद्ध्या वा किं निपुणया बलेनेंद्रियराधसा । किं वा योगेन सांख्येन न्यासस्वाध्या
ययोरपि । किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥

व्यर्थमित्यर्थः ८ शुक्रसंबंधि जन्म विशुद्धमातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन या
ज्ञिकं दीक्षया विबुधानामपि दीर्घेणायुषा वापि १० वचोभिर्वाग्विलासैः चित्तवृत्तिभिर्नानावधानसामर्थ्यैः इन्द्रियाणां राधसा पाटवेन योगेन प्राणा
यामादिना सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण सन्यासवेदाध्ययनाभ्यामपि अन्यैरपि व्रतवैराग्यादिभिः श्रेयःसाधनैः ॥ ११ सम

नन्वेषां नानाफलसाधनानीह हरिसेवा । भावमात्रेणाकृतौ वैयर्थ्यं तत्राह । श्रेयसां फलानामात्मैव अवधिः पराकाष्ठा अर्थतः परमार्थतः आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः । भवत्वात्मावधिः हरेः किमायाति तत्राह । सर्वेषामपीति आत्मदश्च स्वविद्यानिरासेन स्वरूपाभिव्यंजकः । ऐश्वर्येणापि रूपेणावलिप्रभृतिभ्य इवात्मप्रदः । प्रियश्च परमानंदरूपत्वात् । किंच नानाकर्मभिस्तत्तद्देवताप्रीतिनिमि

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः । सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः ॥ १२ ॥ ॥
यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कंधभुजोपशाखाः । प्राणोपहाराच्च यथेंद्रियाणां तथैव
सर्वार्हणमच्युतेज्या ॥ १४ ॥

त्तानपि फलानि हि प्रीत्या भवन्ति । केवलं तत्तद्देवताराधनेन तु न किंचिदिति सदृष्टान्तमाह । यथेति । मूलात्स्कन्धप्रविभागात् स्कन्धात् द्विभागा भुजास्तेषामपि उपशाखाः उपलक्षणं पत्रपुष्पादयोपि तृप्यन्ति न तु मूलसेकं विना स्वस्वनिषेचनेन । प्राणस्योपहारो भोजनं तस्मादेवेंद्रियाणां तृप्तिः । न तु तत्तदिंद्रियेषु पृथगन्नलेपनेन । तथा अच्युताराधनमेव सर्वदेवताराधनं न पृथगित्यर्थः ॥ ॥

सर्वमूलत्वादिति सदृष्टान्तमाह यथैवेति वारः जलानि कर्षैः काले सूर्य्याद्भवन्ति ग्रीष्मे तस्मिन्नेव प्रविशन्ति अस्याप्रसिद्धत्वेन दृष्टान्तरमाह यथाभू तानि भूमाविति गुणप्रवाहस्थेतनाः चेतनात्मकः प्रपंचः १५ ननु सर्गेक्षौ कथं प्रपंचोत्पत्तिलयौ तत्राह यथेति अभ्रं तमः प्रकाशा आग

यथैव सूर्य्यात् प्रभवंति वारः पुनश्च तस्मिन्प्रविशंति काले भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवा हः ॥ एतत्पदं जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा ॥ यथासवोः जाग्रति सुप्तशक्तयो द्रव्य क्रियाज्ञानभिदाभ्रमात्ययः ॥ यथा नभस्यभ्रतमःप्रकाशा भवंति भूपा न भवंत्यनुक्रमात् ॥ एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमः सत्त्वमिति प्रवाहः ॥ १६ ॥ तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशं ॥ स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥ १७ ॥

सापायिनो रजस्तमः सत्त्वस्थानीयाः हे भूपाः प्रचेतसः अभ्रशक्तयो न भवन्ति लीयन्ते इति एवमयं जगत्प्रवाहः १६ तेन सर्वका रणत्वेन हेतुना कालं निमित्तं प्रधानमुपादानं पुरुषः कर्त्ता एतत्त्रितयात्मकत्वात्सर्वकारणं परमीश्वरं अद्धा साक्षाद्भज ध्वं कथं आत्मना एकभावेन अभिन्नत्वेन १७

साधनमाह दययादिभिः शीघ्रं तुष्यति १८ ततोनकदाचित्त्यजतीत्याह अपहतानिरस्ताः सकलाएषणाः कामायस्मात्तस्मिन्वात्मावमलश्चा त्मामनस्तस्मिन्नंतीमनसि निरंतरमेधितयाभावनोपहूतः सान्निधापितः सन्स्वतोहरिः छिद्रवत्तत्त्वात्याकाशवत् ततोनसरतिनाप यातिहि किंकुर्वन् आत्मनोनिजजनवशगात्वं स्वभक्ताधीनत्वमयन् १९ अवगच्छन् सतामेवंवश्योः सोऽक्षरसतीत्पूजामपिनगृह्णा

दय यासर्व्वभूतेषु संतुष्ट्यायेनकेनव सर्व्वेंद्रियोपशांत्यावतुष्यत्याशुजनार्द्दनः १८ अपहतसकलैषणामलात्म न्यविरतमेधितभावनोपहूतः निजजनवशगात्वमात्मनोयन्नसरतिछिद्रवदक्षरःसतांहि १९ नभजतिकुमनीषिणांसइज्यांहरिरधनात्मधनप्रियोरसज्ञः श्रुतधनकुलकर्म्मणांमदैर्येविदधतिपापमकिंचनेषु २० सत्सु श्रियमनुचरतींतदर्थिनश्चद्विपदपतीन्विबुधांश्चयःस्वपूर्णः नभजतिनिजभृत्यवर्गतंत्रः कथममुमुद्वि सृजेत्पुमान्कृतज्ञः

नीत्याह नेति कुमनीषिणां कुत्सितमतीनां अधनाश्चतेआत्मधनाश्च भगवद्भक्तास्तेप्रियायस्य सरसज्ञः भक्तिरसज्ञः केकुमनीषिणः ना नाह श्रुतादिभिर्निमित्तैर्मदैर्येसत्सु पापंतिरस्कारं कुर्वन्ति २० भक्ताधीनत्वंप्रपंचयन्नाह अनुवर्त्तमानामपिश्रियं तदर्थिनः सकामान्द्विप दपतीन्नरेंद्रान्विबुधान्देवानापियो ननुवर्त्ततेयतः स्वेनैवपूर्णः अतः स्वभृत्यवर्गाधीनएव एवंभूतममुंईश्वरंपिकथंपरित्यजेत् २१

प्रचेतसः कर्मभूतान्॥ अन्यांश्च सूनवस्त्वनीतेरित्यादि ध्रुवचरितायाः सर्वेऽप्यगायत तत्प्रचेतसामपि तच्छ्रुतवान्॥ प्रचेतसां नारदस्य च संवादं श्रुतमेतदाख्या

मैत्रेय उवाच॥ इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः॥२१॥ तेऽपि तन्मुखवि

र्यातं यशो लोकमलापहं॥ हरेर्निशम्य तत्पादं ध्यायंतस्तद्गतिं ययुः॥२२॥ एवं तेऽभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान्॥

प्रचेतसां नारदस्य संवादं हरिकीर्तनं शुक उवाच य एष उत्तानपदो मानवस्यानुवर्णितः॥ वंशः प्रियव्रतस्या

पि निबोध नृपसत्तम॥ यो नारदादात्मविद्यामधिगम्य पुनर्महीं॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वर्यं समगात्पदं॥ इमां तु

कौषारविणोपवर्णितां क्षत्ता निशम्याजितवादसत्कथां॥ प्रवृद्धभावोऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृ

दा हरेः॥ विदुर उवाच सोऽयमद्य महायोगिन्भवता करुणात्मना॥ दर्शितस्तमसः पारो यत्राकिंचनगो हरिः॥२७॥

इत्यानम्य तमामंत्र्य विदुरो गजसाह्वयं॥ स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः॥२८॥ एतद्यः शृणुयाद्राजन्राज्ञां

हर्यर्पितात्मनां॥ आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् इति श्रीभा० चतुर्थस्कंधे प्रचेतसोपाख्याने एकत्रिं

नं तेऽभिहितं॥ हरेः कीर्तनं यस्मिन्॥ तत्र य एष वंशः सोऽनुवर्णितः यः प्रियव्रतः॥ स्वान्ज्ञातीन्दिदृक्षुः एतच्चरितमिति शेषः॥ शोऽध्यायः

इति श्री चतुर्थस्कंधे टीकायां एकत्रिंशोऽध्यायः

भा॰पं॰
१

श्रीगणेशाय नमः ॥ ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय ॥ १ ॥ अथातः पंचमस्कंधव्याख्यानेकविशेषवान् प्रिय
व्रतान्वयो यत्र सप्रपंचः प्रपंच्यते ॥ २ ॥ षड्विंशत्याधुनाध्यायैः पंचमे स्थानमीर्यते ॥ लोकद्वीपादिमर्यादापालनाख्यमनेकधा ॥ ३ ॥ पृथिव्युपर्यधोलोकैर्मर्यादात्रिविधापता
भुवि द्वीपादिमर्यादा पाल्यते राजभिः पृथक् ॥ स्वर्गे मरुत्परिदेवाद्यैस्ततस्त्वाधोऽसुरादिभिः ॥ तत्राध्यायैस्तु विंशत्या प्रियव्रतपुरःसरैः ॥ ५ ॥ भुवो द्वीपादिमर्यादाः पालिता इति व
र्ण्यते ॥ त्रिभिः सूर्यादिभिर्ज्योतिश्चक्रादिस्थितिकीर्त्यते ॥ ६ ॥ अतलादिषु दैत्याद्यैः पालनं वततत्रिभिः ॥ ७ ॥ तत्र तु प्रथमेध्याये ज्ञानिनो राज्यनिर्वृतिः ॥ ज्ञानस्य ज्ञाननिष्ठेति प्रि

॥ ॐ नमो भगवते श्रीवासुदेवाय ॥ राजोवाच ॥ प्रियव्रतो भागवत आत्मारामः कथं मुने ॥ गृहेरमत यन्मूलः कर्मबंधः पराभवः ॥ १ ॥ १ ॥

यव्रतकथाऽद्भुता ॥ न ॥ वंशं प्रियव्रतस्यापि निबोध नृपसत्तम ॥ यो नारदादात्मविद्यामधिगम्य पुनर्महीं ॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्परं ॥ इति पूर्वस्कंधांते
प्रियव्रतस्य प्रथमं आत्माविद्या ततो गृहाश्रमः ॥ ततः सर्वसंगत्यागेन मोक्ष इत्युक्तं ॥ तत्र विस्मितः पृच्छति प्रियव्रतो भागवतः ॥ अत एवात्मारामो गृहे कथमरमत
न नु रमतां को दोष इति चेत् ॥ अत आह ॥ कर्मणा बंधः पराभवश्च स्वरूपतिरस्कारो यन्मूलो भवति ॥ यन्मूलं यस्य ॥ ॥ १ ॥ ॥ गोपालाय नमः

राम
१

आत्मारामाणां १

गृहेषु रतिश्च तत्राभिनिवेशात्स्यात् ॥ सच भागवतानां न संभवतीत्याह ॥ नूनमिति ॥ २ ॥ गृहासक्तिर्हि कुटुंबादिस्पृहया भवति सा च तेषां नास्तीत्याह ॥ महतामिति ॥ उत्तमश्लोकपादयोः छायाकामादिसंतापहारिणी तया निर्वृतं चित्तं येषां तेषां स्पृहायुक्ता मतिर्नास्ति ॥ ३ ॥ दाराद्यासक्तस्य तु मोक्षः श्रीकृष्णे स्खलिता मतिश्चाभूदिति यत् ॥ अयं च महान् संशय इत्याह ॥ संशय इति ॥ ४ ॥ अंगीकृत्य परिहरति ॥ बाढं अभिनिवेशादिकं नास्तीति सत्यमेव ॥ तथापि विघ्नवशेन तेषां प्रवृत्तिः पूर्वाभ्यासबलेन पुनर्निवृत्तिश्च संगच्छत इत्याह ॥ भगवतः श्रीमच्चरणारविंदमकरंदरूपो यो रसस्तस्मिन्नावेशितं चेतो येस्तेपि केनचिदंतराये

न नूनं मुक्तसंगानां तादृशानां द्विजर्षभ ॥ गृहेष्वभिनिवेशोयं संभवितुमर्हति ॥ २ ॥ महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ॥ छायानिर्वृतचित्तानां न कुटुंबे स्पृहामतिः ॥ ३ ॥ संशयोयं महान्ब्रह्मन् दारागारसुतादिषु ॥ सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ॥ ४ ॥ श्रीशुक उवाच ॥ बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविंदमकरंदरस आवेशितचेतसो भागवतपरमहंसदयितकथां किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वंति ॥ ५ ॥ यर्हि वाव ह राजन् स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांजसाऽवगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकांतभाजनतया स्वपित्रोपामंत्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनंदत

णविघ्नेन विहतामपि स्वां पदवीं मार्गं न हिन्वंति न त्यजंति ॥ के भागवता एव परमहंसास्तेषां दयितस्य प्रियस्य हरेः ॥ कथा ॥ प्रियव्रतस्य ब्रह्मज्ञाने वांतरायश्च प्राबभूवेति ॥ सप्रसंगमाह ॥ यर्हीत्यादिना विमुक्तसंगः प्रकृतिं भजस्वेति श्रुतेन ॥ यर्हि वाव ह यदा हि वा वेति प्रसिद्धौ रोह इति वमः ॥ स्वपित्रा मनुना अवनितलपरिपालनायोपामंत्रितो नियुक्तो नैवाभ्यनंदत ॥ अथ ह तदेव भगवानादिदेवो ब्रह्मा स्वभवनादवततारेत्यन्वयः ॥

भा॰पं
३

उपासनत्रयोहेतवः ॥ आम्नातारं ज्ञानशास्त्रे मोक्षोपायप्रवरश्रेष्ठगुणान्तेषां गणानामैकान्तभाजनतया नियताः । अयत्नेन अनिष्ठायां हेतवः ॥ परमार्थसतत्त्वमा
त्मयाथात्म्यमवगंतत्वेन सततथा ॥ अतः ब्रह्मसूत्रेणात्मध्यानेन कार्यणारीहृ प्रमाणः नियमग्रहिष्णून्प्रागपि वासुदेव एव निरंतरसमाधियोगे
न विघ्नैकाग्रेण समावेशितः ॥ समर्पितः ॥ सकलकारकाणां सिद्धिगणानां याः क्रियास्तासां कलापो येन सः ॥ यद्यपि तत्पित्रोक्तं न प्रत्याख्येयं तथा

यद्यपि तरस्वत्याम्नातवांस्तदधिकरणात्मनोन्यस्मारसतोपि पराभवमवीभुसमाणः ॥ ६ ॥ अथ सह भगवा
नादिदेव एतत्सगुणाविसर्गस्य परिहृहणत्वध्यानव्यवस्थितसकलजगदभिप्रायआत्मयोनिरखिलनि
गमनिजगणापरिवेष्टितः स्वभवनारवतता ॥ ७ ॥ सततनगगनतलउडुपतिरिवविमानावलिभिरत्र
पथपथपरिहृदैरभिपूज्यमानः पथिपथि वरुणः सिद्धगंधर्वसाध्यचारणमुनिगणोरुपगीयमानो
धमारनेद्राणीमवधानसयत्नपरमसर्प ॥ ८ ॥

पितरधिकरणो राज्याधिकारे ॥ असतोपि मिथ्याभूतादपि अपवादात्मनः पराभवमालोच्य यत्नात्प्रनंरत ॥ ६ ॥ गुणविसर्गस्य गुणसृष्टेः परिवृंहणात्सृ
ष्टिस्तदनुचिंतया व्यवस्थितः सकलजगतामभिप्रायो येन स यथा गणाचारैर्मंडले स्वगणानामभिप्रायो निश्चीयते तद्वत् ॥ अखिलैर्निगमैर्मूर्त्तिमद्भिर्वेदैर्निजग
णैश्च मरीच्यादिभिः परिवृतः सत्यलोकादवतीर्णः ॥ ७ ॥ सव ब्रह्मा नत्वोडुपतिश्चन्द्र इव प्रकाशमानो गंधमादनस्य द्रोणीं दरीमवभासयन्नुपससर्पेत्य
न्वयः अमरपरिवृढैर्देवेन्द्रादिभिः ॥ ८ ॥

राम
१

हंसयानेन उपलक्षितेन एनं पितरं उपलभमानः ॥ प्रत्युत्थितो लक्षयन्नपि तौ पुत्राभ्यां मनुप्रियव्रताभ्यां सह कृतांजलिः सहसैवाभ्युत्थाया
यार्हणेन प्रजया सहोपतस्थे ॥ तत्र च ॥ प्रियव्रतं तत्र नारदोऽपि यानारद उपदिशति ॥ मनुश्चं तं तेन तु मार्गेतो हि तिज्ञातव्यं ॥ ९ ॥ हे भारत भगवाना
दिपुरुषो ब्रह्मा पितं प्रियव्रतं इति होवाचेत्यन्वयः ॥ तेन नारदेनोपनीतमर्हणं यस्य सः सूक्तवाको यथोचितवाक्येन स्तुतिप्रियेणाउदितावर्णिता
गुणगणावताराः सुजयाः सर्वोत्कर्षो यस्य ॥ १० ॥ प्रवृत्तिनिषिद्धं मद्वाक्यं प्रतिकूलं मत्वा मय्यप्रियं करिष्यतीति शंकमानो नाहमेव वदामि किं तु मन्तु

तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवंतं हिरण्यगर्भमुपलभमानः सहसैवाभ्युत्थायार्हणेन सह पितापुत्राभ्यामवहितां
जलिः उपतस्थे ॥ ९ ॥ भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरु
षस्तं सदयहासावलोक इति होवाच ॥ १० ॥ ब्रह्मोवाच निबोध तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयम् ॥ वयं भवस्ते तत ए
ष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टं ॥ ११ ॥ न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ॥ नैवार्थधर्मैः परतः स्व
तो वा कृतं विहंतुं तनुभृद्विभूयात् ॥ १२ ॥

स्वेन हरिरेव त्वामाज्ञापयतीति वदन्प्रवृत्तिनिवृत्तिरहस्यमाह ॥ निबोधेति नवभिः ॥ ऋतं सत्यं अप्रमेयं देवं
असूयितुं दोषारोपेण द्रष्टुं नार्हसि इति तत्र हेतुः तात एष त्वं रुद्रश्च महर्षिः दिष्टं आज्ञां विवशा अस्वतंत्राः संतो वहामः ॥ विवशत्वमेवाह चतुर्भिः ॥ नेति त
स्य कृतं तेन निर्मितं तनुभृज्जीवः तपआदिभिः विहंतुं अन्यथा कर्तुं न विभूयात् प्रभुर्न भवेत् ॥ मनीषया सामर्थ्यादिबुद्धिबलेन परतः बलवदाश्रयात् ॥ १२

न

आस्थाय तत्त्वादयुक्तनाथः

भा॰ पं॰ ३

तत्र देहयोगे तावत्पारतन्त्र्यं प्रसिद्धमित्याह । भवायेति । भवो जन्म भवाद्यर्थं अव्यक्तेनेश्वरेण दिष्टं । दत्तं देहयोगं जनता जीवसमूहः सदा धत्ते । न त्वन्यथा कर्तुं शक्नोति अंग हे प्रियव्रत ॥१३॥ कर्मकर्तॄणामपि पारतन्त्र्यमाह । यस्य वाचि वेदलक्षणायां तन्त्यां दाम्न्यां । गुणाः सत्वादयस्तत्पूर्वकाणि च यानि कर्माणि तत्त्रिविधं नेत्रीभिः ब्राह्मणादिशब्दैः सुदुस्तरैः सुदृढैः । हे वत्स वयमेवं सुयोजितानि बद्धाः सन्तः सर्वे ईश्वराय बलिं वहाम । तदिच्छया कर्म कुर्मः ॥

भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय । सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनतांग धत्ते ॥१३॥ यद्वाचि तन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः । सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥१४॥ ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसंगात् [illegible] चक्षुष्मतान्धा इव नीयमानाः ॥१५॥ मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः । यथानुभूतं प्रतियातनिद्रः

नसि नासिकायां प्रोता बद्धाः सन्तः यथा बलीवर्दा यथा द्विपदे पुरुषाय ॥१४॥ भोगेऽपि पारतन्त्र्यमाह । ईशेनेश्वरेण अभिसृष्टं दत्तमेव वयं गृह्णीमः हे प्रियव्रत अवरुन्ध्महे स्वीकुर्मः । यथा स्वामिना दत्तमेव कणाशादि बलीवर्दा भक्षयन्ति न स्वेच्छया तद्वत् । न चैवं षण्मासीं इव स्म । यतो गुणकर्मसंगात्तत्र योग्यं यद्देवतिर्यगादिलक्षणं देहमयुक्तं योजितवान् तत्तदवस्थायां स्वीकुर्मः । यथान्धाः चक्षुष्मता छायायामातपे वा नीयमानाः सन्तः ॥१५॥ नन्वेतत्सर्वमविदुषां एव न तु ब्रह्मविदः । तत्राशंक्याह । मुक्तोऽपीति । यावत्प्रारब्धं कर्म तावत् यथा स्वप्ने अनुभूतं प्रतिजातनिद्रः गतनिद्रः अभिमानशून्य एवानुस्मरति तर्हि भोगवासनया पुनर्जन्म भवेत्तत्राह । किं त्वदेहान्तरारंभकान् गुणान् कर्माणि वासनश्च न स्पृशन्नेन संभजेत ॥१६॥

न्ह

राम

३

ननु गृहे वर्त्तमानस्य भोगान् भुंजानस्य कुतोभिमानाभावो मोक्षो वा अतस्तत्यागेन वनवास एव युक्तः॥ तत्राह भयमिति प्रमादः स्यादेव प्रमत्तस्याजि
तेंद्रियस्य वनेष्विति संगाभिध्यावनाद्वनान्तरं गच्छतोपीत्यर्थः॥ सह षट् सपत्नाः शत्रवो मनोबुद्धींद्रियाणि यस्य स तथाभूत एव वनेष्वपि यतः॥
आस्ते॥ बुधत्वेन जितेंद्रियत्वादात्मारामस्य॥ अवद्यं रागादिदोषं॥ १७॥ ननु गृहे रागादिदोषः संभवति न तु वन इत्याशंक्याह॥ य इति॥ यो विजिगीषमाणः
स पूर्वं गृहेषु स्थित्वा तेषामत्यंतनिरोधमकृत्वैव नूनं जेतुं यतेत तत्क्षीणेषु कामं गृहेन्यत्र वा विचरेत॥ यतो लोके ऊर्जितारीन् दुर्गाश्रित एवात्येति जयति

भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सहषट्सपत्नः॥ जितेंद्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यं॥ १७॥
यः षट् सपत्नान् विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वं॥ अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विप
श्चित॥ १८॥ त्वं त्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः॥ भुंक्ष्वेह भोगान् पुरुषातिदिष्टान् विमुक्तसंगः
प्रकृतिं भजस्व॥ १९॥ श्रीशुक उवाच इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयावन
तशिरोधरो बाढमिति सबहुमानमुवाह

पश्चात्॥ दुर्गेन्यत्र वा वर्त्तेत बुध्येतेति पाठे प्रहरेदित्यर्थः॥ १८॥ इदं च गृहदुर्गमाश्रयणं प्राकृतानां त्वं तु अब्जनाभ
स्यांघ्रिसरोजकोश एव दुर्गं तदाश्रितः अत एव निर्जितषट्सपत्नश्च तथापि पुरुषेणेश्वरेणातिदिष्टान् दत्तान् भोगान् तावत् भुंक्ष्व॥ पश्चात् मुक्तसंगः स
न् प्रकृतिं स्वरूपं भजस्व॥ आत्मनिष्ठो भवेत्यर्थः॥ १९॥ आत्मनः स्वतो लघुतयाल्पतया तच्छासनं संगीचकार॥ यद्वा आत्मनोस्य हरेरनुशासनं ततः अलघुतया गौरवे
ण बाढं तथा करिष्यामीति अवनतकंधरः सन् जग्राह॥ २०॥

भा॰पं
४

मनुना मन्तृश्रेष्ठेन उपकल्पिता पूजा यस्य । प्रियव्रतस्य योगभ्रंशात् नारदस्य च शिष्यनाशात् । कलिमभीक्ष्णां समं भवति तन्नाम्नात्वाह । अविषमं समं
यथा भवति तथा तयोरपि समीक्षमाणयोः सतोः आत्मनः सम्यगवस्थानं अवाङ्मनसं अवाङ्मनसयोः अविषयं क्षयं निवासं पाठान्तरे अर्वाक्वाचा
मगोचरं कथंचिन्मनसः क्षयं विषयं अतो व्यवहृतं व्यवहारशून्यं तल्लोनिवृत्तं प्रवर्तयन् व्यवहाराद्विषमः सन्नव्यवहारातीतं स्वरूपं चिन्तयन्नन्तर्हित

भगवानपि मनुनायथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्ष्यमाणयोरात्मसमवस्थानमवाङ्मनसं क्ष
यमव्यवहृतं प्रवर्तयन्नगमत् ॥११॥ मनुरपि परेणैवं प्रतिसंधितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामण्डलस्थितिगु
प्तय आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम ॥१२॥ इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशितकर्मा
धिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धितकषायाशयोऽवदातो
ऽपि मानवर्द्धनो महतां महीतलमनुशशास ॥१२॥

इत्यर्थः ॥११॥ एवं राज्येभिषिच्य वनं यास्यामीत्येवं यो मनोरथः स परेण ब्रह्मणैव प्रतिसंधितः सं
पादितो यस्य सः । नारदस्यानुमतेन स्थापयित्वा । अतिविषमादुस्तराद्विषयविषजलाशयाद्गृहं तस्य आशा शारीरिकप्रवृत्तिवासना भोगेच्छा वा तस्या उपरतो
भूत् ॥१२॥ यस्तु गृहे कथमरमतेति तत्रोक्तमुत्तरमुपसंहरति । इति ह वाव स्तृतमेव हि अधिनिवेशितः प्रापितः कर्माधिकारो यस्य । अखिलस्य जगतो बं
धध्वंसनः परोनुभावो यस्य स यदंघ्रियुगलं तस्यानवरतं ध्यानं तत्र यदनुभावेन परिरन्धितकषायो रागादिमलः आशयो यस्य । अतः अवदातोऽशुद्धोऽपि म
हतां ब्रह्मादीनां आज्ञापालनेन मानवर्द्धनः ॥१३॥

राम
५

उ इति विस्मये ह इति प्रसिद्धौ वाव इति निश्चये आत्मना समानैः शीलादिभिरुदारान्महतो दश पुत्राननजनयामास ॥ २५ ॥ तत्राह आग्नीध्रः इध्मजिह्वः यज्ञबाहुर्महावीरः हिरण्यरेताः घृतपृष्ठः सवनमेधातिथिः वीतिहोत्रः कविश्चेति अग्निनामानि येषां ते ॥ २६ ॥ अर्भकभावात् बाल्यादारभ्य तस्मिन्पा

अथ दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम ॥ २४ ॥ तस्यामु ह वाव आत्मजानात्मसमान शीलगुणकर्मरूपवीर्योदारान्दश भावयांबभूव ॥ कन्यां च यवीयसीमूर्जस्वतीं नाम ॥ २५ ॥ आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥ २६ ॥ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसः ॥ २७ ॥ तस्मादविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥ २८ ॥ तस्मिन्नु ह वा उपशमशीलाः परर्षयः सर्वजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥ २९ ॥ अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इति मन्वन्तराधिपतयः ॥ ३० ॥

रमहंस्याश्रमे ॥ श्रीमच्चरणारविन्दयोरविरतस्मरणेनाविगलितोऽखंडितो यः परमो भक्तियोगः तस्यानुभावेन विशोधितांतःकरणे अधिगतो यो भगवांस्त स्मिन्नात्मनः त्वंपदार्थस्य तादात्म्यमविशेषेण विशेषो देहाद्युपाधिः तदपोहेन प्रापुः ॥ २९ ॥

भा०पं
५

उपशमायनेषु सत्सु दशकोटिभिरेकमर्बुदं ॥ एतादृशानि वर्षाणामेकादशार्बुदानि जगतीं बुभुजे इत्यन्वयः ॥ राज्ञो धर्मपालनविषयभोगप्रभावैर्भाव्यं तत्रानायासेनैव धर्मपालनमाह ॥ अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात् ॥ तेन सारेणावलेन संभृतौ पुष्टौ यौ दोर्दंडौ तयोर्युगलं तेनापीडित आकृष्टो मौर्वीगुणस्तस्य स्तनितं टंकारः ॥ तेनैव युद्धं विना विरमिता निरस्ता धर्मप्रतिपक्षा येन ॥ भोगातिशयमाह ॥ बर्हिष्मत्या स्वभार्यया च अनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इव अतएव विषयाशक्त्या आत्मानमनवबुध्यमान इव बुभुजे ॥ तत्र प्रमोदः पतिं दृष्ट्वा हर्षः ततः प्र

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दंडयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥ २९ ॥ यावदवभासयति सुरगिरिमनुपरिक्रामन् भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनंदन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीय इव पतंगः ॥ ३० ॥

सरणम् उत्थानादिलीलाः ॥ यौषिण्यं योषित्स्वभावकृतशृंगारानुभावप्रकाशनं ततो व्रीडया प्रमुषिताः संकोचिता हासावलोकास्तै रुचिराः क्ष्वेल्यादयः परिहासवाक्यादीनि तैः ॥ २९ ॥ प्रभावातिशयमाह ॥ यावद्वसुधातलं लोकालोकपर्यंतं तमवभासयति मेरुं प्रदक्षिणीकुर्वन्नादित्यः तस्मिन्नर्धेनैवोपलक्षितं प्रतपति प्रकाशयति अर्धेन चाच्छादयति तमसावृणोति तदा द्वितीयः पतंगः सूर्य इव पर्यक्रामत् न चेदमसंभावितं यतो भगवदुपासनेनोचितः ॥ अतिपुरुषः पुरुषाननतिक्रांतः प्रभावो यस्य ॥ ३० ॥

राम
५

यैवैउह्रूत्तिप्रभिद्धास्तत्वस्य रथचक्राग्रकृताः परिखाता गर्ताः ॥ २३ ॥ यतः यैरेव कृताः ॥ २४ ॥ तेषां परिमाणं पृथिवीविशेषः पूर्वस्माद्द्विगुणविस्तारमानं उ
त्तरस्तेत्वाद्धिगुणेन विस्तारमानेन तेष्वेव सिंधुत्वमो बहिः समंतत उपक्लृप्ताः रचिताः ॥ २५ ॥ यथा सिंधुत्वमो बहिरेवैकैकशो द्वीपानामपि बहिः सिंधवः ॥
इत्याह क्षारोदेति दधिमंडोमथितं दधि ॥ २६ ॥ एते सप्त जलधयः सप्तद्वीपानि परिखा अभ्यंतरैः संवेष्टिता ये द्वीपाः तैः समानाविस्तारतः बहि

ये वा उ ह तद्रथचरणनेमिकृतपरिखातास्ते सप्त सिंधव आसन् ॥ २३ ॥ यत एव कृताः सप्त भुवो द्वीपाः जंबूप्लक्षशाल्मलि
कुशक्रौंचशाकपुष्करसंज्ञाः ॥ २४ ॥ तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तरउत्तरो यथासंख्यं द्विगुणमानेन बहिः समंतत उपक्लृप्ताः
॥ २५ ॥ क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमंडोदशुद्धोदाः ॥ २६ ॥ सप्त जलधयः सप्तद्वीपपरिखा इवाभ्यंतरद्वीपसमा
ना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक्परित उपकल्पितास्तेषु जंब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजा
नाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येनैकैकस्मिन्नेकमेवाधिपतिं वि
दधे ॥ २७ ॥ दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवयानी नाम काव्यसुता ॥ २८ ॥ नैवंविधः पुरुषकार उरुक्रमस्य
पुंसां तदंघ्रिरजसा जितषड्गुणानाम् ॥ चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति तत्वं ॥ ४० ॥

वीहिनातः पृथक्कृत्य संकीर्णतया ॥ २७ ॥ अहो आश्चर्यरूपतः सामर्थ्यमिति परिहरति प्रियव्रतस्य भगवान्नारायण आह ॥ नैवमिति जिताः षड्गुणाः इंद्रि
याणि षडूर्मयो वा यैस्तेषामेवंविधः पुरुषकार इति न चित्रं नाः संभावितं विदूरविगतः अंत्यजोपि यस्योरुक्रमस्य नाम सकृदुच्चारयेद्यः अधुना तत्क्षणमे

वंबंधं संसारं तत्वमिति पाठेप्ययमेवार्थः पाठांतरे तत्व
चंडालत्वं जहाति शुद्धो भवतीत्यर्थः ॥ ४० ॥

भा०पं
६

तस्य पराक्रमं उपमहन्तु निरुक्तिक्रममाह एवमिति । देवर्षिवरणयोरनुशायनमुपपत्तिः तदनु पतितो योगुणाविसर्गो राज्यादिप्रपंचः तत्संसर्गे
णात्मानि मनसि निर्वेदोपस्य ४१ मयाऽप्राप्यनुष्ठितं यद्यतोःभिनिवेशितस्तन्तत्फलमल्पमिति विषयैर्विनोदमृगं मर्ह्यां ४१ पदेवता
याहरेः प्रसादेनाधिगतः प्राप्नोप्रत्यात्मप्रत्यवमर्शी विवेकस्तेन नारदस्य पदवीं तदुपदिष्टमार्गमेव पुनरनुसंसारेत्वयः । किं कृत्वा अनुगते

स एव परिमितबलपराक्रम एकादानु देवर्षिवरणानुशायनानुपतितगुणाविसर्गसंसर्गेणाः निरूतमिवात्मानमन्यमा
नस्त्वात्मनिर्वेदद्रस्माह ४१ अहो अप्राप्यनुष्ठितं यदभिनिवेशितोहमिन्द्रियैरविद्यारचितविषमविषयांधकूपेतदल
मलमनुष्यावनितायाविनोदमृगं मांधिग्धिगितिगर्हयांचकार ४१ परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुहृते
भ्यः पुत्रेभ्यः स्मां यथादायं विभज्य भुक्तभोगां वमहिषीमृतकमिव महदमहाविभूतिमपहाय स्वयं निहतनिर्वेदो हृदिगृहीत
हरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार तस्य ह वा एते श्लोकाः ४५ प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरं
यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्त वारिधीन्

भ्यः पुत्रेभ्यः इमां पृथ्वीं विभज्य भुक्तो भोगो यस्याः तां च महाविभूतिं मात्राज्यसंपत्तं महिषिमृतस्य
रीरमिव परित्यज्य तत्र हेतुः हृदि निहितो निर्वेदो येन हृदी त्यस्यां तत्त्वाप्यत्वयः हृदि गृहीतो हरिविहारस्तेनानुभावः त्यागसामर्थ्यं यस्य सः ४२
तस्य महिमाय निबन्धनश्लोकाः पूर्वसिद्धाः कथ्यते यथा वेदे तदस्य श्लोको भवतीति ४४ को न्विति नाम कुर्यात छायां तमसि निरस्यन् ४५

राम
६

भूसंस्थानं द्वीपैः कृतं ॥ सरित्‌छिंरिवनादिभिः सीमाबन्धेन कृतानां भूतानां निर्वृत्त्यै स्वस्ववायश्रविवादाय ॥ ४६ ॥ भौमं पातालजं दिव्यं स्वर्गजं मानुषं
मर्त्यलोकजं महित्वं वैभवं योनिरयतुल्यं मेने ॥ पुरुषानुजना विष्णुभक्तास्त एव प्रिया यस्येति ॥ ४७ ॥ इति पंचमस्कंधे प्रथमः ॥ द्वितीये प्रोक्तमा
ग्नीध्रचरित्रं स्त्रैणसंमतं ॥ पत्न्या हि पूर्वचित्त्या यो नाभिमुख्यान्‌नजीजनत् ॥ अस्मिन्‌वंशे द्वीपविद्वीपमाग्नीध्रः स्त्रैणपुंगवः ॥ विहृतस्त्रिवतसे

भूसंस्थानं कृतं येन सरित्‌छिंरिवनादिभिः ॥ सीमा च भूतनिर्वृत्त्यै द्वीपे द्वीपे विभागशः ॥ भौमं दिव्यं मानुषं च महित्वं कर्मयो
गजं ॥ यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे भुवनकोशे प्रियव्रतविजयो
प्रथमोध्यायः शुकउवाच ॥ एवं पितरि संप्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जंबूद्वीपौकसः प्रजा औरसवद्धर्मावेक्ष
माणः पर्यगोपायत ॥ १ ॥ स च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवंतं विश्वसृजां पतिमाभृतपरि
चर्योपकरण आत्मैकाग्र्येण तपस्व्याराधयां बभूव ॥ २ ॥ तदुपलभ्य भगवानादिपुरुषः सदसि गायंतीं पूर्वचित्तिं नामाप्स
रसमभियापयामास ॥ ३ ॥

इत्थं चरितं मुनिरब्रवीत् ॥ १ ॥ जंबूद्वीपमोको येषां ताः प्रजाः पुत्रवत्पालयामास ॥ धर्मावेक्षमाणः धर्मेणावेक्षमाण इत्यर्थः ॥
पितृलोककामः पुत्रकामः ॥ सुरवराणां वनितानामामोदाक्रीडाचलो मंदरस्तस्य द्रोण्यां ॥ आभृतानि संपादितानि परिचर्योपकरणानि पूजाद्रव्या
णि येन सः ॥ २ ॥ तदुपलभ्य ज्ञात्वा अभियापयामास संभोगार्थं प्रस्थापयामास ॥ ३ ॥

भा॰पं
१

यावत्तराश्रमोपवनमुपवश्रामो त्यन्वयः रमणीयत्वमाह विविधाश्च निविडाश्च ये विटपिनस्तेषां विटपनिकरा ये तैर्मसंश्लिष्टाः प्ररूढलताः स्वर्णवल्ल्यः
ता यत्र तादृशाः स्थूलविहङ्गमा मयूरादयस्तेषां मिथुनैः प्रोच्यमाना मिश्रुतिभिः अर्च्यमानैः षडङ्घ्रिवृन्दैः प्रतिबोध्यमाना ये सलिलकुक्कुटादयस्तैर्वि
चित्रं यथा तथोपकूजिता अमला जलाशया यास्तेषु कमलानि तेषामाकरं वन ॥४॥ सललितगमने येपरं विन्यासमार्गे तो विलासो यस्याः चकार त्वमा

यावत्तराश्रमोपवनमतिरमणीयं विविधनिविडविटपिविटपनिकरसंश्लिष्टप्ररूढलतादूरं स्थूलविहंगमिथुनैः प्रोच्यमानश्रु
तिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपवनश्राम ॥४॥
त्वस्याः सललितगमनपदविन्यासगतिविलासायास्त्वांतु पदं स्वरणावर्ण्यमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नारदे
वकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ॥५॥ तामेवाविदूरे मधुकरीमिव सम
नस्तुपजिघ्रन्तीं दिविजमनुजमनोनयनाङ्काररङ्गैर्गतिविहारविनयावलोकस्वस्वाङ्गावयवैर्मनसिजोत्सवमायुधसम
विवर्तं विदधतीम् ॥६॥

वेत्येकवाक्यत्वायपणोषवोति ध्वनिं कर्णे तो रुचिरस्य चरणाभरणस्य स्वनं आमीलितनयनेषु नलिनमुकुले तयोः युगल
मीषद्विकचय्य किंचिद्विउन्मील्य व्यचष्ट ददर्श ॥५॥ तामेव देवीं मकरध्वजस्य वशमुपनीतः सन्नूजड इति वक्ष्यमाणान्वयः श्लोकान्तुवाद जाड्यान्तकरणांववे
रथेन तद्वशीकरणार्थम् दिविजानां देवानां मनुजानां च यानि मनांसि नयनानि च तेषामाङ्काररङ्गैर्गत्यादिभिर्गुणैर्मनसिकामस्य विवर्तं प्रवेशद्वारं विद
धतीं गतिश्च विहारश्च क्रीडाविनयश्चक्षोवलोकश्च तैः स्वाङ्गावयवाश्च नेत्रादयस्तैः ॥६॥

राम
१

निजमुखाद्विगलितममृतमिव स्वाद्वाज्ञासवरूवमारं कं यत्सदा मे माधुर्यं वतस्मिन्नामोदेनेनिष्ठामगाधः। तेन मदांधो जे मधुकरनिकरो हे तेऽ
परोधश्चावरनं तेन भयात्तद्भुतः शीघ्रः पदन्यासः तेन वल्लभसंचरनं किंचिच्चलनं तेन योः कवरभारे मनाग्नावयस्यां तातस्याः अवलोकनेन वि
हृतावसरस्मेरत्नावकाशाम्॥ ७॥ कांतं वै शैले गिरावस्मिन् किं विचिकीर्षसि॥ मुनिवर्य त्यादि॥ पुंल्लेन मे वोधनादिज्ञाद्यात्कारार्थे हे मुनिवर्य मनुं नं भ
गवतः परदेवताभूतस्य मायामिप्रुवावालन्नूप्याज्ञाह॥ हे मुहमल्लखेविज्ञेनिग्राधधन्नीं विमर्षिकिमात्मनोर्थे तेवेवाभ्यां किंचित कार्यमस्ति॥ किंवा

निजमुखविगलितामृतामवमहामसमाधुरणामोदमदांधमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्लभसंचरनमस्तन
कलशाकवरभारसमनारेवीतरवलोकनेन विहृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतोऽजडव इति होवाच
॥ ७॥ कांतं विचिकीर्षसि वकिं मुनिवर्य॥ शैले मायापिकापि भगवत्परदेवतायाः॥ विज्ञे विमर्षिधनुषी मृदुहृदात्मनोर्थे किंवा
मृगान्मृगयसे विपिने भ्रमन्तान्॥ ८॥ वाणाविमो भगवतः शतपत्रपत्रौ शान्तावसुंविहरविप्रावतितितिग्मदंतौ॥ कस्मेयुयुंक्षसि
वने विचरन्निविघ्नः हे माय नो जडधियां तव विक्रमोस्तु॥ ९॥

भ्रमन्तान् अजितेन्द्रियान् मृगतुल्यान् स्मरादीन् मृगयसे तान् वशीकर्तुं धनुषी
धारयसीत्यर्थः॥ ८॥ कराङ्गावालक्ष्याह वाणाविमो शतपत्रे नेत्रकमले ते एव पित्राणि पिच्छानि ययोस्तौ शांतौ विक्रमेणामंथरौ पुंखाभ्यां विनापि हृदि विरोपय
तयाकल्पितनेत्राभ्यां परमात्मस्वरूपस्थानीयस्याभावात् अतितिग्मौ तीक्ष्णौ रंतो अग्रभागौ ययोस्तौ कस्मै प्रयोक्तुमिच्छसीति न विघ्नः॥ अतो भया देवतावस्त्वार्थ
यामहेतवापं विक्रमोः स्माकं त्वे मायास्तु॥ ९॥

भा०पं
८

तरंगपरिमललोभेनानुगच्छतो भ्रमरपानालक्ष्याह शिष्या इति । अजस्रं संततं । युष्मद्विषातोलुलिता विगलिताः स्मरमनसामभिता वृष्टीः गलिता निष्क्राम्ह
मानिभजंतीत्यर्थः । शुद्धत्वेनोपमा वेदशाखा वाइवेति ॥१०॥ नूपुरस्वरमाकर्ण्याह वाचमिति त्वं तव चरणपंकजयोः नूपुरयोः शिंजितानामंतर्गतर
त्ना नापरं केवलं वाचस्त्वद्गमः कथंभूतां अरुणाद्दष्टवल्कलामुखरां श्रुतिप्रकारेतमाव । पीतं परिधानं वल्कलं नितंबकांतित्वेन प्रकल्प्याह । कादंबकाह्म

शिष्या इमे भगवतः पुरतः पठंति गायंति साममसकृत्समजस्रमीश । युष्मद्विषा विलुलिताः स्मरमनोपि वृष्टिः सर्वे म
जस्रविगलिता इव वेदशाखाः ॥१०॥ वाचं परं चरणपंजरतित्तिरीणां ब्रह्मन्नरूपमुखराश्रुणुकेवा मतस्यं । लब्धाकरं वहवि
रंकविरंकविवेयस्यामलातपरिधिः कवचवल्कलं ते ॥११॥ किं सेभृतह विरयोर्द्विजअंगयोस्त मध्ये कशां वहसि यत्र
वृष्टिः स्थिता मे । पंकोरुहाः स्वभिरामविषाणाइदं कुयेनाश्रमं स्वभगमे स्वरभीकरोषि ॥१२॥

स्मरवृष्टिदीप्तिः अंकविरंकविवेनितंबस्पर्हरमंडलेकलद्यापाठं तरेअंगेति संबोधनं । मेखलामालक्ष्याह । यस्यामलातपरिधिवर्त्तते । बालनितंबका
तित्वेन प्रकल्प्य वल्कमहं दृष्ट्वष्टकतिवचतेवल्कलमिति ॥११॥ स्तनावालक्ष्याह । शृंगयोः स्तनयोः किंसभृतं पूर्णमस्तिमनोहरं किंचिदस्तीत्याह तावन्न
जानामि । यतो मध्ये कशोपि कष्ट्रणा वहसि यत्र वपेदृशिर्दृष्टिः श्रिता संलग्नास्ति । अन्यथेदं द्वयं नवहरतइतिभावः । स्तनगतं कमपमालक्ष्याह । पंकोरुहाणा
आलमनस्तव विषाणास्तनेद्दकू अत्पूर्वः कृतइत्यतआह । येनकंपेन ॥१२॥

६२

राम
८

लोकं स्थानं यत्र तत्योजनजरमाइत्थमपूर्वावयवैर्वा विपर्तिमनमर्गत्रयनोक्तो मकोमतां तरे इत्थंभूतलक्षणेन तृतीया ॥ वक्रे च वक्ष्वङ्कुतं विपर्त्तिं किं
तदाह ॥ रमोमधुरालापः रामो विलासहस्ता स्यांसहिता सुधा अधरामृतं आदि हिंसाद्वात्मित तन्मा शिः ॥ १२ ॥ कावातव लोके आत्मनो देहस्य
वृत्तिः आहारः अंगाहेसवे अरुचनाद्यर्वनाद्यविरितितत्तवं धीगंधो वाति आगछति इति तां तूलामभिप्राय ॥ अरुचनाइहिंगंभातीति पाठे ममता व
तमोजनात वहिर्भूते वक्त्रे निर्मातितस्यर्थः ॥ यतस्त्वं विश्वेः कलामि ॥ विश्वस्वनाम्नाति ॥ अनमेननन्या अपि वाक शीतातिस्मृतेः ॥ विश्वोः क

लोकं प्रदर्शयस्य हृत्रतमता वकं मेयत्रत्य इत्थमुरमावयवावपूर्वो ॥ अस्मद्विधस्यमनगत्त्रयनो विपर्त्ति वक्त्रं कुतं
मरमरामह्रुधादिवक्त्रे ॥ १२ ॥ कावात्मवृत्तिरदनाद्यविरागवाति विश्वोः कलास्यनिमिषोन्मपरो वकर्णे ॥ उद्विग्न
मीनयुगलं द्विजपङ्क्तिशोभि विराजते भृंगनिकरं सरहन्मुखं ते ॥ १४ ॥ घोषात्वयाकार परोजहतः पतंगो दिह्म्रत्रम
न्नभ्रमतएजयते त्विविणामे ॥ भ्रक्रं न तेस्मरमिव क्रजयावत्र्थं कष्टोनिलोहरति लपरएषनीवीम् ॥ १५ ॥

लामीतत्रहेतुः तव कर्णौ विश्वोरिवानिमिषोन्मकरो अनिमिषो रत्नेनेत्रत्वेन निमिषशून्यो उन्मसंतौ मकरौ मकराकारे कुंडले यस्योः तौ किं विद्ध
मुखं सरहतमस्यैवत देवाह ॥ उद्विग्नं चचलं मीनयुगलमिव नेत्रद्वयं यस्मिन् द्विजाः दंतास्तेषां पङ्क्त्या शोभि विः शोभायस्मिन् ॥ सर हं द्विजाः हंसाः
आसतेत्रो भृंगनिकाइवकेशाहतोमः पद्मिमलतुष्टभृंगस्तोमो वायस्मिन् ॥ १४ ॥ पतंगाः कंडकः भ्रमतः भ्रमवित्तस्य मे अत्रिविणामे जयते चंचलतानयति
वक्त्रके मम मंपूर्हमुक्तं वंधनं नन्मरमिनसंभालयमिति किंकष्टः धूर्त्तो नीवीं हरति एतत्त्वनस्मरमिति किं ॥ १५ ॥ ॥ राम

सि

भा०पं
८

उपलब्धं प्राप्तं मह्यं मम महे हेम मम पित्रा मयाहृत पश्चात्तन्मर्हसि किंच । स एव सर्वभावनः समर्हति विस्तारकोऽवस्थायां मे प्रष्टीदति त्वां भार्यां कल्पयतीत्य
र्थः ।१६। द्विजदेवेन ब्रह्मणा दत्तं कुमनस्थलग्नं मनूनापयाति । हेयाहस्त्रिगियतस्तेवित तस्मात्त्वरध्यानं नेतुमर्हसि । प्रविश्यत्तत्वमस्त्वापि द्वि

रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्त्वकेन तपसा भवतोपलब्धम् । यत्तत्तपोऽर्हसि मया सह मित्र मह्यं किं वा प्रसीदति
स वै भवभावनो मे ।१६। न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नं । मां चारुशृङ्ग्यर्हसि ने
तुं मनुव्रतं ते चित्तं यतः प्रतिसरंतु शिवाः सचिव्यः ।१७। शुक उवाच । इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्य
या परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास ।१८। सा च ततः तस्य वीरयूथपतेः बुद्धिशीलरूपवयः
श्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जंबूद्वीपपतिना भौमस्वर्गभोगान्बुभुजे ।१९।
तस्यामु ह वा आत्मजान्स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञा
न्नव पुत्रानजनयत । सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ।२१।

शृङ्गकुलाः सत्यः मा प्रतिसरंतु अनुव्रतं नेतां यद्वा एतावत्पर्यंतमेयाः सचिव्यः सख्यः शिवाः फेरवः प्रतिसरंतु निर्यांतु । यद्वा वनवासे हृद्वर्यो
हरिरूपः शिवाः प्रतिसरं तत्र प्रदक्षिणां गच्छंतु ।१७। ग्राम्यवैदग्ध्ययुक्तया ।१८। कुमारीणां इद्द्वैकं ।१९। सूत्वा प्रसूय उपतस्थे अभजत ।२१।

राम
८

औत्पत्तिकेनैव स्वभावेन संहननं दृढगात्रत्वं ॥२१॥ कामानां भोगैः अधिअधिकमन्यमानः ॥ श्रुतिभिः वेदोक्तैः कर्मभिः ॥ अवरुंधत प्राप मादय-
यंते मोदंते ॥२२॥ इति एवंभूताः संज्ञा यासां ताः परिणीतवंतः ॥२३॥ इति पंचमे द्वितीयः ॥ तृतीये चरितं नाभेः परं मंगलमीर्यते ॥ यत्र यज्ञप-
प्रीतः सन् पुत्रोऽभूदृषभो हरिः ॥ नाभिरग्नीध्रसुतः अप्रजया मेरुदेव्या भार्यया सह ॥१॥ प्रवर्ग्यसंज्ञकेषु कर्मसु क्रियमाणेषु द्रव्यादयः

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्र्या विभक्ता आत्मतुल्यनामानि यथाभागं जंबूद्वी-
पवर्षाणि बुभुजुः ॥२१॥ आग्नीध्रो राजा तृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभि-
रवारुंधत यत्र पितरो मादयंते ॥२२॥ संपरेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं
भद्रां देववीतिमिति संज्ञाः नवोदवहन् ॥२३॥ इति श्रीभागवते महापुराणे पंचमस्कंधे द्वितीयोऽध्यायः ॥ श्रीशुक उवाच ॥ ना-
भिरपत्यकामोऽप्रजया मेरुदेव्या भगवंतं यज्ञपुरुषमवहितात्मायजत ॥१॥ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रव-
र्ग्येषु प्रचरत्सु द्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्र-
तीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानंदनावयवाभिराममाविश्चकार ॥२॥

संपन्नैः योगात् उपायात् तेषामुपपत्त्या संपत्त्या दुरधिगमोऽपि प्राप्तोऽपि भागवतेषु कृपालुतया सुप्रतीकः शोभनावयवः सन् आत्मानं प्राविश्चकार ॥ अपराजि-
तं स्वतंत्रं ॥ निजभक्तानां ये अभिप्रेतार्थास्तेषां विवित्सया गृहीतमाकृष्टं हृदयं चित्तं यस्य ॥ हृदयंगमं सुखकरं यतः मनोनयनानामानंदयंति ये अवयवास्तैरभि-

अथहेत्यादिनिपातवाक्यंवावाक्यालंकाराय ॥ आविः कृतंभुजानांयुगलंद्वयंचतुष्टयंयेनहिरण्मयंतेजोमयं ॥ पुरुषंपुरुषविशिष्टमतइतित
थापुरुषोत्तममित्यर्थः ॥ अर्हेनेणार्द्धेणमहोपतस्थुअपजत्रित्यस्वयः ॥ विलसतश्रीवत्सएवललामचिह्नंयस्यसदरवाः शंखः वनरुहंप
यंअच्छूरिवकंअमृतमणिः कौस्तुभः एवमादिभिः स्फुरत्किरणैर्येप्रवराभरणैः तन्मध्यानिमुकुटादीनिअग्र्याणिनानाभूषणानितैर्विभूषितं
वर्द्धमानोदष्टात्ः अधनारवोत्तमेधनेनिधिं ॥ २ ॥ अर्हसीत्यादिनानिगदेनस्तुवंतिहेअर्हन्नत्तमपापरिपूर्णोपित्वंअनुपथ्यानांभृत्यानांअस्मा

अथहतमाविष्कृतभुजयुगलद्वयंहिरण्मयंपुरुषविशेषंकपिशकौशेयांवरधरमुरसिविलसत्श्रीवत्सललामदर
वनरुहवनमालाः कौस्तुभमणिगदादिभिरुपलक्षितंस्फुरत्किरणोत्करमणिमयमुकुटकुंडलकटककटिसूत्रहा
रकेयूरनूपुराद्यंगविभूषणविभूषितमृत्विक्सदस्यगृहपतयोः अधनायवोत्तमधनमुपलभ्यसवर्द्धमानमर्हणा
नावनतशीर्षाणउपतस्थुः ॥ ३ ॥ ऋत्विजऊचुः ॥ अर्हसिमुहुरर्हत्तमार्हणमस्माकमनुपथानांनमोनमइत्येतावत्सदुप
शिक्षितम् ॥ ४ ॥ कोर्हतिपुमान्प्रकृतिगुणव्यतिकरमतिरनीशईश्वरस्यपरस्यप्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभिः

कमर्हणांगुरुः स्वयमेवस्वीकर्त्तुमर्हसिनत्ववयंस्तोतुंशक्ता इत्याहुः नमोनमइत्येतदेवास्माकंसद्भिरुपशिक्षि स्वरूपनिरूपने ॥ ५ ॥
तं त्वद्रूपस्यदुर्ज्ञेयत्वात् ॥ ५ ॥ तदेवाहुः कोर्हतीति ॥ प्रकृतिगुणानांव्यतिकरः प्रपंचस्तस्मिन्नेवमतिर्यस्यअतएवानीशः प्रकृतिपुरुषयोः परस्यअ
तएवेश्वरस्य ॥ अर्वाक्तनाभिरस्मास्पृशंतीभिः प्रपंचांतर्गताभिः नामचरूपं [illegible] चआकृतिश्चआकाराः ताभिः स्वस्वरूपनिरूपणंकर्त्तुंकोनामपुमा
नर्हति ॥ ५ ॥

सत्येतावन्मात्रमेवार्हति नाधिकमित्याह ॥ सकलजीवनिकायस्य वृजिनं निरस्यतीति तथा शिवतमाः प्रवराश्च ये गुणगणाः तेषामेकदेशः
तस्य कथनाद्विना ॥ ६ ॥ वाङ्मनसागोचरोपि त्वं भक्तानां सुखाराध्य एवेत्याह ॥ हे परम परिजनैरनुरागेणाविरचिता ये शवलशब्दाः गद्गदाक्षर
स्तुतयस्त एव स्तवकाः पुष्पसमूहाः लाजाश्चाक्षताश्च सलिलं वर्षितकिशलयाश्च शुद्धपल्लवाः शिलेतिपाठे शिलं कुशादिमंजर्यो माद्विभिः

सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥ ६ ॥ परिजनानुरागविरचित
शवलशब्दस्तवकलाजाक्षतसलिलसितकिसलयतुलसिदूर्वाङ्कुरैरपि संभृतया सपर्यया किल परम
परितुष्यसि ॥ ७ ॥ अथानयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥ ८ ॥ आत्मन एवानु
सवनमञ्जसाव्यतिरेकेणावबोभूयमानातिशयिताशेषपुरुषार्थस्वरूपस्य ॥ ९ ॥ किंतु नाथाशिष आशासानानामे
तदपि समाराधनमात्रं भवितुमर्हति ॥ १० ॥

संभृतया संपादितया पूजया परितुष्यसि ॥ ७ ॥ अथेति प्रकारान्तरे अन्यथा तु अनया इज्यया यागेनापि उरु
भारभरया अनेकाङ्गसमृद्ध्यापि भवतः समुचितमपेक्षितं प्रयोजनं नैव पश्यामः ॥ ८ ॥ अत्र हेतुः आत्मनः स्वत एव अनुसवनं सर्वदा अञ्जसा साक्षात्
बोभूयमाना अतिशयेन संभवतो ये अशेषाः पुरुषार्थास्तत्स्वरूपस्य परमानन्दस्य ॥ ९ ॥ न चैवं सत्यपि यागानर्थक्यमित्याह ॥ किंत्विति ॥ सकामानामस्मा
कमेवैतदुपपद्यते न तवेत्यर्थः ॥ १० ॥

सोपयोगमेव प्रदर्शयंति । तद्यथेति परमेभ्योपि परमपुरुषः प्रकर्षयुक्तया करुणया उपकल्पयिष्यन् संपादयिष्यन् । चकारात्कामिनां च नापवृक्तिः अपूजित एव पूजानपेक्षत्वात् ॥ त्वमेव मे वोपलक्षितः शिष्टोभि इत्यत्र वत्सापेक्षवत् । यद्यपि त्वं वरान् दातुमाविर्भूतोसि तथापि अर्हत्तमराजर्षेर्बर्हिषि विधित्से निजपुरुषाणां त्वदुक्तानामस्माकमीक्षणविषयो भवान् यर्हि यदा आसीत् । तदा ह्येष एव वरः संजातः ॥१२॥

तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपुरुषः प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नोपचित एवेतरवदिहोपलक्षितः ॥११॥ अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्षभो भगवान् निजपुरुषेक्षणविषय आसीत् ॥१२॥ असंगनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगणपरममंगलायनगुणगणकथनोसि ॥१३॥ अथ कथंचित्स्खलनक्षुत्पतनजृंभणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवंतु ॥१४॥

दर्शनस्य दुर्लभतामाहुः असंगेन वैराग्येन निशितं यत् ज्ञानं स एवानलस्तेन विधूता अशेषा मला येषां अतो भवतः स्वभाव एव भावो येषां । तानेवाह आत्मारामाणामेवंभूतानां मुनीनामपि परममंगलायनगुणगणकथनमेव न तु दर्शनं यस्मात् अनवरतपरिगणितानामपि तावत् गुणगणानां यस्य इति संबोधनं । दर्शनेनैव कृतार्था अपि वरमेकं प्रार्थयंते अथेति स्मरणाय

अन्यद्वप्रार्थनीयमस्तीत्याहुः किंचेति आशिषामैहिकानां स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति ॥५॥ प्रजायामेव पुरुषार्थ इति प्रत्ययो यस्य ॥ अध-
नो यथा फलीकरणं तुषकणादिकमाशासानो धनदमुपधावति ॥६॥ इदं च नातिचित्रमित्याहुः ॥ इह संसारे पराजितया मायया अनवसित-
पदव्या अलक्षितमार्गया अपराजितः को वेन कोपि । अनहत्वया नावृतमतिः कः न कोपि अनावृत एव विषय एव विषं तस्य रयावेगास्तैरनावृता प्रकृति

किंवापरं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भगवंतमुपधावति ॥५॥ प्रजाया-
मर्थप्रत्ययो धनदमिवाधनः फलीकरणं ॥६॥ को वा इह तेऽपराजितोऽपराजितया माययाऽनवसितपदव्याऽनावृतम-
तिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः ॥७॥ यदु ह वाव तव पुनरदभ्रकर्त्तरिह समाहूतस्तत्रार्थधियां मंदा-
नां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान्प्रतिवोढुमविदुषां ॥८॥ श्रीशुक उवाच ॥ इति निगदेनाभिष्टूयमानो भगवाननि-
मिषर्षभो वर्षधराभिवादिताभिवंदितचरणः सदयमिदमाह ॥९॥ श्रीभगवानुवाच ॥ अहो बताहमृषयो भवद्भिरवितथगी-
र्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भ-
वितुमर्हति ॥१०॥ ममैव हि मुखं यद्द्विजदेवकुलं ॥११॥

यस्य सः कः यश्चानुपासितमहच्चरणः अतस्त्वन्मायया मोहितस्यैवमाशंसा घटत इत्यर्थः
॥७॥ अदभ्रकर्त्तः हे बहुकार्यकारिन् अल्पीयसे कार्याय त्वं यद्यस्मादिह समाहूतोसि ॥ तत्र प्रजायामर्थधीर्येषां मंदानां तेषां नो यद्देवहेलनं भवदवज्ञानं तत्
सर्वान्प्रति तव साम्येन हे देवनाथ प्रतिवोढुं सोढुमर्हसि ॥८॥ इति निगदेन अध्यात्मस्तोत्रेण वर्षधरो भारतवर्षपतिर्नाभिः तेनाभिवादिता ये ऋत्विजस्तेषामभि-
वंदितौ चरणौ यस्य ॥९॥ अहमेव मत्त्वे हेतुः । ममाहमेवाभिरूपः सदृशः कैवल्यादद्वितीयत्वात् ॥१०॥ द्विजेषु देवरूपं वेदब्राह्मणास्तेषां कुलं ॥११॥

आग्नीध्रीये नाभेः ॥ पतिं नाभिं ॥ हे विष्णुदत्त ॥ तस्याऽवरोधायने अंतःपुरे मेरुदेव्यां शुक्लया शुद्धसत्वमूर्त्याऽवततार ॥ केषां धर्मान् वातरशनानां दिग्वा-
ससां ॥ यावंडिव्याहृत्यथैमाह ॥ श्रमणानां तपस्विनां ऋषीणां ज्ञानिनां ऊर्ध्वमंथिनां नैष्ठिकब्रह्मचारिणां ॥ २ ॥ प ॥ मे तृतीयोध्यायः ॥ चतुर्थादि-
त्रिभिः प्रोक्तमृषभस्य हितं महत् ॥ लोकार्थं येन सत्कर्म नैष्कर्म्यं च निदर्शितं ॥ १ ॥ चतुर्थे नातपुत्रस्य राज्यं तस्योपवर्ण्यते ॥ यस्य राज्ये जनः सर्वः

ततआग्नीध्रीये शाकलयाऽवतरिष्यामि आत्मतुल्यमनुपलभमानः ॥ श्रीशुक उवाच ॥ इति निशामयंत्या मेरुदेव्याः पति-
मभिधायांतर्दधे भगवान् ॥ बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरो-
धायने मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमंथिनां शुक्लया तन्वाऽवततार ॥ इति
श्रीभागवते महापुराणे पंचमस्कंधे तृतीयोध्यायः ॥ श्रीशुक उवाच ॥ अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपश-
मवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृ-
धुः ॥ तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार

संतोषामृतनिर्वृतः ॥ १ ॥ अभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु वज्रांकुशादीनि यस्य ॥ महाविभूतिभिः सर्वसंपत्तिसाधनादिभिः सह वर्द्ध-
मानप्रभावं ॥ प्रकृतयोऽमात्यादयः जगृधुः अभिकांक्षितवंतः ॥ वर्ष्मणा देहेन तस्य विशेषणद्वयं वरीयसा ॥ श्रेष्ठतमेन बृहतः श्लोकाः पद्यानि कवी-
नां यस्मिन् तेन च ॥ ओजः तेजः वीर्यं प्रभावः शौर्यमुत्साहः ॥ एतैर्गुणैरतिश्रेष्ठत्वादृषभः ॥ श्रेष्ठ इति नाम चकार

कालेन तन्महिमानं जीवन्मुक्ततामवाप ॥५॥

तस्य वर्षमंडले त्र्यवहध्यप्राप्य ॥ विरंच्छ्या गृहीतो नरलोकसमानधर्म्मो मनुष्याकारो येन तं अत एव मायया त्वक्षत्र इति विलसिता मतिर्यस्य आ
पौरप्रकृति पौरान् प्रकृतीः स्वामि व्याप्य विहितो नु रागो यस्मिन् ॥ कथंभूतो नाभिः जनपदः जनाः पौरादयः परं आपर्णायस्य सः आत्मजं धर्ममर्या
दारक्षार्थमभिषिंच्य ब्राह्मणानामुत्संगे निधाय विशालायां बदरिकाश्रमे प्रसन्नं परात्मदेवं कं नियमेन च तीव्रं तेन उपासीनः सेवमानः ॥ नाभेस्तेन

तस्य हीद्रः स्पर्द्धमानो भगवान् वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं ना
माभ्यवर्षत् ॥ नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकस
धर्मं भगवंतं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन् परां निर्वृतिमुपगतः ॥ विदितानुरागमापौरप्र
कृतिजनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिंच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तप
सा समाधियोगेन नरनारायणाख्यं भगवंतं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥ यस्य ह पांडवेय श्लोकावुदाहरंति
को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् ॥ अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥ ब्रह्मण्यो न्यः कुतो नाभेर्विप्रा मंगलपूजिताः
यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥ अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धव
रैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयंत्यामिंद्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुंजन्नात्मजानामात्म

प्रसिद्धं कर्म अनुतरनंतरं को नु उपमानाचरेत ॥ मंगलैर्दक्षिणाभिः पूजिताः संतः ओजसा मंत्रबलेन अन्येषां गृहाणाय प्रदर्शितो गुरुकुलवासो येन अनुशि
क्षमाणः ॥ शिक्षयन् उभयविधं श्रुतिस्मृतिलक्षणं कर्म विधिं अभियुंजन् अनुतिष्ठन् ॥ जयंत्या मात्मजानां शतं जनयामास

तं भरतमनु कुशावर्त्तादयो नव प्रधाना नवतेः प्रधाना ज्येष्ठाः । तदनंतरं कविप्रमुखा नव भागवतधर्मप्रदर्शकाः । वसुदेवनारदयोः संवादोयमि
न्नुपरिष्टात् एकादशे । महाशालीनाः श्रुतिविनीताः केवलाः शुद्धाः विपरीतवतश्च नीश्वरवत्कर्माणि कुर्वंत्यमयत नियमितवान्नुपाठांतरेनि

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् । येनेदं वर्षं भारतमिति व्यपदिशन्ति । तमनु कुशावर्त्त इलावर्त्तो ब्रह्मा
वर्त्त आर्यावर्त्तो मलयकेतुर्भद्रसेन इंद्रस्पृशक् विदर्भः कीकट इति नवति प्रधानाः कविर्हविरंतरिक्षः प्रबुद्धः पिप्पलायनः
आविर्होत्रोथ द्रुमिडश्चमसः करभाजनः । इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहि
तं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः । यवीयांस एकाशीतिर्जायंतेयाः पितुरादेशकारिणः महाशा
लीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः । भगवानृषभसंज्ञ आत्मतंत्रः स्वयं नित्यनिवृत्तानर्थपरंपरः केव
लानंदानुभव ईश्वर एव विपरीतवत् कर्माण्यारभमाणः । कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशांतो मैत्रः
कारुणिको धर्मार्थयशः प्रजानंदामृतावरोधेन गृहेषु लोकं नियमयत् । यद्यच्छीर्षण्याचरितं तत्तदनुवर्त्तते लोकः । यद्यपि स्व
विदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास ॥

नतामरमयत । कर्मकरणे हेतुः । अनुगतं अनुष्ठितं धर्मं स्वयमेवाचरणेनातद्विदामुपशिक्षयन् । कथं धर्माणामवरोधेन संग्रहेण । अत्र आनंदो भोगः
अमृतं मोक्षः शीर्षण्यः श्रेष्ठः तेनाचरितं तत्तदनुवर्त्तते यतः सकलो धर्मो यस्मात् ततब्राह्मं गुह्यं वेदरहस्यं परं विदितं नैवं विदितं तथापि ब्राह्मणान्पृ

इत्यादीनि उपाचितैर्यत्नैरिष्टवान्॥ तत्र वयो यौवनं युवैव धर्ममन्विच्छेदिति वचनात्॥ विविधोद्देशाः नानादेवतोद्देशाः यथोपदेशं यथाविधि
अन्यस्मात्त्वकाशादात्मनः कश्चिदपि किमपि कथंचनापि न वाञ्छति॥ इच्छाद्वेषयोर्दर्शनतः अविद्यमानखपुष्पादिकमिव॥ न वान्यदीपमप

द्रव्यदेशकालवयःश्राद्धर्त्विक्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाय॥ भगवतर्षभे-
णापरिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वाञ्छत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंचन किमपि कर्हिचिद-
वेक्षते भर्त्तर्यनुसवनं विजृंभितस्नेहातिशयमंतरेण॥ स कदाचिदटमानो भगवानृषभो ब्रह्मावर्त्तगतो ब्रह्म-
र्षिप्रवरसभायां प्रजानां निशामयंतीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयंत्रितानप्युपशिक्षयन्नि-
ति होवाच॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते चतुर्थोध्यायः॥ ऋषभ उवाच॥ नायं
देहो देहभाजां नृलोके कष्टान्कामानर्हते विड्भुजां ये॥ तपो दिव्यं पुत्रका येन सत्त्वं शुद्ध्येद्यस्माद्ब्रह्मसौख्यं त्वनंतं॥१॥

न्नेतेः प्रीत्यर्थं॥ भर्त्तरि ऋषभदेवे प्रतिक्षणमुज्जृम्भितस्नेहोद्रेकं विना अन्यत्र वांछा अवहितात्मनः संयतचित्तानपि॥ प्रजानुशासनार्थं उपशिक्षय-
न्निति ह वक्ष्यमाणमुवाच॥ इति पंचमे चतुर्थोध्यायः॥ पंचमे मोक्षधर्मोपदेशः पुत्रानुशासनं उक्तं पारमहंस्यव्रतस्य दृढतेति निरूप्यते॥ विड्भुजामपि ये
संमतितान्॥ कष्टान् दुःखदान्कामान्विषयान्नार्हति तेन तद्योग्यः अयं मनुष्यदेहो न भवति॥ दिव्यमुत्कृष्टं येन तपसा यस्मात् शुद्धात्सत्त्वात् अनंतं ब्रह्मसौख्यं
भवति॥१॥

भा॰ पं॰
१४.

मोक्षवंधयोर्निदानमाह। महत्सेवामिति। तमसः संसारस्य द्वारं। योषितां ये संगिनस्तेषां संगं। महतां लक्षणमाह। सार्द्धेन महान्त इति। साधवः स
दाचाराः। मयीईशे कृतं सौहृदमेव अर्थः पुरुषार्थो येषां वा शब्देनान्यनिरपेक्षसेव महल्लक्षणत्वे दर्शयति। देहं विभ्रतीति देहंभरा विषयवार्त्तैव
वार्त्ता येषां तेषु जनेषु जायादियुक्तेषु वा रातिर्मित्रं धनं वा। पाठांतरे जायादिषु रेषु। यावदर्थाश्च यावद्देहमेवार्थो येषामिति मध्यपद

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगम्। महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये
॥२॥ ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्त्तिकेषु। गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके
॥३॥ नूनं प्रमत्तः कुरुते विकर्म यदिन्द्रियप्रीतय आपृणोति। साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस दे
हः ॥४॥ पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम्। यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीर
बंधः ॥५॥

के न

लोपी समासः। देहनिर्वाहाधिकस्पृहाशून्या इत्यर्थः॥३॥ कामानार्हतीति यदुक्तं तदुपपादयति नूनमिति। यद्यदा इंद्रियप्रीतये आपृणोति व्याप्रियते
तदा प्रमत्तः सन् विकर्म पापं नूनं करोति। यतो विकर्मणः प्राचीनादयं क्लेशदो देहो जातः। तदेव पुनः कारणं साधु न मन्ये। देहादेरनात्मत्वा
त् क्रियानयमनर्थ इत्याशंक्याह। पराभवो देहादिनात्मस्वरूपाभिभवः। अज्ञानकृतस्तावद्भवति। तत्र हेतुः। यावत्क्रियाः स्युः तावदिदं मनो हि क
र्मस्वभावमेव स्यात्। येन कर्मात्मकेन मनसा ॥५॥

राम
१४

उक्तमुपसंहरति ॥ एवं पूर्वकृतं कर्म्मैकतंत्रं मनः कर्मभूतं मनः कर्मभूतं वशं प्रयुंक्ते पुनः कर्म निष्ठं करोति ॥ जीवन्मुक्तकर्पाव्यावृत्यर्थमाह
अविद्ययेति न केवलं देहयोगमात्रेणानर्थोऽन्तरं वेत्याह ॥ यदा गुणानामिंद्रियाणां इहात्मस्पृष्टा अयथा मिथ्यात्मीया न भवतीति विपश्चितं वि
वेकी मन्नं न पश्यति ॥ न पश्यतीति पाठे अयथा आत्मीयत्वेनेत्यर्थः ॥ ततस्तदा महस्मागतस्मृतिः स्वरूपस्मृतिभ्रंशः मनं अत्तो मूढः मैथुनस
खप्रधानं गृहं प्राप्य तापान्विंदति ॥ न तु यथोपयोगं स्त्रियामिथुनीभूय सुखमात्रमनुभवतः ॥ अतः तापाः स्युः ॥ तत्राह ॥ उभयति ॥ प्रत्येकं त

एवं मनः कर्मवशं प्रयुंक्ते अविद्ययात्मन्युपधीयमाने ॥ प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ यदा
न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ॥ गतस्मृतिर्विंदति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ॥ पुं
सः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रंथिमाहुः ॥ अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति
यदा मनोहृदयग्रंथिरस्य कर्मानुबद्धो दृढ आश्लथेत तदा जनः संपरिवर्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुं

योरेकैको हृदयग्रंथिरेवमेवं मिथः स्थूलमनं हृदययोर्ग्रंथिं द्वैमेयं वदंति ॥ कुत इत्यत आह ॥ अस्मात् मिथुनीभावात् ॥ प्रत्येकं हृदयग्रंथिन
तु देहेंद्रियमात्रेऽहं ममेति मोहः ॥ अस्मात्तु गृहादिभिर्विषयभूतैर्महान्मोहो भवेदित्यर्थः ॥ कदा कर्हि तस्य निवृत्तिरत आह ॥ यदास्य जन
स्य कर्मभिरनुबद्धो दृढो मनोरूपो हृदयग्रंथिः शिथिलो भवेत् तदास्मात् मिथुनीभावान्निवर्तते ॥ ततश्च हेतुमहंकारं त्यक्त्वा मुक्तः सन् परं
परं याति

हेतुमतिहायेत्युक्तं तत्र पंचविंशतिसाधनान्याह चतुर्भिः । हंसे मयि गुरौ भक्तिः सेवा अनुवृत्तिस्तत्परता विगततृष्णया सर्वत्र लोकांतरेऽपि व्यसनाव
गत्या दुःखानुसंधानेन । ईहानिवृत्त्या काम्यकर्मत्यागेन । मदर्थैः कर्मभिः अहमेव देवो येषां तैः संगात् । हे पुत्राः देहगेहयोरात्मबुद्धिः अहंममेतिबु
द्धिः । अध्यात्मयोगेन अध्यात्मशास्त्राभ्यासेन । सध्र्यक् सम्यक् । असंप्रमादेन कर्तव्यस्यापरित्यागेन । सर्वत्र मद्भावना तत्र विचक्षणेन निपुणेन

हंसे गुरौ मयि भक्त्याऽनुवृत्त्या वितृष्णया द्वंद्वतितिक्षया च । सर्वत्र जंतोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या । म
त्कर्मभिर्मत्कथया च नित्यं मद्देवसंगाद्गुणकीर्तनान्मे । निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः । अ
ध्यात्मयोगेन विविक्तसेवया प्राणेंद्रियात्माभिजयेन सध्र्यक् । सच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचां । स
र्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन । योगेन धृत्युद्यमसत्त्वयुक्तो लिंगं व्यपोहेत्कुशलोऽहमाख्यं । कर्मा
म शयं हृदयग्रंथिबंधमविद्ययासादितमप्रमत्तः । अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात्

विज्ञानविराजितेन अनुभवपर्यंतेन ज्ञानेन । योगेन समाधिना । धृत्युद्यमसत्त्वयुक्तः धैर्यप्रयत्नविवेकैर्युक्तः सन् अहंकाराख्यं उपाधिं व्यपोहे
त । निरस्येत् । ततः साधनादुपरमेदित्याह कर्माशयमेते यस्मिन् । योगेन उपायेन । यद्यपि फले सिद्धे साधनोपरमः सिद्ध एव तथापि यावद्दे
हपातं तदभ्यासशंकावारणायोक्तं ॥ ११ ॥

किंच । पुत्रान् पिता शिष्यान्वा गुरुः नृपश्च प्रजा एवमनुशिक्षयेत । मम लोकं यः कामयते यद्वा मदनुग्रह एवार्थो यस्य । विमन्युः शिक्षितस्याक-
र्णोपि कोपशून्यः । अतत्त्वज्ञात तत्त्वमविदुषः । श्रेयोर्थः कर्मसु मूढान् न योजयेदित्येतदुपपादयति । लोक इति त्रिभिः । नष्टदृष्टित्वे हेतुः
यदिति । निकामं अतिशयेन कामो यस्य तमीदृशमज्ञमुद्दिश्य हितं त्वेवकं हितं प्रवर्त्तयेत न कोपि । उत्पथेन गच्छन्तमन्धं यथा तेनैव गच्छेति कः
ब्रूयात् । समुपेतः संप्राप्तो मृत्युः संसारो येन तं ततो भक्तिमार्गोपदेशेन यो न मोचयेत स गुर्वादिर्न भवतीत्यर्थः । यद्वा यः हि मोचयितुं न

पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः । इत्थं विमन्युरनुशिष्यादतत्त्वान्न योजयेत्कर्मसु कर्ममूढा-
न् ॥ लोकः स्वयं श्रेयसि नष्टदृष्टिर्योर्थान्समीहेत निकामकामः ॥ अन्योन्यवैरः सुखलेशहेतोरनन्तदुःखं च न वेद मूढः
कस्तं स्वयं तदभिज्ञो विपश्चिद्विद्यायामन्तरे वर्त्तमानम् ॥ दृष्ट्वा पुनस्तमघृणः कुबुद्धिः प्रयोजयेदुत्पथगं यथान्धम् ॥ गुरुर्न स स्या-
त्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ॥ दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥ इदं शरीरं मम दुर्वि-
भाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः ॥ पृष्ठे कृतो मे यदधर्म आराद् अतो हि मामृषभं प्राहुरार्याः ॥

शक्नुयात् । अतस्तस्य गुर्वादिर्न स्यादिति निषेधः । ततश्च पिता न स्यादिति पुत्रोत्पत्तौ यत्नो न कार्य इत्यर्थः । दैवं देवता न स्यादिति पूजां न ग्राह्येत्यर्थः । एवम-
मदपि द्रष्टव्यम् । एवं मोक्षधर्माननुपदिश्य भ्रातृन् शुश्रूषमाणान् लक्षणया धर्मस्पर्द्धीति निवृत्तये तेषां जन्मकथनपूर्वकमाह द्वाभ्याम् ॥ इदं मत्स्वाकारं शरीरं मम दुर्वि-
भाव्यम् अवितर्क्यं मदिच्छाविलसितं न त्वहं शाकृतो मे ... इत्यर्थः । मे हृदयं यत्र धर्मः । किं तद् हृदयं यत्र धर्मः ततस्तु सत्त्वमित्यर्थः । कुतः यद्यस्मान्मया धर्मो

भा० पं
१६

भवंतस्तु मद्धृदयेन शुद्धसत्वमयेन जाताः । तस्मान्मत्सरं हित्वा महत्तमं मम सनाभं सोदरं भजध्वं । ननु त्वत्तस्त्वन्नात्तत्वां वयं भजेम राजन्तत्र त्वात्मना
स्वपालयामेति चेत्तत्राह । तदेव मे शुश्रूषणं प्रजानां च पालनं भरतानुवृत्त्यैव सर्वं कृतं स्यादिति भावः । इदानीं ब्राह्मणाश्च सेव्या इत्याशयेन
तेषां सर्वेभ्यः श्रेष्ठ्यमाह । पंचभिः भूतेषु चेतनाचेतनेषु विशिष्टं हंतीति वीरुधः स्थावराः उत उद्भिः अतिशयेनोत्तमाः । तेभ्योऽपि ये सरीसृपाः
सर्पंतीति जंगमाः तेऽत्तमा इति सर्वत्रानुषंगः । तेष्वपि सबोधनिष्ठाः स्थितिर्येषां पश्वादीनां ते कीटादिभ्यः ततः तेष्वपि मनुष्याः ततोऽपि प्रमथाः
प्रमथेतादयः । ततोऽपि गंधर्वाः ततः सिद्धाः ततोऽन्ये विबुधानुगाः किंनरादयः । तेभ्योऽसुराः देवाः असुरेभ्यः संधिरार्षः देवाश्च मघवत्प्रधानाः देवेभ्यः

तस्माद्भवंतो हृदयेन जाताः सर्वे महीयांसममुं सनाभम् । अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् । भूतेषु वीरुद्भ्य उदुत्तमा ये
सरीसृपास्तेषु सबोधनिष्ठाः ततो मनुष्याः प्रमथास्ततोऽपि गंधर्वसिद्धा विबुधानुगा ये । देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु
तेषां । भवः परः सोऽथ विरिंचवीर्यः स मत्परोऽहं द्विजदेवदेवः । न ब्राह्मणैस्तुलये भूतमन्यत् पश्यामि विप्राः किमतः परं तु । यस्मिन्नृभिः प्रहुतं
श्रद्धयाहमश्नामि कामं न तथाग्निहोत्रे ॥

इंद्रः श्रेष्ठ इत्यर्थः । ततोऽपि ब्रह्मसुता दक्षादयः तेषां मध्ये भवः परः श्रेष्ठः स भवः । विरिंचस्य सवीर्य
शक्तिकारणं यस्य स विरिंचवीर्यः अतस्तज्जनकत्वाद्विरिंचस्ततः पर इत्यर्थः । स विरिंचो मत्परः अहं परो यस्य । द्विजदेवा ब्राह्मणा एव देवाः
पूज्या यस्य सोऽहं । ब्राह्मणैस्तुलये तेन तुलये सममन्यत् पश्यामि अतो ब्राह्मणसदृशं भूतं किंचित् पश्यामि न किंचित् । विप्रा इति तत्रत्यानां ब्राह्मणानां राम
संबोधनं समसमेवाभावार्थेऽधिकं कुतस्त्यमित्यर्थः । तत्र हेतुमाह यस्मिन्निति यस्मिन् ब्राह्मणे श्रद्धया प्रकर्षेण हुतं अन्नादिकामं यथेष्टं अहमश्नामि १६

सेतन्मूर्त्तिर्वेदाख्यायेनब्राह्मणेनइहलोकेभूतायत्रचब्राह्मणेसत्वादयोष्टौगुणाः संतिनततःपरंकिंपश्यामीत्यन्वयः ॥ १४ ॥ निस्पृहत्वमाह
सन्तोपियेषांनकिंचित्स्वार्थनीयमस्तितेषामितरेणराज्यादिनाकिमुतस्वात्रकिमपि ॥ १५ ॥ तदेवंब्राह्मणसमानंविधत्ते ॥ हेसुताः सर्वाणिजंगमानि
स्थावराणिचभूतानिमदधिष्ठानतयावोयुष्माभिः ॥ संमाननीयानिपदेपदेत्तेषामर्हणेविविक्ताप्तामलादिरहितादृष्टिर्येषांतैः ॥ तदेवसमाहेणा

धृतांतनूमुशतीम्मेपुराणींयेनेहसत्वंपरमंपवित्रं ॥ शमोदमःसत्यमनुग्रहश्चतपस्तितिक्षानुभवश्चय
त्र ॥ १४ ॥ मत्तोप्यनंतात्परतःपरस्मात्स्वर्गापवर्गाधिपतेर्नकिंचित ॥ येषांकिमुस्यादितरेणतेषा
मकिंचनानांमयिभक्तिभाजां ॥ १५ ॥ सर्वाणिमद्धिष्ण्यतयाभवद्भिश्चराणिभूतानिसुताःध्रुवाणि
संभावितव्यानिपदेपदेवोविविक्तदृग्भिस्तदुहार्हणंमे ॥ १६ ॥ मनोवचोदृक्करणेहितस्यसाक्षात्कृतंमे
परिवर्हणंहि ॥ विनापुमान्येनमहाविमोहात्कृतांतपाशान्नविमोक्तुमीशेत ॥ १७ ॥

सर्वकर्म्मणांईश्वरार्पणंविधत्ते ॥ १६ ॥ मनोवचोदृशामन्येषांचकरणानांमीहितस्यव्यापारस्यमेपरिवर्हणंआराधनमेवसाक्षात्कृतं
फलं ॥ येनपरिवर्हणेनविनाकालपाशाद्विमोक्तुंनईशीतनसमर्थोभवेत ॥ १७ ॥

भा॰पं॰
१७

स्वतनयेष्वनुशिष्टानपि लोकानुशासनार्थमनुशास्य मुनीनां पारमहंस्यधर्ममुपशिक्षयिष्यन् ॥ भरतमभिषिच्य ऋषभ इत्यपदेशो नाम यस्य भगवान्ब्रह्मावर्तात्स्व
देशात्प्रवव्राजेत्यन्वयः उर्वरितोऽवशिष्टः शरीरमात्रपरिग्रहो यस्य ॥ २८ ॥ अभिभाष्यमाणोऽपि जनानां मध्ये जडादिवद्वर्तमानस्तूष्णीं बभूव ॥ अवधूतस्येव वेषो
यस्य ॥ २९ ॥ तत्र पुरादिष्वनुपथं मार्गे मार्गे अवनिचरापसदैर्दुर्जनादिभिः परिभूयमानोऽपि तदविगणयन्नेवैकचर एकाकी पृथिवीं परिबभ्रामेत्यन्वयः ॥ तत्र पु
रं नगरं ग्रामो हट्टहीनः आकरः खनिः शिबिरं कृषीवलग्रामः वाटः पुष्पादिवाटिका शिबिरं सेनायावासस्थानं व्रजो गवां स्थानं घोषो गोपानां सार्थो यात्रिकज

नैमर्ज

मूल ॥ एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरत
कर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणी
पालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेशः आत्मन्यारोपिताऽऽहवनीयो ब्रह्मावर्ता
त्प्रवव्राज ॥ २८ ॥ जडांधमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव ॥ २९ ॥ तत्र तत्र पुरग्रामा
कराखेटवाटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमव ॥ निचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेह
नष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थाने एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिम्ना
वस्थानेनासमारोपिताहंममाभिमानत्वादविखंडितमनाः पृथिवीमेकचरः परिबभ्राम

नसंस्थानः ॥ आश्रमा ऋषीणां तर्जनं भयजननं ताडनं प्रहारः ॥ अवमेहनं उपरि मूत्रणं ष्ठीवनं थूत्कृतश्लेष्मप्रक्षेपः पूतिवातोऽधोवायुः दुरुक्तं शापः एतैः अ
गणने दृष्टान्तः ॥ मक्षिकाभिरिवेति तत्र हेतुः असति मिथ्याभूते संस्थाने सन्निवेशे देहे इत्युपलक्षणमात्रं करोति यस्य सदित्यपदेशमात्रं यस्य तस्मिन्निरभिमान
त्वात् ॥ केन हेतुना उभयोः ॥ सदसतोर्योऽनुभवस्तत्स्वरूपेण यः स्वमहिम्नोऽवस्थानं तेन अत एवाखंडितमना यस्समः परिबभ्राम ॥ ३० ॥

राम
१७

एवं च तदा ग्रहगृहीत इवादृश्यत ॥ तत्र हेतुः पराक्पृष्ठतो वलंबमानाश्च ते कुटिलाश्च कपिशाश्च केशाः तेषां भूरिभारो यस्य सः ॥ अवधूतमनाहृ
तत्वृत एव मलिनं निजशरीरं तेन कथंभूतोप्येवमदृश्यत ॥ अतिसुकुमाराणि करचरणोरःस्थलानि तथा विपुला बाह्वंसादयः तएवावयवाः ते
षां विशिष्टो न्यासः सन्निवेशो यस्य सः ॥ तथा प्रकृत्यैव सुंदरः स्वभावस्निग्धहासः तेन श्रीमन्मुखं यस्य तथा नवनलिनदलवदाचरंती ये शिशिरतारे ताप
हारिके नीनिके अरुणे आयते नयने ताभ्यां रुचिरः ॥ तथा सदृशाः अन्यूनाधिकाः सुभगाश्च कपोलकर्णकंठनासिका यस्य तथा विगूढस्मितं यद्वदनं त

अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः प्रकृतिसुंदरः स्वभावहाससुमुखो नवनलिन
दलायमानशिशिरतारारुणायतनयनरुचिरः ॥ सदृशसुभगकपोलकर्णकंठनासो विगूढस्मितवदनमहोत्सवेन पुरव
नितानां मनसि कुसुमशरासनमुपदधानः ॥ पराग्वलंबमानकुटिलजटिलकपिशकेशभूरिभारः अवधूतमलिननिजशरी
रेण ग्रहगृहीत इवादृश्यत ॥ ३१ ॥ यर्हि वाव स भगवान् लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सि
तमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद्देशः ॥ ३२ ॥

स महोत्सवेन विभ्रमेण पुरांगनानां मनसि कामम् उद्दीपयन् एवंभूतोपि तथा दृश्यते इत्यन्वयः ॥ ३१ ॥ यर्हि यदा लोकं जनं योगस्य प्रतिपक्षमाचक्षाणः पश्यन्
वक्ष्यमाणस्य प्रतिक्रियाकरणं च निंदितमित्याचक्षाणः ॥ तदा आजगरं व्रतमास्थितः सन् शयान एवाश्नाति इत्यन्वयः ॥ आजगरं व्रतं नाम एकत्रैव स्थित्वा प्रा
रब्धकर्मोपभोगः ॥ अवमेहति मूत्रयति हदति पुरीषमुत्सृजति ॥ उच्चरिते पुरीषे चेष्टमानो विलुठन् तेनैवादिग्धा आलिंगिता उद्देशाः देहप्रदेशा यस्य सः ॥ ३२ ॥

बीभत्समिवाशंक्याह । तस्येति पुरीषस्य सुरभिणा गंधेन सौगंध्यं यस्य स वायुः ॥ ३३ ॥ एवं गवादिचर्यया पानादि करोति स्मेत्याह । व्रजन्निति
ति काकमृगगवामिवान्यदपि चरितं वृत्तिर्यस्य नानायोगचर्याश्चाचरतीति तथा लोकयात्रापरिहाराय योगिभिरेवं वर्तितव्यमिति प्रदर्शनाय तत्
था कृतवान् वस्तुतस्तु भगवान् यतोऽविरतः परममहानंदानुभवरसात्मत्वेनोक्तस्थानंदः तदनुभवस्वरूपः । किं च वासुदेवे आत्मनोऽव्यव

तस्य ह यः पुरीषसुरभिसौगंध्यवायुस्तं देशं दशयोजनं समंतात्सुरभिं चकार ॥ ३३ ॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासी
नः शयानः काकमृगगोवच्चरितः पिबति खादत्यवमेहति स्मेति नानायोगचर्याचरणो भगवान्कैवल्यपतिर्ऋषभोऽवि
रतपरममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानानंतरोदरभावेन सिद्धस
मस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवांतर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसा नृप हृद
येनाभ्यनंदत ॥ ३४ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते पंचमोऽध्यायः ॥ ५ ॥

धानेनाभेदेन न विद्यते अन्येषामपि अंतरायमध्ये उदरस्य उदरे ह्युपाधेर्भावस्तेन नित्यनिवृत्तोपाधित्वेनेत्यर्थः । स्वत एव सिद्धैः समस्तैरर्थैः फलैः
परिपूर्णत्वाद्योगैश्वर्यादिना अभ्यनंदत । विहायसं खे विचरत्वं मनोजवं मनसः वेगः दूरग्रहणं दूरदर्शनं हृन्नृप हृदयेन मनसा ॥ ३४ ॥ इति पं
चमे पंचमः ॥ ५ ॥

षष्ठे लीनाभिमानस्य देहत्यागक्रमाभिधा ॥ अदर्हं तरवाग्निर्यः पश्यन्नपि न पश्यति ॥ योगैश्वर्याणि नाश्यानंदत इत्युक्तं तत्र पृच्छति ॥ भगवन् हे भग
वन् योगेन समीरितमुद्दीपितं यत् ज्ञानं तेन नावमर्जितानि दग्धानि कर्मबीजानि येषां तेषां यदृच्छया प्राप्तानि योगैश्वर्याणि पुनः क्लेशदानि
भवितुं नार्हन्ति अतः किमिति नाश्यानंदत इत्यर्थः ॥१॥ अंगीकृत्य परिहरति सत्यमिति ॥ एके तु द्विमतः ॥ अनवस्थानस्य चंचलस्य मनसो विक्षि

राजोवाच ॥ ननूनं भगवन् आत्मारामाणां योगसमीरितज्ञानावमर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदा
नि भवितुमर्हन्ति यदृच्छयोपगतानि ॥१॥ शुक उवाच ॥ सत्यमुक्तं किं त्विह वा एके न मनसोद्धा विस्रंभमन
वस्थानस्य शठकिरात इव संगच्छते ॥२॥ तथा चोक्तं न कुर्यात् कर्हिचित् सख्यं मनसि ह्यनवस्थिते
यद्विस्रंभाच्चिराच्चीर्णं चस्कंद तप ऐश्वरम् ॥३॥ ॥

संगच्छेते ॥ न सम्यक् प्राप्नुवंति शठः किरातो यथा व्याधे तेषामपि मृगेषु शठे किराते यथा मृगा इति सन्नमपं तं वा ॥ पाठांतरे शठो वंचकः किरातो वनि
कृव्यवहर्त्रे यथा अस्मिन् विश्वासव्यवहर्त्री विश्वासं न याति इत्यर्थः ॥ पात्रितैः कोशोषा वर्जनीय इत्युपदेशं नाश्यानंदत इति भावः ॥२॥ यद्विस्रंभात् यस्य
विस्रंभात् चिराच्चीर्णं बहुकालं संचितं तपः चस्कंद शुश्राव ॥ एष्वर्य विस्मो मोहिनी रूपदर्शनेन ॥ यद्वा ऐश्वराणां समर्थानामपि सौभरिप्रभृतीनां
तपः ॥३॥

तत्र हेतुः नित्यमिति। कृतविश्रम्भो योगी तदीयं मनः कामस्य तमनु येऽरयस्तेषां च छिद्रमवकाशं ददाति यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जारादीनामवकाशं दत्वा पतिं घातयति तथा मनोपि कामादिभिर्योगिनं भ्रंशयतीत्यर्थः ॥४॥ अरीन् कथयन्नुपसंहरति। काम इति। यन्मूलः यन्निमित्तो भवति तन्मनः को नु बुधः स्वीकुर्यात् स्वाधीनमिति मन्येत ॥५॥ प्रासंगिकं समाप्य प्रकृतमाह अथेति। अखिलानां लोकानां ललामो मंडनभूतो

नित्यं ददाति कामस्य च्छिद्रं तमनु येऽरयः। योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥४॥ कामो मन्युर्मदो लोभः शोकमोहभयादयः। कर्मबंधश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ॥५॥ अथैवमखिललोकपालललामो विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमनुशिक्षयन् स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥६॥ तस्य ह वा एवं मुक्तलिंगस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः ॥७॥

पि उपरताबाधितानुवृत्तिर्यस्मात्स उपरराम देहाभिमानं जहौ। यैर्विलक्षणैरलोकपत्कैरवधूतवेषादिभिरविलक्षितो भगवत्प्रभावो यस्मिन्। सांपरायविधिं देहत्यागप्रकारं। आधाराधेयव्यावृत्तिमाह अनर्थांतरभावेन अभेदेन। उपासनाव्यावृत्त्यर्थमाह असंव्यवहितमनसा स्वयं तस्यैव। स्वयं तस्य त्यक्तेप्यभिमाने केनापि संस्कारेण देहः प्रचलति यथा कुलालचक्रं सोयमभिमानाभासस्तेन। एवं जीवन्मुक्तानामविद्यावासना भवतीति ततो विशेषः

कोकारीनूदेशान्नागतः सन् कयापि वा मनया आसेकृतः अस्मकवलोपेन अयं संवीतो नग्नः ॥ ७ ॥ समीरवेगेन विधूतानां वेणूनां संघर्षणेन जातेगौरेदवानलः आलेलिहानः सर्वतो ग्रसन् ॥ ८ ॥ अक्षधूतवेषेणाक्रमणमरेवस्त्र आगतः त्येनस्पास्त्रवकमाह ॥ यस्य किलाश्रमानो तमत्तचरितं तद्देशावासिस्य उपाकार्ये अर्हन्निति नाम यस्य स राजा स्वयं नत्र उपशिक्षितोवाक्रपथश्चात्मापाखंडवतनिजमनीषया प्रवर्त्तयिष्य

कोकंवककुटकानूदक्षिणकर्णाटकानूदेशानूयदृच्छयोपगतः कुटकाचलोपवनआस्यकृतादमकवलउन्मादइव मुक्तमूर्द्धजो संवीतएव विविचार ॥ ७ ॥ अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सहतेन ददाह ॥ ८ ॥ यस्य किलानुचरितमुपाकर्ण्य कोकवकुटकानां राजार्हन्नामोपशिक्ष्य कलावधर्मउत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाखंडमसमंजसं निजमनीषया मंदः संप्रवर्त्तयिष्यते येन ह्वावकलो मनुजापसदा देवमायामोहिता स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजनिजेच्छया गृह्णाना अस्नाना चमनाशौचकेशोपलुंचनादीनीति कलिनाः अधर्मवहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुष लोकविदूषकाः प्रायेण भविष्यति ॥ ८ ॥

तदत्ययः तत्रहेतुः कलावित्यादि भवितव्येन प्राणिनां पूर्वसंचितपापफलेन ॥ ॥ संप्रवर्त्तकेन मनुष्यपसदा निकृष्टाः स्वविधिनानियोगोयस्मिन् शौचचारित्रेतद्विहीनाः देवावहेलनारूपाण्व्रतानि गृह्णाना वेदादीनां विदूषका भविष्यति ॥ ११ ॥

भा॰पं॰
२०

तत्कालेच बाधितमः प्राप्नुयतीत्याह ॥ शूर्वीकृतनयाश्रुवेदमूलयानिजलोकयात्रया न्वेच्छाकृतप्रवृत्त्यागां शवतां कतविहावामाः ॥१४॥ नन्वतत्यन
थ्येकाली किमध्याग्रमृषभावतारः तत्राह ॥ अपिति ॥ जोव्याप्नानां जनानां मोहनमार्गोपशिक्षणार्थः तस्यैवैवल्यापशिक्षणाप्याऽप्यपात ॥१२॥ अ
थिकं प्रणयपतिनूतज्ञारतं वर्षं ऋषभाद्यवतारप्रत्तानिकमेणि ॥१५॥ प्रियव्रतस्य वंशः अवदातः शुद्धः ॥ यत्र वंशोयद्यस्मात अकार्योमोक्षहेतु

तेचशूर्वीकृतनयानिजलोकयात्रायांः धर्मपरंपरायाशवतां त्वमपधेत्वयमेवप्रपतिष्याति ॥११॥ अयमवतारोरजसोपप्लु
तकैवल्योपशिक्षणार्थः ॥१२॥ तस्यानुगुणानुश्लोकाननुगायति ॥१४॥ अहोभुवः सप्तसमुद्रवत्याद्वीपेषु वर्षेष्वधिपुण्यमे
तत् ॥ गायंति यत्र [illegible] तजनाः मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥१५॥ अहोनुवंशोयशसावदातः प्रैयव्रतोयत्रपुमान्
पुराणः कृतावतारः पुरुषः स आद्यश्चचारधर्मं यदकर्महेतुं ॥१६॥ कोन्वस्यकाष्ठामपरोनुगच्छेन्मनोरथेनाः प्यभवस्ययोगी
योयोगमायाः स्पृहयत्युदस्ता ह्यसत्तया येनकृतप्रयत्नाः ॥१७॥ इतिहस्मसकलवेदलोकदेवब्राह्मणगवांपरमगुरोर्भ
गवतऋषभाख्यस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामंगलायनमिदमनुश्रद्धयोपचितया
नुशृणोत्याश्रावयतिवाः वहितो भगवति तस्मिन् वासुदेव एकांततो भक्तिरनयोरपि समनुवर्तते ॥१८॥

तस्य धर्ममवचार ॥१५॥ अपरः कोनुयोगी अस्यकाष्ठां स्थितिं मनसाप्यनुगच्छेत ॥ योयोगी येन ऋषभेणासत्तयाऽवस्तुत्वेन उदस्तानिरस्ता योगमायाः सिद्धि
र्वांछति ॥ कथंभूताः कृतः प्रयत्नो याभिस्तद्भजनार्थं यत्नं कुर्वन्तीत्यर्थः ॥ यद्वा कथंभूता उदस्ताः कृतप्रयत्नाः अवितृप्यन्ताः अपीत्यर्थः ॥१५॥ विशुद्धाचरि
तेयत ईरितं कथितं तत्समस्तदुश्चरिताभिहरतीति तथा परममहामंगलानामयनं च ॥ अवहितः सन् अनयोरपि श्रोतृश्रावयित्रोरविशेषेण भक्तिः

राम
२०

मन्के्रपरमपुरुषार्थमाह ॥ यस्यामन्कावेवनरुयोगादिषु ॥ अनुसवनमविरतमात्मानं तापयन्नः स्वयमेवासादितमपि अर्थितं भागवतास्स्वयमेवही
यमानमपि ॥ १७ ॥ अनादरे हेतुः भगवदीयत्वेनैव परितः समाप्ताः सम्यक् पूर्णाः सर्वे पुरुषार्था येषां ते ॥ १८ ॥ ननु भगवत इति सुलभत्वं दर्शनात्मो
क्षस्य यातिदुर्लभत्वादित्याशंक्याह ॥ हे राजन् भवतां पांडवानां यदूनां च पतिः पालकः ॥ गुरुः उपदेष्टा दैवं उपास्यः प्रियः सुहृत
कुलस्य पतिः नियंता किंबहुना क्वचित्कदाचिद्दौत्यादिषु वः ॥ पांडवानां किंकरोपि अस्तु नाम एवं तथापि एषां नित्यं भजतामपि

यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयन्तस्तयैव परया निर्वृत्या
ह्यपवर्गमात्यंतिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियंते ॥ १७ ॥ भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥ १८ ॥ राज
न्पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः ॥ अस्त्वेवमंग भगवान् भजतां मुकुंदो मुक्तिं ददाति कर्हि
चित्स्म न भक्तियोगं ॥ १९ ॥ नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ॥ लोकस्य यः करुणयाऽभ
यमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥ २० ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते षष्ठोध्यायः

मुक्तिं ददाति न तु कदाचिदपि सप्रेमभक्तियोगं ॥ १९ ॥ वर्णितमृषभावतारं नमस्करोति ॥ नित्यमनुभूतं यन्निजरूपं सुखलाभः तेन निवृत्ता तृष्णा यस्य सः
अतद्रचनया देहाद्यर्थमनोरथेन श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य जनस्य करुणया यो निर्भयमात्मस्वरूपं पथ आख्यातवान् तस्मै ऋषभाय नमः
इति श्रीभागवते पंचमस्कंधे षष्ठोध्यायः ॥ ६ ॥

भा॰प॰
११

अध्यायानां त्रये योसौ ऋषभाख्यानमीरितं । अष्टभिर्भरताख्यानमतः प्रस्तूयतेऽमृतं । सप्तमे भरतो राज्ये चिरं यत्तैर्हरिं यजन् । आरब्धकर्मनिर्वाणो हरिक्षेत्रे समजद्धरिं ॥१॥ सचिंतितः संकल्पे संकल्पेनैव राज्याहीति प्रयुक्तः । आत्मनोनुरूपात भूतादिरहंकार इव भूतसूक्ष्माणीति संततिदृष्टांतः ॥२॥ ॥३॥ भारतमिति स्वनाम्नो व्यापकत्वेन धर्माद्यतिशयः सूचितः ॥४॥ बहुवित्सर्ववित्तः यज्ञाः स्वरूपाः तद्रूपं उच्चावचैर्महद्भिरल्पैश्च क्रतुभिः श्रद्धया

श्रीशुक उवाच ॥ भरतस्तु महाभागवतो यदा भगवतावनितलपरिपालनाय संचिंतितः तदनुशासनपरः पंचजनीं विश्वरूपदुहितरमुपयेमे ॥१॥ तस्यामु ह वा आत्मजान्कार्त्स्न्येनानुरूपानात्मनः पंच जनयामास भूतादिरिव भूतसूक्ष्माणि ॥२॥ सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति ॥३॥ अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशंति ॥४॥ स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनुवर्तमानः पर्यपालयत् ईजे च भगवंतं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना ॥५॥

ईजे च ॥ तानेवाह ॥ आहृताः स्वाधिकारेणात्मसात्कृताः येऽग्निहोत्रादयः ॥ तेषां प्रकृतिविकृतिभिः अग्निहोत्रादयो द्विविधाः सकलांगयुक्ताः प्रकृतयः विकलांगाः विकृतय इति तैर्द्विविधैरपीष्टवानित्यर्थः ॥ अनुसवनमि ॥ तं वा चातुर्होत्रविधिनेत्यंतं वाक्यं ॥५॥

रा॰म
११

किंचमखपंचरत्नप्रवर्त्तमानेषुनानायोगेषुविचरितात्रनुष्ठिताङ्गक्रियायेषांतेषुयज्ञाहदेवएवभावयमानस्त्रिंतयन्नूमयजमानोयत्नमाज्ञोयदे
वाः॥ मुर्यादयज्ञानुष्ठानपुरुषस्यवासुदेवाप्यावयवेषुवक्रुगादिष्विभिःध्यायन्॥ नतत्स्थानेनेत्यन्वयः॥ अपूर्वपक्षद्वयंमीमांसकानां॥ तदानीमेवशुद्धं
त्वेनोत्पन्नंफलमेवापूर्वंकालांतरफलोत्पादिकाकर्मशक्तिर्वेति॥ तदुक्तं॥ यागादेवफलंसिद्धिशक्तिद्वारेणसिद्ध्यति॥ सूक्ष्मशक्त्यात्मकंवाऽपिफलमेवो
पजायतइति॥ तदेवाहक्रियाफलंधर्माख्यमितिच॥ ननुयद्यागदेवताःकर्मप्रधानमिगतंतर्हिकिमिष्टमपूर्वंस्यात्॥ तदुक्तं॥ कर्मभ्यःप्रागयोग्यस्यकर्म
णःपुरुषस्यवा॥ योग्यताशास्त्रगम्यायापरासाऽपूर्वमिष्यतइति देवताप्रधानंकर्मतद्देवताराधनार्थंतदादेवताप्रसादरूपत्वादपूर्वस्यदेवताश्रयत्व

मंत्रप्रवरात्मनायागेषुविचरितांगक्रियेषुपूर्वंयत्नात्क्रियाफलंधर्माख्यंपरेब्रह्मणियत्नपुरुषेसर्वदेवतालिंगानांमंत्राणांसर्व
नियामकतयासाक्षान्नात्मकेऽपिपरदेवतायांभगवतिवासुदेवएवभावयमानआत्मनेपुरुषप्रदितकषायोहविःप्रभृतिभिर
त्यमाणेषुमयजमानोयत्नमाज्ञोदेवास्तानुपुरुषावयवेष्वध्यायत॥६॥

मेवयुक्तंकर्मभ्यःप्रागयोग्यस्यपुरुषस्याद्यपूर्वस्येवत्रीत्याद्याश्रयत्वंकृतोवासुदेवाश्रयमपूर्वंभावयति॥ उच्यतेयागादिकर्तृनिष्ठमपूर्वंतर्हिवासुदेव
स्यांतर्यामिणःप्रवर्तकत्वेनमुख्यकर्तृत्वात्तदाश्रयमेवापूर्वंनतुतत्प्रयोज्ययजमानाश्रयं॥ शास्त्रफलंप्रयोक्तरीतिन्यायात्॥ अन्यथाऽत्मविज्ञानमप्यपू
र्वाश्रयत्वप्रसंगात्॥ तदेवाहसाक्षात्कर्तरीति॥ देवाश्रयत्वेऽपिवासुदेवाश्रयत्वमभोक्तृ॥ परदेवतामितिपरदेवतात्वेहेतुःसर्वदेवतालिंगानांतत्तद्देवताप्र
काशकानांमंत्राणांयेऽर्थाइंद्रादिदेवतास्तेषांनियामकतयातस्येवप्रसादनीयत्वात्॥ फलदातृत्वाच्चपुरुषमेवापूर्वाश्रयत्वमित्यर्थः॥ एवंभावनमेवात्म
नोनैपुण्यंकौशलंतेनमृदिताःक्षीणाःकषायाःरागादयोयस्यअध्वर्युभिरितिवहुवचनंनानाकर्माभिप्रायेण॥६॥

एवंभूतया कर्मविशुद्ध्या विशुद्धसत्वस्य भक्तिरजायतेत्यन्वयः ॥ अन्तर्हृदये य आकाशः स एव शरीरमभिव्यक्तिस्थानं यस्य तस्मिन् ब्रह्मणि कीदृशे
महापुरुषस्योपलक्षणमाकारो यस्य तस्मिन् किं च श्रीवत्सादिभिरुपलक्षिते निजपुरुषाणां नारदादीनां हृदि लिखितवत्स्थितं तया स्थितेन उ
क्तेन पुरुषरूपेणात्मनि हृदये मनसि विरोचमाने कीदृशी भक्तिः ॥ उत्पन्नातिशयेन एधमानो रयो वेगः प्रकर्षो यस्याः ॥ ७ ॥ एवमयुतसहस्रं वर्षाणा

एवं कर्मविशुद्ध्या विशुद्धसत्वस्यान्तर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीव
त्सकौस्तुभवनमालारिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां
भक्तिरनुदिनमेधमानरयाजायत ॥ ७ ॥ एवं वर्षायुतसहस्रपर्यन्तावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्व
तनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसंपन्निकेतात्स्वनिकेतात्पुलहाश्रमं प्रवव्राज ॥ ८ ॥ यत्र
ह वाव भगवान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन सन्निधाप्यत इच्छारूपेण ॥ ९ ॥ यत्राश्रमपदान्युभय
तो नाभिभिर्दृषच्चक्रैः चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥ १० ॥

मयुतानि तेषां सहस्रं तत्पर्यन्तकालोऽवसितो निश्चितः क
र्मनिर्वाणावसरः राजभोगादुपसमाप्तिसमयो येन सः अधिभुज्यमानं रिक्थं धनं यथाविभागं विभज्य सकलसंपन्निकेतात् आश्रयात् स्व
गृहात् पुलहाश्रमं हरिवर्षक्षेत्रं प्रवव्राज ॥ ८ ॥ यत्र क्षेत्रे विद्याधरकाण्डे वात्सल्यकर्तृत्वेन सन्निहितः क्रियते भक्तानामपेक्षितेन रूपेण सन्निहितो भवती
त्यर्थः ॥ ९ ॥ आश्रमस्थानानि उभयत उपर्यधश्च नाभिर्येषां तैश्च दृषच्चक्रैः शिलामध्यगतैश्चक्रैः चक्रनदी गण्डकी सरितां श्रेष्ठा पवित्रीकरोति ॥ १० ॥

एकलः एकः आराधनं समीहमानः कुर्वाणः ॥ विविक्तः शुद्धः अत एव उपरतो विषयाभिलाषो यस्य उपभृतः संवृद्धः उपशमो यस्य ॥ ११ ॥ प्रव-
र्द्धमानानुरागस्य भरेण यत् द्रुतं द्रवीभूतं हृदयं तस्मिन् शैथिल्यमनुद्यमो यस्य आत्मनि देहे उद्भिद्यमानरोमपुलककुलकं रोमावृन्दं यस्य
ककारः समासान्तः ॥ औत्कंठ्यात्प्रवृत्तेन प्रणयबाष्पेणानिरुद्धावलोकौ ययोः ते नयने यस्य सः ॥ एवं वर्त्तमानस्तामपि भगवत्सपर्यां न सस्मा-

तस्मिन्वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिशलयतुलसिकांबुभिः कंदमूलफ-
लोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवा-
प ॥ ११ ॥ तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्यु-
द्भिद्यमानरोमपुलककुलक औत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारवि-
दानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगंभीरहृदयह्रदावगाढधिषणस्तामपि क्रियमाणां भग-
वत्सपर्यां न सस्मार ॥ १२ ॥

रेत्यन्वयः ॥ निजरमणस्य हरेः रीतिरारान्तेर्थे ऽरुणे चरणारविंदे तयोरनुध्यानेन परिचितः समृद्धो भक्तियोगः
तेन परिप्लुतः सर्वतो व्याप्तः परमाह्लादः परमानंदो यस्मिन् गंभीरहृदयह्रदे तस्मिन्नवगाढा निमग्ना धिषणा यस्य ॥ १२ ॥ गोपालाय नमः

धृतानि भगवद्व्रतानि येन स भगवन्तं सूर्यमंडलेऽभ्युपतिष्ठन्नेतदुहोवाचेत्यन्वयः ॥ का ॥ एणो हरिणस्तस्याजिनेनैवैणेयं तदेव वासस्तेनानुसव
नाभिषेकेणार्द्राः कपिशाश्च याः कुटिला जटास्तासां कलापेन च विरोचमानः सूर्यर्चा काशिकर्या ऋचा वा हिरण्मयं ध्येयः सदा सवितृमंडल
मध्यवर्तीत्यादिनोक्तं ॥ उज्जिहाने उद्गच्छति सति ॥ १३ ॥ सकारांतपाठे सन्नतत्यवाच्यं चकारार्थस्तु स एव ॥ परोरजसः प्रकृतेः परं शुद्धसत्वात्मकं सवितुः

इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः
सूर्यर्चा भगवंतं हिरण्मयं पुरुषमुज्जिहाने सूर्यमंडलेऽभ्युपतिष्ठन्नेतदुहोवाच ॥ १३ ॥ परोरजः सवितुर्जा
तवेदो देवस्य भर्गो मनसेदं जजान ॥ सुरेतसादः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिंगिरामिमः ॥ १४ ॥
इति श्रीभागवते महापुराणे पंचमस्कंधे भगवत्परिचर्यायां सप्तमोऽध्यायः ॥ ७ ॥

देवस्य सूर्यस्य भर्गः स्वरूपभूतं तेजः ॥ जातो वेदो धनं कर्मफलं यस्मात् कर्मफलप्रदमित्यर्थः अत्र हेतुः यन्मनसैवेदं विश्वं जजान ससर्ज पुनश्च
अदः सृष्टं विश्वमंतर्यामिरूपेणाविश्य विश्वपरध्यानं कामयंतं हंसं जीवं सुरेतसा विचक्षणया विचष्टे पश्यति पालयतीत्यर्थः नृषदि रति उपाधितया
तिष्ठतीति ॥ नृषदि रति उपाधितया तिष्ठतीति नृषद्बुद्धिः तस्यां रिंगाणं गतिमतीति नृषद्रिंगिराणां वा बुद्धिरतीत्यपूर्ववद्रूपत्वाभावः तद्रिंगिरां इमः शरणं
व्रजामः ॥ १४ ॥ इति पंचमे सप्तमः ॥ ७ ॥

अदृष्टे प्रजने ते विद्धं तस्य कर्म्मेतदायतः ॥ एतदर्थं मया प्रसन्नात्प्रजातमेणाल्पमीर्ष्यते ॥ ११ ॥ कृपयापि कृतः संगः पतनायैव योगिनः ॥ इति श्रुर
णायत्राहं भरतस्येन पोषणं ॥ ११ ॥ नैयमिकनित्यनैमित्तिकविधिप्रायश्चित्तावश्यकं अर्थप्रायश्चित्तं सूर्योत्सर्गादि ॥ स्नानमभिषेकादिकं येन ॥ ब्रह्मा
क्षरं प्रणवं जपन् ॥ उदकांते नद्यास्तीरे ॥ जलाशयाभ्याशं नद्याः समीपे ॥ पेपीयमाने अत्याशं क्लाम्यमाने पतितावदेव तन्मृगेणैव ॥ ब्रह्मा

शुक उवाच ॥ एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकांत उपविवेश
तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम ॥ तया पेपीयमान उदके तावदेवाविदूरेण नद
तो मृगपतेरुन्नादो लोकभयंकर उदपतत् ॥ तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभ
याभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात्सहसैवोच्चक्राम ॥ तस्या उत्पतंत्या अंतर्वत्न्या उरुभयावगलितो यो
निनिर्गतो गर्भः स्रोतसि निपपात ॥ तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्दर्यां कृष्णसारसती नि
पपात ॥ अथ च ममार ॥

अविदूरेण सन्निधौ ॥ मृगपतेः सिंहस्य उन्नादो महान्नादः उदपतत उत्थितः ॥ प्रकृत्या स्वभावत एव विक्लवा व्याकुला सुत
रां हरिभयस्याभिनिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः पारिप्लवदृष्टिः परिभ्रांतनेत्रा ॥ अगता तृषा तरयस्याः उच्चक्राम नदीमुल्लंघितवती अंतर्वत्न्या ग
र्भिण्या उरुभयेन महाभयेन अवगलितो योनेर्निर्गतं सन् स्रोतसि प्रवाहे निपतितः ॥ तत्प्रसवो गर्भपातः उत्सर्पणमुल्लंघनं भयं एतैः खेदेनातुरा पीडिता
दर्यां गिरिगुहायां हरिणवधूः पपात ॥ अथानंतरं मृता च

भा॰पं
२४

एणकुणकं हरिणबालकं । अपविद्धं बंधुभिस्त्यक्तं । इति एतैः कुणकत्वादिहेतुभिर्यानुकंपा तया अनयत । कृतो निजः स्वीय इत्यभिमानो येन
पोषणं तृणादीनां पालनं वृकादिभ्यो रक्षणं प्रीणनं कंडूयनादि लालनं तु चुंबनादिना आदिना । एतैर्यदनुध्यानं सा आशक्तिः तत आत्मनो नियमः स्ना‍ना
दयः । यमा अहिंसादयः । तत्सहिता ईश्वरपरिचर्यादयश्च प्रत्यहमेकैकशो वियुज्यमानाः सन्तः कतिपयेनाहर्गणेन सर्वे उत्सन्ना बभूवुः । आशक्तिं

तत्वेणकुणकं कृपणं स्रोतसानूह्यमानमभिवीक्ष्यापविद्धं बंधुरिवानुकंपया राजर्षिर्भरत आदाय मृतमातरमित्याश्रम
पदमनयत् । तस्य ह वा एणकुणक उच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेना
त्मनियमाः सहयमाः पुरुषपरिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥ अहो बतायं
हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बंधुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापित
रौ भ्रातृज्ञातीन्यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पोषणपालनप्रीणनलाल
नमनसूयुनानुष्ठेयं शरण्योपेक्षादोषविदुषा । नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुत
रानुपेक्षन्ते ॥ ॥

प्रपंचयति । अहो इत्यादि कृतानुष्ठेयं इत्येतत्पर्यंतेन । ईश्वररथचरणः कालचक्रं तस्य परिभ्रमणवेगेन स्वगणादिभ्यो विभ्रंशितः ।
मा इति मा च शरणं प्रापितः । मामेव मातापित्रादिबुद्ध्या उपेयाय प्राप्तः यौथिकान् यूथसंघातिनः अनसूयुना एतत् त्विभिन्नं न मम स्वार्थो भ्रश्यतीति दोषदृष्टि
मकुर्वता । तदेवाह नूनं हीति ॥ ॥

राम
२४

इति एवं कृतोऽनुषंगः आसक्तिर्येन ॥ मृगजहुना मृगापत्येन सह स्नेहेनानुबद्धं हृदयं येन ॥ स्नेहानुबंधमेव प्रपंचयति कण्ठमेत्यादिना ह्रियमाणमध्यतीतं
तेन ॥ शालावृकाः श्वानः ॥ परामर्षशोकभावो भवति तदा तेन सह वने मम विशतिरित्यतिशयितः प्रणयभरो यस्य तत् हृदयं यस्य सः ॥ १४ ॥ १५ ॥ १६ ॥ वर्षपति
भरतः प्रकृतिस्थेन स्वस्थेन स्वविहितस्नानभूयात ॥ १७ ॥ अमंदं रारदर्शनेन शोकहरणाय यथा भवेत्तथैव मनः शोकान्निर्गतिरिति होवाचेत्यन्वयः ॥ अपि तिर्येषणाश्च तैर्नष्टको

इति कृतानुषंग आसनशयनाटनस्थानाशनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ १४ ॥ कुशकुसुमसमित्पलाश
फलमूलादिकान्याहरिष्यमाणो वृकशालावृकादिभ्यो भयमाशंसमानः सह हरिणकुणकेन वनं समाविशति ॥ १३ ॥ प
थिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणयभरहृदयः कार्पण्यात् स्कंधेनोद्वहति ॥ १४ ॥ एवमुत्संग उरसि चाधायोप
लालयन्मुदं परमामवाप ॥ १५ ॥ क्रियायां निर्वर्त्यमानायामंतरालेऽप्युत्थायोत्थाय यदैनमभिवीक्षेत ॥ १६ ॥ तर्हि वाव स वर्षपतिः
प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स ते सर्वत इति ॥ १७ ॥ अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः
सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन् ॥ किल कश्मलं महदभिरंभित इति होवाच ॥ १८ ॥
अपि बत स वै कृपण एणबालको मृतहरिणीसुतः अहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रंभ आत्मप्रत्य
येन तदविगणयन् सुजन इवागमिष्यति किम् ॥ १९ ॥

न हरिणकुणकविरहेण विह्वले हृदये संतापो यस्य ॥ कश्मलं मोहं प्रापितः सन् ॥ १८ ॥
अपीति संभावनायां ॥ [illegible] बतेत्यनुकंपायां ॥ अहो इति किरातयोः विवेचनपराक्रांतमतिर्यस्य ॥ अकृतसुकृतस्य निर्भाग्यस्य मम तच्छायादिकमगणय
न्नागमिष्यति किं अपराधं चिंतनेहेतवः ॥ आत्मप्रत्ययेन स्वचित्तस्थैर्यभावकृतविस्रंभः सन् सुजनो न यथागणयति तद्वत् ॥ १९ ॥

शाखाग्रािकोमलतृणानि १० नैकचरोपूथचरः अकारादिर्यद्वाएकएवचरतियः क्रूरः स्वभावोव्याघ्रादिर्नभक्षयतिकिं ११ सकललोकस्यत्वेमोघ
प्यात्मउदेयायस्यवेदस्त्रयीआत्मानूपंयस्यसः सूर्योनिम्लोचतिअस्तंयाति भगवद्ध्यानोपमानिक्षेपः १२ हरिएवराजकुमारः आगत्यमांअपिवि
त्यखयिष्यतित्यन्वयः किंकुर्वन्विविधेरुचिरैःतैर्दर्शनायैर्निजैर्मृगारारकविनोदैः मीयानांखेदमपनुदन् १३ संभवंतिचेतदित्याह त्वेडिका

अपिस्त्वेमेरणाम्निन्नाश्रमोपवनेशाखाग्रािचरंतंदेवरगृहंद्रष्ट्यापि १० अपिनरकः शालावृकोऽन्यतमोवानैकचरएव
कोवाभक्षयति ११ निम्लोचतिहभगवान्सकलजगत्त्वेमोदयअध्यात्मा ऽद्याविनममममृगवधून्यासआगन्ता ति १२
अपिविदत्तानसस्वतमांगत्यमांखविपिष्यतिहरिणराजकुमारोविविधरुचिरदर्शनीयनिजमृगारारकविनोदैरसं
तोषस्वानामपनुदन् १३ त्वेडिकायामामृषासमाधिनाआमिलितदृशोप्रेमसंरंभेणावकिचतचकितआवृत्यश्चर
परुषविषाणाग्रेणालुठति १४ आसादितहविषिबर्हिषिदूषितेमयोपालब्धोभीतभीतः सपद्युपरतरासआधिकुमार
वदवहितकरणकलापआस्ते १५

यांक्रीडायांमृषायः समाधिस्तेनाऽमीलितेदृशौयेनतंमांप्रेमसंरंभेणप्रणयकोपेनशृपतजलबिंदुतद्धदयरुषेणमृडनाविषाणाग्रेणालुठति
संघट्टयति ॥ १४ आसादितेहविर्यस्मिंस्तस्मिन्बर्हिषिदर्भेदंताकर्षणादिनाचापलेनदूषितेसति दूषितेवितिपाठेबर्हिषिविषयेदूषणंक
॥ ॥ त्वेत्यर्थः मायाधिक्षिप्तः सन्नतत्क्षणमेवोपरतक्रीडोनिश्चलआस्ते १५

इति वदन्धावल्लणोत्थाय वह्निर्निर्गत्य ततस्तु रखात भूमागोपलं मनं प्रातहृदयस्त्राह । किं वेति । अरे रे ह्वोऽग्नयात्विरित्या किं वा तपस्त्रावरितं त
पस्त्विन्या मया गायत्याय यस्मादि पितविनयस्य कल्पमारतनयस्यातनुतरः स्वमगाश्रशिवतमाभ्यु भावेग ख्नुरायेषु तेषां पदानांतत्रतत्रा किंताना
पंक्तिभिः दुर्विपाणमृगाहितेनरहितस्यस्थतएवाहरस्यदुःखितस्य ममद्विपाणमार्ग्गम्भूवयती मती ह्वात्मानं वताभिः कृतमण्डनं द्विजानां यद्भूमिं क
रोति । यस्मिन्देशे मृगाः कल्पः तस्मिन्धर्म्मो त्रिवोधतेतिस्मृतेः ॥ १६ ॥ तावदुदितेवंडे मृगं दृष्ट्वा स्वमृगत्वमेव भावयन्नाह । अपि त्विति । ॥ १७ ॥ सुंदरास्मि

किं वारण्ये आचरितं तनयस्तपस्त्विन्या अनयायद्दियमवनिः मविनयकल्पमारतनयतनुतरस्य मगशिवतमावराभ्यु पदपंक्ति
भिर्दुर्विपाणाविध्वरा ततः स्य रूपाणास्य मनद्विपाण परवीभ्रवयत्यात्मानं च मर्द्वितः कृतकौतुका द्विजानां स्वर्गापवर्गकामानां रे
वयजनं करोति ॥ १६ ॥ अपि त्विर्हैमा मगवानुदुपतिरेनं मृगपति भयात्स्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकंपया क्रप
याजनवत्सलः परिपाति ॥ १७ ॥ किं चात्मजविश्लेषज्वरदवदहनशिखाभिरूपतप्यमानहृदयस्यस्थलनलिनीकंमाभुपहतमृगीत
नयशिशिरशान्तान्तराग्रगलिततनिजवदनशलिलामृतमयगभस्तिभिः स्वधयतीति व ॥ १८ ॥

स्पर्शात्स्वप्राप्याह । किं चेति संभावनायां । आत्मजविश्लेषाज्वरस्तापः सएव दवेरहनः तस्य ज्वालाभिरूपतप्यमानाद्हृदयमेवरूपास्थलनलिनी यस्य ज
लस्य पंमता पंमोऽहमिति स्थलग्रहणं । उपहतोऽवगतो मृगी तनयो येन तं मां चंद्रः स्वधयति शांतिं गमयति । कैः शिशिरं यत्तच्छान्तं च यन्मध्ये गलितं ग
लितं च आवर्जितं चनः चनः श्रवत यद्वदनसलिलं तदेवामृतमयागभस्तिपः तैर्लोके हिमं च वदिनो वदनसलिलेनैव तापं शमयतीति प्रसिद्धः ॥ उपहतात्म
गीतनयइति पाठे मनोरथां ततस्तेन । उपहत्य मृगीतनयः । किंवा मां स्वधयिष्यतीति शेषः । प्रमानंम् ॥ १८ ॥

भा॰पं
१६

मृगदारकवशाभासमानेन भगवदाराधनलक्षणात्कर्मणश्च विभ्रंशितः ॥१९॥ स्वारब्धकर्मत्वे हेतुः ॥ कथमितरथेति ॥ साक्षात्त्वभद्रवत्कथ
मासंगः स्यात् ॥ पूर्वं परित्यक्ताः दुस्त्यजा ज्येष्ठारमात्मजेन अन्तरायेण विहितं योगारंभणं यस्य ॥ आत्मानमविगणयतः आत्मचिंतामकुर्वतः ॥ ताव

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारंभणतो विभ्रंशितः स योगतापसो भगव
दाराधनलक्षणाच्च ॥१९॥ कथमितरथा जात्यंतर एणकुणक आसंगः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्त
दुस्त्यजहृदयाभिजातस्य तस्यैवमंतरायविहितयोगारंभणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणन
लालनानुषंगेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥२०॥ तदानीमपि
पार्श्ववर्तिनमात्मजमिवानुशोचंतमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेन कलेवरं मृत
मनु न मृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥२१॥ तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभा
वेनानुस्मृत्य भृशमनुतप्यमान आह ॥२२॥

रेवतीव्रवेगः कालो मृत्युः सहसा आपद्यत ॥२०॥ लोकं देहं मृगेण सहितं विसृज्य प्राकृत
इव मृगशरीरमवाप ॥ कथंभूतः कलेवरं मृतमनु न मृता न विनष्टा पूर्वजन्मानुस्मृतिर्यस्य ॥२१॥ आह स्वविन्ने ॥२२॥ राम

राम
१६

अहोकष्टं धीराणां मार्गात् भ्रष्टोऽहं । भ्रष्टमेवाह । यद्यतः विमुक्ताः समस्ताः संगायेन विविक्तं पुण्यारण्यं शरणं यस्य । आत्मवतो धीरस्य सम
मनः सर्वेषां भूतानामात्मनि वासुदेवे समावेशितं समाहितं निश्चलं सत् आराधनादिभिः अविस्रावि अवनिः स्रुतं । केन समावेशितं । तस्मात् अनुस्रव

अहोकष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसंगस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वे
षामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन का
लेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनु परिसुस्राव ॥ २३ ॥ इत्येवं निगूढ
निर्वेदो विसृज्य मृगीं मातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालंज
रात्प्रत्याजगाम ॥ २४ ॥ तस्मिन्नपि कालं प्रतीक्षमाणः संगाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा
वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥ २५ ॥ इति श्रीभागवते म
हापुराणे पंचमस्कंधे भरतोपाख्याने अष्टमोऽध्यायः ॥ ८ ॥

णादिष्वभियोगेन अभिनिवेशेन अशून्याः सकला यामा यस्मिन् तेन कालेन ॥ २३ ॥ निगूढोऽनाविष्कृतो निर्वेदो येन । शालावृक्षैरुपलक्षितं ग्रामं कालं
जरात् यत्र हरिणो जातः तस्मात्पर्वतात् ॥ २४ ॥ आत्मैव सहचरो एकाकी प्रतीक्षणमेव प्रपंचः । मृगत्वनिमित्तं तिक्तं क्लिन्नं माईमर्द्धोदकमग्नमित्यर्थः ॥ २५

भा॰ पं
९७

नवमे जडविप्रत्वे तस्य रागाद्यभावतः ॥ मद्रकालीप्रसूत्वेऽपि निर्विकारत्वमीर्यते ॥ १ ॥ पितुः शास्त्रात्मविज्ञानो भरतो मृगतां गतः । प्रारब्धकर्मवेगेन
तदंते जडविप्रतां ॥ १ ॥ अंगिरस्सगोत्रजानां प्रवरस्य श्रेष्ठस्य शमादियुक्तस्य ॥ त्यागः स्वातिथ्यादि सोत्रदानादि ॥ विद्या कर्मविद्या आत्मज्ञानं देहादिव्य
तिरिक्तभोगात्मज्ञानं ॥ आनंदो धर्मसंपन्निजः आत्मना सदृशाः श्रुतादयो गुणा येषां ते सम्मानो दरा नव सुता बभूवुः ॥ १ ॥ जवीयस्याः कनिष्ठायां यवि

श्रीशुक उवाच ॥ अथ कस्यचिद्द्विजवरस्यांगिरः प्रवरस्य शमदमतपः स्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्याऽ
नसूयात्मज्ञानानंदयुक्तस्याऽऽत्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नवसोदर्या अंगजा बभूवुः ॥ १ ॥ मिथुनं च जवी
यस्यां भार्यायां ॥ २ ॥ यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः
॥ ३ ॥ तत्रापि स्वजनसंगाच्च भृशमुद्विजमानो भगवतः कर्मबंधविध्वंसनश्रवणस्मरणगुणविवरणचरणारवि
दयुगलं मनसा विदधदात्मनः प्रतिघातमाशंकमानो भगवदनुग्रहेणानुस्मृतिपूर्वजन्मावलिरात्मानमुन्मत्तज
डांधबधिरस्वरूपेण दर्शयामास लोकस्य ॥ ४ ॥

थुनं स्त्रीपुरुषयुग्मं ॥ १ ॥ उत्सृष्टं मृगशरीरं येन ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजा-
यते इति स्मृतेः ॥ २ ॥ तत्रापि चात्मसंगादात्मनो भ्रंशमाशंकमान आत्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः किं कुर्वन् ॥ कर्मबंधं विध्वंसनं श्रवणं
गुणानां विवरणं कथनं च यस्य तद्भगवतश्चरणारविंदयुगलं मनसा विशेषेण धारयन् ॥ प्रतिघातशंकायां हेतुः अनुस्मृता स्वीयपूर्वजन्मनामावलीय

राम
९७

पुत्रस्नेहेन तु वद्धं मनो यस्य ॥ जड इत्यगार्हस्थ्यानधिकारात् समावर्त्तनान्तान् संस्कारान् विदधान इत्युपनीय उपनीतस्य वटुनः शौचादीनुक्तत्वात्तान्
अनभिप्रेतानपि शिक्षितवान् ॥५॥ तत्र हेतुः अनुशिष्टेन हि भाव्यं पितुः सकाशात् पुत्रेणेति ॥६॥ सोपि च पितुः शिक्षां निर्बंधनिबंधनेष्वसध्रीची
नं असध्रीचीनमिव करोति स्म ॥७॥ उपाकरणे वेदव्रतादानन्तरं श्रावणादिमासेषु वेदानध्यापयिष्यन्नादौ तावद्व्याहृतिभिः सहत्रि

तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुवद्धमना आसमावर्त्तनात् संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः
शौचाचमनादीन् कर्मनियमाननभिप्रेतानपि समशिक्षयत ॥५॥ अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति ॥६॥ स चापि
तदु ह पितृसन्निधावेवासध्रीचीनमिव स्म करोति ॥७॥ छंदांस्यध्यापयिष्यन् सह व्याहृतिभिः सप्रणवशिरस्त्रिप
दीं सावित्रीं ग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥८॥ एवं स्वतनुज आत्मन्यनुरागा
वेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणकर्माण्यनभियुक्तान्यपि समनुशिष्टेन भा
व्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः ॥९॥

णवशिरः सहितां त्रिपदां चेत्यादि चतुरो मासानधीयमानमप्यसमवेतरूपं यथा भवत्येवं ग्राहयामास ॥ तावतापि कालेन स्वतनुजे पूर्व्वादि स्वयुक्तं म
हत्यादि तस्यानागतमित्यर्थः ॥८॥ आत्मभूते स्वतनूजे अनुरागेणावेशितं चित्तं येन शौचादीनि यान्यौपकुर्वाणकस्य समावर्त्तनपर्यंतं ब्रह्मचर्यव्रतः कर्मा
माणि तेनानभियुक्तानि अनादृतानि अपि तं पुत्रं प्रत्यनुशास्य अपि अप्राप्तपुत्रपांडित्यमनोरथः स्वयं कालेनोपसंहृतः मृत इत्यर्थः अनुशासनं निर्बंधे

भा०पं
१८

सपत्न्यै समर्प्य अनुसंस्थया अनुमरणेन ॥ सपत्न्यां तत्पाठेऽप्ययमेवार्थः ॥ १० ॥ न्यवृत्सन् निवर्त्तितोऽपेक्षत निवृत्ता इत्यर्थः ॥ यदाभिभाष्यमाणस्तदा तदनुरूपाणि प्रभाषते ॥ मूल्यमंतरेणावलोद्यतकर्म कार्यते सा विष्टिः ॥ वेतनं मूल्यं विष्टादिभिरुपसादितमन्नमभ्यवहरति परं स्वक्तो केवलं नेंद्रियप्री-

अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात् ॥ १० ॥ पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिर्बंधान्निवृत्सन्त ॥ स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि च कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहु मिष्टं कदन्नं वाभ्यवहरति परं नेंद्रियप्रीतिनिमित्तं ॥ ११ ॥ नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगमः सुखदुःखयोर्द्वंद्वनिमित्तयोरसंभावितदेहाभिमानः ॥ १२ ॥

तये ॥ अत्र हेतुद्वयमाह नित्यं सदा निवृत्तं निमित्तं यस्मात् उत्पादकशून्यः स्वसिद्धः अभिव्यंजकशून्यः विशुद्धः केवलो योऽनुभवः स एवानंदरूपः स्वात्मा तस्य लाभः एवंभूतोऽहमिति ज्ञानं तस्याधिगमः प्रीतिरतिर्यस्मात् द्वंद्वानि सन्मानावमानादीनि तद्धेतुकयोः सुखदुःखयोरकृतदेहाभिमानः तस्मान्नेंद्रियप्रीतिनिमित्तमभ्यवहरतीत्यन्वयः ॥ १२ ॥ गोविंदाय नमः

राम
१८

अत एव शीतोष्णादिष्वनावृतांगः विवृतशरीरः त्यक्तवस्त्रः कीदृशः पीनः पुष्टः संहननांगः संहन्यन्ते निबिडीभवन्ति स्नायूनि अंगानि यस्य कठिनावयवः इत्यर्थः
स्थंडिलसंवेशनं भूमिशयनं अनुन्मर्दनं मर्दनाभावः अमज्जनं स्नानाभावः तैर्युक्तः तेनाप्रकटं ब्रह्मवर्चसं ब्राह्म्यं तेजो यस्य यथा महामणि
रनभिव्यक्ततेजा भवति कुत्सितेन पटेनावृता कटिर्यस्य उरुमषिणा अतिमलिनेन न तत्त्वतं तज्जानंति ये तज्ज्ञैरेवमतः सः १३ यदा तु परेभ्यः कर्म

शीतोष्णवातवर्षेषु वृष इवानावृतांगः पीनः संहननांगस्थंडिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवा
नभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबंधुरिति संज्ञया तज्ज्ञजनावमतो वि
चचार ॥ १३ ॥ यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति ॥ १४ ॥
किं तु न समं विषमं न्यूनमधिकमिति न वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्य
वहरति ॥ १५ ॥

मूल्येनाहारमपेक्षमाणो भवति तदा केदारकर्मणि शालिक्षेत्रकर्मविलोडनादौ आहारप्रलोभनेन नियुक्तः सन् करोति ॥ १४ ॥
किं तु अत्र कर्दमस्य पक्षेऽपेक्षेत्रे समं भवेत् इत उद्धरणो विषमस्यादिति न वेद भ्रातृभिर्दत्तान् कणादीनप्यमृतवद्भुंक्ते कणाः चूर्णितंडुलाः पिण्याकं
तैलयंत्रोद्धृततिलकिट्टं फलीकरणं तुषाः कुल्माषा माषाः स्थालीपुरीषं स्थालीलग्नं दग्धान्नं ॥ ॥ ॥ १५ ॥ ॥ गोपालगोविंदाय नमः ॥

भा॰पं
१९

तस्याराणादिराहितमलोल्यंचैवमीरितं ॥ अथान्यच्चरितंप्राहविचित्रंमृत्यावयसंभ्रमं ॥ वृषलपतिःशूद्रमामन्तश्चोरराजः ॥ अलपतअलंह्यप्रहन्तः
॥१६॥ देवाद्बंधनविमुक्तस्यपशोः तस्मात्पाव्याप्ताधानिशितत्रापिनिशीथसमये ॥ अर्धरात्राववसरे ॥ आकस्मिकोदैवनिर्मितः विधिःप्रकारः

अथकदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यैपुरुषपशुमालभतापत्यकामः ॥१६॥ तस्यहृतैदैवमुक्तस्यपशोःपदवीत
रक्षवराःपरिधावंतोनिशिनिशीथसमयेतमसावृतायामनधिगतपशवः आकस्मिकेनविधिनाकेदारान्तवीरा
सनेनमृगवराहादिभ्यःसंरक्ष्यमाणामंगिरःप्रवरंहंतमपश्यन् ॥१७॥ अथतंएनमनवद्यलक्षणमवमृश्यपाप
कर्मनिर्भास्तिमन्यमानावध्यारसनयाचंडिकागृहमुपनिन्युःस्फुरद्विकसितवदनाः ॥१८॥ अथपशुमपायस्तस्वविधिनाः
भिषिंच्याःहतेनवाससाछाद्यधूपगाणालेपस्रक्तिलकादिभिःउपस्कृतंभुक्तवंतंधूपदीपमाल्यलाजकिशलयांकुर
फलोपहारोपेतयावैशासमंस्थयामहतागीतेस्तुतिमृदंगवेणुप्रवीणोषेणचपुरुषपशुंभद्रकाल्याःपुरतउपवेशया
माहः ॥१९॥

तेनवीरासनेनउद्दीवस्थानेन ॥१७॥ अवमृश्यपत्ताता ॥१८॥ प्रणायश्चोरराः अहतेननूतनेनउपस्कृतंअलंकृतंवेशासमंस्थ ॥
यार्हिसाविधानेनगीतादिघोषेणसह ॥१९॥

राम
१९

वृषलराजस्य पणिः पुरोहितत्वेन वर्त्तमानः स्थौरः ॥ तदभिमंत्रितं भद्रकालीमंत्राभिमंत्रितं ॥ १० ॥ धनएव रजः तेनोत्सिक्तं त्यक्तमर्यादं म-
नो येषां ॥ भगवत्कलायुक्तं वीराणां ब्राह्मणानां कुलं तत्र श्रीकृत्य यथेष्टं वर्त्तमानानां तत्कर्म तदुपलभ्य देवी उच्चचार प्रतिमातस्मात् वहिर्नि-
र्गता ॥ कथंभूतमालभनं ॥ सूनायामपि हिंसायामननुज्ञातं भद्रकाली त्येतदंगं धं ॥ ११ ॥ अमर्षोपराधासहनं रोषश्च वधुरोदाहननंतयोरावे-

अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीभद्रकालीयक्ष्यमाणः स्तदभिमंत्रितमसिमतिविकरालं निशितमुपाद-
ददइति ॥ १० ॥ तेषां वृषलानां रजस्तमः प्रकृतीनां धनमदरज उत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वै-
रं विहरतां हिंसाविहाराणां कर्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननु-
मतमालंभनं तदुपलभ्य ब्रह्मतेजसातिदुर्विषहेण दंदह्यमानेन वपुषा सहसोच्चचार सैव देवी भद्रकाली ॥ ११ ॥ भृशम-
मर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हंतुकामेवेदं महाट्टहासमतिसं-
रंभेण विमुंचंती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात्स्रवंतमसृगासवमत्युष्णं सहगणेन निपी-
यातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त्त च विजहार च शिरः कंदुकलीलया ॥ १२ ॥

षात्तस्य रभसेन वेगेन विलसिते उन्नमिते भ्रुकुटी लक्षणे विटपः शाखे ताभ्यां कुटिलादंष्ट्राश्च अरुणानीक्षणानि च तेषामाटोपः संभ्रमः तेनातिभयानकं
वदनं यस्याः ॥ इदं तद्यथा भवति तथा दृश्यते न ॥ महाट्टहासं महाहासं सनादं हासं ततः स्थानाद् उत्पत्य वृक्णानि छिन्नानि शीर्षाणि येषां ॥ गणेन पार्षदवारेण सह पिबं

ननु कथं देव्या एव बधकानामेवं विपरीतं फलं तत्राह ॥ एवमेवेति ॥ महत्सु अभिचाररूपोऽतिक्रमः अपराधः ॥१२॥ नन्वसम्भावितमिदमेवं यज्ञम
रणेऽप्यव्याकुलत्वं मारकेषु चक्रोधाभाव इत्यादि तत्राह ॥ न वा इति ॥ विमुक्तो देहाद्यात्मभावलक्षणः सुदृढो हृदयग्रन्थिर्यैः सर्वसत्त्वानां सुहृ

एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति ॥१३॥ न वा एतद्विष्णुदत्त महदद्भुतं यदसम्भ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्वसत्त्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवताऽनिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानां ॥१४॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे जडभरतचरितं नाम नवमोऽध्यायः ॥९॥ ॥ गोविंदाय नमः ॥ रामाय नमः

हृदः आत्मा च येषां तेषां देहाद्यभिमानसद्भावेऽपि मरणादिभयमस्तीत्याह ॥ साक्षाद्भगवतोऽभितो रक्ष्यमाणानां ॥ केन अनिमिषः स एव अरिः चक्रं तेन
च वरायुधेनैतैस्तैर्भावैश्चक्रं तत्र यैर्मितयाप्रवर्त्तमानैर्भद्रकाल्यादिरूपैः ॥ न कुतश्चिदपि भयं यस्मिन् भागवतानां भगवदुपासकानां परमहंसानाम् ॥१४॥ इति पञ्चमे नवमः ॥९

दशमे न्निपतात्तत्ताशिबिकां स्वावहन्मुनिः ॥ स्वदुर्वीदानुवादेन विज्ञाताया उपसादितः ॥ १ ॥ एवंभूतां विकारित्वमतत्सर्ववत्तयोः समं ॥ इति
सर्ववत्ता सिद्धो रहूगणकथेरणां ॥ १ ॥ रहूगणो नाम सिंधुसौवीरदेशयोः अज्ञातत्वजिज्ञासुः कपिलाश्रमं प्रति गच्छतिस्म ॥ तदा यहूत्तं
तदाह ॥ अथेति इक्षुमत्या नद्यास्तीरे तेषां शिबिकावाहानां कुलस्यनाथेन एष गौरिव खर इव भारं वोढुं समर्थ इति धिया पूर्वयं के

श्रीशुक उवाच ॥ अथ सिंधुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसम
मये दैवेन उपसादितः स द्विजवर उपलब्ध एष पीवा संहननांगो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह
प्रसभमतदर्ह उवाह शिबिकां स महानुभावः ॥ १ ॥ यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा वि
षमगतां स्वशिबिकां रहूगण उपधार्य पुरुषानधिवहत आह हे वोढारः साध्वतिक्रमत किमिति विषममुह्यते यानमिति
॥ १ ॥ अथ त ईश्वरवचः सोपालंभमुपाकर्ण्योपायतुरीयाच्छंकितमनसस्तं विज्ञापयांबभूवुः ॥ ३ ॥ न वयं नरदेव प्रमत्ता भव
न्नियमानुपथाः साध्वेव वहाम ॥ ४ ॥ अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमु ह वयं पारयाम इति ॥ ५ ॥

न च विष्ट्या बलाद्गृहीतास्तैः सह प्रसभं बलात् गृहीतः सन् अतदर्होऽपि स महानुभावः शिबिकामुवाहेत्यन्वयः ॥ १ ॥ हिंसापरिहारार्थमिषुमात्रप्रदे
शावलोकनस्यानुपश्चात् अनुयायिगतिः तस्याः हेतुभूतायाः पुरुषाणां गतिर्न समाहिता एकरूपा नाभूत ॥ १ ॥ सान्वेपं साभिप्रायमदानमेदंडेषु उपायेषु चतुर्थात् शं
कितचित्ताः ॥ ३ ॥ भवन्नियमा[illegible]थाः त्वदाज्ञानुवर्तिनः ॥ ४ ॥ नपारयाम न शक्नुमः ॥ ५ ॥

भा॰पं॰
३१

कृपणानां वचो निशम्य सांसर्गिकः संसर्गनिमित्तः एकस्यापि दोषः सर्वेषां समस्तानां भवितुमर्हतीति निश्चित्य रहूगणः आहेत्यन्वयः कथंभूतः उपासिता वृद्धा येन सोपि स्वभावेन बलात्कारेण रजसा कृतः मन्युः ॥ कथंभूतं प्रत्याह ॥ अविस्पष्टं ब्रह्मतेजो यस्मिन् ॥ भस्मनाच्छन्नम् अग्निमिव स्थितं ॥ ५ ॥ भ्रातरिति संबोधनं आक्षेपाभिप्रायं ॥ व्यक्तं निश्चितं उरु अधिकं परिश्रान्तः पीनत्वादि निविपरीतार्थो निषेधः काचानि

सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह ॥ ५ ॥ अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रान्तो दीर्घमध्वानमेक उहिवान्सुचिरं नातिपीवा न संहननांगो जरसा चोपद्रुतो भवान्सखे नो एवापर एते संघट्टिन इति बहुविप्रलब्धोप्यविद्यया विरचितद्रव्यगुणकर्माशयस्वचरमकलेवरे ॥ वस्तुनि संस्थानविशेषेहं ममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह ॥ ६ ॥ अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः ॥ ७ ॥

ऊहिवान् प्रापितवान् ॥ तत्रापि सुचिरं ॥ जरसा वृद्धत्वेन संघट्टिनः सहचराः बहु यथा भवत्येवं विप्रलब्धः पिवकोन्यायेन उपहसितोपि तूष्णीं उवाहेत्यन्वयः ॥ तूष्णींभावे हेतुः अविद्यया रचिता द्रव्यादयो यस्मिन् चरमकलेवरे नाध्यारोपितः मिथ्याप्रत्ययो येन ॥ तत्र द्रव्याणि भूतानि गुणाः इन्द्रियाणि कर्माणि पुण्यपापानि ॥ आशयोन्तःकरणं ॥ यतो ब्रह्मभूतः ॥ ६ ॥

एम
नि ३१

किमिदम् परेत त्वं जीवन्मृतो मां कदर्थीकृत्य पापेनाहृत्य मर्त्यैः स्वामिनो मम प्रशासनमाहात्म्यमतिक्रामसि ॥ विकित्थमानं श्लाघमानं दण्डपाणिर्यमो यथा उ
न मम दूतस्य शासितिं करोति ॥ तथा त्वां प्रकृतिस्थं प्रपन्नं ॥ ७ ॥ श्रुत्वेदमनुचिंतं ॥ नारदेवाहमित्यभिमानो यस्य तं ॥ श्रुत्वेदं न प्रगुणोतेन तिरस्कृ
तः अशेषः प्रपूर्णो भगवतः प्रियो निकेतश्चाश्रयो येन तं ॥ यद्वा शेषाणां भगवत्प्रियाणां निकेतः ॥ सर्वेषां भूतानां हृदयस्थ आत्मा च ॥ योगेश्वरा
णां वयाजडादिवत्‌ आचरणं ॥ तस्माद्वा तस्य तत्त्वमुत्पन्नां परिचिन्ता मतिर्यस्य सः ॥ तत्स्मयमानो हसन्निवेति प्रत्युवाचं प्रसन्नो घोरात्मने ॥ विगतस्मयः गतमा

किमिदम् परेत त्वं जीवन्मृतो मां कदर्थीकृत्य मर्त्यैः शासनमतिवर्तसि प्रमत्तस्य वेत्ता करोमि चिकित्सां दण्डपाणिरिव जननाम
यायथा प्रकृतिं स्वां भजिष्यसि इति ॥ ८ ॥ एवं वदन्तं वद्धमपि भाषमाणं नारदेवाभिमानं रज्जमानतमसः नविद्धेन परेण तिर
स्कृतो भगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतहृदयस्थात्मा योगेश्वरवर्यो याम प्रतियुक्तस्य
मतिः स्मयमान इव विगतस्मय इदमाह ॥ ९ ॥ ब्राह्मण उवाच ॥ नैव विहितं त्वयाकृतं प्रविप्रलब्धं मर्त्यैः मम स्याद्यदि वीरभारः ॥ गं
तव्यदि स्याद्यदधि गमनं वह्नाापीवेति रागश्चाव विरं प्रवाहः ॥ ॥

वः ॥ १ ॥ तत्र वक्रोक्त्या यदुक्तं त्वया न श्रांतः न वदरीह्यं मद्वहनमागरिति तत्रोत्तरमाह
तथा यदुदितं उक्तं श्रमादिनाहीति तद्युक्तं स्फुटं तन्निश्चयेव ॥ श्रविप्रलब्धं विप्रलंभो न भवति ॥ नरदेवाह ॥ हे वीर ॥ यदि भारो नाम कश्चित्स्यात तस्य च मर्त्यैर्वोढुर्देहस्य
यदि स्यात ॥ तच मे यदि प्रसक्तः स्यात तर्हि इदानीमाभावात् विप्रलंभः स्यात ॥ न त्वेतदस्ति भारस्य वोढुश्चानिरूपत्वात मम च तत्सम्बन्धाभावात ॥ तथा गंत
व्यमधिगम्यं प्राप्यमध्वा वा यदि स्यात अद्देतिपाठमाशङ्क्यात्परमार्थतः ॥ तच्च मे यदि स्यादित्यादि योज्यं यच्च पीनत्वं नातिपीवेति तत्राह ॥ चेतन एव देहः पत्वं पीवेति प्रवाहो

एतत्प्रपंचयति स्थौल्यमिति कलिः कलहः अहंकारो गर्वः मदः स्मयः देहेन सहतदभिमानेन जातस्य हि भवन्ति मम तु निरभिमानस्य न संति यद्वा देहे जाते यो जातस्तस्यैवतानि मम तु तत्र न जातस्य न संतीति ॥१२॥ यद्वोक्तं जीवन्मृतोऽसीति तत्राप्याह जीवन्मृतत्वं न केवलं मम किंतु विकृतस्य सर्वस्य परिणामिनो दृष्टं यद्यस्माद्विकृतं प्रतिक्षणमाद्यंतवत् यदुक्तं भर्तृशासनमतिचरसीति तत्राह स्वस्वामिभावः स्वस्वामिनोर्भावः स एवाहे ईड्य यत्र पक्षे ध्रुवः स्थिरो व्यवस्थितः स्यादित्यर्थः तर्हि विधिर्नियोगः कृत्यं कर्म तयोर्योगो युक्तत्वमुच्यते उचितो भवति उच समवाय इति धातोः यदि तु न व राजभृत्य मे मम चाज्ञे स्यात् तदा सर्वमेतद्विपरीतं स्यादित्यर्थः ॥१३॥ ननु यावद्राजाहं तावत्त्वं स्वामी भवाम्येवेति चेत् तत्राह विशेषो राजभृत्यादिभेदस्तद्बुद्धेर्वि

स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च ॥ निद्रा रतिर्मन्युरहंमदः शुचो देहेन जातस्य हि मे न संति ॥१२॥ जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद्यद्विकृतस्य दृष्टं ॥ स्वस्वाम्यभावो ध्रुव ईड्य यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः ॥१३॥ विशेषबुद्धेर्विवरं मनाक्च पश्याम यन्न व्यवहारतोऽन्यत् ॥ क ईश्वरस्तत्र किमीशितव्यं तथापि राजन् करवाम किं ते ॥१४॥ उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर चिकित्सितेन ॥ अर्थः कियान् भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः ॥१५॥

वरमवकाशं यत व्यवहारादन्यन्न पश्यामि मनाक् ईषदपि अथापि तवायमभिमानश्चेत्तर्हि ब्रूहि किं ते करवामीति ॥१४॥ यदुक्तं प्रमत्तस्य ते चिकित्सां करोमि यथा प्रकृतिं भजिष्यसि इति तत्राह उन्मत्तादिवद्वर्तमानस्य वस्तुतः स्वसंस्थां ब्रह्मभावं गतस्य भवता कृतेन चिकित्सितेन दंडेन शिक्षितेन न वाक्ये कियानर्थः प्रयोजनमनर्थयोरभावात् यदि रहं प्रमत्तः किंतु प्रमत्तः स्तब्ध एव तथापि मम शिक्षादिकं पिष्टपेषणं व्यर्थमित्यर्थः नहि जडस्वभावः शिक्षया पिपर्तुं कर्तुं शक्यत इति ॥१५॥

अनुवादरूपयापरिभाषयाभाषणेनतंप्रत्युत्तरंदत्वाउपरतंअनात्म्येदेहात्मत्वेनिमित्तमविद्यायस्य। आरब्धफलंकर्मक्षपयन्। १६। हेपा
ण्डवेय। सम्यक्कृपाश्रद्धातयैवतत्त्वजिज्ञासायांप्राप्तोधिकारोयेन। यथादर्शपूर्णमासाभ्यामधिकृतस्यैवाग्नेयोहहनेनपशुकामस्याग्नेयपश्वालायेदिति
गुणफलसंबंधोप्यधिकारः। एवंसात्त्विकश्रद्धयासमधिकृतस्यैवास्यासमधिकारइत्यर्थः। बहुयोगग्रंथसंमतंद्विजस्याहृदयः श्रुत्वाविगतोनृपदेवे

श्रीशुकउवाच। एतावदनुवादपरिभाषयाप्रत्युदीर्यमुनिवरउपशमशीलउपरतानात्म्यनिमित्तउपभोगेनकर्मारब्धंव्यपन
यन्राजयानमपितथैवोवाह ॥१६॥ सचापिपाण्डवेयसिंधुसौवीरपतिस्तत्त्वजिज्ञासायांसम्यक्श्रद्धयाधिकृताधिकार
स्तद्धृदयग्रंथिविमोचनंद्विजवचआश्रुत्यबहुयोगग्रंथसंमतंत्वरयावरुह्यशिरसापादमूलमुपसृतःक्षमापयन्विग
तनृपदेवस्मयउवाच ॥१७॥ कस्त्वंनिगूढश्चरसिद्विजानांबिभर्षिसूत्रंकतमोवधूतः। कस्यासिकुत्रत्यइहापिकस्मात्
क्षेमायनश्चेदसिनोतशुक्लः ॥१८॥ नाहंविशंकेसुरराजवज्रान्नत्र्यक्षशूलान्नयमस्यदंडात्। नाग्न्यर्कसोमानिलवित्त
पास्त्राच्छंकेभृशंब्रह्मकुलावमानात् ॥१९॥

धियाजडइतिगर्वोयस्य ॥१७॥ द्विजानांमध्येकतमः यतःसूत्रमुपवीतंबिभर्षि। यद्वादत्तात्रेयाणांमध्ये
कतमोऽवधूतः। इहापिकस्माद्धेतोःप्राप्तः। नोऽस्माकंक्षेमायचेत्प्राप्तः तर्हिशुक्लःकपिलोमुनिर्नभवसिकिं। उतेतिवितर्के ॥१८॥ किमनयाचिं
तयाशिवविकानांवद्धहामीतिवेरत्याह ॥१८॥ नाहमितिविप्रपःजवेरः ॥१९॥

भा॰पं
३३

यस्मात्तमुपशंकेतस्मात्कस्त्वमित्यादि प्रश्नात्तत्प्रश्नं ब्रूहि । निगूढं पिहितं विज्ञानरूपं वीर्यं प्रभावो येन । अपारः अनंतमहिमा अतएव हेतोः नो
मनसापि भेत्तुं न ज्ञातुं न शक्यं किं भेत्तुमित्यपेक्षायामाह । तेव वचांसीति । यद्वा मनसाप्यक्लेशः सूक्ष्मदृष्ट्यापि भेत्तुं न शक्नुवंतीत्यर्थः ॥२०॥ त्वमपि ता
नार्थितार्थं शृणु इति । इहहंसारेयत् अरणं शरणं तत् किमिति प्रष्टुं प्रवृत्तोऽस्मि ज्ञानशक्त्यावतीर्णं कपिलं ॥२१॥ स एव भवान् किंस्विदेवं विचरति
गृहाभिषक्तः कथं विचक्षीत पश्येत ॥२२॥ एवं तत्स्वरूपं पृष्ट्वा तदुक्तौ नरणायाज्ञिपति । तत्र यदुक्तं मम न श्रमो नास्तीति तत्राह दृष्ट इति । आत्मनो मे अनु

तद्ब्रूह्यसंगो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः । वचांसि योगग्रथितानि साधो न नः क्षमन्ते मनसापि भेत्तुं ॥२०॥
अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां परमं गुरुं वै । प्रष्टुं प्रवृत्तः किमिहारणं तत्साक्षाद्धरिं ज्ञानकलावतीर्णं ॥२१॥
स वै भवाल्लोकनिरीक्षणार्थमव्यक्तलिंगो विचरत्यपिस्वित् । योगेश्वराणां गतिमंधबुद्धिः कथं विचक्षीत गृहानुबंधः ॥२२॥
दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गंतुर्भवतश्चानुमन्ये । यथासतोदानयनाद्यभावात्समूल इष्टो व्यवहारमार्गः ॥२३॥

मानेचैवं भवान् भवान् भारवाहादिनीतः कर्तृत्वात् यः कर्ता स श्राम्यतीति यथाऽहं पुद्धारिकर्त्तेति । न त्विदं व्यवहारमा
त्रेण न तु सत्यं तदुक्तं । व्यवहारोऽस्त्वत्र पश्यामीति । तत्राह । यथेति । व्यवहारमार्गः प्रपंचः समूलः सप्रमाणक एवेष्टः यथा यथावत् असता
घटादिना उदकानयनादेरभावात् । एवं प्रयोगः प्रपंचः सत्यः अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी यथा मिथ्याघटादि
रिति ॥२३॥

राम
३३

यदुक्तं उपाधिधर्माः स्थौल्यादयो मेन वस्तुतः सन्तीति । औपाधिकत्वेऽपि सत्यत्वं किं न स्यादित्याह । स्थाल्यग्निना तापात्पयसो ऽभिवर्त्तिनः क्षीरस्य तापः तस्य तापात्तंडुलानां वह्निभागस्य तत्तत्तंडुलगर्भस्य चरंधिकः पाकः । न चात्र किंचिन्मिथ्या एवं देहादिभिः सन्निकर्षात्तद्वधात्तन्निमित्तं संसृतिः पुरुषस्य भवति । अत एव प्राणाः आशयो मनः अ[illegible] उपाधीनां उपाधिधर्माश्च वृत्तेः । तथा हि निद्राद्याद्दिनादेहे तत्पश्चेंद्रियाणां तापः ततः प्राणानां ततो मनसः स्वृत्स्वेवं यथा पथ्यमुत्य ॥२४॥ यदुक्तं त्वया मम भावो ध्रुव इति तत्राह । शास्तेति । अध्रुवत्वेऽपि यद्राजो नृपतेः सः फलाना शास्ता गोप्ता च । यच्चोक्तं त्वया देवः शिक्षापि दृष्टपेष इति तत्राह । यो ऽद्भुतस्य किंकरः स पिष्टं न पिनष्टि निष्फलं न करोति । त्वं च स्वधायनपगमैः पिशा

स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्तंडुलगर्भरंधिः । देहेंद्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ॥२४॥ शास्ताभिगोप्ता नृपतिः प्रजानां यः किंकरो वै न पिनष्टि पिष्टं । स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघं ॥२५॥ तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृतसत्तमस्य । कृषीष्ट मैत्रीदृशमार्त्तबंधो यथा तरे सदवध्यानमंहः ॥२६॥ न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि । महद्विमानात्स्वकृताद्धि मादृङ् नंक्ष्यत्यदूरादपि शूलपाणिः ॥२७॥

इति श्रीभागवते महापुराणे पंचमस्कंधे दशमोऽध्यायः ॥१०॥

त्वरीश्वराज्ञासंपादनेनैव फलत्वात् । तदाह स्वधर्ममिति । स्वधर्ममच्युतस्याराधनं कुर्वन् यस्मादघौघं जहाति ॥२५॥ यस्मादेवमपमत्त्वदुक्तं विपरीतं प्रतिभाति तन्नस्मान्नरदेवाभिमदेन तुच्छीकृताः तिरस्कृताः सत्तमा येन तस्य मे मैत्रीदृशा त्वं कृषीष्ट कुरु । हे आर्त्तबंधो सतामवध्यानं यदंहः पापं यथा तरिष्यामि ॥२६॥ ननु मामवज्ञाकृते विकाराभावात्कुतः पापं तत्राह नेति । यद्यपि तव कृपानास्ति विश्वसुहृदः ईश्वरस्य सखा यो मत्तो वा वनसपत्रतः स वेत्त्र साम्येन त्वं देहे विगताभिमानस्य । तथापि महतामवमानात् मादृशो विनं

क्ष्यातिश्रदूरात्तादिप्रशूलपाणिरिवाक्तंप्रमर्याऽपौ नार्थः ॥२७॥ इति पंचमे दशमः ॥

भा०पं
३४
बो

एकादशोऽध्यायसंक्षेपोरहूगणाय महीभृता । उपादिशत्परं ज्ञानं स योगीति निगद्यते ॥ १ ॥ अकोविदः अविद्वानपि त्वं कोविदानां वादानुद्भूय
कोविदत्वेनाल्पावादान्वदसि ॥ अर्थोऽयतः अस्मात्त्वं विदुषां मध्ये श्रेष्ठो न भवति ॥ अतः हि यस्मात्तत्परत्वात् मिथ्यात्वादि लौकिकव्यवहारत्वं यत्व
मात्थ एवं पुरुषः तत्त्वविचारेण सह संवदतीति किं त्वविचारेण संवदतीत्यर्थः ॥ १ ॥ वैदिकोऽपि कर्मफलव्यवहारो न सत्य इत्याह ॥ तथैवे
ति ॥ उरुगार्हाः गृहमेधिनो मेधायत्ताः तेषां वितानो विस्तारः तद्विषया हि विद्या तद्रुहत्त्वाधिकविज्ञंभितेष्वविलसितेषु वेदवादेषु ततत्त्व

वाद ब्राह्मण उवाच ॥ अकोविदः कोविदवादान्वदस्यथो नात्मविदां वरिष्ठः ॥ न सूरयो हि व्यवहारमेतं तत्त्वावमर्शेन सह
मनंति ॥ १ ॥ तथैव राजन्नुरुगार्हमेधवितानविद्योरुविज्ञंभितेषु न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति
साधुः ॥ २ ॥ न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ॥ स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेया नुमितं स्वयं स्यात् ॥ ३ ॥

म १

वादः शुद्धिं तं न चकास्ति ॥ न प्रकाशते ॥ तथा च श्रुतिः ॥ नेह नानास्ति किंचनेत्यादि ॥ शुद्धो हि साधिः ॥
भूयः साधुः रागादिशून्यस्य प्रायेणोति इ स्वर्गादिर्वितत कर्मणां परमार्थफलत्वापि प्रायेणोक्तं ॥ १ ॥ ननु श्रुतवेदांतस्यापि पुंसः स्व
मेधप्रवृत्तेः कथं सत्यमत आह ॥ नेति ॥ साक्षाद्यथावत्तत्त्वज्ञानाय वरीयस्योऽपि वेदांतवाचस्तस्य न समासन् समर्था न भवन्ति ॥
स्वप्ने यानि रुक्तिः स्वयां स्वप्नदृष्टानि तेन दृष्टत्वादिहेतुना स्वयमेव हेयत्वेनानुमितं यस्य न स्यात् ॥ ३ ॥ गोपालोपनमः

राम
३४

एवं प्रपंचस्य सत्यत्वं तदुक्तं निराकृत्य संसारस्यापि तदुक्तां सत्यतां निराकर्तुं तस्य मनोनिमित्ततामाह । यावदित्यादिना यावत्तत्त्वप्राप्तिः । मनो यावदज्ञस्य
त्रिभिर्गुणैरनुरुद्धं वशीकृतं भवति तावत्तन्मनो निरंकुशं सत्तदुःखस्य कुशलं धर्ममितरमधर्मं च आतनोति । कैः । चेतोभिः ज्ञानेंद्रियैः आकूतिभिः कर्मे-
न्द्रियैश्च ॥४॥ ततश्च धर्माधर्मवासनायुक्तं तदेवानेकदेहादिवैचित्र्यं करोतीत्याह । सइति । स आत्मा आत्मशब्दविशेषत्वेन तन्मन इत्यर्थः । वासनायुक्तः आ-
त्मोपाधित्वादात्मा अतो विषयेषूपरक्तः अनुबद्धः । अतो गुणप्रवाहगुणैरितस्ततः चाल्यमानः अतएव विकृतः कामादिपरिणामवान् । षोडशात्मा षोड-
शकलात्मकं तद्बियात्रपाहुस्सत्त्वेः पृथङ्ङ् । नामभिः स्थकार्थकुरूपभेदं तिर्यगादिरूपं अंतर्बहिष्ट्वं उत्कृष्टत्वं निकृष्टत्वं पुरैर्देहैर्वपुर्देहैः । देहभूतैस्तनोति मनोतिमामपि

यावन्मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वानुरुद्धं । चेतोभिराकूतिभिरातनोति निरंकुशं कुशलं चेतरं वा ॥४॥ स वासनात्मा वि-
षयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा बिभ्रत्पृथङ्नामभिरूपभेदमंतर्बहिष्ट्वं च पुरैस्तनोति ॥५॥ दुःखं सुखं व्यतिरिक्तं च तीव्रं
कालोपपन्नं फलमाव्यनक्ति । आलिंग्य मायारचितांतरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥६॥ तावानयं व्यवहारः सदाविः क्षेत्रज्ञ-
साक्ष्यो भवति स्थूलसूक्ष्मः । तस्मान्मनो लिंगमदो वदंति गुणागुणत्वस्य परावरस्य ॥७॥

रित्यत्रे रेफलोपे दीर्घाभावश्चार्षः ॥५॥ फलप्रदत्वरूपं करोतीत्याह । दुःखमिति । सुखं व्यतिरिक्तं च मोहं तीव्रं दुर्निवारं कालप्राप्तं सर्वतोऽभिव्यनक्ति सृजति
जनजनः । कथं सृजति तत्राह । स्वदेहिनमालिंग्य । आलिंगने कारणमाह । मायारचितः अंतरात्मा जीवोपाधिः उपाधितामाह । संसृतिचक्रे कूटयति छ-
लयति तथा यथा ग्रामकूटक इति ॥६॥ एवं मनोनिबंधनः संसारो जीवे फलतीत्याह । तावानिति । आविः प्रकाशमानं सदा क्षेत्रज्ञसाक्ष्यः दृश्यो भवति
स्थूलसूक्ष्मः जाग्रत्स्वप्नरूपः मनसः संसारहेतुत्वमुपसंहरन् मोक्षस्यापि तदेव कारणमित्याह । तस्मादिति । अदो मनः लिंगं कारणं गुणात्वं गुणाभिमानि-
त्वमगुणत्वं तद्राहित्यं तदेव परमवरं च तस्य ॥७॥

कथमेकमेवविलक्षणयोः कारणं अवस्थाभेदादित्याह गुणेति नैर्गुण्यपरिणाम अर्थो इति कार्त्स्न्येन दृष्टं तेन स्फुरयति यथेति अन्यदाह घृत
त्वेयपृथङ्मुखं एवाक्षरूपमहाभूतात्मत्वं वा अन्यत्र अन्यदा ॥ वृत्तीर्दर्शयति एकादशानामप्यनूनाकृतयः क्रियाकाराः पंचविधाः ज्ञाना
काराः पंच अभिमानश्चेति हेवीरवूपिः विषयान् विषयानेवाह ॥ गंधादयः पंच ज्ञानेन्द्रियद्वाराणां वृत्तीनां विषयाः आकृतिः रूपं श्रवः शब्दः
विसर्गादयः पंच कर्मेन्द्रियद्वाराणां कर्मकारवृत्तीनां विषयाः रतिः संभोगः अर्निर्गतिः ॥१॥ अस्याभिमानविषयत्वप्रकारमाह एकादशं स्वीक्रिय
गुणात्परक्कं व्यपनायजंतोः स्नेमायनैर्गुण्यपमथोपनः स्यात ॥ यथाप्रदीपो घृतवर्तिमग्रनूपिखोमधूमायजातित्यन्यदाहत्व
पंकतथागुणाकर्मानुवद्धं वृत्तिर्मनः अयतेऽन्यत्रतत्वं ॥ एकादशाप्यनूमनसोहि वृत्तयः आकृतयः पंचविधियोऽभिमानः मा
त्राणि कर्माणि पुरं च तासां वदेति हे कादशावीरवूपिः ॥ गंधाकृतिस्पर्शरसः श्रवांसि विसर्गरत्यर्तिमनल्पशिल्पाः एकाद
शाश्वीकरणं ममेति शय्यामहं द्वादशमेकमाहुः ॥१॥ इत्यस्वभावाशयकर्मकालैरेकादशामीमनसो विकाराः ॥११॥

न इति स्वीकरणं आयमर्थः शरीरमभिमानस्मनत्तेयम् यथा गंधादिवद्विषयः नापि कार्यन्यायाविसर्गादिवत किंतु ममेति योगायतनत्वेन स्वीकार्यतया
विषयइति एकेनविवेकिनामेवशरीरं ममत्वाभिमानविषयः नमूढानामत्तोमूढदृष्ट्या अहेत्र अहंकारद्वादशवृत्त्यंतरमाहुः नम्यवशरीरमेव शय्यामिति
द्वादशं विषयमाहुः तत्र हि जीवोऽहंकारेणाशेते यतः शरिशयनात्पुरुषइत्युच्यते ॥१॥ तासां वृत्तीनामवांतरभेदकारणत्वमाह इत्स्याणि विषयाः
स्वभावः परिणामहेतुः आशयः संस्कारः कर्म अदृष्टं कालः क्षोभकः तैर्निमित्तभूतैः ॥११॥

प्रथमं शतशः सहस्रशः ततः कोटिशः स्युः किंतु क्षेत्रज्ञतः परमेश्वरात् ॥ तस्य चानंतशक्तित्वात् ॥ अनंताः स्युरित्यर्थः ॥ यद्वा तासां मिथ्यात्वमने
नोच्यते ॥ कोटिशो भवंत्यनंताः क्षेत्रज्ञतत एव स्युः तत्सत्तैव सत्तां लभेरन् ॥ न तु मिथो न च स्वत इति ॥ यद्वा क्षेत्रज्ञतो जीवस्तस्मान्न स्युः तस्याविकारि
त्वात् न मिथः इतरेतराश्रयापत्तेः ॥ न स्वतः आत्माश्रयापत्तेः ॥ अतो मिथ्याभूता एवेति ॥ तदेवं श्लोकत्रयेणाहणाकार्यमात्र हृद्धं मनोवृत्तिः अथ तद्
ति यद्गुणं तत्स्वरूपं विविनं ॥ अन्यदा तत्त्वं अथ तद् इति यद्गुणं तदेव तत्त्वमाह ॥११॥ क्षेत्रज्ञ इति जीवस्य जीवोपाधेः अविशुद्धकर्तुर्मनसः नित्याः प्रवाहरूपे
ण अनवच्छिन्नाः जाग्रत्स्वप्नयोराविर्भूताः पश्यति क्वापि सुषुप्तौ तिरोभूताः पश्यति अत्र चस्त्वात्र यथा क्षेत्रज्ञ आत्मतत्त्वमित्यर्थः ॥१२॥ क्षेत्रज्ञो द्विविधः ॥

सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥११॥ क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः ॥ आविर्हिताः
क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥१२॥ क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ॥ नारायणो भगवा
न्वासुदेवः स्वमाययात्मन्यवधीयमानः ॥१३॥ यथानिलः स्थावरजंगमानामात्मस्वरूपेण निविष्ट ईशेत् ॥ एवं परो भगवान्वासुदेवः क्षे
त्रज्ञ आत्मेदमनुप्रविष्टः ॥१४॥

त्वंपदार्थो जीवः तत्पदार्थ ईश्वरस्य ॥ तत्राद्यो निरूपितः इदानीं तत्प्राप्यमीश्वरं निरूपयति ॥ क्षेत्रज्ञ आत्मा व्यापी पूर्ण
णो जगत्कारणभूतः पुरुषः पूर्णः साक्षात्परेशः स्वयं स्वयंज्योतिः न तु ज्ञानस्य विषयत्वेनाश्रयत्वेन वा परोक्षः ॥ अजो जन्मादिशून्यः ब्रह्मादीना
मपीशः नारं जीवसमूहः अयनं यस्य नियंता भगवान् ऐश्वर्यादिषड्गुणवान् वासुदेवः सर्वभूतानामाश्रयः स्वाधीनया मायया आत्मनि जीवे अवधी
यमानः अवस्थाप्यमानः कर्मकर्त्रीरिप्रयोगाः तन्नियंतृत्वेन वर्तमान इत्यर्थः ॥१३॥ एतत्सदृष्टांतेनाह यथेति ॥ आत्मस्वरूपेण प्राणरूपेण ईशेत ईशीत

॥ ११ ॥

भा॰पं॰
३६

तदेवञ्चात्मनः शुद्धत्वं संसारस्य मिथ्यात्वं प्रदर्श्य इदानीं तन्निवृत्तिमाह । तनुभृत् देही वयुनोदयेन ज्ञानोत्पत्त्या यावन्मायां विधूयात्मतत्त्वं न वेद
तावदिह भ्रमति ॥ १५ ॥ यावद्वा विषयासक्तं मन एवानर्थहेतुरिति न वेद तावन्निर्वेदाभावात्परिभ्रमत्येवेत्याह । आत्मनो लिंगमुपाधिभूतं मनः
संसारतापानामावपनं क्षेत्रं यावन्न वेद तावत् भ्रमतीत्यनुषंगः । तावावपनत्वे हेतुः यन्मनः शोकाद्यनुबंधं ममतां च विधत्ते ॥ १६ ॥ तस्माद्भ्रा

न यावदेतां तनुभृन्नरेन्द्र विधूय मायां वयुनोदयेन । विमुक्तसंगो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥ १५ ॥
न यावदेतन्मन आत्मलिंगं संसारतापावपनं जनस्य । यच्छोकमोहामयरागलोभवैरानुबंधं ममतां विधत्ते ॥ १६ ॥
भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः । गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषं ॥ १७ ॥
इति श्रीभागवते महापुराणे पंचमस्कंधे एकादशोऽध्यायः ॥ ११ ॥ गोपालगोविंदाय नमः

तृव्यं शत्रुं अध्येधितं संवृद्धं स्वयं व्यलीकं मिथ्याभूतं तत्तथाप्यात्मानं मुष्णातीति तथा तं गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभू
तः सन् जहि त्वा तय ॥ १ ॥ ३ ॥ ॥ ७ ॥ ॥ ४ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे टीकायामेकादशोऽध्यायः ॥ ११ ॥

राम
३६

द्वारेणोपनतःपृष्टः संदेहेनमहीभृता। सयोगीसर्वसंदेहानुपाकरिष्यतीर्यते ॥१॥ कारणंमोऽस्वरः तस्येवलोकरक्षार्थंविग्रहोदेहोयस्य। स्वरूपेण
परमानंदस्वप्रकाशकेनतुच्छीकृतोविग्रहोयेन। येऽवधूतयोगेश्वराद्विजवंधोर्लिंगेनवेषेणनिगूढोनित्यानुभवोयेनतस्मैनमः॥१॥ विशेषतःप्र
वृत्तद्वाक्यमभिनंदति॥ ज्वरएवामयोरोगस्तेनार्त्तस्ययथासत्त्वगदमौषधं॥ यथाचनिदाघेनदग्धस्यसंतप्तस्यहिमांभः शीतलमुदकंवातथाहेब्र
ह्मन्कुत्सितेदेहेयोमानःअहंकारः सएवअहिः। तेनविशेषेणदष्टादृष्टिर्विवेकलक्षणायस्यतस्यमेतवेदंवचः अमृतमौषधं॥२॥ मम

रहूगणउवाच॥ नमोनमःकारणविग्रहायस्वरूपतुच्छीकृतविग्रहाय॥ नमोवधूतद्विजवंधुलिंगनिगूढनित्यानु
भवायतुभ्यं॥१॥ ज्वरामयार्त्तस्ययथागदंसन्निदाघदग्धस्ययथाहिमांभः॥ कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्ते
मृतमौषधंमे॥२॥ तस्माद्भवंतंममसंशयार्थंप्रक्ष्यामिपश्चादधुनासुवोधम्॥ अध्यात्मयोगग्रथितंतवोक्तमाख्याहि
कौतूहलचेतसोमे॥३॥ यदाहयोगेश्वरदृश्यमानंक्रियाफलंसद्व्यवहारमूलं॥ नह्यंजसातत्त्वविमर्शनायभवान
मुष्मिन्भ्रमतेमनोमे॥४॥

संशयविषयार्थंपश्चात्प्रक्ष्यामि। अधुनातावत्त्वदुक्तंवचः अध्यात्मयोगेनग्रथितंदुर्वोधंसुवोधंयथा॥
भवतिएवंव्याख्याहि कौतूहलयुक्तंचेतोयस्यतस्यमम॥३॥ त्वयोदितंव्यक्तमविमृश्यलब्धं इत्यादिनाभारवाहनादिक्रियाचतत्फलंश्रमादिभिः
दृश्यमानंसत्तथाबाधितमपिव्यवहारमात्रंमूलंयदासततः आबाधितव्यवहारस्यमूलंकारणमपि। नह्यंजसातत्त्वविमर्शनायपर्याप्तमितिभवान्यद
ह अमुष्मिन्नर्थेममनोभ्रमति॥४॥

अवाधितत्वमसिद्धमित्याह । हे पार्थिव अयं यः पार्थिवो विकारः स एव कस्य हेतोः कस्माच्चित्कारणात्पृथिव्यां चलन्नयं पारवाहकादिर्जनो नाम प्रसि-
द्धः । यस्तु न चलति स पाषाणादिरित्येतावानेव भेदः तस्य च जडत्वान्न भारश्रमश्चा किंच भवेदेवं यदि श्रमस्याश्रयो निरूप्येत न त्वेतदस्ति अवयव-
तिरेकेणाप्रामाण्यादवयविनोऽनिरूपणादित्याशयेनाह । तस्यापि पृथ्वीविकारस्यापि अङ्घ्र्योरधि उपरि गुल्फादयः उरसः सलोपश्चा-
र्षः ॥५॥ शिविकायामप्यवयवी नास्ति त्वय्यपि नास्तीत्याह । सौवीरराज इत्यपदेशो नाममात्रं यस्य स पार्थिवो विकारश्चास्ते राजेति संधिः आर्षः

ब्राह्मण उवाच । अयं जनो नाम चलन्पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः । तस्यापि चाङ्घ्र्योरधि गुल्फजङ्घाजानूरुमध्योरशिरो-
धरांसाः ॥५॥ अंसेऽधि दार्वी शिविका च यस्यां सौवीरराजेत्यपदेश आस्ते । यस्मिन्भवान्रूढनिजाभिमानो राजास्मि सिंधुष्विति दु-
र्मदान्धः ॥६॥ शोच्यानिमांस्त्वमधिकष्टदीनान्विष्ट्या निगृह्णन्निरनुग्रहोऽसि । जनस्य गोप्तास्मि विकत्थमानो न शोभसे वृद्धसभासु धृ-
ष्टः ॥७॥ यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यं । तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतां सत्क्रिययानुमेयं ॥८॥

यस्मिन्भवान्निरूढात्माभिमानः सिंधुषु प्रजाऽस्मीति दुर्मदेनान्धः सन् ॥६॥ व्यवहारस्य मूलं कारणं अर्थक्रियया सदित्यनुमेयं निरूप्यतां तथा च श्रु-
तिः । शोच्यान्विष्ट्या निगृह्णन्निष्कृपो वर्तसे । अथो पितेव गोप्तास्मीति श्लाघमानो महतां सभासु न शोभसे यतो धृष्टः ॥७॥ भवत्वन्त्यावयवभावः पू-
र्वपूर्वावयवानां भवेदिति वाच्यं तेषामप्यनिरूपणादित्याशयेनाह । यदेति । निष्ठां नाशं प्रभवमुत्पत्तिं विदाम विद्मः तत्र क्षितेरन्यस्य विकारस्या-
भावान्नाममात्रादन्यत् व्यवहारस्य मूलं कारणं । अर्थक्रियया सदित्यनुमेयं निरूप्यतां तथा च श्रुतिः वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं ॥८॥

वा

तर्हि क्षितेः सत्यता स्यात् तत्राह ॥ एवं क्षितिशब्दस्यापि वृत्तं वर्त्तनं न त्वर्थोऽस्ति निरूक्तं ॥ यद्वा क्षितिशब्दस्य वृत्तं यस्मिन् तदपि मिथ्यात्वेन निरूक्तमित्य
र्थः ॥ कुतः असतः सूक्ष्मस्य परमाणुरूपस्य कारणभूतेषु विधानात् लयात् अतः परमाणुव्यतिरेकेण क्षितिर्नास्तीत्यर्थः परमाणवस्तर्हि सत्याः ॥
स्युः ॥ तत्राह ॥ ते मनसा कार्यानुपपत्त्याँ ऋषिभिः कल्पिताः कल्पनावीजमाह ॥ येषां समूहेन विशेषः कृतः तेषां समूहः पृथ्व्यवधारणं वनमित्यर्थः अ
वयविनो निरस्तत्वात् समूहग्रहणं तथापि सत्याः स्युः न अविद्यया प्रपंचस्य भगवन्मायया विलसितत्वात् तज्ज्ञानेन कल्पित ॥९॥ एवमन्यदपि कृशत्वा

एवं निरूक्तं क्षितिशब्दवृत्तमसन्निधानात् परमाणवो ये ॥ अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः ॥९॥
घ एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीव[illegible]मजीवमन्यत् ॥ द्रव्यस्वभावाशयकालकर्मनाम्नाजयावेहि कृतं ॥
द्वितीयं ॥१०॥ ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यं ॥ प्रत्यक्प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो
वदन्ति ॥११॥

रिधर्मकं वध्यापि प्रतीतं तद्द्वितीयं द्वैतं द्रव्यादिनाम्ना उपलक्षितया यया मायया कृतमेवेहि ॥ तत्र कश्शंकत्वस्थूलं तत्प्रतियोगि अणुरह
तोऽपृथगुपादानात् ॥ असत् कारणं सत् कार्यं जीवं चेतनम् अजीवं जडं तर्हि किं सत्यं ॥१०॥ तत्राह ॥ ज्ञानं सत्यं ॥ व्यावहारिकसत्यत्वं व्यावर्त्तयति परमार्थः ॥
वृत्तिज्ञानव्यवच्छेदार्थमिषय ॥ विशेषणानि विशुद्धं ॥ नत्वाविद्यकम् एकं नत्वनानारूपम् अनंतरं त्वबहिः बाह्याभ्यंतरशून्यं नत्व ---- ब्रह्म परिपूर्णं
नत्वपरिच्छिन्नं ॥ प्रत्यक् नत्वविषयाकारं प्रशान्तं निर्विकारं ॥ तदेव स्वरूपज्ञानं सत्यमित्युक्तं कीदृशं तत् ॥ ऐश्वर्यादिषड्गुणत्वेन भगवच्छब्दः संज्ञा यस्य य
ज्ज्ञानं वासुदेवं वदन्ति ॥११॥

तर्हि किं सत्यं २

६४

भा॰पं॰
३८

एतत्प्राप्तिश्च महत्सेवां विना न भवतीत्याह। हे रहूगण एतत् ज्ञानं तपसा पुरुषो न जाति। इज्यया वैदिककर्मणा निर्वपणात् अन्नादिसंविभागेन
गृहाद्वा तन्निमित्तपरोपकारेण छंदसा वेदाभ्यासेन जलाग्निसूर्यादिभिरुपासितैः ॥१२॥ महत्सेवायास्तत्प्राप्त्युपायतामाह। यत्रेति उत्तमश्लोककथन
स्य विघातो यस्मात् ॥१३॥ विषयसंगात्स्वयोगभ्रंशप्रकारं निवेदयन् कर्मविनिर्गृह्य स्पष्टयति अहं पुरेति द्वाभ्यां। विमुक्तो दृष्टश्रुताभ्यां संगनि
मित्तो बंधो येन। हतोर्थः प्रयोजनं यस्य ॥१४॥ श्रीकृष्णार्चनेन प्रभव उद्भवो यस्याः सेत्याह। सेति जनसंगात् विशंकमानः अविवृतः अप्रकटः ॥१५॥ अस

रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा। न छंदसा नैव जलाग्निसूर्यैर्विना महत्पादरजोभिषेकं ॥१२॥ यत्रोत्तम
श्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः। निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥१३॥ अहं पुरा भ
रतो नाम राजा विमुक्तदृष्टश्रुतसंगबंधः। आराधनं भगवत ईहमानो मृगोऽभवं मृगसंगाद्धतार्थः ॥१४॥ सा मां स्मृतिर्मृगदेहेपि
वीर कृष्णार्चनप्रभवा नो जहाति। अथो अहं जनसंगादसंगो विशंकमानोऽविवृतश्चरामि ॥१५॥ तस्मान्नरोऽसंगसुसंगजातज्ञा
नासिनेहैव विवृक्णमोहः। हरिं तदीहाकथनश्रुताभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥१६॥ इति श्रीभागवते महापुराणे पंच
मस्कंधे ब्राह्मणरहूगणसंवादे द्वादशोऽध्यायः॥

गो महद्भिः सुसंगस्तेन जातं ज्ञानमेवासिस्तेन छिन्नमोहः सन्नध्वनः संसारमार्गस्यातिपारं परं
श्रेष्ठपारं हरिं याति। यद्वा पारमतिक्रान्तिक्रम्य हरिं याति अतिरतिक्रमणे वेति कर्मप्रवचनीयत्वात् द्वितीया तत्स्य हरेरीहानां कथनश्रुतिभ्यां
लब्धा स्मृतिर्येन सः ॥१६॥ इति भागवते पंचमे द्वादशः ॥१२॥

राम
३८

इयोरक्षो विरक्ताय दृष्टा तत्त्वनिरूपणा ॥ इति वैराग्यपराध्यायं भवार्णवमुपवर्णयते ॥ अथ धनः पारमिति उक्तं तदेव प्रसिद्धमार्गरूपकेण वैराग्याय
प्रपंचयति ॥ दुरत्ययेष्विति दुस्तरे अध्वनि प्रवृत्तिमार्गे रजस्तमः सत्त्वविभक्तानि कर्माणि कार्यं तथा पश्यतीति तथा एष प्रसिद्धः सार्थो जीवसमू
हस्वार्थपरः स्वलोर्थमनु यथा वणिक् सार्थो धनार्जनाय गच्छन्न्नरवीं याति तद्वत् ॥ अथ सोध्यायस्य व्याख्यानरूपं उक्तरागध्यायो हीनतथापि स्तव
प्रतिपन्नये किं विद्याम्यायते ॥ यस्यां भवाटव्यां इमे इन्द्रियनामानः षट् दस्यवः चोराः कुत्सितो नायकः सारथिर्बुद्धिर्यस्य तं सार्थं विलुंपति ॥ तस्य

॥ जडभरत उवाच ॥ दुरत्ययेऽध्वन्यजयानिवेशितो रजस्तमःसत्त्वविभक्तकर्मदृक् ॥ स एष सार्थोऽर्थपरः परिभ्रमन् भवाटवीं
याति न शर्म विंदति ॥ १ ॥ यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुंपंति कुनायकं बलात् ॥ गोमायवो यत्र हरंति सा
र्थिकं प्रमत्तमाविश्य यथोरणं वृकाः ॥ २ ॥ प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ॥ क्वचित्तु गंधर्वपुरं

धर्मधनमुपभोगेन हरंतीत्यर्थः ॥ गोमायवः शृगालवत्स्त्रीपुत्रादयः त्वं मे भर्त्ता पितेत्येवं प्र (प्रपश्यति क्वचित् क्वचिच्चाशुरयोल्मुकग्रहम् ॥ ३ ॥)
विश्य प्रमत्तं सार्थिकं सार्थस्थितं हरंति हरंतस्तत्त्वाकर्षंति ॥ उरणं मेषं ॥ वीरुधो लताः तृणानि गुल्मानि वल्लता दिजालानि प्रभूतैस्तैर्गह्व
रेः प्रवेशन्नेव कठोरदंशैर्मक्षिकाविशेषैर्मशकैश्च यथा कश्चिदुपद्रुतो भवति ॥ एवं कामकर्मादिभिर्गह्वरे गृहाश्रमे वर्त्तमानो दुर्जनैरुपद्रु
तो भवतीत्यर्थः ॥ गंधर्वपुरं वरन्नस्मानमेव देहादिकं प्रकर्षेण मत्वेमे वेदमिति पश्यति क्वचित् क्वचित्पिशाचादिः आशुरयः शीघ्रवेगा उल्मुकाका
रो ग्रहः पिशाचः तत्तत्त्वं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः ॥ ३ ॥

भा॰पं
३९

निवामान्हाव्हान्माव्हमावोयस्याः साद्धिर्यस्य सः । ततस्ततो धावतीत्युभयत्र तावानेवार्थः । वात्या चक्रवातः तस्या उत्थितः पांसुस्तेन धूम्रा
दिशः रजस्वलो रजोव्याप्ते अह्निणी यस्य स यथा न जानाति । तथा वात्येव भ्रमयतीयाह्वीतस्याउद्गते रागादिः अप्रकाशमाना दिशेव ताः क
मिमान्ह्निभूतान जानतीत्यर्थः ॥ ४ ॥ अहदस्य नदिल्लीनां धृंगारिकां तेनाना कीरविशेषाणां ध्वनैः कर्णयोः शूलो व्यथा यस्य । उलूकाद्युका
ध्रिषाणामिर्वधितो तालापनो यस्य । अत्र च परोक्षमप्रियवक्तारो दिल्लीठल्लाः प्रत्यक्षमप्रियवक्तारो चक्रठल्लाः येषां कापापिपापहेतुः

निर्वापितोपद्रविणात्मबुद्धिस्ततस्ततो धावति योऽसुखार्त्यां । क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाः सः ॥ ४ ॥
अहर्दिवा दिल्लीध्वनकर्णशूल उलूकवाग्भिर्व्यथितान्तरात्मा । अपुण्यवृन्दोच्छ्रयतो हि धार्ष्ट्यितो मरीचितोयान्यभिधावति क्वचित्
क्वचिद्वितोयाः सरितोपिपासितपरमांश्चालयते निरुद्धः । अमार्घदावक्कविरम्रितप्तो निर्विद्यते क्व च यः पक्षेकृतातापुः ॥ ६ ॥

ते अपुण्यवृन्दाः तत्कल्यान धार्मिकामेव ते मरीचितोयानीति निष्फलत्वेन विज्ञातानपि विषयान् ॥ ५ ॥ धावितो याउसरित्स्वपतितस्य गात्रमंगा
त्सेद्योऽदुः खंभवति न चोरकलाभः तद्वदिहचपरत्रवदुः खदान्यापंडान मियाति । शूलयते दायादिमयोऽस्त्राद्दिवा छतिउभयत्रापि समएवार्थ
दावंदावाग्नितल्पड्डवेरंगहृप्राप्यशोकाग्निनातप्तो निर्विद्यते विषीदति । तत्र च यत्त्वाण्णमवठल्पे राजभिः कृतं अस्य च स्वेशं धनं यस्य स निर्विद्य
ते ॥ ६ ॥

राम
३९

अन्यैश्च श्रेष्ठैः हृतं स्वविनं यस्य ॥ निर्विण्णं विषण्णं चेतो यस्य ॥ कश्मलं मूर्छां गां गंधर्वपुरमिव मनोरथोपगतपितृपुत्रादिसमाजं प्रविष्टः सन् ७
कंटकाशिविद्धांघ्रिरिव विघ्नैरभिभूतः सन्नगात्वल्पमहत्कर्माराद्धं कर्तुमिच्छु विमनाइव आस्ते पदे पदे त्नेणोत्नेणाग्न्य स्पृष्टेरणा वह्निनाज्ञाऽ
रेण ॥ ८ ॥ अजगराहिना निद्रारूपेण गिलितो न वेत्ति ॥ विपिने त्यक्तः शाव इव ॥ दंदशूकैः हिंस्रैर्दुर्जनैर्दष्टः पीडितः अधोऽलुब्धविवेकांधः

क्रोधैर्हृतस्वः क्वच निर्विण्णचेताः शोचन्विमुह्यन्नुपयाति कश्मलं ॥ क्वचिच्च गंधर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तं ॥ ७ ॥
चलन्क्वचित्कंटकशर्कराङ्घ्रिर्नगारुरुक्षुर्विमना इवास्ते ॥ पदे पदे स्पृष्टेरवह्निनार्दितः कौटुंबिकः क्रुध्यति वै जनाय ॥ ८ ॥
क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिनेऽपविद्धः ॥ दष्टः स्म शेते क्व च दंदशूकैरंधोंधकूपे पतितस्तमि
स्रे ॥ ९ ॥ कर्हि स्म चित [illegible] न्विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः ॥ तत्रातिकृच्छ्रात्प्रतिलब्धमानो बलाद्विलुंप
न्त्यथ तं ततोऽन्ये ॥ १० ॥ क्वचि [illegible] वर्षप्रतिक्रियां कर्तुमनीश आस्ते ॥ क्वचिन्मिथो विपणन्यच्च किंचिद्विद्वेषमृ
च्छत्युत वित्तशाठ्यात् ॥ ११ ॥

कूपे मोहे पतितः तमिस्रे दुःखे शेते लीयते ॥ ९ ॥ [illegible] परपोषादीन् विचिन्वन् तन्मक्षिकाभिर्योषादिभिः
भिः विमानः अवज्ञातः ताडितः सन् व्यथि [illegible] यदि कथं चित्त्रातिकृच्छ्रेण न प्रतिलब्धमानः प्राप्तयोषादिर्भवति तदा बलादन्यो ऽपह
रंति तान्यस्मिन् युक्तेतराः ततोऽन्ये हरंति ॥ १० ॥ [illegible] चित्तअत्यल्पमपि मिथो व्यवहरन् क्रयादिना गृह्णन् वित्तशाठ्यात् धनवंचनात् ॥ ११ ॥

भा०पं
४०

शय्यादिहीनः आस्यते ऽस्मिन्नित्यासनं कवलादि । स्थीयते ऽत्रेति स्थानं गृहं । विरहंत्यनेनेति विहारो यानादि । यावदाप्नोपि यदा परस्माद
प्राप्नकामस्तदा परकीयेवस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानं प्राप्नोति ॥ १२ ॥ एवमन्योन्यं विन्नव्यतिषंगे साधनविनिमयेन विरुद्धो वै
रानुबंधो यस्य तथाविधो ऽपि परस्परं विवदन्नु विवादादिसंबंधं कुर्वन् ॥ उद्गतैः कष्टैः श्रमैः विन्नबाधैः उपसर्गौर्वृद्धैषादिभिर्विपन्नः

क्वचित्क्वचित्तद्धीनाधनस्तत्तस्मिन्नु शय्यासनस्थानविहारहीनः ॥ यावत्परात्प्रतिलब्धकामः पारक्यदृष्टि
लभतेऽवमानं ॥ १२ ॥ अन्योन्यवित्तव्यतिषंगवृद्धवैरानुबंधो विवदन्नु मिथश्च ॥ अध्वन्यमुष्मिन्नुरुकष्टवित्तबा
धोपसर्गैर्विहरन्नु विपन्नः ॥ १३ ॥ तांस्तान्विपन्नान्स हि तत्र तत्र विहाय जातं परिगृह्य सार्थः ॥ आवर्ततेऽद्यापि
न कश्चिदत्र वीराध्वनः पारमुपैति योगम् ॥ १४ ॥ मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः
मृधे शयीरन्न तु तद्व्रजंति यन्न्यस्तदंडो गतवैरोऽभियाति ॥ १५ ॥

मृतप्रायो भवति ॥ १३ ॥ इत्थं साधमध्वनो दर्शयति । तांस्तान्विपन्नान् मृतान् विहाय जातं परिगृह्यं विहरन् ॥ यतः प्रस्थितः तं प्रतिनावर्त्ततेहे
वीरस्याध्वनः पारं योगमस्तं च नोपैति ॥ १४ ॥ अत्र सार्थे कश्चिदिति समर्थोपि न देवाह ॥ मनस्विनः शूरा निर्जितदिग्गजेन्द्रा ये ः ॥ ममेयं भूमिर्ममेय
मिति भुवि निमित्तभूतायां बद्धवैरा ये ः ॥ न्यस्तदंडः सन्यासी यत्पदं क्षेमापरमभियाति तन्न व्रजंति ॥ १५ ॥ गोपालाय नमः ॥ राम

राम
४०

सिंहावलोकनेन पुनः पर्ववार्त्तामेवानुवर्णयति ॥ प्रसज्जतीत्यासक्तिं करोति । कीदृशः लतानां भुजाः शाखाः तद्वल्लक्रमाणां येऽवीर्णां भुजास्तदाश्रयः सन् तदाश्रयात्त्यक्तपराश्रयस्फुटराज्ञाः कलमाशिणो ये द्विजाः पक्षिणः तत्र लोभेऽवीर्णां गगनमक्षेऽपपत्तेषु स्पृहा यस्य तादृशो भूत्वा हरिवक्त्रः सिंहसमूहः तत्तुल्यात्कालचक्रनिपिन्नाडंन्यसरणे रवमन् ॥ तत्परिहाराय वैकिष्ठिरलेलीपितो वकारिवद्धं वक्त्रः स्कडैः कूरैश्च पार्वडैः सह सख्यं करोति तेषु प्रविशति ॥ १६ ॥ तैर्वंचितस्तत्र फलाभावं ज्ञात्वाहं महानां ब्राह्मणानां जालं पुनः प्रविशन्ते पाशीलं प्रायश्चित्तं पूर्वं कं पुनर्न पनयनाद्यावार

प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयात्यक्तपरद्विजस्पृहः ॥ क्वचित्कदाचिद्धरिवक्त्रतस्त्वसन्नसाध्यं विधत्ते नवकंकगृध्रैः ॥ १६ ॥
तैर्वंचितोऽहं सकलं समाविशत्रोचयन् शीलमुपेति वानरान् ॥ तज्जातिरागेण मनाग्निविष्टे तेद्रियः परस्परोद्दीप्तगणाविस्मृतावधिः ॥
द्रुमेषु रंस्यन्सुतदारवत्सलो व्यवायदीनो विवशः स्ववंधने ॥ क्वचित्प्रमादाद्गिरिकंदरे पतन्वल्लीं गृहीत्वा गजभीत आस्थितः ॥
॥ १७ ॥ श्वानः कथंचित्प्रविष्टक्ताप्यपरः पुनश्च मार्गं प्रविशत्यरिंदम ॥ प्रबुध्य सुप्तिमित्रजयानिवेशितो भ्रमञ्जनोद्यापि न वेद कश्चन ॥ १९ ॥

क्रोधवशात् प्रियं पश्यन् वानरतुल्यान् भ्रष्टाचारान् शूद्रप्रायानुपैति ॥ तज्जातिरागेण वानरजातिक्रीडया स्त्रियामिथुनीभूय परस्परम् ॥ मुखोद्दीप्तगणो न विस्मृतो ज्ञानी विना विधिर्येन ॥ १७ ॥ द्रुमवल्केवलदृष्ट्यार्थेषु गृहेषु व्यवायदीनः स्वरतेच्छयाकृपणाः एवं स्वसंपदं वनं प्राप्तं तस्मिन् विवशः परिहृत्य समशङ्कः पाठान्तरे त्ववने संसारे चरन्नित्यर्थः गिरिकंदरे वसति भयानकेऽरण्ये हिडुः वेपतनं कंदरस्थो गजतुल्यान्मृत्योर्भीतः सन् वल्ली तल्पप्राचीनकर्मावलंब्यावस्थितो भवति ॥ १८ ॥ मार्गं प्रविशति यथापूर्वं प्रवृत्तिमार्गे रमते ॥ १९ ॥

त्वमपि अर्धनिनिवेशित इत्यनुषंगः अतो ममाध्वनः पारमेति नरः अप्रजितात्मा विषयेषु नमनिनिवेशितचित्तः मन्नुः हरिसेवयाशितं तीर्णाभिकृतं ॥१०॥ अखिलजन्मसु शोभनं नृजन्मैव परं श्रेष्ठं येभ्यो देवादिजन्मभ्यः तेष्वपि किं अमुष्मिन्नु स्वर्गो विजन्मभिः किं न किंचित्प्रयतेषु जन्मस्वयत्र स्वर्गो वा । वो महात्मनां मम भागमः प्रवृत्तो न भवति हृषीकेशस्य यशसा कृतः शोधित आत्मा येषां तेषां ॥११॥ हंत तमुपाश्रितैः त्वत्पदाब्जरेणुभिर्हृतमंहो यस्य तस्याधो

रहूगणात्वमपित्यधनोस्मि संन्यस्तदंडः कृतभूतमैत्रः अप्रजितात्मा हरिसेवयाशितं ज्ञानासिमादाय तरातिपारं ॥१०॥ रहूगण उवाच अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् । न यद्धृषीकेशयशः कृतात्मनां महात्मनां वः प्रचुरः समागमः ॥११॥ न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजे मला । मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोपहतो विवेकः ॥१२॥ नमो महद्भ्यः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः । ये ब्राह्मणा गामवधूतलिंगाश्चरंति तेभ्यः शिवमस्तु राज्ञाम् ॥१३॥

क्षेत्रे निर्मला भवतीति नैवाद्भुतं ॥ यस्य तव मुहूर्त्तमात्रं भवत्समागमः मात्रादपि दुस्तर्कमूल एवं वद्धमूलोपि मम अविवेको नष्टः ॥१२॥ ब्रह्मविदः के न रूपेण विचरंतीत्यतः ज्ञानात्सर्वान्नमस्यति नम इति ये वटवः क्रीडापरतत्वाच्छद्मेव चोरयान्तानप्यभिव्याप्य सर्वेभ्यो नम इत्यर्थः स्वदृष्टान्तेन राज्ञामहंकारं वा नाम आह ॥ शिवमस्त्विति ॥ ॥४॥ ॥१३॥ ॥ गोविंदाय नमः ॥ गोपालाय नमः ॥ रामाय नमः राम

उत्तरामातायस्येहे उत्तरामातः विगणयतः नगणयतः अवसन्नयद्यपिपरमकरुणाकरत्वेनसिंधुपतयआत्मतत्त्वमुपदिश्यनिभृताः
शांताः करणामूर्तयोयस्मिन्सः आशयोयस्य ॥२४॥ सुजनात्तस्मात्सम्यगवगतंपरमात्मसतत्त्वंयेनतथाभूतः सन् ॥ तदानीमेवदेहेआत्म
मतिंचविससर्ज ॥२५॥ हेनृपभगवदाश्रितोभरतः यदाश्रितोरहूगणोयः तस्मात्प्रभावः सद्योदेहाहंकारत्यागः ॥२६॥ परोक्षेणावलोकु

॥ शुकउवाच ॥ इत्येवमुत्तरामातः सवैब्रह्मर्षिसुतः सिंधुपतयआत्मसतत्त्वंविगणयतः परानुभावः परमका॰पि
कतयोपदिश्यरहूगणेनसकरुणमभिवंदितचरणः आपूर्णार्णवइवनिभृतकरणोर्म्याशयोधरणिमिमांविचचा
र ॥२४॥ सौवीरपतिरपिसुजनसमवगतपरमात्मसतत्त्वआत्मन्यविद्याध्यारोपितांचदेहात्ममतिंचविससर्ज ॥२५॥
एवंहिनृपभगवदाश्रिताश्रितानुभावः ॥२६॥ राजोवाच ॥ योहवाइहबहुविदामहाभागवतत्वयाभिहितः परोक्षे
णवचसाजीवलोकभवाध्वासत्यार्यमनीषिकयाकल्पितविषयोनांजसाव्युत्पन्नलोकसमधिगमः ॥२७॥ अथतदे
वैतदुरवगमंसमवेतानुकल्पेननिर्दिश्यतामिति ॥२८॥ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेत्रयोदशोध्यायः

सार्थकत्वेपिफलआर्याणांविवेकिनांमनीषयेवदस्युस्थानीयानींद्रियाणिगोमायुस्थानीयान्यपत्यादीनीत्येवंकल्पितविषयः
अव्युत्पन्नस्यतुलोकस्यसम्यक्अधिगम्योनभवति ॥२७॥ अथअतस्तदेवभवाध्वरूपंसमवेतानुकल्पप्रत्तेननतस्यरूपार्थाप

चतुर्दशे भवारण्यरूपकव्याकृतिः कृता । यद्भूतेन तस्य गोप्याद्युपशाकाद्यर्थकल्पनैः ॥१॥ यः परोक्षितया दृष्टः स श्रीशुक उवाच स इहेति स्फुटोक्तिभिः ॥१॥ उ
रत्यये ध्वन्यजया निवेशित इति यदुक्तं तदेव निवेशनप्रकारं कथनेन प्रपंचयति । य एष प्रसिद्धो जीवलोकः सुखं विह्वलो मायया त्रिगुणमेत्य ध्वन्या
पतितो भवाटवीं गतः स तत्र हरिगुरुपदसरोरुहचरणारविंदमधुकराः सेवकाः तेषां अनुपदवीं तेरनुष्ठितं भक्तिमार्गं नाद्यापि नावरुंधे न प्राप्नोतीत्य
न्वयः स्वकार्यद्वारेणाः संसारमार्गपातहेतुत्वमाह । देहात्ममानिनां सत्वादिगुणविशेषैर्विकल्पितानि विभक्तानि यानि कुशलाकुशलानि

स होवाच ॥ स एष देहात्ममानिनां सत्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदेहावलिभिर्वियोग
संयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षड्ंद्रियवर्गेण तस्मिन्दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वश
वर्तिन्या मायया जीवलोकोऽयं यथा वणिक्सार्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां ग
तो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविंदमधुकरानुपदवीमवरुंधे ॥१॥ यस्यामु ह वा एते षडिन्द्रि
यनामानः कर्मणा दस्यव एव ते ॥२॥

शुक्र(?)कर्माणि तैर्विनिर्मिताभिः विविधदेहावलिभिः वियोगसंयोगादिर्यः नादिसंसारः तदनुभव
स्य द्वारभूतेन तस्मिन्संसाररूपे दुर्गमार्गवदसुगमेऽध्वन्यापतितः यथा वणिजां समूहः सार्थः । अर्थार्जनपरः स्वदेहनिष्पादितानां कर्मणां
फलद्वारेणानुभवो यस्य विफला बहवः प्रतियोगाः बहुविघ्नाश्च ईहाः चेष्टा यस्य सः । तस्मिन्संसाराटव्यां येन तापास्तेषां उपशमनीं ॥ १ ॥ यस्या
मित्यादि व्याचष्टे यस्यां भवाटव्याम् ॥ २ ॥ ॥

दस्युतुल्यं तेषां कर्म दर्शयति ॥ तद्यथेति ॥ धर्मोपयिकं धर्मकारणं तमेव ह्यापि येनं धर्ममाह ॥ साम्ना इति ॥ तं तु सामपरायेपरलोकार्थमुदाहरंति
॥ ४ ॥ तद्धर्मधर्मो हि धनम् ॥ दर्शनाद्याः पंचज्ञानेन्द्रियाणां वृत्तयः ॥ संकल्पश्च व मायावन्नः करणस्यैते गृहे योग्या स्युपभोगास्तेन तु नाथस्य
उक्ते दुरजितात्मनो विलुंपति ॥ यथा चौराः कपालस्य शून्य नवहितात्मनः सार्थस्य धनं हरन्ति तद्वत् ॥ ५ ॥ गोमायव चोपद्रेत्येतदाचष्टे ॥ अथ

तद्यथाप्रहृषस्य धनं यत्किंचित्साक्षाद्धर्मोपयिकं वक्रकृत्स्नाधिगतं साम्नात्परमपुरुषाराधनलक्षणो यो सौ धर्मस्तं तु सांप
रायउदाहरन्ति ॥ ४ ॥ तद्धर्मधनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्या
जितात्मनो यथा सार्थस्य तथाजितात्मनो विलुंपन्ति ॥ ५ ॥ अथ च यत्र कौटुंबिका दारापत्यादयो नाम्ना कर्मणा वृकशृ
गाला एवानिच्छतोपि कदर्यस्य कुटुंबिन उरणकवत्संरक्ष्यमाणमपि मिषतोपि हरन्ति ॥ ६ ॥ यथा ह्यनुवत्सरं कृष्यमाणमप्य
दग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवति ॥ एवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन्न हि कर्मा
ण्युत्सीदंति यदयं कामकरंड एष आवसथः ॥ ७ ॥

चेति ॥ अथ चेत्यर्थान्तरोपन्यासे कर्मणा तुकाः शृगालाः श्वकदर्यस्यानिलुब्धस्य
॥ ६ ॥ अप्रभृष्टबीजं तृणगुल्माद्यंकुराः इत्येतदाचष्टे ॥ यथाहीति ॥ नदग्धानि बीजानि यस्मिन् यद्यस्मात् योयमावसथश्चाश्रमः एष कामानां करंडः
यथा कर्पूरभाजने कर्पूरक्षयेपि परिमलो न क्षीयते एवमत्रवासनानाम क्षीणत्वात्र कर्माण्युत्सीदंतीत्यर्थः ॥ ७ ॥ रामाय नमः ॥

दंशमशकतुल्यैरपसदैर्नीचैः शलभादिभिश्चोपद्रूयमानः पीड्यमानो बहिःप्राणो विनष्टप्रायस्तथा विध्वोऽस्य स्मिन्नधनि परिभ्रमन्नकुविद्यादिभि
रुपरक्तेन मनसा गांधर्वपुरतुल्यमविद्यमानं नरलोकमसत्यतया मिथ्यादृष्टिरनुपश्यति ॥ ८ ॥ अनुपश्यतीति प्रशस्तस्मृवितमर्थ्यान्तरं दर्शयति तत्र वा गां
धर्वपुरे क्वचिद्दातपोदकं मृगतृष्णाजलं तत्तुल्यान्विषयाननुपधावतीति ॥ ९ ॥ क्वचित्क्वचिद्विद्याहारयोल्मुकग्रहमित्यतस्मावष्टे ॥ क्वचिद्वाशेषाणा

तत्रापातो दंशमशकसमापसदैर्मनुजैः शलभशकुन्ततस्करमूषकादिभिरुपद्रूयमानबहिःप्राणः क्वचित्परिवर्तमानोऽ
स्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसाऽनुपपन्नार्थं नरलोकं गांधर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥ ८ ॥
क्वचिद्दातपोदकनिभान्विषयाननुपधावति पानभोजनव्यवायादिव्यसनलोलुपः ॥ ९ ॥ क्वचिच्चाशेषदोषनिषदनं पुरी
षविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचं ॥ १० ॥ अथ कदाचिन्निवासपानीय
द्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधावति ॥ ११ ॥

दोषाणां निषदनं स्थानं पुरीषविशेषं ऋग्नेर्विष्टा तस्य पुरीषस्य वलोहितो वर्णो रजोऽयस्परजो गणास्पतेन निर्मितानद्विशेषेणामतिर्यस्य सः सुव
र्णमुपादित्सति ऋग्निकामेन कातरः परवशः उल्मुकमर्दशापिशाचमिव शीतार्तरोदुपरापश्रग्निवज्जाज्वल्यमानं ततस्ततो धावन्नमुल्मुकपिशा चम
चमग्निबुद्धा अनुधावन्नपि न तेन तस्मात्प्रीतिकर्थं विस्तारोऽन्यत्र तद्धितेन भक्तिः सन्मृयते एवं सुवर्णमनुधावन्नपीत्यर्थः ॥ १० ॥ निवासमिति
यद्रविणत्यन्तस्मावष्टेऽथेति निवासादिष्वनेकेष्वात्मन उपजीव्येष्वभिनिवेशो यस्य ॥ ११ ॥ गोपालायनमः

क्वचिच्छ्ववात्योत्थितेत्येतद्व्याचष्टे । क्वचिच्छेति । आरोहकंकंकयस्मिन्काले यद्रजः रागः त्वदृष्ट्यावरकोराराजन्यारात्रौ भूताःस्वद्धत्वपाठेरजनीभूतत्वमो
मयइतिश्रुतिरजसाछन्नमतिः अत एव रजोव्याप्तचक्षुरिवदिक्षु स्थितामर्यादाति क्रमसा त्रिभूता देवतानजानाति ॥ १२ ॥ अनुपादेयमेवोपादेयत
यागृह्णातीतिप्रक्रमप्रज्ञातात्पाडुन्नरश्लोकचतुर्थपादं प्रथमव्याचष्टे । क्वचित्मकरेति । क्वचिरातपोरकनिभानित्यपिथ्याविषयेषुलंपटत्वमुक्तं ।
निवाप्तत्तोमेन्यत्रतडुक्तेनप्रयाप्तउक्तः । अन्वतद्बाधितेषुविषनः प्रवृत्तित्युत्पद्यतरत्याघोनहन्त्रो । त्वयमेवमकरवगतंविषयानां वैतच्याविफलत्व

क्वचिच्छ्ववात्योपप्लवयाप्रमरयारोहमारोपितस्तत्कालरजसारजनीभूतस्वासाधुमर्यादारोजस्तलाक्रोदिरिदेवताश्रुतिरजत्व
लप्तिर्विजानाति ॥ १२ ॥ क्वचित्मकरवगतविषयवैतथ्यः त्वयंपराभिध्यानेनविभ्रंमितस्मतिस्तयेवपरीचितोघप्रायांनेवा
भिधावति ॥ १३ ॥ क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपंप्रत्यक्षं परोक्षंवारिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्ण
मूलहृदयः ॥ १४ ॥ सयदापूर्वदुग्धसुकृततस्तदाकारस्काराकाकगुडाख्यपुण्यफडुमलताविषोदपानवदुभयार्थशून्यद्रविणाज्जीव
न्मृतात्स्वयंजीवन्म्रियमाणउपधावति ॥ १५ ॥

येनपराभिध्यानेनरेहासिनिवेशोनविभ्रंमितास्मृतिर्यस्यतथेवविभ्रंमितयास्मृत्यास्मृतिभ्र
मारेवेत्यर्थः ॥ १३ ॥ उदूकपदिझिल्लीस्वनेत्येतद्व्याचष्टे । क्वचिदुलूकेति । अतिपरुषोरभसउत्साहस्तेनाटोपः संभ्रमोयथाभवत्येवंवरिपूणांराजकुलस्य
चनिर्भर्त्सितेनअतिव्यथितंकर्णमूलहृदयंयचयस्य ॥ १४ ॥ अपुण्यवृक्षानित्येतद्व्याचष्टे । सयदेति । दुग्धपुण्यंपूर्वसुकृतंयेनतदाकारस्काराविषति
उत्स्वप्तावाघअपुण्यद्रुमास्तथाविधालताश्चविषोदपानाश्चविषकूपाः तन्सत्यानुदृष्टाइष्टप्रयोजनशून्याधनानु ॥ १५ ॥

क्वचिद्धितो याः स्थित इत्येतद्याचष्टे । एकदा क्वचित् असन्तं तातप्रसंगात निष्क्रान्तां वञ्चितामतिर्यस्मात् जित्तुरकनरीयात्रैर्यातेयथा सुद्युः शिरः स्फु
रति पश्चात्स्पिचतद्वेस्तनागुवर्त्तते एषपि हृपरत्रवद्गुः स्वेदं ।६। परस्पं रवालषतेनिरंध इत्येतद्याचष्टे मद्दात्विति श्रंधः अत्रैनोपनमति
नोपतिष्ठति । पितृपुत्राणां वहिः क्रमः तद्भतः पितुः पुत्राणां कशाद्दितणोमात्रमपि येषु परपतितान्नु पत्तपतिवाधयत इत्यर्थः । पितृपुत्र
वर्हिव्यानिति पितुः पाठः सुगमः ।७। स्वाप्ताद्यदावमित्येतद्याचष्टे । क्वचिदात्ताद्येति ।८। क्वचयत्रैद्देताद्यरित्येतद्याचष्टे क्वचित्काले

एकदा मत्स्यप्रसंगात्त्रिकूटपतिर्मुद्रकस्रोतसमप्यवलनवद्गुमयतो पितुः स्वेदपापपाउमपि याति ।६। यदा त्वपरवा
धंधांधआत्मने नोपनमति । तदाहि पितृपुत्रवर्हिष्मतः पितृपुत्राद्वामास्वल्गुमन्दयति ।७। क्वचिदामद्यगृहदावव
त्रियार्थविधुरं अस्वश्रोरङ्गेशोकाग्निनारत्यमानो भृशानिर्वेदमुपगच्छति ।८। क्वचित्कालविषमितराजकुलरक्षसा
हृतप्रियतमधनासुः प्रमृतकइव विगतजीवलक्षणआस्ते ।९। कदाचिन्मनोरथोपगतपितृपितामहाद्यः सत्व
दिति स्वप्ननिर्वृतिलक्षणमनुभवति ॥ १० ॥

न विषमितं यति कुलं तातानीतं यद्राजकुलं तदेव रक्षस्तेन अपहृताः प्रियतमधनासू
प्राणाश्च येन सः विगतानि जीवलक्षणानि हर्षादीनि यस्य सः हृतव इत्यप्यनेनैव व्याख्यातं ।९। क्वचिद्गन्धर्वपुरं प्रविष्ट इत्येतद्याचष्टे
कदाचिन्मनोरथोपगतान् पित्राद्यसदेव सदिति मत्वा पूर्वं गन्धर्वपुरं अवरुद्धमानदर्शनमुक्तं इदानीं तन्निमित्तसुखाभासोपि हन्यत इति भेदः ।१०।

चलत्क्वचिदित्येतद्व्याचष्टे क्वचिद्गुहाश्रमेषाः कर्मचोदनात्तामामतिमयोऽतिविस्तारः स एव गिरिरत्नमाकन्दङ्कनूतदेङ्गोगम्यपिच्छन्तु ॥११॥ परे परैः स्पर्शनरवह्निनेत्येतद्व्याचष्टे क्वचिद्दुःसहेनेति ॥१२॥ क्वचित्त्रिगीर्णा इत्येतद्व्याचष्टे स एवेति ॥१३॥ उष्णस्पर्शतद् इत्येतद्व्याचष्टे क्वचिदिति मानोगर्वं एवं दंष्ट्रा परपीडाकरणात् भग्नमानदंष्ट्राय स्मश्रुतएवनलब्धो निद्राया क्षणोपिये ॥१४॥ कर्हिस्मचित्क्षुद्ररसानित्येतद्व्याचष्टे कर्हिस्मचित्काममधुलवानिति यदा निहतो भवति तदा मद्य एव निरये पतति ॥१५॥ चक्रेणात्मत्रस्य कर्मणः संसार

क्वचिद्द्रुमाश्रमकर्मचोदनात् भरगिरिमारुरुक्षमाणो लोकव्यसनकर्षितमनाः कण्टकशर्कराङ्घ्रिस्तत्रैव प्रविशन्नि
वसीदति ॥११॥ क्वचिच्च दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारः स्वकुटुम्बाय क्रुध्यति ॥१२॥ स एव पुनर्निद्राज
गरगृहीतोऽन्धे तमसि मग्नः शून्यारण्य इव शेते नान्यत्किंचन वेद शव इवापविद्धः ॥१३॥ क्वचिद्भग्नमानदंष्ट्रो दुर्जनदन्द
शूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत्पतति ॥१४॥ कर्हि स्म चित्काममधुलवान्
विचिन्वन् यदा परदारपरद्रव्याण्यवरुन्धानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये ॥१५॥ अथ च तस्मादुभयथापि
हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरन्ति ॥१६॥ मुक्तस्ततो यदि बन्धाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यन
वस्थितिः ॥१७॥

हेतुत्वं स्फुटयति अथ चेति यस्मादेवं तस्मात् ॥ अथ च अनन्तरमेवं उभयथापि इह च परत्र च अस्मिन्प्रवृत्तिमार्गे संसारस्या
वपनं जन्मक्षेत्रं कर्माहुरिति ॥१६॥ तत्रातिकष्टं प्रतिलब्धमान इत्येतद्व्याचष्टे मुक्त इति यदि बन्धान्मुक्तो भवति तर्हि तेनः सकाशात्

२

भा०५
४५

क्वचिच्छीतातपेत्येतद्व्याचष्टे। क्वचिच्छेति शीतातपयोः नेकाद्याधिदैविकाद्याया याः दशाः दुःखावस्थास्तासां ॥१८॥ क्वचिन्निःस्थ इत्येतद्व्याचष्टे
क्वचिन्निःस्वो यत्किंचिद्धनं न ग्रहवहरन् काकिणीकामात्रं विंशतिकपर्दकमात्रं ततोऽपि न्यूनं वा यत्किंचिदपहरन् विद्वेषमेति ॥१९॥ अध्वन्यमुष्मिन्
उरुकृच्छ्रं वाधोपसर्गैरित्यस्याऽउपसर्गान्प्रपंचयति। अध्वन्यमुष्मिन्निम उरुकृच्छ्रविन्नवाधोदयः तथाहि खेदुःखोदयश्च ॥२०॥ सुतापैः पुनरुक्ते

क्वचिच्छीतवातातपनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणेऽप्यकल्पो दुरन्तचिन्तया विषण्ण आस्ते ॥१८॥ क्वचि
न्मिथो व्यवहरन्यत्किंचिद्धनमन्येभ्यो वा काकिणिकामात्रमप्यपहरन्यत्किंचिद्वा विद्वेषमेति वित्तशाठ्यात् ॥१९॥ अध्वन्यमु
ष्मिन्निम उरुकृच्छ्रतथाहि खदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्या
धिजन्मजरामरणादयः ॥२०॥ क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारम्भाकुल
हृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्माऽपारेऽन्धे तमसि प्रहिणो
ति ॥२१॥

सूनानापौरेतः परं दुर्गमोऽपि मया व्याख्यायं संप्रदायेन नीयते। तत्रप्रसज्जति क्वापि त्यादिना सिंहावलोकनन्यायेन उक्तमर्थमपकृष्य
क्रमेण व्याचष्टे। क्वापि देवमाययेति प्रस्कन्नं अपगतं विवेकविज्ञानं यस्य यस्याः स्त्रियाः विहारगृहं क्रीडागृहं तदारम्भेण आकुलं हृदयं यस्य तत्रैनेन प्रस
ज्जतीति व्याख्यातं तदाश्रयेत्यादि व्याचष्टे। तस्याः आश्रये अवसक्ताः संलग्नाः सुतादुहितृस्त्रीकलत्रं च येषां ते च तेषां भाषितादिभिरपहृतं हृदयं यस्य
प्रहिणोति प्रक्षिपति ॥२१॥

राम
४५

क्वचित्कदाचिद्धरिचक्रतस्त्रसन्नित्येतद्व्याचष्टे । कदाचिदीश्वरस्येति । परमाणुपरार्द्धद्विपरार्द्धापवर्गेति तत्तदेवोपलक्षणं यस्य तस्मात्कालोपल
क्षणादितिहृदयकारत्वेन पाठे कालस्वरूपादित्यर्थः । रंहसा शीघ्रेणापरिवर्त्तितेन परिभ्रमणेन वयसा वालादिक्रमेणायुष्याणामपि व्याप्नुत
णास्तं वा रिनीभूतानि वक्रातः सकाशात वित्रस्तहृदयः सनूपाषंडदेवताश्रमिमुक्षोणाधन्नरस्तत्पयुषः । अनिमिषितः निमेषमकुर्वतः अप्रमत्तादि
त्यर्थः । मिषतां प्रतिकल्लं मषशत्नानामित्यर्थः । कर्मणि षष्ठ्याः कालचक्रं निजं नित्यमायुधं यस्य सुदर्शनाख्येन मूलप्रमाणाश्रम्येन पाषण्डागमे २४

कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाणवादिद्विपरार्द्धापवर्गात्कालोपलक्षणात्परिवर्त्तितेन वयसा रंहसा हरत आवृह्म
तृणस्तंवादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेव वेदैः कालचक्रं निजायुधं साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पा
षण्डदेवताः कंकगृध्रवकवटप्राया आर्यसमयपरिहृताः सांकेत्येनाभिधत्ते २५ यदा तु पाषण्डिभिरात्मवंचितैस्तैरुरु वंचि
तो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादि श्रौतस्मार्त्तकर्मानुष्ठानेन भगवतो यज्ञपुरुषस्याराधनमेव तदरोचयन् शूद्र
कुलं भजते निगमाचारे ऽशुद्धितो यस्य मिथुनीभावः कुटुम्बभरणं यथा वानरजातेस्तत्रापि निरवरोधः स्वैरेण विहरत्यतिकृ

तैर्वंचितात्स्येतद्व्याचष्टे । यदा त्विति । आत्मना वंचितैः उरु अधिकं वंचितः । पाषण्डिभिरात्मप्रतारणादिना ग्राम्यकर्मणो विषमतकलावधिः
सततेषां ब्राह्मणानां यच्छीलमुपनयनादि तदरोचयच्छूद्रवदकृत्तेतेनिगमोक्ताचारे ऽशुद्धितः स्वयमशुद्धमावातयस्य शूद्रस्य केवलमिथुनीभा
वः कुटुम्बभरणं च व्यापारो नाग्निहोत्रादि । तज्जातिगामेनेत्यादि व्याचष्टे तत्रापि निरवरोधः प्रतिबंधरहितः स्वैरेण स्वेच्छया क्रीडन् विमूढतः कालो

डुपेशुरंसमस्त्रित्येतद्व्याचष्टे । क्वचिद्दुमवदिति व्याघ्रपञ्चाननः सिंहुनोत्सवो भवति ॥ ३४ ॥ क्वचित्समदादित्येतद्व्याचष्टे । एवमध्वनिस्वाद्यः वरंधानो
गिरिकंदरप्रायेतमभियोगाद्यापद्यतीतिशेषः ॥ ३५ ॥ क्वचिद्धीनवातेत्यादिपूर्वमाद्धिकोक्तिः । रोगाद्यापदिपतितः सनूशीतादिभिः क्लिश्य
न्नात्मन्स्त्यर्थः ॥ ३६ ॥ तदेवं सिंहावलोकनन्यायेनोक्तमर्थं यथास्थानमपकृष्यवाप्यायकुमसमस्यमनुवर्न्नयितुं पूर्वोक्तमेवानुवदति । क्वचिन्मिथ

क्वचिद्दुमवैरेहिकार्थेषुरंसमनुयथावानरः हृतदारवत्सलोव्यवायपञ्चाननः ॥ ३४ ॥ एवमध्वन्यवरुंधानो मत्तगजभयात्तमपिगि
रिकंदरप्राये ॥ ३५ ॥ क्वचिच्छीतवाताद्यनेकदैविकाधिभूतात्मीयानां दुःखानामतिनिवारणाकल्पोदुरन्तविषयविषण्णास्ते
॥ ३६ ॥ क्वचिन्मिथो व्यवहरन्यत्किंचिद्धनमुपयाति वित्तशाठ्येन ॥ ३७ ॥ क्वचित्क्षीणधनः शय्यासनाद्युपभोगविहीनोयाव
दप्रतिलब्धमनोरथः तस्यादानेऽवसितमतिस्तस्तस्ततोऽवमानादीनि जनाद्दभिलभते ॥ ३८ ॥ एवं वित्तव्यतिषंगवृद्धवैरानुब
न्धोपि पूर्ववासनया मिथ उद्वहत्यथापवहति ॥ ३९ ॥ एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गबाधितः आपन्नविपन्नो यत्र यस्तमुह वावे
तरस्तत्रैव विसृज्य जातंजातमुपादाय शोचन्मुह्यन्बिभ्यद्विवदन्क्रंदन्संहृष्यन्गायन्नह्यमानः साधुवर्जितो नैवावर्त्ततेः

इति वित्तशाठ्येन कदाचिद्द्युत्किंचिद्धनमुपयाति ॥ ३७ ॥ क्वचित्क्षीवि ॥ याप्ययं नृलोक एष नरलोकसार्थो यमध्वनः पारमुपदिशंति ॥ ४० ॥
न्क्षीणधन इत्येतद्व्याचष्टे । क्वचित्क्षीणधन इति । अलब्धं यस्मनोरथेनोपगतं वाछितं तत्स्यादाने ह्याकारेनिश्चितमतिः सन् ॥ ३८ ॥ अन्योन्यवित्त
व्यतिषंगेत्येतद्व्याचष्टे । एवं वित्तव्यतिषंगेति । अपवहति त्यजति ॥ ३९ ॥ अध्वन्यमुष्मिन्नित्यादि व्याचष्टे एतस्मिन्निति आपन्नः आपदं प्राप्तः विप
न्नो विनष्टो वा यत्र यः तमितरस्तत्रैव विसृज्य आऊह्यमानः वध्यमानः साधुवर्जितः साधुव्यतिरिक्तः ॥ ४० ॥

नुनाट्टतैत्तो हेतुमाह ॥ यदिदमिति ॥४१॥ मनस्विन इत्यादि व्याचष्टे ॥ यदपीति ॥ ये वै राजर्षयस्तेपि नावरुंध्यते किंतु परं केवलं मृधे शयीरन् ॥४२॥
प्रसज्जतीत्यादि गिरिकंदरस्य पत्तनमपकृष्य व्याख्यातं मपकृष्य व्याख्यातं ग्रंथमतिक्रम्य वल्लीं गृहीत्वेत्यादि ग्रंथं व्याचष्टे ॥ कर्मवल्लीमिति ॥ एव
मुपरि स्वर्गगतोपि नरलोकसार्थमेवोपयाति ॥४३॥ तदेवं भरतोक्तिं व्याख्याय तद्वृत्तिसंग्रहश्लोकानाह ॥ तस्येदं कर्मश्लोकैरुपगायंति ॥४४॥ आर्ष
भस्य ऋषभपुत्रस्य सद्गुणोन्यो नृपः अनुवर्त्म नार्हति ॥ वर्त्मानुगंतुं न शक्नोति ॥४५॥ तत्र हेतुमाह ॥ य इति ॥ हृद्ग्राज्यया दृढं यो दुस्त्यजान्दारा

यदिदं योगानुशासनं न वा एतदवरुंधते यन्न्यस्तदंडा मुनय उपशमशीला उपरतात्मानः समवगच्छंति ॥४१॥ यदपि दिगिभजयिनो
यज्विनो ये वै राजर्षयः किं तत्परं मृधे शयीरन्नस्यामेव ममेयमिति कृतवैरानुबंधायां विसृज्य स्वयमुपसंहृताः ॥४२॥ कर्मवल्लीमव
लंब्य तत आपदः कथंचिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोकसार्थमुपयाति एवमुपरि गतोपि ॥४३॥ तस्ये
दमुपगायंति ॥४४॥ आर्षभस्येह राजर्षेर्मनसापि महात्मनः । नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥४५॥ यो दुस्त्यजान्दारसुता
न्सुहृद्राज्यं हृदिस्पृशः ॥ जहौ युवैव मलवदुत्तमश्लोकलालसः ॥४६॥ यो दुस्त्यजान्क्षितिसुतस्वजनार्थदारान्प्रार्थ्यां श्रियं सुरव
रैः सदयावलोकां ॥ नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गुः ॥४७॥

दीनपि विष्ठामिव जहौ ॥ तस्यार्षभस्येति संबंधः उत्तमश्लोके हेतुः हृदिस्पृशः मनोज्ञानपि त्यागे हेतुः उत्तमश्लोके लालसः लंपटत्वं यस्य ॥४६॥ तस्यैवं वि
षयत्यागो न विचित्रमित्याह य एवंभूतो स नृपः क्षित्यादीन्नैच्छदिति यत्तदुचितं सदयावलोकां भरतस्य सदयाय या श्रीर्भवतो वमवलोकाय स्याऽइति पर

सेवानुरागमेवाह ॥ यज्ञायेति ॥ यज्ञरूपाय धर्मपतये यज्ञादिफलदात्रे ॥ विधानैपुणं यस्य तस्मै धर्मानुष्ठात्रे योगो ऽष्टांगस्तस्मै ॥ सांख्यज्ञानं
तच्छिरः प्रधानं फलं यस्य तस्मै योगाय ॥ प्रकृतीश्वराय मायानियंत्रे अत एव नारं जीवसमूहः सः अयनमाश्रयो यस्य तस्मै जीवनियंत्रे एवं
कर्मज्ञानदेवताकांडैः प्रतिपादिताय हरये नम इति उदारं उच्चैः यः समुदाजहारेति वा मृगत्वं प्रारब्धं हास्यन्नपि एवंभूतस्य तदुचि

यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय ॥ नारायणाय हरये नम इत्युदारं हास्यन्मृगत्व
मपि यः समुदाजहार ॥ ४५ ॥ इदं भागवतस्सभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमा
युष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वानुशृणोत्याख्यास्यत्यभिनंदति च सर्वा एवाशिष आत्मनः ॥ आशास्ते न कांचन परत इ
ति ॥ ४६ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे चतुर्दशोऽध्यायः ॥ ॥ श्रीरामचंद्र ॥ श्रीराम

तमिति वा तस्यानुवर्त्म नार्हतीति वा संबंधः ॥ ४५ ॥ भरतचरित्रश्रवणादिफलमाह ॥ इदमिति ॥ भागवतैः सभाजितान्यवदातानि शुद्धा
नि गुणाः कर्माणि च यस्य तस्य भरतस्यानुचरितं योऽनुशृणोति स आत्मन एव सकाशात्सर्वा आशिष आशास्ते स्वत एव प्राप्नोति न तु कांचिद
पि परस्मादपेक्षत इत्यर्थः ॥ ॥ ४६ ॥ इति श्रीभागवते टीकायां पंचमस्कंधे चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीराम

एवमादिभिरध्यायैर्भरतस्योक्तमीरितं । ततः पंचदशे तस्य कीर्त्यते वंशजा नृपाः ॥ १ ॥ ऋषभपदवीं जीवन्मुक्तमार्गमनुवर्त्तमानं यं दृष्ट्वेति शेषः
यद्वा येहमतिं श्रुवेदसमाम्नातां कल्पयिष्यंति उद्योगं साक्षाद्देवतां ॥ इति मम स्पष्टस्त्वर्थः ॥ १ ॥ तत्तनयः देवतजितः पुत्रः ॥ १ ॥ २ ॥ आत्मविद्यां

श्रीशुक उवाच ॥ भरतस्यात्मजः सुमतिर्नामाभिहितो यमु ह वाव केचित्पाषंडिन ऋषभपदवीमनुवर्त्तमानं चानार्या अवेद
समाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यंति ॥ १ ॥ तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत् ॥ २ ॥
अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः ॥ ३ ॥ य आत्मवि
द्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ॥ ४ ॥ प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्नि
ज्याकोविदाः सूनवः ॥ ५ ॥ प्रतिहर्त्तुः स्तुत्यामजभूमानावजनिषातां ॥ ६ ॥ भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो
देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुः ॥ ७ ॥ विभो रत्यां च पृथुषेणः तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपु
त्रो गयो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्त्वस्य कलात्मवत्त्वादिलक्ष

अनुसस्मार ध्यायन् व्याख्यानेनैव स्वयं संशुद्धो अनुसस्मार अपरोक्षतयानुभूतवान् ॥ ४ ॥ प्रतिहर्त्रादयः प्रस्तोता उद्गातेति । तेन महापुरुषं तां प्राप्तः ॥ ५ ॥
त्रयो यज्ञनिपुणाः सूनव आसन् ॥ ५ ॥ अजनिषातां जातौ ॥ ६ ॥ हृदयजः पुत्रः ॥ ७ ॥ जगतो रिरक्षिषया गृहीतं सत्त्वं येन तस्य विष्णोः कलांशस्तस्य ॥ ८ ॥

महापुरुषत्वमाह सर्वे इति धर्मस्तस्य द्विविधः अभिषिक्तत्वात्प्रजापालनादिरेकः गृहस्थत्वादिज्यादिश्चापरः द्विविधोपि भगवति सर्वात्मना
र्पितः समर्पितपरमार्थलक्षणाः तेन परिभाविता संस्कृता अतिशुद्धामतिर्यस्य अत एवोपरतानात्म्ये देहाद्यहंभावो यस्मिन्हतस्मिन्नात्मनि
विन्ने स्वयमेवोपलभ्यमानेब्रह्मरूपात्मानुभवो यस्मिन्ताट्शोपि निरभिमान एवअवनिंअजूगुपत पालयामास ॥९॥१०॥ कर्मभिर्गयंकः प्रतिया

सर्वे स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि
सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभिक्ष्णशः परिभावितविशु
द्धमतिरुपरतानात्म्य आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोपि निरभिमान एवावनिमजूगुपत ॥९॥ तस्येमां गा
थां पाण्डवेय पुराविद उपगायंति ॥१०॥ गयं नृपः कः प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता ॥ समागतश्रीः स
दसस्पतिः सतां सत्सेवको न्यो भगवत्कलामृते ॥११॥ यमभ्यषिंचत्परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः यस्य प्र
जानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधा

तिअनुकरोति न कोपि अत्र हेतुः यज्वादिरूपां भगवत्कलाम् ऋते अन्यः कः तत्तुल्यः अपि
मानी सर्वतो मानास्पदं मन नहीति वा समागता संपूर्णा श्रीर्येन यद्वा मिति वा सतां सदसः सभायाः पतिः सतां सेवकः यद्वा यज्वादिरूपोपि भगवत्कला
मृते गयं कोन्यः प्रतियातीत्यन्वयः ॥११॥ सतीः सत्यः सत्या आशिषो यासां ताः दक्षकन्याः श्रद्धामैत्रीदयेत्याद्याः निराशिषोपि यस्य प्रजानामाशिषः
कामान्धरा दुदुहे तत्र गुणा एव वत्सः तैः तेन स्नुतमूधो यस्याः ॥ षष्ठ्यर्धेनान्वयः गयंकः प्रतियातीति संबंधः ॥१२॥

हुताग्निवेशास्तद्विहितकर्माणि बहुदुहुः । इडइडः । ऋषिप्रत्यर्चिताः वाग्भिः प्रतिपूजिता नृपाः यस्य बलिमाजह्रुः अर्घ्ययामाहुः धर्मेणापाल
नतोऽर्ह्शिरागादिभिश्च प्रशस्तं प्रत्यर्चिता विप्राः तदा परेत्य लोकान्ते ह्याशिषां धर्मफलानां षष्ठमंशमाजह्रुः अपवादित्रिभ्यः सकाशाद्राजयाग
ष्ठांशं राजा षड्गुणमाददे तैन्यायेन परिपालयन्निति स्मृतेः ॥१२॥ उत्तमोत्तमपीथे बहुसोमपानाध्वरे मघोनि इन्द्रे माद्यति मत्ते सति ब्राह्मणा भवन्ति तत्र श्रद्धया

हुतं दास्य कामस्य च यस्य कामान् दुदुहुराजह्रुरथो बलिं नृपाः ॥ प्रत्यर्चिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य ॥१३॥
यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ॥ श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥१४॥
यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंच्यात् ॥ प्रीयेत जीवः सह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य
गयाद्गयंत्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुः ॥१६॥ चित्ररथादूर्णायां सम्राडजनिष्ट ॥१७॥ तत उत्कला
मरीचिः मरीचेर्बिन्दुमत्यां बिन्दुमानुदपद्यत ॥१८॥ तस्मात्सरघायां मधुर्नामाभवत् मधोः सुमनसि वीरव्रतः ॥१९॥ ततो
भोजायां मंथुप्रमंथू जज्ञाते ॥२०॥ मंथोः सत्यायां भौवनस्ततो दूषणायां त्वष्टाजनिष्ट ॥२१॥ त्वष्टुर्विरोचनायां विरजः विरजस्य श
तजित्प्रवरं पुत्रशतं कन्या च विषूच्यां किल जातं ॥ तत्रायं श्लोकः ॥ प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः ॥ अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥२२॥

विशुद्धो योऽचलो भक्तियोगः तेन समर्पितमिज्याफलमाजहार स्वयं हरणामिव प्रत्यक्षतः स्वीकृतवानित्यर्थः ॥१४॥ यस्य भग
वतः प्रीणनात् देवादीनां इन्द्रादिकां ततः सद्यः प्रीयेत प्रीतिं गच्छेत् सः विश्वजीवः सर्वान्तर्यामि स्वयं प्रीतिरूप एवं बर्हिषि विषये तेन गयस्य सहस्रारं प्रतिमगात्

इति श्रीभागवते महापुराणे पंचमस्कंधे पंचदशोध्यायः ॥

पूर्वोक्तद्वीपसिंध्वादिमानचिह्नस्वरूपतः स्वर्गापवर्गमार्गश्चापंचाध्यायीततः परं १ षोडशेऽधस्तथावोर्द्ध्वं परितः सन्निवेशतः मेरोः स्थि
तिर्महीकंजकर्णिकाचोपवर्ण्यते १ प्रियव्रतवरिष्ठोक्ताउक्ताद्वीपादिकल्पना तद्विशेषविजिज्ञासुः कथांतेपरिपृच्छति २ उक्तइति
किंपर्यंतमुक्तमत्राह यावदादित्यस्तपति यत्रयत्रचासौसुक्षकरुस्मयोर्वंशश्चगणैः सहचंद्रमावादृश्यतेतावत् १ यत्तोयेभ्यः सिंधुभ्यः

१ राजोवाच उक्तस्त्वयाभूमंडलायामविशेषोयावदादित्यस्तपतियत्रयत्रचासौज्योतिषांगणैश्चंद्रमावासहदृश्यते १
तत्रापिप्रियव्रतरथचरणपरिखातैः सप्तभिः सप्तसिंधवउपक्लृप्ताः २ यतएतस्याः सप्तद्वीपविशेषविकल्पस्त्व
याभगवत्खलुसूचितः ३ एतदेवाखिलमहमानतोलक्षणतश्चसर्वंविजिज्ञासामि ४ भगवतोगुणमयेस्थू
लरूपआवेशितंमनोह्यगुणेपिसूक्ष्मतमआत्मज्योतिषिपरेब्रह्मणिभगवतिवासुदेवाख्येक्षममावेशितुंतदुहैत
द्गुरोऽर्हस्यनुवर्णयितुमिति ५ श्रीशुकउवाच नवैमहाराजभगवतोमायागुणविभूतेः स्थानविशेषाणांकाष्ठांवच
सावाधिगंतुमलंविबुधायुषापिपुरुषस्तस्मात्प्राधान्येनैवभूगोलकविशेषंनामरूपमानलक्षणतोव्याख्यास्यामः
६ योवायंद्वीपःकुवलयकमलकोशाभ्यंतरकोशोनियुतयोजनविशालःसमवर्त्तुलोयथापुष्करपत्रम् ७

एतस्याश्चवः सूचितः संक्षेपतोदर्शितः ३ जिज्ञासायाःफलमाह भगवतइतियामायागुणविभूतिस्तस्याःकाष्ठामंतंरूपसन्निवेशःलक्षणंवि
धं ६ कुवलयंभूमंडलंतदेवकमलंतस्यकोशाःसप्तद्वीपाःतेषामभ्यंतरःकोशःप्रथमोजंबूद्वीपःनियुतंयोजनविशालःलक्षयोजनविस्तीर्णः ७

नवयोजनसहस्राण्यायामो येषां आयामोऽत्र विस्तारः । एतच्च भद्राश्वकेतुमालव्यतिरेकेण द्रष्टव्यं । तयोस्तु त्रिंशद्योजनसहस्रायामत्वात् केचि
त्तु नीलनिषधयोः समुद्रप्रवेशं मत्वा कल्पितयोरपि संकुचितत्वेन नवसाहस्रायामत्वं समपादयंति सन्निवेशस्त्ववाउनोक्तः । धनुर्वत्संस्थिते ते हि
यद्ववर्षं दक्षिणोत्तरे । दीर्घाणि तत्र वक्रविवृतत्वान्मिलावृतमपीति ॥ ७ ॥ नाभ्यां मध्ये द्वीपस्यायामो लक्षयोजनप्रमाणः । तावन्मात्रमुन्नाहः उच्छ्रा
योऽस्य ॥ ९ ॥ मूले षोडशसहस्रं विततः तावत्षोडशयोजनसहस्रमानेन चतुराशीतियोजनसहस्रमानेन च बहिरेश्यते एवं लक्षयोजनोन्नाहः

यस्मिन्नववर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवंति ॥ ८ ॥ एषां मध्ये इलावृतं नामाभ्य
न्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमल
स्य ॥ ९ ॥ मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसाहस्रं तावतांतर्भूम्यां प्रविष्टः ॥ १० ॥ उत्तरोत्तरेणेलावृतं नीलः श्वे
तः शृंगवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव
एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसंति ॥ ११ ॥

॥ १० ॥ उत्तरोत्तरेणेलावृतं इलावृतस्योत्तरोत्तरतः क्रमेण नीलादयस्त्रयो मर्यादागिरयः प्रागायताः पूर्वतो दीर्घाः क्षारोदावधयो येषां द्विसहस्रयोज
नविस्तीर्णाः दशांशाधिकांशेन दैर्घ्य एव ह्रसंति न तूच्चत्वे पृथुत्वे वा यथोक्तं विष्णुपुराणे लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे इति ॥ ए
तच्च स्थूलदृष्ट्यैवोक्तं ॥ तयोरपि यथावन्मध्यमत्वाभावेन लक्षप्रमाणत्वाभावात् ॥ ११ ॥

अयुतयोजनउत्सेधः उच्छ्रायो येषां अग्रयं वोत्सेध्यो नीलादीनामपि द्रष्टव्यः नीलादिष्वयुतत्वेषामपि द्रष्टव्यं यथासंख्यमर्थाद्गिरयस्तथा ॥ १२ ॥ आनी
लनिषधायतो उत्तरतो नीलपर्यन्तं दक्षिणतो नीलपर्यन्तं च द्वीपप्रस्थः विस्तीर्णो भवतः ॥ १३ ॥ तथैव केतुमालभद्राश्वयोर्वर्षयोः सीमानं कुर्व
ति ॥ नन्वेवं सति पूर्वापररेखायामिलावृतं वेष्टितो मेरुर्मध्ये ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं वनानां किं विशिष्टि ॥ दक्षिणोत्तररेखायां तु तथैव इलावृ
तं वेष्टितो मध्ये मेरुः उभयत स्त्रीणि त्रीणि वर्षाणि गिरयश्च सन्त्यथ सर्वतो लक्षप्रमाणत्वं जंबूद्वीपस्य उच्यते ॥ मेरोः षोडशसहस्राणि सर्वतः स्थि
तत्वादिलावृतस्याष्टादशः ॥ अन्येषां वर्षाणां वत्सश्चतुःपंचाशत गिरिणां द्वादशेत्येवं दक्षिणोत्तररेखायां तावल्लक्षं पूर्वापररेखायामपि समपरोऽिला

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः अयुतजोजनोत्सेधा हरिवर्षकिंपुरुषभारता
नां यथासंख्यं ॥ १२ ॥ तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः ॥ १३ ॥ केतुमा
लभद्राश्वयोः सीमानं विदधाते ॥ १४ ॥ मंदरो मेरुमंदरः सुपार्श्वः कुमुद इत्ययुतजोजनविस्तारोन्नाहाः मेरोश्चतुर्दिशमवष्टं
भगिरय उपक्लृप्ताः ॥ १५ ॥ चतुर्ष्वेतेषु चूतजंबूकदंबन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्ना

वतस्य चतुस्त्रिंशत् गिर्योश्चत्वारिंशोषाणि द्विषष्टिसहस्राणि पूर्वापरवर्षयोः समुद्रैर्मीतं ॥ हाः तावद्विटपविततयः शतयोजनपरिणाहाः ॥ १६ ॥
इष्टव्यानि अतो न विरोधः ॥ १४ ॥ अयुतयोजनप्रमाणौ विस्तारोन्नाहौ येषां विस्तीर्णमूर्द्धो मेरोरवष्टंभत्वात् पूर्वपश्चिमौ गिरि दक्षिणोत्तरविस्तारो दक्षिणोत्तरो
च पूर्वापरविस्तारो इष्टव्यो सर्वतोऽशयोजनसहस्रविस्तारणीकरेऽविलावृतलोपात् पूर्वेणेलावृतमुपसर्पावयतीत्यां विविरोधः स्यात् ॥ १५ ॥ अधिकशत
मेकादशशतानि उन्नाहो येषां तावत्प्रमाणाविटपविततिर्येषां शतयोजनं परिणाहो विस्तारो येषां ॥ १६ ॥ टि० २ ॥ गोपालाय नमः राम

यदुपस्पर्शिनः यत्सेविनः ॥ १७ ॥ ललामो भूषणं सुरललनानां भूषणभूताः स्त्रियस्तासां यूथस्य पतयः सहसंभूय येषु विहरं ॥ १९ ॥ एकादशशतयोज-
नोत्तुंगो यो देवचूतस्तस्य शिरसः सकाशात् फलप्रमाणमुक्तं ॥ वायुपुराणे ॥ आरत्नीनां शतान्यष्ट एकषष्ट्यधिकानि च ॥ फलप्रमाणमाम्रस्योत-

कुशादयश्चत्वारः पयोमधुइक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयन्ति ॥ १७ ॥
देवोद्यानानि च भवंति चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति ॥ १८ ॥ येष्वमरपरिवृढाः सहसुरललनाललाम-
यूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरंति ॥ १९ ॥ मंदरोत्संग एकादशशतयोजनोत्तुंगदेवचूतशि-
रसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि निपतंति ॥ २० ॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिबहु-
लारुणरसोदेनारुणोदा नाम नदी मंदरगिरिशिखरान्निपतंती पूर्वेणेलावृतमुपप्लावयति ॥ २१ ॥ यदुपजोषणाद्भवा-
न्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगंधवातो दशयोजनं समंतादनुवासयति ॥ २२ ॥ एवं जंबूफलानामत्यु-
च्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जंबू नाम नदी मेरुमंदरशिखरादयुतयोजनादवनित-
ले निपतंती दक्षिणेनात्मानं यावदिलावृतमुपस्यंदयति ॥ २३ ॥

मृत्तिमिश्रितत्वदर्शिभिरिति ॥ २० ॥ अतिमधुरस्वादो युक्तः सुरभिश्च सुगंधिश्च तान्येषां गं-
धैरधिवासितः बहलश्चासावरुणश्च रसः स एवोदकं तेन ॥ २१ ॥ यदुपयोषणात् यस्य रसस्य सेवनात् ॥ २२ ॥ अनस्थिप्रायाणां अतिसूक्ष्मबीजानां यत्र
निपतंति तत आरभ्य आत्मनो दक्षिणतः सर्वमिलावृतं व्याप्य वहतीत्यर्थः ॥ २३ ॥

भा०पं
५१

तावत्पर्वतः रोधसोस्तटयोः १४ १५ आयामो ऽत्र व्यामः तत्र व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगंतरं पितृघ्नालक्षणाः पंचव्यामं परिणाहः स्थौल्यं यास
मित्यर्थः केचित्तु पंचव्यामपरिणाहा इत्येव पठंति १६ नीचीनाः अधोमुखाः १८ चतुर्दिक्षु मेरुमूलात योजनसहस्रांतरमुत्क्रम्य परितः परिधय इव २१

तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जांबूनदं नाम सुवर्णं भवति १४
यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयंति १५ यस्तु महाकदंबः सुपार्श्व
निरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पंचायामपरिणाहाः पंचमधुधाराः सुपार्श्वशिखरात्पतंत्योऽपरेणात्मानमिलावृतमनु
मोदयंति १६ या ह्युपयुंजानानां मुखनिर्वासितो वायुः समंताच्छतयोजनमनुवासयति १७ एवं कुमुदनिरूढो यः शतवल
शो नाम वटस्तस्य स्कंधेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यंबरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्प
तंतस्तमुत्तरेणेलावृतमुपयोजयंति १८ यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशी
तोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवंति १९ यावज्जीवं सुखं निरतिशयमेव २० कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरप
तंगरुचकनिषधशिनीवासकपिलशंखवैडूर्यजारुधिहंसऋषभनागकालंजरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभू
ता मूलदेशे परित उपक्लृप्ताः २१ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुंगौ भवतः २२ एवम
परेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतावेवमुत्तरतस्त्रिशृंगमकरावष्टभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति
जठरदेवकूटादयस्तिष्ठंति अतोऽष्टादशयोजनसहस्रप्रमाणमत्रोक्तं वैष्णवादिपुराणेषु परमाणादि यत्नतः अन्यथा च कांचनगिरिः २३

ग्रीतितत्त्वकल्पभेदाद्यपेक्षयाद्विसहस्रंस्थवतो ॥ २१

राम
५१

यथादिशं प्राच्यादिदिक्षु । यथारूपं इंद्रादिवर्णानतिक्रमेण तुरीयमानेन सार्द्धद्विसहस्रप्रमाणेन नानाप्राणिभरणार्थं तत एव ज्ञातव्यानि । यथोक्तं
मेरौ नवपुराणि स्युर्मनोवत्यमरावती । तेजोवती संयमनी तथा कृष्णांगना परा । श्रद्धावती गंधवती तथा चान्या महोदया । यशोवती च ब्रह्मेंद्र
वह्न्यादीनां यथाक्रममिति ॥२५॥ इति पंचमे षोडशः ॥१६॥ ततः सप्तदशे गंगागमनं तत्त्वनिर्दिशं । इलावृते च रुद्रेण संकर्षणनिषेवणं ॥ १ ॥ यत्र

मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौंभीं वदंति ॥२८॥ तामनु
परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥२९॥ इति श्रीभागवते महापुरा
णे पंचमस्कंधे भुवनकोशवर्णने षोडशोध्यायः ॥ शुक उवाच ॥ तत्र भगवतः साक्षाद्यज्ञलिंगस्य विष्णोर्विक्रम
मतो वामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टा या बाह्यजलधारा तच्चरणपंकजावनेजनारुणकिंज
ल्कोपरंजिताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधीयमानातिमहता काले
नसहस्रोपलक्षणेन दिवो मूर्द्धन्यवततार ॥१॥

लिंगस्य बलेर्यज्ञे लिंगं विक्रमस्य त्रिविधस्य विक्रमतः दक्षिणेन पदा भुवं क्रान्त्वा वामपदं क्षिपतः वाम
पादांगुष्ठनखेन निर्भिन्नं मूर्द्धमुपरिभागो यस्याण्डकटाहस्य तस्य विवरेण ततः प्रविष्टा या बाह्यजलधारा आदि यो मूर्द्धन्यवततारेत्यन्वयः तस्य यच्च
रणपंकजं तस्यावनेजनेन क्षालनेन अरुणानि तानि किंजल्कानि तैरुपरंजिता अत एव अखिलस्य जगतोऽघमलापहमुपस्पर्शनं यस्याः
तथाप्यमलातन्मलसंगशून्या साक्षाद्भगवत्पदीति यत्तदुपलक्षितं जाह्नवी भागीरथीत्याद्युपलक्षणं तद्रहितं वचो नाम तेनाभिधाना ॥१॥

भा॰पं
५२

कोसौ हरिर्वा पुनर्दीनमाह । यदिति १ किं तद्विष्णुपदं तदाह । यत्रेति । वीरव्रतः दृढसंकल्पः अस्मत्कुलदेवतायाः हरेश्चरणारविंदोदकमिति हेतोः परमा
दरेण विभर्त्तीत्यन्वयः कथंभूतः सन् प्रतिक्षणं वर्द्धमानेन भगवद्भक्तियोगेन दृढं सम्यक् तं क्लिद्यमानमंतर्हृदयं यस्य सः अत एव उत्कंठ्येन विवशामीलितं य
ल्लोचनयुगलं तदेव कुड्मलं तस्मात् विगलितवाष्पस्य कलया सहस्रमभिव्यज्यमानो रोमपुलकानां कुलं यस्य सः २ ततः सप्तऋषयस्तत्प्रभावाभिज्ञा याः गंगायाः प्रभा

५८२

यत्तद्विष्णुपदमाहुः १ यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविंदोदकमिति यामनुसवन
मुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानांतर्हृदय औत्कंठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलवाष्पकलया
ऽभिव्यज्यमानरोमपुलककुलकः अधुनापि परमादरेण शिरसा विभर्त्ति २ ततः सप्तऋषयस्तत्प्रभावाभिज्ञा यां ननु तपस
आत्यंतिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इ
व सबहुमानमद्यापि जटाजूटैरुद्वहंति ४ ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरंतींदुमंडलमावार्य ब्रह्म
सदने निपतति ५

वाभिज्ञाः यां ततो यां जटाजूटैरुद्वहंतीत्यन्वयः एतावत्येव नातोऽधिकाऽस्तीत्यभिप्राय वतः तत्र हेतुः भगवति सततं भक्तियोगलाभेनैवोपेक्षिता
अन्येऽपुरुषार्था आत्मगतात्मज्ञानं येषैः कामिव कइव धारयंति । यत्र ननु मुक्तिमिव तत्राभागतां मुमुक्षवो जना इति ४ ततोऽनेकसहस्रकोटिनां विमाना
नामनीकैः संकुलेन देवयानेनाकाशमार्गेणावतरंती सप्तर्षिभ्योऽवीरीवग्रायणाः कार्मिण्णां गतिरिति ततो वा गेच संकुलत्वं आवार्य आच्छाद्य
मेरुमूर्द्धस्थे ब्रह्मसदने निपततीति ५

भाग
५२

ऽभिष्यंदंती अभिगच्छंती ॥ ६ ॥ केसराचलानां मेरुसमानां उच्छ्रयत्वात् अथ मेतेषामादिशिखरेषु पुष्पभृंगेषु पततितततेभ्यो ...वः प्रव-
वंती सती ॥ ७ ॥ माल्यवच्छिखरात् केतुमालाभिमुखं निष्पतंती कुः संज्ञा ॥ ८ ॥ गिरिशिखराशिनिकुचदरी ॥ उच्छलिता नीलशिखरात् तत उ-
च्छलिता श्वेतशिखरं तरत्यतिहाय ॥ शृंगतः शृंगादधः स्रवंती ॥ ९ ॥ अतिरभसतरं इसासु अस्खलिततीव्रतरवेगेन ॥ प्रस्तालाना थपानार्थ

तत्र चतुर्द्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्यंदंती नदनदीपतिमेवाभिनिविशति सीतालकनंदा चक्षुर्भद्रेति ॥ ६ ॥
सीता तु ब्रह्मसदनात्केसराचलादिशिखरेभ्योऽधः प्रस्रवंती गंधमादनमूर्द्धसु पतित्वांतरेण भद्राश्ववर्षं प्राच्यां दिशि क्षार-
समुद्रमभिप्रविशति ॥ ७ ॥ एवं माल्यवतः शिखरान्निपतंती ततो अनुपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्र-
विशति ॥ ८ ॥ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृंगवतः शृंगादवस्यंदमाना उत्तरांस्तु
कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ॥ ९ ॥ तथैवालकनंदा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेम-
कूटान्यतिरभसतररंहसा लुठयंती भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति ॥ १० ॥ अन्ये च नदा नद्यश्च वर्षे वर्षे संति
बहुशो मेर्वादिगिरिदुहितरः शतशः ॥ ११ ॥ तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थाना-

पानार्थं वा गच्छतः छद्मः पदे पदे अश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥ १० ॥ बहुशः बहुविधाः ॥ नि भौमानि स्वर्गपदानि व्यपदिशंति ॥ १२ ॥
मेर्वादिगिरीणां दुहितरः तत्प्रसूताः ॥ ११ ॥ दिव्यभौमबिलभेदात् त्रिविधः स्वर्गः यत्र भौमस्वर्गस्य पदानि स्थानानि व्यपदिशंति ॥ १२ ॥

अयुतंतत्रवर्षमानेआयुर्वर्षाणियेषांवज्रवत्दृढंसंहननंशरीरंतस्मिन्बलंवयोमोदाः तेषुप्रमुदितानिमिथुनानिमहामोदरतानिमिथुनानितेषांव्यवा
यापवर्गसंभोगावसानेएकवर्षशेषआयुषिविधृतएकोगर्भोयैः तादृशानिकलत्राणियेषां त्रेतायुगसमः विषयसुखोत्कर्षात् कृतयुगोहित
वैध्यानतिष्ठाः द्वापरादौतुदुःखबहुला॥१२॥ यत्रहेत्यादिवर्षधरदेवपतयः स्वैः स्वैः सेवकगणाध्यक्षैः कृतमहोपचाराः सन्तः स्वैरंविहरंती

एषुपुरुषाणामयुतपुरुषायुर्वर्षाणांदेवकल्पानांनागायुतप्राणानांवज्रसंहननबलंवयोमोदप्रमुदितम
हासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणांतत्रतुत्रेतायुगसमः कालोवर्त्तते॥१३॥ यत्रहदेवपतयः स्वैः
स्वैर्गणनायकैः विहितमहार्हणाः सर्वर्त्तुकुसुमस्तवकफलकिशलयश्रियानम्यमानविटपलताविटपिभिरुपशु
म्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषुतथाचामलजलाशयेषुविकचविविधनववनरुहामोदमुदितरा
जहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषुजलक्रीडादिभिर्विचित्रविनो
दैः सुललितसुरसुन्दरीणांकामकलिलविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरंविहरंति॥१४॥

ऋतवः स्वस्थानेषुसर्वेषुऋतुषुकुसुमस्तवकादीनांश्रियासमृद्ध्यास्तयानम्यमानाविटपाःशाखाःआश्रितालतास्तुयेषुतैर्विटपिभिः। उपशुम्भमानानिशो
भमानानिरुचिराणिकाननानियेषुतेष्वाश्रमायतनेषुवर्षगिरिद्रोणीषुचजलाशयेषुचवनानिविविधानिनवानियानिवनरुहाणिनीराजानि
तेषामामोदेनमुदितैराजहंसादिभिर्मधुकरनिकराकृतिभिर्यानिविशेषेणउपकूजितेषु। कामेनकलिलैःकम्पितैर्विलासहासादिभिःआकृष्टमनो
दृष्टयोयेषांते॥१४॥

अ त्वमपि वर्षेषु येऽङ्ग हृषीकेशात्तेषां तदनुग्रहाय सर्वाशो वर्तमानोः त्वग्रहस्तत्त्वर्थं आत्मतत्त्वव्यूहेन त्वमूर्तिर्निसंपूर्हे हेन सः ध्येयते सन्निहितो सन्नि
हितो भवति ॥ १५ ॥ अपरः अर्वाचीनः पश्चात् न नवमहत्कंधे ॥ १६ ॥ भवानीनाथा त्वामपि नीयेषां तेः गणेश मंडैश्वमहेश्वरैर्वन्द्यमानः सर्वतः से
व्यमानः ॥ आत्मनः प्रकृतिकारणां आत्मनि समाधिर्ध्यानयस्य तेन रूपेण ॥ एतद्दृश्यमाणां मंत्रादिवं अतिगृणानूजपन् ॥ १७ ॥ सर्वेषां गुणा

न वै त्वामपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि संनिधीयते ॥ १५ ॥ इला
वृते तु भगवान्भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञः यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चा
द्वक्ष्यामि ॥ १६ ॥ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृ
तिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण सन्निधाप्यैतदभिगृणन्भव उपधावति ॥ १७ ॥ श्रीभगवानुवाच
ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति ॥ १८ ॥ भजे भजन्यारणपादपंकजं भगस्य
कृत्स्नस्य परं परायणम् ॥ भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरम् ॥ १९ ॥

नासंख्यानं प्रकाशो यस्मात् ॥ त्वयंतः अव्यक्ताय अप्रमेयाय ॥ १८ ॥ हे भजन्य भजनीय त्वा त्वां परमीश्वरं भजे इत्यन्वयः अरणं शरणं पादपंकजं यस्य कृ
त्स्नस्य भगस्य ऐश्वर्यादिषाड्गुण्यस्य परम परमाश्रयं ॥ भक्तेषु अलमत्यर्थं भावितप्रकारितं भूतभावनं स्वरूपं येन ॥ भवापहं संसारहरं ॥ भक्तेषु इत्यु
षंगः भवं भावयतीति तथा तं अर्थात् भक्तेषु इति द्रष्टव्यं ॥ १९ ॥

इश्वरत्वमुपपादयंस्तामसत्वेन प्रसक्तमनादरं वारयति । नयस्येति । निरीक्षमाणस्यापि दृष्टिर्मायागुणैर्विषयैः चित्रवृत्तिभिः करणैरण्वप्य एव पि दृष्टदपि नाज्यते न लिप्यते । किमर्थं निरीक्षमाणस्य ईशस्य ईशनाय नियमनाय । ईशनमरमेपदादित्वाद्गात्वेद्धिप । अत एवैष मर्यादिष्टेशितः यथा अजितक्रोधवेगानां नोऽस्माकं दृष्टिरज्यते न तथेति । अतः आत्मन इंद्रियाणि जिगीषुर्जेतुमिच्छुर्मुमुक्षुः तं को न मन्येत नाद्रियेत ॥ १० ॥ ननु तमस घ्यात्यामत्रस्मङ्गतो दृष्टिर्नाज्यते तत्राह । असदिति । असद्दृशो दुर्दृशोऽयस्त स्वमायया क्षीबावमत्त इव यो मधंकरः प्रतिभाति मध्वासवाभ्यामाताम्रलोचन

न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते । ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥
१० ॥ असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ॥ न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ॥ ११ ॥ यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनन्तमृषयः ॥ न वेद सिद्धार्थमिव क्वचित्स्थितं भूमण्डलं मूर्धसहस्रधामसु ॥ १२ ॥

इव । नागवध्वो विमोहनेन तया प्रतिभानं प्रसङ्गमित्याह । नेति । पाताले नागस्य पादयोः स्पर्शनेन धर्षितं मोहितमिन्द्रियं मनो यासां ताः ह्रिया लज्जया अर्हणं पूजां कर्तुं नेशिरे न शेकुः कस्तं न मन्येतेति पूर्वेणान्वयः ॥ ११ ॥ अस्याऽस्य विश्वस्य स्थितिजन्म ॥ संयमं यमाहुः अत एव त्रिभिः स्थित्यादिभिर्विहीनं अनन्तं च यमाहुः ऋषयो मन्त्राः छेदाद्रोधेन दीर्घपादयोर्देवमातालक्ष्मीः सा च ऋषयश्च तथोक्ताः अनन्तत्वं दर्शयति मूर्द्ध सहस्रमेव धामानि स्थानानि तेषु ॥ एकदेशस्थितं भूमण्डलं यो न वेद सिद्धार्थं सर्षपमिव तस्मै नम इति चतुर्थेनान्वयः ॥ १२ ॥

तत्र जन्महेतुत्वं महदादिद्वारेण प्रपंचयति ॥ यस्य गुणानि मित्तो महात्मा भविग्रहः आसीत् ॥ विज्ञानं सत्वं धिष्ण्यमाश्रयो यस्य । न स्वाविकृतरूपत्वे
न सत्वप्रधानत्वात् ॥ स एव किलाधिदैवो वा हे देवा भेदविवर्जितो भगवानजो ब्रह्मा यत्संभवः यस्मात् ब्रह्मणः संभूतः अहं रुद्रः त्रिवृता त्रिगु
णेन स्वतेजसा स्वविभूतिरूपेणाहंकारेण वैकारिकेण वैकारिकं देवतावर्गं तामसं भूतवर्गं राजसमिंद्रियं इंद्रियवर्गं च सृजामि ॥ १३ ॥ किं च एते वयम
हदादयः सर्वे यस्यानुग्रहादिदं ब्रह्मांडं सृजामः कथंभूताः यस्य महात्मनो वशे स्थिताः स्तः यतः सूत्रेण क्रियाशक्त्या यंत्रिताः शकुंताः शकुंताः

यस्याद्य आसीद्गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल ॥ यत्संभवोहं त्रिवृता स्वतेजसा वैकारिकं ताम
समैंद्रियं सृजे ॥ १३ ॥ एते वयं यस्य वशे महात्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः ॥ महानहं वैकृततामसेंद्रियाः
सृजाम सर्वे यदनुग्रहादिदं ॥ १४ ॥ यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोयं गुणसर्गमोहितः ॥ न वेद नि
स्तारणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने ॥ १५ ॥ इति श्रीभागवते महापुराणे पं... म... धे सप्तदशो

पक्षिण इव लौकिकेन सूत्रेण ॥ वयमित्युक्तं तानेवाह महानहंकारस्त्रिवैकृतादयः पूर्वोक्ता वर्गाश्च ॥ १४ ॥ स्थितिलयहेतुत्वं ध्यायः ॥ १७ ॥
रुद्रीयत्वं घणामति ॥ येन निर्मितां मे तामेवायं जनो जन्मा वेदनत्रिस्तारयोगमुपायं कर्हिचिदपि वेद निस्थितिहेतुत्वं दर्शितं कर्माणि पर्वाणि ग्रंथ
यः तानि नयति प्रापयतीति तथा तां प्रलयहेतुत्वमाह ॥ विलीयते अस्मिन्निति विलय उदेत्यस्मादित्युदयः विलयश्चोदयः आत्मा स्वरूपं यस्य तस्मै नमः
॥ १५ ॥ इति ... २ ध्यायः ॥ १८ ॥

अष्टादशे ततो मेरोः पूर्वादिक्रमतस्त्रिषु । त्रिषु वोत्तरवर्षेषु सेव्यसेवकवर्णनं ॥ १ ॥ भद्रश्रवा वर्षपतिः तत्कुलपतयः सेवकाः प्रख्याताः ॥ १ ॥ भद्रश्रवस ऊ
चुरिति सम्भृत उपधावंतीति वक्ष्यमाणलक्षणया यान्त्या योगात्तुणोडुलिंगसमवायन्यायेन वक्तव्यवचनं १ । २ । अंधजनो मिषन्नपि पश्यन्नपि घ्नंतं हि संतं मृत्युं न प
श्यतीति नालोचयतीति भगवद्विचेष्टितमेव तच्च विचित्रं अदर्शने लिंगं पुत्रं वा लं पितरं वा हृदं मृतं निर्हृत्य दग्ध्वा स्वयं तद्भयप्रयोग्ये जिजीविषति जीवितुमि
च्छति । पावन्नरेतद्धंदूरमार्गं जनस्य । किं धर्माद्यर्थं न यर्हि यतः असत्तुच्छं विषयसुखं सेवितुं विकर्म पापमेव ध्यायन् ४ नन्वविद्वानत्र पश्यतीति किमत्र चि

श्रीशुक उवाच । तथा भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्म
मयीं हयशीर्षाभिधानां परमेण समाधिना संनिधाप्येदमभिगृणंत उपधावंति १ भद्रश्रवस ऊचुः २ ॐ नमो भग
वते धर्मायात्मविशोधनाय नम इति ३ अहो विचित्रं भगवद्विचेष्टितं घ्नंतं जनोयं हि मिषन्न पश्यति ध्यायन्नसद्य
र्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषुः ४ वदंति विश्वं कवयः स्म नश्वरं पश्यंति चाध्यात्मविदो विपश्चितः तथा
पि मुह्यंति तवाज मायया सुविस्मितं कृत्यमजं नतोस्मि तं ५ विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरंगीकृतमप्यपावृतः

त्रं तदाह । नश्वरं वदंति स्म शास्त्रतः पश्यंति च समाधौ हे अज तथापि मायया मुह्यंति युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुनि ६
स्यति । एतच्च नव कृत्यं चेष्टितं सुविस्मितं चित्रं अतः शास्त्रादिश्रममं विहाय तत्वामजं नतोस्मि ५ इदमपरं चित्रं वत्स्यतीयमानमपि त्वयि न चित्रमित्या
ह विश्वस्योद्भवादिकर्म अकर्तुरपि अपगतावृतेश्चावरणशून्यस्यातो नादेशस्यापि ते अंगीकृतं वेगेन त्वयि तत्र चित्रं यतः मायया सर्वात्मनि कार्ये सा
कारणे अपरि कर्मयुक्तं । वस्तुतः सर्वव्यतिरिक्ते निरुपधावना न तत्वमकर्तृत्वं च युक्तं ६

परमेश्वरत्वेन स्तुत्वा प्रस्तुतावतारचरितमाह वेदानिति तमसा दैत्यरूपेण तिरस्कृतान् अपनीतान् नाश्वेन रंग अश्वेन तुरंगो तद्रूपो विग्रहो यस्य कवये ब्रह्मणे गोतरदर्थं अवितथेहिताय सत्यसंकल्पाय ॥ ७ ॥ ८ ॥ उत्तरत्र षष्ठस्कंधे चरिते ॥ ९ ॥ महापुरुषस्य गुणानामाश्रयः दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं येन वयस्य फलसंकल्पेन व्यवधानं च स्वाम्याव्यभिचारी भक्तियोगस्तेन उपास्ते सेवते

वेदान्युगान्ते तमसा तिरस्कृतान्रसातलाद्यो नृतुरंगविग्रहः प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथेहिताय इति ॥ ७ ॥ हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते ॥ ८ ॥ तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये ॥ ९ ॥ तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते ॥ १० ॥ इदं चोदाहरति ॥ ११ ॥ ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान्रंधय रंधय तमो ग्रस ग्रस ॐ स्वाहा अभयमभयमात्मनि भूयिष्ठाः ॥ १२ ॥ ॐ स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायंतु भूतानि शिवं मिथो धिया मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी ॥ १३ ॥

॥ १० ॥ ११ ॥ तेजसामपि तेजसे आविराविः प्रतिप्रकटो भव तीक्ष्णावाक कर्माशयान् कर्मवासनाः कर्माशयानिति पाठे रागादीन् रंधय निर्दह भूयिष्ठा भूयाः ॥ १२ ॥ विश्वस्य स्वस्ति प्रार्थ्य नेखलस्यापि भवेत् न यस्मात् परपीडां विना न स्यात् अन्योन्यमपि मंगलं ध्यायतां च भूतानामन्योन्यद्रोहं विना न भवेत् इत्याशयेनाह खलः प्रसीदतु क्रौर्यं त्यजतु भूतानि च मिथः शिवमेव ध्यायंतु तेषामनन्यमद्भुतं उपशमादि किं भजतु नोऽस्माकमपि मतिः अपि हेतुं

नः मा गाः क्वापि माभूयात् यदि कथंचित्स्यात् तर्हि आगारादिषु मा स्यात् किंतु भगवत्प्रियेष्वेव ११ आगारादिसंगदोषमाह य इति इंद्रियप्रियो गृहाद्या-
सक्तः भगवत्प्रियसंगगुणमाह यत्संगेति भगवत्प्रियाणां संगात् लब्धं मुकुंदविक्रमं स्तुतिभिः संस्पृशतां सेवमानानां ऽजो हर्यंतर्गतो जोमानसं मलं ह-
रति कथंभूतं विक्रमं निजमसाधारणं वीर्यवैभवं प्रभावातिशयो यस्य तीर्थं गंगादि मुहुः संस्पृशतामंगजं मलं केवलं हरति साक्षात्सेवनं सेवेत्येव
यः १४ मानसमलापगमफलमाह यस्येति अकिंचना निष्कामा मनःशुद्धौ हरेर्भक्तिर्भवति ततश्च तत्प्रसादेन सर्वे देवाः सर्वैर्गुणैः धर्मज्ञानादि-
भिः सह तत्र सम्यगासते नित्यं वसंति यद्वा द्याशंका स्यात् हरिभक्तिसंभवात् कुतो महतां गुणाः ज्ञानवैराग्यादयो भवंति असति विषये हि बहिर्मनोरथेन

मागारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रियेषु नः यः प्राणवृत्त्या परितुष्ट आत्मवान्सिद्ध्यत्यदूरान्न तथेंद्रियप्रियः १२
यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं हरत्यजोंतः श्रुतिभिर्गतोंगजं को वै न सेवेत मुकुंदविक्रमं १३
यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः
हरिर्हि साक्षाद्भगवाञ्छरीरिणामात्मा झषाणामिव तोयमीप्सितं हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनां
तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलं हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयमिति १६

बहिर्धावतः १५ ननु हरिविमुखस्य गृहाद्याशक्तस्यापि लोके महत्त्वं दृश्यते तत्तु यथा स्मरति सहेतुकमाह हरिर्हीति यथा झषाणां मीनानां प्रि-
तं तोयमेवात्मा तेन विना जीवनाभावात् महांश्चेति प्रसिद्धोपि गृहे यदि सज्जते [illegible] तदा दंपतीनां मिथुनानां मध्ये इति प्रसिद्धं वयसैव के-
वलं यन्महत्त्वं तदेव तस्य भवति न तु ज्ञानादिना मिथुनेषु तेषु मध्ये वृद्धत्वमात्रं महत्त्वं बालमिथुनेभ्यश्च वृद्धमिथुनानां महत्त्वमित्यर्थः १६
यस्मादेवं तस्मात् गृहं हित्वा अकुतोभयं नृसिंहपादं भजतेत्यादि कार्यं दर्शयन् गृहं रजस्तमसा रागो मिथ्याभिनिवेशः रजश्चादीनां मूलकारणं गृहं

केतुमालेऽपि कामदेवस्वरूपेणास्त इति शेषः किमर्थमास्ते तत्राह लक्ष्म्या इति प्रजापतिः संवत्सरः संवत्सरो वै प्रजापतिरिति श्रुतेः तस्य दुहि-
तरो रात्र्यभिमानिन्यो देवताः पुत्राश्च दिवसाभिमानिनो देवाः तेषां च प्रियचिकीर्षया पुरुषायुषा वर्षशतेन यान्यहोरात्राणि तैः परिसंख्यानं गणना
येषां ते षट्त्रिंशत्सहस्राणामित्यर्थः यासां दुहितॄणां महापुरुषस्य महास्त्रं चक्रं तेजसा सारः सांरपयन्न्स्वीयानीन्द्रियाणि रमयते ॥१८॥ केन साधनेन रमयन्
तत्राह अतीव सुललितया गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशोपेतः स्मितं तत्सहितोऽवलोकस्तल्लीलया किञ्चिदुत्तम्भितं उत्तेजितं सुंदर

केतुमाले भगवान्कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां तद्वर्षपतीनां पुरुषायुषाहोरात्रपरिसंख्यानां
यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते विनिपतन्ति ॥१८॥ अतीव सुललितगतिवि
लासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तम्भितसुंदरभ्रूमंडलसुभगवदनारविंदश्रिया रमां रमयन्निंद्रिया
णि रमयते ॥१९॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताहःसु च तद्भ
र्तृभिरुपास्ते इदं चोदाहरति ॥२०॥ ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां
विशेषाणां चाधिपतये षोडशकलाय छंदोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कांताय कामाय नमस्ते उ
भयत्र भूयात् ॥२१॥

रं उन्नं मंडलं तेन सुभगं वदनारविंदं तस्य श्रिया ॥१९॥ तद्भर्तृभिः दिवसाधिष्ठातृभिरुपेता ॥२०॥ सर्वैर्गुणविशेषैः श्रेष्ठैर्वत्सलादिभिर्विलक्षितो लक्षि-
तो आत्मा यस्य आकूतीनां क्रियाणां चित्तानां ज्ञानानां चेतसां संकल्पाध्यवसायादीनां विशेषाणां तत्तद्विषयाणां षोडशकलाः श्रेष्ठाः एकादशेंद्रियपंचविष-
य लक्षणा यस्य छंदोमयाय वेदोक्तकर्मप्राप्याय अन्नमयाय अन्नोपष्टम्भत्वात् अमृतमयाय परमानंदविकारत्वात् सर्वमयाय सर्वविषयत्वात् सहसे ओ-

भा॰ पं
५१

त्वत्कामैनेव त्वत्सेवकत्वादहं कृतार्थास्मि अन्यकामनया तु त्वामर्चतो न परिपूर्णमनोरथाः स्युरित्याह ॥ स्त्रिय इति स्वतंत्र एव हृषीकाणामीश्वरं पतिं
सं त्वामाराध्य याः स्त्रियोऽन्यं पतिं प्रार्थयंति । पतिकामा नाहि । कामाराधनं तु तेषु प्रसिद्धं तासामपत्यादीनि ते पतयो न पातुं शक्ताः ॥१२॥ अतः स्वतंत्र
एव नं सम्भवतीत्याह ॥ स वा इति ॥ यस्त्वेवंभूतः पतिः भवानेक एव नान्यो यो भवानात्मलाभात्परमन्यधिकं न मन्यते इतरथा स्वाधीनसुखस्य न स्वतंत्रता
नानात्वे च मंडलेश्वराणामिव मिथो भयं स्यादित्यर्थः ॥१३॥ किंच निःकामभजनैः प्रार्थितं एव सर्वे कामा भवंति । सकामभजनेन तु कांक्षितमात्रं अनित्यं च

स्त्रियो व्रतैस्त्वां हृषीकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यं । तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि न ते स्वतंत्राः ॥१२॥ स
वै पतिः स्यादकुतोभयं स्वयं समंततः पाति भयातुरं जनं । स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्यते परं ॥१३॥ या तस्य
ते पादसरोरुहार्हणं निःकामयेत्साखिलकामलंपटा । तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाञ्चा भगवन्प्रतप्यते ॥१४॥ मत्प्रा
प्तयेऽजेश सुरासुरादयस्तप्यंत उग्रं तप ऐंद्रियेधियः । ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्हृदया यतोऽजित ॥१५॥

त्याह ॥ या स्त्री तस्य तव अकलंकेन पादसरोरुहस्यार्हणां पूजामेव कामयेत न फलांतरं सा अखिलेषु कामेषु लंपटा सर्वान्कामान्प्राप्नोतीत्यर्थः ईप्सितमीप्सित
ः फलांतरं प्राक्तु अभिप्रेतः भवनार्चितश्चेत्तर्हि तदेव केवलं राति ददाति किंच । यद्यतः फलं भोगानंतरं भग्नाया यञ्चायाचितोऽर्थो यस्याः सा । प्रतप्यते दुःखं प्राप्नोति न
देवाप्तिनस्तु नित्यं ॥१४॥ ननु न माहं लोकतः सर्वकामप्राप्तिः त्वमेव हि कामार्थिभिः सेव्यसे अत आह ॥ मत्प्राप्तये ब्रह्मादयः तत्र तपस्तप्यते किं वं त्रिकरणभूताः ए
द्रिये स्वैः धीर्येषां ते लुब्धमनसः तथापि भवत्पादपरायणादृते न मां विंदंति मत्कटाक्षविलसिता विभूतीर्न भजंत इत्यर्थः ॥ यतः त्वय्येव हृदयं यस्याः साहं त्वत्पा
तत्र त्वा रतुवर्तिनमेव विलोकयामि नान्यमित्यर्थः ॥१५॥

राम
५१

इदानीं तद्रूपं प्रार्थयते सत्वमिति यदनुजनं विना न कश्चित्पुरुषार्थः सत्वं वरितं त्वया यत्कारणं जंमात्वतां भक्तानां शार्ङ्गिन् श्रीधामि रूपयान्यस्तत न्ममापि शार्ङ्गिन् निधेहीति शेषः कथंभूतं वरितं सर्वकामवर्षित्वेन मङ्गिः स्तितं नवमपि तवानादरः यतः ईश्वरेणपमायं च्छामिलक्ष्मविमर्षितं हो विचित्रमेतत्तमपि केवलमादरमात्रं भक्तेषु परमाकृपान्तर्ईश्वरस्य तव मायया यायतं ईहितं तत्को वितर्क्यापितं समर्थः १६ सत्वाय सत्व

सत्वं सम्प्राप्य सुत शार्ङ्गिन् वरितं कारणं जं यत्वरधामि मानवतां विमर्षिमां लक्ष्मवरेणपमायया कईश्वरस्येहितं प्रहितं विभुरिति १६ रम्यके च भगवतः प्रियतमं मात्स्यमवतार रूपं तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं १७ सइदानीमपि महता भक्तियोगेनाराधयन्निदं चोदाहरति १८ ॐ नमो भगवते मुख्यतमाय नमः सत्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति १९ अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः स ईश्वरस्त्वं य इदं वशेनयन्नाम्ना यथा दारुमयीं नरः स्त्रियं २० यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोपि पृथक्समेत्य च पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते २१

प्रधानाय मुख्यतमाय प्राणाय सूत्रात्मने १९ उरुस्वनो वेदात्मको नादो यस्य य इदं विश्वं ब्राह्मणादिनाम्ना विधिनिषेधात्मवन मन्त्रेण वशे नयत नियमितवान् सत्वमीश्वरः तथा च श्रुतिः तस्य वाचं तिरामनीति २० न त्विंद्रादयो वशं नयंति लोकपालकत्वात् कुतो हेतत्राह यमिति मत्सर एव ज्वरो येषां ते यं हित्वा द्विपदश्चतुष्पदः सरीसृपं जंगमं स्थाणुं स्थावरं च यदत्र दृश्यते तत्किंचिदपि पातुं न शक्ताः सत्वमेव प्राणरूपेण पालक ईश्वरस्त्वेत्यर्थः तथा च श्रुतिः ताः अहिमता हन्तन्नमस्मिन् ...कमस्मीत्यादि २१

भा०पं
५८

अवतारचरितमाह ॥ भगवानिति इमां क्षोणीं मया सहन्तु नामहमत्स्यहितां धत्त्वेत्यध्याहारः ऊर्मिमालावति प्रलयार्णवे ओजसा क्रमते विचर-
ति ॥ यद्वा पातमित्यस्यानुषंगः क्षोणीं पातक्रमते उत्सहत इत्यर्थः ॥ यतः अजः कीदृशीं ओषधीनां विरुधांच निधिं आश्रयभूतां ॥ तस्मै नमः
जगतो यः प्राणगणस्तस्यात्मने नियंत्रे ॥२१॥ तत प्रियतमां तां प्रियतमां ॥२२॥ अकूपाराय कूर्माय सर्वैः संपूर्णैः सत्वगुणैर्विशेषणाय

भवान्युगांतार्णवे ऊर्मिमालिनी क्षोणीमिमामोषधिवीरुधां निधिं ॥ मया सहोरु क्रमतेऽज ओजसा तस्मै जगत्प्रा-
णगणात्मने नम इति ॥२२॥ हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्ष-
पुरुषैः पितृगणाधिपतिरुपधावति मंत्रमिमं चानुजपति ॥२३॥ ॐ नमो भगवते अकूपाराय सर्वसत्वगुणविशेषणा-
यनोपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमो नमोवस्थानाय नमस्ते ॥२४॥ यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपं ब-
हुरूपरूपितं ॥ संख्या न यस्यास्त्ययथोपलंभनात्तस्मै नमस्तेऽव्यपदेशरूपिणे ॥२५॥

य नउपलक्षितं स्थानं यस्य ॥ वारिचरत्वात् ॥ वर्ष्मणो वर्षीयसे कालानवच्छिन्नाय भूम्ने सर्वगताय अवस्थानाय आधाराय ॥२४॥ निजमाययार्पितं प्र-
काशितमेतदर्थस्वरूपं दृश्यं पृथिव्यादि यस्यैव रूपं यतः पृथग्[illegible] कथंभूतं बहुभिरूपैरूपितं निरूपितं ॥ यस्यैवं संख्या नास्ति कुतः अयथोपलं-
भनात् ॥ न हि मरीचिजलमेतावदिति संख्यातुं शक्यते ॥ अव्यपदेशरूपिणे अनिरुक्तप्रपंचाय कूर्माय ॥२५॥ ॥ गोविंद

राम
५८

वद्रूपत्वं स्पर्शा यत्नस्येष्वणश्च व्यतिरेकमाह ॥ जरायुजेति ॥ द्वीपग्रहर्क्षेत्यभिधेयस्त्वमेवैकः न तद्व्यतिरेकोऽस्ति ॥ सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेरित्यर्थः
सखपंचतामनूद्य तन्निराकरणप्रणाममाह ॥ यस्मिन्निति ॥ असंख्येयमनंता विशेषाणां नामानि रूपाणि आकृतयश्च यस्मिंस्तादृशे यस्मिन्त्वयि कविभिः
कपिलादिभिरियं चतुर्विंशत्यादि संख्या कल्पिता सती यया तत्त्वदृशा येन तत्त्वज्ञानेनापनीयते तस्मै ते सांख्यसिद्धान्ताय नमः परमार्थरूपायेति

जरायुजं स्वेदजमण्डजोद्भिदं चराचरं देवर्षिपितृभूतमैन्द्रियम् ॥ द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३६ ॥
यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम् ॥ संख्या यया तत्त्वदृशापनीयते तस्मै नमः सांख्यनिदर्शनाय ते
इति ॥ ३७ ॥ उत्तरेषु च कुरुषु भगवान्यज्ञपुरुषः कृतवराहरूप आस्ते ॥ ३८ ॥ तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्ति
योगेनोपधावति इमां च परमामुपनिषदमावर्तयति ॥ ३९ ॥ ॐ नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय महा
पुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥ ४० ॥ यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् ॥ मथ्नन्ति मथ्ना
मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥ ४१ ॥

वा ॥ ३७ ॥ एषामिदमुपधावतीत्यन्वयः ॥ ३९ ॥ मन्त्रैः तत्त्वेन लिङ्ग्यत इति तथा तस्मै यज्ञाः सप्त क्रतवः स
यूपाः ॥ तद्रूपाय अत एव महान्तः अध्वराः अवयवभूता यस्य ॥ कर्मशुक्लाय धर्मशुद्धाय यत्नानुष्ठात्रे ॥ त्रियुगाय कृतयुगादित्रयाभावात् ॥ यद्वा कलियुगे
छन्नत्वात् ॥ ४० ॥ कवयो विद्वांसः विपश्चितो निपुणाः गुणेषु देहेन्द्रियादिषु मथ्नन्ति विविधं निमथ्नन्ति विवेकसाधनेन मनसा क्रियार्थैः कर्मभिः न
त्मलैश्च गूढं अप्रकाशमानं दिदृक्षवः ॥ एवं मथितेन ईरितः प्रकटितस्वात्मा आत्मस्वरूपं यस्य तस्मै नमः ॥ ४१ ॥

मथनमेव दर्शयन्नाह । द्रव्यं विषयः क्रिया इंद्रियव्यापारः हेतुर्देवता अयनं देहः ईशः कालः कर्त्ताऽहंकारः एतैर्मायागुणैः कार्यैरुपलक्षणैः वस्तुत्वेन निरीक्षितो यः आत्मा तस्मै । अन्वीक्षया विचारेणांगैर्यमनियमादिभिः अतिशयात्मा निश्चयवती बुद्धिर्येषां तैः निरस्ता मायायां निमित्ता आकृतिर्यस्मात्तस्मै ॥ ४२ ॥ तदेव निर्गुणः रूपेणानव्यापरमेश्वरस्वरूपेण प्रणमति करोतीति । यस्येप्सितं जीवार्थमीप्सितं अत्यंतानिच्छाय । मीक्ष्णायोगात् स्वार्थेन नेप्सितं विश्वस्थित्यादि स्वगुणैर्माया करोति । तस्माज्जडत्वेपीश्वरसन्निधानात् प्रवृत्तिं दर्शयन्नेनाह । यथायोलोहं ग्रावाः

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने अन्वीक्षयांगातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः । माया यथायो भ्रमते तदाश्रयं ग्रावो नमस्ते गुणकर्मसाक्षिणे ॥ ४३ ॥ प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः । कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुमिति ॥ ४४ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे भुवनकोशवर्णनं अष्टादशोऽध्यायः

यस्कांतो निमित्तात् भ्रमति तदाश्रयं तत्संनिधिमेव प्राप्त । गुणानां कर्माणि जीवादृष्टानां च साक्षिणे तस्मै ते नमः ४३ अवतारचरितमाह प्रमथ्येति यो जगतामादिकारणभूतः सूकरः पृथ्वीमग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा रसातलादारभ्य उदन्वतः प्रलयार्णवात् इभो गज इव निरगात् ततश्च प्रतिगजं तल्पं दैत्यं प्रमथ्य यः क्रीडन्निव स्थितः तं विभुं प्रणतास्मीत्यन्वयः ॥ ४४ ॥ इति भागवतटीकायां पंचमे अष्टादशः

उनविंशे किंपुरुषे भारते चोपवर्ण्यते ॥ सेव्यसेवकभावस्थं भारतं श्रेष्ठ्यमेव च ॥ १ ॥ भर्त्तीरचार्यो भगवांस्तत्तस्य कथां ॥ १ ॥ आर्याणि लक्षणानि शी
लं व्रतं च यस्मिन् ॥ उपशिक्षितात्मने संयतचित्ताय ॥ उपाश्रितः अनुवृत्तो लोको येन ॥ साधुवादः साधुत्वप्रसिद्धिः तस्यातिकषणाय निकषा
य वक्रिडीरणाह्यानायापरमोमीत्यर्थः ॥ २ ॥ श्रीरामस्य परमार्थरूपेणावगमतिपरे एकं वेदांतेषुप्रसिद्धं तत्त्वं तं प्रपद्ये ॥ कथंभूतं विशुद्धस्वा

शुक उवाच ॥ किंपुरुषे वर्षे भगवंतं आदिपुरुषं लक्ष्मणाग्रजं सीताभिरामं तच्चरणसंनिकर्षाभिरतः परमभागवतो हनु
मान् सह किंपुरुषैर् अविरतभक्तिर् उपास्ते ॥ १ ॥ आर्ष्टिषेणेन सह गंधर्वैर् अनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां
समुपशृणोति स्वयं चेदं गायति ॥ २ ॥ ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नमः उपशिक्षिता
त्मने उपाश्रितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥ ३ ॥ यत्तद्वि
शुद्धानुभवमात्रमेकं स्वतेजसाध्वस्तगुणव्यवस्थं प्रत्यक्प्रशांतं सुधियोपलंभनं ह्यनामरूपं निरहं प्रपद्ये ॥ ४ ॥

मानुभवस्वरूपमेव मात्रा स्वरूपं यस्य ॥ विशुद्धत्वे हेतुः एकत्वं तत्रापि हेतुः स्वतेजसा स्वरूपप्रकाशेन ध्वस्ता गुणानां विविधा जाग्रदाद्यवस्था य
स्मिन् ॥ अनुभवमात्रत्वे हेतुः प्रत्यक् दृश्यादन्यत् ततश्चातः अनामरूपं ॥ ननु एवं सति तदेवभूतस्यापि जीवस्यासंसर्गविपर्ययो दृश्यते तत्राह निरह
महंकाराभावात्तत्तथैव परित्यामित्यर्थः ॥ ननु श्रीरामस्वरूपेण एवं प्रतीयते ॥ तत्राह सुधियां पुंसामुपलभ्यते इत्युपलंभनं ॥ शुद्धचित्तेन ब्रह्मत्वेनैव बो

कथं तर्हि ईश्वरस्य दुःखं तत्राह विभोर्मर्त्यावतारस्तु रक्षो रावणास्य वधाय तस्य मनुष्याद्वध्यत्वात् न केवलमेतावत् किंतु इह मर्त्यशि-
क्षीसंगादिकृतं दुःखं दुर्वारमिति मर्त्यानां शिक्षणं च शिक्षार्थमपीत्यर्थः अन्यथा स्वरूपे रममाणस्य जगदात्मनः सीताविरहकृतानि व्यसना-
नि कुतः स्यात् ५ विषयाशक्त्यभावेन व्यसनानर्हत्वमुपपादयति न वै स भगवान् पित्रोन्याख्यापिशत्रुः यतः आत्मवतां धीराणामात्मा सु-
हृत्तमश्च अतो न स्त्रीकृतं मोहं प्राप्नुयात् न लक्ष्मणं चेति देवदूतेन श्रीरामं संमंत्रयती विज्ञापितं अत्रागतं त्वया वध्य इति तदैव द्वारि स्थितं

मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्व-
रस्य ५ न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान्वासुदेवः न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि वि-
हातुमर्हति ६ न जन्म नूनं महतो न सौभगं न वाङ् न बुद्धिर्नाकृ[illegible]तिस्तोषहेतुः तैर्यद्विसृष्टानपि नो वनौकस-
श्चकार सख्ये बत लक्ष्मणाग्रजः ७ सुरोऽसुरो वाप्यथ वानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमं भजेत रामं मनुजाकृतिं ह-

लक्ष्मणं दुर्वाससमागतं विज्ञापयितुं प्रविष्टं हंतुमुद्यतो वसिष्ठवाक्यात्त्यजत्तत्र न युक्तमेतदित्यर्थः ६ रिं य उत्तराननयत्कोशलान्दिवमिति ८
श्रुतः श्रीराम एव सर्वैः सेव्य इति वक्तुं न तस्य तोषहेतवः सत्कुलजन्मादि किंतु भक्तिरेवेत्याह न जन्मेति महतः उत्कृष्टजन्म महतः श्रीरामस्येति
वा सौभगं सौंदर्यं आकृतिर्जातिः यद्यस्मात्तैर्जन्मादिभिर्विसृष्टान् त्यक्तानपि नो वनौकसश्चकार सख्ये बत अहो लक्ष्मणाग्रजः सोऽपि सख्ये स्वीकृतवान् ७ त-
स्मात्सुरो वा असुरो वा यः कोपि श्रीराममेव सर्वप्रकारेण भजेत सुकृतं ते अल्पीयस्यापि भजने बहुमानिनं उत्तरान् कोशलान् अयोध्यावासिनः ८

उपचितैर्धर्मादिभिरात्मोपलभ्यते येन तत्तपश्चरति ॥ तत्र उपशमः इंद्रियाणां संयमः ॥ उपरमो निरहंकारता आत्मवतामनुग्रहाय न स्वार्थं ईश्वरत्वात्
॥९॥ भगवदनुभाव उपवर्णिते येन पंचरात्रेण तत्र सावर्णेर्मनोः उपसरति सेवते १० उपरतानात्म्याय निरहंकाराय ११ असक्तश्चासौ विविक्त
श्च साक्षी च तस्मै नमः ॥ असक्तत्वं दर्शयति ॥ अस्य विश्वस्य सर्गादिषु कर्तापि यो न बध्यते अहं कर्तेति ॥ न हन्यते विविक्तत्वमाह गतोपि दैहिकैः

भारतेपि वर्षे भगवान्नरनारायणाख्य आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहाया
त्मवतामनुकंपया तपोव्यक्तगतिश्चरति ॥९॥ तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्य
योगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ॥१०॥ ॐ नमो भगवते उ
पशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये
नमो नम इति ॥११॥ गायंति चेदं ॥१२॥ कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोपि दैहिकैः ॥ द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते त
स्मै नमोसक्तविविक्तसाक्षिणे ॥१३॥ इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान्जगाद यत् ॥ यदंतकाले त्वयि निर्गुणे मनो
भक्त्या दधीतोज्झितदुष्कलेवरः ॥१४॥

क्षुत्पिपासादिभिर्यो न हन्यते नाभिभूयते ॥ साक्षित्वमाह ॥ यस्य द्रष्टुरपि सतो दृग्ज्ञानं गुणैर्दोषैर्न दूष्यते न विक्षिप्यते ॥१३॥
योगकौशलं निरूपयन्योगं प्रार्थयते इदमिति त्रिभिः ॥ हे योगेश्वर हिरण्यगर्भेण यद्योगनैपुण्यं जगाद तदेव तत् ॥ किं जन्मप्रभृति भक्त्या अंतकाले प्रमादात्त्व
यि मनो धारयेदिति यत् कथंभूतः सन् उज्झितं दुःकलेवरं तदभिमानो येन १४ ॥

अन्यथा तस्य शास्त्राभ्यासमात्रेण मोक्षः स्यादित्याह ऐहिकामुष्मिककामेष्वलंपरो मूर्खः सुतादिषु योगक्षेमं वितन्वन् त्यक्तस्य कलेवरस्यात्ययात् भृत्योः शंकेत तथा विद्वानपि सन्नयं शंकेत तस्य यत्नः श्रम एव ॥१५॥ यस्माद्विदुषोऽपि भयमेवं दृश्यते ततस्मात् देहत्रयोऽस्थितो नाहं जडात्मेव नोद्योगं विधेहि कीदृ

यद्यैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिंतयन् । शंकेत विद्वान्कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलं ॥१५॥
तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहंममतामधोक्षज । भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावमिति ॥१६॥
भारतेऽप्यस्मिन्वर्षे सरिच्छैलाः संति बहवः ॥१७॥ मलयो मंगलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिः ऋष्यमूकः श्रीशैलो महेंद्रो वारिधारो विंध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितंबप्रभवा नदा नद्यश्च संत्यसंख्याताः ॥१८॥ एतासामपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना चोपस्पृशंति ॥१९॥ चंद्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिंधुरंधः शोणश्च नदौ महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥२०॥

शं त्वयि स्वभावं सहजदास्यमनारूपं येन योगेन च यं त्वन्माययानः कुकलेवरेऽर्पितामहंममतां शीघ्रं भिंद्याम तत्स्वजेम सुदुर्भिदामपायांतरैः सर्वथात्यक्तुमशक्यां ॥१६॥ इलावृतवदस्मिन्नपि वर्षे सरितः शैलाश्च संति ॥१७॥ नितंबप्रभवाः तटेभ्यः संभूताः ॥१८॥ आत्मनां च देहे वा उपस्पृशंति ॥१९॥

लब्धजन्मभिः तैः पुरुषैः सात्विकादिस्वकृतेन कर्मणा दिव्यादिगतय आत्मनो विधीयन्ते साध्यन्ते । हि यस्मात् सर्वा एव गतयः कर्मानुसारेण
सर्वेषां भवति ॥२१॥ यस्य वर्णस्य यद्विधानं मोक्षप्रकारः तस्मात् सर्वस्मादभ्युक्षा इति दर्शनतिक्रमेणाप्यस्मिन्नेव वर्षे नृणामपवर्गश्च भवति । एत
स्वकर्मादि स्वकृतसाधनं यद्भवति सिद्धाये यो ... न त्वन्यत्रापवर्गाभावेन तदुपजीविवारायणः स्वभवत्वादिति देवानामपि
मोक्षस्य सूचितत्वात् ॥२२॥ अपवर्गस्वरूपमाह । योसाविति । अनात्म्ये आत्मनि भवत्यप्रामाणिक इति दाहिते । अनिरुक्ते वाचामगोचरे । अनिल

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्यः आ
त्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते ॥२१॥ यथावर्णविधानमपवर्गश्चापि भवति ॥२२॥ योसौ भगवति सर्व
भूतात्म्यन्यनात्म्ये निरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतनिमित्ताविद्याग्रन्थि
रंधनद्वारेण यदा हि महापुरुषपुरुषप्रसंगः ॥२३॥ एतदेव हि देवा गायन्ति ॥२४॥ अहो अमीषां किमकारि शोभनं प्रसन्न ए
षां स्विदुत स्वयं हरिः । यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः ॥२५॥

यनेऽनाधारे अनन्यनिमित्तो हैतुको भक्तियोग एव लक्षणं स्वरूपं यस्य स कथं भवति नानागतीनां निमित्तभूतो योऽविद्याग्रन्थिस्तस्य रंधनं छेदनं तत
द्वारेण महापुरुषपुरुषा विष्णुभक्ताः तैः प्रकृष्टः संयोगो यदा भवति तदा ॥२३॥ एतदेव माहात्म्यमेव सर्वपुरुषार्थसाधनं गायंति ॥२४॥ अमीषां एभिः उत
स्वित् अथवा स्वयमेव साधनं विनैव हरिः एषां प्रसन्नः भूत एवंभूतस्य उपकारत्वात् भारताजिरे भारतांगणे नः केवलं स्पृहैव यतस्तन्मुकुन्दसेवोप

स्पृहामेवाह ॥ किमित्यादि सप्तभिः ॥ दुष्करैः क्रत्वादिभिर्नः फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्या किं न किंचित्फलं ॥ कुतः यत्र नारायणपादपंकजस्मृतिर्नास्ति ॥ यतस्तत्रातिशयितैरिन्द्रियाणामुत्सवान् भोगान् प्रमुष्टा भूत ॥ २१ ॥ क्षणायुष्यमल्पमेवायुर्येषां वरत्वे हेतुः मर्त्येनापि देहेन क्षणेनैव कालेन कृतं कर्म संन्यस्य हरेः पदं संप्रयान्ति ॥ २२ ॥ अतः यत्र वैकुंठकथामृतनद्यो न सन्ति ॥ तदाश्रयाः कथापगाश्रयाः ॥ महात्मानो नृत्यादयुत्सवा यत्र

किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ॥ न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टातिशयेंद्रियोत्सवान् ॥ २१ ॥
कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरं ॥ क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः ॥ २२ ॥
न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ॥ न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न वै स सेव्यतां ॥ २३ ॥
प्राप्तां नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृतां ॥ नैवै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनं ॥ २४ ॥

तादृशाय यज्ञेशमखाश्च पूजाः सः सुरेशस्य ब्रह्मणोपि लोकोपि न सेव्यतां ॥ २३ ॥ अस्मात्कृतत्र पश्चित्ति इति प्राप्ता इति ॥ ज्ञानं च तदर्थाः क्रियाश्च तदर्थानि द्रव्याणि च तेषां कलापेन संभृता पूर्णां अपुनर्भवाय मोक्षाय वनौका इव वनौकसः पक्षिणो यथा लुब्धकान्मुक्ता अपि वनं प्रविश्य न यथेष्टं स्थित्वैव वृक्षे प्रमत्ता विहरन्ति तर्हि यथा बध्यन्ते तद्वत ॥ २४ ॥

अहो भारतवासिनां भाग्यमित्याहुः यैरिति । अग्नये इदं निर्वपामि इन्द्राय जुष्टं निर्वपामीत्येवं भागशो निरुप्तं पृथक् हुतं । कथं विधिना प्रकारेण
मंत्रेणा च वस्तुतश्च शुद्धपुरोडाशादिभेदेन इष्टं देवतामुद्दिश्य त्यक्तं निरुप्तं च ममेदमिति स्वीकृत्य त्यागानंतरं प्रश्नातीत्यर्थः । पृथङ्नामभिरिंद्रादिनामभिराहूतः
आहूतः आशिषां प्रभुः स्वयं पूर्णोपि हरिः ॥ २० ॥ तत्रापि निष्कामाः कृतार्था इत्याहुः सत्यमिति । अर्थितः सन्नर्थितं ददातीति सत्यं तथापि परमार्थ

यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमंत्रवस्तुनः । एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां
प्रभुः ॥ २० ॥ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः । स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं
निजपादपल्लवं ॥ २१ ॥ यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य दत्तस्य कृतस्य शोभनं । तेनाजनाभे स्मृतिमज्जन्म नः स्या
द्वर्षे हरिर्यद्भजतां शं तनोति ॥ २२ ॥ शुक उवाच ॥ जंबूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति ॥ २३ ॥ सगरात्मजैरश्वा
न्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २४ ॥ तद्यथा स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो रमणको मंदरहरिणः पांचज
न्यः सिंहलो लंकेति ॥ २५ ॥ एवं तव भारतोत्तम जंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥ २६ ॥ इति श्रीभागवते महापु
राणे पंचमस्कंधे एकोनविंशोऽध्यायः

दोन भवत्येव । यद्यस्मात् । यतो दत्त्वानंतरं पुनरप्यर्थिता भवति । ननु नार्थितं चेत्तर्हि किमपि न दद्यादित्याशंक्याह
अनिच्छतामपि कामानामिच्छायाः पिधानमाच्छादकं सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव संपादयति ॥ २१ ॥ स्विष्टस्य सम्यग्यजनस्य दत्तस्य दानस्य
सुकृतस्य अन्यस्यापि कर्मणः स्वर्गसुखावशेषितं यदि किंचिदस्ति । तेनाजनाभे वर्षे नोऽस्माकं जन्म स्यात् कीदृशं स्मृतिमत् हरिर्वे येन
इत्यनुसंधानयुक्तं यतः हरिः भजतां शं सुखं तनोति ॥ २२ ॥ इति पंचमे टीकायामेकोनविंशः

विशेषं प्लक्षादिषट्द्वीपस्थितिमाह सप्तार्णवैः लोकालोकस्थितिं चान्तर्बहिर्भागादिमानतः १ तावता लक्षविस्तारेण १ पारेक्षिप्तः परिवेष्टितः उपास्ते तिष्ठति । आकलय्य समर्प्य २ अभिज्ञाता प्रसिद्धास्तावन्त एव । अन्येऽपि च पर्वता नद्यश्च सन्ति सहस्रशः सन्ति तत्र तथैवः ५ मानमेत्तर स्य सण्डलाकारत्वोक्ते रेतेषु

शुक उवाच । अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते १ जंबूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जंबूद्वीपाख्येन १ लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जंबूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वस्तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपराम २ शिवं यवसं सुभद्रं शांतं क्षेममम‍ृतमभयमिति वर्षाणि ४ तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः ५ मणिकूटो वज्रकूट इंद्रसेनो ज्योतिष्मान्सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः ६ अरुणा नृम्णांगिरसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरेति महानद्यः ७ यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते ॥ ८

क्षारादिपंचद्वीपेषु वर्षद्वयपक्तिर्यथैवाकार उभयतोः स्प्रश इति गम्यते अन्यथा सप्तभिः सप्तवर्षविभागासंभवाच्च वैम्येव वर्षाणां पूर्वादिक्रमोक्तेन ६ जलोपस्पर्शनेन विधूतं रजस्तमश्च येषां हंसादयोऽत्र ब्राह्मणादिस्थानीयाः विबुधोपमं संदर्शयत्क्रम स्वैरादि हितं नृपं प्रजननमपत्योत्पादनं येषां ८

विगीतात्र्यपि द्वीपसंस्थाव्याख्यायते ॥ अत्रस्य पुराणस्य रूपस्य विष्णोः स्वरूपं सूर्यमीमहि शरणं व्रजेम कथंभूतं सत्यादीनामात्मानमधिष्ठातारं तत्र सत्यमनुष्ठीयमानो धर्मः ऋतं प्रतीयमानो धर्मः ॥ ब्रह्मणः तद्बोधकस्य वेदस्य अमृतस्य शुभफलस्य मृत्योः अशुभफलस्य ॥ प्र

प्रत्नस्य विष्णो रूपं यत्सत्यस्यर्तस्य ब्रह्मणः अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥ ८ ॥ प्लक्षादिषु पंचसु पुरुषाणामायुरिंद्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्तते ॥ १० ॥ प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपो विशाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृंक्ते ॥ ११ ॥ यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतः छंदःस्तुतः पतत्रिराजस्य सा द्वीपहूतय उपलक्ष्यते ॥ १२ ॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत्सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥ १३ ॥ तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः ॥ १४ ॥ स्वरसः शतशृंगो वामदेवः कुंदो मुकुंदः पुष्पवर्षः सहस्रश्रुतिरिति ॥ १५ ॥ अनुमतिः सिनीवाली सरस्वती कुहू रजनी नंदा राकेति ॥ १६ ॥ तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरेषंधरसंज्ञा भगवंतं वेदमयं सोममात्मानं वेदेन यजंते ॥ १७ ॥ स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः प्रजानां सर्वासां राजांधः सोमो न आस्त्विति ॥ १८ ॥

देव

यो ऽसि शिगरत्नात्तत्रि द्विश्ववेशिर इत्यादिश्रुतेः ॥ ९ ॥ छंदोभिः स्वावयवभूतैः श्रीविष्णुं स्तौतीति छंदः स्तुतः तस्य द्वीपस्य हूतये व्यपदेशाय ॥ १२ ॥ स्वगोभिः स्वरश्मिभिः अंधः अन्नं ॥ सोमो राजा अस्तु ॥ अस्माभिस्तु मैव भवतु ॥ कृष्णपाठे विविच्य यथासंध्यभावः ॥ १८ ॥

एवं सुरोदाद्बहिर्द्विगुणो घृतोदेनावृतः कुशद्वीप इत्यन्वयः ॥ स्वशष्पाः स्तंबको महागिरिः स्वातेषां रोचिषा ॥१९॥ हे जातवेदः त्वं साक्षात्परब्रह्मणो हरेर्हव्यवाडसि हुतो देवानां यज्ञेन पुरुषं यक्षरिमेव यज ॥ अंगानानामग्रादेवत्वं मंगिने समर्पयेत्यर्थः ॥२५॥ उपक्लृप्तो वेष्टितः यथा कुशद्वीपो घृतोदेनावृतः ॥२६॥

एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपो यस्मिन् कुशस्तंबो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति ॥१९॥ तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत ॥२०॥ वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः ॥ तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव ॥२१॥ चक्रश्चतुःशृंगः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति ॥२२॥ रसकुल्या मधुकुल्या मित्रविंदा श्रुतविंदा देवगर्भा घृतच्युता मंत्रमालेति नद्यः ॥२३॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवंतं जातवेदसरूपिणं कर्मकौशलेन यजंते ॥२४॥ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् देवानां पुरुषांगानां यज्ञेन पुरुषं यजेति ॥२५॥ तथा घृतोदाद्बहिः क्रौंचद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौंचो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥२६॥ योऽसौ गुहप्रहरणोन्मथितनितंबकुंजोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥२७॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान्निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविंदमुपजगाम ॥२८॥ आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः ॥२९॥ शुक्लो वर्धमानो भोजन उपबर्हिणो नंदो नंदनः स

गुहस्य कार्त्तिकेयस्य प्रहरणेनास्त्रविशेषेणोन्मथिताः नितंबाः कुंजाश्च यस्य ॥२७॥ स्वयं भगवान् तानि परमकल्याणं यशो यस्य ॥२८॥ ९ ॥ ३० ॥

मधुर

अपोमयं स्य ॥ मयं २२ ॥ आपः पुरुषवीर्यास्स्थ पात लब्धसामर्थ्याः स्तमव था अत एवं भूर्भुवः स्वः त्रैलोक्यं पुनंतं तानामवत्यो नो ह्यस्माकं स्पृशतां स्पर्श

अमयामृतौ चास्यार्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्लेति ॥ २१ ॥ यासामंभः पवित्रममलमुपयुंजानाः पुरुषर्ष
भद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजन्ते ॥ २२ ॥ आपः पुरुषवीर्याः स्थ पुनन्तीर्भूर्भुवः स्वः ता
नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥ २३ ॥ एवं पुरस्तात्क्षीरोदात्परितः उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्ष
योजनायामः समानेन च दधिमंडोदेन परीतो यस्मिन्शाको नाम महीरुहः [illegible] क्षेत्रव्यपदेशको यस्य ह महा
सुरभिगंधस्तं द्वीपमनुवासयति ॥ २४ ॥ तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोपि विभज्य सप्त वर्षाणि पुत्रना
मानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिपतीन् स्वयं भग
वत्यनंत आवेशितमतिस्तपोवनं प्रविवेश ॥ २५ ॥ एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ॥ २६ ॥ ईशान उरुशृंगो बलभद्रः
शतकेशरः सहस्रस्रोतो देवपालो महानस इति ॥ २७ ॥ अनघायुर्दा उभयस्पृष्टिरपराजिता पंचपदी सहस्रस्रुतिर्निजधृति
रिति ॥ २८ ॥ तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्राणायामविधूतरजस्तमसः परम
समाधिना यजन्ते ॥ २९ ॥

नंतर्वर्तते भुवः शरीराणि पुरं तत्र पतत्यात्मना स्वरूपेणो व अमीवघ्नीः पापहंत्र्यः ३१ २ ग्रोमंडलमः स एवोरकं यस्य प
र्णितः स्वस्पर्शीनिवहिम्पुरु स्पर्शीनि ह्य [illegible] शाको नाम हरहः २४ ॥

आत्मकेतुभिः प्राणादिवृत्तिभिः ॥ ४० ॥ ज्वलनशिखावदातमलानां कनकपत्राणामयुतानि यस्य तत् ॥ ४१ ॥ देवानामहोरात्राभ्यां उत्तरदक्षिणा-
यनाभ्यामित्यर्थः ॥ ४२ ॥ ब्रह्मरूपिणं कमलासनमूर्तिं सकर्मकेन ब्रह्मसालोक्यादिसाधनेन ॥ ४४ ॥ कर्ममयं कर्मफलं तद्रूपं ब्रह्मलिंगं यते

अंतःप्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः अंतर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटं ॥ ४० ॥ एवमेव दधिमंडोदात्परतः पुष्क-
रद्वीपस्ततो द्विगुणायामः समंतत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतो यस्मिन् बृहत्पुष्करं ज्वलनशिखा-
मलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितं ॥ ४१ ॥ तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाची-
नपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिंद्रादीनां यदुपरिष्टात्सू-
र्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥ ४२ ॥ तद्द्वीपस्याधिपतिः प्रैयव्रतो वीति-
होत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते ॥ ४३ ॥ तद्वर्षपुरु-
षा भगवंतं ब्रह्मरूपिणं सकर्मकेण कर्मणाऽऽराधयंतीदं चोदाहरंति ॥ ४४ ॥ यत्तत्कर्ममयं लिंगं ब्रह्मलिंगं जनोऽर्चयेत् ॥ एकांतम-
द्वयं शांतं तस्मै भगवते नम इति ॥ ४५ ॥ [illegible] ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरंतराले परित उपक्षिप्तः ॥ ४६ ॥

यस्मात् एकस्मिन्नेव परमेश्वरे ऽतो निष्ठा यस्य तत् अत एव वस्तुतोऽद्वैतं ॥ ४५ ॥ ततः शुद्धोदात्परस्तात् लोकः सूर्याद्यालोकवान् देशः अलोकः तद्रहि-
तः तयोरंतराले मध्ये तयोर्विभागार्थमित्यर्थः ॥ ४६ ॥ राम

ततः परस्तादित्युक्तं तदेव विक्रियतांतरेणाऽऽह इति अपेक्षायां तदंतर्वर्त्तिनीं भूमिमाह । यावन्मानसोत्तरमेर्वोरंतरं सार्द्धसप्तपंचाशल्लक्षोत्तरसार्द्धकोटिपरिमितं
तावती भूः शुद्धोदात्परतोऽस्ति । तत्र च प्राणिनोऽपि संति । ततः कांचनी भूमिरन्यास्तीत्यर्थः । सा चैकोनचत्वारिंशल्लक्षोत्तरकोट्यष्टकपरिमितदे
शा । एवं हि सति मेरुलोकालोकयोरंतरं सार्द्धद्वादशकोटिपरिमितं वक्ष्यमाणमुपपन्नं भवति । एतदेव शैवं तत्रैवोक्तं । कोटिकोटिः स्मृतं त्रिपंचाशल्ल
क्षाणि च ततः परं । पंचाशच्च सहस्राणि सप्तद्वीपाः ससागराः । ततो हेममयी भूमिर्दशकोट्यायतानने । देवानां क्रीडनार्थाय लोकालोकः ततः परं

यावन्मानसोत्तरमेर्वोरंतरं तावती भूमिः कांचन्यादर्शतलोपमा । यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते तस्मात्स
र्वसत्वपरिहृताऽऽसीत् ॥ ४७ ॥ लोकालोक इति समाख्या यदनेनालोकेनालोकस्यांतर्वर्त्तिनावस्थाप्यते । स लोकत्रयांते
परित ईश्वरेण विहितः यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रीँल्लोकानावितन्वाना न कदाचि
त्पराचीना भवितुमुत्सहंते तावदुन्नहनायामः ॥ ४८ ॥ एतावाल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिंतितः कविभिः स तु पंचा
शत्कोटिगणितस्य भूगोलस्य तुरीयभागोऽयं लोकालोकाचलः ॥ ४९ ॥

अत्र च दशकोटित्वं पूर्वोक्तभूम्या सह द्रष्टव्यम् । सर्वसत्वपरिहृतेति देवव्यतिरेकेणेति ज्ञेयं देवानां क्रीडनार्थायेत्युक्तत्वात् ॥ ४७ ॥ लोकत्रयस्यांते परितो मर्यादा
रूपो विहितः यस्मात्प्रतिबंधकात् । सूर्यप्रभृतिर्येषां ध्रुवोऽपवर्गोंऽतो येषां । आवितन्वानाः प्रकाशयंतः परतो गंतुं न शक्नुवंति । तावदुन्नहनमुत्से
धः तदनुरूप आयामश्च विस्तारो यस्य । ध्रुवादप्युच्छ्रितत्वात्त्रिलोकीमर्यादाभूत इत्यर्थः ॥ ४८ ॥ सोऽयं लोकालोकाचलस्तुरीयभागः चतुर्थांशः सार्द्धद्वा

आशास्तद्दिक्षु योधिनिवेशिताः ते आसते ॥ ४० ॥ तेषां दिग्गजानां स्वविभूतीनां स्वांशभूतानां महेन्द्रादीनां विविधवीर्योपबृंहणाय सकललोकस्वस्तये च
भगवानन्तस्मिन्नास्ते इत्यन्वयः किं कुर्वन् आत्मनः स्वस्य विशुद्धं सत्वं तनुं संधारयमाणः आविः कुर्वन् कीदृशं धर्मज्ञानादीन्यष्टमहासिद्धयश्चोपल
क्षणं यस्य तत् । हारेंद्रैरुपलक्षितः सन् महाविभूतेः परमैश्वर्यस्य पतित्वादेकैव सन् समंतादास्ते ॥ ४१ ॥ स च्चं तथाविनो तस्थेनैव सर्वकर्तृत्वाका

तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाधिनिवेशिता ये द्विरदपतयः ऋषभः पुष्करचूडो वामनो
पराजित इति सकललोकस्थितिहेतवः ॥ ४० ॥ तेषां स्वविभूतीनां लोकपालानां च विविधवीर्योपबृंहणाय भगवान्परममहा
पुरुषो महाविभूतिपतिरन्तर्याम्यात्मनो विशुद्धसत्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपा
र्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्भुजदंडैः संधारयमाणः तस्मिन्गिरिवरे समंतात्सकललोकस्व
स्तय आस्ते ॥ ४१ ॥ आकल्पमेवं वेषं गत आत्मयोगमायया विरचितविविधलोकयात्रागोपीथायेत्यर्थः ॥ ४२ ॥ यो
ऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात् । ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरंति ॥ ४३ ॥

किं तस्य बहिः समंतात् व्याख्यानेनेत्याशंक्य तस्यार्थं स्वयमेव व्याचष्टे आत्मयोगमायया विरचिताया विविधाया लोकयात्रायास्तस्या गोपीथाय र
क्षणाय एष भगवानेवंभूतश्च आकल्पं वेषं गतः लीलया आस्ते इति समंतादास्ते इत्यर्थः ॥ ४२ ॥ अलोकपरिमाणं च मेरोरेकतः सार्धद्वादशकोटयः
ततो लोकालोकात् अलोकाद्यः परस्तात् विशुद्धा हि द्विजपुत्रानयने ऽर्जुनस्य श्रीकृष्णेन प्रदर्शितम् ॥ ४३ ॥ गोपालायमायनमः

विस्तारेणोक्तं ब्रह्माण्डमानं सर्वतोपि निरूपयति । अण्डमध्यगतः किं तन्मध्यं तदाह । द्यावाभूम्योः ऊर्ध्वोत्तरकपालयोः यदन्तरं मध्यं तस्यानां सर्वतः पंचविंशतिकोट्यः स्युः ॥ ५४ ॥ अण्डमध्यावस्थानो कारणं तन्नामनिर्वचनेनाह ॥ मृते अण्ड एव ... सूर्यो वैराजरूपेण प्रस्तात्सविशेषः ॥ ५५ ॥ किंच सूर्येणैव विभज्यन्ते दिशः खमन्तरिक्षं भिदा भेदेनापि विभागः स्वर्गापवर्गौ भोगमोक्षदेशौ रसौकांसि तलातलादीनि ॥ ५७ ॥

अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पंचविंशतिः ॥ ५४ ॥ मृतेऽण्ड एष एतस्मिन्यदभूत्ततो मार्तण्ड इति व्यपदेशः ॥ ५५ ॥ हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ॥ ५६ ॥ सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥ ५७ ॥ देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधां सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥ ५८ ॥ इति श्रीभागवते महापुराणे पंचमस्कन्धे भुवनकोशवर्णने समुद्रद्वीपविंशतितमोध्यायः ॥ श्रीशुक उवाच ॥ एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतो व्याख्यातः ॥ एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति ॥ १ ॥ यथा द्विदलयोर्निष्पावादीनां ते अन्तरेणान्तरिक्षं तदुभयसंधितं ॥ २ ॥

प्रासनार्थं सरीसृपादीनां सूर्य आत्मा दृगीश्वरः नेत्राधिष्ठाता ॥ ५८ ॥ पंचमे विंशः ॥ एवमध्याये विंशत्या भूमर्यादा निरूपिता । अतः परं तु सूर्यस्यापालनं त्रिभिरुच्यते ॥ १ ॥ एकविंशे रवेः कालचक्रेणाभ्रमतोन्वहं । स्वगत्याऽहनिशि संचारो लोकयात्रादि निरूप्यते ॥ १ ॥ एतावानेव विस्तारेणोक्तो द्यः पंचाशत्कोटयस्तेषामर्धेन पंचविंशति ॥ १ ॥ द्विदलयोर्मध्ये यथैकस्य मानेनापरस्य मानमुपदिश्यते तद्वत् येऽन्तरेण तयोर्मध्ये अण्डे मध्यसंधितं

उदगयनादिसंज्ञाभिर्मन्दशीघ्रसमगतिभिः यथाकालमारोहणादिस्थानेषु आरोहणाद्यभिपद्यमानो मकरादिषु होरात्राणि दीर्घह्रस्वसमा
नानि विधत्ते ॥ ४ ॥ तत्र प्रपंचयति यदेति ॥ अत्यन्तवैषम्याभावात्समानानीत्युक्तं ॥ सर्वथा साम्यं त्वेकस्यैवाहोरात्रस्य ॥ यद्यपि वृषमिथुनयोरे

योन्मध्यगो भगवांस्तपतांपतिस्तपनस्त्वातपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयनदक्षिणा
यनवैषुवतसंज्ञाभिर्मान्द्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादि
षु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ४ ॥ यदा मेषतुलयोर्वर्त्तते तदाहोरात्राणि समानानि भवन्ति यदा
वृषभादिषु पंचसु राशिषु चरति तदाहान्येव वर्द्धन्ते ह्रसति च मासि मास्येकैका घटिका रात्रिषु यदा वृश्चिकादिषु पंच
सु वर्त्तते तदाहोरात्राणि विपर्ययाणि भवन्ति ॥ ५ ॥

वाह्ना वृद्धिः कर्कराशिषु ह्रासः तथापि रात्र्यपेक्षयाप्यधिकत्वादहर्वृद्धेस्तदा तदुक्तं एवं रात्रिवृद्धावपि दिनापेक्षयाल्पत्वात्तदुक्तं ॥ एकैकेति स्थूलं दृष्टो
क्तं वृद्धिह्रासयोः प्रतिमासं वैषम्यात् ॥ विपर्ययाणीति ॥ अहानि न्यूनानि रात्रयोऽधिका इत्यर्थः ॥ ५ ॥

तद्वृद्धिह्रासप्रकारमाह । यावदिति ॥ ६ ॥ एवं परिहारिगतिभिः नवकोटय इति । मेरोः समपतो मानसोत्तरस्यान्तर्वर्त्तित्वारेणपंचदशलक्षाधिककोटि-
त्रयपरिमिते नेदं परिमंडलमानप्रत्येकं । एवं पंचदशपरिधौ द्विकादिभिरित्यादिद्विघ्नपित्रैराशिकगणितेन तत्तन्मानमुन्नेयम् । अत्रापेक्षितो विशेषः पु-
राणोद्दर्शितानि । पर्यग्रहाणां वीथ्यपेक्षस्थानानि द्विजसत्तमाः । स्थानं जरद्गवं मध्यं तथैरावतमुत्तरम् । वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ।
तितद्देवमध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथित्रयेण त्रिधा विधाते त्रिभिस्त्रिभिः अश्विन्यादिनक्षत्रैर्नागवीथिर्गजवीथी ऐरावती चेत्युत्तर-
मार्गे वीथीत्रयं । आर्षभी गोवीथी जरद्गवी चेति । वैष्णवे तेन मध्यमार्गे अजवीथी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयं तत्र पुनर्दृष्टं तेन

यावद्दक्षिणायनमहानि वर्द्धन्ते यावदुदगयनं रात्रयः ॥ ६ ॥ एवं नवकोटय एकपंचाशल्लक्षाणि योजनानां मानसो-
वन्त्याश्विनी कृत्तिकायाम्या नागवीथीति शब्दिता । रोहिण्यार्द्रा मृगशिरो चाजवीथ्यभिधीयते । त्तरगिरिपरिवर्त्तनस्योपदिशंति ॥ ७ ॥

पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता । एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते । तथैव चापि फल्गुन्यौ मघा चैवार्षभी मता । हस्तचित्रा
तथा स्वाती गोवीथीति तु शब्दिता । ज्येष्ठा विशाखानुराधा वीथी जरद्गवी मता । एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥ ४ ॥ मूलाषाढोत्तराश्वा
षाढा अजवीथ्यभिशब्दिता । श्रवणं चापि धनिष्ठा च मार्गी शततारका तथा ॥ ५ ॥ वैश्वानरी भाद्रपदे रेवती चैव कीर्त्तिता ॥ ६ ॥ एतास्तु वीथयस्तिस्रो दक्षिणो
मार्ग उच्यत इति । याम्यान्तरालाश्रुहितादैवतकाप्यनर्द्धभः ॥ ७ ॥ टीका । रामन्तराटवर्गतव्यः तत्रारोहणादिस्थानानि वाप्नुयात् २

मार्गो मृगवीथ्याख्यं वक्ष्यति उत्तरायणे तु ध्रुवेण मात्रकोटिनिबद्धवायुपाशाद्याकर्षणेन रथस्यारोहणात्तदाभ्यन्तरमंडलप्रवेशो गतिमान्द्यं चेति
दिनवृद्धिरात्रिह्रासश्च दक्षिणायने पाशश्रेण्यवरोहणाच्च -- हिर्मंडलप्रवेशो गतिशैघ्र्यं चेत्यहोरात्रयोर्विपर्ययः ॥ वैषुवे तु पाशमाध्यान्म
मवरोहणे मध्यमंडलप्रवेशो गतिमान्द्यं चेत्यहोरात्रयोः साम्यमिति तथा च पुराणान्तरं स्माकृष्यते यदा तेन ध्रुवेण समधिष्ठिते ॥ तदाभ्यन्तर

तस्मिन्नैन्द्रीपुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः
सौम्यां विभावरीं नाम ॥ ७ ॥ तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण
मेरोश्चतुर्दिशम् ॥ ८ ॥

तः सूर्योऽभ्रमते मंडलानि तु ध्रुवेणामुच्यमानेन प्रग्रहरश्मिनियोगेन तु ॥ तथैव बाह्यतः सूर्यो भ्रमते मंडलानि वै
ति ॥ ७ ॥ तदेतदुक्तं पदार्थविवेचनयोरित्यादिना उदयास्तादिकं वक्तुमाह ॥ तस्मिन्मानसोत्तरे मेरोः पूर्वत ऐंद्रीप्रभृतय उपदिशास्थितास्तु एषां
॥ ८ ॥ तासु पुरीषु उदयादीन्सूचयन्दर्शयति ॥ चतुर्दिशमित्युक्तं च मेरोर्दक्षिणोत्तरे शतेषामैन्द्र्यामारभ्य पूर्वोदयः ॥ येषां पश्चिमे तेषां याम्यामारभ्य येषामुत्त
रे तेषां वारुणीमारभ्य ये पूर्वे तेषां सौम्यामारभ्य ॥ ९ ॥ गोपालाय नमः गोविंदाय नमः ॥ रामाय नमः

तत्रत्यानां मेरुस्थानां मध्येनेति ॥ नक्षत्रादिगुरुत्वतयाप्यगत्या मेरुं वामतः ॥ कुर्वन्तीति प्रदक्षिणावर्त्तं प्रवहाख्यवायुनाभ्रम्यमाणाज्योतिश्चक्राव
शात प्रत्यहं प्रदक्षिणातः करोति ॥१०॥ अतश्चक्रमतिवशादिति दूरतो भूतलगस्येव दर्शनं गुरुत्वयाश्चाकाशमात्रस्य दर्शनं मध्यो ऽक्षभूमि प्रविष्टस्ये
वादर्शनमप्यल्पपथः ततोतिविदुरगामनेनिशीथइति सम्मुद्दृतीरस्य दृष्टाचक्षुर्ज्ञो वाएषप्रातरुदेत्यथः मापंप्रविशतीतिश्रुतिर्मे वहायोनव
स्थितः ॥ नतुकं वैसेव ॥ उदयास्तमये चैवमर्द्धकालेन तं सेव ॥ दिशाप्रविशेषाभावात्तथा मेत्रपविदिशाप्रव यैर्यत्रदृश्यते भाम्वान्सतेषामुदयः स्म
तत्रत्यानां दिवसमध्यगत एवमराहरित्यात्तपतिमध्येनाचलं दक्षिणेनकरोति ॥१०॥ पश्चादेतितस्यहमेमानमन्यत्रनिपाते
निम्नोचतियत्रक्षचनमस्तंरेनाभितपतितस्यदेषमभानमन्यत्रनिपाते प्रह्वापयति ॥ तत्रगतंनपश्यन्तियेतं मध्यमुपश्य
न्त ॥११॥ यदावरुद्धाः पुर्याः प्रचलनेपंचदशाब्धरिकाभियोमयां मेषादकोटिद्वयं योजनानां साई द्वादशलक्षाणिमा
धिकानिचोपयाति ॥१२॥
तः तिरोभावंचयत्रेतितत्रैवास्तमनं रवेः नैवास्ताभिनमर्द्धस्यनोदयस्तर्ववैराम्भतः उदयास्तमनारव्यं हि दर्शना
दर्शनं रवेः ॥ शक्रादीनां पुरेतिष्ठन्स्पृशत्येषत्रयमप्यविकर्णौद्धौ विकर्णास्थमप्यत्वीनकोणान्द्वेपुरे तथेति ॥ अतएवतत्रैवोक्तं सर्वेषां द्वीप
वर्षाणां मेरुरुत्तरतस्थित इति यतो यत्रयः ॥ पश्यतिसेवतस्य प्राचीतस्यवामतो मेरुषीष्टतीति ॥१०॥ यथोक्तापुरुदयास्तमयनाधनियमं दर्शयतिय
त्रोदेत्यादिना सूर्योदयेन नव्हेद्धमेन प्रह्वापयतिनिशीथं करोति ॥ येतं मध्यमुपश्येरन्प्रह्वस्थायमानमन्यत्र स्थोमाधिकानिपंचविंशतिमहस्त्राधिका
नि ॥१२॥

सहवास्तंहैवयन्त्यपि वस्तुतः सूर्यस्यापि नक्षत्रैः संबन्धोऽस्त्यन्यथा तथापि तस्य तत्साहित्यादर्शनात्सोमादीनामेव तत्साहित्यमुक्तं १२ त्रयीम
यस्त्र्याद्युपासनार्थः १४ द्वादशमासा आरा यस्य षट् ऋतवो नेमयो यस्य त्रीणि चातुर्मास्यानि नाभयो यस्य १५ कृतेतरभागो यस्य मानसोत्त
रगिरौ लग्नाक्षाग्रे उपरिवाहुवद्भ्रमा वितिष्ठुष्टव्यावक्रं वातावद्धृतमिति मन्तव्यम् अन्यथा घृतमात्रोऽक्षायत्वन्मानसोत्तरस्य मेरोश्च तन्मात्रस्तुल्यय
त्वादनन्वयमात्रापानुपपन्नेः १६ तस्मिन्नक्षे चक्रपाते कृतमूलः निबद्धपूर्वभागः प्रथमाक्षात्मेरुमानसोत्तरायनः साईसप्तलक्षाधिकसार्धकोटिप्र

एवं ततो वारुणीं सौम्यामैन्द्रीं च पुनस्तथान्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्युद्यन्ति सह वा निम्लोचन्ति १२
एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु १४ यस्यैकं चक्रं द्वाद
शारं षण्णेमि त्रिनाभि संवत्सरात्मकं समामनन्ति १५ तस्याक्षो मेरोर्मूर्द्धनि कृतोन्तरभागः मानसोत्तरे कृतेतरभागो यत्र प्रोतं रवि
रथचक्रं तैलयन्त्रचक्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति १६ तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन संमितस्तैलयन्त्राक्षवत्
ध्रुवे कृतोपरिभागः १७ रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान् रविरथयुगो यत्र हयाः छन्दोनामा
नः सप्तारुणयोजिता वहन्ति देवमादित्यं पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते १८

भागः तस्य तुर्यमानेन साईसप्तत्रिंशल्लक्षयोः ऽधिकैकोनचत्वारिंशल्लक्षमानेनाध्रुवे कृतः वायुपाशेन निबद्ध उपरिभागो यस्य १७ नीड उपवे
शस्थानं तस्यायत्यारिक्तं छन्दोनामानः अरुणेन योजिताः सप्त तोरेव वहन्ति पुरस्तात्स्थितोऽपि पश्चान्मुखस्त्वसौ नियुक्तः सारथ्ये तत्र तस्य परः तस्मै च पश्चि
मत्वात्पश्चाहित्युक्तं सूत्रस्थानेन च वायुनोक्तं सप्ताश्वा अपञ्छन्दांसि वहन्ते वामतो रविचक्रपक्षानि बद्धानि चक्रे चाक्षः समाहित इति १८

स्तनवाकायषड्भाषिताय ॥१९॥ एकैकशः शङ्कृत्वर्द्वंशाद्द्वशः सप्तगणाः संतो मासिमासि सूपासत इत्यन्वयः ॥२०॥ गव्यूतिः क्रोशद्वयम् सगव्यूत्युत्त
रं यथा भवति तथा ॥२१॥ इति पंचमे एकविंशः ॥ द्वाविंशे सोमशुक्रादैः स्थानमाहात्म्यमीरितम् ॥ तत्रऊत्यात्तु सौरेणाद्दृष्टोनिष्टोतथान्तरा ॥ राशी

तथा वालखिल्या ऋषयोंगुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥१९॥ त
थान्ये च ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगव
न्तं सूर्यमात्मानं नानानामानं नानानामानः पृथक्कर्मभिर्द्वंद्वश उपासते ॥२०॥ लक्षोत्तरं सार्द्धनवकोटियोजनपरिमंडलं भूवल
यस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि च भुंक्ते ॥२१॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ज्योतिश्चक्रसू
र्यरथमंडलवर्णनं नाम एकविंशतिध्यायः ॥ राजोवाच ॥ यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्राम
तो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमीमहीति ॥१॥ स होवाच ॥ यथा कुला
लचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभि
रुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे
राश्यन्तरे चोपलभ्यमानत्वात् ॥२॥

नामभिमुखं प्रदक्षिणं च उपवर्णितं तत् सव्येन वलनं प्रदक्षिणेन करोतीति वदता अमुष्य वयं कथमनुमीमहि
एतत्कथं तयोः परस्परविरुद्धत्वादित्यर्थः ॥१॥ चक्रवशाद्गतिद्वयमविरुद्धमिति परिहारार्थः ॥२॥

भा॰पं
७०

तत्रकालनियमेनकर्मणांविशुद्धेःसाधनत्वेनस्वनिमित्तभूतमात्मानंविभज्याविजिज्ञास्यमानःवितर्क्यमाणः यथोपजोषंयथाकर्मभोगंऋतुगुणान्
शीतोष्णादीन् ३ वर्णाश्रमाचारानुवर्तिनःपुरुषास्त्रय्याम्नातैःकर्मभिःइडादिरूपैर्योगवितानैश्चध्यानादिभिःतमीश्वररूपंयजंतः ४ सएवब्र
गत्याभोगादिव्यवहारकारणमित्याह सएषलोकानामात्माद्यावापृथिव्योरंतरेणमध्येयन्नभोवलयमंतरिक्षंतस्यमध्येयत्कालचक्रंतद्गतः
राशिभिर्मेषादिभिः संज्ञायेषांचैत्रादिसंज्ञानांचांद्रमासानांमासमाह पक्षद्वयंमासइति चांद्रमानेन सपादंमहानक्षत्रद्वयंसौरेणाहदिवा

सएषभगवानादिपुरुषएवसाक्षान्नारायणोलोकानांस्वस्तयआत्मानंत्रयीमयंकर्मविशुद्धिनिमित्तंकविभिरपिचवेदेनवि
जिज्ञास्यमानोद्वादशधाविभज्यषट्सुवसंतादिष्वृतुषुयथोपजोषमृतुगुणान्विदधाति ३ तमेतमिहपुरुषास्त्रय्याविद्य
यावर्णाश्रमाचारानुपथाउच्चावचैःकर्मभिराम्नातैर्योगवितानैश्चश्रद्धयायजंतोञ्जसाश्रेयःसमधिगच्छंति ४ अथसएषआ
त्मालोकानांद्यावापृथिव्योरंतरेणनभोवलयस्यकालचक्रगतोद्वादशमासान्भुंक्तेराशिसंज्ञान्संवत्सरावयवान्मासःपक्षद्व
यंदिवानक्तंचेतिसपादर्क्षद्वयमुपदिशंति ५ यावताषष्ठमंशंभुंजीतसवैऋतुरित्युपदिश्यतेसंवत्सरावयवः ६ अथचयावता
र्धेननभोवीथ्यांप्रचरितंकालमयनमाचक्षते ७ अथचयावन्नभोमंडलंसहद्यावापृथिव्योर्मंडलाभ्यांकार्त्स्न्येनसहभुंजी
ततंकालंसंवत्सरंपरिवत्सरमिडावत्सरमनुवत्सरंवत्सरमितिभानोर्मांद्यशैघ्र्यसमगतिभिःसमामनंति ८

नक्तंचअहोरात्रावितिपित्र्येण ५ षष्ठमंशंमासद्वयं मंडलाभ्यांसहभुंजीत ६ । ७ सहसहितःसूर्यःयदाशुक्लप्रतिपदिसंक्रांतिर्भवतितदासौरचांद्रयो
र्युगपदुपक्रमोभवतिससंवत्सरः सौरमानेनवर्षेषट्दिनानिवर्द्धंतेचांद्रमानेनचषट्ह्रसंतीतिद्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावोभव
ति । एवंपंचवर्षाणिगच्छंति तन्मध्येद्वौमलमासौभवतः ततःपुनःषष्ठःसंवत्सरोभवति तदेवमवांतरभेदेनसंवत्सरादिपंचकंसमामनंति ८

राम
७०

सोमादीनामपि स्थानं कार्यं चाह ॥ एवं चंद्रमा इति ॥ अर्कागस्तिभ्यः मंडलरूपेभ्यः सपादद्वाभ्यां सपादद्विनवद्वयेन ॥ ९ ॥ १० ॥ सर्वेषां जीवनि
वहानां प्राणानां अन्नमयत्वात् अमृतमयत्वाच्च ॥ अत एव जीवनहेतुत्वात् जीवस्थानत्वेन चाह यत्प्रपश्यति ॥ ११ ॥ इति ज्योतिषे चतुर्थेषां प्रथमगत्यागतिरस्ति

एवं चंद्रमाः अर्कागस्तिभ्यः उपरिष्टाल्लक्षयोजनतः उपलभ्यमानोऽर्कागस्तिभ्यः मंडलरूपेभ्यः सपादद्वाभ्यां सपादद्वि
भ्यां दिनैरेव पक्षमासिकं पक्षत्यागत्वातिद्रुततरगमनो भुंक्ते ॥ ९ ॥ अथ चापूर्यमाणाभिश्चकलाभिः अमराणां क्षीयमाणाभिश्च
कलाभिः पितृणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैक एकमेकं नक्षत्रं
त्रिंशता मुहूर्तैर्भुंक्ते ॥ १० ॥ य एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुप
क्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयन्ति ॥ ११ ॥ तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं
दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ॥ १२ ॥ तत उपरिष्टादुशना द्विलक्षयोजनतः उपलभ्य
मानः पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति ॥ १३ ॥ लोकानां नित्यदानुकूल एव प्रायेण वर्ष

सर्वथः ॥ १० ॥ कालायने कालचक्रे उत्तराषाढाश्रवणयोः संधावभिजिन्नक्षत्रं फलविशेषेणाष्टाविंशकं वारेणाप्यभीयते ॥ १४ ॥ सहैवार्कस्य विक्षेपमग्रहोपशमनः ॥ १५ ॥
ल्पितं तेन ॥ तथा च श्रुतिः ॥ अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अवस्ताच्छ्रोणायाः इत्यादि ॥ १२ ॥ पुरतः सूर्येण भोक्ष्यमाणे नक्षत्रे पश्चाद्भुक्ते सहैव

वसु ॥ ज्यमाने १२ चारेणाक्रमस्थनक्षत्राद्यतिक्रमेण ४
वृष्टेर्विक्षेपः स्तंभनं यस्मात् ग्रहान् तमुपशामयतीति
तथा १५

बुधो व्याख्यातः पुरतः पश्चात्सहैव वावर्ततीति ॥ १६ ॥ किंचिद्विशेषं त्वाह तत इत्यादिना । अशुभं सतेसूचयति ॥ १७ ॥ अघशमः ऽङ्गः खेष्ट्ववकाः य-
दि न वक्रेणाभिवर्तेत तर्हि त्रिभिस्त्रिभिः पक्षैः ॥ १८ ॥ यदि न वक्रः स्यात्तर्हि परिसंवत्सरं ॥ १९ ॥ इति पंचमे द्वाविंशः ॥ त्रयोविंशे ध्रुवस्थानं ज्यो-

उशनसा बुधो व्याख्यातः ॥ १६ ॥ तत उपरिष्टात् द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदार्काद्व्यतिरि-
च्येत तदातिवाताभ्रप्रायेणावृष्ट्यादिभयमाशंसते ॥ १७ ॥ तत अङ्गारकोपि द्विलक्षयोजनत उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरे-
कैकशो राशीन्द्वादशानुभुंक्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोऽघशंसः ॥ १८ ॥ तत उपरिष्टाद्द्विलक्षयोजनान्तरतो भगवा-
न्बृहस्पतिरेकैकस्मिन्राशौ परिवत्सरं चरति यदि न वक्रः स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य ॥ १९ ॥ तत उपरिष्टाद्योजनलक्ष-
द्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशन्त्रिंशन्मासान्विलंबमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि
सर्वेषामशान्तिकरः ॥ २० ॥ तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलभ्यन्ते य एव लोकानां शमनुभावयन्तो भगवतो विष्णो
र्यत्परमं पदं प्रदक्षिणं प्रक्रमन्ति ॥ २१ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ज्योतिश्चक्रवर्णने द्वाविंशोऽध्यायः ॥ शुक उवाच
अथ तस्मात्परतः त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति ॥ १ ॥ यत्र ह महाभागवतो ध्रुव औत्तानपादिर-
ग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य
उपास्ते ॥ २ ॥ तस्येहानुभाव उपवर्णितः ॥ ३ ॥

तिश्चक्राश्रयं ततः शिशुमाररूपेणाहरेस्थितिरुच्यते यत्तत्प्रसिद्धं विष्णोः पदं ॥ १ ॥ यत्र ध्रुव उपास्ते
तिष्ठतीत्यन्वयः समकालमेव युज्यत इति तथा तैर्नक्षत्ररूपैः ॥ २ ॥ ३ ॥

मेढीस्तंभेबद्धान्याक्रमणपशवोबलीवर्दाः ॥ ५ ॥ कर्मसारथिः सहायोयेषां ॥ ७ ॥ ध्रुवाधारत्वात्पतनशंकैवनास्तीतिवक्तुंमतांतरमाह केचि
दिति ॥ ज्योतिरनीकंज्योतिश्चक्रंयोगधारणयावस्थितमितिशेषः ॥ ९ ॥ लांगूलेअग्न्यादयोभागा ॥ ११ ॥ उदगयनानिअभिजिदादीनिपुनर्वस्वंता

सहिसर्वेषांज्योतिर्गणानांग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसाभगवताकालेनभ्राम्यमाणानांस्थाणुरिवावष्टंभई
श्वरेणविहितःसश्वदवभासते ॥ ४ ॥ यथामेढीस्तंभआक्रमणपशवःसंयोजितास्त्रिभिःसवनैःयथास्थानमंडला
निविचरंति ॥ ५ ॥ एवंभगणाग्रहादयएतस्मिन्नंतर्बहिर्योगेनकालचक्रआयोजिताध्रुवमेवावलंब्यवायुनोदीर्यमाणाआ
कल्पांतंपरिचक्रमंति ॥ ६ ॥ नभसियथामेघाःश्येनादयोवायुवशाःकर्मसारथयःपरिवर्त्तन्ते ॥ ७ ॥ एवंज्योतिर्गणाःप्रकृ
तिपुरुषसंयोगानुगृहीताःकर्मनिर्मितगतयोभुविनपतंति ॥ ८ ॥ केचनैतज्ज्योतिरनीकंशिशुमारसंस्थानेनभगवतोवासु

श्री५

देवस्ययोगधारणयामनुवर्णयन्ति ॥ ९ ॥ यस्यपुच्छाग्रेवाक्छिरसःकुंडलीभूतदेहस्यध्रुवउपकल्पितः ॥ १० ॥ तस्यलांगूलेप्रजाप
तिरग्निरिन्द्रोधर्मइतिपुच्छमूलेधाताविधाताचकट्यांसप्तर्षयःतस्यदक्षिणा[illegible]कुंडलवर्त्तलीभूतदेहस्ययान्युदगयनानिदक्षि
णपार्श्वेतुनक्षत्राण्युपकल्पयन्ति ॥ ११ ॥ दक्षिणायनानितुसव्ये ॥ १२ ॥ यथाशिशुमारस्यकुंडलभोगसन्निवेशस्यपार्श्वयोरुभयोरप्य
वयवाःसमसंख्याभवंति ॥ १३ ॥ पृष्ठेत्वजवीथीआकाशगंगाचोदरतः ॥ १४ ॥

नी२

निचतुर्दशदक्षिणपार्श्वेदक्षिणायनानिपुष्यादीन्युत्तराषाढांतानिचतुर्दशवामपार्श्वे ॥ ॥ ॥ ॥ १२ ॥ १३ ॥ १४ ॥ गोपालायनमः ॥ [illegible]

तदेव स्थानविशेषेणाविभज्य दर्शयति पुनर्वसुपुष्यावित्यादिना । पुनर्वसु[illegible] दक्षिणायनात्यं नक्षत्रं । पुष्यो दक्षिणायनस्याद्यं आश्लेषतयोर्निरंतरे । अभिजिदुत्तराषाढे उत्तरदक्षिणायनयोराद्यंते नक्षत्रे । श्रवणपूर्वाषाढे धनिष्ठामूलं च तयोः पुनः पूर्वमघाश्विन्यानि श्रुत्वाधांतानि दक्षिणायनान्यष्टतानि वामपार्श्ववक्रिषु वामपार्श्वीस्थितेषु ॥ १५ ॥ मृगशीर्षादीनि प्राति[illegible]लोम्येन पूर्वभाद्रपदांतानि यान्युदगय

पुनर्वसुपुष्यौ दक्षिणावामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणावामयोः पश्चिमयोः अभिजिदुत्तराषाढे दक्षिणावामयोर्नासिकयो यथासंख्यं श्रवणपूर्वाषाढे दक्षिणावामयोर्लोचनयोः धनिष्ठा मूलं च दक्षिणावामयोः कर्णयोः । मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववक्रिषु युंजीत ॥ १५ ॥ तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववक्रिषु प्रातिलोम्येन प्रतियुंजीत ॥ १६ ॥ शतभिषाज्येष्ठे स्कंधयोर्दक्षिणावामयोर्न्यसेत ॥ १७ ॥ उत्तराहनावगस्त्योधराहनौ यमः मुखेषु चांगारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चंद्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ॥ १८ ॥ ग्रहर्क्षताराभयमाधिदैविकं पापापहं मंत्रकृतां त्रिकालं । नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापं ॥ २० ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे शिशुमारसं

नक्षत्राण्यष्टतानि दक्षिणपार्श्वेषु ॥ १६ ॥ शतभिज्ज्येष्ठे दक्षिणोत्तरायनयोर्द्वे विशिष्टे तस्कंधयोः ॥ १७ ॥ यमो नक्षत्ररूपः तथाना । स्थानत्रयो विंशोध्यायः
रायणः श्विनौ च ककुदि गलं हृदि शृंगे ॥ १८ ॥ ज्योतिषो लोकायकालायनाय चक्ररूपायनमधीमहीति मंत्रेनोपतिष्ठेत ॥ १९ ॥ मंत्रकृतां पूर्वोक्तमंत्रजपतां ॥ २० ॥

एवं त्रिभिर्दिग्भागमर्यादापालनं वर्णितं तथा । अधोभुवनमर्यादापालनं त्रिभिरिहोच्यते ॥ १ ॥ चतुर्विंशे रवेरर्वाक् स्वर्भान्वादिस्थितिः क्रमात् । अतलादिबिलस्वर्गमर्यादाः सप्त वर्णिताः ॥ २ ॥ स्वर्भानोरसित्वनिवेशं निरूप्येदानीं सूर्यादधस्तान्निरूपयति अधस्तादिति स्वर्भानू राहुः अ
लब्धतले से सिंहिकायाः पुत्रः ॥ १ ॥ ग्रहत्वं चामरत्वमाह यददः प्रतपतस्तरणेर्मण्डलं अमृतपाने मध्यप्रवेशेन तयोर्व्यवधानं करोतीति तथा

श्रीशुक उवाच । अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं चालभत भगवदनुकंपया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हः तस्य तात जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः ॥ १ ॥ यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबन्धः सूर्याचन्द्रमसावभिधावति ॥ २ ॥ तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सु[illegible]दर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपरागमिति वदन्ति लोकाः ॥ ३ ॥ ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ॥ ४ ॥ ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमन्तरिक्षम् ॥ ५ ॥ यावद्वायुः प्रवाति यावन्मेघा उपलभ्यन्ते ॥ ६ ॥ ततोऽधस्ताच्छतयोजनान्तर इयं पृथिवी यव

श्रुतमेवेतावत्यां स्थितिस्तत्रादेरपत्यवधूलीतितथा ॥ २ ॥ भागवतचक्रं परिभ्रमन्तमभिमुखं मुहू दुःसहमपि सहस्रशः सन्नासहूपराग इयः पततिश्चवा उपयातीति ॥ ३ ॥
न मर्यादास्थितः सन्नेति एवं मतं तद्व्याख्यानमुपरागं वदन्ति तत्र चक्रतेजः कास्थितिर्यथा इयामः सर्वग्रासो न तु ग्रासो भवति तत्रान्तरं स्यात् ३
तावन्मात्रे योजनायुते ४ अन्तरिक्षं गृहहीनं ५ तस्यावधिमाह यावद्वायुः प्रवातीति तीव्रो वातितत्त्ववायुः वधिमाह यावन्मेघाः ६ पृथिव्या उपरिभूर्लोकः

योजनायुतान्तरेण प्रत्येकमुद्दिष्टाः आयामोच्छ्रायः कराद्यस्तावद्विस्तारेण ॥ ८ ॥ सामान्येन विवराणि वर्णयति एतेष्वित्यादिना । अथातलस्य
तः प्राक्तनेन ग्रंथेन । एतेइत्यादश्योनिवर्णतीत्यन्वयः । कथंभूतेषु अधिकः कामभोगश्च ऐश्वर्यानंदश्च विभूतिश्च संपत्तिः तैः सुसमृद्धाः
भवनादयो येषु । कथंभूता नित्यप्रमुदितानुरक्ताः कलत्रादयो येषां । न प्रतिहतः कामो मायेषां मायया विनोदो येषां ॥ किं च हे महाराज ये

उपवर्णितं भूमेर्यथासंनिवेशावस्थानं ॥ ७ ॥ अवनेरप्यधस्तात्सप्त भूविवराः एकैकशो योजनायुतान्तरेणायामविस्ता
रेणोपक्लृप्ताः ॥ ९ ॥ अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ॥ १० ॥ एतेषु हि विलस्वर्गेषु स्वर्गादप्य
धिककामभोगैश्वर्यानंदविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडाविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तक
लत्रापत्यबंधुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसंति ॥ ११ ॥ येषु महाराज मयेन मायाविना
विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपा
रावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकासति ॥ १२ ॥

मयेन निर्मिताः पुरश्चकासतीत्यन्वयः । कथंभूताः नानाये मणिप्रवरास्तेषां प्रवेकाः मुख्याः तैर्विरचितैर्विचित्रैर्भवनादिभिः । तथा विवर
स्वराणां गृहोत्तमैश्च समलंकृताः । कीदृशैर्गृहोत्तमैः नागाश्च असुराश्च मिथुनभूताः पारावतादयश्च तैराकीर्णाः कृत्रिमा भूमयो येषु तैः । पाठां
तरे नानावनश्चमिथुनविशेषणं ॥ १२ ॥

उद्यानानि च अतितराममरलोकश्रियमतिशायितानि येषु च काशं तां तत्पन्नवयः । काभिः स्त्रीभिः केषां कुसुमफलस्तवकास्तबकप्रसगकिशलया
नि च तैरवनता हविटाविटपा येषां तेषां विटपिनां लतानामगेगलिंगितानां स्त्रीभिः । तथा समिथुनाः चक्रवाकादिमिथुनसहिता ये वि
विधविहंगाः । तद्युक्तानां जलाशयानां च स्त्रीभिः कीदृशानां । अमलैर्जलैः पूर्णानां । पुनरपि कैरतिशायितानि हंसकल्लोलहंसनेन क्षुभितं
यज्जलाशयानां नीरं तस्मिन्नुद्यानि नीरजानि तेषां वनेषु कृतनिकेतनं येषां तेषामुत्थानां पक्षिणां एकोद्यदेशयो विहारः । तेनाकुलाश्चेतमधुरा

उद्यानानि चातितरां मनइन्द्रियाणां हारिभिः कुसुमफलस्तवकस्तबकगकिशलयावनतविटपविटपविटपिनां लतांगालिंगि
तानां स्त्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णानां हंसकल्लोलहंसनक्षुभितनीरनीरजकुमुद
कुवलयकल्हारनीलोत्पललोहितशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिन्द्रियोत्सवे
रमरलोकश्रियमतिशायनानि ॥१३॥ यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते ॥१४॥ यत्र महाहिप्रवरशिरोम
णयः सर्वतमः प्रबाधन्ते ॥१५॥ न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादय
श्च देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति ॥१६॥ न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्ते

श्च विविधस्वनाः यः तैरिन्द्रियोत्सवा उत्सवैश्च ॥ यद्वा समिथुनेत्यादेरुत्तरेणैव संबंधः मनइन्द्रियाणां हारिभिरिति स्वनादीनां वि ॥ जसश्चक्रापदेशात् ॥१७॥
शेषणं तत्र नीरजं सामान्येन कमलं लोहितं शतपत्रं तद्विशेषः ॥१३॥ अहोरात्रादिभिर्यद्वयं तत्रोपलक्ष्यते सूर्याद्यभावात् ॥१४॥ तमः अन्धः ग्लानिरुत्साहः
॥१६॥ कल्याणानां मंगलरूपाणां ॥१७॥

भा॰पं॰ यस्मिन्भगवन्नेत्रजाग्नौ प्रविष्टे पुंसवनानि गर्भाः ॥ आवर्तयाद्भवेत्स्रावः पातः पंचमषष्ठयोरिति स्रावपातौ ज्ञेयौ ॥१८॥ सुवर्णे रताः स्वैरिण्यः
७५ कामिन्यः स्वसवर्णेऽपि ॥ तत्राप्यतिचंचलाः पुंश्चल्यः ॥२१॥ विलायनं बिलायतनं साधयित्वा संभोगसमर्थं कृत्वा स्वविलासाः साधारणा विभ्रमाः तत्

यस्मिन्नस्य विद्यान्यसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवंति पतंति च ॥१८॥ अथातले मयपुत्रोऽसुरो बलो निवस
ति ॥१९॥ येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयंति ॥२०॥ यस्य च जृंभमाणस्य मुखत
स्त्रयः स्त्रीगणा उदपद्यंत स्वैरिण्यः कामिन्यः पुंश्चल्य इति ॥२१॥ या वै विलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन सा
धयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंति ॥२२॥ यस्मिन्नुपयुक्ते पुरुष ई
श्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदांध इव ॥२३॥ ततोऽधस्ताद्वितले हरो भगवा
न्हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूत आस्ते ॥२४॥ यतः प्रवृ
त्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण ॥२५॥ यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति ॥२६॥ तन्निःष्ठ्यू
तं हाटकाख्यं सुवर्णं भूषणेनासुरेंद्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयंति ॥२७॥

विकोऽवलोकः तेनानुरागयुक्तं स्मितं तेन संलापश्चोपगूहनं च तदादिभिः ॥२२॥ यस्मिन् रसे उपयुक्ते सेविते ॥२३॥ भवयोः भवस्य भवान्याश्च ॥२५॥ चित्रभा राम
नुरग्निः ॥२६॥ तन्निष्ठ्यूतं फूत्कारत्यक्तं ॥ असुरेंद्राणामवरोधेष्वंतः पुरुषीभिः स्त्रीभिः ॥२७॥ गोपालाय नमः ७५

सुतलेबलिरद्धनाप्यास्तइत्यन्वयः कथंभूतः महेंद्रस्यप्रियंकर्त्तुमिच्छताप्रथमंपराक्रांतमपहृतंलोकत्रयंयस्मात्सः पुनर्भगवतानुकंपयैवतत्रप्रवेशितः
मनुकीदृशेन ॥ योदितेः सकाशाद्भूत्वावटुवामनरूपेणालब्धकायहृतेन ॥१७॥ केचित्तस्यसुतलेराज्यंभूमिदानफलंमन्यंते तन्निराकरोति ॥ नोएवेति ॥ य
द्विलनिलयेविवरस्थानेऐश्वर्यमेतत्तुभूमिदानस्यसाक्षात्कारः फलेनभवत्येव ॥ कुतइत्यपेक्षायामेवंभूतस्यदानस्यसाक्षादपवर्गहेतुत्वादित्याह ॥ यत्र

ततोधस्तात्सुतलउदारश्रवाः पुण्यश्लोकोविरोचनात्मजोबलिर्भगवतामहेंद्रस्यप्रियंचिकीर्षमाणेनादितेर्लब्धका
योभूत्वावटुवामनरूपेणपराक्षिप्तलोकत्रयोभगवदनुकंपयैवपुनःप्रवेशितइंद्रादिष्वविद्यमानयासुसमृद्धयाश्रि
याभिजुष्टः स्वधर्मेणाराधयंस्तमेवभगवंतमाराधनीयमपगतसाध्वसआस्तेधुनापि ॥१८॥ नोएवैतत्साक्षात्काराद्भू
मिदानस्ययत्तद्भगवत्यशेषजीवनिकायानांजीवभूतात्मभूतेपरमात्मनिवासुदेवेतीर्थतमेपात्रउपपन्नेपरयाश्रद्धयापर
मादरसमाहितमानसेनसंप्रतिपादितस्यसाक्षादपवर्गद्वारस्ययद्बिलनिलयैश्वर्यं ॥१९॥ यस्यहवावक्षुतपतनप्रस्खलना
दिषुविवशः सकृन्नामाभिगृणन्पुरुषः कर्मबंधनमंजसाविधुनोति ॥२०॥ यस्यहैवप्रतिबाधनंमुमुक्षवोन्यथैवोपलभंते ॥२१॥

त्रमपिद्वदानंतस्यतदेवाह ॥ भगवत्यशेषजीवनिकायानांजीवभूतस्यात्मावात्मभूतश्चसर्वजीवनियंतावासात्मात्मापरमेश्वरेत्यर्थः तस्मिन्संप्रतिपादि
तस्य ॥१९॥ किंचयस्यनामसकृत्क्षुतादिषुविवशोपिसकृदपिगृणन्कर्मबंधंविधुनोति ॥२०॥ कथंभूतंयस्यप्रतिबाधनंविहृत्यमुमुक्षवोन्यथैवोपलभं
तेयंनिवृत्यर्थयोगाभ्यासादिक्लेशाननुभवंतितीर्थहृत्कर्मबंधंत्यजति ॥२१॥

भा० पं
७५

तत्रस्थितं भगवतां भक्तानां ज्ञानिनां वा यथायथं आत्मने आत्मानमेव समर्पितमस्य भूमिदानस्य न तत्फलमिति पूर्वेणैव संबंधः २१ किंच नेदं भगवद
नुकंपाया फलमस्ति किं त्वेकांतभक्तस्यांतरायमात्रमित्याह नेति भगवानमुष्य अमुनैवानुगृहीतवान् २२ तत्र हेतुः यदुतेति आत्मनः
स्वरूपस्यानुस्मृतिं मुष्णातीति तथा तदुक्तं वामनेनैव मनो यस्य जपहोमाद्यैर्नारिरिष तस्मात्तरायो मे त्र्यं यदेवेद्वादि किंफलमिति २४ तस्यैकांतभक्ति
मुपपादयन्नाह यत्तदिति प्रसिद्धं इति वक्ष्यमाणानुवादेन हेत्वन्वयः कथंभूतः अनधिगतः अन्यउपायो येन तेन भगवता याञ्चाच्छलेनापहृतं स्वशरीर

तद्भगवतामात्मवतां सर्वेषामात्मन्यात्मद आत्मतमेव २२ नवै भगवान्नूनममुष्यानुजग्राह २३ यदुत पुनरात्मानुस्मृति
मोषणं मायामयं भोगैश्वर्यमेवातनोति २४ यत्तद्भगवतानधिगतान्योपायेन याञ्चाच्छलेनापहृतस्वशरीरावशेषितलोक
त्रयो वरुणपाशैश्च संप्रतिमुक्तो गिरिदर्यां चापविद्ध इति होवाच २५ नूनं बतायं भगवानर्थेषु न निष्णातो योसाविंद्रो
यस्य सचिवो मंत्राय वृत एकांततो बृहस्पतिस्तमतिहाय स्वयमुपेंद्रेणात्मानमयाचतात्मनश्चाशिषो नो एव तद्दास्यं २६
अतिगंभीरवयसः कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदम् २७

मात्रावशेषितं लोकत्रयं यस्य स च स च प्रतिमुक्तो बद्धः अपविद्धः प्रक्षिप्तोपि सन् २५ बतेति खेदे भगवानु विद्वानपि योसाविंद्रः यस्यैकांतेन बृहस्पतिः स
चिवः सहायः यतो मंत्रार्थं वृतः सोपि प्रकृष्टार्थेषु नूनं न निष्णातः न निपुणः यतः उपेंद्रेणाहारभूतेनात्मनः उपेंद्रं विहाय आत्मानं मा लोकत्रयमयाचत तं मंत्रप
दं बृहस्पतिमतिहाय एव २६ तस्मिन्नर्थे मन्वंतरे एव वचरणप्रयेन लोकत्रयं यत्प्रत्यहृतमिति तच्छमित्याह अतिगंभीरस्य अनंतस्य योयस्य तस्य कालस्य मन्वं
तरं तेन परिवृतं विपर्यस्तं लोकत्रयमिदं कियत् २७

राम
७५

प्रह्लादस्त्वेक एवार्थ्येतिस्नात इत्याह ॥ यस्यानुदास्यमिति ॥ स्वपितरि उपरते मृते सति स्वपित्र्यं पदं भगवता दीयमानमपि भगवतः खलु परमन्यादि-
ति कृत्वा न तु जग्राहेत्यर्थः ॥ २८ ॥ ननु त्वमतिवीरः कृतस्तमेव वद्धुमन्यसे तत्राह ॥ तस्यानुपथं अनुवर्त्म अमृजिता अक्षीणाः कषायाः रागादयो य-
स्य परिहीनो भगवदनुग्रहो यस्य स मकोवाउपगंतुमिच्छतीति ॥ २९ ॥ अथ स्म कौशिकिः नन्वेवंभूतश्चेद्बलिः तर्हि तस्यैव चरितं विस्तरेण कथ्यतां तत्राह ॥

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परस्येति भगवतोपरतेन ख-
लु स्वपितरि ॥ २८ ॥ तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीनभगवदनुग्रह उपजिगमिषती-
ति ॥ २९ ॥ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते इति ॥ ३० ॥ यस्य भगवान्स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणि-
रवतिष्ठतीति निजजनानुकंपितहृदयो येनांगुष्ठेन पदा दशकंधरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥ ३१ ॥ ततोधस्ता-
त्तलातले मयो नाम दानवेंद्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्ध-
पदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥ ३२ ॥

तस्य बलेश्चरितमुपरिष्टादष्टमे विस्तरिष्यते ॥ ३० ॥ यस्य द्वार्यवतिष्ठते ॥ निजजनेष्वनुकंपितं कृतानुकंपितं । कृत्वानुकंपहृदयं यस्य ॥ द्वारपालक-
मं दर्शयति । येन श्रीनारायणेन । बलेर्द्वारि विशत् दशकंधर उच्चाटितः केन पदा । तत्राप्यंगुष्ठेनैव ॥ ३१ ॥ हरिणा स्वभक्तो बलिः सुतले निहतः
सुखमास्ते । एवं महादेवभक्तोपि मयस्तलातले सुखमास्ते इत्याह ॥ तत इति ॥ लब्धं पदं स्थानं येन । महीयते पूज्यते ॥ ३२ ॥

नैकशिरसामनेकफणानां गणोऽस्ति ॥ एतत्प्रपंचयति ॥ कुहकेति ॥ महाभोगवंतो महाकायाः पुरुषवाहात् हरेर्वाहनात् ॥ ४३ ॥ विबुधप्रत्यनीकाः रे
वशत्रवः ॥ सकलेष्वपि लोकेष्वनुभावो यस्य तस्य हरेव तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषां बिलेशया यथा सर्पा इव ॥ ४४ ॥ इंद्रदूत्या सरम
क्ताभिर्मंत्ररूपाभिर्वाग्भिः ॥ एवं हि वैदिकमाख्यानं ॥ पणिभिरसुरैर्निगूढासु गोषु अन्वेष्टुं सरमां देवशुनीमिंद्रेण प्रहितां संधिमिच्छंतः पणयः प्राकिभि

ततोऽधस्तान्महातले काद्रवेयाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालीयसुषेणादिप्रधाना महाभोगवं
तः पतत्रिराजाधिपतेः पुरुषवाहादुद्विजमानसः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति ॥ ४३ ॥ ततोऽधस्ता
द्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौ
जसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति ॥ ४४ ॥ ये वै सर
मयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ॥ ४५ ॥ ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहा
शंखश्वेतधनंजयधृतराष्ट्रशंखचूडाकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति ॥ ४६ ॥ येषामु ह वै पंचस
प्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति ॥ ४७ ॥

इति श्रीभागवते महापुराणे पंचमस्कंधे चतुर्विंशतितमोऽध्यायः

छुतिसरमेत्यादि ॥ सा च संधिमनिच्छंतीं दूत्वपूर्वकं तान् अतिपुरु
षमाह ॥ हता इंद्रेण पणयः शायद्धं इत्यादि वेवतत ॥ श्रुत्वा बिभ्यतीति ॥ ४५ ॥ महाभोगिनः महाफणाः महानमर्षः क्रोधो येषां ॥ ४६ ॥ पंचादिसंख्या
नि शीर्षाणि येषां ॥ शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यार्षः ॥ ४७ ॥ इति पंचमे टीकायां चतुर्विंशतिः २४

पंचविंशेततोधस्तादाहशेषस्यसंस्थितिं ॥ संजिहीर्षोर्यदंकालेयस्माद्रुद्रःसमुद्भवः ॥१॥ कोसावनंतः सात्वतीयाः सात्वततंत्रनिष्ठाः चतु
र्व्यूहोपासनेनसंकर्षणइत्याचक्षते ॥ तथाख्यानेहेतुः द्रष्टृदृश्ययोः सम्यक्कर्षणात्संकर्षणमेकीकरणंयेन ॥ तत्कृतः अहमि
त्यभिमानोलक्षणं ॥ चिद्रूपमधिष्ठातृयस्य ॥ अहंकाराधिष्ठानेनद्रष्टृदृश्यसंकर्षणात्संकर्षणइत्यर्थः ॥१॥ अनंतत्वमाह ॥ यस्येदमिति ॥ यच्छिरा

श्रीशुकउवाच ॥ तस्यमूलदेशेत्रिंशद्योजनसहस्रांतरआस्तेयावैकलाभगवतस्तामसीसमाख्यातानंतइति ॥१
सात्वतीयाद्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणंयंसंकर्षणइत्याचक्षते ॥२॥ यस्येदंक्षितिमंडलंभ
गवतोनंतमूर्तेः सहस्रशिरसएकस्मिन्नेवशीर्षणिध्रियमाणंसिद्धार्थइवलक्ष्यते ॥३॥ यस्यहवाइदंकालेन
संजिहीर्षतोमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेणसांकर्षणोनामरुद्रएकादशव्यूहः त्र्यक्षः त्रिशिखंशूल
मुत्तंभयन्नुदतिष्ठत् ॥४॥ यस्यांघ्रिकमलयुगलारुणविशदनखमणिखंडमंडलेष्वहिपतयः सहसात्वतर्षभैः
एकांतभक्तियोगेनावनमंतः स्ववदनानिपरिस्फुरत्कुंडलप्रभामंडितगंडस्थलान्यतिमनोहराणिप्रमुदितमनसः

नासाएषभगवाननंतइत्युक्तेरेणाख्यया ॥३॥ तामसत्वमाह ॥ यस्येदंविश्वमुपसंहर्तुमिच्छतः अमर्षेणाविरचितेरुचि खलुविलोकयंति ॥५॥
राकृतेभ्रुकुंडलीकृतेभ्रमंत्योर्भ्रुवोर्यन्तयोर्मध्ये उत्तंभयन्नुन्नमयन् ॥४॥ रुद्रमगत्वमाह ॥ यस्यांघ्रिकमलयुगलेः अरुणाविशदानखाएवमणयः तेषांखंडः
समूहः तस्यमंडलेषुपरिस्फुरतांकुंडलानांप्रभयामंडितानिगंडस्थलानियेषुतानि ॥५॥

चारूण्यंगावलयेविलसितास्तेविशदाविपुलाधवलाः सुभगाः रुचिराभुजाएवरजतस्तंभास्तेषु अगुरुचंदनकुंकुमानां पंक एवानुलेपः तेना वलिंपमानास्तेषामभिमर्शनेनोन्मथिते हृदये मकरध्वजस्यावेशो यासां रुचिरं ललितं च स्मितं च यासां ताः तस्यानुरागेण यो मदस्तेन मुदितं च तत् मदेन विघूर्णितं प्रचलितं च यदरुणकरुणावलोकयुक्तेन नयनेन यस्मिन् तद्वदनारविंदं लोकयंति ६ अमर्षः सहनं रोषः क्रोधः उपसंहृ

यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं किल विलोकयंति ॥ ६ ॥ स एव भगवाननंतोऽनंतगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥ ७ ॥ ध्यायमानः सुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्याययमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलककुदि कृतसुभगसुंदरभुजो भगवान्माहेंद्रो वारणेंद्र इव कांचनीं कक्षामुदारलीलो बिभर्ति ॥ ८ ॥

तत्र तत्र उपवर्ण्यते ७ उपासनार्थमाह सुरादिभिर्ध्यायमानः अनवरतं मदेन मुदिते अतएव विकृतविह्वलालोचनश्च सुललितेन मुखरिकामृतेन स्वपार्षदा न्विबुधयूथपानां पतीनाप्याययमानः ईषद्धसन्नीलवासा यस्य एकमेव कुंडलं यस्य हलस्य ककुदि पृष्ठे कृतः न्यस्तः सुभगः सुंदरश्च भुजो येन उदार लीलाप्रसन्नः न परिम्लानो रागः कांतिर्यस्यास्तस्या नवतुलसिकाया आमोदमध्वासवेन मधुरसेन माद्यतां मधुकराणां व्राताः तेषां मधुरगीतेन श्री

संश्लोकयामासवर्णयामास ॥९॥ अस्यजगतउत्पत्त्यादिहेतवोगुणायस्येक्षयाकल्पाःस्वकार्यसमर्थाआसन् ॥ यस्यतद्रूपंध्रुवंअनंतं
अकृतंचअनादि ॥ यदेकमेवसत्आत्मन्आत्मनिनानाकार्यप्रपंचमधात् तस्यब्रह्मरूपस्यवर्त्मतत्त्वंजनःकथमुहवेद नवेदेवेत्यर्थः
॥ तर्हिकथमसौमुमुक्षुभिःसेव्यतेतत्राह मूर्त्तिमिति ॥ यत्रेदंसदसद्विभातिसःनोस्माकंभक्तानांबहुकृपयासंशुद्धंसत्वंमूर्त्तिंबभार

यएषएवमनुश्रुतोध्यायमानोमुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयंहृदयग्रंथिंसत्व
रजस्तमोमयंअंतर्हृदयंगतआशुनिर्भिनत्ति ॥८॥ तस्यानुभावंभगवान्स्वायंभुवोनारदःसहतुंबुरुणा
सभायांब्रह्मणःसंश्लोकयामास ॥९॥ उत्पत्तिस्थितिलयहेतवोऽस्यकल्पाःसत्वाद्याःप्रकृतिगुणायदी
क्षयाःसन् ॥ यद्रूपंध्रुवमकृतंयदेकमात्मन्नानाधात्कथमुहवेदतस्यवर्त्म ॥ मूर्त्तिंनःपुरुकृपयाबभार
सत्वंसंशुद्धंसदिदमिदंविभातियत्र ॥ यल्लीलांमृगपतिराददेऽनवद्यामादातुंस्वजनमनांस्युदारवीर्यः ॥१०॥

स्वजनानांमनांस्यादातुंवशीकर्तुंकृतायस्यलीलांमृगपतिःसिंहआददे शिक्षणायतउदाराणिवीर्याणियस्यतस्मादन्यंमुमुक्षुःकमाश्रयेदि
त्यन्तरेणान्वयः ॥ यद्वाकृपयेत्यत्रहेतुः ॥ यद्यस्मात्स्वजनानांमनांस्यादातुंलीलामाददेमृगपतिरिवोदारवीर्यः ॥ यद्वामृगपतयइतिमृगाःकामप्रदातॄ
णांपतिर्मुख्यः ॥१०॥

किंच आस्तां तावत्स्वरूपयावदुद्धारगांतं ज्ञानं वा तन्नामौदार्यमेवातिविचित्रमित्याह यस्य नाम यदि पतितो महापातक्यपि अनुकीर्तयेत् तर्हि सद्यो
हितिकिं वक्तव्यं यतो मावेव नृणामशेषमहः सद्योहन्ति कथमनुकीर्तयेत् श्रुतः श्रुतं वा अकस्माद्वा आर्त्तो वा सन् प्रलंभनाद्वा परिहासाद्वा अ
न्यतस्माच्छेषादन्यं ॥१३॥ गिर्यादिसहितं भूगोलं सत्वानि प्राणिनः सहस्रजिह्वोपि कोगणयेत् ॥१४॥ दुरंतं वीर्यं बलं यस्य उरवो गुणाश्च अनुभावश्च यस्य

यन्नाम श्रुतमनुकीर्त्तयेदकस्मादार्त्तो वा यदि पतितः प्रलंभनाद्वा हंत्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आ
श्रयेन्मुमुक्षुः ॥१३॥ मूर्द्धन्यर्पितमणुवत्सहस्रमूर्द्ध्नो भूगोलं सगिरिसरित्समुद्रसत्वं आनंत्यादनिमितविक्रमस्य भूम्नः
को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥१४॥ एवंप्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः मूलेरसायाः स्थित
आत्मतंत्रो यो लीलया क्ष्मां स्थितये बिभर्त्ति ॥१५॥ एता ह्येवेह नृभिरुपगंतव्या गतयो यथाकर्मविनिर्मिता यथोपदेश
मनुवर्णिताः कामान्कामयमानैः ॥१६॥ एतावत्यो हि राजन्पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा
विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत्कथयाम इति ॥१७॥ इति श्रीभागवते महापुराणे पंचमे पंचविंशोध्यायः ॥

स च रसायाः भूमेर्मूले स्थितः तिष्ठति आत्मतंत्रः आत्माधारः ॥१५॥ उक्तस्य लोकविभागस्योपयोगं वदन्नुपसंहरति एता ह्येवेह कामात्कामयमानै
र्हेभिरुपगंतव्या इत्यन्वयः विपाकगतयः फलभूता गतयः ताः व्याचख्ये आख्यातवानस्मि ॥१७॥ इति पंचमे पंचविंशतिः ॥२५॥

षड्विंशे तु ततोधस्तान्नरकस्थितिरुच्यते पापिनो यत्र रुंध्यंते यमदूतैर्यथायथं ॥१॥ पूर्वोगतय उच्चावचा विसदृशा इति योगवैचित्र्यमुक्तं तदेतज्ज्ञातु
मिति पृच्छति महर्ष इति ॥१॥ कर्मिणः समानत्वेपि श्रद्धावैचित्र्यात्फलवैचित्र्यमिति परिहरति त्रिगुणत्वादिति सात्विक्या श्रद्धया कर्तुः सुखित्वं
दुःखित्वं च तामस्या दुःखित्वं तत्रापि तामसीश्रद्धानां तारतम्यं सर्वेषामित्यर्थः ॥२॥ प्रतिषिद्धं प्रतिषेधः स एव लक्षणं प्रमाणं यस्य अधर्मकर्तुः

राजोवाच ॥ महर्ष एतद्वैचित्र्यं जीवलोकस्य कथमिति ॥१॥ शुक उवाच ॥ त्रिगुणत्वात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधा
सर्वा एव सर्वस्य तारतम्येन भवंति ॥२॥ अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैशादृश्यात्कर्मफलं
विसदृशं भवति ॥३॥ या ह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानु
वर्णयिष्यामः ॥४॥ राजोवाच ॥ नरका नाम भगवन्किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदंतराल इति ॥५॥ शुक उ
वाच ॥ अंतराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः पितृगणाः दिशि
स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसंति ॥६॥ यत्र ह वाव भगवान्पितृराजो वैवस्वतः स्व
विषयं प्रापितेषु स्वपुरुषैर्जंतुषु संपरेतेषु यथाकर्मावद्यं दोषमेवानुल्लंघितभगवच्छासनः सगणो दमं धारयति ॥७॥

श्रद्धावैशादृश्यतमसत्त्वारतम्यात ॥३॥ तत्रापि कारणं दर्शयन्नाह अनाद्यविद्याकृतानां कामानां सृतयो नरकाः तासां ताः अथेदानीं ताः प्राचुर्येणानु
वर्णयिष्याम इत्यन्वयः ॥४॥ किं भूमावेव देशविशेषाः त्रिलोक्या ब्रह्माण्डाद्बहिर्वा आवरणेषु मध्ये अंतराले वा भूमिव्यतिरिक्ते ॥५॥ कर्मदोषमनतिक्रम्य दोष
मेव दमं पापफलं दंडं करोति । अनुल्लंघितं भगवच्छासनं येन ॥७॥

भा॰पं॰
७९

सतां ते रौरवाद्यष्टाविंशतिमाह । किंचेति ॥ पापभेदेन तत्तन्नरकयातनाभेदं प्रपंचयति । यस्त्वित्यादिना ॥ पात्यमानः पीड्यमानः एकदैव तदैव ॥१३॥ प्रह

तत्रहैकेनरकानेकविंशतिंगणयंति ॥८॥ अथतांस्तेराजन्नामरूपलक्षणतोनुक्रमिष्यामः ॥९॥ तामिस्रोंधतामिस्रोरौरवः
कुंभीपाकः कालसूत्रमसिपत्रवनंसूकरमुखमंधकूपः क्रिमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकंटकशाल्मलीवैतरणीपूयो
दः प्राणनिरोधोवैशसनंलालाभक्षः सारमेयादनमवीचिरयः पानमिति ॥१०॥ किंचक्षारकर्दमोरक्षोगणभोजनः शूलप्रो
तोदंदशूकः अवटनिरोधनः पर्यावर्त्तनः सूचीमुखमित्यष्टाविंशतिनरकाविविधयातनाभूमयः ॥११॥ तत्रयस्तुपरवित्तापत्य
कलत्राण्यपहरतिसहिकालपाशबद्धोयमपुरुषैरतिभयानकैस्तामिस्रेनरकेबलान्निपात्यते ॥१२॥ अनशनानिपानदंडताड
नसंतर्जनादिभिर्यातनाभिर्यात्यमानोजंतुर्यत्रकश्मलमासादितएकदैवमूर्छामुपयाति ॥१३॥ तामिस्रप्रायेएवमेवांधतामिस्रेय
स्तुवंचयित्वापुरुषंदारादीनुपयुंक्ते ॥१४॥ यत्रशरीरीनिपात्यमानोयातनास्थोवेदनयानष्टमतिर्नष्टदृष्टिश्चभवति ॥१५॥ यथावनस्प
तिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रंतमुपदिशंति ॥१६॥ यस्त्विहवाएतदहमितिममेदमितिभूतद्रोहेणकेवलंस्वकुटुंबमेवानु
दिनंप्रपुष्णातिसतदिहविहायस्वयमेवतदशुभेनरौरवेनिपतति ॥१७॥

पुरुषंपतिंवंचयित्वा ॥१४॥ एतच्छरीरमहमिति इदंधनादिममेतिमत्वास्वंचकुटुंबमेवप्रपुष्णातितेनाशुभेन ॥१७॥ गोविंदायनमः

राम
७९

नरको भूदिति । कर्माण्येव तथा परिणामं प्राप्येत्यर्थः । १८ श्रुतिक्रूरस्य पारुष्यं गाढस्य सत्त्वस्यापदेशः संज्ञा । १९ कर्त्र्योगानिमितेन मांसा
र्थमित्यर्थः । २० प्राणान्तः सजीवान् उपरंधयति प्रपंचयति । अपकरुणं निर्दय । २१ खले समये देशे । २२ स्वधर्महा स्वधर्मत्यागी । २३

येत्विह यथैवामुना विहिंसिता जन्तवः तैर्यातनामुपगतं तत एव उरवो भूत्वा तथा तमेव विहिंसंति तस्माद्रौरवमित्याहुः । १८
रुरुरिति सर्पादतिक्रूरसत्त्वापदेशः । १९ एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवः स्वक्रव्येणाघ्नात
यन्ति यः केवलं देहंभरः । २० यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरंधयति तमपकरुणं पुरुषादैरपि विगर्हि
तममुत्र यमानुचराः कुंभीपाके तप्ततैले उपरंधयति । २१ यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरके अयुतयोज
नपरिमंडले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानोऽन्तर्बहिःश
रीर आस्ते शेते चेष्टते अवतिष्ठति परिधावति च यावंति पशुरोमाणि तावद्वर्षसहस्राणि । २२ यस्त्विह वै निजवेदपथादनापद्य
गतः पाखंडं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरंति तत्र हासावितस्ततो धावमान उभयतो धारैस्तालवनासिपत्रैः छि
द्यमानसर्वांगो हा हतोऽस्मीति परमवेदनया मूर्छितः पदे पदे निपतति स्वधर्महा पाखंडानुगतं फलं भुंक्ते । २३ यस्त्विह वै राजा राजपु
रुषो वा अदंड्ये दंडं प्रणयति ब्राह्मणे वा शरीरदंडं स पापीयान्नरके अमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेह
अदंडश्चार्तस्वरेण स्वनयन् क्वचिन्मूर्छितः कश्मलमुपगतः यथैवेहादृष्टदोषा उपरुद्धाः । २४

स्वनयन् रुदन् कश्मलं मोहमुपगतो भवति अदृष्टदो

इश्वरेणोपकल्पिताः मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता विज्ञाता परव्यथा यैरविवेकिभिस्तेषां ब्राह्मणादिभा
वेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य विविक्ता परव्यथा येन विवेकिनास्य विद्याहिंसिना ॥१५॥ विहितानिद्रारूपाणि वृत्तिर्य
स्यानलब्धमवस्थानं येन स तमसि परिक्रामति ॥१६॥ यत्किंचन मह्यादिकं उपनतं प्राप्तं तदसंविभज्य न निर्मिताः पंचयज्ञा येनासुतप्र

यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथा
माचरति स परत्रांधकूपे तदभिद्रोहेण निपतति ॥१५॥ तत्र हासौ तैर्जंतुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कु
णमक्षिकादिभिर्ये के चाभिद्रुग्धास्तैः सर्वतोभिद्रुह्यमाणस्तमसि विहितनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति
यथा कुशरीरे जीवः ॥१६॥ यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स प
रत्र कृमिभोजने नरकाधमे निपतति ॥१७॥ तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः
कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोनिर्वेशमात्मानं पातयते ॥१८॥ यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्रा
ह्मणस्य वापहरति अन्यस्य वानापदि पुरुषस्तममुत्र राजन्यमपुरुषा अयस्मयैरग्निकुंडैः संदंशैस्त्वचि निःकुषंति ॥१९॥

वायसैः संस्तुतः समत्वेन वर्णितः ॥१७॥ कृमिभोजनः कृमिभिरेव भुंजानः यावन्ततया यावन्ति योजनानि तत्कृमिकुंडे तावंति वर्षाणि या
वदात्तत्याप्रमित्यर्थः अप्रत्तं असंविभक्तं अप्रहुतं चाश्नातीति तथा सः न निर्वेशोऽस्य कृतप्रायश्चित्तेः ॥१८॥ निष्कुषंति छिंदंति ॥१९॥

तिग्मयातनया ॥ सूर्मीप्रतिमया २० ॥ सर्वाभिगमः पश्वाद्युपगंता ॥ २१ ॥ अपाषंडाः सत्कुलीनाः संतः द्वितीयांतपाठे संतु विशेषणं ॥ २२ ॥ नदी

यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयंतस्तिग्मया सूर्म्या लोहमय्या पुरुष
मालिंगयंति स्त्रियं वा पुरुषरूपया सूर्म्या ॥ २१ ॥ यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकंटकशाल्मलीमारो
पयंति निष्कर्षंति ॥ २१ ॥ ये त्विह वै राजन्या राजपुरुषा वा अपाषंडा धर्मसेतून्भिंदंति ते संपरेत्य वैतरण्यां निपतंति भिन्नमर्या
दास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाः स्वासुभिरुह्यमानाः स्वा
घेन कर्मपाकमनुस्मरंत उपतप्यंते ॥ २२ ॥ विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यंते ॥ २२ ॥ ये
त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरंति ॥ २४ ॥ ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्ण
वे निपतंति तदेवातिबीभत्सितमश्नंति ॥ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नंति तान
पि संपरेतांल्लक्ष्यभूतान्यमपुरुषा इषुभिर्विध्यंति ॥ २५ ॥ ये त्विह वै दांभिका दंभयज्ञेषु पशून्विशसंति तानमुष्मिंल्लोके वैशसे
नरके पतितान्निरयपतयो यातयित्वा विशसंति ॥ २६ ॥ यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितः तं पापकृतममुत्र
रेतःकुल्यायां पातयित्वा रेतः संपाययंति ॥ २७ ॥

विशीर्णसेतव इति ॥ २३ ॥ पशुचर्यां स्वेच्छाचारं ॥ २४ ॥ अतीर्थे विहितादन्यत्र विध्यंतीति प्राणानि
रोधोदर्शितिः २५ निरयपतयो यमपुरुषाः २६ लालाभक्षमाह यस्त्विहेति रेतःपानं कारयंति ॥ २७ ॥

यमदूताः श्वेयेश्वानः सारमेयं सरमेयं सारमेयं ॥ २८ ॥ द्रव्यविनिमये क्रयविक्रयादौ निरावकाशे निरालंबे ॥ २९ ॥ अवाचीशिरा अर्थमाह ॥ यत्रेति ॥ वीचिस्तरंग-
तद्रहितत्वादवीचिः ॥ ३० ॥ यो विप्रस्तत्कलत्रं वा सुरां पिबंति अन्योपि वा व्रतस्थः सन् राजन्यो वैश्यो वा सोमपीथः कृतः सोमपानः स्वत्वयः

यस्त्विह वै दस्युः अग्निदो गरदो ग्रामान् सार्थान् वा विलुंपति राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वा-
नः सप्तशतानि विंशतिश्च सरभसं खादंति ॥ २८ ॥ यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित्स वै प्रेत्य
नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायात् गिरिमूर्ध्नः संपात्यते ॥ २९ ॥ यत्र जलमिव स्थलमश्मपृष्ठ-
मवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥ ३० ॥ यस्त्विह वै विप्रो राज-
न्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये
वह्निना द्रवमाणं कार्ष्णायसं निषिंचंति ॥ ३१ ॥ अथ च यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारव-
र्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरये अवाक्शिरा निपातितो दुरंता यातना ह्यश्नुते ॥ ३२ ॥

तयोः सोमस्य नैकलवत्सम्यविधानात् सोमपाननिषेधाच्च तथा च श्रुतिः न्यग्रोधस्तिभीन् आहृत्य तान् संपिष्य दधन्युपसृज्य तमस्मै भक्षं प्रय-
च्छेन्न सोममिति ॥ ३१ ॥ स पूर्वमपि मृतक एव सन् मृत्वा ॥ ३२ ॥

पुरुषस्यमेधेनहिंसयापैरवारीन्मजन्ते ॥ याश्चस्त्रियः नानारूपोरक्षोगणामृत्वायथेहपुरुषादाः संतः पूर्वमनत्यंततद्गत ॥ ५३ ॥ वैश्रंभ
केर्विश्वासोपायैः ॥ उपविश्रंभय्य ॥ विश्वास्य ॥ ५४ ॥ विलेशयाननुपकारान् ॥ ५६ ॥ सगरेणासविषेण ॥ ५७ ॥ कृतिथयोः

येत्विहवैपुरुषाःपुरुषमेधेनयजंतेयाश्चस्त्रियोनृपशून्खादंतितांश्चतेपशवइहनिहतायमसदने
पातयंतोरक्षोगणाः सौनिकाइवस्वधितिनावदायासृक्पिबंति ॥ नृत्यंतिगायंतिचहृष्यमाणायथेह
पुरुषादाः ॥ ५३ ॥ येत्विहवाऽनागसोरण्येग्रामेवावैश्रंभकैरुपसृतानुपविश्रंभय्यजिजीविषून्शूलसूत्रादिषू
तानुप्रोतान्क्रीडनकतयायातयंतितेपिचप्रेत्ययमयातनासुशूलादिषुप्रोतात्मानः क्षुत्तृड्भ्यांचाभिहताः कंकवटादि
भिश्चेतस्ततस्तिग्मतुंडैराहन्यमानाआत्मसमलंस्मरंति ॥ ५४ ॥ येत्विहवैभूतान्युद्वेजयंतिनराउल्बणस्वभावाय
थादंदशूकास्तेपिप्रेत्यनरकेदंदशूकाख्येनिपतंति ॥ ५५ ॥ यत्रनृपदंदशूकाः पंचमुखाः सप्तमुखाः उपसृत्यग्र
संतियथाबिलेशयान् ॥ ५६ ॥ येत्विहवाअंधावटकुसूलगुहादिषुभूतानिनिरुंधंतितथाविधेष्वेवोपवेश्यसगरेण
वह्निनाधूमेननिरुंधंति ॥ ५७ ॥ यस्त्विहवाअतिथीनभ्यागतान्वागृहपतिरसकृदुपगतमन्युर्दिधक्षुरिवपापेनचक्षुषानि
रीक्षतेतस्यचापिनिरयेपापदृष्टेरक्षिणीवज्रतुंडागृध्राः कंककाकवटादयः प्रसह्योरुबलादुत्पाटयंति ॥ ५८ ॥

ज्ञातपूर्वाः अभ्यागताज्ञातपूर्वाः तान्पापेनवक्रीकृतेन ॥ ५८ ॥

आढ्याभिमतिः धनगर्वितः अहंकृतिः श्रेष्ठोहमिति मानी तिर्यक्प्रेक्षणं यस्य सर्वतः गुर्वादेरपि धनं चोरयिष्यतीति विशंकमानः परि
शुष्यमाणहृदयवदनं च यस्य । अनवगतः अप्राप्तः तस्यार्थो येन उत्पादनादिभिः शमलं ग्रहणातीति तथा ॥ ४७ ॥ परिवयंति सूत्रप्रोतानः ॥

यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोभिविशंकी ह्यर्थव्ययनाशचिंतया परिशुष्यमाणहृदयवद
नो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके
निपतति ॥ ४७ ॥ यत्र ह — वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोंगेषु सूत्रैः परिवयंति ॥ ५० ॥ एवंविधा
नरका यमालये संति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते
पर्यायेण विशंति ॥ ५१ ॥ तथैव धर्मानुवर्तिन इतरत्र ॥ ५१ ॥ इह तु पुनर्भवे त उभयशेषाभ्यां निविशंति निवृत्तिलक्षणमार्ग
आदावेव व्याख्यातः ॥ ५२ ॥ एतावानेवांडकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते ॥ ५४ ॥ यत्तद्भगवतो नाराय
णस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः ॥ ५५ ॥ पठति शृणोति श्रावयति स उपगे
यं भगवतः परमात्मनोग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥ ५६ ॥

वर्तीति ५० । इतरत्र स्वर्गादौ ॥ ५२ ॥ इह मनुष्यलोके पुनर्भवे पुनर्जन्मनि निमि
त्तं उभयोर्धर्माधर्मयोः शेषाभ्यां आदावेव द्वितीयस्कंधे वैश्वानरं यातीत्यादिना ॥ ५३ ॥ उपगेयं उपनिषत्सु श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य ॥ ५६ ॥

भा० पं
८३

यथावद्व्ख्यात्वा ॥ ३७ ॥ कथंभूतास्संस्थाः सकलानां जीवनिकायानां धामस्थानमधभूतं वपुः ॥ ३८ ॥ पंचमस्कंधमेवंविधिपरमावार्थहा

श्रुत्वा स्थूलं यथा सूक्ष्मं रूपं भगवतो यतिः ॥ स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धियान
येदिति ॥ ३९ ॥ भूद्वीपवर्षसरिदद्रिनभःसमुद्र पातालदिङ्नरकभागणलोकसं
स्थां ॥ गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ४० ॥

इति श्रीभागवते महापुराणे पंचमस्कं धे श्रीशरशामाहंस्यां संहिता
यां नरकवर्णनो नाम षड्विंशतिमोध्यायः लिः वैरलीहासतत्रयोगदासतनये
पंचैः ॥ श्रीयतां परमानंदनहरिर्वालमाधवैः ॥ १ ॥ इति श्रीभागव ते टीकायां पंचमस्कंधे षड्विंशतिमोध्यायः ॥ राम

राम
८३

পষ:

श्रीगणेशायनमः ॥ अथपारायणेनृसिंहैकनामसिंहोविराजते ॥ यत्रारतःपलायंतेमहाकल्मषकुंजराः ॥१॥ विसर्गेत्रभवान्जीवान्स्वमर्याद
हसंस्थितान् ॥ विष्णुःपात्यखिलैर्हृष्टैरित्येवंषष्ठमेस्थितं ॥२॥ अध्यायैकोनविंशत्याषष्ठेपोषणमुच्यते ॥ श्रुतिलंघितमर्यादभंगरक्षण
लक्षणं ॥३॥ अजामिलोमनुष्येषुमहापापोपियथावितः ॥ विश्वरूपादिदैत्यातीचतथादेवेषुवासवः ॥४॥ अजामिलस्यपन्नत्वंविष्णुदूतै
र्निरूपितं ॥ एकेनभगवन्नामग्रहणेनैवहानुषंगजं ॥५॥ इंद्रोपिभगवद्भक्तःसर्वेनोपेंद्रसेवकः ॥ तदधीनहरेरैश्वर्यशत्रुनिर्जयजीवितः ॥६॥
नत्रादौत्रिभिरध्यायैरजामिलकथोच्यते ॥ विश्वरूपकथाषड्भिरिंद्रदोषोक्षपेततः ॥७॥ इंद्रस्यैवतदोषोक्तौवृत्राख्यानंततोष्टभिः ॥ द्वाभ्यांच

राजोवाच ॥ निवृत्तिमार्गःकथितआदौभगवतायथा ॥ क्रमयोगोपलब्धेनब्रह्मणायदसंसृतिः ॥१॥
प्रवृत्तिलक्षणश्चैवत्रैगुण्यविषयोमुने ॥ योसावलीनप्रकृतेर्गुणसर्गःपुनःपुनः ॥२॥

महदाख्यानमेवंप्रकरणक्रमः ॥८॥ तत्रादौप्रथमेविष्णोर्दूतैःपातकिमोचने ॥ तत्प्रापख्यापनायोक्तंयाम्यैर्धर्मादिलक्षणं ॥९॥ अथषष्ठस्कंधोव्या
ख्यायते ॥ पूर्वोक्तानुवादपूर्वकंनिरंतरोक्तनरकपरिहारोपायंपृच्छति ॥ निवृत्तिमार्गइतिद्वाभ्यां ॥ आदौद्वितीयस्कंधेवैश्वानरंयातीत्यादिना ॥ भगवता
त्वया ॥ यथायथावत् ॥ यतएवमार्गात्क्रमेणयोगोर्चिरादिभिः ॥ तेनोपलब्धेनब्रह्मणातेनसहासंसृतिर्मोक्षोभवति ॥ ब्रह्मणासहतेसर्वे
संप्राप्तेप्रतिसंचरे ॥ परस्यांतेकृतात्मानःप्रविशंतिपरंपदमितिवचनात् ॥१॥ त्रैगुण्यंस्वर्गादितद्विषयःप्राप्योयस्य ॥ नलीनाप्रकृतिर्य राम
स्यतस्यपुनःपुनर्गुणसर्गोभोगार्थदेहारंभरूपोयोमार्गः ॥ सचकथितःतृतीयेदक्षिणेनपथार्यम्णःपितृलोकंव्रजंतीत्यादिना ॥२॥ १

अनुवर्णिताः निरंतराध्याये ॥ व्याख्यातश्चतुर्थस्यादौ यतः यस्मिन् ॥ ३ ॥ द्वीपादीन् भागतो लक्षणतो मानतश्च ॥ ४ ॥ धरामंडलस्य संस्थानं ज्योतिषां वि
वराणां च इदं संस्थानं विभुर्यथाऽसृजत् तथा व्याख्यातमित्यर्थः ॥ ५ ॥ नानाउग्रा यातना येषु तान् नरकान् ॥ यथा येनोपायेन नरः यातना न गच्छेत् तन्मे
अधुना व्याख्यातुमर्हसि ॥ ६ ॥ तत्र तावन्महापातकप्रायश्चित्तं विना नरकाउ न निवार्य इत्याह न चेदिति द्वाभ्यां ॥ मनउक्तिपाणिभिः मनोवाक्कायैः कृतस्या
हसस्तैरेव इहैवापचितिं प्रायश्चित्तं न कुर्याच्चेत् तर्हि अंहसः प्रेत्य मृत्वा नरकान् ध्रुवमुपैति ॥ मे मया ये भवतः कीर्तिताः तिग्मा यातना येषु तान् ॥ ७ ॥ यस्मा

अधर्मलक्षणा नानानरकाश्चानुवर्णिताः मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः ॥ ३ ॥ प्रियव्रतोत्तानपदोर्वंशस्तच्च
रितानि च ॥ द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ॥ ४ ॥ धरामंडलसंस्थानं भागलक्षणमानतः ॥ ज्योतिषां विवराणां
च यथेदमसृजद्विभुः ॥ ५ ॥ अधुनेह महाभाग यथैव नरकान्नरः ॥ नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ॥ ६ ॥ श्रीशुक उ
वाच ॥ न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्ति
ग्मयातनाः ॥ ७ ॥ तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना ॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक्चिकित्से

देवं तस्मात्पापस्य निष्कृतौ प्रायश्चित्ते यतेत ॥ कदा मृत्योः पुरैव ॥ तत्रापि अविपद्यता म्रियमाणेन आत्मना देहेन ॥ यद्वा ॥ तद्रुजां निदानवित् ८ ॥
अविपद्यता विपत्तिरहितेः यावत्पर्यंतात्मनां यतेत न मनसा ॥ तत्रापि आशु ॥ अन्यथा अतीव चिरकालेन तद्विगुणांत्रमर्हतीति द्वैगुण्यापत्तेः तत्र च
पापस्य महत्त्वमल्पत्वं वा वेद्यं तदनुरूपं प्रायश्चित्तं यतेत ॥ रुजां रोगाणां निदानवित् यथा वैद्यस्तदनुरूपं चिकित्सेत तद्वत् ॥ ८ ॥

अत्र चोदयति द्वाभ्यां ॥ दृष्टं राजदंडादि ॥ श्रुतं नरकपातादि ॥ ताभ्यामात्मनः पापमहितं जानन्नपि भूयः प्रायश्चित्तानंतरं करोति ॥ अथो अतः कारणात् द्वादशाब्दादि कथं प्रायश्चित्तं ॥ तेन समूलदोषस्यानिवृत्तेः निवृत्तो वा पुनस्तत्पापप्ररोहयोग्यादिति भावः ॥ ५ ॥ किंच ॥ क्वचित्कदाचित् अभद्रात्पापान्निवर्त्तते ॥ क्वचित्तदेव पुनराचरति ॥ यथा कुंजरः स्नातोपि रजोभिरात्मानं मलिनीकरोति ॥ तथा पापस्य पुनर्दुर्निवारत्वे नरकपातस्यावश्यंभावित्वात् प्रायश्चित्तं व्यर्थमिति ॥ ६ ॥ परिहरति कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य निर्हारो नाशः आत्यंति

॥ राजोवाच ॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितं ॥ करोति भूयो विवशः प्रायश्चित्तमथो कथं ॥ ५ ॥ क्वचिन्निवर्त्तते ऽभद्रात्क्वचिच्चरति तत्पुनः ॥ प्रायश्चित्तमथोऽपार्थं मन्ये कुंजरशौचवत् ॥ ६ ॥ बादरायणिरुवाच ॥ कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते ॥ अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनं ॥ ७ ॥ नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवंति हि ॥ एवं नियमकृद्राजन् शनैः क्षेमाय कल्पते ॥ ८ ॥

रिहा॰

कः समूलो न हीष्यते ॥ अविद्वानधिकारी यस्मिन् तस्य भावस्तत्त्वं तस्मात् ॥ अतो अविद्यायां नाशाभावात् नष्टेपि तस्मिन्पापे तत्संस्कारेण पापांतरस्य पुनः पुनः प्ररोहो भवत्येव ॥ किं तर्हि सम्यक् प्रायश्चित्तं तदाह ॥ प्रायश्चित्तं तु विमर्शनं ज्ञानं ॥ ७ ॥ तच्च नियमसमन्नः शनैर्लभते नान्यदिति सदृष्टांतमाह ॥ नेति ॥ पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो न बाधंते ॥ तथा नियमादिकर्त्ता क्षेमाय तत्त्वज्ञानाय समर्थो भवति ॥ ८ ॥

एतदेव विशदयति द्वाभ्यां तपसा एकाग्र्येण मनस इंद्रियाणां चैकाग्र्यं परमं तप इति स्मृतेः ब्रह्मचर्येणाष्टांगेन तदुक्तं स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं शमो मनसो नियमनं दमो बाह्येंद्रियाणां त्यागो दानं यमो ऽहिंसादिः नियमो जपादिः १० अस्यातिदुष्करत्वात्सुखमेवान्यमार्गमपि तमाह केचिदिति अनेनैवंभूता भक्तिप्रधाना विरला इति दर्शयति केवलया तपआदिनिरपेक्षया वासुदेवपरायणा इति नाधिकारिविशेषणं

तपसा ब्रह्मचर्येण शमेन च दमेन च त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ९ देहवाग्बुद्धिजं धीराः धर्मज्ञाः श्रद्धयान्विताः क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः १० केचित्केवलया भक्त्या वासुदेवपरायणाः अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ११ न तथा ह्यघवान् राजन् पूयेत तपआदिभिः यथा कृष्णार्पितप्राणस्तत्पुरुषनिषेवया १२ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोऽकुतोभयः सुशीलाः साधवो यत्र नारायणपरायणाः १३ प्रायश्चित्तानि चीर्णानि

मेतत् किंत्वेषामशुद्धयातत्वात्सर्वत्रैवेष्वेव पर्यवसानादत्रुक्ता नारायणपराङ्मुखं न निःपुनंति राजेंद्र सुराकुंभमिवापगाः १४ दमात्रं ११ . एतद्युक्तानमार्गादपि श्रेष्ठमित्याह न तथेति पूयेत शुद्ध्येत तत्पुरुषनिषेवया कृष्णार्पिताः प्राणा येन १२ तत्र हेतुः सध्रीचीनः सम्यगीनः अयं पंथाः भक्तिमार्गः यतः क्षेमः क्षेमत्वे हेतुः नकुतश्चिदपि प्रारंभे भयं यस्मिन् तत्र हेतुः सुशीलाः कृपालवः साधवो निष्कामाः यत्र धर्मनिष्ठा अतो न ज्ञानमार्गे इवासहायतानिमित्तं भयं नापि कर्ममार्गवन्मत्सरादिभ्यो भयं इति भावः १३ भक्तेरन्यनिरपेक्षत्वमुक्त्वा कृच्छ्रादिनिष्ठा भक्तिं विना न शोधयंती-

त्याह प्रायश्चित्तानीति महतामप्यघशोधकत्वे दृष्टांतमाह सुराकुंभमिवेति १४

भा०ष ३

मन्त्रिः ह्यल्पापि तन्नाम्नावेत्याहमस्त्विति ॥ नस्मरणेषु रोगमात्रमस्ति ॥ न तद्ज्ञानं यस्य तन्मनः ॥ तावत्तेव वीर्याणि निष्कृतं ज्ञापास्विन्नैयैः ॥१५॥ इममर्थ मिति हा मे नो मयापारयति ॥ श्रुत्वेति मे मन्त्रः ॥१६॥ कन्यकुब्जे पुरे राज्ञः पतिः ॥ नाम्नाऽजामिलः ॥१७॥ वंदीग्रहे गणिकाः सृष्ट्वा घृतेन कैतवैर्वं वनादिभिश्चरन्तिं जीविकां विप्रकृत्स्नम् ॥ यातयामास पीडयामास ॥१८॥ आयुषः सर्वं धीमहान् कालोऽत्यगात् ॥ सक्रियानित्यपेक्षायाम

एकन्मनः कृत्स्नपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह ॥ न ते यमं पाशभृतश्च तद्भटान् स्वप्नेपि पश्यन्ति हि चीर्णनिष्कृताः श्रुत्वा चोदाहरन्तीममितिहासं पुरातनं ॥ दूतानां विष्णुयमयोः संवादस्तं निबोध मे ॥१९॥ कन्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ॥२॥ नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥१७॥ बंदयक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः ॥ बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनः ॥१८॥ एवं निवसतस्तस्य लालयानस्य तत्सुतान् ॥ कालोऽत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः ॥१९॥ तस्य प्रवयसः पुत्रा दशतेषां कनीयः पिता ॥ बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं ॥२०॥ स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं ॥२१॥ भुंजानः प्रपिबन्खादन्बालकस्नेहयंत्रितः ॥ भोजयन्पाययन्मूढो न वेदागतमंतकं ॥२२॥ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते ॥ मतिं चकार तनये बाले नारायणाह्वये ॥२३॥

इत्यूषाशीत्यायसो व्यापावर्त्ताः समाः संवत्सराः ॥१७॥ प्रवयसो वृद्धस्य ॥२०॥ बद्धहृदयः येन जरठो वृद्धः ॥२१॥ एतच्चातउपलालनादि श्रीनारायणनामोपचारमाहात्म्येन तदुक्तिरेवाभूदिति सिद्धान्तोपयोगित्वेनाविष्कृतं ॥२२॥

एम ३

वक्राणि तुंडानि मुखानि येषां ॥ ऊर्ध्वानि रोमाणि येषां तान् ॥ २४ ॥ प्लावितेन प्लुतत्वं नीतेन ॥ २५ ॥ हरिकीर्त्तनं निशम्यापतन् ॥ यतस्तद्भर्त्तुर्नाम ॥ २६ ॥ २७ ॥
पुरःसराः मुख्याः ॥ २८ ॥ अस्माननयन्तं निषेधथ ॥ २९ ॥ वयं तु युष्मान्न जानीमः इति न कोपः कार्यः ॥ यतो लोकिकाद्युत्तमरूपा उपयमित्याहुः ॥ सर्वे इति सा-
र्द्धाभ्यां ॥ लसंत्यः पुष्करमालाः संति येषां ॥ ३० ॥ नूतनं वयो वयो येषां ॥ निषंगः इषुधिः धनुः निषंगादिभिः श्रीः शोभा येषां ते ॥ ३१ ॥ विगतं तिमिरं यस्मा-

स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषानतिदारुणान् ॥ वक्रतुंडानूर्ध्वरोमण आत्मानं नेतुमागतान् ॥ २४ ॥ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्व-
यं ॥ प्लावितेन स्वरेणोच्चैराजुहावाकुलेंद्रियः ॥ २५ ॥ निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्त्तनं ॥ भर्त्तुर्नाम महाराज पार्षदाः सहसाऽप-
तन् ॥ २६ ॥ विकर्षतोंऽतर्हृदयाद्दासीपतिमजामिलं ॥ यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥ २७ ॥ ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरः-
सराः ॥ के यूयं प्रतिषेद्धारो धर्मराजस्य शासनं ॥ २८ ॥ कस्य वा कुत आयाताः कस्मादस्य निषेधथ ॥ किं देवा उपदेवा वा यूयं किं सिद्धसत्त-
माः ॥ २९ ॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ॥ किरीटिनः कुंडलिनो लसत्पुष्करमालिनः ॥ ३० ॥ सर्वे च नूत्नवयसः सर्वे चारुच-
तुर्भुजाः ॥ धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः ॥ ३१ ॥ दिशो वितिमिरालोकाः कुर्वंतः स्वेन तेजसा ॥ किमर्थं धर्मपालस्य किंकरान्नो
निषेधथ ॥ ३२ ॥ श्रीशुक उवाच ॥ इत्युक्ते यमदूतैस्ते वासुदेवोक्तकारिणः ॥ तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३३ ॥ विष्णुदूता ऊचुः

लोकस्यान्यस्य प्रकाशो यासां ताः तथाभूता दिशः कुर्वंतः ॥ भवा ॥ यूयं वै धर्मराजस्य यदि निर्देशकारिणः ॥ ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणं ॥ ३४ ॥
नामैतदस्तु चिंतमित्याहुः ॥ किमर्थमिति ॥ ३२ ॥ अहो इदमाश्चर्यं दृष्ट्वादितानश्रूयाए ते चौरा एवास्माद्भिया धर्मराजस्य किंकरा इत्यनृतं वदंतीति विस्मयेन प्रहस्येत्य-
स्यार्थः ॥ मेघस्येव निर्ह्रादो यस्या निर्घोषस्या तया गिरा ॥ ३३ ॥ तत्त्वं स्वरूपं लक्षणं प्रमाणं ॥ ३४ ॥

भा०ष
४

कथंचित्केनप्रकारेणास्थानंविषयः ॥ कारिणः कर्म्मिणः ॥ नृणामिति ॥ नराएवनपश्वादयः ॥ तेष्वपिकतिचिदेवेत्यर्थः ॥ २५ ॥ वेदेनप्रणिहितो
विहितोधर्मः वेदप्रमाणक इत्यर्थः ॥ अनेनयोवेदप्रमाणकः सधर्मइत्यर्थः ॥ योधर्मः सवेदप्रमाणक इतिस्वरूपंप्रमाणंचोक्तं ॥ यथाहजै
मिनिः ॥ चोदनालक्षणोर्थोधर्मइति ॥ व्याख्यातंभेदः द्वयमेकेनैवेत्याशङ्क्यार्थोभ्यांनिरूप्यतइति ॥ अथाधर्मस्यस्वरूपंलक्षणंवदउ
त्थानकथनायाऽऽह ॥ तद्विपर्ययः ॥ योवेदनिषिद्धः सोऽधर्मः निषेधस्यापितत्रप्रमाणमित्यर्थः ॥ वेदस्यप्रमाण्येहेतुः ॥ वेदोनारायणादुद्भूतः
सएवसाक्षाद्विरूपचारः स्वयंभूरितिचनिःश्वासमात्रेणस्वयमेवभवतीतितथा ॥ तथाचश्रुतिः ॥ अस्यमहतोभूतस्यनिश्वसितमेतदृग्वेद

कथंचित्ध्रियतेदण्डः किंवास्यस्थानमीप्सितं ॥ दण्ड्याः किंकारिणः सर्वेआहोस्वित्कतिचिन्नृणां ॥ २५ ॥ यमदूतउवाच ॥ वेद
प्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः ॥ वेदोनारायणः साक्षात्स्वयंभूरितिशुश्रुमः ॥ २६ ॥ येनस्वधाम्न्यमीभावारजः सत्व
तमोमयाः ॥ गुणनामक्रियारूपैर्विभाव्यन्तेयथातथं ॥ २७ ॥ सूर्योग्निः खंमरुद्देवः सोमः संध्याहनीदिशः ॥ कंकुः स्वयंधर्म

इति ॥ २६ ॥ कोसौनारायणस्तत्राऽऽह ॥ येनस्वधाम्निस्वस्वरूपेअमीभावाः प्राणिनः गुणाः शान्तत्वादयः ना इतित्येतेदैह्यस्यसाक्षिणः ॥ २८ ॥
मानिब्राह्मणादीनि ॥ क्रियाध्ययनादयः ॥ रूपाणिवर्णाश्रमादयः तैर्विभाव्यन्तेविरच्यन्ते ॥ यथातथंयथावत्सनारायणः ॥ २७ ॥ तथास्यध
र्मानेनकृतइतिकुतोज्ञायतेतत्राऽऽह ॥ सूर्यइति ॥ अहनीअहश्चरात्रिश्च ॥ कंउदकं ॥ कुः पृथ्वी ॥ दैह्यस्यजीवस्ययथाऽऽह ॥ आदित्यचंद्रावनिलो
नलश्चद्यौर्भूमिरापोहृदयंयमश्च ॥ अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति ॥ २८ ॥

राम
४

स्थानमाहुः एतैर्निमित्तभूतैर्विज्ञातः दंडस्थानमाहुः सर्वे इति ॥ ३९ ॥ विपरीतानि चेत्तु भद्राण्येव एककर्मिणां संभवंति ॥ यतस्तेषां गुणसंगोस्ति ॥ यदि कश्चिदेकस्मिन्नस्य
तर्हि तस्य भद्राणि न स्युः न त्वेतदस्तीत्याह नहि देहवानकर्मकृदस्तीति ॥ अतः सर्वे कर्मिणः कर्मिणां च पापस्यावश्यंभावित्वात्तेन सर्वे दंडमर्ह
न्तीत्यर्थः ॥ ४० ॥ कथं विज्ञायते दंडस्य स्थानं येनेति ॥ धर्मो वेति दृष्टांतः अधर्मानुसारेण दंडो धर्मानुसारेण सुखं वेदित्यर्थः ॥ ४१ ॥ न केवलं श्रुत्यै
इयत्ताज्ञापका: किंत्वर्थापत्तिरपीत्याह यथेति ॥ इह देवप्रवराः इह जन्मनि शांतघोरमूढत्वेन वा सुखदुःखमिश्रत्वेन वा धार्मिकत्वादिना वा
त्रैविध्यं भूतेषु यथोपलभ्यते तथान्यत्र जन्मांतरेप्यनुमीयते ॥ त्रैविध्यान्यथानुपपत्त्या कल्प्यते ॥ ४२ ॥ वर्तमानजन्मना पूर्वापरजन्मना पूर्वापरजन्म

एतैरधर्मो विज्ञातः स्थानं दंडस्य युज्यते ॥ सर्वे कर्मानुरोधेन दंडमर्हन्ति कारिणः ॥ ३९ ॥ संभवंति हि भद्राणि विपरीतानि चानघाः ॥ कारिणां गु
णसंगोस्ति देहवान्न त्वकर्मकृत ॥ ४० ॥ येन यावान्यथा धर्मो धर्मो वेह समीहितः ॥ स एव तत्फलं भुंक्ते तथा तावदमुत्र वै ॥ ४१ ॥ यथेह देवप्र
वरास्त्रैविध्यमुपलभ्यते ॥ भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते ॥ ४२ ॥ वर्तमानोन्ययोः कालो गुणाभिज्ञापको यथा ॥ एवं जन्मान्य
योरेतद्धर्माधर्मनिदर्शनं ॥ ४३ ॥ मनसैव पुरे देवः पूर्वरूपं विपश्यति ॥ अनुमीमांसते पूर्वं मनसा भगवानजः ॥ ४४ ॥

भौ वे ह २

धर्माधर्मज्ञानं भवतीति सदृष्टांतमाह वर्तमानो वसंतादिकालः अन्ययोर्भूतभविष्यतोर्वसंतयोर्गुणाः उष्णफलादयः तेषामभिज्ञापको यथा ॥ एवमे
तज्जन्म अन्ययोर्भूतभाविजन्मनोः धर्माधर्मौ निदर्शयतीति तथा ॥ ४३ ॥ अयमेव धर्माधर्मज्ञानप्रकारः तेषां ॥ धर्मराजस्तु मनसैव सर्वं पश्यतीत्याह पुरे
संयमिन्यां स्थित एव देवो यमः देहे स्थितोन्तर्यामी वा जीवस्य पूर्वरूपं सधर्मादि स्वज्ञेन विशेषेण पश्यति ॥ अनुरूपं अनंतरमपूर्वरूपं मीमांसते यद्यस्यानु
रूपं तद्विचारयति ॥ यतोसौ भगवानजः ॥ ४४ ॥

जीवत्वात्स्ववैरेणोपस्थापितं वर्तमानं देहं पश्यति न तु पूर्वमपरं वा देहं त्याह ॥ यथेति ॥ अतः स्वविद्योपाधिर्जीवस्तु व्यक्तमेव प्राचीनकर्माभिव्यक्तं वर्तमानमेव देहं सूपात्ते अहमिति मन्यते ॥ पूर्वमपरं वा न वेद ॥ तत्र हेतुः नष्टजन्मनाम्स्मृतिर्यस्य ॥ अत्र दृष्टांतः तमसा निद्रया ग्रस्तो यथा स्वप्ने ऽभिव्यक्तमेव देहाद्युपात्ते ॥ न तु जाग्रद्देहादि पूर्वं स्वप्नादिगतं वा तद्वदित्यर्थः ॥ ४५ ॥ एवंभूतस्य जीवस्य संसारप्रपंचयति पंचभिः श्लोकैः ॥ पंचभिः कर्मेंद्रियैः स्वार्थानुपादानादीन् प्रवर्तयन् शरीरान्वेद पंचभिर्ज्ञानेंद्रियैः षोडशेन मनसा सह सहस्रदृशः ॥ षोडशोपाध्यंतर्गतोपि स्वयं त्वेक एव सर्वेंद्रियविषयप्रतिसंधानात्

यथाः तत्तमसा ग्रस्तो ऽपात्ते व्यक्तमेव हि ॥ न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४५ ॥ पंचभिः कुरुते स्वार्थान्प्रपंचं वेदाथ पंचभिः एकस्तु षोडशेन त्रीन्स्वयं सप्तदशोऽश्नुते ॥ ४६ ॥ तदेतत्षोडशकलं लिंगं शक्तित्रयं महत् ॥ धत्तेनुसंसृतिं पुंसि हर्षशोकभयार्तिदं ॥ ४७ ॥ देह्यज्ञो ऽजितषड्वर्गो नेच्छन्कर्माणि कार्यते ॥ कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति ॥ ४८ ॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ॥ ४९ ॥ लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ॥ यथायोनि यथाबीजं स्वभावेन

त्रीन् ज्ञानकर्मेंद्रियमनोविषयान् प्राप्नोति ॥ ४६ ॥ तदेतल्लिंगशरीरं शक्तित्रयं गुणत्रयकार्यं महदहंकारादिरूपं जीवे अनुसंसृतिं धत्ते ॥ ४७ ॥ बलीयसा ॥ ५० ॥ नेच्छन्नपि विज्ञो नैव कर्माणि कार्यते ॥ कोशकारः कीटविशेषः यद्वत्तिनिर्गमोपायं न जानाति ॥ ४८ ॥ कार्यते इत्यत्रोक्तमेवं प्रमाणयति नहीति गुणैर्गुणकार्यैरागादिभिः स्वाभाविकैः पूर्वसंस्कारोद्भूतैः ॥ ४९ ॥ कर्मवशेन च तदनुरूपो देहो भवतीत्याह लब्ध्वेति ॥ अव्यक्तं अदृष्टं निमित्तं निमित्तं लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलसूक्ष्मशरीरं भवति ॥ यथायोनि मातृसदृशं यथाबीजं पितृसदृशं ॥ स्वभावो वासना भोक्तृशक्तिस्तयोरेकत्वेपि कर्मवासनया मातापितृसदृशो देहो भवतीत्यर्थः ॥

संसारचक्रमुपसंहरतोऽग्निप्रकारमाशु ईशप्रसंगात्परमेश्वरभजनात् ॥५०॥ नदेवं सामान्यतो धर्मादीनिर्णीय प्रयुक्त्वा प्रकृतस्यां जामिलस्यापि धर्म
प्रपंचं वर्णनोद्यतत्वमाशु अयं हीति यावदध्यायसमाप्ति तत्र ह्यस्यां तत्पूर्वं रत्नाकरवादो न्यायातिरेकप्रदर्शनार्थः शीलं सत्स्वभावः वृत्तं सदा
चारः गुणाः क्षमादयः तेषामालयः ॥५१॥ निरहंकृतो निरहंकारः ॥५२॥ आवृत्तः वनात्परावृत्तः ॥५४॥ भुजिष्यया भोगविद्यया दास्या मैरेयं मधु
एवं प्रकृतिसंगेन दुष्टस्वभावविपर्ययः ॥ आसीत्स एव नवविरोदीशसंगाद्दिलीपते ॥५०॥ अयं च श्रुतसंपन्नः शीलवृत्तगुणाश्रयः
धृतव्रतो मृदुर्दान्तः सत्यवाङ्मन्त्रविच्छुचिः ॥५२॥ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतः ॥ सर्वभूतसुहृत्साधुर्मितवागनसू
यकः ॥५३॥ एकदासौ वनं यातः पितृसंदेशकृद्द्विजः ॥ आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥५४॥ ददर्श कामिनं कंचि
च्छूद्रं सह भुजिष्यया ॥ पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ॥५५॥ मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपं ॥ क्रीडंतमनुगायंत
हसंतमनयांतिके ॥५६॥ दृष्ट्वा तां कामलिप्तेन बाहुना परिरंभितां ॥ जगाम हृच्छयवशं सहसैव विमोहितः ॥५७॥ स्तंभयन्नात्मनात्मा
नं यावत्सत्त्वं यथाश्रुतं ॥ न शशाक समाधातुं मनो मदनवेपितं ॥५८॥ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ॥ तामेव मनसा ध्या
पेयं श्रीण्यपि त्वां मदेनाघूर्णिते भ्रांते नेत्रे यस्याः सा ॥५५॥ विशेषेण श्लथंती नीवी यस्याः तया सह व्यपेतं ह्रिया वा पत्रपं ॥ यन्स्वधर्माद्विरराम ह
कामोद्दीपकेन तदंगरागेण हरिद्रादिना लिप्तेन ॥५७॥ सत्त्वं धैर्यं श्रुतं ज्ञानं तद्बलेन नियंत्रयन्नपि मदनेन कंपितमनः समाधातुं न शक्तोऽभूत् ॥५८॥ तद्दर्श
नमेव निमित्तं यस्य स्मरव्याजस्य ग्रहस्य तेन ग्रस्तः विचेतनो गतस्मृतिः ॥५९॥

यावता समग्रेण ॥ ६० ॥ लंभिता परिणीतां ॥ ६१ ॥ ॥ २ ॥ अघमेवायुर्यस्य मलमेव तदीयमत्रारिकमत्रीति मलात् ॥ ६२ ॥ अकृतनिर्वेशं ॥ अकृतप्रायश्चित्तं मृषैव
वहितार्थेनेषामस्त्याङ्गः यद्येति ॥ ६४ ॥ ६ ॥ इति षष्ठे प्रथमोध्यायः ॥ द्वितीये दूतैर्वैष्णवैर्यमानाममाहात्म्यमद्भुतं ॥ श्रावयित्वा द्विजो विष्णोर्लोकं नीतस्त्वमीर्यते
नयकोविदाः न्यायनिपुणाः ॥ १ ॥ धर्मदृशां सभामधर्मः स्पृशति ॥ तदाह यत्र सभायां यैर्धर्मदृग्भिः ॥ तेषामेतां सभां ॥ २ ॥ पितरः पितृवत्पालकाः शास्तारः

तमेव तोषयामास पित्र्येणार्थेन यावता ॥ ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६० ॥ विप्रां स्वभार्यामप्रौढां कुले महति लंभितां ॥ वि
सस्रर्जाचिरात्पापः स्वैरिण्यपांगविद्धधीः ॥ ६१ ॥ यतस्ततश्चोपनिन्ये न्यायतोन्यायतो धनं ॥ बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ॥ यद
सौ शास्त्रमुल्लंघ्य स्वैरचार्यतिगर्हितः ॥ अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६३ ॥ तत एनं दंडपाणेः सकाशं कृतकिल्बिषं ॥ नेष्यामोऽकृ
तनिर्वेशं यत्र दंडेन शुध्यति ॥ ६४ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे प्रथमोध्यायः ॥ बादरायणिरुवाच ॥ एवं ते भगवद्दूता यमदू
ताभिभाषितं ॥ उपधार्याथ तान्राजन्प्रत्याहुर्नयकोविदाः ॥ १ ॥ विष्णुदूता ऊचुः ॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभां ॥ यत्रादंड्येष्व
पापेषु दंडो यैर्ध्रियते वृथा ॥ २ ॥ प्रजानां पितरो ये च शास्तारः साधवः समाः ॥ यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ॥ ३ ॥ यद्यदाचरति श्रे
यानितरस्तत्तदीहते ॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ४ ॥ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः ॥ स्वयं धर्ममधर्मं वा न हि
वेद यथा पशुः ॥ ५ ॥ स कथं न्यर्पितात्मानं कृतमैत्रमचेतनं ॥ विस्रंभणीयो भूतानां सघृणो दोग्धुमर्हति ॥ ६ ॥

अनुशिक्षकाः वैषम्यमदंड्यदंडनं ॥ ३ ॥ एतत्स्वयं वर्जितमधर्मं मन्योपि करिष्यतीति यदि त्वमेव मन्यसे इत्याहुः ॥ यद्यदिति ॥ श्रेयान् श्रेष्ठः ॥ ४ ॥ विश्वस्तघातादपि
त्याहुः ॥ यस्येति द्वाभ्यां ॥ निर्वृतो निश्चिंतः ॥ ५ ॥ विश्वासेन नितरामर्पित आत्मा येन तं ॥ विस्रंभणीयः विश्वसनीयः सघृणश्चेत् ॥ ६ ॥ ॥ रामाय ॥

न त्वस्य पापिनो दण्डे किमर्थमाक्रोशः क्रियते तत्राहुः अयं हीति यद्यस्माद्विवशोऽपि हरेर्नाम व्याजहार उच्चारितवान् । न केवलं प्रायश्चित्तमात्रं हरेर्नाम
अपितु तत्त्वे ह्यस्य मोक्षसाधनमपि । सकृदुच्चरितं येन हरिरित्यक्षरद्वयं बद्धः परिकरस्तेन मोक्षाय गमनं प्रतीति स्मृतेः ७ ननु कर्मसाद्गुण्यकरं ह
रेर्नामेति प्रसिद्धं । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां यातीत्यादिवचनात् तथा तत्त्वज्ञानेऽपि निवर्त्तकं हरेर्नाम कथं स्यात्तत्राहुः एतेनै
वेति । अघोनः अघवतः मघवच्छब्दवद्रूपं यत आ इति छेदः आ ईषदपि शब्दाभ्यासमात्रं चतुरक्षरं यन्नाम जगाद एतेनैव केवलेन चतुरक्षरमित्यनेनाधि
कं परिहृतं कथं जगाद नारायण आयाहि आगच्छ इत्येवं विक्रोशन् पुत्राह्वानेन अयं भावः कर्मांगत्वेऽपि हरिनाम्नः स्वादिरत्वादिवत्स्वयोगप्रथ

हि ।

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि । यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥ एतेनैव ह्य
घोनोऽस्य कृतं स्यादघनिष्कृतं । यदा नारायणायेति जगाद चतुरक्षरं ॥ ८ ॥

त्वेन सर्वपापप्रायश्चित्तार्थत्वमुक्तमेव तथाहि अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादिभिः पुराणे
षु सर्वपापहरत्वेन स्तुतनाम्नः स्वातन्त्र्यमवगम्यते न चैते अर्थवादा इति शंकनीयं विधिशेषत्वाभावात् न च विध्यश्रवणादर्थवादता कल्पनीया यथाग्नेयो
ऽष्टाकपालोऽमावास्यायां भवतीत्यादिवत् प्राप्तार्थत्वेन विधिकल्पनोपपत्तेः मंत्रेषु च मर्त्ताः मर्त्ताः मरणधर्माणः विप्रासो विप्रा वयं अमर्त्य
स्य जातवेदसः सर्वज्ञस्य ते नाम भूरि यथा तथा महिमाधिकं मनामहे मन्यामहे इत्यर्थः आ अस्य विष्णोः आसन्त्यकृत्कारणनाम यूयं विवक्त
न कीर्तयत किं कुर्वन्तः किंचित् विज्ञानन्तः नाममाहात्म्यं जानन्त इत्यर्थः ॥

ननु कामतः कृतानां बहूनां महापातकानां सहस्रशश्चावर्त्तितानां द्वादशाब्दिकादिभिरप्यनिवर्त्यानां कथमिदमेकमेव प्रायश्चित्तं स्यात् तत्राह स्तेन
इति द्वाभ्यां ॥९॥ सुनिष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव ॥ तत्र हेतुः यतो नामव्याहरणात् तद्विषया नामोच्चारकपुरुषविषया मदीयोयं मया सर्वतो रक्ष
णीय इति विष्णोर्मतिर्भवति ॥१०॥ श्रेष्ठत्वमेवोपपादयति नेति द्वाभ्यां ॥ मन्वादिभिर्ब्रह्मवादिभिरुदितैर्व्रतादिभिर्निष्कृतैस्तथा न शुद्ध्यति ॥ उदाहृतैस्तु हरे
र्यथा नामपदैः शिरसा नमामीत्यादि क्रियायोगो विनापेक्षित इति दर्शितं ॥ किंच ॥ तन्नामपदोच्चारणं उत्तमश्लोकस्य गुणानां चोपलम्भकं तत्पापकं
भवति ॥ न तु कृच्छ्रचान्द्रायणादि वस्तुतस्तु निवृत्तिमात्रोपक्षीणमित्यर्थः ॥११॥ नैकान्तिकं नात्यन्तशोधकं तत्रैः कृत ॥ यस्मिन्कृतेपि पुनस्तथैव

स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः ॥ स्त्रीराजपितृगोहन्ता ये च पातकिनोपरे ॥९॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतं ॥ नाम
व्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥१०॥ न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान्व्रतादिभिः ॥ यथा हरेर्नामपदैरुदाहृतै
स्तदुत्तमश्लोकगुणोपलम्भकं ॥११॥ नैकान्तिकं तद्धि कृतेपि निष्कृते मनः पुनर्धावति चेदसत्पथे ॥ तत्कर्मनिर्हारमभीप्सतां हरेर्गुणा
नुवादः खलु सत्वभावनः ॥१२॥ अथैनं मापनयत कृताशेषाघनिष्कृतं ॥ यदसौ भगवन्नाम म्रियमाणः समग्रहीत ॥१३॥

पमार्गे मनो धावति चेत् ॥ कर्मणां पापानां निर्हारं आत्यन्तिकं नाशमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तं ॥ यतो सौ खलु सत्वभावनः चित्तशोधकः
॥१२॥ अथ तस्मादेनं मापनयत मापमार्गे नयत ॥ कृताशेषाघानां निष्कृतं येन तु ॥ यद्यस्मात्सम्यग्गृहीतं सम्पूर्णमुच्चारितवान् ॥ नामैकदेशेनाप्यलमिति
भावः म्रियमाण इत्यनेन तु गच्छतः पापान्तराणां संभव उक्तः ॥ न तु तत्कालत्वमेव विवक्षितं ॥ तदानीं कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसंभवात्
न च विधिं विना काकतालीयवन्नामोच्चारणं न पापापहमिति प्रमाणमस्ति ॥ ॥१३॥

नन्वयं पुत्रनामाग्रहीत् न तु भगवन्नाम तत्राह ॥ सांकेत्यं पुत्रादौ संकेतितं ॥ पारिहास्यं परिहासेन कृतं ॥ स्तोभं गीतालापपूरणार्थं कृतं ॥ हेल-
नं किंचिदेतेनेति सावज्ञमपि वैकुंठनामोच्चारणं ॥ ॥ ननु नामसंकल्पपूर्वकं वैकुंठनामाग्रहीत् ॥ किं तु पुत्रस्नेहपरवशः सन्नुतत्रा-
हुः पतित इति ॥ अवशेनापि यो हरिरित्याह स यातनां नार्हतीति ॥ एमो नित्यनेन नात्र वर्णाश्रमादिनियम इत्युक्तं ॥ अवशत्वमेवाह पतितः
प्रासादादिभ्यः ॥ स्खलितो मार्गे ॥ भग्नः भग्नगात्रः ॥ संदष्टः सर्पादिभिः ॥ तप्तो ज्वरादिना ॥ आहतो दंडादिना ॥ ॥ ननु महतः पापस्य महदेव

सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥ वैकुंठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥ पतितः स्खलितो
भग्नः संदष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान्नार्हति यातनां ॥ १५ ॥ गुरूणां च लघूनां च गुरूणि

च लघूनि च ॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥ १६ ॥

प्रायश्चित्तमुक्तं ॥ न त्वल्पं नामग्रहणमात्रं पापतारतम्येन कृच्छ्रा-
दितारतम्यवत् ॥ तत्राह द्वाभ्यां ॥ गुरूणां गुरूणि प्रायश्चित्तानि ॥ लघूनां च लघूनि तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि यद्यपि तत्र तथैव व्यवस्था
हरिनाम्नस्तु नेयं व्यवस्थोक्ता ॥ विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैः इति वचनात् ॥ न च हरणादिंदुपानेन महापातकत्वस्मरणाव-
तनामहत्त्वात् प्रायश्चित्तस्मरणस्यापमतिभारः ॥ १६ ॥

१ स्कं:

किंच तैस्तपोदानादिभिर्यान्यघान्येव पूयंते नश्यंति ॥ अधर्मजं तन्मलिनं तत्संस्कारपापकलुषितं हृदयं न पूयते ॥ तेषामघानां हृदयं संस्काररूपं संस्कारा-
ख्यं न शुध्यति तदपीशांघ्रिसेवया कीर्तनादिना शुद्ध्यतीत्यर्थः ॥ अयं भावः महांत्यपि पापानि प्रायश्चित्तैस्तेनैव नाम्ना नश्यंति ॥ संस्कारास्तु वर्त्मि-
तेन नरीपेनेव गाढेध्यानानि ॥ तदाद्रव ज्ञात्वा उपायातरस्यानुत्पत्तिः दीपधारणेः रवनमोतरस्य ॥ तत्तु श्रवणनामकीर्तनहृदयशुद्धिः एतदर्थमेव तत्र
तत्राहेतिविधानं ॥ पापरूपस्य भवति स्मरतां तमहर्निशमित्यादि ॥ तदेवात्राप्युक्तं ॥ गुणानुवादः खलु सत्त्वभावनः तदपीशांघ्रिसेवयेति

तैस्तान्यघानि पूयंते तपोदानजपादिभिः ॥ नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥१७॥ अज्ञानादथवा ज्ञानात्
उत्तमश्लोकनाम यत् ॥ संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥१८॥ यथागदं वीर्यतममुपयुक्तं यदृच्छया ॥ अजा-
नतोप्यात्मगुणं कुर्यान्मंत्रोप्युदाहृतः ॥१९॥

तत्सुतोस्य हरिनाम्नैव सर्वपापक्षयः वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति ॥१७॥ तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमि-
ति चेत्तत्राह ॥ अज्ञानादिति बालकेनाज्ञानादपि प्रक्षिप्तोग्निर्यथा काष्ठादि दहति तद्वत् ॥१८॥ नन्वेवमपि पर्यवसितं परिहृत्य श्रद्धाहीनं वक्-
र्थं ग्राह्यमित्यर्थं स्यात्तत्राह ॥ यथेति ॥ अगदमौषधं वीर्यवत्तममिति वक्ष्यमाणवीर्यतमाभिप्रायं ॥ यदृच्छया श्रद्धादिहीनं उपयुक्तं भक्षितं तत्पथ्याद्यपेक्षा
रज्ञानतोपि स्वगुणमारोग्यं कुर्यात् ॥ मंत्रोपि नामात्मकस्तथा स्वकार्यं कुर्यादेव ॥ नहि वस्तुशक्तिः श्रद्धादिकमपेक्षते इत्यर्थः ॥ तदुक्तं विष्णुधर्मे
ॐ हरिर्हरति पापानि दुष्टचित्तैरपि संस्पृष्टो दहत्येव हि पावकः ॥१९॥

तं विप्रम्मृत्योरमूमुचन् मोचयामासुः ॥२०॥ घत्तुरिना निराकृताः सन्तः यात्वा गत्वा यमराजाय यथावत्कथयामासुः ॥२१॥ दर्शनेनोत्सवो यस्य ॥२२॥ वि
वक्षुं वक्तुमिच्छुं तं ज्ञात्वा ॥२३॥ त्रैविद्यं वेदत्रयप्रतिपाद्यं ॥ गुणाश्रयं सगुणमहतानां धर्मविद्भिः कृतानां च भागवतं भगवत्प्रणीतं शुद्धं निर्गुणं धर्ममाक
र्ण्येति शेषोऽयं भक्तिमानासीदित्यन्वयः शुभंगः ॥२४॥२५॥ अनुतापं प्रपंचयति ॥ अहो इति चतुर्भिः ॥ येनात्मना मया वृषल्यां प्रजातया जाय

श्रीशुक उवाच ॥ त एवं सुविनिर्णीय धर्मं भागवतं नृप ॥ तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥२०॥ इति प्रत्युदिता याम्या दूता यात्वा यमां
तिके ॥ यमराज्ञे यथा सर्वमाचचक्षुररिंदम ॥२१॥ द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ॥ ववंदे शिरसा विष्णोः किंकरान् ॥
दर्शनोत्सवः ॥२२॥ तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः ॥ सहसा पश्यतस्तस्य तत्रांतर्दधिरेऽनघ ॥२३॥ अजामिलोऽप्यथाकर्ण्य
दूतानां यमकृष्णयोः ॥ धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयं ॥२४॥ भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥ अनुतापो महाना
सीत्स्मरतोऽशुभमात्मनः ॥२५॥ अहो मे परमं कष्टमभूदविजितात्मनः ॥ येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना ॥२६॥ धिङ्मां विग
र्हितं सद्भिर्दुष्कृतं कुलकज्जलं ॥ हित्वा बालां सतीं योऽहं सुरापामसतीमगां ॥२७॥ वृद्धावनाथौ पितरौ नान्यबंधू तपस्विनौ ॥ अहो
मयाधुना त्यक्तावकृतज्ञेन नीचवत् ॥२८॥ सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे ॥ धर्मघ्नाः कामिनो यत्र विंदंति यमयातनाः

मानेन ॥ ब्रह्म ब्राह्मण्यजातिः विप्लावितं नाशितं ॥२६॥ दुःकृतं दोषकर्त्तारं कुलस्य कज्जलं कलंकं ॥२७॥ नान्यो बंधुः पुत्रादिर्ययोः तपस्वि
नौ दीनौ तयोश्चाधुनातन ऋणमेव ॥ ॥२८॥ राम राम गोविंद

भा.ष
९

इदानीं तस्य विमर्शपूर्वकं मोक्षक्रममाह॥ किमिदमित्यष्टभिः॥ साक्षात्सत्यत्वमिह जाग्रति वद्दृष्टं॥३०॥ ये मां व्यमोचयन्ते क्व गताः॥३१॥ यद्यप्यहम-
स्मिन् जन्मनि दुर्भगः पापीयान् तथापि जन्मान्तरे नूनं पुण्यवानित्याह॥ विबुधोत्तमदर्शनहेतुनिमित्तेन सम्भाव्यम्॥ तेषां दर्शनार्थं पूर्वेण मङ्गलेन

किमिदं स्वप्न आहोस्वित् साक्षाद्दृष्टमिहाद्भुतं॥ क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः॥३०॥ अथ ते क्व गताः सिद्धाश्चत्वार-
श्चारुदर्शनाः॥ व्यमोचयन्नीयमानं बद्ध्वा पाशैरधो भुवः॥३१॥ अथापि मे दुर्भगस्य विबुधोत्तमदर्शने॥ भवितव्यं मङ्गलेन येना-
त्मा मे प्रसीदति॥३२॥ अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः॥ वैकुण्ठनामग्रहणं जिह्वा वक्तुमिहार्हति॥३३॥ क्व चाहं कितवः
पापो ब्रह्मघ्नो निरपत्रपः॥ क्व च नारायणेत्येतद्भगवन्नाम मङ्गलं॥३४॥ सोऽहं तथा यतिष्यामि यतचित्तेन्द्रियानिलः॥ यथा न भूय
आत्मानमन्धे तमसि मज्जये॥३५॥ विमुच्य तमिमं बन्धमविद्याकामकर्मजं॥ सर्वभूतसुहृच्छान्तो मैत्रः करुण आत्मवान्॥३६॥
मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः॥३७॥ ममाहमिति देहादौ हित्वामिथ्या-
र्थधीर्मतिं॥ धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः॥३८॥ इति जातसुनिर्वेदः क्षणसङ्गेन साधुषु॥ गङ्गाद्वारमुपेयाय मुक्त-

महता पुण्येन भवितव्यं येन दर्शनेन॥३२॥ अन्यथा पूर्वपुण्यं विना कथंभूतं वैकुण्ठनामग्रहणं ते वशीक्रियते अनेन॥ सर्वानुबन्धनः॥३९॥
नेति ग्रहणं॥३३॥ ब्रह्मघ्नः विप्रत्वनाशकः॥३४।३७॥ अमिथ्याभूते अर्थे धीर्यस्य तथाभूतः सन् देहादौ ममाहमिति मतिं हित्वा धास्ये॥३८॥ मुक्तसर्व-
मनुबन्धनं बन्धकारिस्नेहो येन सः॥३९॥

राम
९

प्रत्याहृतं इंद्रियग्रामो येन ॥ ४० ॥ गुणेभ्यो देहेंद्रियादिभ्य आत्मानं वियुज्य विशोध्य आत्मसमाधिना विवेकाग्रेण भगवतो धाम्नि रूपे ॥ ४१ ॥ तस्मिन् भगवद्धाम्नि उपरता निश्चला धीर्यस्य सः तस्मिन् काले इदानीं इति वा ॥ उ: । पुरतः तत्र प्राक् उपलब्धान् एव तान् उपलभ्य प्रत्यभिज्ञाय ववंदे ॥ ४२ ॥ उपसंहरति एवमिति द्वाभ्यां ॥ विप्लाविताः सर्वे धर्मा येन ॥ हतं व्रतं स्वदारनियमादि यस्य ॥ ४५ ॥ कर्मनिबंधस्य पापमूलस्य निकृंतकं

वा ॥ राय णि उ वाच ॥ स तस्मिन् देवसदन आसीनो योगमास्थितः ॥ प्रत्याहृतेंद्रियग्रामो युयोज मन आत्मनि ॥ ४० ॥ ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ॥ युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ॥ ४१ ॥ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः ॥ उपलब्धोपलब्धान्प्राग्ववंदे शिरसा द्विजः ॥ ४२ ॥ हित्वा कलेवरं तीर्थे गंगायां दर्शनादनु ॥ सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनां ॥ ४३ ॥ साकं विहायसा विप्रो महापुरुषकिंकरैः ॥ हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ॥ ४४ ॥ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा ॥ निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥ ४५ ॥ नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्तनात् ॥ न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा ॥ ४६ ॥ य एवं परमं गुह्यमितिहासमघापहं ॥ शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ॥ ४७ ॥ न वै स नरकं याति नेक्षितो यमकिंकरैः ॥ यद्यप्यमंगलो मर्त्यो विष्णुलोके महीयते ॥ ४८ ॥ म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितं ॥ अजामिलोप्यगाद्धाम किमुत श्रद्धया गृणन् ॥ ४९ ॥ इति षष्ठस्कंधे द्वितीयोऽध्यायः ॥

छेदकं अतः परं नास्ति ॥ कस्मात् परं तीर्थपदस्यानुकीर्तनात् ॥ तत्र हेतुः यद्यतोऽनुकीर्तनात् ततोऽनुकीर्तनादन्यथा प्रायश्चित्तादिभिः रजस्तमोभ्यां कलिलं मलिनमेवावतिष्ठतीति यत्तन्मनः ॥ ४६ ॥ ४७ ॥ न वेक्षितो भवति ॥ ४८ ॥ म्रियमाणः अवशत्वेन श्रद्धाविहीनोपि ॥ ४९ ॥ इति षष्ठे द्वितीयः ॥

भा.ष ततीयेतुयमेनापिवैष्णवोत्कर्षवर्णनैः॥सांत्वयित्वास्वदूतांस्तुवैष्णवेकिंकराकृताः॥१॥विष्णुदूतैर्निर्णीतंशास्त्रार्थंयमद्युखेनदृढयितुंतृतीय
१० अध्यायारंभः तत्रयदुक्तंयमराजस्तेतथासर्वमाचचक्षुरिति॥ततःकिंवृत्तमितिपृच्छति॥निशम्येति॥मुरारेर्नैदेशिकैःकिंकरैर्विहतान्॥स्वानए
वहताआज्ञायस्य॥यस्यवशेवर्तीअयंजनः सोपितान्प्रतिकिमाह॥१॥अश्रुतपूर्वमेतदित्याहयमस्येति॥हेऋषेयमस्यदंडभंगःकुतश्चन
कस्माच्चिदपिश्रुतपूर्वोनासीत्॥एततएतस्मिन्नर्थेयद्वानश्रुतपूर्वःएतद्यमदंडनिराकरणंचासीत्॥अतःसर्वस्यापिलोकस्यसंशयोवृश्चते

॥राजोवाच॥निशम्यदेवःस्वभटोपवर्णितंप्रत्याहकिंतानपिधर्मराजः॥एवंहताज्ञोविहतान्मुरारेर्नैदेशिकैर्यस्यवशेजनोयं॥१॥
यमस्यदेवस्यनदंडभंगःकुतश्चनर्षेश्रुतपूर्वआसीत्॥एतन्मुनेवृश्चतिलोकसंशयंनहित्वदन्यइतिमेविनिश्चितं
श्रीशुकउवाच॥भगवत्पुरुषैःराजन्याम्याःप्रतिहतोद्यमाः॥पतिंविज्ञापयामासुर्यमंसंयमनीपतिं॥२॥यमदूताऊचुः क
तिसंतीहशास्तारोजीवलोकस्यवैप्रभो॥त्रैविध्यंकुर्वतःकर्मफलाभिव्यक्तिहेतवः॥४॥यदिस्युर्बहवोलोकेशास्तारोदंड
धारिणः॥कस्यस्यातांनवाकस्यमृत्युश्चामृतमेववा॥५॥

तवत्वत्तोन्योनह्यस्तिनन्नीतिमेनिश्चितं अतःकथयेतिशेषः॥१॥भगवतःपुरुषैः
प्रतिहतउद्यमोयेषांतेयाम्याःप्रहृष्टाः॥२॥कतिसंतीतिस्त्याहेपोक्तिः त्रैविध्यंत्रिविधत्वंप्रापयितुं॥ यद्वात्रैविध्यंयथाभवतितथाकर्मकुर्वतः
तत्रैविध्यंचकर्मफलस्याभिव्यक्तिहेतवः कतिसंतीति॥४॥संतुबहवः कोबाधस्तत्राहुः यदीति सस्वरूपैः स्वस्वमतस्थत्वेतेषांविप्रतिपन्नोतेउभयंकस्य
स्यातां॥नकस्यापिपरस्परविरोधोनोभयोरपिप्रतिबंधात्॥एकमत्येतुकस्यवानस्यातां॥एकः स्वातंत्र्येणकर्तृत्वमिच्छन्निरुद्धःस्वबाधाः॥एकमत्येवतयोः
परस्परकार्यान्तमोरनेनोभयोरपिप्राप्तिः कस्यचितेउभेअपिनस्यातामित्यर्थः॥५॥

राम
१०

नच बहूनां धर्म्मिणां व्यवस्थया यावद्बहवः शास्तारो भवंति तथा प्रतिनायं दोषः स्यान्नन्वाहुः ॥ बहूनां कर्म्मिणां व्यवस्थया शास्तृत्वे बहुत्वे शास्तृत्वं स्या
न्न घटेत ॥ किंतु तदा प्रत्येकं शास्तरि मुख्यं शास्तृत्वं ॥ तदेकदेशे उपचारमात्रमेव स्यात् ॥ यथा चक्रवर्त्तिन एव मुख्यं शास्तृत्वं मंडलवर्त्तिनामुप
चारमात्रं ॥ निरंकुशशास्तृत्वाभावात् ॥ ६ ॥ यस्मादेवं शास्तृबहुत्वं न घटते ॥ अतस्त्वमेक एव शास्ता त्वामु भाष्यमेव विनिनन्नीति ॥ ७ ॥ तथा विप्रलंभिता

किंतु शास्तृबहुत्वे स्याद्बहूनामिह कर्म्मिणां ॥ शास्तृत्वमुपचारो हि यथा मंडलवर्त्तिनां ॥ ६ ॥ अतस्त्वमेको भूतानां सेश्वराणा
मधीश्वरः ॥ शास्ता दंडधरो नृणां शुभाशुभविवेचनः ॥ ७ ॥ तस्य ते विहतो दंडो न लोके वर्त्तते ऽधुना ॥ चतुर्भिरद्भुतैः सि
द्धैराज्ञा ते विप्रलंभिता ॥ ८ ॥ नीयमानं तवादेशादस्माभिर्यातनागृहान् ॥ व्यमोचयन्पातकिनं छित्वा पाशान्प्रसह्य
ते ॥ ९ ॥ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमं ॥ नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतं ॥ १० ॥ बादरायणि
रुवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः ॥ प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबुजं हरेः ॥ ११ ॥

वंचिता लंघिता इत्यर्थः ॥ ८ ॥ तदेवाहुः नीयमानमिति ॥ ९ ॥ तेत्वन्नः यदि नो ऽस्माकं क्षमं हितं मन्यसे ॥ अन्यथा तानजानतस्तव तानेतवाप्यनर्थः स्यात्
अतः कौ हि तेषां प्रभावः यतो नारायणायेति केवलमभिहिते मा भयं कुर्व्विति वदंतः शीघ्रमागताः ॥ १० ॥ संयमयतीति संयमनः हरिणा हो
उंजस्मरणां हृतान्प्रत्याह ॥ ११ ॥

भा०ष
११

मन्नोन्योजगतःस्तस्थुषश्चपरोधीश्वरोस्ति ॥ अहंतुजनानामेव ॥ तत्रापिनृणामेव ॥ तत्रापिपापिनामेवतत्किंकरःसन्नीश्वरःसतुसर्वेश्वरः ॥ को सौ ॥ यत्रयस्मिन्नुविश्वमोतंप्रोतंचऊर्द्ध्वतिर्य्यक्तंतुषुपटइव ॥ यदंशेभ्योविष्णुब्रह्महरेभ्योस्यस्थित्यादयोभवति ॥ तस्यवशेलोकोवर्त्तते ॥ नसिनासिकायांप्रोतबलीवर्द्दवत् ॥ १२ ॥ एतत्प्रपंचयति ॥ यइतिब्राह्मणादिनामाभिर्वाचिनिजायांतंत्यांदाम्न्याजनंयोबध्नाति ॥ दामभिर्गाः

यमउवाच ॥ परोमदन्योजगतस्तस्थुषश्चओतंप्रोतंपटवद्यत्रविश्वं ॥ यदंशतोस्यस्थितिजन्मनाशानस्योतवद्यस्यवशेचलोकः ॥ १२ ॥ योनामभिर्वाचिजनान्निजायांबध्नातितंत्यामिवदामभिर्गाः ॥ यस्मैबलिंतइमेनामकर्मनिबद्धबद्धाश्चकितावहंति ॥ १३ ॥ अहंमहेंद्रोनिर्ऋतिःप्रचेताःसोमोग्निरीशःपवनोविरिंचिः ॥ आदित्यविश्वेवसवोथसाध्यामरुद्गणारुद्रगणाःससिद्धाः ॥ १४ ॥ अन्येचयेविश्वसृजोमरेशाभृग्वादयोस्पृष्टरजस्तमस्काः ॥ यस्येहितंनविदुःस्पृष्टमायाःसत्वप्रधानाअपिकिंततोन्ये ॥ १५ ॥

बलीवर्द्दानिव ॥ तइमेजीवानामकर्मभिर्निबद्धैर्बद्धाःयस्मैबलिंवहंति ॥ परधीनाःकर्म्मकुर्वंतीत्यर्थः ॥ १३ ॥ यस्यवलीलादुर्विभाव्येत्याह ॥ अहमितिद्वाभ्यां ॥ नस्पृष्टरजस्तमश्चये ॥ ईहितंमभिप्रेतं ॥ चेष्टितंवानविदुः ॥ स्पृष्टमायाःमायायांस्पृष्टाः ॥ ततस्तेभ्योन्येनविदुरितिकिंपुनर्वक्तव्यं ॥ १४ ॥ १५ ॥

राम
११

तन्मायामोहितत्वान्नजानंतीत्युक्तं॥ अविषयत्वाच्चेत्याह॥ यमिति॥ गोभिरिंद्रियैर्हृदा चित्तेन न विचक्षते न पश्यंति॥ यद्वाचा नस्तुवंति॥ यन्मनो न मनुते इत्यादिश्रुतेः॥ आत्मनां जीवानां आत्मानं द्रष्टारं॥ आकृतयो रूपाणि चक्षुर्यथा कर्मभूतानि न जानंति॥ ततः परमात्मनां प्रकाशकं॥ नहि प्रमाता प्रमाणस्य विषय इति भावः॥ एवंभूतः परमेश्वरोस्तीति पूर्वेणैव संबंधः॥ १६॥ भवत्वेवंभूतोन्यः परमेश्वरः॥ ये तु नरस्मात्त्रिभेतव्यं पापिनं रक्षितुं वर्तते वेत्तानाह॥ तस्येति॥ द्वाभ्यां॥ तस्यैव रूपं गुणाः प्रभावादयः स्वभावः भक्तवात्सल्यादिर्येषां ते॥ १७॥ विष्णोर्भूता-

यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते॥ आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथैवाकृतयस्ततः परं॥ १६॥
तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः॥ प्रायेण दूता इह वै मनोहराश्चरंति तद्रूपगुणस्वभावाः॥ १७॥
भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि॥ रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च॥ १८॥ धर्मं
तु साक्षाद्भगवत्प्रणीतं न वै विदुरृषयो नापि देवाः॥ न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः॥ १९॥ स्वयं-
भूर्नारदः शंभुः कुमारः कपिलो मनुः॥ प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं॥ २०॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः॥

नि भृत्याः दुर्दर्शानि दुष्प्रकाशानि लिंगानि रूपाणि येषां तानि॥ तद्भक्तिमतः विष्णुभक्तान् परेभ्यो गुह्यं विशुद्धं दुर्बोधं यज्ज्ञात्वामृतमश्नुते॥ २१॥ भक्तेभ्यः शत्रुभ्यः सर्वतः अग्न्यादिभ्यश्च रक्षंति॥ १८॥ ननु विष्णुभक्ताश्चेत्वाय मधर्मपक्षपातं कृतवंतः तत्राह॥ धर्ममिति॥ ऋषयः भृग्वादयः॥ १९॥ ननु केपि चेन्न जानंति तस्य सत्वे किं प्रमाणं॥ तत्राह॥ स्वयंभूरिति॥ कुमारः सनत्कुमारः॥ वयमित्यात्मानमेव वक्तुं मन्यमानो यमो निर्दिशति॥ २०॥ हे भटाः॥ २१॥

तमेवधर्ममाह एतावानिति ॥२२॥ नचात्रप्रमाणंवक्तव्यंदृष्टत्वादित्याह ॥ नामोच्चारणेति ॥ येनैवकेवलेन ॥२३॥ नच सकृदुच्चारितेन नाम्नाभासेनक
थंसर्वपापक्षयःस्यात् ॥ श्रद्धाभक्त्यावृत्त्यादेरपिविधानात् ॥ तथाहि ॥ सायंप्रातर्गृणन्भक्त्यादुःखग्रामाद्विमुच्यतइति ॥ अतउहनहिदमाहरेणाश्रवणे
त्विति श्रवणंकीर्तनंध्यानंहरेरित्यादिष्वस्मिन्नेवश्रवणेनतत्रतत्रपठ्यते ॥ श्रवणानन्तरेच ॥ पापक्षयश्च भवतिस्मरतांसमहत्त्रिशमिति ॥ अत्रैवच त
स्मात्संकीर्तनंविष्णोर्जगन्मंगलमंहसां ॥ महतामपिकौरव्यविद्ध्यैकान्तिकनिष्कृतमित्यादिनासकृत्कीर्तनादेवगम्यते ॥ किंच ॥ तथासतिकिमि

एतावानेवलोकेस्मिन्पुंसांधर्मःपरःस्मृतः ॥ भक्तियोगोभगवतितन्नामग्रहणादिभिः ॥२२॥ नामोच्चारणमाहात्म्यंहरेःप
श्यतपुत्रकाः ॥ अजामिलोपियेनैवमृत्युपाशादमुच्यत ॥२३॥ एतावतालमघनिर्हरणायपुंसांसंकीर्तनंभगवतोगुण
कर्मनाम्नां ॥ विक्रुश्यपुत्रमघवान्यदजामिलोपिनारायणेतिम्रियमाणअवापमुक्तिं ॥२४॥

तिमन्त्रादयोद्वादशाक्षरीनिष्फलाःस्युः तस्मादिदमनुपपन्नमिव तत्राह एतावतेति ॥ भगवतोगुणानांकर्मणांचनाम्नांसकृत्कीर्तनमितियत् ॥ एताव
तापुंसामघनिर्हरणायपापक्षयमात्राय अलंउपयोगोनास्ति ॥ अलंशब्दोत्रवारणे ॥ तदाहामरसिंहः अलंभूषणपर्याप्तिशक्तिवारणवाचकमि
ति ॥ उपयोगाभावमेवाह ॥ अजामिलोमहापातक्यपिनारायणेतिविक्रुश्य ॥ नतुसम्यक्कीर्तयित्वा ॥ नचपुत्रेविक्रुश्य ॥ नतुहरिं अघवानप्यचिर
म्रियमाणोपिमुक्तिमवाप ॥ नत्वघनिर्हरणमात्रं ॥ अतोनामाभासेनापिसर्वपापक्षयइत्येवतत्त्वं ॥ आवृत्तिश्रद्धादिविधयस्तु
पापवासनानाशार्थाइत्यन्यमेवहरेर्गुणानुवादःखलुसत्त्वभावनइत्यत्र ॥२४॥

यन्नूनमयमर्थं तर्हि द्वादशानां स्मरणमिति तत्राह ॥ प्रायेणेति ॥ महाजनो मन्वादिः ॥ अयं भावः यथा मृतसंजीवनौषधमजानंतो वैद्या रोगनिर्हरणाय
त्रिकटुकनिंबादीनि स्मरंति ॥ तथा तत्त्वयं भूशंभुप्रभृतिद्वादशव्यतिरेकेण यं महाजनाः निगूढत्वान्निरमंतात्वात् द्वादशादिकं स्मरंतीति ॥ किंच
मायया देव्या अलं विमोहितमतिरयं जनः ॥ मधुरं यथा भवत्येवं पुष्पितायां पुष्पस्थानीयैरर्थवादैर्मनोहरायां त्रय्यां जडीकृता अभिनिविष्टा मतिर्य
स्य अतो महत्येव कर्मणि श्रद्धया युज्यमानो नाल्पे प्रवर्तते ॥ दृश्यते हि प्राकृतस्य लोकस्य महति मंत्रादौ श्रद्धा अल्पे वा अश्रद्धा ॥ तस्मादस्याग्रहको

प्रायेण वेद तदिदं न महाजनोयं देव्या विमोहितमतिर्बत माययालं ॥ त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके मह
ति कर्मणि युज्यमानः ॥ २५ ॥ एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भावयोगं ॥ ते मे न दंडमर्हंत्य
थ यद्यमीषां स्यात्पातकं तदपि हंत्युरुगायवादः ॥ २६ ॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भ
गवत्प्रपन्नाः ॥ तान्नोपसीदत हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे ॥ २७ ॥

नास्तीति तैर्नोक्तं ॥ यद्वा स्वाधीनः सिंहोस्तीत्येतावता शृगालादिनिवारणाय तं यथा न प्रयुंज्यते ॥ तथा नितरां तत्त्वात्पातकस्य तत्तन्निरसनाय परम
मंगलं हरेर्नाम स्मरंति ॥ यद्वा नाममाहात्म्यज्ञाने सर्वत्र भक्तिप्रसंगादित्यपारिक् ॥ ग्रंथविस्तरभयान्नातिप्रपंच्यते ॥ २५ ॥ भावयोगं भक्तियोगं
अमीषां पातकं न स्यादेव ॥ यदि स्यात् उरुगायवादो हरेः संकीर्तनं ॥ २६ ॥ तदेवं धर्मतत्त्वं निर्णीय भृत्याननुशास्ति ॥ त इति ॥ ये भगवंतं प्रपन्नाः
ते देवैः सिद्धैश्च परिगीतपवित्रगाथाः वर्णितपवित्रकथाः ॥ अतस्तान्नोपसीदत तत्समीपमपि न गच्छत ॥ वयः कालोपि न प्रभवति ॥ २७ ॥

भा.ष
१२

केतर्हिइंडार्यमानेयारत्पत्राहतानितिह्वाभ्यां॥ अप्रततःउष्टाव॥ तानेवाह सुकरपारारविंदयोर्मकरंदरूपोरसस्तस्माद्विमुखान्॥ कथंभूतानानिःकिंच
नेरजहंत्रजुष्टान्॥ तेषांतापकमाह॥ निरयवर्त्मनिसर्वधर्मशून्येगृहेवद्धानस्माद्येतान्॥१८॥ किंच॥ जिह्वेत्यादि॥ यद्येषांजिह्वेत्याद्यत्पद्वयः॥ नकृत
विष्णुकृत्यंभगवद्व्रतंयैः॥१९॥ भगवंतंक्षमापयति॥ तदिति॥ अयंभावः॥ नःस्वपुरुषैरस्मदीयतेनाप्तैः॥ स्वीयैरेवपुरुषैः यद्यस्मादसत

तानानयध्वमसतोविमुखान्मुकुंदपारारविंदमकरंदरसादजस्रं॥ निःकिंचनैःपरमहंसकुलैरसंगैर्जुष्टान्गृहेनिरयव
र्त्मनिवद्धतस्मान्॥१८॥ जिह्वानवक्तिभगवद्गुणनामधेयंचेतश्चनस्मरतितच्चरणारविंदं॥ कृष्णायनोनमतियच्छिर
एकदापितानानयध्वमसतोःकृतविष्णुकृत्यान्॥१९॥ तत्क्षम्यतांसभगवान्पुरुषःपुराणोनारायणःस्वपुरुषैर्यद
सत्कृतंनः॥ स्वानांमहोनविदुषांरचितांजलीनांक्षांतिर्गरीयसिनमःपुरुषायभूम्ने॥२०॥ तस्मात्संकीर्तनंविष्णोर्जगन्मं
गलमंहसां॥ महतामपिकौरव्यविद्ध्यैकांतिकनिःकृतिं॥२१॥ शृण्वतांगृणतांवीर्याण्युद्दामानिहरेर्मुहुः॥ यथासुजातयाभ

अन्याप्यंकृतंतत्क्षम्यतांत्वयमेवक्षम्यतां॥ महतां॥ स्वानांत्वीयानांनःविदुषांअज्ञानां॥ अहोगरीयसितस्मिन्॥ क्त्याशुद्ध्येन्नात्माव्रतादिभिः॥२२॥
कृतान्निर्यत्नेव॥ महहृतिपाठे॥ स्वीयानांमाहात्म्यंनविदुषांनःक्षमाकार्येतित्यर्थः॥२०॥ तस्मादित्यादिशुकोक्तिः जगतोपिमंगलरूपं॥२१॥
एकांतिकत्वमेवाह॥ शृण्वतामिति॥ व्रतादिभिस्तथानशुद्ध्येत॥२२॥

राम
१२

एतदुपपादयति ॥ कस्माद्विपयोर्मधुलेटि आत्मारयतीति तथा मधुलिट्तात्वछत्वेन पविविसृषामायागुणाेविषयास्तेषु पुनर्न रमते ॥ अन्यत्कतन्मध्या
त्वाद्रहितः ॥ अत एव कामाभिभूतः सन्नात्मनो रजः प्रापंपमाष्टमपि कर्मवृषाप स्विन्नेपमीहते ॥ यतः कर्मणा पुनरपि रजः पापं स्यादेव ॥ कु
जरशौचवत् ॥ सत्वशोधकत्वाभावात् ॥ २२ ॥ नैव विस्मितधियो वयं तु किं ॥ सत्यमुक्तं इत्येवमेनिरे ॥ ततः प्रभृति प्रतिशंकमानाः अस्मान्नैव
षहन्त्यारिति शंकावहंतः नंद्रष्टुमपि विष्यातिस्म ॥ पातन्तेषु विस्मितधियो ज्ञाताः ॥ नैव ततः प्रभृति विष्यातिस्मेत्यर्थः ॥ २४ ॥ कुंभसंभवोगास्त्यो

कस्माद्विपतमधुलिट् न उर्विर्विरहष्टमायागुणेषु रमते वृजिनावहेषु ॥ अन्यत्कामहतआत्मरजः प्रमार्ष्टुमीहेत कर्म यत ए
व रजः पुनः स्यात् ॥ २३ ॥ इत्थं त्वमहंगदिते भगवन्महित्वं तं स्मत्याविस्मितधियो यमकिंकराहै ॥ नैवाच्युताश्रयजनं प्रति
शंकमाना द्रष्टुं च विष्यातिततः प्रभृतिस्मराजन् २४ इतिहासमिममत्यं भगवानकुंभसंभवः ॥ कथयामास मलय आ
सीनो हरिमर्चयन् ॥ २५ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे तृतीयोध्यायः ॥ राजोवाच ॥ देवासुरनृणां सर्गो ना

मेलयेपर्वते आसीनोऽव्यग्रो हरिमर्चयन् ॥ पुनः पुनर्विस्तरतो गानां मृगपक्षिणां ॥ सामासिकस्त्वया प्रोक्तो यस्तु स्वायंभुवेंतरे ॥ १ ॥
र्थं हरेः पादौ स्पृशात्रित्यर्थः ॥ २५ ॥ इति षष्ठे तृतीयः ॥ चतुर्थे रिविनिर्दिवद्ररूपजन्म विवक्षया ॥ प्रचेतः सुतदक्षस्य वंशः साला वर्ण्यते ॥ १ ॥ चतुर्थे
वपजाप्रद्येस्त्रैणाणाधनं हरेः ॥ नपसा हंसगुत्याख्यहोत्रेणोवनिरूप्यते ॥ प्रसक्तात्प्रसक्तेन स्वायंभुवानाच्चवे ॥ नाम प्रभावमा कोपि वंशत्याप्तं उ
पत्यते ॥ १ ॥ देवाहरेतिद्वाभ्यां सामासिकः संक्षिप्तोयः प्रोक्तस्तृतीयस्कंधे ॥ १ ॥

भा.६
१४

व्यासं विस्तारं ॥ त्वं नः यथा शक्त्या यथा ससर्ज तां शक्तिं तं च प्रकारं ज्ञातुमिच्छामि ॥ अनुसर्गमनुवृत्तं सर्गं ॥ २ ॥ २ इत्यादि रूपेण ससर्जेति वक्ष्यत् दक्षजन्मप्र
कारमाह ॥ यदेति ॥ प्राचीनबर्हिषः पुत्राः यदा समुद्रमध्यादुन्मग्ना निर्गताः तदा गां पृथिवीं द्रुमैर्वृतां ददृशुः नारदोपदेशतः प्राचीनबर्हिषो निवृत्या
अराजके सति कृष्याद्यभावात् ॥ ४ ॥ तपसा दीपितो मन्युर्येषां ते तेषां द्रुमाणां दग्धुमिच्छया ॥ ५ ॥ ताभ्यां वाय्वग्निभ्यां दह्यमानान्तान्द्रुमान् वनस्पती

तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा ॥ अनुसर्गं यया शक्त्या ससर्ज भगवान्परः ॥ २ ॥ सूत उवाच ॥ इति संप्रश्नमाकर्ण्य राजर्षेर्बा
दरायणिः ॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तमः ॥ ३ ॥ श्रीशुक उवाच ॥ यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ॥ अंतः समुद्रादुन्म
ग्ना ददृशुर्गां द्रुमैर्वृतां ॥ ४ ॥ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः ॥ मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥ ताभ्यां निर्दह्य
मानांस्तानुपलभ्य कुरूद्वह ॥ राजोवाच महान्सोमो मन्युं प्रशमयन्निव ॥ ६ ॥ न द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ ॥ विवर्ध
यिषवो यूयं प्रजानां पतयः स्मृताः ॥ ७ ॥ अहो प्रजापतिपतिर्भगवान्हरिरव्ययः ॥ वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ ८ ॥
अन्नं चराणामचरा ह्यपदः पादचारिणां ॥ अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ ९ ॥ यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः
प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥ आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं ॥ पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ ११ ॥

नां राजा सोम उवाच ॥ ६ ॥ मा द्रुमेभ्य इति नवभिः हे महाभागा विशेषेण वर्धयितुमिच्छवः ॥ ७ ॥ प्रजापतीनां तदन्नभोज्यदाता हो ऊर्जितरस्याद
अहो इति त्रिभिः ॥ ऊर्जं अन्नं इषं रसं ॥ ८ ॥ १० ॥ अतः आतिष्ठत आश्रयत ॥ सतां मार्गं सुपरामं ॥ पित्रादिभिर्जुष्टं ॥ ११ ॥

एम
१४

प्रजानां प्रजापतिरेव बंधुः । अतस्तज्जीविकानाशेन कर्त्तव्य इति दृष्टांतपंचकेनाह । बालानां मातापितरौ अज्ञानां ज्ञानदो गुरुर्धर्म एव सुहृद्गत ॥ १२ ॥
इष्टाधिष्ठानत्वाद्भूतेष्टोऽहं न युक्त इत्याह ॥ भूतेष्वेहेष्विति ॥ वः युष्मानिः ॥ १३ ॥ आकाशादेहेषु समुत्पतितं तं भूतं कस्मिन् कनितार्थः । आत्मविचारेणापो
नियच्छेत ॥ १४ ॥ खिलानां शोषणेन वः युष्माकं वशिवमस्तु ॥ दृष्टं दृष्टं हरणार्थं तदीयं कन्यादि हरति ॥ वार्क्षी वृक्षैः पालिता ॥ १५ ॥ आमंत्र्य संतो वाचि

लोकानां पितरो बंधुः ईशः पद्मात्मविद्याः पतिः ॥ पतिः प्रजानां भिक्षूणां गृत्यत्तानां बुधः सुहृत ॥ १२ ॥ भूतं देहेषु भूतानां आत्मा तेहि हरी
श्वरः ॥ सर्वेतच्छिष्ममीशं धूमेवं वतो षितोत्थसौ ॥ १३ ॥ यः समुत्पतितं देह आकाशान्मनुगुर्ज्वले ॥ आत्मजित्तामपापद्दे तस्य गु
णानतिवर्त्तते ॥ १४ ॥ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः ॥ वार्क्षीत्येषा वराकन्या पत्नीत्वे प्रतिगृह्यतां ॥ १५ ॥ इत्यामंत्र्य वरा
रोहीं कन्यामाप्सरसीं नृप ॥ सोमो राजा ययौ दत्वा ते धर्मेणोपयेमिरे ॥ १६ ॥ तेभ्यस्तस्यामभवत दक्षः प्राचेतसः किल यस्य प्र
जाविसर्गेण लोका आपूरितास्त्रयः ॥ १७ ॥ यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममावहितः शृणु
॥ १८ ॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन्नभस्थलजलौकसः ॥ १९ ॥ तमबृंहितमालोक्य प्रजास
र्गं प्रजापतिः ॥ विंध्यापादानुपव्रज्य सोऽचरद्दुष्करं तपः ॥ २० ॥ तत्राघमर्षणं नाम तीर्थं पापहरं परं ॥ उपस्पृश्यानुसवनं तपसा तो
षयद्धरिं ॥ २१ ॥ अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजं ॥ तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ २२ ॥

त्वा सुस्वसारः प्रचेतसः प्रजा वा यासां छत्रां ॥ १६ ॥ १७ ॥ दुहितृवत्सल इति तस्य कन्या वंश एवेत्युक्तं ममपमनः ॥ १८ ॥ प्रजापतिर्दक्षः ॥ १९ ॥ अबृंहितमपुष्टं विंध्यस्य
पादान् प्रत्यंतपर्वतान् ॥ २० ॥ ॥ हंसगुह्याख्येन स्तोत्रेण ॥ कस्य दक्षस्य ॥ २२ ॥

भा॰ष
१५

परायसर्वोत्तमाय नमो दधे नमनं करोमि ॥ परत्वे हेतुः अवितथा अनुभूतिः चिच्छक्तिर्यस्य ॥ अतो गुणत्रयाभासो जीवस्तन्निमित्तं मायाव
न्तयोर्बंधवे नियंत्रे ॥ एवमपि गुणोत्थतत्त्वबुद्धिर्येषां ते जीवैरदृष्टं धाम स्वरूपं यस्य ॥ तत्र हेतुः निवृत्तं मानं यस्मात् ॥ प्रमाणांतरैर्निवृत्तमा
नमवधिश्च यस्मात् ॥ तर्हि कथं तत्सिद्धिः अत आह स्वयंभुवे स्वप्रकाशाय ॥ २३ ॥ अदृष्टधामत्वं दर्शयन्नाह ॥ नेति ॥ पुरुषः सखा जीवः
अस्मिन्पुरे देहे वसन्नपि अस्य सहवसतः सख्युर्यस्य सख्यं कर्मणि प्रवर्त्तकत्वादिकं नावैति न जानाति तस्मै ॥ कुतः व्यक्तदृष्टेः प्रपंच

प्रजापतिरुवाच ॥ नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबंधवे ॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्त
मानाय दधे स्वयंभुवे ॥ २३ ॥ न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन् संवसतः पुरेऽस्मिन् ॥ गुणो यथा गुणिनो
व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि ॥ २४ ॥ देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ॥ सर्वं पु

दृष्टेः ॥ नहि दृष्टा दृश्यो भवतीति ॥ प्रथमांतपाठे व्यक्ते प्रपंच एव दृष्टिर्यस्य सः ॥ मान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे ॥ २५ ॥
गुणो विषयो गुणिनो विषयिणः इंद्रियादेः स्वप्रकाशत्वं यथा न वेत्ति तद्वत् ॥ २४ ॥ न तु गुणो जडत्वान्न जानाति जीवस्तु चेतनः किमिति
न जानाति ॥ तत्राह देह इति ॥ देहश्च असवश्च प्राणाश्च अक्षाणीन्द्रियाणि मनवश्च अंतःकरणानि ॥ भूतानि च मात्राश्च तन्मात्राणि आत्मानं स्व
रूपं स्वं इन्द्रियवर्गं तयोः परं देवतावर्गं च न विदुः पुमान् जीवस्तु सर्वमेतत्त्रयं वेद ॥ गुणांश्च तन्मूलभूतांश्च वेद ॥ तज्ज्ञोऽपि सन् यं सर्वज्ञं न वेद तं

षप
१५

अहं इत्याभत्वमुद्धत्यामिष्टप्रकाशात्मनामाह ॥ यत्रेति मनसः उपशमः समाधिः ॥ मनउत्पन्नाविविलयः मनसो नाशस्त्वप्रयोगि विविक्षेपः ॥ तदाह नामरूपे
रूपं तेन येन तत्ख्यातस्य ॥ उपरमे हेतुः ॥ दृष्टदर्शनसम्बन्धितिस्त्वतयोः संप्रमोषात्त्राशात् ॥ तदाय केवलेन चिद्रूपतानेन प्रतीयते ॥ तस्मै हंसायशु
द्धाय शुद्धचिन्मनः सम्प्रतीतिस्थानाय स्वतस्मै नमः ॥ २६ ॥ एवंभूतः केषां प्रतीयत इति अपेक्षायामाह मनीषिण इति द्वाभ्यां ॥ विवेकिनो य
निः कर्षन्ति विविध्यध्यायंति ॥ यतिनिर्वाणसुखानुभूतिर्मयप्रसीदतामिति द्वयोरन्वयः ॥ एवं निः कर्षतां प्रतीयत इति भावः ॥ किमिति निः कर्षन्ति स्व
शक्तिभिर्गूढं स्वप्रकाशमानं ॥ कतिभिर्नवभिः पुनः स्वत्रिवृद्भिः त्रिगुणाभिः स्वस्वविशात्मपाधिभिर्गूढं स्वशाविशांनिः कर्षतीत्यर्थः ॥ यत्रानवभिः

ना   यत्रोपशमो मनसो हंमरूपरूपस्य दृष्टस्यातिसंप्रमोषात् ॥ यदि प्रतिकेवलयात्मसत्तयाहं सायतस्मै शुचिविमनेनमः ॥ २६ ॥
मनीषिणोन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिस्त्रिवृद्भिः ॥ वह्निं यथा दारुणि पांचदश्यं मनीषया निः कर्षन्ति गूढं ॥ २७ ॥
स एव मायाशेषविशेषमायानिशेषमायानिषेधनिर्वाणसुखानुभूतिः ॥ स सर्वनामा स च विश्वरूपः प्रसीदतामनिरु

प्रकृतिपुरुषमहदहंकारपंचतन्मात्ररूपाभिः ॥ त्रिवृद्भिस्त्रिगुणात्मकाभिः ॥ चकारात् षोडशविकाररूपाभिश्च कथंभूतं ॥   क्तात्मशक्तिः ॥ २८ ॥
निः कर्षन्ति ॥ मनीषयांतर्हृदि संनिवेशितं निश्चलीकृतं ॥ पांचदश्यं ॥ पंचदशसामिधेनीमंत्रैः प्रकाश्यं ॥ अलौकिकं वह्निमिव ॥ अहंकारमसंदा
नो स्वं परमात्मानं निः कर्षन्तीत्यर्थः ॥ २७ ॥ अशेषाः विशेषाः यस्याः सा मायायाः निषेधेन निर्वाणसुखेऽनुभूतिर्यस्य ॥ अप्रत्यक्षप्रतिषेधात्
भवान्तप्रसक्तिमाह ॥ स एव सर्वनामा स एव विश्वरूप इति ॥ तद्रूपत्वेपि वास्तवत्वाभावान्निषेधः संभवतीत्याह ॥ अनिरुक्तात्मशक्तिर्मायया

॥ ८ ॥ श्रीः

ननु यदि केवलया त्वसत्त्वया प्रतीयते तर्हि सर्वनामत्वं विश्वरूपत्वं वा नोपपन्नं ॥ वागाद्यगोचरत्वादित्याशंक्याह सर्वैर्नामभिर्वाच्यत्वप्रत्यक्षादिदृश्यत्वं तथा
विश्वरूपं च सत्तो मा भूत् तथापि मायया त्वेतदिति श्लोकत्रयेणोपपादयन्नाह यत्र प्रसक्तो ऽति ॥ यद्यद्वचसा निरुक्तं अभिहितं धिया निरूपितं व्यवसितं ॥ अक्षभिर्वा
इन्द्रियैर्वा निरूपितं गृहीतं ॥ उत अपि मनसा निरूपितं संकल्पितं ॥ यस्य स्वप्रकाशत्वं तस्य तत्स्वरूपं मा भूत् ॥ स्वरूपत्वाभावे हेतुः ॥ हि यस्मान्नु गुणानामेव
रूपं ॥ पाठांतरे गुणैर्व्यधितं ॥ सत्त्वगुणव्यतिरिक्तः यतो गुणानां मायाया विसर्गाप्ययौ प्रलयोत्पत्ती यस्माल्लक्ष्यन्त इति तथा ॥ चेतनाधिष्ठानं विना तयोरसंभावा
त् यद्वा यस्य स्वरूपं मा भूत् अभवति तस्मै नमः इति तृतीयेनान्वयः ॥ २८ ॥ न चैवं वस्तुतो गुणा स्वरूपत्वाभावप्रसंगो ... अनिरुक्तात्मशक्तिरित्यनेन द्यो
तितं मायाया सर्ववाच्यत्वेन विश्वरूपत्वमाह ॥ यस्मिन्नधिकरणे ॥ यतो ऽपादानात् ॥ येन करणेन यस्य संबंधि यस्मै संप्रदानाय ॥ यद्दीप्सितं तम

यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसोत यस्य ॥ मा भूत्स्वरूपं गुणरूपं हि तत्तत्स वै गुणापायविसर्गलक्षणः ॥ २९ ॥
यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च ॥ परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकं ॥ ३० ॥

यः कर्त्ता कुरुते स्वतंत्रः कार्यते वा अन्येन प्रयोज्यकर्त्ता तद्ब्रह्मेति प्रत्येकं संबंधः ॥ अत्र च सप्तभिर्विभक्तिभिः सप्त विभक्त्यर्था दर्शिताः ॥ यथेति च क्रियाकारक
संबंधप्रकारवाचिना अव्ययानामर्थाः ॥ कुरुते कार्यते चेति स्वार्थपरार्थक्रियाश्रयत्वं सर्वेषां दर्शिताः ॥ चशब्देन भावकर्मादिविहितप्रत्ययार्थाः
संगृहीताः ॥ तद्ब्रह्मैवेति ॥ कुत इत्यत्राह ॥ तद्धेतुः तेषां कारणं ॥ तत्कुतः सर्वेभ्यः प्राक्प्रसिद्धं ॥ ननु ब्रह्मादयस्य हेतवः श्रूयंते ॥ अवरे च दर्शितेत
तत्कार्यं ब्रह्मैवेतद्धेतुस्तत्राह परेषामवरेषां च हेतूनां परमं कारणं ॥ ननु सर्वकारणत्वे तस्य किं नाम सहकारि भवेत् न तदानीमन्यस्याभावात् ॥ सत्यं नि
रपेक्षमेव तत्कारणमित्याह ॥ अनन्यत् विजातीयशून्यं च तस्मै नमः इत्युत्तरेणान्वयः ॥ ३० ॥

नन्वेवं ब्रह्म चेद्विश्वस्य हेतुस्तर्हि न कदाचिदनीदृशं जगदिति वदन्तो मीमांसकाः कुतो न विवदन्ते । तेऽश्चान्ये प्रधानावादिनः संवदन्ते नैव ते च तत्त्व-
विद्भिर्बोधिता अपि कुतः पुनः पुनर्मुह्यन्तीति तत्राह ॥ यस्य शक्तयो मायाया विद्याद्याः विवादस्य क्वचित्संवादस्य भुवः स्थानानि भवन्ति तस्मै नमः ॥३१॥
ननु किं तद्ब्रह्म यस्य शक्तयो विवादादिभुवो भवन्ति । तत्राह । अस्तीति । योगं उपासनाशास्त्रं । तत्र हि विष्ण्वादिरूपेणोपासनाया पातालपादादिक-
ल्पनात्तु उपास्यत्वेन विधीयते । नास्तीति सांख्यं ज्ञानशास्त्रं । तत्र हि अपाणिपादः अचक्षुः श्रोत्रमिति च पादादीनां नास्तीति निषिध्यते । तयोर्योग-
सांख्ययोः यत्किंचित्समं अनुकूलं मानं अवेक्षितं प्रतीतं तत्तद्बृहद्ब्रह्म विवादेऽपि विवादास्पदं ब्रह्मेत्यर्थः । विवादं स्फुरयति । भिन्नौ अस्तिनास्तीत्येव-

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति । कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥३१॥ अस्तीति नास्ती-
ति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मणोः । अवेक्षितं किंचन योगसांख्ययोः समं परं ह्यनुकूलं बृहत्तत् ॥३२॥ योऽनुग्रहार्थं
भजतां पादमूलमनामरूपो भगवाननन्तः । नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ॥३३॥

भूतौ विरुद्धौ धर्मौ ययोस्तयोर्भिन्नविषयत्वे विरोधो न स्यादित्येकस्थयोरित्युक्तं । एकविषययोः कुतः वस्तुनिष्ठत्वात् । समं त्वविरोधः परं हि यतो विधि-
प्रतिषेधयोरविषयः । तयोः पादादिविषयत्वात् । नहि तथापि अविषयस्य सद्भावे किं प्रमाणं तत्राह । अनुकूलमधिष्ठानं विना पादादिकल्पनायोगात्
अवधिं विना तन्निषेधायोगाच्च । तयोरुपपादकत्वेन सिद्धमित्यर्थः । तस्मै नम इति पूर्वस्यानुषंगः ॥३२॥ नन्वुदासीनस्य समस्य न मह्यकारे को लाभस्तत्राह
य इति । पादमूलं भजतामनुग्रहार्थं प्राकृतनामरूपरहितोऽपि जन्मभिरवतारैर्विशुद्धानि तत्सत्त्वानि रूपाणि कर्मभिर्नामानि च यो भेजे । तत्कुतः । भगवान्

ननुत्वादृशाः सकामाः गणेशादीन्प्रार्थयंते ॥ त्वं तु तान्विहाय किमिति भगवंतमेव प्रार्थयसे तत्राह ॥ प्राकृतैरर्वाचीनैर्ज्ञानपथैरुपासनामार्गैः ॥ यथा
शयं तत्तद्वासनानुसारेण यो देहंगतो तथापि तत्तद्देवतारूपेण विविधो भाति ॥ यथा वायुः पार्थिवं वपुःकारिणं धमेदमाश्रित्य नानागंधवान्विभा
ति ॥ रेणोर्गुणं ॥ भूमरत्वारिकं आश्रित्य नानारूपवान्प्रतीयते तद्वत्तत्सेवकानां तत्तद्देवतारूपेण फलदातृत्वात् ॥ स ईश्वर एव मम मनोरथं सत्यं करोतु
किमंतर्गडुभिर्दैवतांतरैरित्यर्थः ॥ तदुक्तं गीतासु ॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहमिति स तया

यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ॥ यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथं ॥ ३४ ॥
श्रीशुक उवाच ॥ इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे ॥ आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः ॥ ३५ ॥ कृतपादः सुप
र्णांसे प्रलंबाष्टमहाभुजः ॥ चक्रशंखासिचर्मेषुधनुःपाशगदाधरः ॥ ३६ ॥ पीतवासा घनश्यामः प्रसन्नवदनेक्षणः ॥ वन
मालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥ महाकिरीटकटकः स्फुरन्मकरकुंडलः ॥ कांच्यंगुलीयवलयनूपुरांगदभूषितः ॥ ३८ ॥

श्रद्धयायुक्तस्तस्याराधनमीहते ॥ लभते च ततः कामान्मयैव विहितान्हि तान् ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति च ॥ ३४ ॥ संस्तुवतो द
क्षस्य भगवान्प्रत्यक्षोऽभूत ॥ ५ ॥ तं वर्णयति सार्द्धैस्त्रिभिः ॥ सुपर्णस्यांसे स्कंधे कृतौ पादौ येन ॥ प्रलंबा अष्टौ महांतो भुजा यस्य ॥ चक्राद्यष्टायुध
धरः ॥ ६ ॥ प्रसन्ने वदनेक्षणे च यस्य ॥ वनमालया निवीतं कंठादिपादपर्यंतं व्याप्तमंगं यस्य ॥ लसंतौ श्रीवत्सकौस्तुभौ यस्य ॥ ७ ॥ महांति कि
रीटकटकादीनि यस्य ॥ स्फुरंती मकरकुंडले यस्य ॥ कांच्यादिभिर्विभूषितः ॥ वलयमत्र पादभूषणं द्रष्टव्यं ॥ करकस्योक्तत्वात् ॥ ३८ ॥

त्रैलोक्यमोहनं श्रीवत्सशोभमानमाल्यं ।। हरयूथपैर्लोकपालैः ।। ए ।। ४० ।। आपूरितानि मनोद्वाराणीन्द्रियाणि तैर्यथाह्लादिन्यो नद्यो निर्झरैरापूर्यंते ।। तथाप
हानंदपूर्णत्वेनावृत्तिकत्वाद्वाग्वादीनां न किंचिद्वक्तुं शक्तो भूदित्यर्थः ।। ४१ ।। यद्यप्यसौ नावोचत्तथापि चित्तज्ञ इदं वक्ष्यमाणमाह ।। ४२ ।। भावं म
त्त्रिगतः प्राप्तः ।। २ ।। यत यत त्वत्तपः अस्य विश्वस्योद्बृंहणं वृद्धिकरं अतस्तेहं प्रीतः मद्रूपमेतं लोकसमृद्ध्यर्थत्वेत्वत्प्रतीतेः ।। किंकारणं तत्रा

त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः ।। वृतो नारदनंदाद्यैः पार्षदैः सुरयूथपैः ।। ३९ ।। स्तूयमानोनुगायद्भिः सिद्धगंध
र्वचारणैः ।। रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ।। ४० ।। ननाम दंडवद्भूमौ प्रहृष्टात्मा प्रजापतिः ।। न किंचनोदीरयितु
मशकत्तीव्रया मुदा ।। आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः ।। ४१ ।। तं तथावनतं भक्तं प्रजाकामं प्रजापतिं ।। चित्तज्ञः स
र्वभूतानामिदमाह जनार्दनः ।। ४२ ।। श्रीभगवानुवाच ।। प्राचेतस महाभाग संसिद्धस्तपसा भवान् ।। यच्छ्रद्धया मत्परया
ते मयि भावं परं गतः ।। ४३ ।। प्रीतोहं ते प्रजानाथ यत्तेस्योद्बृंहणं तपः ।। ममैष कामो भूतानां यद्भूयासुर्विभूतयः ।। ४४ ।।
ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः ।। विभूतयो मम ह्येता भूतानां भूतिहेतवः ।। ४५ ।।

ह ममेति ।। भूतानां विभूतयः समृद्धयो भूयासुरिति यत एष एव मम कामः ।। अतो मत्कामपूरणादेवाहं प्रीतोस्मीत्यर्थः ।। ४४ ।। भूतिविस्तार
प्रयत्नश्च तवोचित एवेत्याह ।। ब्रह्मेति ।। भवंतः ।। प्रजापतयः ।। भूतेहद्भवस्य हेतवः ।। ४५ ।।

विश्वविसृष्ट्यर्थेन त्वन्नप्रसाः स्वप्रीतस्त्वमुक्तं ॥ तदेव तत्पत्तो वस्यममाह तस्मान्मयि लोकस्य संगात्स्मान्मयि लोकवृद्धिकराणि विद्यादीनि सन्तीति ॥ तपः यम
नियमादिसहितं ध्यानं मे हृदयं ॥ विद्या सांगमंत्रजपः साध्यानं ततनोतीति तनुर्देहः ॥ क्रियाध्यानादिविषयः पुंव्यापारो भावनाशब्दवाच्यस्तेन हि
ध्यानादिकमाक्रियत इति आकृतिः जाताः स्वनिष्पत्राः क्रतवो यागानि शिरो वा एतद्यज्ञस्य यत्प्रवर्ग्यः ग्रीवा उपसदः ॥ चक्षुषी आज्यभागावित्या
दिश्रुतेः ॥ धर्मकृत्वाद्यपूर्वं ॥ आत्मा मनः ॥ हृदयाश्रयत्वात् ॥ ह्रायत्तश्च जन्तुरेव असवः प्राणाः संतर्पणीयत्वात् ॥ ४६ ॥ तपसः संतानवृद्धिहे

तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाकृतिः ॥ अंगानि क्रतवो जाता धर्म आत्मासवः सुराः ॥ ४६ ॥ अहमेवासमेवाग्रे नान्यत्किं
चांतरं बहिः ॥ संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥ ४७ ॥ मय्यनंतगुणे नंते गुणतो गुणविग्रहः ॥ यदासीत्तत एवा
द्यः स्वयंभूः समभूदजः ॥ ४८ ॥ स वै यदा महादेवो मम वीर्योपबृंहितः ॥ मेने खिलमिवात्मानं उद्यतः सर्वकर्मणि ॥ ४९ ॥
अथ मेभिहितो देवस्तपोतप्यत दारुणं ॥ नवविश्वसृजो युष्मान्येनादावसृजद्विभुः ॥ ५० ॥

तत्त्वं दर्शयितुं द्वितीयतृतीयोक्तमिति हासमाह चतुर्भिः ॥ अहमेवेति वस्त्वंतरव्यावृत्तिः ॥ आसमेवेति क्रियांतरव्यावृत्तिः ॥ आंतरं ग्राहकं बहिर्ग्रा
ह्यं ॥ संज्ञानमात्रं चैतन्यमात्रं ॥ अव्यक्तं इंद्रियादिभिरनभिव्यक्तं ॥ अत एव प्रसुप्तमिव विश्वतः सर्वतः गुणतो मायातः ॥ ४७ ॥ गुणमयो विग्र
हो ब्रह्मांडं ॥ ततः तदैव अजः अयोनिजः ॥ ४८ ॥ खिलमसमर्थमिव ॥ ४९ ॥ मे मया नपतपेत्यभिहितः यत्तयेन तपसा ॥ ५० ॥

संततिविवृद्ध्युपायमाह एषेति ॥ अंग हे दक्ष पंचजनाख्यस्य प्रजापतेः ॥ १ ॥ मिथुनस्य योर्व्यवायो रतिः स एव धर्मो यस्य स त्वं ॥ तथाभूतायां य
स्यां ॥ २ ॥ मायया निमित्तभूतया मत्तेऽहं मिथुनीभूय भविष्यंति ॥ पुत्रादिरूपेणोत्पत्स्यन्ते ॥ ५२ ॥ ४ ॥ इति षष्ठ चतुर्थः ॥ पंचमे नारदेनाय
वाचः कृते स्थनारितान् ॥ हृतानाकर्ण्य दक्षो मुनिं शशापेति निरूप्यते ॥ १ ॥ अपृथक् धर्मशीलाः एकाचारस्वभावाः ॥ २ ॥ तत्र प्रतीच्यां दिशि
एषा पंचजनस्यांग दुहिता वै प्रजापतेः ॥ असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यतां ॥ ५१ ॥ मिथुनव्यवायधर्मस्त्वं प्रजासर्ग
मिमं पुनः ॥ मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥ ५२ ॥ त्वत्तोऽधस्तात्प्रजाः सर्वाः मिथुनीभूय मायया ॥ मदीय
या भविष्यंति हरिष्यंति मे बलिं ॥ ५३ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा मिषतस्तस्य भगवान्विश्वभावनः ॥ स्वप्नोपलब्धार्थ इव तत्रैवां
तर्दधे हरिः ॥ ५४ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे चतुर्थोऽध्यायः ॥ श्रीशुक उवाच ॥ तस्यां स पांचजन्यां वै विष्णुमायोप
बृंहितः ॥ हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ॥ १ ॥ अपृथक्धर्मशीलास्ते सर्वे दाक्षायणा नृप ॥ पित्रा प्रोक्ताः प्रजासर्गे प्र
तीचीं प्रययुर्दिशं ॥ २ ॥ तत्र नारायणसरस्तीर्थं सिंधुसमुद्रयोः ॥ संगमो यत्र सुमहन्मुनिसिद्धनिषेवितं ॥ ३ ॥ तदुपस्पर्शनादे
व विनिर्धूतमलाशयाः ॥ धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः ॥ प्रजाविवृद्धये यत्तान्
देवर्षिस्तान्ददर्श ह ॥ ५ ॥
सिंधोर्नद्याः समुद्रस्य च यः संगमस्तत्रस्थं नारायणसरो नाम तीर्थं तत्र प्रययुरित्यन्वयः सुमहदिति विस्तीर्णं ॥ ३ ॥ विनिर्द्धूतोऽपगारिर्य
स्मात्स आशयो येषां ॥ ४ ॥ तान्संवृद्धस्तत्वा नपि ॥ पित्रादेशजाद्येन प्रजाविवृद्धये यत्तान्युक्तान्ददर्श ॥ ५ ॥

भा॰ष॰ अहो मोक्षमार्गाधिकारिणः संत एते प्रवृत्तिनिष्ठैः कर्मभिर्भ्रंश्येरन्निति कृपयातान्निगूढार्थैर्वाक्यैः सह उपदिशति स्म ॥ नारद उवाचेति चतुर्भिः पालकाः
१९ संतोऽपि वालिशाः अज्ञा यूयं ॥ कथं प्रजाः स्रक्ष्यथ ॥ वतेति खेदे ॥ वालकाः इति पाठे वालिशत्वे हेतुः ॥ ६ ॥ एक एव पुरुषो यस्मिन्नृत द्राष्ट्रं ॥ अदृष्टे
त्यनुषंगः ॥ विलं चेत्यादि द्वितीयांतानां अविज्ञाय कथं सर्गं करिष्यथेति तृतीयेनान्वयः ॥ पंचपंचानां पंचविंशतेरद्भुते गृहे ॥ ७ ॥ क्षौरपव्यं क्षुरैः
पविभिः वज्रैश्च निर्मितमिवातीति दृढं दृढं चेत्यर्थः ॥ स्वयं स्वतंत्रं ॥ भ्रमिं भ्रमणस्वभावं ॥ विपश्चितः सर्वज्ञस्य स्वपितुरादेशमात्मनो नुरूपम

उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः ॥ अदृष्ट्वांतं भुवो यूयं वालिशा वत पालकाः ॥ ६ ॥ तथैकपुरुषं राष्ट्रं विलं चादृष्टनि
र्गमं ॥ बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिं ॥ नदीमुभयतो वाहां पंचपंचाद्भुतं गृहं ॥ ७ ॥ क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्व
यं भ्रमिं ॥ कथं स्वपितुरादेशमविद्वांसो विपश्चितः ॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ८ ॥ श्रीशुक उवाच ॥ तन्निशम्याथ
हर्यश्वा औत्पत्तिकमनीषया ॥ वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥ ९ ॥ भूः क्षेत्रं जीवसंज्ञं यदनादि निजबंधनं ॥ अदृष्ट्वा त

विद्वांसो ज्ञानंतः पूर्वोक्तं चैकपुरुषं राष्ट्रमित्याद्यविज्ञाय अहो कथं सर्गं करिष्यथेत्यन्वयः ॥ ९ ॥ वाचः कूटं ॥ स्य निर्वाणं किमसत्कर्मभिर्भवेत्
परोक्षवादेनार्थांतरमिव प्रतीयमानं वचनं ॥ औत्पत्तिकी सहजा मनीषा विचारशक्तिर्यस्यास्तया धिया स्वयमेव विममृशुः विचारितवंतः ॥ ९ ॥ नार
दोक्तवाक्यानां तैर्विमृष्टान् निर्णीतानर्थानाह दशभिः अदृष्ट्वांतं भुवः इत्यत्र भूशब्दार्थमाह ॥ भूरिति क्षेत्रं जीवसंज्ञं जीवस्य तं लिंगशरीरं तत् निजबं
धनमात्मनो बंधकारणं ॥ अंतशब्दार्थमाह ॥ निर्वाणं नाशं ॥ असद्भिर्मोक्षानुपयोगिभिः किं भवेत् किमपि ॥ १० ॥

जी१

एम
१९

एकएवेत्यस्यार्थमाह एकएवेति सर्वः सर्वसाक्षी सर्वः सर्वसाक्षी स्वाश्रयः स्वाधारः अभवंनित्यमुक्तं असद्भिरीश्वरसमर्पितैः कर्मभिः ॥१॥
विलंबाद्दृष्टनिर्गमं इत्यस्यार्थमाह उमान्यजन्नाप्याप्यविलस्वर्गपातालंगतइवनैवेति नावर्त्तते तत्रात्यक्तधामज्योतीरूपं ब्रह्मस्य अविदः अवि-
द्यः असद्भिः नश्वरस्वर्गादिसाधनैः कर्मभिः ॥२॥ बहुरूपोप्रियमित्यस्यार्थमाह नानारूपेति स्वैरिणीवच्चंचलीवविमोहकैरजस्रादिगुणैरा-
न्विता तत्रिष्टं तस्याश्च वशानां विवेकं अगतस्य अज्ञानस्य असद्भिरशांतैः ॥३॥ उमांसंयुक्तलीपतिमित्यस्यार्थमाह तस्याः संगेन भ्रंशितमै-
श्वर्यत्वात् अंतस्य कल्पिता भार्या यस्य तत्कृत तस्यागतीः हेतवः खलकृत्याः गच्छंतं तस्य जीवमबुधस्याज्ञानतः असद्भिर्बुद्ध्याविवेकयोगैः

एकएवेश्वरस्तस्थौ भगवान्स्वाश्रयः परः । तमदृष्ट्वा भवंत्येतः किमसत्कर्मभिर्भवेत् ॥१॥ उमान्येवेति यज्ञत्वा विलस्वर्गगतो यथा ।
प्रत्यग्धामा विदेव किमसत्कर्मभिर्भवेत् ॥२॥ नानारूपात्मनो बुद्धिः स्वैरिणीवद्गुणान्विता । तन्निष्ठमगतस्येह किमसत्कर्म-
भिर्भवेत् ॥३॥ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत् । तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥४॥ सृष्ट्यप्ययकरीं मायां वेलाकू-

॥४॥ नदीमुभयतो वाहामित्यस्यार्थमाह सृष्ट्यप्ययौ करोतीति उभयतः प्रवाहो दर्शितः वेलांतवेगितां मत्तस्य तामवित्तस्य किमसत्कर्मभिर्भवेत्
लाकूलेप्रवाहपतितानां निर्गमस्थानं तपोविद्यादि तस्यां तत्समीपे वेगितां निर्गमप्रतिबंधाय क्रोधाहंकारादिभिः कृतवेगां मत्तस्य तद्वेगेन वि-
वशस्य अत एव तां तथाभूतामवित्तस्य अविचारयतः असद्भिर्मायिकैः यद्वा वेलाकूलं समुद्रस्य व्यवहारस्थानं तत्समीपे समुद्रवद्धिकारो यस्यां
यथा उभयतो नर्वहिः कृतवेगा नदी भवति एवं समुद्रकल्पस्यात्मनो व्यवहारस्थाने देहे जन्ममरणादिभिः कृतवेगामित्यर्थः वेगिनीमिति पाठे
वेगवतीं ॥५॥

भा०ष
१०

पंचपंचेत्यस्यार्थमाह ॥ पंचविंशतितत्त्वानां पुरुषो नियामी ॥ अद्भुतदर्पणं आश्चर्यरूप आश्रयः ॥ अध्यात्मं कार्यकारणसंघातानाधिष्ठातारं तमबुध
स्य ॥ मिथ्याभूतात्मकृतैः ॥१६॥ क्वचिद्धंसमित्यस्यार्थमाह ॥ ऐश्वरं ईश्वरप्रतिपादकं विविक्तं परं विज्ञ तद्रूपं च तत्के येनेति हंसपदं व्याख्यातं
बंधमोक्षावनुदर्शयतीति तथा ॥ अनेन चित्राः कथा यस्येति व्याख्यातं ॥ तदुत्सृज्य अनभ्यस्य अज्ञात्वा च अविदुषो ॥ अपद्धिर्वैर्हिर्भिर्वैः ॥१७॥ क्षौ
रपव्यमित्यस्यार्थमाह ॥ कालचक्रमिति ॥ भ्रमिः भ्रमणात्मकं ॥ तीक्ष्णमिति ॥ निःकर्षयदिति क्षौरपव्यपदं व्याख्यातं ॥ तदबुधस्य स्वतंत्रमेव फल

पंचविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणं ॥ अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत ॥१६॥ ऐश्वरं शास्त्रमुत्सृज्य बंधमोक्षानु
दर्शनं ॥ विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत ॥१७॥ कालचक्रं भ्रमितीक्ष्णं सर्वं निःकर्षयज्जगत ॥ स्वतंत्रमबुधस्येह
स्य२ किमसत्कर्मभिर्भवेत ॥१८॥ शास्त्रस्य पितुरादेशं यो न वेद निवर्त्तकं ॥ कथं तदनुरूपाय गुणविस्रंभ्युपक्रमेत ॥१९॥ इति व्यव
सिता राजन्‌ हर्यश्वा एकचेतसः ॥ प्रययुस्तं परिक्रम्य पंथानमनिवर्त्तनं ॥२०॥

स्यानित्यत्वबुध्या काम्यकर्मानुष्ठाने वैराग्यमेवाकल्पोत्तरसद्विः ॥१८॥ स्वपितुरादेशमित्यस्यार्थमाह ॥ शास्त्रस्य स्वपितुर्द्वितीयजन्महेतोः स्वरू
पाय निवृत्यनुरूपाय निवर्त्तकमादेशं यो न वेद ॥ स कथं गुणविस्रंभी गुणमयप्रवृत्तिमार्गविश्वासवानुपक्रमेत तस्याशे प्रवर्त्तेत
॥१९॥ मोक्षे रागत्वसद्बुद्धीनां जीवमायातमात्मनां ॥ शास्त्रं कालोपदेशानां अंतेन किं प्रकर्मभिः ॥ इति वाचः कूटसंग्रहश्लोकः ॥ इति व्यव
सिताः एवं निश्चितवंतः ॥ एकचेतसः ॥ एकमत्यं प्राप्ताः ॥ तं नारदं प्रदक्षिणीकृत्य अपुनरावृत्तिमार्गं प्रययुः ॥२०॥

एम
१०

निर्मातः साक्षात्कृतो यो हृषीकेशस्तस्य पदाब्जे अनुचरन् अन्ववरदित्यर्थः ॥२१॥ नाशामदर्शनं स्वधर्मस्य शंवा ॥ शीलेन शालंते शोभंत इति तथा तेषां
कः दक्षः सुप्रजात्वमनुच्चवरत्वं ॥ शुचा शोकानां स्थानं ॥२२॥ अजेन ब्रह्मणा ॥ सहस्रशः सहस्रसंख्याः ॥२३॥ ४ ॥ परमं ब्रह्म प्रणवं वब्रह्ममाणं मंत्रं
वा ॥५॥ इडस्पतिं वाचामंत्राणां पतिं विष्णुमाराधयामासुः ॥ ६ ॥ विशुद्धसत्त्वाश्रयाय परमहंसाय नमो धीमहि ॥ ७ ॥ प्रजासर्गे धीर्येषां तान् ॥ वाचः

स्वर्ब्रह्मणि निर्भातहृषीकेशपदांबुजे ॥ अखंडं चित्तमावेश्य लोकाननुचरन्मुनिः ॥२१॥ नाशं निशम्य पुत्राणां नारदाच्छीलशा
लिनां ॥ अन्वतप्यत कः शोचन् सुप्रजात्वं शुचां पदं ॥२२॥ स भूयः पांचजन्यायां अजेन परिसांत्वितः ॥ पुत्रानजनयद्दक्षः स
वलाश्वान् सहस्रशः ॥२३॥ ते पि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः ॥ नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः ॥२४॥ तदुपस्पर्श
नादेव विनिर्धूतमलाशयाः ॥ जपंतो ब्रह्म परमं तेपुस्तत्र महत्तपः ॥२५॥ अब्भक्षाः कतिचिन्मासान् कतिचिद्वायुभोजनाः ॥ आरा
धयन्मंत्रमिमं मभ्यस्यंत इडस्पतिं ॥२६॥ ॐ नमो नारायणाय पुरुषाय महात्मने ॥ विशुद्धसत्वधिष्ण्याय महाहंसाय धीमहि ॥२७॥
इति तानपि राजेंद्र प्रतिसर्गधियो मुनिः ॥ उपेत्य नारदः प्राह वाचः कूटानि पूर्ववत् ॥२८॥ दाक्षायणाः संशृणुत गदतो निगमं
मम ॥ अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ॥२९॥ भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् ॥ स पुण्यबंधुः पुरुषो मरुद्भिः

कूटानि अदृष्टार्थं तत्त्ववरत्वादीनि पूर्वोक्तानि प्राह ॥ २८ ॥ हे दाक्षायणाः संशृणुत ते त्वारि पुनरन्यदपि प्राह ॥ निगमम् उपदेशं अन्विच्छ ॥ सह मोदते ॥ ३० ॥
हुतत्त्वलोकयत ॥ २९ ॥ प्रायणं प्रकृष्टं गमनं ॥ पुण्य एव बंधुर्यस्य ॥ मरुद्भिर्भ्रातृवत्सलैर्देवैः ॥ ३० ॥

भा॰६
११

मोक्षदर्शनं यस्य ॥ हे मारिष आर्य ॥ ३१ ॥ सध्रीचीनं समीचीनं ॥ प्रतीचीनं प्रत्यग्वृत्तिलभ्यं ॥ अनुपथं अनुगमनं ॥ पंथानं ॥ पश्चिमायामिनीः गताः
रात्रय एव ॥ ३२ ॥ ३३ ॥ पुत्राणां पारमहंस्यनिष्ठां उपश्रुत्य दक्षो विप्राय शोकविरक्तः स्यादिति तदनुग्रहार्थं देवर्षिस्तत्पार्श्वं गतः ॥ तदा तमुपलभ्य
दक्ष आह ॥ ३४ ॥ साधोरिव लिंगं वेषो यस्य तेन नस्त्वया नोऽस्मदीयानामर्भकाणां ॥ असाधु अकारि कृतं ॥ तदेवाह ॥ साधूनां स्वधर्मप्रवृत्तानां भि
क्षोर्यो मार्गः प्रदर्शितः ॥ ५ ॥ ननु सन्यासिनो मार्गः साधुरेव मोक्षहेतुत्वात् ॥ सत्यं ॥ ऋणत्रयापाकरणं विना तु महाननर्थ एवेत्याह ॥ [illegible]

एतावदुक्त्वा प्रययौ नारदो मोघदर्शनः ॥ तेपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ॥ ३२ ॥ सध्रीचीनं प्रतीचीनं परस्या
नुपथं गताः ॥ नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ॥ ३३ ॥ एतस्मिन्नु काल उत्पातान् बहून्पश्यन्प्रजापतिः ॥ पूर्व
वन्नारदकृतं पुत्रनाशमुपाशृणोत् ॥ ३३ ॥ चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः ॥ देवर्षिमुपलभ्याह रोषाद्विस्फुरिता
धरः ॥ ३४ ॥ दक्ष उवाच ॥ अहो असाधो साधूनां साधुलिंगेन नस्त्वया ॥ असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥ ३५ ॥
ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणां ॥ विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ॥ ३६ ॥

[illegible] ऋणैरिति ॥ जायमानो वै ब्राह्मणस्त्रिभिरृणैर्वा जायते इत्यादिश्रुतेः ऋणैरमुक्तानाममीमांसितानि न विचारितानि कर्मा
णि यैस्तेषां तावदेतां विमोक्षो नास्ति उत्तरकालभावित्वाच्च पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षिऋणाविमुक्तिश्च नास्ति अतः हे पाप
विषयभोगत्यागादिहलोके श्रेयसो विघातः कृतः मोक्षाधिकारित्वाच्च परलोकेपि श्रेयसो विघातः कृतः ॥ तथा च मनुः ऋणानि त्रीण्यपाकृत्य मनो
मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इति ॥ ३६ ॥

राम
११

बालानां मतिं वुद्ध्यादि विषयाभिनन्दीति तथा ॥ एवं निरनुक्रोशः निर्घृणः हरेर्यशोनाशकः सन् तत्पार्षदानां मध्ये कथं चरसि ३७ निर्लज्जत्वमेवा
ह ॥ ननु त्वामृते भागवताः सर्वे भूतानुग्रहपरवशाः ॥ त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जसे इति भावः ॥ ३८ ॥ ननु वैराग्यादुपशमः उपशमाद्
भूतस्नेहपाशच्छेदो न भवति ॥ न च विरक्तस्य कर्मणस्त्यागाकरणमावश्यकं ॥ यदहरेव विरजेत्तदहरेव प्रव्रजेत ॥ यदि वेतरथा ब्रह्मचर्या
द्ब्रह्मचर्यादेव प्रव्रजेदित्यादिश्रुतेः ॥ अतो वैराग्योपदेशेन तेषां मयानुग्रह एव कृत इति चेन्नत्याह ॥ नेति ॥ यद्यपि त्वमेवं मन्यसे तथापि मृषा

एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः ॥ पार्षदां मध्ये चरसि यशोहा निरपत्रपः ॥ ३७ ॥ ननु भागवता नित्यं भूतानुग्रहका
तराः ॥ ऋते त्वां सौहृदघ्नं वै वैरंकरमवैरिणां ॥ ३८ ॥ नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा ॥ मन्यसे यद्युपशमं स्नेह
पाशनिकृन्तनं ॥ ३९ ॥ नानुभूय न जानाति पुमान्विषयतीक्ष्णतां ॥ निर्विद्येत स्वयं तस्मान्न तथा भिन्नधीः परैः ॥ ४० ॥
यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनां ॥ कृतवानसि दुर्मर्षं विप्रियं तव मर्षितं ॥ ४१ ॥

केवलिना ज्ञानं विनावधूतवेषेण त्वया इत्थं मतिचालने कृतेपि पुंसां विरागो नैव स्यात् ॥ न च विरागं विनोपशमः ॥ न च तेन विना स्नेहपाशनि
कृन्तनमित्यर्थः ॥ ३९ ॥ इत्थं विरागो न स्यादित्यत्र हेतुमाह ॥ नानुभूयेत्यनुभूय विषयाणां तीक्ष्णतां दुःखहेतुत्वं न जानाति ॥ तस्माद्विषयानुभवे
नतीक्ष्णत्वज्ञानानन्तः ॥ ४० ॥ अतस्त्वयास्माकमप्रियमेव कृतं तथापि वयं न क्रुध्यामहे इत्याह ॥ यदिति ॥ कर्मसंधानां कर्ममर्यादानां ॥ कर्मसंधानामिति
पाठे विप्रियं कर्म अजानतामित्यर्थः ॥ दुःसहं यत्त्वं कृतवानसि तन्मर्षितं सोढं ॥ ४१ ॥

तथापितवामङ्गलंभविष्यत्येवेत्याह॥ हेतन्तुकृन्तनसंतानच्छेदक॥ यद्यस्मात् अभद्रंपुत्राणाम्पथानभ्रंशरूपाचारः॥ तत्तस्मात्त्वल्लोकेभ्रमतःपदंस्था
नंनभवेदितिमूढछलेनशापः॥४२॥ बाढंतथेतिस्वीकृतवान्॥ ईश्वरोपिप्रतिशापसमर्थोपितितिक्षेतसहेतेतियत्एतावानेव॥४२॥ इतिषष्ठपंचमः
षष्टेदक्षेणासिक्न्यांकन्याषष्ठ्याप्रवर्तिता॥ यद्वंशाद्यतोजातोविश्वरूपोऽदितेःसुतात्॥ नारदात्पुत्राणांनाशमाशंकमानोदक्षःजनयामास

तन्तुकृन्तनयन्नस्त्वमभद्रमचरःपुनः॥ तस्माल्लोकेषुतेमूढनभवेद्भ्रमतःपदं॥४३॥ श्रीशुकउवाच॥ प्रतिजग्राहतद्बाढंनारदःसाधुसंमतः
एतावान्साधुवादोहितितिक्षेतेश्वरःस्वयं॥४४॥ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेदक्षनारदशापःपंचमोध्यायः॥ श्रीशुक
उवाच॥ ततःप्राचेतसोऽसिक्न्यामनुनीतःस्वयंभुवा॥ षष्टिंसंजनयामासदुहितॄःपितृवत्सलाः॥१॥ दशधर्मायकायादाद्वि
षट्त्रिनवचेन्दवे॥ भूतांगिरःकृशाश्वेभ्योद्वेद्वेतार्क्ष्यायचापराः॥२॥ नामधेयान्यमूषांत्वंसापत्यानांचमेशृणु॥ यासांप्रसूति
प्रसवैर्लोकाआपूरितास्त्रयः॥३॥ भानुर्लम्बाककुद्यामिर्विश्वासाध्यामरुत्वती॥ वसुर्मुहूर्तासंकल्पाधर्मपत्न्यःसुतांशृणु
॥४॥ भानोस्तुदेवऋषभइन्द्रसेनस्ततोनृप॥ विद्योतआसील्लम्बायास्ततश्चस्तनयित्नवः॥५॥ ककुभःसंकटस्तस्यकीकटस्तनयोयतः

॥ कायकश्यपाय॥ द्विषट्द्विगुणाःषट्द्वादशयाम्हताः त्रयोदशेत्यर्थः॥ इन्दोःसोमाय॥ त्रिनवस भुवोदुर्गाणियामेयःस्वर्गोनन्दिस्ततोभवत्
प्तविंशतिं॥ तार्क्ष्यायनाम्नेऽपरायकश्यपायैवअपराश्चवशिष्टाश्चतस्रः॥१॥ सापत्यानांअपत्यसहितानांमेमत्तःशृणु॥ प्रसूतिप्रसवैः
पुत्रपौत्रादिभिः॥२॥४॥ ततोदेवऋषभात्॥५॥ यतःकीकटात्भुवोदुर्गाणिदुर्गाभिमानिनोदेवाः॥ यामेयःयाम्याःपुत्रःस्वर्गः॥६॥

तस्मात्तः साध्यानां हृतः ॥ ७ ॥ वंशोर्वंशस्य भूयस्त्वात् ते निर्देशः समंततः ॥ १० ॥ अपिमतिर्नाम पत्नी तस्याहर्षादयः पुत्राः ॥ ११ ॥ सहस्वाप्याप्य पु
ऐजवस्य पुत्राः पुरः पुराणि ॥ १२ ॥ २ ॥ स्कंदस्तु कृत्तिकाहृतोः येः पुत्रः प्रत्यारोहतिस्त्रियमित्रीरितिचप्रसिद्धः ॥ ततः स्कंदात ॥ १४ ॥ आकृतीपति

विश्वेदेवास्तु विश्वायाः प्रजातास्तान् प्रचक्षते ॥ साध्यो गणास्तु साध्यायाः अर्थसिद्धिस्तु तत्सुतः ॥ ७ ॥ मरुत्वांश्च जयंतश्च मरुत्वं
त्वाव भूवतः ॥ जयंतो वासुदेवांशः उपेंद्र इति यं विदुः ॥ ८ ॥ मौहूर्त्तिकास्तु देवगणास्तु मुहूर्त्तायाः प्रजज्ञिरे ॥ ये वै फलं प्रयच्छंति भूतानां
स्वस्वकालजं ॥ ९ ॥ संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः ॥ वसवोऽष्टौ वसोः पुत्राः तेषां नामानि मे शृणु ॥ १० ॥ द्रोणः
प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः ॥ द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥ ११ ॥ प्राणस्योर्जस्वती भार्या सह आयुः पुरो
जवः ॥ ध्रुवस्य भार्या धरणी सृतनविविधाः पुरः ॥ ११ ॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ॥ अग्नेर्जाया वसोर्धारा पुत्रा
उ द्रविणकादयः ॥ १२ ॥ स्कंदस्तु कृत्तिकापुत्रो ये विशाखादयस्ततः ॥ दोषस्य शर्वरी पुत्रः शिशुमारो हरेः कला ॥ १४ ॥ वसोरांगिर
सीपुत्रो विश्वकर्मा कृतीपतिः ॥ ततो मनुश्चाक्षुषोभूत विश्वे साध्या मनोः सुताः ॥ १५ ॥ विभावसोरसूतोषा व्युष्टरोचिषमातप
शिल्पाचार्यः ॥ ततो विश्वकर्मणः चाक्षुषो मनुरासीत ॥ ५ ॥ उषा भार्या ॥ अथ आतपात ॥ पंचयामो पंचयामोथ भूतानि येन जाग्रति कर्मसु ॥ ६
दिवसोजातः ॥ अनव वर्णात्रियामा ॥ प्रदोषप्रत्यूषयोर्दिवसस्यावयवत्वात ॥ १६ ॥

भा॰ष॰
११

भूतस्य द्वे भार्ये तयोर्वंशमाह सरूपेति ॥ १७ ॥ महानित्येवमेकादशरूपस्य रुद्रस्य पार्षदाः प्रेतादयः अन्ये अन्यस्यां जाताः ॥ १८ ॥ अंगिरसः स्वधा सती चे
ति द्वे भार्ये तयोर्वंशमाह ॥ प्रजापतेरिति ॥ स्वधानाम पत्नी पितॄन्पुत्रत्वे ऽकरोत् ॥ अथ सती च अथर्वांगिरसं नाम वेदं ॥ १९ ॥ कृशाश्वस्यार्चिर्धिष
णेति द्वे भार्ये तयोर्वंशमाह कृशाश्व इति ॥ २० ॥ २१ ॥ सुपर्णा विनता ॥ अनूरुमरुणं ॥ २२ ॥ रोहिण्यामेव प्रीतिशयेनान्यासामुपेक्षणात् ॥ कृ

सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः ॥ रैवतोजो भवो भीमो वाम उग्रो वृषाकपिः ॥ अजएकपादहिर्बुध्न्यो बहुरूपो महानिति ॥ १७ ॥
रुद्रस्य पार्षदाश्चान्ये घोराः प्रेतविनायकाः ॥ १८ ॥ प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ ॥ अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती ॥ १९ ॥
कृशाश्वोर्चिषि भार्यायां धूमकेतुमजीजनत् ॥ धिषणायां वेदशिरो देवलं वयुनं मनुं ॥ २० ॥ तार्क्ष्यस्य विनता कद्रूः पतंगी यामिनीति च ॥ पतं
गासूत पतगान्यामिनी शलभानथ ॥ २१ ॥ सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनं ॥ सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥ २१ ॥ कृ
त्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत ॥ दक्षशापात्सोनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ पुनः प्रसाद्य तं सोमः कला लेभे क्षयेदि
ताः ॥ २२ ॥ शृणु नामानि लोकानां मातॄणां शंकराणि च ॥ अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥ २५ ॥ अदितिर्दितिर्दनुः काष्ठा

पितृत्वस्य दक्षस्य शापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तास्वनपत्योभूत् ॥ तं ॥ ईशं हरं सालया ॥ पुनः क्रोधवशात् तत्प्राहरभिः परमात्मभिः प्रस
दक्षं प्रसाद्य केवलं कला एव लेभे न त्वपत्यानि ॥ कथंभूताः क्षये कृष्णपक्षे दिताः खंडिताः सतीः पाठान्तरे क्षये सति पुनरेधिताः तेनैव वर्धिताः
सतीः ॥ २४ ॥ ११

तिमेर्यदि गणनमत्र स्यादिति श्रुत्यत्वेन तद्गमत्वात् यथायथं स्मृता मे तातामां वंशानाह तिमेरित्यादिना ॥ १७ ॥ सौरसाः सरमायाः पुत्राः

॥ ५ ॥ प्राधानिकान्प्रव्याख्यानेन शरशगणाः ॥ २० ॥ २१ ॥ वैश्वानरोदनोः पुत्रः तस्य सुताः ॥ २२ ॥ कः प्रजापतिः कश्यप उपयेमे ॥ दानवी उपरि

तिमेर्यदि गणनमत्र श्वापदाः सरमासुताः ॥ सरमेर्महिषा गावो ये चान्ये द्विशफा नृप ॥ २३ ॥ ताम्रायाः श्येनगृध्राद्याः सुनेर

श्वरप्रोगणाः ॥ दंदशूकादयः सर्पाणां जनकाः क्रोधवशात्मजाः ॥ २४ ॥ इलायाः भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ अरिष्टायास्तु

गांधर्वाः काश्यपाद्द्विजफेनपाः ॥ २५ ॥ एतान्दनोरेकषष्टिस्तेषां प्राधानिकान् श्रृणु ॥ द्विमूर्धा शंकरोऽरिष्टो हयग्रीवो विभावसुः ॥ ९ ॥

अयोमुखः शंकुशिराः पुलोमा कालकस्तथा ॥ २३ ॥ स्वर्भानुः कपिलोऽरुणः ॥ पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ॥ २ ॥ धूम्रकेश

विरूपाक्षो विप्रचित्तिश्च दुर्जयः ॥ स्वर्भानोः सुप्रजा कन्या शचीवानपत्यः किल ॥ वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ॥ ११ ॥

वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ॥ उपदानवी हयशिराः ॥ उपदानवी हिरण्याक्षः क्रतुर्हयशिरा नृप ॥ पुलोमा कालका च द्वे

वैश्वानरसुते तु के ॥ उपयेमे यथ भगवान् कश्यपो ब्रह्मचोदितः ॥ २४ ॥ पौलोमा दानवे याश्च दानवा युद्धशालिनः ॥ तयोः षष्टिसहस्रा

णि यत्र आसीत् पितः पिता ॥ जघान स्वर्गतो ह्यर्जुन एकं दैत्यप्रियंकरः ॥ २५ ॥ विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ॥ राहुज्येष्ठं केतुश

तं ग्रहत्वमुपागतः ॥ २६ ॥ अथातः श्रूयतां वंशो यादितेरनुपूर्वशः ॥ यत्र नारायणो देवः स्वांशेनावतरद्विभुः ॥ २७ ॥ विवस्वानर्यमापू

षा त्वष्टाथ सविता भगः ॥ धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥ २८ ॥ विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुं ॥ २९ ॥

नयने हेतुः ब्रह्मणा चोदित इति ॥ ४ ॥ तयोः षष्टिसहस्राणि निवातकवचाः उत्पन्नाः ताश्च स्वर्गगतः सन् ते पितामहोऽर्जुनो जघान ॥ राहुः ज्येष्ठो यस्य

भुवि वर्त्तमाना ॥४०॥ ततः विवस्वतः ॥४१॥ वर्षणायः रूता कृतज्ञानवतः पशुपतिकर्मत्वेन निवृत्तो भक्तेः ॥ यत्र येषु आत्मानुसंधानविशे
षेण मानुषी जातिश्चोपकल्पिता ॥ तथा च श्रुतिः ॥ ब्रह्मपत्वेवाविद्धान्मानोति ॥४२॥ कुपितं हरमिति शेषः ॥ विवृतद्विजः प्रकटितदंतः

मिथुनं च महाभागा यमं देवं यमीं तथा ॥ सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि ॥४०॥ छायाशनैश्चरं लेभे साव
र्णिं च मनुं ततः ॥ कन्यां च तपतीं या वै वव्रे संवरणं पतिं ॥४१॥ अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः
यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥४२॥ पूषानपत्यः पिष्टादो भग्नदंतोऽभवत्पुरा ॥ योऽसौ दक्षाय कुपि
तं जहास विवृतद्विजः ॥४३॥ त्वष्टुर्दैत्यात्मजा भार्या रचना नाम कन्यका ॥ संनिवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य
वान् ॥४४॥ तं वव्रिरे सुरगणाः स्वस्रियं द्विषतामपि ॥ विमतेन परित्यक्ता आचार्येणात्मनः सुराः ॥ यस्य हेतोः प
रित्यक्ता आचार्येणात्मनः सुराः ॥४५॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे षष्ठोऽध्यायः ॥ राजोवाच ॥ एतदा

सन्नु ॥२॥४५॥ यदा यदा विमतेनावज्ञातेन बृहस्पतिना परित्यक्ताः तदा द्विषतां शत्रू ॥ चक्ष्व भगवन् शिष्याणामक्रमं गुरौ ॥१॥
णां भागिनेयमपि विश्वरूपं पौरोहित्ये वृतवंतः ॥५॥ इति षष्ठः ॥६॥ सप्तमे विश्वरूपो सौ पौरोहित्ये वृतः सुरैः ॥ शत्रूणां संपरित्यक्तैः पौरो
हित्यमथाकरोत् ॥१॥ यस्य हेतोः कस्माद्धेतोः आत्मनः शिष्याः सुराः परित्यक्ताः अक्रमम् अपराधं ॥१॥

स इंद्रो यदा सभां प्राप्तं वाचस्पतिं नाभ्यनंदत नादृतवान् ॥ तदा सभां आंगिरसः ततो निर्गत्य तस्मीद्गृह मायया विस्मृतात्मा नामत्वयः ॥ श्रृणु नारद हे त्वं मद्‌-
र्शीयितं तं विशिनष्टि ॥ त्रिभुवनैश्वर्यमदेनोल्लंघितः सतां पंथा येन सः ॥ १ ॥ परिश्रितः परिवृतः ॥ ३ ॥ ४ ॥ आत्मासनं सभा तस्मिन्नध्यासनं सिं-
हासनं तदाश्रितः ॥ ५ ॥ पारमेष्ठ्यैर्महार्णविह्नैः आसनस्यार्धस्थितया पौलोम्या सह विराजमानः सन् ॥ ६ ॥ उत्थानादिना नाभ्यनंद-

वादरायणिरुवाच ॥ इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः ॥ मरुद्भिर्वसुभीरुद्रैरादित्यैर्ऋभुभिर्नृप ॥ १ ॥ विश्वेदेवैश्च साध्यैश्च ना-
सत्याभ्यां परिश्रितः ॥ सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥ २ ॥ विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः ॥ निषेव्यमाणो
मघवान्स्तूयमानश्च भारत ॥ ४ ॥ उपगीयमानो ललितमास्थानाध्यासनाश्रितः ॥ पांडुरेणातपत्रेण चंद्रमंडलचारुणा ॥ ५ ॥
युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ॥ ७ ॥ वाचस्पतिं मुनिवरं सुरासुरनमस्कृतं ॥ नोच्चचालासनादिंद्रः पश्यन्नपि स-
भागतं ॥ ८ ॥ ततो निर्गत्य सहसा कविरांगिरसः प्रभुः ॥ आययौ स्वगृहं तूष्णीं विद्वान्श्रीमदविक्रियां ॥ ९ ॥ तर्ह्येव प्रतिबुद्ध्येंद्रो गुरुहेल-
नमात्मनि ॥ गर्हयामास सदसि स्वयमात्मानमात्मना ॥ १० ॥ अहो बत मयासाधु कृतं वै दभ्रबुद्धिना ॥ यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥ ११ ॥
त ॥ ७ ॥ न चोच्चचाल ॥ आसनस्थ एव स्थितो नापि किंचित्त्रचलितवान् ॥ ८ ॥ श्रीमदेन या विक्रिया तां विद्वान् जानन् ॥ ९ ॥ प्रतिबुध्य अनुस्मृत्य
॥ १० ॥ मया कृतं कर्म अहो असाधु यद्यस्मात् दभ्रबुद्धिना अल्पबुद्धिना ॥ मया कात्कृतः तिरस्कृतः ॥ ११ ॥

भा०८
१५

विबुधानां प्रातिकानां दैत्यानामीश्वरोऽप्यहं ॥११॥ नतु विहाय स्थ्योराजा स्मृत्यानं नकर्माहितिविद्धवचनं तत्राह प्रतिहास्यां ॥ धिषणं मा सन
॥१२॥ कूपयं हरिणां तितृ परिहरंती तिकूप एवं दृष्टारस्तेषां वचः श्रामयः सर्वो येषां ॥ तेय थासर्व मज्ञं ते सर्व मत्तमज्ञं तितद्दत ॥१४॥ श्रागाधाशंभी
रधिषणा यस्मतं ॥ निःशठः शास्त्रहीनः सत्र ॥१५॥ अधिकाया आत्ममायया ॥१६॥ गुरोः संत्तातानो पायं पराक्रमाणो विनाधिगतः अज्ञानः

को गृध्येत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि ॥ ययाहमासुरं भावं नीतोऽद्य विबुधेश्वरः ॥१२॥ येनाप्रमेयं धिषणमधितिष्ठन्त्र कंचन प
त्सन्निघ्ने हितिबद्धधर्म तेन परं विदुः ॥१३॥ तेषां कूपएवदृष्णां पततामपि तिग्यधः ॥ येऽप्रद्भुर्वचहत्ते यम ज्ञं तत्र समस्वार व ॥१४॥ अथा
हममरा चार्यमगाध धिषणं द्विजं ॥ प्रमादयिष्ये निशठः शीर्षा तच्चरणां स्पृशन ॥१५॥ एवं चिंतयतस्तस्य ब्रह्मणो भवानगृहात् वृहस्प
तिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥१६॥ गुरोर्नाधिगतः संज्ञां परीक्षन्भगवान् स्वराट् ॥ ध्यायन्धिया सुरैर्युक्तः शर्म नालभतात्मनः ॥
तच्छ्रुत्वैवासुराः सर्व आश्रित्यौशनसं मतं ॥ देवान्प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ॥१७॥ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबा
बाहवः ॥ ब्रह्माणं शरणं जग्मुः सहेंद्रा नतकंधराः ॥ तांस्तथाभ्यर्दितान्वीक्ष्य भगवानात्मभूरजः ॥ कृपया परया देव उवाच परिसांत्वय
न् ॥ ब्रह्मोवाच ॥ अहो वत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत् ॥ ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्यान्नाभ्यनंदत ॥२१॥

सत्र ॥१५॥ आततायिनः उद्यतास्त्राः ॥१८॥ निर्भिन्नान्यंगानि शिरांसि उरवो बाहवश्च येषां ॥१९॥२०॥ यो युष्माकं कृतं करणं महद्भद्रं तदाह ब्रह्मिष्ठ
मिति ॥ नाभ्यनंदत नाभिनंदितवंतः ॥२१॥

राम
१५

परेभ्यः शत्रुभ्यो वः पराभव इति यतस्त्वं तस्य त्वनयस्य त्वन्यायस्य संबंधी फलनूप आसीत ॥ उक्तं च ॥ ब्राह्मणकुलसंपन्नं मन्नं विष्णोर्महात्मनः ॥
आपत्तं वीक्ष्य नो निष्ठेत्तद्गुः वैः परिभूयत इति ॥ त्वयमेव वैरिणोहं तारेयेषां तेभ्यः ॥११॥ गुरुतिरस्कारस्तत्कारणं वेवापचयोपचयकारणमित्याह
ऽदंशानेनाहमद्यवत्रिति ॥ द्विषतः शत्रून्काव्यमार्गविग्रहमेवबेभ्योपचितान् ॥ उपचितत्वमेवाह आरत्द्वारनुगस्त्रोद्वः ॥२०॥ अमेध्यो मेवेयेषां अ
तप्यापमनयस्यामीत्यरेभ्यो वः पराभवः ॥ प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्तपः ॥२१॥ मघवन्द्विषतः पश्य प्रक्षीणान्
गुर्वतिक्रमात् ॥ संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः ॥ आददीरन्निलयनं ममापि भृगुदेवताः ॥२३॥ त्रिविष्टपं किंग
णयंत्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः ॥ न विप्रगोविंदगवीश्वराणां भवंत्यभद्राणि नरेश्वराणां ॥२४॥ तद्विश्वरूपं भजताशु
विप्रं तपस्विनं त्वाष्ट्रमथात्मवंतं ॥ सभाजितोर्थान्स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥२५॥ श्रीशुक उवाच ॥ त एवमु
दिता राजन्ब्रह्मणा विगतज्वराः ॥ ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥२६॥ देवा ऊचुः ॥ वयं तेऽतिथयः प्राप्ता आश्रमं भद्र
मस्तु ते ॥ कामः संपाद्यतां तात पितॄणां समयोचितः ॥२७॥ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सतां ॥ अपि पुत्रवतां ब्रह्मन्किमुत ब्र
ह्मचारिणां ॥२८॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥ भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः ॥२९॥ दयाया भगिनी
नुशिक्षितार्थाः शिष्याः यतः विप्राणो विंदोगा नरेश्वराः अनुग्राह मूर्तिर्धर्मस्यात्मातिथिः स्वयं ॥ अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥३०॥
काये षां तेषामेव अभद्राणि न भवंति ॥ अन्येषां तु भवंति ॥ ४ ॥ तन्नस्मात् ॥ सुधाः नंतरमेव भजत ॥ अस्य कर्म गुरुत्यागरूपं ॥ ५ ॥ उदिता उक्ताः ॥२६॥ ६ ॥ अपि
नाविनष्टांगं संबोधयति माउः ॥ आचार्य उपनीय वेदाध्यापकः ब्रह्मणो वेदस्य मूर्तिः ॥ ९ ॥ धर्मस्यात्मा मूर्तिरतिथिः स्वयं साक्षात् ॥ आत्मनः श्रीविष्णोः यद्वा

भा०ष
२६

परेभ्यः परामवश्वाग्निहोत्रं ॥ २३ ॥ संदेशमाहुः वशीमहइति ॥ २४ ॥ ननूपाध्यायत्वेकनिष्ठस्यममापि वरं नेकरिष्यत्तत्वागर्हितं तत्राहुः ॥ नेति ॥ अर्थेष्व
श्रेयोजननं निमित्तं प्रविष्टानामपि वादनं ननिरंरति ॥ किंतु छंदोभ्यो मंत्रेभ्योऽन्यत्र वयोज्येष्ठस्य कारणं ॥ न तु मंत्रेषु ॥ अतोस्मभ्यं पत्रसातत्वे नत्व
मेवज्येष्ठो भविष्यति ॥ यद्वा छंदोभ्योन्यत्र ॥ वेदान्विहाय ॥ वयएव ज्येष्ठस्य कारणं न भवति ॥ किंतु वेदा एव कारणं ॥ तस्मादेतेवयः ॥ वेदतत्वा
च्चेत्वमेव ज्येष्ठ इत्यर्थः ॥ २५ ॥ ४ ॥ निंदितमपीरक्षणमेधाच्चाभंगभयेन करिष्यामीत्याह सार्धेन ॥ विगर्हितं यो तेहित्वं धर्मशालेः अधर्मे हेव

तस्मात्पितॄणां मान्त्रीनामाग्निपरंपराभवं ॥ तच्छ्रुत्वा पनयत्नान् संदेशं कर्तुमर्हेमि ॥ २१ ॥ वशीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणाग्रहं
यथाजमा विज्ञेयाप्यः सपत्नोस्त्ववतेजसा ॥ २२ ॥ नार्हति यत्न्धर्थेषु प्रविष्टाष्वपि वादिनं ॥ छंदोभ्योन्यत्र न तु ब्रह्मन्वयोज्येष्ठस्य
कारणं ॥ २३ ॥ ऋषिरुवाच ॥ अभ्यर्थितः स्वगणोः पोतेहित्येमहातपाः ॥ सविश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ २४ ॥ वि
श्वरूपउवाच ॥ विगर्हितं धर्मशीलैर्ब्रह्मवर्चउपव्ययं ॥ कथं नु मद्विधो नाथाः लोकेशैरभियाचितं ॥ प्रत्याख्यास्यति तच्छिष्यः स
एव स्वार्थ उच्यते ॥ २५ ॥ अकिंचनानां हि धनं शिलोंछनं तेनेह निर्वर्तितसाधुसत्क्रियः ॥ कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधस

त्वात् किं च ब्रह्मवर्चउपव्ययं पूर्वसिद्धस्य वर्चसस्य व्ययकरं प्रत्याख्यातं वमादृशो नार्हतीत्याह कथं त्विति तेषां शि दृष्यति येनउमेतिः
ष्याः शिक्षणार्हः स एव प्रत्याख्यानाभाव एव हि ॥ [illegible] लोशिष्यस्य स्वार्थ उच्यते ॥ २५ ॥ ननु पौरोहित्येन धनलाभात् धर्मः सि ताम
ध्येत अन्यथा निधनस्य कुतो धर्मः अत एव तेन लोको द्रक्ष्यति ॥ तेनाह ॥ अकिंचनानां शिलोंछनं हि धनं ॥ शिलं चेहाण्मु पेक्षित कणिशोपादानं शिलं ॥ उंछो ॥ २६
ऽशप्रतीनत्राण्यादेहपादानमुंछनं ॥ इह एहाश्रमे तेनैव निवर्तितसाधुसत्क्रियायेन ॥ २६ ॥

कियदेतत्प्रार्थितमल्पमेव ॥ अप्यधिकमपि करिष्यामीत्याह ॥ भवतामपि ॥ ३७ ॥ समाधिना परमोद्यमेन ॥ ३८ ॥ वैष्णव्या नारायणकवचात्मि

कया ॥ ८ ॥ शुक्रस्य वपुः दैत्यसेनाः ॥ ४० ॥ इति भावार्थदीपिकायां षष्ठे सप्तमः ॥ अष्टमे विश्वरूपस्तु वर्म नारायणात्मकं ॥ इंद्राय प्राह येनेंद्रो

गुप्तो दैत्यानथाजयत् ॥ १ ॥ त्रिलोक्याः संबंधिनीं श्रियमैश्वर्यं ॥ १ ॥ २ ॥ मंत्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वांगेषु करयोश्च न्यासो येन

तथापि न प्रतिब्रूयां गृहमिः प्रार्थितं कियत् ॥ भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३७ ॥ बादरायणिरुवाच ॥ तेभ्य एवं प्रतिश्रुत्य

विश्वरूपो महातपाः ॥ पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥ ३८ ॥ सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया ॥ आच्छिद्यादान्म

हेंद्राय वैष्णव्या विद्यया विभुः ॥ ३९ ॥ यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ॥ तां प्राह स महेंद्राय विश्वरूप उदारधीः ॥ ४० ॥ इति श्री

भागवते महापुराणे षष्ठस्कंधे सप्तमोध्यायः ॥ ७ ॥ राजोवाच ॥ यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ॥ क्रीडन्निव विनिर्जित्य त्रिलो

क्या बुभुजे श्रियं ॥ १ ॥ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकं ॥ यथाततायिनः शत्रून्येन गुप्तोऽजयन्मृधे ॥ २ ॥ बादरायणिरु

वाच ॥ वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते ॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥ विश्वरूप उवाच ॥ धौतांघ्रिपाणिरा

चम्य सपवित्र उदङ्मुखः ॥ कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ॥ नारायणपरं वर्म संनह्येत्

नारायणमयं परं वर्म संनह्येत ॥ बध्नीयात ॥ ४ ॥

तत्राष्टाक्षरेण पादाद्यष्टांगेषु न्यासमाह पादयोरिति सार्धेन ॥ प्रणवमूर्ध्नि ओंकारादीन्येकैकमक्षरं विन्यसेत् ॥५॥ विपर्ययं यथा भवत्येवं शिरस्यारि
पादान्तं वा विन्यसेत् ॥ उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्यर्थः ॥६॥ द्वादशाक्षरस्योद्धारः प्रणवादियकारान्तमिति ॥ प्रणवमूर्ध्नि तमेकैकम
क्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमंगुलिषु परिशिष्टमक्षरचतुष्टयमंगुष्ठयोराद्यन्तपर्वसु न्यसेत् ॥७॥ मन्त्रान्तरन्यासमाह न्यसेदिति

पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ॥५॥ ॐ नमो नारायणायेति विपर्ययमथापि वा
॥६॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ प्रणवादियकारान्तमंगुल्यंगुष्ठपर्वसु ॥७॥ न्यसेद्धृदय ओंकारं विकारमनु मूर्धनि
षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥ वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ॥८॥ मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बु
धः ॥ सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत् ॥९॥ ॐ विष्णवे नम इति ॥ आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतं ॥ विद्यातेजस्त
पोमूर्तिमिमं मंत्रमुदाहरेत् ॥१०॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेंद्रपृष्ठे ॥ दरारिचर्मासिगदेषुचापपाशान्दधानोष्ट

षकारणकारयोर्विश्लेषेण षडक्षराणि हृदयादिषु न्यसेत् ॥८॥ मकारमस्त्रमुद्दिश्य ॥ ध्यात्वा तन्मकारेण हुं नमः ॥ अस्त्राय फ गुणोष्टबाहुः ॥११॥
डिति एवं दिग्बंधं विनिर्दिशेत् ॥९॥ ध्येयमीश्वरमात्मानं ध्यायेत् ॥ षट्शक्तिभिः ऐश्वर्यादिभिर्भगवच्छब्दवाच्याभिर्विद्यावतेजस्तपश्च मूर्तिर्यस्य एम
तं ॥ इमं वक्ष्यमाणं श्रीनारायणकवचाख्यं ॥१०॥ अष्टगुणाः अणिमाद्यष्टैश्वर्ययुक्तः ॥११॥

यादसां गणाएव वरुणस्य पाशात्तस्मात् ॥१३॥ खे रवी आजिमुखे संग्रामोपग्रहश्च आदिर्येषां तेषु मकरस्थानेषु ॥१४॥ अट्टहासं तेन्वे वराहो मामध्व
नि रक्षतु ॥ यज्ञैर्वपवत्कल्पैः कल्प्यते निरूप्यत इति तथा ॥ उन्नीता उद्धृता धृता धरा येन सः ॥ आद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः ॥१४॥ उग्रध
र्मो रभिचारादिलक्षणात् ॥ हासात् गर्वात् ॥ नरः अवतु ॥ दत्तो दत्तात्रेयः अयोगात् योगभ्रंशात् ॥१५॥ पथि पदे देवानां हेलनं ॥ नमस्कारमकृत्वा गमनं

जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ॥ स्थलेषु मायावटुवामनोऽव्यात्त्रिविक्रमः खेवतु विश्वरूपः ॥१३॥ दुर्गे
ष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ॥ विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥१३॥ रक्ष
त्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामोद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोव्याद्भरताग्रजोस्मान् ॥१४॥ मामुग्रधर्मा
दखिलात्प्रमादात् नारायणः पातु नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबंधात् ॥१५॥ सनत्कु
मारोवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ॥ देवर्षिवर्यः पुरुषार्चनांतरात् कूर्मो हरिर्मां निरयादशेषात् ॥१६॥ धन्वंतरि
र्भगवान्पात्वपथ्यात् द्वंद्वाद्भयादृषभो निर्जितात्मा ॥ यज्ञश्च लोकादवताज्जनांतात् बलो गणात्क्रोधवशादहींद्रः ॥१७॥ द्वैपाय
नो भगवानप्रबोधाद्बुद्धस्तु पाषंडगणात्प्रमादात् ॥ कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥१८॥

तस्मात् ॥ पुरुषार्चनस्यांतरात् देवपूजाच्छिद्रात् ॥ द्वात्रिंशदपराधात् नारदः ॥१६॥ लोकाज्जनापवादाद्यज्ञः जननिमित्तो योत उपघातः तस्मात् बल
भद्रः अवतात् ॥ जनांतादिति पाठे जनांतान् कालाद्रक्षतु ॥ क्रोधवशात् सर्पाणां गणात् अहींद्रः शेषः ॥१७॥ कालमलप्रभृतात्कलेः कल्किः धर्मावना
यरक्षणाय ॥ उरुर्महान्कृतोऽवतारो येन ॥१८॥

दिनस्य पंचदशभागो भुक्तमेण प्रातरादिसंज्ञा तेषु प्रातः त्रेधा प्रदोषादिसंज्ञा तेषु रात्रौ तु प्रार्थनं मां केशव इति त्रिभिः ॥ आसंगवं संगवमभिव्याप्य ॥१९॥ त्रिधामावत्वा
दितिमूर्त्तिः ॥ श्रीमाधवः दोषे प्रदोषे ॥ अर्धरात्रे अर्धरात्रे विपर्यन्ते काले ॥ निशीथे च ॥ एक एव पद्मनाभः वदतु ॥२०॥ अपररात्रे ईशः श्रीवत्सधामा वदतु ॥
प्रत्यूष ईशः ॥ श्रीजनार्दनः श्रीदामोदरः प्रभाते ॥ श्रीविश्वेश्वरः पातु संध्यं ॥२१॥ युगान्तानलवत् ॥ तिग्मा तीक्ष्णा नेमिर्यस्य तत् चक्रं भगवता प्रयुक्तं सत् अरिसैन्यं

मां केशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः ॥ नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ॥१९॥ देवोऽप
राह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो मां ॥ दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥२०॥ श्रीवत्सधामाप
ररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ॥ दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः ॥२१॥ चक्रं युगान्तानलतिग्म
नेमि भ्रमत्समंताद्भगवत्प्रयुक्तं ॥ दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥२२॥ गदेऽशनिस्पर्शनविस्फुलिंगे नि
ष्पिंढि निष्पिंढ्यजितप्रियासि ॥ कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥२३॥ त्वं यातुधानप्रमथप्रेतमातृपिशा
चविप्रग्रहघोरदृष्टीन् ॥ दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् ॥२४॥

दंदग्धि अतिशयेन दहति ॥ तस्यापि स्वभाव एव ॥ न तु तस्मात्तत्प्रार्थनीयमित्यर्थः यद्वा दंदग्धीति लोण्मध्यमपुरुषः अतस्त्वमेवंभूतं चक्रमिति त्वत्पक्षा
यं वो ध्यप्रार्थ्यते ॥ अतिशयेन दहेति ॥ कक्षं शुष्कतृणं ॥२२॥ अशनिवत्स्पर्शो येषां ते विस्फुलिंगा यस्यास्तस्याः संबोधनं हे गदे त्वमजितस्य प्रियासि ॥ अत
एव त्वदुक्तामः अतः कूष्मांडादीनि त्रि निष्पिंढि निष्पिंढि संचूर्णय संचूर्णय अरीन् चूर्णय चूर्णय ॥ सर्वत्र वीप्सा अतिशीघ्रत्वात् ॥२३॥ हे दरेंद्र पांचजन्य त्वं यातु
धानादीन् विद्रावय ॥ विप्रग्रहाः ब्रह्मराक्षसाः येषां च घोरदृष्टयस्तान् ॥२४॥

तिग्मधारायस्येति हे तिग्मधार असिवर खड्ग श्रेष्ठ त्वं मम अरिसैन्यं छिंधि छिंधि ॥ शतचंद्राकाराणि मंडलानि यस्मिन् हे शतचंद्र चर्मन् अघोनाम द्वतां
द्विषां चक्षूंषि छादय ॥ पापचक्षुषां च उग्रदृष्टीनां चक्षूंषि हर ॥ २५ ॥ यतये भ्यो भयं ॥ श्रेयोभ्यः पापेभ्यः ॥ २६ ॥ श्रेयः प्रतीपकाः ऽऽ व्याघातकाः
॥ २७ ॥ स्तोत्राणि वृहद्रथंतरादिसामानि तैः स्तोभ्यते संस्तूयते इति स्तोत्रस्तोभः । छंदोमय ओवेदमूर्तिः ॥ सुपर्णोसि गरुत्मान् इत्यादि श्रुतेः ॥ एकप
द्यपाठे स्तोभागीतिपूरकाक्षराणि स्तोत्रस्तोभेति पाठे सामाधारभूत अक्षरकूस्तोभः ॥ २७ ॥ नामानि च रूपाणि च यानानि वाहनानि आयुधानि च

त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि ॥ चक्षूंषि चर्मन् शतचंद्र छादय द्विषामघोनां हर पापचक्षुषां ॥ २५ ॥ यन्नो भ
यं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽघेभ्य एव च ॥ २६ ॥ सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तना
त् ॥ प्रयांतु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ॥ २७ ॥ गरुडो भगवान् स्तोत्रस्तोभः छंदोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः
स्वनामभिः ॥ २८ ॥ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ॥ बुद्धींद्रियमनःप्राणान् पांतु पार्षदभूषणाः ॥ २९ ॥ यथा हि भगवानेव वस्तु
तः सदसच्च यत् ॥ सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः ॥ ३० ॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयं ॥ भूषणायुधलिंगाख्या धत्ते श
क्तीः स्वमायया ॥ ३१ ॥ तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ॥ पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३२ ॥ विदिक्षु दिक्षूर्ध्वमधः समंतात्

नो बुद्ध्यादीन् पांतु पार्षदभूषणाः पार्षदाश्चाभूषणानि च पांतु ॥ २९ ॥ सदसच्च मूर्तं तद्वैहि भगवान्नारसिंहः ॥ महाप्रलोकभयं स्वेनेन स्वतेजसा ग्रस्तसमस्ततेजाः
क्तीमूर्त्तिर्यत्तत्सर्वं जगत् ॥ ३० ॥ एकात्म्यानुभावोः ऽऽध्यानं येषां तेषां विकल्पो भेदस्तद्रहितोपि ॥ ३१ ॥ सत्यमानेन सत्यभूतेन प्रमाणेन ॥ ३२ ॥ यनरूपि श्रीनृसिंहः
एव साध्यते विदिक्षु दिक्षु ॥ पाहि त्वमात्मसंगः ॥ महानारसिंहः प्रङ्कारस्वनेन प्रीन्नसिंहनामगर्जनेन ॥ स्वतेजसा स्वप्रभावेन ग्रस्तानि समस्तानि दिग्गजविषशाद्वे

भा॰ष
१९

दंशितः कवचितः ॥४॥ सोपि सद्यः साध्वसाद्भयात् ॥ विमुच्यते ॥ न तस्य भयं भवेदेव ॥५॥ ६ ॥ एतद्विद्याप्रभावमितिहासेनाहर मामिति सार्धैस्त्रिभिः
मरुधन्वनि निरुदके देशे ॥ अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वमुक्तं दर्शितं ॥३७॥ यत्र द्विजस्य क्षयो देहत्यागस्थलं तस्योपरि ॥३८॥ सद्यस्तत्क्षणमेव

मघवन्निदमाख्यातं वर्म नारायणात्मकं ॥ विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् ॥३४॥ एतद्धारयमाणस्तु यं यं पश्यति
चक्षुषा ॥ पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥३५॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ॥ राजदस्युग्रहादिभ्यो व्या
घ्रादिभ्यश्च कर्हिचित् ॥३६॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः ॥ योगधारणया स्वांगं जहौ स मरुधन्वनि ॥३७॥ तस्यो
परि विमानेन गंधर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥३८॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शि
राः ॥ स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥३९॥ श्रीशुक उवाच ॥ य इदं
शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥४०॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥४१॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे नारायणवर्मनामा अष्टमोऽध्यायः ॥८॥

गगनान्न्यपतत् ॥ पाठांतरे अंगनाभिः सह वालखिल्योपदेशात्तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् स्वधाम गंधर्वलोकं जगाम
॥३९॥ ॥४०॥ अधिगतः प्राप्तः ॥४१॥ इति भावार्थदीपिकायां षष्ठस्कंधेऽष्टमः ॥ ॥ ॥

राम
१९

नवमे विश्वरूपे हते शक्रेण कोपतः ॥ त्वष्ट्रा चोत्पादिते वृत्रे भीतैर्देवैर्हरिः स्तुतिः ॥ १ ॥ सोमस्य पीथं पानं यस्मिन्न्ह एव सुरापीथं ॥ अन्नमन्नीत
न्नादं अत्र विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीदिति श्रुतिरुक्तमधेया ॥ १ ॥ तस्मात् सुरापत्वपातमाह ॥ स वा इति द्वाभ्यां ॥ प्रत्यक्षं परोक्षं
यथा भवति तथा सर्वविनयं देवेभ्यो हविर्भागं इंद्राय ददामि त्वं च वदत ॥ अत्र हेतुः यस्य पितरो देवाः ॥ २ ॥ सः असुरेभ्यस्तत्परोक्षं यत्नं

शक्र उवाच ॥ तस्यासीद्विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरापीथमन्नादमिति सत्तमः ॥ १ ॥ स वै बर्हिषि दे
वेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अवदद्यस्य पितरो देवाः सत्यं नृप ॥ २ ॥ स एव हि ददौ भागं परोक्षमसुरान् प्रति ॥ यज
मानो वहद्भागं पात् त्वेह वशानुगः ॥ ३ ॥ तदेव हेलनं तस्य धर्मलीलं कृतेश्वरः ॥ आलस्य तरसा भीतस्तच्छीर्षाणि च्छिन
द्रुषा ॥ ४ ॥ सोमपीथं तु यत्तस्य शिर आसीत् कपिंजलः ॥ कलविंकः सुरापीथमन्नादं यत्तित्तिरिः ॥ ५ ॥ ब्रह्महत्यामथ जलि
ना जग्राह यदपीश्वरः ॥ संवत्सरान्ते तद्द्वं भूतानां सविशुद्धये ॥ भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ ६ ॥ नमिति सीपंज

भागं ददौ तदेवाह देवानुयजमानोऽसावसुरान्प्रति भागमवहत ॥ ३ ॥ ५ ॥ तां वारयितुं समर्थस्तथापि जग्राह संवत्सरं ग्राह ख्यातपूर्ववरेणावे ॥
तथैव च्छित्वा संवत्सरान्ते भूतानां क्रोशमानः सन् भूतानां मध्ये विशुद्धये लोकापवादपरिहाराय सह हारीडो भूम्यादिभ्यस्तद्द्यं विभज्य ददौ ॥ नदीयं च चतुर्थभा
गं ख्यातस्य गर्भस्य पूरः पूरणं तेन वरेण ॥ यदि ख्यातपूरणं हन्त एव भविष्यति तर्हि ग्रहिष्यामीति तोयं भागावं देनजग्राहेत्यर्थः ॥

भा०ष
२०

ईरिणमूषरं ॥ अत एवोषरे यज्ञादि निषिध्यते ॥ छेदे सति पुनर्विरोहः प्ररोहो भवत्विति वरेण निर्यासरूपेण ब्रह्महत्याया दृष्टत्वात् ॥ निर्यासो
न भक्ष्यः ॥ ॥ शश्वत्कामवरेण यावत्प्रसवं गर्भात्तुपघाते नैव संभोगवरेण ॥ अत एव रजोदर्शने तत्संगादि न कार्यं ॥९॥ द्रव्यभूयो वरेण यस्मि
न्द्रव्ये क्षीरादावापो मिश्रा भवेयुस्तस्य भूयस्त्वमाधिक्यं स्यादिति वरेण ॥ यद्वा स्वसेवनिर्झरादिक्रमादिना भूयस्त्ववरेण द्रव्यभूय इति पाठे प्ययमे
वार्थः यद्वा द्रव्यभूयस्त्वं सामिस्थिकद्रवत्वं तेन वरेण ॥ अस्य विभागस्य विश्वरूपो वै त्वाष्ट्र इत्यस्यां श्रुतावनुक्तेः ॥ तस्य विभागफलमाह तत्पाप

ईरिणं ब्रह्महत्याया रूपं भौमं प्रदृश्यते ॥७॥ तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः ॥ तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते
ता०२ शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः ॥ रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ॥९॥ द्रव्यभूयो वरेणापस्तुरीयं जगृ
हुर्मलं ॥ तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति किल्बिषं ॥१०॥ हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे ॥ इन्द्रशत्रो विवर्धस्व मा
चिरं जहि विद्विषं ॥ अथान्वाहार्यपचनादुत्थितो घोरदर्शनः ॥१२॥

हरतीति निर्णकरोतीति कः क्षिपन् ॥ बुद्बुदादिरूपेण जलाद्बहिः क्षिपन्नित्यर्थः यद्वा क्षिपन् जलं पापं हरति आहरति गृह्णातीत्यर्थः अयं तस्यापराधो न परि
चक्षाद्यत्वादित्युक्तमर्थ उक्तः पाठांतरे हरति किल्बिषं इंद्रपापं ॥१०॥ इंद्राय इंद्रं हंतुं शत्रवे शत्रुं त्यक्तो ॥११॥ तदाह हे इंद्रशत्रो विवर्द्धस्वेति अत्र वेदशत्रुं परस्या
स्वरान्तत्वात् अवग्रहो होतुः प्रमादात् पूर्वपदमितिस्मृतेर्बहुव्रीहिलक्षणपदत्वादिंद्र एव तस्य शत्रुर्भूतः तच्च कर्मश्रुतः ॥ परब्रवीत् त्वाहेन्द्रशत्रुर्वर्धस्वेति ॥ एष
तस्मात् स इन्द्रशत्रुरभवदिति ॥ तथा च श्रुतिः ॥ मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्व र-
तोपराधादिति ॥ अन्वाहार्यपचनाद्दक्षिणाग्नेः ॥१२॥

१२ तं वीक्ष्य वित्रस्ता लोका दश दिशो विदुद्रुवुरिति पंचमेनान्वयः कथंभूतं विष्वक्समंततः इषुविक्षेपमात्रं प्रतिदिनं वर्धमानं १२ दग्धशैलप्रतीकाशं कृष्णवर्णं संध्याभ्रानीकवद्बहुवर्चो दीप्तिर्यस्य तं तप्ततामवच्छिखाः श्मश्रूणि च यस्य मध्याह्नार्कवदुग्रे लोचने यस्य १४ रोदसी द्यावापृथिव्यौ ॥ १५ दरीवद्गंभीरेण वक्त्रेण मुहुर्मुहुर्जृंभमाणमित्यन्वयः कथंभूतेन नभस्तलं पिबता ऋक्षाणि जिह्वया लिहता भुवनत्रयं ग्रसता एवं लोकानां भयंकरं समये यथा ॥ १२ ॥

विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने ॥ १३ ॥ दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसं ॥ तप्ततामशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनं ॥ १४ ॥ देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी ॥ नृत्यंतमुन्नदंतं च चालयंतं पदा महीं ॥ १५ ॥ दरीगंभीरवक्त्रेण पिबता च नभस्तलं ॥ लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयं ॥ १६ ॥ महता रौद्रदंष्ट्रेण जृंभमाणं मुहुर्मुहुः ॥ वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥ १७ ॥ येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्तिना ॥ स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥ १८ ॥ तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः ॥ स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः ॥ १९ ॥ ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः ॥ प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः ॥ २० ॥

ततत्रयं ग्रसतां १६ महता विस्तीर्णेन रौद्रा दंष्ट्रा यस्मिन् १७ वृत्रनामनिर्वचनं येनावृता इति त्वाष्ट्री मूर्तिर्यस्य तपसः तेन तथा च श्रुतिः स इमान् लोकानावृणोत् यदिमांल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वमिति १८ अग्रसत् भक्षितवान् १९ ग्रस्तं तेजो येषां प्रत्यंचमंतर्यामिणं त्रिभुवनग्रासेन व्याप्तत्वात् क्वापि गमनासंभवात् तत्रैव स्थित्वा हृदिस्थं हरिमित्यर्थः महाभये परित्राणमन्यतो न भवेदिति हरिमेव प्रपद्यंते स्म एवः शरणमागताः ॥ २० ॥

वायारीनि पंचमहाभूतानि तैर्निर्मिता ब्रह्मयो लोकास्तेषामाधिपतयो ब्रह्मादयश्च ततोर्वाचीना वयं च सर्वे यस्मै भूतकायकालायोद्विजंतः सतो बलिं हराम श्रुभावविघ्यस्माद्विभेति ततः परमेश्वरादेव नोस्माकं शरणं शरण्याद्रूगम्यमस्तु ॥ २१ ॥ ततएवतत्पवधारणोहेतुमाह ॥ अविस्मितं निरहंकारं कुतः दुहलश्रुत्येवा ॥ कुतः प्रशांतं रागादिशून्यं ॥ तच्च कुतः स्वेनैव लाभेन परिपूर्णकामं ॥ तच्च कुतः समंतउपाधिपरिच्छेदशून्यं ॥ एवंभूतेपरमेश्वरं विनाअपरंयः शरणंयियुपसर्पति सहि वालिशो नः यतोसौ सुनोलांगूलेन पुच्छेन समुद्रमतितितर्तिस्वातितर्तुमिच्छतीत्य

देवा ऊचुः ॥ वाय्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः ॥ हराम यस्मै बलिमंतकोसौ बिभेति यस्मादरणं ततो नः ॥ २१ ॥ अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतं ॥ विनोपसर्पत्यपरं हि बालिशः श्वलांगूलेनातितितर्त्ति सिंधुं ॥ २२ ॥ यस्योरुशृंगे जगतीं स्वनावं मनुर्यथाबध्य ततार दुर्गं ॥ स एव नस्त्वाष्ट्रभयाद्दुरंतात् त्राताश्रितान् वारिचरोपि नूनं ॥ २३ ॥ पुरा स्वयंभूरपि संयमांभस्युदीर्णवातोर्मिरवैः कराले ॥ एकोरविंदात्पतितस्ततार तस्माद्भयाद्येन स नोस्तु पारः ॥ २४ ॥

र्थः ॥ यथा तेन समुद्रतरणं न भवति तथा निःश्रेयसाश्रयणेन व्यसनार्णवतरणं न भवतीति भावः ॥ २२ ॥ महाभये स एव रक्षक इति दृष्टांतमाह यस्येति द्वाभ्यां ॥ यस्य महाशृंगे जगतीं पृथ्वीमेव स्वनावं बद्ध्वा मनुः समुद्रं ततो यथा ततार दुर्गं संकटं ततार ॥ स एव वारिचरो मत्स्यमूर्त्तिर्नोस्मान् त्वाष्ट्राश्रितान् सतः नूनं त्राता रक्षिष्यति ॥ २३ ॥ संयमांभसि प्रलयोदके उदीर्णोर्मिभिर्वातैः येउर्मयस्तेषां रवैः कराले भयंकरे ॥ अरविंदान्नाभिकमलात् पतितप्राय एकः स्वयंभूरपि महाभयात् एव तस्माद्भयाद्येन ततार स एव नः पारहर्ता कोस्तु ॥ २४ ॥

किंच वयं भगवतैव सृष्टाः पालिताश्च वयं इशाः अतस्त्वमेव शरण्यं ब्रह्मा मे त्वाऽऽह ॥ य एक इति त्रिभिः ॥ येनानुगृहीताः संतो विश्वं सृजाम ॥ नतु पृथग्भे-
वदृष्टाः नान्योऽस्माकमनुग्राहकोऽस्ति ॥ तस्मादीशीनात्त्राह ॥ अस्मत्तः पुरः पूर्वमेवातर्यामितयाऽस्मीहमानस्यापि यस्य लिंगं रूपं नप-
श्यामः ॥ तत्र हेतुः पृथक्पृथक् ईशाऽस्त्वाभिमानिनः ॥ २५ ॥ देवारिक्षुउपेंद्रपरशुरामसत्स्यमादितनुभिः कृतावतारः सन्नात्मसात्कृत्वा
पाति च ॥ २६ ॥ आत्मभूतैर्देवतं ॥ ऊतः विश्वं विश्वात्मकं ॥ तथापि विकारं वारयति ॥ अनंतं विश्वात्मकत्वे हेतुः परं कारणं ॥ नतु प्रधानं पुरुषश्च

य एक ईशो निजमायया नः स्रष्टा स येनानुसृजाम विश्वं ॥ वयं न यस्यापि पुरः समीहतः पश्याम लिंगं पृथगीशमानिनः ॥ २५ ॥
यो नः सपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृषु नित्य एव ॥ कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च
॥ २६ ॥ तमेव देवं वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यं ॥ व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ॥ २७ ॥ श्रीशु-
क उवाच ॥ इति तेषां महाराज सुराणामुपतिष्ठतां ॥ प्रतीच्यां दिश्यभूदाविः शंखचक्रगदाधरः ॥ २८ ॥ आत्मतुल्यैः षोडशभिर्वि-
नाश्रीवत्सकौस्तुभौ ॥ पर्युपासितमुन्निद्रशरदंबुरुहेक्षणं ॥ २९ ॥ दृष्ट्वा तमवनौ सर्वे ईक्षणाह्लादविक्लवाः ॥ दंडवत्पतिता राजन्

शनैरुत्थाय तुष्टुवुः
विश्वस्य कारणं ॥ तत्राह ॥ प्रधानं पुरुषं च ततोऽन्यत्कोऽपि स एवेत्यर्थः ॥ स एव नः शं विधास्यति ॥ २७ ॥ प्रतीच्यां दिशि हृदि ॥
यमभाविरभूत् ॥ २८ ॥ पुनस्तं पुरो दृष्ट्वा ईक्षणाह्लादेन विवशाः अवनौ दंडवत्पतिताः संतः शनैरुत्थाय तुष्टुवुः अतस्त्वयः ॥ कथंभूतं श्रीवत्सकौस्तु-
भौ विनाऽऽत्मतुल्यैः षोडशभिः स्वनंदादिभिः परितः सेवितं ॥ उन्निद्रशरदंबुरुहवदीक्षणे यस्य तं ॥ २९ ॥ ३० ॥

भा०ष
३२

यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मै नमः ॥ वयसे उत तत्फलपरिच्छेदककालात्मनेपि ॥ तद्विघातकेषु दैत्येषु अस्तं प्रक्षिप्तं चक्रं येन ॥ एवंभूतैः प्रभावैः सुपुरुहूतये शोभनबहुनाम्ने ॥ ३ ॥ न च समस्तगुणानां तत्स्वरूपं विहाय यज्ञगुणोपाधिकं यज्ञवीर्यत्वादि किमिति वर्ण्यते तत्राह ॥ यत्र वर्णना त्र यस्येशितुर्नियंतुः त्रिगुणात्मकानां तिसृणां गतीनां परमं परं निर्गुणस्वरूपं तत् ॥ विसर्गस्यार्वाचीनः इदानीतनः हे धातः वेदितुं नार्हति ॥ अतः केवलं तस्मै नमोस्तु ॥ ४ ॥ मिताक्षराणि पद्यानि नमीयंते हरेर्गुणाः ॥ इति पद्यैरवबद्धं तः सयोगद्येन कृष्टः ॥ भक्त्युद्रेकेण बहुधा संबोधयंतो ऽनेन पद्येन

देव ऊचुः ॥ नमस्ते यज्ञवीर्याय वयसे उत ते नमः ॥ नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये ॥ ३ ॥ यस्य गतीनां तिसृणामीशितुः परं पदं नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ॥ ३१ ॥ ॐ नमस्ते भगवन्नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममंगल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्ते ऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥ ३ ॥ दुरवबोध इव तवायं विहारयोगो यदशरणो ऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रि-

यमाणेन सगुणमगुणः सृजसि पासि हरसि ३४

अपि च यदि भगवन्नित्यादिना ॥ परमं मंगलं सद्बोधमयं यस्मिन् ॥ आत्मयोगेनाष्टांगेन यः समाधिः चित्तैकाग्र्यं तेन ॥ परिभावितः सम्यग्लालितः परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेन उद्घाटितं तमोरूपं कपाटं यस्मिंस्तस्मिन् द्वाररूपे चित्ते अपावृते प्रकटे आत्मलोके स्वरूपे स्वयमेवोपलब्धमभिव्यक्तं यन्निजसुखं तदनुभवरूपो भवान् ॥ ३ ॥ ननु केवलानुभवरूपत्वे मम सृष्ट्यादिकर्तृत्वं कथं तत्राह ॥ दुरवबोध इव तवायं विहारयोगः क्रीडायोगः ॥ यद्यस्मात् अशरणो निराश्रयः ॥ इदं विश्वं अनवेक्षितो ऽस्माकं समवायो मेलनं साहाय्यं येन सः ॥ ३४ ॥

राम
३२

दुर्ज्ञेयत्वात्तदाह । अथ तत्रेति यथेह देवदत्तो गृहादिनिर्मायितन्त्रस्वकृतस्वभाग्यभययोः फलमुपादत्ते । एवं भवान् ब्रह्मस्वरूपो जीवरूपेण गुणविसर्गे पतितः सन्नुपाददाति । यद्वा समञ्जसमसुप्रस्तुतं दर्शनं चिच्छक्तिर्यस्य स भवानुदास्ते उदासीनः साक्षितयावतिष्ठत इति ॥ २५ ॥ तदेवं विरोधेन दुर्ज्ञेयत्व मुक्त्वा तत्परिहारे तत्तान्यप्रकारमाह । नहीति । विरुध्यत इति विरोधः उभयं न विरुद्धमित्यर्थः । नत्वन्यदृष्टान्तेन त्वयि विकल्पो युज्यते । अतः कोऽप्यर्थं त्वा दित्याह । भगवतीति । अपरिमितगुणगणा यस्य तस्मिन्नीश्वरे त्वत्तत्त्वे । अनवगाह्यमनर्क्यमाहात्म्यं यस्य तस्मिन् विकल्प एवं वा एवं वेति । वितर्कः किमत्र युक्तमिति । विचारः इत्थमेवेति । तत्र प्रमाणाभासाः तदनुग्राहकाः कुतर्काश्चार्वाचीनावक्तृत्वरूपाः सर्वशिनो ये विकल्पादयस्तेषु शास्त्रेषु ॥

अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतन्त्र्येण कृतकुशलाकुशलं फलमुपाददाति आहोस्वित् आत्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः ॥ २५ ॥ नहि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाश्रयदुरवग्रहवादिनां विवादानवसर उपरतसमस्तमायामये केवल एवात्ममायामन्तर्धाय को न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥ समविषममतीनां मतमनुसरसि

कलिलं व्याकुलं अन्तःकरणमाश्रयो येषां दुरवग्रहस्तेन वादिनां विवादस्यानवसरे अगोचरे । ननु ग्रहमात्रमेतत् । यथा रज्जुखण्डः सर्पादिधियां युक्तिरुच्यतां तत्राह । उपरतेति मायामयः संसारो यस्मिन् तस्मिन् केवले आत्ममायां मध्ये निधाय कोऽन्वर्थः कर्तृत्वादिर्न संभवति । यदि वस्तुतः कर्तृत्वादिर्भवेत् तर्हि विरोधः स्यात् । न तु तदस्तीत्याह । स्वरूपद्वयाभावादिति । अनुग्रहनिग्रहादिकं तु तत्तन्मतिभेदेन त्वन्मायया त्वयि स्फुरतीत्याह । समविषमाश्च मतिर्येषां मतमनुसरसि यथा सर्पादिविषयाधीर्येषां यथा रज्जुखण्डस्तथा तथा भाति । यद्वा तमेवाविरोधं प्रपञ्चयति भेदेन दर्शयति समविषमेति इति

भा० ष
११

तदेवं विरोधं परिहृत्य निश्चितं परमार्थमाह। स एव नानारूपेणाप्रतीतः॥ वस्तुतस्त्वरूपः सद्रूपः सर्वेषां गुणानां विषयाणां भासाभासैः प्रकाशैरु-
पलक्षितः॥ न ह्येतैर्जीव एवोपलक्ष्यते॥ न॥ सर्वप्रत्यगात्मत्वात् सर्वजीवान्तर्यामित्वात्॥ न तु तादात्म्याध्यासेन जीवस्यापि जडप्रायत्वात्तेन वि-
नाप्रकाश इति भावः। पर्यवशेषितः नेति नेतीत्यादिश्रुतिभिः॥ ३७॥ अतस्त्वदंघ्रिरेव परमपुरुषार्थ इत्याह॥ अथ हेति पर्यावर्त इत्यंतेन॥ य-
स्मादेवंभूतस्त्वं परमेश्वरः॥ अथ ह वाव अत एव हे मधुमथन परमभागवता एते त्वत्पदांबुजानुसेवां कथं नु उरु उ विसृजंतीत्यन्वयः॥ हिय

स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः॥ सर्वेश्वरः सकलजगत्कारणभूतः॥ सर्वप्रत्यगात्मत्वात् सर्वगुणाभासोपलक्षित ए-
क एव पर्यवशेषितः॥ ३७॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यंदमानानवरतसुखे-
न विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकांतिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरंतर-
निर्वृतमनसः कथमु ह वा एते मधुमथन पुनः॥ स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणांबुजानुसेवां विसृजंति
न यत्र पुनरयं संसारपर्यावर्त्तः॥ ३८॥ श्रीरामकृष्णसहायरहना॥ गोपालकृष्णसहाइ

स्मात् स्वार्थे पुरुषार्थे कुशलाः निपुणाः॥ आत्मा त्वमेव प्रियः सुहृच्च येषां ते॥ साधवो रागादिशून्याः तत्र हेतुः॥ तव महिमैवामृतरससमुद्रस्तस्य
विप्रुषा बिंदुमात्रेण सकृदपि लीढयास्वादितया स्वमनसि निष्यंदमानेनातिशयेनानवरतं निरंतरं सुखेन तेन विस्मारिता दृष्टश्रुतविष-
याः सुखलेशाभासा येषां ते॥ अत एव भगवति त्वयि नितरां निर्वृतं मनो येषां ते॥ यत्र यस्याम् अनुसेवायां सत्याम्॥ ३८॥

राम
११

ग्रस्तं विस्तापयंति त्रिभुवनेत्यादिना यावत्समाप्ति ॥ त्रिभुवनमात्मा स्वरूपं भवनं च यस्य त्रिभुवनस्यात्मा भवनं चेति वा ॥ त्रयो विक्रमा यस्य
त्रीन् लोकान् त्रयतीति तथा ॥ त्रयाणां लोकानां मनोहरोऽनुभावो यस्य ॥ एवंवत्सर्धर्षितं बोध्याः ॥ तेषामनुपक्रमसमयः उद्यमकालो न भ
वतीति मत्वा ॥ हे दंडधर पूर्वं यथा दंडं धर्षं धृतवानसि ॥ एवमेनं त्वाष्ट्रमपि जहि ॥ यदि मन्यसे हं तं यदीच्छसि ॥ ४० ॥ अथ मं तावत्त्वरीयानां

त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयस्त्वापि तेषामनु
पक्रमसमयोयमिति स्वात्ममायया हर नरमृगापि श्रितजलवराकृतिभिर्यथापराधं दंडधर दंडं दधर्थ एवमेनम
पि भगवन्जहि त्वाष्ट्रमुत यदि मन्यसे ॥ ४० ॥ अस्माकं तावकानां तव नततानां ततताम हत ववरणानलिनयुगल
ध्यानानुवद्धहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया वांतस्तापमनघार्हसि शमयितुं ॥ ४१ ॥

मस्माकं अंतस्तापं शमयितुमर्हसि ॥ तावकानामित्यत्र हेतुः हे पितः हे पितामह तव चरणनलिनयुगलध्यानेनैवानुबद्धो हृदयनिगडः स्व
र्वलायेषां ॥ स्वलिंगविवरणेन निजमूर्तिप्रकटनेन स्वीकृतानां केनचानुकंपितपानुरंजितं मानुरागं वत द्विशदं रुचिरं वशिशिरं च स्मितं त
त्सहितेनावलोकेन तथा नुकंपयैव विगलितो मधुरो मुखरसः प्रियावाक् सैवामृतकला तया च ॥ ४१ ॥ श्रीरामनामसत्य

भा०ष
३४

किंवा अस्मदभिप्रायस्त्वया ज्ञात एव किमत्रास्माभिर्विज्ञापनीयमित्याहुः ॥ अथेति हे भगवन्नतस्तवास्माभिरिह कियानर्थविशेषो विज्ञापनीयः स्या
दित्यन्वयः ॥ यथा हिरण्यरेतसोऽग्नेस्तदंशभूतैर्विस्फुलिंगादिभिः प्रकाशो न क्रियते ॥ तथा तवास्माभिः कार्यार्थप्रकाशनं न कार्यमित्यर्थः ॥ अत्र
हेतुगर्भाणि विशेषणानि ॥ अखिलजगतामुत्पत्त्यादिभिर्निमित्तायमानया दिव्यमायया विनोदो यस्य अत एव सर्वजीवनिकायानामंतर्हृ
दयेषु ब्रह्मस्वरूपेण प्रत्यगात्मान्तर्यामीतद्रूपेण च बहिरपि प्रधानरूपेण देशकालदेहावस्थानविशेषाननुल्लंघ्यानुभवतः कथं तेषामुपा

अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामन्तर्हृदयेषु ब
हिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलंभकतयानुभवतः सर्व
प्रत्ययसाक्षिण आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिह वार्थविशेषो विज्ञापनीयः स्यात् ॥ विस्फुलिं
गादिभिरिव हिरण्यरेतसः ॥ ४१ ॥ अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविध
वृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः ॥ ४२ ॥

दानतया उपलंभकतया उपादानतया उपलंभकतयेति वा ॥ अत एव सर्वेषां प्रत्ययानां बुद्ध्यादीनामपि साक्षिणः साक्षित्वे हेतुः आकाशवदलिप्तं श
रीरं स्वरूपं यस्य ॥ अलिप्तत्वे हेतुद्वयं ॥ साक्षात्परब्रह्मणो निरुपाधेः परमात्मनः शुद्धसत्वमूर्तेश्च ॥ १ ॥ अत एव सर्वज्ञत्वादेव वयं यत्कामेन यस्यका एप
यस्य कामेनोपसादिताः प्रापिताः तदस्माकं कार्यं स्वयमेवोपकल्पय संपादयेति चरणमेव शतपलाशं कमलं तस्य छायां विविधैर्वृजिनैर्युक्तः संसार
परिश्रमस्तस्योपशमकारीमुपसृतानामाश्रितानां ॥ ४२ ॥

नी०४
३४

पूर्वमन्त्रे हृत्कर्षो न्नो स्वात्मामशंकामाभूदिति स्वकामं कथयन्ति ॥ अथो नंतरमेव ॥ रा ॥ रीग्रंतहृध्यायप्रनः प्रणमंति ॥ हंसायसंध्यायहरये आर्तिहृप
यतेनमः ॥ स्वहृत्वे हेतवः हंसनिलयायपरस्याकारानिकेतायनिरीहकायसाध्यादिप्राप्तिशो ॥ रुणायसरानंदरूपाय ॥ हरिर्भुवाचकः रावश्ला
स्वनिर्वृतिवाचकः ॥ तयोरेकं परंब्रह्म स्वस्मात्त्वमभिधीयत इति निरुक्तेः आर्तिहरत्वे हेतवः मृष्टहृदविकरं यस्यायस्य ॥ निरूपक्रमाय आदिस्व
त्वाय ॥ सद्भिः संगृहीतनरनितथातस्मै ॥ भवपांथः भवरूपे पथि वर्तमानः तस्य जनस्य निजाश्रमाप्ति स्वरारणप्राप्ति स्वरूपमसारस्यातेय

अथोर्इराजहि त्वाश्रयतं भुवनत्रयं ॥ प्राप्तानि येन नः स्वस्मातेजांस्यवाप्यधानि च ॥ ४३ ॥ हंसाय सन्निलयाय निरीहकायरू
प्ताय मृष्टयशसे निरुपक्रमाय ॥ सत्संग्रहाय भवपांथनिजाश्रमाप्तावंते परिष्टगतये हरये नमस्ते ॥ ४४ ॥ सू ॥ उवाच ॥ इत्थं
वनीडितो राजन्नूस्यादरं त्रिशो हरिः ॥ विप्रपस्थानमाकर्ण्य प्राहतानभिनंदितः ॥ ४५ ॥ श्रीभगवानुवाच ॥ प्रीतोहं वः सुरश्रेष्ठाः
मदुपस्थानविद्यया ॥ आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥ ४६ ॥ किं दुरापं मयि प्रीते तथापि विबुधर्षभाः ॥ मय्येकां
तमतिर्नान्यत्मत्तो वांछति तत्त्ववित् ॥ ४७ ॥ न वेद कृपणः श्रेयः आत्मनो गुणवस्तुदृक् ॥ तस्य तानिच्छतो यच्छेद्यदि सोपि त
थाविधः ॥ ४८ ॥

रिः सर्वतः पूजितात्मभागतिः फलं यत्नाम्ने ॥ ४४ ॥ अभिनंदितः संतोषितः ॥ ४५ ॥ मदीयमुपस्थानं स्तोत्रं तत्सहितया विद्यया ज्ञानेन
न आत्मनः ऐश्वर्यमसंसारित्वं तस्य स्मृतिर्यया न हि विरोध उभयमित्यादिना कर्तृत्वभोक्तृत्वादिर्मायिक इत्युक्तेः ॥ भक्तिश्च यया भवति ॥ ४६ ॥ अथ हम
गवत्रित्यादिनामंत्रः सर्वोत्कर्षोक्तेर्भक्तमभिनंदति किमिति ॥ ४७ ॥ तदुक्तं देवैः स्वयं तदुपकल्पयास्माकमित्यादि तत्सपारनं ज्ञापालोर्ममाउचितमि
त्याशयेनाह न वेदेति द्वाभ्यां ॥ गुणैर्विषयेषु तद्दर्शितात्र विषयानिच्छतो यथाविधः तदेव ॥ ४८ ॥

भा॰ष
२५

कर्मनवक्तिप्रवृत्तिमार्गंनवक्तिहि अपथ्यंपथ्यानएतिभिषक्तमः संदेह्यः ॥ ५० ॥ एवंत्वत्कथनेनाश्विनौपरिहृत्यतदभिप्रायमनुसरन्नाह ॥ मघव
न्निति ॥ विद्ययाव्रतेनतपसाचसारंदृढंगात्रंशरीरं ॥ याचतयाचध्वं ॥ ५१ ॥ तत्रतदीयंविघातिरायमाह ॥ सवाइतिद्वाभ्यां ॥ एवंत्वत्रप्रसिद्धाकथा ॥ निशा
म्याथर्वणोदध्यङ् प्रवर्ग्यब्रह्मविद्ययोः ॥ दध्यंचंतमुपागम्यतपूर्वतरथाश्विनौ ॥ भगवन्नदेहिनौविद्यामितिश्रुत्वासवाब्रवीत ॥ कर्मण्येवस्थितो
द्याहंपश्चाद्वक्ष्यामिगच्छतं ॥ तयोर्निर्गतयोरेवशक्रआगत्यतंमुनिं ॥ उवाचभिषजौविद्यांमावदीरश्विनौमुने ॥ यदिमद्वाक्यमुल्लंघ्यब्रवीषिमह
सेवते ॥ शिरःछिंद्यांनसंदेहइत्युक्त्वासययौहरिः ॥ इंद्रेगतेतथाभ्येत्यनासत्यावूचतुर्द्विजं ॥ तन्मुखादिंद्रगदितंश्रुत्वातावूचतुःपुनः ॥ आवांत

स्वयंनिःश्रेयसंविद्वान्नवक्त्यज्ञायकर्महि ॥ नरातिरोगिणोपथ्यंवांछतोहिभिषक्तमः ॥ ५० ॥ मघवन्यातभद्रंवोदध्यंचमृषि
सत्तमं ॥ विद्याव्रततपःसारंगात्रंयाचतमाचिरं ॥ ५१ ॥ सवाअधिगतोदध्यङ् अश्विभ्यांब्रह्मनिष्कलं ॥ यद्वाअश्वशिरोनाम

एशिरःछित्वापूर्वमश्वस्यमस्तकं ॥ संधास्यावस्ततोब्रूहितेनविद्यांवनोद्विज ॥ तस्मिन्निंद्रेणसंछिन्नेपुनःसंधायमस्त तयोरमरतांव्यधात ॥ ५२ ॥
कं ॥ निजंतेदशिरःतांरत्वागमिष्यावोयथागतं ॥ एतत्श्रुत्वातथोवाचदध्यङाथर्वणस्तयोः ॥ प्रवर्ग्यंब्रह्मविद्यांचसत्कृतोसत्यशंकितइति ॥ ततश्चाय
मर्थः दध्यङ् निष्कलंशुद्धंब्रह्माधिगतःज्ञातवान् ॥ पाठांतरेतुनिगतएकतंभवति ॥ धनंतंप्रवर्ग्यंवाधिगतःज्ञातवान् ॥ ततोश्विभ्यांप्रादादि
त्युत्तरस्यानुषंगः ॥ उपदिदेशेत्यर्थः ॥ कथंभूतं ॥ यद्वैअश्वशिरसाप्रोक्तत्वात्अश्वशिरोनामप्रसिद्धं ॥ तयोरमरतांजीवन्मुक्तत्वंव्यधात ॥
तथाचश्रुतिः ॥ अश्वस्यशीर्ष्णाप्रयदीमुवाचेति ॥ ५२ ॥

राम
२५

मरात्मकं वर्म श्रीनारायणाकवचं च अधिगत इति पूर्वस्माच्छेषांगः ॥ तत्र हेतुः ॥ यद्यस्मात् त्वष्टुः प्रादात् ॥ यत् विश्वरूपाय त्वष्ट्रा यत्प्रादात् ॥ की
दृशं यत् त्वं विश्वरूपात् अधीः धृतवानसि ॥ तदेवं विद्ययामात्रं गात्रं याचध्वमित्यर्थः ॥ ५२ ॥ ननु प्रेष्टं देहं कथं दास्यतीति तत्राह ॥ युष्मभ्यमंगानि
॥ अश्विभ्यां याचितः सन् दास्यति ॥ यतो धर्मज्ञः विशेषतो अश्विभ्यां शिष्यप्रीत्या दास्यति ॥ आश्विनी नाम येन नहे यत्त्वं दर्शितं ॥ ततः श्चिभिर्विश्वक

दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकं ॥ विश्वरूपाय यत्प्रादात् त्वष्टा यत्त्वमधास्ततः ॥ ५२ ॥ युष्मभ्यं याचितोऽश्विभ्यां ध
र्मज्ञोऽङ्गानि दास्यति ॥ ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ॥ ५३ ॥ येन वृत्रशिरो हर्ता मत्तेज उपबृंहितः ॥ तस्मिन्
विनिहते यूयं तेजोस्त्रायुधसंपदः ॥ भूयः प्राप्स्यथ भद्रं वो न हिंसंति च मत्परान् ॥ ५४ ॥ इति श्रीभागवते महापुराणे ष
ष्ठस्कंधे नवमोऽध्यायः ॥ बादरायणिरुवाच ॥ इंद्रमेवं समादिश्य भगवान् विश्वभावनः ॥ पश्यतामनिमेषाणां तत्रैवांत
र्दधे हरिः ॥ १ ॥ तथाभियाचितो देवैः ऋषिराथर्वणो महान् ॥ मोदमान उवाचेदं प्रहसन्निव भारत ॥ २ ॥

र्मणा विनिर्मित आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः ॥ ५३ ॥ येन भवान् वृत्रस्य शिरो हर्ता हरिष्यति ॥ मम तेजसा उपबृंहितः सन् ॥ तेजश्च अस्त्राणि
च संपदश्च केऽपि न हिंसंति ॥ अतो युष्माकं भद्रमेवेति ॥ ५४ ॥ इति षष्ठे नवमः ॥ दशमे केशवादिष्टदध्यङ्ऽस्थिजवज्रभृत ॥ इंद्रो युध्यन् वृत्रेणाभि
रणे सनिर्दरः ॥ १ ॥ मोदमान एव तन्मुखाद्धर्मं श्रोतुकामः प्रत्याचक्षाण इवोवाच ॥ २ ॥

अपीति द्वाभ्यां ॥ हे वृंदारकाः अपि किं संस्थायां मृत्यौ यो ऽभिद्रोहो दुःखं तत्र जानीथ ॥ ३ ॥ आत्मा देहः ॥ तं यं जानीम एव किं त्वस्त्री विहृरस्मा
त्वेन याचतः इति चेत्तत्राह याचते विष्णवे ऽपि दातुं क उत्सहेत ॥ ४ ॥ पुण्यश्लोकैरीड्यानि कर्माणि येषां ॥ ५ ॥ याचको यदि वेद तर्हि न याचेत
यदीश्वरः दानसमर्थश्चेत्तर्हि सो ऽपि नेति नाह ॥ अतो यथा तव संकटं वयं स्वार्थपरा न जानीमः ॥ एवं प्रत्याख्याता स्त्वमप्यस्मत्संकटं न जा

अपि वृंदारकाः यूयं न जानीथ शरीरिणां ॥ संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥ जिजीविषूणां जीवानामात्मा प्रेष्ठ इहे
प्सितः ॥ क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ॥ ४ ॥ देवा ऊचुः ॥ किं नु तद्दुस्त्यजं ब्रह्मन्पुंसां भूतानुकंपिनां ॥ भवद्विधानां
महतां पुण्यश्लोकेड्यकर्मणां ॥ ५ ॥ नन्वै स्वार्थपरो लोको न वेद परसंकटं ॥ यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥ ऋषिरु
वाच ॥ धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः ॥ एष वः प्रियमात्मानं त्यजंतं संत्यजाम्यहं ॥ ७ ॥ यो ऽध्रुवेणात्मना नाथा
न धर्मं न यशः पुमान् ॥ ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥ एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः ॥ यो भूतशो
कहर्षाभ्यामात्मा शोचति हृष्यति ॥ ९ ॥ अहो दैन्यमहो कष्टं पारक्यैः क्षणभंगुरैः ॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥

नास्तीति भावः ॥ ६ ॥ मे मया प्रत्युदाहृताः प्रत्युक्ताः मां त्यजंतं त्यक्तायांतं आत्मानं देहं ॥ ७ ॥ अध्रुवेणात्मना देहेन ॥ हे नाथाः ॥ ८ ॥ भूतानां शोकेन
शोचति हर्षेण हृष्यति य आत्मा स्वयं तस्य यो धर्मः एतावानेवाव्यय इत्यर्थः ॥ ९ ॥ पारक्यैः श्वसृगालादिभक्ष्यैः अस्वार्थैः आत्मानुपयोगिभिः स्वविज्ञाता
नपः पुत्रादयः विग्रहो देहः तैर्नोपकुर्यादिति यत ॥ १० ॥

कृतं व्यवसितं निश्चयो येन आत्मानं हे त्वं तेन पत्रे कीर्त्तवं नूतं तत्ते जहौ ॥ १ ॥ यतो अग्न्यादयो येन ॥ तत्वं परमपतीति तथा ध्यात्वा निगता निर्बंधना
नियमा ॥ ५ ॥ अथेंद्रः अशोभनं तेभ्यो नैरणा व्ययः ॥ मुनेः शक्तिभिरस्थिभिर्निर्मितं ॥ उत्सिक्तः ॥ ऊर्जितः मुनेः साक्थ्यभिरितिवा पाठः ॥ १२ ॥ १४ ॥

वादृएयणिहृवाच ॥ एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुं ॥ परे भगवति ब्रह्मण्यात्मानं संनयन्जहौ ॥ १ ॥ यताक्षासुमनोबुद्धि
स्तत्वदृग्ध्वस्तबंधनः ॥ आस्थितः परमं योगं न देहं बुबुधे गतं ॥ १ ॥ अथेंद्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा ॥ मुनेः शक्तिभि
रुत्सिक्तो भगवत्तेजसान्वितः ॥ १२ ॥ वृतो देवगणैः सर्वैर्गजेंद्रोपर्यशोभत ॥ स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥ १४ ॥ वृत्रम
भ्यद्रवच्छक्त्या महतानीकयूथपैः पर्यस्तमोजसा राजन्क्रुद्धो रुद्र इवांतकं ॥ १५ ॥ ततः सुराणामसुरै रणः परमदारुणः ॥ त्रेतामु
खे नर्मदायामभवत्प्रथमे युगे ॥ १६ ॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः ॥ मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिं ॥ १७ ॥
दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वया श्रिया ॥ नामृष्यन्नसुरा राजन्मृधे वृत्रपुरःसराः ॥ १८ ॥ नमुचिः शंबरोऽनर्वा द्विमूर्धा ऋषभोऽसुरः
हयग्रीवः शंकुशिराः विप्रचित्तिरयोमुखः ॥ १९ ॥ पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः ॥ दैतेया दानवा यक्षा रक्षांसि च सहस्र
शः ॥ सुमालिमालिप्रमुखाः कार्त्तस्वरपरिच्छदाः ॥ प्रतिषिध्येंद्रसेनाग्रं मृत्योरपि दुरासदं ॥ २१ ॥ अभ्यर्दयन्नसंभ्रांताः सिंहनादेन दु

अनुहानीकानां यूथपैः ॥ पर्यस्तं परिवृतं ॥ १५ ॥ रणः संग्रामः प्रथमे चतुर्युगे ॥ त्रेतायुगस्य मुखे प्रवेशे ॥ मरुतः ॥ पादाभिः परिवेष्टितो वीतोः आसमंततो मेरुः
रमे ॥ १६ ॥ ७ ॥ नामृष्यन्न सहंत ॥ १८ ॥ २२ ॥

शतघ्नीचचक्रइहस्तालोककंटककंपविता ॥ भुशुंडी सर्वतोलोहकंटकान्वक्रमोत्रतेनाभिधानं ॥ १३ ॥ उरोवो मूलदेश: मत्तुतत्पलग्नोपरस्पृष्ठं खो भवतिन
नभःस्थैर्वनैः ज्योतिषी वेत्यनेनतेषां तद्ग्राह्रिः सूचिता: ॥ १४ ॥ तामेवाह ॥ नतइति शाल्वाणामहत्वाणां वयानिवर्षाणि तेषां त्र्योऽश्वाः नासेडुःन
पातः ॥ सिद्धपथेआकाशे ॥ ५ ॥ कीर्णाःअश्वाणां चंडबाणेषां ॥ गिरिशृंगलेड्डमेहत्पलैश्च ॥ ६ ॥ तानिंडं सैनिकान् ॥ शाल्वाणां महत्वाणां वपुरेः समूहै

शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः ॥ सर्वतोवाकिरन्शाल्वैरत्रैश्चविविधर्षमान् ॥ १३ ॥ नतेदृश्यंतसंछन्नाः शरजालैः
समंततः ॥ उवोन्नुउवेपतितेज्योतिषीवनभोद्यनैः ॥ १४ ॥ नतेशाल्वाववर्षोघ्याश्वाःसेडुःपरसैनिकान् ॥ छिन्नाः सिद्धपथे
देवैर्लगुहत्तैः सहस्रधा ॥ १५ ॥ अपतीकीर्णाच्छशाल्वोघ्याः गिरिशृंगडुमोपलैः ॥ अपप्ववर्षनृगवेलंविछिड्डुस्तांश्चपूर्वे
वत ॥ १६ ॥ तानहृतांस्त्वाविलिमतोनिशाम्यशाल्वाविपूगाः ॥ यदूत्रनाथ्याः ॥ डुमैर्दृषड्भिर्विविधाद्रिशृंगैरविकृताल्लैत्रसंभ्रोडुसै
निकान् ॥ १७ ॥ सर्वेयाधाश्चभवडिमोघाः कृताः कृताद्देवगाणेभुरेन्यैः ॥ इत्यात्रकूलेषयथामहत्त्वकृद्देःयद्युक्ताउष
तीअक्षवाव: ॥ १८ ॥ नेहत्वयाथासंवितथंनिरीश्चहाववभन्नाहतयुद्धदर्पाः ॥ पलायनायाजिमुखेविसज्यपतिंमनत्वैदधरान्न

रक्षतातक्रतश्रून्यात्र ॥ विालिमतः छविनः डुमादिभिश्चअविक्षतात्रिशाल्ववृत्रोनाथोयेषांतेनत्रहाभिर्भिताः ॥ १९ ॥ कृताः कृताः छनः सााः ॥ १५ ॥
उनःकृताः ॥ इत्स्नोश्चनुकूलोयेषांतेउदेवगाणेभु ॥ हषतीहषत्यः अनुकल्याणेपः कृता: ॥ पहत्वावाचायथामहत्त्वक्रोभक्रयोंनभवंतितद्वत ॥ १८ ॥
हतोयुद्धदर्पायेषां ॥ आत्तःपौरगृहीताः साणेधैर्ययेषांते ॥ अतिप्रसिद्धाःअपितेदैत्याः एवंतेरत्यस्यापोनहन्ता ॥ आजिमुखेयुद्धारंभेपतिंविसृज्यपला
यनायमनोदधुः यतोहाववभन्नाः ॥ १९ ॥

प्रधावतः पलायनान् प्रेक्ष्य अग्राहावेवतीरो नमयेन पलायितं मग्नं च ततः द्वलं सैन्यं तद्वप्रेक्ष्य एतद्दृश्यमानं व भाषे ॥ २० ॥ नरेव विशिनष्टि
कालोपपन्नाम वपुषो चितां मनन्हि विनां हविषा ॥ हेमय ॥ हे अनर्वन् मे वाच शृणुत ॥ ततो मृत्योः ६ हयशः लोकः स्वर्गश्च यदि स्यात ॥ अ
यतर्हि अमुं मृत्युमुक्तं स्मपीडीनं ग्राप्नुवा ॥ १ ॥ ब्रह्मसंधारणाया कलेवरं जह्यादितियत स एको मृत्युः वीरशय्ये रणाभूमौ त्रनिवृत्तः सुपरा
वेः स न जह्यादितियत ॥ स चैकः लोकद्वा विहराह्वे समतो मृत्यु ॥ तथा च स्मृतिः द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ ॥ परिव्राड्योगयु
क्तश्चो रणे त्वाननुगान्मन ह्वी प्रधावतः प्रेक्ष्य च भाष एतत ॥ पलायितं प्रेक्ष्य बलं च मग्नं भयेन तीव्रेण विहस्य वीरः ॥ २० ॥ का
लोपपन्नां हविषां मनन्हि विनाश वाच वाचं पुरुष प्रवीरः ॥ हे विप्र विवेन नृप लोपन् मया नर्वन् शवरं मे शृणुध्वं ॥ २१ ॥ जातस्य मृ

यदि

त्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता ॥ लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तं ॥ २४ ॥ द्वौ सम्मताविह मृ
त्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः ॥ कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशये निवृत्तः ॥ २२ ॥ इति श्रीभागवते महा
पुराणे षष्ठस्कन्धे दशमोऽध्यायः ॥ १० ॥ च ॥ तदेवं शंसतो धर्मं वचः पत्युरचेतसः ॥ नैवागृह्णन्त भयत्रस्ताः पलायनपरा नृप
विशीर्यमाणां पृतनामासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत ॥ १ ॥ दृष्ट्वातप्यत संक्रुद्ध इंद्रशत्रुरमर्षितः
तान्निवार्योजसा राजन्निर्भर्त्स्येदमुवाच ह ॥ २ ॥
नश्वरणे वा भिमुखो हतः इति ॥ २३ ॥ इति षष्ठे दशमः ॥ एकादशे तु वृत्रस्य युध्यमानस्य वज्रिणा ॥ भक्तिज्ञानबलोत्ता त्रिवार्योजसा राजन्निभर्त्स्ये दमुवाच ह
इर्को श्रुत्वा वाचो न वर्णिताः ॥ १ ॥ शंसतः कथयतः पत्युर्वचः ॥ १ ॥ कालानुकूलैः कालानुवर्तिभिः काल्यमानां विद्राव्यमाणां ॥ १ ॥ अमर्षितः असहमा

तराह द्वाभ्यां । मातुरुच्चरितैः उच्चारप्रायैः । प्रथमांतपाठे देवानां संबोधनं पृष्ठतो हतैः हतैः किं न किंचित् । न यशो नापि धर्मः तदेवाह न हीति ४ ॥
प्रधने संग्रामे ॥ सारं धैर्यं ॥ हृदि क्षुल्लकाः क्षुद्राः । मात्रं क्षणमात्रं ॥ अग्रे तिष्ठत ॥ न चेदिहलोकभोगेस्पृहास्ति ॥ ५ ॥ सुरगणान् रिपून् ॥ सुमहाप्रा

किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनां ॥ ४ ॥ यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि
अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥ ५ ॥ एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ॥ व्यनदत्सुमहाप्राणो येन लोका विचेत
सः ॥ ६ ॥ तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ॥ निपेतुर्मूर्छिता भूमौ यथैवाशनिना हताः ॥ ७ ॥ ममर्द पद्भ्यां सुरसैन्यमातुरं निमी
लिताक्षं रणरंगदुर्मदः ॥ गां कंपयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥ विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्र
वेऽभिद्रवते महागदां ॥ चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन करेण लीलया ॥ ९ ॥ स इंद्रशत्रुः कुपितो भृशं तया महेंद्रवा
हं गदयोरुविक्रमः ॥ जघान कुंभस्थल उन्नदन्मृधे तत्कर्म सर्वे समपूजयन्नृप ॥ १० ॥ ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कु
लिशाहतो यथा ॥ अपासरद्भिन्नमुखः सहेंद्रो मुंचन्नसृक्सप्तधनुर्भृशार्तः ॥ ११ ॥ न सन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः स गदां

णो बलं यस्य ॥ येन विचेतसो बभूवुः ६ ॥ वृत्रस्य विस्फोटनेन नादेन ७ ॥ महात्मा ॥ इंद्रोऽमृतस्यंदिकराभिमर्शवीतव्यथक्षतवाहोऽवतस्थे ॥ १२ ॥
उद्यतं शूलं येन ॥ नालं नलानां वनं ॥ उन्मत्तो मदो यस्य ॥ स यूथपतिर्गजो यथा मर्दयति ८ । १० ॥ सप्तधनूंषि प्रमाणं देशं ॥ ११ ॥ सन्नो वसन्नो वाहो यस्य ताप
तस्मै न प्रायुंक्त ॥ अमृतस्यंदी अमृतस्रावी यः स्वकरः तेनाभिमर्शः स्पर्शस्तेन वीतव्यथो गतदुःखः क्षतो वाहो यस्य स तथाभूतोऽवतस्थे ॥ १२ ॥

सर्वज्ञः ॥ हे नृपेंद्र अहं वकाम्यया पुण्ड्रदेहया ॥ वस्थितं भ्रातृहणं भ्रातरं विश्वरूपं हंतारं नृशंसं क्रूरं ॥ नरे वाह पापं तस्य कर्मस्मरन् ॥ ११ ॥ योऽहं ब्रह्महा ब्रा
ह्मणं हतवान् ॥ विशेषतः स्वगुरुं ॥ मम च भ्रातरं ॥ स भवानग्रतः समवस्थितः तद्दिष्ट्या मद्रंजातं ॥ दिष्ट्येत्यप्रमानं द्वार्थे ॥ हे अन्नमममम [illegible] लेननिर्भि
न्नं देषन्नत्वं [illegible] ॥ तेन त्वयानिमित्तभूतेन ॥ अयमश्व [illegible] ॥ एतच्च दिष्ट्या ॥ १४ ॥ स्वर्गकामो यो भवानत्र दृष्ट्वेत ॥ स्वर्ग

सर्तं नृपेंद्र अहं वकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ॥ स्मरं तश्च तत्कर्म नृशंसं महः शोकेन मोहेन ह सन्नु जगाद ॥ १२ ॥ दृष्ट्वेउ
वा ॥ व दिष्ट्या भवान्मे समवस्थितो रिपुः यो ब्रह्महा गुरुहा भ्रातृहा च ॥ दिष्ट्याः नृणोऽद्याहमसत्तमत्वया मच्छूलनिर्भिन्नदेषहृद
विराद ॥ १४ ॥ योनोग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ॥ विश्रम्य खड्गेन शिरांस्यवृश्चत्पशोरिवाकरुणः स्वर्गका
मः ॥ १५ ॥ ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यं ॥ कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदंति गृध्राः ॥ १६ ॥
अन्येऽनु ये त्वेह नृशंसमज्ञा यदुद्यतास्त्राः प्रहरंति मह्यं ॥ तैर्भूतनाथान्सगणान्निशातत्रिशूलनिर्भिन्नगलैर्यजामि ॥ १७ ॥ अ
थो हरे मे कुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदीह ॥ तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ॥ १८ ॥

कामो याज्ञिकः पशोरिवेति वा ॥ १५ ॥ तं त्वामस्पृष्टवह्निं अग्रे गृध्रा रहं समदंति ॥ वर्तमानसामीप्ये वर्तमानवन्निर्देशः ॥ १६ ॥ अन्येपि ये अनुसारेह त्वात्वानृशंस
मज्ञमत्प्रभुं यतास्त्राः संतो यदि प्रहरंति ते भूतनाथान् भैरवादीन् सगणान् कथंभूतैः निशातं तीक्ष्णं यत् त्रिशूलं तेन निर्भिन्ना गला येषां तैः ॥ १७
अथो अथवा हरे भोइंद्र ॥ यदि भवान्मेव मम शिरो हर्ता हरिष्यति ॥ तत्र तथा सति अनृणो विमुक्तः कर्मबंधः सन् ॥ तेभ्यो बलिं देहेन विधाय मनस्विनां पा
दरजः प्रपत्स्ये धीराणां पदं प्राप्स्यामि ॥ १८ ॥

भा॰ष
१९

जीवितादपि मृत्युरेव ममाभिमत इत्याशयेनाह । हरेशेति । न हिनोषि न हि क्षिपसि गदेव विफलो यास्यतीति संशयं माकार्षीः । कृपणार्थप्रयोजनं य-
स्याः सा याञ्चा यथा निःफला तथा न स्यात् ॥ १९ ॥ अमोघत्वे हेतुः वररंतं प्रोत्साहयितृ दधीचिनस्त्विति । तेजितस्तीक्ष्णीकृतः शत्रुं मां जहि विष्णुनायंत्रितः प्रे-
रितः ॥ २० ॥ हननेन मम पीडा स्यादित्यपि मा संशयिष्टा इत्याह । अहमिति । संकर्षणो मत्पतिर्यथाह तथा तदीयचरणारविंदे मनः समाधाय मुने-
र्यांतिमगातिमहंयास्यामि । तव वज्रस्य रंहसा लुलितः छिन्नो ग्राम्यपाशो विषयभोगलक्षणो यस्य स अपविद्धलोकः त्यक्तदेहः ॥ २१ ॥ किं तर्हि भग-

हरेश कस्मान्न हिनोषि वज्रं पुरः स्थिते वैरिणि मय्यमोघं । मा संशयिष्ठा न गदेव वज्रं स्यान्निःफलं कृपणार्थेव याञ्चा ॥ १९ ॥ न-
न्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचेस्तपसा च तेजितः । तेनैव शत्रुं जहि विष्णुयंत्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः ॥ २० ॥
अहं समाधाय मनो यथाह नः संकर्षणस्तच्चरणारविंदे । त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ॥ २१ ॥
पुंसां किलैकांतधियां स्वकानां याः संपदो दिवि भूमौ रसायां । न राति यद्द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं संप्रयासः ॥ २२ ॥
म१ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र । ततोनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोन्यैः ॥ २३ ॥

वान्संकर्षणः स्वभक्ताय मह्यमेव स्वर्गादि संपदो दास्यतीत्यपि मा संशयिष्टा इत्याह पुंसामिति । स्वर्गे भूमौ रसातले च याः संपदस्ताः किल नि-
श्चितं न राति न ददाति । तत्र हेतुः यत्तयाभ्यो द्वेषादयो भवंति ॥ २२ ॥ नहि स्वभक्तस्य किं विधत्ते । तत्राह । त्रैवर्गिको धर्मार्थकामविषयो य आयासस्त-
स्य विघातं विधत्ते । ततस्तु आयासोपरमात् अनुमेयः । नत्वैश्वर्यादिना । अतः सम्यक् भगवत्प्रसादाभावान्न संपदो भविष्यतीति भावः ॥ २३ ॥

राम
१९

एवंमिंद्राय त्वाभिप्रायं निवेद्य भगवंतं प्रार्थयते ॥ अहमिति ॥ तव पादावेव एकं मूलं आश्रयो येषां तेषां दासानुदासो भूयो भवितास्मि भ
विष्यामि ॥ मदेयं ॥ असुपतेः प्राणनाथस्य तव गुणान् मम मनः स्मरतु ॥ वागपि तानेव कीर्त्तयतु ॥ कायस्त्वेव कर्म करोतु ॥ २४ ॥ ननु किं
दास्येन ॥ तुभ्यं महाफलानि दास्यामि तत्राह ॥ नाकपृष्ठं ध्रुवपदं ॥ ब्रह्मलोकादिकं च ॥ हे समंजस ॥ निखिलसौभाग्यनिधे ॥ त्वां त्वा विरह
य्य कृत्स्नं न कांक्षे नेच्छामि ॥ २५ ॥ तर्हि किमिच्छसि तत्राह ॥ अजातपक्षाः खगाः क्षुधादिभिः पीडिताः यथा मातरं ॥ यथा च वत्सा अवद्धाः

अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ॥ मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म करोतु कायः ॥ २४ ॥ न
नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा विरहय्य कांक्षे ॥ २५ ॥ अजातपक्षा
इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्त्ताः ॥ प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविंदाक्ष दिदृक्षते त्वां ॥ २६ ॥ ममोत्तम
श्लोकजनेषु सख्यं संसारचक्रे भ्रमतः कर्मभिः ॥ त्वन्माययात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥ २७ ॥ इति श्री
भागवते महापुराणे षष्ठस्कंधे एकादशोऽध्यायः ॥ ११ ॥

वालवत्साः स्तन्यं ॥ यथा च व्युषितं दूरदेशं गतं ॥ प्रियं कामेन विषण्णा प्रिया तथा मे मनः तापत्रयपीडितं कर्मभिर्वद्धं च कामादिभिर्विषण्णं च त्वां
दिदृक्षते ॥ द्रष्टुमिच्छति त्वामर्थः ॥ २६ ॥ उत्तमश्लोकस्य तव जनेषु भक्तेषु एव सख्यं भूयात् त्वन्मायया देहादिष्वासक्तचित्तस्य भूयोपि तेष्वासक्तिर्भू
यात् ॥ २७ ॥ इति षष्ठे एकादशः ॥

भा०प०
४०

द्वादशेति विषणेन त्वयप्युत्साहितेन तु । महेन्द्रेण महायुद्धे वृत्रस्य वध ईर्यते ॥ १ ॥ महापुरुषं श्रीविष्णुं अप्सु प्रलयोदके ॥ १ ॥ युगान्ताग्निवत् कठोरा जिह्वा शिखा यस्य तत् आविध्य भ्रामयित्वा ॥ २ ॥ तत ख आपतत् तत् आगच्छत् ॥ निश्चलन्त्यो भ्रमन्त्यो ग्रहा उल्काश्च यस्मात् तद्वत् तदुःप्रेक्ष्यं ॥ शतपर्वणा वज्रेण उरगराजो वासुकिः तस्य भोगो देहः तदाकारं ॥ ३ ॥ हनौ कपोलप्रान्ते अमरेभमैरावतं च ॥ ४ ॥ ५ ॥ पुनश्च तमाह वृत्रः ॥ हर हे इंद्र ॥ ६ ॥ सदा जयो नैव

ऋषिरुवाच ॥ एवं जिहासुर्नृप देहमाजौ मृत्युं वरं विजयान्मन्यमानः ॥ शूलं प्रगृह्याभ्यपतत्सुरेन्द्रं यथा महापुरुषं कैटभोऽप्सु ॥ १ ॥ ततो युगान्ताग्निकठोरजिह्वमाविध्य शूलं तरसासुरेन्द्रः ॥ क्षिप्त्वा महेन्द्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद ॥ २ ॥ ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुःप्रेक्ष्यमजातविक्लवः ॥ वज्रेण वज्री शतपर्वणाच्छिनद्भुजं च तस्योरगराजभोगं ॥ ३ ॥ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रं ॥ हनौ तताडेन्द्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥ ४ ॥ वृत्रस्य कर्मातिमहाद्भुतं तत्सुरासुराश्चारणसिद्धसंघाः ॥ अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हा हेति विचुक्रुशुर्भृशं ॥ ५ ॥ इंद्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसन्निधौ पुनः ॥ तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥ ६ ॥ युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनां ॥ विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनं ॥ ७ ॥ लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे ॥ द्विजा इव शिचा बद्धाः स काल इह कारणं ॥ ८ ॥

किं तु क्वचित्तत्र विजयः एकत्र क्वचित्तत्र वितर्नवे ॥ परात्मनां तत्र विरपि पुरुषं तं सदा जयो नैव किं त्वेकत्रैव ॥ ईश्वरः शिचा बद्धाः स काल इह कारणं ॥ ८ ॥ कदाचिदेवेत्यर्थः परेषामात्मना येषां पराधीनात्मनामिति वा ॥ आद्यमनादिं सनातनं नित्यं ॥ ७ ॥ पराधीनतामाह ॥ लोका इति सप्तभिः यस्य वशे स्थिताः विवशाः संतः श्वसन्ति चेष्टंते ॥ द्विजाः पक्षिणः शिचाजालेन ॥ कालः कलयतीति भगवानिह जयादौ कारणं ॥ ८ ॥

शा०प०
४०

ओजआदिरूपं कालं तं हेतुमज्ञात्वायत्वविज्ञाय जडं सन्तमात्मानं देहं हेतुं मन्यते ॥ ९ ॥ नन्वहंकारात्मकत्वज्ज्ञानं तु दुःखादित्रीणीति पुरुषं तत्र

दुःखसुखम् इति व्यक्तं महत्तत्त्वं ॥ आत्मा अहंकारः ॥ ११ ॥ नन्वहं कर्म महाराजी वएव वहस्यारिहेहारितियी मामकामन्यं ते तत्राह ॥ एवमविद्वा

नसुनीशमेवात्मानमनमीश्वरत्वेन तं च मन्यते ॥ नन्वपि ब्राह्मणः श्रूयते ... तत्राह ॥ भूतैरिति ॥ स्वयं ईश्वरः ॥ १२ ॥ नन्वत

यामराजितस्य ममजयारिशंकैव नास्ति ॥ किमिति मां वलात् ॥ युद्धे अवक्त्रं यतितत्राह आयुरिति तत्काले जयादिकाले ॥ विपर्ययाः अकीर्त्या

ओजः सहो वलं प्राणममृतं मृत्युरेव च ॥ तमज्ञाय जनो हेतुमात्मानं मन्यते जडं ॥ ९ ॥ यथा दारुमयी नारी यथा यंत्रमयो मृगः एवं

भूतानि मघवन्नीश्वरतन्त्राणि विद्धि भो ॥ १० ॥ पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेन्द्रियाशयाः ॥ शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ॥ ११ ॥

अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरं ॥ भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयं ॥ १२ ॥ आयुः श्रीः कीर्त्तिरैश्वर्यमाशिषः पुरुष

स्य याः ॥ भवंत्येव हि तत्काले यथानिच्छोर्विपर्ययाः ॥ १३ ॥ तस्मादकीर्त्तियशसोर्जयापजययोरपि ॥ समः स्यात्सुखदुःखाभ्यां मृत्यु

जीवितयोस्तथा ॥ १४ ॥ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ तत्र साक्षिणमात्मानं यो वेद न स बध्यते ॥ १५ ॥ पश्य मां निर्जितं शत्रु

वृक्णायुधभुजं मृधे ॥ घटमानं यथाशक्ति तव प्राणजिहीर्षया ॥ १६ ॥ प्राणग्लहोयं समर इष्वक्षो वाहनासनः ॥ अत्र न ज्ञायतेमुष्य जयो

रयः ॥ १७ ॥ यस्मादेवं सर्वमीश्वराधीनं तस्मात्समः स्यात् हर्षविषादहीनो भवेत ॥ १४ ॥ समः स्यादुपायमाह सत्वमिति ॥ हर्षादिभिर्नबध्यते ॥ उपायपराजयः ॥ १६

ते ॥ १५ ॥ हर्षविषादनिवृत्त्यै तवाहमेव गुरुरित्याह ॥ पश्येति ॥ वृक्णायुधं भुजं यस्य ॥ अनियतं ब्रूते तत्र रूपकेणोपसंहरति ॥ प्राणएव ग्लहः पणो यस्मिन्

भा॰ष गतालीकं निः कपटं १७ भक्तः सेवितवानसि १८ २० न स तव खातकोदकैर्गर्तार्द्रिजलोपमैः स्वर्गादिभिः किं २१ युद्धानां संग्रामाणां पती योद्धारौ
४१ ॥ २२ ॥ हे मारिष श्रेष्ठ राजन् २३ ॥ ४ ॥ उत्कृत्तमूलं ययोस्ताभ्यां रक्तं स्रवतीति तथा ॥ गोत्रः पर्वतः २५ कृत्वाधरामित्यादेर्जग्रासेति वृत्तीयेनान्वयः

श्रीशुक उवाच ॥ इंद्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत ॥ गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः १७ अहो दानव सिद्धोसि यस्य ते मतिरी
दृशी भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरं ॥ १८ ॥ भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीं ॥ यद्विहायासुरं भावं महापुरुषतां
गतः ॥ १९ ॥ खल्विदं महदाश्चर्यं यद्रजः प्रकृतेस्तव ॥ वासुदेवे भगवति सत्वात्मनि दृढा मतिः २० ॥ यस्य भक्तिर्भगवति हरौ निः
श्रेयसेश्वरे ॥ विक्रीडतोमृताम्भोधौ किं क्षुद्रैः खातकोदकैः ॥ २१ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप ॥ युयु
धाते महावीर्याविंद्रवृत्रौ युधांपती ॥ २२ ॥ आविध्य परिघं वृत्रः कार्ष्णायसमरिंदमः ॥ इंद्राय प्राहिणोद्घोरं वामहस्तेन मारिष
॥ २४ ॥ स तु वृत्रस्य परिघं करं च करभोपमं ॥ चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥ २४ ॥ दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोसुरः
छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः ॥ २५ ॥ कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुं ॥ नभोगंभीरवक्त्रेण लेलिहोल्बणजि
ह्वया ॥ २६ ॥ दंष्ट्राभिः कालकल्पाभिः ग्रसन्निव जगत्त्रयं ॥ अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् ॥ २७ ॥ गिरिराट् पादचारीव पद्भ्यां नि
र्जरयन्महीं ॥ जग्रास स समासाद्य वज्रिणं सहवाहनं ॥ महाप्राणो महावीर्यो महासर्प इव द्विपं ॥ २८ ॥ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः
हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ॥ २९ ॥ निगीर्णोप्यसुरेंद्रेण न ममारोदरं गतः

नभोगंभीरेण वक्त्रेण लेलिहः सर्पः तद्वदुल्बणया जिह्वया ॥ २६ ॥ कालकल्पाभिः ग्रसन्निव ॥ २७ ॥ निर्जरयन् चूर्णयन् ॥ महाप्राणो महाबलो महावीर्यो महा
प्रभावः ॥ २८ ॥ २९ ॥

एम
४१

महापुरुषेण कवचरूपेण श्रीनारायणेन सन्नद्धो दंशितः योगबलेन मायाबलेन च ॥ ३१ ॥ बलभित् इंद्रः उच्चकर्त्त चिच्छेद ॥ ३२ ॥ तस्य कंधरां कंधरम् आशुवेगं अतिवेगवान् ॥ ज्योतिषां सूर्यादीनाम् अयने दक्षिणोत्तरगतिरूपे संवत्सरे यो ऽहर्गणः ॥ षष्ठ्युत्तरशतत्रयात्मकः तावता ऽहर्गणेन वार्त्रहत्ये वृत्रहत्यायोग्ये कालेन्यपातयत ॥ यद्वा ॥ स्वार्थे तद्धितः वृत्रहत्यायां वृत्रहननार्थं परिवर्त्तमानस्त्वर्थः ॥ ३३ ॥ वार्त्र

महापुरुषसन्नद्धो योगमायाबलेन च ॥ ३१ ॥ भित्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः ॥ उच्चकर्त्त शिरः शत्रोर्गिरिशृंगमिवौजसा ॥ ३२ ॥ वज्रस्तु तत्कंधरमाशुवेगः कृतन्समंतात्परिवर्त्तमानः ॥ न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥ ३३ ॥ तदा च खे दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः ॥ वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ॥ ३४ ॥ वृत्रस्य देहान्निष्क्रांतमात्मज्योतिररिंदम ॥ पश्यतां सर्वलोकानामलोकं समपद्यत ॥ ३५ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे द्वादशोऽध्यायः ॥ श्रीशुक उवाच ॥ वृत्रे हते त्रयो लोका विना शक्रेण भूरिद ॥ सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः ॥ १ ॥ देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयं ॥ प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः ॥ २ ॥

घ्नलिंगैर्मंत्रैः ॥ वृत्रहंतृवीर्यप्रकाशकैः वार्त्रहत्याय शवसे ष्टतनाषाह्याय च त्वा ऽऽहुवे इत्यादिभिस्तमिंद्रमभिष्टुवानाः अभिष्टुवंतः ॥ ३४ ॥ अलोकं लोकातीतं ॥ ३५ ॥ इति षष्ठे द्वादशः ॥ त्रयोदशे तु वृत्रघ्नं ब्रह्महत्यामहाभयात् ॥ विदंनशो वितः शक्रो निलीनेति निरूप्यते ॥ १ ॥ अनिर्वृतं शक्रमपि

भा॰ष ॥३॥ नमस्य हरेरिंद्रस्य दुःखहेतुं वक्तुं प्रस्तावकथामाह वृत्रविक्रमेत्यादिना अर्थ्यमानः प्रार्थ्यमानः वृहद्वधात ब्राह्मणवधाद्भीतः सन ॥४॥ एनः
४२ पापं विभक्तं विभज्य गृहीतं ॥ मार्ज्मि शोधयामि ॥५॥ ए ॥ वृषाकपिमिंद्रं ॥१०॥ तयादेवारिभिः कारितया ॥ स्मेत्यवधारणे ॥ इंद्र एवतामममृ

राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने ॥ येनासन्सुखिनो देवाः हरेर्दुःखं कुतोऽभवत ॥१॥ शुक उवाच ॥ वृत्रविक्रम
संविग्नाः सर्वे देवाः सहर्षिभिः ॥ तद्वधायार्थयन्निंद्रं नैच्छद्भीतो बृहद्वधात ॥२॥ इंद्र उवाच ॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवं
विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्यहं ॥५॥ शुक उवाच ॥ ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन ॥ याजयिष्याम भद्रं ते हयमे
धेन मा स्म भैः ॥६॥ हयमेधेन पुरुषं परमात्मानमीश्वरं ॥ इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात ॥७॥ ब्रह्महा पितृहा गोघ्नो मा
तृहाचार्यहाघवान ॥ श्वादः पुल्कसको वापि शुद्ध्येरन्यस्य कीर्तनात ॥८॥ तमश्वमेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठि
तेन ॥ हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण ॥९॥ शुक उवाच ॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं ॥ ब्रह्मह
त्या हते तस्मिन्नाससाद वृषाकपिं ॥१०॥ तयेंद्रः स्मासहत्तापं निर्वृतिर्नामुमाविशत ॥ ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गु
णाः ॥११॥ तां ददर्शानुधावंतीं चांडालीमिव रूपिणीं ॥ जरया वेपमानांगीं यक्ष्मग्रस्तामसृक्पटां ॥१२॥ विकीर्य पलितान्केशानृति
ष्ठ तिष्ठेति भाषिणीं ॥ मीनगंध्यसुगंधेन कुर्वतीं मार्गदूषणं ॥१३॥ नभोगतो दिशः सर्वाः सहस्राक्षो विशांपते ॥ प्रागुदीचीं दिशं तूर्णं प्रवि ष्टम

हतनाभाः अमुमिंद्रं निर्वृतिर्नाविशत ॥ नरुधैर्यादिगुणायुक्तः सजातो निर्वृतिस्त्वाह ॥ ह्रीमंतं वाच्यतां निघतां ॥१॥ यक्ष्मग्रस्तां क्षयरोग ॥ शोनपमानसं ॥१४॥ ४२
व्याप्ता ॥१२॥ मीनस्येव गंधो यस्य स मीनगंधिः ॥ सा चासावसुश्च तस्य गंधेन ॥१३॥ प्रागुदीचीं दिशं गतः सन्नूर्णमानसं सरः प्रविष्टः ॥१४॥

सेंद्रैः सह स्ववर्षाणि पुष्करनालस्य तंतूनावसन् ॥ कथंभूतः नलब्धोभोगोयेनसः ॥ ज्ञातः यद्यस्मादिह जलेवसन् ॥ अग्निदूतस्त्वं स्वयं अग्नेस्तु
स्वदूतस्य हविर्भागान्न जग्धेव आदेशाद्वैषामं प्रवादलब्धभोगदत्यर्थः ॥ पांमं तेरेण लब्धोयत्तभागोयेनसः ॥१५॥ त्रिनाकं ॥ नमुकंडुः स्वयमिति त्रि
तिनाकः पुण्यलोकः ॥ तृतीयं नाकं स्वर्गं ॥ नतु परतु पस्पकृतः स्वर्गराज्यं ॥ तत्राह ॥ विद्यादिभिरुद्भावः स्वर्गपालनसामर्थ्यं यस्यसः नहि
तस्मिन्नसति कथमिंद्रस्यपुनः स्वर्गप्राप्तिस्तत्राह ॥ नहुषः संपदैश्वर्ययोर्यो मदस्तेनांधाबुद्धिर्यस्यसः ॥ इंद्रपत्न्या शच्या तिरश्चां गतिं सर्प
योनिं ॥ उपायेनप्रापितः नीतः नहुषः किलकदाचिदिंद्राणीमुवाच ॥ इंद्रस्त्वावरं हे भूतत्त्वं मां भजेति ॥ तयाचावेदितवृत्तान्तो वृहस्पति

सस्नावसन्पुष्करनालतंतूनलब्धभोगो यदिहाग्निदूतः ॥ वर्षाणि साहस्रमलक्षितोंतः संचिंतयन्ब्रह्मवधाद्विमोक्षं ॥१५॥
तावत्त्रिनाकं नहुषः शशास विद्यातपोयोगबलानुभावः ॥ संपन्मदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चां गतिमिंद्रपत्न्या ॥१६॥
ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः ॥ पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ॥१७॥

स्तामुवाच ॥ ब्राह्मणवाह्यशिविकामारुह्यागतं त्वां भजिष्यामीति ब्रूहि ॥ ततोसौ ब्रह्मशापात्पतिष्यतीति ॥ तयाचोक्तो नहुषोऽगस्त्यादीन्
शिविकां वाहयामास ॥ तदा चशीघ्रं सर्प सर्पेत्यगस्त्यं पदापस्पर्श ॥ तेनक्रुपितेन सर्पो भवेति शप्तो महासर्पो ऽजगरो भूत ॥ इति ॥१६॥ तत
इंद्रः स्वर्गगतः प्राप्तः ॥ कथंभूतः ॥ ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः ऋतंभरः सत्यपालको हरिः तस्यध्यानेन निवारितमघं येन सः ॥ अभ्यु
पितः पापो ब्रह्मवधस्तमिंद्रं नाभ्यभूत तस्यापि भवं नाकरोत ॥ ज्ञातः दिग्देवतया ऐशान्यादिशि स्थितया श्रीहडेतो श्रीरूपयाअवितं र

२

भा०ष
४२

शुश्रूषस्य हरेराधनयस्मिंस्तेन ॥१८॥ सर्वदेवमयः स्वात्मा मूर्तिर्यस्य तस्मिन् वेदमयात्मनीति वा पाठः ॥ ब्रह्मवादिभिर्वितते तस्मिन्नश्वमेधे म
हेन्द्रेणोज्यमाने पुरुषे सति ॥१९॥ तेनैव पुरुषेणैव शून्यायनीतः नाशित इत्यर्थः ॥२०॥ अधिक्रतायस्तायेनतं ॥२१॥ पाठादि विधानमाख्यानं
स्तोति ॥ इदमिति ॥ प्रक्षाल्यते नेनेति क्षालनं ॥ तीर्थपदस्यानुकीर्तनं यस्मिन् ॥ भक्त्युच्छ्रयो यस्मिन् ॥ भक्तजनानामनुवर्णनं यस्मिन्

तं च ब्रह्मर्षयोऽश्वमेधेन भारत । यथावदीक्षयांचक्रुः पुरुषाराधनेन ह ॥१८॥ अथेज्यमाने पुरुषे सर्वदेवमयात्मनि
अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः ॥१९॥ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप । नीतस्तेनैव शून्याय नीहार इव भा
नुना ॥२०॥ स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः । इष्ट्वाधियज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः ॥
॥२१॥ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनं । भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः
॥२२॥ पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियं । धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं तथायु
ष्यं ॥२३॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे इंद्रविजयो नाम त्रयोदशोऽध्यायः ॥१३॥

महेन्द्रस्य मोक्षो यस्मिन् मरुत्वतो विशेषेण जयो यस्मिन् ॥२२॥ इन्द्रियं तन्नामर्षवकरं ॥ इन्द्रसंबंधीति वा आयुष्यमायुष्यं ॥२३॥ इति षष्ठे त्रयो
दशः ॥ वृत्रस्य तामसस्य जन्मादि श्रुत्वा पृष्टः परीक्षिता ॥ देवमाह च वृत्रस्य सर्वं जन्मसरितोक्तिभिः ॥१॥

राम
४२

चतुर्दशोतसहस्राकछूलद्येहतेमते ॥ चित्रकेतोरतिस्नेहादतिशोकोनिरूप्यते ॥ रजस्तमःस्वभावोयस्य ॥ १ ॥ भक्तेर्दुर्लभत्वंप्रपंचयतित्रिभिः पा
र्थिवैरजोभिः परमाणुभिः समाः संख्याताः अनंताइत्यर्थः ॥ जंतवोजीवास्तेषांमध्येयेकेचनकतिपयेश्रेयोधर्ममीहंतेकुर्वंति ॥ २ ॥ मुमुक्षवस्त

परि॰ उवाच ॥ रजस्तमःस्वभावस्यब्रह्मन्वृत्रस्यपाप्मनः ॥ नारायणेभगवतिकथमासीदृढामतिः ॥ १ ॥ देवानांशुद्धसत्वाना
मृषीणांचामलात्मनां ॥ भक्तिर्मुकुंदचरणेनप्रायेणोपजायते ॥ २ ॥ रजोभिःसमसंख्याताःपार्थिवैरिहजंतवः ॥ तेषांयेकेच
नेहंतेश्रेयोवैमनुजादयः ॥ ३ ॥ प्रायोमुमुक्षवस्तेषांकेचनैवद्विजोत्तम ॥ मुमुक्षूणांसहस्रेषुकश्चिन्मुच्येतसिध्यति ॥ ४ ॥ मु
क्तानामपिसिद्धानांनारायणपरायणः ॥ सुदुर्लभःप्रशांतात्माकोटिष्वपिमहामुने ॥ ५ ॥ वृत्रस्तुसकथंपापःसर्वलोकोपता
पनः ॥ इत्थंदृढमतिःकृष्णेआसीत्संग्रामउल्बणे ॥ ६ ॥ अत्रनःसंशयोभूयान्श्रोतुंकौतूहलंप्रभो ॥ यःपौरुषेणसमरेसह
स्राक्षमतोषयत ॥ ७ ॥ सू॰ उवाच ॥ परीक्षितोथसंप्रश्नंभगवान्बादरायणिः ॥ निशम्यश्रद्दधानस्यप्रतिनंद्यवचोब्रवीत ॥ श्री
शुक उवाच ॥ शृणुष्वावहितोराजन्नितिहासमिमंयथा ॥ श्रुतंद्वैपायनमुखान्नारदाद्देवलादपि ॥ ९ ॥ आसीद्राजासार्वभौमः
शूरसेनेषुवैनृप ॥ चित्रकेतुरितिख्यातोयस्यासीत्कामधुङ्मही ॥ १० ॥ तस्यभार्यासहस्राणांसहस्राणिदशाभवन् ॥ सांतानि
कश्चापिनृपोनलेभेतासुसंततिं ॥ ११ ॥ रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ॥ संपन्नस्यगुणैःसर्वैश्चिंतावंध्यापतेरभूत ॥ १२ ॥

हादिसंगाद्विमुच्यतेसिध्यतितत्त्वंजानाति ॥ ४ ॥ ५ ॥ नचेद्रूपिघाश्लोकत्रयंशरणागतरत्याह ॥ यःपौरुषेणेति ॥ ७ ॥ ८ ॥ यथायथावच्छ्रुतम् ॥ ९ ॥ १० ॥ भार्यासहस्रा
णांसहस्राणि [struck out] कोटिरित्यर्थः ॥ सांतानिकःस्वयंसंतानानांहर्ताविप्रेभ्योस्तारंनसमर्थोपितासुसंततिनलेभेसर्वाणिंवंध्यास्व

भा० ष
४४

॥१४॥ उपासीदत् तस्य समीप उपविवेश ॥ समाहितः संयतः ॥१५॥ ॥१६॥ अपि किं अनामयमारोग्यं स्वस्ति शुभः ॥ प्रकृत्यधीनमेव राज्यमिति सदृष्टांत
माह ॥ यथा महदाद्याभिः सप्तभिः सप्तभिः प्रकृतिभिः गुप्तः पुमान् जीवो नित्यं गुप्तो भवति न तु तद्व्यतिरेकेण रक्षणमपि तिष्ठति ॥ तथा राजापि
सप्तभिः स्वाम्यमात्यो जनपदा दुर्गं द्रविणं संपदः ॥ दंडो मित्रं च तस्यैताः सप्तप्रकृतयो मताः इत्युक्तलक्षणाभिर्नित्यं गुप्तः सन् ॥१७॥ आत्मा
नं प्रकृतिषु अद्धा साक्षात् निधाय तदनुवर्तिनं कृत्वा श्रेयो राज्यसुखं प्राप्नुयादित्यर्थः ॥ स्वामी गृहः स्वयं वा ॥ मंत्रसहायो मित्रं ~~कर्मसहा~~षे

न तस्य संपदः सर्वाः महिष्यो वामलोचनाः ॥ सार्वभूमस्य भूश्चेयमभवन्प्रीतिहेतवः ॥१३॥ तस्यैकदा तु भवनं अंगिरा भग
वानृषिः ॥ लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥१४॥ तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ॥ कृतातिथ्यमुपासीद
त्सुखासीनं समाहितः ॥१५॥ महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ॥ प्रतिनंद्य महाराज समाभाष्येदमब्रवीत ॥१६॥ अंगिरा उवाच
अपि तेनामयं स्वस्ति प्रकृतीनां तथात्मनः ॥ यथा प्रकृतिभिर्गुप्तः पुमान्राजापि सप्तभिः ॥१७॥ आत्मानं प्रकृतिष्वद्धा निधाय श्रे
य आप्नुयात ॥ राज्ञा तथा प्रकृतयो नरदेवाहिताधयः ॥१८॥ अपि दाराः प्रजामात्या भृत्याः श्रेण्योथ मंत्रिणः ॥ पौरा जानपदा भूपा आ
त्मजा वशवर्तिनः ॥१९॥

~~षे~~ं कर्मसहायो भात्य इति भेदः ॥ प्रकृतीनां च सुखं राजाधीनमेवेत्याह ॥ हे नरदेव तथा प्रकृतयोपि राज्ञा आहिताधयः
निहितनिक्षेपाः धनैः समृद्धा भवंति ॥ पाठांतरे ॥ आसमंततो हिताधयो निरस्तमनोदुःखा भवंतीत्यर्थः ॥१८॥ अमात्याः श्रेण्यः स्वसमयविराम
शेषेण संघशो वर्तमानाः ॥ वणिक्प्रभृतयः ॥ पौराः पुरवासिनः जानपदास्तत्तद्ग्रामाधिकारिणः ॥१९॥

४४

तव मनः स्ववशं वा नवेत्यर्थात् इच्छति ॥ यस्मात्मा मनः आत्मवशः आत्मवर्त्ती आत्माधीनः स्यात् तस्य वशगा इमे सर्वे भवंति ॥ किंच ॥ लोका
तस्य बलिं यच्छंति १० आत्मा भवान् आत्मनो न निष्प्रीमते न तद्भाषते ॥ तत्किं परतो वा स्वतो वा ॥ अलब्धकामत्वाल्लप्स्यसे ॥ ११ विदुषां सर्वे
नावि ॥ १२ ॥ अलब्धकामत्वं कथयन् उत्तरं यावत् भगवन्निति वत्तुभिः ॥ १ ॥ ४ ॥ अग्रजम एतत् ॥ कुन्तः स्यामतत्पानकाम ॥ अपरेत्स कुर्वंदनाद

यस्मात्मा त्ववशश्चेत्स्मात् सर्वे तद्वशगा इमे ॥ लोकाः सपाला यच्छंति सर्वे बलिं मतं द्विजः ॥ १० आत्मनाप्रीतेयनात्मा परतः स्वतो
एव वा ॥ लप्स्यसे लब्धकामं त्वां विंतयापाव लब्धवे ११ एवं विकल्पितो राजन् विदुषां मुनिना पितः ॥ प्रश्रयावनतोः प्याह प्रज्ञाका
मत्त्वतो मुनिं १२ वि… भगवन् किं न विदितं तपोत्मानसमाधिभिः ॥ योगिनो ध्वस्तपापानां बहिरंतः शरीरिणं
॥ १३ ॥ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिंतितं ॥ भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥ १४ लोकपालैरपि प्रार्थ्याः साम्रा
ज्यैश्वर्यसंपदः ॥ न नंदयंत्यप्रजं मां क्षुत्तृट् काममिवापरे १५ ततः पाहि महाभाग पूर्वैः सहगतं तमः ॥ यथा तरेम दुस्तारं प्रज
यातद्विधेहिनः ॥ १६ श्रीशुक उवाच ॥ इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः ॥ श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥ १७
ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत ॥ नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद्विजः ॥ १८ अथाह नृपतिं राजन् भवितैक आत्म

योयथानसुखयंति ५ पूर्वैः पित्रादिभिः सहगतं प्राप्तं तमः नरकं प्रजया यथा वा त्वजः ॥ हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ १९
तरेम तन्नथा विधेहि ॥ १६ ॥ ८ ॥ यज्ञोच्छिष्टं यज्ञशेषं १८ जन्मना हर्षं मरणेन च शोकं प्रदास्यतीति तथा ॥ इत्येव ब्रह्मा ययौ ॥ १९ ॥

॥ ३० ॥ शूरसेनानामीशस्यतेजसावीर्येणगर्भःसववृधे ॥ १ ॥ जातकंजातकर्म ॥ २ ॥ सूर्द्धं रस्ताकोदयः वेरेत्वकोशिरेवार्द्धंदनिष्ठुतंव
प्रगतवसूउंदं चेतिप्रधुतानंतरनिर्हृतात ॥ ४ ॥ धन्यंधनकं ॥ आयुष्यआयुःकरं ॥ ५ ॥ ६ ॥ मोहस्यसमुद्भवोयस्मिन् ॥ प्रजाकामस्यपो

सापितस्याशनारेवचित्रकेतोरधारयत ॥ गर्भंकृतद्युतिर्देवीकृत्तिकाग्नेरिवात्मजं ॥ ३० ॥ तस्याश्रयुदर्दिनं गर्भः शुक्लपक्षइवोडु
पः ॥ ववृधेशूरसेनेशतेजसाशनकैर्नृप ॥ ३१ ॥ अथकालउपावृत्तेकुमारःसमजायत ॥ जनयन्शूरसेनानांशृण्वतांपरमांमु
दं ॥ ३२ ॥ हृष्टोराजाकुमारस्यस्नातःशुचिरलंकृतः ॥ वाचयित्वाशिषोविप्रैःकारयामासजातकं ॥ ३३ ॥ तेभ्योहिरण्यंरजतंवा
सांस्याभरणानिच ॥ ग्रामान्हयान्गजान्प्रादाद्धेनूनामर्बुदानिषट् ॥ ३४ ॥ ववर्षकामानन्येषांपर्जन्यइवदेहिनां ॥ ध
न्यंयशस्यमायुष्यंकुमारस्यमहामनाः ॥ ३५ ॥ कृच्छ्रलब्धेऽथराजर्षेस्तनयेऽनुदिनंपितुः ॥ यथानिःस्वस्यकृच्छ्राप्तेधनेस्नेहोऽन्वव
र्धत ॥ ३६ ॥ मातुस्त्वतितरांपुत्रेस्नेहोमोहसमुद्भवः ॥ कृतद्युतेःसपत्नीनांप्रजाकामज्वरोऽभवत् ॥ ३७ ॥ चित्रकेतोरतिप्रीतिर्यथादा
रेप्रजावति ॥ नतथान्येषुसंजज्ञेबालंलालयतोऽन्वहं ॥ ३८ ॥ ताःपर्यतप्यन्नात्मानंगर्हयंत्योऽभ्यसूयया ॥ आनपत्येनदुःखेनरा
ज्ञोनादरणेनच ॥ ३९ ॥ धिगप्रजांस्त्रियंपापांपत्युश्चागृहसंमतां ॥ सुप्रजाभिःसपत्नीभिर्दासीमिवतिरस्कृतां ॥ ४० ॥ दासीनांकोनु
संतापःस्वामिनःपरिचर्यया ॥ अभीक्ष्णंलब्धमानानांदास्यादासीवदुर्भगाः ॥ ४१ ॥ एवंसंदह्यमानानांसपत्न्याःपुत्रसंपदा ॥ रा
ज्ञोऽसंमतवृत्तीनांविद्वेषोबलवानभूत् ॥ ४२ ॥ विद्वेषनष्टमतयःस्त्रियोदारुणचेतसः ॥ गरंददुःकुमारायदुर्मर्षानृपतिंप्रति ॥ ४३ ॥

ज्वरस्तापः ॥ ३७ ॥ दारेइत्येकवचनमार्षं ॥ ३८ ॥ आनपत्येनसुतरहितत्वनिमित्तेन ॥ ३९ ॥ नगृहेसंमतानबहुमता ॥ पत्युर्गृहेऽप्येवगृहं ॥ ममभार्येतिसंमतापित्यर्थः ॥ ४० ॥ दासा
राशीयथातथावयं ॥ दुर्भगाः ॥ ४१ ॥ नसंमतावृत्तिर्जीवनंयासां ॥ ४२ ॥ विद्वेषेणनष्टामतिर्यासांताः ॥ गरंविषं ॥ दुर्मर्षाअसहमानाः ॥ ४३ ॥

॥४४॥ धात्री स्तनदायिनी ॥४५॥ उन्नतेन तारकेकनीनिके ययो येन लोचने यस्याः तं ॥४६॥ विभ्रष्टाः शिरोरुहाः स्रुवे रेव यस्याः सा ॥४७॥ तास्त्वपत्योवि
॥४७॥ स्खलकिताः स्रस्तकः मस्तके तद्यस्याः तं स्वयमागताः प्रकृतयो मात्यारयायस्य सो तत्र प्रकृतिः ॥५०॥ बाष्पकलाभिः स्रस्तविन्दुभिरुपरो
रुतद्युतिरजानंतीसपत्नीनामदृश्यमहतः ॥ तत्त्वमेवेति संचिन्त्य निरीक्ष्याव्यवरुहे ॥४४॥ राघानं चिरं बालमुपधार्य मनीषि
णी ॥ तत्रमानयमे भद्रे इति धात्रीमचोदयत् ॥४५॥ सा राघानमुपवत्तत् दृष्ट्वा चोत्तारलोचनं ॥ प्राणप्रियात्मप्रियमप्यनं हतास्मीत्य
पतद्भुवि ॥४६॥ तस्यास्तदाकार्ण्य भृशातरं स्वरं घ्रंत्याः कराभ्यां उरश्च वैरपि ॥ अविरपराती त्वरयात्मजातिकं ददर्श बालं सहसा
मृतं हृतं ॥४७॥ पपात भूमौ परि[illegible] चाशु मोहविभ्रष्टशिरोरुहा वरा ॥ ततो नृपाताः पुरवर्त्तिनो जनाः नराश्च नार्यश्च निशम्य रोदनं ॥४८॥
आगत्य तस्य मनाः खिन्नाः ताश्च म्लानीकं रुरुदुः कृतागसः ॥४९॥ ज्ञात्वाम तेपुत्रमलक्षितांतकं विनष्टदृष्टिः पपात स्खल
नपथि ॥ स्नेहान्तवंधेषिनयासु वाष्पशांविमूर्छितोपकाति द्विजेंद्रतः ॥५०॥ पपात बालस्य सपादमूले मृतस्य विस्रस्तशिरोरुहा वरं
दीर्घं श्वसन् वाष्पकलोपरोधतो निरुद्धकंठो न शशाक भाषितुं ॥५१॥ पतिं निरीक्ष्यो रुरुस्रु चार्पितं तदा मृतं च बालं तमेकसंत
तिं ॥ जनस्य राज्ञी प्रकृतेश्च हृद्गतं रतीरधाना विललाप विचेतना ॥५२॥ स्तनद्वयं कुंकुमपंकमंडितं निषिंचती सांजनवाष्पविंदुभिः
पतः सरतत्वेन निरुद्धः कंठो यस्य ॥ उरुसु चार्पितं ॥ वज्रशोकेन व्याप्तं ॥ एकमेव ॥ विकीर्य केशान् विगलत्स्रजः सतं सुशोचविवर्णकरा वहहती ॥५३॥
संततिरूपं ॥५२॥ विगलंत्यः स्रजो येभ्यस्तान् केशान् ॥५३॥

आत्मसृष्टेरप्रतिरूपं चेष्टसे तदेवाह ॥ अहो परे वृद्धे जीवति अपरस्य बालस्य या मृतिस्तत्तदा हि वृद्धस्य सृष्टिसामर्थ्याभावे बाले च मृते सति त
वत्सृष्टिर्नश्यत्स्यादित्यर्थः ॥ सांप्रतं त्वत्सृष्टेर्विपरीतोऽस्मीति चेत्तत्राह ॥ विपर्ययः विपरीतोऽसि चेत्तर्हि त्वं प्राणिनामपतिः दुःखकारित्वाद्ध्रुवः नित्यः
परः शत्रुरसि न तु कृपालुरित्यर्थः ॥५४॥ ननु जीवकर्मानुसारेण जन्मादि कुर्वतो मम कोऽपराध इत्यत्राह ॥ नहीति ॥ पुत्रे जीवति एव पिता म्रि
यते पितरि जीवत्येव पुत्रो जायत इति क्रमो नास्ति कर्माधीनत्वादिति चेत् ॥ तर्ह्यात्मकर्मभिरेव तज्जन्मादिकमस्तु किं त्वया कृतं ॥ ननु मयेश्व

अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे ॥ परे नु जीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥५४॥
न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ॥ यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृ
श्चसि ॥५५॥ त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं ॥ अञ्जस्तरेम भवताप्रजदुस्तरं
यद्ध्वांतं न याह्यकरुणेन यमेन दूरं ॥५६॥ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयंति नृपनंदन संविहर्तुं ॥ सुप्तश्चिरं
ह्यशनया च भवान्परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानां ॥५७॥

रेण विना जन्तुः कर्मभिरिदं कथं सिध्येत ॥ भवत्वेवं नाम तथापि निजसर्गवृद्धये ते त्वया यः स्नेहपाशः कृतस्तमिमं स्वयमेव विवृश्चसि छिनत्सि ततोऽत्यादिकारुणिकोऽसीति ॥ न त्वेवंविधं दुःखं दृष्ट्वा कश्चिदपि पुत्रादि
स्नेहं करिष्यतीति भावः ॥५५॥ अप्रजदुस्तरं प्रजानांऽदुस्तरं ॥ अकरुणेन सह ॥५६॥ अशनया क्षुधा ॥५७॥ श्रीरामसहाय

तत्र जन्मे पुत्र ॥ नाहं प्रथमं त्वत्पार्श्वमागता मृतानीतवपुः साधक्ष्यितं वक्त्रं ददर्शोन दृष्टवत्यस्मि ॥ इदानीमपि गिरा न शृणोमि ॥ तर्हि किं अत्र पुनरत्र हे पुन
रागमनं यथा न भवति तथा गतोसि ॥ ५८ ॥ ६१ ॥ इति श्री षष्ठ चतुर्दशोध्यायः ॥ ततः पंचदशे चित्रकेतोः शोकापनोदनं ॥ कृत्वा तत्वोपदेशेन नारदांगि
रोभ्यां ॥ १ ॥ मृतकोपान्ते शवसमीपे ॥ १ ॥ त्वं चास्य बंधुना कतमः सृष्टौ प्रजारूपाभ्यां ॥ अयं पुत्रः अहं चास्य पितेति चेत्तत्राह त्वं पुरेति ॥ ये पूर्वं
नाहं तत्र जन्मदर्शी हतमंगला ते पुत्रं धक्ष्यितं पुरितवीक्षमाणमानना ॥ किं वा गतोस्य पुनरन्वयमन्यलोकं नीतो घृणेन नशृ
णोमि कलागिरं ते ॥ ५८ ॥ श्रीशुक उवाच ॥ विलपंत्या मृतपुत्रामिति चित्रविलापनैः ॥ चित्रकेतुर्भृशं तप्तो मुक्तकंठो रुरोद ह ॥ ५९ ॥
तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः ॥ रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनं ॥ ६० ॥ एवं कश्मलमापन्ने नष्टसंज्ञमनायकं
नायकं ॥ ज्ञात्वांगिरा नाम ऋषिराजगाम सनारदः ॥ ६१ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे चतुर्दशोध्यायः ॥ श्रीशुक उ
वाच ॥ ऊचतुर्मृतकोपांते पतितं मृतकोपमं ॥ शोकाभिभूतं राजानं बोधयंतौ सदुक्तिभिः ॥ १ ॥ कोयं स्यात्तव राजेंद्र भवान्यम
नुशोचति ॥ त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परं ॥ २ ॥ यथा प्रयांति संयांति स्रोतोवेगेन बालुकाः ॥ संयुज्यंते वियुज्यंते
जन्मनि पित्रादिरूपेण संयुक्ता अपि सन्त एव मरणेन वियुक्ताः संतो वर्त्तमाने जन्मनि कदाचित्स्येवान्यस्य वा पुत्रादयो ॥ तथा कालेन देहिनः ॥
भवंति ॥ ते जन्मांतरे तस्यैवान्यस्य वा कलत्रादयो वा भवंति ॥ अतो नायं नियम इति भावः ॥ २ ॥ नमेवाभिप्रायं प्रकटयति यथेति ॥ स्रोतसः प्रवाहस्य
वेगेन यथा प्रयांति वियुज्यंते संयांति संयुज्यंते तथा कालवेगेन देहिनो जीवा अपि ॥ ३ ॥

तथाप्येतावंतंकालंममपुत्रोनाभूत्वार्द्धकेजातोमृतइतिदुःखमितिचेत्तत्राहतुः ॥ यथाधानासुवीजेषुधानाः वीजांतराणिभवंति ॥ काश्चिन्न
भवंतिनश्यंतिच ॥ नतुभवंतोनश्यंतोतिष्ठंतोवेतिवानियमः ॥ एवमेवभूतानिपुत्रादिरूपाणिभूतेषुपित्रादिषु ॥ अतोधानानांजन्मना
नकत्वेपियथापितृपुत्रादिभावोनास्तिएवमत्रापीतिनशोकःकार्यइतिभावः ॥४॥ ईशमाययाप्रेरितानामेवभवनमभवनं ॥ वस्तुतस्तुतस्यचस
वैधारणत्वात्पुत्रएवशोचनीयइत्याहतुः वयंचेति ॥ तुल्यकालावर्त्तमानकालीनाः ॥ जन्मनःप्राक्मृत्योःपश्चाच्चयथानसंतिएवमधु
नापिनसंति ॥ भोराजन् ॥ आद्यंतयोरसत्वात्तत्त्ववद्धस्तीत्यर्थः ॥५॥ भूतत्वेकथंप्रतीतिः कथंवाहमस्यजनकइत्याद्यभिमानस्तत्राहतुः भूतैरिति

यथाधानासुधानानाभवंतिनभवंतिवा ॥ एवंभूतेषुभूतानिचोदितानीशमायया ॥४॥ वयंचत्वंचयेचेमेतुल्यकालाश्चराचराः ॥ जन्म
मृत्योर्यथापश्चात्प्राङ्गैवमधुनापिभोः ॥५॥ भूतैर्भूतानिभूतेशःसृजत्यवतिहंत्यजः ॥ आत्मसृष्टैरस्वतंत्रैरनपेक्षोपिवालवत् ॥६॥
देहेमदेहिनोराजन् देहोदेहोभिजायते ॥ वीजादेवयथावीजंदेह्यर्थइवशाश्वतः ॥७॥ देहिदेहविभागोयमविवेककृतःपुरा ॥ जातिव्यक्तिविभागोयंयथावस्तुनिकल्पितः ॥८॥

इत्यादेरणमाययासृष्टत्वात्प्रतीतिः निमित्तमात्रत्वेनैवचभूतानामयममाभिमानइतिभावः नन्वी
श्वरस्यसृष्ट्यादिभिःसाध्यमस्तिचेत्तत्रपूर्णकामतास्यात् ॥ नास्तिचेत्तर्ह्यज्ञतःप्रवृत्तिस्तत्राहतुः अनपेक्षोपिवालवल्लीलयाकरोतीति ॥६॥ अयंदे
हाद्यादिव्यवहारोदेहानामेवनत्वात्मनइत्याहतुः देहिनः पितृदेहेनदेहिनःपुत्रस्यदेहोमात्रदेहिनोदेहादभिजायते ॥ यथावीजादेववीजं
जायते देहीत्वशाश्वतएवअर्थोभूम्यादिर्यथातद्वत् ॥७॥ ननुतर्हिदेहप्रतियोगित्वात्देह्यपिनशाश्वतःस्यात्तत्राहतुः देहदेहिनोरयंपरस्पर
प्रतियोगिविभागः पुराअनादिः अविवेककृतः अज्ञानकल्पितः ॥ जातिःसामान्यंव्यक्तिर्विशेषस्तयोर्विभागोयथावस्तुनिमृन्मात्रेकल्पितः घटाम

ध्याधिनाम्लानं वक्त्रं ॥ ९ ॥ १० ॥ उन्मत्तस्येव लिंगं येषां ते ॥ ११ ॥ ५ ॥ समग्रभूरहस्यैकौ बोधे समर्थाविति वा ॥ अतो भवान् ज्ञानदीपः प्रवर्त्यतां ॥ १६ ॥ १७ ॥ महा

शुकउवाच ॥ एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः ॥ विमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ॥ ९ ॥ राजोवाच ॥ कौ युवां ज्ञान
संपन्नौ महिष्ठौ च महीयसां ॥ अवधूतेन वेषेण गूढाविव समागतौ ॥ १० ॥ चरंति ह्यवनौ कामं ब्राह्मणा भगवत्प्रिया ॥ मादृशां
ग्रामबुद्धीनां बोधायोन्मत्तलिंगिनः ॥ ११ ॥ कुमारो नारद ऋभुरंगिरा देवलोसितः ॥ अपांतरतमो व्यासो मार्कंडेयोथ गौतमः ॥ १२
वसिष्ठो भगवान्रामः कपिलो बादरायणिः ॥ दुर्वासा याज्ञवल्क्यश्च जातूकर्णस्तथारुणिः ॥ १३ ॥ रोमशश्च्यवनो दत्तः आसुरिः सप
तंजलिः ॥ ऋषिर्देवशिरा धौम्यो मुनिः पंचशिखस्तथा ॥ १४ ॥ हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः ॥ एते परेशसिद्धेशा
श्चरंति ज्ञानहेतवः ॥ १५ ॥ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू ॥ अंधे तमसि मग्नस्य ज्ञानदीप उदीर्यतां ॥ १६ ॥ अंगिरा उवाच ॥
अहं ते पुत्रकामस्य पुत्रदोस्म्यंगिरा नृप ॥ एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः ॥ १७ ॥ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे
अतदर्हमनुस्मृत्य महापुरुषगोचरं ॥ १८ ॥ अनुग्रहाय भवतः प्राप्तावावमिह प्रभो ॥ ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥ १९
तदैव ते परं ज्ञानं ददामि गृहमागतः ॥ ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददावहं ॥ २० ॥ अधुना पुत्रिणां तापो भवतैवानुभूयते ॥ एवं
दारा गृहा रायो विविधैश्वर्यसंपदः ॥ २१ ॥ शब्दादयश्च विषयाश्चला राज्यविभूतयः ॥ मही राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः ॥ २२

पुत्रमार्गो वर्त्तावां हरिमन्नं ॥ १८ ॥ ९ ॥ तदैव पुरा पूर्वमागतोस्मि ॥ २० ॥ रायः अर्थाः ॥ चलाः अनित्याः किं च महीति ॥ २२ ॥

भा०ष०
५८

हेशूरसेनइमेसर्वेपिशोकादिप्रदाः ॥ किंचआगमापायित्वेनगंधर्वनगरतुल्याः ॥ गंधर्वनगरंत्वकस्मादेवक्वचिदायातिचाशुयातिचेति
प्रसिद्धं ॥ तद्वदनित्यत्वंशोकादिहेतुत्वंचागमापायित्वंचोक्तं ॥ मिथ्यात्वमप्याह स्वप्नश्चमायाचमनोरथश्चयथातद्वत् ॥ २२ ॥ मनोभवाः
मनोमात्रविजृंभिताः ॥ अत्रहेतुः अर्थेनतात्त्विकस्वरूपेणविनैवदृश्यमानाः तत्कुतः ॥ यस्मात्क्षणांतरेनदृश्यंतेऽतः ॥ तात्त्विकत्वेहिक्ष
णांतरेबाधोनस्यात्अतोमनोमात्रविजृंभितत्वेनस्वप्नादिवन्मिथ्याभूताइत्यर्थः ॥ नचैतेउपाणोपणक्तताइतिमीमांसकाः प्राहुः तत्रा

सर्वेपिशूरसेनेमेशोकमोहभयार्त्तिदाः ॥ गंधर्वनगरप्रख्याःस्वप्नमायामनोरथाः ॥ २२ ॥ दृश्यमानाविनार्थेननदृश्यंतेम
नोभवाः ॥ कर्मभिर्ध्यायतोनानाकर्माणिमनसोभवन् ॥ २४ ॥ अयंहिदेहिनोदेहोद्रव्यज्ञानक्रियात्मकः ॥ देहिनोविवि
धक्लेशसंतापकृदुदाहृतः ॥ २५ ॥ तस्मात्स्वस्थेनमनसाविमृश्यगतिमात्मनः ॥ द्वैतेध्रुवार्थविस्रंभंत्यजोपशममाविश ॥ २६ ॥

तोमनोमात्रविजृंभितत्वंतत्राह ॥ कर्मभिः कर्मवासनाभिः अर्थाननुध्यायतः पुंसोमनसएवनिमित्तात्कर्माण्यभवन्पाठांतरेकर्मदृष्टित
तमभिध्यायतइत्यर्थः ॥ कर्माण्यपिमनोभवत्वात्तत्साध्याअर्थाश्चापिमनोभवाएवेतिभावः ॥ २४ ॥ नकेवलंममतास्पदानांदुःखादिहेतुत्व
मुक्तं ॥ तत्रदेहसंबंधोमूलमित्याह ॥ अयंहीति ॥ हीत्यवधारणे ॥ अयंद्रव्यज्ञानक्रियात्मकः अधिभूताधिदैवाध्यात्मरूपोदेहएवदेहिनःदेहोऽह
मितिमन्यमानस्यदेहिनोजीवस्यविविधान्क्लेशान्संतापांश्चकरोतीतितथा ॥ २५ ॥ स्वस्थेनाव्यग्रेणगतिंतत्त्वंध्रुवोवास्तवःयःअर्थःइतिविस्रंभंविश्वा
संभ्रमणंवात्यज ॥ ततउपशममाविशाश्रय ॥ २६ ॥

राम
५८

अंगिरसोपदिष्टं तत्त्वं परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मंत्रविद्यां नारद उपदिशति एतामिति । उपनिषदां परं श्रेयोः स्वामि तत्त्वपनि
षत् मंत्र एवोपनिषत् तां प्रतिष्ठगृहाण । द्रष्टाद्रष्टुपतिर्भवान् ॥ ७ ॥ भूतलं च तदनधिकं च समानाधिकं भूम्नः परं महिमानं प्राप्नुः उपेति उपेष्यति ॥ ८ ॥
इति षष्ठे पंचदशोध्यायः ॥ षोडशे तत्त्वतोकोपविशोकीकृत्य तं नृपं ॥ अंगिरादिशा महाविद्यां नारदः शेषतो ब्रवीत् ॥ ॥ अंगिरा तावदनेन तत्पुत्रं पुत्रेणैव विपत्
प्रत्याहिसंबंधो मिथ्येति दर्शयितुं योगबलेन तमेव ज्ञातीनां दर्शयित्वा ॥ जीवात्मन् इत्याद्युवाच ॥ १ ॥ शोकमवशिष्टमाहुरति ॥ अथ देवऋषिर्नाम तत्त्वादित्य
नारद उवाच ॥ एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम । यां धारयन् सप्तरात्राद् द्रष्टा संकर्षणं प्रभुं ॥ २७ ॥ यत्पादमूलमुपसृत्य नरेंद्र पूर्वे शर्वादयो
भ्रममिमं द्वितीयं विसृज्य ॥ सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं नचिरादुपैति ॥ २८ ॥ इति श्रीभागवते महापुराणे षष्ठ
स्कंधे पंचदशोध्यायः ॥ बादरायणिरुवाच ॥ अथ देवऋषी राजन् संपरेतं नृपात्मजं ॥ दर्शयित्वेति होवाच ज्ञातीनामनुशोचतां ॥ ॥ श्रीना
रद उवाच ॥ जीवात्मन् पश्य भद्रं ते मातरं पितरं च ते ॥ सुहृदो बांधवास्तप्ताः शुचा त्वत्कृते भृशं ॥ २ ॥ कलेवरं स्वमाविश्य [illegible]
[illegible] शेषमायुः सुहृद्वृतः ॥ भुंक्ष्व भोगान् पितृप्रत्तान् अधितिष्ठ नृपासनं ॥ ३ ॥ जीव उवाच ॥ कस्मिन् जन्मन्यमी मह्यं पितरो मा
तरोऽभवन् ॥ कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ॥ ४ ॥ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ॥ सर्व एव हि सर्वेषां भवं
धेः ॥ ३ ॥ न देव कलेवरं प्रविश्योत्थितो जीव उवाच ॥ यद्वा श्रुतं लोके प्रेतशरीरे स्थित्वेति तत्रेयं ॥ ४ ॥ न यदि मृते पुत्रे हृष्या शोकश्चेतरा ॥ विक्रमशो मिथः ॥ ५ ॥
संबंध्याहर्षः किं न क्रियत इत्याशयेन संबंधस्यानियतत्वमाह ॥ बंधवो विवाहादिभिः संबंधिनः ज्ञातयः सपिंडाः अरयो घातकाः मित्रादीनि रह
काः ॥ ४ ॥ मध्यस्थास्तिरस्कारमध्यस्थाः विद्विषोऽद्यादिनीमित्तेन द्वेषिणः उदासीनास्त्वयोनिःक्रमः इति भेदः ॥ ५ ॥

भा.द
४९

कर्मभिर्भ्राम्यमाणत्वे दृष्टांतः यथा पण्यानि क्रयविक्रयाभ्यां हेमादीनि कर्तृषु व्यवहर्तृषु परिभ्रमंति ॥ एवं जीवोपि योनिषु जन्तुकेषु ॥ ६ ॥ एकस्मिन्नपि ज
न्मनि संबंधस्यानियतत्वे दृष्टांतमाह द्वाभ्यां ॥ नित्यस्य जीवस्यापि अर्थस्य पश्वादेः अनित्यः अनियतः विक्रयादिना संबंधनिवृत्तेः ॥ ७ ॥ एवं योनि
गतः पित्रादिसंबंधं प्राप्तोपि जीवो नित्यः देहजन्मादिना तस्य जन्माद्यभावात् ॥ अत एव वस्तुतो निरहंकृतः अहंममेत्यभिमानशून्यः यत्र पि
त्रादेः संबंधि नि यावदुपलभ्येत कर्मवशान्न वर्तते तावदेव तस्य पित्रादेः तत्रास्मिन् स्वत्वं न तु विक्रयादूर्ध्वं कालमपि ॥ यथैवैवं संबंधः ॥ यद्यन्नं कलेवरं
समाविशेपेति ॥ नत्र तस्मिन् कलेवरे ममेदानीं स्वत्वं निवृत्तमिति दृष्टांतमाह ॥ नित्यस्याविकाराव्यापिनः स्वधर्मादेः ॥ योनिगतो देहं प्रविष्टः

यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः ॥ पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥ नित्यस्यार्थस्य संबंधो ह्यनित्यो दृश्यते नृषु
यावद्यस्य हि संबंधो ममत्वं तावदेव हि ॥ ७ ॥ एवं योनिगतो जीवः स नित्यो निरहंकृतिः ॥ यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य
तत् ॥ ८ ॥ एष नित्योऽव्ययः सूक्ष्मः एष सर्वाश्रयः स्वदृक् ॥ आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ॥ ९ ॥

यत्र देहे तस्य जीवस्य तत्रास्मिन्देहे स्वत्वं ॥ न तु मरणोत्तरकालमपीत्यर्थः शेषं स्पष्टं ॥ जीवस्य नित्यत्वं साधयति ॥ एष नित्यः तत्र हेतुः अव्ययः
अपक्षयशून्यः ॥ तत्र हेतुः सूक्ष्मः जन्मादिशून्यः तत्र हेतुः सर्वाश्रयः ॥ जन्मादिमतो देहादेराश्रयः नतु देहादिरूपः यतः स्वदृक् स्वप्रकाशः सर्वाश्रय
त्वमुपपादयति ॥ आत्ममायया गुणैरात्मानमेव विश्वं विश्वात्मकं सृजति ॥ तदात्मानं स्वयमकुरुतेति श्रुतेः उपादानकारणत्वात्सर्वाश्रय इत्यर्थः जीव एव
स्य वस्तुतो ब्रह्मत्वाद्ब्रह्मण एव विवक्षितविशिष्टस्य स्वरूपेणावशिष्टत्वाज्जीवः सृजतीति वा वाग्भङ्गिः यद्वा स्वकर्मद्वारा सृष्टिनिमित्तत्वेन स्रष्टृत्वं ॥ सोपम्यस्य सर्व ४९
स्याभोक्त्राश्रयत्वात्सर्वाश्रयत्वं वोक्तमिति द्रष्टव्यं ॥ ९ ॥

यउक्तं स्वदेहस्त्वन्न इति ॥ स्वदेहो वा बंधवत्वगुणा इति वतदप्याह ॥ नत्वस्येति ॥ तत्र हेतुः एकः स्वदेहादिसंगरहितः ॥ न त्वतः गुणदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनां
याः सर्वधियः विविधा बुद्धयः तासां द्रष्टा साक्षी ॥ १० ॥ पद्योक्तं स्वंभोगानित्याशंक्य तत्राप्याह ॥ नादत्त इति ॥ गुणं सुखं दोषं दुःखं क्रियाफलं राज्यादिकं उ
दासीनत्वे हेतुः परावरदृक् कारणस्य कार्यस्य च साक्षी न तु भोक्ता ॥ यतः ईश्वरः स्वदेहादिपारतंत्र्यशून्यः अत एवं भूतस्य मम न युष्माकं संबंधाभावाच्छो

न त्वस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा ॥ एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः ॥ १० ॥ नादत्त आत्मा हि गुणं न दोषं न क्रिया
फलं ॥ उदासीनवदासीनः परावरदृगीश्वरः ॥ ११ ॥ बादरायणिरुवाच ॥ इत्युदीर्य गतो जीवः ज्ञातयस्तस्य ते तदा ॥ विस्मिता मुमु
चुः शोकं छित्वात्मस्नेहशृंखलां ॥ १२ ॥ निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः ॥ तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्त्तिदं ॥ १३ ॥ बाल
घ्न्यो व्रीडितास्तत्र बालहत्याहतप्रभाः ॥ बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं ॥ यमुनायां महाराज स्मरंत्यो द्विजभाषितं ॥ १४ ॥ स इत्थं
प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ॥ गृहांधकूपान्निःक्रांतः सरः पंकादिव द्विपः ॥ १५ ॥ कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजल
क्रियः ॥ मौनेन संयतप्राणो ब्रह्मपुत्राववंदत ॥ १६ ॥ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने ॥ भगवान्नारदः प्रीतो विद्यामेतामुवाच ह

कं मा कृथा इति वाक्यार्थः ॥ ११ ॥ १२ ॥ द्विजभाषितं अंगिरसा प्रोक्तं ॥ १३ ॥ नमस्तुभ्यं भगवते वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च
ब्रह्मचारिणां उः स्वदेहे त्वं स्मरंत्यः पुत्रकामनाशून्या निर्मत्सराः सत्य इति भावः ॥ १४ ॥ निबिडपंकतुल्यं गृहं विहाय मुनिः क्रमेण मतिधीरस्ततः सर्वयोगं
नान्यस्येति संदिष्टां तमाह ॥ सरसः पंकात् द्विपो गज इवेति ॥ १५ ॥ कृताः पुण्यजलक्रियाः पितृतर्पणादयो येन संयतप्राणो नियतेंद्रियः ॥ १६ ॥ १७ ॥ नमो धि

निवृत्ता द्वैतदृष्टिर्यस्मात् ॥ १८ ॥ आत्मानंदानुभूत्या शक्त्यूर्मयः मायानिमित्ता रागद्वेषादयो येन ॥ १९ ॥ मनसा सह वचसि अप्राप्य उपरते सति य एक एव प्रकाशते ॥ वचसीति सर्वेंद्रियोपलक्षणं ॥ सोऽस्मान् अव्यात् सदसत्परः कार्यकारणयोः कारणं ॥ २० ॥ नरं वाह ॥ यस्मिन्निदं कार्यकारणं तिष्ठति ॥ यतश्चेति च यतश्च जायते ॥ मृन्मयेषु घटादिषु मृज्जातिर्मृन्मात्रमिव सर्वत्र स्थितं यत् तस्मै ॥ २१ ॥ न तु सर्वत्र स्थितं चेत् जानाति वस्तुतोऽपि तत्कथं मनोवचसोरप्राप्तिस्तत्राह यत् ब्रह्म व्योमवद्विततमपि असवः प्राणाः क्रियाशक्त्या न स्पृशंति मनआदिनि च ज्ञानशक्त्या न विदुः तं ब्रह्म नतोऽस्मि ॥ २२ ॥ तेषां तत्स्पर्शाद्यभावे हेतु

नमो विज्ञानमात्राय परमानंदमूर्तये ॥ आत्मारामाय शांताय निवृत्तद्वैतदृष्टये ॥ १८ ॥ आत्मानंदानुभूत्यैव न्यस्तशक्त्यूर्मये नमः ॥ हृषीकेशाय महते नमस्तेऽनंतमूर्तये ॥ १९ ॥ वचस्युपरतेऽप्राप्य य एको मनसा सह ॥ अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥ २० ॥ यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ॥ मृन्मयेष्विव मृज्जातिः तस्मै ते ब्रह्मणे नमः ॥ २१ ॥ यन्न स्पृशंति न विदुर्मनोबुद्धींद्रिया वाप्रतप्तं स्थानेषु तद्द्रष्टृपदेशमेति ॥ २३ ॥ सवः ॥ अंतर्बहिश्च विततं व्योमवत्तन्नतोऽस्म्यहं ॥ २२ ॥ देहेंद्रियप्राणमनोधियोऽमी यदंश

माह देहेंद्रियादयोऽमी यदंशविद्धाः यच्चैतन्यांशेनाविष्टाः संतः कर्मसु स्वस्वविषयेषु प्रचरंति जाग्रत्स्वप्नयोः विद्धाः प्रचरंति कर्मसु ॥ नैवान्यदा लोहमि ॰ व
अन्यदा सुषुप्तिमूर्छादौ नैव प्रचरंति ॥ यथा ॥ अप्रतप्तं लोहं न दहति ॥ अतो यथा लोहमग्निशक्त्यैव दाहकं स्वदग्निं विना न दहति ॥ एवं ब्रह्मगतज्ञानक्रियाशक्तिं व्याप्तिमंतरेण देहादयः ॥ तत्स्पर्शनेन विदुश्चेति भावः जीवस्तर्हि द्रष्टृत्वाज्जानात्वित्याह ॥ स्थानेषु जाग्रदादिषु द्रष्टृपदेशं द्रष्टृसंज्ञां तदेव ब्रह्म ए ति प्राप्नोति ॥ नान्यो जीवो नाम अस्ति ॥ नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः यद्वा द्रष्टृपदेशं द्रष्टृसंज्ञं जीवमपि तदेव एति जानाति न तु जीवस्तज्जानातीत्यर्थः तदुक्तं हंसगुह्यस्तोत्रे ॥ देहोऽसवोऽक्षा इत्यादि ॥ २३ ॥

सकलायेसात्वतपरिवृढाः तेषांनिकरः समूहस्तस्यकरकमलानांकुड्मलैरुपलालितंचरणारविंदंयुगलंयस्यतस्यसंबोधनंपरमउत्कृष्टपर
मेष्ठिनसर्वेश्वर ॥२५॥ पूर्वनारदोगिरामुत्राजगामेत्यगिराः प्राधान्येनोक्तः चित्रकेतोः प्रत्युपदत्वेनतस्यपृथगुक्तत्वात् ॥ इहतुनारदोगिरस्सामा
कंयथाविधिनारदस्यप्राधान्यनिर्देशः ॥ तदुपदेशेनतस्यवैराग्योत्पत्तेः प्रभोहेसमर्थ ॥२६॥ यथायथावद्धारयामास ॥ इ ॥ विद्याधराधिपत्यंवाबा

ॐनमोभगवतेमहापुरुषायमहाविभूतिपतयेसकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविंदयु
गलपरमपरमेष्ठिन्नमस्ते ॥२५॥ श्रीशुकउवाच ॥ भक्तायैतांप्रपन्नायविद्यामादिश्यनारदः ॥ ययावंगिरसासाकंधामस्वायं
भुवंप्रभो ॥२६॥ चित्रकेतुस्तुविद्यांतांयथानारदभाषितां ॥ धारयामाससप्ताहमब्भक्षः सुसमाहितः ॥२७॥ ततस्सप्तरात्रांतेवि
द्ययाधार्यमाणया ॥ विद्याधराधिपत्यंसलेभेऽप्रतिहतंनृप ॥२८॥ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ॥ जगामदेवदेवस्य
शेषस्यचरणांतिकं ॥२९॥ मृणालगौरंशितिवाससंस्फुरत्किरीटकेयूरकटित्रकंकणं ॥ प्रसन्नवक्त्रारुणलोचनंवृतंददर्शसिद्धे
श्वरमंडलैः प्रभुं ॥३०॥ तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलांतः करणोभ्ययान्मुनिः ॥ प्रवृद्धभक्त्याप्रणयाश्रुलोचनः प्रहृष्टरोमा

नरफलंलेभे अप्रतिहतमस्खलितं ॥२८॥ कतिपयैरहोभिः विद्ययाइद्धनदीप्तेनमनसागतिर्यस्य ॥२९॥ मृणालवद्गौरं ॥ शितिवाससंनीलवाससं ॥ मृणालगौरं शितिवाससं नमसादिपुरुषं ॥३०॥
लांबरं ॥ स्फुरंतिकिरीटादीनियस्य ॥ कटित्रकटिसूत्रं ॥ प्रसन्नानिवक्त्राणियस्य ॥ अरुणानिलोचनानियस्य ॥ तंचतंच ॥३०॥ इत्थोवतमादिपुरुषंअभ्ययादुपजगा
गतः ॥ अनमस्तनाम ॥ कथंभूतः तस्यदर्शनेनध्वस्तंसमस्तंकिल्बिषंयस्य ॥ स्वच्छममलंचांतः करणंयस्य ॥ प्रणयेनाश्रुयुक्तेलोचनेयस्य ॥ प्रहृष्टानिरोमा

भा०ष
५१

तं प्रसमीडितुं स्तोतुं चिरं नैवाशकत् न शशाक ॥ तत्र हेतुः उत्तमश्लोकस्य पदाब्जयोर्विष्टरम् आसनं उपमेहयन् अभिषिंचन् प्रेम्णा उपरुद्धः अखिलानां वर्णा-
नां निर्गमं उच्चारणं यस्य सः ॥३२॥ मनीषया बुद्ध्या मनः समाधाय एतद्बभाषे ॥ प्रतिलब्धा वाग्येन सात्वतशास्त्रं विग्रहो यस्य तं ॥३३॥ अन्योन्य-
प्रेमजानंदनिर्भरतान् त्वामिव वक्तुं अभिनंदन् तुष्टाव तोतिदशभिः पंचभिर्विभिः ॥ हे अजित अन्यैरजितोपि भवान् साधुभिः भक्तैर्जितः स्वाधीन एव कृ-
तः ॥ यतो भवान् अतिकरुणः ॥ तेपि च निष्कामास्त्वया अपि भवता विजिताः ॥ यो भवान् अकामात्मनां आत्मानमेव ददाति ॥ न तु भक्तैरेव जित इति कथं स्पर्धमाने-

स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः ॥ प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरं ॥३२॥ ततः समा-
धाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ ॥ नियम्य सर्वेंद्रियबाह्यवर्त्तनं जगद्गुरुं सात्वतशास्त्रविग्रहं ॥३३॥ चित्रकेतुरुवाच ॥
अजित जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता ॥ विजितास्तेपि च भजतामकामात्मनां य आत्मदोतिकरुणः ॥३४॥
तव विभवः खलु भगवन् जगदुदयस्थितिलयादीनि ॥ विश्वसृजस्तेंशांशास्तत्र मृषा स्पर्द्धंति पृथगभिमत्या ॥३५॥ परमाणु-
परममहतोस्त्वमाद्यंतांतरवर्त्ती त्रयविधुरः ॥ आदावंतेपि च सत्त्वानां यद्ध्रुवं तदेवांतरालेपि ॥३६॥

एभिः सृष्ट्यादिकर्तृभिरन्यैरीश्वरैर्जयः संभवति तत्राह तवेति ॥ जगतः उदयादीनि तवैव विभवः विभवनं महिमा लीलेति यावत् ॥ आदिशब्देन प्रवेशनिय-
मादीनि ॥ विश्वसृजस्त्वब्रह्मादयो नेश्वराः ॥ किं तु ते तवांशांशः अहूपः तदंशांशाः ॥ तत्र एवं स्थितेपि पृथक् पृथगीश्वराभिमानेन तु स्पर्द्धंते ॥३५॥
तमेव सृष्ट्यादिकर्तृत्वेनेतदुपपादयति ॥ परमाणोः सूक्ष्मं स्थूलं कारणं परमहत्त्व अंतिमं कार्यं तयोस्त्वमेवाद्यंतांतर्वर्त्ती ॥ आदावंते चांतरे मध्ये च वर्त्तित्वात्-
शीलं यस्य सः ॥ अतएव त्रयविधुरः आद्यंतमध्यशून्योध्रुवः ॥ तत्र यासृजंते ॥ न तु ध्रुवाः ॥ कुत इत्यत आह ॥ सत्वानां सत्वेन प्रतीतानां कार्याणां आदावं-
तेप्यंतरालेपि तदेव ध्रुवं सद्वर्णादिवत् ॥३६॥

टाप
५१

एवं ध्रुवत्वेन कालतः परिच्छेदो नास्तीत्युक्तं । देशतोऽप्यपरिच्छेदमाह क्षित्यादिभिरिति । सर्वस्माद्दशगुणोत्तरैरधिकैरावृतः । यत्र त्वयि अणुक-
ल्पः अणुतुल्यः पतति परिभ्रमति ॥ तत्तस्मादनंतस्त्वं ॥३७॥ यस्मादेवं परमेश्वरस्त्वमेव । अन्ये देवास्तव विभूतयः अतस्त्वां विहाय विषयका-
मनया अन्योपासकान्निंदति भेदादित्याह ॥ विषयेषु तर्षस्तृष्णा येषां ते नरपशवः पशवः । अतः ये विभूतीरिंद्राद्या उपासते । न तु परं त्वां ॥ ततः किं
तत्राह तेषामिति । तदनूपास्यनाशानंतरं ॥ यथा राजकुलं राजकुलनाशानंतरं यथा तत्सेवकानां आशिषो नश्यंति तद्वत् अधुवपरमाव-
धिः ॥ यद्वा विनश्यंति ॥३८॥ विषयकामेनापि दत्ता त्वत्सेवा मोक्षफलैवेत्याह ॥ कामधियः विषयकामनयापि हे परम त्वयि रचिताः कृता-

क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरंडकोशः ॥ यत्र पतत्यणुकल्पः सहांडकोटिभिस्तदनंतः ॥३७॥ विषयतृषो
नरपशवो य उपासते विभूतीर्न परं त्वां ॥ तेषामाशिष ईश तदनु विनश्यंति यथा राजकुलं ॥३८॥ कामधियस्त्वयि रचिता
न परम रोहंति यथा करंभबीजानि ॥ ज्ञानात्मन्यगुणगणतोऽस्य द्वंद्वजालानि ॥३९॥ जितमजित तदा भवता यदाह भागवतं

गुणमये १

श्चेत् न रोहंति देहांतरोत्पन्नये न भवंति ॥ करंभबीजानि भर्जितबीजानि धर्ममनवद्यं ॥ निष्किंचना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥४०॥
जानि यथा ॥ यतोऽस्य जीवस्य गुणगणात् देवद्वंद्वसमूहा भवंति ॥ अतः कामेनापि निर्गुणस्य तव भजनात् तस्य नैर्गुण्यं भवतीत्यर्थः ॥३९॥ फलकामन-
यापि त्वदाराधनं यदा मोक्षहेतुस्तदा किं वक्तव्यं भगवद्धर्ममाहात्म्यमिति वक्तुं तत्संप्रदायप्रवर्तकत्वेन भगवंतं स्तौति जितमिति ॥ यदा भवान् भागवतं
धर्ममाह तदा भगवन् त्वयाजितं सर्वोत्कर्षेणास्थितं ॥ तत्र हेतुः येनिः किंचनाः सनत्कुमारादयो मुनयस्तेयं भवंतमपवर्गाय सेवंते तेन भवताजितं
धर्ममिति वा ॥

भा॰ष
५२

अनवद्यतामेवाह॥ विषममतिर्यत्र यस्मिन् भागवते धर्मे नास्ति॥ यदन्यत्र यथान्यस्मिन् काम्यधर्मे॥ नन्वसोपि वेदोक्तत्वात् अनवद्य एवेत्यत आह॥ विषमधिया शत्रुमरणादिकामनया रचितो विहितो यः सत्वाविशुद्धः रागद्वेषादिमत्वात् क्षयिष्णुश्च नश्वरफलत्वात् अधर्मबहुलश्च हिंसादिबाहुल्यात्॥ तदुक्तं श्रावरत्वाभिभिः उभयमिह ह्येव दरनाद्यं लक्ष्यते अर्थोऽनर्थश्चेत्यादि॥४१॥ एतत्प्रपंचयति॥ कः क्षेमः किं कुशलं॥ निकिंचितनिजपरयोः स्वपरस्य च स्वपरद्रुहा स्वस्मै च द्रुह्यतीति स्वपरद्रुहा स्वस्मै च द्रुह्यतीति स्वपराधकृतेन॥ यतः स्वद्रोहात् अनंतकायक्लेशात् तव कोपः पीडा संभवति॥ तदुक्तं गीता

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र॥ विषमधिया रचितो यः सत्वाविशुद्धः क्षयिष्णुरधर्मबहुलः॥ ४१॥
कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण॥ स्वद्रोहात्तव कोपः परसंपीडया च तथाऽधर्मः॥ ४२॥ न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः॥ स्थिरचरसत्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः॥ ४३॥ न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः॥ यन्नाम सकृच्छ्रवणात्पुल्कसकोपि विमुच्यते संसारात्॥ ४४॥

ह॥ कर्शयंतः शरीरस्थं भूतग्राममचेतसः॥ मां चैवांतः शरीरस्थं तान्विध्यासुरनिश्चयानिति॥ तथा परसंपीडया अधर्मः च शब्दात्तव कोपश्च॥ अत स्त्वया एव धर्मोपि कथं विद्वेषमार्गप्रवर्तनीयं काम्यधर्मोऽभिहितो न तत्त्वदृष्ट्या॥ २॥ भागवतधर्मेण तु न द्रोह इत्याह न व्यभिचरति न परमार्थं जहातीति तव तव ईक्षा दृष्टिः॥ अव्यभिचारे हेतुः॥ स्थिरेति॥ स्थावरजंगमप्राणिसमूहेषु समत्वबुद्धयो भागवता यं धर्मं सेवंते॥ ४३॥ एवं भागवतधर्मप्रवर्तकस्य तव दर्शनात्सर्वपापक्षयो भवतीति किं चित्रमित्याह॥ नहीति॥ ४४॥

भाग
५२

अतो हं कृतार्थोस्मीत्याह अद्येति ॥ अतो हेतोः तवावलोकेन परिमृष्टानि ह्रतान्याशये चित्ते मलानि येषां ते ॥ त्वद्दर्शनं च मम नारदोपदेशेन जा
तमित्याह ॥ सुरर्षिणेति ॥ ४५ ॥ यथा वाहं पूर्वं पतिमूढस्त्वाहं ॥ यथा च नारदेनाङ्गहातोस्मि ॥ तत्सर्वं तयोभिन तत्त्वं मया किं प्रकाशनीय
मित्याह ॥ विदितमिति ॥ विशेषेण ज्ञाप्यं प्रकाशनीयं कियदिव न किमपीत्यर्थः ॥ सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वत् ॥ ४६ ॥

अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः ॥ सुरर्षिणा यदुदितं तावकेन कथमन्यथा भवति ॥ ४५ ॥ विदित
मनंतसमस्तं तवैव विदितात्मनो जनैरिहाचरितं ॥ विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतः ॥ ४६ ॥ नमस्तुभ्यं भगवते स
कलजगत्स्थितिलयोदयेशाय ॥ दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥ ४७ ॥ यं वै श्वसंतमनु विश्वसृजः श्व
संति यं चेकितानमनु चित्तय उच्चकंति ॥ भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेस्तु सहस्रमूर्ध्ने ॥ ४८ ॥ श्रीशुक उ
वाच ॥ संस्तुतो भगवानेवमनंतस्तमभाषत ॥ विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ॥ ४९ ॥ श्रीभगवानुवाच ॥ यन्नारदाङ्गिरो

जग२

उक्तलक्षणं भगवंतं प्रणमति ॥ नम इति द्वाभ्यां ॥ सकलस्य ज ॥ भ्यां ते व्याहृतं मेनुशासनं ॥ संसिद्धोसि तया राजन् विद्यया दर्शनाच्च मे ॥ ५० ॥
गतः स्थित्यादीनामीशाय समर्थाय ॥ दुरवसिता अविज्ञाता आत्मगतिर्निजतत्त्वं यस्य तस्मै ॥ कुयोगिनां केन भिदा भेददृष्ट्या ॥ ४७ ॥ श्वसंति चेष्टंते ॥ चेकिता
नं पश्यंतमनुचित्तयः ज्ञानेंद्रियाणि उच्चकंति विश्वं स्वरूपं पश्यंति ॥ ४८ ॥ ४९ ॥ मेनुशासनं मद्विषय उपदेशः तेन च तया च विद्यया अस्माच्च दर्शनात् संसिद्धोसि ॥ ५० ॥

भा.ख
५२

तद्वोधरार्थायमत्त्वयमष्टपदिशति ॥ अहमित्यादिना ॥ सर्वभूतान्यहमेवभूतानामात्माभोक्ताप्यहमेवभोक्तृभोग्यात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः ॥ यतो
ऽहं भूतभावनः भूतानां प्रकाशकः कारणं च ॥ ननु शाश्वतं ब्रह्म प्रकाशकं परं ब्रह्म कारणं च प्रकाशकं च ॥ सत्यं ॥ ते तु भे ममेव रूपे इत्याह शब्दब्रह्मेति ॥ शा
श्वती शाश्वत्यौ ॥ ५१ ॥ अनन्यमेवं पश्येत्याह ॥ लोके भोग्यप्रपंचे भोक्तृत्वेन विततं प्रसृतगतमात्मानं ॥ लोकं चात्मनि भोग्यत्वेन सृष्टं ततं व्याप्तं तदुभयं च मायाका
रणात्मना व्याप्तं ॥ मयि चैवोभयं प्रकृतं कल्पितं स्मरेदिति तती येनान्वयः ॥ पश्येदित्यध्याहारो वा ॥ ५२ ॥ ननु जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वं

अहं वै सर्वभूतानि भूतात्मा भूतभावनः ॥ शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥ ५१ ॥ लोके विततमात्मानं लोकं चात्मनि संततं ॥ उ
भयं च मया व्याप्तं मयि चैवोभयं कृतं ॥ ५२ ॥ यथा स्वप्नः प्रसुप्तः प्रपश्येत विश्वं पश्यति चात्मनि ॥ आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः
॥ ५३ ॥ एवं जागरणादीनि जीवस्थानानि चात्मनः ॥ मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत ॥ ५४ ॥ येन प्रसुप्तः पुरुषः स्वापं वेदा
त्मनस्तदा ॥ सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां

कृ.पं.१

स्फुरद्यती यमानं कल्पितं स्यादित्याशंक्याह स्वप्नगतजाग्रदादिदृष्टांतेन संभावयन्नाह ॥ यथेति द्वाभ्यां ॥
यथा स्वप्ने प्रसुप्तो विश्वं गिरिवनादिरूपं देशांतरस्थमात्मन्येव पश्यति स्वप्नमध्ये प्रबुद्धमिव स्वप्नं च पश्यतीत्यर्थः ॥ यथा स्वप्न एव उत्थितः सन्नात्मानमेक
देशस्थं शयनदेशस्थं मन्यते जाग्रदवस्थामनुभवति ॥ ५३ ॥ एवं प्रसिद्धान्यपि जागरणादीनि जीवस्थानानि जीवोपाधेर्बुद्धेरवस्था आत्मनो मायामात्राणि
इत्येवं विज्ञाय तेषां द्रष्टारं ॥ अत एव परं ॥ तदवस्थारहितमात्मानं स्मरेत ॥ ५४ ॥ ननु तेषां द्रष्टारमिति कथमुच्यते ॥ स्वापे दृश्याभावेन द्रष्टृत्वाभावात् तत्राह ये
नेति ॥ प्रसुप्तः पुरुषो जीवः येन रूपेण तदा स्वापकाले स्वात्मनः स्वापं ॥ निर्गुणमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्मरूपमवेहि ॥ तदा स्वापसुखयोः संवेदने
सुखमहमस्वाप्समिति स्मृतेरसंभवात ॥ ५५ ॥

राम
५२

नन्वत्स्वापसाक्षिणा दृष्टं कथं जाग्रदवस्थः स्मरेत ॥ नह्यन्येन दृष्टमन्यः स्मरति तत्राह ॥ उभयं स्वापप्रतिबोधं च स्मरतः अनुसंदधत
स्तयोः स्वापप्रतिबोधयोः प्रकाशकत्वेन यदस्त्वेति ॥ तान्यपि व्यतिरिच्येतत्वा एकैकापायेप्यनपायात् तद्ज्ञानं परं ब्रह्म तदेव ॥ ननु भिन्नभि
न्नार्थः ॥ अतो बाल्यदृष्टस्य यौवनेस्मृतिवदवस्थांतरत्वेऽपि स्वापानंदयोः स्मरणं युक्तमिति भावः ॥ तदेवंभूतं ब्रह्मात्मानं अनुवेदीत्यनुषंगः ॥
॥ ६ ॥ विपक्षे दोषमाह ॥ यत यदि हि तन्नापि भावं मत्वा त्वं पंचब्रह्मविस्मृतं तदात्मनः प्रकाशात भिन्न भवति तत एव तस्याज्ञस्य संसारो भवति स

उभयं स्मरतः पुंसः स्वापप्रतिबोधयोः ॥ अन्वेति व्यतिरिच्येत तद्ज्ञानं ब्रह्म तत्परं ॥ ५६ ॥ यदेतत् विस्मृतं पुंसो मद्भावं
भिन्नमात्मनः ॥ ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ॥ ५७ ॥ लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवां ॥ आत्मानं यो
न बुध्येत न क्वचित् क्षेममाप्नुयात् ॥ ५८ ॥ स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययं ॥ अभयं चाप्यनीहायां संकल्पाद्विरमेत्कविः ॥ ५९ ॥

सारत्वरूपमाह ॥ देहाद्देहं जन्मानंतरं पुनर्जन्म मृतेरनंतरं मृतिश्चेति ॥ ५७ ॥ योन्यंतरेपि भोगादिसंपादनं शक्यं ॥ तत्र नार्थत्वेनैव यानि तत्व्यामित्या
ह ॥ लब्ध्वेति ॥ ज्ञानं शास्त्रोत्थं ॥ विज्ञानमपरोक्षं तयोः संभवो यस्यां ताः ॥ ५८ ॥ वैराग्योपायमाह ॥ ईहायां प्रवृत्तिमार्गे ॥ ततः देहातः अनीहायां नि
वृत्तिमार्गेतु अभयं मोक्षो भवतीति च ॥ स्मृत्वा फलसंकल्पाद्विरमेत ॥ पाठांतरे नो भयं पारक्लेशः फलविपर्ययश्च नास्तीत्येवं स्मृत्वा ॥ ५९ ॥

भा॰ष
५५

एतद्धि शृणोति ॥ सुखायेति त्रिभिः दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः ६० विज्ञाः उभयप्रवीणा वयमिति मानवन्तः ॥ स्थानत्रयाद्विलक्षणां तुरीयां ब
ध्या ॥ दृष्टश्रुताभिर्मात्राभिरैहिकामुष्मिकैर्विषयैः स्वेन तेजसा विवेकबलेन ॥ २ ॥ न चातः परः पुरुषार्थोऽस्तीत्याह ॥ एतावानिति ॥ योगनै
पुण्यं यस्याः साधुबुद्धिर्येषां ॥ परस्यात्मनः एकं दर्शनमिति एतावानेव ॥ ६३ ॥ ६५ ॥ इति षष्ठस्कंधे षोडशोऽध्यायः ॥ ततः सप्तदशे मोघमहार्द्रि

सुखाय दुःखमोक्षाय कुर्वाते दंपती क्रियाः ॥ ततोऽनिवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥ ६० ॥ एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमा
निनां ॥ आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणां ॥ ६१ ॥ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ॥ ज्ञानविज्ञानसंतृप्तो मद्
भक्तः पुरुषो भवेत् ॥ ६२ ॥ एतावानेव मनुजैर्योगनैपुण्यबुद्धिभिः ॥ स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं ॥ ६३ ॥ तमेतच्छ्रद्धया रा
जन्नप्रमत्तो वचो मम ॥ ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि ॥ ६४ ॥ श्रीशुक उवाच ॥ आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ॥
पश्यतस्तस्य विश्वात्मा ततश्चांतर्दधे हरिः ॥ ६५ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे षोडशोऽध्यायः ॥ श्रीशुक उवाच ॥ यतश्चांत
र्हितोऽनंतस्तस्यै कृत्वा दिशे नमः ॥ विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥ १ ॥ स लक्षं वर्षलक्षाणामव्याहतबलेंद्रियः ॥ स्तूयमानो
महायोगी मुनिभिः सिद्धचारणैः ॥ २ ॥ कुलाचलेंद्रद्रोणीषु नानासंकल्पसिद्धिषु ॥ रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरं ॥ ३ ॥

एम
५५

आप्य खेचरत्वं ॥ विहस्य गिरिशं शापात् पार्वत्या मायया हेतुनाऽऽगतः ॥ १ ॥ यतः यस्यां तस्यै दिशे नमः नमनं कृत्वा ॥ १ ॥ स विद्याधरस्त्रीभिः हरिं गापयन् रेमे इति द्वयो
रन्वयः ॥ अव्याहतबलमिंद्रियपाटवं च यस्य ॥ नानाविधाः संकल्पा येन वा सिद्ध्यन्ति याः ताः ॥ २ ॥ ३ ॥

अकस्माद्दृष्ट्वैतेश्वर्यं गर्वात्प्राचीनकर्मतः ॥ आहारीयो निमापत्रो भवानीशापतः सत ॥ ५ ॥ नरा हृष्ट्वैकदेव्यादिना ॥ ५ ॥ अंकीकृतां तु तत्संगे नैकीकृत्य रे
वीबाहुना लिंगं स्थितं तु वाव जहांसतत्यांति कोप्यितः सत ॥ ५ ॥ धर्मवक्ता वदति ॥ शरीरिणां मध्ये तु त्वमेष्व ॥ भार्यया निधुनीभूय वाहे ॥ ६ ॥ न
भूतधात्री भारधीर्यस्यतः ॥ ७ ॥ ननम्य वीर्यप्रभावं विज्ञातस्तत्स्तद्वीर्यं विज्ञाय तस्मिन् निर्जितात्माभिमानिने ॥ जितेंद्रियो ह विप्राभिमानवतः इति

एकदा स विमानेन विहरन्नेन भाव्यता ॥ गिरिशं ददृशे गच्छन् परीतं सिद्धचारणैः ॥ ४ ॥ आलिंगनांकीकृतां देवीं बाहुना मुनिसंसदि
उवाच देव्याः शृण्वंत्याः जहासोच्चैस्तदंतिके ॥ ५ ॥ विचके तु रुषा वच ॥ एष लोकगुरुः साक्षाद्धर्मवक्ता शरीरिणां ॥ आस्ते मु
ख्यैः सभायां वै निधुनीभूय भार्यया ॥ ६ ॥ जटाधरस्तीव्रतपाः ब्रह्मवादिसभापतिः ॥ अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो
यथा ॥ ७ ॥ प्रायशः प्राकृताः स्त्रीया विविक्ते विहरंति वै ॥ अयं महाव्रतधरो विभर्त्ति सदसि स्त्रियं ॥ ८ ॥ भगवानपि तच्छ्रुत्वा प्रहस्या
गाधधीर्नृप तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९ ॥ इति क उवाच ॥ इत्यतद्वीर्यविदुषि ब्रुवाणे वह्यशोभनं ॥ रुषाह देवी धृ
ष्टाय निर्जितात्माभिमानिने ॥ १० ॥ देव्युवाच ॥ अयं किमधुना लोके शास्ता दंडधरः प्रभुः ॥ अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्र
कृत ॥ ११ ॥ न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः ॥ न वै कुमारः कपिलो मनुश्च ये नो निषेधंत्यतिवर्त्तिनं हरं ॥ १२ ॥
एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंगलं स्वयं ॥ यः क्षत्रबंधुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दंड्यः ॥ १३ ॥

रुषा क्रोधेनाह ॥ १० ॥ विहर्तुं प्रकर्षेण क्रीडतीति विप्रकृत ॥ ११ ॥ अतिवर्त्तिनं शास्त्रमतिक्रम्य वर्त्तमानशीलं ॥ ये नो निषेधंति न वारयंति ॥ १२ ॥ एषां ब्रह्मादीनामनु
ध्येयं पादाब्जयुग्मं यस्य तं मंगलमंगलं परमधर्ममूर्त्तिं ॥ सूरीन् परिभूय अस्मान् कृत्वा जगद्गुरुं हरं वै स्वयं सदाशिवं प्रशास्ति ॥ तत तस्मात ॥ १३ ॥

भा॰ष॰
५५

ननु हरिभक्तोऽयं नरकं नार्हतीति चेन्नेत्याह ॥ नायं साधुभिः परिसेवितं वैकुंठपादमूलोपसर्पणमर्हति ॥ यतः संभावितात्मा इह अधिक इति
कृता मतिर्येन ॥ अत एव स्तब्धः अनम्रः ॥४॥ तदेवं स्वयं इत्थं त्वं निश्चित्य तत्प्रत्याह ॥ अत इति ॥ हे पुत्र यथा भूयः महतां किल्बिषमपराधं न कर्ता
करिष्यसि तथा याहीत्यर्थः ॥५॥ ६ ॥ पूर्वदिष्टं प्राचीनकर्मप्राप्तमेव ॥७॥ अयं च संसारचक्रस्वभाव एव न विचित्रं इत्याह संसारचक्र इति ॥८॥ अ

नायमर्हति वैकुंठपादमूलोपसर्पणं ॥ संभावितमतिः स्तब्धः साधुभिः पर्युपासितं ॥४॥ अतः पापीयसीं योनिमासुरीं याहि
दुर्मते ॥ यथेह भूयो महतां न कर्ता पुत्र किल्बिषं ॥५॥ श्रीशुक उवाच ॥ एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः ॥ प्रसादयामास
सतीं मूर्ध्ना नम्रेण भारत ॥६॥ चित्रकेतुरुवाच ॥ प्रतिगृह्णामि ते शापमात्मनोऽञ्जलिनांबिके ॥ देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्ट
१७ हि तस्य तत् ॥७॥ संसारचक्र एतस्मिन् जंतुरज्ञानमोहितः ॥ भ्राम्यन् सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा ॥८॥ नैवात्मा न परश्चा
पि कर्ता स्यात्सुखदुःखयोः ॥ कर्तारं मन्यतेऽप्राज्ञ आत्मानं परमेव च ॥९॥ गुणप्रवाह एतस्मिन् कः शापः को न्वनुग्रहः
कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा ॥१०॥ एकः सृजति भूतानि भगवानात्ममायया ॥ एषां बंधं च मोक्षं च सुखं दुःखं च

तदेवाज्ञमप्यतत्त्ववन्न कोपि दोष इत्याह नैवेति ॥९॥ एवं तावत्सुखदुःखादिकमंगीकृत्योक्तं इदानीं तदपि वस्तुतो नास्तीत्याह ॥ च निष्कलः ॥११॥
गुणानां मायामयानां प्रवाहे संसारे ॥१०॥ ननु मायागुणानां चेदयं संसारप्रवाहस्तर्हि तेषां जडत्वाद्बंधमोक्षौ यदुभवो न स्यातां तत्राह ॥ एकः परमेश्व
रो मायया निमित्तभूतया भूतानि प्राणिनः सृजति ॥ एषां बंधादिकं च सृजति ॥ निष्कलः स्वयं बंधादिशून्यः ॥११॥

राम
५५

नचैवंभूतविषमसदृशेनतस्य किंकारणंप्रियाप्रियादिवैषम्याभावादित्याशंक्य यद्यपि द्वियाद्योर्नसंगतिस्तथापितत्तत्कर्मवशात्सर्वंभवतीत्याह॥ नतस्येतिद्वाभ्यां॥ प्रतीपः अप्रियः॥ नज्ञातिर्बंधुश्चेत्यर्थः॥ तत्रहेतुः॥ सर्वत्रसमस्यतत्त्वतः॥ निरंजनस्यनिःसंगस्य॥ अतएवतन्निमित्तेसुखेरागोनास्ति॥ रागाभावेदोषःकुतःस्यात्॥२२॥ यद्यप्येवंतथापितस्यशक्त्यामाययायोविसर्गः उत्पत्त्यपायादिलक्षणःकर्मएषां

नतस्यकश्चिद्दयितःप्रतीपोनज्ञातिर्बंधुर्नपरोनचस्वः॥ समस्यसर्वत्रनिरंजनस्यसुखेनरागःकुतएवरोषः॥२२॥ तथापितच्छक्तिविसर्गएषांसुखायदुःखायहिताहिताय॥ बंधायमोक्षायचमृत्युजन्मनोःशरीरिणांसंसृतयेऽवकल्पते॥२३॥ अथप्रसादयेनत्वाशापमोक्षायभामिनि॥ जगामस्वविमानेनपश्यतोःस्मयतोस्तयोः॥२५॥ यन्मन्यसेह्यसाधूक्तंममतत्क्षम्यतांसति॥२४॥ श्रीशुकउवाच॥ इतिप्रसाद्यगिरिशौचित्रकेतुररिंदम॥ ततस्तुभगवान्रुद्रोरुद्राणीमिदमब्रवीत्॥ देवर्षिदैत्यसिद्धानांपार्षदानांचशृण्वतां॥२६॥ रुद्रउवाच॥ दृष्टवत्यसिसुश्रोणिहरेरद्भुतकर्मणः॥ माहात्म्यंभृत्यभृत्यानांनिस्पृहाणांमहात्मनां॥२७॥ नारायणपराःसर्वेनकुतश्चनबिभ्यति॥ स्वर्गापवर्गनरकेष्वपितुल्यार्थदर्शिनः॥२८॥

शरीरिणांसुखाद्यर्थमवकल्पतेसमर्थोभवतियथोक्तंगीतासु॥ भूतभावोद्भवकरोविसर्गःकर्मसंज्ञितइति॥२३॥ अथतस्मात्हेभामिनिकोपनेत्वांकेवलंप्रसादयामि॥ नतुशापमोक्षाय॥ तर्हिकिंप्रसादनेनअतआह॥ ममोक्तंउक्तंसाध्वपि॥ असाधुवन्मन्यसेतत्तयाक्षम्यतां॥२४॥ गिरिशौभवानीशंकरौप्रसाद्य स्मयतोर्विस्मयंकुर्वतोःसतोः॥२५॥ ॥ स्वर्गादिरेवंतुल्यार्थःप्रयोजनमितिद्रष्टुंशीलंयेषांतेतथा॥२८॥

भा०ष
५६

तत्रतदुक्तमेवहेतुमाह द्वाभ्यां ॥ देहिनामिति । सुखदुःखमित्यादि द्वन्द्वानि ईश्वरलीलया मायया भवंति ॥ १९ ॥ तेषु च गुणदोषविकल्पः वेत्यन्वयः ॥ इष्टानिष्टभेद इत्ययः स्फुरतीत्यर्थः ॥ आत्मन्यर्थभेदः सुखादिभेदः । कुतः सुखमेव यथा रज्ज्वविवेककृतो भवति ॥ तज्जिद्रज्जुसर्पमालादिविर्णयात तथैव कृत इत्यर्थः ॥ स्रग्वदिति वक्तव्ये स्रजिवदित्यार्षपाठांतरे सुगमं ॥ २० ॥ अतो भागवतानां निस्पृहत्वाद्युचितमेवेत्याह वासुदेवे इति ॥ ज्ञानवैराग्ययोर्वीर्यं वलं येषां तेषां व्यपाश्र

देहिनां देहसंयोगात द्वंद्वानीश्वरलीलया ॥ सुखं दुःखं मृतिर्जन्म वशापोनुग्रह एव च ॥ १९ ॥ अविवेककृतः पुंसोह्यर्थभेद इवात्मनि ॥ गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः ॥ २० ॥ वासुदेवे भगवति भक्तिमुद्वहतां नृणां ॥ ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ २१ ॥ नाहं विरिंचो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः ॥ विदाम यस्येहितमंशकांशकाः न तत्स्वरूपं पृथगीशमानिनः ॥ २२ ॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा ॥ आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ॥ २३ ॥ तस्य चायं महाभागश्चित्रकेतुः प्रियोनुगः ॥ सर्वत्र समदृक्शांतो ह्यहं चैवाच्युतप्रियः ॥ २४ ॥ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु महापुरुषभक्तेषु शांतेषु समदर्शिषु ॥ २५ ॥ श्रीशुक उवाच ॥ इति श्रुत्वा भगवतः शिवस्योमाभिभाषितं ॥ बभूव शांतधी राजन्देवी विगतविस्मया

श्री को ३

यः ॥ विरिंचो ब्रह्मा अत्र पाणी योर्थो नास्ति ॥ २१ ॥ अस्य च श्रीहरेर्दासत्वेन तत्स्वभाववत्त्वान्नैतच्चित्रमिति वक्तुं हरेर्माहात्म्यमाह ईहितम (या) ॥ २२ ॥ भिप्रायं लीलां वा यस्य वयं न विद्मस्तदा तत्स्वरूपं मेशकारा काश्रु पि संतः ॥ पृथगीशमानिनो न विदुरेव ॥ १ ॥ अतएव हरिरविषमवैषांभूता नां प्रियः ॥ २२ ॥ अहं चैवाच्युतप्रियः ॥ तस्मान्ममास्मिन् क्रोधो नाभूदिति भावः ॥ २४ ॥ २६ ॥

एम
५६

प्रतिशापं दातुमलं तमः समर्थं तमोपि ॥ ३७ ॥ ३८ ॥ असुरजातेः असुरस्वभावेनोत्पन्नेः भगवति मतेश्च ॥ ३९ ॥ ४० ॥ एतत एतत ॥ ४१ ॥ इति षष्ठे सप्तदशः ॥
आदित्यानां वंशमष्टादशे त्वष्टुर्वंशप्रसंगतः । प्रोक्तमिंद्रकृतं विश्वरूपवृत्रवधादिकं ॥ १ ॥ अदितेः पंचमादीनां पुत्राणामनुयोन्नितः । असुराः शोऽदिते
गर्भशक्रेण महतां मिशः ॥ त्वष्टुर्वंशमनुक्रमात्प्रसंगतः यथाक्रमं ॥ आदित्यानामथान्येषां वंशानाह पृश्निरीश्वरः । इन्द्रः कन्यानुयायान्तु कथ्यते आदित्या:

इति भागवतो देव्याः प्रतिशप्तुमलं तमः । मूर्ध्ना संजगृहे शापमेतावत्साधुलक्षणं ॥ ३७ ॥ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रिताः । वृ
त्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ॥ ३८ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि । वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ॥ ३९ ॥
इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः । माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते ॥ ४० ॥ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठे
त् ॥ इतिहासं हरिं स्मृत्वा स याति परमां गतिं ॥ ४१ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे चित्रकेतूपाख्याने सप्तदशोऽध्यायः ॥ छ ॥ क
पत्नी वा च ॥ पृश्निस्तु पत्नी सवितुः सावित्री व्याहृती त्रयी ॥ अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥ १ ॥ सिद्धिर्भगस्य भार्यांग महिमानं विभुं प्रभुं
आशिषं च वरारोहां कन्यां प्रासूत सुव्रतां ॥ २ ॥ धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ॥ सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात्

द्वादशादित्याः प्रोक्ताः विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः धाता विधाता वरुणो मित्रः शक्र उरुक्रम इति अग्नीन्पुरीष्यानाधत्त क्रियायां समनंतरः ॥ ४ ॥
तत्र अणुधाद्यायान्नमारभ्य विश्वरूपवृत्रचित्रकेतूपाख्यानेन त्वष्टुर्वंशमनुवर्ण्य इदानीं सवितृवंशमाह पृश्निस्त्विति ॥ सावित्रीमित्यादि प्रासूतेत्यस्या
नुषंगः ॥ पशुं पशुयागं ॥ महामखान् पंचयज्ञान् ॥ १ ॥ २ ॥ धातुर्भार्या कुहूः सायं दर्शं प्रासूत ॥ एवं सिनीवाल्यादयः तिस्रोनुक्रमात् ॥ ३ ॥ समनंतरो विधाता क्रि
यायां भार्यायां पुरीष्याख्यानग्नीन्पंचचितान ॥ चर्षण्यां सोमभृगुप्रसूतिं पंचवायेते यो यद्यपि चित्तपरतिश्रुतेः ॥ ४ ॥ एप एप

वर्षणी वरुणस्य भार्यासीत् ॥ पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः ॥ वाल्मीकिर्वरुणात्पुत्रो भवत् ॥ एतौ वरुणस्यासाधारणौ पुत्रौ ॥ तथोत्सर्गादि
यो मित्रस्यासाधारणाः ॥५॥ तयोरेव साधारणौ द्वौ पुत्रावाह ॥ अगस्त्यश्च वसिष्ठश्च ऋषी मित्रावरुणयोरभवतां ॥ यत उभावपि कुंभे रेतः सिषिचतुः सम
हजातौ विषमानमोभिः ॥ कुंभे रेतः सिषिचतुः सामान्यमिति श्रुतेः ॥ इति तत्त्वं ॥६॥ ७॥ पश्चात् षष्ठमस्कंधे ॥९॥ अथेति कश्यपस्यादितेः पुत्राणां द्वा

वर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ॥५॥ अगस्त्यश्च वसिष्ठश्च मित्रावरुणयो
ऋषी ॥ रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतं ॥६॥ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥ पौलोम्यामिंद्र आधत्त त्रीन् पुत्रानिति
नः श्रुतं ॥ जयंतमृषभं तात तृतीयमीढुषं प्रभुः ॥७॥ उरुक्रमस्य देवस्य मायावामनरूपिणः ॥ कीर्त्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन्सौभ
गादयः ॥८॥ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः ॥ पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ॥९॥ अथ कश्यपदायादान् दैतेयान्
कीर्त्तयामि ते ॥ यत्र भागवतः श्रीमान् प्रह्लादो बलिरेव च ॥१०॥ दितेर्द्वावेव दायादौ दैत्यदानववंदितौ ॥ हिरण्यकशिपुर्नाम हिरण्या
क्षश्च कीर्त्तितौ ॥११॥ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी ॥ जंभस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥१२॥ संह्रादं प्रागनुह्रादं ह्रा
दं प्रह्लादमेव च ॥१३॥ तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् ॥ शिरोऽहरद्यस्य हरिश्चक्रेण पिबतो मृतं ॥१४॥ संह्रादस्य कृतिर्भा
र्या सूत पंचजनं ततः ॥ ह्रादस्य धमनिर्भार्या सूत वातापिमिल्वलं ॥१५॥ योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलः ॥१५॥

रवतारित्यानामंते तनिरुक्तारितेः पुत्रान् कथयामीत्यर्थः ॥१०॥ हिरण्यकशिपुर्हिरण्याक्षश्चेति प्रथमं द्वावेव ॥ तौ च कीर्त्तितौ तृतीयस्कंधे ॥११॥१२॥
विप्रचितो दानवाद्भर्त्तुः सकाशाद्राहुं पुत्रमग्रहीत् ॥१४॥ ततः संह्रादात्सूत ॥ यो मेषरूपं वातापिं विप्रेभ्य इल्वलः ॥ यं पचेत्तं च वातापिं विदार्य निर्लेत्वयः ॥१५॥

।६। ततो वलेः सकाशात् भवत् ।७। तस्य वलेरनुभावः उत्तमश्लोकः गीतः कीर्त्तिभिः ॥ यद्वास्यानुभाव्यते यद्भिः नृपतरति अनुभावं उत्तमश्लोकां परारति

रोषः तस्य गतोपद्रव्यतां गाधाम्नां ।८। ।९। सात्मतां समानरूपतां देवत्वं प्रापिताः ॥१०॥ ॥११॥ आदृतं सादरं ॥ सुल्यं मितान्नरं ॥ सुधैवत वडऊस्थेष्ठतं

सतं मयन सामुग्रयोधस्य ॥ हेराजा यत्र शौनक ॥१२॥ पार्ष्णिग्राहेणाप्रहतः सहायेन ॥१३॥ भ्रातहंतारं द्वमारयित्वा द्विविनीय्यामिति चिंतयाम

स्तु ज्ञारस्य पूर्यां गवाष्कलो महिषस्तथा ॥१४॥ विरोचनसकाशाङ्गारिदैत्यात्तस्याभवद्वलिः वाणज्येष्ठं शतमशनायांततो

भवत् ॥१७॥ तस्यानुभावः उत्तमश्लोकः पश्चादेवाभिधास्यते ॥ वाणस्यात्मगिरिशं लेभे तद्गणमुख्यतां ॥१८॥ तत्पादैव भगवाना

त्तेत्यद्यापि पुरपालकः ॥१९॥ महत्तमद्वादितेः पुत्रास्त्वादीशत्र वाधिकाः ॥ तत्रास्तनप्रजाः सर्वे नीतारं देशात्मतो ॥२०॥ राजो

च कथं तत्राहरं भावमपोत्योन्यन्निकं गतो ॥ इंद्रेणाप्रापिताः सात्म्यं किं तत्साधु कृतं हितैः ॥२१॥ इमे पुत्र इंद्रधते प्रसन्न ऋषयो हि

मयासह ॥ परित्राणाय भगवतस्तत्त्वोत्यात्वा तमर्हसि ॥२२॥ सूत उवाच ॥ तद्विष्णुरातस्य सवादरायणि वचो निशम्यादत मल्पमर्थ

वत् ॥ सभाजयन्संनिभृतेन चेतसा जगाद सत्रायणसर्वदर्शनः ॥२३॥ श्रीशुक उवाच ॥ हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना

मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयत् ॥२४॥ कदा तु भ्रातृहंतारमिंद्रियाराममुल्वणं ॥ अक्लिन्नहृदयं पापं घातयित्वा शये सु

खमिति ः उल्वणं क्रूरं अक्लिन्नहृदयं कठिनचित्तं ॥२५॥ नरदेव ॥२५॥ कृमिविड्भस्मसंज्ञासीत् यस्येशाभिहितस्य च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः

राजा देहः शरीरं स्वार्थं मन्यो पापात करोत्येव किमत्र चित्रं ॥ तत्राह कृमीति ॥ ईशाः प्रभुरित्यभिहितस्यापि यस्य पूर्वेषां अंते देहस्य मरणानंतरं द्विविधिरिनाव

स्थितस्य ॥ किमयं इति श्वादिभिर्भक्षितस्य तु विष्टेति दग्धस्य भस्मेति संज्ञासीत तत्कृते तस्य देहस्यार्थे योभूतेभ्यो द्रुह्यति स किं स्वार्थं वेद नवेद

इदं हृदि हारि किं ध्रुवं वनितेत्याशासानस्य मन्यमानस्य अन्तर्गतदुःखलं चेतो यस्य तस्येदृश्या योमरत्नस्य शोषकः पुत्रो मे येन हेतुना भूयात् ॥ भवेत् ॥१७॥ भर्तुः प्रियाचरणमेवेति भावेन सा भर्तुः प्रियमसकृदाचचार ॥१८॥ १९॥ विवशः स्त्रीपरतन्त्रः सन् बाढं तव मनोरथं पूरयिष्यामीति यदाह तत्र चित्र ॥२०॥ तत्र हेतुमाह ॥ विलोकेति ॥ एकान्तभूतानि निर्भृतानि [illegible] स्वदेहार्धमेव स्त्रियं चक्रे ॥२१॥ एवं स्त्रिया शुश्रूषितः सन् ॥२२॥

आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ॥ मदशोषक इन्द्रस्य भूयाद्येन सुतो हि मे ॥१७॥ इति भावेन सा भर्तुराचचारासकृत्प्रियं ॥ शुश्रूषयानुरागेण प्रश्रयेण दमेन च ॥१८॥ भक्त्या परमया राजन्मनोज्ञैर्वल्गुभाषितैः ॥ मनो जग्राह भावज्ञा सस्मितापाङ्गवीक्षणैः ॥ एवं स्त्रिया जडीभूतो विद्वानपि मनोज्ञया ॥ वाढमित्याह विवशो न तच्चित्रं हि योषिति ॥२०॥ विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः ॥ स्त्रियं चक्रे स्वदेहार्धं यया पुंसां मतिर्हृता ॥२१॥ एवं शुश्रूषितस्तात भगवान्कश्यपः स्त्रिया ॥ प्रहस्य परमप्रीतो दितिमाहाभिनन्द्य च ॥२१॥ कश्यप उवाच ॥ वरं वरय वामोरु प्रीतस्तेऽहमनिन्दिते ॥ स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ॥२२॥ पतिरेव हि नारीणां दैवतं परमं स्मृतं ॥ मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥२४॥ स एव देवतालिङ्गैर्नामरूपविकल्पितैः ॥ इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक्

॥२३॥ चकारात्परं च ॥ अगमः अप्राप्यः ॥२२॥ ननु परमेश्वरे सुप्रीते सर्वकामप्राप्तिरिति प्रसिद्धं तत्राह पतिरेवेति ॥ ननु मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवमिति प्रसिद्धं ॥ तत्र ॥ स एव स्वाधिकारेण रूपभेदैः पूज्यत इत्याह सार्धेन मानस इति ॥२४॥ देवतालिङ्गैर्मूर्तिभिर्नामरूपलक्षितैः नान्यो वा हनाम इन्द्रादि ॥ रूपं वज्रहस्तत्वादि ताभ्यां विविधं कल्पितैः ॥२५॥

॥ ३७ ॥ इंद्रहणं इंद्रहंतारं ॥ अमृत्युं मृत्युशून्यं ॥ येन इंद्रेण विष्णुना सहायेन घातितौ ॥ ३८ ॥ ४० ॥ स्वभावमनुवर्तमानाया योषितः कोतिक्रमो पराधः ॥ ४१ ॥ स्वभावमेवाह द्वाभ्यां ॥ शरत्पद्मसेवोत्सवो विकाशो यस्मिंस्तत् श्रवणामृतं तीतयोरमृतं ॥ क्षुरधारोपमं चित्तं ॥ ४२ ॥ स्वाशिषात्मनां स्वार्थकामनया आत्मवल्लभत्वेन प्रतीयमानानां ॥ ४३ ॥ तत्रेदमुपकल्पते योग्यं भवति ॥ अयं भावः ॥ वैष्णवं व्रतं तावदुपदेक्ष्यामि ॥ तेनैवास्याः शुद्धचित्तायाः इंद्रकोपो निव

तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे यजेरंस्तनन्यभावेन पतिमात्मानमीश्वरं ॥ ३६ ॥ सोहं त्वयार्चितो भद्रे ईदृग्भावेन भक्तितः तत्ते संपादये काममसतीनां सुदुर्लभं ॥ ३७ ॥ दितिरुवाच ॥ वरदो यदि मे ब्रह्मन्पुत्रमिंद्रहणं वृणे ॥ अमृत्युं मृतपुत्राहं येन मे घातितौ सुतौ ॥ ३८ ॥ निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत अहो अधर्मः सुमहानद्य मे समुपस्थितः ॥ ३९ ॥ अहो अर्थेंद्रियारामो योषिन्मय्येह मायया गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवं ॥ ४० ॥ कोतिक्रमोनुवर्तंत्याः स्वभावमिह योषितः ॥ धिङ्मां बताबुधं स्वार्थे यदहं त्वजितेंद्रियः ॥ ४१ ॥ शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतं हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितं ॥ ४२ ॥ नहि कश्चित्प्रियः स्त्रीणामंजसा स्वाशिषात्मनां ॥ पतिं पुत्रं भ्रातरं वा घ्नंत्यर्थे घातयंति च ॥ ४३ ॥ प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् ॥ वधं नार्हति चेंद्रोपि तत्रेदमुपकल्पते ॥ ४४ ॥ इति संचिंत्य भगवान्मारीचः कुरुनंदनः ॥ उवाच किंचित्कुपित आत्मानं च विगर्हयन् ॥ ४५ ॥ कश्यप उवाच ॥ पुत्रस्ते भविता भद्रे इंद्रहा देवबांधवः ॥ संवत्सरं व्रतमिदं यद्यंजो धारयिष्यसि ॥ ४६ ॥

एकं चेद्विद्धि गुणे पत्नी इंद्रस्य वधोपि न भविष्यतीति ॥ ४७ ॥ हे भद्रे अंजः यथावद्यदि धारयिष्यसि तर्हींद्रहा भविष्यति वैगुण्ये तु देवबांधवो भविष्यति वैष्णवत्वाद्व्रतस्य कथं चिद्वैगुण्येपि समति सर्वथा वैफल्याभावात् ॥ ४६ ॥

भा०४ कार्याण्यावश्यकानि यानि व्रतं न घ्नंति ॥ नावश्यकानि च निषिद्धानि ॥ किं त्वभ्यनुज्ञातानि ब्रूहि सर्वाण्यपि ॥४७॥ तत्रैकत्रिंशान्निषेधानाह ॥ नहि स्नादि
५९ तिपं च भिः न रायेत ॥ परमंगलं कपालास्थ्यादिकं न तत्र स्पृशेत ॥४८॥ नाप्सु श्लाविश्यस्नायात ॥ पूर्वविधृतां स्रजं प्रसन्ने धारयेत ॥४९॥ भोजने पंचनि
षेधानाह ॥ नोच्छिष्टमिति ॥ चंडिकान्नं भद्रकाल्यै निवेदितं ॥ विधवा लिकाद्रिःविनिवा ॥ अंजलिनात्वपो न पिबेत ॥५०॥ गृहाद्बहिर्निर्गमे सप्तनिषेधान

रितिहवाच ॥ धारयिष्ये व्रतं ब्रह्मन्ब्रूहि कार्याणि यानि मे ॥ यानि चेह निषिद्धानि न व्रतं घ्नंति यान्यपि ॥४७॥ कश्यप उवाच ॥ नहिं
स्नात्वा तत्र जातानि न शपेत्रान्नं तं वरेत ॥ नच्छिंद्यान्न खनेमात्ति न स्पृशेद्यद्रमंगलं ॥४८॥ नाप्सु स्नायान्नव्रजप्येत न प्रभाषेत दुर्ज्ज
नैः ॥ न वसीताधौतवासः स्रजं च विधृतां ब्रवित ॥४९॥ नोच्छिष्टं चंडिकान्नं च सामिषं वृषलाहृतं ॥ भुंजीतोदक्यया दृष्टं पिबेद
जलिना त्वपः ॥५०॥ नोच्छिष्टाः स्पृष्टसलिलां संध्यायां मुक्तमूर्धजा ॥ अनर्चिता संयतवाङ्‌ नासंवीता बहिश्चरेत ॥५१॥ नाधौत
पादाप्रयता नार्द्रपान्नो उदक्शिराः ॥ शयीत नापरा नान्यैर्न नग्ना न च संध्ययोः ॥५२॥ धौतवासाः शुचिर्नित्यं सर्वमंगलसंयुता
पूजयेत्प्रातराशात्प्राक् गोविप्रान्श्रियमच्युतं ॥५३॥ स्त्रियो वीरवतीश्चार्चेत्स्रग्गंधबलिमंडनैः ॥ पतिं चार्च्योपतिष्ठेत ध्यायेत्को

ह ॥ नोच्छिष्टेति ॥ अनर्चिता मंडनहीना ॥ असंवीता अप्रावृता ॥५१॥ शयने षोनिषेधानाह ॥ नाधौतपादेति ॥ नापरान्कुपाश्रिमाशिरगतं वत ॥५२॥ राम
णः ॥५२॥ कार्याण्याह ॥ धौतवासा इति द्वाभ्यां ॥ प्रातराशात्प्रथमभोजनात ॥५२॥ वीरवतीर्जीवद्भर्तृकाः ॥ आर्च्या संपूज्य काश्यगतं भक्तं संतरंगत ॥५३॥ ५९

ढमलवनं प्रविष्टोत्पत्निकां ॥ तुभ्यं नव ॥ ५५ ॥ ५५ ॥ हरिरिंद्रो व्रतस्याथ छिद्रं प्रेप्सुः पार्थिवेऽभिक्षुः जिह्मः कुटिलः ॥ साधुवेषः मृगहा लुब्धको यथा मृगं वंचनाय मृ
गवेषो भवति ॥ लब्धत ॥ ९ ॥ केन मे शिवस्यादिति चिंतां प्राप्नः ॥ ६० ॥ अस्पृष्टवारिस्त्री मावधौतांघ्रिम् ॥ ६१ ॥ निद्रापहृतचेतो यस्याः ॥ ६२ ॥ मारोदीरि

मा वत्सरं त्वेवमेवं व्रतमेतद् विशुद्धं ॥ धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥ ५५ ॥ वाढमित्यभ्युपेत्याथ दितीराजन्महामनाः ॥ का
श्यपं गर्भमाधत्त व्रतं चाञ्जो दधार सा ॥ ५६ ॥ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद ॥ शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ॥ ५७ ॥
नित्यं वनात्सुमनसः फलमूलसमित्कुशान् ॥ पत्रांकुरमृदोऽपश्च काले काले उपाहरत ॥ ५८ ॥ एवं तस्या व्रतस्थाया व्रतछिद्रं हरिर्नृ
प ॥ प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥ ५९ ॥ नाध्यगच्छद्व्रतछिद्रं तत्परोऽथ महीपते ॥ चिंतां तीव्रां गतः शक्रः केन मे स्याच्छिव
त्विह ॥ ६० ॥ एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता ॥ अस्पृष्टवार्यधौतांघ्रिः सुष्वाप विधिमोहिता ॥ ६१ ॥ लब्ध्वा तदंतरं शक्रो निद्राप
हृतचेतसः ॥ दितेः प्रविष्ट उदरं योगेशो योगमायया ॥ ६२ ॥ चकर्त सप्तधा गर्भं वज्रेण कनकप्रभं ॥ रुदंतं सप्तधैकैकं मा रोदीरिति ता
न्पुनः ॥ ६३ ॥ ते तमूचुः पाट्यमानाः सर्वे प्रांजलयो नृप ॥ नो जिघांससि किं शक्र भ्रातरो मरुतस्तव ॥ ६४ ॥ मा भैष्ट भ्रातरो मह्यं यूयमित्याह
कौशिकः ॥ अनन्यभावान्पार्षदानात्मनो मरुतां गणान् ॥ ६५ ॥ न ममार दितेर्गर्भः श्रीनिवासानुकंपया ॥ बहुधा कुलिशक्षुण्णो
द्रोण्यस्त्रेण यथा भवान् ॥ ६६ ॥ सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यतां ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ॥ ६७ ॥

स्तुपलालपन्नुरवतानूपनः ॥ सप्तमासचकर्त्तविच्छेद ॥ २ ॥ ६४ ॥ कौशिक इंद्रः गणान्सप्तसप्तगणानेवमरुत इति स्तुतेः ॥ ६५ ॥ ६७ ॥

सज्जः सह ॥ ६९ ॥ ७० ॥ रित्यानिः कपरस्तुक्तेषतिरिंद्रोपिनिः कपरमेवाह ॥ अंबेति ॥ लब्धमंतरंयेन ॥ अर्थ्यएवबुद्धिर्यस्य ॥ ७ ॥ ॥ अपिपरंमोक्षमपि ॥ ७ ॥ गुणस्प

सज्जरिंद्रेणपंचाशद्देवात्मेमहत्तोभवन् ॥ व्यपोत्यमातृदोषंतेहरिणासोमपाःकृपाः ॥ ६७ ॥ दितिहत्यायदृद्दशोकमाणाननलप्रभा
न् ॥ इंद्रेणसहितान्देवीपर्यतुष्यदनिंदिता ॥ ६८ ॥ अथेंद्रमाहताताहमादित्यानांभयावहं ॥ अपत्यमिच्छंत्यचरंव्रतमेतत्सुदुष्करं
॥ ७० ॥ एकःसंकल्पितःपुत्रःसप्तसप्ताःभवन्कथं ॥ यदितेविदितंपुत्रसत्यंकथयमामृषा ॥ ७१ ॥ इंद्र उवाच ॥ अंबतेहंव्यवसितंउप
धार्यागतोतिकं ॥ लब्धांतरोच्छिदंगर्भमर्थबुद्धिर्नधर्मवित् ॥ ७२ ॥ कृतोमेसप्तधागर्भआसन्सप्तकुमारकाः ॥ तेपिचैकैकशोवृक्णाः
सप्तधानापिमम्रिरे ॥ ७३ ॥ ततस्तत्परमाश्चर्यंवीक्ष्याध्यवसितंमया ॥ महापुरुषपूजायाःसिद्धिःकाप्यनुषंगिकी ॥ ७४ ॥ आराधनंभ
गवतईहमानानिराशिषः ॥ येतुनेछंत्यपिपरंतेस्वार्थकुशलाःस्मृताः ॥ ७५ ॥ आराध्यात्मप्रदंदेवंस्वात्मानंजगदीश्वरं ॥ कोवृणीते
गुणस्पर्शंबुधःस्यान्नरकेपियत् ॥ ७६ ॥ तदिदंममदौर्जन्यंबालिशस्यमहीयसि ॥ क्षंतुमर्हसिमातस्त्वंदिष्ट्यागर्भोमृतोत्थितः ॥ ७७ ॥ श्री
शुक उवाच ॥ इंद्रस्तयाभ्यनुज्ञातःशुद्धभावेनतुष्टया ॥ मरुद्भिःसहतांनत्वाजगामत्रिदिवंप्रभुः ॥ ७८ ॥ एवंतेसर्वमाख्यातंयन्मांत्वंपरिपृ
छसि ॥ मंगलंमरुतांजन्मकिंभूयःकथयामिते ॥ ७९ ॥ इतिश्रीभागवतेमहापुराणेषष्ठेस्कंधेमहतोत्पत्तिर्नामाष्टादशोध्यायः ॥ १८ ॥

र्शविषयभोगांबुधःकोवृणीते ॥ यद्यस्मान्नरकेपिविषयभोगःस्यात् ॥ ७५ ॥ महीयसि ॥ हेमहत्तमे ॥ मतःसन्नुत्थितः ॥ ७७ ॥ ७८ ॥ इतिषष्ठे अष्टादशः ॥ १८ ॥

ऊनविंशेऽवयत्योक्तं कश्यपेन हरिणेर्दितं ॥ तदेव विवृतं लोकहिताय हरिणोषणं ॥ नस्य प्रकारमिति शेषः ॥ मार्गशिरे मासि शुक्लपक्षे आदि
तः प्रतिपदि ॥ १ ॥ अथ तु मंत्र श्रद्धया ॥ स्वकारं ताय स्याः स्नातु क्रत्वा दन्तधौतं दत्वा ॥ अलंकृताय स्त्री पूजयेत ॥ २ ॥ आदौ तावन्नमस्कारमंत्रानाह द्विविधैः
तेन मंत्र अलं पर्याप्तमेव सर्वं ॥ न किंचिद्विशेषः कल्पमस्ति ॥ अतः केवलं तेन मंत्रेन मोक्ष ॥ पर्याप्तो हेतवः निरपेक्षाय हे पूर्णकाम महाविभूतिपत
ए जेमाच ॥ व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितं ॥ तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥ सूत उवाच ॥ शुक्ले मार्गशिरे पक्षे यो
षिद्भर्तुरनुज्ञया ॥ आरभेत व्रतमिदं सार्वकामिकमादितः ॥ ३ ॥ निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च ॥ स्नात्वा शुक्लदती शुक्ले
वसीतालंकृताम्बरे ॥ पूजयेत्प्रातराशात्प्राक् भगवन्तं श्रिया सह ॥ ४ ॥ अलं ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते ॥ महाविभूतिपतये
नमः सकलसिद्धये ॥ ४ ॥ यथा त्वं कृपया भूत्या तेजसा महिमौजसा ॥ जुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान्प्रभुः ॥ ५ ॥ विष्णुपत्नि
महामाये महापुरुषलक्षणे ॥ प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥ ६ ॥ ॐ नमो भगवते महापुरुषाय महानुभावाय महावि
भूतिपतये सह महाविभूतिभिर्बलिमुपाहराणीति ॥ अनेनाहरहर्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूष
णगन्धपुष्पधूपदीपोपहाराद्युपहारान्समाहित उपाहरेत् ॥ हविः शेषं तु जुहुयादनले द्वादशाहुतीः ॥ ॐ नमो भगवते महापुरुषाय महाविभू
तये लक्ष्मीपतये ॥ सकलाः सिद्धयोऽणिमाद्याः यस्मिन्नेतस्मै ॥ ७ ॥ योऽशेष यथायथावतत्वं कृपादिभिर्ज्जुष्टः अन्यैश्च सत्यसंक ॥ ल्पतये स्वाहेति ॥
ल्पत्वादिभिः सर्वैर्गुणैः ततस्तस्मात् ॥ ५ ॥ महापुरुषस्य परमेश्वरस्य केवलकृपाणानि निरपेक्षत्वादि नियमः संबोधनं ॥ ६ ॥ पूजायां मन्त्रमाह ॐ नमः इति

प्रकर्षेणामवंत्याभ्यामिति प्रभवौ ॥ ७ ॥ ९ ॥ इज्याघृताभिर्निर्वर्त्तकः प्रहृष्यमाणोऽभावनात्मकः क्रियालौकिकी ॥ १० ॥ ११ ॥ अन्ययोर्नामरूपयोः प्र
काशः स्वप्राश्रयः तयोराधारः ॥ १२ ॥ १४ ॥ महाप्रहृष्टचेतसा ईश्वरप्रध्याउपनमेत् भजेत ॥ ५ ॥ पतिसत्त्वमिदं प्रेमशीलः सत्यपत्न्याः कर्माणि
श्रियं विसृज्य वरदावाशिषां प्रभवाप्रभो ॥ भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसंपदः ॥ ७ ॥ प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वेण चेतसा द
शवारं जपेन्मंत्रं ततः स्तोत्रमुदीरयेत ॥ ८ ॥ युवां तु विश्वस्य विभू जगतः कारणं परं ॥ इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया ॥ ९ ॥
अस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः ॥ त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ॥ १० ॥ गुणव्यक्तिरियं देवी व्यंजको गुण ॥
भुग्भवान् ॥ त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेन्द्रियाशया ॥ ११ ॥ नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥ यथा युवां त्रिलोकस्य वरदौ
परमेष्ठिनौ ॥ तथा म उत्तमश्लोक सन्तु सत्या महाशिषः ॥ १२ ॥ इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह ॥ तन्निःसार्योपहरणं दत्वाचमन
मर्चयेत ॥ १३ ॥ ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा ॥ यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिं ॥ १४ ॥ पतिं च परया भक्त्या महाप्र
हृष्टचेतसा ॥ प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ॥ १५ ॥ बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च ॥ कृतमेकतरेणापि दंपत्यो
रुभयोरपि ॥ १६ ॥ पत्न्यां कुर्यादनर्हायां पतिरेतत्समाहितः ॥ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन ॥ १७ ॥ विप्रान्स्त्रियो वीरव
तीः स्रग्गंधबलिमंडनैः ॥ अर्चेदहरहर्भक्त्या देवं नियममास्थितः ॥ १८ ॥ उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः ॥ अद्याद्वात्मवि
विभृयात ॥ तरउक्तलोभवेदित्यर्थः यतः दंपत्योर्मध्ये एकतरेण कृतं उभयोरपि भवति ॥ १६ ॥ नविह ॥ शुद्ध्यर्थं सर्वकामर्द्धये तथा ॥ १९ ॥
न्यातनविछिंद्यात ॥ १७ ॥ १९ ॥

भा० ष
६१

द्वादशमासानित्युक्ते कदाचित्तन्मध्ये मलमासे पतिते तेन सह द्वादशसंख्यापूरणात्त्वाशुद्धस्यैकस्य त्यागः स्यात् ॥ हायनमित्युक्ते तन्मध्यपातिनस्तस्यापि ग्र
हणः स्यात् ॥ तदुभयं वारयितुमुभयमुक्तं ॥ उपरमेत् उपवसेत् ॥ श्वोभूते प्रभाते सति ॥ ११ ॥ पयसि शृतेन पक्वेन पाकयज्ञविधानेन पार्वणस्थालीपाकविधा
नेन ॥ १२ ॥ सुप्रजास्त्वं सत्पुत्रमित्यर्थः ॥ वाग्यतः मौनी ॥ १३ ॥ १४ ॥ १५ ॥ अवीरा विधवा ॥ धनेश्वरी सुदुर्भगा सुभगा भवति ॥ १६ ॥ य आमयावी रोगी स विरु

एतेन पूजाविधिना मासान् द्वादश हायनं ॥ नीत्वाथोपरमेत्साध्वी कार्त्तिके चरमेऽहनि ॥ ११ ॥ श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् ॥ पयः
शृतेन जुहुयाच्चरुणा सह सर्पिषा ॥ १२ ॥ पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥ आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः ॥
प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञया ॥ १३ ॥ आचार्यमग्रतः कृत्वा वाग्यतः सह बंधुभिः ॥ दद्यात्पत्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभगं
॥ १४ ॥ एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह ॥ स्त्री त्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहं
॥ १५ ॥ कन्या च विंदेत समग्रलक्षणं पतिं त्ववीरा हतकिल्बिषां गतिं ॥ मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यं ॥ १६ ॥ विंदे
द्विरूपा विरुजा विमुच्यते य आमयावींद्रियकल्यदेहं ॥ एतत्पठन्नभ्युदये च कर्मण्यनंततृप्तिः पितृदेवतानां ॥ १७ ॥ तुष्टाः प्रयच्छंति
समस्तकामान् होमावसाने हुतभुक् श्रीहरिश्च ॥ राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ॥ १८ ॥ इति श्रीभागव
ते महापुराणे षष्ठस्कंधे पुंसवनव्रतकथनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ श्रीमद्वेदव्यासाय नमः ॥ गोपीनाथाय नमः ॥

जा विमुच्यते इन्द्रियैः सह कल्यदेहं च विन्देदिति शेषः पठन् यो वर्त्तेत ॥ तस्य पितृणां देवतानां चानंततृप्तिर्भवतीत्यर्थः ॥ १७ ॥ उपसंहरति राजन्
राजन्निति ॥ महत्त्वपुण्यजन्म महद्व्रतं च ॥ १८ ॥ षष्ठस्कंधे निगूढार्थप्रकाशा भावार्थदीपिका ॥ वह्निना सेव्यतामेषा यतिश्रीधरनिर्मिता ॥ इति षष्ठ एकोनविंशः

राम
६१

षष्ठः पत्रे ६२

श्रीगणेशाय नमः ॥ त्वद्भक्तपक्षपातेन तद्विपक्षविदारणम् ॥ नृसिंहमद्भुतं वन्दे परमानन्दविग्रहम् ॥१॥ ऊतिः पंचदशाध्यायैः सप्तमे वर्ण्यतेऽधुना ॥
ऊतिः सद्वासना प्रोक्ता तत्कर्मानुसारिणी ॥२॥ शुभा च शुभा चेति द्विधा सा हेतुभेदतः ॥ अशुभा महतां कोपाच्छुभा भाग
हरेरनुग्रहात् ॥३॥ हरेर्द्वारपयोर्ब्रह्मकोपे च सनतोरपि ॥ चतुः सनकादिब्रह्मद्वेषाद्यशुभवासना ॥४॥ यथाहि दैत्ययोर्भेदि
प्रह्लादस्य सतः स्थिरा ॥ नारदानुग्रहाद्दामविष्णोर्भक्तिवासना ॥५॥ त्वद्भक्तं च सदा विष्णुर्द्विषंतमपि रक्षति

राजोवाच ॥ समः प्रियः सुहृद्ब्रह्मन्भूतानां भगवान्स्वयं ॥ इंद्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ॥१॥

तृतीयेऽथ भवेद्व्याख्यावकरोदात्मयात्मनः ॥६॥ अतो मनीषिणां यत्नः कार्यो महदनुग्रहे ॥ इत्येतदर्थं स्तीनामवल
हेलनमुच्यते ॥७॥ तत्रादौ दशभिर्दैत्यतत्सुतमतिभेदतः ॥ महत्कोपादुत्कंपोत्थवासनाभेद उच्यते ॥८॥ सद्वासना
चतुर्ज्येत कर्मभिः शुद्धचेतसः ॥ परैरेकपंचभिस्तस्मात्क्रियतेऽधर्मनिर्णयः ॥९॥ तत्र तु प्रथमेऽध्याये हिरण्यकशिपोः
हते ॥ विष्णुभक्तेर्विरोधस्तु विप्रशापजदर्पिते ॥१॥ यदुक्तं पूर्वस्कंधान्ते ॥ हतपुत्रार्दितिः शक्रपार्ष्णिग्राहेण विष्णुना ॥ मन्युनाशोकदीप्ते

किं च ॥ यस्यार्थैः प्रयोजनं सिद्ध्यति स तत्पक्षपाती भवति ॥ येभ्यो बिभेति तान् द्वेष्टि द्विषेणाहति ॥ न तु तत्र तव तरश्चास्तीत्याह न हीति ॥ निःश्रेयसं परमानन्द एवात्मा
स्वरूपं यस्य ॥ अहरेभ्य श्वोद्वेगो भयं नास्ति ॥ अतो विद्वेषोपि नास्त्येव ॥ न च हेतुः ॥ अगुणस्येति ॥ १ ॥ श्रीनारायणस्य गुणान् अनुग्रहनिग्रहादीन् प्रति ॥ तत
तत्संशयं ॥ ३ ॥ भागवतस्य प्रज्ञादस्य माहात्म्यं ॥ ४ ॥ कृष्णाय व्यासाय कृष्णं मुनिं नत्वेत्यर्थः ॥ ५ ॥ यस्मात्प्रकृतेः परः अतो निर्गुणः ॥ अत एवाजः ॥ अत एवा
व्यक्तः रागद्वेषादिनिमित्तभूतदेहेंद्रियादिरहितः ॥ सोपि स्वमायागुणमत्वारिकं आविश्य प्रअधिष्ठाय बाध्यामिति ॥ यद्वा ॥ देवासुरादीनां परस्परं बाध्यबाध

न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः ॥ नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥ १ ॥ इति नः सुमहाभाग नारा
यणगुणान् प्रति ॥ संशयः सुमहान् जातस्तद्भवांश्छेत्तुमर्हति ॥ ३ ॥ शु ॥ उ ॥ च ॥ साधु पृष्टं महाराज हरेश्चरितमद्भुतं ॥ यद्भा
गवतमाहात्म्यं भगवद्भक्तिवर्द्धनं ॥ ४ ॥ गीयते परमं पुण्यमृषिभिर्नारदादिभिः ॥ नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथां ॥ ५ ॥
निर्गुणोपि ह्यजो व्यक्तो भगवान् प्रकृतेः परः ॥ स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥ ६ ॥ सत्त्वं रजस्तम इति प्रकृतेर्ना
त्मनो गुणाः ॥ न तेषां युगपद्राजन् ह्रास उल्लास एव वा ॥ ७ ॥ जयकाले तु सत्त्वस्य देवर्षीन् रजसोसुरान् ॥ तमसो यक्षरक्षांसि
तत्कालानुगुणोभजत ॥ ८ ॥

कतां गतः प्राप्तः ॥ न च देहतो जात इत्यर्थः ॥ ६ ॥ न च गुणानां स्वीयत्वे सति प्राकृतपुरुषवद्विषमः स्यान्न तु तरस्तीत्याह सत्त्व
मिति ॥ न तु स्वेच्छया गुणाधिष्ठाने नापि पक्षपाते वैषम्यं स्यादेव ॥ न ॥ तस्य कालकृतत्वादित्याह न तेषामिति साईन ॥ ह्रासोल्लासौ वृद्धिः ॥ ७ ॥ सत्त्वस्य जयका
ले देवादीन् ऋषींश्च अभजत ॥ तत्तद्देहं प्रविश्य वर्द्धयतीत्यर्थः ॥ रजसो जयकाले ॥ तमसो जयकाल इत्यन्वयः ॥ तस्य कालस्यानुगुणः सन् ॥ ८ ॥

भा॰स
१

समस्यापि निमित्तभेदेन वैषम्ये दृष्टान्तः ज्योतिर्यथाकाशादिषु जलं यथा पात्रेषु आकाशं यथा घटादिषु तथा नानारूपश्च भाति ननु तर्हि तद्देहविवेके न प्रतीयते तत्राह संघातात् शरीरादेहात् न विविच्यते न पृथक् प्रतीयते तर्हि तान्नुभजतीति कुतो ज्ञायते तत्राह विदन्तीति आत्मस्थं परमात्मानं कवयो निपुणाः मथित्वा कार्यदर्शनलिंगेन विचार्य जानन्ति अन्ततः स्वभावकर्मादिवादनिषेधेन विदन्तीति पाठे लाभो विज्ञानमेव अत्रापि ज्योतिरादिरिवेति दृष्टान्तं यथा हि सूर्यकान्तादौ दाहदर्शनात् ज्योतिर्ज्ञायते यथा वा गन्धदर्शनात् द्रव्यादिरित्यादि ९ तदेवं मायागुणावशेनैतद्वैषम्यं न स्वाभाविकमित्युक्तं तर्हि गुणपारतन्त्र्यादनीश्वरत्वमाशंक्याह यदा आत्मनो जीवस्य भोगापवर्गः शरीराणि उरः परमेश्वरः सिसृक्षुर्भवति तदा मायेन स्थितं त

ज्योतिरादिरिवाभाति संघातान्न विविच्यते विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ९ यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ १० कालं चरन्तं सृजतीश आश्रयं प्रधानपुम्भ्यां नरदेव सत्यकृत य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ११

जः पृथक् सृजति विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुः सत्त्वं पृथक् सृजति शयिष्यमाणः संजिहीर्षन् तमः पृथगीरयति प्रेरयति १० यदा सिसृक्षुरित्यादि निर्दिष्टान् प्रतीतं कालपारतन्त्र्यं वारयन् प्रधानपुरुषपारतन्त्र्यं अपि वारयति कालमिति हे नरदेव प्रधानपुंभ्यां निमित्तभूताभ्यां सत्यकृत् अमोघकर्ता ईश्वरस्तयोः सहकारित्वेनाश्रयभूतं चरन्तं वर्तमानं कालं स्वयमेव सृजति स्वचेष्टारूपत्वात्कालस्य न तत्पारतन्त्र्यमित्यर्थः तथापि प्रवृत्ते किमायातं तत्राह य एष कालः स सत्त्वमेधयतीत्यतो हेतोः ईशितापि ईश्वरोपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयतीवेत्यर्थः तत्प्रत्यनीकान् सुरप्रतिपक्षान् प्रमिणोति हिनस्तीवेत्यन्वयः उरुश्रवाः कीर्तिर्यस्य सः कालशक्तिक्षुभितगुणगतवैषम्यं संनिधिमात्रेणानुदधिष्ठातरि स्फुरतीति

राम
१

इदानीं तु तयोर्वधो नेश्वरपक्षपातेन किंतु ब्राह्मणशापेनासुरीयोनिप्राप्तयोरनुग्रहार्थमेवेति वक्तुमितिहासमुपक्षिपति अत्रैवेति द्वेषादिर
हितस्यापि दैत्यवधे चेदिभूभुजः शिशुपालस्य ॥ १३ ॥ १४ ॥ एकांतभक्तानामपि दुर्लभा प्राप्तिर्विद्विषो जाता तेत्येतदद्भुतं हि ॥ १५ ॥ तमसि पतद्वेनवन्नरकपा
तएवोचितमित्याह भगवन्निंदयेति तमसि नरके ॥ १६ ॥ दमघोषसुतः शिशुपालः कलभाषणात् बाल्ये कोमलभाषणमारभ्य संप्रति शुद्धेनापि व्र

अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ॥ प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे ॥ १२ ॥ दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ ॥ वा
सुदेवे भगवति सायुज्यं चेदिभूभुजः ॥ १३ ॥ तत्रासीनं सुरऋषिं राजा पांडुसुतः क्रतौ ॥ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदं ॥ १४ ॥
युधिष्ठिर उवाच ॥ अहो अत्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि ॥ वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १५ ॥ एतद्वेदितुमिच्छामः सर्व ए
व वयं मुने ॥ भगवन्निंदया वेनो द्विजैस्तमसि पातितः ॥ १६ ॥ दमघोषसुतः पाप आरभ्य कलभाषणात् ॥ संप्रत्यमर्षी गोविंदे दंतवक्रश्च
दुर्मतिः ॥ १७ ॥ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययं ॥ श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः ॥ १८ ॥ कथं तस्मिन् भगवति दुरवग्रा
ह्यधामनि ॥ पश्यतां सर्वलोकानां लयमीयतुरंजसा ॥ १९ ॥ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ॥ ब्रूह्येतदद्भुततमं भगवांस्तत्र
कारणं ॥ १० ॥ श्रीशुक उवाच ॥ राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः ॥ तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः ॥ ११ ॥

मर्षी क्रोधी मत्सरी वा ॥ १७ ॥ श्वित्रः कुष्ठं ॥ १८ ॥ दुरवग्राह्यं दुःप्रापं धाम स्वरूपं यस्य तस्मिन् लयं सायुज्यं ईयतुः ॥ अस्मत्सापि दंतवक्त्रलयस्य तस्मिन् लयं सायुज्यं तज्ज्ञा
नकप्रामाण्येन सिद्धवन्निर्दिशः ॥ १९ ॥ एतत्तदद्भुततमं हि अतएतत्प्रति भ्राम्यति भगवान् सर्वज्ञस्त्वं ब्रूहि ॥ १० ॥ आभाष्य संबोध्य मीरंति निषीदंत्याः सामिति सद
सभाः तस्याः सदः सदसः शृण्वत्याः कथाः प्राहेत्यन्वयः ॥ ११ ॥

भगवन्निंदकस्य नरकपातेन भाव्यमिति वदतस्तव कोऽभिप्रायः । भगवत्पीडाकरत्वेन वा । तदभावेपि सुरापानादिवन्निषिद्धाचरणाद्वा । तत्र नावद्देहाभिमानकृतनिंदानिमित्तत्वात्पीडा हीनां भगवतस्तु तदभावान्न पीडाशंकास्तीत्याह सार्द्धैस्त्रिभिः । निंदनं दोषकीर्तनं । न्यक्कारस्तिरस्कारः । निंदनस्तुत्यादिज्ञानार्थं प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं रचितं ॥ २२ ॥ तदभिमानेन भूतानां यथा ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति तथा न यस्येत्युत्तरेणान्वयः । दंडस्ताडनं । पारुष्यं निंदा । तयोर्हेतुभूतयोर्हिंसा पीडा च भवति ॥ २३ ॥ यस्मिन्निबद्धोयमभिमानः तस्य देहस्य वधाद्वधश्च यथा यस्याभिमानो नास्ति । अस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते न केनापि । अभिमानाभावे हेतुः । कैवल्यात्

नारद उवाच ॥ निंदनस्तवसत्कारन्यक्कारार्थं कलेवरं ॥ प्रधानपरयो राजन्नविवेकेन कल्पितं ॥ २२ ॥ हिंसा तदभिमानेन दंडपारुष्ययोर्यथा ॥ वैषम्यमिह भूतानां ममाहमिति पार्थिव ॥ २३ ॥ यन्निबद्धोभिमानोयं तद्वधात्प्राणिनां वधः ॥ तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः ॥ परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥ २४ ॥ तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा ॥ स्नेहात्कामेन वा युंज्यात्कथंचिन्नेक्षते पृथक् ॥ २५ ॥ यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् ॥ न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ २६ ॥ कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् ॥ संरंभभययोगेन विंदते तत्स्वरूपतां ॥ २७ ॥ अहिंसायत्वेनाभिमतव्याभावात् । वैषम्याभावे हेतुः । अखिलात्मनः स

र्वात्मन इति । तर्हि किमिति हंति तत्राह परस्येति । दमकर्तुः हितार्थं दंडं करोतीत्यर्थः ॥ २४ ॥ यस्माद्भगवतो निंदादिकृतं वैषम्यं नास्ति तस्माद्येन केनाप्युपायेन ध्यायतस्तेनैव निंदादिकृतपापस्यापि नाशात्तावज्जयं युक्तमित्याशयेनाह तस्मादिति सप्तभिः । निर्वैरेण नास्ति वैरं केनापि यस्मिन् स्नेहेन भक्तियोगेनेत्यर्थः । युंज्यान्मन इति शेषः । यस्मादेतैरुपायैः पृथक् नेक्षेत । तत्रापि वैरानुबंधः श्रेष्ठ इत्याह यथेति । न तथा भक्तियोगेनापि ॥ २५ ॥ २६ ॥ अत्र दृष्टांतः कीटः पेशस्कृता भ्रमरेण । संरंभो द्वेषः स एव योगस्तेन ॥ २७ ॥

वैरेणयाऽनुचिंतातयैवधूतःपाप्मायेषांतेतंप्रापुः १८ नरद्वेषकामादिनिमित्तंपापंहित्वा १९ २० तर्हिवेनःकिमितिनरकेपातितःतीव्रध्यानाभावात्ता
पमेवतत्रफलितमित्याहकतमोपीति पुरुषंश्रीहरिंप्रति पुरुषंपुरुषस्यकामासंभवात् भयादिभिश्चिंतयतांपंचानांमध्येनैकतमोपीत्युक्तं २१ तदे
वमितिहासमप्युक्त्वाबकथामुक्त्वाश्रीकृष्णेशिशुपालस्यवैरानुबंधेकोहेतुरित्यपेक्षायांतमेवेतिहासंसंवक्तुमाहमातृष्वस्रेयइति परात्वैकुंठात्प्रच्यु

एवंकृष्णेभगवतिमायामनुजईश्वरे वैरेणपूतपाप्मानस्तमापुरनुचिंतया १८ कामाद्द्वेषाद्भयात्स्नेहाद्यथाभक्त्येश्वरेमनः आवेश्यत
दघंहित्वाबहवस्तद्गतिंगताः १९ गोप्यःकामाद्भयात्कंसोद्वेषाच्चैद्यादयोनृपाः संबंधाद्वृष्णयःस्नेहाद्यूयंभक्त्यावयंविभो २० कत
मोपिनवेनःस्यात्पंचानांपुरुषंप्रति तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेत् २१ मातृष्वस्रेयोवश्चैद्योदंतवक्त्रश्चपांडव पार्षद
प्रवरौविष्णोर्विप्रशापात्पदच्युतौ २२ युधिष्ठिर उवाच कीदृशःकस्यवाशापोहरिदासाभिमर्शनः अश्रद्धेयइवाभातिहरेरेकांति
नांभवः २३ देहेंद्रियासुहीनानांवैकुंठपुरवासिनां देहसंबंधसंबद्धमेतदाख्यातुमर्हसि २४ नारद उवाच एकदाब्रह्मणःपुत्रा
विष्णोर्लोकंयदृच्छया सनंदनादयोजग्मुश्चरंतोभुवनत्रयं २५ पंचषड्ढायनार्भाभाःपूर्वेषामपिपूर्वजाः दिग्वाससःशिशून्मत्वाद्वा
स्थौतान्प्रत्यषेधतां २६ अशपन्कुपिताएवंयुवांवासंनचार्हथः रजस्तमोभ्यांरहितेपादमूलेमधुद्विषः पापिष्ठामासुरींयोनिंबालिशौयात
तौ २७

हरिदासोऽभिमर्शतिअभिभवतीतितथा अश्रद्धेयःअनादरणीयइवअसंभवात् भवोजन्म २३ असंभवमेवाह जन्महेतुभूतैःप्राकृतैर्देहेंद्रि मासुभिः २३
यासुभिर्हीनानांनाश्चर्यसत्वमयदेहानामित्यर्थः प्राकृतदेहसंबंधेनसंबद्धमेतदाख्यानमाख्यातुमर्हसि २४ ५ कथंभूताःपंचवासमरवाहायनानियेषांतेचअर्भाबालाः
तद्दशाभायेषांते पूर्वेषांमरीच्यादीनामपि दिग्वाससःदिगंबराः अतःशिशून्मत्वा २६ वासमपिनार्हथःकुतःपुनर्नित्यवासमितिचकारार्थः हेबालिशौ अतोहेतोः
स्त

भा०स
४

वाढं वयोस्त्रिभिर्जन्मभिः लोकाय त्वस्थानपातनप्रायेकल्पतां तावता च यं शापः समागममिति पुनः प्रोक्तावित्यर्थः ३८ ३९ धरोद्धारे निमित्ते तत्र वितिद्यातीहतः ४० हिरण्यकशिपोर्वधे कारणं सूचयति हिरण्यकशिपुः पुत्रमिति ४१ सर्वभूतानामात्मभूतं अतः समं सर्वत्रैव पश्यतीति तथा तं अतः प्रशान्तं द्वेषादिरहितं अत एव भगवत्तेजसा संस्पृष्टं व्याप्तं उद्यमैः शास्त्रप्रहारादिभिः ४२ विश्रवसः सुतौ ४३ न्यहन्यत हतवानित्यर्थः तद्वितरेव कथनीयमित्युक्तं

एवं मे प्रोक्त भवनात्पततौ तैः कृपालुभिः प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पतां ३८ जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ३९ हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ४० हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियं जिघांसुरकरोन्नाना यातना मृत्युहेतवे ४१ सर्वभूतात्मभूतं तं प्रशान्तं समदर्शनं भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ४२ ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवःसुतौ रावणः कुम्भकर्णश्च सर्वलोकोपतापनौ ४३ तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात्प्रभो ४४ तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ४५ वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मतां नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ४६ युधिष्ठिर उवाच विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ४७ इति श्रीभागवते महापुराणे सप्तमस्कन्धे नारदयुधिष्ठिरसंवादे प्रथमोऽध्यायः नारद उवाच भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना हिरण्यकशिपू राजन्पर्यतप्यद्रुषा शुचा १

कं प्रत्याह रामवीर्यमिति ४४ कृष्णचक्रेण हतमंहो ययोस्तौ तयोः पापमेव हतं न तु तावित्यर्थः ४५ ४६ येन कारणेन प्रह्लादस्याच्युतात्मता अच्युते कविन्नतत्वं तदपि ब्रूहि इति शेषः ४७ इति सप्तमे प्रथमः द्वितीये विष्णुद्वेषेण लोकविद्रावणं दैत्यैः तद्भ्रातृप्रचारीनिति हा मे रमात्वयन् भगवद्द्वेष एव तद्द्वेषोऽपि कारणमित्याशयेनाह भ्रातरीत्यादिना १

राम
४

एवं देवपक्षपातेन । कोपेन उत् अतिशयेन ज्वलद्भ्यां । कोपाग्निधूमेनेव धूम्रमम्बरं निरीक्ष्यमाणः १ करालदंष्ट्राभिर्युक्तया उग्रया दृष्ट्या दुःप्रेक्ष्यं भ्रुकुटीयुक्तं मु-
खं यस्य सः २ ॥ ५ ॥ समेनापि उपधावनैर्भजनैः निमित्तभूतैः पार्ष्णिग्राहेण सता ६ ॥ एवं त्यक्तः स्वभावः समत्वं येन तस्य । घृणोः अद्भुततेजोमयस्यापि
मायया वनौकसः वराहरूपस्य सतः । अस्थिरात्मनः अनवस्थितचित्तस्य । कुतः । यो यो भजति तं तं भजमानस्य अनुसरतः ७ । तस्य रुधिरेणाप्याययन्तर्प्य

अथ हैवं रुषा घूर्णः संदष्टदशनच्छदः । कोपात् ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमम्बरं ॥ १ ॥ करालदंष्ट्रोग्रदृष्ट्या दुःप्रेक्ष्यभ्रु-
कुटीमुखः । शूलेनोद्यम्य सदसि दानवानिदमब्रवीत् ॥ ३ ॥ भो भो दानवदैतेया द्विमूर्द्ध त्र्यक्ष शंबर । शतबाहो हयग्री-
व नमुचे पाक इल्वल ॥ ४ ॥ विप्रचित्ते मम वचः पुलोमन् शकुनादयः । शृणुतानंतरं सर्वे क्रियतामाशु मा चिरं ॥ ५ ॥ सपत्नै-
र्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् । पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥ तस्य त्यक्तस्वभावस्य घृणोर्मायावनौ-
कसः । भजंतं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥ मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै । रुधिरप्रियं तर्पयिष्ये भ्रात-
रं मे गतव्यथः ॥ ८ ॥ तस्मिन्कूटेहिते नष्टे कृत्तमूले वनस्पतौ । विटपा इव शुष्यंति विष्णुप्राणा दिवौकसः ॥ ९ ॥ तावद्यात भुवं
यूयं ब्रह्मक्षत्रसमेधितां । सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः ॥ १० ॥

यिष्यामि तावद्यूयं भुवं यातेति तृतीयेनान्वयः ८ न तु देवैस्त[illegible]द्वधः कारितः अतस्ते किं न हन्यंते तत्राह । तस्मिन्कूटे कपटे । अहिते प्रतिपक्षे । कूटमीहितं यस्येति
वा । नष्टे अदृष्टे सति । देवाः शुष्यंति स्वयमेव नाशयास्यंति । कुतः विष्णुरेव प्राणो येषां ते ९ । तपोयुक्तादियुक्तान् सूदयध्वं घातयत ॥ १० ॥

भा॰स॰
५

ननु तैः किमपराद्धं तत्राह विष्णुरिति द्विजानां क्रियाश्चानुष्ठानं मूलं यस्य सः यतो सौ यज्ञो धर्ममयस्तथा पराणां परमश्चाश्रयः अतो यज्ञरूपस्य विष्णोर्मूलत्वात् मा
मनादृत्य तदाश्रयणाद्द्वेव वध्य इति भावः ११ तस्मात्परमं मंत्रश्लोकेनाह यत्र यत्रेति संदीपयत दहत वृश्चत छेदं कुरुत १२ पुरं हट्टादिमत् ग्रामस्तद्रहितः
व्रजो गवां वासः उद्यानं कृत्रिमं वनं क्षेत्रं व्रीह्यादेः आरामो कृत्रिमं वनं आश्रमः ऋषीणां स्थानं आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटो गिरिद्रो

विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् देवर्षिपितृभूतानां धर्मस्य च परायणं ११ यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रि
याः तं तं जनपदं यात संदीपयत वृश्चत १२ इति ते भर्तृनिर्देशमादाय शिरसादृताः तथा प्रजानां कदनं विदधुः कदनप्रियाः
१२ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् खेटखर्वटघोषांश्च ददहुः पत्तनानि च १३ केचित्खनित्रैर्बिभिदुः सेतुप्रा
कार[illegible]गोपुरान् आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः प्रादहन्शरणान्यन्ये प्रजानां ज्वलितोल्मुकैः १४ एवं
विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः १५ हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः
कृत्वा कटोदकादीनि भ्रातृपुत्रानसांत्वयत् १६ शकुनिं शंबरं धृष्टं भूतसंतापनं वृकं कालनाभं महानाभं हरिश्मश्रुमथो
त्कचं १७ तन्मातरं रुषाभानुं दितिं च जननीं गिरा श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर १८

णी आश्रयो ग्रामः घोषश्चाभीराणां वासः पत्तनं राजधानी १३ खनित्रैः खननसाधनैः आजीव्यान् उपजीव्यान् शरणानि गृहान् १४ विप्रकृते उपद्रुते यज्ञभागाना
मभावात् दिवं परित्यज्य १५ तदेवं प्रजानां कदनं दानवेषु कृतवत्सु ईदृशं स्वर्गराज्यादि साधयितुं तपस्तप्तुकामः प्रथमं यत्कृतवान् तत्तदाह हिरण्यकशिपुरित्या
दिना कटोदकं प्रेताय यद्देयमुदकं आदिशब्दात्प्रेतश्राद्धादिकं १६ १८

राम
५

हे वत्स इति भ्रातृभार्यां संबोधयति ॥ १९ ॥ भवत्वेनाम तस्य साध्यो वधः तथाप्यस्माकं तावद्दुर्गतिरेवेति चेत्तत्राह भूतानामिति ॥ दैवेन प्राचीनकर्मणा एकत्र नीतानां संयोजितानां पुनस्तु स्वैः स्वैः कर्मभिः उन्नीतानां वियोजितानां ॥ २० ॥ एवं लौकिकदृष्ट्या शोकं विवार्य तत्त्वदृष्ट्या वारयन्नित्य इति ॥ नित्यः मृत्युशून्यः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः सर्वगतः सर्ववित् सर्वज्ञश्च ॥ सर्वत्र हेतुः परो देहादिव्यतिरिक्तः ॥ अतो मृत इति कृश इति मलिन इति ॥ शोको न कार्य

हि एप शि हत्वा च तं वा वहे वधूः पुत्रा वीरमार्हथ शोचितं ॥ रिपोरपि मृत्युर्वेधस्याध्यः प्राणानां वध ईप्सितः ॥ १९ ॥ भूतानामिह संवासः प्रपायामिव सुव्रते ॥ दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥ २० ॥ नित्य आत्माव्ययः शुद्धः सर्वगः सर्ववित्परः ॥ धत्तेसावात्मनो लिंगं मायया विसृजन्गुणान् ॥ २१ ॥ यथा भ्रमत्सु · · · तरवोपि चलाइव ॥ चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ॥ २२ ॥ एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् ॥ याति तत्साम्यतां भद्रे ह्यलिंगो लिंगवानिव ॥ २३ ॥ एष आत्मविपर्यासो ह्यलिंगे लिंगभावना ॥ एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ॥ २४ ॥

इत्यर्थः कथं तर्हि तस्य संसारः तत्राह धत्त इति ॥ आत्मनो मायया अविद्यया लिंगं धत्ते ॥ गुणानुच्चावचान्देहान्सृजन् स्वादिस्वाविशेषेण सृजन् स्वीकुर्वन् ॥ लिंग शरीरोपाधिः संसार इत्यर्थः ॥ २१ ॥ एतत्सदृष्टान्तं प्रपंचयति यथेति चलद्भिः तरवः प्रतिबिंबिताः उपाधिधर्मा उपहिते भवंतीति दृष्टांतमुक्त्वा ग्राहकधर्मा ग्राह्ये भवंतीति दृष्टांतमाह चक्षुषेति ॥ २२ ॥ अविकलः परिपूर्ण एव एतत्साम्यतां मनःसमतामित्यर्थः ॥ २३ ॥ लिंगभावना देहाभिमानः एष आत्मनो विपर्यासः अन्यथाभावः तमेवाह प्रियैर्वियोगः अप्रियैर्योगश्च कर्म च संसृतिश्च नानागर्भप्रवेशः ॥ २४ ॥

भा॰स॰
६

ततश्च संभव उत्पत्तिः॥ विवेकाख्या स्मृतिः॥ अनंतरं संधानं॥२५॥ अत्रापि शोकहेतुं विनावध्यैवायं शोककर इत्यस्मिन्नर्थे प्रेतस्य मृतस्य ये बांधवास्तेषां च॥२६॥ उपासत तं समीपे आरत्यास्थिताः॥२७॥ विशीर्णरत्नमयं कवचं यस्य॥ विभ्रष्टान्याभरणानि स्रजश्च यस्य॥ शरेण निर्भिन्नं हृदयं यस्य॥ असृजा रक्तेनाविलं लिप्तं॥२८॥ प्रकीर्णाः

संभवश्च विनाशश्च शोकश्च विविधः स्मृतः॥ अविवेकश्च चिंता च विवेकास्मृतिरेव च॥२५॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ यमस्य प्रेतबंधूनां संवादं तं निबोधत॥२६॥ उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः॥ सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत॥२७॥ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजं॥ शरनिर्भिन्नहृदयं शयानमसृगाविलं॥२८॥ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदं॥ रजःकुंठमुखांभोजं छिन्नायुधभुजं मृधे॥२९॥ उशीनरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः॥ हताः स्म नाथेति करैरुरो भृशं घ्नंत्यो मुहुस्तत्पदयोरुपापतन्॥३०॥ रुदत्य उच्चैर्दयितांघ्रिपंकजं सिंचंत्य अस्रैः कुचकुंकुमारुणैः॥ विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्य आक्रंदनया विलेपिरे॥३१॥ अहो विधात्राकरुणेन नः प्रभो भवान्प्रणीतो दृगगोचरां दशां॥ उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्द्धनः॥३२॥

केशा यस्य॥ ध्वस्ते अक्षिणी यस्य॥ रभसा संरंभेणारब्धो दच्छदः ओष्ठो येन॥ रजसा कुंठं आवृतं मुखांभोजं यस्य॥ छिन्नमायुधं भुजश्च यस्य॥२९॥ तस्य पादयोरुपसमीपे आसमंतात् उपतन्॥३०॥३१॥ विलापमेवाह अहो इति द्वाभ्यां॥ अकरुणात्वमेवाद्भुः दृगगोचरां दशां येन भवान्प्रणीतो गमितः तेन विधात्रा त्वमधुना शुचां विवर्द्धनः कृतोऽसीत्यन्वयः॥३२॥

राम
६

त्वया हृतक्रमेण विना वयं कथं स्याम भवेम जीवेम । अतः हे वीर त्वयं त्वया सितवेते अनुपानं अनुगमनं तव पादयोः शुश्रूषां कुर्वतीनामस्माकं दिश
देहि ३३ निर्हारं दाहार्थं नयनं अलंकृतमाचलप्रति ३४ परिदेवितं रोदनं तद्विपर्ययमेवास्तु तत्स्तुवा ३५ तत्र स्वयमेवोपगतो यमः स्तानाह अहोइत्या
दिना । वयसा अस्मत्तोऽधिकानामपि लोकस्य विधिं जन्ममरणादिप्रकारं विपश्यतामपि विमोहः यत्र यस्मात् अव्यक्तादागतः तत्रैव गतमपार्थं शोचं
ति तदुक्तं गीतासु । अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिदेवनेति । किंच त्वयमपि सधर्माः मृतेन सह स

त्वयाहृततत्त्वेन वयं महीपते कथं विनास्याम हृतक्रमेण ते । तवानुयानं तव वीर पादयोः शुश्रूषतीनां दिश यत्र यास्यसि ३३
एवं विलपतीनां वै परिगृह्य मृतं पतिं । अनिच्छतीनां निर्हारमर्कोऽस्तं सन्न्यवर्तत ३४ तत्राह प्रेतबंधूनां मा स्म तत्परिदे
विंतं । आह तान् बालको भूत्वा यमः स्वयमुपागतः ३५ यम उवाच । अहो अमीषां वयसाधिकानां विपश्यतां लोकवि
धिं विमोहः । यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचत्यपार्थं ३६ अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न
विचिंतयामः । अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ३७ य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुं

मानो मृत्युलक्षणो धर्मो येषां तथाभूता अपि ३६ अबला दुर्बला अपि वृकादिभिरभ पते च यः तस्याबलाः क्रीडनमाहुरीशितुश्चराचरं निग्रहसंग्रहे प्रभुः
क्ष्यमाणा वयं तत्र हेतुः यो गर्भे रक्षति स एव नित्यं हि विश्वं रक्षिता रक्षति ३७ ननु तस्य रक्षणे किं प्रयोजनं न किंचिदपि किंतु क्रीडैव केवलमित्याह य इच्छया
इदं विश्वं सृजति रक्षति संहरति च भो अबलाः स ईशितुश्चराचरं क्रीडासाधनमाहुः अतः स एव निग्रहे संहारे संग्रहे पालने च प्रभुः ॥ ३८

भा० स्क० ८

पृथक्त्वमेवान्वयव्यतिरेकाभ्यां दर्शयति पथीति दिष्टेन दैवेन ईश्वरेण रक्षितं तेनेश्वरेण विहतं अस्य हतः तेनोपेक्षितः ३९ तदेवमात्मनो जन्ममरणादि
कर्मणि रुष्टत्वेश्वराधीनत्वान्न शोकः कार्य इत्युक्तं ॥ इदानीं देहानामेव जन्मादिमत्त्वान्नात्मन इत्याह द्वाभ्यां भूतानि देहाः निजयोनिः स्वकारणभूतं लिंगश
रीरं तन्निमित्तैः कर्मभिः भवंति जायंते न भवंति नश्यंति च ॥ सर्वशः देवादिदेहा अपि न तत्र हातरा प्रकृतौ देहे स्थितोप्यात्मा तस्या गुणैः देहधर्मैर्जन्मा
दिभिर्न बध्यते न युज्यते ॥ यतः अन्यतमो देहादत्यंतविलक्षणः ४० ॥ ननु देहकाशः स्थूल इत्यादौ नैव लक्षणं प्रतीयते तत्राह ॥ इदं मोहजं अविवेकाद

पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति ॥ जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तो
ऽस्य हतो न जीवति ॥ ३९ ॥ भूतानि तैस्तैर्निजयोनिकर्मभिर्भवंति काले न भवंति सर्वशः ॥ न तत्र हात्मा प्र
कृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥ ४० ॥ इदं शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिक
मीयते गृहं ॥ यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ४१ ॥ रामाय

त्मत्वेन ज्ञानं ॥ वस्तुतस्तु पृथगेव ॥ यतः ईयते दृश्यते भौतिकं च यथा गृहं इत्यन्वयः अत्रैवं प्रयोगः दृष्टं भौतिकाच्च पुरुषात् शरीरं भिन्नं दृश्यत्वात् ॥ भौति
कत्वाच्च ॥ यथा इत्यत्र विवेकिनश्चात्मत्वेनाभिमतमपि गृहं ततः पृथक् तद्वदिति भौतिकत्वानुमानं विवृण्वन्नात्मनो जन्माद्यभावमुपसंहरति ॥ यथा औदकैः
परमाणुभिर्जातो बुद्बुदादिः तथा च पार्थिवैर्जातो घटादिः यथा च तैजसैर्जातः कुंडलादिर्विनश्यति ॥ तथा नैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विक्रि
तः परिणतः सन् विनश्यति न त्वात्मेत्यर्थः ॥ ४१ ॥

राम
१

पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टान्तद्वयमाह यथाऽनलो दारुषु स्थितोऽपि कठोरत्वेन प्रकाशकत्वेन भिन्नः प्रतीयते तथा च देहगतो
ऽप्यनिलो नानाछिद्रेषु पृथक्स्थित एव प्रतीयते देहस्थत्वेऽप्यात्मनो लिङ्गसंयोगाभावे दृष्टान्तमाह यथा नभो न सज्जते क्वापि संगं न प्राप्नोति
तथाऽऽत्मा न पि सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयः तेषामाश्रितो वा परः पृथगेवेत्यर्थः ॥ ४२ ॥ किंच हेतृद्वयः यमनुशोचथ सोऽयं प्रब्र
ह्मत्तोऽहमतः शेते किमिति शोचथ नन्वेतावन्तं कालमयं मनोऽशृणोति स्म नेतरं इति वक्ति च इदानीं तस्यादर्शनान्मृत इति शोचामः इति

यथानलो दारुषु भिन्न ईयते यथाऽनिलो देहगतः पृथक् स्थितः सर्वगतं न सज्जते तथाऽऽत्मा न सर्वगुणाश्रयः परः ॥ ४२ ॥
ह्ययत्तो नन्वयं शेते मूढा यमनुशोचथ यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित् ॥ ४३ ॥ न श्रोता नानुवक्ताऽयं मुख्यो
ऽप्यत्र महानसुः यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः ॥ ४४ ॥ भूतेन्द्रियमनोलिङ्गान्देहानुच्चावचान्विभुः भज

चेत स तु शोच्यो न भवति प्राणापि तस्यादर्शनादित्याह यः श्रोतेति ॥ ४३ ॥ ननु प्राणवनासिका सुसूत्सजति त्यन्यस्तच्चापि स्वेन तेजसा ॥ ४५ ॥
सं तु प्राणाः श्रोता वक्ता च दृष्ट एव नायं श्रोता वक्ता वा अचेतनत्वादित्याह न श्रोतेति महानपि सर्वेन्द्रियचेष्टाहेतुः अत एव मुख्यः प्राणो
वेत्युच्यत इति श्रुतेः कस्तर्हि वक्ता श्रोता च तत्राह यस्त्विह देहे इन्द्रियवान्सर्वद्रष्टाऽऽत्मा स तु प्राणदेहाभ्यामचेतनाभ्यामन्य एव सचेतनः ॥ ४४ ॥
ननु चेतनत्वे अन्यत्वे च तस्याहंकारः स्थूलः कारणविधिरस्यादिधर्मोपलब्धिः कुतस्तत्राह भूतेन्द्रियमनोभिर्लिङ्ग्यते लक्ष्यत इति तथा तान्दे
हानुच्चावच्यानेव भजति गृह्णाति तिमस्यति तर्हि कथं मोक्षस्तत्राह तच्च भजनं स्वेन तेजसा विवेकबलेन उत्सृजति त्यजति हि स्वं तु भवं प्रमाणयति ॥ ४५ ॥

यथानलो

नन्वविवेकानंतरमप्याह एरिकर्महेतुदरन्नैर्बंधः स्यादेवेत्यत आह यावल्लिंगशरीरेणान्वितः तदभिमानवानात्मा भवति तावदेव तस्य
तत्कर्मनिबंधनं बंधहेतुर्भवति ततो विपर्ययः देहधर्मभाक्त्वं ततः क्लेशश्चानुवर्त्तते ननु लिंगाभिमानेनिवृत्तेपि यतोयं मायायोगो वि
पर्ययादिः मायया अनुवर्त्तत इति तथा न परमार्थ इत्यर्थः ४६ ननु देहदुःखादीनां तत्साधनानां च सत्यत्वप्रतीतेः कुतो मृषात्वं तथा च व
हवो वादिनः सत्यत्वमेव वदंतीति तत्राह वितथो मिथ्याभूतोयमभिनिवेशः कोसौ गुणेषु तत्कार्येषु देहादिषु अर्थः परमार्थ इति दृक्
वचश्चेति यत एषः कुत इत्यत आह यथेति ४७ उपसंहरति अथ तस्मात् नित्यमात्मानं अनित्यं देहं वा तद्विदः नित्यमनित्यं च जानंतः

यावल्लिंगान्वितो ह्यात्मा तावत्कर्मनिबंधनं ततो विपर्ययः क्लेशो मायायोगोनुवर्त्तते ४६ वितथाभिनिवेशोयं यद्गुणेष्व
र्थदृग्वचः यथा मनोरथः स्वप्नः सर्वमैंद्रियकं मृषा ४७ अथ नित्यमनित्यं वा नेह शोचंति तद्विदः नान्यथा शक्यते कर्त्तुं
स्वभावः शोचतामिति ४८ लुब्धको विपिने कश्चित्पक्षिणां निर्मितोंतकः वितत्य जालं विदधे तत्र तत्र प्रलोभयन् ४९ कुलिंग
मिथुनं तत्र विचरत्समदृश्यत तयोः कुलिंगी सहसा लुब्धकेन प्रलोभिता ५० आसज्जत शिचस्तंत्र्यां महिषी कालयंत्रिता कु

नन्वेवमुपदेशेपि शोचंतो दृश्यंते तत्राह लिंगस्तां तथापन्नां निरीक्ष्य भृशदुःखितः स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ५१
नान्यथेति शोचनशीलानां भावात्स्वभावो न निवर्त्तते इत्यर्थः ४८ स्वयं सधर्मा अपीति यदुक्तं तत्रेतिहासमाह लुब्धक इत्यादिना पक्षिणामंत
कः ईश्वरेण निर्मितः सन् यत्र यत्र तेन तत्र तान् प्रलोभयन् जालं वितत्य विशेषेण धृतवान् पाठांतरे तेषामभिषादिभिः प्रलोभनं कृतवानि
त्यर्थः ४९ कुलिंगः कंदभक्षी पक्षिविशेषः कुलिंगयोर्मिथुनं ५० शिचस्तंत्र्यां जालसूत्रे सज्जत बंधं प्राप आपन्नां आपदं प्राप्तां ५१

आकरुणया सर्वतोनुकंपया ॥ ५१ ॥ आत्मनो देहस्यार्द्धेन ॥ विधुरायुषा भार्याशून्यजीवितेनानेन ॥ दुःखं यथा भवत्येवं जीवता किं मे प्रयोजनं ॥ अतो माम
पि कामं नयत्वित्यन्वयः ॥ ५३ ॥ न जाताः पक्षा येषां तान् कथं बिभर्मि पोष्यामि ॥ मे प्रजा मातरं प्रतीक्षन्ते ॥ ५४ ॥ शाकुनिकः पक्षिहंता ॥ विलीनः सन् ॥ ५५ ॥

अहो अकरुणो देवः स्त्रिया करुणया विभुः ॥ कृपणं मानुशोचंत्या दीनया किं करिष्यति ॥ ५२ ॥ कामं नयतु मां देवः किमर्द्धेना
त्मनो हि मे ॥ दीनेन जीवता दुःखमनेन विधुरायुषा ॥ ५३ ॥ कथं त्वजातपक्षांस्तान्मातृहीनान्बिभर्म्यहं ॥ मंदभाग्याः प्रतीक्षन्ते
नीडे मे मातरं प्रजाः ॥ ५४ ॥ एवं कुलिंगं विलपंतमारात्प्रियावियोगातुरमश्रुकंठं ॥ स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो
विलीनः ॥ ५५ ॥ एवं यूयमपश्यंत्य आत्मापायमबुद्धयः ॥ नैनं प्राप्स्यथ शोचंत्यः पतिं वर्षशतैरपि ॥ ५६ ॥ हिरण्यकशिपुरुवाच ॥
बाल एवं प्रवदति सर्वे विस्मितचेतसः ॥ ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितं ॥ ५७ ॥ यम एतदुपाख्याय तत्रैवांतरधीयत ॥ ज्ञातयो
हि सुयज्ञस्य चक्रुर्यत्सांपरायिकं ॥ ५८ ॥ ततः शोचत मा यूयं परं चात्मानमेव वा ॥ क आत्मा कः परो वात्र स्वीयः पारक्य एव वा ॥ स्वपरा
भिनिवेशेन विनाज्ञानेन देहिनां ॥ ५९ ॥ नारद उवाच ॥ इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ॥ पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्त
मधारयत ॥ ६० ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे द्वितीयोध्यायः ॥

आत्मापायं स्वमृत्युं ॥ ५६ ॥ अयथोत्थितं मिथ्यैवाविर्भूतं ॥ ५७ ॥ सांपरायिकं परलोककृत्यं ॥ ५८ ॥ सस्नुषा स्नुषया सहिता ॥ ६० ॥ सप्तमे द्वितीयः ॥ ॥ तृतीये तप्ततपसा तप्तं वीक्ष्य
॥ ५८ ॥ अशोचतेति पाठे अडागमश्चार्षः स्वः परश्चेत्यभिनिवेश एवाज्ञानं तेन विना ॥ ५९ ॥
जगद्विधिः ॥ आगत्य विस्मितस्तेन सत्कृतस्तद्वरान्ददौ ॥ १ ॥

भा॰स॰ ९

तदेवं साधनं नां करने दानवानामीश्वरः॥ वंश्यनाशशोकं तत्व नि नृपणो नापनीय यत्कृतवान् तदाह हिरण्यकशिपुरित्यादिना॥ अप्रतिद्वंद्वं प्रतिपक्षहीनं॥ एकराजं एकमेव राजानं व्यधित्सत कर्तुमैच्छत॥१॥ ऊर्ध्वबाहू यस्मान्नभसि दृष्टिर्यस्य॥ पादांगुष्ठेनाश्रिता अवनिर्येन॥२॥ जटानां दीधितिभिः अंशुभिः रश्मिभिः प्रलयकर्ता अर्क इव रेजे॥ पूर्वं ये अलक्षिताः संतो विचेरुस्ते देवाः पुनः स्वानि स्थानानि भेजिरे॥३॥ विष्वगीरितः सर्वतः प्रसृतः सन्॥४॥ द्वीपेरेड्डिभिश्च सहि

म१ ना॥ रउवाच॥ हिरण्यकशिपू राजन्नजेयमजरामरं॥ आत्मानमप्रतिद्वंद्वमेकराज्यं व्यधित्सत॥१॥ स तेपे मंदरद्रोण्यां तपः परमदारुणं॥ ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः॥२॥ जटादीधितिभी रेजे संवर्तार्क इवांशुभिः॥ तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे॥३॥ तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः॥ तिर्यगूर्ध्वमधो लोकानतपद्विष्वगीरितः॥४॥ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल भूः॥ निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश॥५॥ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः॥ धात्रे विज्ञापयामासुर्देवदेव जगत्पते॥६॥ तस्यायं किल संकल्पश्चरतो दुश्चरं तपः॥ श्रूयतां किं न विदितं तवाथापि निवेदितं॥८॥

तास्तु स्खलिताः॥५॥६॥ नववलिहारः करप्रदाः पूजाकारिणः इति वा अभितो भवतीत्यभिभूः हे अभिभो सर्वाधिपते पाठांतरे भो इति संबोधनं अभितो पाव त्रनं नंक्ष्यंतीति संबंधः॥७॥ ब्रह्मणा स्मिन्देहे यमुत्पादयितुं तं तमहं कल्पमाद्यः तस्येति चतुर्भिः अथाप्यस्माभिर्निवेदितं तत्वया श्रूयतां॥ ॥८॥

दैत्येंद्र तपसा तप्ता दिवि स्थातुं न शक्नुमः तस्य चोपशमं भूमन् विधेहि यदि मन्यसे॥७॥ लोका न यावन्नंक्ष्यंति

राम ९

तपोयोगयोः समाधिनानिष्ठया सर्वधिष्ण्येभ्यः श्रेष्ठं निजासनं सत्यलोकं यथाध्यास्ते अधितिष्ठति ९ तत्रैवात्मनः साधयिष्यामि ननु ब्रह्मणः
श्रुतिर्दीर्घायुषा तपस्विना तत्साधितं अन्यः कृतं तत्साधयेत् तत्राह कालात्मनोऽशिति यद्यप्यायुषोऽल्पत्वेन देहो वारंवारं म्रियेत तथापि कालस्या
त्मनः स्वनित्यत्वात् बहुभिर्जन्मभिस्तपस्तप्त्वा तत्साधयिष्याम्येवेति १० वर्द्धमानेनेति यदुक्तं तस्य फलमाह अन्यथेति हराहरादिव्यत्ययेन अ
यथापूर्वं सृष्टिपापादिव्यत्ययेन इदं जगद्विधास्यामि वैष्णवादिभिः ध्रुवादिपदैः किं प्रयोजनं अतस्तदेव साधयिष्यामि ११ इति त्वत्पदापहरणोत

दृष्ट्वाचराचरमिदं तपोयोगसमाधिना अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनं ९ तदहं वर्धमानेन तपोयोगसमाधिना काला
त्मनोऽस्य नित्यत्वात्साधयिष्ये तथात्मनः १० अन्यथेदं विधास्येऽहमयथापूर्वमोजसा किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभि
रिति प्रसुप्तमनिर्बंधं तपः परममास्थितः ११ विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वरं १२ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते भवाय
श्रेयसे भूत्यै क्षेमाय विजयाय च १३ इति विज्ञापितो देवो भगवानात्मभूर्नृप परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमं १४ न ददर्श प्र
तिच्छन्नं वल्मीकतृणकीचकैः पिपीलिकाभिराचीर्णमेदस्त्वङ्मांसशोणितं १५ तपन्तं तपसा लोकान् यथाभ्रापिहितं रविं विलक्ष्य
विस्मितः प्राह प्रहसन्हंसवाहनः ॥ १६

स्यानिर्बंधं प्रसुप्तम ततएवासौ तपः परममास्थितः यदत्र युक्तं तदनंतरमेव विधत्स्व १२ अन्यथा तव
स्थानं भ्रंशेतेति साधु नाम निष्ठं स्यादिति शोचं तमाहुः तव पारमेष्ठ्यमिदमासनं द्विजानां गवां च भवाय उद्भवाय श्रेयसे उदयाय भूत्यै ऐश्वर्याय क्षेमाय लब्धप
लनाय विजयाय उत्कर्षाय १३ १४ वल्मीकादिभिः प्रतिच्छन्नत्वाद्यमदर्शयश्चात्तकथं विद्विलक्ष्य तं प्राहेति द्वयोरन्वयः आचीर्णं समंततो भक्षितमेदस्त्वङ्मांसं

॥ १७ हत्वा रविं धैर्य दंष्ट्रोर्मत्कुणिका विशेषैर्भक्षितो देहो यस्य ॥ १८ ॥ निरुद्धः निषिद्धमन्त्रयेन मसः त्वक्कोरकस्त्वर्थः ॥ १९ ॥ नेत्रैर्नेनम्य अवमार्यैनैवता वर्जितो हं ॥ तपोनिष्ठेन
भगवतानुहृतरां जितः ॥ २० ॥ अमत्यस्य मम दर्शनमफलन भवति ॥ २१ ॥ औरै भवतीत्यादिभवः श्रीकृतप्रोक्षितवान् ॥ २२ ॥ वज्रवंशं हननं अगरार्घ्यस्य ॥ तत्र

श्लो ब्रह्मोवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते तपः सिद्धोऽसि काश्यप ॥ वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥ १७ ॥ अद्राक्षमहमेतत्ते हृत्सारं महद
द्भुतं ॥ दंशभक्षितदेहस्य प्राणास्त्वय्यस्थिषु शेरते ॥ १८ ॥ नैतत्पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे ॥ निरम्बुर्धारयेत्प्राणान्को वै दिव्यसम
माः शतं ॥ १९ ॥ व्यवसायेन तेऽनेन दुष्करेण मनस्विना ॥ तपोनिष्ठेन भवता जितोऽहं दितिनन्दन ॥ २० ॥ ततस्त आशिषः सर्वा ददाम्य
सुरपुंगव ॥ मर्त्यस्य ते ह्यमर्त्यस्य दर्शनं नाफलं मम ॥ २१ ॥ नारद उवाच ॥ इत्युक्त्वादिभवो देवो भक्षिताङ्गं पिपीलिकैः ॥ कमण्डलुज
लेनौक्षद्दिव्येनामोघराधसा ॥ २२ ॥ स तत्कीचकवल्मीकात्सहओजोबलान्वितः ॥ सर्वावयवसंपन्नो वज्रसंहननो युवा ॥ उत्थितस्त
प्तहेमाभो विभावसुरिवैधसः ॥ २३ ॥ स निरीक्ष्याम्बरे देवं हंसवाहमवस्थितम् ॥ ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ २४ ॥ उत्थाय
प्राञ्जलिः प्रह्व ईक्षमाणो दृशा विभुम् ॥ हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयागृणात् ॥ २५ ॥ हिरण्यकशिपुरुवाच ॥ कल्पान्ते कालसृष्टेन योऽ
धेन तमसावृतं ॥ अभिव्यनक् जगदिदं स्वयंज्योतिः स्वरोचिषा ॥ २६ ॥

स्येह प्ररव आभायस्य ॥ १३ ॥ तस्य दर्शनमेव महानुत्सवो यस्य ॥ १४ ॥ हर्षेणाश्रुणि पुलको
द्भेदो यस्य ॥ १५ ॥ अंधेन निबिडेन ॥ तत्र हेतुः कालसृष्टेन प्रकृतिगुणरूपेण तद्ध्वांतेन ॥ तमसावृतमिदं जगत् यः अभिव्यनक् अभिव्यक्तमकरोत् ॥ १६ ॥ राम

यस्त्रिगुणेनात्मना इदं सृजति ॥ अवति लुंपति च तस्मै रजःसत्वतमोधाम्ने आश्रयाय ॥ महते पराय परमेश्वराय नमः इति द्वयोरन्वयः ॥ १७ ॥ अत्र च त्वत्प्रकाश
कत्वं जगत्प्रकाशकत्वं तत्कारणत्वं तत्स्रष्ट्यादिकर्तृत्वं महत्वं परमेश्वरत्वं चेति षड्विधत्वमुक्तं ॥ तदेव प्रपंचयन्नमस्करोति नम इति चतुर्भिः वीजाय कारणा
य ॥ तत्र हेतुः ॥ आद्याय ॥ ज्ञानेन तृप्तिः विज्ञानविषयाकारं ज्ञानं मूर्तिर्यस्य तस्मै ॥ अनेन त्वत्प्रकाशत्वं जगत्प्रकाशत्वं च दर्शितं ॥ वीजायेति निमित्तत्वमुक्तं ॥ उपाद
नत्वमाह घ्राणादयो ये विकारास्तैस्तैर्व्यक्तिः कार्याकारः येषु ते प्राप्नुवते ॥ १८ ॥ एवमात्मना त्रिवृता चेत्यनेनोक्तं कारणत्वं द्वेधा दर्शितं ॥ महत्वमीश्वरत्वं चाह ॥ त्व
मेव जगतां जंगमस्य तस्थुषः स्थावरस्य च इशिषे नियंता भवसि ॥ केन मुख्येन प्राणेन सूत्रात्मरूपेण ॥ अतस्त्वं प्रजानां पतिः ॥ नाना विभिन्नस्य विभिन्नैस्तत्परिणाम

आत्मना त्रिवृता चेदं सृजत्यवति लुंपति ॥ रजःसत्वतमोधाम्ने पराय महते नमः ॥ १७ ॥ नमस्त आद्याय वीजाय ज्ञानविज्ञानमूर्त
ये ॥ घ्राणेंद्रियमनोबुद्धिर्विकारैर्व्यक्तिमीयुषे ॥ १८ ॥ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानां ॥ विभिन्नस्य
विभिन्नैर्मन इंद्रियाणां पतिर्महान् भूतगणाशयेशः ॥ १९ ॥ त्वं सप्ततंतून् वितनोषि तन्वा त्रय्या चतुर्होत्रकविद्यया च ॥ त्वमेक आत्मा
आत्मवतामनादिरनंतपारः कविरंतरात्मा ॥ २० ॥

भूतायाश्चेतनायाः ॥ मनसश्च ॥ तन्नियम्यानामिंद्रियाणां च पतिः ॥ अतस्त्वमेव महान् ॥ भूतानामाकाशादीनां ॥ तद्गु
णानां शब्दादिविषयाणां ॥ आशया वांतर्हृदयनानामीशश्च ॥ एतेनैव स्रष्टृत्वं दर्शितं ॥ १९ ॥ इदानीं यज्ञप्रवर्तकत्वेनांतर्यामित्वेन जगत्पालकत्वमाह ॥ त्वमेव सप्तत
तून् अग्निष्टोमादियज्ञान् ॥ विस्तारयसि ॥ कथं ॥ त्रय्या तन्वा वेदत्रयरूपेण ॥ कथंभूतया ॥ चत्वारो होतारो यत्र तच्चातुर्होत्रकं कर्म तद्विषयया विद्यया ॥ आत्मवतां प्राणिना
मात्मभूतस्त्वमेवात्मा वा अंतर्यामी ॥ उतः ॥ यतः ॥ कविः सर्वज्ञः ॥ नतस्ततः एकः अखंडः तत्र हेतुः ॥ अनादिः अनंतपारश्चेति ॥ नास्यांतः पारं च देशतो यस्य सः ॥ २० ॥

भा०स
११

कालरूपेण संहर्तृत्वमाह त्वमेवेति ॥ लवाद्यैरवयवैः क्षिणोषि क्षपयसि ॥ तदेवं सृष्ट्यादिकर्तृत्वेऽपि निर्विकारत्वमेवाह कूटस्थ इति ॥ तत्र हेतवः आत्माज्ञान
रूपः ॥ परमेष्ठी परमेश्वरः अजः जन्मशून्यः महत् अपरिच्छिन्नः किं च ॥ जीवलोक एव कर्मवशाज्जन्मादिभिर्विक्रियते ॥ त्वं तु तस्य जीवः जीवनस्य हेतुः ॥
यतस्तस्यात्मा नियंता ॥ ३१ ॥ ननु तत्तत्राह त्वत्त इति ॥ त्वत्तो व्यतिरिक्तं यदि किंचिद्भवेत् तर्हि तस्मान्नवजन्मादिविकारो नियम्यत्वादिकं वा भवेत् ॥ तत्तु त्वत्तः
परं कारणं अपरं कार्यं ॥ न च चैतत्तजंगमं ॥ अनेजत्स्थावरं च ॥ व्यतिरिक्तं नास्ति ॥ बोधवैशद्याद्व्यतिरिक्तं प्रतीतमिति चेत् ॥ न ॥ यतः विद्यावेदोपवेदादिविद्या

त्वमेव कालो निमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि ॥ कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ॥ ३१ ॥
त्वत्तः परं ना परमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति ॥ विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ॥ ३२ ॥
व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं ॥ भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ॥ ३३ ॥
अनंताव्यक्तरूपेण येनेदमखिलं ततं ॥ चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ॥ ३४ ॥

स्थानानि ॥ कलास्तत्तदंगानि ॥ तवैव तनवः न तत्त्वव्यति-
रिक्ताः ॥ ननु ततः यतः त्वं बृहत् ब्रह्मैवासि ॥ तदपि कुतः तत्राह ॥ हिरण्यरूपं ब्रह्मांडं गर्भे यस्य सः त्रिपृष्ठः त्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः ॥ अक्षरात्
ततः परः इत्यादिश्रुतेः ॥ ३२ ॥ ननु ब्रह्मांडशरीरस्य मम कुतो वा ब्रह्मांडगर्भत्वादि तत्राह ॥ व्यक्तं कार्यमिदं तव शरीरं व्यक्तं सत्यमिति वा ॥ येन शरीरेण त्वमिं-
द्रियप्राणमनसां गुणान् विषयान् भुंक्षे ॥ किं च पारमेष्ठ्ये परमेश्वरे ऐश्वर्ये धामनि स्वरूपे स्थित एव भुंक्षे ॥ न तु स्वरूपतिरोधानेन ॥ अतस्त्वमव्यक्त आ- राम
त्मा निरुपाधि ब्रह्मैव ॥ पुराणः पुरुषश्च त्वमसि ॥ ३३ ॥ ननु ब्रह्मत्वं पुराणपुरुषत्वं कथमेकस्य तत्राह ॥ हे अनंत येन ॥
त्वया अव्यक्तेन मनोवचनागोचरेण रूपेण इदं विश्वं ततं व्याप्तं ॥ तस्मै तुभ्यं भगवते अचिंत्यैश्वर्याय नमः ॥ भगवत्त्वे हेतुः चिच्छक्तिर्विद्या अचिच्छक्तिर्माया ताभ्यां युक्तायेति ॥ ३४ ॥

श्रन्यस्मात्त्वत्सृष्टव्यतिरिक्तादपि ॥ हे भगवन् आयुधैर्मा भूत ॥ ३६ ॥ व्यसुभिः अप्राणैः असुमद्भिः सप्राणैः यथा आत्मनस्तव तथा अप्रतिद्वंद्वता दिक्
देहीति शेषः ॥ ३७ ॥ तपसा योगेन च प्रभवा वो येषां तेषां यत् ऐश्वर्यं न रिष्यति न नश्यति तच्च देहीत्यर्थः ॥ ३८ ॥ सप्तमस्कंधे तृतीयोध्यायः ॥ यत्र

यदि दास्यस्यभिमतान्वरान्मे वरदोत्तम ॥ भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ॥ ३५ ॥ नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः ॥
न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि ॥ ३६ ॥ व्यसुभिर्वासुमद्भिर्वा सुरासुरमहोरगैः ॥ अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां ॥ ३७ ॥
सर्वेषां लोकपालानां महिमानं यथात्मनः ॥ तपोयोगप्रभावाणां यन्न रिष्यति कर्हिचित् ॥ ३८ ॥ इति श्रीभागवते महापुराणे
सप्तमस्कंधे तृतीयोध्यायः ॥ नारदउवाच ॥ एवं वृतः शतधृतिर्हिरण्यकशिपोरथ ॥ प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्ल
भान् ॥ १ ॥ ब्रह्मोवाच ॥ तातेमे दुर्लभाः पुंसां यान्वृणीषे वरान्मम ॥ तथापि वितराम्यंग वरान्यद्यपि दुर्लभान् ॥ १ ॥ ततो जगाम भ
गवानमोघानुग्रहो विभुः ॥ पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ॥ ३ ॥ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः ॥ भगवत्यकरोत्
द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥ स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरः ॥ देवासुरमनुष्येंद्रान्गंधर्वगरुडोरगान् ॥ ५ ॥ सिद्ध
चारणविद्याध्रानृषीन्पितृपतीन्मनून् ॥ यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ॥ ६ ॥

येनैव वरान् लब्ध्वा विजित्याखिललोकपान् ॥ विसृष्टद्वेषे
णतान् सर्वान् दैत्येंद्रः समपीडयत् ॥ १ ॥ शतधृतिर्ब्रह्मा ॥ १ ॥ ममसत्तः यद्यपि यद्यपि मे दुर्लभाः ॥ २ ॥ अमोघोऽनुग्रहो यस्य ॥ ३ ॥ यदर्थं तपस्तप्तं तदाह ॥ एवमित्यादि ॥ ४ ॥ ६ ॥

भा०स
१२

सर्वेषां सत्वानां प्राणिजातानां ये ये पतयस्तान् ७ त्रिविष्टपं स्वर्गं अध्यास्ते स्म अधिष्ठितवान् तत्रैव महेंद्रभवनं मध्युवास अधिवसति स्म ८ अखिलसमृद्धिभिन्नात्वमेवाह यत्रेति त्रिभिः ९ मुक्तादामानि परिच्छदाः परिकरा यासां १० सुदतीः सुदन्त्यः ११ ऊर्जितं अधिकं चंडं तीव्रं शासनं यस्य १२

सर्वसत्वपतीन् जित्वा वशमानीय विश्वजित् ॥ जहार लोकपालानां स्थानानि सहतेजसा ७ देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपं ॥ महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा ॥ त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ८ यत्र विद्रुमसोपाना महामारकता भुवः ॥ यत्र स्फाटिककुड्यानि वैडूर्यस्तंभपंक्तयः ९ ॥ यत्र चित्रवितानानि पद्मरागासनानि च ॥ पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः १० ॥ कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इतस्ततः ॥ रत्नस्थलीषु पश्यंति सुदतीः सुंदरं मुखं ११ तस्मिन्महेंद्रभवने महाबलो महामना निर्जितलोक एकराट् ॥ रेमेभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचंडशासनः १२ तमंगमत्तं मधुनोरुगंधिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ॥ उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलोजसां पदं १३ जगुर्महेंद्रासनमोजसा स्थितं विश्वावसुस्तुंबुरुरस्मदादयः ॥ गंधर्वसिद्धा ऋषयोऽलकं मुहुर्विद्याधराश्चाप्सरसश्च पांडव १४ स एवं वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ॥ इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा ॥ १५

अंगे हे राजन् उरुगंधिना उग्रगंधेन मधुना सुरया मत्तं अत एव विवृत्ते विघूर्णिते ताम्रे अक्षिणी यस्य तं अशेषधिष्ण्यपाः सर्वलोकपालाः उपायनैः पाणिभिः उपासत त्रिभिर्ब्रह्मविष्णुहरैर्विना परं आश्रयं भूतं १३ उपासनप्रकारमाह जगुरिति १४ १५ ॥ राम

राम

१६ तत्पत्न्यो नद्यः ऊढ्वः वहंति स्म ॥ रत्नाकराणेवाहस्फारेति ॥ १७ ॥ आक्रीडं क्रीडास्थानं ॥ गणानुकुप्यफलादीन् ॥ सर्वलोकपालानां पृथग्विधानुगणान् ॥
वर्षेण दहनशोषणादीनेक एव दधार ॥ १८ ॥ निर्जिताः ककुभो येन ॥ यथोपजोषं यथाप्रीति ॥ १९ ॥ २३ ॥ अनूपा वक्ररहिता ॥ २४ ॥ ममदर्शनं सर्वांगसर्वेषां

अकृष्टपच्या तस्यासीत्सप्तद्वीपवती मही ॥ तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः ॥ १६ ॥ रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहु-
रूर्मिभिः ॥ क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥ १७ ॥ शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान्द्रुमाः ॥ दधार लोकपालानामेक
एव पृथग्गुणान् ॥ १८ ॥ स इत्थं निर्जितककुबेकराड्विषयान्प्रियान् ॥ यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः ॥ १९ ॥ एवमैश्वर्य-
मत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ॥ कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः ॥ २० ॥ तस्योग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः ॥
अन्यत्रालब्धशरणाः शरणं ययुरच्युतं ॥ २१ ॥ तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः ॥ यद्गत्वा न निवर्तंते शांताः संन्यासिनोऽमलाः ॥
इति ते संयतात्मानः समाहितधियोऽमलाः ॥ उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥ २२ ॥ तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना
सनादयंती ककुभः साधूनामभयंकरी ॥ २४ ॥ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ॥ मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २५ ॥ ज्ञा-
तमेतस्य दौरात्म्यं दैतेयापसदस्य यत् ॥ तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत ॥ २६ ॥ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ॥ धर्मे मयि
च विद्वेषः स वा आशु विनश्यति ॥ २७ ॥ निर्वैराय प्रशांताय स्वसुताय महात्मने ॥ प्रह्रादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितं ॥ २८ ॥ ना ॥ २३ ॥ व
॥ इत्युक्ता लोकगुरुणा तत्प्रणम्य दिवौकसः ॥ न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतं ॥

श्रेयसां उपपत्तये प्राप्तये ॥ २५ ॥ २७ ॥ ननु देवद्विजादिविद्वेषेऽप्यस्य विनाशो नास्ति
ब्रह्मवरेणोर्जितत्वात् ॥ तत्राह निर्वैरायेति ॥ सत्यमहं संहेनयद्ब्रह्मद्रोहमिति भावः ॥ २८ ॥ असुरं हतं मेनिरे ॥ तदानीं तद्द्वेषस्य प्रवृत्तत्वादिति भावः ॥ २९ ॥

९३

भा॰स
१२

तमेवद्वेषवर्जं मोहो हतस्य महत्वमाहतस्येत्यादिना ॥ गुरोर्महानभूत ॥ गुणानेवाहमुपासक इत्यादिना २० ॥ सत्यासंधाप्रतिज्ञायस्य ॥ एकएवप्रियस्त्व
सुहृत्तमस्य २१ ॥ तस्य कृतताआर्याणामंघ्रयोयेन ॥ ईश्वरइतिभावनायस्य २१ ॥ व्यसनेषुनोद्विग्नचित्तः गुणेषुविषयेषुनिस्पृहः ॥ पतत्तेषु ऋसक्त
हृदा ॥ शांताइंद्रियाण्येयस्य ॥ हितआहरोभावोमत्स्यारेयस्य ॥ अहोऽपि सन् ॥ २२ ॥ अधुनापितेगुणानापिधीयंतेगुणानापिधीयंतेतिरोहितानभ

तस्यै दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ॥ प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः २० ॥ ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितें
द्रियः ॥ आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः २१ ॥ दासवत्संनतार्याङ्घ्रिः पितृवद्दीनवत्सलः ॥ भ्रातृवत्सदृशे स्निग्धो गुरुष्वी
श्वरभावनः ॥ विद्यार्थरूपजन्माढ्यो मानस्तम्भविवर्जितः २२ ॥ नोद्विग्नचित्तो व्यसनेषु निस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक्
दांतेंद्रियप्राणशरीरधीः सदा प्रशांतकामो रहितासुरोऽसुरः २३ ॥ यस्मिन्महद्गुणा राजन् गृह्यन्ते कविभिर्मुहुः ॥ न तेऽधुनापिधी
यंते यथा भगवतीश्वरे २४ ॥ यं साधुगाथासदसि रिपवोऽपि सुरा नृप ॥ प्रतिमानं प्रकुर्वन्ति किमुतान्ये भवादृशाः २५ ॥ गुणैरल
मसंख्येयैर्माहात्म्यं तस्य सूच्यते ॥ वासुदेवे भगवति यस्य नैसर्गिकी रतिः २६ ॥ न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया ॥ कृष्ण
ग्रहगृहीतात्मा न वेद जगदीदृशम् ॥ २७ ॥ आसीनः पर्यटन्नश्नन् शयानः प्रपिबन्ब्रुवन् ॥ नानुसंधत्त एतानि गोविन्दपरिरम्भितः २८ ॥

नि २४ ॥ साधुगाथासदसि साधुकथाप्रसंगवत्यांसभायां प्रतिमानंदृष्टांतं २५ ॥ सूच्यते मयाकेवलंघोत्यते ॥ सुष्टुकथ्यतइतिवा २६ ॥ नैसर्गिकारतेर्लिंगान्या
हन्यस्तक्रीडनकइतिषड्भिः ॥ तन्मनस्तयातदेकचित्तत्वेन २७ ॥ एतानिआसनादीनि ॥ गोविंदेनपरिरम्भितः आत्मनाएकीकृतः ॥ २८ ॥

राम
१२

रुदति रोदिति ॥ वैकुंठस्य चिंतया शबला मिश्रा आक्रमिता चेतना यस्य ॥ तस्य चिंतया आक्रांदोपस्य ॥ ३९ ॥ उत्कंठः मुक्तकंठः सन् ॥ अनुचकार तद्वेशादि
कांत्वयं कृतवान् ॥ ४० ॥ संस्पर्शस्तद्भावापत्तिः तेन निर्वृतः ॥ अस्पंदः स्थिरो यः प्रणयस्तेन यः आनंदः तेन यत्सलिलं तेन नयने आमीलिते ईषन्मि

क्वचिद्रुदति वैकुंठचिंताशबलचेतनः ॥ क्वचिद्धसति तच्चिंताह्लादउद्गायति क्वचित् ॥ ३९ ॥ नदति क्वचिदुत्कंठो विलज्जो नृत्यति
क्वचित् ॥ क्वचित्तद्भावनायुक्तस्तन्मयोनुचकार ह ॥ ४० ॥ क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ॥ अस्पंदप्रणयानंदसलिला
मीलितेक्षणः ॥ ४१ ॥ स उत्तमश्लोकपदारविंदयोर्निषेवयाऽकिंचनसंगलब्धया ॥ तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसंगदीनस्य
मनः शमं व्यधात् ॥ ४२ ॥ तस्मिन्महाभागवते महाभागे महात्मनि ॥ हिरण्यकशिपू राजन्नकरोदघमात्मजे ॥ ४३ ॥ युधिष्ठिर उवा
च ॥ देवर्ष एतदिच्छामो वेदितुं तव सुव्रत ॥ यदात्मजाय शुद्धाय पितादात्साधवे ह्यघं ॥ ४४ ॥ पुत्रान्विप्रतिकूलान्स्वा
न्पितरः पुत्रवत्सलाः ॥ उपालभंते शिक्षार्थं नैवाघमपरो यथा ॥ ४५ ॥

लितेक्षणे यस्य ॥ ४१ ॥ आत्मनः परां निर्वृतिं तन्वन् दुःसंगेन दीनस्यान्यस्यापि मनः शमं शांतं व्यधात् ॥ ४२ ॥ अघं द्रोहमकरोत् ॥ ४३ ॥ प्रथमाध्यायाते ह्य
घमेवार्थमतिविस्मयेन पुनः पृच्छति देवर्ष इति ॥ तव त्वत्तः तव वा कामिति वा साधवे अघं परात् साधो ईदृशं कृतवानिति यत् एतद्वेदितुं ॥ ४४ ॥ उपालभंते
आक्षिपंति अघं तु नैव कुर्वंति अपरः शत्रुरिव ॥ ४५ ॥ एवमेव

भा०स
१४

अनुवशानननुव्रतान्साधून् अपराधे दोषात् ॥ गुरुः पितैव देवता येषां तानुद्दिश्य पानेऽहं न कार्यं वर्तीति किंस्विद्वक्तव्यमित्यर्थः ॥ पुत्राय पुत्रमुद्दिश्य पितृद्वेषः ॥ पि
त्राकृतो द्वेषः पुत्रस्य मरणार्थं प्रयोजितः प्रवर्तित इति यत् एतत्कौतूहलं विधम अपाकुरु ॥ यद्वा यस्मात्पुत्राय यो द्वेषः स पितृमरणाय प्रयोजितः ॥ अत
एतत्कौतूहलं विधमेत्यर्थः ॥४६॥ इति श्रीमत्सप्तमे चतुर्थः ॥ पंचमे गुरुतोऽधीतं त्यक्त्वा विष्णुस्तुतौ रतं ज्ञात्वा पुत्रं हि प्रणोद्यैः हन्तुं दैत्यो न वाशकत् ॥ प्रागेवं द्वि
ष्टे द्विद्वेषकारणमिति वक्तुमाह ॥ पौरोहित्यायेत्यादिना ॥ काव्यः शुक्रः ॥ अन्तिके स्वगृहे तौ तत्र न्यवसतामिति शेषः ॥ १ ॥ पाठ्यान्दण्डनीत्यादीन्

किमुताननुवशान्साधूंस्तादृशान्गुरुदेवतान् ॥ एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो ॥ पितुः पुत्राय यद्द्वेषो मरणाय प्र
योजितः ॥४६॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे चतुर्थोऽध्यायः ॥ नारद उवाच ॥ पौरोहित्याय भगवान्वृतः काव्यः कि
लासुरैः ॥ षंडामर्कौ सुतौ तस्य दैत्यराजगृहांतिके ॥ १ ॥ तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदं ॥ पाठयामासतुः पाठ्यान
न्यांश्चासुरबालकान् ॥ २ ॥ यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनुपपाठ च ॥ न साधु मनसा मेने स्वपरासद्ग्रहाश्रयं ॥ ३ ॥ एकदासुरराट् पुत्र
मंकमारोप्य पांडव ॥ पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ॥ ४ ॥ प्रह्लाद उवाच ॥ तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधि
यामसद्ग्रहात् ॥ हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ॥ ५ ॥

न्पाठ्याननसुरबालकानिति वान्वयः ॥ २ ॥ अनुश्रवणानंतरं तथैवानुपपाठ च ॥ किंतु न तत्साधु न मेने ॥ तत्र हेतुः स्वः पर इति असद्ग्रहो मिथ्याभिनिवेशः स एवाश्रयो यस्य तत् ॥
॥ ३ ॥ ४ ॥ हे असुरवर्य अहमहं ममेति मिथ्याभिनिवेशाद्धेतोः समुद्विग्ना धीर्येषां ॥ वनं गतः सन् हरिमाश्रयेतेति यत् तदेवाहं साधु मन्ये ॥ कथंभूतं गृहं हि
त्वा आत्मनः पातं अधःपातनिमित्तं ॥ अतः अंधकूपवन्मोहावहं ॥ ५ ॥

राम
१४

परपक्षाविमोसमाहितः॥ परिनिष्ठिताः हास्यमेवाहबुद्धिरिति ६॥ विलक्षपक्षैर्भोगवतैर्हेतुभूतैः॥ नत्वहं हेतुकृतत्वेषामावेशः सत्यं॥ नथापि
तेषु नैतेरणा छत्रैः॥ ७॥ ८॥ रैत्यर्गृहमानीतं॥ वालान्सर्वान्नतिक्रम्य॥ बुध्यंतव॥ ९॥ अहो मायामोहितो भवं तोमामाक्षिपंतीत्याशय
नतावदाह परपक्षेति मिथ्याभिनिवेशोयदीययामायैवकृतः॥ नत्वात्मवः॥ अतएवतयाविमोहितबुद्धिनाभवतामवदृष्टः॥ नत॥
ना दृष्टवान॥ श्रुत्वाश्वत्रागिरोदैत्याः परपक्षसमाहिताः॥ जहासबुद्धिर्बालानांभिद्यतेपरबुद्धिभिः॥ ६॥ सम्यग्विधार्यतां
बालोगुरुगेहेद्विजातिभिः॥ विलक्षपक्षैः प्रतिष्ठत्वेनेभिद्येतास्मधीर्यथा॥ ७॥ गृहमानीतमाहूयप्रह्लादं दैत्ययाजकाः
प्रशस्यश्लक्ष्णयावाचासमपृच्छंतसामभिः॥ ८॥ वत्सप्रह्लाद भद्रंतेसत्यंकथयमामृषा॥ बालानेतिकृतस्त्वस्यमेषबु
द्धिविपर्ययः॥ ९॥ बुद्धिभेदः परकृतउताहोतेस्वतो भवत्॥ भण्यतांश्रोतुकामानांगुरूणांकुलनंदन॥ १०॥ प्रह्लाद उवाच॥
परः स्वश्चेत्यसद्ग्राहः पुंसायन्मायया कृताः॥ विमोहितधियां दृष्टस्तस्मैभगवतेनमः॥ ११॥ सयदानुव्रतः पुंसां पशुबुद्धि
र्विभिद्यते॥ अन्यएषतथान्योहमितिभेदगतासती॥ १२॥ सएषआत्मास्वपरेत्यबुद्धिभिर्दुरत्यया॥ उक्रमणोनिरूप्यते॥ मुह्यंति
यत्॥ तस्मैअचिंत्यमायेश्वरायनमः॥ ११॥ अहो किमेतत्सत्यपासितवबुद्धिभेदो यद्यत्मनिवेदवादिनोब्रह्मादयोऽप्यभिनंतिमेमतिं॥ १२॥
यतोजातस्तंकथयेत्याशंक्यः सन्नंतत्त्वमहरादेवेत्युत्तरमाह सद्यतितृभिः॥ सभगवान्यदाअनुव्रतः अनुकूलो भवतितदापशूनामिवबुद्धिर्भेदगता
असतीमिथ्याविषयाभिद्यते अभिन्नात्मनिष्ठाभवति॥ १४॥ भेदस्यासत्वंदर्शयन्नाह सएषपरमात्मैवत्वंपरइतिचअविवेकिभिर्निरूप्यते॥ उक्ते

भा. स्क.
१५

ननु निर्विकारस्य कथं मतिभेदकत्वं तत्राह ॥ यथाऽयो लोहमाकर्षस्यायस्कान्तस्य समीपे स्वयमेव भ्रमति ॥ चेतश्चक्रपाणेः सन्निधिरेव कृतो जानतस्त-
ज्ज्ञाह यदृच्छयेति ॥ कस्य तपोदानादेः फलमेतदिति न ज्ञायत इत्यर्थः ॥ १४ ॥ राजसेवक उवाचेति शेषः ॥ १५ ॥ वेत्रं कशा उपायानां मध्ये चतुर्थः दमो
दंडः दमोऽस्य दुर्बुद्धेः ॥ उदितः उक्तः शास्त्रेषु ॥ दुर्बुद्धित्वे हेतुः ॥ कुलस्यांगारवन्नाशहेतोः ॥ १६ ॥ तदेव तत्त्वमाह ॥ दैतेया एव चंदनद्रुमाः तेषां वने अय-

यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ ॥ तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥ १४ ॥ एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः ॥
तं सन्निर्भर्त्स्य कुपितः सुदीनो राजसेवकः ॥ १५ ॥ आनीयतामरे वेत्रमस्माकमयशस्करः ॥ कुलांगारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो द-
मः ॥ १६ ॥ दैतेयचंदनवने जातोऽयं कंटकद्रुमः ॥ तन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ॥ १७ ॥ इति तं विविधोपायैर्भीषयंस्त-
र्जनादिभिः ॥ प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनं ॥ १८ ॥ तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं ॥ दैत्येंद्रं दर्शयामास मातृमृष्टम-
लंकृतं ॥ १९ ॥ पादयोः पतितं बालं प्रतिनंद्याशिषाऽसुरः ॥ परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं ॥ २० ॥ आरोप्यांकमवघ्राय मूर्द्ध-
न्यश्रुकलांबुभिः ॥ आसिंचन्विकसद्वक्त्रमिदमाह युधिष्ठिर ॥ २१ ॥ हिरण्यकशिपुरुवाच ॥ प्रह्लादानूच्यतां तात स्वधीतं किंचिदु-

कंटकद्रुमतुल्यो जातः ॥ तदेवाह ॥ यस्य दैत्यस्य वनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोः ॥ त्तमं ॥ कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान्
अयमर्भक एव नालायितः नालमिवाचरत ॥ यथा परशोः छेदकत्वे दंडादी निर्मितो दंडः सहकारी तं विना छेदनासंभवात ॥ तथायं विष्णोरे- राम
स्य मूलच्छेदे हेतुर्जात इत्यर्थः ॥ १७ ॥ इति तं प्रह्लादं भीषयन् धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास ॥ १८ ॥ ज्ञातं ज्ञेयं उपायानां चतुष्टयं ये- १५
न तं ज्ञात्वा दैत्येंद्रं प्रति ॥ मात्रा मृष्टं उद्वर्त्तितं स्नापितं ॥ १९ ॥ २१ ॥

॥ २२ ॥ पादसेवनं परिचर्या ॥ अर्चनं पूजा ॥ दास्यं कर्मार्पणं ॥ सख्यं तद्विश्वासादि ॥ आत्मनिवेदनं देहसमर्पणं यथा विक्रीतस्य गवाश्वादेर्भरणपालनादिचिं-
ता न क्रियते तथा देहं तस्मै समर्प्य तच्चिंतावर्जनमित्यर्थः ॥ इति नवलक्षणानि यस्याः सा अर्पितैव भगवति विष्णौ भक्तिः क्रियेत साक्षादर्पि-
तैव सति यदि क्रियेत न तु कृता सती पश्चादर्प्येत तदुत्तममधीतं मन्ये ॥ न तु त्वच्छुरोरधीतं शिक्षितं वा नैविधं किंचिदस्तीति भावः ॥ २२ ॥ [illegible]

प्रह्राद उवाच ॥ श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनं ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं ॥ २३ ॥ इति पुंसार्पिता विष्णौ भक्ति-
श्चेन्नवलक्षणा ॥ क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमं ॥ २४ ॥ निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा ॥ गुरुपुत्रमुवाचेदं रु-
षा प्रस्फुरिताधरः ॥ २५ ॥ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयतासता ॥ असारं ग्राहितो बालो मामनादृत्य दुर्मते ॥ २६ ॥ संति ह्यसा-
धवो लोके दुर्मैत्राश्छद्मवेषिणः ॥ तेषामुदेत्यघं काले रोगः पातकिनामिव ॥ २७ ॥ गुरुपुत्र उवाच ॥ न मत्प्रणीतं न परप्रणीतं सु-
तो वदत्येष तवेंद्रशत्रो ॥ नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कददाः स्म मा नः ॥ २८ ॥ नारद उवाच ॥ गुरुणैवं प्रतिप्रोक्तो भूय आ-
न वर्त्तमानस्यापि विविरोधाचरणं नास्माभावितमित्याह संति हीति ॥ दुष्टं मैत्रं मित्रत्वं येषां ते ॥ हासुरः सुतं ॥ न चेद्गुरुमुखीयं ते कुतोऽभद्रासती मतिः ॥ २९ ॥
ते रोग इति ॥ ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः ॥ स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः इत्यादिस्मृत्युक्ताः पातकिनां रोगा यथा रेति ॥ तथा ते-
षामप्यघं विद्वेषादिकं स्फुरेदित्यर्थः ॥ २७ ॥ मत्प्रणीतं मया पाठितं ॥ नास्मत्प्रयुक्तं तदुक्तमिति तं दोषं मास्म आददाः अदाङ्गमस्मासु रोषः ॥ मयि दोषारोपं माकार्षीरित्यर्थः ॥
इंद्रशत्रो इति न हि ब्राह्मणोऽर्थतव कोपं उचितं इति भावः ॥ २८ ॥ गुरुमुखी गुरुणा कारिता हे अभद्र ॥ २९ ॥

भा॰स॰
१६

आत्मन्यपि एवं वा न्नी भवादृशानां विषयासक्तानामज्ञानानधिकारादित्याशयेनाह मतिरिति । परतः गुरोः स्वतो वा मिथो वा अन्योन्यतः नाभिपद्येत न प्र
पद्येत । केषां गृहव्रतानां गृह एव व्रतं येषां कल्पः इति कृत्यचिंता येषां । अत एव अदांतैः रवरतैः गोभिः इंद्रियैः हेतुभूतैः तमिस्रं संसारं विशतां । तत्र चर्वितस्यैव च
र्वणं येषां ॥३०॥ ननु श्रीकृष्णस्य परमानंदरूपत्वात् पितृत्रिशाएव किं न स्युः तदत्तानादित्याह नेति । ये दुराशयाः विषयवासितांतःकरणाः ते
हि विष्णुं न विदुः । तत्र हेतुः स्वार्थगतिं त्वेवार्थ्यः पुरुषार्थयोर्यो येषां ते षां गतिं गम्यं । ननु ते पि गुरूपदेशाद्विज्ञास्यंति तत्राह बहिर्विषये अर्थो येषां
ते बहिरर्थास्तानेव गुरुत्वेन मन्यंत इति शीलं येषां ते । अतः अंधैः उपनीयमाना अंधा यथा पथ्यापथ्यानं न विदुः किं तु गर्ते पतंति । तथा ते पि ईशस्य तंत्र्यां

प्रह्लाद उवाच ॥ मतिर्न कृष्णे परतः स्वतो वा मिथोभिपद्येत गृहव्रतानां ॥ अदांतगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानां ॥
३० ॥ न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ॥ अंधा यथांधैरुपनीयमानास्ते वाचीशतंत्र्यामुरुदाम्नि बद्धाः ॥ ३१ ॥ नै
षां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः ॥ महीयसां पादरजोभिषेकं निष्किंचनानां न वृणीत यावत् ॥ ३२ ॥

ईश्वरस्य वेदलक्षणायां उरूणि दामानि ब्राह्मणादिनामानि यस्यां तस्यां काम्यैः कर्मभिर्बद्धा एव भवंतीत्यर्थः । तदुक्तं विषयाविष्टचित्तानां वि
ष्ण्वावेशः सुदूरतः । वारुणी दिग्गतं वस्तु व्रजन्नैंद्रीं किमाप्नुयादिति ॥ ३१ ॥ ननु च एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेत्यादिश्रुतिश्रु राम
पादितं विष्णुं कथं न विदुः । अतो वा तेषां तमिस्रप्रवेशस्तत्राह नैषामिति । निःकिंचनानां निरस्तविषयाभिमानानां महतां पादरजसा अभिषेकं यावन्न १६
वृणीत तावत्स्तुतिवाक्यतो ज्ञाताप्येषां मतिरुरुक्रमस्यांघ्रिं न स्पृशति न प्राप्नोति । स्पर्शं भावनादिभिर्विहन्यात इत्यर्थः । अनर्थस्य संसारस्यापग
मो यस्मात् अंघ्रिस्पर्शिन्याः मतेरर्थः प्रयोजनं महद्रजोग्रहाभावात्तत्त्वनिश्चयो नापीह मोक्षस्तेषामित्यर्थः ॥ ३२ ॥

निरस्यत निरास्यत विक्षेप ॥२२॥ अमर्षो सहनं तेन सहितया रुषा आविष्टो व्याप्तः कषायीभूते आताम्रे लोचने यस्य ॥ हे नैर्ऋताः राक्षसाः ॥२४
वध्यत्वे हेतुः ॥ अतो यं मे भ्रातृहा कुतः यो विष्णोः पादाववर्चति तत्परिपातीत्यर्थः ॥ अतः स एवायमित्याह यः ॥२५॥ अहो विष्णुरथ विश्वसनीयं कि
मिति त्वीकृतवानित्याह विष्णोर्वेति ॥ अहात् जहौ ॥२६॥ ननु त्वया यमपत्यं च कथं वध्यस्तत्राह परोप्यौषधमिव हितकृत्वेन तदपत्यमेव देहेयः

उत्संगात्परं तं पुत्रं हिरण्यकशिपू रुषा ॥ अधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ॥२२॥ आहामर्षरुषाविष्टः कषायीभूतलोचनः
वध्यतामाश्वयं वध्यो निःसारयत नैर्ऋताः ॥२४॥ अयं मे भ्रातृहा सोयं हित्वा स्वान् सुहृदो धमः ॥ पितृव्यहंतुर्यः पादौ विष्णो
र्दासवदर्चति ॥२५॥ विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमंजसः ॥ सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ॥२६॥ परोप्यपत्यं हि
तकृद्यथौषधं स्वदेहजोप्यामयवत्सुतोहितः ॥ छिंद्यात्तदंगं यदुतात्मनोहितं शेषं सुखं जीवति यद्विवर्जनात् ॥२७॥ सर्वै
रुपायैर्हंतव्यः संभोजशयनासनैः ॥ सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियं ॥२८॥ नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः ॥ तिग्मदं
ष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥२९॥ नदंतो भैरवं नादं छिंधि भिंधीति वादिनः ॥ आसीनं चाहनन् शूलैः प्रह्रादं सर्वमर्मसु ॥४०॥

स्वतः स्वदेहजोपि अहितश्चेत् ॥ आमयश्च ॥ आत्मनो ममतास्पदस्य कस्य ॥ अंगमपि वृयतवरणादि तद्यत्मनो हितं चेत् छिंद्यादेवेत्यर्थः ॥२७॥ अतः स
र्वैरुपायैर्हंतव्यः संभोजो भोजनं ॥ भोजनादि विषादि प्रयोगैरित्यर्थः ॥ यथा दुष्टमिंद्रियं मुनेः शत्रुः ॥२८॥ तिग्मास्तीक्ष्णा दंष्ट्रा येषां ॥ करालान्यास्यानि येषां ते
च ते च ॥ ताम्राणि श्मश्रूणि शिरोरुहाश्च येषां ॥२९॥ ॥४०॥

भा॰स
८

परेऽीश्वरेभक्तः समाहितआत्मामनोयस्यतस्मिन् ॥ तेषांप्रहाराणिनिष्फलाञ्जाताः ॥ तत्रहेतवः ॥ ब्रह्मणिनिर्विकारे ॥ अनिर्देश्येअविषये ॥ भगवतिनिर
तिशयैश्वर्ये ॥ अखिलात्मनिशस्त्रादीनामपिनियंतरि ॥ एवंभूतेपरे ॥ अ[illegible]पस्यनिर्वैरस्यसत्क्रियामहोद्यमाइव ॥ ४१ ॥ ४२ ॥ अभिचाराः कृत्यादयः
अवपातनानिगिरिशृंगादधःपातनानितैः ॥ असदादिष्टंनिरोधैश्च ॥ ४३ ॥ पर्वताक्रमणैः पर्वतानांतदुपरिक्षेपैः ॥ वरुणवंधनैरभिचारादयश्चा
त्त्रिदशायति ॥ ततहन्तुंनकर्तुंनाप्यपद्यततदापनाशक्तोदित्यर्थः ॥ ४४ ॥ चिंतामेवाहएषइतित्रिभिः ॥ मेमयाअसाधुपरुषंयथाभवतितथो

परेब्रह्मण्यनिर्देश्येभगवत्यखिलात्मनि युक्तात्मन्यफलाआसन्नपायस्यैवसत्क्रियाः ॥ ४१ ॥ प्रयासेऽपहतेतस्मिन्दैत्ये
न्द्रःपरिशंकितः ॥ चकारतद्वधोपायान्निर्बंधेनयुधिष्ठिर ॥ ४२ ॥ दिग्गजैर्दंदशूकेंद्रैरभिचारावपातनैः ॥ मायाभिःसंनिरोधैश्च
गरदानैरभोजनैः ॥ ४३ ॥ हिमवाय्वग्निसलिलैःपर्वताक्रमणैरपि ॥ नशशाकयदाहंतुमपापमसुरःसुतं ॥ चिंतांदीर्घतमांप्राप्तस्त
त्कर्तुंनाभ्यपद्यत ॥ ४४ ॥ एषमेबह्वसाधूक्तोवधोपायाश्चनिर्मिताः ॥ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तःस्वेनैवतेजसा ॥ ४५ ॥ वर्तमानोविदूरेवैबा
लोप्यजडधीरयं ॥ नविस्मरतिमेनार्यंशुनःशेपइवप्रभुः ॥ ४६ ॥ अप्रमेयानुभावोयमकुतश्चिद्भयोमरः ॥ नूनमेतद्विरोधेनमृत्युर्मेभवि

क्तः असद्धर्मैरपकारैःअभिचारैर्वा ॥ ४५ ॥ अविदूरेवर्तमानोपिबालोप्ययंअजडधीःनिर्भयचित्तःमेअनार्यमन्यायंशप्तवान ॥ ता नवा ॥ ४७ ॥
विस्मरतिअजीगर्तस्यमध्यमपुत्रस्यशुनःशेपोनामपित्रास्यांहरिश्चंद्रायविक्रीतःएषयथातयोरपकारंविस्मरतितद्विपरीतविश्वामित्रमाश्रित्यगो
त्रांतरमापन्नस्तद्वत ॥ यद्वा ॥ स्वभावापरित्यागेदृष्टांतःशुनःशेपःप्रभुमिवेति ॥ ४६ ॥ अप्रमेयः अप्रमेयोऽनुभावोयस्य ॥ नकुतश्चिद्भयंयस्य ॥ नचाभ
विता ॥ अन्यथाम्रत्युर्नैवभविष्यतीत्यर्थः ॥ ॥ ४७ ॥

राम
८

श्मशानमो उश्मशानमः प्रद्रोनीतिर्हो ॥ विविक्ते एकांते ॥ ४८ ॥ प्रभुवो विजंभणेनैव वस्त्राधिक्षेपणाय स्मिन् ॥ न मया विंत्यं न वक्तुमर्हे न पश्यामः ॥ परमालंब
नेनैवाहि ॥ यद्वा शिष्टूनां वृत्तं गुणदोषयोः परविषयं न भवतीत्यर्थः ॥ ४९ ॥ तथापि तेवं धनमस्माविंतनमित्याह ततः इमं त्विति ॥ यावद्गुरुरागमिष्य
ति ॥ तावद्ध्यानि धेहि ॥ ततः किं श्रुत उचतः उद्दिष्टसमीचीनानावयमाभवतीति ॥ ५० ॥ अनुज्ञाप्य तथेत्यंगीकृत्य ॥ ५१ ॥ ततस्त्वे तो पश्चाद्रायधर्मादिक

इति तं चिंतयाकिंचिन्ध्यानस्थियमधोमुखं ॥ शंडामर्कौ वोश्मशानेशोविविक्त इतिहोचतुः ॥ ४८ ॥ जितं त्वये केन जगत्त्रयप्रभुवोर्विजंभणात्त्व
एमस्त्राधिक्षेपं ॥ न तस्मा चिंतनं वनाथ वक्तुमर्हे नैव शिष्टानां गुणदोषयोः परं ॥ ४९ ॥ इदं तु पार्श्वे वर्हणास्माव ध्यानि धेहि भीतो न पलाय
ते यथा ॥ वृद्धिस्त्वंभो वयमार्यमेव यायावद्गुरुर्भार्गवश्यागमिष्यति ॥ ५० ॥ तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत ॥ धर्माद्यस्योपदेष्ट
रात्तां येग्रहमेधिनां ॥ ५१ ॥ धर्ममर्थं च कामं च नितरां वा ऽपूर्वराः ॥ वज्ञादायावतूएजनं प्रश्रयावनतायच ॥ ५२ ॥ यथा त्रिवर्गगुरुभिरात्म
नो उपशिक्षितं ॥ न साधुमेने तच्छिक्षां द्वंद्वारामोपवर्णितां ॥ ५३ ॥ यदाचार्यः परावृत्तो गृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्र सोपहूतः कृ
तक्षणैः ॥ ५४ ॥ अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ॥ उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥ ५५ ॥ ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरि
च्छेदैः बालानदूषितधियो द्वंद्वारामेरितेहितैः ॥ ५६ ॥

पूर्वतः प्रश्रनस्वाभावनत्स्वतस्ये ॥ ५२ ॥ यथावत ॥ त्रिवर्गमनुशिक्षितमपि साधुनमेने ॥ तां शिक्षां च
द्वंद्वारामेषारिभिर्विषयेष्वारमणां येषां तैरुपवर्णितां ॥ ५३ ॥ परावृत्तः अन्यत्रगतः सउपहूतः संधिः पारपूरणार्थं ॥ ५४ ॥ क्रीडार्थं कृतक्षणैः कृतोत्सवैः लब्ध
वसरैरितिवा ॥ ५४ ॥ तेषां निष्ठां जन्ममरणादिलक्षणां विद्वान् ॥ ५५ ॥ द्वंद्वारामाणामीरितैरीहितैश्चानदूषिताधीर्येषां यते बालाः ॥ ५६ ॥

भा० स
१८

तस्मिन्नेव जन्मन्यस्तं हृदयमीह्रां प्राणांश्च धेः ॥५७॥ इति सप्तमे पंचमः ॥ षष्ठे गौरगृहव्यग्रे प्रह्लादो दैत्यबालकान् ॥ अनुकंप्य परं तत्त्वं नारदोक्तमुपाविशत निरर्थ
वकक्रियालोपेऽप्यायुर्व्ययमजानतां ॥ प्रह्लादः स्वयं प्राह धर्मं भागवतं कृती ॥ कौमार इत्यादिना ॥ इहैव मानुषजन्मनि धर्मानाचरेत ॥ यतोऽर्थदमेतत ॥
तत्र कौमार एव ॥ यतः तदप्यध्रुवं ॥ नैव वंध्ये ते जन्मांतरे ॥ यतः दुर्लभमतस्तत्र धर्मानेवाचरेत ॥ न तु स्वार्थप्रयासान् ॥ तत्र भगवानेव न काम्या ॥१॥ इह भा

पर्युपासत राजेंद्र तन्न्यस्तहृदयेक्षणाः ॥ तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥५७॥ इति श्रीभागवते महापुराणे सप्तम
स्कंधे पंचमोध्यायः ॥ प्रह्लाद उवाच ॥ कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह ॥ दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं ॥१॥
यथा हि पुरुषस्येह विष्णोः पादोपसर्पणं ॥ यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत ॥२॥ सुखमैंद्रियकं दैत्या देहयोगेन दे-
हिनां ॥ सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ॥३॥ तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परं ॥ न तथा विंदते क्षेमं मुकुंदचरणां-
बुजं ॥४॥ ततो यतेत कुशलः क्षेमाय भयमाश्रितः ॥ शरीरं पौरुषं यावन्न विपद्येत पुष्कलं ॥५॥

गवतानेव धर्मानाचरेदित्येतदुपपादयति यथा हीति चतुर्भिः ॥ इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथा अनुरूपं योग्यमित्यर्थः यद्यस्मात् एष प्रिय
इत्यादि ॥२॥ भोगोद्यमः कथं त्याज्य इति चेत तत्राह सुखमिति ॥ सर्वत्र पश्वादावपि ॥ दैवात पूर्वादृष्टादेव ॥३॥ अतस्तदर्थो प्रयासो न कर्तव्यः ॥ यतः प्रायो
त्तात परं केवलं आयुषो व्यय एव ॥ यतस्तथा तेन प्रकारेण क्षेमं न प्राप्नोति ॥४॥ भयमाश्रितः संसाराद्भीतः ॥ पुरुषत्वप्रशरीरं यावत्पुष्कलमस्ति ॥ न विपद्ये

राम
१८

आयुर्व्ययक्रममाह पुंस इति त्रिभिः यद्यस्मादन्धं शेते ॥ ६ ॥ विंशतिर्वर्षाणि आयुर्याति ॥ ७ ॥ दुरापूरेण दुःखैः समंतात्पूर्यमाणेन ॥ ८ ॥ ननु यौवने गृहासक्तो
ऽपि पश्चाद्विरक्तः सन्मुक्तो भविष्यतीत्याशंक्यातरसंभवं दर्शयन् कौमार एवाचरेदित्येतदुपपादयति को गृहेष्विति सप्तभिः ॥ ९ ॥ यमर्थमसुभिः क्रीणाति
प्राणहानिमंगीकृत्यापि तस्करादिर्यमाधयति ॥ तस्मिन्नर्थे तृष्णां को नु विसृजेत ॥ १० ॥ किंच कथमित्यादि ॥ प्रियायाः संगादिकं स्मरन्कथं त्यजेदिति
तृतीयेनान्वयः ॥ मंत्रान् हितशिक्षालापान् ॥ सुहृत्सु च स्नेहसितं ॥ तेषां स्नेहेन सितो बद्धः ॥ कलानि मधुराण्यक्षराणि येषां तेषां च संगतेष्वनुरक्तं चित्तं यस्य ॥ ११ ॥

पुंसो वर्षशतं ह्यायुस्तदर्द्धं वाऽजितात्मनः ॥ निःफलं यदसौ रात्र्यां शेतेंऽधं प्रापितस्तमः ॥ ६ ॥ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः ॥ जर
याग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥ ७ ॥ दुरापूरेण कामेन मोहेन च बलीयसा ॥ शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥ को गृहेषु
पु[illegible]मान्सक्तमात्मानमविजितेंद्रियः ॥ स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुं ॥ ९ ॥ को न्वर्थतृष्णां विसृजेत्प्राणेभ्योऽपि य ईप्सितः ॥ यं क्री
णात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १० ॥ कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् ॥ सुहृत्सु च स्नेहसितः शिशूनां
कलाक्षराणामनुरक्तचित्तः ॥ ११ ॥ पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ ॥ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः प
शुभृत्यवर्गान् ॥ १२ ॥ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः ॥ औपस्थ्यजैह्वं बहु मन्यमानः कथं विरज्येत दुरंतमोहः ॥ १३ ॥

ताः श्वशुरगृहे स्थिताः हृदयंगमाः ॥ मनोज्ञा उरवः परिच्छदा येषु तान् ॥ वृत्तीर्जीविकाः कुल्याः कुलपरंपरागताः ॥ १२ ॥ कोशस्कृत् कोशकारी कीटः स यथा गृहं कृ
त्वात्मनो निर्गमद्वारमपि नावशेषयति ॥ तथा कर्माणीहमानः ॥ ननु वित्तप्रकामोऽपि दोषदर्शनेन विरक्तः सन् त्यजेत ॥ तत्राह ॥ औपस्थ्यं च शिश्नं जैह्वं च बहु
तरं वाधिकं मन्यमानः ॥ अतो दुरंतो मोहो यस्य स कथं विरज्येत विरक्तः स्यात् ॥ १३ ॥

भा॰स
१९

दुरंतमोहत्वं दर्शयन्नाह । कुटुंबपोषणाय वियत् क्षीयमाणं निजमायुः पुरुषार्थं च विहितं न बुध्यते । अत एव तापत्रयेण दुःखितचित्तोपि न निर्विद्यते
दुःखबुद्धिं न करोति । यतः स्वकुटुंबे रामो रतिर्यस्य ॥ १४ ॥ यदुक्तं तेर्थं करोतीत्याह वित्तेष्विति । नित्यमभिनिविष्टं चेतो यस्य सः । परवित्तहर्तुः प्रेत्य नरकलक्ष
णं इह च दंडादिरूपं दोषं यद्यपि विद्वान् तथापि अशांताभिलाषः सन् परवित्तं हरत्येव ॥ १५ ॥ तदेवं कोशगृहेषूपमानित्यादिसप्तभिः श्लोकैरुपपादितं गृहादिषु
प्रसक्तस्य वैराग्यासंभवमुपसंहरति विद्वानपीति । स्वलोकाय स्वात्मपरामर्शाय न कल्पते । किंतु विमूढो यथा तथा विद्वानपि तमः अभिनिवेशमेव प्रपद्य

कुटुंबपोषाय वियन्निजायुर्न बुध्यतेर्थं विहतं प्रमत्तः । सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरामः ॥ १४ ॥ वित्तेषु नित्याभिनिवि
दु॰ २
ष्टचेता विद्वांश्च दोषं परवित्तहर्तुः । प्रेत्येह वाथाप्यजितेंद्रियस्तदशांतकामो हरते कुटुंबी ॥ १५ ॥ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन् स्वलो
काय न कल्पते वै । यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥ १६ ॥ यतो न कश्चित्क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं
समर्थः । विमोचितुं कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः ॥ १७ ॥ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु । उपेत नारायण
मादिदेवं स मुक्तसंगैरिषितोपवर्गः ॥ १८ ॥

ते । तत्र हेतुः य इति । स्वीयमिदं पारक्यमिदमिति विभिन्नो भावो भावना यस्य सः ॥ १६ ॥ तस्मात्कौमार एव भगवतान्
धर्मान् आचरेदिति सहेतुकमुपसंहरति । यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थः । ततो नारायणमुपेत शरणं यातेत्युत्तरेणान्वयः । असामर्थ्ये हेतुः अलं दीनो लंप
टः अतः कामोद्दृशियासां तासां विहारो क्रीडायां निमित्ते क्रीडामृगः विहारमिति पृथक्पाठे तासां विहारसाधनमात्मानं यत्स्वासां क्रीडामृगः इत्यन्वयः । किंच यत् यस्य
याः निगडः शृंखलात्मको विसर्गः पुत्रादिरूपो भवति ॥ १७ ॥ विदूरात् दूरतः संगं परिहृत्य यद्वा अविदूरात् शीघ्रं नारायणमुपेतेत्यन्वयः यस्मात् स एवापवर्गः इषितरुः ॥ १९

भौतिजीवेषु भौतिकेष्वजीवेषु महत्सु च स्थूलेष्वाकाशा २

वालानामस्माकं तद्भजनमशक्यमिति चेत् तत्राह न हीति बह्वायासः प्रतिप्रयासः १९ आत्मत्वात्सर्वत्र प्रसिद्धत्वादिति च हेतुद्वयमुपपाद
यति परावरेष्विति च त्रिभिः ब्रह्मान्ते येषां स्थावरादि येषां तेषु जीवेषु [illegible] दिषु २० गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्वादौ
च परब्रह्मस्वरूपः २१ कथं तर्हि दृष्टृदृश्यभोक्तृभोग्यादिभेद प्रतीयते त्याह प्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया निर्देशः दृश्यं
भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ईयते स्वतन्त्रेणाव्ययः वस्तुतस्तु विपश्च अविकल्पितो भूतेषु निर्देश्यो विपरि पद्या अनिर्दे

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः १९ परावरेषु भूतेषु ब्रह्मान्तस्थावरादि
षु भौतिकेषु विकारेषु भूतेष्वथ महत्सु च २० गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा एक एव परो ह्यात्मा भगवानीश्वरो
व्ययः २१ प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयं व्याप्यव्यापकनिर्देश्यो वस्तुभेदाविकल्पितः २२ केवलानुभवान
न्दस्वरूपः परमेश्वरः मायायान्तर्हितैश्वर्य ईयते गुणसर्ग [illegible] या २३ तस्मात्सर्वेषु भूतेषु द
याङ्कुरुत सौहृदं भावमासुरमुन्मुच्य यया तुष्यत्यधोक्षजः तुष्टे च तत्र किमलभ्यमनन्त आद्ये किं तैर्गुणव्यतिकरादिह

रूपोऽपि एवं निर्देश्यः सन्नविकल्पित ईयते दृश्यतेऽव्ययः २२ यतः के ये स्वसिद्धाः धर्मादयः किमगुणेन च काङ्क्षितेन सारं जुषां चरणयोरुपगायतां नः २५
वलानुभवात्मक आनन्द एव स्वरूपं यस्य न तु मायैव चेत्सर्वत्र तर्हि सर्वतत्त्वादुपलभ्येत तत्राह गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया माया
यान्तर्हितमैश्वर्यं येन सः २४ यस्मादेवं तस्मात्सर्वेषु यथोचितं दयासौहृदं च कुरुत यथास्यया उन्मुच्य त्यक्त्वा २४ ततः किमत आह तु
ष्टे च तत्र तस्मिन्न किमलभ्यं तथापि गुणपरिणामादेवादेव स्वसिद्धाः प्राप्तास्ततः सिद्धा ये धर्मादयः तैः किं अगुणेन मोक्षेणापि काङ्क्षितेन किं न तु

ननु धर्मादिरूपपुरुषार्थस्त्रिविधोपि शास्त्राभ्यां वेदोक्तत्वेन सत्य एवाभिहितः तत्राह धर्मार्थः कामश्चेति यस्त्रिवर्गः तदर्थं चोपायाश्चाभिहि-
ताः ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदमौ तर्कदण्डनीती च विविधा च वार्त्ता जीविका तदेतत्सर्वं निगमस्यार्थजातं स्वसुहृदः स्वान्तर्या-
मिणः परस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सत्यं मन्ये सत्यपरत्वात् अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्यविषय-
स्य प्रतिपाद्यं मन्ये सत्यं पुनर्नैर्गुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेवेत्यर्थः तदुक्तं भगवता त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुने

धर्मार्थकाम इति योभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्त्ता मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसु-
हृदः परमस्य पुंसः २६ ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय एकान्तिनां भगवतस्तदकिंच-
नानां पादारविंदरजसाप्लुतदेहिनां स्यात् २७ श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतं धर्मं भागवतं शुद्धं नारदाद्देवदर्श-
नात् २८ दै उ ऊः प्रह्राद त्वं वयं चापि नर्तेन्यं विद्महे गुरुं एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ २९

नेति २६ तेषां विश्वासार्थं गुरुसंप्रदायमाह ज्ञानमिति यन्नारदः श्रोता तत्र वक्ता तो याहृशानामधिकार इति याशंक्याह भगवत एका-
न्तभक्तानां यत्पादरजस्तेनाप्लुतानां स्नातानां देहिनां सर्वेषामपि तत ज्ञानं स्यात् न तु ब्राह्मणानामेवेति नियमः २७ अत एव मयापि नारदा-
च्छ्रुतं विज्ञानसंयुतं शुद्धं भवत्पर्यंतं धर्मं च श्रुतं २८ तत्रातिविस्मिताः पृच्छंति प्रह्रादेति एताभ्यां गुरुपुत्राभ्यामन्यो गुरुर्न विद्मः एतदागमनात्पूर्वं गर्भ
एवाहं नारदपार्श्वगत इति चेत्तत्राहुः बालानामपि इति हि अस्माकमेतावीश्वरौ नियंतारौ अतस्तवान्यत्रागमनं न संभवति २९ १०

स एव ब्रह्मागतस्त्वपि न स्म भवतीत्याह ॥ बालस्येति ॥ दुरत्ययः दुर्बोधः विभ्रमकारणं विस्मयस्य हेतुः ॥ १ ॥ इति सप्तमे ष ६ मातृगर्भस्थितेनास्मिन्नार
दभाषितं प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये ॥ अश्राविनारदेन तन्मया गर्भ इतीरितं ॥ तत्र सप्तमे कथ्यमाह पद्यैः षोडशभिः सुधीः

बालस्यांतःपुरस्थस्य महत्संगो दुरत्ययः ॥ छिंधि नः संशयं सौम्य स्याच्चेत विभ्रमकारणं ॥ १ ॥ इति श्रीभागवते महापुराणे
सप्तमस्कंधे प्रह्लादानुचरिते षष्ठोऽध्यायः ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ॥ उवाच स्मयमानस्तान्स्मरन्मदनु
भाषितं ॥ प्रह्लाद उवाच ॥ पितरि प्रस्थितेऽस्माकं तपसे मंदराचलं ॥ युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ॥ १ ॥ पिपीलि
कैरहिरिव दिष्ट्या लोकोपतापनः ॥ पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ २ ॥ तेषामतिबलोद्योगं निशम्यासु
रयूथपाः ॥ वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशं ॥ ४ ॥ कलत्रमित्रपुत्राप्तान्गृहान्पशुपरिच्छदान् ॥ नावेक्षमाणा
स्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥ व्यलुंपन्राजशिबिरममरा जयकांक्षिणः ॥ इंद्रस्तु राजमहिषीं मातरं मम चाग्रही
त् ॥ नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ॥ यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥ प्राह नैनां सुरपते नेतुमर्हस्य
नागसं ॥ मुंच मुंच महाभाग सतीं परमविग्रहं ॥ ८ ॥ इंद्र उवाच ॥ आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ॥ आस्यतां यावत्प्र
सूमाकंपितरिहिरण्यकशिपो ॥ १ ॥ स्वकृतेनैव पापो सोऽग्रभक्षितस्तस्ति हर्षेण भद्योद्यमं चक्रुः ॥ २ ॥ ५ ॥ एतस्य ॥ सर्वं मोक्ष्येऽर्थपदवीं गतः ॥ ९ ॥
विरं आयाशं मत्तु पत्नी वैष्णापहारेण नारीत्वं वतः ॥ ६ ॥ ७ ॥ अन्नागमनिरपराधा मे नां नेतुं नार्हसीति प्राह ॥ ८ ॥ अविषह्यं दुःसहं अंतः
आ प्रसवपर्यंतमत्रास्यतां ॥ ततः अर्थस्य पदवीं मार्गं गतः प्राप्तः सन् ॥ जातं पुत्रं हत्वा मोक्ष्ये मोक्ष्यामीत्यर्थः

साक्षात्त्वत्तएवैवमहानन्नपितृआदिसंबंधात ॥ त्वयाहेवः प्रतेनमस्थापमत्तनयास्पति ॥ तत्रहेतवोनिःकिल्विषइत्याद्यंशः ॥ १ ॥ अनंतस्यापि
योयोहमेवत्रियोयस्यममभक्त्याप्नोप्रदृश्यत्र ॥ ११ ॥ इहोप्यतामित्याहेतिशेषः ॥ १२ ॥ अंतिममीपे ॥ १३ ॥ सूतर्वत्वागर्भिणी ॥ इत्यया
भर्त्रेणगमनांतरंप्रसूतये ॥ एवमपिविरागभंस्यकेमाय ॥ १४ ॥ तस्याशोकशांत्येधर्मस्यतत्वभक्तिलक्षण ॥ ज्ञानमात्मानात्मविवेकः

ना॰ उवाच ॥ अयंनिःकिल्विषःसाक्षान्महाभागवतोमहान् ॥ त्वयानप्राप्यतेसंस्थापनंतातउवचोवली ॥ १ ॥ इच्छन्
त्वाविहायेत्रोदेवर्षेमानयन्वचः ॥ अनंतत्रियमन्नेवेनांपरिक्रम्यादिवंययो ॥ ११ ॥ ततोनोमातरष्वभिःसमानीयनि
जाश्रमं ॥ आश्वास्येहोष्यतांवत्सेयावत्तेभर्त्रेणगमः ॥ १२ ॥ तथेत्यवात्सीद्देवर्षेरंतिमाप्यकुतोभया ॥ यावद्दैत्यपतिर्घोरा
त्तेपसोनन्यवर्तत ॥ १३ ॥ ऋषिपर्यचरत्तत्रभक्त्यापरमयासती ॥ अंतर्वत्नीस्वगर्भस्यक्षेमायेच्छाप्रसूतये ॥ १४ ॥ ऋषिः
कारुणिकस्तस्याःप्रादादुभयमीश्वरः ॥ धर्मस्यतत्वंज्ञानंचमामप्युद्दिश्यचनिर्मलं ॥ १५ ॥ तत्तुकालस्यदीर्घत्वात्स्त्रीत्वा
न्मातुस्तिरोदधे ॥ ऋषिणानुगृहीतंमांनाधुनाप्यजहात्स्मृतिः ॥ १६ ॥ भवतामपिभूयान्मेयदिश्रद्दधतेवचः ॥ वैशारदी
धीःश्रद्धातःस्त्रीबालानांचमेयथा ॥ १७ ॥ जन्माद्याःषडिमेभावाःदृष्टादेहस्यनात्मनः ॥ फलानामिववृक्षस्यकालेनेश्व
रेणयथात्मदृष्टःस्वरःसमर्थः ॥ १५ ॥ १६ ॥ भूयात्भवेत ॥ वैशारदीत्वार्थेतद्धितः ॥ रेहाद्यहंकारच्छेदनिपुणेत्यर्थः काशावैशारदीधीस्तत्रिना ॥ १७ ॥
इत्यपेक्षायांनारदोन्नमेवदेहात्मविवेकप्रकारमाह ॥ जन्मेतिद्वाभ्यां ॥ जन्माद्याःजायते ॥ अस्तिवर्द्धतेविपरिणमते ॥ अपक्षीयते ॥ नश्यतीत्ये तम
वेभूताः मेषड्भावाः विकाराः दृष्टाःस्त्येवयथाफलानांदृश्यते ॥ नतद्दात्मनितथेवाश्रितेदेहस्यदृष्टादित्यर्थः ॥ इश्वरीविकारसमर्थात्प्रनिर्विषयेन ॥ ११

तदेवं देहधर्मैर्मलिनत्वैर्लक्षणैरात्मनो देहाद्भेदो दर्शितः ॥ इदानीमात्मधर्मैरेवं भेदस्फुरणं यथा स्वहंकारादिकं त्याजयति ॥ आत्मा नित्यः अविनाशी वा अरे यमात्मेति श्रुतेः ॥ अव्ययः अपक्षयशून्यः ॥ अयो अक्षरे परमे व्योमन्निति श्रुतेः ॥ शुद्धः निरवद्यं निरंजनमिति श्रुतेः ॥ एकः एकमेवाद्वितीयमिति श्रुतेः ॥ क्षेत्रज्ञः विज्ञातारमरे केन विजानीयादिति श्रुतेः ॥ आश्रयः यस्मिन्द्यौः पृथिवी चांतरिक्षमिति श्रुतेः ॥ अविक्रियः निष्कलं निष्क्रियं शांतमिति श्रुतेः ॥ स्वदृक् आत्मज्योतिः सम्राडिति होवाचेति श्रुतेः ॥ हेतुः स इमान्लोकान्सृजत इति श्रुतेः ॥ व्यापकः

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ॥ अविक्रियः स्वदृक् हेतुर्व्यापकोऽसंग अनावृतः ॥ १९ ॥ एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ॥ अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥ स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ॥ क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत ॥ २१ ॥

सत्यं ज्ञानमनंतमिति श्रुतेः ॥ असंगी असंगो ह्ययं पुरुष इति श्रुतेः ॥ अनावृतः पूर्णात्पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुतेः ॥ १९ ॥ परैः श्रेष्ठैः विवेकक्षमैर्देहादेरं विद्वान् अहंममेति असद्भावं मिथ्याबुद्धिं त्यजेत् ॥ २० ॥ ननु विवेकात्मज्ञानं निर्णयपरोक्षज्ञानं भवेन्न ब्रह्मताप्राप्तिः कथं स्यात् यतोऽहंकारादिकं त्यजेदित्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टांतमाह ॥ स्वर्णकारः क्षेत्रेषु स्वर्णोत्पत्तिस्थानेषु ग्रावसु योगैर्धमनाद्युपायैस्तदभिज्ञ उपायाभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् ॥ आत्मयोगैः आत्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मसत्तां अध्यात्मवित् आत्माधिष्ठितकार्यकारणसंघातज्ञाता ॥ २१ ॥

श्रि २

अथात्मविवेकमात्मशास्त्रप्रायमाह अष्टाविति त्रिभिः मूलप्रकृतिः महदहंकारौ पंचतन्मात्राणि चेत्यष्टौ त्रयः सत्वादयः तेच प्रकृतिगुणा
एव न तद्भिन्नाः एकादशेन्द्रियाणि पंचमहाभूतानि चेति षोडशात्र मानात्मा एकः प्रोक्तः कपिलादिभिराचार्यैः एकत्वे हेतुः एषु साक्षित्वेना-
न्वयात् तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः इति ॥१२॥ जगतं जंग-
मं तस्थुः स्थावरं अत्रैव सर्वसंघातात्मके देहे मृग्यः अन्वेष्टव्यः इत्याकांक्षेतरित्याह नेति नेतीत्यन्यापोहे क्रियमाणे स्वयमेव अतस्मिन् अ-
नात्मवर्गात्स्वयमुपलभ्यमान इत्यर्थः ॥१२॥ मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः अत एव मणिभ्यः सूत्रस्येवैको व्यतिरेकश्च तयोर्द

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥१३॥ देहस्तु सर्वसंघातो जगतां तस्थुरिति द्वि-
धा अत्रैव मृग्यः पुरुषो नेति नेतीत्यतस्मिन् ॥१३॥ अन्वयव्यतिरेकाभ्यां विवेकेनोशतात्मना सर्गस्थाननसमाम्नाये विमृशद्भिर-
सत्वरैः ॥१४॥ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति तद्वृत्तयः ताये नेवानुभूयंते सोऽध्यक्षः पुरुषः परः ॥१५॥ एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिर्भेदैः

दैक्यं तेनयोर्विवेकः पृथक्करणं वा तेनउशता शुद्धेनात्मना मनसा सर्गस्थाननसमाम्नाये क्रियोद्भवैः स्वरूपमात्मनो बुद्धं धेनुषु मिवाद्वयात् ॥१६॥
सृष्टिस्थितिसंहारैः यतो वा इमानि भूतानि जायंते इत्यादि श्रुत्युक्त सर्गाद्यनुसंधाने नेत्यर्थः विमृशद्भिः विचारयद्भिः असत्वरैः अव्यग्रैः पुण्य-
तरातिपूर्वेणाद्भवः ॥१४॥ विमर्शप्रकारमाह बुद्धेरिति द्वाभ्यां अध्यक्षः साक्षी ॥१५॥ अतः एभिर्बुद्धेर्भेदैः परिणामैः परावृत्तैः परितः क्षिप्तैः आत्म-
धर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः आत्मा तु बुद्धत्वयात् तस्य वस्थोयानिव भाति न तत्वतः स्यात्मनः स्वरूपं बुद्ध्येत जानीयादित्यर्थः अत्र दृष्टां-
तः ज्ञात्मधर्मगांधेनत्र राशेर्यथा सुमिव ॥१६॥ त्रि॰ त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरपि त्रिगुणात्मकत्वात् कर्मकर्तृत्वाच्च
तस्या एवैता अवस्थाः ॥१॥

भा॰भा॰

ननु तर्हि यथात्मनः सोपाधिकोपि व्यापारो ग्योर्विवेकज्ञानेन न निवर्त्तते एवमात्मनः संसारोपि न निवर्त्तते त्याशंक्याह ॥ एतद्द्वारः बुद्धिद्वारकः तदेव स्याद्द्वारकोवा न तु स्वतः हि यस्मात् बुद्धेर्गुणाः कर्माणि चैतैः निबध्यते इति तथा ॥ स चाज्ञानमूलः अतो अपार्थो मिथ्याभूतोपि स्वप्न इव दृश्यते ॥ वायोर्गंधवत् इत्यसंबंधस्य संबंधे वायोर्गंधवत् दृष्टांतः २७ ॥ यस्मादेवं निवृत्तिर्युक्ततरेति तस्मात् ॥ बीजं मज्ञानं तस्य निर्हरणं हननं किं तत् ॥ योगः कथंभूतः धियः प्रवाहं जाग्रदादिरूपं उपरमयतीति तथा ॥ २८ ॥ तदेवं ज्ञानप्रकारसहस्राणि तत्साधनं धर्मस्य तत्त्वनारदोक्त

एतद्द्वारो हि संसारो गुणकर्मनिबंधनः ॥ अज्ञानमूलोऽपार्थोपि पुंसः स्वप्न इवेष्यते ॥ २७ ॥ तस्माद्भवद्भिः कर्त्तव्यं कर्मणां त्रिगुणात्मनां ॥ बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥ तत्रोपायसहस्राणामयं भगवतोदितः ॥ यदीश्वरे भगवति यथा यैरंजसा रतिः ॥ २९ ॥ गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च ॥ संगेन साधुभक्तानामीश्वराराधनेन च ॥ ३० ॥ श्रद्धया तत्कथायां च कीर्त्तनैर्गुणकर्मणां ॥ तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ॥ ३१ ॥ हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ॥ इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३२ ॥ एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ॥ वासुदेवे भगवति यया संलभते रतिं ॥ ३३ ॥

मेवाह ॥ तत्रेति पंचभिः ॥ येर्द्धर्मैर्यथा अंजसा रतिर्भवति इति यत् अयमुपायो भगवतोक्तः ॥ तथापि गीतासु ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं ॥ इति ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वत इत्यादि २९ ॥ तत्रैव तदंगानि धर्मानाह ॥ गुरोः शुश्रूषया भक्त्या सर्वेषां लब्धानामर्पणेन च ३० ॥ तत्पादलिंगानां मूर्तीनां ईक्षणमर्हणं चादि येषां तैश्च ३१ ॥ निर्जितः षड्वर्गः कामक्रोधलोभमोहमदमत्सराणां यैः

म ८१

भगवद्भक्तेर्लिंगान्याह निशम्येति त्रिभिः गुणान् भक्तवात्सल्यादीन् अतिहर्षेण उद्गताः पुलकाः अश्रूणि च यस्मिन् गद्गदं यथा भवत्येवं प्रोत्कंठ उद्गायति ३४ ॥ ५ तस्य भावस्तद्भावो हरिः तस्य भावो भावना तेनानुकृते आशयाकृती मनः शरीरे यस्य निर्दग्धबीजमज्ञानमनुशयो वासना च यस्य सः सम्यगेति प्राप्नोति ३६ ततः किमत आह अधोक्षजस्यालंभनमालंभः स्पर्शः प्राप्तिरेतस्याश्रयणं अशुभः एणादिदुःखः आत्मा मनो यस्य संसृतिचक्रशा तनं त्रिवर्गकं बुधा विदुः तदेव ब्रह्मनिर्वाणं लयो मोक्षः तदात्मकसुखं विदुः हृदीश्वरमंतर्यामिणं ३७ भक्तिरशक्येति चेन्न मतन्यमित्या

निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति ३४ ॥
यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं ॥ मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ३५ ॥
तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः ॥ निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजं ॥
अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं ॥ तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ॥ ३७ को
तिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः ॥ स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ३८ ॥
रायः कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः ॥ सर्वेऽर्थकामाः क्षणभंगुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः ॥ ३९ ॥

हृद इति छिद्रवत् आकाशवत् ॥ विषयाणामुपपादनैरर्जनैः किं तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्पत्तेश्चकारादिसाधारणापत्तेरित्यर्थः नैवं समारोपो नहर्क्षं दोषः ॥ नादरोक्तानुवादरूपत्वादस्य प्रकारणस्य ३८ ॥ अनर्थकं च विषयार्जनमाह ॥ रायः अर्थाः ॥ क्षणभंगुरमायुर्यस्य रायः तत्कामिनितिहासेषु ॥ धने हि सुहृषो लोके सुहृषधनमेव वा ॥ अवशः एकं त्यजति तस्मात्किं धनलक्ष्मयेति ॥ ३९ ॥ ॥

यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं। अभिलाषोपपन्नं च तत्सुखं स्वःपदास्पदमित्येवंभूताः स्वर्गादिभोगा अपि न मे वाहा इत्याह एवंहीति। क्षयिष्णवो
हेतवः क्रतुभिः कृता इति। तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुतेः अत एव पुण्यतारतम्येन सातिशयाः
न च निर्मलाः स्पर्द्धादिमत्त्वात्। न विद्यते दृष्टं श्रुतं च दूषणं यस्मिन्। ४० किंच। यदर्थ्यमर्थ्य यत्नं कल्प्य। अतः संकल्पितात्। विपर्ययमेव विपरीतफलं। अ
मोघं च अवश्यं प्राप्नोति। ४१ नरे वरं शीयति दुःखायेति। इहया इछया क्रियया वा। यः पूर्वमनीहया हेतोः सुखेनावृतो व्याप्त आसीत स इहया दुःखमा

एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः। सातिशया न निर्मलाः। तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये। ४०
यदर्थ्यमर्थ्येह कर्माणि विद्वन्मान्यसकृन्नरः। करोत्यतो विपर्यासममोघं विंदते फलं। ४१ सुखाय दुःखमोक्षाय संकल्प इह
कर्मिणः। सदाप्नोतीहया दुःखमनीहायाः सुखावृतः। ४२ कामान्कामयते काम्यैर्यदर्थमिह पूरुषः। स वै देहस्तु पारक्यो भं
गुरो यात्युपैति च। ४३ किमुव्यवहितापत्यदारागारधनादयः। राज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः। ४४ किमेतैरात्म
नस्तुछैः सह देहेन नश्वरैः। अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः। ४५ निरूप्यतामिह स्वार्थः कियान्देहभृतोसुराः। निषेकादिष्वव

प्नोत्येव। ४२ किंच। कामान्नुभोगान्। काम्यैर्विषयैः कर्मभिर्वा। पारक्यः श्वादिभोग्यः न त्वात्मीयः भंगुरश्च। ४३ किमुते स्थासु क्लिश्यमानस्य कर्मभिः।
हा तद्व्यवहिताः अपत्यादयो ममताविषयाः पारक्या इति वक्तव्यं। ४४ किंच स्वयंपुरुषार्थरूपस्य किमेतैरित्याह किमेतैरात्मन इति। ४५ भोगावसराभावाच्चैतैः
उपयोग इत्याह निरूप्यतामिति। प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः कियानर्थ इति चान्वयः। ४६

भा॰स॰
१४

नन्तु कर्मसु समासक्तो भोगाय परः स्यात् तत्राह कर्माणीति । न चैवं कर्म तत्फलं देहादिकं च परमार्थमित्याह उभयः कर्मवदेहवत्र अविवेकतः अज्ञानेनैव
तनुते ४७ यदपाश्रयाः यदधीनाः ४८ भूतानां प्राणिनां जीवसंज्ञितः अंतर्यामी ४९ अस्माकमत्र नाधिकार इत्यपि न वाच्यमित्याह देवइति

कर्माण्यारभते देही देहेनात्मानुवर्तिना । कर्मभिस्तनुते देहमुभयं त्वविवेकतः ॥ ४७ ॥ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ।
भजतानीहयात्मानमनीहं हरिमीश्वरं ॥ ४८ ॥ सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ॥ भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ॥
देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव वा ॥ भजन् मुकुंदचरणं स्वस्तिमान् स्याद्यथा वयं ॥ ५० ॥ नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः ॥
प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता ॥ ५१ ॥ न दानं न तपो नेज्या न शौचं न व्रतानि च ॥ प्रीयतेऽमलया भक्त्या हरिरन्यद्विडंबनं ॥ ५२ ॥ ततो ह
रौ भगवति भक्तिं कुरुत दानवाः ॥ आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥ ५३ ॥ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ॥ खगा मृगाः
पापजीवाः संति ह्यच्युततां गताः ॥ ५४ ॥ एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः ॥ एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं ॥ ५५ ॥ इति श्री
भागवते महापुराणे सप्तमस्कंधे सप्तमोऽध्यायः ॥ नारद उवाच ॥ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितं ॥ जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं ॥ १ ॥

पंचभिः ५० । ५१ ॥ अमलया निष्कामया विडंबनं नटनमात्रं ॥ ५२ ॥ ५३ ॥ अच्युततां अमृतत्वं ॥ ५४ ॥ अध्यायद्वयोक्तमुपसंहरति एतावानिति तदीक्षणं गोविंददृष्ट्या
समाननं ॥ ५५ ॥ सप्तमे प्र ॥ अष्टमेतिहषामसुरं निघ्नन् दैत्योहतः स्वयं आविर्भूय नृसिंहेन सब्रह्मादिभिः स्तुतः ततः कृपासुधापूर्णो वहिः क्रोधोन्हेके
शरी दैत्येंद्रमणिभावेन भजेतं स्वमभावयत् ॥ १ ॥

राम
१४

एकांतसंस्थितां अत्यद्भिष्टां यथा यथावत् १ सद्यः हंतुं मनो दधे कथंभूतः कोपस्यावेशेनोद्रेकेण चलद्गात्रं वपुर्यस्य सः २ क्षिप्त्वा तिरस्कृत्य पापे
न सरोषेण तिरश्चीनेन वक्रेण ४ ५ महात्मन् अल्पबुद्धे मदाज्ञातिलंघिनं त्वामद्य यमालयं नेष्यामि ६ अभीतवत् किंबलं यस्य सः किंबलः ७ न

अथाचार्यसुतस्तस्य बुद्धिमेकांतसंस्थितां आलक्ष्याभीतस्त्वरितो राज्ञ आवेदयद्यथा १ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयं
कोपावेशचलद्गात्रः पुत्रं हंतुं मनो दधे क्षिप्त्वा परुषया वाचा प्रह्रादमतदर्हणं आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ४
प्रश्रयावनतं दांतं बद्धांजलिमवस्थितं सर्पः पदाहत इव श्वसन् प्रकृतिदारुणः ५ हे दुर्विनीत मंदात्मन् कुलभेदकर
अधम स्तब्धं मच्छासनोद्वृत्तं नेष्ये त्वाद्य यमक्षयं ६ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः सहेश्वराः तस्य मेऽभीतवन्मूढ शासनं
किंबलोऽत्यगाः ७ प्रल्हाद उवाच न केवलं मे भवतश्च राजन् स वै बलं बलिनां चापरेषां परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो
येन वशं प्रणीताः ८ स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्वबलेंद्रियात्मा स एव विश्वं परमः स्वशक्तिभिः सृज
त्यवत्यत्ति गुणत्रयेशः ९ जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न संति विद्विषः ऋतेऽजितादात्मन उत्पथस्थितात्त
द्धि ह्यनंतस्य महत्समर्हणं १०

वशं प्रणीता इत्यत्र हेतुः स ईश्वर इति उरवः क्रमाः पादविक्षेपा यस्य उरुः पराक्रमः इति वा ओजः आदिरूपः सत्वं धैर्यं बुद्धिर्वा ९
मच्छत्रुरसौ कथं ममापि स एव बलं यस्मात् अत आह जहीति आत्मनः स्वस्य स्वभावं त्यज यतः अजितादात्मनो मनसः ऋते विना अन्ये विद्विषो न संति किंच
तद्धि हितदेव हि साम्येन मनसो धारणमेव समर्हणमाराधनं १०

मयापि दिग्विजये सर्वे जिताः अतः सांप्रतं न संतीति मन्यसि इति चेत् तत्राह दस्यूनिति एके भवादृशा मंदाः पुरा आत्मदेहं लुंपतः सर्वस्वं हरतः षडिंद्रियलक्षणान्
दस्यून् न विजित्य अजित्वा दश दिशः स्वयं जिता मन्यंते साधोस्तु जितविज्ञस्य देहिनां समस्य स्वमोहात्सा विदुषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः स्युः ॥ व्यक्तं

दस्यून्पुरा षण्न विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश ॥ जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः प
रे ॥११॥ हिरण्यकशिपुरुवाच ॥ व्यक्तं त्वं मर्तुकामोसि योतिमात्रं विकत्थसे ॥ मुमूर्षूणां हि मंदात्मन्नूनं स्युर्विक्लवा गिरः ॥१२॥ यस्त्व
या मंदभाग्योक्तो मदन्यो जगदीश्वरः ॥ क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते ॥१३॥ सोहं विकत्थमानस्य शिरः कायाद्धरा
मि ते ॥ गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं ॥१४॥ एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः ॥ खड्गं प्रगृह्यो
त्पतितो वरासनात्स्तंभं तताडातिबलः स्वमुष्टिना ॥१५॥ तदैव तस्मिन्निनदोतिभीषणो बभूव येनांडकटाहमस्फुरत् ॥ यं वै स्व
धिष्ण्योपगतं त्वजादयो श्रुत्वा स्वधामात्ययमंग मेनिरे ॥१६॥ स विक्रमन्पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतं ॥ अंतः
सभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥१७॥

निश्चितं विक्लवाः अनन्विता इत्यर्थः ॥१२॥ हे मंदभाग्य यद्यसावस्ति तर्हि क्वास्ति ॥ प्र
ह्लादस्त्वाह स सर्वत्रास्ति ॥ हिरण्यकशिपुराह तर्हि कस्मात्स्तंभे नास्ति प्रह्लादस्तु तं स्तंभं निरीक्षमाणो न मया स्तंभेत्वाह दृश्यत इति ॥१३॥ हिरण्यकशिपुस्तु
तत्र तमपश्यन्नाह सोहमिति ॥१४॥ प्रह्लादेन मूर्ध्नि बद्धांजलिना निरीक्षमाणं स्तंभं ताडितवान् ॥१५।१६॥ तत्पदं तस्य ध्वनेराश्रयं ॥१७॥ तामद्भुतं

भगवांस्त्वदाश्रूहृष्यतहृष्टो बभूव । किमर्थं निजभृत्येन प्रह्लादेन यद्भाषितं हृष्यत इति तत्सत्यं विधातुं कर्तुं । तथाश्रु विलेषभूतेषु ह्यात्मनो व्याप्तिं च
सत्यां कर्तुं त्वं मे श्रूहृष्यत । तत्किमर्थं भोगीति केषु च भावेषु भूतेषु च महत्सु च । भगवानात्माह इति तेनैव भृत्येन भाषितं तत्सत्यं कर्तुं । तथाश्रुत्पद्यतेहै
न्यद्यातकमतिद्योरेनृपद्यहृदनृदध्यत तत्किमर्थं । निजभृत्यैः सनकादिभिः शापानन्तरं प्रजातैर्भाषितं यद्विभिर्जन्मभिः शापमोक्षो भवत्विति । तत्सत्यंक
र्तुं । तथाश्रुत्पद्यन्तेष्वस्मिन्ह्यास्थावृहष्टमश्नातं च नृपद्यहृदनृ । तच्च नमृगाकारं न च मनुष्याकारं दृहृनन्सभायां मध्ये श्रूहृष्यत । तत्किमर्थं निजभृत्येन हिरण्यक
शिपुना ब्रह्मणः प्रति यद्भाषितं । भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो इति । तथा नान्तर्न बहिरिति । न नरैर्न मृगैरिति । ब्रह्मणो वनिजभृत्येन तथाश्लि

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः । अदृश्यतात्यद्भुतरूपमुद्वहन् स्तंभे सभायां न मृगं न मानुषं ॥
स सत्वमेवं परितो विपश्यन् स्तंभस्य मध्यादनुनिर्जिहानं । नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेंद्ररूपं ॥ १९ ॥

ति यद्भाषितं तत्सत्यं कर्तुं । न हि तद्ब्रह्मसृष्टं भूतं न च नरो वा मृगो वा । न च सभा गृहस्यांतः न च सभांगणवत् बहिः एवं ताभ्यां भाषितं सत्यं कर्तुं । यच्च हिरण्य
कशिपुना भाषितं नृपमेत द्विरोधेन मृत्युर्मे भवितेति । तथा अयमङ्गतास्त्विड्योमाः इति । तच्च नारदेन निजभृत्येन इष्टतिभाषितं अयमहान् स्वस्थानेषाप्य
ति । अनेनानुरुत्यनेन न ह्वस्य भक्त्या परुपातित्वं च यद्भाषितं तच्च सत्यं कर्तुं अदृष्यत । चकारात् निजभाषितं यत् कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यतीति त
था तेषां महं समुद्धर्ता मृत्युसंसारसागरादित्यादि तच्च सत्यं कर्तुं महृष्यतेति द्रष्टव्यं । अलमिति विस्तरेण ॥ १८ ॥ सदैत्यः एवं ध्वनिश्रुत्वा तदा अयं सत्वं प्राणि
विशेषं सर्वतो विलोकयन् स्तंभस्य मध्यान्निर्गच्छन्नृमृगेंद्रयोर्मिश्ररूपमहो किमेतदिति मीमांसितवानिति शेषः ॥ १९ ॥

भा०स

२६

तस्यैवमलं भयानकं तन्नृसिंहरूपं मीमांसमानस्याग्रतः ~~स नृसिंहरूपं मीमांसमानस्याग्रतः~~ स नृसिंहरूपो हरिः समुत्थितः भयानकत्वमेव दर्शयंस्तद्रूपमवर्ण
यति त्रिभिः प्रतप्तं चामीकरं स्वर्णमिव पिंगानि चंडानि लोचनानि यस्मिन् सटाजटाः केशराः कंठरोमाणि स्फुरद्भिः सटाकेशरैर्जृंभितं स्मारोपमाननं यस्मिन् १०
करालाः तुंगाः दंष्ट्रा यस्मिन् करवालः खड्गः तद्वत् चंचला क्षुरांतवती तीक्ष्णा च जिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्बणं स्तब्धावनम्रौ शंकुवद्दीर्घौ च कर्णौ य
स्मिन् गिरिकंदरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हनू कपोलप्रांतौ तयोर्भेदेन विदारणेन भीषणं ११ दिविस्पृशन् कायो यस्मिन् अह्रस्वकामांसः ग्री

मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकं प्रतप्तचामीकरचंडलोचनं स्फुरत्सटाकेशरजृंभिताननं १० करा
लदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भ्रुकुटीमुखोल्बणं स्तब्धोर्द्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं ११ दिवि
स्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं चंद्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधं १२
दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवं प्रायेण मेयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किं १३

र्घा ह्रस्वा पीवरा च स्थूला ग्रीवा यस्मिन् उरु विशालं वक्षःस्थलं यस्मिन् तच्च तच्च अल्पमध्यमं उदरं यस्मिन् चंद्रांशुवद्गौरैः तनूरुहैर्लोमभिः छुरितं व्याप्तं विष्वक् सर्वतः प्र
वेतः प्रसृता भुजास्तेषामनीकानि स्तोमाः तेषां शतानि यस्मिन् नखान्येवायुधानि यस्मिन् १२ दुरासदं प्राप्तुमशक्यं सर्वाणि च निजानि चक्रादीनि इतराणि वज्रा
दीनि इतराणि वज्रादीनि तान्येवायुधप्रवेकाः श्रेष्ठोत्तमाः तैर्विद्राविता दैत्यदानवा येन तद्रूपं मीमांसमानस्याग्रतः समुत्थित इति पूर्वेणान्वयः तदाविर्भावप्रयो[illegible]
जनविमर्शपूर्वकं तेन महद्दैत्यस्य युद्धमाह सप्तभिः प्रायेण महामायाविना हरिणा मे अयमेवंभूतो वधः मृत्युहेतुः स्मृतः चिंतितः तथाप्यनेन समुद्यतेन किं न किं वि २६
स्यादित्येवं ब्रुवन्नभ्यपतदित्यन्वयः १३

तदा सोऽसुरो नृसिंहं सो ऽजसिरः शीघ्रोपतितः सन्नृ अलक्षितः अदृश्योऽभूत् १५ सत्वधामनि सत्वप्रकाशो ऽप्युपतितस्य तमोमयस्यादर्शनं न
द्विचित्रं न भवति तत्र हेतुः यो हरिः पुरा ब्रह्मादेः प्रलयकाले तं तमः जगदुरू अपिबत् तस्मिन् विक्रमं तन्वति सति ततः प्रहरन् हस्ता
नि॰ उत्कालितः स तः १६ तदा अमराः देवाः सर्वधिष्ण्यपाः असाध्वमन्यंत हृतान्योकांक्षिष्यानां निर्येषां ते तद्वियापि वनछदाः मेघान्तरिताः

एवं वृत्त्वाऽल्पमपतद्गदाप्रधानो नरसिंहप्रति दैत्यपुंगवः अलक्षितोऽप्युपतितः पतंगमो यथा नृसिंहो जसिसोऽसुरहस्तेन १५
नतद्विचित्रं खलु सत्वधामनि स्वतेजसा यो नु पुराऽपिबत्तमः ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया
तं विक्रमंतं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहीत् स तस्य हस्तोत्कलितस्तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः
असाध्वमन्यंत हृतौकसोऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः
पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे १८ तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधो हरिः कृत्वा
सतः १७ यस्य हस्तात्प्रयंभक्तः तं नृहरिं स्ववीर्याच्छंकितं मन्यमानः खड्गच ऽट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः १९
र्मणी प्रगृह्य पुनस्तमासज्जत अभ्यपद्यत युद्धाय १८ श्येनस्येव वेगो यस्य तं शतचंद्रवर्त्मभिः खड्गचर्ममार्गैः अच्छिद्रं यथा भवत्येवमुपर्य
धश्चरंतं अट्टहासमेवाह खरं तीव्रं उत्स्वनेन महाशब्देनोल्बणं भयंकरं तद्भयेन हरेस्तेजसा च निमीलिते अक्षिणी यस्य १९

ग्रहणोदर्षतः व्यालोपथ्या श्राखुमूर्खकं विदारणोदर्षतः अहिंगरुडरवेति विषकृत्सर्वतः स्फुरन्तं निःसरन्तं ग्रहणोनादरं विवशं इद्गेण सुह
ग्रद्धेतत्स्वयुक्तेनकुलिशेननरुत्तात्त्वगपिपस्य द्वारस्थभार्यानीतनेवहिः ॐरॐरेणनिपात्यनभूमौनचांवरोनरवेर्नव्यहपिरहमद्रिवौ एव
दिवानक्तपरिहाणप्रदेधापामितिदर्श्व्यौ २॰ रैत्यवधप्रत्क्रान्तइत्यवधमाहद्वाभ्यां सरं भेणोडुः प्रेक्षणीकरालानिलोचनानियस्य श्र
तजोरक्तस्थलेवेविडंभिः रक्ताः सिक्ताः श्रुतएवसृहणाः केशराश्चाननंवपस्सतः करव द्विपहत्ययागजवधेनहरिः सिंहोपथा एवंम्र

विक्षकृत्स्फुरन्तंग्रहणात्तंरंहेहरिर्व्यालोपथ्याखुकुलिशाहृतत्वचं द्वार्यपूर्ह्रस्त्रापात्यद्दारलीलयानखैर्यथाहिंगरुडोमहाविषं
सरंभेडुः प्रेक्षाकरालनलोचनोव्यात्ताननान्तंविलिहन्स्वजिह्वया अग्निकल्पवारक्ताहणकेशराननोयथात्रमालीद्विपहत्यया
हरिः २१ नखांकुरोत्पारितहृत्सरोरुहंविसृज्यतस्याः अवनान्वराप्सुधानु अग्रहनसमता अवगाहपार्थ्मिभिर्दोदंडसूथोडुपथा
सेहस्वराः २१ सरावधूताः जलदाः परापतन्ग्रहाश्चतदृष्टिविमुष्टरोचिषः अंभोधयः श्वासहतावितुक्रु निर्वाभिताः दि
गिभाविनुत्तसुः २२ घोत्तरयोत्क्षिप्तविमानसंकुलाप्रोत्सर्पितक्ष्माचपदातिपीडिता शैलाः समुत्पेतुरमुष्यरंहसातत्तेजसा
नतत्सपाडवरान्त्रहनितमन्नेरणत्वपः २१ नखांकुरैहत्पारितंहृत्सरोरुहं प्रस्तं सोदैंडानां पृथ्वीनियस्पसः तमत्तपंथ्यावकेक्रभोनेरेजि
येषांतान् अन्यानवितत्पहृपातिनरस्पर्थः २१ रैत्यवधत्राश्रन्यहृदोरोपमाहद्वाभ्यां सरामिरवधूताः प्रकंपिताः परापतन्व्यशीर्यत न
स्पदृष्ट्याविमुष्टरोचिर्येषांते तिरस्कृतप्रभाः अभवन्निगतशेषः दिशिभारिगणाः २३ तस्मसरामिहत्क्षिप्तानिविमानानितैः संकुलान्यासन्
प्रोत्सर्पितह्वस्यानातप्रकर्षणोदसर्पित २४

स्वमृत्योरप्याश्चर्यमिदमत्वा कौतूहलेन तत्स्यासने उपविष्टं भयात्कोपि न बभाजनासेवत ॥ नलक्षितो द्वैरथः प्रतियोद्धा येन ॥३५॥ लोकत्रय
मस्तकज्वरो रोगवद्व्यथकः सहं ॥ प्रहर्षस्य वेगेनोत्कलितानि विकसितान्याननानि यासां ताः नेहरिं ववृषुः ॥३६॥ नाकिनां विमानाव
लिभिः सुराणामानकाः पटहाः ॥ तेजघ्निरे वादिताः ॥ स्त्रियोप्सरसो ननृतुः ॥३७॥ ८ ॥ गंधर्वाप्सरसश्चारणाश्चेत्यर्थः ॥३९॥ नरशार्दूलं नृहरिमत्र

ततः सभायामुपविष्टमुत्तमे नृपासने संभृततेजसं विभुं ॥ अलक्षितद्वैरथमत्यमर्षणं प्रचंडवक्त्रं न बभाज कश्चन ॥३५॥ निशम्य लो
कत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ॥ प्रहर्षवेगोत्कलिताननामुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥३६॥ तदा विमाना
वलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनां ॥ सुरानकादुंदुभयोथ जघ्निरे गंधर्वमुख्या ननृतुर्जगुः स्त्रियः ॥३७॥ तत्रोपव्रज्य
विबुधा ब्रह्मेंद्रगिरिशादयः ॥ ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥३८॥ मनवः प्रजानां पतयो गंधर्वाप्सरचारणाः ॥ यक्षाः
किंपुरुषास्तात वेतालाः सिद्धकिन्नराः ॥३९॥ ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः ॥ मूर्ध्नि बद्धांजलिपुटा आसीनं तीव्रतेजसं ॥ ईडि
रे नरशार्दूलं नातिदूरचराः पृथक् ॥४०॥ ब्रह्मोवाच ॥ नतोस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवित्रकर्मणे ॥ विश्वस्य सर्गस्थितिसं
यमान्गुणैः स्वलीलया संदधतेऽव्ययात्मने

तोंत्र

तमं ॥ ब्रह्मादयो नृसिंहस्य शंकया दूर एव तस्थुः आदेवाक्तवत्सरदराश्लोकैः पृथक्पृथक् ॥४०॥ यमान्गुणैः स्वलीलया संदधते अव्ययात्मने
अनंताय अनंतप्रसादयितुं नतोस्मि ॥ अनंतत्वे हेतुः दुरंताः शक्तयो यस्य ॥ नत्वतः विचित्राणि वीर्याणि प्रभावा यस्य ॥ तत्किमर्थं ॥ पवित्राणि शो
धकानि कर्माणि यस्य ॥ विचित्रवीर्यत्वमेवाह विश्वस्येति ॥ संदधते सम्यक्कुर्वते ॥ एवमपि अव्ययात्मने अच्युतस्वरूपाय ॥४१॥

हृद्रक्तान्तत्कोपकालाभिज्ञो नायं कोपावसर इति तं प्रार्थयते ॥ हर हर युगान्ते कोपस्य कालः कोपायोग्यस्थायमित्याह ॥ अल्पकः क्षुद्रः अल्पः क्षुतः को पनिवृत्त्या श्रङ्कारं मा हिंसीरित्याह ॥ तत्स्तोतुमिति ॥ यद्वा युक्तकालेऽप्ययं कोपो भक्तस्यानुग्रहार्थं इति चेत् तर्हि इदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः ॥ ईदृक्तान्नास्माकं विभागादिलाभः प्रहृष्टार्थः किं तत्त्वत्परिचर्यैव ॥ भवतापि नरसिंहेन तत्सर्वं संपादितं तस्मात् त्वत्कार्यमेव प्राधितं तत्सेवा सिद्धत्वाद्युपसंहर्तुं क्रोधमित्याह ॥ हे परमन्त्यो हृद्यायतार ङ्गतामभवतादिविध्या एव भागादि त्याज्यत्वादिति तः ॥ आतुर्याभिशान्त्वे वयं ते भोगात्वात् अस्मद्दैवं हृदयकमलं च तव हृदि शैव तावत् पर्यन्तं भयहेतुत्वेनास्मा स्मृतिपथेऽनित्यं स्थितेन नरे त्वेना ज्ञान्तं व्याप्तमनुष्ठस्य बोधिभयापाकरणेन विकाशः

हरिरुवाच ॥ कोपकालो युगान्तस्ते हतोऽयमसुरोऽल्पकः ॥ तत्स्तोतुं पाहि उपसंहर तं भक्ते भक्तवत्सल ॥ ५३ ॥ ईश्वर उवाच ॥ प्रत्यानीताः परमभवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि ॥ कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां नहि बहुमता नारसिंहापरैः किं ॥ ५४ ॥ ऋषय ऊचुः ॥ त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज ॥ तद्विप्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ५४ ॥

नीतं ॥ तव वैत्रैलोक्यैश्वर्यसाधनार्थं मयपुष्प्यमरानिवेतन्तत्राह ॥ कालग्रस्तमिति तेनत्वां हे नरसिंह नरस्यासिंहस्य चाकारप्रकाशाविर्भूत ॥ ५३ ॥ ऋषयस्तु तपः प्रवर्तनेनास्माकमनुग्रहः कृत इत्याहुः ॥ त्वं नो यदात्थ परमं ध्यानलक्षणं तपः परमत्वे हेतुः आत्मनस्तव तेजः प्रभावरूपं तदेवाहुः येन तपसा आत्मनि लीनमिदं विश्वं ससर्ज सृष्टवानसि ॥ तत्तमुनादैत्येन विप्रलुप्तं कुण्ठितं सत् हे शरण्यपाल ॥ अद्य रक्षार्थं गृहीतेनानेन वपुषा पुनरपि तपः अन्वमंस्थाः अनुज्ञातवानसि तस्मै तेनमः स्तुतस्य ईश्वरार्थं पारस्यानुषङ्गः ॥ ५५ ॥

पितरस्त्वच्छ्राद्धोद्धरणेन परमोपकारिणां प्रणामं प्रति ॥ श्राद्धानि श्रद्धया दत्तानि पिंडादीनि नो ऽस्मभ्यं प्रदत्तैर्दत्तानि श्रद्धमं बलात् त्वयमधिकृत्य भुंजे ॥ किंच
तीर्थस्नानसमये दत्तं तिलोदकमप्यपिबत् ॥ तानि तस्योद्यताद्यधृष्टात्याहृतवान् ॥ कथंभूतान् ॥ नवैर्विदीर्णां वपाधस्मात् ॥ वपा विदारणा
समतकृतपिंडोद्धरणफलमिति भावः ॥४४॥ योगसिद्धां गतिं प्राप्ता सा हि सिद्धिं ॥ नानाभूतेनेकरूपाधस्पृष्टं ॥ तस्मै तुभ्यं ॥४६॥ विद्याश्रुतः तद्धीनादिलक्षणां
अनुपल्लवां स प्राप्ताः ॥ सन्त्यये युद्धे त्वया प्रदिष्ट ॥४७॥ रत्नानि फलानि स्थितानि स्त्रीरत्नानि च उत्तमाः स्त्रियः ॥ प्रसाम्ना त्रीणां दत्तस्थानदोषेन तत्त्वबाधन

पितर ऊचुः ॥ श्राद्धानि नो ऽधिभुंजे प्रसभं तत्कृतैर्दत्तानि तीर्थसमये पितृतिलांबु सम्यः ॥ तस्योदराच्च खविदीर्णा वपाध्यक्षादत्तस्मेन मोक्ष
हरये विलधर्मगोप्तृ ॥४५॥ पितामह उवाच ॥ योनोगतिं योगसिद्धा मसाधु हर्षी योगतपोबलेन ॥ नानारूपं तत्त्वनैर्व निर्ददार तस्मै तुभ्यं प्र
णतास्मो नृसिंह ॥४६॥ विद्याधरा ऊचुः ॥ विद्याः पृथक् धारणयानुप्राप्तानूपषेध दत्ता बलवीर्यदृप्तः ॥ स एनेन संख्ये स मस्तु बद्धं तत्त्वमाया
नृसिंह प्रणतास्म नित्यं ॥४७॥ नागा ऊचुः ॥ येन पापेन रत्नानि ह्यस्त्रीरत्नानि हृतानि नः ॥ तद्वक्षः पाटने नास्मद्दत्तानंदन मोक्षते ॥४८॥
मनव ॥ ऊचुः ॥ मनवो वयं तव निदेशकारिणो दितिजेन देवपरिभूतमतेव ॥ भवता खलः स उपसंहृतः प्रभो करवाम ते किमत्र
शाधि किंकरान् ॥४९॥ प्रजापतय ऊचुः ॥ प्रजेशा वयं ते परेशाभिसृष्टा नयेन प्रजा वै सृजामो निषिद्धाः ॥ स एष त्वया भिन्नवक्षानुशेते
पाठांतरे अस्माकं दत्तस्थानं दोषेनेति ॥४८॥ नृसिंहेनावलोकिताः संतो भूर्भुवः स्वःजनयो मनवः प्रोचुः ॥ मनवो वयं धर्मपाल जगन्मंगलं स त्वं पूर्णैर्वताः
काः ॥ परिभूताः पितवो वर्णाश्रमधर्ममर्यादा ये षां ते ॥ अनुशाधि अनुशिक्षय ॥४९॥ प्रजापतयो पितर्दवलोकिताः प्रोचुः ॥ हे परेश ते त्वया अभिसृष्टाः
प्रजेशा वयं येन निषिद्धाः संतः प्रजा न सृजामः स एषः भिन्नवक्षो यस्य सः अनिश्चितः मतः शेते अतः परं प्रजाः सृजाम रति सृष्टं ततः आह ॥ हे सत्व

भा॰स॰
१९

गंधर्वाश्रुमितस्वर्लोकिनाः श्रोतुः ॥ हे विभो वयं ते त्वदीयाः नरा नर्त्तकाः ॥ नाथेन त्वया गायकाः स्वयं येन स्वाधीनाः कृताः ॥ कथं भूतेन वीर्यशौर्य
बलशक्तिः ॥ नाम्नाभोजः प्रभावो यस्य तेन ॥ इमां दशां प्रति ॥ उचितमेतदित्याऊः किमिति ॥ ५१ ॥ भवापवर्गयोः हेतोरिव त्रैके ॥ आश्रये हेतुः
यद्यस्मात्साधु नो हरिमयजनककते नरोते तिष्ठतीति तथा सदोषो हरत्व याप समापितः अंतनीत ॥ ५२ ॥ मनोज्ञैः कर्मभिरुच्चैरप्युभ्योः घं

गंधर्वा ऊचुः ॥ वयं विभो ते नरनाथ गायका येनात्मसाद्वीर्यबलेन सकाकृताः ॥ सएव नीतो भवता दशामिमां किमुत्पथस्थः कुश
लायकल्पते ॥ ५१ ॥ चारणा ऊचुः ॥ हरे तवांघ्रिपंकजे भवापवर्गमाश्रिताः ॥ यदेष साधुहृच्छयस्त्वयासुरः समापितः ॥ ५२ ॥ य
क्षा ऊचुः ॥ वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वं ॥ स तु जनपरितापं तत्कृतं जानता ते नरहर
उपनीतः पंचतां पंचविंश ॥ ५३ ॥ किंपुरुषा ऊचुः ॥ वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः ॥ अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्य
दा ॥ ५४ ॥ वैतालिका ऊचुः ॥ सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे ॥ यस्तां व्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हत
स्ते भगवन्यथामयः ॥ ५५ ॥ किंनरा ऊचुः ॥ वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनाकारिताः ॥ भवता हरे स वृजिनो
वसादितो नरसिंह नाथ विभवाय

च विंशाच्चतुर्विंशतितत्त्वनियामक ॥ ५३ ॥ किंपुरुषास्त्वं तु लोके वयं बलकाः इत्याऊः ॥ वयं किंपुरुषास्तु चाणि
नः त्वं तु महान्पुरुषः प्रभावः पुरुषः ॥ न त्वयं महान् दैत्यो हतः शंकि न वर्णितः स्थाः का क्रियते तदित्याऊः अयमिति ॥ ५४ ॥ सत्रेषु यज्ञेषु
ते त्वया हतः एतद्दिष्ट्या भद्रं कृतं ॥ ५५ ॥ अमुना दितिजेन विष्टिं निर्मूल्य कर्मस्थ अनिरंतरकारिताः ॥ अतः परं नः विभवाय समृद्धये भव ॥ ५६ ॥

राम
१९

नोऽस्माकं भक्तानां शरणं रक्षाश्रयप्रद ॥ सर्वेषां लोकानां शर्म मंगलमेतदद्भुतं रूपमद्यैव दृष्टं न तु पूर्वं ॥ विधिकरः किंकरः ५ इति स मेप ४
मः ॥ नवमेव स्मरणाभीत्याचोदितोः हरबालकः ॥ कोऽयं प्रशमयत्वेतोऽत्र विहमति भीषणां ॥ उग्रोग्यः तुग्र एवायं त्वं भक्तानां त्वं करणी ॥ केश
विश्वमार्षदाजउः ॥ स्रुद्दैतद्दारिनरत्नरूपमद्भुतं तेऽदृष्टं नः शरणं दम सर्वलोकशर्म ॥ सोऽयं ते विधिकर ईशा विप्रशाम्यत्वस्मै रं निधन
मनुग्रहाय विस्मः ॥ ५८ ॥ इति श्री भगवते महापुराणे सप्तमस्कंधे प्रह्लादाय हरिवरितेदैत्यराजवधो नाम अष्टमो ऽध्यायः ॥ ना
रदउवाच ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः ॥ नोपैतुमशकन्मन्युसंरंभं सुदुरासदं ॥ १ ॥ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा त
न्महदद्भुतं ॥ अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता ॥ २ ॥ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंतिके ॥ तात प्रशमयोपे
हि स्वपित्रे कुपितं प्रभुं ॥ ३ ॥ तथेति शनकै राजन्महाभागवतोऽर्भकः ॥ उपेत्य भुवि कायेन ननाम विधृतांजलिः ॥ ४ ॥
स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ॥ उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयं ५
॥ स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ॥ तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥ ६ ॥
(इवत्स्वपोतानामन्येषामुग्रविग्रहः ॥ कृत्याद्यागमोक्तां भक्तानुकंपितामाह एवमिति सन्नमिः ॥ एवं कृरतएवस्थित्वा ॥ अद्भुतत्वे हेतुः अदृष्टेति
स्त्वावतः ॥ मन्युनासंरंभं मन्युवेगाय स्मृतं उपगंतुं नाशकन् ॥ १ ॥ महदद्भुतं रूपं दृष्ट्वा शंकितासती तेनोपजगाम ॥ ५ ॥
उपेति उपगच्छ ॥ ३ ॥ ४ ॥ कालएवाहिस्तस्मात् वित्रस्ताधीर्येषां तेषां कृतमभयं येन तत् ॥ ५ ॥

भा॰स
३०

तत्करस्पर्शेन धुतं निरस्तमखिलमशुभं यस्य सपदि तत्क्षणमेव अभिव्यक्तं अपरोक्षीभूतं परात्मदर्शनं यस्य निर्वृतः सन् हृदि दधौ हृष्यती रोमांचिता
तनुर्यस्य क्लिन्नं द्रवीभूतं हृदयं यस्य अश्रुपूर्णे लोचने यस्य परमपुरुषार्थं तत्पादध्यानं साधनत्वेनाप्यर्थः ६ तत्समाधिमेवाह तस्मिन्नेव न्यस्ते
हृदयमीक्षणे च येनेति ७ तस्मिन्निरवसमतिशतत्कृपामृतवृष्ट्ये ब्रह्मादयः स्तौति सत्यं ये हि देवत्वादिगुणा हरिं तत्र तावदात्मनो भगवत्तोषणे
नधिकारमभिवारं व्याधिकारं संभावयन्नाह ब्रह्मादय इति पंचभिः मुनयो मननशीलाः सिद्धा ज्ञानिनो ऽपि कथंभूताः सत्त्वे एवैकस्मिन् तानो

सतत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ६
अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ७ प्रह्लाद उवाच ब्रह्मादयः सुरगणा
मुनयोऽथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः
८ मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय ९

विस्तारो येषां ताः मतयो येषां ते तथाविधा अपि वचसां प्रवाहैरपि तथा बहुभिर्वर्णैर्मार्गैर्गुणैरपि यमाराधयितुं न भगवान्तं यूथपाय
पिप्रुः न पूर्णाः न शक्ता इत्यर्थः स हरिर्मम कथं तोषं प्राप्नुमर्हति तत्र हेतुः उग्रा घोरा आसुरी जातिर्यस्य ८ एवं हरितोषणे स्वस्यायो
ग्यतां संभाव्य योग्यतां संभावयति मन्ये इति द्वाभ्यां अभिजनः सत्कुले जन्म रूपं सौंदर्यं श्रुतं पांडित्यं ओजः इंद्रियनैपुण्यं तेजः
नैपुण्यं तेजः कांतिः प्रभावः प्रतापः पौरुषमुद्यमः बुद्धिः प्रज्ञा योगः योगः एते धनादयो द्वादश गुणाः परमपुरुषस्याराधनाय न भव

राम
३०

गज १

एवं भक्त्यैव केवलया हरेस्तोषः संभवतीत्युक्तं इदानीं भक्तिं विना नान्यत्किंचित्तत्तोषहेतुरित्याह विप्रादिति ॥ पूर्वोक्ता धनादयो द्विषट् द्वादश
गुणास्तैर्युक्तात् ज्ञानविप्राद्विश्वपचं वरिष्ठं मन्ये ॥ यद्वा ॥ सनत्सुजातोक्ता द्वादश धर्मा द्वादश योगा द्वादश व्याः तदुक्तं ॥ धर्मश्च सत्यं च दमः श्रुतं चेत्य
मात्सर्यं ह्रीस्तितिक्षानसूया ॥ यज्ञश्च दानं च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्येति ॥ सनत्सुजातोक्तश्लोकव्याख्याने ॥ ज्ञानं तत्त्वा
र्थसंवेदनं ॥ सत्यं ॥ यथार्थभाषणं भूतहितं च मात्सर्यं एवंभूतेषु सहमानता तदभावो मात्सर्यं दमो मनसो दमः श्रुतं अध्यात्मशास्त्रश्रवणं
ह्रीरकार्यकरणे त्रपा तितिक्षा द्वंद्वसहिष्णुता ॥ दानं ब्राह्मणेभ्यो धनादित्यागः भूताभयदानं वा धृतिर्विषयसन्निधावपीन्द्रियनिग्रहः ॥ शमः श्रुत
करणोपरतिः ॥ बहिष्करणोपरतिरिति केचित् ॥ एते ज्ञानादयो गुणा महाव्रताः परमपुरुषार्थसाधनभूताः ॥ ब्राह्मणस्योक्ताः ॥ कथंभूतात्तवि

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखात्श्वपचं वरिष्ठं ॥ मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः ॥ ९ ॥
नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ॥ यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ १० ॥

पात् ॥ अरविंदनाभस्य पादारविंदद्विमुखात् ॥ कथंभूतं श्वपचं तस्मिन्नरविंदनाभे अर्पितानि मनआदयो येन तं ॥ ईहितं कर्म ॥ वरिष्ठत्वे हेतुः
स एवंभूतः श्वपचः सर्वं कुलं पुनाति ॥ भूरिमानो गर्वो यस्य स तु विप्र आत्मानमपि न पुनाति कुतः कुलं ॥ यतो भक्तिहीनस्यैते गुणा गर्वायैव भवंति
न तु स्वहृदये ॥ अतो हीन इति भावः ॥ ९ ॥ नहि किं धनाद्यर्पणोवसमानेच्छाकृतरेव भगवानपेक्षते तेनैवेत्याह नैवेति ॥ अयं प्रभुरीश्वरः अविदुषोल्पका
ज्जनात् मानं पूजामात्मनोर्थं न वृणीते नेच्छति ॥ यतो निजलाभेनैव पूर्णः ॥ तर्हि पूजा नेच्छत्येव तत्राह ॥ करुणः कृपालुः अतो वृणीते च ॥ तत्र हेतुः
यद्यदिति यद्यं मानं ॥ यद्वा ॥ यद्यस्मात् ॥ यद्येन धनादिना भगवते मानं विदधीत तत्तदात्मने भवति नान्यत ॥ यथा मुखे कृते वा तिलकादिश्रीः शोभा

यस्मादेवं भगवान् भक्त्यैव तुष्यतीति तस्मादहं नीचोऽपि विगतविक्लवः गतशङ्कः सन्नीश्वरस्य महिमानं सर्वप्रयत्नेन स्वमनीषानुसारेणानुवर्णया
मि ‖ अज्ञानतोऽपि स्तुतिकरणे हेतुमाह ‖ येनैव महिम्नानुवर्णितेन ‖ अविद्यया संसारमनुप्रविष्टः पुमान् पूयेत शुद्ध्येत तस्माद्धि ‖ अन्यस्यात
थाशोधकस्याभावादित्यर्थः ‖ १२ ‖ नदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं तत्कोपोपसंहारं प्रार्थयते सर्वे ह्यमी इति द्वाभ्यां ‖ भो ईश अ
मी उद्विजन्तो बिभ्यतः सर्वे ब्रह्मादयः सत्त्वमूर्तेस्तव विधिकराः त्वन्नियोगकर्तारो भक्ता एव ‖ नान्ये ‖ न वयमसुरा इव वैरभावेनेति भक्ताः किं
तेऽस्य द्विषैव ‖ ते हि रुचिरैरवतारैर्विविधं क्रीडितं अस्य विश्वस्य क्षेमादिप्रयोजनाय ‖ न तु भयोत्पादनाय ‖ १३ ‖ तत्तस्माद्देवानां भयपरिहाराय मन्युं यच्छ

तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषं ‖ नीचोऽजयागुणविसर्गमनुप्रविष्टः पूयेत येन हि पु
मानेनुवर्णितेन ‖ १२ ‖ सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजन्तः ‖ क्षेमाय भूतय उतात्मसुखाय
चास्य विक्रीडितं भगवतो रुचिरावतारैः ‖ १३ ‖ तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या ‖ लोकाश्च
निर्वृतिमिताः प्रतियन्ति सर्वे रूपं नृसिंह विभयाय जनाः स्मरन्ति ‖ १४ ‖

उपसंहर यदर्थं मन्युः स चासुरः साधूनां संतापार्थं अयं ह
तः परं क्रोधेन कार्याभावान्नियच्छ ‖ ननु त्वन्येषां वधे न साधुः किं मोदेत तत्राह ‖ वृश्चिकादेः परोपद्रवकारिणः स्वतो जातया हत्या वधेन तस्येतद्
इं जातमिति साधुरपि मोदेतैव ‖ तर्हि बहूनां प्राणवधोद्भवत्वात् क्रोधं न त्यजामीति चेत्तत्राह ‖ लोकाश्च निर्वृतिं निरताः प्राप्ताः सन्तः प्रतियन्ति क्रोधोप
संहारं प्रतीक्षन्ते ‖ तर्हि जनानां भयाभावाय मन्युं धारयामीति चेत्तत्राह रूपमिति ‖ विभयाय भयनिवृत्तये एतद्रूपस्मरणादेव भयनिवृत्तेर्न मन्यु
धारणेन कृत्यमस्तीत्यर्थः ‖ १४ ‖

त्ववेद्विप्रेषितर्हि त्वत्स्वामीति चेत्तत्राह नाहमिति ॥ भो अजित ते तव अस्माद्रूपात् अहं न बिभेमि ॥ कथंभूतात् ॥ आस्यं च जिह्वा च अर्कवत्सदृशानि नेत्राणि च
भृकुटी नाम भस्त्रआरोपस्र उग्रा दंष्ट्राश्च एतान्यतिभयानकानि यस्मिन् तत्तस्मात् ॥ आंत्रमय्यः स्रजो यस्मिन् तत आंत्रस्रक तस्मात् ॥ क्षतजा
क्ताः केशरा यस्मिन् ॥ शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तच्च तत्तस्मात् ॥ निर्ह्रादेन भीता दिग्गिभा यस्मात् ॥ अरीन्भिंदंतीत्यरिभिंदि तानि
नखाग्राणि यस्मिन् ॥ एवंभूतादपि ते रूपादहं न बिभेमि ॥ १५ ॥ महदुग्रपंत्वन्यदर्शीत्याह त्रस्तोस्मीति ॥ दुःसहश्च उग्रश्च संसारचक्रे कदनं दुःखं तस्मा
दहं त्रस्तोस्मि ॥ तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन् प्रणीतः निक्षिप्तोस्मि ॥ हे कृपणवत्सल ॥ हे उशत्तम ॥ कदा नु त्वं प्रीतः सन्

नाहं बिभेम्यजित तेतिभयानकास्यजिह्वार्कनेत्रभृकुटीरभसोग्रदंष्ट्रात् ॥ आंत्रस्रजः क्षतजकेशरशंकुकर्णान्निर्ह्रादे
भीतदिगिभादरिभिन्नखाग्रात् ॥ १५ ॥ त्रस्तोस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः
बद्धः स्वकर्मभिरुशत्तम तेंघ्रिमूलं प्रीतोपवर्गशरणं ह्वयसे कदा नु ॥ १६ ॥ यस्मात्प्रियाप्रियवियोगसंयोगजन्मशो
काग्निना सकलयोनिषु दह्यमानः ॥ दुःखौषधं तदपि दुःखमतद्धियाहं भूमन्भ्रमामि वद मे तव दास्ययोगं ॥ १७ ॥

अपवर्गभूतं शरणं तवांघ्रिकमलं प्रति ह्वयसे मां आह्वास्यसि ॥ १६ ॥ दास्ये मतिं मत्वा तिष्ठेति चेत्तर्हि नानायोनिषु क्लिश्यमानस्य मम दास्यता
नाभावात् त्वमेव तदुपदिशेति प्रार्थयते ॥ तस्मात्प्रियैरप्रियैश्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु
दह्यमानोस्मि ॥ दुःखस्य प्रतीकारः कार्य इति चेत्तत्राह ॥ दुःखौषधं प्रतीकारः तदपि दुःखमेव ॥ एवमपि अतद्धिया देहाद्यभिमानेन भ्रमामि
अतः हे भूमन् विभो मे तव दासत्वं संयोगं ॥ निस्तारं वद ॥ १७ ॥
रोपा

ननु दास्ययोगेन प्रवृत्तस्यापि तदंतरायभूतानां पूर्वोक्तनानादुःखानां कुतः परिहारः तत्राह ॥ सोहं त्वद्दासः सन् भो नृसिंह ॥ तव लीलाकथा अनु
गृणन्नुदुर्गाणि महादुःखान्यंजसा तितर्मि तरामि ॥ न गुणाविता पीत्यर्थः ॥ तत्र हेतुः गुणै रागादिभिर्विशेषेण प्रमुक्तः सन् ॥ तत्कुतः ते पदयु
गमेवालयो येषां भक्तानां त एव हंसास्तात्विकाः तैः संगो यस्य सम सोहं ॥ कथंभूतस्य कथास्तत्राह प्रियस्येत्यादि ॥ कुतो ज्ञाताः विरंचेन गी
ताः तत्संप्रदायप्रवृत्ताः ॥ तथा चाथर्वणीश्रुतिः ॥ देवा ह वै प्रजापतिमब्रुवन् इत्यादि ॥ दास्यप्रवृत्तस्य भगवदनुग्रहे गाण संगः ॥ ततो वीतराग
तया भगवद्गुणानुवर्णनं ॥ ततश्च न दुःखाभिभवः स्यादिति वाक्यार्थः ॥ १८ ॥ ननु दुःखे तत्प्रतीकारो लोके प्रसिद्ध एव किं महास्यादिना

सोहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरंचगीताः ॥ अंजस्तितर्म्यनुगृणन्गुणविप्रमुक्तो दुर्गाणि ते पद
युगालयहंससंगः ॥ १८ ॥ बालस्य नेह शरणं पितरौ नृसिंह नार्त्तस्य चागदमुदन्वति मज्जतो नौः ॥ तप्तस्य तत्प्रतिविधिर्य इहांजसेष्ट
स्तावद्विभो तनुभृतां त्वदुपेक्षितानां ॥

तत्राह बालस्येति ॥ भो नृसिंह तप्तस्य तत्प्रतिविधिः दुःखप्रतीकारः इह लोके यो अंजसा इष्टः सत्वद्युपे
क्षितानां तावदेव क्षणमात्रमेव नत्वात्यंतिकः ॥ तदेवाह ॥ बालस्य पितरौ शरणं रक्षकौ विहन्ते भवतः ॥ ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्श
नात् ॥ क्वचिद्रजोगत्रारिष्टताभ्यामेव तद्वधदर्शनाच्च ॥ न चार्त्तस्य रोगिणः अगदमौषधं शरणं ॥ कृतेप्योषधे मृत्युदर्शनात् ॥ न च उदन्वति समु
द्रे मज्जतः प्लवो नौः शरणं ॥ तया सह मज्जनदर्शनात् ॥ अतस्त्वमेव शरणमित्यर्थः ॥ अथ चैवं काका व्याख्येयं ॥ तप्तस्य तत्प्रतिविधिर्य इह ता
वत्प्रसिद्धः ॥ यत्वदुपेक्षितानां किमजसेष्टः अपि तु नेष्ट एव ॥ यद्वा यस्तावदिह प्रतिविधिरिष्टः स किमंजसानेवाजसेत्यादि योज्यं ॥ बालस्ये
त्यादि पूर्ववदेव ॥

नन्वन्वितकृतश्चित्केनचित्कदाचित्कश्चिद्रूको ऽपि दृश्यते एवं त्वाशंक्यातत्रापि तद्रूपेण त्वमेव रूकदृस्यरीकृत्य तस्यैव सर्वात्मतामाह यस्मिन्निति
अपरोवीचीनः पित्रादिः परो ब्रह्मादिर्वी भावः कर्त्ता तत्र त्वां रेकैर्ष्यद्यत्करोति तत्सर्वं भवत एव स्वरूपं न तु पृथक् ॥ यस्मिन्निति अधिकरणे ॥ यतो निमित्तात्
यर्हि यस्मिन्काले ॥ येन कारणेन ॥ येन हेतुकर्त्रा प्रेरितश्च ॥ यस्य संबंधि ॥ यस्मादपादानात् ॥ यस्मै संप्रदानाय ॥ यदीप्सिततमं ॥ यः कर्त्तैत्येव सप्तविभक्त्यर्थाः
यथा येन प्रकारेणेति क्रियाविशेषणाभूतानामव्ययानामर्थः पृथक् स्वभावः सत्वादिप्रकृतिः करोति उत्पादयति ॥ विकरोति रूपांतरं नयतीति १० ॥ स्व
तोऽन्यस्य रक्षकस्याभावात्संसारित्वाद्यनित्यमुक्तस्त्वमेव शरणागतं रक्षेति प्रार्थयते मायेति द्वाभ्यां ॥ त्वदंशस्य पुंसोऽनुमतेन ईक्षणानुरूपेण अनुग्रहेण माय

यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा ॥ भावः करोति विकरोति पृथक्स्वभावः संचोदितस्तदखिलं
भवतः स्वरूपं ॥ १० ॥ मायामनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः ॥ छंदोमयं यदजयार्पितषोडशारं संसा
रचक्रमज कोऽतितरेत्त्वदन्यः ॥ ११ ॥ सत्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः ॥ चक्रे विसृष्ट
मजयेश्वर षोडशारे निःपीड्यमानमुपकर्ष विभो प्रपन्नं ॥ १२ ॥

नः प्रधानं ॥ लिंगं माया सृजति कथंभूता ॥ कालेन चोदिताः क्षोभिता गुणा यस्याः कथंभूतं मनः कर्ममयं कार्यरूपं ॥ बलीयः दुर्जयं ॥ छंदोमयं वेदोक्तकर्मप्रधा
नं च ॥ अजया जीवस्याविद्यया तद्भोगार्थमर्पिताः षोडशारा अरा विकारा यस्मिन् ॥ यदेवंभूतं संसारचक्रात्मकं मनः तत्कोऽतितरेत् ॥ भो अज त्वदन्यः त्वत्तः पृथक्
स्थितः त्वामभजन्नित्यर्थः ॥ ११ ॥ ननु ममापि मायासंबंधात्कर्तृत्वाद्यविशेषाद्भवत्तः को विशेष इत्यत आह स इति ॥ स्वधाम्ना चिच्छक्त्या नित्यविजिता आत्मनो
द्गुणा येन स हि त्वं ॥ यतः कालः सर्वप्रेरकः अत एव वशीकृता विसृज्यानां कार्याणां साधनानां च शक्तयो येन ॥ अतः इक्षुदंडवन्निःपीड्यमानं मामुपक

विसर्गी १

॥ भागवतटीका ॥

भा॰ स
२२

ननुलोकपालानांभोगान्भुंक्ष्वपित्र्यंवाराज्यमभिरक्षस्वामिकिमितिसंसारादुद्विजसेतत्राहदृष्टाइतित्रिभिः श्रियःसंपदः ॥ विभवउद्भवः ॥ आयुरायुष्यं
दृष्टाइतिकाक्वाउत्त्प्रेक्षा ॥ तदेवाह ॥ येस्मत्पितृः कोपहासविकृतभ्रूभंगमात्रेणविध्वस्ताः सद्यस्त्वयानिरस्ताः ॥ १२ ॥ यस्मादेवंतस्मात्तत्राशिषः
भोगान्नत्वः ॥ तत्परिपाकंविद्वान्अहं ॥ ऐंद्रियंइंद्रियभोग्यवस्तुयोगभममपिव्याप्यकिमपिनेच्छामि ॥ तेकालात्मनाऊरुविक्रमेणविलुलितान्

दृष्टामयाद्रिविविधोखिलधिष्ण्यपानामायुःश्रियोविभवसंस्तुतियाःसुजनोयं ॥ येस्मत्पितृःकुपितहासविजृंभितभ्रूवि
स्फूर्जितेनदलिताःसहतेनिरस्ताः ॥ १३ ॥ तस्मात्मृत्तेअद्भुतामहहमामहाशिषोज्ञआयुःश्रियंविभवमैंद्रियमाविरिंच्या
त ॥ नेच्छामितेविलुलितानुरुविक्रमेणकालात्मनोपनयमांनिजभृत्यपार्श्वं ॥ १४ ॥ कुत्राशिषःश्रुतिसुखान्मृगतृष्णिरूपाःक्वे
दंकलेवरमशेषरुजांविरोहः ॥ निर्विद्यतेनतुजनोयदपीतिविद्वान्कामानलंमधुलवैःशमयन्दुरापैः ॥ १५ ॥

विध्वस्तानाशितमारीनपि ॥ १४ ॥ किंच ॥ वर्त्तमानकालेपिनभोगार्हाइत्याहकुत्रेति ॥ श्रुतिःश्रवणंतदेवसुखंयासांताः मृगतृष्णिकावन्मिथ्याभूताआशा
शिषःक्व ॥ अशेषाणांरुजांरोगाणांविरोहःउद्भवस्थानंक्वचेदंकलेवरं ॥ एवंचेत्सर्वोपिजनःकिंनविरज्यते ॥ तत्राह ॥ यद्यपियद्यपिइतिएवंविद्वान् राम
नयंजनस्तथापिननिर्विद्यतेविरक्तोनभवति ॥ कुतः कामएवानलः तंमधुलवैःसुखलवैःदुःसाध्यैरपिशमयन् ॥ कामाग्निशमनव्यग्रस्यनिर्वेद
स्यावकाशोनास्तीत्यर्थः यद्वा ॥ अचिंत्यमिदंत्वन्मायाचेष्टितमितिभावः ॥ १५ ॥

२२
३२

तर्हि त्वं कथं निर्विण्णोसि ॥ अनर्हेपि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाह द्वेति ॥ रजसैव प्रभवो जन्म यस्य सः ॥ सन्नमयं तं वा कलविशेषणं ॥ नमोधिकं
यस्मिंस्तस्मिन्ब्रह्मणोद्विकलेजातोऽहं द्व्या ॥ कथं तवानुकंपा ॥ तामेवाह ॥ ब्रह्मादीनां शिरसि धीनैवार्पितः ॥ स एष त्वत्सकलशान्तापहरः करः प्रसादः
पुरुषार्थरूपो मे शिरस्यर्पितः इति ॥ यत् ॥ यत्परयाऽनुकंपयेति वा ॥ १६ ॥ नव तत्परःधर्मतिविचित्रमित्याह नैषेति ॥ एते ब्रह्मादयस्तु तत्सम्यगनुग्रहणेनावइत्ये
षां परावरमतिः जंतोः प्राकृतस्य यथा तथा भवतो नैव स्यात् ॥ अत्र हेतुः ॥ जगतश्चात्मनः सुहृदस्त्व ॥ तर्हि सर्वत्र समत्वसमाधेः एकरूपस्त्वं किं न स्यात्
तत्राह ॥ संसेवया तव प्रसादो भवति ॥ तत्र च सेवानुरूपं तत्तदिच्छानुसारेण धर्मादीनामुदयो भवति ॥ एवं सत्यपि वैषम्याभावे दृष्टांतः सुरतरुरिव यथा

काहं रजःप्रभव ईश तमोऽधिकेस्मिन्जातः सुरेतरकुले क्व तवानुकंपा ॥ न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेर्पितः शि
रसि पद्मकरः प्रसादः ॥ नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथाऽऽत्मसुहृदो जगतस्तथापि ॥ संसेवया सुरतरोरिव ते प्रसा
दः सेवानुरूपमुदयो न परावरत्वं ॥ १७ ॥ एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसंगात् ॥ कृत्वात्म
सात्सुरर्षिणा भगवन्गृहीतः सोऽहं कथं नु विसृजे तव भृत्य[illegible]सेवां ॥ १८ ॥

सेवकस्यैव संकल्पानुसारेण फलं ददाति न च विषमस्तद्वत्
न परावरत्वं अत्र कारणमिति शेषः ॥ १७ ॥ एतच्च त्वदनुकंपया मया प्राप्तमिति वदत्यपार्थिवमेवमानं येत्याशयेनाह एवमिति ॥ यथा त्वयानुकंपितोस्मि
एवं नारदेनात्मसात्कृत्वा पूर्वमनुगृहीतः ॥ सोऽहं कथं तु त्वद्भृत्यसेवां विसृजामि ॥ कथंभूतोऽनुगृहीतोस्मि ॥ प्रभव एवाहिरूपः कूपस्तस्मिन्कामानभि
तः कामयमानं जनं निपतितमनु तत्प्रसंगात्प्रपतन्योऽहं ॥ तं एवं त्वद्भृत्यस्य श्रीनारदस्यानुग्रहेण त्वयात्यंतमनुकंपितोऽस्मि ॥ अपि च च परमोऽनुग्रहः
न पुनरिदमतितुच्छमस्त्राणारक्षणादि ॥ १८ ॥

न चेदं त्वया मदनुग्रहार्थं किं त्वन्यार्थमित्याह ॥ सोऽहमनंतपदे तत्मत्प्राणरक्षणं मां हन्तुमुद्यतस्य मत्पितुर्वधश्च तदुभयं स्वभृत्यस्य ऋषिवाक्यमृतं विधातुमि
त्यहं मन्ये ॥ कुतः यद्यस्मात् असत् अयुक्तं विधित्सुः खड्गं प्रगृह्य यो वोचत ॥ किमवदत् मदपरो मदतिरिक्तश्चेदीश्वरोऽस्ति तर्हि त्वामितो (?) नीयेत (?) तव कं शिरो हं
हरामीति पाठांतरे ऽप्ययमेवार्थः यद्यदास्यवोचत ॥ तदा मत्प्राणरक्षणमिति वाक्ययः एतच्च मत्ययं विधातुं निजभृत्यभाषितमित्यपेक्षया व्याख्यातं
॥ १९ ॥ न चेदं पक्षपातेन रक्षणं दैत्यहननं च त्वयि संभावितं ॥ कुतः मायागुणोपाधिकं सर्वात्मके त्वयि तदसंयोगादित्याह ॥ एक इति ॥ एतच्च जग

मत्प्राणरक्षणमनंत पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं । खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वा
मीश्वरो मदपरोऽवतु कं हरामि ॥ १९ ॥ एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्यसि मध्यतश्च ॥
सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥ २० ॥

त्त्वमेवैकः यद्यतः अमुष्यासांते च पृथगवस्यसि विरामं करोषि ॥ तन्मात्रतया कारणत्वेनावधित्वेन च वर्तसे इत्यर्थः ॥ अतो मध्यतश्च त्वमेव ॥ कुत
स्तर्हि भेदप्रतीतिस्तत्राह ॥ निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेवावस्थितो दृष्टः ॥ हेतेवच्च ॥ अवसितः
प्रतीतः ॥ तदुक्तं बोधोपक्रमे ॥ निर्गुणोपि ह्यजोऽव्यक्तो भगवान्प्रकृतेः परः ॥ स्वमायागुणमाविश्य बाध्यबाधकतां गत इत्यादिना ॥ २० ॥

ननुप्रद्योतज्जगद्दृश्यमेव । तर्हिजगतोवैषम्येणममवैषम्यमपिकिंनस्यादित्यतआह । त्वंवैत्वमेवइदंसदसत्कार्यकारणात्मकंजगत् । नतुत्वत्तःपृथक्
भूतंवाक्तततोन्यः । आद्यंतयोःपृथगवस्थानात् । यतःयस्मादेवंअतोयमात्मायोयंपरइतियाबुद्धिःसाअपार्थामायैव । कार्यकारणभेदंदृष्टांतेन
साधयति । यद्यतःयस्यजन्म । ईक्षणंप्रकाशश्च । यस्मिन्निधनंच । स्थितिश्च । तद्वैतदेव । अष्टिर्बीजंकारणं । तरुःकार्यंतयोर्यथावसुकालमात्रत्वं
अयमर्थः । कालशब्देननीलत्वमाधाररूपगुणयोगात्पृथ्वी । वसुशब्देनवसुमात्रंभूतसूक्ष्मं । तत्रतरोर्यथापृथ्वीमयबीजमात्रत्वं । तस्यचयथाभू
तसूक्ष्ममात्रत्वं । एवंसर्वमपिकार्यकारणात्मकंजगत्परमकारणात्मकमेवेति । तथाचपारमर्षंसूत्रं । तदनन्यत्वमारंभणशब्दादिभ्यइति । श्रुतिश्च

त्वंवाइदंसदसदीशभवांस्ततोन्योमायायदात्मपरबुद्धिरियंह्यपार्था । यद्यस्यजन्मनिधनंस्थितिरीक्षणंचतद्वैतदेववसु
कालवदष्टितर्वोः ॥३१॥ न्यस्येदमात्मनिजगद्विलयांबुमध्येशेषेत्मनानिजसुखानुभवोनिरीहः । योगेनमीलितदृगात्मनि
पीतनिद्रस्तुर्येस्थितोनतुतमोनगुणांश्चयुंक्षे ॥३२॥

वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमिति ॥३१॥ ननुतावदंतेपृथगवस्थानं
दर्शयतिन्यस्येति । इदंजगत्आत्मनाआत्मन्येवात्मनिनिक्षिप्यसुखमेवानुभवन्निष्क्रियःसन्प्रलयोदकमध्येशयनंकरोषि । तर्हिकिंजीवस्येवम
मापितमोवृत्तिरूपानिद्रास्ति । नहिनहि । योगएवतत्रबहिर्दृत्यभावमाप्यानिद्रोच्यतइत्याह । योगेनमीलितेदृशौयेन । आत्मनास्वरूपप्रकाशेन
निपीतानिनिद्रायेन । यतस्तुर्येअवस्थात्रयातिरिक्तेस्वस्वरूपेस्थितस्त्वं । नतुतमःस्वप्नइवात्मनोतमोयुंक्षेनयोजयसिनपश्यसि । नजाग्रत्स्वप्नयोरिवगुणान्
विषयानित्यर्थः ॥३२॥

इदानीं कारणत्वेनादावपि पृथगवस्थानं दर्शयन्नध्यात्मस्वरूपमेवेत्येतत्प्रपंचयति चतुर्भिः ॥ यत्त्वमशेषः तस्यैव ते इदं जगत् वपुः स्वरूपं नान्यस्
यत्त्वमध्यतोऽपि तस्य ॥ कथंभूतस्य ॥ निजया कालशक्त्या संचोदिताः प्रकृतेर्धर्माः सत्वादयो येन स्वरूपत्वे हेतुः ॥ अनंतशयनात् शेषपर्यंका
त् विरमत् समाधिर्यस्य तस्य तव नाभेः ॥ सकाशात् एकार्णवोदके महाब्जं लोकपद्मं अभूत् ॥ कथंभूतं आत्मनि तिष्ठेव गूढं सत् ॥ स्वकणिकातः
सूक्ष्मात् वटबीजात् महावट इव ॥ ३३ ॥ तदेवं कारणत्वेनानुगतः सन्नध्यात्मस्वरूपमेव वर्त्तसे इत्याह एतदेव शुद्धसत्वस्य ब्रह्मणोऽनुभवेन स्फु

तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढं ॥ अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेः भूत्स्व
कणिकावटवन्महाब्जं ॥ ३३ ॥ तत्संभवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिंत्य ॥ नाविंददब्द
शतमप्सु निमज्जमानो जातेऽङ्कुरे कथमुहोपलभेत बीजं ॥ ३४ ॥ स त्वात्मयोनिरतिविस्मित आश्रितोऽब्जं कालेन तीव्र
तपसा परिशुद्धभावः ॥ त्वामात्मनीश भुवि गंधमिवातिसूक्ष्मं भूतेंद्रियाशयमये विततं ददर्श ॥ ३५ ॥

हृयितं तस्य प्राक्तनीमवस्थामाह ॥ तत्संभव इति ॥ तस्मिन्नब्जे संभवो यस्य सः कविर्ब्रह्मा ॥ अतः पद्मादन्यदपश्यन् ॥ बीजं उपादानकारणभूतं त्वां स्वस्मिन् ॥
त्यान्तस्तेनापि नाविंदत ॥ पुनश्चैतत् ॥ उह अहो अङ्कुरे जाते सति बीजं तदनुगतं कारणं एषु कथं नाम मज्जमानः पश्येत ॥ ३४ ॥ भवदुपास
नया तद्विस्मितेन व दृष्टवानित्याह स त्विति ॥ पद्मत्यागमाश्रितः सन् तीव्रेण तपसा ध्यानेन ॥ ३५ ॥

अनेन सन्मात्ररूपेणोपादानतया दर्शनमुक्तं । ईश्वरत्वेन च दृष्ट्या कृतार्थो ऽभवादित्याह । एवं अनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादी
नि तैः आढ्यं समृद्धं । मायामयं मायाप्रधानं । सताप्रपंचेनोपलक्षितः सन्निवेशः पादादिरचना यस्य ॥ ३६ ॥ तदा भवानस्यानुग्रहं कृतवानित्याह
तस्मा इति । हयग्रीवमूर्त्तिं बिभ्रत्स्मन् रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान्समर्पितवान् । तत्र हेतुः सत्वमिति ॥ ३७ ॥ एवमन्यमेव त्वा

एवं सहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यं । मायामयं सदुपलक्षितसन्निवेशं दृष्ट्वा महापुरु
षमापमुदं विरिंचः ॥ ३६ ॥ तस्मै भवान्हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ । हत्वानयच्छ्रुति
गणांश्च रजस्तमश्च सत्वं तव प्रियतमां तनुमामनंति ॥ ३७ ॥ इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि
जगत्प्रतीपान् । धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोथ स त्वं ॥ ३८ ॥ नैतन्मनस्तव कथासु
विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रं । कामातुरं हर्षशोकभयैषणार्त्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ॥ ३९ ॥

रिमिरष्टभिः श्लोकैर्यदुक्तं पक्षपातेन रक्षणं तद्विपक्षवधश्च । सत्वोपाधिको न तत्स्वतः इति उपसंहरति इत्थमिति । विभावयसि पालयसि । हंसि घातयसि
कलौ तु तन्न करोषि । यतस्तदा त्वं छन्नो ऽभवः । यतः त्रिष्वपि युगेष्वाविर्भावात्स एवंभूतस्त्वं त्रियुग इति प्रसिद्धः ॥ ३८ ॥ तदेवं भगवतस्तत्त्वं निरूप्य स्वस्य
तद्विचारायोग्यतां निवेदयन्प्रार्थयते नैतदिति त्रिभिः । असाधु बहिर्मुखं । तीव्रं दुर्दमं । हर्षशोकभयैषणात्रयेणार्त्तं दुःखितमपि त्वत्कथासु न संप्रीयते
तस्मिन्नेवंभूते मनसि सति कथं तव तत्त्वं विचारयामि ॥ ३९ ॥

भा०स
३६

किंच जिह्वाऽवितृप्ता सती भोऽच्युत मां मां यतो मधुरादिरसस्तत्राकर्षति उदरं तु क्षुधार्तं सदन्नमयमेव यत्किंचिदाहारमात्रं प्रति चपला दृक्क्व च क्वः
कर्मशक्तिः कर्मेंद्रियाणि लुनंति त्रोटयंति ४० न केवलमहमेक एव एवं कष्टं शरणापन्नः किंतु महाजनोऽप्येवमेव क्लिश्यति अतः सर्वजनं
पालयेति प्रार्थयते एवमिति भवः संसार एव वैतरणी यमद्वारनदी तस्यां अन्योन्यतो या निजजन्मारीनिते भीतभीतं द्विषां परेषां च विग्रहे यथायथं
वैरं मैत्रं च यस्य एवंभूतं जनं पश्यन् त्वं हे पारचर तस्याः पारे स्थित नित्यमुक्त हंतेति अहो कष्टमित्येवमनुकंप्य अद्यापीह हि वैतरणीमुत्तीर्य पालय ४१

जिह्वैकतोऽच्युतविकर्षति मावितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः
सपत्न्य इव गेहपतिं लुनंति ४० एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतं पश्यन्जनं स्वपरविग्र
हवैरमैत्रं हंतेति पारचरपीपृहि मूढमद्य ४१ को न्वत्र तेऽखिलगुरो भगवन्प्रयासभवसंभवलोपहेतोः मूढेषु वै महदनुग्रह आर्त
बंधो किं तेन ते प्रियजनाननुसेवतां नः ४२

एकेन मया कथं सर्वो जनस्तारणीय इति चेत्तत्राह को न्विति को नु ते अत्र सर्वजनोत्तारणे प्रयासः न कोपि कुतः अस्य विश्वस्य भवसंभवलोपा
नां उत्पत्तिस्थितिसंहाराणां हेतोः ततोपि किमेतत् दुष्करमिति भावः उचितं चैतदित्याह मूढेष्विति त्वां च त्वदीयांस्तारयिष्यामि इमं मद्दुराग्रहं मा
कृथा इति चेत्तत्राह तव ये प्रियजना भक्ताः ताननुसेवमानानां नोऽस्माकं तेनोत्तारणेन किं कोऽतिशयः अस्मो हरिबालकाः हे को न्वत्र ते
ऽखिलगुरो भगवन्प्रयासः षड्कारस्त्वयमुपमन्युमिश्रोनाणामीशेन सत्वमकारि रमणीयमाद्यां ४२ ॥ ॥ ॥ ॥ ॥ ॥

राम
३६

वत्सप्रह्लाद त्वां तारयिष्यामि तावतैव कृतार्थः स्याः किमनेन निर्बंधेनेत्यत आह नैवेति हे पर सर्वोत्तम त्वद्वीर्यगायनमेव महामृतं तस्मिन्
मग्नं चित्तं यस्य सोहं भववैतरण्याः नैवोद्विजे किंतु विमूढान् शोचामि तानेवाह ततो महामृताद्विमुखं चेतो येषां अतस्तं इंद्रियार्थनिमित्तं यन्माया
सुखं तदर्थं भारं कुटुंबादिभारमुद्वहतः ४२ त्वं तावद्भक्तिं गृहाण तांस्तु न त्वं तांस्तु न य उपदेक्ष्यंतीति चेन्नत्राह प्रायेणेति न विमुक्ते विमुक्तिं नेच्छामि
तर्ह्येन्यकमपि प्रार्थयमानमेव किमिति निबध्नासीति चेत्तत्राह त्वत्तोस्य मस्य जनस्य शरणं न पश्यामि ४४ नन्वेते ह्यां संभोगादिना सुखिन एव

नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः शोचे ततो विमुखचेतस इंद्रियार्थमायासुखाय भर
मुद्वहतो विमूढान् ४२ प्रायेण देवमुनयः स्वविमुक्तिकामा मौनं चरंति विजने न परार्थनिष्ठाः नैतान्विहाय कृप
णान्विमुमुक्षुरेको नान्यं त्वदस्य शरणं भ्रमतोनुपश्ये ४५ यन्मैथुनादिगृहमेधिसुखं हि तुच्छं कंडूयनेन करयो
रिव दुःखदुःखं तृप्यंति नेह कृपणा बहुदुःखभाजः कंडूतिवन्मनसिजं विषहेत धीरः ४५

कृपणाः तत्राह यदिति करयोः कंडूयनेन संघर्षणेनेव दुःखं यस्मिन् तर्हि दुःखत्वादेव ततो निर्वेदश्च स्यादित्यत आह कृपणाः कामुकाः
बहुदुःखभाजोपि गृहमेधिसुखेन न तृप्यंति किंतु अलमिति मन्यंते कंडूतिवत्कामोपि दुःसहत्वात् ननु केचित्कंडूतिमपि सहंते कामं चेत्तत्राह
त्वत्प्रसादात्कश्चिद्धीर एवं मनसिजं काममविषहेत सर्वे अत्रापि कंडूतिवादिति दृष्टांतः ४५

भा॰स॰
३१

ननु मौनादिभिर्मोक्षसाधनैः सुलभैव तेषामपि मुक्तिः तत्राह मौनेति हे पुरुष अंतर्यामिन् यमौनादयो दश आपवर्ग्या हेतवः प्रसिद्धाः रहः विविक्तवा
सः तेन प्रायशः अजितेंद्रियाणां इंद्रियभोगाय अर्थार्थं विक्रीणानां वार्त्ताः जीवनोपाया भवंति दांभिकानां वार्त्ता अपि भवंति वा न वा दंभस्यानियतफ
लत्वात् ४६ ननु तर्हि ज्ञानं तद्भक्तिं विना मुक्तौ मौनादिभिर्न भवत्येवेत्याह रूपे इति द्वाभ्यां बीजांकुरौ इव प्रवाहापन्ने सदसती कार्यकारणे एव ते रूपे
उपलक्षणभूते वेदेन सृष्टे प्रकाशिते न चान्यत् स्वतः एवं तं गौरत्वादिवाभिवेदेवदन्नादेः अरूपकस्य साक्षात् तद्रूपादि अरूपस्य अतः युक्ताः संयताः एवं

मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः प्रायः परं पुरुष ते त्वजितेंद्रियाणां वार्त्ता भवं
त्युत न वात्र तु दांभिकानां ४६ रूपे इमे सदसती तव वेदसृष्टे बीजांकुराविव न चान्यदरूपकस्य युक्ताः समक्षमुभ
यत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ४७ त्वं वायुरग्निरवनिर्वियदंबुमात्राः प्राणेंद्रियाणि हृदयं चिद
नुग्रहश्च सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तं ४८

भक्तियोगेन युक्ताः त्वां उभयत्र कार्यकारणयोः अनुगतं पश्यंति मथनेन दारुषु वह्निमिव नान्यतः स्यात् ज्ञानमिति शेषः यद्वा ज्ञानप्रकारमेवाह एतदुभय
मप्यन्यतः प्रमाणात् तर्केण न स्यात् स एव हेतुस्त्वादिश्रुतेः अतः त्वमेव कारणत्वात् सर्वत्रानुस्यूत इति ४७ तदेवाह त्वं वायुरिति हृदयं मनः चि
त्तं चित् अनुग्रहः अहंकारः देवतावर्गो वा सगुणः स्थूलः विगुणः सूक्ष्मः मनसा वचसा च मनोवचसः तेन निरुक्तं प्रकाशितं किमपि त्वत्तोऽन्यन्नास्ति ४८ ३२

ऽपक्वात्मत्वाल्लिङ्गत्वगतामपि त्वां न जानंतीत्याह नैतेति ॥ नैते गुणाद्याः प्राणिनो देवाः आद्यंतवंतः जडोपाधित्वात् ॥ अनाद्यंतं निरुपाधिं त्वां न विंदंति ॥ हि यस्मात् सुधियो विद्वांसः एवं विचार्य शब्दात् अध्ययनादिव्यापारादुपरमंति ॥ त्वामेव समाधिनोपासत इत्यर्थः ॥ तथा च श्रुतिः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे इति ॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति च ॥ स्मृतिश्च ॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेत्यादि ॥ ४९ ॥ उपसंहरति तदिति ॥ हे अर्हत्तम ॥ नमः स्तुतिकर्मपूजाः प्रणाम स्तुति सर्व

नैते गुणा न गुणिनो महदादयो ये सर्वे मनः प्रभृतयः सहदेवमर्त्याः ॥ आद्यंतवंत उरुगाय विदंति हि त्वामेवं विमृश्य सुधियो विरमंति शब्दात् ॥ ४९ ॥ तत्तेऽर्हत्तम नमः स्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायां ॥ संसेवया त्वयि विनेति षडंगया किं भक्तिं जनः परमहंसगतौ लभेत ॥ ५० ॥ नारद उवाच ॥ एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ॥ प्रह्रादं प्रणतो प्रीतो यतमन्युरभाषत ॥ ५१ ॥ श्रीभगवानुवाच ॥ प्रह्राद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम ॥ वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणां ॥ ५२ ॥ मामप्रीणत आयुष्मन्दर्शनं दुर्लभं हि मे ॥ दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति ॥ ५३ ॥

कर्मार्पणानि कर्म च परिचर्या ॥ चरणयोः स्मृतिश्च ॥ कथायाः श्रवणं चेत्येवं षडंगया संसक्तेव या विना परमहंसानां गतौ प्राप्ये त्वयि जनः कथं भक्तिं लभेत ॥ यस्मादेवं भक्तिं विना न मोक्षः न च भक्तिः संसेवया विना ॥ अतः प्राक्प्रार्थितं दासयोगमेव देहीति प्रकरणार्थः ॥ ५० ॥ एतावता वर्णिता गुणा यस्य ॥ यतमन्युः उपसंहृतकोपः ॥ ५१ ॥ कामान्पूरयतीति तथा ॥ यद्वा उरुषार्थप्रवाहोऽस्मीत्यर्थः ॥ ५२ ॥ अप्रीणतः तज्ञ्ज अपूर्णकामस्य त्वं नरोऽविंदं ५३ ॥

प्रीणातीति तोषयति ५५ एकांतित्वात् निरुपाधिभक्तत्वात् ५५ इति सप्तमे नवमः दशमे तु गृह्यात्तु भक्तमतर्हिते गुरौ प्रसंगाद्धरिणा ह्येक-
नोऽन्तु ग्रहं ह्दयते तत्सर्वं वरजातं १ उत्पत्त्या स्वभावेनैव सक्तमाते षां कामानां संगाद्भीतः १ न तु किमहं भक्तं प्रलोभयामि नहि किं त्वं रक्ष-
णीष्वेति वदंतं त्वं वा अभिप्रायोऽन्य एवेत्याह भृत्यलक्षणेति हृदयस्य ग्रंथिवद्बंधकेषु अन्यथा अनर्थसाधने प्रवर्त्तनं न घटेते त्यर्थः २ कथमेवं

प्रीणाति ह्यथ मां धीराः सर्वभावेन साधवः श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिं ५५ एवं प्रलोभ्यमानोऽपि वरैर्लोकप्र-
लोभनैः एकांतित्वाद्भगवति नैच्छत्तानसुरोत्तमः ५५ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते भगवत्स्तवो
नाम नवमोऽध्यायः ९ नारद उवाच भक्तियोगस्य तत्सर्वमंतरायतयार्भकः मन्यमानो हृषीकेशं स्मयमान उवाच ह १ प्रह्राद
उवाच मा मां प्रलोभयोत्पत्त्या सक्तं कामेषु तैर्वरैः तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः २ भृत्यलक्षणजिज्ञासुर्भक्तं कामे-
ष्वचोदयत् भवान्संसारबीजेषु हृदयग्रंथिषु प्रभुः नान्यथा तेऽखिलगुरो घटेत करुणात्मनः ३ यस्त आशिष आशास्ते न स भृत्यः
स वै वणिक् आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः ४ अहं त्वकामस्त्वद्भक्त-
स्त्वं च स्वाम्यनपाश्रयः नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ५

भृत्यलक्षणं ज्ञातुं मां तत्र हयस इति तेन त्वं नः न तु कामनयाऽपि
सेव्यसेवकयोः स्वामिभृत्यभावः प्रसिद्धः स तु सोपाधिको मे न तु तात्त्विक इत्याह स्वामिनात्मनः आशिषोऽपेक्षमाणो नैव भृत्यः भृत्यहेतवे
मात्मनः स्वाम्यमिच्छन् यो भृत्याय ददाति स च नैव स्वामी ४ आवयोस्तु तात्त्विकः संबन्धोऽस्तीत्याह अहं त्विति अनपाश्रयो निरभिसंधिः अन्यथा कामा

न तु तथापि परमोदारस्य मम मत्तोभीष्टं किमपि वृणीष्वेति चेदत आह यदीति ॥ कामानामकरणमसंरोहमत उत्पत्तिं भवतः सकाशात् ॥ ८ ॥
न तु कामोत्पत्तौ को दोषस्तत्राह इंद्रियाणीति यस्य जन्मना नश्यंतीति ॥ आत्मा देहः ॥ ९ ॥ कामाभावे गुणमाह विमुंचतीति ॥ भगव
त्वाय तत्समानैश्वर्याय ॥ तथा च श्रुतिः यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥ १० ॥ निरी

यदि रासीश मे कामान्वरांस्त्वं वरदर्षभ ॥ कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ॥ ८ ॥ इंद्रियाणि मनः प्राण आत्मा
धर्मो धृतिर्मतिः ॥ ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ॥ ९ ॥ विमुंचति यदा कामान्मानवो मनसि स्थिता
न्तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते ॥ १० ॥ ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने ॥ हरयेऽद्भुतसिंहाय ब्रह्मणे प
हाशिर रमात्मने ॥ ११ ॥ नृसिंह उवाच ॥ नैकांतिनो मे मयि जात्विहाशिषः आशासतेऽमुत्र च ये भवद्विधाः ॥ अथापि मन्वंतरमेतदत्र दै
त्येश्वराणामनुभुंक्ष्व भोगान् ॥ १२ ॥ कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि संतमेकं ॥ सर्वेषु भूतेष्वधियज्ञमीशं
यजस्व योगेन च कर्म हिन्वन् ॥

षान्कामान्नरात्मनि स्थितं तत्प्रत्याख्यास्यन्नमस्यति ॐ नम इति ॥ ११ ॥ सत्यमेकांतभक्तस्त्वं तथापि मत्प्रसा
दात्कं रणीयमित्याह नैतीति ॥ ये एकांतिनः कदाचिदपि इहामुत्र च मत्त आशिषो न वांछंत्येव ॥ तथापि एतन्मन्वंतरमात्रं भोगाननुभुंक्ष्व ॥ १२ ॥ न तु तर्हि बं
धः स्यादित्यत आह कथा इति द्वाभ्यां ॥ सर्वेषु भूतेषु संतमेकं मामीशं ॥ यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व तात्पर्ये नैवं कर्मणा बंधः स्यात् ॥ नेत्याह

नां तानमपदमणि मकामैहृदे वेदनटकमदज दैवेज ॥

किंच भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा मुक्तबंधः सन् लोकानुग्रहार्थं कीर्तिं च विस्तार्य मां प्राप्स्यसि ॥ कुशलेन पुण्याचरणेन पापं हित्वेति वि
विभीषामात्रं ॥ अन्यथा तस्य राज्यप्रवृत्तेः ॥ नतु तस्य प्राचीनं पापमस्ति ॥ तदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति न्यायात् ॥ तत्सुकृत
दुःकृते विधुनुत इति श्रुतेश्च ॥ न चेदं प्रारब्धपापाभिप्रायं तस्य भोगेनैव क्षययात् ॥ कुशलेन हि वेति वचनानुपपत्तेः न चाभावविवक्षाऽनिति वाच्यं ॥ भगवद्वै
वक्तृतार्थत्वस्यानंतरवक्ष्यमाणत्वात् ॥ अत एव योगेन कर्म हि विद्धि नीतीरमपि लोकसंग्रहार्थं कर्माणि प्रवर्तितस्यानुद्वेगमात्राय एतत्सर्वमनवद्यं ॥१२॥

भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ॥ कीर्तिं विशुद्धां सुरलोकगीतां वितायमामेष्यसि मुक्तबंधः ॥१२॥ य एतत्कीर्त
येन्मह्यं त्वया गीतमिदं नरः ॥ त्वां च मां च स्मरन् काले कर्मबंधाद्विमुच्यते ॥१३॥ प्रह्लाद उवाच ॥ वरं वरय एतत्ते वरदेशान्महेश्वर ॥ यदनि
न्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरं ॥१४॥ विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुं ॥ भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् ॥१५॥
तस्मात्पिता मे पूयेत दुरंताद्दुस्तरादघात् ॥ पूतस्तेऽपांगसंदृष्टस्तदा कृपणवत्सल ॥१६॥ श्रीभगवानुवाच ॥ त्रिःसप्तभिः पिता पूतः पि
तृभिः सह तेऽनघ ॥ यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः ॥१७॥

किंच ॥ य इति ॥ त्वां च मां च स्मरन्निति स्मरन्नेतत्स्तोत्रं यः कीर्तयेत् सोऽपि कर्म
बंधाद्विमुच्यते कुतस्तत्र बंधशंकेत्यर्थः ॥१३॥ ईश्वरात्तातपापकर्माधिकारः सन्नपि निष्कृतिं प्रार्थयते त्रिभिः वरं वराणीयमेतत्परं ऋणेनेत्यन्वयः ॥१४॥ विद्धेति अम
र्षेण क्रोधेन आशयो यस्य ॥१५॥ ते अपांगेन संदृष्टः अतः पूत एव ॥ तथापि भोः कृपणवत्सल कार्थ्यद्यपेन प्रार्थयेयरित्यर्थः ॥१६॥ यद्यपि कृतापोमया विविक्षा
चेतितत्पितृतयाप्येवं पूर्वजाः तथापि त्रिःसप्तभिः सहेति प्राकृतन्यायेन पितृत्वाभिप्रायेणोक्तं ॥१७॥

यद्यस्मात्सम्यगुत्तमस्वाचारास्तेषां ते कीकटास्तुपि देशाः तत्कल्याणं वंशास्त्रपूयन्ते शुद्धा भवन्ति ॥ १८ ॥ न ते त्वद्भक्ता नाम मयप्यमहिंसेति न विचित्रं ॥ अ॒ह तत्तु
देशो न भवाम्यितिचेत् ॥ तत्राह सर्वात्मने तिद्वाभ्यां ॥ मद्भावेन मद्भक्त्या विगता स्पृहा येषां ॥ १९ ॥ त्वामनुगता ये केचित् पुरुषाः तेऽप्येवं लक्षणाः स्व
तो मद्भक्ताः भवन्ति ॥ अतो भवान्मे भक्तानां सर्वेषां प्रतिरूपधृक् उपमानास्पदं श्रेष्ठः खल्वित्यर्थः मदङ्गस्पर्शनेन सर्वशः पूतस्य ते पितुः

यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः ॥ साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः ॥ १८ ॥ सर्वात्मना न हिंसन्ति भूतग्रामेषु किंचन
उच्चावचेषु दैत्येन्द्र मद्भावेन गतस्पृहाः ॥ १९ ॥ भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ॥ भवान्मे खलु भक्तानां सर्वेषां प्रतिरूप
धृक् ॥ २० ॥ कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ॥ मदङ्गस्पर्शनेनाङ्ग लोकान्यास्यति सुप्रजाः ॥ २१ ॥ पित्र्यं च स्थानमातिष्ठ
यथोक्तं ब्रह्मवादिभिः ॥ मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः ॥ २२ ॥ श्रुक उवाच ॥ प्रह्रादोपि तथा चक्रे पितुर्यत्साम्परा
यिकं ॥ यथाह भगवान्राजन्नभिषिक्तो द्विजोत्तमैः ॥ २३ ॥ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिं ॥ स्तुत्वा वाग्भिः पवित्राभिः प्राह देवा
दिभिर्वृतः ॥ २४ ॥ ब्रह्मोवाच ॥ देवदेवाखिलाध्यक्ष भूतभावन पूर्वज ॥ दिष्ट्या ते निहतः पापो लोकसंतापनोऽसुरः ॥ २५ ॥ योसौ लब्ध
वरो मत्तो न वध्यो मम सृष्टिभिः ॥ तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥ २६ ॥ दिष्ट्या सुतनयः साधुर्महाभागवतोऽर्भकः ॥ त्व

पापशंकैव नास्ति ॥ केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु ॥ २१ ॥ वेदवादिभिः हे क्रममनानि क्रम्य या विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना ॥
मत्परः मत्कर्माणि कुरु ॥ २२ ॥ ५ ॥ मम सृष्टिभिर्मया सृष्टैः भूतैः समस्तान्निगमान्धर्मानित्यर्थः अहन् हतवान् सत्वयाहतः ॥ २६ ॥ एतद्

भा॰ स सर्वतः संत्रासात् गोप्तर इत्यर्थः ॥ १८ ॥ एवं वरात्मप्रधानप्रदेयः क्रूरो निसर्गः स्वभावो येषां श्रुतं हीन ॥ १९ ॥ २१ ॥ शिशुपालदंतवक्त्रयोर्द्वेषतोः श्रीकृष्ण
५॰ सायुज्यं कथमिति यत्पृष्टं तदेव तयोः पूर्वजन्मकथनाद्विनिहृपपादितं तदुपसंहरति एवमिति सप्तभिः इतेः पुत्रत्वं प्रापितौ विप्रशापेनोत्तमेत्य

एतदुक्त्वा भगवन् ध्यायतः प्रपन्नात्मनः ॥ सर्वतो गोप्तृसंत्रासान्मृत्योरपि जिघांसतः ॥ १८ ॥ न सिंहवा च मेवं वरो । हु ए ए ए ते
प्रदेयः पयसे भव ॥ वरः क्रूरनिसर्गाणां महीनाम मृतेयथा ॥ १९ ॥ ना २३ वा च ॥ इत्युक्त्वा भगवान्राजंस्तत्रैवान्तर्दधे हरिः ॥
सुदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ २० ॥ ततः संपूज्य गिरिशं प्रणम्य च परमेष्ठिनं ॥ भवं प्रजापतीन्देवान्प्रजापतिर्भगव
त्कलाः ॥ २१ ॥ ततेः काव्यादिभिः सार्द्धं मुनिभिः कमलासनः ॥ दैत्यानां दानवानां च प्रजापतिमकल्पयत् ॥ २२ ॥ प्रतिनंद्य तत
तो देवाः प्रयुज्य परमाशिषः ॥ स्वधामानि ययू राजन् ब्रह्माद्याः प्रतिपूजिताः ॥ २३ ॥ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दि
तेः ॥ हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ २४ ॥ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः ॥ कुंभकर्णदशग्रीवौ हतौ तौ रामवि
क्रमैः ॥ २५ ॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ॥ तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ २६ ॥ ताविहाथ पुनर्जातौ शि
शुपालकरूषजौ ॥ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः ॥ २७ ॥ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः ॥ जहुस्त्वंते तदात्मानः की
टः पेशस्कृतो यथा ॥ २८ ॥ यथा यथा भगवतो भक्त्या परमयाभिदा ॥ नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः ॥ २९ ॥

उपसंगः ॥ २४ ॥ तच्चित्तौ श्रीराममेव चिंतयंतौ ॥ २६ ॥ करूषजो दंतवक्त्रः हरौ सायुज्यं समीयतुः ॥ २७ ॥ कृष्णनिंदादिना पूर्वं कृतं यदेनः पापं तत् ध्यानेन न ते राम
तदात्मानः संतो जहुः तदात्मत्वे दृष्टांतः कीटः पेशस्कृतो ध्यानेन तदात्मानः संतो जहुः यथा तदात्मा भवतीति ॥ अभिदा भेददर्शनशून्यया ॥ हरेः साम्य ५॰

४० अवतारः श्रीनृसिंहरूपस्य कथा आख्याने विशेषः प्रह्लादस्यानुचरितमित्यादेः समाम्नातमिति तृतीयेनान्वयः अह्नोत्पन्नेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वं ४२ अनेन कृतं हरेर्गुणकर्मानुवर्णनं वेत्यर्थः परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः अध्यात्मिकं आत्मानात्मविवेकादि ४४ एतच्छ्रवणादिफलमाह य इति द्वाभ्यां एतत्कृत्वा यः कीर्तयेत ४५ एतत

एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ॥ अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४१ ॥ प्रह्लादस्यानुचरितं महाभागवतस्य च भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४२ ॥ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनं ॥ परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४३ ॥ धर्मो भागवतानां च भगवान्येन गम्यते ॥ आख्यानेऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः ॥ ४४ ॥ य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितं ॥ कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ॥ [struck through] ॥ एतद्य आदिपुरुषस्य मृगेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः पठेत ॥ दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभावमकुतोभयमेति लोकं ॥ ४६ ॥ यूयं नृलोके वत भूरिभागा लोकं पुनाना मुनयोऽभियंति ॥ येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगं ॥ ४७ ॥

एतां मृगेंद्रस्य लीलां ॥ तामेवाह दैत्येंद्रस्य यूथपानां च वधं यथा प्रयतः शुचिः सन् पठेत ॥ पुण्यमनुभावमतिनिश्चयं वा ॥ लोकं वैकुंठं ४६ अहो प्रह्लादस्य भाग्यं येन देवो दृष्टः ॥ वयं तु मंदभाग्याः इति विषीदंतं प्रत्याह यूयमिति त्रिभिः ॥ येषां युष्माकं गृहान् मुनयोऽभियंति सर्वतः समायांति ॥ तत्कस्य हेतोः यतः गृहेषु नराकारं गूढं सन् श्रीकृष्णाख्यं परं ब्रह्म साक्षाद्वसतीति ॥ ४७ ॥

भा·७ ननु कृष्णोऽस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते तत्राह स वा अ इति । सोऽयं ब्रह्मैव । कथंभूतः । महद्भिर्विमृग्यं यत्कैवल्यनिर्वाणसुखं निरुपाधिः
४१ परमानन्दः तदनुभूतिरूपः वः युष्माकं खलु प्रियः सुहृदित्यादिरूपो भवति । विधिकृत आज्ञानुवर्ती ॥ ४८ ॥ ननु परं ब्रह्म चेत् कथमस्मदीहत्व
हीनरतिः कथं वा धर्माद्याचरणं तस्येत्यत आह । न यस्य रूपं तत्त्वं भवादिभिरपि धिया वस्तुतया इदमित्थमिति स्फोटात्त्रोपवर्णितं । स यु
ष्माकं स्वयमेव प्रसन्नः । अस्माकं तु मौनादिसाधनेन प्रसादः प्रार्थनीय इत्याह । मौनेनेति । स एष सात्वतां पतिर्नः प्रसीदतु न

स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः । प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च ॥ ४८ ॥
न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं । मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां प
तिः ॥ ४९ ॥ स एष भगवान् राजन् व्यतनोद्विहतं यशः । पुरा रुद्रस्य देवस्य मयेनानंतमायिना ॥ ५० ॥ राजोवाच ॥ कस्मिन्कर्मणि
देवस्य मयोऽहन् जगदीशितुः । यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यतां ॥ ५१ ॥ नारद उवाच ॥ निर्जिता असुरा देवैर्युध्यनेन (नोपबृंहितैः)

हि षड्गाः स्वगृहेषु परं ब्रह्म वसति । न च तद्दर्शनाय यत्नं प्रत्यहमानयंति नोपबृंहितैः । मायिनां परमाचार्यं मयं शरणमाययुः ॥ ५२ ॥
न च तस्य मातुलेयादिरूपेण वर्तते । न च स्वयमेव प्रसन्नः । अतो यूयमेव न तोऽपि अस्मत्तोऽपि भूरिभागा इति भावः ॥ ४९ ॥ न च मेऽयमुपकारं विधु
रे हार्दिकं श्रीरुद्रः कृतवान् स एवंभूत ईश्वरोऽस्य तत्त्वं न जानातीति कथमिदमपि ह्यायां तस्याप्येतन्माहात्म्यादेवास्तीत्यभिप्रायेणाह केवलं सेरोप
तिवृक्षमात्र्यानत्युपाक्षिपति स एष इति ॥ ५० ॥ उपरि ॥ २३ ॥ जगदीशितुर्देवस्य कीर्तिः कस्मिन्कर्मणि मयो हतवान् ॥ ५१ ॥ कृष्णेन श्रीकृष्णे ४१

हेमी च रौप्या वायसी चेति तिस्रः पुरो निर्मीयते मयेनेति शेषः ॥ दुर्लङ्घ्योऽनुपायसंयोगो गमनागमने यासां ॥ दुर्वितर्क्याः परिच्छदा यासां
अहरणां तेनान्याः सेनापतयः पूर्ववैरं स्मरंत्यः ॥ ५४ ॥ अस्त्रं अभिमंत्रितं शरं शरेभ्यो मुंचत ॥ ५६ ॥ ततः शरात् सूर्यमंडलान्मयूखसंदोहः

स निर्माय पुरस्तिस्रो हैमी रौप्यायसी विभुः ॥ दुर्लङ्घ्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥ ५३ ॥ ताभिस्तेसुरसेनान्यो लोकांस्त्रीन्
सेश्वरान् नृप ॥ स्मरंतो नाशयांचक्रुः पूर्ववैरमलक्षिताः ॥ ५४ ॥ ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो ॥ त्राहि नस्तावका
न्देव विनष्टांस्त्रिपुरालयैः ॥ ५५ ॥ अथानुगृह्य भगवान्मा भैष्टेति सुरान्विभुः ॥ शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुंचत ॥ ५६ ॥ त
तोग्निवर्णा इषव उत्पेतुः सूर्यमंडलात् ॥ यथा मयूखसंदोहा नादृश्यंत पुरो यतः ॥ ५७ ॥ तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौक
सः ॥ तानानीय महायोगी मयः कूपरसेऽक्षिपत् ॥ ५८ ॥ सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः ॥ उत्तस्थुर्मेघदलना वैद्युता
इव वह्नयः ॥ ५९ ॥ विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजं ॥ तदायं भगवान्विष्णुस्तत्रोपायमकल्पयत् ॥ ६० ॥ वत्स आसीत्तदा ब्र
ह्मा स्वयं विष्णुरयं हि गौः ॥ प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥ तेऽसुरा ह्यपि पश्यंतो न्यषेधन्विमोहिताः ॥ ६१ ॥ तद्विज्ञाय म
हायोगी रसपालानिदं जगौ ॥ स्वयं विशोकः शोकार्त्तान्स्मरन्दैवगतिं च ताः ॥ ६२ ॥

रश्मिसमूह इव ॥ यतः पुरोपमः ॥ ५७ ॥ कूपरसे स्वयं निर्मितकूपा
मते ॥ वज्रसाराः वज्रवद्दृढांगाः महौजसो महाबलाः मेघदलनाः मेघभेदिनो विद्युद्रूपा वह्नय इव ॥ ५९ ॥ ६० ॥ काले मध्याह्ने ॥ ६१ ॥

भा॰स आत्मनो वाऽन्यस्य वा द्वयोरपि वा दैवेन दिष्टमुपकल्पितं अपोहितुं परिहर्तुं इह कश्चिदपीश्वरः समर्थो नास्ति ॥ ६३ ॥ अथो अमी कलमः प्रधनं संग्रामम-
४२ त्साधनं ६४ ५ अभिजितमध्याह्ने ॥ ६६ ॥ विमानशतानि संकुलानि संकीर्णानि येषां ते देवादयः ॥ ६७ ॥ आदित्य आरभ्य अहं धार्य निगमयति एवं वि-
धानीति ६८ नृलोकं नरकारं आत्मनो विडंबमानस्य अनुकुर्वतः ॥ ६९ ॥ इति सप्तमे दशमः ॥ एकादशे नृणां धर्माः साधारण्येन वर्णिताः ॥ वि-

देवो हरो नरो न्योवा नैतत्तीह कश्चन ॥ आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ॥ ६२ ॥ अथाशेषशक्तिभिः स्वाभिः रां-
मोः साधानि कंव्यधात् ॥ धर्मज्ञानविरक्त्यर्द्धितपोविद्याक्रियादिभिः ॥ ६४ ॥ रथं ससूतं ध्वजवाहनान्वितं धनुर्वर्मशरादि यत् ॥ सन-
द्धो रथमास्थाय शरं धनुरुपाददे ॥ ६५ ॥ शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ॥ ददाह तेन दुर्भेद्याः हरोऽथ त्रिपुरो नृप
दिवि दुंदुभयो नेदुर्विमानशतसंकुलाः ॥ देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ॥ अवाकिरन् जगुर्हृष्टा ननृतुश्चाप्स-
रोगणाः ॥ ६७ ॥ एवं दग्ध्वा पुरस्तिस्रो भगवान् पुरहा नृप ॥ ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥ ६८ ॥ एवंविधान्यस्य हरेः स्व-
मायया विडंबमानस्य नृलोकमात्मनः ॥ वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किं ॥ ६९ ॥ इति श्रीभागव-
ते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे दशमोऽध्यायः ॥ श्रीशुक उवाच ॥ श्रुत्वेहितं साधु सभासभाजितं महत्तमाग्र-

शेषेणैव वर्णानां आश्रमाणां व्याश्रययोर्विहिता ॥ तदेवं दर्शयति ॥ ण्य उरुक्रमात्मनः ॥ युधिष्ठिरो दैत्यपतेर्मुदायुतः पप्रच्छ भूयस्तनयं स्वयंभुवः ॥
त्तीन भक्तियोगाद्युदीरितो ॥ अथ पंचभिरध्यायैः कर्मयोगोऽत्र वर्ण्यते ॥ १ ॥ दैत्यपतेः प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतं ईहितं चरितं

४२

श्रवणेच्छायां हेतुः यत यतो धर्मान् अनुष्ठितान् परं ज्ञानं भक्तिं च विंदति ॥ १ ॥ २ ॥ ननु स्मृतिकारैर्धर्मा उक्ता एव तत्राह नारायणपरा इति ॥ ४ ॥ अजाय श्री
नारायणाय ॥ न ह्येवं स्तुवोक्तं ॥ ५ ॥ ननु स्वोदात्मनः श्रवणं संभावयन्नू विशिनष्टि यदिति ॥ ६ ॥ प्रथमं तावद्धर्मे प्रमाणमाह धर्ममिति ॥ धर्मस्य मू
लं प्रमाणं ॥ स्मृतं च स्मृतिः तद्विदां वेदविदां । येन चात्मा मनः प्रसीदति तुष्यति ॥ तथा च याज्ञवल्क्यः श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्म
नः सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतमिति ॥ मन्वस्य ॥ वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां ॥ आचारश्चैव साधूनामात्मनस्तु

युधिष्ठिर उवाच ॥ भगवन् श्रोतुमिच्छामि नृणां धर्मं सनातनं ॥ वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं ॥ १ ॥ भवान्प्रजापतेः साक्षा
दात्मजः परमेष्ठिनः ॥ सुतानां संमतो ब्रह्मंस्तपोयोगसमाधिभिः ॥ २ ॥ नारायणपरा विप्रा धर्मं गुह्यं परं विदुः ॥ करुणाः साधवः
शांतास्त्वद्विधा न तथापरे ॥ ४ ॥ नारद उवाच ॥ नत्वा भगवतेऽजाय लोकानां धर्मसेतवे ॥ वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं
॥ ५ ॥ योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः ॥ लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ॥ ६ ॥ धर्ममूलं हि भगवान्सर्ववेदम
यो हरिः ॥ स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ॥ ७ ॥ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ॥ अहिंसा ब्रह्मचर्यं च त्यागः स्वा
ध्यायं आर्जवं ॥ ८ ॥ संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः ॥ नृणां विपर्ययेहेक्षा मौनमात्म

स्थिरवचेति ॥ तत्र तावत्सर्वमात्रसाधारणं धर्ममाह ॥ सत्यमिति पंचभिः ॥ तप एकादश्युपवासादि ॥ शौचं कायशुद्धिः ॥ ईक्षा युक्तायुक्तविवेकः ॥ शमो मनसः संयमः ॥ दमो बाह्येंद्रियाणां ॥ त्यागो दानं ॥ स्वाध्यायो यथोचित
जपः ॥ ८ ॥ संतोषो दैवलब्धेनालंबुद्धिः ॥ समदृशां महतां सेवा ॥ ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः ॥ विपर्यये नृणामीहा निष्फलक्रियाणामीहाणां मोघे
क्षयाप्रलापनिवृत्तिः ॥ आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसंधानं ॥ ९ ॥

भा॰स
४३

आत्मेतिरेवतेतिवद्बुद्धिः १० असंस्त्रीकाम्नस्यश्रवणादयोनव इत्याअर्थवतं ॥ एवंत्रिंशल्लक्षणमाह ११ इदानींवर्णधर्मानुवक्तुं द्विजानांल
क्षणमाह संस्कारमंत्रवतोगर्भाधानादयो यस्मिन्नविच्छिन्नाः सद्विजः नहिशूद्रस्यापिसंस्कारेणविच्छेदसतिद्विजत्वस्यातत्राह अजोद्भ्रा
यमेवंश्रुतसंस्कारयुक्तंजगामसद्विजः शूद्रंतमंत्रवत्संस्कारयुक्तंनगारनेचोपनयनेवंतत्रतोमासोद्विजः तथावस्मृतिः विवाहमात्र
संस्कारंशूद्रोपिलभतांसदा नवेनवित्सामवर्जंछंदसातप्रजापतिरिति श्रुतिश्च गायत्र्याब्राह्मणमसृजतत्रिष्टुभाराजन्यंजगत्यावैश्यंन

अन्नाद्यादेः संविभागोभूतेभ्यश्चयथार्हतः तेषामदेवताबुद्धिः सतंनृपपांडव १० श्रवणंकीर्तनंचास्यस्मरणंमहतांगतेः
सेवेज्यावनतिर्दास्यंसख्यमात्मसमर्पणं ॥ नृणामयंपरोधर्मः सर्वेषांसमुदाहृतः त्रिंशल्लक्षणवात्राजन्सर्वात्मायेनतु
ष्यति ११ संस्कारायत्राविच्छिन्नाः सद्विजोऽजोजगादयं इज्याध्ययनदानानिविहितानिद्विजन्मनां जन्मकर्मावदातानां क्रिया

केनचिच्छंदसेति ॥ अतोविवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वात उपनयनस्यतुसर्वथात्रिषेधात्तत्स्याद्विजत्वमित्यर्थः स्वाश्रमचोदिताः १२
पाठांतरेवैदिकादयइतिगर्भाधानादयइत्यर्थः तेवर्णिकानामावश्यकाइधर्मानादरजोति जन्मनाविशुद्धेन कर्मणाचआचारेणश्र
वदातानांशुद्धानांदुःशीलानांदुराचाराणांचनेतानिविहितानित्यर्थः ब्रह्मचर्यादयाश्रमविहिताः क्रियाश्च शूद्रस्यवर्णधर्माएव आश्रम
भेदकृतविशेषाभावात १३

राम
४३

ब्राह्मणादीनां वर्णानामपि वृत्तिरूपान् धर्मानाह विप्रेति सार्द्धैः षड्भिः ॥ विप्रस्य षट् कर्माणि विहितानीत्यन्वयः ॥ तत्र त्वध्यायनं प्रतिग्रह
श्च जीविका ॥ यथाह मनुः ॥ षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः इति ॥ अन्यस्य क्षत्रि
यस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं वाप्यग्रे जानाति ॥ वक्ष्यति वानंतरमेव अतेरजन्यमिति ॥ अयते व क्षत्रवपतिर्वै
केष्वपि नीनां क्षत्रियाणामुपदेष्टृत्वादि ॥ प्रजापालनेऽधिकृतस्य ॥ क्षत्रियस्य वृत्तं तमाहरति ॥ आदिशब्देन दंडग्रहणादि ॥ ४ ॥ वार्त्ता कृषि

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः ॥ एतो वृत्तिः प्रजागोप्तुर्विशश्चाद्या कणादिभिः ॥ ४ ॥ वैश्यस्य वार्त्ता वृत्तिश्च नित्यं वृ
स्तकलानुगः ॥ शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ ५ ॥ वार्त्ता विचित्रा शालीनयायावरशिलोञ्छनं ॥ विप्रवृ
त्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा ॥ ६ ॥ जघन्यो नोत्तमां वृत्तिमनापदि भजेत्त्वरः ॥ अतेरजन्यमापत्सु सर्वेषामपि सर्वशः ॥ ७ ॥

वाणिज्यादिलक्षणा वृत्तिर्यस्य सः शूद्रस्य द्विजशुश्रूषा विहिता ॥ स्वामिनो द्विजस्य तच्छुश्रूषा वृत्तिश्च भवेत् ॥ ५ ॥ विप्रस्य तु लोकान्तु कल्पभेदेन वृत्त्यंतरा
ण्याह ॥ वार्त्ता विचित्रा कृष्यादिरूपाः शालीनं धान्यार्घ्यविनैव याञ्चाप्रयाचितं ॥ यायावरं प्रत्यहं धान्ययाञ्चा ॥ शिलं शालिकेदारादौ त्यक्तानां क
णिशोपादानं ॥ उञ्छनं आपणादिपतितकणोपादानं ॥ शिलोञ्छनं द्वयमेकीकृत्य चतुर्द्धेयं वृत्तिः ॥ श्रेयसी उत्तमा ॥ ६ ॥ वृत्तिष्वेव व्यवस्थामाह
यन्नापद्यन्नाह जघन्यो नीचः उत्तमां अध्यापनादिरूपां अतेरजन्यां ॥ क्षत्रियस्य प्रतिग्रहादिरूपां भजेत ॥ ७ ॥

भा०स
४४

चतुर्विधां पूर्वोक्तां विप्रवृत्तिं निपितरेषामपि दर्शयन्नाह ऋतामृताभ्यामिति ॥ १८ ॥ श्लोकं व्याचष्टे ऋतमिति ॥ १९ ॥ तयोर्लंघने हेतुमाह सर्ववेदमय [illegible]
इति ॥ २० ॥ वर्णानामपि व्यंजकरूपान् धर्मानाह शम इति चतुर्भिः अच्युतात्मत्वं अविक्षिप्तपरत्वं ॥ २१ ॥ शौर्यं प्रह्वोत्साहः ॥ वीर्यं प्रभावः ॥ तेजः प्राग
ल्भ्यं ॥ २२ ॥ २३ ॥ अमंत्रयज्ञः नमस्कारेणैव पंचयज्ञानुष्ठानं ॥ तथा च याज्ञवल्क्यः ॥ नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति ॥ २४ ॥ स्त्रीधर्मानाह

ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥ १८ ॥ ऋतमुंछशिलं प्रोक्तममृतं यदयाचितं
मृतं तु नित्ययाञ्चा स्यात्प्रमृतं कर्षणं स्मृतं ॥ सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनं ॥ १९ ॥ वर्जयेत्तां सदा विप्रो राजन्यश्च जु
गुप्सितां ॥ सर्ववेदमयो विप्रः सर्वदेवमयो नृपः ॥ २० ॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवं ॥ ज्ञानं दयाच्युतात्मत्वं सत्यं च
ब्रह्मलक्षणं ॥ २१ ॥ शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ॥ ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणं ॥ २२ ॥ देवगुर्वच्युते भक्ति
स्त्रिवर्गपरिपोषणं ॥ आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणं ॥ २३ ॥ शूद्रस्य संनतिः शौचं सेवा स्वामिन्यमायया ॥ अमंत्रयज्ञो
ह्यस्तेयं सत्यं गोविप्ररक्षणं ॥ २४ ॥ स्त्रीणां च पतिदेवानां तच्छुश्रूषानुकूलता ॥ तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणं ॥ २५ ॥ संमार्जनो
पलेपाभ्यां गृहमंडलवर्तनैः ॥ स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा ॥ २६ ॥ कामैः उच्चावचैः साध्वी प्रश्रयेण दमेन च ॥ वाक्यैः स

स्त्रीणां पंचभिः ॥ पतिरेव देवो यासां तासां तस्य पत्युः शुश्रूषा ॥ तदनुकूलता च ॥ तस्य पत्युर्व्रतं नियमस्तस्य धारणं ॥ तैः त्रिभिः प्रमाणकाले काले भजेत्तु ति
एतच्च सर्वं पतिव्रतानां लक्षणं धर्मश्च ॥ २५ ॥ किंच संमार्जनोपलेपाभ्यामित्यादेः पतिं भजेदित्यन्तेनान्वयः परिमृष्टा उद्वर्तनादिनाति निर्मला

राम
४४

किंच संतुष्टशय्यालाभेन तावन्मात्रभागेऽलोलुपा दक्षानलसा प्रियासत्यावाग्यस्याः सर्वत्रापि अप्रमत्ता शुचिर्हिता अपतितं महा
पातकशून्यं यथाह याज्ञवल्क्यः आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषित इति २८ तत्परा सती भजेत तां श्रीहरिमिव हर्यात्मना पत्या
सह २९ प्रतिलोमजानुलोमजानां वृत्तिमाह वृत्तिरिति तत्तत्कुलकृता कुलपरंपराप्राप्ता परंपराप्राप्तमपि चौर्यं हिंसादिकं च प्रतिषे
धति अचौराणामपापानां चेति तत्र प्रदर्शनार्थं काश्चित्प्रतिलोमजविशेषानाह अन्त्यजेति रजकश्चर्मकारश्च नटो बुरुड एव च कैवर्त

संतुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत २८ या पतिं हरिभावेन भजे
च्छ्रीरिव तत्परा हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते २९ वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् अचौरा
णामपापानामन्त्यजान्तेवसायिनां ३० प्रायः स्वभावविहितो नृणां धर्मो युगे युगे वेददृग्भिः स्मृतो राजन्प्रेत्य चेह च
शर्मकृत ३१ वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात ३२

मेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः अन्तेवसायिनश्च चांडालं पुल्कसमातंगादयः तेषां परंपराप्राप्तैव वृत्तिर्निर्दोषेण नादिष्टवृत्तिरित्यर्थः ३०
श्रेष्ठादपि परधर्मान्नीचोपि स्वधर्म एव श्रेयानित्याह प्राय इति स्वभावेन सत्वादिप्रकृत्या विहितो धर्मः शर्मकृत इह सुखहेतुः स्मृतः केवेद
एवदृक्वक्तुर्येषां तैः भगवता चोक्तं श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितादिति ३१ ननु स्वाभाविकस्य कर्मणो बंधहेतुत्वात्कथं सु
खहेतुत्वं तत्राह वृत्त्येति ३२

भा॰स

४५

ननु काम्यानि कर्माणि कुर्वतस्तत्फलोपभोगपरस्य कथं नैर्गुण्यं स्यात् ॥ तदुक्तं प्रह्लादेन ॥ सोपसृज्य जनेष्वं वङ्कु मन्यमानः कथं विरज्येत तदुरा
तमोह इत्यादि ॥ तत्राधिकारिभेदेन व्यवस्थामुद्दिशन्माह उप्यमान इति द्वाभ्यां ॥ पुनः स्मृत्येतस्य प्रसवाय ॥ कामाश्चाशेरते वासनारूपेण
यस्मिन् तत् ॥ अयं भावः उत्कटवासनाविशिष्टस्येह सर्वकामत्यागसंभवाद्देशोक्तनियमेन बहुशः कामान् भुञ्जानस्यैव नित्यनैमित्तिकै
विशुद्धचेतसस्तद्दोषदर्शनेन यथातिसो परिपक्वबुद्धोनामिव शनैर्विरागो भवति ॥ यथाप्सवीर्यं क्षेत्रं शनैर्निवीर्यं भवति ॥ यथा च प्रदग्ध

उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात् ॥ न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति ॥ ३३ ॥ एवं कामाशयं चित्तं कामाना
मतिसेवया ॥ विरज्येत यथा राजन्नग्निवत्कामबिंदुभिः ॥ ३४ ॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकं ॥ यदन्यत्रा
पि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ३५ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे एकादशोऽध्यायः ॥

लितोग्निर्न घृतबिंदुभिः शाम्यति ॥ महता तु घृतपूरेण शाम्यत्येव तद्वत् ॥ प्रह्लादस्तु तत्कोमार एव निरस्तोपदेशो मंदवासनानामधि
कारेण ॥ तदुक्तं तेनैव ॥ बालानतिपिततधियोह्वदारामेरितेरिति ॥ अतः सर्वमनवद्यं ३३ शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यः
न जातिमात्रादित्याह यस्येति ॥ यद्यदि अन्यत्र वर्णान्तरेपि दृश्येत तद्वर्णान्तरेणैव वर्णेन विनिर्दिशेन्नतु जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥ राम

॥ ३५ ॥ इति सप्तमे एकादशः ॥

४५

द्वादशे वर्ण्यते धर्मो ब्रह्मचारिवनस्थयोः ॥ वर्णानामाश्रमाणां च साधारण्येन कश्चन ॥ वर्णादीनां धर्म उक्तः इदानीमाश्रमधर्म उच्यते तत्रा-
स्मिन् द्वादशेऽध्याये ब्रह्मचारिवनस्थयोरसाधारणो ब्रह्मचर्याणां साधारणश्चोच्यते ॥ त्रयोदशे यतेर्धर्माः चतुर्दशे गृहस्थस्य पंचदशे सर्वधर्म-
सारसंग्रहः ॥ ब्रह्मचारी गुरुकुले वसन् गुर्वादीनुपासीतेत्युत्तरेणान्वयः ॥ १ ॥ ब्रह्म गायत्रीं जपन् संध्यात्रयमप्युपासीत ॥ उभे संध्ये तु यतवा-

ना ॥ २३ ॥ च ॥ ब्रह्मचारी गुरुकुले वसन्दान्तो गुरोर्हितं ॥ आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥ १ ॥ सायं प्रातरुपासीत गुर्वग्न्य-
र्कसुरोत्तमाः ॥ संध्ये उभे च यतवाग्जपन्ब्रह्म समाहितः ॥ २ ॥ छंदांस्यधीयीत गुरोराहूतश्चेत्सुयंत्रितः ॥ उपक्रमेऽवसा-
ने च चरणौ शिरसा नमेत ॥ ३ ॥ मेखलाजिनवासांसि जटादंडकमंडलून् ॥ बिभृयादुपवीतं च दर्भपाणिर्यथोदितं ॥ ४ ॥ सा-
यं प्रातश्चरेद्भैक्ष्यं गुरवे तन्निवेदयेत ॥ भुंजीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित ॥ ५ ॥ सुशीलो मितभुग्दक्षः श्रद्दधानो जिते-
न्द्रियः ॥ यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ॥ ६ ॥ वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः ॥ इंद्रियाणि प्रमाथीनि हरंत्यपि
यतेर्मनः ॥ ७ ॥ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं ॥ गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥ ८ ॥ नन्वेभिः प्रमदानामप्रत

कं भवेत् अतः संध्याकालनिमित्तमौनं कार्यमित्यर्थः ॥ २ ॥ गुरोश्चरणौ नमेत ॥ ३ ॥ य ॥ ओं नमस्मः उमान् ॥ उतामपि रहो जल्पाद्यन्यदा यावदर्थं कृते ॥ ७ ॥
यथोदितं पालाशो दंडो ब्राह्मणस्येत्यादिनियममनतिक्रम्य जटाधारणं च केशप्रसाधनाभावमात्रं ॥ ४ ॥ ५ ॥ यावदर्थं यथोपयोगमेव ॥ ६ ॥ बृहद्व्रतः ब्र-
ह्मचर्यवान् अगृहस्थो गृहस्थव्यतिरिक्तः सर्वोऽपि गाथामपि वर्जयेत तत्र हेतुः इंद्रियाणि बलवंति यतेस्त्यापि मनो हरंतीति ॥ ७ ॥ ८ ॥ नकारयेदित्यत्र हेतुः

नतु मिथ्यात्वादिति कश्मलत्वाच्च स्वयं त्यक्तुमशक्यत्वादि जन्यादिनिकोपमतिनिर्बंधस्तत्राह कल्पयित्वेति ॥ आत्मनात्मस्वरूपसाक्षात्कारेण इदं देहेंद्रि
यादि आभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीव ईश्वरः स्वतंत्रो न भवेत् ॥ तावद्द्वैतं गृहक्षेत्रादि नियंत्रीत्यादिभेदो न विरमेत् ॥ ततः किमत आ
ह ॥ ततो हि द्वैतानुविपर्ययः गुणाध्यासेन भोग्यताबुद्धिः ॥ अतो जन्मादेवेत्यर्थः ॥१०॥ एतत्सर्वं ब्रह्मशीलेत्याद्युक्तं ॥ गृहस्थस्य विशेषमाह गृहस्थेति
रिति ॥ ११ ॥ अंजनादीनि समानि निषाताना द्वंद्वैक्यं ॥ अंजनं शरीरस्य ॥ अभ्यंजनं शिरसः ॥ स्त्रियं प्रत्यवलेखो चित्रकर्मणि स्त्रीणां क्रीडा दोलेखनं वा ते

कल्पयित्वात्मना यावदाभासमिदमीश्वरः ॥ द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः ॥१०॥ एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि
गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥११॥ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषं मधु ॥ स्रग्गंधलेपालंकारांस्त्यजेयु
र्ये धृतव्रताः ॥१२॥ उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च ॥ त्रयीं सांगोपनिषदं यावदर्थं यथाबलं ॥१३॥ दत्त्वा वरम
नुज्ञातो गुरोः कामं यदीश्वरः ॥ गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् ॥ ॥१४॥ ॥ अग्नौ गुरावात्मनि च सर्वभूते
ष्वधोक्षजं ॥ ॥ भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥ ॥१५॥

स्त्रीरूपाणां वा आलेखनं स्पर्शादि स्वरूपतो निषिध्यते ॥ एवं च कथं विद्यापरिसमाप्तिमपि विद्याकर्तृकं निषिद्धमिति भेदः ॥१२॥ अंगैः शिक्षादिभिः सहोपनिषद्भि
श्च सहितां भेदत्रयीमधीत्य अवबुध्य वतदर्थं विचार्य ॥ यावदर्थं स्वाधिकारानुसारेण ॥१३॥ यदीश्वरः शक्तः तर्हि गुरोः काममपेक्षितं वरं दत्त्वा ॥ एव
यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात् ॥ तत्रैव वा वसेत् ॥ नैष्ठिकः स्यादित्यर्थः ॥१४॥ स्वधामभिः स्वाश्रयैर्भूतैर्जीवैः सह तत्र प्रियंत्रतया

चरन् एवमाचरन् ॥ विदितं वित्तानं वित्तेयं येन सः ॥ १६ ॥ ऋषिलोकं महर्ल्लोकं ॥ १७ ॥ अकृष्टं अकृष्टपच्यं ॥ अकालतः पापकालात्पूर्वमेव वाभि
प्रायमित्यर्थः ॥ अर्द्धपक्वं फलादि आहरेत अश्नीयात ॥ १८ ॥ वन्यैर्नीवारादिभिः काले चोदितान् नित्यान् ॥ पुराणं पूर्वं संचितं ॥ १९ ॥ हिमादी
न् सहेत इति तथा ॥ २० ॥ केशादीन् मलं चाप्रक्षालनेन धारयेत् ॥ कमंडल्वादीन् स्वदधत ॥ २१ ॥ कृच्छ्रतः तपः क्लेशाद्यथावृद्धिर्नेन शपेन्नथाचरेत

एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही ॥ चरन्नविदितविज्ञानः परं ब्रह्माधिगच्छति ॥ १६ ॥ वानप्रस्थस्य वक्ष्यामि नियमान् मुनिसंम
तान् ॥ यानास्थित्य मुनिर्गच्छेदृषिलोकमिहाजया ॥ १७ ॥ न कृष्टपच्यमश्नीयादकृष्टं वाप्यकालतः ॥ अग्निपक्वमथामं वा अर्कपक्व
मुताहरेत ॥ १८ ॥ वन्यैश्च हव्यैः पुरोडाशान्निर्वपेत्कालचोदितान् ॥ लब्धे नवे नवे चान्ने पुराणं च परित्यजेत ॥ १९ ॥ अरण्यमेकमेव शर
णं कुर्वन् जलवादीकरः ॥ अपेतहिमवाय्वग्निवर्षाकालतपोष्णसय ॥ २० ॥ केशरोमनखश्मश्रुमलानि जटिलो दधत ॥ कमंडल्वजि
नेदंडवल्कलाग्निपरिच्छदान् ॥ २१ ॥ चरेद्वै द्वादश शाब्दान् शैवाचारपरो मुनिः ॥ द्वावेकं यथावृद्धिर्न विपद्येत कृच्छ्रतः ॥ २२ ॥ यदा कृ
त्स्नः क्रियायोग्याधिभिर्जरयाथवा ॥ आत्मन्यग्नीं क्रियां विद्यायात्कुर्यादनशनादिकं ॥ २३ ॥ आत्मन्यग्नीन् समारोप्य तेन स्याहं ममात्म

२२ ॥ द्वादश शाब्दाधनंतरमपि यदि धर्मानुष्ठाने शक्तस्तर्हि वन एव वसेत ॥ परिवज्ञानाम्याहे तो ॥ कारणोपन्यासेत्स्यकृ संघातं तद्यथाहतः
योग्यस्तर्हि सन्यासेदित्यनेनाध्याये वक्ष्यति ॥ नतु भयरहितस्य तत्वयल्क्षात्पतेदाह ॥ यदा कृत्स्नः कल्पः असमर्थः ॥ अत्वीहिकांनानाम्यासे ॥ २३ ॥ अन
नादिकरिष्यतः पूर्वं कृत्यमाह आत्मनीत्यादि यावत्समाप्ति ॥ यथार्हवः ॥ यथायोग्यात्व कारणोबाकाशादि संघातं देहं न्यसेत पविला

तदेवाभिमन्य दर्शयति । खे आकाशे खानि देहगतछिद्राणि आत्मवान् धीमान् । शेषं अस्थिमांसादिकठिनांशं ॥१५॥ एवं स्थूलशरीरस्य लयमुक्त्वा लिं-
गशरीरस्याध्यात्मादित्रयस्य लयमाह वाचमित्यादिना । तत्र यद्यपि यथोद्भवं लयस्योक्तत्वात् अध्यात्मादीनां स्वस्वकारणे राजसाहंकारादिषु
लयो वाच्यः तथापीह तेषां लयभावनेयमद्वितीयात्मप्रतिपत्तिपरेति यथाकथंचित्तत्त्वे पाभावे देवतानां प्रवर्तकत्वेन प्राधान्यादिन्द्रियतद्विषय-
योर्देवतासु लयः कथ्यते । वक्तव्यसहितां वाचमग्नौ न्यसेत् । एवं सर्वत्र पदानि पादौ च वयसि विष्णौ ॥१६॥ सनादेन शब्देन सह । अध्यात्मनि वायौ

खे खानि वायौ निश्वासांस्तेजसूष्माणमात्मवान् । अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवं ॥१५॥ वाचमग्नौ सवक्तव्या-
मिन्द्रे शिल्पं करावपि । पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥१६॥ मृत्यौ पायुं विसर्गं च यथास्थानं विनिर्दिशेत् । दिक्षु श्रो-
त्रं सनादेन स्पर्शमध्यात्मनि त्वचं ॥१७॥ रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवेशयेत् । अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ
न्यसेत् ॥१८॥ मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे । कर्माण्यध्यात्मना रुद्रे यदहं ममताक्रिया । सत्त्वेन चित्तं क्षेत्रज्ञे गुणै-
र्विकारिकं परे

घ्रे ३

अध्यात्मविदिति पाठे वायाविति ज्ञातव्यं ॥१७॥ ज्योतिषि आदित्ये । रसगंधयोस्त्विंद्रियाद्याकर्षकत्वेन प्राधान्याविवक्षया
देवतासहितस्येंद्रियस्य विषये लयमाह । प्रचेतसा सह जिह्वां रसनं । अप्सु रसरूपासु घ्राणशब्दो नासिकयोरप्युपलक्षणं । अश्विभ्यां सह
घ्राणं घ्रेयैर्गंधैरुपलक्षितानां घोषितानित्यर्थः ॥१८॥ परे कवौ ब्रह्मणि । अध्यात्मनाऽहंकारेण । अध्यात्मतामिति पाठे कर्माण्यहंकारेत्यर्थः
कथंभूते रुद्रे यद्यस्मादहंममतापूर्विका क्रिया भवति तस्मिन् सत्त्वेन चेतनया । गुणैः गुणकार्यैः प्रागवशिष्टैः सह यद्वा सत्त्वादिभिर्गुणैः
हेतुभूतैः वैकारिकं भोक्तृत्वादिविकारवंतं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि ॥१९॥

ननु विकारवतः कथं परे लयः स्यात् ॥ विकारहेतूनां सर्वोपाधीनां लयद्वारेणेत्याह अप्स्विति ॥ अदो ज्योति तच्च नभः कूटस्थेऽहंतत्त्वे
तच्च कूटस्थं महति महत्तत्त्वे तदव्यक्ते प्रधाने ॥ तच्चाव्यक्तं अक्षरे परमात्मनि ॥ ३० ॥ इति सर्वोपाधिलयाद्धेतोः अवशेषितं चिन्मात्रमात्मा
नं केवलमक्षरतया ज्ञात्वा अद्वयः सन्विरमेत ॥ दग्धकाष्ठो यथानलः ॥ ३१ ॥ इति सप्तमे द्वादशः ॥ त्रयोदशे यतेर्धर्मः साधकस्योच्यते महा

अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुं ॥ कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ॥ ३० ॥ इत्यक्षरतयात्मानं चिन्मात्रम
वशेषितं ॥ ज्ञात्वाद्वयोऽथ विरमेद्दग्धयोनिरिवानलः ॥ ३१ ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे द्वादशोऽध्यायः ॥
नारद उवाच ॥ कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ॥ ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीं ॥ १ ॥ बिभृयाद्यद्य
सौ वासः कौपीनाच्छादनं परं ॥ त्यक्तं न लिंगदंडादेरन्यत्किंचिदनापदि ॥ २ ॥ एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः ॥
सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥ ३ ॥ पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये ॥ आत्मानं च परं ब्रह्म सर्वत्र सदसन्म

न् ॥ अवधूतेतिहासेन सिद्धावस्था च वर्ण्यते ॥ एवं ध्यात्वा अकल्पः अनशनादिकं कुर्यात् ॥ अन्त्वीहितस्ताकल्पस्त्वेवं ध्यात्वा परिव्रज्य ये ॥ ४ ॥
लिसिवंधः किंयदत्र त्याज्यं देहव्यतिरिक्तं सर्वमित्याह देहमात्रेति ॥ तस्य धर्मानाह ग्रामैकरात्रेन वासः ॥ १ ॥ कौपीनमाच्छाद्यते यावता
तावन्मात्रं ॥ परं केवलं अन्यदिति वा ॥ त्यक्तं पैषोऽचारणात् सर्वमेव ॥ २ ॥ ३ ॥ सदसतः परे कार्यकारणव्यतिरिक्ते ॥ ४ ॥

भा॰ ए
४८

नचात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः॥ नहि बद्धमुक्तयोरैक्यं संभवतीत्यत्राह ब्रह्मेति॥ सुप्ते हि तमसावृतमात्मतत्वं जाग्र
त्स्वप्नयोश्च विक्षिप्तं प्रकाशते संधौ तु न तमो नापि विक्षेपः॥ अतस्तदा आत्मदृक् आत्मानं लक्ष्मीकृत्य स्थितः तत्र आत्मनो गतितत्त्वं
पश्यन्नुभूत एवं बंधमोक्षं च मायामात्रं पश्यन्नात्मानं परं ब्रह्म सर्वज्ञं पश्येदित्यन्वयः॥ तदुक्तं योगग्रंथे॥ निद्रादौ जागरस्यांते यो भाव उप
जायते॥ तं भावं प्राप्य तिष्ठन्ति नेतरो यतिरिति॥ ५॥ ध्रुवस्य देवस्य प्रभवोऽप्ययश्च यस्मात्तत्कालं॥ ६॥ असच्छास्त्रेष्वनात्मपरेषु॥ जीवि

सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक्॥ पश्यन्बंधं च मोक्षं च मायामात्रं न वस्तुतः॥ ५॥ नाभिनंदेद्ध्रुवं मृत्युम
ध्रुवं वास्य जीवितं॥ कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययं॥ ६॥ नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकां॥ वादवा
दांस्त्यजेत्तर्कान्पक्षं कंचन नाश्रयेत॥ ७॥ न शिष्याननुबध्नीत ग्रंथान्नैवाभ्यसेद्बहून्॥ न व्याख्यामुपयुंजीत नार
म्भानारभेत्क्वचित्॥ ८॥ न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः॥ शांतस्य समचित्तस्य बिभृयादुत वा त्यजेत॥ ९॥

[illegible]ानन्हास्व विद्यादिवृत्तिं॥ वादवादान् जल्पवितंडानिष्ठान्॥ कंचकमपि पक्षं निर्बंधेन संश्रयेत॥ आरंभान् मठादिव्यापारान्॥ न परमहंस
स्य विशेषमाह॥ न यतेराश्रमो धर्मार्थः कथंभूतस्य महात्मनः॥ तस्य लक्षणं शांतस्येत्यादि॥ प्राय इत्यस्यायं भावः॥ ज्ञानोत्पत्तिपर्यंतं वह्द
कादिलिंगमाश्रित्य सत्वशुद्ध्यर्थं यमान्नियमांश्चाचरन्नेव ज्ञानोत्पद्यते॥ उत्पन्ने तु ज्ञाने न नियमः कृत्यमस्ति यमाश्च ... एवं स्मृतेः श्रुते
हरालिंगादिभिः प्रयोजनाभावात् लोकसंग्रहार्थं धारयेद्वा त्यजेद्वेति॥ ९॥

राम
४८

तस्यैवज्ञानदार्ढ्याभावे योगभ्रंशपरिहारार्थमाह ॥ नवहिर्व्यक्तलिंगं यस्य ॥ व्यक्तोर्थः प्रयोजनमात्मानुसंधानं यस्य सः ॥ मनीष्यपि उन्मत्तवद्बालवद्बक
विरपि मूकवदात्मानं नृणां दृष्ट्या दर्शयेत ॥ तेष थोन्मत्तादिरूपमन्येरन् तथा वर्त्तेत ॥ स्वद्दष्ट्येति पाठे वा ह्यानुसंधानाभावेनेत्यर्थः ॥ १० ॥ परमहंसमे
वेतिहासेन स्फुरयति अत्रापीति यावदध्यायसमाप्ति ॥ अजगरवृत्तिसमुनेश्च ॥ ११ ॥ धरोपस्थे भूपृष्ठे ॥ सह्याद्रेः सानौ ॥ रजोभिर्धूमरैस्तनुदेशैरीर्द्दावयवैर्नि

अव्यक्तलिंगो व्यक्तार्थो मनीष्युन्मत्तबालवत ॥ कविर्मूकवदात्मानं सदृष्ट्या दर्शयेन्नृणां ॥ १० ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ प्र
ह्लादस्य च संवादं मुनेराजगरस्य च ॥ ११ ॥ तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि ॥ रजस्वलैस्तनूदेशैर्निगूढामलतेजसं ॥ १२ ॥ ददर्श लो
कान्विचरंल्लोकतत्वविवित्सया ॥ वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ॥ १३ ॥ कर्मणाकृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः ॥ न
विंदंति जना यं वै सोसाविति न वेति च ॥ १४ ॥ तं नत्वाभ्यर्च्य विधिवत्पादयोः शिरसा स्पृशन् ॥ विवित्सुरिदमप्राक्षीत्महाभागवतोऽसुरः
बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा ॥ वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ॥ भोगिनां खलु देहोयं पीवा भवति नान्यथा ॥ १६ ॥
न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः ॥ अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेत ॥ १७ ॥

गूढममलं तेजो यस्य तं ॥ १२ ॥ १३ ॥ कर्मादिभिर्जना यं न विदुः तं पादयोः शिरसा स्पृशन्नत्वा अप्राक्षीदित्युत्तरेणान्वयः ॥ १४ ॥ १५ ॥ उद्यमसहितः इव भोगवानिव
पीवानं स्थूलं देहं धारयसि ॥ तत्र हेतुं वदेति तृतीयेनान्वयः ॥ १६ ॥ उद्यमं विनैव मम भोगोऽस्तीति चेत्तत्राह वित्तं चेति ॥ उ इति निश्चये ह इति प्रसिद्धौ ॥ न वा
र्थो नास्तीति प्रसिद्धमेवेत्यर्थः यतोऽर्थादेव यतो हेतोः पीवा ॥ क्षमं योग्यं चेत ॥ १७ ॥

किंत्वविद्वान्जनाद्यसमर्थोऽप्ययं जनस्त्वदर्थमुद्यमं करोति । त्वं तु समर्थोऽपि किमिति न करोषीत्याह । कविर्विद्वान् । कल्पो दक्षः । निपुणदृक् चतुरः । चित्राः प्रियाः लोकरंजनाः कथा यस्य । तथापि लोकस्य कर्म कुर्वतः सतः शेषे । तद्वीक्षिताऽपि वा । तत्सर्वं पश्यन्नपि । पाठांतरे न दूषितकर्म न देष्टि नो विवादं वदेत्तोषीत्यर्थः ॥ तस्य वागेवामृतं तेन यं त्रितो वशीकृतः सन् । अथात्मवच्छुश्रूषा तत्रिषेव्या भवांत्वैरेव । आर्याणां ज्ञानिनां सम्मतो न तु भवान् । इदमिति यदुक्तं तत्रैवाह । नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः महान्ति श्रेयांसि फलानीत्यर्थः । वेदेत्यत्र हेतुः यस्येति हृदि स्थितः सन्नज्ञानं धुनोति । अर्को यथा वह्निध्वांतं । यथा श्रुतमपि

कविः कल्पो निपुणदृक्चित्रप्रियकथः समः । लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा ॥ १८ ॥ ना ॥ २३ ॥ वा ॥ सद्धत्यैरेष पतितनापरिशिष्टो महाश्रुतिः । स्वयं मानव्रतं मन्यो हृतद्वागमृतयंत्रितः ॥ १९ ॥ वा ॥ ३ ॥ वा ॥ वा ॥ वेदे दमस्तु रश्रेष्ठ भवान्नन्यार्थसम्मतः ॥ ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा ॥ २० ॥ यस्य नारायणो देवो भगवान्हृद्गतः सदा । भक्त्या केवलयाऽज्ञानं धुनोति ध्वांतमर्कवत् ॥ २१ ॥ अथापि भूम महेश्रात्मस्तवाजनुयथा श्रुतं । संभावनीयो हि भगवानात्मनः शुद्धिमिच्छता ॥ २२ ॥ तत्स्मया भववाहिन्याथोऽपि कामैरसृष्टया ॥ कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः ॥ २३ ॥ यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् ॥ स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥ २४ ॥

तौ हृत्यपरिहारायोक्तं । लोकः कर्मसु प्रवर्तते । त्वं तु निवृत्तः सन् किं शेषरतीति यदुक्तं तत्राह । तत्स्मयेति चतुर्भिः । भवप्रवाहकारिण्या यथोचितोऽपि विषयैः प्रेरितः सन्नशक्याया तत्स्मायया हेकर्मप्रवर्त्यमानो इहपूर्वे नानायोनिषु प्रवेशितः तथैवेमं लोकं मनुष्यदेहं यदृच्छया प्रापितं । कथंभूतं लोकं । धर्मेण स्वर्गापवर्गसाधनं । अधर्मेण तिरश्चां अस्माकमिति योनेर्द्वारं । मिश्रात्मिकायाः पुनरप्यस्य द्वारं । सर्वतो निवृत्या अपवर्गस्य द्वारमित्यर्थः ॥ २४ ॥

अत्रापि मनुष्यत्वेपि अन्यापत्त्यन्यपेतुः खनिवृत्तेश्च विपर्ययं दृष्ट्वा निवृत्तोऽस्मि ॥ २५ ॥ प्रवृत्त्या कदाचित्सुखमस्त्यपि निवृत्त्या तु किं स्यादिति चेत्तत्राह ॥ सुखमस्य जीवस्य स्वरूपमेव ॥ तर्हि किं न प्रकाशते तत्राह सर्वेति ॥ तनोतीति तनुः सर्वक्रियानिवृत्तौ सुखं तत एव प्रकाशत इत्यर्थः ॥ भोगान्
मनःसंस्पर्शजान् मनोरथमात्रजान् अशाश्वतान् दृष्ट्वा स्वप्स्यामि निरीहश्च मोक्ष्यामीत्यर्थः ॥ तर्हि कदाचित्त्वं भुङ्क्षे तत्राह संविशन् प्रारब्धभो
गात्तद्भुञ्जान इत्यर्थः ॥ २६ ॥ एवं चेत्कोऽपि संसारं न प्राप्नुयात्तत्राह ॥ इत्येतदात्मनः सुखात्मकरूपं स्वार्थं स्वस्मिन्नेव सन्तं पुरुषार्थं विस्मृत्य असतापि द्वै

अत्रापि दम्पतीनां च सुखायान्यापनुत्तये ॥ कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययं ॥ २५ ॥ सुखमस्यात्मनो रूपं सर्वेहोपर
तिस्तनुः ॥ मनःसंस्पर्शजान् दृष्ट्वा भोगान् स्वप्स्यामि संविशन् ॥ २६ ॥ इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान् ॥ विचि
त्रामसति द्वैते घोरामाप्नोति संसृतिं ॥ २७ ॥ जलं तदुद्भवैश्छन्नं हित्वाऽज्ञो जलकाम्यया ॥ मृगतृष्णामुपाधावेत् यथाऽन्यत्रा
र्थदृक् स्वतः ॥ २८ ॥ देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः ॥ दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः ॥ २९ ॥ आध्यात्मि
कादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ॥ मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किं ॥ ३० ॥ पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनां ॥
भयादलब्धनिद्राणां सर्वतोऽभिविशङ्कितां ॥ ३१ ॥

ते ॥ २७ ॥ एतदेव दृष्टान्तेन स्पष्टयति जलमिति ॥ तदुद्भवैः तृणशैवालादिभिः जलकाम्यया जलेच्छ
या स्वतः आत्मत्वरूपादन्यत्र सुखार्थं पश्यन् ॥ एवं स्वनिहितमविवेकारणाज्ञात्वा विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति देहादिभिरिति पञ्चभिः
ईहतः इच्छतः ॥ अनीशस्य निरीश्वरस्य दैवतन्त्रैः प्रारब्धाः क्रिया मोघा विफला एव भवन्ति ॥ २९ ॥ क्रियाणां सफलत्वेपि फलस्य उपयोगमाह सुख

भा॰स
५०

भयं प्रपंचयति एतन्नदति || तस्मान्नर एव कथं चित्यागभोगविस्मरणादिनानाशाः स्यादिति ३२ प्राणवतामर्थवतां च भयं नित्यं अतो न स्पृहे
त्वान्यागेणो वार्थं च स्पृहा नेकार्ये स्याद्दशोकेति ३३ न त्वेवमनर्थो न त्वभवं तोऽपि न के विद्धिरुच्यते न च यथा लाभे न तुष्यति त्वेतत्कथं वे
णापादिकं प्राप्नोमि तत्राह मधुकारेति || मधुमक्षिकाजगरौ || ययोः शिक्षया इन्नपर्यालोचनया ३४ मधुकाराच्छिक्षितमाह विराग इति वित्त

राजतश्चोरतः शत्रोः स्वजनात्पशुपक्षितः अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयं ३२ शोकमोहभयक्रोधरागक्लैब्य
श्रमादयः || यन्मूलाः स्युर्नृणां जह्यात्स्पृहां प्राणार्थयोर्बुधः ३३ मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ || वैराग्यं प
रितोषं च प्राप्ता यच्छिक्षया वयं ३४ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् || कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पति
३५ अनीहः परितुष्टात्मा यदृच्छोपनतादहं || नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् || ३६ क्वचिदल्पं क्वचिद्भूरि भुंजे
न्नं स्वाद्वस्वादु वा || क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् || ३७ श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितं || भुंजे भुक्त्वाथ
कस्मिंश्चिद्दिवा नक्तं यदृच्छया || ३८ क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा || वसेऽन्यदपि संप्राप्तं दिष्टभुक् तुष्टधीरहं || ३९ ||
क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु || क्वचित्प्रासादपर्यंके कशिपौ वा परेच्छया || ४० || क्वचित्स्नातोऽनुलिप्तांगः सुवासाः स्रग्व्य

पतिं हत्वाप्यन्यो वित्तं हरेदित्येवं ३५ || अजगराच्छिक्षितमाह अनीह इति || सत्त्ववान् लंकृतः रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ४१ ||
धैर्यवान् पानतेदेवः अनीह इति ३६ अनीहत्वेन यदृच्छया प्राप्तमात्रेण संतोषं प्रपंचयति || क्वचिदल्पमिति त्रिभिः ३७।३८ || चीरं जीर्णं वस्त्रखंडं व
से परिदधे || दिष्टभुक् प्रारब्धभोगी ३९ || प्रासादमध्ये पर्यंक तत्रापि कशिपौ ४० || वरो विचरामि || क्वचिद्दहरपरिगं वरो विचरामि ४१ ||

राम
५०

नचमानापमानकर्त्तृत्वममैवेषष्यामित्याह॥ नाहंनिंदामि॥ महात्मनिविह्लो॥४१॥ एवंधृतत्वेनस्थितातृपायमाह विकल्पमितिद्वाभ्यां॥ वि
ह्नौभेदग्राहकमनोरेह्नौ॥ अर्थेनूपेविभ्रमोयस्मिन्॥ वैकारिकेअहंकारे॥ अनुअनंतरंमहत्तत्वद्वारेणेत्यर्थः॥४३॥ सत्यमेवपश्यतीति
तथा॥४४॥ भेददृष्ट्यालोकशास्त्राभ्यांव्यपेतंनष्टनत्वदृष्ट्याघतोभवान्भगवत्परः॥४५॥ ४६॥ इति सप्तमे त्रयोदशः॥ चतुर्दशेगृहस्थस्यप

नाहंनिंदेनचस्तौमिस्वभावविषमंजनं॥ एतेषांश्रेयआशासेउतैकात्म्यंमहात्मनि॥४२॥ विकल्पंजुहुयाच्चित्तौतांमनस्यर्थविभ्रमे
मनोवैकारिकेहुत्वातंमायायांजुहोत्यनुः॥४३॥ आत्मानुभूतौतांमायांजुहुयात्सत्यदृङ्मुनिः॥ ततोनिरीहोविरमेत्स्वानुभूत्यात्म
निस्थितः॥४४॥ स्वात्मवृत्तंमयेत्थंतेसुगुप्तमपिवर्णितं॥ व्यपेतंलोकशास्त्राभ्यांभवान्हिभगवत्प्रियः॥४५॥ नारदउवाच॥ धर्मं
पारमहंस्यंवैमुनेःश्रुत्वासुरेश्वरः॥ पूजयित्वाततःप्रीतआमंत्र्यप्रययौगृहं॥४६॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेयुधिष्ठि
रनारदसंवादेत्रयोदशोध्यायः॥ युधिष्ठिरउवाच॥ गृहस्थएतांपदवींविधिनायेनचांजसा॥ यातिदेवऋषेब्रूहिमादृशोगृहमूढ
धीः॥१॥ नारदउवाच॥ गृहेष्ववस्थितोराजन्क्रियाःकुर्वन्गृहोचिताः॥ वासुदेवार्पणंसाक्षादुपासीतमहामुनिन्॥२॥ शृण्वन्भ
गवतोभीक्ष्णमवतारकथामृतं॥ श्रद्दधानोयथाकालमुपशांतजनावृतः॥

मोधर्मईर्यते॥ देशकालादिभेदेनपुनःश्रेयोविशेषकृत॥ गृहस्थस्यगृहस्थमोक्षंप्रतिश्र[illegible]संगत्वेनप्रथमंवनस्थयतिधर्मेष्वभिहितेषुतर्हिगृहस्थ
स्यापिमोक्षोनस्यादितिशंकितविनःपृच्छतिगृहस्थइति॥ तस्यमोक्षधर्मानाहगृहेष्वित्यादियावदध्यायसमाप्ति॥ साक्षाद्वासुदेवार्पणंयथाभवत्ये

भा०स०
५१

स्वप्नमेव मुच्यमानेषु वियुज्यमानेषु यथा उत्थितः स्वप्नात् स्वप्नदृष्टेषु पुत्रादिषु संगं विमुंचति तद्वत् ४ ननु चैवंभूतस्य उदासीनैरभिभूयमानस्य कुतो गृहोचि-
ताः क्रियाः स्युस्तत्राह यावदर्थमिति अंतरेणासक्तः बहिस्त्वासक्तः इव नृलोके जनमध्ये नरतामात्मनुष्यत्वं न्यसेत् प्रकटयेत् प्रकारमात्रं विस्तृकुर्यादित्यर्थः ५ आग्रहं
च क्वापि न कुर्यादित्याह ज्ञातय इति ६ ननु चैवं सर्वविनोदो ऽनेन विना द्रव्यसंपादितो जीवनं कुतो वा कथं कारणं तत्राह दिव्यं स्वर्गादि भौमं धान्यादि
भौमं निधानादि अंतरिक्षं अकस्मात् दैवप्राप्तं एवं स्वत एव अच्युतनिर्मितं दैवलब्धं यत् एतत् पूर्वोक्तं कर्माहि ७ दैवाद्धरिलाभे जातेऽपि तत्राभिमा-

तत्संगाच्छनकैः संगमात्मजायात्मजादिषु विमुंचेन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ४ यावदर्थमुपासीनो देहे गेहे च पंडितः वि-
रक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ५ ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे यद्वदंति यदिच्छंति चानुमोदेत निर्ममः ६ दिव्यं भौ-
मं चांतरिक्षं वित्तमच्युतनिर्मितं तत्सर्वमुपयुंजान एतत्कुर्यात्स्वतो बुधः ७ यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनां अधिकं यो-
ऽभिमन्येत स स्तेनो दंडमर्हति ८ मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः आत्मनः पुत्रवत्पश्येत्तैरेषामंतरं कियत् ९ त्रिवर्गं
नातिकृच्छ्रेण भजेत गृहमेध्यपि यथादेशं यथाकालं यावद्दैवोपपादितं १० आश्वाघांतेऽवसायिभ्यः कामान्संविभजेद्यथा अप्ये-
कामात्मनो दारां नृणां स्वत्वग्रहो यतः ॥ ।११॥ ॥

मानं कार्यमित्याह यावदिति म्रियेत पूर्यते न अत एव यं कमपि स्वगृहे दृष्ट्वा प्रविशंतं जानं
न निवारयेदित्याह मृगेति मर्को मर्कटः सरीसृप् सर्पः मक्षिकाश्चैतैः पुत्रैः एषां मृगादीनां ९ अतिकृच्छ्रेणापायेन भजेत किंतु यावद्दैवप्रापितं तावदेव
भजेत १० श्वानश्च आघाश्च पतिताः श्वपाकाश्चांडालादयः तान् अभिव्याप्य यथार्हं कामान् संविभजेत स्वभोग्यात् विभज्य दद्यात् यद्यप्येकैवात्म-
नो दारा भार्या तस्यामपि तिथिसुश्रूषणे नियुक्तायां स्वस्य सुश्रूषा हीयेत यस्मात् तत्र नृणां स्वत्वग्रहः ममैवेयमित्याग्रहः तामेव कमपि संविभजेत अतिथ्यादिषु
शुश्रूषणे नियुंजीतेत्यर्थः न त्वन्यथा मंतव्यं यथाहं संविभजेरिति स्तेनत्वात् ११

न३
एम
५१

एवं चेत्तेनेश्वरो वशीकृतः स्यादित्याह यदर्थे यत्निभिस्तैः अन्यैरजित एव ॥ १२ ॥ कथमेवं तस्यां स्वत्वाभिमानो हातुं शक्यः तत्त्वविचारेणेत्याह
क्रिमिविडिति भस्मसंनिष्ठापर्यवसानमंते यस्य तदीया देहार्था रतिर्यस्याः सा स्वमहिम्ना नभः पिच्छादयतीति ॥ १३ ॥ किंच सिद्धैर्दैवलब्धैः यज्ञा
वशिष्टार्थैः पंचयज्ञशेषैरन्नादिभिः ॥ १४ ॥ महतां निरूढात्मनां एतद्विवृण्वन्नाह देवादीन् पंचयज्ञदेवताः आत्मानं च एवं पृथक् पुरुषमंत

जह्याद्यदर्थं स्वप्राणान्हन्याद्वा पितरं गुरुं तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः ॥ १२ ॥ क्रिमिविड्भस्मनिष्ठांतं क्वेदं तुच्छं
कलेवरं क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥ १३ ॥ सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः शेषे स्वत्वं त्यजन्प्रा
ज्ञः पदवीं महतामियात् ॥ १४ ॥ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥ १५ ॥ यर्ह्यात्म
नोऽधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः वैतानिकेन विधिना अग्निहोत्रादिना यजेत ॥ १६ ॥ न ह्यग्निमुखतोऽयं वै भगवान्सर्वय
ज्ञभुक् इज्येत हविषा राजन्यथा विप्रमुखे हुतैः ॥ १७ ॥ तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं
ब्राह्मणाननु ॥ १८ ॥

र्यामिणमेव यजेत ॥ १५ ॥ १६ नतु नरतिनिर्बंधो यज्ञार्थं कार्य इत्याह नहीति विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत पूज्येत न
तथाग्निमुखतो हविषा इज्येत ॥ १७ ॥ ब्राह्मणेषु च पंचयज्ञदेवतासु मर्त्यादिषु अन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञं तमंतर्यामिणं ब्राह्मणाननु
मर्त्यादियजने ब्राह्मणयजनानंतरमन्येषु यजनस्य पांक्तेयब्राह्मणानां नियमस्येत ॥ १८ ॥

प्रोष्ठपदे भाद्रपदे ॥ १९ ॥ १० शुक्ले मासि शुक्लेपक्षेऽकृष्णपक्षतृतीयायामित्यर्थः ॥ हेमंते शिशिरे च मार्गशीर्षादिमासचतुष्टयेपि याम्यास्तिस्रोऽष्टकाख्या ॥ २१ ॥ संपूर्णचंद्रा पौर्णमासी राका ॥ न्यूनचंद्रा सैवानुमतिः तयामासनक्षत्राणि तन्नाम्ना मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि युतानि यदा स्युः तदा ॥ नक्षत्रं कृत्तिकाद्यात्तद्युक्ता पौर्णमासी पौषी मासे तत्पत्रया ॥ नाम्ना सपौषो मासाद्याश्चैवमेकादशापर इति ॥ २२ ॥ अनुराधाश्रवणज्ञा

कुर्यादपरपक्षीयं मासि प्रोष्ठपदे द्विजः ॥ श्राद्धं पित्रोर्यथाविन्नं तद्वधूनां च वित्तवान् ॥ १९ ॥ अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये ॥ चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु च ॥ १० ॥ तृतीयायां शुक्लपक्षे नवम्यामथ कार्त्तिके ॥ चतसृष्वष्टकास्वहे हेमंते शिशिरे तथा ॥ २१ ॥ माघे च पितृसप्तम्यां मघायां राकाष्टमागमे ॥ राकायां चानुमत्यां च मासर्क्षाणि युतान्यपि ॥ २२ ॥ द्वादश्यामनुराधासु श्रवणान्तिम उत्तरा ॥ तिसृष्वेकादशी वा स्वे जन्मर्क्षश्रोणयोगयुक् ॥ २३ ॥ तएते श्रेयसः काला नृणां श्रेयोविवर्द्धनाः ॥ कुर्यात्सर्वात्मनैतेनेष्ठ श्रेयोमोघं तदायुषः ॥ २४ ॥ एषु स्नानं जपो होमो व्रतं देवद्विजार्चनं ॥ पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरं ॥ २५ ॥

षाढा उत्तरा भाद्रपदा वा द्वादश्यां यदा स्यात् ॥ अष्टर्क्षारा उत्तराषाढा एकादशी वा यदा स्यात्तदा च ॥ जन्मर्क्षश्रोणयोगयुक् ॥ जन्मनक्षत्रस्य श्रवणस्य च योगेन युक्तं दिनं यदा ॥ योगग्रहणात् संबंधवाक्तल्यार्थं ॥ २३ ॥ न केवलं श्राद्धस्यैवैते कालाः किंतु धर्ममात्रस्येत्याह ॥ तएत इति द्वाभ्यां ॥ तदेव आयुषः अमोघं सदाकल्पमित्यर्थः ॥ २४ ॥ ५ ॥

संस्कारकाल इति ज्ञायायाः उत्सवनादि ॥ अपत्यस्य जातकर्मादि ॥ आत्मनो यत्तदीक्षादि ॥ प्रेतस्य संस्थारहनादि ॥ मृताहस्य श्राद्धसांवत्सरिकं यदा ॥ अन्
स्मिन्नपि ॥ अभ्युदयार्थकर्मणि श्रेयः कुर्यादित्यनुषंगः ॥ २६ ॥ ७ ॥ यत्र यस्मिन्न् सर्वमेतत्स्थावरजंगमाप्ति [illegible] तस्य भगवतो बिंबं रूपं सत्पात्रं यत्र लभ्य
ते स देव एव पुण्यतमो देशः ॥ २७ ॥ अर्हे हन्त्रे पात्राश्रितानि ॥ ३० ॥ सीतायाराम स्यवाश्रमाश्चादिर्येषां द्वयोः पृथक्ग्रहणं पवियोगकालापि द्राक्षेया ॥ ३१ ॥

संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ॥ प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ॥ २६ ॥ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेयआव
हान् ॥ स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥ २७ ॥ बिंबं भगवतो यत्र सर्वमेतच्चराचरं ॥ यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितं ॥ २८ ॥
यत्र यत्र हरेरर्चा स देशः श्रेयसां पदं ॥ यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः ॥ २९ ॥ सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत ॥ कुरु
क्षेत्रं गयाशिरः प्रयागः पुलहाश्रमः ॥ ३० ॥ नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ॥ वाराणसी मधुपुरी पंपा बिंदुसरस्तथा ॥ ३१ ॥ ना
रायणाश्रमो नंदा सीतारामाश्रमादयः ॥ सर्वे कुलाचला राजन्महेंद्रमलयादयः ॥ ३२ ॥ एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ॥ एता
न्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥ धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥ ३३ ॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ॥
हरिरेवैक उर्वीश यन्मयं वै चराचरं ॥ ३४ ॥ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ॥ राजन्यदग्रपूजायां मतः पात्रतयाच्युतः ॥ ३५ ॥

उर्वीश्रिताश्च स्थिरप्रतिमाश्रिताः पूर्वं च शालग्रामशिलार्घ्यर्चरदेशे उक्ता इत्यपौनरुक्त्यं ॥ अत्र येषु देशेषु ईहितः सहस्रगुणाधिकस्य फलस्योदयो य
स्मान्स तथा ॥ ३३ ॥ हरिरेव पात्रं निरुक्तं निर्णीतं ॥ ३४ ॥ तदेवाह देवेषु चक्रादिषु च अर्हत्सु वत पोयोगादिसिद्धेषु च ब्रह्मात्मजो दिशुसनकादिष्वपि सत्सु तत्र युधिष्ठिरीये

भा०स
५२

संमतत्वे हेतुमाह जीवराशिभिर्व्याप्तो ब्रह्मांडकोशएव यो द्विपः सर्वजीवानामात्मनस्तत्तर्पणं ॥ ३६ ॥ तदेव पुरुषनामं निरुक्त्या दर्शयति पुराणीति नृ
तिर्यगादिरूपाणि पुराणि शरीराणि ॥ तेषु तत्तद्रूपेण प्रत्यगंशेन वसतः शेतेऽतः पुरुष इति प्रसिद्धः तारतम्येन तिर्यगादिभ्यः पुरुषः यस्मादाधि
ज्येन वर्तते तस्मात्पुरुषः पात्रं ॥ तत्रापि यावानात्मज्ञानांशः यथा यथा इयते तपआदियोगेन यत्र तत्र पुरुषे यतः ॥ तथा तथा सोपात्रमित्यर्थः ॥ तथाच स्कं

जीवराशिभिराकीर्णोऽण्डकोशांघ्रिपो महान् ॥ तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं ॥ ३६ ॥ पुराण्यनेन सृष्टानि नृतिर्यगृषि
देवताः ॥ शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥ ३७ ॥ तेष्वेषु भगवान्राजंस्तारतम्येन वर्तते ॥ तस्मात्पात्रं हि पुरुषो यावानात्मा यथे
यते ॥ ३८ ॥ दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप ॥ त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥ ३९ ॥ ततोऽर्चायां हरिं केचि
त्संश्रद्धाय सपर्यया ॥ उपासत उपास्तापि नार्थदा पुरुषद्विषां ॥ ४० ॥ पुरुषेष्वपि राजेंद्र सुपात्रं ब्राह्मणं विदुः ॥ तपसा विद्यया
तुष्ट्या धत्ते वेदं हरेस्तनुं ॥ ४१ ॥ नन्वस्य ब्राह्मणा [illegible] ॥ ४१ ॥ [illegible] विदुः
[illegible] राजन्कृष्णस्य जगदात्मनः ॥ पुनंतः पादरजसा त्रिलोकीं दैवतं महत् ॥ ४२ ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे चतुर्दशोऽध्यायः

तिः पुरुषत्वेनाविशिष्टानामात्मेत्यादि ॥ ३८ ॥ तर्हि प्रतिमादौ हरेः पूजा किमिति तत्राह दृष्ट्वेति द्वाभ्यां मिथोऽवज्ञानसन्मानलक्षितानात्माऽपि येषां तेषां
भावं दृष्ट्वा क्रियायै पूजार्थं हरिमुपासते ॥ ३९ ॥ उपासितापि सर्वा पुरुषद्विषिणामर्थदा न भवति पुरुषेषु द्वेषं हित्वार्चितासती सापि महाधिकारिणां पु
रुषार्थप्रदा भवतीत्यर्थः ॥ ४० ॥ पुरुषेष्वेवजात्यात तपआदिभिस्तुपुनर्विशेषांतरमाह पुरुषेष्वपीति यो धत्ते तं सुपात्रं विदुः ॥ ४१ ॥ एतदेव कैमुत्यन्यायेन द्रढ
यति नन्वस्येति ॥ ४२ ॥ सप्तमे चतुर्दशः ॥ १४ ॥

९

राम
५२

ततः पंचदशे सर्गे वर्णाश्रमनिबंधनं ॥ सारतः संग्रहेणाथ वर्णितो मोक्षलक्षणं ॥ सर्वेषामपि मोक्षधर्माणां सारसंग्रहार्थमध्यायारंभः
तत्र श्राद्धगतान् विशेषानाह कर्मनिष्ठा इति ॥ स्वाध्यायादिषु परिनिष्ठिता इति शेषः ॥१॥ कव्यानि पितृउद्दिश्य देयानि ॥ दैवे च हव्यान्यपि त
स्मै देयानि ॥ यथार्हं तदिति सर्वत्र ज्ञानादितारतम्येन ॥२॥३॥ नन्वविस्तरः कृतः श्राद्धे येन निषिद्धस्तत्राह ॥ स्वजनानामसंप्रणात ॥ जा

ना ॥२७॥ च ॥ कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठास्तथा परे ॥ स्वाध्यायेऽन्ये प्रवचने केचिज्ज्ञानयोगयोः ॥१॥ ज्ञाननिष्ठा
य देयानि कव्यान्यानंत्यमिच्छता ॥ दैवे च तदभावे स्यादितरेभ्यो यथार्हतः ॥२॥ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ भो
जयेत्सुसमृद्धोपि श्राद्धे कुर्यान्न विस्तरं ॥३॥ देशकालोचितश्रद्धाद्रव्यपात्रार्हणानि च ॥ सम्यग्भवंति नैतानि विस्तरा
त्स्वजनार्पणात् ॥४॥ देशकाले च संप्राप्ते मुन्यन्नं हरिदैवतं ॥ श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयं ॥५॥ देवर्षिपितृभूते
भ्य आत्मने स्वजनाय च ॥ अन्नं संविभजन्पश्येत्सर्वं तत्पुरुषात्मकं ॥६॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ॥ मुन्यन्नैः
स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥७॥ नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छतां ॥ न्यासो दंडस्य भूतेषु मनोवाक्कायजस्य यः ॥८॥

मानाचेत्त्रिषु संध्याने ततः पित्राद्यः कथं वर्ज्योऽन्य इत्येवं प्राप्ताह्वात्तत्राह इत्यर्थः ॥४॥ मुन्यन्नं आरण्यपक्वव्रीह्यादि ॥ हरिदैवतं हरये निवेदितं सत् ॥५॥७
तत्पुरुषात्मकं ईश्वरस्वरूपं ॥ ॥६॥ ॥७॥ दंडस्य न्यासः हिंसायास्त्यागः ॥ एतादृशोऽन्यो नास्ति ॥८॥

अतएवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजंतीत्याह एक इति अनीहा निष्कामाः ज्ञानदीपिते आत्मस्फूर्तिमति आत्मसंयमने जुह्वति मनोनि
यमनरूपे तत्र यजनयागं त्यजंतीत्यर्थः तदुक्तं सर्वैतदेतैः प्रत्यकूस्फूर्तिरसत्स्फूर्तिलक्षणनिष्ठाविद्यात्मकं मलजन्मसंत्यजेत्वात्मयज्ञमनिग्रहतोः न्यषे
ति ९ मा मा एषः क्रूरं हन्यादिति कुतः अकरुणः तत्कुतः अतज्ज्ञः प्राणान्तर्पकः तत्किं अतत्तः आत्मतत्त्वानभिज्ञः तथा चश्रुतिः नतं विदाथ
यदमाजजानान्यद्युष्माकमंतरंबभूव नीहारेणप्रावृताजल्प्याचाहुतपउक्थशासश्चरंतीति १० धक्कतमनुवर्णयतितस्मादिति ११ अधर्मव

एके कर्ममयान्यज्ञाञ्ज्ञानिनो यज्ञवित्तमाः आत्मसंयमने नीहा जुह्वति ज्ञानदीपिते ९ द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्य
ति एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृप् ध्रुवं तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकीः
क्रियाः ११ विधर्मः परधर्मश्च आभास उपमा छलः अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् १२ धर्मबाधो विधर्मः स्यात्पर
धर्मोन्यचोदितः उपधर्मस्तु पाखंडो दंभो वा शब्दभिच्छलः १३ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात्पृथक् स्वभावविहितो
धर्मः कस्य नेष्टः प्रशांतये १४

तथा क्षात्रियविद्ध्वत् १२ क्रममनादृत्य पंचानि व्याचष्टे धर्मबाधा यस्मिन् क्रियमाणे स्वधर्मबाधः अन्य
स्मै चोदितो ऽन्यस्य परधर्मः उपमेति व्याचष्टे उपधर्मस्त्विति शब्दभित्भेदः अन्यथा व्याख्यानं यस्मिन् यथा दृशावरान्नभोजयेदित्युक्ते दृशाभ्योः
वयानितिशब्दभूरितिपाठे धर्मशब्दमात्रविभर्मानीतितथा यथा गोरस्या इत्युक्ते मरिष्यंत्या गोर्दानं १३ स्वधर्माद्विशेषानंतरं धर्मभूतयस्त्वाश्रममपि
परधर्मो नाश्रेयः अनुपयोगादित्याह स्वभावविहित इति १४

किंच ॥ अधनो धर्मार्थं धनं नेहेत नापेक्षेत ॥ धनार्थं न व्याप्रियेतेति वा ॥ दैवोपपन्नैर्नैव स्वधर्मसिद्धेः कृतत्वात् ॥ यात्रार्थमपि नेहेत स्वेतत्स्वयं वयति अ
नीहेति सर्पोऽहेः षड्भिः ॥ १५ ॥ १६ ॥ उपानहोपादरयोर्यथा उपानत्पादस्य ॥ १७ ॥ गृहपालः श्वा तद्वदाचरति ॥ १८ ॥ १९ ॥ क्षुधा तृषा च जनः कामस्यां
तं याति ॥ अन्नोदकातिरिक्तस्य कामान्तराभावात् ॥ क्रोधस्य चान्तं याति ॥ एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयात् ॥ त्रिश्चिन्तैः दिशो जित्वापि भुवो उ

धर्मार्थमपि नेहेत यात्रार्थं वा धनो धनं ॥ अनीहानीहमानस्य महाहेरिव वृत्तिदा ॥ १५ ॥ संतुष्टस्य निरीहस्य स्वात्मारामस्य
यत्सुखं ॥ कुतस्तत्कामलोभेन धावतोऽर्थेहया दिशः ॥ १६ ॥ सदा संतुष्टमनसः सर्वाः शिवमया दिशः ॥ शर्कराकंटकादिभ्यो यथोपा
नत्पदः शिवं ॥ १७ ॥ संतुष्टः केन वा राजन्न वर्तेतापि वारिणा ॥ औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः ॥ १८ ॥ असंतुष्टस्य
विप्रस्य तेजो विद्या तपो यशः ॥ स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते ॥ १९ ॥ कामस्यांतं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् ॥ जनो
याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥ २० ॥ पंडिता बहवो राजन्बहुज्ञाः संशयच्छिदः ॥ सदसस्पतयोऽप्येके असंतोषात्पतंत्यधः ॥
असंकल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् ॥ अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥ २२ ॥ आन्वीक्षिक्या शोकमोहौ दंभं मह
दुपासया ॥ योगांतरायान्मौनेन हिंसां कायाद्यनीहया ॥ २३ ॥

क्वापि लोभस्यैवांतं यांतीत्यर्थः ॥ २० ॥ २१ ॥ इदानीं कामादिजयोपायानाह ॥ असंकल्पादिति नवभिः ॥ जयेदिति यथापेक्षमन्वेति ॥ अर्थेऽनर्थदर्शनेन
तत्त्वावमर्शनात् अद्वैतानुसंधानेन ॥ २२ ॥ आन्वीक्षिक्या आत्मानात्मविवेकेन ॥ महतां सात्त्विकानां सेवया ॥ योगस्यांतरायान्लोकवार्तादीन् ॥ २३ ॥

नृ॰ १

येभ्यो भूतेभ्यो भयं जायते तेष्वेव कृपया हिताचरणेन । दैवं देवोपसर्गनिमित्तं दुःखं मनःपीडादि तदुक्तं याज्ञवल्क्येन । विमना विफलारंभः संसीदत्यनिमि
त्ततः इति । आत्मजं देहजं योगवीर्येण प्राणायामबलेन । सत्वनिषेवया सात्विकाहारेण ॥ २४ ॥ ननु कथं गुरोर्भक्त्या सर्वस्य जयः स्यात् । तस्या
पि मनुष्यत्वेन नश्वरत्वात् । तत्राह यस्येति । मर्त्यासद्धीः मनुष्य इति दुर्बुद्धिः तस्य शास्त्रश्रवणादि कुंजरस्नानवद्व्यर्थं ॥ २६ ॥ ननु गुरोरपीश्वरस्य सतो नरमे
व मन्यंते अत आह । एष वै इति । साक्षाद्भगवानेव भवेत् । लोकस्य नरोऽसाविति बुद्धिर्भ्रान्तिरित्यर्थः । यद्वा न हि तत्त्वचारे मनुष्यबुद्ध्या प्रतीयमानोऽपि त

कृपया भूतजं दुःखं दैवं जह्यात्समाधिना । आत्मजं योगवीर्येण निद्रां सत्वनिषेवया ॥ २४ ॥ रजस्तमश्च सत्वेन सत्वं चोपशमेन च । एतत्स
र्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् ॥ २५ ॥ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ । मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् ॥ २६ ॥ एष वै भ
गवान्साक्षात्प्रधानपुरुषेश्वरः । योगेश्वरैर्विमृग्यांघ्रिर्लोको यं मन्यते नरं ॥ २७ ॥ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः । तदंता यदि
नो योगानावहेयुः श्रमावहाः ॥ २८ ॥

द्रूपो भगवानेव भवेत् । यथैव श्रीकलस इत्यर्थः ॥ २७ ॥ एवं सर्वैः रूपायैः कामादिवेगं जित्वा नियतेंद्रियो भूत्वा ध्यानपरो भवेत् । अन्यथा तु प्रवृत्तिसर्वशास्त्र
वैफल्यं स्यादित्याह षड्वर्गेति । सर्वा अपि नियमचोदनाः इष्टापूर्तादिविधयः षडिंद्रियवर्गस्य यः संयमः तस्मिन्नेवैकस्मिन्नंतो यासां तादृशेकपरा इत्य । एम
र्थः न च मात्रमपि चरितार्था इत्याह तदंताः सत्योऽपि यदि योगान् धारणाध्यानसमाधीन्नो आवहेयुः न साधयेयुः तर्हि केवलं श्रमावहा एवेत्यर्थः ॥ २८ ॥ ५५

एतदेव दृष्टान्तेनाह ॥ यथा वार्तादयः कृष्यादयः अर्थाः ॥ तत्फलानि च योगस्यार्थं मोक्षं न साधयन्ति ॥ प्रत्युत अनर्थाय संसारायैव ॥ असतो बहिर्मुखस्येष्टापूर्तादीन्यपि तथा ॥ २९ ॥ एवं योगं युञ्जतोपि यस्य कुटुंबादिसंगेन चित्तं विक्षिप्येत तस्य कृत्यमाह यश्चित्तस्य विजये यत्त उद्युक्तः स भिक्षुः स्यात् संन्यसेत ॥ तथा च स्मृतिः ॥ दृढाहतस्य गार्हस्थ्ये ध्यानभंगादिकारणे ॥ लब्ध्वा पित्रा गृही स्वेष्टं संन्यसेदविचारयन्निति भिक्षया प्राप्तं मितमशनं यस्य ॥ ३० ॥ ऋजु सम

यथा वार्तादयो ह्यर्था योगस्यार्थं न बिभ्रति ॥ अनर्थाय भवेयुः स्म पूर्तमिष्टं तथासतः ॥ २९ ॥ यश्चित्तविजये यत्तः स्यान्निःसंगोऽपरिग्रहः ॥ एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ॥ ३० ॥ देशे शुचौ समे राजन् संस्थाप्यासनमात्मनः ॥ स्थिरं सुखं समं तस्मिन्नासीतर्ज्वंग ॐमिति ॥ ३१ ॥ प्राणापानौ सन्निरुन्ध्यात्पूरकुंभकरेचकैः ॥ यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ॥ ३२ ॥ यतो यतो निःसरति मनः कामहतं भ्रमत् ॥ ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः ॥ ३३ ॥ एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः ॥ अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ॥ ३४ ॥ कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत् ॥ चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥ ३५ ॥ यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गावपनात्पुनः ॥ यदि सेवेत तान्भिक्षुः स वै वान्ताश्यपत्रपः ॥ ३६ ॥

मंगं यस्य सः ॥ सुखं यथा भवत्येवमासीत ॐमित्युच्चारयन्निति शेषः ॥ ३१ ॥ ३२ ॥ एवमनिशमभ्यसतस्तस्य यतेश्चित्तं निर्वाणं याति ॥ ३४ ॥ न च पुनर्विक्षिप्येतेत्याह ॥ कामादिभिरस्पृष्टं यच्चित्तं न तत्रोत्तिष्ठेत ॥ यतः प्रशान्ता अखिला वृत्तयो यस्य ॥ कुतः ब्रह्मसुखेन स्पृष्टं ॥ ३५ ॥ यस्तु प्रव्रज्यां कृत्वापि भोगमभिलिप्सुः स्यात्तं निन्दति य इति ॥ त्रयाणां धर्मादीनां वर्गः आसमन्तादुप्यते यस्मिन्नूतस्माद्गृहात् तान्धर्मादीन् ॥ वान्ताशी छर्दितभोजी निर्लज्जश्च सः ॥ ३६ ॥

नचेदमुचरितं दृश्यत्वादित्याह ॥ येः पूर्वस्वदेहः अनात्मादिरूपः स्मृतः विंतितः तएव पुनरेतिमात्मेति त्वाश्लाघयंति ह्यावयंतिहि ॥ ३७ ॥ पतितपलज्ञणीकृत्यानपि
स्वधर्मत्यागिनोनिंदति गृहस्थस्येतिद्वाभ्यां ॥ ३८ ॥ ७ ॥ नचात्मतत्वज्ञस्यभिक्षोरिन्द्रियलौल्यंपिकोदोषस्तत्राह आत्मानं परंब्रह्मवेज्ञानीयात ॥ ज्ञानेनधुतानिर
स्ता आशयावासनायस्यतस्यज्ञानिनोलौल्यमेवनसंभवतीत्यर्थः ॥ तथाचश्रुतिः ॥ आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरम
नुसंज्वरेदिति ॥ ४० ॥ ज्ञानस्यतुलौल्येननरकपाताप्यत्रेरुप्रमत्तेनप्रदानत्वज्ञानेपतितव्यमितीममर्थं आत्मानंरथिनंविद्धि शरीरंरथमेववेत्यादिश्रुत्युक्तरथरूपक

येः स्वदेहः स्मृतोऽनात्मामर्त्योविट्कृमिभस्मसात् ॥ तएनमात्मसात्कृत्वाश्लाघयंतिह्यसत्तमाः ॥ ३७ ॥ गृहस्थस्यक्रियात्यागोव्रत
त्यागोवटोरपि ॥ तपस्विनोग्रामसेवाभिक्षोरिन्द्रियलोलता ॥ ३८ ॥ आश्रमापसदाह्येतेखल्वाश्रमविडंबकाः ॥ देवमायाविमूढांस्ता
नुपेक्षेतानुकंपया ॥ ३९ ॥ आत्मानंचेद्विजानीयात्परंज्ञानधुताशयः ॥ किमिच्छन्कस्यवाहेतोर्देहंपुष्णातिलंपटः ॥ ४० ॥ आहुः शरी
रंरथमिन्द्रियाणिहयानभीषून्मनइन्द्रियेशं ॥ वर्त्मानिमात्राधिषणांचसूतंसत्वंबृहद्बंधुरमीशसृष्टं ॥ ४१ ॥ अक्षंदशप्राणमधर्म
धर्मौचक्रेऽभिमानंरथिनंचजीवं ॥ धनुर्हितस्यप्रणवंपठंतिशरंतुजीवंपरमेवलक्ष्यं ॥ ४२ ॥

द्वारेणाह आहुरितिषड्भिः ॥ इन्द्रियेशंमनोऽभीषून्रश्मीनाहुः ॥ मात्राःशब्दादीन्वर्त्माभिगंतव्यदेशानाहुः सत्वंचित्तंबृहद्देहव्यापिबंधुरंबंधनं ॥ चित्तंविना
ह्यनिबद्धमपिवशरीरंभवति ॥ ईशसृष्टमितिबंधनकर्त्तावीराएवेत्यर्थः ॥ ४१ ॥ प्राणादयः पंच ॥ नागः कूर्मश्चकृकलोदेवदत्तोधनंजयश्चेत्येवंदशविधप्राण
मक्षं ॥ अभिमानमहंकारःजीवरथिनंशुद्धंजीवंशरं ॥ परंब्रह्मलक्ष्यंयथाधनुषाशरोलक्ष्येनिपात्यते ॥ तथाप्रणवेनजीवोब्रह्मणिनिपात्यतइत्यर्थः ॥ ४२ ॥

एगारयोजेतव्याः शत्रवः ४३ तत्र रजोभिनिवेशः क्वचित्तु आरूढसमाधेः सत्वप्रकृतयो ऽपि परोपकारादिप्रवृत्तयः शत्रवः ४४ नृकायमेव रथं आत्म
वशाः उपकल्पा इंद्रियादिपरिकरो यस्मिन्‌ तं तथाभूतं यावद्धत्ते तावदेव गरिष्ठानां गुरूणां चरणसेवया निशितं तीक्ष्णं ज्ञानखड्गं बिभ्रन्‌ अच्युताश्रयः सन्निरस्तश-
त्रुः उपशांतः स्वानंदेन तुष्टो भूत्वा इदं रथादिकमुपेक्षेत इत्यर्थः ४५ अच्युताश्रयाभावे बाधकमाह नो चेदिति अप्रमत्तो बहिर्मुखा ये इंद्रियवाजिनः सू-
तश्च ते उत्पथप्रवृत्तिमार्गं नीत्वा विषयाख्येषु दस्युषु निक्षिपंति ॥ दस्यवः सूतेन च सह वर्तमानं ॥ तमोंधे तमसा व्याप्ते ॥ उरुमृत्युभयं यस्मिन्‌ ॥ ननु वेदवि-

रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ॥ मानो ऽवमानो ऽसूया च माया हिंसा च मत्सरः ४३ रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमा-
दयः ॥ रजस्तमः प्रकृतयः सत्वप्रकृतयः क्वचित्‌ ४४ यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातं
ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वानंदतुष्ट उपशांत इदं विजह्यात्‌ ४५ नो चेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं
विषयदस्युषु निक्षिपंति ॥ ते दस्यवः सहयसूतममुं तमोंधे संसारकूप उरुमृत्युभये क्षिपंति ४६ प्रवृत्तं च निवृत्तं च द्विविधं कर्म
वैदिकं ॥ आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुते ऽमृतं ४७ हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशांतिदं ॥ दर्शश्च पूर्णमासश्च चातुर्मास्यं
पशुः सुतः ४८ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ॥ पूर्तं सुरालयारामकूपाजीव्यादिलक्षणं ॥ ४९

हितेष्टापूर्तादिकारिणः प्रश्नः कथमेवमनर्थप्राप्तिः स्यादित्याशंक्य वेदोक्तकर्मणां द्वैविध्यं दर्शयन्‌ फलभेदमाह प्रवृत्तं चेति द्वाभ्यां ४७ हिंस्रं स्वरूपेणादि-
कर्म अशांतिदं अत्यासक्तिप्रयुक्तं आदिशब्दार्थं विवरणं दर्शश्चेति पशुः पशुयागः सुतः सोमयागः ४८ हुतं वैश्वदेवं प्रहुतं बलिहरणं एतत्सर्वमिष्ट-
मुच्यते एतदेव यदि काम्यमशांतिदं च तर्हि प्रवृत्ताख्यमित्यर्थः आजीव्यं प्रपादि ४९

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह । द्रव्यस्य वह्नौ हुतस्य वा भुक्ताशनादेः सूक्ष्मो विपाकः परिणामो देहांतरारंभकः येन संपरिष्वक्तो गच्छति य एव सू-
त्रावयवशब्दे नोक्तः इति तेपंचम्यामाहुतावापः पुरुषवचसो भवंतीति । पाठांतरे द्रव्यशब्देन तेजोमात्रशब्दोक्तानि इंद्रियाणि । ऊष्मविपाकशब्देन हृदयाग्र-
प्रद्योतः तथा च श्रुतिः स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति तथा तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन नैष आत्मा निष्क्रामतीति धूमादि-
शब्दैः तत्तदभिमानिन्यो देवताः तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः तत्र भुक्तभोगस्यावरोहणप्रकारो दर्शः इत्यादि । दर्श इति विपरीतलक्षणया विशिष्ट

द्रव्यात्सूक्ष्मविपाकस्थ धूमो रात्रिरपक्षयः ॥ अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥ ५० ॥ अन्नं रेत इति ज्ञेयाः पितृयानेन पुनर्भवः ॥ ए-
वैकरूपेणावरुह्य भूत्वा भूत्वेह जायते ॥ ५१ ॥ निषेकादिश्मशानांतैः संस्कारैः संस्कृतो द्विजः ॥ इंद्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जु-
ह्वति ॥ ५२ ॥

भोगक्षयशोकाग्निना देहलयेनादर्शनमुच्यते ॥ एतदुक्तं भवति ॥ भूतसूक्ष्मयुक्तो धूमाद्यातिवाहिकदेवताभिः सोमलोकं प्रापितस्तत्रोपभोगावसाने विलीनदेहो
वृष्टिद्वारेणौषधीवीरुधादिस्थामापन्नः क्रमेण जायते ॥ एवं पुनर्भवहेतुः पितृयानं प्रवृत्तकर्ममार्ग इति ॥ ५० ॥ ज्ञेया इति भूपते ॥ पुनर्भवमेवाह ॥ एकैकरूपेण
प्रत्येकं क्रमेण भूत्वा तत्तत्स्थानं त्रिधा प्राप्येह भूमौ जायते ॥ ५१ ॥ तत्राधिकारिणमाह निषेकादीति ॥ अन्यास्त्विष्टादिकाप्येवं जन्म न लभत इत्यर्थः ॥ निवृत्तक- राम
र्मिस्योपासनाविशेषमुपदिशन्नर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह इंद्रियेष्वित्यादिना ॥ यज्ञाद्व्यपनेतुं हिंसाया उर्वीरत्वादिति मुख्यं निवृत्तं कर्मैव दर्शयन्ना- ५७
ह ॥ ज्ञानेन दीप्यंत इति ॥ तथा तेषु ॥ इंद्रियव्यापारेणाभिष्टाभक्तौ दीनामिंद्रियतावन्मात्रतां भावयंतीत्यर्थः ॥ एवमुत्तरत्रापि ॥ ५२ ॥

ओंमौ दर्शनादिसंकल्परूपे मनसि ॥ वैकारिकं विकारयुक्तं मनो वा वि ॥ विद्यादिलक्षणया वा वाह्यि मनः कर्तृत्वादि विकारं भजति ॥ वर्णानां समाम्नाये समु
दाये तद्विशेषत्वाद्भावः स्वरेणाऽकारादि स्वरत्रयात्मके ॥५३॥ ॐकारं विशेतं वनारे ॥ प्राणे सूत्रात्मनि ॥ महति ब्रह्मणि ॥ अग्निरिति तत्तदभिमानिन्यो देवताः
ताः प्राप्नोतीति पूर्ववत् ॥ देवाहः प्राज्ञात्तस्य वांतः शकाशुक्लपक्षस्यांतः ॥ पक्षा ॥ प्राज्ञोणकेति च षण्मासं त उत्तरायण ॥ स्वराट् ब्रह्मा ॥ एवं ब्रह्मलोकं गतस्य
भोगावसाने मोक्षप्रकारमाह विश्व इति ॥ विश्वः स्थूलोपाधिः स स्थूलं ॥ तत्सूक्ष्मे विलाप्य सूक्ष्मोपाधिस्तैजसो भवति ॥ सूक्ष्मं च कारणे विलाप्य कारणोपाधिः

इन्द्रियाणि मनस्सर्वो वा विवैकारिकं मनः ॥ वा वर्णसमाम्नायेन मौंकारे स्वरेत्यमेत ॥५३॥ ॐकारं विशेनारे ततः प्राणम
हत्परं ॥ अग्निः सूर्यो दिवा प्राह्णः शुक्लोणकोत्तरं स्वराट् ॥ विश्वस्तैजसः प्राज्ञस्तुर्य आत्मा समवयात ॥५४॥ देवयानमि
दं प्राप्य भूत्वा भूत्वा तु पूर्ववशः ॥ आलयात्सुपशांतात्मा ह्यात्मस्थो न निवर्तते ॥५५॥ यदेते पितृदेवानामयने वेदनिर्मिते ॥ शास्त्रे
ण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥५६॥ आद्यावंते जनानां सद्बहिरंतः परावर ॥ ज्ञानं ज्ञेयं चवे वाच्यं तमो ज्योतिश्च तत्स्वयं ॥५७॥

प्राज्ञो भवति ॥ कारणं च सर्वसाक्षित्वेनान्वयात्साक्षिस्वरूपे विलाप्य तुर्यो भवति ॥ तेषां च व्यभिचारिणां साक्ष्याणां लये शुद्ध आत्मा भवति शुद्ध्यत इत्यर्थः
॥५४॥ यथेतरो भूत्वा निवर्तते तेन तथा न निवर्तत इत्यर्थः ॥५५॥ वेदेन निर्मिते ॥ ते धूममभिसंभवंतीत्यादिना ॥ तेऽर्चिरभिसंभवंतीत्यादिना च ॥ निश्चयेन वि
विच्य सत्यापित इत्यर्थः ॥ जनस्थोऽपि देहस्थोऽपि न मुह्यति ॥५६॥ तत्र हेतुमाह आद्याविति ॥ जनानां देहादीनामादौ कारणत्वेनांते चावधित्वेन यत्सत्तत्तथा बहि
र्भोगं प्रत्यक्षं भोक्ता ॥ परं भवरं च उच्चं नीचं ॥ तमः प्रकाशः ज्योतिः प्रकाशः तत्सर्वमेवं यत्तस्मान्नाद्यविना नात्मन एव न तस्मादतिरिक्तं वस्तु किंचिदस्ति येन मुह्येदित्यर्थः ॥५७॥

२७

भा०स
५८

ननु तर्हि कथं दृश्यमानस्यापि प्रतीयते तत्राह ॥ आबाधितः तर्कविरोधेन सर्वतो बाधितो ऽपि आभासः प्रतिबिंबादिर्वस्तुतया यथास्मृतः ॥ तद्वद्देहादिकं यं सर्वं सर्वथा त्वे
न विकल्पितं तत्त्व परमार्थतः दुर्घटत्वात् ॥ ५७ ॥ तदेवाह क्षित्यादीनां पंचभूतानां छायाया एकत्र ध्यानं वननूपं देहादिसंघातानां परिणामानां मध्ये कतमापि न भवति
न तावत्तेषां संघातः वृक्षाणामिव वनं ॥ एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः न ह्येकस्मिन्वृक्षे आकृष्टे सर्वं वनमाकृष्यते ॥ न च विकारः आरब्धो ऽवयवी ॥ अपि
हारात्वपरिणामोपि ॥ कुतः ॥ स किं स्वावयवेभ्यो वा परिणामतेभ्यो वा पृथक् ॥ तदन्वितो वा ॥ न तावत्पृथक् तथा अप्रतीतेः ॥ न चान्वितः स किंचित्प्रत्येकं सर्वे
पि अन्वेति अंशेन वा ॥ आद्ये अंगुलिमात्रे ऽपि देहबुद्धिः स्यात् ॥ द्वितीये तस्याप्यंगीकारे सत्यनवस्था स्यात् ॥ अतो मृषैवेत्यर्थः ॥ ५८ ॥ एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां

२७

हि

आबाधितो ऽपि ह्याभासो यथा वस्तुतया स्मृतः ॥ दुर्घटत्वाद्देहादिकं तद्वदर्थविकल्पितं ॥ ५७ ॥ क्षित्यादीनामिहार्थानां छायानकत
मापि ॥ न संघातो विकारो ऽपि न पृथक्नान्वितो मृषा ॥ ५८ ॥ धातवो ऽवयवित्वाच्च तन्मात्रावयवैर्विना ॥ न स्युर्ह्यसत्यवयविन्यस
न्नवयवों ततः ॥ ५९ ॥ स्यात्सादृश्यभ्रमस्तावद्विकल्पे सति वस्तुनः ॥ जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६० ॥

क्षित्यादीनामपि मिथ्यात्वमाह धारयंतीति धातवो महाभूतानि ॥ तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः ॥ अवयवित्वात्तेषामपि ॥ तर्ह्यवयवः सत्य इति चेत् तत्राह
उक्तप्रकारेणावयविन्यसति ॥ अवयवो ऽप्यंततो ऽसन्नेव स्यात् ॥ अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः ॥ ननूक्तं पंचमस्कं
धे ॥ एवं निरुक्ते क्षितिशब्दवृत्तमित्यादि ॥ ५९ ॥ न चावयविनो ऽभावे अणुमात्रावशेषत्वाद्बाल्यादिरूपो ऽयं देवदत्त इति प्रत्यभिज्ञानं न स्यात् तदुक्तं भेदैः ॥ आविर्भाव
तिरोभावधर्मकेषु तनुपाधिषु तद्दृढ्मीति ॥ तत्राह स्यादिति ॥ वस्तुनः परमात्मनो विकल्पे भेदे ऽभ्युपगते ॥ यद्वा वस्तुनोः विद्याविकल्पे सति पूर्वपूर्वापरोपसादृश्या
त्स एवेति भ्रमः स्यात् ॥ स च तावदेव यावद्विद्यानिवृत्तिः ननु सर्वमिथ्यात्वे शास्त्रस्य विधिनिषेधता कथं तत्राह ॥ स्वप्नमध्ये जाग्रत्स्वापयोरवस्थयोर्यथेति ॥ ६० ॥

राम
५८

इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति भावाद्वैतमिति चतुर्भिः वर्णयन्संपादयन् ॥ स्वानुभूत्यात्मतत्त्वानुभवेन त्रीन् जाग्रदादीन् त्रय आवसथास्त्रयः स्वप्ना इति श्रुतेः ॥ यद्वा ॥ वस्तुभेदबुद्धिरेकः स्वप्नः ॥ तत्स्वाधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः ॥ यतो मत्कर्मसाधितमेव तत्फलं ममैव भोग्यमिति तृतीयः ॥ तान्धुनुते निवर्तयति ॥ ६२ ॥ कार्यकारणयोर्वस्त्वैक्यस्य दर्शनं आलोचनं तंतुरेव न पट इति ॥ ६३ ॥ मनोवाक्

भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं यथात्मनः ॥ वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ॥ ६२ ॥ कार्यकारणवस्त्वैक्यदर्शनं पटतंतुवत् ॥ अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ॥ ६३ ॥ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणं ॥ मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ॥ ६४ ॥ आत्मजायासुतादीनामन्येषां सर्वदेहिनां ॥ यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥ ६५ ॥ यद्यस्य वानिषिद्धं स्याद्येन यत्र यतो नृप ॥ स तेनेहेत कार्याणि नरो नान्यैरनापदि ॥ ६६ ॥

तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा ॥ उद्देश्यफलभेदो हि क्रियाभेदहेतुः ॥ ईश्वरार्पणे तु तदभावात्क्रियाणामद्वैतं ॥ ६४ ॥ आत्मनः स्वस्य जायादीनां च स्वार्थश्च कामश्च तयोः ॥ देहादीनां पंचभूतात्मकत्वेन ॥ भोक्तुश्च परमात्मत्वेनाभेदालोचने नार्थकामयोर्यदैक्यदर्शनमित्यर्थः ॥ ६५ ॥ उक्तानाश्रमधर्मान्संक्षिप्याह यद्यदिति ॥ यत् द्रव्यं ॥ येनोपायेन ॥ यतः सकाशात् ॥ ६६ ॥

भा॰स
५९

प्रक्रान्तमुपसंहरति एतैरिति अस्य श्रीकृष्णस्य गतिं तद्भक्तिभाक् तस्य भक्तः ६७ एतच्च सर्वसाधारणमुक्तं भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहेतुरिति
पांडवानेव लक्षीकृत्याह यथाहीति हे नृपदेव नृपेषु देवैश्च सहोपेत दुस्त्यजादिति वा आत्मनः श्रीकृष्णदेवप्रभोर्हेतोः अडभावश्चार्षः उत्कर्षेणातर
तेत्यर्थः यथा यथावत् तमेव भजतेति शेषः यद्वा यथा आपद्गणादुत्तीर्णा त्वं यथा वक्रतून् अहार्षीत् तथा श्रीकृष्णदेवतारकात् संसारादप्युत्तरते

एते चान्ये च वेदोक्तैर्वर्त्तमानः स्वकर्मभिः गृहेप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाग्नरः ६७ यथाहि यूयं नृपदेव दुस्त्यजादा
पद्गणादुत्तरतात्मनः प्रभोः यत्पादपंकेरुहसेवया भवानहारषीन्निर्जितदिग्गजः क्रतून् ६८ अहं पुराभवं कश्चिद्गंध
र्वउपवर्हणः नाम्नातीते महाकल्पे गंधर्वाणां सुसंमतः ६९ रूपपेशलमाधुर्यसौगंध्यप्रियदर्शनः स्त्रीणां प्रियतमो नि
त्यं मत्तस्तु पुरलंपटः ७० एकदा देवसत्रे तु गंधर्वाप्सरसां गणाः उपहूता विश्वसृग्भिर्हरिगाथोपगायने ७१ अहं च गायंस्त
द्विद्वान्स्त्रीभिः परिवृतो गतः ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ७२ ता
वद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनां शुश्रूषयानुषंगेण प्राप्तोहं ब्रह्मपुत्रतां ७३ धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः

त्यर्थः ६८ श्रीकृष्णसेवा महत्तामवाह यथा भ्रमरयति तत्कृपयावसिष्यतीति दर्शयन् पूर्ववृत्तं गृहस्थो येन पदवीमंजसा न्यासिनामियात् ७४
तमाह अहमिति सार्द्धैः पंचभिः नाम्ना उपवर्हणः ६९ पेशलसौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ७० ॥ ७१ ॥ तदाकर्ण्य विद्वान् उन्मत्तः सन्
गायन्नेव गतः ॥ ७४ ॥

राम
५९

भा॰स॰
६०

त्वंतत्कृतार्थएवेतिसूचयति ततः पूर्वश्लोकानेवपठतियूयमिति
यूयंस्वलोकेवतभूरिभागालोकंधुनानाधुनेनयेभिर्यति
वायंदुरूहमहद्भिःस्मृतंपदेवैकल्पनिर्वाणसुखानुभूति
श्रः ॥१६॥ नयस्यसाक्षाद्भवपद्मजादिभीरूपंधिया
स्वतामेषसमाविर्तापतिः ॥१७॥ श्रीशुकउवाच ॥ ६
तः कुलंमवधेमविद्धलं ॥१८॥ इत्थंपार्थोनुपाम
मविस्मितः ॥१९॥ इतिदाक्षायणीनांतेष्टकवंशा
॥ ६ ॥ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेपारमह
रदीपकासमेत्यपद्धिर्यतिश्रीधरनिर्मितायांटीकायांसप्तमे

शोषस्पष्टं ॥ १५ ॥ ६ ॥ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेष्टीकार्थोप
येषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्यलिंगं ॥१५॥ स
॥ श्रियःस्वहस्तैःखलुमातलेयमात्मार्हणायोविधिकर्तु रु
वस्तुतयोपवर्णितं ॥ सोनेनभक्त्योपशमेनपूजितः प्रसी
तिदेवर्षिर्गणाप्रोक्तंनिशाम्यभरतर्षभ ॥ पूजयामाससुप्री
तः सूजितः प्रययौमुनिः ॥ श्रुत्वाकृष्णंपरंब्रह्मपार्थः पर
: प्रकीर्त्तितः ॥ देवाःसर्वमनुष्याद्यालोकायत्रवरावराः ॥
स्यांसंहितायांवैयासिक्यांयुधिष्ठिरनारदसंवादेपंचद
पंचदशोध्यायः ॥ १५ ॥ शोध्यायः ॥

राम
६०

अष्टमः ८

मा० श्रु
१

श्रीगणेशाय नमः ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्तजनमानसनिवासाय श्रीराम
यस्त्रुथाष्टमेचतुर्विंशात्यध्याये तु वर्णितं ॥ तत्त्वतेऽर्कोपि रे वेदैर्मूर्त्तिमिश्च हरेः सह ॥ १ ॥ इति मन्वन्तरं चैवम
त्वाद्याः षट् पृथक् पृथक् ॥ एवन्तैर्यंति मद्धर्मान्पालयंत्याचरन्ति च ॥ २ ॥ अतो मन्वन्तरस्यान्ते मद्धर्मेशतिलद्द्राणि
गनोवाच ॥ स्वायंभुवस्येह गुरुवंशोयं विस्तरोक्तः ॥ यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः ॥ १ ॥
येनैव क्रियमाणेन नरेणानिरयं व्रजेत ॥ ३ ॥ तत्र तत्पथमे स्वायंभुवः स्वारोचिषस्तथा ॥ उत्तमस्तामसश्चेति चतुर्थम
उनिरूपणं ॥ ४ ॥ स्वायंभुवेतरेनं तदुरं तद्गुणावर्णनात उदितः परिपप्रच्छ सर्वमन्वन्तरस्थितिं ॥ ५ ॥ स्वायंभु
वस्येति विधिः ॥ यत्र विश्वसृजां मरीच्यादीनां मत्तकन्या सवत्र पोत्राहितसर्गः ॥ १ ॥ ॥ गोपालकृष्णाय नमः

राम
१

महीयसो हरेः अत्र कश्चिद्रूपान्तरमाश्रित्य उपेक्षितमस्माभिः १ यस्मिन्नतीते यत्कृतवान् यस्मिन्ननागते यत्कर्ता करिष्यति अद्य वा वर्तमाने यत्कु-
रुते तद्वदेत्यन्वयः २ अस्मिन्कल्पे षट् मनवो व्यतीताः ४ तस्य मनोः दुहित्रोः कपिलयज्ञमूर्ती अपि पुत्रतां गतः प्राप्तः ५।७ घोरं दुश्चरं तपस्तप्यमानः समा-
धावद्भूतामिंद्रियग्रामाणां निद्रितोत्थितवद्विस्मितइव उपदिशन्निव अश्रुवर्षन्निव वाष्पैः श्लोकेरन्वाह ८ येन चिदात्मना विश्वं चेतयते चेतनी भवति वि-
श्वं तु यं न चेतयते न चेतनी करोति स्वत एव चिद्रूपत्वात् तत्र हेतुः अस्मिन्शयाने स्वपति यो जागर्ति साक्षितया वर्तते अहो विश्वं नायं जनः तं वेद स तु वेद ९

यत्र यत्र हरेर्जन्म कर्माणि च महीयसः गृणंति कवयो ब्रह्मंस्तानि नो वद शृण्वतां १ यद्यस्मिन्नंतरे ब्रह्मन् भगवान्विश्वभावनः कृतवान्कुरुते
कर्ता ह्यतीतेऽनागतेऽद्य वा २ श्री शु उ च मनवोऽस्मिन्व्यतीताः षट् कल्पे स्वायंभुवादयः आद्यस्ते कथितो यत्र देवादीनां च संभवः ४ आकृत्यां
देवहूत्यां च दुहित्रोस्तस्य वै मनोः धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ५ कृतं पुरा भगवतः कपिलस्यानुवर्णितं आख्यास्ये भगवान्यज्ञो यच्च-
कार कुरूद्वह ६ विरक्तः कामभोगेषु शतरूपापतिः प्रभुः विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ७ सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन्
तप्यमानस्तपो घोरमिदमन्वाह भारत ८ मनुरुवाच येन चेतयते विश्वं विश्वं चेतयते न यं योजागर्ति शयानेऽस्मिन्नायं तं वेद वेद सः ९ आत्मावा-
स्यमिदं विश्वं यत्किंचिज्जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनं १०

तस्येश्वरत्वं दर्शयन् लोकस्य हितमुपदिशति आत्मना ईश्वरेणावास्यं व्याप्तं
न्नौ वेतन्याभ्यासंख्यायं विश्वं सर्वं जगत्यां लोके यत्किंचिज्जगद्गतिजालरूपं तत्तैने वेश्वरेण यत्किंचित्प्रत्तं तेन धनेन तेनैव भुंजीथाः भोगान्भुंक्ष्व यद्वा तेन देहेन त्यक्तेन
नश्वरार्पितेनैव भुंजीथाः न तु स्वार्थं कस्य स्वित्कस्यापि धनं मा गृधः नाभिकांक्षीः यद्वा कस्य स्विद्धिरिति कस्यान्यस्य धनमस्ति यतो धनाकांक्षा क्रियते इत्यर्थः तथा च
श्रुतिः ईशावास्यमिति यथा श्लोकमेव ॥ १० राम

भा॰ अ॰
१

ननु यदि स सर्वं व्याप्नोति तर्हि चक्षुरादिभिः किं न प्रतीयते अत आह । यं पश्यंतं जनः चक्षुरादिर्न पश्यति चक्षुराद्यविषयत्वात् । न हि प्रमातारं प्रमाणं विषयीकरोतीति भावः । तथा च श्रुतिः । चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमित्यादि । ननु तर्हि इतरनाशे ईश्वरस्यापि तत्तद्विषयं चाक्षुषज्ञानमिवेश्वरस्यापि स्वरूपभूतं तद्विषयं ज्ञानं नश्येत् अत आह । यस्य तु पश्यतः चक्षुर्ज्ञानं न रिष्यति न नश्यति तत्तदाकारेण तस्य चाभावात् तत्र तेनैव नाशो न स्यात् । सिद्धज्ञानस्य । न हि सवितृप्रकाशः प्रकाश्यनाशे नश्यतीति भावः । भूतानि निलयो यस्य तं सर्वान्तर्यामिणं तथापि सुपर्णं शोभनं पतन्तं असंगं उपधावत भजध्वं ॥ तस्य स्वरूपस्य नित्यत्वमेवो

यं न पश्यति पश्यन्तं चक्षुर्यस्य न रिष्यति । तं भूतनिलयं देवं सुपर्णमुपधावत ॥ ११ ॥ न यस्याद्यन्तौ मध्यं च स्वः परो नान्तरं बहिः । विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् ॥ १२ ॥ स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः ॥ १३ ॥ धत्तेस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते ॥ १३ ॥ अथाग्रे ऋषयः कर्माणीहन्तेऽकर्महेतवे । ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते ॥ १४ ॥

पपादयन्नाह । न यस्येति अमूनि आद्यन्तादीनि विश्वस्य यस्मात् भवन्ति विश्वं च यत् यद्रूपं अतएवाव्यभिचारित्वात् ऋतं सत्यं महत् परिपूर्णं ब्रह्म ॥ १२ ॥ ननु विश्वं चेत्तद्रूपं तर्हि तस्य कुतो जन्माद्यभावः स्वप्रकाशत्वं वा कथं वा जगज्जन्मादिकर्तृत्वे न विकारित्वं सत्यत्वं पूर्णत्वं च तत्राह । स ईशः अजः सत्यश्च स्वप्रकाशश्च पुराणश्च निर्विकारः विश्वं कायो यस्य पुरूणि हूतानि यस्य तथाविधोपि यतः अस्य विश्वस्य जन्मादि स्वशक्त्या मायया धत्ते तां च नित्यसिद्धया विद्यया उदस्य हित्वा निरीह एवास्ते ॥ १० ॥ यस्मादेवमीश्वरः कर्म कृत्वापि तत्त्यागेन नैष्कर्म्येणास्ते अतः अस्मात्तेनैव तोषयितुं ऋषयः कर्माणि कुर्वन्ति किमर्थं अकर्महेतवे मोक्षार्थं पापात्

रामः
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वीहमानः कर्मभिरवगुंठितः कोशकार इव बध्येतैवेत्यत आह। ईहत इति अतस्तमनुवर्तमाना येते नावसीदंति न विषज्जंते १५ ततस्तं लोकानुग्रहाय विश्व
सृष्ट्यादि यः करोति श्रीरामकृष्णाद्यवतारैश्च वेदोक्तं धर्ममाचरति तं शरणं व्रजामीत्याह। तमिति निजं वर्त्म नरावताररूपो मार्गः तत्र सम्यक् स्थितं अत ईह-
मानं कर्माचरंतं तथापि जीववल्लक्षणमाह निरहंकृतं निराशिषं च अनन्यचोदितमिति निरहंकारत्वे हेतुः बुधं निराशीष्ट्वे हेतुः पूर्णं अनन्यनियुक्तत्वे हेतुः
प्रभुं तथापि कर्मानुष्ठाने हेतुः नॄन् स्वाचारेण शिक्षयंतं तत्किमर्थमत आह अखिलान् धर्मान् भावयति प्रवर्तयतीति तथा तं १६ समाहितमपि संतं मंत्रोपनि-

ईहते भगवानीशो न हि तत्र विषज्जते आत्मलाभेन पूर्णार्थो नावसीदंति येनु तं १५ तमीहमानं निरहंकृतं बुधं निराशिषं पूर्ण-
मनन्यचोदितं नॄन् शिक्षयंतं निजवर्त्मसंस्थितं प्रभुं प्रपद्येखिलधर्मभावनं १६ श्रीशुक उवाच इति मंत्रोपनिषदं व्याहरंतं
समाहितं दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा १७ तांस्तथावसितान्वीक्ष्य यज्ञः सर्वगतो हरिः यामैः परिवृतो दे-
वैः हत्वाशासत्त्रिविष्टपं १८ स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोभवत् द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः १९

षदं व्याहरंतं दृष्ट्वा सुप्तोत्थितवत् विवशमिव मत्वा नाशं असुरा यातुधानाश्च क्षुधानिमित्तेन जग्धुं भक्षयितुमभ्यद्रवन्नभिदुद्रुवुः १७ यामैः स्वपुत्रैः त्रिविष्टपं स्वर्गमपा-
लयत् स्वयमेवेंद्रो भूत्वेत्यर्थः तत्र प्रतिमन्वंतरं मन्वादयः षडन्ये भवंति तथा हि स्मृतौ द्वादशे वक्ष्यति मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः ऋषयोंशावतारश्च हरेः
षड्विधमुच्यत इति तत्राद्ये स्वायंभुवे मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ यामाख्या देवाः मरीचिप्रमुखाः सप्तर्षयः यज्ञो हरेरवतारः इंद्रश्च स एवेति तन्मन्वंतरं पंचवि-
धमेव तत्र तच्चरितं षड्विधोपदर्शनमिति निरूपितं १८ द्वितीयादिषु षट्सु मन्वंतरेषु मन्वादिषट्कमाह स्वारोचिषो द्वितीय इत्यादि यावदध्यायसमाप्ति १९

२१ विभोरसाधारणचरितमाह अष्टाशीतिसहस्राणीति २२ ५ सत्यजितः इंद्रस्य सखा सन् २६ उत्तमस्तृतीयो मनुस्तस्य भ्राता तामसस्तु चतुर्थो मनुरिति
२७ त्रिशिख ईश्वर इंद्रः २८ अन्यानपि विशिष्टपराक्रमान्देवानाह देवा वैधृतय इति २९ हरिरित्याहृतः व्याहृतः ग्रहात ग्राहात ३० अमूमुचन्

तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः २० ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत
तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः २१ अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारि
णः २२ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप २३ वसिष्ठतनयाः सप्त ऋषयः प्रमदा
दयः सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित २४ धर्मस्य सूनृतायां तु भगवान्पुरुषोत्तमः सत्यसेन इति ख्यातो जातः सत्यव्र
तैः सह २५ सोनृतव्रतदुःशीलानसतो यक्षराक्षसान् भूतद्रुहो भूतगणांश्चावधीत्सत्यजित्सखः २६ चतुर्थ उत्तमभ्राता मनुर्ना
म्ना च तामसः पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः २७ सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ज्योतिर्धामादयः सप्त ऋष
यस्तामसेंतरे २८ देवा वैधृतयो नाम विधृतेस्तनया नृप नष्टाः कालेन यैर्वेदाः विधृताः स्वेन तेजसा २९ तत्रापि जज्ञे भगवान्हरिण्यां
हरिमेधसः हरिरित्याहृतो येन गजेंद्रो मोचितो ग्रहात ३० राजोवाच बादरायण एतत्ते श्रोतुमिच्छामहे वयं हरिर्यथा गजपतिं ग्राहग्रस्त
ममूमुचत् ३१ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभं यत्र यत्रोत्तमश्लोको भगवान्गीयते हरिः ३२

मोचयामास ३१ श्रवणेच्छायां हेतुः तत्कथास्विति तासु कथासु सा कथैव वा महत्पुण्यं पुण्यप्रापकं विशेषेण धन्यमित्यादि ३२ रामायकृष्णायनमः

२१ इति श्रीमद्भागवतेऽष्टमे प्रथमोऽध्यायः ॥ तुर्ये मन्वन्तरे प्रोक्तं गजेन्द्रस्य विमोक्षणं । द्वितीयादिभिस्त्रिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥ द्वितीये तु गजेन्द्रस्य गजीभिः क्रीडतो जले । दैवा-
द्ग्राहगृहीतस्य हरिस्मृतिरुदीर्यते ॥ आसीदिति ॥१॥ तावता योजनायुतेन पर्यक् परितः त्रिकूटनामाख्यावीजमाह त्रिभिः शृंगैः रुप्यैः सुवर्णैः रौप्यलोह-
मयैरायसमयैः ॥२॥ अन्यैश्च शृंगैः निर्झराम्भसां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्ते इति पूर्वेणान्वयः कथंभूतैः शृंगैः रत्नैः धातुभिश्च विचित्रितैः नानाविधाद्रु-

शु. उ. व. परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः । उवाच विप्राः प्रतिनंद्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वतां ॥२२॥
इति श्रीभागवते महापुराणेऽष्टमस्कन्धे मन्वन्तरानुचरिते प्रथमोऽध्यायः ॥ शु. उ. व. आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः । क्षीरोदेना-
वृतः श्रीमान्योजनायुतमुच्छ्रितः ॥१॥ तावता विस्तृतः पर्यक्त्रिभिः शृंगैः पयोनिधिं । दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥१॥ अन्यै-
श्च ककुभः सर्वा रत्नधातुविचित्रितैः । नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसां ॥३॥ स चावनिज्यमानांघ्रिः समंतात्पय ऊर्मिभिः । करोति श्या-
मलां भूमिं हरिन्मरकताश्मभिः ॥४॥ सिद्धचारणगंधर्वविद्याधरमहोरगैः । किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ॥५॥ यत्र संगीतसन्नादैर्न-
दद्गुहममर्षया । अभिगर्जन्ति हरयः श्लाघिनः परशंकया ॥६॥ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः । चित्रद्रुमसुरोद्यानकलकंठविहंगमः ॥

मलतानां गुल्मा येषु तैः ॥३॥ पयसः ऊर्मिभिः समंतात् अवनिज्यमाना अंघ्रयो जलप्रांता यस्य स हरिद्भिः पालाशवर्णैः ॥४॥५॥ किंनरादीनां संगीतसंनादैः नदंत्यो गुहा यस्मिन् प्रदेशे तं
अभिगर्जन्ति हरयः सिंहाः अमर्षया असहनेन ॥६॥ नानाविधा ये आरण्याः पशवः तेषां व्रातैः संकुलाभिः द्रोणीभिः अलंकृतः आस्ते किंच चित्रद्रुमा येषु सुरोद्यानेषु कलकं-
ठास्वना विहंगमा यस्मिन् ॥७॥ ॥ राम

भा॰ अ॰
४

किंचस्वच्छोदकैः सरित्सरोभिर्युतः मणयस्स्ववालुकायेषुतैः पुलिनैश्चयुतः देवस्त्रीणांमज्जनेनयआमोदः तेनसौरभयुक्तान्यम्बूनिअनिलाश्चतैश्चयुत
आस्ते ८ तस्यद्रोण्यांवरुणस्योद्यानमास्तेगिरिवनादिसर्वंध्येयमितिवक्ष्यतिऋतौगिरिसप्रवर्णपवनंवर्णयतिसर्वतोलंकृतमिति ९ पुनर्गिरिवर्णय

सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः देवस्त्रीमज्जनामोदसौरभाम्बुनिलैर्युतः ८ तस्यद्रोण्यांभगवतोवरुणस्यमहात्मनः उद्या
नमृतुमन्नामआक्रीडंसुरयोषितां सर्वतोलंकृतंदिव्यैर्नित्यपुष्पफलद्रुमैः ९ मंदारैः पारिजातैश्चपाटलाशोकचंपकैः चूतैः प्रिया
लैः पनसैराम्रैराम्रातकैरपि १० क्रमुकैर्नारिकेलैश्चखर्जूरैर्बीजपूरकैः मधुकैः सालतालैश्चतमालैरसनार्जुनैः ११ अरिष्टोडुंबर
प्लक्षैर्वटैः किंशुकचंदनैः पिचुमंदैः कोविदारैः सरलैः सुरदारुभिः १२ द्राक्षेक्षुरंभाजंबूभिर्वदर्यक्षाभयामलैः बिल्वैः कपित्थैर्जं
बीरैर्वृतोभल्लातकादिभिः १३ तस्मिन्सरः सुविपुलंलसत्कांचनपंकजं १४ कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितं मत्तषट्पद
निर्घुष्टंशकुंतैश्चकलस्वनैः १५ हंसकारंडवाकीर्णंचक्राह्वैः सारसैरपि जलकुक्कुटकोयष्टिदात्यूहकुलकूजितं १६ मत्स्यकच्छपसंचा
रचलत्पद्मरजःपयः कदंबवेतसनलनीपवंजुलकैर्वृतं १७ कुंदैः कुरवकाशोकैः शिरीषैः कूटजेंगुदैः कुब्जकैः स्वर्णयूथीभिर्नागपुंना
गजातिभिः ८ मल्लिकाशतपत्रैश्चमाधवीजालकादिभिः शोभितंतीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः ९

तिमंदारैरितिचतुर्भिः मंदारादिभिर्वृतइत्यन्वयः १०।१३ तस्मिन्गिरौसरश्चास्तेतद्वर्णयतिसुविपुलमित्यादिसार्धैः पंचभिः लसंतिकांचनपंकजानियस्मिन् १४ कुमु
दादीनांश्रियाऊर्जितं कलस्वनोयेषांतैः शकुंतैश्चनिर्घुष्टं १५ चक्राह्वैः सारसैश्चाकीर्णंजलकुक्कुटादीनांकुलैः कूजितं १६ मत्स्यानांकच्छपानांचसंचारेणचलतांपद्मानां
रजोयस्मिंस्तत्पयोयस्मिंस्तत् १७ ८ नित्यमृतवः फलपुष्पादिसंपत्तिहेतवोयेषांतैरलंशोभितं ८

राम
४

तत्रैव सरसि एकदा तद्गिरिकाननाश्रयो वारणयूथपः करेणुभिश्चरन् तृषार्दितेन स्वयूथेन वृतः सरोवराभ्याशं समीपमगमदिति पंचमेनान्वयः
किं कुर्वन् कीचकवेणुवेत्रवंतं विशालगुल्मं लतादिमंतं एवं वनस्पतींश्च प्ररुजन् प्रभंजन् १० कथंभूतः यस्य गंधमात्राद्धरयः सिंहाः गजेंद्रादयश्च भ

तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् सकंटकं कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन् १० यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः महोरगाश्चापि भयाद्द्रवंति सगौरकृष्णाः शरभाश्चमर्यः ११ वृकावराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च अन्यत्र क्षुद्रा हरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण १२ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः गिरिं गरिम्णा परितः प्रकंपयन्निषेव्यमाणोलिकुलैर्मदाशनैः १३ सरोनिलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्यासमथागमद्द्रुतं १४ विगाह्य तस्मिन्नमृतांबु निर्मलं हेमारविंदोत्पलरेणुवासितं पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः १५ स्वपुष्करेणोद्धृतशीकरांबुभिर्निपाययन्संस्नपयन्यथा गृही घृणी करेणुः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोजमायया १६ तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाग्रहीत् यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोतिबलो विचक्रमे १७ तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् १८

याद्द्रवंति पलायंते ११ वृकादयस्तु क्षुद्रा अल्पप्राणिनः अन्यत्र तद्दृष्टिपथं त्यक्त्वा चरंति १२ पुनः कीदृशः घर्मतप्तः
मदच्युतः मदस्राविणः मदमत्ता इति तथोक्तैः १३ ४ निजेन पुष्करेण कराग्रेणोद्धृतं गतक्लमः सन् निकामं पपौ १५ ७ दीनधियः करेणवः तं केवलं विचुक्रुशुः १८

॥१९॥ मनउत्साहशक्तिः बलं शारीरं जयेंद्रियं तेषां ॥ सकलं बलादिविपर्ययो विपरीतमधिकं जलौकसो ग्राहस्य ॥२०॥ इत्थं यदा प्राणस्य सं
कटमापद्यतो देही ॥२१॥ बुद्धिमेवाहं नमामीति अहं च न प्रभवामि यतः ग्राहरूपेण केवलं विधातुः पाशेनावृतः तथापि तं परं परमेश्वरं प्रपे
षां ब्रह्मादीनां अयनमाश्रयभूतं शरणं यामि ॥२२॥ को मोक्षयेत् शरणं यामि तत्राह यः कश्चनेति अंतकाएवोरगात्तस्मात् ॥ तं शरणं यामि महे ब्रजेम

नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो बहिर्मिथः ॥ समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः
ततो गजेंद्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत्सकलं जलौकसः
इत्थं गजेंद्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया ॥ अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत २॥
न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवंति मोचितुं ॥ ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणं
॥२२॥ यः कश्चनेशो बलिनोंतकोरगात्प्रचंडवेगादभिधावतो भृशं ॥ भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमी
महि ॥२३॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे मन्वंतरानुवर्णने गजेंद्रोपाख्याने द्वितीयोऽध्यायः ॥ बादरायणिरुवाच ॥
एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि ॥ जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितं ॥१॥

यद्भयादित्यत्र श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः ॥ भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ॥२३॥ अष्टमे द्वितीयः ॥ ततो येन गजें
द्रेण हृत्कोमलहरिरूपेयात्तं ॥ स्मरद्धारेंतग्राहाद्ग्राहं देवलशापतः ॥१॥ जाप्यं जप्यं स्तोत्रं प्राग्जन्मनि इंद्रद्युम्नजन्मनि द्वि ॥१॥

राम
राम राम
५

तस्मै नमो नमनं अभिधीमहि अभिध्यायेम केवलं ग्राह्यग्रहीतत्वेन कायप्रमाणैरशक्यत्वात् । स्वस्य तज्ज्ञानेन संभावयितुं विशिनष्टि यत एत
द्देहादि विश्वात्मकं चेतनं भवति तदुक्तं । येन चेतयते विश्वमिति । तत्र हेतुः पुरुषाय पूर्वकारणत्वेन प्रविष्टाय । ननु प्रकृतिपुरुषौ कारणमिति प्रसि
द्धं तत्राह । आदिः प्रकृतिः वीजं पुरुषः तद्रूपाय । प्रविष्टत्वेपि जीववत्पारतंत्र्यं वारयति परेशायेति । १ । परमैश्वर्यं विवृण्वन्नाह यावत्समाप्ति । यस्मिन्नधि
ष्ठाने । यत उपादानात् येन कर्त्रा यश्च स्वयमेवेदं विश्वं भवति अस्मात्कार्यात् परस्मात्कारणाच्च यः परः तं स्वयंभुवं स्वतः सिद्धं । प्रपद्ये शरणं व्रजामि २

गजेंद्र उवाच ॐ नमो भगवते तस्मै यत एतच्चिदात्मकं । पुरुषायादिबीजाय परेशायाभिधीमहि १ । यस्मिन्निदं यतश्चेदं येनेदं
य इदं स्वयं । योस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवं ३ । यः स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्व च तत्तिरोहितं । अवि
द्धदृक्साक्ष्युभयं तदीक्षते स आत्ममूलोवतु मां परात्परः ४ । कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु
तमस्तदासीद्गहनं गभीरं यस्तस्य पारेभिविराजते विभुः ।। ५ ।। ।। श्रीरामकृष्णायनमः ।। गोविंद सहाय ।।

विश्वहेतुत्वं स्वतः सिद्धत्वं चोक्तं इदानीं विश्वप्रकाशकत्वं स्वप्रकाशकत्वं च वर्णयन् प्रार्थयते । यः स्वात्मनीति । विभातमभिव्यक्तं सत्तत्वविस्मलयेपि तिरोहि
तं लीनमसत्तदुभयं कार्यकारणं वसाक्षी सन् समीक्षते साक्षित्वे हेतुः अविद्धदृक् अलुप्तदृष्टिः आत्ममूलः स्वप्रकाशः अतः परात् प्रकाशकात् वक्रादेरपि
परः तस्यापि प्रकाशकस्य यथा चक्षुषश्चक्षुरिति श्रुतेः ४ तिरोहितमीक्षत इत्येतत्प्रपंचपूर्वकं दर्शयन् स्वस्य प्रार्थयते कालेनेति द्वाभ्यां पंचत्वमितेषु नाशं प्राप्तेषु ग
हनं दुरवगाहं गंभीरमनंतं । तस्य तमसः आदित्यवर्णं तमसः परस्तादिति श्रुतेः ५ ।। ६ ।।

अतएवदेवादयोप्यस्यस्वरूपंनविदुः जंतुरर्वाचीनः गंतुंज्ञातुंईरितुंवक्तुंवा दुरत्ययंदुर्गमंअनुक्रमणंचरितंकथनंवायस्यसः मामां ६ कथंतर्हिते
मेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिरित्याशंक्यातज्ज्ञानोपायंकथयन्नाह दिदृक्षवइति अलोकव्रतंब्रह्मचर्यादिअव्रणमच्छिद्रं भूतानामात्मभूताः भूते
ष्वात्मदृष्टयः संतः समेगतिरस्तु ७ दुरत्ययानुक्रमणत्वंप्रपंचयन्प्रणमति नविद्यतइत्यादिना लोकानामप्ययः प्रलयः संभवोजन्मतयोर्हेतवेकांतरत्र्थे

नयस्यदेवाऋषयः पदंविदुर्जंतुःपुनःकोर्हतिगंतुमीरितुं यथानटस्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणःसमावतु ६ दिदृ
क्षवोयस्यपदंसुमंगलंविमुक्तसंगामुनयःसुसाधवः चरंत्यलोकव्रतमव्रणंवनेभूतात्मभूताःसुहृदःसमेगतिः ७ नविद्य
तेयस्यचजन्मकर्मवाननामरूपेगुणदोषएववा तथापिलोकाप्ययसंभवाययःस्वमाययातान्यनुकालमृच्छति ८ तस्मैन
मःपरेशायब्रह्मणेनंतशक्तये अरूपायोरुरूपायनमआश्चर्यकर्मणे ९ नमआत्मप्रदीपायसाक्षिणेपरमात्मने नमोगिरां
विदूरायमनसश्चेतसामपि १० सत्वेनप्रतिलभ्यायनैष्कर्म्येणविपश्चिता नमःकैवल्यनाथायनिर्वाणसुखसंविदे ११

यत्तानिजन्मादीनिस्वीकरोतितस्मैनमस्त्वित्यन्वयः ८ ब्रह्मणेब्रह्मरूपायअनंतशक्तयेउरुरूपायअतएवआश्चर्याणिकर्माणियस्यतस्मैपरेशायनमः ९
आत्मप्रदीपायप्रकाशांतरस्याविषयायअतःसाक्षिणेप्रकाशकायपरमात्मनेजीवानियंत्रे अतएवगिरांविदूरायअप्राप्याय चेतसांचित्तवृत्तीनां तथाचश्रु
तिः यतोवाचोनिवर्त्तंतेअप्राप्यमनसासहेति १० एवमपिविपश्चितानिपुणेननैष्कर्म्येणसंन्यासेनसत्वेनशुद्धेन सन्यासयोगाद्यतयःशुद्धसत्वाः इतिश्रुतेः
प्रतिलभ्यायप्रत्यक्त्वेनप्राप्याय निर्वाणसुखसंविदेमोक्षानंदानुभूतये ११

गुणधर्मिणेसत्वादिधर्मोपकारिणेज्ञानघनायचेतिनिर्विशेषत्वेपिप्रधानवैलक्षण्यमुक्तं ॥११॥ साक्षिणइतिसर्वाध्यक्षत्वेपिनिर्विकार
त्वमुक्तं ॥ आत्मनांक्षेत्रज्ञानांमूलायमूलस्यप्रधानस्यापिप्रकृतयेउद्भवहेतवेतत्रहेतुःपुरुषायपूर्वमेवसते ॥ तथाचश्रुतिःपूर्वमेवाहमि
हासमितितत्पुरुषस्यपुरुषत्वमिति ॥ पूर्णायेतिवा ॥१२॥ सर्वेंद्रियाणांयेगुणाःविषयास्तेषांद्रष्ट्रेसर्वेप्रत्यया इंद्रियवृत्तयोहेतवोज्ञापकाय
स्यतस्मैतेतुभ्यं ॥ असताअहंकारादिप्रपंचेनछाययासादृश्येनउक्तायप्रतिबिंबेनबिंबमिवसूचिताय ॥ तत्रहेतुः ॥ सद्रूपेषुविषयेष्वाभासो

नमःशांतायघोरायमूढायगुणधर्मिणे ॥ निर्विशेषायसाम्यायनमोज्ञानघनायच ॥१२॥ क्षेत्रज्ञायनमस्तुभ्यंसर्वाध्य
क्षायसाक्षिणे ॥ पुरुषायात्ममूलायमूलप्रकृतयेनमः ॥१३॥ सर्वेंद्रियगुणद्रष्ट्रेसर्वप्रत्ययहेतवे ॥ असताच्छाययोक्ता
यसदाभासायतेनमः ॥१४॥ नमोनमस्तेखिलकारणायाद्भुतकारणाय ॥ सर्वागमाम्नायमहार्णवायनमोपवर्गाय
परायणाय ॥१५॥

यस्यतस्मै ॥ तदुक्तंतृतीये ॥ यथाजलस्थआभासइत्यादिनापाठांतरेअसत्यस्यछाययाअध्यासेनअज्ञाययुक्तायत
दधिष्ठानायेत्यर्थः ॥४॥ अखिलकारणायसर्वकारकरूपायअतएवस्वयंनिष्कारणायकारणत्वेपिमृदादिवद्विकारंवारयति ॥ अद्भुतकारणायेति
एवंभूतत्वेप्रमाणमाह ॥ सर्वेआगमाःपंचरात्रादयःआम्नायाश्चवेदाःतेषांमहार्णवायस्रोतसामिवपर्यवसानस्थानायअपवर्गायमोक्षरूपायअतः
परायणायउत्तमानामाश्रयाय ॥१५॥

गुणाएवारणिस्तयाछन्नाश्चिदूष्मपोज्ञानाग्निस्तस्मै तेषांगुणानांक्षोभेकार्येविस्फूर्जितंवहिर्वृत्तिकंमानसंयस्य सोकामयतवहुस्यामितिश्रुतेः
नैष्कर्म्यमात्मतत्वंतस्यभावेनभावनयाविवर्जिताआगमाविधिनिषेधलक्षणायेनतस्मै स्वयमेवप्रकाशोयस्यतस्मै ॥१६॥ मादृक्मद्विधस्त्वामेवप्रपन्नः
पशुः तस्यपाशोःविद्यातस्यविशेषेणमोक्षणंयेनतत्रयोग्यतामाह मुक्ताय मोचनेहेतुः भूरिःकरुणायस्यअतस्तत्रार्थेऽलसोयायअनलसायत्वां
शेनअंतर्यामिरूपेण सर्वेषांतनुभृतांमनसिप्रतीतायाप्रत्यग्दृक्दृक्तस्मै तथाचश्रुतिः यआत्मनितिष्ठन्आत्मानमंतरोयमयतीतिभगव

गुणारणिछन्नचिदूष्मपायतत्क्षोभविस्फूर्जितमानसाय नैष्कर्म्यभावेनविवर्जितागमस्वयंप्रकाशायनमस्करोमि ॥१६॥ मादृक्
प्रपन्नपशुपाशविमोक्षणायमुक्तायभूरिकरुणायनमोऽलयाय स्वांशेनसर्वतनुभृन्मनसिप्रतीतप्रत्यग्दृशेभगवतेबृहतेनमस्ते
॥१७॥ आत्मात्मजाप्तगृहवित्तजनेषुसक्तैर्दुःप्रापणायगुणसंगविवर्जिताय मुक्तात्मभिःस्वहृदयेपरिभावितायज्ञानात्मनेभगवते
नमईश्वराय ॥१८॥ यंधर्मकामार्थविमुक्तकामाभजंतइष्टांगतिमाप्नुवंति किंत्वाशिषोरात्यपिदेहमव्ययंकरोतुमेऽदभ्रदयोविमो
क्षणं ॥१९॥

तेसर्वेषांतनुभृतांनियमनेसमर्थाय तेषांमनसिस्थितत्वेपिवृहत्तेअपरिछिन्नाय ॥१७॥ आत्मत्वेपिदेहादिष्वासक्तैःदुष्प्रापणायप्राप्तुम
शक्यायतत्रहेतुः गुणसंगेनविवर्जितायअतएवमुक्तात्मभिःदेहादिष्वनासक्तैःचिंतितायतैःपरिभावितत्वमाह ज्ञानात्मनइत्यादि ॥१८॥ इष्टांगतिंकामि
तंधर्मादिफलंप्राप्नुवंत्येवनतुतावदेवकिंतुयाचितैरकामितामप्यन्याआशिषोरातिदेहमप्यव्ययंरातिएवंभूतःअदभ्रदयःसमेविमोक्षणमेवकेवलंकरो
तुनाधिकंप्रार्थये ॥१९॥ ॥४॥

एतावदस्याहमनुक्षिहरवो मम भिन्नत्वेन वाञ्छामि ॥ यस्य त्वेकान्तभक्ता न किंचिदर्थं वाञ्छन्ति ॥ तं परमेश्वरमीडे स्तौमीत्युत्तरेणान्वयः ॥ तेषां निष्कामत्वे हेतुः
ये वै भगवतः सर्वज्ञानुभक्तानुप्रपन्नाः सेवितवन्तः ॥ २० ॥ अत्यद्भुतं सुमंगलं तद्दर्शनार्थमक्षरत्वादिविशेषणानि ॥ २१ ॥ परिपूर्णत्वं प्रदर्शयन्ना
ह त्रिभिः यस्येति ॥ फल्ग्व्या न ह्वल्पयैव कलयांशेन कृताः सृजयतारिति तृतीयेनान्वयः ॥ २२ ॥ कथं कृता इत्यपेक्षायां दृष्टान्तौ यथार्चिषोऽग्नेरि

एकान्तिनो यस्य न कंचनार्थं वाञ्छन्ति ए वै भगवत्प्रपन्नाः ॥ अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः ॥ २० ॥ तमक्षरं
ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यं ॥ अतीन्द्रियं सूक्ष्ममिवातिदूरमनंतमाद्यं परिपूर्णमीडे ॥ २१ ॥ यस्य ब्रह्मादयो देवाः
वेदा लोकाश्चराचराः ॥ नामरूपविभेदेन फल्ग्व्या च कलया कृताः ॥ २२ ॥ यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयांत्य
सकृत्स्वरोचिषः ॥ तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ॥ २३ ॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री
न षंढो न पुमान्न जंतुः ॥ नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः ॥ २४ ॥ श्रीगोपालकृष्णसहाहरहना

तिप्रवाहे दृष्टान्तः सवितुर्गभस्तयः रश्मयोऽनन्ता निर्यान्ति उद्गच्छन्ति संयान्ति लीयन्ते गुणानां संप्रवाहमेवाह बुद्धिर्मनः खानि करणानि शरीरसर्गाः कार्यदेहप्रवाहा
श्च यतो भवति सः ॥ २३ ॥ अत एव देवादीनां मध्ये कोऽपि न भवति न जंतुः लिंगत्रयशून्यं प्राणिमात्रमपि किंतु सर्वस्य निषेधस्यावधित्वेनावशिष्यत इति निषे
धशेषः ॥ मायया अशेषात्मकश्च जयतात तन्महिमोत्कर्षेणाविर्भवतात ॥ २४ ॥ रामरामरामरामराम

म३

नचग्राहाच्छरीरस्यमोक्षणेनाहंजीवितुमिच्छामि ॥ अत्रहेतुः अमुयाअंतर्बहिश्चाविवेकव्याप्तयागजजात्याकिंप्रयोजनंआत्मलोकस्यआत्मप्रकाश
स्यपरावरणमज्ञानंतस्यैवतुमोक्षमिच्छामि ॥ यस्यमोक्षस्यकालेननाशोनास्तियद्वादेहसंबंधोदेहनाशेनश्येदेवकिंतन्मोक्षप्रार्थनेनआत्मलोका
वरणस्यतुकालेनविप्लवोनास्तिज्ञानेनैवनिवर्त्यत्वात् ॥ अतस्तस्यैवमोक्षमिच्छामीत्यर्थः ॥ २५ ॥ सोहमुमुक्षुर्विश्वं ॥ विश्वरूपंचविश्वंविश्वव्यतिरिक्तं
चविश्वंवेदोधनमुपकरणंयस्यतंविश्वस्यात्मानंचकेवलंप्रणतोस्मिनतुतंजानामि ॥ २६ ॥ योगविनाडुर्ज्ञानत्वादित्याह ॥ योगेनभगवद्धर्मेणारंधि

जिजीविषेनाहमिहामुयाकिमंतर्बहिश्चावृतयेभयोन्या ॥ इच्छामिकालेननयस्यविप्लवस्तस्यात्मलोकावरणस्यमोक्षं ॥ २५ ॥ सो
हंविश्वसृजंविश्वमविश्वंविश्ववेदसं ॥ विश्वात्मानमजंब्रह्मप्रणतोस्मिपरंपदं ॥ २६ ॥ योगरंधितकर्माणोहृदियोगविभाविते
योगिनोयंप्रपश्यंतियोगेशंतंनतोस्म्यहं ॥ २७ ॥ नमोनमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालायदुरंतश
क्तयेकदिंद्रियाणामनवाप्यवर्त्मने ॥ २८ ॥ नायंवेदस्वमात्मानंयच्छक्त्याहंधियाहतं ॥ तंदुरत्ययमाहात्म्यंभगवंतमितोस्म्यहं ॥ २९ ॥

तानिदग्धानिकर्माणियेषांतेयंप्रपश्यंति ॥ २७ ॥ तर्हिसर्वेपियोगमेवकिंनाश्रिताः तत्राहनमइतिद्वाभ्यां ॥ असह्योवेगोरागादिलक्षणोयस्मात्
थाभूतंशक्तित्रयंयस्यतस्मै ॥ बहिश्चाखिलधियांसर्वेंद्रियाणांगुणायशब्दादिरूपेणप्रतीयमानायअतःकदिंद्रियाणांकुत्सितानींद्रियाणियेषां
तेषामनवाप्यंतवर्त्मयस्य ॥ २८ ॥ यच्छक्त्यायस्यमाययाअहंधीस्तयाहतंतमात्मानंस्वंजनःनवेददुरत्ययंमाहात्म्यंयस्यतंइतःआश्रितोस्मि ॥ २९ ॥

धी १

उपवर्णितं निर्विशेषं मूर्त्तिभेदं विना परतत्त्वं येन तं विविधा वा ये मोलिंगभिदा मूर्त्तिभेदास्तत्साभिमाना येषां तथाभूता एते यदा नोपसस्रुपुः तत्र तदा अखिलामरमयः
सर्वदेवमयमूर्त्तिः ३० दिविजैर्देवैः सह छंदोमयेनेति वेदात्मना ३१ खे दृष्ट्वा उपात्तमुद्यतं चक्रं येन ३२ गरुडोपि मंदगतिरिति ततः सहसावतीर्य अरिणा
चक्रेण विपाटितमुखं यस्य उस्रियाणां देवानां ३३ इति [illegible] चतुर्थे तयोर्ग्राहः शापं गंधर्वतां पुनः गजं च पार्षदं कृत्वा हरिर्निन्ये निजं पदं ॥ १ ॥ हूहू

श्रु उवाच एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभिमानाः नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलाम
रमयो हरिराविरासीत् ३० तं तद्वदार्त्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः छंदोमयेन गरुडेन समुह्य
मानश्चक्रायुधोभ्यगमदाशु यतो गजेंद्रः ३१ सोंतःसरस्युरुबलेन गृहीत आर्त्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रं उत्क्षिप्य साम्बुज
करं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते ३२ तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः कृपयोज्जहार ग्राहा
द्विपाटितमुखादरिणा गजेंद्रं संपश्यतां हरिरमूमुचदुस्रियाणां ३३ इति श्रीभागवते महापुराणे अष्टमस्कंधे तृतीयोध्यायः श्रु
उवाच तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः मुमुचुः कुसुमासारं शंसंतः कर्म तद्धरेः १ नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः
ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं २ योसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ॥ ३ ॥

सत्तो यो गंधर्वसत्तमः श्रेष्ठो देवलस्य शापेन ग्राहो जातः स वै ततः सद्यो मुक्तः सन्नुत्तमश्लोकमगायत तस्य वयः एवं हीति हाहा सोन्नमेकथा [illegible] सिद्धाभिः क्रीडन्नेसौ स्नातं
प्रविष्टं देवलपादौ प्रगृह्य विचकर्ष स च क्रुद्धः कुपितो ग्राहो भवेति शशाप तेन च प्रसादितः सन्नुवाच एवमेव गजेंद्रग्रहणानंतरं श्रीमज्जेंद्रमुद्धरन्हरिस्त्वामपि मोचयिष्यतीति २

भा०अ
८

कथंभूतं यशोधाम अस्याश्रयं अतः कीर्तन्याः कीर्तनीया गुणाः शोभनाः कथा यस्य तं ॥ ४ ॥ स्वं लोकं गंधर्वलोकं ॥ ५ ॥ ७ ॥ कुलाचले मलयाद्रावाश्रमो यस्य ॥ ८ ॥ रहसि
उपासीनं वीक्ष्य ॥ ९ ॥ शापमेवाह असाधुरित्यादि ॥ अकृता अशिक्षिता बुद्धिर्यस्य ॥ गजो यथा स्तब्धमतिस्तथैवायमतः स एव गज एव भवत्विति शेषः ॥ १० ॥ दिष्टं

प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययं ॥ अगायत यशोधाम कीर्तन्यगुणसत्कथं ॥ ४ ॥ सोनुकंपित ईशेन परिक्रम्य प्रणम्य तं ॥ लोक
स्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥ ५ ॥ गजेंद्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात् ॥ प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः
॥ ६ ॥ स वै पूर्वमभूद्राजा पांड्यो द्रविडसत्तमः ॥ इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥ ७ ॥ स एकदाराधनकाल आत्मवान्गृहीतमौ
नव्रत ईश्वरं हरिं ॥ जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ॥ ८ ॥ यदृच्छया तत्र महायशा मुनिः समागमच्छिष्य
गणैः परिश्रितः ॥ तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥ ९ ॥ तस्मा इमं शापमदादसाधुरयं दुरात्माकृतबु
द्धिरद्य ॥ विप्रावमंता विशतां तमोंधं यथा गजः स्तब्धमतिः स एव ॥ १० ॥ श्रीशुक उवाच ॥ एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः ॥ इंद्र
द्युम्नोपि राजर्षिर्दिष्टं तदुपधारयन् ॥ ११ ॥ आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीं ॥ हर्यर्चनानुभावेन यद्गजत्वेप्यनुस्मृतिः ॥ १२ ॥ एवं
विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः ॥ गंधर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोगात् ॥ एत
न्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणं ॥ स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वतां ॥ १४ ॥

दैवप्रापितं तदुपधारयन्नालोचयन् ॥ ११ ॥ कौंजरीं योनिमापन्नः तर्हि पश्चात्कथं स्मृतिर्जाता तत्राह ॥ हरेरर्चनस्यानुभावेनेति ॥ १२ ॥ अद्भुतं स्वभवनमगात् ॥ १३ ॥ एतत् गजराज
मोक्षणं नाम कृष्णानुभावस्तवेरितः ॥ कथंभूतं तत्राह ॥ स्वर्ग्यमित्यादि ॥ दुःस्वप्नं नाशयतीति तथा ॥ १४ ॥

राम
८

ऽतः श्रेयस्कामाय तद्यथा वश्यत्यनुकीर्तयति १४ अनेन श्रेयो भवतीति कुतो ज्ञातं तत्राह भगवद्वचनादेवेत्याह इदमाहेति यावत्समाप्तिः १५ प्रसंगादन्यस्यापि
स्मरणात्फलमुच्यते सर्वेषां द्वितीयान्तानां स्मरन्तीत्यष्टमेनान्वयः १६ २० अव्यक्तं मायामव्ययं धर्मं भक्तिं लक्षणां सोमकश्यपयोरपि पत्नीर्दाक्षायणीः २१

यथानुकीर्तयन्त्येतच्छ्रेयस्कामा द्विजातयः शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये १४ इदमाह हरिः प्रीतो गजेन्द्रं कुरुसत्तम शृण्व
तां सर्वभूतानां सर्वभूतमयो विभुः १५ श्रीभगवानुवाच ये मां त्वां च सरश्चेदं गिरिकंदरकाननं वेत्रकीचकवेणूनां गुल्मानि
सुरपादपान् १६ शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं १७ श्रीवत्सं कौस्तुभं
मालां गदां कौमोदकीं मम सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं १८ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयां ब्रह्माणं नारद
मृषिं भवं प्रह्लादमेव च १९ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे कर्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनं २० प्रणवं सत्यम
व्यक्तं गोविप्रान्धर्ममव्ययं दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि २१ गंगां सरस्वतीं नंदां कालिंदीं सितवारणं ध्रुवं ब्रह्मर्षी
न्सप्त पुण्यश्लोकांश्च मानवान् २२ उत्थायापररात्रांते प्रयताः सुसमाहिताः स्मरंति मम रूपाणि मुच्यंते ह्यंहसोऽखिलात् २३
ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये तेषां प्राणात्यये चाहं ददामि विपुलां गतिं २४ श्रीशुक उवाच इत्यादिश्य हृषीकेशः प्रध्मा
य जलजोत्तमं हर्षयन्विबुधानीकमारुरोह खगाधिपं २५ इति श्रीभागवते महापुराणेऽष्टमस्कंधे चतुर्थोऽध्यायः ॥४

सितवारणमैरावतं २२ सुसमाहिताः एकाग्रचित्ताः मम रूपाणि मद्विभूतीः २३ ४ जलजोत्तमं शंखवरं प्रध्माय वादयित्वा २५ इत्यष्टमे चतुर्थः

भा॰अ॰ अमृताब्धिमन्थनमष्टाभिरध्यायैरनुवर्णिते स्वमन्वन्तरपक्षपातेन यत्र योषायितं प्रभोः पञ्चमे पञ्चमं वाथ षष्ठं चाकथयन्मनुम् ॥ विप्रशापाद्धनिः श्रीकैः कृतं

१० देवैर्हरिस्तुतिः ॥ तामसस्वस्तदोषा मनुः तस्य सोदरः भ्राता १ ५ तस्य वैकुंठमंतस्य हरेरनुभावः सनकादिशापेन दैत्यतां प्राप्ताभ्यां स्वपार्षदाभ्यां व

शुक उवाच राजन्नुदितमेतत्ते हरेः कर्माघनाशनं गजेन्द्रमोक्षणं पुण्यं रैवतं त्वन्तरं शृणु १ पंचमो रैवतो नाम मनुस्तामससोदरः बलिविंध्यादयस्तस्य सुता हार्जुनपूर्वकाः २ विभुरिन्द्रः सुरगणाः राजन्भूतरयादयः हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ३ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयं ४ वैकुंठः कल्पितो येन लोको लोकनमस्कृतः रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ५ तस्यानुभावः कथितो गुणाश्च परमोदयाः भौमान्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ६ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः पूरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ७ इंद्रो मन्त्रद्रुमस्तत्र देवा आप्यादयो गणाः मुनयस्तत्र वै राजन्हविष्मद्वीरकादयः ८ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः अजितो नाम भगवानंशेन जगतः पतिः ९ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा भ्रममाणोंऽभसि धृतः कूर्मरूपेण मंदरः १० राजोवाच यथा भगवता ब्रह्मन्मथितः क्षीरसागरः यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना ११ यथामृतं सुरैः प्राप्तं किं चान्यदभवत्ततः एतद्भगवतः कर्म वदस्व परमाद्भुतं ११ त्वया संकथ्यमानेन महिम्ना सात्वतां पतेः नातितृप्यति मे चित्तं सुचिरं तापतापितं १२

एवं हरिरूपेण युद्धादिलक्षणाः गुणाः ब्रह्मण्यतादयः परमोदयाश्च महर्षयः कथितास्तस्य तत्त्वाद्यादिषु ६ १० यतो हेतोः अंबुचरात्मना कूर्मरूपेण १२ एम १०

सुराणां साधिता सुधा तस्य पापद्वारायपि सुवितेनुः ततः एतं तितिंवेति ॥ १२ ॥ ३

१४ नोत्तिष्ठेरन्न पुनर्जीवंति स्मेत्यर्थः १५ दुर्वासमहर्षिः कदाचिन्मार्गे गच्छंतमिंद्रं दृष्ट्वा स्वकंठस्थां मालां तस्मै दत्ता तेन च श्रीमदेन नागहस्तेनैरावतस्य कुंभयो
र्निक्षिप्ता स च गजोन्मत्तः पद्भ्यां तां मालां चूर्णीचकार ततः कुपितो दुर्वासास्तं शशाप त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति अत एतदाह दुर्वाससः शापादिति इज्यादयः
यागाद्याः १६ ८ अयथा न यथावदेव वैलक्षण्येन बलप्रभ्वादियुक्तान्विलोक्येत्यर्थः १९ हरिं शरणं गताः संतः यथापूर्वं सर्वं प्राप्स्याम इति हर्षेणोत्फुल्लं विकसितं वदनं

सूत उवाच स पृष्टो भगवानेवं द्वैपायनसुतो द्विजाः अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे १४ शुक उवाच यदा युद्धेऽसुरैर्देवा बाध्यमाना
ः शितायुधैः गतासवो निपतिता नोत्तिष्ठेरन्स्म भूरिशः १५ यदा दुर्वाससः शापात्सेंद्रा लोकास्त्रयो नृप निःश्रीकाश्चाभवंस्तत्र नेशुरि
ज्यादयः क्रियाः १६ निशाम्यैतत्सुरगणा महेंद्रवरुणादयः नाध्यगच्छन्स्वयं मंत्रैर्मंत्रयंतो विनिश्चयं १७ ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि
सर्वशः सर्वं विज्ञापयां चक्रुः प्रणताः परमेष्ठिने १८ स विलोक्येंद्रवाय्वादीन्निःसत्वान्विगतप्रभान् लोकानमंगलप्रायानसुरानयथा
विभुः १९ समाहितेन मनसा संस्मरन्पुरुषं परं उवाचोत्फुल्लवदनो देवान्स भगवान्परः २० अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रु
मघर्मजातयः यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययं २१ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः अथा
पि सर्गस्थितिसंयमार्थं धत्ते रजःसत्वतमांसि काले २२ अयं च तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय देहिनां तस्माद्व्रजामः शरणं जगद्गु
रुं स्वानां स नो धास्यति शं सुरप्रियः २३

स्य २० मनुष्यादयो जरायुजांडजोद्भिज्जस्वेदजाः यस्यावतारः ~~पुरुषः~~ तस्यांशो ब्रह्मा तस्य कलाः मरीच्यादयः ताभिर्विसर्जिताः
प्रजापत्यो वा रिद्वारा जनिताः २१ ननु तर्हि सर्वेषु समः स्यात् किं तच्छरणाश्रयेण सत्यं यद्यप्येवं तथाप्यस्मत्पक्षपाती भविष्यतीत्याशयेनाह नयस्येति द्वाभ्यां २२ स्थितिपा

भा॰अ॰
॥

यत्रश्रीराढ्यो हरेर्वासः तदेव तमसः परं स्थानं यद्वा लोकालोकात्परतो यत्तमस्ततः परं स्थानं जगाम २४ दैवीभिर्लोके अप्रसिद्धाभिर्वैदिकीभिर्गीर्भिः स्तुतिमकरोत् २५ देववरं नमामहे हे देववर त्वां नमामेति वा वरं त्वे हेतुः सत्यत्वात् अविक्रियं तत्त्वात् अनंतं आद्यं च अनादिं आद्यंतवतो हि वृध्यादि विक्रिया यज्ञो भवति किंच गुहाशयं सर्वांतरं अतः निष्कलं निरुपाधिं तत्त्वतोऽप्रतर्क्यं तत्त्वतः मनोग्रयाणं मनसोपि जविष्टं मनः प्राप्यस्थाने ततः प्रागेव विद्यमानत्वात् तथा च श्रुतिः अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्शत् तद्धावतोन्यानत्येति तिष्ठदिति वचसा अनिरुक्तं अविषयत्वात् यद्वाचानभ्युदितं येन वागभ्युद्यत इति श्रु

श्रीशुक उवाच ॥ इत्याभाष्य सुरान्वेधाः सह देवैररिंदम अजितस्य पदं साक्षाज्जगाम तमसः परं ॥ २४ ॥ तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभो ॥ स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेंद्रियः ॥ २५ ॥ ब्रह्मोवाच ॥ अविक्रियं सत्यमनंतमाद्यं गुहाशयं निष्कलमप्रतर्क्यं ॥ मनोग्रयाणं वचसा निरुक्तं नमामहे देववरं वरेण्यं ॥ २६ ॥ विपश्चितं प्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणं ॥ छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥ २७ ॥

तेः मनोवचसोरगोचरत्वादप्रतर्क्यं यथेष्टं वा सर्वेषां हेतुहेतुमद्भावः २६ किंच प्राणादीनां विपश्चितं ज्ञातारं आत्मा अहंकारो देहो वा न तु तद्व्यतिरिक्तं तेषामस्तीत्याह अर्था विषयाः इंद्रियाणि तद्ग्राहकाणि तद्रूपेणाभासत इति तथा तं तथाप्यनिद्रं स्वप्नदृष्ट्वत्स्थानरहितं कुतः अव्रणं अदेहं अत एवाक्षरं खमिव व्यापिनं च सर्वत्रदेहतः यत्र यस्मिन्गृध्रपक्षौ जीवपक्षपातिनौ छायातपौ अविद्या च तत्त्रिवर्त्तिका विद्या च न स्तः तं त्रियुगं त्रिषु युगेषु आविर्भवंतं शरणं व्रजामः ॥ २७ ॥ रामराम

रामं
॥

तदेवमविक्रियत्वादिभिः सर्वज्ञत्वादिभिश्च सत्यत्वं वेदोपदेशस्य संसारचक्राधारत्वेनापि तद्दर्शयन्नाह ॥ अजस्य जीवस्य चक्रं चक्रवद्वर्त्तनं दावर्त्तमानं देहादि
अजयामाययाप्रेर्यमाणं यतः अक्षो यस्य परस्याधिष्ठानमाहुः तं ऋतं सत्यं प्रपद्ये कथंभूतं चक्रं मनोमयं मनःप्रधानं दशेन्द्रियाणि पंचप्राणाश्चेत्येवं पंचदश अरा
यस्य आशु शीघ्रं । त्रयो गुणा नाभिरिव मध्ये यस्य विद्युदिव चलं अष्टौ प्रकृतयो नेमय इवावरणानि यस्य ॥ २८ ॥ सर्वजीवनियंतृत्वादिना च वरिष्ठत्वमाह ॥ य इति य
पसुवर्णं जीवसमीपे तन्नियंतृत्वेन आसांचकार आस्ते स्म । द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजात इति श्रुतेः यद्वा मन्त्राक्षरार्थं गरुडस्योपरि उपविष्ट

अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु । त्रिणाभिविद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ॥ २८ ॥ य ए
कवर्णं तमसः परं तद्लोकमव्यक्तमनंतपारं । आसांचकारोपसुपर्णमेनमुपासते योगरथेन धीराः ॥ २९ ॥
या न यस्य कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थं । तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरंतं ॥ ३० ॥

इत्यर्थः तर्हि देहस्थत्वादज्ञानरक्तगुणादिक्रियावेशाज्जीवसाम्यं स्यात्तत्राह ॥ एकवर्णं नानेकाकारस्वरूपं तमसः प्रकृतेः परं अलोकमदृश्यं अव्यक्तं निर्विकल्पं अनंत
पारं कालतो देशतश्चापरिच्छिन्नं ततश्चैवंविधः अप्रच्युतस्वरूपत्वान्न जीवसाम्यं तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति विशेषश्रवणादित्यर्थः अ
तएव य धीराः योगेन रथेन प्राप्तिसाधनेनोपासते भजंते तेन मामेत्युत्तरेणान्वयः ॥ २९ ॥ मायानियंतृत्वेनापि जीवसाम्यं परिहृत्य वरिष्ठत्वमाह ॥ यस्य मायां कश्चित्कोपि
रपि नातितर्ति तर्त्तुं नातिक्रामति कथंभूतां जनो यया मुह्यति अर्थं आत्मस्वरूपं न तु वेद निर्जितः आत्मा आत्मशक्तिर्माया आवृतगुणाश्च येन तं ॥ ३० ॥ एमाण

भा० अ०
१२

अर्थेन वेदेति यदुक्तं तत्स्पष्टयन्नाह इमे वयं देवा ऋषयश्च यस्य प्रियया तन्वा सत्त्वेनैव सृष्टाः अपि बहिः स्थितस्य सन्नाश्रकाशमाप्याविः प्रकाशमपि स्व
स्मा गतिं निरुपाधिस्वरूपं न विद्मः इतरप्रधाना रजस्तमोमयाः कुतो विदुः तेन मामेति पूर्वेणान्वयः इदानीं विराजरूपेणापि स्तुवन्प्रार्थयते पादौ महीति
द्वादशभिः ॥ यत्र मर्त्याजरायुजादिभूतसर्गः स महापुरुषः प्रसीदतु ॥ आत्मतन्त्रः पादादिमत्त्वेऽपि न तत्परतन्त्रः कुतः ब्रह्म अपरिच्छिन्नरूपः त
स्मात् महती विभूतिरैश्वर्यं यस्य सः ॥ ३१ ॥ उदारं वीर्यं शक्तिर्यस्य तद्रेतो यस्य रेतः स नः प्रसीदतु ॥ उदारवीर्यतामाह यतो भवन्तो लोकाः सिध्यन्ति जा

इमे वयं यत्प्रिययैव तन्वा सत्त्वेन सृष्टा बहिरन्तराविः ॥ गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः ॥ ३१ ॥ पादौ
महीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः ॥ स वै महापूरुष आत्मतन्त्रः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३१ ॥ अम्भस्तु य
द्रेत उदारवीर्यं सिध्यन्ति जीवन्त्युत वर्धमानाः ॥ लोका यतोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३२ ॥ सोमं
मनो यस्य समामनन्ति दिवौकसां यो बलमन्ध आयुः ॥ ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः स महाविभूतिः ॥ ३४ ॥
अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा ॥ अन्तःसमुद्रेऽनुपचन्स्वधातून्प्रसीदतां नः स महाविभूतिः ॥ ३५ ॥

यन्ते ॥ ३३ ॥ यः सोमो देवानामन्धः अन्नं अमृतं एव बलमायुश्च नगानां वृक्षाणां प्रकर्षेण जनयति वर्द्धयतीति प्रजनः तं यस्य मनः समामनन्ति स प्रसीदतु ॥ ३५ ॥ अग्नि
र्यस्य मुखं जातः कथंभूतः जातवेदा धनं यस्मात् ॥ क्रियाकाण्डं तत्प्रतिपाद्यकर्म तन्निमित्तं जन्म यस्य अन्तः समुद्रे उदरमध्ये स्वधातून् पाकाहीनेव वान्नादीन् पचन् अपि
च समुद्रे पिबन् वाडवानलरूपेण उदकान्येवानुपचन्नग्निः ॥ ३५ ॥

राम
१२

एष तरणिर्यस्य वक्त्रमासीत् कथंभूतः देवयानं अर्चिरादिमार्गः देवता त्रयीमयः सैषा त्रय्येव विद्या तपतीति श्रुतेः ब्रह्मणो धिष्ण्यं उपासनास्थानं य एषो-
न्तरादित्ये हिरण्मयः पुरुषः इति श्रुतेः मुक्तेर्द्वारं देवयानत्वात् अमृतं च पुण्यलोकत्वात् मृत्युश्च कालात्मकत्वात् एवंभूतस्तरणिर्यस्य वक्त्रं सः
३६ कथंभूतो वायुः चराचराणां सहः आदिश्च एव अस्वः प्राणाः ये प्राणानां च पंचधाद्याधिष्ठातारो देवाः सम्राजं भृत्या इव अन्वास्म अनुसृत्य स्थिताः एवं

यद्वक्त्रमासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यं द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः ३६ प्राणा-
दभूद्यस्य चराचराणां प्राणाः सहो बलमोजश्च वायुः अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ३७ श्रो-
त्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः प्राणेन्द्रियात्मासुशरीरकेतः प्रसीदतां नः स महाविभूतिः ३८ बला-
न्महेन्द्रस्त्रिदशाः प्रसादात् मन्योर्गिरीशो धिषणाद्विरिञ्चिः खेभ्यश्च छन्दांस्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः ३९
श्रीर्वक्षसः पितरः छायया सन् धर्मः स्तनादितरः पृष्ठतोऽभूत् द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात् प्रसीदतां नः स महाविभूतिः ४०
विप्रो मुखं वयस्य च ब्रह्मगुह्यं राजन्य आसीद्भुजयोर्बलं च ऊर्वोर्विडोजोऽङ्घ्रिरवेदशूद्रौ प्रसीदतां नः स महाविभूतिः ४१

भूतो वायुर्यस्य प्राणादभूत् सः ३७ खानि देहगतानि छिद्राणि प्राणाः पञ्चवृत्तिः इन्द्रियाणि च आत्मा मनश्च असवो नागकूर्मादयः शरीरं च तेषां केतं आश्रयभूतं
खं यस्य पुरुषस्य नाभ्याः प्रजज्ञिरे ३८ यस्य बलान्महेन्द्रो जज्ञे छन्दांसि ऋषयश्च खेभ्यः कः प्रजापतिः ३९ इतरो अधर्मः ४० विट् वैश्यः ओजः नैपुण्यं तस्य शक्ति-
श्च अंघ्रेः अङ्घ्रिजाविति द्वयोः अवेदः शूद्रो अवेदः वेदव्यतिरिक्तास्तु श्रवणवृत्तिः तद्वृत्तिमानस्तु शूद्रश्च पादांतरोद्गमं ४१

भा॰अ
१२

उपरिउत्तरोष्ठेप्रीतिर्नस्तः नासिकातोद्युतिर्दीप्तिः पशव्यः पशूनांहितःकामःस्पर्शेनाभूत ॥४१॥ द्रव्यंभूतानिवयःकालःविशेषोलोकविचित्रप्रपंचयद्यस्मा
तद्दुर्विभाव्यंकुतः प्रबुधापबाधंविद्वद्भिरपोह्यमानं ॥ पाठांतरे प्रबुधानांमायायेत्प्रबाधोयस्मिन्नितित्रिपदार्थः ॥४२॥ तदेवसप्रपंचप्रपवर्णेनिष्प्रपंचत्व
पवर्णयन्प्रणमति ॥ नमइतिवृत्तिभिरिंद्रियैर्नातिरिपिः नभस्वान्वायुः तस्येवऊतिर्लीलायस्यतस्मै ॥४४॥ तेसस्मितंमुखांबुजंदिदृक्षूणांनोस्माकंकुरु ॥

लोमोधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेनकामः ॥ भ्रुवोर्यमः पक्ष्मभवस्तुकालः प्रसीदतान्नः समहाविभूतिः ॥४१॥
द्रव्यंवयः कर्मगुणान्विशेषंयद्योगमायाविहितान्वदंति ॥ यद्दुर्विभाव्यंप्रबुधापबाधंप्रसीदतान्नः समहाविभूतिः ॥४२॥ न
मोस्तुतस्मा उपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्मने ॥ गुणेषुमायारचितेषुवृत्तिभिर्नसज्जमानायनभस्वदूतये ॥४४॥
सत्वंनोदर्शयात्मानमस्मत्करणगोचरं ॥ प्रपन्नानांदिदृक्षूणांसस्मितंतेमुखांबुजं ॥४५॥ तैस्तैः स्वेच्छाभूतैरूपैः कालेकालेस्वयंवि
भो ॥ कर्मदुर्विषहंयन्नोभगवांस्तत्करोतिहि ॥४६॥ क्लेशभूर्यल्पसाराणिकर्माणिविफलानिवा ॥ देहिनांविषयार्त्तानांनतथैवार्पि

दिकरणगोचरंयथाभवत्येवंवात्मानंदर्शय ॥४५॥ भक्तेच्छानुवर्तित्वंवदंतववदुःशोदृश्यमेवेत्याह ॥ तैस्तैरितियन्नोदुर्विषहंमस्माकंकर्म ॥ तंत्वयि ॥४७॥
तद्भगवान्स्वयमेवकरोतिहि ॥४६॥ नचवाईर्मुखानामिवत्वदन्यानामस्माकंत्वय्यर्पितानिपूर्वंकर्माणिविपरीतफलानिभवितुमर्हतीत्याहक्लेशे
भूरिर्येषुअल्पंसारंफलंयेषु यद्वाविफलान्येवसकामानांकर्माणित्वय्यर्पितंतन्नैवतथा ॥४७॥

रामायनमः

प्रभ
१२

नत्वात्वे फलस्य उपपादयति अवमः अल्पोपि कर्मकल्पः कर्मीभासोपि ईश्वरार्पितश्चेद्विफलाय अमायनकल्पते हि यस्मात् एष ईश्वरः पुरुषस्यात्मा अत
एव दयितो हि तस्य नस्वात्मनि दयिते हिते वार्पितं निष्फलं स्यात् ४७ अनंतफलत्वमाह यथाहि मूलावसेचनेन स्कंधानां शाखानां च भवति ४८ एवं स
त्वपि त्वदर्पितकर्मणां त्वं इष्टानाम् अस्माकं यन्निमित्तमिदं दुःखमपि तत्त्वमेव वेत्सि तत्प्रशमने नाहं न मम इति ४९ दुर्वितर्क्य अगणात्मकर्माणि त्वभाव चेष्टितानि

नावमः कर्मकल्पोपि विफलायेश्वरार्पितः ॥ कल्पते पुरुषस्यैव सह्यात्मा दयितो हितः ॥ ४७ ॥ यथा हि स्कंधशाखानां तरोर्मूलावसे
चनं ॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥ ४९ ॥ नमस्तुभ्यमनंताय दुर्वितर्क्यात्मकर्मणे ॥ निर्गुणाय गुणेशाय सत्वस्थाय च
सांप्रतं ॥ ५० ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे अमृतमथने पंचमोऽध्यायः ॥ शुक उवाच ॥ एवं स्तुतः सुरगणैर्भगवान्
हरिरीश्वरः ॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः ॥ १ ॥ तेनैव सहसा सर्वे देवाः प्रतिहतेक्षणाः ॥ नापश्यन्खं दिशः क्षोणी
मात्मानं च कुतो विभुं ॥ २ ॥ विरिंचो भगवान्दृष्ट्वा सह शर्वेण तां तनुं ॥ स्वच्छां मरकतश्यामां कंजगर्भारुणेक्षणां ॥ ३ ॥ तप्तहे
मा[illegible]वदातेन लसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वांगीं सुमुखीं सुंदरभ्रुवं ॥ ४ ॥ गोपालारामा गोविंदरामा

निःश्रेयसं ततस्मै ५० ॥ ६ ॥ अ मेयं वमः षष्ठे पुनः स्तुतिनिर्विघ्नाद्वाविर्भूतो हरेः कृता तन्मंत्राद्यामृतार्थे महोद्यमः सहस्रार्काणामुदये द्युतिरिव द्युतिर्यस्य
सहसा तेजसा प्रतिहतानीक्षणानि चक्षूंषि येषां १ तामाविर्भूतां तनुं विरिंचो दृष्ट्वा तुष्टाव इति पंचमेनान्वयः कंजगर्भवदरुणे ईक्षणे यस्याः ३ तप्तहेमवदवदातेन पीतेन
लसत्कौशेयवाससा उपलक्षितां प्रसन्नानि चारूणि सर्वाण्यंगानि यस्याः शोभनं मुखं यस्याः सुंदरे भ्रुवौ यस्याः ४

महांतो मणयो यस्मिन् तेन किरीटेन कर्णाभरणे कुंडले ताभ्यां निर्भातौ यौ कपोलौ ताभ्यां श्रीर्मुखांबुजं यस्य ५ कौस्तुभः आभरणं कंठे यस्याः लक्ष्मीं वक्षसि बिभ्रतीं ६ देवप्रवरो ब्रह्मा सर्वांगैरवनिगतैः साष्टांगप्रणतैः अनाविराविरामयंनाभूतप्रभूरिति भुवन् ब्रह्माभिषेति नित्यत्वं विभुत्वं भगवन्नतोः ७ श्रीमूर्तेरयमाविर्भावः एवं नत्वा स्मरादिवज्जन्मादि नवास्तीत्याह नजातजन्मा स्थितिः संयमो यस्य तत्तः अगुणाय अतः निर्वाणसुखस्यार्णवाय अपारमोक्षसुखरूपायेत्यर्थः तथापि अणोरणिम्नेति सूक्ष्माय दुर्ज्ञेयत्वात् वस्तुतस्तु अपरिगणय्य इयत्ता तां तं धाम मूर्त्तिर्यस्य तस्मै नवेतरसभा

महामणिकिरीटेन केयूराभ्यां च भूषितं कर्णाभरणनिर्भातकपोलश्रीमुखांबुजं ५ कांचीकलापवलयहारनूपुरशोभितं कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीं ६ सुदर्शनादिभिः शास्त्रैर्मूर्तिमद्भिरुपासितं तुष्टाव देवप्रवरः सशर्वः पुरुषं परं सर्वामरगणैः साकं सर्वांगैरवनिंगतैः ७ ब्रह्मोवाच अजातजन्मस्थितिसंयमायागुणाय निर्वाणसुखार्णवाय अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥ ८ ॥ रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण योगेन धातः सह नस्त्रिलोकान् पश्याम्यमुष्मिन्नु ह विश्वमूर्त्तौ ॥ ९ ॥ ॥ नारायणमहाईरहना

चिंतयतः महानचिंत्योऽनुभावो यस्य ८ तन्मूर्तेः सनातनत्वं अपरिमेयत्वं चोपपादयति रूपमिति हे पुरुषर्षभ हे धातः एतत्तव रूपं वैदिकेन तांत्रिकेन च योगेन उपायेन श्रेयोर्थिभिः सह इज्यं पूज्यं श्रुतौ नेदमिदानीमपूर्वं जातमिति भावः ननु यूयं देवाः पूज्यत्वेन प्रसिद्धाः सत्यं सर्वेप्यत्रैवांतर्भूता इत्याह उअहो अहमस्मिन् अमुष्मिन् तव योनौ मां त्रिलोकांश्च सह पश्यामि तेन हेतुः विश्वं मूर्त्तौ यस्य अतस्तवैतद्रूपं परिच्छिन्नमपि न भवतीति भावः ९

विश्वमूर्त्तिस्त्वमेवाहं त्वयीति ।। घटस्य मृत्तिका यथा आधारो न्यस्य मध्यं च तथा त्वमस्य जगतः तत्र हेतुः परस्मात् प्रधानादपि परः ।। १० मृत्तिकादृष्टान्तेन परि
णाममाशंक्य वारयति ।। त्वमिति त्वया स्वाधीनया अतएव गुणानां व्यवाये परिणामेऽप्यगुणामेव त्वा युक्ताः पश्यन्ती मनीषिणो विवेकिनः विपश्चितः प्रा
ज्ञाः ।। ११ एतदेव सदृष्टान्तमाह ।। यथाग्निं काष्ठे मन्थनेन अमृतमाज्यं गोषु दोहनादिना ।। भुवि अन्नं वीत्यादि कर्षणादिना अनु खननेन ।। उद्यमने

त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यन्त आसीदिदमात्मतन्त्रे ।। त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मा
त् ।। १० त्वं माययात्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः ।। पश्यन्ति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगु
णं विपश्चितः ।। ११ यथाग्निमेधस्यमृतं च गोषु भुव्यन्नमम्बूद्यमने च वृत्तिं ।। योगैर्मनुष्या अधियन्ति हि त्वां गुणेषु बु
द्ध्या कवयो वदन्ति ।। १२ तं त्वा वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थं ।। दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा द
वार्त्ता इव गाङ्गमम्भः ।। १३ स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलं ।। समागतास्ते बहिरन्तरात्मन् किं
वान्यविज्ञाप्यमशेषसाक्षिणः ।। १४

प्रत्युषकारे वा णिज्यादिना वृत्तिं जीविकां ।। यद्वा अनु खननः उद्यमने त्वरियन्त्रादिनोद्धरणे ।। योगैरुपायैर्मनु
ष्या अधियन्ति प्राप्नुवन्ति तथा कवयस्त्वां बुध्या गुणेषु अधियन्ति वदन्ति च ।। १२ हे नाथ सरोजनाभ अतिचिरादीप्सितमर्थं तं योगैकप्राप्यं त्वां समुज्जिहा
नं आविर्भवन्तं प्रत्यक्षतः दृष्ट्वा सर्वे वयं निर्वृतिं प्राप्ताः दवार्त्ताः दवाग्निपीडिताः ।। १३ यदर्थं यं तत्कथयेति चेत्तत्राह हे अन्तरात्मन् अशेषसाक्षिणस्ते बहिः

विष्णुपुराणटी ४४

भा० अ०
१५

स्वयमेव किं चिन्तकं हन्तेति चेत्तत्राह अहमिति अहं अग्नेः केतवो विस्फुलिंगा इव तेत्वन्नो वयं पृथग्विभाताः सतः आत्मनः सं श्रेयः किं वा विघ्नः अतस्त्व
मेव द्विजानां देवानां च मंत्र विधत्स्व इदं कं हन्तत्युपायमुपदिशेत्यर्थः १५ इदं यं मंत्रं उपदेष्टव्य इति अभिप्रेतं यथात्रैव विज्ञाय जगाद सेद्र
तानि नियमितानि सर्वाणि कारिकाणि इंद्रियाणि येन तान् १६ ईश्वरस्याभिप्रेतं चेत् वा अभिप्रेतमित्याह एक एवेश्वरः समर्थोपि १७ हे सुराः देवाः अनेन

अहं गिरित्रश्च हरिश्च परयोपरः अस्य परयोग्रे रविवकेतवस्ते किं वा वरामे शपृथकु विभाता विधत्स्व शं नो द्विजेरवमंत्रं
मुपउवाच एवं विरिंच्यादि मिः ईडतमस्तद्धितायते षाहृदयं यथैव जगाद जीमूत गभीरया गिरा वद्धांजलीन्सं
वृत्तसर्वकारकान् १६ एक एवेश्वरस्तस्मिन् सुरकार्ये हरेश्वरः विहन्तुं कामसक्तो नाहं समुद्धं न्मथ नादिभिः १७
श्रीमगवानुवाच हेतवुह्मन्नहोर्शमोहे देवाममभाषितं श्रुणता वहिताः सर्वे श्रेयोवः स्याद्यथा सुराः १८ या
तरानवरेतैयेः तावत्संधिर्विधीयतां कालेनानुगृहीतेषु ते यावद्वो भव आत्मनः १९ अरयोपि हि संधेयाः सति
कार्यार्थगौरवे अहिमूषकवद्देवा ह्यर्थस्य पदवीं गतैः २० अमृतोत्पादने यत्नः क्रियतामविलंवितं यस्य पीतस्य वै
जंतुर्मृत्युग्रस्तोः मरो भवेत् २१ क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं सहायेन

च गंधर्वादयः १८ वः आत्मनः यावद्भवो वृद्धिर्भवति १९ अर्थस्य प्रयोजनस्य पदवीं मिद्धिं प्राप्तैः ततः पश्चादहिमूषक मयादेवा निर्मथध्वमतंद्रिताः
वद्धमद्यातकभावेन वर्त्तितव्यमिति शेषः यद्वा पेटिकायां निरुद्धो हि यथा निर्गमद्वारविधानार्थं प्रथमं मूषकेण सधिविधत्ते पश्चात्तमेव कदाचिद्भक्षयतितथार्थ

राम
१५

नन्वतर्हि तेऽप्यमृतपानेनामरास्युस्तत्राह क्लेशभाज इति १३ बलिभिः सहकारिभिः साध्याः कार्यार्थास्तदन्तु सुरासां विना न सिध्यंतीति कृत्वा समारिक्
मुपदिशति यूयमिति द्वाभ्यां हे सुराः संरंभेण सध्रमेण सांत्वयामास मार्गेण यथा सिध्यंति १४ वस्तुषु मथनाद्युत्पन्नेषु १५ । १६ सुरास्तु बलिमुपे

क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः २ यूयं तदनुमोदध्वं यदिछंत्यसुराः सुराः न संरंभेण सिध्यंति सर्वेर्थाः सांत्वया य
था २४ न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात् लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु २५ ॥ इति दे
वान् समादिश्य भगवान् पुरुषोत्तमः तेषामंतर्दधे राजन् स्वछंदगतिरीश्वरः २६ अथ तस्मै भगवते नमस्कृत्य पितामहः
भवश्च जग्मतुः स्वं स्वं धामोपेयुर्बलिं सुराः २७ दृष्ट्वारीनप्यसंयत्तान् जातक्षोभान् स्वनायकान् न्यषेधद्दैत्यराट् श्लोक्यः सं
धिविग्रहकालवित् २८ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः श्रिया परमया जुष्टं जिताशेषमुपागमन् २९ महेंद्रः
श्लक्ष्णया वाचा सांत्वयित्वा महामतिः अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ३० तदरोचत दैत्यस्य तत्रान्ये ये सुराधिपाः शंब
रोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ३१ ततो देवासुराः कृत्वा संविदं कृतसौहृदाः उद्यमं परमं चक्रुरमृतार्थे परंतप ३२ ततस्ते मंदरगि
रिमोजसोत्पाट्य दुर्मदाः नदंत उदधिं निन्युः शक्ताः परिघबाहवः ३३ दूरभारोद्वहश्रांताः शक्रवैरोचनादयः अपारयंतस्तं वोढुं विव
शा विजहुः पथि ३४ निपतन् स गिरिस्तत्र बहूनमरदानवान् चूर्णयामास महता भारेण कनकाचलः ३५

युः उपजग्मुः २७ असंयत्तानपि दृष्ट्वा श्लोक्यः कीर्त्यर्हः २८ वैरोचनिं बलिं जितमशेषं त्रैलोक्यं येन तं २९ तत्सर्वं अमृतोन्मथनादि ३० तत्रान्ये अन्येऽसुराधिपाः पौ
लोमकालेयादयः शंबरादयश्च तेऽप्यरोचत ३१ संविदं समयं ३२ परिघाः इव बाहवो येषां ३४ ३४ ३५

रुन विसर्जितः प्रस्थापितः सुपर्णो तत्र स्थिते वासुकेरागमनो योगारिति भावः २९ ८ अ मेषष्टः सन्नमेमथनोद्धतेभीत्याखिलेजनैः स्नतः
सन्नरूपया सुहृदः येषां विषमितीर्यते फलभागेन तत्वाप्यमृते भागो भविष्यतीति सम्मन्त्र्य वासुकिं नेत्रं गिरेः परिवीय संवेष्ट्य अब्धिं मथितुमारेभिरे १ वा

तांस्तथा भग्नमनसो भग्नबाहूरुकंधरान् विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः २६ गिरिपातविनिःपिष्टान् विलोक्यामरदानवान्
इक्षयाजीवयामास निर्जरान्निर्व्रणान्यथा २७ गिरिंचारोप्य गरुडे हस्तेनैकेन लीलया आरुह्य प्रययावब्धिं सुरासुर
गणैर्वृतः २८ अवरोप्य गिरिं स्कंधात्सुपर्णः पततांवरः ययौ जलांत उत्सृज्य हरिणा स विसर्जितः २९ इति श्रीभागवते
महापुराणेऽष्टमस्कंधे षष्ठोऽध्यायः ६ ते नागराजमामंत्र्य फले भागेन वासुकिं परिवीय गिरौ
तस्मिन्नेत्रमब्धिं मुदान्विताः आरेभिरे सुरा यत्ता अमृतार्थे कुरूद्वह १ हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोभवन् तन्नैच्छन्दैत्य
पतयो महापुरुषचेष्टितं २ न गृह्णीमो वयं पुच्छमहेरंगममंगलं स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः ३ इति तू
ष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ४ कृतस्थानविभागास्त एवं कश्यपनं
दनाः ममंथुः परमायत्ता अमृतार्थं पयोनिधिं ५ मथ्यमानेर्णवे सोद्रिरनाधारो ह्यपोविशत् ध्रियमाणोपि बलिभिः गौरवा
त्पांडुनंदन ६ ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ७ ॥ राम

केऽहं खतीव्रं रैत्यानुग्राहयितुमेव पूर्वं हरिः पुरस्तात्समग्रहे ततोऽभवन्नक्रभवजंगरुडः १ ४ कृतो धारणे स्थानविभागो यैः ५ ६ दैवेन हेतुना स्वपौरुषे नष्टे सति ७ ॥ रामराम

विघ्नेशस्य विघितेन रवितं विघ्नश्च वितथः सत्यो ऽभिसंधिः संकल्पो यस्य ८ लक्षयोजनः ५ हस्ता गोस्या हस्तीति तथा तेन दृष्टेन ९ तस्य गिरेराव
तेन भ्रमणं शृंगकंडूयनं मेने १० आहरेणाश्रुहरणाकारेणा दैवानरेवाकारेणान्वपेणा विशत ॥ १ आत्मनि देवदैत्य मध्ये गोत्रेदाढ्ये न्रूपेण
नेत्रे श्रमेद्या बोधत्रूपेण परेणाहारिणा क्षोभितं नक्राणां चक्रं समूहो यस्मिन् १२ देहश्च पृष्ठमोनिचयस्वा साश्रञ्च हीडस्य साहस्रं अपारमिताः

विलोक्य विघ्नेशाविघितेद स्वकोडुरं तवीर्यो ऽवितथाभिसंधिः कृत्वा वपुः कान्तपमद्भुतं महत्त्वविश्रुतो यं गिरिमुज्जहार ८ तमुत्थि
तं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितं हलाहलः रधारदृष्टेन सलक्षयोजनं पञ्चशारिणा द्वीपस्वापो ऽमहान् ९ द्वि
गाहरेद्भुजवीर्यवेपितं पारिभ्रमन्तं गिरिमंगदृष्टतः विभ्रन्नसावर्त्तनमादिकच्छपो मेनेंगकंडूयनमप्रमेयः १० तथाहरणावि
शदाहरेणान्वपेण तेषां बलवीर्यमारयन् उद्दीपयन् देवगणाश्च विस्मर्दैवेन नागेंद्रमबोधरूपः ॥ उपर्यगेंद्रं गिरिराड्विवान्यः श्री
कम्पदृष्टेन सहस्रबाहुः तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टवाद्भिः सुमनोभिरिष्टः ॥ उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण तेजावि
शतासमेधिताः ममंथुरद्धितरसा महोत्कराम महाद्रिणा क्षोभितनक्रचक्रं १३ अहीन्द्रसाहस्रकठोरदृग्मुखश्वासाग्निधूमाहततवर्चसो
सुराः [illegible] पौलोमकालेयबलील्वलादयो दवाग्निदग्धाः सरलाद्रवा भवन् १४ देवांश्च तच्छ्वासशिखाहतप्रभान् धूम्रा
म्बरस्रग्वरकंचुकाननान् समभ्यवर्षन् भगवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः १५ [illegible] ततो ऽरगेन्द्रगारदग्धेभ्यो निर्गता ध्यामप्रिधूमा
ध्यामाहतंवर्चोयेषां ते सरलाद्रुमविशेषाः १४ देवांश्च भगवद्वशाः घनाः समभ्यवर्षन् समुद्रोर्मिभिः उपगूढा वायवः ववुः वातिस्म कथंभूतान्

भा॰अ॰
८

॥ १६ ॥ धृतो ऽद्रिर्येन स धृताद्रिः भवान्यन्मन्दरम् उद्धृत्य अनंतरम् अशोभतेत्यन्वयः कथंभूतः कनकपरिधिः पीतवासाः कर्णयोर्विद्योतमाना विद्युत्कुंडललक्षणा
यस्य स तथा मूर्ध्नि भ्राजंतो विलुलिताः कचा यस्य स तथा जैत्रैर्जित्वरैः दंदशूकं सर्पं प्रतिगिरिः प्रतिद्वंद्वी पर्वतः ॥ १७ ॥ हालाहलमित्याह्वा नाम य
स्य संभ्रांता मीना उन्नता मकरा अहयश्च यस्मिंस्तस्मात् तिमयो ऽहिभिरा कुलाच्च ॥ १८ ॥ तद्विषं अप्रतिमं प्रतिक्रियाशून्यमिति वा कुतः उग्रो वेगो यस्य

मथ्यमानात्तदा सिंधोर्देवासुरवरूथपैः यदा सुधा न जायेत निर्ममंथाजितः स्वयं ॥ १६ ॥ मेघश्यामः कनकपरिधिः क
र्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मंथन्मथ्ना प्र
तिगिरिरिवाशोभताथो धृताद्रिः ॥ १७ ॥ निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः संभ्रांतमीनोन्म
कराहिकच्छपात्तिमिद्विपग्राहतिमिंगिलाकुलात् ॥ १८ ॥ तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति
भीताः प्रजा दुद्रुवुरंग सेश्वराः अरक्ष्यमाणाः शरणं सदाशिवं ॥ १९ ॥ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याभि
मतं मुनीनां आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः ॥ २० ॥

तदेवाह दिशि दिशीति यद्वा उग्रो वेगो यस्य असह्यं दुःसहं दाहकत्वात् अत एवाप्रतिं विलोक्य भीता अन्येन केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुः
जग्मुः ॥ १९ ॥ त्रिलोक्या उद्भवाय देव्या सह अद्रौ कैलासे आसीनं तथापि मुनीनामभिमतं तेषामेवापवर्गाय तपो जुषाणं ॥ २० ॥

राम
४

निर्गुणमगुणं चैव शिवं हरिपराक्रमैः एवं तत्त्व प्रजेशानानामरूपं तान्तरयोः ॥ ११ ॥ १ नन्वेवंभूतो विष्णुरिति प्रसिद्धं तत्राह गुणमयीति अस्य जगतो य
हार्णारीन्ध्रत्सेतराहे भूमन्न त्वदृक्त्वतः सिद्धान्तानः त्वं ब्रह्मादिसंज्ञां धत्से ॥ १२ ॥ तत्र हेतुः त्वं ब्रह्मेति मरस्मतो भगवान् देवतिर्यगादिरूपान् भावयती
ति तथा सर्जयतत्वश्चातिरिक्तं नास्तीत्याह आत्मैव त्वं नानाशक्तिभिः जगद्रूपेणाभाना यस्मादीश्वरः ॥ १४ ॥ त्वतः सिद्धान्तानत्वमुपपादयतो जगदात्म

प्रजापतय ऊचुः देवदेव महादेव भूतात्मन् भूतभावन त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥ ११ ॥ त्वमेकः सर्वज
गत ईश्वरो बंधमोक्षयोः तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुं ॥ १२ ॥ गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्विभो धत्से
यदा स्वदृग्भूमन् ब्रह्मविष्णुशिवाभिधां ॥ १३ ॥ त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः
॥ १४ ॥ त्वं शब्दयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्यगुणः स्वभावः कालः क्रतुः सत्यमृतं च धर्मः त्वय्यक्षरं यत्त्रिवृदामनन्ति ॥ १५ ॥
अग्निर्मुखं ते खिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजं कालं गतिं ते खिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशं ॥ १६ ॥

नाख्यामानप्रकाशमाह त्वं शब्दस्य वेदस्य योनिः श्रुतः त्वत्तः सिद्धत्वानत्वं जगदादिर्महत्तत्वं आत्मा च अहंकारः कथंभूतः प्राणेंद्रियद्रव्याणां कारणभूता
गुणायस्य राजसादि त्रिविध इत्यर्थः स्वभावादयश्च त्वमेव क्रतुः संकल्पः सत्यमृतं चेति यो धर्मः स त्वं महदादिरूपत्वे हेतुः त्रिवृत त्रिगुणात्मकं यदक्षरं प्रधानं
त्वयि त्वदाश्रयं तदामनन्ति यद्वा एवंभूते त्वयि त्रिवृदक्षरं प्रणवं प्रकाशकमाहुरित्यर्थः ॥ १५ ॥ अखिलदेवतात्मा अग्निः सर्वदेवतात्मकस्ते मुखः अग्निस्ते मुखं हे लोक

भा॰अ॰
१८

परे अवरे च ये आत्मनो जीवास्तेषामाश्रयः तवात्माहंकारः २७ त्रयीमात्मन् वेदत्रयमूर्त्ते २८ पंचोपनिषदः तत्पुरुषाघोरसद्योजातवामदेवेशानरूपाम्
त्राः ये पुरुषे शेनात्र त्रिंशन्मंत्राणां वर्गः तेषामेव मंत्राणां पदच्छेदेन अष्टोत्तरत्रिंशत्कलात्मका मंत्रा इत्यर्थः अवस्थितिः स्वरूपं तावकम् २९ अधर्मोर्मि
षु दंभलोभादिषु यैर्भिर्विसर्गः प्रतिसर्गः संहारः यद्वा यैः सत्वादिभिर्विविधः सर्गस्तानि नेत्रत्रयं हे देव छंदोमयः ऋषिर्वेदः स तवेक्षा ईक्ष

नाभिर्नभस्ते श्वसनं नभस्वान्सूर्यश्च चक्षूंषि जलं स्म रेतः । परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवन् शिरस्ते २७ कुक्षिः समु
द्रा गिरयोऽस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते । छंदांसि साक्षात्तव सप्त धातवः त्रयीमयात्मन् हृदयं सर्वधर्मः २८ मुखानि पंचो
पनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः । यत्तच्छिवाख्यं परमार्थतत्वं देव स्वयंज्योतिरवस्थितिस्ते २९ [struck out]
छायात्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्वरजस्तमांसि । सांख्यात्मनः शास्त्रकृतस्तवेक्षा छंदोमयो देव ऋषिः पुराणः ३० न ते गिरि
त्राखिललोकपालविरिंचवैकुंठसुरेंद्रगम्यं । ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद्ब्रह्म निरस्तभेदं ३१ कामाध्वरत्रिपुरकालगरा
द्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते । यस्त्वंतकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिंगशिखया भसितं न वेद ३२

णः साक्षान्मंत्रदृगिति पाठे मंत्रवेदः तमेवाह छंदोमय इति ३० हे गिरित्र ते परं ज्योतिः अखिलानां लोकपालादीनां गम्यं न भवति ज्ञातः यत्र रजआदि नास्ति किं तज्ज्यो
तिः यन्निरस्तभेदं ब्रह्म ३१ कामश्च अध्वरश्च दक्षस्य त्रिपुरादयश्च ये अनेकभूतद्रुहस्तान् क्षपयतः संहरतस्ते तत्कर्म स्तुतये न भवति ज्ञानरूपमेतदित्यर्थः गरम
गरलस्यापि वशंभावित्वेन सिद्धत्वान्निर्देशः स्तुतये अलं न भवतीत्यत्र हेतुः यस्त्वं भवान् स्वनेत्रवह्निविस्फुलिंगस्य शिखया इदं जगत् भसितं भस्मसाज्जातं न वेद ना

राम
१८

तदेवं नित्यपराङ्मुखेष्वयं त्वया ये निंदिति ते नेति मूर्खा इत्याह ॥ येऽत्र मया तत्त्वं चरंतं तस्मान्नितरां रतं कामिनं कथ्यते प्रलपति तथा श्मशाने चरंतं उग्रं क्रूरं परुषं वा हि त्व कथ्यते ॥ कथंभूतं ॥ आत्मारामा आत्मतेऽवरो विश्वहितोपदेष्टारो ब्रह्मविष्णुहरिविरिंचितनं मयाब्रह्महृदयस्य तथा भूपमपि तपसामितं तपमपि तेन नूनं नवोतिमविरंचितिकाङ्गः त्व ह्लीलां नैव विदुरित्यर्थः ॥ अतो हातनलज्जाः त्यक्तत्रपाः कथमात्मारामैः सेवितवराणां युगलस्य कामित्वमिति भवः कथं वा तपसामितं प्रस्वश्यात तस्याग्रं त्वं परुषत्ववा सभवतीत्यविचार्यैव प्रलापा इत्यर्थः ॥ ३३ ॥ आत्मारामा तावन्निंदकानां वार्त्ता महतोऽपि तव तत्त्वं न जानंतीत्याह ॥ तत्र स्मात्त्वमव तत्त्वरूपाः स्पगमने ज्ञाने ब्रह्मादयोऽपि न स

येन त्वात्मारामग्रहणमिह हरिर्विरिंचितां चिद्धृदं चरंतं मया तपसामितं नं ॥ कथ्यते उग्रपरुषं निरतं श्मशाने तेनेऽनमूर्तिमविरंचि त्वं वहा तलज्जाः ॥ ३३ ॥ तत्र स्पेत मदृमतोः परतः परस्य नाजः स्वत्त्वरूपगमने प्रभवंति भूम्नः ॥ ब्रह्मादयः शिवमुत मत्त्वतेनेव यत्तेऽतनन्तग गोविषयात्त्वपिशाचिमात्रं ॥ ३४ ॥ एतत्परं त्रपपश्यामो न परं ते महेश्वर ॥ मृडनाय स्पहि लोकस्य व्यक्तिस्ते व्यक्तकर्मणः ॥ ३५ ॥ सुक उवाच ॥ तद्दीश्यं समनंतामाकृपया नृशापीडितः ॥ सर्वभूतसुहृद्देवः स्मरन्नाह सतीं प्रियां ॥ ३६ ॥ शिव उवाच ॥ अहो वत भवान्येतत्प्रजानापश्यवेशसं ॥ क्षीरोदमथनाद्भूतात्कालकूटादुपस्थितं ॥ ३७ ॥ आसां प्राणपरीप्सूनां विधेयमभयं हि मे ॥ एतावान्हि प्रभोरर्थो यद्दीनपरिपालनं ॥ ३८ ॥ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः ॥ बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९ ॥

प्राणैः

समर्थाः संपत्त्ववेनेऽज्ञातः शास्त्रयात्रः तत्र वयं कथं प्रभवाम यतस्तेषां सर्गे अत्यंतमार्वाचीनाः तथापि यदेतत्तत्त्व नवतदीत्मशक्तिपरिमितमात्रमित्यर्थः ॥ ३४ ॥ तदाह ॥ एतत्परमिति न परं रूपं तथापि त्वद्दर्शनादेव कृतार्था वयमित्याह ॥ मृडनाय हीति ॥ ३५ ॥ ३६ ॥ मत्प्रभावमविचार्य विषपाने प्रवृत्तं मां कथमन्यदि प्रिया वारयेदिति शंकया तामनुनाययन्नाह ॥ अहो वतेति सार्द्धैस्त्रिभिः ॥ वैशसं दुःखं ॥ ३७ ॥ प्राणोप्सूनां प्राणान्रक्षितुमिच्छूनां मम यात्प्रभोः समर्थस्य अर्थः कार्यः ॥ ३८ ॥ किं च बद्धवैरं परस्परं जिघांसत्सु ॥ ३९ ॥

पं२

सुमतेषु १

कृपयतः कृपां कुर्वतः पुंसः ॥ ४० ॥ प्रेममन्त्रः स्वस्तिशो भनायासस्यात्मसुखेन जीवितमहिस्त्यर्थः ॥ जग्धुमत्ते ॥ ४१ ॥ करतलीकृत्य करतलपरिमात्रं कृत्वा ॥ ४२ ॥ जलक
ल्मषः जलदोषो विषं ॥ यस्मात् गले नीलं चकार ॥ साधोः कृपालोः ॥ ४३ ॥ ५ ॥ प्रस्कन्नं गलितं अपरे वृश्चिकादयः विषाः ते पि जगृहुः अनेन विषं स्पृतीव तोका ॥ ४६ ॥

पुंसः कृपयतो भद्र सर्वात्मा प्रीयते हरिः ॥ प्रीते हरौ भगवति प्रीयेहं सचराचरः ॥ ४० ॥ तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ॥ एवमाम
न्त्र्य भगवान् भवानी विश्वभावनः ॥ तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत ॥ ४१ ॥ ततः करतलीकृत्य व्यापि हालाहलं विषं ॥ अभक्ष
न्महादेवः कृपया भूतभावनः ॥ ४२ ॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः ॥ यच्चकार गले नीलं तच्च साधोर्विभूषणं ॥ ४३ ॥ त
प्यन्ते लोकतापेन साधवः प्रायशो जनाः ॥ परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥ ४४ ॥ निशम्य कर्म तच्छंभोर्देवदेवस्य मीढुषः ॥
प्रजा दाक्षायणी ब्रह्मा वैकुण्ठश्च शशंसिरे ॥ ४५ ॥ प्रस्कन्नं पिबतः पाणेर्यत्किंचिज्जगृहुः स्म तत् ॥ वृश्चिकाहिविषौषध्यो दन्दशूकाश्च
ये परे ॥ ४६ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे अमृतमथने सप्तमोध्यायः ॥ श्रीशुक उवाच ॥ पीतं गरे वृषांकेण प्रीतास्ते मनरा
नवाः ॥ ममन्थुस्तरसा सिंधुं हविर्धानी ततो भवत् ॥ १ ॥ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः ॥ यज्ञस्य देवयानस्य मेध्याय हविषे न
प ॥ २ ॥ तत उच्चैःश्रवा नाम हयो भूच्चन्द्रपाण्डुरः ॥ तस्मिन् बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया ॥ ३ ॥ तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः ॥
दन्तैश्चतुर्भिः श्वेताद्रेर्हरन् भगवतो महिं ॥ ४ ॥ ततो भवत्पारिजातः सुरलोकविभूषणं ॥ पूरयत्यर्थिनो योर्थैः शश्वद्भुवि यथा भवान् ॥ ५ ॥
ततश्चाप्सरसो जाताः ... तस्मिन् मणिं स्पृहां चक्रे वक्षोलंकरणे हरिः

अष्टमे सप्तमः ॥ अष्टमे मथ्यमाने ब्धौ लक्ष्म्या विष्णोर्वृतेः हरेः धन्वं ॥ कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः ॥ तस्मिन् मणौ स्पृहां चक्रे वक्षोलंकरणे हरिः
ते देवेभ्यो मोहिन्या दत्त्वा वर्ण्यते ॥ हविर्धानी सुरभिः ॥ १ ॥ देवयानस्य ब्रह्मलोकमार्गप्रापकस्य यज्ञस्य संबंधिने हविषे ॥ २ ॥ ईश्वरशिक्षया प्रागेव कृततया ॥ ३ ॥ भगवतो यः श्वेताद्रिः

वल्गुभिर्गत्यादिभिः स्वर्गिणां रमणोरतिकर्त्र्यः ७ सौदामापर्वतः तत्रैव कल्यां दिशि जाता सौदामिनी स्फाटिकाद्रिमयगिरिशृंगेष्वधिकं विस्फुरंती विद्युदिव कां
त्या दिशो रंजयती श्रीः संपत्साक्षान्मूर्तिधारिणी सती सैव भगवत्परायणा विरभूदित्यर्थः ८ तस्यां रूपादिमहिम्नाक्षिप्तचेतसो येषां ९ भगवद्वक्षःस्थि
तया श्रिया विलोकितानां देवानां यथापूर्वं सर्वसंपत्प्राप्तिर्महाराणां च तद्विपर्ययं वक्तुं अभिषेकमहोत्सवपूर्वकं ब्रह्मादिपरिहारेण भगवत्प्राप्तिप्रकार

ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः । रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ७ ततश्चाविरभूत्साक्षाच्छ्री रमा भग
वत्परा । रंजयंती दिशः कांत्या विद्युत्सौदामिनी यथा ८ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः । रूपौदार्यवयोवर्णमहि
माक्षिप्तचेतसः ९ तस्याश्चासनमानिन्ये महेंद्रो महदद्भुतं । मूर्तिमत्यः सरिच्छ्रेष्ठाः हेमकुंभैर्जलं शुचि १० आभिषेचनिका
भूमिराहरत्सकलौषधीः । गावः पंचपवित्राणि वसंतो मधुमाधवौ ११ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि । जगुर्भद्रा
णि गंधर्वा नट्यश्च ननृतुर्जगुः १२ मेघा मृदंगपणवमुरजानकगोमुखान् । व्यनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान् १३ त
तोभिषिषिचुर्देवीं श्रियं पद्मकरां सतीं । दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः १४ समुद्रः पीतकौशेयवाससी समुपाहरत् ।
वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदां १५

माह तस्याश्चासनमित्यादि अथासीद्वाहरणीत्यतः प्राक्तनेन ग्रंथेन १० आभिषेचनकाः अभिषेकोचिताः
पंचपवित्राणि पंचगव्यानि मधुमाधवौ चैत्रवैशाखभवं फलपुष्पादि प्राप्तातेरपि द्वंद्वैकवत्स एवार्थः मधुमासभवं मध्विति वा ११ अभिषेकं अभिषेकोचितं विधिन
र्तकानां स्त्रियः नर्तक्यः १२ शंखवेणुवीणास्तु तुमुलो निःस्वनो येषां तान् मृदंगादीन् १३ १४ १५

भा॰ स्क॰
१०

१८ परमाश्रयं ध्रुवं नित्यं अव्यभिचारिणो नित्याः सन्तो गुणा यस्मिंस्तत् नान्वविंदत क्वचित्कस्यचिद्दोषस्य सद्भावात् १९ तदेवाह नूनमिति त्रिभिः मन्युनिर्जयो नास्ति दुर्वासःप्रभृतिषु गुरुशुक्रादिषु संगवर्जितं ज्ञानं नास्ति प्रह्लादेऽपि ब्रह्मसोमादीनां न कामनिर्जयः परतो व्यपाश्रयः परापेक्षा रुद्रादिः स किमीश्वरः २०
न भूतसौहृदं परशुरामादिषु न मुक्तिकारणं त्यागः शिविप्रभृतिषु पुंसः कार्त्तवीर्यादेर्वीर्यं नास्ति अजवेगनिष्कृतं कालवेगेन परिहृतं तद्धि न भवति गुणसंगवर्जितः

भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः हारं सरस्वती पद्ममजो नागाश्च कुंडले १६ ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनं १७ स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितं ततस्ततो नूपुरवल्गुशिंजितैर्विसर्पती हेमलतेव सा बभौ १८ विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणं गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत १९ नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितं कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः २० धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणं वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसंगवर्जितः २१ क्वचिच्चिरायुर्न हि शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः यत्रोभयं कुत्र च सोऽप्यमंगलः सुमंगलः कश्च न कांक्षते हि मां २२

सनकादिः द्वितीयः मम वरो न हि समाधिनिष्ठत्वात् २१ चिरायुष्ट्वमपि मार्कंडेयादेः शीलमंगलं नास्ति इंद्रियरमणशीलत्वात् क्वचित्तदप्यस्ति हिरण्यकशिपुप्रभृतौ आयुषस्तु स्थैर्यं न वेद्यं दुर्ज्ञानं भगवद्द्वेषेणाकस्मादेव मृत्युसंभवात् यत्र तूभयं श्रीरुद्रे मार्कंडेयादिषु वा इंद्रियदमनाद्यभावाच्छीलमंगलं वायुर्निश्चयश्चास्ति भयमपि न चान्यः पूर्वोक्तः कश्चिद्दोषः तथापि सोऽप्यमंगलः श्मशानवासाद्यमंगलवेषितः श्री[illegible] इति कश्चित्सुमंगलः निरवद्यश्च सन् मां न हि कांक्षते आत्मारामत्वात् २२

राम
१०

एवं विमृश्य परमानिरपेक्षमपि मुकुंदमेव वरं वव्रे तत्किं अव्यभिचारिभिः सद्भिर्धर्मज्ञानादिभिर्गुणैर्निजैकाश्रयतया चैनैरपेक्षेण वरं सर्वोत्तमं तत्र हेतुः अगु-
णाश्रयं प्रकृतिगुणातीतं पाठांतरे प्रथममेवार्थः अयमेव त्वया ईप्सितं ॥ किंच सर्वैर्गुणैरणिमादिभिरपेक्षितं वृतं ॥ अयं भावः यद्यपि त्वयमात्मारामत्वेनान्य-
निरपेक्षः तथाप्याश्रिताश्रणिमादिसिद्धिर्यथा नोपेक्षते तथा मामपि नोपेक्षेत तावतैव तत्सेवया हेत्कृतार्थास्यां किमन्यैः प्राकृतैरिति तमेव वृतवतीति ॥ २३ ॥ तदेव

एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रययागुणाश्रयं ॥ वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुंदं निरपेक्षमीप्सितं ॥ २३ ॥ तस्यांस-
देश उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टां ॥ तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन या-
ता ॥ २४ ॥ तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ॥ श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन
यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥ २५ ॥ शंखतूर्यमृदंगानां वादित्राणां पृथुः स्वनः ॥ देवानुगानां सस्त्रीणां नृत्य-
तां गायतामभूत् ॥ २६ ॥ ब्रह्मरुद्रांगिरोमुख्याः सर्वे विश्वसृजो विभुं ॥ ईडिरेऽवितथैर्मंत्रैस्तल्लिंगैः पुष्पवर्षिणः ॥ २७ ॥

ह तस्यांसप्रदेशे कमनीयां नवकंजमालां निधाय तस्य वक्षः प्रतीक्षमाणा तूष्णीं तस्य निकटे तस्थौ कथंभूतां मालां माद्यंतो ये मधुव्रताः भ्रमराः तेषां वरूथस्य गिरा
उपघुष्टां नादितां कथंभूता श्रीः सव्रीडहासेन विकसन्नयनेन तेन तस्य उरः स्वधाम यातास्ती वक्षः प्रतीक्षमाणा तस्थावित्यर्थः ॥ २४ ॥ भगवानपि त्रैलोक्यजननीं हृदये स्व-
वक्षः तस्याः स्थानं दत्तवानित्याह तस्या इति विशिष्टाः भूतयो विभवाः यस्याः तस्याः त्रिजगतो जनन्याः श्रियः परमं स्थिरं एधयत अवर्धयत ॥ २५ ॥ २६ ॥ तल्लिंगैर्विश्वसृष्टि-
पादकैः अवितथैः सत्यार्थैः ॥ २७ ॥

भा॰ अ॰
२१

॥ १९ ॥ वारुणीं वरुणो देवतास्य यदन्नं तन्मयी हरा ॥ ३० ॥ १ ॥ दीर्घौ पीवरौ दोर्दंडौ यस्य कंबुग्रीवः शंखनाभिरिव त्रिरेखा सहवर्त्तमाना ग्रीवा यस्य ॥ ३१ ॥ स्निग्धः कुंचितः केशा
नामंतो यस्य ॥ ३३ ॥ इज्यभाक् यज्ञभागभोक्ता ॥ ३४ ॥ अमृतेन आभृतं पूर्णं ॥ ३५ ॥ ६ ॥ मिथः दैत्यानां परस्परं कलहोत्यादनेन योगमायया मोहितान् वोऽर्थं साधयि

श्रीशुक उवाच ॥ श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः ॥ शीलादिगुणसंपन्ना लेभिरे निर्वृतिं परां ॥ १८ ॥ निःसत्वा लोलुपा राजन्नि
रुद्योगा गतत्रपाः ॥ यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥ १९ ॥ अथासीद्वारुणी देवी कन्या कमललोचना ॥ असुरा जगृहु
स्तां वै हरेरनुमतेन ते ॥ ३० ॥ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ॥ उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥ ३१ ॥ दीर्घपीवरदोर्द
ण्डः कंबुग्रीवोऽरुणेक्षणः ॥ श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥ ३१ ॥ पीतवासा महोरस्कः सुमृष्टमणिकुंडलः ॥ स्निग्धकुंचि
तकेशांतः सुभगः सिंहविक्रमः ॥ ३३ ॥ अमृतापूर्णकलशं बिभ्रद्वलयभूषितः ॥ स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः ॥ धन्वंतरिरिति
ख्यातः आयुर्वेददृगिज्यभाक् ॥ ३४ ॥ तमालोक्यासुराः सर्वे कलशं चामृताभृतं ॥ लिप्संतः सर्ववस्तूनि कलशं तरसाहरन् ॥ ३५ ॥ नीयमानेः तं
हरेस्तस्मिन्कलशेमृतभाजने ॥ विषण्णमनसो देवा हरिं शरणमाययुः ॥ ३६ ॥ इति तद्दैन्यमालोक्य भगवान्भृत्यकामकृत् ॥ मा खिद्यत मिथोऽर्थं त
वः साधयिष्ये स्वमायया ॥ ३७ ॥ मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसां ॥ अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ॥ ३८ ॥ ॥ रामायनमः

ष्यामि अतो मा खिद्यतेत्याहेति शेषः ॥ ३७ ॥ तदेवाह मिथ इति तर्षः कामः तद्युक्तानि चेतांसि येषां दत्स्व त्वं मम बलानां कलिरभूत ॥ ३८ ॥ रामकृष्णायनमः

राम
११

दुर्बलानां त्वाक्रोशप्रकारमाह देवा इति द्वाभ्यां ये देवाः तुल्येनायासेन हेतवः साधकाः तुल्यप्रयासा इत्यर्थः सोऽहेतुश्च धनादिर्येषामिति वा सत्रयागे यथा सर्वेषां स-
मफलं तद्वत् तथा च श्रुतिः ऋद्धिकामाः सत्रमासीरन्निति ये यजमानास्त ऋत्विज इति च ३९ ४१ तद्रूपं वर्णयति पञ्चभिः प्रेक्षणीयमुत्पलमिव श्यामं
सर्वेष्ववयवेषु सुन्दरं समानयोः कर्णयोराभरणं यस्मिन् सुकपोलं च तदुन्नतनासिकं चाननं यस्मिन् ४२ २ नवयौवनेन निर्वृत्तौ यौ स्तनौ तयोर्भारेण च

देवाः स्वभागमर्हन्ति ये तुल्यायासहेतवः । सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥ ३९ ॥ इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः ।
दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ॥ ४० ॥ एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः । योषिद्रूपमनिर्देश्यं दधार परमा-
द्भुतं ॥ ४१ ॥ प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरं । समानकर्णाभरणं सुकपोलोन्नसाननं ॥ ४२ ॥ नवयौवननिर्वृत्तस्तनभारकृ-
शोदरं । मुखामोदानुरक्तालिझङ्कारोद्विग्नलोचनं ॥ ४३ ॥ बिभ्रत्सुकेशभारेण मालामुत्फुल्लमल्लिकां । सुग्रीवकण्ठाभरणं सुभु-
जाङ्गदभूषितं ॥ ४४ ॥ विरजाम्बरसंवीतनितम्बद्वीपशोभया । काञ्च्या प्रविलसद्वल्गुचलच्चरणनूपुरं ॥ ४५ ॥ सव्रीडस्मितविक्षिप्तभ्रू-
विलासावलोकनैः । दैत्ययूथपचेतःसु काममुद्दीपयन्मुहुः ॥ ४६ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे अमृतमथनेऽष्टमोऽध्यायः ॥

कृशमुदरं यस्मिन् सुष्ठु ग्रीवा यस्मिन् कण्ठे आभरणं यस्मिन् तच्च तच्च शोभना ग्रीवा येन तत्कण्ठाभरणं यस्मिन्निति वा सुभुजयोरङ्गदाभ्यां भूषितं
४४ विरजोम्बरेण संवीतो नितम्ब एव द्वीपः विशालत्वात् तत्र शोभा यस्याः तया काञ्च्या प्रकर्षेण विलसत् वल्गु यथा भवत्येवं चलतौ चरणयोर्नूपुरे यस्मिन् ४५
सव्रीडेन स्मितेन सह विक्षिप्ते कम्पिते याभ्यां भ्रूभ्यां तयोर्विलासेन सह यान्यवलोकितानि तैः दैत्ययूथपानां चेतःसु मुहुर्मुहुः काममुद्दीपयन् ४६ अष्टमे [illegible]

नवमेमोहितैर्दैत्यैरर्पितेमृतभाजने ॥ नद्यवनेनदेवेभ्योमृतंरत्नतपर्यते ॥ १ ॥ अहोनूपंमोदर्यधामद्युतिः इतिवदतः कात्वमित्यादिपप्रछुः ॥ २ ॥ मथ्नतीवज्ञोभयं नीव ॥ ३ ॥ कस्यासीत्यपुत्रनुक्तमस्माभिः यतस्त्वंनकेनचित्भुक्तापूर्वेत्याहुः नेति ॥ त्वांत्वांअमराशिभिस्पृष्टपूर्वांनजानीमइतिनअपितुजानीमएव ॥ ४ ॥

अमृतउवाच ॥ तेन्योन्यतोसुराःपात्रंहर्तुंतत्पाक्रमोद्धताः ॥ क्षिपंतोदस्युधर्माणआयातीदंदृशुस्त्रियं ॥ १ ॥ अहोरूपमहोधामअहोअस्या नवंवयः ॥ इतितेतामभिद्रुत्यपप्रच्छुर्जातहृच्छयाः ॥ २ ॥ कात्वंकंजपलाशाक्षिकुतोवाकिंचिकीर्षसि ॥ कस्यासिवदवामोरुमथ्नतीव मनांसिनः ॥ ३ ॥ नवयंत्वामरैर्दैत्यैः सिद्धगंधर्वचारणैः ॥ नास्पृष्टपूर्वांजानीमोलोकेशैश्चकुतोनृभिः ॥ ४ ॥ नूनंत्वंविधिनासुभ्रु प्रेषितासिशरीरिणां ॥ सर्वेंद्रियमनःप्रीतिंविधातुंसघृणेनकिं ॥ ५ ॥ सात्वंनःस्पर्द्धमानानामेकवस्तुनिमानिनि ॥ ज्ञातीनां बद्धवैराणांशंविधत्स्वसुमध्यमे ॥ ६ ॥ वयंकश्यपदायादाः भ्रातरःकृतपौरुषाः ॥ विभजस्वयथान्यायंनैवभेदोयथाभवेत् ॥ ७ ॥ इत्युपामंत्रितोदैत्यैर्मायायोषिद्वपुर्हरिः ॥ प्रहस्यरुचिरापांगैर्निरीक्षन्निदमब्रवीत् ॥ ८ ॥ श्रीभगवानुवाच ॥ कथंकश्यपदा यादाःपुंश्चल्यांमयिसंगताः ॥ विश्वासंपंडितोजातुकामिनीषुनयातिहि ॥ ९ ॥ सालावृकाणांस्त्रीणांचस्वैरिणीनांसुरद्विषः सख्यान्याहुरनित्यानिनूत्ननूत्नंविचिन्वतां ॥ १० ॥ ऋषिरुवाच ॥ इतितेक्ष्वेलितैस्तस्याः आश्वस्तमनसोसुराः ॥ जहसुर्भावगंभीरंददुश्चा मृतभाजनं ॥ ११ ॥

आत्माभिरत्वद्दर्शनंतदीश्वरेणैवसंपादितमित्याहुः नूनमिति ॥ सर्वेंद्रियाणांमनसश्चप्रीतिंविधातुंसघृणेनकिंप्रेषितासिकिंवा यदृच्छयैवगतामितिनेवनूनंप्रेषितेवेत्यर्थः ॥ ५ ॥ ६ ॥ भेदोविग्रहोयथानभवेत्तथा ॥ ७ ॥ ८ ॥ संगताःअनुरक्ताः ॥ ९ ॥ हेसुरद्विषः ॥ १० ॥ भावेनकेनाभिप्रायेणगंभीरंयथा भवत्येवंजहसुः ॥ ११ ॥

ईषत्स्मितेन शोभा यस्यास्तया मया कृतं साधु वा असाधु वा यद्यप्युपेतश्च गीर्वा कृतं तथापि हि विभजे ॥ १२ ॥ असुरपुंगवा ईत्यपेक्षाः प्रमाणमियन्नामजानंतः ॥ १३ ॥
यथोपजोषं यथाप्रीति ॥ अहतमक्षतं ॥ अहतं यन्त्रनिर्मुक्तं धौतं वासः स्वयंभवा ॥ शास्त्रं तन्मांगलिकोषतावन्मात्रेण सर्वदा ॥ प्रागग्रेष्वक्षुशेषु विविशुः
॥ १५ ॥ धूपेनामोदितायां हारभावृतायां ॥ १६ ॥ अथ तस्यां शालायां हे नरेंद्र सा कलशपाणिराविवेश कथंभूता मणिबंधादानिष्टकरस्य करभो वहिः करभस

ततो गृहीत्वामृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा ॥ यद्यप्युपेतश्च वसाधु साधु वा कृतं मया वो विभजे सुधामिमां ॥ १२ ॥ इत्य
भिव्याहृतं तस्याः आकर्ण्यासुरपुंगवाः ॥ अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥ १३ ॥ अथोपोष्य कृतस्नाना हुत्वा च हविषान
लं ॥ दत्त्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः ॥ १४ ॥ यथोपजोषं वासांसि परिधायाहतानि ते ॥ कुशेषु प्राविशन्सर्वे प्रागग्रेष्वभि
भूषिताः ॥ १५ ॥ प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च ॥ धूपामोदितशालायां जुष्टायां माल्यदीपकैः ॥ १६ ॥ तस्यां नरेंद्र करभोरुरुशद्दुकू
लश्रोणीतटालसगतिर्मदविह्वलाक्षी ॥ सा कूजती कनकनूपुरशिंजितेन कुंभस्तनी कलशपाणिरथाविवेश ॥ १७ ॥ तां श्रीसखीं
कनककुंडलचारुकर्णनासाकपोलवदनां परदेवताख्यां ॥ संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकांतां ॥ १८ ॥

दृशौ सदृशौ ऊरू यस्याः सा उशत्कमनीयं दुकूलं यस्मिंस्तेन श्रोणीतटेन विशालया श्रोण्या अलसा मंदा गतिर्यस्याः सा पाठांतरे करभसदृशयोरूर्वोः सतदुकूलं यस्याः
सा चासौ श्रोणीतटेन अलसगतिश्च मदेन विह्वले अक्षिणी यस्याः ॥ १७ ॥ तां श्रियः सखीं संवीक्ष्य देवासुराः संमुमुहुः कथंभूतां कनकमये कुंडले यस्याः सा चासौ चा
रु च कर्णौ यस्याः सा च विगलितौ विस्रस्तौ स्तनपट्टिकायाः अंतौ यस्याः ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥

ए॰ मोहयित्वा यत्कृतवान्तदाह त्रिभिः असुराणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयं अन्याय्यं मत्वा तां सुधां यो न व्यभजत् अयं भावः दैत्यैर्मदीयं साधु साधु वा सर्वमस्मन्मतमेवेत्युक्तो ऽहं ततो देवानेव सुधां पाययिष्यामि किं च तैर्यथान्यायं विभजस्वेत्युक्तं नचैते भोजनार्हास्त्ववक्रे भोदानं न्याय्यमत इत्यस्मः सुधां न दद्यामिति १९ पंक्तीः पृथग्विभिन्नाः कल्पयित्वा विधाय ताः स्वपंक्तिषु स्वेषु स्वेषु तत्तज्जातीयेषु तांश्च असुरानपि सुरान्त्यर्थमेवोपवेशयामास २० उपसंच

धा

असुराणां सुधादानं सर्पाणामिव दुर्नयं । मत्वा जातिनृशंसानां न तां व्यभजदच्युतः ॥ १९ ॥ कल्पयित्वा पृथक्पंक्तीरुभयेषां जगत्पतिः । तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्तिषु ॥ २० ॥ दैत्यान्गृहीतकलशो वंचयन्नुपसंचरैः । दूरस्थान्पाययामास जरामृत्युहरां सुधां ॥ २१ ॥ ते पालयंतः समयमसुराः स्वकृतं नृप । तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया ॥ २२ ॥ तस्यां कृतातिप्रणयाः प्रणयापायकातराः । बहुमानेन चाबद्धा नोचुः किंचन विप्रियं ॥ २३ ॥ देवलिंगप्रतिच्छन्नः स्वर्भानुर्देवसंसदि । प्रविष्टः सोममपिबच्चंद्रार्काभ्यां च सूचितः ॥ २४ ॥ चक्रेण क्षुरधारेण जहार पिबतः शिरः । हरिस्तस्य कबंधस्तु सुधयाप्लावितोऽपतत् ॥ २५ ॥ शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् । यस्तु पर्वणि चंद्रार्कावभिधावति वैरधीः ॥ २६ ॥ पीतप्राये ऽमृते देवैर्भगवाँल्लोकभावनः । पश्यतामसुरेंद्राणां स्वं रूपं जगृहे हरिः ॥ २७ ॥

रैः बहुमानप्रियवाक्यादिना तानतिक्रम्यागमनैर्दूरस्थानपि देवान् २१ तस्यां कृतः स्नेहो यैः स्त्रियामसह विवादस्य जुगुप्सया २२ कृतः अतिप्रणयः स्नेहो यैः प्रणयापायेन कातराः भीताः एते तावत्स्वपणाः पूर्वं किंचित्किंचिदेतत्स्वयं प्रथमं धाराः इत्यादि बहुमानेन चाबद्धाः नियंत्रिताः समयपालनादिभिः षड्भिरेतैः कारणैः अप्रियं किंचिदपि नोचुः किंतु तूष्णीमासन् २३ देवपंक्तौ चंद्रार्कयोर्मध्ये प्रविष्टः सोमममृतमपिबत् २४ हरिस्तस्य शिरो जहार आप्लावितः अस्पृष्टः २५ ग्रहं सूर्यादिवद्ग्रहत्वाधिकारिणं २६ ॥ ७ ॥

हरिभक्तानामेवोद्यमः फलति नान्येषामित्येवं व्याख्यानतात्पर्यमाह ॥ एवमिति ॥ समा देशादयो येषां हेतुर्मूलं रागादिः अर्थः समुद्रेत्यमृतं चीरधारि विविधः क
ल्पः फलं केषांचिज्ज्ञातं केषांचिन्नेति वै विकल्पं येषां ते फले वैषम्यवंतो वभूवुरित्यर्थः ॥ तदेवाह तत्रेति यस्य पादपंकजरजः श्रयणाद्देवा अमृतं फलमापुः न
एव ते च दैत्या इत्यर्थः ॥ यत्तरोर्नित्यसंबंधात् ॥ २७ ॥ एतदेवोपपादयति यदिति ॥ असवः प्राणाः वसुधनं ॥ प्राणादिभिर्देहात्मजातिषु नृभिर्यद्युज्यते प्रयुज्यते देहा
द्यर्थं यत्क्रियत इत्यर्थः ॥ तदसद्व्यर्थं भवति कुतः पृथक्त्वात् भेदाश्रयत्वात् ॥ शाखानिषेचनवत् ॥ तैरेव प्राणादिभिः सद्भावेनोद्देशेन यत्क्रियते तत्तु सन्महाफलं

एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोपि फले विकल्पाः ॥ तत्रामृतं सुरगणाः फलमंजसापुर्यत्पादपंकजरजः
श्रयणान्न दैत्याः ॥ २७ ॥ यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिभिर्नृभिस्तदसत्पृथक्त्वात् ॥ तैरेव सद्भवति यत्क्रिय
तेऽपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत् ॥ २८ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधेऽमृतमथने नवमोऽध्यायः ॥ ९ ॥ श्रीशु
क उवाच ॥ इति दानवदैतेया नाविंदन्नमृतं नृप ॥ युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ॥ १ ॥ साधयि
त्वामृतं राजन्पाययित्वा स्वकान्सुरान् ॥ पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥ २ ॥ ग्रामकस्ममहार

भवति ॥ कुतः अपृथक्त्वात् ईश्वरस्य सर्वत्रानुगतत्वात् तत्र दृष्टांतः यत्तरोर्मूलनिषेचनं तत्तद्यथा सर्वस्यापि स्कंधशाखादेरपि भवति यद्वाल्पत्वेनोपपंचयो पृथक्त्वमपर्या
लोच्य भेददृष्ट्या देहाद्युद्देशेन यत्क्रियते तदसत् अपृथक्त्वं पर्यालोच्येश्वरदृष्ट्या तैरेव तैर्वस्तुभिर्यत्क्रियते तत्सत् भवतीति शेषः समानं ॥ २८ ॥ अष्टमे नवमः ॥ दशमे सम
रे दैत्येरन्योन्यं संरंभः ॥ दैत्यमायाविषण्णेषु देवेषु प्रादुर्बभौ हरिः ॥ १ ॥ तदेवममृतावाप्तिर्भक्तानामीरिता ॥ भक्तमत्सरतः प्राप्ताहानिः प्रदर्श्यते ॥ १ ॥

भा॰ अ॰
१४

ध॥ रणाः संग्रामः उद्भवतः समुद्भ्रूपो धाम्पितीरेव भूव ॥५॥ अन्योन्यसमासाद्य निजघ्नुः ॥ ६ ॥ १२ चित्रध्वजपटाग्रैर्मिश्च वीराणां मालाभिश्च राजिभिर्देवदा
नववीराणां ध्वजिन्यायादसामालाभिः ॥ सागराविवरेजतुरिति त्रयाणामन्वयः ॥ घोरोभिरितिवातोद्भूतैरमलैर्गतपत्रैश्च बार्हैश्च चामरैश्च व्यजनैः ॥१३

सपत्नानां परामृद्धिं दृष्ट्वा तेऽरितिमिरदनाः अमृष्यमाणा उत्पेतुर्देवास्त्रस्तुद्धतायुधाः ॥३॥ ततः सुरगणाः सर्वे सुधया पीतयैधिताः
प्रतिसंयुयुधुः शात्रवैनारायणपरायणाः ॥४॥ तत्र दैवासुरो नाम रणः परमदारुणः ॥ रोधसः सुद्धतो राजंस्तुमुलो रोमहर्षणः ॥५॥
तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे ॥ समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥६॥ शंखतूर्यमृदंगानां भेरीडमरिणां म
हान् ॥ हस्त्यश्वरथपत्तीनां नदतां निःस्वनो भवत् ॥७॥ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ॥ हया हयैरिभाश्चेभैः सम
सज्जंत संयुगे ॥८॥ उष्ट्रैः केचिदिभैः केचित्परे युयुधुः खरैः ॥ केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥९॥ गृध्रैः कंकैर्बकैरन्ये
ः श्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥१०॥ शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः ॥ बस्तैरेके
कृष्णसारैर्हंसैरन्ये च सूकरैः ॥११॥ अन्ये जलस्थलखगैः सत्वैर्विकृतविग्रहैः ॥ सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः ॥१२॥ चित्र
ध्वजपटै राजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदंडैः व्यजनैर्बार्हचामरैः ॥१३॥ वातोद्धूतोत्तरोष्णीषैरर्चिभिर्वर्मभूषणैः ॥ स्फुरद्भि
र्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥१४॥ देवदानववीराणां ध्वजिन्यौ पांडुनंदन ॥ रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥१५॥

वातेनोद्धूतहत्तरोष्णीष्व ॥ उष्णीषैः सूर्यरश्मिभिः ॥ ॥ सुतरां स्फुरद्भिः ॥ ॥१४॥ ॥१५॥ गोपालकृष्णश्रीरामसहाय

राम
१४

असुराणां यावभूः तस्याः पतिः सबलिर्यानमास्थितः उदये उदयगिरिशिखरे स्थितः चंद्र इव विरेजे इति त्रयाणामन्वयः १६ १४ स्वर्वं तिस्तत्व
णानि षष्ठिर्निनिमस्धारासादपं १५ नानावाहाहीनि येषां ते देवा असुराश्च १६ मियो [illegible] १७

वैरोचनो बलिः सांख्ये सासुराणां चमूपतिः यानं वैहायसं नाम कामगं मयनिर्मितं १६ सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं शुभं अप
तर्क्यमनिर्देश्यं दृश्यमानादर्शनं १७ आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः बालव्यजनहस्ताग्र्यो रेजे चंद्र इवोदये १८ ते
स्यासन्सर्वतो यानैर्यूथानां पतयोसुराः नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः १९ द्विमूर्धा कालनाभोथ प्रहेतिर्हेतिरिल्वलः
शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः २० हयग्रीवः शंकुशिराः कपिलो मेघदुंदुभिः तारकश्चक्रदृक्शुंभो निशुंभो जंभ उत्कलः २१
अरिष्टोरिष्टनेमिश्च मयश्च त्रिपुराधिपः अन्ये पौलोमकालेया निवातकवचादयः २२ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः
सर्व एते रणमुखे बहुशो निर्जितामराः २३ सिंहनादं विमुंचंतः शंखान्दध्मुर्महारवान् दृष्ट्वा सपत्नानुत्सिक्तान्बलभित्कुपितो भृ
शं २४ ऐरावतं दिग्करिणमारूढः शुशुभे स्वराट् यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः २५ तस्यासन्सर्वतो देवा नानावाहध्वजायु
धाः लोकपालाः सहगणैर्वाय्वग्निवरुणादयः २६ तेन्योन्यमभिसंसृत्य क्षिपंतो मर्मभिर्मिथः आह्वयंतो विशंतोग्रे युयुधुर्द्वंद्वयोधिनः
युयोध बलिरिंद्रेण तारकेण गुहोस्यत वरुणो हेतिनायुध्यन्मित्रो राजन्प्रहेतिना यमस्तु कालनाभेन विश्वकर्मा मयेन वै शंबरो युयुधे
त्वष्ट्रा सवित्रा तु विरोचनः

युयुधुः १७ द्वंद्वान्येवाह युयोधेति सप्तभिः अस्यत आसमंताद्युद्धं येनेत्यर्थः १७ १८ १९

भा० अ०
१५

सूर्यादिवरएकएवशतेनवलिसहितैः बाणोज्येष्ठोयेषांतैः ३० निशुंभशुंभादीनांदेवी ३१ ई आरोहंतीत्यारोहाः तैः सहितान्अन्येचवाहाः पूर्वंतैकेव
लगजारथअश्वाः कथंभूताः निकृत्ताबाहवआरयोयेषांछिन्नानिध्वजादीनियेषां २७ तेषांदेवादीनांपराघातेरथांगेश्चूर्णितादायोधनाद्रणभूमे

अपराजितेनतमुचिरश्विनोवृषपर्वणा सूर्याबलिसहितैर्देवोबाणज्येष्ठैः शतेनच ३० राहुणावतथासोमः पुलोम्ना च प्रधेनिलः निशुं
भशुंभयोर्देवीभद्रकालीतराविनी ३१ वृषाकपिस्तुजंभेनमहिषेणविभावसुः इल्वलः सहवातापिर्ब्रह्मपुत्रैररिंदम ३२ कामदे
वेनदुर्मर्षउत्कलोमातृभिः सह बृहस्पतिश्चोशनसानरकेणशनैश्चरः ३३ मरुतोनिवातकवचैः कालेयैर्वसवोमराः विश्वेदे
वास्तुपौलोमैः रुद्राः क्रोधवशैः सह ३४ तएवमाजावसुराः सुरेंद्रा द्वंद्वेनसंहत्यचयुध्यमानाः अन्योन्यमासाद्यनिजघ्नुरोजसा
जिगीषवस्तीक्ष्णशरासितोमरैः ३५ भुशुंडिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि निस्त्रिंशभल्लैः परिघैः समु
द्गरैः सभिंदिपालैश्चशिरांसिचिच्छिदुः ३६ गजास्तुरंगाः सरथाः पदातयः सारोहवाहाविविधाविखंडिताः निकृत्तबाहूरुशिरो
धरांघ्रयः छिन्नध्वजेष्वासतनुत्रभूषणाः ॥ ३७ ॥ तेषांपराघातरथांगचूर्णितादायोधनादुल्बणउत्थितस्तदा रेणुर्दिशः खं
द्युमणिंचछादयन्न्यवर्ततासृक्स्रुतिभिः परिप्लुतात ॥ ॥ ॥ ॥३८॥ ॥ ॥ श्रीरामकृष्णगोपालायनमः

स्थितोरेणुर्दिशः खंद्युमणिंचसूर्यंचछादयंस्तैरेवासृगादेर्न्यवर्त्तत कथंभूतात असृक्स्रुतिभिः रक्तप्रवाहैः परिप्लुतात् सिक्तात्पश्चात्परिप्लवनात्हेतो राम
न्यवर्त्ततभावेक्तः रक्तधाराणांतत्पर्यंतमुत्थानादित्यर्थः प्रथमांतपाठेरेणोर्विशेषणं ॥ ॥ ॥ ३८ गोपालायनमः १५

शिरोभिर्महाभुजैश्चकरभमस्तकैरुरुभिश्च समाराणभूः प्रचकर्षगणहतानतीव भौ ॥ कथंभूतैः शिरोभिः उद्धृतानि उत्पतितानि किरीटानि कुंडलानि च येभ्य
स्तैः सरभसयुक्ताः दशोपष्टैः परिदष्टदशच्छदाः ओष्ठोपष्टैः ॥ ३९ ॥ पतितानि यानि स्वशिरांसि तत्र तैः प्रहरद्भिः तैः पश्यंत इत्यर्थः ॥ उद्यतान्यायुधानि यै

शिरोभिरुद्धृतकिरीटकुंडलैः ससंभ्रमैः परिदष्टदच्छदैः महाभुजैः सायुधैः महायुधैः साधारतताभूः करभोरुभिर्विभौ ॥ ३७ ॥ कबंधा
स्तत्र चोत्पेतुः पश्यंतः स्वशिरांसि ते ॥ उद्यतायुधदोर्दंडा धावंतो भयानके ॥ ४० ॥ बलिभिर्महेंद्रदशाभिस्त्रिभिरैरावतं शरैः ॥ चतुर्भिश्च
हयोर्वाहानेकेनाऽरोहमार्द्रयत ॥ ४१ ॥ सतानापततः शक्रः स्वावङ्गैः शीघ्रविक्रमः ॥ विच्छेद निशितैर्भल्लैः सप्राणानामकृतविव ॥ ४२ ॥ तस्य
कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमारदे ॥ ताज्वलंतिं महोल्काभां हस्तस्थामच्छिनद्धरिः ॥ ४३ ॥ ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः ॥ पट्टिशं
खड्गमादर्शास्तर्वतस्त्विच्छिनद्धिभिः ॥ ४४ ॥ समन्नीयाहरीमायासुतद्दीनगतो हरः ॥ ततः प्राडुरभूच्छैलः हरानीकोपरि प्रभो ॥ ४५ ॥ ततो नि
पेतुस्तस्योरस्यमानारवामिना ॥ शिलाः संकशिखराः चूर्णयंतो द्विषद्बलं ॥ ४६ ॥ महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः ॥ सिंहव्याघ्र
वराहाश्वामर्दयंतं महागजाः ॥ ४७ ॥ यातुधान्यश्च शतशः शूलहस्ता विवाससः ॥ छिंधि भिंधीति वादिन्यस्तथा रक्षोगणाः प्रभो ॥ ४८ ॥ ततो
महाध्वनाव्योम्नि गंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ॥ ४९ ॥ सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः ॥ सांवर्तक

स्तेदोर्दंडैर्युक्ताः ॥ ४० ॥ वाहान्हरणावतपादरक्षकान् आरोहगजायंतांश्छिछेयत विव्याध ॥ ४१ ॥ १ ॥ दुर्मर्षः असहनो वा ॥ इवावाच्यो विद्धवधद्भिर्जिनाभिधाः ॥ ५ ॥
लिः ॥ ४२ ॥ ५ ॥ रंकवती ज्ञाणाग्रैः शिखरैः सहिताः ॥ ४६ ॥ ८ ॥ स्तनयित्नवश्च अंगारान्मुमुचुरित्यन्वयः ॥ ४९ ॥ अधाकृष्णार्षः अधाद्वीदित्यर्थः ॥ ५० ॥ राम

भा॰अ॰
१६

उद्धूतैस्तरंगैरावर्त्तैश्च भीषणाः ॥५१॥ एवमेभिर्दैत्यैः सृज्यमानासु ॥५२॥ यत्र यदा तत्र तदा तैर्ध्यातः सन् ॥५३॥ अष्टौ आयुधानि येषु तादृशा बाहवो यस्य श्रीश्च
कौस्तुभश्च अनर्घ्यौ किरीटकुंडले च ॥ उल्लसंति श्रीकौस्तुभादीनि यस्मिन् ॥५४॥ असुराणां कूटं कर्म मंत्रादिप्रयोगः ॥ तस्माज्जाताः महिना महिम्ना हरेः स्मृति

ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत ॥ प्रचंडवातैरुद्धूततरंगावर्त्तभीषणः ॥५१॥ एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः
सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ॥५२॥ न तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप ॥ ध्यातः प्रादुरभूत्तत्र भगवान्विश्व
भावनः ॥५३॥ ततः सुपर्णांसकृतांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभा
नर्घ्यकिरीटकुंडलः ॥५४॥ तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः ॥ स्वप्नो यथा हि प्रतिबोध आगते
हरिस्मृतिः सर्वविपद्विमोक्षणं ॥५५॥ दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः ॥ तल्लीलया ग
रुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥५६॥ माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ मा
ल्यवांस्तं ॥ आहत्य तिग्मगदयाहनदंडजेंद्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाद्यः ॥५७॥ इति श्रीभागवते महापुराणे अष्टमस्कं

रेव सर्वासां विपदां विमोक्षणात् नृपाकिमुत हरेः प्रवेश इत्यर्थः ॥५५॥ इभारिवाहः सिंहवाहः अहिनोत् चिक्षेप लीलयैव तद्गृहीत्वा अहन् धे दशमोऽध्यायः ॥
नतेहे नृप ॥५६॥ यस्य चक्रेण कृत्तशिरसौ पेततुः तं तथाभूतमपि आहत्य संहत्य अंडजेंद्रं गरुडं अहनत् तं तं हंतुं गदामच्छिनत् इत्यर्थः आद्यो हरिः ॥५७॥ अष्टमे दश ॥

राम
१६

एकादशे तु देवेषु दैत्यघ्नातिघ्नता रुदः । देवान्नवारयच्छक्रो मृतान्दैत्यानजीवयत् ॥ १ ॥ उदयच्छत उद्यमे ॥ १ ॥ २ ॥ निबद्धान्यक्षीणि येषां तान्बालान्जित्वा नरः कपटवृत्तिर्यथा तेषां धनं हरति तथा हे मूढ मायेशान्जेतुमिच्छसि ॥ ४ ॥ मत्प्रभावं शृणु इत्याह आरुरुक्षन्ति आरोढुमिच्छन्ति ये च उत्सिसृप्सं

शुक उवाच ॥ अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानुकम्पया ॥ जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान्रणे येऽभिसंहताः पुरा ॥ १ ॥ वैरोचनाय संरब्धो भगवान्पाकशासनः ॥ उदयच्छद्यदा वज्रं प्रजा हाहेति चुक्रुशुः ॥ १ ॥ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरःस्थितं ॥ मनस्विनं सुसंपन्नं विचरन्तं महामृधे ॥ ३ ॥ नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसि ॥ जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनं ॥ ४ ॥ आरुरुक्षन्ति मायाभिरुत्सिसृप्सन्ति ये दिवं ॥ तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्च पदादधः ॥ ५ ॥ सोऽहं दुर्मायिनस्तेऽद्य वज्रेण शतपर्वणा ॥ शिरो हरिष्ये मन्दात्मन्घटस्व ज्ञातिभिः सह ॥ ६ ॥ बलिरुवाच ॥ संग्रामे वर्त्तमानानां कालचोदितकर्म्मणां ॥ कीर्त्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥ ७ ॥ तदिदं कालरशनं जगत्पश्यन्ति सूरयः ॥ न हृष्यन्ति न शोचन्ति तत्र यूयमपण्डिताः ॥ ८ ॥ न वयं मन्यमानानामात्मानं तत्र साधनं ॥ गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः ॥ ९ ॥ रामराम

नित उत्सं घयितुमिच्छति मोक्तुमिच्छतीत्यर्थः गृध्नो विधुनोमि पातयामि ॥ ५-७ ॥ कालरशनं कालपरवशं तिताः ततो न हृष्यन्ति तत्र एवंविवेके यूयमपण्डिताः अनिपुणाः ॥ ८ ॥ तत्र कीर्त्तिजयादौ आत्मानं साधनं मन्यमानानां वो गिरो न गृह्णीमः मर्मस्ताडिनं यामिति ताः ॥ ॥ ॥ ९ ॥ राम राम

भा॰अ
३७

विष्णुमिंद्रवीरो बलिः १० तीव्रमन्त्रशराः तेनाहतश्च ॥ स यानः विमानसहितः १२ ८ नमुचिर्बलः पाकश्चेति त्रयश्चाजग्मुः १७ १० त्रयाणां पृथग्विक्रमा

मुकुंदवच इत्याक्षिप्य विष्णुवीरो नाराचैर्वीरमर्द्दनः आकर्णपूर्णैरिह नराङ्कैरिहतं पुनः १० एवं निराकृतो दैवो बैरिणा त
थ्यवारिणा ॥ नामृष्यन्नरः धिङ्कृर्प्यंतो वाहतश्चद्विपः ११ प्राहरत्त्रिलिशातम्यानमोघं परमर्द्दनः ॥ स यानोन्यपतद्भूमौ छि
न्नपक्ष इवाचलः १२ सखायं पतितं दृष्ट्वा जंभो बलि सखः रुद्दत श्रु म्यथात्मोहरं सस्मृहैत स्या पिससमाचरन् ॥ १३ स सिंह
वाहश्चासाद्य गदाप्रद्युम्नरं हसा ॥ जत्रावताडयच्छत्रं गजं च महाबलः १४ गदाप्रहारव्यथितो भृशं विह्वलितो गजः जा
नुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥ १५ ततो रथो मातलिना हरिभिर्दशशतैर्वृतः ॥ आनीतो द्विपमुत्सृज्य रथमारुरुहे
विभुः १६ तस्य तत्पूजयन्कर्म यंतुर्दानवसत्तमः शूलेन ज्वलता तं तु स्मयमानो हनन्मृधे १७ सेहे रुजं सुदुर्मर्षां सत्वमा
लंब्य मातलिः इंद्रो जंभस्य संक्रुद्धो वज्रेणापाहरच्छिरः १८ जंभं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः नमुचिश्च बलः पाकः त
त्रापेतुस्त्वरान्विताः १९ वचोभिः परुषैरिंद्रमर्दयंतो स्य मर्मसु शरैरवाकिरन्मेघा धाराभिरिव पर्वतं २० हरीन्दशशता
न्याजौ हर्यश्वस्य बलः शरैः तावद्भिर्दयामास युगपल्लघुहस्तवान् २१ शताभ्यां मातलिं पाकोरथं सावयवं पृथक् सकृत्संधान
मोक्षेण तदद्भुतमभूद्रणे २२ नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः आहृत्य व्यनदत्संख्ये सतोयइव तोयदः २३ सर्वतः शरकूटेन
शक्रं सरथसारथिं छादयामासुरसुराः प्रावृट्सूर्यमिवांबुदाः

नाहं हारीनिति त्रिभिः हर्यश्व स्य इंद्रस्य तावद्भिर्दशशतैः शरैः २१ १ आहत्य इंद्रं विध्वा २२ प्रावृट्कालीनं २४

राम
३७

वणिक्पथाः वणिजः मित्रानौर्येषां ते मित्रनावः इत्यर्थः ॥ १५ ॥ तपोषाडिंडः अश्वादिसहितो विनिर्गतः अग्रणीः सारथिः ॥ १६ ॥ च शोकामर्षाभ्यांयुक्तया ह
षात्क्रोधेनान्वितः ॥ सत्रिंडंहंतुंपरमोद्यमंचकार ॥ १९ ॥ ध्वंसयवत ॥ ध्वंसयामिर्युक्तं ॥ २० ॥ २१ ॥ श्रुतिवीर्यवृत्रमभिनदिति ॥ ३१ ॥ ३२ ॥ ते

अलक्ष्यंतत्तमतीवविह्वलावित्रस्तासुरेश्वरगणाः सहानुगाः ॥ अनायकाः शात्रवबलेननिर्जितावणिक्पथामित्रनवोयथार्णवे
ततस्तपोषाडिर्भुवद्वपंजराद्विनिर्गतः साश्वरथध्वजाग्रणीः ॥ चमोरिशः स्वंस्थिवीविरोचयन्स्वतेजसासूर्यइवक्षपात्यये ॥ १६ ॥
निरीक्ष्यस्वतनोरेवः परैरभ्यर्दितांरणे ॥ उदयच्छद्विषंहंतुंवज्रंवज्रधरोरुषा ॥ १७ ॥ सतेनैवाशुधारेणशिरसीबलपाकयोः ॥ ज्ञातीनां
पश्यतांराजन्नुज्जहारजनयन्भयं ॥ १८ ॥ नमुचिस्तद्वधंदृष्ट्वाशोकामर्षरुषान्वितः ॥ जिघांसुरिंद्रंनृपतेचकारपरमोद्यमं ॥ १९ ॥ अ
श्मसारमयंशूलंघंटावद्धेमभूषणं ॥ प्रगृह्याभ्यद्रवत्क्रुद्धोहतोसीतिवितर्जयन् ॥ प्राहिणोद्देवराजायनिनदन्मृगराडिव ॥ २० ॥ तदा
पतद्गगनतलेमहाजवंविचिच्छिदेहरिरिषुभिः सहस्रधा ॥ तमाहनन्नृपकुलिशेनकंधरेरुषान्वितः त्रिदशपतिः शिरोहरन् ॥ २१ ॥
नतस्यहित्वचमपिवज्रऊर्जितोविभेदयः सुरपतिनोजसेरितः ॥ तदद्भुतंपरमतिवीर्यवृत्रभित्तिरस्कृतोनमुचिशिरोधरत्वचा ॥ २२ ॥ त
स्मादिंद्रोविभेच्छत्रोर्वज्रः प्रतिहतोयतः ॥ किमिदंदैवयोगेनभूतंलोकविमोहनं ॥ २३ ॥ येनमेपूर्वमद्रीणांपक्षच्छेदः प्रजात्यये ॥ कृतो
निविशतांभारैः पतत्रैः पततांभुवि ॥ २४ ॥ तपः सारमयंत्वाष्ट्रंवृत्रोयेनविपाटितः ॥ अन्येचापिबलोपेताः सर्वास्त्रैरक्षतत्वचः ॥ सोयंप्रतिहतो
घापततैत्रैः पक्षैः ॥ २४ ॥ सारमयंवीर्याधिक्यंत्वाष्ट्रंतपएववृत्रः सयेनवज्रेणमयाविपाटितः ॥ २५ ॥ वज्रोमयाप्रक्षोः क्षेपल्पके ॥ नाहंतदाददेदंडंब्रह्मतेजोप्यकारणं ॥ २६ ॥
दंडंलकुटंतत्स्वल्पंब्रह्मतेजः दधीचेः सामर्थ्यं ॥ २६ ॥

आर्ई प्रष्का म्यां मत्स्यै नैवेति ॥ ७ ॥ ३५ ३ मयात्मत्वमेवाह नत्सप्रेक्षेणान वाईणाफेनेन तथा च श्रुतिः अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयत इति ॥ ३८ ॥ अग्रचैररु

इति शङ्कां विषीदन्तमाह वागशरीरिणी ॥ नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥ ३७ ॥ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः ॥ अ
तोन्यश्चिन्तनीयस्त्वमुपायो मघवन्रिपोः ॥ ३८ ॥ तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ॥ ध्यायन्नुपेनमथापश्यदुपायमुभया
त्मकं ॥ ३९ ॥ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः ॥ तं तुष्टुवुर्मुनिगणाः माल्यैश्चावाकिरन्विभुं ॥ ४० ॥ गांधर्वमुख्यौ जगतुः
विश्वावसुपरावसू ॥ देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥ ४१ ॥ अन्येप्येवं प्रतिद्वंद्वान्वाय्वग्निवरुणादयः ॥ सूदयामासुरस्त्रौ
घैः मृगान्केसरिणो यथा ॥ ४२ ॥ ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप ॥ वारयामास विबुधान्दृष्ट्वा दानवसंक्षयं ॥ ४३ ॥ ना
रद उवाच ॥ भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः ॥ श्रिया समेधिताः सर्व उपारमत विग्रहात् ॥ ४४ ॥ श्रीशुक उवाच ॥ संयम्य
मन्युसंरंभं मानयंतो मुनेर्वचः ॥ गीयमानानुचरैर्ययुः सर्वे त्रिविष्टपं ॥ ४५ ॥ येवशिष्टा रणे तस्मिन्नारदानुमतेन ते ॥ बलिं वि
पन्नमादाय अस्तं गिरिमुपागमन् ॥ ४६ ॥ तत्राविनष्टावयवान्विद्यमानशिरोधरान् ॥ उशना जीवयामास संजीविन्या स्वविद्यया
॥ ४७ ॥ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेन्द्रियस्मृतिः ॥ पराजितोपि नाखिद्यल्लोकतत्त्वविचक्षणः ॥ ४८ ॥ इति श्रीभागवते महापु
राणे अष्टमस्कंधे देवासुरसंग्रामे एकादशो
ध्यायः ॥

गीयमाना इत्यर्थः उपगीयमानैरनुचरैः सहेति वा ॥ ४५ ॥ ४६ ॥ अविनष्टा अवयवा येषां विद्यमानाः
शिरोधरा येषां तान् ॥ ४७ ॥ प्रत्यापन्नानि पुनःप्राप्तानि इन्द्रियाणि स्मृतिश्च येन सः ॥ ४८ ॥ [illegible] ॥ ॥

हारस्रो मोहिनीरूपविभ्रमालोकनोत्सुकं ॥ भवं संमोहयामास हरिः पुनरसौ त्वयन् ॥ अमृतस्य नम्रणा विष्णुमायया न तद्दृष्टं ॥ इति वचनं महादेवमोहापि सुप्रवर्णि
ते ॥ हरिः सोममपाययदिति इदं निशम्य मयत्राहितेन तद्रूपं दृष्ट्वा यथा विमुग्नोऽणात्वयः ॥ १ ॥ १ ॥ सोमपा उमया सह ॥ २ ॥ त्वयि किं चित्रं चाश्चर्यं वयं तु आश्चर्यमान
साः ॥ इति वचनं महादेवस्तोष्टा वर्हरिमष्टभिः ॥ त्वयि महामायाविनि परमेश्वरे न हि किल किंचिदद्भुतमिव वयं तु परमकौतूहलेन दृष्टुमागता इति वज्रधा
संबोधयन्नेतोति हे देवदेव ज्ञातो हे देवानां देवस्तत्र आह हे जगद्व्यापिन् तत्कृतः ॥ हे जगन्मय तर्हि किं प्रधानं ॥ नहि जगदीश ॥ तेन ज्ञातं तत्राह ॥ सर्वेषामपि

वादरायणिरुवाच ॥ वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् ॥ मोहयित्वा सुरगणान् हरिः सोममपाययत् ॥ १ ॥ वृषमारुह्य
गिरिशः सर्वभूतगणैर्वृतः ॥ सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः ॥ २ ॥ सभाजितो भगवता सादरं सोमया भवः ॥ सूपविष्ट
उवाचेदं प्रतिपूज्य स्मयन् हरिं ॥ ३ ॥ महादेव उवाच ॥ देवदेव जगद्व्यापिन् जगदीश जगन्मय ॥ सर्वेषामपि भावानां त्वमात्मा
हेतुरीश्वरः ॥ ४ ॥ आद्यन्तावस्य यन्मध्यमिदमन्यदहं बहिः ॥ यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान् ॥ ५ ॥

त्वं हेतुः सृतईश्वरः ॥ आत्मत्वाच्च न जडं प्रधानं त्वमित्यर्थः ॥ ४ ॥ न तु जगन्मयत्वेनास्याजगत उत्पत्त्यादिनाः सत्यत्वेन च ॥ जाड्येन च ममापि किं न तथात्वं तत्स्वरूपेण नहि
नहीत्याह आद्यन्तौ मध्यं च अस्य जगतो यतो ब्रह्मणः भवंति अस्य च अव्ययस्य एतानि आद्यन्तमध्यानि न संति ॥ यद्वा ब्रह्म इदंकारास्पदं दृश्यं अहंकारास्पदं द्रष्टृ
वहिर्भोग्यं अन्यज्ज्ञेयं च तत्सत्यं च चिद्रूपं च ब्रह्मैव भवान् अतो न तव विकारादिशंकेत्यर्थः ॥ ५ ॥ रामकृष्णमहाहारहना

भा॰अ॰
१८

तवैवंभूतत्वे मुमुक्षूणामाचारः प्रमाणमित्याह। तवैवेति उभयतः इहामुत्र च संगं त्यक्त्वा ॥६॥ ननु ब्रह्मैव चेदहं तर्हि संगोदासीनस्य मम चरणाम्भोजोपासन
या किं तेषां तत्राह। त्वमिति। ब्रह्मत्वेपि त्वं नात्यन्तमुदासीनः किंतु विश्वस्य सर्गस्य च स्थेरपारोनां हेतुः तदुपाधीनामात्मनां जीवानां ईश्वरश्च तत्र तत्फलदाता
तर्हि किं राजादिवत् कृपाद्यपेक्षया सेवकेभ्यः फलं ददासि नहि नहि। अनपेक्ष एव त्वं तर्हि किमीश्वरत्वेन तत्राह। नैरात्म्यभिः तत्फलदानार्थमपेक्षत इति तदपे
क्षत्वस्य भावः तदपेक्षता तया। अनपेक्षत्वमेव दर्शयितुं तदीयं ब्रह्मत्वं विशिनष्टि पूर्णोऽमृतं च सुखं च स्वरूपं विषयसुखवैलक्षण्यार्थमाह। अविकारं नित्यं आन

तवैव चरणाम्भोजं श्रेयस्कामा निराशिषः विसृज्योभयतः संगं मुनयः समुपासते ॥६॥ त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानंदमा
त्रमविकारमनन्यदन्यत् विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयानपेक्षः ॥७॥ एकस्त्वमेव सदसद्द्वयमद्व
यं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरुपाधिकस्य ॥८॥

दमात्रं च अतः विशोकं तत्त्वतः विगुणं ॥ किंच अनन्यत् न विद्यते अन्यद्यस्मात् तद्ब्रह्मव्यतिरिक्ताभावात् स्वयमपि निरपेक्षः त्वमित्यर्थः तर्हि सर्वात्मकत्वे तत्तद्विकारप्रसंगो
दुर्वारः तत्राह अन्यत् सर्वेभ्यो व्यतिरिक्तं च कारणत्वात् ॥ नन्वेवंभूतस्य सर्वात्मकस्य ब्रह्मत्वरूपस्य तवान्यापेक्षा नास्ति ॥ अतः केवलं भक्तानुग्रहार्थमेव त्वं तेषां ईश्वर इत्यर्थ
मित्यर्थः ॥७॥ अनन्यत्वमन्यत्वं चैकस्य कथमित्याशंक्य दृष्टान्तेनोपपादयति ॥ सदसत् कार्यकारणरूपं द्वयं अद्वयं च परमकारणं च त्वमेव कः कृतं कुंडलादिरूपं द्वयं
अकृतं च केवलं सद्रूपं स्वर्णं यथैकमेव तद्वदेवेह त्वयि वस्तुतो भेदो नास्ति कथं तर्हि भेदप्रतीतिस्तत्राह ॥ अज्ञानत इति अतः यस्मान्निरुपाधिकस्यैव तवायं गुणो
पाधिकृतो भेदः न वस्तुतः ॥८॥

राम
१८

श्रुतय एवं त्वां बहुधा वर्णयंति तत्त्वतस्त्वां केपि न जानंतीत्याह द्वाभ्यां । त्वां ब्रह्म वेदांतिनो वदंति मन्यते । त्वामेव धर्मं मीमांसका मन्यते प्रकृतिपुरुषयोः परं पुमांसं सांख्याः । विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना अनुग्रहा चेत्येवं नवशक्तियुतं परं पांचरात्राः महापुरुषं पातंजलाः ॥ ९ ॥ परायुर्ब्रह्मायुर्ब्रह्मा सत्वसर्गाः सत्वगुणेन सृष्टा अपि येन त्वया विरचितं विश्वमपि वस्तुतस्तत्त्वतो न जानंति किं पुनरन्ये हे ईश ॥ अहं इंद्र अज संतान मसं चवहर्त्ने अत्यंति दशे त्रिश्च ये पातेन

त्वां ब्रह्म केचिदवयंत्युत धर्ममेक एके परं सदसतोः पुरुषं परेशं । अन्येवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रं ॥ ९ ॥ नाहं परायुरृषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्वसर्गाः । यन्माययामुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः ॥ १० ॥ स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ । वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतयावगमोवरुंत्से ॥ ११ ॥ अवतारा मया दृष्टा रममाणस्य ते गुणैः । सोहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतं ॥ १२ ॥ येन संमोहिता दैत्याः पायिताश्चामृतं सुराः । तद्दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १३ ॥

जानंतीति किमु वक्तव्यं ॥ १० ॥ किं तत्त्वं सर्वं जानासीत्याह । सत्वं सर्वज्ञ एव कुतस्त्वं व्याप्नोषि जानासि । किं तत्सर्वं । समीहितं त्वत्कृतं अदः स्थितिजन्मनाशं अस्य जगतो जन्मादि । भूतानामीहितं च जगतो भवबंधमोक्षौ वा व्याप्नोषि दृष्टांतः । चराचराख्यं देहजातं खं च यथा वायुः प्रविशति तथा । कथमवरुंत्से तदात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः । आत्मत्वे हेतुः अवगमः ज्ञानरूप इति ॥ ११ ॥ एवं स्तुत्वा प्रस्तुतं विज्ञापयति अवतारा इति द्वाभ्यां ॥ १२ ॥ ॥ १३ ॥

भा॰ अ॰
३०

१४ ॥ सुरकार्याणि योषिद्वेषेण भविष्यंतीति पश्यता स्वयं भावः ॥ अवश्यं तावदुन्मत्तान् दैत्यान् वंचयित्वा देवेभ्योऽमृतं देयं न चैवं वेषरूपांतरेण वान्छितं अतो वंदन
मोहनादिसारं कामिनीरूपं मया धृतमिति ॥ १५ ॥ तद्रूपं दर्शयिष्यामि संकल्पप्रभवः कामः तस्योदयो यस्मात् ॥ १६ ॥ १७ ॥ विचित्राणि पुष्पाणि अरुणाः पल्लवाश्च येषां ते
द्रुमा यस्मिन् तल्लसत् दुकूलेन पर्यस्ते परिवृते नितंबे मेखला यस्याः ता ॥ १८ ॥ उत्पतत्पतत्कंदुकलीलावशेन य आवर्त्तनोद्वर्त्तने ताभ्यां कंपितयोः

श्रीशुक उवाच ॥ एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना ॥ प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत ॥ १४ ॥ श्रीभगवानुवाच ॥ कौतूहलाय दै
त्यानां योषिद्वेषो मया कृतः ॥ पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १५ ॥ तत्तेहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ॥ कामिनां ब
हुमतं तत्संकल्पप्रभवोदयं ॥ १६ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया
॥ १७ ॥ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ॥ विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलां ॥ १८ ॥
आवर्त्तनोद्वर्त्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदे पदे ॥ प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः ॥ १९ ॥ दिक्षु
भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनां ॥ स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमंडिताननां ॥ २० ॥

स्तनयोः प्रकृष्टहाराणां चोरुभारैः प्रतिपदं मध्ये प्रभज्यमानामिव चलत्पदमेव प्रवालवत्कोमलं ततस्ततो नयंती ॥ १९ ॥ दिक्षु भ्रमतः कंदुकस्य चापलैः चांचल्यैः भृशं
प्रोद्विग्नतारे आयते लोले चंचले लोचने यस्याः स्वकर्णयोः विभ्राजिते ये कुंडले ताभ्यां उल्लसंतौ कपोलौ ताभ्यां च नीलालकैश्च मंडितमाननं यस्याः ॥ २० ॥

राम
३०

सनत्यतीवध्नंतीजगाद्विमोहयंती ॥१०॥ तांवीक्ष्यदेवः श्रीहरः आत्मानमतिकोस्थितासुमोह्वगणांश्चनवरः ॥ कथंभूतः इत्येवंभूतयाकंडुकलीलयाया
ईषद्व्रीडातयाश्चस्फुरंस्मितंततेनसहविस्तृष्टोयः करात्रस्तेनमुष्टोवंचितः अतएवत्वंययतात्विया: प्रेक्षणांतयावध्नतिसमीक्षणेनताभ्यांविह्वलत्वा

अथदुकूलेकवरीवविच्युतासेनत्यतीवामकरेणवल्गुना ॥ विनिध्नतीमन्यकरेणकंदुकंविमोहयंतीजगदात्ममायया ॥११॥
तांवीक्ष्यदेवइतिकंडुकलीलयेषद्व्रीडाः स्फुरस्मितविसृष्टकराक्षउष्टः ॥ स्त्रीप्रेक्षणाध्वतिसमीक्षणाविह्वलात्मानात्मा
नमंतिकउमांस्वगणांश्चवेद ॥१२॥ तस्याः करान्नात्सवकंडुकोयदागतोविदूरंतमनुव्रजंत्स्त्रियाः ॥ वासः ससूत्रंलघुमा
हतोः हरइवपश्यदेवस्यकिलानुपश्यतः ॥१३॥ एवंतांरुचिरापांगीदर्शनीयांमनोरमां ॥ दृष्ट्वातस्यांमनश्चक्रेविषज्जंत्यांभ
वः किल ॥१४॥ तयापहृतविज्ञानः तत्कृतस्मरविह्वलः ॥ भवान्याअपिपश्यत्यागतह्रीस्तत्पदंययौ ॥१५॥ सातमायांत
मालोक्यविवस्त्राव्रीडितभृशं ॥ निलीयमानावृक्षेषुहसंतीनान्वतिष्ठत ॥१६॥ तामन्वगच्छद्भगवान्भवः प्रमुषितेंद्रियः
कामस्यचवशंनीतः करेणमिवयूथपः ॥१७॥ सोनुव्रज्यातिवेगेनगृहीत्वानिच्छतींस्त्रियं ॥ केशबंधउपानीयबाहुभ्यांपरि
षस्वजे ॥१८॥ सोपगूढाभगवताकरिणाकरिणीयथा ॥ इतस्ततः प्रसर्पंतीविप्रकीर्णशिरोरुहा ॥ ॥१९॥ आत्मानंमोच
पित्वांगसुरर्षभभुजांतरात ॥ प्राद्रवत्साष्टथुश्रोणीमायादेवविनिर्मिता
त्मामनोयस्य ॥११॥ कंडुकमनुव्रजंत्याः स्त्रियाः लग्नसह्रंसवासः समस्तंचेका
सहितं ॥१२॥ विषज्जंत्यांद्राविनकराशेणात्मानं ॥ निरीक्षमाणायां ॥१४॥ तत्पदंतस्याः समीपंययौ ॥१५॥७॥ ओंगहेराजन ॥२०॥ ॥ ॥ राम॥

भा॰ श्री॰
३१

२२ ॥ एवं तामनुधावन्हरः सरित्सरः स्वशैलारिषु च सन्निहितो बभूव ॥ ३४ ॥ ॥ ३५ ॥ तेडुहमायया जडीकरणं ॥ ३६ ॥ ७ ॥ स्वानिष्ठांप्रकृतिं ॥ ३८ ॥ ए ॥ कालेनस्वया

तस्यासौ पर्वीह्रदो विष्णोरद्भुतकर्मणः ॥ छलपद्यतकामेनवैरिणेव विनिर्जितः ॥ ३१ ॥ तस्यानुधावतो रेतश्चस्कन्दामोघरेतसः
शुष्मिणो यूथपस्येव वासितामनुधावतः ॥ ३२ ॥ यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः ॥ तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते
३३ ॥ सरित्सरःसु शैलेषु वनेषूपवनेषु च ॥ यत्र क्व चासन्नृषयः तत्र संनिहितो हरः ॥ ३४ ॥ स्कन्ने रेतसि सोपश्यदात्मानं देवमायया
जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात ॥ ३५ ॥ अथावगतमाहात्म्य आत्मनो जगदात्मनः ॥ अपरिज्ञेयवीर्यस्य न मेने तदु हाद्भुतं ॥ ३६ ॥
तमविक्लवमव्रीडमालक्ष्य मधुसूदनः ॥ उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुं ॥ ३७ ॥ श्रीभगवानुवाच ॥ दिष्ट्या त्वं विबुधश्रेष्ठ स्वां
निष्ठामात्मना स्थितः ॥ यन्मे स्त्रीरूपया स्वैरं मोहितोप्यङ्ग मायया ॥ ३८ ॥ को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान् ॥ तांस्तान्विसृज
ती भावान्दुस्तरामकृतात्मभिः ॥ ३९ ॥ सेयं गुणमयी माया न त्वामभिभविष्यति ॥ मया समेता कालेन कालरूपेण भागशः ॥ ४० ॥ शुक
उवाच ॥ एवं भगवता राजन् श्रीवत्साङ्केन सत्कृतः ॥ आमन्त्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥ ४१ ॥ आत्मांशभूतां तां मायां भवानीं भगवा
न्भवः ॥ शंसतामृषिमुख्यानां प्रीत्याचष्टाथ भारत ॥ ४२ ॥ अपि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ॥ अहं कलानामृषभो वि
मुह्ये ययावशोन्ये किमुतास्वतन्त्राः ॥ ४३ ॥ यं मामपृच्छस्त्वमुपेत्य योगात्समासहस्रान्त उपारतं वै ॥ स एष साक्षात्पुरुषः पुराणो न यत्र कालो
विशते न वेद ॥ ४४ ॥

दिति भिन्नेन मया कालरूपेण भागशो रज आद्यंशेन समेतामदघोनामसती ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ॥ ४४ ॥

राम
३१

शुश्रूषयाध्यायार्थे निगमनं इतीति ॥४५॥ एतत्कीर्त्तनादेः फलमाह एतानीति ॥४६॥ भगवता कृतं मनःपङ्कपातं स्मरत्नमहत्करोति असदविषयं भावोपजननं तेन गम्यमङ्घ्रिं प्रपन्नान् सिंधुमथ्यं सिंधोर्मथने जातममृतयः आशयत ॥ अभोजयत ॥४७॥ इति श्रीमद्भा० टी० अष्टमः द्वादशः ॥ त्रयोदशे तु वर्ण्यन्ते सप्तमाद्यन्तु उक्तमात ॥ मद्ये

श्रीशुक उवाच ॥ इति तेभिहितस्तात विक्रमः शार्ङ्गधन्वनः ॥ सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः ॥४५॥ एतन्मुहुः कीर्त्तयतोनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित् ॥ यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहं ॥४६॥ असदविषयमङ्घ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं ॥ कपटयुवतिवेषो मोहयन्यः सुरारींस्तमहमुपसृतानां कामपूरं नतोस्मि ॥४७॥ इति श्रीभागवते महापुराणेष्टमस्कंधे अमृतमथने द्वादशोऽध्यायः ॥ श्रीशुक उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥ सप्तमो वर्त्तमानो यः तदपत्यानि मे शृणु ॥१॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ॥ नरिष्यन्तोथ नाभागः सप्तमो दिष्ट उच्यते ॥२॥ करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः ॥ मनोर्वैवस्वतस्यैते दशपुत्राः परंतप ॥३॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः ॥४॥ कश्यपोत्रिर्वसिष्ठश्च विश्वामित्रोथ गौतमः ॥ जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥५॥ अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ॥ आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥६॥ संक्षेपतो मयोक्तानि सप्तमन्वन्तराणि ते ॥ भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ॥७॥

नाम १

नराणि सर्वाणि षड्विधानि पृथक्पृथक् ॥ सप्तमादि मन्वन्तराण्याह मनुरित्यादिना यावदध्यायसमाप्ति ॥३॥ आदित्या रथ्योदेवा इत्यन्वयः ॥४॥५॥ भगवतो जन्मावतारः तमेवाह ॥ आदित्यानां विवस्वानर्यमा पूषा त्वष्टेत्यादीनामवरजं जन्मना पश्चाद्भवः ॥६॥ राजन्याश्च वतोरणाद्धितानि ॥७॥

भा०अ०
३१

अष्टमंमन्वन्तरंकथयामाह विवस्वतइतित्रिभिः ॥ ८ ॥ एकेवडवांतृतीयामाहुः ममतुसंज्ञैववडवेतिमतं तदुक्तंषष्ठेसैवभूत्वाथवडवानासत्यौसुषुवेभुवीति
यमश्चयमीचयमुनाश्राद्धदेवश्चेतित्रयःसुताः ॥ ९ ॥ १० ॥ सावर्णिःमनुः ॥ ११ ॥ १२ ॥ पदत्रयंयाचमानायइमांसर्वांमहींसप्तमेमन्वंतरेविष्णोःप्रसादेनराद्धं

विवस्वतश्चद्वेजायेविश्वकर्मसुतेउभे ॥ संज्ञाछायाचराजेंद्रयेप्रागभिहितेतव ॥ ८ ॥ तृतीयांवडवामेकेतासांसंज्ञासुतास्त्रयः ॥ यमोय
मीश्राद्धदेवश्छायायाश्चसुतांछृणु ॥ ९ ॥ सावर्णिस्तपतीकन्याभार्यासंवरणस्यया ॥ शनैश्चरस्तृतीयोभूदश्विनौवडवात्मजौ ॥ १० ॥
अष्टमेंतरआयातेसावर्णिर्भवितामनुः ॥ निर्मोकविरजस्काद्याःसावर्णितनयानृप ॥ ११ ॥ तत्रदेवाःसुतपसोविरजाअमृतप्रभाः ॥
तेषांविरोचनसुतोबलिरिंद्रोभविष्यति ॥ १२ ॥ दत्वेमांयाचमानायविष्णवेयःपदत्रयं ॥ राद्धमिंद्रपदंहित्वाततःसिद्धिमवाप्स्यति ॥
१३ ॥ योसौभगवताबद्धःप्रीतेनसुतलेपुनः ॥ निवेशितोधिकेस्वर्गादधुनास्तेस्वराडिव ॥ १४ ॥ गालवोदीप्तिमान्रामोद्रोणपुत्रः
कृपस्तथा ॥ ऋष्यशृंगःपितास्माकंभगवान्बादरायणः ॥ १५ ॥ इमेसप्तर्षयस्तत्रभविष्यंतिस्वयोगतः ॥ इदानीमासतेराजन्स्वेस्वे
आश्रममंडले ॥ १६ ॥ देवगुह्यात्सरस्वत्यांसार्वभौमइतिप्रभुः ॥ स्थानंपुरंदराद्धृत्वाबलयेदास्यतीश्वरः ॥ १७ ॥ नवमोदक्षसा
वर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुतानृप ॥ १८ ॥ पारामरीचिगर्भाद्यादेवाइंद्रःश्रुतःस्मृतः ॥ द्युतिमत्प्रमु
खास्तत्रभविष्यंत्यृषयस्ततः ॥ १९ ॥

लब्धमिंद्रपदंहित्वेत्यर्थः ॥ १३ ॥ १४ ॥ रामःपरशुरामः द्रोणपुत्रोश्वत्थामा ॥ १५ ॥ इदानींतत्स्वयोगतआसते ॥ १६ ॥ ८ ॥
श्रुतोद्भुतः ॥ १९ ॥

राम
३१

१९ ॥ हविष्मत्प्रमुखाः सुतास्तु नामैव बंधोर्विप्राणामप्याह ॥ हविष्मानिति ॥ २२ ॥ विषूच्यां जातः सन् ॥ २४ ॥ एकादशमन्वादिरार्षः ॥ २५ ॥ ए ॥ तस्य मनोरंतरं साधयिष्यति

आयुष्मन्तोंबुधारायामृषभो भगवत्कला ॥ भवितायेन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥ २० ॥ दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ॥ २१ ॥ तत्रापि जन्म भवति हरेर्विश्वसृजां गृहे ॥ अमूर्तिरिति विख्यातो येनाप्यायते जगत ॥ २२ ॥ हविष्मान्सुकृतः सत्यो जयो मूर्तिस्तथा द्विजाः ॥ सुवासनविरुद्धाद्याः देवाः शंभुः सुरेश्वरः ॥ २३ ॥ विष्वक्सेनो विषूच्यां तु शंभोः सख्यं करिष्यति ॥ जातः स्वांशेन भगवान्गृहे विश्वसृजो विभुः ॥ २४ ॥ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ॥ अनागतास्तत्सुताश्च सत्यधर्मादयो दश ॥ २५ ॥ विहंगमाः कामगमाः निर्वाणरुचयः सुराः ॥ इंद्रश्च वैधृतस्तेषामृषयश्चारुणादयः आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ॥ वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥ २६ ॥ भविता रुद्रसावर्णी राजन्द्वादशमो मनुः देववानुपदेवश्च देवश्रेष्ठादयः सुताः ॥ २७ ॥ ऋतधामा च तत्रेंद्रो देवाश्च हरितादयः ॥ ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः ॥ २८ ॥ स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ॥ अंतरं सत्यसहसः सूनृतायाः सुतो विभुः ॥ २९ ॥ मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥ ३० ॥ देवाः सुकर्मसुत्रामसंज्ञा इंद्रो दिवस्पतिः ॥ निर्मोकतत्त्वदर्शाद्या भविष्यंत्यृषयस्तदा देवहोत्रस्य तनय उपहर्ता दिवस्पतेः ॥ योगेश्वरो हरेरंशो बृहत्यां संभविष्यति ॥ ३१ ॥ मनुर्वा इंद्रसावर्णिश्चतुर्दशम एष्यति ॥ उरुगंभीरबुद्धाद्या इंद्रसावर्णिवीर्यजाः ॥ ३२ ॥

सत्यसहसः सूनृतायाश्च सुतः सन् ॥ २९ ॥ ३ ॥ दिवस्पतेरिंद्रस्योपहर्ता संपादकः भविष्यति ॥ ३२ ॥ ३४ ॥

३५ ॥ क्रियातंतन् कर्मसंततीः वितायिता विस्तारयिष्यति ॥ ३६ ॥ युगसाहस्रेण पर्ययः परिवर्त्तो यस्य ॥ युगसहस्रप्रमाणस्त्यर्थः ॥ ३७ ॥ श्री अष्टमे त्रयोदशः चतुर्दशेत
सर्वेषां मन्वादीनां यथायथं ॥ इच्छन्नमीणि वर्ण्यते भगवद्दृशवर्त्तिनां ॥ १ ॥ पुरुषेणाईश्वरेण यन्त्रायत्ता वर्त्तौः शासन्ते ते नियुज्यन्ते इति तथा ॥ २ ॥ तदेवाह यज्ञादय इति

पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति ॥ अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः ॥ ३५ ॥ सत्रायणस्य तनयो बृहद्भानुस्तदा
हरिः ॥ वितानायां महाराज क्रियातंतून्वितायिता ॥ ३६ ॥ राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते ॥ प्रोक्तान्येभिर्मितः कल्पो युग
साहस्रपर्ययः ॥ ३७ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णने त्रयोदशोऽध्यायः ॥ राजोवाच ॥ मन्वंतरे
षु भगवन्यथा मन्वादयस्त्विमे ॥ यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे ॥ १ ॥ श्रीशुक उवाच ॥ मनवो मनुपुत्राश्च मुनयश्च मही
पते ॥ इंद्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥ १ ॥ यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप ॥ मन्वादयो जगद्यात्रां नयंत्याभिः प्रचो
दिताः ॥ चतुर्युगांते कालेन ग्रस्ताञ्छ्रुतिगणान्यथा ॥ तपसा ऋषयोऽपश्यन्यतो धर्मः सनातनः ॥ ४ ॥ ततो धर्मं चतुष्पादं मनवो हरि
णोदिताः ॥ युक्ताः संचारयंत्यद्धा स्वे स्वे काले महीं नृपाः ॥ ५ ॥ पालयंति प्रजापाला यावदंतं विभागशः ॥ यज्ञभागभुजो देवा ये च तत्रानुकी
र्त्तिताः ॥ ६ ॥ इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जितां ॥ भुंजानः पाति लोकांस्त्रीन्कामं लोके प्रवर्षति ॥ ७ ॥

२ कर्माद्यानां कर्माणिपाह ॥ चतुर्युगांत इति चतुर्भिः ॥ यतः येभ्यः श्रुतिगणेभ्यः ॥ ४ ॥ उदिताः उक्ताः संयताः संतो महीं धर्मं संचारयंति सत्याधर्मं प्रवर्त्तयंतीत्यर्थः ॥ ५ ॥ प्रजाप
लाः मनुपुत्रास्तद्धर्मं पालयंति ॥ यावदंतं यावन्मन्वंतरावसाने ॥ विभागशः पुत्रपौत्रादिक्रमेण ये चान्ये यावाष्टयिम्यादयो यत्र कर्माणि भोक्तुं तेनान्विताः ते सह ॥ ६ ॥ ७ ॥

वदगाद्रूपांतरैरपि जगद्यात्राश्चवर्त्तनमाहुः ज्ञानमितिद्वाभ्यां सिद्धाः सनकादयः आपयोगात्तवल्क्यादयः योगेश्वरा दत्तात्रेयादयः तत्ररूपः सनत्कुमारनकर्मयोगे च वशु
ते ॥ ८ ॥ प्रजेशा मरीच्यादयः तेन रूपेण सर्गं करोतीति शेषः स्वाड्रूपः राजमूर्त्तिः सर्वेषामभवाय भवति पृथग्विधा गुणाः शीतोष्णादयो यस्य ॥ ९ ॥ नामरूपा
त्मिकया मायया मोहितात्मभिरभिजनैः नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोऽपि नैव दृश्यते इत्यर्थः ॥ १० ॥ आसंगिकनिरूप्यमुक्तं तमेवोपसंहरति

तानं वा युयुगांत्रे तेहरिः सिद्धस्वरूपधृक् ॥ ऋषिरूपधरः कर्मयोगेशरूपधृक् ॥ ७ ॥ सर्गप्रजेशरूपेण दस्यून्हन्यात्स्व
राड्वपुः ॥ कालरूपेण सर्वेषामभावाय पृथग्गुणः ॥ ८ ॥ स्तूयमानो जनैरेभिर्मायया नामरूपया ॥ विमोहिता
त्मभिर्नानादर्शनैर्न च दृश्यते ॥ ९ ॥ एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितं ॥ यत्र मन्वंतराण्याहुः चतुर्दश
पुराविदः ॥ १० ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णने चतुर्दशोऽध्यायः ॥ १४ ॥ राजोवाच ॥ बलेः
पदत्रयं भूमेः कस्माद्धरिरयाचत ॥ भूतेश्वरः कृपणवल्लब्धार्थोऽपि बबंध तं ॥ १ ॥ एतद्वेदितुमिच्छामो महत्कौतू
हलं हि नः ॥ यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः ॥ २ ॥

एतत्कल्पविकल्पस्य अवांतरकल्पस्य ॥ १४ ॥ अष्टमे पंचदशे बलिं पंचदशे विश्व
जिता वाप्याश्वमेधैरजयत ॥ ततो यो ह्वर्गमजयद्रूपाद्देवा निलिल्यिरे ॥ अत्रैव तेन बाध्याय्यावामनचेष्टितं ॥ निग्रहच्छलतो यत्र बलेर्भूयाननुग्रहः ॥ ईश्वरः स्वपरूप
णावत कस्माद्धेतोरयाचत ॥ लब्धार्थोऽपि भूत्वापि तं कस्माद्बबंध ॥ १ ॥ २ ॥ । । । राम

वामं २

तत्रतावद्दलेखित्रिलोकीमपहर्तुंपाञ्चादिच्छलं कृतवानितिवक्तुं ब्राह्मणाराधनेनवलेरकांडएवस्वर्गविजयक्रममाह ॥ पराजितइत्यादियावदध्यायसमाप्ति
युद्धेपराजितात्श्रीर्येनसःइंद्रेणत्र्रहमिश्चत्याजितः सन्भृगून्भृगोर्वंशप्रोच्छ्कारीन् ॥ महात्माउदारचित्तः अर्थानांनिवेदनेनअर्पणेन ॥ १३ ॥ त्रिणाकायु
गिजेतमिच्छतं विश्वजितायागेनअयाजयन् ॥ महाभिषेकेणऐंद्रेणावद्धं चब्राह्मणाप्रसिद्देन ॥ ४ ॥ हर्यश्वसंदंदस्यपवनरंगालेषामिववर्णोहरितोपषां ॥ ५ ॥ ध्वरं

स ॥ उ ॥ च ॥ पराजितश्रीरसुभिश्चहापितोमहेंद्रेणराजन्भृगुभिः सजीवितः ॥ सर्वात्मनातानभजद्दृगून्वलिः शिष्योम
हात्माऽर्थनिवेदनेन ॥ ३ ॥ तंब्राह्मणाभृगवःप्रीयमाणाअयाजयन्विश्वजितात्रिणाकं ॥ जिगीषमाणंविधिनाभिषि
च्यमहाभिषेकेणमहानुभावाः ॥ ४ ॥ ततोरथःकांचनपट्टनद्धोहयाश्वहर्यश्वतुरंगवर्णाः ॥ ध्वजश्चसिंहेनविराजमा
नोहुताशनादासहविर्भिरिष्टात् ॥ ५ ॥ धनुश्चदिव्यंपुरटोपनद्धंतूणावरिक्तौकवचंचदिव्यं ॥ पितामहस्तस्यददौचमा
लामम्लानपुष्पांजलजंचशंखः ॥ ६ ॥ एवंसविप्रार्जितयोधनार्थः तैःकल्पितस्वस्त्ययनोथविप्रान् ॥ प्रदक्षिणीकृत्य
कृतप्रणामः प्रह्रादमामंत्र्यनमश्चकार ॥ ७ ॥ अथारुह्यरथंदिव्यंभृगुदत्तंमहारथः ॥ सुस्रग्धरोथसंनह्यधन्वीखङ्गी
धृततेषुधीः ॥ ८ ॥ हेमांगदलसद्वाहुः स्फुरन्मकरकुंडलः ॥ रराजरथमारूढोधिष्ण्यस्थइवहव्यवाट् ॥ ९ ॥

सुवर्णानिर्मितोऽस्तिपट्टोयस्मिन् ... तूणावक्षय्यौ अरिक्तौ ... पितामहः प्रह्लादः जलजंशंखं ॥ ६ ॥ विप्रैरर्जितः संपादितोयोधनार्थोयुद्धपरिकरोयस्य ॥ तैरेवकल्पितंस्वस्त्ययनंमंगलवाचनंयस्य
नादिप्रयस्यअम्लानपुष्पांअग्रहया ॥ ७ ॥ अथारुह्यराजेतिद्वयोःसुष्ठुसग्धरः शोभनमालाधरः ॥ ८ ॥ हेमांगदाभ्यांलसंतौबाहूयस्यधिष्ण्यस्थः भवनेप्रज्वलितः कुंडस्थअग्निः

तस्यामैश्वर्यबलंबश्रीश्चयेषांतैरीश्वरपृथ्वीपैः वृतोयथाविनितिद्वयोरन्वयः परिधीनृदिशः ॥१०॥ सुद्धांत्रुनिसमृद्धा ॥ धिक्ग्राम्यास्वेतथाविधांपुरीमकस्मादेवप
रित्यज्येंद्रादयः पलायिताइतिवैराग्यपार्थ्यमिद्वपुरीमनुवर्णयति ॥ रम्यामितिमाधुर्यैरकारशमिः उपवनानिफलप्रधानानि निकरानिवाउद्यानानिपुष्पप्रधाना
निक्रीडास्थानानिवा तैरम्यां कूजंतिविहंगमिथुनानियेषु गायन्तोमत्ताःमधुव्रतायेषु ॥१२॥ प्रवालादीनामुरुभिरीरोयाहताः शाखायेषांतेद्रुमारुमायेषुतैः यत्रयात्रस

तस्यैश्वर्यबलश्रीभिः स्वपृथ्वैरीश्वरपृथ्वीपैः । विवद्भिरिवरत्नाद्रिभिर्दृढैः परिधीनिव ॥१०॥ वृतोविकर्षन्महतीमाहारीध्वजिनीं विभुः
यथाविटपुरीहृद्यांकंपयन्निवरोदसी ॥११॥ रम्यामुपवनोद्यानैःश्रीमद्भिर्नंदनाशिभिः कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः
प्रवालफलपुष्पोरुभारशाखामरद्रुमैः हंससारसचक्राह्वकारंडवकुलाःकुला नलिन्योयत्रक्रीडंतिभ्रमराःसरसवि
ताः ॥१३॥ आकाशगंगयारेम्यावृतांपरिखभूतया प्राकारेणाग्निवर्णेनमाद्ररालेनोन्नतेनच ॥१४॥ हकमपट्टकपाटैश्चद्वारैःस्फटिक
गोपुरैः जुष्टांविभक्तप्रपथांविश्वकर्मविनिर्मितां ॥१५॥ सभाचत्वरपथ्याढ्यांविमानैर्न्यर्बुदैर्युतां शृंगारकैर्मणिमयैर्वज्रविद्रुम
वेदिभिः ॥१६॥

रसेविताः भ्रमराः क्रीडंतितताः हंससारसचक्रवाककारंडवकुलाव्याप्ताः नलिन्यः सरांसियत्रयेषुसंतितैरुपवनोद्यानैरम्यामितिपूर्वेणेवान्वयः ॥१३॥ किंच
परिखाभूतयाआकाशगंगयावृतांप्रकारेणाग्निवर्णेनचावृतां अट्टालाःप्राकारोपरिरचितान्युन्नतानियुद्धस्थानानितत्सहितेन ॥१४॥ हकमपट्टानिकपाटानियेषुतै
द्वारैरवांतरैः स्फटिकमयगोपुरैश्चपुरद्वारैर्जुष्टां विभक्ताःप्रपथाराजमार्गायस्यां ॥१५॥ सभाउपवेशस्थानानिचत्वराणांपराणिरथ्याउपमार्गाः तेराढ्यांसंपन्नांन्यर्बुदैर
संख्यैः तैगृणानायैरनेतोविमानैर्युतांवज्रविद्रुममयावेदयोयेषुतैःशृंगारकैश्चतलप्रधैर्युतां ॥१६॥

भा॰अ॰ नित्यं वयस्तारुण्यं रूपं च सौंदर्यं यासां ताः रूपवन्नार्यः स्त्रियः यत्र यस्यां भ्राजंते ॥ १७ ॥ हारः स्त्रीणां केशेभ्यो विभ्रष्टानां नवसौगंधिकस्रजामामो
३५ मोदं ॥ १८ ॥ हेमगवाक्षेभ्यो निर्गच्छता धूमेन सुरप्रिया अप्सरसः ॥ १९ ॥ मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिर्ध्वजैः नानापताकायुक्ताभिः वलभीभिश्च

यत्र नित्यवयोरूपाः श्यामा विरजवाससः ॥ भ्राजंते रूपवन्नार्यो अर्चिर्भिरिव वह्नयः ॥ १७ ॥ हारस्त्रीकेशविभ्रष्टनवसौगंधि
कस्रजां ॥ यत्रामोदमुपादाय मार्ग आवाति मारुतः ॥ १८ ॥ हेमजालाक्षनिर्गच्छद्धूमेनागरुगंधिना ॥ पांडुरेण प्रतिच्छन्नमा
र्गे यांति सुरप्रियाः ॥ १९ ॥ मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृतां ॥ शिखंडिपारावतभृंगनादितां
वैमानिकस्त्रीकलगीतमंगलां ॥ २० ॥ मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः ॥ नृत्यैः सवाद्यै
रुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभां ॥ २१ ॥ यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः ॥ मानिनः कामिनो लु
ब्धा एभिर्हीना व्रजंति यत् ॥ २२ ॥ तां देवधानीं स वरूथिनीपतिर्बहिः समंताद्रुरुधे पृतन्यया ॥ आचार्यदत्तं जलजं महास्वनं
दध्मौ प्रयुंजन् भयमिंद्रयोषितां ॥ २३ ॥ मघवांस्तमभिप्रेत्य बलेः परममुद्यमं ॥ सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ २४ ॥

विमानानां पुरोभागैरावृतां व्याप्तां वैमानिकानां स्त्रीणां कलगीतैर्मंगलां ॥ २० ॥ उपदेवानां गंधर्वादीनां गीतकैश्च मनोरमां जिताप्रभा भासा ह्लादिन्या अधिष्ठात्री देव राम
तायया तां अन्यैरजितप्रभामिति वा ॥ पाठांतरे जिताः ग्रहाः सूर्यादयो यया ॥ २१ ॥ यत् यां ॥ २२ ॥ पृतन्यया सेनया ॥ २३ ॥ ॥ २४ ॥ रामराम ३५

केन हेतुना ।। एवं तेजसा ऊर्जितमासीत ।।२५।। प्रतिव्योढुं अपाकर्तुं ।।२६।। यतः कारणादेतस्य ओजआदि यत ओजआदेः एतस्य समुद्यमः ।।२७।। उपभृतं संभृतं सवि-
तं ।।२८।। २९।। अत्रोचितमेवमाह ।। तस्माद्यूयं ।। त्रिविष्टपं त्यक्त्वा निलयमदर्शनं यात ।। यतः कालात ।।३०।। केनास्य विपर्ययः स्यादित्यत आह एष इति

भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः ।। अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः ।।२५।। नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः
पिबन्निव मुखेनेदं लिहन्निव दिशो दश ।। दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ।।२६।। ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः
ओजः सहो बलं तेजो यत एतत्समुद्यमः ।।२७।। गुरुरुवाच ।। जानामि मघवञ्छत्रोरुन्नतेरस्य कारणं ।। शिष्यायोपभृतं तेजो भृगुभिर्ब्र-
ह्मवादिभिः ।।२८।। भवद्विधो भवान्वापि वर्जयित्वेश्वरं हरिं ।। नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः ।।२९।। तस्मान्निलयमुत्सृ-
ज्य यूयं सर्वे त्रिविष्टपं ।। यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्ययः ।।३०।। एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः ।। तेषामेवापमानेन
सानुबंधो विनंक्ष्यति ।।३१।। एवं सुमंत्रितार्थास्ते गुरुणार्थानुदर्शिना ।। हित्वा त्रिविष्टपं जग्मुः गीर्वाणाः कामरूपिणः ।।३२।। देवेष्वथ
निलीनेषु बलिर्वैरोचनः पुरीं ।। देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयं ।।३३।। तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः ।। शतेन ह-
यमेधानामनुव्रतमयाजयन् ।।३४।। ततस्तदनुभावेन भुवनत्रयविश्रुतां ।। कीर्तिं दिक्षु वितन्वानः स रेज उडुराडिव ।।३५।। बुभुजे च
श्रियं स्वृद्धां द्विजदेवोपलंभितां ।। कृतकृत्यमिवात्मानं मन्यमानो महामनाः ।।३६।। इति श्रीभागवते महापुराणेऽष्टमस्कंधे पंचदशो-
ऽध्यायः ।।

विप्राणां बलेन उदर्क उन्नतोत्तरमधिकं फलं यस्य सः ।।३१।। सुमंत्रितः अर्थः कार्यं येषां ते निलयं जग्मुः ।।३२।। ३३ एवं प्राप्तामिंद्रपदं स्थिरीकर्तुम-
याजन् ।। अनुव्रतमनुवर्तिनं ।।३४।। ३५ द्विजदेवैर्ब्राह्मणैरुपलंभितां प्रापितां ।।३६।। इति [illegible] ।।

षोडशेऽत्र नाशेन शोचंत्यादित्या पतिः ॥ प्रार्थितः कश्यपः प्राह पयोव्रतमितीर्यते ॥ इदानीं श्रीवामनावतारप्रसंगमाह एवमित्यादि यावत्समाप्ति । नष्टेषु अदृष्टे
षु सत्सु ॥१॥ सः कश्यपः पत्नीमिदमाह ॥३॥ दीनवदनत्वादिकमालक्ष्य वक्ष्यमाणविकल्पान् पृच्छति अप्यभद्रमिति सप्तभिः हे भद्रे मृत्योः छंदमिच्छामनुवर्तिन इति
तथा मृत्युवशवर्तिनो जनस्येत्यर्थः ॥४॥ हे गृहमेधिनि अपि वा किं वा गृहेषु धर्मादेः किंचिदकुशलमिति काकाक्षन्यायः ॥ यत्र येषु गृहेषु अयोगिनामपि योगः । विध

श्रीशुक उवाच ॥ एवं पुत्रेषु नष्टेषु देवमाताऽदितिस्तदा ॥ हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥१॥ एकदा कश्यपस्तस्या आश्रमं भगवानगात्
निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् ॥२॥ स पत्नीं दीनवदनां कृतासनपरिग्रहः ॥ सभाजितो यथान्यायमिदमाह कुरूद्वह ॥३॥ अ
प्यभद्रं न विप्राणां भद्रे लोकेऽधुनागतं ॥ न धर्मस्य न लोकस्य मृत्योः छंदानुवर्तिनः ॥४॥ अपि वाकुशलं किंचिद्गृहेषु गृहमेधिनि ॥ धर्म
स्यार्थस्य कामस्य यत्र योगो ह्ययोगिनां ॥५॥ अपि वातिथयोऽभ्येत्य कुटुंबासक्तया त्वया ॥ गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित्
गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ॥ यदि निर्यांति ते नूनं फेरुराजगृहोपमाः ॥७॥ अप्यग्नयस्तु वेलायां न हुता हविषा सति ॥ त्वयो
द्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥८॥ यत्पूजया कामदुघान् याति लोकान् गृहान्वितः ॥ ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो
मुखं ॥९॥ अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि ॥ लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहं ॥१०॥

र्मादीनां योगफलं भवति ॥५॥ किं वा त्वया अपूजिता एव अभ्येत्य गृहाद्याताः ॥६॥ नार्चिताः अनर्चिताः संतो यदि निर्गच्छंति ते गृहाः फेरुराजः शृगालराजः तदीयविवरतु
ल्याः ॥७॥ वेलायां होमकाले कर्हिचित् न हुताः किं ॥८॥९॥ भवत्या आत्मानं मनः अस्वस्थमप्रकृतिस्थं लक्षणैर्विवर्णत्वादिभिर्लक्षयामि ॥१०॥ राम ॥

अत्वास्यकारणमन्यदस्तीति वक्तव्यं त्वत्सखमभद्रादिकं नास्तीत्याह भद्रमिति द्वाभ्यां ॥ इमे गृहाः त्रिवर्गस्य परं क्षेत्रं उद्भवस्थानानि वर्गोपि यथावद्वर्तत इत्यर्थः
॥ ११ ॥ भगवतस्तव अनुध्यानं यन्मया क्रियते तस्मादग्न्योऽतिथ्यपस्त्यादि सर्वं न रिष्यति न हीयते ॥ १२ ॥ अन्तःस्थं विज्ञापयितुमाह को न्विति ॥ १३ ॥ संपाद्यं काममम

अदितिरु ॥ वाच ॥ भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य वा ॥ त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृहा इमे ॥ ११ ॥ अग्नयोऽतिथयो भृत्याः भि
क्षवो ये च लिप्सवः ॥ सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥ १२ ॥ को नु मे भगवन्कामो न संपद्येत मानसः ॥ यस्या भवान्प्रजा
ध्यक्ष एवं धर्मान्प्रभाषते ॥ १३ ॥ तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्वरजस्तमोजुषः ॥ समो भवांस्तास्वसुरादिषु प्रभो त
थापि भक्तं भजते महेश्वरः ॥ १४ ॥ तस्मादीश भजंत्या मे श्रेयश्चिंतय सुव्रत ॥ हृतश्रियो हृतस्थानान्सपत्नैः पाहि नः प्रभो ॥ १५ ॥ प
रैर्विवासिता साहं मग्ना व्यसनसागरे ॥ ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ॥ १६ ॥ यथा तानि पुनः साधो प्रपद्येरन्ममात्मजाः ॥
तथा विधेहि कल्याणं धिया कल्याणकृत्तम ॥ १७ ॥ श्रीशुक उवाच ॥ एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव ॥ अहो मायाबलं वि
ष्णोः स्नेहबद्धमिदं जगत् ॥ १८ ॥ क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेः परः ॥ कस्य के पतिपुत्राद्या मोह एव हि कारणं ॥ १९ ॥ उपतिष्ठ
स्व पुरुषं भगवंतं जनार्दनं ॥ सर्वभूतगुहावासं वासुदेवं जगद्गुरुं ॥ २० ॥ स विधास्यति ते कामान्हरिर्दीनानुकंपनः ॥ अमोघा भगवद्भक्ति
र्नेतरेति मतिर्मम ॥ २१ ॥

हृतैवेति चतुर्भिः ॥ १४ ॥ सपत्नैर्दैत्यैर्हृता श्रीर्येषां हृतं स्थानं येषामिति उभयत्राभिप्रायेण बहुवचनं ॥ १५ ॥ १७ ॥ कः कश्यपः प्रथमं ताव नेतरेति मतिर्मम ॥ २१ ॥ तद्देवांतर
त्वत्स्नेहस्त्याजयितुं विस्मयव्याजेन तत्त्वमुपदिशति अहो इति सार्धेन ॥ १८ ॥ १९ ॥ अत्रापरितुष्यंतीं प्रत्याह उपतिष्ठस्वेति द्वाभ्यां ॥ २० ॥ नेत्येवंभूतकामप्राप्तिर्देवतांतर

यथा च मे मनोरथं विदध्यात ११ यथा च मे आशु तुष्यति तथा तस्य वा प्रकारमादिश ॥ २२ ॥ मे मया एष्टः पद्मजो यदुक्तमाह एतत्ते प्रवक्ष्यामीत्यन्वयः ॥ २४ ॥ अमले शुक्ले ॥ २५ ॥ मत्राद्यो पूर्वदृष्टः कृत्यमाह सिनीवाल्यामित्यादिना ब्रह्मचार्यथ तद्वाक्यामित्यं तेन ग्रंथेन यदि लभ्यते तर्हि क्रोडविदीर्णया वन्यवराहोत्खातया आलिप्य

ऋषिरुवाच ॥ केनाहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिं ॥ यथा मे सत्यसंकल्पो विदध्यात्स मनोरथं ॥ २१ ॥ आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनं ॥ आशु तुष्यति मे देवः सीदंत्याः सहपुत्रकैः ॥ २२ ॥ कश्यप उवाच ॥ एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मजः ॥ यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणं ॥ २४ ॥ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ॥ अर्चयेदरविंदाक्षं भक्त्या परमयान्वितः ॥ २५ ॥ सिनीवाल्यां मृदालिप्य स्नायात्क्रोडविदीर्णया ॥ यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत ॥ २६ ॥ त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता ॥ उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥ २७ ॥ निर्वर्तितात्मनियमो देवमर्चेत्समाहितः ॥ अर्चायां स्थंडिले सूर्ये जले वह्नौ गुरावपि ॥ २८ ॥ नमस्तुभ्यं भगवते पुरुषाय महीयसे ॥ सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥ २९ ॥ नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ॥ चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥ ३० ॥

तत्र मंत्रः त्वं देवीति ॥ हे देवि त्वं रसायाः उद्धृतासि ॥ २७ ॥ निर्वर्तितः आत्मनियमो नित्यनैमित्तिको येन ॥ २८ ॥ तत्रावाहनादौ नव मंत्रानाह नमस्तुभ्यमित्यादि ॥ पाद्यादौ विशेषतस्तद्वारशात्तु रेखा स्मृति ॥ २९ ॥ चतुर्विंशतिर्गुणाः तत्त्वानि तान् जानातीति तथा ॥ तेषां गुणानां संख्यानस्य हेतवे सांख्यप्रवर्तकाय ॥ ३० ॥

एवं सामान्यतो नत्वा गुणावतारान् प्रणमति त्रिभिः । नत्वा इति मंत्रोक्तयज्ञरूपेण विष्णोः प्रणामो नमः इति द्विशीर्षाय सप्तत्रयः पादाय यस्य तं तत्र वेफलविस्तारकाय त्रय्या विद्यायाः आत्मा यस्येति त्रिधा बद्ध इत्यस्यार्थ उक्तः । तथा च मंत्रः । चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेशेति । मार्गप्रवृद्धवदाल्नः सोपप्राप्तेर्ग्रन्थापथ्य । विस्तृताय यज्ञरूपेणात्मपते ते नतत्वतः तथा च याज्ञिकाः चत्वारि शृंगेति वेदाः ए

नमो द्विशीर्ष्णे त्रिपदे चतुःशृंगाय तंतवे । सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥ ३१ ॥ नमः शिवाय रुद्राय नमः शक्तिधराय च । सर्वविद्याधिपतये भूतानां पतये नमः ॥ ३२ ॥ नमो हिरण्यगर्भाय प्राणाय जगदात्मने । योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥ ३३ ॥ नमस्त आदिदेवाय साक्षिभूताय ते नमः । नारायणाय ऋषये नराय हरये नमः ॥ ३४ ॥ नमो मरकतश्यामवपुषेऽधिगतश्रिये । केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥ ३५ ॥ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ । अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥ ३६ ॥ अन्ववर्तंत यं देवाः श्रीश्च तत्पादपद्मयोः । स्पृहयंत इवामोदं भगवान्मे प्रसीदताम् ॥ ३७ ॥ एतैर्मंत्रैर्हृषीकेशमावाहनपुरस्कृतम् । अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥ ३८ ॥ अर्चित्वा गंधमाल्याद्यैः पयसा स्नापयेद्विभुं । वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥ ३९ ॥ गंधधूपादिभिश्चार्चेद्द्वाद[illegible]शाक्षरविद्यया ॥ ४० ॥ गोपालकृष्णाय नमः । एम

क्ताः त्रयो अस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्ताः सप्त छंदांसि त्रिधा बद्धो मंत्रब्राह्मणकल्पैः वृषभो रोरवीति रोरवणं सवनक्रमेणाभि यज्ञेभिः यदेनमृग्भिः शंसति यजुर्भिर्यजंती सामभिः स्तुवंतीति ॥ ३१ ॥ प्राणाय सूत्रात्मने योगैश्वर्यं शरीरं यस्य ॥ ३४ ॥ अधिगता प्राप्ता श्रीर्येन तस्मै ॥ ३५ ॥ ६ ॥ तत्पादपद्मयोः आमोदं स्पृहयंत

[illegible]

मा॰ अ
३८

पयसि स्नातपञ्चाम्पायसं मूलविद्यया द्वादशाहुरेणैव ।। ४० ।। १ पूर्वोक्ताभिरन्याभिरष्टाहुतिभिः ४१ ।। तस्य शेषं निर्माल्यं द्रोणं वैरोचनं येषां तानष्टौ समवेद्यावपि भोजये

स्नातपयसि नैवेद्यं शाल्यन्नं विभवे सति ।। समर्पिः सगुडं दत्वा जुहुयान्मूलविद्यया ।। ४० निवेदितं तदन्नाद्यं दद्यादुञ्जीत वा स्वयं ।। दत्वा चमन

मर्चयित्वा तांबूलं च निवेदयेत ।। ४१ ।। जपेदष्टोत्तरशतं स्तवीत स्तुतिभिः प्रभुं ।। कृत्वा प्रदक्षिणां भूमौ प्रणमेद्दण्डवन्मुदा ।। ४२ ।। कृत्वा शिरसि तच्छे

षं स्वस्मिन्नुद्वासयेत्ततः ।। ब्राह्मणान्भोजयेद्विप्रान्पायसेन यथोचितं ।। ४३ ।। भुंजीत तैरनुज्ञातः शेषं स्वेष्टैः समाजितैः ।। ब्रह्मचार्यथ तद्रात्र्यां

शेवाभूतेश्च प्रेहनि ।। ४४ ।। स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ।। पयसा स्नापयित्वार्चयेद्यावद्व्रतसमापनं ।। ४५ ।। पयोभक्षो व्रतमिदं

चरेद्विष्णुर्चनादृतः ।। पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत ।। ४६ ।। एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतः ।। हरेराराधनं होमं मर्हणं द्वि

जतर्पणं ।। ४७ ।। प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ।। ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिषवणं चरेत ।। ४८ ।। वर्जयेदसदालापं भोगानुच्चावचां

स्तथा ।। अहिंस्रः सर्वभूतानां वासुदेवपरायणः ।। ४९ ।। त्रयोदश्यामथो विष्णोः स्नपनं पंचकैर्विभोः ।। कारयेच्छास्त्रदृष्टेन विधिना विधिकोवि

दैः ।। ५० ।। पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ।। चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ।। ५१ ।। सुतेन तेन पुरुषं यजेत सुसमाहितः

नैवेद्यं चातिगुणवद्दद्यात्पुरुषतुष्टिदं ।। ५२ ।। आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः ।। तोषयेदृत्विजश्चैव तद्विद्याराधनं हरेः

।। ५३ ।। भोजयेत्तान्गुणवता सदन्नेन शुचिस्मिते ।। अन्यांश्च ब्राह्मणाञ्छक्त्या ये च तत्र समागताः ।। ५४ ।।

रित्यर्थः ।। ४२ ।। समाजितैस्तैरनुज्ञातः सन्शेषं बंधुभिः सहितः तस्यां रात्र्यां ब्रह्मचारी सन् श्वोभूते प्रभाते स्नातः ।। ४४ ।। ५ पयस्वेव मन्त्रः आहारो यस्य ।। ४६ ।। ७ अधः स्वप्नं

राम
३८

५७ ॥ समाप्ते समाहृतं ॥ ५८ ॥ ५९ ॥ सर्वयज्ञो व्ययं यज्ञः सर्वव्रतमिति च स्मृतम् एतद्व्रतं ॥ ६ ॥ ४ ॥ अ १ मे ३ ॥ ततः सप्तदशो ऽहि त्याक्ते तस्मिन्नव्रते हरिः तत्का

दक्षिणां गुरवे दद्यात् तत्राविप्रांश्च यथार्हतः ॥ अनाद्येनाशपाकांश्च प्रीणयेत् समुपागतान् ॥ ५५ ॥ भुक्तवत्सु च सर्वेषु दीनान्धकृपणा
दिषु ॥ विष्णोस्तत्प्रीणनं विद्वान् भुंजीत सह बंधुभिः ॥ ५६ ॥ नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः ॥ कारयेत्तत्कथाभिश्च पूजां भ
गवतो न्वहं ॥ ५७ ॥ एतत्पयोव्रतं नाम पुरुषाराधनं परं ॥ पितामहेनाभिहितं मया ते समुदाहृतं ॥ ५८ ॥ त्वं चानेन महाभागे सम्यक्
चीर्णेन केशवं ॥ आत्मना शुद्धभावेन नियतात्मा भजाव्ययं ॥ ५९ ॥ अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतं ॥ तपःसारमिदं भद्रे
दानं चेश्वरतर्पणं ॥ ६० ॥ त एव नियमाः साक्षात् त एव च यमोत्तमाः ॥ तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ॥ ६१ ॥ तस्मादेतद्व्रतं भद्रे
प्रयता श्रद्धयाचर ॥ भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥ ६२ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे पयोव्रतं नाम षोडशो
ध्यायः ॥ १६ ॥ श्रीशुक उवाच ॥ इत्युक्ता सादिती राजन् स्वभर्त्रा काश्यपेन वै ॥ अन्वतिष्ठद्व्रतमिदं द्वादशाहमतंद्रिता ॥ १ ॥ चिंतयंत्येकयाबुद्ध्या म
हापुरुषमीश्वरं ॥ प्रगृह्येंद्रियदुष्टाश्वान् मनसा बुद्धिसारथिः ॥ २ ॥ मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि ॥ वासुदेवे समाधाय चचार ह
पयोव्रतं ॥ ३ ॥ तस्याः प्रादुरभूत्तात भगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुः शंखचक्रगदाधरः ॥ ४ ॥ तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरं
ननाम भुवि कायेन दंडवत्प्रीतिविह्वला ॥ ५ ॥ सोत्थाय बद्धांजलिरीडितुं स्थिता नोत्सेहे आनंदजलाकुलेक्षणा ॥ बभूव तूष्णीं पुलकाकुला
कृतिः तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥

सपूरणायासेतनतुजोन्वहरितीर्यते ॥ ५५ ॥ प्रीतिविह्वलत्वादेव साबद्धांजलिः सती स्थिताकेवलं ईडितुं नोत्सेहे न शशाक ॥ अपि

भा०अ
३७

तुष्टाव पिबंतीवोद्वीक्ष्यमाणेति चक्षुषामेदात्मेत्यस्याद्विःकृत्स्निर दोषः ॥ ७ ॥ अजस्ततो विनिर्जित्य दैत्यानप्यूर्जितानपि । भक्तान्रक्षितुमीशात्वमिस्त्वतोरदिति ह्विभिः ॥ यज्ञेशेत्यादिदशभिः संबोधने यज्ञवाराह कां विमृपिनास्तीति वदती प्रार्थयते ॥ शंनः कृधि कुरु यतो दीनानां नाथो सि त्वं तीर्थश्रवः कीर्तिर्यस्य ॥ श्रवणमेव मंगलं यस्य तन्नामधेयं यस्य ॥ आपन्नानां शरणागतानां लोकानां वृजिनोपशमाय उदयो यस्य ॥ ८ ॥ भूम्ने महते नमः महत्त्वे हेतवः विश्वाय विश्वस्य

पीत्वा शनैर्गद्गदया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ॥ उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिं ॥ ७ ॥ अदितिरुवाच ॥ यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमंगलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश भगवन्नसि दीननाथः ॥ ८ ॥ विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ॥ स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ ९ ॥ आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाः सकलयोगगुणास्त्रिवर्गः ॥ ज्ञानं च केवलमनंत भवंति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥ १० ॥ श्रीशुक उवाच ॥ अदित्यैवं स्तुतो राजन् भगवान्पुष्करेक्षणः ॥ क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ॥ ११ ॥

भवनस्थितिसंयमार्थं स्वैरं गृहीताः पुरुशक्तेर्मायाया गुणा येन तस्मै तथापि स्वेच्छाय अपच्युतस्वरूपाय कुतः शश्वदुपबृंहितः नित्योर्जितो यः पूर्णो बोधस्तेन व्यापादितं निरस्तं आत्मनि तमो मायालक्षणं येन तस्मै ॥ ९ ॥ अस्मदीयमनोरथपूरणमीषत्कारमेव न तवेति कैमुत्यन्यायेनाह ॥ आयुः परं ब्रह्मायुः पुनरपि द्यौश्च भूश्च रसातलं च द्योभूरसाः द्योरिति पृथक्पाठे भूश्च रसाश्च विलक्षणा इति विग्रहः रसेति पाठे ताणि पदानि सकला योगगुणा अणिमादयः ॥ १० ॥ क्षेत्रज्ञः अंतर्यामी ॥

राम
३७

सपत्नैर्हृताश्रियो येषां स्वधामतः च्यावितानां च पुत्राणामवधि यत्तद्भवत्या स्थिरमां कांक्षितं मया विज्ञातं ॥१२॥ कांक्षितमेवाह तानिति त्रिभिः ॥ प्रतिलब्धो जयश्च श्रीश्च यैस्तैः पुत्रैः सह उपासितुं एकत्र स्थातुमिच्छसि ॥१३॥१४॥ प्रत्याहृते यशश्च श्रीश्च यैस्तान् ॥१५॥ अपारणीयाः अनतिक्रमणीयाः यत यस्मात्तेनुकूले

श्रीभगवानुवाच ॥ देवमातर्भवत्या मे विज्ञातं चिरकांक्षितं ॥ यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥१२॥ तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान् ॥ प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुं ॥१३॥ इंद्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषां ॥ स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥१४॥ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः ॥ नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥१५॥ प्रायोधुनाते सुरयूथनाथा अपारणीया इति देवि मे मतिः ॥ यत्तेनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥१६॥ अथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते ॥ ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥१७॥ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः ॥ स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्तास्मि मारीचतपस्यधिष्ठितः ॥१८॥ उपधाव पतिं भद्रे प्रजापतिमकल्मषं ॥ मां च भावयती पत्यावेवं रूपमवस्थितं ॥१९॥ नैतत्परस्मा आख्येयं पृष्टयापि कथंचन ॥ सर्वं संपद्यते देवि देवगुह्यं सुसंवृतं ॥२०॥

ईश्वरः कालो येषां तैर्विप्रैः गुप्ताः रक्षिताः अनुकूलेश्वरैः समर्थैः विप्रैर्गुप्ता इति वा ॥१६॥ मम मया चिंत्य एव तत्र हेतुः संतोषितस्ये त्यादि ॥ श्रद्धानुरूपं इच्छानुसारेण फलहेतुत्वात् ॥१७॥ मारीचस्य तपसि स्वांशेन अधिष्ठाय स्थितः सन् गोप्तास्मि पालयिष्यामि ॥१८॥ अतः पतिमुपाधाव भजस्व ॥१९॥ देवानां गुह्यं रहस्यं सर्वं सुसंवृतं सुगुप्तं सत् संपद्येत सिध्यति ॥२०॥

प्रभोः हरेरात्मनि जन्म लब्ध्वा ॥२१॥ अवितथमीक्षणं दृष्टिर्यस्य सः ॥२२॥ अनिलो यथा सर्वत्र समोपि दारुणि संघर्षेण वनदाहकमग्निमाधत्ते एवं स्वयं प्रभेत्र समोपि दित्यां कृपया वीर्यमाधत्तेत्यर्थः ॥२३॥ धिष्ठितं अधिष्ठाय स्थितं समीडे तुष्टावेत्यर्थः ॥२४॥ ५ अदितेरेव पूर्वस्मिन्जन्मनि पृश्निरिति नाम तस्याः गर्भाय पृश्नि

शुक उवाच ॥ एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत ॥ अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः ॥ उपाधावत्पतिं भक्त्या परया कृतकृत्यवत् ॥२१॥ स वै समाधियोगेन कश्यपस्तदबुध्यत ॥ प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः ॥२२॥ सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतं ॥ समाहितमना राजन्दारुण्यग्निं यथानिलः ॥२३॥ अदितेर्धिष्ठितं गर्भं भगवंतं सनातनं ॥ हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ॥२४॥ ब्रह्मोवाच ॥ जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते ॥ नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः ॥२५॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे ॥ त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥२६॥ त्वमादिरंतो भुवनस्य मध्यमनंतशक्तिं पुरुषं यमाहुः ॥ कालो भवानाक्षिपतीश विश्वं स्रोतो यथांतः पतितं गभीरं ॥२७॥ त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः ॥ दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु ॥२८॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे सप्तदशो

गर्भाय ॥ वेदा गर्भे यस्य यद्वा वेदानां गर्भाय वेदेषु प्रकाशमानायेत्यर्थः त्रयो लोकाः नाभौ यस्य सः त्रिनाभस्तस्मै त्रयाणां लोकानां पृष्ठे उपरि स्थिताय ध्यायः शिपिविष्टेन पशवो जीवाः तेष्वंतर्यामितया प्रविष्टाय यत्तो वै विष्णुः पशवः शिपिर्यज्ञस्तत्र पशुषु प्रतितिष्ठतीति श्रुतेः यद्वा शिपयो रश्मयः तेषु विशिष्टायेत्यर्थः तथापि
विष्णवे व्यापिने ॥२६॥ अंतः पतितं तृणादि यथा गंभीरं स्रोतः आक्षिपते आकर्षति तथा कालात्मा भवान् विश्वमाक्षिपति ॥२७॥

ततस्त्वं शरण्यो भूत्वा वामनः सन्त्राता खिलैः। प्रत्यंगतस्ततस्तेन महात्मा कोवरानुवरणा। इत्थं विरिंचेन स्तुतं कर्म चेदेव कार्यं लक्षणं वीर्यं च प्रभावो यस्य सः अदित्यां प्रादुर्बभूवेति त्रयाणामन्वयः। अमृतभूः मृत्युजन्मशून्यः शंखगदाब्जचक्राण्यस्य संतीति तथा कृशांशस्तिवेनमतन्वर्थीयो अश्वृतस्य सः। अपि विसर्गपाठे सचासौ पिशंगवासाश्च ॥१॥ झषराजो मकरः तदाकारयोः कुंडलयोस्त्विषा उल्लसंती श्रीर्वदनांबुजे यस्य। श्रीवत्सो वक्षसि यस्य वलयैरंगदैश्च सहोल्लसंति

श्रीशुक उवाच। इत्थं विरिंचस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्यां। चतुर्भुजः शंखगदाब्जचक्रः पिशंगवासा नलिनायतेक्षणः ॥१॥ श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान्। श्रीवत्सवक्षा वलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः ॥२॥ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः। प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन् कंठनिविष्टकौस्तुभः ॥३॥ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः। द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ॥४॥ श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः। सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणं ॥५॥

किरीटादीनि यस्य ॥२॥ श्रीमत्या वनमालया विराजितः वेश्मगतं तमः ॥३॥ अग्निजिह्वा देवाः नगाः पर्वताः ॥४॥ तस्या द्वादश्याः माहात्म्यमाह। श्रोणा इति। श्रोणायामिति ॥ भाद्रपदशुक्लद्वादश्यामिति प्रसिद्धं। तस्यां तस्यामपि श्रोणायां श्रवणस्थे चंद्रे इत्यर्थः। तत्रापि श्रवणस्य प्रथमांशे अभिजिति नक्षत्रे। तच्च श्रवणस्य संदर्शितं। अभिजिन्नामनक्षत्रं उपरिष्टादाषाढानामवसानं श्रोणायाः इति। एवं विशिष्टे मुहूर्ते प्रभुः प्रादुर्बभूवेत्यर्थः। किंच नक्षत्राण्यश्विन्यादीनि ताराशब्देन ग्रहा गुरुशुक्रादयः तेऽन्ये आद्या येषां ते सर्वेऽपि सर्वे तस्य जन्म दक्षिणं अनुकूलं चक्रुः। जन्ममुहूर्ते गुणाः बहवो बभूवुरित्यर्थः ॥५॥

भा०अ० विशेषांतरमाह ॥ यस्यां द्वादश्यां हरेर्जन्म तत्तस्यां मध्यमन्ह्येव विदुः तदा च मध्यंदिनगतः सविता तिष्ठत् सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ६ शंखादयो येषां ते ता२
८१ श्चान्येषां च वित्रतूर्याणां निर्घोषो भवत् ॥ ७ ॥ देवा मनवस्त्वादीनां कुसुमैः समवाकिरन्निति तेनान्वयः ८ ॥ ११ विस्मयांतरमाह यत्तदिति यद्वपुः हरिः धारयत्

द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो नृप ॥ विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥ ६ ॥ शंखदुंदुभयो नेदुर्मृदंगपणवानकाः ॥ वि
४ त्रवादित्रतूर्याणां निर्घोषस्तुमुलो भवत् ॥ ७ ॥ प्रीताश्चाप्सरसो नृत्यन्गंधर्वप्रवरा जगुः ॥ तुष्टुवुर्मुनयो देवाः मनवः पितरोग्नयः ॥ ८ ॥ सि
द्धविद्याधरगणाः सकिंपुरुषकिन्नराः ॥ चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥ ९ ॥ गायंतो तिप्रशंसंतो नृत्यंतो विबुधानुगाः ॥ अदि
त्या आश्रमपदं कुसुमैः समवाकिरन् ॥ १० ॥ दृष्ट्वादितिस्तं निजगर्भसंभवं परं पुमांसं मुदमाप विस्मिता ॥ गृहीतदेहं निजयोगमायया प्र
जापतिश्चाह जयेति विस्मितः ॥ ११ ॥ यत्तद्वपुर्भाति विभूषणायुधैः अव्यक्तचिद्व्यक्तमधारयद्धरिः ॥ बभूव तेनैव स वामनो वटुः संप
श्यतोर्दिव्यगतिर्यथा नटः ॥ १२ ॥ तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः ॥ कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिं ॥ १३ ॥ तस्योपनीयमा
नस्य सावित्रीं सविताब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपो ददात् ॥ १४ ॥ ददौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः ॥ कौपीनाछा
दनं माता द्यौश्छत्रं जगतः पितेः ॥ १५ ॥ कमंडलुं वेदगर्भः कुशान्सप्तर्षयो ददुः ॥ अक्षमालां महाराज सरस्वत्यव्ययात्मनः ॥ १६ ॥ तस्मा इत्युप

प्रकटितवान् ॥ तेन वपुषा मातापित्रोः संपश्यतोरेव वामनो वटुर्बभूव दिव्यगतिः नीताय यक्षराट् पात्रिकामदात् भिक्षां भगवती साक्षादुमादादंबिका सती ॥ १७ ॥ राम
श्रुत्वैतच्चेष्टितः स्वयं कथंभूतः अव्यक्तचिद्रूपः कथमधारयत् ॥ भाति शरीरत्नैः विभूषणानि च आयुधानि च तैर्व्यक्तं यथा भवति तथा ॥ १२ ॥ कर्माणि जातकर्मादीनि १३ ४ वन ८१
स्पतिः वनस्पतिः सोमः १५ ॥ ६ ॥ पात्रिकां भिक्षापात्रीं ॥ १७ ॥ राम

स एवं संभावितो मारिषः श्रेष्ठो वटुर्ब्रह्मवर्चसेन ब्रह्मर्षिगणान्समुत्थान्स्तां सभामतिक्रम्यारोचत ॥ १७ ॥ १८ ॥ यद्दर्शवटुर्वपुःवत्तदाह ॥ श्रुत्वेत्याहरियावत्समाप्तियज्ञ
मानं यज्ञं तं ॥ भृगूणां भृगुभिरुपकल्पितैः प्रवर्त्तितैः अखिलेन सारेण वलेन संभृतः संपूर्णः ॥ १० ॥ नर्मदाया उत्तरे तटे भृगुकच्छसंज्ञके देशे वटे व्रतन्त्रमं प्रवर्ति

स ब्रह्मवर्चसेनैवं सभां संभावितो वटुः ॥ ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः ॥ १७ ॥ समिद्धमाहितं वह्निं कृत्वा परिसमूहनं परि
स्तीर्य समभ्यर्च्य समिद्भिरजुहोद्द्विजः ॥ १८ ॥ श्रुत्वाश्वमेधैर्यजमानमूर्जितं वलिं भृगूणामुपकल्पितैस्ततः ॥ जगाम तत्राखिलसा
रसंभृतो भारेण गां सन्नमयन्पदे पदे ॥ १९ ॥ तं नर्मदायास्तट उत्तरे वलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञके ॥ प्रवर्त्तयन्तो भृगवः क्रतूत्तमं व्य
चक्षतारादुदितं यथा रविं ॥ २० ॥ त ऋत्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप ॥ सूर्यः किलायात्युत वा विभावसुः सन
त्कुमारोथ दिदृक्षया क्रतोः ॥ २१ ॥ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान्स वामनः ॥ छत्रं सदण्डं सजलं कमंडलुं विवेश
विभ्रद्धयमेधवाटं ॥ २२ ॥ मौंज्या मेखलया वीतमुपवीताजिनोत्तरं ॥ जटिलं वामनं विप्रं मायामाणवकं हरिं ॥ २३ ॥ प्रविष्टं वीक्ष्य भृग
वः सशिष्यास्ते सहाग्निभिः ॥ प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा ॥ २४ ॥ यजमानः प्रमुदितो दर्शनीयं मनोरमं ॥ रूपानुरूपावयव
तस्मा आसनमाहरत् ॥ २५ ॥ स्वागतेनाभिनंद्याथ पादौ भगवतो वलिः ॥ अवनिज्यार्चयामास मुक्तसंगमनोरमं ॥ २६ ॥

र्त्तयंतो ये वलेः ऋत्विजो भृगवः ते तं व्यचक्षत ॥ अपश्यन् ॥ आरात् समीपएवोदितं रविमिव ॥ २१ ॥ ते ऋत्विगादयः सूर्यः किलेत्येवमादि व्यतर्कयन्निति शेषः ॥ २१ ॥ हय
मेधवाटं अश्वमेधमंडपं विवेश ॥ २२ ॥ उपवीताजिनं उपवीतवद्धृतमजिनमेव उत्तरं यस्य तं ॥ २३ ॥ संक्षिप्ताः अभिभूताः सन्तः ॥ २४ ॥ रूपस्यानुरूपा अवयवा यस्य

भा॰ अ॰ वंद्रमौलिश्चोत्पाद्ययः आप्यर्थेवकारः ॥ वंद्रमौलिरपिगंगामूर्पयपन्मूर्ध्नीरधारेत्यर्थः २८ ॥ हेआर्यत्वांत्वामाज्ञात्स्वत्यक्त्वब्रह्मर्षीणांतपएवमन्ये ॥ कथंभूतंत
४१ पः वपुर्धरंमूर्त्तिधारि ॥ २९ ॥ ३१ ॥ त्वच्चरणावनेजनैर्वार्भिः हतमंहोयस्यास्याः भूमे ॥ पुनीतापवित्रीकृता ॥ ३१ ॥ मेमत्तः प्रतीच्छगृहाण ॥ हेअर्हत्तमपूज्यतम ३२

तत्पादशौचंजनकल्मषापहंसधर्मविन्मूर्ध्न्यदधात्सुमंगलं ॥ यद्देवदेवोगिरिशश्चंद्रमौलिर्दधारमूर्ध्नापरयाचभक्त्या ॥ २८ ॥ बलीरुवाच ॥ स्वागतंतेनमस्तुभ्यंब्रह्मन्किंकरवामते ॥ ब्रह्मर्षीणांतपः साक्षान्मन्येत्वार्यवपुर्धरं ॥ २९ ॥ अद्यनः पितरस्तृप्ता अद्यनः पावितंकुलं ॥ अद्यस्विष्टः क्रतुरयंयद्भवानागतोगृहान् ॥ ३० ॥ अद्याग्नयोमेसुहुतायथाविधिद्विजात्मजत्वच्चरणावनेजनैः ॥ हतांहसोवार्भिरियंचभूरहोतथापुनीतातनुभिः पदैस्तव ॥ ३१ ॥ यद्यद्वटोवांछसितत्प्रतीच्छमेत्वामर्थिनंविप्रसुतानुतर्कये ॥ गांकांचनंगुणवद्धाममृष्टंतथान्नपेयमुतवाविप्रकन्यां ॥ ग्रामान्समृद्धांस्तुरगान्गजान्वारथांस्तथार्हत्तमसंप्रतीच्छ ॥ ॥ ३२ ॥ ॥ इति श्रीभागवतेमहापुराणेअष्टमस्कंधेबलिवामनसंवादेअष्टादशोध्यायः १८ श्रीशुकउवाच ॥ इतिवैरोचनेर्वाक्यंधर्मयुक्तंससूनृतं ॥ निशम्यभगवान्प्रीतः प्रतिनंद्येदमब्रवीत् ॥ १ ॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेवसूनृतंकुलोचितंधर्मयुतंयशस्करं ॥ यस्यप्रमाणंभृगवः सांपरायेपितामहः कुलवृद्धः प्रशांतः ॥ २ ॥

इतिश्री श्री शः ॥ ऊनविंशेतुहरिणायाचितेनपदत्रयं ॥ प्रतिश्रुतेनबलिनाजानन्भृगुरवारयत् ॥ दातुः स्तुतिः स्वीयतद्विपरीत्यादिप्रह्वतोचितं वक्तव्यमिति
भिक्षुः स्वाभिज्ञयन्नाहवामनः ॥ १ ॥ वचस्तवैतदितिषोडशभिः हेदेवसांपरायेपारलौकिकेधर्मेपितामहप्रह्लादः प्रमाणं ॥ २ गोपाल

निःसत्वस्पलक्षणं यो द्विजातये याचकाय प्रत्याख्याता न ददामीति वक्ता ॥ कृपणाः स्पलक्षणा प्रथमं प्रतिश्रुत्य यो वा न ददातीति ॥ २ ॥ तीर्थे दानावसरे यत्र य-
स्मिन् युष्मत्कुले ॥ ४ ॥ यतः यस्मिन् जातः ॥ ५ ॥ क्ष्मोद्धारे भूम्या उद्धरणे ॥ ६ ॥ ८ ॥ पराग्दृशः बहिर्दृष्टेः ॥ ९ ॥ अतो हृदये स्थितं मा न द्रक्ष्यतीत्येवं निश्चित्य श्वा-

न त्वेतस्मिन् कुले कश्चिन्निःसत्वः कृपणः पुमान् ॥ प्रत्याख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये ॥ ३ ॥ न सन्ति तीर्थे युधि चार्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः ॥ युष्मत्कुले यद्यशसामलेन प्रह्राद उद्भाति यथोडुपः खे ॥ ४ ॥ यतो जातो हिरण्याक्षश्चरन्नेक इमां महीं ॥ प्रतिवीरं दिग्विजये नाविंदत गदायुधः ॥ ५ ॥ यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतं ॥ आत्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ॥ ६ ॥ निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा ॥ हंतुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ॥ ७ ॥ तमायांतं समालोक्य शूलपाणिं कृतांतवत् ॥ चिंतयामास कालज्ञो विष्णुर्मायाविनां वरः ॥ ८ ॥ यतो यतोऽहं तत्रासौ मृत्युः प्राणभृतामिव ॥ अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥ ९ ॥ एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशेऽसुरेंद्र ॥ श्वासानिलांतर्हितसूक्ष्मदेहस्तत्प्राणरंध्रेण विविग्नचेताः ॥ १० ॥ स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद ॥ क्ष्मां द्यां दिशः खं विवरान् समुद्रान् विष्णुं विचिन्वन्न ददर्श वीरः ॥ ११ ॥ अपश्यन्निति होवाच मयान्विष्टमिदं जगत् ॥ भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् ॥

सानिलेन्तर्हितः सूक्ष्मो देहो यस्य विविग्नमतिकंपितं चेतो यस्य अनुकंपितचित्त इति वा तत्त्वबोधार्थः ॥ १० ॥ न ददर्श अंतः प्रविष्टत्वात् ॥ ११ ॥ पुमान् यतः सकाशान्नावर्त्तते तत
ह्रस्त्रैव नूनं गतः नित्यमहत्वादिति वा तत्त्वबोधार्थः एवं मृत्युपर्यंतमावर्द्धं विष्णौ वैरं यत्कृतवान् तदुचितमेव तस्य प्रतिद्वंद्व महाबलं पराक्रमस्मरणाद् हेमानविजं

भा॰ अ॰
४२

कथं नाम महोऽसुरशिरोमणिः जीवन्नेव कातरवद्वैरमुपेक्षितवानित्याशयेनाह वैरानुबंध एतावानामृत्योर्भवति। देहिनां देहे निवृत्ताभिमानवतां शर
णा अहंमानेनोपबृंहितो मन्युश्च भवत्यवयतो ज्ञानप्रभवः अज्ञाननिवृत्तेः प्राकृपोरूपरत्या गोपांत्वमेवेत्यर्थः॥१३॥ तदेव पूर्वजानां स्मृत्वा तति
नरहितोऽपि पितेति द्विजवेषधारिणो महेन्द्रस्यैव देवाय एतेन तद्विज्ञा इति॥ तद्विद्वानपि स्वेष्टयाचितः स्वं स्वीयमायुर्देवेभ्योऽदात्॥१४॥१५॥ मम पदा संमि
तानीति त्रिविक्रमपदाभिप्रायेणानचान्तवादः तत्रापि त्वपदत्वानवगमात॥१६॥ यावदर्थमेव प्रतिग्रहो यस्य सः॥१७॥ ईश्वरस्यापि याच्ञाप

वैरानुबंध एतावानामृत्योरिह देहिनां। अज्ञानप्रभवो मन्युरहंमानोपबृंहितः॥१३॥ पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्वि
जवत्सलः॥ स्वमायुर्द्विजलिंगेभ्यो देवेभ्योऽदात्स याचितः १४ भवानाचरितान्धर्मानास्थितो गृहमेधिभिः ब्रा
ह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः॥१५॥ तस्मात्त्वत्तो महीमीषद्वृणोहं वरदर्षभात॥ पदानि त्रीणि दैत्येंद्र सं
मितानि पदा मम॥१६॥ नान्यत्ते कामये राजन्वदान्याज्जगदीश्वरात॥ नैनः प्राप्नोति वै विद्वान्यावदर्थप्रतिग्रहः॥१७॥ ब
लिरुवाच॥ अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः॥ त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा॥१८॥ मां वचोभिः स
माराध्य लोकानामेकमीश्वरं॥ पदत्रयं वृणीते योऽबुद्धिमान्द्वीपदाशुषं॥१९॥ न पुमान्मामुपव्रज्य भूयो याचितुमर्हति त

कारश्चोक्तावलेवंधनप्रश्नोत्तरत्वेन तस्य गर्वातिरेकेणाधिक्षेपप्रकारमाह अहो इति त्रिभिः तेवा स्माद्वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे॥२०॥
चो वृद्धानां संमताः त्वं तु बालः बालिशमतिश्च बालिशानामज्ञानामिव मतिर्यस्य अत एव स्वार्थं प्रति यथाबुधः वक्तात स्मृत्वा बाल इव अज्ञो बालिश
मतिश्चेति विशेषः स्वार्थं प्रत्यबुध इति व्यक्तानामेवार्थबुध्येन स्वार्थपरिपूर्णास्मि तवतस्यातिरेकेण स्वार्थाभावादित्यर्थः॥१८॥ अबुधत्वमेवाह॥ मामिति द्वी

राम
४२

पुनरपि निस्पृहत्वमेवाविःकुर्वन्नाह यावंत इति सप्तभिः ॥१॥ नववर्षसमेतेन द्वीपेनापि ॥ सप्तानां द्वीपवराणामिछया ॥१४॥ तस्मायाग्र्यतेन गता इत्यस्माभिः श्रु
ते ॥१३॥ अयं संतुष्टस्तु ब्रह्मा त्रिभिर्लोकैरपि न संतुष्टवन्निति ॥१४॥५॥ आशुशुक्षणिरग्निः ॥१६॥ सिद्धोहं कृतार्थः एतावतैव सर्वस्वापहारसिद्धेरिति गूढोभिप्रायः

श्रीभगवानुवाच ॥ यावंतो विषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियं ॥ न शक्नुवंति ते सर्वे प्रतिपूरयितुं नृप ॥११॥ त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते
नववर्षसमेतेन सप्तद्वीपवरेछया ॥१२॥ सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः ॥ अर्थैः कामैर्गता नांतं तृष्णाया इति नः श्रुतं ॥१३॥ यदृच्छयोप
पन्नेन संतुष्टो वर्त्तते सुखं ॥ नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥१४॥ पुंसोयं संसृतेर्हेतुरसंतोषोर्थकामयोः ॥ यदृच्छयोपपन्नेन संतोषो
मुक्तये स्मृतः ॥१५॥ यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते ॥ तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः ॥१६॥ तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्
षभात ॥ एतावतैव सिद्धोहं वित्तं यावत्प्रयोजनं ॥१७॥ श्रीशुक उवाच ॥ इत्युक्तः स हसन्नाह वांछातः प्रतिगृह्यतां ॥ वामनाय महीं दातुं जग्राह
जलभाजनं ॥१८॥ विष्णवे क्ष्मां प्रदास्यंतमुशना असुरेश्वरं ॥ जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदांवरः ॥१९॥ शुक्र उवाच ॥ एष वैरोचने सा
क्षाद्भगवान्विष्णुरव्ययः ॥ कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥२०॥ प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता ॥ न साधु मन्ये दैत्यानां महानु
पगतोनयः ॥२१॥ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतं ॥ दास्यत्याछिद्य शक्राय मायामाणवको हरिः ॥२२॥ त्रिभिः क्रमैरिमांल्लोकान्विश्वका
यः क्रमिष्यति ॥ सर्वस्वं विष्णवे दत्त्वा मूढ वर्त्तिष्यसे कथं ॥ ॥२३॥

तत्राह ॥ वित्तं हि यावत्प्रयोजनमेव सुखावहं अधिकमसंतोषावहत्वादनर्थः ॥१७॥ द्र अून ... त्रिभिरिति ॥ क्रमता मितिं चेन्न त्राह ॥ सर्वस्वमिति ॥२३॥ हापया
यः अन्नायः ॥२१॥ अन्नायमेवाह एष इति ॥२२॥ नन्वमया परक्रममेव प्रतिश्रुतं नाधिकं तत्राह

भा०अ

५५

तथापि प्रतिश्रुतं संपादनीयमेवेति चेत्तत्राह द्वाभ्यां । एकेन पादन्यासेन भूमिमाक्रममाणस्येत्यर्थः । तार्तीयस्य तृतीयपदन्यासस्य ॥ ३४ ॥ तथापि सर्वस्वदानात्कीर्तिस्तावद्भविष्यतीति चेत्तत्राह । न तद्दानमिति । तपश्छिद्रेण काम्यं कर्म प्रवृत्तं ॥ ३६ ॥ ननु तर्हि प्रतिश्रुतस्यादानेन कथमसत्यं वा स्यात्तत्राह धर्मायेति सार्धैः षड्भिः ॥ ३७ ॥ अत्रापि सत्यानृतव्यवस्थायां । बह्वृचश्रुत्या हि प्रथमं ओमिति सत्यं नेत्यनृतमित्यादिना सत्यानृतयोर्लक्षणमुक्त्वा तन्निन्दाभ्यां सत्यं विहितं अनृतं च निषिद्धं अनंतरं च पराग्वा एतद्रिक्तमक्षरमित्यादिना सत्ये दोषानृते च गुणं वक्त्वा तस्मात्काल एव दद्यात्कालेन न दद्यात्तत्सत्यानृते मिथुनीकरोतीत्युपसं-

क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः । खं च कायेन महता तार्तीयस्य कुतो गतिः ॥ ३४ ॥ निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतं । प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान् ॥ ३५ ॥ न तद्दानं प्रशंसन्ति येन वृत्तिर्विपद्यते । दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ॥ ३६ ॥ धर्माय यशसेऽर्थाय कामाय स्वजनाय च । पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥ ३७ ॥ अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम । सत्यमोमिति यत्प्रोक्तं यन्नेत्याहानृतं हि तत् ॥ ३८ ॥ सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते । वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ॥ ३९ ॥

हारेण वृत्तिसंकटादिषु अनृतमप्युक्तं तां तमिमं श्रुत्यर्थं दर्शयन्नाह । ओमित्यंगीकारेण यत्प्रोक्तं तत्सत्यं नेति यदाह तदेवानृतं ॥ ३८ ॥ तन्न सत्यमीषदनृतं विना न सिध्यतीति श्रुत्याशयेनाह । सत्यं पुष्पफलं विद्याज्जानीयात । आत्मवृक्षस्य देहरूपस्य वृक्षस्य फलं तःगीयते श्रुत्योच्यत इत्यर्थः । पाठांतरे हे अगमं यद्यपि श्रुत्या वाचः सत्यं पुष्पं फलं चेत्युक्तं तथापि वाचो देहनिर्वाहाधीनत्वात्सा आत्मवृक्षस्येति पक्षे तातो मारेणोक्तं भवत्पुष्पफलस्थानीयं सत्यं ततः किमत आह । वृक्षे देहे अजीवति तत्पुष्पफलं न स्यात्सा न स्यादिति पाठे श्रुत्युक्ता या वाचः परामर्शः । देहस्यानृते न रक्षणीयत्वादनृतं तत्वात्मनो देहस्य मूलं ॥ ३९ ॥ रामरामरामसत्य

राम

५५

एतदेव दृष्टान्तेन स्पष्टयति तद्यथा वृक्ष उत्पाटितमूलः शुष्यति । अविरतं च वोद्धृन्नेते पतति च । एवं नष्टमच्छिन्नयस्य सः आत्मा देहः शुष्येत । यद्यपि च श्रुत्या एवमे वाश्रितं वदन्नात्मानमाविर्मूलं करोतीत्येवं निरंशाः नृतं निषिद्धं । तथापि उपसंहारे उपसंहारेण तत्केवलानृतविषयमित्यभिप्रेत्य एवं व्याख्यातं । इयेनत्वेनेनेति वतयैवोक्तः । तथा च श्रुतिः । ॐमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं । स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोः पुष्पं हि फलं वाचः सत्यं वदत्यथै तन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तते एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते तस्मादनृतं न वदेद् दयेतत्त्वेनेनेति एतेन त्वनेन तु अनृतेन दयेन संकरे आत्मानं रक्षेदिति श्रुत्यर्थः ॥ ४० ॥ तर्हि यथा सत्यवचनेन देहो न निर्वहेदिति स्फुरीकर्त्तुं सत्यस्य दोषान् अनृतस्य च गुणानाह य

तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्तते ऽचिरात् । एवं नष्टानृतः सद्यः आत्मा शुष्येन्न संशयः ॥ ४० ॥ पराग्रिक्तमपूर्णं वा अक्षरं
यन्नदोमिति । यत्किंचिदोमिति ब्रूयात्तेन रिच्येत वै पुमान् ॥ ४१ ॥ मिद्रेवे सर्वमोंकुर्वन्नालं कामेन चात्मने । अथैतत्पू
र्णमभ्यात्मं यच्च नेत्यनृतं वचः ॥ ४२ ॥

राग्गीति द्वाभ्यां । यदोमित्यक्षरं तत्पराक्रूरे अर्थं गृहीत्वा वर्ततीति पराकृरिक्तमिति श्रुतिपदस्य व्याख्या न मपूर्णं वेश्यति । तत्तस्मादर्थिने यत्किंचिदोमिति दास्यामीति ब्रूयात्तेन रिच्येत न्यूनो भवेत् ॥ ४१ ॥ किंच मिद्रेवे सर्वमोंकुर्वन्नुदास्यामीत्यंगीकुर्वन्नात्मनेकामेन नालं पर्याप्तो न भवति तस्य भोगो न सिध्यतीत्यर्थः । तथा च श्रुतिः । पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमोंकुर्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यादिति । नेति यदनृतं वचः एतत्पूर्णमर्थव्ययाभावात् अभ्यात्मं चेति चकारात्स्वपः आत्मनोऽभिमुखमन्यस्यार्थमाकर्षतीत्यभ्यात्मं यो हि नित्यं मनन किंचिदपि नाहं किंचिदास्यामीति ब्रूते स हि तेनानृतेन परेषामर्थानामाकर्षन्नीति प्रसिद्धं ॥ ४२ ॥

ननु तर्हि इदमनृतमेव सर्वदा मे व्यस्यात् तेनेत्याह सर्वमिति ॥ तथा च श्रुतिः अथैतत्पूर्णमभ्यात्मं यत्रेति स यत्सर्वं नेति ब्रूयात् पापिका स्य कीर्तिर्जायेत
सैनं तत्रैव हन्यादिति ॥ अतो वृत्तिसंकटादिष्वनृतं न दोषायेत्युपसंहरति ॥ स्त्रीषु प्रोत्साहनेन वशीकारे नर्म्मणि परिहासे विवाहे च वराद्दिस्तवे गवां वा
ब्राह्मणानां च हितार्थे हिंसायां च कस्यचित् प्राणात्यये ॥ तथा च याज्ञवल्क्यः वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ॥ इति अतस्तस्मात्काल एव दद्यात्कालेन
सर्वं नेत्यनृतं ब्रूयात् स दुष्कीर्त्तिः श्वसन्मृतः ॥ स्त्रीषु नर्म्म विवाहे च वृत्त्यर्थे प्राणसंकटे ॥ गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगु
प्सितं ॥ ४३ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे वामनचरित्रे एकोनविंशोऽध्यायः ॥ श्रीशुक उवाच ॥ बलिरेवं गृहपतिः
कुलाचार्येण भाषितः ॥ तूष्णीं भूत्वा क्षणाद्राजन्नुवाचावहितो गुरुं ॥ १ ॥ बलिरुवाच ॥ सत्यं भगवता प्रोक्तं धर्म्मोऽयं गृहमेधिनां
अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥ १ ॥ स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजं प्रतिश्रुत्य ददामीति प्राह्लादिः कि
तवो यथा ॥ ३ ॥ न ह्यसत्यात्परोऽधर्म इति होवाच भूरियं सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरं ॥ ४ ॥ नाहं बिभेमि
निरयान्नाधन्याद्दुःखार्णवात् ॥ न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलम्भनात् ॥ ५ ॥ रामाय कमलायनमः

रद्यान्नत्सत्यानृते मिथुनीकरोतीति ॥ ४३ ॥ इति श्रीभागवते अष्टमे एकोनविंशः ॥ विंशे त्वनृतभीतो मोहात्त्वापि कपटं हरेः ॥ ददावेव ततो विष्णुः सहसा वर्द्ध
ताद्भुतं ॥ १ ॥ भवता त्वया प्रोक्तं सत्यं किं तत् ॥ योऽर्थकामादिकं न बाधेत स गृहमेधिनां धर्म इति ॥ १ ॥ कथं तत्प्रत्याचक्षे निराकरोमि ॥ २ ॥ ४ ॥ न च
प्रत्याख्याने दोषा उक्ताः तत्राह नाहमिति ॥ अधन्यात् दारिद्र्यात् ॥ मृत्योरपि ५ श्रीरामाय नमः

यद्यद्धनादिकं तत्सर्वं संपरेतं मृतं पुरुषं हास्यति त्यक्ष्यत्येव तन्निमित्तं जीवतैव तत्सर्वं यथेष्टं देयमिति भावः ॥ तथापि तावद्दत्रिमकारपरिहारार्थं अर्थदीय
नामिति चेत्तत्राह ॥ तस्येति ॥ विप्रश्चेत्तेनार्थेन रत्नेनापि न तुष्येन्नहि तस्यार्थस्य त्यागे दाने किंनिमित्तेन किंचित ॥ याचितादल्पस्य दाने विप्रस्याप्र
तोषेणार्थदानं व्यर्थमेव स्यादतस्तद्याचितं सर्वं देयं न वा किंचिदिति भावः ॥ ६ ॥ तर्हि न देयमेवेति चेत्तत्राह ॥ श्रेय इति ॥ दुस्त्यजैरसुभिरपि को विकल्पो विचा
रः ॥ ७ ॥ यैरीदृशैः पुरुषैः अनिवर्त्तिभिरियं भूर्बुभुजे उपभुक्ता तेषामिह लोकात्परलोकाच्च भोगानिति वा कालोऽग्रसीत ॥ संग्रहे न वा न तेषु वितैरधिगत

यद्यद्धास्यति लोकेस्मिन् संपरेतं धनादिकं ॥ तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ॥ ६ ॥ श्रेयः कुर्वन्ति भूतानां साधवो
दुस्त्यजासुभिः ॥ दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥ ७ ॥ यैरियं बुभुजे ब्रह्मन् दैत्येन्द्रैरनिवर्त्तिभिः ॥ तेषां कालोऽग्र
सील्लोकान्न यशोधिगतं भुवि ॥ ८ ॥ सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः ॥ न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥
मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः ॥ कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटोरस्य ददामि वां
छितं ॥ १० ॥

ग्रासन्न यशोग्रसीत ॥ अतः कीर्त्तिरेव साध्या नान्यदिति भावः ॥ ८ ॥ देहत्यागादपि धनत्यागे कीर्त्तिर्विशिष्यतीत्याह सुलभा इति तनुत्यज
इति तथा तीर्थे पात्रे आगते ॥ ति दुष्करो धनत्याग एवं मया कार्य इति भावः ॥ ९ ॥ तर्हि निधनत्वेन दैन्यं स्यादिति चेत्तत्राह मनस्विन इति यादृशतादृशा
नामर्थिनां कामोपनयेन कामपूरणेन दुर्गतिर्दैन्यमिति निःयन्नं शोभनं भद्रमेव भवादृशानां तु कामोपनयेन दुर्गतिः शोभनमिति किं पुनर्वक्तव्य
मित्यर्थः ॥ १० ॥

॥रोमांचिततनुर्भूत्वा हर्षास्रुनयनोऽब्रवीत्॥ अद्य मे सफलं जन्म अद्य मे सफलो मखः॥ ॥जीवितं सफलं मे द्य कृतार्थोऽस्मि न संशयः॥

पं॥ ॥फलत्यद्य मे गर्वो याति तः स्वच्छानमेकनेत्रधृक्॥ बलिर्ददौ तदा विष्णोर्मही त्रिपदसंमितां॥ ॥४×

ननु नाथं वदः किं तु विष्णुस्तत्र शत्रुरिति कृतं तर्हि हितं रामेव दास्यामीत्याह ॥ यजतीति परः शत्रुर्वाक्ता ॥१॥ १ ॥ यद्य पियशो न जिहासति तर्हि यदेहमाहत्वाए नाभूमि हरेत ॥ शयीत वा रम्यमन्तः मन्नमम वितेन शयीते ति वाक्ते वोर्थः ॥३॥ अश्रद्धितं श्रुतं जातं श्रद्धं ॥४॥ ६ ॥ मालकं कृत्वा भरणविशेषतः तन्मालाव

यजंति यत्न कृत्वाभिर्यमाहृता मवंतः आम्नायविधानकोविदाः स एष विष्णुर्वरदो नवा परो दास्याम्यमुष्मै क्षितिमीप्सितां ततः ने ॥ ॥ यद्य यमावधर्मेण मां वध्रीयाद्रसनागमं ॥ तथाप्येनं न हिंसिष्ये भीतं ब्रह्म तत्तेरितं ॥२॥ एषवा उन्नमस्तो को नाजहासतितद्यशः ॥ हत्वा पि नाहरे यद्युद्देशाहीत नियतो मया ॥३॥ अकृत ॥ एव मश्रद्धितं शिष्य मनादेश करं गुरुः ॥ शापदैव प्रहितः सत्यसंधमनस्विनं ॥४ ददंपंडितमान्यस्तस्त्वद्वोस्यः स्व उपेक्षया ॥ महाभासना तिगोयत्स्वं अविराडूपमेश्रियः ॥५॥ एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् ॥ वामनाय ददावेना मर्चित्वोदक पूर्वकं ॥६॥ विंध्यावलिस्तदागत्य पत्नी जालकमालिनी ॥ आनिन्ये कलशं हैममवनेजन्य पो भृतं ॥७॥ यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा ॥ अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥८॥ तदासुरेंद्रं दिवि देवतागणाः गंधर्वविद्याधरसिद्धचारणाः ॥ तत्कर्म सर्वेपि गृणंतमार्जवं प्रसूनवर्षैर्ववृषुर्मुदान्विताः ॥९॥ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपुरुषकिंनराजगुः ॥ मनस्विनानेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयं ॥१०॥ तद्वामनं रूपमवर्धताद्भुतं हरेरनंतस्य गुणत्रयात्मकं ॥ भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ॥११॥

ती अवनेजनीनामपां कलशं भृतं पूर्णं ॥७॥१०॥ अवर्धत वा छातः प्रतिगृह्य ताम्पितिवलिना पूर्वं संक्रान्त्वात गुणत्रयमात्मनियस्तत ॥ अतएव भूः खमि त्यादयो यस्मिन्नासत स्थिता वत्तः ॥११॥

ऋत्विगादिसहितोवलिस्तस्यमहतेःकायेएतद्विश्वंददर्श॥११॥तदेवप्रपंचयतिरसामितिपादरौनैःसप्तभिः॥मारुतंगणंवायुसप्तकं इंद्रसेनेनवसेनायस्यसः इं
द्रसेनःस्थितत्वात्॥अचष्टऐक्षत॥१२॥आत्माह्येषंवलिर्मुख्योयेषांतान्आत्ममुख्यान्ऋक्षमालांनक्षत्रपंक्तिं॥१४॥अंगहेराजन्॥समस्तान्रेफान्शब्दान्॥१५॥घोषःध्वनिः॥१६॥

कायेवलेस्तस्यमहाविभूतेःसहर्त्विगाचार्यसदस्यएतत्॥ददर्शविश्वंत्रिगुणंगुणात्मकेभूतेंद्रियार्थाशयजीवयुक्तं॥१२॥रसामचष्टां
घ्रितलेथपादयोर्महींमहीध्रान्पुरुषस्यजंघयोः॥पतत्रिणोजानुनिविश्वमूर्तेरूर्वोर्गणंमारुतमिंद्रसेनः॥१३॥संध्यांविभोर्वास
सिगुह्यऐक्षत्प्रजापतीन्जघनेआत्ममुख्यान्॥नाभ्यांनभःकुक्षिषुसप्तसिंधूनुरुक्रमस्योरसिचर्क्षमालां॥१४॥हृद्यंगधर्मंस्तनयो
र्मुरारेरृतंचसत्यंचमनस्यथेंदुं॥श्रियंचवक्षस्यरविंदहस्तांकंठेचसामानिसमस्तरेफान्॥१५॥इंद्रप्रधानानमरान्भुजेषुतत्कर्णयोः
ककुभोद्यौश्चमूर्ध्नि॥केशेषुमेघान्श्वसनंनासिकायामक्ष्णोश्चसूर्यंवदनेचवह्निं॥१६॥वाण्यांचछंदांसिरसेजलेशंभ्रुवोर्निषेधंचवि
धिंचपक्ष्मसु॥अहश्चरात्रिंचपरस्यपुंसोमन्युंललाटेधरएवलोभं॥१७॥स्पर्शेस्यकामंनृपरेतसांभःपृष्ठेत्वधर्मंक्रमणेषुयज्ञं॥छायासुमृत्युं
हसितेचमायांतनूरुहेष्वोषधिजातयश्च॥१८॥नदीश्चनाडीषुशिलानखेषुबुद्धावजंदेवगणान्ऋषींश्च॥प्राणेषुगात्रेस्थिरजंगमानिसर्वाणि
भूतानिददर्शवीरः॥१९॥सर्वात्मनीदंभुवनंनिरीक्ष्यसर्वेसुराःकश्मलमापुरंग॥सुदर्शनंचक्रमसह्यतेजोधनुश्चशार्ङ्गं॥स्तनयित्नुघोषं॥२०॥

रसेरसने॥१७॥रेतसोरेतसि॥क्रमणेषुपादन्यासेषु॥ओषधिजातयःओषधिजातीः॥१८॥प्राणेषुइंद्रियेषु॥१९॥सर्वात्मनीत्यादिवाक्यांतरंसुदर्शनमित्यादीनामीशानु
प्रतस्थुरितिउत्तरेणान्वयः॥२०॥

विद्याधरः खंगोसिः ॥३१॥ मीनकुंडले मकरकुंडले स्फुरंति किरीटादीनि यस्य सः मधुव्रतानां स्रजो यस्यां तया वनमालया श्रीवत्सादिभिश्चावृतो व्याप्तः ॥३२॥ उरुक्रम त्वमेवाह क्षितिमिति ॥३३॥ द्वितीयं पदं क्रमतो विक्षिपतः त्रिविष्टपं तदीयं किंचिन्मात्रं ज्ञातं तृतीयाय पदे न किंचिदपि तत्र हेतुः उरुक्रमस्यांघ्रिस्त्रिविष्टपादुपर्युपरि गच्छन् महर्जनाभ्यां तपसश्च परं गतः सत्यलोकं गत इति ॥३४॥ इति श्री॰ विंशः एकविंशे परामृष्टिनिषेधेन बलिबंधनं ॥ विश्वनाकृत॰

पर्जन्यघोषो जलजः पांचजन्यः कौमोदकी विष्णुगदा तरस्विनी विद्याधरोसिः शतचंद्रयुक्तस्तूणोत्तमावक्षयसायकौ च ॥ सुनंदमुख्या उपतस्थुरीशं पार्षदमुख्याः सहलोकपालैः ॥३१॥ स्फुरत्किरीटांगदमीनकुंडलः श्रीवत्सरत्नोत्तममेखलांबरैः मधुव्रतस्रग्वनमालयावृतो रराज राजन् भगवानुरुक्रमः ॥३२॥ क्षितिं पदैकेन बलेर्विचक्रमे नभः ॥ शरीरेण दिशश्च बाहुभिः ॥३३॥ पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि ॥ उरुक्रमस्यांघ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥३४॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे विश्वरूपो नाम विंशतितमोऽध्यायः ॥ श्रीशुक उवाच ॥ सत्यं समीक्ष्याब्जभवो नखेंदुभिर्हतस्वधामद्युतिरावृतोभ्यगात् ॥ मरीचिमिश्रा ऋषयो बृहद्व्रताः सनंदनाद्या नरदेव योगिनः ॥१॥

त्वर्षं तस्याख्यापयितुं जने ॥१॥ उरुक्रमस्यांघ्रिस्तपसः परं गत इत्युक्तं ततः किं वृत्तं तदाह सत्यं सत्यलोकं प्राप्तं तमंघ्रिं समीक्ष्याब्जभवोऽभ्यगात् तथा मरीचिमिश्रा ऋषयश्चेति द्वयोरन्वयः कथंभूतोऽब्जभवः हरेरंघ्रेर्नखा एवेंदवः तैर्हता स्वधाम्नो द्युतिर्यस्य सः स्वयं चैतेनावृतः छन्नः हे नरदेव बृहद्व्रता योगिनश्च ॥१॥

ऽंगानि शिक्षादीनि ॥ पुराणानि तत्संहिताश्च ये योगा एव समीरस्तेन दीपितं ज्ञानमेवाग्निस्तेन रंधितं दग्धं कर्म कल्मषं कर्मफलं येषां ते च सर्वे तमंघ्रिवर्यं
हरेर्यस्यांघ्रेः स्मरणानुभावतः अकर्मकं कर्मभिरभिधाय्यं ॥ २ ॥ विष्णोरंघ्रये ॥ ध्येयं यस्य नाभिपंकेरुहं हंससंभवः तस्य विष्णोरंघ्रिं समभ्यर्च्य ॥ ३ ॥ लोकत्रयं

वेदोपवेदा नियमा यमान्विता स्तर्केतिहासांगपुराणसंहिताः ॥ ये चापरे योगसमीरदीपितज्ञानाग्निना रंधितकर्मक-
ल्मषाः ॥ ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकं ॥ २ ॥ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोर्ह-
णोदकं ॥ समर्च्य भक्त्याभ्यगृणाच्छुचिश्रवाः यन्नाभिपंकेरुहसंभवः स्वयं ॥ ३ ॥ धातुः कमंडलुजलं तदुरुक्रमस्य पादाव-
नेजनपवित्रतया नरेंद्र ॥ स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥ ४ ॥ ब्रह्मादयो लोकना-
थाः स्वनाथाय समाहृताः ॥ सानुगा बलिमाजह्नुः संक्षिप्तात्मविभूतये ॥ ५ ॥ तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः
धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलांकुरैः ॥ ६ ॥ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः ॥ नृत्यवादित्रगीतैश्च शंखदुंदुभिनि-
स्वनैः ॥ ७ ॥ जांबवानृक्षराजस्तु भेरीशब्दैर्मनोजवः ॥ विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥ ८ ॥ महीं सर्वां हृ-
तां दृष्ट्वा त्रिपदव्याजयाच्ञया ॥ ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ॥ ९ ॥

निमार्ष्टि पवित्रयति ॥ ४ ॥ संक्षिप्तात्मविभूतये संक्षिप्ता आत्मविभूतिः स्वविभवो येन तस्मै ॥ यथा पूर्वं वामनरूपेण स्थिता येत्यर्थः ॥ ५ ॥ ८ त्रिपदविषया व्याजयाच्ञा कपटयाच्ञा
तया स्वभर्तुर्बलेर्महीं हृतां दृष्ट्वा ऊचुः ॥ ९ ॥ । राम

विप्रस्तत्र हनेवेरतिमार्धेर्विभिः ॥१०॥२॥ अनुचराश्चतेऽश्वास्त्र ॥२॥८॥ अर्थकृत अनुकूलः ॥९॥ यो हि येत्कालमतिवर्तितं प्रमानीश्वरः समर्थोन
नवाश्रुयं ब्रह्मवंधविंल्लमर्यायां विनोवरः ॥ द्विजरूपप्रतिच्छन्नो रेवकार्य चिकीर्षति ॥ १० ॥ अनेन याचमानेन शत्रुणा वरूपिणा
सर्वं हृत्वेन हृतं मन्ये नियतं दंडस्य वाह्निषि ॥ ११ ॥ सत्यव्रतस्य सततं दाक्षितस्य विशेषतः ॥ नानृतं भाषितुं शक्यं ब्राह्मणस्य दयावतः ॥ १२ ॥
तस्मादस्य वधो धर्मो मन्ये शुश्रूषणं च नः ॥ इत्यायुधानि जगृहुर्बलेरनुचराः सुराः ॥ १३ ॥ ते सर्वे वामनं हंतुं शूलपट्टिशपाणयः
अनिच्छतो बले राजन्प्राद्रवन्जातमन्यवः ॥ १४ ॥ तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप ॥ प्रहस्यानुचरा विष्णोः प्रत्यषेधन्
नुदायुधाः ॥ १५ ॥ नंदः सुनंदोऽथ जयो विजयः प्रबलो बलः ॥ कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट् ॥ १६ ॥ जयंतः श्रुतदे
वश्च पुष्पदंतोऽथ सात्वतः ॥ सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीं ॥ १७ ॥ हन्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः ॥ वारयामास संरब्धान्काव्यशापमनुस्मरन् ॥ १८ ॥ हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः ॥ मा युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ॥ १९ ॥
यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये ॥ तं नातिवर्तितुं दैत्याः पौरुषैरीश्वराः पुमान् ॥ २० ॥ यो नो भवाय प्रागासीदभवाय दिवौकसां
स एव भगवानद्य वर्तते तद्विपर्ययं ॥ २१ ॥ बलेन सचिवैर्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः ॥ सामादिभिरुपायैश्च कालं नात्येति वै जनः ॥ २२ ॥
भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः ॥ दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदंति नः ॥ २३ ॥ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति ॥ तस्मात्
कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ॥ २४ ॥ श्रीशुक उवाच ॥ पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः ॥ रसां निर्विविशू राजन्विष्णुपार्षदताडिताः ॥ २५ ॥

भवति ॥२०॥२॥ हे रेनुचरा देवाः देवेनर्द्धैः समृद्धैर्भवद्भिः ॥ २३ ॥ अर्थित्वाय अस्मज्जयाय कल्पाय ॥ २५ २५

विष्णुपाक्षिप्राजनत इति विराय। प्रमोक्ष्विकीर्षितं ज्ञात्वा। अथ मर्थः अस्मात्सर्वस्वापहारेण ममेत्यभिमानं संत्याज्येदानीं देहस्वीकारेणाहंकारमपि त्याज्य यित्वा परमानुग्रहं कर्तुमिच्छति। नचानेन तुल्योऽन्यः कोपि मत्यं स धीरो वा त्यागीति तद्यशः प्रख्यापनार्थं किंचित्कालं ताव पित्व मपीड्तीति प्रमोरभिप्रा यं ज्ञात्वा तं ववंधेति। सोत्यक्तनिभ्रमो माभिषवादिने। ३६। गोरस्तोः द्यावापृथिव्योः। ३७। अप्रोत्थः। ३० मयाऽऽत्मने त्यक्त्वयः। व्यापिनेत्यर्थः। स्वव दिशश्च

अथ तावास्त्रितो ज्ञात्वा विराड्डिप्रविकीर्षितं। ववंध वारुणैः पाशैर्वलिं मत्येक्षनिक्रतोऽनः ३६। हाहाकारो महानासीद्रोदस्योः सर्वतो दिशं। प्रत्युमाणेः शरणं तो विक्षनाध्रुविक्षनाः। ३८। तं वद्धं वारुणैः पाशैर्भगवानाह वामनः। नष्टश्रियं स्थिरप्रज्ञमुदार यशसं नृप। ४०। श्रीभगवानुवाच। पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वया सुर। द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय। ४१। यावत्तपत्यसौ गोभिर्यावदिन्दुः सहोडुभिः। यावद्वर्षति पर्जन्यस्तावती भूरियं तव। ४२। पदैकेन मयाक्रान्तो भूर्लोकः खं दिशस्तनोः स्वर्लोकस्ते द्वितीयेन पश्यतस्ते स्वमात्मना। ४३। प्रतिश्रुत [illegible] मदातुस्ते निरये वास इष्यते। विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः। ४४। वृथा मनोरथस्तस्य दूरः स्वर्गः पतत्यधः। प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलंभते। ४५। विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना। तद्व्यलीकफलं भुङ्क्ष्व निरयं कतिचित्समाः। ४६। इति श्रीभागवते महापुराणेऽष्टमे [illegible] वलिवंधने एकविंशोऽध्यायः।

तनोः तन्वा। तेहं त्वत्तुरीयं सर्वस्वं। ४३। गुरुणाश्रुतेणानुमोदितः सन्। ४४। एवमुक्तेपि निरयपरिहारार्थं स्वर्गादूरीपरिहारार्थं च मनोरथं कुर्वतः प्रत्याह। वृथेति यः प्रति श्रुतस्यादानेन यावकं विप्रलंभते तस्य मनोरथो वृथैव स्वर्गस्तस्य दूर एव सद्याधः पतत्येव। ४५। त्वया चाहं विप्रलब्धः तस्माद्व्यलीकफलं निरयं भुङ्क्ष्वेत्यर्थः। ४६।

भा॰अ॰ ४७

द्वाविंशे तु प्रपन्नः सन् प्रस्थाप्य हृततलं बलिं ॥ सत्वावरान् हरिर्मुक्तिमत्वा ततद्वारपोभवत् ॥ समर्पिततनुवित्तनिर्मलाचलभक्तितः ॥ छलितो बलिना वित्तं त्वमे
वाधिपस्स्मृतः ॥ विप्रकृतः अपकृतः ॥ भिद्यमानः सत्याच्चाल्यमानः ॥ १ ॥ हे उत्तमश्लोकेति कशरंद्गः ममवचईरितं प्रतिश्रुतं तेन तावद्व्यलीकं ॥ तथापि कपटेन
वामनतया भिक्षित्वात् रूपांतरस्याविष्कृतत्वात् एवमपि यदि भवान् व्यलीकं मन्यते तथापि ऋतमेवाहं करोमि मदुक्तं विप्रलंभनं न भवतु मे शीर्ष्णि निजं
तृतीयं पदं कुरु नवत्वहंप्यो विश्वं वक्रांतवतः ॥ तव मे शिरः परपर्याप्तं न भवतीति मन्येथाः वित्तेन वेत्तारहृदयं जातं तर्हि रमाधिकमेव स्यात ॥ वित्तादपि वित्त

शुक उवाच ॥ एवं विप्रकृतो राजन् बलिर्भगवतासुरः ॥ भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥ १ ॥ बलिरुवाच ॥
यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते ॥ करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि मे नि
जं ॥ १ ॥ बिभेमि नाहं निरयात्पदच्युतो न पाशबंधाद्व्यसनाद्दुरत्ययात् ॥ नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमु
द्विजे यथा ॥ ३ ॥ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितं ॥ यं न माता पिता भ्राता सुहृदश्चादिशंति हि ॥ ४ ॥

वतोऽधिकत्वादिति भावः ॥ २ ॥ ननु बंधादपरस्येंधनं रज्जेद्ग्राद्रज्जेर्देनेरपि ॥ आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ इत्यादिवचनाद्दात्मभयपरिहाराय सर्वं त्वं त्यज्यते तत्व
तत्कृतो भीतः सन्नात्मानमर्पयसीति चेत्तत्राह ॥ बिभेमीति ॥ असाधुवादात् अपकीर्तेर्यथाहं भृशमुद्विजे तथा निरयादिभ्यो न बिभेमि ॥ ३ ॥ ननु मया निग्रहात्ते चापराप
कीर्तिर्जातैव नेवेत्याह पुंसामिति ॥ अर्हत्तमेनार्पितं यं दंडं मात्रादयोऽपि न हि आदिशंति नैवार्पयंति हि नैविणा त्वया निगृहीतोऽहं श्लाघ्य एवास्मीति भावः ॥ ४ ॥

राम
४७

नत्वहं देवानां हितैषीना हरणोंतत्राहं तं त्वं नमिति ॥ पारोऽस्मः शत्रुबलेन वर्त्तमानः ॥५॥ शत्रुत्वउन पंक्तानि वास्मानत्तु गृहीतमेवेत्याह यस्मिन्निति
उग्रहो हप्रसिद्धं ॥६॥ अतो नात्र मम लज्जा नापि दुःखमित्याह ॥ तेन गृहणा भवता ॥७॥ किं वयापि दं दुरूपाप माउग्रह ह त्वया कृतः सः त्वं क्रोपात्रत्वे
न न त्वहं मत्तु यह स्य पात्र मित्याश येनाहं पिता महं इति भवदीयानां संमतः ॥ यतस्त्वाविष्कृतः माधुवाद्दोयमस्पात्वमेव परमभ्यास्याय यो यस्सः ॥ अतः भवतो

त्वं ब्रह्मन्परमहंसगणानां पारोऽस्मः परमो गुरुः ॥ योनोऽनेकमहाध्वानां विमर्शं चक्रुणा दिशत् ॥५॥ यस्मिन्नेव गुरौ
त्वंधे नष्टे न विद्धे धेतनः ॥ वदहवो लोभिरेमिति हि यापशुहेकांतयोगिनः ॥६॥ तेनाहं निगृहीतोस्मि भवता
भूरिकर्मणा ॥ बद्धश्च वारुणैः पाशैः नातिव्रीडे न च व्यथे ॥७॥ पितामहो मे भवदीयसंमतः प्रह्लाद आविष्कृतसाधुवा
दः ॥ भवद्विपक्षेण विचित्रवेशसं प्रापितस्त्वत्परमः स्वपित्रा ॥८॥ किमात्मनानेन जहाति योऽन्ततः किं रिक्थहारैः स्वज
नाख्यदस्युभिः ॥ किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥९॥ इत्थं स निश्चित्य पितामहो म
हानगाधबोधो भवतः पराभवः ॥ ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तमः ॥१०॥

सं

विपक्षेण विद्विषा हिरण्यकशिपुना विचित्रवैशसं हिंसां संप्रापितोपि ॥८॥ देहादीनामसारतां निश्चित्य अकुतोभयं ध्रुवं च भवतः पादपद्ममेव प्रपेदे ॥ अथ तस्मा
दहमपि दैवेन तस्यैव मार्गेन तवातिकं नीत इति च तत्र्णोति वपः ॥ ततः आयुषो तेरिक्थहारैः पुत्रैः इह गेहेषु केवलमायुषो व्यय एव न तु सुखं किंचित ॥९॥ सः
प्रसिद्धो महान् स्वपक्षे देत्यकुलं क्षपयतीति तथा तस्मापि ॥१०॥

अथ तस्मादहमपि दैवेन तस्यैव भाग्येन त्वांतिकं नीतः प्रसभबलात्त्याजिताश्रीर्यस्य यया श्रिया स्तब्धमतिः सन्नुमानि रज्जीवितमध्रुवं न बुध्यते कथं
भूतं कृतांतस्यांतिकवार्त्तिकमृत्योः सन्निहितं ॥११॥ राकापतिः पूर्णेंदुः ॥१२॥ अनुजन्मा त्विषं स्यामं ॥१३॥ त्वीकृताहंकारादिरूपापराधस्मरणेन सव्रीडनीचीनम
धोमुखं यस्य सः ॥१४॥ शिरसा नमनमत्रैव उपेत्य मूर्ध्नानानाम ॥ वले स्तत्स्तनमत्युग्रं हृद्याप्लवकेर स्त्रमिश्रविक्लवः ॥१५॥ त्वयैवेति ॥ नैत्यिदं परं एतदीयं त्वया पदं तं

अथाहमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्रीः ॥ इदं कृतांतांतिकवर्त्ति जीवितं ययाध्रुवं स्तब्धमतिर्न बुध्यते
॥११॥ शुक उवाच ॥ तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः ॥ आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥१२॥ तमिंद्रसेनः स्व
पितामहं श्रिया विराजमानं नलिनायतेक्षणं ॥ प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं शुभगर्षभमैक्षत ॥१३॥ तस्मै बलिर्वा
रुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत् ॥ ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥१४॥ स तत्र हा
सीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितं ॥ उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥१५॥ प्रह्लाद उ
वाच ॥ त्वयैव दत्तं पदमैंद्रमूर्जितं हृतं तदेवाद्य तथैव शोभनं ॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात्
॥१६॥ यया हि विद्वानपि मुह्यते यतः तत्को विचष्टे गतिमात्मनो यथा ॥ तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे

किं त्वदीयमेव पुनः स्वीकृतं तत्र शोभनमेव कृतं तत्र हेतुः मन्य इति ॥ यच्छ्रियः आत्ममोहनं तस्माद्विभ्रंशितः ॥१६॥ मोहनत्वमेवाह ॥ य ।ा ॥१७॥ राम
या श्रिया विद्वानपि यतः संयतोपि मुह्यते तत्र श्रियामत्तः कोन्यः स्वमात्मनो गतिं तत्त्वं यथावद्विचष्टे पश्यति ॥ तस्मै महाकारुणिकाय ॥ ॥१७॥ राम

तस्य प्रह्लादस्यानुश्रावितः उवाचेति किंचिद्वक्तुं प्रवृत्तस्यार्थः ॥ तदेव विंध्यावलिरपि वक्तुं प्रवृत्ता । तां च संमानयन् हिरण्यगर्भः कृपयान्तरा स्थितः श्र-
तत्तस्या एव वाक्यं प्रथममवतारयति बद्धं वीक्ष्य ॥ १९ ॥ त्रिजगतः कर्त्तुः प्रभोः पालकस्य सुतस्य तः महत्त्वे स्वर्ग ईश्वरस्य तवान्यत्किमावहंति किं समर्पयंति त्व-
याचं गोपितः कर्त्तृवादः कर्त्तारः स्वितेत्वावयमिति वादमात्रमपि येषां तेषां भावः लोकत्रयं मयार्पितं तस्मै तापादाय देहं मम पुण्यप्रतिमृते मृतेन करोमीति ॥ २ ॥

श्रीशुक उवाच । तस्यानुभावतो राजन्प्रह्लादस्य कृतांजले । हिरण्यगर्भो भगवानुवाच मधुसूदनं ॥ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला । प्रांजलिः प्रणतोपेंद्रं बभाषे वाङ्मुखी नृप ॥ १९ ॥ विंध्यावलिरुवाच । क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोपर ईश कुर्युः । कर्त्तुः प्रभोस्तव किमस्यत आवहंति त्यक्तह्रियस्त्वदवरोपितकर्त्तृवादाः ॥ २० ॥ ब्रह्मोवाच ॥ भूतभावन भूतेश देवदेव जगन्मय । मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहं ॥ २१ ॥ कृत्स्ना तेनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये । निवेदितं च सर्वस्वमात्माविक्लवया धिया ॥ २२ ॥ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां ॥ अप्युत्त-
मां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्त्तिमृछेत् ॥ २३ ॥

स्वाम्याविष्कारेणाब्रुवन् अयं तु बुद्धिनिर्लज्जः स्वयं तत्त्वमेव सर्वस्यापि स्वामी । अतो मंदबुद्धिमेनं केवलं कृपया विमुच्य पालयेति ॥ २० ॥ तदेवं प्रह्लादस्य विंध्यावलेश्च परमार्थोक्त्या प्रसन्नो हरिः । ब्रह्मा तु लोकदृष्ट्यैव विज्ञापयति भूतभावनेति त्रिभिः ॥ २१ ॥ निग्रहानर्हत्वे हेतुः कृत्स्नेति । सर्वस्वमेवाहमात्मेति ॥ २२ ॥ तदेव कैमुत्यन्यायेना-
ह । यस्य तव पादयोः सलिलमात्रमपि प्रदाय सर्वोपि जनः उत्तमां गतिं प्राप्नोति । तस्मै त्वस्मै यः स बलिः त्रिलोकीं दाश्वान् दत्तवान् स आर्त्तिं कथं प्राप्नुयात् ॥ २३ ॥

भा॰ अ॰
५१

तस्य विशः अर्थान् ॥ नन्वर्थापहारः कोयमनुग्रहः तत्राह । यन्मद इति येरर्थैर्मदो यस्य मदः अत एव स्तब्धः अनम्रः सन् मदवज्ञं महतामवहेलनामर्थानामपहार एवानुग्रह इ-
त्यर्थः ॥ २४ ॥ इदं मनुष्यजन्म कथंचिल्लब्धवतो जीवस्य जन्मादिनिमित्तो गर्वो महाहानिकरस्तस्य नाशो मदनुग्रहादेवेत्याह । यदेति द्वाभ्याम् अनीशः परतन्त्रः
स्वकर्मभिर्नानायोनिषु क्लिश्यमानः कदाचिदागत्य मनुष्यजन्म प्राप्य संसरन् ॥ २५ ॥ तत्र पौरुष्यां गतौ जन्मादिभिर्यस्य यदि स्तम्भो न भवेत्तर्हि अयं मदनुग्रह एव ॥ २६ ॥ कथं तर्हि ध्रुवादि-

श्रीभगवानुवाच ॥ ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहम् ॥ यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते ॥ २४ ॥ यदा कदाचिज्जीवात्मा
संसरन्निजकर्मभिः ॥ नानायोनिष्वनीशोयं पौरुषीं गतिमाव्रजेत् ॥ २५ ॥ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्य न भवे-
त्स्तम्भः तत्रायं मदनुग्रहः ॥ २६ ॥ मानस्तम्भनिमित्तानां जन्मादीनां समन्ततः ॥ सर्वश्रेयःप्रतीपानां हन्त मुह्येन्न मत्परः ॥ २७ ॥
एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः ॥ अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥ २८ ॥ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो ब-
द्धश्च शत्रुभिः ॥ ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः ॥ २९ ॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ॥ छलैरुक्तो मया धर्मो
नायं त्यजति सत्यवाक् ॥ ३० ॥ एष मे प्रापितः स्थानं दुष्प्रापममरैरपि ॥ सावर्णेरन्तरस्यायं भवितेन्द्रो मदाश्रयः ॥ ३१ ॥

ष्वपि स्तम्भो दृश्यत इति चेत्तत्राह । मानस्तम्भः अनम्रता तस्य निमित्तभूतानां समन्ततः सर्वश्रेयःप्रतिकूलानां जन्मादीनां सत्त्वेऽपि जन्मादिभिर्निर्वाहं तदेव ब्रह्मन्
मत्परो न मुह्येत ॥ अतो मद्भक्तस्य तु यावान्परोपि स्तम्भोपि ॥ मद्भक्त उत्तम इति तत्र प्रहारस्वरूपमेव तस्यानुग्रहं करोमीति भावः ॥ २७ ॥ अस्य त्विदानीं मत्परत्वात्तत्रापीदृशः
प्राप्तमपि राज्यं स्यामीति वक्तं तस्य मोहाभावमाह एष इति त्रिभिः ॥ २८ ॥ २९ ॥ न त्यजेत्तस्मिन्गुरौ बलेः कश्चित्त्रिः सत्यः स्वपणः प्रमाणमित्यादिना छलैरेव मया धर्म उक्तः तथापि

रम
५१

धर्ममयं न त्यजति यतः सत्यवाक् ॥ ३० ॥ मे मया अहमेवाश्रयः पालको यस्य सः ॥ ३१ ॥

स्थानं प्रापित इति पृष्टः प्रोक्तं तदेव स्थानमाह । तावत्सावर्णिमन्वंतरपर्यंतं सुतलमध्यास्तां त्रिपिवसतित्यर्थः । यद्यस्मिन्नेव सतां श्राध्याद्योमये स्थान
ह भवति ॥ ३१ ॥ एवं ब्रह्माणोऽप्यस्मात्कारणात्परवशः साक्षाद्बलिं प्रत्याह । इंद्रसेनेति चतुर्भिः ॥ ३२ ॥ त्वच्छासनं अतीत्य । गच्छंति त्वच्छासनातिगान् इति तच्चायातान

तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितं । यत्राधयो व्याधयश्च क्लमस्तंद्रा पराभवः । नोपसर्गा निवसतां संभवंति मम
ईक्षया ॥ ३१ ॥ इंद्रसेन महाराज याहि भो भद्रमस्तु ते । सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ॥ ३३ ॥ न त्वामभिभ
विष्यंति लोकेशाः किमुतापरे । त्वच्छासनातिगान् दैत्यान् चक्रं मे सूदयिष्यति ॥ ३४ ॥ रक्षिष्ये सर्वतोहं त्वां सानुगं सपरि
छदं । सदा संनिहितं वीर तत्र मां द्रक्ष्यते भवान् ॥ ३५ ॥ तत्र दानवदैत्यानां संगात्ते भाव आसुरः । दृष्ट्वा मदनुभावं वै सद्यः
कुंठो विनंक्ष्यति ॥ ३६ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे बलिनिग्रहो नाम द्वाविंशतितमोऽध्यायः ॥ श्रीशुक
उवाच ॥ इत्युक्तवंतं पुरुषं पुरातनं महानुभावोऽखिलसाधुसंमतः । बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो गद्गद
याऽगिराब्रवीत् ॥

३४ ॥ तथापि भगवद्वियोगान्नरनिष्ठं तत्प्रत्याह सदेति ॥ ३५ ॥ संगाद्य आसुरो भावः स विनंक्ष्यति ॥ ३६ ॥ इति श्रीअष्टमे द्वाविंशः ॥ त्रयोविंशे व
लोकाते सुतलं सपितामहः । उपेंद्रमादि विंगत्वा पूर्ववन्मोदते हरिः ॥ बाष्पस्य कलाभिर्बिंदुभिः आकुले ईक्षणे यस्य भक्त्या उत्कलः उत्कंठः ॥ १ ॥ राम

भा॰अ॰
५२

अहो त्वच्छरणामस्य महिमा । परमर्थं कृतः समुद्यम एव प्रपन्नानां भक्तानां योऽर्थः तस्य विधौ अभक्तेऽपि त्वया संपादने समाहितः अप्रमत्तः स्थितः । यतः येनोद्य-
मेन लोकपालैरमरैः सत्वप्रधानैरपि अलब्धपूर्वस्त्वदनुग्रहः अपसदे नीचे राजसे मय्यर्पितः । अयं भावः परमेश्वराय त्वय्यहं वराकस्त्रिलोकीं दत्तवानि-
त्येतदास्तां प्रणामोऽपि न सम्यक्कृतः किंतु तदर्थमुद्यममात्रं कृतं तेन च कर्मतदाशापाशानादिकोटिभिरप्यलभ्यस्त्वदनुग्रहः संपादितः अहो त्वच्छरणामप्रभा-

बलिरुवाच ॥ अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः ॥ यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वो-
ऽपसदे सुरेऽर्पितः ॥ २ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः ॥ विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥
३ ॥ एवमिन्द्राय भगवान्प्रत्यानीय त्रिविष्टपं ॥ पूरयित्वादितेः काममशासत्सकलं जगत् ॥ ४ ॥ लब्धप्रसादं निर्मुक्तं पौ-
त्रं वंशधरं बलिं ॥ निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥ ५ ॥ प्रह्लाद उवाच ॥ नेमं विरिञ्चो लभते प्रसादं न श्री-
र्न शर्वः किमुतापरे ये ॥ यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवंद्यैरभिवंदिताङ्घ्रिः ॥ ६ ॥ यत्पादपद्ममकरंदनिषे-
वणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः ॥ तस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥

वाश्चर्यमिति ॥ २ ॥ ३ ॥ अशासत् उपेन्द्रः सन्पालयामास ॥ ४ ॥ ५ ॥ दुर्गपालो विघ्नेभ्यो रक्षिता सर्वतोऽहमित्युक्तत्वात् ॥ ६ ॥ हे शरण्य अस्माश्रयपदस्येवं कुसृतयो दुर्वृत्ताः ख-
लयोनयः उग्रजातयश्च नैव यतस्य भवतो दाक्षिण्यदृष्टेः पदवीं कस्माद्धेतोः प्रणीताः वक्रमानेन विना उपवर्त्तनं दाक्षिण्यं तेन या दृष्टिः तद्विषयतां प्रापिताः ॥

राम
५२

भक्तप्रियत्वादितिचेत् । तर्हिएवंतवेहितंअहोचित्रं ॥ किंतत्सर्वात्मनःसमदृशःस्वभावोविषमइतियत्सर्वात्मत्वेविचरितत्वेहेतुःअपिताअचिंत्या
योगमायातयालीलातयाविसृष्टानिविरचितानिभुवनानियेनतस्यअहोइत्यत्रसंबोधिराषिः ॥ समदृक्त्वेहेतुः । विशारदस्यसर्ववित्तस्य । अथवाभक्तप्रिय
त्वेपितववैषम्यंनास्त्येव ॥ यतःकल्पतरुस्वभावःसभक्तप्रियोपि । नहिकल्पतरुराश्रितानामेवकामान्पूरयन्नपिविषमोभवतीत्यर्थः ॥ ८ ॥ ९ ॥

चित्रंतवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्यविशारदस्य । सर्वात्मनःसमदृशोविषमःस्वभावोभक्तप्रियोयदसि
कल्पतरुस्वभावः ॥ ८ ॥ श्रीभगवानुवाच ॥ वत्सप्रह्लादभद्रंतेप्रयाहिसुतलालयं ॥ मोदमानःस्वपौत्रेणज्ञातीनांसुख
मावह ॥ ९ ॥ नित्यंद्रष्टासिमांतत्रगदापाणिमवस्थितं । मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः ॥ १० ॥ शुकउवाच ॥ आ
ज्ञांभगवतोराजन्प्रह्लादोबलिनासह । बाढमित्यमलप्रज्ञोमूर्ध्न्याधायकृतांजलिः ॥ ११ ॥ परिक्रम्यादिपुरुषंसर्वासुरचमूप
तिः । प्रणतस्तदनुज्ञातःप्रविवेशमहाबिलं ॥ १२ ॥ अथाहोशनसंराजन्हरिर्नारायणोंतिके ॥ आसीनमृत्विजांमध्येसदसिब्रह्म
वादिनां ॥ १३ ॥ ब्रह्मन्संतनुशिष्यस्यकर्मच्छिद्रंवितन्वतः । यत्तत्कर्मसुवैषम्यंब्रह्मदृष्टंसमंभवेत् ॥ १४ ॥ ॥ नारायणसहाय

मद्दर्शनेनयोमहाह्लादःतेनध्वस्तंकर्मबंधनंअज्ञानंयस्य ॥ १० । १३ ॥ कर्मवितन्वतःशिष्यस्ययत्छिद्रमंतरंन्यूनंजातंतत्संतनुविस्तारयसंधत्स्व । यजमानंविना
कथंसंधातव्यमितिनवाच्यमित्याहयत्तदितिब्रह्मदृष्टंब्राह्मणैर्दृष्टमेवसमंभवेत् । किंपुनरनुष्ठितमित्यर्थः ॥ १४ ॥

भा०अ०
५२

भवान्यस्य सर्वेणापि भावेन वस्तुमात्रेण पूजितः तस्य कर्मसु कुतो वैषम्यं कथंभूतः कर्मणामीश्वरः प्रवर्त्तकः यज्ञेशः यज्ञफलदः यज्ञमयश्च पुरुषः ॥१५॥
अतोऽत्र तावत् जायस्मान्मन्त्रतः स्वरादिभ्रंशेन तंत्रतः क्रमादिनाशेन देशतः कालतश्च अर्हतः पात्रतः वस्तुतः दक्षिणादिना यच्छिद्रं न्यूनं तत्सर्वं तवानु

शुक्र उवाच ॥ कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ॥ यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥१५॥ मंत्रतस्तंत्रतश्छिद्रं देशका
लार्हवस्तुतः ॥ सर्वं करोति निश्छिद्रं नामसंकीर्त्तनं तव ॥१६॥ तथापि वदतो भूमन् करिष्याम्यनुशासनं ॥ एतच्छ्रेयः परं पुंसां यत्त
वाज्ञानुपालनं ॥१७॥ अभिनंद्य हरेराज्ञां उशना भगवानिति ॥ यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥१८॥ एवं बलेर्महीं राजन्भि
क्षित्वा वामनो हरिः ॥ ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतं ॥१९॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः ॥ दक्षभृग्वंगिरोमुख्यैः
कुमारेण भवेन च ॥२०॥ कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च ॥ लोकानां लोकपालानामकरोद्वामनं पतिं ॥२१॥ वेदानां सर्वदे
वानां धर्मस्य यशसः श्रियः ॥ मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥२२॥ उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये ॥ तदा सर्वाणि भू
तानि भृशं मुमुदिरे नृप ॥२३॥ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनं ॥ लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥२४॥ प्राप्य त्रि
भुवनं चेंद्र उपेंद्रभुजपालितः ॥ श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥२५॥ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभू
तानि सिद्धा वैमानिकाश्च ये ॥२६॥

कीर्त्तनमात्रमेव निश्छिद्रं करोति ॥१६॥१७॥ इति हरेराज्ञां प्रतिनंद्य बलेर्यज्ञच्छिद्रं समाधत्त संदधे पाठांतरे समाधात्
तां स्वयादिति वानितिशेषः ॥१८॥१९॥ देवाश्च ऋषयश्च भूमिपाश्च सनवसहितैः ॥२०॥२१॥ तत्र लोकानामीशपतित्वे इंद्रोऽस्मिन्नेव ममत्वं ॥ तथापि ॥ वेदादीनां कल्पं पालनेऽसं

राम
५२

२५ ॥ एतच्चरितं सर्वमाख्यातमिति विशेषोक्त्याऽन्यान्यपि मतीत्युक्तं ॥ तानि तर्हि निःशेषाणि वर्णनीयानीत्यपेक्षायामाह पारमिति ॥ उरुवक्रमस्य विक्रम
तो विष्णोर्महिम्नः पारं यो गृणानो भवति स मर्त्यः पार्थिवानि रजांस्यपि विममे गणितवान् स्यात् यथा पार्थिवपरमाणुगणनमशक्यं तथा विष्णोर्गुणगणगण
नमशक्यमित्यर्थः ॥ तथा च मन्त्रः विष्णोर्नु कं वीर्याणीति ॥ एतदेवं मन्त्रान्तरार्थसंवादेनाह ॥ यस्य पुरुषस्य पूर्णस्य महिम्नः पारं मन्त्रदृक् ऋषिर्वशिष्ठ इत्येव

रुमहत्त्वमेतद्विष्णोर्गीयते परमाद्भुतं ॥ धिष्ण्यानि स्वानि ते जग्मुरदितिश्च शशंस वै ॥ २७ ॥ सर्वमेतन्मयाख्यातं भवतः कुलनं
दन ॥ उरुक्रमस्य चरितं श्रोतॄणामघमोचनं ॥ २८ ॥ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि म
र्त्यः किं जायमान उत जात उपैति मर्त्य इत्याह मन्त्रदृगृषिः पुरुषस्य यस्य ॥ २९ ॥ य इदं देवदेवस्य हरेरद्भुतकर्मणः ॥ अवता
रानुचरितं शृण्वन्याति परां गतिं ॥ ३० ॥ क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे ॥ यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः
॥ ३१ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे वामनावतारचरिते त्रयोविंशोऽध्यायः ॥ राजोवाच ॥ भगवञ्छ्रोतुमिच्छामि ह
रेरद्भुतकर्मणः ॥ अवतारकथामाद्यां मायामत्स्यविडम्बनं ॥ १ ॥ ॥ ॥ ॥ रामराम

माह ॥ कथं किं जायमानो जातो वा उपैति न कोऽपीति वस्त्र नं नत्वं नैवाहेत्यर्थः तथा च मन्त्रः न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमापेति ॥ २९ ॥ य इदं
शृण्वन् भवति स परां गतिं याति ॥ ३० ॥ क्रियमाणे तद्यथावत्कृतं विदुः ॥ ३१ ॥ श्री ॥ मे घो शः चतुर्विंशे प्रसङ्गेन मत्स्यरूपस्य शार्ङ्गिणः ॥ लीलोच्यते यतः सत्यव्रतेरक्षा
महार्णवे ॥ तत्तं तत्र निरस्य वैरोनिर्जे स्वर्ग निरसनात् ॥ मत्स्य इच्छति शुच्यो शोलीलया वामनोपमं ॥ मायया मत्स्यविडम्बनं मत्स्यरूपानुकरणं यस्मिन्निरूप्यते ॥

ननु कस्मात् अकस्मादेव मत्स्यावतारश्रवणोत्कण्ठा । श्रीवामनमाहात्म्यादित्याह । यदर्थमिति द्वाभ्यां दुर्मर्षं दुःसहं १ बलेरजुगुप्सितमपि याचकरूपं धृतवानिति युक्तमुक्तं । यदर्थं तु लोकजुगुप्सितं मात्स्यं रूपं धारयत एतन्नो यथावद्वक्तुमर्हसीत्यर्थः २ । ४ सामान्येनावतारप्रयोजनमाह गोविप्रेति ५ जुगुप्सितत्वं परिहरति धियो गुणैर्या उच्चावचानि रूपाणि तेषु निर्गुणत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते । निर्गुणत्वात्तत्कृतः पुनः शु

यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं । तमःप्रकृतिदुर्मर्षं कर्मग्रस्त इवेश्वरः २ एतन्नो भगवन्सर्वं यथावद्वक्तुमर्हसि उत्तमश्लोकचरितं सर्वलोकसुखावहं ३ सू उ वा च इत्युक्तो विष्णुरातेन भगवान्बादरायणिः उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं ४ शुक उवाच गोविप्रसुरसाधूनां छंदसामपि चेश्वरः रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ५ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ६ आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ७ कालेनागतनिद्रस्य धातुः शिशयिषोर्बली मुखतो निःसृतान्वेदान्हयग्रीवोंतिकेहरत् ८ ज्ञात्वा तद्दानवेंद्रस्य हयग्रीवस्य चेष्टितं दधार शफरीरूपं भगवान्हरिरीश्वरः ९ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् नारायणपरोतप्यत्तपः स सलिलाशनः १० योसावस्मिन्महाकल्पे तनयः स विवस्वतः श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः ११

दुःसत्वमेये मत्स्यादिभिराकारैरुच्चावचत्वशंकेति भावः ६ विशेषतो मत्स्यावतारप्रयोजनमाह आसीदिति त्रिभिः ब्रह्मणो निद्रायां भवो ब्राह्मः तेनैव निमित्तेन जातो नैमित्तिकः समुद्रे उपप्लुता निमग्नाः ७ मुखतो निःसृता ८ शफरीरूपं मात्स्यं ७। ९ योजनांतरं बलीलाघकारं वाह तत्र राजर्षिरित्यादि यावत्समाप्ति १० स एव श्राद्धदेव इति ख्यातः ११

कृतमालायां नद्यां ॥१२॥ यत्राहं सुखं निवसामि तत्र शोकः स्थानं कल्पय ॥१८॥ औदंचनोदके पणिकस्थे जले ॥१९॥ २१ रक्षायायोगेनोपायेन यथा मह्यं ह्रदस्था

एकदा कृतमालायां कुर्वतो जलतर्पणं ॥ तस्यांजल्युदके काचित् शफर्येकाभ्यपद्यत ॥११॥ सत्यव्रतोंजलिगतां सहतोयेन भारत ॥ उत्स-
सर्ज नदीतोये शफरीं द्रविडेश्वरः ॥१३॥ तमाह सातिकरुणं महाकारुणिकं नृपं ॥ यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ॥ कथं
विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥१४॥ तमात्मनोनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरं ॥ अजानन् रक्षणार्थाय शफर्याः स मनो दधे ॥१५॥
तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥ कलशाप्सु निधायैनां दयालुर्निन्य आश्रमं ॥१६॥ सा तु तत्रैकरात्रेण वर्धमाना कमंडलौ ॥
अलब्ध्वात्मावकाशं वा इदमाह महीपतिं ॥१७॥ नाहं कमंडलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे ॥ कल्पयौकः सुविपुलं यत्राहं निवसे सुखं ॥
॥१८॥ स एनां तत आदाय न्यधादौदंचनोदके ॥ तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्धत ॥१९॥ न म एतदलं राजन् सुखं वस्तुमुदंचनं ॥ पृथु
देहि पदं मह्यं यत्त्वाहं शरणं गता ॥२०॥ तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे ॥ तदावृत्यात्मना सोयं महामीनोन्ववर्धत ॥२१॥ नैतन्मे
स्वस्तये राजन्नुदकं सलिलौकसः ॥ निधेहि रक्षायोगेन ह्रदे मामविदासिनि ॥२२॥ इत्युक्तः सोनयन्मत्स्यं तत्र तत्राविदासिनि ॥ जलाशये
ऽसंमितं तं समुद्रे प्राक्षिपज्झषं ॥२३॥ क्षिप्यमाणस्तमाहेदमिह मामकरादयः ॥ अदंत्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ॥२४॥ एवं विमोहित-
स्तेन वदता वल्गुभारती ॥ तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् ॥२५॥ नैवं वीर्यो जलचरो दृष्टोस्माभिः श्रुतोपि वा ॥ यो भवान्
योजनशतमह्नाभिव्यानशे सरः ॥२६॥ नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसां ॥२७॥

घ्रेर्वाग्जलं विना नश्येयं तेनोपायेन निधेहि ॥ अविदासिनि अनुपक्षये ॥२२॥ असंमितं तज्जलाशयपरिमितं संतं ॥२३॥ अभिव्यानशे अभिव्याप्तवान् ॥२६॥ ॥२२॥

सुसख्यः सत्यः आत्मा च गतिश्च आश्रयः ॥ १८ ॥ १९ हे अरविंदाक्ष ॥ पृथगात्मनां देहाद्यभिमानिनां सतामितरेषां परोपसर्पणं यथा मृषा भवेत्तथा सर्वसु-
हृत्प्रियात्मनस्तव पदोपसर्पणं मृषा न भवेत् ॥ यद्यस्मात्त्वं भक्तानामद्भुतं वपुरदीदृशः दर्शितवानसि ॥ पाठांतरे पृथगात्मनो भेददर्शिनः सुहृदः अ-

नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ १८ ॥ सर्वे लीलावतारा-
स्ते भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतं ॥ १९ ॥ न तेऽरविंदाक्ष पदोपसर्पणं मृषा भवेत्
सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥ २० ॥ शुक उवाच ॥ इति
ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ॥ विहरन्नेकार्णवः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकांतजनप्रियः
प्रियं ॥ २१ ॥ श्रीभगवानुवाच ॥ सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं
॥ २२ ॥ त्रिलोक्यां लीयमानायां संवर्ताम्भसि वै तदा ॥ उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ॥ २३ ॥

सतामपरिच्छिन्नानां परोपसर्पणं यथा मृषेत्यर्थः ॥ २० ॥ एकांतजना भक्ताः प्रिया यस्य ॥ २१ ॥ अप्ययांभोधौ प्रलयार्णवे भूर्भुवादिकमित्यर्थः ॥ २२ ॥ संवर्ताम्भसि
प्रलयोदके त्वामुपस्थास्यति प्राप्स्यति ॥ २३ ॥

उषधीः आरोपयेति शेषः ॥२५॥ ऋषीणामेवालोके न विचरिष्यसि ॥२६॥ महाहिना वासुकिना ॥२७॥ न मे मयानुगृहीतं प्रसादीकृतं हृदि संप्रश्नैर्वेत्स्य

त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ॥२५॥ आरुह्य बृहतीं नावं विचरिष्यस्य
विक्लवः ॥ एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥२६॥ क्षुभ्यमानां तां नावं समीरेणाबलीयसा ॥ उपस्थितस्य मे शृंगे
निबध्नीहि महाहिना ॥२७॥ अहं त्वामृषिभिः सार्कं सहनावमुदन्वति ॥ विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ॥२८
मदीयं महिमानं च परं ब्रह्मेति शब्दितं ॥ वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥२९॥ इत्युक्त्वा राजानं हरिरन्तरधी
यत ॥ सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत ॥४०॥ आस्तीर्य दर्भान्प्राक्कूलान् राजर्षिः प्रागुदङ्मुखः ॥ निषसाद ह
रेः पादौ चिंतयन्मत्स्यरूपिणः ॥४१॥ ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीं ॥ वर्धमानो महामेघैर्वर्षद्भिः समपद्यत ॥४२॥
ध्यायन्भगवदादेशं ददृशे नावमागतां ॥ तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः ॥४३॥ तमब्रुवन्मुनयः प्रीता राजन्ध्यायस्व
केशवं ॥ स वै नः संकटादस्मादविता शं विधास्यति ॥४४॥ सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे ॥ एकशृंगधरो म
त्स्यो हैमो नियुतयोजनः ॥४५॥ निबध्य नावं तच्छृंगे यथोक्तो हरिणा पुरा ॥ वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनं ॥४६॥

सि त्वया कृतैः संप्रश्नैः मया विवृतं प्रकाशितं सत् ॥ २९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ वरत्रेण दोरकरूपेण ॥ ४६ ॥

भा॰ अ॰
५६

सागरं तारयिष्यंतं तरिष्यनिव सागरं । सत्यव्रतोऽगच्छत्वैन तच्छावहरिमष्टभिः । अत्रेदं चिंत्यं किमयं महाप्रलयो दैनंदिनो वेति तत्र तावद्ब्राह्मो लय इति यो साव
स्मिन् महाकल्प इति चोक्तेर्महाप्रलय इति प्राप्तं । नेति ब्रूमः महाप्रलये पृथिव्यादीनामवशेषासंभवात् यावद्ब्राह्मी निशेत्याद्युक्तिविरोधाच्च अतो दैनंदि
न इति युक्तं नैवेतदपि संगच्छते । सौवर्णे वैरनादृष्टादिभिर्विनात्र कस्माद्देव सप्तमे इति त्रैलोक्यं निमंक्ष्यतीति मत्स्योक्तेरनुपपत्तेः । यच्चोक्तं प्रथमत्वं
धेनूपसंजगृहे मात्स्यं वाक्रूषांतरं संप्लवे । नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुमिति । तदपि तदा दुर्घटं । न हि प्रलयद्वयेपि महीमय्यां नाव्यारोहः संभ
वति । न च चाक्रूषमन्वंतरे प्रलयोस्ति । तथा च सति सप्तमो मनुर्वैवस्वतः इत्यपि दुर्घटं स्यात् तत्वं तावदेषा धीः सर्व इत्यादिनिर्देशोपि न संगच्छते । न हि तदा उषध्या

राजोवाच । अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः । यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो
नः परमो गुरुर्भवान् ॥ ४६ ॥

दीनां सत्वानां वा विशेषः संभवति । तस्मादन्यथा वर्ण्यते । नैवायं वास्तवः कोपि प्रलयः किंतु सत्यव्रतस्य
ज्ञानोपदेशाय आविर्भूतो भगवान् वैराग्यार्थमकस्मात् प्रलयमिव दर्शयामास । यथास्मिन्नेव वैवस्वतमन्वंतरे मार्कंडेयाय दर्शितवान् । तदपेक्षयैव
च महाकल्पे स्मिन्निति विशेषणं संगच्छते तथा च ततः समुद्र उद्वेलः सर्वतः समदृश्यतेति तस्यैव तथा दर्शनमुक्तमिति एषा दिक् । प्रकृतं स्तोत्रं व्याख्या
स्यामः । तत्र नानायोनिषु संसरतः स्वस्य भगवत्कृपयैव तत्प्राप्तिं दर्शयन् तमेव प्रार्थयते अनादिर्याऽविद्या तया उपहता आवृता आत्मसंविद्येषां ते अत एवावि द्यामू
लैः संसारपरिश्रमेणातुराः इह संसारे यदृच्छया यदनुग्रहादेव उपाश्रिताः आश्रिताः सतो यं प्राप्नुयुः स भवानेव साक्षान्नो गुरुः सन् ग्रंथिविच्छेदाद्विमुक्तिदो ५६
गणान्वयः ॥ ४६ ॥

नन्वैराग्यं विना कुतो मुक्तिः तर्हि तत्सत्वात्तस्यैवैकफलत्वात्तस्यैवामादिशेत्याशंक्यपेनाह । अत्र घोषयजनः अहंत्वं यथा भवति तथा कर्मसमीहिते । तांस्त
स्वेच्छा नो हृदयस्य ग्रंथिं संभिद्यात् । यतः स एव परो गुरुः ॥ ४८ ॥ ननु यत्तदानादिभिः सत्वशुद्धिं विना कथं ग्रंथिर्भेद्यः स्यात् तत्राह यस्य सेवैव मा
त्मनो मनसो मलं तं भाविविजत्यात् । एषः प्रहीनमलः निजं वर्णं विस्वरूपं भजेत ईशो नो गुरुर्भूयात् । यतः स एव गुरोरपि परमो गुरुः मलहाने दृष्टान्तः
रुद्ररोदनं रजतं । यद्रोरीनडड स्य रुद्रत्वे परस्ते त्वविशीयतं तद्रजतं हिरण्यमभवदिति श्रुतेः । तद्यथाग्नेः संपर्कात् मलं जहाति स्ववर्णं भजते न त

जनोऽबुधोऽयं निजकर्मबंधनः ॥ सुखेच्छया कर्मसमीहतेऽसुखं ॥ यत्सेवया तां विधुनोत्यसन्मतिं ग्रंथिं स भिद्या
द्धृदयं स नो गुरुः ॥ ४८ ॥ यत्सेवयाग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः ॥ भजेत वर्णं निजमेष सो
ऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ॥ ४९ ॥ न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयं ॥ कर्तुं समेताः
प्रभवंति पुंसः तमीश्वरं त्वां शरणं प्रपद्ये ॥ ५० ॥ अचक्षुरंधस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः
त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सतां ॥ ५१ ॥

क्षालनादिभिः तथा न यज्ञादिभिर्मलत्यागः किंतु त्वत्सेवयैव
वं तेषां तु पूर्वागत्वमेवेति भावः ॥ ४९ ॥ परमेश्वरत्वं परमगुरुत्वं च प्रपंचयन्नाह ॥ यस्य प्रसादस्यायुतभागः तस्य लेशमात्रमपि अन्ये देवादयः सर्वे समेता अपि
स्वयं तन्निरपेक्षाः संतः कर्तुं न प्रभवंति ॥ ५० ॥ तदेव दृष्टांतेन स्पष्टयन्नाह ॥ अचक्षुरिति अविदुषो जनस्य अबुधः विद्वान् गुरुस्तथैवार्कप्रकाशवत्त्वमेव दृक् ज्ञाता
नयस्य सः अर्कदृक् । यतः सर्वदृशां सर्वेंद्रियाणां समीक्षणः प्रकाशकः अत एव स्वगतिं बोद्धुमिच्छद्भिः नोऽस्माभिर्गुरुर्वृतोऽसि ॥ ५१ ॥

भा॰अ॰ ५७

किंच प्राकृतो गुरुरनर्थहेतुरित्याह जन इति । आदिशते उपदिशति असतीं मतिं अर्थकामादिमतिं तमः संसारं ॥ ५२ ॥ ननु तर्हि सर्वोपि लोकः मामेव किं नोपसर्पति अज्ञानादित्याह त्वमिति प्रियश्चासावीश्वरश्च ॥ ५३ ॥ अहं तं त्वामेव शरणं यामीत्याह तं त्वामिति प्रतिबोधनाय उपदेशाय अर्थदीपैः परमार्थप्रकाशकैः

जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः । त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदं ॥ ५२ ॥
त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः । तथापि लोको न भवंतमंधधीर्जानाति संतं हृदि बद्धकामः ॥ ५३ ॥ तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय । छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्विवृणु स्वमोकः ॥ ५४ ॥ श्रीशुक उवाच । इत्युक्तवंतं नृपतिं भगवानादिपूरुषः । मत्स्यरूपी महांभोधौ विहरंस्तत्वमब्रवीत् ॥ ५५ ॥
पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीं । सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥ ५६ ॥ अश्रौषीदृषिभिः साकमात्मतत्वमसंशयं । नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनं ॥ ५७ ॥ अतीतप्रलयापाये उत्थिताय स वेधसे । हत्वासुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥ ५८ ॥ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः । विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः ॥ ५९ ॥

हृदये भवान् ग्रंथीन् अहंकारादीन् अहंकारादीन् स्वमोकः स्वरूपं विवृणु प्रकाशय ॥ ५४ ॥ नृपतिं प्रति ॥ ५५ ॥ पुराणसंहितां मत्स्यपुराणं अशेषतः अब्रवीदित्यनुषंगः ॥ ५६ ॥ ॥ ५७ ॥ अतीतः पूर्वो यः प्रलयः तस्यापाये अवसाने ॥ ५८ ॥ ॥ ५९ ॥

सीताराम सहाय

राम ५७

भा· स्कं
५८

६· योयंहरेरवतारस्तेयः प्रकीर्त्तयेत ॥ ६० ॥ सत्यव्रता नांसत्यव्रतस्यर्क्षाषिराणावच्छत्रिराणोगच्छतीतिवाह्लिग

सत्यव्रतस्यराजर्षेर्मायामत्स्यस्यशार्ङ्गिणः ॥ संवादंमहदाख्यानंश्रुत्वाडच्येतकिल्बिषात

अवतारेहरेर्योयंकीर्त्तयेदन्वहंनरः संकल्पा स्तस्यसिध्यंतिसर्वानिपरमांगतिं ॥ ६१ ॥ प्रल

यपयसिधातुःसुप्तशक्तेर्मुखेभ्यःश्रुतिगण मुपनीतंप्रत्युपादत्तहत्वा ॥ दितिजमकथ

यद्योब्रह्मसत्यव्रतानांतमहमखिलहेतुंजि ह्ममीनंनतोस्मि ॥ ६२ ॥ इतिश्रीभागवतेम

हापुराणेऽष्टमस्कंधेमत्स्यावतारवर्णनं चतुर्विंशतितमोध्यायः ॥ २४ ॥ श्रीराम

समवायाद्दृढवचनेजिह्नमीनमायामत्स्य ॥ ६२ ॥ ६ ॥ मे मो यः ॥ नारायणमहापरहना

राम
५८

अष्टमः पत्रे ५८

श्रीगणेशाय नमः ॥ गुणांयं गुणावतारा वा श्रेयेरणाते करुणानिधिम् ॥ तमहं शरणं यामि परमानंदमाधवम् ॥१॥ त्रिगुणाष्टभिरध्यायैर्वैवस्वतम

राजोवाच ॥ मन्वंतराणि सर्वाणि त्वयोक्तानि श्रुतानि मे ॥ वीर्याणि नंतवीर्यस्य हरेस्तत्र कृतानि च ॥१॥ योसौ
सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ॥ ज्ञानं योतीतकल्पांते लेभे पुरुषसेवया ॥२॥ स वै विवस्वतः पुत्रो मनु
रासीदिति श्रुतम् ॥ त्वत्तस्तस्य सुताः प्रोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥३॥ तेषां वंशं पृथक् ब्रह्मन्वंशानु
चरितानि च ॥ कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥४॥ ये भूता ये भविष्याश्च भवंत्यद्यतनाश्च ये ॥ ते
षां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥५॥ सूत उवाच ॥ एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनां ॥ पृ
ष्टः प्रोवाच भगवान् शुकः परमधर्मवित् ॥६॥ शुक उवाच ॥ श्रूयतां मानवो वंशः प्राचुर्येण परंतप ॥ न शक्यते वि
स्तरतो वक्तुं वर्षशतैरपि ॥७॥

तान्वयः ॥ नवमे कुलसत्कीर्तिप्रसंगाय वितन्यते ॥१॥ एवमुक्तोष्टमस्कंधे सधर्मः सत्वशोधकः कर्तृपाल
कवक्त्रादि सद्वादीनां निरूपणैः ॥२॥ सद्धर्मशुद्धसत्वानां मतरंगे सत्कथा ॥ सूर्यसोमान्वयाख्यानैरधुना संगतोच्यते ॥४॥ तत्र त्रयोदशभिरध्यायैः सूर्यवंशो व
र्ण्यते ॥ एकादशभिरध्यायैः सोमवंशस्ततः परैः ॥ तत्राद्यप्रथमेध्याये वैवस्वतमनोस्तावत् ॥ सोमवंशप्रवेशोत्र सुद्युम्नस्य विधीयते ॥ उक्तानुवादपूर्वकं वैवस्वतम

अनुक्तं वंशं वक्तुं पूर्वोक्तमेव तावद्दर्शयति तत्र वर्णकं श्रीनारायणमारभ्यानु ... यतिप्रावरेषामिति पंचभिः ॥८॥ ११ नाभागं चेति पाठेपि नभग एव नाभागः
॥१२॥ दिष्टपौत्रस्य रुक्मसूत्रस्य इति वैसातिरुधात्पुरूरवः प्रभृति सोमवंशसंचारं वक्तुं स एवं स्तावमिलोपाख्यानमाह अप्रजस्य मनोः पूर्वमित्यादिनाध्यायावशेषा

परावरेषां भूतानामात्मा यः पुरुषः परः ॥ स एवासीदिदं विश्वं कल्पांतेऽन्यन्न किंचन ॥८॥ तस्य नाभेः समभवत्पद्मकोशो हिरण्म
यः ॥ तस्मिन्जज्ञे महाराज स्वयंभूश्चतुराननः ॥९॥ मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः ॥ दाक्षायिण्यां ततोऽदित्यां विवस्वा
नभवत्सुतः ॥१०॥ ततो मनुः श्राद्धदेवः संज्ञायामास भारत ॥ श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ॥११॥ इक्ष्वाकुनृगशर्याति
दिष्टधृष्टकरूषकान् ॥ नरिष्यंतं पृषध्रं च नाभागं च कविं विभुः ॥१२॥ अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान्किल ॥ मित्रावरुणयोरि
ष्टिं प्रजार्थमकरोद्विभुः ॥१३॥ तत्र श्रद्धा मनोः पत्नी होतारं समयाचत ॥ दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥१४॥ प्रेषितो
ऽध्वर्युणा होता ध्यायंस्तत्सुसमाहितः ॥ हविषि व्यचरत्तेन वषट्कारं गृणन्द्विजः ॥१५॥ होतुस्तद्व्यभिचारेण कन्येला नाम साभ
वत् ॥ तां विलोक्य मनुः प्राह नातितुष्टमना गुरुम् ॥१६॥ भगवन्किमिदं जातं कर्म वो ब्रह्मवादिनाम् ॥ विपर्ययमहो कष्टं मैवं स्या
द्ब्रह्मविक्रिया ॥१७॥ यूयं मंत्रविदो युक्तास्तपसा दग्धकिल्बिषाः ॥ कुतः संकल्पवैषम्यमनृतं विबुधेष्विव ॥१८॥

यसमाप्ति ॥१३॥ पूर्वमिक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक् दुहित्रर्थं मम कन्या भवेत्तथा यजेति होतारं सम्यगयाचत पय एव व्रतमाहारो नियतो यस्याः ॥१४॥
अध्वर्युणा होतर्यजेति प्रेषितो होता तेन गृहीते हविषि समिति तत्तया प्रार्थितं ध्यायन्व्यचरत् अयजत् पाठांतरे तत आध्यायन्वाचा वषट्कारं गृणन्वौषडि
त्युच्चारयन् ॥१५॥ ब्रह्मविक्रिया मंत्राऽन्यथात्वम् ॥१७॥

गं

८

भा॰ न॰ प्रपितामहो वसिष्ठः ॥१७॥ १८॥ विगततिमिरं आभासः शून्यस्य प्रकाशः स्वयाहतया भूतादिशः उर्वीतः ॥१९॥ २०॥ प्रसंगं रत्याभिनिवेशं स्त्रीप्रसंगर

१

तन्निशम्य वचस्तस्य भगवान्प्रपितामहः॥ होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनम्॥ ९॥ एतत्संकल्पवैषम्यं होतुस्ते व्यभिचारतः तथापि साधयिष्ये ते सुप्रजस्त्वं स्वतेजसा॥ १०॥ एवं व्यवसितो राजन्भगवान्स महायशाः॥ अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया॥ ११॥ तस्मै कामवरं तुष्टो भगवान्हरिरीश्वरः॥ ददाविलाभवत्तेन सुद्युम्नः पुरुषर्षभः॥ १२॥ स एकदा महाराज विचरन्मृगयां वने॥ वृतः कतिपयामात्यैरश्वमारुह्य सैंधवम्॥ १३॥ प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान्॥ दंशितोनुमृगं वीरो जगाम दिशमुत्तरां॥ १४॥ सकुमारो वनं मेरोरधस्तात्प्रविवेश ह॥ यत्रास्ते भगवान्शर्वो रममाणः सहोमया॥ १५॥ तस्मिन्प्रविष्ट एवासौ सुद्युम्नः परवीरहा॥ अपश्यत्स्त्रियमात्मानमश्वं च वडवां नृप॥ १६॥ तथा तदनुगाः सर्वे आत्मलिंगविपर्ययम्॥ दृष्ट्वा विमनसोऽभूवन्वीक्षमाणाः परस्परम्॥ १७॥ राजोवाच॥ कथमेवं गुणो देशः केन वा भगवन्कृतः॥ प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः॥ १८॥ शुकउवाच॥ एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः॥ दिशो वितिमिराभासाः कुर्वंतः समुपागमन्॥ १९॥ तान्विलोक्यांबिका देवी विवासा व्रीडिता भृशं॥ भर्तुरंकात्समुत्थाय नीवीमाश्वथ पर्यधात्॥ २०॥ ऋषयोपि तयोर्वीक्ष्य प्रसंगं रममाणयोः॥ निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमम्॥ २१॥ तदिदं भगवानाह प्रियायाः प्रियकाम्यया॥ स्थानं यः प्रविशेदेतत्स

२

र्शनकलुषितमनसः संतप्तस्त्वसंगमत्यं नरनारायणाश्रमं प्रययुः ॥ २१॥ २२॥ गोपालकस्य वेयोषिद्भवेदिति ॥ २२॥

राम
१

प्रसंगिकमुक्त्वाप्रकृतमनुवर्णयति साचेति ॥ अनुचरीसंयुक्तेतिविचचारेत्यभूतपूर्वगत्यापुंल्लिंगनिर्देशः ॥ ३२ ॥ आशयन्इच्छन् ॥ ३७ ॥ नाभ्यनंदनस्त्रीत्वेलज्जा

तत ऊर्ध्वं वनं तद्वै पुरुषा वर्जयंति हि ॥ सा चानुचरसंयुक्ता विचचार वनाद्वनं ॥ ३३ ॥ अथ तामाश्रमाभ्याशे चरंतीं प्रमदोत्तमां ॥ स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान्बुधः ॥ ३४ ॥ सापि तं चकमे सुभ्रूः सोमराजसुतं पतिं ॥ स तस्यां जनयामास पुरूरवसमात्मजं ॥ ३५ ॥ एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ॥ सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम ॥ ३६ ॥ स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः ॥ सुद्युम्नस्याशयन्पुंस्त्वमुपाधावत शंकरं ॥ ३७ ॥ तुष्टस्तस्मै स भगवानृषये प्रियमावहन् ॥ स्वां च वाचमृतां कुर्वन्निदमाह विशांपते ॥ ३८ ॥ मासं पुमान्स भविता मासं स्त्री तव गोत्रजः ॥ इत्थं व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीं ॥ ३९ ॥ आचार्यानुग्रहात्कामं लब्ध्वा पुंस्त्वं व्यवस्थया ॥ पालयामास जगतीं नाभ्यनंदन्स्म तं प्रजाः ॥ ४० ॥ तस्योत्कलो गयो राजन्विमलश्च त्रयः सुताः ॥ दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ॥ ४१ ॥ ततः परिणते काले प्रतिष्ठानपतिः प्रभुः ॥ पुरूरवस उत्सृज्य गां पुत्राय गतो वनं ॥ ४२ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे इलोपाख्यानं नाम प्रथमोऽध्यायः ॥ श्रीशुक उवाच ॥ एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते ॥ पुत्रकामस्तपस्तेपे यमुनायां शतं समाः ॥ १ ॥ ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुं ॥ इक्ष्वाकुपूर्वजान्पुत्रान्लेभे स्वसदृशान्दश ॥ २ ॥

यामासमासंनिलीयावस्थानात् ॥ ४० ॥ इति भागवतटीकायां नवमस्कंधे प्रथमोऽध्यायः ॥ १ ॥ द्वितीये मनु ॥
पुत्राणां द्वावपुत्रौ विरागतः ॥ करूषकादिपंचानां वंशानाह पृषध्रक्रमात् ॥ इक्ष्वाकुः पूर्वजो येषां तान् ॥ १ ॥

भा० न
३

तत्र पृषध्रस्य वंशो नास्तीति सहेतुकमाह पृषध्रस्त्वित्यादिना कविः कनीयानित्यतः प्राक्तनेन ग्रंथेन ॥ खड्गपाणेः प्रतन्त्रिश्चतो जाग
रणं विदधतः सन्ततं देवव्रतं यस्य यत्तः अवहितः सन् गाः पालयामास ३ ॥ शार्दूलो व्याघ्रः ४ प्रलीना उडुगणा यस्मिन् तस्मिन् समये बभ्रोः

पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः ॥ पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ॥ ३ ॥ एकदा प्राविशद्गोष्ठं शार्दू
लो निशि वर्षति ॥ शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ॥ ४ ॥ एकां जग्राह बलवान् सा चुक्रोश भयातुरा ॥ तस्यास्तत्क्र
न्दितं श्रुत्वा पृषध्रोऽभिससार ह ॥ खड्गमादाय तरसा प्रलीनोडुगणे निशि ॥ अजानन्नवधीद्बभ्रोः शिरः शार्दूलशंक
या ॥ ६ ॥ व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः ॥ निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ॥ ७ ॥ मन्यमानो हतं व्याघ्रं
पृषध्रः परवीरहा ॥ अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥ ८ ॥ तं शशाप कुलाचार्यः कृतागसमकामतः ॥ न
क्षत्रबंधुः शूद्रस्त्वं कर्मणा भवितामुना ॥ ९ ॥ एवं शप्तस्तु गुरुणा प्रत्यगृह्णात्कृतांजलिः ॥ अधारयद्व्रतं वीर ऊर्ध्वरेता
मुनिप्रियं ॥ १० ॥ वासुदेवे भगवति सर्वात्मनि परेऽमले ॥ एकांतित्वं गतो भक्त्या सर्वभूतसुहृत्समः ॥ ११ ॥ विमुक्तसंगः शांतात्मा
संयताक्षोऽपरिग्रहः ॥ यदृच्छयोपपन्नेन कल्पयन्वृत्तिमात्मनः ॥ १२ ॥ आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः ॥ विचचार म
हीमेतां जडांधबधिराकृतिः ॥ १३ ॥ एवं वृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितं ॥ तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः ॥ १४ ॥ कविः क
नीयान्विषयेषु निस्पृहो विसृज्य राज्यं सह बंधुभिर्वनं ॥ निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोरवयाः परं गतः ॥ १५ ॥

कपिलायाः गोः ६ गां कामतो न जघ्नेति ज्ञापयितुं रक्तस्रवणदर्शनं ७ व्युष्टायां प्रभातायां क्षत्रबंधुरपि त्वं न भविता अपितु शूद्रो भवितेति ९ ॥

गतो

उपयुक्तकरणः दग्धदेहः १४ कवेरपि वंशो नास्तीत्याह
कविरिति बंधुभिः सह राज्यं विसृज्य १५

राम
३

१६ ब्रह्मभूयं ब्राह्मणत्वात् नृगस्य वंशः पुत्रः सुमतिः ततो भूतज्योतिः ततो वसुः ॥ १७ ॥ ओघवतः पिता ॥ तत्पुत्रो ओघवानिति वेत्यर्थः ॥ ८ ॥ तद्देवं त्रिभिः
श्लोकैः करूषाद्युत्पत्तिर्नाभागान्वंशा उक्ताः नरिष्यंतस्य वंशमाह चित्रसेन इति सार्द्धैस्त्रिभिः ततः पश्चादेव दिष्टाधिकं यस्मात् तत्राद्वंतर्य ततः इत्यादि

करूषान्मानवादासन् कारूषाः क्षत्रजातयः ॥ उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥ १६ ॥ धृष्टाद्धार्ष्टमभूत्क्षत्रं ब्रह्मभू-
यमतं हितौ ॥ नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः ॥ १७ ॥ वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता ॥ कन्या चौघवती
नाम सुदर्शन उवाह ताम् ॥ १८ ॥ चित्रसेनो नरिष्यंताद्दक्षस्तस्य सुतोऽभवत् ॥ तस्य मीढ्वांस्ततः कूर्च इंद्रसेनस्ततस्सुतः ॥ १९ ॥ वीति-
होत्रस्त्विंद्रसेनात्तु तस्य सत्यश्रवा अभूत् ॥ उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ॥ २० ॥ ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत्सु-
तः ॥ कानीन इति विख्यातो जातूकर्ण्यो महानृषिः ॥ २१ ॥ ततो ब्रह्मकुलं जातमग्निवेश्यायनं नृप ॥ नरिष्यंतान्वयः प्रोक्तो दिष्ट-
वंशमतः शृणु ॥ २२ ॥ नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः ॥ भलंदनः सुतस्तस्य वत्सप्रीतिर्भलंदनात् ॥ २३ ॥ वत्सप्रीतेः
सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः ॥ खनित्रः प्रमतेस्तस्माच्चाक्षुषोऽथ विविंशतिः ॥ २४ ॥ विविंशतिसुतो रंभः खनिनेत्रोऽस्य धार्मिकः
करंधमो महाराजस्तस्यासीदात्मजो नृप ॥ २५ ॥ तस्यावीक्षित्सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् ॥ संवर्तोऽयाजयद्यं वै महायोगी गिरःसुतः ॥
२६ ॥ मरुत्तस्य यथा यज्ञो न तथान्यस्य कस्यचित् ॥ सर्वं हिरण्मयं त्वासीद्यत्किंचिच्चास्य शोभनं ॥ २७ ॥ स्य

परं व्याख्येयं ॥ यत्र तत्र श्रन्यत्वं तत्र पूर्वस्य परस्य वा तद्विषयादिभिर्व्याख्येयं ॥ १९ ॥ २० ॥ अग्निवेश्यपदवत् कानीन इति जातूकर्ण्य इति च विख्यातः ॥ २१ ॥ २ ॥ दिष्टस्य पुत्रो
नाभागो वक्ष्यमाणान्नाभागादन्य इति प्रोक्तिः श्रुतिहासार्थ मरुत्वादमात्रे ॥ २५ ॥ अंगिरसः सुतो महायोगी संवर्तो यमहायज्ञत् मरुत्तः ॥ २६ ॥ अस्य यत्किंचित्पात्रा

ठ

कूर्च

८ [illegible]

भा०न
४

अमाद्यन्न अहृष्यत् ॥ २८ ॥ यतः यस्मात् तृणबिंदोः पुत्रा अभवन् ३१ शतानेवाह विशाल इति तस्य तृणबिंदोः सुताः ३३ सहदेवजेन सहिताः पाठांतरे ॥ नामान्यत्वमात्रं अर्थस्तु स एव ३४ वैशालभूपालाः विशालस्यान्वये जाताः ३६ ॥ इति नवमे द्वितीयः ॥ तृतीये मनुपुत्रस्य शर्यातेः ॥

अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्विजातयः ॥ मरुतः परिवेष्टारो विश्वेदेवाः सभासदः ॥ २८ ॥ मरुत्तस्य दमः पुत्रस्तस्यासीद्राज्यवर्द्धनः ॥ सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः ॥ २९ ॥ तत्सुतः केवलस्तस्मात् बंधुमान्वेगवांस्ततः ॥ बुधस्तस्याभवद्यस्य तृणबिंदुर्महीपतिः ॥ ३ ॥ तं भेजेऽलंबुषा देवी भजनीयगुणालयं ॥ वराप्सरा यतः पुत्राः कन्या चेडविडाभवत् ॥ ३१ ॥ तस्यामुत्पादयामास विश्रवा धनदं सुतं ॥ प्रादाय विद्यां परमामृषिर्योगेश्वरात्पितुः ॥ ३२ ॥ विशालः शून्यबंधुश्च धूम्रकेतुश्च तत्सुताः ॥ विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीं ॥ ३३ ॥ हेमचंद्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः ॥ तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः ॥ ३४ ॥ कृशाश्वात्सोमदत्तोऽभूद्योऽश्वमेधैरिडस्पतिं ॥ इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ॥ ३५ ॥ सौमदत्तिस्तु सुमतिस्तत्पुत्रो जनमेजयः ॥ एते वैशालभूपालास्तृणबिंदोर्यशोधराः ॥ ३६ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे द्वितीयोऽध्यायः ॥ श्रीशुक उवाच ॥ शर्यातिर्मानवो राजा ब्रह्मिष्ठः संबभूव ह ॥ यो वा अंगिरसां सत्रे द्वितीयमहरूचिवान् ॥ १ ॥ सुकन्या नाम तस्यासीत्कन्या कमललोचना ॥ तया सार्द्धं वनगतो ह्यगमच्च्यवनाश्रमं ॥ २ ॥

कीर्त्यते त्वयः यत्र सौकन्यमाख्यानं रैवतं च महद्भुतं ॥ ब्रह्मिष्ठः वेदार्थतत्त्वज्ञः तदेवाह यो वा इति ॥ द्वितीयमहः द्वितीये अह्नि क्रियमाणं कर्म मंत्रं विवान् उवाच तत्र स्वं शंसतानवर्हिरानतं इत्यादिना वक्ष्यति ॥ १ ॥ आरोता वल्कन्यावन्नात माह सुकन्या नामेत्यादिना ॥ २ ॥ ॥ गोविंदश्रम

राम
४

५ ॥ भार्गवस्य च्यवनस्य महदपराधः ॥ ६ ॥ ७ ॥ ध्येयं मम कन्या कृतवती त्वयेतच्च्यमाने कतिवर्षाणि तपस्याः विवाहः कृतो न वेत्याद्विवाक्योः त
दभिप्रायं तस्य मुनेरभिप्रायं ज्ञात्वा तस्मै तां दुहितरं प्रादात् ॥ ९ ॥ १० ॥ हे दस्रौ सोमस्य ग्रहं ग्रहीष्ये युवयोर्वयः प्रयच्छतां तथा रूपं दत्तं मे यत्पादगतं ॥ ११ ॥ अप्रमत्तामपयाः

सा सखीभिः परिवृता विचिन्वंत्यंघ्रिपान्वने ॥ वल्मीकरंध्रे ददृशे खद्योते इव ज्योतिषी ॥ ३ ॥ ते दैवचोदिता बाला ज्योतिषी कंटकेन वै ॥ अविध्यन्मुग्धभावेन सुस्रावासृक्ततो बहु ॥ ४ ॥ शकृन्मूत्रनिरोधोऽभूत्सैनिकानां च तत्क्षणात् ॥ राजर्षिस्तमुपालक्ष्य पुरुषान्विस्मितोऽब्रवीत् ॥ ५ ॥ अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितं ॥ व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणं ॥ ६ ॥ सुकन्या प्राह पितरं भीता किंचित्कृतं मया ॥ द्वे ज्योतिषी अजानंत्या निर्भिन्ने कंटकेन वै ॥ ७ ॥ दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः ॥ मुनिं प्रसादयामास वल्मीकांतर्हितं शनैः ॥ ८ ॥ तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुनेः ॥ कृच्छ्रान्मुक्तस्तमामंत्र्य पुरं प्रायात्समाहितः ॥ ९ ॥ सुकन्या च्यवनं प्राप्य पतिं परमकोपनं ॥ प्रीणयामास चित्तज्ञा अप्रमत्तानुवृत्तिभिः ॥ १० ॥ कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ ॥ तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥ ११ ॥ ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः ॥ क्रियतां मे वयोरूपं प्रमदानां यदीप्सितं ॥ १२ ॥ बाढमित्यूचतुर्विप्रमभिनंद्य भिषक्तमौ ॥ निमज्जतां भवानस्मिन्ह्रदे सिद्धविनिर्मिते ॥ १३ ॥ इत्युक्तो जरया ग्रस्तदेहो धमनिसंततः ॥ ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविप्रियः ॥ १४ ॥

सोमपानरहितयोरपि वां युवयोः सोमस्य ग्रहं सोमपूर्णं पात्रं ग्रही-
ष्ये दास्यामीति ॥ एवं वां सोमेन यक्ष्य इत्यर्थः ऐंद्रवायवग्रहं नीत्वाश्विभ्यां देवतामेवं धानुपपन्नानां ग्रहातेर्योगपर्यंव वाच्यं पित्वा ॥ १२ ॥ बाढमित्यभिनं
नद्य भवानस्मिन्निमज्जतामित्यूचतुः ॥ १३ ॥ ह्रदं प्रवेशितः तावपि तमपि वृद्धं गृहीत्वा प्रविष्टावित्यर्थः ॥ १४ ॥

भा०न
५

१५ अश्विनौशरणंययौ उवाहरथकृष्ठियत्वामत्पतिंदर्शयतमितिप्रार्थयामासेत्यर्थः १६ ७ प्रलंभितोवंचितः हेअसति असंमतंअनभिष्टं १० हिंस

पुरुषास्त्रयउत्तस्थुरपीच्यावनिताप्रियाः पद्मस्रजःकुंडलिनस्तुल्यरूपाःसुवाससः १५ तान्निरीक्ष्यवरारोहासरूपान्सूर्यवर्चसः
अजानतीपतिंसाध्वीअश्विनौशरणंययौ १६ दर्शयित्वापतिंतस्यैपातिव्रत्येनतोषितौ ऋषिमामंत्र्यययतुर्विमानेनत्रिविष्टपं १७
यक्ष्यमाणोथशर्यातिश्च्यवनस्याश्रमंगतः ददर्शदुहितुःपार्श्वेपुरुषंसूर्यवर्चसं १८ राजादुहितरंप्राहकृतपादाभिवंदनां आ
शिषश्चाप्रयुंजानोनातिप्रीतमना इव १९ चिकीर्षितंतेकिमिदंपतिस्त्वयाप्रलंभितोलोकनमस्कृतोमुनिः यत्त्वंजराग्रस्तमस
त्यसंमतंविहायजारंभजसेमुमध्वगं २० कथंमतिस्तेवगतान्यथासतांकुलप्रसूतेकुलदूषणंत्विदं बिभर्षिजारंयदपत्रपा
कुलंपितुश्चभर्तुश्चनयस्यधस्तमः २१ एवंब्रुवाणंपितरंस्मयमानाशुचिस्मिता उवाचतातजामातातवैषभृगुनंदनः २२
शशंसपित्रेतत्सर्वंवयोरूपाभिलंभनं विस्मितःपरमप्रीतस्तनयांपरिषस्वजे २३ सोमेनयाजयन्वीरंग्रहंसोमस्यचाग्रहीत
असोमपोरप्यश्विनोश्च्यवनःस्वेनतेजसा २४ हंतुंतमाददेवज्रंसद्योमन्युरमर्षितः सवज्रंस्तंभयामासभुजमिंद्रस्यभार्गवः २५
अन्वजानंस्ततःसर्वेग्रहंसोमस्यचाश्विनोः भिषजावितियत्पूर्वंसोमाहुत्याबहिःकृतौ २६ उत्तानबर्हिरानर्त्तोभूरिषेणइतित्रयः सा
शर्यातेरभवन्पुत्राआनर्त्ताद्रेवतोभवत २७ सोंतःसमुद्रेनगरींविनिर्मायकुशस्थली आस्थितोभुंक्तविषयानानर्त्तादीनरिंदमः २८

ताकुलप्रसूतेतेमतिरन्यथातद्विपर्ययेणकथमवगता अवमता अध्वगमितेतिवा तदेवाह कुलदूषणंत्विदमित्यादि २४ सद्यस्तत्क्षणमेवमन्युर्यस्य

राम
५

ककुद्मी ज्येष्ठो यस्मिन् तत्॥ विभुं ब्रह्माणं॥२९॥ न लब्धः क्षणो वसरो येन सः॥३०॥ आद्यं ब्रह्माणं॥३१॥ ते त्वया ये हृदये कृतास्ते सर्वे कालेन निरस्ताः
सह ताः॥ त्रिणव सप्तविंशति चतुर्युगानि तैः विकल्पितो विभक्तः॥३२॥ यो देवस्यांशो स्थितस्तस्मै नररत्नाय देहि॥३३॥ तदेवाह भुव इति॥३४॥
पुण्यजनत्रासात् यक्षभयात् पूर्वमेव पुरं तद्भ्रातृभिः त्यक्तं॥३५॥३६॥ इति नवमे तृतीयः॥ चतुर्थे मनुपुत्रस्य नभगस्य कथोच्यते॥ तत्र नाभागोम्बरी

तस्य पुत्रशतं यस्ते ककुद्मिज्येष्ठमुत्तमं॥ ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः॥२९॥ कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतं॥ आवर्त
माने गांधर्वे स्थितो लब्धक्षणः क्षणं॥३०॥ तदंत आद्यमानम्य स्वाभिप्रायं न्यवेदयत्॥ तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह॥३१॥
अहो राजन् निरुद्धास्ते कालेन हृदि ये कृताः॥ तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे॥ कालोऽभियातस्त्रिणवचतुर्युगविकल्पितः॥
तद्गच्छ देवदेवांशो बलदेवो महाबलः॥ कन्यारत्नमिदं राजन् नररत्नाय देहि भो॥३३॥ भुवो भारावताराय भगवान् भूतभावनः॥ अवतीर्णो
निजांशेन पुण्यश्रवणकीर्तनः॥३४॥ इत्यादिष्टोऽभिवंद्याजं नृपः स्वपुरमागतः॥ त्यक्तं पुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः॥३५॥ सु
तां दत्वानवद्यांगीं बलाय बलशालिने॥ बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमं॥३६॥ इति श्रीभागवते महापुराणे नवमस्कंधे तृती
योध्यायः॥ श्रीशुक उवाच॥ नाभागो नभगापत्यं यं ततं भ्रातरः कविं॥ यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतं॥१॥

षष्ठस्कन्धात्प्रतिहतापतः॥ नभगस्य वंशमाह॥ नभगस्यापत्यं नाभानाभागः नाभागादंबरीषो महाभागवते॥ भूरिति वक्ष्यतत्त्वेन वंशप्रवर्तक
स्य नभगस्य निःकपटचरितेन च श्रीरुद्रप्रसादमाह यं ततमित्यादिना॥ ब्रह्मचारिणं बहुकालं गुरुकुले वसंतं नैष्ठिको वा इति मत्वा विभागसमये
तस्मै भागमकल्पयैव भ्रातरः सर्वदायं विभज्य गृहीत्वा पश्चाद्गुरुकुलादागतं यं भागार्थिनं कविं विद्वांसं यविष्ठं प्रति ततं तात पितरं दायं व्यभजन्नित्यर्थः॥

एतदेव प्रश्नोत्तराभ्यां दर्शयति तत्र नाभागः पृच्छति । हे भ्रातरः मह्यं किमभक्त अभजत कं भागं मह्यं यूयं प्रकल्पितवन्तः । भ्रातरस्त्वाहुः तदा विस्मृत-
मस्माभिरिदानीं तत्र च पितरं विभजामः तं पितरं गृहाणेत्यर्थः । स च पितरं गत्वाह । तत हे तात आर्याः श्रेष्ठाः मम त्वामभाङ्क्षुः भागं चक्रुः । मदीयो
भागस्त्वमित्यर्थः । पाठान्तरे हे तात किमिदं ममाभाङ्क्षुः भजाम पितरं तवेत्युक्तवन्त आर्यास्त्वां मह्यं किमर्थं ददुरित्यर्थः । पिताह हे पुत्रक तैरुक्तं माआ-
दृथाः । प्रतारणमात्रं तैः कृतं तस्मिन्नादरं माकार्षीः । न ह्यहं दायरूपं भोगसाधनमित्यर्थः ॥ १ ॥ तथापि ते भोगत्वेन रक्षोऽहं तव जीवनोपायमुपदेक्ष्या-

भ्रातरोऽभाक्त किं मह्यं भजामाम पितरं तव । त्वां ममार्यास्तताभाङ्क्षुर्मा पुत्रक तदादृथाः ॥ १ ॥ इमे अङ्गिरसः सत्रमास-

सु

तेऽद्य सुमेधसः । षष्ठं षष्ठमुपेत्याहः कवे मुह्यन्ति कर्मणि ॥ २ ॥ तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः । ते स्वर्यं-

तो धनं सत्रपरिशेषितमात्मनः ॥ ३ ॥ दास्यन्त्यथ ततो गच्छ तथा स कृतवान् यथा । तस्मै दत्त्वा ययुः स्वर्गं ते सत्रपरिशेषितम् ॥

मीत्याह इमे इति सपादद्वाभ्याम् । अभिप्लवः षडहो भवति । पृष्ठ्यः षडहो भवतीति विहितेषु षडहेष्वावर्त्यमानेषु षष्ठं षष्ठमहः कर्मोपेत्य प्राप्य कर्मणि
तदनुष्ठाने सुमेधसोऽपि ते सूक्तविशेषाज्ञानेन मुह्यन्तीति । कवे हे विद्वन् ॥ २ ॥ तान् महात्मनोऽपि त्वं इदमित्था रौद्रमिति च ये यज्ञेन दक्षिणायेति च त्वं वैश्व-
देवे द्वे सूक्ते संशय पाठय । ततः कर्म्मणि समाप्ते सति ते स्वर्यन्तः स्वर्गं गच्छन्तः स्वसत्रे परिशेषितमवशिष्टमात्मनो धनं तत्तुभ्यं दास्यन्ति । अथ
तस्मात्तान् गच्छेति । तथेत्यादिकं शुकवाक्यं । तथा च कृतवान् । सत्रपरिशेषितं सत्रावशिष्टधनं ॥ ४ ॥ ॥ ५ ॥

पुरुषः श्रीरुद्रः ॥ दृश्यत इति दर्शनं शरीरं कृष्णं दर्शनं यस्य सः ॥ वास्तुकं यज्ञभूमिगतं वसु धनं मे तदुवाच ॥ ६ ॥ तर्हि स्म तदेव मे नैतदिति मानवो नाभाग उवा-
च ॥ पुनः स रुद्र उवाच ॥ नौ आवयोः किल विवादे ते पितरि प्रश्नः स्यादिति ॥ पृष्टवानिति श्लोकोक्तिः ॥ ७ ॥ पृष्टस्य मनोर्वाक्यं यज्ञवास्तुगतमिति ॥ उच्छिष्टमृषि-
रिति ॥ क्वचिदिति दत्त्वाध्वरे ॥ उच्छिष्टभागो वै रुद्र इति श्रुतेः ॥ किंच ॥ स देव ईश्वरः सर्वमर्हतीति किं पुनर्यज्ञावशिष्टमित्यर्थः ॥ ८ ॥ श्रीरुद्रमाह यत्त इति

तं कश्चित्स्वीकरिष्यंतं पुरुषः कृष्णदर्शनः ॥ उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु ॥ ममेदमृषिभिर्दत्तमिति तर्हि स्म मानवः ॥
स्यान्नौ ते पितरि प्रश्नः पृष्टवान्पितरं तथा ॥ यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् ॥ चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति ॥ ८ ॥
नाभागस्तं प्रणम्याह तवेश किल वास्तुकं ॥ इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये ॥ ९ ॥ यत्ते पितावदद्धर्मं त्वं च सत्यं प्रभा-
षसे ॥ ददामि ते मंत्रदृशो ज्ञानं ब्रह्म सनातनं ॥ १० ॥ गृहाण द्रविणं दत्तं मत्सत्रपरिशेषितं ॥ इत्युक्त्वांतर्हितो रुद्रो भगवान्धर्म-
वत्सलः ॥ ११ ॥ य एतत्संस्मरेत्प्रातः सायं च सुसमाहितः ॥ कविर्भवति मंत्रज्ञो गतिं चैव तथात्मनः ॥ १२ ॥ नाभागादंबरीषोऽभू-
न्महाभागवतः कृती ॥ नास्पृशद्ब्रह्मशापोऽपि यं न प्रतिहतः क्वचित् ॥ १३ ॥ राजोवाच ॥ भगवन् श्रोतुमिच्छामि राजर्षेस्तस्य धी-
मतः ॥ न प्राभूद्यत्र निर्मुक्तो ब्रह्मदंडो दुरत्ययः ॥ १४ ॥

१० ॥ इदमाख्यानं श्रुतिप्रसिद्धं ॥ तथाहि बह्वृचब्राह्मणे नाभानेदिष्ठं श्रुतिर्नाभानेदिष्
वै मानवं ब्रह्मचर्यं वसंतं भ्रातरो निरभजन् सोऽब्रवीदित्यादि ॥ उपाख्यानस्य स्मरणफलमाह य एतदिति ॥ आत्मनो गतिं च प्राप्नोतीति शेषः ॥ १२ ॥
क्वचिदपि न प्रतिहतो ब्रह्मशापोऽपि ब्राह्मणेन दुर्वाससा निर्मिता कृत्यानलो यं नास्पृशत् ॥ श्रुतो मे महाभागवतः श्रुत एव कृतीदृग्गुणवान् ॥ १३ ॥
तस्य श्रोतुमिच्छामि चरितमिति शेषः ॥ ब्रह्मदंडः कृत्यानलो न प्राभूत् न समर्थो बभूव ॥ १४ ॥

भा॰न
७

श्रियं संपदं विभवं ऐश्वर्यं अतुलं निरुपमं ॥१५॥ सुमानमतिदुर्लभमपि तत्सर्वं स्वप्नवत्संस्तुतं निरूपितं अनुपादेयं मेने तत्र हेतुः विभवस्य निर्वाणं नाशं वि-
द्वान् ॥ यत्र यं न विभवेन तन्नाशेन वा पुमान् तमो विशति मोहे निमज्जति ॥१६॥ न त्वेवं ज्ञानेनापि विभवे वैराग्यमपि तु स्वपतेस्तत्राह ॥ वासुदेव इति ॥ भावं भक्तिं प्रा-
प्तः ॥ येन भावेन इदं विश्वं लोष्ठवत् अतितुच्छं स्मृतं ॥१७॥ भक्तिमेव सर्वेन्द्रियाणां भगवत्परत्वकथनेन प्रपंचयति स वा इति त्रिभिः ॥ श्रुतिः श्रोत्रं अच्यु-
तस्य सत्कथानामुदये श्रवणे ॥ चकारेत्यस्य सर्वत्रान्वयः ॥१८॥ मुकुंदस्य लिंगानामालया निस्थानानि तेषां दर्शने दृशौ नेत्रे श्रीमत्याः तुलस्याः तत्पा-

श्रीशुक उवाच ॥ अंबरीषो महाभागः सप्तद्वीपवतीं महीं ॥ अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥१५॥ मेनेतिदुर्लभं पुंसां सर्वं तत्
स्वप्नसंस्तुतं ॥ विद्वान् विभवनिर्वाणं तमो विशति यत्पुमान् ॥१६॥ वासुदेवे भगवति तद्भक्तेषु च साधुषु ॥ प्राप्तो भावं परं विश्वं ये-
नेदं लोष्ठवत्स्मृतं ॥१७॥ स वै मनः कृष्णपदारविंदयोर्वचांसि वैकुंठगुणानुवर्णने ॥ करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्यु-
तसत्कथोदये ॥१८॥ मुकुंदलिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेंगसंगमं ॥ घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां त-
दर्पिते ॥१९॥ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवंदने ॥ कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया
रतिः ॥२०॥ एवं सदा कर्मकलापमात्मनः परेधियज्ञे भगवत्यधोक्षजे ॥ सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥२१॥

दसरोजे यत्सौरभं तस्मिन् ॥ तदर्पिते तस्मै निवेदितान्नादौ ॥१९॥ कामं संकल्पं चंदनादिसेवां दास्ये निमित्तात् तत्प्रसादस्वीकाराय न तु कामकाम्यया विषयेच्छ-
या ॥ कथं चकार ॥ उत्तमश्लोकजनाश्रया रतिर्यथा भवेत्तथा ॥ अनेन तद्भक्तेषु च परं भावं प्राप्त इत्येतत्स्फुटीकृतं ॥२०॥ सर्वात्मेति भावो भावना यस्मिन् तं
मात्मनः स्वस्य कर्मणां कलापं समूहं भगवति विदधत् समर्पयन् ॥ तन्निष्ठैर्भागवतैर्विप्रैः अभिहितः शिक्षितः सन् महीं शशास पालयामास ॥ अनेनाधि-
कारधर्मोपि यथावदर्पितः ॥२१॥

राम
७

किंच ॥ यज्ञाधिष्ठातारमीश्वरमश्वमेधैराजे आराधयामास ॥ महाविभूत्या उपचितान्यङ्गानि दक्षिणाश्च येषु तैः ॥ वसिष्ठादिभिर्हतैः प्रवृत्तैस्ततैर्वि
स्तृतैः ॥ धन्वनि धन्वदेशे निरूदके ॥ सरस्वतीमभिस्रोतं तस्याः प्रतिलोममित्यर्थः १२ ॥ किंच ॥ यस्य क्रतुषु सदस्यादयो गीर्वाणाः सहभूषणादि
भिस्तुल्यरूपा व्यदृश्यन्त सहत्वमिति वहर्षेनाल्पधः ॥ ननु देवानां निमेषाभावाद्विलक्षणत्वं स्यात् ॥ यतः अनिमिषास्तु व्यदृश्यन्त ॥ न निमिषन्तीति तथा

ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचिताङ्गदक्षिणैः ॥ ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीम् ॥ १२ ॥
यस्य क्रतुषु गीर्वाणाः सदस्या ऋत्विजो जनाः ॥ तुल्यरूपाश्चानिमिषा व्यदृश्यन्त सुवाससः ॥ १३ ॥ स्वर्गो न प्रार्थितो यस्य मनुजै
रमरप्रियः ॥ श्रावयद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितं ॥ १४ ॥ समृद्धयन्ति तान्कामाः स्वाराज्यपरिभाविताः ॥ दुर्लभा नापि सि
द्धानां मुकुन्दं हृदि पश्यतः ॥ १५ ॥ स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः ॥ स्वधर्मेण हरिं प्रीणन्सर्वान्कामान्शनैर्जहौ ॥ १६ ॥
गृहेषु दारेषु सुतेषु बन्धुषु द्विपोत्तमस्यन्दनवाजिवस्तुषु ॥ अक्षय्यरत्नाभरणाम्बरादिष्वनन्तकोशेष्वकरोदसन्मतिं ॥ १७ ॥

आश्चर्यदर्शनोत्सुक्येन तेषां निमिषोपरमादिति भावः ॥ १३ ॥ यस्य यशोभिर्मनुजैरपि स्वर्गो न प्रार्थितः यस्य तु का वार्त्ता ॥ १४ ॥ आस्तां स्वर्गप्रार्थनशंका
पि यद्यतः मुकुन्दं हृदि पश्यतस्तान् कामा विषयाः समर्धयन्ति न हर्षयन्ति ॥ कथंभूताः स्वाराज्येन स्वस्वरूपसुखेन परिभाविताः ॥ अतिशायिताः ॥ स्वत
एव सिद्धानामपि दुर्लभाः यानिति पाठे ॥ यान्मनुजान् ॥ स्वाराज्यं तत्राधिष्ठितां यानिति पाठे ॥ मनुजानां विशेषणं ॥ यमिति योगपक्षे वा ॥ पश्यतामिति
पाठे सिद्धानां विशेषणं ॥ १५ ॥ एवं भगवदाराधनपरस्य कामाद्यपेक्षा नैव वा चित्रमित्युपसंहरति स इत्थमिति द्वाभ्यां ॥ १६ ॥ ७ ॥

नन्वेवंभूतो मोक्षः कथं प्रतिपद्यते न जपेत्त्वाह तस्मात् इति ॥१८॥ तदेवं तस्य वैराग्यपारिकं हरिभक्तिं चोक्त्वा ब्रह्मन्दं डोयत्र न प्राप्नुरिति पतत्क्वंतं देवद्वादशी
व्रतनिष्ठां कथयत्याह ॥ आराधयिष्यति त्वादि यावद्ध्यायसमाप्तिः ॥ अर्चयन् अड्डागमा भावसाधिः ॥१९॥ ब्राह्मणांश्च प्रपूजयामास ॥ सिद्धार्थान् अ
प्रकामान् पूजानपेक्षानपि ॥२१॥ तृष्णां ज्ञानानां स्वषु ताराणां ॥ पयः शीलादिरूपदेशया मानसं ॥२२॥ न्याईरानिषयः ॥ षष्ठिकोऽरी ॥२३॥ तर्हि तदेव ड्डवी सा

तस्मात् अराइहरिस्वकं तत्पनीकमयावहं ॥ एकांतभक्तिभावेन प्रीतो भृत्याभिरक्षणं ॥१८॥ आरिराधयिषुः कृत्स्नं पद्धिष्यात्तल्पशीलया
युक्तः संवत्सरं वीरो द्वादशीव्रतं ॥१९॥ व्रतांते कार्त्तिके मासि त्रिरात्रं समुपोषितः ॥ स्नातः कदाचित्कालिंद्यां हरिं मधुवनेऽर्चयत् ॥२०॥
महाभिषेकविधिना सर्वोपस्कारसंपदा ॥ अभिषिच्यांबराकल्पैर्गंधमाल्यार्हणादिभिः ॥२१॥ तद्गतांतरभावेन पूजयामास केशवं ॥
ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ॥२२॥ गवां रुक्मविषाणीनां रूप्यांघ्रीणां सुवाससां ॥ पयःशीलवयोरूपवत्सोपस्कर
संपदां ॥ प्राहिणोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् ॥ भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमं ॥२४॥ लब्धकामैरनुज्ञातः पारणा
योपचक्रमे ॥ तस्य तर्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत् ॥२५॥ तमानर्चातिथिं भूपः प्रत्युत्थानासनार्हणैः ॥ ययाचेऽभ्यवहाराय पाद
मूलमुपागतः ॥२६॥ प्रतिनंद्य स तद्याञ्चां कर्तुमावश्यकं गतः ॥ निममज्ज बृहद्ध्यायन् कालिंदीसलिले शुभे ॥२७॥ मुहूर्तार्द्धावशिष्टायां
द्वादश्यां पारणां प्रति ॥ चिंतयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ॥२८॥ ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे ॥ यत्कृत्वा साधु मे भूयाद

अतिथिः साक्षात्तत्पक्षो भूत ॥२५॥ आनर्च शुचिर्वितवान् ॥ अभ्यवहाराय भोजनाय ॥२६॥ आवश्यकं नैयमिकं माध्याह्निकं कर्म कर्तुं ॥ धर्मो वा न मां स्पृशेत ॥२९॥
गतः ॥ बृहद्ब्रह्म ॥२७॥ ८ ॥ धर्मसंकटमेवाह ॥ यद्यतः ब्राह्मणातिक्रमे दोषः अधर्मो द्वादश्यामपारणे पि दोषात्मनेवेदांगं यत् कृत्वा यस्मिन् कृते ॥२९॥

एवंद्विजैः सहविचार्यनिश्चिनोतिस्म पमेति ॥ व्रतस्यपारणंसमाप्तिं ॥ ततअशितमाहुः अशितंनेतिवाहुः श्रुतिस्तु ॥ अपोऽश्नातितन्नेवाशितं
नैवानशितमिति ॥४०॥ प्रत्यचष्टप्रत्येकृत ॥४१॥२॥ प्रचलतकंपमानगात्रंयस्य ॥ भ्रूकुटिर्भ्रूभंगाकुलितमाननंयस्य ॥४३॥ क्रुद्धमहिपावकोऽत्रवा

अंभसाकेवलेनाथकरिष्येव्रतपारणं ॥ प्राहुरब्भक्षणंविप्राह्यशितंनाशितंचतत् ॥४०॥ इत्यपःप्राश्यराजर्षिश्चिंतयन्मनसाच्युतं ॥
प्रत्यचष्टकुरुश्रेष्ठद्विजागमनमेवसः ॥४१॥ दुर्वासायमुनाकूलात्कृतावश्यकआगतः ॥ राज्ञाभिनंदितस्तस्यबुबुधेचेष्टितंधिया ॥४२॥
मन्युनाप्रचलद्गात्रोभ्रूकुटीकुटिलाननः ॥ बुभुक्षितश्चसुतरांकृतांजलिमभाषत ॥४३॥ अहोअस्यनृशंसस्यश्रियोन्मत्तस्यपश्यत ॥ ध
र्मव्यतिक्रमंविष्णोरभक्तस्येशमानिनः ॥४४॥ योमामतिथिमायातमातिथ्येननिमंत्र्यच ॥ अदत्वाभुक्तवांस्तस्यसद्यस्तेदर्शयेफलं
एवंब्रुवाणउत्कृत्यजटांरोषविदीपितः ॥ तयासनिर्ममेतस्मैकृत्यांकालानलोपमां ॥४६॥ तामापतंतींज्वलतीमसिहस्तांपदा
भुवं ॥ वेपयंतींसमुद्वीक्ष्यनचचालपदान्नृपः ॥४७॥ प्राग्दिष्टंभृत्यरक्षायांपुरुषेणमहात्मना ॥ ददाहकृत्यांतांचक्रंक्रुद्धाहिमिव
पावकः ॥४८॥ तदभिद्रवदुद्वीक्ष्यस्वप्रयासंचनिष्फलं ॥ दुर्वासा दुद्रुवेभीतोदिक्षुप्राणपरीप्सया ॥४९॥ तमन्वधावद्भगवद्रथा
ङ्गंदावाग्निरुद्धूतशिखोयथाहिं ॥ तथानुषक्तंमुनिरीक्षमाणोगुहांविविक्षुःप्रससारमेरोः ॥५०॥ दिशोनभःक्ष्मांविवरान्समुद्रांल्लोका
न्सपालांस्त्रिदिवंगतःसः ॥ यतोयतोधावतितत्रतत्रसुदर्शनंदुःप्रसहंददर्श ॥५१॥ अलब्धनाथःसयदाकुतश्चित्संत्रस्तचित्तोऽरणमेषमा
श्रीरिवा ॥४८॥ निष्फलमुद्वीक्ष्य ॥४९॥ अनुषक्तंपृष्ठतःसंलग्नंमेरोर्गुहांविविक्षुःधाव णः ॥ देवंविरिंचंसमगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसोमां ॥५२॥
न् ॥५०॥ अरणमेषमाणःशरणमिच्छन्अजिततेजसःहरेश्चक्रात् ॥५२॥

भा॰न
९

एतत्सर्वं यस्य भ्रूभंगमात्रेणातिरोभविष्यति । करक्रीडायाश्च वदनेन तस्य पिकरद्विपरार्द्धसंज्ञो कालो ॥ ५२ ॥ अतो वयं सर्वैश्वर्ययस्य नियमं मात्तां प्रपन्नाः प्रा
प्ताः सन्तो लोकहितं यथा भवत्येवं तत्प्रियं सम्यक् अर्पितं वहामः ॥ अतस्त्वं तं कृष्णं द्विपरार्द्धाख्यकालं स्वरक्षितुं न समर्थोऽहमिति शेषः ॥ यत्त्वरोसिर्नितं तं सं वधात् ॥ ५३ ॥ श्री

ब्रह्मोवाच ॥ स्थानं मदीयं सह विश्वमेतत्क्रीडावसाने द्विपरार्द्धसंज्ञे ॥ भ्रूभंगमात्रेण हि संदिधक्षोः कालात्मनो यस्य तिरोभ
विष्यति ॥ ५२ ॥ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः ॥ सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ॥
५४ ॥ प्रत्याख्यातो विरिंचेन विष्णुचक्रोपतापितः ॥ दुर्वासाः शरणं यातः शर्वं कैलासवासिनं ॥ ५५ ॥ शंकर उवाच ॥ वयं न तात
प्रभवाम भूम्नि यस्मिन्परेन्येप्यजजीवकोशाः ॥ भवन्ति काले न भवन्ति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ॥ ५६ ॥ अहं सनत्कुमा
रश्च नारदो भगवानजः ॥ कपिलोपान्तरतमो देवलो धर्म आसुरिः ॥ ५७ ॥ मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शिनः ॥ विदाम न व
यं सर्वे यन्मायां माययावृताः ॥ ५८ ॥ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः ॥ तमेव शरणं याहि हरिस्ते शं विधास्यति ॥ ५९ ॥ त
तो निराशो दुर्वासाः पदं भगवतो ययौ ॥ वैकुण्ठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ॥ ६० ॥ संदह्यमानोऽजितशस्त्रवह्नि
ना तत्पादमूले पतितः सवेपथुः ॥ आहाच्युतानन्त सदीप्सित प्रभो कृतागसं मावहि विश्वभावन ॥ ६१ ॥

रुद्रोपि प्रत्याचष्टे वयमिति चतुर्भिः ॥ भूम्नि महति महत्त्वमेवाह यस्मिन्परमेश्वरेऽन्येऽजाब्रह्माणस्त एव जीवास्तेषां कोशाः उपाधिभूता ब्रह्माण्डविग्रहाः
ईदृशा ईदृग्प्रमाणब्रह्माण्डप्रमाणाश्चान्येपि भवन्ति । जायन्ते न स्युरिति च यत्र येषु ब्रह्माण्डेषु लोकेशाभिमानिनो वयं भ्रमाम ॥ ५६ ॥ ननु सर्वज्ञस्त्वं भ्रमः कु
तस्तत्राह अहमिति पारदर्शिनः सर्वज्ञा अपि यस्य मायां न विद्मः ॥ ५७ ॥ हे सदीप्सित मामवहि पाहि ॥ ६१ ॥

एम
९

अपराधं निवेदयन्प्रार्थयते अजानतेति ॥ अघं दुःखं ॥ अपचितिभिः कृतिं ॥ मद्भक्तद्रोहेभिः कृतिं न पश्यामीति चेत्तत्राह ॥ यस्य तव नामकीर्तितेन नरकस्थोपि मुच्येत तस्य तव किमशक्यमिति भावः ॥६१॥६२॥ न आशासे न स्पृहयामि ॥६४॥ इमं परं च लोकं हित्वा ॥६५॥६६॥ प्रतीतं प्राप्तमपि ॥६७॥६८॥

अजानता ते परमानुभावं कृतं मयाघं भवतः प्रियाणां ॥ विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोपि ॥६२॥ श्रीभगवानुवाच ॥ अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज ॥ साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥६३॥ नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ॥ श्रियं चात्यंतिकीं ब्रह्मन्येषां गतिरहं परा ॥६४॥ ये दारागारपुत्राप्तान्प्राणान्वित्तमिमं परं ॥ हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥६५॥ मयि निर्बद्धहृदयाः साधवः समदर्शनाः ॥ वशीकुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥६६॥ मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयं ॥ नेच्छंति सेवया पूर्णाः कुतोन्यत्कालविप्लुतं ॥६७॥ साधवो हृदयं मह्यं साधूनां हृदयं त्वहं ॥ मदन्यत्ते न जानंति नाहं तेभ्यो मनागपि ॥६८॥ उपायं कथयिष्यामि तव विप्र शृणुष्व तत् ॥ अयं ह्यात्माभिचारस्ते यतस्तं यातु वै भवान् ॥६९॥ साधुषु प्रहितं तेजः प्रहर्तुः कुरुते शिवं ॥ तपो विद्या च विप्राणां निःश्रेयसकरे उभे ॥ ते एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ॥७०॥ ब्रह्मंस्तद्गच्छ भद्रं ते नाभागतनयं नृपं ॥ क्षमापय महाभागं ततः शांतिर्भविष्यति ॥७१॥ इति श्रीभागवते महापुराणे नवमस्कंधे अंबरीषचरिते चतुर्थोध्यायः ॥

आत्मन एव ते अभिचारो हिंसा यतः ॥ तं तमेव यातु ॥ अशिवमनर्थं ॥६९॥
तपोविद्यासंपन्नस्य मम कथमनर्थः स्यादिति मा स्म विस्मयं कार्षीरित्याह तप इति ॥७०॥ ॥ नवमे चतुर्थः ॥

पंचमे विश्वचक्रं तत्प्रसाद्य प्राणसंकटात् दुर्वासा रक्षितस्तेन न तथा तद्वृत्तमीर्यते ॥१॥ सउद्यमनमिति छेदः सलोपः पादपूरणार्थः ॥२॥ ज्योतिषां नक्षत्राणां पतिः सोमस्त्वं मात्राणि इंद्रियाणि च त्वदंशभूतानि वा मात्रास्यः त्वं त्वं कार्यं कर्त्तेत्यर्थः ॥३॥ सहस्राण्यरा यस्य हे सहस्रार स्वस्ति शरणं भूयाः इडस्पते पृथ्वीपते ॥४॥ यज्ञानां तद्यज्ञमेवेत्याह त्वं धर्म इति नचतं वधमतिष्ठतिरित्याह पौरुषं पुरुषस्वरूपं परं तेजः सामर्थ्यं त्वं अर्थभावः

॥ अंबरीष उवाच ॥

शुक उवाच एवं भगवतादिष्टो दुर्वासाश्चक्रतापितः अंबरीषमुपागम्य तत्पादौ दुःखितोऽग्रहीत् ॥१॥ तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशं ॥२॥ त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेंद्रियाणि च ॥३॥ सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय सर्वास्त्रघातिन् विप्राय स्वस्ति भूया इडस्पते ॥४॥ त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक् त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परं ॥५॥ नमः सुनाभाखिलधर्मसेतवे ह्यधर्मशीलासुरधूमकेतवे त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणे गृणे ॥६॥ त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मनां दुरत्ययस्ते महिमा गिरां पते त्वद्रूपमेतत्सदसत्परावरम् ॥७॥

स एवं कृते त्वादिष्कृतिप्रसिद्धं भगवतः शोभनं दर्शनं हि सुदर्शनं ततएव सर्वं जातं अतस्त्वमेव सर्वात्मेति ॥५॥ हे सुनाभ अद्भुतकर्माणं त्वां कः स्तोतुं समर्थः अतस्त्वां केवलं नमो गृणामीत्यन्वयः अद्भुतकर्मत्वमेवाह अखिलानां धर्माणां सेतवे मर्यादारूपाय अतएवाधर्मशीलानामसुराणां धूमकेतवे दाहकाय त्रैलोक्यं गोपायतीति तथा विशुद्धमत्युज्ज्वलं वर्चो यस्य मनोजवाय तस्मै ॥६॥ तदेव प्रपंचयति त्वत्तेजसेति द्वाभ्यां सुदर्शनेन प्रकाशस्त्वयैव धृत

हे अजित अनंजनेन श्रीहरिणा यदा विसृष्टः त्वं तदा दैत्यदानवानां बलं प्रविष्टः सन् तेषां बाह्वाकारान् भिन्दन् विराजसे ॥ पाठांतरे ऊर्ज्जितौ दैत्यदानवा
यस्मिन् तद्बलं ॥ पूर्वपदेन संबंधः ॥ ८ ॥ किंच त्वया भगवन्नियुक्तेन खलानामेव दंडः कार्यः साधवस्तु रक्षणीयाः अतो विप्ररक्षणेनास्म

यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टोजित दैत्यदानवं ॥ बाहूदरोर्वंघ्रिशिरोधराणि वृश्चन्नजस्रं प्रधने विराजसे ॥ ८ ॥
स त्वं जगत्त्राण खलप्रहाणये निरूपितः सर्वसहो गदाभृता ॥ विप्रस्य चास्मत्कुलदैवहेतवे विधेहि भद्रं तदनुग्रहो हि नः ॥ ९ ॥
यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः ॥ कुलं नो विप्रदैवं चेद्द्विजो भवतु विज्वरः ॥ १० ॥ यदि नो भगवान्प्रीत एकः सर्वगुणा
श्रयः ॥ सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥ ११ ॥ श्रीशुक उवाच ॥ इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनं ॥ अशाम्यत्सर्व
तो विप्रं प्रदहद्राजयाच्ञया ॥ १२ ॥ स मुक्तोस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः ॥ प्रशशंस तमुर्वीशं युंजानः परमाशिषः ॥
१३ ॥ दुर्वासा उवाच ॥ अहो अनंतदासानां महत्त्वं दृष्टमद्य मे ॥ कृतागसोपि यद्राजन्मंगलानि समीहसे ॥ १४ ॥ दुष्करः को नु
साधूनां दुस्त्यजो वा महात्मनां ॥ यैः संगृहीतो भगवान्सात्वतामृषभो हरिः ॥ १५ ॥ यन्नामश्रुतिमात्रेण पुमान्भवति निर्म
लः ॥ तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥ १६ ॥ राजन्ननुगृहीतोहं त्वयातिकरुणात्मना ॥ मदघं पृष्ठतः कृत्वा प्राणा यन्मेभि
रक्षिताः ॥ १७ ॥

न तु गृहाणेत्याह स त्वमिति हे जगत्त्राण स एवंभूतः त्वं खलानामेव प्रहरणार्थं निरूपितो नियुक्तः अतोस्मत्कुलस्य दैवहेत
वे भाग्यलाभाय विप्रस्य भद्रं विधेहि तदेव नोनुग्रहः ॥ ९ ॥ सर्वसहत्वेनापि न विप्ररक्षा प्रार्थयते यद्यस्तीति द्वाभ्यां ॥ विप्रो दैवं देवता यस्मिन् तत्

ण

प्राण

भा॰न
११

राजेत्यादिश्लोकद्वयं शुकोक्तिः प्रीतोस्मीतिश्लोकद्वयं दुर्वासविप्रोक्तिः ॥१८॥१९॥ आत्मानि मेधायेनातिथ्येन ॥२०॥ भूरियं तत्रस्थो जनः कीर्तयिष्यति ॥२१॥ तस्य धैर्यमिति माह ॥ तां मुनिर्यावता नागतः ॥ तावत्संवत्सरोऽतिक्रान्त इति ॥२२॥ द्विजस्योपयोगेन भोजनेनातिपवित्रं आहरन् बुभुजे ॥ स्ववीर्यं च धैर्यादि

राजा तमकृताहारः प्रत्यागमनकांक्षया ॥ चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥१८॥ सोशित्वादृतमानीतमातिथ्यं सार्वकामिकं तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरं ॥१८॥ प्रीतोस्म्यनुगृहीतोस्मि तव भागवतस्य वै ॥ दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ॥२०॥ कर्मावदातमेतत्ते गायंति स्वः स्त्रियो मुहुः ॥ कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियं ॥२१॥ शुक उवाच ॥ एवं संकीर्त्य राजानं दुर्वासाः परितोषितः ॥ ययौ विहायसामंत्र्य ब्रह्मलोकमहैतुकं ॥२२॥ संवत्सरोत्यगात्तावद्यावता नागतो गतः ॥ मुनिस्तद्दर्शनाकांक्षो राजाब्भक्षो बभूव ह ॥२३॥ गतेथ दुर्वाससि सोंबरीषो द्विजोपयोगातिपवित्रमाहरत् ॥ ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा मेने स्ववीर्यं च परानुभावं ॥२४॥ एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ॥ क्रियाकलापैः समुवाह भक्तिं ययाविरिंच्यान्निरयांश्चकार ॥२५॥ अथांबरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः ॥ वनं विवेशात्मनि वासुदेवे मनो दधद्ध्वस्तगुणप्रवाहः ॥२६॥ इत्येतत्पुण्यमाख्यानमंबरीषस्य भूपतेः ॥ संकीर्तयन्ननुध्यायन्भक्तो भगवतो भवेत् ॥२७॥ इति श्रीभागवते महापुराणे नवमस्कंधे अंबरीषचरिते पंचमोध्यायः ॥५॥

लक्षणं ॥ परानुभावं भगवतः प्रभावं मेने ॥२४॥ एवंविधाश्चानेके गुणा यस्य सः विरिंच्यं ब्रह्मसहितान् भोगान् निरयप्रायान्
अपश्यदित्यर्थः ॥२७॥ इति नवमे पंचमः ॥ ५॥

राम
११

सप्तानांवं

पृषध्रांबरीषस्य वंशमुक्त्वा ततः परं || षष्ठाध्याये दिष्टपरिध्याये इक्ष्वाकोर्वंशप्रोच्यते || तत्र षष्ठे शशादादि मांधातृवंशो निरूप्यते || सप्तमे गात्सोमेरण्ध्या
मांधातृतनयापतेः ततवैष्णतानार्थे १ || ये ऽंगिरसा जनिताः एते रथीतरस्य क्षेत्रे प्रसूतत्वेन रथीतरगोत्राः स्मृताः अंगिरसो वीर्याणा प्रसू
तत्वांगिरसा अपि || पुनः रथीतराणां अन्येषां ज्ञातानां प्रवरा मुख्याः स्मृताः यतः क्षेत्रोपेताः ब्राह्मणा इत्यर्थः ३ || तदेवमनोर्दश पुत्रेषु
पृषध्रस्य कविस्तु विरक्तत्वात् न वंशप्रवर्त्तकौ करूषादीनां तु वंशास्तारतम्यक्रमेणोक्ताः || इदानीमतिविततमिक्ष्वाकोर्वंशमाह तत्क्षुवतस्त्विस्या

श्रु ॥ ७ ॥ ७ ॥ विरूपः केतुमान् शंभुरंबरीषसुतास्त्रयः || विरूपात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः || १ || रथीतरस्यापत्यजस्य भार्यायां तंत
वेर्थितः || अंगिरा जनयामास ब्रह्मवर्च्चस्विनः सुतान् || २ || एते क्षेत्रप्रसूता वै पुनस्त्वांगिरसाः स्मृताः || रथीतराणां प्रवराः क्षे
त्रोपेता द्विजातयः || ३ || क्षुवतस्तु मनोर्यज्ञे इक्ष्वाकुर्घ्राणतः सुतः || तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः || ४ || तेषां पुरस्ता
दभवन्नार्यावर्त्ते नृपा नृप || पंचविंशति पश्चाच्च त्रयो मध्ये परेऽन्यतः || ५ || स एकदाष्टकाश्राद्धे इक्ष्वाकुः सुतमादिशत् || मांसमानी
यतां मेध्यं विकुक्षे गच्छ माचिरं || ६ || तथेति स वनं गत्वा मृगान् हत्वा क्रियार्हणान् || श्रांतो बुभुक्षितो वीरः शशं चाद्यदपस्मृतिः || ७ ||

इदानीमाध्यायवत्सोमवंशप्रस्तावः क्षुतं कुर्वतो मनोर्घ्राणतो यत्ते || श्राद्धायां जनयामास दश पूर्वानिति पूर्वोक्तं वा कल्पान्तराभिप्रायेणेति द्रष्टव्यं || पुत्राणां
शतेज्येष्ठाः ४ || आर्यावर्त्तः पुण्यभूमिर्मध्यं विंध्यहिमालयोः || तस्मिन्पुरस्तात्पूर्वपर्यंतमंडलविभागेन पंचविंशतिर्नृपा अभवन् || तथैव प
श्चाच्च पंचविंशतिः || मध्ये तु ज्येष्ठास्त्रयः || अपरे तु अन्ये त्र्यधिकेणोत्तरादिषु अन्यासु क्षिरेवमुखाः शशादादि इति विकुक्षोतस्य इति वक्ष्यति || तत्र हेतुमाह || स एकदे

भा॰न
१२

तद्गुरुर्वसिष्ठः प्रोक्तगाणपत्राद्याचित्संस्कारादय ॥ ८ ॥ त्यक्तो विधिः सदाचारो येन तं ॥ ९ ॥ सततं इक्ष्वाकुः नायकेन वसिष्ठेन ॥ राज्यभोगेन विरक्तो योगी सन्नते
नयोगेन कलेवरं त्यक्त्वा सायुज्यं तत्त्वं तत्स्वाप ॥ १० ॥ शशादनृपालयन्नृहरिमीजे ॥ ११ ॥ इत्यपुरस्य जयात्पुरंजयः ॥ इन्द्रो वाहोऽस्येतीन्द्रवाहः ॥ ककुदि स्थि
तत्वात्ककुत्स्थ इति च ॥ शशादस्तत्सप्तत्रीणि नामानि तन्नत्कर्मनिमित्तानि ॥ १२ ॥ तान्येव व्याचष्टे ॥ गाथाह्कतान्तशतिमपञ्चभिः ॥ कृत्तविश्वं स तं यतीत

शेषं निवेदयामास पित्रे तेन च तद्गुरुः ॥ चोदितः प्रोक्तगाथाहदुष्टमेतदकर्मकं ॥ ८ ॥ ज्ञात्वा पुत्रस्य तत्कार्यं गुरुणाभिहितं नृपः ॥ देशात्त्रिः
सारयामास सुतं त्यक्तविधिं रुषा ॥ ९ ॥ सततविप्रेणासं वादं ज्ञायकेन समाचरन् ॥ त्यक्त्वा कलेवरं योगी सतेनावापयत्परं ॥ १० ॥ पितर्युपर
तेऽस्येत्य विकुक्षिः पृथिवीमिमान् ॥ शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥ ११ ॥ पुरंजयस्तस्य सुतं इन्द्रवाह इतीरितः ॥ ककुत्स्थ इति वा
प्युक्तः शृणु नामानि कर्मभिः ॥ कृतान्तश्रासीत्समरो देवानां सहदानवैः ॥ पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ॥ १३ ॥ वचनाद्देवदे
वस्य विष्णोर्विश्वात्मनः प्रभोः ॥ वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः ॥ १४ ॥ स संनद्धो धनुर्दिव्यमादाय विशिखाञ्छरान् ॥ स्तूयमानः स
मारुह्य युयुत्सुः ककुदि स्थितः ॥ १५ ॥ तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः ॥ प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरं ॥ १६ ॥ तैस्त
स्य चाभूत्प्रधनं तुमूलं लोमहर्षणं ॥ यमाय भल्लैरनयद्दैत्यान्येऽभिययुर्मृधे ॥ १७ ॥ तदिषुपातादिमुखं युगान्ताग्निमिवोल्बणं ॥ विसृज्यडु

था ॥ पार्ष्णिग्राहः सहायः ॥ १३ ॥ इन्द्रोऽयमिमं वाहनं प्राप्नोति हि दैत्यान् हनिष्यामीति तेन वाहनत्वेन ॥ दुद्रुवुर्दैत्या हन्यमानाः स्वमालयं ॥ १८ ॥
वृतासन्निद्रो लज्जया तदानीं गौः ककुद्मान् विष्णोर्वचनात्तस्य वाहनत्वाय महावृषो बभूवेत्यर्थः ॥ १४ ॥ ६ ॥ येऽभिमुखं ययुः तान् यमस्य शिथिलं सदेहानेव भल्लैरनयत्
प्रापयदित्यर्थः ॥ १७ ॥ तच्चक्षुष्मान्नो दुद्रुवुः स्वमालयं पातालं ॥ १८ ॥

राम
१२

इति एतैः कर्मभिः उरुजयादिनामभिः [illegible] हृतः आहृतः पाठांतरे आहूत इत्यर्थः ॥ १९ ॥ २० ॥ शावस्तिः श्रावस्तस्य पुत्रः कुवलयाश्वक एव धुंधुमा
र इति ख्यातः ॥ २१ ॥ तत्र कारणमाह यस्येति सुतानामेकविंशत्या सहस्रैर्वृतः सन् हतवान् धुंधुमार इति चेति चकारस्यान्वयः ॥ २२ ॥ ४ ॥ अथ तस्मा
न्निकुंभानिकुंभ शाश्वः ॥ २५ ॥ भार्याणां शतेन सह ॥ अस्य पुत्रार्थमिंद्रदेवत्यामिष्टिं प्रवर्तयामासुः ॥ स्मितास्वर्थे ॥ २६ ॥ तदेवाह राजेति षड्भिः ॥ अर्षितः सन् ज

जित्वा युद्धं धनं सर्वं पृथिव्यां वज्रपाणये ॥ प्रतियच्छन्स राजर्षिरिति नामभिराहृतः ॥ १९ ॥ पुंजयस्य पुत्रोभूदनेना नाम तत्सुतः ॥ पृथुः वि
श्वगंधिस्तत्सुतश्चंद्रो युवनाश्वस्तु तत्सुतः ॥ २० ॥ शावस्तिस्तत्सुतो येन शावस्ती निर्मिता पुरी ॥ बृहदश्वस्तु शावस्तिः ततः कुवलयाश्वकः ॥ २१ ॥
यः प्रियार्थमुतंकस्य धुंधुनामासुरं बली ॥ सुतानामेकविंशत्या सहस्रैरहनद्वृतः ॥ २२ ॥ धुंधुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः ॥
धुंधोर्मुखाग्निना सर्वे त्रय एवावशेषिताः ॥ २३ ॥ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत ॥ दृढाश्वपुत्रो हर्यश्वो निकुंभस्तत्सुतः स्मृतः ॥ २४ ॥
बर्हणाश्वो निकुंभस्य कृशाश्वोथास्य सेनजित् ॥ युवनाश्वोभवत्तस्य सोनपत्यो वनं गतः ॥ २५ ॥ भार्याशतेन निर्विण्ण ऋषयोस्य कृपालवः ॥ इ
ष्टिं स्म वर्तयांचक्रुरैंद्रीं ते सुसमाहिताः ॥ २६ ॥ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः ॥ दृष्ट्वा शयानान्विप्रांस्तान्पपौ मंत्रजलं स्वयं ॥ २७ ॥ उ
त्थितास्ते निशाम्याथ व्युदकं कलशं प्रभो ॥ पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं ॥ २८ ॥ राज्ञा पीतं विदित्वाथ ईश्वरप्रहितेन ते ॥ ईश्वराय नम
श्चक्रुरहो दैवबलं बलं ॥ २९ ॥ ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणं ॥ युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥ ३० ॥ कं धास्यति कुमारोयं
स्तन्ये रोरूयते भृशं ॥ मां धाता वत्स मा रोदीरितींद्रो देशिनीमदात्

लार्थं प्रविष्टः मंत्राभिमंत्रितं जलं पत्नीदेयं पुंसवनं पपौ ॥ २७ ॥ व्युदकं निरुदकं पुंसव
नं पुत्रोत्पत्तिकारणं ॥ २८ ॥ अहो दैवबलमेव मुख्यबलं पुरुषबलं तु न किंचिदिति वदंतः ईश्वराय नमस्कारं चक्रुः ॥ २९ ॥ ३० ॥ अयं कं धास्यति पास्यतीति
उः खिन्नैर्विप्रैरुक्ते पतितस्यास्मिन्मामायं धास्यति इंद्रो मां धाता हे वत्स मा रोदीरिति ब्रुवन् देशिनीं तर्जनीमदादित्यर्थः ॥

तस्यापि पिता युवनाश्वो भिन्नकुक्षिरपि न ममार । किं तु कालांतरेण तपसा सिद्धिमन्वगात् ।३२। मांधातुर्महिमानमाह त्रसद्दस्युरिति षड्भिः । अंग हे राजन् यस्मात् मांधातुरेव उद्विग्नाः कंपिताः संतस्त्रसंति अतः इंद्रः यस्य त्रसद्दस्युरिति नाम विदधे । स मांधाता अवनीमेकः शशासेत्युत्तरेणान्वयः ।३३। अच्युतस्य तेजसा अच्युतं तेजो यस्येति वा ।३४। आत्मविदपि सः यज्ञैर्विष्णुमीजे । तमेव विशिनष्टि सर्वदेवमयमिति सार्द्धेन ।३५। यत इति

न ममार पिता तस्य विप्रदेवप्रसादतः । युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ।३२। त्रसद्दस्युरितींद्रोंऽग विदधे नाम यस्य वै । यस्मात्त्रसंति ह्युद्विग्ना दस्यवो रावणादयः ।३३। यौवनाश्वोऽथ मांधाता चक्रवर्त्यवनीं प्रभुः । सप्तद्वीपवतीमेकः शशासाच्युततेजसा ।३४। ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः । सर्वदेवमयं देवं सर्वात्मकमतींद्रियं ।३५। द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः । धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकं ।३६। यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति । सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ।३७। शशबिंदोर्दुहितरि बिंदुमत्यामधान्नृपः । पुरुकुत्समंबरीषं मुचुकुंदं च योगिनं । तेषां स्वसारः पंचाशत् सौभरिं वव्रिरे पतिं ।३८। यमुनांतर्जले मग्नस्तप्यमानः परं तपः । निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ।३९। जातस्पृहो नृपं विप्रः कन्यामेकामयाचत । सोऽप्याह गृह्यतां ब्रह्मन् कामं कन्या स्वयंवरे ।४०। स विचिंत्याप्रियं स्त्रीणां जरठोऽयमसन्मतः । वली पलित एजत्क इत्यहं प्रत्युदाहृतः ॥ ४१ ॥

तिष्ठति अस्तं गच्छति ।३७। प्रसंगात्सौभरेश्चरितमाह तेषामिति यावत्समाप्ति । तेषां स्वसारः मांधातुः कन्याः ।३८। ननु महातापसस्य कुतो विवाहप्रसंगः कथं वा जरठं राजकन्या वव्रिरे तत्राह यमुनांतर्जले इति षड्भिः ।३९। नृपं मांधातारं । सोऽपि मांधाता स्वयंवरे कामं गृह्यतामित्याह ।४०। स विप्रः स्त्रीणामप्रियमात्मानं विचिंत्य अनेनाहं प्रत्याख्यातः आत्मानं तथा साधयिष्यामीति ध्यायन् इतः निश्चितवानित्युत्तरेणान्वयः । अपि प्रत्युदाहृतः । जरठो वृद्धः । वलीभिर्युक्तः पलितश्च एजत्कः कंपमानशिराः तापसत्वादिना वा असन्मतोऽहमिति कृत्वा ।४१।

तथेत्यस्यप्रपंचः सुरस्त्रीणामपीप्सितं किंपुनर्मनुजेंद्राणां याः स्त्रियः तासामिति ॥ ४१ ॥ ततः किं वृत्तं तदाह मुनिरिति द्वाभ्यां ॥ तत्रा प्रतीहारेण
पंचाशतापि राजकन्याभिः स्वयं एक एव वरो वृतः ॥ ४३ ॥ ४ ॥ गार्हस्थ्यं वर्णयति सइति चतुर्भिः ॥ बह्वृचस्तिमन्त्रसामर्थ्यमुक्तं ॥ ताभिः सहरेमसत्वन्तरेण
वृषः ॥ क्रीरेमेसुपारणीयेषु रतं यत्र याति स स्फटिक्रियासमृद्ध्याग्नेर्घ्याः परिच्छदायेषु तेषु गृहेषु ॥ तथा नानाविधेषूपवनेषु च ॥ अमलाभासि येषां तेषु

साधयिष्यति तथात्मानं सुरस्त्रीणामपीप्सितं ॥ किंपुनर्मनुजेंद्राणामिति व्यवसितः प्रभुः ॥ ४१ ॥ मुनिः प्रवेशितः कन्यांतः
पुरं हृष्टमद्विमत् ॥ वृतश्च राजकन्याभिरेकः पंचाशता वृतः ॥ तासां कलिरभूद्भूयांस्तस्यार्थेऽथोत्यसौ हृदयम् ॥ समाप्तरूपो नाथ वसति
तत्कृतवेतसां ॥ स बह्वृचस्ताभिरपारणीयः तपः श्रियानर्घ्यपरिच्छदेषु ॥ गृहेषु नानोपवनामलाम्भः सरस्सु सौगंधिककाननेषु
महार्हशय्यासनवस्त्रभूषणास्नानानुलेपाभ्यवहारमाल्यकैः ॥ स्वलंकृतस्त्रीषु गृहेषु नित्यदा रेमे स्तुगायद्द्विजभृंगबर्हिषु
यन्नार्हस्थ्यं तमवीक्ष्य सप्तद्वीपवतीपतिः ॥ विस्मितः स्तमसजहान्मान्धाता सौभरिश्रियाभिवितः ॥ एवं गृहेष्वभिरतो विषयान्विविधैः
सुखैः ॥ सेवमानो न चात्मध्यदाज्यस्तोकैरिवानलः ॥ सकदाचिदुपासीनस्त्वात्मापह्नवमात्मनः ॥ ददर्श बह्वृचाचार्यो मीन

सरस्सु च ॥ कथंभूतेषु सौगंधिकानां कह्लाराणां वकाननानि तिस्सोपानयाषु ॥ ४ ॥ कथंभूतेषु गृहादिषु ॥ अलंकृताः स्त्रियः पुरुषा सगमसुत्थितं
स्वयेषु ॥ अनुगायंतो द्विजाश्च पक्षिणः भृंगाश्च बर्हिणश्च येषु ॥ कथंभूतं महार्हशय्यादिभिरुपलक्षितः सन् ॥ ४६ ॥ आज्यस्तोकैरिव विंदुभिः ॥ ४८ ॥
ददर्शनीतस्यानुतापपूर्वकं वाणाप्रवृत्तो अस्य साहसकदाचिदिति सप्तभिः ॥ आत्मनापसमोहेतोः आत्मनोऽपह्नवं तपोहानि ददर्श ॥

भा०न
१४

संस्थायां सौभरिरिव व्रतस्थो योऽहं तस्य ब्रह्मतपः ॥ ५० ॥ मिथुनव्रतीनां दांपत्यधर्मवतां वेश्यपरिग्रहं संगं त्यजेत् हितं तद्व्रतिषु स्वधर्मधर्मपरेष्वेव कार्य इति शेषः ॥ ५१ ॥
संगाज्जातं दोषं प्रपंचयति एक इति ॥ पंचाशता भार्याभिः संवर्धमानः अभवमित्यर्थः ॥ ततश्च सुतैः पंचसहस्रसर्गश्चासं प्रत्येकं तासु पुत्रशतस्यो
त्पत्तेः उभयकृत्यानि ऐहिकपारत्रिकाणि कर्माणि तद्विषयाणां मनोरथानां ॥ अर्थभावः अर्थबुद्धिमान् ॥ ५२ ॥ न्यासमात्रसंगत्याग एव वा

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ॥ अंतर्जले वारिचरप्रसंगात्प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥ ५० ॥ संगं त्य
जेत मिथुनव्रतीनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि ॥ एकश्चरन् रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चे
त्प्रसंगः ॥ ५१ ॥ एकस्तपस्व्यहमथांभसि मत्स्यसंगात्पंचाशदासमुत पंचसहस्रसर्गः ॥ नांतं व्रजाम्युभयकृत्यमनोरथानां मा
यागुणैर्हृतमतिर्विषयेऽर्थभावः ॥ ५२ ॥ एवं वसन् गृहे कालं विरक्तो न्यासमास्थितः ॥ वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥
तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्षणमात्मवान् ॥ सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥ ५४ ॥ ताः स्वपत्युर्महाराज निरीक्ष्याध्या
त्मिकीं गतिं ॥ अन्वीयुस्तत्प्रभावेन अग्निं शांतमिवार्चिषः ॥ ५५ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे षष्ठोऽध्यायः ६ ॥
शुक उवाच ॥ मांधातुः पुत्रप्रवरो योंऽबरीषः प्रकीर्तितः ॥ पितामहेन प्रवृतो यौवनाश्वस्तु तत्सुतः ॥ १ ॥

न्यस्यधर्मस्त्यर्थः ॥ ५३ ॥ ४ ॥ आध्यात्मिकीं गतिं ब्रह्मणि लयं ॥ ५५ ॥ इति नवमे षष्ठः ॥ मांधातुरन्वयः प्रोक्तः सप्तमे यत्र गीयते ॥ पुत्रजात्प्रहासंवा
न्हरिश्चंद्रस्य चोत्तमं ॥ पुत्रप्रवरः पुत्रश्रेष्ठः पितामहेन युवनाश्वेन प्रवृतः पुत्रत्वेन स्वीकृतः अत एव तस्य मांधातप्रवरा यस्य तत्सुतः स्मृतः गो
त्रप्रवरो ॥ १ ॥

राम
१४

इमे युवनाश्वाम्बरीषहारीताः मांधातृगोत्रस्य प्रवराः अवांतरविशेषप्रवर्त्तकाः ॥ यद्वा ॥ यौवनाश्वविशेषणं पितामहेन मांधात्रा सह आर्षेयवरणे प्रवृत्तः मांधाता प्रवरो येषां ते इमे अंबरीषयौवनाश्वहारीताः यथाह आश्वलायनः ॥ हरितकुत्सपिंगशंखदर्भभैमगवानां आंगिरसांबरीषयौवनाश्वेति मांधातारं हैके भवते अंगिरसां गिरसं मांधात्राम्बरीषयौवनाश्वेतीति ॥ १ ॥ पुरुकुत्सस्य वंशं कथयिष्यन्नादौ तावत्तस्य विवाहं प्रभावं चाह ॥ उरगैर्भ्रातृभिर्यादत्तां नर्मदां तत्यावः धात्वर्थाहीन् ॥ स च पुरुकुत्सो नागान्नवरो भूत् ॥ वरमाह ॥ इदं नर्मदया रसातलनयनादिकं स्मरतां सर्पादभयमिति ॥ ३ ॥ देहकृत्पिता त्रसदस्योः नराणां

हारीतस्त्वस्य पुत्रोऽभून्मांधातृप्रवरा इमे ॥ नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः ॥ तया रसातलं नीतो भुजगेंद्रप्रयुक्तया ॥ १ ॥ गंधर्वानवधी
त्तत्र वध्यान्वै विष्णुशक्तिधृक् ॥ नागाल्लेभे वरः सर्पादभयं स्मरतामिदं ॥ २ ॥ त्रसदस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत ॥ हर्यश्वस्तत्सुत न
य स्तस्मात्तु हरुणोऽथ त्रिबंधनः ॥ ४ ॥ तस्य सत्यव्रतः पुत्रः त्रिशंकुरिति विश्रुतः ॥ याज्याश्चांडालतां प्राप्तो गुरोः कौशिकतेजसा ॥ ५ ॥ सशरीरो ग
तः स्वर्गमद्यापि दिवि दृश्यते ॥ पातितो वा शिरा देवैस्तेनैव स्तंभितो बलात् ॥ ६ ॥ त्रैशंकवो हरिश्चंद्रो विश्वामित्रवसिष्ठयोः ॥ यत्र मित्र
मध्यस्थाद्वपक्षिणो वाडवार्षिकं ॥ ७ ॥

इत्यर्थः ॥ त्रयः शंकवः वड्ढः स्वदेहेन वो रोषाय यस्य सोयं त्रिशंकुः ॥ तदुक्तं हरिवंशोपि तत्रैवापरितोषेण गुरोर्दोग्ध्रीव धेनव ॥ अप्रेषितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः इति ॥ परिणीयमानविप्रकन्यापहरणान् तद्दुःस्य गुरोः पितुः शीघ्रात् ॥ कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेन ॥ ५ ॥ तेनैव कौशिकेन ॥ ६ ॥ पक्षिणोः आडीबकयोः ॥ विश्वामित्रो राजसूये दक्षिणाच्छलेन हरिश्चंद्रं सर्वस्वमपहृत्य यातयामास ॥ तत्क्रुत्वा जपितो वशिष्ठोपि विश्वामित्रत्वमाडी भवेत्य शशाप सोपि तं बको भवेति वसिष्ठं शशाप ॥ तपोरायुद्धमभूदिति प्रसिद्धं ॥ हरिश्चंद्रो वैधस ऐक्ष्वाको राजा पुत्रश्चास्ते इत्यादिश्रुतिप्रसिद्धं ॥ ७ ॥

यौवना

भा॰न
१५

हरिश्चंद्र[illegible]स्य चरितमाह सोनपत्य इत्यादि यावत्समाप्ति कथं शारंगायात तस्मै राह पुत्रो मे जायतां । न यदि वीरः पुत्रो मे जायते तर्हि तेनैव पुत्रेण पशुना त्वा यजे यजामीति भाषया । तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहितो नाम पुत्रो जातः । ८ । जाते पुत्रे स वरुणो जातः सुतो मामनेन यज

सोन पत्ये विषाणोत्मानारदस्योपदेशतः । वरुणं शारंगायातः पुत्रो मे जायतां प्रभो । न यदि वीरो महाराज तेनैव त्वां यजे इति । तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः । जातः सुतो यनेनामां यजस्वेति सोऽब्रवीत् । यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति निर्दशो वरुण आगत्य यजस्वेत्याह सोऽब्रवीत् । दंताः पशोर्यदा जायेरन्नथ मेध्यो भवेदिति ॥ ११ ॥ जाता दंता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् । यदा पतंत्यस्य दंता अथ मेध्यो भवेदिति । १२ । पशोर्निपतिता दंता यजस्वेत्याह सोऽब्रवीत् । यदा पशोः पुनर्दंता जायंतेऽथ पशुः शुचिः । पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् । सांनाहिको यदा राजन् राजन्योऽथ पशुः शुचिः । १४ । इति पुत्रानुरागेण स्नेहयंत्रितचेतसा । कालं वंचयता तेन तमुक्तो देव तन्मे कृत । १५ । रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितं । प्राणप्रेप्सुर्धनुःपाणिररण्यं प्रत्यपद्यत । १६ । पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरं । रोहितो ग्राममेयाय तमिंद्रः प्रत्यषेधत ॥ १७ ॥

जस्वेत्यब्रवीत् । यदा पशुर्निर्दशः निर्गतदशदिवसः स्यादित्यत्र स राजाब्रवीदित्यनुषंगः ॥ १० ॥ राजन् हे वरुणः राजन्यः पशुर्यदा सांनाहिकः कवच संबंधार्हो संग्रामसमर्थः । अथ तदा हविरित्येवं तत कालं वंचयता राज्ञा उक्तः ॥ १४ ॥ प्रार्थितो देवो वरुणः तत्कालं प्रतीक्षते इत्यर्थः ॥ १५ ॥ चिकीर्षितं आत्मना पशुना वरुणयजनं ॥ १६ ॥ ततश्च कुपितेन वरुणेन ग्रस्ते अत एव जातं महद् उदरं यस्य तं पितरं श्रुत्वा ॥ १७ ॥

एम
१५

समां वर्ष ॥ १८ ॥ द्वितीये च वर्षे वृत्रहाज्ञ्यमेत्य तथैव तं ग्रन्थेषु तत किंचित्किंचिद्विदाह ॥ १९ ॥ २० ॥ वरुणेन मुक्तः स दरं यस ॥ महत्त्व कथायस्मतः ॥ २१ ॥ आत्मवा
नुजमहर्ग्निरध्वर्युरभूत् ॥ आयास्योद्गुनिः सामगात् ज्ञाताऽभूदित्यर्थः ॥ २२ ॥ उपरिष्टात विश्वामित्रस्त्र ताख्यानप्रसंगेन ॥ २३ ॥ अविहतं गतिहानं २४
तामेव गतिमाह साङ्ख्ययोगमनः पृथिव्यां धारयन् ॥ तानकलोध्यात्वा तयाऽज्ञानं विनिर्दहन् ॥ तां वहित्वा मुक्त्वा मुक्तं बंधनं स्थावि त्यन्वयः मनो प्र
भृपेः पर्यटन्नं पुण्यां पतीर्थक्षेत्रनिषेवणेः ॥ रोहिताय्यादिशक्रोक्तः प्रोप्यरण्ये वसत्समां ॥ १८ ॥ एवं द्वितीये तृतीये चतुर्थे पंचमे तथा ॥ अभ्येत्याभ्ये
त्य स्थविरो विप्रो भूत्वाह वृत्रहा ॥ १९ ॥ षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीं ॥ उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतं ॥ शुनःशेफं पशुं पित्रे
प्रदाय समवंदत ॥ २० ॥ ततः पुरुषमेधेन हरिश्चन्द्रो महायशाः ॥ मुक्तोदरोऽयजद्देवान्वरुणादीन्महत्कथः ॥ २१ ॥ विश्वामित्रोऽभवत्तस्मिन्हो
ता चाध्वर्युरात्मवान् ॥ जमदग्निरभूद्ब्रह्मा वसिष्ठोऽयास्यः सामगः ॥ २२ ॥ तस्मै तुष्टो ददाविंद्रः शातकौंभमयं रथं ॥ शुनःशेफस्य माहात्म्य
मुपरिष्टात्प्रवक्ष्यते ॥ २३ ॥ सत्यसारां धृतिं दृष्ट्वा सभार्यस्य च भूपतेः ॥ विश्वामित्रो भृशं प्रीतो ददावविहतां गतिं ॥ मनः पृथिव्यां तामद्भिस्तेज
सापोऽनिलेन तत् ॥ स्वे वायुं धारयंस्तच्च भूतादौ तं महात्मनि ॥ तस्मिन्ज्ञानकलां ध्यात्वा तयाऽज्ञानं विनिर्दहन् ॥ हित्वा तां स्वेन भावेन निर्वा
णसुखसंविदा ॥ अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबंधनः ॥ इति श्रीभागवते महापुराणे नवमस्कंधे हरिश्चन्द्रोपाख्यानं नाम सप्त
मोऽध्यायः ७
लोहितं समाहः मनश्चात्रमयं ॥ अन्नमयं हि सोम्य मन इति श्रुतेः ॥ अतोऽत्र शब्दवाच्यायां पृथिव्यां मनो धारयन् एकीकुर्वन् तां पृथिवीमद्भि
रेकीकुर्वन् ॥ अपस्तेजसा ॥ तत्तेजोऽनिलेन ॥ तं च स्वेऽआकाशे ॥ तच्च भूतादावहंकारे ॥ तं च भूतादिमहंकारं ॥ महात्मनि महत्तत्त्वे ॥ २५ ॥ तस्मिन्विषयाकारं ज्ञान
लेशानकलां ज्ञानांशमात्मत्वेन ध्यात्वा तया ध्यानप्रवृत्त्यानुपयाऽज्ञानावरकमज्ञानं विनिर्दहन् निर्वाणसुखसंविदा तां वहित्वा मुक्तबंधनः सन्न
निर्देश्येनाप्रतर्क्येण स्वेन भावेन स्वस्वरूपेणातस्थौ ॥ नवमे सप्तमः ॥ ॥ रामराम

अष्टमे रोहितस्योक्तो वंशो यत्राभवन्नृपः । सगरः कपिलाक्षेपात् निर्दग्धाप्तसुतव्रजः । वंशस्तस्मादंशुमद्येन यत्र गङ्गा विनिर्मिता । अतः वंशात्
देवः ॥१॥ हतावृषस्य ॥२॥ और्वेणाश्रावितं ॥ आत्मानं देहं प्रजावंतं सगर्भं ३ ॥ गरो विषं तेन गरेण सहैव जातः ॥४॥ ॥५॥ गुरुवाक्येन और्ववचनेन क

श्रीशुक उवाच ॥ हरितो रोहितसुतश्चंपस्तस्माद्विनिर्मिता । चंपापुरी सुदेवोऽतो विजयो यस्य चात्मजः ॥१॥ भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि बाहुकः । सोऽरिभिर्हृतभू राजा सभार्यो वनमाविशत् ॥२॥ वृद्धं तं पञ्चतां प्राप्तं महिष्यनुमरिष्यती । और्वेण जानतात्मानं प्रजावंतं निवारिता ॥३॥ आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽन्धसा सह । सह तेनैव संजातः सगराख्यो महायशाः ॥४॥ सगरश्चक्रवर्त्यासीत्सागरो यत्सुतैः कृतः । यस्तालजंघान्यवनाञ्छकान्हैहयबर्बरान् ॥५॥ नावधीद्गुरुवाक्येन चक्रे विकृतवेषिणः । मुंडाञ्छ्मश्रुधरान्कांश्चिन्मुक्तकेशार्द्धमुंडितान् ॥६॥ अनंतर्वाससः कांश्चिदबहिर्वाससोऽपरान् । सोऽश्वमेधैरयजत सर्ववेदसुरात्मकं ॥७॥ और्वोपदिष्टयोगेन हरिमात्मानमीश्वरं । तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः ॥८॥ सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः । हयमन्वेषमाणास्ते समंतान्न्यखनन्महीं ॥९॥ प्रागुदीच्यां दिशि हयं ददृशुः कपिलांतिके । एष वाजिहरश्चौर आस्ते मीलितलोचनः ॥१०॥ हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः । उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥११॥ स्वशरीराग्निना तावन्महेंद्रहृतचेतसः । महद्व्यतिक्रमहता भस्मसादभवन्क्षणात् ॥१२॥

क्षिरदृष्ट्वैव विकृतवेषिणश्चक्रे तदेवाह मुंडानिति ॥ मुक्तके शार्द्धमुंडिताश्च ॥६॥७॥ और्वेणोपदिष्टो योगः उपायस्तेन तस्य सगरस्य द्वे भार्ये सुमतिः केशिनी चेति तत्र सुमत्याः पुत्राणां प्रभावं मत्वा स्वयं वाहयन्सुमत्या इति षड्भिः एष वाजिहर इति द्वे तत्रेति ॥ षष्टिसहस्राणि परिसंख्यता यासां ते यदा अनिमिषलोचनोन्मीलनं चकार ॥१२॥

मु
६
६
राम
१६

केचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयंति तत्त्रिरात्रिकमेवेति ॥ कृतत्यात्त्वाह ॥ सत्वधामनि निखिलसत्वमूर्तौ ॥ जगतः पवित्रशुद्धिकर आत्मा यस्य तस्मिन् कथं विभाव्यते संभाव्यते ॥ अत्र भाववनायां दृष्टांतः भुवो रजः खे कथं संभाव्यत इति ॥ १३ ॥ किंच यस्य येन ईरिता प्रवर्त्तिता ॥ तत्त्वविपश्चितः मर्त्य तस्य कथं पृथक्मतिः अरिमित्रादिभेददृष्टिः ॥ १४ ॥ तदेवं समतामसमंजसो त्रेषु सर्वेषु केशिन्याः पौत्रः अंशुमान् समानीतः पितामहाद्दृशाः ... इति द्वौ

न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इति सत्वधामनि ॥ कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः ॥ १३ ॥ यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययं ॥ भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथक्मतिः ॥ १४ ॥ योऽसमंजस इत्युक्तः स केशिन्यां नृपात्मजः ॥ तस्य पुत्रोंऽशुमान्नाम पितामहहिते रतः ॥ १५ ॥ असमंजस आत्मानं दर्शयन्नसमंजसं ॥ जातिस्मरः पुरा संगाद्योगी योगाद्विचालितः ॥ १६ ॥ आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियं ॥ सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयन् जनं ॥ १७ ॥ एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै ॥ योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ ॥ १८ ॥ अयोध्यावासिनः सर्वे बालकान् पुनरागतान् ॥ दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत ॥ १९ ॥ अंशुमांश्चोदितो राज्ञा तुरगान्वेषणे ययौ ॥ पितृव्यखातानुपथं भस्मांति ददृशे हयम् ॥ २० ॥

यित्तु माह योः असमंजस इति प्रोक्तः केवलमेतेः बहुतरत्व असमंजस एव स तु केशिन्याः सुतः ज्ञात्रजत्वमिव प्रतीतं वारयति ॥ तस्यैवंरूपस्य त्मनो देहाज्जातः ॥ १५ ॥ तस्य कथामाह ॥ चतुर्भिः असमंजसः प्राक्पूर्वजन्मनि योगी सन् संगाद्धेतोः योगाद्विचालितः ॥ १६ ॥ अत इदानीं जातिस्मरः सन् संगपरिहाराय जनमुद्वेजयन् लोके गर्हितं ज्ञातीनां च विप्रियं कर्माचरन् ॥ क्रीडितो बालान् शरय्वां प्राशान् प्राक्षिपदिति द्वयोरन्वयः ॥ १७ ॥ एवंविधवृत्तः कर्म्मयस्य सः ॥ १८ ॥ १९ ॥ पितृव्याः खातमनुपथः पंथा तपयो भस्मांति भस्मसमीपे

भा॰न
१७

अजानतोः वजानंतोप्यनुकंप्यावपंब्बिति । तुष्टाव षड्भिः एशान मस्तमानेवमाशयः ॥ १ ॥ अजतः अजः ब्रह्मापित्वा मद्यापि न पश्यति न च बुध्यते । क
थंभूतं । आत्मनः स्वस्मात्परं परमेश्वरं । कैर्हेतुभिः समाधियुक्तिभिः समाधिनाप्यपरोक्षं न पश्यति । युक्तिभिः परोक्षमपि सम्यग्न बुध्यत इत्यर्थः । अ
परे अर्वाचीनास्तु कतं न ह्यात्वा पश्येयुः । अर्वाचीनत्वे हेतुः तस्य ब्रह्मणः मनस्तु शरीरं वधीस्त्व मत्वतमो रजः कार्याणि ताभिर्ये विविधा देवतिर्यङ्नराणां मगाः
तेषु सृष्टाः । तत्रापि वयमप्रकाशाः पश्चाः कुतः पश्यामेत्यर्थः ॥ ११ ॥ अपरे तर्हि किं किं पश्यंति तत्राह । ये देहभाजस्ते त्विमित्र मस्य कुक्ष्यंतमपि त्वा न विदुः । किं

रव्य तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजं । अस्तौ समाहितमनाः प्रांजलिः प्रणतो महान् ॥ ११ ॥ अं॰ मा॰ वा॰ च॰ न पश्य
न्ति त्वां परमात्मनोः जनो न बुध्यतेऽद्यापि समाधियुक्तिभिः । कुतोऽपरे तस्य मनः शरीरधीविसर्गसृष्टा वयमप्रकाशाः ॥ १२ ॥
त ये देहभाजस्त्रिगुणप्रधाना गुणान्विपश्यंत्युत वा तमश्च । यन्मायया मोहितचेतसस्त्वां विदुः स्वसंस्थं न बहिःप्रकाशाः ॥ १३ ॥ तं त्वा
महं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमोहैः । सनंदनाद्यैर्मुनिभिर्विभाव्यं कथं विमूढः परिभावयामि ॥ १४ ॥

तद्गुणानेव विपश्यंति । अथवा न गुणानपि अपितु तम एव पश्यंति । यतस्त्रिगुणप्रधाना बहिरेव प्रधानं येषां । अतो बहिरेव प्रकाशो ज्ञानं येषां । उद्धिपरतंत्रत
याज्ञा अतस्त्वं स्वयोविषयान्पश्यंति । स्वभैस्तं तम एव केवलं न तु निर्गुणत्वा । सर्वत्र हेतुः यन्मयतः । यस्य तव माययेति वा मोहितं चेतो येषां ते ॥ १३ ॥ तथा
प्यहं विचारेण ज्ञास्यामीति चेत्तत्राह । तं त्वामहं विमूढः कथं परिभावयामि विचारयामि । कथंभूतं । ज्ञानघनं स्वस्वरूपज्ञानशक्तिस्तत एव प्रध्वस्ता मायागुणा
निमित्तो भेदमोहो येषां तैर्विभाव्यं विविक्तं । अयंभावः ज्ञानघनत्वान्न ज्ञानविषयत्वं । विचारविषयत्वमपि मायागुणारमितस्तोह॰ विचारसमर्थ इति ॥ १४ ॥

राम
१७

तस्मात् हे प्रशांत त्वां पुराणपुरुषं केवलं नमामेत्यन्वयः पुराणपुरुषत्वे हेतुः मायया गुणाः कर्माणि च विश्वसृष्ट्यादीनि लिंगानि च ब्रह्मादिरूपाणि यस्मात्ः प्रशान्तत्वे हेतुः सदसत्यां कार्यकारणाभ्यां ॥ पुण्यपापाभ्यां वा विमुक्तं ॥ अतः अनामरूपं तत्कृतनामरूपशून्यं ॥ किं तु ज्ञानोपदेशाय गृहीता प्रकारितो देहः शुद्धसत्वमूर्तिर्येनतं ॥ यद्वा ॥ हे प्रशांतमायेति ॥ हे अगुणेति च संबोध्याकर्मभिः सृष्ट्यादिकार्यैर्लिंगानि यस्येति योज्यं ॥ यद्वा ॥ प्रशांता मा

प्रशांतमायागुणकर्मलिंगमनामरूपं सदसद्विमुक्तं ॥ ज्ञानोपदेशाय गृहीतदेहं नमामहे त्वां पुरुषं पुराणं ॥ १५ ॥ त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु ॥ भ्रमंति कामलोभेर्ष्यामोहविभ्रांतचेतसः ॥ १६ ॥ अद्य नः सर्वभूतात्मन् कामकर्मेंद्रियाशयः ॥ मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥ १७ ॥ श्रीशुक उवाच ॥ इत्थं गीतानुभावस्तं भगवान् कपिलो मुनिः ॥ अंशुमंतमुवाचेदमनुगृह्य धियानृप ॥ १८ ॥ श्रीभगवानुवाच ॥ अश्वोऽयं नीयतां वत्स पितामह पशुस्तव ॥ इमे च पितरो दग्धा गंगांभोऽर्हंति नेतरत् ॥ १९ ॥ तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् ॥ सगरस्तेन पशुना क्रतुशेषं समापयत् ॥ २० ॥ राज्यमंशुमति न्यस्य निस्पृहो मुक्तबंधनः ॥ और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमां ॥ २१ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे सागरोपाख्याने अष्टमोऽध्यायः ॥ ८ ॥

यागुणाश्रयो यस्मिन्नित्येकमेव पदं ॥ १५ ॥ त्वमायां पश्चाद्यते त्वन्मायेति द्वाभ्यां ॥ कामादिभिर्विभ्रांतानि चेतांसि येषां त इमे सर्वे गृहादिषु भ्रमंति ॥ १६ ॥ हे सर्वभूतात्मन् ॥ नः अस्माकं तत्क्षणे एव दुरितात् त्वद्दर्शनात् दृढोपि मोहमयः पाशश्छिन्नः कथंभूतः कामादीनामाशयः आश्रयः त्वत्प्रसादेन कृतार्थोऽस्मीत्यर्थः ॥ १७ ॥ १८ ॥ अश्वं लब्ध्वापि महांकांक्षंत्याह इमे चेति परिक्रम्येति श्लोकोक्तिः ॥ २० ॥ इति नवमेऽष्टमः

तत्र पेशुमतो वंशः खट्वांगावधि वर्ण्यते ॥ गंगा भूतलमानिन्ये यस्य पौत्रो भगीरथः ॥ यथा सगरः पौत्राय राज्यं दत्वा तपस्तेपे तथा अंशुमान्स्वपुत्राय राज्यं
दत्वा महांतं कालं तपस्तेपे इति चकारस्यार्थः ॥ नाशक्नोत् गंगामानेतुमिति शेषः संस्थितः मृतः ॥१॥ कालं मृत्युमेयिवान् प्राप्तः ॥२॥ तं प्रत्यात्मानं दर्शयामा
स तेन वरदास्मीति गंगायोक्तः सन् स्वमभिप्रायं पूर्वजोद्धरणं शशंस कथयामास ॥३॥ आह गंगा ॥ कोपि गगनात्पतंत्या मे वेगं धारयिता धारयिष्यति ॥४॥

श्रीशुक उवाच ॥ अंशुमांश्च तपस्तेपे गंगानयनकाम्यया ॥ कालं महांतं नाशक्नोत्ततः कालेन संस्थितः ॥१॥ दिलीपस्तत्सुतस्तद्व-
दशक्तः कालमेयिवान् ॥ भगीरथस्तस्य सुतस्तेपे स सुमहत्तपः ॥२॥ दर्शयामास तं देवी प्रसन्ना वरदास्मि ते ॥ इत्युक्तः स्वमभिप्राय
शशंसावनतो नृप ॥३॥ कोपि धारयिता वेगं पतंत्या मे महीतले ॥ अन्यथा भूतलं भित्वा नृप यास्ये रसातलं ॥४॥ किं चाहं न भुवं या-
स्ये नरा मय्यामृजंत्यघं ॥ मृजामि तदघं क्वाहं राजंस्तत्र विचिंत्यतां ॥५॥ भगीरथ उवाच ॥ साधवो न्यासिनः शांता ब्रह्मिष्ठा लोकपा-
वनाः ॥ हरंत्यघं तेंगसंगात्तेष्वास्ते ह्यघभिद्धरिः ॥६॥ धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणां ॥ यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव त-
तुषु ॥७॥ इत्युक्त्वा स नृपो देवं तपसातोषयच्छिवं ॥ कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ॥८॥ तथेति राज्ञाभिहितं सर्वलोक-
हितः शिवः ॥ दधारावहितो गंगां पादपूतजलां हरेः ॥९॥

किं च अस्मासु मृजंति क्षालयिष्यंति ॥ तत्रोपायो विचिंत्यतां ॥५॥ हरंति हरिष्यंति ॥ अघं यंमि-
नन्नित्यद्यमित ॥६॥ आत्मा कथंभूतः यस्मिन्निदं विश्वमोतं ग्रथितं तंतवः तंतुषु शाटीपट इव प्रोतं च तिर्यक्तंतुषु पट इव ॥ अस्मै रुद्रो धारयत्व-
द्वेगं धारयिष्यतीत्यर्थः ॥ इति एवं गंगा उक्त्वा ॥ तन्मुक्त्वेति पाठे आवयितेत्यर्थः ॥८॥ राज्ञाभिहितं तथेत्यंगीकृत्य हरेः पादेन पूतं जलं यस्याः तां ॥९॥

॥ स गंगान्माहात्म्यमाह वतुर्भिः घस्राः जलस्पर्शमात्रेण तस्य केवलं देहमस्माभिर्वा नमास्कात । ब्रह्मणिस्त्वकृते नरदंडे महता अपि । तां श्रद्धया से
वेतेति शेषः ॥ १२ ॥ तत्र पंचयति ॥ तस्मीभूते नांगेन यः संगः तेन ॥ १४ ॥ अनेन तस्य विशेषणं प्रतिवेदयति ॥ त्रेतायां देहसंबंधं ॥ १५ ॥ १६ ॥ नलस्य सखा ॥ अ

भगीरथः स राजर्षिस्त्रिन्ये भुवनपावनीं । यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते ॥ रथेन वायुवेगेन प्रयांतमनुधावंती । देशान्पुनंती
निर्दग्धानासिंचत्सगरात्मजान् ॥ ११ ॥ यज्जलस्पर्शमात्रेण ब्रह्मदंडहता अपि ॥ सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥ १३ ॥ भ
स्मीभूतांगसंगेन स्वर्याताः सगरात्मजाः ॥ किं पुनः श्रद्धया देवीं ये सेवंते धृतव्रताः ॥ १४ ॥ न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहोदितं ॥ अ
नंतचरणांभोजप्रसूताया भवच्छिदः ॥ सन्निवेश्य मनो यस्मिन् श्रद्धया मुनयोऽमलाः ॥ त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मतां या
श्रुतो भगीरथाज्जज्ञे तस्य नाभोऽपरोऽभवत् ॥ सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥ १६ ॥ ऋतुपर्णो नलसखो योऽश्वविद्यामया
न्नलात् ॥ दत्वाक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः ॥ १७ ॥ ततः सुदासस्तत्पुत्रो मदयंतीपतिर्नृप ॥ आहुर्मित्रसहं यं वै कल्माषांघ्रिमु
स्व तक्वचित् ॥ वशिष्ठशापाद्रक्षोऽभूदनपत्यः कर्मणा ॥ राजोवाच ॥ किंनिमित्तो गुरोः शापः सौदासस्य महात्मनः ॥ एतद्वेदितुमिच्छामि
कथ्यतां न रहो यदि ॥ १८ ॥ श्रीशुक उवाच ॥ सौदासो मृगयां किंचिच्चरन्रक्षो जघान ह ॥ मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया ॥ २० ॥
संचिंतयन्नघं राज्ञः सूदरूपधरो गृहे ॥ गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषं ॥ २१ ॥

यान्नृपान्नः तत्सुतः ऋतुपर्णस्य सुतः ॥ १७ ॥ तत्सुतः सौदासः ॥ १८ ॥ न रहः न रहस्यं ॥ १९ ॥ मृगयां चरन् कंचिद्राक्षसं जघान ॥ तस्य भ्रातरं मुमोच ॥ २० ॥ स भ्राता
सूयन्निष्ठ ॥ सूदः पाचकः तद्रूपधरः सन्नस्य गेहे वर्तमानः ॥ २१ ॥

अमज्यमंजसा विलोक्य । एवं नरमांसाभ्यवहारेण वसिष्ठ एवं तं शापं द्वादशवार्षिकं चक्रे ॥ ११ ॥ दृशातीः नीज्ञात्रपः स्वपादस्पो जहौ । मान्यत्र इत्यत्र हेतुः दि
शाइति । एवमनेन मित्रसहत्वमपि दर्शितं । मित्रसकलत्रस्य वाचः सहना इ ॥ १४ ॥ तद्वैराज्ञं सौविकल्माषांघ्रित्वे स कारणमुक्तो स्वकर्मणाः नपत्या इति
यदुक्तं तत्स्वपं वर्णनिवासो यो ः नौवनौकसौ नौवतोः पतीच । इह कूपस्पाठे सकारलोपश्चार्षः । अकृतार्थं वह्नी नवत ॥ १५ ॥ ६ ॥ अकृतार्थ असमाप्त इति

परिवेष्यमाणं भगवान् विलोक्यामिषमंजसा । राजानमशपत्क्रुद्धो रक्षो ह्येवं भविष्यसि । रक्षः कृतं तद्विदित्वा चक्रे द्वादशवार्षिकं
सोऽप्यपोंजलिमादाय गुरुं शप्तुं समुद्यतः । वारितो मदयंत्यापो रुशतीः पादयोर्जहौ ॥ १३ ॥ दिशः खमवनिं सर्वं पश्यन्नेवमयं नृपः
राक्षसं भावमापन्नः पादेकल्माषतां गतः ॥ १४ ॥ व्यवायकाले ददृशे वनौकौ दंपती द्विजौ । क्षुधार्त्तो जगृहे विप्रं तत्पत्न्याहाकृतार्थ
वत् ॥ १५ ॥ न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः । मदयंत्याः पतिर्वीर नाधर्मं कर्तुमर्हसि ॥ १६ ॥ देहि मेऽपत्यकामाया अकृता
र्थं पतिं द्विजं । देहोऽयं मानुषो राजन् पुरुषस्याखिलार्थदः ॥ १७ ॥ तस्मादस्य वधो वीर सर्वार्थवध उच्यते । एष हि ब्राह्मणो विद्वान् तपः
शीलगुणान्वितः ॥ १८ ॥ आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितं । सर्वभूतात्मभावेन भूतेष्वंतर्हितं गुणैः ॥ १९ ॥ सोऽयं ब्रह्मर्षिवर्यस्ते
राजर्षिप्रवराद्विभो । कथमर्हति धर्मज्ञ वधं पितुरिवात्मजः ॥ २० ॥ तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः । कथं वधं यथा बभ्रोर्म
न्यते सन्मतो भवान् ॥ २१ ॥

१५ ॥ ६ ॥ अकृतार्थं असमाप्तरतिं ॥ १७ ॥ सर्वभूतानां आत्मेति भावेन यो ब्रह्म आराधयितुमिच्छुः । यद्वा सर्वभूतानामात्मभावेन भू
तेषु स्थितमपि गुणैरंतर्हितं ब्रह्मेति संबंधः पाठांतरे अंतर्हितः सोऽपि स्वगुणैरेणान्वयः ॥ २० ॥ भ्रूणस्य श्रोत्रियस्य गर्भस्य भूत इति व ॥ बभ्रोः गोः सन्माम
तो भवान् वधं कथं साधु मन्यत इत्यर्थः ॥ २१ ॥ कृ. टी. ३ ॥ तिव्यवायकाल इत्यादिनाकर्मणो अप्रज इत्येतेन । वनमोका ॥ २ ॥

त्र्णामपि प्रियेन विना न जीविष्यामि मो यथा परिमज्ञः क्रियते तर्हि मृतकं यथा मृतप्रायामा पूर्ववद्भवत्रय ॥ ३१ ॥ २ ॥ दिधिषुं गर्भाधानकर्त्तारं ॥ ३४ ॥ गाधानान्मैथु
नाद् हे अकृतप्रज्ञा मृत्युर्मया दर्शितः ॥ ३५ ॥ ७ ॥ तदेवं कर्मणा अप्रजः ॥ ३८ ॥ अबिभ्रद्धारेत्यर्थः न व्यजायत न प्रासूत ॥ अतो वसिष्ठ एव तस्याउदरमश्मना

यद्ययं क्रियते भक्षस्तर्हि मां खाद पूर्वतः ॥ न जीविष्ये विना येन क्षणं च मृतकं यथा ॥ ३२ ॥ एवं करुणा भाषिण्या विलपंत्या अनाथवत् ॥ व्या
घ्रः पशुमिवाखादत्सौदासः शापमोहितः ॥ ३३ ॥ ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितं ॥ शोचंत्यात्मानमुर्वीशमशपत्कुपिता स
ती ॥ ३४ ॥ यस्मान्मे भक्षितः पाप कामार्त्तायाः पतिस्त्वया ॥ तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः ॥ ३५ ॥ एवं मित्रसहं शप्त्वा पतिलोक
परायणा ॥ तदस्थीनि समिद्धेग्नौ प्रास्य भर्तुर्गतिं गता ॥ ३६ ॥ विशापो द्वादशाब्दांते मैथुनाय समुद्यतः ॥ विज्ञाय ब्राह्मणीशापं महिष्या
स निवारितः ॥ ३७ ॥ अत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणा प्रजः ॥ वसिष्ठस्तदनुज्ञातो मदयंत्यां प्रजामधात् ॥ ३८ ॥ सा वै सप्त समा गर्भ
मबिभ्रन्न व्यजायत ॥ जघ्नेश्मनोदरं तस्याः सोश्मकस्तेन कथ्यते ॥ ३९ ॥ अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ॥ नारीकवच
इत्युक्तो निःक्षत्रे मूलकोभवत् ॥ ४० ॥ ततो दशरथस्तस्मात्पुत्र ऐडविडस्ततः ॥ राजा विश्वसहो यस्य खट्वांगश्चक्रवर्त्यभूत् ॥ ४१ ॥
यो देवैरर्थितो दैत्यानवधीद्युधि दुर्जयः ॥ मुहूर्त्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ॥ ४२ ॥

जघान ॥ स उत्पन्नः सन् अश्मकः ॥ ३९ ॥ स्त्रीभिः संवेष्ट्य परशुरामात्परिरक्षिता ॥ अतो नारीकवच इत्युक्तः निःक्षत्रे सति क्षत्रवंशस्य मूलमभवत् ॥ मूलकार
ति वोक्तः ॥ ४० ॥ ४१ ॥ प्रमेते देवैर्वरं वृणीष्वेत्युक्तो खट्वांगेनोक्तं प्रथमं तावन्ममायुः कथ्यतामिति ॥ देवैश्चोक्तं मुहूर्त्तमात्रमिति तत्तत्र ज्ञात्वा देवैर्दत्तेन विमा
नेन शीघ्रं स्वपुरमेत्य मनः परमेश्वरे संदधे ॥ ४२ ॥

भा०न
९०

एतदेवस्वस्य साधुत्वं ब्राह्मणपूर्वकं तत्कृतेन निश्चयेन दर्शयति नेतिसप्तभिः कुलदैवात् ब्रह्मकुलात् प्रकाशात् येप्राणादयो नातिवल्लभाः नातिप्रियाः ॥४३॥ मह्यं मम ॥४४॥ भूतभावनो हरिस्तस्मिन्नेव भावना यस्य सोहं तं कामं न वृणे ॥४५॥ तत्र हेतुः य इति विक्षिप्तानीन्द्रियाणि धीश्च येषां ते देवा अपि ॥४६॥ अथ तस्मात् प्रकृत्यात्मनि मनसि रूढं गुणेषु संगं विश्वकर्तुर्भावेन हित्वा तमेवाहं प्रपद्ये ॥४७॥ अन्यभावं देहाद्यभिमानं स्वयमत्ता-

न मे ब्रह्मकुलात्प्राणाः कुलदैवान्न चात्मजाः न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ॥४३॥ न बाल्येपि मतिर्मह्यमधर्मे रमते क्वचित्
नापश्यमुत्तमश्लोकादन्यत्किंचन वस्त्वहं ॥४४॥ देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः ॥ न वृणे तमहं कामं भूतभावनभावनः ॥४५॥
ये विक्षिप्तेन्द्रियधियो देवास्ते स्वहृदि स्थितं ॥ न विंदंति प्रियं शश्वदात्मानं किमुतापरे ॥४६॥ अथेशमायारचितेषु संगं गुणेषु गंधर्वपुरो-
पमेषु ॥ रूढं प्रकृत्यात्मनि विश्वकर्तुर्भावेन हित्वा तमहं प्रपद्ये ॥४७॥ इति व्यवसितो बुद्ध्या नारायणगृहीतया ॥ हित्वान्यभावमज्ञानं
ततः स्वभावमाश्रितः ॥४८॥ यत्तद्ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितं ॥ भगवान्वासुदेवेति यं गृणंति हि सात्वताः ॥४९॥ इति श्रीभागव-
ते महापुराणे नवमस्कंधे सूर्यवंशानुकथने नवमोध्यायः ॥ श्रीशुक उवाच ॥ खट्वांगाद्दीर्घबाहुश्च रघुस्तस्मात्पृथुश्रवाः ॥ अजस्त-
तो महाराजस्तस्माद्दशरथोभवत् ॥१॥ ॥

नं हित्वा ॥४८॥ स्वभावमेवाह यत्तदिति अन्यवाक्कल्पितं वागाद्यविषयत्वात् वासुदेवं इति यं गृणंति ॥ ब्राह्मण एव भक्तानुग्रहार्थमाविष्कृत शक्तेर्वीरा-
देवत्वात् ॥४९॥ इति नवमे नवमः ॥ दशमे प्राह रघुस्थागवतोश्रीरामसंभवं तच्चरित्रं च लंकेशं हत्वायोध्यागमाविधि ॥ खट्वांगाद्दीर्घबाहुः ॥१॥

राम
९०

१॥ ऋषिभिर्वाल्मीकमुख्यैर्भूरि वर्णितं त्वया गुरुः स्मृतं ॥ तथापि मे संक्षेपतः कथ्यमानं शृणु ॥१॥ ग्रंथकोटिभिराकीर्णं महत्तत्पौरुषविक्रमं ॥ अध्यायद्वय
तो वक्ष्ये कश्लोकैः समस्यति ॥ स कोशलेन्द्रः श्रीरामः स नोऽस्मान् भुवनान्यपात् ॥ कथंभूतः याग्ये यौवने पितुः सत्यस्य पालनार्थं त्यक्तराज्यः सन् पथ्य
वरति सकमाराप्यापड्या तदेवाहाविधयोः पाणिना पिस्पर्शेना क्लिन्नमायय्योः ताभ्यां प्रतिवनं चचार ॥ हरी ड्डो हहूत मान् ॥ सुग्रीवो वा ॥ स्नजो
लक्ष्मणाहताभ्यां मृजिताभ्यपनीतापथिरजो मार्गश्रमाय सा सूर्पणख्यो वैरूप्यात्कर्णनासिकाछेदाद्धेतोः तया प्रलोभिते न रावणेनापहारात्तद्विय

तस्यापि भगवानेष मानुषाकृतिमयो हरिः ॥ अंशांशेनवतीर्णोगात्सुरैस्त्वं प्रार्थितः स्वैः ॥१॥ रामलक्ष्मणभरतशत्रुघ्नाख्यतिमन्त
या ॥ तस्य त्वचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः ॥ श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥२॥ गुर्वर्थे त्यक्तराज्यो व्यचरदनु
वनं पद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथिरुजो यो हरीन्द्रानुजाभ्यां ॥ वैरूप्याच्छूर्पणख्याः प्रियविरहरुषारो
पितभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुः ॥ खलदवदहनः कोशलेन्द्रोऽवतान्नः ॥४॥ विश्वामित्राध्वरे येन मारीचाद्या निशाचराः ॥ पश्य
तो लक्ष्मणस्यैव हता नैर्ऋतपुंगवाः ॥५॥

णाकलत्रेण विरहः तेन रुड् तया आरोपितयो भ्रुवोर्विजृंभेणो वत्रस्तो ब्धिर्यस्मात् ॥ ततस्तद्विता
यनेन बद्धः सेतुर्येनातस्तः ॥ खलारावणादय एव दवो वनं तत्स्य दहनः ॥ संक्षेपतो वर्णितं रामचरितं श्रुत्वादित्यक्षरार्थमुपविस्तरेणाह विश्वामित्राध्वर
इत्यादिना यावद्वन्नाध्यायसमाप्ति ॥ पश्यत एव लक्ष्मणस्य तमप्यनयत्स्यैव हता इत्यर्थः ॥ यच्छब्दानां कोशलेन्द्रोऽवतादित्यनेनैवान्वयः ॥५॥

लोकेयेवीरास्तेषां समितौ समाजे ओघ एव तैर्ययं वक्रं धनुरिक्षुयष्टिमिव लीलयैवादाय सज्जीकृतमारोपितं विकृष्य मध्येव भञ्ज हे नृप। उग्रं कठिनं गिरिशत्रदा
रु। बाहुकानां त्रिभिः शतैरुपनीतं बालमज्जःस लीलेव लीलायसमः ॥ ६ ॥ अतः तत्र पाणिं त्वयोग्यानि गुणशीलादीनि यस्यास्तां सीतां महता। पूर्वं उरसि स्थि
तिलब्धो मानो यया तां श्रियं यहित्वा ॥ धनुर्भंगमहानादः स्ववणाकर्णितस्य भृगुपतेर्दर्पं व्यनयत अपनीतवान्। कथंभूतस्य त्रिः त्रिसप्तकृत्वः राजबीजस्य भूम्या
मही यो करोत् तस्य ॥ ७ ॥ इदानीं गर्वं ध्यंशति। श्लोकविषये त्वगमहयशति। कदाचित्कैकेय्या हृष्टेन राज्ञा वरं ये वृणीष्व इति दास्यामीति प्रतिश्रुतं। तदा श्रीरामस्य

यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयंवरगृहे त्रिशतोपनीतम्। आदाय बालगजलील इवेक्षुयष्टिं सज्जीकृतं नृप विकृष्य
बभंज मध्ये ॥ ६ ॥ जित्वानुरूपगुणशीलवयोगरूपां सीताभिधां श्रियमुरस्यभिलब्धमानां। मार्गे व्रजन्भृगुपतेर्व्यनयत्प्ररूढं दर्पं
महीमकृत यस्त्रिरराजबीजां ॥ ७ ॥ यः सत्यपाश परिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः। राज्यं श्रियं प्रणा
यिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसंगः ॥ ८ ॥ रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदूषणमुख्य
बंधून्। जघ्ने चतुर्दशसहस्रमपारणीयकोदंडपाणिरटमान उवास कृच्छ्रं ॥ ९ ॥

युवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य च वने
वासः प्रार्थितः। तदा सत्यपाशेन परिवीतस्य पितुर्निदेशमाज्ञां शिरसा जगृहे। ततो राज्यादिकं त्यक्त्वा सभार्यो वनं ययौ। स्त्रैणस्य अपि सहर्षं त्यागे दृष्टान्तः
मुक्तसंगो योगी यथा तत् प्राणान्निवर्तते ॥ ८ ॥ रक्षसो - - - - - - - - स्वसुः शूर्पणखायाः। अशुद्धबुद्धेः सीताच्छिद्रकृतो कामातुरायाः इति वा रूपं व्यकृत विका
रमनयत। तस्याः खरत्रिशिरोदूषणामुख्यान् बंधून् वधवीयेषु तान् चतुर्दशसहस्रान् जघान। अपारणीयं अलंघ्यं असह्यं कोदंडं पाणौ यस्य सः ॥ ९ ॥

सीतायाः कथाश्रवणेन दीपितो हृच्छयो यस्य तेन सीतां हरिष्यता स्वस्माद्भीतेन स्वस्याश्रमाद् अपकर्षणार्थं सृष्टं निसृष्टं मारीचं विलोक्य जघानं क
थंभूतं॥ छद्मैतेणवपुषा स्वर्णहरिणरूपेणोपलक्षितं॥ अतएव छलोभनेनाश्रमतस्तेनापकृष्टः सन्॥ कदर्त्तेयथा उग्रः श्रीरुद्रः॥ १०॥ ततस्स्वरक्षोऽधमेन
रावणेन अस्मन्नमयनीतायां प्रियया वियुक्तो भ्रात्वा सह लक्ष्मणेन सह कृपणवद्दुनेव चचार॥ किमभिप्रायः सन्॥ इति अनेन प्रकारेण खीमेगिना
दुःखोदर्कां गतिं प्राप्यापयन्॥ ११॥ आत्मार्थिनकृत्येनकर्म्मणा रावणेन सह युद्धेन हतेश्च त्यं शाखीयं दहनादिकं यस्य तं जटायुषं पत्रवद्दग्ध्वा कबंधं

सीताकथाश्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपतेर्दशकंधरेण॥ जघ्ने द्रुतैणवपुषाश्रमतोपकृष्टो मारीचमाशु विशिखे
न यथा कमुग्रः॥ रक्षोऽधमेन शकवद्द्विपिनेऽसमन्ते वैदेहराजदुहितर्यपयापितायां॥ भ्रात्रा वने कृपणवत्प्रियया वियुक्तः
खीमेगिनां गतिमिति प्रथयंश्चचार॥ दग्ध्वात्मकृत्यहतकृत्यमहश्च कबंधं सख्यं विधाय कपिभिर्दयितागतिं तैः॥ बुद्ध्वाथ वालि
निहते सुवगेंद्रसैन्यैर्वेलामगात्समनुजोऽजमवार्यितां धिः॥ १२॥ यद्दोषविभ्रमविवृत्तकराग्रपातसंभ्रांतनक्रमकरोऽमयगा
णीद्योषः॥ सिंधुः शिरस्सहसांगपरिगृह्य नृपपादारविंदमुपगाद्भव माषयतत॥ १३॥

स्वगरहणाय प्रसारितबाहुरास्तमसमहत॥ अथवालिनि हते॥ तैः कपिभिर्दयितायागतिं बुद्ध्वा॥ अजमवाप्यामर्षितावंधीबस्समसमनुजोवेलां समुद्र
तीरमगात॥ १२॥ तत्रविराजमुपवासेनप्रतीक्षतोपि सिंधुर्यदानोपस्थितः॥ तदायस्सरोषविभ्रमेण कोधलीलया विवृत्तोयः कराग्रस्तस्पातेनस
भ्रांतानक्रामकरायस्मिन्॥ भयेनगीर्णः ग्रस्तः स्तिमितोद्योषोयेनसः सिंधुः एतद्दृश्यमाणेव भाषे॥ अर्हणामध्वादिकं नृपीमूर्द्धिमान्॥ १३॥

भाषणमेवाहमन्त्वामिति द्वाभ्यां । एतावत्पर्यन्तं नु निश्चितत्वान विरामनज्ञानीनइत्यर्थः इदानीं तज्ज्ञातो सीत्याह । यदिति ह्य कुपरं । यस्येत्यर्थः यद्दृशे
भ्यामत्वा हिमः सुरगणाः रघो भवंति सभवानिति । १४ कामं यथेष्टं जलमाक्रम्यापि प्रथाहि । त्रैलोक्यपावयति अंकरयति तथा तं जहि । हि वीरयद्य
पि तव जलप्रतिबंधकं न भवति तथापी हमेतं वध्नीहि । किमर्थं तत यशो विस्तारय तरेवाह । यं सेतुमुपेत्य दुःकरं कपीवेष्टनात्त्वद्यशो गास्यति भू
याप्ते । १५ तद्वाक्यमभिनंद्य यत्कृतं तत्तदाह बबंधेति । विविधैरद्रीणां कूटैः शृंगैः सेतुं बबंध । अग्रेसानात्वेषपाह तमसेन वरंध्वालंकामविशन् कथं

मत्वा वयं जडधियो नु विराम भूमन् कर्तुं समाधि शुभ पंकजगतामधीशं । यत्सत्वतः सुरगणा रजसः प्रजेशा मन्योश्च भूत
पतयः सभवान्गुणेशाः ॥ १४ ॥ कामं प्रयाहि जहि विश्रवसो वमेहं त्रैलोक्यरावणमवाप्नुहि वीरपत्नीं । वध्नीहि सेतुमि
ह ते यशसो वितत्यै गायंति दिग्विजयिनो यमुपेत्य भूपाः ॥ १५ ॥ बध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपींद्रकरकंपित
भूरुहांगैः सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लंकां विभीषणदृशाविशदग्रदग्धां ॥ १६ ॥ सा वानरेंद्रबलरुद्धविहारको
ष्ठश्रीद्वारगोपुरसदोवलभीविटंका । निर्भज्यमानधिषणध्वजहेमकुंभशृंगारकागजकुलैर्ह्रदिनीव घूर्णा ॥ १७ ॥

शृंगैः कपींद्राणां करैः कंपितानि भूरुहाणां अंगानि शाखादीनि येषु तैः विभीषणस्य दृशा उद्धरणैर्महाविशन् सुग्रीवादयः प्रमुखा येषां तैरनीकैः
१६ ततस्तु सा लंका घूर्णा प्रचलिताभूत् कथंभूताः वानरेंद्राणां बलैरुद्धा विहारादयो यस्यां निर्भज्यमाना धिषणा रथो यस्यां सा तत्र विहारं क्रीडास्थानम
ने कोष्ठं धान्यागारादि श्रीः कोशः द्वारं गृहद्वारं गोपुरं पुरद्वारं सदः सभा वलभी प्रासादशिरो गृहाच्छादिनी विटंका कपोतपालिका धिषणां वहि ११

रक्षःपतौ रावणः पुत्रमिन्द्रजितं प्रहस्तादींश्च रामदिनोत्साहमन्त्रा ॥ १८ ॥ शूलिमिश्च लाटिमिर्दुर्गमां तां यांतद्धानष्टतनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्य
गात ॥ महत्कृतोमान् ॥ स्फोटोजांबवान् ॥ १९ ॥ तेरक्षपतेरनीकयाऽङ्गगदाद्याः सर्वैः रावणास्त्रःसाहिभिर्युद्धं युद्धं सेन्यातत्वं द्वंद्वयथामवतितथामि
यत्पसरागस्य इमाहिभिर्जेघ्राः कानसीतायाऽभिमर्शनं हृतमंगलं यस्य सरावणाद्वशोयेषांतान् ॥ २० ॥ स्वबलस्यनष्टिनाशमेक्ष्य रुष्टः क्रुद्धः सनृपा

रक्षःपतिस्तरवलोकानिकं सकं सधूम्राक्षदुर्मुखवशांतनरांतकादीन् ॥ एवं प्रहस्तमतिकायविकंपनादीन् सर्वोत्तुगात्मसहि
तोरथकुंभकर्णौ ॥ १८ ॥ तायात्तधानष्टतनासमपिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गो ॥ सुग्रीवलक्ष्मणमरुत्सुतगंध
मादनीलोंगदर्न्नपनसादिभिरन्वितोगात ॥ १९ ॥ तेनीकपारक्षपतेरभिपत्य सर्वे द्वंद्वं चक्रुरभिमयन्निरयाश्च योधैः ॥ जघ्नुर्नैमे
गिरिगरेषुभिरंगदाद्याः सीताभिमर्शहतमंगलरावणोंशान् ॥ २० ॥ रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिसमा
रामं ॥ स्वःस्पंदनेक्रमतिमातलिनोपनीते विभ्राजमानमहनंत्रिशितैः क्षुरप्रैः ॥ २१ ॥ रामस्तमाह पुरुषाद्दुरीषपत्रैः कांतः स
मक्षमपताः पद्भताश्च वने ॥ त्यक्तत्रयस्य फलमद्य जुगुप्सितस्य पश्चाभिकाल इव कर्हिरलंध्यवीर्यः ॥ २२ ॥ एवं क्षिपन् धवषितं
धितमुत्सर्जबाणां सवज्रमिवतद्धृदयं विभेद ॥ सोऽसृग्वमन्दशमुखो विनिपतद्विमानाद्दोहेतिजल्पतिजने सुकृती वरिक्तः ॥ २३ ॥

नकं पुष्पकं विमानं रथं वा आरुह्य श्रीरामसमभिससार ॥ अथ तत्स्वःस्पंदने स्वर्गस्थेंद्रस्य रथे मातलिना इन्द्रसारथिनोपनीते क्रमतिदीप्तियुक्तो विभ्रा
जमानमहनन् अहन् ॥ २१ ॥ हे पुरुषाधम पुरीषपात्र सपुरीषप्राय ॥ यद्यस्माद् पद्भताश्च वनस्थाया यथा अस्मत्कग्रहं प्रविश्य किमपि हरतितत्कृत ॥ तस्माज्जुगुप्सि
तस्य कर्मणाः कर्हि क्षेयकालस्वालंध्यवीर्यो हं फलं यच्छामि ॥ अधर्मकर्तुः पुनः कालो यथा यच्छतीति वा ॥ २० ॥ रिक्तः क्षणपुण्याः सुकृती विमानादिव

विमानानामाकाशस्थपतटीका ॥ १४ ॥

भा० न
१२

रक्षःस्त्रीणां विलापमाह तत इति पंचभिः मंदः स्वल्पमुदरं यस्याः तया रावणभार्यया सह ॥ २४ ॥ परैरर्दिता ॥ २६ ॥ गृध्राणामन्नं भक्ष्यः नरकहे
तवे नरकभोगाय ॥ २८ ॥ सांपरायिकं और्ध्वदैहिकं ॥ २९ ॥ ३० ॥ आत्मनः स्वस्य संदर्शनेन य आह्लादस्तेन विकसन्मुखपंकजं यस्याः ॥ ३१ ॥ यानं

ततो निःक्रम्य लंकाया यातुधान्यः सहस्रशः ॥ मंदोदर्या समं तस्मिन्प्ररुदंत्य उपाद्रवन् ॥ २४ ॥ स्वान्स्वान्बंधून्परिष्वज्य लक्ष्मणे
षुभिरर्दितान् ॥ रुरुदुः सुस्वरं दीना घ्नंत्य आत्मानमात्मना ॥ २५ ॥ हा हताः स्म वयं नाथ लोकरावण रावण ॥ कं यायाच्छरणं लं
का त्वद्विहीना परार्दिता ॥ २६ ॥ नैवं वेद महाभाग भगवान्कामवशं गतः ॥ तेजोनुभावं सीताया येन नीतो दशामिमां ॥ २७ ॥ कृ
तैषा विधवा लंका वयं च कुलनंदन ॥ देहः कृतोन्नं गृध्राणामात्मा नरकहेतवे ॥ २८ ॥ श्रीशुक उवाच ॥ स्वानां विभीषणश्चक्रे को
शलेंद्रानुमोदितः ॥ पितृमेधविधानेन यदुक्तं सांपरायिकं ॥ २९ ॥ ततो ददर्श भगवानशोकवनिकाश्रमे ॥ क्षामां स्वविरहव्या
धिं शिंशपामूलमाश्रितां ॥ ३० ॥ रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकंपत ॥ आत्मसंदर्शनाह्लादविकसन्मुखपंकजां ॥ ३१ ॥
आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः ॥ विभीषणाय भगवान्दत्वा रक्षोगणेशतां ॥ लंकामायुश्च कल्पांतं ययौ चीर्णव्रतः
पुरीं ॥ ३२ ॥ अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥ उपगीयमानचरितः शतधृत्यादिभिर्मुदा ॥ ३३ ॥ गोमूत्रयावकं श्रु
त्वा भ्रातरं वल्कलांबरं ॥ महाकारुणिकोतप्यज्जटिलं स्थंडिलेशयं ॥ ३४ ॥ भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥ पादुके
शिरसि न्यस्य रामं प्रत्युद्यतोग्रजं ॥ ३५ ॥

उपमकं भ्रातृभ्यां लक्ष्मणहनुमद्भ्यां आयुश्च दत्वा तेनापि सहैव ययौ ॥ ३२ ॥ ३३ ॥ गोमूत्रयावकं गो
मूत्रपक्वयवान्नभोजिनं भ्रातरं ॥ ३४ ॥ ३५ ॥

राम
१२

स्वशिबिरात् एतं विना ॥ योध्याम् अप्रविशन् स्वस्य वासं यत्र निर्मितवान् ॥ तस्मात्स्वकीयाद्गीतादिभिर्युक्तो गणं प्रत्युद्यताः अपि भिन्नं वयसो ॥ ब्रह्मघो-
षेणाभिहताद्घोषेण पठद्भिः स्वर्णारमाक्ताः कक्षाः यांतायाः यांताभिः पताकाभिः ॥ हेमैः इति चत्वारि रथविशेषणानि ॥ ३१ ॥ परमेष्ठ्यानि एणार्हा

नंदिग्रामात्स्वशिबिरात् गीतवादित्रनिस्वनैः ॥ ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ॥ ३६ ॥ स्वर्णाङ्कृतपताकाभिर्हैमैश्चित्रध्वजै रथैः ॥ क
मरैश्च हस्तकमस्तनैः हैमैः परः वर्मभिः ॥ श्रेणीभिर्वीरमुख्याभिर्भृत्यैश्चैव पदानुगैः ॥ ३७ ॥ पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च ॥
पादयोर्न्यपतत्प्रेम्णा प्रश्रितः हृदयेक्षणाः ॥ ३८ ॥ पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्पलोचनः ॥ तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्ज-
लैः ॥ रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः ॥ तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥ ४० ॥ धुन्वन्त उत्तरं गात्र्यं पतिं वीक्ष्य
चिरागतं ॥ उत्तराकोशला माल्यैः किरंतो ननृतुर्मुदा ॥ ४१ ॥ पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे ॥ विभीषणः ससुग्रीवः श्वेतच्छत्रं
मरुत्सुतः ॥ ४२ ॥ धनुर्निषंगाञ्छत्रुघ्नः सीता तीर्थकमंडलुं ॥ अबिभ्रदंगदः खड्गं हैमं चर्म ऋक्षराण्नृप ॥ ४३ ॥ पुष्पकस्थः स्थितः स्त्री-
भिः स्तूयमानश्च बंदिभिः ॥ विरेजे भगवान् राजन् ग्रहैश्चंद्र इवोदितः ॥ ४४ ॥ भ्रातृभिर्नंदितः सोऽपि सोत्सवां प्राविशत्पुरीं ॥ प्रविश्य रा-
जभवनं गुरुपत्नीश्च मातरः ॥ ४५ ॥ गुरून्वयस्यावरजान्पूजितः प्रत्यपूजयत् ॥ वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ॥ ४६ ॥ उत्थाय स्वमा- तुः

णि छत्रचामरादीनि ॥ प्रेम्णा प्रश्रितः हृदयं स्वेक्षणे लोचने येषां ॥ ३ ॥ गरस्ताः स्वप्राणांस्तन्वोत्थिताः ॥ आरोप्यांकेऽभिषिंचत्यो बाष्पौघैर्विजहुः शुचः ॥ ४७
नेत्रजैर्जलैः स्नापयन्नाश्लिष्य ॥ ३९ ॥ येऽर्हसत्तमाः कुलवृद्धास्तेभ्योऽपि नमश्चक्रे ॥ ४ ॥ अयोध्याप्रवेशप्रकारमाह पादुके इति सार्धैर्द्वादशभिः ॥ ४२ ॥ धनुश्च
निषंगौ च तान् ॥ ४३ ॥ ४४ ॥ गुरुपत्नीः कैकेय्याद्याः ॥ ४५ ॥ वयस्यानवरजांश्च ॥ ४६ ॥ बाष्पौघैरभिषिंचत्यः शुचः शोकान् विजहुः शोषमसु ॥ ४७ ॥

इतिनवमस्कंधेदशमः ॥ ततस्त्रैकादशोध्यायाभावमत्रतंजेःसह ॥ यत्तादिपिचकारशोणमस्त्रस्तुवर्णिते ॥१॥ तस्तताम्रादिशांमध्येयावतीभूस्तां व्र

जटानिर्मुच्यविधिवत्कुलवृद्धैःसमंगुरुः ॥ अभ्यषिंचद्यथैवेंद्रंचतुःसिंधुजलादिभिः ॥४८॥ एवंकृतशिरःस्नानःसुवासाःस्रग्व
लंकृतः ॥ स्वलंकृतैःसुवासोभिर्भ्रातृभिर्भार्ययाबभौ ॥ अग्रहीदासनंभ्रात्राप्रणिपत्यप्रसादितः ॥४९॥ प्रजाःस्वधर्मनिरताव
र्णाश्रमगुणान्विताः ॥ जुगोपपितृवद्रामोमेनिरेपितरंचतं ॥५०॥ त्रेतायांवर्तमानायांकालःकृतसमोभवत् ॥ रामेराजनिध
र्मज्ञेसर्वभूतसुखावहे ॥५१॥ वनानिनद्योगिरयोवर्षाणिद्वीपसिंधवः ॥ सर्वेकामदुघाआसन्प्रजानांभरतर्षभ ॥५२॥ नाधिव्या
धिजराग्लानिदुःखशोकभयक्लमाः ॥ मृत्युश्चानिच्छतांनासीद्रामेराजन्यधोक्षजे ॥५३॥ एकपत्नीव्रतधरोराजर्षिचरितःशु
चिः ॥ स्वधर्मंगृहमेधीयंशिक्षयन्स्वयमाचरत् ॥ प्रेम्णानुवृत्त्याशीलेनप्रश्रयावनतासती ॥ धियाह्रियाचभावज्ञाभर्तुःसीता
हरन्मनः ॥५५॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेरामानुचरितेदशमोध्यायः ॥ श्रीशुकउवाच ॥ भगवानात्मनात्मानं
रामउत्तमकल्पकैः ॥ सर्वदेवमयंदेवमीजेआचार्यवान्मखैः ॥ होत्रेददाद्दिशंप्राचींब्रह्मणेदक्षिणांप्रभुः ॥ अध्वर्यवेप्रती
चींवउदीचींसामगायसः ॥२॥ आचार्यायददौशेषांयावतीभूस्तदंतरा ॥ मन्यमानइदंकृत्स्नंब्राह्मणोर्हतिनिस्पृहः ॥३॥ इ
त्ययंतदलंकारवासोभ्यामवशेषितः ॥ तथाराज्ञ्यपिवैदेहीसौमंगल्यावशेषिता ॥४॥ तेतुब्राह्मणदेवस्यवात्सल्यंवीक्ष्य
ह्मणएवार्हतीतिमन्यमानाः ॥३॥ अयंश्रीरामःतत्तदासौमंगल्यमात्राभरणादि संस्तुतं ॥ प्रीताःक्लिन्नधियस्तस्मैप्रत्यर्प्येदंबभाषिरे ॥५॥
कृतावन्मात्रमवशेषितंयस्मात्तस्मादतिरिक्तंहिरण्यादिसर्वंददावित्यर्थः ॥ ४ ॥

अघ्नतं किं अस्त्रं तं सर्वं स्वमित्यर्थः ॥ विश्वपत्र विश्व न्यस्तं दंडे मुनिभिरर्पितो विघ्नेन्याहत्ता वघ्रीयस्य तस्मै तेषु अर्पिता वघ्रीयेनेति वा ॥ ७ ॥ अंसं विदः
श्रुत्वान्याप तमो वाल्मीकिः तस्याश्रमं प्राप्ता ॥ १० ॥ अन्तर्वत्नी गर्भिणी क्रियाजातकर्माद्याः ॥ ११ ॥ इक्ष्वाकोऽपि श्रुत्वा रोद्धुं नाशक्नोत् ॥ १६ ॥ नचातति

ग्नौ

अथ त्वं न त्वया किंतु भगवन् पृच्छ्यते नेश्वर ॥ यस्तौति दं दं विश्वपतमो हमितिसर्वा विषा ॥ ६ ॥ नमो ब्रह्मण्यदेवाय रामायाकुंठमेधसे
उत्तमश्लोकधुर्याय न्यस्तदंडार्पितांघ्रये ॥ कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः ॥ चरन्वाचोऽशृणोद्रामो भार्यामुद्दिश्य कस्य
चित् ॥ ८ ॥ नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् ॥ स्त्रीलोभी बिभृयात्सीतां रामो नाहं भजे पुनः ॥ ९ ॥ इति लोकाद्बहुमु
खाद्दुराराध्यादसंविदः ॥ पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम् ॥ १० ॥ अन्तर्वत्न्यागते काले यमौ सा सुषुवे सुतौ ॥ कुशो
लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ॥ ११ ॥ अंगदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ ॥ तक्षः पुष्कल इत्यास्तां भरतस्य मही
पते ॥ सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ॥ १२ ॥ गंधर्वान्कोटिशो जघ्ने भरतो विजये दिशां ॥ तदीयं धनमानीय सर्वं राज्ञे न्यवे
दयत् ॥ १३ ॥ शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ॥ हत्वा मधुवने चक्रे मथुरां नाम वै पुरीं ॥ १४ ॥ मुनौ निक्षिप्य तनयौ सीता भर्त्रा
विवासिता ॥ ध्यायन्ती रामचरणौ विवरं प्रविवेश ह ॥ १५ ॥ तच्छ्रुत्वा भगवान्रामो रुंधन्नपि धिया शुचः ॥ स्मरंस्तस्या गुणांस्तांस्तान्
नाशक्नोद्रोद्धुमीश्वरः ॥ १६ ॥ स्त्रीपुंप्रसंग एतादृक्सर्वत्र त्रासमावहः ॥ अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः ॥ १७ ॥ तत ऊ
र्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः ॥ ॥ त्रयोदशाब्दसाहस्रमग्निहोत्रमखंडितम् ॥ १८ ॥

त्र

सी
म्य
त्रि

त्रमेतादृगित्याह स्त्रीपुंसयोः प्रसंग आसक्तिः त्रासमाव
हतिन्नित त्या विभक्तो रलगार्षः पाठांतरं स्तगम किमुतेति ग्राम्यस्य कोकिलः ॥ १७ ॥ अग्निहोत्रमजुहोत् ॥ १८ ॥

तस्य

भा० न क १५

आत्मज्योतिर्निजं धाम ॥१९॥ जलधिबंधनं अस्त्रपूगैश्च रक्षसां वध इतिदं कपिभिः साहाय्यमिव वर्णितमपि यशः स्तुतिर्न भवति तत्र हेतुः ॥ अधिक
साम्याभ्यां विमुक्तं धाम प्रभावो यस्य सः किं च कपयः सहायाः अतः सुग्रीवाद्याश्च यथा लीलामात्रं तथैवेदमपि युक्तं चेदित्याह सुरयाचनया
आत्ता स्वीकृता लीलार्थी तनुर्येन तस्य ॥२०॥ एवंविधलीलाप्रयोजनमैश्वर्यमित्याह यस्यामलमिति यस्य यशः नृपाणां युधिष्ठिरादीनां सदस्सु ऋषयो
मार्कंडेयादयो गायंति दिगिभेंद्राणां पट्टवत् पट्टरूपं तत्पर्यंतं तथा प्रमितमित्यर्थः नाकपाला देवाः वसुपालाश्च वसुधापालाश्च तेषां किरीटैर्जु

स्मरतां हृदि विन्यस्य विद्धं दंडककंटकैः ॥ स्वपादपल्लवं राम आत्मज्योतिरगात्ततः ॥१९॥ नेदं यशो रघुपतेः सुरयाच्ञयात्तलीला
तनोरधिकसाम्यविमुक्तधाम्नः ॥ रक्षोवधो जलधिबंधनमस्त्रपूगैः किं तस्य शत्रुहनने कपयः सहायाः ॥२०॥ यस्यामलं नृप
सदस्सु यशोऽधुनापि गायंत्यघघ्नमृषयो दिगिभेंद्रपट्टं ॥ तं नाकपालवसुपालकिरीटजुष्टपादांबुजं रघुपतेः शरणं प्रपद्ये
यैः संस्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतापि वा ॥ कोशलास्ते ययुः स्थानं यत्र गच्छंति योगिनः ॥२२॥ पुरुषो रामचरितं श्रवणै
रुपधारयन् ॥ आनृशंस्यपरो राजन् कर्मबंधैर्विमुच्यते ॥२३॥ राजोवाच ॥ कथं स भगवान् रामो भ्रातॄन्वा स्वयमात्मनः ॥ तस्मिन्वा ते
न्ववर्त्तंत प्रजाः पौराश्च ईश्वरे ॥२४॥

ष्टं पादांबुजं यस्य तं रघुपतिं पाठांतरे तत्तस्य रघुपतेर्जुष्टं पादांबुजं प्रपद्य इत्यर्थः ॥२१॥ स रामः संविष्टः अ
उक्तो वा यैः ते कोशलदेशवासिनः सर्वेपि यत्र योगिनो गच्छंति तत्स्थानं ययुः ॥२२॥ अनृशंस्यपरः उपशमनिष्ठः सन् विमुच्यते ॥२३॥ स रामः स्वयमकथ
मवर्त्तत भ्रातॄन्प्रति वा कथमवर्त्तंत ते कथं भूतान् आत्मनः आत्मांशभूतान् तस्मिन्वा ईश्वरे ते भ्रात्रादयः अनु आनतेः कथमवर्त्तंतेति प्रश्नत्रयं ॥२४॥

राम १५

तथा श्रीरामस्यायोध्यादिप्रवृत्तिप्रकारमाह ॥ अथेति ॥ अनेनैव मार्गेण प्रेषितदासानुसारितया वृत्तिरुक्ता स्वाध्यसिंहासनसमीकारानंतरं ॥ १५ ॥ उरंकर्णी
यतित्रिभिः ॥ गंधोदकैर्मदविंदुभिश्च आसिक्ता मार्गा यस्यां ॥ हृत्तराम स्तोमिव समृद्धा चेति वितर्कैः पाठांतरधोमितरां कामाव्यक्तांगामिचेत्यर्थः
॥ १६ ॥ १७ ॥ १८ ॥ पौराणां तस्मिन् वृत्तिमाह ॥ तमुपेत्येति वराहस्वरूपेणात्वेयाह्वतामिमां स्थावाहृति ॥ १९ ॥ प्रजानां तस्मिन् वृत्तिमाह ॥ ततः प्र

मुकुअव व ॥ अथादिशाहिग्विजये आत्हाद्विमदवेनेश्वरः ॥ आत्मानं दर्शयन्स्वानां पुरीमैन्नतमातुगः ॥ १५ ॥ आसिक्तमार्गां
गंधोदैः करिणां मदसीकरैः ॥ स्वामिनं प्राप्तमालोक्य मत्तांवा स्तृतरामिव ॥ १६ ॥ प्रासादशोभरमणाचैत्यदेवगृहादिषु ॥
विन्यस्तहेमकलशैः पताकाभिश्च मंडितां ॥ १७ ॥ पूगैः सवृंतै रंभाभिः पट्टिकाभिः सुवाससां ॥ आदर्शैरंशुकैः स्रग्भिः कृ
तकौतुकतोरणां ॥ १८ ॥ तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः ॥ आशिषो युयुजुर्देव पाहीमां प्राक्त्वयोद्धृतां ॥ १९ ॥ ततः प्र
जा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ॥ आरुह्य हर्म्याण्यरविंदलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ॥ २० ॥ चे
अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ॥ अनंताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥ २१ ॥ ब्प

जा इति ॥ २० ॥ स्वयं कथमवर्त्ततेत्यस्योत्तरमाह ॥ अथेति यावत्समाप्ति ॥ स्वगृहं प्रविष्टः सन् तस्मिन् रेमे ततः इति पंचमेनान्वयः ॥ गृहं वर्णयति स्वै
र्द्वित्रिभिः ॥ अनंता ये अखिला रत्नादीनां कोशाः तैराढ्यात्रानर्घ्यां त्रानर्घ्याडिवः परिच्छदा यस्मिन् ॥ ॥ २१ ॥ ॥ गोपालसहाइ ॥

भा॰न
२६

विद्रुममया उडुंबरा देहल्यो येषु तैर्द्वारैः ॥ स्वच्छैः स्थलैः मरतानां तानां मंडितं शतितनतायेनान्वयः ॥ वासमणीगणानां च अंशुकैः दीप्तिभिः विचितं मंडल्वाभिः ॥ छद्मैलैः यद्वा विचित्रकावित ॥ क्वचित ॥ वैडूर्यस्तंभाः रिष्ठयथा तो भमुक्ताफलैर्मुक्ताकपोलैर्मुक्ताकपोलैर्मंडितमित्यर्थः कांताकमनीयाः का

विद्रुमोडुंबरद्वारैर्वैदूर्यस्तंभपंक्तिभिः ॥ स्थलेर्मारकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ॥ ३२ ॥ चित्रस्रग्भिः पट्टिकाभिर्वासोम
णिगणांशुकैः ॥ मुक्ताफलैश्चिदुल्लासैः कांतकामोपपत्तिभिः ॥ ३३ ॥ धूपदीपैः सुरभिभिर्मंडितं पुष्पमंडनैः ॥ स्त्रीपुंभिः सुर
संकाशैर्जुष्टं भूषणभूषणैः ॥ ३४ ॥ तस्मिन्स भगवान्रामः स्निग्धया प्रियेष्टया ॥ रेमे स्वारामधीराणामृषभः सीतया किल ॥ ३५ ॥
बुभुजे च यथाकालं कामान्धर्ममपीडयन् ॥ वर्षपूगान्बहून्नृणामभिध्यातांघ्रिपल्लवः ॥ ३६ ॥ इति श्रीभागवते महापुराणे न
वमस्कंधे एकादशोऽध्यायः ॥ ११ ॥ ॥ कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः ॥ पुंडरीकोऽथ तत्पुत्रः क्षेमधन्वाभ
वत्ततः ॥ देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः ॥ ततो बलस्थलस्तस्माद्वज्रनाभोऽर्कसंभवः ॥ १ ॥ खगणस्तत्सुतस्त
स्माद्विधृतिश्चाभवत्सुतः ॥ ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ॥ ३ ॥

छ

मापन्नयो योगमार्गस्तानानिताभिः भूषणानां भूषणभूतैः ॥ ३४ ॥ ३५ ॥ नृणां मध्ये यद्ध्यानं भिरभिध्यातं मघ्रिपल्लवं यस्येति ॥ ३६ ॥ नवमे एकादशोऽध्यायः ॥ ११ ॥ एवमेकादशाध्यायेणोपमपुत्रस्य
कुशस्यान्वय उच्यते ॥ एवमिद्वादशे कुशपुत्रस्य शाखा रसमुत्थितोऽन्वयः कुशस्य श्रीरामपुत्रस्यातिथिः स्तो भवत ॥ १ ॥ अर्कस्तं भवः अर्कस्य सूर्यस्य शात्संभूत ॥ २ ॥ हिरण्यनाभः
कथंभूतः जैमिनेः शिष्यो योगाचार्यः ॥ ३ ॥

राम
२६

तराह् ॥ यतः प्रकाशात्कौशल्यो याज्ञवल्क्यः ऋषिरध्यात्मं योगमध्यगात् ॥ महोदयं उदयाः सिद्धयो यस्मिन् तं हृदयग्रंथेर्भेदकं च ॥ यामहतं विशिनष्टि योग

शिष्यः कौशल्य आध्यात्मं याज्ञवल्क्योऽध्यगाद्यतः ॥ योगं महोदयमृषिर्हृदयग्रंथिभेदकं ॥ ४ ॥ पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्ततो भवत् ॥ सुदर्शनोऽथाग्निवर्णश्च शीघ्रस्तस्य मरुस्सुतः ॥ ५ ॥ सोसावास्ते योगसिद्धः कलापग्राममास्थितः ॥ कलेरंते सूर्यवंशं नष्टं भावयिता पुनः ॥ ६ ॥ तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः ॥ महस्वांस्तत्सुतस्तस्माद्विश्वसाह्वोऽन्वजायत ॥ ७ ॥ ततः प्रसेनजित्तस्मात्तक्षको भविता पुनः ॥ ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ॥ ८ ॥ एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् ॥ बृहद्बलस्य भविता पुत्रो नाम्ना बृहद्रणः ॥ ९ ॥ ऊरुक्रियः सुतस्तस्य वत्सवृद्धो भविष्यति ॥ प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः ॥ १० ॥ सहदेवस्ततो वीरो बृहदश्वोथ भानुमान् ॥ प्रतीकाश्वो भानुमतः सुप्रतीकोथ तत्सुतः ॥ ११ ॥ भविता मरुदेवोथ सुनक्षत्रोथ पुष्करः ॥ तस्यांतरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ॥ १२ ॥ बृहद्राजस्तु तस्यापि बर्हिस्तस्मात्कृतंजयः ॥ रणंजयस्तस्य सुतः संजयो भविता ततः ॥ १३ ॥ तस्माच्छाक्योथ शुद्धोदो लांगलस्तत्सुतः स्मृतः ॥ ततः प्रसेनजित्तस्मात्क्षुद्रको भविता ततः ॥ १४ ॥ रणको भविता तस्मात्सुरथस्तनयस्ततः ॥ सुमित्रो नाम निष्ठांत एते बार्हद्बलान्वयाः ॥ १५ ॥ इक्ष्वाकूणामयं वंशः सुमित्रांतो भविष्यति ॥ यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ १६ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे रामचरितवर्णने द्वादशोऽध्यायः ॥ ॥ १२

सु

न

१३

विति पुनर्भावयिता प्रावर्तयिष्यति ॥ ६ ॥ ७ ॥ दिष्ट्यामृमिमस्तुना ८ ॥ ११ ॥ तदन्तस्मादमित्रजित् ॥ १२ ॥ १४ ॥ निःशब्दं वंशस्य स्थितिस्तस्यान्तः ॥ १५ ॥ तदेवाह इक्ष्वाकूणामि
ति ॥ १६ ॥ इति नवमे द्वादशः ॥ १२ ॥

भा०न
१७

इक्ष्वाकोरेवपुत्रस्यनिमेर्वंशस्त्रयोदशे वर्ण्यतेजनितिरयत्रब्रह्मज्ञानकादयः ॥१॥ निमेरौरसःपुत्रोनास्तीतिदर्शयन्कथामाहनिमिरित्येकादशभिः
सत्रमारभ्यवसिष्ठंऋत्विजंअवृणतवृत्ते ॥१॥ तंशक्रस्यमखंनिर्वर्त्याप्रतिपालयप्रतीक्षस्वेति गृहपतिर्निमिः ॥२॥ इदंजीवितंचलंअस्थिरंसविद्वा
न् ॥३॥ इंद्रस्यमखंनिर्वर्त्यागतोगुरुः शिष्यस्यव्यतिक्रममन्यायंवीक्ष्यनिमेर्देहःपतत्वित्यशपात ॥४॥५॥ उर्वश्यांदर्शनात्स्कन्नरेतस्त्वात्कुंभेनि

श्रीशुकउवाच ॥ निमिरिक्ष्वाकुतनयोवसिष्ठमवृतर्त्विजम् ॥ आरभ्यसत्रंसोप्याहशक्रेणप्राग्वृतोस्मिभो ॥१॥ तंनिर्वर्त्यागमिष्यामितावन्मां
प्रतिपालय ॥ तूष्णीमासीद्गृहपतिः सोपींद्रस्याकरोन्मखम् ॥२॥ निमिश्चलमिदंविद्वान्सत्रमारभतात्मवान् ॥ ऋत्विग्भिरपरैस्तावन्नाग
मद्यावतागुरुः ॥३॥ शिष्यव्यतिक्रमंवीक्ष्यनिर्वर्त्यगुरुरागतः ॥ अशपत्पतताद्देहोनिमेःपंडितमानिनः ॥४॥ निमिःप्रतिददौशापंगुरवे
धर्मवर्तिने ॥ तवापिपतताद्देहोलोभाद्धर्ममजानतः ॥५॥ इत्युत्ससर्जस्वंदेहंनिमिरध्यात्मकोविदः ॥ मित्रावरुणयोर्जज्ञेउर्वश्यांप्रपि
तामहः ॥६॥ गंधवस्तुषुतद्देहंनिधायमुनिसत्तमाः ॥ समाप्तेसत्रयागेचदेवानूचुःसमागतान् ॥७॥ राज्ञोजीवतुदेहोयंप्रसन्नाःप्र
भवोयदि ॥ तथेत्युक्तेनिमिःप्राहमाभून्मेदेहबंधनम् ॥८॥ यस्ययोगंनवांछंतिवियोगभयकातराः ॥ भजंतिचरणांभोजंमुनयोह
रिमेधसः ॥९॥ देहंनावरुरुत्सेहंदुःखशोकभयावहम् ॥ सर्वत्रास्ययतोमृत्युर्मत्स्यानामुदकेयथा ॥१०॥ देवाऊचुः ॥ विदेहउष्य
तांकामंलोचनेषुशरीरिणां ॥ उन्मेषणनिमेषाभ्यांलक्षितोध्यात्मसंस्थितः ॥११॥

षिक्तंतस्मात्प्रपितामहोवसिष्ठोजज्ञे ॥ तदाहमित्रावरुणयोरिति ॥ तथाचश्रुतिः कुंभेरेतःसिषिचतुःसमानमिति ॥६॥७॥ यदिप्रसन्नाःप्रभवःसमर्थाश्चेत्त
र्हिजीवत्विसत्त्वः ॥८॥ यस्यदेहस्ययोगंनवांछंतिअपितुमोक्षायैवभजंति ॥९॥१०॥ निमिर्विदेहएवसन्त्वत्रव्यस्तांवसतु ॥ काममित्यस्यार्थः ॥ एवंसतिप्राणिभिःप्राणि
तंजीवितमस्यभविष्यतिनचदेहसंबंधइतिभावः ॥ सचअध्यात्मसंस्थितःलोचनयोःस्थितःसन्उन्मेषणनिमेषाभ्यांतत्सर्वज्ञकत्वेनलक्षितोवर्तते

राम
१७

तदेवं मृतादपि निमेर्देहाद्वंशप्रवृत्तिं दर्शयति अराजकभयमिति ॥ १२ ॥ अस्याव्यर्थानि त्रीणि नामान्याह ॥ जन्मनासाधारणेन जनन एव जनकः ॥ यद्वा व
देहाद्राजनकत्वात् निमिर्जनको भूदित्यर्थः ॥ मिथिला येन निर्मितेत्येतेन नाम्नान्तरमर्थादुक्तं ॥ १३ ॥ १४ ॥ सुधृतः सुधृतिः तस्य पिता ॥ १५ ॥ तस्य केशिध्वज

अराजकभयं नृणां मन्यमाना महर्षयः ॥ देहं ममंथुः स्म निमेः कुमारः समजायत ॥ १२ ॥ जन्मना जनकः सोभूद्वैदेहस्तु विदेहजः ॥ मिथिलो
मथनाज्जातो मिथिला येन निर्मिता ॥ १३ ॥ तस्मादुदावसुस्तस्य पुत्रोभून्नंदिवर्द्धनः ॥ ततः सुकेतुस्तस्यापि देवरातो महीपते ॥ १४ ॥ तस्माद्बृहद्रथ
स्तस्य महावीर्यः सुधृत्पिता ॥ सुधृतेर्धृष्टकेतुर्वै हर्यश्वोथ मरुस्ततः ॥ १५ ॥ मरोः प्रतीपकस्तस्माज्जातो कृतरथो यतः ॥ देवमीढस्तस्य सुतो
विश्रुतोथ महाधृतिः ॥ १६ ॥ कृतिरातस्ततस्तस्मान्महारोमा च तत्सुतः ॥ स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥ १७ ॥ ततः सीरध्वजो ज
ज्ञे यज्ञार्थं कर्षतो महीं ॥ सीता सीराग्रतो जाता तस्मात्सीरध्वजः स्मृतः ॥ १८ ॥ कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृप ॥ धर्मध्वजस्य द्वौ पुत्रौ
कृतध्वजमितध्वजौ ॥ १९ ॥ कृतध्वजात्केशिध्वजः खांडिक्यस्तु मितध्वजात् ॥ कृतध्वजसुतो राजन्नात्मविद्याविशारदः ॥ २० ॥ खांडिक्यः कर्मत
त्त्वज्ञो भीतः केशिध्वजाद्द्रुतः ॥ भानुमांस्तस्य पुत्रोभूच्छतद्युम्नस्तु तत्सुतः ॥ २१ ॥ शुचिस्तु तनयस्तस्मात्सनद्वाजः सुतोभवत् ॥ ऊर्द्ध्वकेतुः सनद्वा
जादजोथ पुरुजित्सुतः ॥ २२ ॥ अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ॥ ततश्चित्ररथो यस्य क्षेमाधिर्मिथिलाधिपः ॥ २३ ॥ तस्मात्समरथ
स्तस्य सुतः सत्यरथस्ततः ॥ आसीदुपगुरुस्तस्मादुपगुप्तोग्निसंभवः ॥ २४ ॥ वस्वनंतोथ तत्पुत्रो युयुधो यत्सुभाषणः ॥ श्रुतस्ततो जयस्तस्मा
द्विजयोस्मादृतः सुतः ॥ २५ ॥ शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः ॥ बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी ॥ २६ ॥ एते वै मिथिला राज
न्नात्मविद्याविशारदाः ॥ योगेश्वरप्रसादेन द्वंद्वैर्मुक्ता गृहेष्वपि ॥ २७ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे त्रयोदशोध्यायः ॥ १३ ॥

सभानुमान् ॥ २१ ॥ तत्तस्मात्सुपार्श्वकः ॥ २३ ॥ अग्निसंभवः अग्नेरंशात्संभूतः ॥ २४ ॥ यद्यस्मात्सुभाषणः ॥ योगेश्वराणां याज्ञवल्क्यादयस्तेषां प्रसादेन ॥ २७ ॥ इति नवमे

भा॰ ९
१८

चतुर्दशे द्विभिः सोमवंशमाह समाप्तितः । यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः । चतुर्दशे गुरोः पत्न्यां तारायां सोमजाद् बुधात् । जातश्चैलः पुरू-
वश्यमायुर्मुख्यानजीजनत् ॥ १ ॥ दृग्भ्यः आनन्दाश्रुभ्यः अत एवामृतमयः किलेत्याश्चर्ये ॥ मानं तेरहशः नेत्यात् ॥ ब्रह्मणा गर्वितस्य कारणमाह विप्रे

शुक उवाच ॥ अथातः श्रूयतां राजन्वंशः सोमस्य पावनः ॥ यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः ॥ १ ॥ सहस्रशिरसः पुंसो
नाभीह्रदसरोरुहात् ॥ जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः ॥ २ ॥ तस्य दृग्भ्योऽभवत्पुत्रः सोमोऽमृतमयः किल ॥ विप्रौषध्यु-
डुगणानां ब्रह्मणा कल्पितः पतिः ॥ ३ ॥ सोऽयजद्राजसूयेन विजित्य भुवनत्रयं ॥ पत्नीं बृहस्पतेर्दर्पात्तारां नामाहरद्बलात् ॥ ४ ॥ य-
दा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् ॥ नात्यजत्तत्कृते जज्ञे सुरदानवविग्रहः ॥ ५ ॥ शुक्रो बृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपम् ॥
हरो गुरुसुतं स्नेहात्सर्वभूतगणावृतः ॥ ६ ॥ सर्वदेवगणोपेतो महेन्द्रो गुरुमन्वयात् ॥ सुरासुरविनाशोऽभूत्समरस्तारकामयः ॥
॥ ७ ॥ निवेदितोऽङ्गिरसा सोमं निर्भर्त्स्य विश्वकृत् ॥ तारां स्वभर्त्रे प्रायच्छदन्तर्वत्नीमवैत्पतिः ॥ ८ ॥

ति ॥ ३ ॥ सोमस्य पुत्रो बुध इति कथयितुं तारायाहरणमाह पत्नीमिति सार्द्धैर्नवभिः ॥ ४ ॥ तत्कृते तन्निमित्तं ॥ ५ ॥ सुराणां दानवानां च विग्रहे कारणमाह शुक्र इति असुरैः
सहितं उडुपमग्रहीदित्यर्थः सर्वधिशार्षी ॥ हरो गुरुसुतं बृहस्पतिमग्रहीत् ॥ अङ्गिरसः सकाशात्स्वाप्तविद्यो हर इति हि प्रसिद्धिः ॥ ६ ॥ ७ ॥ निवेदितो विज्ञापितः
विश्वकृद्ब्रह्मा अवैन्नु अबुध्यत्

राम
१८

बृहस्पतिराह त्यज त्यजेति पौरोहितं गर्भं । गर्भस्त्यक्तो भस्मीकरिष्यतीति विभ्यती अत्याह नाहमिति । सांतानिकः संतानार्थी । संतानिके इति पाठे हेत्व-
मन्त्रेत्यर्थः ॥ ९ ॥ ११ ॥ रहः एकांते ॥ १३ ॥ १४ ॥ पुरूरवसमुर्वश्यामायुः प्रमुखाः षट् पुत्रा जाता इति वक्तुं कथामाह तस्मै त्यारिनायावत्समाप्ति ॥ १५ ॥ ननु देवी

त्यज त्यजाः शुद्धः प्रोक्ते महेन्द्रेणाराद्धितं पौरैः । नाहं त्वां संस्मरामात्क्रोधात्स्याविधिं सांतानिकोः स्मृति ॥ ९ ॥ तत्याज व्रीडिता तारा कुमारं कनकप्रभम् ।
स्पृहामांगिरसश्चक्रे कुमारे सोम एव च ॥ १० ॥ ममायं न तवेत्युच्चैस्तस्मिन्विवदमानयोः । पप्रच्छुर्ऋषयो देवा नैवोचे व्रीडिता तु सा ॥ ११ ॥ कु-
मारोऽब्रवीत्तां प्राह कुपितो लीकलज्जया । किं न वोचसि सद्वृत्ते आत्मावद्यं वदाशु मे ॥ १२ ॥ ब्रह्मा तां रह आहूय समप्राक्षीच्च सान्त्वयन् । सो-
मस्येत्याह शनकैः सोमस्तं तावदग्रहीत् ॥ १३ ॥ तस्यात्मयोनिरकृत बुध इत्यभिधां नृप । बुद्ध्या गंभीरया येन पुत्रेणापोडुराण्मुदम् ।
ततः पुरूरवा जज्ञे इलायां य उदाहृतः ॥ १४ ॥ तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् । श्रुत्वोर्वशीन्द्रभवने गीयमानान्सुरर्षिणा ॥
१५ ॥ तदन्तिकमुपेयाय देवी स्मरशरार्दिता । मित्रावरुणयोः शापादापन्ना नरलोकताम् ॥ १६ ॥ निशम्य पुरुषश्रेष्ठं कंदर्पमिव रूपि-
णम् । धृतिं विष्टभ्य ललना उपतस्थे तदन्तिके ॥ १७ ॥ स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः । उवाच श्लक्ष्णया वाचा देवी हृष्टत-
नूरुहः ॥ १८ ॥ पुरूरवा उवाच । स्वागतं ते वरारोहे आस्यतां करवाम किम् । संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥ १९ ॥ उर्वश्यु-
वाच । कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुन्दर । यदंगान्तरमासाद्य च्यवते ह रिरंसया ॥ २० ॥

कृतो मनुष्यस्य निकं उपगच्छेत्तत्राह । तत्रावरुणयोः शापान्नरलोकता मनुष्यभावमापन्ना सती ॥ १६ ॥ न नोच्यावयोरतिरस्त्विति ॥ १९ ॥ यस्य तव अंगान्तरं वक्षः
आमाद्य रिरंसया तं मिथुयाह सुन्दरं न च्यवते नापयाति पद्मालारिति वा ॥ २० ॥

शापावसाने मायामंगामिषे त्वां जिगमिषो स्तस्या मायावंधमाह एतावितिद्वाभ्यां ॥ उरगाकौ मेयो न्यामौ निक्षेपक्षपोरक्षपस्नाघ्यः सएवस्त्रीणां वरः स्मृतः ॥ अ
तो विज्ञानीयत्वं न दोष इति भावः ॥ हे वीर इतं मे मन्ये स्यात ॥ २१ ॥ अमृतं वा अन्यमिति श्रुतेः ॥ देवानां चामृताशित्वात ॥ मेघनादन्यत्र विवाहसंमतं वा नेति ज्ञाय इति
प्रतिपदे अंगीकृतवान् ॥ २२ ॥ तदेवाह अहो इति ॥ २३ ॥ ४ ॥ पद्मकिंजल्कास्यगंध इव गंधो यस्याः तस्याः स्वाखामोदेन सुषितः प्रलोभितः सन् ॥ २५ ॥ सद्यं मम ॥ २६ ॥

एतावुरगाकौ राजन्नन्यामौ रक्षप्रमानद संस्येमवतामार्कस्नाघ्यः स्त्रीणां वरः स्मृतः ॥ १ ॥ इतं मे वीर मन्ये स्यात्त्वं हे त्वां न्यत्रमे घनात
विवाहसंमतं न्वयेति प्रतिपदे महामनाः ॥ २२ ॥ अहो रूपमहो भावो नरलोकविमोहनम् ॥ को न मे वेत मनुज्ञो देवी त्वां ह्रियमागताम्
॥ २३ ॥ तथा सह हस्ते श्रेष्ठा रमयं त्याय यथार्हतः ॥ रमे ह रविहारे ७ कामं चक्र यथादिषु ॥ २४ ॥ समसाण तथा देव्यापद्मकिंजल्कागंध
या ॥ तन्मुखामोदमुषितो मुहुरे दूर्गाण्वहूतु ॥ २५ ॥ अपश्यमुर्वशी मिंदाकिनी गंधर्वी समुद्धारयत ॥ उर्वशी रहितं सद्य मां ह्यानं
नातिशोभते ॥ २६ ॥ तत्रपेत्य महाराजेत्र पमितिप्रत्युपस्थिते ॥ उर्वश्या उरोगाजेद्धुलं महाराजनिजायया ॥ २७ ॥ निशम्याक्रंदितं देवीपुत्र
याचीयमानयोः ॥ हतास्मि ह कुनाथेन नन्दमादावीरमानिना ॥ २८ ॥ यद्दिग्भ्रमाद हे न ष्टाहतापमावदस्पदिः ॥ यः सेतेतिशि सत्र
स्तायथा नारी इवाप्युसान् ॥ २९ ॥ इति वाक्सायकैर्विद्धः प्रतोत्रैरिव कुंजरः ॥ निशि निशि विशमाशायविवह्लोः सद्वर्वदुःषा ॥ २० ॥
तेविसृज्योरगौ तत्र व्यघोतं तत्स्म विघ्नतः ॥ आशायमेषावायीतं नग्रमेहतसापतिम् ॥ २१ ॥

महारात्रे मध्यरात्रे महानिशाद्वे घटिके रात्रौ मध्यमयामयोरिति स्मृते ॥ २७ ॥ जिगमिषो स्तस्याः पक्षयोक्तिमाह हतास्मीति सार्द्धेन ॥ नपुंमानवसकेन ॥ २८ ॥ नाम
यथा नारी तथा - - - मते ॥ २९ ॥ २० ॥ विद्धतावित्रिशृद्धतिमंतः व्यघोतं तदी निमकुर्वत ॥ यद्वा ॥ तदेवतडितः आकाशांतेत्यर्थः ॥ नग्रमेहत ॥ अतो भाषा
संगात्रिंशागामेतिर्ज्ञेयं ॥ २१ ॥

२१ ॥ तस्याः सखीद्वयं प्रति वचनं ॥ सखीं प्रति शोभनं वचनं अहो जायेत्यादि ॥ २२ ॥ तदेवार्थं तत्राह अहो इति द्वाभ्यां ॥ अनिर्वृत्य मत्कां तां निर्वृत्तिं मत्प्राप्यापा ठां तदेमां निर्वृत्तिमप्राप्य इत्वा ॥ मत्राणं उत्क्वेति वा ॥ वचांसि करणा वा वदेह गोष्ठीः करवावहे ॥ २४ ॥ इदे हे इति कमनीयोयं मम देहः ॥ २५ ॥ पुरूरवो मामप्याय इत्यादि तस्याः सखीं तदर्थं तत्राह मामप्याय इति वल्गुभिः ॥ ना प्रियस्य पुरूरवसः प्रि ॥ अतो धैर्यमावहेति भावः ॥ इमे तु काः प्रति द्वाविन्द्रियाणि

एवोपि शयने जायामपश्यन् विमना इवात त्विन्नो विह्वलः शोचन् बभ्रामोन्मत्तवन्महीम् ॥ २३ ॥ स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्र सखीः ॥ पंच प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥ २२ ॥ अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ॥ मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥ इदं देहोयं पतत्यत्र देवि दूरं हृतस्त्वया ॥ खादंत्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥ २५ ॥ उर्वश्युवाच ॥ मा मृथाः पुरूरवो मि त्वं मा स्म त्वाद्युर्वृका इमे ॥ क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥ २६ ॥ स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ॥ घ्नंत्यल्पार्थेपि विश्रब्धं पतिं भ्रातरमप्युत ॥ २७ ॥ विधायालीकविश्रंभमज्ञेषु त्यक्तसौहृदाः ॥ नवं नवमभीप्संत्यः पुंश्चल्यः स्वैरवृत्तयः ॥ २८ ॥ संवत्सरांते हि भवानेकरात्रं मयेश्वरः ॥ वत्स्यत्यपत्यानि च ते भविष्यंत्यपराणि भो ॥ अंतर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरम् ॥ २९ ॥ पुनस्तत्र गतोब्दांते उर्वशीं वीरमातरम् ॥ उपलभ्य मुदा युक्तः समुवास तया निशां ॥ ४० ॥ अथैनमुर्वशी प्राह कृपणं विरहातुरं ॥ गंधर्वानुपधावेमांस्तुभ्यं दास्यंति मामिति ॥ ४१ ॥ तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ॥ उर्वशीं मन्यमानस्तां सोबुध्यत चरन्वने ॥ ४२ ॥

वा त्वा इति त्वां मा स्म आ ऋक्षुः मा नयेयुः ॥ इंद्रियवशो मा भवेत्यर्थः ॥ २६ ॥ स्त्रियो निमित्तं प्राह स्त्रिय इत्यादिना ॥ ३७ ॥ संवत्सरांते इति ॥ अपराणीति वचनात् अंतर्वत्नीमुपालक्ष्य ज्ञात्वा ॥ ३८ ॥ ४० ॥ अनेनाग्निनाकं प्रकृत्वा नष्ट उर्वशीप्राप्त्यभिप्रायेणाग्निस्थालीं ददुः ॥ स तु तां स्थालीमेव उर्वशीं मन्यमानः तया सहितो वने

विक्रमोर्वशी... ५८

कृराः

भा॰न॰ ३०

ततश्च तां स्थालीं वने स्थापयित्वा गृहानागत्वा निशि निशि मनसैव ध्यायतस्तस्य मनसि त्रेतायां त्रयी प्रावर्त्तत कर्म्मबोधकं वेदत्रयं प्रादुरभूत् ॥ ४३ ॥ ततः स्थालीस्थानं गतामनुशम्यागर्भे जातमश्वत्थं विलक्ष्य अस्मिन्नेवाग्निरस्तीति विशेषेण लक्षयित्वा तेनाश्वत्थेन द्वे अरणी कृत्वा ॥ अग्निमंथेति शेषः । शमीगर्भादग्निं मन्थयेतिश्रुतेः ॥ ४४ ॥ मंथनप्रकारमाह । अधरारणिमुर्व्वशीं ध्यायन्नुत्तरारणिमात्मानं ध्यायन्नुभयोररण्योर्मध्ये यत्काष्ठं तत्प्रजननं ध्यायन् । तथा च मंत्रः । उर्व्वश्यस्यायुरसि पुरूरवा इति ॥ ४५ ॥ तस्य तेन कृतान्निर्मंथनाद्विभावसुरग्निर्जातः । कथंभूतः । त्रिवेदी

स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि । त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्त्तत ॥ ४३ ॥ स्थालीस्थानं गतोश्वत्थं शमीगर्भं विलक्ष्य सः । तेन द्वे अरणी कृत्वा उर्व्वशीलोककाम्यया ॥ ४४ ॥ उर्व्वशीं मंत्रतो ध्यायन्नधरारणिमुत्तराम् । आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ॥ ४५ ॥ तस्य निर्मंथनाज्जातो जातवेदा विभावसुः । त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ॥ ४६ ॥ तेनायजत यज्ञेशं भगवंतमधोक्षजम् । उर्व्वशीलोकमन्विच्छन्सर्वदेवमयं हरिम् ॥ ४७ ॥ एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः । देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥ ४८ ॥ त्रि

धनं योग्यं यस्मात्स च त्रय्या विद्यया विहितेनाधानसंस्कारेण त्रिवृत् आहवनीयादिरूपः सन् राज्ञा पुरूरवसा पुत्रत्वे कल्पितः । उर्व्वशीलोकमापकत्वात् ॥ ४६ ॥ तदाह तेनेति ॥ ४७ ॥ नन्वनादिर्वेदत्रयबोधितो ब्राह्मणादीनामिंद्राद्यनेकदेवयजनेन स्वर्गप्राप्तिहेतुः कर्म्ममार्गः कथमादिरिव वर्णिते । तत्राह । एक एवेति द्वाभ्यां । पुरा कृतयुगे सर्ववाङ्मयः सर्वासां वाचां बीजभूतः प्रणव एक एव । देवश्चैको नारायण एव । अग्निश्चैक एव लौ

एम ३०

वेदत्रयी पुरूरवसः सकाशादासीत्॥ एयिवान् प्राप॥ अयं भावः कृतयुगे सत्वप्रधानाः प्रायशः सर्वेपि ध्याननिष्ठाः रजःप्रधाने तु त्रेतायुगे वेदादिवि
भागेन कर्ममार्गः प्रकटो बभूवेति॥ ४९॥ इति नवमे चतुर्दशः॥ ततः पंचदशे गाधिरैलपुत्रान्वये जनि यद्दौहित्रसुतो रामः कार्त्तवीर्यसहस्रजेषा॥ १॥
स्वग्रहत्वा घाल्यादिक्रमेणाख्येतायुष्वृत्तीनाथ प्रागावंशानाह अष्टनायोरित्यादिना॥ एकः एकमंत्रः अमितः सत्वतः॥ १॥ जह्नोः पुरुः तस्य बलाकः॥

पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप॥ अग्निना प्रजया राजा लोकं गांधर्वमेयिवान्॥ ४९॥ इति श्रीभागवते महापुराणे नवमस्कंधे
चतुर्दशो ध्यायः॥ बादरायणिरुवाच॥ ऐलस्य चोर्वशीगर्भात्षडासन्नात्मजा नृप॥ आयुः श्रुतायुः सत्यायू रयोथ विजयो जयः॥
१॥ श्रुतायोर्वसुमान् पुत्रः सत्यायोश्च श्रुतंजयः॥ रयस्य सुत एकश्च जयस्य तनयो मितः॥ २॥ भीमस्तु विजयस्याथ कांचनो होत्रक
स्ततः॥ तस्य जह्नुः सुतो गंगां गंडूषीकृत्य योपिबत्॥ ३॥ जह्नोः पुरुस्तस्य पुत्रो बलाकश्चात्मजो जकः॥ ततः कुशः कुशस्यापि कु
शांबो मूर्त्तयो वसुः॥ कुशनाभश्च चत्वारो गाधिरासीत्कुशांबुजः॥ ४॥ तस्य सत्यवतीं कन्यामृचीको याचत द्विजः॥ वरं विसदृशं मत्वा
गाधिर्भार्गवमब्रवीत्॥ ५॥ एकतः श्यामकर्णानां हयानां चंद्रवर्चसां॥ सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयम्॥ ६॥ इत्युक्त
स्तन्मतं ज्ञात्वा गतः स वरुणांतिकम्॥ आनीय दत्वा तानश्वानुपयेमे वराननां॥ ७॥

गाधेः पुत्रो विश्वामित्रो ब्रह्मर्षिरभूदित्युक्तं तदध्याये तेवक्ष्यति गाधेरभून्महातेजा इत्यादिना॥ ४॥ तत्र तावत्तदुपोद्घातत्वेन भृगुवंशभवस्य ऋचीकस्य चरिते
च प्रसक्तानुप्रसक्तेन च परशुरामाचरित्रं चरितमाह तस्य सत्यवतीमित्यादिना विशदं शंत्र अनन्तरूपं॥ भार्गवमृचीकं॥ ५॥ एकतः श्यामकर्णानामितरेकतः श्यामाः कर्णा
येषां॥ सर्वस्मिन्नंगे चंद्रस्येव वर्चो येषां॥ न चेदमपि पर्याप्तमस्मत्कन्यायाः॥ यतः कुशिकाः कौशिका वयं॥ ६॥ ॥ ७॥

भा०न ३१

उभयोः पत्न्योर्ब्राह्मैर्मंत्रैः स्व... उक्तार्थैरित्यर्थः ॥ ८ ॥ यावत्स्नातुमुनिर्निर्गतः तावद्भार्याया मंतेस्नेहात्पृच्छाः सत्यवत्याश्चरुं श्रेष्ठमत्वा तया मात्रा सत्यवती याचिता सती ब्राह्मणमंत्राभिमंत्रितं स्वचरुं मात्रे श्रेष्ठयधूप्रादात् मातुश्चरुं क्षात्रमंत्राभिमंत्रितं स्वयमदत्त आदत ॥ ९ ॥ कष्टं ज्ञात्वापि तं तद्वचः ह तेत्र घोरो घोरो भविष्यतामात्राता तव ब्रह्मवित्तमो भविष्यतीति ॥ १० ॥ एवं माभूदिति प्रसादितो भार्गव आह अथ तर्हि पौत्रो घोरो भविष्यति जमदग्निः पुत्रो भवत्वित्यर्थः

सऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया श्रपयित्वोभयैर्मंत्रैश्चरुं स्नातुं गतो मुनिः ॥ तावत्सत्यवती मात्रा स्वचरुं याचिता सती श्रेष्ठं मत्वा तयायच्छन्मात्रे मातुरदत्स्वयम् ॥ ८ ॥ तद्विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः घोरो दंडधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ॥ प्रसादितः सत्यवत्या मैवं भूरिति भार्गवः अथ तर्हि भवेत्पौत्रो जमदग्निस्ततो भवत् ॥ ११ ॥ सा चाभूत्सुमहापुण्या कौशिकी लोकपावनी रेणोः सुतां रेणुकां वै जमदग्निरुवाह याम् ॥ १२ ॥ तस्यां वै भार्गवऋषेः सुता वसुमदादयः यवीयाञ्जज्ञ एतेषां राम इत्यभिविश्रुतः ॥ १३ ॥ यमाहुर्वासुदेवांशं हैहयानां कुलांतकम् त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥ १४ ॥ दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमधीमिकि रजस्तमोवृतमहन्फल्गुन्यपि कृतेंऽहसि ॥ १५ ॥ रा० वाच किं तदंहो भगवतो राजन्यैरजितात्मभिः कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥ १६ ॥ श्री शुक उवाच हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः दत्तं नारायणांशांशमाराध्य परिकर्मभिः ॥ १७ ॥

॥ ११ ॥ सा च सत्यवती कौशिकी नद्यभूत् ॥ ११ ॥ भार्गवऋषेः जमदग्नेः सुताः ॥ १३ ॥ १४ ॥ अनीनृशन्नाशयामास तदेवाह रजस्तमोवृतमिति पाठांतरस्तु गमं ॥ १५ ॥ कार्तवीर्यार्जुनेन कृतमपराधं वक्तुं तस्य रूपं हेतुमैश्वर्यादिकमाह हैहयानामिति षड्भिः परिकर्मभिः परिचर्याभिर्दत्तं दत्तात्रेयमाराध्य ॥ १७ ॥

राम ३१

अव्याहतमिन्द्रियारिक्थं बलं मे ॥१८॥ यत्र यस्मिन्नैश्वर्ये अणिमादयो गुणाः ॥१९॥ रेवामभिति नर्मदाजलं सरितेन नर्मदां ॥२०॥ एवं सतो दिग्विजयो मा
हिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वत्तेन दशवाहस्यापि रोधान् प्रतिस्रोतसः सत्यास्तस्यास्तीरितोर्ज्जलैर्विप्लावितं स्वशिविरं मालक्ष्य तस्यां
तद्वीर्यं न सेहे ॥२१॥ ततस्तत्कृतकिल्विषः क्रीडन्तमभिभवितुं प्रवृत्तः सन्गृहीतमाहिष्मत्या स्वपुर्यां कपिरिव सन्निरुद्ध्वा प्रवेश्यावनतयायेन

बाहून्दशशतं लेभे दुर्द्धर्षत्वमरातिषु ॥ अव्याहतेन्द्रियोजः श्रीतेजोवीर्ययशोबलम् ॥१८॥ योगेश्वरत्वमैश्वर्यं गुणा यत्राणि
मादयः ॥ चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥१९॥ स्त्रीरत्नैरावृतः क्रीडन्रेवांभसि मदोत्कटः ॥ वैजयन्तीं स्रजं बिभ्रन्
रुरोध सरितं भुजैः ॥ विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः ॥ नामृष्यत्तस्य तद्वीर्यं वीरमानी दशाननः ॥ गृहीतो लीलया
स्त्रीणां समक्षं कृतकिल्बिषः ॥ माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथा ॥२१॥ स एकदा तु मृगयां विचरन्विपने वने ॥ यदृच्छया
६ आश्रमपदं जमदग्नेरुपाविशत् ॥ तस्मै स नरदेवाय मुनिरर्हणमाहरत् ॥ ससैन्यामात्यवाहाय हविष्मत्या तपोधनः ॥ स वीरस्तत्र
तद्दृष्ट्वा आत्मैश्वर्यातिशायनम् ॥ तन्नाद्रियताग्निहोत्र्यां साभिलाषः सहैहयः ॥ हविर्धानीमृषेर्दर्पान्नरान्हर्तुमचोदयत् ॥ ते च
माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥ अथ राजनि निर्याते राम आश्रम आगतः ॥ श्रुत्वा तत्तस्य दौरात्म्यं चुक्रोधाहिरिवाहतः ॥

मुक्तः इदानीं तत्कृतमपराधं दर्शयन्नाह स एकदेत्यादिना ॥ अर्हणमातिथ्यादि हविष्मत्या कामधेन्वा ॥२४॥ तदर्हणं नाद्रियत तस्मिन्नाश्रमे यत् ऐश्वर्यं य
तेनाग्निहोत्र्या होमधेन्वां साभिलाषः सहैहयः हैहयैः सह वर्त्तमानः ॥२५॥ दर्पाद्धेतोः ऋषेर्हविर्धानीमग्निहोत्रीं वत्सेन सह हर्तुं नरानचोदयत् ॥२६॥

भा.न. सत्वरं कार्मुकं वर्म चादाय ॥ २६ ॥ एषो यं वर्म्मिकः कल्माजिनमहं वरं यस्य ॥ २७ ॥ २० ॥ सहरन्तारस्व घोषस्य मनश्च श्रुनिलश्चतयो रिकैनो वीर्यं यस्य ॥ परेषां
३१ चक्रं सैन्यं मर्दयतीति तथा ॥ छिन्नो त्र जाउरवः कंधराश्च येषां ॥ हताः सूता वाहनानि च येषां ते वीरा निपेतुः ॥ ३१ ॥ विहृत्त्या श्रमार्दयो यस्य ॥ ३२ ॥ पंच

घोरं परशुमादाय सन्नह्यं चर्म कार्मुकं अन्वधावत दुर्मेधा योद्धुं रघुवरं प्रपं ॥ २८ ॥ तमापतन्तं भृगुवर्य ओजसा चर्मं बाणापर हृद्धधायुधं धरं१
युतं२ ऐणीयचर्म्मीबरमर्कं चामर्षिं जयामि दृढ़ोपौ विशान् ॥ अचोद्यद्धुक्तिरथाश्चपन्निर्मिर्गद्दामिबाणोष्टिं शतं च त्रिशक्तिभिः ॥ अच्छे
छिन्नाः समस्त्रशातिभीषणास्ता समरे को भगवान् सहदयन् ॥ यतो यतो मोप्रहारस्त्वरश्च घोमनोनि नैनाः परचक्रमर्दनः ॥ ततस्त
तच्छिन्नभुजोरुकंधरा निपेतुर्हयाहतसूतवाहनाः ॥ दृष्ट्वा तेन्यरुधिरोद्धवकर्दमे रणाजिरे रामकृता समाधिकेः ॥ विवृक्तवर्मधे
जवापविग्रहं निपातितं महेहयश्चापतद्भुषा ॥ अथाजुनः पंचशतैर्बाहुभिर्दधनुः षुबाणान्युगपत्समंदधे ॥ रामाय रामो ह्यवितां प्र १८
मग्राणी त्वानेकधनूंषि सायकैश्छिनत्त्समम् ॥ ततो ह्यहस्तैर्बलान्मधौ घ्रिपाश्च नुक्षिप्य वेगात्स भिधावतो युधि ॥ भुजान्दकुठारेणाकठो
रेणा निनाविच्छेद रामः प्रसभं तदैरिव ॥ कृत्तबाहोः शिरस्तस्य पादिगिरेः शृंगमिवाहरत् ॥ हते पितरि तत्सुता अयुते दुद्रुवुर्भयात् ॥ अग्नि
होत्रीमुपावर्त्य सवत्सां परवीरहा ॥ समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्पयत् ॥

शतेषु धनुष्षु सोऽर्जुनः रामाय संदधे एकमेव यत्तद्धर्यस्य सः पाठान्तरे एक एव संधानं संधानं येषां ते रिषुभिः तानि धनूंषि समं सहतं तत्त्वाणामेवाच्छिन राम
त ॥ ३३ ॥ मृधे संधनभूतान चलानं घ्रियाश्चारात्क्षिप्याधावतस्तस्य भुजान्विच्छेद ॥ अहो करणानि चिह्नयर्थः ॥ ३४ ॥ समर्पयत् समार्पयत् ॥ ३६ ॥ ३१

३९ अर्हणतां पूज्यतां ४० सौरी सूर्यस्य प्रभेव ४१ तीर्थसेवानेन नगा वकारान्नृपमनिर्घ्यमेश्वा अच्युते चेतना चित्तं यस्य सः ४१ इति नवमे पंचदशः
षोडशेऽर्जुनपुत्रैस्तु जमदग्नेर्हते गुरौ रामात्तज्ज्ञवधः प्रोक्तो विश्वामित्रस्य चान्वयः १ किंचिच्चित्ररथे गंधर्वराजे स्पृहा यस्याः सा किंचि

स्वकर्म तत्कृतं रामः पितृभ्रातृभ्य एव च वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ३७ राम राम महाबाहो भवान्पापमकारषीत्
अवधीन्नरदेवं यत्सर्वदेवमयं वृथा ३८ वयं हि ब्राह्मणास्तात क्षमयाऽर्हणतां गताः यया लोकगुरुर्देवः पारमेष्ठ्यमगात्पदं
३९ क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधा-
द्गुरुः तीर्थसंसेवया चांहो जह्यंगाच्युतचेतनः ४१ इति श्रीभागवते महापुराणे नवमस्कंधे परशुरामचरिते हैहयार्जुनवधे पंचद-
शोऽध्यायः शुक उवाच पित्रोपशिक्षितो रामस्तथेति कुरुनंदन संवत्सरं तीर्थयात्रां चरित्वाश्रममाव्रजत् १ कदाचिद्रेणुका जा-
ता गंगायां पद्ममालिनम् गंधर्वराजं क्रीडंतमप्सरोभिरपश्यत २ विलोकयंती क्रीडंतमुदकार्थं नदीं गता होमवेलां न सस्मार किं-
चिच्चित्ररथस्पृहा ३ कालात्ययं तं विलोक्य मुनेः शापविशंकिता आगत्य कलशं तस्थौ पुरोधाय कृतांजलिः ४ व्यभिचारं मुनिर्ज्ञा-
त्वा पत्न्याः प्रकुपितोऽब्रवीत् घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ५ रामः संचोदितः पित्रा भ्रातॄन्मात्रा सहावधीत् प्रभाव-

न सस्मारेति वा ३ कलशं पुरोधाय अग्रे निधाय ४ व्यभिचारं मानसं ज्ञात्वा ४ अहो तातेति लंघितवानाभ्रातॄणां मात्रा सह ज्ञो मुनेः सम्यक्समाधेस्तपसश्च सः
वधे संचोदितः सन्मुनेः समाधेस्तपसश्च तयोः प्रभाववित्तः यदि न हन्यात्तर्हि मामपि शपेत्स समर्थः यदि तु हन्यात्तर्हि मयि प्रसन्नः सन् तानपि जीवयिष्यति तं
समर्थ इति ज्ञानत्रितयमर्थः

८५

पं

भा०न०
२२

७ नह्वति निर्दिशतं तत्कथं कृतवान् तत्राह पितुर्विद्वानिति पूर्वोक्तमेवाभिप्राय ८ सर्वक्षत्रियवधे कारणं वक्तुमाह येऽर्जुनेन समहता इत्यादिना ९ ॥ भग
वत्याशिताधीर्येन तं ॥ ११ ङः स्वादीनां वेगेन विमोहितः १५ ब्रह्मघ्नैर्विहता श्रीर्येषां ते ॥ हे राजंस्त्वं रामस्त्वेषां शीर्षत्रि प्रादिप्सता मध्ये महोत्तागिरि

वरेण छन्दयामास प्रीतः सत्यवतीसुतः वव्रे हतानां रामोऽपि जीवितं चास्मृतिं वधे ७ उत्तस्थुस्ते कुशलिनो निद्रापाय इवांजसा पितु
र्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम् ८ येऽर्जुनस्य सुता राजन् स्मरंतः स्वपितुर्वधम् रामवीर्यपराभूता लेभिरे शर्म न क्वचित्
एकदाश्रमतो रामे सभ्रातरि वनं गते वैरं सिषाधयिषवो लब्धछिद्रा उपागमन् १० दृष्ट्वाग्न्यागार आसीनमावेशितधियं मुनिम् भग
वत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ११ याच्यमानाः कृपणया राममात्रातिदारुणाः प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबंधवः १२ म
प रेणुका दुःखशोकार्ता निघ्नंत्यात्मानमात्मना राम रामेति तातेति विचुक्रोशोच्चकैः सती १३ तदुपश्रुत्य दूरस्था हा रामेत्यार्तवत्स्व
नम् त्वरयाश्रममासाद्य ददृशुः पितरं हतं १४ ते दुःखरोषामर्षार्तिशोकवेगविमोहिताः हा तात साधो धर्मिष्ठ त्यक्त्वास्मान्स्व
र्गतो भवान् १५ विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयम् प्रगृह्य परशुं रामः क्षत्रांताय मनो दधे १६ गत्वा माहिष्मतीं रामो ब्र
ह्मघ्नविहतश्रियम् तेषां स शीर्षभी राजन्मध्ये चक्रे महागिरिम् १७ तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहां हेतुं कृत्वा पितृवधं
क्षत्रेऽमंगलकारिणि १८ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः समंतपंचके चक्रे [illegible] १९

चक्रे १७ तेषां रक्तेन अब्रह्मण्यानां भयावहां घोरां नदीं चक्रे तथापि सर्वक्षत्रैः किं कारणं तत्राह हेतुं कृत्वेति माऽर्द्दन अमंगलकारिणि अन्यायवर्ति
नि सति १८ त्रिःसप्तकृत्वो रेणुकया दुःखाद्वेवाउरस्ताडनं कृतं ततो रामस्तावत्कृत्यः क्षत्रमुत्सारितवानिति प्रसिद्धिः ॥ १९ ॥

राम
२२

वधे

शोणितोदान्ह्रदान्नव

संज्ञानं स्मृतिस्तदेवलक्षणं चिह्नं यस्य तं स्वदेहं लब्ध्वा ऋषीणां मण्डले सप्तमो ऋषिरभूत् २४ बृहद्ब्रह्म वेदं वेदप्रवर्त्तकेषु सप्तर्षिष्वेकतमो भवि
ष्यतीत्यर्थः २५ २६ भुवो भारमहन् भारमेवाहन्नृपाणामिति २७ तदेवं प्रसक्तानुप्रसक्तं समाप्य प्रकृतमाह गाधेरिति महातेजा विश्वामित्रः २८
ते सर्वे लिंगसमवायन्यायेन आग्नामृत उपदधातीतिवन्मधुच्छंदस एवोच्यंत इति तथा च श्रुतिः तस्य विश्वामित्रस्यैकशतं पुत्रा आसुः पंचाशदे

पितुः कायेन संधाय शिर आदाय बर्हिषि सर्वदेवमयं देवमात्मानमयजन्मखैः २० ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम्
अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम् २१ अन्येभ्योऽवांतरदिशः कश्यपाय च मध्यतः आर्यावर्त्तमुपद्रष्ट्रे सदस्येभ्यस्ततः
परम् २२ ततश्चावभृथस्नानविधूताशेषकिल्बिषः सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् २३ स्वदेहं जमदग्निस्तु लब्ध्वा
संज्ञानलक्षणम् ऋषीणां मण्डले सोऽभूत्सप्तमो रामपूजितः २४ जामदग्न्योऽपि भगवान्रामः कमललोचनः आगामिन्यंतरे रा
जन्वर्त्तयिष्यति वै बृहत् २५ आस्तेऽद्यापि महेंद्राद्रौ न्यस्तदंडः प्रशांतधीः उपगीयमानचरितः सिद्धगंधर्वचारणैः २६ एवं भृ
गुषु विश्वात्मा भगवान्हरिरीश्वरः अवतीर्य परं भारं भुवोऽहन्बहुशो नृपान् २७ गाधेरभून्महातेजाः समिद्ध इव पावकः तपसा
क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् विश्वामित्रस्य चैवासन्पुत्रा एकशतं नृप मध्यमस्तु मधुच्छंदा मधुच्छंदस एव ते २९

व ज्यायांसो मधुच्छंदसः पंचाशत्कनीयांस इत्यादि तत्र च विश्वामित्रेषु भार्गवस्याजीगर्त्तस्य देवरातस्य ज्येष्ठत्वमवगम्यते तथा चाश्वलायनबो
धायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तं प्रवरश्च तस्मिन्नेव वंशे अवांतरभेदः न तु वंशांतरं तथा च स्मृतिः एक एव ऋषिर्यावत्प्रवरे
ष्वनुवर्त्तते तावत्समानगोत्रत्वं विनान्येभ्यो गिरोगणादिति ॥ २९ ॥ राम

तत्कृतो भृगुवंशप्रवरस्य देवरातस्य कौशिकप्रवरत्वमित्याशंक्य तदुपपादयन्नाह एवं कृत्वेत्यादि यावत्समाप्ति पूर्वमजीगर्तसुतत्वेन मध्यमत्वे
न पितृभ्यां ममता विहाय विक्रीडितत्वान्नस्य तदुपपाद्य सुतानाह ज्येष्ठ एष प्रकल्प्यतामिति ३० एवं देवरातस्य ज्येष्ठत्वं विधिना विधाय इति द्वाभ्यां पुरुषो वै
मुमुचे ३१ भार्गवः पिता गाधिषु गाधेस्तु देवैर्दत्तः देवरात इति आख्यातः ३२ तत्र तस्य ज्येष्ठत्वं कुशलं न मेनिरे मध्यमस्यानर्थाय वहत्त्वं दृष्ट्वा नाङ्गीकृतवन्तः
मुनिविश्वामित्रः ३३ पंचाशता कनिष्ठैः सार्धं मधुच्छन्दा उवाच नोऽस्माकं यत् ज्येष्ठत्वं कनिष्ठत्वं वा भवान् पिता संजानीते तस्मिन्नस्थि

एवं कृत्वा सुतान् शुनःशेफं देवरातं च भार्गवं । आजीगर्तसुतानाह ज्येष्ठ एष प्रकल्प्यताम् ॥ ३० ॥ यो वै हरिश्चन्द्रमखे विक्रीतः पुरुषः प
शुः स्तुत्वा देवान् प्रजेशादीन् मुमुचे पाशबन्धनात् ॥ ३१ ॥ यो रातो देवयजने देवैर्गाधिषु तापसः । देवरात इति ख्यातः शुनःशे
फस्तु भार्गवः ॥ ३२ ॥ ये मधुच्छन्दसो ज्येष्ठाः कुशलं मेनिरे न तत् । अशपत्तान् मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः ॥ ३३ ॥ स होवाच
मधुच्छन्दाः सार्धं पंचाशता ततः । यन्नो भवान् संजानीते तस्मिंस्तिष्ठामहे वयम् ॥ ज्येष्ठं मंत्रदृशं चक्रुस्त्वामन्वंचो वयं स्म हि
॥ ३४ ॥ विश्वामित्रः सुतानाह वीरवन्तो भविष्यथ । ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त माम् ॥ ३५ ॥

स्थापयितिष्ठामेति एवमुक्त्वा मंत्रदृशं कस्य तत्रैकतमस्याभूत् तामामितित्यादि मंत्राणां द्रष्टारं शुनःशेफं ज्येष्ठं चक्रुः तदाह वयं सर्वे त्वामन्वञ्चः स्म
हि अनुगन्तारः कनिष्ठाः स्म इत्यर्थः ३४ ततः प्रसन्नो विश्वामित्रः सुतानाह वीरवन्तः पुत्रवन्तो भविष्यथ ये यूयं मे मानं पूज्यत्वमनुगृह्णन्तः माम
नाः अनुवर्तमानाः सन्तः मां वीरवन्तं सुकर्तं कृतवन्त इत्यर्थः ॥ ३५ ॥ गोपालाय नमः गोविन्दाय नमः ॥ रामाय नमः ३४

हे कुशिकाः एष देवरातः वो युष्माकं दायः कौशिक एव । यतः वीरो मत्तु ज्ञातमेनमन्वितमनुगच्छत । अन्ये चाष्टकादयस्तस्यानुज्ञाता भ्रातरः ॥ २६ ॥ उप
संहरति एवमिति । एके शप्ताः एके अनुगृहीताः । अन्यस्तु पुत्रत्वेन स्वीकृत इत्येवं कौशिकगोत्रं पृथग्विधं नानाप्रकारं जातं । तत्र च देवरातस्य मा
पन्नं प्राप्तं ह्रियमाणात एवं देवरातं ज्येष्ठत्वेन तत्र कल्पितं ॥ २७ ॥ इति नवमे षोडशः ॥ आयोः शाखा दर्शितैवेलज्येष्ठपुत्रस्य पवंशस्य । हितेषु क्षत्रवृद्धादिव

एष वः कुशिका वीरो देवरातस्तमन्वित । अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥ २६ ॥ एवं कौशिकगोत्रं तु विश्वामित्रैः पृथ
ग्विधं । प्रवरान्तरमापन्नं तद्धि चैवं विकल्पितं ॥ २७ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे षोडशोऽध्यायः ॥ श्रीशुक उवाच ॥ यः पुरू
रवसः पुत्र आयुस्तस्याभवन्सुताः । नहुषः क्षत्रवृद्धश्च रजी रंभश्च वीर्यवान् ॥ अनेना इति राजेन्द्र शृणु क्षत्रवृधोऽन्वयं ॥ १ ॥ क्षत्रवृद्ध
सुतस्यासन्सुहोत्रस्यात्मजास्त्रयः । काश्यः कुशो गृत्समद इति गृत्समदादभूत् ॥ २ ॥ शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः ।
काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमःपिता ॥ ३ ॥ धन्वन्तरिर्दीर्घतमस आयुर्वेदप्रवर्तकः । यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिना
शनः ॥ ४ ॥ तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः । दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः ॥ ५ ॥ स एव शत्रुजिद्वत्स ऋतध्व
जइतीरितः । तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ।

र्णां वंशवर्णनं । इह श्रीकृष्णावतारप्रस्तावाय वंशानुक्रमणमल्पादिक्रमेणापक्रां
तमिति यस्य वंशे कृष्णावतारस्तस्य वंशमिति विस्तरात्वादरेते निरूप्यते । अतः पुरूरवसः पुत्राणां पंचानां कनिष्ठानां वंशाननुक्रमेदानीं प्रथमस्य वंश
माह य इति । एवं नहुषययातिप्रभृतिषु पिरहृष्टव्यं । क्षत्रवृधात्क्षत्रवृधस्य ॥ १ ॥ २ दीर्घतमसः पिता ॥ ३ ॥ स्मृतमात्र एवार्तिरोगं दुःखं नाशयतीति
तथा ॥ ४ ॥ ५ ॥ ततः प्रतर्दनादिशब्दवाच्याद्द्युमतः सकाशादलर्कादयः ॥ ६ ॥

७ ॥ संततिसंतः ॥ ८ ॥ सत्यकेतोर्धृष्टकेतुः तस्मात्सुकुमारः तस्माद्वीतिहोत्रः तस्य भर्गः ततो भार्गभूमिः ॥ ९ ॥ काश्यस्य काशेर्वंश्याः काशिप्रपितामहस्य क्षत्रवृद्धस्यान्वयं अयं ते याता इति तथा ॥ १० ॥ ततः अनेनसः शुद्धोपत्ये कृतकृत्यः सः यतः आत्मवान् ज्ञानी ॥ अतः पुत्रोत्पादनेन कृतवानित्यर्थः ॥

षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च ॥ नालर्कादपरो राजा बुभुजे मेदिनीं युवा ॥ ७ ॥ अलर्कात्संततिस्तस्मात्सुनीथोथ निकेतनः ॥ धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ॥ ८ ॥ धृष्टकेतुस्ततस्तस्मात्सुकुमारः क्षितीश्वरः ॥ वीतिहोत्रोऽस्य भर्गोतो भार्गभूमिरभून्नृप ॥ ९ ॥ इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः ॥ राभस्य रभसः पुत्रो गंभीरश्चाक्रियस्ततः ॥ तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः ॥ शुद्धस्ततः शुचिस्तस्माच्चित्रकृद्धर्मसारथिः ॥ ततः शांतरजो जज्ञे कृतकृत्यः स आत्मवान् ॥ ११ ॥ रजेः पंचशतान्यासन्पुत्राणाममितौजसां ॥ देवैरभ्यर्थितो दैत्यान्हत्वेंद्रायाददाद्दिवम् ॥ १२ ॥ इंद्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः ॥ आत्मानमर्पयामास प्रह्रादाद्यरिशंकितः ॥ १३ ॥ पितर्युपरते पुत्रा याचमानाय नो ददुः ॥ त्रिविष्टपं महेंद्राय यज्ञभागान्समाददुः ॥ १४ ॥ गुरुणा हूयमानेऽग्नौ बलभित्तनयान्रजेः ॥ अवधीद्भ्रंशितान्मार्गान्न कश्चिदवशेषितः ॥ १५ ॥ कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ॥ ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः ॥ १६ ॥ सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः ॥ संकृतिस्तस्य च जयः क्षत्रधर्मा महारथः ॥ क्षत्रवृद्धान्वया भूपाः शृणु वंशं च नाहुषान् ॥ १७ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे सप्तदशो ध्यायः ॥

तेषां प्रतिग्रहत्यागप्रकरणे ब्रह्मस्पतिनाभिचारविधानेनाग्नौ हूयमानेषु इति ॥ सिंहावलोकनेनाह क्षात्रवृद्धात् क्षत्रवृद्धयोत्रात् कुशात्प्रतिः प्रतेः संजयः ॥ १६ ॥ नवमे सप्तदशः ॥

हा

भर्गो
रम्भ
नो

अष्टादशे ययातेस्तु नाहुषस्य कथोच्यते । यस्य पंच सुतास्तेषु कनीयान्गृहीतजरां ॥ १ ॥ तस्य राज्यस्य परिणामं अनर्थावहत्वं वेत्तीति तथा तत्र हेतुः यत्रेति ॥ २ ॥ स्थानान्नहुषं स्वर्गान्नहुषं द्विजैर्महर्षिभिः ॥ ३ ॥ यवीयसां भ्रातॄणां दिशान् ॥ काव्यस्य शुक्रस्य वृषपर्वणश्च कन्याभ्यां कृतदारः सन्

शुकउवाच ॥ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः ॥ षडिमे नहुषस्यासन्निंद्रियाणीव देहिनः ॥ १ ॥ राज्यं नैच्छद्यतिः पित्रा दत्तं तत्परिणामवित् ॥ यत्र प्रविष्टः पुरुषः आत्मानं नावबुध्यते ॥ २ ॥ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणाद्द्विजैः ॥ प्रापिते जगरत्वं वै ययातिरभवन्नृपः ॥ ३ ॥ चतसृष्वादिशद्दिक्षु भ्रातॄन्भ्राता यवीयसः ॥ कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ॥ ४ ॥ राजोवाच ॥ ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबंधुश्च नाहुषः ॥ राजन्यविप्रयोः कस्मात् विवाहः प्रतिलोमकः ॥ ५ ॥ शुकउवाच ॥ एकदा दानवेंद्रस्य शर्मिष्ठा नाम कन्यका ॥ सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥ ६ ॥ देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले ॥ व्यचरत्कलगीतालिनलिनीबले ॥ ७ ॥ (पुलिने) ता जलाशयमासाद्य कन्याः कमललोचनाः ॥ तीरे न्यस्य दुकूलानि विजह्रुः सिंचतीर्मिथः ॥ ८ ॥ वीक्ष्य व्रजंतं गिरिशं सह देव्या वृषस्थितम् ॥ सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥ ९ ॥ शर्मिष्ठाऽजानती वासो गुरुपुत्र्याः समव्ययत् ॥ स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥ १० ॥ अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसांप्रतं ॥ अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥

न प्रतिलोमता दोषः ईश्वरेच्छरनादिति दर्शयन्कथामाह एकदेत्यादिना ॥ यतिजग्राह तद्धवस्त्रं तेन गुरोः शुक्रस्य पुत्र्या देवयान्या च व्यवहरदिति द्वयोरन्वयः ॥ कलगीता अलयो येषु तानि नलिनीपुलिनानि यस्मिन् पुरोद्याने अबला शर्मिष्ठा ॥ ७ ॥ सिंचतीः सिंचत्यः ॥ ८ ॥ ९ ॥ अजानती स्वीयं मत्वा गुरुपुत्र्या वासः समव्ययत् पर्यधात् ॥ १० ॥ असांप्रतमन्याय्यं ॥ ११ ॥ ॥ एमएम ॥

अन्वायमेव ब्राह्मणोत्कर्षवर्णनेन व्यनक्ति यैरिति त्रिभिः यैर्ब्राह्मणैः परस्य पुंसो मुखं मुखत्वाद् उत्पन्नत्वेन तत्प्रिद्यत्वेन च श्रेष्ठा इत्यर्थः ज्योतिर्ब्रह्मापथ
वेदमार्गः ॥ १२ ॥ ततेवं ब्राह्मणमात्रमेव तावत्पूज्यं तत्रापि वयं भृगवः अस्यास्त्वपिता नाशिष्यः एवमस्त्वपि अस्माभिर्दार्य्यं वासस्त्वयमसती धृतवती ॥ १४

यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये। धार्यते यैरिह ज्योतिः शिवः पंथाः प्रदर्शितः ॥ १३ ॥ यान्वंदंत्युपतिष्ठंते लोकनाथाः सुरेश्वराः ॥ भग
वानपि विश्वात्मा पावनः श्रीनिकेतनः ॥ १४ ॥ वयं तत्रापि भृगवः शिष्योऽस्याः पिताऽसुरः। अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती नः वेद
एवं शपंतीं शर्मिष्ठा गुरुपुत्रीमभाषत ॥ रुषा श्वसंत्युरंगीव धर्षिता दष्टदच्छदा ॥ १५ ॥ आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि। किं न प्रति कि
प्रतीक्षसेऽस्माकं गृहान्बलिभुजो यथा ॥ १६ ॥ एवंविधैः सुपरुषैः क्षिप्त्वाचार्यसुतां सतीं। शर्मिष्ठा प्राक्षिपत्कूपे वासश्चादाय मन्युना ॥
तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन्। प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥ १८ ॥ दत्वा स्वमुत्तरं वासस्तस्यै राजा विवास
से गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥ तं वीरमाहौशनसी प्रेमनिर्भरया गिरा ॥ राजंस्त्वया गृहीतो मे पाणिः परपुरंजय ॥ २० ॥
हस्तग्राहोऽपरो मा भूद्गृहीतायास्त्वया हि मे। एष ईशकृतो वीर संबंधो नौ न पौरुषः ॥ २१ ॥ यदिदं कूपमग्नाया भवतो दर्शनं मम। न ब्राह्म
णो मे भविता हस्तग्राहो महाभुज ॥ कचस्य बार्हस्पत्यस्य शापाद्यमशपं पुरा ॥ २२ ॥ निषिद्धोयं प्रतिलोमसंबंध इति चेत्तत्राह एष इति ॥ २१ ॥ ब्राह्म

णमेव त्वं वृणीहि किमनेनाग्रहेणेति चेत्तत्राह न ब्राह्मण इति बृहस्पतेः सुतः कचः शुक्रात्संजीवनीविद्यामध्यगात् तदा च देवयानी तं पतिं वव्रे तां च का राम
मे स च गुरुपत्नी मम पूज्येति नेति तां प्रत्युवाच तस्य वृत्तेरे ततः क्रुद्धा पिता मदीया सती तवेयं विद्या निष्फला भवत्विति तं शशाप स च तव ब्राह्मणः पतिर्न भवेदिति तां श ९६
शाप तदेतदाह यमहं शापं कचस्य शापात् ॥ २२ ॥

अशास्त्रीयत्वान् अनभिप्रेतमपि दैवेनोपहृतं प्रापितं बुद्ध्वा तत्कृतत्वात्स्वकामं स्वमनसश्च बुद्ध्वा नत्वधर्मभयादीयमनः प्रविशोरितितस्या वचः प्र
तिजग्राह अंगीकृतवान् ॥ २३ ॥ सर्वं शर्मिष्ठायां सर्वं वृत्तं पितृवे ववृशाद्देवा स्ववरितितिदशीयत्राह गते राजमीति न वपिः उक्तं पिकृकीत्यादि कृतं कृपयं त्रेपा
दि ॥ २४ ॥ कापोतीमुञ्छवृत्तिं ॥ २५ ॥ प्रत्यनीकोऽरेवाहृते विवक्षितो जयप्राप्तमणीयाद्रत्यभिप्रेतं यस्य तथाभूतं ज्ञात्वा ॥ प्रत्यनीकानां विवक्षितमितिवा ॥ २६ ॥

ययातिरनभिप्रेतं दैवोपहृतमात्मनः ॥ मनस्त्वनुगतं बुद्ध्वा प्रतिजग्राह तद्वचः ॥ २३ ॥ गते राजर्षौ वीरे तत्र स्म रुदती पितुः ॥
न्यवेदयत्ततः सर्वमुक्तं शर्मिष्ठया कृतं ॥ २४ ॥ दुर्मना भगवान्काव्यः पौरोहित्यं विगर्हयन् ॥ स्तुवन्वृत्तिं च कापोतीं दुहित्रा स य
यौ पुरात् ॥ २५ ॥ वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितं ॥ गुरुं प्रसादयन्मूर्ध्ना पादयोः पतितः पथि ॥ २६ ॥ क्षणार्धमन्युर्भगवा
ञ्छिष्यं व्याचष्ट भार्गवः ॥ कामोऽस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे ॥ २७ ॥ तथेत्यवस्थिते प्राह देवयानी मनोगतं ॥ पि
त्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥ २८ ॥ स्वानां तत्संकटं वीक्ष्य तदर्थस्य च गौरवं ॥ देवयानीं पर्यचरत्स्त्रीसहस्रेण दा
सवत् ॥ २९ ॥ नाहुषाय सुतां दत्वा सह शर्मिष्ठयोशनाः ॥ तमाह राजञ्छर्मिष्ठामाधास्तल्पे न कर्हिचित् ॥ ३० ॥ विलोक्यौशन
सीं राजञ्छर्मिष्ठा सुप्रजां क्वचित् ॥ तमेव वव्रे रहसि सख्याः पतिमृतौ सती ॥ ३१ ॥ राजपुत्र्यार्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् ॥
स्मरञ्छुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥

७ ॥ सानुगा मत्सखी सहिता शर्मिष्ठा मामनुयायादिति ॥ २८ ॥ तत्रस्मात्त्रिर्गताच्छुकात्संकटं वीक्ष्य ॥
तत्रस्मारवस्थितार्थं सत्यप्रयोजनस्य गौरवं च वीक्ष्य ॥ २९ ॥ तल्पेनाधाः नोपगच्छेरित्यर्थः ॥ ३० ॥ ३१ ॥ अपत्यार्थमृतुकाले प्रार्थनात्रयस्याः काम इत्यर्थः ध
र्ममवेक्ष्य शुक्रस्य वचश्च स्मरन् ॥ दिष्टं दैवप्रापितमेव तत्संगममभ्यपद्यत न तु काममत इत्यर्थः ॥ ३२ ॥

२३ ॥ आसूर्याः शर्मिष्ठायाः सुताः सकाशात् ॥ २४ ॥ उपमंत्रयन् प्रभाषं स्वयन् ॥ २५ ॥ विक्रांतं त्र्यं करोतीति तिथ्या ॥ २६ ॥ तेऽतु हितगिरेकोपेरयाप्यतस्तोस्मि ॥ कामानां मो
गैरितिवा ॥ सुक्रश्चाह ॥ नहि यो मे धास्यति अमितो धारयिष्यति तं सवयमाकाम व्यत्यसतां यथेच्छं जरां व्यत्ययेथा ॥ व्यत्ययं नीयतां मेति वा यदुः ॥ व्यत्यसेति
छेदः तां जरां व्यत्यामग्न्यपये त्स्पर्शः ॥ २७ ॥ इतिलब्ध्वा व्यवस्था न जरायाः व्यवस्थितिर्मनसः ॥ २८ ॥ ४० ॥ यतो नधर्मज्ञा ॥ श्रुनिस्ते वयोत्रते नित्यवृद्धयः ॥ ४१ ॥ वंजंत

यदुं च तुर्वसुं चैव देवयान्यभ्यजायत ॥ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ३३ ॥ गर्भसंभवमासुर्याः भर्तुर्विज्ञाय मानिनी ॥ देव
यानी पितुर्गेहं ययौ क्रोधविमूर्छिता ॥ ३४ ॥ प्रियामनुगतः कामी वचोभिरुपमंत्रयन् ॥ न प्रसादयितुं शेके पादसंवाहनादिभिः ॥ ३५ ॥ शु
क्रस्तमाह कुपितः स्त्रीकामानृतपूरुष ॥ त्वां जरा विशतां मंद विरूपकरणी नृणां ॥ ३६ ॥ ययातिरुवाच ॥ अतृप्तोस्म्यद्य कामानां ब्रह्मन्दु
हितरि स्मते ॥ व्यत्यस्यतां यथाकामं वयसा योभिधास्यति ॥ ३७ ॥ इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत ॥ यदो तात प्रतीच्छेमां जरां दे
हि निजं वयः ॥ ३८ ॥ मातामहकृतां वत्स न तृप्तो विषयेष्वहं ॥ वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥ ३९ ॥ यदुरुवाच ॥ नोत्सहे ज
रया स्थातुमंतरा प्राप्तया तव ॥ अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥ ४० ॥ तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ॥ प्रत्याचख्यु
रधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥ ४१ ॥ अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकं ॥ न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ॥ ४२ ॥ पू
रुरुवाच ॥ को नु लोके मनुष्येंद्र पितुरात्मकृतः पुमान् ॥ प्रतिकर्तुं क्षमो यस्य प्रसादाद्विंदते परं ॥ ४३ ॥ उत्तमश्चिंतितं कुर्यात् प्रोक्तकारी च
मध्यमः ॥ अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥ ४४ ॥

किन गृहीष्यसीत्यपृच्छत ॥ प्रत्याख्यानं मा कथा यस्तु आह न त्वमिति ॥ ४२ ॥ आत्मकृतः स्वदेहक
र्तुः प्रत्युपकर्तुं को क्षमः ॥ ४३ ॥ तथापि दुर्यां स्थितिं तत्कार्यात् स उत्तमः ॥ यस्तु प्रोक्तकारी स मध्यमः ॥ यस्त्वश्रद्धया कुर्यात् सोऽधमः ॥ अकर्ता पितुश्चरितं पुरीषवत् ॥ पः ॥ ४४

जुजुषे सेवितवान् ॥४५॥ यथोपजोषं यथाप्रीति जुजुषे ॥४६॥ ज ॥ नानावभाति ज्ञावद्भिः द्विप्रवृत्तिः तदुपरमे नाभाति स्वप्नमायाभ्यां सहितो मनोरथ इवेत्यर्थः ॥४९॥ ५० ॥ मनःसुखं कामभोगं कदिंद्रियैः कुत्सितैः पराङ्मुखैरिंद्रियैः ॥ इति नवमे ष्टादशः ॥ उनविंशे ययातिः स्वचेष्टितं न स्वयोग्यं ॥ देवयानीमाश्राव्य विरक्तो मुक्तिमाप्तवान् ॥ भुक्तभोगामजां हास्यन्नवं जहत्तमात्मनः ॥ विडंबयन्स्त्रियामाह निर्वेदं स्थितमात्मवान् ॥ कामानाचरन्नुपभुंजा

अ

इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ॥ सोपि तद्वयसा कामान्यथावज्जुजुषे नृप ॥४५॥ सप्तद्वीपपतिः सम्यक्पितृवत्पालयन्प्रजाः ॥ यथोपजोषं विषयान्जुजुषेऽव्याहतेंद्रियः ॥४६॥ देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ॥ प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ॥४७॥ अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः ॥ सर्ववेदमयं देवं सर्वदेवमयं हरिं ॥४८॥ यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ॥ नानेव भाति नाभाति स्वप्नमायामनोरथः ॥४९॥ तमेव हृदि विन्यस्य वासुदेवं गुहाशयं ॥ नारायणमणीयांसं निराशीरयजत्प्रभुं ॥५०॥ एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखं ॥ विदधानोपि नातृप्यत्सार्वभौमः कदिंद्रियैः ॥ इति श्रीभागवते महापुराणे नवमस्कंधे अष्टादशोऽध्यायः ॥१८॥ श्रीशुक उवाच ॥ स इत्थमाचरन्कामान्स्त्रैणोऽपह्नवमात्मनः ॥ बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत ॥ शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि ॥ धीरा यस्यानुशोचंति वने ग्रामनिवासिनः ॥१॥ बस्त एको वने कश्चिद्विचिन्वन्प्रियमात्मनः ॥ ददर्श कूपे पतितां स्वकर्मवशगामजां ॥२॥

नः गाथामिति द्वाभ्यां ॥ मद्विधेन मत्सदृशेनाचरितामनुष्ठितां ॥ मद्विधस्याचरितं यस्यामिति वा ॥ यस्य ग्रामनिवासिनः कामिनो मद्विधस्याचरितं वने स्थिता धीराः शोचंति तस्य गाथां शृणु ॥१॥ आत्मानमनुलक्ष्याह बस्त इति प्रियामनुलक्ष्याह अजामिति ॥ वने संसारे ॥ प्रियं विषया ॥२॥

रोधसी तट्टे विषाणाग्रेण मृद्दारिकमुद्धृत्य तीर्थं निर्गमाय मार्गं व्यधत्त ॥४॥ वस्त इति शर्म्मिष्ठावृत्तचेष्टाः कामयामास ॥ कांतं प्रति कामिनीः कामवत्यः
पीवानं पुष्टं ॥ श्मश्रुलं श्मश्रुवज्ञलं रतिसमर्थमित्यर्थः मीढ्वांसं रेतःसेक्तारं ॥ यामकोविदं सुरतं श्रुत एव प्रेष्ठं ॥५॥ नाबुध्यत नाबुध्यत ॥६॥७॥ स्वामिन
मिति पुंकामिप्रायेणोक्तं ॥८॥ इडविडाकारं बहुजातिशब्दं ॥ संधितुं प्रसादयितुं ॥९॥ वृषणं मुष्कं छिन्नत ॥ तरसा संभोगसमर्थं मकरोत् ॥ अर्थाय स्वप्रयोजनाय

तस्या उद्धरणोपायं बस्तः कामी विचिंतयन् व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसि ॥४॥ सोत्तीर्य कूपात्सुश्रोणी तमेव चकमे किल ॥ तया
वृतं समुद्वीक्ष्य बह्व्योजाः कांतकामिनीः ॥५॥ पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं यामकोविदं ॥ स एकोजवृषस्तासां बह्वीनां रतिवर्द्धनः ॥ रेमे जात
कामग्रहग्रस्त आत्मानं नावबुध्यत ॥६॥ तमेव प्रेष्ठतमया रममाणमजान्यया ॥ विलोक्य कूपसंविग्ना नामृष्यद्बस्तकर्म तत् ॥७॥ तं दुर्हृदं
सुहृद्रूपं कामिनं क्षणसौहृदं ॥ इंद्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ॥८॥ सोपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुं ॥ कुर्व
न्निडविडाकारं नाशक्नोत्पथि संधितुं ॥९॥ तस्यास्तत्र द्विजः कश्चिदजास्वाम्यछिनद्रुषा ॥ लंबंतं वृषणं भूयः संदधेर्थाय योगवित् ॥१०॥
संबद्धवृषणः सोपि ह्यजया कूपलब्धया ॥ कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥११॥ तथाहं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः
आत्मानं नाभिजानामि मोहितस्तव मायया ॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ॥ न दुह्यंति मनःप्रीतिं पुंसः कामाहत
ना स्यते ॥१३॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥१४॥

कामभोगाय ॥ योगवित् उपायज्ञः अजाव्यत्ययेन रतिशक्तिं ददावित्यर्थः ॥१०॥ कूपलब्धया सह कामैः सेव्यमानैर्न तृप्यति ॥११॥ ततः तर्हि पुनरपि बहवो विष
याः सेव्यतां ततो मनःतिप्रीतेरति कामेप्याशांत्या मोहो निवर्त्तते तिवेत्तत्राह यदिति द्वाभ्यां ॥ न दुह्यंति न पूरयंति ॥१३॥ हविषा घृतेन कृष्णवर्त्माग्निरिव

तर्हि कदा केनोपायेन वा मनसः संपूर्णा प्रीतिः स्यात् यया कामोपशमः स्यादित्यत आह यदेति षड्भिः अमंगलं भावं रागद्वेषादिवैषम्यं दुःखानि
नितरां वहतीति तथा ॥ १६ ॥ स्त्रीसन्निधानं तु सर्वथा त्याज्यमित्याह मात्रेति अविविक्तं एकासनं यस्य सः कर्षति आकर्षति --- न तु त
स्मात् त्यागः स्यादिति दुःखं कथं ब्रह्मणि मनस्समाधानं स्यात् तत्राह दृष्टमिति योनानुध्यायेन्न संविशेत्र चोपभुंजीत तत्र तत्र दृष्टश्रुतयोरनुध्या

यदा न कुरुते भावं सर्वभूतेष्वमंगलं ॥ समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते ॥ तां त
ष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ १६ ॥ मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् ॥ बलवानिंद्रियग्रामो विद्वांसमपि
विकर्षति ॥ १७ ॥ पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् ॥ तथापि चानुसवनं तृष्णा तेषूपजायते ॥ १८ ॥ तस्मादेतामहं त्यक्त्वा ब्रह्म
ण्याधाय मानसम् ॥ निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह ॥ १९ ॥ दृष्टं श्रुतमसद्बुध्वा नानुध्यायेन्न संविशेत् ॥ संसृतिं चात्मनाशं च ये

तत्र विद्वान्स आत्मदृक् ॥ २० ॥ इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः ॥ दत्वा स्वां जरसं तस्मादाददे विगतस्पृहः ॥ २१ ॥ दिशि दक्षिण

पूर्वस्यां द्रुह्युं दक्षिणतो यदुं ॥ प्रतीच्यां तुर्वसुं चक्रे उदीच्यामनुमीश्वरं ॥ २२ ॥ भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशां ॥ अभिषिच्या

यं
दुं

ग्रजान्तस्य वशे स्थाप्य वनं ययौ ॥ २३ ॥ आसेवितं वर्षपूगान् षड्वर्गं विषयेषु सः ॥ क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥ २४ ॥ स तत्र
निर्मुक्तसमस्तसंग आत्मानुभूत्या विधुतत्रिलिंगः ॥ परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥ २५ ॥

तादृशे सत्यात्मा द्रष्टा भवति २०। २१ तस्य पूरो --- पायित्वा २३ विषयेषु शब्दादिषु आसेवितं षड्वर्गं षडिंद्रियसंबंधं मुमुचे तत्याज यद्वा विषयेषु आसेवि
तं सेवाकारितं षण्णामिंद्रियाणां वर्गं मुमुचे उपेक्षितेत्यर्थः २४ विधुतानि --- त्रिगुणात्मकलिंगं येन प्रतीतः प्रख्यातः २५

दिशा।।या

पु। मुं

भा०न ब्रह्मणोत्मनेवाहं परिहासमिवेति । प्रस्तोभं निवृत्तिमार्गप्रोत्साहनं मेने ॥ २६ ॥ कथं समावेश्य मनस्तदाह नमस्त इति । नमस्तादिभिः समावेश्येत्यर्थः । शुक्रो वा नमस्तु

३९ इति ॥ २९ ॥ नवमे कोनविंशः ॥ विशेषितः प्रसाराः राज्ञां महोत्सवे ततः ॥ पूरोर्वंशे तु दौष्यन्तेर्भरतस्येर्यते यशः ॥ १ ॥ ततस्ततः श्रुतः ययातेः सुतः ॥ ३ ॥ धर्मेयुश्च

श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः । स्त्रीपुंसोः स्नेहवैक्लव्यात्परिहासमिवेरितं ॥ २६ ॥ सा सन्निवासं सुहृदां प्रपायामिव गच्छतां । विज्ञायेश्वरतन्त्राणां मायाविरचितं प्रभोः ॥ २७ ॥ सर्वत्र संगमुत्सृज्य स्वप्नौपम्येन भार्गवी । कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः ॥ नमस्तुभ्यं भगवते वासुदेवाय वेधसे ॥ सर्वभूताधिवासाय शान्ताय बृहते नमः ॥ २९ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे एकोनविंशतितमोध्यायः ॥ श्रीशुक उवाच ॥ पूरोर्वंशं प्रवक्ष्यामि यत्र जातोसि भारत ॥ यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥ १ ॥ जनमेजयो ह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः ॥ प्रवीरोथ मनस्युर्वै तस्माच्चारुपदोभवत् ॥ २ ॥ तस्य सुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः ॥ संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः ॥ ३ ॥ ऋतेयुस्तस्य कक्षेयुः स्थंडिलेयुः कृतेयुकः ॥ जलेयुः सन्नतेयुश्च धर्मसत्यव्रतेयवः ॥ दशैतेप्सरसः पुत्रा वनेयुश्चावमः स्मृतः ॥ घृताच्यामिन्द्रियाणीव मुख्यस्य जगदात्मनः ॥ ५ ॥ ऋतेयो रंतिभारोभूत्त्रयस्तस्यात्मजा नृप ॥ सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥ ६ ॥ तस्य मेधातिथिस्तस्मात्प्रस्कन्नाद्या द्विजातयः ॥ पुत्रोभूत्सुमते रेभिर्दुष्यंतस्तत्सुतो मतः ॥ ७ ॥ दुष्यंतो मृगयां यातः कण्वाश्रमपदं गतः ॥ तत्रासीनां स्वप्रभया मंडयंतीं रमामिव ॥ विलोक्य सद्यो मुमुहे देवमा यामिव स्त्रियं ॥ ८ ॥

सत्येयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥ वनेयुश्चावमः स्मृतः एवं दशैते ऋतेयुप्रमुखा अप्सरसो घृताच्यामुत्पन्ना अमी तिपुत्रा जाताः श्रुतम् । यथा मुख्यस्य जगदात्मनः जगतः आत्मभूतस्य मुख्यस्य प्राणस्येंद्रियाणीव ॥ ५ ॥ ७ ॥ दुष्यंतस्य शकुंतलायां भरतः पुत्रो भविष्यतीति तस्य

२९ कथाशेषेणाह दुःषंतो मृगयामिति पंचदशभिः । तामाश्रमं मंडयंतीं स्त्रियं विलोक्य मुमुहे इत्यन्वयः ॥ ८ ॥

तस्या दर्शनेन प्रमुदितः अत एव सन्निवृत्तः परिश्रमो यस्य ॥ ९ ॥ १० पौरवाणां चेतो न त्वधर्मे रमते ॥ अतो मद्वचनं मः त्वयि रमणाय विवाहं त्वाम्
जन्यतनया वेद्मि ॥ ११ विश्वामित्रस्यात्मजाहं मेनकायां जाता ॥ तथा च स्वर्गं गच्छन्त्या सुवचनेत्युक्त्वा ॥ अतो राजकन्यैव विवाहमित्यर्थः ॥ १२ ॥ ३ किंक

बभाषे तां वरारोहां मधुरैः कतिपयैर्वृतः ॥ तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः ॥ सच्छकामसंतप्तः प्रहसन्सुस्नुह्या गिरा ॥ ९ ॥
का त्वं कमलपत्राक्षी कस्यासि हृदयंगमे ॥ किं वा चिकीर्षितं त्वत्र भवत्या निर्जने वने ॥ १० ॥ व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ॥
न हि चेतः पौरवाणामधर्मे रमते क्वचित् ॥ [शकुन्तलोवाच] ॥ विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ॥ वेदैतद्भगवान्कण्वो वी
र किंकरवाम ते ॥ ११ ॥ आस्यतां ह्यरविन्दाक्ष गृह्यतामर्हणं च नः ॥ भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥ १३ ॥ [दुष्यन्त उवाच] ॥ उपप
न्नमिदं सुभ्रु जातायाः कुशिकान्वये ॥ स्वयं हि वृणते राज्ञां कन्यकाः सदृशं वरं ॥ १४ ॥ ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलां ॥ गांध
र्वविधिना राजा देशकालविधानवित् ॥ १५ ॥ अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे ॥ श्वोभूते स्वपुरं यातः काले नासूत सा सुतं ॥ १६ ॥
कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः ॥ बद्ध्वा मृगेन्द्रांस्तरसा क्रीडति स्म स बालकः ॥ १७ ॥ तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा ॥ हरे
रंशांशसंभूतं भर्त्तुरन्तिकमागमत् ॥ १८ ॥ यदा न जगृहे राजा भार्यापुत्रावनिन्दितौ ॥ शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी ॥ १९ ॥ मा
ता भस्त्रा पितुः पुत्रो येन जातः स एव सः ॥ भरस्व पुत्रं दुष्यन्त मावमंस्थाः शकुन्तलां ॥ २० ॥

र वा मे इत्यादिवाक्यात्तदभिप्रायं ज्ञात्वाह उपपन्नमिति ॥ १४ गांधर्वविधिना मिथः समयपूर्वकेन ॥ १५ दुरत्ययविक्रान्तं विक्रमं यस्य ॥ १८ ॥ भस्त्रावच्चर्मपात्रं
तद्वत्माता आधारमात्रं पितुरेव तु पुत्रः ॥ तत्र हेतुः येनेति ॥ आत्मा वै पुत्रनामासीति श्रुतेः ॥ भरस्व पोषणाय अनेन भरत नाम निरुक्तं ॥ २० ॥

भा.न.
४०

किंच रेतोधाः रेतः सेक्ता वंशकृत पुत्रो यमक्षयात्पितरं नयति तारयति तथा च श्रुतिः पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः
स्वयमेव स्वयंभुवेति पाठान्तरे मातापित्रोः पुत्रं प्रति विवादे यमक्षयादिं धर्मनिर्णीतार्थं सत्यमाह भार्यायाः प्रकाशादि रेतोधा रेतः सेक्ता पितैव धर्मेण विजि
त्य पुत्रं नयति न तु मातेत्यर्थः ततश्च माता भस्त्रेत्याह्वानीकृतवानिति ज्ञेयं २१ चक्रवर्तीत्यनुवर्तिशेषः तस्य महिमा गीयते तदप्येते श्लोका अभिगीता इत्या
हिवक्ष्य चक्रता हरेरंशभुवः अंशाज्जातस्य तत्र लिंगमाह चक्रमिति २२ गंगायामनुलोमं पंचपंचाशता वाजिभिरीजे २३ पुरोधाय पुरोहितं कृत्वा
यमुनामनु च यमुनायाश्चानुलोम्यं अष्टाधिकसप्ततिमेध्यानश्वान्बबंध किं कुर्वन् वसु धनं प्रकर्षेण ददत् २४ साचीगुणे प्रकृष्टगुणवति

रेतोधाः पुत्रो नयति नरदेव यमक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला २१ पितर्युपरते सोऽपि चक्रवर्ती
महायशाः महिमा गीयते तस्य हरेरंशभुवो भुवि चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः २२ ईजे महा
भिषेकेण सोऽभिषिक्तोऽधिराड्विभुः पंचपंचाशता मेध्यैर्गंगायामनु वाजिभिः २३ मामतेयं पुरोधाय यमुनामनु च
प्रभुः अष्टसप्ततिमेध्याश्वान्बबंध प्रददद्वसु २४ भरतस्य हि दौष्यंतेरग्निः साचीगुणे चितः सहस्रं बद्वशो यस्मिन्

देशे अग्निश्चितोऽभूत् यस्मिन्नग्निचयने देशे वा सहस्रं ब्राह्मणाः प्रतेनदानेन दत्ताः गाः बद्वशः प्रत्येकं बद्वं बद्वं वि ब्राह्मणा गा विभेजिरे २५
भेजिरे विभज्य जगृहुः चतुर्दशाधिकैर्द्वयोः शतसहस्रैरेकं बद्वं भवति तथाहि रत्नेन परीवृतान् कृष्णान् शुक्लदतो मृगान् मष्णारे भरतो ददाच्छतं
बद्वानि सप्त चेति श्रुतः सप्ताधिकशतं बद्वानि श्रीशुकेनोक्तश्लोकेषु बद्वशत्वेन संगृहीतानि अत्र दानकर्माणि मष्णारे नियुतानि चतुर्दश
तिएवं चतुर्दशलक्षाणां सप्ताधिकशतभागो बद्वनित्येकं भवति इयं च बद्वसंख्या श्लोकेन संगृह्यते चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः बद्व

राम
४०

देवानामपिमायायांवैभवं अत्यगात् अत्यशेताययतः पुहस्तप्रहस्तिआयधौधा: तदंशामवत्वाशमपिवन्नरइतिपाठे द्रुत्वस्तुत्पमारेण मायावतांश्रेष्ठः हरि
वाणाविसर्थः १६ मृगान्श्रेष्ठराजान् मद्रमद्रमृगाइयोगजजातिभेदाः मस्त्रारेइत्पस्यश्रुतिपदस्याख्यानंकर्माणीति कस्मिंश्चित्कर्मविशेषे के
चित्मस्त्रारेतीर्थव्याचक्षते १७ ७ ततोदेवान्जित्वायेरसातलोकाभिरमातलादिस्थानिभेजिरे तेःप्राणिभिर्वलिभिर्दैवत्वियोरमातलनीताःम

२१ तपस्विवेशच्छन्नंस्थानवधीविप्रापयत्रृपान् दैत्यतिरत्पर्णोमायांदेवनांगतमायोयो १६ मृगान्प्रत्रस्तःकस्मात्हिरण्येनपरी
वृतान् अदात्कमेणिमस्त्रारेनियुतानिवतुर्दश १७ भरतस्यमहत्त्वंमेनपूर्वेनापरेनृपाः नैवापुर्नैवप्राप्स्यन्तिवाहुजोयांत्रिदि
वंयया १८ किरातदूताननवनानंधात्लोकानकषान्धुकान् अब्रह्मण्यान्नपांसूहंस्मैच्छान्दिग्विजयेऽविलान् जित्वाप
राःहरादेवानुपेरसौकोभिभेजिरे देवस्त्रियोरमानीताःप्राणिभिःपुनराहरन् २० सद्यकामानदुदुहदःप्रजानांनतस्पराद
मी समाविश्णवपाहवीर्दिरवक्रमवर्त्तयन् २१ सम्भ्रारूलोकपालानांममैसर्वमाधिराद्धित्रियं चक्रंचास्मवलितंप्राण
न्मृथेस्तुपराणमद २२ तस्याश्चक्षुपवेदर्भ्यःपत्न्यासिलः हमस्माताः जघुस्त्वागमयात्त्वत्रानुनातनृपाइतीरिते २३

ताःपुनराहरन् आनिन्ये प्राणिभिरन्यैर्मत्तश्चादिभिःसहनीताइतिवा पाणिभिरितिपाठेपणायोः हराहत्तैर्नीताःसतीःयद्वा पणायोद्यतात्तैःहृतान्
प्रस्थाप्यहरदित्यर्थः २० त्रिणवमाहवीःसमाःसप्तविंशतिसहस्रमंवत्सरान् वक्रंसेनाश्चता वा २१ तस्यवैराग्येणमोहप्रकारमोहमइति स
षेतिविवार्यतिरोषः २२ नातनृपःमत्समदृशानभवंतीतिभर्त्रीहरितेमतिव्यभिचारशंकयायास्मात्मन्हतीतिभयात्त्वत्रास्तुःपुनःपुनःप्रत्याणादर्शने
वैमाट्टयातसंधानेनत्यजेतनान्यथेत्याशयेनहृतवत्यः २३

भा० न
५१

वितथे व्यर्थे सति तदर्थं पुत्रार्थं मरुत्स्तोमेन यागेन यजतस्तस्य प्रसन्नाः सन्तो मरुतो भरद्वाजं नाम पुत्रमुपाददुः समर्पयामासुः २४ मरुतां भरद्वाजागमप्रकारं दर्शयान्नाह अन्तर्वत्न्यामिति द्वाभ्यां अन्तर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां यवीयान् मैथुनाय कदाचित्प्रवृत्तो बृहस्पतिः तदा द्वितीयगर्भस्यावकाशाभावात् हाक्रोशपूर्वकं गर्भस्थेन वारितः ततः क्रुद्धो बृहस्पतिरन्धो भवेति तं गर्भं शप्त्वा बलाद्वीर्यमन्यषिंचत् ततो बृहस्पतेः शापाद्गर्भस्थो दीर्घतमा अन्धो बभूव तेन च द्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं भूमौ पतितं सद्य एव कुमारो भवत् २५ तं च परवीर्यजं भर्तृ

तस्यैवं वितथे वंशे तदर्थं यजतः सुतं मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः २४ अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् २५ तं त्यक्तुकामां ममतां भर्तृत्यागविशङ्कितां नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः २६ मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं २७

त्यागाद्विशङ्कितामतीत्यक्तुकामां ममतां प्रति सुराः एवं बृहस्पतेर्ममतायाश्च विवादे इमं श्लोकं जगुः किमर्थं जगुरतत्राह तस्य नामनिरुक्त्वोतिये नतं तन्नामनिर्वचनेनैव भर्तृत्यागशङ्कामपाकर्तुमित्यर्थः २६ तत्र पुत्रं त्यक्तुकामां तां ममतां बृहस्पतिराह हे मूढे इमं पुत्रं भर पोषणाय भर्तृविमं मिति चेत्तत्राह द्वाजं एकस्य क्षेत्रे अन्यस्य बीजादिति एवं द्वाभ्यां जातं अतस्त्वमप्यस्य पुत्र इति न तस्माद्भयशङ्केत्यर्थः एवमुक्ता ममता प्रत्याह बृहस्पते त्वमिमं भर यतः द्वाजं द्वाभ्यामावाभ्यामस्माभिस्त्वयि तेजातं अतो नाहमेकाकिनी भरामीत्यर्थः यद्यस्मादेवमुक्त्वा पितरौ ममता बृहस्पती विवदमानौ पुत्रं परित्यज्य यातौ ततो हेतोरयं भरद्वाज इति पाठान्तरे यस्य पुत्रस्य त्यागे ऽङ्गः वोन्तु पितरौ यातावित्यर्थः २७

५१

वितथं व्यभिचारसंभवान्सुतमात्मजं वितथं निरर्थकं मन्वाना ममताया बृहस्पतेर्जातं तत्याजापाठांतरे ॥ आविर्भूतं भ्रष्टप्रजं भर्तृवीर्याज्जातमेव अव्यक्तमात्मजं
मन्वाना बृहस्पतेर्जातं तत्याजेत्यर्थः ॥ एवं तया त्यक्तो मरुतो विप्रत्वं अविग्रहः तदेवं मरुद्भिः प्राप्नोय भरतस्यान्वये वितथे सति दत्तः ३८ ॥ इति नवमे
विंशः ॥ एकविंशे तु दौष्यंतेः सुतस्यान्वय उच्यते ॥ रंतिदेवादिराजर्षेर्यत्र कीर्तिः प्रतन्यते ॥ भरतस्यान्वये वितथे सति दत्तत्वाद्वितथः संतो भरद्वाजः ॥ स्व
चेष्टमानान्हरेरेवं मत्वा वितथमात्मजं ॥ व्यसृजन्मरुतो विप्रस्तं दत्तोयं वितथेऽन्वये ३८ ॥ इति श्रीभागवते महापुराणे नव
मस्कंधे विंशोध्यायः ॥ शुक उवाच ॥ वितथस्य सुतान्मन्योर्बृहत्क्षत्रो जयस्ततः ॥ महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः १ ॥
गुरुश्च रंतिदेवश्च संकृतेः पांडुनंदन ॥ रंतिदेवस्य महिमा इहामुत्र च गीयते १ ॥ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षितः ॥ निः
किंचनस्य धीरस्य सकुटुंबस्य सीदतः ३ ॥ व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल ॥ घृतपायससंयावं तोयं प्रातरुपस्थितं ४ ॥
कृच्छ्रप्राप्तकुटुंबस्य क्षुत्तृड्भ्यां जातवेपथोः ॥ अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ५ ॥ तस्मै संव्यभजत्सोन्नमादृत्य
श्रद्धयान्वितः ॥ हरिं सर्वत्र संपश्यन्स भुक्त्वा प्रययौ द्विजः ६ ॥ अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपतेः ॥ विभक्तं व्यभजत्तस्मै वृष

ब्राह्मणोपि भरतस्य दत्तपुत्रो जात इति तद्वंशोनुक्रम्यते ॥ वितथस्य सुतो मन्युः तस्माद्बृहत्क्षत्रजयमहावीर्यनरगर्गाः पंचपु ॥ लाय हरिं स्मरन् ७ ॥
त्रा बभूवुः १ ॥ वियद्वित्तस्य वियतो गगनादिवोद्यमं विना दैवादुपस्थितमेव वित्तं भोग्यं यस्य ॥ यद्वा वियद्व्ययं प्राप्तमेव वित्तं भोग्यं यस्य ॥ तदेवाह ददतो बुभुक्षितोपि
सतो लब्धं लब्धं ददतः ॥ अतएव अतिनिः किंचनस्येत्यादि सार्द्धैः पंचदशभिः ३ ॥ अपिबतो जलपानमप्यकुर्वतः घृतादित्रयाणां द्वंद्वैक्यं तोयं च ४ ॥ अथान्यो वृ
षलोतिथिरागमत् ॥ विभक्तस्य कुटुंबार्थमन्नादिकं विभक्तवतः ७ ॥

भा०न
५२

सगणायस्वपृथक्संहिताय ९ उच्छेषमुच्चरितं एकमेवतर्प्यतीतितथा १०।११ परदुःखोमहिम्नसयापर्वैषांदुःखंस्वयंभोक्तुमाशालेनेति अपि
माद्यष्टसमृद्धियुक्तांगतिमपिमोक्षमपिवाहंनकामये तर्हिकिंकामयसेतत्राह अखिलदेहभाजामर्त्तिंदुःखंतन्मध्येतद्रूपेणांतःस्थितःसन्नहं
प्रपद्येप्राप्नुयामित्येवंकामयेयेनततदुःखमोक्षामयाहितभूतेनतेसर्वेअदुःखाभवति १२ मन्नदुःखंकिमितिप्रार्थयसेपरदुःखनिवृत्त्यैव

यातेशूद्रेतमन्योगादतिथिःश्वभिरावृतः राजन्मेदीयतामन्नंसगणायबुभुक्षते ८ सआदृत्यावशिष्टंयत्बहुमानपुरस्कृतं त
च्चदत्वानमश्चक्रेश्वभ्यःश्वपतयेविभुः ९ पानीयमात्रमुच्छेषंतच्चैकपरितर्पणं पास्यतःपुल्कसोभ्यागादपोदेह्यशुभायमे १० तस्य
तांकरुणांवाचंनिशम्यविपुलश्रमां कृपयाभृशसंतप्तइदमाहामृतंवचः ११ नकामयेहंगतिमीश्वरात्परामष्टर्द्धियु
क्तामपुनर्भवंवा आर्त्तिंप्रपद्येखिलदेहभाजामंतःस्थितोयेनभवंत्यदुःखाः १२ क्षुत्तृट्श्रमोगात्रपरिभ्रमश्चदैन्यंक्लमःशो
कविषादमोहाः सर्वेनिवृत्ताःकृपणस्यजंतोर्जिजीविषोर्जीवजलार्पणान्मे १३ एवंप्रभाष्यपानीयंम्रियमाणःपिपासया
पुल्कसायाददाद्धीरोनिसर्गकरुणोनृपः १४ तस्यत्रिभुवनाधीशाःफलदाःफलमिच्छतां आत्मानंदर्शयांचक्रुर्मायाविष्णु
विनिर्मिताः १५ सवैतेभ्योनमस्कृत्यनिःसंगोविगतस्पृहः वासुदेवेभगवतिभक्त्याचक्रेमनःपरम् १६ पानी०

ममसर्वदुःखनिवृत्तिरित्यतआह क्षुत्तृडिति कृपणस्यजंतोर्जीवनहेतोःजलस्यार्पणान्मेसर्वेक्षुत्तृडादयोनिवृत्ताः १३ इत्येवंप्रभाष्य १४ त्रिभुव
नाधीशाःब्रह्मादयःमायाःतदीयधैर्यपरीक्षार्थंप्रथमंमाययावृषलादिरूपेणागतास्तेसंतइत्यर्थः १५ परंकेवलंवासुदेवेभक्त्यामनश्चक्रेनतु
तान्किमपियाचितवान् १६

राम
५२

अनन्यराधसः ईश्वरातिरिक्तफलांतरानपेक्षस्य प्रत्यलीयत अत्यन्तं विलीनाबभूव १७ १८ मन्युसुतस्य नरस्य वंशमुक्त्वा तत्सुतस्यैव गर्गस्य वंशमाह
गर्गाच्छिनि महावीर्यस्य वंशमाह दुरितक्षयः तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः कथंभूताः येऽत्र क्षत्रवंशे ब्राह्मणगतिं ब्राह्मण्य
रूपतां गतास्ते १९ मन्युपुत्राणां पंचानां ज्येष्ठस्य वंशमाह बृहत्क्षत्रस्येति यत् येन हस्तिनापुरं कृतमित्यर्थः अजमीढादयस्त्रयो हस्तिनः २० दिवान्धः
पुत्रो बृहदिषुर्नामाभवत् २१ २२ पारस्य तनयो नीपस्य नीपस्य पुत्रशतं २३ सपत्न्या कृत्वीसंज्ञायां शुककन्यायां ब्रह्मदत्तं जनयामास तदुक्तं हरिवंशे

ईश्वरालंबनं चित्तं कुर्वतोऽनन्यराधसः मायागुणमयी राजन् स्वप्नवत्प्रत्यलीयत १७ तत्प्रसंगानुभावेन रंतिदेवानुवर्तिनः अभवन्यो
गिनः सर्वे नारायणपरायणाः १८ गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः पुष्करा
रुणिरित्यत्र ये ब्राह्मणगतिं गताः बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरं अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः अजमीढस्य वंश्याः
स्युः प्रियमेधादयो द्विजाः २० अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः २१ तत्सुतो विशदस्त
स्य श्येनजित्समजायत रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः २२ रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः पारस्य तनयो नीप
स्तस्य पुत्रशतं त्वभूत् २३ स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् स योगी गवि भार्यायां विष्वक्सेनमधात्सुतम् २४

दिषु पराशरकुलोत्पन्नः शुको नाम महायशाः व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन् स तस्यां पितृकन्यायां पीवर्यां जनयिष्यति कृष्णं गौरं प्रभुं शंभु
तथा भूरिश्रुतं जयं कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरं ब्रह्मदत्तस्य जननीं महिषीमणुहस्य चेति यद्यपि शुकस्तत्त्वतस्त्यैव विमुक्तसंगो निर्गतः
तथापि विरहातुरं व्यासमनुयांतं दृष्ट्वा छायाशुकं निर्माय गतवान् तदभिप्रायेणैवायं गार्हस्थ्यादिव्यवहार इत्यविरोधः स च ब्रह्मदत्तो योगी गवि वाचि

अजमीढा

१८३

सएवयोगतंत्रंचकार। वार्हदीषवाः वृहद्विषोर्वंशयाः सेमे। दीर्घत्वमार्षं २५ सुपार्श्वस्यपिता २६ प्राच्यसाम्नांषट्संहिताजगौविभज्याध्यापितवान् २७
अजमीढस्यवंश्याः प्रियमेधादयः केचिद्ब्राह्मणावभूवुः वृहदिषुप्रभृतयः क्षत्रियाश्चेतिवंशद्वयमुक्तं २८ तमेवंवंशान्तरमाह नलिन्यामितियाव

जैगीषव्योपदेशेनयोगतंत्रंचकारह ॥ उग्रायुधस्त्वेनस्ततस्तस्माद्भल्लाटोवार्हदीषवाः २५ ॥ यवीनरोद्विमीढस्यकृतिमांस्तत्सुतःस्मृतः
नाम्नासत्यधृतिर्यस्यदृढनेमिःसुपार्श्वकृत ॥ सुपार्श्वात्सुमतिस्तस्यपुत्रःसम्नतिमांस्ततः ॥ कृतीहिरण्यनाभाद्योयोगंप्राप्यज
गौस्मषट् ॥ संहिताःप्राच्यसाम्नांवैनीपोह्युग्रायुधस्ततः २७ ॥ तस्यक्षेम्यःसुवीरोथसुवीरस्यरिपुंजयः ॥ ततोवहुरथोनामपुरु
मीढोःप्रजोभवत् २८ ॥ नलिन्यामजमीढस्यनीलःशान्तिस्तुतत्सुतः ॥ शान्तेःसुशान्तिस्तत्पुत्रःपुरुजोर्कस्ततोभवत् २९ ॥ भर्म्या
श्वस्तनयस्तस्यपंचासन्मुद्गलादयः ॥ यवीनरोवृहद्विश्वःकांपिल्यःसंजयःसुताः ३० ॥ भर्म्याश्वःप्राहपुत्रामेपंचानांरक्षणाय
हि ॥ विषयाणामलमिमेइतिपंचालसंज्ञिताः ३१ ॥ मुद्गलाद्ब्रह्मनिर्वृत्तंगोत्रंमौद्गल्यसंज्ञितं ॥ मिथुनंमुद्गलाद्भार्म्याद्दिवोदासःपुमा
नभूत ॥ अहल्याकन्यकायस्यांशतानंदस्तुगौतमात ॥ तस्यसत्यधृतिःपुत्रोधनुर्वेदविशारदः ॥ शरद्वांस्तत्सुतोयस्मादुर्वशीद
र्शनात्किल ॥ शरस्तंबेपतद्रेतोमिथुनंतदभूच्छुभं ३२ ॥ तद्दृष्ट्वाकृपयागृह्णाच्छंतनुर्मृगयांचरन् ॥ कृपःकुमारःकन्याचद्रोणप
त्न्यभवत्कृपी ३४ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेएकविंशतितमोध्यायः ॥ २१ ॥

णम
स

भार्म्यान्भर्म्याश्वपुत्रान्मिथुनंचाभूत ॥ तदेवाह दिवोदासःपुमानहल्याचकन्येति ३४
त्समाप्तिः ३० मुद्गलएकः यवीनरादयश्चत्वारः इत्येवंपंच ३१ ॥
इतिनवमेएकविंशः ॥

द्वाविंशेतुदिवोदासवंशपुत्रकाथवर्णिताः ॥ अजमीढवंशेजरासंधोपार्थदुर्योधनादयः ॥१॥ तस्यसोमकस्यपुत्राणांशतंवभूवतेषांजंतुर्ज्येष्ठःयवी
यान्पृषतः ॥२॥ अजमीढस्यैववंशांतरमाहयइति ॥ ततःसंवरणात्कुरुः ॥३॥४॥ तस्याःकृतिनःउपरिचरोवसुःततोवसोःवृहद्रथोमुख्यादिर्येषां

श्रीशुक उवाच ॥ मित्रायुश्चदिवोदासाच्च्यवनस्तत्सुतोनृप ॥ सुदासःसहदेवोथसोमकोजंतुजन्मकृत ॥ तस्यपुत्रशतंतेषांयवीयान्पृषतःसुतः
द्रुपदोद्रौपदीतस्यधृष्टद्युम्नादयःसुताः ॥ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याःपांचालकाइमे ॥ योजमीढसुतोह्यन्यऋक्षःसंवरणस्ततः ॥ तपत्यां
सूर्यकन्यायांकुरुक्षेत्रपतिःकुरुः ॥ परीक्षित्सुधनुर्जह्नुर्निषधाश्चकुरोःसुताः ॥ सुहोत्रोभूत्सुधनुषश्च्यवनोथततःकृती ॥४॥ वसुस्तस्यो
परिचरोवृहद्रथमुखास्ततः ॥ कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्चचेदिपाः ॥५॥ वृहद्रथात्कुशाग्रोभूदृषभस्तस्यतत्सुतः ॥ जज्ञेसत्यहितो
पत्यंपुष्पवांस्तत्सुतोजहुः ॥६॥ अन्यस्यांचापिभार्यायांशकलेद्वेवृहद्रथात् ॥ तेमात्राबहिरुत्सृष्टेजरयाचाभिसंधिते ॥ जीवजीवेतिक्री
डंत्याजरासंधोभवत्सुतः ॥७॥ ततश्चसहदेवोभूत्सोमापिर्यच्छ्रुतश्रवाः ॥ परीक्षिदनपत्योभूत्सुरथोनामजाह्नवः ॥८॥ ततोविदूरथस्त
स्मात्सार्वभौमस्ततोभवत् ॥ जयसेनस्तत्तनयोराधिकोतोयुतोह्यभूत ॥९॥ ततश्चाक्रोधनस्तस्माद्देवातिथिरमुष्यच ॥ ऋक्षस्तस्यदि
लीपोभूत्प्रतीपस्तस्यचात्मजः ॥१०॥ देवापिःशांतनुस्तस्यबाह्लीकइतिचात्मजाः ॥ पितृराज्यंपरित्यज्यदेवापिस्तुवनंगतः ॥११॥

तानेवाहकुशांबेति ॥ तत्सुतःपुष्पवान्जज्ञे ॥ तस्यापत्यंसत्यहितइतियोज्यं ॥६॥ जरयाराक्षस्याः ॥७॥ यत्यस्मात्सोमापेःश्रुतश्रवाः ॥ कुरोःपुत्रःपरीक्षि
दनपत्यः जाह्नवः जह्नोःपुत्रः ॥८॥ अतोराधिकादयुतोभूदित्यर्थः ॥९॥१०॥ तस्यप्रतीपस्यदेवापिःशांतनुवाह्लीकाः ॥११॥ गोपालसहाय ॥

भा०न
४४

प्राक्पूर्वजन्मनि महाभिषइति संज्ञा यस्य सः ॥ १२ ॥ यदा देवो न ववर्ष तदा शंतनुस्तत्र कारणं ब्राह्मणान्पप्रच्छ ॥ १३ ॥ ब्राह्मणैश्चैवमुक्तः दाराग्निहोत्रसंयोगं
कुरुते योऽग्रजे स्थिते सः परिवेत्ता परिवित्तिस्तु पूर्वज इति स्मृतेः । योऽग्रभुक् भुनक्ति अयं त्वादृशोऽपि परिवेत्तैव भवति । अतस्तद्दोषपरिहाराय रा
ज्यमग्रजाय देहि । ततो वृष्टिर्भविष्यतीत्येवमुक्तः ॥ १४ ॥ शंतनुर्वनं गत्वा ज्येष्ठं छंदयामास । राज्याय प्रजापालनादिः परो धर्मः अतस्त्वं राज्यं स्वीकुर्विति

दि

अभवच्छंतनू राजा प्राङ्महाभिषसंज्ञितः । यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥ १२ ॥ शांतिमाप्नोति चैवाग्र्यां कर्मणा तेन शंतनुः ।
समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥ १३ ॥ शंतनुर्ब्राह्मणैरुक्तः परिवेत्तायमग्रभुक् । राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥ १४ ॥
एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् । तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा । वेदवादातिवादान्वै तदा देवो ववर्ष ह ॥ १५ ॥
देवापिर्योगमास्थाय कलापग्राममाश्रितः । सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ॥ १६ ॥ बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवा

रा

स्ततः । शलश्च शंतनोरासीद्गंगायां भीष्म आत्मवान् ॥ १७ ॥ सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः । वीरयूथाग्रणीर्येन रामोऽपि यु
धि तोषितः । शंतनोर्दाशकन्यायां जज्ञे चित्रांगदः सुतः । विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः ॥ १८ ॥

गिरा

प्रार्थितवान् । ततः पूर्वमेव तस्य मंत्रिणा अश्मरावसंज्ञेन देवापिः पाषंडीकृत्य राज्यानर्हः कर्त्तुं ये प्रहिता विप्रास्तैः पाषंडमताश्रयणादिभिर्वेदाद्विभ्रंशितः
सत्वेदवादस्यातिवादान्निंदावचनानि सोऽब्रवीत् । ततस्तस्य पातित्येन राज्यानर्हत्वे जाते शंतनोर्दोषाभावाद्देवो ववर्षेत्यर्थः ॥ १६ ॥ ततः सोमदत्ताद्भूरिर्भूरिश्रवाः शलश्चेति त्रयः ॥ १७ ॥ रामो जामदग्न्यः ॥ १८ ॥ दाशकन्यायामिति उपरिचरस्य वसोर्वीर्येण मत्स्यागर्भादुत्पन्ना कन्या दाशेन कैवर्त्तेन पालितातो दाश
कन्येति प्रसिद्धायां सत्यवत्यां । नाम्ना तत्समाननाम्ना चित्रांगदेन गंधर्वेण युद्धे हतः ॥ १८ ॥

४४

यस्यां सत्यवत्यां शंतनुपरिग्रहात्पूर्वमेव । वेदगुप्तोऽयेन । यतोऽहमज्ञातं इदं श्रीभागवतं वाध्यगाम् अधीतवानस्मि २० स्वयंवरादाक्षेपेणाबलाडुपनीते ॥ २१ ॥ मातुः सत्यवत्या उक्त इति निषेधाभावमाह । अपतिरपत्यलिप्सुर्देवराद्गुरुप्रयुक्ता ऋतुमतीयादिति वचनात् ॥ २२ ॥ दुःशला नाम कन्या

यस्यां पराशरात्साक्षादवतीर्णो हरेः कला । वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम् ॥ २० ॥ हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः । मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ॥ विचित्रवीर्योऽथोवाह काशिराजसुते बलात् । स्वयंवरादुपानीते अम्बिकाम्बालिके उभे ॥ तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः । क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः ॥ धृतराष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत् ॥ २३ ॥ गान्धार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप । तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका ॥ शापान्मैथुनरुद्धस्य पाण्डोः कुन्त्यां महारथाः । जाता धर्मानिलेन्द्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥ २५ ॥ नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः । द्रौपद्यां पञ्च पञ्चभ्यः पुत्रास्ते पितरोऽभवन् ॥ २६ ॥ युधिष्ठिरात्प्रतिविन्ध्यः श्रुतसेनो वृकोदरात् । अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः ॥ सहदेवसुतो राजञ्छ्रुतकर्मा तथापरे ॥ २७ ॥ युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः । भीमसेनाद्धिडिम्बायां काल्यां सर्वगतस्ततः ॥ २८ ॥ सहदेवात्सुहोत्रं तु विजयासूत पार्वती । करेणुमत्यां नकुलो नरमित्रं तथार्जुनः । इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम् । मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ॥ ३० ॥

कात जज्ञे २४ अरण्ये मृगयाशापान्मैथुनोरुद्धस्य प्रतिबद्धस्य २५ नासत्यदस्रौ अश्विनौ । पंच पंचभ्यो युधिष्ठिरादिभ्यः पंचाभवन् २६ तथापरे च भार्यान्तरेषु २७ कालीनाम्नी भीमस्य भार्या तस्यां ततो भीमसेनात्सर्वगतो नाम पुत्रोऽभवदित्यर्थः २८ । २९ उलूप्यां नागकन्यायां मणिपूरपतेः सुतायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनमसूत । अतस्तत्पुत्रः सन्नपि तः पुत्रिकासुतत्वान्मातामहस्य सुत इत्यर्थः ३०

भा०न०
४५

२४ गुरुमन्त्रं तं पुरोहितं कृत्वा ॥ २५ भविष्यानाहतनस्य पुत्र इति यावन्नमाप्ति ॥ यातवल्क्याद्वियात्ताना ॥ पवालतानं शौनकात्पाप्स्यति ॥ अश्वत्तानं
चकृपाचार्यानिदृष्टव्यं ॥ यातवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्येति वै सवोक्तेः ॥ कचित्तु अश्वत्तानं कृपाचार्योहितो वपाठः ॥ २६ ॥ २७ ॥

ततस्तातः सुभद्रायामभिमन्युरजायत ॥ सर्वोभीरुरथजिद्वीर उत्तरायां ततो भवान् ॥ २१ परिक्षीणेषु कुरुषु द्रौणौर्ब्रह्मास्त्र
तेजसा ॥ त्वं च कृष्णानुभावेन सञ्जीवो मोचितो गतकाल ॥ २२ तवेमे तनयास्तात जनमेजयपूर्वकाः ॥ श्रुतसेनो भीमसेन
उग्रसेनश्च वीर्यवान् ॥ २३ जनमेजयस्त्वां विदित्वा तक्षकात्त्रिधनं गतं ॥ सर्पान्वै सर्पयागाग्नौ स होष्यति हृषान्वितः ॥ २४
न
काश्यपेयं पुरोधाय तुरगमेधयाजुः ॥ समन्तात्पृथिवीं सर्वां जित्वा यक्ष्यति चाश्वमेधैः ॥ २५ तस्य पुत्रः शतानीको यातवल्क्या
पठन्
त्रयीं वयत ॥ अश्वत्तानं क्रियां तां न शौनकात्परमेष्यति ॥ २६ सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः ॥ अधिसीमकृष्णस्त
स्यापि नेमिचक्रस्तु तत्सुतः ॥ गङ्गाकृष्टेऽहते नयीं कौशाम्ब्यां साधु वत्स्यति ॥ २७ उक्तस्ततश्चित्ररथस्तस्मात्कविरथः सुतः
तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः ॥ २८ सुनीथस्तस्य भविता नृचक्षुर्यस्तु खीनलः ॥ परिप्लवस्ततस्तस्मान्मेधावी
न हविर्यालजः ॥ २९ नृपंजयस्ततो पूर्वो तिमिस्तस्माज्जनिष्यति ॥ तिमेर्बृहद्रथस्तस्मात् शतानीकस्सुदासजः ॥ ४० ॥

यद्यस्मात्तु खीनलः तस्मात्परिप्लवात्तनयः तस्मात्सुदासः तस्मान्महो मेधावीत्यर्थः ॥ २९ तस्मात्सुदास ---- शतानीकस्त्यर्थः ॥ ५० ॥

राम
४५

४१ ॥ बृहद्रथस्य जरासंधः तस्य सहदेवः तस्य मार्जारिः यस्मात्मार्जारेः श्रुतश्रवाः ४२ ॥ सहस्रसंवत्सरमेते भाव्या भूपालाः ततः परं भाव्यान्द्वादशस्कंधे वक्ष्यति ॥ ४६ ॥ इति नवमे द्वाविंशः ॥ त्रयोविंशे त्वनोर्द्रुह्योस्तुर्वसोश्चान्वयः क्रमात् ॥ यदोश्च वंशोऽनुक्रान्तो यावज्जन्महरेर्भवः १ ॥ तदेव

शतानीकादुदेमनस्तस्यापत्यं वह्नीनरः ॥ दंडपाणिर्निमित्तस्य क्षेमको भविता नृपः ४१ ॥ ब्रह्मक्षत्रस्य वंशो यं प्रोक्तो देवर्षिसत्कृतः

क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ अथ मागधराजानो भविता ये वदामि ते ॥ भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवा ॥ ४२ ॥

ततो युतायुस्तस्यापि निरमित्रोऽथ तत्सुतः ॥ सुनक्षत्रः सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित् ॥ ततः सुतंजयाद्विप्रः शुचिस्तस्य भविष्य

ति क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः शमस्ततः ॥ ४५ ॥ द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः ॥ सुनीथः सत्यजिदथ विश्वजिद्यद्रि

पुंजयः ॥ बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरं ॥ ४६ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे द्वाविंशोऽध्यायः ॥ श्रीशुक उवाच ॥

अनोः सभानरश्चक्षुः परोक्षश्च त्रयः सुताः ॥ सभानरात्कालनरः सृंजयस्तत्सुतस्ततः ॥ १ ॥ जनमेजयस्तस्य पुत्रो महाशालो महामनाः ॥

उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥ शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः ॥ वृषादर्भः सुवीरश्च मद्रः केकय आत्मजाः ॥

शिबेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ॥ ततो होमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥ अंगवंगकलिंगाद्याः सुह्मपुंड्रौड्रसंज्ञिताः ॥

जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥ चक्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते ॥ खनपानोंऽगतो जज्ञे तस्माद्दिविरथस्ततः ॥

सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः ॥ रोमपाद इति ख्यातस्तस्मै दशरथः सखा ॥ शांतां स्वकन्यां प्रायच्छदृष्यशृंग उवाह ताम् ॥ ६ ॥

ययातेः पुत्राणां पंचमस्य पूरोर्वंशोऽनुक्रान्तः ॥ इदानीं चतुर्थस्य वंशमनुक्रामति अनोरिति कर्णस्य जगतीपतेरित्यंतेन १ ॥ तस्य जनमेजयस्य महाशालः तस्य

भा०न
४६

१४ दुष्यंतः स्ववंशे पौरवं वंश। १६ ॥ प्रथमस्य सहस्रजितस्त्वात्मजः १७ १० सोऽहंजेम हैहयान् महिष्मतो भद्रसेनकः तस्य दुर्मदो धनकस्त्वेति दैहात्तो

दि देवो वर्षति यं राजा राज्ञा निसृष्टहरिणीहतं ॥ नाद्य संगीत वाद्यैश्च विचित्रमालिंगनादिभिः ॥ सतु राजा तेन पत्न्या स्वमित्र प्रेष्ठ्यं सुतस्तत्वतः ॥ प्र-
जामहाद्भुत शरत्थो येन लेभे प्रजाः प्रजाः ॥ ८ ॥ चतुरंगो रोमपादात्पृथुलाक्षस्तु तत्सुतः ॥ बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुतः
आद्याद्बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥ विजयस्तस्य संभूत्यां ततो धृतिरजायत ॥ ततो धृतव्रतस्तस्य सत्कर्माधिरथस्ततः ॥ ११
यो सौ गंगातटे क्रीडन् मंजूषांतर्गतं शिशुं ॥ कुंत्यापविद्धं कानीनमनपत्योऽकरोत्सुतं ॥ वृषसेनः सुतस्तस्य कर्णस्य जगतीपते ॥
द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥ आरब्धस्तस्य गांधारस्तस्य धर्मस्ततो धृतः ॥ धृतस्य दुर्मदस्तस्मात् प्रचेताः प्राचेतसं
शतं ॥ म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः ॥ १४ ॥ तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोथ भानुमान् ॥ त्रिभानुस्तत्सुतोऽस्यापि क-
रंधम उदारधीः ॥ १५ ॥ मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥ दुष्यंतः स पुनर्भेजे स्ववंशं राज्यकामुकः ॥ १६ ॥ ययातेर्ज्येष्ठपुत्र-
स्य यदोर्वंशं नरर्षभः ॥ वर्णयामि महापुण्यं सर्वपापहरं नृणां ॥ १७ ॥ यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥ यत्रावतीर्णो भग-
वान् परमात्मा नराकृतिः ॥ १८ ॥ यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति श्रुताः ॥ चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः ॥ १९ ॥ महा-
हयो वेणुहयो हैहयश्चेति तत्सुताः ॥ धर्मस्तु हैहयसुतो नेत्रः कुंतेः पिता ततः ॥ १० सोहंजिरभवत्कुंतेर्महिष्मान् भद्रसेनकः ॥ दुर्म-
दो भद्रसेनस्य धनकः कृतवीर्यसूः ॥ कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥ २१ ॥ ॥ श्रीरामकृष्णनारायणमहाद ॥

कृतवीर्यसुतजनकः कृतवीर्यादप्यथवा रोधनकस्यात्मजा इत्यर्थः ॥ २१ गोविंदाय नमः गोपालाय नमः पतितपावननाम श्रीकृष्ण

राम
४६

२

अनष्टविनाशं वित्तं येन तथाविधस्मरणं यस्य सः। अक्षय्यं षडिंद्रियविषयं बुभुजे ॥ २४ ॥ २५ ॥ और्वस्य तेजसा भार्गवेणोपसंहृतमित्यर्थः ॥ २६ ॥ तेषां ताल-
जंघपुत्राणां ज्येष्ठः तस्य मधोः पुत्रशतं तेषु वृष्णिर्ज्येष्ठो यस्मिन्। यतो मधोर्वृष्णेर्यदोश्च हेतोरिदं कुलं चतुर्दश महारत्नानि तत्तज्ज्ञातिश्रेष्ठानि

अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत्। दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणाः ॥ २२ ॥ न नूनं कार्तवीर्यस्य गतिं यास्यंति पार्थिवाः। यज्ञदानतपोयोगश्रुतवीर्यदयादिभिः ॥ २३ ॥ पंचाशीतिसहस्राणि ह्यव्याहतबलः समाः। अनष्टवित्तस्मरणो बुभुजेऽक्षय्यषड्वसु ॥ २४ ॥ तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे। जयध्वजः शूरसेनो वृषभो मधुरूर्जिताः ॥ २५ ॥ जयध्वजात्तालजंघस्तस्य पुत्रशतं त्वभूत्। क्षत्रं यत्तालजंघाख्यमौर्वतेजोपसंहृतं ॥ २६ ॥ तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः। तस्य पुत्रशतं त्वासीद्वृष्णिज्येष्ठं यतः कुलं। माधवा वृष्णयो राजन् यादवाश्चेति संज्ञिताः। यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः। स्वाहितोऽतो विषद्गुर्वै तस्य चित्ररथस्ततः। शशबिंदुर्महायोगी महाभोजो महानभूत्। चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः। तस्य पत्नीसहस्राणां दशानां सुमहायशाः। दशलक्षसहस्राणि पुत्राणां तास्वजीजनत्। तेषां तु षट् प्रधानानां पृथुश्रवस आत्मजः। धर्मो नामोशना तस्य हयमेधशतस्य याट्। तत्सुतो रुचकस्तस्य पंचासन्नात्मजाः शृणु। पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ॥ ३१ ॥

यस्य सः। तानि च मार्कंडेयपुराणे वर्णितानि गजवाजिरथस्त्रीइषुनिधिमाल्यांबरद्रुमाः शक्तिपाशमणिच्छत्रविमानानि चतुर्दशेति ॥ ३२ ॥ दशानां प-
त्नीसहस्राणां भार्याणां तस्य प्रत्येकं लक्षं लक्षमित्येवं तासु पुत्राणां दशलक्षसहस्राणि जनयामास। पृथुश्रवाः पृथुः कीर्तिः पृथुश्रवा इत्यादयः षट्

भा०न
५७

भार्यभयाद्दैवैकभार्यस्यवध्यापतेर्ज्यामघस्यापुत्रस्यतद्रूपमेवपुत्रमुद्दिश्यममवरितिदर्शयन्नाहज्यामघस्त्विति ॥३५॥ यदिइमेसपत्नीस्यात्तर्हिस्नुषे
यद्युज्येतापि ॥ नत्वेवंरस्त्रीत्याह अहंअसपत्नीचेति ॥३७॥ अतिभयव्याकुलत्वमाहजनयिष्यसीति ॥ भार्य्याभयात्कंपमानस्विन्नसर्वांगस्यराज्ञःप्रा
र्थनांकरुणालोक्यानुकंपितात्तेनपूर्वैववज्रकालमाराधितविश्वेदेवापितरश्चतथेत्यन्वमोदंत ॥३९॥ ततश्चदेववरप्रसादेन नयिष्यसीतिवति

ज्यामघस्त्वप्रजोप्यन्यांभार्यांशैब्यापतिर्भयात् ॥ नाविंदच्छत्रुभवनाद्भोज्यांकन्यामहार्षीत् ॥ रथस्थांतांनि
रीक्ष्याहशैब्यापतिममर्षिता ॥ केयंकुहकमत्स्थानंरथमारोपितेतिवै ॥३६॥ स्नुषातवेत्यभिहितेस्मयंतीपतिम
ब्रवीत् ॥ अहंवंध्यासपत्नीचस्नुषामेयुज्यतेकथं ॥ जनयिष्यसियंराज्ञितस्येयमुपयुज्यते ॥ अन्वमोदंततद्वि
श्वेदेवाःपितरएवच ॥ शैब्यागर्भमधात्कालेकुमारंसुषुवेशुभं ॥ सविदर्भइतिप्रोक्तउपयेमेस्नुषांसतीं ॥३८॥
इतिश्रीभागवतेमहापुराणेनवमस्कंधेयदुवंशानुकथनेत्रयोविंशतिध्यायः ॥ शुकउवाच ॥ तस्यांविदर्भोजनयत्पु
त्रौनाम्नाकुशक्रथौ ॥ तृतीयंरोमपादंचविदर्भकुलनंदनम् ॥ रोमपादसुतोबभ्रुर्बभ्रोःकृतिरजायत ॥ उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयोनृपः ॥१॥

ववनप्रहृष्टेंगरोनवनिवृत्तराजन्कोपिशैब्याभार्याभयात् तस्यवमहिमापरशरादिदक्षः यथोक्तंभार्यवश्यास्तु ये चेदिश्चैद्यादयोनृपः ॥१॥
येकेविषयभ्रष्टाथवामृताः ॥ तेषांतुज्यामघःश्रेष्ठःशैब्यापतिरभूत्रृपइति ॥ ॥ न ॥ मैत्रेयोविश्वाः ॥ चतुर्विंशेविदर्भस्यपुत्रत्रयपरम्प
द्रुवा वंशानानाप्रवोःप्रोक्ताराममहोद्भवावधि ॥ चैद्यादयः२मचैद्योषादयः ॥१॥

पति
ग
जा

४ ततो दशरथाच्छकुनिः पुराणांतरे देवरातादिविशेषो द्रष्टव्यः ततः कुरुवंशादनुः ५ अनोः पुत्रः पुरुहोत्रः महाभोजश्चेत्येवं सप्त मारिष
हे आर्य ६ ७ ततस्तदुपदेशेन ये पंचषष्ट्यादिसंख्याः पुरुषास्ते अमृतत्वं मोक्षं प्राप्ताः ९ १० तस्य युधाजितः शिनिरनमित्रश्च ११ सा

क्रथस्य कुंतिः पुत्रोऽभूद्वृष्णिस्तस्याथ निर्वृतिः ततो दशार्हो नाम्नाभूत्तस्य व्योमः सुतस्ततः ३ जीमूतो विकृतिस्तस्य यस्य भीमर
थः सुतः ततो नवरथः पुत्रो जातो दशरथस्ततः ४ करंभिः शकुनेः पुत्रो देवरातस्तदात्मजः देवक्षत्रस्ततस्तस्य मधुः कु
दनुः॥ रुवशादनुः ५ पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽंधकः सात्वतस्य सुताः
सप्त महाभोजश्च मारिष ६ भजमानस्य निम्लोचिः किंकिणो धृष्टिरेव च एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः मा
शताजिच्च सहस्राजिदयुताजिदिति प्रभो ७ बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठंत्यमू यथैव शृणुमो दूरात्संपश्यामस्तथा
तिकात् बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ८ पुरुषाः पंचषष्टिश्च षट्सहस्राणि चाष्ट च ये मृतत्वमनुप्राप्ता
बभ्रोर्देवावृधादपि ९ महाभोजोऽपि धर्मात्मा भोजा आसन्तदन्वये वृष्णेः सुमित्रः पुत्रोऽभूद्युधाजिच्च परंतप १० शिनिस्त
स्यानमित्रश्च निघ्नोऽभूदनमित्रतः सत्राजितः प्रसेनश्च निघ्नस्याप्यासतुः सुतौ ११ अनमित्रसुतो योऽन्यः शिनिस्तस्याथ स तुः
त्यकः युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः १२ युगंधरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः श्वफल्कश्चित्ररथश्च गां

त्यकिः सत्यकस्य पुत्रो युयुधानः तस्य जयस्तस्य कुणिस्ततः कुणेः १२ दिन्यां च श्वफल्कतः अक्रूरप्रमुखा आसन्पुत्रा द्वादश विश्रुताः १३
अनमित्रस्यैवापरः वृष्णिनामा पुत्रः अक्रूरः प्रमुखो येषामित्यतद्गुणसंविज्ञानो बहुव्रीहिः १२ गोपालगोवर्द्धनसहाय ॥ रामाय नमः

न

भा॰ न॰ अतोऽक्रूरातिरिक्तान्द्वादश दर्शयति आसंग इति ॥१४॥ पृथुरेकः विदूरथाद्याश्चान्ये बहवः पृथुश्च धामाद्य इति पाठे आद्यशब्देन विदूरथोऽप्युक्तः ॥
४८ ततश्च पृथुर्विदूरथो धामाद्य इति बहूनां नामानिर्देशोपपत्तिः ॥१६॥ कुकुरादयश्चत्वारोऽन्धकस्य सुता इति ज्ञेयाः तथा च पराशरः कुकुरभजमानशु

आसंगः सारमेयश्च मृदुरो मृद्विद्गिरिः धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः ॥१४॥ शत्रुघ्नो गंधमादश्च प्रतिबाहुश्च द्वा-
दश ॥ तेषां स्वसा सुचाराख्या द्वावक्रूरसुतावपि ॥१५॥ देववानुपदेवश्च तथा चित्ररथात्मजाः पृथुर्विदूरथाद्याश्च बहवो
वृष्णिनंदनाः ॥१६॥ कुकुरो भजमानश्च शुचिः कंबलबर्हिषः कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः ॥१७॥ कपोतरोमा
तस्यानुः सखा यस्य च तुंबुरुः अंधकाद्दुंदुभिस्तस्मादरिद्योतः पुनर्वसुः ॥१८॥ तस्याहुकश्चाहुकी च कन्या चैवाहुकात्म-
जौ ॥१९॥ देववानुपदेवश्च सुदेवो देववर्द्धनः तेषां स्वसारः सप्तासन्धृतदेवादयो नृप ॥२०॥ शांतिदेवोपदेवा च श्रीदे-
वा देवरक्षिता सहदेवा देवकी च वसुदेव उवाह ताः ॥२१॥ कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहूस्तथा राष्ट्रपालो-
ऽथ सृष्टिश्च तुष्टिमानौग्रसेनयः ॥२२॥ कंसा कंसवती कंका शूरभू राष्ट्रपालिका उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ॥२३॥

देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥ पंक्ति ३

चिकंबलबर्हिषाख्यास्तथान्धकस्य पुत्रा इति अतोऽन्धकः अंधकाद्दुंदुभिरित्यत्र तद्वंशजोऽन्यो ज्ञेयः ॥१७॥१८॥ धृतदेवाद्या आसन् यासां शांतिदेवादीनां षण्णां राम-
ताः सप्त ॥२१॥ उग्रसेनस्य सुताः वसुदेवस्य येऽनुजाः देवभागादयस्तेषां स्त्रियो भार्या अन्धकस्य सुतानां च तेषां प्रथमस्य कुकुरस्य वंश उक्तः ॥२३॥ ४८

द्वितीयमजमानस्य वंशमाह शूरो विदूरथादिति भजमानाद्विदूरथः पुत्रोऽभवत् विदूरथाच्छूर इति पराशरादिवचनात् यद्वा रघुविदूरथा
द्याश्चेति पूर्वोक्तविदूरथात्मजाद्विदूरथात् १४ देवमीढस्य शूरो नाम पुत्रः तस्य देवमीढो हृदीकस्यैव सुतः यथाह पराशरः तस्यापि हृतवर्म
शतधन्वदेवमीढुषाद्याः पुत्रा बभूवुः देवमीढुषस्य शूरस्तस्यापि मारिषा नाम पत्न्यभवत् तस्यां चास्मो दश पुत्रानजनयत् वसुदेवपूर्वानिति १५ ६ आन

शूरो विदूरथादासीद्भजमानस्तु तत्सुतः । शिनिस्तस्मात्स्वयंभोजो हृदीकस्तत्सुतो मतः ॥ १४ देवबाहुः शतधनुः कृतवर्मेति
तत्सुताः । देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥ तस्यां जनयामास दश पुत्रानकल्मषान् १५ वसुदेवं देवभागं देवश्र
वसमानकं । सृञ्जयं श्यामकं कंकं शमीकं वत्सकं वृकं १६ देवदुन्दुभयो नेदुरानका यस्य जन्मनि । वसुदेवं हरेः स्थानं वद
न्त्यानकदुन्दुभिं ॥ १७ पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः । राजाधिदेवी चैतेषां भगिन्यः पंच कन्यकाः १८ कुंतेः स
ख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् । सा पदुर्वाससो विद्यां देवहूतिं प्रतोषितात् १९ तस्या वीर्यपरीक्षार्थमाजुहाव रविं शु
चिः । तदैवोपागतं देवं वीक्ष्य विस्मितमानसा ॥ प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे २० अमोघं दर्शनं देवि आधत्से त्वयि चात्मजं ॥
योनिर्यथा न दुष्येत कर्ताहं ते सुमध्यमे २१

कास्वनेदुः हरेः प्रादुर्भावस्य स्थानं १७ न पृथायाः कन्यकावस्थायां कर्णोत्पत्तिप्रकारमाह कुं
तेरिति पंचभिः कदाचिद्गृहमागतं दुर्वाससं पृथा परिचर्यादिना तोषयामास ततस्तस्मात्सा देवहूतीं देवाह्वानहेतुविद्यामवाप तदाह सा पेति
१९ देवमुपागतं वीक्ष्य सा प्राह प्रत्ययार्थं परिज्ञानार्थं मया विद्या प्रयुक्ता न तु त्वया किंचित्कार्यमित्यभिसंधिना २० अतो याहीत्येवमुक्तो रविराह
अमोघं देवदर्शनमिति कन्याहमिति चेत्तत्राह यथा योनिर्न दुष्येत्तथाहं कर्ता करिष्यामि २१

२५ ॥आवंत्यौ विंदानुविंदौ ॥२६॥ तदेवं वसुदेवस्य भगिनीनां पतिन्पुत्रांश्चोक्त्वा तद्भ्रातृणां नवानां पत्नीः पुत्रांश्चाह देवभागस्येति नवभिः श्लोकार्द्धैः
इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः ॥ सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ॥२१॥ तं सा त्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती
प्रपितामहस्तामुवाह पांडुर्वै सत्यविक्रमः ॥२२॥ श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत ॥ यस्यामभूद्दंतवक्त्र ऋषिशप्तो दितेः सुतः ॥
कैकयो धृष्टकेतुश्च श्रुतकीर्तिमविंदत ॥ संतर्दनादयस्तस्यां पंचासन्कैकयाः सुताः ॥२५ ॥राजाधिदेव्यामावंत्यौ जयसेनोऽज
निष्ट ह ॥ दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत ॥२६ शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः ॥ देवभागस्य कंसायां चित्र
केतुबृहद्बलौ ॥२७॥ कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा ॥ कंकायामानकाज्जाताः सत्यजित्पुरुजित्तथा ॥२८ ॥संजयो राष्ट्रपा
ल्यां च वृषदुर्मर्षणादिकान् ॥ हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ॥२९ ॥मिश्रकेस्यामप्सरसि वृकादीन्वत्सुकस्तथा ॥ तक्ष
पुष्करशालादीन्दुर्वाक्ष्यां वृक आदधे ॥४० सुमित्रार्जुनपालादीन् समीकात्तु सुदामिनी ॥ कंकश्च कर्णिकायां वै ऋतधामजया
वपि ॥ पौरवी रोहिणी भद्रा मदिरा रोचना इला ॥ देवकीप्रमुखाश्चासन्पत्न्य आनकदुंदुभेः ॥४१ ॥बलं गदं सारणं च दुर्मदं विपु
लं ध्रुवं ॥ वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥४२ ॥सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च ॥ पौरव्यास्तनया ह्येते भूताद्या द्वादशाभ
वन् ॥४४ ॥नंदोपनंदकृतकशूराद्या मदिरात्मजाः ॥ कौशिल्या केशिनं त्वेकमसूत कुलनंदनं ॥४५ ॥रोचनायामतो जाता हस्तहेमांगदा
दयः ॥ इलायामुरुवल्कादीन्यदुमुख्यानजीजनत ॥४६ ॥विपृष्ठो धृतदेवायामेक आनकदुंदुभेः ॥ शांतिदेवात्मजा राजन्प्रशमप्रसितादयः ॥
सुताश्च रयः ॥४७ ॥राजानः कल्पवर्षाद्या उपदेवासुता दश ॥ वसुहंससुवंशाद्याः श्रीदेवायास्तु षट्सुताः ॥४८ ॥

४१ वसुदेवस्य पत्नीः पुत्रांश्चाह पौरवीत्येकादशभिः ॥४२ ॥कौशल्या भद्रा ॥ ॥४५ ॥ ४६ ॥ ॥४७ ॥ सु ४८ ॥ राम

५०॥ अष्टमस्तु स्वयमेवासीन्न तु कर्मादिना हेतुना ॥ तामेवं जनितो वा ॥ यतोसौ हरिः ॥५१॥ तदेवोपपादयति त्रिभिः ॥५२॥ ईशस्य मायानियंतुः परस्य
असंगस्य द्रष्टुः साक्षिणः आत्मनः सर्वगस्य ॥ न ह्येवंभूतस्य मायाविनोदं विना जन्मनः कर्मणो वा हेतुर्भवतीत्यर्थः किंच ॥ यस्य मायाचेष्टितं पुं
सो जीवस्यानुग्रहस्तस्य सर्वजीवानुग्राहकस्य जातः कर्मादिपारतंत्र्येण जन्मादिसंभवः ॥ अनुग्रहमेवाह ॥ हि यस्मात्तद्देवस्थित्यादय दृष्यते

देवरक्षितया लब्ध्वा नव चात्र गदादयः ॥ वसुदेवः सुतानष्टावादधे सहदेवया ॥ पुरुविश्रुतमुख्यांस्तु साक्षाद्धर्मो वसूनिव ॥४९॥
वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत् ॥ कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः ॥५०॥ ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरम्
अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल ॥ सुभद्रा च महाभागा तव राजन् पितामही ॥५१॥ यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः
तदा तु भगवानीश आत्मानं सृजते हरिः ॥५२॥ न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ॥ आत्ममायां विनेशस्य परस्य द्रष्टु
रात्मनः ॥५३॥ यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ॥ अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥५४॥ अक्षौहिणीनां पति
२ भिरसुरैर्नृपलांछनैः ॥ भुव आक्रम्यमाणाया अभाराय कृतोद्यमः ॥५५॥ कर्माण्यपरिमेयानि मनसापि सुरेश्वरैः ॥ सहसंकर्षण

प्रलयो नीलोपाधेर्जीवस्य धर्मो यथासंभवादुपाधिसद्भावादिना धर्मादिसंपादनेनानुग्रहः ॥ तथात्मलाभाय मो ॥ श्चक्रे भगवान्मधुसूदनः ॥ ६
क्षाय चेष्यते ॥ तत्र हेतुः ॥ तेनैव क्रियमाणेन तस्यापि स्थित्यादेर्निवृत्तेः ॥५४॥ तस्य चेष्टितं भूमेरप्यनुग्रह इत्याह ॥ अक्षौहिणीनामिति द्वाभ्यां
अभाराय भारपरिहाराय ॥५५॥ सुरेश्वरैरपि मनसापि अपरिमेयानि अचिंत्यानि कर्माणि संकर्षणसहितश्चक्रे ॥ ५६ ॥

संकल्पमात्रेणाभूभारहरणसमर्थोऽप्यपि कर्मकरणं यशोविस्तारद्वारा भक्तानुग्रहार्थमित्याह कलाविति द्वाभ्याम् दुःखशोकतमांसि नुदतीति तथा तद्यशः व्यतनोत् ॥ ५७ ॥ यस्मिन्सतां कर्णपीयूषे यशोरूपे तीर्थवरे श्रोत्रमेवाञ्जलिः पानसाधनं यस्य स सकृदपि उपस्पृश्य श्रावणमात्रं कृत्वा ततो हार्दया कृष्टचित्तः कर्मवासनां धुनुते ॥ ५८ ॥ तदेवाह द्वाभ्यां भोजादिभिः श्लाघनीयमीहितं यस्य ॥ सर्वाङ्गैरम्यया मूर्त्या

कलौ जनिष्यमाणानां दुःखशोकतमोऽपहम् ॥ अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ॥ ५७ ॥ यस्मिन्सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् ॥ श्रोत्राञ्जलिरुपस्पृश्य धुनुते कर्मवासनाम् ॥ ५८ ॥ भोजवृष्ण्यन्धकमधुशूरसेनदशार्हकैः ॥ श्लाघनीयेहितः शश्वत्कुरुसृञ्जयपाण्डुभिः ॥ ५९ ॥ स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ॥ नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ॥ ६० ॥ यस्याननं मकरकुंडलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासम् ॥ नित्योत्सवं न ततृपुर्दृशिभिः पिबंत्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥ ६१ ॥

वं ६० तत्र च दर्शनार्थसुखशोभामाह यस्याननं दृशिभिर्नेत्रैः पिबंत्यो नार्यो नराश्च न ततृपुर्न तृप्ताः निमेषोन्मेषमात्रव्यवधानमप्यसहमाना अतस्तत्कर्तृनिमेः कुपिताश्च बभूवुः कथंभूतमाननं मकरकुंडलाभ्यां चारुकर्णौ भ्राजंतौ कपोलौ च ताभ्यां सुभगं सविलासो हासो यस्मिन् नित्यमुत्सवो यस्मिन् ॥ ६१ ॥

भा॰ न॰
५१

श्रीकृष्णचरितंसमासतोवर्णयतिजातइतिद्वाभ्यां ॥ जातोनिजेनरूपेण पश्चात्तुकृष्णोमनुष्याकारःसन्व्रजंगतःव्रजवासिनांपाथि
नायेनतेषुदारेषुहतानाशनात्तुत्याद्य ॥ आत्मनिगमंस्वकीयंवे दमार्गं ॥ ६१ ॥ अतःसमुत्थेनकलिनानिमित्तेनतुरुभार
जातोगतःपितृगृहाद्व्रजमेधितार्थोहत्वारिपून्सुतशता ॥ निकृतोरुदारः ॥ उत्पाद्यतेषुपुरुषःक्रतुभिः
समीजेह्यात्मानमात्मनिगमंप्रथयञ्जनेषु ॥ ६१ ॥ २ ष्व्याःसवैगुरुभरंक्षपयन्कुरूणामंतःस
मुत्थकलिनायुधिभूपचम्वः ॥ दृष्ट्याविधूयविजयेज यमुद्विघोष्यप्रोच्योद्धवायचपरंसमगात्स्व धो
धाम ॥ ६२ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कं धेयदुवंशानुकीर्तनंनामचतुर्विंशोऽध्यायः

क्षपयन्दृष्ट्यैवभूपचमूर्विधूयविजयेजयंयंअर्जुनेननजितमित्य वमुद्घोषंकृत्वा ॥ परंतत्त्वमुद्धवायोपदिश्यस्वधाम
सम्यक्तेनैवरूपेणाजगामेति ॥ ६२ ॥ इतिश्रीभागवतेभावार्थदीपि कायांश्रीधरस्वामिविरचितायांनवमस्कंधेचतुर्विंशोऽध्यायः

राम
५१

द०भू०
१

श्रीगणेशाय नमः ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं ॥ श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् ॥१॥ दशमे द-
शमे लक्ष्यमाश्रिताश्रयविग्रहं । क्रीडद्यदुकुलांभोधौ परानंदमुदीर्यते ॥२॥ दशमे कृष्णसत्कीर्त्तिवितानायात्र
वर्ण्यते ॥ धर्मग्लानिनिमित्तस्तु निरोधो दुष्टभूभुजां ॥३॥ प्राकृतादिसृष्टेर्दृष्टयोनिरोधः सत्तु वर्णितः । न
तत्र संगतः सृष्टिसंहारादिनिरूपणोऽध्यायाः । तात नवतिरध्याया दशमे कृष्णकीर्त्तये ॥ आरोवद्भिरध्या
येत्रैलक्षणार्थे नयाः । वने ॥५॥ भारं हर्त्तुं हरेर्जन्मसंख संगं निरूप्यते ॥ गोकुले मथुरायां च द्वारवत्यां ततः
क्रमात् ॥६॥ [illegible] कृष्णलीलास्त्रिधा प्रोक्तास्तत्रैव ते त्वनेकधा ॥ सपंचविंशताध्यायैर्हृहंस
वनारिषु ॥७॥ गोकुले वसतो लीला वर्ण्यते सूरदृष्ट रा ॥ एकेन यमुनावारिण्यक्रूरेणाकृता स्तुतिः ॥८॥ एका
दशभिराख्याता लीला मधुपुरे कृता शेषैर्द्वारावती लीला तत्रिमिणादि वर्ण्यते ॥९॥ एवं नवतिरध्यायाश्च
मे विशदा कथाः तत्र लेषु प्रथमे कंसः स्विपत्पुरे वकी सुताद् ॥१०॥ ॥ ॥

राम
१

श्रुत्वाभीतोः वधीन्नस्याः षड्गर्भानितिवर्ण्यते ॥ कृष्णावतारचरितश्रवणामृतनिर्वृतः ॥ ॥ उक्तानुवादेनोत्तरकथाजिज्ञासां पृच्छतितत्तुनः ॥ कथितो वंशवि
स्तार इति त्रिभिः श्लोकैः इति प्रतीत्य अभिप्रायेणोक्तं ॥ ननूक्तानि जातो गतः पितृगृहाद्व्रजमेधितार्थ इत्यादिना सत्यं ॥ पुनर्विस्तरेण वदेत्याह ॥ अवतीर्येति
अत्र लोके त्रिविधा जनाः मुक्ता मुमुक्षवो विषयिणश्च तेषां मध्ये अत्र न कस्याप्यलं प्रत्यय इत्याह ॥ निवृत्ततर्षैरिति ॥ गानतत्रैर्मुक्तैरित्यर्थः मुमुक्षू
णामयमेवौषधमित्याह ॥ भवौषधादिति ॥ विषयिणां परमो विषयः एवमेवेत्याह ॥ श्रोत्रमनोभिरामादिति ॥ अपगतात्मकृ यस्मात्तमात्मानं हंतीत्यपश्च

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ कथितो वंशविस्तारो भवता सोमसूर्ययोः ॥ राज्ञां चोभयवंश्यानां चरितं परमाद्भुतं ॥१॥ यदोश्च
धर्मशीलस्य नितरां मुनिसत्तम ॥ तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥२॥ अवतीर्य यदोर्वंशे भगवान् भूतभावनः ॥ कृतवा
न्यानि विश्वात्मा तानि नो वद विस्तरात् ॥३॥ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् ॥ क उत्तमश्लोकगुणानुवादा

विना त्पुमान्विरज्येत पशुघ्नात् ॥४॥ पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः ॥ दुरत्ययं कौरवसैन्यसागरं कृत्वाऽतर
न्वत्सपदं स्म यत्प्लवाः ॥५॥ द्रौण्यस्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवानां ॥ जुगोप कुक्षिंगत आत्तचक्रो मातुश्च मे यः शरणंगतायाः ॥६॥

घ्नः तस्मात् ॥ पशुघ्नादिति वा ॥४॥ किंच अस्मत्कुलदेवतं कृष्णः अतस्तत्कथैव नितरां श्रोतव्येत्याशयेनाह ॥ पितामहा इति ॥ अमराञ्जयन्तिये तैः
देवव्रतो भीष्मः तदाद्यैरतिरथैस्तिमिंगिलतुल्यैर्दुरत्ययं ॥ वत्सपदमिव अत्यल्पं कृत्वा तुच्छीकृत्यातरन् स्म यः कृष्ण एव प्लवो येषां ते तस्य वीर्याणि वदस्वे
ति तृतीयश्लोकगतेनान्वयः ॥५॥ न केवलं पांडवानेवावकृत् ॥ इदं मम शरीरमपि यो रक्षितवानित्याह ॥ द्रौण्यस्त्रविप्लुष्टमिति ॥ द्रौणेरश्वत्थाम्नो ब्रह्मास्त्रेण
दग्धमिदं मच्छरीरं च कुरूणां च पांडवानां च संतानस्य निदानं मम मातुः कुक्षौ प्रविष्टो धृतचक्रो यो जुगोपेति ॥६॥

१०.स्कं०
१

अखिलदेहभाजां सर्व्वप्राणिनां अन्तश्च बहिश्च पूरुषरूपेण कालरूपेण च ॥ आशाभिप्रायेण बहुवचनम् ॥ मृत्युं संसारं उत अपि अमृतमपि प्रयच्छतो वी
र्याणि वद स्वबुद्धि ॥ अयंभावः अन्तर्यामिरूपेणांतर्दृष्टीनां मुक्तिं बहिर्दृष्टीनां च कालरूपेण मृत्युं ददातीति य ॥ श्रोतान्तर्दृष्ट्या तद्वीर्याण्येव श्रोतव्यानीति
७ ॥ ननु बलरामं सारणं च वडम्भिरं विप्रलंधवम् ॥ वसुदेवस्तु रोहिण्यां कृतादीनुदपादयदिति ॥ रोहिण्यास्तनयो रामः प्रोक्तः वसुदेवस्तु देवक्यां
अष्टपुत्रानजीजनत ॥ कीर्त्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ॥ ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वर ॥ अष्टमस्तु तयोरासीत्स्वयमेव हरिः किलेति ॥ पुन

वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः ॥ प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ७ ॥
रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया ॥ देवक्या गर्भसंबंधः कुतो देहांतरं विना ॥ ८ ॥ कस्मान्मुकुंदो भगवान्
पितुर्गेहाद्व्रजंगतः ॥ क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतांपतिः ॥ ९ ॥ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः ॥ भ्रातरं चा
वधीत्कंसं मातुरद्धातदर्हणं ॥ १० ॥ देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः ॥ यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ॥ ११ ॥
एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितं ॥ वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतम् ॥ १२ ॥ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते
पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतम् ॥ १३ ॥ सूत उवाच ॥ एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स भगवानथ विष्णुरातं

देवक्या गर्भसंबंधस्तु से वोक्तः सूक्ततोद्धरतइत्यापेः ॥ ८ ॥ कस्मादिति ॥ मु ॥ प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥ १४
गवतः कंसभयसंकोसि भवान् इत्यर्थः ॥ ९ ॥ मातुर्भ्रातरं कंसं तस्याः ढ्धानर्हं अद्धासाक्षात्कस्मादवधीत् ॥ १०। ११ ॥ ननु त्यक्तान्नोदकस्य ते क्षुतः श्रवणे वका
शः स्तत्राह नैषेति त्यक्तोदकस्यापि ममजीवनं हरिकथामृतपानेनेति भिन्नं तदुपायभूमिं सद्य एव जीवितं तस्मादित्यर्थः ॥ १३ ॥ एवं साधुवादं समीचीनं प्रश्नं भागवत
प्रधानः भागवतश्रेष्ठः ॥ १४

भा० १०
१

स्त्रि

भा०१२

कारण

व्यवसिता कृतनिश्चया यतस्त्वयतो बुद्धिः ॥ १६ ॥ तत्र तावत्प्रथमं भगवदवतारे कारणं भूमिरित्यादिना नवभिः श्लोकैः दृप्तनृपव्याजा ये दैत्यास्तेषामनीकशतानां युतैः मद्युतैर्या भूरिभारस्तेनाक्रान्ता ॥ १७ ॥ विभोरन्तिके उपस्थिता सती ॥ २० ॥ पौरुषीं पुरुषस्य भगवतः गां वाचं ॥ मे मत्तः आशु शृणुत माचिरं अविलंबितं तथै

शुक उवाच ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम ॥ वासुदेवकथायां ते यज्जाता नैष्ठिकी मतिः ॥ १५ ॥ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि ॥ वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ १६ ॥ भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ॥ आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ ॥ १७ ॥ गौर्भूत्वाश्रुमुखी खिन्ना क्रन्दन्ती करुणं विभोः ॥ उपस्थितान्तिके तस्मै व्यसनं स्वमवोचत ॥ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह ॥ जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥ १८ ॥ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं ॥ पुरुषं पुरुषसूक्तेनोपतस्थे समाहितः ॥ २० ॥ गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ॥ गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव माचिरं ॥ २१ ॥ पुरैव पुंसा वधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां ॥ स यावदुर्व्या भरमीश्वरेश्वरः ॥ स्वकालशक्त्या क्षपयंश्चरेद्भुवि ॥ २२ ॥ वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः ॥ जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः ॥ २३ ॥ वासुदेवकलानंतः सहस्रवदनः स्वराट् ॥ अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥ २४ ॥ विष्णोर्माया भगवती यया संमोहितं जगत् ॥ आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति ॥ २५ ॥

व विधीयतां चेति ॥ २१ ॥ विज्ञापनात्पूर्वमेव पुंसा ईश्वरेण धराज्वरः तापः ॥ २२ ॥ देवकीगर्भसंकर्षणयशोदामोहनादिकार्यार्थे यशोदायां संभविष्यति ॥ २५ ॥

१०.पू
३

१६॥ भोजेंद्रबंधनागारे वसतोप्यस्मात्वकथामाह ॥ अरिष्टेन इत्यादिना यावद्दध्यायस्मान्निमथुरामावसन् ॥ १८ ॥ सर्पयानवोरयाश्रयाणोश्रया
णार्थी ॥ १९ ॥ रुक्मीनग्रहीतः २० ॥ पारिबर्हं उपस्कारं ॥ २१ ॥ २२ ॥ आभाष्य रेरे कं मैं बोध्य हंता हनिष्यति ॥ २४ ॥ कुलपांसनः कुलदूषणः आरब्धः उद्युक्तः

शुक उवाच ॥ इत्यादिश्य गणामरगणान्प्रजापतिपतिर्विभुः ॥ आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ ॥ २६ ॥ शूरसेनो यदुपतिर्मथुरा
मावसन्पुरीं ॥ माथुराञ्छूरसेनांश्च विषयान्बुभुजे पुरा ॥ २७ ॥ राजधानी ततः साभूत्सर्वयादवभूभुजां ॥ मथुरा भगवान्यत्र नि
त्यं संनिहितो हरिः ॥ २८ ॥ तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः ॥ देवक्या सूर्यया सार्द्धं प्रयाणे रथमारुहत् ॥ २९ ॥ उग्रसे
नसुतः कंसः स्वसुः प्रियचिकीर्षया ॥ रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः ॥ ३० ॥ चतुःशतं पारिबर्हं गजानां हेममालि
नां ॥ अश्वानामयुतं सार्द्धं रथानां च त्रिषट्शतं ॥ ३१ ॥ दासीनां सुकुमारीणां द्वे शते समलंकृते ॥ दुहित्रे देवकः प्रादाद्याने दुहितृव
त्सलः ॥ ३२ ॥ शंखतूर्यमृदंगाश्च नेदुर्दुंदुभयः समं ॥ प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलं ॥ ३३ ॥ पथि प्रग्रहिणं कंसमाभाष्या
हाशरीरवाक् ॥ अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध ॥ ३४ ॥ इत्युक्तः स खलः पापो भोजानां कुलपांसनः ॥ भगिनीं हंतुमा
रब्धः खड्गपाणिः कचेऽग्रहीत् ॥ ३५ ॥ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं ॥ वसुदेवो महाभाग उवाच परिसांत्वयन् ॥ ३६ ॥

कचे केशबंधे ॥ ३५ ॥ नृशंसं क्रूरं महाभाग इत्ययं भावः स्वजन्मनि हर्षेणादेवानकदुंदुभिनिर्घोषणाद्वा विभगावद्वतारेणाशक्यप्रतीकारतासंभवतीति सार्द्धय राम

३

३७ मरणभयेन हन्मीति चेत्तथापि मरणस्यापरिहार्यत्वादेहांतरस्यावश्यंभावित्वात्तत्रापि च भोगश्रेमास्पदत्वाद्वा नाम विशेषात्तद्भयेन
पापाचरणमयुक्तमित्यभिप्रेत्याह मृत्युर्जन्मवतामित्यादि देहेन सहेति विधात्रा ललाटे लिखितत्वादिति तथापि कालविलंबार्थं हन्मीति
चेत्तत्राह अद्य वेति अवश्यंभाविनि मरणे विलंबमात्राय न पापाचरणं युक्तमिति भावः ३७ किंच अस्मिन्देहे गते यद्देहांतरं न स्यात्तदा ३

स वसुदेव उवाच श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः । कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ॥ ३७ ॥ मृत्युर्जन्मवतां वी
र देहेन सह जायते । अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ३८ ॥ देहे पंचत्वमापन्ने देही कर्मानुगोऽवशः । देहांतर
मनुप्राप्य प्राक्तनं त्यजते वपुः ॥ ३९ ॥ व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति । यथा तृणजलूकैवं देही कर्मगतिं गतः ॥ ४० ॥

न्येत पापेनापि तत्पालनं न तु तदस्तीत्याह देहे पंचत्वमापन्नेति देहे पंचत्वमापन्ने प्राप्ते देही कर्मवशादपत्तत एव प्रथमं देहांतरं प्राप्यैवाप्यपूर्वं वपु
स्त्यजति ३९ अत्र दृष्टान्तः व्रजन्निति एकेनाग्रतो निहितेन पदा तिष्ठन्नुत्तरमवष्टभ्य देहं बिभ्रत्पश्चात्स्थेन पूर्वप्रदेशादुत्थाप्य पुरो निहितेन ग
च्छति तद्वत् अत्र स्वीकारपरित्यागौ नात्यंतभिन्नविषयाविति स्पष्टं दृष्टान्तरमाह यथा तृणजलूकेति सा हि यथा तृणांतरं त्यजति एवं कर्म
पथैवर्त्तमानो न्यो जीवोपि ४० १ तरमवष्टभ्य पूर्वं त्यजति १

तां

ना२

तु

प

२०५
४

देहविषयाभेवद्वीकारपरित्यागोऽदर्शयितुं दृष्टांतांतरमाह स्वप्नइति दृष्टराजादिदर्शनं श्रुतं इंद्रादिश्रवणं ताभ्यामाहितसंस्कारेणमनसातदेवा
नुचिंतयन् ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमपि अनिरूक्तं पश्यति तं गांतदेव तदेवाहमितिप्रपद्यते मन्यते ततआजाग्रदेहा
पगते स्मृतिर्भवति पूर्वरूपाग्रहेति जाग्रत्येव दर्शयितुं दृष्टांतांतरमाह मनोरथेनेति अत्रापि दृष्टश्रुताभ्यामिन्त्यादि सर्वं योज्यं तथा च दृष्ट
ति मंतोवैकस्यविदितोर्मृत्युरत्यंतविस्मृतिः जन्मत्वात्मतयांगीकारः सर्वभावेन स्वीकार विषयस्वीकारेति प्राकृर्यथा स्वप्नेमनोरथः स्वप्नं मनो

स्वप्नेयथापश्यतिदेहमीदृशं मनोरथेनापिनिविष्टचेतनः दृष्टश्रुताभ्यांमनसानुचिंतयन्प्रपद्यतेतत्किमपित्यपस्मृ
तिः ४१ यतोयतोधावतिदैवनोदितं मनोविकारात्मकमापपंचसु गुणेषुमायारचितेषुदेह्यसौप्रपद्यमानः
सहतेनजायते ४२ ॥

रथं चेत्यंग्राक्कनं नस्मरत्यभावित्यादि तद्वदत्रापिकर्मवशाद्देहांतरंप्राप्यप्राक्कनं त्यजतीति ४१ ननुं विचित्रदेहहेतूनांकर्मणांकृतत्वाद्दे
विशेषप्राप्तौ किंकारणमतआह यतोयतइति दैवकृतपंचसुगुणेषुमायारचितेषुमायया नानादेहरूपेणारचितेषु देवेनफला
भिमुखेनकर्मणानोदितंनानाविकारात्मकं मनोयदेहं देवतिर्यङ्नरादिरूपं प्रतिधावतिधाक्षप्रमतरूपमापआभिनिवेशेनप्राप्नं तत्रतत्रा
सौदेहीजायते तत्रमननमयः कर्तत्वात्त्रदेवजायतांनत्ववांत्मीत्वेप्यतआह तदेवाहमितिमन्यमानस्तेनसहजायते ४२

प्रपद्यमानइति।

राम
४

त्ति

नन्वसत्त्वमविष्यत्त्वेवं किमपि देहमात्रं तथाप्यस्य रतिद्विषस्य राजन् देहस्य रहूगणाय योक्तत्वमपि क्रियते तत्राह । ज्योतिरिति । अरस्वादि ज्योतिः उदकशुक्रेषु पार्थिवेषु द्रवेषु यद्वा । उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिंबेन स्थितं समीरस्य वायोर्वेगमनुगतं कंपादिधर्मं प्रतीयते तथा । एवं स्वमायाविद्यया रचितेषु गुणेषु देहेषु योगरागेनानुगतः प्रविशेषु तद्धर्मानभिनिवेशं प्राप्नोति । अयं भावः आत्मनस्तावद्देहाद्यध्यास जन्मोक्तं । स देहतेन जायत इति । तत आत्मन्यात्म धर्माध्यासाद्यध्यासे देहधर्माः कार्श्योदय आत्मनि प्रतीयते । एवमात्मधर्माः प्रेमास्पदत्वादि

ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते । एवं स्वमायारचितेष्वसौ पुमान्गुणेषु रागानुगतो विमुह्यति ४३
तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः । आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै परतो भयं । एषा तवानुजा बाला कृपणा पुत्रिकोपमा । हन्तुं नार्हसि कल्याणामिमां त्वं दीनवत्सल । शुक उवाच । एवं स सामभिर्भेदैर्बोध्यमानोऽपि दारुणः । न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ४६ । निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः । प्राप्तं कालं प्रतिव्योढुमिदं तत्रा

योऽपि देहादिष्विति राजन् तत्कारो देहयोर्विशेषाभावादन्यथास्य प्रतीकार इति ४३ । एवमुक्तं सामोपायमुपसंहरन्भेदमाह । तस्मादिति । न्वपद्यत ४७
परतः इत्यभिद्रुह्यमानात् तत्त्वं बोधिने स्वधर्मोऽपि देहादौ च भयमिति भेदोऽपि दर्शितः ४४ । पुनः साम्नाह । एषेति । पुत्रिकोपमा राह मयीव स्नेहेन तन प्राप्य
च्योद्यमानः उपदिश्यमानः स्वयं दारुणः पुनः पुरुषादाननुव्रतः इति ४६ । आनकदुंदुभिरिति परं महाभाग इत्यत्रोक्ताभिप्रायः प्रतिव्योढुं प्रति

८३

१०. मृ
५

न तु खलोपमेतन्न मन्येतेत्याशंक्याह स्वयमेव मृत्युरिति ॥ ४८ ॥ तस्मादुपेक्षादोषपरिहारायैवं करिष्यामीत्याह ॥ प्राहापेति मृत्युवेकं प्राप्यानचि
रमपि नैव प्राज्ञस्य इत्याशंक्याह ॥ हतमा इति ॥ अस्याप्युरिमे हतमा जायेरन् नतरां यद्भावितं भवति जीवितं तन्नावद्भवेदेव ॥ तरंतराय यद्युमेव म्रीयेत नतरान
किंचिदस्याप्यं ॥ ४९ ॥ यदि वहतमा भविष्यंति न चाग्रं म्रियेत तदा मृत्युश्चारेवास्य मरणमितिं पर्यायो वा किं न स्यात् ॥ ननु प्रौढस्य तत्बालकात्क्वथं मृत्युः
स्यात्तत्राह ॥ गतिरिति धातः अस्या ह्वाश्मोगमोहिंतेन्तुन्नावतः अतः इदानीमपत्यापर्णप्रतिन्नेव मंत्रः ॥ तथा प्राप्ति उपस्थितो मृत्युरयं तावन्निवर्त्तेत

मृत्युर्बुद्धिमतापोत्थ्योयावद्बुद्धिबलोदयः ॥ यद्यसौ न निवर्त्तेत नापराधोस्ति देहिनः ॥ ४८ ॥ प्रदाय मृत्यवे पुत्रान्मोचयेत्कृपणानिमां ॥ ह
तामेयदि जायेरन् मृत्युर्वा न म्रियेत चेत ॥ ४९ ॥ विपर्ययो वा किं न स्यात्कृति धीनदुरत्यया ॥ उपस्थितो निवर्त्तेत निश्वासः पुनरापतेत ॥ ५० ॥
अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोन्यत्र निमित्तमस्ति ॥ एवं हि जंतोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥ एवं विमृश्य तं
पापं यावदात्मनिदर्शनं ॥ पूजयामास वै सौरिर्वद्धमानप्ररः सरं ॥ ५२ ॥ अथ तत्र वदन्नांभोजो दृष्टो निरपत्रपम् ॥ मनसा दूयमानेन विहस

तु नरस्तेन मृत्युश्रेणामवेदवेति ॥ यद्यागतिर्द्धिनद्दुरत्ययेति स्पष्टवः उपस्थित इति ॥ ५० ॥ प्राणिनाम दृष्टं दुर्वितर्क्यमिति सदृष्टं न्निदमब्रवीत ॥ ५३ ॥
नमाह अग्नेरिति वने देहज्ञान्स्य दहत्त्वग्निः सन्निहितानू दहत्यन्यदिति जपकरा विदूरस्थाद्दहत्यि [illegible] ॥ नत्यस्य प्राश्यदृष्ट्यतिरेकेण किंचि
त्रियामकमस्ति यथा एवं जंतोर्जन्ममरणयोरपि हेतुर्दुर्विभाव्यः अचिंत्यः ॥ ५१ ॥ यावदात्मनिदर्शनं स्वप्रत्ता वधिविचार्य ॥ ५२ ॥ तस्य विश्वा एम
साय विकसित [illegible] भोजः सन्नब्रवीत ॥ ॥ ५२ ॥ नं निवृत्तस्य पुनः कालांतरे आपतेच्चेत्तदा नापराधो मम मे स्यर्थः ॥ अथवा मृत्युरुपस्थि
तो मृत्युः अस्यावधायो निवर्त्तेत ४

दि २ वी ३
५

यत्तयथाशरीरिणीवाग्गाह तथाह निश्चितं ॥ अस्याः सकाशान्मे भयं नास्ति ॥ यतः येभ्यः पुत्रेभ्यस्ते भयमुत्थितं ॥ अष्टमो हन्तेत्युक्ते ऽन्योन्यापेक्षया सर्वेषुप
हमामवेपुरिस्सुद्धते ते नस्याः पुत्रान्समर्पयिष्ये ॥ ५४ ॥ निवर्त्तते निवृत्तः तद्वाक्यसाररुपपत्तिः तद्धितं ॥ ५५ ॥ प्रसूतिकाले संप्राप्ते सर्वः सर्वात्मना भगवा

वसुदेव उवाच ॥ न ह्यस्यास्ते भयं सौम्य यद्वै साहाशरीरवाक् ॥ पुत्रान्समर्पयिष्येस्या यतस्ते भयमुत्थितं ॥ ५४ ॥ शुक उवाच ॥ स्वसुर्व
धान्निवृत्ते कंसस्तद्वाक्यसारवित् ॥ वसुदेवोपि तं प्रीतः प्रशस्य प्राविशद्गृहं ॥ ५५ ॥ अथ काल उपावृत्ते देवकी सर्वदेवता ॥ पुत्रान्प्रसु
षुवे चाष्टौ कन्यां चैवानुवत्सरं ॥ ५६ ॥ कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः ॥ अर्पयामास कृच्छ्रेण सोनृतादतिविह्वलः ॥ ५७ ॥ किं
दुःसहं नु साधूनां विदुषां किमपेक्षितं ॥ किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां ॥ ५८ ॥ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थि
तिं ॥ कंसस्तुष्टमना राजन्प्रहसन्निदमब्रवीत् ॥ ५९ ॥ प्रतियातु कुमारोयं न ह्यस्मादस्ति मे भयं ॥ अष्टमाद्युवयोर्गर्भान्मृत्युर्मे
विहितः किल ॥ ६० ॥ तथेति सुतमादाय ययावानकदुंदुभिः ॥ नाभ्यनंदत तद्वाक्यमसतोऽविजितात्मनः ॥ ६१ ॥

नेवदेवताय स्याः सा तथा सर्वदेवतामयीति भगवदाश्रयत्वात् ॥ ५६ ॥ ७ ॥ सत्यव्रतं कथमर्पितवानित्यपेक्षायामाह ॥ किं दुःसहमिति ॥ साधूनां सत्यस
धानां ॥ प्रत्यालालनं ह्यपेक्षा कथं त्यक्तेत्यत आह ॥ विदुषामिति ॥ भगवानेव तत्त्वं नान्यदिति जानतामित्यर्थः ॥ ननु स्वयं नीतेकं सो बालं न हन्यादि
ति मत्वा नीतवानिति ॥ किं न स्यादिति नेत्याह ॥ किमकार्यमिति ॥ ननु देवकी कथं पुत्रं त्याजेत्यत आह ॥ किं त्वेधृतात्मा हरौ धैर्ये नैषां ॥ ५८ ॥ ६१ ॥

१०. भा. ६

कंसस्य शांतिर्देवकार्यात्तुगणानभवतीतिनारदस्यतत्पवस्थानं ॥ नंदाद्या इति त्रयेण ॥ ६२ ॥ उभयोर्वसुदेवनंदकुलयोः ॥ ६३ ॥ वधोद्यमं देवतकृतमिति शे
षः ॥ ६४ ॥ निगडैः शृंखलैः ॥ अजनो विष्णुः तच्छंकया ॥ ६६ ॥ इति दशमे प्रथमः ॥ द्वितीये कंसबाधायां देवकीगर्भगो हरिः ॥ ब्रह्मादिभिः स्तुतः सांत्व

नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः ॥ वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥ ६२ ॥ सर्वे वै देवताप्राया उभयोरपि भारत ॥ ज्ञात
यो बंधुसुहृदो ये च कंसमनुव्रताः ॥ ६३ ॥ एतत्कंसाय भगवान् शशंसाभ्येत्य नारदः ॥ भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं ॥ ६४ ॥ ऋ
षेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति ॥ देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति ॥ ६५ ॥ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे ॥ जातं जा
तमहन्पुत्रं तयोरजनशंकया ॥ ६६ ॥ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा ॥ घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ॥ ६७ ॥ आत्मान
मिह संजातं जानन्प्राग्विष्णुना हतं ॥ महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥ ६८ ॥ उग्रसेनं च पितरं यदुभोजांधकाधिपं ॥ स्वयं नि
गृह्य बुभुजे शूरसेनान्महाबलः ॥ ६९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे कंसावतारोपक्रमे प्रथमोऽध्यायः ॥ श्रीशुक उवाच ॥ प्रलंबबक
चाणूरतृणावर्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः ॥ यदूनां कदनं च
क्रे बली मागधसंश्रयः ॥ २ ॥ ते पीडिता निर्विविशुः कुरुपंचालकेकयान् ॥ शाल्वान्विदर्भान्निषधान्विदेहान्कोसलानपि ॥ ३ ॥

नेति निरूप्यते ॥ षड्भिः संक्षिप्य तं तमेव विरोधं प्रपंचयति ॥ तत्र देवकीगर्भस्यान्यत्र संचारेण भगवतः प्रवेशं वक्तुमाह ॥ प्रलंबेत्यादि सार्द्धश्लोक

१० प ६

अनुरुंधाना अनुवर्त्तमानाः ॥४॥ धाम कला तेन वैष्णवमंशो गर्भो बभूव ॥ किं तद्धामेत्यत आह ॥ यमनंतमिति ॥ हर्षशोकविवर्द्धनः अनंतरूपस्यावतीर्णत्वाद्धर्षः
पूर्वगर्भसाधारण्याद्ध्याशोक इति ॥५॥ ६ ॥ नंदगोकुले किमित्यत आह ॥ अन्याश्चेति न केवलं सैव ॥ अन्या अपीति विवरेषु अलक्ष्यस्थानेषु ॥७॥ जठरे
स्तं ॥ ननु गर्भमाकृष्यमाणः कथं जीवेदित्यत आह ॥ मा पकं धापेति ॥ ततततः ॥८॥ किमर्थमेवं कार्यमित्यत आह ॥ अथेति ॥ अनंतरमेवेत्यर्थः ॥ अंशभागे

२ एके तमनुरुंधानाः ज्ञातयः पर्युपासते ॥ हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥ सप्तमो वैष्णवं धाम यमनंतं प्रचक्षते ॥ गर्भो बभूव दे
वक्या हर्षशोकविवर्द्धनः ॥५॥ भगवानपि विश्वात्मा विदित्वा कंसजं भयं ॥ यदूनां निजनाथानां योगमायां समादिशत् ॥ गच्छ देवि व्र
जं भद्रे गोपगोभिरलंकृतं ॥६॥ रोहिणी वसुदेवस्य भार्यास्ते नंदगोकुले ॥ अन्याश्च कंससंविग्ना विवरेषु वसंति हि ॥ देवक्या जठरे
गर्भं शेषाख्यं धाम मामकम् ॥ तत्संनिकृष्य रोहिण्या उदरे संनिवेशय ॥८॥ अथाहमंशभागेन देवक्याः पुत्रतां शुभे ॥ प्राप्स्यामि त्वं यशो
दायां नंदपत्न्यां भविष्यसि ॥९॥

नेति अंशैः शक्तिभिर्भजते अधितिष्ठति सर्वान्ब्रह्मादीन् स्वपर्यंतानित्यंशभागः तेन परिपूर्णेन रूपेणेत्यर्थः ॥ यद्वा
अंशेन ज्ञानैश्वर्यबलादिभिर्भजयति ह्रीयानिति ॥ तथा तेनेति ॥ यद्वा ॥ अंशेन पुरुषरूपेण मायाया भोगो भजनं ईक्षणं यस्य तेन ॥ यद्वा ॥ अंशेन मायया पुरुषावता
रादिरूपा भागा भेदा यस्य तेन ॥ यद्वा ॥ अंशा एव मत्स्यादिरूपा भजनीयाः ॥ तत्साक्षात्स्वरूपं यस्य तेन ॥ यद्वा ॥ अंशैः ज्ञानबलादिभिर्भजनं भक्तो भयं दस्य
तेन ॥ सर्वथा परिपूर्णेन रूपेणेति विवक्षितं ॥ कृष्णस्तु भगवान्स्वयमिति वचनादिति ॥ प्रोत्साहयति त्वं यशोदायामिति साईवतष्टयेन ॥९॥ ॥

अनुवर्त्तनं २

नं।१

द॰ स्कं॰ ८

सर्वान्सुरा कामयंते येते षां वरां ईश्वरीं श्रेष्ठां नियंत्री ॥ अर्द्धकानां सर्वान्कामवरान्स्वरान् इत्यभियातां ॥१०॥ त्वद्विक्रमेणतस्य परेशाम् विष्यंतीत्याह ॥ गर्भसंक
र्षणादिना रामेति च संबोधनं करिष्यति ॥ त्वया संकृष्टेन तेन लोकस्य रमणात् रसत्वात् रमणात् ॥१२॥ तथेति भूनरपि जेमित्याह रेणुषति गृह्याशंख्यी
॥१४॥ विस्त्रंसितः विस्त्रस्त इत्यर्थः इति विचुक्रुशुः नष्टतद्विड्ड इत्यर्थः ॥१५॥ मनस्याविवेश मनस्याविर्बभूव ॥ जीवानामिव न धातुसंबंध मित्यर्थः ॥१६॥ धाम
श्रीमूर्त्तिः ॥१७॥ जगन्मंगलं [illegible] तो मूर्त्तिमन्मंगलं ॥ अच्युतां ॥ शं अच्युतात् च्युतिरहितान् अंशान् ऐश्वर्यादि येषां यस्य तद्यद्वा ॥ अच्युतस्यांशं इत्यंशः ॥ नक्का उग्रहार्थ्यं पारि

अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं ॥ धूपोपहारबलिभिः सर्वकामवरप्रदां ॥१०॥ नामधेयानि कुर्वंति स्थानानि च नरा भुवि
दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥११॥ कुमुदा चंडिका कृष्णा माधवी कन्यकेति च ॥ माया नारायणीशानी शारदेत्यंबि
केति च ॥१२॥ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि ॥ रामेति लोकरमणात् [illegible] लभद्रं बलो[illegible]च्छ्रयात् ॥१३॥ संदिष्टैवं
भगवता तथेत्योमिति तद्वचः ॥ प्रतिगृह्य परिक्रम्य गां गता तत्तथाकरोत् ॥१४॥ गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया ॥ अहो
विस्त्रंसितो गर्भ इति पौरा विचुक्रुशुः ॥१५॥ भगवानपि विश्वात्मा भक्तानामभयंकरः ॥ आविवेशांशभागेन मन आनकदुंदुभेः ॥१६॥
स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः ॥ दुरासदोतिदुर्द्धर्षो भूतानां संबभूव ह ॥१७॥ ततो जगन्मंगलमच्युतांशं समाहितं शूर

छिन्नवपुरित्यर्थः सम्यग्भूतमेवाहितं वेधदीक्षयार्पितं देवी द्योतमाना शुद्ध — सुतेन देवी ॥ दधार सर्वात्मकमात्मभूतं काष्ठा यथानंदकरं मनस्तः ॥ राम
सत्वेत्यर्थः सर्वात्मकं सर्वस्यात्मानं ॥ अत एव आत्मभूतं स्वस्मिन्नारादेव संतं ॥ मनस्तः मनस एव दधार धारणा धृतवती ॥ अत्रानुरूपं दृष्टांतमाह ॥ यथा

८

सर्वजगन्निवासस्यनिवासभूतासत्यपिनितरांसर्वजनाह्लादकतयानरेजे ॥ किंतुस्वयमेवानंदमग्नभवत ॥ यतःकंसस्यगृहेरुद्धाअन्यैर्नदृश्यते ॥ यथारि
गुरुद्धाअग्निशिखावारीपरवतेथासतीशोभमानासरस्वतीज्ञानखलेज्ञानवंचकेरुद्धायथाःन्येषामनुपकारिणीनराजतेतद्वत ॥ प्रभयाभवनंविरोच
यंतीं ॥ अजितंअंतरांज्ञिमधोयस्याःसाता ॥ एषविरोचयानःध्रुवंहरिरेव ॥ यतःयस्मात्ईदृशीपूर्वंनासीत ॥ नत्रुहेतिसासारयत्रपायाः ॥ नेतिस्वयमेवाह
अयमर्थंतंत्रोरेवकार्यप्रधानःविक्रमंनविहंति ॥ मद्वधेपराक्रमंकरिष्यत्येवेत्यर्थः ॥ यद्वातदिदंयमिदानीमेवहन्यतामितिविचिंत्याह ॥ अर्थतंत्रोपिउमा

सादेवकीसर्वजगन्निवासनिवासभूतानितरांनरेजे ॥ भोजेंद्रगेहेग्निशिखेवरुद्धासरस्वतीज्ञानखलेयथासती ॥ १९ ॥ तांवीक्ष्यकंसःप्रभया
जितांतरांविरोचयंतींभवनंशुचिस्मितां ॥ आहैषमेप्राणहरोहरिर्गुहांध्रुवंश्रितोयन्नपुरेयमीदृशी ॥ २० ॥ किमद्यतस्मिन्करणीयमाशुमेयद
र्थतंत्रोनविहंतिविक्रमं ॥ स्त्रियाःस्वसुर्गुरुमत्यावधोयंयशःश्रियंहंत्यनुकालमायुः ॥ २१ ॥ सएषजीवन्खलुसंपरेतोवर्तेतयोत्यंतनृशंसितेन
देहेमृतेतंमनुजाःशपंतिगंतातमोधंनमानिनोध्रुवं ॥ २२ ॥ इतिघोरांतमभावात्संनिवृत्तःस्वयंप्रभुः ॥ आस्तेप्रतीक्षंस्तज्जन्महरेर्वैरानुबंध
कृत ॥ २३ ॥ आसीनःसंविशंस्तिष्ठन्भुंजानःपर्यटन्महीं ॥ चिंतयानोहृषीकेशमपश्यत्तन्मयंजगत ॥ २४ ॥ ब्रह्माभवश्चतत्रैत्यमुनिभिर्नारदादिभिः ॥

ख१ नं विक्रमंन विहंतिननाशयति ॥ स्त्रीवधेतत्राशःस्यादितिभावः ॥ तदेवाह ॥ स्त्रियाइतिगुरुमत्यागर्भिण्याःकिंचमए \ देवैःसानुचरैःसाकंगीर्भिर्वृषणमैडयन ॥ २५
षजीवन्नपिमृतःस्यात ॥ नृशंसेनक्रौर्येणयोवर्तेतंजीवंतमेवमनुजाःशपंतिदुष्टोयंधिक् कुर्वंतिमृतेदेहेमृतेतेनमानिनःपापिनोनरकंगच्छति ॥ अथवासा
यप्रकारमेवाह ॥ तेनमानिनोःसरदेहमृतेध्रुवमंधंतमोगमिष्यतीतिसंविशन्शयानःस्थाभिर्गीर्भिःवृषणंकामवर्षिणंऐडयन्तुष्टुवुः ॥ २५ ॥

प्रतिश्रुतं सत्यं कृतमिति हृष्टाः सत्यत्वेनैव प्रथमं स्तुवंति ॥ सत्यव्रतमिति ॥ सत्यं व्रतं संकल्पो यस्य तं ॥ सत्यपरं श्रेष्ठप्राप्तिसाधनं यस्मिन्नं तं ॥ त्रिसत्यं त्रिष्वपि काले
ष्व सृष्टेः पूर्वं प्रलयानंतरं मध्ये स्थितिसमये अव्यभिचारेण वर्त्तमानं ॥ ते हेवाहुः सत्यस्य योनिमिति सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशौ एवं सच्च त्यच्च
सत्यं भूतपंचकं ॥ तत्सत्यमित्याचक्षत इति श्रुतेः तस्य योनिं कारणं ॥ अनेन पूर्ववर्त्तमानतोक्ता ॥ तथा सत्ये तस्मिन्नेव निहितं अंतर्यामितया स्थितं ॥ अनेन स्थि
तिसमये सत्वमुक्तं ॥ तथा सत्यस्य सत्यं पारमार्थिकं नाशेप्यवशिष्यमाणं रूपं ॥ अनेन प्रलयेप्यवधित्वेन सत्यत्वं दर्शितं ॥ एवं त्रिसत्यत्वमुपपादितं ॥ तथा ऋत
सत्यनेत्रं ऋतं च सूनृता वाणी ॥ सत्यं च समदर्शनं ॥ भगवताव्याख्यासमानत्वात्सत्यं च समदर्शनं ॥ ऋतं च सूनृता वाणी कविभिः परिकीर्त्तिते ॥ तयोर्नेत्रं नयन

देवा ऊचुः ॥

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ॥ सत्यस्य सत्यं ऋतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥ २६ ॥ एकायनोसौ द्वि
फलस्त्रिमूलश्चतूरसः पंचविधः षडात्मा ॥ सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः ॥ २७ ॥

साधनं नेतारं वर्त्तकमिति यावत् एवं सर्वप्रकारेण सत्यात्मकं त्वां भगवन्नवयं शरणं प्रपन्नाः प्राप्ता इति ॥ ननु भवंतोपि लोके स्वशरणं प्रपन्नाः एव किमिति मां श
रणं प्रपद्यंते ॥ नैवं वाच्यं त्वमेवैकः सर्वेश्वरः सर्वसृष्ट्यादिकारणत्वात् वयं तु त्वदेकशरणा एव ॥ लोकादिरूपं द्वैतं च सर्वं त्वद्व्यतिरेकेण नास्तीति वक्तुं द्वैतं प्रपंच
वृक्षरूपकेण निरूपयंति ॥ एकायन इति ॥ असौ प्रपंचरूप आदिवृक्षः वृक्षाकार इति वृक्षः समष्टिदेहरूपः कथंभूतः एकायनः एका प्रकृतिराश्रयो यस्य सः

बोधि

द्विफलः सुखदुःखे फले यस्य सः त्रयो गुणाः मूलानि यस्य सः धर्मार्थकाममोक्षाश्चत्वारो रसा यस्य सः ॥ पंचेंद्रियाणि विज्ञानानि प्रकारा यस्य सः षडूर्मयः शो

गम
८

शावाग्न्यात्मनः स्वभावा यस्य सः सप्तधातवस्त्वचो यस्य सः पंचभूतानि मनोबुद्धिरहंकारश्चेत्यष्टौ विटपाः शाखा विस्तारा यस्य सः दशप्राणाश्छदाः पत्राणि विद्य
ते यस्य सः दशच्छदी ॥ द्वौ जीवेश्वरौ खगौ यस्मिन् स द्विखगः ॥ २७ ॥

नव द्वाराणि अक्षाः छिद्राणि यस्य।

एवंरूपस्य संसारवृक्षस्य सतः कार्यस्य त्वमेक एव प्रसूतिः प्रकर्षेण सूतिर्जन्म यस्मात्स त्वं कारणमित्यर्थः त्वं सन्निधानं त्वमेव सम्यग्निधीयतेस्मिन्निति लयस्थानं ॥ त्वमेवानुग्रहश्च अनुगृह्णातीति पालकः ॥ ननु ब्रह्मविष्णुरुद्रा एवंभूताः प्रसिद्धाः कथमहमेवेति चेत्तत्राह त्वन्माययेति ॥ संवृतं पिहितं चेतो ज्ञानं येषां ते त्वामेव नाना पश्यंति ॥ ये तु विपश्चितो विद्वांसस्ते तथा न पश्यंति ॥ २८ ॥ ननु देवकीपुत्रं मां कथमेवं वर्णयथेति चेत्तत्राह विभर्षीति ॥ अवबोधैकस्वरूपतः ॥ आत्मा त्वमेव रूपाणि मूर्त्तीर्विभर्षि धत्से ॥ ननु त्वं कस्यापि पुत्र इत्यर्थः क्षेमाय पालनाय ॥ सतां धर्मवर्त्तिनां सुखकराणि ॥ खलानामभद्राणि नाशकानि ॥ २९ ॥ न केवलमेतावत् भक्तानां मोक्षार्थमपीत्याह त्वयीति ॥ त्वयि समाधिनावेशितचेतसा निमित्तेन त्वत्पादपोतेनाश्रितेन केचन मनुष्याः किंविवेकिनः महद्भिः कृतेनैव ध्यानतया संपा-

त्वमेक एवास्य सतः प्रसूतिस्त्वं संनिधानं त्वमनुग्रहश्च ॥ त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चितो ये ॥ २८ ॥ विभर्षि रूपाण्यव-
बोध आत्मा क्षेमाय लोकस्य चराचरस्य ॥ सत्त्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानां ॥ २९ ॥ त्वय्यब्जजाक्षाखिलसत्त्वधा-
म्नि समाधिनावेशितचेतसैके ॥ त्वत्पादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धिं ॥ ३० ॥ स्वयं समुत्तीर्य सुदुस्तरं द्युमन्भवार्णवं भीममद-
भ्रसौहृदाः ॥ भवत्पदांभोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥

दितेन ॥ यद्वा ॥ इदमपि मायामयमिति नादरं परित्यज्य इदमेव महत्सर्वोत्कृष्टमिति मनसि कृतेन बहुमतेनेत्यर्थः ॥ भवाब्धिं तुच्छीकुर्वंति ॥ अनायासेनैव भजनात् निष्कामानामनिष्टहारिणी तेषां मुक्तिरित्यर्थः ॥ ३० ॥ ननु तेन पोतेन पूर्वे बहवः पारं गताः तर्हि इदानीं तन्नास्ति का गतिस्तत्राह स्वयमिति ॥ अयमर्थः ॥ हे द्युमन् स्वप्रकाश त्वत्पादपोतस्य सामीप्यमात्रेण भवाब्धौ गोवत्सपदमात्रे जाते ॥ तत्ते निरपेक्षाः स्वयमेवान्येषां भीमदुस्तरमपि भवार्णवं समुत्तीर्य भवत्पदांभोरुहरूपां नावमत्रैव निधाय भक्तिमार्गसंप्रदायं प्रवर्त्य इत्यर्थः ॥ ननु किं यतोऽदभ्रसौहृदाः सर्वभूतेष्वतिप्रीतियुक्ताः ॥ अतस्तेऽन्येषां तरणाय नि-

ननु विवेकिनां किमङ्ग जनेन मुक्ता एव हि ते ॥ तत्राह येन्य इति ॥ विमुक्तमानिनः विमुक्ता वयमिति मन्यमानाः त्वय्यस्तो निरस्तोऽस्त एवास्तत्र ॥ यो भावः तस्माद्भक्तेरभावादित्यर्थः ॥ न विशुद्धा बुद्धिर्येषां ते तथा ॥ यद्वा ॥ त्वय्यस्तभा इतिच्छेदः अस्तमतयः वारेष्वव विशुद्धबुद्धयः ॥ कृच्छ्रेण बहुजन्मतपसा परं पदं मोक्षसन्निहितं सत्कुलतपःश्रुतादि ॥ पतंति विघ्नैरभिभूयंते ॥ अनादृता युष्मदङ्घ्रयो यैस्ते ॥ ३२ ॥ त्वदीयास्तु न कदाचिदपि पतंतीत्याह तथा नेति ॥ विनायका विघ्नहेतवः

येऽन्येऽरविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ॥ आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोऽनादृतयुष्मदंघ्रयः ॥ ३२ ॥
तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः ॥ त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो ॥ ३३
सत्त्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेयउपायनं वपुः ॥ वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते ॥ ३४ ॥

तेषामनीकानि स्तोमास्तानि यांति ये तेषां मूर्द्धसु विचरंति विघ्नान् जयंतीत्यर्थः ॥ ३३ ॥ सत्त्वं स्वभावसहानि रूपाणि धारयसीत्युक्तं ॥ विभर्षि रूपाणीति ॥ तत्केन प्रकारेणाह स्वाव सत्त्वमित्यपेक्षायामाह ॥ सत्त्वं वपुः श्रयत इत्यन्वयः श्रियउपायनं कर्मफलदं ॥ तत्कथं येन वपुषा जनस्तवार्हणं पूजां समीहते ॥ करोति ॥ वेदैः वेदस्य क्रियायोगाः शास्त्रतपश्चैतैः चतुराश्रमधर्मैरित्यर्थः ॥ वपुषो नाश्रयणे ईशणो भवान्न कर्मफलसिद्धिः स्यात् ॥ ३४ ॥ ॥ ॥

त्वत्पदांबुजानाहे त्यादिना श्लोकत्रयेण भगवद्भक्तानामेव मोक्षो नान्येषामित्युक्तं ॥ तत्र कर्मफलं भक्तिं विनामाभूत ॥ मोक्षस्तु ज्ञानैकसाध्यत्वात्किं भक्त्येति माउ
शयानुग्रत्याहुः सत्वं न चेद्रिति ॥ हे धातः इदं सत्वं निजं तव वपुर्न चेद्भवेत्तर्हि विज्ञानं विशिष्टमपरोक्षं ज्ञानं न भवेदित्यनुषंगः ॥ कथंभूतं अज्ञानभिदापमार्जनं
अज्ञानं च तत्कृता भिदा च तयोरपमार्जनं निवर्तकं ॥ यद्वा ॥ अज्ञानं भिनत्तीत्यज्ञानभित् विज्ञानं मार्जनं अपवर्गमेवेति ॥ ननु जडानां गुणादीनां यतः प्रकाशः तद्
स्तीति ज्ञानं भवेदेव न गुणप्रकाशैः गुणवृत्तिभिः प्रकाशो भवानस्त्येव साक्षी पूर्णः केवलमनुमीयते ॥ कथ्यते ॥ न तु साक्षात्क्रियत इत्यर्थः ॥ अनुमानप्रकारमाहुः
प्रकाशते यस्य च येन वा गुणः इति ॥ यस्य संबंधी अयं बुद्ध्यादिगुणः प्रकाशते ॥ यो गुणसाक्षीत्येवं येन वा बुद्ध्यारूढेन प्रमात्रा वा त्वया गुणः प्रकाशत इत्यनु

सत्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं ॥ गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य च ये
न वा गुणः ॥ ३५ ॥ न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः ॥ मनोवचोभ्यामनुमेय
वर्त्मनो देव क्रियायां प्रतियंत्यथापि हि ॥ ३६ ॥ शीनदयालमहार ॥

मीयत इत्यर्थः ॥ अयं हि सत्ववपुषि त्वयि सेव्यमाने तत्तदाकारे ततः ॥ कारणे त्वत्प्रसादेन साक्षात्कारो भवेदिति भावः एवं तावद्भक्तानामस्युरस्यापवर्गार्थं रूपाणि वि
भर्षीत्युक्तं ॥ ३५ ॥ तान्यपि भजनीयानि केवलं न तु ज्ञातुं शक्यंते अनंतत्वादतर्क्यत्वाच्च मनोवचसोरगोचरत्वादित्याहुः ॥ न नामरूपे इति ॥ गुणाः जन्मानि कर्माणि चैतै
र्निरूपितव्ये निरूपणार्हे न भवतः कुतः अनुमेयं वर्त्म मार्गो यस्य तवेति तत्रापि हेतुः तस्य साक्षिण इति ॥ न हि साक्षिणस्तत्वं मनोवचोगोचर इत्यर्थः ॥ हे देव वयं धाद्यो
तमाह ॥ अथापि क्रियायां उपासनादिलक्षणायां त्वा प्रतियंति उपासकाः साक्षात्पश्यंति हि प्रसिद्धं ॥ ३६ ॥

२०.पू. तस्माद्भक्तैरेव मोक्ष इत्युपसंहरति शृण्वन्निति शृण्वानपि संस्मारयन्नपि क्रियासु देवार्च्चनादिषु ३७ विशेषतः श्रीकृष्णावतारमभिनंदति दिष्ट्येति दि
१० ष्ट्या भद्रं तवेदं पादभूतायाः ॥ स्वरूपतस्तव जन्ममात्रेणापनीत एवाकिंच ॥ त्वत्पदैः कोमलैः पदैः स्वशोभनैर्वज्राङ्कुशादिरुग्लक्षणैः गां पृथ्वीं द्यां स्व
र्गं च तव त्वयानुकंपितां ॥ ३८ ॥ तव जन्मना भारोपनीत इत्युक्त्वा प्रमादि विजीववत्कर्मारब्धः नहीं नहीत्याहुः नेति ॥ तव हे ईश अभवस्य संसाररहितस्य जन्मनः

शृण्वन्गृणन्संस्मारयंश्च चिंतयन्नामानि रूपाणि च मंगलानि ते ॥ क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेता न भवाय क
ल्पते ॥ ३७ ॥ दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोपनीतस्तव जन्मनेशितुः ॥ दिष्ट्यांकितां त्वत्पदकैः सुशोभनैर्द्रक्ष्या
म गां द्यां च तवानुकंपितां ॥ ३८ ॥ न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे ॥ भवो निरोधः स्थितिरप्यवि
द्यया कृता यतस्त्वय्यभयाश्रयात्मनि ॥ ३९ ॥ मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः ॥ त्वं पासि
नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते ॥ ४० ॥ दिष्ट्याम्ब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय
नः ॥ माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ॥ ४१ ॥ कारणं क्रीडां विना न तर्कयामः किं च हे अभय आश्रय आत्मन्
अयमाश्रयत इति तेष्वात्मत्वे बोधनं हे नित्यमुक्तेत्यर्थः तव जन्मकारणं नास्तीति किं वक्तव्यं ॥ यतो जीवात्मन्यपि भवादयः त्वयि विपर्ययेण अविद्यातया क
ल्पिता न परमार्थतः संतीति ॥ ३९ ॥ प्रकृतं प्रार्थयंते मत्स्याश्वेति ॥ नोऽस्मान् त्रिभुवनं चान्यदापद्भ्यः पालितवान् तथाधुनापि पाहीति वंदनं ते इति वदंतः सर्वे शिरोः प्र

रा
१०

यस्यरूपमनिदंसर्वशून्यमभूतं ॥ यथायथावत अस्मात्त्वंचापित्वाएतावित् स्थास्यत इति मन्यमानाः ब्रह्मेशानौ पुरोधाय सुरतः ज्ञात्वा यसुरिति ॥४४॥ इति रणमे
तीयः ॥ लक्ष्मी येनिजरूपेण संभूतस्तं हरिः स्तुवे ॥ पितृभ्यां संस्तुतो नीतः पित्राभीतेन गोकुलं ॥ अथेति मंगलार्थं ॥ यर्हि सर्वगुणोपेतः कालो बभूव तदा देव
क्यां विष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः परमशोभनत्वमेवाह यर्हीत्यादिना ॥ अजानातेनारायणाज्जन्मयस्य तज्जायते तस्य रोहिणी नक्षत्रं कथं

श्रीशुक उवाच इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ॥ ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवं ॥४४॥ इति श्रीभागवते महापुराणे दशमस्कंधे गर्भगतवि
ष्णोर्ब्रह्मादिकृतस्तुतिर्नाम द्वितीयोऽध्यायः ॥ श्रीशुक उवाच ॥ अथ सर्वगुणोपेतः कालः परमशोभनः ॥ यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतार
कं ॥१॥ दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयं ॥ मही मंगलभूयिष्ठपुरग्रामव्रजाकरा ॥१॥ नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः
द्विजालिकुलसन्नादस्तबका वनराजयः ॥३॥ ववौ वायुः सुखस्पर्शः पुण्यगंधवहः शुचिः ॥ अग्नयश्च द्विजातीनां शांतास्तत्र समीध
त ॥४॥ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहां ॥ जायमानेऽजने तस्मिन्नेदुर्दुंदुभयो दिवि ॥५॥ जगुः किन्नरगंधर्वास्तुष्टुवुः सिद्धचारणाः
विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा ॥६॥ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः ॥ मंदं मंदं जलधरा जगर्जुरनुसागरं ॥७॥

स
दु
र

भूतं ॥ शांतानि ऋक्षाण्यश्विन्यादीनि ग्रहाश्च तारकाश्च यस्मिन् तत् तत यर्हीति सर्वत्रानुषज्यते ॥ निर्मला नामुडुगणानामुदयो यस्मिन् तत्तथा ॥ मंगलभूयिष्ठाः पुरादयो
यस्यां सा ॥२॥ जलरुहैः श्रीः शोभा येषां ते ॥ द्विजालिकुलानां सन्नादा येषु ते स्तबका यासां ताः ॥३॥ समिंधत उद्दीपनो न इंधः समैधंतेति ॥ सम्यग्दीप्ताश्च बभूवुरि
त्यर्थः ॥ असुरद्रुहां कंसादिव्यतिरिक्तानां सर्वप्राणिनां देवानां चेति अजने जायमाने आसन्नः प्रसन्नो यस्मिन्समये ॥५॥ ६ ॥ ॥७॥

१०.पू ॥

तमसा उद्भूते च ननु तमसि निशीथे यथा यथावत् ॥ एष श्लोको विवरणरूपेण ॥ ८ ॥ तमद्भुतं बालकं वसुदेव ऐक्षतेति द्वितीयश्लोकेनान्वयः अद्भुतत्वे हेतुगर्भाणि विशेषणानि अंबुजेक्षणमित्यादीनि ॥ श्रीवत्सलक्ष्माणं ॥ गलेन शोभते गलशोभी सकौस्तुभो यस्मिन् ॥ ९ ॥ परिषक्तसहस्रकुंतलं ॥ किरीटकुंडलादीनां त्विषा स्फुरत्परिमितकेशमित्यर्थः ॥ १० ॥ विस्मयेनोत्फुल्ले विलोचने यस्य सः ॥ गवामयुतमस्पृशन्मनसा रत्नवाञ् ॥ कंसनिगृहीतस्य दानासंभवात् स्पर्शो हेतुः

निशीथे तमउद्भूते जायमाने जनार्दने ॥ देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ॥ ८ ॥ आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः ॥ तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदार्युदायुधं ॥ श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीतांबरं सांद्रपयोदसौभगं ॥ ९ ॥ महार्हवैडूर्यकिरीटकुंडलत्विषा परिष्वक्तसहस्रकुंतलं ॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसुदेव ऐक्षत ॥ १० ॥ स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा ॥ कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवां ॥ ११ ॥ अथैनमस्तौदवधार्य पूरुषं परं नतांगः कृतधीः कृतांजलिः ॥ स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् ॥ १२ ॥ वसुदेव उवाच ॥ विदितोऽसि भवान्साक्षात्पुरुषः प्रकृतेः परः ॥ केवलानुभवानंदस्वरूपः सर्वबुद्धिदृक् ॥ १३ ॥ ॥

कृष्णावतारेति ॥ मुदा स्नातो वा आप्लुतः स्नात इति वा ॥ ११ ॥ कृतधीः शुद्धबुद्धिः ॥ १२ ॥ प्रथमं प्रबुद्धाय पश्यन् तापरित्यज्याह ॥ अहो विदितोऽस्मि भवान्प्रकृतेः परः पुरुष इति ॥ ननु किमाश्चर्यं पुरुषस्य प्रकृतेरन्यत्वादेवेति आह साक्षादिति प्रत्यक्षत इत्यर्थः ॥ नन्वक्षिसंनिकर्षप्रत्यक्षत उपलभ्यते किं चित्रमित्यत आह केवलेति ॥ केवला यश्चासावनुभवश्च आनंदश्च तत्रेव स्वरूपं यस्य सः ॥ किं च सर्वबुद्धिदृक् ॥ नत्वेवंभूतो दृश्यो भवतीत्यर्थः ॥ १३ ॥

राम ॥

अन।२

ननु देवकीजठरे प्रविष्टस्य किमियमतिस्तुतिः क्रियते अत आह स एवेति स एव उक्तस्त्वं रूप एव त्वं न देवकीजठरे प्रविष्ट इत्यर्थः ननु विश्वं सृष्ट्वा तद‑
नुप्रविष्टस्य किमेतद् ऊष्म अत आह स्वप्रकृत्येति ॥ स्वमायया सृष्ट्वा तदनु त्वमप्रविष्ट एवेति ॥ ननु तर्हि कथं श्रुत्योच्यते ॥ तत्सृष्ट्वा तदेवानुप्राविशदि‑
ति अत आह प्रविष्ट इवेति ॥ भाव्यसे निरूप्यसे ॥ पृतज्ञतो वा सद्रूपेण प्रविष्ट इव लक्ष्यसे ॥ १४ ॥ अत्र दृष्टान्तः यथेति ॥ इमे अविक्रिता भावा महदादयो

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकं ॥ तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥ १४ ॥ यथेमे विकृता
भावास्तथा ते विकृतैः सह ॥ नानावीर्याः पृथग्भूता विराजं जनयंति हि ॥ १५ ॥ सन्निपत्य समुत्पाद्य दृ‑
श्यंते ऽनुगता इव ॥ प्रागेव विद्यमानत्वान्न तेषामिह संभवः ॥ १६ ॥

यथा तथेति ॥ दृष्टांतविकृतैः षोडशविकारैः सह सन्निपत्य विराजं जनयन्ति ॥ सन्निपतने हेतुः यतः पृथग्भूताः संतो नानावीर्या विशिष्टकार्यसम‑
र्था न भवंति ॥ १५ ॥ अतः सन्निपत्येति ॥ एवं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यन्ते न पुनः प्रविष्टाः कुतः उत्पन्नः प्रागेव कारणतया विद्यमानत्वा‑
न्न तेषामिह सृष्टे कार्ये पश्चात्संभवः प्रवेश इति ॥ १६ ॥

२०पू
११

रार्ष्टीतिकेतिदिशातिएवंभवानिति । नन्वयद्यहमप्रस्तुतत्वन्नूपएवकारणतयाकार्येषुवर्त्तततत् । तर्हिंतेष्विंद्रियैर्गत्यमानेषुममग्रहणंकिंनास्त्वितत्राह
बुद्ध्यनेमेयलक्षणैरिति बुद्ध्यानुपादित्तानेनानुमेयलक्षणं स्वरूपं येषांतैर्गुणैरिंद्रियैर्ग्राह्यैर्गुणैः सहसन्नपिवर्त्तमानोपितद्गुणाग्रहः । तैर्गुणैः स
हनगृह्यते । अयंभावः नहिग्राह्यैः सहभावमात्रंग्रहणेकारणंकिंत्विंद्रियाणांशक्तिः साचकार्यैकसमधिगम्यायथाकार्यमेवकल्पते । अतोयथा
चक्षुषारूपग्रहणेरसादिरूपग्रहणंनास्तितथैवविषयग्रहणेत्वद्ग्रहणमपीति । अविषयत्वेनचग्रहणानर्हत्वमुक्तमेवसर्वबुद्धिदृगित्यत्रएवंतावत्

एवंभवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपितद्गुणाग्रहः । अनावृतत्वाद्बहिरंतरंनतेसर्वस्यसर्वात्मनआत्मवस्तुनः ।१८।

गेवविद्यमानत्वात्प्रवेशोनास्तीत्युक्तंकिंच परिच्छिन्नस्यनीडेपक्ष्यादेरिवप्रवेशोभवेत् । तवत्वनावृतत्वादपरिच्छिन्नत्वेनबहिरंतरभेदोनास्ति । कुतःप्रवेश
इत्याह । अनावृतत्वेहेतुमाह । सर्वस्येति । नहिसर्वस्वरूपस्यअन्यदावरकमस्ति । सर्वात्मनः सत्येवेनावृतोऽन्यस्यात्माभवेत् । आत्मवस्तुनइति । आत्म
नोवस्तुनस्त्वेतिहेतुद्वयं । अतस्मात्तत्पगमेनइत्यस्मात् । अनतिव्याप्तोतीत्यात्मानहिव्यापकस्यावरणंघटेततथावस्तुनः परमार्थस्यवस्तुनः आवरणं
नघटतइत्यर्थः तस्मात्त्वंतर्यामितयाप्रवेशोनसंभवोस्ति । कुतस्तर्हिगर्भप्रवेशः अतः केवलात्तुभवानित्युक्तंस्वरूपएवत्वंविदितोसित्याश्चर्यंममभाग्यमित्यर्थः

राम
१२

नन्वेतदेतत्त्वतस्त्वरूपं न प्रपंचस्यावस्तुत्वे घटेत । नह्यसन्नसद्भवति सत्त्वेन प्रतीतेरित्याशंक्याह । यदिति । आत्मनो दृश्यरूपेषु गुणेषु देहादिषु तद्व्यतिरेकतः आ-
त्मव्यतिरेकेण पृथक् सत्त्वं यं देहादिरिति व्यवस्यते निश्चिनोति यः पुमान् सः अबुधः अविद्वान् व्यतिरेकदर्शनान् । किं च मनीषितं विचारितं तत्
देहादि सर्वं यतः विनानुवादं वाचारंभणमात्रं विना सम्यग्गतं न भवति । अतो अवस्तुत्वेन त्यक्तं बाधितमेव वस्तुबुद्ध्या उपाददत् स्वीकुर्वन् अबुधः इत्यर्थः
॥१८॥ एवं परमेश्वरस्य स्वरूपस्य तद्व्यतिरेकेण सत्त्वमुक्तं । परमेश्वरोपादानत्वात् प्रपंचस्य तद्व्यतिरेकेण सत्त्वमित्याह । त्वत्तोस्येति । न चैवं सत्यपि विकारित्वमित्याह

यस्यात्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः । विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान् ॥१८॥
त्वत्तोस्य जन्मस्थितिसंयमान्विभो वदन्त्यनीहादगुणादविक्रियात् । त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यते गुणैः ॥
स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः । सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये ॥२०॥
त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वर । राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे चमूः ॥

हा अनीहादिति । अगुणत्वादनीहत्वं ततोऽविकारित्वमित्यर्थः । ननु अनीहत्वे कथं कर्तृत्वं कर्तृत्वे वा कुतोऽविकारित्वं तत्राह । त्वयीश्वरे इति ब्रह्मत्वा-
दविकारित्वमीश्वरत्वाच्च कर्तृत्वमिति । ननु तदेतदपि विरुद्धमेव नेत्याह । त्वदाश्रयत्वादिति । गुणैः कुर्वद्भिः त्वयि तद्व्यापारकर्तृत्वमुपचर्यते गुणानामाश्र-
यत्वात् यथा भृत्यकृतं राजनीति ॥१९॥ एवंभूतस्यैव तव यथा विश्वस्थितिसर्गप्रलयार्थं त्रिवर्णगुणावताराः एवमयं भूभारापनयनार्थमिति तत्तान-
मित्याह । स त्वमिति श्लोकद्वयेन ॥२०॥ रिरक्षिषुरिच्छावतीर्णोऽसि क्रमेण वर्णेन । अतः साधूनां रक्षणार्थं राजन्यसंज्ञा ये असुरकोटियूथपास्तैर्निर्व्यूह्यमा-

किं तत्तथाप्यप्रमत्तेन त्वया भाव्यमित्याह ॥ अथैतमिति असभ्यः खलः समर्पितं कथितं ॥२२॥ उपाधावन् अस्तौद्य ॥२३॥ त्वयि भयशंकेवतात्रास्ति ॥ इति श्लोक
चतुष्टयेनाह देवकी ॥ किं विविदित्वात्पविरूपमिति ॥ यत्तत्किमपि रूपं वेदशास्त्राः वेदाः किं तद्इत्यत आह अव्यक्तं ॥ अत्र हेतुः आद्यं कारणं किं परमाणवः न
ब्रह्म बृहत्तं किं प्रधानं न ज्योतिः चेतनं ॥ किं वैशेषिकाणामिव ज्ञानगुणं न निर्गुणं किं मीमांसकानामिव कर्तानं परिणामि न निर्विकारं किं प्रधानकारी
नामिव शक्तिविक्षेपेण परिणामि ॥ न सत्तामात्रं ॥ तर्हि किं सामान्यं न निर्विशेषं ॥ तर्हि किं कारणत्वात्सक्रियं न निरीहं सन्निधानमात्रेण कारणं ॥ स

अथैतमस्मत्तव जन्म नो गृहे श्रुत्वाऽग्रजांस्ते न्यवधीत्सुरेश्वर ॥ स तेऽवतारं पुरुषैः समर्पितं श्रुत्वाऽधुनैवाऽभिसरत्युदा
युधः ॥२२॥ शुक उवाच ॥ अथैनमात्मजं वीक्ष्य महापुरुषलक्षणं ॥ देवकी तमुपाधावत्कंसाद्भीता सुविस्मिता ॥ ॥२३॥
देवक्युवाच ॥ रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्मज्योतिर्निर्गुणं निर्विकारं ॥ सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्वि
ष्णुरध्यात्मदीपः ॥ ॥२४॥ ॥ श्रीरामाय नमः ॥ ॥ श्रीकृष्णाय नमः ॥ ॥ श्रीगोपालाय नमः

वंभूतं किमपि कार्यं कल्पयद्वस्तु स एव साक्षात्त्वं विष्णुरिति ॥ अपरोक्षत्वेत्याह ॥ अध्यात्मदीप इति बुद्ध्यादिकारणसंघातप्रकाशक इत्यर्थः ॥
अथवा अव्यक्तं न केनापि प्रकारेण व्यज्यत इत्यव्यक्तं ॥ कथं तर्हि तावत्त्वं व्यज्यत इत्याह ॥ आद्यं सर्वस्य कार्यस्याद्यं अनादीत्यर्थः ॥ तथा ब्र
ह्मज्योतिर्निर्गुणं निर्विकारमिति चतुर्भिः पदैरंशेन प्रकाशेन च विकारेण च व्यक्तिं निराकरोति ॥ तथा सत्तामात्रमिति विशेषेण निर्वि
शेषमिति सामान्येन निरीहमिति क्रियया च व्यक्तिं निराकरोति ॥ अन्यत्समानं ॥ एवंभूतस्य तव न भयशंकेति भावः ॥२४॥

गुणेनच२

किंच महाप्रलयेप्यः वशित्वमाणाम्यक्ततो भयमित्याह ॥ नष्टे लोक इति ॥ चराचरे लोके महाभूतेषु लीनेषु तेष्वप्यादिभूतं भूतसूक्ष्मं प्रविष्टेषु तस्मिन्न
व्यक्ते अव्यक्तप्रधाने प्राप्ते ॥ अशेषात्मके प्रधाने संज्ञायस्य एवंविधे मयि लीनमिदमस्मिन्पश्चादेवमुद्बोधनीयमिति स अशेषसंज्ञः शेषसंज्ञ इति वा ॥१५
किंच एवं प्रलयहेतुर्योयं कालः एतं हे अव्यक्तबंधो प्रवृत्तिप्रवर्त्तकतस्य प्रलयावधिभूतस्य तेतचेष्टां लीलां ॥ चेष्टते विपरिवर्त्तते ॥ पुनः पुनः वत्स

नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु ॥ व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः ॥१५॥ योयं का
लस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वं ॥ निमेषादिर्वत्सरांतो गरीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥१६॥ मर्त्यो मृत्युव्या
लभीतः पलायन् लोकान्सर्वान्निर्भयं नाध्यगच्छत् ॥ त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ॥१७॥ स त्वं घो
रादुग्रसेनात्मजान्नः पाहि त्रस्तान्भृत्यवित्रासहासि ॥ रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्ठाः ॥१८॥ जन्म ते म स
य्यसौ पापो मा विद्यान्मधुसूदन ॥ समुद्विजे भवद्धेतोः कंसादहमधीरधीः ॥१९॥ उपसंहर विश्वात्मन्नदो रूपमलौकिकं ॥ शंखचक्र

एवं त्वा महीयान्द्विपरार्द्धरूपः यस्य चेष्टामाहुः तं त्वा क्षेमधाम अभयस्थानं प्रपद्ये शरणं भजे ॥१६॥ क्षेमधाम तत्व गदापद्मश्रिया जुष्टं चतुर्भुजं ॥ २
मेवाह ॥ मर्त्य इति लोकान्व्रजति यदृच्छया केनापि भाग्योदयेन हे आद्य ॥१७॥ त्रस्तान्त वित्रासयति ॥ भृत्यानां वित्रासं हंतीति ॥ भृत्यवित्रासहा भृत्यविदिति
वा छेदः ॥ पौरुषं ऐश्वरं ध्यानधिष्ण्यं ध्यानास्पदं मांसदृशां चर्मचक्षुषां प्रत्यक्षं मा स्म कृथाः ॥१८॥ भवत एव हेतोः निमित्ते भूतात्कंसात्समुद्विजे विभेमि ॥ यत
अधीरचित्ता ॥१९॥२०॥

द॰भा॰
१४

कि मित्युपसंहरन्नेव्य ॥ एवंभूतेन मया पुत्रेण न त्वं महतीत्याश्चर्यास्यादिति ॥ तत्राह विश्वमिति निशान्ते प्रलयावसाने यथावकाशं असंकोचतः अस्तमा
वितत्वादुपहास्यमेव स्यादित्यर्थः ॥ ३१ ॥ वसुदेवजन्मरूपेणाविर्भावे कारणं तत्राह ॥ त्वमेवेत्यादि चतुर्दशभिः पूर्वसर्गे प्रथमजन्मनि अभूः आसीः ॥

विश्वं यदेतत्स्वतनौ निशान्ते यथावकाशं पुरुषः परो भवान् ॥ बिभर्ति सोऽयं मम गर्भगोऽभूदहो नृलोकस्य विडंबनं तत् ॥ ३१ ॥
श्रीभगवानुवाच ॥ त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति ॥ तदायं सुतपा नाम प्रजापतिरकल्मषः ॥ ३२ ॥ युवां वै ब्रह्मणादिष्टौ
प्रजासर्गे यदा ततः ॥ सन्नियम्येंद्रियग्रामं तेपाथे परमं तपः ॥ ३३ ॥ वर्षवातातपहिमघर्मकालगुणाननु ॥ सहमानौ श्वासरोधवि-
निर्धूतमनोमलौ ॥ ३४ ॥ शीर्णपर्णानिलाहारावुपशांतेन चेतसा ॥ मत्तः कामानभीप्संतौ मदाराधनमीहतुः ॥ ३५ ॥ एवं वां तप्य-
तोस्तीव्रं तपः परमदुःकरं ॥ दिव्यं वर्षसहस्राणि द्वादशेयुर्मदात्मनोः ॥ ३६ ॥ तदा वां परितुष्टोहममुना वपुषानघे ॥ तपसा श्रद्धया
नित्यं भक्त्या च हृदि भावितः ॥ ३७ ॥ प्रादुरासं वरदराड् युवयोः कामदित्सया ॥ व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥ ३८ ॥ अजुष्टग्रा-

श्निर्नाम स्वायंभुवे मन्वंतरे ॥ अयं वसुदेवः ॥ ३२ ॥ तपाथे तपः कृत- म्यविषयावनपत्यौ च दंपती ॥ न वव्राथेऽपवर्गं मे मोहितौ देवमायया ॥ ३९ ॥
वंतौ तप्यते ॥ ३३ ॥ ३४ ॥ ३५ ॥ आवर्ततोः ईयुः गतानि ॥ मदात्मनोः मच्चित्तयोः ॥ ३६ ॥ अमुना वपुषा प्रादुर्भूतोऽस्मि ॥ वरदराट् वरदेषु श्रेष्ठ इत्यर्थः तेन सत्कारेण च
वारंवारमाविर्भावे कारणमुक्तं ॥ मादृशः मया सदृशः कामस्य दित्सया दातुमिच्छया ॥ ३८ ॥ मे मत्तः विमुक्तामपवर्गं न वव्राथे न हृतवंतौ ॥ ३९

राम
१४

वरं दत्वा समधिगते ॥ ४० ॥ आदित्या कश्यपान्वामन आसेति यदुक्तं तदपि तद्रूपयोरहमेव पुनरासमित्यर्थः ॥ ४१ ॥ २ ॥ प्राक् प्रथमं तावदेतद्रूपं मे जन्मेति स्म-
रणाय यत्तानाय दर्शितमद्य वां मदभिप्रायं अनंतरं त्वदिच्छया वालोऽपि भविष्यामीति भावः ॥ ४४ ॥ ननु त्वयि पुत्रस्नेहेऽपि कथमावयोः पुनः पुनर्जन्मेति
अतः परं न भविष्यतीत्याह युवामिति ॥ ४५ ॥ ६ ॥ यदि कंसाद्बिभेषि तर्हि मां गोकुलं नय यशोदायास्तु कन्यां मन्मायां मामानयेति प्रथममेव भगवता

गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतं ॥ ग्राम्यान्भोगानभुंजाथां युवां प्राप्तमनोरथौ ॥ ४० ॥ अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः
समं ॥ अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ॥ ४१ ॥ तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ॥ उपेंद्र इति विख्यातो वामनत्वा-
च्च वामनः ॥ ४२ ॥ तृतीयेऽस्मिन्भवेऽहं वै तेनैव वपुषाथ वां ॥ जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥ ४३ ॥ एतद्वां दर्शितं रूपं प्राक्-
जन्मस्मरणाय मे ॥ नान्यथा मद्भवं ज्ञानं मर्त्यलिंगेन जायते ॥ ४४ ॥ युवां मां पुत्रभावेन ब्रह्मभावेन वासकृत् ॥ चिंतयंतौ कृतस्ने-
हौ यास्येथे मद्गतिं परां ॥ ४५ ॥ शुक उवाच ॥ इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ॥ पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शि-
शुः ॥ ४६ ॥ ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ॥ यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाऽजनि नंदजा-
यया ॥ ४७ ॥ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ ॥ द्वारश्च सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः

प्रचोदितो वसुदेवो यदा गंतुमैच्छत्तदैव च अजापि या योगमाया सा नंदजायया निमित्तमात्रभूतया अजनि जाता ॥ ४७ ॥ हृताः प्रत्ययोर्थाः सर्ववृत्तयो येषां अथ-
वा हृताः प्रत्यया ज्ञानान्यावृत्तयश्च येषां जाग्रतामपि ॥ तथाभूतेषु द्वारपालेषु सत्सु बृहत्सु कपाटेषु लोहकीलकयुक्तशृंखलैः बृहद्भिः कपाटादिभिर्दुरत्यया

२०पू० त्वयमेवहयशीर्यतविदृताइत्यर्थः व्याडियंतेनिवक्त्वोग्रणशब्दादमः ॥ रवेर्निमित्तान् ॥४९॥ गांभीरोयस्तोयौघः तस्यजवेनयेऊर्मयस्तैः फेनिलाफेनव्याप्ताभया
१५ नकैरावर्त्तैश्चतैर्व्याप्ताविश्रियः पतेः सीतापतेः ॥५०॥ निद्रयाऽञ्जनया ॥५१॥ प्रतिमुच्यवद्धापदोः पादयोः लोहनिगडं आस्ते स्म ॥५२॥ जातकिंचिदितिकेवलमवध्य

ताः कस्मवाहेवसुदेवआगतेत्वयंव्यशीर्यतयथातमोरवेः ॥ ववर्षपर्जन्यउपांशुगर्जितः शेषोऽन्वगाद्वारिनिवारयन्फणैः ॥४९॥
मघोनिवर्षत्यसकृद्यमानुजागंभीरतोयौघजवोर्मिफेनिला ॥ भयानकावर्त्तशताकुलानदीमार्गंददौसिंधुरिवश्रियःपतेः ॥५०॥
नंदव्रजंशौरिरुपेत्यतत्रतान्गोपान्प्रसुप्तानुपलभ्यनिद्रया ॥ सुतंयशोदाशयनेनिधायतत्सुतामुपादायपुनर्गृहानगात् ॥५१॥
देवक्याःशयनेन्यस्यवसुदेवोथदारिकां ॥ प्रतिमुच्यपदोर्लोहमास्तेपूर्ववदावृतः ॥५२॥ यशोदानंदपत्नीचजातंपरमबुध्यत ॥ नत
ल्लिंगंपरिश्रांतानिद्रयापगतस्मृतिः ॥५३॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकृष्णजन्मनितृतीयोऽध्यायः ॥ श्रीशुकउवाच ॥ बहिर
न्तःपुरद्वारःसर्वाःपूर्ववदावृताः ॥ ततोबालध्वनिंश्रुत्वागृहपालाःसमुत्थिताः ॥१॥ तेतुतूर्णमुपव्रज्यदेवक्यागर्भजन्मतत् ॥ आ
चख्युर्भोजराजाययदुद्विग्नःप्रतीक्षते ॥२॥ सतल्पात्तूर्णमुत्थायकालोयमितिविह्वलः ॥ सूतीगृहमगात्तूर्णंप्रस्खलन्मुक्तमूर्द्धजः ॥३॥
तमाहभ्रातरंदेवीकृपणाकरुणंसती ॥ स्नुषेयंतवकल्याणस्त्रियंमाहंतुमर्हसि ॥४॥ बहवोहिंसिताभ्रातःशिशवःपावकोपमाः ॥
त्वयादैवनिसृष्टेनपुत्रिकैकाप्रदीयतां ॥५॥ नन्वहंतेह्यवरजादीनाहतसुताप्रभो ॥ दातुमर्हसिमंदायाअंगेमांचरमांप्रजां ॥६॥

तेनत्वद्गुतः कन्यावेति ॥ योगनिद्रयाचमोहितेति ॥५३॥ इतिदशमेतृतीयः ॥ चतुर्थेचंडिकावाक्यमाकर्ण्यातिभयाकुलः दुर्मंत्रिभिर्हितंमेनेकंसोबालारिहिं राम
१५

दीनदीनवन्नदीनाववि दीनवतनत्रतथाश्त्रस्यान्यत्रनीतत्वात्मावयोगमायेतितानवात् याचितोपिश्राविछिदेश्राकृष्य जग्राह ७ अपोथयन्वलेन विक्षेप ८ सद्यएवदेवीभूत्वा ९ ॥ कृपणानिति अन्यानुशिशून्हनिष्यतीतितान्वारयति पापात्मन्ते मामाकृपणांवृथा अहिंसीः हिंसितवानसि

श्रुक उवाच उपगम्यात्मजामेवंरुदंत्यादीनदीनवत् याचितः स्तांविनिर्भर्त्स्यहस्तादाविछिदेखलः ७ तांगृहीत्वाचरणयोर्जातमात्रांस्वसुःसुतां अपोथयच्छिलापृष्ठेस्वार्थोन्मूलितसौहृदः ८ सातद्धस्तात्समुत्पत्यसद्योदेव्यंबरंगता अदृश्यतानुजाविष्णोःसायुधाष्टमहाभुजा ९ दिव्यस्रगंबरालेपरत्नाभरणभूषिता धनुःशूलेषुचर्मासिशंखचक्रगदाधरा १० सिद्धचारणगंधर्वैरप्सरःकिन्नरोरगैः उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत ११ किंमयाहतयामंदजातःखलुतवांतकृत यत्रक्ववापूर्वशत्रुर्माहिंसीः कृपणान्वृथा १२ इतिप्रभाष्यतंदेवीमायाभगवतीभुवि बहुनामनिकेतेषुबहुनामाबभूवह १३ तयाभिहितमाकर्ण्यकंसःपरमविस्मितः देवकीवसुदेवंचविमुच्यप्रश्रितोब्रवीत १४ अहोभगिन्यहोभाममयावांवतपाप्मना पुरुषादइवापत्यंबहवोहिंसिताःसुताः १५ सत्वहंत्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः कान्लोकान्वैगमिष्यामिब्रह्महेवमृतःश्वसन् १६ दैवमप्यनृतंवक्तिनमर्त्याएवकेवलं यद्विश्रंभादहंपापःस्वसुर्निहतवान्शिशून् १७ माशोचतंमहाभागौह्यात्मजान्स्वकृतंभुजः जंतवोनसदैकत्रदैवा

ति ।१२ बहुनामनिकेतेषुवाणास्यादिस्थानेषु ।१३ परमविस्मितःकथंदेवीवागनृताजातेति ।१४ भामभगिनीभर्तृःपुरुषादोराक्षसोयथा धीनाःसहासते ।५
स्तापत्यमेवहिनिहितद्धन् ।१५ ।१६ ।१७ हेमहाभागौ स्वकृतंभुजः स्वारब्धकर्मभोक्तृन्किंचजंतवःप्राणिनःसदानासते किंतुअल्पकालमेवनसापिएकत्रनासते

२०.५
१६

सदानात्मत इत्यनेन यदुक्तं जन्ममरणादि तदपि देहानामेव नात्मन इत्याह ॥ भुवीति भूतानि देहा एव यांति अपयांति भवंति नश्यंति चेत्यर्थः ॥ यथा भुवि भौमानि घटादीनि तद्वत् ॥ एतेषु भूतेषु जन्मादिभिर्विक्रियमाणेष्वयमपरोक्षतया प्रत्यभिज्ञायमानो न विपर्येति विपर्ययं न प्राप्नोति एकरूप एव वर्त्तत इत्यर्थः ॥ भौमेषु विक्रियमाणेष्वपि यथा भूस्तथेति ॥ १९ ॥ एवं विचार्यमाणे सति न शोकाद्यवकाशः अज्ञानात्तु न निवर्त्तत इत्याह ॥ यथेति ॥ यथा यथावत् अनेवंविदः एवमजानतः आत्मविपर्ययः देहात्मबुद्धिर्भवति यतो विपर्ययाद्भेदो भवति देहाहंकारेणात्यात्मनि परिच्छिन्ने सति इदं कार्यमिदं भिन्नं भवति ॥ यतो भेदात्पुत्रादिदेहैर्योगश्च वियोगश्च ॥ ततः संसृतिः सुखदुःखे इति यावत् तत्तानेन न निवर्त्तत इत्यर्थः ॥ २० ॥ एवमुक्तप्रकारेण न तत्त्वतः मृताः अहं तु तान्नेद्घातितवान् ॥ तथाप्यज्ञानदृष्ट्या

भुवि भौमानि भूतानि यथा यांत्यपयांति च ॥ नायमात्मा तथैतेषु विपर्येति यथैव भूः ॥ १९ ॥ यथानेवंविदो भेदो यत आत्मविपर्ययः ॥ देहयोगवियोगौ च संसृतिर्न निवर्त्तते ॥ २० ॥ तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि ॥ मानुशोच यतः सर्वः स्वकृतं विंदतेऽवशः ॥ २१ ॥ यावद्भृतोऽस्मि हर्तास्मीत्यात्मानं मन्यते स्वदृक् ॥ तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥ २२ ॥ क्षमध्वं मम दौरात्म्यं साधवो दीनवत्सलाः ॥ इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् ॥ २३ ॥ य

स्वतनयान्मया व्यापादितानपि मानुशोचेति सांत्वयति ॥ तस्मादिति ॥ अज्ञानाश्रयमेव कर्मवादमाह ॥ यत इति ॥ २१ ॥ कथं तर्हि ब्राह्मणादिहंतुः तद्दोषश्च प्रायश्चित्त श्रवणं ॥ अज्ञानमूलमेवेत्याह ॥ यावदिति ॥ अस्वदृक् देहाभिमानी तदभिमानी तितत्सदेहस्य हननमात्मनि अभिमन्यमान इत्यर्थः ॥ २२ ॥ श्यालः कंसः स्वस्रोरिति स्वसृशब्देन द्विवचनात्तूपपन्नामिथुनगणाद्वा सामिथुरेल्लक्षणया स्वसृतत्पत्योरभिधानं लिंगसमवायेन प्राणभृत उपदधतीतिवत् ॥ देवकीवसुदेवयोः प्रत्येकं पादमग्रहीदित्यर्थः श्यालशब्देनवाकथं विद्रदुहेवाभिधानं ॥ २३ ॥ १६

आत्मसौहृदं प्रियवादादिना दर्शयन् ॥ १४ ॥ ५ ॥ ६ ॥ स्वपरभेददर्शने किं भवति तदाह ॥ शोकहर्षेति भावैरेव निमित्तभूतैर्मिथो भावान् घ्नन्तं भावमीश्वरं पृथक्
दृशस्तेन पश्यन्ति किं त्वहमेव हन्ता हतस्त्वेति मन्यन्त इत्यर्थः ॥ १७ ॥ विशुद्धं यथा भवति ॥ १८ ॥ १९ ॥ नातिकोविदाः दृष्टमात्रमतयः ॥ २० ॥ न निर्गता निर्दशा दि

मोचयामास निगडाद्विश्रब्धः कन्यकागिरा ॥ देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं ॥ १४ ॥ भ्रातुः समनुतप्तस्य क्षान्तरोषा च देवकी
व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह ॥ १५ ॥ एवमेतन्महाभाग यथा वदसि देहिनां ॥ अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः ॥ १६ ॥ शोक
हर्षभयद्वेषलोभमोहमदान्विताः ॥ मिथो घ्नन्तं न पश्यन्ति भावैर्भावं पृथग्दृशः ॥ १७ ॥ कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः ॥ देवकी
वसुदेवाभ्यामनुज्ञातोऽविशद्गृहं ॥ १८ ॥ श्रीशुक उवाच ॥ तस्यां रात्र्यां व्यतीतायां कंस आहूय मन्त्रिणः ॥ तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनि
द्रया ॥ १९ ॥ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः ॥ देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः ॥ २० ॥ एवं चेत्तर्हि भोजेन्द्र पुरग्रामव्रजा
दिषु ॥ अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ॥ २१ ॥ किमुद्यमैः करिष्यन्ति देवाः समरभीरवः ॥ नित्यमुद्विग्नमनसो ज्याघोषैर्धनु
षस्तव ॥ २२ ॥ अस्यतस्ते शरव्रातैर्हन्यमानाः समन्ततः ॥ जिजीविषव उत्सृज्य पलायनपरा ययुः ॥ २३ ॥ केचित्प्राञ्जलयो दीना न्यस्तश
स्त्रा दिवौकसः ॥ मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ॥ २४ ॥ न त्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसंवृतान् ॥ हंस्यन्यासक्तविम

नानि येषां तान् अन्यांस्तु ॥ २१ ॥ २ ॥ अस्यतः विध्यतः सतः उत्सृज्य रणं त्यक्त्वा ॥ २३ ॥ ४ ॥ अन्यासक्तान् विमुखांश्चेति न हंसि न हिनस्सि ॥ २५ ॥ खान्भग्नचापानयुध्यतः ॥ २५ ॥

२०प्र.
१७

क्षेमेति निर्भयदेशे शूरैः संयुगादन्यत्र विकत्थनं श्लाघा येषां तैः ननु हरेर्बिभेमि शंभोश्चेति तत्राह रहोजुषेति सर्वभूतानामन्तः प्रविष्टेन न क्वचिदपि बहिर्दृष्टेनेत्यर्थः पुरुषप्रवेशरहितनिलावृतवनमोको यस्य तेन शंभुना ३६ यद्यप्युपमर्दे देवानां किंचिदपि कर्त्तुमसमर्थास्तथापि नीतिरस्तु मत्रेत्यभिप्रेत्याह तथा

किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः रहोजुषा किं हरिणा शंभुना वा वनौकसा ३६ किमिन्द्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता त थापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ततस्तन्मूलखनने नियुंक्ष्वास्माननुव्रतान् ३७ यथामयोङ्गे समुपेक्षितो नृभिर्न शक्य ते रूढपदश्चिकित्सितुं यथेन्द्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते ३८ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः ३९ तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः तपस्विनो यज्ञशीलान्गाश्च ह न्मो हविर्दुघाः ४० विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ४१ स हि सर्वसुराध्यक्षो ह्यसुरद्विड्गुहाशयः तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः अयं वै तद्वधोपायो यदृषीणां विहिंसनं ४२ एवं दुर्मंत्रिभिः कंस सह संमंत्र्य दुर्मतिः ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः ४३ संदिश्य साधुलोकस्य कदने कदनप्रियान् कामरूपधरान्दि क्षु दानवान्गृहमाविशत् ४४ ते वै रजःप्रकृतयस्तमसा मूढचेतसः सतां विद्वेषमाचेरुरारादागतमृत्यवः ४५

यीति ३७ रूढपदः बद्धमूलः ३८ देवानां मूलं विष्णुः सर्वयज्ञधर्मः तत्रास्ते धर्मस्य मूलं वेदादय इति ३९ १ किंच विप्रादयो हरेरेव तनवोऽस्मादयमेवोपायः इत्याह अयमिति ४२ ४ आरात्समीपमागता मृत्युर्येषां ४५ [illegible]

रास
१७

पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवं गत्वाथ मथुरां प्राप्य वसुदेवागमोत्सवं ॥ महामनाः उदारचित्तः १ सता विद्वेषेण मृत्युमात्रहेतुः किं तद्वक्ष्यन्नर्थ
कारीत्याह आयुः श्रियमिति इति २ ॥ ॥ निगुते द्वे लक्षे सप्त तिलपर्वतांस्तथा रत्नौघैः शातकौम्भाम्बरैः रत्नसमूहैः शातकौम्भं सुवर्णं तैः रावै
आवृतान् ३ द्रव्याणां गो हिरण्यादीनां तन्मध्ये केषांचित्तद्दानेन केषांचित्तथा दानादिभिः जातकर्मादिसंस्कारैः स्वार्थेन शुद्धिरिति दर्शयितुं प्रतिनियता
निशोधकानि दृष्टांतत्वेनोदाहरति कालेनेति कालेन भूम्यादि स्नानेन देहादि शौचेन नामेध्यलिप्तादि संस्कारेण भोदितपसाइंद्रियादि इज्यया ब्राह्मणादि

आयुः श्रियं यशो धर्मं लोकानाशिषमेव च हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्थोऽध्यायः ॥ ४ ॥ शु
कउवाच ॥ नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः आहूय विप्रान्वेदज्ञान्स्नातः शुचिरलंकृतः ॥ १ ॥ वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै
कारयामास विधिवत्पितृदेवार्चनं तथा ॥ २ ॥ धेनूनां नियुते प्रादाद्विप्रेभ्यः समलंकृते ॥ तिलाद्रीन्सप्त रत्नौघशातकौंभांबरावृतान् ॥ ३ ॥ काले
न स्नानशौचाभ्यां संस्कारैस्तपसेज्यया ॥ शुध्यंति दानैः संतुष्ट्या द्रव्याण्यात्मात्मविद्यया ॥ ४ ॥ सौमंगल्यगिरो विप्राः सूतमागधवंदिनः गायका
श्च जगुर्नेदुर्भेर्यो दुंदुभयो मुहुः ॥ ५ ॥ व्रजः संमृष्टसंसिक्तद्वाराजिरगृहांतरः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ॥ ६ ॥ गावो वृषा वत्सतरा हरि
द्रातैलरूषिताः ॥ विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ॥ ७ ॥

नेंद्रियाणि संतुष्ट्या मन आत्मा आत्मविद्ययेति ४ सौमंगल्यगिरः स्वस्तिवाचकाविप्रा
यो वभूवुः न च सूताः पौराणिकाः प्रोक्ता मागधाः वंशशंसकाः वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ५ संमृष्टानि संसिक्तानि च द्वाराणि आजिराणि अंगनानि
गृहांतराणि गृहमध्यानि च यस्मिन् सतथा चित्रध्वजेषु पताकानां स्रजश्चैलपल्लवतोरणानि च तैः भूषितः ६ हरिद्रातैलरूषितालिप्ताः विचित्रा धातवश्च व

न॥ श्लाकल्पास्त्वलंकाराः ॥ ९ ॥ नवकुंकुमकिंजल्कैर्मुखपंकजेषु भूतिः श्रीर्यासां ता ॥ १० ॥ स्तनस्थानि उज्ज्वलितानि मणिमयानि कुंडलानि यासां निष्काः पदका
निकंठे यासां ताः शबलाः शबशिखाः प्रसूनानि माल्यवर्षाणि यासां ताः ॥ ११ ॥ नंदालयं व्रजंतीः ॥ व्रजंत्यः पथि विरेजुः सवलयाः कंकणभूषिताः व्यालोलैः

महार्हैर्वस्त्राभरणैः कंचुकोष्णीषभूषिताः ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥ ८ ॥ गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतो
द्भवं ॥ आत्मानं भूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ॥ ९ ॥ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलिभिस्त्वरितं जग्मुः पृथुश्रोणय
श्चलत्कुचाः ॥ १० ॥ गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः ॥ नंदालयं सवलया व्रजतीर्विरेजु
र्व्यालोलकुंडलपयोधरहारशोभाः ॥ ११ ॥ ता आशिषः प्रयुंजानाश्चिरं पाहीति बालके ॥ हरिद्राचूर्णतैलाद्भिः सिंचंत्योजनमुज्जगुः ॥ १२
अवाद्यंत विचित्राणि वादित्राणि महोत्सवे ॥ कृष्णे विश्वेश्वरेऽनंते नंदस्य व्रजमागते ॥ १३ ॥ गोपाः परस्परं हृष्टा दधिक्षीरघृतांबुभिः
आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः ॥ १४ ॥ नंदो महामनास्तेभ्यो वासोऽलंकारगोधनं ॥ सूतमागधवंदिभ्यो येऽन्ये विद्योपजी
विनः ॥ १५ ॥ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् ॥ विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥ १६ ॥ रोहिणी च महाभागा नंदगोपाभि
नंदिता ॥ व्यचरद्दिव्यवासःस्रक्कंठाभरणभूषिता ॥ १७ ॥ तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप
॥ १८ ॥ गोपान् गोकुलरक्षायां निरूप्य मथुरां गतः ॥ नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥ १९ ॥

कुंडलादिभिः शोभा यासां ताः ॥ ११ ॥ जनं सिंचंत्यः अजनमुज्जगुरिति वा ॥ १२ ॥ १४ ॥ तेभ्यः द्वारान् ॥ १५ ॥ यथोचितमन्यानपि अपूजयत् ॥ १६ ॥ १७ ॥ हरेर्निवासेन ये आत्मनि गुणास्तै
रमाया आक्रीडं विहारस्थानं ॥ १८ ॥ वार्षिक्यं प्रतिवर्षं देयं ॥ १९ ॥

भ्रातरं सखायं तं दवमोचनं तं स्मरन्नितिष्ठ्यानं ॥ ९ ॥ २ ॥ उत्तरार्धं वः पुनर्जात इव ॥ नत्वेहेह गर्भविशेषणं समारब्धके वर्त्तमान इति ॥ १४ ॥ दुर्लभत्वमेवाह ॥ नैकत्वे
तित्रियस्यासोमं वा सस्त्रिप्रियमेव सः हे प्रियेति वा ॥ भ्रातृसंज्ञाद्येन नीयमानानां प्रवंतीति स वाः तत्र एकाश्रयत्वे प्रायश्च एकत्र स्थितिर्नास्तीत्युक्त
कश्चिदितिपदव्याहितं रूपेतस्मिन्नित्वेनेनिर्दिष्टगोपयोरध्यारोपप्रभृतगोपिकात्वेत्यादिनाउवत्रे समविवरूयाश्रुति ॥ प्रसन्नधीः स्वात्मजयोरित्युक्तत्वात् ॥ १६

वसुदेवं उपसृत्य भ्रातरं नंदमागतं ॥ ज्ञात्वा राज्ञे करं दत्तं ययौ तं दवमोचनं ॥ १० ॥ नंदं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतं ॥ प्रीतः प्रीयतमं
दोर्भ्यां सस्वजे प्रेमविह्वलं ॥ ११ ॥ पूजितः सुखमासीनः पृष्ट्वानामयमादृतः ॥ प्रसक्तधीः स्वात्मजयोरिदमाह विशांपते ॥ १२ ॥ दिष्ट्या भ्रा
तः प्रवयस इदानीमप्रजस्य ते ॥ प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत ॥ १३ ॥ दिष्ट्या संसारचक्रेस्मिन् वर्त्तमानः पुनर्भवः ॥ उपलब्धो भ
वानद्य दुर्लभं प्रियदर्शनं ॥ १४ ॥ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणां ॥ ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ॥ १५ ॥ कच्चित्प
शव्यं निरुजं भूर्यंबुतृणवीरुधं ॥ बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥ १६ ॥ भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे ॥ तातं भवंतं मत्वा
नो भवद्भ्यामुपलालितः ॥ १७ ॥ पुंसस्त्रिवर्गो विहितः सुहृदोह्यनुभावितः ॥ न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते ॥ १८ ॥ नंद उ
वाच ॥ अहो ते देवकीपुत्राः कंसेन बहवो हताः ॥ एकावशिष्टावरजा कन्या सापि दिवं गता ॥ १९ ॥

भवद्भ्यामुपलालितः सन् कच्चिद्वर्त्तत इति शेषः ॥ १७ ॥ उत्तरार्धं दर्शनस्नेहेनाह ॥ पुंस इति सुहृदो बंधून् प्रत्यनुभाविता संपादितो यः त्रिवर्गः सहि पुंसो विहितः
उक्तः शास्त्रेण वा प्रोक्तः न तु स्वमात्रपर्यवसितः ॥ अत एतेषु क्लिश्यमानेषु स सुखायन भवतीत्यर्थः ॥ १८ ॥ नंदो वसुदेवं सांत्वयन्नाह ॥ अहो त इति ॥ १९ ॥ ॥

२०.पू
१८

अदृष्ट एव निष्ठा समाप्तिर्यस्य सः॥ यदेवकुमारि[illegible]स्व परं अदृष्टं हीयते तेन देवते कृतादर्यो न भवतीत्यर्थः॥ अदृष्टपरमः तथा अदृष्टमेव परमं यस्य सः यद्वा
विकुमारस्योविकुमारस्तथापि तानदृष्टमेव जनः संगमयतीत्यर्थः॥ एवमदृष्टमात्मनस्तत्त्वमव्यभिचारिकारणं सुखदुःखयोर्यो वेद न स मुह्यतीति॥ तस्मा
द्दिष्टानीत्वया न दुःखं भावनीयं मृतानामपि विप्रयुक्तानामपि च कालान्तरे दर्शनयोगयोः सम्भवात्॥ अस्मदादिभिरपि कालान्तरे तद्वियोगमत्यपीति॥ नं
दस्य दैवी वागेषा भाविस्तचिकं॥ ३०॥ नोदुधा वसुदेवोऽडुः स्वं त्वक्तानन्दमाह॥ करो वै इति॥ कंसोपाभिः॥ ३१॥ इति दशमे पञ्चमः॥ षष्ठे स्तन्येन गिरिणा नन्दो व्रजं ग

नूनं त्वदृष्टनिष्ठोयमदृष्टपरमो जनः॥ अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति॥ ३०॥ वसुदेव उवाच॥ करो वै वार्षिको दत्तो राज्ञो दृष्टा वयं
वः॥ नेह स्थेयं बहुतिथं सन्त्युत्पाताश्च गोकुले॥ ३१॥ इति नन्दादयो गोपाः प्रोक्तास्ते शौरिणा ययुः॥ अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य
गोकुले॥ ३२॥ इति श्रीभागवते महापुराणे दशमस्कन्धे नन्दवसुदेवसंगमो नाम पञ्चमोऽध्यायः॥ श्रीशुक उवाच॥ नन्दः पथि वचः शौरेर्न
मृषेति विचिन्तयन्॥ हरिं जगाम शरणमुत्पातागमशङ्कितः॥ १॥ कंसेन प्रहिता घोरा पूतना बालघातिनी॥ शिशूंश्चचार निघ्नन्ती पुरग्रा
मव्रजादिषु॥ २॥ न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु॥ कुर्वन्ति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि॥ ३॥ सा खेचर्येकदोत्पत्य पूतना

नन्दगोकुलम्॥ योषित्वा माययात्मानं प्राविशत्कामचारिणी॥

शून्यकृतं पथि॥ हत्यात्तराजधीनस्य पृत्युश्रुत्वा च विस्मितः॥ १॥ २॥ कृष्णविषयेशंकमानं राज्ञानं प्रति विषये प्रवृत्तासैव मरिष्यतीति सूचयत्राह॥ न यत्रेति॥ यत्र श्रीकृष्णस्य श्रवणादीनि न सन्ति॥ न चैवं तासां शक्तिः सा कृष्णान्तिके वसतिका
शंकेति भावः॥ ३॥ योषित्वा योषितो वरां नारीमिव आत्मानं विधाय॥ ननु निर्लज्जा निर्विशंका सती कथं परमपि निप्रविष्टा अतआह॥ कामचारिणीति॥ नहि

श्री॥ भागवतटीका

दम
१८

तां वनितां पतिं दृष्ट्वा भागतां अतिरूपवतीं श्रियमिव ॥ गोप्योः संपतंते स्मेरं स्लोकेनान्वयः श्रीमाम्पार्थानि विशेषणानि केशवधूपतिपन्नमल्लिकांधम्मिल
संलमकामल्लिकाहे मां रूहतानिं ते वेन स्तनाभ्यां च उभयत आक्रांतमिव कृशं कृशमध्यमध्य उदरं यस्याः तां ॥ रुचा भासमानं समणीयेवा समीपस्यास्तां कंपित
योः कर्णभूषणयोः क्षिपा उद्भासमाडिः कुंतलैर्मण्डितमाननं यस्याः तां ॥ प ॥ वल्गु स्मितापांगविसर्गवीक्षितैः वल्गुरस्मिं स्मितं येषु तैस्तथाभूतास्त्र पांगवि
सर्गा येषु तैर्व्रजौकसां मनोहरंती अतो गोपा दृप्तमनसस्ते ॥ तेन निवारितं वेत न इति सुन्नं भवति ॥ गोप्यस्त्रियमिव मत्वा तृष्णीं आसन् अतः ॥ केनापि

तां केशवंधम्मतिपन्नमल्लिकां बृहन्नितंबस्तनकृच्छ्रमध्यमां ॥ सुवासंसंकंपितकर्णभूषणत्विषोल्लसत्कुंतलभूषिताननां ॥ प ॥
वल्गुस्मितापांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसां ॥ अमंसतां भोजकरेण रूपिणीं ॥ गोप्यः स्त्रियं दृष्ट्वमिवाग
बाल तां पतिं ॥ ६ ॥ यद्बालकत्रविविचिन्वती शिशुं यदृच्छया नंदगृहे असदंतकं ॥ बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पे अग्निमि
वाहितं भसि ॥ ७ ॥ विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः ॥ अनंतमारोपयदंकमंतकं यथोरगं नि

निवारितात्मतीव्रविवेशेति भावः ॥ ६ ॥ बालग्रहः पूतना असदंतकं बालं ददर्श असतामंतकं दृष्ट्वा कथं न बिभेति तत्रा सुप्तमप्युद्धिरज्ज्वधीः ॥
प्रतिच्छन्ननिजोरुतेजसं बालनाट्येन प्रतिच्छन्नं तिरोहितं निजं उरुतेजो येन तं कमिव ॥ भस्मिभस्मन्याहितमग्निमिवेति ॥ ७ ॥ चराचरात्मत्वा देवतां वि
बुध्य निमीलितेक्षणः आसत्सवयमनंतं दुष्टानां अंतकं सः कमारोपयत् ॥ बालमत्वा यथोरगं सुप्तमप्युद्धिरज्ज्वा धीश्वराः अतानंतोरक्षु
बुध्यायथारज्ज्ञातितद्वदिति ॥ ८ ॥

२.१.
१०

नन्वयशोदारोहिणीरूपेण तां कथं न्यवारयतां तत्राह तामिति ॥ वामं वल्गु जनन्याः इव वेषितं यस्यास्तां वराख्रियं वसहहैसेव ॥ अंतरगृहमध्ये वीक्ष्य तेतिष्ठापेवहि मर्दैवेवदृष्टांतः कोशपरिच्छदासिवत् ॥ मृदुविचित्रचर्ममयः कोशपरिच्छदः आवरणं यस्य तत्र सेः खड्गस्य तद्वत् ॥ तत्प्रभयावधर्षिते अभिभूते अहमस्य जननी इयं चेति मोहिते च सत्यौ जननीजनन्यौ निरीक्षमाणे एव केवलमतिष्ठतां न तु निवारितवत्यौ ॥ ९ ॥ तस्मिन् स्थाने दुर्जरं

तां तीक्ष्णचित्तामथ वामवेष्टितां वीक्ष्यांतरा कोशपरिच्छदासिवत् ॥ वरस्त्रियं तत्प्रभया च धर्षिते निरीक्षमाणे जननी ह्यतिष्ठतां ॥ ९ ॥
तस्मिन् स्तनं दुर्जरवीर्यमुल्बणं घोरांकमादाय शिशोर्ददावथ ॥ गाढं कराभ्यां भगवान् प्रपीड्य तत्प्राणैः समं रोषसमन्वितोऽपिबत् ॥ १० ॥
सा मुंच मुंचालमिति प्रभाषिणी निपीड्यमानाऽखिलजीवमर्मणि ॥ विवृत्य नेत्रे चरणौ भुजौ मुहुः प्रस्विन्नगात्रा क्षिपती रुरोद ह ॥ ११ ॥
तस्याः स्वनेनातिगभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा ॥ रसा दिशश्च प्रतिनेदिरे जनाः पेतुः क्षितौ वज्रनिपातशंकया ॥ १२ ॥
निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि ॥ प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप ॥ १३ ॥
पतमानोऽपि तद्देहस्त्रिगव्यूत्यंतरद्रुमान् ॥ चूर्णयामास राजेन्द्र महदासीत्तदद्भुतं ॥ १४ ॥

वीर्यं विषं यस्मिन् तत् स्तनं तं घोरं कृत्स्नं अंकमादाय तस्मै शिशवे ददौ ॥ अनंतरमेव प्रपीड्य केवलं विषमपथ्यमिति मन्युवतस्याः प्राणैः सहापिबत् ॥ १० ॥ चरणौ भुजौ च मुहुर्मुहुः क्षिपती निक्षिपंती निखिन्नानि स्वेदयुक्तानि गात्राणि यस्याः सा ॥ ११ ॥ रसाः रसातलानि च ॥ १२ ॥ व्यादाय मुखं विवृत्य निजरूपमास्थिता मरणसमये एव परमयुक्तमिति नीव ॥ १३ ॥ पतन्नपि तस्या देहः षट्क्रोशमध्यवर्तिनो द्रुमान् चूर्णीचकार ॥ १४ ॥

राम
१०

ईषामात्रोग्रदंष्ट्रास्यं ईषा लांगलदंडः ॥ तत्प्रमाणा उग्रा दंष्ट्रा यस्मिन् तत् तथाभूतमास्यं यस्मिन् तत् तस्याः कलेवरं वीक्ष्य गोपा गोप्यश्च संतत्रसुः सद्यास्सहेतुत्वेन पुनरष्टभिः पदैर्विशिनष्टि गिरिकंदरवन्नासिके यस्मिन् तत् तद्गिरेः च्युतौ स्थूलोपलौ ताविव स्तनौ यस्मिन् तत् ॥ रौद्रं घोरं ॥ प्रकीर्णान्यरुणानि मूर्धजा यस्मिन् तत् ॥१५॥ अंधकूपवद्गंभीरे अक्षिणी यस्मिन् तत् पुलिनवदारोहो जघनं तेन भीषणं ॥ सेतुवद्वक्षोभुजोरुअंघ्रयो यस्मिन् तत् शून्यतोयह्रदवदुदरं यस्मिन् तत् तदिति ॥१६॥ पूर्वमेव तस्याः शब्देन भीताः पुनर्दर्शनेनातित्रस्ता इत्याह ॥ पूर्वं त्विति तस्या निःस्वनितं शब्दः तेन निर्भिन्नानि हृत्कर्णमस्तकानि

ईषामात्रोग्रदंष्ट्रास्यं गिरिकंदरनासिकं ॥ गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजं ॥१५॥ अंधकूपगभीराक्षं पुलिनारोहभीषणं ॥ वक्षःसेतुभुजोर्वंघ्रिशून्यतोयह्रदोदरं ॥१६॥ संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरं ॥ पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः ॥१७॥ बालं च तस्या उरसि क्रीडंतमकुतोभयं ॥ गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः ॥१८॥ यशोदारोहिणीभ्यां ताः समं बालस्य सर्वतः ॥ रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः ॥१९॥ गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकं ॥ रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः ॥२०॥ गोप्यः संस्पृष्टसलिला अंगेषु करयोः पृथक् ॥ न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत ॥२१॥ अव्यादजोंघ्रि मणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः ॥ हृत्केशवस्त्वदुर ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं ॥२२॥

येषां ते ॥१७॥१८॥१९॥ द्वादशांगेषु ललाटादिषु केशवादिद्वादशनामभिः ॥२०॥ अनावाता एव प्रथमं मतिसंभ्रमेणैवं रक्षां कृत्वा किंचिद्विस्वस्थास्वस्थाः पुनस्तात्पर्येण बीजन्यासमकुर्वतेत्याह ॥ संस्पृष्टसलिलाः आचांताः ॥ आत्मनि प्रथमं अंगेषु करयोः पृथक् अजाद्येकादशबीजानां मध्ये करसंबद्धौ द्वौ त्रीणि करयोः संधिषु चत्वारि चत्वारि तथा अंगुष्ठादावेकस्मिन्नंगे अजाद्येकैकं बीजं न्यस्य बालस्याप्यंगेषु तथैवाकुर्वत ॥२१॥ अव्यादजोंघ्रि अजो जननीजोज

रा

१०.१ तथारिरक्षां रक्षामकुर्वन्नित्याह ॥ चक्र्यग्रत इति ॥ चक्रसहितो हरिरस्त्वग्रतोऽस्तु ॥ सहगदेगदासहितो हरिः तव पश्चादस्तु त्वत्पार्श्वयोर्धनुरसी धनुर्द्धरो मधुहा
११ असिधरः अजनश्च समंततः शंखधरउरुगायः कोणेषु क्षितौ अधस्तात् ॥ ३ ॥ एवं बहिरक्षां कृत्वा अंतरंगां रक्षां कुर्वन्नित्याह ॥ इंद्रियाणीति ॥ ४ ॥ आत्मानमह-

धु चक्र्यग्रतः सहगदो हरिरस्तु पश्चात् त्वत्पार्श्वयोर्धनुरसी मधुहाजनश्च ॥ कोणेषु शंख उरुगाय उपर्युपेंद्रः तार्क्ष्यः क्षितौ हलधरः पु-
रुषः समंतात् ॥ २३ ॥ इंद्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु ॥ श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु ॥ २४ ॥ पृश्निगर्भस्तु ते बुद्धि-
मात्मानं भगवान्परः ॥ क्रीडंतं पातु गोविंदः शयानं पातु माधवः ॥ २५ ॥ व्रजंतमव्याद्वैकुंठ आसीनं त्वां श्रियः पतिः ॥ भुंजानं यज्ञ-
भुक्पातु सर्वग्रहभयंकरः ॥ २६ ॥ डाकिन्यो यातुधान्यश्च कुष्मांडा येऽर्भकग्रहाः ॥ भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ २७
कोटरा रेवती ज्येष्ठा पूतना मातृकादयः ॥ उन्मादा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः ॥ २८ ॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये
सर्वे नश्यंतु ते विष्णोर्नामग्रहणभीरवः ॥ २९ ॥ इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणं ॥ पाययित्वा स्तनं माता संन्यवेशयदात्मजं
तावन्नंदादयो गोपा मथुराया व्रजं गताः ॥ विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ॥ ३१ ॥ नूनं बतर्षिः संजातो योगेशो वा समास सः
स एव दृष्टो ह्युत्पातो यदाहानकदुंदुभिः ॥ ३२ ॥ कलेवरं परशुभिः छित्वा तत्ते व्रजौकसः ॥ दूरे क्षिप्त्वावयवशो न्यदहन्काष्ठधि-
ष्ठितं ॥ ३३ ॥ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः ॥ उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३४ ॥

हंकारः ॥ ५ ॥ ९ ॥ संन्यवेशयत् शाययामास ॥ विस्मयमेवाह ॥ नूनमिति बत विस्मये सांप्रतं स ऋषिस्तपः प्रभाववान् योगेशो ज्ञानी वा सम्यगास ॥ यतः स एव दृ-
ष्ट इति ॥ ३२ ॥ ३३ ॥ विस्मयांतरमाह ॥ दह्यमानस्येति कृष्णेन निर्भुक्तः अत एव सपद्याहतः पाप्मा यस्याः ॥ ३४ ॥

राम
११

सर्वंगात्रे कैमुत्यन्यायेन भक्तिवैभवमाह ॥ पूतनेति ॥ श्रद्धयास्तिक्येन भक्त्या प्रेम्णा रक्ताः स्निग्धाः तन्मातर इति वत्साहरणलीलायामपि प्रायेणैव बहूनां च

पूतना लोकबालघ्नी राक्षसी रुधिराशना ॥ जिघांसयापि हरये स्तनं दत्त्वाप सद्गतिं ॥ ३५ ॥ किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने ॥ यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ॥ ३६ ॥ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोकवंदितैः ॥ अंगं यस्याः समाक्रम्य भगवानपिबत्स्तनं ॥ ३७ ॥ यातुधान्यपि सा स्वर्गमवाप जननीगतिं ॥ कृष्णभुक्तस्तनक्षीराः किमु गावोनुमातरः ॥ ३८ ॥ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलं ॥ भगवान्देवकीपुत्रः कैवल्याद्यखिलप्रदः ॥ ३९ ॥ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणं ॥ न पुनः कल्पते राजन्संसारोऽज्ञानसंभवः ॥ ४० ॥ कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः ॥ किमिदं कुत एवेति वदंतो व्रजमाययुः ॥ ४१ ॥ ते तत्र वर्णितं गोपैः पूतनागमनादिकं ॥ श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ॥ ४२ ॥ नंदः स्वपुत्रमादाय प्रेत्यागतमुदारधीः ॥ मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ॥ ४३ ॥ य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भुतं ॥ निशम्य श्रद्धया मर्त्यो गोविंदे लभते रतिं ॥ ४४ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूतनामोक्षो नाम षष्ठोऽध्यायः ॥ ६ ॥

नं गोगोपिवत्सरूपा मातरो भवन्निति ॥ ३६ ॥ ४३ ॥ एतत्पूतनामोक्षणं आर्भकं आर्भचरितं किं तत्पूतनामोक्ष इति ॥ ४४ ॥ अद्वन्द्वैरेतत्षड्कालानीशः पूतनायाः शिशु-
छलात्स्तन्यापोषणान्ततः प्राणैः प्राणाद् इति भक्त्यायेजे ॥ ४४ ॥ दशमे षष्ठः ॥

१०.पु.
११

उत्क्षिपन्शकटंव्योम्नितृणावर्त्तमधःक्षिपन् दर्शयन्विश्वमास्येचकृष्णःक्रीडतिसप्तमे ॥ कृष्णार्भकसुधासिंधुसंप्लवानंदनिर्भरः भूयस्तदेवसंप्रष्टुराजान्य दभिनंदति ॥ येनयेनेति येनमत्स्याद्यवतारेण विद्यानि यानिकर्म्माणि करोतितानिनः कर्णरम्याणि वदानिमनःप्रीतिकराणीतिचभवंत्येव ॥ तथाःपि यत् शृण्वतः पुंसः पुरुषमात्रस्य अरतिर्मनोग्लानिः तन्मूलभूताविविधातृष्णाचअपगच्छति ॥ तथासत्त्वशुद्धिः हरिभक्तिः हरिदाससख्यानिचभवंति ॥ तदेवहारं हरि चरितंमनोहरंवावदअनुग्रहंयदिकरोषीति १ ॥ अथ तोकस्यकोपनस्य नर्विशिनष्टि अथेति ॥ अनुरंधतः अनुवर्त्तिनः ३ ॥ उत्थानेशिशोरंगपरिवर्त्तनेतत्रकारणीयेकौ

राजोवाच ॥ येनयेनावतारेणभगवान्हरिरीश्वरः ॥ करोतिकर्णरम्याणिमनोज्ञानिचनःप्रभो ॥ १ ॥ यच्छृण्वतोपैत्यरतिर्वितृष्णासत्त्वंचशुद्ध्यत्यचिरेणपुंसः ॥ भक्तिर्हरौतत्पुरुषेचसख्यंतदेवहारंवदमन्यसेचेत् ॥ २ ॥ अथान्यदपिकृष्णस्यतोकाचरितमद्भुतं मानुषंलोकमासाद्यतज्जातिमनुरुंधतः ॥ ३ ॥ श्रीशुकउवाच ॥ कदाचिदौत्थानिककौतुकाप्लवेजन्मर्क्षयोगेसमवेतयोषितां ॥ वादित्रगीतद्विजमंत्रवाचकैश्चकारसूनोरभिषेचनंसती ॥ ४ ॥ नंदस्यपत्नीकृतमज्जनादिकंविप्रैःकृतस्वस्त्ययनंसुपूजितैः ॥ अन्नाद्यवासःस्रगभीष्टधेनुभिःसंजातनिद्राक्षमशीशयच्छनैः ॥ ५ ॥ औत्थानिकौत्सुक्यमनामनस्विनीसमागतान्पूजयतीव्रजौकसः ॥ नैवाशृणोद्वैरुदितंसुतस्यसारुदन्स्तनार्थीचरणावुदक्षिपत् ॥ ६ ॥ ॥ राम ॥ ॥ ॥

त्कौतुकाप्लवेउत्सवाभिषेकेतथातस्मिन्नेवदिनेजन्मर्क्षस्यापियोगेअतिमहोत्सवेसमवेतयोषितांमिलितपुरंध्रीणांमध्येवादित्रादिभिःशोभितमभिषेचनंयशोदा चकार ॥ ४ ॥ अन्नादिभिः सुपूजितैर्विप्रैः कृतमंगलंसंजातनिद्रेअक्षिणीयस्यतंअशीशयत्शायितवतीसकरस्याधस्तात्शनैरेव ॥ ५ ॥ उदक्षिपत्ऊर्ध्वंचालितवान् ॥ ६ ॥

२३

११

तदाधः शयानस्य शिशोरल्पकस्यापि प्रवालवन्मृदुस्य पदोः क्षिप्तैः तेन हतं शकटं व्यवर्त्तत विपरीतमपतत् ॥ कथं विध्वस्तानि नानारसवन्ति कुप्यभाज-
नानि स्वर्णरजताभिरिक्तकांस्यादिमयानि यथा भवंति तथा व्यवर्त्तत । व्यत्यस्ते चक्राक्षौ यस्मिन् भिन्नः कूबरो युगंधरो यस्मिन् तद्यथा तथा
यथा भवति तथा व्यवर्त्तेति ॥७॥ अद्भुतदर्शनेन आकुलाः व्यग्राः ॥ तदेवाह ॥ कथमिति विपर्यगात् ॥ विपरीतमपतदिति ॥८॥ न श्रद्दधिरे विश्वासं न ज-

अनः शयानस्य शिशोरथाल्पकप्रवालमृद्वंघ्रिहतं व्यवर्त्तत ॥ विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरं ॥७॥
दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः ॥ नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै श-
कटं विपर्यगात् ॥८॥ ऊचुरव्यवसितमतीन् गोपान् गोपीश्च बालकाः ॥ रुदतानेन पादेन क्षिप्तमेतन्न संशयः ॥९॥ न ते श्र-
द्दधिरे गोपा बालभाषितमित्युत ॥ अप्रमेयं बलं तस्य बालकस्य न ते विदुः ॥१०॥ रुदंतं सुतमादाय यशोदा ग्रहशंकिता ॥ कृत-
स्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ॥११॥ पूर्ववत् स्थापितं गोपैर्बलिभिः सपरिच्छदं ॥ विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशांबु-
भिः ॥१२॥ येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः ॥ न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥१२॥

दधुः उत अपि ॥ बालस्यैतन्न संभवति ॥ एते च बालाः किं जानंतीति ॥१०॥ रक्षोघ्नैः सूक्तैः कृत्वा ॥११॥ भगवत्प्रभावानभिज्ञविप्रचेष्टितं विडंबयन्नाह ॥ पूर्ववदित्या-
दिना बलिभिः शक्तैः यद्वा अनुष्ठदरिद्रबलिभिः सहितं सपरिकरं च यथा यथापूर्वं स्थापितं विप्रा दध्यादिभिरर्चयामासुः हुत्वा ग्रहादिहोमं विधाय ॥१२॥ अ-
सूया गुणेषु दोषाविष्कारः ईर्ष्या असहनं ताभिः तेषामाशिषः कृताः तैः प्रयुक्ताः ॥१२॥

१०.७
१३

इति एवमभिप्रेत्य सामर्ग्यजुभिरुपाकृतैः संस्कृतैः पवित्राः ओषधयो येषु जलेषु तैः कृत्वा द्विजोत्तमैः कर्तृभिरभिषिच्य अभिषेकं कारयित्वा ॥ १४ ॥ हुत्वाहा
वयित्वा गावः गाश्च प्रादात् ॥ अन्वयुञ्जत आशिषो युयुजुः ॥ १६ ॥ ताः तथैव भविष्यन्ति इत्यर्थः ॥ १७ ॥ उत्क्षिप्य पदुपादेन शकटं व्योम्नि लीलया ॥ तृणावर्त्तपदाः

इति बालकमानीय सामर्ग्यजुरुपाकृतैः ॥ जलैः पवित्रौषधिभिः अभिषिच्य द्विजोत्तमैः ॥ १४ ॥ वाचयित्वा स्वस्त्ययनं नन्दगोपः समा
हितः ॥ हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणं ॥ १५ ॥ गावः सर्वगुणोपेता वासःस्रग्रुक्ममालिनीः ॥ आत्मजाभ्युदयार्थाय
प्रादात्ते चान्वयुञ्जत ॥ १६ ॥ विप्रा मन्त्रविदो युक्तास्तैर्याः प्रोक्तास्तथाशिषः ॥ ता निष्फला भविष्यन्ति न कदाचिदपि स्फुटं ॥ १७ ॥ एकदा
रोहमारूढं लालयन्ती सुतं सती ॥ गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् ॥ १८ ॥ भूमौ निधाय तं गोपी विस्मिता भारपीडिता ॥ महापु
रुषमादध्यौ जगतामास कर्मसु ॥ १९ ॥ दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रणोदितः ॥ चक्रवातस्वरूपेण जहारासीनमर्भकं ॥ २०
गोकुलं सर्वमावृण्वन्मुष्णंश्चक्षूंषि रेणुभिः ॥ ईरयन्सुमहाघोरशब्देन प्रदिशो दिशः ॥ २१ ॥ मुहूर्तमभवद्गोष्ठं रजसा तमसावृतं
सुतं यशोदा नापश्यत्तस्मिन्न्यस्तवती यतः ॥ २२ ॥ नापश्यत्कश्चनात्मानं परं चापि विमोहितः ॥ तृणावर्तनिसृष्टाभिः शर्कराभिरुप

पीडया व्यपातयदर्भकः आरोहमुत्सङ्गं गतं तृणावर्तान्मृत्युपरिहाराय कश्मलेनेवात्मन उत्सङ्गादुत्तारायत तत भारमजानती ॥ १८ ॥ उत्पातशंकोद्भूतः ॥ १९ ॥
यां महापुरुषमादध्यौ श्रीकृष्णोदरवर्त्तिना जगतां भारेणापीडिता विस्मिता च सती यद्वा जगतां मध्ये कर्मसु आस बभूव न तु जगाम कुत्रान्तं वैवेत्यर्थः ॥ १९ ॥
ईरयन् नादयन् इत्यर्थः ॥ २१ ॥ यतः यत्र न्यस्तवती तस्मिन् स्थाने नापश्यत् ॥ २२ ॥ २ ॥

राम
१०. १३

खरपवनचक्रांतपांशुवर्षैसति ॥ १४ ॥ उपारतः पांशुवर्षस्यवेगोयस्मिंस्तथाभूतेपवनेसति तत्रतस्माद्रुदितमनुनिशाम्यगोप्योरुरुदुः ॥ १५ ॥ वात्यावक्रावा
तः तद्रूपधरः कृष्णंहरन्नुच्चाशांतरयः कथंचित्रंभोगतः ततः परंगंतुमशक्तोदित्यर्थः गुरुमत्तयाः स्थिगोरेवेणातंतथा ॥ अश्ममानोस्मसवर्णापर्वतप्रायेम
न्यमानत्वेनैवश्वासात्मनोगलेग्रहीतः ॥ तंनपक्ष्मामिच्छन्नपिनाशक्तोदित्यर्थः तस्योरसिलंबमानंकृष्णमाराद्यमात्रेप्रतिहृत्यसमर्प्यविस्मितास्त्रवमहुरिति

इतिखरपवनपांशुचक्रवर्षैर्हृतपदवीमबलाःविलक्ष्यमाता ॥ अतिकरुणमनुस्मरंत्यशोचद्भुविपतितामृतवत्सकायथागौः
॥ १४ ॥ रुदितमनुनिशम्यतत्रगोप्योभृशमनुतप्तधियोश्रुपूर्णमुख्यः ॥ रुरुदुरनुपलभ्यनंदसूनुंपवनउपारतपांशुवर्षवेगे ॥ १५ ॥ तृणा
वर्तः शांतरजोवात्यारूपधरोहरन् ॥ कृष्णंनभोगतोगंतुंनाशक्नोद्भूरिभारभृत ॥ १६ ॥ तमश्मानंमन्यमानआत्मनोगुरुमत्तया ॥ गलेगृ
हीतउत्स्रष्टुंनाशक्नोदद्भुतार्भकं ॥ १७ ॥ गलग्रहणनिश्चेष्टोदैत्योनिर्गतलोचनः ॥ अव्यक्तरावोन्यपतत्सहबालोव्यसुर्व्रजे ॥ १८ ॥ तमं
तरिक्षात्पतितंशिलायांविशीर्णसर्वावयवंकरालं ॥ पुरंयथारुद्रशरेणविद्धंस्त्रियोरुदत्योददृशुःसमेताः ॥ १९ ॥ प्रादायमात्रेप्रतिहृ
त्यविस्मिताः कृष्णंचतस्योरसिलंबमानं ॥ तंस्वस्तिमंतंपुरुषादनीतंविहायसामृत्युमुखात्प्रमुक्तं ॥ २० ॥ गोप्यश्चगोपाः किलनंदमुख्या
लब्ध्वापुनः प्रापुरतीवमोदं ॥ अहोबतात्यद्भुतमेषरक्षसाबालोनिवृत्तिंगमितोभ्यगात्पुनः ॥ २१ ॥ हिंस्रः स्वपापेनविहिंसितः खलः सा

४१२

विहायसागगनमार्गेणपुरुषादेननीतंतथापिमृत्युमुखान्मुक्तंपुनर्लब्ध्वामोदंप्रापुरिति ॥ २० ॥ परस्परंहर्षकथामाहुः अ धुः समत्वेनभयाद्विमुच्यते
होबतेतिनिवृत्तिंगमितः मृत्युंप्रापितः कोऽत्रविस्मयः युज्यतएवैतदितितेष्वेवंकोविदाऊः हिंस्रइति ॥ २१ ॥

२.पू.
१४

नः शुश्रूषाभिः चीर्णाः इष्टापूर्त्तं वापीकूपादिनिर्माणं इष्टं पंचयज्ञाग्निहोत्रादिः दत्तं दानं यतः यस्मात् तस्मात् परेतः प्रणयन् हर्षयन् ॥ ३३ ॥ ५ ॥ तृणावर्त्तनामे दृष्टे अंगे रिवाशंकिनी इव स्तनपानं निवारयन्ती(?) माता सजेन माणोपु खेन गतं ॥ पीतप्रायस्य पीतप्रायः स्तनो येन तस्य ॥ ३६ ॥ नगान् गिरीन् तत्तद्दुहितॄः नदीः ॥ ३८ ॥ ६ ॥ निशामे सप्तमः ॥ अष्टमे नामकर्मास्य बालक्रीडा तत्र हले ॥ मद्ग्रहणं मियोगे विश्वरूपं निरूप्यते ॥ १ ॥ विश्वरूपादिबालस्य निशाम्यांशंकिताः पितुः ॥ नाम

किं नस्तपश्चीर्णमधोक्षजार्चनं पूर्त्तेष्टदत्तमुत भूतसौहृदं ॥ यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबंधून् प्रणयन्नुपस्थितः ॥ ३३ ॥ तत्राद्भुतानि बहुशो नंदगोपो बृहद्वने ॥ वसुदेववचो भूयो मानयामास विस्मितः ॥ ३४ ॥ एकदार्भकमादाय स्वांकमारोप्य भामिनी ॥ प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥ ३५ ॥ पीतप्रायस्य जननी सुतस्य रुचिरस्मितं ॥ मुखं लालयती राजन् जृंभतो ददृशे इदं ॥ ३६ ॥ खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च ॥ द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि ॥ ३७ ॥ सा वीक्ष्य विश्वं सहसा राजन् संजातवेपथुः ॥ संमील्य मृगशावाक्षी नेत्रे आसीत्सुविस्मिता ॥ ३८ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे तृणावर्त्तभंगो नाम सप्तमोध्यायः ॥ श्रीशुक उवाच ॥ गर्गः पुरोहितो राजन् यदूनां सुमहातपाः ॥ व्रजं जगाम नंदस्य वसुदेवप्रचोदितः ॥ १ ॥ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतांजलिः ॥ आनर्चाधोक्षजधिया प्रणिपातपुरःसरं ॥ २ ॥ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिं ॥ नंदयित्वाब्रवीद्ब्रह्मन् पूर्णस्य करवाम किं ॥ ३ ॥ महद्विचलनं नृणां गृहिणां दीनचेतसां ॥ निःश्रेयसाय भगवन् कल्पते नान्यथा क्वचित् ॥ ४ ॥

कृतार्थं कर्तो वा न निजतत्त्वं महत्त्वं ब्रह्मन् ॥ १ ॥ ३ ॥ पूर्णस्योक्ता यं धनिनां गृहमागतस्तत्राह ॥ महद्विचलनमिति ॥ महतां स्वाश्रमादन्यत्र विचलनं न स्वार्थं किं तर्हि गृहिणां मंगलाय न तत्र तर्हि तस्य एव महद्दर्शनार्थे किमिति नागच्छंति तत्राह ॥ दीनचेतसां कृपणानां कृपणमपि गृहं त्यक्तुं न शक्तानामित्यर्थः ॥ ४ ॥

दश
१४

त्वया बालयोर्नामकरणादि करणीयमिति वक्तुं तस्य ज्ञानातिशयमाह ज्योतिषामयनमिति ॥ यदतीन्द्रियज्ञानसाधनं ज्योतिषामयनं तत्त्वमेति पारकं ज्योतिःशास्त्र
मित्यर्थः । साङ्गाद्वेदात् गणितं येनाः ज्योतिषि प्रमाणपरावरपरं कारणं पूर्वजन्मकृतं कर्मसंचयं वर्णं काशितं अस्मिन् जन्मनि भाविफलं तद्दैवं उक्तं च जातके ॥ यदुपचितमन्य
जन्मनि शुभाशुभं तस्य कर्मणः पंक्तिं व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इवेति ॥ ५ ॥ विवादं तमाह ॥ त्वं हीति ॥ देवदत्तो मे च विद्युत्त्वं अतो नामकरणादि संस्का
रान् कर्तुमर्हसीत्यर्थः । न त्वेतत् कुहणाकरणीयमिति चेत्तत्राह ॥ नृणामिति ॥ ६ ॥ अस्तु तस्माद्धितं नंदप्रतिग्रहमेतत्कार्यमित्यभिप्रायेणाह ॥ यदूनामिति ॥ भवता त्वया

ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानमतीन्द्रियं ॥ प्रणीतं भवता येन पुमान्वेद परावरम् ॥ ५ ॥ त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान् कर्तुमर्हसि
गा बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ॥ ६ ॥ गर्ग उवाच ॥ यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा ॥ सुतं मया संस्कृतं ते मन्यते दे
वकीसुतम् ॥ ७ ॥ कंसः पापमतिः सख्यं तव चानकदुन्दुभेः ॥ देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ॥ ८ ॥ इति संचिंतयञ्छ्रुत्वा
देवकीदारिकावचः ॥ अपि हंता गताशंकस्तर्हि तन्नोऽनयो भवेत् ॥ ९ ॥ नंद उवाच ॥ अलक्षितोऽस्मिन् रहसि मामकैरपि गोव्रजे

पितृत्वमत्रागत इति को विद्यादिति चेत्तत्राह ख्यातश्चेति ॥ ततः किमत आह सुतमिति ॥ कंसो मन्यते मन्यतेक कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकं ॥ १० ॥
ल्पयेदित्यर्थः ॥ ७ ॥ ननु यदुकुमार इति कथं विज्ञानात् तत्र वसुदेवसुतत्वे तत्रापि देवक्यां जात इति कुतो जानीयात् ॥ तत्राह पापमिति दित्यादि ॥ ८ ॥ किमयाऽहं तयामंदेत्या
दि देवकीकन्यावचः श्रुत्वा देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हतीति तन्नित्यं संचिंतयन् सामान्येन कश्चिदस्तीति ज्ञात्वा युवयोश्च सख्यं संचिंतयन् त्वद्गृहे भवेदिति संभा
व्य संस्कारलिंगेन वस्रागताशंकः आगता आशंका यस्य सः ॥ अपि यदि हंता हनिष्यति तर्हि तत्तदानीं नो महाननयः स्यादिति ॥ ९ ॥ द्विजातीनामवश्यकर्तव्यं संस्कारमात्रं केवलं
स्वस्तिवाचकपूर्वकं कुर्विति ॥ १० ॥ ॥ [illegible]

२०५
१५

॥ यदूनामपृथग्भावात् उक्तस्य विद्वेतोर्विपतियद्यमानानां यदूनामपृथग्भावात् भावो भावनं तस्मात् अन्योन्यमिश्रया सर्वैकमत्यकरणादित्यर्थः समृक्षर्षति एकीकरोति ॥ संकर्षणमप्युशन्ति मन्यन्ते वक्ष्यतीत्यर्थः ॥ गर्भसंकर्षणात्तु न प्रकाशयति ॥ १२ ॥ अस्य तव पुत्रस्य अतः श्रीकृष्ण इत्येकनाम भविष्यति ॥ १३ ॥ प्रागयमिति ॥ सामान्योक्त्याभिरतस्मात्तरगतं नाम कथयति नंदो मन्यते स्म ॥ अत एनं वासुदेवेति संप्रचक्षत इति ॥ १४ ॥ गुणानुरूपाणि ईश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गो-

श्रीशुक उवाच ॥ एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् ॥ चकार नामकरणं गूढो रहसि बालयोः ॥ ११ ॥ अयं हि रोहिणीपुत्रो रमयन्सुहृदो गुणैः ॥ आख्यास्यते राम इति बलाधिक्याद्बलं विदुः ॥ यदूनामपृथग्भावात्संकर्षणमुशन्त्युत ॥ १२ ॥ आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १३ ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥ १४ ॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वन्ति मानवाः ॥ नारयोऽभिभवन्त्येतान्विष्णुपक्षानिवासुराः ॥ १५ ॥ बहूनि सन्ति नामानि रूपाणि च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १५ ॥ एष वः श्रेय आधास्यन्गोपगोकुलनंदनः ॥ अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ ॥ १६ ॥ पुरानेन व्रजपते साधवो दस्युपीडिताः ॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधितान् ॥ १७ ॥ तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः ॥ श्रिया कीर्त्यानुभावेन गोपायस्व समाहिताः ॥ १८ ॥ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते ॥ नन्दः प्रमुदितो मेने

पतिर्गोवर्द्धनोद्धरण इत्यादीनि तानि सर्वाण्यहमपि नो वेद जना अपि नो विदुरिति ॥ १५ ॥ जातकफलमाह एष इति ॥ आधास्यन् ॥ आत्मानं पूर्णमाशिषाम् ॥ २० ॥ आधास्यति ॥ १६ ॥ अनेन रक्ष्यमाणाः समेधिताश्च दस्यून् जिग्युरिति ॥ १७ ॥ १८ ॥ इति च आत्मानं यतिः समादिश्य आत्मानं कृष्णं वा आशिषां आशीर्भिः ॥ २० ॥

राम
१५

बालंक्रीडाप्रसक्तौ ॥ कृष्णौ रामेण संयुतः ॥ परमानंदमाधत्त व्रजे नंदयशोदयोः ॥ भूर्णत्वमेव दर्शयन्नाह ॥ कालेनेति ॥ २१ ॥ अनुकृष्य पुनः पुनराकृष्य सरीसृपं
तौ अतिशयेन चलंतौ कथं घोषाः नूपुरपादभूषणाः किंकिणयः तेषां प्रघोषेण रुचिरं यथा तेषां घोषाणां नादेन हृष्टमनसौ यथा स्तो लोकं ततः स्वतो गच्छंतं
जनं अनुसृत्य विचरणशीला परानिश्चय गम्य मुग्धवत्प्रभीतवन्मात्रोरंतिसमीपं उपयेतुः उपजग्मतुः ॥ २२ ॥ तन्मातराविति तन्मातरौ निजसुतौ दोर्भ्यां उपगृह्य प्रमो-
दं ययतुः ॥ कथंभूते ॥ घृणया कृपया स्नुवंत्यौ पयः पूर्णपयोधरे ययोः ते पंकेनांगरागेण रुचिरौ कथंभूतं मुखं निरीक्ष्य मुग्धं स्मितं यस्मिन् अल्पा दश-

कालेन व्रजताऽल्पेन गोकुले रामकेशवौ ॥ जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः ॥ २१ ॥ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोष-
प्रघोषरुचिरं व्रजकर्दमेषु ॥ तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंतिमात्रोः ॥ २२ ॥ तन्मातरौ निजसुतौ घृ-
णया स्नुवंत्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्यां ॥ दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः प्रमोदं ॥
यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः ॥ वत्सैरितस्तत उभावपि कृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृ-
षुर्हसंत्यः ॥ २४ ॥ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं ॥ गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात

नाश्च यस्मिन् तत्तु तत्च ॥ २३ ॥ यर्हि अंगनानां दर्शनीयाः कुमारलीला ययोः ॥ तथाभूतौ जातौ तदा अंतर्व्रजे व्रजस्य मध्ये तदव — आपतुरलं मनसो नवस्थां ॥ २५ ॥
लाः व्रजांगनाः तौ प्रेक्षंत्यः प्रेक्षमाणाः विस्मृतगृहकृत्याः हसंत्यो जहर्षुः ॥ कथंभूतौ ॥ ताभ्यां गृहीतानि पुच्छानि येषां तैः वत्सैरितस्ततः अनुकृष्यमाणौ ॥ २४ ॥ अतिच-
पलौ तौ शृंग्यादिभ्यो निषेद्धुं गृहोचितानि च कर्माणि च कर्तुं यत्र यदा तज्जनन्यौ न शेकाते तदा अलं मनसो नवस्थामापतुरिति गृहमोहस्य पराकाष्ठा दर्शिता ॥ २५ ॥

२०५
२६

२६ ॥ १७ ॥ तच्च चापलं चौर्यादि संदेहवाखिलसम्मतः प्रजल्पंत्यः समागत्य गोप्यो गोपेष्वरंरडुः असमये अरोहकाले क्रोशे संजातहासः स्तेयं चौर्यार्जितं स्वादु अन्नं
अपि खादेत् नेतरत् दधिपयश्च दधिपयश्च त्रिकिंच भोक्ष्यन् मर्कटान् प्रति विभजन् ददाति तेषां मध्ये तृप्तत्वेन कोऽपि नात्ति चेत् तर्हि भांडं भिनत्ति विनूद्रव्यस्य अलाभे सति
सः गृहाय धस्मामि त्येवं ॥ कुपितो जीति ॥ यद्वा सगृहाः गृहिण्याः तेभ्यः कुपितः तेषां तोकान् पर्यंकादिषु हस्तादुपक्रोशयोरयित्वा यातीति ॥ १९ ॥ कल्पितैः स्तेययोगैरित्युक्तं

कालेनाऽल्पेन राजर्षे रामकृष्णश्च गोकुले ॥ अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा ॥ २६ ॥ ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबालकैः ॥ सहरा
मो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं ॥ २७ ॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलं ॥ शृण्वंत्याः किल तन्मातुरिति होचुः समागताः ॥ २८ ॥
वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधि पयः कल्पितैः स्तेययोगैः ॥ मर्कान्भोक्ष्यन्विभजति सचेन्नात्ति भां
डं भिनत्ति द्रव्यालाभे सगृहकुपितो यात्युपक्रोश्य तोकान् ॥ २९ ॥
हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैः छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ॥ ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ॥ ३० ॥ एवं धार्ष्ट्यान्युशति कुरुते मे
हनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते ॥ इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसित

पंचयति ॥ हस्ताग्राह्ये इति तं गशिक्यस्य भांडेषु अंतर्निहितेषु धारोवयुनं ज्ञानं यस्य सः छिद्रं रचयति तद्वित् छिद्ररचनावित् ॥ ध्वांत ॥ मुखी न ह्युपालब्धुमैच्छन् ॥ ३१ ॥
गृहे गृहे स्वांगमेवार्थप्रदीपं विरचयति विशेषतो धृतमणिगणं ॥ यर्हि यस्मिन्काले ॥ ३० ॥ रे चोर इत्याक्रुष्टः जल्पति त्वमेव चोरः अहं गृहस्वामी ॥ मेहनादीनि धार्ष्ट्यानि प्रा
गल्भ्यानि ॥ उशति शोभनमनाये यद्वा उशतीवास्तो वास्तुनि गृहे मेहनादीनि परीक्षोत्सर्गादीनि कुरुते ॥ एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः ॥ त्वत्समीपे सु
प्रतीकः साधुरिवास्ते सभयेन नयनेन यस्मिन् तत्तथा तत् श्रीयुक्तं मुखं यस्मिन् तदालोकिनीभिः व्याख्यातार्था प्रख्यापितजन्मकर्मफला उपालब्धुमपि नैच्छन् ॥ ३१ ॥

स्यंतद

मरि

गम
२६

कदाचित्प्रणष्टांतरे उपालभंतं तदा तु महाश्चर्यं संभूदिति कथयन्नाह ॥ एकदेति ॥ ३१ ॥ उपालभ्य निर्भर्त्स्य भयेन संभ्रांतप्रेक्षणा चपलनिरीक्षणा अक्षिणी यस्य
स्यत ॥ अदांतात्मन् चपलगात्र रहः एकांते ॥ ३४ ॥ नाहं भक्षितवानिति ॥ नवात्यं किं विस्मया भण्यते ॥ पुत्रस्त्राशीवादादेव यत्पर्य महत्नोति भावः समक्षं प्रत्यक्षं
॥ ३५ ॥ व्यादेहि मुखं प्रसारयेति व्यादत्तं प्रसारितवान् ॥ ३६ ॥ तत्र तस्मिन्मुखे विश्वं ददर्शोद्दर्शत्तत्प्रपंचयति ॥ जगत् जंगमं स्थास्नु स्थावरं च खं अंतरिक्षं ला

एकदा क्रीडमानास्ते रामाद्या गोपदारकाः ॥ कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥ ३२ ॥ सा गृहीत्वा करे कृष्णमुपालभ्य हितैषि
णी ॥ यशोदा भयसंभ्रांतप्रेक्षणाक्षमभाषत ॥ ३३ ॥ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः ॥ वदंति तावका ह्येते कुमारास्ते
ऽग्रजोऽप्ययं ॥ ३४ ॥ नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः ॥ यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ॥ ३५ ॥ यद्येवं तर्हि व्यादेही
त्युक्तः स भगवान्हरिः ॥ व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥ ३६ ॥ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः ॥ साद्रिद्वी
पाब्धिभूगोलं सवाय्वग्नींदुतारकं ॥ ३७ ॥ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च ॥ वैकारिकाणींद्रियाणि मनो मात्रा गुणास्त्रयः ॥
३८ ॥ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदं ॥ स्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां ॥ ३९ ॥

कं साद्रिद्वीपादि भूगोलं पर्वतद्वीपसमुद्रसहितं भूर्लोकं ॥ वायुः प्रवहः अग्निर्वैद्युतः इंदुश्च तारकाश्च तत्सहितं ॥ ३७ ॥ ज्योतिश्चक्रं स्वर्लोकं वैकारिकाणि देवाः म
न इति वैकारिकशब्देन गृहीतमपि देववैलक्षण्यापन्नं तु नरुक्तं ॥ इंद्रियाणि च तैजसानि मात्राः तामसाः शब्दादयः ॥ ३८ ॥ एवमेतद्विचित्रं विश्वं सह एकदेव वीक्ष्य वि
चित्रतामाह ॥ जीवश्च गुणक्षोभकः ॥ कालश्च परिणामहेतुः स्वभावं जन्मस्वभावततहेतुः कर्म च तत्संस्कार आशयश्च एते लिंगानां च शरीराणां भेदो यस्मिन्तत्त

मे२

सूनो

भोक्ता

१०.८
१७

तामाह किं स्वप्न इति प्रथितो विलोक्याह ॥ नायं स्वप्नः नहि किरे वस्तु हे मोयातथा चेत ॥ अन्ये किं न पश्यन्ति ॥ तर्हि किं वा मदीय एव कश्चिद्बुद्धिमोहः विपर्यासः इन्द्रियाणां स्वत्र ॥ एवं तर्हि अयं कश्चिदमीषां कथमन्तः प्रतीयते अन्तर्वहिश्च कस्तु पेणा च कथं जगत प्रतीयते तथापि ति बिंबप्रतिबिंबयोरिव परस्परं वैपरीत्येन प्रतीतिः ॥ स्यादित्याशंकान्यथा वितर्कयति अथो इति ॥ अथवा ममाप्यर्भकस्यापि पतः यः कश्चनाचिन्त्य आत्मयोगस्तद्विभवमिदं सर्वं औत्पत्तिकः स्वाभाविकः ॥ ४० ॥ चरमं पक्षमाश्रित्यायमीश्वर इति निश्चित्याह ॥ अथो चेतः चित्तं चिन्तादिभिर्न वितर्कगोचरं जगत् यदाश्रयं यदधिष्ठानं येन कारणे

किं स्वप्न एतदुत देवमाया किं वा मदीयो वत बुद्धिमोहः ॥ अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ॥ ४० ॥ अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरंजसा ॥ यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणताः स्मि तत्पदं ॥ ४१ ॥ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती ॥ गोप्यश्च गोपाः सह गोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ॥ ४२ ॥ इत्थं विदिततत्वायां गोपिकायां स ईश्वरः ॥ वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ॥ ४३ ॥

धिष्ठानाद्यतः बुद्धिवृत्त्याभिव्यक्तात् ॥ न विस्मय वितर्कं भव ततस्तस्मै कीदृक् इत्यत आह ॥ सुदुर्विभाव्यं ॥ इदमत्यन्तमचिन्त्यमित्यर्थः ॥ ४१ ॥ एवं प्रपंचप्रतीत्योर्नीतं तत्त्वं पुनर्जीवस्यंस्मृतिर्हेतुर्मायाश्रयत्वेनोत्रयंत्याह ॥ अहमिति यशोदा नामाह अहं असौ मम पतिः अयं मे सुतः व्रजेश्वरस्याखिलवित्ताधिष्ठात्री अहं सती जाया एवं ह्यहमेव हतः गोप्याः परिवृत्य मदीया इति त्थं कुमतिर्यन्मायया स एव मे शरणमिति ॥ ४२ ॥ वैष्णवीं स्वीयां ॥ ४३ ॥

दाम
८

न॰

प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा पूर्ववासीत् ॥४४॥ मायाबलोद्रेकमाह ॥ त्रय्येति ॥ त्रय्या इन्द्रादिरूपेण उपनिषद्भिर्ब्रह्मेति सांख्यैः पुरुष इति योगैः पर
मात्मेति सात्वतैर्भगवानिति उपगीयमानं माहात्म्यं यस्य तं ॥४५॥ अतिविस्मयेन पृच्छति नंद इति ॥ महोदयं महानुदय उद्भवो यस्य तत् ॥४६॥ ययोः प्रसन्नो ऽव
तीर्णः तौ पितरावपि यन्नान्वविन्देतां न प्राभवतां ॥ कृष्णस्योदारं महत् तत्र्यार्भकेहितं बाललीलां यद्वक कवयो गायंति ययोः किं दत्तवान् किं श्रेयः कारोदिति ॥४७

सद्यो नष्टस्मृतिर्गोपी सारोप्यारोहमात्मजं ॥ प्रवृद्धस्नेहकलिलहृदयाऽऽसीद्यथा पुरा ॥४४॥ त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सा
त्वतैः ॥ उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजं ॥४५॥ राजोवाच ॥ नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयं ॥ यशोदा वा महा
भागा पपौ यस्याः स्तनं हरिः ॥४६॥ पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितं ॥ गायंत्यद्यापि कवयो यल्लोकशमलापहं ॥४७॥ श्रीशु
क उवाच ॥ द्रोणो वसूनां प्रवरो धरया भार्यया सह ॥ करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह ॥४८॥ जातयोर्नौ महादेवे भुवि वि
श्वेश्वरे हरौ ॥ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ॥४९॥ अस्त्वित्युक्तः स भगवान् व्रजे द्रोणो महायशाः ॥ जज्ञे नंद इति ख्या
तो यशोदा सा धराभवत् ॥५०॥ ततो भक्तिर्भगवति पुत्रीभूते जनार्दने ॥ दंपत्योर्नितरामासीन् गोपगोपीषु भारत ॥५१॥ कृष्णो ब्रह्मण आ
देशं सत्यं कर्तुं व्रजे विभुः ॥ सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ॥५२॥ इति श्रीभागवते महापुराणे दशमस्कंधे विश्वरूपदर्शने ष्टमो ध्यायः ॥

ब्रह्मण आदेशान् गोपालनादिलक्षणान् ॥४८॥ ४९ ॥ स एव हि द्रोणो यत्ते स च नंद इति ख्यातः सा च धरा यशोदाख्या भवत् ॥५०॥ गोपगोपीनामपि व
त्सत्वभावादस्येव भक्तिस्तयोः पुनर्नितरामिति ॥५१॥ स्वलीलया पुत्रभावानुकारिण्या ॥५२॥ इति दशमे ष्टमो ध्यायः ॥ ८ ॥

पा

१०.९. नवमे य उत्संगे गत्वा गोप्य यतन्कांतं विलोक्य मां उमंगारिकांसं दामन्ना ववंधनं १ तनूदराम्रितं विस्मृद्दृष्ट्वा विस्मितचेतसः वंधनद्यगलापुच्छ्यापूर्णातामचरणी

१८ यत् २ स्वयं दधि निर्ममंथ १ तदा वा गायते तिच कारवयः स्तनद्वंकांवी वद्दरजोराकर्षणाश्रमा यथा यो स्तन्यो ईजयोः चलतो कंकणो च कवरा द्विगलंतो

मालत्यो यस्याः सा ३ ४ अधिश्रिते उष्णी मारोपिते उत्सिच्यमाने श्रुतितापेनोद्विग्नमाने ५ दृषद् स्मना शिलापुत्रेणाश्रूतं रहः मध्यं गतः रहः एकांते नव

श्रु उ वा व एकदा गृहदासीषु यशोदानंदगेहिनी कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि १ यानि यानीह गीतानि तद्बालचरितानि च दधिनिर्मंथने काले स्मरंती तान्यगायत २ क्षौमं वासः पृथुकटितटे विभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कवरविगलन्मालती निर्ममंथ ३ तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ४ तमंकमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखं अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ५ संजातकोपं स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनं भित्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयंगवमंतरं गतः ६ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ७ उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितं हैयंगवं चौर्यविशंकितेक्षणं

यत् स

वनीतमक्षयत् ६ कृष्णं तं सुतं दधिमथनविस्थानं प्रविश्य मित्रं संदृश्य पदृष्ट्वा ७ उलूखलांघ्रेः परि स्थितः स्योलूखल । निरीक्ष्य पश्चात्सुतमागमच्छनैः ८ ग़ाप

स्योपरि शिचि विशिक्ये चौर्यर्णा विशंकितं चचलमीक्षणां यस्य तं ८ ॥ ॥ ॥ ॥ श्रीगोविंदाय नमो नमः ग़ापाप १८

तपसाएकाग्रेणाईरितंतदाकारतांनीतं ॥ अतएवक्षमंयोग्यंप्रवेष्टुंयोगिनांमनोऽपिनापयंतं ॥ अथवाअन्वधावत्केवलंनत्वापयतोयोगिनांमनोऽपिप्रवेष्टुं
नक्षममिति ९ ॥ अन्वंचमानाएवंक्रममनुगच्छंती ॥ बृहत्योःश्रोण्योर्भरेणाक्रांतात्वरितागतिर्यस्याःसाविस्रंसितात्केशबंधात्च्युतैःप्रसूनैरनुगतिरनुगम-
नंयस्याःसा ॥ यद्वाजवेनकंपितात्केशबंधात्ततःपतितानिप्रसूनानिअनुपश्चाद्गतिर्यस्याःसापरामृशतधृतवती १० ॥ अंजन्मषिणीअंजनीसर्वतःप्रसृतं

तामात्तयष्टिंप्रसमीक्ष्यसत्वरस्ततोवरुह्यापससारभीतवत् ॥ गोप्यऽन्वधावन्नयमापयोगिनांक्षमंप्रवेष्टुंतपसेरितंमनः ९ ॥
अन्वंचमानाजननीबृहच्चलच्छ्रोणीभराक्रांतगतिःसुमध्यमा ॥ जवेनविस्रंसितकेशबंधनच्युतप्रसूनानुगतिःपरामृशत् ॥
कृतागसंतंप्ररुदंतमक्षिणीकषंतमंजन्मषिणीस्वपाणिना ॥ उद्वीक्षमाणंभयविह्वलेक्षणंहस्तेगृहीत्वाभिषयंत्यवागु-
रत् ॥ ११ ॥ त्यक्त्वायष्टिंसुतंभीतंविज्ञायार्भकवत्सला ॥ इयेषकिलतंबद्धुंदाम्नातद्वीर्यकोविदा ॥ १२ ॥ नचांतर्नबहिर्यस्यनपू-
र्वंनापिचापरं ॥ पूर्वापरंबहिश्चांतर्जगतोयोजगच्चयः ॥ १३ ॥

तीमषीययोःतेअक्षिणीस्वपाणिनाकषंतंसमर्दयंतीक्ष्णस्वच्छादसंभीषयंती
भयमुत्पादयंती ॥ अवागुरत्अभर्त्सयत् ॥ ११ ॥ इयेषऐच्छत्अतद्वीर्यकोविदातत्प्रभावानभिज्ञा ॥ १२ ॥ अकोविदत्वमेवाह ॥ नचांतरितिपंचभिः ॥ बंधनंहिब-
हिःपरिवेष्टनेनदाम्नःतत्रसूत्रस्यभवतितथापूर्वापरवतोवस्तुनःपूर्वतोदामधृत्वापरितःपरिवेष्टनेनभवति ॥ नचैतदस्तीत्याह ॥ नचांतरिति ॥ किंच
व्यापकेनव्याप्यस्यबंधोभवति ॥ तच्चविपरीतमित्याहपूर्वापरमितिकिंचतद्व्यतिरिक्तस्याभावान्नबंधइत्याह ॥ जगच्चयइति ॥ १३ ॥

तं मर्त्यलिंगमधोक्षजं आत्मजं मत्वा ववंधेति ॥ १४ ॥ द्व्यंगुलोनं ह्रास्यं प्राप्तं तन्नाम्ना ऊनमपूर्णं ॥ १५ ॥ १६ ॥ स्मितं कुर्वतीति विस्मयमाप ॥ १७ ॥ १८ ॥ नैवं स्वा
तन्त्र्यमंगेत्याह ॥ एवं संदर्शितेति ॥ सेश्वरमिदं विश्वं यस्य वशे यद्वशीनमित्यर्थः ॥ १९ ॥ भगवत्प्रसादमन्यैः पि न कोलभते इदं त्विति विचित्रमिति प्रसा

तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजं ॥ गोपिकोलूखले दाम्ना ववंध प्राकृतं यथा ॥ १४ ॥ तद्दाम वध्यमानस्य स्वार्भकस्य कृ
तागसः ॥ द्व्यंगुलोनमभूत्तेन संदधे न्यच्च गोपिका ॥ १५ ॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे ॥ तदपि द्व्यंगुलं न्यूनं यद्यदादत्त
वंधनं ॥ १६ ॥ एवं स्वगेहदामानि यशोदा संदधत्यपि ॥ गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत् ॥ १७ ॥ स्वमातुः स्विन्नगात्रा
या विस्रस्तकवरस्रजः ॥ दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्ववंधने ॥ १८ ॥ एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता ॥ स्ववशेनापि
कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ ॥ नेमं विरिंचो न भवो न श्रीरप्यंगसंश्रया ॥ प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥ २० ॥ नायं सुखा
पो भगवान्देहिनां गोपिकासुतः ॥ ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥ २१ ॥ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभो अद्रा
क्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ ॥ २२ ॥ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् ॥ नलकूवरमणिग्रीवाविति ख्यातौ च श्रियान्वितौ ॥ २३ ॥

मां चित्तमाह नेममिति ॥ विरिंच्यः पुत्रोऽपि भवः स्वात्माऽपि ॥ २० ॥ श्रीर्जायाः (इति श्रीभागवते महापुराणे दशमस्कंधे गोपीप्रसादो नाम नवमोऽध्यायः ॥ गाप
विफलितमाह ॥ नायमिति देहिनां देहाभिमानिनां तापसादीनां ज्ञानिनां निवृत्ताभिमानानामपीति ॥ २१ ॥ भक्तैर्वेद्यस्याप्यन्यैर्मोचकत्वं वक्तुमाह ॥ कृष्ण
स्त्विति ॥ २२ ॥ २३ ॥ इति दशमे नवमोऽध्यायः ॥ ॥ ॥

दशमे ध्यातयद्विगर्त्ततएयमलार्जुनौ॥ तत्रत्याप्यांवरेवाप्यांकल्पः हृतिइतीर्यते॥१॥ यद्विगर्हितंकर्मयेनवादेवर्षेर्भोगवतोन्नमस्थापितमः क्रोधः तदेतत्क
थ्यतामिति॥१२॥ गंगायामुत्तरप्रसंगेकथंभूते अंभोजानांवनानितेषांराजयः विद्यंतेयस्मिन्तस्मिन्॥४॥ अपश्यत्दृष्ट्वावक्षीवाणौमत्तौसमबुध्यत॥५॥ अ
नइत्यतआह॥ तंदृष्ट्वेति॥६॥ अनुग्रहार्थायेत्यनुग्रहस्तुमदनाशः अर्थश्चश्रीकृष्णदर्शनंतत्रदर्शयिष्यंस्तत्रप्रमाणंनत्यन्यइत्यादि॥७॥ जोष्यान्प्रियान्विष

राजोवाच॥ कथ्यतांभगवन्नेतत्तयोःशापस्यकारणं॥ यत्तद्विगर्हितंकर्मयेनवादेवर्षेस्तमः॥ श्रीशुकउवाच॥ रुद्रस्यानुचरौभूत्वा
सुदृप्तौधनदात्मजौ॥ कैलासोपवनेरम्येमंदाकिन्यांमदोत्कटौ॥२॥ वारुणींमदिरांपीत्वामदाघूर्णितलोचनौ॥ स्त्रीजनैरनुगा
यद्भिश्चेरतुःपुष्पितेवने॥३॥ अंतःप्रविश्यगंगायामंभोजवनराजिनि॥ विचिक्रीडतुर्युवतिभिर्गजाविवकरेणुभिः॥४॥ यदृच्छया
चदेवर्षिर्भगवांस्तत्रकौरव॥ अपश्यन्नारदोदेवौक्षीवाणौसमबुध्यत॥५॥ तंदृष्ट्वाव्रीडितादेव्योविवस्त्राःशापशंकिताः॥ वासांसि
पर्यधुःशीघ्रंविवस्त्रौनैवगुह्यकौ॥६॥ तौदृष्ट्वामदिरामत्तौश्रीमदांधौसुरात्मजौ॥ तयोरनुग्रहार्थायशापंदास्यन्निदंजगौ॥७॥ ना
रदउवाच॥ नह्यन्योजुषतोजोष्यान्बुद्धिभ्रंशोरजोगुणः॥ श्रीमदादाभिजात्यादिर्यत्रस्त्रीद्यूतमासवः॥८॥ हन्यंतेपशवोयत्रनिर्दयैर

यान्जुषतःसेवमानस्यपुंसः श्रीमदादन्यःआभिजात्यादिःसत्कुलविद्यादिजनितोमदःअ — जितात्मभिः॥ मन्यमानैरिमंदेहमजरामृत्युनश्वरं॥९॥
न्योवारजोगुणःरजःकार्यःहास्यहर्षादिरूपःनहितथाभ्रंशबुद्धिभ्रंशयतीतितथाकिंतत्श्रीमदएवेति तत्राह॥ यत्रेत्यादिभिःश्लोकैः॥८॥ यत्रश्रीमदेइमंनश्व

द०पु
३०

नरदेवसंज्ञितमपि स्वादिभिर्भक्षितं विट्संज्ञितं दग्धं भस्मसंज्ञितं अन्यदा कृमिसंज्ञितं ॥ तत्कृते तदर्थं यो भूतध्रुक् द्रोग्धा यतो भूतद्रोहान्निरयो भ
वति स किं स्वार्थं वेद न वेदैवेत्यर्थः ॥१०॥ निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाकरणे ॥११॥ अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवस्तस्मिन्ने
वाप्ययो यस्य तं ॥ आत्मसात्कृत्वा आत्मेति मत्वा असतः मूढादृते ॥१२॥ एवं श्रीमदविवेष्टितमुक्त्वा तन्निवारकं निःस्वनोति ॥ असत इति परं श्रेष्ठं द

देहसंज्ञितमप्येनं कृमिविड्भस्मसंज्ञितं ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥१०॥ देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव वा ॥ मातुः
पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा ॥११॥ एवं साधारणं देहमव्यक्तप्रभवाप्ययं ॥ को विद्वानात्मसात्कृत्वा हन्ति जंतून् ऋते ऽसतः ॥१२॥
असतः श्रीमदांधस्य दारिद्र्यं परमांजनं ॥ आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥१३॥ यथा कंटकविद्धांगो जंतोर्नेच्छति तां व्यथां ॥ जीव
साम्यं गतो लिंगैर्न तथाविद्धकंटकः ॥१४॥ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह ॥ कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः ॥१५॥ नित्यं क्षु
त्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः ॥ इंद्रियाण्यनुशुष्यंति हिंसापि विनिवर्तते ॥१६॥ दरिद्रस्यैव युज्यंते साधवः समदर्शिनः ॥ स
द्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति ॥१७॥ साधूनां समचित्तानां मुकुंदचरणैषिणां ॥ उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः ॥१८॥
तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांधयोः ॥ तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः ॥१९॥ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमः

दारिद्र्यमेव केवलमिति वा कुत इत्यत आह ॥ आत्मौपम्येनेति ॥ ततो न द्रुह्यतीति भावः ॥१३॥ सदृष्टांतमाह ॥ यथेति स्वव्यथान्यादिलिंगैः सर्वेषां जीवानां स्वावद्दः
स्वसमः इति ज्ञात्वा नित्यर्थः ॥१४॥ किंच दारिद्र्यं मोक्षमपि साधयतीत्याह श्लोकचतुष्टयेन ॥ निरहंस्तंभः निर्गतः अहंकाररूपः स्तंभो यस्मात् सः ॥१५॥१६॥ युज्यंते तु
न एव सद्भिः तं तर्षं तृष्णां ॥१७॥ ननु साधूनामपि धनिक एव प्रियः स्यान्न दरिद्र इति तत्राह ॥ साधूनामिति धनेन स्तंभो गर्वो येषां ते तमोमदं तानकतमदं

तमः प्लुतौ तमोव्याप्तौ

दाम
३०
२०

शापति || अतोऽर्हतइति || अनुगृह्णाति || स्यातां नैवमित्यादिना मत्प्रसादेन स्मृतिः स्यात् ||११|| तल्लोकतां देवत्वं पुनर्लब्ध्वा तस्मिन्मदनुग्रहः || लब्धभक्ती भविष्यतइति
||१२||१३|| उक्त्वैवमाह || ऋषिरिति ||१४|| किमिति सत्यकर्तव्यं तत्राह || देवर्षिरिति || यत्र यतः तत्र ततः यमयोः यमलयोः सहजातयोः || आत्मनः कृष्णस्य तत्त्वमध्यवे
शमात्रेण ||१६|| अन्वगन्वतीत्यवक्र || अवहेलनः || दामोदरेणेति || उत्कलित उत्पाटितः अंघ्रिबंधो मूलबंधो ययोस्तौ परमस्य श्रीकृष्णस्य विक्रमितं विक्रमः तेन अति

अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः || स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ||११|| वासुदेवस्य सांनिध्यं लब्ध्वा दिव्यशरच्छते || वृत्ते स्व
र्लोकतां भूयो लब्धभक्ती भविष्यतः ||१२|| श्रीशुक उवाच || एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमं || नलकूवरमणिग्रीवावासतुर्यमलार्जुनौ
ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः || जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ ||१४|| देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ || तत्तथा सा
धयिष्यामि यद्गीतं तन्महात्मना ||१५|| इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ || आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं ||१६|| बालेन निःक
र्षयतान्वगुलूखलं तद्दामोदरेण तरसोत्कलिताङ्घ्रिबंधौ || निःपेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ ||१७|| तत्र श्रि
या परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः || कृष्णं प्रणम्य शिरसाखिललोकनाथं बद्धांजली विरजसाविदमूचतुः स्म
||१८|| कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः || व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ||१९||

वेपः कंपो येषु ते स्कंधप्रवालविटपा ययोस्तौ ||१७|| ककुभः प्रति सर्वतः स्फुरंताविति अर्थः यद्वा दिशः प्रकाशयंताविति || कुजयोर्वृक्षयोः स्थितोऽग्निर्यथा मूर्तिमानुपेत्य तिन
ह्योपेत्य विरजसौ विमलौ ||१८|| गोपालबालं मां एवं वा देवौ किमिति प्रणताविति चेत् || तत्राहतुः हे कृष्ण महायोगिन् अचिंत्यप्रभावत्वेन बालः किंतु परः पुरुषः यतः आद्यः
कारणभूतः तत्रापि न निमित्तमात्रं किंतु उपादानमपि त्वमेवेत्याशयेनाहतुः || व्यक्ताव्यक्तमिति स्थूलसूक्ष्ममिदं ते रूपं विदुः ||१९||

२०.५
३१

नियंतापि त्वमेवेत्याह तु ॥ त्वमेक इति देहस्य भवः प्राणाः आत्मा अहंकारः इंद्रियाणि च तेषामीश्वरः ॥३०॥ नन्वयं कालो निमित्तं प्रकृतिरुपादानं प्रकृतेर्जी तो महान् विश्वात्मतया परिणमते पुरुषः कर्ता नियंता च किमत्राह ॥ अत आह तु ॥ त्वमेव काल इत्यादिना सार्द्धेन ॥ यतो भवानीश्वरो विष्णुस्त्वं ॥ अतः कालो नाम तव लीला प्रकृतिः शक्तिः पुरुषोंऽशः महान् कार्यं अतस्त्वमेव सर्वमित्यर्थः ॥३१॥ नन्वहमेव चेत्सर्वं घटादि ज्ञानेन मत्स्वरूपज्ञानं किं न भवति ॥ भवति चेत्त

त्वमेकः सर्वभूतानां देहास्वात्मेंद्रियेश्वरः ॥ त्वमेव कालो भगवान् विष्णुरव्यय ईश्वरः ॥३०॥ त्वं महान् प्रकृतिः सूक्ष्मा रजःसत्वतमोमयी ॥ त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ॥३१॥ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः ॥ को न्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ॥३२॥ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे ॥ आत्मद्योतिगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ॥३३॥ यस्यावतारा ज्ञायंते शरीरेष्वशरीरिणः ॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ॥३४॥ स भवान् सर्वलोकस्य भवाय विभवाय च ॥ अवतीर्णोंऽशभागेन सांप्रतं पतिराशिषां ॥३५॥ नमः परमकल्याण नमः परममंगल ॥ वासुदेवाय शांताय यदूनां पतये नमः ॥ ३६ ॥

वैः पितृब्रह्मविन्न्यायात् ॥ अत आह तु ॥ गृह्यमाणैरिति दृश्यत्वेन वर्तमानैर्बुद्ध्यहंकारेंद्रियादिभिः द्रष्टा त्वं न गृह्यसे इति भावः ॥ ननु तर्हि जीवो जानातु नैवेत्या ह तु ॥ को न्विहेति ॥ जीवा ह्युत्पन्नैः प्रागेव स्वप्रकाशतया सिद्धं त्वां को वा जानाति गुणसंवृतः देहाद्यावृतः ॥ अतो दुर्ज्ञेयत्वात्केवलं प्रणमतः ॥ तस्मै तुभ्य मिति आत्मनः स्वस्माद्द्योतः प्रकाशो येषां तैर्गुणैः छन्नो महिमा यस्य अभ्रैरिव रवेः ॥ तस्मै ॥३३॥ अहो अस्मदीश्वर इति कुतो ज्ञातं तत्राह तु ॥ यस्येति ॥३४॥ भवाय उद्भवाय विभवाय मोक्षाय विगतो भवो यस्मिन् तस्मै कैवल्यायेत्यर्थः ॥३५॥३६॥

राम
३१

२ मदं।

नौ आवां अनुचरः क्षवेरो नारदो वा तस्य किंकरौ भगवतस्तव दर्शनं ॥३६॥ तत्रागतयोरावयोः पूर्व्वस्वभावो माभूदिति तवाणी गुणानुकथने इ
त्यादिनः अस्मदीद्रियाणीति द्विवचनस्थाने बहुवचनं ॥ अस्मत्संगिनां सर्व्वेषामपीति वा बहुवचनं तव निवासभूतं यज्जगत्तस्य प्रणामे ॥ तन्निवास
इति बहुमानेन जगतः प्रणामे शिरोस्त्वित्यर्थः ॥ भवत्तनूनां भवतो मूर्त्तीनां ॥३८॥ संकीर्त्तितः संस्तुतः ॥३९॥ वाग्भिर्नेत्थमन्योनुग्रहतो जोष्यनित्याद्यो

अनुजानीहि नौ भूमंस्तवानुचरकिंकरौ ॥ दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ॥३७॥ वाणी गुणानुकथने श्रवणौ कथायां हस्तौ
च कर्मसु मनस्तव पादयोर्नः ॥ स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेस्तु भवत्तनूनां ॥३८॥ श्रीशुक उवाच ॥ इत्थं सं
कीर्त्तितस्ताभ्यां भगवान् गोकुलेश्वरः ॥ दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ॥३९॥ श्रीभगवानुवाच ॥ ज्ञातं मम पुरैवैतदृषि
णा करुणात्मना ॥ यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोनुग्रहः कृतः ॥४०॥ साधूनां समचित्तानां सुतरां मत्कृतात्मनां ॥ दर्शनान्नो भवेद्बंधः
पुंसोक्ष्णोः सवितुर्यथा ॥४१॥ तद्गच्छतं मत्परमौ नलकूवर सादनं ॥ संजातो मयि भावो वामीप्सितः परमोभवः ॥४२॥ श्रीशुक उवाच ॥ इ
त्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः ॥ बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तरां ॥४३॥ इति श्रीभागवते महापुराणे दशमस्कंधे यम

भिः श्रीभ्रंशरूपोनुग्रहः कृत इति ॥४०॥ युक्तमेवैतदित्याह ॥ साधूनां स्वधर्मवर्त्तिनां समचित्तानां आत्मविदां (लार्जुनसंवादे दशमोध्यायः
तरां मत्कृतात्मनां मय्यर्पितचित्तानां तेषां कृपातिरेकात् सुतरामित्यंतं सवितुर्दर्शनात्तयोर्यथा वधो न भवेत्तद्वत् ॥४१॥ साधान्यादे वासस्य संबोधनं हे
नलकूवरश्च वा ततस्तस्मात् सादनं सदनं स्वनिकेतनं मत्परमौ संतौ गच्छतं युवयोरपेक्षितो मयि प्रेमा जात एव ॥ अभवः न भवो यस्मिन्न ॥४२॥ तत्र बद्धोलूख

२०.१ एकादशे समागत्य नंदादावनगमयार्थं गैः वत्सान्चारयतः नेनहतो वत्सवकासुरौ ॥१॥ निर्घातो वज्रपात इति भयेन शंकिताः ॥१॥ ततलस्थम्प्रत्यक्षतः
२१ श्रुतौ दृश्यमपि पतनकारणमविज्ञाय वभ्रमुः ॥१॥ लक्ष्यं कारणं दर्शयति उलूखलमिति ॥ अमप्रकारमाह ॥ कस्येदं कुत आश्चर्यं कर्मं कृतं वा कारणा
न्न्यूह्यो आश्चर्यं उत्पात इति कातरा भीताः ॥ ते तो वभ्रमुरित्यर्थः ॥२॥ मध्यगेन कृष्णयोर्मध्यगतेन ॥ न केवलमेतावत् उत्खलैर्यानिर्गतौ दिव्यौ पुरु

श्रुक उवाच ॥ गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवं ॥ तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः ॥१॥ भूम्यां निपतितौ तत्र ददृ
शुर्यमलार्जुनौ ॥ वभ्रमुस्तमविज्ञाय लक्ष्यं पतनकारणं ॥२॥ उलूखलं विकर्षंतं दाम्ना बद्धं च बालकं ॥ कस्येदं कुत आ
श्चर्यमुत्पात इति कातराः ॥३॥ बाला ऊचुरनेनेति तिर्यग्गतमुलूखलं ॥ विकर्षता मध्यगेन पुरुषावप्यचक्ष्महि ॥४॥ न
ते तदुक्तं जगृहुर्न घटेतेति तस्य तत् ॥ बालस्योत्पाटनं तर्वोः केचित्संदिग्धचेतसः ॥५॥ उलूखलं विकर्षंतं दाम्ना बद्धं स्व
मात्मजं ॥ विलोक्य नंदः प्रहसद्वदनो विमुमोच ह ॥६॥ गोपीभिः स्तोभितो नृत्यन् भगवान् बालवत्क्वचित् ॥ उद्गायति क्वचि
न्मुग्धस्तद्वशो दारुयंत्रवत् ॥७॥ बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकं ॥ बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ॥८॥

भावप्यचक्ष्महि दृष्टवंतो वयमिति संकमानोः तौ व बाल्यमनुकरोतिस्म ॥ तदाह ॥ गोपीभिरिति स्तोभितः करतालादिना प्रोत्साहितः
॥७॥ इदमानयेत्याज्ञप्तस्तथानेतुमसमर्थ इव बिभर्ति केवलं पीठादि वक्षुद्रे प्रकरताडनं च दिहिहावेति च कारस्याववपः ॥८॥ ॥ ३ ॥ केवल
तार्किकान जगृहुरेवमन्येत संदेहयुक्ता विज्ञावभूरिति ॥५॥ भगवन्मायामोहितस्य नंदस्याचरितमाह ॥ उलूखलमिति ॥६॥ तातस्यात्मजमिति

च

वत्

राम
२१

ततएश्वर्यविरंतियेतेषां ॥ एवंव्रजस्पर्हर्षमुवाहेति ॥ ९ ॥ ७ ॥ रेमंदृंदावनंगतमतंतः कृष्णेनयंत्रिताः ॥ खतंत्राःस्ववनंदाद्यामंत्रमेतममंत्रयन्व्रजकार्यगो

दर्शयन्नद्भुतांलीलांआत्मनोमृत्यवश्यतं ॥ व्रजस्योवाहवैहर्षंभगवान्वालचेष्टितैः ॥ ९ ॥ मरिचीरगतंकृष्णंभयाज्ञेनमथांकयन्

तेच जन्मर्क्षेमिव्यमवितोविप्रेभ्योदेहिगाःसुविः ॥ १० ॥ पशुपपशुपवयस्यांस्तैमात्रास्पृष्टाखिलेकृताः ॥ त्वंचस्नातः कृताहारो विहर

त्वत्खिलेकृतः ॥ ११ ॥ नोपपातांयदाहूतोक्रीडासंगेनपुत्रकौ ॥ यशोदांप्रेषयामासरोहिणीपुत्रवत्सला ॥ १२ ॥ इत्ययशोदातमशोपरोरव

रंमत्वाहूतेत्वेहनिवद्धधीर्नृप ॥ हुत्तेगेहीत्वामहाराममनस्तेतनीत्वाहवारंकृतवत्यथोरयं ॥ १३ ॥ क्रीडंतंतावाहूतंवालैरतिवेलमहा

ग्रजं ॥ यशोदाजोहुवीत्कृष्णंपुत्रस्नेहस्नुतस्तनी ॥ १४ ॥ कृष्णकृष्णारविंदाक्षतातएहिस्तनंपिव ॥ अलंविहारैः क्षुत्क्षांतः क्रीडाश्रां

तोसिपुत्रक ॥ १५ ॥ हेरामागच्छताताशुसानुजः कुलनंदन ॥ प्रातरेवकृताहारस्तद्भवान्भोक्तुमर्हसि ॥ १६ ॥ प्रतीक्षतेत्वांदाशार्हभो

क्ष्यमाणोव्रजाधिपः ॥ एत्यावयोःप्रियंधेहिस्वगृहान्यातवालकाः ॥ १७ ॥ श्रीशुकउवाच ॥ गोपवृद्धामहोत्पातानंनुभूयवृहद्वने ॥ नंदा

दयःसमागम्यव्रजकार्यममंत्रयन् ॥ १८ ॥ तत्रोपनंदनामाहगोपोज्ञानवयोधिकः ॥ देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः ॥ १९ ॥

उत्थातव्यमितोस्माभिर्गोकुलस्यहितैषिभिः ॥ आयांत्यत्रमहोत्पातावालानांनाशहेतवः ॥ २० ॥ मुक्तः कथंचिद्राक्षस्यावालघ्न्यावाल

कुलस्यहितंकृत्यं ॥ १८ ॥ १९ ॥ २० ॥ २१ कोप्यसौ ॥ हरेरनुग्रहान्नूनमनश्चोपरिनापतत् ॥ २१ ॥

१०.पू.
३३

विपद्दीनापरित्राणपरं विहारस्थानं वियत् ॥ विगतप्रतिबंधा ॥ १२ ॥ अन्यतमो वा कश्चिद्बालः अस्मात्तैर्नैव रक्षणमासीत् ॥ १३ ॥ अरिष्टः अनर्थः इतः स्थानात्
॥ २४ ॥ पशव्यं पशुभ्यो हितं नवानि काननानि यस्य तत् पुण्या अद्रितृणवीरुधो यस्मिन् तत् ॥ २५ ॥ ६ ॥ एकधियः विप्रतिपत्तिरहिताः व्रजान्नाकरव्यूहान् रूढाः शकटानि
चकाराद्येन नीताः यैर्दैत्यैर्न विपर्द्दं वियत् ॥ शिलायां पतितस्तत्र परित्रातः हरेश्वरैः ॥ ११ ॥ यत्राग्निर्येतद्रुमयोरंतरं प्राप्य बालकः ॥ अपावन्य
तमो वा अपि तरप्यः अतरक्षणा ॥ १२ ॥ यावदौत्पातिको रिष्टो व्रजं नाभिभवेदितः ॥ तावद्बालानुपादाय यास्यामो न्यत्र सानुगाः
२४ ॥ वनं वृंदावनं नाम पशव्यं नवकाननं ॥ गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधं ॥ २५ ॥ तत्तत्राद्यैव यास्यामः शकटान्युङ्क्त मा चि
रं ॥ गोधनान्यग्रतो यांतु भवतां यदि रोचते ॥ ६ ॥ तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः ॥ व्रजान् स्वान् स्वान् समायुज्य ययू रू ज्य
ढपरिच्छदाः ॥ २७ ॥ वृद्धान् बालान् स्त्रियो राजन् सर्वोपकरणानि च ॥ अनःस्वारोप्य गोपाला यत्ता आत्तशरासनाः ॥ २८ ॥ गोधनानि पुरस्कृ
त्य शृंगाण्यापूर्य सर्वतः ॥ तूर्यघोषेण महता ययुः सहपुरोहिताः ॥ २९ ॥ गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः ॥ कृष्णलीला जगुः
प्रीता निष्ककंठ्यः सुवाससः ॥ ३० ॥ तथा यशोदारोहिण्यावेकं शकटमास्थिते ॥ रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ॥ ३१ ॥ वृंदा
वनं संप्रविश्य सर्वकालसुखावहं ॥ तत्र चक्रुर्व्रजावासं शकटैरर्द्धचंद्रवत् ॥ ३२ ॥ वृंदावनं गोवर्द्धनं यमुनापुलिनानि च ॥ वीक्ष्यासीदुत्त
आरोपिताः परिच्छदाः येस्ते ॥ २७ ॥ यत्ताः कृतप्रयत्नाः ॥ २८ ॥ २९ ॥ नूतनैः कुचगतैः कुंकुमैः कांतिर्यासां ताः नूत्नेष्वकुचेषु यत् (मा प्रीती रामसाधवयोर्नृप ॥ ३३
कुंकुमं तेन कांतिर्यासामिति वा ॥ ३० ॥ व्रजावासं गोकुलवासस्थानं ॥ ३२ ॥ ३३ ॥

राम
३३

स्वकालेन तद्योग्यकालेन ॥ ३४ ॥ कौमारलीलां निरूपयति ॥ अविदूर इत्यादिना ॥ ३५ ॥ क्षेपणैः बिल्वामलकादिभिः किंकिणीयुक्तैः पादैः क्षिपतः ताडयंतः वत्सपाला एवद्विवाः कंबलादिपिहिताः वृषरूपमनुकुर्वंति तैः सह ॥ ३६ ॥ स्वयमपि तथैव वृषायमाणौ नर्दंतौ तत्तत्कारिशब्दान्कु-

एवं व्रजौकसां प्रीतिं यच्छंतौ बालचेष्टितैः ॥ कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ॥ ३४ ॥ अविदूरे व्रजभुवः सह गोपालदारकैः ॥ चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ ॥ ३५ ॥ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् ॥ क्वचित्पादैः किंकिणीभिः क्वचित्कृत्रिमगोवृषैः ॥ ३६ ॥ वृषायमाणौ नर्दंतौ युयुधाते परस्परं ॥ अनुकृत्य रुतैर्जंतूंश्चेरतुः प्राकृतौ यथा ॥ ३७ ॥ कदाचिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः ॥ वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥ ३८ ॥ तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः ॥ दर्शयन्बलदेवाय शनैर्मुग्ध इवासदत् ॥ ३९ ॥ गृहीत्वापरपादाभ्यां सहलांगूलमच्युतः ॥ भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजीवितं ॥ स कपित्थैर्महाकायः पात्यमानैः पपात ह ॥ ४० ॥ तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति ॥ देवाश्च परिसंतुष्टा बभूवुः पुष्पवर्षिणः ॥ ४१ ॥ तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ॥ सप्रातराशौ गोवत्सांश्चारयंतौ विचेरतुः ॥ ४२ ॥ ॥

र्वंतौ युयुधाते इत्यर्थः रुतैः शब्दैः जंतून्हंसमयूरादीन् ॥ ३७ ॥ ८ ॥ मुग्ध इव अज्ञानन्निव आसदत् समीपमागमत् ॥ ३९ ॥ अपरपादाभ्यां सलांगूलं यथा भवति तथा गृहीत्वा ॥ ४० । १ ॥ सर्वेषां लोकानामेकौ मुख्यौ पालकौ ॥ प्रातराशः प्रातर्भोज्यमन्नं तत्सहितौ ॥ ४२ ॥

अभ्यासस्समीपं ॥४३॥ पं ॥ एामस्यारिर्येषां तेन तत्रणमः ॥४६॥ तुंडयोः चंच्वोः वीरणावत् अग्रंथिमृणालविशेषवत् ॥४८॥ समीडिरे तुष्टुवुः ॥ आनकैः
शंखैः अन्यैश्च सस्तवैः सह ॥४९॥ स्वस्थानमागतं प्राणमिव वत्सान्स्वं प्रणीय एकीकृत्य ॥५०॥ अतिप्रियेण प्रीत्या आदृताः सादराः प्रेत्यागतमिव

स्वंस्वंवत्सकुलंसर्वेपाययिष्यंतएकदा ॥ गत्वाजलाशयाभ्याशंपाययित्वापपुर्जलं ॥४३॥ तेतत्रददृशुर्बालामहासत्वमवस्थितं
तत्रसुर्वज्रनिर्भिन्नंगिरेःशृंगमिवच्युतं ॥४४॥ सवैबकोनाममहानसुरोबकरूपधृक् ॥ आगत्यसहसाकृष्णंतीक्ष्णतुंडोग्रसद्बली
कृष्णंमहाबकग्रस्तंदृष्ट्वारामादयोर्भकाः ॥ बभूवुरिंद्रियाणीवविनाप्राणंविचेतसः ॥४६॥ तंतालुमूलंप्रदहंतमग्निवद्गोपालसू
नुंपितरंजगद्गुरोः ॥ चच्छर्दसद्योतिरुषाक्षतंबकस्तुंडेनहंतुंपुनरभ्यपद्यत ॥४७॥ तमापतंतंसनिगृह्यतुंडयोर्दोर्भ्यांबकंकंससखंसता
पतिं ॥ पश्यत्सुबालेषुददारलीलयामुदावहोवीरणवद्दिवौकसां ॥४८॥ तदाबकारिंसुरलोकवासिनःसमाकिर[न्न]न्नंदनम
ल्लिकादिभिः ॥ समीडिरेचानकशंखसंस्तवैस्तद्वीक्ष्यगोपालसुताविसिस्मिरे ॥४९॥ मुक्तंबकास्यादुपलभ्यबालकारामादयःप्रा
णमिवेंद्रियोगणः ॥ स्थानागतंतंपरिरभ्यनिर्वृताःप्रणीयवत्सान्व्रजमेत्यतज्जगुः ॥५०॥ श्रुत्वातद्विस्मितागोपागोप्यश्चातिप्रि
यादृताः ॥ प्रेत्यागतमिवौत्सुक्यादैक्षंततृषितेक्षणाः ॥५१॥ अहोबतास्यबालस्यबहवोमृत्यवोभवन् ॥ अप्यासीद्विप्रियंतेषांकृतंपू

तृषितैः तानि अतृप्तानि अमृतं पिबंतीव ईक्षणानि येषां ते ॥५१॥ अहो बतेत्यादि श्लोकत्रयस्य इति नंदादयः परस्परेण आहुः अपि एव (वैयतो भयं ॥५२॥
मपि तेषामेवानिष्टमासीत् तैर्यतः पूर्वमन्येषां भयं कृतं ॥५२॥

अथघोरदर्शनाअपिनाभिभवंति ॥ न घर्षयंति ॥ ५३ ॥ गर्गो यदाह तस्मात्त्वंरात्मजो येते नारायणसमो गुणैरित्यादि ॥ ५४ ॥ ६ ॥ वत्सपृथग्गतं हत्वा वत्सरूपं भा
ष्वरं हरिः ॥ पुनिपृथगतं वाहत्रयग्णपरभिनांवकं ॥ २ ॥ रामेएकार गः ॥ द्वारशोत्थमहासर्पवपुर्दूरमद्याहरं ॥ वत्सपालगिलं क्रुद्धोगलेहत्त्रितिवृषापं
ते ॥ महावकगलक्रीडाकेवलस्यनकौतुकं ॥ इतीर्वचाघासुरस्यरवमप्रवः प्राविशद्धरिः ॥ क्कचित्करावितवनाशायवनएववृथ्यमभोजनेकार्य ॥ १

अथाप्यभिभवंत्येनं नैधंते घोरदर्शनाः ॥ जिघांसयैनमासाद्य नश्यंत्यग्नौ पतंगवत् ॥ ५३ ॥ अहो ब्रह्मविदां वाचो नासत्याः संति कर्हि
चित् ॥ गर्गो यदाह भगवानन्वभावि तथैव तत् ॥ ५४ ॥ इति नंदादयो गोपाः कृष्णरामकथां मुदा ॥ कुर्वंतो रममाणाश्च नाविंद
न्भववेदनां ॥ ५५ ॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ॥ ५६ ॥ इति श्रीभागवते महा
पुराणे दशमस्कंधे वत्सकवकयोर्वधो नामैकादशोऽध्यायः ॥ शुक उवाच ॥ क्कचिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्यवत्स
पान् ॥ प्रबोधयञ्छृंगरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः ॥ १ ॥ तेनैव साकं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाण
वेणवः ॥ स्वान्स्वान्सहस्रोपरि संख्ययान्वितान्वत्सान्पुरस्कृत्य विनिर्ययुर्मुदा ॥ २ ॥ कृष्णवत्सैरसंख्यातैर्यूथीकृत्य स्ववत्सकान् ॥ चारय
तोऽर्भलीलाभिर्विजह्रुस्तत्र तत्र ह ॥ ३ ॥ फलप्रबालस्तवकसुमनःपिच्छधातुभिः ॥ काचगुंजामणिस्वर्णभूषिता अप्यभूषयन् ॥ ४ ॥

तेनैव शृंगारवेणचारुणा वा ॥ पृथुकाः बालाः स्निग्धाः स्नेहयुक्ताः शिक्यादिकं रम्याः शिग्वेत्रादयो येषां तेः सहस्राधिकसंख्यायुक्तान् स्ववत्सान् ॥ ३ ॥ काचादि
भिः पूर्वं भूषिता अपि फलादिभिरात्मानमभूषयन्नित्यर्थः ॥ ३ ॥ ४ ॥ ॥ एमएम

२०५०
२५

पुरस्तं तस्योरपंतः ॥५॥ यद्यरिसृंगतः कस्मोन भवतितर्हीति ॥६॥ ध्मांतः वारयंतः मृगैः सह ॥७॥ विछायाभिः कलापिभिः मयूरैः ॥८॥ कीशवालान्सृर
शाखोल्ललंबमानानि वानरलांगूलानि आकर्षतः लांगूलमभुंचतस्तैः ॥ सहहुमानानहहतः विकुर्वतः रंतरशीनभूविभं भारिभिस्तैः सहविकाराननुकु
र्वतः ॥ पलाशिषु वृक्षेषु सवतः शाखांतरमुत्कटंतः ॥९॥ प्रतिछायाः प्रतिबिंबानि ॥१०॥ तान् निविस्मिताः स्त्रीकादयो नाभिनंदति ॥ इत्थमिति ॥ स्वतां वि

पुरस्तान्योन्यारिकारिस्तत्तानानाद्वविरिशिपुः तत्रत्याश्च पुनर्दृष्टा तदन्तस्तु पुनर्ददुः ॥५॥ यरिसृंगतः कस्मोवनशोभेक्षणा
यंते अहंपूर्वमहंपूर्वमिति तेमस्पर्धया रेमिरे ॥६॥ केचिद्दृष्टा नुवारयंतो ध्मांतः मृगाणि केवन ॥ केचिद्भृंगैः प्रगायंतः कूजंतः
कोकिलैः परे ॥७॥ विछायाभिः प्रधावंतो गच्छंतः साधुहंसकैः ॥ वके रूपविशांतश्च नृत्यंतश्च कलापिभिः ॥८॥ विकर्षतः कीश
वालान् आरोहंतश्च तेद्रुमान् ॥ विकुर्वंतश्च तैः साकं प्लवंतश्च पलाशिषु ॥९॥ साकं भेकैर्विलंघंतः सरित्स्रवसंस्रुताः ॥ हसंतश्च
प्रतिछायाः शपतश्च प्रतिखिनान् ॥१०॥ इत्थं समतो ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ॥ मायाश्रितानां नरदारकेण साकं

दुधा ॥ ब्रह्मवतन्सुखं च ॥ अनुभूतिश्च तया ब्रह्मकाशपरमसुखेनेत्यर्थः ॥ भक्तानां परदैवतेन आत्मप्ररेननायेन ॥ माया (विजह्रुः कृतपुण्यपुंजाः ॥)
श्रितानां नरदारकेन योप्रतीयमानेन ॥ सहविजह्रुः कृतानि पुण्यानि पुंजा एषां येषां ते ॥ ब्रह्मविरानंदरसु भव एव ॥ भक्तानां पतिगोरवैशौवभज
ने ॥ एतेनतेन सहसख्येन विजह्रुः ॥ अहो भाग्यमिति भावः ॥११॥

एम
२५

बहुजन्मभिः कष्टेनाधृतस्यात्मनो धैर्यैरपि ॥१२॥ सुखक्रीडनवीक्षणे न क्षमा यस्य सः ॥ कथंभूतः यस्यान्तः अंतरं छिद्रं पीतामृतैरपि तनो मृत्युभीतै रमरैः प्रतीक्ष्यते कथं मरिष्यति कदा वेति ॥ यद्वा कथंभूतं सुखक्रीडनं यदंतः हृदये अमरैः प्रतीक्ष्यते विचिन्त्यते ॥ पीतामृतैरपि निजजीवितेप्सुभिः ॥ अयं भावः नामृतपानमात्रेणाजीवितं सफलं भवति ॥ किंतु भगवल्लीलाश्रवणेनेति ॥ तदेव नित्यमतश्चिन्त्यत इति ॥१३॥ कृष्णमुखानर्भकान्दृष्ट्वासुर इति

यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यलभ्यः ॥ स एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमहो व्रजौकसां ॥१२॥ अथाघनामाभ्यपतन्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः ॥ नित्यं यदंतर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥१३॥ दृष्ट्वार्भकान्कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः ॥ अयं तु मे सोदरनाशकृत्तयोर्द्वयोर्ममैनं सबलं हनिष्ये ॥१४॥ एते यदा मत्सुहृदोस्तिलापः कृतास्तदा नष्टसमा व्रजौकसः ॥ प्राणे गते वर्ष्मसु का नु चिंता प्रजासवः प्राणभृतो हि ये ते ॥१५॥ इति व्यवस्याजगरं बृहद्वपुः स योजनायाममहाद्रिपीवरं ॥ धृत्वाद्भुतं व्यात्तगुहाननं तदापथि व्यशेत ग्रसनाशया खलः ॥१६॥

व्यवस्य निश्चित्य आजगरं वपुः धृत्वा तेषां ग्रसनाशया पथि व्यशेतेति तृतीयश्लोकेनान्वयः ॥ कंसेनानुशिष्टः प्रहितः ॥ बकीपूतना ॥ कथं व्यवस्यत्तदाह ॥ अयं त्विति सार्द्धेन ॥ मम तयोर्द्वयोः स्थाने एनं कृष्णं सबलं सबलं सपालसहितं हनिष्यामि ॥१४॥ ननु तथापि व्रजस्थास्तव्य वशिष्येरन्नित्याह ॥ एते इति तिलापः कृताः तिलोदकतया कल्पिताः वर्ष्मसु देहेषु प्रजा एव असवो येषां ते तथा ॥१५॥ योजनायामं योजनप्रमाणेन दैर्घ्येण युक्तं च तन्महाद्रिपीवरं च ॥ व्यात्तं प्रसारितं गुहा दरी आननं यस्मिंस्तत् ॥१६॥

२०५
३६

अद्भुतमितियदुक्तंएतद्दर्शयितुंविशिनष्टि धराधरमधरीकृतोयस्मात्सः दर्प्याविवाननस्यांतोत्कृष्टिरणीयस्मात्सः गिरेः शृंगाणीवरथ्रायस्मात्सः धृतंतवदं
तराग्रंयस्मात्सः वितताधृतवजिह्वायस्मात्सः परुषोनिलवान्स्वासोयस्मात्सः रावणरीकृणणीयोहृत्सः रावद्वृषिरित्यर्थः परुषानिलवत् स्वासस्वासोरावे
कृणणस्त्वतथा १८ वतुतोअजगरमेवव्याघ्रतुंडंदृष्ट्वाद्रेरावणस्संप्राप्तंपरेवेति धोत्पामत्वाविपरीतंव्याघ्रास्रजगरपतंडंप्रादृश्यमानोत्कृतिवंतः

धि०२

१८ उत्तेजामेवप्रश्नोत्तरणीयाऽऽः अहोइति सत्यकूटंमत्वामामसिदंनवा अत्रापि अस्मत्प्रसन्नायव्याघ्रपतव्यालंतंडंतदृराचरितवान् १९ निश्चितं

धराधरोषोजलरोत्तरोशेदर्पोनतांतोगिरिशृंगदंष्ट्रः धृतान्तराग्रोविततावृजिह्वः परुषानिलास्वासरवेकृणोऽस्मः १८ दृ
ष्टातंतादृशंसर्वेमत्वादेरावणप्रियं व्याघ्राजगरतंडेनतृप्रसन्नंतेस्मलीलया १८ अहोमित्रागिरतसत्वकूटेश्वरः स्थितं
अस्मत्प्रसन्नव्याघ्रव्यालतंडायतेनच १९ सत्यमर्ककरारक्तंअत्रारहत्तवद्धनं अधराहत्तवद्रोधतत्प्रतिष्ठायथाहृणां २०
प्रतिस्पर्द्धतेत्सहिविंध्योसव्यासव्येनगोदरे तंगशृंगालयोपेतेतंदष्ट्राभिश्चपश्यत २१ आत्ततायामपमार्गोपरंसत्ताप्रतिगर्जति एषम्
नर्गतंधृतमेतदप्यतराननं २२ रावोल्पसखरवातोयंस्वासवद्वातिपश्यत तद्गंधसत्वदुर्गधोः प्यंतरामिषगंधवत् २३

तथैवेत्याह सत्यमिति अर्ककरैरारक्ताघनस्तत्तरोशवत्पश्यत तस्यव्रनस्यप्रतिष्ठायथाअरुणारोधस्थलंअधरोष्ठवत्पश्यतेति सर्वत्रान्वेति २४ सविं
ध्योउष्ट्राताध्यांप्रतिस्पर्द्धते तत्यतयाव्रतेनते नगोदरेगिरिदर्पोतस्मदंष्ट्राभिः स्पर्द्धमाना २१ आत्ततायामार्गः वितत्तोदैर्घ्यवान्मार्गः प्रतिगर्जति
स्पर्द्धते एषांशृगाणांमध्यगतमधकारंएतदंतराननंआननमध्यंप्रतिगर्जति २२ रावेनउल्पः खरोवातोयंतेनदवाग्निनादः धानांसत्वानांयोदुर्गधः राम

३६

एवं संतमजगरमन्यथोत्प्रेक्ष्य निर्भयाः पश्यतः किं ग्रसितानां ग्रसिष्यति ॥ अनेन श्रीकृष्णेन हत्वा ॥ बकारेरुशत्कमनीयमुखं ॥ २४ ॥ अमृषापि तत्त्वतः सर्पवपुर
सुर एव मृषायते ॥ स्वानां सर्पास्यदृष्टगोचरत्वेन ज्ञानीति यत इति तान्निरोद्धुं चारयितुं पाव मनो दधे तावत्प्रविष्टास्त्वसुरोदरान्तरम् ॥ २५ ॥ प्रविष्टा एव
केवलं तु तेन गीर्णा निगलिताः जीर्णा इति पाठेपि स एवार्थः कथंभूतेन हतयो रतं स्मरतीति तथा तेन अत एव कारेः श्रीकृष्णप्रवेशं प्रतीक्षमाणेन

अस्मान्किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनंक्ष्यति ॥ क्षणादनेनेति बकार्युशन्मुखं वीक्ष्योद्धसन्तः करताडनैर्ययुः ॥ २४
इत्थं मिथोतथ्यमतज्ज्ञभाषितं श्रुत्वा विचिंत्येत्यमृषा मृषायते ॥ रक्षो विदित्वाखिलभूतहृत्स्थितः स्वानां निरोद्धुं भगवान्म-
नो दधे ॥ २५ ॥ तावत्प्रविष्टास्त्वसुरोदरान्तरं परं न गीर्णाः शिशवः सवत्साः ॥ प्रतीक्षमाणेन बकारिवेशनं हतस्वकान्तस्मर-
णेन रक्षसा ॥ २६ ॥ तान्वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथान्स्वकरादवच्युतान् ॥ दीनांश्च मृत्योर्जठराग्निघासान्घृणा-
र्दितो दिष्टकृतेन विस्मितः ॥ २७ ॥ कृत्यं किमत्रास्य खलस्य जीवनं न वा अमीषां च सतां विनाशनं ॥ द्वयं कथं स्यादिति संविचिं-
त्य तं ज्ञात्वाविशत्तुंडमशेषदृग्घरिः ॥ २८ ॥ तदा घनच्छदा देवा भयाद्धाहेति चुक्रुशुः ॥ जहृषुर्ये च कंसाद्याः कौणपास्त्वघबांधवाः ॥ २९

२६ ॥ स्वकरादवच्युतान् विनिःसृतान् विस्मितः सन् ॥ २७ ॥ कृत्यं किमत्रेत्यादि विविच्य तत्रोपायं ज्ञात्वा हामप्याविशदित्यन्वयः कथं विचिंत्य अस्य जीवनं अ-
मीषां वा विहिंसनमिति द्वयं वै निश्चितं कथं न स्यादिति ॥ २८ ॥ घनच्छदा मेघान्तरिताः कौणपाः कुणपाशिनो राक्षसाः कौणपा योनिस्त्वेति त्वरीया इति वा ॥ २९

ततोतिहृष्टाः खलु तत्र तारा हर्षं पुष्पैः सुरा अप्सरसश्च नर्त्तनैः गीतैः सुगा वादित्रधराश्च वाद्यैः स्तवैश्च विप्रा जयनिःस्वनेन गणाः ॥२१॥४

२०५
३७

दर्शीकर्त्तुमिच्छोतस्य गते आराविवतरसावरुद्धे अवर्द्धयत ॥२०॥ निरुद्धो मुखादीनां मार्गभूतः कण्ठो यस्या निलस्य उद्गीर्णो दृष्टे वहिर्निर्गत लोचनत
स्य ॥ अंतरंगे देहमध्ये ॥ पूर्णो परिभूतः मूर्द्धन मूर्द्धनि ब्रह्मरंध्रं निर्भिद्य वहिर्गत इति ॥२१॥ प्राणेषु इंद्रियेषु ॥ त्विषः मतेषु वर्षिणाद्दृष्टेषु च ॥२२॥ अथ हि दे
हे स्थितं सद्रूप तत्त्वमयं ज्योतिर्गतं खेः वस्थितं ॥ तस्मिन् ईशे विवेश ॥२३॥ विकृततः त्वकायतः श्रीकृष्णस्याहेर्णां अकृतप्रज्ञा मकवेन ॥ हगाः ह

तं कृत्वा भगवान्कृष्णस्त्वन्मयः सान्त्ववत्सकं ॥ दर्शी विकीर्षो रात्मानं तरसावरुद्धे गले ॥२०॥ ततोऽहिकायस्य निरुद्धमार्गिणो
ह्युद्गीर्णदृष्टेर्भ्रमतास्थितस्ततः ॥ पूर्णोऽन्तरंगे पवनो निरुद्धो मूर्द्धन्विनिर्भिद्य विनिर्गतो वहिः ॥२१॥ तेनैव सर्वेषु वहिर्गतेषु प्राणेषु
वत्सान्सुहृदः परेतान् ॥ दृष्ट्वा स्वयोत्थाप्य तदन्वितः पुनर्वक्त्रान्मुकुंदो भगवान्विनिर्ययौ ॥२२॥ पीनाहिभोगोत्थितमद्भुतं महज्ज्यो
तिः स्वधाम्ना ज्वलयद्दिशो दश ॥ प्रतीक्ष्य खेऽवस्थितमीश निर्गमं विवेश तस्मिन्मिषतां दिवौकसां ॥२३॥ ततोऽद्भुतस्तोत्र सुवाद्य गी
तकाजयादि नैकोत्सव मंगलस्वनान् ॥ श्रुत्वा स्वधाम्नोऽन्त्यज आगतोऽचिराद्दृष्ट्वा महीशस्य जगाम विस्मयं ॥२५॥ राजन्नाजगरं च
र्म्मशुष्कं वृंदावनेऽद्भुतं ॥ व्रजौकसां बहुतिथं बभूवाक्रीडगह्वरं ॥२६॥

सुगाद्यंतीति गंधर्वादयः ॥२३॥ किंच ॥ तेषां यान्यद्भुतस्तोत्रादीनि नैकोत्सवाये मंगलस्वनास्तान् ॥ स्वधाम्नः अंतिसमीपे श्रुत्वा अजो ब्रह्मादिरचिराद्
गतः ॥ ईशस्य श्रीकृष्णस्य महिमानं दृष्ट्वा विस्मयं प्रापेति ॥२५॥ बहुतिथं बहुकालं आक्रीडगह्वरं क्रीडार्थं महाबिलं ॥२६॥ ॥ ॥

राम
३७

अन्यद्यातिविचित्रं वृत्तमित्याह एतदिति॥ कौमारं पंचमाब्दांतं पौगंडं दशमावधि॥ कैशोरमापंचदशात् यौवनं तु ततः परं॥ हरेः कौमारं पंचमाब्दांतं तत्क
र्मितद्देवदृष्टा॥ पौगंडे षष्ठे वर्षे बाला अर्थ्यैतन्न वृत्तमित्यूचुः॥ किं तत्कर्म मृत्योः सकाशादात्मना मेहेश्वमोक्षणं॥ आत्मनैव सिद्धा मृत्योः अघेहेतुसंसा
रलक्षणात्॥ अघाहरस्य ज्योतिषः श्रीकृष्णप्रवेशमपि तदा दृष्टं काथितं वेतनं इत्यर्थः॥३६॥ नैतद्विचित्रं किं तदित्यपेक्षायामाह अघोपीति॥ आत्मसात्म्यं

एतत्कौमारजं कर्म हरेरात्माहिमोक्षणं॥ मृत्योः पौगंडके बाला दृष्ट्वोचुर्विस्मिता व्रजे॥३७॥ नैतद्विचित्रं मनुजार्भमायिनः परावराणां परमस्य वेधसः॥ अघोपि यत्स्पर्शनधौतपातकः प्रापात्मसाम्यं त्वसतां सुदुर्लभं॥३८॥ सकृद्यदंगप्रतिमांतराहिता मनोमयी भागवतीं ददौ गतिं॥ स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायोंऽतर्गतो हि किं पुनः॥३९॥ सूत उवाच इत्थं द्विजा यादवदेवदत्तः श्रुत्वा स्वरातुश्चरितं विचित्रं॥ पप्रच्छ भूयोपि तदेव पुण्यं वैयासकिं यन्निगृहीतचेताः॥४०॥ राजोवाच ब्रह्मन्कालांतरकृतं तत्कालीनं कथं भवेत्॥ यत्कौमारे हरिकृतं जगुः पौगंडकेर्भकाः॥४१॥ तद्ब्रूहि मे महायोगिन्परं कौतूहलं गुरो॥ नूनमेतद्धरेरेव माया भवति नान्यथा॥४२॥ वयं धन्यतमा लोके गुरोपि क्षत्रबंधवः॥ यत्पिबामो मुहुस्त्वत्तः पुण्यं कृष्णकथामृतं॥४३॥

ह्यत्र पसमानतां॥३८॥ यस्यांगप्रतिर्विग्रहस्य प्रतिमा प्रतिकृतिः तत्रापि केवलं मनोमयी सापि बलादंतराहिता सती भागवतीं गतिं ददौ प्रह्लादादिभ्यः स एव
सा साक्षात्स्वयमंतर्गतः किं पुनः नित्यो यः आत्मसुखानुभूतिः तया व्युदस्ता माया येन सः॥३९॥ येन श्रवणेन निगृहीतवत्कृतं चेतो यस्य सः॥४०॥
कालांतरे कौमारे कृतं पौगंडके कथं तत्कालजं भवेदित्यर्थः॥४१।४२॥

२०पू

३८

तेन यः स्मारितोनंतः तेन हृतान्यखिलेंद्रियाणि यस्य सः॥ तथाभूतोपि कथं विलब्धबहिर्दृष्टिः हे भागवतोत्तमशौनक॥४४॥ इति श्रीमेहृदयः॥ त्वयोदरे
हृतं ब्रह्मा वत्सान्बालांश्च मायया॥ तदा तत्सर्वं रूपो भूत्वा पूर्ववदाचरत॥१॥ नूतनयसि नव्यं करोषि॥१॥ तथा हि॥ सारभृतानां सारग्राहिणामयं निसर्गः
स्वभावः॥ कोसौ अच्युतस्य वार्त्ता प्रतिक्षणं साधु नव्यवद्भवतीति यत्सः॥ विटानां स्त्रैणानां स्त्रियाः कामिन्या वार्त्तेव॥ कथंभूतानामपि सतां॥ यान्यच्युतस्य

सूत उवाच॥ इत्थं स्म पृष्टः स तु बादरायणिस्तत्स्मारितानंतहृताखिलेंद्रियः॥ कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतो
त्तमोत्तमं॥४४॥ इति श्रीभागवते महापुराणे दशमस्कंधे अघासुरवधो नाम द्वादशोध्यायः॥ शुक उवाच॥ साधु पृष्टं महाभाग त्वया
भागवतोत्तम॥ यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः॥१॥ सतामयं सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि॥ प्रति
क्षणं नव्यवदच्युतस्य यत्स्त्रिया विटानामिव साधुवार्त्ता॥२॥ शृणुष्वावहितो राजन्नपि गुह्यं वदामि ते॥ ब्रूयुः स्निग्धस्य शिष्य
स्य गुरवो गुह्यमप्युत॥३॥ तथाघवदनान्मृत्यो रक्षित्वा वत्सबालकान्॥ सरित्पुलिनमानीय भगवानिदमब्रवीत्॥४॥ अहो ति
रम्यं पुलिनं वयस्याः स्वकेलिसंपन्मृदुलाच्छबालुकं॥ स्फुरत्सरोगंधहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलं॥५॥

वार्त्तैव वार्त्ता येषां तन्निवाणीश्रुतिचेतांसि येषां तथाभूतानामपि॥१॥४॥ भोजनविधानाय पुलिनं स्तौति॥ अहो इति द्वाभ्यां नो कलीनां संपदो विद्यंते यस्मिन्
स्मिन्नतत॥ मृदुला अच्छा वालुका यस्मिन्नतत॥ किंच॥ स्फुरद्विकसत्सरः सरोजवायुलेनोपचारतः सर एव विकसदित्युक्तं॥ तस्य गंधः॥ तेन हृता आ
कृष्टा भ्रमराः पत्रिणश्च तेषां प्रतिध्वानाः तैर्लसंतो द्रुमाः तैराकुलं व्याप्तं॥५॥

राम

३८

दिवारूढं वेलातीतेत्यर्थः ॥६॥ आरुध्य समरुध्य शाड्वले नवहरिततृणप्रदेशे ॥७॥ तदा ते विरेजुः कृष्णस्य विष्वक् परितः पुरुणा जितं मंडलैर्वक्राभिः
पंक्तिमंडलैः सहैतैरंतर्येऽग्रतो प्रविष्टाः ॥ अंभोरुहाभिमुखान्याननानि येषां ते फुल्लदृशो विकसितनयनाः कमलकर्णिकायाः परितः पत्राणि
यथेति ॥८॥ पुष्पैस्तद्दलैः अंकुरैश्च पत्रैः कृतानि भाजनानि यैस्ते ॥९॥ रुचिं स्वादविशेषं ॥ अभ्यवजह्रुः बुभुजिरे सहेश्वराः श्रीकृष्णसहिताः ॥१०॥

अत्र भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः ॥ वत्साः समीपेऽपः पीत्वा चरंतु शनकैस्तृणं ॥६॥ तथेति पाययित्वार्भा वत्सा-
नारुध्य शाड्वले ॥ मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा ॥७॥ कृष्णस्य विष्वक्पुरुराजिमंडलैरभ्याननाः फुल्लदृशो
व्रजार्भकाः ॥ सहोपविष्टा विपिने विरेजुश्छदा यथांभोरुहकर्णिकायाः ॥८॥ केचित्पुष्पैर्दलैः केचित्पल्लवैरंकुरैः फलैः
शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ॥९॥ सर्वे मिथो दर्शयंतः स्वस्वभोज्यरुचिं पृथक् ॥ हसंतो हासयंतश्चाभ्य-
वजह्रुः सहेश्वराः ॥१०॥ बिभ्रद्वेणुं जठरपटयोः शृंगवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यंगुलीषु ॥ तिष्ठन्मध्ये स्वपरि-
सुहृदो हासयन्नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बालकेलिः ॥११॥ भारतैवं वत्सपेषु भुंजानेष्वच्युतात्मसु ॥ वत्सास्त्वंतर्व-

स्कं १

यज्ञभुगपि तेषु बुभुजे बालानामिव केलिर्यस्य सः ॥ तदाह ॥ उदरवस्त्रयोर्मध्ये वेणुं च विभ्रद्दधत् सर्वत्र ॥ वाम इति ॥ ने दूरं विविशुस्तृणलोभिताः ॥१२॥
कक्षयोः पाण्योर्विशेषणं ॥ मसृणं स्निग्धं दध्योदनकवलं ॥ तदुचितानि विल्वादिफलानि अंगुलिसंधिषु ॥ कर्णिकेव स्वसखीनां मध्ये तिष्ठन् स्व-
स्वपरित उपविष्टान् सुहृदः ॥ स्वैर्नर्मभिः परिहासवाक्यैः स्वर्गे स्वर्गवासिनि जने आश्चर्येण पश्यति सति लोके जनानां मध्ये बुभुजे

२०५ भीमयं भयहेतुस्तोभयं अस्य पापस्य ॥ यद्वा ॥ अस्य विश्वस्य सर्वस्यापि भयं यः श्रीकृष्णः आशनात भोजनात ॥ अस्मिन्पादेऽक्षराधिक्यमार्षं ॥ १३ ॥ अद्रीशु
३९ तद्दरीषु कुंडलेषु लतासु विहितोदरविवरेषु ॥ गह्वरेषु ॥ संकरस्थानेषु ॥ १४ ॥ अंभोजन्मनः पद्माज्जनिर्यस्य स ब्रह्मा तदंतरे तस्मिन्नवसरे ॥ गतः आगतः
नद्विद्रष्ट्राग्रोवा ॥ अन्यदपि महित्वं महिमानं दृष्टुं तस्य वत्सानितः स्थानात ॥ वत्सपांश्चान्यत्र नीत्वा स्वयं तिरोबभूव घ भवतः श्रीकृष्णस्य ॥ १५ ॥ उभाव

तान्दृष्ट्वा भयसंत्रस्तानूचे कृष्णोऽस्य भीभयं ॥ मित्राण्याशान्माविरतेहानेष्ये वत्सकानहं ॥ १३ ॥ इत्युक्त्वाद्रिदरीकुंजगह्वरे
ष्वात्मवत्सकान् ॥ विचिन्वन्भगवान्कृष्णः सपाणिकवलो ययौ ॥ १४ ॥ श्रीशुक उवाच ॥ अंभोजन्मजनिस्तदंतरगतो मायार्भ
कस्येशितुर्द्रष्टुं मंजु महित्वमन्यदपि तद्वत्सानितो वत्सपान् ॥ नीत्वान्यत्र कुरूद्वहांतरदधात्खेऽवस्थितो यः पुरा दृष्ट्वा
घासुरमोक्षणं प्रभवतः प्राप्तः परं विस्मयं ॥ १५ ॥ ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् ॥ उभावपि वने कृष्णो विचिका
य समंततः ॥ १६ ॥ क्वाप्यदृष्ट्वांतर्विपिने वत्सान्पालांश्च विश्ववित् ॥ सर्वं विधिकृतं कृष्णः सहसावजगाम ह ॥ १७ ॥ ततः
कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च ॥ उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥ १८ ॥

भा० पि वत्सान्वत्सपांश्च विचिकाय अन्वीक्षितवान् ॥ १६ ॥ विधिकृतं ब्रह्मणा कृतं ॥ १७ ॥ उभावपि तं वत्सतत्पालनरूपेणावर्तमानमित्यर्थः ॥ अयं भावः यद्य राम
दि तन्मी प्रापयेत तर्हि मातॄणां विषादः स्यात यदि च तानेवानयिष्यामि तर्हि ब्रह्मणो मोहो न स्यादिति तदुभयप्रीतये तथा चक्रे इति ॥ १८ ॥ ॥ ३९

तदेव दर्शयति यावदिति वत्सपानां वत्सकानां चाल्पकवपुः प्रमाणमनतिक्रम्य एवमुपर्यपि योज्यं यद्वा यावद्वत्सपादिवपुस्तावत् वैरूप्यो जः स्वस्लोव भाविति उत्तरत्राप्येवं सर्वविष्णुमयं जगदिति प्रसिद्धा या गीः तस्याः अंगवत् मूर्तिगीरेवार्थं स्वरूपेण प्रत्यक्षा यथा तथा वभूवेत्यर्थः १९ एवं सर्वात्मा सन् व्रजं प्रविशत् कथं स्वमात्मैव प्रयोजक आत्मरूपाणि गोवत्सानि निति कर्माणि स्वयमेवेत्युक्तं आत्मरूपैः

यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिक् यावद्विभूषांवरं याव
च्छीलगुणाभिधाकृतिवयो यावद्विहारादिकं सर्वं विष्णुमयं गिरोंगवदजः सर्वस्वरूपो वभौ १९ स्वयमा
त्मात्मगोवत्सान्प्रतिवार्यात्मवत्सपैः क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद्व्रजं २० तत्तद्वत्सान्पृथग्नीत्वा त
त्तद्गोष्ठे निवेश्य सः तत्तदात्माभवद्राजंस्तत्तत्सद्म प्रविष्टवान् २१ तन्मातरो वेणुरवत्वरोत्थिता उत्थाप्य दोर्भिः परिरभ्य निर्भरं स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा परं ब्रह्म सुतानपाययन्

वत्सपैः प्रतिवार्य प्रयोज्यकर्त्रीपि स्वयमेव आत्मविहारैः क्रीडानादिभिः संलालितः स्वाचरितैः प्रहर्षयन्नायगतो याममेनमाधवः २२
क्रीडन्निति क्रियापि कारकाण्यपि स्वयमेवेत्यर्थः २० तत्तदात्मा तत्तद्गोप्यबालरूपो भवति ततस्तत्तत्सद्म प्रविष्टः २१ गोपिकामोहनमाह तन्मा
तर इति तन्मातरो वेणुरवात्त्वरया उत्थिताः सत्यः स्तनान्मत्वा परब्रह्मेव दोर्भिरुत्थाप्योरत्यपयः सुधासवं पयएव सुधासवं आसवन्मादकं पा
ययामासुरित्यर्थः एवं याममयेनचतत्कालक्रीडानियमेन सायंगतः स्वचरितैः शोभनैराचरितैर्वा मातः प्रहर्षयन् ततस्ताभिरुन्मर्दनादिभिः

उत्थाप्य दोर्भ्यां परिरभ्य निर्भरं स्नेहस्नुतस्तन्यपयः सु
धासवं मत्वा परं ब्रह्म सुतानपाययन् २२ ततोनृपोन्

१०पू
५०

गवां मोहनमाह गाव इति ॥ परिहूता आहूताश्च ते संगताश्च तान् ॥१३॥ एतावन्तं वैषम्यं कृष्णस्यापि दुर्निवारमासीदित्याह ॥ गोगोपीनामिति ॥ गवां
गोपीनां चास्मिन्कृष्णे मातृतारि [illegible] पललेनादिरूपा पुरोवदेवासीत् ॥ किं तु स्नेहर्द्धिकं विना ॥ स्नेहाधिक्यं त्वितरानी विशेष इत्यर्थः ॥ आह गोगोपी
षु हरेस्तोकतां च बालभावतामपि पूर्ववदेवासीत् ॥ किं तु मायया विना ममेयं माता इत्यस्याः पुत्र इति मोहं विनेत्यर्थः ॥१४॥ स्नेहर्द्धिमेव दर्शयति ॥
व्रजौकसामिति ॥ यथा कृष्णे यशोदानंदने त्वपुत्रेष्वपि स्नेहाधिक्यं पूर्वमासीत् ॥ इदानीं त्वितरेष्वपि तथैवाववृद्धे इत्यर्थः ॥ अन्वहं यावदब्दं निःसी

ता१ गावस्ततो गोष्ठमुपेत्य सत्वरं हुंकारगर्भैः परिहूतसंगतान् ॥ स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहंत्यः स्रवदौधसं पयः ॥१३॥ गोगो
ता२ पीनां मातृतास्मिन्सर्वा स्नेहर्द्धिकां विना ॥ पुरोवदास्वपि हरेस्तोकता मायया विना ॥१४॥ व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहं ॥ शनै
र्निःसीम ववृधे यथा कृष्णेन पूर्ववत् ॥१५॥ इत्थमात्मात्मनात्मानं वत्सपालमिषेण सः ॥ पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः
॥१६॥ एकदा चारयन्वत्सान्सरामो वनमाविशत् ॥ पंचषासु त्रियामासु हायनापूरणीष्वजः ॥१७॥ ततो विदूराच्चरतो गावो वत्सानु
पव्रजं ॥ गोवर्द्धनाद्रिशिरसि चरंत्यो ददृशुस्तृणं ॥१८॥

मयथा भवति ॥१५॥ एवमात्मा श्रीकृष्णः वत्सपो भूत्वा तत्रापि वत्सानां च मिषेणात्मा
नमात्मना पालयन् क्रीडितवानित्यर्थः ॥१६॥ एतावत्पर्यंतमन्यस्यापि मोह एवासीत् ॥ संवत्सरांते कथं चित्तज्ज्ञातवानिति दर्शयन्नाह एकदेति
पंचषासु पंचषड्वा षट् [illegible] वासु त्रियामासु हायनस्यातपूरणीषु पूरकंतयाः वशिष्टास्वित्यर्थः ॥१७॥ ततो दूरे तत एव गोवर्द्धनशिखरे चरंत्यो गावो व्रजसमी
पे चरतो वत्सान्ददृशुः ॥१८॥

राम
५०

तैरेव गोव्रजः गवां कलापः स्नेहवशः तेषां वत्सानां स्नेहेनाकृष्टः ॥ अत एव तस्मात् आत्मीयेन मतः जवेन उपव्रजमगात ॥ कथंभूतः अन्यात्मपदुर्गमार्गः ॥ अतिक्रांतम् आत्मपान् गोपालान् तथा दुर्गो दुर्गमो मार्गो यस्य स तथा ॥ तथा पुरस्ताभ्यां पद्भ्यां धावन् द्विपादिव प्रतीयमानः कन्धरा आकुंचिता ग्रीवा यस्य सः ॥ उदास्यपुच्छः उत्क्षिप्तानि आस्यानि पुच्छानि च येन सः आत्तपयाः ॥ सर्वतः स्रवंति पयांसि यस्य सः ॥ अत्र पयासीत्यपि पाठे स एवार्थः ॥ १९ ॥ गोव्रजस्तत्पनेन वृषभार्यागिरित्युक्तं ॥ तत्र विशेषतो धेनूनां चेष्टितमाह समेत्येति ॥ गोवर्द्धनस्याधः वत्सवत्यः पुनः प्रस्नुता अपि ॥ ३० ॥ तामेता दृष्ट्वा वत्से

दृष्ट्वाथ तत्स्नेहवशः स्मृतात्मा स गोव्रजोऽत्यात्मपदुर्गमार्गः ॥ द्विपात्ककुद्ग्रीव उदास्यपुच्छोऽगाद्धुंकृतैस्तान् सपयाजवेन ॥ १९ ॥ समेत्य गावोऽधो वत्सान् वत्सवत्योऽप्यपायपन् ॥ गिलंत्य इव चांगानि लिहंत्यः स्वौधसं पयः ॥
३० ॥ गोपास्तद्रोधनायासमौघ्यलज्जोरुमन्युना ॥ दुर्गाध्वकृच्छ्रतोऽभ्येत्य गोवत्सैर्ददृशुः सुतान् ॥ २१ ॥ तद्दीक्षणोत्प्रेमरसाप्लुताशया जातानुरागा गतमन्यवोऽर्भकान् ॥ उदूह्य दोर्भिः परिरभ्य मूर्द्धनि घ्राणैरवापुः परमां मुदं ते ॥ ३१ ॥

पुगवां स्नेहातिशयमुक्त्वा गोपानामपि तद्दर्शयितुमाह गोपा इति ॥ तासां गवां रोधेन य आयासः ॥ तस्य मोघ्येन मोघत्वेन लज्जया सहोरुमन्युना दुर्गमार्गजनितकृच्छ्रेण चाभ्येत्य गोवत्सैः सह सुतान् ददृशुः ॥ २१ ॥ ततस्ते तेषामीक्षणोत्कृतीयः प्रेमरसस्तस्मिन्नाप्लुताः निमग्ना आशया येषां ते लज्जामन्युकृच्छ्रैस्तानपि ताडयितुमागताः संतो विगतमन्यवः ॥ प्रत्युत जातानुरागो येषां ते मूर्द्धनि घ्राणैः परमां मुदमवापुः ॥ ३२ ॥ एवं गामस्य हाऽहे

कृच्छ्रात्ततोऽपगताः निःनिवृत्ताः तेषां हृतानामनुस्मृत्या उत्कंठ्यमश्रूणि येषां ते ॥२२॥ प्रेमर्द्धेः हेतोः औत्कंठ्यमतिशयं मुक्तस्तनेष्वप्यपत्येष्ववीक्ष्य हेतुमजानन्नचिंतय
त् ॥२४॥ चिंतामेवाह किमेतदिति द्वाभ्यां व्रजौकसां सर्वेषां यथा पुरा प्रेमा न तथा हि तोकेष्वपि व्रजस्य प्रेमा वर्द्धते किमेतदद्भुतमिति ॥ किंच ॥ सात्मनः मत्सहितस्य व्रजस्य
ममपते प्रेमकारणं किमिति भावः ॥२५॥ केयं माया देवानां वा नराणां वा असुराणां वा कुतो वा कस्मात् प्रकृताः ॥ तत्रान्यमायाया न संभवति यतो ममापि मोहो व
र्त्तते ॥ अतः प्रायशो मत्स्वामिनः श्रीकृष्णस्यैव मायेयमस्त्विति संभावयति ॥२६॥ वयस्यान्वत्सान्विवक्षेनेन ज्ञानेन ... वर्णवैकुंठं श्रीकृष्णमेवापश्यत् ॥२७॥

ततः प्रवयसो गोपास्तोकाश्लेषसुनिर्वृताः ॥ कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः ॥२२॥ व्रजस्य रामः प्रेमर्द्धेर्वीक्ष्यौत्कंठ्यमनुक्षणं ॥ मुक्तस्तनेष्वप
त्येष्वप्यहेतुविदचिंतयत् ॥२४॥ किमेतदद्भुतमिव वासुदेवेऽखिलात्मनि ॥ व्रजस्य सात्मनस्तोकेष्वपूर्वं प्रेम वर्द्धते ॥२५॥ केयं वा कुत आयाता दैवी वा
नार्युतासुरी ॥ प्रायो मायास्तु मे भर्त्तुर्नान्या मेपि विमोहिनी ॥२६॥ इति संचिंत्य दाशार्हो वत्सान्सवयसानपि ॥ सर्वानाचष्ट वैकुंठं चक्षुषा वयुनेन
सः ॥२७॥ नैते सुरेशा ऋषयो न चैते त्वमेव भासीश भिदाश्रयेपि ॥ सर्वं पृथक्त्वं निगमात्कथं वदेत्युक्तेन वृत्तं प्रभुणा बलोऽवैत ॥२८॥ ता
वदेत्यात्मभूरात्ममानेन त्रुट्यनेहसा ॥ पुरोवदाब्दं क्रीडंतं ददृशे सकलं हरिं ॥२९॥ श्रीकृष्णाय नमः गोपालाय नमः ॥

एवं कृष्णस्वरूपात्मतामान्यतो ज्ञात्वा कृष्णस्य पृष्ट्वा कृष्णोपदेशेन विशेषतो ज्ञानवानित्याह नैत इति ऋयमर्थः पास्यमानात्स्ना वदत्सा ऋषीणामंशाः पालाश्च
देवानामंशा इति तावदहं वेद्मि इदानीं तु न तथा किंतु ॥ अस्मिन्भिदाश्रयेपि त्वमेव भासि ॥ अतस्त्वमेव सर्वं पृथग्विधं कथं वृत्तमिति वदेत्युक्तेन प्रभुणाव
क्रा निगमात्संक्षेपत एवोक्तं वृत्तं बलोऽवैत विदितवानित्यर्थः ततः किं वृत्तमित्यपेक्षायामाह ॥ तावदिति ॥ वर्षे जाते आत्मनो मानेन त्रुट्यनेहसा त्रुटि
मात्रेण कालेन ॥ सकलं सानुचरं हरिं ददर्श ॥२९॥ राम

दृष्ट्वाप्यतर्कयदित्याह ॥ यावंतइति ॥ अस्यामेमायाशयेतल्पे ॥ ४० ॥ यन्मायया मोहितेभ्य इतरे कुतत्याः ॥ ४१ ॥ इतिवितर्कयन्नन्यदित्याह ॥ एवमेतेषु भेदेषु विरं
ध्यात्वा स आत्मभूरिति पाठः ॥ ४२ ॥ ननु मायाश्रयस्य तस्य कुतो मोह इत्यत आह ॥ तम्यामिति ॥ महामाया विनि भगवति अन्य माया आवरणा विक्षेप
कत्वाभावे दृष्टांतद्वयमाह ॥ तम्यां तमिस्रायां रात्र्यां नैहारं हिकरस्वभवं तम इव तद्दिनार्थो पसर्जनस्यापितमसोनैहारमिति विशेषणं छादकं तन्नमो

यावंतो गोकुले बालाः सवत्साः सर्व एव हि ॥ मायाशये शयाना मे नाद्यापि पुनरुत्थिताः ॥ ४० ॥ इत एतेत्र कुतत्या मन्मायामोहितेतरे ॥ ता
वंत एव तत्राब्दं क्रीडंतो विष्णुना समं ॥ ४१ ॥ एवमेतेषु भेदेषु चिरं ध्यात्वा स [illegible] आत्मनात्मभूः ॥ सत्याः के कतरे नेति ज्ञातुं नेष्टे कथंचन ॥ ४२ ॥
एवं संमोहयन्विष्णुं विमोहं विश्वमोहनं ॥ स्वयैव मायया जोपि स्वयमेव विमोहितः ॥ ४३ ॥ तम्यां तमोवन्नैहारं खद्योतार्चिरि
वाहनि ॥ महतीतरमायैश्यं निहंत्यात्मनि युंजतः ॥ ४४ ॥ तावन्सर्वे वत्सपालाः पश्यतोजस्य तत्क्षणात् ॥ व्यदृश्यंत घनश्यामाः
पीतकौशेयवाससः ॥ ४५ ॥ चतुर्भुजाः शंखचक्रगदाराजीवपाणयः ॥ किरीटिनः कुंडलिनो हारिणो वनमालिनः ॥ ४६ ॥ श्रीवत्सां
गददोरत्नकंबुकंकणपाणयः ॥ नूपुरैः कटकैर्भाताः कटिसूत्रांगुलीयकैः ॥ ४७ ॥

यथा ॥ पृथगावरणं न करोति ॥ किंतु तत्रैव लीयते ॥ यथावा ख
द्योतार्चिरहनि पृथक्प्रकाशं न करोति ॥ एवं महति पुरुषे युंजतः पुंस इतराणीवामायाः तत्र किंचित्करोति ॥ किंतु आत्मनि त्वास्मिन्नेव ऐश्यं सामर्थ्यं
निहंतीति ॥ ४४ ॥ अन्यदप्याश्चर्यमाह तावदिति वत्सपालाः वत्साः पालाश्च सर्वे यष्टिविषाणादयश्च ॥ ४५ ॥ ४६ ॥ श्रीवत्सप्रभाभुजान्यंगदानि दोषु येषां

२०५
४१

तथाभूरिवद्धजन्मार्जितंपुण्यंतद्योग्जैर्नैरर्पितैः॥४८॥ चंद्रिकाविशदस्मितयुक्तैः सहाहरुणापुणोनवर्वर्त्तमानायेः पांगास्तैर्वीक्षितैः स्वकार्थीनां स्व
भक्तमनोरथानांरजः सत्वाभ्यामपिपालकाइवदृश्यते॥ सत्वबद्धिशदस्मितेनपालकाइवरजोवरहरुणागुणेनसृष्टाइवतादृशापांगद्योतमानाइत्य
र्थः॥४९॥ आत्माबह्मातरादिभिस्तैर्वपर्यंतैरनेकाहंः अनेकाहंशोः॥५०॥ अजाद्याभिर्मायाः विद्यादिभिर्विभूतिभिः शक्तिभिः महदादिभिरितिमहत्त
त्वयोः श्यविवद्धयावत्तुर्विंशतितत्वैर्जगत्कारणैः॥५१॥ कालादिभिश्चतत्सहकारिभिः॥ तत्रस्वभावः परिणामहेतुः संस्कारउद्बोधकः॥ स्वमहिम

अंघ्रिमस्तकमाशर्णाक्तलशीचनदामभिः॥ कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितः॥४८॥ चंद्रिकाविशदस्मेरैः सारुणापांगवीक्षितैः
स्वकार्थीनामिवरजः सत्वाभ्यांस्वष्टिपालकाः॥४९॥ आत्मादिस्तंवपर्यंतैर्मूर्तिमद्भिश्चराचरैः॥ नृत्यगीताद्यनेकाहैः स्वथंगस्वथगुपासि
ताः॥५०॥ अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः॥ चतुर्विंशतिभिस्तत्वैः परीतामहदादिभिः॥५१॥ कालस्वभावसंस्कारकामक
र्मगुणादिभिः॥ स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः॥५२॥ सत्यज्ञानानंतानंदमात्रैकरसमूर्तयः॥ अस्पृष्टभूरिमा
हात्म्याअपित्युपनिषद्दृशां॥ ॥५२॥ ॥४॥ ॥श्रीरामायनमः॥ श्रीगोविंदायनमोनमः॥ गोपालायनमः

स्वमहिभिः॥ भगवन्महिम्नातिरस्कृतत्वात्वच्छ्रेः॥५२॥ उक्तेः सर्वैरणिमाद्यैः सर्वेषांमूर्तिमत्वेपिविशेषमाह सत्यज्ञानेनेति॥ सत्याश्चज्ञानानन्दपाश्चअनंताश्च
आनंदरूपाश्चतत्रापितदेकमात्राविजातीयभेदरहिताः तत्रापिचैकरसाः सदैकरूपामूर्तयोयेषांते॥ यद्वा॥ सत्यज्ञानादिमात्रैकरसंयद्ब्रह्मतदेवमूर्त
योयेषामिति॥ अतएवउपनिषदात्मज्ञानंसैवदृक्चक्षुर्येषांतेषामपिहिनिश्चितं॥ अस्पृष्टभूरिमाहात्म्याः नस्पृष्टस्पर्शयोग्यंभूरिमाहात्म्यंयेषांतेतथाचे

राम
४१

एवंसकृतएकैवददर्शपरब्रह्मणोविशेषणांयम्येति ॥ ५४ ॥ अतिकुतुकेनाश्चर्येणाऽहृत्यदृष्टिः परावृत्यः हंसस्यपृष्ठेनिपत्येतिवा ॥ कुतुकस्यावेननती
यायांमृच्छादस्मालुक् ॥ यद्वा ॥ उद्धृत्यइतिच्छेदः अतिकुतुकेनोद्धृत्यः विलोडः विपर्ययस्तस्मिन्नितियावत् ॥ पाठांतरेतु अतिकुतुकेनोद्धृतः ऊभितः तेषांधात्रा
तेजसास्तब्धसर्वेंद्रियोब्रह्मातूष्णींनिश्चलोभूत् ॥ अत्रहेतुः पूर्वरेवीब्रजाधिष्ठात्रीकाचिद्देवतास्याअंतिसमीपेपुत्रिकावत्तूष्णींभूतकेप्रतिमेव ॥ ५५
एवंमोहमग्नमहंमुक्तहासेत्याहइतीति ॥ इरेशेइरासरस्वतीतस्याईशोब्रह्मणिकिमिदमितिमुह्यतिसति ॥ पश्चात्तद्दृष्टुमप्यनीशेसति ॥ परमोजःश्रीकृष्णः
स्वपरिअज्ञानजवनिकांमायारूपांतिरस्कारिणीं ॥ यथाद्भुतंदर्शितंतथाचच्छादस्वातिरोधत्तअपसारितवानित्यर्थः ॥ अथवाः यलोकाभिमानीममेश्वर्यंइह

एवंसकृद्ददर्शाजः परंब्रह्मात्मनोऽखिलान् ॥ यस्यभासासर्वमिदंविभातिसचराचरं ॥ ५४ ॥ ततोऽतिकुतुकोद्वृत्यस्तिमितैकादशेंद्रियः
तद्धाम्नाभूदजस्तूष्णींपूर्देव्यंतीवपुत्रिका ॥ ५५ ॥ इतीरेशेऽतर्क्येनिजमहिमनिस्वप्रमितिके परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ
अनीशेऽपिद्रष्टुंकिमिदमितिवामुह्यतिसति चच्छादाजोज्ञात्वासपदिपरमोऽजाजवनिकां ॥ ५६ ॥ ततोऽर्वाक्प्रतिलब्धाक्षः कः परेतवदु

मयोऽपइतितस्योपरिमायांप्रसारितवानिति ॥ कमुह्यतीसतिअतर्केतर्कागोचरेनिजः त्थितः ॥ कृच्छ्रादुन्मील्यवैदृष्टीराचष्टेदंसहात्मना ॥ ५८
अस्याधारणामहिमायस्यतस्मिन् ॥ इतिमोहेतुहेतुः इशंनायोऽपत्वायत्रीणिविशेषणानि ॥ स्वप्रमितिकेस्वप्रकाशंचतत्कहेत्वंचतस्मिन् ॥ अतएव
अजातः प्रकृतेःपरेत्रपरस्मिन्अतएवअतन्निरसनमुखेनब्रह्मवेः श्रुतिभिःरोधिमिमितिज्ञानंयस्मिन्स्वरूपे ॥ ५६ ॥ अर्वाक्बहिः प्रतिलब्धान्य
क्षाणियेनसः ॥ परेतवत्मृतोयदिउत्थितः ॥ कथंचित्सनहन्निष्टतितथा ॥ दृष्टीः नेत्राणि ॥ ५७ ॥ राम ॥ श्रीगोविंदायनमोनमः ॥

द०पू
४२

जनानामाजीव्यैर्द्रुमैराकीर्णाः समाप्रियं संततानि श्रामसंतात्प्रियाणि यस्मिंस्तत ॥५८॥ तदाहत्वयेति ॥ नैसर्गदुर्वैराः सहासन्नाविकाः प्रतिकार्यवैरा वंतोपि नराः
मिहारयस्य मित्राणीव यत्र सहैवासन् ॥ अजितस्यावासेन द्रुताः पलायिता रुट् तर्षादयः क्रोधलोभादयो यस्मात्तथाभूतं वृंदावनमपश्यदिति ॥५९॥ तत्र
च परमेष्ठी ब्रह्मा स्वगणार्वेव देवब्रह्म अन्वेष्टमपश्यत् ॥ कथंभूतं पशुपवंशशिशुत्वनाट्यमुद्वहंतं ॥ नाट्यमित्यत्र हेतुः अद्वयमित्यादि ॥ अद्वयं च वत्सा
न्विविच्य ॥ एवं च सखीन् ॥ अगाधबोधं च विविच्य ॥ अनंतं च परितो विविच्य ॥ परं च शिशुत्वमुद्वहंतं ॥ ब्रह्म वयस्य सपाणिकवलमिति नाट्यमेवोद्वहंतमित्य

सपद्येवाभितः पश्यन्दिशोऽपश्यत्पुरःस्थितं ॥ वृंदावनं जनाजीव्यद्रुमाकीर्णं समाप्रियं ॥५८॥ यत्र नैसर्गदुर्वैराः सहासन्नृमृगादयः
मित्राणीवाजितावासद्रुतरुट्तर्षकादिकं ॥५९॥ तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनंतमगाधबोधं ॥ वत्सान्सखीन्
निव पुरा परितो विचिन्वदेकं सपाणिकवलो परमेष्ठ्यचष्ट ॥६०॥ दृष्ट्वा त्वरेण निजधोरणतोऽवतीर्य पृथ्व्यां वपुः कनकदंडमिवा
भिपात्य ॥ स्पृष्ट्वा चतुर्मुकुटकोटिभिरंघ्रियुग्मं नत्वा मुदश्रुसुजलैरकृताभिषेकं ॥६१॥ उत्थायोत्थाय कृष्णस्य चिरस्य पादयोः पतन्
आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ॥६२॥ शनैरथोत्थाय विमृज्य लोचने मुकुंदमुद्वीक्ष्य विनम्रकंधरः ॥ कृतांजलिः प्रश्र
यवान्समाहितः सवेपथुर्गद्गदयैलतेलया ॥६३॥ इति श्रीभागवते महापुराणे दशमस्कंधे वत्साहरणे त्रयोदशोऽध्यायः ॥ ॥१३॥ ॥

त्यर्थः ॥६०॥ निजधोरणतः स्ववाहनात् ॥ त्वरेण वेगेनावतीर्य दंडवन्नत्वा ॥ चतुर्णां मुकुटानामग्रैरंघ्रियुग्मं स्पृष्ट्वा मुदश्रुजलैरभिषेकमकरोदि त्यर्थः
ति ॥ चिरस्य चिरं पादयोः पतन्नास्ते ॥६२॥ सवेपथुः सकंपः ॥ अनया गद्गदया अस्खलितया एतयैव एलयतस्तौतीति ॥६३॥ ॥१३॥ मे त्रयोदशः ॥ ॥

४२

चतुर्दशीः ड्डुतं हस्थापूर्वागंतकनिश्चयं ॥ अनीशाः कर्त्तुं महेशोषीः कृत्स्नं ब्रह्मविमोहितः ॥१॥ त्वत्कृतापराधेन भियास्त्वेकं पतया भगवन्महिमान
मनवगाहमानो यथा दृष्टं त्वद्रूपमेव कीर्त्तयन्नाह ॥ नौमीति ॥ हे ईड्य त्वत्पने ठ भ्यं नौमि द्वितीयार्थे चतुर्थी ॥ अथवा नौमीत्यन्मात्प्रत्ययस्य भग
वतः कर्मत्वे ताते प्रयोजनापेक्षायामेवंभूतो भगवानेव प्रयोजनमिति ॥ तादर्थ्ये चतुर्थी ॥ यद्वा तं भ्यं त्वामेव प्रसादयितुं त्वामेव स्तौमीत्यर्थः
अभ्रवद्वपुर्यस्य तस्मै ॥ तडिदिव दंवरं यस्य तस्मै ॥ गुञ्जाभिरवतंसौ कर्णभूषणौ परिपिच्छं च बर्हापीडं तैर्लसन्मुखं यस्य तस्मै ॥ वन्याः स्रजो यस्य त
स्मै ॥ कवलादिभिः लक्ष्मभिः श्रीः शोभा यस्य तस्मै ॥ मृदुपादौ यस्य तस्मै ॥ पशुपस्यांगजाय ॥१॥ ननु नौमीति प्रतिज्ञाय किं त्वद्रूपानुवादमात्रं
क्रियते अत आह ॥ अस्यापीति ॥ भो देव अस्यापि स्वभक्त्वेन प्रकारितस्यापि तव वपुषः अवतारस्य महिमहिमानं अवसितुं ज्ञातुं को

ब्रह्मोवाच ॥ नौमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरिपिच्छलसन्मुखाय ॥ वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रि
ये मृदुपदे पशुपांगजाय ॥१॥ अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोपि ॥ नेशे महि त्ववसितुं मन

पिकः ब्रह्मा अहमपि न ईशे न शक्नोमि यद्वा कश्चिदपि न ईशे न समर्थः आसीत् ॥ स्वलमत्वा सांतरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः ॥२॥
पविशेषणद्वयं मदनुग्रहस्य मम अनुग्रहो यस्मात् मदनुग्रहं तस्य किंच ॥ स्वेच्छामयस्य स्वीयानां यथायथेच्छा तथा तथा भवतः तर्हि किमिति ज्ञा
तुं न शक्यते अत आह ॥ न तु भूतमयस्य अविद्यामयस्य च सत्वात्मकस्य ॥ यदास्यैवं तदा कस्य पुनः साक्षात्तव केवलस्य आत्मसुखानुभूतेः स्वसुखानु
भवमात्रस्यावतारिणो गुणातीतस्य महिमानं अंतरेण निहृद्देनापि मनसा को वा ज्ञातुं समर्थो भवेत् ॥ अथवा भूतमयस्यापि विराड्रूपस्य तव दुनि
यम्यस्य वपुषः महिम्न अवसितुं कोपि न ईशे तदा साक्षात्तवैव असाधारणस्य नियम्यनियंतृभेदरहितस्य उज्ज्वलरूपस्य स्य महिमहिमानं अवसितुं

१०पू
४४

तर्हिश्रुताःकथंप्रसीदसितेष्वतआह॥ज्ञानइति॥उदपास्यईषदप्यकृत्वासद्भिर्मुखरितांस्वतएवनित्यप्रकाशितांभवदीयांवार्त्तांस्वस्था
नेषुस्थिताः॥तत्त्वनिधिमात्रेणास्वतएवश्रुतिगतांश्रवणप्राप्तांतनुवाङ्मनोभिर्नमन्तःसन्तस्तद्वार्त्तयोपजीवंतिकेवलंयद्यपिनान्य
त्कुर्वन्तितैःप्रायशःत्रिलोक्यामन्यैरजितोपित्वंजितःप्राप्तोसीतिकिंज्ञानश्रमेणेत्यर्थः॥३॥भक्तिंविनाज्ञानंनैवसिद्ध्येदित्याह॥श्रेयःसृ
तिमिति॥श्रेयसामभ्युदयापवर्गलक्षणानांसृतिःस्रवणंयस्याःसरसइवनिर्झरणानांतांतेतवभक्तिमुदस्यत्यक्त्वाश्रेयसांमार्गभूतामि

ज्ञानेप्रयासमुदपास्यनमंतएवजीवंतिसन्मुखरितांभवदीयवार्त्तां॥स्थानेस्थिताःश्रुतिगतांतनुवाङ्मनोभिर्येप्राय
शोजितजितोप्यसितैस्त्रिलोक्यां॥३॥श्रेयःसृतिंभक्तिमुदस्यतेविभोक्लिश्यन्तियेकेवलबोधलब्धये॥तेषा
मसौक्लेशलएवशिष्यतेनान्यद्यथास्थूलतुषावघातिनां॥४॥पुरेहभूमन्बहवोपियोगिनस्त्वदर्पितेहानिजकर्मल

तिवा॥तेषांक्लेशतःकरणाहीनान्स्थूलधान्याभासान्तुषा ब्धया॥विबुध्यभक्त्यैवकथोपनीतयाप्रपेदिरेंजोच्युततेगतिंपरां॥५
नेवावघ्नंतितेषांनकिंचित्फलं॥एवंभक्तिंउच्छीकृत्ययेकेवलंबोधायपततेतेषामपीति॥भक्त्यैवज्ञानंनान्यथेत्यत्रसदाचारंप्रमा
णयतिपुरेति॥हेभूमन्इहलोकेपूर्वयोगिनोपिसन्तःयोगेनाननप्राप्यपश्चात्त्वदर्पितेहात्वय्यर्पितालौकिक्यपिईहाचेष्टायैः एवं
तैनिजकर्मलब्धयात्वदर्पितैर्निजैःकर्मभिर्लब्धयात्वय्यर्पिताईहावैदिकानिकर्माणिचैतैःलब्धयात्वत्कथेवापरकथोपनीतया
कथयात्वत्समीपंप्रापितयाभक्त्यैवविबुध्यआत्मानंज्ञात्वाअञ्जः॥सुखेनैवतेपरांगतिंप्राप्ताः॥ ॥५॥

राम
४४

एवं तावत्सगुणनिर्गुणयोरुभयोरपि त्वत्तानं दुर्घटमिति तत्त्वकथाश्रवणादिनैव तत्त्वसाक्षात्कारो नान्यथेत्युक्तं ॥ इदानीं यद्यप्युभयोर्विशे-
षेण दुर्ज्ञेयत्वमुक्तं तथापि निर्गुणातीतस्य ज्ञानं कथंचिद्भवेत् ॥ न तु सगुणस्य तत्त्वं अचिंत्यानंतगुणत्वादिति निर्णेति ॥ श्लोकद्वयेन तत्-
थापीति ॥ हे भूमन् अपरिच्छिन्नगुणस्य ते महिमा अमलात्मभिः ॥ प्रत्याहृतैरिंद्रियैः विवोढुं बोधगोचरीभवितुं अर्हति ॥ योग्यो भव-
ति ॥ अथवा विवोढुं ज्ञातुं अर्हतीत्यर्हते ॥ शक्यत इत्यर्थः ॥ यद्वा महिमेति महिमानं कश्चित्विवोढुमर्हतीत्यर्थः ॥ कथं स्वानुभवात् आत्मा-
कारतः करणग्राह्याकारतन्न बुद्धितः करणमपि स्वविकारमेव विषयीकरोति ॥ इति कथमात्माकारता तस्येति ॥ अत आह ॥ अ

तथापि भूमन्महिमागुणस्य ते विवोढुमर्हत्यमलात्मभिः ॥ अविक्रियात्स्वानुभवात्स्वरूपतो ह्यनन्यवोध्यात्मत-
या न चान्यथा ॥ ६

विक्रियादिति ॥ विक्रियाविशेषाकारत्वरहितात् ॥ विशेषपरित्यागेन वात्माकारतेत्यर्थः ॥ ननु ततः करणसाक्षात्कार-
विषयत्वे नात्मत्वप्रसंगः स्यादत आह ॥ अरूपत इति ॥ रूपं विषयः अविषयात् निर्विषयत्वमेवात्मनो न फलविषयत्वमतो नायं दोष इति
भावः ॥ कथं तर्हि स्फूर्त्तिः अनन्यबोध्यात्मतया स्वप्रकाशत्वेनैव न त्वन्यथा स्वतः इति विषयत्वेनेत्यर्थः ॥ अथवा मास्तु ततो न तु मल-
स्तैरपि अगुणस्य ते महिमहिमानं अमलैरंतःकरणवद्भिः प्रत्याहृतैरिंद्रियैरपि तथाप्यदृश्यत्वात् ॥ तेन न रूपेण विवोढुं किमर्हतीति तिनाहेत्यवे-
त्यर्थः ॥ कथं तर्हीति तत्राह ॥ स्वानुभवादित्यादिना उक्तार्थमेवैतत् ॥ ६ ॥

श्री

गुणात्मनः गुणानामात्मनः गुणाधिष्ठातुस्तेन वर्त्तिनः गुणान्विमातुं एतावंत इति गणयितुमपि क ईशिरे समर्था बभूवुः ॥ हन्त तर्हि विशेषवान्नी
कथंभूतस्य तव अस्य विश्वस्य हिताय पालनाय बहुधा अवतीर्णस्य गुणाविष्कारेणावतीर्णस्य ॥ ननु कालेन निपुणैः किमशक्यमत आह ॥ कालेनेति
वा राशेश्चिंतकैः सुकल्पैरिति निपुणैर्वेधोभिर्ज्ञैर्महता कालेन भूपरिमाणवो वा विमिताः विशेषेण गणितास्ता भवेयुः ॥ तथा खे मिहिकाः हिमक
णाश्च विंतथा द्युभासः रश्मिनक्षत्रादिकिरणपरमाणवो वा वि ॥७॥ तस्माद्भक्तिरेव संगच्छत इत्याह ॥ तत्तेनुकंपामिति ॥ सुसमीक्षमाणः करा

गुणात्मनस्तेपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेस्य ॥ कालेन यैर्वा विमिताः सुकल्पैर्भूपांसवः खे मिहिका द्यु
भासः ॥७॥ तत्तेनुकंपां सुसमीक्षमाणो भुंजान एवात्मकृतं विपाकं ॥ हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो मुक्तिप
दे स दायभाक् ॥८॥ पश्येश मेनार्यमनंत आद्ये परमात्मनि त्वय्यपि मायिमायिनि ॥ मायां वितत्येक्षितुमात्मवैभवं ह्य
हं कियानैच्छमिवार्चिरग्नौ ॥९॥

भविष्यतीति वञ्चममन्यमानः स्वार्जितं कर्मफलमनासक्तः सन् भुंजान एव नातीव तपआदिनाक्लि
श्यन् एवं यो जीवेत् स मुक्तौ दायभाग्भवति ॥ भक्तस्य जीवनव्यतिरेकेण दायप्राप्ताविव मुक्तौ नान्यदपेक्ष्यत इति भावः ॥८॥ तदेवं ब्रह्मत्वा
भगवंतं कृपापात्रविधिं त्वापराधं निवेदयति ॥ पश्येति ॥ हे ईश मे अनार्यं दौर्जन्यं पश्य ॥ यदहं मायिनामपि मायिनि विमोहके त्वय्यपि स्वमा यामा
याप्रसार्यात्मैश्वर्यं मीक्षितुमैच्छं अभिलषितवान् ॥ अहो एवं कर्तुं त्वयि अहं कियान् न किंचित् यथाग्नेः उत्पन्ना ज्वालाग्नेर्न किंचित्करा इति ॥९॥ ४५

रजोभुवः रजसो जातस्य अतः अजानतः अत एव अजावलेपांधतमोंधचक्षुषः अजो जगत्कर्त्ताहमिति मदेन गाढतमोरूपेणांधीभूतनेत्रस्य अतः
त्वत्तः पृथगीशमानिनः अन्यत्र पृथुत्वेन वर्त्तमानोऽपि मयि नाथवान् मदीय एव अत एषोनुकंप्य इति मत्वा क्षमस्वेत्यर्थः ॥१०॥ ब्रह्मांडविग्रहत्वमपि ईश्व-
र एवेति चेत् । तत्राह क्वाहमिति । तमः प्रकृतिः महान् अहंकारः खं चरो वायुः अग्निः वार्जलं भूः पृथ्वी प्रकृत्यादिपृथिव्यंतैरेतैः संवेष्टितो योंडघटः स एव त-
स्मिन् वा स्वमानेन सप्तवितस्तिः कायो यस्य सोहं क्व क्व च ते महित्वं कथंभूतस्य । ईदृग्विधानि यानि अविगणितानि अंडानि तान्येव परमाणवः तेषां

अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः । अजावलेपांधतमोंधचक्षुष एषोनुकंप्यो मयि नाथवानि-
ति ॥१०॥ क्वाहं तमोमहदहंखचराग्निवार्भूः संवेष्टितांडघटसप्तवितस्तिकायः । क्वेदृग्विधाविगणितांडपराणुचर्यावा-
ताध्वरोमविवरस्य च ते महित्वं ॥११॥ उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे । किमस्तिनास्तिव्यपदेश-

चर्यापरिभ्रमणं तदर्थं वाताध्वानो गवाक्षाः रोमविवराणि यस्य तव अतोऽतितुच्छत्वात् त्वयानुकं-भूषितं वास्ति कुक्षेः कियदप्यनंतः ॥१२॥
प्योहमिति ॥११॥ अपि च गर्भगतस्य शिशोः पादयोरुत्क्षेपणं मातुः किमपराध भवति लोके । अस्तिनास्तिव्यपदेशाभ्यां भावाभावशब्दाभ्यां स्थूलसू-
क्ष्मकारणरूपैर्वा भूषितं अभिहितं एतेषां शब्दानां बुद्धिविषये उषितं स्थितमिति वा सर्वं तवास्तीत्यर्थः । हे अधोक्षज तव कुक्षेरनंततः वहिः किमपि
किंचिन्नास्तमिति किमस्ति न किंचिदस्तीत्यर्थः । अतः सर्वस्य तव कुक्षिगतत्वेन ममापि तथात्वान्मातृवदपराधः सोढव्य इति भावः ॥१२॥

२०१
४६

किंच विशेषतोपि त्वत्तो मम जन्म प्रसिद्धमित्याह ॥ जगत्त्रयेत्यादि ॥ जगत्त्रयस्यांते प्रलये य उदधीनां संप्लवः संश्लेषः तस्मिन्नुदके नारायण
स्योदरे नाभिः तस्य नालादजो निर्गत इति या वाक् सा तावन्मृषा न भवति वै निश्चितं तथापि त्वद्देहस्थ एव तत्र अहं किं न विनिर्गतः नोत्पन्नोस्मि
अपि तु त्वत्त एवोत्पन्न इत्यर्थः ॥१३॥ तर्हि नारायणस्य पुत्रस्त्वं मम किमायातं तत्राह ॥ नारायणस्त्वमिति ॥ नहीति काक्वा त्वमेव नारायण इत्यु
पादयति ॥ कुतोहं नारायण इति चेत् ॥ अत आह ॥ सर्वदेहिनामात्मासि एवमपि किं नारायणो न भवसि नारं जीवसमूहो अयनमाश्रयो यस्य

जगत्त्रयांतोदधिसंप्लवोदे नारायणस्योदरनाभिनालात् ॥ विनिर्गतोजस्त्विति वाङ् न वै मृषा किंत्वीश्वर त्वन्न विनिर्गतो
स्मि ॥१३॥ नारायणस्त्वं न हि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी ॥ नारायणोंगं नरभूजलायनात् तच्चापि सत्यं
न तवैव माया ॥१४॥

स तथेति त्वमेव सर्वदेहिनामात्मत्वान्नारायण इति भावः ॥ हे अधीश त्वं नारायणो न हीति पुनः काकुः अधीशः प्र
वर्त्तकः ततश्च नारस्यायनं प्रवृत्तिर्यस्मात् स तथेति ॥ पुनस्त्वमेवासावित्याह किंच ॥ त्वमखिललोकसाक्षी अखिलं लोकं साक्षात्पश्यति अ
तो नारमयसे जानासीति त्वमेव नारायण इत्यर्थः ॥ नन्वेवं नारायणपदस्य तत्त्वं भवेदेवं न त्वन्यथा प्रसिद्धमित्याशंक्याह ॥ नारायणोंगमिति
नराद्भूता ये अर्थाः ॥ तथा नराज्जातं यज्जलं तदयनाद्यो नारायणः प्रसिद्धः सोपि तवैवांगं मूर्त्तिः तथा च स्मर्यते ॥ नराज्जातानि तत्त्वानि नाराणी
ति विदुर्बुधाः ॥ तस्य तान्ययनं पूर्वं तेन नारायणः स्मृत इति ॥ तथा आपो नारा इत्यादि ननूपमन्मूर्त्तेः परिच्छिन्नायाः कथं जलाशयत्वं अत आह ॥ त

राम
४६

अपरिच्छेदमेवोपपादयति ॥ तच्चेदिति ॥ जगत्त्रयाश्रयभूतं तत्तद्वपुः जलस्थमित्येवं यदि सत्यं स्यात् ॥ तर्हि तदैव कमलनालमार्गेणान्तः प्रविश्य सवत्सर
शतं विचिन्वतापि मया हे भगवन् अपि त्वं स्वयं तत्र किमिति न दृष्टः हृद्यपि किमिति नो व्यदर्शि न दर्शितः अतस्त्वन्मूर्तेर्देशविषयपरिच्छेदः सत्यो न भवतीत्यर्थः
॥१५॥ अपि च यद्गिरिजलादिप्रपंचः सत्यः स्यात्तर्हि तेन तव परिच्छेदो भवेत् ॥ स तु माया विलसित इति त्वयैव दर्शितमित्याह ॥ श्लोकत्रयेणाह मयाधमनमा
यापशमनं तद्रूपे अवतारे बहिः स्फुरस्यापि जठरमध्ये जनन्याः प्रदर्शनेन ॥१६॥ ननु बहिः सत एवान्तर्जठरे प्रतिबिम्बोक्तिः ॥ कुतः सर्वस्य मायात्वमत आह यस्य

तच्चेज्जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदैव ॥ किं वा सुदृष्टं हृदि मे तदैव किं नो सपद्येव पुनर्व्यदर्शि ॥१५॥ अत्रैव माया
धमनावतारे त्वस्य प्रपंचस्य बहिः स्फुटस्य ॥ कृत्स्नस्य चान्तर्जठरे जनन्या मायात्वमेव प्रकटीकृतं ते ॥१६॥ यस्य कुक्षाविदं स
र्वं सात्मं भाति यथा तथा ॥ तत्त्वय्यपीह तत्सर्वं किमिदं मायया विना ॥१७॥ अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शितम् ए
कोऽसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता अपि ॥ तावन्तोऽसि चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावन्त्येव जगन्त्यभू
स्तदमितं ब्रह्माद्वयं शिष्यते ॥१८॥

सेति यस्य तव कुक्षौ सर्वमिदं यथा भवति तत्सर्वमिहापि बहिरपि तथैव भाति किं च सात्मं त्वत्सहितं तत्तदिदं त्वयि मा
यया ॥ विना किं घटेत ॥ अयं भावः त्वयि प्रतिबिम्बं च बाह्ये ह्यन्यान्यतया प्रतीयेत ॥ ननु तत्रैव हि तव चादर्शसाम्यानीयस्य त्वयि प्रतीतिर्न स्यात् ॥ अतः सर्वस्यामि
थ्यात्वमेवेति ॥१७॥ अपि च न केवलं जनन्या ममापि तथैव दर्शितमित्याह ॥ अद्यैवेति त्वदृते त्वां विनास्य विश्वस्य मायात्वं त्वया ममैव तत्र प्रथं किं नादर्शि
किं त्वदर्शितमेव ॥ तथा हि एकोऽसि त्वमासीः ततः मया सह खेलतास्त्वादृशिर्मित्रपालितास्तावन्तश्चतुर्भुजा अभवन् जगन्ति ब्रह्माद्वैतमिति प्रागवदन्यमपि द्व

१०.पू.
५७

ननु ब्रह्मन् तव मया दर्शितं स्वरूपमेव वै तत्त्वं कथं प्रपंचवत् मायेत्युच्यते ॥ सत्यं किंतु अद्वितीये त्वयि नानात्वं गुणाद्यवतारमत्स्याद्यवतारेष्वि
वकार्यवशेन त्वत्तत्र मायानिबंधनमित्याह ॥ श्लोकद्वयेन अजानतामिति ॥ त्वत्पदवीं त्वत्तत्त्वरूपमजानतां अनात्मनि प्रकृतौ स्थितः आत्मै
व त्वमात्मनैव त्वात्मनैव मायां वितत्य भासि ॥ कथं जगतः सृष्टावहमिव ब्रह्मेव विधाने पालने एष त्वमिव अंते त्रिनेत्र इवेति ॥१९॥ १०॥
ननु च त्वात्त्वे कथं जातिरिति तेषु मत्स्यादिषु जन्म कथं वा वामनाद्यवतारे यज्ञादिकार्यार्थं पंकथं वास्मिंस्तत्रैव भवदपलायनादि ॥ अत आह ॥ को

अजानतां त्वत्पदवीमनात्मन्यात्मात्मना भासि वितत्य मायां ॥ सृष्टाविवाहं जगतो विधान इव त्वमेषोंत इव त्रिनेत्रः ॥१९॥ सुरे
र्षिष्वीश तथैव नृष्वपि तिर्यक्षु यादःस्वपि तेऽजनस्य ॥ जन्मासतां दुर्मदनिग्रहाय प्रभो विधातः सदनुग्रहाय ॥२०॥ को वेत्ति
भूमन् भगवन् परात्मन् योगेश्वरोतीर्भवतस्त्रिलोक्यां ॥ क्वाहो कथं वा कति वा कदेति विस्तारयन् ॥ क्रीडसि विष्णुमायां
तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखं ॥ त्वय्येव नित्यसुखबोधतनावनंते मायात

वेत्तीति ॥ अन्वर्थैः संबोधनैः दुर्ज्ञेयत्वमेवाह ॥ भूमन्नित्यादिभिः भवतः ऊतीर्लीलाः त्रिलोक्यां को वेत्ति क्व उद्यदपि यत्सदिवावभाति २२
वा कथं वा कदा वा कतीति वेत्ति ॥ अवितर्क्यतत्त्वयोगमायावैभवमिति भावः ॥२१॥ ननु भवत्त्ववताराणामचिंत्यो महिमा प्रपंचस्य सत्त्वे कथं स
त्वप्रतीतिरिति ॥ मा मा शंकां सपरिकरमुपसंहरति ॥ तस्मादिति ॥ अस्तधिषणं निरस्तप्रतिभासं त्वय्येव उद्यत् उद्भवत् ॥ अपि यत् नश्वरं तत् स
दिवेति ॥ उपलक्षणमेतत् ॥ नित्यमिव सुखमिव चेतनमिव अधिष्ठानभूतस्य तव गुणैस्तथा तथा भातीत्यर्थः ॥२२॥ ॥

योग.२

राम
५७

त्वमेव सत्य इत्याह ॥ एकस्त्वं सत्यः कुतः आत्मा ह्यपमस्त्वं दृष्टं नवात्मा हृदयः अतः सत्यः किंच ॥ यद्धि कार्यवत् दृश्यत्वं नच तत्त्वधियं जन्मादयो विकाराः संतीत्याह ॥ आद्यः कारणं अतो न जन्म ॥ आद्यत्वे हेतुः पुराणः पुरापि नवः कार्यात्पूर्वमपि वर्तमान इत्यर्थः अत्र हेतुः पुरुष इति ॥ तथा च श्रुतिः पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमिति ॥ जन्माभावे तरणित्वं लक्षणं विकारं वारयति ॥ नित्य इति ॥ सनातन इत्यर्थः पूर्णः अजस्रसुखः अक्षरः अमृत इति च विशेषणैः परैः क्रमेण वृद्धिपरिणामापक्षयविनाशान्वारयति ॥ पूर्णत्वे हेतुः अनंत अद्वय इति च देशकालपरिच्छेदरहितः वस्तुतः परिच्छेदरहितोपि अमृतत्वोपपादनाय च बहुविधक्रियाफलत्वं वारयति ॥ स्वयंज्योतिः निरंजनः उपाधितो मुक्त इति पारतंत्र्येण ॥ अयं भावः

एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्यः ॥ नित्योक्षरोजस्रसुखो निरंजनः पूर्णोद्वयो मुक्त उपाधितोमृतः ॥१३

एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते ॥ गुर्वर्कलब्धोपनिषत्सुचक्षुषा ये ते तरंतीव भवानृतांबुधिं ॥१४

ततो न्यन्निराद्य इत्यनेनैव निराकृता प्राप्तिरपि क्रियया ज्ञानेन न भवेत् ॥ क्रियया प्राप्तिरात्मपरैनैव निराकृता ॥ ज्ञानतः प्राप्तिं वारयति ॥ स्वयंज्योतिरिति ॥ विकृतिरपि तु पापकरणेनाविद्यातेन व्रीहिणामिव उपाध्या पाकरणेन भवेत् ॥ तच्चासंगत्वान्न संभवतीत्याह मुक्त उपाधित इति ॥ संस्कारोपि किं मलिनिशयाधानेन मलापकरणेन वा तत्रातिशयाधानं पूर्णत्वेनैव निराकृतं मलापाकरणं वारयति निरंजन इति ॥ निर्मल इत्यर्थः ॥१३॥ तस्माद् बंधुतज्ज्ञानात्तु मुच्यत इत्याह ॥ एवंविधमिति ॥ त्वां ये विचक्षते सम्यक् पश्यंति ॥ कथं आत्मात्मतया आत्मा प्रत्यक् तस्य स्वरूपेणैव तत्र आदिरिष्टिवषेणामित्याह ॥ सकलात्मनामपि स्वात्मानं केन गुरुरेव अर्कस्तस्माल्लब्धा उपनिषत् तान्येव सुचक्षुः तेन भव एवानृतं अंबुधिः ते तरंतीव ॥

२०५
४८

अत्रच ज्ञानेन न तरतीति । तच्च तरतीवेति । तच्च आत्मात्मतयाज्ञानेनेत्यर्थः अयं प्रतिज्ञातार्थः क्रमेणोपपाद्यते । आत्मानमेवात्मतयेत्यनेन श्लोकेन ज्ञानेन तरतीत्युपपाद्यते । अज्ञानसंज्ञाविति अनेन तरतीवेत्येतत् । त्वामित्यादिश्लोकद्वयेन तु आत्मात्मतयेत्येतदुपपाद्यते । ननु ज्ञानेन कथं भवं तरतीति । तस्याज्ञानमूलत्वादित्याह । आत्मानमेवेति तेनैव अज्ञानेनैव प्रपंचितः प्रपंचः । रज्ज्वामहेर्भोगभवाभवाविति । सर्पशरीरस्याध्यासापवादौ यथेति । ननु ज्ञानेन तरत्येव किमिदमुच्यते तरतीवेति तत्राह । अज्ञानसंज्ञाविति । अज्ञानेन संज्ञा ययोः तौ भवबंधमोक्षौ भवेन बंधस्तन्मोक्षश्च तौ द्वौ नाम प्रसिद्धौ अस्तभावात् । अतस्तौ तस्य आत्मनो भावत्त्वस्मात् स्त्यो न स्तः । ननु कथं महानपलापः क्रियते । परमार्थविचारादित्या

आत्मानमेवात्मतया विजानतां तेनैव जातं निखिलं प्रपंचितं । ज्ञानेन मृषापि चेत्तत्प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा ॥ २५ ॥ अज्ञानसंज्ञौ भवबंधमोक्षौ द्वौ नाम नान्यौ स्त ऋतज्ञभावात् । अजस्रचित्यात्मनि केवले परे विचार्यमाणे तरणाविवाह्नि ॥ २५ ॥ त्वामात्मानं परं मत्वा परमात्मानमेव च । आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनताज्ञता ॥ २७ ॥

ह । अजस्रेति । अखंडज्ञानस्वरूपे परे स्वस्वरूपे आत्मनि नाज्ञानं न च बंधमोक्षौ अत एव नाज्ञानं न च मोक्षः तरणौ सूर्ये अहनीव इति ॥ २७ ॥ ननु परमार्थज्ञानाद्ज्ञानकृतौ बंधमोक्षौ निवर्तेतां आत्मात्मतयैव ज्ञाना नानारितिको यमाग्रहः स्याशरीरकायपरंध्यामासात्मनः परिरूपास्त्वन्निहितादपवारेन तत्रैव ज्ञातुमिति मनर्थं विस्मयेनाक्रोशन्निवाह । त्वामिति । त्वां आत्मानं परं देहादिभिन्नं मत्वा आत्मनि देहादिमध्यस्थे तथा परं देहादिभ्य आत्मानं मत्वा देहादावनिमध्यस्यात्रनष्ट आत्मा बहिर्मृग्यत इति विचित्रं । न हि गृहे नष्टं वने मृग्यत इत्यर्थः ॥ २७ ॥ श्रीराम

राम
४८

विवेकिनस्त्वत्स्वरूपमेव परमात्मानं विविंचंतीत्याह ॥ अंतर्भव इति भवतीति भवः चिज्जडात्मकं शरीरं तन्मध्ये एवं त्वा मृग
यंति अतत्त्वं त्यजंतः ॥ अपवरतः ॥ ननु सतोज्ञाने नालं किमसतोपवादेनेत्याशंक्याह अध्यस्तासतोपवादं विनाधिष्ठानतत्त्वं न ज्ञा
यत इति सतां व्यवहारेणाह ॥ असंतमिति ॥ अंतिसमीपे असंतं त्वमसि हि अंतरेण निषेधं विनेत्यर्थः ॥ सतं गुणाढ्यं संतः किमु यंति
जानंति ॥ अंतिसंतमपि गुणमिति वा न जानंतीत्यर्थः ॥ तस्मादात्मतयैव त्वज्ज्ञानान्मुक्तिरिति भावः ॥ १८ ॥ नैवं त्वज्ज्ञानैकसाध्ये मोक्षे

अंतर्भवेऽनंतमवंतमेव ह्यतत्त्यजंतो मृगयंति संतः ॥ असंतमप्यंत्यहि मंतरेण संतं गुणं तं किमु यंति संतः ॥ १८ ॥
अथापि ते देव परां भजन्तु यः प्रसादलेशानुगृहीत एव हि ॥ जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोपि चिरं
विचिन्वन् ॥ १९ ॥ तदस्तु मे नाथ स भूरिभागो भवेत्र चान्यत्र तु वा तिरश्चां ॥ येनाहमेकोपि भवज्जनानां भूत्वा निषेवे

किमिति भक्तिं हृदि धारयेत्तत्राह ॥ अथापीति ॥ यद्यपि इह प्राप्यमिव तत्त्वानं मुक्तं तथापि हे देव तव पादांबुजद्वयमध्या तव पादपद्मद्वयं ॥ २० ॥
एकदेशभागपि यः प्रसादलेशोपि तेनानुगृहीत एव भगवतस्तव महिम्नः तत्त्वं जानाति ॥ हे भगवन् ते महिम्नस्तत्त्वमिति वा ॥ एकोपि क
श्चिदपि चिरमपि ॥ विचिन्वन् अतदपवादेन विचारयन्नपीत्यर्थः ॥ १९ ॥ तस्मात् भूरिभागः महद्भाग्यं अत्र भवे ब्रह्मजन्मनि तिरश्चाप
पि मध्ये यज्जन्म तस्मिन्वा ॥ येन भाग्येन भवदादीनां जनानां एकोपि यः ॥ कश्चिदपि भूत्वा निषेवे अत्यर्थं सेवे ॥ २० ॥

१०.स्क यद्देवादिजन्मनोऽपि यत्र क्वचित् त्वदङ्घ्रिपङ्कजस्यैव श्रेष्ठमित्यौत्सुक्येन सप्तभिः श्लोकैरभिनन्दति ॥ अहोऽतिधन्या इत्यादिभिः व्रजगो
४७ रमण्यः व्रजस्था गावो गोप्यश्च तेन त्वया वत्सतरात्मजात्मना वत्सानामात्मजानां च रूपेण यस्य तव तन्ये स्तन्यं पि यत्ता अद्यापि न तृ
प्ताः ॥ तेन त्वयाद्यापि तृप्तिलक्षणो यज्ञस्तासां तस्मात्ताभिस्तन्यममृतरूपं पीतमिति ॥ ३१ ॥ किंच ॥ एतेषां भाग्यस्य तावत् महिता महिमास्तामास्तां
कस्तां वक्तुं शक्नोति ॥ शर्वादयः शर्वाहंकाराद्यधिष्ठातारः इन्द्रियाणां वह्न्यादीनामेकादशानां तेषां ॥ वयं च वयमित्यात्मानमेवाह

अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा ॥ यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेऽद्या
पि न चालमध्वराः ॥ ३१ ॥ अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसां ॥ यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनं ॥ ३२ ॥
एषां तु भाग्यमहिमाच्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः ॥ एतद्धृषीकचषकैरसकृत्पिबामः शर्वाद

वङ्मन्यमानः एवं मनोबुद्ध्यहंकारवह्न्याद्यधिष्ठातारस्त्वयोदरादेवा एव तावत् भूरिभागाः यस्मादेतेषां हृषीकाणीन्द्रियाण्यङ्घ्र्युदजमध्वमृतासवं ते
न्द्रियाण्येव चषकाणि तैः ॥ ते च चन्द्रासवितृनाधिष्ठातः अंघ्र्या एव उरुदजे वाणि जेत यो मधु मकरंदः तदेवामृतं तद्वा उन्मादकं पिबा राम
मः ॥ एतदुक्तं भवति ॥ परात्प्रत्येकं इंद्रियाभिमानिनो वयं कीर्त्तिसौन्दर्यसौगंध्याद्यैकैकरसास्वादेनापि कृतार्थाः सर्वेन्द्रियैः सर्वरसज्ञा विनामेते ४७
षां किं वर्ण्यते भाग्यमिति ॥ ३३ ॥

अतो मया प्रार्थितं तत् तदस्तु मे नाथ स भूरिभागा इति यावत् ॥ तदेतदेवाह ॥ भूरिभाग्यमिति ॥ किं तत् इह मनुष्यलोके यत्किमपि जन्म तत्रापि अटव्यां यत्
तत्रापि गोकुले अहो यत्तत्स्वलोकं विहायात्र जन्म निजाते कोलाभत्र तत्राह ॥ अपि कतमांघ्रिरजोभिषेकमिति गोकुलवासिनां मध्ये कत
मस्य यस्य कस्याप्यंघ्रिरजसाभिषेको यस्मिंस्तत् ननु उक्तो गोकुलवासिन एवातिधन्याः तत्राह ॥ यदिति येषां जीवितं निखिलं मुकुंद इति मुकुंद
परमेव जीवनमित्यर्थः दुर्लभतामाह ॥ अद्यापीति ॥ श्रुतिमृग्यं वेदैरपि मृग्यत एव न तु दृश्यत इत्यर्थः ॥ ३४ ॥ अपि च किं वार्पितेत्यत आह त्वमेषां ॥ येषां भ

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेपि कतमांघ्रिरजोभिषेकं ॥ यज्जीवितं तु निखिलं भगवान्मुकुंदस्त्वद्यापि य
त्पदरजः श्रुतिमृग्यमेव ॥ ३४ ॥ एषां घोषनिवासिनामुत भवान् किं देव रातेति नश्चेतो विश्वफलात्फलं त्वदपरं कुत्राप्यय
न्मुह्यति ॥ सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥ ३५ ॥

वानपि ऋणी वास्ते ॥ मत्तु किं दातुमसमर्थोहं येन ऋणी स्यां ॥ अत आह उत अपि भवानपि एषां कुत्रापि किं विश्वफलात् सर्वफलात्मकात्त्व
त्तः परं फलं दातास्मीति निश्चेतः अयन्नस्मद्बुद्ध्या चिन्तयन् विचारयन् मुह्यति मामेव दत्वा अनृणाः स्यामिति चेत् ॥ नहि नहि ॥ सद्वेषादिव सतां भ
क्तानां वेषमस्तनस्तुकारमात्रेणापि दुष्टा पूतनापि त्वामेवापिता प्रापिता ॥ नहि एतत्त्वं त्वद्विन्नामपि दास्यामीति चेत्तत्राह ॥ सकुलेति ॥ बकाघाद्या
सहिता एषां एषामपि तावदेवं देवेद पर्याप्तमित्याह ॥ यदिति ॥ येषां धामादयः त्वत्कृते त्वदर्थमेवेत्यर्थः ॥ ३५ ॥

२०५
५०

ननु विगतरागादिदोषाणां संन्यासिनामपि न मत्तः परं किं विरहितं ॥ कथमेषामपर्याप्तं इत्यत आह ॥ तावदिति ॥ हे कृष्ण रागादयस्तावदेव स्तेनाः चोरा भवंति ॥ तथा तावद्गृहमपि कारागृहं बंधनागारं मोहोऽपि तावदेवाङ्घ्रिनिगडः पादशृंखलं ॥ यावत्ते त्वदीया जना न भवंति ॥ त्वदीयानां रागादयोऽपि त्वन्निष्ठा एव कारागृहं वैतिनयतिभ्यो विशेषः भजनं त्वधिकमिति भावः ॥ ३६ ॥ ननु तत एवाहं येषां प्राप्तिरूपेणावर्त्त इति चेत् तत्राह ॥ प्रपंचमिति ॥ प्रपन्नाया जनताया जनसमूहस्य आनंदसंदोहमानंदसमूहं प्रथयितुमिति ॥ नहि कर्मपरतंत्रत्वादिना ताद्रूक् भक्तेरनूपपन्नं प्रप

तावद्रागादयः स्तेनास्तावत्कारागृहं गृहं ॥ तावन्मोहोऽङ्घ्रिनिगडो यावत्कृष्ण न ते जनाः ॥ ३६ ॥ प्रपंचं निःप्रपंचोऽपि विडंबयसि भूतले ॥ प्रपन्नजनतानंदसंदोहं प्रथितुं प्रभो ॥ ३७ ॥ मनसो वपुषो वाचो वैभवं तव गोचरः ॥ ३८ ॥ अनुजानीहि मां कृष्ण सर्वं त्वं वेत्सि सर्वदृक् ॥ त्वमेव जगतां नाथो जगदेतत्तवार्पितं ॥ ३९ ॥

ञ्चयत इत्यर्थः ॥ ३७ ॥ तदेवमादित आरभ्याचिंत्यानंतगुणत्वेन त्वं दुर्ज्ञेय इत्युक्तं ॥ केचित्तु जानीम इति स्थिताः ॥ तांस्तूपहसन्निवाह ॥ जानंत इति ॥ ननु मे मनस आदीनां तव वैभवविषय इति ॥ ३८ ॥ जगदीशत्वाद्यभिमानं परिहृत्याज्ञामाह ॥ अनुजानीहीति ॥ त्वन्महिमानं अस्मदादीनां वक्तात तवलादि सर्वं त्वमेव वेत्सि यतः सर्वदृक् जगतां नाथस्त्वं त्वमेवैते तावत् त्वां न ॥ अतो ममतास्पदं जगतत्प ततशरीरं च तवार्पितं ॥ ३९ ॥

जानंत एव जानंतु किं बहूक्त्या न मे प्रभो २

राम
५०

तरेवं किं करवण्याप्येति ॥ अत्पारेणानमस्करोति ॥ श्रीकृष्णेति ॥ वृष्णिकुलपद्मस्य प्रीतिदातृत्वेन हे हर्षोपम क्ष्मायां निर्जरा देवाश्च द्विजाश्च प
शवश्च त एव उदधयः तेषां वृद्धिकारित्वेन हे चंद्रोपम ॥ उद्धर्मः पाखंडधर्मः तदेव शार्वरं तमः तद्धरतीति तथा ॥ अनेन सूर्योपम ॥ हे क्षितिराक्षसध्रुक्
क्षितौ राक्षसाः कंसादयः उग्रत्वेन तेभ्यो द्रुह्यतीति पुनः सूर्योपम सूर्यस्याप्युपमा पन्नेनेति मत्वाह ॥ आर्कं अर्कमपि व्याप्य सर्वेषां अर्हत्व पूज्य भगवन्नत्रा
कल्पं कल्पपर्यंतं ते तुभ्यं नमः इति ॥ ४० ॥ एवं स्वस्य तत्कर्मा क्षणाकोतक दृष्ट्वा विलंबितं च तदेकुर्वतो निखिलरूपमतो रथः दत्तः वत्सपवः कलयन्

श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन् क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् ॥ उद्धर्मशार्वरहर क्षितिराक्षसध्रुगाकल्पमा
र्कमर्हन् भगवन्नमस्ते ॥ ४० ॥ शुक उवाच ॥ इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः ॥ नत्वाभीष्टं जगद्धाता स्वधाम प्रत्य
पद्यत ॥ ४१ ॥ ततोऽनुज्ञाप्य भगवान् स्वभुवं प्रागवस्थितान् ॥ वत्सान् पुलिनमानिन्ये यथापूर्वं सखं स्वकं ॥ ४२ ॥ एकस्मिन्न
पि याते ऽब्दे प्राणेशं चांतरात्मनः ॥ कृष्णमायाहता राजन् क्षणार्द्धं मेनिरेऽर्भकाः ॥ ४३ ॥ किं किं न विस्मरंतीह मायामोहितचेतसः

व्रजमंगलं ॥ पादयोर्नत्वा अभीष्टं सर्वतः पूजितं अपि प्रेतं वा ॥ ४१ ॥ अनुज्ञाप्य अनुज्ञां प्रदाप्य गृह्य एतदर्थः ॥ यन्मोहितं जगत्सर्वमभीक्ष्णं विस्मृतात्मकं ॥ ४४
स्वभुवं ब्रह्माणं यथापूर्वं वत्सा वा यस्मिन् तं तत् स्वकं पुलिनं ॥ ४२ ॥ ननु तावंतं कालं कथं ते तत्रैवोपविष्टाः कथं वत्सपिपासादि विस्मरणमत आह ॥ एकस्मि
न्निति श्लोकद्वयेन ॥ अब्दे पियाते प्राणेशं कृष्णमंतरा च विनापि प्रियविरहे क्षणोपि वर्षाधिको भवति तथापि मायया हताः क्षणार्द्धं मेनिरे ॥ ४३ ॥ यया मायया मो

रवं

१०पू०
५१

श्रुत एवमद्भुतरव॥ नेत्वयाति वेगेन ह्यागतं समपागतं॥ एकोपि ग्रामस्त्वां विना यस्मात्पिर्नाभोजि न भुक्तः इत एहि साधं अविक्षेपेण भुज्यतां
मिति॥ ३५॥ अस्य वरहृदयस्य हृष्ट्वा॥ ४०॥ श्रीहरिमीयो वेणवादि रवे ज्ञात्वा च तेनाघः संपन्नः गणानुरूपवालाने नेराद्ध्यनुगोपी हरिगन्तव्यहृदिः गोपीरह शाङ्ग
त्सव वरूपा हरि हरिनेयसमः॥ ४१॥ यशोदा नन्दस्तु नेति॥ यशोदा हन्नानन्दहृन्नेति॥ वहूनापङ्क्तिः स हे वरसिंहा॥ यदा केचिद् राज्ञः यशोदा
नन्दहृन्नेति॥ अपरे नन्दहृन्नेति॥ यदा यशोदानन्दयतीति यशोदानन्दः सदा सोमहृष्टेति तथा तेन॥ अस्मात महाख्यालात॥ वंशव अविता

उद्धवस्त्वहरः कस्मिन्नागततेति हसा॥ नेकोप्यभोजि कवलपहीतः साधु भुज्यतां॥ ४५॥ ततो हसन् हृषीकेशो स्यवद
त्यसहायैकैः॥ दर्शीयन्त चर्मोजगांस्यवर्तन्ते वनाहूतं॥ ४६॥ वहूप्रसूननवधातुविचित्रितांगः श्रीहामवेणुरलसूगरवोत्त
वायुः॥ वत्सान्वारणान नुगीत पवित्रकीर्त्तिर्गोपीहगुत्सवहृदिः प्रविवेश गोष्ठं॥ ४७॥ अद्य नेन महाख्यालोयशोदानन्दहृन्ना
हृतो वितावयवास्मादिति वालाव्रजे जगुः॥ ४८॥ राजोवाच॥ ब्रह्मन्परोद्भवे कृष्णे इयान्प्रेमा कथं भवेत॥ योभूतपूर्वस्तोकेषु
स्वोद्भवेष्वपि कथ्यतां॥ ४९॥ श्रीकशुक उवाच॥ सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः॥ इतरे पत्यवित्ताद्यास्तद्वल्लभतयैव हि॥ ५०॥
३ग
शिताः॥ ४५॥ ब्रजौकसां स्वतोकेषु स्नेहवल्यारमन्वहं॥ शनैर्निःसीमवद्वृधे यथा कृष्णे त्वपूर्ववत्॥ हिताहिनाह्व तोकेष्वपि परब्रजे कृष्णे प्रेमाधिक्यस्त त्र
तत्रश्च हृति॥ व्रह्मन्त्रिति॥ ४९॥ श्रीकृष्णस्यात्मत्वात्तस्मिन्नात्मयेभ्यः प्रेमाधिक्यं युज्यत इति वक्तं प्रथमं तावदात्मनः स्वतः प्रेष्ठत्वमन्येषां तदुपाधिक

राम
५१

ज्ञातः तथा दर्शनादित्याह ॥ तदिति ॥ ५१ ॥ तस्माद्देवकारणात् ॥ स्वस्वकात्मभिन्न अहंकारास्पदे अहंकारास्पदेऽपि देहे आत्माध्यासेनात्रतमेनबद्धे माता
रतंप्रदृश्यमानं तन्निबंधनमेवेति दर्शयितुं दृष्टांतमुखेन विशेषमाह ॥ देहात्मवादिनामिति द्वाभ्यां ॥ तद्देहमत्त्वेये तु भवंति पुत्रादयस्तेन न तथा
प्रियतमा इत्यर्थः ॥ ५२ ॥ यतः यस्माज्जीर्यत्यपि आसन्नमरणोऽपि जीविताशा भवति अयं भावः ॥ न जीविष्यतीति निश्चितेऽपि देहे यत्प्रेमास्पदत्वं

तद्राजेंद्र यथा स्नेहः स्वस्वकात्मनि देहिनां ॥ न तथा ममतालंबि पुत्रवित्तगृहादिषु ॥ ५२ ॥ देहात्मवादिनां पुंसामपि रा
जन्यसत्तम ॥ यथा देहः प्रियतमस्तथा न ह्यनु ये च तं ॥ देहोऽपि ममताभाक् चेत्तर्ह्यसौ नात्मवत्प्रियः ॥ यज्जीर्यत्यपि देहेऽस्मि
न्जीविताशा बलीयसी ॥ ५३ ॥ यस्मात्प्रियतमः स्वात्मा सर्वेषामपि देहिनां ॥ तदर्थमेव सकलं जगदेतच्चराचरं ॥ ५४ ॥
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनां ॥ जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥ ५५ ॥ वस्तुतो जानतामत्र कृष्णं

तदात्मगतमेव संगच्छत इति ॥ अथवा यत यस्मिन्देहे जीर्यत्यपि स्थास्नु चरिष्णु च ॥ भगवद्रूपमपरं नान्यदस्तीह किंचन ॥ ५६ ॥
जीविताशा अविवेकदशामाश्रित्य ॥ तापि विवेकिनो ममताभाग्भवति ॥ तदा तत्र नातिवास्थेति ॥ ५२ ॥ तदर्थमेव सकलं प्रियमित्यर्थः ॥ ५४ ॥
प्रकृतमाह ॥ कृष्णमेनमिति ॥ ५५ ॥ न केवलमात्मनात्मा अपितु जडानामपीत्याह ॥ वस्त्विति ॥ सर्वं जगत्कारणमिति ॥ कृष्णं जानतां स्थाव
जंगमं च सर्वं भगवद्रूपं भगवानेव वस्तुरूपं यस्मात्तस्मान्नान्यत् ॥ ५६ ॥ श्रीराम

खिलं १

२०.१०.
५२

कृत इति तत्राह॥ सर्वेषामिति भावार्थः परमार्थः भवति भवत्यस्मिन्प्रमाणाश्चाद्युत्पत्तिकारणानि तस्मिन्न तस्यापि भवतः कारणस्यापि भगवान्कृष्णो भव
त्कारणं अतः किमतत्र अक्षरं कृष्णव्यतिरिक्तं वस्तु निरूप्यतां॥५७॥ तस्माच्छ्रीकृष्णस्यैव परमार्थत्वात्तदेकशरणानां नास्ति भयं तत्रविद्या मोक्ष इति॥ प्रकरणार्थ
मुपसंहरति समाश्रिता इति॥ पुण्यं यशो यस्य स पुण्ययशाः भवाम्बो मुरारिश्च तस्य पदपल्लवं पदं वा ये समाश्रिताः महत्पदं महतामाश्रयं यद्वा महद्ब्रह्म तत्पदं चेति तथा तेषां भवाम्बुधिर्वत्सपदमात्रं भवति॥ किंच परं पदं श्रीवैकुंठाख्यं पदं स्थानं भवति॥ विपदां यत्पदं विषयः तन्नः

सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः॥ तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यतां॥५७॥ समाश्रिता ये पदपल्लवप्लवं
महत्पदं पुण्ययशो मुरारेः॥ भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषां॥५८॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया
यत्कौमारे हरिकृतं पौगंडे परिकीर्तितं॥५९॥ एतत्सुहृद्भिश्चरितं मुरारेरघार्दनं शाद्वलजेमनं च॥ व्यक्तेतरद्रूपमजोर्वभिष्ट
वं शृण्वन्गृणन्नेति नरोऽखिलार्थान्॥६०॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादि
भिः॥६१॥ इति श्रीभागवते महापुराणे दशमस्कंधे ब्रह्मस्तुतिर्नाम चतुर्दशोऽध्यायः॥ कदाचिदपि तेषां न भवति॥ नततंषुनराख्यानं तस्यार्थः

सुहृद्भिश्च परितं पुण्यं हंसतो नो न्यसिक्यकारी नित्यादिनोक्तं अघार्दनं च शाद्वले येमनं भोजनं व्यक्तेतरं व्यक्तात्जडाप्रपंचादितरत् शुद्धसत्त्वादिकं वत्सत्व पाल
त्वपालत्वरूपं यद्वा व्यक्तेतरः चिद्विलासः तं रूप्यत इति रूपं अजस्य ब्रह्मणो महानभिष्टवः तं च सहतान् हन्ति पततश्शृण्वन्गृणन्नरः सर्वपुरुषार्थान्प्रा ५२
प्नोति॥६०॥६१॥ इति टीकायां चतुर्दशः॥॥॥॥

५६

ततः पंचदशो धेनुपालनं धेनुकार्दनं ॥ कालीयक्ष्वेलतो गोपरक्षणं च निरूप्यते ॥ अह्निवनप्रवेशेन रथ्याखिलौ तु सखीन ततः ॥ कृष्णस्य
वेशायत्पञ्चफलेनालारिसंकुलं ॥१॥ पशुपालसंमतौ पशुपालेन संमतौ ॥ इष्टद्वयोर्बलातिरेकमनुकृतवन्तावित्यर्थः ॥ अतीव चक्रतुः सं
वेतः सम्पर्णेन ॥१॥ स्वयशो गृणद्भिर्मित्रैस्तद्वनं प्राविशत् ॥२॥ तद्वनं निरीक्ष्य रन्तुं मनो दधे ॥ कथंभूतं मंजुघोषा येषां अलिमृगद्विजाः पक्षिणस्तैराकुलं

श्रीशुक उवाच ॥ ततश्च पौगंडवयः श्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ ॥ गाश्चारयंतौ सखिभिः समं पदैर्वृंदावनं पु
ण्यमतीव चक्रतुः ॥१॥ तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः ॥ पशून्पुरस्कृत्य पशव्य
माविशद्विहर्तुकामः कुसुमाकरं वनं ॥२॥ तन्मंजुघोषालिमृगद्विजाकुलं महन्मनःप्रख्यपयःसरस्वता ॥ वातेन जु
ष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भगवान्मनो दधे ॥३॥ स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ॥ स्पृश
च्छिखान्वीक्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥४॥ श्रीभगवानुवाच ॥ अहो अमी देववरामरार्चितं पादांबुजं ते
सुमनःफलार्हणं ॥ नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतं

ज्ञिणः तैराकुलं व्याप्तं महन्मनःप्रख्यापयःसरस्वता ॥ महतां मनस
स्तुल्यं प्रख्यं स्वच्छं पयो यस्मिन् तत्सरः ॥ आश्रयत्वेनास्ति यस्य तेन च ॥ तेनेति शीतत्वमुक्तं ॥ शतपत्रगंधिनेति परिमलस्तु स्पृष्टं वनमिति माधुर्यं वर्णितं ॥३॥ अरुणप
ल्लवश्रिया सह स्पृशंत्यः शिखाः शाखाग्राणि येषां तान् ॥४॥ तरुजन्म येन कृतं तस्य तमसः पापस्यापहत्यै नाशाय ॥ अथवा येन त्वया स्ववेणुसर्वोपकारकं

१०.१
५२

हे अनघ वने गूढमपि त्वां न त्यजंति ॥ त्वयि मनुष्यवेषेण निगूढे सति मुनयोप्यलिवेषेण निगूढास्त्वां भजंतीत्यर्थः ॥ ६ ॥ इयान्हि सतां निसर्ग इति परहितेच्छास्मिन्नेतद्गृहमागताय सत्कृत्य समर्पयति ॥ ७ ॥ तृणवीरुधस्त्वत्पादैः स्पृशंतीति तथा ॥ करजाभिमृष्टाः नखैः स्पृष्टाः सदयैरवलो

एतेऽलिनस्तव यशोऽखिललोकतीर्थं गायंत आदिपुरुषानुपदं भजंते ॥ प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेपि न जहत्यनघात्मदैवं ॥ ६ ॥ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्षणेन ॥ सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान्हि सतां निसर्गः ॥ ७ ॥ धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः ॥ नद्योऽद्रयः खगमृगाः सदयावलोकैः गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः ॥ ८ ॥ श्रीशुक उवाच ॥ एवं वृंदावनं श्रीमान्कृष्णः प्रीतमनाः पशून् ॥ रेमे संचारयन्नद्रेः सरिद्रोधःसु सानुगः ॥ ९ ॥ क्वचिद्गायति गायत्सु मदांधालिष्वनुव्रतैः ॥ उपगीयमानचरितः स्रग्वी संकर्षणान्वितः ॥ १० ॥ क्वचिच्च कलहंसानामनुकूजति कूजितं ॥ अभिनृत्य

कनैः श्रीरपि यस्मै स्पृहयति केवलं तेन भुजयोरंतरेण वक्षसा गोप्यो धन्या इति ॥ ८ ॥ एवं श्रीमत्वृंदावनं ति नृत्यंतं बर्हिणं हासयन्क्वचित् ॥ प्रतिप्रीतः सन् ॥ अद्रेः समीपवर्तिसरिन्नैरोधःसु संचारयन् सानुगः प्रीतमना रेमे ॥ ९ ॥ तामेव रतिमाह क्वचिदित्यादिदशभिः ॥ १० ॥ बर्हिणं नृत्यंतं ५२
तमनु अभिनृत्यति ॥ बर्हिणमभिलक्ष्य नृत्यतीति वा ॥ सखीन् हासयन् ॥ ११ ॥

१२ चकोरादीननुकृत्य रौति ॥ कदाचिद्वित्तसत्त्वानां मध्ये व्याघ्रसिंहयोरन्त्याभ्यां भीतवदुद्रवति सत्त्वेषु पलायमानेषु पलायत इत्यर्थः यतो सत्त्वानां वले
द्रेकात्ताभ्यां भीतवदुद्रवतीति वा ॥ १३ ॥ आर्यमग्रजं विश्रमयति विगतश्रमं करोति ॥ १४ ॥ मिथो नृत्यादीन् कुर्वतो गोपान् प्रशशंसतुः ॥ १५ ॥ १६ ॥ जनैः पल्लवा

मेघगंभीरया वाचा नामभिर्दूरगान्पशून् ॥ क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया ॥ ११ ॥ चकोरक्रौंचचक्राह्वभारद्वाजांश्च बर्हिणः ॥
अनुरौति स्म सत्त्वानां भीतवद्व्याघ्रसिंहयोः ॥ १२ ॥ क्वचित्क्रीडापरिश्रांतं गोपोत्संगोपबर्हणं ॥ स्वयं विश्रमयत्यार्यं पादसंवाह
नादिभिः ॥ १४ ॥ नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः ॥ गृहीतहस्तौ गोपालान्हसंतौ प्रशशंसतुः ॥ १५ ॥ क्वचित्पल्लवत
ल्पेषु नियुद्धश्रमकर्षितः ॥ वृक्षमूलाश्रयः शेते गोपोत्संगोपबर्हणः ॥ १६ ॥ पादसंवाहनं चक्रुः केचित्तस्य महात्मनः ॥ अपरे हत
पाप्मानो व्यजनैः समवीजयन् ॥ १७ ॥ अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः ॥ गायंति स्म महाराज स्नेहक्लिन्नधियः शनैः ॥ १८ ॥ ए
वं निगूढात्मगतिः स्वमायया गोपात्मजत्वं चरितैर्विडंबयन् ॥ रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः ॥ १९ ॥
श्रीदामा नाम गोपालो रामकेशवयोः सखा ॥ सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् ॥ २० ॥ राम राम महाबाहो कृष्ण दुष्टनिब
र्हण ॥ इतोऽविदूरे सुमहद्वनं तालालिसंकुलं ॥ २१ ॥ फलानि तत्र भूरीणि पतंति पतितानि च ॥ संति किंत्ववरुद्धानि धेनुकेन दुरात्मना ॥ २२ ॥

रीनिर्मितैः ॥ १७ ॥ १८ ॥ ईशचेष्टित इति निगूढस्वभावत्वेप्यंतरांतरा ईशस्यैव चेष्टितानि दर्शयते यस्मिन्सः ॥ १९ ॥ ईशचेष्टितत्वमेव दर्शयितुमाह ॥ श्रीदामेति हो

२०५० ॥ १२ ॥ विश्वचीनः सर्वतः प्रसृतः ॥ १५ ॥ ८ ॥ तन्नगं सत्वरं ॥ २० ॥ वृतमद्वान्ध्यां शंकाशब्दमितिगर्दभजातिशब्दानुकरणं ॥ पर्यसरत् परितो धावदित्यर्थः ॥ २० ॥
५४ उपकीचकगर्दभः पराक्रमतिप्रखरः अपरोपम्भिमो बलायबलं हहं ॥ २१ ॥ तरणजात्तालेः ॥ २२ ॥ उत्कर्षेन खरदेहेन हतैर्हेतावकं पिरेजुर्वकं पपात ॥ २४ ॥ यस्मि

न्सोऽतिवीर्यो हरोणमहे तत्प्रखरतु पपृथुकु ॥ आत्मतल्पवलेरन्ये तातिभिर्वहुभिर्हतः ॥ १३ ॥ तस्मात्कृततनराहाराद्गीते नृभिरभित्रहत्य
नसेव्यते पश्चुगणैः पक्षिभिर्घर्विवर्जितं ॥ १४ ॥ विद्यते भक्तसवोत्तिफलानि हरभीतितव ॥ एषवेहरभोगं धो विष्वचीनो विगतरत्नते
प्रयस्तुतानिनः रक्ष्मंगधलोभितचेतसा ॥ वान्छामान्महतीमपगम्यमानतायदिवाचेत ॥ १६ ॥ एवं तत्तद्भवः श्रुत्वा तत्पुमितिप्रविवर्षया
प्रहसन् जगमतरो पेद्रुतौ तालवनं प्रभुः ॥ १७ ॥ बलः प्रविश्य बाहुभ्यां तालान् संपरिकंपयन् ॥ फलानि पातयामास मतंगज इवौजसा ॥ १८ ॥ फलानां पततां शब्दं निशम्यासुररासभः ॥ अभ्यधावत्क्षितितलं सनगं परिकंपयन् ॥ १९ ॥ समेत्य तरसा प्रत्यग्द्वाभ्यां पद्भ्यां व
लं बली ॥ निहत्योरसि काशद्भः मुंचन्पर्यसरत् खलः ॥ २० ॥ पुनरासाद्य संरब्धउपक्रोष्टापराक्स्थितः ॥ चरणावपरौ राजन्बलाय प्र
क्षिपद्रुषा ॥ २१ ॥ सतंगृहीत्वा प्रपदो भ्रामयित्वैकपाणिना ॥ चिक्षेप तृणराजाग्रे भ्रामणात्यक्तजीवितं ॥ २२ ॥ तेनाहतो महातालो वे
पमानो बृहच्छिराः ॥ पार्श्वस्थं कंपयन् भग्नः सचान्यं सोपि चापरं ॥ २३ ॥ बलस्य लीलयोत्सृष्टखरदेहहताहताः ॥ तालाश्चकंपिरे सर्वे महा
वातेरिता इव ॥ २४ ॥ नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे ॥ ओतप्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः ॥ २५ ॥
निदं विश्वं ॥ तत ऊर्ध्वं तंतुषु पटइवं ग्रथितं ॥ प्रोतं तिर्यक्तंतुषु पट एवेदं संग्रथितं ॥ सर्वतः प्रसृतं वर्त्तत इत्यर्थः ॥ २५ ॥ श्रीकृष्णायनमः ॥ राम

राम
५४

पु २

३६ ॥ ३७ ॥ घनैर्नभ इव भुवस्तलं रराज ॥ तत्र फलप्रकरसंकीर्णा इति दैत्यदेहैः सतालाग्रैः संकीर्णमित्यरुणश्वेतनीलघनसादृश्यसंपादनं ३८ ॥
आगमनमुत्प्रेक्षयन्नाह ॥ ४० ॥ ४१ ॥ गोरजोभिश्छुरितेषु कुंतलेषु बद्धं बर्हं वन्यानि प्रसूनानि च यस्य सः रुचिरमीक्षणं चारुहासश्च यस्य तं वंतं च दिदृक्षितदृशः दिदृ

ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये ॥ क्रोष्टारोऽभ्यद्रवन्सर्वे संरब्धा हतबांधवाः ॥ ३६ ॥ तांस्तानापततः कृष्णो रामश्च नृप लीलया ॥ गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ॥ ३७ ॥ फलप्रकरसंकीर्णं दैत्यदेहैर्गतासुभिः ॥ रराज भूः सतालाग्रैर्घनैरिव नभस्तलं ॥ ३८ ॥ तयोस्तत्सुमहत्कर्म निशम्य विबुधादयः ॥ मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ॥ ३९ ॥ अथ तालफलान्यादन्मनुष्या गतसाध्वसाः ॥ तृणं च पशवश्चेरुर्हतधेनुककानने ॥ ४० ॥ कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः ॥ स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाव्रजत् ॥ ४१ ॥ तं गोरजःछुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासं ॥ वेणुं क्वणंतमनुगैरुपगीतकीर्तिं गोप्यो दिदृक्षितदृशोऽभ्यगमन्समेताः ॥ ४२ ॥ पीत्वा मुकुंदमुखसारघमक्षिभृंगैस्तापं जहुर्विरहजं व्रजयोषितोऽह्नि ॥ तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहासविनयं यदपांगमोक्षं ॥ ४३ ॥

क्षा दर्शनोत्कंठा युक्ता या दृशो यासां ताः ॥ ४२ ॥ मुकुंदस्य मुखमुपगतं सारघं मधु ॥ अह्नि यो विरहस्तस्माज्जातं तापं सर्वतां तासां सत्कृतिं कथं वा कृतवान्तमाह
सव्रीडेति ॥ सलज्जेन हासेन विनयेन यथा भवति तथा वदेतत् किं अपांगमोक्षणं कटाक्षदर्शनं ॥ तथा सत्कृतिं प्राप्येति ॥ ४३ ॥ श्रीरामसहाय

५४

२०.५
५५

४४ ॥५०॥ सम्प्रतिसद्यएव एताव्राज्ञाज्ञास्मृतिर्येहत्तेसप्रतीतस्मृतयः ॥ यद्वा ॥ सम्यक्प्रतीताप्रतिज्ञाज्ञास्मृतिर्येहत्तेतथेति ॥५१॥ इतिदशमस्कंधेपं
चदशोध्यायः ॥ षोडशेकालियस्योक्तोनिग्रहोयमुनाह्रदे ॥ तत्पत्नीभिस्तुतेनाथकृष्णेनानुग्रहःकृतः ॥ ह्रत्वाराममपैहैतेयाह्रजः ध्यातालफ

तयोर्यशोदारोहिण्यौपुत्रयोःपुत्रवत्सले ॥ यथाकामंयथाकालंव्यधत्तांपरमाशिषः ४५ ॥ गताध्वानश्रमौतत्रमज्जनोन्मर्द्दना
दिभिः ॥ नीवींवसित्वारुचिरांदिव्यस्रग्गंधमंडितौ ॥ ४६ ॥ जनन्युपहृतंप्राश्यस्वाद्वन्नमुपलालितौ ॥ संविश्यवरशय्यायांसुखंसु
षुपतुर्व्रजे ॥ ४७ ॥ एवंसभगवान्कृष्णोवृंदावनचरःक्वचित् ॥ ययौराममृतेराजन्कालिंदींसखिभिर्वृतः ॥ ४८ ॥ अथगावश्चगोपाश्च
निदाघातपपीडिताः ॥ दुष्टंजलंपपुस्तस्यास्तृषार्त्ताविषदूषितं ॥ ४९ ॥ विषांभस्तदुपस्पृश्यदैवोपहतचेतसः ॥ निपेतुर्व्यसवः
सर्वेसलिलांतेकुरूद्वह ॥ ५० ॥ वीक्ष्यतान्वैतथाभूतान्कृष्णोयोगेश्वरेश्वरः ॥ ईक्षयामृतवर्षिण्यास्वनाथान्समजीवयत् ॥ ५१ ॥
तेसंप्रतीतस्मृतयःसमुत्थायजलांतिकात् ॥ आसन्सुविस्मिताःसर्वेवीक्षमाणाःपरस्परं ॥ ५२ ॥ अन्वमंसततद्राजन्गोवि
दानुग्रहेक्षितं ॥ पीत्वाविषंपरेतस्यपुनरुत्थानमात्मनः ॥ ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेधेनुकवधोनामपं
चदशोध्यायः ॥ श्रीशुकउवाच ॥ विलोक्यदूषितांकृष्णांकृष्णःकृष्णाहिनाविभुः ॥ तस्याविशुद्धिमन्विच्छन्सर्पंतमुदवासयत् ॥१॥
न्यपलं ॥ प्रीतोःनृत्यफणारंगेकालीयस्यकलानिधिः ॥१॥ उदवासयत् ॥ निःसारितवान् ॥१॥

राम
५५

वहूनि युगान्यावासो यस्य तमहिं स वै अहिः अंतर्जलवर्धितस्तस्मिन्नंतर्जले यथा येन प्रकारेणासीत् अथवा वहूनि युगान्यावासो यथा भवति तेन प्रकारेण स वै तत्रासीदिति कथ्यतामिति १ गोपालेन यदुदारं महच्चरितं तदेवामृतं अतः कथ्यतामिति २ श्रप्यमाणं पच्यमानं पयो यस्य सः अत उपरि गच्छंतः खगा यस्मिन्पतंति ४ किंच विप्रुष्मता उदकणायुक्तेन विषोदतरंगस्पर्शिमारुतेन स्पृष्टा यस्य तीरगाः म्रियंते सर्वे प्राणिनः

राजोवाच ॥ कथमंतर्जलेऽगाधे न्यगृह्णाद्भगवानहिं ॥ स वै वहुयुगावासं यथासीद्विप्र कथ्यतां १ ब्रह्मन्भगवतस्तस्य भूम्नः स्वच्छंदवर्तिनः ॥ गोपालोदारचरितं कस्तृप्येतामृतं जुषन् २ ॥ बादरायणिरु० ॥ कालिंद्यां कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना श्रप्यमाणपया यस्मिन्पतंत्युपरिगाः खगाः ॥ ४ ॥ विप्रुष्मता विषोदोर्मिमारुतेनाभिमर्शिताः ॥ म्रियंते तीरगा यस्य प्राणिनः स्थिरजंगमाः ॥ ५ ॥ [illegible] तं चंडवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः ॥ कृष्णः कदंवमधिरुह्य ततोऽतितुंगमास्फोट्य गाढरशनो न्यपतद्विषोदे ॥ ६ ॥ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांवुराशिः

रिति ॥ ५ ॥ तं कालियं चंडवेगो यस्य तद्विषमेव वीर्यं यस्य तं कदंव पर्यंकृद्धतो विषकषायविभीषणोर्मिर्धावन् धनुः शतमनंतवलस्य किं तत् मिति भाविना श्रीकृष्णचरणस्पर्शेन भाग्येन प्रत्येकमेव तीरेणानुपघ्नः अमृतमाहरता गरुडेनानुज्ञातत्वादिति पुराणांतरं आस्फोट्य वाहुं करतलेनाहत्य गाढं दृढं वद्धा रशना येन सः ६ तदा सर्पह्रदः पुरुषश्रेष्ठस्य पतनमारेण संक्षोभितानामुरगाणां विषैरुच्छ्वसितोद्गतोर्मिर्यस्य सः विषेन कषायीकृता भयंकरा

भुजदंडाहतोरस्कघोषश्रुत्वा ततः स्वसदनात् पितृवत्सनिरीक्षस्तदा सहमानः समभरत् समाजगाम ॥ ७ ॥ प्रेक्षणीयश्च रक्तकमारश्च घनवदुज्ज्वलश्च तं ॥ श्री
वत्सपीतवसनं ॥ कृष्णदेवविहरतः श्रीवत्सेन सपक्षकच्छलत्या नवं हृदयस्थं तं ॥ भुजयाभोगेन वक्षादरश्च वेष्टयन् ॥ ८ ॥ सः प्रियायेषां तेन स्त्रियाः ते च ते सखा

तस्य कृष्णदेवविहरतो भुजदंडघर्षणावाघोषमंगवरवारणविक्रमस्य ॥ आश्रुत्य तत्त्वसदनात् पितृवत्सनिरीक्षश्च कृष्णः श्रवाः समभरत् त्वरमाण
मानाः ॥ ८ ॥ तं प्रेक्षणीयरक्तकुमारघनावदातं श्रीवत्सपीतवसनं स्मितहरसं ॥ क्रीडंतमप्रतिभयं कमलोरुशिराधिग्रस्तं सर्पमर्म
हरुषाभुजगाश्च कृष्णार ॥ ९ ॥ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपाभृशार्ताः ॥ कृष्णेर्पितात्महरदर्थकल
त्रकामाडुःखानुशोकभयमूढधियो निपेतुः ॥ १० ॥ गावो वृषा वत्सतर्यः क्रंदमानाः सुदुःखिताः ॥ कृष्णे न्यस्तेक्षणाभीता रुद
त्य इव तस्थिरे ॥ ११ ॥ अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः ॥ उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः ॥ १२ ॥ तानालक्ष्य भयो
द्विग्ना गोपा नंदपुरोगमाः ॥ विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतं ॥ १३ ॥ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः ॥ तत्प्राणास्तन्म
नस्कास्ते दुःखशोकभयातुराः ॥ १४ ॥ आबालवृद्धवनिताः सर्वे पशुवृत्तयः ॥ निर्जग्मुर्गोकुलाद्दीनाः कृष्णदर्शनलालसाः ॥ १५ ॥

पश्यतीति तथा ॥ १० ॥ भुवि कंपादयः दिक्षु उल्कापातादयः आत्मनि वामनेत्रस्फुरणादयः आसन्नं भयं शंसितुं शीलं येषां ते ॥ १२ ॥ तानालक्ष्य गोकुलान्निर्जग्मुरि
ति तृतीयेनान्वयः ॥ भयोद्विग्नाः भयहेतुभ्यो भीताः भयेन कंपमाना इति वा ॥ १३ ॥ मत्वेति विदंतीति तद्विदः ॥ १४ ॥ पशुवृत्तयः अतिवत्सलाः ॥ १५ ॥

कातराननुश्रितिभीतान् ॥ ६ ॥ भगवंतं लक्ष्ययंति यानि पदानि तैः सूचितया पदव्या मार्गेण ॥ ७ ॥ पदैरमार्गज्ञानप्रकाशकमाहत इति ॥ चितैः श्रीकृष्ण
स्यानुन्येषां पदानां अंतरा मध्ये मध्ये तन्नदपोहेन गवांश्चतीनां मार्गे सत्त्वराश्रुपमन्नायोगिनस्तदुपाध्यपवादेन यथा परं तत्त्वं मृगयंति तद्वदिति भा

ताः तथा कातराबीज्ञ भगवान्माधवो बलः ॥ बृहस्पतिं किं विज्ञो वा वद प्रवाचतोऽनुजस्पमतः ॥ ६ ॥ त्वमेषमाणा दर्शितं कृष्णं सूचितया
पदैः ॥ भगवल्लक्षणोर्जेमुः परव्यायजनांतरं ॥ ७ ॥ तेतत्रतत्रान्यपदंवाक्षणाशानिध्वजोपपत्रानि पदानि विश्वपतेः ॥ मार्गे गवाम
न्यपदांतरांतरे निरीक्षमाणाः यद्युरंगमत्वराः ॥ ८ ॥ श्रुतंहृदे स्वजनभोगपरीतमाराद्कृष्णं निरीक्ष्य उपलभ्य जलाशयांते ॥ गोपाश्च
भूरधिषण्यास्पदिताः पशुश्च मेकं दंतः परमकश्मलमापुरार्तः ॥ ९ ॥ गोप्यो नुरक्तामनसो भगवत्यनंते तत्सौहृदस्मितविलोक
गिरः स्मरंत्यः ॥ ग्रस्तेहिना प्रियतमे भृशदुःखतप्ताः शून्यं प्रियं व्यतिहृतं ददृशुस्त्रिलोकं ॥ १० ॥ ताः कृष्णमातरमपत्यमनुप्रविष्टां
तुल्यव्यथाः समनुगृह्य शुचः स्रवंत्यः ॥ तास्ता ब्रजप्रियकथाः कथयंत्य आसंकृष्णाननेऽर्पितदृशो मृतकप्रतीकाः ॥ ११ ॥ कृष्णप्राणा
स्त्रिविशतो नंदादीन्वीक्ष्य तं ह्रदं ॥ प्रत्यषेधत्स भगवान् रामः कृष्णानुभाववित ॥ १२ ॥ इत्थं स्वगोकुलमनन्यगतिं निरीक्ष्य सस्त्रीकुमा
रमतिदुःखितमात्महेतोः ॥ आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरंगबंधात् ॥ १३ ॥

व ॥ ८ ॥ ततश्च सर्पशरीरवेष्टितं कृष्णं दृष्ट्वा त्रिरीक्ष्य गोपांश्च पशूंश्च तथा निरीक्ष्यार्ताः परं मोहं प्रापुः ॥ ९ ॥ प्रियेण श्रीकृष्णेन विरहितं त्रैलोक्यं शून्यं ददृशुः ॥ १० ॥
॥ ११ ॥ अनन्यगतिमात्मानं दृष्ट्वा निरीक्ष्य ॥ अतएवात्महेतोः स्वगोकुलमतिदुःखितमाज्ञाय उरंगबंधादुदतिष्ठदित्यन्वयः ॥ १३ ॥

३१

१०पू
५७

तस्यप्रथ्यमानेनवपुषाव्यथितात्मशरीरोभुजंगः कुंडलीभूतमुच्यतांत्यक्त्वाकुपितःस्वफणानुन्नमय्यश्वसन्केवलमीक्षमाणस्तस्थौ॥ कथंभूतःश्वस
नरंध्रेषुनासाविवरेषुविषंयस्य॥ तच्चांवरीषोमंडकपाकभाजनंतद्वत्स्तब्धेनिश्चलेईक्षणेयस्य॥ तथोल्मुकानिवखेषुयस्यसतथावमव
२४॥ हरिस्तुक्रीडंस्तमहंसर्पंपरिससारपरितोबभ्राम॥ अतिकरालविषाग्निर्दृष्टिर्यस्यतंजिह्वयाद्विशिखयेतिप्रतिमुखमेव॥२५॥ परिभ्रमेणै

तत्प्रथ्यमानवपुषाव्यथितात्मभोगस्त्यक्त्वोन्नमय्यकुपितःस्वफणान्भुजंगः॥ तस्थौश्वसञ्छ्वसनरंध्रविषांबरीषस्तब्धेक्षणो
ल्मुकमुखोहरिमीक्षमाणः॥२४॥ तंजिह्वयाद्विशिखयापरिलेलिहानंद्वेसृक्किणीअतिकरालविषाग्निदृष्टिं॥ क्रीडन्नमुंपरिस
सारयथाखगेंद्रोबभ्रामसोप्यवसरंप्रसमीक्षमाणः॥२५॥ एवंपरिभ्रमहतौजसमुन्नतांसमानम्यतत्पृथुशिरःस्वधिरूढ
आद्यः॥ तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादांबुजोखिलकलादिगुरुर्ननर्त॥२६॥ तंनर्तुमुद्यतमवेक्ष्यतदातदीयगंध
र्वसिद्धसुरचारणदेववध्वः॥ प्रीत्यामृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिःसहसोपसेदुः॥२७॥ यद्यच्छिरोननमते
गशतैकशीर्ष्णस्तत्तन्ममर्दखरदंडधरोंघ्रिपातैः॥ क्षीणायुषोभ्रमतउल्वणमास्यतोसृङ्नस्तोवमन्परमकश्मलमापनागः॥२८

वहतमोजोयस्यतं॥ उन्नतांसौयस्यतं॥ तस्यमूर्द्धसुयेनरत्ननिकरास्तेषांस्पर्शेनातिताम्रपादांबुजंयस्यसः ननुकथंचंचलेषुशिरःसुननर्त्ततत्रा
हअखिलकलानामादिगुरुः॥२६॥२७॥ तशैकशीर्ष्णः शतंएकानिमुख्यानिशीर्षाणियस्यतस्यक्षीणायुषोपिपुनर्भ्रमतः यद्यच्छिरोननमते
त्तद्यंतांनजाति॥ न्यत्यच्छलेनांघ्रिपातैस्तत्तन्ममर्द॥ ततश्चआस्यतोमुखेभ्यः नस्तोनासाविवरेभ्यश्चासृग्वमन् ॥२८॥ ॥

राम
५७

पुनरपि हृष्टाउच्चैर्निःस्वनोयद्यत्तत्तत्प्रपतितत्परापातेनात्तु नयत् ॥ इह्वास्मिन्नवसरे हृष्टैर्गंधर्वादिभिः शेषास्ततः पुराणाः पुरुषइवयथोदानंदनः
पुष्पैः पूजितः ॥ यद्वा ॥ तदा गंधर्वादिभिः पुष्पैः सपूजितोगोपैः पुराणाः पुराणानिवहृष्ट इति ॥ यद्वा ॥ पुष्पैः सपूजितइवप्रमत्तः सन् ॥ यद्वायावद्
वहितं कृतवानित्यर्थः ॥ २७ ॥ अरण्योशरण्यो ॥ २० ॥ गार्भेजगंतियस्मतस्यातिभरेणाभुवमन्त्रमाक्रांतं ॥ पार्थिः पादपृष्ठ ॥ अत्यंश्री कृष्णस्त्रथंतोवि

तस्याहिभिर्गरलपुद्धमतः शिरः सुपद्यन्नप्रपतिभिः स्नुमतोहृषोच्चैः ॥ तत्परापातेनमयन्नुरयथावकुवपुष्पैः सपूजि
तइवेह पुरान्पुराणः ॥ २८ ॥ तच्चित्रतांडवविहस्तफणातपत्रोरक्तं मुखेस्सहवर्मरुपमग्रगात्रः ॥ स्मृत्वाचराचरगुरुं पुरुषं पुराण
ना रायणं तमरणं मनसाजगाम ॥ २० ॥ कृष्णस्यगार्भजगतोतिभरावनंतपार्ष्णिप्रहारपरिरुग्णफणातपत्र ॥ दृष्ट्वाहिमाद्यमुपसे
दुरमुष्यपत्न्यः पत्न्यास्त्रथनस्तनवृत्तकेशावंधाः ॥ ३१ ॥ तांतस्मविग्नमथगुप्तोथपुरस्कृतार्भाः कायंनिधायभुविभूतपतिंप्र
णम्युः ॥ साध्व्यः कृतांजलिपुराः शमलस्यभर्तुर्मोक्षेप्सवः शरणदंशरणंप्रपन्नाः ॥ ३२ ॥ नागपत्न्यऊचुः ॥ न्याय्योहिदंडः कृतकिल्बि
षेस्मिन्नवतारः खलनिग्रहाय ॥ रिपोः सुतानामपिवत्सलस्य दृष्टोदमंवनलमेवानुशस्त ॥ ३३ ॥
अथसमानावपनारयोयाप्रानाः ॥ ३१ ॥ शरणंप्रपन्नाः सत्पतत्प्रणोघः सुविग्नमनसः विकलचित्ताः प्रवीतितस्मिन् ॥ कृष्णेजलाधस्थाहा ॥ तीरेवासम
लस्यपापात्मनोभिभर्तुर्मोक्षेप्सवः ॥ भर्तुर्यंधमतंतस्यवा ॥ कृतपतिप्राणिमात्रस्यपतिं ॥ शरणदंप्राश्रयपुरं ॥ ३२ ॥ प्रथमंतावत्प्रापितं भगवंतदंडा
भोरनेनोपशमयंत्यः सुवंति ॥ न्याय्योहीति ॥ तत्रादंडभोरनेषड्भिर्दशाभिस्थ्वहरेर्नेति ॥ प्रार्थनापंचभिःश्लोकैः स्तुतःपन्नगयोषितां ॥ नचनिग्रहात

२०.पू
५८

निग्रहोप्यनुग्रहायेत्युक्तं इदानीमनुग्रह एवायं न निग्रह इत्याह । अनुग्रह इति ॥ नोऽस्माकं यस्मात् दुष्प्रसर्पत्वं दर्पतेः तद्धन्मूलपापनिवर्त्तको दण्डो
नुग्रह एव ॥ क्रोधस्त्वेनद्योघमानोऽपीत्यर्थः २४ ॥ महात्म्याय मनुग्रह इति तस्य पूर्वगुणमभिनंदति ॥ नमइति ॥ त्वयमानरहितेनेऽन्येभ्यो मानदेन
च ॥ सर्वजीवयतीति सर्वजीवः ॥ २५ ॥ नतपश्चाशिनि भिन्न एव भागपारदयः किंत्व विंत्यं तव रूपावैभवमित्याह । कस्यानुभावइति त्र्येण ॥ नमआदि

अनुग्रहोऽयं भवतः कृतो हि नो दण्डोऽसतां ते खलु कल्मषापहः ॥ यद्दंदशूकत्वममुष्य देहिनः क्रोधोऽपि तेऽनुग्रह एव संमतः ॥ २४ ॥
तपः सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन ॥ धर्मोऽथवा सर्वजनानुकंपया यतो भवांस्तुष्यति सर्वजीवः ॥ २५ ॥ कस्या
नुभावोऽस्य न देव विद्महे तवांघ्रिरेणुस्पर्शाधिकारः ॥ यद्वांछया श्रीर्ललनाचरत्तपो विहाय कामान् सुचिरं धृतव्रता ॥ २६ ॥ न
नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजः प्रपन्नाः ॥ २७ ॥ तदेव ना
थाय दुरापमन्यैस्तमोजनिः क्रोधवशोऽप्यहीशः ॥ संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः स्याद्विभवः समक्षः ॥ २८ ॥

नाद्रहारयोयस्याः श्रियाः प्रसादमिच्छंति ॥ साश्रीर्ललनापि ॥ श्रीरेव ललना उत्तमा स्त्री ॥ यस्य त्वंघ्रिस्पर्शाधिकारस्य वांछया तपश्चचार ॥ अस्य
र्पस्य सर्पस्य किं कृतमिति को वेत्तीत्यर्थः २६ ॥ यत्तव पादरजः प्रपन्नाः प्राप्ताः पारमेष्ठ्यमपि न वांछंति २७ ॥ अहो तदेष तु प्राप्तवानः एव प्राप ॥ अन्यैः श्रिया दाम
दिभिरपि ॥ पुनः कथंभूतं पादरजः ॥ यदिच्छतः ॥ संसारे भवति प्रार्थयत एव समक्षः प्रत्यक्ष एव विभवः अपेक्षितार्थसंपद्भवति ॥ २८ ॥

५८

नमस्तुभ्यं भगवते अचिन्त्यैश्वर्यादिगुणाय तदुपपादनाय दशभिः श्लोकैर्विशेषणानि कृष्णाय पूर्वं नरयोनिरूपेण वर्त्तमानाय माहात्म्येनैवम
पि नातिपरिच्छिन्नाय कुतः भूतावासाय आकाशाद्याश्रयाय तदपि कुतः भूताय पूर्वमपि विद्यमानाय॥ कुतः परायकारणाय॥ किं च॥ परमात्मने कारणानां नियन्ताय
॥३९॥ कारणत्वकारणानां नियन्तृत्वे च सामर्थ्यमाहुः॥ ज्ञानविज्ञाननिधये ज्ञानं ज्ञप्तिः विज्ञानं चिच्छक्तिः तयोर्निधये ताभ्यां पूर्णाय॥ कथं तथा
त्वम् अत उक्तं॥ ब्रह्मणेऽनन्तशक्तये॥ ब्रह्मणः कथं भूताय अगुणाय अविकाराय॥ अतः कथं भूतायानन्तशक्तये॥ प्राकृताय प्रकृतिप्रवर्त्तकाय॥ अप्राकृ
तायेति वा॥ अप्राकृतानन्तशक्तियुक्तायेत्यर्थः॥ अगुणत्वादविकारित्वं ब्रह्मत्वं प्रमातृत्वात्कारणानां नियन्तृत्वं प्रकृतिप्रवर्त्तकोऽनन्तशक्तिः विज्ञा

नमस्तुभ्यं भगवते कृष्णाय महात्मने॥ भूतावासाय भूताय पराय परमात्मने॥३९॥ ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तश
क्तये॥ अगुणायाविकाराय नमस्ते प्राकृताय च॥४०॥ कालाय कालनाभाय कालावयवसाक्षिणे॥ विश्वाय तदुपद्रष्ट्रे त
त्कर्त्रे विश्वहेतवे॥४१॥ भूतमात्रेन्द्रियप्राण मनोबुद्ध्याशयाय च॥ त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये॥४२॥

ननिधित्वादीश्वरः कारणं तदुभयात्मने नमः॥४०॥ अनन्तशक्तित्वं कालशक्त्याविसृष्ट्यादिरूपेण नमस्यति॥ कालाय कालरूपाय कालनाभाय का
लशक्त्याश्रयाय॥ कालावयवानां सृष्ट्यादिसमयानां साक्षिणे॥ ततश्च विश्वाय विश्वरूपाय॥ नहि किं जडो द्रष्टा न हि तदुपद्रष्ट्रे न च द्रष्टमात्राय किं तु तत्क
र्त्रे न च कर्तृमात्राय विश्वहेतवे सर्वकारणरूपाय॥४१॥ तदेवाहुः॥ भूतमात्रेन्द्रियप्राणमनोबुद्ध्याशयात्मने आशयश्चित्तं॥ भूतादिरूपायात एव सर्वका
रणरूपायेति॥ अहंकारात्मतया नमस्यति॥ त्रैगुण्येनेति॥ एवं सृष्टिकार्ये यद्यपि त्रिगुणाभिमानेन तेन गूढा स्वात्मभूतानामात्मनोऽनुभूतिर्येन तस्मै॥४२॥

श्री

८

२०५ ५८

त्वं त्वहंकारावृत इति स्तुवंति ॥ नमोऽनंताय अहंकारपरिच्छेदहीनात् ॥ अतः सूक्ष्माय अदृश्यत्वात् अत एव कूटस्थाय उपाधिकृतविकाराभावात् ॥ अत एव विपश्चिते सर्वज्ञाय ॥ एवं वस्तितः त्वं विचित्रमायात्वेन न स्तुवंति ॥ नानावादानुरोधाय अस्ति नास्ति सर्वज्ञः बद्धः मुक्तः अनेकः इत्यादीन् ॥ नानावादानां अनुरोधो मायया अनुवर्त्तते यस्तस्मै ॥ किंच ॥ वाच्यवाचकशक्तये ॥ अभिधानाभिधेयशक्तिभेदरूपिणा नानात्वेन प्रतीतायेत्यर्थः ॥ ४३ ॥ अनावृततत्त्वमेव हेत्वंतरेणाविष्कृत्वयंत्यः स्तुवंति ॥ नमः प्रमाणमूलाय चक्षुरादीनां चक्षुरादिरूपाय ॥ अत एव कवये छिंपतं ॥ निरपेक्षज्ञानाय उक्तः शास्त्रयोनये वेदात्मकनिश्वासाय ॥ किंच ॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ॥ ४४ ॥ किंच ॥ अनावृतैश्वर्योपत्वाद् वचतुर्मूर्त्तिरूपेणाप्य सर्वोपास्यत्वेन नमंति ॥ नमः कृ

नमोऽनंताय सूक्ष्माय कूटस्थाय विपश्चिते ॥ नानावादानुरोधाय वाच्यवाचकशक्तये ॥ ४३ ॥ नमः प्रमाणमूलाय कवये शास्त्रयोनये ॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ॥ ४४ ॥ नमः कृष्णाय रामाय वसुदेवसुताय च ॥ प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ ४५ ॥ नमो गुणप्रदीपाय गुणात्मच्छादनाय च ॥ गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥ ४६ ॥

ष्णायेति श्लोके न रामाय संकर्षणाय ॥ वसुदेवसुताय ॥ वसुदेवशरीरं शुद्धसत्त्वं तत्र प्रकाशमानाय वासुदेवायेत्यर्थः सात्वतां उपासकानां पतये पालोकारिणा पालकाय एवं चतुर्मूर्त्तये कृष्णाय नम इति ॥ ४५ ॥ कथं चतुर्मूर्त्तिनेति तत्राहुः नमो गुणप्रदीपायेति गुणाः अंतःकरणानि तानि प्रदीपयति ॥ प्रकाशयति तथा तस्मै ॥ चित्तं यद्धिष्ठातृत्वेन चतुर्मूर्त्तिनेत्यर्थः न तु तथाप्येकस्यैवं चतु ॥ अत आहुः गुणात्मच्छादनाय च तैरेव गुणैः उपासकानां फलं वैचित्र्याय आत्मानमाच्छाद्य नानात्वेन प्रतीतायेत्यर्थः न तु कथं तर्हि प्रतीतिः तत्राहुः गुणवृत्त्युपलक्ष्याय चित्तधारीणां चेतनाव्यवसायादिवृत्तिभिरुपलक्ष्याय उपलक्षणमेवाहुः ॥ गुणद्रष्टे तन्नाक्षिणा कथं चिदुपलक्ष्य एवेत्यत आहुः स्वसंविदे गोचरायेत्यर्थः ॥ ४६ ॥

कथं

राम ५८

कृयस्३

गोचरत्वं उपलक्ष्यत्वं दर्शयंत्यो नमंति ॥ अव्याकृत विहाय अतर्क्य महिम्न इत्यर्थः सर्वव्याकृत सिद्धये सर्वकार्योत्पत्तिप्रकाशहेतवे नोपलक्ष्य योग्यायेत्यर्थः उपलक्षणांतरमाहुः हृषीकेश करणप्रवर्त्तक किं विषयलिप्सया ॥ न ॥ पुनर्यो ह्यात्मारामाय किं साधनवशेन ॥ नहि ॥ नहि मौनशीलिने मौनमात्मारामतत्त्वभावाय ॥ ४७ ॥ अतः परावरगतिज्ञाय स्थूलसूक्ष्माणां स्वरूपज्ञत्वेन न क्वापि सज्जमानायेत्यर्थः अपि च सर्वाध्यक्षाय सर्वस्याधिष्ठात्रे ॥ अत एतत् ॥ अविश्वाय न विश्वं यस्मिंस्तत् त्रिविधावधये ॥ विश्वाय च तद्द्विवर्त्ताधिष्ठानायेत्यर्थः ॥ किं च ॥ तद्दृष्टे अध्यासापवादसाक्षिणे ॥ अपि च ॥ अस्य विश्वाध्यासस्य तदपवादस्य चाविद्याविद्याभ्यां हेतवे ॥ यद्वा ॥ अविश्वाय विश्वतेजसाद्यवस्थारहिताय विश्वाय मायया सर्वात्मने

अव्याकृतविहाराय सर्वव्याकृतसिद्धये ॥ हृषीकेश नमस्तेस्तु मुनये मौनशालिने ॥ ४७ ॥ परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः ॥ अविश्वाय च विश्वाय तद्दृष्टेस्य च हेतवे ॥ ४८ ॥ त्वय्यस्य जन्मस्थितिसंयमान्प्रभो गुणैरनीहोऽकृतकालशक्तिधृक् ॥ तत्तत्स्वभावान्प्रतिबोधयन्सतः समीक्षयामोघविहार ईहसे ॥ ४९ ॥ ॥ ॥ श्रीरामकृष्णसहाय ॥ श्रीराम ॥

स्वतंत्रत्वस्थाय ॥ तद्दृष्टे तासामवस्थानां भावाभावसाक्षिणे ॥ अन्यत्समानं तस्मात्सर्वगतित्तत्त्वसर्वाधिष्ठातृत्वादिभिर्निरतिशयैश्वर्याय तुभ्यं नमस्ते ॥ ४८ ॥ विशेषेण रसकीर्णः एवं पंचाशता श्लोकैः अहिस्त्रीभिः प्रसन्नीकृत्य तासामेव मनसेहरिः एवं तावदङ्गुष्ठमादेन नमस्कारैः स्तुत्वा भगवंतं प्रसादेहांनीत्वदधीनानां प्राणिनां को परा धस्तथापि भवतः प्रार्थयं तेन वहीति ॥ अस्य लोकस्य जन्मादिकमेवाकृतस्त्वं गुणैः ॥ ततस्तेन तेन कालस्वरूपेण सतः स्वभावान् घोरसत्त्वादीन् प्रतिबोधयन्नीहसे क्रीडसि ॥ यद्वा ॥ अस्य जन्मादीन्सर्वमीहसे इत्यन्वयः कथंभूतः अकृतानुमारिणी कालशक्तिस्तां धारय

२०५
६०

अतस्तस्य ते वैवामूस्तनवः तन्वंत इति क्रीडोपकरणाः तथापि तवाधुना शांताः प्रियाः कुतः सतां धर्मपरिपालने छयाई हतः प्रवर्त्तमानस्य अतः स्थानविरुद्धं स्थातुः स्थितस्य॥५०॥ एवं च तवाप्रियाचरणाद्यपराधः इति सोढव्य मिति॥५१॥ प्रश्नरुग्रहे अन्येषां प्रसवेति चेन्नेत्याहुः विधे

तस्यैव तेमूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः॥ शांताः प्रियास्ते ह्यधुनावितुं सतां स्थातुश्च ते धर्मपरीप्सयेहतः॥५०॥ अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः॥ क्षंतुमर्हसि शांतात्मन्मूढस्य त्वामजानतः॥५१॥ अनुगृह्णीष्व भगवन्प्राणांस्त्यजति पन्नगः॥ स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयतां॥५२॥ विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया॥ यच्छ्रद्धयानुतिष्ठन्वै मुच्यते सर्वतो भयात्॥५३॥ शुक उवाच॥ इत्थं स नागपत्नीभिर्भगवान्समभिष्टुतः॥ मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः॥५४॥ प्रतिलब्धेंद्रियप्राणः कालीयः शनकैर्हरिं॥ कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः॥५५॥ कालिय उवाच॥ वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः॥ स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः॥५६॥ त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनं॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृति॥५७॥ वयं च तत्र भगवन्सर्पा जात्युरुमन्यवः॥ कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः स्वयं

हित्वन्नराततया प्राणिनो नाद्यामेति भावः॥५२॥५५॥ यदसद्ग्रह इति यतः स्वभावो सत्नग्रह स्वरू पः यद्वा॥ यतः स्वभावा रस्वतिरेहासीयोग्रहः सद्भिप्सरति गुणो विविधतया सृजते इति गुणविसर्जनं॥ तत्रापि नाना स्वभावा स्योपस्पतन्न ५७ नात्याजन्मनैव उरुर्मन्युर्येषां ते वयं कथं त्यजामः॥५८॥

राम
६.

अनुग्रहं विधेहि ममात्मयाथात्म्यरतीति ईश्वरत्वान्निग्रहं वा विधेहीति ॥ ५६ ॥ स्वज्ञात्यादिभिर्नृभिश्च नदी भुज्यत इति ॥ ६० ॥ न युष्मत्तो मम भयमाप्नुया-
न्न तस्य युष्माभिर्भयं नोत्पादनीयं हि यस्मात् त्वन्मायया त्वयो भवानेव कारणमिति तत्पादस्मरणीयमित्याशा ॥ ६१ ॥ इतोऽपि त्वया हि निर्गतव्य-

भवान् हि कारणं तत्र सर्वज्ञो जगदीश्वरः ॥ अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ॥ ५६ ॥ श्रीशुक उवाच ॥ इत्याकर्ण्य वचः
प्राह भगवान् कार्यमानुषः ॥ नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरं ॥ ६० ॥ स्वज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यतां नदी
य एतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनं ॥ कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ॥ ६१ ॥ योऽस्मिन्स्नात्वा मदाक्री-
डे देवादींस्तर्पयेज्जलैः ॥ उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ॥ ६२ ॥ द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः ॥ यद्भ-
यात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितं ॥ ६३ ॥ ऋषिरुवाच ॥ एवमुक्तो भगवता कृष्णेनाद्भुतकर्मणा ॥ तं पूज-
यामास मुदा नागपत्न्यश्च सादरं ॥ ६४ ॥ दिव्याम्बरस्रङ्मणिभिः परार्ध्यैरपि भूषणैः ॥ दिव्यगंधानुलेपैश्च महत्यो-
त्पलमालया ॥ पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजं ॥ ६५ ॥ ततः प्रीतोऽभ्यनुज्ञातः परिक्रम्याभिवन्द्य तं ॥ सकलत्र-
सुहृत्सुतो द्वीपमब्धेर्जगाम ह ॥ ६६ ॥ तदैव सामृतजला यमुना निर्विषाभवत् ॥ अनुग्रहाद्भगवतः क्रीडामानुषरूपि-
णः ॥ ६७ ॥ ६ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे कालीयनिर्यापणो नाम षोडशोऽध्यायः ॥

मित्याह ॥ योऽस्मिन्निति ॥ त्वयि स्थिते स्नं भवतीति भावः ॥ ६२ ॥ न च तव गरुडभयं भवेदित्याह ॥ द्वीपमिति ॥ ६३ ॥ ७ ॥ इति दशमे षोडशः ॥ ६ ॥

द०प्र
दी।

नागान्ननरदेशेनागालयं तं निर्यापन ॥ बंधस्त्वद्गुः स्वतः श्रोतान्कृष्णात्तत्रस्वादपात्र ॥१॥ अस्मत्प्रजमसेञ्ञत्रिय उपहार्यैः सुपर्णाभक्ष्यैः सर्वजनैः सर्पा
यन्नैर्जनैः वान्यस्पत्यः वनस्पतेर्मूलेदेयः ॥ नागानां तद्बाधपरिहाराय यो बलिर्निरूपितः उपकल्पितः ॥१॥ तत्र नागाः स्वं स्वं भागं जनेभ्यः सुपर्णा
य प्रयच्छंति ॥ ततो भीताः गोपीथाय रक्षणाय ॥३॥ विषवीर्येण यो मदस्तेनाविष्टः काद्रवेयः कद्रूपुत्रः गरुडं कदर्थीकृत्य अविगणय्य यद्वा
उपहार्यैः सुपर्णाय देयैः सर्पैरेव जनैस्तैः ॥ नागानां मासं धाय यत्किंचित्तत्रैकैको नागो दीयते तेन यो बलिः ॥ सुपर्णाय निरूपितः ॥ तत्र स्वयं स्व

राजोवाच ॥ नागालयं रमणकं कस्मात्तत्याज कालियः ॥ कृतं किं वा सुपर्णस्य तेनैकेनासमंजसं ॥१॥ श्रीशुक उवाच ॥ उपहा
र्यैः सर्पजनैर्मासि मासीह यो बलिः ॥ वानस्पत्यो महाबाहो नागानां प्राङ्निरूपितः ॥२॥ स्वं स्वं भागं प्रयच्छंति नागाः
पर्वणि पर्वणि ॥ गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ॥३॥ विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः ॥ कदर्थी
कृत्य गरुडं स्वयं तं बुभुजे बलिं ॥४॥ तच्छ्रुत्वा कुपितो राजन्भगवान्भगवत्प्रियः ॥ विजिघांसुर्महावेगः कालियं समुपा
द्रवत् ॥५॥ तमापतंतं तरसा विषायुधः प्रत्यभ्ययादुत्थितनैकमस्तकः ॥ दद्भिः सुपर्णं व्यदशद्ददायुधः करालजिह्वोछ्व
सितोग्रलोचनः ॥६॥ तं तार्क्ष्यपुत्रः स निरस्य मन्युमान्प्रचंडवेगो मधुसूदनासनः ॥ पक्षेण सव्येन हिरण्यरोचिषा जघान

भागं स्वं नागाः प्रयच्छंति ॥ कालियस्तु न प्रयच्छति ॥ किंत्वन्यैर्दत्तमपि तं बलिं स्वयमेव बुभुजे ॥४॥५॥ विष (कद्रुसुतमुग्रविक्रमः ॥७॥
विषायुधं पन्नगः प्रत्यभ्ययात् योद्धुं प्रतिजगाम ॥ उत्थितानेकमस्तकः उत्थितानेकफणाः ददायुधः दंतायुधः दंतायुधः करालजिह्वाश्वासादुच्छ्व
सितोग्रलोचनः उच्छ्वसितानि उच्छ्वसितानि उग्राणि लोचनानि यस्य सः ॥६॥ तार्क्ष्यपुत्रो गरुडः मधुसूदनस्यासनं यस्मिन्सः ॥७॥

राम
दी

तस्य गरुडस्यागम्यं श्रुत्वा यत्र यावद्दुरासदं ८ तदगम्यत्वे कारणमाह तत्रेति निवारितोऽपि ९।१० लेलिहः सर्प्पः अतस्तत्रावात्सीत् १२ जांबूनद
सुवर्णेनालंकृत १३ असवः इंद्रियाणि प्रमोदनिभृतात्मनः आनंदपूर्णमनसः १४ लब्धेहाः लब्धचेष्टाः १५ नागः वृक्षा अपि रुर्वृक्षाः

सुपर्णपक्षाभिहतः कालियोतीवविह्वलः । कुंदं विवेश कालिंद्यास्तदगम्यं दुरासदं ॥८॥ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितं ।
निवारितः सौभरिणा प्रसह्य क्षुधितो हरत् ॥९॥ मीनान्सुदुःखितान्दृष्ट्वा दीनान्मीनपतौ हते । कृपया सौभरिः प्राह
तत्रत्यक्षेमकाम्यया ॥१०॥ अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति । सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहं ॥११॥ तं कालि
यः परं वेद नान्यः कश्चन लेलिहः । अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः ॥१२॥ कृष्णं ह्रदाद्विनिष्क्रांतं दिव्यस्रग्गंधवाससं ।
महामणिगणाकीर्णं जांबूनदपरिष्कृतं ॥१३॥ उपलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः । प्रमोदनिभृतात्मानो गोपाः प्री
त्याभिरेभिरे ॥१४॥ यशोदा रोहिणी नंदो गोप्यो गोपाश्च कौरव । कृष्णं समेत्य लब्धेहा आसन्लब्धमनोरथाः ॥१५॥ रामश्चाच्युत
मालिंग्य जहासास्यानुभाववित् । नगा गावो वृषा वत्सा लेभिरे परमां मुदं ॥१६॥ नंदं विप्राः समागत्य गुरवः सकलत्रकाः ।
ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः ॥१७॥ देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे । नंदः प्रीतमना राजन्गाः सुवर्णं
तदादिशत् ॥१८॥ यशोदापि महाभागा नष्टलब्धप्रजा सती । परिष्वज्यांकमारोप्य मुमोचाश्रुकलां मुहुः ॥१९॥ तां रात्रिं तत्र

सत्तः सद्य एव विनश्यत्य इत्यर्थः ११ ते विप्रा ऊचुः १७ नष्टलब्धप्रजा नो राजेंद्र क्षुत्तृड्भ्यां श्रमकर्षिताः । ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः ॥२०॥
हृष्टाया प्रत्याप्तलब्धप्रजा पया सा १९ श्रमेण च कर्षिताः उपकूलतः कूलसमीपे ॥२०॥

क्रि

द० स्क
६१

कालाग्नेः सुहृत्स्वपारदग्नेः नमृत्योर्विभीमः किंतत्वाच्चरणवियोगादित्याहुः नशक्नुमइति ॥२४॥ ५ ॥ विमोहानहिरंडेनततः स्वशरणागतान् ॥ गोपानपारनंतोऽपावनेतवनवह्नितः ॥२४॥ इतिश्री दशमस्कंधे सप्तदशः ॥ अष्टादशे ततो ग्रीष्मे वसंतगुणलक्षिते ॥ अघातयत्प्रलंबेनालंबलबलीलयाहरिः ॥१॥ कृत्वान्तस्यं कारणेएव कालियस्य मर्कौतकं ॥ बलप्रलंबवधंगीष्ममारोहस्य रतितहा ॥२॥ गोपालच्छद्ममायया गोपालनमेवच्छद्म

तदाशुचिवनोद्भूतो दावाग्निः सर्वतो व्रजं ॥ सुप्तंनिशीथआवृत्य प्रदग्धुमुपचक्रमे ॥२१॥ ततउत्थायसंभ्रान्ता दह्यमाना व्रजौकसः ॥ कृष्णंययुस्तेशरणं मायामनुजमीश्वरं ॥२२॥ कृष्णकृष्णमहाभाग हे राम अमितविक्रम ॥ एषघोरतमो वह्निस्तावकान्ग्रसते हि नः ॥२३॥ सुदुस्तरान्नः स्वान्पाहि कालाग्नेः सुहृदः प्रभो ॥ नशक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयं ॥२४॥ इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः ॥ तमग्निमपिबत्तीव्रमनंतोनंतशक्तिधृक् ॥२५॥ इतिश्रीभागवते महापुराणे दशमस्कंधे कालियमो नाम सप्तदशोध्यायः ॥ शुक उवाच ॥ अथकृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः ॥ अनुगीयमानोन्यविशद्व्रजंगोकुलमंडितं ॥१॥ व्रजेविक्रीडतोरेवं गोपालच्छद्ममायया ॥ ग्रीष्मोनामर्तुरभवन्नातिप्रेयान्शरीरिणां ॥२॥ सचवृंदावनगुणैर्वसंतइवलक्षितः ॥ यत्रास्ते भगवान्साक्षाद्रामेण सहकेशवः ॥३॥ यत्रनिर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं ॥ शश्वत्तच्छीकरर्जीषद्रुममंडलमंडितं ॥४॥

~~मायया~~ गोपालनमेवच्छद्म यस्यां तया ॥१॥२॥ वसंतसाम्यमाह यत्रत्रिभिः ॥ यत्र ग्रीष्मेपि निर्झराणां निर्ह्रादेन घोषेण निवृत्तस्वनाः छन्नध्वनयो झिल्लिकाः कठोरक्षुद्रनिस्वनकीटाः यस्मिंस्तथाभूतं वृंदावनं भवति ॥ किंच शश्वत्तेषां निर्झराणां शीकरैः अंबुकणैः ऋजीषाणि आर्द्रा ये द्रुमास्तेषां मंडलैर्मंडितं ॥१॥

जी पै

जी
राम
६१

यत्रग्रीष्मेवनेवानिदाघोग्रीष्मतेनतत्कालीनवन्ह्यर्कोप्यांवभवतियोदवः तापः अतिशाद्वलेअतिहरितनृणाकीर्णे ॥ यद्वा ॥ अतिक्रान्तशाड्व
लेविस्थाने ॥ ५ ॥ ननुशाद्वलमेवउक्तंतस्मिंनत्राह ॥ अगाधेति ॥ अगाधानितोयानियासांतासांह्रदिनीनांतरस्पर्शिभिरूर्मिभिः पुलिनैर्द्रवत्पुरी
षंपंकोयस्याः नयात्तुवः समाद्वलितंशाड्वलरूपंतावदविषवडुल्बणाअपिसूर्यरश्मयोनगृह्णन्तेनहरन्ति ॥ ६ ॥ तद्वनंतरंतच्छ्रित्वापगाद्दिजाच्छ्वपति

सरित्सरःप्रस्रवणोर्मिवायुनाकह्लारकंजोत्पलरेणुहारिणा ॥ नविद्यतेयत्रवनौकसांदवोनिदाघवह्न्यर्कभवोतिशाद्वले ॥ ५ ॥
अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समन्ततः ॥ नयत्रचंडांशुकराविषोल्बणाभुवोरसंशाद्वलितंचगृह्णते ॥ ६ ॥
वनंकुसुमितंश्रीमन्नदच्चित्रमृगद्विजं ॥ गायन्मयूरभ्रमरंकूजत्कोकिलसारसं ॥ ७ ॥ क्रीडिष्यमाणस्तत्कृष्णोभगवान्बलसंयुतः
वेणुंविरणयन्गोपैर्गोधनैः संवृतोविशत् ॥ ८ ॥ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयोगोपानन्नृतुर्युयुधुर्ज
गुः ॥ ९ ॥ कृष्णस्यनृत्यतः केचिज्जगुः केचिदवादयन् ॥ वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे ॥ १० ॥ गोपजातिप्रतिच्छन्नादेवा
गोपालरूपिणः ॥ ईडिरेकृष्णरामौचनटाइवनटंनृप ॥ ११ ॥ भ्रामणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः ॥ चिक्रीडतुर्नियुद्धेनकाकप
क्षधरौक्वचित् ॥ १२ ॥ क्वचिन्नृत्यत्सुचान्येषुगायकौवादकौस्वयं ॥ शशंसतुर्महाराजसाधुसाध्वितिवादिनौ ॥ १३ ॥ क्वचिद्बिल्वैः क्वचित्कुंभैः
क्वचामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया ॥ १४ ॥

न् गायन्तोमयूराभ्रमराश्चयस्मिन्कूजन्तः कोकिलाः सारसाश्चयस्मिन् ॥ ७ ॥
नत्प्रविशत् ॥ ८ ॥ १० ॥ काकपक्षाः चूडाकरणान्प्राक्तनकेशाः ॥ ११ ॥ भ्रामणादिप्रकारैर्नियुद्धेनविक्रीडतः ॥ १२ ॥ कुंभैः कुंभवद्बृहत्फलैः अस्पृश्यत्वेनेत्र

२०.प्र
६३

दर्दुरलावैः मंडूकश्रुतिभिः स्पंदोलिकया दोलालंबनेन नृपानामिव लीलया ॥१५॥ नद्यद्रिद्रोणयः कुंजा निचयः षंड ॥१६॥ चारयतोः सतोः सतोः
तद्धनेन तस्मिन्वने ॥ तयोर्हर्त्तुं जिहीर्षया ॥१७॥१८॥ यथायथं द्वयोर्द्वयोर्बलाद्येन रूपेण द्वंद्वीभूय ॥१९॥ परिवृढौ नायकौ ॥ तत्र केचन कृष्णसंघट्टिनः कृष्णपक्षी

क्वचिद्वा दर्दुरलावैर्विविधैरुपहासकैः कदाचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया ॥१५॥ एवं तौ लोकसिद्धाभिः क्रीडाभि
श्चेरतुर्वने ॥ नद्यद्रिद्रोणिकुंजेषु काननेषु सरःसु च ॥१६॥ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः ॥ गोपरूपी प्रलंबोगा
दसुरस्तज्जिहीर्षया ॥१७॥ तं विद्वानपि दाशार्हो भगवान्सर्वदर्शनः ॥ अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् ॥१८॥ तत्रोपहू
य गोपालान्कृष्णः प्राह विहारवित् ॥ हे गोपा विहरिष्यामो द्वंद्वीभूय यथातथा ॥१९॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्द
नौ ॥ कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे ॥२०॥ आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ॥ यत्रारोहंति जेतारो
वहंति च पराजिताः ॥२१॥ वहंतो वाह्यमानाश्च चारयंतश्च गोधनं ॥ भांडीरकं नाम वटं जग्मुः कृष्णपुरोगमाः ॥२२॥ रामसंघ
ट्टिनो यर्हि श्रीदामवृषभादयः ॥ क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप ॥२३॥ उवाह कृष्णो भगवान्श्रीदामानं परा
जितः ॥ वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतं ॥२४॥ अविषह्यं मन्यमानः कृष्णं दानवपुंगवः ॥ वहन्द्रुततरं प्रागादवरोह
णातः परं ॥२५॥

या ॥२०॥ वाह्यमानाः पृष्ठेनोपमानाः ॥२१॥२४॥ कृष्णदलिनिं वनाय अवहत्यते स्मिन्निति अवरोहणं मर्यादा ततः
परं दूरमगात ॥२५॥

राम
६३

धरणीधरेन्द्रवत् गुरुः तस्य गौरवं यस्मात् ॥ निजं आत्मीयं वपुः आस्थितः पुरटपरिच्छदः स्वर्णालंकारः तडिद्युमान् विद्युद्दीप्तिमान् इत्यलंकारोपमा ॥ उडुप
तिवत् इति समोपमा ॥ उडुपतिं वहतीति उडुपतिवाट् ॥ यदि पयोवितस्थाने स्थिता विद्युतो भवति उपरि चोडुपतिर्जलदात् शोभः ... यथा भवति तद्वदि
त्यर्थः ॥ १६ ॥ अलमिति वेगेन प्रदीप्ते दृशौ यस्मिन् तत् प्रदीप्तदृक् भ्रुकुटीतटे यस्मिन् उग्रा दंष्ट्रा यस्मिन् तत् तद्घनं चेति वा ॥ ज्वलन्त्यः शिखाः के

तमुद्वहन् धरणीधरेन्द्रगौरवं महासुरो विगतरयो निजं वपुः ॥ स आस्थितः पुरटपरिच्छदो बभौ तडिद्युमानुडुपतिवाडिवांबु
दः ॥ १६ ॥ निरीक्ष्य तद्वपुरलमंबरे चरत्प्रदीप्तदृक् भ्रुकुटीतटोग्रदंष्ट्रकं ॥ ज्वलच्छिखं कटककिरीटकुंडलत्विषाद्भुतं हलधर ईषद
त्रसत् ॥ १७ ॥ अथागतस्मृतिरभयो रिपुं बलो विहाय सार्थमिव हरंतमात्मनः ॥ रुषाहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरि
मिव वज्ररंहसा ॥ १८ ॥ स आहतः सपदि विशीर्णमस्तको मुखाद्वमन् रुधिरमपस्मृतोऽसुरः ॥ महारवं व्यसुरपतत्समीरयन्
गिरिर्यथा मघवत आयुधाहतः ॥ १९ ॥ दृष्ट्वा प्रलंबं निहतं बलेन बलशालिना ॥ गोपाः सुविस्मिता आसन् साधु साध्विति वादिनः
आशिषोऽभिगृणंतस्तं प्रशशंसुस्तदर्हणं ॥ प्रेत्यागतमिवालिंग्य प्रेमविह्वलचेतसः ॥ २१ ॥ पापे प्रलंबे निहते देवाः परम
निर्वृताः ॥ अभ्यवर्षन् बलं माल्यैः शशंसुः साधु साध्विति ॥ २१ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे [illegible] अध्यायः ॥ १८ ॥ २

शायस्मिन् तत् ॥ १७ ॥ आगतस्मृतिः अभयः एव आत्मनः सार्थं गोपसमूहं विहाय हरंतं रिपुं अहनत् ॥ यद्वा विहायसा आकाशमार्गेण आत्मनः सार्थं स्व
र्यं विहरंतमिति ॥ वज्ररंहसा वज्रवेगेन मुष्टिना ॥ १८ ॥ अपस्मृतः गतस्मृतिः महारवं समीरयन् ॥ १९ ॥ २० ॥ तदर्हणां प्रशंसार्हां ॥ २१ ॥ २२ ॥ रामे १२२ः

२.९.०
६४

ऊनविंशे निविष्टं तु गोपगोकुलमच्युतः ॥ तेनारण्यपरारण्यं रक्षत्रिपानतः ॥ १ ॥ हरवारिणि परा ॥ वनाद्वनांतरं निर्विशंत्यो रावेनतर्षितान्
षिताक्रंरत्यः इषीकारवीशुष्कछिन्नघनतणविशेषारण्यनिविविशुः ॥ २ ॥ कृष्णरामौ स्मारिद्धं पांतेन तुंतौ ॥ ३ ॥ तां संगवी ह्वरेद्दं द्विशुद्धिं तै
सु उवाच ॥ क्रीडासक्तेषु गोपेषु तत्क्रावोद्द्रवारिणीः ॥ दैवं चरंत्यो विविशुस्तत्तालो भेनगाद्धरं ॥ १ ॥ छन्नाज्ञा गावो महिष्यश्च
निर्विशंत्यो वनाद्वनं ॥ इषीकारवीविविशुः क्रंदंत्यो दावनर्षिताः ॥ २ ॥ ते पश्यंतः पशून्गोपाः कृष्णरामादयस्तदा ॥ जातातुरा
पानविडु विविविन्नं तोगवांगतिं ॥ ३ ॥ तेषां तस्तं भरस्थिं त्रस्तं गोपरैरिकितं गवां ॥ मार्गमन्वेगमंत्सर्वे नष्टाजीवा विचेतसः ॥ ४ ॥ मुं
जारव्यां प्रष्टमार्गकं दमानं स्वगोधनं ॥ संप्राप्य तृषिताः श्रांतास्ततस्ते संन्यवर्तयन् ॥ ५ ॥ ता आहूता भगवता मेघगंभीरया
गिरा ॥ स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ॥ ६ ॥ ततः समंतादवधूमकेतुर्यदृच्छया ॥ भूतरयवद्वनौकसां ॥ समीरि
तः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजंगमं महान् ॥ ७ ॥ तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः ॥
उचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभयार्दिता जनाः ॥ ८ ॥ कृष्ण कृष्ण महावीर्य हे राम अमितविक्रम ॥ दावाग्निना दह्यमा
नान्प्रपन्नांस्त्रातुमर्हथः ॥ ९ ॥ नूनं त्वद्बांधवाः कृष्ण न चार्हंत्यवसीदितुं ॥ वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः ॥ १० ॥ श्रीशुक उ
वाच ॥ वचो निशम्य कृपणं बंधूनां भगवान्हरिः ॥ निमीलयत मा भैष्ट लोचनानीत्यभाषत ॥ ११ ॥ तथेति मीलिताक्षेषु भगवानग्नि
मुल्बणं ॥ पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमोचयत् ॥ १२ ॥ ततश्च तेक्षीण्युन्मील्य पुनर्भांडीरमापिताः ॥ निशाम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः ॥ १३ ॥

त्वं सौगंध्यैरंकितैस्तैश्च प्रवेशैः तासौ वा गवामार्गमत्वगमत् ॥ नष्टाजीव्यागतजीविकाम्यां उल्बणं ॥ पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमोचयत्
धनाः ॥ ४ ॥ मुंजारव्यापि सेव ॥ ५ ॥ गोपानां नाशहेतवे वनं वह्निः सर्वतः प्रादुरभूत्सारथिना वायुना ॥ ६ ॥ कृच्छ्रान्मुग्धरप्रवेशात मूर्च्छमारिजनिता न तत

एप
६४

तत्र कृष्णेनैव भांडीरवनीत्वावनमोचयपरिस्पृष्टः कृष्णेनैव भांडीरस्थापितास्ततश्च श्रीराधैवुन्मील्य विस्मिता ॥ १३ ॥ ६ ॥ श्रीदामादिसर्वगोपानां ता
गमाहृत्य गृहं गता ॥ विश्वरूपमाविरकरोद्दनवह्निमियात्वनः ॥ १६ ॥ इति श्रीरामे न स मः ॥ विशेषाद्वृंदारण्ये भावणानेनवनोचिताः ग्रा
दृश्यक्रीडानिरूपणे गोपगणमयुक्तो हरेः ॥ देयाद्रूपोपमानेनबाह्वृंदारण्ये त्रियोः ॥ वर्णनं तदनु तैश्वर्यं कृष्णलीलाविवक्षया ॥ १ ॥ तत्र प्राद

ततश्च ते श्रीराधैवुन्मील्य सुतर्भांडीरमापिताः ॥ निशाम्य विस्मिता आसन्स्वात्मानं गाश्च मोचिताः ॥ २ ॥ कृष्णस्य योगवीर्यं तद्योग
मायानुभावितं ॥ इत्वाग्रेणात्मनः कृष्णं वीक्ष्यं ते मेनिरेमरं ॥ ४ ॥ गाः सन्निवर्त्य सायाह्ने सह रामो जनार्दनः ॥ वेणुं विरणयन्
गोष्ठमगाद्गोपैरभिष्टुतः ॥ १५ ॥ गोपीनां परमानंद आसीद्गोविंददर्शने ॥ क्षणं युगशतमिव यासां येन विना भवत् ॥ १६ ॥
इति श्रीभागवते महापुराणे दशमस्कंधे दावाग्निपानो नामैकोनविंतितमोऽध्यायः ॥ छ ॥ कउवाच ॥ तयोस्तदद्भुतं कर्म
दावाग्नेर्मोक्षमात्मनः ॥ गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च ॥ १ ॥ गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः ॥ मेनि
रे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥ २ ॥ ततः प्रावर्तत प्रावृट् सर्वसत्त्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ॥ ३ ॥
सांद्रनीलांबुदैर्व्योम सविद्युत्स्तनयित्नुभिः ॥ अस्पष्टज्योतिराछन्नं ब्रह्मेव सगुणं बभौ ॥ ४ ॥

दृवर्णनं ततस्त्वादिद्वाविंशत्यामनैर्वर्षांशानीं तास्मसमुद्भवउत्पन्नितो जीवनत्वस्य यस्याः सा प्रावृट् ॥ विद्योतमानाः परिधयः परिवेषा दिशो वायस्यां सा
विस्फूर्जितं संक्षुभितं नभस्तलं यस्यां ॥ २ ॥ सांद्रैर्नीलैरंबुदैर्विद्युद्गर्जितसहितैस्तैरस्पष्टमाछन्नं जीवात्मा ॥ विद्युद्गर्जितादिरूपा ना सत्वरजस्त

द०पू
९५

पर्जन्यः सूर्यः स्वगोभिः रश्मिभिः कालेयथोचितसमयेऽम्बुराजोपमाकरादानतः समयेऽनर्दानतस्तत्र सूचिता ॥ ५ ॥ अम्बुविश्वस्य प्राणानं
आप्यायनकरं प्राणानं जीवनमुद्दरं कं उद्धृतः ॥ कृपालवो यथातेगंजनेनिराश्रुतं कंपमानाः तदाप्यायनाय स्वजीवनमपित्यजंति ॥ तद्वन्म
हातोमयाप्त्विडिनेत्रेतन्नंनिराश्रविश्वंवाग्रभिर्वेपिताजीवनं मुद्धुरिति ॥ ६ ॥ तपसामीषेण कृशांदेवमीरापर्जन्यंहितिन्मा ॥ वर्षायमिशाउच्छ्न्ता३

अच्छोमामात्रिपीतं यदुग्रार्खोदयमयं वह ॥ स्वगोभिर्मोक्षमारेमे पर्जन्यः कालआगते ॥ ५ ॥ तडित्वन्नो महामेघा मुंड
ध्वमन्नेवपिताः ॥ प्राणानं जीवनं त्यस्य मुधुः करुणांइव ॥ ६ ॥ तपः कृशांदेवमीरा आसीद्दर्षीयसी महा ॥ यथैवका
म्यतपसस्तनूः संप्राप्स्यतत्फले ॥ ७ ॥ निशामुस्वपिशुखंयतोतातुममशांतिनयहाः ॥ यथापापेन पाषंडानहि वेदाः क
लौयुगे ॥ ८ ॥ श्रुत्वा पर्जन्यनिनदं मंडूकाव्यसरजनिरः ॥ तूष्णींशयानाः प्रापद्द्ब्राह्मणा नियमात्यये ॥ ९ ॥ आसन्नुत्प
थवाहिन्यः क्षुद्रनद्योनशुष्यतीः ॥ पुंसोयथाः स्वतंत्रस्य देहद्रविणसंपदः ॥ १० ॥ हरिताहरिभिः शष्पैरिंद्रगोपैश्च लो
हिताः ॥ उच्छिलींध्रकृतछाया नृणां श्रीरिव भूरभूत ॥ ११ ॥ क्षेत्राणि शस्यसंपद्भिः कर्षकाणां मुदं ददुः ॥ मानिनामनुताप

थ्याकामान्नपोयसरतस्थानंतुः कामान्सप्राप्यथयेति ॥ ७ ॥ ९ ॥ नित्यकर्मैवस्नाने आचार्यनिगदं श्रुत्वा तच्छिष्यायथावेदवादीनमजानतां ॥ १२
अपीधीयंतेतद्वदिति ॥ ९ ॥ क्षुद्रस्थल्यः अल्पतत्रतसरद्धिपरतंत्रस्य अन्नसंग्रहपराणां निरंकुशस्येतिवा ॥ १० ॥ हरिभिः नीलैः शष्पैर्बालतृणैः नीलव
र्णां इन्द्रगोपैः कीरविशेषैः लोहितातत्रतत्र उच्छिलींध्रैः छत्राकारैर्हरिद्रैः कृतछायानांपृथिव्याः श्रीःसेवासमपरिश्रेत्राणीतितदाहि
थ्यविप्रदेनसंतः त्रिपंग्वारयोमुदंददतिविप्रदेस्मुष्यंतोनुतापंवेति ॥ १२ ॥ रामरामराम

राम
९५

अविस्रस्तं अविभ्रंशः यथा हरिनिषेवयेति ॥ हरिसेवाया ग्रहणाद्धि सर्वे रुचिरा भवंति ॥ तस्याः परमधर्मत्वात्परमहत्त्वत्वाद्वा तत्र इति ॥ १३ ॥ कामा
क्तं मन एव मनाक्कामितिसूत्रमनोर्मिमान्म ॥ गुणो विषयस्तद्युक्तं इति तथाऽतिमात्रं तमातिमात्रम् ॥ १४ ॥ अधोक्षज एव चेतो येषां ते ॥ १५ ॥ असंस्कृता
अशुद्धा नाभ्यस्यमानाः त्यक्तसंस्कारमाम्य ॥ कालेन वा हता इति तृणाच्छादनमाम्य ॥ १६ ॥ यथा कामिन्यः पुंश्चल्यः ॥ १७ ॥ निर्गुणं ज्यारहितमपि गु

जलस्थलौकसः सर्वे नववारिनिषेवया ॥ अबिभ्रद्रुचिरं रूपं यथा हरिनिषेवया ॥ १३ ॥ सरिद्भिः संगतः सिंधुश्चुक्षुभे श्वसनो
र्मिमान् ॥ अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा ॥ १४ ॥ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः ॥ अभिभूयमाना व्यसनै
र्यथाधोक्षजचेतसः ॥ १५ ॥ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः ॥ नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव ॥ १६ ॥
लोकबंधुषु मेघेषु विद्युतश्चलसौहृदाः ॥ स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव ॥ १७ ॥ धनुर्वियति माहेंद्रं निर्गुणं च
गुणिन्यभात् ॥ व्यक्ते गुणव्यतिकरेऽगुणवान्पुरुषो यथा ॥ १८ ॥ न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः ॥ अहंमत्या भासित
या स्वभासा पुरुषो यथा ॥ १९ ॥ मेघागमोत्सवा हृष्टाः प्रत्यनंदञ्छिखंडिनः ॥ गृहेषु तप्तनिर्विण्णा यथाच्युतजनागमे ॥ २० ॥ पीत्वा
पः पादपाः पद्भिरासन्नानात्ममूर्तयः ॥ प्राक्क्षामास्तपसा श्रांता यथा कामानुसेवया ॥ २१ ॥

णिनि गर्जितशरवति अभात् अशोभत गुणव्यतिकरात्मके व्यक्ते प्रपंचे अगुणवान्निर्गुणः पुरुषो यथेति ॥ १८ ॥ स्वभासा भासितयाऽहंमत्येति स्पष्टमेवेत्यन्येनैव
प्रकाशिते नाहंकारेणाच्छन्नो जीवो यथा ॥ यद्वाहं विद्वानदातावेत्यात्मैरिति स्वप्रतीत्यैवारोपितया इति ॥ १९ ॥ मेघागमेनोत्सवो येषां ते अतो हृष्टाः ॥ २० ॥ अत्रैव नानात्म
मूर्तयः अनेकरूपदेहाः ॥ २१ ॥

२०.५
६६

अशांतानिषंककंरकादिभक्तानिरोधांसितरानियेषांतेषपिन्नृभुं नितरामवसन्नासरसाः वक्रवाकाः अशांतानियोरागिअनुपरतानिव्या
क्तानिवाक्तानिषेभतेषपिगृहेषु ॥१२॥ ईश्वरे इंद्रे ॥१४॥ उग्राः प्रेरिताः आशिषः कामान्नविश्पतयोराजानः वणिजापतयोवाद्विजेरिताः
प्ररोहितोरुक्ताः ॥१४॥ आरुषिकृतीक्षीडांवर्षापति ॥ एवंवनमितिमग्नमिः वर्षिष्ठंसमृद्धं ॥१६॥ वनौकसः पुलिंदाः प्रमुदिताः भगवान्ददर्श
सरः स्वशांतरोधस्तन्मृष्टंरंगान्तुसारसाः ॥ गृहेषुशांतकृत्येषुग्राम्यास्वत्रुरागयाः ॥१२॥ जलौघैर्निरनियंतसेतवोवर्षतीश्व
रे ॥ पाषंडिनामसद्वाधैर्वेदमार्गाः कलौयथा ॥१२॥ व्यमुचन्वायुभिर्नुन्नाभूतेभ्यश्चामृतंघनाः यथा ॥ शिष्यो विश्पतयः काले
लेकालेद्विजेरिताः ॥१४॥ एवंवनंतद्वर्षिष्ठंपक्वखर्जूरजंबुमत ॥ गोगोपालैर्वृतोरंतुंसबलः प्रविशद्धरिः ॥१५॥ धेनवोमंदगा
मिन्यऊधोभारेणभूयसा ॥ ययुर्भगवताहूताऊतीप्रीत्यास्नुतस्तना ॥१६॥ वनौकसः प्रमुदितावनराजीर्मधुस्नुतः ॥ जल
धारागिरेर्नादादासन्नाददृशेगुहाः ॥१७॥ क्वचिद्वनस्पतिक्रोडे· गुहायांचाभिवर्षति ॥ निर्विश्यभगवान्रेमेकंदमूलफलाशनः
॥१८॥ दध्योदनंसमानीतंशिलायांसलिलांतिके ॥ संभोजनीयैर्बुभुजेगोपैः संकर्षणान्वितः ॥१९॥ शाद्वलोपरिसंविश्यच
र्वतोमीलितेक्षणान् ॥ तृप्तान्वृषान्वत्सतरान्गाश्चस्वोधोभरश्रमाः ॥२०॥ प्रावृट्श्रियंचतांवीक्ष्यसर्वकालसुखावहं ॥ भगवान्पूजया
तस्यावनराजीः मधुस्नुतः मधुस्रवादद्दशेगिरेः सकाशात्जलधारास्रुतांसांवनाराजीनासन्नानिकंदरर्त्रिनीगुहाश्चवनेत्वांसालराजपर्वहितः ॥२१॥ राम
प्रहावनौकसः प्रमुदितासन्तस्यावनराजीवनराजयः मधुस्नुतआसन्गिरेर्जलधाराआसन् ॥ तानेवंभूतानआददर्शसर्वतोरदर्शनभगवा ६६
न्तस्याधारांनादान्गुहस्त्वेति ॥२१॥

शारदवर्णयति ॥ एवं निवसतोरित्यष्टादशभिः विगतान्यभ्राणि यस्याः सा व्यभ्रा अपरुषः शांतोऽनिलो यस्यां सा वा ॥ ३२ ॥ नीरजानामुत्पत्तिर्यया तया
शरदा कृत्वा नीरजानामुत्पत्त्या वा ॥ ३३ ॥ व्योम्न इति ॥ व्योमादीनां क्रमेणाब्दं शाबल्यं पंकं मलानि शरद्धृत ॥ आश्रमिणां च कृष्णे जाता भक्तिर्यथाशुभं
पूर्वं दूरे तथा ब्रह्मचारिणो गृहस्थवनस्थकाहरणां क्रमेण यथा भक्तिर्हरति ॥ तथा पूर्णास्मते नाऽत्र पयोमानुगृह्णभिरपि कृतार्थस्य तस्यानियोगात् ॥ एवं
व्योम्नोऽब्दं शरज्जहार ॥ यथा च गृहिणो पत्यादिमाकर्षं भक्तिर्हरति ॥ विविक्तवासहेतुत्वात्तथा भूतानां शाबल्यं संकर्षं शरत्तव पातु हिंद्रिश्चिमिया

एवं निवसतोस्तस्मिन्रामकेशवयोर्व्रजे ॥ शरत्समभवद्व्यभ्रा स्वच्छाम्ब्वपरुषानिला ॥ ३२ ॥ शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः
भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ॥ ३३ ॥ व्योम्नोऽब्दं भूतशाबल्यं भुवः पंकमपां मलं ॥ शरज्जहाराश्रमिणां कृष्णे भक्तिर्यथा
शुभं ॥ ३४ ॥ सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ॥ यथा त्यक्तैषणाः शांता मुनयो मुक्तकिल्बिषाः ॥ ३५ ॥ गिरयो मुमुचुस्तो
यं क्वचिन्न मुमुचुः शिवं ॥ यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ॥ ३६ ॥ नैवाविदन्क्षीयमाणं जलं गाधजलेचराः ॥ यथा

स्थाकुलानि वर्षन्ति ॥ यथा वचनस्य स्यमलधारणाक्लेशं भक्तिर्हरति ॥ एवं भुवः पंकं शरत् ॥ यथायुरन्वहं क्षय्यं नरा मूढाः कुटुंबिनः ॥ ३७ ॥
वयतीनां कामादिवासनामलं श्रीकृष्णभक्तिर्हरति ॥ एवमपामलं शरदिति ॥ ३४ ॥ त्यक्तैषणाः त्यक्ताः पुत्रवित्तलोकैषणा यैः ॥ ३५ ॥ ते गिरय इति
अपि भावः नैतु पाध्यायाः कर्मविद्यामिव ज्ञानिनो ज्ञानामृतं सर्वतो वितरंति अपि तु हृदयाच्छादि देव एवं गिरयः शिवं निर्मलं तोयं क्वचिन्मुमु
चुः ॥ क्वचिन्न ज्ञानतः प्रावृषीव सर्वत इति ॥ ३६ ॥ ७ ॥

२०१ गाधेष्वऽदेजलं चरंतीति तथा ते मीनादयः अविंदंस्तु लेभिरे २८ ॥ शनैरिति ॥ नवप्रमत्तामिव पंकजस्थं हंतामिवामत्तामुपपन्नतां जहुरिति २९ ॥ आत्मानु
६७ परते त्यक्तक्रियोग्रन्तिरिव निश्चलांगः स एव मृगुपरतागमः निवृत्तवैरस्य बोधात्प्रवत्तलीम भूदिति ॥ ३० ॥ केदारे भ्यो वद्धैस्तैः शालिक्षेत्रेभ्यो हेदः पेत
भिरयोगहस्तुततः परं दृष्टान्नभावः प्राणोरिंद्रियैः तन्निरोधेनं इंद्रियप्रत्याहारेण ॥ ३१ ॥ देहाभिमानजं बोधरवघोषितांमृकंदस्य वचेत्यर्थः ॥ ३२ ॥ शर
दा विमलानां ताराकायामस्तु तत्ते शाद्वब्रह्मणो वेदस्यार्थीत्र पूर्वोत्तरमीमांसाशास्त्रनिर्णीतानुदर्शयतीति तथा ततदिव ॥ ३४ ॥ समस्त्रमूनाधिकः शीतरश्मि

गाधवारिवृगतापप्रविरत्नशारदर्कजं ॥ यथा हरिद्रः कृपणाः क्षुद्रं व्याविद्भितेंद्रियाः २९ ॥ शनैः शनैर्जहुः पंकस्थलान्यामंचवी
रुधः ॥ यथा हंसमत्ताधीराः शरीरादिधनात्मसु ३० ॥ निश्चलांगस्तूस्लीममृडः शारदागमे ॥ आत्मानुपरते सम्यक्कृगुनिर्वृ
पतागमः ॥ ३१ ॥ केदारे भ्यः स्थलियोः गढ्नत्कर्षकाहृदस्रैरभिः ॥ यथा प्राणाः स्ववत्तानं तन्निरोधेन योगिनः ॥ ३१ ॥ शारदर्कांशुर्जा
लापानप्रतानामुडुपोः हरत्तु ॥ देहाभिमानजं वोधोमृकंदोवजयोषितां ॥ ३२ ॥ विमशोभत निर्मेघो शारदविमलतारकं ॥ म
खेयुक्तं यथा विन्नेशाद्वब्रह्मार्थदर्शिनं ॥ ३३ ॥ अखंडमंडलो व्योम्नि राजोडुगणैः शशी ॥ यथा यदुपतिः कृष्णो दृष्णिचक्रावृतोऽवि
श्वान्निष्पमशीतांशुपहृतवनमागतं ॥ जनाह्वापं जडगोप्योन कृष्णस्तवेन सः ॥ ३४ ॥ गावो मृगाः खगानार्यः उष्णिएप शर
स्नुवत ॥ नत्वगोप्यः कृष्णहृतचेतः तेनताप्रोडुः सहरति ॥ यद्वानकारउपमार्थः शः भवत ॥ अन्वीयमानाः स्वरूपैः फलैरीशाक्रियाइव ॥ ३६
तदा कृष्णहृतचेतसां कृष्णमाश्चिष्यपयेत्यर्थः ॥ ३५ ॥ उष्णिएपोगार्भिएपः अन्वीयमानाः स्वरूपैः स्वयतिभिरनिश्चंत्योः पिवलाद्दृगाम्यमानाः इस्वरूप

कष्टं नकष्टं कृत्स्निते चन्द्रमस्य इति दस्युशब्दार्थः ॥ ४७ ॥ आग्रयणैः नवान्नप्राशनार्थैर्वैदिकैः इन्द्रियैः ऐन्द्रियार्थैर्लौकिकैश्च महोत्सवैः कलाभ्यां रामकृ
ष्णाभ्यां दर्शनादि महोत्सवाभ्यां ॥ ४८ ॥ वणिजो यतयो नृपाः स्नाताः काशवद् वर्षादुद्धाः संतो निर्गम्यार्थान् वाणिज्यस्वाध्याय दिग्विजयवि
धादीन् प्रपेदिरे प्रापद्यंत ॥ यथा मंत्रयोगादि सिद्धाः आयुषारूढा काले आगते स्वपिंडान्तु योगादिः प्राप्यान् देवादिदेहान् निति ॥ ४९ ॥ इति दशमे विंश
तितमः ॥ एकविंशे शरद्रम्ये वृन्दावनगते हरौ ॥ तद्वेणुहर्षमाकर्ण्य गोपीभिर्गीत ईर्यते ॥ १ ॥ इत्थमेवंभूतं वनं ॥ मदेवाह ॥ शरदा स्वच्छानि जलानि यस्मि

उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना ॥ राज्ञा तु निर्भया लोका यथा दस्यून्विना नृप ॥ ४७ ॥ पुरग्रामेष्वाग्रयणैरिन्द्रियैश्च महोत्स
वैः ॥ बभौ भूः पक्वशस्याढ्या कलाभ्यां नितरां हरेः ॥ ४८ ॥ वणिङ्मुनिनृपस्नाता निर्गम्यार्थान्प्रपेदिरे ॥ वर्षरुद्धा यथा सिद्धाः स्वपिंडान्का
ल आगते ॥ ४९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे शरद्वर्णनो नाम विंशोऽध्यायः ॥ श्रीशुक उवाच ॥ इत्थं शरत्स्वच्छजलं प
द्माकरसुगंधिना ॥ न्यविशद्वायुना वातं सगोगोपालकोऽच्युतः ॥ १ ॥ कुसुमितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रं
मधुपतिरवगाह्य चारयन्गाः सहपशुपालबलश्चुकूज वेणुं ॥ २ ॥ तद्व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयं ॥ काश्चित्परोक्षं कृष्णस्य
स्वसखीभ्योऽन्ववर्णयन् ॥ ३ ॥ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितं ॥ नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥ ॥

न्तत् वायुना वातं सुगंधं तं वनं तदेकदा व्याविशदित्यर्थः ॥ १ ॥ ततश्च कुसुमितवनराजिषु शुष्मिणो मत्ता भृंगा द्विजाश्च तैः घुष्टानि कूजितानि सरांसि सरितः
महीध्राश्च यस्मिंस्तत् वनं कृष्णः वनात्प्रविश्य वेणुमवादयत् ॥ २ ॥ ततो वेणुगीतं स्मरस्य उदयो यस्मात् तत् श्रुत्वा परोक्षं यथा भवति तथा श्रीकृष्णस्य चरितं ॥ ३ ॥ वि
क्षिप्तमनसः व्याकुलचित्ताः ॥ ४ ॥

२०१० याह कृष्णस्य स्मरणं तासां मनसः क्षोभकं जातं तदाह ॥ वर्हापीडमिति ॥ नटवत् वरवपुर्विभ्रत् वृंदावनं प्राविशत् ॥ कथंभूतं वनं ॥ स्वपदै रंकितैः रमणीयं

९८ निजजनैर्गोपवृंदैः गीतकीर्त्तिः तथा वर्हमयमापीडं शिरोभूषणं विभ्रत् वर्हमापीडाद्यमिति त्रिविधविशेषणं वा ॥ वेणोर्वा रन्ध्रान् पूरयन् अधरेण

रिति ॥ श्रुतोक्तं अधरसुधेव पूर्णं द्वेणौ हृद्यं रतीगीतवत्त्वमपि पिबन् मर्दतीति भावः ॥ ५ ॥ अभिरेभिरे वर्णयंत्यः परे परे परमानंदमूर्त्तिं कृष्णं परिरब्ध-

वत्यः ॥ ६ ॥ अक्षण्वतामेवाह ॥ अक्षण्वतामिति त्रयोदशभिः ॥ अक्षण्वतां चक्षुष्मतां तावदिदमेव फलं विप्रदर्शनं परमन्यत् न विदामः न विद्मः सख्यः

तत्फलमप्यविभिः सह पशूननुवेशयतोः ॥ रामकृष्णयोर्वक्त्रं यैर्निपीतं तैरवकृष्टं सेवितं नान्यैरित्यर्थः ॥ कथंभूतं वक्त्रं ॥ अनुवेणु वेणुमनुवर्त्तमा-

वर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं विभ्रद्वासः कनककपिशं वैजयंतीं च मालां ॥ रंध्रान्वेणोरधरसुधयापूरयन्गोपवृंदै-

र्वृंदारण्यं स्वपदरमणं प्राविशद्गीतकीर्त्तिः ॥ ५ ॥ इति वेणुरवं राजन्सर्वभूतमनोहरं ॥ श्रुत्वा व्रजस्त्रियः सर्वा वर्णयंत्योभिरेभि-

रे ॥ ६ ॥ गोप्य ऊचुः ॥ अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः ॥ वक्त्रं व्रजेशसुतयोरनुवेणु-

जुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षं ॥ ७ ॥ चूतप्रवालवर्हस्तवकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ ॥ मध्ये विरेज-

नंतं वारयन् ॥ तथा अनुरक्तकटाक्षमोक्षं स्निग्धकटाक्षविसर्गं ॥ अ तुरलं पशुपालगोष्ठ्यां रंगे यथा नटवरौ क्व च गायमानौ ॥ ८ ॥ राम

थवा यैर्निपीतं तैरवकृष्टं इदमेवाक्षण्वतामक्ष्णोः फलमिति ॥ ७ ॥ अन्यामाहुः ॥ चूतेति चूतप्रवालादीनां विचित्राभिर्मालाभिः अनुपृक्तेर्इषदंत राम

णतरतः संपृक्तेन परिधानेन नीलपीतांवराभ्यां विचित्रवेषौ यद्यपि तौ नाना च कदाचित् पशुपालगोष्ठ्यां गोपानां सभायां मध्ये अलं अत्यर्थं विरेजतुः ॥ अ ९८

हो गोपानां भाग्यमिति भावः ॥ ८ ॥

अन्यात्रुवुः ॥ गोप्यः अयं वेणुः किं स्म शुभमाचरत् कृतवान् कथं यस्मात् गोपिकानामेव भोग्यां सतीमपि दामोदराधरसुधां स्वयं स्वातंत्र्येणाय
थेष्टं भुंक्ते ॥ कथं अवशिष्टरसं केवलमवशिष्टरसमात्रं यथा भवति तथा ॥ यतो यस्मात् पयसा पुष्टाः तामातृवत्पा ह्रदिन्यः हृष्यत्त्वचः विकसितकमल
वनमिषेण रोमांचिता लक्ष्यंते ॥ येषां वंशे जाताः तेन तरवो मधुधारामिषेण आनंदाश्रु मुमुचुः यथा आर्याः कुलवृद्धाः स्ववंशे भगवत्सेवकं दृष्ट्वा हृ
ष्यत्त्वमेवाः अश्रु मुंचति ॥ न त्विदिति ॥ काश्चिदाहुः हे सखि वृंदावनं भुवः कीर्तिं त्रिविष्टपादपि विशेषेण तनोति ॥ कथं भूतं यद्देवकीसुतपदांबुजाभ्यां लब्धा

गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानां ॥ भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोश्रु मु
मुचुस्तरवो यथार्याः ॥ ९ ॥ वृंदावनं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मी ॥ गोविंदवेणुमनु म
त्तमयूरनृत्यं प्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्वं ॥ १० ॥ धन्याः स्म मूढमतयोपि हरिण्य एता या नंदनंदनमुपात्तविचि
त्रवेषं ॥ आकर्ण्य वेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ॥ ११ ॥ श्रीदुर्गादेव्यै नमः ॥ ॥

लक्ष्मीः शोभासंपद्येन तत् ॥ किं च गोविंदस्य वेणुमनु वेणुनिनादं श्रुत्वानंतरं मंद्रगर्जितं नीलमेघं मत्वा मत्ताये मयूराः तेषां नृत्यं प्रेक्ष्य सद्यस्तत्र
तत्र अद्रिसानुषु अवरतानि उपरतक्रियाणि अन्यानि समस्तानि सत्वानि यस्मिन् तत् नैतदन्येषु लोकेषु विद्यते ॥ अतो भुवः कीर्तिं वितनोतीत्य
र्थः ॥ १० ॥ अपरा आहुः हे सखि मूढमतयोपि एता हरिण्यो धन्याः कृतार्थाः या वेणुरणितं वेणुनादमाकर्ण्य नंदनंदनं उपात्तविचित्राण्यपमादि
तेरवलोकनैर्विरचितां पूजां सन्मानं दधुः कृतवत्यः किं च कृष्णसारैः स्वपतिभिः सहिता एव स्वैः अस्मत्पतयस्तु गोपाः क्रुद्धाः समक्रूतत्रसहेतरतिभावः ॥

दे॰ पु
६८

अन्याउक्तः हे गोप्यः आश्चर्यं श्रीकृष्णकृतवनितानां मुत्सवो यस्मात्तद्रूपशीलं च यस्य तं श्रीकृष्णं निरीक्ष्य तेन वादितवेणोरणितकीर्णगीतं च श्रुत्वा विमाने
गच्छत्यो देव्यो मारबाणानामकेषु स्थिता अपि स्मरेण उन्मनाः परिस्खिन्नधैर्या मुमुहुः मोहलिंगमाहुः स्रस्तपत्त्रनीवाः कबर्याश्चूडाया स्रस्ताः विगता
नीव्यो मानियास्तांताः ॥ १२ ॥ अत्र सर्वत्र वक्तृभेदं ज्ञातीव संगतिर्वक्तव्या हरणे शकपवोन्नमितहन्नमितैः कर्णपुटैः पिबंत्यः सत्यः तथा शावाश्च व
त्साश्च स्तनपाने प्रवृत्ताः सम अनंतरमेव गीतं श्रुत्वा तदेव पीयूषमुत्तभितकर्णपुटैः पिबंतः स्नुतस्तनपयः कवलाः केवलं स्तनेभ्यः इति तक्षीरस्था
मापुरवेष्वेषां ते तस्थुः विस्मृतक्रियावत् तूरित्यर्थः ॥ तत्र हेतुः गोविंदं दृशा मार्गेण आत्मनि मनसि स्पृशंतः आलिंगंत्यः ॥ अत एव अश्रुपूर्णा कले

कृष्णं निरीक्ष्य वनितोत्सवरूपवेषं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतं ॥ देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा
मुमुहुर्विनीव्यः ॥ १२ ॥ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबंत्यः ॥ शावाः स्नुतस्तनपयः कवलाः
स्म तस्थुर्गोविंदमात्मनि दृशाश्रुकलाः स्पृशंत्यः ॥ १२ ॥ प्रायो बताम्ब विहगा मुनयो वनेस्मिन्कृष्णेक्षितं तदुदितं कलवेणुगीतं
आरुह्य ये द्रुमभुजान्रुचिरप्रवालान्शृण्वंति मीलितदृशो विगतान्यवाचः ॥ १४ ॥

लेशाः लोचनयोर्यासां ताः गावः ते च शावाः ॥ १२ ॥ भो अम्ब मातः
अस्मिन्वने ये विहगाः पक्षिणः ते प्रायेण मुनयो भवितुमर्हंति ॥ कुतः कृष्णेक्षितं कृष्णदर्शनेन उच्चफलाद्युत्तरं विना यथा भवति तथा रुचिराः निष्प
बाला येषां तान् द्रुमभुजान् वृक्षाणां शाखा आरुह्य तेन श्रीकृष्णेन उदितं प्रकटितं कलवेणुगीतं केनापि विघ्नेन निमीलितदृशः त्यक्तान्यवाचः संतः शृण्व
ये शृण्वंतीति तथा हि मुनयः श्रीकृष्णदर्शनं यथा भवति तथा वेदोक्तकर्मफलत्यागेन वेदद्रुमशाखा आरुह्य रुचिरप्रवालस्थानीयानि कर्माण्येवोपपादयानाः ह
रिनः श्रीकृष्णगीतमेव शृण्वंति अतस्त एवैते भवितुमर्हंतीति भावः ॥ ये भगवद्गीतं भागवतं शृण्वंति ते वा हरेर्देवरूपा भवंतीत्यर्थः ॥ १४ ॥

६८

आस्तां चेतनानां कथा ॥ नद्यो ऽपि श्रावैर्न्नेपरिरम्भेमल्लज्ञितेन मनोभवेन कामेन मग्नो वेगो यासां ताः ॥ आलिंगनेन स्थगित माच्छादितं यथा भवति
न तथा ऊर्म्मय एव भुजा तैः कामलोपहाराः ॥ कमलान्युपहरन्त्यः श्रीरोः पादयुगलं गृहे विधारयन्ति ॥ १५ ॥ लोकान्तिहरणाशीलत्वादिप्राग्भा
रम्भे ॥ श्रीकृष्णस्य संगे भूरसन्निङ परिग्रहिताः श्रनः प्रेम्णा प्ररूढः मरकतमावलिभिः श्यामसमूहैः तन्निन्ये ताम्रौ रंवांग रवश्यामाङ्गं विहितवा
न ॥ १६ ॥ साहंकारमाऊः पूर्णाः कृतार्थाः शलिंग्यः शावरागरागाः कथमित्यत आह ॥ प्रथमं रचितानां तानेन श्रमं डितेन अञ्जलिप्तेन श्रनस्वराति

नद्यस्तदातदुपधार्य हरे रंदगीतमावर्त्तनेनलज्ञितमनोभवमग्नवेगाः ॥ आलिंगनस्थगितमूर्म्मिभुजैर्मुरारेर्गृह्णन्ति पादयुग
लं कमलोपहाराः ॥ १५ ॥ रत्स्यातपेद्भजपश्चून्स्तहरणामगोपैः संचारयन्तमनुवेणुमुदारचरितं ॥ प्रेमप्ररूढमुदितः कुसुमाव
लीभिः सख्युर्व्यधात्स्ववपुषा ऽम्बुदआतपत्रं ॥ १६ ॥ पूर्णाः शलिंग्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमंडिते
न ॥ तद्दर्शनस्मररुजः तृणरूषितेन लिंपन्त्य आननकुचेषु जहुस्तदाधिं ॥ १७ ॥

तमपे उरुगायस्य श्रीकृष्णस्य पदाब्जयोः रागे रागाश्च हात्वेन श्रीः कान्तिर्यस्य तेन कुंकुमेन श्वनस्तस्य वनस्थलीष्ववकमेण तरणे श्रूषितेन लग्ने
न तद्दर्शनेन तथाभूतस्य कुंकुमस्य दर्शनेन स्मरकृता पीडा यासां ताः ते न कुंकुमेन आननेषु कुचेषु च कामतप्तेषु लिंपन्त्यः ॥ तदा कामव्यथा जहुः
अत एताः कृतार्थाः ॥ धिगन्या मादृशाः ॥ पाएवं भूतं तथाविशमं ननलभंतति ॥ १७ ॥

१०पू
८०

हंतेति हर्षे हे सख्यः अयमद्रिर्गोवर्द्धनो ध्रुवं हरिदासेषु श्रेष्ठः कुतस्तत्राह ॥ यस्माद्रामकृष्णयोः चरणस्पर्शेन प्रमोदो यस्य सः तगणाद्युरुम मनिमेनरो
मद्दर्षदर्शनात् ॥ किंच यत्र मानं तनोति सह गोभिर्गणेन सखिभिश्च हेतुना वर्तमानयोस्तयोस्तयोः कैः पानीयैः सूयवसैः शोभनतृणैः कंदरैः कंदमू-
लैश्च यथोचितं ॥ अतोऽयमतिधन्य इत्यर्थः ॥१८॥ हे सख्यः इदं तु अतिचित्रं ॥ गोपैः सह गाः संचारयतोस्तयोः रामकृष्णयोः मधुरपदैः महावेणुनादैः ग

हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः ॥ मानं तनोति सहगोगणयोस्तयोर्यत्पानीयसूयवसकंदरकं-
दमूलैः ॥१८॥ गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः ॥ अस्पंदनं गतिमतां पुलकस्तरूणां निर्योग-
पाशकृतलक्षणयोर्विचित्रं ॥१९॥ एवंविधा भगवतो या वृंदावनचारिणः ॥ वर्णयंत्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥२०॥
इति श्री भगवते महापुराणे दशमस्कंधे एकविंशतिध्यायः ॥ श्रीशुक उवाच ॥ हेमंते प्रथमे मासि नंदगोपकुमारिकाः ॥ चेरुर्हविष्यं

णिरिभ्यो गतिमंतः तेषामस्पंदनं स्थावरधर्मः तरूणां पुलकः जंगमधर्मः इति ॥ निर्युज्यंते गावश्चाभिरिति नि (भुंजानाः कात्यायन्यर्चनं व्रतं)
र्योगाः पाशः बंधनरज्जवः अधस्था गवां कर्षणार्थाः पाशाश्च तैः कृतलक्षणयोर्विचित्रं यथयोः शिरसि निर्योगवेष्टनेन स्कंधस्थपाशेन च गोपपरिच्छ-
च्छिपाविराजमानयोरित्यर्थः ॥१९॥२०॥ गोपीनां कामतः कृष्णेनिः सोमपूर्णसंगमः कात्यायन्यर्चनतो हूतः तत्प्रसादमहोदयः ॥२०॥ इतिश्री मे एकविंशः राम
ह्यविशेषेण गोपकन्यानां वस्त्राहरणलीलया वरं दत्वा गतः कृष्णोयत्र शालाभिनीर्यते ॥१॥ प्रथमे मासि मार्गशीर्षे ॥१॥ श्रीरामजीसहाय

८०

॥ महामायेत्यादि । संबोधनैस्तव न किंचिद् अशक्यमिति सूचयन्तः प्रत्येकं प्रार्थयन्ते ॥ ४ ॥ कस्मै चेत् तत्स्वमेवाह ॥ भूयात्त्वं रक्षतः पतिरित्यानंदोरि-
ति ॥ ५ ॥ व्रतस्य स्वरूपमाह ॥ उषस्युत्थाय ॥ गोत्रैर्नामभिः अन्योन्यबद्धबाहवः परस्परं गृहीतपाणयः ॥ ६ ॥ ७ ॥ योगेश्वरात्मानमीश्वरं इति अन्ये

आप्लुत्यांभसि कालिंद्या जलांते चोदिते रुणे । कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीं ॥ २ ॥ गंधैर्माल्यैः सुरभिभिर्बलिभि-
र्धूपदीपकैः । उच्चावचैश्चोपहारैः प्रवालफलतंडुलैः ॥ ३ ॥ कात्यायनि महामाये महायोगिन्यधीश्वरि । नंदगोपसु-
तं देवि पतिं मे कुरु ते नमः ॥ इति मंत्रं जपंत्यस्ताः पूजां चक्रुः कुमारिकाः ॥ ४ ॥ एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः । भद्र-
कालीं समानर्चुर्भूयान्नंदसुतः पतिः ॥ ५ ॥ उषस्युत्थाय गोत्रैः स्वैः अन्योन्याबद्धबाहवः । कृष्णमुच्चैर्जगुर्यांत्यः कालिंद्यां स्ना-
तुमन्वहं ॥ ६ ॥ नद्यां कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् । वासांसि कृष्णं गायंत्यो विजह्रुः सलिले मुदा ॥ ७ ॥ भगवांस्तदभिप्रेत्य कृ-
ष्णो योगेश्वरेश्वरः । वयस्यैरावृतस्तत्र गतस्तत्कर्मसिद्धये ॥ ८ ॥ तासां वासांस्युपादाय नीपमारुह्य सत्वरः । हसद्भिः प्रहसन्बा-
लैः परिहासमुवाच ह ॥ ९ ॥ अत्रागत्याबलाः कामं स्वं स्वं वासः प्रगृह्यतां । सत्यं ब्रवाणि नो नर्म यद्यूयं व्रतकर्शिताः ॥ १० ॥ न मयोदितपूर्वं वा
एकैकशः प्रतीच्छत सहैवेति सुमध्यमाः ॥ ११ ॥ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः । व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न नि-
र्ययुः ॥ १२ ॥ एवं ब्रुवति गोविंदे नर्मणाक्षिप्तचेतसः । आकंठमग्नाः शीतोदे वेपमानास्तमब्रुवन् ॥ १२ ॥

कं ताः कृष्णमनोरथपूरणसामर्थ्यं दर्शयति तासां कर्मणः सिद्धये फलदानायेति ॥ ८ ॥ नीपं कदंबं बालैः सह ॥ ९ ॥ हे अबला नो नर्म परिहासः यस्मात् यूयं व्रत-
क्षांताः ॥ १० ॥ एकैकशो वा आगत्य स्वीकुरुत सहैव वा न तत्रास्माकमाग्रह इत्यर्थः ॥ ११ ॥ १२ ॥ क्ष्वेलितं परिहासः प्रेमपरिप्लुताः प्रेमरसमग्नाः ॥ १३ ॥

२.०.५

७१

तत्रस्थाऊचुः प्रोक्तास्त्र नयपन्याध्यं प्राकृष्या ॥१४॥ प्रोचाऊचुः नो वेद्मास्तेन नरायकं मायवाहृवामहे कृष्णेति ॥१५॥ ६ घात्रेठ निर्गताः आहताः दे
षदृक्तनयोनी वीक्ष्य ॥१८॥ व्रतव्रताः सत्योविवक्ष्यात्रापोव्यगाहत त्रु फुल्लाता इतियतत दे ततउए वदेवहेलनं अपराध एवेत्यर्थः व्रतवेष्ठणपमा

मानयं प्रोक्तथात्वंत्वं नरं गोपहृतं प्रियं ॥ जानीमो गव्रजस्याद्यं देहि वासांसि वेपिताः ॥१४॥ रूपाम हं द्रतेदास्यः करवाम त
वोदितं ॥ देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे ॥१५॥ श्री भगवानुवाच ॥ भवत्यो यदि मे दास्यो मयोक्तं वा करिष्यथ ॥ अत्राग
त्य स्ववासांसि प्रतीच्छन्तु शुचिस्मिताः ॥१६॥ ततो जलाशयात्सर्वा दारिकाः शीतवेपिताः ॥ पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शी
तकर्षिताः ॥१७॥ भगवानाहता न्वीक्ष्य शुद्धभावप्रसादितः ॥ स्कंधे निधाय वासांसि प्रीतः प्रोवाच सस्मितं ॥१८॥ यूयं विव
स्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनं ॥ वध्वांजलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा नमोऽधो वसनं प्रगृह्यतां ॥१९॥ इ
त्यच्युतेनाभिहिता व्रजाबला मत्वा विवस्त्राप्लवनं व्रतच्युतिं ॥ तत्पूर्त्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः ॥
२०॥ तास्तथावनता दृष्ट्वा भगवान् देवकीसुतः ॥ वासांसि ताभ्यः प्रायच्छत्करुणस्तेन तोषितः ॥२१॥

तानां ग्राघयाश्चिन्नमिवाह ॥ अस्याहमः प्राप स्यनिवृत्तये मूर्ध्न्यंजलिं वध्वा धोनमः प्रणाममं कृत्वेति ॥१९॥ इति दोषत्वेनाच्युतेनाभिहितं विव
स्त्राप्लवनं व्रतस्यच्युतिं हेतुं मत्वा तस्य व्रतस्य पूर्त्तिकामा ॥ तदशेषकर्मणां तस्य व्रतस्यान्येषामशेषकर्मणां च साक्षात्कृतं फलभूतं तं नेमु
रवद्यमृग्यतः ॥ यतः ॥ सएवावद्यमृक् पापमार्जनः ॥ ॥२१॥

राम

७१

दृढमत्यर्थं प्रलब्धा वंचिताः पूर्वं विवस्त्राप्लवनादिना त्रपया लज्जया च हापितास्त्याजिताः अज्ञानात्स्ववासांसीत्याग्रहेण प्रस्तोभिता उपहसि-
ताः सत्यं ब्रुवाणि नो नर्मेत्यादिना क्रीडनवत्कारिताः स्वबद्धांजलिमित्यादि प्रायश्चित्तच्छलेन नाभ्यसूयन् दोषदृष्ट्या नापश्यन् ॥२२॥ प्रेष्ठसंगमे
न सज्जिताः वशीकृताः अतो गृहीतचित्ताः सत्यो नो चेलुः गृहीतचित्तत्वमाह ॥ तस्मिन्कृष्णे लज्जाविलसितमीक्षणं यासां ता इत्यर्थः ॥२३॥ दामो-
दर इति भक्तिवात्सल्यं दर्शयति ॥ अबलाः प्रति ॥२४॥ भोः साध्व्यः भवतीनां मदर्चनमेवं संकल्पो मनोरथः स लज्जया युष्माभिरकथितोऽपि मया वि-

दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः ॥ वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन्प्रियसंगनिर्वृ-
ताः ॥२२॥ परिधाय स्ववासांसि प्रेष्ठसंगमसज्जिताः ॥ गृहीतचित्ता नो चेलुस्तस्मिंल्लज्जायितेक्षणाः ॥२३॥ तासां विज्ञाय भग-
वान्स्वपादस्पर्शकाम्यया ॥ धृतव्रतानां संकल्पमाह दामोदरोऽबलाः ॥२४॥ संकल्पो विदितः साध्व्यो भवतीनां मदर्चनं
मयानुमोदितः सोसौ सत्यो भवितुमर्हति ॥२५॥ न मय्यावेशितधियां कामः कामाय कल्पते ॥ भर्जिताः क्वथिता धानाः
प्रायो बीजाय नेष्यते ॥२६॥ यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः ॥ यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः ॥२७॥

दितः स मयानुमोदितः अतः सत्यो भवितुमर्हति अर्हतीति संभावनोक्त्या सत्यतां किं न भविष्यतीति सूचितं ॥२५॥ तत्कुत इत्यत आह ॥ न मयीति
कामाय पुनः कामभोगाय विषयमहिम्ना कामस्याविशांतहेतुत्वादिति भावः ॥ कामाप्ररोहे दृष्टांतः ॥ भर्जिता दग्धा क्वथिता पक्वा धाना यवादिबीजा-
न्यंकुरोद्गमाय प्रायश इति ॥ त्विच्छया पुनः प्ररोहमपि दर्शयति ॥२६॥ सिद्धाः पूर्णाः मनोरथाः तदा हेतुमाह आगामिनीः रात्रीः मया रंस्यथेति ॥ आर्यां कात्याय-

द०स्कं०
७१

भक्त्यानुकथयकन्यास्नात्वा हि वर्जितयज्वनां ॥ पत्न्यस्तु ग्रहतत्तेषामहत्कर्म महाभट ॥२१॥ विप्रभार्यायाश्चत्तु प्रहायपयतवारं गच्छन्तः विप्राणां काठिन्य मभिप्रेत्य तेभ्योः पितृमाश्रेष्ठ्याः इति तान् अभिनंदयति वचोभिः पश्यतेति ॥ हेस्तोक कृष्ण हे अंशो गोपाः एतान् द्रुमान् पश्यत ॥ परार्थमेव एकांतेन जीवितं ये ॥ वातवर्षादीन् स्वयं सहमानाः अस्मान् वारयंति ॥२१॥ सुजनस्य कपालो र्थिन इव ॥२२॥ निर्यान्ति सो ह्यनरसः नो कृपाः ॥ पत्रवाद्यैः

शुक उवाच ॥ इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः ॥ ध्यायंत्यस्तत्पदांभोजं कृच्छ्रान्निर्विविशुर्व्रजं ॥२८॥ अथ गोपैः परिवृतो भगवान् देवकीसुतः ॥ वृंदावनाद्गतो दूरं चारयन्गाः सहाग्रजः ॥२९॥ निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः ॥ आतपत्रायितान्वीक्ष्य द्रुमानाह व्रजौकसः ॥३०॥ हे स्तोककृष्ण हे अंशो श्रीदामन् सुबलार्जुन ॥ विशाल वृषभौजस्विन् देवप्रस्थ वरूथप ॥३१॥ पश्यतैतान्महाभागान्परार्थैकांतजीविनः ॥ वातवर्षातपहिमान्सहंतो वारयंति नः ॥३२॥ अहो एषां वरं जन्म सर्वप्राण्युपजीवनं ॥ सुजनस्येव येषां वै विमुखा यांति नार्थिनः ॥३३॥ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ॥ गंधनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते ॥३४॥ एतावज्जन्मसाफल्यं देहिनामिह देहिषु ॥ प्राणैरर्थैर्धिया वाचा श्रेय आचरणं सदा ॥३५॥ इति प्रवालस्तबकफलपुष्पदलोत्करैः ॥ तरूणां नम्रशाखानां मध्येन यमुनां गतः ॥३६॥ तत्र गाः पाययित्वापः सुमृष्टाः शीतलाः शिवाः ॥ ततो नृप स्वयं गोपाः कामं स्वादु पपुर्जलं ॥३७॥ तस्या उपवने कामं चारयंतः पशून्नृप ॥ कृष्णरामावुपागम्य क्षुधार्ता इदमब्रुवन् ॥३८॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्वाविंशोऽध्यायः ॥

॥२४॥ इत्यभिनंदन् प्रवालादिसमूहैर्नतशाखानां तरूणां मध्यतो यमुनां प्राप्तः ॥२६॥ कुमारिकाभ्यः पूर्वमेव तत्र माकृजन्तयाम्पगृहीतपशु गृहीत भोज्या राम
७१

त्रयोविंशे ततो गोपैरन्नयाच्ञाप्रेषणं ॥ तत्प्रसंगाद्ब्राह्मणीभ्यो दीक्षितानन्वतापयत् ॥ ॥ भक्ताया इत्येकवचनं प्रथमः प्राधान्याभिप्रायेण ॥ २ ॥ अ-
स्मद्विसर्जिताः आवाभ्यां प्रहिताः इतो यावद्धं ॥ युष्माकं कातरलज्जा ॥ नन्वतथाप्यपात्रत्वादस्माकं किमिति दास्यंतीति चेत्तत्राह कीर्त-
यंत इति ॥ ४ ॥ ६ ॥ अविदूरे वर्त्तमानौ संतौ वो युष्मदन्नं लषतः अभिलषतः वः ७ दूनं श्रद्धा च यद्यस्ति तर्हि यच्छतेति ॥ ८ ॥ दीक्षितायाः यमभोज्यान्ना

गोपा ऊचुः ॥ राम राम महावीर्य कृष्ण दुष्टनिवर्हण एषा वै बाधते क्षुन्नस्तच्छांतिं कर्तुमर्हथः ॥ १ ॥ श्रीशुक उवाच ॥ इति विज्ञापि-
तो गोपैर्भगवान्देवकीसुतः ॥ भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् ॥ २ ॥ प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः
सत्रमांगिरसं नाम ह्यासते स्वर्गकाम्यया ॥ ३ ॥ तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः ॥ कीर्त्तयंतो भगवत आर्यस्य मम चा-
भिधां ॥ ४ ॥ इत्यादिष्टा भगवता गत्वा याचंत ते तथा ॥ कृतांजलिपुटा विप्रान्दंडवत्पतिता भुवि ॥ ५ ॥ हे भूमिदेवाः शृणुत कृष्ण-
स्यादेशकारिणः ॥ प्राप्तान्जानीत भद्रं वो गोपान्नो रामचोदितान् ॥ ६ ॥ गाश्चारयंतावविदूर ओदनं रामाच्युतौ वो लषतो बुभुक्षितौ
तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ॥ ७ ॥ दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ॥ अन्यत्र दीक्षि-
तस्यापि नान्नमश्नन्हि दुष्यति ॥ ८ ॥ इति ते भगवद्याच्ञां शृण्वंतोपि न शुश्रुवुः ॥ क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः ॥ ९ ॥

इति विदरिष्यंतीति त्वयमेव शंकाह दीक्षाया अनंतरं अग्नीषोमीयपश्वालंभात्पूर्वं दोषः न ततो ऽन्यत्र तथा सौत्रामण्यामन्यत्र अन्यदा ॥ ८ ॥ क्षुद्रे स्वर्गादा-
वाशीमात्रं येषां ते भूरीणि क्लेशाधिकानि कर्माणि येषां ते ॥ अतो ऽज्ञाः वयसा तु न वृद्धा इति मानवंतः ॥ ९ ॥

द०पू० ७२

नत्वकर्मज्ञमस्मत्स्वद्या देशकालैः न्यार्थ्यमन्नमन्यस्मै कथं देयं तत्राह देश इति पृथक् द्रव्यं पुरोडाशादि द्रव्यं तत्र प्रयोगः धर्मोऽपूर्वं १० मन्त्र
ष्टोः प्रमिति दृष्ट्या मर्त्यात्मानो ब्राह्मणा वयमहान्न इति मन्यमानाः ११ १२ लौकिकीं गतिमिति न हि कार्यार्थिनो निर्विद्यंते को न पराभूयत इत्या

देशः कालः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः देवता यजमानस्य क्रतुधर्मश्च यन्मयाः १० तं ब्रह्म परमं साक्षाद्भगवंतमधोक्षज
मनुष्यदृष्ट्या दुःप्रज्ञाः मर्त्यात्मानो न मेनिरे ११ न ते यदोमिति प्रोचुर्न नेति च परंतप गोपाला निराशाः प्रत्येत्य तथोचुः
कृष्णरामयोः १२ तदुपाकर्ण्य भगवान् प्रहस्य जगदीश्वरः व्याजहार पुनर्गोपान् दर्शयन् लौकिकीं गति १३ मां ज्ञापय
त पत्नीभ्यः ससंकर्षणमागतं दास्यंति काममन्नं वः स्निग्धा मय्युषिता धिया १४ गत्वाथ पत्नीशालायां दृष्ट्वासीनाः
स्वलंकृताः नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् १५ नमो वो विप्रपत्नीभ्यो निबोधत वचांसि नः इतोऽविदूरे चर
ता कृष्णेनेषिता वयं १६ गाश्चारयन्स गोपालैः सरामो दूरमागतः बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयतां १७
श्रुत्वाच्युतमुपयातं नित्यं तद्दर्शनोत्सुकाः तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः १८

दि लोकस्थितिं दर्शयन् १३ केवलं देहेन गृहव्यवसति धिया तु मय्येवोषिताः यतो मयि स्निग्धाः अतो दास्यंतीति १४ १५ इषिताः प्रेषिताः १६
सहैव कृष्णो गोपालैः सह १७ तत्कथाक्षिप्तमनस्त्वात् तद्दर्शनोत्सुकात्वत स्तमुपयातं श्रुत्वा जातसंभ्रमा बभूवुरिति १८

राम ७२

महाभोज्यलेह्यचोष्यभेदैश्चतुर्विधं बहुगुणं संस्कारविशेषैर्बहुगुणाः रसभेदा यस्मिंस्तत् ॥ भाजनैः अमत्रैः भांडैर्वा ॥ पत्न्याः परिभिर्वार्य-
माणा अपि प्रियं श्रीकृष्णमभिसस्रुः अभिजग्मुः अप्रतिबंधे हेतुमाह समुद्रं निम्नगा नद्य इवेति ॥ १९ ॥ अत्र हेतुर्भगवतीति ॥ दीर्घं बहुकालं
श्रुतेन श्रवणेन धृत आशयो याभिस्ताः ॥ २० ॥ तथागताः सत्यो ददृशुः ॥ २१ ॥ हिरण्यवत् परिधिः परिधानं यस्य तं पीतांबरमित्यर्थः वनमाला च बर्हे
धातुभिः प्रवालैश्च नटवद्वेषो यस्य तं अनुव्रतस्य सख्युरंसे विन्यस्तो निहितो येन तं ॥ इतरेण हस्तेन लीलयाब्जं धुनानं भ्रामयंतं कर्णयो-
रुत्पले अलकाश्च कपोलौ च मुखाब्जहासो यस्य तं तं च ॥ [illegible] इतरेपि लये न मा ममनाह ॥ प्राय इति बहुशः श्रुता ये प्रियतमस्योदयाः उत्कर्षाः त एव कर्णपूराः

चतुर्विधं बहुगुणमन्नमादाय भाजनैः ॥ अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः ॥ १९ ॥ निषिध्यमानाः पतिभिः भ्रातृभि-
र्बंधुभिः सुतैः ॥ भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः ॥ २० ॥ यमुनोपवनेऽशोकनवपल्लवमंडिते ॥ विचरंतं वृतं गोपैः
साग्रजं ददृशुः स्त्रियः ॥ २१ ॥ श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे ॥ विन्यस्तहस्तमितरेण धुनानमब्जं
कर्णोत्पलालककपोलमुखाब्जहासं ॥ २२ ॥ प्रायःश्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः ॥ अंतः
प्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेंद्र ॥ २३ ॥ तास्तथा त्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया ॥ विज्ञायाखि-

कर्णपूरं यंति कृतार्थं कुर्वंतीति तथा तैः कर्णाभरणैरिति वा यस्मिन् श्रीकृष्णे निमग्नमनसः आ लदृग्द्रष्टा प्राह प्रहसिताननः ॥ २४ ॥
विस्मृतचेतसः लोचनद्वारैरंतः प्रवेश्य सुचिरं परिरभ्य तापमहंकारजं अभिमतयोऽहंवृत्तयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिंल्लयं प्राप्य यथेति
अखिलदृग्द्रष्टा सर्वबुद्धिसाक्षी तासां तथाभावं विज्ञायापि तथैव तत आह द्वाभ्यां त्यक्तसर्वाशाः त्यक्ताः सर्वा आशा याभिस्ताः ॥ केवलमात्मानः स्वस्य

२०१
७४

हे महाभागाः वः स्वागतं शोभनमागमनं ।। तदेवाह ।। यत् यस्मात् प्रतिबंधतिरस्कारेणास्मान् दिदृक्षया प्राप्ताः इति इदं वः उपपन्नं संपन्नं युक्तमि
तिवा ।। २५ ।। फलं त्वमाह ।। नन्विति ।। आत्मप्रिये आत्मा च प्रियश्च तस्मिन् मयि कुशलाः विवेकिनः तएव स्वस्यात्मनोऽर्थं पश्यंति ये ते यथावद्भक्तिं
कुर्वंतीत्यर्थः तदाह ।। अहैतुकीति ।। अहैतुकीं फलाभिसंधिरहितां तथा अव्यवहितां निरंतरां ।। २६ ।। आत्मनः सर्वेषां प्रेष्ठत्व
मुपपादयति ।। प्राणेति ।। स्वात्मा देहः ।। एते सर्वे यत्संपर्कान्यस्याध्यासेन उपकरणत्वेन वा ।। २७ ।। तत्तस्मात्कृतार्थाः यूयं यात देवयजनं

स्वागतं वो महाभागा आस्यतां करवाम किं । यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि वः ।। २५ ।। नन्वद्धा मयि कुर्वंति कुशलाः
स्वार्थदर्शिनः ।। अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा ।। २६ ।। प्राणबुद्धिमनः स्वात्मदारापत्यधनादयः ।। यत्संपर्का
त्प्रिया आसंस्ततः को न्वपरः प्रियः ।। २७ ।। तद्यात देवयजनं पतयो वो द्विजातयः ।। स्वसत्रं पारयिष्यंति युष्माभिर्गृहमे
धिनः ।। २८ ।। पत्न्य ऊचुः ।। मैवं विभोऽर्हति भगवान् गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलं ।। प्राप्ता वयं तुलसिदाम पदा
वसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून् ।। २९ ।। गृह्णंति नो न पतयः पितरौ सुता वा न भ्रातृबंधुसुहृदः कुत एव चा
न्ये ।। तस्माद्भवत्प्रपदयोः पतितात्मनां नो नान्या भवेद्गतिररिंदम तद्विधेहि ।। ३० ।।

यत्तत्त्वारं गच्छत ।। कृतार्थाः किमिति यस्मान्मय्य इति चेत् अत आह ।। पतय इति पारयिष्यंति समापयिष्यंति पतीनामनुग्रहायेत्यर्थः ।। २८ ।। नृशंसं परुषमनि
गमं प्रतिज्ञां न मे भक्तः प्रणश्यतीति वेदं वा नस्मापुनरावर्तंत इति ।। यदावत्तस्मात्स्वपदेनया विरक्तं वक्षुमानेन केशैर्निवोढुं दासी भवितुं ।। २९ ।। किं
न गृह्णंति नोस्मान् हे अरिंदम कामलोभपापादिदमन भवतः पादाग्रयोर्निपतितदेहानां अन्या स्वर्गादिगतिरपि न भवेत् माभूत् तस्माद्दास्यमेव विधे

राम
७४

मयात्तु येनाऽभूत्तत्त्वनाः प्रत्यक्षं देवानुग्रहं दर्शयाह ॥ देवा अपीति ॥ २ ॥ तथापि त्वां त्यक्तुं न शक्नुमः इति वेत्तत्राह नेति प्रीतये त्त्वां वाय ॥ अत्र तु गा यद्वे
हृदृष्ट्वे अग्रं गत्वाः आगाम्यां दृष्टाः ॥ २१ ॥ अनत्तु एवः अरोपदृष्टयः ॥ २२ ॥ देह मिति ॥ नदी यदेदृह तत्र विहायैवेतन्येन भगवंतं प्राप्येत्यर्थः ॥ २४ ॥ गत
शीघ्रत्र अनुकुर्वन् ॥ गोगोपगोपीनामिति कर्मणिषष्ठी ॥ रूपवाकृकृतैः रूपेणवावान्नते श्वरस्तेश्वरमयन ॥ तानू रमयितुं रेमे इत्यर्थः ॥ २६ ॥ अत्र
स्मिति प्रकारमाह ॥ नरात्तु कारणवतो विश्वेश्वरयोर्धीम्नापयन्नु अहन्महतन्वैतः नत्कता गमो वयमित्यत्तु स्मृत्येति ॥ तदाच मार्याः गृहान्निवमानयेतो

श्रीभगवानुवाच ॥ पतयो नाभ्यसूयेरन्नित्य प्रातर्हतादयः ॥ लोकाश्च ये पयोपेता देवोऽभ्युपमन्यते ॥ २ ॥ नश्रीत येत्तु गायपत्धग
सगोत्त्रगामिह ॥ तन्मनो मयि युञ्जाना अचिरान्मामवाप्स्यथ ॥ २३ ॥ श्रवणादर्शनाध्यानान्मयि भावोऽनुकीर्तनात् ॥ न तथा सन्नि
कर्षेण प्रतियात ततो गृहान् ॥ इत्युक्ता द्विजपत्न्यस्ता यज्ञवाटं पुनर्गताः ॥ ते चाः नसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥ २५ ॥ त
त्रैका विधृता भावा भगवंतं यथाश्रुतं ॥ हृदोपगृह्य विजहौ देहं कर्मानुबंधनं ॥ २४ ॥ भगवानपि गोविंदस्तेनैवान्नेन गोपकान् ॥ च
तुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभुः ॥ २५ ॥ एवं लीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमे गोगोपगोपीनां रमयन्रूपवाकृकृतैः
अथानुस्मृत्य विप्रास्ते अन्वतप्यन्कृतागसः ॥ यद्विश्वेश्वरयोर्याच्ञामहन्म नृविडंबयोः ॥ २७ ॥ दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिं
मलौकिकीं ॥ आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥ २८ ॥ धिग्जन्म नस्त्रिवृद्यत्तद्धिग्व्रतं धिग्बहुज्ञतां ॥ [illegible] धिक्कुलं

भगवद्भक्तिरहितमात्मानं व्यनिंदन्नित्याह ॥ दृष्ट्वेति ॥ अलौकिकीं लोकातीतां ॥ २४ ॥ त्रिवृत् ॥ धिक्क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥ २९ ॥ नाम ॥
न शौक्लं सावित्रं दैक्षमिति त्रिगुणितं जन्म व्रतं ॥ ब्रह्मचर्यं क्रियाः कर्माणि ॥ दाक्ष्यं च क्रियादाक्ष्यमित्येकं वा परं धिगित्यधिक्षेपे ॥ ये च यदधोक्षजे विमुखा हे

४० योः विध्यतअच्छिनंतत्रतदुरंतंभवं भक्तिंपश्यतनेति ४१ द्विजातिसंस्कारउपनयनंनन्निवासोपासंध्योपासनादयः ४२ स्वात्मदोषापवर्गेणाचावल्पागवीदित्या

नूनंभगवतोमायायोगिनामपिमोहिनी यद्वयंगुरवोनृणांस्वार्थेमुह्यामहेद्विजाः ४० अहोपश्यतनारीणामपिकृष्णेजगद्गुरौ दुरंतभावं
योविध्यन्मृत्युपाशान्गृहाभिधान् ४१ नासांद्विजातिसंस्कारोननिवासोगुरावपि नूनंस्वार्थविमूढानांप्रमत्तानांगृहेहया अ
होनःस्मारयामासगोपवाक्यैःसतांगतिः ४४ नान्यथापूर्णकामस्यकैवल्याद्याशिषांपते ईशितव्यैःकिमस्माभिरीशस्यैत
द्विडंबनं ४५ हित्वान्यान्भजतेयंश्रीःपादस्पर्शाशयासकृत् आत्मदोषापवर्गेणतद्याञ्चाजनमोहिनी ४६ देशःकालः
पृथग्द्रव्यंमंत्रतंत्रर्त्विजोग्नयः देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः ४७ सएवभगवान्साक्षाद्विष्णुर्योगेश्वरेश्वरः जा
तोयदुष्वित्याशृण्महापिमूढानविद्महे ४८ अहोवयंधन्यतमायेषांनस्तादृशीःस्त्रियः भक्त्यायासांमतिर्जाताअस्माकंनि
श्चलाहरौ ४९ नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे यन्मायामोहिताधियोभ्रमामःकर्मवर्त्मसु ५० सवैनआद्यःपु
रुषःस्वमायामोहितात्मनां अविज्ञातानुभावानांक्षंतुमर्हत्यतिक्रमं ५१ इतिस्वाघमनुस्मृत्यकृष्णेतेकृतहेलनाः दिदृ
क्षवोव्रजमथकंसाद्भीतानचाचलन् ॥ ५२ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे विप्रपत्न्युद्धरणंनामत्र

गेन ॥ ४६ ॥ इत्यश्रृण्म एवंसर्वत्रश्रुतवंतोवयंहितथापीति ॥ ४८ ॥ ५१ ॥ नचाचलन्तयोर्दर्शनायनजग्मुः योविंशतितमोऽध्यायः

॥ ॥ ५२ ॥ इति श्रीभागवते दशमस्कंधेटीकायांत्रयोरशाध्यायः ॥ ॥ २३ ॥ ॥ ॥ ॥

व्रतविशेषमहं द्रष्टुमस्मत्प्रयावर्त्तहेतुभिः ॥ कल्पः प्रवर्त्तयामासगोवर्द्धनमखोत्सवं ॥ ॥ भूगणान्क्रियागर्व्वनिरस्तं हत्वेषुच ॥ मद्यवत्कार भंगायतनम्
रवितमवारयत् ॥ १ ॥ व्रात्रस्तगाः कं प्राह्नीनाः स्वाश्रमस्थाएव भगवं तमभजत्तु भगवानपितत्रैव निवसन्निन्द्रयागकृतोद्यमान्गोपानपश्यदितिसम्बं
धः ॥ १ ॥ २ ॥ वृथा संभ्रमो न भवति सर्व्वोपिपितिवेत एवं चेत्क्रिमत्र फलं कादेवता केनाधिकारिणा केन वा साधनेन साध्यते ॥ एतत्तद्ब्रूहि महान्तु का
मो मम श्रवणे वर्त्तते ॥ यद्वा ॥ तद्वा ॥ तव महान्कामो हे पितः इति तत्र स्थितं प्रत्याह ॥ नेति सर्व्वात्मदृष्टीनां ॥ ४ ॥ अत एव न विद्यते स्वितः परइति दृष्टिर्ये

शुक उवाच ॥ भगवानपि तत्रैव बलदेवेन संयुतः ॥ अपश्यन्निवसन्गोपानिन्द्रयागकृतोद्यमान् ॥ १ ॥ तदभिज्ञोपि भगवान्सर्वा
त्मा सर्वदर्शनः ॥ प्रश्रयावनतोपृच्छद्वृद्धान्नंदपुरोगमान् ॥ २ ॥ कथ्यतां मे पितः कोयं संभ्रमो व उपागतः ॥ किं फलं कस्य
वोद्देशः केन वा साध्यते मखः ॥ ३ ॥ एतद्ब्रूहि महान्कामो मह्यं शुश्रूषवे पितः ॥ नहि गोप्यं हि साधूनां कृत्यं सर्वात्मनामिह ॥ ४
अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां ॥ उदासीनोरिवद्वर्ज्य आत्मवत्सुहृदुच्यते ॥ ५ ॥ ज्ञात्वाज्ञात्वा च कर्माणि जनोयमनुति
ष्ठति ॥ विदुषः कर्मसिद्धिः स्यात्तथा विदुषो भवेत् ॥ ६ ॥ तत्र तावत्क्रियायोगो भवतां किं विचारितः ॥ अथवा लौकिकस्तन्मे पृष्टः साधु

यां परइति दृष्ट्यभावादेव तद्भेदाभिप्रायोपि येषामस्तीत्याह ॥ अमित्रेति न मित्रं उदास्त उदासीनो विद्विट् येषां हत्तमेवं कर्म न गोपनीयं किं भण्यतां ॥ ७ ॥
विद्विट् इत्यर्थः सत्यपि भेददर्शने उदासीनः शत्रुवद्वर्ज्यः आत्मतुल्यत्वात्सुहृत्तमः तेषु न वर्जनीयः इत्याह ॥ उदासीन इति ॥ ५ ॥ किं च ज्ञात्वेति अज्ञात्वा तत्र विदु
षो यथा तत्कर्मफलं स्यात् ॥ ६ ॥ भवतामयं क्रियायोगः शास्त्रतो निर्विचारितः प्रवृत्तो लौकिक आचारप्राप्तो वेति ॥ साधुसोपपत्तिकं भण्यतां कथ्यतामिति ॥ ७

१०५ आचारप्राप्तएवेति सहेतुकमाह पर्जन्यइति आत्ममूर्त्तयः प्रियामूर्त्तयः ८ ततः किमतआह तइति तमिंद्रंवायुर्वा मेघानांतद्वेतमानहृष्टिपयसा
७६ ९ उपजीवंतिजीविकांकल्पयंतिधर्मार्थकामसिद्धये नतुकृष्यादिभिर्जीवितंकिमिंद्रेणतत्राह शुभामिति फलभावनः फलसाधकः पर्जन्यं
विनाकृष्यादिवैफल्यादित्यर्थः १०।११ इंद्रायमन्युंजनयन्निति कोपजननद्वाराराणवपर्वतादिष्वमवतानाममानिराकारणांनत्वेयमेवाभिप्रायइत्यर्थः

नं ८ उ० च पर्जन्योभगवानिंद्रोमेघास्तस्यात्ममूर्त्तयः तेभिवर्षंतिभूतानांप्राणानंजीवनंपयः ८ ततातवयमन्येवावायुं .
वांपतिमीश्वरं इज्यैस्तैर्देतपसासिद्धैर्यजंतेक्रतुभिर्नराः ९ तच्छेषेणोपजीवंतित्रिवर्गफलहेतवे शुभासुरूपकारणा
पर्जन्यःफलभावनः १० यएवंविसृजेद्धर्मंपारंपर्यागतंनरः कामाद्वाभाद्वयाद्वेषात्सवैनाप्नोतिशोभनं ११ श्रु० उ०
वचातिशाप्यनंदस्यतथान्येषांद्विजोत्तमा इंद्रायमन्युंजनयन्नितरश्चाहकेशवः १२ श्री० भ० उ० वा० कर्मणाजाय
तेजंतुःकर्मणैवविलीयते सुखंदुःखंभयंक्षेमंकर्मणैवाभिपद्यते १३ अस्तिवेदीश्वरःकश्चित्फलदस्त्यस्यकर्म
णः कर्त्तारंभजतेसोपिनत्वकर्त्तुःप्रभुर्हिसः १४

१२ प्रथमंतावत्कर्मवादेनदेवान्निराकरोति कर्मणेति नतुजडात्कर्मणःकेव
लात्कथंफलसिद्धिःस्यादाशंक्याहो अश्लीलितमीमांसकानां मतमितिविलसितश्रद्धाकर्मणःफलकारणत्वेवचनतोवगते किंततोऽत्रपपन्नमाम १३ राम
केचित्तुनरतिसाहप्रभीताःकर्मपरतंत्रमीश्वरमन्यंतेतन्मतमत्रद्यन्निराकरोति अस्तिवेदितिस्वयंकर्मभिमान्येषांजीवानांकर्मणांफलरूपी ७६
फलदातांकर्त्तारंभजते तत्कर्मफलदानेन १४

अतः कर्मणामेव फलसिद्धेस्तत्स्वातंत्र्ये च अजागलस्तनवदल्पत्वान्न देवतायाः कृत्यमित्याह किमिंद्रेणेति नन्वकर्मणोपि प्रवृत्तिरंतर्याम्यपेक्षैव
कथं सर्वथा देवताया अनुपयोग इत्याशंक्याह स्वभावविहितमिति स्वभावेन प्राक्तनसंस्कारेणैव विहितं यत्कर्म तदन्यथा कर्तुमनीशेन
एतद्विवृणोति स्वभावतंत्र इति प्रवृत्तेः संस्काराधीनत्वात्किमंतर्यामिणेत्यर्थः १६ तस्मात्स्वभावतो निष्पन्नस्य कर्मण एव सर्वैककारणत्वात्कर्मैव

किमिंद्रेणेह भूतानां स्वस्वकर्मानुवर्त्तिनां ॥ अनीशेनान्यथा कर्तुं स्वभावविहितं नृणां ॥ १५ ॥ स्वभावतंत्रो हि जनः स्वभावमनुव
र्त्तते ॥ स्वभावस्थमिदं सर्वं सदेवासुरमानुषं ॥ १६ ॥ देहानुच्चावचाञ्जंतुः प्राप्योत्सृजति कर्मणा ॥ शत्रुर्मित्रमुदासीनः कर्मैव गु
रुरीश्वरः ॥ १७ ॥ तस्मात्संपूजयेत्कर्म स्वभावः स्वस्वकर्मकृत ॥ अंजसा येन वर्त्तेत तदेवास्य हि दैवतं ॥ १८ ॥ आजीव्यैकतरं भावं य
स्त्वन्यमुपजीवति ॥ न तस्माद्विंदते क्षेमं जारं नार्यसती यथा ॥ १९ ॥ वर्त्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः ॥ वैश्यस्तु वार्तया जीवे
च्छूद्रस्तु द्विजसेवया ॥ २० ॥ कृषिवाणिज्यगोरक्षा कुशीदं तुर्यमुच्यते ॥ वार्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिश ॥ २१ ॥

पूज्यमित्याह देहानिति सार्द्धेन १७ संपूजयेत्सम्मानयेत् ननु देवताद्वेषेण तद्धर्मत्यागाद्धात्मकत्वात्कर्मणः कथं देवतां विना सिद्धिरित्याशंक्य कर्मणामात्र
देवतेति पक्षमुपसंहरति वहद्भवाः स्माश्रित्यान्यामेव देवतां समर्थयते अंजसेति १८ हेतुबलेनैव विपक्षे दोषमाह आजीव्येति उपजीवति सेवते
स्वधर्मवत्तो देशान्तरेण वर्णानां वृत्तिभेदमाह वर्त्तेति ब्राह्मणो वेदाध्यापनादिना २० वैश्यवृत्तेश्चातुर्विध्यमाह कृषीति कृषिवाणिज्यसहिता गोर

२०१
७७

न तु गवामपि तृप्तिर्महेन्द्राधीनेत्याशंक्य गिरिगोब्राह्मणानां व्यमतामध्येयेणानिराघ्नोतेति सर्वमितिश्लोकद्वयेन अन्योन्यं हि वीरुधपयोगेन १२ सर्वतः
निमतडुशिलोषरादिष्वपि तृप्तिर्गवां नान्यथेषविकत्वं हेतृतेति भावः तेरेवमेघेरेवसिध्यंतिजीवति १३ तथापरियोगक्षेमार्थं देवतापेक्षेतिवे
दत्त आह ततः इति पुरः पत्तनानि जनपदादेशाः अस्माकं योगक्षेमहेतवे वनशैलादय एव इति भावः ब्राह्मणानपि संगृह्णन्नाह निगमयति

सत्त्वं रजस्तम इति स्थितिसृत्यन्तहेतवः रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत् १२ रजसा चोदिता मेघा वर्षंत्यंबूनि सर्वतः
प्रजास्तैरेव सिध्यंति महेन्द्रः किं करिष्यति १३ नतः पुरोजनपदानग्रामानगृहा वयं वनौकसस्तात नित्यं वनशैलनिवासि
नः १४ तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः यदृद्धयागसंभाराः तैरयं साध्यतां मखः १५ पच्यन्तां विविधाः पाकाः स
पाताः पायसादयः मयावाद्ययशाकल्पः सर्वदोहश्च गृह्यतां १६ हूयतामग्नयः सम्यक् ब्राह्मणोत्तैर्ब्रह्मवादिभिः अन्नं वस्त्रं वि
धंते भ्योदेयं चाधेनुदक्षिणा १७ अन्येभ्यश्चाश्वचांडालपतितेभ्यो यथार्हतः यवसं च गवां दत्वा गिरये दीयतां बलिः १८ स्वलंकृ
ताः कृतवंतश्च अनुलिप्ताः सुवाससः प्रदक्षिणं च कुरुत गो विप्रानलपर्वतान् १९ एतन्मम मतं तात क्रियतां यदि रोचते अयं गो

२४ तस्मादिति स्वयमुत्सेक्षितयागस्य योगकल्पनामाह यदृद्धसंभारा इति मार्हपयादिभिः संभाराः सा ब्राह्मणादीनां मत्यथ वदयितेति भावः २०
धनानि २५ सूपमोदनं पायसं केवलेपयसि पक्वं तथावारयोः गोधूमादिविविक्तिषान्नं सहश्च सूपपायसयोः सूत्यादहस्रार्थं सोन्यपापाठतः २६ याग
योमार्थं श्रद्धोत्याह नार्थं वाह हूयतामिति धेनुदक्षिणाः धेनुसहिते दक्षिणा तत एव या दक्षिणाः वः एभ्याभिः २७ यवसं तृणं २८ सर्वान्नगिरः कंपेन राम
७७

तद्द्रव्येनतेनमहेंद्रमखद्रव्येणगिरिद्विजान्प्रतियथायथं ।।३२।। वलीन्उपहृत्यदत्वाआदृताः सादराः ।।३३।। अनडुद्युक्तानिउत्तमानड्डुहिर्युक्ता
नि ।। सद्वजाशिषः द्विजाशीर्भिः सहिताः ।।३४।। गोपविश्रंभणंगोपानांविश्वासजनकंरूपंगतःप्राप्तःसन्बलिमुपहारमादत् ३५ ।। अभक्षयत्

श्रीशुक उवाच ।। कालात्मनाभगवताशक्रदर्पजिघांसया ।। प्रोक्तंनिशम्यनंदाद्याः साध्वगृह्णंततद्वचः ।।३१।। तथाचव्यदधुः सर्वं
यथाहमधुसूदनः ।। वाचयित्वास्वस्त्ययनंतद्द्रव्येणगिरिद्विजान् ।।३२।। उपहृत्यवलीन्सम्यगादृतायवसंगवां ।। गोधना
निपुरस्कृत्यगिरिंचक्रुः प्रदक्षिणं ।।३३।। अनांस्यनडुद्युक्तानितेचारुह्यस्वलंकृताः ।। गोप्यश्चकृष्णवीर्याणिगायंत्यः सद्विजा
शिषः ।।३४।। कृष्णस्त्वन्यतमंरूपंगोपविश्रंभणंगतः ।। शैलोस्मीतिब्रुवन्भूरिबलिमादद्बृहद्वपुः ।।३५।। तस्मैनमोव्रजजनैः स
हचक्रेत्मनात्मने ।। अहोपश्यतशैलोसौरूपीनोनुग्रहंव्यधात् ।।३६।। एषोवजानतोमर्त्यान्कामरूपीवनौकसः ।। हंतिह्यस्मै
नमस्यामः शर्मणेआत्मनोगवां ।।३७।। इत्यद्रिगोद्विजमखंवासुदेवप्रणोदिताः ।। यथाविधायतेगोपाः सहकृष्णाव्रजंययुः
।।३८।। इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्विंशतितमोध्यायः ।।

३५ ।। तस्मैआत्मनेआत्मनात्मीयंव्रजजनैः सहनमश्चक्रे ।। अहोइतिसार्द्धश्लोकंपठन् ३६ ।। कामरूपीसर्पादिरूपः अस्मैअद्रये ।। शर्मणेक्षेमाय ३७ ।। कर्मै
बालं ।। साकल्यमप्राप्यगणोवा ।। कर्मगावा ।। तद्दृशोवामहेंद्रः कर्त्ताकर्त्तीदेवतेतीदंउन्मादेवंश्रीमद्यतीतिनत्वभीष्मा ३८ ।। इति दशमे चतुर्विंशोध्यायः

२·१
७८

पंचविंशे तु पाशानां व्रजनाशाय वर्षति अहृत्यगिरिमासाद्य रक्षाहो कलयाप्रभुः ॥ १ ॥ कृष्णो नाथो येषां तेभ्यः क्रुद्धः सन्निंद्रः संवर्तकं नाम संवर्तः प्रलयः तत्कर्तारं मेघानां गणं प्रति इंद्रगणं प्रचोदयत् प्रेषयामास ननु कथं कृष्णनाथानां घाते प्रवृत्त इत्याशंक्यात्मसंभावनया निरस्तविवेकत्वादित्याशयेनाह वाक्यं वाहेत्यादि पंचभिः ईशमानी अहमेवेश्वर इति गर्ववान् ॥ १ ॥ देवहेलनं देवस्य ममावज्ञां ॥ ३ ॥ अदृढैः अप्रमर्थैः कर्ममयैः क्रियानिर्वर्त्यैः अत एव नामनौनिभैः नाममात्रेणाध्यानावरति व्यवहियतत्तत्सदृशैः आन्वीक्षिकी मात्मात्तु स्मृतिरूपा ॥ ४ ॥ तथा वाचालं बहुभाषिणं बालिशं शिशुं पंडितमा

श्रीशुक उवाच ॥ इंद्रस्तदात्मनः पूजां विज्ञाय विहतां नृप । गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप सः ॥ १ ॥ गणं संवर्तकं नाम मेघानां चांतकारिणां ॥ इंद्रः प्राचोदयत्क्रुद्धो वाक्यं चाहेशमान्युत ॥ २ ॥ अहो श्रीमदमाहात्म्यं गोपानां काननौकसां ॥ कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनं ॥ ३ ॥ यथादृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः ॥ विद्यामान्वीक्षिकीं हित्वा तितीर्षंति भवार्णवं ॥ ४ ॥ वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं ॥ कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं ॥ ५ ॥ एषां श्रियावलिप्तानां कृष्णेनाध्मापितात्मनां ॥ धुनुत श्रीमद स्तंभं पशून्नयत संक्षयं ॥ ६ ॥

निनं पांडितमन्यं अत एव स्तब्धमविनीतमिति निंदायां योजितां पीडयम्मारती श्रीकृष्णं स्तौति तथाहि वाचावाल शास्त्रयोनिं बालिशं एवमपि शिशुं निरभिमानिनं स्तब्धमनन्यस्य वंद्यस्याभावात् न प्रह्वं अज्ञं नास्ति ज्ञातव्यं यस्मात्तं सर्ववेत्तारं नित्यपूर्णः पंडितमानिनं ब्रह्मविदां बहुमाननीयं कृष्णं महांतं स्वरूपं परं ब्रह्म मर्त्यं तथापि भक्तवात्सल्येन मनुष्यतया प्रतीयमानमिति ॥ ५ ॥ अवलिप्तानां मत्तानां ध्मापितात्मनां संहितदेहानां धुनुत अपनयत श्रीमदेन यत्स्तंभं भोगवात्मा ॥ ६ ॥

राम
७८

विप्लुतः तान् प्रत्याह ॥ अहं वेति अस्तु व्रजे अस्तु अनंतरमेवाभयमियिष्यामि ॥ महत्त्वैः देवगणैः सह ॥ ७ ॥ मघवता इंद्रेण निर्मुक्तं वंधनं येषां ते ॥ प्रलयायापि प्रायेण वर्द्धा
आसन् तदा निर्मुक्तवंधना मेघास्ततः आसारैः धारासंपातैः पीडयामासुः ॥ ८ ॥ तेन पिन्नमिरशनिभिः स्तनयंतः गर्जंतः महत्त्वैः आवहप्रवहादिवायुभिः मेघैः प्रेरिताः प्रे
रिताः जलशर्करैः जलोपलशर्करैः ॥ ९ ॥ जलोपलस्थूलेनावस्थूला ॥ अथ श्रेष्ठसुवन्हनतो वनतनिम्नरूपत्वात तद्विपरीतं निम्नरूपतात तद्विपरीतं तथा भवति तथापि नो

अहं वेगावतं नागमाहत्य व्रजेव्रजं ॥ महद्गणैर्महावीर्यै नंदगोपजिघांसया ॥ ७ ॥ श्रीकृष्ण उवाच ॥ इत्थं मघवता तत्र मेघा निर्मुक्तवंधनाः
नंदगोकुलमासारैः पीडयामासुरोजसा ॥ ८ ॥ विद्युत्पाताविद्युद्भिर्नैदृतः स्तनयित्नुभिः ॥ तीव्रैर्मरुद्गणोद्भूतैरावहज्जलशर्करैः ॥ ९ ॥
स्थूणास्थूलावर्षधारा मुंचत्स्वभ्रेषु भीक्ष्णशः ॥ जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतं ॥ १० ॥ अत्यासारातिवातेन पशवो जातवेपनाः
गोपा गोप्यश्च शीतार्त्ता गोविंदं शरणं ययुः ॥ ११ ॥ शिरः सुतांश्च कायेन प्रच्छाद्यासारपीडिताः ॥ वेपमाना भगवतः पादमूलमुपाययुः
१२ ॥ कृष्ण कृष्ण महाभाग त्वं नाथो गोकुलप्रभो ॥ त्रातुमर्हसि देवान्नः कुपिताच्छक्रवत्सल ॥ १३ ॥ शिलावर्षनिपातेन हन्यमानमचेत
नं ॥ निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः ॥ १४ ॥ अपर्त्त्वत्युल्वणं वर्षमतिवातं शिलामयं ॥ स्वयागे निहतेस्माभिरिंद्रो नाशाय वर्षति ॥ १५
तत्र प्रतिविधिं सम्यगात्मयोगेन साधये ॥ लोके समानिनो मौढ्याद्धरिष्ये श्रीमदं तमः ॥ १६ ॥ श्रीकृष्ण महाहरहनो ॥

हृष्यत ॥ १० ॥ जातवेपना जातकंपाः ॥ ११ ॥ तत्र पञ्चमं नायातं विशिनष्टि शिर इति ॥ गोपीनां प्रार्थनमाह ॥ कृष्ण कृष्णेति त्वमेव नाथो यस्मात् तस्माद्गोकुलं गवां कुलं वंशो नः अस्माक
देवात् इंद्रात् रक्षितुमर्हसि ॥ १३ ॥ विज्ञापनात् पूर्वमेव कुपितेनेंद्रेणाहृतं तत् दृष्ट्वा मेने ॥ तदाह ॥ अपर्त्त्विति अपगत ऋतुर्यस्मात् तत् वर्षं अतिशयितो यस्मिन् तत् अतिवातं शिला
मयं शिलाबहुलं तत्र प्रतिविधिं पूर्वं गोवर्द्धनोद्धरणमाह ॥ तत्रेति प्रतिविधिं प्रतीकारं स्वमात्मयोगेन साधयिष्यामि ॥ तेन च मौढ्यादज्ञानात् ईशमानिनां श्रीमदलक्षणं तमो हरि

नतु देवाः सात्विकाः त्वद्भक्ताश्च कृतं तेषां तमस्तत्राह । नहीति सद्भावः सत्वं सद्भक्तिर्वा तद्युक्तानां सुराणामीशावयमिति विस्मयो गर्वो हि यस्मात्त्र
धैरतेऽस्वतोः सतां तेकिंचितेषां मानभंगोऽनुग्रह एवेति ।। १७ ।। गोपाये रक्षयिष्यामि ।। किंच सोयं मे मया व्रतो नियमः संकल्पो वा आहितः धृत इत्यर्थः

नहि सद्भावयुक्तानां सुराणामीशविस्मयः ।। मत्तोऽसतां मानभंगः प्रशमायोपकल्पते ।। १७ ।। तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहं । गोपाये स्वात्मयोगेन सोयं मे व्रत आहितः ।। १८ ।। इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्द्धनाचलं ।। दधार लीलया कृष्णः छत्राकमिव बालकः ।। १९ ।। अथाह भगवान्गोपान्हेऽब तात व्रजौकसः ।। यथोपजोषं विशत गिरिगर्त्तं सगोधनाः ।। २० ।। न त्रास इह वः कार्यो मद्धस्तादिनिपातने ।। वातवर्षभयेनालं तत्त्राणं विहितं हि वः ।। २१ ।। तथा निर्विविशुर्गर्त्तं कृष्णाश्वासितमानसाः ।। यथावकाशं सधनाः सव्रजाः सोपजीविनः ।। २२ ।। क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः ।। वीक्ष्यमाणो दधावद्रिं सप्ताहं नाचलत्पदात् ।। २३ ।। कृष्णयोगानुभावं तं निशाम्येन्द्रोऽतिविस्मितः ।। निस्तंभो भ्रष्टसंकल्पः स्वान्मेघान्सन्न्यवारयत् ।। २४ ।। खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणं ।। निशाम्योपरतं गोपान्गोवर्द्धनधरोऽब्रवीत् ।। २५ ।। निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः ।। उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः ।। २६ ।।

१८ कृत्वा उत्क्षिप्य छत्राकं शिलीध्रं यथा ।। १९ ।। यथोपजोषं यथासुखं ।। २० ।। सव्रजाः शकटमंडलीसहिताः सोपजीविनः भृत्यपुरोहितादिसहिताः पाम
।। २२ ।। पदात्स्थानात् ।। २३ ।। २५ ।। व्युदप्रायाः विगतोदकप्रायाः ।। स्वल्पजला इत्यर्थः ।। २६ ।।

शकटोरोपकरणं शकटैरूढमुपकरणं यथा भवति तथा ॥ २७ ॥ निःसृताः पूर्णाय यथायथो विजितं परिरंभणादिभिः समीयुः उपजग्मुः सदाशि
षः श्रेष्ठानाशीर्वादान् ॥ २९ ॥ ततो गोवर्द्धनस्थानात् अस्य श्रीकृष्णस्य तथाविधानि गोवर्द्धनोद्धरणादिरूपाणि कृतानि कर्माणि गायंत्यः ईयुः
ययुः कथंभूताः एवं प्रेम्णा हरिस्पर्शनीतिहृदिस्पृशः ततः पद्माकथंभूतस्य प्रेम्णा त्वेन तासां हृदिस्पृशनीति हृदिस्पृक्तस्य ॥ ३३ ॥ इति श्रीम

ततस्ते निर्ययुर्गोपाः स्वंस्वमादाय गोधनं । शकटोढोपकरणं स्त्रीबालस्थविराः शनैः ॥ २७ ॥ भगवानपि तं शैलं स्वस्थाने पू
र्ववत्प्रभुः । पश्यतां सर्वभूतानां स्थापयामास लीलया ॥ २८ ॥ तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरंभणा
दिभिः । गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः ॥ २९ ॥ यशोदा रोहिणी नंदो रामश्च बलिनां वरः ।
कृष्णमालिंग्य युयुजुराशिषः स्नेहकातराः ॥ ३० ॥ दिवि देवगणाः साध्याः सिद्धगंधर्वचारणाः । तुष्टुवुर्मुमुचुस्तुष्टाः पु
ष्पवर्षाणि पार्थिव ॥ ३१ ॥ शंखदुंदुभयो नेदुर्दिवि देवप्रणोदिताः । जगुर्गंधर्वपतयस्तुंबरुप्रमुखा नृप ॥ ३२ ॥ ततोऽनुरक्तैः पशुपैः
परिश्रितो राजन्स गोष्ठं सबलोऽव्रजद्धरिः । तथाविधान्यस्य कृतानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ॥ ३३ ॥ इति श्रीभागवते महापुराणे द
शमस्कंधे पंचविंशतितमोऽध्यायः ॥ श्रीशुक उवाच ॥ एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते । अतद्वीर्यविदः प्रोचुः समभ्येत्य सुविस्मिता

पंचविंशः ॥ षड्विंशे विस्मितान्गोपान्कृष्णस्याद्भुतकर्मभिः । बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै ॥ कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितं १
नंदे गर्गोक्तिमाश्रुत्यैश्वर्यमवर्णयन् ॥ समभ्येत्य नंदमभिगम्य ॥ यदुक्तं तदाह बालकस्येति ॥ यद्यस्मादद्भुतानि कर्माणि तस्माद्ग्राम्येषु कथं जन्मार्हतीत्या
त्मजुगुप्सितं आत्मनेहं २

२०१ अद्भुतानि कर्माण्याह द्वादशभिः यः सप्तहायन इति । कथं बिभ्रत् स्थित इति पुष्करं पद्मं गजराट् महागज इव ३ महौजसः महाबलायाः
८० तनोः वयः आयुः यौवनं वा कालेन यथा पीयते तद्वत् । कथमित्यत उद्वर्त्तेते ४ अनसः अधः शयानस्य मासस्य मासमात्राख्यः परिच्छेदकायस्य
उदक् ऊर्ध्वं चरणौ हिन्वतः चालयतः प्रपदेन पादाग्रेणाहतं विपर्यस्तं अनः कथमपतत् ५ यः दैत्येन ह्रियमाणः सन् तेन तृणावर्त्तेन दैत्यं कथं

यः सप्तहायनो बालः करेणैकेन लीलया कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ३ तोकेनास्यं मास्यस्य चरणावुदक् अनोऽपतद्वि-
पर्यस्तं रुदतः प्रपदाहतं ५ मीलिताक्षेण पूतनाया महौजसः । पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः ४ हिन्वतोऽधःशयान
एकहायन आसीनो ह्रियमाणो विहायसा । दैत्येन यस्तृणावर्त्तमहन् कण्ठग्रहातुरं ६ क्वचिद्धैयंगवस्तैन्ये मात्रा बद्ध उदूखले गच्छ-
न्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ७ वने संचारयन्वत्सान् सरामो बालकैर्वृतः । हन्तुकामं बकं दोर्भ्यां मुखतोऽरिमपाटयत् ८
वत्सेषु वत्सरूपेण प्रविशन्तं जिघांसया । हत्वा न्यपातयत्तेन कपित्थानि च लीलया ९ हत्वा रासभदैतेयं तद्बन्धूंश्च बलान्वितः
चक्रे तालवनं क्षेमं परिपक्वफलान्वितं १० आशीविषतमाहीन्द्रं दमित्वा विंग्रं बलेन बलशालिना । अमोचयद्व्रजपशून्गोपांश्चार-
ण्यवह्नितः ११ प्रलंबं घातयित्वोग्रं मदं ह्रदात् प्रसह्योद्वास्य यमुनां चक्रेऽसौ निर्विषोदकां १२ दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसां

अहन्नित्यर्थः हैयंगवः ह्यस्तनेन नवनीतचौर्ये बाहुभ्यां गच्छन् अरिमपाटयदित्यर्थः मुखतो हन्तुकामो यस्य तं । नंदतेतनयेः स्वाभाविकस्तस्माद्यात्मिकः कथं १२
बकवेषं अरिं बाहुभ्यां मुखतः कथमपाटयत् ८ ॥ आशीविषतमः अतिक्रूरविषः अतिक्रूरश्चासौ अहीन्द्रश्च तं १२ आत्यन्तिकः स्वाभाविकः कथमि-

टीका ८०

उक्तमपि श्रुतिविस्मयेनापि नयेन वर्द्धते ॥ क्वासप्तहायन इति ॥ १४ ॥ प्राकृस्तुतमेव गर्गोच्चार्यतच्चरितपरिशीलनेन निवृत्तानामभावनस्य
नंदस्य कृष्णतत्त्वावबोधो न कजातं ॥ स इदानीं तेनैव वाक्येन गोपानुद्दिशति ॥ श्रूयतामिति ॥ १५ ॥ २१ ॥ तस्मात्तस्य कर्मसु विस्मयो नास्तीति

क्वासप्तहायनो बालः क्व महाद्रिविधारणं ॥ ततो नो जायते शंका व्रजनाथ तवात्मजे ॥ १४ ॥ नंद उवाच ॥ श्रूयतां मे वचो गो-
पा व्येतु शंका च वोऽर्भके ॥ एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥ १५ ॥ वर्णास्त्रयः किलास्यासन्गृह्णतोऽनुयुगं तनूः ॥
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १६ ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः सं-
प्रचक्षते ॥ १७ ॥ बहूनि संति नामानि रूपाणि च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १८ ॥ एष वः श्रेय आ-
धास्यद्गोपगोकुलनंदनः ॥ अनेन सर्वदुर्गाणि यूयमंजस्तरि- ष्यथ ॥ १९ ॥ पुरानेन व्रजपते साधवो दस्युपीडिताः ॥ अराजके
रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः ॥ २० ॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः ॥ नारयोऽभिभवंत्येतान्विष्णुपक्षानि-
वासुराः ॥ २१ ॥ तस्मान्नंदकुमारोऽयं नारायणसमो गुणैः ॥ श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः ॥ २२ ॥ इत्यद्धा मां समादिश्य
गर्गे च स्वगृहं गते ॥ मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणं ॥ २३ ॥ इति नंदवचः श्रुत्वा गर्गगीतं व्रजौकसः ॥ दृष्टश्रुतानुभावस्य
कृष्णस्यामिततेजसः ॥ मुदिता नंदमानर्चुः कृष्णं च गतविस्मयाः ॥ २४ ॥ नंदस्योक्तिः २१ इत्यद्धा साक्षान्मां प्रति समादिश्य गर्गे स्वगृहं गते सति
तदानीं तथा मन्यमानोऽपि इदानीं कृष्णं नारायणस्यांशं मन्ये ॥ अत्र हेतुः ॥ अक्लिष्टकारिणमिति ॥ २४ ॥

२०५
८१

गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन् प्रकरिते ऐश्वर्यस्य प्रीतिप्रार्थयतो देवरति यन्नविघ्नवेदं देवर्षेनि वज्राश्मवर्षानिलैः श्रुपनिनलप्रार्थ्या रातीवस्तुभिः सीदंतः पालाः पशवः स्त्रियस्त्वात्मानं तत तथा आत्मानं त्वयैव शरणाय स्तनोष्टेट द्द्याः स्तु कंपी उत्तमयतु हमनुषोटि माविहस्तु वर्द्धनं शैल प्रत्याद्यवलीलार्थं उष्छिलिंध्रु यथा तथा एकेनकरेणाविभ्रत् दधनु गोष्टमपात्पालितवान् एवं महेंद्रमदभिन् गवामिंद्र इत्युन्नराध्य पार्थवदृत्ति सएवं प्रतः श्री कृष्णेनः प्रीयतामिति ॥ षड्विंशे दशमे व्यक्तः षड्विंशोदशमोहरिः ॥ व्यनन्त पंचविंशोऽध्यावत्र विंशतितः श्लोकाः २५ ॥

देवे वर्षति यज्ञविप्लवरुषा वज्राश्मपर्षानिलैः सीदत्पालपशु स्त्रि आत्मशरणं दृष्ट्वानुकंप्युत्स्मयन् उत्पाट्यैककरेण शैलमबलो लीलोच्छिलींध्रं यथा बिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्न इंद्रो गवां २५ ॥ इति श्री भा गव ते म हा पु रा णे द श म स्कं धे षड्विंशतितमोऽध्यायः ॥ श्री शु क उ वा च ॥ गोवर्द्धने धृते शैले आसाराद्रक्षिते व्रजे गोलोकादाव्रजत्कृष्णं सुरभिः शक्र एव च ॥ १ ॥ विविक्त उपसंगम्य व्रीडितः कृतहेलनः पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ॥ २ ॥ दृष्टश्रुतानुभावोऽस्य कृष्णस्यामिततेजसः नष्टत्रिलोकेशमद इदमाह कृताञ्जलिः ॥ ३ ॥

सप्तविंशे तदा लब्धकृष्णस्य प्रभवं परं वर्ण्यते सुरभीन्द्राभ्यामभिषेकमहोत्सवः ॥ गोवर्द्धनधृते शैल इति शक्रस्य भयेनागमने हेतुः आसाराद् रक्षिते व्रज इति सुरभेर्हर्षेणागमने तत्रेंद्र आगत्य किं कृतवानित्याह विविक्त उपसंगम्येत्यादिना त्रयाहः सुरभिरित्यतः प्राक् तेनान्वयेन विविक्त एकांते पादयोः पस्पर्श नमस्कारः ॥ २ ॥ अस्य कृष्णस्य दृष्टोऽनुभावो येन सः इंद्रः नष्टस्त्रिलोकेशोऽहमिति मदो यस्य सः ॥ ३ ॥

८१

मा
रो

तत्र मद्यां पराद्धं रूपमस्ति वक्रांतं वता तावत् परार्धो नात्मैवं वयाः तु ग्रहेएव कृतं तस्याह चतुर्भिः विशुद्धं सत्वमिति ॥ धाम स्वरूपं शांतं एकत्र रूपं
तस्य तपोमयं प्रकृष्ट ज्ञानं सर्वं ग्यमित्यर्थः ॥ क्रूतः ध्वस्तं रजस्तमसां ध्वस्ते अविद्यमाने रजस्तमसी यस्मिन् अतएव त्रयं त्र्यं अस्मदादिषु दृश्यमा
नः मायाकार्यरूपः गुणानां प्रवाहः गुणोः प्रवाहोस्ति तस्य त्रयं इत्यर्थः सतेतत्व न विद्यते यतः अनुग्रहेणोनाज्ञानेनाऽवध्यत इति ॥ तथा च
सर्वज्ञस्य तेनात्मेत्यर्थः अज्ञाने संधोवा ४ ॥ परात्मज्ञानेन तत्कृते रहसंबंधो न स्त्रेरात कृतानाते भारीनांकावार्त्तेत्याह ॥ क्रूतो त्विति ॥ तत्कृता

इं ३ ॥ च ॥ विशुद्धं सत्वं तव धाम शांतं तपोमयं ध्वस्तरजस्तमस्कं ॥ मायामयो गुणप्रवाहो न विद्यते ते नग्रहणानु
बंधः ॥ कृतोनु तद्वत्तव ईश मन्युर्लोकाः स्वयोपेक्ष धर्मलिंगभावाः ॥ तथापि दंडं भगवान् बिभर्ति धर्मस्य गुप्त्यै खलनिग्र
हाय ॥ ५ ॥ पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदंडः ॥ हिताय चेच्छातनुभिः समीहसे मानं विधुन्वन्

जगदीशमानिनां ॥ ६ ॥
नालोभारीनांकावार्त्तेत्याह ॥ कृतोत्विति तत्कृतारे हसंबंधकृताः तद्वन्नवः पुनरन्यास्य देहस्य हेतवः नच तानि
नाम पितेहशंपतेत अत आह ॥ अबुध लिंगभावाः अज्ञानिनां गमकाः यावद्रागादिमत्त्वं तावत्तानि त्वमेवनक्लिष्ट मित्यर्थः लोभाद्यभावेपि मन्मानभं
गोद्दंडार्थमित्याह ॥ अथाः पीनि ॥ ५ ॥ नचत्वं दंडेमम गोप्य अस्मत्कारणैः किंच कारणको वा दंडोमया रक्षतः स्य तत्राह ॥ पिते तिजगतां त्वं पिता जनकः
गुरुरुपदेश अधीशः नियंताइति दंड धारणे हेतुत्रयं ॥ कालत्वात् समर्थं ॥ तस्मादुपात्तदंडो लीलावतारैः समीहसे ॥ नत्व समीहा लीलैव जगदीशमानिना
मस्माकमानधून नमित्यर्थः ॥ ६ ॥

मा २

द०भू०
८२

कथमेतदित्यत आह ॥ ये इति ॥ मद्विधास्त्वेते अज्ञास्त्वेते ॥ अज्ञो जगदीशमानिनः ॥ काले समये काले पि यथाधुनैवातिदृष्ट्यो त्वां त्वं भयं भयं समगनयं तं वी
त्यज्ञा अस्तु तन्मदं जगदीशा इति मदं हित्वा विगतगर्वाः संतः आर्यमार्गं त्वदङ्घ्रिनलिनं शरणं भजंति ॥ अतस्त्वं इहैव खलेनापि मनुशासनं दंड इत्यर्थः ॥ ७ ॥
एवं भगवतस्त्वद्रूपं अपि शरण्यं वा उत्तमपदं प्रापयति ॥ सत्वमिति एवं भूतास्मत्ती मतिर्मे पुनर्मा भूदिति प्रार्थनोत्तरं ॥ ८ ॥ महानयमपराधः कथं
शंतव्य इति चेदत आह ॥ नवेति ॥ त्वयं मरणोद्भवस्य उद्भवजन्मनां वहूनां भाराणां जन्मयेभ्यः तेषां भवबाधनाशाय ॥ दुष्टदर्शणे विनाशभ

ये मद्विधास्ताज्जगदीशमानिनस्त्वावीक्ष्य काले समये पादा हि तन्मदं ॥ हित्वार्यमार्गे भजंत्यपत्यसप्तयोऽहाखलानामपि ते नु शासन
ने ॥ ७ ॥ तत्त्वं समम भेश्वर्यमदस्तु तस्य कृतागमस्ते विबुधः प्रभावं ॥ शंतु प्रयोषाहि भिष्टदेव तमोमेव पुनर्भूत्मतिरीश्वरे मती
८ ॥ तवावतारोयमधोक्षजेह स्वबोभराणामुरुभारजन्मनां ॥ चमूपतीनामभवाय देव भवाय युष्मच्चरणानुवर्तिनां
नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ वासुदेवाय कृष्णाय सात्वतां पतये नमः ॥ १० ॥ स्वच्छंदोपात्तदेहाय विशुद्धज्ञान

वायाभ्युतोऽसमस्त्वतस्तेवकत्वात्संतापराधिनोपि तत्वमिति भावः ॥ ९ ॥ रूपाय सर्वस्मै सर्ववीजाय सर्वभूतात्मने नमः ॥ ११ ॥
यत्र मस्करोति ॥ नम इति तुभ्यं भगवते कृष्णाय नमः ॥ पुरुषाय सर्वान्तर्यामिणे महात्मने अनंताय स्वत्वे अपरिच्छिन्नाय ॥ अतः वासुदेवाय सर्व
निवासाय सात्वतां यादवानां पतये ॥ १० ॥ तर्हि किं मत्कृत्यारूढ ॥ वोन स्वच्छंदोपात्तदेहाय ॥ स्वेषां भक्तानां छंदेन इच्छया आविष्कृतदेहाय ॥ तत्रापि
विशुद्धज्ञानमेव मूर्तिर्यस्य तस्मै सदा यथा सर्वस्मै जगतः सर्वस्य वीजाय कारणाय अत एव सर्वभूतात्मने नम इति ॥ ११ ॥

दाम
८२

कृतागस्त्वमित्यनेनोक्तमपराधं निवेदयति ॥ मयेदमिति ॥ आसारवायुभिर्गोष्ठनाशाय मयेदं मखात्यं विचेष्टितं कृतं ॥१२॥ तथापि सोऽहं शास्त्रयानु
गृहीतोऽस्मि अनुग्रहं दर्शयति ध्वस्तस्तंभ इति वृथोद्यम इति च ॥१३॥ इंद्रेणाभिप्राये निवेदिते भगवानपि तथैवाह ॥ मयेति ॥ इंद्रश्रिया देवरा
ज्येन ॥१५॥ वः युष्माभिर्वृद्धवचनं बहुमानेनाभिप्रायेण ॥ कं गतस्त्वं स्वर्गाधिपतिर्वै देवेश्वरस्त्वामिति चेत्तत्राह ॥ क्रियतामिति मदनुशासनेन यथा

मयेदं भगवन्गोष्ठनाशायासारवायुभिः ॥ चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना ॥१२॥ त्वयेशानुगृहीतोऽस्मि ध्वस्तस्तं
भो वृथोद्यमः ॥ ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः ॥१३॥ श्रीशुक उवाच ॥ एवं संकीर्तितः कृष्णो मघोना भगवानमुं ॥ मे
घगंभीरया वाचा प्रहसन्निदमब्रवीत् ॥१४॥ श्रीभगवानुवाच ॥ मया तेऽकारि मघवन्मखभंगोऽनुगृह्णता ॥ मदनुस्मृतये नित्यं
मत्तस्येंद्रश्रिया भृशं ॥१५॥ मामैश्वर्यश्रीमदांधो दंडपाणिं न पश्यति ॥ तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहं ॥१६॥ गम्यतां श
क्र भद्रं वः क्रियतां मेऽनुशासनं ॥ स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तंभवर्जितैः ॥१७॥ अथाह सुरभिः कृष्णमभिवंद्य मनस्विनी ॥ स्वसंता
नैरुपामंत्र्य गोपरूपिणमीश्वरं ॥१८॥ सुरभिरुवाच ॥ कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वसंभव ॥ भवता लोकनाथेन सनाथा व
यमच्युत ॥ ॥१९॥ त्वं नः परमकं दैवं त्वं न इंद्रो जगत्पते ॥ भवाय भव गोविप्रदेवानां ये च साधवः ॥२०॥

पूर्ववत्स्थीयतामित्यर्थः युक्तैः अप्रमत्तैः स्तंभवर्जितैर्निरहंकारैः ॥१७॥ स्वसंतानैर्गोभिः सह हे कृष्णेत्यादि संबोध्य इंद्रेणाहृता अपि भवता सनाथा वयं
कृताः रक्षिता इत्यर्थः ॥१९॥ त्वं नः परमं दैवं देवताः अतः हे जगत्पते गोविप्रदेवानां ये च साधवः तेषां भवाय अभ्युदयाय त्वमेवेंद्रो भव ॥२०॥

ह.वं.
८२

नत्तु भवतामिंद्रो ह्नीतिचेत्तत्राह ॥ इंद्रमिति । अलंघ्यशासनं इंद्रत्वेपत्यर्थः नतु देवेंद्रो भवति कथमहं भवेयमिति चेत्तत्राह भवतीगोर्ग्गीति ॥ १
हरिभिरात्मनः पयसाभ्यषिंचत् इंद्रश्चाकाशगंगायाजलैरभ्यषिंचत् ॥ ११ ॥ देवमातृभिरदित्यादिभिः देवमातृभिश्चेतिवा ॥ गाः पयस्रुताः स्वर्ग्गवाइंद्र
त्वेनविंदतीति कृत्वा गोविंद इत्यभिधानं नाम कृतवानित्यर्थः ॥ १२ ॥ १४ ॥ देवनिकायेषु केतवः स्वदर्शनीयाः सुख्या इत्यर्थः गावः गावश्चिवीपयोभिंद्र

इंद्रं नत्वाभिषेकार्थमाजग्मुर्ह्लादनोदितावयं ॥ भवतीगोभिर्विश्वात्मन् भूमेर्भारापनुत्तये ॥ १ ॥ एवं कृष्णमुपामंत्र्य अहस्थिभिः पयसात्मनः
जलैस्त्वाकाशगंगायाए वत्तकरोद्धृतैः ॥ १ ॥ इंद्रः सुरर्षिभिः सार्कं नोदितो देवमातृभिः ॥ अभ्यषिंचनदाशार्हं गोविंदइतिवाऽभ्यधा
त् ॥ ११ ॥ तत्रागतास्तं तुष्टुवुर्नारदाद्या गंधर्वविद्याधरसिद्धचारणाः ॥ जगुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मुदान्विताः ॥ ४
तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदागामनयन्पयोद्रुतां
नानारसौघाः सरितो वृक्षा आसन्मधुस्रुतः ॥ अकृष्टपच्यौषधयः गिरयो बिभ्रदुन्मणीन् ॥ ५ ॥ कृष्णेभिषिक्त एतानि सत्वानि
क्रूराण्यपि । निर्वैराण्यभवंस्तात तद्रूपाण्यपि विनिसर्गतः ॥ १६ ॥ इति गोगोकुलपतिं गोविंदमभिषिच्य सः ॥ अनुज्ञातो ययौ शक्रो वृतो
देवादिभिर्दिवं ॥ १७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे इंद्रस्तुतिः सप्तविंशतितमोऽध्यायः ॥

तामार्द्रीभवनपयस्रुत्तं कृत्वेत्यर्थः ॥ २५ ॥ नानारसौघाः क्षीरादिवाहिन्यः अकृष्टपच्याः कर्षणं विनैव पक्वा ओषधयो व्रीह्यादयः आसन् यद्वा अकृष्ट
पच्या ओषधयो येषु ते गिरयः उन्मणीन् ऊर्ध्वगतान् मणीन् उत्तमान् वा बिभ्रतः प्रकटान् अबिभ्रन् अबिभ्रन् ॥ २६ ॥ इति रामे नत्व दृग मः ॥ इंद्रस्त्वमसिदे
वानां त्वं गवामिंद्रतां गतः ॥ गोविंद इति लोके त्वां गास्यंति भुवि मानवाः ॥

राम
८२

अष्टाविंशे ततो नंदानयनं वरुणालयात् ॥ वैकुंठदर्शनं चाथ गोपानामनुवर्ण्यते ॥ १ ॥ गोवर्द्धनमखकृत्यवशोत्थामरेश्वर ॥ नंदानयनतः कृष्णो वरु
णाच वशेनयत् ॥ २ ॥ कलामात्रायां द्वादश्यां पारणारंभनिवेशनात् आसुरीवेलामविज्ञाय अरुणोदयात्पूर्वमेव स्नानार्थं वलेन निशि उदकं प्रविष्टमतस्तं नमि
तो वरुणस्य भृत्यो ॥ नयदिति तथा च शास्त्रं ॥ कलार्द्धद्वादशीदृष्टा निशीथादूर्ध्वमेव हि ॥ आमध्याह्नक्रियाः सर्वाः कर्त्तव्याः शंभुशासनात् इत्यादि
वक्ष्यति च वारुणाः अजानतामामकेनेति भगवद्धर्ममजानतेत्यर्थः ॥ स्वानां भगवद्धर्मपराणामभयदः मा भैष्टेत्यभयं ददात ॥ ३ ॥ सपर्यया अर्हणेन ४

शुक उवाच ॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनं ॥ स्नातुं नंदस्तु कालिंद्यां द्वादश्यां जलमाविशत् ॥ १ ॥ तं गृहीत्वाऽनयद्भृ
त्यो वरुणस्यासुरोंतिकं ॥ अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ॥ २ ॥ चुक्रुशुस्तमपश्यंतः कृष्ण रामेति गोपकाः ॥ भ
गवांस्तदुपश्रुत्य पितरं वरुणाहृतं ॥ ३ ॥ तदंतिकं गतो राजन्स्वानामभयदो विभुः ॥ प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सप
र्यया ॥ ४ ॥ महत्या पूजयित्वाह तद्दर्शनमहोत्सवः ॥ वरुण उवाच ॥ अद्य मे निभृतो देहोऽद्यैवार्थोधिगतः प्रभो ॥ त्वत्पादभाजो भ
गवन्नवापुः पारमध्वनः ॥ ५ ॥ नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ॥ न यत्र श्रूयते माया लोकसृष्टिविकल्पना ॥ ६ ॥

अद्य इदानीं मे मया देहो निभृतः धृतः यदा त्वद्दर्शनं जातं तदैव मया फलं प्राप्तमित्यर्थः यद्वा निभृतः पूर्णमनोरथ इत्यर्थः किंच ॥ अद्यैवार्थोधिगतः
सर्वरत्नाकरपतिनाः पि इतः पूर्वं नैवं विधोर्थः प्राप्त इत्यर्थः किंच मयाऽपि निस्तीर्ण एवेत्याशयेनाह त्वत्पादभाज इति ॥ अध्वनः पारं मोक्षं ५ भगव
ते निरतिशयैश्वर्याय ब्रह्मणे पूर्णाय परमात्मने सर्वजीवनियंत्रे ॥ तत्र हेतुः न यत्रेति ॥ लोकसृष्टिविकल्पाति या माया सा यत्र न श्रूयते अविद्यमाने

२.२.
८४

अजानता मढ्त्येन त्वत्पितुराहरणाय त्वत्कृतं तदिति नं स्वविभूत्यसमर्पयति ॥ गोविंदेति ॥ ७ ॥ अतींद्रियं अदृष्टपूर्वं लोकपालस्य महोदयं ऐश्वर्यं ९ ॥ १० ॥ औत्सु
क्ययुक्ता धीर्येषां ते ॥ अपि किं स्वगतिं स्वस्थानं सूक्ष्मं ब्रह्माख्यं च ॥ उपाधास्यत् उपधास्यति नः अस्मान् प्रापयिष्यतीति संकल्पितवंत इत्यर्थः ॥ ११ ॥ इति
एवं भूतं ॥ स्वानां स्वीयानां संकल्पं अखिलदृक् ॥ सर्वज्ञः स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपयैतद्वक्ष्यमाणमचिंतयत् ॥ १२ ॥ अविद्या देहाद्यहंबु

अजानता मामकेन मूढेनाकार्यवेदिना ॥ आनीतोयं तव पिता तद्भवान्क्षंतुमर्हसि ॥ ७ ॥ गोविंद नीयतामेष पिता ते पितृवत्सल ॥ भ
गवानुवाच ॥ एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः ॥ ८ ॥ आदायागात्स्वपितरं बंधूनां चावहन्मुदं ॥ नंदस्त्वतींद्रियं दृष्ट्वा लोकपाल
महोदयं ॥ ९ ॥ कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥ ते त्वौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरं ॥ १० ॥ अपि नः स्वगतिं सूक्ष्मा
मुपाधास्यदधीश्वरः ॥ इति स्वानां स भगवान्विज्ञायाखिलदृक् स्वयं ॥ ११ ॥ संकल्पसिद्धये तेषां कृपयैतदचिंतयत् ॥ जनो वै लोक
एतस्मिन्नविद्याकामकर्मभिः ॥ उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् ॥ १२ ॥ इति संचिंत्य भगवान्महाकारुणिको हरिः ॥ १३ ॥ द
र्शयामास लोकं स्वं गोपानां तमसः प ॥ १४ ॥ सत्यं ज्ञानमनंतं यद्ब्रह्म ज्योतिः सनातनं ॥ यद्धि पश्यंति मुनयो गुणापाये समाहिताः ॥ १५ ॥

द्धिस्तः ततः कामस्ततः कर्म ततउच्चावचासु देवतिर्यगादिषु भ्रमन् स्वीयां गतिं न वेद ॥ १२ ॥ १३ ॥ ब्रह्मस्वरूपं लोकं वैकुंठाख्यं तमसः परं तमसः उत्कृतेः प
॥ १४ ॥ देहादिविविक्ततया दर्शनं सत्याख्यमिति प्रथमं देहादिभ्यो विविक्तं ब्रह्मस्वरूपं दर्शयामास सत्यमिति सत्यं अबाधितं ज्ञानं अजडं अनंतं अपरिच्छिन्नं
ज्योतिः स्वप्रकाशं ॥ सनातनं शाश्वत्सिद्धं ॥ गुणापाये गुणापोहे ज्ञानिनो यत्पश्यंति तत्स्वरूपं वैकुंठं दर्शयामास ॥ १५ ॥

राम
८४

एवं ब्रह्महृदं ब्रह्मैव ह्रदः तत्र निमग्नस्य विशेषविज्ञानाभावात्तद्ब्रह्मपदं तेन नीताः स्थापिताः तस्मिन्न्यायस्व ॥ तदारोक्तं विशेषमाह ॥ पुनः कृ
ष्णेन उद्धृताः समाधेरिवोत्थापिताः संतः ब्रह्मणः तस्यैव लोकं वैकुंठाख्यं ददृशुरिति ॥ ननु ब्रह्मणि निमग्नानां पुनर्लोकदर्शनमघटितमि
वेत्याशंक्याह ॥ यत्रेति यत्र यस्मिन् ब्रह्मणि निमित्ते सति पूर्वमक्रूरोऽध्यगात् दृष्टवान् स एकपरोक्षित्संवरात्माक्तनत्वाद्भूतनिर्देशः नत्यंतकेपश्चद्भ
गवति किं विशिष्टं प्रभावितमिति भावः अथवा अक्रूरो यत्र ददृश्वान् तस्य पश्चान्नाह्रदस्य ब्रह्महृद इति नाम तं ह्रदं नीताः स्नातो ब्रह्मलोकं ददृशुः पु
नश्च कृष्णेनोद्धृताः पूर्ववत्तं दृष्ट्वा विस्मिता बभूवुरिति व्यवहितान्वयेः प्रसिद्धकल्पनावयोरस्मीति ॥ १६ ॥ इति दशमे ष्टाविंशः उत्तविंशे

ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः ॥ ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा ॥ १६ ॥ नंदादयस्तु तं दृष्ट्वा परमानं
दनिर्वृताः ॥ कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः ॥ १७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे ष्टाविंशोऽध्यायः
श्रीशुक उवाच ॥ भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः ॥ वीक्ष्य रंतुं मनश्चक्रे योगमायामुपाश्रितः ॥ १ ॥

तरणार्थप्रक्तिप्रत्यक्षयोहरेः ॥ गोपीभीरासमसंभेतस्यवांताईकोत्तवं ॥ ब्रह्मादिजयसंरूढदर्पकंदर्पदर्पहा ॥ जयति श्रीपतिर्गोपीरासमंडलमंडि
तः ॥ १ ॥ ननु विपरीतमिदं परदारविनोदेन कंदर्पविजेतृत्वप्रतीतिः मैवं ॥ योगमायामुपाश्रितः आत्मारामोऽप्यरीरमत् ॥ साक्षान्मन्मथमन्मथः ॥ आ
त्मन्यवरुद्धसौरतः इत्यादिषूक्तात्तन्मात्राभिधानात्तस्माद्रासक्रीडाविडंबनं कामजयख्यापनायेत्येव तत्त्वं किंच शृंगारकथापदेशेन विशेषतो निवृत्तिं
परेयं पंचाध्यायीति व्यक्तीकरिष्यामः ॥ ता रात्रीरिति यावता ब्रह्मरात्रिष्वामयेमारस्य यत्र पाद इतिस्मृता स्पर्थः ॥

र०पू० ८५

तदातास्मिन्नेववचनेतन्मीलितेउडुराजमंडलंउदगात्उदितःकिंकर्त्तव्यमूढोदीर्घकालेनदर्शनंयस्यसःसप्रियायामुखमिवअरुणेनकुंकुमेनयथाविलपतितथा प्राच्याःककुभःदिशःमुखंविशंतमैःसुखवत्तमैःकरैःरश्मिभिःअरुणेनउदयरागेणविलिंपन्हरणात्कर्त्तव्यमित्यर्थः॥सःप्रसिद्धःउडुराजःतथाचर्षणीनां जनानांशुचःतापदानीःमृजनअपनयन्॥२॥ कुमुद्वतमुदविकसानीयंविद्यतेयस्यांतंकुमुद्वंतंअखंडमंडलंयस्यांतं॥ रमायाआननस्यआभेवआ भायस्यांतेनवकुंकुममिवअरुणंदृष्ट्वातथावनंचतस्यकोमलैर्गोभिःरश्मिभिरंजितंदृष्ट्वाकलंमधुरंजगौअनुवादयन्॥ कथंवामावामदृशायाया

तदोडुराजःककुभःकरैर्मुखंप्राच्याविलिंपन्नरुणेनशंतमैः॥सचर्षणीनामुदगाच्छुचोमृजन्प्रियःप्रियायाइवदीर्घदर्शनः॥२॥ दृष्ट्वाकुमुद्वंतमखंडमंडलंरमाननाभंनवकुंकुमारुणं॥ वनंचतत्कोमलगोभिरंजितंजगौकलंवामदृशांमनोहरं॥३॥ नि शम्यगीतंतदनंगवर्द्धनंव्रजस्त्रियःकृष्णगृहीतमानसाः॥आजग्मुरन्योन्यमलक्षितोद्यमाःसयत्रकांतोजवलोलकुंडलाः॥४॥ दुहंत्योभिययुःकाश्चिद्दोहंहित्वासमुत्सुकाः॥पयोधिश्रित्यसंयावमनुद्वास्यापराययुः॥५॥परिवेषयंत्यस्तद्धित्वापाययंत्यःशि

तासांमनोहरंयथा॥३॥ अमापूर्व्यांयद्यप्यन्योन्यमलक्षितःनज्ञापितःउद्यमोयाभिस्ताःसः शून्पयः॥शुश्रूषंतीःपतीन्काश्चिदश्नंत्योपास्यभोजनं॥६॥ कांतोयत्रतत्रगीतध्वनिमार्गेणआजग्मुःजवेनवेगेनलोलानिचंचलानिकुंडलानियासांताःश्रीकृष्णरूपचकोरोऽत्रवर्णेनतस्यावविज्ञानानातरू णामेवतत्रैर्गिककर्मनिवृत्तिंद्योतयत्यःवार्थाद्विपितंकर्मविहाययुः॥तदाह॥दुहंत्यइत्यादिना॥पयःस्थालीस्थितंदुग्धमधिश्रित्यैतनचुल्लायमपनीतंसंयावं काश्चिद्ययुः॥संयावंगोधूमकणान्नपक्वंअनुद्वास्यअनवतार्य॥ ६॥ श्रीकामसहाः॥

राप ८५

अन्याः प्रभृजंतवः अंगोद्भवे नादिकुर्वंतः काश्चकाश्चित्क्रमंतप्रार्थकर्मनरात्मक्रमपनतीअन्यथाकृतमपिफलत्येवचेतनयत्राह ॥ अत्यल्पेतिस्यानतः
स्वरूपतरघोर्द्दाधोधारणेनविपर्ययंप्राप्तानिवद्धाभरणानियास्ताताः ॥ ७ ॥ नवचक्रलाकल्पनप्राविद्या ॥ पमंवंतीत्याह ॥ तावार्यमाणाइति ॥ ८ ॥ मल
द्योविनिर्गमोयामित्ताः प्रागपितद्भावनामुक्तास्तदानितरात्रक्षुरित्यर्थः ॥ ९ ॥ किंच ॥ तदानीं एवं तं परमात्मानं श्रीकृष्णंध्यानतः प्राप्ताः सत्यः गुणमय
देहं जहुरित्याह श्लोकद्वयेन दुःसहेति ननुकथं जहुः परमात्मपतितानामभावहित्याशंक्याह ॥ जारबुद्ध्यापीतिनहिवस्तुशक्तिर्बुद्धिमपेक्षते ॥ अन्यथा

लिंपंतः प्रमृजंत्योन्याअंजंत्यः काश्चलोचने ॥ व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ॥ ७ ॥ तावार्यमाणाःपतिभिः
पितृभिर्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानो नन्यवर्तंतमोहिताः ॥ ८ ॥ अंतर्गृहगताः काश्चिद्गोप्योलब्धविनिर्गमाः
कृष्णंतद्भावनायुक्तादध्युर्मीलितलोचनाः ॥ ९ ॥ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृ
त्याक्षीणमंगलाः ॥ १० ॥ तमेव परमात्मानं जारबुद्ध्यापिसंगताः ॥ जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ॥ ११ ॥

मत्वापिपीतामृतवदितिभावः ननुतदपिप्रारब्धकर्मबंधनेसतिकथंजहुस्तत्राह सद्यः प्रक्षीणबंधना इति ॥ ननुकथं भोगमंतरेण प्रारब्धकर्मक्षीणं भोगे
नैवसद्यः क्षीणमित्याह ॥ दुःसहेति ॥ दुःसहो यः प्रेष्ठविरहः तेन तीव्रः तापः तेन धुतानि निर्गतान्यशुभानि सपरियास्ताताः ॥ तत्प्राप्तिपरमं दुःख भोगेन
पापक्षीणमित्यर्थः ॥ तथाध्यानेनप्राप्ताच्युतस्याश्लेषणायानिर्वृतःपरमसुखंभोगः तयाक्षीणमंगलंपुण्यकृतबंधनंयासांताः ॥ अतोध्यानेनपरमात्म
प्राप्तेस्तत्कालमेवदुःखसुखाभ्यां निःशेषकर्मक्षयात्गुणमयदेहंजहुरिति ॥ ११ ॥

२०१
८६

ननु यथा पतिव्रतानां वल्लभतो ब्रह्मत्वेपि न तद्भजनान्मोक्षः तथा ब्रह्मभावात् ॥ एवं कृष्णेपि ब्रह्मत्वबुद्ध्यभावेन न तत्प्राप्तिः कथं मोक्षहेतुरिति शंकते कृष्णं विदुरिति परं केवलं कान्तं कमनीयं ॥ १२ ॥ परिहरति उक्तमिति ॥ अयं भावः जीवेष्वावृतं ब्रह्मत्वं कृष्णस्य तु हृषीकेशत्वादनावृतं अतो न तत्र तदपेक्षेति ॥ १३ ॥ ननु देही कथं गुणानावृतः स्यादत आह ॥ नृणामिति ॥ गुणात्मनः गुणनियन्तुर्भगवत एव एवं रूपाभिव्यक्तिः अतो न देहिसा

राजोवाच ॥ कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने ॥ गुणप्रवाहोपरमस्तासां गुणधियां कथं ॥ १२ ॥ श्रीशुक उवाच ॥ उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ॥ द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥ नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ॥ अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥ कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ॥ नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ १५ ॥ न चैवं विस्मयः कार्यो भवता भगवत्यजे ॥ योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥ १६ ॥ ता दृष्ट्वान्तिकमायाता भगवान्व्रजयोषितः ॥ अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन् ॥ १७ ॥ श्रीभगवानुवाच ॥ स्वागतं वो महाभागाः प्रियं किं करवाणि वः ॥ व्रजस्यानामयं कच्चिद्ब्रूतागमनकारणं ॥ १८ ॥ रजन्येषा घोररूपा घोरसत्त्वनिषेविता ॥ प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥ १९ ॥

दृश्यमनवच्छिन्नमुज्झन्त इति भावः ॥ १४ ॥ अतो यथा कथंचिन्नैरन्तर्यासक्तिर्मुक्तिकारणमित्याह ॥ काममिति ॥ ऐक्यं सम्बन्धं सौहृदं भक्तिं ॥ १५ ॥ न च भगवतोऽयमिति भार इत्याह ॥ न चैवमिति ॥ यतः श्रीकृष्णाद्धेतोः स्थावरादिकमपि विमुच्यते ॥ १६ ॥ प्रकृतमाह ॥ ता दृष्ट्वेति ॥ वाचः पेशैः वाग्विलासैः ॥ १७ ॥ सर्वाः ससंभ्रममागता विलोक्य सभयमिवाह ॥ व्रजस्येति ॥ १८ ॥ लज्जयामरहस्यमितिमालक्ष्याह ॥ रजन्येति ॥ १९ ॥

८६

किंच मातर इति विचिन्वंति मृगयंते ॥ वंधूनां साध्वसं भयं मा कृत मा कुरुत तेनार्थः ॥ २० ॥ इयत्प्रणयकोपेनान्यतो विलोकयंतीः प्रत्याह ॥ दृष्टमिति राके
शस्य पूर्णचंद्रस्य करैः रंजितं यमुनास्पर्शिनोऽनिलस्य लीलया मंदगतिः तया एजंतः कंपमाना ये तरूणां पल्लवास्तैः शोभितं ॥ २१ ॥ सती हे सत्यः ॥ २२ ॥
तेषां परिरंभमिति तद्ध्याः प्रत्याह ॥ अथवेति ॥ यंत्रिताशयाः वशीकृतचित्ताः सती हे सत्यः उपपन्नं युक्तं प्रीते प्रीता भवंति ॥ २३ ॥ दृष्ट्वाद्दृष्टमपयप्रदर्शने

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ॥ विचिन्वंति ह्यपश्यंतो मा कृढ्वं वंधुसाध्वसं ॥ २० ॥ दृष्टं वनं कुसुमितं राकेशकररंजि
तं ॥ यमुनानिललीलैजत्तरुपल्लवशोभितं ॥ २१ ॥ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः ॥ क्रंदंति वत्सा बालाश्च तान्पाययत
दुह्यत ॥ २२ ॥ अथवा मदभिस्नेहाद्भवत्यो यंत्रिताशयाः ॥ आगता ह्युपपन्नं तत्प्रीयंते मयि जंतवः ॥ २३ ॥ भर्तुः शुश्रूषणं स्त्रीणां प
रो धर्मो ह्यमायया ॥ तद्वंधूनां च कल्याण्यः प्रजानां चानुपोषणं ॥ २४ ॥ दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोपि वा ॥ पतिः स्त्री
भिर्न हातव्यो लोकेप्सुभिरपातकी ॥ २५ ॥ अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहं ॥ जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रियः ॥
श्रवणाद्दर्शनाद्ध्यानान्मयि भावोनुकीर्तनात् ॥ न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥ श्रीशुक उवाच ॥ इति विप्रियमाकर्ण्य
गोप्यो गोविंदभाषितं ॥ विषण्णा भग्नसंकल्पाश्चिंतामापुर्दुरत्ययां ॥ २८ ॥ कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्बिंबाधराणि चरणेन भुवं

नेन निवर्त्तयति भर्तुरित्यादि श्लोकत्रयेण ॥ २४ ॥ २५ ॥ फल्गु तुच्छं कृच्छ्रं दुः लिखंत्यः ॥ अस्त्रैरुपात्तमषिभिः कुचकुंकुमानि तस्थुर्मृजंत्य उरुदुःखभराः स्म तूष्णीं ॥
खं पापं च औपपत्यं जारसेवा ॥ २६ ॥ किंच श्रवणादिति ॥ २७ ॥ २८ ॥ चिंतां प्राप्तानां स्थितिमाह ॥ कृत्वेति ॥ शुचः शोकदुःखतेन श्वसनेन शुष्यंतो बिंबफलसदृशा अधरा ये

२०५
८७

किंचप्रेष्ठमिति ॥ किंवित्तरंमेण को पावेशेनगह्वरागिरेयासांतान्नभुवतस्म ॥ सरमेकारणंप्रेष्ठमित्यादि प्रियेतरमिवप्रतिभाषणंज्ञात्वावक्ष्यमा
ण ॥ ३० ॥ नृशंसक्रूरं ॥ उरुवयहत्वच्छिंदपारमूलेभक्ताः सेवितवतीः अस्मान्भजस्वमात्यजेति ॥ ३१ ॥ अपिचयदुक्तंपत्यपत्यसुहृदादिनांत्वयाधर्मविदेति
लोपहासं ॥ एवमेतदुपदेशानांपदेविषयेत्वय्येवास्तुउपदेशपदत्वेहेतुः ईशइति ॥ विविदिषावाक्येनसर्वोपदेशानामीशपरत्वावगमा
दितिभावः ईशत्वेहेतुः ॥ आत्माकिलभवानिति ॥ भोगमपिहिसर्वस्यभोक्ताआत्मैवेशइति ॥ अतः प्रेष्ठोबंधुश्चभवानेवेतिसर्वबंधुषव
रणीयंत्वय्येवास्त्वित्यर्थः ॥ अथवाधर्मोपदेशस्यादित्वयिसतिअस्माकमेवधर्मजिज्ञासमानानामसतीष्टत्वयाधर्मविदायदुक्तं ॥ एवमेतदस्तु
प्रेष्ठंप्रियेतरमिवप्रतिभाषमाणंकृष्णंतदर्थविनिवर्त्तितसर्वकामाः ॥ नेत्रेविमृज्यरुदितोपहतेस्मकिंचित्संरंभग
द्गदगिरोऽब्रुवतानुरक्ताः ॥ ३० ॥ गोप्य ऊचुः ॥ मैवंविभोऽर्हतिभवान्गदितुंनृशंसंसंत्यज्यसर्वविषयांस्तवपादमू
लं ॥ भक्ताभजस्वदुरवग्रहमात्यजास्मान्देवोयथादिपुरुषोभजतेमुमुक्षून् ॥ ३१ ॥ यत्पत्यपत्यसुहृदामनुवृत्तिरंगस्त्री
णांस्वधर्मइतिधर्मविदात्वयोक्तं ॥ अस्त्वेवमेतदुपदेशपदेत्वयीशेप्रेष्ठोभवांस्तनुभृतांकिलबंधुरात्मा ॥ ३२ ॥

नतत्वंधर्मोपदेष्टाकिंतुभवानात्मेति ॥ अथवायदुक्तंएतदुपदेशपदेतस्मोचरेषुरुषेःस्तनामत्वयितदुदेशोह्यामिनिमतिएवंकाकाक्षे
नित्यर्थः ॥ यत्तस्तनुभृतांत्वमात्माफलरूपइति ॥ यद्वायदुक्तंपत्यादिशुश्रूषणंधर्मइतिएवमेतत्वयोवास्तुकुतः उपदेशपदेशापरस्त्री
शुश्रूषणीयत्वेनोपदिश्यमानानापत्यादीनांपदेअधिष्ठानं ॥ कुतः ईशेनहीश्वरमधिष्ठानंविनाकोऽपिपतिप्रभृतिनामेति ॥ अन्यत्सर्व

राम
८७

एतन्मद्दाचारेणाद्दरयन्त्यः प्रार्थयंते कुर्वंति हीति ॥ कुशलाः शास्त्रनिपुणाः तथा च शास्त्रं किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्यादि
॥ २३ ॥ किं च ॥ प्रतियातेति षडुक्तं तद्दशाक्यं ॥ त्वयैव चित्तादीनामपहृतत्वादित्याहुः चित्तमिति यदस्माकं चित्तमेतावंतं कालं सुखेन गृहेषु निर्वि
शति ॥ तत्त्वया ॥ पहृतं करावपि यो गृहकृत्येषु निर्विशतः तावपि हृत्वान्मनात्वयेति वा ॥ २४ ॥ अतः अंगहे रात्मनः अस्माकं तवाधरामृतपूरणानवैव
हासमहितेनावलोकेन कलगीतेन च जातो यो हृच्छयाग्निः कामाग्निः सिंच ॥ तो चेद्वयंतावरेकोग्निस्तथा विरहाग्निर्निष्यते योग्निस्तेन च उपयन्तारे

कुर्वंति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किं तन्नः प्रसीद परमेश्वर मा स्म छिंद्या आशां धृ
तां त्वयि चिरादरविंदनेत्र ॥ २३ ॥ चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ॥ पादौ पदं न चलतस्तव
पादमूलाद्यामः कथं व्रजमथो करवाम किं च ॥ २४ ॥ सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतज
हृच्छयाग्निं ॥ नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते ॥ २५ ॥ यर्ह्यंबुजाक्ष तव पादतलं रमाया
दत्तक्षणं क्वचिदरण्यजनप्रियस्य ॥ अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंग स्थातुं त्वयाभिरमिता बत पारयामः ॥ २६ ॥

हारं गृहशरीराः योगिन इव ते पदवीं मंतिकं ध्यानेन यामः प्राप्स्यामः ॥ २५ ॥ न तु त्वत्पतीनेवोपगच्छत तत एनमग्निं सिंचेयुरिति तत्राहुः यर्हीति ॥ रमाया लक्ष्म्या
दत्तक्षणं दत्तोत्सवं दत्तावसरं वा ॥ तस्यापि क्वचिदेव न सर्वदा अरण्यजनाः प्रियायस्य तव ॥ अरण्यजनप्रियत्वादरण्ये क्वचिदाहर्हि अस्प्राक्ष्म स्पृष्टवत्यो वयं ॥ त
त्प्रभृति त्वयाभिरमिताः आनंदिताः सत्यः तदारभ्य अन्यसमक्षं स्थातुमपि न पारयामः ब्रह्मादीन रोचंत इत्यर्थः ॥ २६ ॥

२०५
७८

त्वत्पादसौभाग्यवतीति विचित्रमित्याह॥ श्रीरिति वक्षसि प्राप्तापि अनन्यस्थानं लब्ध्वापि तुलस्याः सपत्न्याः सह तव पदांबुजरजः कामयते स्म। भृत्यैः सर्वैः जु-
ष्टमिति सौभाग्यातिरेकोक्तिः। यस्याः स्ववीक्षणार्थमन्ये सुरा लोका विलोकयन्त्विति ते स्वर्थमन्ये ब्रह्मादयो नानातपोभिः प्रयासः सा तद्वत् तद्वद्वयमपि प्रपन्ना
इति ॥ ॥३७॥ हे वृजिनार्दन दुःखहर्तः त्वदुपासने त्वद्भजन एवाशा यासां ता वयं वसतीर्गृहान् विसृज्य योगिन इव प्राप्ताः। तव सुंदरस्मितवि-
लसितनिरीक्षणेन यस्तीव्रः कामस्तेन तप्तचित्तानां हे पुरुषरत्न दास्यं देहि ॥३८॥ ननु गृहं त्वमपि विहाय दास्यं किमिति प्रार्थ्यते तत्राहुः वीक्ष्येति ॥ अल-

श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टं ॥ यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पा-
दरजः प्रपन्नाः ॥३७॥ तन्नः प्रसीद वृजिनार्दन तेंघ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ॥ त्वत्सुंदरस्मितनिरीक्षण-
तीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यं ॥३८॥ वीक्ष्यालकावृतमुखं तव कुंडलश्रीगंडस्थलाधरसुधं हसितावलोकं ।
दत्ताभयं च भुजदंडयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ॥३९॥ कास्त्र्यंग ते कलपदामृतवेणुगीतसंमोहितार्यच-
रितान्न चलेत्त्रिलोक्यां । त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥४०॥

कावृतमुखं केशैरावृतं मुखं ॥ तथा कुंडलयोः श्रीर्ययोः ते गंडस्थले यस्मिन् सुधा अधरे सुधा यस्मिन् तच्च तन्मुखं च वीक्ष्य दत्ताभयं भुजदंडयुगं ॥ वक्षश्च श्रिया
एकमेव रमणं रतिजनकं वीक्ष्य दास्य एव भवामेति ॥३९॥ ननु युष्माकं पतिपरित्यागोऽयुक्त इत्यत आहुः कास्त्रीति अंग हे दयित कलानि पदानि यस्मिंस्तत्तदीर्घमू-
र्छितं तद्भ्रालापत्वेन पादान्तरे कलपदामृतमयवेणुगीतेन संमोहिता का वा स्त्री आर्यधर्मान्न चलेत् संमोहिताः पुरुषा अपि चलिताः किंच त्रैलोक्यसौ-
भगमिति पद्यपतः ॥ स्वविश्रमविभ्रमः त्वद्योतकशरीरं वर्णमात्रेणापि तावत्त्रिजगन्मान्या गोद्विजाः किमुत न त्वदर्थं भवेनेति भावः ॥४०॥

राम ७८

व्यक्तं निश्चितं ॥४१॥ विह्लवितं पारवश्यप्रलपितं गोपीरीरमत् रमयामास ॥४२॥ प्रियस्येक्षणेनोत्फुल्लानि मुखानि यासां ताभिः उदारहासस्य द्वि
जाश्च ते कुंदरुक्म हेमवद्दीधितिर्यस्य सः ॥ एणांकश्चंद्रः ॥४४॥ ५॥ बाहुप्रसारश्च परिरंभश्च करादीनां आलंभनं स्पर्शश्च नर्मपरिरंभश्च करादीनां

व्यक्तं भवान्व्रजभयार्त्तिहरोभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता ॥ तन्नो निधेहि करपंकजमार्त्तबंधो तप्तस्तनेषु च शिरः
सु च किंकरीणां ॥४१॥ श्रीशुक उवाच ॥ इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ॥ प्रहस्य सदयं गोपीरात्मारामोप्यरीरमत् ॥४२॥ ता
भिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ॥
४३ ॥ उपगीयमान उद्गायन्वनिताशतयूथपः ॥ मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनं ॥४४॥ नद्याः पुलिनमाविश्य गोपीभि
र्हिमवालुकं ॥ रेमे तत्तरलानंदकुमुदामोदवायुना ॥४५॥ बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः
क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं रमयांचकार ॥४६॥ एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ॥ आत्मानं
मेनिरे स्त्रीणां मानिन्योभ्यधिकं भुवि ॥४७॥ तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥ प्रशमाय प्रसादाय तत्रैवांतरधीयत ॥४८॥
इति श्रीभागवते महापुराणे दशमस्कंधे बालचरित्रवर्णने एकोनविंशोऽध्यायः ॥

आलंभनं स्पर्शश्च नर्मपरिहासश्च नखाग्रपतनं च तैः
क्ष्वेल्या क्रीडया अवलोकैश्च हसितैश्च कामं तासामुद्दीपनं तारमयामास ॥४६॥ महात्मनश्च विमुक्तचित्तान् ॥४७॥ तत्सौभगमदमुत्स्वाधीनं तं मानं गर्वं केशव
कश्चेशश्च तौ वशयतीति तथासः ॥४८॥ इति रासे एकोनत्रिंशः ॥

१०.पू
८९

त्रिंशे विरहसंतप्तगोपीभिः कृष्णमार्गणं ॥ उन्मत्तवच्चीयता तासां भ्रमंतीभिर्वनेवने ॥ अचक्षाणाः अपश्यंत्यः ॥ गत्या च अनुरागस्मिताभ्यां विभ्रमेक्षि
तानि सविलासनिरीक्षितानि तैश्च ॥ मनोरमाश्चालापाश्च विहाराः क्रीडाश्च विभ्रमाश्च अन्ये च विलासास्तैश्च रमापतेर्गत्यादिभिस्तैराक्षिप्तानि
आकृष्टानि चित्तानि यासां ताः ॥ अतएव तदात्मा यासां ताः तस्य विविधाश्चेष्टा जगृहुः तदनुकरणेनाक्रीडन् ॥१॥ अपि च गतिस्मितेति प्रिय
स्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः कृष्णविहारविभ्रमाः कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ताः ॥ अहमेव कृ

श्रीशुक उवाच ॥ अंतर्हिते भगवति सहसैव व्रजांगनाः ॥ अतप्यंस्तमचक्षाणाः करिण्य इव यूथपं ॥ गत्यानुरागस्मितविभ्रमे
क्षितैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥१॥ गतिस्मितप्रे
क्षणभाषणादिषु प्रियाः ॥ प्रियस्य प्रतिरूढमूर्तयः असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ॥२॥
गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनं ॥ पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन् ॥ दृष्टो
वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ॥ नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥

स्म इति परस्परं निवेदितवत्यः ॥३॥ किंच गायंत्य इति ॥ वनाद्वनांतरं गच्छंत्यो विचिक्युः अमृगयन् ॥ उन्मत्तजल्पत्वमाह ॥ वनस्पतीनपृच्छन् ॥ भूतेष्वंत राप
रमध्ये संतं पुरुषं बहिश्च संतमिति ॥४॥ तत्प्रपंचयति नवभिः तत्र महत्त्वादेते परपेदुरिताशयाः अश्वत्थादीन्पृच्छति ॥ दृष्ट इति ॥ प्रेमहासविलोकितैरव ८९
लोकनैरस्माकं मनो हृत्वा चौर इव गतः युष्माभिः किं दृष्ट इति ॥

महांतः स्वपुष्पैर्बहूपकारिणस्त्वेतिकुरवकादीन्पृच्छंति ‖ कच्चिदिति ‖ हे कुरवकादयः दर्पहरस्मितं यस्य सः इतो गतः कच्चिदिति ‖ ६ ‖ अलिकुलैः सह त्वां
बिभ्रद्याति प्रियस्त्वया किं दृष्ट इति ‖ ७ ‖ उपाति रेकेपि न प्रत्वादिमाः पृच्छेयुरिति पृच्छंति ‖ मालतीति ‖ हे मालति मल्लिके जाति यूथिके वः युष्माभिः
किं अदर्शि दृष्टः करस्पर्शेन वः प्रीतिं जनयन्यदृच्छयेति पातइति अत्र मालतीजात्योरवांतरविशेषो द्रष्टव्यः फलादिभिः सर्वप्राणिसंतर्पका एते पृच्छे
रिति पृच्छंति ‖ चूतेति ‖ चूतादयोरवांतरजातिभेदः करंवनीपयोश्च हे चूतादयः हे ये अन्ये च परार्थभविकाः परार्थमेव भवो जन्म येषां ते यमुनोपकूलाः

कच्चित्कुरवकाशोकनागपुन्नागचंपकाः ‖ रामानुजो मानिनीनां गतो दर्पहरस्मितः ‖ ६ ‖ कच्चित्तुलसि कल्याणि गोविंदचरण
प्रिये ‖ सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियोच्युतः ‖ ७ ‖ मालत्यदर्शि वः कच्चिन्मल्लिके जाति यूथिके ‖ प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ‖ ८ ‖ चूतप्रियालपनसासनकोविदारजंबूर्कबिल्वबकुलाम्रकदंबनीपाः ‖ येन्ये परार्थभविका
यमुनोपकूलाः ‖ शंसंतु कृष्णपदवीं रहितात्मनां नः ‖ ९ ‖ किं ते कृतं क्षिति तपो वत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांग
रुहैर्विभासि ‖ अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन ‖ १० ‖

तस्याः जलसमीपे वर्तमानाः तीर्थवासिन इत्यर्थः ते भवंतः रहितात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णस्य मार्गं शंसंतु कथयंतु ‖ ९ ‖ हे क्षिति क्षि
ते त्वया किं तपः कृतं यात्त्वं केशवांघ्रिस्पर्शोत्सवात्केशवस्यांघ्रिस्पर्शेनोत्सवो यस्यास्सा ‖ ऊतः अंगरुहैः उत्पुलकितैः रोमांचितैर्विभासि शोभसे तत्र वि
शेषं पृच्छंति ‖ अपि किं अयं उत्सवः अंघ्रिसंभवः अधुनातनेन केशवांघ्रिस्पर्शसंभवः यद्वा नैतावत् ‖ किंतु उरुक्रमविक्रमात्पूर्वमेव त्रिविक्रमस्य पदाक्रांती

२०पू

९०

हरिणाक्षि प्रमत्त्या कुसुमदर्शनं समाप्याऽऽह ॥ अपीति हे सखि एणपालि ॥ अपि किं उपगतः समीपं गतः गात्रैः सुहृद्भिः सुखवात्यादिभिः प्रियया सहेति युक्तं तत्र योनकांतयाऽङ्गसंगात्कुचकुंकुमेन रंजितायाः ॥ कुंदस्रजो गंधः कुलपतेः कलमस्य वाति आगच्छति ॥ ११ ॥ फलभारेणानतानां हृद्रुकसंदेह्याप्रणताऽ इति मत्वा प्रियया सहतस्य गतिविलासं संभावयंत्यः पृच्छति ॥ बाहुमिति ॥ तुलसिकायाश्च लिङ्गैर्लेः ॥ अनलतरामारं सरधैः अप्राप्यमायाः अनुगम्यमानः इह चरत्रिति ॥ १२ ॥ काश्चिदाह ॥ हे सख्यः मालत्याः स

अथैणपत्न्युपगतः प्रियया सह गात्रैस्तनुनरशांसखि सुनिर्वृतिमस्तु तावत् ॥ कांतांगसंगकुचकुंकुमरंजितायाः कुंद

स्रजः कुलपतेरिह वाति गंधः ॥ ११ ॥ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मरंधैः ॥ अन्वीयमा

न इह वत्तरवप्रणामं किं वा मिनं रतिचरन्प्रणयावलोकैः ॥ १२ ॥ पृच्छति मालतावाहनप्रश्लिष्टावनस्पतेः ॥ नूनं तल

रजस्पृष्टाविभ्रमस्तुलकान्यहो ॥ १३ ॥ शुक उवाच ॥ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ॥ लीला भगवतस्तास्ता ह्य

नुचक्रुस्तदात्मिकाः ॥ १४ ॥

स्नेन संगतान्नूनः ॥ अतः इमाः पृच्छत ॥ न उ हविपतिसंगेनोन त्संगतिर्दुर्वेरानवनस्पतेः यस्तु वाहूनाऽस्ति

घ्नाश्च अपि ॥ अहो भाग्य ॥ नूनं तत्रैवैः स्पृष्टाः पन उत्तुलकानि बिभ्रति ॥ न हि दयितसंगतानाविद्रुकपुलकं संभवइति भावः ॥ १३ ॥ उन्मत्तकवत्तस्य राम

स्तुरित्येवप्रपंचितं ॥ इदानीं रमापते लीलास्तास्ता विवेश्याजग्दुस्तदात्मिका इति यदुक्तं तत्प्रपंचयति ॥ इतीति उन्मत्तवचो गोप्यः उन्मत्तवचप्रश्नवतागोप्यः ॥ ९०

श्च कृष्णान्वेषणेन उपकारे ते अति विह्वला अनुचक्रुः अनुकृतवत्यः ॥ १४ ॥

कस्याश्चिदित्यादिभिश्चतुर्भिरनुकरणान्युपपद्यते ॥ ननत्वचतुर्भिस्त्वमपत्वेउनरेकेणाउकरणमितिविवेकः चूतनामधेयस्याः चूतनावदावर
त्याः कृष्णवदाचरंती स्तनमपिबत् ॥ तोकयित्वातोकवदात्मानंकृत्वा ॥ दैत्यायित्वादैत्यवदात्मानंकृत्वा एकाकृष्णामेमावनांकृष्णस्यामेवा
त्यभावयतियामाश्चन्याजहार ॥ ६ ॥ ७ ॥ हरिणाः हरिवन्नेमानाः गाः यद्वत् यथाकृष्णस्तथाह्वयतंकृष्णंअनुवर्त्ततीं अनुवर्त्तनानांअनुकवे

कस्याश्चित्पूतनायंत्याः कृष्णायंत्यपिबत्स्तनं ॥ तोकयित्वारुदत्यन्याप्रदाहन्शकटायतीं ॥ ५ ॥ दैत्यायित्वाजहारान्यामेकाकृष्णार्भभा
वनां ॥ रिंगयामासकाप्यंघ्रीकर्षंतीघोषनिस्वनैः ॥ ६ ॥ कृष्णरामायितेद्वेतुगोपायंत्यश्चकाश्चन ॥ वत्सायतीहंतिचान्यातत्रैका
तुबकायितां ॥ ७ ॥ आहूयदूरगायद्वत्कृष्णस्तमनुकुर्वतीं ॥ वेणुंक्वणंतींक्रीडंतीमन्याःशंसंतिसाध्विति ॥ ८ ॥ कस्यांचित्स्वभु
जंन्यस्यचलंत्याहापरानतु ॥ कृष्णोहंपश्यतगतिंललितामितितन्मनाः ॥ ९ ॥ माभैष्टवातवर्षाभ्यांतत्त्राणंविहितंमया ॥ इत्यु
क्त्वैकेनहस्तेनयतंत्युन्निदधेंबरं ॥ १० ॥ आरुह्यैकापदाक्रम्यशिरस्याहापरांनृप ॥ दुष्टाहेगच्छजातोहंखलानांननुदंडधृक् ॥ ११ ॥ तत्रै
कावदेहेगोपादावाग्निंपश्यतोल्बणं ॥ चक्षूंष्याश्वपिदध्वंवोविधास्येक्षेममंजसा ॥ १२ ॥ बद्धान्यया स्रजाकाचित्तन्वीतत्रउलूखले ॥ भी
तासुदृक्पिधायास्यंभेजेभीतिविडंबनां ॥ १३ ॥ एवंकृष्णंपृच्छमानावृंदावनलतास्तरून् ॥ व्यचक्षतवनोद्देशेपदानिपरमात्मनः ॥ १४ ॥

नीमितिवापाठः ॥ ८ ॥ ९ ॥ यतंतीप्रयत्नंकुर्वतीअंबरंउत्तरीयंवस्त्रंउन्निदधेऊर्ध्वंधृतवती ॥ १० ॥ अपिदध्वंनिमीलयत ॥ १२ ॥ सुदृक्सुदृक्सुनयनं आस्यं
पिधायाच्छाद्यकृत्वाङ्गीतिवाभीतिविडंबनंभयानुकरणं ॥ १३ ॥ एवंपुनरपिवृंदावनेलताःतरूंश्चकृष्णंपृच्छंत्योवनोद्देशेवनोव्यचक्षतअपश्यत ॥ १४ ॥

१०.१
८१

प॥ सुपृक्तानि संमिश्राणि॥ २६॥ सुपृक्तानि संमिश्राणि तेन तत्र अंसेन्यस्तप्रकोष्ठायस्याः करेणोः हस्तिन्याः॥ २७॥ रहः एकांतस्थानं॥ २८॥ हे आल्यः सख्यः अहो अथ
न्या अमी एते रेणवः गोविंदांघ्र्यब्जरेणवः तत्र हेतुः यानिति आस्ताभिरप्येतद्दोषएवमिषेके नतत्रैव कल्पेषु शांकशक्यतइति भावः॥ २९॥ अन्याह॥ तस्या इति
गोपीनां सर्वेहा॥ अयंभावः॥ मवेद्यः तानि तनोद्धः खंडं कुर्वंतीति॥ ३०॥ तदसंस्पृष्टकांत वलकपारेरणाने विविचित्रं त्यक्तानदहत्याक्षणनं रंत्यंतं समंततपन्॥ तदाश्री

पदानि व्यक्तमेतानि नंदसूनोर्महात्मनः॥ लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः॥ २५॥ तैस्तैः पदैस्तत्पदवीमन्विछंत्योग्रतोबलाः॥ प
दैः सुपृक्तानि विलोक्यार्त्ताः समब्रुवन्॥ २६॥ कस्याः पदानि चैतानि याताया नंदसूनुना॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा
यथा॥ २७॥ अनयाराधितो नूनं भगवान्हरिरीश्वरः॥ यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः॥ २८॥ धन्या अहो अमी आल्यो गोविं
दांघ्र्यब्जरेणवः॥ यान्ब्रह्मेशौ रमा देवी दधुर्मूर्ध्न्यघनुत्तये॥ २९॥ तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि यत्॥ यैकापहृत्य गो
पीनां रहो भुंक्तेऽच्युताधरं॥ ३०॥ न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः॥ खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः॥ ३१॥ अत्र प्र
सूनावचयः प्रियार्थे प्रेयसा कृतः॥ प्रपदाक्रमणे एते पश्यतासकले पदे॥ ३२॥ केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतं
तानि चूडयता कांतामुपविष्टमिह ध्रुवं॥ ३३॥ ॥ ॥ ॥ ॥ ॥ श्रीरामकृष्णसहाय॥

कात्रयेणानलक्ष्यंत इति॥ खिद्यंती सुजाते सुकुमारे अंघ्रितले यस्याः तां उन्निन्ये स्कंधमारोपितवान्॥ ३१॥ प्रपदाभ्यामाक्रमणे शोणी संमर्दं नयपयोः अत एव अत्राप
कले पदे पश्यतेति॥ ३२॥ तस्याः सुमनोजातं तत्र उपविष्टाविविद्धं दृष्ट्वाह॥ केशप्रसाधनमिति कांतामधिकृत्य तानि प्रसूनानि चूडयता उडाकारेण बध्नता
इह ध्रुवमुपविष्टो॥ ३३॥

८१

रमेत्यादिभिः श्लोकैः॥ आत्मरतः स्वतस्तृप्तः आत्मारामः स्वक्रीडः अखंडितः स्त्रीविभ्रमैरनाकृष्टोऽपि॥ तथा चेविकिमितिरेमे कामिनामिति ॥३३॥ स्त्री
णां दुरात्मनामाह॥ सा चेति द्वाभ्यां॥ कामोद्यानं आगमनसाधनं यस्यां ताः गोपीः हित्वा मां भजत इति हेतो रात्मानं वरिष्ठं मेने इति ॥३॥ यदि तमः श
देन अंधकारः उच्यते तदा विरुद्धं भवति॥ कथं द्रष्टा कृष्णदत्तमखंडलमिति पूर्वमुक्तत्वात् अतः तद्गुणच्छायाप्रविष्टः कलंकं आलक्ष्य नात्वा ततः द

रमे तया चात्मरत आत्मारामोऽप्यखंडितः॥ कामिनां दर्शयन्दैन्यं स्त्रीणां चैव दुरात्मतां॥३४॥ इत्येवं दर्शयंत्यस्ताश्चेरुर्गोप्यो विचेतसः॥ यां गोपी
मनयत्कृष्णो विहायान्याः स्त्रियो वने॥३५॥ सा च मेने तदात्मानं वरिष्ठं सर्वयोषितां॥ हित्वा गोपीः कामयाना मामसौ भजते प्रियः॥३६॥
ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत्॥ न पारयेऽहं चलितुं नय मां यत्र ते मनः॥३७॥ एवमुक्तः प्रियामाह स्कंध आरुह्यतामिति॥ त
तश्चांतर्दधे कृष्णः सा वधूरन्वतप्यत॥३८॥ हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज॥ दास्यास्ते कृपणाया मे सखे दर्शय संनिधिं
अन्विच्छंत्यो भगवतो मार्गं गोप्योऽविदूरतः॥ ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीं॥४०॥ तया कथितमाकर्ण्य मानप्राप्तिं च॥
माधवात्॥ अवमानं च दौरात्म्याद्विस्मयं परमं ययुः॥४१॥ ततो विशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते॥ तमः प्रविष्टमालक्ष्य ततो नि
ववृते हरेः॥४२॥ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः॥ तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः॥४३॥

रेद्वेषणो त्रिवधूतः॥३८॥ कामिनां दैन्यं दर्शयति॥ एवमुक्त इति॥ अखंडितत्वमाह॥ ततश्चेति॥ तस्यां स्कंधारोहोद्यतायां मंतर्हित इत्यर्थः॥ अनुतापमाह हा नाथे
ति ॥३९॥ अन्विच्छंत्यः मृगयमाणाः अविदूरतः समीपे॥४०॥ ततस्तयापि सहिताः कृष्णान्वेषणाय वनमविशन्॥ ततो हरेरन्वेषणान्निवृत्ताः॥४१॥ एवमंतः प्र
नाअपि विग्रहान्नैव सस्मरुरित्याह॥ तदात्मिकाः स एव आत्मा यासां ताः तन्मय्य इत्यर्थः॥४३॥

द०पू
७१

किंतुपूर्वंयत्रश्रीकृष्णेनसमागतिस्तस्मिन्नेवकालिंद्याःपुलिनमागत्यकृष्णंभावयंतीतितथाताःकृष्णस्यागमनंकांक्षितंयाभिस्ताःमिलिताःसत्यः
कृष्णमेवजगुरिति ॥४५॥ इतिदशमे श मः ॥ एकत्रिंशेनिराशास्ताःपुनःपुलिनमागताः ॥ कृष्णमेवानुगायंत्यःप्रार्थयंतेतदागमं ॥ जयतीति ॥ हेद
यिततेजन्मनाव्रजोऽधिकंयथाभवतितथाजयतिउत्कर्षेणवर्त्तते ॥ यस्मात्त्वमत्रजातस्तस्मादिंदिरालक्ष्मीःअत्रहिअश्रयतेव्रजमलंकृत्यवर्त्तते ॥
एवंव्रजेसर्वस्मिन्नपिमोदमानेअत्रतवतावकाःत्वदीयागोपीजनाःत्वयीत्वयित्वदर्थमेवकथंचित्धृताअसवोयैस्तेत्वांविचिन्वते ॥ अतस्त्वं
दयितदृश्यताप्रत्यक्षीभूयतामिति ॥ यद्वासाश्रीर्भवान्दृश्यतां ॥ यद्वाएवंत्वयादृश्यतामेतेविचिन्वतइति ॥ अत्रवृत्तत्राणांवहनावज्ञात्वादरपराज्ञाइतिसर्व

पुनःपुलिनमागत्यकालिंद्याःकृष्णभावनाः ॥ समवेताजगुःकृष्णंतदागमनकांक्षया ॥४५॥ इतिश्रीभागवतेमहापुरा
णेदशमस्कंधेत्रिंशत्तमोऽध्यायः ॥ गोप्यऊचुः ॥ जयतितेऽधिकंजन्मनाव्रजःश्रयतइंदिराशश्वदत्रहि ॥ दयितदृश्यतां
दिक्षुतावकास्त्वयिधृतासवस्त्वांविचिन्वते ॥१॥ शरदुदाशयेसाधुजातसत्सरसिजोदरश्रीमुषादृशा ॥ सुरत
नाथतेऽशुल्कदासिकावरदनिघ्नतोनेहकिंवधः ॥२॥ श्रीराम श्रीराम श्रीराम ॥

श्लोकेध्ववनारणा ॥ अथापिसमागतिरुच्यते ॥१॥ तत्रविचिन्वत्सुममकिमितिवेत्तत्राहुःशरदिति शरदुदाशयेशरत्कालीनेसरसिसाधुजातवत्सरसिजो
दरश्रीमुषासाधुजातंसम्यग्जातंयत्सत्सरसिजंतस्योदरं ॥ कथितंपद्मंतस्यउदरेगर्भेयाश्रीःतांमुष्णातिहरतीतितथातयादृशानेत्रेणहेसुरतनाथसंभो
गपतेवरदअस्माभिःसहसाअशुल्कदासिकाःअमूल्यदासीनिःनिघ्नतोमारयतस्तवत्वयाक्रियमाणःइहलोकेअपिवधोनभवतिकिं ॥ किंशस्त्रेणैवव
धोवधःकिंदृशावधोनभवतिकिंतुभवत्येवअतस्तवदर्शनःपद्मंतत्रप्राणप्रत्यर्पणायत्वयादृश्यतामितियथासंभवंसर्वत्रवाक्यशेषः ॥२॥

राम
७१

किंच वयं मुहुर्मुहुः त्वया रक्षिताः किमिति ते इदानीं दृश्यामन्यथेर्थप्रेक्ष्यघातपमीत्याहुः विषेति हे ऋषभश्रेष्ठ विषमयाज्जलाद्योः प्ययोना
शस्तस्मात्तथा व्यालराक्षसादघासुरात् ॥ वर्षामारुतात् ॥ वैद्युतानलात् अस्मन्निनिपातात् ॥ वृषारिष्टस्तस्मात् मयात्मजाद्व्योमात् ॥ विश्वतः
सर्वस्मात् ऋत्विग्भयाद्वा कालियदमनादिना रक्षिताः किमिदानीमुपेक्षसे इति भावः ॥३॥ अपि च विश्वपालनायावतीर्णस्य तव भक्तो
पेक्षा न युक्तेत्याशयेनाहुः नखल्विति ॥ हे सखे ॥ भवान् खलु निश्चितं यशोदासुतो न भवति किंतु सर्वप्राणिनां बुद्धिसाक्षी ॥ ननु मम किं

विषजलाप्ययात् व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ॥ वृषमयात्मजाद्विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ॥३॥ न खलु
गोपिकानंदनो भवानखिलदेहिनामन्तरात्मदृक् विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सात्वतां कुले ॥४॥ विरचि
ताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ॥ करसरोरुहं कांत कामदं शिरसि धेहि नः श्रीकरग्रहं ॥५॥ व्रजजना
र्तिहन्वीर योषितां निजजनस्मयध्वंसनस्मित ॥ भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय ॥६॥

दृष्टो भवतीति तत्राहुः विखनसा ब्रह्मणा विश्वपालनाय प्रार्थितः सन् सात्वतानां कुले उदेयिवान् उदितः इति ॥४॥ तस्मात्त्वदंकानामस्माकमेतत्स
र्थनावतउश्यंत्वपारयेत्याहुः विरचिताभयमित्यादि चतुर्भिः हे वृष्णिधुर्य संसृतेर्भयात् त्वच्चरणमीयुषां प्राप्तानां प्राणिनां विरचितं दत्तमभ
भयं येन तत्तथा हे कांत कामदं वरदं तथा श्रियः करं गृह्णातीति तथा तत्तव करसरोरुहं नः शिरसि धेहि ॥ हे व्रजजनार्तिहर हे वीर निजजना
यः स्मयो गर्वस्तस्य ध्वंसनं नाशकं स्मितं यस्य हे तथाभूत हे सखे भवत्किंकरीर्नः अस्मान् ॥५॥ भज आश्रय यस्मान्निनिश्चितं प्रथमं तावज्जलरुहा

२०१
१०३

अविशेषेण प्रणतानां देहिनां पापकर्शनं पापहन्तृ तृणचरान्पशूननुगच्छति तथा । सोभाग्येन श्रियो निकेतनं । वीर्यातिरेकेण फणिनः फणासु अर्पितं ते पदांबुजं कुचेषु कृणु कुरु । किमर्थं हृच्छयं कामं कृन्धि छिन्धि ॥७॥ हे पुष्करेक्षण तवैव मधुरया गिरा वल्गूनि वाक्यानि यस्यां तया बुधानां मनोज्ञया हृद्यया गंभीरयेत्यर्थः मुह्यतीः इमाः नः विधिकरीः किंकरीः अधरसीधुना आप्यायय स्वस्थं संजीवयेति ॥८॥ किंच अस्माकं तद्विरहे प्राणमेव मरणात् किंतु त्वत्कथामृतं पाययद्भिः ह्रियन्ते इति निर्विवितमित्याह ॥ तवेति ॥ कथैव अमृतं ॥ अत्र हेतुः तप्तजीवनं ॥ अतिविद्याप्रताडत्वकर्षमाह ॥

प्रणतदेहिनां पापकर्षणं तृणचरानुगं श्रीनिकेतनं ॥ फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृंधि हृच्छयं ॥७॥ मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ॥ विधिकरीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः ॥८॥ तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहं ॥ श्रवणमंगलं श्रीमदाततं भुवि गृणंति ये भूरिदा जनाः ॥९॥

कविभिर्ब्रह्मविद्भिः पीडितं स्तुतं । देवभोग्यं त्वमृतं तत्तु तुच्छीकृतं । किंच कल्मषापहं कामकर्मनिरसनं तत्त्वमृतं नैवं भूतं । किंच श्रवणमंगलं श्रवणमात्रेण मंगलप्रदं । तत्तु सुष्ठ नापेक्षं । किंच श्रीमत् सुशान्तं । तत्तु मादकं । एवंभूतं तव कथामृतं आततं यथा भवति तथा भुवि ये गृणंति निरूपयंति ते जना भूरिदाः बहुदातारः जीवितं ददतीत्यर्थः । यद्वा एवंभूतं त्वत्कथामृतं ये भुवि गृणंति ते भूरिदाः पूर्वजन्मसु बहुदत्तवंतः सुकृतिन इत्यर्थः । एतदुक्तं भवति ये केवलं कथामृतं गृणंति तेऽपि तावदतिधन्याः किं पुनर्ये त्वां पश्यंति । अतः प्रार्थयामहे त्वया दर्शनतामिति ॥९॥

राम
१०३

ननु तर्हि मत्कथाश्रवणेनैव निर्वृत्ता भवत ॥ किं मद्दर्शनेन न त्वद्विलासस्फुरितविन्नावयं तत्रापि शान्तिं न विराम इत्याहुः प्रहसितमिति हे प्रिय
हे कुहक कपट ॥ संविदः संकेतनर्मोक्तयः ॥ ० ॥ किंच त्वयि वयमतिप्रेमार्द्रचित्ताः त्वं पुनरस्माकं केन हेतुना कपरमावरसीत्याहुः श्लोकद्वयेन हे
नाथ हे कान्त यत् यदा व्रजाच्चलसि पशूंश्चारयन् तदा ते तव नलिनवत् सुन्दरं कोमलं ते पदं शिलैः कणिशैः तृणैरङ्कुरैश्च सीदतीति क्लिश्यतीति नो
मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति ॥ एवंभूतानस्तु स्वदर्शितविन्नावयं तां मनः कान्त दिनपरिक्षये सायंकाले नीलकुन्तलैराव्

प्रहसितं प्रियप्रेमवीक्षणं विहरणं च ते ध्यानमंगलं ॥ रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥ १० ॥ च
लसि यद्व्रजाच्चारयन्पशून्नलिनसुन्दरं नाथ ते पदं ॥ शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥ ११ ॥
दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतं ॥ घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥
प्रणतकामदं पद्मजार्चितं धरणिमंडनं ध्येयमापदि ॥ चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥

तं घनरजस्वलं गोरजः स्फुरितं वनरुहाननं मुखकमलमात्माकलपरागस्फुरितमपमत्यल्पमानं विभ्रशतच्छमुहुर्मुहुर्दर्शयन्नामनसि केवलं
स्मरं यच्छसि न तु संगं ददासीति कपट इति भावः ॥ १२ ॥ अतोऽधुनाक्षपटं विहायैवं कार्यमिति प्रार्थयन्ति श्लोकद्वयेन प्रणतकामदमिति हे आ
धिहन् हे रमण पद्मजेनार्चितं आपदि ध्येयं ध्यानमात्रेणापन्निवर्तकं ॥ शंतमं च ते मत्त्वा मध्ये चापि हृत्स्वेव तं मते चरणपंकजं कामतापशा

२·प्र
९४

अपिच ॥ हे वीर ते धराम्मृतं नो विरहे हि ॥ हारितेन नारितेन नारितेन वेणुना हृष्ट्वं वितमितिमिति ॥ माहा मृतवा पितमिति भावः इतररागविस्मार
णानृणां इतरेषु सर्वं प्रेमा रति हि विषुरागपिष्ठा विस्मारयति तथा तन ॥ ४ ॥ किंच ह्रस्मामपि त्वदर्शनेन दुःखं दर्शनेन वहर्ष दह्यास सर्वं संगपरि
त्यागेन यतपदं वव पंत्वा उपगताः त्वं तु कथमस्मान् त्यक्तुमस्मद हृदयरति मकहणामृतः ॥ अरतीति द्वयेन ॥ यशपरा भवात्रयशपराभवा इका
ननं हृंदावनं प्रति अरितिगच्छति ॥ तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्द्धमपि युगवद्भवति ॥ एवं दर्शनेन दुःखमुक्तं ॥ पुनस्त्वं कथं विहि नो

हरतवईनं शोकनाशनं हारितवे णुनाहृष्टं वुवितं ॥ इतररागविस्मारणं नृणां वितरवीरनस्ते धराम्मृतं ॥ १४ ॥ अटति
यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यतां ॥ कुटिलकुंतलं श्रीमुखं च ते जडउदीक्षतां पक्ष्मकृद्दृशां ॥ १५ ॥ पतिसुता
न्वयभ्रातवांधवानतिविलंघ्यतेत्यः च्युतागताः ॥ गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥

तेतव श्रीमत्सुखं उन्नतउच्चैरीक्ष्यमाणानां तेषां दृशां पक्ष्मकृत्तव्रह्मा जडो मंदः एव ॥ निमेषमात्रमपि अंतरमसत्यमिति दर्शनहर्षमुक्तं ॥ १५ ॥ पत
स्मात् ॥ हे अच्युत पतीन् सुहृतान् अन्वयान् तत्संबंधिनः भ्रातृन्वांधवान्श्चातिविलंघ्य तव समीपमागतावयं ॥ कथंभूतस्यागतिविदः अस्म राम
दागमनं जानतः गीतगतिवीजनतः गतिविदो वयं वा ॥ तवोद्गीतउच्चैर्गीतेन मोहिताः हे कितव शठ एवंभूता योषितो निशि त्वयमागता ९४
स्ताम्नते कस्त्यजेन्न कोपीत्यर्थः ॥ १६ ॥

अतस्त्वयात्यक्तानामस्माकंशात्क्तनत्वद्दर्शननिदानस्यहृद्रोगस्यत्वत्संगात्येवचिकित्साकुर्वीत्याहरहसीति श्रियोधामतेवृहद्विशालंउर
श्ववीक्ष्यातिस्पृहाभवति ।। तयाचमुहुर्मुहुर्मेनोमुह्यति ।।१७।। तवचव्यक्तिरभिव्यक्तिर्व्रजवनौकसांसर्वेषांअविशेषेणवृजिनहंत्रीदुःखनि
रसनी ।। विश्वमंगलंसर्वमंगलरूपाच ।। अतस्त्वत्स्पृहात्मनांत्वत्स्पृहाकुलमनसांनःमनाक्रषत्किमपित्यजमुंच ।। कार्यरूपमकार्यरूरे

रहसिसंविदंहृच्छयोदयंप्रहसिताननंप्रेमवीक्षणं ।। वृहदुरःश्रियोवीक्ष्यधामतेमुहुरतिस्पृहंमुह्यतेमनः ।।१७।। व्रजवनौ
कसांव्यक्तिरंगतेवृजिनहंत्र्यलंविश्वमंगलं ।। त्यजमनाक्चनस्त्वत्स्पृहात्मनांस्वजनहृद्रुजांयन्निषूदनं ।।१८।। यत्तेसु
जातचरणांबुरुहंस्तनेषुभीताःशनैःप्रियदधीमहिकर्कशेषु ।। तेनाटवीमटसितद्व्यथतेनकिंस्वित्कूर्पादिभिर्भ्रम
तिधीर्भवदायुषांनः ।।१९।। इतिश्रीभागवतेमहापुराणेदशमस्कंधेगोपिकाविरहोनामएकत्रिंशोध्यायः ।।

हीत्यर्थः किंतत् ।। स्वजनहृद्रोगाणांयद्धरतिगोप्यंनिषूदनंनिवर्तकमौषधं तत्त्वमेवजानासीतिगूढाभिप्रायं ।।१८।। स्फुटितप्रेमधर्षिताहृदत्याग्राजः
यहीति ।। हेप्रिय ।। यत्तेतवचरणकमलंपराङ्मुकठिनेषुकुचेषुमसद्वेनशंकिताःशनैःशनैर्दधीमहिधारयेमवयं ।। तेनाटवीमटसितिनचोतिइति
पाठे ।। पश्चात्वांविरहय्याव ।। आत्मानमेवचावानयसिप्रापयसि ।। तन्नत्र ।। तत्परंतत्सर्वंवाकूर्पादिभिःसूक्ष्मपाषाणादिभिःकिंस्विन्नव्यथतेकथंउना
मनव्यथतेति ।। भवानेवायुर्जीवनंयासांतासांनोधीर्भ्रमतिमुह्यतीति ।।१९।। दशमेएकत्रिंशः

द्वात्रिंशे विरहालापविज्ञप्तिन्नहृदयो हरिः ॥ तत्राविर्भूय गोपीभिः सान्त्वयामास मानयन् ॥ १ ॥ त्वत्प्रेमामृतकल्लोलविह्वलीकृतचेतसः सरय
नं दयन्तु गोपीहृद्गतोऽनंगनंदनः ॥ २ ॥ इति गोप्य इति ॥ इत्येवंप्रभृति चित्रधा हृद्धैर्य उच्चैः कृष्णदर्शनलालसाः निःस्पृहायाः सात्ताः ॥ १ ॥ साक्षान्मन्म
थमन्मथः जगन्मोहनस्य कामस्यापि मनस्तद्वतः कामः साक्षात्तस्यापि मोहकारकत्वार्थः ॥ २ ॥ तच्च कारवरणाश्रयः ॥ ३ ॥ अंजलिना सहतहस्ते

प्रभु क उ व ॥ इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा ॥ रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ १ ॥ तासामाविरभूच्छौरिः स्म
यमानमुखांबुजः ॥ पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥ तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ॥ उत्तस्थुर्युग
पत्सर्वास्तन्वः प्राणमिवागतं ॥ ३ ॥ काचित्करांबुजं शौरेर्जगृहेंजलिना मुदा ॥ काचिद्दधार तद्बाहुमंसे चंदनरूषितं ॥ ४ ॥ काचि
दंजलिनागृह्णात्तन्वी तांबूलचर्वितं ॥ एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ॥ ५ ॥ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला ॥ घ्न
तीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥ अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजं ॥ आपीतमपि नातृप्यत्संतस्तच्चरणं यथा ॥ ७ ॥
तं काचिन्नेत्ररंध्रेण हृदिकृत्य निमील्य च ॥ पुलकांग्युपगुह्यास्ते योगीवानंदसंप्लुता ॥ ८ ॥ सर्वास्ताः केशवालोकपरमोत्सवनि

हृदयेन ॥ ४ ॥ ५ ॥ भ्रुकुटिमाबध्य भ्रुकुटिलीकृत्य प्रेमसंरंभेण प्रणयकोपावेशेन विह्वलाविव र्वृताः ॥ जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ ९ ॥
शाः संदष्टधरोष्ठीकराः कटाक्षाः तैरेवाक्षेपाः परिभवास्तैस्ताडयंतीव ऐक्षत ॥ ६ ॥ अनिमिषं निमेषाभावो यत्र अनिमीलंती दृग्भ्यां आपीतमपि सम्यगू
दृष्टमपि पुनः पुनर्नेत्राभ्यामानीतमप्यतृप्यत ॥ ७ ॥ हृदिकृत्य हृदये नीत्वेत्यर्थः ॥ ८ ॥ प्राज्ञं सर्वं प्राप्य यथा मुमुक्षवो यथा मुमुक्षवो जनाः सुखिनो भवंति प्रातस्तद्वत्सर्वं तं प्राप्य

पुरुषः परमात्मा शक्तिभिः सत्त्वादिभिर्यथा यद्वा उपासकः पुरुषोत्तमो नवीर्यबलादिभिः यद्वा पुरुषोऽनुशायी प्रकृत्याद्युपाधिभिर्दैन्तो यथा
विरोचते तद्वत ॥ १ ॥ विकसत्कुंदमंदारैः सुरभिर्यो निलस्तस्मात् षट्पदाय यस्मिन् ॥ ॥ शरच्चंद्रांशुनां संदोहेः समूहैर्ध्वस्तं दोषातमः रात्रिगतं तत
मो यस्मिन् तत् अतः शिवं सुखकरं स्वतटे पुलले हस्तरंगे पवितान्याश्रितानि वो मला वालुका यस्मिन् एवंभूतं पुलिनं ताः समाराय निर्विषयं ततः
तामिर्दैन्तो धिकं व्यरोचयेति तेपूर्वेणान्वयः ॥ २ ॥ तासां मनोरथानामं तयथुः पूर्णकामा बभूवुः स्तुतयोऽगरथेति अयमर्थः यथा कर्मकांडे स्तुतयः

ताभिर्विधूतशोकाभिर्भगवानच्युतो वृत व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥ १ ॥ ताः समाराय कालिंद्याः निर्विशं पुलिनं
विभुः ॥ विकसत्कुंदमंदारसुरभ्यनिलषट्पदं ॥ ॥ शरच्चंद्रांशुसंदोहध्वस्तदोषातमः शिवं ॥ कृष्णायहस्ततरलाचितकोमलवा
लुका ॥ २ ॥ तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथांतं श्रुतयो यथा ययुः ॥ स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्नासनमात्म
बंधवे ॥ ३ ॥ तत्रोपविष्टो भगवान् स ईश्वरो योगीश्वरांतर्हृदि कल्पितासनः ॥ चकार गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं
वपुर्दधात ॥ ४ ॥ सभाजयित्वा तमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा ॥ संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कु

परमेश्वरमपश्यंत्यः स्वस्वकामाद्यनुबंधैः संपूर्णाः स्वभवंति ज्ञानकांडे तु परमेश्वरं दृष्ट्वा तदाह्लादपूर्णाः कामाद्यनुबंधं जहतीति पिताव भाषिरे ॥ ५ ॥
द्दरिति आत्मकामाश्रुपिदमात्त मम जन्त्रितयाहहेतरिति अवीक्लृपन् रचयामासुः आत्मबंधवे तयोमिरो ॥ ३ ॥ गोपीसभागतस्ताभिः संमानितः स
त्रैकाष्टस्त्वमे त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदं स्थानं तद्वपुर्दधात दीप्यत् ॥ ४ ॥ सहासलीलेक्षणेन विभ्रमो विलासो यासां तयाश्चवाअ

२०५
९६

तत्र भगवतोऽकृततां तद्धृदये नैवापास्यितुकामा गूढाभिप्रायं लोकवृत्तान्तमिव पृच्छन्ति भजत इति । भजतः प्राणिनः अनु अनन्तरं केचिद्भजना
नुसारेण भजन्ति । केचिदेतद्विपर्ययं यथा भवति तथा तद्भजनानपेक्षमभजतोपि भजन्ति । अन्ये तूभयानिति ॥ १६ ॥ विवृताभिप्रायउत्तरमाह
मिथ इति । हे सख्यः उपकारप्रत्युपकारतया ये मिथो भजन्ते ते ऽन्यन भजन्ति किंत्वात्मानमेव कुतः हि यस्मात्स्वार्थ एवैकान्त उद्यमो येषां ते
तत्र च सौहृदं अतो न ह्यस्व नैव धर्मो दृष्टो हे शास्त्रो मम हि ष्यादि भजनेवत इत्यर्थः ॥ १७ ॥ ये त्वभजतो भजन्ति ते द्विविधाः करुणाः स्निग्धाश्च तत्रैव

गो का ऊचुः ॥ भजतोऽनुभजन्त्येक एक एतद्विपर्ययं । नोभयांश्च भजन्त्येक एतन्नो ब्रूहि साधु भोः ॥ १६ ॥ श्री भगवानुवाच ॥ मिथो भ
जन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते । न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १७ ॥ भजन्त्यभजतो ये वै करुणाः पितरो यथा ।
धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १८ ॥ भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः । आत्मारामा ह्याप्तकामा अकृतज्ञा गुरु
द्रुहः ॥ १९ ॥ नाहं तु सख्यो भजतोऽपि जन्तून्भजाम्यमीषामनुवृत्तिवृत्तये । यथाऽधनो लब्धधने विनष्टे तच्चिन्तयान्यन्निभृतो न वेद ॥ २० ॥

यथाक्रमं धर्मैकामो भवत इत्याह भजन्त्यभजत इति ॥ १८ ॥ तृतीयचतुर्थयोरुत्तरं भजतोपीति । अयमर्थः ते चतुर्विधाः एके आत्मारामाः विषयस्पर्शनेपि पूर्
णकामत्वेन भोगेच्छारहिताः अन्ये अकृतज्ञाः संमूढाः अन्ये गुरुद्रुहः अतिकठिनाः सपितायदल्लपोषक इति न्यायादुपकर्तॄनपि हत्यातरो द्रुह्यन्ति । ताम
नयातेति ॥ १९ ॥ अत्र चरमकोटिं यात मात्मानं मंस्ताः किंतु मनिकोचैः परस्परं रूढस्मितमुखीनां दृष्ट्वाह नाहं त्विति । हे सख्यः अहं त्वेषां मध्ये न कोटिरिति
उपरमकाहारिणिकः परमसुहृच्च । कथं अमीषां भजतामनुवृत्तिवृत्तये निरन्तरध्यानप्रवृत्त्यर्थं तान्न भजामि एतत्सदृष्टान्तमाह यथेति तस्य धनेपि ९६
वचिन्तया निभृतः पूर्णो व्याप्त इति यावत् अन्यत्क्षुत्पिपासाद्यपि न वेद ॥ २० ॥

एवं मदर्थोज्झितलोकवेदस्वानां मदर्थं उज्झितलोकः युक्तायुक्ताप्रतीक्षणात् । वेदः स्वधर्माप्रतीक्षणात् स्वाः ज्ञातयः स्नेहत्यागात् । याभि
स्तासां वो युष्माकं परोक्षं अदर्शनं यथा भवति तथा भजता युष्मात्प्रेमालापान् शृण्वतैव तिरोहितं मं तद्दीनेन स्थितं । तत्र मासूयत हे अबलाः हे प्रि
याः मा मा असूयितुं दोषारोपेण द्रष्टुं यूयं मार्हथ न योग्याः स्थः ॥२१॥ आत्मानमिरं परमार्थत ऋणानेत्याह नेति ॥ निरवद्यसंयुजां निरवद्या संयुक्
संयोगो यासां तासां वः विबुधायुषापि चिरकालेनापि स्वीयं साधुकृत्यं प्रत्युपकारं कर्तुं न पारये न शक्नोमि ॥ कथं ॥ भूतानां ॥ या मा भजन्त्यो दुर्जराः अ

एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ॥ मया परोक्षं भजता तिरोहितं मासूयितुं मार्हथ तत्प्रियं
प्रियाः ॥२१॥ न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः ॥ या माभजन् दुर्जरगेहशृंखलाः संवृश्च्य
तद्वः प्रतियातु साधुना ॥२२॥ इति श्रीभागवते महापुराणे दशमस्कन्धे द्वात्रिंशोऽध्यायः ॥ ॥ शुक उवाच ॥ इत्थं
भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ॥ जहुर्विरहजं तापं तदंगोपचिताशिषः ॥ ॥१॥

जराः याः गेहशृंखलाः तां संवृश्च्य निःशेषं छित्वा मां माम् अभजन् तासां ॥ मद्विधं तु सर्वबहुप्रेमयुक्तानां तथा नैव मे एकनिष्ठं ॥ तस्माद्वो युष्माकमेव साधुना
साधुकृत्येन तत्तद्युष्मात्स्वसाधुकृत्यं प्रतियातु प्रतिकृतं न भवति युष्मत्सौशील्येनैव मामानृण्यं न तु मत्कृतप्रत्युपकारेणेत्यर्थः ॥२२॥ मेद्वात्रिं
शः ॥ त्रयस्त्रिंशे ततो गोपीमंडलीमध्यगो हरिः ॥ प्रियाभिस्ता रमयामास ह्रदिनीवनकेलिभिः ॥ ॥ तत्र रासं गृहे राजन् ॥ यद्वा ॥ तस्य भगवतो गेन
वपुषाकारवरणाद्यवयवैर्वा उपचिताः समृद्धा आशिषो यासां ताः ॥२॥

२०२
८७

रासक्रीडा रासो नाम बहुभिर्नर्त्तकीभिर्युक्तो नृत्यविशेषः तां क्रीडां अन्योन्यमाबद्धाः संग्रथिता बाहवो यैस्तैः सह ॥ १ ॥ तत्ताहितत्समभिनयेन रसे
ति रासोत्सवरसप्रस्तुतरवहुष्णध्विकेन माईन ॥ नारीमंडलरूपेण वेष्ठिता नाना ह्ययोर्द्वयोर्मध्ये प्रविष्टेन ॥ ते नैव कंठे गृहीता नानाउभयतश्चालिंगि
ता नाना ॥ कथंभूतेन येन सर्वाः स्त्रियः स्वस्वनिकटं मामेवाश्लिष्टवानिति मनोरमे(?) रतेन ॥ एतदर्थं द्वयोर्द्वयोर्मध्ये प्रविष्टेनेत्यर्थः नचैकस्य कथंत

तत्रारभत गोविंदो रासक्रीडामनुव्रतैः ॥ स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ १ ॥ रासोत्सवः संप्रवृत्तो गोपीमंडलमं
डितः ॥ योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ २ ॥ प्रविष्टेन गृहीतानां कंठे स्वनिकटं स्त्रियः ॥ यं मन्येरन्नभस्तावद्विमा
नशतसंकुलं ॥ ३ ॥ दिवौकसां सदाराणां औत्सुक्यापहृतात्मनां ॥ ततो दुंदुभयो नेदुर्निपेतुः पुष्पवृष्टयः जगुर्गंधर्वपतयः
सस्त्रीकास्तद्यशोऽमलं ॥ ४ ॥ वलयानां नूपुराणां किंकिणीनां च योषितां ॥ सप्रियाणामभूच्छब्दस्तुमुलो रासमंडले ॥ ५ ॥ तत्रा

तिशुशुभे ताभिर्भगवान्देवकीसुतः ॥ मध्ये मणीनां हैमानां महामरकतो यथा ॥ ७ ॥
याप्रवेशः सर्वसंनिहितत्वेवाकृतः
स्वैकनिकटत्वाभिमानस्तासामित्यत उक्तं योगेश्वरेणेति ॥ अचिंत्यशक्तिनेत्यर्थः ॥ ३ ॥ तावत्तत्क्षणमेव ॥ अत्यौत्सुक्यव्याप्तमनसां
सस्त्रीकाणां देवानां विमानशतैः संकीर्णं नभो बभूव ॥ ४ ॥ ५ ॥ सप्रियाणां कृष्णसहितानां कलः संकीर्णः ॥ ६ ॥ महामरकतो नीलमणि
मणिरिव हैमानां मणीनां मध्ये मध्ये ताभिः स्वर्णवर्णाभिरास्त्रिष्टाभिः शुशुभे गोपीद्वयमभिप्रायेणावादि नैव मध्यपदार्थत्वेनैकवचनं ॥

८७

स यथा ताभिः शुशुभे तथा तासु पितेन विरेजुरित्याह पादन्यासैरिति भुजविधुतिभिः करचालनैर्भज्यमानैर्मध्यैः चलद्भिः कुचैश्च पटैश्च गंडलो-
लैः गंडेषु लोलैः चंचलैः स्विद्यन्मुख्यः स्विद्यंति स्विद्यन्ति मुखानि यासां ताः कवरेषु रशनानां च ग्रंथयो यासां ताः ॥ यद्वा तेषु ताम्रवत्र-
ग्रंथयस्त्वर्थः ॥ तत्र नानामूर्तिः कृष्णो मेघवक्रमिव ता तडित इव विधा तडितः ... इव गीतं गर्जितमिव चेति यथा मेघवपुर्वपुत्वं ॥ ८ ॥ नृत्यमा-
नाः नृत्यंतः ॥ रक्तकंठ्यः नानारागैरनुरंजितकंठ्यः कृष्णस्याभिमर्शेन मुदिताः इदं विश्वं ॥ ९ ॥ मुकुंदेन सह स्वरजातीः षड्जादिस्वरालापगतीः श्रु-

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः ॥ स्विद्यन्मुख्यः कवररशनाग्रंथयः
कृष्णवध्वो गायंत्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥ ८ ॥ उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः ॥ कृष्णाभिमर्शमुदिताय-
द्गीतेनेदमावृतं ॥ ९ ॥ काचित्समं मुकुंदेन स्वरजातीरमिश्रिताः ॥ उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ॥ तदेव ध्रुवमुन्निन्ये
तस्मै मानं च बह्वदात् ॥ १० ॥ काचिद्रासपरिश्रांता पार्श्वस्थस्य गदाभृतः ॥ जग्राह बाहुना स्कंधं श्लथद्वलयमल्लिका ॥ ११ ॥ तत्रैकां-
सगतं बाहुं कृष्णस्योत्पलसौरभं ॥ चंदनालिप्तमाघ्राय हृष्टरोमा चुचुंब ह ॥ १२ ॥ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडितं ॥ गंडं गंडे
संदधत्याः प्रादात्तांबूलचर्वितं ॥ १३ ॥

मिश्रिताः कृष्णोन्नीताभिरसंकीर्णाः प्रीयमाणेन संमानिताः ॥ तदेव ध्रुवमनमेव ध्रुवं ध्रुवाख्यं
तालविशेषं कृत्वा त्रिरुन्नीतवती ॥ १० ॥ एवं नृत्यगीतादिना श्रीकृष्णसंमानिताः नानाभावप्रीतिविलसितं तन्माह काचिदिति ॥ श्लथंति वलयानि
मल्लिकाश्च यस्याः सा ॥ ११ ॥ उत्पलस्य सौरभमिव सौरभं यस्य तं बाहुं ॥ १२ ॥ नाट्येन नृत्येन विक्षिप्तयोश्चलयोः कुंडलयोः त्विषा त्विषा मंडितं गंडं

१०.१
७८

कूजंती नूपुरमेखला च यस्याः सा ॥१४॥ एवमन्यास्वपि गोप्यो यथा यथा नानाविभ्रमैर्विजह्रुरित्याह गोप्य इति ॥१५॥ तत्र वारकेषु गायकेषु च सत्स्वीकेषु च सत्स्वीकेषु गंधर्वचित्ररथादिषु रसावेशेन स्तुत्युक्तवान्स्वामेव वाद्यादि संपत्तिर्दर्शयन् रासमंडलमाह कर्णोत्पलेति ॥ कर्णोत्पले चालकविटंके च ऽलंकृताः कपोलेषु घर्मा वक्त्रेषु श्रीः शोभा यासां ताः ॥ घोषाः किंकिण्यः वलयनूपुरघोषैर्वाद्यैर्वादित्रैः स्वकेशेभ्यः स्रस्ताः स्रजो यासां

नृत्यंती गायती काचित्कूजन्नूपुरमेखला ॥ पार्श्वस्थाच्युतहस्ताब्जं श्रांताधात्स्तनयोः शिवं ॥१४॥ गोप्यो लब्ध्वाच्युतं कांतं श्रिय एकांतवल्लभं ॥ गृहीतकंठ्यस्तद्दोर्भ्यां गायंत्यस्तं विजह्रिरे ॥१५॥ कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः ॥ गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्यां ॥१६॥ एवं परिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ॥ रेमे रमेशो व्रजसुंदरीभिर्यथार्भकः स्वप्रतिबिंबविभ्रमः ॥१७॥

ताः ॥ एतेन लीलागतिसंभ्रमः केशाः सशिरःकंपया रेखया दृष्टिमिवाद्भुतं चित्रितं शितं ॥ भगवता सह ननृतुः भ्रमरा एव गायका यासां ता दृशसभायां ॥१६॥ यथा गोप्यो नानाविभ्रमैर्भगवता सह वि[illegible]जह्रुः एवं भगवानपि ह्यावित्विलासैस्ताभिः सह रेमे इत्याह एवमिति ॥ तद्विलासा न भिन्नतसीव चरतीति दृष्टांतः यथार्भकः रमते ॥ स्वप्रतिबिंबैर्विभ्रमः क्रीडा यस्य स एव ॥ अनेनैव दर्शितं ॥ स्वीयमेव सर्वकलाकौशलं सौभाग्यलाव ण्यमाधुर्यादि च ताभिः संचार्य ताभिः सह रेमे ॥ यथार्भकः स्वप्रतिबिंबैरिति ॥१७॥

रास
७८

नात्र भगवद्विलासे राकुलाव भूवुरित्याह तरंगेति॥ तरंगास्तरंगेन प्रकृष्टा प्रसूतप्रीति त्वया आकुलान्यवशानीन्द्रियाणि यासां ताः विस्मयवंध
नात केशाः रीनजमाप्रतिवोरं यथापूर्वं धम्मिल्लनाले समर्थ्यां वभूवुः विहत्वन्नमाला आभरणानि च यासां ताः॥ १८॥ न केवलं ता एवाकुलेन्द्रियाः किंच
रे व्योपीत्याह हृत्स्वविक्रीडितमिति॥ किंच॥ शशांकत्वेति॥ च्युनेनेतत्सवितशशांकेन विस्मितेन नगतो विस्मृतायाः नतः प्राकृताः सर्वे विग्रहाः तत्रैव
तस्थुः नतस्त्रातिरीयां हृत्पविश्वयया हृद्विजकृद्धिरिति॥ १९॥ किंच॥ कृत्वेति॥ अयं भावः॥ कात्यायनि महामाये महायोगिन्यधीश्वरि॥ नंदगोपसुतं देवि

नदद्गांगतरंगसंगरभसाकुलेंद्रियाः केशान्तबद्धकल्हारकवरीकांचा॥ नांजः प्रतिव्योढुं मलं व्रजाद्व्रियो विवित्वन्नमाला भरणाः कृत्स्न
॥ १८॥ हृत्स्वविक्रीडितवीक्ष्य मुमुहुः खेचराः स्त्रियः॥ कामार्दिताः शशांकश्च सगणो विस्मितो भवत्॥ १९॥ कृत्वा तावं
तमात्मानं यावतीर्व्रजयोषितः॥ रेमे स भगवांस्ताभिरात्मारामोऽपि लीलया॥ २०॥ तासामपि विहारेण श्रान्तानां वदनानि सः
प्रामृज्यत्करुणः प्रेम्णा शंतमेनांगपाणिना॥ २१॥ गोप्यः स्फुरत्पुरटकुंडलकुन्तलत्विड्गंडश्रिया सुधितहासनिरीक्षणेन

पतिं मे कुरु ते नम इति प्रत्येकं ताभिः प्रार्थनात्॥ भगवतापि यावता
मानेरधत्यर्षभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः॥ २२॥
वाला व्रजस्त्रियस्तावमयेमारमस्य यदूपा इति तथैव प्रतिसन्तत्वानावंतमात्मानं कृत्वा रेमे इति॥ यावतीर्यावत्यः॥ २०॥ कृपातिशयमाह तासामिति॥ ततोऽतिहृ
ष्टानां गोपीनां चरितमाह गोप्य इति॥ स्फुरतां पुरटकुंडलानां कुंतलानां च त्विषा गंडेषु या श्रीस्तया सुधीतेनामृतायितेन अमृतायितेन हासेन सहितेन
निरीक्षणेन च ऋषभस्य पत्युः कृष्णस्य मानेरधत्यः पूजां कुर्वत्यः तत्कर्माणि जगुः तस्य कररुहैर्नखैः स्पर्शेन प्रमोदेन यासां ताः॥ २२॥

२०मू

८८

अथ जलकेलिमाह ॥ ताभिरिति ॥ ताभिः अंगसंगेन घृष्टा समर्दिता स्रक् तस्याः अ एव तासां कुचकुंकुमेन रंजितायाः सवंधिभिर्गंधर्वपालिभिः गंधर्वपाः गंधर्वपतय एवमायंतो ये अलयः तैरनुद्रुतः अनुगतः सन् कं अंभः वाः उदकं आविशत् ॥ भिन्नसेतुः विदारितवप्रः स्वयं चातिक्रांतलोकवेदमर्यादः ॥ २३ ॥ स्वरतिः आत्मारामोपि अत्र गोपीमंडले अभिरवितवान् ॥ २४ ॥ स्थलजलक्रीडे दर्शिते वनक्रीडां दर्शयति तत इति ॥ यमुनायाः उपवने ॥ जलस्थलप्रसूनानां गंधो यस्मिन् तेनानिलेन जुष्टानि दिशां तटानि अंतानि यस्मिन् ॥ यद्वा दिशां अंतरस्थलं यस्मिन् तस्मिन् उपवने ॥ भृंगानां

ताभिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजः स्वकुचकुंकुमरंजितायाः ॥ गंधर्वपालिभिरनुद्रुत आविशद्वाः श्रांतो गजीभिरिभराडिव भिन्नसेतुः ॥ २३ ॥ सोंभस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोंग ॥ वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेंद्रलीलः ॥ २४ ॥ ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे ॥ चचार भृंगप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः ॥ २५ ॥ एवं शशांकांशुविराजिता निशाः स सत्यकामोनुरताब

मदानां च गणैरावृतः ॥ २५ ॥ एवं क्रीडाभिगमनं एवमिति सत्य ॥ लागणाः ॥ सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥

मः सत्यसंकल्पः अनुरागेह्लीकरं वस्तुः एवं सर्वा निशाः सेवितवान् ॥ शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषां माश्रयभूता निशाः ॥ यद्वा निशा इति द्वितीयांतं तत्संयोगे शृंगाररसाश्रयाः शरदि प्रसिद्धाः काव्येषु या कथास्ताः सिषेवे इति ॥ एवमप्यात्मन्येवावरुद्धः सौरतः चरमधातुर्न तु स्खलितो यस्येति कामजयोक्तिः ॥ २६ ॥

राम

९९

म॥ प्रतीपं प्रतिकूलं अधर्ममित्यर्थः आचरत् कृतवान्॥ न चेदधर्ममात्रं कलत्रं प्रकृताणां रिव त॥ किंतु महात्माहमित्याह परदाराभिमर्शन-
मिति॥२७॥ आप्तकामस्यैनाप्यमधर्म इति चेत् यद्येवं काममावान्निरिदितं केनाभिप्रायेण कृतवानिति पृच्छति आप्तकाम इति॥२८॥ परमेश्वरैके
सत्यन्यायेन परिहर्तुं सामान्यतो महतां वृत्तमाह धर्मव्यतिक्रम इति॥ साहसं च दृष्टं प्रजापतीन्द्रसोमविश्वामित्रादीनां तच्च तेषां तेजस्विनां दोषा-
य न भवतीति॥२९॥ नहि यद्यदाचरति श्रेष्ठः इति न्यायेनान्योपि कुर्यादित्याशंक्याह नैतदिति॥ अनीश्वरः देहादिपरतंत्रः यथाहृद्व्यतिरिक्तो विष-

सं॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च॥ अवतीर्णो हि भगवानंशेन जगदीश्वरः॥२६॥ स कथं धर्मसेतूनां वक्ता कर्त्ता-
भिरक्षिता॥ प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनं॥२७॥ आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितं॥ किमभिप्राय एतन्नः संशयं
छिंधि सुव्रत॥२८॥ श्रीशुक उवाच॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा॥२९॥ नैतत्स-
माचरेज्जातु मनसापि ह्यनीश्वरः॥ विनश्यत्याचरन्मौढ्याद्यथारुद्रोब्धिजं विषं॥३०॥ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित्॥
तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत्॥३१॥ कुशलाचरितेनैषामिह स्वार्थो न विद्यते॥ विपर्ययेण वानर्थो निरहंकारिणां प्र-
भो॥३२॥ किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसां॥ ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः॥३३॥

मावरन्नु अमहरुपन्॥३०॥ कथं तर्हि सदाचारस्य प्रामाण्यं अत आह ईश्वराणामिति तेषां वचः सत्यं॥ अतस्तदुक्तमाचरेदेव॥ आचरितं तु क्वचित्सत्यं॥ अतः
स्ववचोयुक्तं तेषां वचसा यद्युक्तं अविरुद्धमाचरितं तदेवाचरेत्॥३१॥ ननु तर्हि तेपि किमेवं साहसमाचरंति तत्राह कुशलेति आत्मकर्मक्षपणमात्रे

२०५
१००

एतदेव स्फुटीकरोति यत्पादेति यस्य पादपंकजपरागस्य निषेवया तृप्ताः यद्वा यस्य पादपंकजपरागेनिषेवा येषां ते तथा ते च ते तृप्ताश्चेति भक्ता इत्यर्थः त याात्तानिच्छया न नह्यमानाः बंधं न प्राप्नुवंतः ३५ परदारत्वं गोपीनामभ्युपगम्य परिहृतं इदानीं भगवतः सर्वांतर्यामित्वेन परदारसेवा नाम न काचिदित्याह गोपीनामिति यो ऽतश्चरत्यध्यक्षो बुद्ध्यादिसाक्षी स एव क्रीडनेनेह देहभाक् न त्वस्मदादिवद्देहस्थः येन दोषः स्यादिति ३६ नेवं

यत्पादपंकजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबंधाः स्वैरं चरंति मुनयोपि न नह्यमानास्तस्येच्छयात्तवपुषः कुत एव बंधः ३५ गोपीनां तत्पतीनां च सर्वेषामेव देहिनां योंतश्चरति सोध्यक्षः क्रीडनेनेह देहभाक् ३६ अनुग्रहाय भक्तानां मानुषं देहमास्थितः भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ३७ नासूयन्खलु कृष्णाय मोहितास्तस्य मायया मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ३८ ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः अनिच्छंत्यो ययुर्गोप्यः स्वगृहान्भगवत्प्रियाः ३९ विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोनुशृणुयादथ वर्णयेद्यः भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ४० इति श्री भाग वते महा पु रा णे द श म त्रयस्त्रिंशोध्यायः

एवं चेत्तर्ह्याप्तकामस्य निरीहस्य ततः प्रवृत्तिः किमिति तत्राह अनुग्रहायेति शृंगाररसाकृष्टचेतसोतिबहिर्मुखानपि स्वपरान्कर्तुमिति भावः ३७ न नु ते पि किं नाचाराः स्वचेष्टितमेवमेवेति वदंतीति तत्राह नासूयन्निति एवंभूते स्वमायाप्रभावेन तत्पाशंकावा कः पापाशंकेत्यादि इति भावः ३८ ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते ३९ भगवतः कामविजयरूपा रासक्रीडा श्रवणादेः कामविजयमेव फलमाह विक्रीडितमिति अचिरेण धीरः सन्हृद्रोगं कामं आशु अपहिनोति त्यजतीति ४० इति श्रीपरमानंदश्रीपादशिष्यश्रीधरनिर्मिता श्रीभागवतभावार्थदीपिकाटीकायां त्रयः ३ ३ मं य

रास
१००
राः

चतुःत्रिंशेहिनाग्रस्तं नंदं हरिरमूमुचत् ॥ विद्याध्रं चांगिरःशापाछंखचूडं तथावधीत् ॥१॥ एवमापरेशतः कामं किंकरीकृत्य कामतः अनंगशंखचूडं वशं निन्ये
तथा विद्याधराधिपं ॥२॥ तदेवकामानुग्रहसुखेन कामनं प्रदर्शितिपाद्य तथैव विद्याधरं जगद्धिपादार्थितं तत्र प्रसंगादर्शयति एकदेति ॥१॥ गावः
गाः मधु मधुरं ॥ मध्वन्नं मधुना सहितमन्नं ॥ जलमात्रं प्राश्य पोषिता ह्यानिशां तत्र ऊषुः स्थितवन्तः ॥४॥ महान् अहिः अजगरः उरगः उरसा गच्छतीति

शुक उवाच ॥ एकदा देवयात्रायां गोपाला जातकौतुकाः ॥ अनोभिरनडुद्युक्तैः प्रययुस्तेंबिकावनं ॥१॥ तत्र स्नात्वा सरस्वत्यां देवं प
शुपतिं विभुं ॥ आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेंबिकां ॥२॥ गावो हिरण्यं वासांसि मधु मध्वन्नमादृताः ॥ ब्राह्मणेभ्यो ददुः सर्वे देवो
नः प्रीयतामिति ॥३॥ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः ॥ रजनीं तां महाभागा नंदसुनंदकादयः ॥४॥ कश्चिन्महानहिस्तस्मि
न्विपिनेतिबुभुक्षितः ॥ यदृछयागतो नंदं शयानमुरगोग्रसीत् ॥५॥ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयं ॥ सर्पो मां ग्रसते ता
त प्रपन्नं परिमोचय ॥६॥ तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसोत्थिताः ॥ ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं विव्यधुरुल्मुकैः ॥७॥ अलातैर्दह्यमा
नोपि नामुंचत्तमुरंगमः ॥ तमस्पृशत्पदाभ्येत्य भगवान्सात्वतांपतिः ॥८॥ स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ॥ भेजे सर्पवपु
र्हित्वा रूपं विद्याधरार्चितं ॥९॥ तमपृछद्धृषीकेशः प्रणतं समवस्थितं ॥ दीप्यमानेन वपुषा पुरुषं हेममालिनं ॥१०॥

सुपलक्षितं तद्वपन्नं ॥ अग्रसीत् जग्रास ॥५॥६॥ विव्यधुः ताडयामासुः उल्मुकैः ज्वलत्काष्ठैः ॥७॥ अलातैः तैरेव ॥८॥ विद्याधरेषु अर्चितं पूजितं ॥९॥ गोपे
श्वात्मन ऐश्वर्यं प्रकाशयितुमविद्वानिव तमपृछत् ॥ दीप्यमानेन वपुषा समवस्थितं ॥१०॥

१०.पू
१०१

यः परया शोभया प्रकाशेन स भवान् ॥ क इति ॥ ११ ॥ प्राहसं उपहसितवानस्मि ॥ प्रलब्धैः स्वप्रहसितैः मदीयैर्नेव पापेन निमित्तेन ॥ १२ ॥ यत्स्य पतः शापा
न् ॥ १४ ॥ आपृच्छे त्वलोकं गंतुमनुज्ञां याचे आत्मावह हन् दुःखनाशनं ॥ १५ ॥ ७ ॥ अहिरिहेह निहत्यैवं प्राय्यन्मत्तन्नहरर्शनं ॥ तद्वदुन्मादिनं

कोपरागनुपरयालब्धापीव नेदृत दर्शनः कथं नुगुप्तितापेनां मातिवा प्रापितो वनं ॥ ११ ॥ सर्प उवाच ॥ अहं विद्याधरः क
श्चित्सुदर्शन इति श्रुतः ॥ श्रिया स्वरूपसंपत्त्या विमानेनाचरन् दिशः ॥ १२ ॥ ऋषीन् विरूपांगिरसः प्राहसं रूपदर्पितः ॥
तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥ १३ ॥ शापो मेनुग्रहायैव कृतस्तैः करुणात्मभिः ॥ यदहं लोकगुरुणा पादस्पृष्टो
हताशुभः ॥ १४ ॥ तं त्वाहं भवभीतानां प्रपन्नानां भयापहं ॥ आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥ १५ ॥ प्रपन्नोस्मि महा
योगिन् महापुरुष सत्पते ॥ अनुजानीहि मां देव सर्वलोकेश्वरेश्वर ॥ १६ ॥ ब्रह्मदंडाद्विमुक्तोहं सद्यस्तेच्युत दर्शनात् ॥ यन्ना
म गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ॥ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥ १७ ॥ इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवंद्य
च ॥ सुदर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः ॥ १८ ॥ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः ॥ समाप्य तस्मि
न्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः ॥ १९ ॥ कदाचिदथ गोविंदो रामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वने रात्र्यां मध्यगौ व्रज
योषितां ॥ २० ॥ उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्तांगौ स्रग्विनौ विरजांबरौ ॥ २१ ॥ ॥ ॥

कृष्णः शायक्त्वडमताउपत ॥ नम्रमंगमाह कदाचिदिति ॥ १० ॥ विरजोवरात्रिति विरजसी अंबरे ययोस्तौ ॥ २२ ॥ श्रीकल्याणनमः राम

राम
१०१

किंच निशाप्रवेशे समुद्भवेतो ॥ उदित उडुपस्य तारका यस्मिन् तत ॥ मल्लिकागंधेन मन्दानुकूलपोपसृतत ॥ २१ ॥ अनिबद्धत्वा रसैर्युगपत्कल्पयित
मराकाप्रपिता हारमंडलमूर्छितं युगपत्कल्पयंतौ ॥ मनःश्रवणयोर्मंगलं यथा भवति तथा जगतः आगायतामिति ॥ २२ ॥ मूर्छिताः तनुगीतलीन

निशामुखं मानयंतावुदितोडुपतारकं ॥ मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना ॥ २१ ॥ जगतुः सर्वभूतानां मनःश्रवणमंगलं ॥ तौ
कल्पयंतौ युगपत्स्वरमंडलमूर्छितं ॥ २२ ॥ गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप ॥ स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः
एवं विक्रीडितोः स्वैरं गायतोः संप्रमत्तवत् ॥ शंखचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥ २४ ॥ तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदा
जनं ॥ क्रोशंतं कालयामास दिश्युदीच्यामशंकितः ॥ २६ ॥ क्रोशंतं कृष्ण रामेति विलोक्य स्वपरिग्रहं ॥ यथा गा दस्युना ग्रस्ता भ्रातरावन्व
धावतां ॥ २७ ॥ मा भैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ ॥ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं ॥ २८ ॥ स वीक्ष्य तावनुप्राप्तौ काल
मृत्यू इवोद्विजन् ॥ विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥ २९ ॥ तमन्वधावद्गोविन्दो यत्र यत्र स धावति ॥ जिहीर्षुस्तच्छिरोरत्नं
तस्थौ रक्षन् स्त्रियो बलः ॥ ३० ॥ अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः ॥ जहार मुष्टिनैवांग सहचूडामणिं विभुः ॥ ३१ ॥ शंखचूडं निहत्यै
वमादाय मणिं भास्वरं ॥ अग्रजायाददात्प्रीत्या पश्यंतीनां च योषितां ॥ ३२ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे शंखचूडवधः

विन्नाः स्रंसद्दुकूलवलयं यस्मात् तमात्मानं देहं स्रस्ताः केशेभ्यः स्रजो यस्मात्तं च ततो नाविदन् ॥ २४ ॥ २५ ॥ निरीक्षतोः निरीक्षमाणयोः तन्नाथे
यस्य तं ॥ कालयामास वहते स्म यामास ॥ २६ ॥ दस्युना ग्रस्ता ॥ २७ ॥ मा भैष्टेत्यभयं प्रदत्तेत्यभयवाचौ ॥ २९ ॥ ३० ॥ शिरसा सह चूडामणिं नहारेत्यर्थः ॥ ३२ ॥ ने हिताः

२०पू० पंचत्रिंशे वनं याते कृष्णे गोकुलयोषितः॥ युग्मश्लोकानुगीतेन निन्युर्दुःखेन वासरान्॥१॥ एवं रात्रिषु कृष्णेन सह रमणमभिरमिता अपि दिवा तद्विरहा
१०२ नाम युगगीतेन हरिं निस्तार प्रकारमाह गोप्य इति॥ दुःखेन कृच्छ्रेण वामबाहुकृतवामकपोल इत्यादीनि द्वादश युगलानि॥ हे गोप्यः वाम
बाहोर्मूले कृतः अर्पितः वामकपोलो येन सः वल्गिते नर्त्तिते भ्रुवौ यस्य स वल्गितभ्रूर्मुकुंदः अधरेऽर्पितं कोमलाभिरंगुलीभिराश्रि

श्रीशुक उवाच॥ गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः॥ कृष्णलीलाः प्रगायंत्यो निन्युर्दुःखेन वासरान्॥१॥
गोप्य ऊचुः॥ वामबाहुकृतवामकपोलो वल्गितभ्रूरधरार्पितवेणुं॥ कोमलांगुलिभिराश्रि
तमार्गं गोप्य ईरयति यत्र मुकुंदः॥१॥ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः॥
काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः॥२॥

तमार्गाः समसन्नत्वात् छिद्राणि यस्य तं यत्र यदा ईरयति वादयति॥२॥ तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सह वर्त्तमा
ना अपि तद्गीतिरागमुपधार्य कर्णपथं प्रथमं विस्मिताः ततः काममार्गणैः समर्पितानि चित्तानि याभिस्ताः तत एव रात्स्यर्थः सल
ज्जाः सत्यः कश्मलं मोहं ययुः अलिगां अपस्मृताः विस्मृता नीव्यो याभिरिति॥ अत एवंभूतस्य कृष्णस्य विरहे कथं सहाम इति सर्वत्र वा १०२
क्यशेषः॥३॥

हंत हे अबलाः इदं चित्रं शृणुत । हारहासः हारवद्विशदो हासो यस्य सः यद्वा वेणुवादनेन अधोवदनेन नंदसूनुः हारेषु स्फुरन् हासो यस्य । हार
वद्वा वक्षसि शोभमानो हासो यस्य सः । यद्वा हारेण हास इव विशदा स्फुरंती यस्मिन् उरसि स्थिरा विद्युद् इव लक्ष्मीर्यस्य सः । यर्हि यदा कू
जितवेणुः नादितवेणुर्भवति ३ तदा ते व्रजवृषा मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ते आरात् दूरादेव दंतैर्दष्टाः कवला ग्रासा यैः
ते धृता उन्नमिता कर्णा यैस्ते निद्रिता इव लिखितचित्रमिवासन् । अविद्यमानाभिः चेष्टाभिः स्थितवंत इति चित्रमित्यर्थः ४ किंच अचेतनेष्वपि

हंत चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् । नंदसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ३
वृंदशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् । दंतदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ४
बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः । कर्हिचित्सबल आलि स गोपैः गाः समाह्वयति यत्र मुकुंदः ५
तर्हि भग्नगतयः सरितो वै तत्पदांबुजरजोनिलनीतं । स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः

हृतं तदतीव चित्रमित्याहुः हे आलि बर्हिणः मयूरस्य स्तबकाः मयूरपिच्छाः धातवो गैरिकादयः पलाशानि पल्ल
वाश्च तैः बद्धश्चासौ मल्लानां परिबर्हः परिकरः तं विडंबयति अनुकरोतीति तथा स मुकुंदः गोपैः सह वेणुनेति उपरितनमत्रापि तातवां यत्र य
दा गाः समाह्वयति ५ तर्हि तदा तत्पदांबुजरजः अनिलेन नीतं तत्पदांबुजरजः स्पृहयंत्य इव भग्नगतयः सरितः वै निश्चितं वयमिव ता अ
प्यबहुपुण्याः यतो नं प्राप्नुवंति । केवलप्रेम्णा वेपिताः कंपिता भुजास्तरंगा यासां ताः स्तिमिता निश्चला आपो यासां ताः गोप्योपि लोचनयोः स्तिमितज

२०५ स्थावरेष्वपि अतिचित्रं दृश्यत इत्याह ॥ अनुचरैर्गोपैः देवादिभिर्वा मुग्धानां वा आदिपुरुषश्चेति अचलभूतिनिश्चलश्रीः वेणुनातन्ननाम्ना
१०२ गीतेन नतदाशरणानां भारेण विटपाशाखा यासां ता वनगता लताः ॥ यस्मिन्विहंगप्रकाशमानं पूर्वयंत्यः स्वमधुधारा एव भूत्वा स्रोतीति विस्मये ॥ तरव
स्तत्स्थानतीत्यनामपि तत्रैवानंद इति भावः ॥ एतानि विस्मयचिह्नलक्षणानि ॥ ८ ॥ किंच सरसि कमलवनेषु विहरतां पक्षिणां मनआकर्षणं

अनुचरैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः ॥ वनचरो गिरितटेषु चरंती वेणुनाह्वयति गाः सयदाहि ॥ ७ ॥ वनल
ताः तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्पफलाढ्याः ॥ प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ ८ ॥ दर्श
नीयतिलको वनमाली दिव्यगंधतुलसीमधुमत्तैः ॥ अलिकुलैरलघुगीतमभीष्टमाद्रियन्यर्हि कूजितवेणुः ॥ ९ ॥
सरसिसारसहंसविहंगाश्चारुगीतहृतचेतस एत्य ॥ हरिमुपासित ते यतचित्ता हंत मीलितदृशो धृतमौनाः ॥ १० ॥

तद्गीतं किंच नरस्येषामित्याह ॥ दर्शनीयतिलक इति ॥ दर्शनीयतिलको यस्य दर्शनीयानां ह्रदराणां मध्ये श्रेष्ठ इति भावः ॥ वनमालया
हृद्या दिव्यगंधा तुलसी तस्या मधुना मत्तैः अलिकुलैः अलघूच्चैः अभीष्टं अनुकूलं गीतं आद्रियन् आदरेण गृह्णन् यर्हि अधरे संधित राम
वेणुर्भवति ॥ ९ ॥ तर्हि ये सरसि सारसहंसाद्यन्ये च विहंगाश्चारुणा गीतेन हृतचेतसः एत्य आगत्य हरिं उपासत अपजन समीपे उपविविश्य १०२
वीहतेति विषादे ॥ १० ॥

मेघोपिहरिसेवतस्मादाहः सहवलइति ॥ मोव्रजदेव्योगोप्यः सहवलः सरामः कृष्णः स्रग्भिर्निर्मितानामवतंसानांकर्णभूषणानांविला
सोयस्ययद्वा ॥ मुक्ताफलस्रगापीडेनविलासोयस्येतिक्षितिभृतः सानुषुगिरिस्तेषुवर्तमानः स्वयंजातहर्षोविश्वंहर्षयन्यदावेणुरवेण
उपरंभवतिनादयतिनादेनापूरयतीत्यर्थः ॥ ११ ॥ तदामेघः महतः कृष्णस्यातिक्रमेणशंकितंचेतोयस्यसः नउच्चैर्यातिनचोच्चैर्गर्जति ॥ किंतु
तत्रैवस्थितःसन्वेणुरवमनुमंदमंदंगर्जति ॥ किंचमहत्सुहृदंविश्वाग्निहरणाद्विभाव्यासुहृत्कृष्णः तंसुमनोभिरभिवर्षन्नत्रसुहृदोरैर्वैः क्रियमा
णांकृष्णमवर्षंमेघकल्पयित्वोक्तंउपारोपात्कृष्णमनतयाकल्पितः सहववववारेववतारूपाभ्यवर्षति ॥ आतपादातपात्रायतइतिप्रतपत्रंछत्रंचछा

सहवलः स्रगवतंसविलासैः सानुषुक्षितिभृतोव्रजदेव्यः ॥ हर्षयन्यर्हिवेणुरवेणजातहर्षउपरंभतिविश्वं ॥ ११ ॥ महद
तिक्रमणशंकितचेतामंदमंदमनुगर्जतिमेघः ॥ सुहृदमभ्यवर्षत्सुमनोभिः छाययाचविदधत्प्रातपत्रं ॥ १२ ॥ विविध
गोपचरणेषुविदग्धोवेणुवाद्यउरुधानिजशिक्षाः ॥ तवसुतः सतियदाधरबिंबेदत्तवेणुरनयत्स्वरजातीः ॥ १३ ॥ सव
नशस्तदुपधार्यसुरेशाः शक्रसर्वपरमेष्ठिपुरोगाः ॥ कवयआनतकंधरचित्ताः कश्मलंययुरनिश्चिततत्त्वाः ॥ १४ ॥

छाययाकुर्वन्निति ॥ १२ ॥ अपिचमहदेतदाश्चर्यमित्याहः विविधेति ॥ हे सतियशोदे तवसुतः नानागोपक्रीडासुनिपुणः वेणुवाद्येनिजैर्वशिक्षायाउ
ताः स्वात्मशिक्षिताननन्याः श्रुताइत्यर्थः स्वरजातीः विषादकमधमारिस्वरालापभेदात् अनयत्नीतवान् ॥ १३ ॥ एताः स्वरजातीः सवनसः मंद्रमध्य
तारभेदेनयत्नोगीतध्वनिरागतः तत्रआनताकंधराश्चित्तंचयेषांतेउपधार्यसम्यगाकर्ण्यकवयाः कोविदाअपितेननिश्चितंतत्त्वंतद्धेतुर्यैः कश्मल
मोहंययुरिति ॥ १४ ॥

द०पू
१०४

अस्माकं तु मोहं विभ्रमं रत्याढ्यः निजपदाब्जदलैरिति ॥ ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषु तैः निजानि पदान्येवाब्जदलानि तैः व्र
जभुवः ॥ खुरतोदं खुराक्रमणव्यथां शमयन् वर्ष्मणा धुर्यो गजः तद्वद्गतिर्यस्य स कृष्णो वादितवेणुः सन् यत्र व्रजति ॥ ५ ॥ तेन निमित्तेन सविलास
वीक्षणेनार्पितो मनोभववेगो यासां ता वयं ॥ कुजा वृक्षास्तेषां गतिं गमिताः सत्यः मोहेन न विरामः कबरं वा वसनं वेति ॥ ६ ॥ किंच ॥ मणिधरः

निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः ॥ व्रजभुवः शमयन्खुरतोदं वर्ष्मधुर्यगतिरीरितवेणुः ॥ ५ ॥ व्रज
ति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥ कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥ ६ ॥ ॥
मणिधरः क्वचिदागणयन्गाः मालया दयितगंधतुलस्याः ॥ प्रणयिनोनुचरस्य कदांसे प्रक्षिपन्भुजमगायत यत्र
॥ ७ ॥ क्वणितवेणुरववंचितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥ गुणगणार्णमनुगम्य हरिण्यो गोपिका इव विमुक्तगृ
हाशाः ॥ ८ ॥

मणीन्ग्रथितान् गोगणनार्थं धरतीति मणिधरः ॥ क्वचिद्देशे तैर्मणिभिः गा आगणयन् तथा दयितगंधा या तुल
सी तस्या मालया सह वर्तमानः प्रणयिनः प्रियस्यानुचरस्यांसे भुजं प्रक्षिपन् यत्र यदा कदाचिदगायत ॥ ७ ॥ तदा तत्र क्वणितस्य वेणो रवे
ण वंचितानि अपहृतानि चित्तानि यासां ताः कृष्णस्य हरिण्यः कृष्णगृहिण्यो भार्याः गुणगणार्णां गुणगणमयं कृष्णमनुगत्य प्राप्ताः सत्यः कृष्णमे
वान्वसत अधावसत अनन्यवर्त्मना इत्यर्थः ॥ कुतो यतो विमुक्ता गृहाशा याभिः ताः गोपिका इव अपि इत्येवमेवं अन्वासतेति ॥ ८ ॥

राम
१०४

तदेवं वृंदावनप्रदेशेषु क्रीडित्वा सायाह्ने गोधनानि प्रत्याहृत्य यमुनायां क्रीडतस्तस्य सौभाग्यमनुवर्णयंति कुंददामकृतकौतुकवेष इति ॥ गोपीनामुक्त्वा
वा यः कुंददामभिः कृतः कौतुकेन वेषोऽलंकारो येन सः ॥ हे अनघे यशोदे तव वत्सः पुत्रः नंदसूनुः स्नेहलः यद्वा नंदे एव वृद्धः कथयंत्यः कश्चित्तव वत्स इति क-
श्चिन्नंदसूनुरिति वा ऊः नर्मदः हर्षदः सन् प्रणयिनां विजहार क्रीडति स्म ॥१९॥ तदा मलयजस्पर्शेन मलयपवनस्यैवं स्वेदहरणैः शीतस्पर्शः स्पर्शनेन तं संमा-
नयन् मंदः अनुकूलं यथा वाति वीजयति ॥ यद्वा मलयजो रक्षिणो वायुः ॥ यद्वा मलयजस्य चंदनस्य स्वांगेनुलिप्तेन स्पर्शमानयन्निति किं च वंदिन इति तावकाः सु-
नः ॥ गंधर्वादिगणाः वाद्यगीतपुष्पवर्षादिभिः परिवव्रुः परितउपासत ॥२०॥ आयांतमालोक्य ऊर्ध्वस्थिताः परस्परमूचुः वत्सल इति व्रजस्य गवां च यद्यस्माद्व्रजे

कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायां ॥ नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥१९॥ मंदवायुरुपवा-
त्यनुकूलं मानयन्मलयजः स्पर्शेनावंदिनस्तमुपदेवगणा ये गीतवाद्यबलिभिः परिवव्रुः ॥२०॥ वत्सलो व्रजगवां यदगध्रो
वंद्यमानचरणः पथि वृद्धैः ॥ कृत्स्नगोधनमुपोह्य दिनांते गीतवाद्य अनुगोडितकीर्तिः ॥२१॥ उत्सवं श्रमरुचापि दृशीनामुन्नय-
न् खुररजश्छुरितस्रक् ॥ दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ ॥२२॥ श्रीरामकृष्णगोपालकृष्णहरिहर

निवृद्धानां गवां अनुकंप्यानामस्माकमित्यर्थः ॥ वत्सलः हितकृत् अतः यद्यस्मान्नगधरः अगं गिरं धरतीति गोवर्धनोद्धरणः वृद्धैः ब्रह्मादिभिः ... पलक्षणमे-
तत्र वृद्धैर्ब्रह्मादिभिः पथीति वंद्यमानचरण इत्यर्थः ॥ सायं शीघ्रमागंतुं नंदरतिः उपोह्य एकीकृत्य गीतवेणुः वेणुकोविदाः अनुगेडितकीर्तिर्यस्य सः ॥२१॥ श्रमयुक्तयापि कांत्या
नेत्राणां हर्षमुन्नयन् उद्धर्षयन् खुररजोभिर्व्याप्तः स्रजो यस्य सुहृदामस्माकमाशिषः मनोरथस्य दित्सया दातुमिच्छया देवक्या जठरे भवतीति त-
था स एव उडुराजश्चंद्रः निरंतरं हेतुत्वेन सम्यग्भवतीति ॥२२॥

२०५ अतिसंभ्रमेणकाश्चित्समीपमायातंकथयति ॥ ईषन्मदेनविघूर्णितेविह्वलितेलोचनेयस्यसः बदरपांडुवदनः ईषन् ॥ २३ ॥ बदरवत्पांडुरवदनः
१०५ यस्यसः अत्रहेतुः कनककुंडलयोर्लक्ष्म्याकांत्यामृदूरंध्रौयस्मिन्नितिकृतदूरनमंडयन्निति ॥ कोमलगंडस्थलत्वाशोभतइति ॥ यदुपतिरितिद्विरदकोज
करमूर्ध्वोतिचप्राग्यंबहुदेवसाक्षाद्विज्ञानलित्वात्मजद्यसाविगर्वाकाधृष्टिध्यानं ॥ यद्वामस्वसंधेयिवान्मनोत्वतोज्ञकालइतिचत्तात्वाकाश्चिद्दृष्ट्वती
तिगजेंद्रगतिः चंद्रइवप्रसन्नवक्त्रः व्रजगवामस्माकंचअनंतरदिनतापंवशमयन्नुपयातिएषसमीपमायातीति ॥ २४ ॥ एवंविरहदुःखेनापित

मदविघूर्णितलोचनईषन्मानदःस्वसुहृदांवनमाली ॥ बदरपांडुवदनोमृदुगंडंमंडयन्कनककुंडललक्ष्म्या ॥ २३ ॥ यदुप
तिर्द्विरदराजविहारोयामिनीपतिरिवैषदिनांते ॥ मुदितवक्त्रउपयातिदुरंतंमोचयन्व्रजगवांदिनतापं ॥ २४ ॥ एवंव्रजस्त्रि
योराजन्कृष्णलीलानुगायतीः ॥ रेमिरेहःसुतच्चित्तास्तन्मनस्कामहोदयाः ॥ २५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे
पंचत्रिंशोध्यायः ॥ शुकउवाच ॥ अथतर्ह्यागतोगोष्ठमरिष्टोवृषभासुरः ॥ महींमहाककुत्कायः कंपयन्खुरविक्षतां ॥ १ ॥

अहोकृष्णलीलाएवगायंत्यः तस्मिन्नेवचित्तंचेतनाजीवितंयासांताः तस्मिन्नेवमनः संकल्परूपंयासांताः अतोमहानुदयउत्सवोयासांताः
अहः सुदिवसेषुरेमिरे ॥ २५ ॥ इति श्रीमत्पंचत्रिंशः ॥ षट्त्रिंशेतुहतोरिष्टोनारदोक्त्यावलात्मजौ ॥ बद्धदेवहतौताभ्यांकंसोक्रूरंसमादिशत् ॥ १ ॥ गो
पीनांसोत्सवंगीतंरासक्रीडनिहत्यसः ॥ अहन्नुगोपीमहानंदानिमहदुःखमरिष्टंतंवर्णयतिसार्धत्रयेण ॥ एवंदेवांधर्वोहिगीतनृत्यवाद्यक राम
हमवर्षादिभिः कृष्णंप्रीणयंतीनांव्रजस्यपरमोत्सवेवर्तमानेतद्विहिंसार्थंनराधिकारार्थंमयशक्त्याः तर्हितदावृषभासुरोगतिरखुरैःतंवर्णयति १०५
सार्धत्रयेण ॥ महत्यौतौककुत्कायौयस्यसः खुरैर्विदारितांमहींकंपयन् ॥ १ ॥

रंभमाणः वृषभजातिशब्दं कुर्वन् विलिखन् विदारयन् उद्यम्य ऊर्ध्वं कृत्वा ॥ वप्राणि तटानि उल्लिखन् १ ॥ किंचित्किंचिच्छकृन्मध्ये षन्नुत्सृजन्
मूत्रमुत्सृजन् ॥ तथा स्तब्धलोचनः अनिमिषलोचनः यस्य ध्वनिना गवां नारीणां चात्र आवर्तगर्भान् भवेत्स्रावः पातः पंचमष
ष्ठयोः अत ऊर्ध्वं प्रसूतिः स्यादिति भावः ॥ ३ ॥ ककुदि गतं १ ह्यंधे ४ ॥ कृष्णकृष्णरेणेति ५ ॥ ७ ॥ एवं ब्रुवन् ॥ आस्फोट्य करतलेन बाहू आहत्य तेन न

रंभमाणः खरतरः पदा च विलिखन्महीं ॥ उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् १ ॥ किंचित्किंचिच्छकृन्मुंचन्मूत्रयन्स्तब्ध
लोचनः ॥ यस्य निर्ह्रादितेनांग निष्ठुरेण गवां नृणां ॥ पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै ॥ ३ ॥ निर्विशंति घना यस्य
ककुद्यचलशंकया ॥ तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ॥ ४ ॥ पशवो दुद्रुवुर्भीता राजन् संत्यज्य गोकुलं ॥ कृष्ण कृष्णेति
ते सर्वे गोविंदं शरणं ययुः ॥ ५ ॥ भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतं ॥ मा भैष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् ॥ ६ ॥ गोपालैः
पशुभिर्मंद त्रासितैः किमसत्तम ॥ बलदर्पहाहं दुष्टानां त्वद्विधानां दुरात्मनां ॥ ७ ॥ इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन्
सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ॥ ८ ॥ सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् ॥ उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृ
ष्णमुपाद्रवत् ॥ ९ ॥ अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतं ॥ कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोऽशनिर्यथा ॥ १० ॥ भ

लशब्देन कोपयन् भुजाभोगं भुजाभोगः सएव भोगः सर्पदेहः तं सर्परेखाकारं भुजमित्यर्थः स्वयमच्युतः अन्यान् हरति संहरतीति हरिः ॥ ८ ॥ उद्यता
ऊर्ध्वं गच्छता पुच्छेन भ्रमंतो मेघा यस्मात्सः ॥ ९ ॥ अग्रेन्यस्ते विषाणाग्रे येन सः स्तब्धे असृक् लोचने रक्तलोचने यस्य सः कटाक्षिप्य कटाक्षेपेण निर्यक्

२०५
१०६

प्रत्युपोवाह प्रत्यलोमं व्याहरन् ॥ अपविद्धः अपक्षिप्तः आपतन् आद्रवन् । विक्षिप्तानि विक्षिप्तानि सर्वाङ्गानि येन सः क्रोधमूर्च्छितः क्रोधेन
व्याप्तः कृत्वा विषाणाग्रमुत्ताड्यते नैव जघान सव्यमुपतन् ॥२ सृष्टं विकटं मुखं येन स इत्यर्थः । एकवद्भावः तदुभयं समस्तं जत्रितस्य अर्थः पाराश्वाक्षिपन्
रहसितं तस्थालयन् अनवस्थिते रङ्गाणः प्रचलितनेत्रः कण्ठं कण्ठं जग्राह ॥ अथ निक्रान्ते मृत्योः शृङ्गं निवासं जग्राह । कण्ठग्रह यथा भवति तथा मृत इति वा
॥५ नयनोत्सवः नयनानामानन्दवोद्वृत्तिमान् ॥५ कामं त्रिभुवनेन वधं स्तनं तकं सतेन न विस्मृतिं । नारदः स्मारयामास कंसं हृतगिरेखवत् तदाह अरि

गृहीत्वा शृङ्गयोस्तं वृष्टशदशपदानि सः । प्रत्युपोवाह भगवान् गजः प्रतिगजं यथा ॥२ सोपविद्धो भगवता ऽनन्तरं छायम
वरः । आपतन् विक्षिप्तसर्वाङ्गो निःश्वसन् क्रोधमूर्च्छितः ॥३ तमापतन्तं स निगृह्य शृङ्गयोः पदा समाक्रम्य निपात्य भूतले । निः
पीडयामास यथार्द्रमम्बरं कृत्वा विषाणेन जघान सोपतत् ॥४ असृग्वमन्मूत्रशकृत्समुत्सृजन् क्षिपंश्च पादाननवस्थितेक्ष
णः । जगाम कृच्छ्रं निरृतेरथ क्षयं पुष्पैः किरन्तो हरिमीडिरे सुराः ॥४ एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः । विवेश गो
ष्ठं सबलो गोपीनां नयनोत्सवः ॥५ अरिष्टे निहते गोष्ठे कृष्णेनाद्भुतकर्मणा । कंसायाथाह भगवान् नारदो देवदर्शनः ॥६

इति देवदर्शनः देवर्षिः यद्वा एवं कथितेऽप्येवं म यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च । रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता
विन्यस्तौ ति सा इत्याह देवदर्शनं यस्मात् ॥६ आद्ये नैवं नारदोऽन्यमाह यशोदाया इति । देवक्या अष्टमो गर्भस्त्वेन प्रसिद्धो कन्यायशोदायाः सुतमाह
यशोदायाः सुतत्वेन प्रसिद्धः कृष्णो देवक्याः सुतमाह । रोहिणीपुत्रं रामं च वसुदेवस्याः सप्तमं सुतमाह । यद्वा नेरसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्याया
रोहिण्याः पुत्रमाह । वासुदेवसुतौ चेत् कथं व्रजं गतौ तत्राह वसुदेवेनेति ॥७॥

मत्तं चर

राम
१०६

१८ ॥ निवारित इति हते वसुदेवे तौ पलायेतां ॥ अतो वध्यतामिति मंत्रवरस्तु नारदेन निवारित इति ॥ १९ ॥ २ ॥ मत्त्यमम निवारितः विधात्रा नारदेन वा

न्यहेतोह्वमित्रेनैदेवैयाम्यांतेष्ठ हृषाहताः ॥ निशम्य तद्भोजपतिः कोपात्प्रचलितेंद्रियः ॥ निशातमसिमादाय वसुदेवं जिघांसया ॥ १८ ॥ निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ॥ ज्ञात्वा लोहमयैः पाशैर्बबंध सह भार्यया ॥ १९ ॥ प्रतियाते तु देवर्षौ कंस आभाष्य केशिनं ॥ प्रेषयामास हन्येतां भवता रामकेशवौ ॥ २० ॥ ततो मुष्टिकचाणूरशलतोशलकादिकान् ॥ अमात्यान्हस्तिपांश्चैव समाहूयाह भोजराट् ॥ २१ ॥ भो भो निशम्यतामेतद्वीरचाणूरमुष्टिकाः ॥ नंदव्रजे किलासाते सुतावानकदुंदुभेः ॥ २२ ॥ रामकृष्णौ ततो मह्यं मृत्युः किल निदर्शितः ॥ भवद्भ्यामिह संप्राप्तौ हन्येतां मल्ललीलया ॥ २३ ॥ मंचाः क्रियंतां विविधा मल्लरंगपरिश्रिताः ॥ पौरा जानपदाः सर्वे पश्यंतु स्वैरसंयुगं ॥ २४ ॥ महामात्र त्वया भद्र रंगद्वार्युपनीयतां ॥ द्विपः कुवलयापीडो जहि तेन ममाहितौ ॥ २५ ॥ आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि ॥ विशसंतु पशून्मेध्यान्भूतराजाय मीढुषे ॥ २६ ॥ इत्याज्ञाप्यार्थतंत्रज्ञ आहूय यदुपुंगवं ॥ गृहीत्वा पाणिना पाणिं ततोऽक्रूरमुवाच ह ॥ २७ ॥ भो भो दानपते मह्यं क्रियतां मैत्रमादृतः ॥ नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु ॥ २८ ॥ अतः त्वामाश्रितः सौम्य कार्यगौरवसाधनं ॥ यथेंद्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः ॥ २९ ॥ गच्छ नंद

सूत्रं गीत विध्यते तावाह ॥ भवद्भ्यामिति ॥ २३ ॥ मंचास्तु हंगमल्लं मादिर ॥ व्रजं तत्र सुतावानकदुंदुभेः ॥ आसाते ताविहानेन रथेनानय मा चिरं ॥

विनष्टानानि ॥ २४ ॥ अहितौ शत्रू ॥ २५ ॥ मीढुषे वरदाय ॥ २६ ॥ अर्थतंत्रज्ञः अर्थसिद्धांतमेव जानातीति अर्थतंत्रज्ञः दानपते अक्रूर मैत्रं मित्रकृत्यं या

२० पू०
१८

नो मे मृत्युर्निर्गतः सृष्टः वैकुंठसंश्रयैः विष्णुसंश्रयैर्देवैः ॥ २१ ॥ किं ततः तत्राह घातयिष्य इति ॥ कालकल्पेन मृत्युतुल्येन वैद्युतोपमैः अशनितु-
ल्यैः ॥ २२ ॥ ४ ॥ नष्टकंटका नष्टशत्रुः ॥ ननु कतिपय सुहृद्वधे नष्टकंटकता कथं स्यादिति तत्राह ॥ जरासंध इति ॥ २५ ॥ ७ ॥ दुष्टं च तितत्र स्वहितमेव मनीषितं वि-

निःसृष्टः किल मे मृत्युर्देवैर्वैकुंठसंश्रयैः ॥ तावानयत समं गोपैर्नंदाद्यैः साभ्युपायनैः ॥ २१ ॥ घातयिष्य इहानीतौ कालकल्पेन
हस्तिना ॥ यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ॥ २२ ॥ तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान् ॥ तद्बंधून्निहनिष्यामि वृष्णि
भोजदशार्हकान् ॥ २३ ॥ उग्रसेनं च पितरं स्थविरं राज्यकामुकं ॥ तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ॥ २४ ॥ ततश्चैषा मही
मित्र भवित्री नष्टकंटका ॥ जरासंधो मम गुरुर्द्विविदो दयितः सखा ॥ २५ ॥ शंबरो नरको बाणो मय्येव कृतसौहृदाः ॥ तैरहं सु-
रपक्षीयान्हत्वा भोक्ष्ये महीं नृपान् ॥ २६ ॥ एतज्ज्ञात्वानय क्षिप्रं रामकृष्णाविहार्भकौ ॥ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियं ॥ २७ ॥
अक्रूर उवाच ॥ राजन्मनीषितं सम्यक्तव स्वावद्यमार्जनं ॥ सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलभाजनः ॥ २८ ॥ मनोरथा-
न्करोत्युच्चैर्जनो दैवहतानपि ॥ युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ॥ २९ ॥ एवमादिश्य चाक्रूरं मंत्रिणश्च विसृज्य सः ॥
प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयं ॥ इति श्रीभागवते महापुराणे दशमस्कंधे षट्त्रिंशोऽध्यायः ॥ ॥ ॥

चारितं सम्यक्स्वावद्यमरणं तन्मार्जनं ॥ तथाप्येतावानभिनिवेशो न कार्य इति मत्वा विषममप्यत्राह सिद्ध्यसिद्ध्योरिति ॥ २८ ॥ प्रहर्षकारणमन्या
मित्याह मनोरथानिति ॥ २९ ॥ ३१ ॥ षट्त्रिंशः ॥

ब्रज

दशम
१८

तस्मिन्निशि शोऽरिष्टे हते केशिन्यप्यच्युतो भाविकर्मभिः ॥ नारदेन स्वतः क्रीडन्व्योमासुरमथावधीत् ॥ १ ॥ वृषवेषासुरं यद्वत्केशिनं हयवेषिणं ॥ कंसप्राण
समं हत्वा कंसं वधं हमिवाकरोत् ॥ २ ॥ केशी चापीति प्रथमश्लोकेन य एवंभूतः केशी त्यनूद्यत भगवानुपाख्यायारेति द्वितीयेनान्वयः ॥ महाहयत्वेन
महीनिर्जरयत् अथ यत् विसारयत्रित्यर्थः सटाभिः केसरैः अवधूतानि इतस्ततः क्षिप्तानि अभ्राणि विमानानि च तैः संकीर्णं ॥ ततः कुर्वन्हे
षितेन रख जातित्रासैः भीषितमखिलं विश्वं येन ॥ १ ॥ तत्तद्धेषितैरेतैः रणनिष्ठरैः हेषितैर्वालैः पुच्छलोमभिर्विघूर्णिताः परिभ्रमिताः अम्बुदाः येनं तत्र

श्रीपराशर उवाच ॥ केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन्मनोजवः ॥ सटावधूताभ्रविमानसंकुलं कुर्वन्नमोहेषि
तभीषिताखिलः ॥ १ ॥ विशालनेत्रो विकरास्यो कोरयोद्धृतगात्रो नीलमहाम्बुदोपमः ॥ दुराशयः कंसहितेन विकोषु
ङ्जं सनेरस्य जगाम कंपयन् ॥ २ ॥ तमापतन्तं भगवान्स्वगोकुलं तद्धेषितैर्वालविघूर्णिताम्बुदं ॥ आत्मानमाजौ मृगरा
जमग्रणीरुपाङ्कयत्स स्वनदन्मृगेन्द्रवत् ॥ ३ ॥ स तं निरीक्ष्याभिमुखो मुखेन तं पिबन्निवाभ्यद्रवदत्यमर्षणः ॥ जघान
पद्भ्यामरविन्दलोचनं दुरासदः स्फुरखोडुरत्ययः ॥ ४ ॥ तद्दूषयित्वा तमधोक्षजो हयं प्रगृह्य दोर्भ्यां परिविध्य पादयोः ॥ सावज्ञमुत्क

ज्ञो संग्रामार्थं आत्मानं कृष्णं अग्रणीः पुरतो निर्गतः सन् उपाक्षयत् स्वसमीपमा ज्यधनुःशतान्तरे यथोरगं तार्क्ष्यहतो व्यवस्थितः ॥ ॥ ५ ॥
ह्वात ॥ स च केशी तं निशाम्य मृगेन्द्रवन्नादमकरोत् ॥ २ ॥ ततः स केशी तं कृष्णं दृष्ट्वा मुखेन तं पिबन्निव व्यादाय मुखं विवृत्य अभिमुखः सन् अभिजगाम ॥ किंच अत्य
मर्षणः अतिकोपितः अत्यन्तमसहमानो वा पद्भ्यां जघान दुरासदः अन्यैरपि भवितुमशक्यः दुरत्ययः उद्यतः दुरतिक्रमः अत्र हेतुः चंडजवः तं च हननप्रवृत्तं
तं च हननाय प्रसारितयोः पादयोः हस्ताभ्यां गृहीत्वा परिविध्य भ्रामयित्वा व्यवस्थितः तथैव स्थितो बभूव ॥ ५ ॥

२०५
१०८

आदाय तुक्तपार्श्ववेगेन हरिश्चुत्प्लाव इव तमोपि हरिः हसन्नुत्तरं सव्यभुजं निर्भयत्वे दृष्टान्तः यथोरगं बिल इति ॥ ५ ॥ ततः किं तदा दन्ता इति चर्वणाय भग-
वद्भुजस्पृशन्तीति तथा ॥ ते व्यादानेन ये विशीर्णाः अयः लोहं स्पृशन्तीति स्पृशः यद्वा तप्तमयं यः इति तप्तलोहस्पर्शिस्पृशतोपयथेति ॥ आमयो जलोदरं ॥ ६ ॥
लेडं पुरीषं उत्सृजन् ॥ ७ ॥ कर्कटिकाफलं पक्वं सा ह्येतं विदीर्णा भवतीति तद्वद्विदीर्णान्नस्य देहात् विगतप्राणात् अविस्मिताः अयत्नेन हतो रिपुर्येन
सः ॥ ८ ॥ कंसायकृष्णमाशिशृपत इत्याह रहस्यादिपञ्चभिः कंसघातादिकृष्णस्य कार्यमावेदयन् मुनिः तदाह देवर्षिरित्यादिना न चार्यं तत्त्वकः किंतु

स लब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसापतद्धरिं ॥ सोप्यस्य वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले ॥ ५ ॥
दन्ता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयःस्पृशो यथा ॥ बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः ॥ ६ ॥
समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् ॥ प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेडं विसृजन् क्षितौ व्यसुः ॥
७ ॥ तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः ॥ अविस्मितोऽयत्नहतारिरुत्स्मयैः प्रसूनवर्षैर्दिविषद्भिरीडितः ॥
८ ॥ देवर्षिरुपसंगम्य भागवतप्रवरो नृप ॥ कृष्णमक्लिष्टकर्माणं रहस्येतदभाषत ॥ ९ ॥ कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर ॥ वासु-

सर्वं हृत्वा इत्याह भागवतप्रवर इति ॥ ९ ॥ अस्मद्रहस्यवैरिणां कंसे हृचिन्तवानिति माशंकीरित्याह देवाखिलाधार सात्वतां प्रवर प्रभो ॥ १० ॥
कृष्णे कृष्णेत्यादिना अयं भावः त्वमीश्वरो भूभारे दैत्यदेहाणावतीर्णोसि ॥ अतस्त्वं स्व उरू पावरणेन विश्वं परिपालयेति तत्र त्वयि तावत् भयशंकैव रान
नास्तीत्याह ॥ अप्रमेयात्मन् अपरिच्छिन्नस्वरूप योगेश अचिन्त्यप्रभाव जगदीश्वर विश्वनियन्तः वासुदेव सर्वभूतेषु वर्तमान ॥ अखिलावास सर्वेषां १०८
आश्रयः सम्प्रति सात्वतां प्रवर श्रेष्ठ प्रभो सर्वशक्ते ॥ १० ॥

कथमेवंरूपोहमितिचेत्तत्राह ॥ त्वमात्मेति ॥ नहित्वंजीववत्परिच्छिन्नः किंतुसर्वभूतानामंतरएकोनुस्यूतआत्मा अंतरनुस्यूतत्वेदृष्टांतः ॥ एध
सांकाष्ठानामंतर्ज्योतिरिवेति ॥ भूतेषुस्थितोपितैर्नदृश्यसइत्याहगूढइति ॥ अत्रहेतवः गुहाशयः बुद्धेरभ्यंतरः किंचसाक्षी नहिसाक्षीदृश्यतइत्य
र्थः अपिच ॥ महापुरुषः अतः परिच्छिन्नमतिभिर्नज्ञायसइत्यर्थः नहिसर्वांतरत्वेकिंप्रमाणं अतआह ईश्वरइति ॥ नहीश्वरंविनाः पारतंत्र्या
णांजीवानांप्रवृत्तिनिवृत्तीस्तइत्यर्थः ॥ ११ ॥ अहमीश्वरः अन्यत्सर्वमीशितव्यमित्येतदेवकुतः अतआह आत्मनेति ॥ साधनांतरनिरपेक्षएवआत्मा

त्वमात्मासर्वभूतानामेकोज्योतिरिवैधसां ॥ गूढोगुहाशयः साक्षीमहापुरुषईश्वरः ॥ ११ ॥ आत्मनात्माश्रयः पूर्वंमाययाससृ
जेगुणान् ॥ तैरिदंसत्यसंकल्पः सृजस्यत्स्यवसीश्वरः ॥ १२ ॥ सत्वंभूधरभूतानांदैत्यप्रमथरक्षसां ॥ अवतीर्णोविनाशायसाधू
नांरक्षणायच ॥ १३ ॥ दिष्ट्यातेनिहतोदैत्योलीलयायंहयाकृतिः ॥ यस्यहेषितसंत्रस्तास्त्यजंत्यनिमिषादिवं ॥ १४ ॥ चाणूरंमुष्टि
कंचैवमल्लानन्यांश्चहस्तिनं ॥ कंसंचनिहतंद्रक्ष्येपरश्वोहनितेविभो ॥ १५ ॥ तस्यानुशंखयवनमुराणांनरकस्यच ॥ पारिजाताप
हरणमिंद्रस्यचपराजयं ॥ १६ ॥ उद्वाहंवीरकन्यानांवीर्यशुल्कादिलक्षणं ॥ नृगस्यमोक्षणंपापाद्द्वारकायांजगत्पते ॥ १७ ॥

आश्रयः स्वतंत्रः माययात्मशक्त्याभवान्गुणान्ससृजेसृष्टवान् तैः सृष्टैर्गुणैः इदंविश्वंसृजसिसंहरसि अवसिपालयसि ॥ ननुसर्वथाक्रियायाः कारकसा
पेक्षेत्यतआह ॥ सत्यसंकल्पइति ॥ नहिसंकल्पैकसाध्येबाह्यसाधनापेक्षेतिभावः अतस्त्वमीश्वरइत्युपसंहारः ॥ १२ ॥ प्रकृतमाह सत्वमिति ॥ भूधरभूतानां
भुवंधरंतीतिभूधराराजानः तद्रूपाणां ॥ १३ ॥ १४ ॥ परश्वोहनीति ॥ अद्यैवाक्रूरएष्यति श्वोमथुरांगंतासि ॥ परश्वश्चाणूरादींस्त्वयानिहतान्द्रक्ष्यामीति ॥ लिङ्वन्नि
र्देशोविज्ञापनप्रकारविशेषः ॥ १५ ॥ तस्यअनुतदनंतरंशंखादीनां शंखःपंचजनः वधंद्रक्ष्यामीतिशेषः भवानिर्देशमात्रमेतन्नचरितत्वानंतर्यंविवक्षितं ॥ १६ ॥ १७ ॥

२०१
१०७

भार्यया जांबवत्या सह स्वधामतः महाकालपुरात् ॥ १८ द्वारकामावसन्नुद्धारकार्यांवसन् कर्त्ता करिष्यति ॥ २० अमुष्य विश्वस्य भारवा ॥ २१ एवंवि
त्ताण्यकृतान्यभिनंदन्भगवंतंनमस्यतिद्वयेन । विशुद्धविज्ञानघनमितिकेवलज्ञानैकमूर्त्तिमतएवत्वंस्वसंस्थयास्वरूपस्थित्याकृत्स्नत्वेवपरमानंदरूप
याप्तसमस्तगात्राः सर्वार्था येन तं आप्तकामयोन्नात्सत्यसंकल्पतामाह । अमोघवांछितमिति । नचवांछावैशल्यादर्शनंवागुणसंगतिः अतआह । स्वतेज

स्यमंतकस्यचमणेरादानंसहभार्यया । मृतपुत्रोपदानंचब्राह्मणस्यस्वधामतः ॥ १८ पौंड्रकस्यवधंपश्चात्काशिपुर्याश्चदीपनं
दंतवक्रस्यनिधनंचैद्यस्यमहाक्रतौ ॥ १९ यानिचान्यानिवीर्याणिद्वारकामावसन्भवान् । कर्त्ताद्रक्ष्याम्यहंतानिगेयानिकवि
भिर्भुवि ॥ २० अथतेकालरूपस्यक्षपयिष्णोरमुष्यवै । अक्षौहिणीनांनिधनंद्रक्ष्याम्यर्ज्जुनसारथेः ॥ २१ विशुद्धविज्ञानघनंस्वसं
स्थयासमाप्तसर्वार्थममोघवांछितं । स्वतेजसानित्यनिवृत्तमायागुणप्रवाहंभगवंतमीमहि ॥ २२ त्वामीश्वरंस्वाश्रयमात्ममाय
याविनिर्मिताशेषविशेषकल्पनं । क्रीडार्थमद्यात्तमनुष्यविग्रहंनतोस्मिधुर्यंयदुवृष्णिसात्वतां ॥ २३ श्रीशुक उवाच । एवंयदुपतिंकृष्णं
महाभागवतोमुनिः । प्रणिपत्याभ्यनुज्ञातोययौतद्दर्शनोत्सवः ॥ २४ भगवानपिगोविंदोहत्वाकेशिनमाहवे । पशूनपालयत्पालैः
प्रीतैर्व्रजसुखावहः ॥ २५

सेति चिच्छक्त्यानित्यनिवृत्तोमायाकार्यरूपोगुणप्रवाहोयस्मात्तं अतोभगवंतंनिरतिशयैश्वर्यंमहिशरणंव्रजेमेति ॥ २२ ॥
नन्वत्रिकालतत्त्वंकथमत्रप्रपंचेनजानासीतिचेत्तथागुणप्रवाहंत्वंविधितवानाह । त्वामिति । ईश्वरंअन्यस्यवशयितारंस्वाश्रयंअन्यस्यावश्यं आत्मधी
नयामाययाविनिर्मितअशेषविशेषामहदाद्यायस्यसारिरूपावाल्पनायेनतंधुर्यंश्रेष्ठंनतोस्मीति ॥ २३ ॥ ५ ॥

राम
१०७

प्रातरेव केशिवधानंतरं नारदोक्तमंगीकृत्य पुनस्तत्रैव पशून्पालयता व्योमो हतः पश्चाद्व्योमवधः पूर्वमेव वृत्तोपि वेषधारिवधप्रसंगात्प्रोच्य
न इति द्रष्टव्यं ॥ केचित्तु नः शंखचूडवधात्पूर्वमेव पठंति च ॥ तमाह ॥ एकदेति ॥ २६ ॥ २७ ॥ मेषवदाचरितान्वयं चोरवदाचरितः सन्नपोवाह अप
कृष्य निनाय ॥ २८ ॥ पिदधे छादितवान् ॥ २९ ॥ शरणदः आश्रयप्रदः हरिः सिंह इव ॥ ३० ॥ ३१ ॥ पशुमारं पशुमारो यथा भवति तथा ॥ अनिश्वासमित्य

एकदा ते पशून्पालांश्चारयंतोद्रिसानुषु ॥ चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः ॥ २६ ॥ तत्रासन्कतिचिच्चोराः पाला
श्च कतिचिन्नृप ॥ मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः ॥ २७ ॥ मयपुत्रो महामायो व्योमो गोपालरूपधृक् ॥ मेषायितान
पोवाह प्रायश्चोरायितान्बहून् ॥ २८ ॥ गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः ॥ शिलया पिदधे द्वारं चतुःपंचावशेषिताः
तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सतां ॥ गोपान्नयंतं जग्राह वृकं हरिरिवौजसा ॥ ३० ॥ स निजं रूपमास्थाय गिरींद्रसदृशं ब
ली ॥ इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ॥ ३१ ॥ तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले ॥ पश्यतां दिवि देवानां प
शुमारममारयत् ॥ ३२ ॥ गुहापिधानं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः ॥ स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलं ॥ ३३ ॥ इति श्री

र्थः ॥ ३२ ॥ ३३ ॥ विगोपैः स्तूयमान उपरि वैमानिकैर्देवैरिति ॥ ३३ ॥ दशमे सप्तत्रिंशः ॥ भागवते महापुराणे दशमस्कंधे सप्तत्रिंशतितमोध्यायः ॥
अष्टत्रिंशे यथाध्याय त्वक्रूरो गोकुलं गतः ॥ तत्रैव रामकृष्णाभ्यां गृहं नीत्वा सत्कृतः ॥ १ ॥ प्रातः केशिवधे वृत्ते द्वारपानिर्गते मुनौ ॥ ततो व्योमे हतेऽक्रूरः
सायं गोकुलमागमत् ॥ २ ॥

२०१ ततेवंनारदेनकंसेवधारिकार्येविज्ञापितोश्रीकृष्णमथुरांगंतुमुद्युतोवर्त्ततेतदाक्रूरोपिगोकुलमगादित्याह ॥ अक्रूरोपीति ॥ १ ॥ अपीतिसंभाव
११० नायां अर्हतेयोग्याय ॥ २ ॥ उत्तमश्लोकस्यदर्शनेनसंभवमाशंक्यतन्नःसंभावयति ॥ ममैतदिति द्वयेन विषयात्मनःविषयाविष्टचित्तस्यशूद्रजन्मज
न्मजस्यतस्यब्रह्मकीर्त्तनंवेदोच्चारणंयथेति ॥ ४ ॥ यद्यप्येवंकिंतथापिममस्यात्देत ॥ कुतइत्यतआहह्रियमाणःकालमयीतिअ

मक्रूरउवाच ॥ अक्रूरोपिचतांरात्रिंमधुपुर्यांमहामतिः उषित्वारथमास्थायप्रययौनंदगोकुलं ॥ १ ॥ गच्छन्पथिमहाभागो
भगवत्यंबुजेक्षणे ॥ भक्तिंपरामुपगतएवमेतदचिंतयत् ॥ २ ॥ किंमयाचरितंभद्रंकिंतप्तंपरमंतपः ॥ किंवाथाप्यर्हतेदत्तंयद्
द्रक्ष्याम्यद्यकेशवं ॥ ३ ॥ ममैतदुर्लभंमन्येउत्तमश्लोकदर्शनं ॥ विषयात्मनोयथाब्रह्मकीर्त्तनंशूद्रजन्मनः ॥ ४ ॥
मैवंममाधमस्यापिस्यादेवाच्युतदर्शनं ॥ ह्रियमाणःकालनद्याक्वचित्तरतिकश्चन ॥ ५ ॥ ममाद्यामंगलंनष्टंफलवांश्चै
वमेभवः ॥ यन्नमस्येभगवतोयोगिध्येयांघ्रिपंकजं ॥ ६ ॥ कंसोवताद्याकृतमेत्यनुग्रहंद्रक्ष्येंघ्रिपद्मंप्रहितोमुनाहरेः ॥ कृताव
तारस्यदुरत्ययंतमःपूर्वेतरन्यन्नखमंडलत्विषा ॥ ७ ॥
यंभावःयथानद्याह्रियमाणानांतृणादीनांकिंचित्कदाचित्तरतितथाकर्मवशो
नकालेनह्रियमाणानांजीवानामपिमध्येकश्चित्तरतिसंभवतीति ॥ ५ ॥ अतोनद्याप्रवृत्त्यैवममामंगलंनष्टंध्रुवमेवेतिज्ञायते ॥ भवोजन्मचसफ ॥ ाम
लंजातमितियतःनमस्करिष्यामि ॥ ६ ॥ अमंगलनाशोहेतुवकातरमाह ॥ कंसइति ॥ वतेत्याश्चर्येअखिलःकंसोपिममात्यंतमनुग्रहंकृतवानित्यर्थः ११०
नाप्रहितेहरेरंघ्रिपद्मंद्रक्ष्यामीति ॥ पूर्वेअर्वाचीनाःसंसारंअतरंतीत्यर्थः ॥ ७ ॥

अंघ्रिपद्मं विभावयति यदिति ॥ ब्रह्मादिभिरर्चितं मितिपरमैश्वर्यमाह ॥ श्रियावेति ॥ सौभाग्यातिशय ॥ मुनिभिर्भक्तसहितैरितिपरमपुरुषार्थत्वं
गोचारणायेतिकृपालुत्वं ॥ तन्नोपिनामिति प्रेममात्रसुलभत्वं ॥ ८ ॥ मनोरथांतरं करोति द्रक्ष्यामीति ॥ शोभमानौ कपोलौ नासिका च यस्मिन् ॥ नत
स्मितसहितः अवलोको यस्मिन् अरुणकंजवल्लोचने यस्मिन् तद्वदनं च मुकुंदस्य ॥ गुडालकावृतं वक्त्रं केशावृतं ॥ तदानीमेव वक्त्रं भगवच्चरणः द्रक्ष्यतीति हृद्यं
हृद्यरक्षिणामिति ॥ ९ ॥ पुनरप्यन्यत् चिंतयति ॥ अप्यद्येति ॥ ईदृशः प्रापन्नवतः लावण्यधाम ॥ आश्रयः तस्य विष्णोः यद्वा ॥ विष्णोर्लावण्यपुंजस्य यद्वा भव
पः तस्योपलंभनं दर्शनं भविता भविष्यति अपि यद्येवं स्यात्तर्हि मत्त्वमम दृशोर्लोचनस्य फलं नस्यादिति न अपितु स्यादेवेत्यर्थः ॥ १० ॥ यदंशितेति चतुर्भिः

यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः ॥ गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुचकुंकुमांकितं ॥ ८ ॥
द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलोचनं ॥ मुखं मुकुंदस्य गुडालकावृतं प्रदक्षिणं मे प्रचरंति वै मृगाः ॥ ९ ॥
अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावतारा य भुवो निजेच्छया ॥ लावण्यधाम्नो भवितोपलंभनं मह्यं न न स्यात्फलमंजसा दृशः ॥ १० ॥
यदंशितांहः हितोप्यसत्सतोः स्वतेजसापास्ततमोभिदाभ्रमः ॥ स्वमायया आत्मन्रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते ॥ ११ ॥

कुलकं ॥ तत्रैव शंकां निरस्यन् स्मरारि वरे वक्ति तं त्वमोक्षत्वादिधर्मैस्तत्र तत्र प्रतीयमानस्य कथं विष्णुत्वमिति मा मा शंकास्त्वोकतंत्रेणापि जर्व यस्थ र्थेन ततम
हं द्रक्ष्यामीति मनोरथं करोति तथा हि यदंशितेति ॥ दृष्ट्रमात्रवर्त्ती अनुसत्सतोः कार्यकारणयोः ईक्षिता द्रष्टा मात्रेणाकर्त्ता अप्यहंकारहितः अहंकाररहितः तथा
पास्ततमोभिदाभ्रमः तमः स्वाज्ञानं तत्ततो भिदा भेदः ॥ ततो भ्रमः अभिनिवेशादिः अपास्ता अपाकृता तमआधारे यो यस्मिन् सः कृत [illegible] ॥ स्वतेजसा
चिद्रूपानित्यस्वरूपसाक्षात्कारेण ॥ तथापि स्वमायया स्वाधीनया मायया तदीक्षया तस्यैव क्ष्यया प्राणाक्षधीभिः सहितैः आत्मनः आत्मनि स्वस्मिन्नेव रचितैर्जी
वैः सदनेषु देहेषु [illegible] लीलया कर्माणि [illegible] अभीयते आदिभिः इव्यमप्रतीयते ॥ ११ ॥

२०५

।।।

ननु सर्वथाऽहंकारादिरहितस्यात्मारामस्य लीलापि कृत इत्याशंक्य पराऽनुग्रहार्थैन्वाशयेनाहयस्येति ॥ अखिलानि अखिलस्य वा अमीवानि पापानि
घ्नतीत्यखिलामिः इव हानि तैः तथा हमंगलैः शोभनानि मंगलानि येभ्यः तैः गुणाः करुणादयः कर्माणि जन्मानि चैतैर्विमिश्रा युक्ता वाचो जगत्
प्राणंति जीवयंति शुंभंति शोभयंति पुनंति पवित्रयंति ॥ व्यतिरेकमाह यया इति ॥ तैर्विरहिता रहिताः ताः सुष्ठ्वलंकृता अपि वह्याद्यलंकृता शव व
च्छोभमानाः मताः सतां सम्मताः ॥ १२ ॥ स्वयं चरितान्वेतत्स्वर्णाश्रमधर्मान्पालयताममरवर्षाणां सुखकर्त्री सत्त्रवतीर्णाः यत्तयशः ॥ १२ ॥ त्रैलोक्ये

यस्याखिलामीवहभिः सुमंगलैर्वाचो विमिश्रा गुणकर्मजन्मभिः ॥ प्राणंति शुंभंति पुनंति वै जगत् यास्तद्विरक्ताः शवशो
भना मताः ॥ १२ ॥ स चावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्यशर्मकृत् ॥ यशो वितन्वन्व्रज आस्त ईश्वरो गायंति देवा
यदशेषमंगलं ॥ १३ ॥ वेत्स्वद्य नेमहतां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवं ॥ रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुष
सः सुदर्शनाः ॥ १४ ॥ अथ वक्त्रः सपरीशयोरथात्प्रधानपुंसोश्चरणं स्वलब्धये ॥ धियाधृतं योगिभिरप्यहं ध्रुवं नमस्य आस्याच

एवमेवकांतं ॥ दृशिः दृष्टिः तस्य दृष्टं महोत्सवो यस्मात् ॥ यद्वा ॥ महोत्सवमेवभूतमेवश्रिया ईप्सितमास्पदं एवंभूतं रूपं श्री सखींश्च वनौकसः ॥ १५
मूर्तिं दधानं तमीश्वरं द्रक्ष्यामीति ॥ अत्र लिंगं ॥ उषसः प्रभातसमयाः सुदर्शनाः शुभदर्शनाः सुखं प्रभातारजन्यः शुभमद्भवकाव भूद्धारित्यर्थः ॥ १४ ॥
किंच ॥ अथ दर्शनानंतरं रथादवतीर्णः सत्प्रधानयोः पुरुषयोरात्मकत्वात्सयोश्चरणं योगिभिरप्यात्मलाभाय केवलं धियैव धृतं नमस्य

एम

।।।

स्याऽहं नमस्यामि ॥ अस्यास्सहाः नयोः सखीननुगोपांश्च नमस्यामि इति ॥ १५ ॥

किंच ।। अपीति ।। अधाप्यनधास्यतितद्धिमावयतिरन्नामयमितिमाईन ।।६।। वलिनानावत्यरन्मयपरिमितभूरानसमयेतस्पहत्तेउरकंनि
हितं ।। कौशिकरंद्रः तेनापिकरावितकिंचित्रिहितमितितातव्यं ।। ७७कृ ।णांतसारमयनिर्वर्त्तकंसकानामभ्युरयपद्रंचेतन्नंअयुतंरन्नानापर
महवरं चेतसाह ।। यद्वा ।। भागरोचितकेविहारेणसक्रीडाया ।। सौगंधिकस्यगंधरवागंधोयस्यतेनसौगंधिकगंधिः ।।७।। एवंपरमात्ययहेसभावस्य
नरप्यसेमवमाशंकापरिहरतिनमयीति ।। यद्यप्यहंकंसेनग्रहितः अतत्स्यहृतः मयापिमयिअरेरपमितिउद्दिनउपेक्ष्यतिनकरिष्यतीत्यर्थः
अथांघ्रिमूलेपतितस्यमेविभुः शिरस्यधात्स्वनिजहस्तपंकजं ।। रत्नामयंकालभुजंगरंहसाप्रोद्वेजितानांशरणैषि
णांनृणां ।।६।। समर्हणायत्रविधायकौशिकंतथावलिश्चापजगत्रयेंद्रतां ।। यद्वाविहारेव्रजयोषितांश्रमस्पर्शेन
सौगंधिकगंधपानुदत ।।७।। नमय्युपेक्षात्परिउद्धिमच्युतः कंसस्यहूतः प्रहितोपिविष्णुदक् ।। योतर्वहिश्चेतसएव
तरीहितंरेचवत्तईक्षत्यमलेनचक्षुषा ।।८।। अप्यांघ्रिमूले वहितंकृतांजलिंमामीक्षितासस्मितमाईयादृशा ।। सप
यतोविष्णुदकस्वंवनः अतोममचेतसोऽन्तःअपरीहितंवेष्टितंएतद्यः ।। ययद्दत्तसमस्तकिल्विषोवोदामुदंवीतविशंकऊर्जितां ।।९।।
रेचवत्तः अंतर्यामिनित्यत्वानेनेक्षते ।। अयंभावः ।। चेतसोवहिरेववर्त्तमानवर्त्ते ।। अंतस्तुकस्मैव ।। ततोसौहृदिस्थोजानातीति ।। यद्वा ।। एतस्यजगत
ईहितमितिअतः ।।८।। अपियदिअंघ्रिमूलेवरणोपांतेः वहितंसंयतंकृपामृतेनाईयादृशामांसक्षिताइक्ष्यति ।। तर्हिसद्यएवविनष्टाखिलकल्म
षः परांमुदंवोढाप्राप्स्यामिति ।।९।। रामराम

२०५ अथ मां परिरप्स्यते आलिंगिष्यति यदा तदैव मे आत्मदेहः तीर्थीक्रियते ऽतिपवित्रीकरिष्यते उच्छ्वसितिशिथिलो भविष्यतीति अहो देहात् १०
११२ ततः भो तातेति तदा जन्मभृतः सफलजन्मानः अन्यथा तज्जन्मैव न भवतीत्याह महीयमाश्री कल्पेनयो नादतः तस्य जन्मधिक् अत्र पुष्पजंतोः
११ ननु हृद्दरारिष्टपरिष्वंगस्य अस्माद्दयो जीवधर्माः कथमीश्वरे संगच्छते अत आह नन्वतस्येति दयितः प्रियः तद्विपरीतो ऽप्रियः सुहृन्न मोहितः

सुहृन्नमं तातिमनन्यैरेवं ततो ऽप्यं हृद्याः परिरप्स्यते अथ मां आत्मा हितीर्थीक्रियते तदेवमेवं धन्यकर्मात्मक उच्छ्वसितपतः १० लब्धा
गहं गं प्रणतं कृतांजलिमावक्ष्यते क्रूरतते तस्य स्वश्रवाः येरावयं जन्मभृतो महीयमानैवादतो योधिगच्छस्य जन्मतत ११ न तस्य क
श्चिद्दयितः सुहृन्नमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा तथापि भक्तान्भजते यथा तथा सहृद्भो यथाद्धपाश्रितो ऽथ रः १२ किं चाग्रजो मा
वनतं यहृन्नमः स्वयमन्यरिष्टज्ज्य गृहीतमंजलो गृह्य प्रवेश्य पाष्य सम्मल्लसत्कृतं संप्रेक्ष्यते वा च वक्ता तत्त्ववंधुः १३ इति संचिंतयन्कृ
ष्णं श्वफल्कतनयो ऽध्वनि रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप १४ पदानि तस्याखिललोकपालकिरीटजुष्टामलपादरेणोः
तद्विपरीतो द्वेष्यः एतत्सर्वव्यतिरिक्त उपेक्ष्य इति दयितादयो न संतीति सत्यं तथा १२ ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवांकुशाद्यैः १५
पि भक्तान्भजते तत्र च यथा ये भक्ता हितां स्तथा भजते ये यथा मां प्रपद्यंते तां स्तथैव भजाम्यहं इति भगवद्वचनात् अविषद्वेति भक्तो ऽप्य एव फलं दर्शामिति
त्वत्र दर्शितः सुहृत्स्वदृङ्मइति १३ यो मम मां जलिः करिष्यते तस्मिन्नेव गृहीतं मामाश्रित निःसमग्रान्यर्धादिसत्कृतानि येन तं मां १३ सत्यमार्गमपि नवेदम
इत्यथाविरथे न प्राप्त इति १४ अखिलैर्लोकपालैः किरीटेषु जुष्टा अमलाः पादरेणवो यस्य तस्य क्षितिकौतुकानि तेरलंकाररूपाणि १५ ११२

तद्दर्शनेन यच्छृंगाररसेन विवृद्धः संभ्रमो यस्य सः प्रेम्णा ऊर्ध्वानि रोमाणि यस्य सः अश्रूणां कलाभिर्बिंदुभिः आकुले ईक्षणे यस्य सः अवस्कंद्य अव-
प्लुत्य तेषु पदरेणुषु अचेष्टत व्यलुठत् अहो इति दुर्लभं तां भावयन् ॥ २६ ॥ ननु किमर्थमेवं व्यलुठत्तत्राह ॥ नास्ति प्रेमसंभ्रमे फलोद्देश इत्याह देहेति देहंभृतामिति
देहभाजामेतावानेव पुरुषार्थः कंसस्य संदेशादारभ्य हरेर्लिंगदर्शनश्रवणादिभिर्योयमक्रूरस्य वर्णित इति संदेशाद्य इत्यस्यार्थो यस्य स यावान्

तद्दर्शनह्लादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः ॥ रथादवस्कंद्य स तेष्वचेष्टत प्रभोरमून्यंघ्रिरजांस्यहो इति ॥ २६ ॥
देहंभृतामियानर्थो हित्वा दंभं भियं शुचं ॥ संदेशाद्यो हरेर्लिंगदर्शनश्रवणादिभिः ॥ २७ ॥ ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ ॥ पीतनीलांबरधरौ शरदंबुरुहेक्षणौ ॥ २८ ॥ किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ॥ सुमुखौ सुंदरवरौ बालद्विरदविक्रमौ ॥ २९ ॥ ध्वजवज्रांकुशांभोजैः चिह्नितैरंघ्रिभिर्व्रजं ॥ शोभयंतौ महात्मानौ सानुक्रोशस्मितेक्षणौ ॥ ३० ॥ उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ ॥ पुण्यगंधानुलिप्तांगौ स्नातौ विरजवाससौ ॥ ३१ ॥ प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती ॥ अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ॥ ३२ ॥

क्रूरस्य हर्षं प्रीतः इति वा ॥ २७ ॥ ततोऽक्रूरः कृष्णं रामं च ददर्श गावो दुह्यंते यस्मिन्निति गोदोहनं तत्स्थानं गतौ प्राप्तौ
॥ २८ ॥ २९ ॥ अनुक्रोशोऽनुकंपा तद्युक्तं स्मितं यत्र तादृशानि ईक्षणानि ययोः ॥ ३० ॥ उदारा रुचिरा क्रीडा ययोः तौ स्रग्विणौ रत्नमालिनौ अलंकृतौ ॥ ३१ ॥ प्रधानभूतौ पुरुषौ प्रकृ-
तिपुरुषात्मकौ वा अतः आद्यौ तदपि कुतः जगद्धेतू अत एव जगत्पती विपरीतौ वा चतुर्णामपि दानादिहेतवः तद्धेतुमद्भावः ॥ जगत्यर्थे रक्षायै भूभारापनयनाय वा
स्वांशेन मूर्तिभेदेन बलकेशवौ संतौ ॥ ३२ ॥

२०पू
११२

तस्यप्रभयाविगततिमिरादिशःकुर्वाणोकनकाचितोद्धवर्णाभ्याम्नाविति माल्लंकारयोःशैलस्थादशार्थमुक्तं ॥ ३३ ॥ ३४ ॥ भगवद्दर्शनाह्लादेनद्यद्वाष्पंते
नपर्याकुलेदृशोयस्यसः उत्पलकैरुपचितंव्याप्तंअंगंयस्यसः हृद्याख्यानेअक्रूरोहंनभक्तोरामीतिकथनेनाशक्नोत् ॥ ३५ ॥ अभिप्रेत्यअक्रूरायमेत
दर्थमागइतिज्ञात्वाअंकेसहननमामर्थ्यंधोतयत्रिवरथागेनचक्रेः तांकितोयःपाणिस्तेनाभ्युपाकृष्यमामालिंगितवा ॥ ३६ ॥ श्यामाणिअंजलिरूपे

दिशोवितिमिराराजन्कुर्वाणोप्रभयास्वया ॥ यथामारकतःशैलौरौप्यश्चकनकाचितो ॥ ३३ ॥ रथात्तूर्णमवप्लुत्यसोक्रूरःस्नेहवि
क्लवः ॥ पपातचरणोपांतेदंडवद्रामकृष्णयोः ॥ ३४ ॥ भगवद्दर्शनाह्लादवाष्पपर्याकुलेक्षणः ॥ पुलकाचितांगऔत्कंठ्यात्स्वाख्या
नेनाशकन्नृप ॥ ३५ ॥ भगवांस्तमभिप्रेत्यरथांगांकितपाणिना ॥ परिरेभेभ्युपाकृष्यप्रीतःप्रणतवत्सलः ॥ ३६ ॥ संकर्षणश्च
प्रणतमुपगृह्यमहामनाः ॥ गृहीत्वापाणिनापाणीअनयत्सानुजोगृहं ॥ ३७ ॥ पृष्ट्वाथस्वागतंतस्मैनिवेद्यचवरासनं ॥ प्र
क्षाल्यविधिवत्पादौमधुपर्कार्हणमाहरत् ॥ ३८ ॥ निवेद्यगांचातिथयेसंवाह्यश्रांतमादृतः ॥ अन्नंबहुगुणंमेध्यंश्रद्धयोपाह
रद्विभुः ॥ ३९ ॥ तस्मैभुक्तवतेप्रीत्यारामःपरमधर्मवित् ॥ मुखवासैर्गंधमाल्यैःपरांप्रीतिंव्यधात्पुनः ॥ ४० ॥ पप्रच्छसत्कृ
तंनंदःकथंस्थनिरनुग्रहे ॥ कंसेजीवतिदाशार्हसौनपालाइवावयः ॥ ४१ ॥

णाअंजलिरूपेणासंहतावेवगृहीत्वा ॥ ३७ ॥ मधुपर्कोएवार्हणंतत्तस्मिन्वाघउचितमर्हणं ॥ आहरत्आनीयसमर्पितवानित्यर्थः ॥ ३८ ॥ ४० ॥ सत्कृत
समानितंनिरनुग्रहेक्रूरेकथंकेनप्रकारेणास्थजीवथेत्यर्थःसौनःहिंसाकारिणस्तत्पालाःकोयेषामवीनांमेषाणांतइवतद्वत्यास्थेत्यर्थः ॥ ४१ ॥

राम
११२

निरनुग्रहत्वमाह योवधीरिति तोकान् तोकानि अक्षतान् एव अनुक्तान् एव तान् वर्धयतीत्यर्थः अतः खलः तस्य कंसस्य प्रजानां ॥ हे अक्रूर येषां जीवनमात्रमपि दुर्ल-
भं तेषां वः किन्नु कुशलं विचारयामि इति ॥४२॥ मधुरया वाचा इत्थं संस्मृतः एवं वाचा परिपृष्टेन प्रश्नेन अनघपतिश्रमं संसारश्रमं ॥४३॥ इति ॥३८॥ मेः एवं त्रिराः
नवत्रिंशे पुरीं गन्तुं ततो गोपिकोन्मयः अक्रूरेणाथ कालिन्द्यां विष्णुलोकस्य दर्शनं भक्तानां मनोरथाः ॥ भवन्ति विद्योतयन्नाह सुखोपविष्ट

यो वधीन्नः स्वसुस्तोकान् क्रोशन्त्या असुरो दीनवत् ॥ किं नु स्वित्तत्प्रजानां वः कुशलं विमृशामहे ॥४२॥ इत्थं सूनृतया वाचा नन्देन सुसभा-
जितः ॥ अक्रूरः परिपृष्टेन जहावध्वपरिश्रमम् ॥४३॥ इति श्रीभागवते महापुराणे दशमस्कन्धे अक्रूरागमने अष्टत्रिंशत्तमोऽध्यायः ॥ श्रीशु-
क उवाच ॥ सुखोपविष्टः पर्यङ्के रामकृष्णोरुमानितः ॥ लेभे मनोरथान्सर्वान्पथि यान्स चकार ह ॥१॥ किमलभ्यं भगवति
प्रसन्ने श्रीनिकेतने ॥ तथापि तत्परा राजन्न हि वाञ्छन्ति किंचन ॥२॥ सायंतनाशनं कृत्वा भगवान्देवकीसुतः ॥ सुहृत्सु वृत्तं
कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥३॥ श्रीभगवानुवाच ॥ तत सौम्यागतः कच्चित्स्वागतं भद्रमस्तु वः ॥ अपि स्वज्ञातिबन्धूनामन-
मीवमनामयम् ॥४॥ किं नु नः कुशलं पृच्छे एधमाने कुलामये ॥ कंसे मातुलनाम्न्यङ्ग स्वानां नस्तत्प्रजासु च ॥५॥

इति रामकृष्णाभ्यामुरु अधिकं मानितः ॥१॥२॥ हे तात हे सौम्य स्वागतं यथा तथा आगताः स्वज्ञातिबन्धूनां स्विदिति हरः ज्ञातयः सपिण्डाः बन्धवः
असपिण्डाः संबन्धिनः तेषामपि किं अनमीवं अपापं अदुःखमिति यावत् अनामयं आरोग्यं ॥४॥ एवं प्रश्नोऽपि ममनाति संगत इत्याह किं त्विति अंग हे
अक्रूर पृच्छे पृच्छामि नः अस्माकं कुलस्यामये रोगे नो मातुल इति नाम यस्य तस्मिन् नः स्वानां ज्ञातीनां तस्य प्रजानां च ॥ ५ ॥ एवं रामस्तहाद

अस्मात् अस्मन्निमित्तं वृजिनं दुःखं आर्ययोः विरपशाधयोः यद्धेतोः यः अहमेव हेतुः तस्मात् ॥ ६ ॥ हे सौम्य स्वानां वो दर्शनं अद्य मम संजातं दिष्ट्या
भद्रं भद्रं ॥ ७ ॥ माधवः मधोर्वंशजः ॥ ८ ॥ यदत्तर्मत्वभ्यागं संदेशो यस्य परस्थ्यैवात्रागतादिभिर्व्रातितनार्थ्ये ॥ अस्य कृष्णस्य स्वजन्म कृष्णजन्म आनकदुन्दु-
भे ॥ एकाशात ॥ ९ ॥ विजज्ञतुः विशेषेण ज्ञापयामासतुः ॥ १० ॥ सोपि नंदो गोपान् समादिशत् तत्र देवदर्शयति गृह्यतामित्यादिना गोरसः क्षी

अहो अस्मदभूद्भूरिपित्रोर्वृजिनमार्ययोः यद्धेतोः पुत्रमरणं यद्धेतोर्बन्धनं तयोः ॥ ६ ॥ दिष्ट्याद्य दर्शनं स्वानां मत्यं वः सौम्य
काङ्क्षितं ॥ संजातं वर्ण्यतां तात तवागमनकारणं ॥ ७ ॥ इत्युक्तो भगवता सर्वं वर्णयामास माधवः ॥ वैरानुबन्धं यदुषु वसुदेव
वधोद्यमं ॥ ८ ॥ यत्संदेशो यदर्थं वा दूतः संप्रेषितः स्वयं ॥ यदुक्तं नारदेनास्य स्वजन्मानकदुन्दुभेः ॥ ९ ॥ श्रुत्वाक्रूरवचः कृ
ष्णो बलश्च परवीरहा ॥ प्रहस्य नन्दं पितरं राज्ञा दिष्टं विजज्ञतुः ॥ १० ॥ गोपान्समादिशत्सोपि गृह्यतां सर्वगोरसः ॥ उपायना
नि गृह्णीध्वं युज्यन्तां शकटानि च ॥ ११ ॥ यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ॥ द्रक्ष्यामः सुमहत्पर्व यान्ति जानपदाः
किल ॥ एवमाघोषयत्क्षत्रा नन्दगोपः स्वगोकुले ॥ १२ ॥ गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशं ॥ रामकृष्णौ पुरीं नेतुमक्रूरं व्रज

एरि उपायनानि उत्तमवस्तूनि ॥ ११ ॥ रसान् घृतादीन् शरच्छलेनेदं सूचयति अविविक्तस्य रोगस्य विविक्त्यार्थं रसान्दास्याम मागतं ॥ १३ ॥
महति ॥ क्षत्रा व्रजरक्षाधिकृतेन अघोषयत् सर्वतो घोषितवान् ॥ १२ ॥ केचिदेकजीवनाः गोप्यः तत्तदाक्रूरमागतमुपश्रुत्येति ॥ १३ ॥

३

अथालिंगनमाह पंचभिः काश्चिदिति ॥ तेन श्रवणेन कृतो हृत्तापः तेन यः श्वासः तेन म्लाना मुखश्रीर्यासां ताः स्रस्तानि दुकूलानि वलयानि च केश
ग्रंथयश्च यासां ताः दुकूलादयो यासां ता याभूताः काश्चन वधूरिति ॥ १४ ॥ तस्य श्रीकृष्णस्यानुध्यानेन निरुद्धा अशेषा वृत्तयो याभिस्ताः ॥
इमं लोकं देहमपि न जानंति स्म मुक्ता इवेति ॥ १५ ॥ अपराः स्त्रियः शौरेर्गिरः स्मरंत्यः संमुमुहुः कथंभूताः अनुरागेण प्रस्मितं तेन हरिताः हृदि स्पृशं
मनोज्ञाः चित्राणि पदानि यासां ताः ॥ १६ ॥ १७ ॥ विरहेण कातरा विह्वलाः अच्युते आशयश्चित्तं यासां ताः ॥ १८ ॥ कृष्णस्य गतिं विधाय विद्रवयतीति विधाता

काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः ॥ स्रस्तदुकूलवलयकेशग्रंथ्यश्च काश्चन ॥ १४ ॥ अन्याश्च तदनुध्याननिवृत्ता
शेषवृत्तयः ॥ नाभ्यजानन्निमं लोकमात्मलोकं गता इव ॥ १५ ॥ स्मरंत्यश्चापराः शौरेरनुरागस्मितेरिताः ॥ हृदिस्पृशश्चित्रपदा
गिरः संमुमुहुः स्त्रियः ॥ १६ ॥ गतिसुललितचेष्टास्निग्धहासावलोकनं ॥ शोकापहानि नर्माणि प्रोद्दामचरितानि च ॥ १७ ॥
चिंतयंत्यो मुकुंदस्य भीता विरहकातराः ॥ समेताः संघशः प्रोचुरश्रुमुख्योऽच्युताशयाः ॥ १८ ॥ गो ३ ॥ अहो विधातस्
तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनो ॥ तांश्चाकृतार्थान्वियुनंक्ष्यपार्थकं विक्रीडितं तेऽर्भकचेष्टितं यथा ॥ १९ ॥ यस्त्वं
प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सुकपोलमुन्नसं ॥ शोकापनोदस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतं ॥ २० ॥

रुदत्य एव मा क्रोशंत्य आहुः अहो इति मैत्र्या हितावरणेन प्रणयेन स्नेहेन च अकृतार्थान् अप्राप्तभोगान् अपि तान् वियुनंक्षि विजोजयसि तस्मात् तव
दया ॥ बालिशा मित्रामित्याहुः अपार्थकमिति विगर्हितं च तव चेष्टितं कर्मेत्याहुः यस्त्वमिति शोकमपनुदतीति शोकापनोदः स चासौ स्मितलेशश्च तेन सुंदरं
मा ॥ तेन हरेर्मुकुंदस्य वक्त्रं प्रदर्श्य अपरदर्शनमस्य पारोक्ष्यं अदर्शनं करोषि तत्तव कर्म असाधु निंद्यमित्यर्थः ॥ २० ॥

२.पू
११५

किंवदन्नापहारित्वेनातिक्रूरत्वमित्याहः क्रूरत्वमिति॥ नन्वक्रूरो हरति नाहमिति चेदत्राहः अक्रूरसमागमात्प्राप्येतेन तथैवं कर्तव्यमन्यः प्रभव
निश्चितो नानान्तरेण स्पष्टं त्वमेवागतासि॥ कलौ हरामि न चण्मचेक्रूरा इति चेत्तत्र॥ येन त्वरन्ते न वक्रुषामधुद्विषः एकदेशो नेत्रवक्त्रादौ त्वदीयम
मयप्रहितेनैव प्राप्य अङ्गारस्य वत्तो वयं तत्र चक्रुः अयं भावः ममसन्निधेरहमस्मा अभिन्नीता तमित्यमर्षेणैव कमलवियोगं यत्र स्थानं धीकरोषीति॥ २१॥ वि
धातारं॥ विहायपरस्परमूचुः नन्दनेरप्रकृरीतिवतषेदेशकृणानंतं गणं श्रुत्वा सौहृदं यस्य सः॥ गृहान्दीन् विरहाय अन्याभ्यां ज्ञातस्यैवदास्य प्रतिपागताः स्व

क्रूरत्वमक्रूरसमागमाद्यायामिनन्दनहृदि स्त्रैंहरापेवतातानवन्॥ येनैकदेशो विलसर्गसौष्ठं वत्वदीयमङ्गाङ्गवयं मधुद्विषः
नन्दनेरमूचुः कृणभंगसौहृदः समीक्ष्यते नः स्वकृतापराधवत॥ विहाय गेहान् स्वजनान् त्वतान्यतीन्नरास्य महोपगता
नवप्रियः॥ ११॥ ॥ हरिं वप्रभाता रजनीयमाशिषः सत्यावभूवः प्रयोचिताधवम्॥ याः सप्तविष्टस्य
स्वब्रजस्यतेः याप्यत्यपागोत्कलितोस्मितामम्॥ ॥ १२॥ श्रीगोपालकृष्णसहाय

स्वकृतापराधः तन्नकृतैनैवास्मितादिना परवशाज्ञपिनः॥ अत्र अस्मान्न समीक्ष्यते न वं नवं प्रियं यस्य सः अत एवं तिवारयाम इति भावः
सैष्यं मूचुः॥ हरिं वप्रभातेतिव्रजस्यते श्रीकृष्णस्य प्रत्यवेपास्यं तिआहरेणाद्वक्षांतिकथंभूतं अपाङ्गेनेत्रान्तेनोत्कलितं उज्जृम्भितस्मितम्
वज्रामवोरसोयस्मिन् तत्तद्यद्वा अपाङ्गोत्कलितस्मितेनाम एवरूपपन्नत्वं तत्र स्वपानप्रत्यहमेवसंभावयति॥ १३॥ ॥

राम
११५

नतु द्विज्ञानि निरिन्नानि तथा भवन्तु नाम तथाः अः स्मत्नेहा कष्टः पित्राहि मित्रपरावञ्जित आगमीष्यति त्याशंकाह ॥ हे अबलाः तासां मधुवनम्कज्ञमि
नोधिते ष्वेशी कृतचित्तः ॥ तथा तासां सलज्जस्मितैर्द्विभ्रमैर्भ्रमरन् परवान् पित्राहि परं तेत्रोः पिपद्धा उज्जे परे अन्येवं धवः प्रतिपस्य तथा मनही
धीरो पित्रामप्याः अविरध्याः कथं नः प्रतियास्यते प्रत्येष्यति ॥ न कथं विहित्यर्थः ॥ १४ ॥ किंच ॥ अस्मदुत्सव भाजो न्याएवाद्य भविष्यतीत्याह ॥
अद्योनि तत्र पुरे दाशार्हाहोरी नां दृशः इष्टे महोत्सवो भविष्यते भविष्यति ॥ यदेवकीसुतं द्रक्ष्यन्ति तथा येवान्ये ध्वनि ॥ गंडेतं तं द्रक्ष्यन्ति तेषामावि

तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान् मनस्व्यपि ॥ कथं पुनर्नः प्रतियास्यते अबलाग्राम्याः सलज्जस्मि
तविभ्रमैर्भ्रमन् ॥ १४ ॥ अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजांधकवृष्णिसात्वतां ॥ महोत्सवः श्रीरमणं गुणा
स्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतम् ॥ ॥ १५ ॥ मैतद्विधस्याः करुणस्य नाम भूदक्रूर इत्येतदतीवदारुणः
यो साधवः नाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः ॥ १६ ॥ ॥ श्रीगोपालाय नमः ॥ ॥

दृशो भविष्यतीति ॥ यद्वा दृशाः इति द्वितीयातेषां दृशो नेत्राणि महोत्सवो भविष्यते प्राप्स्यति ॥ प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात ॥ १५ ॥ अक्रूर शापत्व
आहः मैतद्विधस्येति एवंविधा विधानं कर्म यस्य अतएव निः कृपस्य अक्रूर इति शोभनं नाम मा भूत् तत्र हेतुः अतीव दारुणः इत्यादि प्रिया
त्प्राणात् अपि प्रियं कृष्णं अध्वनः ॥ पारं अस्मद्गोचरत्वात् दूरं देशं नेष्यति ॥ ॥ १६ ॥ ॥ श्रीगोविंदाय नमः ॥ श्रीकृष्णाय नमो नमः

रा०पू
११६

अहोधिगस्मज्जीवितमित्याहुः अनार्द्रधीरिति अनार्द्रा कठिना धीर्यस्य स तावदेष परात्मा रघुमध्यदूरः अस्माविनयमालम्ब्य स्थाविरैस्तोपेक्षितं तेनानि
वारितवंतः इत्यर्थः किंचदेदं वचेति अयं भावः यदि देवमस्माकमनुकूलं भवेत् तर्हि हि विघ्नः कश्चिदेषो मध्ये प्रतिहन्येत अकस्मात् चक्षुः पतो वा भवे
तत्र अन्यद्वा किं विदीर्णं शिरो नेतत्किः वरस्तीति १७ परस्परमस्मं अप्याह एममधिर्वेत्याहुः निवारयाम इति अकरिष्यन् [illegible] किं करिष्यति निमिषा
र्धदुस्त्यजात् मुकुंदसंगाद्विध्वंसितानि वियोगेन तानि अतएव दीनानि चेतांसि यासां एवंभूतानामस्माकं न मृत्योरपि भयमित्यर्थः १८ रतावितिकारणा

अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयंति दुर्मदाः गोपाश्च नोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रतिकूलमीहते १८
निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन्कुलवृद्धबांधवाः मुकुंदसंगान्निमिषार्धदुस्त्यजाद्दैवेन विध्वंसितदीनचे
तसां १९ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्यां नीताः स्म नः क्षणमिव क्षणदा विना तं गो
प्यः कथं न्वतितरेम तमो दुरंतं २० योऽह्नः क्षये व्रजमनंतसखः परीतो गोपैर्विशन्खुररजश्छुरितालकस्रक् वेणुं क्वणन्
स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम २१

स्वरूपमाह समेवावलंबनीयमित्याहुः हे गोप्यः यस्य ललितं स्मितं वल्गुमंत्रश्छली
लावलोकश्च परिरंभणं च अनुरागेण तानि यस्यां एवं गोष्ठ्यां रासक्रीडासभायां नः अस्माभिः क्षणदाः रात्रयः क्षणमिव नीताः तमच्युतं कृष्णं विनाद्य
तमः विरहदुःखं कथं नु अतितरेम न कथंचिदित्यर्थः २० किंच अत्यासमो अतितरां जीवनमेव कथं स्यादित्याहुः यदति अह्नः क्षये दिनावसाने
खुररजोभिः छुरिता धूसरा अलकाः स्रजश्च यस्य सः व्रजमनंतः विशन् स्मितेन युक्तकटाक्षनिरीक्षणेन तेनास्माकं चित्तं क्षिणोति हरति अमुमृते कृष्णं विना कथं भवेम
जीवेमेति २१

राम
११६

हस्ते विषिक्तमानसा नियास्यतीतः त्वरितैरुच्चैः क्रूरमक्रूरतः श्रुत्वा कंसकेशिनिषूदनः गोपीमनोरथावाप्तः ह्रादमः स्वकृतार्थयो ॥२१॥ स्त्रीणामपि
तिताः अनादृत्य कृतं मैत्रादिकं मैत्रमित्रैरेवतत्संध्योपासनंतरादि कर्म कृतं येन सः ॥२३॥ अतं प्रस्तुतं अत्र गच्छन् ॥२२॥ अगरं जिताः परावृ
त्य निरीक्षणादिभिः किंचिदानंदिताः प्रत्यादेशं प्रत्याख्यानं ॥२४॥ तप्यतीः संतप्यमानाः आयास्ये शीघ्रमागमिष्यामीति हृत वाक्यैः ॥२५

एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ॥ विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥२१॥
स्त्रीणामेवं रुदन्तीनां प्रदिने स विनिर्ययौ ॥ अक्रूरश्चोदयामास कृष्णेन मैत्रादिको रथं ॥२२॥ गोपालमध्ये प्रज्ञेन तन्नेदयाघोः शकटे स्थिताः
आदाय पायनं भूरि कृष्णमानुगोरसस्तं प्रतान् ॥ गोप्यश्च दयितं कृष्णमनुव्रज्यानुरञ्जिताः प्रत्यादेशं भगवतः काङ्क्षन्त्यश्चाव
तस्थिरे ॥२४॥ नातिस्थयान्तप्यतीर्वीक्ष्य त्वरमस्थानमपरं जनमः ॥ शान्तयामास सन्देशैरायास्यामीति केशवः ॥२५॥ यावदालक्ष्यते केतुर्या
वद्रेणू रथस्य च ॥ अनुप्रस्थापितात्मानो लेख्यानीवोपलक्षिताः ॥२६॥ तां निराशा निववृतुर्गोविन्दविनिवर्तने ॥ विशोकाश्च गृहं नीति
सुगायन्त्यः प्रियचेष्टितं ॥२७॥ भगवानपि संप्राप्तो रामाक्रूरयुतो नृप ॥ रथेन वायुवेगेन कालिन्दीमघनाशिनीं ॥२८॥ तत्रोपस्पृश्य पा
नीयं पीत्वा मध्यमतो गमे ॥ वृक्षखण्डमुपव्रज्य सरामो रथमाविशत् ॥२९॥ अक्रूरस्त्वाह पामत्र निवेश्य पर रथोपरि ॥ कालिन्द्याः ह्रदमा
गत्य स्नानं विधिवदाचरत् ॥४०॥ निमज्ज्य तस्मिन्सलिले जजाप ब्रह्मसनातनं ॥ तावेव ददृशे सोऽक्रूरो रामकृष्णौ समन्वितौ ॥४१॥

हस्ते अनुप्रस्थापिताश्चात्मानः स्थित्यानियापिताः लेख्यामयप्रतिकाश्च निश्चलं ॥२६॥ ८ ॥ वृक्षाणां खंडं समूहमुपव्रज्यन् ॥२९॥ रामश्च संयंकितः सन्रथे
पारिनिवेशं ॥४०॥ ब्रह्मवेदं जपन् दृष्टौ मोचलोकनीनौ महाविस्मितवांस्ततः ॥ अक्रूरः पयसि जले द्वप्रमन्त्यो स्नानं विधिवदाचरत् ॥४१॥

श्रीमत्समदर्शयत्र

२०१ ॥

ध्वरा॥श्व॥सिद्धादिभिः स्तूयमानं ॥४४॥ सहस्रशिरसामियस्य तं सहस्रफणेषु मौलयोः स्पृशन्तीनितम्बातं नीलेऽञ्जवेरेयस्य तं विशावन्नकमलकरंवन्
श्वेतं शृंगैः शिखरैः श्वेतकैलाशमिव स्थितं ॥४५॥ तद्योत्संगे कुंडलीकृत्य देहार्धं विलोक्य मेकारशेन श्लोकेनाव्ययः ॥४६॥ शोभनेत्रभोगयस्य
उच्चैनानातिकायस्य तं वतं च शोभनेनोकयोर्लोयस्य श्रुत्योः धरोयस्य तं च तं च ॥४७॥ तगावेशोयस्य गरस्थले श्रीर्यस्य तं वतं च वलिवत्

स्थि

तेरथस्थो कथमिह स्तनावानकडंडपेः ॥ तर्हि त्वत्स्पर्शनेन तत्स्नुत्रमध्यवृषवृषभः ॥४८॥ तत्रापि च यथापूर्वं मासीनो
घनेरेवमः ॥ न्यमज्जनुदर्शने जन्मेमृषाकिंसलिलेतयोः ॥४९॥ भूयः स्तत्रापि मोः इन्द्राद्यैः स्तूयमानमहीश्वरं सिद्धचारण
गंधर्वैरन्यैरन्यैर्तकंधरैः ॥४४॥ सहस्रशिरसं देवं सहस्रफणमौलिनं ॥ नीलांबरं विशीश्वेतं शृंगैः श्वेतमिव स्थितं ॥४५॥ तस्यो
त्संगे चैनः स्थानं पीतकौशेयवाससं ॥ चतुष्पवक्त्रं भुजं शान्तं पद्मपत्राक्षयोरुकं ॥४६॥ चारुप्रसन्नवदनं चारुहासं निरीक्षणं ॥
सुभ्रुं च सवाजकर्णाग्रकपोलारुणाधरं ॥४७॥ प्रलंबपीवरभुजं तुंगनासोरस्थलश्रियं ॥ कंबुकंठं निम्ननाभिं वलिवत्पल्लवोदरं
दृहत्काटितटश्रोणिकरभोरुद्वयान्वितं ॥ चारुजानुयुगं चारुजंघायुगलसंयुतं ॥५०॥ तुंगगुल्फारुणानखव्रातरीक्षितिमिर्हृतं ॥

स्तवोदरं वलयंपः निर्यक् निम्नोरेखाय यस्य संतितं द्वलिवत्तत्पल्लववदनस्पष्टत्यदलंपदर ॥ नवांशस्वंगुष्टदलैर्विलसत्पारपंकजं ॥५१॥
शायद्देरेयस्य तं ॥४८॥ कटितटं च श्रोणिश्च करभसदृशमरुद्वयं च वदहेद्य तत्कटितटश्रोणिकरभोरुद्वयं च तेनान्वितं ॥ चारु सुंदरजानुकटितटश्रोणि
ष्णी करभोरुद्वयं च तेनान्वितं ॥४९॥ तुंगो दीर्घः उन्नतौ गुल्फौ अरुणानखव्रातस्तद्वतेन घोरा दीधितिभिः तथा नवांशुगल्पः अंगुष्ठे च तान्येव दलानि तैः स्वि

२०ए ॥

महार्हा मणिव्राता येषु तैः किरीटादिभिः ॥५०॥५१॥ पृथक् पृथग्भावो विभिन्नाभिप्रायो येषां तैः तत्र पार्षदैः स्वामीति स्तूयमानं सनकादिभिर्ब्रह्मेति ॥ ब्रह्मा
दिभिर्महेश्वर इति मरीच्यादिद्विजोत्तमैः परः प्रजापतिरिति ॥५२॥ वसुः उपरिचरवसुः नारदश्च प्रह्लादादयो येषां तैः परं दैवतमिति च ॥ श्रेष्ठैर्वचोभिः

सुमहार्हमणिव्रातकिरीटकटकांगदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ॥५०॥ भ्राजमानं पद्मकरं शंखचक्रगदाधरं
श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ॥५१॥ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः ॥ सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च
द्विजोत्तमैः ॥५२॥ प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः ॥ स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ॥५४॥ श्रिया पु
ष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया ॥ विद्ययाविद्यया शक्त्या मायया च निषेवितं ॥५५॥ विलोक्य सुभृशं प्रीतो भक्त्या
परमया युतः ॥ हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥५६॥ गिरा गद्गदयास्तौषीत्सत्त्वमालंब्य सात्वतः ॥ प्रण
म्य मूर्ध्नावहितः कृतांजलिपुटः शनैः ॥५७॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनचत्वारिंशोऽध्यायः ॥ ॥

रिति वा ॥५४॥ विद्ययाविद्यये जीवानां मुक्तिबंधहेतू हे तु मायया तयोः कारणं शक्तिर्ह्लादिनी नाम संवित् ज्ञानं आभिरन्याभिश्च निषेवितं ॥५५॥ विलोक्य
सुभृशं प्रीतः सुष्ठु स्थिरः सात्त्विको भावो भक्तः परमेश्वर इति ज्ञात्वेति ॥५६॥५७॥ दशमे कोनचत्वारिंशः ॥ चत्वारिंशे ततोऽक्रूरः जलमध्ये ईश्वरेश्वरं ॥ प्रणम्य
भक्त्या तुष्टाव मत्स्याद्यवतारभेदतः ॥ १ ॥ ॥ ॥

१०.पू
११८

श्रीकृष्णं शरणमिति नतोस्मीति ॥ हे कृष्ण त्वां नतोस्मि त्वमस्मात्पितृव्यः कृतो मा वालनं नमोसि ॥ नन्वाह आद्य पुरुष अव्यय च अनादि निधनमित्यर्थः कृत एवं तु अखिलहेतुहेतवे नाहं त्वं ॥ सत्व नारायणः नाहमिति चेत्नारायणत्वं किं नारायण इति प्राह नोपि ॥ कारणकृतिः स्वयमेवेत्याह ॥ यन्ना भिजाता इति यतो ब्रह्मणः ॥५॥ अखिलहेतुहेतवे इत्येतद्वयंपदं व्याप्ति ॥ भूरिति त्वियाहि रहंकारः अजामायया तस्या आदिः पुरुषः एते यज्जगतो हेतवस्त्वे सर्वे ते तव अंगभूताः अंगानुश्रीमूर्त्तेर्भूतः उपसर्जनभूतानि ॥५॥ नत्वेतिस्त्विति कथं ह्यपते अहमेवान्यत्र उपत्र तत्परं तेन स्वेति चे

रा१

अक्रूर उवाच ॥ नतोस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्ययं ॥ यन्नाभिजातादरविंदकोशाद्ब्रह्माविरासी घत एष लोकः ॥१॥ भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि ॥ सर्वेंद्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोंगभूताः ॥२॥ नैते स्वरूपं विदुरात्मनस्ते ह्यजादयोनात्मतया गृहीताः ॥ अजोनुबद्धः स गुणैरजाया गुणात्परं वेद न ते स्वरूपं ॥३॥

दित्याशंक्य तत्रैव मायया तत्पारमार्थ्यं तेन कोपि वेदेत्याह ॥ नैत इति ॥ एते अजाद्यादिर्येषां ते आत्मनस्ते स्वरूपं न विदुः अनात्मतया जडत्वेन कारणेन जडत्वे हेतवः गृहीताः प्रत्यक्षादिभिर्दृष्टाः न ह्यजडो दृग्गोचर इति भावः नतु जडानामाज्ञानं तु जीव एव ज्ञास्यतीत्यत आह ॥ अज इति स अजो ब्रह्मापि अजायाः गुणैरनुबद्धः आवृतः गुणातीतं त्वद्रूपं तेन वेद ॥ अन्यः कुतो ज्ञास्यतीति ॥ यद्वा एवं कृत्वा द्वयः आत्मनः स्वरूपं तव स्वरूपं न विदुः जडत्वादेव जीवत्वात्तान् आत्मानं च वेत्ति न परं स्वरूपमिति ॥ यथोक्तं हं सगुह्ये देहोसवोक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीड इति ॥३॥

११८

स२

ननु यदि केपि न जानंति कथं तर्हि संसारनिवृत्तिर्जीवानामित्याशंक्य साक्षादगोचरत्वेपि येन केनापि मार्गेण भजतां त्वं गम्योसीत्याह त्रिभिर्यो-
गिन इति हिरण्यगर्भादयोध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषं तत्त्वतोमितस्वरूपमीश्वरं च यजंति तदेवं सांख्ययोगावेकीकृत्योक्त्वा ४
त्रयीमार्गं कर्मज्ञानभेदेन दर्शयति ॥ त्रय्या चेति श्लोकद्वयेन वैतानिकाः कर्मयोगिनः त्वां वै त्वामेव यजंते तेन तेन इंद्रवरुणवाय्वादीनां यजं-
ते न मामिति भ्रमस्तत्राह ॥ नानाविग्रहधारीणि रूपाणि येषां ते ये मरास्तेषामाख्यया नाम्ना त्वामेव यजंत इति ॥ एकत्रयभावः ऐंद्रवारुणादिस्तेनै-

त्वां योगिनो यजंत्यद्धा महापुरुषमीश्वरं ॥ साध्यात्मं साधिभूतं च साधिदैवं च साधवः ॥ ४ ॥ त्रय्या च विद्यया केचित्
त्वां वै वैतानिका द्विजाः ॥ यजंते विततैर्यज्ञैः नानारूपामराख्यया ॥ ५ ॥ एके त्वाखिलकर्माणि संन्यस्योपशमं ग-
ताः ॥ ज्ञानिनो ज्ञानयज्ञेन यजंति ज्ञानविग्रहं ॥ ६ ॥ अन्ये च संस्कृतात्मानो विधिनाभिहितेन ते ॥ यजंति त्वन्मयास्त्वां
वै बहुमूर्त्त्येकमूर्त्तिकं ॥ ७ ॥ त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणं ॥ बह्वाचार्यविभेदेन भगवंतमुपासते ॥ ८ ॥

रिंद्रादयः सर्वैर्हविर्ग्रहणप्रकारं प्रतेन च सर्वैरप्याहवः संभवति अतो नामभेदेन त्वामेव यजंत इति तथा च श्रुतिः स प्रथमः संस्कृतिर्विश्वकर्मा स प्र-
थमो मित्रावरुणोग्निः स प्रथमो बृहस्पतिश्चिकित्वान् तस्मा इंद्राय हविराजुहोतीति ५ ज्ञानयज्ञेन समाधिना ६ सांख्ययोगत्रयीमार्गोक्ताः
वैष्णवशैवमार्गौ च द्वयेनाह अन्ये चेति संस्कृतात्मानः वैष्णवशैवदीक्षादीक्षिता संतः ते वैष्णवा [illegible] ते न पंचरात्रादिविधिना त्वन्मयाः त्वन्मयत्वेनात्मानं
चिंतयंतः त्वदेकप्रधाना इति वा वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदेन बहुमूर्त्तिना एकमूर्त्तिकं च त्वामेव यजंति ७ बह्वाचार्यविभेदेन

द०प्र
११९

येपि क्षुद्रदेवताभक्तास्तेपि त्वामेव यजंतीत्याह ॥ सर्व एवेति हे सर्वदेवमय ननु ते परस्परं देवताधिक्षेपकलहव्याकुलचित्ताः कथमेकमेव यजंतीत्य
श्रते ॥ तत्राह यद्यप्यन्यधिय इति बुद्धिमात्रभेदो न वस्तुभेद इत्यर्थः ॥ ९ ॥ तस्मात्सर्वे मार्गास्त्वामेव पर्यवस्यंतीति सदृष्टांतमाह यथेति अद्रेः समीपाः
प्रभवंति या नद्यः पुनः पर्जन्येनापूरिताः बहुशाखाः संतः सर्वशः सिंधुमेव विशंति तथा नानादेशागता ये मार्गास्ते त्वामेव विशंतीति ॥ १० ॥ अत्र
हेतुमाह सत्वमिति ॥ भवतः शक्तिर्या प्रकृतिः तस्याः सत्वादयो गुणाः अतः प्राकृताः प्रकृतिकार्योपाधयो ब्रह्मपर्यंताः स्थावरादयो जीवाः ह्युपा
धिद्वारेण तेषु गुणेषु प्रोताः प्रविष्टाः ॥ तेव प्रकृतौ प्रावत्वयीति अतः क्रमेणोपाधिलयात्सर्वेपि त्वामेव प्रविशंतीति यद्वा भवतः प्रकृतेर्गुणेषु प्रोता

सर्व एव यजंति त्वां सर्वदेवमयेश्वरं ॥ येप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥ ९ ॥ यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो
विशंति सर्वतः सिंधुं तद्वत्त्वां गतयोमलाः ॥ १० ॥ सत्वं रजस्तम इति भवतः प्रकृतेर्गुणाः ॥ तेषु हि प्राकृताः प्रोक्ताः आब्रह्मस्था
वरादयः ॥ ११ ॥ तुभ्यं नमस्ते त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे ॥ गुणप्रवाहोयमविद्यया कृतः प्रवर्त्तते देवनृतिर्य
गात्मसु ॥ १२ ॥

ब्रह्मादयो भवद्व्यतिरिक्ता न संतीति अतस्त्वमेव सर्वदेवमयेति ॥ ११ ॥ ननु भवतः प्रकृतेरिति चरन्ममापि प्रकृतिसंबंधं ब्रवीषि
न तर्हि तेषां च मम च को विशेषः स्यादित्याशंक्याविशेषमाह ॥ तुभ्यमिति अविषक्ता दृष्टिर्यस्य अलिप्तबुद्धये अतः सर्वात्मने व्यतिरिक्ताभावादविषक्त
दृष्टित्वमित्यर्थः ॥ किंच सर्वधियां साक्षिणे सर्वबुद्धिसाक्षित्वात्तत्कार्यापि बुद्धिलेपरहितेत्यर्थः ॥ इतरेषां संसरतीत्याह गुणप्रवाह इति देवनृतिर्यगात्मनो
येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः ॥ त्वदविद्याकृतो गुणप्रवाहः प्रवर्त्तते अतो महान्विशेष इत्यर्थः ॥ ॥ १२ ॥

दम
११९

सर्वात्मनस्तत्पनेनोक्तं ॥ सगुणात्रूपत्वेनोति ॥ अग्निर्मुखमितिद्वाभ्यां ॥ अग्न्यादीनन्द्ये स्वरावयवतां विधीते योयमग्निः स तव मुखमित्यादि विवचनव्यक्तो ह
रणं चक्षुः श्रुतिः श्रवणेंद्रियं कं मूर्धा प्राणाश्च बलं च ततः ॥ १२ ॥ ह्रद्यः परस्पतेस्थिनखानि ॥ १४ ॥ न केवलमेतावत्किंतु सर्वोप्ययं प्रपंचस्तव
वपव भूत एवेतिवदन्नेवं सत्यपि प्रपंचस्य विकारात्ल्पमपि न प्रसज्यते तस्यनृपिकल्पितत्वादित्याह त्वयीति अव्ययात्मनि पुरुषे पूर्णो लोकास्तथः
संसिद्धेत्तेषु बलंतिहे अव्ययात्मत्रितिवाकथं भूते त्वयि मनोमये मतः प्रधानेमनोवृत्तिविषयेगोरस्यते यद्वा यावद्ध्यानमनसे वाउदृष्टव्य इत्यादि

अग्निर्मुखं तेवनिरंघ्रिरीक्षणं सूर्योनभोनाभिरथोदिशः श्रुतिः ॥ द्यौः कं सुरेंद्रास्तव बाहवोर्णवाः कुक्षिर्मरुत्प्राणबलं
प्रकल्पितं ॥ १२ ॥ रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेद्रयः ॥ निमेषणं राज्यहनी प्रजापतिर्मेढ्रं
तु वृष्टिस्तव वीर्यमिष्यते ॥ १४ ॥ त्वय्यव्ययात्मन्पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसंकुलाः ॥ यथा जले संजिहते
जलौकसोप्युदुंबरे वा मशका मनोमये ॥ १५ ॥ यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ॥ तैरामृष्टशुचो लोका मुदा गायंति
ते यशः ॥ १६ ॥ नमः कारणमत्स्याय प्रलयाब्धिचराय च ॥ हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥ १७ ॥

श्रुतेः जले यथा जलौकसः सूक्ष्मप्राणिपडुराशयः यथा वा तत उदुंबरे ततः केशरेषु मशकाः परस्परवार्तानभिज्ञाः एवमनंतानि ब्रह्मांडानि [illegible]
[illegible] नविसंचरंतीत्यर्थः ॥ १५ ॥ तस्मादेवंभूतं तत्त्वमहं कथं स्तोतुं ... मितित्ववरतारकथामृतमेवं सतः सेवंत इत्याह यानि यानीति आमृष्ट
परिमार्जिता शुक् येषां ते ॥ १६ ॥ अतः तत्रमध्ये तत्रावतारमत्स्याय नमः इति हयशीर्षे हयग्रीवाय मधुकैटभयोः मृत्यवे हंत्रे ॥ १७ ॥ राम राम राम

२०५ अकूपाराय कर्माय परिशिष्टद्वारे विहाराय मत्स्यतन्त्रे ॥ १८ ॥ नृसिंहनाथाय परशुरामाय १० ॥ संकर्षणाय च रामचन्द्रः ॥ अहङ्कारेण रूपेणाग्रणामतिनमस्ते वासुदेवा

१२० येति ॥ ११ ॥ २२ ॥ एवं स्तुत्वा वधं मोक्षं प्रार्थयितुमाह ॥ भगवन्निति ॥ अस्मतिर्देहादौ ग्राहः आग्रहो यस्य सः असद्ग्राहो यस्येति वा ॥ नकेवलं मयैलोकः

अहमपि तथैवेत्याह ॥ अहं चेति ॥ नूनं त्वमेव प्रकारः पतितविपर्यासमतिरिति ॥ अनित्यं कर्मफलं नित्यमिति ॥ अनात्मनि देहे आत्मेति इडः स्वरूपे गृहादौ स्वे

त्वमिति विपरीतः मतिरित्यर्थः ॥ द्वंद्वेषु सुखदुःखादिषु आरामः क्रीडा तीति तथा तः ॥ ततु दुःखे तोरतिः तत्राह तमोनिष्ठः तमसा व्याप्तः आत्मनः प्रि

अकूपाराय वृहते नमो मंदरधारिणे ॥ क्षित्युद्धारविहाराय नमः शूकरमूर्तये ॥ १९ ॥ नमस्तेऽद्भुतसिंहाय साधुलोकभयापह ॥ वामनायनम

स्तुभ्यं क्रांतत्रिभुवनाय च ॥ १० ॥ नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे ॥ नमस्ते रघुवर्याय रावणांतकराय च ॥ २० ॥ नमस्ते वासुदेवाय न

मः संकर्षणाय च ॥ प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ २१ ॥ नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने ॥ म्लेच्छप्रायक्षत्रहंत्रे नमस्ते क

ल्किरूपिणे ॥ २२ ॥ भगवन् जीवलोकोऽयं मोहितस्तव मायया ॥ अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥ २३ ॥ अहं चात्मात्मजागार दा

रार्थस्वजनादिषु ॥ भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो ॥ २४ ॥ अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहं ॥ द्वंद्वारामस्तमोविष्टः न

जाने त्वात्मनः प्रियं ॥ २५ ॥ यथाबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ॥ अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः ॥ २६ ॥ नोत्सहेऽहं कृपणधीः

कामकर्महतं मनः ॥ रोद्धुं प्रमाथिभिश्चाक्षैः ह्रियमाणमितस्ततः ॥ २७ ॥ सोऽहं तवांघ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये ॥ पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ॥ २८ ॥

उद्भवंतीति तदुद्भवानि तृणादीनि तैः तथा मायाछन्नं त्वामहं हित्वा परस्मुखा देहाद्यभिमुखो वर्त्तन इति ॥ २६ ॥ नत्वेवं जानतः कुतो विषयाभिमुखत्वमत आह ॥ राम

हनोत्सहे इति कृपणा विषयवासनया कृपणधीः कृपणमतिः अतएव अतः कामकर्माभ्यां हतं हृतं प्रमाथिभिः इंद्रियैः सबलिभिर्विषयप्रवणैरितस्ततः आकृष्यमाणं ॥ ११० एको

रोद्धुं नियंतुं न शक्नोमीति ॥ २७ ॥

न्तरेव महत्त्वं तेजोऽजः सोऽहं तवाङ्घ्रिमुपगतः शरणागतः नत्विंद्रियपरतंत्रस्सेवनतत्परः इत्यत आह ॥ तच्चापीति हे ईश अंतर्यामिन् तत्र अनुकंपगम
वच्छ्रुतं तादृशं पदं प्राप्तोऽनुग्रह एवेत्यहं मन्ये अनुग्रहे सतीति वा ॥ ननु सतां सेवया इदं भवति किमनुग्रहेणेत्यत आह पुंस इति जीवस्य संसार
स्यापवर्गः ॥ यदा मोक्षो यदा त्वदनुकंपया भवेत् तदा भावनास्य इदं भवति ॥ हे पद्मनाभ तदा सदुपासनया संपद्यते तेन इंद्रियविषयेभ्यो मतिर्भवेत् तत्त्वत्कृपां विना
न सेवा नो नतो नत्वन्मतिः न तत्संगो नित्य इत्यर्थः ॥ २८ ॥ पादयोः पतन् प्रार्थयति द्वयेन नम इति ॥ विज्ञानमेव मात्रा प्रतिपत्तिर्यस्य तस्मै अत एव सर्वं धी

सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये ॥ पुंसो भवेद्यर्हि संसरणापवर्गस्त्वत्पद्मनाभ सदुपास
नया मतिः स्यात् ॥ २८ ॥ नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ॥ पुरुषेशप्रधानाय ब्रह्मणेऽनंतशक्तये ॥ २९ ॥ नमस्ते
वासुदेवाय सर्वभूतक्षयाय च ॥ हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ॥ ३० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे

प्रत्ययहेतवे सम्यग्ज्ञानकारणाय प्रधानाय नियंत्रे ततः ब्रह्मणे परिपूर्णाय किंच अनंताः शक्तयो यस्य यद्वा अनंता चत्वारिंशोऽध्यायः
मायाख्या शक्तिर्यस्य तस्मै ॥ अथवा प्रधानं प्रकृतिः तत्प्रवर्त्तकः पुरुषः ईशः कालः एतत्त्रितयात्मने ब्रह्मणे वस्तुतो भगवान् प्रकृतिर्ये स्वोपा
दानमाधारः पुरुषः परः सत्ताभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वमहमिति ॥ २९ ॥ सर्वप्रत्ययहेतुत्वमभिव्यंजयन्नाह नम इति वासुदेवाय चित्ताधि
ष्ठात्रे सर्वभूतक्षयाय आश्रयः अहंकाराय प्राणिनामाश्रयः तत्तच्च अहंकाराधिष्ठात्रे संकर्षणायेत्यर्थः हृषीकेशेति बुद्धिमनसोरधिष्ठातः प्रद्युम्ना
निरुद्धयोरेकीकृत्यग्रहणं शरणागतं मां पाहीति प्रार्थयते ॥ ३० ॥ २ रामे वेतारिगः ॥

२०५
।२।

एकचत्वारिंशेऽक्रूरानुजकं प्रविश्य नृपुरीं ॥ ततो वराननदाराकृष्टः ह्रदाग्रो वायकस्य च ॥ १ ॥ स्नात्वा समकुण्डमनः प्रमोद्य ह्विधाम सन्दर्शन समन्नयातः
हरा ज धानीमथुरामपश्यद्देहकृतानन्तमहोत्सवाढ्या ॥ २ ॥ भूमौ वियति जले वा यानीडुतानि त्वय्येव सन्तीति चत्वा विपश्यतो मे किमद्भु
तमदृष्टं अपि वसद्धे दृश्यमित्यर्थः ॥ ३ ॥ नन्तु मन्त्र उगाक्षेः पूर्वमेव तान्विस्मितश्च रखोलक्षितोऽपि ॥ अतो भूमौ वियति जले वा किमद्भुतं दृष्टवदेति अ

श्रीशुक उवाच ॥ स्तुवतस्तस्य भगवान्दर्शयित्वा जले वपुः ॥ भूयः समाहरत्कृष्णो नटो नाट्यमिवात्मनः ॥ १ ॥ सोऽपि चान्तर्जले वी
क्ष्य जलाऽद्भुतमपि प्रत्वरः ॥ कृत्वा चावश्यकं कर्म विस्मितो रथमागमत् ॥ २ ॥ तमपृच्छद्धृषीकेशः किं ते दृष्टमिहाद्भुतं ॥ भूमौ वि
यति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥ अक्रूर उवाच ॥ अद्भुतानीह यावन्ति भूमौ वियति वा जले ॥ त्वयि विश्वात्मके तानि किं
मेऽदृष्टं विपश्यतः ॥ ४ ॥ यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ॥ तं त्वानुपश्यतो ब्रह्मन्किं मे दृष्टमिहाद्भुतं ॥ ५ ॥ इत्युक्त्वा चो
दयामास स्यन्दनं गान्दिनीसुतः ॥ मथुरामनयद्रामं कृष्णं चैव दिनात्यये ॥ ६ ॥ मार्गे ग्रामजना राजंस्तत्र तत्रोपसङ्गताः ॥ वसुदेवसु
तौ वीक्ष्य प्रीता दृष्टिं न चाददुः ॥ ७ ॥ तावद्व्रजौकसस्तत्र नन्दगोपादयोऽग्रतः ॥ पुरोपवनमासाद्य प्रतीक्षन्तोऽवतस्थिरे ॥ ८ ॥ तान्समे
त्याह भगवानक्रूरं जगदीश्वरः ॥ गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥ ९ ॥ भवान्प्रविशतामग्रे सहयानः पुरीं गृहं ॥ वयं

तन्न ग्राह्यं पश्चाद्भुतानां नाति ॥ यत्र त्वयि सर्वाण्यद्भुतानि तत्त्वामिह प्रपश्यतो मे त्वन्यत्र भूम्यादौ किमद्भुतं ॥ त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीं ॥
दृष्ट्वा विना न किंचिदद्भुतमित्यर्थः ब्रह्मन्निहे परमेश्वरे त्व — ब्रह्मेति वा पाठः ॥ ५ ॥ गान्दिनीसुतोऽक्रूरः ॥ ६ ॥ दृष्टिं नाददुः पश्यन्त एवास्थिता इत्यर्थः ॥ ७ ॥ राम

राम
।२।

॥ --- रजः सह गोपालैरित्यर्थः ॥ १ ॥ यच्छौचेन यस्य पादरजसः क्षालनोदकेन गृहा गणास्थितं ॥ २ ॥ नश्लोकाः पुण्यकीर्त्यर्हः एकांतभक्तानां
यागतिः तावले --- पतत्पवित्रितवस्त्रः याभिरद्भिः स्वस्वर्गाः प्राप्ताः ॥ ५ ॥ प्रार्थ्यमानोन महकारोतिरेवदेवेति अतः परमत्यत्र श्रेयोनाही

श्रु एवं च नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ॥ आगच्छ याम गेहा
न्नः सनाथान्कुर्वधोक्षज सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम ॥ २ ॥ पुनीहि पादरजसा गृहान्नो गृहमेधिनां
यच्छौचेनानुतृप्यंति पितरः साग्नयः सुराः ॥ ३ ॥ अवनिज्यांघ्रियुगलमासीच्छ्लोको बलिर्महान् ऐश्वर्यमतुलं ले
भे गतिं चैकान्तिकां तु या ॥ ४ ॥ आपस्तेंघ्र्यवनेजन्यस्त्रीन् लोकान् शुचयोपुनन् शिरसाधत्त याः सर्वाः स्वर्याताः स
गरात्मजाः ॥ ५ ॥ देवदेव जगन्नाथ पुण्यश्रवणकीर्तन यदूत्तमोत्तमश्लोक नारायण नमोस्तु ते ॥ ६ ॥ भ वा उ वा च आया
स्ये भवतो गेहमहमार्यसमन्वितः यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं ॥ ७ ॥ एवमुक्तो भगवता सोक्रूरो विमना इव पुरीं प्र
विष्टः कंसाय कर्मावेद्य गृहं ययौ ॥ ८ ॥ अथापराह्ने भगवान् कृष्णः संकर्षणान्वितः मथुरां प्राविशद्गोपैः दिदृक्षुः परिवारितः

तिमत्वावङ्कधामं वोधयति ॥ ६ ॥ आरोतावद्यदुचक्रायदुत्यतीतियदुचक्रध्रुक्कृतं कंसं हत्वा सुहृदां प्रियं वितरिष्ये दास्यामि ॥ ७ ॥ एमकृ
त्वावानीतावपित्वकृतकर्मावेद्य समर्थेति ॥ ८ ॥ गोपैः परिवारितः प्राविशत् ॥ ९ ॥

२०५ श्रीकल्मदृष्टां गरीमन्नवर्णापनिचन्द्रभिः ददर्शांतामिति। स्फाटिकानि हर्म्याणि गोपुरद्वाराणि यस्यां तां बृहंति हेममयानि कपाटानि तोरणानि

१२२ च यस्यां तां। नानाविधा आगाराः आगारकुस्यु तन्मयाः कोष्ठा धान्यागाराः अश्वशालादयो यस्यां तां। परिखाः परितः खाताः गर्ताः ताभिर्दुर्गमां

उद्यानानि वृक्षच्छाया निवनानि रम्याः उपवनानि च निकरानि तैरुपशोभितां॥२०॥ सौवर्णाः शृंगारकाः प्रतिः पद्मा हर्म्याणि धनिनां गृहाणि च

निश्राणगृहोचितानि आगारगार्श्वतः श्रेणीनां एकशिल्पोपजीविनां सभाभिः उपवेशनस्थानैः अन्यैश्च भवनैर्गेहैः उपस्कृतां अमलः स्फटिकः

ददर्शतां स्फाटिकहर्म्यगोपुरद्वारां बृहद्धेममकपाटतोरणां। नानागारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभितां॥२०॥ सौवर्णशृंगारकहर्म्यपंक्तिभिः कृतैः श्रेणीसभाभिर्भवनैरुपस्कृतां। वैडूर्यवज्रामलनीलविद्रुमैर्युक्ताः हारिद्विवेलभीषुवेदिषु॥२१॥ ज्येष्ठप्रवालाग्रवरांधकुट्टिमप्राविष्टपारावतवर्हिनादितां। संसिक्तरथ्यापणमार्गवीथिवेदिकां प्रकीर्णमाल्यांकुरजालतंडुलां॥२२॥ आपूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः॥ ॥

हरितः मर--- वैडूर्यादिरत्नैर्युक्तैः वलभ्यादिषु आविष्टः उपविष्टः पारावतैः बर्हिभिश्च नादितां। तत्र वलभ्यः गृहस्योर्ध्वभागेषु वज्रादिरचित

रत्नानि--- कृतोन्नामवेदिका विरचितानावष्टंभवेदिका। ज्ञालाग्रप्रवालांधकाराणि गवाक्षच्छिद्राणि। कुट्टिमानि मणिबद्धा भूमयः तेषु स्थितिः रथ्या राज

राजमार्गाः आपणाः पण्यवीथयः मार्गाः अन्ये वर्त्मानि तेषां निःसंसिक्तानि रथ्यादीनि यस्याः तां प्रकीर्णमाल्यादरयोपयस्यां तां॥२२॥ १२२

नेत्राह्लादकृतानि द्वारि येषां ते गृहाः यस्यां तां कैः आपूर्णकुंभैः दधिचंदनेन उक्षितैः प्रसूनानां दीपानां वलयाः येषु तैः॥२२॥

तत्रेयं रीतिः नेत्रैः उपलक्षिता रंभा क्रमुकाः तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिकाविततिविस्तारपरवस्त्राणि तत्सहितैः
तत्रेयं रीतिः द्वारे चंभयतं तोरणलानाचपरितः कुंभाः तत्परितः प्रत्नावलयः कंठपट्टिकाः मुखेन्दूनारिपट्टवाः तदुपरिपार्श्वांतरेरीपावल
यः तत्रैव निधौ रंभाः क्रमुकाकेतनवहोरणानि चेति ११ नारेयाबौवर्त्मना राजमार्गेण तास्प्रविश्य द्वितीयां १४ मुक्तकामेवाहद्वेयं

स्फुरंरंभाक्रमुकैः संकेतुभिः स्खलं कृतद्वारगृहा सपट्टिकैः ११ तां प्राविशेव हरेवनं द नो वृतो वयस्यैर्नर
देववर्त्मना १२ स्फुरत्समीयुः त्वरिताऽनुरविंयोहर्म्याणि चैव नाकनकं रूपोत्सुकाः १४ काश्चिन्नु विपर्ययं कृतं तव
विभूषणा विस्मृतवेकंचुगलेषु यथापरा १२ कृतैकपत्रश्रवलोकनूपुरानाथाद्वितीयत्वपरः स्वलोचना १५ श्रु
त्वैवयकातरूपास्यमोत्सव १४ श्रुभज्यमानाश्रुकृतोपमज्जिनाः स्वपनाउत्थापनिरामयेनिः स्वनेनपायपत्याभंकपो
त्यमातरः १६ मनोनितितामामरविरलोचनः प्रासलीलाहसितावलोकनैः जहारमन्नहरिदेवविक्रमोऽशार

नकाश्चिदिति विपर्ययं कपरीतं धृतानि वस्त्राणि भूषणानि वयाभिः ताः युगलेषु यार्थेषु कुंडलकंकणादिषु १२ द्वारमणोमहोत्सवः १२
एकं विस्मृत्य समीयुः केन एकमेव पत्रं ययोस्ते श्रवणो याभ्यां एकमेव नूपुरं चरणाम्यां यासां ताश्चताश्च नाथाश्च न स्थाए काश्चित्तेवनो
वनेकजलनिधाय्येव १५ ततभोजनं त्यक्त्वा श्रुभज्यमानाः सखीभिः कपोलाः सेतलाऽपांगाः श्रुकृतात्मानाः अपोत्यनिरम्य १६ प्रगल्भायाली
लाः नाभिर्हसितानिराकृणानिवचैः श्रियं रमयतीति श्रीरमणः तेनात्मनावण्णांतामाहर्षांउत्सवनेरदेरमनांसिजहार

२०.१ प्रुक्तः स्तुतस्तातकृतचेतसः नरंदृष्ट्वा तस्य पुत्रं णांच उत्स्मितं तवतरेव हृधातयाउक्तणां सेवनं तेन लब्धो मानो यापि निहाद्दशाउद्धारितेननेत्रदृ
११२ रेणात्मनिमननिलब्धं प्राप्नपरिक्षस्यतरप्राप्निजनितमनन्नमाधिप्यायाजडूः ॥ हे ऋरिरमनिर्जितकामेतितंबोधने श्रृंगाररसेनिम
ग्नोमाभूरिति ॥ १८ ॥ सौमनस्यैः सोमनजहमममप्रहैशोमनमनोमावैवो ॥ १९ ॥ २० ॥ पौराः सनः स्त्रियः ॥ २१ ॥ रजकोवस्त्रानिर्णेजकः सप

इत्युक्तः स्तुतमतुडुतचेतसत्तस्तेन्य कृणां स्मितमधौक्षणालब्धमानाः ॥ आनंदमूर्तिमुपगुत्पदृशात्मलब्धं हृष्यत्वचोज
ज्झतमशिरमाधिं ॥ १८ ॥ प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखाम्बुजाः ॥ अभ्यवर्षन्सौमनस्यैः प्रमदाबलकेशवौ ॥ १९ ॥ दध्य
क्षतैः सोदपात्रैः स्रग्गंधैरभ्युपायनैः ॥ तावानर्चुः प्रमुदितास्तत्रतत्र द्विजातयः ॥ २० ॥ ऊचुः पौरा अहोगोप्यः तपः किमचरन्म
हत् ॥ यायेतावनुपश्यंति नरलोकमहोत्सवौ ॥ २१ ॥ रजकं कंचिदायान्तं रंगकारं गदाग्रजः ॥ दृष्ट्वायाचत वासांसि धौतान्यत्यु
त्तमानि च ॥ देह्यावयोः समुचितान्यंग वासांसि चार्हतोः ॥ भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥ २२ ॥ सयाचितो भगवता
परिपूर्णेन सर्वतः ॥ साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥ २३ ॥ ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ॥ परिधत्त किमुद्
वृत्ताराजद्रव्याण्यभीप्सथ ॥ २४ ॥ जाताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा ॥ बध्नंति घ्नंति लुंपंति दृप्तं राजकुलानि हि ॥ २६ ॥ एवंवि
कत्थमानस्य कुपितो देवकीसुतः ॥ रजकस्य कराग्रेण शिरः कायादपाहरत् ॥ २७ ॥ तस्यानुजीविनः सर्वे वासःकोशान्विसृज्य वै

ववद्वारांरंगमपिक्कुर्वन्रंगकारः ॥ २१ ॥ ३ ॥ उषितः कुपितः ॥ २४ ॥ हे उद्वृत्ताः गिरौ वनेवरभ्यदेनिसं ॥ दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः ॥ २८ ॥ राम
नैदृशं परिधत्तेति संभावनायां लोट् ॥ अभीप्सथ इत्यर्थः ॥ २५ ॥ राजकुलानि राजकीयाः ॥ लुंपंतिनिहवं दवंतिवा ॥ २६ ॥ ७ ॥ वासःकोशान्वस्त्रपुटकान् ॥ २८ ॥ ११२

२९ वायकः तंतुवायविशेषः वेषमलंकारं चैलेयैः वस्त्रमयैः अनुकल्पैः भूषणैः ४० पर्वणि उत्सवे ४१ इहलोके परमां श्रियं च बलं च ऐश्वर्यं
च स्मृतिं च इंद्रियं तत्पारवश्यप्रहारात ४२ ५ हे माधव उभवाधव उद्धवाय च ४६ रजकवधेन वायकानुग्रहेण च वयोर्विषमदृष्टितया नीश्वरता

वसित्वात्मप्रियेवस्त्रेकृष्णः संकर्षणस्तथा ॥ शेषाण्यादत्तगोपेभ्यो विसृज्यभुविकानिचित ॥ ततस्तुवायकः प्रीतस्तयोर्वेष
मकल्पयत् ॥ विचित्रवर्णैः चैलेयैराकल्पैरनुरूपतः ४० नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः ॥ स्वलंकृतौ बालगजौ प
र्वणीव सितेतरौ ॥ ४१ ॥ तस्योऽप्रसन्नो भगवान्प्रादात्सारूप्यमात्मनः ॥ श्रियंचपरमांलोके बलैश्वर्यस्मृतींद्रियं ॥ ४२ ॥ ततः सुदा
म्नो भवनं मालाकारस्य जग्मतुः ॥ तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ॥ ४३ ॥ तयोरासनमानीय पाद्यंचार्घ्यार्हणादिभिः
पूजां सानुगयोश्चक्रे स्रक्तांबूलानुलेपनैः ॥ प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो ॥ पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वां
भवंतौ किल विश्वस्य जगतः कारणं परं ॥ अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥ नहि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः
समयोः सर्वभूतेषु भजंतं भजतोरपि ॥ ४७ ॥ तावाज्ञापयतं भृत्यं किमहं करवाणि वां ॥ पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ४८
इत्यभिप्रेत्य राजेंद्र सुदामा प्रीतमानसः ॥ शस्तैः सुगंधैः कुसुमैः मालां विरचितां ददौ ॥ ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहा
नुगौ ॥ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥ सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ॥ तद्भक्तेषु च सौहार्दं भूतेषु च दयां परां ॥ ५१ ॥

नायकनीयेत्याह नहि वामिति अत्र हेतुः समयोरिति ॥ अत्रापि हेतुद्वयं सुहृदोरिति ॥ जगदात्मनोरित्यभिप्रेत्य इति एवं विज्ञापयन् अभिप्रेत्य तन्मतं ज्ञात्वा

२०.५
१२४

अन्वयवर्धिनीं वंशोद्धिमतीमित्यर्थः ॥ अप्रार्थितमाश्रमप्रतिकं वरं दत्वा ततो निर्जगामेति ॥ ५१ ॥ श्वेवरस्वरनूमधुपुरेरजनकं निकायपद्मलः प्रसादयतयान
अवायकायमालाकृतं समसुकमत्रकार कुब्जा गृहीधमुत्र सहदानमयनूववंशेज ॥ इ ॥ मे एकचत्वारिंशो ॥ ४१ ॥ द्विचत्वारिंशके कुब्जात्रिवक्रमतं धनुर्भे
भिदा ॥ वधमल्लेश्च चिह्नोत्कंठ धनुश्च रक्षा प्रमोत्सवादिकं ॥ ५ ॥ अंगविलेपार्थ रन्नाद्यः गृहीतान्यंगविलेपभाजनानि निष्ठानां रसप्रदः ॥ १ ॥ हे अंगने हे वरो

इति तस्मै वरं दत्वा श्रियं चान्वयवर्धिनीं ॥ बलमायुर्यशः कांतिं निर्जगाम सहाग्रजः ॥ ५१ ॥ इति श्रीभागवते महापुराणे दशमे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ श्रीशुक उवाच ॥ अथ व्रजन् राजपथेन माधवः स्त्रियं गृहीतांगविलेपभाजनं ॥ ददर्श कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन् रसप्रदः ॥ १ ॥ कात्वं वरोर्वेतदुहानुलेपनं कस्यांगने वा कथयस्व साधु नः ॥ देह्यावयोरंगविलेपमुत्तमं श्रेयः ततस्ते न चिराद्भविष्यति ॥ २ ॥ सैरंध्र्युवाच ॥ दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि ॥ मद्भावितं भोजपतेरतिप्रियं विना युवां कोन्यतमस्तदर्हति ॥ ३ ॥ रूपपेशलमाधुर्यहसितालापवीक्षितैः ॥ धर्षितात्मा ददौ सांद्रमुभयोरनुलेपनं ॥ ४ ॥

हे इति ह्युपहासं संबोध्य पृच्छति त्वं का ॥ एतदनुलेपनं कस्य चा उह इति निपातो प्रविक्षेप
युक्तो वितर्के अस्मत्सेवायाः फलमित्याह न चिरादिति ॥ २ ॥ त्रिभिः ग्रीवोरःकंठयोर्वक्रा इति त्रिवक्रेति नाम यस्याः सा अनुलेपसाधनकर्मणि
या कंसस्य बहुमता दास्यस्मि ॥ ३ ॥ रूपं च अंगसौष्ठवं पेशलत्वं सौकुमार्यं माधुर्यं चरसिकता हसितं च आलापाः वीक्षितं च तैः धर्षितात्मा मोहिता
विनाप्रासांद्रं घनं ॥ ४ ॥

राम
१२४

त्वद्वर्णितरशोभिनाएमरूहन्मयोर्वर्णाभ्यांतरःपीतारिवर्णात्वेनशोभितंशीलंयस्यतेन संप्राप्तपरभागेनरंप्राप्तः परोनामेहपरितनोभागेयेनसः संप्रा
प्तःपरभागः शोभातिशयोयेनेतिवा तेनानुरंजितो ५ त्वद्दर्शनेनसद्यःफलंदर्शयन्न् ६ तस्याप्रपदेपाराग्रहंयपद्मामापीड्यद्हेत्वंत्यलोउन्नानेउन्नतेयाम्मिन्
पार्ष्णौतेनचित्तेकेउत्वस्याधोभागेधृत्वाःध्यात्मरेहउन्नमयामास ७ नरैवक्रन्सुसमानमंगंयस्याःसा इहत्योश्रोणीपयोधरौचयस्याःसा उत्तंगरस्परर्शा

ननत्वांगणगेणत्वद्वर्णितरशोभिना संप्राप्तपरभागेनश्रुस्मातेनुरंजितो ५ यमन्त्रोमहावाङ्मन्त्याद्विवक्त्रोहचिराननां अज्वीकर्त्वेमनस्य
क्रेदर्शयन्दर्शनेफलं ६ पद्मामाक्रम्यप्रपदेह्युगलोन्नानपार्ष्णिना यगृत्यचित्तेकेध्यात्मगूहनीयमरक्षतः ७ सातदंगार्ज्हसमानांगी वहत्थ्रो
णीपयोधरा उत्तुङ्गदर्शनात्मस्याविवभूवप्रमदोत्तमा ८ ततोनृपगुणोदार्येसंपत्त्वाग्राहकेशवं उत्तरीयान्तमाकृष्यस्मयंतीजातहृच्छया ९ ह
हिवीरेहहृयामेनत्वामिक्रामिहोत्सहे त्वयोन्माथितचित्तायःप्रसीदरघुपुङ्गव १० एवंविह्वियायायामानोःकृष्णोणमस्यपरपतः उत्सवंवीक्ष्य
उग्रानानाविग्रहंमन्नत्वात्वावाचह ११ एष्यामितेगृहंसुभुसमामाधिविकर्षिणां साधितार्थोगृहाणानः पांथानांत्वंपरायणां १२ विसृज्यमाद्धावाणी
तांव्रजमार्गेवतिकाश्चेः नानोपायनंतांदूलस्त्रगंधैःस्याग्रजोर्चितः १३ नद्दर्शनस्मरक्षोभारालानंनाविरन्नाह्विषः विसृज्यत्वावासःकवरंवलया
लेखवृत्रेयः १४ ततःपोगान्वृद्धमानोधनुषस्थानमच्युतः तस्मिन्नुविशेषेरदरोधनुरिवाद्भुते १५ उहषेवदुभिर्गुप्तंअर्चितपरमर्द्धिततं वार्य
माणोनृभिःकृष्णःअसत्यधनुराददे १६ करेणवामेनसलिलसत्वं तस्यंचकत्वानिमिषणापश्यता त्रणाविवधाध्यप्रवंजमध्येयथेक्षुदंडमद

नारितिमुत्लंकारणं ८ आधिविकर्षणंमनःपीडायाम (कर्षुकृत्रुमः १७ धनुषोभज्यमानस्यशब्दःखंरोदसीदिशः पूरयामासयंश्रुत्वाकंसस्त्रासमुपागमत् १८
नं कंसवधेनसाधितोर्थःस्हृहरासयाजनंयेनसः श्रुगृहाणांश्रेसंतद्दाराणां पांथानांप्रवासिनांपरंश्रयनमाश्रयत्वं १२ मदुरयाणिरान्तांश्रस्त्ताम्मद्वजनुवणिक्पय
र्थेवीणांणिमिर्चितः १३ लेख्याःचित्रन्यास्त्नारवपूर्वयोयामातोः १४ धनुर्महाणालांष्ठतत्र १५ असत्यवलात् १६ निमिषेणानिशेषेणं मरकरीमन्नहस्ती १८

२०१ १२५

गृह्यतां वध्यतामिति वदंतो जिघृक्षवः शस्त्रैः ततस्ततः ॥ १९ ॥ न केवलं क्रोद्धे किंतु भग्नस्य धनुषः शकलेन गृहीत्वा जघ्नतुः शत्रूनिति ॥ २० ॥ परतः आतर्गतस्ममितिशालाद्वाराद्वेव जनैर्निः क्रम्य ॥ २१ ॥ तेजः प्रभावः प्रागल्भ्यं धृष्टता ॥ २२ ॥ शाकरः शाकरावमोचनस्थानं ॥ २३ ॥ उत्तंकः स्थविरा मेत्रजाविर्गमनसमये याशिषः आशासत द्यतेव भाता र जनीयं अय धृवंतत्र दर्शने भविष्यतेऽस्यारिपुडत्रावत्यः हतौः मत्वा वभूवुः प्रेक्षकषु षणस्त्रीः कृत्स्नस्य गात्रलक्ष्मीरेहशोभां ॥ कथंभूतस्य गात्रस्य ॥ उत्रस्रोरेतदरत्रेत्स्यारीन्हित्वा परयनं श्रीयश्रीः कामयामास ॥ यां गात्रलक्ष्मीमितिवा ॥ २४ ॥ अवनिम्नां ज्ञालितश्रुविद्युगलं ययोस्तौ ॥ द्विरदनिश्रम

तदृशिरतः पान्नवराः कुपिताः आततायिनः ॥ गृहीकामाआवद्धः गृह्यतां वध्यतामिति ॥ १९ ॥ अथ तानुरभिप्रायाद्विलोक्य बलकेशवौ क्रोद्धो धनुन्नरशा हारयशकलेनाध्नजघ्नतुः ॥ २० ॥ बलेन च कंसम प्रहितं हत्वा शालाद्वारवात्ततः निः क्रम्य वेरं ददृशे निरीक्ष्य परमपरः ॥ २१ ॥ तयोस्तदद्भुतं वीर्यं निशम्य पुरवासिनः ॥ तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ ॥ २२ ॥ तयोर्विचरतोः स्वैरमाहिस्यो लत्पुपेयिवान् ॥ हत्वा रामौ रेतौ गोपैः पुराच्छकर मोचिततः ॥ २३ ॥ गोप्यो मुकुंदविगमे विरहातुराया आशासताशिषऋतामधपूर्व्यभूवन् ॥ संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान्नु भजतश्चक्रमेऽयनं श्रीः ॥ २४ ॥ अवनिक्ताघ्रियुगलौ भुक्त्वा क्षीरोपसेचनं ॥ उषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितं ॥ कंसस्तु धनुषो भंगं रक्षिणां स्वबलस्य च ॥ वधं निशम्य गोविंदरामविक्रीडितं परं ॥ २६ ॥ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ॥ बहून्यवष्ट भयथाभृत्योर्दौत्यकराणि च ॥ २७ ॥ अदर्शनं स्वशिरसः प्रतिरूपे च सत्यपि ॥ असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा ॥ २८ ॥

गुभ्रस्नाद्ध्य्स्वस्य वसतां ॥ २५ ॥ २६ ॥ परं केवलं गोविंदरामयोर्विक्रीडितं तत्र न तत्पराक्रमः कश्चित ॥ २६ ॥ उभयथा स्वप्नजागारितभेदेन प्रत्येकं मृत्योर्दौत्यकराणि च ॥ तथा च मंत्रः स्वाउमूकस्यापघ्नन्हिरण्यशो अयोयुवः ॥ २७ ॥ इत्यहूतआगतस्यारितथायदेतद्दृतानन्त्यादिविशद्यवीवावं वरनीस्यादिह्यं अप्रतिदर्शं प्रतिबिंबामत्रे वा ॥ जलादौ प्रतिरूपे दर्पणादौ प्रतिबिंबे सत्यपि स्वशिरसोऽदर्शनं असत्यपि द्वितीये चक्षुषोः अंगुल्यादिना ज्योतिषां चंद्रादीनां द्वैरूप्यं ॥ २८ ॥ एम १२५

छायायां प्रतिबिंबे छिद्रप्रतीतिः पिहितकर्णयोः ततः श्रूयमाणो ध्वनिः स प्राणघोषः तस्याश्रवणं ॥ वृक्षेषु स्वर्णवर्णप्रतीतिः रजः कर्दमादिषु स्व
पदानामदर्शनं ॥ एतानि जागरितानि दुर्निमित्तानि ॥ १९ ॥ स्वप्नान्याह स्वप्न इति ॥ प्रेतैः परिष्वंगः खरमारुह्य यानं ॥ विषभक्षणं ॥ नलदमाली जपा
कुसुममाली नग्नो याति इति यत् ॥ तदप्येकं दुर्निमित्तमिति ॥ २० ॥ २१ ॥ कष्टेन कथंचित प्रभातायां उतः सूर्ये चाद्भ्यः समुत्थिते इति ॥ तथा च श्रुतिः अद्भ्यो वा

छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः ॥ स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनं ॥ १९ ॥ स्वप्ने प्रेतपरिष्वंगः खरयानं विषादनं ॥ यायान्नल
दमाल्येकस्तैलाभ्यक्तो दिगंबरः ॥ २० ॥ अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च ॥ पश्यन्मरणसंत्रस्तो निद्रां लेभे न चिंतया ॥ २१ ॥ व्युष्टायां
निशि कौरव्य सूर्ये चाद्भ्यः समुत्थिते ॥ कारयामास वै कंसो मल्लक्रीडामहोत्सवं ॥ २२ ॥ आनर्चुः पुरुषा रंगं तूर्यभेर्यश्च जघ्निरे ॥ मंचाश्चालंकृ
ताः स्रग्भिः पताकाचेलतोरणैः ॥ २३ ॥ तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः ॥ यथोपजोषं विविशू राजानश्च कृतासनाः ॥ २४ ॥ कंसः
परिवृतोमात्यै राजमंचमुपाविशत ॥ मंडलेश्वरमध्यस्थो हृदयेन विदूयता ॥ २५ ॥ वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च ॥ मल्लाः स्व
लंकृता दृप्ताः सोपाध्यायाः समासत ॥ २६ ॥ चाणूरो मुष्टिकः कूटः शलस्तोशल एव च ॥ त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥ २७ ॥
नंदगोपादयो गोपा भोजराजसमाहूताः ॥ निवेदितोपायनास्त एकस्मिन्मंच आविशन ॥ २८ ॥ इति श्रीभागवते महापुराणे दशमस्क

इति ॥ उदयगान्महतोर्णवाद्विभ्राजमानः सलिलस्य मध्यात ॥ समारुरोह समो लोहिताङ्गः सूर्यो विपश्चिन्मनसोऽनात्विति च ॥ २२ ॥ २३ ॥ धेहि चत्वारिंशो ध्यायः
यथोपजोषं यथाभिरुचि ॥ २४ ॥ २५ ॥ मल्लतालोत्तरेषु उपरि उच्चैः स्वरयत्सु तेषु तूर्येषु ॥ उपाध्यायाः मल्लाचार्याः ॥ २६ ॥ उपस्थानं मल्लरंगं ॥ २७ ॥ समाहूताः समाहू
ताः निवेदितान्युपायनानि यैस्ते ॥ २८ ॥ इति दशमे [illegible] ॥ त्रिचत्वारिंशके हत्वा गजेन्द्रं मल्लकंसयोः ॥ रंगप्रवेशः सोभाग्यं चाणूरेण च भाषणं ॥ १ ॥

२०पू०
११६

पूर्वैर्हुरेव कृतशौचं शुद्धत्वं निरपराधत्वं याभ्यां तौ ॥ एतदुक्तं भवति ॥ धनुर्भंगादिना आत्मनो याभ्यां निजैश्वर्यं प्रभूवितेपि पितनेन न प्रभवति ॥ आवां च पुनर्जिघांसति
अतो स्माकं खलस्य वधेनापि पापं इत्येवं कृतापराधपरिहारावितिर ॥ महत्त्वानां डुंडुभीनां च निर्घोषं महत्ता लडुडुभिनिर्घोषं वा ॥ १ ॥ अवष्टोहस्तिपस्तेन चोदि-
तं ॥ परिकरं शुद्धोचितपरिधानं कृत्वा सम्मुख्यनी वद्ध ॥ २ ॥ ३ ॥ ४ ॥ अंतकोमृत्युः कालहस्ति निमिन्नं ॥ यमहस्ति नियंता ॥ तेनू पमायस्य ते ॥ ५ ॥ विगलितो विच्युतः पुष्टि-
नानित्यालीलया तत् अदृश्यो बभूव ॥ ६ ॥ अचक्षुपाः अपश्यन् ॥ घ्राणमेव चक्षुर्यस्य तेन दृष्टिर्दर्शनं यस्य ॥ लोचनागोचरमपि परावोहि घ्राणेन न जानाति ॥

पुकउवव ॥ अथ कृतस्नानं कृतशौचपरंतप ॥ महद्दुंडुभिनिर्घोषं श्रुत्वा हृष्टमुपेयतुः ॥ १ ॥ रंगद्वारं समासाद्य तस्मिन्नागमवस्थितं ॥ अपश्य-
त्कुवलयापीडं कृष्णो वृष्टप्रचोदितं ॥ २ ॥ वद्धापरिकरं सोरिसततं त्यक्त्वा कुटिलालकान् ॥ उवाच हस्तिपं वाचा मेघनादगभीरया ॥ ३ ॥ अवष्टांवष्ट
मार्गनौ द्वैत्य पक्रामस्माचिरं ॥ नो चेत्सकुंजरं हत्वा नयामि यमसादनं ॥ ४ ॥ एवं निर्भत्सितो वष्टः कुपितः कोपितं गजं ॥ चोदयामास कृष्णाय
कालांतकयमोपमं ॥ ५ ॥ करीन्द्रस्तमभिद्रुत्य करेण तरसाग्रहीत् ॥ कराद्विगलितः सोमुं निहत्याघ्रिघलीयतः ॥ ६ ॥ स कुद्धस्तमचक्षाणो
घ्राणदृष्टिः स केशवं ॥ परामृशत् पुष्करेण स प्रसह्य विनिर्गतः ॥ ७ ॥ पुच्छे प्रगृह्यातिवलं धनुषः पंचविंशति ॥ विचकर्ष यथा नागं सुपर्णो
हवलीलया ॥ ८ ॥ सपर्यावर्त्तमानेन सव्यदक्षिणतोच्युतः ॥ बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ॥ ९ ॥ ततोभिमुखमभ्येत्य पाणिनाहत्य

निरतिप्रसिद्धं ॥ परामृशत् धृतवान् ॥ पुष्करेण शुंडाग्रेण ॥ प्रकर्षः प्रसत्य बलेन ॥ ७ ॥ धनुषः धनुषां पंच विंशति ॥ वारणं ॥ पादद्वयं पातयामास स्फुरमाणः पदेपदे ॥
विंशति यावत् ॥ तावंतो देशं गजं विचकर्ष आकृष्य नीतवान् ॥ कं करं व विचकर्षय ॥ यथा नागं सर्पं बद्ध्वा मानं गजं सुपर्णो गरुडः वहयमिति ॥ आविरासीद्यथा प्राच्यां रि-
शिरंडुरिवपुष्कलरनिवत ॥ ८ ॥ सपर्यावर्त्तमानेनेति प्रदक्षिणाहिणां श्रीकृष्णेन गृहीत्वा यदि दक्षिणतः परिवर्त्तते गजस्तर्हि सव्यतो भ्राम्यति यदा सव्यतः परिवर्त्तते न
दारदक्षिणतो भ्राम्यति तेन सह बभ्राम ॥ गोवत्सेन भ्राम्यमाणेन बालकः स एव कृष्णो यथा अन्यो वा बालकः इवेति ॥ ९ ॥ वारणं गजे पादद्वयं प्रकर्षेण सम्मतं तो धावनुपाते

११६

॥१॥१४॥ रंगं समाविशत् तत्र वीरश्रिया वभौ ॥ कथंभूतः अंसेन्यस्तविषाणो गजदंतो येन सः असृङ्मदविंदुभिः परितो ऽंकितः विरूढा उद्गताः
स्वेदकणिकाभिरुपलक्षितं वदनांबुरुहं यस्य सः ॥१५॥ न केवलं स एकः समाविशत् किंतु वृतो गोपैरिति ॥१६॥ तत्र च श्रृंगारादिसर्वरसकदंवमूर्तिं भगवा
न्तं रसभिन्नाधाराभेदेन वभौ ॥ न सांकल्येन सर्वेषामित्याह मल्लानामिति ॥ मल्लादीनां अन्यानां दृष्टीनां अशन्यादिरूपेण दशधा विदितः साग्रजो रंगं गत

सधावन् क्रीडया भूमौ पतित्वा सहसोत्थितः ॥ तं मत्वा पतितं क्रुद्धो दंताभ्यां सो ऽहनत् क्षितिं ॥११॥ स्वविक्रमे प्रतिहते कुंजरेन्द्रो ऽत्यमर्षितः ॥ चोद्यमा
नो महामात्रैः कृष्णमभ्यद्रवद्रुषा ॥१२॥ तमापतंतमासाद्य भगवान्मधुसूदनः ॥ निगृह्य पाणिना हस्तं पातयामास भूतले ॥१३॥ पतितस्य पदाक्रम्य
मृगेंद्र इव लीलया ॥ दंतमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः ॥१४॥ मृतकं द्विपमुत्सृज्य दंतपाणिः समाविशत् ॥ अंसन्यस्तविषाणो ऽसृङ्मदविंदु
भिरंकितः ॥ विरूढस्वेदकणिकावदनांबुरुहो वभौ ॥१५॥ वृतो गोपैः कतिपयैर्वलदेवजनार्दनौ ॥ रंगं विविशतू राजन् गजदंतवरायुधौ ॥१६॥ म
ल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् गोपानां स्वजनो ऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ॥ मृत्युर्भोजपतेर्विराडविदुषां
तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः ॥१७॥ हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ॥ कंसो मनस्व्यपि तदा भृशमुद्विवि
जे नृप ॥१८॥ तौ रेजतू रंगगतौ महाभुजौ विचित्रवेषाभरणस्रगंवरौ ॥ यथा नटावुत्तमवेषधारिणौ मनः क्षिपंतौ प्रभया निरीक्षतां ॥१९॥ निरी
क्ष्य तावुत्तमपूरुषौ जना मंचस्थिता नागरराष्ट्रका नृप ॥ प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननं ॥२०॥

इत्यन्वयः मल्लादिषु भिन्नाकारसाः क्रमेण श्लोकेन निवध्यंते ॥ रौद्रोद्भुतश्च श्रृंगारो हास्यं वीरो दया तथा ॥ भयानकश्च वीभत्सः शांतः सप्रेमभक्तिकः ॥ अविदुषां
विराट् विकलः अर्थाद्योराजनयति तथा ॥ अनेन विभक्तमुक्तः विकलत्वं च ॥ कवज्रसारसर्वांगाविन्यादिना वध्यते ॥१७॥ उद्विविजे भीतो वभूव ॥१८॥ यथा नटा
विति निर्भयत्वं दर्शितं ॥१९॥ प्रहर्षवेगेनोत्कलितानीक्षणान्याननानि च येषां ते तथा ऽऽननं पपुः न तृप्ताः नितरां काङ्क्षा न वभूरित्यर्थः ॥२०॥

२०१ तरेवाहपिबंत इवेति || श्लिष्यंतः परिष्वंगं कुर्वंत इव लक्षिता इत्यर्थः || ११ || यथादृष्टं यथा धेनुभंगादि यथाश्रुतं गोवर्द्धनोद्धरणादि तन्नंदनं तिक्रम्यतस्तु हृष्टमित्यर्थः
१२८ ध्रुत्यं च न यो रूपं गजं रंतादित्युक्तं || गुणाः शौर्यादयः माधुर्य सहिता पाला इति गाल्यं यथा धर्मैः स्मारिता इव स्मरणं प्रापिता इत्यर्थः || ११ || विस्मिता नौका
कानाहाशभिः एताविन्यादिभिः || १२ || विलेति सर्वव्याघ्रप्रः || १४ || गन्धकः शंखचूडः अन्ये च || अघाहादयः || १५ || ७ || आश्रमे इष्टेमग्नान्तं सुखं || आश्रमे सुख

पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया || जिघ्रंत इव नासाभ्यां श्लिष्यंत इव बाहुषु || ११ || ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतं || तद्रूपगुणमाधु
र्यं प्रगाल्भ्यस्मारिता इव || १२ || एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि || अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि || १३ || एष वै किल देव
क्यां जातो नीतश्च गोकुले || कालमेवं वसन्गूढो ववृधे नंदवेश्मनि || १४ || पूतनानेन नीतांतं चक्रवातश्च दानवः || अर्जुनौ गुह्यकः केशी
धेनुकोन्ये च तद्विधाः || १५ || गावः सपाला एतेन दावाग्नेः परिमोचिताः || कालियो दमितः सर्प इंद्रश्च विमदः कृतः || १६ || सप्ताहमेक
हस्तेन धृतोऽद्रिप्रवरोमुना || वर्षवाताशनिभ्यश्च परित्रातं च गोकुलं || १७ || गोप्योस्य नित्यमुदितहसितप्रेक्षणं मुखं || पश्यंत्यो विवि
धांस्तापांस्तरंति स्माश्रमं मुदा || १८ || वदंत्यनेन वंशोयं यदोः सुबहुविश्रुतः || श्रियं यशो महत्वं च लप्स्यते परिरक्षितः || १९ || अयं चास्या
ग्रजः श्रीमान्रामः कमललोचनः || प्रलंबो निहतो येन वत्सको ये बकादयः || २० || जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च || कृष्णरामौ समा
भाष्य चाणूरो वाक्यमब्रवीत् || २१ || हे नंदसूनो हे राम भवंतौ वीरसंमतौ || नियुद्धकुशलौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा || २२ ||

निविवा || पद्मा || आश्रमं यथा भवति तथा तरंति स्मेति || अनेन परिरक्षितो यदोर्वंशः सुबहुविश्रुतः सन् श्र्यादिलप्स्यत इति वदंतीति || १९ || धेनुकबकवत्सा राम
रिष्टविपर्ययो क्लिजनवारेष्विति निश्चयात् || २० || जनेष्वेवं ब्रुवाणेषु सत्स्वंतरसहमानश्चाणूरो ब्रवीदिति || २१ || || २२ || रामराम || राम १२८

३४ ॥ हे करवाम प्रियं करवामेति ॥ ह्निश्रीते भूतानि च प्रसीदेयुः ॥ ३५ ॥ ७ ॥ यथोचितं नियुद्धं भवेत् ॥ मल्लसभाधिकृतान् ॥ वाऽयुद्धं भवेत् ॥ अधर्मो मा स्पृशेत् न स्पृशे
दित्यर्थः ॥ हे मल्लेति वा ॥ ३८ ॥ सहस्रद्विपानां सत्वं बलं बिभर्तीति ॥ ३९ ॥ तथा बलिभिर्माऽदृशैः सह ॥ अनयोः अधर्मः विक्रम पराक्रमं कुरु मुष्टिकौ विक्रमतामिति ॥ ४
१ ॥ मे त्रिचत्वारिंशः ॥ चतुश्चत्वारिंशके ठ मल्लकंसादिमर्दनं ॥ कंसयोषिन्मल्लाभ्यां हत्वा भ्रात्पित्रोश्च दर्शनं ॥ १ ॥ चर्चितः निश्चितः एवं संकल्पो यस्य सः ॥ १

प्रियं राज्ञः प्रकुर्वत्यः श्रेयो विंदंति वै प्रजाः ॥ मनसा कर्मणा वाचा विपरीतमथोन्यथा ॥ ३३ ॥ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटं ॥ वने
षु मल्लयुद्धेन क्रीडंतश्चारयंति गाः ॥ ३४ ॥ तस्माद्राज्ञः प्रियं पूयं वयं च करवामहे ॥ भूतानि नः प्रसीदंति सर्वभूतमयो नृपः ॥ ३५ ॥ तन्निशम्याब्र
वीत्कृष्णो देशकालोचितं वचः ॥ नियुद्धमात्मनोभीष्टं मन्यमानोभिनंद्य च ॥ ३६ ॥ प्रजा भोजपतेरस्य वयं चापि वनेचराः ॥ करवाम प्रियं नि
त्यं तन्नः परमनुग्रहः ॥ ३७ ॥ बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितं ॥ भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभासदः ॥ ३८ ॥ चाणूर उवाच ॥
न बालो न किशोरस्त्वं बलश्च बलिनां वरः ॥ लीलयेभो हतो येन सहस्रद्विपसत्वभृत् ॥ ३९ ॥ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोत्र वै ॥ मयि वि
क्रम वार्ष्णेय बलेन सह मुष्टिकः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्रिचत्वारिंशोऽध्यायः ॥ श्रीशुक उवाच ॥ एवं चर्चितसंकल्पो भग
वान्मधुसूदनः ॥ आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः ॥ १ ॥ हस्ताभ्यां हस्तयोर्बध्वा पद्भ्यामेव च पादयोः ॥ विचकर्षतुरन्योन्यं प्रसह्य विजि
गीषया ॥ २ ॥ अरत्नि द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी ॥ शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ॥ ३ ॥ परिभ्रमणविक्षेपपरिरंभावपातनैः ॥ उत्स

२ ॥ याऽऽ मध्यात्कनिष्ठांगुलीव्यतिरेकेण कृतमुष्टिर्हस्तो रत्निः ॥ ३ ॥ परिभ्रामणं हस्ताभ्यां गृहीत्वा परितश्चालनं र्पणापसर्पणैश्चान्योन्यं प्रत्यरुंधतां ॥ ४ ॥
परिरंभो बाहुभ्यां निःपीडनं ॥ अवपातनं ॥ अधःक्षेपः उत्सर्पणं उत्प्लुत्य परतो गमनं अपसर्पणं पृष्ठतो गमनं ॥ एतैः प्रत्यरुंधतां प्रत्याहतवंतौ ॥ ४ ॥

२०१
१२८

उत्क्षेपणं पारोरोजानुनीचपिंडीकृत्य पतितस्योद्धारनं ॥ उन्नयनं हस्ताभ्यामुद्धृत्यनयनं ॥ वालनं कंठादिलग्नस्य निःसारणं ॥ स्थापनं पादादिपिंडीकरणं ॥ एवं परस्परं
मात्मनो रेहस्यापवक्रौ तौ अपकारं कृतवंतौ ॥५॥ तद्युद्धं वलावलेनिति ॥ यद्वा ॥ तद्बलावलवतोर्युद्धं दृष्ट्वा महानधर्मः स्यादित्युक्तं यः वलयोर्वलवतोश्च युद्धं
राज्ञो वेत्यश्येत्स्वयं वारणीयः एतेन राज्ञः पश्यतः स्वयमप्यनिच्छंतिश्च उपमन्यंत इति महानधर्मः स्यादर्थः ॥७॥ वलावलवयुद्धं तत्र प्रपंचयति पंचभिः श्लोकैः वक्र
तारिणि वक्त्रं वनकाठिनानि सर्वांगाणि यस्योक्तौ ॥८॥ समाजस्य सभायां ॥९॥ अपराऊचुः नसभामिति अद्भुत्वत्वापि नृत्तीतिष्टन् ॥ विद्भुवन्वविपरीतं द्भुवन्

उत्क्षेपणैर्हस्तक्षेपैर्वालनैः स्थापनैरपि ॥ परस्परं जिगीषंतावपवक्रात्मनः ॥५॥ तद्बलावलवद्युद्धं समेताः सर्वयोषितः ॥ ऊचुः परस्परं
जन्मा नृपकावत्रदृष्टः ॥६॥ महानयं वतात्यधर्म एषां राजसभासदां ॥ ये बलावलवद्युद्धं राज्ञोन्विच्छंति पश्यतः ॥७॥ क्व वज्रसारसर्वांगौ मल्लौ शैलें
द्रसन्निभौ ॥ क्व चातिसुकुमारांगौ किशोरौ नाप्तयौवनौ ॥८॥ धर्मव्यतिक्रमोत्यस्य समाजस्य ध्रुवं भवेत् ॥ यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र
कर्हिचित् ॥९॥ न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् ॥ अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥१०॥ वल्गतः शत्रुमभितः कृष्ण
स्य वदनांबुजं ॥ वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवांबुभिः ॥११॥ किं न पश्यत रामस्य मुखमाताम्रलोचनं ॥ मुष्टिकं प्रति सामर्षं हाससंरंभशो
भितं ॥१२॥ पुण्या बत व्रजभुवो यदयं नृलिंगगूढः पुराणपुरुषो वनचित्रमाल्यः ॥ गाः पालयन्सहबलः क्वणयंश्च वेणुं विक्रीडयांचति गिरित्ररमा
र्चितांघ्रिः ॥१३॥

अतः न जानामीति ब्रुवन् ॥ अतः प्राज्ञो न सभां प्रविशेदिति ॥१०॥ वल्गतः शत्रुमभितः इति शत्रोः सर्वतो धावधः श्रीकृष्णस्य श्रमवारिणा उप्तं व्याप्तं
ष्णवदनांबुजं दृश्यतां ॥११॥ अन्या ऊचुः किं न पश्यतेति ॥ सामर्षं सक्रोधं हासेन संरंभश्च वेगः तेन शोभितं ॥१२॥ अन्या ऊचुः नृलिंगेन मनुष्यदेहेन गूढः वनस्थानि ॥म
विचित्राणि माल्यानि यस्य सः गिरित्रः शिवः रमा च ताभ्यां समर्चितांघ्रिर्यस्य सः अयं भावः क्षितिमाहात्म्यमाह यस्मा मयं परात्परो पेन ॥ तादृशव्रजभुवो धन्याः यतो यत्र
अयं श्रीकृष्णो विविधक्रीडायाचति गच्छतीति ॥१३॥

१२८

अहो कष्टमल्पपुण्या वयं ॥ यतोः स्मामिरनवसरे दृष्टोः यां गोप्यस्तु वक्ष्यमाणाद्दृग्भिः गोप्य इति ॥ अनुपमश्रीकस्यस्य रूपश्रृंगं ॥ लावण्येन सारं श्रेष्ठं ॥ वि-
च ॥ असमोर्द्ध्वं न सममूर्द्ध्वं मेधिकं यस्य तत् ॥ न इ पिनान्येन आभरणादिना सिद्धं किं तु स्वत एव ॥ ऐश्वरस्य ऐश्वर्यस्य एकांतधाम अन्यत्राभिचारि स्थानं ॥ पाठांतरे अ-
नुपमेश्वरस्येत्यन्वयः ॥ एवंभूतं नित्यनवीनं रूपं याः नेत्रैः पश्यंतीति ॥१४॥ किंच ॥ या दोहनादिषु एनं गायंति ता व्रजस्त्रियो धन्याः प्रेंखेंखनं दोलारोलनं ॥ उरुक्रमे-
सेवनं ॥ कथंभूताः उरुक्रमे चित्तं उरुक्रमे चित्तं येनैव यानेन सर्वविषयप्राप्तिर्यासां ताः ॥ पाठांतरे उरुक्रमं चिंतयंतीत्यर्थः ॥ कुतः अनुरक्ताधियः ततश्च लिंगं अश्रु

गोप्यस्तपः किमचरन्यदमुष्य रूपं लावण्यसारमसमोर्द्ध्वमनन्यसिद्धं ॥ दृग्भिः पिबंत्यनुसवाभिनवं दुरापमेकांतधाम यशसः श्रिय
ऐश्वरस्य ॥१४॥ या दोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ ॥ गायंति चैनमनुरक्तधियोऽश्रुकंठ्यो धन्या व्रज-
स्त्रिय उरुक्रमचित्तयानाः ॥१५॥ प्रातर्व्रजाद्व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वेणुं ॥ निर्गम्य तूर्णमबलाः पथि
भूरिपुण्याः पश्यंति सस्मितमुखं सदयावलोकं ॥१६॥ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः ॥ शत्रुं हंतुं मनश्चक्रे भगवान्भरतर्षभ
॥१७॥ सभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहशुचातुरौ ॥ पितरावन्वतप्येतां पुत्रयोरबुधौ बलं ॥१८॥ तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ ॥ युयुधाते
यथान्योन्यं तथैव बलमुष्टिकौ ॥१९॥ भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरो भज्यमानांगो मुहुर्ग्लानिमवाप ह ॥२०॥

कंठ्यः ॥१५॥ प्रातरिति ॥ याश्चाबलाः अस्य वेणुं निशम्य गृहात्तूर्णं निर्गम्य पथि सस्मितं मुखं पश्यंति ताः भूरिपुण्या इति ॥१६॥ एवं सभयं पौरवाणासु स्त्रीषु तासां भय-
निवृत्तये श्रीकृष्णः शत्रुं हंतुं मनश्चक्रे ॥१७॥ सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक् तया आतुरौ विह्वलौ ॥ पुत्रयोर्बलमजानंतौ पितरावन्वतापं प्राप्ता-
विति ॥१८॥१९॥ तदा भगवतो गात्राणां अनिजाचारीनाभिः पातैः प्रहारैः वज्रस्य निःपेषतः तीव्रैः प्रघातैः तद्वन्निष्ठुरैर्भज्यमानांगः स्नथद्गात्रः ॥२०॥ राम

२०.५
१२९

श्येनस्येव वेगो यस्य स चाणूरः अवातश्च ताडयत् ॥ ११ ॥ १२ ॥ भूपृष्ठे भुवन उपरि पोथयामास आस्फालयत् ॥ इंद्रध्वजो वज्रं ॥ यद्वा ॥ इंद्रध्वजो नाम गौडेषु प्रसिद्धः
कस्मिंश्चिदुत्सवे महोत्तमो ध्वजपताकाद्यलंकृतः प्रकृष्टाकृतिर्हस्तौ यस्य स यथापतत् तिहद्धरयतरिति ॥ १३ ॥ १४ ॥ अर्दितः पीडितः उर्व्युपस्थे भूतले ॥ १५ ॥ ०

स्तस्येन वेग उत्पत्य मुष्टिकृत्य कराडभो ॥ भगवंतं वासुदेवं क्रुद्धो वक्षस्यबाधत ॥ २१ ॥ नाचलत्तत्प्रहारेण मालाहत इव द्विपः ॥ बाहुभ्यो निगृह्य चाणूर
रं बहुशो भ्रामयन्हरिः ॥ २२ ॥ भूपृष्ठे पोथयामास तरसा क्षीणजीवितं ॥ विस्रस्ताकल्पकेशस्रगिंद्रध्वज इवापतत् ॥ २३ ॥ तथैव मुष्टिकः पूर्वं स्व
मुष्ट्याभिहतेन वै ॥ बलभद्रेण बलिना तलेनाभिहतो भृशं ॥ २४ ॥ प्रवेपितः स रुधिरमुद्वमन्मुखतोर्दितः ॥ व्यसुः पपातोर्व्युपस्थे वाताहत इ
वाङ्घ्रिपः ॥ २५ ॥ ततः कूटमनुप्राप्तं रामः प्रहरतां वरः ॥ अवधील्लीलया राजन्सावज्ञं वाममुष्टिना ॥ २६ ॥ तर्ह्येव हि शलः कृष्णपादाहतशी वि
र्षकः ॥ द्विधा विदीर्णस्तोशलक उभावपि निपेततुः ॥ २७ ॥ चाणूरे मुष्टिके कूटे शले तोशलके हते ॥ शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्स
वः ॥ गोपान्वयस्यानाकृष्य तैः संसृज्य विजह्रतुः ॥ वाद्यमानेषु तूर्येषु वल्गंतौ रुतनूपुरौ ॥ २९ ॥ जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः
ऋते कंसं विप्रमुख्याः साधवः साधु साध्विति ॥ ३० ॥ हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ॥ न्यवारयत्स्वतूर्याणि वाक्यं चेदमुवाच ह ॥ ३१ ॥ निःसा
रयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ॥ धनं हरत गोपानां नंदं बध्नीत दुर्मतिं ॥ ३२ ॥ वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः ॥ उग्रसेनः पिता चापि
सानुगः परपक्षगः ॥ ३३ ॥ एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ॥ लघिम्नोत्पत्य तरसा मंचमुत्तुंगमारुहत् ॥ ३४ ॥ तमाविशंतमालोक्य मृ
त्युमात्मन आसनात् ॥ मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ॥ ३५ ॥ तं खड्गपाणिं विचरंतमाशु श्येनं यथा दक्षिणसव्यमंबरे ॥ समग्रही
वल्गतो नृत्यादि कुर्वतौ ॥ २९ ॥ साधु साध्विति वरं ततः ॥ ३० ॥ ३४ ॥ अव्ययः अश्रमः लघिम्ना लाला दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ॥ ३६ ॥
घवेन ॥ ३४ ॥ ३५ ॥ दुर्विषहं अविषह्यमुग्रं तेजो यस्य स तार्क्ष्यसुतः ॥ ३६ ॥

राम
१२९

गरिष्ठन्वायविस्माश्रपन्नमुक्तं ॥ तत्रहेतुः अञ्जनाभः कृतत्तस्योपर्येवपपात आत्मतंत्रः ॥ ३७ ॥ निर्विशेषोनिःकृतिः आनृशंस्यमित्यर्थः तत्कारिणः संततेःप्र
धावत ॥ ४० ॥ तथातातद्‌कृञ्जतिरभसाद्वेगोयेषांतान् ॥ रथयन्नातूउद्धृतांश्च ॥ ४१ ॥ ३ ॥ शोचंत्यो विलापाश्चक्रुःशुचःअश्रूणि ॥ ४४ ॥ धर्मितेत्यादीनिविलापेश्रम

प्रगृह्यकेशेषुवलात्किरीटंनिपात्यरंगोपरितंगमंवात् ॥ तस्योपरिशान्त्वयमञ्जनाभःपपातविस्माश्रय आत्मतंत्रः ॥ २७ ॥ तांसंपरेतांविचकर्ष
भौमोहरिर्यथेभंजगतोविपश्यतः ॥ हाहेतिशब्दःसुमहांस्तदाभूदुदीरितःसर्वजनेनतेरे ॥ २८ ॥ ततोनिरस्तोहिहिप्रधिघातमीश्वरंपिवस्वरस्वावि
वरंत्वयमश्वसत्व ॥ ददर्शवक्राप्रधमथतोयतत्तदेववत्पंडरवापमोप ॥ २९ ॥ तस्यानुजाभ्रातरोःष्ठोवंकनाशोधकारयः ॥ अभ्यधावन्नभिक्रु
द्धाभ्रातुर्निर्वेशकारिणः ॥ ४० ॥ तथापिरभसौतान्तुसमपन्नानेहिणीस्ततः ॥ अहत्परिघमुद्यम्यपञ्चनिवमृगाधिपः ॥ ४१ ॥ नेडुर्दुंदुभयोव्यो
म्निदेहलेशायाविभूतयः ॥ पुष्पैःकिरंतस्तेप्रीताःशंशंहनेनवृत्तःस्त्रियः ॥ ४२ ॥ तेषांस्त्रियोमहाराजहतंस्वरणेडःखिताः ॥ तत्राभीपुर्विनि
घ्नंत्यःशीर्षाणपश्रुविलोचनः ॥ ४३ ॥ शयानान्वीरशय्यायांपतितानालिंग्यशोचतीः ॥ विलेपुःसुस्वरंनार्योविसृजंत्योमुहुःशुचः ॥ ४४ ॥ हानाथप्रियध
र्मज्ञकरुणानाथवत्सल ॥ त्वयाहतेननिहतावयंतेसगृहप्रजाः ॥ ४५ ॥ त्वयाविरहितापत्यापुरीयंपुरुषर्षभ ॥ नशोभतेवयमिवनिवृत्तोत्सवमंग
ला ॥ ४६ ॥ अनागसांत्वंभूतानांकृतवानुद्रोहमुल्वणं ॥ तेनेमांभोदशांनीतमृतधुद्धोलभेतसं ॥ ४७ ॥ सर्वेषामिहभूतानामेषहिप्रभवाप्ययः ॥ योद्धाचत
द्वधध्यायीनह्यचित्सुखमेधते ॥ ४८ ॥ श्रीशुकउवाच ॥ राजयोषितआश्वास्यभगवांल्लोकभावनः ॥ यामाहुर्लौकिकीसंस्थांहतानांसमकारयत ॥ ४९ ॥ मा
तरंपितरंचैवमोचयित्वाथबांधवान् ॥ कंसस्यपितरंराजानंगिरस्ताःस्पृष्टाःपादयोः ॥ ५० ॥ संबोधनानितेत्वरीयावयं ॥ ४५ ॥ त्वयापत्याविरहिताग्रीयंनशोभ
तइतित्वरद्धामिधानं ॥ ४६ ॥ अनागसामितिनिरपराधमिधानं ॥ ४७ ॥ एषप्रीकृतमःप्रभवत्पस्मारितिप्रभवःअपियंत्यस्मिन्नितिअप्ययः सचसचतद्वधध्यानेनरवता
नचकन्वंशीलयस्सनः ॥ ४८ ॥ ४९ ॥ आप्तरपदंघनस्ष्टा ॥ ५० ॥

२०५
१२०

पुत्रभ्रांतिं विहाय जगदीश्वराविति ज्ञात्वा शंकितौ तेन सहस्वजातेनाल्लिंगितवंतौ किं त्ववद्धांजलिस्तस्थतुरित्यर्थः ॥ प्रमत्य हत्वाहत्वेंद्रमल्लेंद्रान्महालीलया ॥ विमत्सव
रितिकं स्तवी भक्तसमाख्यत ॥ ५२ ॥ इति श्री मचवत्स्वत्वारिंशः पंचचत्वारिंशेऽथ पितरौ हरिस्तौ त्वनं ॥ अथ सेनाभिषेकस्य ऋत्योग्रसेनोग्रगमः ॥ उपलब्धार्थौ विदित्वे
ति ॥ अयमर्थः उपसमीपे आवयोः पुत्रबुध्यानं सार्विकपरममहत्वभोगात् स्वमेव लब्धा आवामीश्वराविति प्राज्ञः परमज्ञानरूपोः योग्याभ्यांतथापुत्रौ तौ तात्वा ॥
मयि पुत्रस्नेहे सत्यनयोर्ज्ञानेनाप्राकिं दुर्लभं स्यात् दुर्लभं मपि पुत्रत्वनयापेम ॥ अतस्तदानीमेव तत्त्वज्ञानं मा भूदिति निजां स्वाधीनां मायां ॥ तयोः प्रमोदितवानिति
॥ अतः देवं दर्शयति उवाच त्याद्यष्टभिः ॥ प्रीणयन्नमा सादरं तु वच ॥ २ ॥ अस्मत्तः अस्मिन्निमित्तं ॥ नित्यमुत्कंठितयोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा बाल्यपौगंड

देवकीवसुदेवस्य विज्ञायाजगदीश्वरौ ॥ कृतसंवंदनौ पुत्रौ सस्वजाते न शंकितौ ॥ ५१ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुश्चत्वा-
रिंशोऽध्यायः ॥ श्रीशुक उवाच ॥ पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ॥ मा भूदिति निजां मायां ततान जनमोहिनीं ॥ १ ॥ उवाच पितरावेत्य
साग्रजः सात्वतर्षभः ॥ प्रश्रयावनतः प्रीणन्नंब तातेति सादरं ॥ २ ॥ नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि ॥ बाल्यपौगंडकैशोराः पु-
त्राभ्यामभवन्क्वचित् ॥ ३ ॥ न लब्धो दैवहतयोर्वासो नौ भवदंतिके ॥ यां बालाः पितृगेहस्था विंदंते लालिता मुदं ॥ ४ ॥ सर्वार्थसंभवो देहो ज-
नितः पोषितो यतः ॥ न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥ यस्तयोरात्मजः कल्प आत्मना च धनेन च ॥ वृत्तिं न दद्यात्तं प्रेत्य स्व-
मांसं खादयंति हि ॥ ६ ॥

कैशोराः न जाताः वयस्थायां भवत्सुखानीत्यर्थः तेनाभूवन्निति ॥ अस्मत्तः पुत्राभ्यामिति सामानाधिकरण्यं वा ॥ ३ ॥ किंतु आवामेव दैव
हीनाविति आह ॥ न लब्ध इति ॥ पितृगेहस्था बाला यां मुदं विंदंते सा च न लब्धेति एवं तावत्स्वलोकदुःखं न युवयोरावयोश्च कामहानिर्जातेत्युक्तं ॥ ४ ॥ आवयोः पुनर्दु
स्त्यजत्यंरिचर्यपालोपेन धर्महानिरपि जातेत्याह ॥ सर्वार्थेति ॥ सर्वेषां धर्मार्थकामानां संभवो यस्मिन् स देहः यतः याभ्यां जनितः पोषितश्च तयोः पित्रोर्नि
र्वेशं मानृण्यं मर्त्यः शतसंवत्सरमात्रेणायुषा न प्राप्नोतीति ॥ ५ ॥ नन्वपोषितेऽपि पुत्रः कल्पः समर्थः सन्नपि देहेन धनेन च पित्रोर्वृत्तिं जीविकां न संपादयेत् तं
प्रेत्य लोकांतरे यमदूताः स्वमांसमेव खादयंतीति ॥ ६ ॥

राम
१२०

विंव ॥ मातापित्रोः शुश्रूषामकुर्वतः विफलं जीवितं भवतीत्याह ॥ मातरमिति ॥ अबिभ्रत् अपुष्णन् श्वसन्नपि मृतस्तुल्यमेवेति ॥ ७ ॥ तन्नस्मान्नौ आवयोः मोघं व्यर्थं अनर्चतोः अपूजयतोः ॥ ८ ॥ दुर्हृदा कंसेन हत्वा ॥ ९ ॥ १ ॥ आश्वास्य सांत्वयित्वा ॥ १२ ॥ तमेवाज्ञापयेति मा वदेत्याह ॥ ययातिशापादिति ॥ तवत

मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुं ॥ गुरुं विप्रं प्रपन्नं च कल्पोः विभ्रञ्छ्वसन्मृतः ॥ ७ ॥ तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः ॥ मोघमेते व्यतिक्रांता दिवसा वामनर्चतोः ॥ ८ ॥ तत्क्षंतुमर्हथस्तात मातर्नौ परतंत्रयोः ॥ अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशं ॥ ९ ॥ शुकउवाच ॥ इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ॥ मोहितावंकमारोप्य परिष्वज्यापतुर्मुदं ॥ १० ॥ सिंचंतावश्रुधाराभिः स्नेहपाशेन चावृतौ ॥ न किंचिदूचतू राजन्बाष्पकंठौ विमोहितौ ॥ ११ ॥ एवमाश्वास्य पितरौ भगवान्देवकीसुतः ॥ मातामहं तूग्रसेनं यदूनामकरोन्नृपं ॥ १२ ॥ आह चास्मान्महाराज प्रजाश्चाज्ञप्तुमर्हसि ॥ ययातिशापाद्यदुभिर्नासितव्यं नृपासने ॥ १३ ॥ मयि भृत्य उपासीने भवतो विबुधादयः ॥ बलिं हरंत्यवनताः किमुतान्ये नराधिपाः ॥ १४ ॥ सर्वान्स्वान्ज्ञातिसंबंधान्दिग्भ्यः कंसभयाकुलान् ॥ यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् ॥ १५ ॥ सभाजितान्समाश्वास्य विदेशावासकर्शितान् ॥ न्यवासयत्स्वगेहेषु वित्तैः संतर्प्य विश्वकृत् ॥ १६ ॥ कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः ॥ गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥ १७ ॥ वीक्षंतोहरहः प्रीता मुकुंदवदनांबुजं ॥ नित्यं प्रमुदितं श्रीमत्सदयस्मितवीक्षणं ॥ १८ ॥ तत्र प्रवयसोप्यासन्युवानोतिबलौजसः ॥ पिबंतोक्षैर्मुकुंदस्य मुखांबुजसुधां मुहुः ॥ १९ ॥ अथ नंदं समासाद्य भगवान्देवकीसुतः ॥ संकर्ष

यादवत्वेपि महाराजत्वान्न दोष इति भावः ॥ १३ ॥ मम तादृशी शक्तिर्नास्ति इति चेत्तत्राह ॥ मयीति ॥ मत्प्रसादेन सर्वं ।एश्वराजेंद्र परिष्वज्येपृच तु ॥ १४ ॥ ॥ १० ॥ भविष्यतीत्यर्थः ॥ १४ ॥ स्वान्ज्ञातीन् संबंधांश्च दिग्भ्यः आनाय्येति ॥ १५ ॥ १६ ॥ सिद्धाः पूर्णाः कृष्णरामाभ्यां गतो निवृत्तो ज्वरः संतापो येषां ते ॥ १७ ॥ सदयस्मितवीक्षणं

२०.पू
१२१

भृशं आत्मनो व्याधिकोन पोषितो न चास्वर्ष्यमेतदित्याह पित्रोरिति । आत्मनो देहादपि आत्मजेषु अधिका हि प्रीतिरिति ॥ ११ ॥ देवकीवसुदेवयोः पुत्रोऽप्युवां नाऽस्मत्पुत्रावित्यपि न वाच्यमित्याह स पितेति ॥ १२ ॥ १३ ॥ सव्रजं व्रजवासिभिः सहितं । पुष्टानि स्वर्णालंकृतानि रिक्तकांस्यादिपात्राणीनि तत्सुभृतिभिः ॥ १४ ॥ ५ ॥ पुरोधसा गर्गाचार्येण द्विजसंस्कृतिं उपनयनं ॥ १६ ॥ गावो गावः रुक्मस्वमाला विद्यते यासां ताः रुक्ममालाः क्षौमवस्त्रमालावती ॥ १७ ॥ या पूर्वं मनोरथान्

पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ पालितौ भृशं ॥ पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥ ११ ॥ स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ॥ शिशून्बंधुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ १२ ॥ यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं एवं सांत्वय्य भगवान्नंदं सव्रजमच्युतः ॥ वासोऽलंकारकुप्याद्यैरर्हयामास सादरं ॥ १४ ॥ इत्युक्तस्तौ परिष्वज्य नंदः प्रणयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥ १५ ॥ अथ शूरसुतो राजन्पुत्रयोः समकारयत् ॥ पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिं ॥ १६ ॥ तेभ्योऽदाद्दक्षिणा गावो रुक्ममालाः स्वलंकृताः ॥ स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः ॥ १७ ॥ याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ॥ ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥ १८ ॥ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ॥ गर्गाद्यदुकुलाचार्याद्गायत्रं व्रतमास्थितौ ॥ १९ ॥ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ॥ नान्यसिद्धामलज्ञानं गूहमानौ नरेहितैः ॥ २० ॥ अथो गुरुकुले वासमिच्छंतावुपजग्मतुः ॥ काश्यं सांदीपनिं नाम ह्यवंतीपुरवासिनं ॥ २१ ॥ यथोपसाद्य तौ दांतौ गुरौ वृत्तिमनिंदितां ॥ ग्राहयंतावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ २२ ॥ तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ॥ प्रोवाच वेदानखिलान्सांगोपनिषदो गुरुः ॥ २३ ॥

सन्नता एवासंस्तन् ॥ न तु ताः कंसेन हृताः सत्यं ॥ राज्ञो गोशाला छिद्यस्त्रास्त्याह ॥ कंसेनाधर्मत इति ॥ १८ ॥ गायत्रं ब्रह्मचर्यं ॥ १९ ॥ प्रकर्षेण भवं त्याग्याभिनि प्रभवौ ॥ अतएव सर्वज्ञौ ॥ स्वतः सिद्धममलं ज्ञानं प्रच्छादयंतौ नरचेष्टितैः ॥ २० ॥ यथा यथावत् उपसाद्य प्राप्य गुरौ वृत्तिमन्याञ्ग्राहयंतौ शिक्षयंतौ ॥ गुरुमुपेतौ उपगतौ सेवितवंतावित्यर्थः ॥ २२ ॥ शुद्धो भावो यासामनुवृत्तिभिः ॥ सांगोपनिषदः अंगानि शिक्षादीनि तैः उपनिषद्भिश्च सहितान् ॥ २३ ॥

दम
१२१

सरहस्यं समंत्रं वेदं नानाज्ञानसहितं ॥ धर्मान्समयादि धर्मशास्त्राणि न्यायपथान्मीमांसादीन् ॥ आन्वीक्षिकीं तर्कविद्यां संधिश्च विग्रहो यानमासनं द्वैधमाश्रयः इत्येवं
षड्गुणां राजनीतिं ॥ २४ ॥ सकृत्त्रिगदमात्रेण एकवारं गदितमात्रेण ॥ २५ ॥ तावतीः चतुःषष्टिकलाः ताश्चैवं तंत्रे प्रोक्ता लिख्यंते ॥ गीतं ॥ वाद्यं ॥ नृत्यं ॥ नाट्यं ॥ आले
ख्यं ॥ विशेषकच्छेद्यं ॥ तंडुलकुसुमविकाराः पुष्पास्तरणं दशनवसनांगरागाः मणिभूमिकाकर्म ॥ शयनरचनं ॥ उदकवाद्यमुदकघाताः चित्रायोगाः माल्यग्रथन
विकल्पाः शेखरापीडयोजनं ॥ नेपथ्ययोगाः कर्णपत्रभंगाः सुगंधयुक्तिः भूषणयोजनं ॥ ऐंद्रजालं ॥ कौचुमारयोगाः हस्तलाघवं ॥ चित्रशाकपूपभक्ष्यविकार
क्रिया ॥ पानकरसरागासवयोजनं ॥ सूचीवापकर्म सूत्रक्रीडा ॥ वीणाडमरुकवाद्यानि प्रहेलिका ॥ प्रतिमाला ॥ दुर्वचकयोगाः पुस्तकवाचनं ॥ नाटकाख्यायि
कादर्शनं ॥ काव्यसमस्यापूरणं ॥ पट्टिकावेत्रवाणविकल्पाः तर्ककर्माणि ॥ तक्षणं ॥ वास्तुविद्या ॥ रूप्यरत्नपरीक्षा ॥ धातुवादः मणिरागज्ञानं ॥ आकरज्ञानं

सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा ॥ तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्गुणां ॥ २४ ॥ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ॥ सकृत्त्रिगद
मात्रेणातौ संजगृहतुर्नृप ॥ २५ ॥ अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः ॥ गुरुदक्षिणयाचार्यं छंदयामासतुर्नृप ॥ २६ ॥ द्विजस्तयोस्तं म
न हिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिं ॥ संमंत्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयांबभूव ह ॥ २७ ॥ तथेत्यथारुह्य महारथौ रथं प्रभास
मासाद्य दुरंतविक्रमौ ॥ वेलामुपव्रज्य निषीदतुः क्षणं सिंधुर्विदित्वार्हणमाहरत्तयोः ॥ २८ ॥ तमाह भगवानाशु गुरुपुत्रः प्रदीयतां ॥ योऽसा

वृक्षायुर्वेदयोगाः मेषकुक्कुटलावकयुद्धविधि ॥ शुकसारिकाप्रलापनं ॥ उत्सादनं ॥ केशमार्जनकौशलं ॥ अक्षरमु (विहत्त्वया ग्रस्तो बालको महतोर्मिणा ॥ २९
ष्टिकाकथनं ॥ म्लेच्छितकविकल्पाः देशभाषाज्ञानं ॥ पुष्पशकटिका ॥ निमित्तज्ञानं ॥ यंत्रमातृका धारणमातृका संवाच्यं ॥ मानसी काव्यक्रिया ॥ अभिधानकोशः
छंदोज्ञानं ॥ क्रियाविकल्पाः छलितकयोगाः ॥ वस्त्रगोपनानि ॥ द्यूतविशेषाः आकर्षक्रीडाः बालक्रीडनकानि ॥ वैनायिकीनां वैजयिकीनां ॥ वैयामिकीनां विद्या
ज्ञानानि ॥ २४ ॥ इति चतुःषष्टिकलाः ॥ छंदयामासतुः उपलोभितवंतौ ॥ २६ ॥ प्रभासे क्षेत्रे महार्णवे मृतं बालं वरयामास ॥ २७ ॥ सिंधुः समुद्रः विदित्वा समुद्रस्तयो
रर्हणमाजहारेति ॥ २८ ॥ २९ ॥

पंचजोल्पत्ने हाधीति सचमहानसमासाध्य इत्यर्थः ॥४०॥ सपर्या पूजां ॥४२॥ सर्वेषां भूतानामाशयाअंतःकरणानि तान्यालयो निवासो यस्य तं ॥४४॥ निजं कर्मैव बंधनं यस्य तं ॥ तथाभूतमपि मच्छासनपुरस्कारेणानय न तेन दोष इत्यर्थः ॥४५॥ ६ वत्सेति प्राधान्येनैकस्य संबोधनं ॥ गुरोर्निःक्रयो गुरुदक्षिणा युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु कामो वशिष्यते न कोपि ॥४७॥ हे वीरौ ॥४८॥ अनिलवद्रंहो यस्य तेन ॥ पर्जन्यो मेघः तद्वन्निनदो यस्य तेन ॥४९॥

समुद्र उवाच ॥ नैवाहार्षमहं देव दैत्यः पंचजनो महान् ॥ अंतर्जलचरः कृष्ण शंखरूपधरोसुरः ॥४०॥ जलमाविश्य तं हत्वा नापश्यदुदरेर्भकं तदंगप्रभवं शंखमादाय रथमागमत् ॥४१॥ ततः संयमनीं नाम यमस्य दयितां पुरीं ॥ गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुधः ॥४२॥ शंखनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः ॥ तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहितां ॥४३॥ उवाचावनतः कृष्णं सर्वभूताशयालयं ॥ लीलामनुष्य हे विष्णो युवयोः करवाम किं ॥४४॥ कृष्ण उवाच ॥ गुरुपुत्रमिहानीतं निजकर्मनिबंधनं ॥ आनयस्व महाराज मच्छासनपुरस्कृतः ॥४५॥ तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ ॥ दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥४६॥ गुरुरुवाच ॥ सम्यक्संपादितो वत्स भवद्भ्यां गुरुनिःक्रयः ॥ को नु युष्मद्विधगुरोः कामानामवशिष्यते ॥४७॥ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ॥ छंदांस्ययातयामानि भवंत्विह परत्र च ॥४८॥ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ॥ आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ॥४९॥ समनंदन् प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ ॥ अपश्यंत्यो बह्वहानि नष्टलब्धधना इव ॥५०॥ इति श्रीभागवते महापुराणे दशमस्कंधे पंचचत्वारिंशोध्यायः ॥ श्रीशुक उवाच ॥ वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा ॥ शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥१॥

नष्टमुद्दिष्टं तत्पुनर्लब्धं धनं यैस्तैरिव ॥५०॥ ॐ षट्चत्वारिंशे षद्वत्वारिंशके घोषमुद्धवं प्रेष्य तद्गिरा ॥ यशोदानंदयोश्चक्रे कृष्णः शोकापनोदनं ॥१॥ कामाचारं द्विजातिः सन्मार्गस्त्यजाति संपतः ॥ गुरोर्ज्ञानमनुप्राप्य स व्योमगोपीः कृपाविशत् ॥ गोपीनां सांत्वनमतिरहस्यं संदेशं विधास्यमिति तदर्थमुद्धवं विशिनष्टि वृष्णीनामिति ॥ उद्धिसत्तमः बुद्धिसत्तमः ॥ उध्यात्मेति श्रेष्ठः ॥१॥

गोपीनां विशेषतः संदेशे कारणमाह । ता इति । मय्येव संकल्पात्मकं मनो यासां ताः अहमेव प्राणो यासां ताः मदर्थे त्यक्ता दैहिकाः पतिपुत्रादयो याभि-
स्ताः ततः किं तत्राह । ये त्यक्तलोकधर्मा इति । मत्प्रियमिति त्यक्तो लोकधर्मो यैः हा तत्र हेतुः तत्साधनानि येषां ता बिभर्मि पुष्णामि मद्वियोगाभीत्यर्थः ता-
सां विवियोगाधिं दर्शयति द्वयेन मयि ता इति । विरहेणोत्कंठ्येन विह्वलाः परवशाः ५ गोकुलानि र्गमनशयशीघ्रमागमिष्यामीति प्रत्यागमन-
संदेशाः तैः । मे मदीयाः वल्लव्यो गोप्यः मदात्मिकाः इति तासां मात्मा त्वदेह यदि स्यात्तर्हि विरहतापेन दह्येतैव । तस्मान्मयि वर्त्तमानत्वान्नाथ चिज्जीवं

तमाह भगवान्प्रेष्ठं भक्तमेकांतिनं क्वचित् । गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह । गोपी-
नां मद्वियोगाधिं मत्संदेशैर्विमोचय ॥ ३ ॥ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः । ये त्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहं ॥ ४ ॥ मयि ताः
प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः । स्मरंत्योंग विमुह्यंति विरहोत्कंठ्यविह्वलाः ॥ ५ ॥ धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन । प्रत्यागमनसं-
देशैर्वल्लव्यो मे मदात्मिकाः ॥ ६ ॥ श्रीशुक उवाच ॥ इत्युक्त उद्धवो राजन्संदेशं भर्तुरादृतः । आदाय रथमारुह्य प्रययौ नंदगोकुलं ॥ ७ ॥ प्राप्तो नंदव्रजं
श्रीमान्निम्लोचति विभावसौ । छन्नयानः प्रविशतां पशूनां खुररेणुभिः ॥ ८ ॥ वासितार्थेभियुद्ध्यद्भिर्नादितं शुष्मिभिर्वृषैः । धावंतीभिश्च
वास्राभिरूधोभारैः स्ववत्सकान् ॥ ९ ॥ इतस्ततो विलंघद्भिर्गोवत्सैर्मंडितं सितैः । गोदोहशब्दाभिरवं वेणूनां निःस्वनेन च ॥ १० ॥ गायंतीभि-

नीति भावः ६ संदेशं भवतीनां वियोगो मे न हि सर्वात्मना क्वचिदित्यादिकं ७ श्च कर्माणि शुभानि बलकृष्णयोः स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितं ॥ ११ ॥
निम्लोचति अस्तं गच्छति । छन्नयानं पश्यति तदा गोपीभिरज्ञातत्वेन नंदसंगलब्धावानिति सूचयति ८ व्रजं वर्णयति पंचभिः वासिताः ऋतुमत्यो गावः तन्नि-
मित्तमभितो युध्यद्भिः शुष्मिभिर्मत्तैः गोवृषैर्नादितं । वास्राभिर्धेनुभिः स्ववत्सकान्प्रति ९ विलंघद्भिरुत्प्लवमानैः । गोदोहशब्दैः सहाभितो रवो यस्मिंस्तच्च माधव
न यद्ग्रहाणि देहीत्यादरयोगयुक्तस्मिंस्तत । वेणूनां निःस्वनेन च १० गायंतीभिर्गोपीभिः गोपैश्च सुविराजितं ॥ ११ ॥

दू३ श्रि३

११॥ छ

२०५
१३३

अग्न्याद्यर्चनान्वितैर्गृहैः धूपादिभिश्च मनोरमं ॥११॥ खंडं समूहः ॥१२॥ आत्मार्थं यस्य जन्म या सा ॥१६॥ साधूनामिति कर्मणि षष्ठी ॥१७॥ गावो गाः गिरिं गोवर्द्धनं ॥१८॥ अप्यायास्यति आगमिष्यति किं ॥१९॥ श्रीकृष्णोपकारस्मरणादिभिस्तु परमानंदेनाभिभूयमानस्याह ॥ दावाग्नेरित्यादिना वात द्वर्षाद्येति ॥ वृषात्सर्पाद्येति ॥ अन्योभिश्च दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षिताः स्म ॥२०॥ किंच स्मरतामिति लीलया अपांगेन निरीक्षितं अंग

अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः ॥ धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमं ॥१२॥ सर्वतः पुष्पितद्विजालिकुलनादितं ॥ हंसकारंडवाकीर्णैः पद्मखंडैश्च मंडितं ॥१३॥ तमागतं समागम्य कृष्णस्यानुचरं प्रियं ॥ नंदः प्रीतः परिष्वज्य वासुदेवधियार्चयत् ॥१४॥ भोजितं परमान्नेन संविष्टं कशिपौ सुखं ॥ गतश्रमं पर्यपृच्छत्पादसंवाहनादिभिः ॥१५॥ कच्चिदंग महाभागः सखा नः शूरनंदनः ॥ आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥१६॥ दिष्ट्या कंसो हतः पापः सानुजः स्वेन पाप्मना ॥ साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा ॥१७॥ अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् ॥ गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिं ॥१८॥ अप्यायास्यति गोविंदः स्वजनान्सकृदीक्षितुं ॥ तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्षणं ॥१९॥ दावाग्नेर्वातवर्षाच्च वृषसर्पाच्च रक्षिताः ॥ दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥२०॥ स्मरतां कृष्णवीर्याणि लीलापांगनिरीक्षितं ॥ हसितं भाषितं चांग सर्वा नः शिथिलाः क्रियाः ॥ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् ॥ आक्रीडानीक्ष्यमाणानां मनो याति तदात्मतां ॥२२॥ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ॥ सुराणां महदर्थाय गर्गस्य वचनं यथा ॥२२॥ कंसं नागायुतप्राणं मल्लौ गजपतीं तथा ॥ अवधिष्टां लीलयैव पशूनिव मृगाधिपः ॥२४॥

हं
र

हे उद्धव ॥२१॥ न केवलं शिथिला एव किंतदात्मतां नेत्र परमं तीत्याह ॥ सरिच्छैलेति ॥ सरितश्च शैलाश्च वनोद्देशाश्च तान् ॥ आक्रीडनं क्रीडास्थानानि ॥२२॥ सुराणामर्थाय महदं भारगर्गस्य वचनं यथा ॥२२॥ न केवलं तद्वचनात्तु साधां च चक्षुर्वहारमेवारादपि इत्याह ॥ कंसमिति ॥२४॥ ॥ ॥

पु

इभराट् यष्टिमिव तालत्रयप्रमाणां धनुर्बभंज ॥ २५ ॥ ३० ॥ अखिलस्य जगत्त्वमेव जनककर्त्तृत्वं नियंतृत्वेन वाह एतावितिं ॥ रामो मुकुंदः एतौ विश्वस्य बीजयोनी निमि
त्तोपादाने न केवलं प्रधानयोनित्यं प्रसिद्धमत आह ॥ पुरुषं प्रधानमिति ॥ पुरुषोंशः प्रधानं शक्तिः अतः प्रधानपुरुषावप्येतावेवेत्यर्थः एवं जनकत्वमुक्तं
किंच ॥ अन्वीय भूतेषु अनुप्रविश्य भूतानां तदुपहितस्य विलक्षणस्य च नानाभेदस्य ज्ञानस्य जीवस्य ॥ ईशाते ईश्वरौ नियंतारौ भवतः कुतः पुराणौ
अनादी अनादित्वात्कारणत्वं नियंतृत्वमित्यर्थः ॥ ३१ ॥ ननु शिष्याधिकर्मावेशान्मनुष्यादिजन्मदर्शनाच्चेतरस्मादनयोः को विशेष इत्याशंक्याह य

तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ॥ बभंजैकेन हस्तेन सप्ताहमदधाद्गिरिं ॥ २५ ॥ प्रलंबो धेनुकोऽरिष्टस्तृणावर्त्तो बकादयः ॥ दैत्याः सुरा
सुरजितो हता येनेह लीलया ॥ २६ ॥ श्रीशुक उवाच ॥ इति संस्मृत्य संस्मृत्य नंदः कृष्णानुरक्तधीः ॥ अत्युत्कंठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः ॥ २७ ॥
यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ॥ शृण्वंत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा ॥ २८ ॥ तयोरित्थं भगवति कृष्णे नंदयशोदयोः
वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा ॥ २९ ॥ उद्धव उवाच ॥ युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ॥ नारायणेऽखिलगुरौ यत्कृता मति
रीदृशी ॥ ३० ॥ एतौ हि विश्वस्य च बीजयोनी रामो मुकुंदः पुरुषः प्रधानं ॥ अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ ॥ ३१ ॥ य
स्मिन्जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धं ॥ निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः ॥ ३२ ॥ तस्मिन्भवंता
वखिलात्महेतौ नारायणे कारणमर्त्यमूर्त्तौ ॥ भावं विधत्तां नितरां महात्मन्किं वावशिष्टं युवयोः सुकृत्यं ॥ ३३ ॥ आगमिष्यत्यदीर्घेण काले
न व्रजमच्युतः ॥ प्रियं विधास्यते पित्रोर्भगवान्सात्वतां पतिः ॥

स्मिन्निति द्वाभ्यां ॥ कर्माशयं कर्मवासनां निर्हृत्य दग्ध्वा ब्रह्ममयः स्वरूपज्ञानवान् ॥ अर्कवर्णः सु
द्धसत्त्वमूर्त्तिः सन् ॥ अपरां गतिं तत्परं याति ॥ ३२ ॥ अखिलस्यात्मा च हेतुश्च तस्मिन्कारणेन मनुष्याकृतौ महात्मन्परिपूर्णौ भवतो भक्तिं सुकृतः अतः कृतकृत्या
वित्यर्थः ॥ ३३ ॥ चक्षुत्तमाह आगमिष्यतीति द्वाभ्यां ॥ ३४ ॥

त

२० पू
१२४

यातयूयं व्रजं तातं वयं वत्सेहदुःखिताम् ॥ तातीति ज्ञोद्दिष्टमेष्यामो विधाय सुहृदां सुखमिति ॥ यदाह स कृष्णस्तत्सत्यं करिष्यतीति ॥ ३५ ॥ कालविलंबनमसहमानौ प्रत्याह मा खिद्यतमिति ॥ हे महाभागौ ॥ अन्तिके इदानीमेव समीपे वा ॥ अंत इत्यत आह ॥ अंतर्हृदीति ॥ तर्हि सर्वैः किमिति न दृश्यते तत्राह ॥ ज्योतिरिति ॥ तद्यथा मथनं विना न दृश्यते तथा भक्तिं विना कृष्णोपीति भावः ॥ ३६ ॥ अहो आत्ममेतन्न स्मत्विहागमनं तस्यास्ति प्रियान्मित्रादीन्विहाय तत्र स गच्छतु इति मन्यते तत्राह नत्वस्येति अस्य प्रियाप्रियो न हिंसति ॥ तत्र हेतुः ॥ अमानिनः समानस्येति च ॥ ३७ ॥ ३८ ॥ सोपि जन्मकर्मादिरहितोपि क्रीडाप्रयोजनः सन् साधूनां परिपालनाय सदसन्मिश्रयोनिषु सात्विकतामसराजसयोनिषु ॥ यद्वा ॥ देवासिमत्स्यादिरूपेषु हिंसादियोनिषु कल्पते आविर्भवतीत्यर्थः ॥ ३९ ॥ ननु जन्मकर्मादिरहितस्य क्री

हत्वा कंसं रंगमध्ये प्रतीपं सर्वसात्वतां ॥ यदाह वः समागत्य कृष्णः सत्यं करिष्यति ॥ ३५ ॥ मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमंतिके ॥ अंतर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३६ ॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानिनः ॥ नोत्तमो नाधमो वापि समानस्यासमोपि वा ॥ ३७ ॥ न माता न पिता तस्य न भार्या न सुतादयः ॥ नात्मीयो न परश्चापि न देहो जन्म एव च ॥ ३८ ॥ न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु ॥ क्रीडार्थः सोपि साधूनां परित्राणाय कल्पते ॥ ३९ ॥ सत्वं रजस्तम इति भजते निर्गुणो गुणान् ॥ क्रीडन्नतीतोत्र गुणैः सृजत्यवति हंत्यजः ॥ ४० ॥ यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते ॥ चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ॥ ४१ ॥ युवयोरेव नैवायमात्मजो भगवान्हरिः ॥ सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२ ॥

त एतदित्यत आह ॥ सत्वमिति क्रीडामतीतोपि क्रीडन् ॥ तथा मायागुणैर्वृत इत्यर्थः ॥ ४० ॥ तत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टांतीकृत्वेव तस्याविद्ययेव कर्तृत्वमिति सदृष्टांतमाह यथेति ॥ भ्रमरिका भ्रमणं परिभ्रमणं तयोपलक्षितया दृष्ट्या भूरपि भ्राम्यतीति यथा प्रतीयते ॥ एवं चित्ते कर्तरि सति ॥ तत्र ॥ चित्ते अहंधिया आत्मलब्धात्मेन आत्मा कर्त्ता स्मृतो यथा तद्वदिति ॥ किंच ॥ युवयोरेव नायमात्मजः किंतु सर्वेषामपि तत्रापि नात्मज एव किंतु मित्रादिरूपोपि नित्य सर्वात्मनि रूपेणाह नित्यन्नयेसंबंधमनेकानि कीकरोति युवयोरेवेति द्वाभ्यां ॥ ४२ ॥

राम
१२४

॥४१॥

अस्मृताद्विनान्तरं निनेत रत्नत्वतो वाच्यं निर्वचनार्हं वस्तुनाहीति ॥४३॥ दीपान्निरूप्य प्रज्वाल्य वास्तून् देहल्यादीन् ॥४४॥ मणिभिः कांच्यादिभूषि-
न तैः ॥ रज्जूर्विकर्षन्त्यः भुजेषु कंकणानां स्रजो यासां ताः चलंतो नितंबाः ह्नो हाराः स्रग्या यासां कुंडलैः त्विषा नितः स्फुरितः कपोलौ यासां ॥ आरुणानि कुंकुमा-
नियेषु तो न्यानननानि यासां ताः एवं ताश्च ताश्च ॥४५॥६॥ नरादव्रजोकमो गोप्यः ॥४७॥ सक्रोधमाहुः अक्रूर इति ॥ अर्थसाधिनवानित्यमर्थसाधनः तेदा
ऊः येन नीत इति ॥४८॥ कंसं घातयित्वा एनः किमर्थमागत इत्याशंक्य कार्यं संभावयंति ॥ किमिति ॥ तदा साधितेन कार्येण प्रीत स्वभर्तुः पाठांतरे प्रेत

१ भवत् हृष्ट अस्मृतं भूतं मविषाल्लब्धा हृष्टा रिपुं मेहस्तल्पकं वा ॥ विनाः स्मृताद्दस्तेन एनवाच्यं स एव सर्वं परमार्थभूतः ॥४३॥ एवं निशामाद्भुवतो व्यतीता
नंदस्य कृष्णानुचरस्य राजन् ॥ गोप्यः समुत्थाय निरूप्य दीपान्वास्तून्समभ्यर्च्य दधीन्यमथ्नन् ॥४४॥ ता दीप्यदीप्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्-
भुजकंकणस्रजः ॥ चलन्नितंबस्तनहारकुंडलत्विषत्कपोलारुणकुंकुमाननाः ॥४५॥ उद्गायतीनामरविंदलोचनं व्रजांगनानां दिवमस्पृश-
द्ध्वनिः ॥ दध्नश्च निर्मथनशब्दमिश्रितो निरस्यते येन दिशाममंगलं ॥४६॥ भगवत्युदिते सूर्ये नंदद्वारि व्रजौकसः ॥ दृष्ट्वा रथं शातकौंभं कस्यायमि-
ति चाब्रुवन् ॥४७॥ अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः ॥ येन नीतो मधुपुरीं कृष्णः कमललोचनः ॥४८॥ किं साधयिष्यत्यस्माभिर्भर्तुः
प्रीतस्य निःकृतिं ॥ इति स्त्रीणां वदंतीनामुद्धवोऽगात्कृताह्निकः ॥४९॥ इति श्रीभागवते महापुराणे दशमस्कंधे षट्चत्वारिंशोध्यायः ॥ श्रीशुक उ-
वाच ॥ तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनं ॥ पीतांबरं पुष्करमालिनं लसन्मुखारविंदं मणिमृष्टकुंडलं ॥१॥

स्मृतस्य कंसस्य निःकृतिं भो हे हे हि कमस्माभिः कृत्वा साधयिष्यति किं ॥ अस्मन्तमोपैः पिंडान्नदास्यतीत्यर्थः एवं वदंतीनां स्त्रीणां ॥ तततस्ताभिस्तत्र व्रजस्थैरकृतस्मा
नादि नियम उद्धव आगत इति ॥४९॥ २ ॥ मेषट्चत्वारिंशः ॥ सप्तचत्वारिंशे कथकस्मादेशेन गोपिकाः ॥ बोधयित्वोद्धवस्तत्वमत्तज्ञाप्यागमत्पुरीं ॥१॥

द॰स्कं॰
१२५

अपीत्यमुं हरदर्शनेच्छया समः अस्मृतसेव वेषो भूषणो निवृत्य समः ॥ कोयं कृतो वा कस्य वेति वरस्त्यात्परिवव्रुः ॥ १ ॥ ३ ॥ पार्श्वं समेवक ॥ ४ ॥ पित्रोः प्रियचिकीर्षयेत्यत्र हेतुः स्नेहानुबंध इति ॥ ५ ॥ अन्यथा गोव्रजे तस्येतत्र हेतुः अन्येष्विति ॥ अर्थकृता कार्यनिमित्ता विडंबनमनुकरणं यंत्रेण तेता चिकी मैत्री ॥ पुंभिर्विहृष्टैतैः ॥ ६ ॥ अस्य वान्यार्थदर्शितैः प्रपंचः निःस्वमित्यादिना ॥ दत्तारक्षिणा येन तं याज्यं ॥ ७ ॥ पक्षिणो विगतफलं वृक्षारं तां अतृप्ता अजरता मित्यर्थः ॥ ८

ते विस्मिताः कोयमपीच्यदर्शनः ज्ञातश्च कस्माद्स्मृतवेषभूषणः ॥ इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयं ॥ १ ॥ तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ॥ रहस्यपृच्छन्नुपविष्टमासने विज्ञाय संदेशहरं रमापतेः ॥ ३ ॥ जानीमहे त्वा यदुपतेः पार्षदं समुपागतं ॥ भर्त्रेह प्रेषितः पित्रोर्भवान्प्रियचिकीर्षया ॥ ४ ॥ अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे ॥ स्नेहानुबंधो बंधूनां मुनेरपि सुदुस्त्यजः ॥ ५ ॥ अन्येष्वर्थकृता मैत्री यावदर्थविडंबनं ॥ पुंभिः स्त्रीषु कृता यद्वत्सुमनःस्विव षट्पदैः ॥ ६ ॥ निःस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः ॥ अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणं ॥ ७ ॥ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहं ॥ दग्धं मृगास्तथारण्यं जारो भुक्त्वा रतां स्त्रियं ॥ ८ ॥ इति गोप्यो हि गोविंदे गतवाक्कायमानसाः ॥ कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः ॥ ९ ॥ गायंत्यः प्रियकर्माणि रुदंत्यश्च गतह्रियः ॥ तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ॥ १० ॥ काचिन्मधुकरं दृष्ट्वा ध्यायंती कृष्णसंगमं ॥ प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥ ११ ॥

त्यक्तलौकिकाः त्यक्तलोकव्यवहाराः ॥ ९ ॥ प्रियस्य कर्माणि प्रियस्य स्मृत्वा संस्मृत्य गतह्रियः सत्यो हरंत्यश्च तमं कृष्णं त्रिनिति पूर्वक्रियये वसंबंधः ॥ १० ॥ प्रियेन श्रीकृष्णेन मा प्रसादयितुं प्रस्थापितो यं दूत इति कल्पयित्वा ऽब्रवीत् ॥ यद्वा अस्मिन् प्रियप्रस्थापितोद्धवे दृष्टिं कृत्वा मधुकरापदेशेनोद्धवमेवाब्रवीदित्यर्थः ॥ ११ ॥

राम
१२५

हे मधुप कितव सपत्नीबंधो नोऽस्माकमंघ्रिं मा स्पृश । मामानमत्कारेणाप्रार्थयस्वेत्यर्थः ततः किमपेक्षायां कालवर्णास्तत एव श्मश्रूणां लोहितत्वेका
णाऽत्र स्त्रेऽरुणाह । सपत्न्याः कुचाभ्यां विलुलिता संमर्दिता याश्रीकृष्णस्य वनमालया तत्र एव तत्स्याः कुचकुंकुमं येषु तैः श्मश्रुभिरुपलक्षितः किंत
तासामेव मानिनीनां प्रसादं मधुपतिर्वहतु किमस्माकं प्रसादेन तेन । ननु यदुसदसि विडंब्या उपहास्यास्माः । कुतः यस्य दूतस्त्वमीदृक् ईदृशः ॥१२॥ ननु किमिति
वमवजानीथ किं च निर्हेतुपतं । अत आह सकृदिति । भवादृक् त्वादृशो दुर्मनाः हे मनपः कुसुममानि यथा त्यजति तद्वत् । अहो बता वित्तस्य पादपद्मश्रीः
कथं सेवते । विदितमपेत्याह । अपीति बतेति खेदे । उत्तमश्लोकजल्पैर्मिथ्याकथाभिः प्रायो हृतचेताः वयं तु न लक्ष्मीवदविचक्षणाः इति भावः ॥१३॥ ननु काण

गो उवाच । मधुप कितवबंधो मा स्पृशांघ्रिं सपत्न्याः कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः । वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुस
दसि विडंब्यं यस्य दूतस्त्वमीदृक् ॥१२॥ सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यस्तत्यजेऽस्मान्भवादृक् । परिचरति कथं तत्पाद
पद्मं तु पद्मा ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः ॥१३॥ किमिह बहु षडंघ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणं । विजय
सखसखीनां गीयतां तत्प्रसंगः क्षपितकुचरुजस्ते कल्पयंतीष्टमिष्टाः ॥१४॥ दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहा
सभ्रूविजृंभस्य याः स्युः । चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥१५॥

न्वदुधात्कुर्वेन मस्मत्प्रसादलाभाय कृष्णं गायतीति मत्वाह । किमिहेति । पुराणं पुरातनं बहु शोः त्वं भूतं विजयसखसखस्य कृष्णस्य माग्रतयाः सखीनां तासामग्रत त्वं
हंगो गीयतां । इष्टाः कृष्णस्य प्रियाः । तेन पूजिता इति वा । तेनालिंगितेन क्षपिता कुचरुक् यासां ताः तवेष्टमपेक्षितं दास्यंतीति ॥१४॥ मोमामितस्मैवं वोचयत्वा मन्तस्मत्यानगा
विज्ञवत्वाप्रसादयितुमामामाश्लिष्टवानित्यत आह । दिवीति । दिवि भुवि रसातलेपाताले याः स्त्रियः सन्ति तासां का नाम दुरापा न काश्चन । तदित्यस्यार्थं । तस्येत्यर्थः कपटेन
हचिरेणाहासेन भ्रूविजृंभो यस्य तस्य । हे कपटेति वा । किं च यस्य चरणरजः श्रीः सेवते तेन तत्र वयं काः अपि च । यद्यप्येवं तथापि कृपणपक्षे कृपणानुकंपिनि पुरुषे

२०५
१३६

पादमूले प्रविशांतं क्षमापयिष्यंतमिव मत्वाह । शिरसि न्यस्तं पादं विसृज । तथाप्यनुवृत्तमाह । वेद्मीति चाटुकारान्मोत्पततः शिक्षितैस्त्वदर्थैः रोतैर्ह
नवकर्मभिः चाटुकारैः प्रियोक्तिरचनाभिः अनुनयविदुषः प्रार्थनाचतुरस्य ते सर्वमहं वेद्मि । प्रकारं वृत्तमप्यविश्वसनीय इति भावः । ननु तेन किमप
राधं तत्राह । त्वत्कृते इति । त्वत्कृते तदर्थमेव विसृष्टाः अपत्यपत्यन्यलोकाः अपत्यानि पतयश्चेतीह लोकाः अन्यलोको धर्मसाधनश्च याभिस्ताः नः
अकृतचेताः असंयतचित्ताः योऽस्मि सृजन्त अस्मिन्किमनुसंधातव्यमिति ॥१६॥ किंच रामस्य पूर्वोपाकर्मोपन्यसंदधानो विभेम्यहमस्मादित्याह

विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्ते प्रेतपाशैः प्रेतैर्भुक्तं रात । त्वत्कृते हि विसृष्टा पत्यपत्यान्यलोकाव्यसृजन्त
नचेताः किंतु संधेयमस्मिन् ॥ ॥१६॥ ॥ मृगयुरिव कपीन्द्रं विव्यधे लुब्धकर्मा प्रियमकृत विरूपां व्याजितः कामयानां ॥
ल वलिमपि बलिमत्वा वेष्ट्यच्छादयच्च वयतीरमपि तितमस्खेदुर्ग्राह्यजलत्कथार्थः ॥ ॥१७॥

मृगयुरिवेति । मृगयुर्लुब्धकः इव कपीन्द्रं वालिनं विव्याधे अविध्यत् । लुब्धकर्माक्रोर्यवान् अलुब्धधर्मेति वा । लुब्धको हि तन्मांसमत्तुकामो विध्यति अ
यतनं तथा अपि तेन वृथा कठिन इत्यर्थः । तथा प्रियं वस्तूर्पणखां । व्याजितः सीतापरतंत्रः काम एव यानं प्राप्तिसाधनं यस्यास्तां विरूपां छिन्नकर्णना
सिकामकरोत् शरीरविरूपेण । तथा वलिमपि तत्र वलिं अत्वा भक्षयित्वा धारावतकाकवत् अवष्टभ्य वबंध वामनरूपेण । वलिमपि वलि
राम
मत्वा धोक्षिपद्दिष्टपाय इति पाठे । वलिपूजां गृहीत्वा विष्टपात्स्वर्गाद्धोक्षिपदित्यर्थः । ततस्तस्मादस्मिन्स्य कस्मरस्य मत्व्योरलं । एवं वेत्कि किमिति
१३६
नित्यं गापयतत्राह । दुर्ग्राह्यजलत्कथात्स्य कथानरूपोऽर्थ इति ॥ ॥१७॥

१म

अपिच ॥ तानीमएवतत्कथापिविविर्गलतामूलोन्मूलनीतितथापिनत्यक्तंशंकुमः किंकर्मइत्याह ॥ यस्तुचरितेति ॥ यस्मात्तुचरितमेवलीलातदेवकर्णपीयूष
तस्यविंदुरूकणिकातस्याः स्मरकदनमेवंतेनविधूतानिरस्तद्वंद्वधर्मारागद्वेषाद्यायेषांतेअतएवविनष्टाः असंतुल्याः दीनंदुःखितंगृहकुटुंबंविहायदीनाभो
गहीनाविहंगाअपिभिक्षुचर्यांप्राणवृत्तिमात्रंचरंति ॥ अतस्मात्प्रयत्नथापित्यक्तंनाशंकुमइतिनिरापरत्वेः यंतावच्छोतोर्थः दुस्त्यजंत्वेपिअर्थिकोयमर्थः ॥ विधूत
द्वंद्वधर्माइत्यतः समासः पूर्ववत् ॥ ततस्तैवतेअविनष्टाश्चेतिसमासः इतरेणनद्वंद्वधर्माणोविनष्टाएव ॥ सपरितततकुणमेवरीनतच्छंगृहसहितंकुटुंबंविहायदीना
स्वाकिंचनः ॥ धीराइतिवापाठः वहवोविहंगाःइहसारवसारासारविवेकवन्तः भिक्षुचर्यापारमहंस्यंचरंतितस्मादेवपरम६हमार्थत्रपत्वादुस्त्यजत्वात्कथार्थः इति

यस्तुचरितलीलाकर्णपीयूषविंदुस्मरकदनविधूतद्वंद्वधर्माविनष्टाः ॥ सपरिगृहकुटुंबंवैरीनमुत्सृज्यदीनावहवइवविहंगाभिक्षुचर्यां
चरंति ॥१८॥ वयमृतमिवजिह्मव्याहृतंश्रद्दधानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वोहरिण्यः ॥ ददृश्मस्मरकेतन्नत्रावखस्पर्शतीव्रस्मररुज
उपमंत्रीनृभणेतामन्यवार्त्ता ॥१९॥ प्रियसखपुनरागाः प्रेयसाःप्रेखितः किंवरयकिमत्तुहंधेमाननीयोसिमेंग ॥ नयमितकथमि
हास्मान्दुस्त्यजः इहपार्श्वेसततमुपरिमेमप्पश्रीवधूः साकमास्ते ॥२०॥ ॥ गोविंदायनमोनमः ॥ श्रीकृष्णायनमोनमः ॥ एम

रासि॰

१ एनन्तुकिमेवंत्रूषेपूर्वत्वयेवमाकंरहसिकिमेवंनाबोचरित्यतआहवयमिति ॥ हेउपमंत्रीनृहन ॥ आत्तामियंवार्त्ता ॥ यतः कुलिकस्यमृगाधोः रुतंगीतं अनाय
कथाहतंसत्यमितिश्रद्दधानाः कृष्णस्यहरिणस्यवध्वः भार्याः हरिण्यः शीरैः रुतासत्योहज्जोदृश्मः एवंजिह्मस्यकुटिलस्यव्याहृतंरुतमिवश्रद्दधानाःस्मर
यत्नोवयंअस्मकरेततदृशिम ॥ किंतत ॥ नखस्पनखैः स्पर्शः तेनतीव्रःस्मरः तेनरुजःपीडाः तस्मात्स्यावार्त्तांभणतोकथ्यतामिति ॥१९॥ पराहृतगात्वापुनराग
तेप्रत्याह ॥ प्रियसखेति ॥ हेप्रियस्यसखे ॥ प्रेयसाश्रीकृष्णेनपुनः प्रेषितः किंत्वमागतोसि ॥ अंगहेदूतप्रेमानननीयः पूज्योसि ॥ ग्रतोभवान्किमत्तुहंधेप्राप्नमिच्छ
नीत्यर्थः नद्दरयद्दरणीस्वसमानितंप्रत्याहनयमीति ॥ इहसतीरस्मान्दुस्त्यजेद्वंद्वमिथुनीभावोयस्यतस्यपर्श्वसमीपंकथंनयसि ॥ हिहेमेमप्पश्रीनामवधूः सा

द०पू
१२७

तेन समस्त्रिताः सतीष्वत्र आपिबतेति । बत हर्षे हे सौम्य उद्धव कलारागतत्र आर्यपुत्रः कृष्णः अधुना किं मधुपूर्यां वर्त्तते । कदाचिदपि नोऽस्माकं वार्त्ताः वि-
श्रुते । अगरुवत्सुगन्धं भुजं नो मूर्ध्नि कदा धास्यतीति ॥ २१ ॥ श्रीकृष्णदर्शने लालसाः गोपीः प्रियसन्देशैः सान्त्वयन्नुद्धवः प्रथमं तावदिदमभाषत ॥ २२ ॥ तदा
पद्भिः अहो इति । सम्यक् पूर्णाः कृतार्थाः ॥ २३ ॥ श्रेयोभिः श्रेयःसाधनैः ॥ २४ ॥ अनुत्तमा अतिश्रेष्ठा ॥ २५ ॥ आवृणीत वृतवत्यः ॥ २६ ॥ सर्वात्मना भावः प्रे-

अपि बत मधुपूर्यामार्यपुत्रोऽधुनास्ते स्मरति स पितृगेहान्सौम्य बन्धूंश्च गोपान् । क्वचिदपि स कथा नः किंकरीणां गृणीते भुजमगु-
रुसुगन्धं मूर्ध्न्यधास्यत्कदा नु ॥ २१ ॥ श्रीशुक उवाच ॥ अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः । सान्त्वयन्प्रियसन्देशैर्गोपीरिदमभाषत
॥ २२ ॥ उद्धव उवाच ॥ अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः । वासुदेवे भगवति यासामित्यर्पितं मनः ॥ २३ ॥ दानव्रततपोहोमज-
पस्वाध्यायसंयमैः । श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥ २४ ॥ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा । भक्तिः प्रवर्तिता दि-
ष्ट्या मुनीनामपि दुर्लभा ॥ २५ ॥ दिष्ट्या पुत्रान्पतीन्देहान्स्वजनान्भवनानि च । हित्वावृणीत यूयं यत्कृष्णाख्यं पुरुषं परम् ॥ २६ ॥ सर्वात्म-
भावोऽधिकृतो भवतीनामधोक्षजे । विरहेण महाभागा महान्मेऽनुग्रहः कृतः ॥ २७ ॥ श्रूयतां प्रियसन्देशो भवतीनां सुखावहः । यमादायाग-
तो भद्रा अहं भर्तू रहस्करः ॥ २८ ॥ श्रीभगवानुवाच ॥ भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् । यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही

कान्तभक्तिः अधिकृतः प्राप्तः भगवत्स्येव महानेव दर्शनं ममैव महाननुग्रहः कृत इति ॥ २७ ॥ भर्तुः कृष्णस्य (तथाहं च मनःप्राणबुद्धीन्द्रियगुणाश्रयः
रहस्करः रहस्यकार्यकर्त्ता ॥ २८ ॥ भवतीनां मे मया सह वियोगो नास्ति । कुतः सर्वात्मना सर्वस्योपादानकारणेन । अत एव सर्वेषु मनःप्राणादिका- राम
येष्वहमनुगतत्वेन स्थित इति सदृष्टान्तमाह यथेति भूतेषु चराचरेषु महाभूतानि यथा । वाय्वग्निः वायुसहितोऽग्निः वायुश्चाग्निश्चेत्यर्थः तथाहं चेति

नि॰

ननुकारणात्वैसर्वानुगतत्वेचकार्याकार्यकारणभेदः स्यादतआह आत्मन्येवेति ॥ ननुनित्यसिद्धस्यज्ञातः सृष्ट्यादिरूपता॰ तत्राह भूतेंद्रियगुणात्म
ना ॥ बुद्धींद्रियेति वा पाठः ॥ तद्रूपेणेति ॥ नन्वविकारस्य कुतस्तद्रूपतेति तत्राह ॥ आत्ममायानुभावेनेति ॥ २० ॥ नन्वात्मनो भूतादिरूपत्वेन दोषप्रसंगात्त
त्राह ॥ आत्मेति ॥ आत्मा तु शुद्धः कुतः अगुणान्वयः न गुणो येष्वन्वेतीति तथा ततः कुतः व्यतिरिक्तः तदपि कुतः व्यतिरिक्तः तदपि कुतः ज्ञानमयः ज्ञानस्वरू
पः ॥ नन्वहं प्रत्ययेन स्वयं वेद्यमेवात्मनो नानावस्थत्वमिति कुतः शुद्ध इति तत्राह सुषुप्तेति ॥ मायाकार्यमनोवृत्तिभिर्विश्वतैजसप्राज्ञरूपेण प्रतीयते न स्वत
इत्यर्थः ॥ २१ ॥ कुतः ॥ मनोनिरोधे न तदभावादिति व्यतिरेकं दर्शयितुं मनोनिरोधं विधत्ते ॥ येनेति ॥ उत्थितः उपमानं यथा मिथ्याभूतमेव स्वप्नं ध्यायति ॥ एवं बाधिना

आत्मन्येवात्मनात्मानं सृजे हन्म्यनुपालये ॥ आत्ममायानुभावेन भूतेंद्रियगुणात्मना ॥ २० ॥ आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः
सुषुप्तस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ येनेंद्रियार्थान्ध्यायेत मृषा स्वप्नवदुत्थितः ॥ तन्निरुध्यादिंद्रियाणि विनिद्रः प्रत्यपद्यत ॥ २१ ॥
एतदंतः समाम्नायो योगः सांख्यं मनीषिणां ॥ त्यागस्तपो दमः सत्यं समुद्रांता इवापगाः ॥ २२ ॥ यत्त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशां ॥

नपीन्द्रियार्थान् शब्दादीन् ॥ येन मनसा ध्यायेत चिंतयेत ॥ ध्यायंश्च नेंद्रियाणि प्रत्यपद्यत प्रापतन्म मनसः संनिकर्षार्थं मदनुध्यानकामया
नः विनिद्रः अनलसः संनिरुद्ध्यादिंद्रियं ह्येदिति ॥ २१ ॥ तावता च कृतार्थो भवतीत्याह ॥ एतदंत इति ॥ एष मनोनिरोधः अंतः समाप्तिः फलं यस्य सः स
माम्नायो वेदः सर्वत्र पर्यवस्यतीत्यर्थः ॥ योगोऽष्टांगः सांख्यमात्मानात्मविवेकः त्यागः संन्यासः ॥ तपः स्वधर्मः ॥ दमः ॥ इंद्रियदमनं मार्गभेदेऽप्येकत्र पर्यव
सानेदृष्टांतः ॥ समुद्रांता आपगा नद्य इवेति ॥ २२ ॥ ननुकिमन्यादिस्मानात्मविद्यया प्रलोभयसि ॥ वयं तु सर्वदा हरे सकलगुणगणालंकृतेन त्वया वि
रहेण संतप्ताः स्म इति चेत्तत्राह यत्त्वहमिति ॥ दृशां दूरे यद्वर्ते तन्मदनुध्यानार्थं ॥ न तु ध्यानं समनसः संनिकर्षार्थमिति ॥ २४ ॥

३ मे

९१

२०पू
१३८

एतदुपपादयति त्रयेण यथा दूरचरे इति ३५ ॥ ३६ ॥ उपैष्यथेति माधुर्यमात्रामिति वेदितव्यमाहयेति ॥ हे कल्याण्यः स्वभर्तृभिः प्रतिबद्धा या वने क्रीडता मया
सह अलब्धक्रीडाः ता अत्रैव मां प्राप्ताः प्राप्ताः ॥ ३७ ॥ तत्सन्देशेनागता स्मृतिर्यासां ताः प्रथमार्थे द्वितीया ॥ ३८ ॥ यदूनां सहितः शत्रुः अघकृत दुः
खदः ॥ दिष्ट्या आप्तैः आप्तैः प्राप्तैः हितैर्वा सह ॥ ३९ ॥ अन्या ऊचुः ॥ कच्चिदिति ॥ ना अस्मान् वाक्यैर्विभ्रमैः स्वागतभाजितः पूजितः ॥ ४० ॥ अन्या ऊचुः ॥ क्वचिदि

यथा दूरचरे प्रेष्ठे मन आविश्य वर्त्तते ॥ स्त्रीणां न च तथा चेतः सन्निकृष्टेऽक्षिगोचरे ३५ ॥ मय्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृत्ति यत् ॥ अ
नुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथ ३६ ॥ या मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः ॥ अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्त
या ॥ ३७ ॥ श्रीशुक उवाच ॥ एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः ॥ ता ऊचुरुद्धवं प्रीतास्तत्सन्देशागतस्मृतीः ३८ ॥ गोप्य ऊचुः ॥ दिष्ट्याहि
तो हतः कंसो यदूनां सानुगोऽघकृत् ॥ दिष्ट्याप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ॥ ३९ ॥ कथयति विशेषतः प्रियः सपुरयोषि
ता ॥ नास्त्र वध्येन तद्वाक्यैर्विभ्रमैश्च स्वागतभाजितः ॥ ४० ॥ क्वचिद्गदाग्रजः सौम्य करोति पुरयोषितां ॥ प्रीतिं नः स्निग्धसव्रीडहासोदारेक्ष
णार्चितः ॥ ४१ ॥ अपि स्मरति नः साधो गोविन्दः प्रस्तुते क्वचित् ॥ गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः स्वैरकथान्तरे ॥ ४२ ॥ ताः किं निशाः स्मर
श्री॰ ति यासु तदा प्रियाभिर्वृन्दावने कुमुदकुन्दशशाङ्करम्ये ॥ रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ॥ ४३ ॥

ति ॥ नोऽस्माकं करणीयां प्रीतिं कच्चित्पुरयोषितां करोति स्निग्धवत्सव्रीडहासेनोदारमीक्षणं तेनार्चितः ताभिरस्माभिर्वा ॥ ४१ ॥ पुनरन्या ऊचुः ॥ कि
मनया चिन्तया ॥ अस्माकं क्वचित् प्रस्तुते स्मरति किं ॥ ग्राम्याः अविदग्धाः ॥ ४२ ॥ अन्या ऊचुः ॥ ताः किमिति ॥ कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने च
रणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां ॥ अस्माभिः प्रियाभिरीडिता मनोज्ञाः कथा यस्य सः तदा यासु निशासु रेमे ताः कदाचित् किं स्मरति वा न वेति

राम
१३८

नृ

त्वन्निमित्ते न शोके न तप्ताः नः अकस्मात्तैः करस्पर्शादिभिः संजीवयन् किं त्यक्ष्यतीति ॥ ४४ ॥ अन्या ऊचुः कस्मादिति अनन्यगतित्वेन पूर्वं
मया वयं त्वं प्रतिपद्य स्वर्गप्राप्तः कस्मादिहागमिष्यतीति ॥ ४५ ॥ अन्या ह्यपरमार्थमूचुः किमस्माभिरिति वनचारीभिरस्माभिः अन्याभिराजक
न्याभिर्महात्मनो धीरस्य किं च ॥ श्रीपतेः नरस्यात्मानो वृत एव आप्तकामस्य अत एव हृतात्मनः पूर्णस्य किं कोऽप्यर्थः क्रियते न न कश्चिदिति ॥ ४६ ॥

नो अप्येषतीह हताशा हेतुनिष्ठाः त्वद्गतया शुचा संजीवयन्त्यो गात्रैर्यथेंद्रो वनमंबुदैः ॥ ४४ ॥ कस्मात्कृष्ण इहायाति प्राप्तराज्यो हताहितः
नरेंद्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः ॥ ४५ ॥ किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः ॥ श्रीपते राप्तकामस्य क्रियेतार्थः
कृतात्मनः ॥ ४६ ॥ परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिंगला ॥ तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ॥ ४७ ॥ क उत्सहेत संत्यक्तुं
उत्तमश्लोकसंविदं ॥ अनिच्छतोऽपि यस्य श्रीरंगान्न च्यवते क्वचित ॥ ४८ ॥ सरिच्छैलवनोद्देशा गावो वेणुरवा इमे ॥ संकर्षणसहायेन कृष्णे
नाचरिताः प्रभो ॥ ४९ ॥ पुनः पुनः स्मारयंति नंदगोपसुतं बत ॥ श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ॥ ५० ॥ गत्या ललितयोदार
हासलीलावलोकनैः ॥ माध्व्या गिरा हृतधियः कथं तद्विस्मरामहे ॥ ५१ ॥ हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ॥ मग्नमुद्धर गोविंद गो
कुलं वृजिनार्णवात ॥ ५२ ॥ शुक उवाच ॥ ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वराः ॥ उद्धवं पूजयांचक्रुर्ज्ञात्वात्मानमधोक्षजं ॥ ५३ ॥ उवास क

यतो घरमानायाः कृष्णसंगतिः सेवास्मानाकुलयति अतो नैराश्यमेव परं ॥ तिविन्मासान्गोपीनां विनुदन्शुचः कृष्णलीलाकथा गायन्रमयामास गोकुले
सुखं तत्र आतिडुःकरमित्याहुः परं सौख्यमिति स्वैरिणी कामचारिणी ॥ ४७ ॥ संविदं एकांतवार्तां ॥ ४८ ॥ किं च ॥ तद्विस्मर्तो न न तावद्दुःखम त्विमा विनास्माकं संभ
वतीत्याहुः सरिच्छैलेति त्रिभिः आचरिताः सेविताः ॥ ४९ ॥ ५० ॥ हे उद्धव तं कथं विस्मरामेति ॥ ५१ ॥ २ ॥ श्रीकृष्णमधोक्षजं ज्ञात्वा तं च स्वात्मानं ज्ञात्वा ॥ ५२ ॥ विनुदन्

२०.पू
१३९

५५ ॥ सरिद्वनगिरिद्रोणीर्दिशत्प्रत्येकं कृष्णलीलास्पदस्थानादिभिः संस्मारयन्नुरेमे ॥ ५६ ॥ कृष्णावेशेनात्मनो मनसो विक्लवत्वं वैक्लव्यं ॥ ताः गोपीर्नमस्यन्ननमहा-
रिष्यन्नु ॥ उन्नमस्यात्मनो गोपवधूनमस्कृतिरन्यथा न भवतीति दर्शयितुं तासां महत्त्वं पंचभिर्जगौ उवाच ॥ ५७ ॥ एताः इति ॥ एताः परं केवलं तनुभृतः सफलजन्मा-
नः रूढभावाः परमप्रेमवत्यः ॥ यदिति यद्रूढभावं भवति योगमुमुक्षवः ॥ मुनयो मुमुक्षवश्च अपि वाञ्छन्ति ॥ वयं भक्ताश्च अपि अतः अनंतस्य कथारसो गायस्त-
स्य ब्रह्मजन्मभिर्विप्रस्य वधिभिः शौक्रसावित्रयाज्ञिकैस्त्रिभिः किं कोऽतिशयः ॥ यत्र तत्र जातः स एव सर्वोत्तम इत्यर्थः ॥ यद्वा ॥ अनंतकथारसो यस्य त-
स्य ब्रह्मजन्मभिश्चतुर्मुखजन्मभिरपि किमित्यर्थः ॥ ५८ ॥ किं च ईश्वरप्रसादे महत्त्वे कारणं न स्ववनजातिराचारो ज्ञानं वा कारणं ॥ किंतु ॥ केवलं भजन-

यावंत्यहानि नंदस्य व्रजेवात्सीत्स उद्धवः व्रजौकसां क्षणप्रायाण्यासन्कृष्णस्य वार्तया ॥ ५५ ॥ सरिद्वनगिरिद्रोणीर्वीक्षन्कुसुमितान्द्रुमान् कृष्णं संस्मारयन्रेमे हरिदासो व्रजौकसां ॥ ५६ ॥ दृष्ट्वैवमादि गोपीनां कृष्णावेशात्मविक्लवं ॥ उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ ॥ ५७ ॥ एताः परं तनुभृतो भुवि गोपवध्वो गोविंद एव निखिलात्मनि रूढभावाः ॥ वांछंति यद्भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनंतकथारसस्य ॥ ५८ ॥ क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः नन्वीश्वरोनुभजतोविदुषोपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥ ५८ ॥ नायं श्रियोंग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोन्याः ॥ रासोत्सवेस्य भुजदंडगृहीतकं-ठलब्धाशिषां य उदगाद्व्रजवल्लवीनां

मेवेत्याह ॥ क्वेमाः इति ॥ साक्षादजतः ईशः ननु अहो ॥ उपयुक्तः सेवितः अगदराजः अमृतं यथेति ॥ ५९ ॥ अत्यंतं
पूर्वश्लोकार्थं गोपीषु भगवतः प्रसादं स्त्याह ॥ नायमिति ॥ अंग वत्स हे ॥ उ अहो नितांतरतेः एकांतरतायाः श्रियोपि नायं प्रसादः अनुग्रहोस्ति ॥ नलिनस्येव गंधो यास
धो रुक्कांतिश्च यासां तासां स्वर्गांगनानां अप्सरसामपि नास्ति अन्याः पुनर्दूरतो निरस्ताः रासोत्सवे कृष्णभुजदंडाभ्यां गृहीतः आलिंगितः कंठो यासां १३९
लब्धा आशिषो याभिः तासां गोपीनां य उदगात् आविर्बभूव ॥ ६० ॥

किंच ॥ आस्तां तावद्गोपीनां भाग्यं ममत्वेतावत् श्लाघ्यमित्याह आसामिति ॥ गोपीनां चरणरेणुभाजां गुल्मादीनां मध्ये यत्किमप्यहं स्यामित्याशंसा ॥ कथंभूता
नां यास्ता इति ॥ आर्याणां मार्गं धर्मं च हित्वा ॥ ६१ ॥ पुनस्ता एव विशिनष्टि या वा इति ॥ योगेश्वरैरप्यात्मन्येवार्चितं तत्स्तनेषु न्यस्तं परिरभ्य तापं जहुरिति ॥ ६२ ॥ एवं मह
त्त्वं प्रतिपाद्य नमस्करोति वंद इति ॥ ६३ ॥ अनुज्ञाप्य अनुज्ञातां विधाय आमन्त्र्य च दृष्ट्वा ॥ ६४ ॥ नोऽस्माकं मनसो वृत्तयः कृष्णपदाम्बुजाश्रयाः स्युः अपि

आसामहो चरणरेणुजुषामहं स्यां वृंदावने किमपि गुल्मलतौषधीनां ॥ या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुंदपदवीं श्रुति
भिर्विमृग्यां ॥ ६१ ॥ या वै श्रियार्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्यां ॥ कृष्णस्य तद्भगवतश्चरणारविंदं न्यस्तं स्त
नेषु विजहुः परिरभ्य तापं ॥ ६२ ॥ वंदे नंदव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ॥ यासां हरिकथोद्गीतं पुनाति भुवनत्रयं ॥ ६३ ॥ शुक उवाच ॥
अथ गोपीरनुज्ञाप्य यशोदां नंदमेव च ॥ गोपानामंत्र्य दाशार्हो यास्यन्नारुरुहे रथं ॥ ६४ ॥ तं निर्गतं समासाद्य नानोपायनपाणयः ॥ नंदा
दयोऽनुरागेण प्रावोचन्नश्रुलोचनाः ॥ ६५ ॥ मनसो वृत्तयो नः स्युः कृष्णपादांबुजाश्रयाः ॥ वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु
॥ ६६ ॥ कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ॥ मंगलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥ ६७ ॥ एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप ॥
उद्धवः पुनरागच्छन्मथुरां कृष्णपालितां ॥ ६८ ॥ कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसां ॥ वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ ६९ ॥
॥ इति श्रीभागवते महापुराणे दशमस्कंधे सप्तचत्वारिंशोऽध्यायः ॥ श्रीरामकृष्णाय नमः ॥

धायिनीः अभिधायिन्यः ॥ ६६ ॥ कृष्णे रतिः स्यादिति ॥ ६७ ॥ ६८ ॥ कृष्णादिभ्यो भक्त्युद्रेकमाह उपायनानि चाददादिति ॥ ६९ ॥ दशमे सप्तचत्वारिंशः ॥ अष्टचत्वारिंशे
केशवः कुब्जयामरीरमत ॥ अक्रूरस्य गृहं गत्वा नागसाह्वयमादिशत् ॥ १ ॥ सैरंध्रीकाममासंपूर्य पूरयित्वा मनोरथान् ॥ अक्रूरस्य ततः कृष्णेन पार्थानसौख्यपत

२·५ महार्हैरनर्घैः उपस्कारैः गृहोपस्कारैरोपचितं ॥ कामोपायैस्तदुद्दीपकैः स्वान्तबंधादिलोक्येहस्पदं हितं ॥ १ ॥ यथायथोचितं २४ ॥ अमाधितो योपताम
१४· पादितग्रात्मदेहो यया ॥ सव्रीडं यल्लीलया योऽस्तं स्मितं ग्रीवद्विभ्रमेषुतथा नैरीक्षितेन हयपलक्षिता ॥ ५ ॥ अनुलेपार्पणादन्यतन्मयाः प्राणनायेनाप्तेति दर्श

श्रीकृष्णउवाच ॥ अथविज्ञायभगवान्सर्वात्मासर्वदर्शनः ॥ सैरंध्र्याःकामतप्तायाःप्रियमिछन्गृहंययौ ॥ १ ॥ महार्होपस्कराढ्यैर्वैकामोपायोपबृं
हितः ॥ मुक्तादामपताकाभिर्वितानशयनासनैः ॥ धूपैःसुरभिभिर्दीपैःस्रग्गन्धैरपिमंडितं ॥ २ ॥ गृहंतमायांतमवेक्ष्यसासनात्सद्यःसमुत्था
यहिजातसंभ्रमा ॥ यथोपसंगम्यसखीभिरच्युतंसभाजयामाससदासनादिभिः ॥ ३ ॥ तथोद्धवःसाधुतयाभिपूजितोन्यषीदद्उर्व्यामभि
मृश्यचासनं ॥ कृष्णोपितूर्णंशयनंमहाधनंविवेशलोकाचरितान्यनुव्रतः ॥ ४ ॥ सामज्जनालेपदुकूलभूषणस्रग्गंधतांबूलसुधासवा
दिभिः ॥ प्रसाधितात्मोपससारमाधवंसव्रीडलीलोत्स्मितविभ्रमेक्षितैः ॥ ५ ॥ आहूयकांतांनवसंगमह्रियाविशंकितांकंकणभूषितेक
रे ॥ प्रगृह्यशय्यामधिवेश्यरामयारेमेनुलेपार्पणपुण्यलेशया ॥ ६ ॥ सानंगतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रंत्यनंतचरणेनरुजोमृजं
ती ॥ दोर्भ्यांस्तनांतरगतंपरिरभ्यकांतमानंदमूर्तिमजहादतिदीर्घतापं ॥ ७ ॥ सैवंकैवल्यनाथंतंप्राप्यदुःप्राप्यमीश्वरं ॥ अंगरागार्पणे
नाहोदुर्भगेदमयाचत ॥ ८ ॥ अहोष्यतामिहप्रेष्ठदिनानिकतिचिन्मया ॥ रमस्वनोत्सहेत्यक्तुंसंगंतेंबुरुहेक्षण ॥ ९ ॥ तस्यैकाम
वरंदत्वामानयित्वाचमानदः ॥ सहोद्धवेनसर्वेशःस्वधामागमदर्चितं ॥ १० ॥ श्रीगोपालायनमः ॥

पितं अनुलेपार्पणलेशपुण्येनेत्युक्तं नतुपुण्यस्याल्पत्वविवक्षया ॥ ६ ॥ कुचादीनांरुजोमृजंतीतिनिघ्नतीचरणेन ॥ ७ ॥ काममेवप्राकृतदृष्ट्याःयाचतांनचगो रूप
पाःस्वमनसःविशिष्टनिंदुर्भगेत्युक्तं ॥ कृतार्थत्वेतितत्स्थानंरहः ॥ ८ ॥ ९ ॥ काममेववरंदत्वामानयित्वाबालकाःहिरानैः ॥ १० ॥ १४·

मनोग्राह्यं विषयतामेवं प्राप्तत्वात्स्थूलात् ॥ ११ ॥ किंचिच्चिकीर्षयन्नहस्मिनाशरग्रमस्थानंकारयितुमिच्छन्नित्यर्थः अक्रूरप्रियकाम्यया च ॥ १२ ॥ आराद्दूरत
एव ॥ १३ ॥ १४ ॥ आशुपदमिति विच्छेदः अपरात्मा सर्वतो धारयन्नित्यन्वयः ॥ १५ ॥ १६ ॥ वायुवयोरिदं ज्ञालं अद्भुतं समेधितं च ॥ १७ ॥ वामिदं ज्ञालं इत्यादि व्यवहारदृष्ट्या
त्मा परमार्थमाह पृथग्वामिति ॥ नागान्मयोर्युवां क्वतः जगद्धेतू ॥ नरपि क्वतः प्रधानपुरुषौ तदात्मको ॥ अतो भवद्भ्यां विना परं कारणं ॥ अपरं कार्यं नास्तीति
॥ १८ ॥ तत्प्रत्यक्षादि सिद्धं कथं नास्तीत्याशंक्याह आत्मस्वरूपमिति ॥ ईश्वरमपरमेश्वरब्रह्मेति वा पाठः ॥ ज्ञानिशक्तिरात्मनैव रूपमिदं विश्वम्

दुराराध्यं समाराध्यं विश्वं सर्वेश्वरेश्वरं ॥ यो वृणीते मनोग्राह्यमसत्वात्त्वमनीषया ॥ ११ ॥ अक्रूरभवनं कृष्णः सहरामोऽद्भवः प्रभुः
किंचिच्चिकीर्षयन्नस्माद्गात्क्रूरप्रियकाम्यया ॥ १२ ॥ सतां त्र वरश्रेष्ठानाराद्वीक्ष्य स्ववांधवान ॥ प्रत्युत्थाय प्रमुदितः परिष्वज्याभ्यनंदयत्
ननाम राम कृष्णं च सर्वतेरप्यभिवादितः ॥ पूजयामास विधिवत्कृतासनपरिग्रहात् ॥ १४ ॥ पादावनेजनीयाद्यैर्धारयन्निरसात्मृप ॥ अहं
णोनां वरैर्दिव्यैर्गंधधन्वाम्भूषणोत्तमैः ॥ १५ ॥ अर्चित्वा गिरमानम्यपादावकातो मुजत ॥ प्रश्रयावनतोऽक्रूरः कृष्णं रामं च भाषत ॥ १६ ॥
दिष्ट्यापापो हतः कंसः मातुगो वामिदं कुलं ॥ भवद्भ्यामुद्धृतं कृष्णादुरंतावसमेधितं ॥ १७ ॥ युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ॥ भ
वद्भ्यां न विना किंचित्परमस्ति न चापरं ॥ १८ ॥ आत्मसृष्टमिदं विश्वमत्वाविश्यस्वशक्तिभिः ॥ इयते बहुधा ब्रह्मन्श्रुतप्रत्यक्षगोचरं
॥ १९ ॥ यथा हि भूतेषु चराचरेषु मत्याराद्यो योनिषु भांति नाना ॥ एवं भवानेव बलन्ध्यात्मयोनिरात्मा त्मतंत्रो बहुधा विभाति ॥ २० ॥ ॥

त्वां रिरूपकारणात्वारन्तुप्रविश्यैष्पत्तुप्रविश्य पदस्थितः श्रुतप्रत्यक्षगोचरं यथा भवति तथा बहुधा भवानेव प्रतीयते ॥ १९ ॥ एकस्यैव बहुधा प्रतीतिमदृष्टांतमाह
यथा हीति ॥ योनिषु स्वस्वैव रूपांतरणाभिव्यक्तिस्थानेषु ॥ चराचरेषु भूतेषु यथा महीप्रभृतीनि कारणान्येव नाना भांति आत्मयोनिषु स्वकारणकेषु भूत
भांति केषु ॥ जीवोऽपि नरमृगादिशरीरेषु बालयुवावृद्धस्थाहृतथा नथा प्रतीयत इति तद्वदेवार्थमात्मा तन्त्रग्रहणं ॥ २० ॥

द॰ पू॰
१४१

ननु सुखदुःखादिकर्तृत्वेन सगुणत्वेन च मम जीवस्य बद्धत्वं स्यादित्यत आह नहि नहीत्याह सहजमीति ॥ ननु गुणाः कर्मभिर्बध्नाति गुणैः कर्मभिर्बध्नात्यर्थः ॥ यतः ह्यचक्रदाचिरपि
बंधहेतुरविघातवन्नेवास्ति ॥ कुत इत्यत आह ॥ ता नात्मन इति मायाप्रधानावरकत्वादिति भावः ॥ १ ॥ किंच ॥ आत्मा तावन्न बंधनं शंका ॥ यतो विद्योपाधे
जीवात्मनोपि न बद्धतो बंधाहीत्याह देहाद्युपाधेरिति ॥ भवो जन्म: तन्मूलादिभिरात्मनः स्वप्नस्वरूपतो नस्यादिति ॥ ननु मम बंधाभावे वस्तान्वया
किं मोक्षेण ॥ गीकर्त्तैः उभितिवेन्नहिं बंधाभावे मोक्षाशंसनवारापन्नो बंधोपीत्याशंक्याह ॥ अत इति ॥ यतो न ॥ विद्यात्मनो न बंध मोक्षस्त्व ॥ एवमुभोतस्या

सहजस्यथोत्तमपि पापिविशिष्टं जनसहतत्वगुणैः स्वशक्तिभिः ॥ न बध्यते न हृष्णा कर्मभिर्बध्नात्मनस्तेषु च वंधहेतुः ॥ १ ॥ दे
हाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदात्मनः स्यात् ॥ अतो न बंधस्तव नैव मोक्षः स्यातां निकामस्त्वयि नोऽविवेकः ॥ २ ॥
त्वय्योदितोयं जगतो हिताय यदा यदा वेदपथः पुराणः ॥ बाध्येत पाषंडपथैरसद्भिस्तदा भवान् सत्त्वगुणं बिभर्ति ॥ ३ ॥ स त्वं प्र
भोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः ॥ अक्षौहिणीशतवधेन सुरेतरांशराज्ञाममुष्य च कुलस्य यशो
वितन्वन् ॥ ४ ॥

धा:

तामित्यर्थः ननु खलु लेपा बद्धः श्रुतवान् यमुनाहृदे दृष्टवानसि ॥ अतः कथमुभयं नास्तीत्यत आह ॥ निकाम इति ॥ त्वा
मिथ्यायासनु रूपस्त्वयि नोऽस्माकमविवेक एव परमेवं भूत इति ॥ यद्वा ॥ नः अविवेक एव तवोभोयस्यामामिति ॥ २ ॥ ननु तर्हि मे भावनात्वत्तिद्यरित्वाणि च
शक्तिरजतवत् ॥ अविद्याकल्पितान्येव किं ॥ न हि न हि ॥ इयं तनवलीलेत्याह ॥ त्वय्योनत्वयोदितइति ॥ ३ ॥ हरेतरांशा यथा राजानस्तेषां मक्षौहिणीशता
नां वधेन भूभारमपनेतुं ॥ स्वांशेन रामेण सहावतीर्णोसीति ॥ ४ ॥

ताम
१४१

अत एवंभूतस्य तवागमनेन कृतार्थोऽस्मीत्याह त्वयेणानुग्रहेति ॥ हे ईश अद्य नो वसतयो गृहाः तपोवनानि वद्रूपाण्याः कुतः यावसतीत्वसाकृतान्प्रविष्टः
कथंभूतः यस्य तव पादसलिलमेव गंगा त्रिजगत्पुनाति ॥ यस्य त्वं पंचयज्ञदेवतामूर्त्तिः स त्वं जगद्गुरुरिति ॥ २५ ॥ त्वमनोरथपरिपूरित इति तं प्रत्याह ॥
कः पंडित इति ॥ कृतगिरः सत्यवाचस्त्वत्तोऽपरं शरणं कः समीपागच्छेत ॥ यतो भवाननुभजतः सर्वानपितः कामान्स्वं ददाति ॥ आत्मानमपीति ॥ २६ ॥ नः अवि

अद्येश नो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्त्तिः ॥ यत्पादशौचसलिलं त्रिजगत्पुनाति स त्वं जगद्गुरुरधोक्षज याः प्र
विष्टः ॥ २५ ॥ कः पंडितस्त्वदपरं शरणं समीयात भक्तप्रियादृतगिरः सुहृदः कृतज्ञात ॥ सर्वान्ददाति सुहृदो भजतोऽभिकामानात्मानम
प्युपचयापचयो न यस्य ॥ २६ ॥ दिष्ट्या जनार्दन भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः ॥ छिंध्याशु नः सुतकल
त्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायां ॥ २७ ॥ इत्यर्चितः संस्तुतश्च भक्तेन भगवान्हरिः ॥ अक्रूरं सस्मितं प्राह गीर्भिः संमो
हयन्निव ॥ २८ ॥ भ गवा नुवाच ॥ त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बंधुश्च नित्यदा ॥ वयं तु रक्ष्याः पोष्याश्च अनुकंप्याः प्रजा हि वः ॥ २९ ॥
भवद्विधा महाभागा निषेव्या अर्हसत्तमाः ॥ श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥ ३० ॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छि

वेविकीनां तत्रापि इह गृहे च ॥ २८ ॥ न ॥ वः युष्माकं प्रजाः पुत्राद्वयमिति ॥ २९ ॥ ननु नृभिर्देवाः सेव्या लामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥ ३१ ॥
इति प्रसिद्धं तत्राह देवा इति ॥ स्वार्थाः स्वकार्यसाधनपराः साधवस्तु केवलं परानुग्रहपराः परमार्थतस्तु साधव एव देवा इति त एव सेव्या इत्यर्थः ॥ ३० ॥ न
हि मृच्छिलादिमयाः किं देवा इत्यतो नेत्यत आह न हीति ॥ अम्मयानि तीर्थानि मृन्मयाः शिलामयाश्च देवा न भवंतीति न अपि तु भवंत्येव ॥ तथापि साधूनां तेषा
वमहदंतरमित्याह ते पुनंतीति ॥ ३१ ॥ श्रीराम

किंचिच्चिकीर्षयनुग्रागारिति यदुक्तं तत्कार्यमादिशति ॥ नः सुहृदां मध्ये भवान् श्रेष्ठः अतः पांडवानां श्रेयश्चिकीर्षया गजाह्वयं गच्छ त्वं गच्छेति ॥ यद्वा ॥ त्वे
ति शश्वकृपारं ॥ विहः ॥ आत्मीयेत्यर्थः ॥ ३२ ॥ राज्ञा धृतराष्ट्रेण ॥ वसंतेति वसंति ॥ शुश्रुम श्रुतवंतो वयं ॥ ३३ ॥ दुष्टाये त्वपुत्रा दुर्योधनादयस्तद्वशेन गच्छतीति तथा ॥ यतः
अंधदृक् अंधनेत्रः ॥ ३४ ॥ ३६ ॥ इति शिर मेः ष्टचत्वारिंशः ॥ उत्पन्नपंचाशत्तमे तु गत्वाः क्रूरो गजाह्वयं ॥ राज्ञः स्वभ्रातृपुत्रेषु वैषम्यमागमत् ॥ पौरवेंद्राणां यशो

स भवान्सुहृदां वै नः श्रेयान्श्रेयश्चिकीर्षया ॥ जिज्ञासार्थं पांडवानां गच्छस्व त्वं गजाह्वयं ॥ ३२ ॥ पितर्युपरते बालाः सह मात्रा सुदुःखिताः
आनीताः स्वपुरं राज्ञा वसंत इति शुश्रुम ॥ ३३ ॥ तेषु राजांबिकापुत्रो भ्रातृपुत्रेषु दीनधीः ॥ समो न वर्त्तते नूनं दुःपुत्रवशगोंधदृक् ॥ ३४ ॥ ग
च्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ॥ विज्ञा यतद्विधास्यामो यथा शं सुहृदां भवेत् ॥ ३५ ॥ इत्यक्रूरं समादिश्य भगवान्हरिरीश्वरः
संकर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३६ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टचत्वारिंशोध्यायः ॥ श्रीशुक उवाच ॥ स
गत्वा हास्तिनपुरं पौरवेंद्रयशोंकितं ॥ ददर्श तत्रांबिकेयं सभीष्मं विदुरं पृथां ॥ १ ॥ सहपुत्रं च बाल्हीकं भारद्वाजं सगौतमं ॥ कर्णं सुयो
धनं द्रौणिं पांडवान्सुहृदोपरान् ॥ २ ॥ यथावदुपसंगम्य बंधुभिर्गांदिनीसुतः ॥ संपृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययं ॥ ३ ॥ उवास
कतिचिन्मासान्राज्ञो वृत्तविवित्सया ॥ दुःप्रजस्याल्पसारस्य खलछंदानुवर्तिनः ॥ ४ ॥ तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् ॥

भिः तत्कृतैः वेवद्राह्मणायतनादिभिरंकितं ॥ १ ॥ बाल्हीकपुत्रः सोमदत्तः भारद्वाजो द्रोणः गौत प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितं ॥ ५
मः कृपः ॥ २ ॥ अंबयपत्राराले ॥ ३ ॥ दुःप्रजस्य अप्रजस्य ॥ अल्पसारस्य मंदधृतेः खलानां कर्णादीनां छंदमिच्छामनुवर्तितुं शीलं यस्येति ॥ तथा त
स्य ॥ ४ ॥ तेजः प्रभावं ॥ ओजः शारीरं तेजः ॥ वीर्यं शौर्यं ॥ न सहद्भिः सहमानैश्चिकीर्षितं रतउपदिष्टकर्तुमिष्टं ॥ ॥ ५ ॥ श्रीरामसहाय ॥

...विषसंदानादि ॥ अपेशलं अन्याय्यं तेजस्तु तेज इत्यादि सर्वं कथयामास ॥ ६ ॥ तत्कथनात्पूर्वं तत्र स्थित्वा यावत्तमाह ॥ इत्यादिति ॥ अकृत्यानां कलालेश
...यथा क्लेशं इत्यर्थः ॥ ७ ॥ अपि विज्ञामयः कुलस्त्रियः ॥ ८ ॥ पैतृष्वस्रेयान् मत्पुत्रान् ॥ ९ ॥ सांत्वयिष्यति किं ॥ १० ॥ हे महायोगिन् योगोपायो मायाख्यो
...स्यातीति ॥ हे विश्वात्मन् सर्वान्तर्यामिन् हे विश्वभावन विश्वपालक ॥ प्रपन्नानां शरणागतानां ॥ अबलां इतीनां शीरपति ॥ ११ ॥ आपवर्गिकान्मोक्षप्रदात ॥ १२

कृतं च धार्त्तराष्ट्रैर्यद्दहनाद्यपेशलं ॥ आचख्यौ सर्वमेवास्मै यथाविदुर एव च ॥ ६ ॥ इत्थाभ्रातरं प्राप्तमक्रूरमुपसृत्य तं ॥ उवाच जन्मनिल
यस्मरन्त्यश्रुकलेक्षणा ॥ ७ ॥ अपि स्मरंति नः सौम्य पितरौ भ्रातरश्च मे ॥ भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ॥ ८ ॥ भ्रात्रेयो भगवा
न्कृष्णः शरण्यो भक्तवत्सलः ॥ पैतृष्वस्रेयान्स्मरति रामश्चांबुरुहेक्षणः ॥ ९ ॥ सपत्नमध्ये शोचंतीं वृकाणां हरिणीमिव ॥ सांत्व
यिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ॥ १० ॥ कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वभावन ॥ प्रपन्नां पाहि गोविंद शिशुभि
श्चावसीदतीं ॥ ११ ॥ नान्यत्तव पदांभोजात्पश्यामि शरणं नृणां ॥ बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् ॥ १२ ॥ नमः कृष्णाय शुद्धाय
ब्रह्मणे परमात्मने ॥ योगेश्वराय योगाय त्वामहं शरणं गता ॥ १३ ॥ श्रीशुक उवाच ॥ इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरं ॥ प्रारुदद्दुः
खिता राजन्भवतां प्रपितामही ॥ १४ ॥ समदुःखसुखोऽक्रूरो विदुरश्च महायशाः ॥ सांत्वयामासतुः कुंतीं तत्पुत्रोत्पत्तिहेतुभिः ॥ १५
यास्यन् राजानमभ्येत्य विषमं पुत्रलालसं ॥ अवदत्सुहृदां मध्ये बंधुभिः सौहृदोदितं ॥ १६ ॥

शुद्धाय धर्मात्मने ॥ ब्रह्मणे अपरिच्छिन्नाय ॥ परमात्मने जीवस्वरूपाय ॥ अणिमादिसिद्धाय योगाय युक्तानामात्मने ॥ १३ ॥ प्रपितामहः पांडुः तस्य भार्या हि ते ॥ १४ ॥ इत्यया
समदुःखसुखः सुखं दुःखं यस्य सः तस्याः पुत्राणामुत्पत्तिहेतुभिर्नानावैः धर्मानिलेंद्रादिभिः ॥ तत्कथनेनेत्यर्थः ॥ १५ ॥ बंधुभिः रामकृष्णादिभिः सौहृदेन उदितं अक्रूरं प
नरवरमिति ॥ १६ ॥

२०१
१४३

भ्रातर्ज्येष्ठपरत इति पांडोः पुत्रेषु समुपस्थानं त्वमास्थित इति कराङ्कः ॥ १७ ॥ भवत्त्वकथाध्येवं वर्त्तमानः श्रेयो वाप्स्यसीत्याह धर्मेणेति ॥ १८ ॥ तमः नरकं
इहैव मुहुः खमिति भावः ॥ १९ ॥ नतात्मजानात्मजादिषु कथं समत्वं स्यात्तत्राह नेहेति ॥ अत्यन्तं नित्यं संवासः सम्यक् स्थितिः ॥ २० ॥ तत्रतात्वइत्यत्रि
मातापित्रोः स्वकृ खेदः स्वेष्वृत्तेनापि मयाहितं नान्यदित्याह एक इति ॥ २१ ॥ किंच यदा च समृहत्वं समित्ति तदा पित्र्ये शोपार्जितं वित्तापहारितया पुत्रनाम शत्रव एव

अ॰ ३२ व॰ ॥ भो भो वैचित्रवीर्य त्वं कुरूणां कीर्त्तिवर्द्धन ॥ भ्रातर्ज्येष्ठपरिते पांडावधुना समुपस्थितः ॥ १७ ॥ धर्मेण पालयन्नुर्वीं प्रजाः शी
लेन रंजयन् ॥ वर्त्तमानः समत्वेषु श्रेयः कीर्त्तिमवाप्स्यसि ॥ १८ ॥ अन्यथा त्वाचरंल्लोके गर्हितो यास्यसे तमः ॥ तस्मात्त्वं समत्वे वर्त्तेथ
पांडवेष्वात्मजेषु च ॥ १९ ॥ नेह चात्यन्तसंवासः कर्हिचित्केनचित्सह ॥ राजन्स्वेनापि देहेन किं पुनर्जायात्मजादिभिः ॥ २० ॥ एकः प्र
सूयते जंतुरेक एव प्रलीयते ॥ एको नु भुंजते सुकृतमेक एव च दुष्कृतं ॥ २१ ॥ अधर्मोपार्जितं वित्तं हरन्त्यन्येऽल्पमेधसः ॥ संभोजनी
या प्रेते जलानीव जलौकसः ॥ २२ ॥ पुष्णाति यानधर्मेण स्वबुद्ध्या तमपंडितं ॥ ते कृतार्थं प्रहिण्वंति प्राणा रायः सुताश्च यः ॥ २३ ॥
स्वयं किल्बिषमादाय तैस्त्यक्तो नार्थकोविदः ॥ असिद्धार्थो विशत्यंधं स्वधर्मविमुखस्तमः ॥ २४ ॥ तस्माल्लोकमिमं राजन्स्वप्नमाया
मनोरथं ॥ वीक्ष्यायम्यात्मनात्मानं समः शान्तो भव प्रभो ॥ २५ ॥ धृतराष्ट्र उवाच ॥ यथा वदति कल्याणीं वाचं दानपते भवान् ॥ तथानया

ने याइत्याह अधर्मेति संभोजनीयाः पोष्याः पुत्रादय इत्यपरे शेः अल्पमेधसोमृतस्य वित्तं हरन्ति ॥ तल्लोकमेवमनेतप्यानिमर्त्यः प्राप्य यथामृतं २६
स्वजीवनभूतानि जलानि यथा तत्पुत्राह इति तद्वत् ॥ किंच याने वंतुक्षाति ते धनमोहाधर्मेनार्जीवं तोपिवा न परित्यजंतीत्याह पुष्णातीति ॥ स्वबुद्ध्यावि
यासंधियोनेन ॥ राय अर्थाः अकृतार्थमप्राप्तभोगं ॥ २३ ॥ सएनः पापं कपाथे यो नरकं विशतीत्याह स्वयमिति असिद्धार्थः अर्थशून्यो मनोरथः ॥ २४ ॥ स्वप्नमाय
स्वप्नमायामनोरथं स्वप्नतत्तेन तुल्यं ॥ अयम्य नियम्य शान्तः समः भवेति ॥ २५ ॥ हे दानपते क्रूर ॥ न तृप्यामि चलमिति तिनमर्त्यो ॥ २६ ॥

१४३

हृतं ता प्रियवाक्चले ऽस्थिरे हरि नस्थि यतेन तिष्ठती तात्पर्यं [illegible] रामापर्वतः तत्र मध्ये विद्युद् इव । तस्मिन्स्फटिकशिलामये महसेवा
ति स्फुरिता विद्युद्यथाली यतेत दृढ इत्यर्थः ॥ यद्वा ॥ हे राममाला तस्या इयं सौदामनी ॥ १७ ॥ नत्वेवं जानतोपि कथमेव मोह इति चेत्त

तथापि हृतात्सोऽस्मद् हरि नस्थीयते चले ॥ ७ ज्ञा ७ ॥
धुनोत्यन्यथा ऽप्रमाद ॥ भूमेर्भागवतां यो यो वती
हृता ज्ञाक्तिभजते तत्र त्रुप्रविष्टः । तस्मैन मोऽद्वरवयो
च ॥ इत्यभिप्रेत्य नृपते रभिप्रायं सपार वः । हृहृदि
धृत तद्द्रु विचेष्टितं ॥ पांडवास्म्रति कौरव्य यरर्थः प्रेषि

गविषमे विद्युत्सौदामिनी यथा ॥ १७ ॥ इश्वरस्य विधिं कोन्वि
र्णीयदेः कुले ॥ १८ ॥ योऽदुर्विमर्शपथया निजमायये रस्त
धविहारं तत्र समारभ्य चक्रगतये परमेश्वराय ॥ १९ ॥ श्रीकृष्णा
: समनुज्ञातः पुनर्यदुपुरीमगात् ॥ २० ॥ तां संगमकं संस्था
नः स्वयं ॥ २१ ॥ इति श्रीम स्कंधे एकोनपंचाशो ऽध्यायः ॥ ४९ ॥

आह इश्वरस्येति विधिं विधानं मायामिति पावत ॥ १८ ॥ अत एवमेव नस्पृतिय इति दुर्विमर्शपथया या ऽवितर्कमार्गया ॥ गणान्कार्माणि नत्पाला
निव विभजते विविध मरे हा ति ॥ दुरवबोधो यो विहारस्तस्य क्रीडाराः तत्र ध्यानं [illegible] कारणं यस्य संसारचक्रस्य अत एव तस्य गतिर्यस्मात् तस्मै नमः ॥

श्रीभागवतटीका ९ [illegible]

राम
१४४

दशमः उत्तरार्द्धः

२.३.
१

श्रीगणेशाय नमः ॥ ततः प्रवाशत्रुमेत्य जरासंधमयाद्रिव ॥ कारयित्वा तु धोडं गतं त्रिनाथनिजं जनम् ॥ ॥ कपटात्कपटैरेव हत्वा रैत्यानयत्ततः ॥ श्रुजप
च जरासंधधर्म्मो ज्ञो वतु धार्म्मिकम् ॥ १ ॥ अस्तिप्राप्तिं समस्तकेऽ इयतुः जगमत्तः कंसे शोकः क्रुद्धो ऽमर्षः ताभ्यां युतः ॥ २ ॥ न्यहणान्नहणोध ॥ ३ ॥ त

शुकउवाच ॥ अस्तिः प्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ ॥ हते भर्त्तरि दुःखार्त्ते ईयतुः स्व पितुर्गृहान् ॥ १ ॥ पित्रे मगध
राजाय जरासंधाय दुःखिते ॥ वेदयांचक्रतुः सर्वमात्मवै धव्यकारणं ॥ २ ॥ स तदप्रियमाकर्ण्य शोकामर्षयुतो
नृप ॥ अयादवीं महीं कर्त्तुं चक्रे परममुद्यमम् ॥ ३ ॥ अक्षौहि णीभिर्विंशत्या तिसृभिश्चापि संवृतः ॥ यदुराजधानी
मथुरां न्यरुणत् सर्वतो दिशम् ॥ ४ ॥ निरीक्ष्य तद्बलं कृष्ण उद्वेल मिव सागरम् ॥ स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलं
चिंतयामास भगवान् हरिः कारणमानुषः ॥ तद्देशकालानु गुणं स्वावतारप्रयोजनं ॥ ६ ॥ १ ॥ राम राम

स्वबलं सैन्यं उद्वेलं लंघितमर्यादं सागरमिव तेन तत्स्वबलेन संरुद्धं ॥ ५ ॥ केवलमेवं हनिष्यामि इतं मागधं बाहत्वा बलं गृह्णामि ॥ यद्वा समागधं स
वैहस्यामीति चिंतयामास मनु प्रथमं कथं जेष्यामीत्येवं चिंतयित्वा युक्तं ॥ तत्राह कारणमानुष इति भूभारावतार कारणेन मानुषः न तत्वतः इति ॥ एवं चेष्टा
विचिंत्य प्रथमपक्षं निर्धारितवान् ॥ ६ ॥

राम
१

तदाह चतुर्भिः हनिष्यामीति। बलायोद्यमं कर्त्तीकरिष्यति॥७॥ नन्वत्र एव हंतव्यस्तत्राह एतदर्थेति। एतच्छब्दार्थं स्पष्टयति भूभारहरणायेति॥७॥ अयमेतदर्थोऽ-
वतार इत्युपलक्षणमित्याह अन्योपीति। प्रभवतः उद्भवतः॥१०॥ ससूतौ सारथिसहितौ॥ परिच्छदः परिकरः ध्वजकवचादिः तत्सहितौ॥११॥१२॥ त्वं नाथो वि-

हनिष्यामि बलं ह्येतत्त्वविभारं समीहितं। मागधेन समानीतं वश्यानां सर्वभूभुजाम्॥७॥ अक्षौहिणीभिः संख्यातं मया राज्ञा रथकुंजरैः॥ मा-
गधस्तु न हंतव्यो ध्रुवः कर्त्ता बलोद्यमम्॥८॥ एतदर्थोऽवतारोयं भूभारहरणाय मे। संरक्षणाय साधूनां कृतोन्येषां वधाय च॥९॥ अन्योपि ध-
र्मरक्षायै देहः संभ्रियते मया। विरामायाप्यधर्मस्य काले प्रभवतः क्वचित्॥१०॥ एवं ध्यायति गोविंदे आकाशात्सूर्यवर्च्चसौ॥ रथावुपस्थि-
तौ सद्यः ससूतौ सपरिच्छदौ॥११॥ आयुधानि च दिव्यानि पुराणानि यदृच्छया। दृष्ट्वा तानि हृषीकेशः संकर्षणमथाब्रवीत्॥१२॥ श्रीभगवानु-
वाच॥ पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो। एष ते रथ आयातो दयितान्यायुधानि च॥१३॥ यानमास्थाय जह्येतद्व्यसनात्त्वान् समुद्धर। एतदर्थं
हि नौ जन्म साधूनामिह शर्म्मकृत्॥१४॥ त्रयोविंशत्यनीकाख्यं भूमेर्भारमपाकुरु। एवं समंत्र्य दाशार्हौ दंशितौ रथिनौ पुरात्॥१५॥ निर्जग्मतुः
स्वायुधाढ्यौ बलेनाल्पीयसावृतौ। शंखं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः॥१६॥ ततोभूत्परसैन्यानां हृदि वित्रासवेपथुः। तावाह मागधो
वीक्ष्य हे कृष्ण पुरुषाधम॥१७॥ जरासंध उवाच॥ न त्वया योद्धुमिच्छामि बालेनैकेन लज्जया। गुप्तेन हि त्वया मंद न यास्ये याहि वंकहन्॥१८॥

द्यते येषां ते त्वावंतः तेषां दंशितौ बद्धकवचौ॥१४॥१५॥ स्वायुधाढ्यौ शोभनायुधसम्पन्नौ॥१६॥ पुरुषाधम अयमायस्मारितिवाक्षवोऽर्थः हे पुरुषोत्तमेति॥१७॥ गुप्तेन
सर्व्वोनरत्वाह शंनानहेंण॥ हे अमंद॥ बध्नातीति वंधुः विद्यातां हंतीति तथा॥ हे अविद्यानिरसनेति॥ याहि प्राप्नुहि॥ ॥ ॥१८॥ ॥

९०३

१

अश्छेद्यदेहोमाविति स्वयमेव मत्वा परितोषात्पक्षान्तरमाह ॥ यद्वा मां जहीति ॥ ९ ॥ यथाश्रुतार्थग्रहणेन भगवतउक्तं नैवैश्वर्याधिकत्वं तेनाघ्यते ॥ १० ॥ माधवो मधुवंश्यः ममैव ॥ मम हता सैन्यमणुहेनाहतवान् ॥ वायुरस्त्रैः शत्रुर्वैरिणाम्भिस्त्रामिषयश्चैत्यदर्शनमात्रमेवावरणामिति सूचितं ॥ ११ ॥ परमस्त्रानि कानि हेन्यानि तान्यवदपेयामुत्रवामेघा हैषीशिलीमुखवाणाः ॥ तेषामस्त्रस्त्वंरावर्षते नपीडितव्यस्फुर्जयतउक्तं भितवान् ॥ १२ ॥ नदाह ॥ गृह्णन्निति ॥ निषमादिषु धेः शरान्गृह्णन्नथतानगुणं संदधत ॥ १३ ॥

त्वंवराम यदि मन्द्रायुधस्य सत्वैर्यमुद्धृत ॥ हित्वावामध्योरैः स्थितं रहे स्त्वयोहि मां जहि ॥ ९ ॥ श्रीभगवानुवाच ॥ नैवैश्वर्याधिकत्वं तेदर्शयत्येव पौरुषं ॥ नगर्द्धीमा वचोराजन्नस्त्रान्तरमपेक्षितः ॥ १० ॥ जगाद तत्स्वा वभिहत्य माधवो महावलीयेन वलीयमाहवे ॥ तमैन्ययानध्वजवाजिसारथीस्त्यान लोवायुरिवाभ्ररेणुभिः ॥ ११ ॥ सुपर्णतालध्वजचिह्नितोरथावलङ्ख्यं तोहरिरामयोर्मृधे ॥ स्त्रियः प्रणादालकहस्तिगोपुरं समाश्रिताः सम्मुमुहुः स्तु वार्हिताः ॥ १२ ॥ हरिः परानीकपयोमुचां मुहुः शिलीमुखौघस्त्वरणावर्षपीडितम् ॥ स्वमेव सैन्यमालोक्य हरोगर्जितं व्यस्फूर्जयच्छार्ङ्ग शरासनोन्नमं ॥ १३ ॥ गृह्णन्निषङ्गात्स शरं सम्दधत्तदाशरान्विकर्षन्मुमुचेन्निषिततवाणपूगान् ॥ निघ्नन्नथाप्तान्कुंजरवाजिपत्तीन्निरन्तरं यद्वदलातचक्रं ॥ १४ ॥ निर्भिन्नकुंभाः करिणो निपेतुरनेकशोश्वाः शरवृक्णकंधराः ॥ रथाहताश्च ध्वजहस्तनायकाः पदातयः छिन्नभुजोरुकंधराः ॥ १५ ॥ संछिद्यमानद्विपदेभवाजिनामंगप्रसूताः शतशोसृगापगाः ॥ भुजाहयः प्रुरुषशीर्षकच्छपाहताद्विपद्वीपहयग्रहाकुलाः ॥ ॥ १६ ॥ ॥

गणमाकृष्य निशितवाणमप्रहानमुंचननिघ्नन्प्रहरन्पत्तीः पदातीः निरंतरमितिग्रहणादिक्रियाविशेषणं ॥ अलातकाष्ठम्भ्रमणेयथाचक्रवद्भवतितद्वदास्फुर्ज यदिति ॥ १४ ॥ हताः अश्वाः ध्वजाः सूतानायकारथिनश्चयेषुते ॥ १५ ॥ संछिद्यमानाद्विपदाइभाः वाजिनश्चतेषामंगेभ्यः प्रसूताः असृगापगारुधिरनद्यः परस्परं प्रवर्त्तिताइतितृतीयेमात्वयः प्रसिद्धनदीरूपकमाह ॥ भुजाएवभुजगायाम्तताः पुरुषाणांशीर्षाण्येवकच्छपायासुताः हताद्विपाएवद्वीपाश्च नवर्त्तितरानितथा हयाएवग्रहाग्राहास्तैस्ताकुलाव्याप्ताः ॥ १६ ॥ ॥ ४ ॥ राम

राम

१

२०३
२

पवित्रार्थानिषध्मर्म्मोपदेशपराणिपद्मानियेषुतैर्वाक्यैः नयनैर्नीतिभिः प्राकृतैर्लौकिकैः तत्रलौकिकन्यायमाहुः स्वकर्म्मेति ॥ षड्भिरल्पैकैः कृत्वातेमहतः परा
भवः केवलंकर्म्मबंधनेनप्राप्तः अतस्त्वयानलज्जितव्यमिति ॥ ३४ ॥ बार्हद्रथोजरासंधः ॥ ३५ ॥ मुकुंदोपिययाविस्मयतुर्यगः नकृतेवलयसमः तेसेवामृतदृष्याकृ
ततप्रतिसंधानारिति भावः निस्तीर्णः अनायासेनैवतीर्णः रिवलार्णवोयेन ॥ साधुसाधितमेत्तमोरिति ॥ ३६ ॥ पत्तयुधैनम्मंग्युराणवाणिभिर्ज्जैनेरभितंगम्यमिति

वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि ॥ स्वकर्म्मबंधनप्राप्तोयदुभिस्तेपराभवः ॥ ३४ ॥ शुक उवाच ॥ हतेषुसर्व्वानीकेषुनृपोबार्हद्रथस्तदा ॥
उपेक्षितोभगवतामगधान्दुर्म्मनाययौ ॥ ३५ ॥ मुकुंदोप्यकृतबलोनिस्तीर्णारिवलार्णवः ॥ विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ॥ ३६ ॥
माथुरैरुपसंगम्यविज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयः सूतमागधवंदिभिः ॥ ३७ ॥ शंखदुंदुभयोनेदुर्भेरीतूर्याण्यनेकशः ॥ वीणा
वेणुमृदंगानिपुरंप्रविशतिप्रभौ ॥ ३८ ॥ सिक्तमार्गांहृष्टजनांपताकाभिरलंकृतां ॥ निर्घुष्टांब्रह्मघोषेणकौतुकाबद्धतोरणाम् ॥ ३९ ॥ निचीय
मानोनारीभिर्माल्यदध्यक्षतांकुरैः ॥ निरीक्ष्यमाणः सस्नेहंप्रीत्युत्कलितलोचनैः ॥ ४० ॥ आयोधनगतंवित्तमनंतंवीरभूषणं ॥ यदुराजा
यतत्सर्वमाहृतंप्रादिशत्प्रभुः ॥ ४१ ॥ एवंसप्तदशकृत्वस्तावत्यक्षौहिणीबलः ॥ युयुधेमागधोराजायदुभिःकृष्णपालितैः ॥ ४२ ॥

त्वा ॥ ३७ ॥ तदावपभोपुरंप्रविशतिसतिशंखादयोनेदुः ॥ ३८ ॥ कथंभूतांपुरं ॥ तदाह सिक्तमार्गामिति ॥ ब्रह्मघोषेणनिर्घुष्टांनिनादितां ॥ कौतुकेनउत्सवेनआसर्वतो
वद्धानितोरणानियस्यांतां ॥ ३९ ॥ निचीयमानविकीर्यमाणः प्रविवेशेतिविपरिणतानुषंगः ॥ ४० ॥ आयोधनंरणभूमिस्तत्रस्थंवित्तंवीराणांभूषणंतावतिरिति
हौरः ॥ तावतिपराजयेवर्त्तमानेपि ॥ अक्षौहिणीयोपिवलंयस्यसः सप्तदशकृत्वः सप्तदशवारान्युयुधे ॥ ४१ ॥ ॥ ४२ ॥

राम
३

करालरवश्च मीनाया हताः। नराणां केशाएव शैवलं या हताः। यंत्रं षष्ठे वतरंगा आग्राह्या स्तेव गुल्माः तेष्वेतेष्व संकुलाः। अच्छरिकाश्च मर्माणि चक्राणि वातन्यो
वावर्त्ताः ते भयानकाः महामणीनां प्रवेकाउत्तमाः। आभरणानि च यथायथं अश्मानः शर्कराश्च या हताः॥ १७॥ भीरूणां भयावेहाः मनस्विनां हर्षकर्यः॥ १८॥ किं
च॥ संकर्षणेनापि न दुर्लंघ्यं प्रणीतं॥ अगहे राजन्‌ अर्णववत्‌ दुर्गं दुर्गमम्‌ भैरवं भयानकं च॥ यतः दुरंतपारं॥ अंतो ऽन्तलपारमवधिः दुःशब्दो निषेधे॥ विक्रमे

कराहमीनानरकेशशैवलाध्वजुस्तरंगायुधगुल्मसंकुलाः॥ अच्छरिकावर्त्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः॥ १७॥ प्रवर्त्तिता
भीरुभयावहाप्रधे मनस्विनां हर्षकरीः परस्परं॥ विनिघ्नतामेन्द्रशलेन दुर्म्मदान्‌ संकर्षणेनापरिमेयतेजसा॥ १८॥ वलं तरंगार्णवदुर्ग
भैरवं दुरंतपारं मगधेंद्रपालितं॥ न्यप्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्जगदीशयोः परं॥ १९॥ स्थितस्तु दृष्ट्वा तम्भुवनत्रयस्य यः समीह
तेनतगुणाः स्वलीलया॥ न तस्य चित्रं परपक्षविग्रहं तथापि मर्त्यानुविधस्य वर्ण्यते॥ २०॥ जग्राह विरथं रामो जरासंधं महावलं॥ हतानी
कावशिष्टासुं सिंहः सिंहमिवौजसा॥ २१॥ वध्यमानं हताराति पाशैर्वारुणमानुषैः॥ वारयामास गोविन्दस्तेन कार्यचिकीर्षया॥ २२॥
संमुक्तो लोकनाथाभ्यां व्रीडितो वीरसम्मतः॥ तपसे कृतसंकल्पो वारितः पथि राजभिः॥ २३॥

णागाधं देशातस्य निरवधिकमित्यर्थः। किंच मगधेंद्रेण च पालितं वलं॥ यदेवं भूतं तात्पर्यमकृष्णयोः कर्म्मीक्रीडितं तत्परं केवलं तयोर्विक्रीडितं न तु पराक्रमः॥ २०॥ न चैतदा
श्चर्यमित्याह॥ स्थितस्य दृष्ट्वा तमिति॥ तर्हि किमित्याश्चर्यमिव वर्ण्णितं॥ तत्राह॥ तयोः प्रीति॥ मर्त्याननुविधत्ते अनुकरोतीति मर्त्यानुविधस्तस्य॥ २१॥ किंच जग्राहेति
हतान्यनीकानि यस्य अवशिष्टा असवः एव यस्य तं च॥ २१॥ हतावरूथाः अप्राप्तयो येन तथाभूतमपि जरासंधं वध्यमानं वारयामासेति॥ २२॥

अक्लिष्टा एव नृत्नयनिन्युः ॥४३॥ अष्टादशे मे अष्टादशे संग्रामे भाविनि तन्मध्ये अकस्मात् कालयवनः प्राप्तः ॥४४॥ आत्मसंमितान् स्वतुल्यान् ॥ वृजिनं दुःखं
उभयतः यवनात् जरासंधाच्च ॥ तद्दाहदृष्टेन ॥ निरुंद्धे निरुणद्धि ॥४७॥ अस्मद्भुतेन ॥४८॥४९॥ समुद्रमध्ये दुर्गं तन्मध्ये नगरं कृत्स्नाद्भुतं सर्वाश्चर्यमयं
अचीकरत् कारयामास ॥५०॥ त्वष्टा विश्वकर्मा तत्संबंधि शिल्पनैपुणं चक्रियाकौशलं ॥ तदाह सार्द्धैः त्रिभिः रथ्येति रथ्या राजमार्गाः चत्वरः ॥ वीथ्यः उपमा

अक्लिष्टा एव तद्बलं सर्वं वृष्णयः कृष्णदेवताः ॥ हतेषु स्वेषु सैन्येषु त्यक्तो गाद् अरिभिर्नृप ॥४३॥ अष्टादशमसंग्रामसंआगामिनि तदंतरा
नारदप्रेषितो वीरो यवनः प्रत्यदृश्यत ॥४४॥ रुरोध मथुरामेत्य तिसृभिर्म्लेच्छकोटिभिः ॥ नृलोके वाप्रतिद्वंद्वो वृष्णीन् श्रुत्वात्मसंमितान्
तं दृष्ट्वाचिंतयत्कृष्णः संकर्षणसहायवान् ॥ अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महत् ॥४६॥ यवनोयं निरुंधेस्मानद्य तावन्महाबलः
मागधोप्यद्य वा श्वो वा परश्वो वागमिष्यति ॥४७॥ आवयोर्युध्यतोरस्य यद्यागंता जरासुतः ॥ बंधून्वधिष्यत्यथवा नेष्यते स्वपुरं बली ॥४८॥
तस्मादद्य विधास्यामो दुर्गं द्विपददुर्गमं ॥ तत्र ज्ञातीन्समाधाय यवनं घातयामहे ॥४९॥ इति संमंत्र्य भगवान्दुर्गं द्वादशयोजनं ॥ अंतः
समुद्रे नगरं कृत्स्नाद्भुतमचीकरत् ॥५०॥ दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणं ॥ रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितं ॥५१॥ सुरद्रुम
लतोद्यानविचित्रोपवनान्वितं ॥ हेमशृंगैर्दिविस्पृग्भिः स्फाटिकाट्टालगोपुरैः ॥५२॥

र्गाः ॥ पश्चिमतः उभयतोपि चत्वराण्यंगणानि तन्मध्ये कोष्ठाः ततोप्यंतः
स्वर्णभवनानि तदुपरि स्फाटिकाट्टालिकाः तदुपरि हेमकुंभा इति चतुर्भूमिकं ॥ यथावास्तु गृहादिनिर्माणशास्त्रानतिक्रम्य विनिर्मितं ॥५१॥ सुराणां द्रुमा ल
ताश्च येषु तान्युद्यानानि विचित्रोपवनानि वनैरन्वितं ॥ हेममयानि शृंगाणि येषां तैः दिविस्पृग्भिः अत्युच्चैः स्फाटिका अट्टाला उपरिभूमिकाः गोपुराणि च द्वाराणि

राजतारकूटैः ॥ राजतं वज्रारकूटं च पीतलोहं ताभ्यां निर्म्मितैः कोष्ठैः अश्वशालाः वस्त्रशालादिभिः कथंभूतैः हेमकुंभैरलंकृतैः तथा रत्नकूटैः पद्मरागा दिशिखरैः हेमैः सौवर्णैः महामरकतमयानि स्थलानि येषु तैर्गृहैश्च ॥ ५३ ॥ किंच ॥ नगरस्य हाहो वा रोषयतीनां रेवानां च वलभीभिश्च द्वंद्वशालिकादिभि श्च निर्म्मितं ॥ यद्देवगृहे राजगृहे हृद्यमतः शोभमानं ॥ ५४ ॥ पारिजातं च ग्राहिणो त्वस्थापयामासेति ॥ शुकपरीक्षितसंवादात्मत्वे भावितत्वात भूतनिर्देशः

राजतारकूटैः कोष्ठैर्हैमकुंभैरलंकृतैः ॥ रत्नकूटैर्गृहैर्हैमैर्म्महामरकतस्थलैः ॥ ५३ ॥ वास्तोष्पतीनां च गृहैर्वलभीभिश्च निर्म्मितं ॥ वा त्वेर्वर्णपजनाकीर्णं यद्देवगृहोल्लसत ॥ ५४ ॥ सुधर्म्मां पारिजातं च महेंद्रोः ग्राहिणो हरेः ॥ यत्रचावस्थितो मर्त्यैर्म्मर्त्यधर्म्मैर्न युज्य ते ॥ ५५ ॥ श्यामैककर्णान्वरुणो हयान्शुक्लान्मनोजवान् ॥ अष्टौ निधिपतिः कोशान्लोकपालान्निजोदयान् ॥ ५६ ॥ यद्यद्भगवतादत्त माधिपत्यं स्वसिद्धये ॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥ तत्र योगप्रभावेन नीत्वा सर्वजनं हरिः ॥ ५७ ॥ प्रजापालेन रामेण कृष्णः समनुमंत्रितः ॥ निर्जगाम पुरद्वारात्पद्ममाली निरायुधः ॥ ५८ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे दुर्गनिवेशनं नाम पंचाशत्तमो ध्यायः ॥

मर्त्यधर्म्मैः क्षुत्पिपासादिषड्मिभिः ॥ ५५ ॥ निधिपतिः कुवेरः अष्टौ कोशान्निधीन् पद्मश्चैव महापद्मो मत्स्यकूर्म्मौ तथोरकः ॥ नीलो मुकुंदः शंखश्च निधयोष्टौ प्रकीर्त्तिताः इति प्रसिद्धान्निजोदयान्निजविभूति ॥ ५६ ॥ अन्ये च सिद्धादयो भगवता स्वाधिकारसिद्धये यद्यदाधिपत्यं दत्तमासीत्तत्स र्वं प्रत्यर्पयामासुरिति ॥ ५७ ॥ यथा कालयवनो न वेत्ति न वा सौजनः तथा योगप्रभावेन नीत्वा तत्र स्थित्वा प्रजापालयर्थं तत्पालान्सनिधिमस्य इति समनुमंत्रितो

एकपंचाशत्तमे हृन्मुचुकुंददृशा हरिः ॥ यवनं मुचुकुंदेन हन्तः सत्त्वं कंपत ॥ १ ॥ पंचवेदहृतात्कालयवनाद्युद्भीषणात ॥ हरिर्हरगिरः स्वैरं पालनाद्यापला-
यत ॥ १ ॥ यदा गार्ग्यः श्यालेन षंढ इत्युक्तस्तदा यादवैरुपहसितः क्रुद्धो मोघश्रीमहेशप्रसादाद्युद्भीषणं पुत्रं वरं लब्धवान् ॥ ततश्च यवनेंद्रेण अपुत्रेण स्वक्षेत्रे
पुत्रोत्पादनाय प्रार्थितो गार्ग्यः कालयवनमजीजनदिति पुराणांतरप्रसिद्धं ॥ पुरद्वाराद्विनिःक्रांतं उज्जिहानं उद्गच्छंतं ॥ १ ॥ २ ॥ नित्यप्रमुदितमित्यादि मुखारविं-

शुक उवाच ॥ तं विलोक्य विनिःक्रांतमुज्जिहानमिवोडुपं ॥ दर्शनीयतमं श्यामं पीतकौशेयवाससं ॥ १ ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तु-
भामुक्तकंधरम् ॥ पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणं ॥ २ ॥ नित्यं प्रमुदितं श्रीमत्सुकपोलं शुचिस्मितम् ॥ मुखारविंदं बिभ्राणं
स्फुरन्मकरकुंडलम् ॥ ३ ॥ वासुदेवो ह्ययमिति पुमान् श्रीवत्सलांछनः ॥ चतुर्भुजोरविंदाक्षो वनमाल्यतिसुंदरः ॥ ४ ॥ लक्षणैर्ना-
रदप्रोक्तैर्नान्यो भवितुमर्हति ॥ निरायुधश्चलन्पद्भ्यां योत्स्येनेन निरायुधः ॥ ५ ॥ इति निश्चित्य यवनः प्राद्रवंतं पराङ्मुखं ॥ अन्वधा-
वज्जिघृक्षुस्तं दुरापमपि योगिनां ॥ ६ ॥ हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे ॥ नीतो दर्शयता दूरं यवनेशोद्रिकंदरं ॥ ७ ॥ पलायनं य-
दुकुले जातस्य तव नोचितं ॥ इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ॥ ८ ॥ एवं क्षिप्तोपि भगवान्प्राविशद्गिरिकंदरं ॥ सोपि प्रविष्टस्त-
त्रान्यं शयानं ददृशे नरं ॥ ॥ नन्वसौ दूरमानीय शेते मामिह साधुवत ॥ ॥ ९

दं विशेषणं ॥ ३ ॥ ४ ॥ नारदप्रोक्तैर्लक्षणैरयं पुमान् ॥ वासुदेव एव नान्यो भवितुमर्हति ॥ अयं निरायुधः अतोनेन पद्भ्यामेव चलन्निरायुधोहं योत्स्यामि ॥ ५ ॥ ६ ॥ इति
निश्चित्य पराङ्मुखं प्राद्रवंतमन्वधावदित्यन्वयः ॥ ७ ॥ आत्मानं हस्तप्राप्तं दर्शयता दूरं नीत इत्यन्वयः ॥ अहताशुभः अक्षीणकर्मा ॥ ८ ॥ ॥ ९ ॥ ॥

२०३
५

तं ध्यायानमच्युतं मत्वाऽताडयदिति ॥१०॥ तस्य क्रुद्धस्य दृष्टिपातेन संदरीग्नोयः स्वदेहजोग्निस्तेन ॥११॥ यवनमर्दयति हिनस्ति इति तथा ॥ स कस्य वंशपः किं
वीर्यः कीदृक्प्रभावान् किंतेजः कस्य वीर्यप्रत्र इत्यर्थः ॥ शिश्ये ॥ स्वपायिष्ट ॥१२॥ सत्यः संगरो युद्धं प्रतिज्ञा वा यस्य सः ॥१४॥ ॥१५॥ गुहं कार्त्तिकेयं स्वःपालं

इति मत्वाऽच्युतं मूढस्तं पदा समताडयत् ॥ स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने ॥१०॥ दिशो विलोकयन्पार्श्वे तमद्राक्षीदवस्थितं ॥ सता
वत्तस्य रुष्टस्य दृष्टिपातेन भारत ॥११॥ देहजेनाग्निना दग्धो भस्मसादभवत्क्षणात् ॥ राजोवाच ॥ को नाम स पुमान्ब्रह्मन्कस्य किंवीर्य ए
व च ॥ कस्माद्गुहां गतः शिश्ये किंतेजो यवनार्दनः ॥१२॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जातो मान्धातृतनयो महान् ॥ मुचुकुन्द इति ख्या
तो ब्रह्मण्यः सत्यसंगरः ॥१३॥ स याचितः सुरगणैरिन्द्राद्यैरात्मरक्षणे ॥ असुरेभ्यः परित्रस्तैस्तद्रक्षां सोकरोच्चिरं ॥१४॥ लब्ध्वा गुहं ते
स्वःपालं मुचुकुन्दमथाब्रुवन् ॥ राजन्विरमतां कृच्छ्राद्भवान्नः परिपालनात् ॥१५॥ नरलोके परित्यज्य राज्यं निहतकंटकं ॥ अस्मान्पालय
तो वीर कामास्ते सर्व उज्झिताः ॥१६॥ सुता महिष्यो भवतो ज्ञातयोमात्यमंत्रिणः ॥ प्रजाश्च तुल्यकालीया नाधुना संति कालिताः ॥१७
कालो बलीयान्बलिनां भगवानीश्वरोव्ययः ॥ प्रजापालयते क्रीडन्पशुपालो यथा पशून् ॥१८॥ वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः
एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः ॥१९॥

स्वर्गपालकं सेनान्यं ॥१६॥ उज्झितास्त्यक्ता गता इत्यर्थः ॥१७॥ किंच ॥ सुता इति ॥ तुल्यकालीयाः त्वत्समानका
लीनाः कालिताः विचालिताः ॥१७॥ मत्पुत्राः कोन्यः चालयेदिति चेदत आह ॥ काल इति ॥ कालयते इतस्ततश्चालयति ॥१८॥ तस्य कैवल्यस्य ॥ ॥२०॥ ॥ राम

राम
५

गुहायां प्रविष्टः शेते स्म ॥ १७ ॥ धर्षितः अभिभूतः दुर्द्धर्षश्च धृष्यं ॥ १५ ॥ विपिने अरण्ये तत्रापि गिरेर्गह्वरे दुःप्रवेशस्थाने तत्रापि उत्तुङ्करके ॥ पद्मपला

एवमुक्ताः सर्वे देवास्ते अभिवंद्य महायशाः ॥ अशयिष्ट गुहां विशो निद्रया देवसत्तम ॥ १९ ॥ यः कश्चिन्मम निद्राया भंगं कुर्यात्त्वरोन्नमाः ॥ सोपि भस्मी भवेदाशु तथोक्तः स्वहरेस्तदा ॥ २० ॥ यवनेभस्मसात्प्राप्ते भगवान्सात्वतर्षभः ॥ आत्मानं दर्शयामास मुचुकुंदाय धीमते ॥ २१ ॥ तमालोक्य घनश्यामं पीतकौशेयवाससं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितम् ॥ २३ ॥ चतुर्भुजं रोचमानं वैजयंत्या च मालया ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं ॥ २३ ॥ प्रेक्षणीयं नृलोकस्य सानुरागस्मितेक्षणं ॥ अपीच्यवयसं मत्तमृगेंद्रोदारविक्रमं ॥ २४ ॥ पर्य पृच्छन्महाबुद्धिस्तेजसा तस्य धर्षितः ॥ शंकितः शनकै राजा दुर्द्धर्षमिव तेजसा ॥ २५ ॥ मुचुकुंद उवाच ॥ को भवानिह संप्राप्तो विपिने गिरिगह्वरे ॥ पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकंटके ॥ २६ ॥ किंस्वित्तेजस्विनां तेजो भगवान्वा विभावसुः ॥ सूर्यः सोमो महेंद्रो वा लोकपालो परोपि वा ॥ २७ ॥ मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभं ॥ यद्बाधसे गुहाध्वांतं प्रदीपः प्रभया यथा ॥ २८ ॥ शुश्रूषतामव्यलीकमस्माकं नरपुंगव ॥ स्वजन्म कर्म गोत्रं वा कथ्यतां यदि रोचते ॥ २९ ॥ वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्रबंधवः ॥ मुचुकुंद इति प्रोक्तो यौवनाश्वात्मजः प्रभो ॥ ३० ॥ चिरप्रजागरश्रांतो निद्रयापहृतेंद्रियः ॥ शयेस्मिन्विजने कामं केनाप्युत्थापितोधुना ॥ ३१ ॥ सोपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना ॥ अनंतरं भवान्श्रीमान्लक्षितोमित्रशातनः ॥ ३२ ॥ तेजसा तेविषह्येण भूरि द्रष्टुं न शक्नुमः ॥ हतौजसो महाभाग माननीयोसि देहिनां ॥ ३३ ॥ एवं संभाषितो राज्ञा भगवान्भूतभावनः ॥ प्रत्याह प्रहसन्वाण्या मेघनादगभीरया ॥ ३४ ॥

रामद्दशाभ्यां पद्मपलाशवद्विचरसीति ॥ २६ ॥ तेजः मूर्तिः प्रभावो दीप्तिर्वा ॥ २७ ॥ सर्व त्रापरितोषाद्वाह ॥ मन्ये इति पुरुषर्षभं ॥ अविद्यं गुहाध्वांतं अनत्तमः ॥ २८ ॥ वयं त्विति वंश्याभिप्रायेणा वज्ञवचनं तेषां मध्ये मुचुकुंद इति प्रोक्त इति यौवनाश्वो मांधाता

२०७
६

क्वचित्कदाचित्कश्चिद्यद्यपि रजांस्यपि विममे गणितवान् तथापि न जन्मानि कर्माणि विनिर्मितेत ॥ ३६ ॥ नेति मम चक्षुषा निमित्तेन मयैव दग्धः ॥ ४१ ॥ अपूर्णेहि
मितिशोचितं ॥ यद्वा अन्येर्दैन्तेषु यथा शोचति नैवं मां प्रपन्नः ॥ मदन्नवराणामन्नयत्वादिति भावः ॥ ४३ ॥ अष्टाविंशतितमे युगे भगवाननन्तरिष्यतीति वृद्धग
र्गवाक्यमनुस्मरन्नित्यर्थः ॥ ४४ ॥ त्वद्भक्तिरेव केवलं दुर्लभा कामा मा ह्यहानवरणायोग्याः इत्याशयेन अभक्तानां संसारमहदुःखिभिः प्रपंचयन्स्तौति ॥ विमोहि

श्रीभगवानुवाच ॥ जन्मकर्माभिधानानि संति मेंग सहस्रशः ॥ न शक्यन्तेनुसंख्यातुमनंतत्वान्मयापि हि ॥ ३५ ॥ क्वचिद्रजांसि विममे पार्थिवा-
न्युरुजन्मभिः ॥ गुणकर्माभिधानानि न मे जन्मानि कर्हिचित् ॥ ३६ ॥ कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ॥ अनुक्रमंतो नैवांतं गच्छं-
ति परमर्षयः ॥ ३७ ॥ तथाप्यद्यतनान्यंग शृणुष्व गदतो मम ॥ विज्ञापितो विरिंचेन पुराहं धर्मगुप्तये ॥ ३८ ॥ भूमेर्भारायमाणानामसुराणां
क्षयाय च ॥ अवतीर्णो यदुकुले गृह आनकदुंदुभेः ॥ ३९ ॥ वदंति वासुदेवेति वसुदेवसुतं हि मां ॥ कालनेमिर्हतः कंसः प्रलंबाद्याश्च स-
द्द्विषः ॥ ४० ॥ अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ सोहं तवानुग्रहार्थं गुहामेतामुपागतः ॥ ४१ ॥ प्रार्थितः प्रचुरं पूर्वं त्वयाहं भक्तवत्स-
लः ॥ वरान्वृणीष्व राजर्षे सर्वान्कामान्ददामि ते ॥ ४२ ॥ मां प्रपन्नो जनः कश्चिन्न भूयोर्हति शोचितुं ॥ श्रीशुक उवाच ॥ इत्युक्तस्तं प्रणम्याह
मुचुकुंदो मुदान्वितः ॥ ४३ ॥ ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन् ॥ ४४ ॥ मुचुकुंद उवाच ॥ विमोहितोयं जन ईश मायया त्वदीयया
त्वांन भजत्यनर्थदृक् ॥ सुखाय दुःखप्रभवेषु सज्जते गेहेषु योषित्पुरुषश्च वंचितः ॥ ४५ ॥

तोयमिति ॥ हे ईश योषित्पुरुषश्चेति द्विविधोप्ययं जनस्त्वदीयया मायया विमोहितः ॥ अतः अनर्थदृक् ॥ अर्थं परमार्थं सुखं त्वां न पश्यतीति तथा ॥ ॥
अतस्त्वां न भजति किं तु परस्परं वंचितः सन् सुखेच्छया दुःखानामेव प्रभवो येषु तेषु गेहेषु एव सज्जत इति ॥ ४५ ॥

राम
६

किंच ॥ कामं त्वमत्र करादिष्वपि समं भवति भगवद्भजनं तु न मानुषव्यतिरेके योनीति मानुषत्वं प्राप्यात्मानं भजन्तीति मूढ इत्याह ॥ लब्ध्वेति ॥ अत्र कर्मभूमौ अ-
व्यंगं अविकलांगं ॥ किंच ॥ अमतिविषयत्वे मतिर्यस्य सः गृहमेवान्धकूपस्तस्मिन्पतितः ॥ यथा पशुस्तृणलब्धोऽन्धकूपे पततीति ॥ ४७ ॥ न केवलमस्य
जनस्येयं गतिः किं तु ममापि तथैवेत्याह ॥ ममेति मर्त्ये शरीरे आत्मबुद्धिर्यस्य तस्य मम ॥ अत एव सुतादिष्वासज्जमानस्य ॥ ४८ ॥ उत्तरश्लोकं मदर्थत्वेन प्रपंचयति

लब्ध्वा जनो दुर्लभमत्र मानुषं कथंचिदव्यंगमयत्नतोऽनघ ॥ पदारविंदं न भजत्यसन्मतिर्गृहांधकूपे पतितो यथा पशुः ॥
ममैष कालोऽजित निःफलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः ॥ मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्जमानस्य दुरंत-
चिंतया ॥ ४८ ॥ कलेवरेऽस्मिन्घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहं ॥ वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वा-
गणयन्सुदुर्मदः ॥ ४९ ॥ प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं ॥ त्वमप्रमत्तः सहसाभिपद्यसे
क्षुल्लेलिहानोऽहिरिवाखुमंतकः ॥

कलेवर इति ॥ घटकुड्यादिसदृशे दृश्ये अनात्मनि ॥ यत एवं रूढमभिमानस्ततो ममैष कालो निःफलो गत इति ॥ ४९ ॥
त्वामगणयन् त्वमाक्रामसीत्याह ॥ प्रमत्तमिति ॥ प्रमत्तं अनवहितं ॥ त्वामन्तकमविगणय्य देहादिष्वासक्तमिति यावत् ॥ अतः प्रमत्त इति कृत्यचिंतया एवमेवं करणी-
यमिति मनोरथपरंपरया ॥ मनोरथे मग्नेऽपि विषयेषु लालसं तृष्णाकं प्राप्तेऽपि पुनः प्रवृद्धो लोभः तृष्णा यस्य तं अन्तकस्त्वमभिपद्यसे ॥ अभिभवसीत्यर्थः ॥ क्षुधा सृ-
क्किणी लेलिहानो अहिः आखुं मूषकमिवेति ॥ ५० ॥

२०७
१

किंच ॥ कालात्मनात्वयाभिपन्नो देहएवंभवतीत्याह ॥ प्रेति ॥ श्वमृगालादिभिर्भक्षितो विट्संज्ञितः तैरभक्षितः कृमिसंज्ञितो भवतीति ॥४८॥ किंच ॥ अकृतप्राज्ञैः प्राणापि दिग्विजये नोराज्ञो पि पारत अडुः खं तरवस्थमेवत्याह निर्जित्येति ॥ अभूतविग्रहः अविद्यमानसंग्रामः पूर्वं येसमास्तैरा जभिर्वंदितो पि मिथुनीभावसुखमेव परं येषु तेषु योषितां गृहेषु क्रीडामृग इव हस्ततो नीयते ॥५०॥ किंच ॥ तत्रातिलहाम्राकुलस्यन भोगहाराः कश्चिद्

पुरा रथैर्हेमपरिष्कृतैश्चरन् मतंगजैर्वा नरदेवसंज्ञितः ॥ सएव कालेन दुरत्ययेन ते कलेवरो विट्कृमिभस्मसंज्ञितः ॥४९॥
निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवंदितः ॥ गृहेषु मैथुन्यसुखेषु योषितां क्रीडामृगः पूरुष ईश नीयते ॥५०॥ करोति कर्माणि तपः सुनिष्ठितो निवृत्तभोगस्तदपेक्षया ददत् ॥ पुनश्च भूयेयमहं स्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते ॥५१॥ भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ॥ सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥५२॥

त्तिरित्याह ॥ करोतीति ॥ तपसि अधःशयनब्रह्मचर्यादौ सुनिष्ठितः पुनश्च स्वराडिंद्रः स्यामिति ॥ यद्वा जन्मांतरेप्येवमेव चक्रवर्ती स्यामिति ॥५१॥ तदेवमहर्निशमीश्वरादिशब्दैर्निर्दिष्टानां संसारापश्यं भवत्प्राप्तिनिवृत्तिक्रममाह ॥ भवापवर्ग इति ॥ भो अच्युत भ्रमतः संसरतो जनस्य यदा भवस्य संसारस्य अपवर्गः अंतो भवेत् ॥ प्राप्तकालः स्यात्तदा सतां संगमो भवेत् ॥ यदा च सत्संगमो भवेत्तदा सद्गतौ संगनिवृत्त्याकारणं नियंतरि त्वयि मतिः

ममतरतस्त्वंगमात्पूर्वमेवयोराज्यादिसंगविच्छेदोजातः सोयंत्वयामहाननुग्रहः कृतइत्याह ॥ मन्यइतिनेत्वया ॥ साधुभिर्निर्विवेकिभिः तपसेवनंप्रवेष्टुमिच्छद्भिः
त्वंयत्नमकृमलभमानैः प्रार्थ्यतइति ॥ ५३ ॥ नदेवंविषयसेवामार्गाभगवत्सेवामार्गाविविच्यवरान्नवृणीष्वेतियदुक्तंतत्रोत्तरमाह ॥ नकामयइति ॥ मुक्तिं
वनातिवृत्ताभिमानाः आर्यो विवेकी ॥ ५४ ॥ रजस्तमः सत्वगुणैरनुबध्यंतइतितथाताः ॥ ऐश्वर्यादिशब्दमरणादिधर्मादिरूपाविमुक्त्य ॥ एवंरूपमपीश्वरं
त्वाविमात्रतानघनं ॥ ज्ञातः निरंजनं ॥ नजातः निर्गुणं तदपिज्ञातः शुद्धंयत्सुतएवात्मरंत्वाशरणंव्रजामीति ॥ ५५ ॥ उक्तार्थवद्गोगात्कैवल्यात्तकारस्वमे

मन्येममानुग्रहईशतेकृतोराज्यानुबंधापगमोयदृछया ॥ यःप्रार्थ्यतेसाधुभिरेकचर्य्ययावनंविविक्षद्भिरखंडभूमि
पैः ॥ ५३ ॥ नकामयेन्यंतवपादसेवनादकिंचनप्रार्थ्यतमाद्वरंविभो ॥ आराध्यकस्त्वांह्यपवर्गदंहरेवृणीतआर्योव
रमात्मबंधनं ॥ ५४ ॥ तस्माद्विसृज्याशिषईशसर्वतोरजस्तमःसत्वगुणानुबंधनाः ॥ निरंजनंनिर्गुणमद्वयंपरंत्वांज्ञप्तिमा
त्रंपुरुषंव्रजाम्यहं ॥ ५५ ॥ चिरमिहवृजिनार्त्तस्तप्यमानोनुतापैरवितृषषडमित्रोलब्धशांतिःकथंचित् ॥ शरणदसमुपेत
स्त्वत्पदाब्जंपरात्मन्नभयमृतमशोकंपाहिमापन्नमीश ॥ ५६ ॥

वेतिपुनर्वैरः प्रलोभयंतंश्रीकृष्णंपादोग्रहेणप्रार्थयतेचिरमिति ॥ वृजिनैः कर्म्मफलैरार्त्तःपुनस्तद्वासनाभिस्तप्यमानः तथापिअवितृषषडमित्रः
नष्टैवतृषातत्ज्ञानविगततृषाःषडमित्राःशत्रवइंद्रियलक्षणायस्मात्सः अतएवालब्धशांतिः कथंचिदैववशेनलब्धशांतिरितिवा ॥ शरणंत्वत्तोनंत
इदानीतितथाहेशरणद ॥ समुपेतःप्राप्तोहं ॥ अशोकत्वेहेतुः अभयंतत्रापिहेतुः ऋतं ॥ आपन्नआपदाव्याप्तंपाहीति ॥ ५६ ॥

२०३
द॰

ग्रप्रमादाय ॥ अप्रमादाय न भवत्येव कृतं इत्यत आह ॥ न धीरिति एकांत भक्तानां धीराशीर्भिः आशास्यैरपि न भिद्यते न भज्यत इत्यर्थः ॥ ६० ॥ व्यतिरेकमाह ॥ युंजानानामिति ॥ उत्थितं विषयाभिमुखं ॥ ६१ ॥ तु भ्यतव ॥ ६२ ॥ युक्त्याभासेन भीषयन् तपसि लोकसंग्रहे प्रवर्त्तयति क्षात्रधर्मेति ॥ ६३ ॥ द॰ स्कं॰ ए॰ क॰ पं॰ चा॰ ॥

श्रीभगवानुवाच ॥ सार्वभौम महाराज मतिस्ते विमलोर्जिता ॥ वरैः प्रलोभितस्यापि न कामैर्विहता यतः ॥ ५९ ॥ प्रलोभितो वरैर्यत्त्वमप्रमादाय विद्धि तत् ॥ न धीरेकांतभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥ ६० ॥ युंजानानामभक्तानां प्राणायामादिभिर्मनः ॥ अक्षीणवासनं राजन् दृश्यते पुनरुत्थितम् ॥ ६१ ॥ विचरस्व महीं कामं मय्यावेशितमानसः ॥ अस्त्वेवं नित्यदा तुभ्यं भक्तिर्मय्यनपायिनी ॥ ६२ ॥ क्षात्रधर्मस्थितो जंतून्न्यवधीर्मृगयादिभिः ॥ समाहितस्तत्तपसा जह्यघं मदुपाश्रितः ॥ ६३ ॥ जन्मन्यनंतरे राजन् सर्वभूतसुहृत्तमः ॥ भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलं ॥ ६४ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे मुचुकुंदस्तुतिरेकपंचाशत्तमोऽध्यायः ॥ श्रीशुक उवाच ॥ इत्थं सोऽनुगृहीतोऽङ्ग कृष्णेनेक्ष्वाकुनंदनः ॥ तं परिक्रम्य संनम्य निश्चक्राम गुहामुखात् ॥ १ ॥ संवीक्ष्य क्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन् ॥ मत्वा कलियुगं प्राप्तं जगाम दिशमुत्तरां ॥ २ ॥ तपःश्रद्धायुतो धीरो निःसंगो मुक्तसंशयः ॥ समाधाय मनः कृष्णे प्राविशद्गंधमादनम् ॥ ३ ॥ बदर्याश्रममासाद्य नरनारायणालयं ॥ सर्वद्वंद्वसहः शांतस्तपसाराधयद्धरिं ॥ ४ ॥

राम
द

॥ तमनः ॥ द्विपंचाशत्तमे धावन्भयादिव गतः स्थली ॥ अथ मोरतं संदेशाहक्मिणापाद्विज वर्णितं ॥ क्षुल्लकानल्पप्रमाणान् ॥ २ ॥ तपसि श्रद्धायुतः ॥ ३ ॥ तत्र बदर्याश्रमं ॥ ४ ॥

निन्ये नयन्मार्गो बलतिष्ठ ॥५॥ वेगरभसं वेगोद्रेकं ॥६॥ भीरुभीतवत ॥ इतिभीतवदित्यर्थः ॥७॥ बेलतः पलायेतां बहुयोजनं देशं ॥८॥ अश्रममाणा
मियत्नात तत्रवेत्तीतितथा ॥९॥ तुंगं एकादशयोजनोन्नतं ॥ प्रकर्षेणावर्षित्वाप्ति त्रिभिः प्रवर्षणाद्रित्याख्यायस्यतं ॥ तदा ॥ भगवानिति ॥ इद्धः ॥ ॥ नत्र

भगवांस्तु नरपद्धन्या पुरीं यवनवेष्टितां ॥ हत्वा म्लेच्छबलं निन्ये तदीयं द्वारकां धनं ॥५॥ नीयमाने धने गोभिर्नृभिश्चाच्युतचोदितैः ॥
आजगाम जरासंधस्त्रयोविंशत्यनीकपः ॥६॥ विलोक्य वेगरभसं रिपुसैन्यस्य माधवौ ॥ मनुष्यचेष्टामापन्नौ राजन्दुद्रुवतुर्द्रुतं ॥७॥
विहाय वित्तं प्रचुरमभीतौ भीरुभीरुवत् ॥ पद्भ्यां पद्मपलाशाभ्यां चेरतुर्बहुयोजनं ॥८॥ पलायमानौ तौ दृष्ट्वा प्रहस्य मागधो बली ॥ अ
न्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥९॥ प्रद्रुत्य दूरं संश्रान्तौ तुंगमारुहतां गिरिं ॥ प्रवर्षणाख्यं भगवान्नित्यदा यत्र वर्षति ॥१०॥
गिरौ निलीनावाज्ञाय नाधिगम्य पदं नृप ॥ ददाह गिरिमेधोभिः समन्तादग्निमुत्सृजन् ॥११॥ ततउत्पत्य तरसा दह्यमानतटादुभौ ॥ दशै
कयोजनात्तुंगान्निपेततुरधो भुवि ॥१२॥ अलक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ ॥ स्वपुरं पुनरायातौ समुद्रपरिखां नृप ॥१३॥ सोपि दग्धा
विति मृषा मन्वानो बलकेशवौ ॥ बलमाकृष्य सुमहन्मगधान्मागधो ययौ ॥१४॥ आनर्त्ताधिपतिः श्रीमान्रैवतो रैवतीं सुतां ॥ ब्रह्म
णा चोदितः प्रादाद्बलायेति पुरोदितं ॥१५॥ भगवानपि गोविंद उपयेमे कुरूद्वह ॥ वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे ॥१६॥

विविक्ताव्यवेक्षितयोः पदं निलयस्थानमनधिगम्य ॥११॥ ततो गिरेः दशावएकं च यानि योजनानि तावत्तुंगात ॥ मागधसैन्यादेशमतिक्रम्य परतो धो नि
पेततुः ॥१२॥ श्रीकृष्णस्य विवाहान्तिके प्रथितं बलदेवविवाहं नवमस्कंधोक्तमनुस्मारयति ॥ आनर्त्तेति ॥ मात्रां कलां ॥१६॥

२०३

गरुडो यथा देवान् प्रमथ्य सुधामहरत्तद्वदिति ॥ १७ ॥ राक्षसो युद्धहरणादिति स्मृतेः राज्ञः प्रमथ्येति च तदुक्तं राक्षसेन विधानेनोपयेमे परिणीतवानिति
श्रुतं ॥ १८ ॥ पूर्वमेव चामाभावमानयत एव श्रुतं ॥ विशेषतः श्रोतुमिच्छामः ॥ १९ ॥ शृण्वानः कथमाविः करोति ॥ ब्रह्मन्निति ॥ पुण्याः महाफलाः माध्वीः श्रुतिसुखाः ॥ लो

प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् ॥ पश्यतां सर्वलोकानां तार्क्ष्यपुत्रः सुधामिव ॥ १७ ॥ राजोवाच ॥ भगवान्भीष्मकसुतां रुक्मिणीं रुचिरा
ननां ॥ राक्षसेन विधानेन उपयेमे इति श्रुतं ॥ १८ ॥ भगवन् श्रोतुमिच्छामः कृष्णस्यामिततेजसः ॥ यथा मागधशाल्वादीन् जित्वा कन्यामुपाहर
त् ॥ १९ ॥ ब्रह्मन् कृष्णकथाः पुण्याः माध्वीर्लोकमलापहाः ॥ को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥ २० ॥ श्रीशुक उवाच ॥ राजासीद्भीष्मको
नाम विदर्भाधिपतिर्महान् ॥ तस्य पंचाभवन् पुत्राः कन्यैका च वरानना ॥ २१ ॥ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनंतरः ॥ रुक्मकेशो रुक्ममा
ली रुक्मिण्येषा स्वसा सती ॥ २२ ॥ सोपश्रुत्य मुकुंदस्य रूपवीर्यगुणश्रियः ॥ गृहागतैर्गीयमानाः तं मेने सदृशं पतिं ॥ २३ ॥ तां बुद्धिलक्षणौ
दार्यरूपशीलगुणाश्रयां ॥ कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे ॥ २४ ॥ बंधूनामिच्छतां दातुं कृष्णाय भगिनीं नृप ॥ ततो निवार्य कृष्णद्वि
ड् रुक्मी चैद्यममन्यत ॥ २५ ॥ तदवेत्यासितापांगी वैदर्भी दुर्मना भृशं ॥ विचिंत्याप्तं द्विजं कंचित् कृष्णाय प्राहिणोद्द्रुतं ॥ २६ ॥ द्वारकां स समभ्
येत्य प्रतीहारैः प्रवेशितः ॥ अपश्यदाद्यं पुरुषमासीनं कांचनासने ॥ २७ ॥ दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात् ॥ उपवेश्यार्हयांचक्रे य
थात्मानं दिवौकसः ॥ २८ ॥ तं भुक्तवंतं विश्रांतमुपगम्य सतां गतिः ॥ पाणिनाभिमृशन्पादावव्यग्रः समपृच्छत ॥ २९ ॥

कस्य मलापहाः शृण्वानः श्रवणवान् श्रुतवानित्यर्थः श्रुतसारवित् ॥ नित्यनूतनाः प्रतिक्षणमपूर्ववत्प्रतीयमानाः ॥ २० ॥ चैद्यममन्यत तस्मा वरमित्यर्थः ॥ २५ ॥ अवेत्य ज्ञा
त्वा असितापांगी हे नीलकटाक्षा कृष्णाय कृष्णमानेतुं प्रेषयामास ॥ २६ ॥ प्रतीहारैः द्वारपालैः ॥ २७ ॥ आत्मानं श्रीकृष्णं ॥ २८ ॥ अभिमृशन् शनैः समर्दयन् ॥ २९ ॥

राम
८

सधर्मोस्य ब्राह्मणस्याखिलकामदोग्धा यद्वा स ब्राह्मणोस्य विश्वस्याखिलकामधुगिति ॥ ३१ ॥ लोकानाप्नोति लोकाल्लोकांतरं पर्य्यटति नैकत्र
निर्वृतस्तिष्ठतीत्यर्थः ॥ नाप्नोतीति पाठे सुरेश्वरोपि भूत्वा लोकान्नाप्नोति उत्तमलोकान्प्राप्तोप्यप्राप्तवत् क्लिश्यतीत्यर्थः शेते सुखमास्त इत्यर्थः ॥ तदे
वाह ॥ सर्वेष्वंगेषु वाक्पाणिपादिषु विज्वरस्तापरहितः ॥ स्वलाभः स्वत एव प्राप्तो लाभः ॥ आत्मलाभो वा तेन संतुष्टान् शरण्यान् साधून् त्वधर्म्मनिष्ठान् ॥ ३२ ॥
यस्य राज्ञो विषये देशे ॥ यतः स्थानात् यदिच्छया यस्य कार्यस्येच्छया दुर्गं समुद्रं ॥ ३५ ॥ संपृष्टः सम्प्रश्नः पृष्टो व्योर्थो येन सः ॥ परमेष्ठिना परमेश्वरेण ॥ ३६ ॥ वंधना

कच्चिद्द्विजवरश्रेष्ठ धर्म्मस्ते वृद्धसम्मतः ॥ वर्त्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥ ३० ॥ संतुष्टो यर्हि वर्त्तेत ब्राह्मणो येन केन चित् ॥ अहीयमानः
स्वाद्धर्म्मात्स ह्यस्याखिलकामधुक् ॥ ३१ ॥ असंतुष्टोसकृल्लोकानाप्नोत्यपि सुरेश्वरः ॥ अकिंचनोपि संतुष्टः शेते सर्वांगविज्वरः ॥ ३२ ॥ विप्रा
न्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणः शांतान्नमस्ये शिरसासकृत् ॥ ३३ ॥ कच्चिद्वः कुशलं ब्रह्मन्राजतो यस्य हि प्रजाः
सुखं वसंति विषये पाल्यमानाः स मे प्रियः ॥ ३४ ॥ यतस्त्वमागतो दुर्गं निस्तीर्य्येह यदिच्छया ॥ सर्वं नो ब्रूह्यगुह्यं चेत्किं कार्यं करवाणि ते ॥ ३५ ॥
एवं संपृष्टसंप्रश्नो ब्राह्मणः परमेष्ठिना ॥ लीलागृहीतदेहेन तस्मै सर्वमवर्णयत् ॥ ३६ ॥ रुक्मिण्युवाच ॥ श्रुत्वा गुणान्भुवनसुंदर शृण्वतां ते नि
र्विश्य कर्णविवरैर्हरतोंगतापं ॥ रूपं दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताविशति चित्तमपत्रपं मे ॥ ३७ ॥

मपि पृष्टं तत्तु किं राज्ञश्चेष्टितमित्यादि सर्वं ॥ ३६ ॥ रुक्मिण्या स्वयमेकांते लिखित्वा रत्नपवित्रकामुद्रांहस्तन्यस्य कृष्णाय प्रेमविह्वलां संदर्शयत ॥ ब्राह्मणः श्रीकृष्णाग्रे तयावाचयति
श्रुत्वेति ॥ अयमर्थः ॥ हे अच्युत हे भुवनसुंदरेति ॥ औत्सुक्यं द्योतयति ॥ कृतव महिमा कथा वा हत पंकलाशीलादिगुणान् आपितथापि अपगता त्रपा यस्मात्तत्तमे चित्तं त्वयि आ
विशति ॥ आसज्जते ॥ तत्कुतस्तत्राह ॥ शृण्वतां कर्णविवरैः प्रविश्य अंगतापं अंगतिसंबोधनं वा ॥ हरतस्तव गुणान् श्रुत्वा ॥ तथा दृशिमतां चक्षुष्मतां दृशां अखिलार्थ

२०३
१०

अहोकुलकन्यानामभिरमतिधार्ष्ट्यमिति माशंकीत्याह । कान्त्वेति । हे मुकुंद हे नृसिंह नरश्रेष्ठः का नाम कन्या कुलवती तथा महती गुणोदारा तथा धीरा धी-
मती त्वा त्वां पतिं न वृणीतेति । मय्येव केयं दोषशंकेति भावः । कं भूतं कुलशीलादिभिरात्मनैव तुल्यं निरूपममित्यर्थः । द्रविणं द्रव्यसंपत् । धाम प्रभा-
वः । तथा नरलोकस्य मनसां अभिरामो अभिरमणीयस्तं । किंच । काले विवाहावसरे ॥ ३८ ॥ हे विभो तत्तस्मात् मे मया भवान् स्वयं पतिर्वृतः । अतः आत्मा च भवतो

का त्वा मुकुंद महती कुलशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यं । धीरा पतिं कुलवती न वृ-
णीत कन्या काले नृसिंह नरलोकमनोभिरामं ॥ ३८ ॥ तन्मे भवान् खलु वृतः पतिरंग जायामात्मार्पितश्च
भवतोऽत्र विभो विधेहि । मा वीरभागमभिमर्शतु चैद्य आराद्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष ॥ ३९ ॥
पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान्परेशः । आराधितो यदि गदाग्रज एत्य पाणिं गृ-
ह्णातु मे न दमघोषसुतादयोऽन्ये ॥ ४१ ॥

र्पितः । अतस्त्वमत्रागत्य मां तव जायां विधेहि । विपक्षे बाधकं द्योतयन्नाह । मा वीरभागमिति
वीरस्य तव भागं आरात् शीघ्रमेत्य आगत्य चैद्यो माभिमर्शतु मा स्पृशतु । मृगपतेर्बलिं गोमायुः शृगाल इवेति ॥ ३९ ॥ अनेकजन्मकृतैः सुकृतैरिदमेव
भूयादिति प्रार्थ्यते । पूर्तेति । पूर्तं कूपादि । इष्टं अग्निहोत्रादि । दत्तं हिरण्यादि । नियमस्तीर्थाटनादि । व्रतं कृच्छ्रादि ॥ ॥ ४० ॥

राम
१०

चैद्यायावंधुभिरर्पितायां त्वयापि किमद्य नाकरणीयमित्यपेक्षायामाह ॥ श्वोभाविनीति हे अजित श्वोभाविनि उद्वहने प्रवाहे प्रथमं गुप्तः ॥ स्थलङ्कि
तएवागत्य पश्चात्पृतनापतिभिः परिवृतः सन् चैद्यादिबलं निर्मथ्य प्रसह्य हठात् ॥ वीर्यप्रभावदर्शनमेव शुल्कं वैवाहिकं देयं यस्यास्तां मां ॥ अनेन
राक्षसविधिनोद्वहेत्युपदेशरहस्यं ॥ ४१ ॥ ननु भवतु शिशुपालादिबलप्रमथनं ॥ अतः पुरमध्यगतायास्तव हरणे त्वद्बंधुवधोपि प्रसज्येत तत्रा
ह ॥ अंतःपुरेति ॥ उपायद्वहिर्वृत्तेमानां गिरिजामंबिकां ॥ अंबिकागृहाद्देवमम हरणं सुकरमिति भावः ॥ ४२ ॥ ननु किमनेनानर्थकारिणा निर्बंधनेवद्यो

श्वोभाविनि त्वमजितोद्वहने विदर्भान् गुप्तः समेत्य पृतनापतिभिः परीतः ॥ निर्मथ्य चैद्यमगधेशबलं प्रसह्य मां राक्षसेन विधि
नोद्वह वीर्यशुल्कां ॥ ४१ ॥ अंतःपुरांतरचरीमनिहत्य बंधून् त्वामुद्वहे कथमिति प्रवदाम्युपायं ॥ पूर्वेद्युरस्ति महती कुलदेवयात्रा
यस्यां बहिर्नववधूर्गिरिजामुपेयात् ॥ ४२ ॥ यस्यांघ्रिपंकजरजःस्नपनं महांतो वांछंत्युमापतिरिवात्मतमोपहत्यै ॥ यर्ह्यंबुजा
क्षा न लभेय भवत्प्रसादं जह्यामसून्व्रतकृशान् शतजन्मभिः स्यात् ॥ ४३ ॥ ब्राह्मण उवाच ॥ इत्येते गुह्यसंदेशा यदुदेव मयाहृताः
विमृश्य कर्तुं यच्चात्र क्रियतां तदनंतरं ॥ ४४ ॥ इति श्री भागवते महापुराणे दशमस्कंधे रुक्मिण्युद्वाहोनाम द्विपंचाशत्तमोध्या
यः

पितावत्स्वरव्यातगुणाकर्म्मा योग्य एव वर इति तत्राह यस्येति ॥ हे अंबुजाक्ष यस्य भवतोंघ्रिपंकजरजोभिः स्नपनं आत्मनस्तमसोपहत्यै उमाप
तिरिव महांतो वांछंति तस्य भवतः प्रसादं यद्यहं न लभेय न प्राप्नुयां ॥ तर्हि व्रतैरुपवासादिभिः कृशान् असून् प्राणान् जह्यां त्यजेयं ततः किमित्यत आह श
तजन्मभिरिति ॥ एवमेव वारंवारं जह्यां यावच्छतजन्मभिरपि तव प्रसादः स्यादिति ॥ अत्र यत्कर्तव्यं करणीयं तद्विमृश्य क्रियतां तच्चानंतरमेव क्रियतामिति

रुक्म
द्विपंचाशत्तमः

२०७ ॥

विप्रं चाशत्रमेगत्वा विदर्भान्नद्भुतेहितः ॥ रुक्मिणीमहरत्कृष्णो मिषतां द्विषतां बलात् ॥ १ ॥ निद्राया अलाभे कारणांतरं वेदेति ॥ तयास्तु कथितमप्यहं जाना
मीति ॥ आनयिष्ये ॥ आनेष्यामि ॥ राजन्यापसदान्राजसुहीनान् ॥ उन्मथ्यानयने दृष्टांतः एधसइति २ ॥ उद्वाहर्क्षमिति ॥ परश्वोरात्रौ विवाहनक्षत्रमिति
विज्ञाय तस्याः आगमिष्याम्यथातविदर्भदेशानगमत्स्वो भाविनि त्वमजितोद्वहने विदर्भान्गत्वा ससैन्यः समेत्येति रुक्मिणीसंदेशात ४ ॥ सेत्यमुक्त्वा दीनिचत्वा

श्रीशुक उवाच वैदर्भ्याः सतु संदेशं निशम्य यदुनंदनः ॥ प्रगृह्य पाणिना पाणिं प्रहसन्निदमब्रवीत ॥ १ ॥ श्रीभगवानुवाच तथाहमपि तच्चि
त्तो निद्रां च न लभे निशि ॥ वेदाहं रुक्मिणा द्वेषान्ममोद्वाहो निवारितः ॥ २ ॥ तामानयिष्य उन्मथ्य राजन्यापसदान्मृधे ॥ मत्परामनवद्यांगीमेध
सोग्निशिखामिव ॥ ३ ॥ उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः ॥ रथः संयुज्यतामाशु दारुकेत्याह सारथिं ॥ ४ ॥ स चाश्वैः शैब्यसुग्रीवमेघपुष्पब
लाहकैः ॥ युक्तं रथमुपानीय तस्थौ प्रांजलिरग्रतः ॥ ५ ॥ आरुह्य स्यंदनं शौरिर्द्विजमारोप्य तूर्णगैः ॥ आनर्तादेकरात्रेण विदर्भानगमद्धयैः ॥ ६ ॥
राजा स कुंडिनपतिः पुत्रस्नेहवशंगतः ॥ शिशुपालाय स्वां कन्यां दास्यन्कर्माण्यकारयत ॥ ७ ॥ पुरं संमृष्टसंसिक्तमार्गरथ्याचतुःपथं ॥ चित्रध्व
जपताकाभिः तोरणैः समलंकृतं ॥ ८ ॥ स्रग्गंधमाल्याभरणैर्विरजोंबरभूषितैः ॥ जुष्टं स्त्रीपुरुषैः श्रीमद्गृहैरगरुधूपितैः ॥ ९ ॥ पितॄन्देवा
न्समभ्यर्च्य विप्रांश्च विधिवन्नृप ॥ भोजयित्वा यथान्यायं वाचयामास मंगलं ॥ १० ॥ टि० स्वनामानि ५ पुत्रस्य रुक्मिणः स्नेहेन तद्वशमनुगच्छतीति
तथा ॥ अनेन शिशुपालेनाभिरुचिर्द्योतयति ॥ कर्माणि उपलक्षणालंकारपितृदेवार्चनादीनि ॥ ७ ॥ तान्येवाह ॥ पुरमित्यादि चतुर्भिः ॥ संमृष्टाः संसिक्ताश्च मार्गा रथ्या
यस्मिंस्तत् ॥ चित्रध्वजैः पताकाभिः समलंकृतमकारयत ॥ ८ ॥ स्रग्गंधमाल्याभरणैरित्यत्र मत्वर्थीय इष्टव्यः यद्वा स्रग्गंधमाल्यानि आविद्यंतीति
तथा तैः ॥ तथा विरजोंबरैर्भूषितैश्च स्त्रीपुरुषैः जुष्टं ॥ तथा श्रीमद्भिः गृहैश्च जुष्टं ॥ ९ ॥ यथान्यायमन्वयः ॥ कन्याप्रति मंगलं वाचयामास ॥ १० ॥

राम ॥

कृतकौतुकेन विवाहसूत्रेण मंगलं यस्याः सा तां ॥ अहतं नवीनं भूषणोत्तमैः सुभूषितां ॥ ० ॥ वध्वास्तस्याः कन्यायाः अथर्ववित् अथर्ववेदमंत्रवित्
अभ्युदयेऽवित् ॥१३॥ ततस्तद्वरांगसैन्यैः परिवृतः कुंडिनं भीष्मकस्य पुरं ययौ ॥ मदच्युतं तीति मदच्युतः तैः स्यंदनैः रथैः ॥ हेमरचितमाला विद्यंते ये

स्नातां सुदतीं कन्यां कृतकौतुकमंगलां ॥ अहतांशुकयुग्मेन भूषितां भूषणोत्तमैः ॥ ० ॥ चक्रुः सामर्ग्यजुर्मंत्रैः वध्वा रक्षां द्विजो
त्तमाः ॥ पुरोहितोऽथर्ववित् जुहाव ग्रहशांतये ॥११॥ हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् ॥ प्रादाद्धेनूश्च विप्रेभ्यो राजा विधिवि
दांवरः ॥१२॥ एवं चेदिपती राजा दमघोषः सुताय वै ॥ कारयामास मंत्रज्ञैः सर्वमभ्युदयोचितं ॥१३॥ मदच्युद्भिर्गजानीकैः स्यंदनैर्है
ममालिभिः ॥ पत्त्यश्वसंकुलैः सैन्यैः परीतः कुंडिनं ययौ ॥१४॥ तं वै विदर्भाधिपतिः समभ्येत्याभिपूज्य च ॥ निवेशयामास मुदा क
ल्पितान्यनिवेशने ॥१५॥ तत्र शाल्वो जरासंधो दंतवक्रो विदूरथः ॥ आजग्मुश्चैद्यपक्षीयाः पौंड्रकाद्याः सहस्रशः ॥१६॥ कृष्णराम
द्विषो यत्ताः कन्यां चैद्याय साधितुं ॥ यद्यागत्य हरेत्कृष्णो रामाद्यैर्यदुभिर्वृतः ॥१७॥ योत्स्यामः संहतास्तेन इति निश्चितमानसाः ॥ आज
ग्मुर्भूभुजः सर्वे समग्रबलवाहनाः ॥१८॥ श्रुत्वैतद्भगवान् रामो विपक्षीयनृपोद्यमं ॥ कृष्णं चैकं गतं हर्तुं कन्यां कलहशंकितः ॥१९॥ व
लेन महता सार्धं भ्रातृस्नेहपरिप्लुतः ॥ त्वरितः कुंडिनं प्रागात् गजाश्वरथपत्तिभिः ॥२०॥ भीष्मकन्या वरारोहा कांक्षंत्यागमनं हरेः ॥ प्र
त्युत्तरं ॥१४॥ कल्पितं यदन्यत् निवेशनं तस्मिन् ॥१५॥ यदि श्रीकृष्णो हरेदिति शंकिताः कन्यां साधयितुमित्यर्थः ॥ त्यापत्तिमपश्यंती द्विजस्याचिंतयत्तदा ॥२१॥
प्रत्यागमनं चिंतयामास ... हरिर्यद्यागत्य सर्वमेवोत्कंठेन हाकिमपि वितर्कयदित्याह ॥ भीष्मकन्येति प्रत्यापत्तिः प्रत्यागमनं ॥२१॥

२०७
१२

त्रियामान्तरिता वस्तात्रेणान्तरितः॥ अल्पराधसोऽल्पभाग्यायाः॥२२॥ जुगुप्सितं धार्ष्ट्यादिरूपां निशंकायां नायाति हि॥ कृतोद्यम इति स्पष्टार्थः॥ आदौ कृतो
द्यमत्वान्नेन प्रस्थापितवान्॥ प्रस्थानावसरे च किंचित् मयि जुगुप्सितं मत्वा प्रत्यावृत्तः॥ अतः सोऽपि द्विजो नूनं नायातीति॥ यद्वा ततो निर्गतोऽपि श्रीकृष्णो म
हेश्वरेण त्यक्तोऽत्र गन्तव्यमिति वेधो भवेदित्याह॥ दुर्भगाया इति॥२४॥ कालज्ञा नाधुना प्रियो विवाहगमनकाल इति मत्वा नाकिंचिद्विवाहस्तत्र चिन्तासक्ता चिन्तार्त्ते
द्वे लोचने निमीलितवतीत्यर्थः॥२६॥ प्रियभाषिणः प्रियसूचकाः पुरोपवनं प्राप्तेन श्रीकृष्णेन विनिर्दिष्टः प्राप्तं मां कथयेत्यादिष्टः॥२७॥ नव्यग्रात्म

अहो त्रियामान्तरित उद्वाहो मेऽल्पराधसः॥ नागच्छत्यरविंदाक्षो नाहं वेद्म्यत्र कारणं॥२२॥ सोऽपि नावर्त्ततेऽद्यापि मत्संदेशहरो द्विजः॥ अपि
मय्यनवद्यात्मा दृष्ट्वा किंचिज्जुगुप्सितः॥२३॥ मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः॥ दुर्भगाया न मे धाता नानुकूलो महेश्वरः॥२४॥
देवी वा विमुखी गौरी रुद्राणी गिरिजा सती॥ एवं चिंतयती बाला गोविंदहृतमानसा॥२५॥ न्यमीलयत कालज्ञा नेत्रे चाश्रुकलाकुले॥
एवं वध्वाः प्रतीक्षंत्या गोविंदागमनं नृप॥२६॥ वाम ऊरुर्भुजो नेत्रमस्फुरन्प्रियभाषिणः॥ अथ कृष्णविनिर्दिष्टः स एव द्विजसत्तमः॥२७॥
अंतःपुरचरीं देवीं राजपुत्रीं ददर्श ह॥ सा तं प्रहृष्टवदनमव्यग्रात्मगतिं सती॥२८॥ आलक्ष्य लक्षणाभिज्ञा समपृच्छच्छुचिस्मिता
तस्या आवेदयत्प्राप्तं शशंस यदुनंदनं॥२९॥ उक्तं च सत्यवचनमात्मोपनयनं प्रति॥ नो रेहस्यागतिर्येभ्यः तं॥ इङ्गितलक्षणानि तज्ज्ञा तत्कार्यसूचकमपि
जानातीति तथा॥२८॥ तस्मै प्राप्तं यदुनंदनमावेदितवान्॥ तच्च शशंस॥ आत्मोपनयनं प्रति॥ आत्मनाऽस्त्वेयं श्रीकृष्णस्यानयनं प्रति तेन द्विजेन सत्यवचनं चोक्तमिति एम
आत्मनः प्राणेश्वरस्येति वा॥ यद्वा आत्मनस्तस्या उपनयनं प्रति श्रीकृष्णेन यदुक्तं सत्यवचनं तामानयिष्य इत्यादि तच्छशंस अवर्णयदित्यर्थः॥२९॥

१२

तं श्रीकल्किमस्मिन्कार्ये सर्व्वं स्वार्ण्णामयिरूपर्यायान्मितितनदृवितं प्रियमपश्यंतीतरां केवलं न नाम ॥ पश्चाद्दूरस्थावितर्थः यद्धामाश्रियंयेनमति
तेनावृतं सर्व्वं संपदामास्पदं भवंति किं पुनस्त्रियो गणनायामिति तत्तोधिकमन्यस्त्रियं न पश्यंती न नामेति ॥ २१ ॥ महामतिरित्यनेन श्रीकल्केरावांटक
न्यायदृष्टेभवागतः स्यादिति वरो वितनविधिनामसमपूजयदिति दृष्ट्वितं ॥ यथायथावत ॥ २२ ॥ समेता नानागणमध्ये वीर्याद्यनतिक्रम्य तत्तमर्हितवानित्य

तमागतं समाकर्ण्य वेदमीहृष्टमानसा ॥ न पश्यंती ब्राह्मणं प्रियमन्यत्र नाम सा ॥ २१ ॥ प्रासादोक्तत्वा स्वदुहितृसद्वाहप्रोक्षणे
न्हकौ ॥ अभ्यया न्यूपैर्द्वोषेणारामकल्कोसमर्हणैः ॥ २२ ॥ मधुपर्कमुपानीय वासांसि विरजानि सः उपायनान्यभीष्टानि विधिवत्स
मपूजयत ॥ २३ ॥ तयोर्विवेशनं श्रीमदुपकल्प्य महामतिः ॥ समेतन्ययोः स्वागयोरातिथ्यं विदधे यथा ॥ २४ ॥ एवं राज्ञां समेतानां
यथावीर्यं यथावयः ॥ यथाबलं यथा वित्तं समर्हैः कामैः समर्हयत ॥ २५ ॥ कल्किमागतमाकर्ण्य विदर्भपुरवासिनः ॥ आगत्य नेत्रां
जलिभिः पपुस्तेन तुष्टः त्रिलोककृत ॥ अनुगृह्णाविरुद्धान्वैदर्भ्याः पाणिमस्पृशतः ॥ २६ ॥ एवं प्रेमकलाबद्धा वदंति स्म पुरौकसः
सेन्मुखेपंकजे ॥ २७ ॥ अस्यैव भार्या पवित्रं हकिलपापहेतिनापरा ॥ अस्मावप्यनवद्यात्माभैष्म्याः समुचितः पतिः ॥ २८ ॥ किंचित्स
द्वरितं यत्र ३

र्थः ॥ २५ ॥ श्रीकल्केर्भाविकर्म्मस्तवकजनानुरागं दर्शयति श्रीकल्किमागतमितित्रिभिः ॥ २६ ॥ अस्यैव हकिलएपवाई त्येवअस्मावेव भैष्म्या
एव समुचित एवेति ॥ एउवधारणानितनैकस्मिन्व्यतिरेकशदर्शनं ॥ उपलक्षणार्थं ॥ नापरेति नववाक्यभेददोषः अनुद्यविधेयभेदेन विभिन्नानामेववा
क्यानां सहप्रयोगात्रग्रहं समार्ष्टि इत्याहविदरिति ॥ २७ ॥ अथमेवानुग्रहं इति निर्दिशति शेलाविति ॥ २८ ॥

२०३
१२

तस्यागमनं विशिनष्टि द्वयेन पद्मामिति ॥३८॥ अपिवमृदंमेत्यादिनद्विरेऽस्याहता वादिताः इत्यर्थः ॥३९॥ वारमुख्यागणिकोत्तमाः ॥४४॥ उपस्पृश्य पश्चाव
म्य ॥ अवयसोऽत्युद्भवा भवाब्धिता मिति भवस्योपसर्जनं त्वद्वीक्षयोर्वितमुक्तं ॥४५॥ नमस्य इति हृक्किणिपातरे वदृष्टेषु यं मंत्रः ॥ त्वसंतानयुतागणेशादि सहि

कन्यावांतः पुरात्स्वागात भरेर्गुप्तांविकालयं ॥ पद्मांविनिर्ययौ द्रष्टुं भवान्याः पादपल्लवं ॥३९॥ सावानुध्यायती सम्यक् मुकुंद चरणां बुजं
यतवाक् मातृभिः सार्द्धं सखीभिः परिवारिता ॥४०॥ गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ॥ मृदंगशंखपणवाः तूर्यभेर्यश्च जघ्निरे ॥४१
नानोपहारबलिभिर्वारमुख्याः सहस्रशः ॥ स्रग्गंधवस्त्राभरणैर्द्विजपत्न्यः स्वलंकृताः ॥४२॥ गायतश्च स्तुवंतश्च गायका वाद्यवादकाः
परिवार्य वधूं जग्मुः सूतमागधवंदिनः ॥४३॥ आसाद्य देवसदनं धौतपादकरांबुजा ॥ उपस्पृश्य शुचिः शांता प्रविवेशांविकांतिकं ॥४४॥ तां
वै प्रवयसो बालां विधिज्ञा विप्रयोषितः ॥ भवानीं वंदयां चक्रुर्भवपत्नीं भवान्वितां ॥४५॥ नमस्ये त्वांबिके भीक्ष्णं स्वसंतानयुतां शिवां ॥ भू
यात्पतिर्मे भगवान् कृष्णस्तदनुमोदतां ॥४६॥ अद्भिर्गंधाक्षतैर्धूपैर्वासःस्रङ्माल्यभूषणैः ॥ नानोपहारबलिभिः प्रदीपावलिभिः पृथक्
॥४७॥ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत ॥ लवणापूपतांबूलकंठसूत्रफलेक्षुभिः ॥४८॥ तस्मै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः
ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः ॥४९॥ मुनिव्रतमथ त्यक्त्वा निश्चक्रामांबिकागृहात ॥ प्रगृह्य पाणिना भृत्यां रत्नमुद्रोपशोभिना ॥५०॥

तां ॥ श्लाघ्यात्मारामो मे सोऽकथं त्वत्पतिर्भवेदिति चेदत आह ॥ तदनुमोदतामिति भवतीश्रीकल्पएव वा ॥४६॥ स्रग्गंधादिभिर्विरिंचिकामसमपूजयत ॥४७॥ तथा विप्रस्त्रियोपि ते
ईश्वेलवणादिभिश्च समपूजयदिति ॥४८॥ शेषां निर्माल्यं ॥४९॥ मुनिव्रतं मौनं ॥ रत्ना सखी ॥५०॥

राम
१२

॥ ५० ॥ तां विलोक्य वीरा मुमुहुरिति तृतीयश्लोकेनान्वयः ॥ श्यामां अजातरजस्काम् ॥ कुंतलेभ्यः शंकिते स्वचपले ईक्षणे यस्यास्तां ॥ ५१ ॥ द्विजा एव कुंदानां
कुड्मलानि मुकुलानि बिंबफलवतो अधरस्तस्य द्युतिभिः शोणायमानानि तानि यस्यास्तां ॥ कलाशोभा ॥ तद्धाम्नं नूपुरं सिंजद्यत् तत्कलानूपुरं स्वनतस्य धाम

तां देवमायामिव वीरमोहिनीं सुमध्यमां कुंडलमंडिताननां ॥ श्यामां नितंबार्पितरत्नमेखलां व्यंजत्स्तनीं कुंतलशंकितेक्षणां ॥ ५१ ॥
शुचिस्मितां बिंबफलाधरद्युतिशोणायमानद्विजकुंदकुड्मलां ॥ पदा चलंतीं कलहंसगामिनीं सिंजत्कलानूपुरधामशोभिना ॥ ५२ ॥
विलोक्य वीरा मुमुहुः समागता यशस्विनस्तत्कृतहृच्छयार्दिताः ॥ यां वीक्ष्य ते नृपतयस्तदुदारहासव्रीडावलोकहृतचेतस उज्झिता-
स्त्राः ॥ ५३ ॥ पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राच्छलेन हरयेर्पयतीं स्वशोभां ॥ सैवं शनैश्चलयती चलपद्मकोशौ प्राप्तिं तदा भग-
वतः प्रसमीक्षमाणा ॥ ५४ ॥ उत्सार्य वामकरजैरलकानपांगैः प्राप्तान् ह्रियैक्षत नृपान् ददृशेच्युतं च ॥ तां राजकन्यां रथमारुरुक्षतीं जहार कृष्णो
द्विषतां समीक्षतां ॥ ५५ ॥ रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय माधवः ॥ ततो ययौ रामपुरोगमैः शनैः सृगालमध्या-
द्इव भागहृद्धरिः ॥ ५६ ॥ तं मानिनः स्वाभिभवं यशःक्षयं परे जरासंधवशा न सेहिरे ॥ अहो धिगस्मान् यश आत्तधन्वनां गोपैर्हृतं केसरिणां
मृगैरिव ॥ ५७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिणीहरणे त्रिपंचाशत्तमोध्यायः ॥

दीप्तिः तेन शोभितं सुशीलं मंदं यस्याः तेन पदा चलंती ॥ ५२ ॥ न केवलं संमुमुहुः ये तत्रैवेत्याह ॥ यामिति ॥ यात्राभिषेण हरये स्वलावण्यं समर्पयंतीं यां विस्मापितास्ते पेतुः ॥ ५३ ॥
सा तान् प्राप्तान् ह्रियैक्षत ॥ तदैवाच्युतं ददर्श ॥ तत्प्रेरणाच्चान्वयः ॥ चलत्पद्मकोशतुल्यौ चरणौ वालयंती ॥ ५४ ॥ सुपर्णलक्षणं गरुडध्वजं ॥ हरिः सिंहः ॥ ५५ ॥ अस्पृहमानानां तेषां

२०३
१४

ततः पंचाशन्नमेतजित्वा रात्रौ रिपकृगान् ॥ हकिनणांवविन्नूष्याथ भैष्माः पाणिग्रहे गृहीत इतीति ॥ अहो धिगस्मान् इत्येवं वरं ततः ह्रसंरब्धाः क्रोधाविष्टाः ईरिताः कृतसन्नाहाः परिक्रांताः परिवृताः अत्वीड्यः अत्वधावन् ॥ १ ॥ विस्फूर्जितंकारयित्वा ॥ २ ॥ परेषां शराणां वा ऊन्येपार्श्वानामचलत्वे दृष्टांतः मेघाः

श्रुकृष्णव ॥ इति सर्वे ह्रसंरब्धा वाहाना हत्यर्थंशिताः ॥ हैः हैर्बलैः परिक्रांता अत्वीयुर्धृतकार्मुकाः ॥ १ ॥ तानापततआलोक्य यादवानी कपूथपाः ॥ तस्थुः स्वलसंभ्रुद्धा राजन् विस्फूर्ज्य स्वधनूंषि ते ॥ २ ॥ अश्वपृष्ठे गजस्कंधे रथोपस्थे च कोविदाः ॥ मुमुचुः शरवर्षाणि मेघा अद्रिष्विवापो यथा ॥ ३ ॥ पत्युर्बलं शरासारैः छन्नं वीक्ष्य सुमध्यमा ॥ सव्रीडं ऐक्षत्तद्वक्त्रं भयविह्वललोचना ॥ ४ ॥ प्रहस्य भगवानाह मा स्म भैर्वामलोचने ॥ विनंक्ष्यत्यधुनैवैतत्तावकैः शात्रवं बलं ॥ ५ ॥ तेषां तद्विक्रमं वीरा गदसंकर्षणादयः ॥ अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान्रथान् ॥ ६ ॥ पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि ॥ सकुंडलकिरीटानि सोष्णीषाणि च कोटिशः ॥ ७ ॥ हस्ताः सासिगदेष्वासाः करभा ऊरवोंघ्रयः ॥ अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ॥ ८ ॥ हन्यमानबलानीकावृष्णिभिर्जयकांक्षिभिः ॥ राजानो विमुखा जग्मुर्जरासंधपुरोगमाः ॥ ९ ॥ शिशुपालं समभ्येत्य हृतदारमिवातुरं ॥ नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन् ॥ १० ॥ भो भोः पुरुषशार्दूल दौर्मनस्यमिदं त्यज ॥ न प्रियाप्रिययो राजन्निष्ठा देहिषु दृश्यते ॥ ११ ॥

ति ॥ ३ ॥ एवं कृत ॥ एवं ज्ञात ॥ ४ ॥ मा स्म भैः मा भयं कुरु ॥ हे वामलोचने ॥ तावकैः त्वदीयैः कर्त्वा ॥ ५ ॥ सर्वा सेना विक्रम स्वंते ॥ ६ ॥ उष्णीषाणि शिरोवेष्टनवस्त्राणि तत्सहितानि शिरांसि ॥ ७ ॥ करभाः प्रकोष्ठाः ऊरु विशेषणं वा ॥ ८ ॥ अप्राप्तदारमेवं तं हृतदारमिवातुरं ॥ १० ॥ निष्ठा स्थैर्यं ॥ ११ ॥

राम
१४

कुहकोनर्न्नैपि तातस्नेहाद्याद् दुःखेपीह मानत्वेन पारवश्यं व्यक्तं दर्शितं ॥१॥ अत्रचाहमेव दृष्टांतः इत्याह जरासंधः शौरेरिति ॥ कस्मात्तत्काशात् एकं संयुगं परं

यथा दारुमयी योषिन्नृत्यते कुहकेच्छया ॥ एवमीश्वरतंत्रोयमीहते सुखदुःखयोः ॥२॥ शौरेः सप्तदशाहं वै संयुगानि पराजितः
त्रयोविंशतिभिः सैन्यैर्जिग्ये एकमहं परं ॥३॥ तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित ॥ कालेन दैवयुक्तेन जानन्विद्रावितं ज
गत ॥४॥ अधुनापि वयं सर्वे वीरयूथपयूथपाः ॥ पराजिताः फल्गुतंत्रैर्यदुभिः कृष्णपालितैः ॥५॥ रिपवो जिग्युरधुना काल आ
त्मानुसारिणी ॥ तदा वयं विजेष्यामो यदा कालः प्रदक्षिणाः ॥६॥ एवं प्रबोधितो मित्रैश्चैद्योगात्सानुगः पुरं ॥ हतशेषाः पुनस्ते
पि ययुः स्वं स्वं पुरं नृपाः ॥७॥ रुक्मी तु राक्षसोद्वाहं कृष्णद्विडसहन्स्वसुः ॥ पृष्ठतोन्वगमत्कृष्णमक्षौहिण्या वृतो वली ॥८॥ रुक्म्य
मर्षी सुसंरब्धः शृण्वतां सर्वभूभुजां ॥ प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः ॥९॥ अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीं
कुंडिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः ॥२०॥ इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः ॥ चोदयाश्वान्यतः कृष्णस्तस्य मे संयु
गं भवेत ॥२१॥ अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मते ॥ नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ॥२२॥

केवलं अंतिमं वा जिग्ये जितवानहं ॥३॥ दैवमदृष्टं तद्युक्तेन ॥४॥ फल्गुतंत्रैः स्वल्पसैन्यैः ॥५॥ प्रदक्षिणः अनुकूलः स्यात ॥६॥ गोपालस्य वेदपालकस्येति वा
त्रवीर्यः तथा सुदुर्मतेरिति ॥ शोभना अनुग्रहवती ॥ उदेष्यपि मतिर्यस्य तस्येति ॥२२॥

२०३
१५

यद्भुतां कुलपांसन दूषणाववक्तां तस्यां यद्भुतां कुलपांसपते ॥ हे शंसन त्वं यचरिपुहननवतात्रं समसमाघातःस्मात्तद्वातोः कर्त्रिरिल्पुरुघात्ययोनद्यादि विहितः ॥१४॥ ध्वांक्षः काकः स यथा हविर्भुक्स्मातितद्वत ॥ वक्तातत्स्नां सुध्वांक्षवदिति छेदः सहस्ताक्षवदित्यर्थः ॥ हेमंदस्थिरेत्यर्थः ॥१५॥ परित्रासेन विकंपितान्यंगा

विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित् ॥ रथेनैकेन गोविंदं तिष्ठ तिष्ठेत्यथाह्वयत् ॥१३॥ धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः ॥ आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन ॥१४॥ कुत्र यासि स्वसारं मे मुषित्वा ध्वांक्षवद्धविः ॥ हरिष्येऽद्य मदं मंद मायिनः कूटयोधिनः ॥ यावन्न मे हतो बाणैः शयीथा मुंच दारिकां ॥१५॥ स्मयन्कृष्णो धनुश्छित्वा षड्भिर्विव्याध रुक्मिणं ॥ अष्टभिश्चतुरो वाहान्द्वाभ्यां सूतं ध्वजं त्रिभिः ॥१६॥ स चान्यद्धनुराधाय कृष्णं विव्याध पंचभिः ॥ तैस्ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः ॥१७॥ धनुरन्यदुपादत्त तदप्यच्छिनदव्ययः ॥ परिघं पट्टिशं शूलं चर्मासी शक्तितोमरौ ॥१८॥ यद्यदायुधमादत्त तत्सर्वं सोऽच्छिनद्धरिः ॥ ततो रथादवप्लुत्य खड्गपाणिर्जिघांसया ॥ कृष्णमभ्यद्रवत्क्रुद्धः पतंग इव पावकं ॥१९॥ तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः ॥ छित्वासिमाददे तिग्मं रुक्मिणं हंतुमुद्यतः ॥२०॥ दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला ॥ पतित्वा पादयोर्भर्तुरुवाच करुणं सती ॥२१॥ योगेश्वराप्रमेयात्मन्देवदेव जगत्पते ॥ हंतुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥२२॥ श्रीशुक उवाच ॥ तया परित्रासविकंपितांगया शुचावशुष्यन्मुखरुद्धकंठया ॥ कातर्यविस्रंसितहेममालया गृहीतपादः करुणो न्यवर्तत ॥२३॥

नि यस्याः तया तया शुचा शोकेन शुष्यन्मुखं यस्याः रुद्धः कंठो यस्याः सा च सा च तया ॥ कातर्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्याः तया गृहीतौ पादौ यस्य सः ॥२३॥

यम
१५

सश्मश्रुकेशं श्मश्रुकेशसहितं तानि स्थाने स्थाने अवशिष्टानि श्मश्रूणि केशाश्च यथा भवंति तथा तेनैवासिना प्रवपन्मुंडयन् व्यरूपयत् विरूपमकरोत्
॥३४॥ तथाभूतं हतप्रायमित्यन्तरवाक्यमनुषंगः ॥३५॥ रुक्मिणीं सांत्वयति मैवास्मानिति ॥३६॥ पुनः कृष्णमाक्षिपति । बंधुरिति ॥३८॥ पुनर्देवीं प्रत्याह
क्षत्रियाणामिति येन धर्मेण भ्रातापि भ्रातरं हन्यात्ततस्तस्मात्तद्घोरतरः अतिदारुणः धर्म्मस्त्वतस्त्वकोस्माकमपराध इति भावः ॥३९॥ पुनः श्रीरु

चैलेनबद्ध्वातमसाधुकारिणंसश्मश्रुकेशंप्रवपन्व्यरूपयत् ॥ तावन्ममर्दुःपरसैन्यमद्भुतंयदुप्रवीरानलिनींयथागजाः ॥३४॥
कृष्णांतिकमुपव्रज्यददृशुस्तत्ररुक्मिणं ॥ तथाभूतंहतप्रायंदृष्ट्वासंकर्षणोविभुः ॥३५॥ विमुच्यबद्धंकरुणोभगवान्कृष्ण
मब्रवीत् ॥ असाध्विदंत्वयाकृष्णकृतमस्मज्जुगुप्सितं ॥३६॥ वपनंश्मश्रुकेशानांवैरूप्यंसुहृदोवधः ॥ मैवास्मान्साध्व्यसू
येथाभ्रातुर्वैरूप्यचिंतया ॥ सुखदुःखदोनचान्योस्तियतःस्वकृतभुक्पुमान् ॥३७॥ बंधुर्वधार्हदोषोपिनबंधोर्वधमर्हति ॥ त्या
ज्यःस्वेनैवदोषेणहतःकिंहन्यतेपुनः ॥३८॥ क्षत्रियाणामयंधर्मःप्रजापतिविनिर्मितः ॥ भ्रातापिभ्रातरंहन्याद्येनघोरतर
स्ततः ॥३९॥ राज्यस्यभूमेर्वित्तस्यस्त्रियोमानस्यतेजसः ॥ मानिनोन्यस्यवाहेतोःश्रीमदांधाःक्षिपंतिहि ॥४०॥ तवेयंविषमाबु
द्धिःसर्वभूतेषुदुर्हृदां ॥ यन्मन्यसेसदाभद्रंसुहृदांभद्रमज्ञवत् ॥४१॥

क्मिं प्रत्याह ॥ राज्यस्येति ॥ तथाप्यस्माकमेतदनुचितमिति भावः ॥४०॥ पुनर्देवीं प्रत्याह ॥ तवेयमिति ॥ सर्वभूतेषु दुर्हृदां महितानां भ्रातॄणां अज्ञवत् यद्भद्रं मन्यसे दृष्टाभिर्यत्
वविषमास्माभिर्विनाबुद्धिः कुतः यतस्त्वं वसुहृदामभद्रमिति । यद्वा सर्वभूतेषु दुर्हृदामपि सुहृदां सदा भद्रमेव त्वं उरूपं सुतेन मम भद्रं यन्मन्यसे तवेयं विषमा बुद्धिरिति
अथवा सर्वभूतेषु मध्ये दुर्हृदां शिशुपालादीनामभद्रं सुहृदां भद्रं वधमन्यसे तवेयं विषमा बुद्धिः ॥ समा न भवति अज्ञवत् अज्ञानामिव ॥४१॥

कुतस्तत्राह। आत्ममोह इति ॥ ४१ ॥ परमार्थमाह एक एवेति परः शुद्धः ज्योतिश्चंद्रादिर्य्यथोदकेषु नभो यथा घटादिष्विति ॥ ४२ ॥ कुतस्तर्हि नचंद्रादि
वदात्मानं एवं शुद्धं प्रतीमः। तत्राह देह इति द्रव्यमधिभूतं प्राणा इंद्रियाणि अध्यात्मं गुणा देवा नाधिदैवं तत्त्रितयात्मकः देहोपाधिनाशुद्धो न प्रतीयत इ
त्यर्थः ॥ ४४ ॥ ननु देहसंबंधेनापि संसारे सति शुद्धत्वं गतमेव तत्राह देहमिति अन्येन अधिभूतादिना आत्मनः संयोगवियोगौ न स्तः कुतः असतः
असत्वादन्यस्येत्यर्थः कुतो सत्वं तत्राह तद्धेतुत्वादिति तस्यान्यस्य भूतेंद्रियादेः प्रसिद्धेः प्रकाशस्य तद्धेतुत्वात् आत्महेतुकत्वात् ननु देवरधिष्ठिते

आत्ममोहो नृणामेष कल्पते देवमायया ॥ उद्धनुदुद्धंडुदासीन इति देहात्ममानिनां ॥ ४१ ॥ एक एव परो ह्यात्मा स
र्वेषामपि देहिनां ॥ नानेव गृह्यते भूतैर्यथा ज्योतिर्यथा नभः ॥ ४३ ॥ देह आद्यंतवानेष द्रव्यप्राणगुणात्मकः ॥ आ
त्मन्यविद्यया क्लृप्तः संसारयति देहिनम् ॥ ४४ ॥ नात्मनोऽन्येन संयोगो वियोगश्चासतः सती ॥ तद्धेतुत्वात्तत्प्रसि
द्धेर्दृग्रूपाभ्यां यथा रवेः ॥ ४५ ॥

भ्यः इंद्रियेभ्यो भूतानां प्रतीतिः प्रसिद्धा भूतप्रतीत्या च तत्प्रसिद्धिर्नात्मन इत्यत आह दृग्रूपाभ्यां यथा रवेः यथा प्रकाश्यप्रकाशकत्वेन वर्त्तमानयोरपि चक्षू
रूपयो रवेः सकाशात्प्रसिद्धिः द्वयोरपि तेजस्त्वान्न रवेर्भेदः एवं तत्वतो भूतेंद्रियादीनां परस्परं सिद्धानामपि चैतन्याधीन एव प्रकाशः तत्कार्यत्वाच्च तद्व्यतिरेकेणासम
सत्त्वं चेत्यर्थः तथा च द्वादशे वक्ष्यति दृशश्चक्षूस्वरूपं च ज्योतिषो न पृथग्भवेत् एवं धीः खानि मात्राश्च स्फुरंत्यन्यतमादृतादिति यद्वा रवेः प्रसिद्धाभ्यामेव दृग्

देहसंबंधाभावादेव नात्मनो जन्मादयोपीति विवक्षन् जन्मादीनां देहधर्मत्वमाह । जन्मादयस्त्विति कथं तर्हि जातोहं वालोहं वृद्धोहमिति स्वात्मनि जन्मा
दिप्रतीतिः देहजन्मादिनैवेति सदृष्टांतमाह कलानामिवेति इंदोः कलानामेव जन्मादयो नेंदोः यथा तद्वत् यथा च कलानाशादेव कुहूरमावस्यां इंदु
क्षय उच्यते तद्वद्देहस्यात्मनो देहनाशादेव मृतिव्यवहार इत्यर्थः ४६ नन्वात्मनो देहादिसंबंधाभावे कथं भोक्तृभोगप्रयोगप्रतीतिरित्याशंक्याह सदृष्टांतेन म

जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित् । कलानामिव नैवेंदोर्मृतिर्ह्यस्य कुहूरिव ॥ ४६ ॥ यथा शयान आत्मानं विषयान्फल
मेव च । अनुभुंक्तेप्यसत्यर्थे तथाप्नोत्यबुधो भवं ॥ ४७ ॥ तस्मादज्ञानजं शोकमात्मशोषविमोहनं । तत्त्वज्ञानेन निर्हृत्य स्वस्था भव
शुचिस्मिते ॥ ४८ ॥ श्रीशुक उवाच ॥ एवं भगवता तन्वी रामेण प्रतिबोधिता । वैमनस्यं परित्यज्य मनो बुद्ध्या समादधे ॥ ४९ ॥ प्राणावशे
ष उत्सृष्टो द्विड्भिर्हतबलप्रभः । स्मरन्विरूपकरणं वितथात्ममनोरथः ॥ ५० ॥ अहत्वा दुर्मतिं कृष्णमप्रत्यूह्य यवीयसीं । कुंडिनं
न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद्रुषा ॥ ५१ ॥ भगवान्भीष्मकसुतामेवं निर्जित्य भूमिपान् । पुरमानीय विधिवदुपयेमे कुरूद्वह ॥ ५२ ॥
तदा महोत्सवो नृणां यदुपुर्यां गृहे गृहे । अभूदनन्यभावानां कृष्णे यदुपतौ नृप ॥ ५३ ॥ नरा नार्यश्च मुदिताः प्रमृष्टमणिकुंडलाः । पा
रिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ॥ ५४ ॥

मर्थयते । यथा शयान इति आत्मानं भोक्तारं विषयान्भोग्यान्फलं भोगं असत्यप्यर्थे अनुभुंक्ते तथा
बुधः संसारं प्राप्नोतीति ४७ आत्मानं शोषयति विमोहयति चेति तथा तेन निर्हृत्य अपाकृत्य ४८ समादधे समाहितमकरोत् ४९ रुक्मिणस्त्वेवमात्मवतो ना
त्मनेन निर्वृत्तिमिति दर्शयन्नाह प्राणावशेष इति ५० अहत्वा अहत्वा आत्मना दुर्मतिमिति वमत्योक्तिः अप्रत्यूह्य अप्रत्यावर्त्य प्रतिबोध्य तिरस्कृत्य यवीयसीं स्वसारं यद्व

विरूपितस्तत्रैवावसत्ततो भोजकटनामपुरे
मभवत ५१ वरयोर्विवाहे ददत्तेयं प्रपत्तं ५४

२०३

उन्नमितेंद्रकेतुभिर्ध्वजविशेषैः उपलक्षणानि मंगलानि निलाजांकुरस्तद्युक्तकराणीतिः॥४५॥ आहताः प्रेष्ठाः सुभुजस्तेषां गजैः परामृष्टा उच्छ्रितारंभाः पूगाश्चैते रूपशोभिता॥ यद्वा तैरवगजैः परामृष्टाः संस्पृष्टा रंभाः पूगाश्चैते उपशोभिता॥ ४६॥ संभ्रमौत्सुक्यात्परिधावतामध्वनामदध्यभित्यः समेत्य द्रष्टाम्नाः॥४७॥ २ रामेवतः पंचाशत्तमः॥ पंचपंचाशत्तमे तु प्रद्युम्नजनिरुक्षतः शंबरेण हृतः सोथ हत्वा तं कांतया गमत्॥ प्रद्युम्नहानिलाभाद्यैः शंब

साहस्रिमपर्युन्नमितेंद्रकेतुभिर्विचित्रमाल्यांबररत्नतोरणैः॥ बभौ प्रतिद्वार्युपकॢप्तमंगलैः आपूर्णकुंभागुरुधूपदीपकैः॥५६॥ सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजां॥ गजैर्द्वास्सु परामृष्टरंभापूगोपशोभिता॥५७॥ कुरुसृंजयकैकेयविदर्भयदुकुंतयः॥ मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावतां॥५८॥ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः॥ राजानो राजकन्याश्च बभूवुर्भृशविस्मिताः॥५९॥ द्वारकायामभूद्राजन्महामोदः पुरौकसां॥ रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रियः पतिं॥६०॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुःपंचाशत्तमोऽध्यायः॥ श्रीशुक उवाच॥ कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना॥ देहोपपत्तये भूयस्तमेव प्रत्यपद्यत॥१॥ स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः॥ प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः॥२॥

राहरणादिना॥ कटुं विनामत्पत्यारिस्तद्वडः स्वयमसदृच्चत॥ नावत्पारिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म ततो विवाहाः ततः शंबरगारात्प्रद्युम्नप्रत्यागमने॥ अतः पूर्वकथनप्रसंगेनापि प्रथमं प्रद्युम्नस्य जातमात्रस्य शंबरेण हरणं निरूप्यते प्रत्यागमनं तु तत्कालीनमपि कथापर्यवसानायात्रोक्तमिति॥ वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः स हि देहं त्यक्त्वा देहोपपत्तये देहप्राप्तये॥ अनवमः अन्यूनः॥

राम ८

सप्रमिदः ॥ कामशत्रुः शंवरस्तमात्मनः शत्रुं विदित्वा हृत्वा समुद्रे प्रास्य प्रक्षिप्य गृहमागमदिति ॥ ३ ॥ निर्जगार गिलितवान् ॥ ४ ॥ सुधितिना शस्त्रि-
कया अवद्यन् खंडितवंतः ॥ ५ ॥ तत्त्वं कामोयं तव भर्त्तेति उत्पत्तिः श्रीकृष्णात् तत्क्रिरणं उत्पन्न इति ॥ ६ ॥ यशस्विनी पतिव्रता भर्तृदेहप्राप्तिं प्रतीक्षमाणा [illegible]

तं शंवरः कामरूपी हृत्वा तोकमनिर्दशम् ॥ स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहं ॥ ३ ॥ तं निर्जगार वलवान्मीनः सोप्यपरैः
सह ॥ वृतो जालेन महता गृहीतो मत्स्यजीविभिः ॥ ४ ॥ तं शंवराय कैवर्त्ता उपजह्रुरुपायनं ॥ सूदा महानसं नीत्वावद्यन्सु-
धितिनाद्भुतं ॥ ५ ॥ दृष्ट्वा तदुदरे वालमायावत्यै न्यवेदयन् ॥ नारदोकथयत्सर्वं तस्याः शंकितचेतसः ॥ वालस्य तत्त्वमुत्पत्तिं मत्स्योद-
रनिवेशनं ॥ ६ ॥ सा च कामस्य वै पत्नी रतिर्न्नाम यशस्विनी ॥ पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ॥ ७ ॥ निरूपिता शंवरेण सा सूपौ-
दनसाधने ॥ कामदेवं शिशुं वुध्वा चक्रे स्नेहं तदार्भके ॥ ८ ॥ नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः ॥ जनयामास नारीणां वीक्ष-
तीनां च विभ्रमं ॥ ९ ॥ सा तं पतिं पद्मदलायतेक्षणं प्रलंववाहुं नरलोकसुंदरं ॥ सव्रीडहासोत्तभितभ्रुवेक्षती प्रीत्योपतस्थे रतिरंग
सौरतैः ॥ १० ॥ तामाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा ॥ मातृभावमतिक्रम्य वर्त्तसे कामिनी यथा ॥ ११ ॥ रतिरुवाच ॥ भगवान्नारायण-
सुतः शंवरेणाहृतो गृहात् ॥ अहं तेधिकृता पत्नी रतिः कामो भवान्प्रभो ॥ १२ ॥ एष त्वानिर्दशं सिंधावक्षिपच्छंवरोसुरः ॥ मत्स्योग्रसीत्तदु-
दरादिह प्राप्तो भवान्प्रभोः ॥ १३ ॥ तमिमं जहि दुर्द्धर्षं दुर्जयं शत्रुमात्मनः ॥ मायाशतविदं त्वं च मायाभिर्मोहनादिभिः ॥ १४ ॥

८ ॥ तं शिशुं कामदेवं वुध्वा ॥ विभ्रमं शमोहं ॥ ९ ॥ अंग हे राजन् ॥ सौरतैर्भावैः उपतस्थे अभजत ॥ १० ॥ ११ ॥ अधिकृता पत्नी तत्र हेतुः रतिरहं भवान् काम इति ॥ १२ ॥ १३ ॥ दुर्जयत्वे हे-

२.७
१८

नवात्रविलंबः कार्य इत्याह ॥ परिशोचति रोदतीत्यर्थः ॥१५॥ वज्रस्य निष्पेषे निर्घाते यथा निष्ठुरस्तीव्रो नादो भवति तथाभूतं नादं स्वनरवं सामान्यविशेषतया व्याप्यव्यापकत्वमोरनेपौनरुक्त्यं भवतीति वत् ॥ अतिनिष्ठुरं नादमकरोदित्यर्थः ॥१९॥ वेहायसः आकाशे स्थितः ॥२१॥ सत्वात्मिकां सत्वगुणमयीं प्रायुंक्त ॥

परिशोचति ते माता क्रोशरी विगतप्रजा । स्नेहाक्रुष्टा दीना विवत्सा गौरिवातुरा ॥१५॥ प्रभाषेवं ददौ विद्यां ब्रह्मघ्नाय महात्मने । मायावती महामायां सर्वमायाविनाशिनीं ॥१६॥ स च शंबरमभ्येत्य संयुगाय समाह्वयत् । अविषह्यैस्तमाक्षेपैः क्षिपन् संजनयन् कलिं ॥१७॥ सोधिक्षिप्तो दुर्वचोभिः पराहत इवोरगः । निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः ॥१८॥ गदामाविध्य तरसा ब्रह्मघ्नाय महात्मने । प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरं ॥१९॥ तामापतन्तीं भगवान् प्रद्युम्नो गदया गदां । अपास्य शत्रवे क्रुद्धः प्राहिणोत् स्वगदां नृप ॥२०॥ स च मायां समाश्रित्य दैतेयीं मयदर्शितां । मुमुचेस्त्रमयं वर्षं कार्ष्णौ वैहायसोसुरः ॥२१॥ बाध्यमानोस्त्रवर्षेण रौक्मिणेयो महारथः । सत्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीं ॥२२॥ ततो गौह्यकगांधर्वपैशाचोरगराक्षसीः । प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्ताः ॥२३॥ निशातमसिमुद्यम्य सकिरीटं सकुंडलं । शंबरस्य शिरः कायात्ताम्रश्मश्रोजसाहरत् ॥२४॥ आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः । भार्यया वरचारिण्या पुरं नीतो विहायसा ॥२५॥ अंतःपुरवरं राजन् ललनाशतसंकुलं । विवेश पत्न्या गगनाद्विद्युतेव बलाहकः ॥२६॥

नरस्यानुषंगाः ॥२२॥ तामायाः व्यधमयत् व्यनाशयत् ॥२३॥ ताम्राणि श्मश्रूणि यस्मिन् तत् तं ओजसा बलेन ॥२४॥ विद्युता सह बलाहको मेघ इव ॥२६॥

राम
१८

नीलाश्चवक्राश्चयेलकास्तएवालयस्तैः ॥ ह्रीताः लज्जिताः १८ ॥ श्रीकृष्णोनभवतीत्यवधार्यसहस्त्रीरत्नंस्त्रीषुरत्नंश्रेष्ठारतिस्तत्सहितं ॥ १९ ॥ ततस्मरंता

तंदृष्ट्वाजलदश्यामंपीतकौशेयवाससं ॥ प्रलंबबाहुंताम्राक्षंसुस्मितंरुचिराननं ॥ १७ ॥ स्वलंकृतमुखांभोजंनीलवक्रालकाल
भिः ॥ कृष्णंमत्वास्त्रियोह्रीतानिलिल्युस्तत्रतत्रह ॥ १८ ॥ अवधार्यशनेरीषद्वैलक्षण्येनयोषितः ॥ उपजग्मुःप्रमुदिताःसस्त्री
रत्नंसुविस्मिताः ॥ १९ ॥ अथतत्रासितापांगीवैदर्भीवल्गुभाषिणी ॥ अस्मरत्स्वसुतंनष्टंस्नेहात्स्नुतपयोधरा ॥ २० ॥ कोन्वयंन
रवैडूर्यःकस्यवाकमलेक्षणः ॥ धृतःकयावाजठरेकेयंलब्धात्वनेनवा ॥ २१ ॥ ममचाप्यात्मजोनष्टोनीतोयःसूतिकागृहात्
एतत्तुल्यवयोरूपोयदिजीवतिकुत्रचित ॥ २२ ॥ कथंत्वनेनसंप्राप्तंसारूप्यंशार्ङ्गधन्वनः ॥ आकृत्यावयवैर्गत्यास्वरहासावलो
कनैः ॥ २३ ॥ सएववाभवेन्नूनंयोमेगर्भेधृतोर्भकः ॥ अमुष्मिन्प्रीतिरधिकावामःस्फुरतिमेभुजः ॥ २४ ॥ एवंमीमांस
मानायांवैदर्भ्यादेवकीसुतः ॥ देवक्यानकदुंदुभ्यामुत्तमश्लोकआगमत ॥ २५ ॥

ह ॥ कोन्वयमिति ॥ नरवैडूर्यः पुरुषश्रेष्ठः ॥ २१ ॥ एतेनतुल्यंवयोरूपंचयस्यसः भवेदिति ॥ २२ ॥ तस्यस्वपुत्रत्वंसंभावयंत्याह ॥ कथंत्विति ॥ २३ ॥ तदेवाधिकं
संभावयति ॥ सएवेति ॥ २४ ॥ देवक्यानकदुंदुभ्यां देवक्यानकदुंदुभिभ्यामित्यर्थः ॥ २५ ॥

२०७
१९

श्रुतिमोदर्य्येणप्रद्युम्नमनुवर्णयति॥ यमिति॥ पिताश्रीकृष्णस्तत्स्वरूपेप्रद्युम्नेनिजआत्मीयईशः सन्नेतिभावोभावनायांसांतास्तन्मातरः कृष्णपत्न्यो
विरहमितिनिरूढभावस्सन्तोयमभजन्नितियदातन्ननखलुचित्रंकथंसतिस्मरेस्मर्यमाणत्वेनैवक्षोभकेकामेच्च विषयेसतिकिंचरमास्पदंश्रीकृष्णस्तस्य
बिंबश्रीमूर्त्तिस्तस्यबिंबेप्रतिबिंबेतत्तेनाकिमुवक्तव्यमन्यानार्योभेजुरिति॥४०॥ दशमेपंचपंचाशत्तमः॥ पंचपंचाशत्तमेमिथ्याभियोगेमणिमाहरत्॥ क

विज्ञातार्थोपिभगवान्तूष्णीमासजनार्दनः॥ नारदोकथयत्सर्वंशंबराहरणादिकं॥३६॥ तच्छ्रुत्वामहदाश्चर्यंकृष्णांतःपुरयोषितः॥ अभ्यनं
दन्बहूनब्दान्नष्टंमृतमिवागतं॥३७॥ देवकीवसुदेवश्चकृष्णरामौतथास्त्रियः॥ दंपतीतौपरिष्वज्यरुक्मिणीचययुर्मुदं॥३८॥ नष्टंप्रद्युम्नमा
यातमाकर्ण्यद्वारकौकसः॥ अहोमृतइवायातोबालोदिष्ट्येतिहाब्रुवन्॥३९॥ यंवैमुहुःपितृसरूपनिजेशभावास्तन्मातरोयदभजन्रह
रूढभावाः॥ चित्रंनतत्खलुरमास्पदबिंबबिंबेकामेस्मरेक्षविषयेकिमुतान्यनार्यः॥४०॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचपं
चाशत्तमोध्यायः॥ श्रीशुकउवाच॥ सत्राजितःस्वतनयांकृष्णायकृतकिल्बिषः॥ स्यमंतकेनमणिनास्वयमुद्यम्यदत्तवान्॥१॥ राजोवाच॥ स
त्राजितःकिमकरोद्ब्रह्मन्कृष्णस्यकिल्बिषं॥ स्यमंतकःकुतस्तस्यकस्माद्दत्तासुताहरेः॥२॥ श्रीशुकउवाच॥ आसीत्सत्राजितःसूर्योभक्तस्यप
रमःसखा॥ प्रीतस्तस्मैमणिंप्रादात्सचतुष्टःस्यमंतकं॥३॥ सतंबिभ्रन्मणिंकंठेभ्राजमानोयथारविः॥ प्रविष्टोद्वारकांराजंस्तेजसानोपलक्षितः॥४॥

न्यांजांबवतःप्रापकृष्णःसत्राजितस्ततः॥ प्रचारिकामसौख्यमनिशामुत्क्रातिवंचलां॥ अर्थस्यानर्थतामाहस्यमंताहरणादिना॥ सत्यभामाजांबवत्योर्विवाहश्च
ह्वावायस्यमंतकाख्यानमाह॥ सत्राजितइति॥ सत्राजितस्त्यकरोतः क्वाचिद्वतकारणतोमन्वयानुसारेणाद्रष्टव्यः कृतापराधस्तच्छांतयेस्वयमेवोद्यमंकृत्वाम
णिनासहप्रादादिति॥१॥ २ भक्तस्यसत्राजितःसूर्यःस्वाम्यपिसखास्मीदित्यर्थः सचतुष्टस्तस्मैस्यमंतकनाममणिंप्रादात्प्रीतःस्निग्धः॥३॥ नोपलक्षितःसत्रा १९

दीव्यते क्रीडते सूर्योऽयमिति शंकिताः संतः कथयामासुरिति ॥ ४ ॥ सूर्यं नमस्कारायागतं कल्पयित्वोद्दिष्टभक्तानां संबोधनानि नारायणेत्यादीनि ॥ ५ ॥ गभस्तिचक्रेण रश्मिजालेन मुष्णन् प्रतिघ्नन् तिग्मगुः तीक्ष्णा गावो रश्मयो यस्य सः ॥ ६ ॥ नन्वेवं सदा रमानामित्याशंक्य नन्विति ॥ अन्विच्छंति मृगयंते ॥ अजः सूर्यः ॥ न ॥ बालानां मुग्धानां वचनं ज्वलन् विद्योतमानः ॥ ८ ॥ कृतानि कौतुकेन उत्सवेन मंगलानि यस्मिंस्तत् विप्रैः कृत्वा ॥ ९ ॥ भारप्रमाणमाह ॥ चतुर्भिर्व्रीहिभिर्गुंजं गुंजा-

तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः ॥ दीव्यतेऽक्षैर्भगवते शशंसुः सूर्यशंकिताः ॥ ४ ॥ नारायण नमस्तेऽस्तु शंखचक्रगदाधर ॥ दामोदरारविंदाक्ष गोविंद यदुनंदन ॥ ५ ॥ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते ॥ मुष्णन्गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः ॥ ६ ॥ नन्वन्विच्छंति ते मार्गं त्रिलोक्यां विबुधर्षभाः ॥ ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ॥ ७ ॥ श्रीशुक उवाच ॥ निशम्य बालवचनं प्रहस्यांबुजलोचनः ॥ प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ॥ ८ ॥ सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमंगलं ॥ प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् ॥ ९ ॥ दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो ॥ दुर्भिक्षमार्यरिष्टानि सर्पाधिव्याधयोऽशुभाः ॥ न संति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः ॥ ११ ॥ स याचितो मणिं क्वापि यदुराजाय शौरिणा ॥ नैवार्थकामुकः प्रादाद्याच्ञाभंगमतर्कयत् ॥ १२ ॥ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं ॥ प्रसेनो हयमारुह्य मृगयां व्यचरद्वने ॥ १३ ॥

न्पंच पणं पणान् ॥ अष्टौ धरणमष्टौ च कर्षं तांश्चतुरः पलं ॥ तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुला इति ॥ मारी नाम अकालमृत्युः अरिष्टमभद्रं अशुभा दुःखहेतवः ॥ ११ ॥ क्वापि कदाचित् अनेन भगवत्समर्थ्यत्वं यमग्रतो भोजिनः सर्वानिष्टनिवर्तकमपि श्रुतिशब्दे तदेव भवतीति सूचितं ॥ १२ ॥ तदेव दर्शयितुमाह तमेकदेति प्रतिमुच्य बद्ध्वा प्रसेनः सत्राजिद्भ्राता ॥ १३ ॥

२०३
१०

आच्छिद्यस्याकृष्णगृही ॥ १४ ॥ अजपत् उपाश्ववोचत ॥ १६ ॥ क्रव्यार्थे आमिषार्थे ॥ २३ ॥ अष्टविंशाहं अष्टविंशतिम्दिनानि यस्मिन् तत् अष्टविंशत्यहं विशतिश

प्रसेनं सहयं हत्वा मणिमाच्छिद्य केशरी ॥ गिरिं विशन् जांववता निहतो मणिमिच्छता ॥ १४ ॥ सोपि चक्रे कुमारस्य मणिं क्रीडनकं बिले ॥ अपश्यन् भ्रातरं भ्राता सत्राजित्पर्यतप्यत ॥ १५ ॥ प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः ॥ भ्राता ममेति तच्छ्रुत्वा कर्णाकर्णि जपञ्जनः ॥ १६ ॥ भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि ॥ मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः ॥ १७ ॥ हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने ॥ तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः ॥ १८ ॥ ऋक्षराजबिलं भीममन्धेन तमसावृतम् ॥ एको विवेश भगवानवस्थाप्य बहिः प्रजाः ॥ १९ ॥ तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतं ॥ हर्तुं कृतमतिस्तस्मिन्नवतस्थेर्भकान्तिके ॥ २० ॥ तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् ॥ तच्छ्रुत्वाभ्यद्रवत्क्रुद्धो जांववान्बलिनां वरः ॥ २१ ॥ स वै भगवता तेन युयुधे स्वामिनात्मनः ॥ पुरुषं प्राकृतं मत्वा कुपितो नानुभाववित् ॥ २२ ॥ द्वंद्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः ॥ आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव ॥ २३ ॥ आसीत्तदष्टविंशाहमितरेतरमुष्टिभिः ॥ वज्रनिष्पेषपरुषैरविश्रममहर्निशं ॥ २४ ॥ कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः ॥ क्षीणसत्त्वः स्विन्नगा त्रस्तमाहातीवविस्मितः ॥ २५

इति लोपश्चार्षः ॥ वज्रस्य निष्पेषो निर्घातः तद्वत्परुषैर्निष्ठुरैः ॥ २४ ॥ श्रीकृष्णस्य मुष्टीनां विनिःपातैराघातैर्विनिः
पिष्टानि स्पृष्टानि अंगानां उरूणां बंधनानि सन्धिस्थानानि यस्य सः ॥ २५ ॥

एम
१०

लोके कोवायमन्नोवलीयानितिविस्मितः सन्विमृष्याह ॥ जानेइति सर्वभूतानां यः प्राणः तत्रचयदोजः सहोवलं इंद्रियदृढयदेहवलानि तत्सर्वंत्व
मित्यहंजाने ॥ कथंतथात्वमतआह ॥ विष्णुमित्यादि ॥ १६ ॥ प्राणात्वेहेतुः त्वंहीति ॥ स्वशक्तिभिर्जगद्व्याप्तमतउपादानं ॥ अतः प्राणः प्रभविष्णुत्वेहेतुः
कालइति ॥ अधीश्वरः त्वमप्यतएवेत्याह ॥ ईशः परइति ॥ नचतदन्यइत्याह ॥ आत्मनामात्मेति ॥ १७ ॥ यतएवंभूतः अतोममेष्टदेवं द्युनाथएवत्व
मित्याह ॥ यस्येति ॥ इषद्दुत्कलितउर्द्धीपितोरोषस्तेनयेकराष्ट्रमाजाहैः स्फुमितान्नवगाग्राहान्तिमिंगिलामहामत्स्यास्तद्यस्मिन्सोद्धिवंत्वा दिशत

जानेत्वां सर्वभूतानां प्राणमोजः सहोबलं ॥ विष्णुंप्राणाप्रहर्षप्रभविष्णुमधीश्वरम् ॥ १६ ॥ त्वंहिविश्वसृजांस्रष्टा सृष्टानामपि
यच्चसत् ॥ कालः कलयतामीशः परआत्मा तथात्मनाम् ॥ १७ ॥ यस्येषदुत्कलितरोषकराष्ट्रमाद्रेर्वंत्वा दिशतस्फुमितनक्र
तिमिंगिलोद्धिः ॥ सेतुः कृतः स्वयशउज्वलिताचलंकारदुः शिराम्सिभुविपेतुरिभहतानि ॥ १८ ॥ एतिविनातविनातनदृशः
राजानमच्युतः ॥ व्याजहार हाराजभगवान्देवकीसुतः ॥ १९ ॥ अभिमृश्यारविंदाक्षः पाणिनाशंकरेणतम् ॥ कृपयापरयाभक्तं
प्रेमगंभीरयागिरा ॥ २० ॥ मणिहेमादिरक्षाणां वधमृच्छेपतेविलम् ॥ मिथ्याभिशापं प्रमृजन्नात्मनोमणिनामुना ॥ २१ ॥

दृष्टवानतथापितस्मिन्नेयेनस्वयशएवसेतुः कृतः ॥ उज्वलिताचरंधायस्येषुभिः कृतानिविछिन्नानिरक्षसांदशग्रीवस्यशिरांसिभुविपेतुः सएव
त्वमितिजाने ॥ १८ ॥ इतिविनातविनातयेनतंविनातनशब्दः कारणसाधनः कर्मसाधनोवा ॥ अद्धरांजप्रतिउक्तवान् ॥ १९ ॥ वधयात्विहस्वहेतोवावि
लहाश्प्राप्ताः तत्रमिथ्याभिशापमनेनामणिनाप्रजन्नपमार्ष्टिमद्दमंतर्विलमिहप्राप्तइत्यर्थः ॥ २१ ॥

२०७
११

सहमणिनामसमर्पयामास॥३१॥श्रीकृष्णजाम्बवत्यै वंदुभागिनामदुर्गामसजत॥३२॥स च कृष्णस्तेषां प्रादुर्बभूव॥ आमर्षद् इति पाठे अमर्षवद्विषाणितेषा
प्रेषत्रित्यर्थः कराद्दत्वा उपस्थानां नयानानुपतिआरिशारत्नाणां आशीः कस्मैदद्यामिति तयासद्देवा॥३३॥ परिलोकेननाः कथं चिन्मतं वधं पन

स्तु कृतः स्वां दुहितरं कन्यां जाम्बवतीं मुदा॥ अर्हणार्थं स मणिं कृष्णायोपजहार सः॥३२॥ अदृष्ट्वा निर्गमं शौरेः प्रविश्य बिलं जनाः
प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः॥३३॥ निशम्य देवकी देवी रुक्मिण्यानकदुन्दुभिः॥ सुहृदो ज्ञातयः शोचन् बिलात्कृ
ष्णमनिर्गतं॥३४॥ सत्राजितं शपन्तस्ते दुःखिता द्वारकौकसः॥ उपतस्थुश्चन्द्रभागां दुर्गां कृष्णोपलब्धये॥३५॥ तेषां तु देव्युप
स्थानात्प्रत्यादिष्टाशिषा स च॥ प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन्हरिः॥३६॥ उपलभ्य हृषीकेशं मृतं पुनरिवागतम्॥ सह पत्न्या
मणिग्रीवं सर्वे जातमहोत्सवाः॥३७॥ सत्राजितं समाहूय सभायां राजसन्निधौ॥ प्राप्तिं चाख्याय भगवान्मणिं तस्मै न्यवेदयत्॥३८॥
स चाति व्रीडितो रत्नं गृहीत्वावाङ्मुखस्ततः॥ अनुतप्यमानो भवनमगमत्स्वेन पाप्मना॥३९॥ सोऽनुध्यायंस्तदेवाघं बलवद्विग्र
हाकुलः॥ कथं मृजाम्यात्मरजः प्रसीदेद्वाच्युतः कथं॥४०॥ किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा॥ अदीर्घदर्शनं क्षुद्रं मूढं द्रवि
णलोलुपम्॥४१॥ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च॥ उपायोऽयं समीचीनस्तस्य शान्तिर्न चान्यथा॥४२॥

गतमुपलभ्य तेन तद्दृष्ट्वा उपलभ्य सर्वे जातमहोत्सवा आसन्निति॥३७॥ पाप्मना अपराधेनानुतप्यमानः॥३९॥ अघं दोषं आत्मनो रजः मलं अपराधमिति
किं कृत्वा कस्मिन्कृते इत्यर्थः साधु मह्यं अदीर्घदर्शनं अविचारकं मां क्षुद्रं कृपणं मूढं मम मति॥४१॥ एवं ध्यायन्नुपायं निश्चिनोति दास्य इति स्त्रीरत्नं दुहि

राम
११

॥४३॥ बहुभिः कृतवर्म्मादिभिः ॥४४॥ मणिं न प्रतीच्छामः न ह्यकर्म्मा देवः सूर्यस्तद्भक्तस्येति कराङ्गः फलभागिन इति ॥ तवापुत्रत्वात् तद्दायं
धनमस्माकमेवेति गूढोभिप्रायः ॥४५॥ दशमे षट्पंचाशत्तमः ॥ सप्तपंचाशत्तमे तु पुनः शतधन्ववधे ॥ प्राप्तस्य पुनः शोकार्त्तिः कृष्णोक्रूरएद्द
तान्मणेः अक्रूरगृहे कृतयत्नेः पात्रमथोच्यते ॥ उपमंत्र्यतमेकाते सगणोगाद्गजाह्वयां सत्राजितः श्रीकृष्णात्तामगफलं व्यक्तीकृत्येमाह

एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभां ॥ मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ॥४३॥ तां सत्यभामां भगवानुपयेमे यथा
विधि ॥ बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ॥४४॥ भगवानाह न मणिं प्रतीच्छामो वयं नृप तवास्तां देवभक्तस्य वयं च फ
लभागिनः ॥४५॥ इति श्रीभागवते महापुराणे दशमस्कंधे स्यमंतकाहरणं नाम षट्पंचाशत्तमोध्यायः शुक उवाच वि
ज्ञातार्थोपि गोविंदो दग्धानाकर्ण्य पांडवान् ॥ कुंतीं च कुल्यकरणे सहरामो ययौ कुरून् ॥१॥ भीष्मं कृपं सविदुरं गांधारीं द्रो
णमेव च ॥ तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥२॥ लब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः ॥ अक्रूरकृतवर्म्माणौ मणिः
कस्मान्न गृह्यते ॥३॥ योस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः ॥ कृष्णायादात्तु सत्राजित् कस्माद्भ्रातरमन्वियात् ॥४॥

विज्ञातार्थोपि ॥ पांडवा बिलद्वारेण जतुगृहान्निर्गता इत्येवं विज्ञातोर्थो येन सः कुंतीं च दग्धामाकर्ण्य कुल्यकरणे लोकव्यवहारार्थं ॥१॥ अन्येषां
तुल्यदुःखौ भावात् ॥ भीष्मादीन् संगम्योक्तं ॥२॥३॥ ननु जीवन् सत्राजित् कथं मणिं दास्यति तत्राहतुः योस्मभ्यमिति ॥ भ्रातरं शतेनस्तं कस्मान्नान्वि
यात् ॥ नानुगच्छतु म्रियतामित्यर्थः ॥४॥

२०७
११

जग्मिवान्जगाम ॥ इंद्रे हेलनं प्रतिकूलं ॥ इजिनं अपराधः ॥१॥ अपीतो मृतः सप्तदशसंख्याकात्संगात ॥२॥ तौ एव मरुत्प्रावेकमेवतत्वमित्य

एवं भिन्नमतिस्तांश्चाम्सत्राजितमसत्तमः ॥ शयानमवधील्लोभात्स पापः क्षीणजीवितः ॥५॥ स्त्रीणां विक्रोशमानानां क्रंदतीनामनाथवत् हत्वा पशून्सौनिकवत्मणिमादाय जग्मिवान् ॥६॥ सत्यभामा च पितरं हतं वीक्ष्य शुचार्पिता ॥ व्यलपत्तात ताते ति हा हा तास्मि इति मुह्यती ॥७॥ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयं ॥ कृष्णाय विदितार्थाय तथा चख्यापितं वधं ॥८॥ तदाकर्ण्येश्वरौ राजन् अनुसृत्य नृलोकतां ॥ अहो नः परमकष्टमित्यास्राक्षौ विलेपतुः ॥९॥ आगत्य भगवांस्तस्मात्सभार्यः साग्रजः पुरं ॥ शतधन्वानमारेभे हंतुं हर्तुं मणिं ततः ॥१०॥ सोऽपि कृतोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया ॥ साहाय्ये कृतवर्माणं अयाचत स चाब्रवीत ॥११॥ नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः ॥ को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन् ॥१२॥ कंसः सहानुगोऽपीतो यद्द्वेषात्त्याजितः श्रिया ॥ जरासंधः सप्तदशसंयुगाद्विरथो गतः ॥१३॥ प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत ॥ सोऽप्याह को विरुध्येत विद्वानीश्वरयोर्बलं ॥ य इदं लीलया विश्वं सृजत्यवति हंति च ॥ चेष्टां विश्वसृजो यस्य न विदुर्मोहिताजया ॥१५॥ यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना ॥ दधार लीलया बाल उच्छिलींध्रमिवार्भकः ॥१६॥ नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे ॥ अनंतायादिभूताय कूटस्थायात्मने नमः ॥१७॥ प्रत्याख्यातः स तेनापि शतधन्वा महामणिं ॥ तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ ॥१८॥ गरुडध्वजमारुह्य रथं रामजनार्दनौ ॥ अन्वीयातां महावेगैरश्वै राजन्गुरुद्रुहं ॥१९॥ मिथेत्याह पर रमिति अजया मायया मोहिता जयेति तदभिप्रायः ॥५॥ अंतर्यामि कृष्णनि

एम
११

शतयोजनमात्रगामित्वान्नतः परं गंतुमशक्तस्तत्र पतितं हयं विसृज्य ||१०|| व्यचिनोन्मृगयामास ||११|| अक्रूरे मणिरस्तीति सर्वज्ञतया विदित्वा
विदन्नपि वंचनायैतथा कृतवानिति भावः ||१२|| अन्वेष अन्विच्छ ||१३|| सर्वज्ञस्यैवं चेष्टितं मद्वंचनायेति मत्वा गूढमन्युराह अहमिति ||१४|| कतिचि

मिथिलायामुपवने विसृज्य पतितं हयं || पद्भ्यामधावत्संत्रस्तः कृष्णोप्यन्वद्रवद्रुषा ||१०|| पदातेर्भगवांस्तस्य पदातिस्तिग्म
नेमिना || चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिं ||११|| अलब्धमणिरागत्य कृष्ण आहाग्रजांतिकं || वृथा हतः शतध
नुर्मणिस्तत्र न विद्यते ||१२|| तत आह बलो नूनं स मणिः शतधन्वना || कस्मिंश्चित्पुरुषे न्यस्तस्तमन्वेष पुरं व्रज ||१३|| अहं
विदेहमिच्छामि द्रष्टुं प्रियतमं मम || इत्युक्त्वा मिथिलां राजन्विवेश यदुनंदनः ||१४|| तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः
अर्हयामास विधिवदर्हणीयं समर्हणैः ||१५|| उवास तस्यां कतिचिन्मिथिलायां समा विभुः || ततोशिक्षद्गदां काले
धार्तराष्ट्रः सुयोधनः ||१६|| मानितः प्रीतियुक्तेन जनकेन महात्मना || केशवो द्वारकामेत्य निधनं शतधन्वनः ||१७|| अप्राप्तिं
च मणेः प्राह प्रियायाः प्रियकृद्विभुः || ततः स कारयामास क्रिया बंधोर्हतस्य वै || साकं सुहृद्भिर्भगवान्या याः स्युः सांपरायिकाः ||१८||

त्समाः संवत्सरान् ||१६|| प्रासंगिकमाह तत इति ||१६|| सत्यभामामप्येवं वयरिदिति मूढयन्नाह केशव इति ||१७|| बंधोः सत्राजितः ||१८||
सांपरायिकाः पारलौकिक्यः ||१८||

व्यूषतुः द्वारकायाः सकाशात् क्वापि पलायितौ प्रयोजकौ मणिहरणे शतधन्वनः प्रवर्त्तकौ तत्र । क्रूरः कृष्णानुमतेनैव गतः कृतवर्म्मा तु सक-
पक्षपातशोकयन्नेवाद्रिवोपेक्षित इति गम्यते । कथमन्यथा सर्व्वज्ञस्येश्वरस्य वचनं तयोः संभवतीति ॥१७॥ तदेवं श्रीवाराणस्यां राजपतिममीन्नयो
मणिहृत्वेः क्रूरः कृष्णवैरिकैः म्लेच्छाध्वरे यजमानेनिवसति सति पुनः श्रीकृष्णेनैव प्रस्थापितः क्रूर इति कर्णाकर्णि जनपतिजनेन सत्यभामारामा

अक्रूरः कृतवर्म्मा च श्रुत्वा शतधनोर्वधम् । व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ
॥१७॥ अक्रूरे प्रोषिते रिष्टान्यासन्वै द्वारकौकसां ॥ शारीरा मानसास्तापा मुहुर्दैविकभौ-
तिकाः ॥२०॥ इत्यंगोपदिशं ते के विस्मृत्य प्रागुदाहृतं ॥ मुनिवासनिवासे किं घटेता-
रिष्टदर्शनम् ॥२१॥

दीनामप्यविश्वासे जनसंग्रहाया क्रूर मापृथमाक्षेपः श्रीकृष्णः प्राह इदं च भगवन्मतं संगोप्य केवलं मत्पथयोन्यत्कारणमक्रूरानयने वर्णयंति
तद्यथा श्रुतं रूषयित्र मनुवदति । अक्रूरे प्रोषित इति ॥२०॥ दूषयति इतीति । अंगहे राजन् श्रीकृष्णमाहात्म्यं विस्मृत्येति । तदेवाह मुनिवास इति । मुनी राम
नीनां निवासो यस्मिन् स मुनिवासः श्रीकृष्णस्तस्य निवासे सति अक्रूरागमनमात्रेण रिष्टदर्शनं किं घटेत तदरिष्टं विना न घटेतेत्यर्थः ॥२१॥

उन स्तन्मतमेवान्तर्वर्णयति काशिरेश्वो देवे मघवति अवर्षति सति ॥ २१ ॥ इत्येवंभूतमक्रूरमहिमप्रतिपादनपरं वृद्धानां वाक्यं श्रुत्वा सत्यमेवं न
थाप्येतावदेव कारणं न भवति ॥ किं तु मम रोगपगम इति मत्वेत्यत आह परंतमम् तमम् वहतमहत्के कुत्सेलीलावशादेवारिष्टादिष्टादिदर्शनमिति अकाशादिसंमत
मिति भावः ॥ २४ ॥ वित्तानमखिलं येन सर्वावमोऽत्र तत एव वित्तं तस्य अयं भावः ॥ महाभागवतस्यास्य मयाद्य तेपि मत्परिणावपेक्षानात्सेव वयस्मादाहृतो मया

देवे वर्षति काशीशः श्वफल्कायागताय वै ॥ स्वसुतां गांदिनीं प्रादात् ततोऽवर्षत् स्म काशिषु ॥ २२ ॥ तत्सुतस्तत्प्रभावोऽसाव
क्रूरो यत्र यत्र ह ॥ देवोऽभिवर्षते तत्र नोपतापा न मारिकाः ॥ २३ ॥ इति वृद्धवचः श्रुत्वा नैतावदिह कारणं ॥ इति मत्वा समाना
य्य प्राह ह्यक्रूरं जनार्दनः ॥ २४ ॥ पूजयित्वाभिभाष्यैनं कथयित्वा प्रियाः कथाः ॥ विज्ञाताखिलचित्तज्ञः स्मयमान उवाच
ह ॥ २५ ॥ ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना ॥ स्यमंतको मणिः श्रीमान् विदितः पूर्वमेव नः ॥ २६ ॥ सत्राजितोऽनप
त्यत्वाद् गृह्णीयुर्दुहितुः सुताः ॥ दायं निनीयापः पिंडान् विमुच्यर्णं च शेषितं ॥ २७ ॥ तथापि दुर्धरस्त्वन्यैस्त्वय्यास्तां सुव्रते मणिः ॥
किं तु मामग्रजः सम्यङ् न प्रत्येति मणिं प्रति ॥ २८ ॥

नास्मै हेवागत इति ज्ञात्वेति ॥ २५ ॥ ततः किं मत आह ॥ सत्राजित इति ॥ अपः पिंडांश्च निनीय द
त्वा ऋणं च विमुच्यापाकृत्य शेषितमवशिष्टं दायं दुहितुः सुता भामायाः सुता गृह्णीयुरिति शास्त्रं तथा च स्मरंति पत्नी दुहितरश्चैव पितरो
भ्रातरस्तथा ॥ तत्सुतो गोत्रजो बंधुः शिष्याः सब्रह्मचारिण इति ॥ २७ ॥ अग्रजोपि न प्रत्येति न विश्वसितीति ॥ २८ ॥

२०७
१४

नास्तीति चानवष्टंभं ॥ यतः अकुच्छिन्नाः संततमाप्रवावर्त्तत इति ॥३९॥ आलब्धकृतः हरिः सुष्टुइतिवा ॥४०॥ एनः मिथ्याभिशापं प्रमृजन्नात्मनोऽव
द्यं हत्वा हि मणिस्तेनाप्यनीत्यादि भूयस्तस्मै प्रत्यर्पितवानिति ॥४१॥ दुःकीर्त्तितन्मूलं दुरितं चेति ॥४२॥ दशमे सप्तपंचाशत्तमोध्यायः ॥ अष्टपंचाशत्तमे तु
कृष्णः पंच करेग्रहीत ॥ कालिंदीमित्रविंदा च सत्या भद्रा वलक्ष्मणा ॥ कालिंदी निजलाभाय तपः परमुपेयुषी ॥ परितोषमुनिर्भिया वाच्यमिंद्रप्रस्थम

दर्शयस्व महाभागं वधूनां शांतिमावह ॥ अक्रूरचित्रामप्रत्यावर्ततेहस्य केवंदयः ॥३९॥ एवं सामभिरालब्धः श्वफल्कतनयो म
णिं ॥ आदाय वाससाछन्नं ददौ सूर्यसमप्रभं ॥४०॥ स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः ॥ विमृज्य मणिना भूयस्तस्मै प्रत्यर्प
यत्प्रभुः ॥४१॥ यस्त्वेतद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमंगलं च ॥ आख्यानं पठति शृणोत्यनुस्मरेद्वा दुःकीर्तिं दुरितम
पोह्य याति शांतिम् ॥४२॥ इति श्रीभागवते महापुराणे दशमस्कंधे स्यमंतकोपाख्याने सप्तपंचाशत्तमोऽध्यायः ॥ शुक उवाच ॥
एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः ॥ इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः ॥१॥ दृष्ट्वा तमागतं पार्था मुकुंदमखिलेश्वरं
उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं ॥२॥ परिष्वज्याच्युतं वीरा अंगसंगहतैनसः ॥ सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ॥३॥
युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं ॥ फाल्गुनं परिरभ्याथ यमाभ्यां चाभिवंदितः ॥४॥ परमासन आसीनं कृष्णा कृष्णमनिंदिता ॥ नवोढा
व्रीडिता किंचिच्छनैरेत्याभ्यवंदत ॥५॥

थागमत ॥ प्रतीतान् नष्टान् पितुपरस्वहेतुः नः सर्वेर्दृष्टान् ॥ युयुधानः सात्यकिः प्राणाः इंद्रियाणि मुख्यं प्राणं पंच
वृत्तिप्राणमिव ॥२॥ ज्येष्ठयोः प्राणामं कृत्वा समेनालिंगितः कनिष्ठाभ्यामभिवंदितो बभूव ॥४॥ कृष्णा द्रौपदी वधूर्भार्या सत्यपि निंदारहिता पार्थैस्त्रिवं च विरंकृत्य एम

१४

स्मृतिहार्देन स्नेहेन अर्द्रे ईदृक्जले दृशौ यस्यास्तया परिष्वक्तः परिपृष्टा बांधवा यस्य सः ॥७॥ प्रेम्णा वैक्लव्यं तेन रुद्धः कंठो यस्याः क्लेशापाये आत्मनिदर्शनं
यस्य स ते भजतां क्लेशापायाय आत्मानं दर्शयतीति वा ॥८॥ ज्ञातीन्बंधून्स्वनः अस्मान्यदा भ्राता अक्रूरः प्रेषितः ॥९॥ ज्ञातीनिति वचनात्प्राप्तमोहं वार

तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः ॥ निषसादासनेन्ये च पूजिताः पर्युपासत ॥६॥ पृथां समागम्य कृताभिवादनस्तयातिहा
र्दार्द्रदृशाभिरंभितः ॥ आपृष्टवांस्तां कुशलं सहस्नुषां पितृष्वसारं परिपृष्टबांधवः ॥७॥ तमाह प्रेमवैक्लव्यरुद्धकंठाश्रुलोचना ॥ स्मरंती
तान्बहून्क्लेशान्क्लेशापायात्मदर्शनं ॥८॥ तदैव कुशलं नोभूत्सनाथास्ते कृता वयं ॥ ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ॥९॥ न
ते स्ति स्वपरभ्रांतिर्विश्वस्य सुहृदात्मनः ॥ तथापि स्मरतां शश्वत्क्लेशान्हंसि हृदि स्थितः ॥१०॥ युधिष्ठिर उवाच ॥ किं न आचरितं
श्रेयो न वेदाहमधीश्वर ॥ योगेश्वराणां दुर्दर्शो यन्नो दृष्टः कुमेधसां ॥११॥ इति वै वार्षिकान्मासान्राज्ञा सोभ्यर्थितः सुखं ॥ जन
यन्नयनानंदमिंद्रप्रस्थौकसां विभुः ॥१२॥ एकदा रथमारुह्य विजयो वानरध्वजं ॥ गांडीवं धनुरादाय तूणौ चाक्षयसायकौ ॥१३॥
साकं कृष्णेन संनद्धो विहर्तुं विपिनं वनं ॥ बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा ॥१४॥ तत्राविध्यच्छरैर्व्याघ्रान्शूकरान्महिषान्रु
रून् ॥ शरभान्गवयान्खड्गान्हरिणाञ्शशशल्लकान् ॥ तान्निन्युः किंकरा राज्ञे मेध्यान्पर्वण्युपागते ॥१५॥

यंतीहेति ॥ न ते स्तीति ॥ तत्र हेतुः विश्वस्येति ॥ सुहृच्च आत्मा च तस्य ॥ हंसि नाशयसि ॥१०॥ कुमेधसां विषयासक्तचित्तानां दृष्टोसि ॥११॥ सुखं अवसदिति शे
षः ॥ सुखमभ्यर्थित इति वा क्रियासमाप्तिः ॥१२॥ कालिंदीदर्शनप्रसंगमाह ॥ एकदेति ॥ अक्षय्याः सायका ययोस्तौ तूणौ इषुधी ॥१३॥ राज्ञे युधिष्ठिराय मेध्या

वीभत्सुरर्जुनः ॥ ९ ॥ सख्या श्रीकृष्णेन ॥ १७ ॥ अथ यमाकामयेदिति शंकमानाऽहं नान्यमिति ॥ १९ ॥ अदादेवेतद्विद्वान् ॥ २४ ॥ अस्तंगात्रकालीनं चरित्रं तरमाह । यद्येवेति
पार्थयद्येवेति सदिष्टो वित्तापितः ॥ श्रीकृष्णः तदैव तेषां विश्वकर्म्मणा देवशिल्पिना नगरं कारयामास ॥ २५ ॥ किंच भगवानिर्देतिशये स्वर्थ्यदृरणावानपि अर्जुनेन

तद्‌परीतः परिश्रान्तो वीभत्सुर्यमुनामगात् ॥ तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ ॥ १९ ॥ कृष्णौ ददृशतुः कन्यां चरंतीं चारुदर्शनां ॥ तामासा
द्य वरारोहां सुद्विजां रुचिराननां ॥ १७ ॥ पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमां ॥ का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्षसि ॥ मन्ये त्वां
पतिमिच्छंतीं सर्वं कथय शोभने ॥ १८ ॥ कालिंद्युवाच ॥ अहं देवस्य सवितुर्दुहिता पतिमिच्छती ॥ विष्णुं वरेण्यं वरदं तपः परममास्थिता ॥ ११ ॥ नान्यं प
तिं वृणे वीर तमृते श्रीनिकेतनं ॥ तुष्यतां मे स भगवान् मुकुंदोऽनाथसंश्रयः ॥ २१ ॥ कालिंदीति समाख्याता वसामि यमुनाजले ॥ निर्म्मिते भवने पि
त्रा यावदच्युतदर्शनं ॥ २२ ॥ तथावदद्गुडाकेशो वासुदेवाय सोऽपि तां ॥ रथमारोप्य तद्विद्वान् धर्म्मराजमुपागमत् ॥ २४ ॥ यदैव कृष्णः संदिष्टः
पार्थानां परमाद्भुतं ॥ कारयामास नगरं विचित्रं विश्वकर्म्मणा ॥ २५ ॥ भगवांस्तत्र निवसन् स्वानां प्रियचिकीर्षया ॥ अग्नये खांडवं दातुमर्जुन
स्यास सारथिः ॥ २६ ॥ सोऽग्निस्तुष्टो धनुरदाद्धयान् श्वेतान् रथं नृप ॥ अर्जुनायाक्षयौ तूणौ वर्म्म चाभेद्यमस्त्रिभिः ॥ २७ ॥ मयश्च मो
चितो वह्नेः सभां सख्य उपाहरत् ॥ यस्मिन् दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः ॥ २८ ॥

सयत्नादिदिलामायसारथिरास ॥ खांडवदत्तामेंद्रस्य वनं ॥ २६ ॥ अक्षयौ अक्षयसायकौ ॥ २७ ॥ खांडवदाहकवह्नेः सकाशे अर्जुनाय यस्मात्रितिसमाप्यतो निर्देशः सभ
यस्यामित्यर्थः जलस्थलयोर्दृशोर्दृष्टेर्भ्रमः ॥ यद्वा जले स्थलवत्तदृक् दृष्टिर्यस्मिन् तज्जलस्थलदृक् तस्मिन् भ्रमः अभूदिति ॥ २८ ॥

सुपुण्यः कालः ऋक्षं च यस्मिन् ॥ २९ ॥ पंचमं मित्रविंदाविवाहमाह ॥ विंदानुविंदाविति द्वाभ्यां ॥ आवंत्यौ अवंतिराजानौ ॥ ३० ॥ षष्ठमाह ॥ नग्नजिदिति
कौशल्यः अयोध्याधिपतिः ॥ सत्या नाम कन्या अभवत् ॥ देवी कांतिमती ॥ नाग्नजितीति पितृनाम्ना प्रसिद्धेत्यर्थः ॥ ३१ ॥ वीरस्य गंधमपि न सहंत इति

स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः ॥ आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः ॥ २८ ॥ अथोपयेमे कालिंदीं सुपुण्यर्त्वृक्ष ऊ
र्जिते ॥ वितन्वन्परमानंदं स्वानां परममंगलः ॥ २९ ॥ विंदानुविंदावावंत्यौ दुर्योधनवशानुगौ ॥ स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषे
धतां ॥ ३० ॥ राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः ॥ प्रसह्य हृतवान्कृष्णो राजन्राज्ञां प्रपश्यतां ॥ ३१ ॥ नग्नजिन्नाम कौशल्य आसी
द्राजातिधार्मिकः ॥ तस्य सत्याभवत्कन्या देवी नाग्नजिती नृप ॥ ३२ ॥ न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान् ॥ तीक्ष्णशृंगान्सुदुर्ध
र्षान्वीरगंधासहान्खलान् ॥ ३३ ॥ तां श्रुत्वा वृषजिल्लभ्यां भगवान्सात्वतां पतिः ॥ जगाम कौशल्यपुरं सैन्येन महता वृतः ॥ ३४ ॥ स
कौशलपतिः प्रीतः प्रत्युत्थानासनादिभिः ॥ अर्हणेनापि विविधेना पूजयन्प्रतिनंदितः ॥ ३५ ॥ वरं विलोक्याभिमतं समागतं नरेंद्रक
न्या चकमे रमापतिं ॥ भूयादयं मे पतिराशिषोऽमलाः करोतु सत्या यदि मे धृतो व्रतैः ॥ ३६ ॥ अर्चितं पुनरित्याह नारायण जगत्पते ॥ आ
त्मानंदेन पूर्णस्य करवाणि किमल्पकः ॥ ३७ ॥ श्रीशुक उवाच ॥ तमाह भगवान्हृष्टः कृतासनपरिग्रहः ॥ मेघगंभीरया वाचा सस्मितं
कुरुनंदन ॥ ३८ ॥ श्रीभगवानुवाच ॥ नरेंद्र याच्ञा कविभिर्विगर्हिता राजन्यबंधोर्निजधर्मवर्तिनः ॥ तथापि याचे तव सौहृदेच्छया कन्यां

तथा तान्खलान्दुर्वृत्तान् ॥ ३३ ॥ वृषान्जयति यः तेन लभ्यां ॥ ३४ ॥ प्रतिनंदितस्तं प्रतिनंदितवान् ॥ श्रीकृष्णेन वा सः प्रतिनंदितः ॥ ३५ ॥ वीर्यायां न हि स्वज्ञातावय
हे नरेंद्र राजन्यबंधोः क्षत्रियस्य शुल्कदाः द्रव्यादिप्रदाः ॥ ३५ ॥

गणानामेकमेव धाम सज्जानं त्वं तथा भूतस्य यस्य तवांगे ॥ ४१ ॥ दुर्द्दान्ताः शृंगिणिताः दुरवग्रहाः अपरापन्नाः कृतः नराः ॥ एते रिति भग्नाः भगं प्राप्ताः एतान् यो निगृह्णाति तस्य कन्येति समयः कृतः ॥ ४२ ॥ यत एव हि इमे गोवृषाः ॥ ४४ ॥ सप्तधा कृत्वेति बद्धा नां यो षितानां सपूर्णीएवाहं संभोगयोग्यः ॥

राजोवाच ॥ कोन्यस्त्वत्तोधिकोनाथ कन्यावरइहेप्सितः ॥ एकोकधाम्नो यस्यांगे स्त्री दृष्टमत्यनपायिनी ॥ ४१ ॥ किंत्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ ॥ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीक्षया ॥ ४१ ॥ सप्तैते गोवृषा वीर दुर्द्दान्ता दुरवग्रहाः ॥ एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ॥ ४३ ॥ यदि मे निगृहीताः स्युः त्वयैव यदुनंदन ॥ वरो भवानभिमतो दुहितुर्मे श्रियः पते ॥ ४४ ॥ एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः ॥ आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ॥ ४५ ॥ बद्ध्वा तान् दामभिः शौरिः भग्नदर्पान् हतौजसः ॥ व्यकर्षत लीलया बद्धान्बालो दारुमयान्यथा ॥ ४६ ॥ ततः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः ॥ तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ॥ ४७ ॥ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा प्रियं पतिम् ॥ लेभिरे परमानंदं जातश्च परमोत्सवः ॥ ४८ ॥ शंखभेर्यानकोनेदुर्गीतवाद्यद्विजाशिषः ॥ नरा नार्यः प्रमुदिताः सुवासः स्रगलंकृताः ॥ ४९ ॥ दशधेनुसहस्राणि पारिबर्हमदाद्विभुः ॥ युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससां ॥ ५० ॥

स्याविति सत्याघत्यमापत्य प्रदर्शनार्थमात्मनः सप्तधाकरणं ॥ ४५ ॥ निष्कग्रीवाश्चताः सुवाससश्च तासां युवतीनां वराणां नाम् ॥ ॥ ५० ॥

नागात् नागेभ्यः शतगुणान् नवलक्षाणि रथान् रथेभ्यः शतगुणान् नवकोटीः अश्वान् अश्वेभ्यः शतगुणान् नवपद्मानि ॥५१॥ यदुभिर्गोवृषैश्च भग्नवीर्यांश्चापि हतदुर्मर्षा हतधृः ॥५३॥ अस्यतः क्षिपतः प्रयुञ्जानानिति यावत् ॥५४॥ सप्तमं विवाहमाह श्रुतकीर्तेरिति ॥ श्रुतकीर्तिर्नाम पितृ

नव नागसहस्राणि नागात् शतगुणान् रथान् ॥ रथाच्छतगुणान् अश्वान् अश्वाच्छतगुणान् नरान् ॥५१॥ दंपती रथमारोप्य महत्या सेनया वृतौ ॥ स्नेहप्रक्लिन्नहृदयो यापयामास कौशलः ॥५२॥ श्रुत्वैतद्रुरुधुर्भूपा नयंतं पथि कन्यकां ॥ भग्नवीर्याः सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ॥५३॥ तानस्यतः शरव्रातान् बंधुप्रियकृदर्जुनः ॥ गांडीवी कालयामास सिंहः क्षुद्रमृगानिव ॥५४॥ पारिबर्हमुपागृह्य द्वारकामेत्य सत्यया ॥ रेमे यदूनामृषभो भगवान्देवकीसुतः ॥५५॥ श्रुतकीर्तेः सुतां भद्रामुपयेमे पितृष्वसुः ॥ कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥५६॥ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युतां ॥ स्वयंवरे जहारैकः स सुपर्णः सुधामिव ॥५७॥ अन्याश्चैवंविधा भार्याः कृष्णस्यासन् सहस्रशः ॥ भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ॥५८॥ इति श्रीभागवते महापुराणे दशमस्कंधे कृष्णमहिष्युद्वाहो नामाष्टपंचाशत्तमोऽध्यायः ॥

ष्वसा तस्याः सुतां भद्रां नाम ॥ कैकेयीं तद्देशराज्ञीं ॥५६॥ अष्टममाह सुतां चेति ॥ एक एव सन् स्त्रीकल्लोल लक्ष्मणां जहार एतस्या निरोधोऽतः स्फुरंतस्मात् ॥५७॥
मेष्मी जांबवती भामा सत्या भद्रा च लक्ष्मणा ॥ कालिंदी मित्रविंदा चेत्यष्टपट्टमहिष्यः ॥ इति दशमे अष्टपंचाशत्तमः ॥५८॥

१०.३
१७

ऊनषष्टितमे भौमं हत्वा तेनाहृता हरिः ॥ कन्याः सहस्रशः प्राप्य पारिजातं दिवो हरत् ॥१॥ परिणीय ततस्ताभिस्तन्मनोरथपूरणैः ॥ आत्मारामोऽप्य
रेमे तद्गेहेषु गृहस्थवत् ॥१॥ येन ताः स्त्रियो निरुद्धाः स भौमः ॥ चकाराद्येन कारणेन हतः तदाचक्ष्वेति ॥१॥ इंद्रेण भौमविचेष्टितं ज्ञापितः सन् प्रा
ग्ज्योतिषपुरं भौमनगरं ययाविति स्पष्टार्थः ॥ कथंभूतेन हृतं छत्रं यस्य तेन लोकपालप्रधानत्वादिंद्रस्य वरुणाच्छत्रहरणेऽपि तस्यैव मानभंग इति तथोक्तं
हृते कुंडले यस्याः साऽदितिर्बंधुर्माता यस्य तेन ॥ हृतममराद्रेः स्थानं मणिपर्वतलक्षणं यस्य तेन ॥२॥ सत्यभामाया गृहे भगवंतमिंद्र आगत्य विज्ञापित

राजोवाच ॥ यथा हतो भगवता भौमो येन च ताः स्त्रियः ॥ निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः ॥१॥ श्रीशुक उवाच ॥ इंद्रेण हृ
तछत्रेण हृतकुंडलबंधुना ॥ हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं ॥२॥ सभार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ ॥ गिरि
दुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमं ॥३॥ मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतं ॥ गदया निर्बिभेदाद्रीन् शस्त्रदुर्गाणि साय
कैः ॥४॥ चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना ॥ शंखनादेन यंत्राणि हृदयानि मनस्विनां ॥५॥ प्राकारं गदया गुर्व्या नि
र्बिभेद गदाधरः ॥ पांचजन्यध्वनिं श्रुत्वा युगांताशनिभीषणं ॥६॥ मुरः शयान उत्तस्थौ दैत्यः पंचशिरा जलात् ॥ ७ ॥

वा तदा तस्याः कौतुकायतया भार्यया सह ययाविति ॥ यद्वा त्वदर्थे तेनैव त्वत्सुतं हनिष्यामीति हासोक्तं भूम्यै वरं दत्तं सत्यं कर्तुं सत्यभामाया भूम्यंशत्वा
त्तया सह ययौ ॥ यद्वा नारदानीतपारिजातेनैकदा रुक्मिण्यै दत्ते समतिकोपितां सत्यभामां सांत्वयता तत्पारिजातमेव दास्यामीति श्रीकृष्णेन प्रतिश्रुत
मिति हरिवंशे प्रसिद्धं ॥ नरर्यतानीतवानिति तेन यं ॥ गदयेत्यनेन यानेकारणानि गिरिदुर्गैरित्यादिभिरुपलक्षितं जलाग्न्यनिलैश्च सर्वतो वर्त्मानि दुर्गमं युगांताशने

राम
२८

आविध्य उत्तोल्य स महानादैरित्यन्वयः ॥ ८ ॥ तस्मै श्रीकृष्णाय गदां व्यमुंचत ॥ ९ ॥ इंद्रतेजसा वज्रेण ॥ ११ ॥ प्रतिक्रियया निमित्तभूतया अमर्षजुषः

त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगान्तसूर्यानलरोचिरुल्बणः ॥ ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः ॥ ७ ॥
आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः ॥ स रोदसी सर्वदिशोंबरं महानापूरयन्नंडकटाहमावृणोत् ॥ ८ ॥
तदापतद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधौजसा ॥ मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोपि रुषा व्यमुंचत ॥ ९ ॥ ता
मापतंतीं गदया गदां मृधे गदाग्रजो निर्बिभिदे सहस्रधा ॥ उद्यम्य बाहूनभिधावतोजितः शिरांसि चक्रेण जहार लीलया ॥ १० ॥
व्यसुः पपातांभसि कृत्तशीर्षो निकृत्तशृंगोद्रिरिवेंद्रतेजसा ॥ १० ॥ तस्यात्मजाः सप्त पितुर्वधातुराः प्रतिक्रियामर्षजुषः समुद्य
ताः ॥ ताम्रोंतरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः ॥ ११ ॥ पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगन्
धृतायुधाः ॥ प्रायुंजतासाद्य शरानसीन्गदाशक्त्यृष्टिशूलान्यजिते रुषोल्बणाः ॥ १२ ॥ तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्य
स्तिलशश्चकर्त ह ॥ तान्पीठमुख्याननयद्यमक्षयं निकृत्तशीर्षोरुभुजांघ्रिवर्मणः ॥ १३ ॥ स्वानीकपानच्युतचक्रसायकैस्तथा निर
स्तान्नरको धरासुतः ॥ निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निराक्रमत ॥ १४ ॥ दृष्ट्वा सभार्यं गरुडोपरि स्थितं सू
र्योपरिष्टात्सतडिद्घनं यथा ॥ कृष्णं स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत्स्म विव्यधुः ॥ १५ ॥

॥ ११ ॥ पीठं पीठनामानं ॥ निरगन्निरगमन् ॥ ११ ॥ निकृत्तानि शीर्षादीनि येषां तान् ॥ १३ ॥ शतघ्नीं शस्त्रविशेषं ॥ ॥ १४ ॥ ॥ १५ ॥

२७
१८

विचित्रावाजाः पत्राणि येषां तैर्बाणैः निकृत्ता बाहवः ऊरवः शिरोधाः कंधराः विग्रहाश्च देहाः यस्य तत ॥ तर्ह्येवं तं यदा विव्यधुः तस्मिंस्तेजवनगणे शत्या
श्वयोर्धकउद्धहेतिं संबोधनं ॥ तथाः हितैर्याणि प्रयुक्तानि शस्त्रास्त्राणि तस्माच्छरैः पूर्वमेव तत्तेनं पच हत्वा पश्चान्नानि शस्त्राण्यपस्त्राणि विच्छेद ॥ तत्रापि के

तद्बाणसैन्यं भगवानादायग्रेजो विचित्रवाजैस्त्रिशितैः शिलीमुखैः ॥ निकृत्तबाहूरुशिरोध्रविग्रहं चकार तर्ह्येव हताश्वकुंजरं ॥१६॥ यानि यानि प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह ॥ हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः ॥१७॥ उह्यमानः सुपर्णेन पक्षाभ्यां निघ्नता गजान् ॥ गरुत्मता हन्यमानास्तुंडपक्षनखैर्गजाः ॥१८॥ पुरमेवाविशन्नार्त्ता नरकोयुध्यमुध्यत ॥ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकं ॥१९॥ तं भौमः प्राहरच्छक्त्या वज्रो प्रतिहतोयतः ॥ नाकंपत तया विद्धो मालाहत इव द्विपः ॥२०॥ शूलं भौमोच्युतं हन्तुमाददे वितथोद्यमः ॥ तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः ॥ अपाहरद्गजस्थस्य चक्रेणाक्रूरनेमिना ॥२१॥ सकुंडलं चारु किरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलत् ॥ हाहेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुंदं विकिरंत ईडिरे ॥२२॥ ततश्च भूः कृष्णमुपेत्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे ॥ सवैजयंत्या वनमालयार्प्पयत्प्राचेतसं छत्रमथो महामणिं ॥२३॥ अस्तौषीदथ विश्वेशं देवी देववरार्चितं ॥ प्रांजलिः प्रणता राजन् भक्तिप्रवणया धिया ॥२४॥ भूरुवाच ॥ नमस्ते देववरेवेश शंखचक्रगदाधर ॥ भक्ते

कंशाश्वमस्त्वं चत्रिभिः शरैरित्यन्वयः ॥१७॥ किंच गरुत्मतेति ॥१८॥ यतः यया शक्त्या वज्रः प्रतिहतः आप ॥१९॥ छोपात्तस्य पायपरमात्मन्नमोस्तु ते ॥२५
श्री गरुडस्यनाकंपत ॥ गरुडे वितथोद्यमः सन् ॥२०॥ प्रतप्तेनाहनदेयानि रत्नानि तैर्भास्वरे मे वराधूतमंदरशिखरमहामणिं चाप्यपहरिति ॥ एकस्सूर्यतस्तात्वा

एम
१८

येन मंत्रेण कुंत्याः प्रसन्नः पूर्वं मामासीत् तेन मंत्रेण नमस्यति ॥ नमस्यति ॥ पंकजं नाभौ यस्य तस्मै जगत्कारणायेत्यर्थः ॥ अत एव सत्की र्निमियापं
कजमाला विद्यते यस्य तस्मै ॥ एवंभूतं ध्यायतां पंकजवत्सुप्रसन्नेन तापोपशमनेन नेत्रे यस्य तस्मै ॥ पंकजवत्सुमेध्यौ पंकजांकितौ वांघ्री यस्य त
स्मै नमस्यति ॥१६॥ किंच भगवते निरतिशयैश्वर्याय ॥ वासुदेवाय सर्वभूताश्रयाय ॥ अत एव विष्णवे व्यापिने न हि सर्वभूताश्रयत्वं परिच्छिन्नस्य संभव
तीति ॥ कुतः सर्वाश्रयत्वं पुरुषाय सर्वस्मात्कार्यात्पूर्वमेव सते ॥ पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमिति श्रुतेः ॥ एतदपि कुतः ॥ आदिबीजा

नमः पंकजनाभाय नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥१६॥ नमो भगवते तुभ्यं वासु
देवाय विष्णवे ॥ पुरुषायादिबीजाय पूर्णबोधाय ते नमः ॥१७॥ अजाय जनयित्रेऽस्य ब्रह्मणोऽनंतशक्तये ॥ पराव
रात्मन्भूतात्मन्परमात्मन्नमोऽस्तु ते ॥१८॥

यच्चादेर्जगत्कारणस्यापि कारणाय एवमपि न सृष्टादिवत् जाड्यमित्याह ॥ पूर्णबोधायेति
न त्वेवमपि स्वकारणात्पूर्वमसत्त्वं न स्यात् ॥ अत आह ॥ अजायेति ॥ स्वयमजाय ॥ अस्य जगतः जनयित्रे उभयत्रापि क्रमेण हेतुद्वयं ॥ ब्रह्मणो विहते
अनंतशक्तये इति च ॥ स्रष्टृत्वादजत्वं अनंतशक्तित्वात् जनयितृत्वमित्यर्थः ॥ नन्वपि त्वादयः प्रजादीनां जनकाः तेषां च तत्पूर्वं ते वा च भूतानि तेषां
च स्वकर्मद्वारेण जीवाः किमत्राह तत्राह ॥ परावरात्मन्नित्यादि पित्राद्यात्मत्वात्त्वमेव जनक इत्यर्थः ॥ ॥१८॥

नत्रगुणोविश्वोत्पत्त्यादिहेतवः नैवप्रधानस्यैवतस्यचपुरुषः क्षोभकः तत्रकालोनिमित्तमितिप्रसिद्धं किमत्राहतत्राहत्वमेवेति ॥ तमसोधारणोः स्वमेव
तएव ॥ स्थानाय पालनाय ॥ जगतः सृष्ट्याद्यर्थंउत्कर्षंरतऋाहित्वमेवविमर्षितज्ञसीत्यर्थः ॥ कालप्रधानपुरुषास्त्वत्व्यतिरिक्तानसंतित्वंतुपरः ॥ सर्वव्यति
रिक्तः ॥ त्वतत्त्वमेवजनयितेत्यर्थः ॥ २८ ॥ कार्यकारणप्रपंचस्यतदव्यतिरेकंतस्यैवसर्वस्मात्व्यतिरेकंचप्रपादयति ॥ अहमिति ॥ अहंभूमिः ॥ प्राणा
निदेवामनइतिंइंद्रियाणीतिचत्रिविधाहंकारकार्याणि ॥ कर्ताअहंकारः ॥ २९ ॥ एवंस्तुत्वाप्रार्थयतेतस्येति ॥ हेप्रपन्नार्तिहरतस्यनरकस्यअयंभगव

त्वंवैसिसृक्षुरजउत्कटंप्रभोतमोनिरोधायविमर्षसंवृतः ॥ स्थानायसत्वंजगतोजगत्पतेकालःप्रधानंपुरुषोभवान्परः ॥ २८ ॥
अहंपयोज्योतिरथानिलोनभोमात्राणिदेवामनइंद्रियाणि ॥ कर्तामहानित्यखिलंचराचरं त्वय्यद्वितीयेभगवन्नयंभ्रमः ॥ २९ ॥
तस्यात्मजोयंतवपादपंकजं भीतःप्रपन्नार्तिहरोपसादितः ॥ तत्पालयैनंकुरुहस्तपंकजंशिरस्यमुष्याखिलकल्मषाप
हं ॥ शुकउवाच ॥ इतिभूम्यार्थितोवाग्भिर्भगवान्भक्तिनम्रया ॥ दत्त्वाभयंभौमगृहंप्राविशत्सकलर्द्धिमत् ॥ ३१ ॥ तत्रराजन्यक
न्यानांषट्सहस्राधिकायुतं ॥ भौमाहृतानांविक्रम्यराजभ्योददृशेहरिः ॥ ३२ ॥

भौमेनाममभीतः ॥ अतएवमयातवपादपंकजमुपसादितः ॥ ३० ॥ अभयंदत्त्वा ॥ ३१ ॥ शताधिकमित्यपितात्पर्यंयथाहुःश्रीपराशरः ॥ कन्यापुरेसकन्या
नांषोडशातुलविक्रमः ॥ शताधिकानिददृशेसहस्राणिमहामतइति ॥ राजभ्यइत्युपलक्षणं ॥ सिद्धादिभ्यश्चेति ॥ नरपितेनैवोक्तं ॥ देवसिद्धा
सुरादीनांनृपाणांचजनार्दनः ॥ हृत्वाहिसोऽसुरः ॥ कन्यारुरोधनिजमंदिरे ॥ ३२ ॥

ग्राहिणोऽत्र स्त्राप्ययामास ॥ हृष्टाः कमनीयाश्चताः विरजांवराश्चताः ॥ नरयानैः शिबिकाभिः अपिव महाकोशानिति ॥ ३६ ॥ तत्रियः सत्यभामासहितः
॥ ३८ ॥ गृहोद्यानेनिः क्रमपशोभयतियः ॥ ३७ ॥ देवान् विबुधान्निर्जित्येतीइन्द्रस्य योः संग्राम उक्तस्तत्र ॥ न तु कथं प्रसाधितत्वमनोरथेन श्रीकृष्णेन स
हेइ स्म संग्राम इत्याशंक्याह ॥ ययावइति ॥ अच्युतस्य स्वसाधनमितिवक्तव्ये इत्यं ययावति धातोः विशत्यते विग्रहं करोति महानपितमः क्रोधः ॥ आयंतोधनि

तत्रविष्टं त्रियोवीत्सनरवीरविमोहिताः मनसावब्रिरेभीष्टपतिं दैवोपपादितं ॥ ३४ ॥ ययात्यतिरयमत्यधातातत्त्वमोदत्ता ॥ इतिसर्वाः
पृथक् कृष्णेभावेनहृदयेदधुः ॥ ३५ ॥ ताः ग्राहिणोहारवतीं सपृष्टविरजांवराः ॥ नरयानैर्महाकोशान्रथाश्वान्द्रविणंमहत् ॥ ३६ ॥ एवं व
तकुलेभाश्चवत्रेईताः स्वरक्षितेनः ॥ पांडुराश्चचतुःषष्टिम्प्रेषयामास केशवः ॥ ३७ ॥ गत्वासुरेंद्रभवनंदत्वादित्यैचकुंडले ॥ पूजितस्त्रि
दशेंद्रेणमहेन्द्राण्याचसप्रियः ॥ ३८ ॥ नोदितोभार्ययोत्पाट्यपारिजातंगरुत्मति ॥ आरोप्यसेंद्रान्विबुधान्निर्जित्योपानयत्पुरं ॥ ३९ ॥ स्थापितः
सत्यभामायाः गृहोद्यानोपशोभनः ॥ अन्वगुर्भ्रमराः स्वर्गात्तद्गंधासवलंपटाः ॥ ४० ॥ ययाचआनम्यकिरीटकोटिभिः पादौस्पृशन्नच्युतम
र्थसाधनं ॥ सिद्धार्थएतेनविगृह्यते महानहोसुराणांचतमोधिगाढ्यतां ॥ ४१ ॥ अथोमुहूर्त्तएकस्मिन्नानागारेषुताः स्त्रियः ॥ यथोपयेमेभग
वान्तावद्रूपधरोऽव्ययः ॥ ४२ ॥ गृहेषुतासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः ॥ रेमेरमाभिर्निजकामसंप्लुतो यथेतरोगार्हक
मेधिकांश्चरन् ॥ ४३ ॥

कर्त्तांधिपिनितिच ॥ ४१ ॥ यथायथावत्तत्रनेनेदेवकार्यविंधुजनसमागमोपिप्रतिगृहंयोगपद्येनसहविघ्नः ॥ अव्ययः सर्वत्रापिसंपूर्णएव ॥ ४२ ॥
अहोभाग्यंनारीणामित्याहत्रिभिः गृहेष्विति ॥ अतर्क्यानिकर्म्माणिकरोतितथासः निरस्तसाम्यअतिशयेअर्थैरन्येषांतेषुगृहेषुअनपायीअवस्थितः रमाभिर्ल
क्ष्म्यांशरूपाभिः निजकामसंप्लुतः स्वानंदपरिपूर्णः गार्हकमेधिकान्गृहस्थधर्म्मान् ॥ ४३ ॥

२०७ ऋंगारगर्भहाससहितमवलोकं वतत्पूर्वकं नवसंगमं वतकृतजल्पं वतस्मिन्लज्जां च भेजुः ॥ ४४ ॥ विस्रंभमणमेवाहनं ॥ केशप्रसारः केशप्रसाधनं दा-
३० सीनां शतानि विद्धं तया सांतथा कृताऽपि स्वंयविमोर्हंसविदधुरिति ॥ ४५ ॥ दशमे एकोनषष्टितमः ॥ अथ षष्टितमे कृष्णः परिहासेन रुक्मिणीं ॥ कोपयि-
त्वा ततः प्रेमकलहे तामसांत्वयत ॥ रामारामजनानंदमहोदयविडंबनैः ॥ हरिरुक्मिणीप्रेमकलहसुखमैनेश्वर्यमीघते ॥ स्वतल्पस्थं स्वपर्यंकस्थं ॥ व्यजनेन

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयां ॥ भेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसंग-
मजल्पलज्जाः ॥ ४४ ॥ प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसारशयनस्नपनोपहार्यैर्दा-
सीशताऽपि विभोर्विदधुः स्म दास्यं ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनषष्टितमोऽध्यायः ॥ बादरायणिरुवाच
कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गुरुं ॥ पतिं पर्यचरद्भैष्मी व्यजनेन सखीजनैः ॥ १ ॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवति प्रभुः ॥
स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः ॥ २ ॥ तस्मिन्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना ॥ विराजिते वितानेन दीपैर्मणिमयैरपि
॥ ३ ॥ मल्लिकादामभिः पुष्पैर्द्विरेफकुलनादितैः ॥ जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोऽमलैः ॥ ४ ॥ पारिजातवनामोदवायुनोद्यानशा-
लिना ॥ धूपैरगुरुजै राजन्जालरंध्रविनिर्गतैः ॥ ५ ॥

णां हरिरुक्मिण्याः श्रियः श्रीकृष्णेऽपरमं प्रेमसंमाविधिपितं तत्स्पोन्नमेव तत्त्वमत्र स्मारयति यस्त्विति ॥ २ ॥
स्वारोतावद्भिः श्लोकैर्मंदिरमत्र वर्णयति ॥ तस्मिन्निति ॥ तत्र हे नातिप्रसिद्धमाह ॥ भ्राजंति मुक्तादामानि तेषां विलंबाः संति यस्मिन्तेन वितानेन विराजि- राम
ते ततीयातानां विराजितपदेनान्वयः ॥ ३ ॥ द्विरेफकुलैर्नादितैः प्रविशद्भिः चंद्रस्य गोभिः ॥ ४ ॥ निर्गच्छद्भिः अनंतमधूपैश्चात्रातिमनोहरत्वं दर्शितं ॥ ५ ॥ ३०

पयः फेनः क्षीरस्य फेनस्तद्वन्मृदुनि पर्यंके मञ्चके कशिपूत्तमे हंसतूलिकायां उपतस्थे सुखेनासीनं ॥ तदेवाभिनयति ॥ वालव्यजनमिति ॥७॥ उपास्यांचक्रे शु-
श्रुतं समीपे स्थाने मणिनूपुराभ्यां रेजे ॥ क्वणयति मणिमयौ नूपुरौ कूजयंती तथांगुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्रे यस्याः सा वस्त्रांते-
न गूढौ स्थगितौ कुचौ तयोः कुंकुमेन शोणो हारस्तस्य भासा तथा नितंवे धृतया परार्घ्या अमूल्या कांच्या तया च रेजे ॥८॥ तां निरीक्ष्य प्रीतः सन्

पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे ॥ उपतस्थे सुखासीनं जगतामीश्वरं पतिं ॥६॥ वालव्यजनमादाय रत्नदंडं सखीकरात् ।
तेन वीजयती देवी उपासां चक्र ईश्वरम् ॥७॥ सोपाच्युतं क्वणयती मणिनूपुराभ्यां रेजेंगुलीयवलयव्यजनाग्रहस्ता ॥ वस्त्रां-
तगूढकुचकुंकुमशोणहारभासा नितंवधृतया च परार्घ्यकांच्या ॥८॥ तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य या लीलया ॥ धृ-
ततनोरनुरूपरूपा ॥ प्रीतः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ॥९॥ श्रीभगवानुवाच ॥ राजपु-
त्रीप्सिता भूपैर्लोकपालविभूतिभिः ॥ महानुभावैः श्रीमद्भी रूपौदार्यबलोर्जितैः ॥१०॥ तान्प्राप्तानर्थिनो हित्वा चैद्यादीन्स्मरदु-
र्म्मदान् ॥ दत्ता भ्रात्रा स्वपित्रा च कस्मान्नो ववृषेसमान् ॥११॥

स्मयमानो हरिः ॥ आवभाषे ॥ कथंभूतां या लीलया धृततनोः तस्य अनुरूपरूपा अनु-
रूपं रूपं यस्याः ॥ तां ॥ यथोक्तं श्रीपराशरेण ॥ देवत्वे देवदेहेयं मानुषत्वे च मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुमिति ॥ किंच अलकैः कुंडला-
भ्यां निष्केन पदकेनालंकृतं कंठेन च तद्दिक्षु शोभितेन वक्त्रेण उल्लसंती स्मितसुधा यस्यास्तां ॥९॥ सर्वगुणाढ्यज्ञायाः कुपितवद्बुद्धिर्म्मरेत्याशयेनाह राजपुत्रीत्यादि-
कादशभिः ॥ हे राजपुत्रि लोकपालानामिव विभूतिर्येषां तैस्तथा महानुभावैरौदार्यरूपादिभिरूर्जितैः श्रेष्ठैर्भूपैरीप्सितासि ॥१०॥ तान्हित्वा नोस्मान्कस्माद्ववृषे वृत-

२०३ किंच ॥ प्रायशः राजभ्यो जरासंधादिभ्यो विभ्यतः भयं प्राप्तवतः ॥१२॥ अस्पष्टवर्त्मनां अविज्ञाताचाराणां अलोकपथं अद्वीपारतं अपदवी मार्गां आस्थिता आ
३१ वहतीः ॥१३॥ किंच ॥ निःकिंचना इति ॥१४॥ आत्मसमं परस्परसमं अतन्तुपं जन्मैश्वर्याभ्यां सहिता आकृतिः तुपं जातिर्वा समा ॥ भवः आपतिः ॥१५॥ अरीद्वीसमीज्ञावि

राजभ्यो विभ्यतः सुभ्रु समुद्रं शरणं गतान् ॥ बलवद्भिः कृतद्वेषान् प्रायः त्यक्तनृपासनान् ॥१२॥ अस्पष्टवर्त्मनां पुंसामलोकपथमी
युषां ॥ आस्थिताः पदवीं सुभ्रु प्रायः स्त्रीः इति योषितः ॥१३॥ निःकिंचना वयं शश्वन्निःकिंचनजनप्रियाः ॥ तस्मात्प्रायेण न ह्याढ्या
मां भजंति सुमध्यमे ॥१४॥ ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः ॥ तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥१५॥
वैदर्भ्येतदविज्ञाय त्वयादीर्घसमीक्षया ॥ वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा ॥१६॥ अथात्मनोऽनुरूपं वै भजस्व क्षत्रि
यर्षभं ॥ येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे ॥१७॥ चैद्यशाल्वजरासंधदंतवक्त्रादयो नृपाः ॥ मम द्विषंति वामोरु रुक्मी चा
पि तवाग्रजः ॥१८॥ तेषां वीर्यमदांधानां दृप्तानां स्मयनुत्तये ॥ आनीतासि मया भद्रे तेजोपहरता सतां ॥१९॥ उदासीना वयं नूनं न
स्त्र्यपत्यार्थकामुकाः ॥ आत्मलब्ध्यास्महे पूर्णा गेहयोर्ज्योतिरक्रियाः ॥२०॥ श्रीशुक उवाच ॥ एतावदुक्त्वा भगवानात्मानं वल्लभामिव ॥ मन्यमानामविश्लेषात्तद्दर्पघ्न उपारमत ॥२१॥

चारो यस्याः तया ॥१६॥ अथ इदानीमपि ॥१७॥ तर्हि किमित्यानीताहमिति चेदित्याशं
क्याह ॥ चैद्येति ॥ मम मां द्विषंति ॥१८॥ स्मयनुत्तये गर्वापनयनाय ॥१९॥ स्त्रीणामतिदुःसहमौदासीन्यमकामत्वं वाह उदासीना इति ॥ गेहयोर्देहगेहयोः उ
दासीना अत एव ज्योतिरक्रियाः ज्योतिः शरीरादि तद्वत्साक्षिमात्रतया क्रियया रहिता आस्महे वर्त्तामहे इति ॥२०॥ अविश्लेषाद्धेतोः आत्मानमेवेत्येवा

राम
३१

विच्छिन्नालक्षणा माया ॥ परे इति ॥ न खेदः न ग्लानिः श्रीः कांतिर्यस्याः ॥ सुजातेन सुकोमलेन पदा ॥२३॥ सुदुःखं प्रियस्य श्रवणात् भयं त्यागशंकया शोकः श्रुतेन तापः तैर्विन-
ष्टा बुद्धिर्यस्याः श्लथंति पतंति वलयानि यस्मात्तस्माद्धस्तात् देहश्च पपात ॥ विक्लवा अवशा धीर्यस्याः सा तस्याः ॥२४॥ हास्यप्रौढिं गांभीर्यं ॥२५॥ चतुर्भुज इति
उत्थापनाश्रुमार्जनवक्त्रपरिमार्जनाद्यर्थं आविः कृतवक्त्रभुजः इत्यर्थः समूह्य निबध्य ॥२६॥ अश्रुकले अश्रुभिः शोभिते शुचा शोकाश्रुभिः ॥२७॥ सांत्वयामा-

इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं ॥ आश्रुत्य भीता हृदि जातवेपथुश्चिंतां दुरंतां रुदती जगाम ह ॥२२॥ पदा
सुजातेन नखारुणश्रिया भुवं लिखंत्यश्रुभिरंजनासितैः ॥ आसिंचती कुंकुमरूषितौ स्तनौ तस्थावधोमुख्यतिदुःखरुद्धवाक्
तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्तात् श्लथद्वलयतो व्यजनं पपात ॥ देहश्च विक्लवधियः सहसैव मुह्यन् रंभेव वातविह-
ता प्रविकीर्य केशान् ॥२४॥ तद्दृष्ट्वा भगवान् कृष्णः प्रियायाः प्रेमबंधनं ॥ हास्यप्रौढिमजानंत्याः करुणः सोऽन्वकंपत ॥२५॥ पर्यंका-
दवरुह्याशु तामुत्थाप्य चतुर्भुजः ॥ केशान् समुह्य तद्वक्त्रं प्रामृजत् पद्मपाणिना ॥२६॥ प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा ॥ आ-
श्लिष्य बाहुना राजन्ननन्यविषयां सतीं ॥२७॥ सांत्वयामास सांत्वज्ञः कृपया कृपणां प्रभुः ॥ हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः ॥
२८॥ श्रीभगवानुवाच ॥ मा मा वैदर्भ्यसूयेथा जाने त्वां मत्परायणां ॥ त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमंगने ॥२९॥ मुखं च प्रेमसंरंभ-
स्फुरिताधरमीक्षितुं ॥ कटाक्षेपारुणापांगं सुंदरभ्रुकुटीतटम् ॥ ॥३०॥ ॥

स सांत्वनीतवान् ॥२८॥ मा मा त्वद्वचः किं वदिष्यतीति श्रोतुकामेन श्रोतुमिच्छता क्ष्वेल्या नर्मणा एवमाचरितमुक्तं ॥ न तत्त्वतः हे अंगने सुंदरि ॥२९॥ प्रेमसंरंभेणारुण-
यत्कोपेन स्फुरितः कंपितोऽधरो यस्मिंस्तत् तव यावत् कटाक्षेणारुणापांगे सुंदरं भ्रुकुटिलं भृकुटितं यस्मिंस्तत् ॥३०॥ ॥

१०
३२

नन्वत्र कलहे किं कौतुकं सुखं वा अत आह अयं हीति नर्मैर्नर्मभिः यामः कालः ॥ ३१ ॥ भगवत इत्थं ऐश्वर्यप्रकटनं सुखं सव्रीडहासेन रुचिरेण स्नि
ग्धेनापांगेन वीक्षमाणा ॥ ३२ ॥ अस्त्रमत्तं भयं दुर्गाश्रयणं प्रबलैर्वैरैः कलिः अराजत्वमविज्ञानात् लौकिकेहावमास्तं ॥ निःकिंचनत्वं तत्त्यागिति राधानो
रक्षणीयता ॥ अन्यो चित्तं निर्गुणत्वं वृथाश्लाघा च भिक्षुभिः ॥ श्रोराज्ञीन्यमकामत्वं स्वदोषान्षोडशाहतः अत्तत्वादोद्वैरर्णीत्वे भैष्म्यां राज्ञा वहृत् ॥ कृ

अयं हि परमो लाभो गृहेषु गृहमेधिनाम् । यन्नर्मैरीयते यामः प्रियया भीरु भामिनि ॥ ३१ ॥ श्रु
क उवाच ॥ सैवं भगवता राजन्वैदर्भी परिसांत्विता । ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभयं जहौ ॥ ३२ ॥
बभाषऋषभं पुंसां वीक्षन्ती भगवन्मुखं । सव्रीडहासरुचिरस्निग्धापांगेन भारत ॥ ३३ ॥ रुक्मिण्युवाच
नन्वेवमेतदरविंदविलोचनाह यद्वै भवान्भगवतोऽसदृशी विभूम्नः ॥ क्व स्वे महिम्न्यभिरतो भगवांस्त्र्य
धीशः क्वाहं गुणप्रकृतिरज्ञगृहीतपादा ॥ ३४ ॥

स्मेन नर्मोदितान्नैष्पीन्सावेवन्नहुगुणत्वैः ॥ भगवतः स्वनिंदापराणि वयानि वचनानि तानि सर्वोत्कर्षपरतया व्याचक्षाणा प्रतिभाषते ॥ ३३ ॥ तत्र यदुक्तं
कस्मान्नो वव्रिषे समानिति ॥ तत्रासामर्थ्यमस्त्यमेवेत्याह ॥ नन्वेवमिति ॥ हे अरविंदलोचन ॥ अधीशत्रयाणां ब्रह्मादीनामप्यधीशो नियंता त्वं क्व चाहं गु
णप्रकृतिस्त्रिगुणस्वभावा प्राकृतानां गुणामयि प्रकृतिर्वा ॥ नन्वेवमेवाधीश्वरा अपि श्रीः सर्वैः हृत्पास्तत्वादिति ॥ अत आह ॥ अज्ञैः सकामैर्गृहीतौ पादौ यस्याः सा ॥ ३४ ॥ ३२

यदुक्तं राजन् भयोविभ्यतः समुद्रमुद्रं शरणागतानिति ॥ तत्राह ॥ सत्यमिति ॥ हे उत्कृष्ट मेतिमयाभावं दर्शयति ॥ गुणाः शब्दादय एव राजंतः इति राजानस्त्वेभ्योभ
याद्विवेति श्रोतः हृदये समुद्रे तद्द्वरेणोधे विषयाकारेरपिछित्रस्त्यर्थः ॥ श्रोते निश्चलतयाप्रकाशते उपलंभनमात्रः ॥ वेनस्यपनं आत्मा भवानिति ॥ वलव
द्भिः कृतद्वेषानिति यदुक्तं तदपि सत्यमित्याह नित्यमिति ॥ करींद्रियगणोः कर्मेंद्रियैर्हस्तैर्वेरिंद्रियगणोः वृत्यमिप्रायेणावज्ञवचनं कर्मेंद्रियत इंद्रिय
गणोपेक्षां मितिवातेत्वं नित्यकृतविग्रहः नेष्ठतवाप्रतीतेः ॥ यदुक्तं त्यक्तरूपामसनामिति ॥ तत्रकृष्णमेवेत्याह ॥ त्वत्तो वकैरिति ॥ नृपाणां परमासनं श्रुध

सत्यं भयादिव गतोप्यरूपतामंतः श्रोते समुद्र उपलंभनमात्र आत्मा ॥ नित्यं करींद्रियगणोः
कृतविग्रहस्त्वं त्वत्तो वकै नृपपदं विधृतं तमोधम् ॥ २५ ॥ त्वत्तादरूप्यमकरे रजगुणा गुणीना
वल्मीसारं नृपभूमिनिवेतु दुर्विभावा ॥ यस्मादलौकिकमिवेहितमाश्वरस्य श्रुत्वेहितम
योग्यरूपमेव तव तम् ॥ २६ ॥

गादंतरमेव ततश्च विवेकवकुलत्वात् ॥ त्वत्तो वकैरेव ततस्त्यक्तं किंपुनर्वक्तव्यं त्वया त्यक्तामिति ॥ २५ ॥ अस्य
वर्त्मनापि महाम लोकपथमायुषामितियदुक्तं तदपि तथैवेत्याह ॥ त्वत्तादिति ॥ नृपभूमिभिन्नराकारैः पशुभिः किंपुनर्वक्तव्यं तव वर्त्मोत्कटमिति ॥ किं
चयस्मादीश्वरं तमरवर्त्मनि तेषामपि हितमलौकिकमिवश्रूयते अतः किमु वक्तव्यं तव श्रुतस्येतित मलौकिकमित्यर्थः आश्रिताः पदवीमस्त्रुप्रायः
सीदंतियोचितमिति ॥ अस्य परिहारवस्ततिपद्यत्रयेति पंचमश्लोके ॥ २६ ॥

२०३
२२

निःकिंचनावयंशश्वन्निःकिंचनजनप्रियाः ॥ तस्मात्सायेण नाद्याद्यामां भजंतिहमध्यमइत्येततश्लोकोक्तदोषत्रयंपरिहरति ॥ [illegible]
निःकिंचनइति ॥ हरिद्रतालक्षणंनिःकिंचनंत्वतत्वनहरतइत्याह ॥ यस्मादिति ॥ अन्यतोवलिभुजः पूज्याश्चपितृसारयोयस्मैभवतेवलिंहरंति ॥ तस्मात्तंदैश्वरस्य
भवतोहरिद्रतानहरतइत्यर्थः ॥ निःकिंचिनजनप्रियाइत्यत्रतत्स्वरूपेणावद्भीहितावानिंदास्यादिति ॥ स्वयमप्यभयथाहोति ॥ श्रेष्ठोभवानिति ॥ वलिभुजाङ्
ह्लादीनांलोकेश्वराणांत्वंश्रेष्ठस्तेपितृभ्यंतवेति ॥ तस्मात्सायेणनत्याद्यामांभजंतीत्यस्योत्तरंनत्वाविरंतीति आद्यतयाधाः त्वामंतकनविरंति ॥ अतस्तेश्व
भुतपः ॥ अस्मत्सेवतत्थियतिनत्वाभंजंतीत्यर्थः ॥ २७ ॥ वलिपूज्जामपिभवान्ग्रेश्वइत्यत्रहेदेवरंतीमयोरेवसमभवितमित्यनेनोक्तमनोवित्यपरिहरति ॥ त्वयाहिति

निःकिंचनोनतुभवान्नयतोस्तिकिंचिद्यस्मैवलिंवलिभुजोपिहरंत्यजाद्याः ॥ नत्वाविरंत्यहहरूपोतकमाद्यतांधाः श्रेष्ठोभवा
न्वलिभुजामपितेपितृभ्यं ॥ २७ ॥ त्वंवेममत्तस्यरूपार्थमयः फलात्मायद्वौश्याहमतयोविहंतिहात्य ॥ तेषाविभोसमवितोभवतः
समाजः पुंप्रकृतियाश्चरतयोः सखदुःखिनोत्रे ॥ २८ ॥ त्वमत्तरडछनिमिगीरितांत्रभावश्चात्मात्मरस्यजगतामितिमेवृतोसि ॥ दि
त्वामवहुवउरीरितकालवेगध्वस्ताशिषोत्रभवनाकपतीञ्जतोन्ये ॥ २९ ॥

फलात्मापरमानंदरूपः एतस्यैवानंदस्यान्यानिभूतानिमात्राश्चउपजी
वंतीतिश्रुतेः समाजः सेव्यसेवकलक्षणसंबंधः नेतपुंप्रकृतियाश्चमिथोरतयोः अतएवतत्कृतसखदुःखिनोः तराकालयोरित्यर्थः ॥ २८ ॥ भिक्षुभिः साधितात्र
धेत्यस्यपरिहारः ॥ त्वामितिभिक्षुपरव्याख्यानंमत्तरंडैमुनिभिरिति ॥ अधेत्यस्यपरिहारः ॥ आत्मेति ॥ यद्यपीमस्तुविधंभवतितस्यजगतामात्मनस्त्ववर्णनंनहष्येत्यर्थः
किंच ॥ आत्मइति वैराग्येनदविज्ञायत्वपादावैंसमीक्ष्ययेतिः स्वामित्रुवत्रोदोषद्वयंपरिहरति ॥ इतीति ॥ इतिज्ञात्वैवमेमयाहृतोसीत्यत्तानपरिहारः ॥ हित्वेत्यदीर्घसमीक्षा
परिहारः भवतोन्नवः सकाशादुदीरितोयःकालः तस्यवेगस्तेनध्वस्ताआशिषोयेषांतान्त्रभवस्रादीनपिविहायकतोः स्वेवराकाइत्यर्थः ॥ २९ ॥

राम
२२

स्वात्मानं परिहृत्य प्रहर्षातरेण वर्णनप्रवीणकोपमं रंभेणा तस्मिन्नेवाज्ञानमापादयति ॥ जाड्यमिति ॥ सिंहो यथा पशून्विद्राव्य स्वबलिं हरति ॥ तथा शार्ङ्ग-
धन्वत्रिनादैनैव जगत्संधारीन्विद्राव्य मां स्वभागं श्रियं यत्स्वीकृतवानित्येतस्य तव राजभ्यो भयाद्दुर्दधिं प्रपन्न इति यद्वचो भावयाणतज्जाड्यमाद्यं न च रतस्त्य
धेः ॥ ४० ॥ यद्वा त्वस्पृष्टवर्त्मनामित्यादिना थ्यातत्वं भजंतः सीदंतीत्यवसादनं श्रमावहत्वमुक्तं तदपि मंदमेवेत्याह ॥ यद्वा त्वछ्रयेति ॥ यस्य तव भजनं वा
त्वछ्रया नृपोत्तमाङ्ग्रिगोवेणास्पिता वैराग्यः इष्टः ॥ आयंतो भरतः नाऽऽङ्कषेयययातिः गयश्चादिर्ये घाते यए ते तव पदवीं मार्गमाश्रिता हे तोः किं सीदंति न सीद

जाड्यं वचस्तव गदाग्रजयस्तनूपाद्विद्राव्य शार्ङ्ग-निनदेन जहर्थ मां त्वं ॥ सिंहो यथा स्वबलिमीश पशून्स्वभागं तेभ्यो भया-
द्दुर्दधिं शरणं प्रपन्नः ॥ ४० ॥ यद्वा त्वछ्रया नृपशिखामणयोंगवेणपज्ञायतेनाऽऽङ्कषगयादयएकपत्य ॥ राज्येऽपि विसृज्याविविक्षु
द्वैनमंडजाङ्घ्रिसीरंति ते नृपदवीं नरहाऽऽस्थिताः किम् ॥ ४१ ॥ कान्तं श्रयेत तव पादसरोजगंधमाघ्राय मन्मुखरितं जन-
तापवर्गं ॥ लक्ष्म्यालयं त्वविगणय्य गुणालयस्य मर्त्यामरोरुभयमर्थविविक्तदृष्टिः ॥ ४२ ॥

त्येव श्रुपितज्वत्यरं प्राप्ता इत्यर्थः ॥ एवं च कोपावेशेनावसादनस्य परिहारादस्पृष्टवर्त्मनामित्येतदानंतर्यं विहायाचोत्कर्षः ॥ ४१ ॥ यद्वोक्तं ॥ स्वात्मनो नृपमि
ति ॥ तत्राह ॥ कान्यमिति ॥ श्लोकद्वयेन ॥ गुणानामालयस्य तव पादसरोजगंधं जनतायाः अपवर्गमोक्षरूपं लक्ष्म्याश्चालयं यतस्तेन त्वन्महद्भिर्मुखरितं वर्णितं आ
घ्रायतमविगणय्य मर्त्यामरणधार्म्मिकाः सदा उरुभयं यस्य तमन्यं काद्वीश्रयेत सेवेत ॥ अर्थे विविक्ता दृष्टिर्यस्याः सा ॥ गुणालयस्येत्यनेन गुणैर्हीना इति
यदुक्तं तदपास्तं ॥ ४२ ॥

६०
३४

अतस्त्वामेवाहमभजमित्याह ॥ तंत्वेति प्रार्थयते स्यादिति ॥ अरणं शरणं सृतिभिर्द्देवतिर्यगादिभिर्जन्मभिः प्राप्तांतरे त्वदर्थं वा इव उलूकस्मिन्भववयोरित्यर्थः कथंभूतं स्यात तव यस्त्वं अनृतस्य संसारस्य अपवर्गो नाशो यस्मात्सः भजंतमुपयाति ॥ आत्मसात्करोति ॥ तस्य तवांघ्रिरिति प्रीतस्य हि शरणमेवानुरूपं भजन योग्यं ॥ अतस्त्वामहमभजमित्यर्थः ॥ ४३ ॥ ये वो नृपा राज्ञां वहवो गुणाणां अजपत्राक्षिता भूपैर्लोकपालविभूतिभिरित्यादिना तत्र संबंधमनुपपन्नं गलितं तं गवाह द्वाभ्यां तस्याः स्युरिति ॥ खरइव केवलं भारवाहाः गावो वलीवर्द्दा इव नित्यं व्यापारक्लिष्टाः श्वानइवावमताः विडाला इव कृपणा हिंस्राश्च भृत्या इव किंकराः नृपाः ॥

तं त्वानुरूपमभजं जगतामधीशमात्मानमत्र च परत्र च कामपूरं ॥ स्यान्मे तवांघ्रिररणं सृतिभिर्भ्रमंत्या यो वै भजंतमुपयात्यनृतापवर्गः ॥ ४३ ॥
तस्याः स्युरच्युत नृपा भवतोपदिष्टाः स्त्रीणां गृहेषु खरगोश्वविडालभृत्याः ॥ यत्कर्णमूलमरिकर्षण नोपयायाद्युष्मत्कथा मृडविरिंचसभासु गीता ॥ ४४ ॥ त्वक्श्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफपित्तवातं ॥ जीवच्छवं भजति कांतमतिर्विमूढा या ते पदाब्जमकरंदमजिघ्रती स्त्री ॥ ४५ ॥ अस्त्वंबुजाक्ष मम ते चरणानुराग आत्मन्रतस्य मयि चानतिरिक्तदृष्टेः ॥ यर्ह्यस्य वृद्धय उपात्तरजोतिमात्रो मामीक्षसे तदु ह नः परमानुकंपा ॥ ४६ ॥

स्याउर्भगायाः पतयः स्युः यस्याः कर्णपथं त्वत्कथा न प्राप्नुयादिति ॥ ४४ ॥ तथा हि ते पदाब्जमकरंद मजिघ्रती सती या स्त्री विमूढा सा कांतोयमिति मतिर्यस्याः सा कांतमतिः जीवच्छवं भजति त्वगादिभिः बहिः पिनद्धं छन्नं अंतर्मांसादिमयमिति ॥ ४५ ॥ यदुक्तमुदासीनावयमित्यादि तत्राह ॥ अस्त्विति ॥ यद्यपि त्वं निरपेक्षः तथापि मम ते चरणानुरागोस्तु ॥ मयि च मय्यपि नातिरिक्ता अतिशयवती दृष्टिर्यस्य तस्य ते आत्मन्नात्मनि रम रतस्य तर्हि तव ते न कोलाभः तच्चरणानुराग एव महाल्लाभः किंच ॥ यर्हि अस्य विश्वस्य वृद्धये उपात्तं रजो येन सोतिमात्रो त्वत्कटाक्षेण सत्वयाक्षतः सन्मामीक्षसे तदेवार्थः २४ इह तेर्षे तदेव नः परमानुकंपा अनुग्रह इति ॥ ४६ ॥

तदेवं तदुक्तं सर्वं प्रतिव्याख्याय प्रमत्तविन्नामंत्रमुपदिशत्याह ॥ द्वाभ्यां नैवेति ॥ अथात्मनो ऽनुरूपमित्यादिनैव वचः अलीकं मिथ्येति नैवमन्ये यतो लोके कन्या
या एव कंचिद्विशत्तिर्भवति ॥ यथा काशिराजकन्यानां अंबाविकांबालिकानां निहत्नाणां मध्ये अंबायाः कन्याया एव शाल्वे रतिर्जीतानादृत ॥ ४७ ॥ ऊढायाः पर
णीतायाः अपीति ॥ उभयस्मात्परलोकद्वयाच्युतः भ्रष्ट इति ॥ ४८ ॥ प्रलंभिता उपहसिताविश्रवाबुधन्नाख्यातवती ॥ ४९ ॥ मयि एकांतभक्त्या त्वेका
माः संत्येव ॥ अकामाय कामनिवृत्तये मोक्षपर्यवसायिने इत्यर्थः ॥ ५० ॥ अत्र वारे नवरान्दत्वा तामभिनंदति उपलब्धमिति ॥ यतयस्मात् ॥ मयि विन्नमाना धीन्नि

नैवालीकमहं मन्ये वचस्ते मधुसूदन ॥ अंबाया इव हि प्रायः कन्यायाः स्याद्रतिः क्वचित् ॥ ४७ ॥ ऊढायाश्चापि पुंश्चल्या मनो ऽभ्येति नवं नवम्
वनवम् ॥ बुधो ऽसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ॥ ४८ ॥ श्रीभगवानुवाच ॥ साध्व्येतच्छ्रोतुकामैस्त्वं राजपुत्री प्रलंभिता ॥ मयोदितं
यदन्वात्थ सर्वं तत्सत्यमेव हि ॥ ४९ ॥ यान्यान्कामयसे कामान्मय्यकामाय भामिनि ॥ संति ह्येकांतभक्तायास्तव कल्याणि नित्यदा
॥ ५० ॥ उपलब्धं पतिप्रेम पातिव्रत्यं च ते ऽनघे ॥ यद्वाक्यैश्चाल्यमानाया न धीर्मय्यपकर्षिता ॥ ५१ ॥ ये मां भजंति दांपत्ये तपसा व्रतचर्यया
कामात्मानो ऽपवर्गेशं मोहिता मम मायया ॥ ५२ ॥ मां प्राप्य मानिन्यपवर्गसंपदं वांछंति ये संपद एव तत्पतिं ॥ ते मंदभागा निरयेः

पकर्षिता नान्यविषया जाता ॥ ५१ ॥ एकांतभक्तिमपि मिनं घ्नतामेव दृष्टीकर्तुं सकामान्भक्तान्निंदति ये मामिति ॥ (पिये नृणां मात्रात्मकत्वान्निरयः सुसंगमः ॥ ५३
दांपत्ये दांपत्यसुखोपभोगपर्यवसायिनि ॥ ५२ ॥ मायामोहितत्वमेवोपपादयति मां प्राप्येति ॥ अपवर्गाणां महत्संपदो यस्मिन् तं मां प्राप्य प्रसाद्य ये केवलं संपद एव विष
यानेव वांछंति न तु मां तत्पतिं तासां संपदां पतिं ये निरयेपि निरयोपि भवंति तेषां नृणां ते नात्र विशिष्टास्तान्किंच ॥ तेषां मात्रात्मकत्वात् विषयात्मकत्वान्निरयः सु
संगमः शोभनः संगम एव स्यात् ते मंदभागा इत्यर्थः ॥ ५३ ॥

२०७
३५

तस्मात् हे गृह हे अश्वरित्वयामापि भवमोचनीनिः कामान्तु वृद्धिः कृता एतद्दिष्ट्या भद्रं कथं भूता खलैः हृडुः करा ॥ डुराशिषो डुरभिप्रायायाः अत एवम् हे भरायाः प्रा
णा तर्थिणा परायाः निष्कृतिं वर्जेषां वचनपरायाः स्त्रियाः हतरामप्रावनुर्वृत्तिः हृडुः करोति ॥ ५४ ॥ किंच पदंतिनिः कामदेवमौ वमध्यन्तु वर्तमाना वद्धः किंतत्वया
सदृशी क्वापि न पश्यामीति तस्या भक्तिं तदुमानेनाभिनंदति ॥ नत्वादृशीमिति त्रिभिः ॥ उपश्रुताः सत्यः कथाय स्यामे ॥ ५५ ॥ प्रोद्वाहपर्वणि अनिरुद्ध विवाहे अनुरूपो
स्वांगुत स भाया तस्य प्रातर्युधं तस्मिन्काले कालांतरे वत स्वरूप स्मरणात्ः पुनः पुनः स्मरत्छुडुः खेअस्माभिरयोगो वियोग स्तद्वीत्यागस्वहः सोऽदवत्पामि ॥ अ

दिष्ट्या गृहेश्वर्य्यः सकन्मयि त्वयात्कृताऽवृत्तिर्भवमोचनी खलैः ॥ हृडुङ्कारायोऽहतराङ्कराशिषो त्यहे भराया निष्कृतिं जुषस्त्रियः ॥ ५४
न त्वादृशी प्रणयिनी गृहिणी गृहेषु पश्यामि मानिनि यया स्वविवाहकाले ॥ प्राप्तान्नृपाणा विगणाय्य दोहो मे प्रस्थापितो द्विज
उपश्रुत्य सत्कथस्य ॥ ५५ ॥ प्रोद्वर्हिरूपकरणाऽपधनिर्जितस्य प्रोद्वाहपर्वणि वतत्प्रथमन्त्रणाह्या ॥ डुः खं समस्तु समसौ स्मरयोग
भीत्या नेवाद्रवीः किमपि तेन वयं जिताःस्ते ॥ ५६ ॥ हृतस्त्वयामलमनेन विविक्तमंत्रः प्रस्थापितो मयि विराय तस्स्त्वपमेनत ॥ मत्वा
जिहासदस्सं गमनन्ययोगं तिष्ठेत तत्स्वयि वयंयति नंदयामस ॥ ॥ ५७

नैनेवानिरुद्धविवाहानंतर्यमस्य ज्ञातव्यं ॥ ५६ ॥ अपि च हृत इति ॥ आत्मल
मनेन सत्यास्यर्थमयि विरायति ॥ स्वोभाविनि विवाहे आगतव्यमिति कृते समयेकथं विरस्राप्नवतिमति एतद्विस्पष्टमत्वा इदमनन्ययोगमसंगं जिहासेत्यन्तमि
छामित्यहृम्यामीत्येवं हृतः प्रस्थापितः ॥ तथाप्यनंत्वया ॥ यद्वा अंतज्ञाह्मालमेय भवत्प्रतां ङ्गत्या सस्नेहात स्वशान्तातजन्मभिः स्यादिति ॥ यद्वा अजिहासइति
हे [illegible] पत्नीमेष्ठ इत्यर्थः ॥ तत्तवकर्मत्वय्येव तिष्ठेत ॥ ननु प्रतिकर्तुं शक्या मित्यर्थः ॥ किंतु केवलं त्वां प्रति नंदयामः हर्षयाम इति ॥ ५७ ॥

राम
३५

सौरतसंलापैः सुरतनर्म्मगोष्ठीभिः ॥ ५८ ॥ इति दशमे षष्टितमः ॥ एकषष्टितमे शौरेः पुत्रपौत्रादिसंततिः ॥ अनिरुद्धविवाहे च रुक्मिणो णमतो वधः ॥ अष्टाधिकशतद्व्यष्टसहस्रस्त्रीसमुद्भवान् ॥ कोटिशः पुत्रपौत्रादीन् हरिर्द्वीरैरयोजयत ॥ तदेतदुक्तमाह ॥ एकैकश इति ॥ कृष्णस्य अबला भार्याः सर्वा या आत्मनिसं

शुक उवाच ॥ एवं सौरतसंलापैर्भगवान् जगदीश्वरः ॥ स्वरतो रमया रेमे नरलोकं विडंबयन् ॥ ५८ ॥ तथान्यासामपि विभुर्गृहेषु गृहवानिव ॥ आस्थितो गृहमेधीयान् धर्म्मान् लोकगुरुर्हरिः ॥ ५९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिणीसंवादः षष्टितमोध्यायः ॥ शुक उवाच ॥ एकैकशस्ताः कृष्णस्य पुत्रान्दशदशाबलाः ॥ अजीजनन्ननवमान्पितुः सर्वात्मसंपदा ॥ १ ॥ गृहादनपगं वीक्ष्य राजपुत्र्योऽच्युतं स्थितम् ॥ प्रेष्ठं न्यमंसत स्वं स्वं न तत्तत्त्वविदः स्त्रियः ॥ २ ॥ चार्वब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः ॥ संमोहिता भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन् वनिता विभूम्नः ॥ ३ ॥

पन्नतया पितुः ॥ सकाशादनवमान् अन्यूनान् ॥ १ ॥ प्रेष्ठं न्यमंसत ॥ अच्युतस्य प्रियतमं प्रत्येकं स्वं स्वं मेनिरे ॥ न तस्य तत्त्वमात्मारामत्वं विदन्ति ताः ॥ २ ॥ आत्मारामत्वं व्यनक्ति हृद्येन ॥ चार्विति ॥ चार्वब्जकोशवद्वदनं च आयतानि बाहुनेत्राणि च सप्रेमहासरसेन वीक्षितानि च वल्गुजल्पाश्च ॥ भगवत एतैः संमोहिता वनिताः स्वैरनेकैर्विभ्रमैरस्य मनो विजेतुं हर्तुं न समशकन् न शक्ता बभूवुः ॥ विभूम्नः परिपूर्णस्य ॥ ३ ॥

टी०ग
३६

तासां विभ्रमान्वर्णयन्नेतद्विवृणोति स्मायेति ॥ स्माया योगरूढ इति तं तद्यतः अवलोकलवः कटाक्षस्तेन दर्शितः सूचितो भावोभिप्रायः तेन हारि मनो
हरणशीलं यत् भ्रूमंडलं तेन प्रहिताः प्रस्थापिता ये मारता मन्त्राः ते षट्शौंडैः प्रगल्भैः अनंगस्य वाणैः शरैरस्य वशीकरणैः कामशास्त्रप्रसिद्धैर्यस्यें
द्रियं मनो विमथितं क्षोभयितुं षोडशसहस्रमपि पत्न्यो न शक्तारिति ॥४॥ अनुरागगहाहामोऽवलोकश्च नवसंगमे लालसश्चोत्सुकश्च तेषां द्यायस्सवि

स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितमोरतमंत्रशौंडैः ॥ पत्न्यस्त्रिषोडशसहस्रमनंगवाणैर्यस्येंद्रियं विम
थितं करोतोन्नशेकुः ॥४॥ रत्नाकरा पतिमवाप्य पतिं त्रियस्ता त्रैलोक्यदायपि न विदुः पदवीयदीयां ॥ मेनुर्मुदाविरतमे
धितयानुरागगहाभावलोकनवसंगमलालसाद्य ॥५॥ प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगं
धमाल्यैः ॥ केशप्रसाधशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यं ॥६॥ तासां या दशपुत्राणां क्ष
स्महीणां प्रोहिताः ॥ अष्टौ महिष्यस्तत्पुत्रान्प्रद्युम्नादीनृगृणामि ते ॥७॥

भ्रमकरत्वमप्यतमेनुः अनुरागगहाभावलोकनवसंगम
लालसाद्यमेनुः तस्य मनो विजेतुं न शेकुरिति वा ॥५॥ किंच प्रत्युद्गमादिभिर्विभोस्तस्य दास्यं नित्यं विदधुरिति ॥ पौरभावेपि नवसंगमाद्यभिमानं अंगत
मारत्वे नौत्सुक्यं नव तथा प्रतीतेः तेषामेव श्लोकानां इह तावान्तरे एव पुनरारब्ध इति शोध्यं ते ॥६॥ यासामिकपुत्राः प्रसूतमाहतासामिति दशदशपुत्रा
यासां तासां मध्ये अष्टौ महिष्यो याः प्राधान्यात्तत्पुत्रानिति ॥७॥

राम
३६

श्रीमानिति वसोः कुंतेर्वा विशेषणं ॥ २ ॥ भद्रो नाम एकलः एकः सोमकश्चावरः कनीयान् ॥ एते कालिंद्याः सुता इति ॥ ३ ॥ माद्र्या लक्ष्मणायाः ॥ ४ ॥ क्षुधिश्च हशामः
एते मित्रविंदात्मजाः ॥ ५ ॥ संग्रामजित्प्रमुखाः सत्यकांता भद्रायाः सुताः शैब्या नामापि सैव रोहिण्याः सुता नाउक्तिरन्यासामुपलक्षणार्थं ॥ ६ ॥ एतेषां वेति

चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् ॥ सुचारुश्चारुगुप्तश्च भद्रचारुस्तथापरः ॥ ८ ॥ चारुचंद्रो विचारुश्च चारुश्च दशमो हरेः ॥ प्रद्युम्नप्र
मुखा जाता रुक्मिण्यां नावमाः पितुः ॥ ९ ॥ भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा ॥ चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ॥
श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा नृप ॥ १० ॥ सांबः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित् ॥ विजयश्चित्रकेतुश्च वसुमान्द्रविडः
क्रतुः ॥ जांबवत्याः सुता ह्येते सांबाद्याः पितृसमताः ॥ ११ ॥ वीरश्चंद्रोश्वसेनश्च चित्रगुर्वेगवान्वृषः ॥ आमः शंकुर्वसुः श्रीमान्कुंतिर्नाग्न
जितेः सुताः ॥ १२ ॥ श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एकलः ॥ शांतिर्दर्शः पूर्णमासः कालिंद्याः सोमकोवरः ॥ १३ ॥ प्रघोषो गात्रवान्सिं
हो बलः प्रबल ऊर्ध्वगः ॥ माद्र्याः पुत्रा महाशक्तिः सह ओजोपराजितः ॥ १४ ॥ वृको हर्षोनिलो गृध्रो वर्द्धनोन्नाद एव च ॥ महांसः पावनो
वह्निर्मित्रविंदात्मजाः क्षुधिः ॥ १५ ॥ संग्रामजिद्बृहत्सेनः शूरः प्रहरणोरिजित् ॥ जयः सुभद्रो भद्रायाः वाम आयुश्च सत्यकः ॥ १६ ॥ दीप्तिमा
न्ताम्रतप्ताद्या रोहिण्यास्तनया हरेः ॥ १६ ॥ प्रद्युम्नाच्चानिरुद्धोभूद्रुक्मवत्यां महाबलः ॥ पुत्र्यां तु रुक्मिणो राजन्नाम्ना भोजकटे पुरे ॥ १७ ॥
एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप ॥ मातरः कृष्णजातीनां सहस्राणि च षोडश ॥ १८ ॥ राजोवाच ॥ कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं युधि ॥
कृष्णेन परिभूतस्तं हंतुं रंध्रं प्रतीक्षते ॥ एतदाख्याहि मे विद्वन्द्विषोर्वैवाहिकं मिथः ॥ १९ ॥ अन्येषामपि श्रीकृष्णपुत्राणां शतसंख्यास्त्वेषु पुत्राः पौत्राश्च
कोटिशो बभूवुः ॥ १७ ॥ तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति ॥ मातरः कृष्णजातीनामिति वशदेनाधिकाश्चेत्युक्ताः ॥ १८ ॥ यः कृष्णेन हंतुं रंध्रं प्रतीक्षते स कथं प्रादा

२०३ रुक्मिणोभिप्रायं कथं जानीमइति वेदतत्राह ॥ अनागतमिति अतीन्द्रियमस्मदादीन्द्रियागोचरं विप्रकृष्टं दूरस्थं व्यवहितं कुड्याद्यंतरितं १० तत्रोत्तरं स्व
२७ यंवरे रुक्मवचनादेवतः सन्नद्धो निर्जित्य जहारेति ११ ॥ यद्यपि श्रीकृष्णावमानितः ॥ तथापि वैरमनुस्मरन्नपि ॥ व्यतरन्नुपादात अश्वमोदते त्यर्थः ११ ॥ सर्वामा

अनागतमतीतं च वर्त्तमानमतीन्द्रियं ॥ विप्रकृष्टं व्यवहितं सम्यक्पश्यंति योगिनः १० श्रुक ऊवाच ॥ वृतः स्वयंवरे साक्षादनंगोंग
युतस्तया ॥ राज्ञः समेतान्निर्जित्य जहारैकरथो युधि ॥ ११ ॥ यद्यप्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः ॥ व्यतरद्भागिनेयाय सु
ताकर्त्तुं स्वसुः प्रियं ॥ १२ ॥ रुक्मिण्यास्तनयां राजन्कृतवर्म्मसुतो वली ॥ उपयेमे विशालाक्षीं कन्यां चारुमती किल ॥ १३ ॥ दौ
हित्रायानिरुद्धाय पौत्रीं रुक्म्याददाद्धरेः ॥ रोचनां बद्धवैरोपि स्वसुः प्रियचिकीर्षया ॥ १४ ॥ जानन्नधर्म्मं तद्यौनं स्नेहपाशानु
वंधनः ॥ तस्मिन्नभ्युदये राजन्रुक्मिणी रामकेशवौ ॥ पुरं भोजकटं जग्मुः साम्बप्रद्युम्नकादयः ॥ १५ ॥ तस्मिन्निवृत्त उद्वाहे
कालिंगप्रमुखा नृपाः ॥ दृप्तास्ते रुक्मिणं प्रोचुर्बलमक्षैर्विनिर्ज्जय ॥ १६ ॥ अनक्षज्ञो ह्ययं राजन्नपि तद्व्यसनं महत
इत्युक्तो वलमाहूय तेनाक्षै रुक्म्यदीव्यत ॥ ॥ १७ ॥ ॥ ॥ ॥ ॥ ॥ गोविंद ॥ गोपाल सहाय

मप्येकैकाकन्यात त्सर्वं विवोपलक्षणार्थं ज्येष्ठकन्याविवाहमाह ॥ रुक्मिण्या इति १२ ॥ यौनं विवाहः तद्यौनमधर्म्मं जानन्निति द्विषत्स्त्रेन भोक्तव्यं द्वि राम
षंतं नैव भोजयेदित्यादि लोकविरोधात् अत्र स्वयंपि लोकविद्विष्टं धर्म्ममप्याचरेन्न वितिनिषेधात् ज्ञात्वेत्यर्थः ॥ १४ ॥ लोकविरुद्धाचरणफलं वक्तुमाह २७
१५ ॥ तस्मिन्निति १६ ॥ अदीव्यत क्रीडितवान् ॥ १७ ॥

निः कारणाल्लक्ष्मसहपराकृतवान् ॥ कैतवं कपयं २९ ॥ नर्दवं रंदशकोटिं स्महं कुपितो यमश्नारदे ३० ॥ छलमाश्रितो हरुक्मी मया जितमित्याह ॥ ३१ ॥ नृपसंस

शतं सहस्रमयुतं रामस्तत्रादधे पणं ॥ तं तु रुक्म्यजयत्तत्र कालिंगः प्राहसद्बलम् ॥ २८ ॥ दंतान्संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः ॥ त

तो लक्षं रुक्म्यगृह्णाद्ग्लहं तत्राजयद्बलः ॥ जितवानहमित्याह रुक्मी कैतवमाश्रितः ॥ २९ ॥ मन्युना क्षुभितः श्रीमान्समुद्र इव

पर्वणि ॥ जात्यारुणाक्षोतिरुषान्यर्बुदं ग्लहमाददे ॥ ३० ॥ तं चापि जितवान्रामो धर्मेणा छलमाश्रितः ॥ रुक्मी जितं मयात्रेमे व

दंतु प्राश्निका इति ॥ ३१ ॥ तदाब्रवीन्नभोवाणी बलेनैव जितो ग्लहः ॥ धर्मतो वचनेनैव रुक्मी वदति वै मृषा ॥ ३२ ॥ तामनादृत्य

वैदर्भो दुष्टराजन्यचोदितः ॥ संकर्षणं परिहसन्बभाषे कालचोदितः ॥ ३३ ॥ नैवाक्षकोविदा यूयं गोपाला वनगोचराः ॥ अक्षैर्दी

व्यंति राजानो बाणैश्च न भवादृशाः ॥ ३४ ॥ रुक्मिणैवमधिक्षिप्तो राजभिश्चोपहासितः ॥ क्रुद्धः परिघमुद्यम्य जघ्ने तं नृपसं

सदि ॥ ३५ ॥ कलिंगराजं तरसा गृहीत्वा दशमे पदे ॥ दंतानपातयत्क्रुद्धो योहसद्विवृतैर्द्विजैः ॥ ३६ ॥ अन्ये निर्भिन्नबाहूरुशिरसो रु

धिरोक्षिताः ॥ राजानो दुद्रुवुर्भीता बलेन परिघार्दिताः ॥ ३७ ॥ निहते रुक्मिणि श्याले नाब्रवीत्साध्वसाधु वा ॥ रुक्मिणीबलयो राजन्स्ने

हभंगभयाद्धरिः ॥ ३८ ॥ ततोनिरुद्धं सह सूर्यया वरं रथं समारोप्य ययुः कुशस्थली ॥ रामादयो भोजकटाद्दशार्हाः सिद्धाखिलार्था मधुसू

दनाश्रयाः ॥ ३९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकषष्टितमोध्यायः ॥

रिमंगलसंभाष्यां ॥ २५ ॥ सूर्यया नवोढया सिद्धाखिलार्था अप्सुरयशाउवधारयोयेषां ॥ २८ ॥ इति द्दशमे एकषष्टितमः ॥

२०७
३८

द्वियुक्षष्टितमे प्रोक्तमनिरुद्धस्य रोधनं ॥ कन्यापुरे समाणस्य बाणेन बद्धबाहुना ॥१॥ अनिरुद्धो हि हे वत्सिन् बाणायोरवसंयुगे ॥ श्रीकृष्णः श्रीहरिर्जित्वा बाणं वा
हुच्छेदनं तथा छिन्नवान् ॥२॥ उषाधिपं पुरपालकं ॥४॥ कामान्पूरयतीति कामपूरः सर्वासामावयोरधिपः कल्पतरुः तं त्वां ॥४॥ हे आद्य निर्वृतेतिरिते हे भिंधुरवल्ली सुर्गायन् ॥ स
र्गे वाव ॥ बाणस्य तत्रनयारेषासुपयेमेयदृत्तमः तत्रयुद्धोमम् हृद्धोहंहरिशंकरयोर्महत् ॥ एतत्सर्वं महायोगिन् त्वमाख्यातं त्वमर्हसि ॥ श्रुत्वा वा व
बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः ॥ येन वामनरूपाय हरये दायमेदिनी ॥२॥ तस्यौरसः सुतो बाणः शिवभक्तिरतः सदा ॥ मान्यो वदान्यो धी
मांश्च सत्यसंधो दृढव्रतः ॥३॥ शोणिताख्ये पुरे रम्ये स राज्यमकारयत् ॥ तस्य शंभोः प्रसादेन किंकरा इव ते मराः ॥ सहस्रबाहुवाद्येन ताण्डवे तोषयन्मृ
डं ॥४॥ भगवान्सर्वभूतेशः शरण्यो भक्तवत्सलः ॥ वरेण छंदयामास स तं वव्रे पुराधिपं ॥५॥ स एकदाह गिरिशं पार्श्वस्थं वीर्यदुर्मदः ॥ किरीटेनार्कवर्णे
नसंस्पृशंस्तत्पदाम्बुजं ॥६॥ नमस्ये त्वां महादेव लोकानां गुरुमीश्वरं ॥ पुंसामपूर्णकामानां कामपूरामराघ्रिपं ॥७॥ दोःसहस्रं त्वया दत्तं पर
मां भाराय मे भवत् ॥ त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समं ॥८॥ कंडूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहं ॥ आद्यायां चूर्णयन्नद्रीन्भीतास्तेपि प्रदुद्रु
वुः ॥९॥ तच्छ्रुत्वा भगवान्क्रुद्धः केतुस्ते भज्यते यदा ॥ त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते ॥१०॥ इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप ॥ प्रतीक्ष
न्गिरिशादेशं स्ववीर्यनशनं कुधीः ॥११॥ तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिं ॥ कन्यालभत कान्तेन प्रागदृष्टश्रुतेन च ॥१२॥ सा तत्र तमपश्य
ती क्वासि कान्तेति वादिनी ॥ सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशं ॥१३॥ बाणस्य मंत्री कुंभाण्डश्चित्रलेखा च तत्सुता ॥ सख्यपृच्छत्सखीमूषां कौतू
हलसमन्विताः ॥१४॥ कं त्वं मृगयसे सुभ्रु कीदृशस्ते मनोरथः ॥ हस्तग्राहं न तेद्यापि राजपुत्र्युपलक्षये ॥१५॥

यात्रगतं ॥९॥ स्ववीर्यस्य नशनं नाशकं केतुभंगं प्रतीक्षमाणः ॥११॥ श्रीमहेशादिष्टसंग्रामस्य प्रसंगमाह तस्योषेति प्राद्युम्निना अनिरुद्धेन तत्रापि स्वप्ने ॥१२॥ तं कान्तमपश्यन्ती सा
उत्तस्थौ ॥१३॥ ततः किं वृत्तं तदाह बाणस्येति हस्तग्राहं भर्तारं ॥१५॥

राम
३८

त्वया दृष्टस्तेषां मध्ये को वा भवेदिति ॥ न देवादीन् यथावत्सा पटे लिखत ॥ ९ ॥ प्रद्युम्नं लिखितं वीक्ष्य स्वहृदये यदि निलज्जिता ॥ १० ॥ शोणितपुरं नीत्वा र

उ वाच ॥ दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः ॥ पीतवासा महाबाहुर्योषितां हृदयंगमः ॥ ६ ॥ तमहं मृगये कांतं प्रापयित्वा
धरं मम ॥ का पियातः स्पृहयती त्रिस्वामां दृजिनार्णवे ॥ ७ ॥ चि ले वाच ॥ व्यसनं ते पकर्षामि त्रिलोक्यां यदि भाव्यते ॥ तमानेष्ये न
रं यस्ते मनोहर्त्ता तमादिश ॥ इत्युक्त्वा देवगंधर्वान् सिद्धचारणपन्नगान् ॥ दैत्यविद्याधरान्यक्षान्मनुजांश्च तथा लिखत ॥ ९ ॥ मनुजे
ष्व स्वार्ष्णीन्शूरमानकदुंदुभिं ॥ व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥ १० ॥ अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मुखी ह्रिया
सोऽसावसावती प्राह स्मयमाना महीपते ॥ ११ ॥ चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ॥ ययौ विहायसा राजन् द्वारकां कृष्ण
पालितां ॥ १२ ॥ तत्र सुप्तं सुपर्यंके प्राद्युम्निं योगमास्थिता ॥ गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥ १३ ॥ सा च तं सुंदरवरं वि
लोक्य मुदितानना ॥ दुःप्रेक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समम् ॥ १४ ॥ परार्ध्यवासः स्रग्गंधधूपदीपासनादिभिः ॥ पानभोजनभक्ष्यैश्च
वाक्यैः शुश्रूषयार्चितः ॥ १५ ॥ गूढः कन्यापुरे शश्वत्प्रवृद्धस्नेहया तया ॥ नाहर्गणान्स बुबुधे ऊषयापहृतेंद्रियः ॥ १६ ॥ तां तथा यदुवी
रेण भुज्यमानां हतव्रतां ॥ हेतुभिर्लक्षयांचक्रुः आप्रीतां दुरवच्छदैः ॥ १७ ॥ भटा आवेदयांचक्रू राजन्स्ते दुहितुर्वयं ॥ विचेष्टितं ल.

पुंभिर्दुःप्रेक्ष्ये षोक्षितमशाक्ये ॥ १४ ॥ सवपरार्ध्यैर्स्रग्भूल्यैर्वासः स्वगादिभिः शुश्रूषणपूर्वकमर्चितः सन् ॥ १५ ॥ ऊषया मः कन्यायाः कुलदूषणं
तयापहृतेंद्रियो दिर्गणान दिनसमूहान्न बुबुधे ॥ १६ ॥ आप्रीतां अनिर्हृष्टां दुरवच्छदैः छादयितुमशक्यैः ॥ १७ ॥ विचेष्टितं विरुद्धाचरणं ॥ १८ ॥

१०३ अनपायिभिः अपायः अपसर्पणं प्रमादो वा तद्रहितैः पाठांतरे गोप्तृगणेष्वायुक्तैर्यस्याः तस्याः पुंभिर्दूषणं कृतं वेति न जानीम इति १९ का
३८ मस्यात्मजो देहजातं २१ अभिनृम्णाया सर्वमंगलया तस्याः अंगसंगेन स्तनकुंकुमयस्या स्रजितां बाह्वोर्मध्ये वक्षसि दधानं मधुमल्लिकाः वसंतम

अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो कन्यायादूषणं पुंभिः दुःप्रेक्षायान विद्महे १९ ततः प्रव्यथितो बाणो दुहितुः
श्रुतदूषणः त्वरितः कन्यकागारं प्राप्तो द्राक्षीत यदूद्वहं २० कामात्मजं तं भुवनैकसुंदरं श्यामं पिशंगांबरमंबुजेक्षणं
बृहद्भुजं कुंतलकुंडलत्विषा स्मितावलोकेन च मंडिताननं २१ दीव्यंतमक्षैः प्रियया भिनृम्णया तदंगसंगस्तनकुंकुमस्र
जं बाह्वोर्दधानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः २२ स तं प्रविष्टं वृतमाततायिभिर्भटैरनीकैरव
लोक्य माधवः उद्यम्य मौर्वं परिघं व्यवस्थितो यथांतको दंडधरो जिघांसया २३ जिघृक्षया तान्परितः प्रसर्पतः श्वनो
यथा शूकरयूथपो हनत् ते हन्यमाना भवनाद्विनिर्गता निर्भिन्नमूर्द्धोरुभुजाः प्रदुद्रुवुः २४ तं नागपाशैर्बलिनंदनो बली
घ्नंतं स्वसैन्यं कुपितो बबंध ह ऊषा भृशं शोकविषादविह्वला बद्धं निशम्याश्रुकलाक्ष्यरोदिषीत २५ इति श्रीभागवते महापु
राणे दशमस्कंधे अनिरुद्धबंधो नाम द्विषष्टितमोऽध्यायः ॥

वा मल्लिकाः तदाश्रितां तस्याग्र इत्यार्षः संधिः तस्याग्र इत्यर्थः २२ आततायि
भिरुद्यतशस्त्रैः माधवो निरुद्धः मौर्वं मुरहंतुर्लोहविशेषस्तन्निर्मितं २३ शोकविषादाभ्यां विह्वला अश्रुवशा अश्रूणां कलाबिंदवो ययोस्ते अक्षिणी यस्य
राम ३८

त्रिपुरकृषष्टितमेवाथवाणाद्यादेवसंगरे॥ स्कंतिर्द्वीरेणाहदेणावाणावाङ्मिहोहरेः कर्म्मवप्रद्धारिकं॥१॥ रामकल्पान्तवर्त्तिनइतितोऽरतोनि

शुकउवाच॥ ग्रापश्यतांचानिहद्धतद्धप्रनांवभारत॥ चत्वारो वार्षिकामासाव्यतीयुरतशोचतां॥१॥ नारदान्तउपाकर्ण्यपिवार्त्ती
वद्धस्यकर्म्मच॥ प्रपप्रुःशोणितपुरंवृत्तमेयःकल्पदेवताः॥२॥ प्रद्युम्नोप्रधानसुगदः सांबोथसारणाः॥ नंदोपनंदभद्राद्या
रामकल्पान्तवर्त्तिनः॥३॥ अष्टौहिणीभिर्द्वादशभिः समेताः सर्व्वतोदिशं॥ रुरुधुर्बाणनगरं समंतात्सात्वतर्षभाः॥४॥ भज्यमा
नपुरोद्यानप्राकाराद्दालगोपुरं॥ प्रेक्षमाणोरुषाविष्टःतुल्यसैन्योभिनिर्ययौ॥५॥ बाणार्थेभगवान्रुद्रः ससुतैःप्रमथैर्वृतः॥ आ
रुह्यनंदिवृषभं युयुधेरामकृष्णयोः॥६॥ आसीत्सुतुमुलंयुद्धमद्भुतलोमहर्षणं॥ कृष्णशंकरयोराजन्प्रद्युम्नगुहयोरपि॥७॥ कुंभा
ण्डकूपकर्णाभ्यां बलेनसहसंयुगः॥ सांबस्यबाणपुत्रेणबाणेनसहसात्यकेः॥८॥ ब्रह्मादयः सुराधीशाः मुनयःसिद्धचारणाः॥
गंधर्व्वाप्सरसोयक्षाविमानैर्द्रष्टुमागमन्॥९॥ शंकरानुचरान्शौरिर्भूतप्रमथगुह्यकान्॥ डाकिनीर्यातुधानांश्च वेतालान्सविना
यकान्॥१०॥ प्रेतमातृपिशाचांश्च कूष्माण्डान्ब्रह्मराक्षसान्॥ द्रावयामासतीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः॥११॥ पृथग्विधानिप्रायुङ्क्त
पिनाक्यस्त्राणिशार्ङ्गिणे॥ प्रत्यस्त्रैःशमयामासशार्ङ्गपाणिरविस्मितः॥१२॥ ब्रह्मास्त्रस्यचब्रह्मास्त्रं वायव्यस्यचपार्वतं॥ आग्नेयस्यच
पार्जन्यं नैजंपाशुपतस्यच॥१३॥ मोहयित्वातुगिरिशं जृंभणास्त्रेणजृंभितं॥ बाणस्यपृतनांशौरिर्जघानासिगदेषुभिः॥१४॥

गतोऽरस्त्वपर्थः॥१॥ सर्व्वतोदिशमित्यस्योत्तरेणान्वयः॥४॥ भज्यमानानिपुरोद्यानादीनि द्वंद्वैकवद्भावः अट्टालाःप्रकाराद्युपरि
परितनास्तुत्रतन्स्थानानि॥ अभिनिर्ययौबाणः॥५॥ सुतैःस्कंदः तत्सहितैःप्रमथैर्गणैः॥ रामकृष्णाभ्यांयुयुधे॥६॥ प्रत्यस्त्राण्येवाह ब्रह्मास्त्रस्येति नैजं

शिखिनामयूरेणवाहनेन ॥ १५ ॥ तयोरनीकानि हतानि नाथो येषां तानि ॥ १६ ॥ अनिरुद्धमाराणास्त्रिर्यग्मुखोवभूवेति ॥ ११ ॥ द्वारस्थायोद्धुमभ्यधावदिति ॥ १२ ॥ नारायणाः
शीतज्वरमसृजत ॥ १३ ॥ माहेश्वरः समाक्रंदन्युयुधे ॥ १४ ॥ आत्मानं परशशान्तिमंतमन्यमानः कृष्णतापयितृत्वरूपः स्वयमेव तन्नः सन्तं परमेश्वरं ज्ञात्वा
वन्नमस्करोति नमामीति ॥ त्वां त्वामनंतशक्तिं न मामिकृतः परेषां ब्रह्मादीनां मा ईशः तत्र हेतुः सर्वात्मानं सर्वस्यात्मानं चेतयितारं तत्कृतः केवलं शुद्ध

मोहयित्वा तु गिरिशं जृंभणास्त्रेणाजृंभितं ॥ बाणस्य हतनाशौरिर्जघान मिगरेषुभिः ॥ ३४ ॥ स्कंदः प्रद्युम्नबाणौघैरर्द्यमानः समंततः
असृग्विमुञ्चन्गात्रेभ्यः शिखिनापाक्रमद्रणात् ॥ ३५ ॥ कुंभांडः कूपकर्णश्च पेततुर्मुशलाहतौ ॥ दुद्रुवुस्तदनीकानि हतनाथानि स
र्वतः ॥ ३६ ॥ विशीर्यमाणं स्वबलं दृष्ट्वा बाणोत्यमर्षणः ॥ कृष्णमभ्यद्रवत्संख्ये रथी हित्वैव सात्यकिं ॥ ३७ ॥ धनूंष्याकृष्य युगपद्बाणः
पंचशतानि वै ॥ एकैकस्मिन्शरौ द्वौ द्वौ संदधे रणदुर्मदः ॥ ३८ ॥ तानि चिच्छेद भगवान्धनूंषि युगपद्धरिः ॥ सारथिं रथमश्वांश्च हत्वा शं
खमपूरयत् ॥ ३९ ॥ तन्माता कोटरा नाम नग्ना मुक्तशिरोरुहा ॥ पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥ ४० ॥ ततस्तिर्यग्मुखो नग्नामनि
रीक्षन्गदाग्रजः ॥ बाणश्च तावद्विरथश्छिन्नधन्वाविशत्पुरं ॥ ४१ ॥ विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ॥ अभ्यधावत दाशार्हं दहन्निव
दिशो दश ॥ ४२ ॥ अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरं ॥ माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥ ४३ ॥ माहेश्वरः समाक्रंदन्वैष्णवे
न बलार्दितः ॥ अलब्ध्वाभयमन्यत्र भीतो माहेश्वरो ज्वरः ॥ शरणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः ॥ ४४ ॥ ज्वर उवाच ॥ नमामि त्वानंत
शक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रं ॥ विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिंगं प्रशांतं ॥ ४५ ॥

ज्ञप्तिमात्रं चैतन्यघनं तदेवं सर्वं चेतयितृत्वेन परमेश्वरत्वमुक्तं ॥ किंच विश्वस्य स्थ्यादिहेतुत्वात्परोत्याह ॥ विश्वोत्पत्तीति ॥ न त्वेवंभूतं त्वस्मत्प्रसिद्धं मा हमिति तत्राह

किंच यावत्स विशेषं वस्तुतत्त्ववयं न भवामः त्वयि तु सर्वविशेषाभावात्तेन कस्यापि प्रभुत्वं किं तु त्वमेव सर्वप्रभुरिति तत्त्वनिमात्रं त्वं विरजा एवन्नित्योनि कालइति
कालः क्षोभकः ॥ कर्मनिमित्तं तदेव फलाभिमुखमभिव्यक्तं दैवं ॥ स्वभावः तत्संस्कारः जीवस्तद्वान् द्रव्यं भूतसूक्ष्माणि ॥ क्षेत्रं प्रकृतिः प्राणाः सूत्रं आत्मा अ
हंकारः ॥ विकार एकादशेन्द्रियाणि महाभूतानि चेति षोडशकः तत्संघातो देहः एतस्य च बीजरोहवत्प्रवाहः ॥ देहाङ्कुरः ॥ देहात्तु बीजं तु पकर्म ॥ ततो ङ्कुररूपो
देहः ततः पुनरेवमिति प्रवाहः एषा त्वन्माया ॥ तस्याः निषेधः अपोहो यस्मिन् तत्त्वा निषेधावधिभूतं प्रपद्ये भजइति ॥ २६ ॥ ननु देवकीतनयस्य मे कथमेवं भूत

कालेदैवं कर्मजीवः स्वभावो द्रव्यं क्षेत्रं प्राणआत्माविकारः ॥ तत्संघातो बीजरोहप्रवाहः त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ २६ ॥
नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसयावर्त्तमानान्जन्मैतत्ते भारहाराय भूमेः ॥
२७ ॥ तस्मिन्हते तेजसाढः सहैनश्शांतोग्रेणात्मन्व्योनन्दहरेण ॥ तावत्तापोदेहिनां तेत्रिमूलं नाश्ये वरनूयावदाशान्तवद्धाः ॥ २८

त्वं तत्राह ॥ नानाभावैरिति ॥ सर्वोपाधिविनिर्मुक्त एव त्वं यथा लीलया स्वीकृतैर्मत्स्याद्यवतारैर्देवान्बिभर्षि पालयसि ॥ तत्र च लोकसेतून् वर्णाश्रमध
र्मान् ॥ तदर्थं तत्स्वरूपभूतान् साधून् ॥ तदंगत्वेनउन्मार्गान् दैत्यादीन् हंसि संहरसि ॥ एवमेतदपि तव जन्म भूमेर्भारहरणाय लीलावतारो यं न कस्यापि
त्वं तनय इत्यर्थः ॥ २७ ॥ अतोः स्मान तत्त्व दुःखमिमवेध पूर्वं मां तत्रं रक्षेत्याशयेनाह ॥ तस्मिन्निति ॥ ते तेजसा त्वत्स्वहेन हरेणांशांतोग्रेणाशान्तहरेण पर
संतापकस्य पुत्र एव तापइति च दहतयाह ॥ तावदिति ॥ सेवायाः पूर्वं तु नामसवितइति भावः ॥ २८ ॥

२७
४१

हे त्रिशिरः ज्वरेत्यर्थः प्रयाहि महाज्वरानां पालकः सन्न सुखं विचर । कामं वा ज्ञाता मामाह । य इति । नौ आवयोः इमं संवादं यः स्मरेत् तस्य त्वत्तः न भयं भवेत् । त्वया भयं नोत्पादनीयमित्यर्थः ॥ १९ ॥ भक्तरक्षार्थं श्रीरुद्रो भगवन्तं स्तौति त्वं हीति । अयमर्थः त्वाम् अज्ञात्वा तज्ज्ञानं भूयात् इति न विज्ञेयं यतः त्वं वाङ्मयेषु ब्रह्मणापि विगूढं ब्रह्म अभिधानविषयत्वात् । अतः परं ज्योतिः ज्योतिषामपि प्रकाशकत्वात् अविषय इत्यर्थः कथं तर्हि प्रतीतिः तत्राह । यमिति । अमलात्मनां त्वं तः प्रकाशमस इत्यर्थः

श्रीभगवानुवाच ॥ त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मत्कृताद्भयं । यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयं ॥ १९ ॥ इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ॥ बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनं ॥ २० ॥ ततो बाहुसहस्रेण नानायुधधरो नृप ॥ मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ॥ २१ ॥ तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ॥ चिच्छेद भगवान्बाहून् शाखा इव वनस्पतेः ॥ २२ ॥ बाहुषु छिद्यमानेषु बाणस्य भगवान्भवः ॥ भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥ २३ ॥ श्रीरुद्र उवाच ॥ त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ॥ यं पश्यन्त्यमलात्मान आकाशमिव केवलं ॥ २४ ॥ नाभिर्नभोऽग्निर्मुखमम्बुरेतो द्यौः शीर्षमाशाः श्रुतिरंघ्रिरुर्वी ॥ चन्द्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेन्द्रः ॥ २५ ॥

२४ ॥ आत्मतत्त्वं तावन्निर्गुणं समस्तं च तदानंदलीलयाधिष्ठितस्त्वया यो विराड्विग्रहः सोऽपि न ज्ञायते उदुंबरफलान्तरवर्तिमशकैरिवोदुंबरफलमित्याशयेन विराड्रूपेण स्तौति द्वाभ्यां नाभिरिति ॥ यस्य नभआदयो नाभ्याद्यवयवाः स भवान् लोककल्पः पुरुषः स्वतन्त्रेणान्वयः नभो यस्य नाभिः ॥ अग्निर्मुखं अंबु रेतः द्यौः शीर्षं आशा दिशः श्रुतिः श्रवणेन्द्रियं ॥ उर्वी अंघ्रिः चंद्रो मनः ॥ अर्को दृक् ॥ अहं श्रीशिव आत्मा अहंकारः समुद्रो जठरं ॥ इंद्रः भुजा बाहुः इंद्रादयो लोकपाला बाहव इत्यर्थः ॥ २५

राम
४१

ओषधयो रोमाणि ॥ यच्छब्दावृत्तिः स्पष्टतार्था ॥ अंबुवाहाः केशाः विरिंच्यो धिषणो बुद्धिः प्रजापतिर्विसर्गो मेढ्रः धर्म्मो हृदयं लोकैः कल्प्यते अथ वा कल्प्यत
इति लोककल्पः ॥ ३६ ॥ ननु प्रादेशिकशरीरस्य कथं नभोनाभित्वादीत्यत आह ॥ हेऽकुंठधामन् ॥ अप्रच्युतस्वरूप ॥ भवाय अभ्युदयाय ॥ न केवलमेता
वत किंतु अस्मदनुग्रहार्थमपीत्याह ॥ वयं चेति ॥ सर्वे लोकपालाः त्वया पालिताः सन्तः अपि भुवनानि पालयाम इति ॥ ३७ ॥ ननु यदि विभावयतो रूपाविभा
वानि च संति तर्हि कथमेकत्वं हि ब्रह्मेति ॥ नहि ब्रह्मत्वेन ममस जातीयविजातीयभेदः संभवतीति ॥ अत आह त्वमिति ॥ एकः सजातीयरहितः कुतः आद्यः

रोमाणि यस्यौषधयोंबुवाहाः केशा विरिंच्यो धिषणा विसर्गः ॥ प्रजापतिर्हृदयं यस्य धर्मः स वै भवान्पुरुषो लो
ककल्पः ॥ ३६ ॥ तवावतारोयमकुंठधामन् धर्मस्य गुप्त्यै जगतो भवाय ॥ वयं च सर्वे भवतानुभाविता विभावया
मो भुवनानि सप्त ॥ ३७ ॥ त्वमेक आद्यः पुरुषोऽद्वितीयस्तुर्यः स्वदृक् हेतुरहेतुरीशः ॥ ॥ ॥ प्रतीयसेऽथा
पि यथाविकारं स्वमायया सर्वगुणप्रसिद्ध्यै ॥ ॥ ॥ ३८ ॥ ॥

पुरुषः पुरुषाणामवस्थात्रयवतामाद्यः प्रकृतिभूतः पुरुषः कुतः तुरीयः शुद्ध इत्यर्थः ॥ तदपि कुतः स्वदृक् स्वप्रकाशात्मा ज्ञानरूपः शुद्धो देवत्युपाधियोगाज्जीवा
जायंते ॥ तथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः ॥ सर्व एव आत्मानो व्युच्चरंतीति श्रुतेः ॥ अतः सजातीयरहितः किंच ॥ अद्वितीयः विजातीयरहि
तः कुतः हेतुः सर्वस्य तथा स्वयं हेतुरहितश्चेति कथं तर्हि प्रतिसंसारं जीवभेदः प्रतीयते अत आह ॥ प्रतीयस इति सर्वगुणप्रसिद्ध्यै सर्वविषयप्रकाशनाय ३८

तर्हि किमहमेव संसारी त्वध्यते नहि नहीति सदृष्टांतमाह हे भूमन् स्वया छायया मेघलक्षणया परदृष्ट्यापिहितः छादितोपि सूर्यः छायामेव च रूपा
णि च मेघांतरितान् घटादीनपि संचकास्ति प्रकाशयति एवं गुणेनाहंकारेण स्वकार्येण जीवावरकेण नदृष्ट्याः पिहितोपि गुणान्सत्वादीनुपाधीन् गु
णिनश्च उपहितान् जीवानपि च काशस्ति प्रकाशयसि आत्मप्रदीपः स्वप्रकाशः अतः सर्वसाक्षित्वात्त्वं न संसार इत्यर्थः ४९ किंच मायाश्रयस्या
न्यान्मोहयतस्त्वं कुतः संसृतिरित्याशयेनाह यन्मायेति पुत्रादिषु प्रसक्ताः वृजिनार्णवे दुःखसागरे उन्मज्जति देवादियोनिषु निमज्जंति स्थावरा

यथैव सूर्यः पिहितः स्वच्छायया छायां च रूपाणि च संचकास्ति एवं गुणेनापिहितो गुणांस्त्वमात्मप्रदीपो गु
णिनश्च भूमन् ४९ यन्मायया मोहितधियः पुत्रदारगृहादिषु उन्मज्जंति निमज्जंति प्रसक्ता वृजिनार्णवे ५०
देवदत्तमिमं लब्ध्वा नृलोकमजितेंद्रियः यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवंचकः ५१ यस्त्वां विसृजते
मर्त्य आत्मानं प्रियमीश्वरं विपर्ययेंद्रियार्थार्थं विषमत्त्यमृतं त्यजन् ५१ अहं ब्रह्माथ विबुधा मुनयश्चामलाश
याः सर्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरं ५२

दिषु तदुक्तं वायवीये विपर्ययस्तु भवति ब्रह्मत्वस्थावरत्वयोरिति ५० एवंजी
वेश्वरस्वभावं ज्ञानि दुर्लभे दानीं भजेतं निंदति द्वाभ्यां देवेति देवेन त्वया कर्माध्यक्षेण दत्तं नृदेहमिमं लब्ध्वापीति ५१ शोच्यत्वे हेतुः यस्त्वामिति
विपर्ययाः विपरीताश्च नात्माभिधानीश्वराणि इंद्रियार्थाः शब्दादयस्तदर्थं ५२ अहमन्ये च शुद्धमनसस्त्वामेव भजामः इत्याहाहमिति ५२

भगवतो भजनीयत्वे हेतुस्त्वं वरदस्तद्भक्तिं प्रार्थयतो नान्यत्वेति ॥ ममत्वे हेतुः प्रशान्तमिति ॥ त्वमेव व्याप्यत्वमाह ॥ सुहृदात्मदैवं सुहृत्त्वबुद्धिः प्रवर्त्तकत्वात् ॥ आत्मा
वस्थात्मकत्वात् एवंभूतं देवमीश्वरं त्वा ॥ न चान्यो भजनीयोस्तीत्याह ॥ अनन्यमेकं सामान्यसमानजातीयरहितं ॥ तत्कुतः जगतामात्मनां वैकेतं
अधिष्ठानं ॥ ४४ ॥ स्वयं भक्तिमाशास्य स्वभक्तस्याभीष्टमाशास्ते ॥ अयमिति ॥ दैत्यपतौ प्रह्लादे ॥ ४५ ॥ वैरोचनिर्बलिस्तस्य सुतस्तत्त्वादवध्यस्तावत ॥ किं

त्वा जगत्स्थित्युदयान्तहेतुं समं प्रशान्तं सुहृदात्मदैवं ॥ अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवम् ॥ ४४ ॥ अयं ममेष्टो द-
यितोनुवर्त्ती मयाभयं दत्तममुष्य देव ॥ संपाद्यतां तद्भवतः प्रसादो यथा हि ते दैत्यपतौ प्रसादः ॥ ४५ ॥ श्रीभगवानुवाच ॥ यदात्थ भग-
वंस्त्वं नः करवाम प्रियं तव ॥ भवतो यद्व्यवसितं तन्मे साध्वनुमोदितं ॥ ४६ ॥ अवध्योयं ममाप्येष वैरोचनिसुतोसुरः ॥ प्रह्लादाय व-
रो दत्तो न वध्यो मे तवान्वयः ॥ ४७ ॥ दर्पोपशमनायास्य प्रवृक्णा बाहवो मया ॥ सूदितं च बलं भूरि यच्च भारायितं भुवः ॥ ४८ ॥ चत्वारोस्य
भुजाः शिष्टा भविष्यत्यजरामरः ॥ पार्षदमुख्यो भवतो न कुतश्चिद्भयोसुरः ॥ ४९ ॥ इति लब्ध्वाभयं कृष्णं प्रणम्य शिरसासुरः ॥ प्राद्युम्निं र-
थमारोप्य सवध्वा समुपानयत् ॥ ५० ॥ अक्षौहिण्या परिवृतं सुवासः समलंकृतं सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥ ५१ ॥ स्वराज-
धानीं समलंकृतां ध्वजैः सतोरणैरुक्षितमार्गचत्वरां ॥ विवेश शंखानकदुंदुभिस्वनैरभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥ ५२ ॥ य एवं कृ-
ष्णविजयं शंकरेण च संयुगं ॥ संस्मरेत्प्रातरुत्थाय न तस्य स्यात्पराजयः ॥ ५३ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे अनिरुद्धानयने नाम
त्रिषष्टितमोध्यायः ६३ ॥

च प्रह्लादायेति ॥ अवध्यो वंशः तर्हि किमित्येवं कृतं तत्राह ॥ दर्पोपशमनायेति ॥ ४८ ॥ अनुगृह्णाति चत्वार इति ॥ ४९ ॥ सह वध्वा ऊषया
॥ ५० ॥ रुद्रानुमोदितः इति ॥ नरमित्रेतस्यैव बाणभुजंगस्य कृतत्वात् ॥ ५१ ॥ पौरादिभिरभ्युद्यतः अभिमुखमागत्य सत्कृतः ॥ ५२ ॥ २ रा मे वि ष ६ नमः ॥

२०७ वृत्तः षष्टितमेध्यायोनुगं पापापहो वयत ॥ ब्रह्मस्वहारिदोषोक्त्याराजोद्ध्यानशिक्षयत् ॥ विभूतिभागपभोगादिमहोत्वद्धमनोरथात् ॥ अत्र शास्यद्यहन्त्यहमोत्र
५२ गोद्धारप्रसंगतः पिपासिताः तृषिताः जलं विचिन्वतः सत्वंजीवं ॥१॥ तत्र कृकलासं वीक्ष्य ॥२॥ चर्म्मभिः चर्म्ममयैः पाशैः तांतवैः तंतुमयैश्च ॥४॥ संतप्तचामी

श्रीबादरायणिरुवाच ॥ एकदोपवनं राजन्जग्मुर्यदुकुमारकाः ॥ विहर्त्तुं सांबप्रद्युम्नचारुभानुगदादयः ॥१॥ क्रीडित्वा सुचिरं तत्र विचिन्वंतः पिपासिताः ॥ जलं निरुदके कूपे ददृशुः सत्वमद्भुतं ॥२॥ कृकलासं गिरिनिभं वीक्ष्य विस्मितमानसाः ॥ तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयान्विताः ॥३॥ चर्म्मभिस्तांतवैः पाशैर्बध्वा पतितमर्भकाः ॥ नाशक्नुवन्समुद्धर्त्तुं कृष्णायाचख्युरुत्सुकाः ॥४॥ तत्रागत्यारविंदाक्षो भगवान्विश्वभावनः ॥ वीक्ष्योज्जहार वामेन तं करेण स लीलया ॥५॥ स उत्तमश्लोककराभिमृष्टो विहाय सद्यः कृकलासरूपं ॥ संतप्तचामीकरचारुवर्णः स्वर्ग्यद्भुतालंकरणांबरस्रक् ॥६॥ पप्रच्छ विद्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुंदः ॥ कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां गणयामि नूनं ॥७॥ दशामिमां वा कतमेन कर्म्मणा संप्रापितोस्यतदर्हः सुभद्र ॥ आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे नः क्षममत्र वक्तुं ॥८॥ श्रीशुक उवाच ॥ इति स्म राजा संपृष्टः कृष्णेनानंतमूर्त्तिना ॥ माधवं प्रणिपत्याह किरीटेनार्क्कवर्चसा ॥९॥ नृग उवाच ॥ नृगो नाम नरेंद्रोहमिक्ष्वाकुतनयः प्रभो ॥ दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशः ॥१०॥

करं सुवर्णं तद्वद्वर्णो यस्य सः ॥ अद्भुतान्यलंकारांबरस्रजो यस्य सः स्वर्गी देवो रम्यवेति ॥६॥ यत्तद्यदि क्षमं योग्यं ॥८॥ यदि ते कर्णमस्पृशमिति ॥ असंदेहं संदेहव राम
चनं यदि वेदाः प्रमाणं स्युरितिवत् ॥ कर्णपथं नूनं प्राप्तः स्यामित्यर्थः ॥१०॥ ५२

किंच किंचिदिति सर्वेषां भूतानामात्मनो देहः साक्षिणस्ते ऽविदितं किंतु न किंचित ॥ ११ ॥ कृतव्रतेभ्यः सत्यव्रतेभ्यः तपसा श्रुताः प्रख्यातास्तेभ्यो ब्राह्मणेभ्यो वदान्याश्च
त्युदाराः अध्यापनशीलाश्च तेभ्यस्तेभ्यः ॥ १४ ॥ पूर्तं वापीकूपादि चरितं कृतम् ॥ १५ ॥ एवं वर्त्तमानस्य मम संकटं किंचिदापन्नं शृणु इत्याह ॥ कस्यचिदिति ॥ द्विजमुख्य

किंतु ते विदितं नाथ सर्वभूतात्मसाक्षिणः ॥ कालेनाव्याहतदृशो वक्ष्येथापि तवाज्ञया ॥ ११ ॥ यावत्यः सिकता भूमेर्यावत्यो दिवि तारकाः
यावत्यो वर्षधाराश्च तावतीरददां स्म गाः ॥ १२ ॥ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृंगीः ॥ न्यायार्जिता रूप्यखुराः
सवत्साः दुकूलमालाभरणा ददावहं ॥ १३ ॥ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुंबेभ्य ऋतव्रतेभ्यः ॥ तपः श्रुतब्रह्मवदान्यसद्भ्यः
प्रादां युवभ्यो द्विजपुंगवेभ्यः ॥ १४ ॥ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीः तिलरूप्यशय्याः ॥ वासांसि रत्नानि परिच्छदान्र
थानिष्टं च यज्ञैः चरितं च पूर्तं ॥ १५ ॥ कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने ॥ संपृक्ताविदुषा सा च मया दत्ता द्विजातये ॥ १६ ॥ तां
नीयमानां तत्स्वामी दृष्ट्वोवाच ममेति तं ॥ ममेति प्रतिजग्राह नृगो मे दत्तवानिति ॥ १७ ॥ विप्रौ विवदमानौ मामूचतुः स्वार्थसाध
कौ ॥ भवान्दातापहर्त्तेति तत्श्रुत्वा मे भवद्भ्रमः ॥ १८ ॥ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै ॥ गवां लक्षं प्रकृष्टानां दास्याम्ये
षा प्रदीयतां ॥ १९ ॥ भवंतावनुगृह्णीतां किंकरस्याविजानतः ॥ समुद्धरतं मां कृच्छ्रात्पतंतं निरयेऽशुचौ ॥ २० ॥ नाहं प्रतीच्छे वै राजन्नि
त्युक्त्वा स्वाम्यपाक्रमत् ॥ नान्यद्गवामप्ययुतमिच्छामीत्यपरो ययौ ॥ २१ ॥

स्वप्रतिग्रहनिवृत्तस्य संपृक्ता मिलिता अविदुषा ब्राह्मणस्येयमित्यजानता ॥ १६ ॥
प्रतिग्राहिणो नृगो दातेति ॥ स्वामिनो नृग अपहर्तेति ॥ अभवत् भ्रमः व्याकुलो ऽभवमित्यर्थः ॥ १८ ॥ तदा उभावपि प्रत्येकमनुनीतौ प्रार्थितौ ॥ कथं तदाह ॥ गवामिति
सार्द्धेन ॥ १९ ॥ अपरः प्रतिग्राही उपाग्रहो यद्वेदत्वयो नृग अन्यदपि गवामयुतं यदि तदपि मां विहाय नेच्छामीत्युक्त्वा गां त्यक्त्वा ययावित्यर्थः ॥ २१ ॥ रामकृष्ण

२०३
४४

एतस्मिन्नंतर इति ॥ इतः पूर्वपापाभावात्तेन तमस्समर्थो इति भावः ॥ १२ ॥ उताहो इत्येकं पदं ॥ अथवा पूर्वं गुणमिति ॥ नातमिति यमस्य स्वस्य वा वाक्यं पश्येपश्या मि ॥ १३ ॥ हे देव यम पूर्वं मन्त्रं मं मुंज इति मयोक्तो यमः पतेति प्राह ॥ १४ ॥ दुर्वृत्तेन श्रीकृष्णदर्शनेन विस्मितः सन् आत्मनो भाग्यप्रमिमं इति सत्वमिति हे विभो सत्वं मम अक्षिपथः लोचनगोचरः सन् कथं साक्षात्स्व त्वं ज्ञो सीत्यर्थः ॥ किमत्राश्चर्यं तदाह ॥ परः आत्मा अत एव योगेश्वरैरपि दृष्टुं तिदृशा उपनिष

एतस्मिन्नंतरे यामैर्दूतैर्नीतोऽयमग्रतः ॥ यमेन दृष्टस्तत्राह हे देव देव जगन्नाथ ॥ १२ ॥ पूर्वं त्वमस्य मंत्रज्ञ उताहो नृपतेस्सुमं नातं दानस्य धर्मस्य पश्येलोकस्य भास्वतः ॥ १३ ॥ पूर्वं देवासु मं भुंज इति प्राह पतेति मः ॥ तावद्ददर्श माणात्मानं त्क्षक लाग्रेपतनं विभो ॥ १४ ॥ ब्रह्मणापस्य दानस्य तव दास्यस्य केशव ॥ स्मृति नीयापि विध्वस्ता भवतो दर्शनार्थिनः ॥ १५ ॥ सत्वं कथं मम विभो त्वक्षिपथः परात्मा योगेश्वरैः श्रुतिदृशामलहृद्विभाव्यः ॥ साक्षादधोक्षज उरुव्यसनांधबुद्धेः स्यान्मे उतेदृश इह यस्य भवापवर्गः ॥ १६ ॥ देवदेव जगन्नाथ गोविंद पुरुषोत्तम ॥ नारायण हृषीकेश गुणापस्तोकाच्युताव्यय ॥ १७ ॥ अनुजानीहि मां कृष्ण यांते देवगतिं विभो ॥ यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदं ॥ १८ ॥

चक्षुषा ॥ अमले हृदि विभाव्यः चिंत्यः यतोऽधोक्षजः अक्षजमैंद्रियकं ज्ञानं तत् अधः अर्वाग्गतं यस्मात् सः यस्येह भवापवर्गो भवेत्तस्य भवान् नु दृश्यः स्यात् ॥ उरुव्यसनेन नरककलापभवदुःखेनांधबुद्धेस्तमसैव तद्विचित्रमित्यर्थः ॥ १६ ॥ उद्धिक्तमतिर्विदुषां संबोधयन् अनुज्ञां प्रार्थयति ॥ अनुजानीहि इति देवलोके वर्तमानस्यात्मनो मन्त्रामस्त्रिविधिं प्रार्थयते ॥ यत्र क्वापीति त्वत्पदमास्पदं विषयो यस्य तथाभूतं भूयादिति ॥ १८ ॥

राम
४४

धाम्यन्नमति ॥ नमस्त इति ॥ सर्व्वभावाय सर्व्वस्य भावो जन्म येन तस्मै ब्रह्मणे कर्तृत्वेप्यविकाराय कुतः अनंतशक्तये अनंता माया ह्वीया शक्तिर्यस्य तस्मै
वासुदेवाय सर्व्वभूताश्रयायेत्युपादानत्वमुक्तं ॥ श्रीकृष्णाय सदानंदरूपायेति पुरुषार्थत्वमुक्तं ॥ कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयो
रैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति स्मृतेः ॥ किंच ॥ योगानां स्वपूर्व्वादिकर्म्मणां पतये फलदात्रे ॥ अयमावः एवंभूतं त्वां विहाय गंतुमनिच्छुरपि गमि
ष्यामि त्वदन्यकर्म्मफलभोगायेति ॥१९॥ मानास्मदीयदयपि युक्तं मत्र ॥ अग्नेः अग्निसदृशस्य तेजीयसः अतितेजस्विनोपि दुर्जरं ॥२१॥ किंच ॥ विषादपि घोरमि

नमस्ते सर्व्वभावाय ब्रह्मणेनंतशक्तये ॥ कृष्णाय वासुदेवाय योगानां पतये नमः ॥१९॥ इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना
अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणाम् ॥२०॥ कृष्णः परिजनं प्राह भगवान्देवकीसुतः ॥ ब्रह्मण्यदेवो धर्म्मात्मा राजन्यान
नुशिक्षयन् ॥२१॥ दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि ॥ तेजीयसोपि किमुत राज्ञामीश्वरमानिनां ॥२२॥ नाहं हलाहलं मन्ये वि
षं यस्य प्रतिक्रिया ॥ ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ॥२३॥ हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति ॥ कुलं समूलं दह
ति ब्रह्मस्वारणिपावकः ॥२४॥ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हंति त्रिपूरुषं ॥ प्रसह्य तु बलाद्भुक्तं दश पूर्वान्दशापरान् ॥२५॥ राजानो राजलक्ष्म्यांधा
नात्मपातं विचक्षते ॥ निरयं येभिमन्यंते ब्रह्मस्वं साधु बालिशाः ॥२६॥

त्याह ॥ हिनस्तीति ॥ संसर्गिसंसर्गेणामारकत्वादग्निवल्पतामस्यान्नदपि नेत्याह ॥ वह्नि
रिति ॥ अपि च समूलमिति ॥ वह्निर्म्मूलान्यवशेषयति ॥ ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलेनदपि समूलमिति ॥२४॥ दुरनुज्ञातं यथावदननुज्ञातं त्रिपूरु
षं कुलं शपथपुत्रपौत्रं च प्रसह्य हठात्तु बलात् राजाद्याश्रयतः ॥२५॥ ये ब्रह्मस्वमभिमन्यंते इच्छंति ते निरयमेवाभिमन्यंते ॥ अतो बालिशा अत्ता आत्मपातं न चक्षत इ
ति ॥२६॥

अपिचेद्गृहं तीति ॥ ३७ ॥ राद्धाश्रमिकोस्म ॥ ४० ॥ प्रणमेन मामि ॥ ४१ ॥ न केवलं अर्थवारविभाविके यं किं तु प्रत्युत मित्याह ब्राह्मणार्थ इति ॥ ४२ ॥ २ ॥ मे
वतः षष्टितमः ॥ पंचषष्टितमे रामः स्वज्ञे गोकुलमागतः । रममाणश्च गोपीभिः कालिंद्याकर्षणं मरात् ॥ रामस्य चरितं चित्रं कालिंद्याकर्षणादिय

गृह्णंति यावतः पांसून् क्रंदतामश्रुबिंदवः ॥ विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनां ॥ ३७ ॥ राजानो राजकुल्याश्च तावतोब्दा
न्निरंकुशाः ॥ कुंभीपाकेषु पच्यंते ब्रह्मदायापहारिणः ॥ ३८ ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः ॥ षष्टिवर्षसहस्राणि वि
ष्टायां जायते कृमिः ॥ ३९ ॥ न मे ब्रह्मधनं भूयात् यद्गृध्वाल्पायुषो नराः ॥ पराजिताः च्युता राज्यात् भवंत्युद्वेजिनोहयः ॥ ४० ॥
विप्रं कृतागसमपि नैव द्रुह्यत मामकाः ॥ घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ॥ ४१ ॥ यथाहं प्रणमे विप्राननुकालं समाहितः
तथा च मत यूयं च योन्यथा मे स दंडभाक् ॥ ४२ ॥ ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः ॥ अजानंतमपि ह्येनं नृगं ब्राह्मणगौरिव ॥ ४३
एवं विश्राव्य भगवान् मुकुंदो द्वारकौकसः ॥ पावनः सर्वलोकानां विवेश निजमंदिरं ॥ ४४ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे
नृगोपाख्याने चतुःषष्टितमोध्यायः ॥ श्रीशुक उवाच ॥ बलभद्रः कुरुश्रेष्ठ भगवान् रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकु
लं ॥ १ ॥ परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च ॥ रामोभिवाद्य पितरावाशीर्भिरभिनंदितः ॥ २ ॥ चिरं नः पाहि दाशार्ह सानुजो जगदीश्व
र पौंड्रकांतारिरुत्तमः सप्रथयग्रक्तमतः परं आशीर्भिरभिनंदितोवभूव ॥ तरा हिचिरमिति ॥ ३ ॥ २ः इत्यारोप्यांकमालिंग्य नेत्रैः शिषिचतुर्जलैः ॥ ३

गोपवृद्धांश्च विधिवदभिवंद्य प्रविष्टैरभिवंदित इति ॥ वयस्वेत्यर्थः ॥ अपि च यथावय इति ॥४॥ ते सर्वेपि स्वेषु यादवेषु तं रामं अनामयमारोग्यं पप्रच्छुः ॥५॥ ते च तेन पृष्टाः
ति ॥ कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः त्यक्तसर्वविषयाः ॥६॥ ॥८॥ रामस्य संदर्शनेच्छयादृताः सादराः ॥९॥ तर्हि तद्गमने युष्माभिः प्रतिबंधः किं न कृ

गोपवृद्धांश्च विधिवद्यविष्ठैरभिवंदितः ॥ यथावयो यथासख्यं यथासंबंधमात्मनः ॥४॥ समुपेत्याथ गोपालान् हास्यहस्तग्र
हादिभिः ॥ विश्रान्तं सुखमासीनं पप्रच्छुः पर्युपागताः ॥५॥ पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा ॥ कृष्णे कमलपत्राक्षे संन्य
स्ताखिलराधसः ॥६॥ कच्चिन्नो बांधवा राम सर्वे कुशलमासते ॥ कच्चित्स्मरथ नो राम यूयं दारसुतान्विताः ॥७॥ दिष्ट्या कंसो ह
तः पापो दिष्ट्या मुक्ताः सुहृज्जनाः ॥ निहत्य निर्जित्य रिपून् दिष्ट्या दुर्गं समाश्रिताः ॥८॥ गोप्यो हसंत्यः पप्रच्छू रामसंदर्शना
दृताः ॥ कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ॥९॥ कच्चित्स्मरति वा बंधून् पितरं मातरं च सः ॥ अपि वा स्मरतेऽस्माक
मनुसेवां महाभुजः ॥१०॥ मातरं पितरं भ्रातॄन् पतीन् पुत्रान् स्वसॄनपि ॥ यदर्थे जहिम दाशार्ह दुस्त्यजान् स्वजनान् प्रभो ॥११॥ ता नः
सद्यः परित्यज्य गतः संछिन्नसौहृदः ॥ कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितं ॥१२॥ कथं नु गृह्णंत्यनवस्थितात्मनो व
चः कृतघ्नस्य बुधाः पुरस्त्रियः ॥ गृह्णंति वै चित्रकथस्य सुंदरस्मितावलोकोच्छ्वसितस्मरातुराः ॥१३॥

तः तद्वाक्यविश्वासादिति चेत् न तद्विश्वासः किमिति कृतः तत्राहुः कथं न्विति वंचकत्वान्नानाविधानि वाक्यानि ॥१४॥ तत्रान्याहुः कथं गृह्णंतीति ॥ अन्या ऊचुः
गृह्णंति वा इति ॥ चित्रकथस्य चित्रकथाकथनकोविदस्य किं च सुंदरं स्मितं यस्मिन् तेनावलोकनेन उच्छ्वसितः उन्मितो यः स्मरस्तेनातुराः ॥१३॥

२०३ अपरा उचुः किं न इति ॥ कालस्त्वावन्नस्य वाऽस्माकं वयात्येव ॥ किं तन्नस्य हरवेनास्माकं वडुः खेनेत्येतावाने वदन्ति विशेषद्योतितं ॥१४॥ नानाविधेषकृत्येषु को

४६ विदः ॥१६॥ मधुं चेत्रमाधवं वैशाखं ॥ गोपीनां रतिमिति ॥ श्रीकृष्णक्रीडासमये तत्पत्रानामति वालानां वान्यासामपि तत्पायियुक्तप्रमिहिः ॥१७॥ पूर्णां चंद्रस्य कला

मिमरीचिमिरामृष्टे उज्ज्वले कौमुदीगंधवायुना कुमुदतीनां गंधवातेन सेविते यद्वा कौमुदीशब्देन तद्विकशितानि कुमुदानि मन्यन्ते ॥ कुमुदगंधवातेनेत्यर्थः ॥१८॥

किं नस्त्वत्कथया गोप्यः कथाः कथयतां पराः ॥ यास्यामस्तामपि र्विना कालोयदितस्यतथैव नः ॥१४॥ इति प्रहसितं शौरेर्जल्पितं चारुवी

क्षितं ॥ गतिं प्रेमपरिष्वंगमस्मरं त्योहरुडुः स्त्रियः ॥१५॥ सं कर्षिण्यान्त्वाः कृष्णस्य स्मरे शोईरस्य गामेः ॥ सात्वयामास भगवान्नानानृत्यकोविदः ॥१६॥

हैमामासैतत्रवावात्सीन्मधुमाधवमेवच ॥ रामः कृपाहभगवान्गोपीनां रतिमावहन् ॥१७॥ पूर्णचंद्रकलामृष्टे कौमुदीगंधवायुना ॥ यमु

नोपवने रेमे सेविते स्त्रीगणैर्वृतः ॥१८॥ वृहणाप्रेषितादेवी वारुणीवृक्षकोटरात् ॥ पतंती तद्वनं सर्वं स्वगंधेनाध्यवासयत् ॥१९॥ तंगंध

मधुधारायावायुनोपहृतं वलः ॥ आघ्रायोपगतस्तत्र ललनाभिः पपौ सह ॥२०॥ उपगीयमानचरितो वनितामिर्हलायुधः ॥ वनेषुव्य

चरत्क्षीवो मदविह्वललोचनः ॥२१॥ स्रग्व्येककुंडलो मत्तो वैजयन्त्या च मालया ॥ विभ्रत्स्मितमुखांभोजं स्वेदप्रालेयभूषितं ॥२२॥ सआ

जुहाव यमुनां जलक्रीडार्थमीश्वरः ॥ नेतिवाक्यमनादृत्य मत्तस्त्यापगां वलः ॥२३॥ अनागतां हलाग्रेण कुपितो विचकर्ष ह ॥ पापेत्वं माम

वज्ञाय यन्नायासि मयाहूता ॥ नेष्ये त्वां लांगलाग्रेण शतधा कामचारिणीं ॥२४॥

वारुणी सुधया समहोत्पन्ना मदिरा ॥१९॥ ॥२०॥ ॥ क्षीवो मत्तः ॥ ॥२१॥ स्वेद एव प्रालेयं हिमं तेन भूषितं ॥ ॥२२॥ मत्तो यमित्यनादृत्यानागतां

आपगां नदीं आहूता ॥ आहूतायत यस्मात् ॥ ॥ नागच्छसि ॥ ॥२३॥ ॥ नेष्ये गमयिष्यामि ॥ ॥ ॥२४॥ ॥ श्रीकृष्ण

रास ४६

चकिता ॥ कंपिता ॥२५॥ एकांशेनशेषाख्येन ॥२६॥ विजगाहस्त्ववगाहनंकृतवान् ॥२८॥ उत्तीर्णायनिर्गताय ॥ असितांवरादीनिकांतिर्देवीकांतिर्लक्ष्मीः प
योक्तं वैष्णवे ॥ वरुणप्रहितांचास्मैमालामम्लानपंकजां ॥ समुद्राभेतथावस्त्रेनीलेलक्ष्मीरयच्छतेति ॥ हरिवंशेच ॥ वलंप्रतिलक्ष्मीवाक्यं ॥ जातरूप

एवंनिर्भर्त्सिताभीतायमुनायदुनंदनं ॥ उवाचचकितावाचंपतितापादयोर्नृप ॥२५॥ रामराममहाबाहोनजानेतव
विक्रमं ॥ यस्यैकांशेनविधृताजगतीजगतःपते ॥२६॥ परंभावंभगवतोभगवन्मामजानतीं ॥ मोक्तुमर्हसिविश्वात्मन्
प्रपन्नांभक्तवत्सल ॥२७॥ ततोव्यमुंचद्यमुनांयाचितोभगवान्वलः ॥ विजगाहजलंस्त्रीभिःकरेणुभिरिवेभराट् ॥२८
कामंविहृत्यसलिलादुत्तीर्णायासितांवरे ॥ भूषणानिमहार्हाणिददौकांतिःशुभांस्रजं ॥२९॥ वसित्वावाससी
नीलेमालामामुच्यकांचनीं ॥ रेजेस्वलंकृतोलिप्तोमाहेंद्रइववारणः ॥३०॥ अद्यापिदृश्यतेराजन्यमुनाकृष्टवर्त्मना
वलस्यानंतवीर्यस्यवीर्यंसूचयतीवहि ॥३१॥ एवंसर्वानिशायाताएकेवरमतोव्रजे ॥ रामस्याक्षिप्तचित्तस्यमाधुर्यैर्व्र
जयोषितां ॥३२॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेवलदेवविजयेयमुनाकर्षणंपंचषष्टितमोध्यायः ॥

मयंचैकंकुंडलंवज्रभूषणं ॥ आदित्यमिवमार्कंदिव्यंश्रवणाभूषणं ॥ देवेमांप्रतिगृह्णीष्वपौराणींभूषणक्रियामित्यादि ॥२९॥ वसित्वापरिधाय ॥ आ
मुच्यकंठेनिधाय ॥ वहनादिभियालिप्तः ॥३०॥ एकेवनिशायथामाधुर्यैर्विलासैः ॥३२॥ इतिपंचषष्टितमः ॥

द० उ
४७

षट्षष्टितमे काशीं गत्वाहन्पौंड्रकं हरिः । तन्मित्रं च ततो हत्वा सुदर्शनेनावधारिकां ॥१॥ प्रस्तोभितः स्तुत्या प्रोत्साहितः बालैरज्ञैः ॥२॥ बालकृतो नृपः बालैर्नृपत्वेन क्रीडायां परिकल्पितः ॥३॥ हे मूढ उत्स्रक्ष्ये त्यक्ष्ये त्वाययिष्ये च्यो मुच्यामि यैः ॥ हे हत त्वमेवं विकत्थसे ते स्वपीत्यर्थः ॥ यद्वा यैः चिह्नैः सुदर्शनादिभिस्त्वमेवं

श्रीशुक उवाच ॥ नंदं व्रजं गते रामे करूषाधिपतिर्नृप ॥ वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥१॥ त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः ॥ इति प्रस्तोभितो बालैर्मेन आत्मानमच्युतं ॥२॥ दूतं च प्राहिणोन्मंदः कृष्णायाव्यक्तवर्त्मने ॥ द्वारकायां यथा बालो नृपो बालकृतोऽबुधः ॥३॥ दूतस्तु द्वारकामेत्य सभायामास्थितं प्रभुं ॥ कृष्णं कमलपत्राक्षं राजसंदेशमब्रवीत् ॥४॥ वासुदेवोऽवतीर्णोऽहमेक एव न चापरः ॥ भूतानामनुकंपार्थं त्वं तु मिथ्याभिधां त्यज ॥५॥ यानि त्वमस्मच्चिह्नानि मौढ्याद्बिभर्षि सात्वत ॥ त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवम् ॥६॥ श्रीशुक उवाच ॥ कत्थनं तदुपाकर्ण्य पौंड्रकस्याल्पमेधसः ॥ उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ॥७॥ उवाच दूतं भगवान्परिहासकथामनु ॥ उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे ॥८॥ मुखं तदपिधायाज्ञ कंकगृध्रवटैर्वृतः ॥ शयिष्यसे हतस्तत्र भविता शरणं शुनां ॥९॥ इति दूतस्तमाक्षेपं स्वामिने सर्वमाहरत् ॥ कृष्णोऽपि रथमास्थाय काशीमुपजगाम ह ॥१०॥ पौंड्रकोऽपि तदुद्योगमुपलभ्य महारथः ॥ अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुराद्द्रुतं ॥११॥ तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोऽन्वयान्नृप ॥ अक्षौहिणीभिस्तिसृभिरपश्यत्पौंड्रकं हरिः ॥१२॥

वंस्त्राद्यस्त्राणि उत्स्रक्ष्ये त्याजयिष्यामीत्यर्थः ॥८॥ मां शरणमेहीत्यस्योत्तरं शरणमिति ॥ वटाः कंकादिवत्पक्षिविशेषाः तत्र तदा शुनां शरणमाश्रयो भविता हि ॥९॥ काशीमिति ॥ पौंड्रकस्यापि तदा मित्रं शरेव स्थानात् ॥११॥ ॥ पार्ष्णिग्राहः पृष्ठतो रक्षकः ॥ ॥१२॥

राम
४७

गरुडः स्वन्निमोच्छेजेयस्यतंस्मूल्योः नद्योमौलिरगपरागयस्यत ॥ १४ ॥ १७ ॥ गजस्पंदनावलंगवलमर्हितवान् ॥ पृथक्सुजाः चतुर्विधाश्नतयामयथायुगं

रि । पौंड्रक

शंखार्थ्यसिगदाशार्ङ्गश्रीवत्साकोपलाञ्छितंविभ्राणंकौस्तुभमणिवनमालाविभूषितं ॥ १४ ॥ कौशेयवाससीपीतेवसानंगरु
डध्वजं ॥ अमूल्यमौल्याभरणंस्फुरन्मकरकुंडलं ॥ १५ ॥ दृष्ट्वातमात्मनस्तुल्यवेषंकृत्रिममास्थितं ॥ यथानरंगगताविज्ञा
हासभृशंहरिः ॥ १६ ॥ शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः ॥ असिभिः पट्टिशैर्बाणैः प्राहरन्नरयोहरिं ॥ १७ ॥ कल्पान्तेनसौ
ण्ड्रककाशिराजयोर्बलंगजस्यन्दनवाजिपत्तिमत् ॥ गदासिचक्रेषुभिरार्दयद्भृशं ॥ यथायुगान्तेहुतभुक्पृथक्प्रजाः ॥ १८ ॥ आ
योधनंतद्रथवाजिकुंजरद्विपत्खरोष्ट्रैरिणावखंडितैः ॥ बभौचितंमोदवहंमनस्विनामाक्रीडनंभूतपतेरिवोल्बणं ॥ १९ ॥
अथाहपौण्ड्रकंशौरिर्भोभोः पौण्ड्रवासुदेवत्वाक्येनमामाहूतान्यस्त्राणिस्त्वज्जामिते ॥ २० ॥ त्याजयिष्येभिधानंमेयत्त्वयाज्ञमृषाधृतं
व्रजामिशरणंतेद्ययदिनेच्छामिसंयुगं ॥ इतिक्षिप्त्वाशितैर्बाणैर्विरथीकृत्यपौण्ड्रकं ॥ शिरोवृश्चद्रथांगेनवज्रेणेन्द्रोयथागिरेः ॥
तथाकाशीपतेः कायाच्छिरउत्कृत्यपत्रिभिः ॥ न्यपातयत्काशिपुर्यांपद्मकोशमिवानिलः ॥ २२ ॥ एवंमत्सरिणंहत्वापौण्ड्रकं
ससखंहरिः ॥ द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ २४ ॥ सनित्यंभगवद्ध्यानप्रध्वस्ताखिलबन्धनः ॥ बिभ्राणश्चहरेराजन्
स्वरूपंतन्मयोभवत् ॥ २५ ॥ शिरः पतितमालोक्यराजद्वारेसकुंडलं ॥ किमिदंकस्यवक्त्रमितिसंशयिरेजनाः ॥ २६ ॥ राज्ञः काशिपतेः
तामिरिति ॥ आयोधनंरणस्थानंअरिणाचक्रेणचितंआकर्षितंआक्रीडनमिव कल्पान्तेरुद्रस्यक्रीडास्थानमिवगिरेः शृंगंयथेति ॥ प्रथमकिमिदमितिपश्चाद्दृष्ट्वा

वा

संस्थाविधिं उत्तरक्रियां ॥ अपचितिं निष्कृतिं ॥ २७ ॥ आत्मनाभिसंधाय व्यवस्य दक्षिणाग्निः ॥ २८ ॥ अत्र हरः वरमदात् ॥ दक्षिणाग्निः प्रत्यक्षवानित्यर्थः ॥ २९ ॥ ऋत्विज मिव स्वनियोगकारिणं यत्नस्य देवमृत्विजमिति स्तुतेः ॥ अब्रह्मण्ये प्रयोजितमिति ॥ कृष्णे प्रयोजितं विपरीतं भविष्यतीति सूचितं ॥ अतिचरन्नभिचारं कुर्वन्नव्र

सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः ॥ निहत्य पितृहंतारं यास्याम्यपचितिं पितुः ॥ २७ ॥ इत्यात्मनाभिसंधाय सोपाध्यायो महेश्वरं ॥ सुदक्षिणोऽर्चयामास परमेण समाधिना ॥ २८ ॥ प्रीतोऽविमुक्ते भगवांस्तस्मै वरमदाद्विभुः ॥ पितृहंतृवधोपायं स वव्रे वरमीप्सितं ॥ २९ ॥ दक्षिणाग्निं परिचर ब्राह्मणैः सममृत्विजं ॥ अभिचारविधानेन स चाग्निः प्रमथैर्वृतः ॥ ३० ॥ साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः ॥ इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन्व्रती ॥ ३१ ॥ ततोऽग्निरुत्थितः कुंडात् मूर्तिमानतिभीषणः ॥ तप्तताम्रशिखाश्मश्रुरंगारोद्गारलोचनः ॥ ३२ ॥ दंष्ट्रोग्रभृकुटीदंडकठोरास्यः स्वजिह्वया ॥ आलिहन्सृक्किणी नग्नो विधुन्वन् त्रिशिखं ज्वलन् ॥ ३३ ॥ पद्भ्यां तालप्रमाणाभ्यां कंपयन्नवनीतलं ॥ सोऽभ्यधावद्वृतो भूतैर्द्वारकां प्रदहन्दिशः ॥ ३४ ॥ तमाभिचारदहनमायांतं द्वारकौकसः ॥ विलोक्य तत्रसुः सर्वे वनदाहे यथा मृगाः ॥ ३५ ॥ अक्षैः सभायां क्रीडंतं भगवंतं भयातुराः ॥ त्राहि त्राहि त्रिलोकेश वह्नेः प्रदहतः पुरं ॥ ३६ ॥ श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसं ॥ शरण्यः संप्रहस्याह मा भैष्टेत्यविताऽस्म्यहं ॥ ३७ ॥

व्रती गृहीतनियमः तप्तताम्रशिखाश्मश्रूणि यस्य सः ॥ अंगारोद्गारीणि लोचनानि यस्य सः ॥ दंष्ट्राभिरुग्रैः भृकुटीदंडैश्च कठोरं आस्यं यस्य सः ॥ त्रिशिखं त्रिशूलं दिशः प्रदहन् ॥ त्राहि त्राहीत्याक्रोशतीति शेषः ॥ अहमविताऽस्मि रक्षिष्यामीति ॥ ॥ ३७ ॥ ॥

रोरसौ प्रकाशयदिति शेषः ॥ यद्वा स्वतेजसा खादीन्द्रातिजन्यात्स्यमानं अन्तर्थं प्रकाशमान इत्यर्थः ॥ अर्द्दयत अपीडयत ॥ अर्दितो ग्निर्यत्कृतवान्स्वदाह ॥ कृ
त्यानाल इति ॥ इहर्त्विग्भिः जनैश्च वर्त्तमान अपि वर्यते नेत्यभिचारः कृत्यानलः अहरिमहिताग्निवत्कृतवानल इत्याद्यमवो ॥ इति श्री मे ... षष्टितमः
ष्यषष्ठितमेऽध्यायो गिरौ रैवतमेकदा ॥ स्वैरं युवतिभिः क्रीडन्नवधीद्द्विविदं खले ॥ १ ॥ कालिंदीविदारणानंतरं रामचरितं द्विविदवधाख्यं गतमध्याये ... तस्य द्वि

सर्वे ध्यातस्त्वं दहिः महाकृत्यां माहेश्वरीं विभुः ॥ विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत ॥ ३६ ॥ तत्सूर्यकोटिप्रतिमं सुदर्शनं जाज्व
ल्यमानं प्रलयानलप्रभं ॥ स्वतेजसा खं ककुभोऽथ रोदसी चक्रं मुकुंदास्त्रमथाग्निमर्द्दयत ॥ ३७ ॥ कृत्यानलः प्रतिहतः स रथांगपाणे
रस्त्रौजसा स नृपभग्नमुखो निवृत्तः ॥ वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्वकृतोऽभिचारः ॥ ३८ ॥ चक्रं च विष्णोस्तदनुप्रविष्टं वाराण
सीं साट्टसभालयापणां ॥ सगोपुराट्टालककोष्ठसंकुलां सकोशहस्त्यश्वरथान्नशालिनीं ॥ ३९ ॥ दग्ध्वा वाराणसीं सर्वां वि
ष्णोश्चक्रं सुदर्शनं ॥ भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्म्मणः ॥ ४० ॥ य एनं श्रावयेन्मर्त्य उत्तमश्लोकविक्रमं ॥ समाहितो वा शृणुया
त्सर्वपापैः प्रमुच्यते ॥ ४१ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे काशिराजपौंड्रकवधः षट्षष्टितमोऽध्यायः ॥ राजोवाच ॥ भूयोऽहं
श्रोतुमिच्छामि रामस्याद्भुतकर्म्मणः ॥ अनंतस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः ॥ १ ॥ श्रीशुक उवाच ॥ नरकस्य सखा कश्चिद्द्विविदो नाम वान
रः ॥ सुग्रीवसचिवः सोऽथ भ्राता मैंदस्य वीर्यवान ॥ २ ॥

कामाविकत्वेन पौंड्रकवधारिनिन्द्रप्रेरानीत्रेव प्रहेति ॥ भूयोऽहमित्यादिना रामचरितश्रवणेच्छायामद्भु
तकर्म्मत्वं हेतुं तत्रवानंतत्वं तत्राप्यप्रमेयत्वमिति नरकस्य सखेति हरिणा वैरे कारणं सुग्रीवसचिव इति तस्य मंत्रबलं मैंदस्य भ्रातेति रामायणोति प्रसिद्धत्वेन
वीर्याधिकात्वमिति ॥ २ ॥

विष्णोस्तदनु प्र

२०३
४९

सत्वेन रकस्यापविर्तिं श्चान्तरापराष्टा विह्वमवोधथा भवतितथाउपरहीनरहहरिति ‖ किंवित्क्वाविदितिकदाचित्सद्धिविदमित्रसखिहंतातस्यसमुद्रस्यजलमा
ऊम्याउन्निप्यवेलापः ‖ कुलेवर्त्तमानानास्मावयामाहेति ‖ आश्रमस्थाव्वनस्पतीन्भक्ष्याआहनीपाद्यग्नीउमृत्वाहिस्रातवान्अप्यधोतपिरधत ‖ पेशस्कारी

सत्वेःस्तोपविर्तिंकर्द्धन्वानरोराष्टुविस्रवां ‖ उरग्यामाकाएनद्योषान्स्रस्हाद्वड्रिमत्स्रजन् ‖ ३ ‖ क्वचित्सेशेलातत्पाद्यैतेर्ईशान्स्मचूर्ण
यत ‖ आनन्तीन्स्तनरामेवयझाद्तेमित्रहाहाहीः ‖ ४ ‖ क्वचित्समुद्रमध्यस्थोद्रोर्भ्याम्उद्धृत्यतज्जलं ‖ देशानागाप्लुतप्राणोवेलाकूलानमज्ज
यत ‖ आश्रमान्ऋषिउख्यानांकृत्वाभग्नवनस्पतीन् ‖ अरूषयछत्कन्मूत्रैरग्नीवैतानिकान्वलः ‖ ६ ‖ उरुषान्योषितोदुष्टः स्नामद्रोणाउ
हासमः ‖ निहित्यवाप्याधोच्छेलेः पेशस्कारीवकीटकां ‖ ७ ‖ एवंदेशान्विउकुर्वन्दूषयश्चकलह्रियः ‖ स्रुत्वासललितंगीतंगिरौरैव
तकंपयौ ‖ ८ ‖ तत्रापश्यद्वउपतिराभ्रउष्कारमालिनं सुदर्शनीयसर्वाङ्गं ललनायूथमध्यगम् ‖ ९ ‖ गायन्तंवाहणीपीत्वामदविह्व
ललोचनं ‖ विभ्राजमानंवपुषाप्रभिन्नमिववारणं ‖ १० ‖ दुष्टः शाखामृगः शाखामारूढः कम्पयन्द्रुमान् ‖ चक्रेकिलकिलाशब्दमात्मा
नंसंप्रदर्शयन् ‖ ११ ‖ तस्यधार्ष्ट्यंकपेर्वीक्ष्यतरुणोजातिचापलाः ‖ हस्यप्रियाविहारहृतः वलः दैवपरिग्रहः ‖ १२ ‖ ताहेलयामासकपिन्द्र
तैयेः समरवाहिभिः ‖ दर्शयन्स्वगुदं तासामारामस्यवनिरान्ततः ‖ १३ ‖ तग्रावन्नाग्राहरत्रुद्धोवलः प्रहरतांवरः ‖ सचवंचयित्वाग्रावाणांमरिराक
लशंकपिः ‖ १४

स्वाविभ्रमरः ‖ प्रभिन्नमत्तं ‖ जात्वाहावभावैनैववापालंयामासताः ‖ हेलयामासस्रूवजन्तेनिराङ्कृतोनिराङ्कृमाणाम्यातमनाहत्येत्यर्थः ‖ १४ ‖

राम
४९

आस्फालयत् योषितां वासांसि आकृष्य पाटितवान् ॥ विप्रचक्रे एवमपकृतवान् ॥१५॥ शालं वृक्षं ॥१७॥ सुनंदेन मुशलेनाहनत् ... त्रिरूपार्थः तंवा

तं ग्रावाणा प्राहरत्क्रुद्धो बलः प्रहरतां वरः ॥ अवंचयित्वा ग्रावाणं मदिराकलशं कपिः ॥१४॥ गृहीत्वा हेलया मास धूर्तस्तं कोपयन् हसन् ॥ निर्भिद्य कलशं धृष्टो वासांस्यास्फालयद्बलं ॥ कदर्थीकृत्य बलवान् विप्रचक्रे मदोद्धतः ॥१५॥ तं तस्याविनयं दृष्ट्वा देशांश्च तदुपद्रुतान् ॥ क्रुद्धो मुशलमादत्त हलं चारिजिघांसया ॥१६॥ द्विविदोपि महावीर्यः शालमुद्यम्य पाणिना ॥ अभ्येत्य तरसा तेन बलं मूर्द्धन्यताडयत् ॥१७॥ तं तु संकर्षणो मूर्ध्नि पतंतमचलो यथा ॥ प्रतिजग्राह भगवान् सुनंदेनाहनच्च तं ॥१८॥ मुशलाहतमस्तिष्को विरेजे रक्तधारया ॥ गिरिर्यथा गैरिकया प्रहारं नानुचिंतयन् ॥१९॥ पुनरन्यं समुत्क्षिप्य कृत्वा निष्पत्रमोजसा ॥ तेनाहनत्सुसंक्रुद्धस्तं बलः शतधाछिनत् ॥२०॥ ततोन्येन रुषा जघ्ने तं चापि शतधाछिनत् ॥ एवं युध्यन् भगवता भग्ने भग्ने पुनः पुनः ॥ आकृष्य सर्वतो वृक्षान्निर्वृक्षमकरोद्वनं ॥२१॥ ततोमुंचच्छिलावर्षं बलस्योपर्यमर्षितः ॥ तत्सर्वं चूर्णयामास लीलया मुशलायुधः ॥२२॥ स बाहू तालसंकाशौ मुष्टीकृत्य कपीश्वरः ॥ आसाद्य रोहिणीपुत्रं ताभ्यां वक्षस्यरूरुजत् ॥२३॥ यादवेंद्रोपि तं दोर्भ्यां त्यक्त्वा मुशललांगले ॥ जत्रावभ्यर्दयत्क्रुद्धः सोपतद्रुधिरं वमन् ॥२४॥ चकंपे तेन पतता सटंकः सवनस्पतिः ॥ पर्वतः कुरुशार्दूल वायुना नौरिवांभसि ॥२५॥ जयशब्दो नमःशब्दः साधु साध्विति चांबरे ॥ सुरसिद्धमुनींद्राणामासीत्कुसुमवर्षिणां ॥२६॥

मस्तिष्कं मस्तकावयवविशेषः गैरिकया लोहितधातुना नानुचिंतयत् न गणयत् ॥ अरूरुजत् ताडयामास ॥२२॥ जत्रौ कंठबाहुमूले ॥२४॥ टंकाः स

६०७
५०

जगतो व्यतिकरं नाशमाहवतीति तथा तं ॥ २७ ॥ इति श्रीमद्भागवते दशमे पुरंदर स्कंधे टीकायां सप्तषष्टितमोऽध्यायः ॥ अष्टषष्टितमे साम्बे निबद्धे कौरवैर्युधि । तद्विमोक्षाय रामेण गजाह्वयविकर्षणं ॥ १ ॥ रामचरित्रान्तर निरूपयितुमाह ॥ दुर्योधनसुतामिति ॥ समितिंजयः संग्रामजित ॥ १ ॥ नो ऽस्माकं महीं ॥ ३ ॥ अस्माभिर्दत्तां ते भूमिपतय इति भावः ॥ ३ ॥ यान्ति यास्यन्ति ॥ प्राणा इंद्रिया

एवं निहत्य द्विविदं जगद्व्यतिकरावहं । संस्तूयमानो भगवान्जनैः स्वपुरमाविशत ॥ २७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्विविदवधो नाम सप्तषष्टितमोऽध्यायः ॥ श्रीशुक उवाच ॥ दुर्योधनसुतां राजन्लक्ष्मणां समितिंजयः ॥ स्वयंवरस्थामहरत्साम्बो जाम्बवतीसुतः ॥ १ ॥ कौरवाः कुपिता ऊचुः दुर्विनीतोऽयमर्भकः ॥ कदर्थीकृत्य नः कन्यामकामामहरद्बलात ॥ २ ॥ बध्नीतेमं दुर्विनीतं किं करिष्यन्ति वृष्णयः ॥ येऽस्मत्प्रसादोपचितां दत्तां नो भुंजते महीं ॥ ३ ॥ निगृहीतं सुतं श्रुत्वा यद्येष्यन्तीह वृष्णयः ॥ भग्नदर्पाः शमं यान्ति प्राणा इव सुसंयताः ॥ ४ ॥ इति कर्णः शलो भूरिर्यज्ञकेतुः सुयोधनः ॥ साम्बमारेभिरे योद्धुं कुरुवृद्धानुमोदिताः ॥ ५ ॥ दृष्ट्वानुधावतः साम्बो धार्तराष्ट्रान्महारथः ॥ प्रगृह्य रुचिरं चापं तस्थौ सिंह इवैकलः ॥ ६ ॥ तं ते जिघृक्षवः क्रुद्धास्तिष्ठ तिष्ठेति भाषिणः ॥ आसाद्य धन्विनो बाणैः कर्णाग्रण्यः समाकिरन् ॥ ७ ॥ सोऽपविद्धः कुरुश्रेष्ठ कुरुभिर्यदुनंदनः ॥ नामृष्यत्तदचिंत्यार्भः सिंहः क्षुद्रमृगैरिव ॥ ८ ॥ विस्फूर्ज्य रुचिरं चापं सर्वान्विव्याध सायकैः ॥ कर्णादीन्षड्रथान्वीरस्तावद्भिर्युगपत्पृथक ॥ ९ ॥ चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन् ॥ रथिनश्च महेष्वासांस्तस्य तत्तेऽभ्यपूजयन् ॥ १० ॥ तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान् ॥ एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनं ॥ ११ ॥ तं बद्ध्वा विरथीकृत्य कृच्छ्रेण कुरवो युधि ॥ कुमारं स्वस्य कन्यां च स्वपुरं जयिनोऽविशन् ॥ १२ ॥

मारेभिरे इति ताः ॥ ४ ॥ कुरुवृद्धो भीष्मः तेनानुमोदिताः तस्मिन्हिताय घटेत इत्यर्थः ॥ ५ ॥ कर्णो अग्रणीर्येषां ते ॥ ७ ॥ अपविद्धः ताडितः अमृष्यत् अचिंत्यस्य श्रीकृष्णस्य अर्भो बालः ॥ ८ ॥ तत्पराक्रमं ॥ ९ ॥ चतुर्भिरिति ॥ चतुर्भिश्चतुरः तस्य तत्कर्म ते समानितवंतः ॥ १० ॥ स्वस्य दुर्योधनस्य कन्यां च नीत्वा राम निरोधः ॥ ११ ॥ १२ ॥

५०

यतः कलिं नेछत्॥ छतः सान्त्वयित्वा जगामेति॥१५॥ धृतराष्ट्रबुभुत्सयेति॥ अभिप्राय जिज्ञासयेत्यर्थः॥१६॥ विधिवदभिवाद्य॥१७॥ ततस्तद्वचमर्पयित्वा सकलमंगलपाणयः॥ उपायनहस्ताः॥१८॥ दृष्ट्वा अविप्रणेमुः॥१९॥ यद्यप्यभित्सुग्रहेन स्ववाक्यं॥ मृष्ये सहे॥ अथाभ्यागतानीयतं समर्पयतेति शेषः॥२२॥

तच्छ्रुत्वा नारदोक्तेन राजेन्द्र जातमन्यवः॥ कुरून्प्रत्युद्यमं चक्रुरुग्रसेनप्रचोदिताः॥१३॥ सान्त्वयित्वा ततस्तान्सः सन्नद्धान्वृष्णिपुंगवान्॥ नैछत्कुरूणां वृष्णीनां कलिं कलिमलापहः॥१४॥ जगाम हास्तिनपुरं रथेनादित्यवर्चसा॥ ब्राह्मणैः कुलवृद्धैश्च वृतश्चन्द्र इव ग्रहैः॥१५॥ गत्वा गजाह्वयं रामो बाह्योपवनमाश्रितः॥ उद्धवं प्रेषयामास धृतराष्ट्रबुभुत्सया॥१६॥ सोभिवाद्याम्बिकापुत्रं भीष्मद्रोणं सबाह्लिकं॥ दुर्योधनं च विधिवद्राममागतमब्रवीत्॥१७॥ तेतिप्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमं॥ तमर्चयित्वाभिययुः सर्वे मंगलपाणयः॥१८॥ तं संगम्य यथान्यायं गामर्घ्यं च न्यवेदयन्॥ तेषां ये तत्प्रभावज्ञाः प्रणेमुः शिरसा बलं॥१९॥ बंधून्कुशलिनः श्रुत्वा पृष्ट्वा शिवमनामयं॥ परस्परमथो रामो बभाषे विक्लवं वचः॥२०॥ उग्रसेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः॥ तदव्यग्रधियः श्रुत्वा कुरुध्वमविलंबितं॥२१॥ यद्यूयं बहवस्त्वेकं जित्वाधर्मेण धार्मिकं॥ अबध्नीताथ यन्मृष्ये बंधूनामैक्यकाम्यया॥२२॥ वीर्यशौर्यबलोन्नद्धमात्मशक्तिसमं वचः॥ कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः॥२३॥ अहो महच्चित्रमिदं कालगत्या दुरत्यया॥ आरुरुक्षत्युपानद्वै शिरो मुकुटसेवितं॥२४॥

वीर्यं प्रभावः शौर्यमुत्साहः बलं सत्त्वं तैरुन्नद्धं उच्छृंखलं॥ कथं आत्मनः शक्तेः समं अनुरूपं॥२३॥ उपानत्पादरक्षा॥ शिर आरोढुमिच्छती॥ हीनाश्रयानाता पर्यंतीत्यर्थः॥२४॥

२०३
५१

अस्यैव प्रपंचः एत इति ॥ वर्द्धिभिः योनेनरथ्यायाविवाहेन ॥ १५ ॥ किंवचामरव्यजनेइति ॥ भुजन्ति उपभुंजंते इत्यर्थः अस्मदुपेक्षयाअस्माकमनाग्रहेण ॥
॥ १६ ॥ अलमिति ॥ अतः परंतान्यपरिक्षामहे इत्यर्थः ॥ १७ ॥ अवंहधीतह्वीकुर्यीत ॥ उरणोमेषः ॥ १८ ॥ जन्मनावंधुभिश्चोपलक्षितश्रियाउन्नद्धउत्कर्षोमदो

एतेयैनेनृपवंद्याः प्रहृशय्याप्रनाशनाः ॥ इत्यमयस्ताल्पतानीताअस्माद्दत्तनृपासनाः ॥ १५ ॥ चामरव्यजनेशंखमातपत्रंचपांडुरं ॥ कि
रीटमासनंशय्यांभुंजंत्यस्मदुपेक्षया ॥ १६ ॥ अलंयदूनांनरदेवलाञ्छनैर्दुःखप्रदैःपन्नगफणामिवामृतं ॥ येनः प्रमादोपचिताहि
यादवास्तानापयत्स्वयातत्रपावत ॥ १७ ॥ कथमिंद्रोपिकुरुभिर्भीष्मद्रोणार्जुनादिभिः ॥ अदत्तमवरुंधीतसिंहग्रस्तमिवोरणः ॥ १८
श्रीशुकउवाच ॥ जन्मबंधुश्रियोन्नद्धमदास्तेभरतर्षभ ॥ आश्राव्यरामंदुर्वाच्यमसभ्याःपुरमाविशन् ॥ १९ ॥ दृष्ट्वाकुरूणांदौःशील्यंश्रु
त्वावाच्यानिवाच्युतः ॥ अवोचतकोपसंरब्धोदुःप्रेक्ष्यःप्रहसन्मुहुः ॥ २० ॥ नूनंनानामदोन्नद्धाःशांतिनेच्छंत्यसाधवः ॥ तेषांहिप्रश
मोदंडःपशूनांलगुडोयथा ॥ २१ ॥ अहोयदून्सुसंरब्धान्कृष्णंचकुपितंशनैः ॥ सांत्वयित्वाहमेतेषांशममिच्छन्निहागतः ॥ २२ ॥
तइमेमंदमतयः कलहाभिरताःखलाः ॥ तंमामवज्ञायमुहुर्दुर्भाषान्मानिनोब्रुवन् ॥ २३ ॥ नोग्रसेनःकिलविभुर्भोज
वृष्ण्यंधकेश्वरः ॥ शक्रादयोलोकपालायस्यादेशानुवर्तिनः ॥ २४ ॥ गोपालकमहाई

येषांते दुर्वाच्यंपरुषंवाक्यं ॥ असभ्याः दुर्जनाः ॥ १९ ॥ नानाधनादिभिर्जानादिमदैरुन्नद्धाः दंडएवप्रशमः प्रकर्षेणशमयतीतितथा ॥ यथा
लकुटोदंडः ॥ २१ ॥ दुर्भाषान् अवाच्यान्शब्दान् ॥ २३ ॥ दुर्भाषणमपरुषमरातिषडङ्गः ॥ नोग्रसेनइतिविभुः अन्तापयितुंसमर्थः ॥ २४ ॥

राम
५१

अहो भ्रष्टाः श्रीकृष्णमप्यधिक्षिप्तवन्त इति कुपितस्त्वाह ॥ स्वधर्म्मेत्यादि भिस्त्रिभिः मौल्युत्तमैः मौलिपूर्जैर्हत्तमांगैः उत्तमैर्मौलिभिरिति वा ॥ उपासि
तानि तीर्थानि यैर्योगिभिः तेषामपि तीर्थं यद्वा उपासितं सर्वैः सेवितं तीर्थं गंगा तस्य तीर्थत्वनिमित्तं किंच ॥ ब्रह्मा भवः श्रीः स्वयमहमपि अद्धा हे म ॥ कथं भ्र

स्वधर्म्माक्रम्यते येन पारिजातोमराङ्घ्रिपः ॥ आनीय भुज्यते सोसौ न किलाध्यासनार्हणः ॥ २५ ॥ यस्य पादयुगं साक्षाच्छ्रीरुपा
स्तेखिलेश्वरी ॥ स नार्हति किल श्रीशो नरदेवपरिच्छदान् ॥ २६ ॥ यस्यांघ्रिपंकजरजोखिललोकपालैर्मौल्युत्तमैर्धृतमुपासित
तीर्थतीर्थं ॥ ब्रह्मा भवोहमपि यस्य कलाः कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥ २७ ॥ भुंजते कुरुभिर्दत्तं भूखंडं वृष्णयः
किल ॥ उपानहः किल वयं स्वयं तु कुरवः शिरः ॥ २८ ॥ अहो ऐश्वर्यमत्तानां मत्तानामिव मानिनां ॥ असंबद्धा गिरो रुक्षाः कः सहे
तानुशासिता ॥ २९ ॥ अद्य निःकौरवां पृथ्वीं करिष्यामीत्यमर्षितः ॥ गृहीत्वा हलमुत्तस्थौ दहन्निव जगत्त्रयं ॥ ४० ॥ लांगलाग्रेण
नगरमुद्विदार्य गजाह्वयं ॥ विचकर्ष स गंगायां प्रहरिष्यन्नमर्षितः ॥ ४१ ॥ जलयानमिवाघूर्णं गंगायां नगरं पतत् ॥ आकृष्यमाणमा
लोक्य कौरवा जातसंभ्रमाः ॥ ४२ ॥ तमेव शरणं जग्मुः सकुटुंबा जिजीविषवः ॥ सलक्ष्मणं पुरस्कृत्य सांबं प्रांजलयः प्रभुं ॥ ४३ ॥

तावयं ॥ यस्य कलायाः अंशस्य कलाः अंशाः ॥ २७ ॥ मत्तानामिव मद्यादिना ॥ रुक्षाः परुषाः अनुशासिता स्वयं दंडकः सन् ॥ २९ ॥ लांगलाग्रेणोद्विदारणतः
प्राकारमूले निखातेन उद्विदार्य उत्पाट्य ॥ ४१ ॥ जिजीविषवस्त्यक्तरणाधिकामा सह्यम् ॥ ४३ ॥

१०७ शेषेशयनं कोपि विशेषपर्य्यंकोपरि शिष्यमाणो यः स एव त्वमेवेति ॥ ४६ ॥ अस्मात् कोप स्तुतवायमनुचिंतएवेत्याङ्कः ॥ कोपस्त्वमसि ॥ क्षितिपालनेतत्परः तात्प

५२

णमणमाखिलाधारत्वभावं न विरामते ॥ म्लेच्छानां नः कृतवृद्धीनां हंतुमर्हसि धर्म्मधरः ॥ ४४ ॥ स्थित्युत्पत्त्यपयानां त्वमेको हेतुर्निराश्रयः
लोकान् क्रीडनकानीश क्रीडतस्ते वदंति हि ॥ ४५ ॥ त्वमेव मूर्द्ध्नीदमनंत लीलया भूमंडलं बिभर्षि सहस्रमूर्द्धन् ॥ अंते च यः स्वात्मनि
रुद्धविश्वः शेषे द्वितीयः परिशिष्यमाणः ॥ ४६ ॥ कोपस्ते खिलशिक्षार्थं न द्वेषान्न च मत्सरात् ॥ बिभ्रतो भगवन् सत्त्वं क्षितिपालनतत्प
रः ॥ ४७ ॥ नमस्ते सर्वभूतात्मन् सर्वशक्तिधराव्यय ॥ विश्वकर्म्मन्नमस्तेस्तु त्वां वयं शरणं गताः ॥ ४८ ॥ श्रीशुक उवाच ॥ एवं प्रपन्नैः संविग्नै
र्वेपमानायनैर्बलः ॥ प्रसादितः प्रसन्नोभून्माभैष्टेत्यभयं ददौ ॥ ४९ ॥ दुर्योधनः पारिबर्हं कुंजरान् षष्टिहायनान् ॥ ददौ च द्वादशश
तान्ययुतानि तुरंगमान् ॥ ५० ॥ रथानां षट्सहस्राणि रौक्माणां सूर्यवर्च्चसां ॥ दासीनां निष्ककंठीनां सहस्रं दुहितृवत्सलः ॥ ५१ ॥ प्रति
गृह्य तु तत्सर्वं भगवान् सात्वतर्षभः ॥ ससुतः सस्नुषः प्रायात् सुहृद्भिरभिनंदितः ॥ ५२ ॥ ततः प्रविष्टः स्वपुरं हलायुधः समेत्य बंधून
नुरक्तचेतसः ॥ शशंस सर्वं यदुपुंगवानां मध्ये सभायां कुरुषु स्वचेष्टितं ॥ ५३ ॥ अद्यापि च पुरं ह्येतत् सूचयद्रामविक्रमं ॥ समुन्नतं दक्षि
णतो गंगायामनुदृश्यते ॥ ५४ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे बलभद्रविजयो नाम षष्टितमोध्यायः

र्यवान् कोपः पातालतरे संबोधनं ॥ ४७ ॥ विश्वकर्म्मन् कृत्यमयस्मत् त्वमिति संबोधनं ॥ ४८ ॥ वेपमानमयनं प्रत्येषां तैः ॥ ४९ ॥ तुरंगमाः द्वादशसहस्रायुतानि ॥ ५० ॥ सुहृद्भिः
कौरवैः ॥ मध्ये सभायां सभामध्ये ॥ ५४ ॥ अष्टषष्टितमः ॥

राम ५२

एकोनसप्ततितमे गार्हस्थ्यं प्रतिपादितं । कृष्णस्य नारदो दृष्ट्वा विस्मितो गान्नं तत्कृतवत् ॥ १ ॥ दिदृक्षामभिनयेनाह । चित्रमिति द्व्यष्टसहस्राः स्त्रीः उदावहत् परिणीत
वान् ॥ २ ॥ तां द्वारवतीं सत्वर्णयति सार्द्धत्रयेण पुष्पितेति । पुष्पितेषूपवनेषु आरामेषु उद्यानेषु च द्विजानां अलिनां च कुलानि तैर्नादितां ॥ ३ ॥ छुरितेषु व्याप्तेषु ॥ ४ ॥
महामरकतैः प्रख्यायन्ते प्रकाशन्त इति तथा तैः स्वर्णरत्नमयाः परिच्छदाः परिकरा येषु तैः पततः प्रचलन्त्यः पताका येषु तैर्ध्वजैर्वारित आतपो यस्यां तां ॥ ६ ॥

श्रीशुक उवाच ॥ नरकं निहतं श्रुत्वा तथोद्वाहं च योषितां । कृष्णेनैकेन बह्वीनां तद्दिदृक्षुः स्म नारदः ॥ १ ॥ चित्रं बतैतदेकेन वपुषा युग
पत्पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥ २ ॥ इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत् । पुष्पितोपवनारामद्विजा
लिकुलनादितां ॥ ३ ॥ उत्फुल्लेन्दीवराम्भोजकह्लारकुमुदोत्पलैः । छुरितेषु सरःसूच्चैः कूजितां हंससारसैः ॥ ४ ॥ प्रासादलक्षै
र्नवभिर्जुष्टां स्फाटिकराजतैः । महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः ॥ ५ ॥ विभक्तरथ्यापथचत्वरापणैः शालासभाभी रुचि
रां सुरालयैः । संसिक्तमार्गाङ्गणवीथिदेहलीं पतत्पताकाध्वजवारितातपां ॥ ६ ॥ तस्यामन्तःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः ।
हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितं ॥ ७ ॥ तत्र षोडशभिः सद्मसहस्रैः समलंकृतं । विवेशैकतमं शौरेः पत्नीनां भवनं
महत् ॥ ८ ॥ विष्टब्धं विद्रुमस्तम्भैर्वैदूर्यफलकोत्तमैः । इन्द्रनीलमयैः कुड्यैर्जगत्या चाहतत्विषा ॥ ९ ॥

तस्यां सर्वैर्धिष्ण्यपैर्लोकपालैरर्चितं षोडशभिः सद्मसहस्रैः समलंकृतं हरेरंतःपुरं विवेश तत्र च तस्य शौरेः पत्नीनां भवनेषु एकतमं विवेश तत्स्वरूपः यत्र
स्वकौशलं त्वष्ट्रा दर्शितमित्यंतःपुरभवनयोर्विशेषणं ॥ ८ ॥ तदेव वर्णयति वज्रभिर्विष्टब्धमिति । विद्रुमस्तंभैर्विष्टब्धं विधृतं वैडूर्यमयानि फलकोत्तमानि हस्तभा
श्रयाणि छादनानि तैः । इन्द्रनीलमयैः कुड्यैरभिसर्वोपलक्षितं जगत्या भूमिकया च इन्द्रनीलमय्या न हता त्विट् यस्याः तया ॥ ९ ॥

२०७ मुक्ताहारप्रालंबाः विविधानि लंबनानि विद्यंते येषु तैः मरकतमणिभिः परिष्कृतैर्भूषितैः १० इंद्रनीलमहानीलमणिर्घोषमितिद्वयं प्रोक्तं ११ अत्र सर्वसर्द्ध
५२ कालं ॥ आत्मना समानानि निगमागमरूपवर्णानि यस्य तं चिह्नवेषालंकारस्वरूपसमं तेन राज्ञा सह स्थितेन तया गृहिण्या सह ॥ १२ ॥ श्रियः रुक्मिण्याः पर्यंकतः अवीविश

वितानैस्त्रिभिर्नित्यं त्वष्ट्रा मुक्ताहारप्रलंबिभिः ॥ शोभितं रत्नपर्यंकैर्मरकतमणिपरिष्कृतैः ॥ १० ॥ राजमौक्तिकहारैश्च कंठाभिः सुवा
सोभिरलंकृतं ॥ पुष्पैः सकर्पूरकोत्साहैः सुवर्णमणिकुंडलैः ॥ ११ ॥ रत्नप्रदीपनिकरैर्ज्योतिर्भिः स्तंभितं विचित्रवलभीष
शिखंडिनां ॥ स्तंभैः यत्र विहिता गरुधूपमहैर्निर्यातनीलमेघवत्यं चरंतः ॥ १२ ॥ तस्मिन्समानगुणरूपवयः सु
वेषदासीसहस्रयुतया नुसवं गृहिण्या ॥ विप्रो ददर्श वामरव्यजनेन सख्या तं चेत्समालवतपतिपरिवीजयंत्या ॥ १३ ॥ तं संनि
रीक्ष्य भगवान् सहसोत्थितः श्रीपर्यंकतः सकलधर्मभृतां वरिष्ठः ॥ आनम्य पादयुगलं शिरसा किरीटजुष्टेन सांजलिरवी
विशदासने स्व ॥ १४ ॥ तस्यावनिज्य चरणौ तदपः स्वयं च स्वमूर्ध्ना विभ्रज्जगद्गुरुतरोपि सतां पतिर्हि ॥ ब्रह्मण्यदेव इति यद्गुणनाम
युक्तं तस्यैव यच्चरणशौचमशेषतीर्थं ॥ १५ ॥ संपूज्य देवर्षिवर्यमृषिः पुराणो नारायणो नरसखो विधिनोदितेन ॥ वाण्या
भिभाष्य मितया मृतमृष्टया तं प्राह प्रभो भगवते कर वाम तेकिं ॥ १६ ॥

तदुपवेशयामास ॥ १४ ॥ अविभ्रत् अविभ्रः दधारेत्यर्थः विभ्रदिति शत्रंतं वा तदा वसंपूज्यापि भाष्य च प्राह तस्मात्तेजसा भूयः यस्य चरणशौचं गंगा अशेषतीर्थं सः अत
एव जगद्गुरुतरोपि सतां धर्मवृत्तां पतित्वात् स्वयं करोतीत्यर्थः सतां पतित्वे हेतुः ब्रह्मण्यदेव इति यत् गुणकृतं नाम तस्यैव यतो युक्तं समंजसं अत स्तद्धर्मप्रवर्तना | याम ५३
येव मा चरणमित्यर्थः ॥ १५ ॥ अभिभाष्य हर्षितावदागमन मित्यादि विप्रमुक्त्वा ॥ १६ ॥ ॥

भगवता ह्यस्माकं हितमनर्हमस्य मानस्तत्त्वं भावयन्नाह ॥ नैवेति ॥ सर्वमित्यन्वारेवमर्हणं नत्तमम गौरवात् ॥ तर्हि किं कथं कंसादिरिपुमेवीत्याह ॥ खलानां
रमस्त्वं नैवाद्भुतमिति ॥ कुतः जगतः स्थितिनिर्वाहरक्षणपालनेन तात्पर्यसहितस्य निःश्रेयसायतवायच्छेष्टावतार इति विघसम्यक् विग्रहः श्र
तः खलरमः साधुसम्मानं वधकमिति भावः ॥ १८ ॥ यदुक्तं श्रमो किंकरवाणीति तत्राह ॥ दृष्टमि ॥ भक्तजनतापापवर्गास्त्विपकिंच ॥ श्रुतिदुर्लभत

ना ॥ १६ ॥ अव ॥ नैवाद्भुतं त्वयि विभोऽखिललोकनाथे मैत्री जनेषु सकलेषु दमः खलानां ॥ निःश्रेयसाय हि जगत्स्थितिरक्षणा
भ्यां त्वेवावतार उरुगाय विराम सम्यक् ॥ १७ ॥ दृष्टं तवाङ्घ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृदि विचिंत्यमगाधबोधैः ॥ संसारकू
पपतितोत्तरणावलंबं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् ॥ १८ ॥ श्रु ॥ उ ॥ व ॥ ततोऽन्यदाविशद्गेहं कृष्णपत्न्याः स नारदः ॥
योगेश्वरेश्वरस्याङ्ग योगमायाविवित्सया ॥ १९ ॥ दीव्यंतमक्षैस्तत्रापि प्रियया चोद्धवेन च ॥ पूजितः परया भक्त्या प्रत्युत्थानासनादि
भिः ॥ २० ॥ पृष्टश्चाविदुषेवासौ कदायातो भवानिति ॥ क्रियते किं नु पूर्णानामपूर्णैरस्मदादिभिः ॥ २१ ॥ अथापि ब्रूहि नो ब्रह्मन् जन्मैतच्छो
भनं कुरु ॥ स तु विस्मित उत्थाय तूष्णीमन्यदगाद्गृहं ॥ २२ ॥ तत्राप्यचष्ट गोविंदं लालयंतं सुतान् शिशून् ॥ ततोऽन्यस्मिन् गृहेऽपश्यन्मज्जनाय
कृतोद्यमं ॥ २३ ॥ जुह्वंतं च वितानाग्नीन् यजंतं पंचभिर्मखैः ॥ भोजयंतं द्विजान्क्वापि भुंजानमवशेषितम् ॥ २४ ॥

यं ब्रह्मादिभिर्योगेश्वरैरपि हृदि विचिंत्यं किंच ॥ संसारकूपपतितानामुत्तरणाय अवलंबं आश्रयः एवंभूतं तवाङ्घ्रियुगलं मया दृष्टं अतः कृतकृत्योऽस्मि तथापि त्वन
स्मृतिर्यथा स्यात्तथानुगृहाण ॥ ततस्तस्याप्यत्रैव नित्यं चरामीति ॥ १८ ॥ अक्षैर्दीव्यंतमित्यादौ ददर्शेति तत्रान्वयः ॥ २० ॥ वितानाग्नीनाहवनीयादीनग्निहोत्रेण पंचभिर्महा

नारदपं० ४५

कालेन तत्समये विधिना उपपादनं प्रापणं विवाहमित्यर्थः कल्पयंतं विभूतिभिः विभवैः ॥ २२ ॥ प्रस्थापनं दुहितृजामात्रादीनां स्वगृहात्तद्गृहं प्रति नयनं उपानयनं तद्गृहात् स्वगृहं प्रत्यानयनं तैः सर्वैर्महोत्सवान् कल्पयंतं योगेश्वरेशस्य येषां प्रपत्यानां महोत्सवान् वीक्ष्य लोकाः सर्वे विसिस्मिरे विस्मयं चक्रुस्तथा भूतानुक

क्वापि संध्यामुपासीनं जपंतं ब्रह्म वाग्यतं ॥ एकत्र चासिचर्माभ्यां चरंतमसिवर्त्मसु ॥ २५ ॥ अश्वैर्गजै रथैः क्वापि विचरंतं गदाग्रजं ॥ क्वचिच्छयानं पर्यंके स्तूयमानं च वंदिभिः ॥ २६ ॥ मंत्रयंतं च कस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः ॥ जलक्रीडारतं क्वापि वारमुख्याबलावृतं ॥ २७ ॥ कुत्र चिद्द्विजमुख्येभ्यो ददतं गाः स्वलंकृताः ॥ इतिहासपुराणानि शृण्वंतं मंगलानि च ॥ २८ ॥ हसंतं हासकथया कदाचित् प्रियया गृहे ॥ क्वापि धर्मं सेवमानमर्थकामौ च कुत्र चित् ॥ २९ ॥ ध्यायंतमेकमात्मानं पुरुषं प्रकृतेः परं ॥ शुश्रूषंतं गुरून् क्वापि कामैर्भोगैः सपर्यया ॥ ३० ॥ कुर्वंतं विग्रहं कैश्चित् संधिं चान्यत्र केशवं ॥ कुत्रापि सह रामेण चिंतयंतं सतां शिवं ॥ ३१ ॥ पुत्राणां दुहितॄणां च काले विध्युपयापनं ॥ दारैर्वरैस्तत्सदृशैः कल्पयंतं विभूतिभिः ॥ ३२ ॥ प्रस्थापनोपानयनैरपत्यानां महोत्सवान् ॥ वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ॥ ३३ ॥ यजंतं सकलान् देवान् क्वापि क्रतुभिरूर्जितैः ॥ पूर्तयंतं क्वचिद्धर्मं कूपारामालयादिभिः ॥ ३४ ॥ चरंतं मृगयां क्वापि हयमारुह्य सैंधवं ॥ घ्नंतं ततः पशून्मेध्यान् परीतं यदुपुंगवैः ॥ ३५ ॥ अव्यक्तलिंगं प्रकृतिष्वंतःपुरगृहादिषु ॥ क्वचिच्चरंतं योगेशं तत्तद्भावबुभुत्सया ॥ ३६ ॥ अथोवाच हृषीकेशं नारदः प्रहसन्निव ॥ योगमायोदयं वीक्ष्य मानुषीमीयुषो गतिं ॥ ३७ ॥ विदाम योगमायास्ते दुर्दर्शा अपि मायिनां ॥ योगेश्वरात्मन्निर्भाता भवत्पादनिषेवया ॥ ३८ ॥

[illegible] ॥ २८

ल्पयंतं ॥ ३३ ॥ अव्यक्तलिंगं वेषान्तरेणाच्छन्नं ॥ ३६ ॥ हे योगेश्वर आत्मन् आत्मनि मम मनसि तव स्वरूपे वा निर्भाताः प्रतीतास्तव योगमायाः केवलं विदाम विघ्नः न त्वन्य

त्वन्मानुषनाट्येन तु त्वामपि भ्रान्तो मां प्रस्थापयेत्याह ॥ अनुजानीहीति ॥ ३९ ॥ तत्र स्वस्माल्लोकं शिक्षयन्निमं धर्ममास्थितः न तु तत्त्वतः हे पुत्र मा खिद मोहं माप्नुहीति ॥ ४० ॥ इति एवमनुगृहीतस्तमेकमेव संतं ददर्शेति ॥ ४१ ॥ मुहुर्मुहुर्दृष्ट्वा जातकौतुकोपि निर्विस्मितो भूदिति ॥ ४२ ॥ श्रद्धितः श्रद्धायुक्तः आ

अनुजानीहि मां देव लोकांस्ते यशसाप्लुतान् ॥ पर्यटामि तवोद्गायन् लीला भुवनपावनीः ॥ ३९ ॥ श्रीभगवानुवाच ॥ ब्रह्मन्धर्मस्य वक्ताहं कर्ता तदनुमोदिता ॥ तच्छिक्षयंल्लोकमिममास्थितः पुत्र मा खिदः ॥ ४० ॥ श्रीशुक उवाच ॥ इत्याचरंतं सद्धर्मान् पावनान्गृहमेधिनां तमेव सर्वगेहेषु संतमेकं ददर्श ह ॥ ४१ ॥ कृष्णस्यानंतवीर्यस्य योगमायामहोदयं मुहुर्दृष्ट्वा ऋषिरभूत् विस्मितो जातकौतुकः ॥ ४२ ॥ इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना सम्यक्सभाजितः प्रीतस्तमेवानुस्मरन्ययौ ॥ ४३ ॥ एवं मनुष्यपदवीमनुवर्त्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः ॥ रेमेंग षोडशसहस्रवरांगनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः ॥ ४४ ॥ यानीह विश्वविलयोद्भववृत्तिहेतुः कर्म्माण्यनन्यविषयाणि हरिश्चकार ॥ यस्त्वंग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥ ४५ ॥

॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनसप्ततितमोऽध्यायः

स्त्वादयस्तेन ॥ ४३ ॥ नारदः दृष्टां श्रीकृष्णलीलां निगमयति एवमिति ॥ अखिलस्य भवाय उद्भवाय गृहीताः शक्तयो नानामूर्तयो येन सः सव्रीडं यत्सौहृदं तेन निरीक्षणं हासश्च ताभ्यां जुष्टः ॥ ४४ ॥ अनन्यविषयाणि अन्यासाधारणानि अपवर्गमार्गे मोक्षप्रदे ॥ ४५ ॥ दशमे एकोनसप्ततितमः

२०३
५५

ततस्तामप्यतीतमेकृष्णस्याह्निककर्म्मणि । हृतनारदयोः कार्येकार्यमंत्रविचारणां ॥ १ जगन्मंगलचारित्रमाह्निकंजगरीशितुः । नारदेनकृचित्किंचिद्दृश्
मादयथाक्रमं ॥ इत्यर्थे धर्म्मकामेष्ठकृष्णेनप्रेदितात्मनेति ॥ यत्नतस्यश्रीकृष्णाह्निकस्याधिकारेश्यशरः उपट्टन्नायांन्नामत्रायांपतिभिः श्रीकृष्णेमाधवो
माधवस्यभार्याः ॥ १ वंदिनस्वश्रीकृष्णवोधयंतिसंतिवयांसिपक्षिणोरोरुवन् अतिशयेनाकूजत ॥ मंदारवनवायुभिर्गायत्स्वलिस्वनिद्राणिवयांसि ॥ १

श्रु ॥ उ ॥ व ॥ अथोषस्युपद्दन्नायांकूजयानकूजतोः शयनं ॥ गृहीतकंठ्यः पतिभिर्म्माधवोविरहातुराः ॥ १ वयांस्यहूरवन्कृष्णंवोधयं
तीववंदिनः ॥ गायत्स्वलिस्वनिद्राणिमंदारवनवायुभिः ॥ १ मूहूर्त्तेतद्वैदर्भीनाप्रुष्यदतिशोभनं ॥ परिरंभनविश्लेषात्प्रियवाहूंत
रगता ॥ ३ ब्राह्मेमुहूर्त्तउत्थायवार्युपस्पृश्यमाधवः ॥ २ ध्योयत्प्रसन्नकरणआत्मानंतमसःपरम् ॥ ४ एकंस्वयंज्योतिरनन्यमव्ययं
स्वसंस्थयानित्यनिरस्तकल्मषं ॥ व्रह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृति ॥ ५ अथाप्लुतोंभस्यमलेयथाविधि
क्रियाकलापंपरिधायवाससी ॥ चकारसंध्योपगमादिसत्तमोहुतानलोब्रह्मजजापवाग्यतः ॥ ६

वेदर्भीत्युपलक्षणंपरिरंभणाद्विश्लेषात्तंपर्यालोच्य ॥ ३ एकंअखंडतत्रहेतुः अनन्यंनिरुपाधिअतएवअव्ययंनित्यं ॥ स्वयंज्योतिष्ट्वेहेतुः नित्यंनिवृत्तंकल्मषं
अविद्यायस्मात्तंउपलक्षणमाह ॥ अस्येतिविश्वस्यलक्षितोभावस्थासौनिवृत्तिश्चभावः सत्तानिर्वृतिरानंदः तथाहिगुणक्षोभात्पूर्वंसत्तामात्रंयः सदेवसौ
म्येदमग्रआसीदित्यादिश्रुतेः सएवानंदश्चविज्ञानमानंदमित्यादिश्रुतेः तंसदानंदमित्यर्थः ॥ ५ आप्लुतः स्नातः संध्यायांउपगमउपासनंआदिर्यथाभवति
तथाक्रियाकलापंचकार ॥ कामवद्वाड्वयात्पूर्वमेवहुतानलः ब्रह्मगायत्रींजजाप ॥ ६

राम
५५

कलाः अंशान् देवान् ऋषीन् पितॄंश्च तर्पयित्वा ७ ऋषीनां प्रथमप्रसूतानां ८ बद्धमिति हिरण्येन परिष्कृतान् कलान् शुक्लदंतो मृगान् मष्णारे भरतो रा
छतं बद्धानि सप्त चेति सुत्येक्तानि सप्तशोन्नरशतं बद्धान्येकीकृत्य एकस्मै चतुर्दश लक्षत्वेन गणितानि । यथोक्तं भरत मे बाधिकृत्य नवम स्कंधे मृगान् शु
क्लदतः कृष्णान् स्ववर्णेन परिष्कृतान् अदात्कर्मणि मष्णारे ति युतानि चतुर्दशेति । ततश्च यं बद्धसंख्यास्तोकेन संगृह्यते । चतुर्दशानां लक्षाणां सप्त

उपस्थायार्केमुद्यंतं तर्पयित्वात्मनः कलाः देवान् ऋषीन् पितॄन् वृद्धान् विप्रान् अभ्यर्च्य आत्मवान् ७ धेनूनां रुक्मशृंगीणां साध्वीनां मौक्तिक
स्रजां पयस्विनीनां गृष्टीनां सवत्सानां सुवाससां ८ ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह । अलंकृतेभ्यो विप्रेभ्यो बद्धं बद्धं दिने
दिने ९ गोविप्रदेवतावृद्धगुरून् भूतानि सर्वशः नमस्कृत्यात्मसंभूतीर्मंगलानि समस्पृशत् १० आत्मानं भूषयामास नरलो
कविभूषणं । वासोभिर्भूषणैः स्वीयैर्दिव्यस्रग्गंधलेपनैः ११ अवेक्ष्याज्यं तथादर्शं गोवृषद्विजदेवताः कामांश्च सर्ववर्णानां पौरा
न्तःपुरचारिणां प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनंदत १२ संविभज्याग्रतो विप्रान् स्रक्ताम्बूलानुलेपनैः १३ सुहृदः प्रकृतीर्दा
रानुपायुंक्त ततः स्वयं तावत्सूत उपानीय स्यंदनं परमाद्भुतं सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्यावस्थितोऽग्रतः १४ गृहीत्वा पाणिना पाणी सार

थेस्तमथारुहत् सात्यकिउद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः
धिकशतं शाकं बद्धं बद्धं दशीत्यग्रमहस्त्राणि त्रयोदशेति दिने दिने प्रति गृहं चेति ९
आत्मसंभूतीः स्वविभूतीः मंगलानि कपलादिन् १० नरलोकस्य विभूषणं रूपमात्मानं स्वीयैः पीतांबरकौस्तुभादिभिः ११ कामानभिलषितानर्थान् १२
विप्रादीन् स्रगादिभिः संविभज्य तेभ्यस्तानि दत्वेत्यर्थः उपायुंक्त भोगार्थं संगृहीत १३ पाणीकृतेऽजलौ गृहीत्वा १५

सद्वीडप्रेमवीक्षितैः ए क्षितः स्त्रीणां स्थितस्त्राभिरेववीक्षितैः कुछ्राद्विसृष्टोनिरगादिति ॥६॥ एवं सर्वगृहेभ्यः पृथक्पृथग्विनिर्गत्यानंतरं कएवसन् स्वधर्म्मां प्रविशत ॥ यन्निविष्टानां ॥ यत्रप्रविष्टानां ॥७॥ नृसिंहैः नृश्रेष्ठैः ॥८॥ उपमंत्रिणः परिहासकाः पृथक् पृथक् स्वस्वसमुदायैः ॥९॥ मृदंगादयः प्रसिद्धाः रः शेषः

इक्षितोतः पुरस्त्रीणां सव्रीडप्रेमवीक्षितैः ॥ कुछ्राद्विसृष्टोनिरगात जातहासोविहस्मनः ॥६॥ स्वधर्म्मां व्योमभासं सर्वैर्वृष्णिभिः परिवारितः
प्राविशद्यन्निविष्टानां नसंत्यंगषडूर्म्मयः ॥७॥ तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा ककुभोवभासयन् ॥ वृतो नृसिंहैर्यदुभिर्यदूत्तमो
यथोडुराजो दिवि तारकागणैः ॥८॥ तत्रोपमंत्रिणो राजन् नानाहास्यरसैर्विभुं ॥ उपतस्थुर्नटाचार्यान् नर्तक्यस्तांडवैः पृथक् ॥९॥ मृदंगवीणा
मुरजवेणुतालदरस्वनैः ॥ ननृतुर्जगुस्तुष्टुवुश्च सूतमागधवंदिनः ॥१०॥ तत्राहुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः ॥ पूर्वेषां पुण्य
यशसां राज्ञां चाकथयन् कथाः ॥११॥ तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः ॥ विज्ञापितो भगवते प्रतीहारैः प्रवेशितः ॥१२॥ सनमस्कृत्य कृ
ष्णाय परेशाय कृतांजलिः ॥ राज्ञामावेदयद्दुःखं जरासंधनिरोधजं ॥१३॥ येच दिग्विजये तस्य संनतिं न ययुर्नृपाः ॥ प्रसह्य रुद्धास्तेनासन्नयुत
ते द्वे गिरिव्रजे ॥१४॥ कृष्णकृष्णाप्रमेयात्मन् प्रपन्नभयभंजनं ॥ वयं त्वा शरणं यामो भवभीताः पृथक्धियः ॥१५॥

सतारयत्सुष्टुवुः ॥१०॥ ब्राह्मणाः ब्रह्मवेदमाहुः मंत्रान् व्याचक्षते तदर्थः वादिनः वदनचतुराः ॥११॥ गिरिव्रजे तन्नगरके दुर्गेतिरुद्धाभ्यासन् तेषां दुःखमावेदयदिति ॥१२॥ यम
तत्त्वयः ॥१४॥ श्रीकृष्णकृष्णेतिषट् श्लोकी राज्ञां विज्ञप्तिः तत्र प्रथमेन शरणाश्रयणं ॥ त्रिभिर्भयानुवादः द्वाभ्यां प्रार्थनमिति ॥१५॥ ॥ ॥४॥

पृथक्दर्शिनो लोकस्य भवभयविद्रावणे तोन मति ॥ लोक इति विकर्मनिषिद्धकाम्यवत्तस्मिन्निरतः ततः स्वकुशले धर्मे भवतोर्चने ॥ त्वया उदिते उक्ते पंचरात्रेमा
मान्यतस्तु गीतासु ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति ॥ प्रमत्तोऽनवहितो यावदयं लोकः तावदेवा
स्य लोकस्य यः सद्यो जीविताशां छिनत्ति तस्मै अनिमिषाय कालात्मने नमः इति ॥ १६ ॥ एवं लोकस्य गतिः वृथत्वदृक्ताः अतोस्माकं कृतमेतत् दुः
खमापन्नमित्याशयेनाह लोक इति ॥ भो ईश जगतः इनः ईश्वरः त्वयि सद्रक्षणार्थं अवतीर्णेऽपि चेदस्माकं दुःखं स्यात् ॥ नहि किमन्यो कश्चिज्जगन्मेधा

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमि
षाय नमोऽस्तु तस्मै ॥ १६ ॥ लोके भवाञ्जगदिनः कलयावतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः ॥ कश्चित्त्वदीयमतियाति
निदेशमीश किं वा जनः स्वकृतमृच्छति तन्न विद्मः ॥ १७ ॥ स्वप्नायितं नृपसुखं परतन्त्रमीश शश्वद्भयेन मृतकेन धुरं वहामः ॥ हि
त्वा तदात्मनि सुखं त्वदनीहलभ्यं क्लिश्यामहेऽतिकृपणास्तव माययेह ॥ १८ ॥

रित्यहंतामपि लंघयति ॥ किं वा त्वया रक्ष्यमाणोऽपि जनः स्वकर्मजं दुःखं प्राप्नोत्येवेति न विद्मः ॥ नैवैतद्द्वयमपि युक्तमिति भावः ॥ १७ ॥ किं दुःखं तत्राहुः
स्वप्नायितमिति ॥ स्वप्नवज्जातं नृपसुखं नृपोचितं सुखं ॥ यतः परं तत्र विषयसाध्यं ॥ किं च शश्वद्भयं यस्मिन् तेन मृततुल्येन शरीरेण धुरं पुत्रदारादि
विता केवलं वहामः अहो कष्टं नः ये वयमितः पूर्वमेव निःकामाः सन्तः त्वां नाश्रिताः इत्याहुः त्वत्त्वतः अनीहैः निःकामैर्लभ्यं आत्मनि स्वतः सिद्धं सुखं
तद्धित्वा क्लिश्यामः ॥ १८ ॥

१०उ
५७

त्वन्मायाकृतं कर्म्मबंधं त्वमेव विनिवर्त्तयेति प्रार्थयंते तत्र इति ॥ विमुंक्ष्व ॥ विमोचय ॥ मगधो जरासंधः तत्संज्ञकात् कर्म्मपाशात् ॥ भवद्भिरेव विक्रम्य ततो निर्गम्य तामिति चेत्तत्राहुः य इति य एक एवायुतमतंगजानां वीर्यं बिभ्रत्सन् स्वभवने भूभुजो स्मान् रुरोध सिंहो मेषीरिव ॥ १९ ॥ किं च युष्मदीयाचयमित्यस्मान्न वि बाधत इत्याहुः यो वा इति ॥ हे उदात्तचक्र उद्यतसुदर्शन यो वै द्विनवकृत्वः अष्टादशवारान् त्वया सह मृधे वर्त्तमाने तत्र सप्तदशकृत्वः त्वया खलु भग्नः

तन्नो भवान् प्रणतशोकहरांघ्रियुग्मो बद्धान् विमुंक्ष्व मगधाह्वयकर्म्मपाशात् ॥ यो भूभुजोऽयुतमतंगजवीर्यमेको बिभ्रद्रुरोध भवने मृगराड् इवावीः ॥ १९ ॥ यो वै त्वया द्विनवकृत्व उदात्तचक्र भग्नो मृधे खलु भवंतमनंतवीर्यं ॥ जित्वा नृलोकनिरतं सकृदूढदर्प्पो युष्मत्प्रजा रुजति नो जित तद्विधेहि ॥ २० ॥ इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः ॥ प्रपन्नाः पादमूलं ते दीनानां शं विधीयतां ॥ २१ ॥ राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः ॥ बिभ्रत्पिंगजटाभारं प्रादुरासीद्यथा रविः ॥ २२ ॥ तं दृष्ट्वा भगवान् कृष्णः सर्वलोकेश्वरेश्वरः ॥ ववंद उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ॥ २३ ॥ सभाजयित्वा विधिवत्कृतासनपरिग्रहं ॥ बभाषे सूनृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिं ॥ २४ ॥ अपि स्विदद्य लोकानां त्रयाणामकुतोभयं ॥ ननु भूयान् भगवतो लोकान्पर्यटतो गुणः ॥ २५ ॥ न हि तेऽविदितं किंचिल्लोकेष्वीश्वरकर्त्तृषु ॥ अथ पृच्छामहे युष्मान्पांडवानां विकीर्षितम् ॥ २६

पराजितः पश्चादनंतवीर्यमपि त्वां लोके निरतं नरशरीरविनोदं भगवंतं सकृज्जित्वा ऊढदर्पः प्राप्तगर्वः युष्मत्प्रजा नः रुजति पीडयति ॥ तत तत्र यद्युक्तं तद्विधेहीत्यर्थः ॥ २० ॥ इत्यत्राह ॥ इतीति ॥ २१ ॥ भूयान्महान् गुणो लाभो यमस्माकं यत्सर्व्वलोकदृष्टात्तज्ज्ञानमिति ॥ २५ ॥ ईश्वरः कर्त्ता येषां तेषु ॥ २६ ॥ एवमा

राम
५७

एवमविदुषेव सर्वज्ञेन जरासंधवधार्थमेव पांडवचिकीर्षितं कृष्णेन नारदो मायेयमिति ज्ञात्वाह दृष्टा इति त्रिभिः विश्वसृजश्च ब्रह्मणोपि मायिनो मोह
कस्य ते स्वशक्तिभिर्विद्यादिभिर्भूतेष्वंतर्यामितया चरतो वर्त्तमानस्य यद्यहं भूतेषु वर्त्ते तर्हि भूतानि मां किं न पश्यंतीत्यत आह वह्नेरिव छन्नरुच इति स्वश
क्तिभिरेव छन्नात्मरुक्प्रकाशस्य अतस्त्वेवं प्रश्नादि न मेद्भुतम् ॥ ३७ ॥ इदं जगत्कथंभूतं अतः स्वेव प्रपंचमायया विद्यमानात्मतयावभासते तेन जगत्स्र

ना रद उ वा च ॥ दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः ॥ भूतेषु भूमंश्चरतः स्वशक्तिभिर्वह्नेरिव छन्नरुचो
न मेद्भुतं ॥ ३७ ॥ तवेहितं कोर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः ॥ यद्विद्यमानात्मतयावभासते तस्मै नमस्ते स्ववि
लक्षणात्मने ॥ ३८ ॥ जीवस्य यः संसरतो विमोक्षणं न जानतो नर्थवहाच्छरीरतः ॥ लीलावतारैः स्वयशः प्रदीपकं प्राज्वाल
यत्त्वा तमहं प्रपद्ये ॥ ३९ ॥ अथाप्याश्रावये ब्रह्मन् नरलोकविडंबनं ॥ राज्ञः पैतृष्वस्रेयस्य भक्तस्य च चिकीर्षितं ॥ ४० ॥

जतः किंतु केवलं ते तुभ्यं नमनमेव शक्यमित्याह तस्मै नमस्ते इति अतः स्वेन रूपेण सर्वतो विलक्षणात्मने अचिंत्यायेत्यर्थः ॥ ३८ ॥ नन्वेवंभूतस्य किं मा
यावेष्टितैरित्यत आह जीवस्येति अविद्यातमसावृतत्वेन अनर्थप्रापकात् शरीरात् संसरतः तेनैव तमसा तस्माच्छरीराद्विमोक्षोपायमजानतः प्राज्वा
लयत् प्रदीपितवान् ॥ तं त्वा यशःश्रवणादिभिर्जीवस्य मोक्षार्थमित्यर्थः ॥ ३९ ॥ आश्रावये आश्रावयिष्यामि ॥ नरलोकविडंबनं ब्रह्म त्वा ब्रह्मत्रिति पाठेपि हे ब्र
ह्मन् परमात्मन् नरलोकानुकारिणं त्वा आश्रावयिष्यामीति ॥ ४० ॥

१०
५८

नचाज्ञैवात्तुमोदनं कार्यं किं तु तत्रागंतव्यमित्याशयेनाह ॥ तस्मिन्निति ॥ ४१ ॥ तत्रागतास्त्वसर्वे त्वद्दर्शनादिनाश्रुता भविष्यंतीत्याह ॥ श्रवणादिति ॥ श्रुतेवसा
यिनः श्वपचा अपि ब्रह्ममयस्य ब्रह्मघनस्य ते ॥ ईक्षाया अभिमर्शनं च तैर्येषां ते ॥ ४२ ॥ कैमुत्यमतिशयेनाह ॥ यस्येति ॥ हे भुवनानां मंगलं रूप ॥ दिवि पातालेषु
मौ च ॥ प्रथितं यस्य यशो विश्वं पुनाति कथं प्रथितं ॥ दिवि वितानेन दिवि भवनानां वितानवदलंकाराणां तथा चरणात्प्रथितं पुनाति ॥ कथं तत्प्रथितं दिवि मंदा

यक्ष्यति त्वां मखेंद्रेण राजसूयेन पांडवः ॥ पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोदताम् ॥ ४१ ॥ तस्मिन्देवक्रतुवरे भवंतं वै सुरादयः ॥ दि
दृक्षवः समेष्यंति राजानश्च यशस्विनः ॥ ४२ ॥ श्रवणात्कीर्तनाद्ध्यानात्पूयंतेंतेवसायिनः ॥ तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ॥ ४३ ॥
यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल दिग्वितानं ॥ मंदाकिनीति दिवि भोगवतीति चाधो गंगेति चेह चरणांबु पु
नाति विश्वं ॥ ४४ ॥ श्रीशुक उवाच ॥ तत्रेतेष्वात्मपक्षेष्वगृणत्सु विजिगीषया ॥ वाचः पेशैः स्मयन्भृत्यमुद्धवं प्राह केशवः ॥ ४५ ॥ श्रीभगवानु
वाच ॥ त्वं हि नः परमं चक्षुः सुहृन्मंत्रार्थतत्त्ववित् ॥ तथात्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत् ॥ ४६ ॥ इत्युपामंत्रितो भर्त्रा सर्वज्ञेनापि
मुग्धवत् ॥ निदेशं शिरसाधाय उद्धवः प्रत्यभाषत ॥ ४७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे भगवद्याने सप्ततितमोऽध्यायः ॥

किनीति स्वर्धस्त्वभोगवतीति इह च भूम्यौ गंगेति तत्सतवागमनात् सर्वं मंगलं पवित्रं च भविष्यतीति भावः ॥ ४४ ॥ तत्रैवं नारदेनोक्ते तेषु वर्त्तमानेष्वात्मीयप
क्षेषु यादवेषु जरासंधस्य जिगीषया अगृणत्सु ॥ अमन्यमानेषु वाचः पेशैः पेशलवाग्भिरित्यर्थः ॥ ४५ ॥ चक्षुर्हेतुः मंत्रार्थानां मंत्रसाध्यानां तत्त्ववित् ॥
पाकवेदिता ॥ ४७ ॥ दशमे सप्ततितमः ॥

राम
५८

अथैकस्मिन्दिने तस्मिंस्तु उद्विग्नस्य मनस्ततः ॥ इदं प्रष्टुं गते कृष्णे पार्थानां परमोत्सवः ॥ १ ॥ राजसूयमपि संकृत्वा भीमदुर्योधनादिभिः ॥ कलिमुत्पाद्य तद्धाय पृथुमार
महारणे युतः ॥ देवर्षिस्मृते तं राजसूयागमनं सभ्यानाममतं राजरक्षाकं ह्यस्मतं मयं ॥ १ ॥ पश्चात्तः यागं करिष्यतः पैतृस्वश्रेयस्य पितृस्वसुः पत्रस्य समाविद्मया
हार्यं तत्र कार्यं तत्र शरणार्थिनां त्वारक्षा च कार्या ॥ २ ॥ तत्र प्रथमं राजसूयार्थं गंतव्यं ॥ ततो राजरक्षाकर्तव्येत्याह ॥ यष्टव्यमित्यष्टभिः ॥ अतः दिग्विजय

शुक उवाच ॥ इत्युदीरितमाकर्ण्य देवर्षिस्तु बोधवीत् ॥ सभ्यानां मतमाज्ञाय कृत्स्नस्य च महीपतिः ॥ १ ॥ उद्धव उवाच ॥ यदुक्तमृषिणा देव
माविश्वं प्रत्युत त्वया ॥ कार्यं पैतृस्वश्रेयस्य रक्षा च शरणार्थिनां ॥ २ ॥ यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो ॥ अतो जरासुतजये उ
भयार्थो मतो मम ॥ ३ ॥ अस्माकं च महानर्थो ह्येतेनैव भविष्यति ॥ यशस्तव च गोविंद राज्ञो बद्धांश्चि मुंचतः ॥ ४ ॥ स वै दुर्विषहो राजा
नागायुतसमो बले ॥ बलिनामपि चान्येषां भीमं समं बलं विना ॥ ५ ॥ द्वैरथे स तु जेतव्यो मा शताक्षौहिणीयुतः ॥ ब्रह्मण्योभ्यर्थितो विप्रै
र्न प्रत्याख्याति कर्हिचित् ॥ ६ ॥ ब्रह्मवेषधरो गत्वा तं भिक्षेत वृकोदरः ॥ हनिष्यति न संदेहो द्वैरथे तव संनिधौ ॥ ७ ॥

हेतोः उभयार्थः शरणागतरक्षार्थश्च ॥ २ ॥ अस्तु तत्र कतरो वा सद्य एव जरासंधं हंतुं मिह तो यादवान् नालमित्याह ॥ स वा इति ॥ अन्येषां ततो बलिनामपि ॥ यद्यपि समं
बलमेव भीमस्तथापि तं विना भीमादेव तस्य मृत्युर्विहित इति भावः ॥ ५ ॥ न तु त्वं बलसाम्येपि ॥ सेनाबलं तस्याधिकमिति चेत्तत्राह ॥ द्वैरथ इति ॥ द्वंद्वयुद्धे
शतेनाक्षौहिणीभिर्युतो मा न जेतव्य इत्यर्थः ॥ न च भीमो द्वैरथं नाम वयुद्धाय निर्युंजीत कुतस्तेन द्वैरथमिति तत्राह ॥ ब्रह्मण्य इति न प्रत्याख्याति न निराकरोति ॥ ६ ॥
भिक्षेत द्वंद्वयुद्धं यावेत ॥ तथापि समबलत्वात्तस्य मेव स्यादित्यत्राह ॥ तव संनिधाविति ॥ ७ ॥

नन्वस्तु किं विलम्बेनेतो मम संनिधानात्किं स्यादत आह ॥ निमित्तमिति ॥ अयमर्थः यथा तवारूपस्य कालात्मनो विश्वसर्गे निमित्तं केवलं हिरण्यगर्भ
स्तथा संहारे च शर्वस्तथा त्वमेव संनिधिमात्रेण हंता भीमो निमित्तमात्रमिति ॥ ७ ॥ अतोऽनेनोपायेन त्वया स्वराज्ञां हितं कार्यमित्याशयेनाह ॥ गायंतीति ॥ जरा
संधधृतानां राज्ञां देव्यः पत्न्यः ते विशदं कर्म स्वगृहेषु बालकलालनादौ गायंति ॥ किं तत्कर्म स्वशत्रोर्जरासंधस्य वधं आत्मनां पतीनां विमोक्षणं च ॥
वत्समारोहीः श्रीकृष्ण एवं करिष्यतीति अत्र दृष्टांतः गोप्यश्चेत्यादयः यथा गोप्यः शंखचूडवधं स्वमोक्षं च गायंति ॥ अवतारान्तरगतं कुंजरपतेर्नक्रा

निमित्तं परमीशस्य विश्वसर्गनिरोधयोः ॥ हिरण्यगर्भः शर्वश्च कालस्यारूपिणस्तव ॥ ७ ॥ गायंति ते विशदकर्म गृहेषु देव्यो राज्ञां
स्वशत्रुवधमात्मविमोक्षणं च ॥ गोप्यश्च कुंजरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं च ॥ ८ ॥ जरासंधवधः कृष्ण
भूर्यर्थायोपकल्पते ॥ प्रायः पाकविपाकेन तव चाभिमतः क्रतुः ॥ ९ ॥ इत्युद्धववचो राजन्सर्वतो भद्रमच्युतं ॥ देवर्षिर्यदुवृद्धाश्च कृ
ष्णश्च प्रत्यपूजयन् ॥ ११ ॥

त ॥ जनकात्मजायाः सीतायाः रावणात् ॥ पित्रोश्च कंसगृहान्मोक्षं ॥ अत एवंभूतानां तासां कृपया त्वया तथैव कर्तव्यमिति भावः ॥
॥ ८ ॥ किंच जरासंधवध इति ॥ भूर्यर्थायेति ॥ ततः शिशुपालवधादयोऽपि हि स्वसाध्या भविष्यंतीति भावः ॥ एतच्च सर्वं भविष्यत्येवेति संभावयन्नाह ॥ प्राय
इति ॥ पच्यत इति पाकः कर्म तस्य विपाकः फलं तेन राज्ञामुग्रविपाकेन ॥ पाठांतरे जरासंधस्य पापविपाकेनेति ॥ तेनायं क्रतुस्तवाभिमतः नत्वा राम
तेत्वपि सिद्धो भविष्यतीत्यर्थः ॥ १० ॥ अच्युतं उपपत्त्याढ्यं ॥ यदुवृद्धा इति वरत्रे निरुद्धा रयस्तेनापूजयन्निति सूचितं ॥ ११ ॥

अनुज्ञाप्यानुज्ञाप्य गुरून्वसुदेवादीन् ॥ १२ ॥ अवरोधान् दारान्निर्गमय्य प्रयाणं कारयित्वा ॥ १३ ॥ भटाः पदातयः सादिनः अश्वारोहाः रथ्यादिनाय
कैः करालयातीभया ॥ आत्मीयेन यापरिवृतो निराक्रमत निरगात् ॥ ततः प्रकाशात मृदंगादिभिर्वाद्यैः प्रघोषेणाघोषितायाः ककुभः ॥ १४ ॥ नृवाजीति

अथादिशत्प्रयाणाय भगवान्देवकीसुतः ॥ भृत्यान्दारुकजैत्रादीननुज्ञाप्य गुरून्विभुः ॥ १२ ॥ निर्गमय्यावरोधान्स्वान्ससुतान्स
परिच्छदान् ॥ संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन् ॥ सूतोपनीतं स्वरथमारुहद्गरुडध्वजः ॥ १३ ॥ ततो रथद्विपभटसादिनायकैः करा
लया परिवृत आत्मसेनया ॥ मृदंगभेर्यानकशंखगोमुखैः प्रघोषघोषितककुभो निराक्रमत ॥ १४ ॥ नृवाजिकांचनशिबिकाभिरच्युतं
सहात्मजाः पतिमनु सुव्रता ययुः ॥ वरांबराभरणविलेपनस्रजः सुसंवृता नृभिरसिचर्मपाणिभिः ॥ १५ ॥ नरोष्ट्रगोमहिषखराश्वतर्य
नःकरेणुभिः परिजनवारयोषितः ॥ स्वलंकृताः कटकुटिकंबलांबराद्युपस्करा ययुरधियुज्य सर्वतः ॥ १६ ॥ बलं बृहद्ध्वजपटछत्र
चामरैर्वरायुधाभरणकिरीटवर्मभिः ॥ दिवांशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः ॥ १७ ॥

नरयानैः अश्वैः कांचनशिबिकाभिश्च अच्युतं पतिमनुययुः सुव्रताः वराण्यंबरादीनि यासां ताः ॥ १५ ॥ नरोष्ट्रादिभिर्यानैः अश्वतरी गर्दभ्यामश्वाज्जाता अनः
शकटं करेणुः हस्तिनी ॥ परिजनयोषितो वारयोषितश्च कटकुटयः उशीरादितृणानिर्मितगृहाः कंबलांबरादयश्चोपस्कराः कुड्यादिरूपा यासां ताः ॥ अधियु
ज्य बलिवर्दादिषु तानुपस्कारान्दृढं सन्नह्य ॥ १६ ॥ रवेरंशुभिश्च तद्बलं दिवा बभौ कथंभूतं तुमुलरवं यथार्णवो जलरवं क्षुभितैस्तिमिंगिलैः ऊर्मिभिश्च ॥ १७ ॥

मुनिर्नारदो विहायसा ययाविति शेषः ॥१८॥ मा भैष्टेति वक्तव्यं राज्ञामित्यभिप्रायेण ॥१९॥ प्रत्यैक्षन्त प्रत्यैक्षन्त कृतायतत्यस्मात्तत्पुरुषर्षभाः ॥२०॥ आनर्तादयो मार्गस्थदेशाः
तीर्त्वा अतिक्रम्य विनशनं कुरुक्षेत्रं अतीयाय अतिक्रम्य ययौ ॥२१॥ शक्रप्रस्थं इंद्रप्रस्थं ॥२२॥ प्राणा इंद्रियाणि प्राणं मुख्यं प्राणमिव ॥२४॥ सस्वजे परिरेभे

अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि विदधद्विहायसा । निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदसंदर्शननिर्वृतेंद्रियः ॥१८॥
राजदूतमुवाचेदं भगवान्प्रीणयन्गिरा । मा भैष्ट दूत भद्रं वो घातयिष्यामि मागधं ॥१९॥ इत्युक्तः प्रस्थितो दूतो यथावदवदन्नृपान् । तेपि सं
दर्शनं शौरेः प्रत्यैक्षन्यत्मुमुक्षवः ॥२०॥ आनर्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः । गिरीन्नदीरतीयाय पुरग्रामव्रजाकरान् ॥२१॥ ततो दृष
द्वतीं तीर्त्वा मुकुंदोथ सरस्वतीं । पंचालानथ मत्स्यांश्च शक्रप्रस्थमथागमत् ॥२२॥ तमुपागतमाकर्ण्य प्रीतो दुर्दर्शनं नृणां । अजातशत्रुर्नि
रगात्सोपाध्यायः सुहृद्वृतः ॥२३॥ गीतवादित्रघोषेण ब्रह्मघोषेण भूयसा । अभ्ययात्स हृषीकेशं प्राणाः प्राणमिवादृतः ॥२४॥ दृष्ट्वा विक्लि
न्नहृदयः कृष्णं स्नेहेन पांडवः । चिराद्दृष्टं प्रियतमं सस्वजेथ पुनः पुनः ॥२५॥ दोर्भ्यां परिष्वज्य रमामलालयं मुकुंदगात्रं नृपतिर्हताशुभः ।
लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥२६॥ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मयन्प्रेमजवाकुलेंद्रियः । यमौ कि
रीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेच्युतं ॥२७॥ अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः । ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथार्हतः ॥२८॥

॥२५॥ रमायाः अमलं निर्दोषमालयं ॥ विस्मृतो लोकविभ्रमो लोकव्यवहारो येन सः ॥२६॥ अर्जुनेन समवयस्त्वात्परिष्वक्त एव केवलं पादेन नमस्कार्यत्वेनर्जुनः कृष्णेन
यमाभ्यां धृतरतिभावः ॥ यमाभ्यां त्वभिवादितश्चेति ॥२८॥

राम
ह.

विचित्रध्वजादिभिर्विराजमानं ॥२२॥ प्रतिसमन्तादुद्दीप्तैर्दीपैर्वलिभिः पुष्पादिघकैरैश्च जस्रं ॥ जालेभ्यो गवाक्षेभ्यो निर्गतैर्धूपैः रुचिरं ॥ विलसंतः पताकाय
स्मिन्नूतनं ॥ मूर्द्धन्याः मूर्द्धिभवाः हेमकलशा येषां तैः रजतमयानि रूप्यमयानि उत्तुंगानि स्थूलानि शृंगाणि कलशाधस्तले भूमिका येषां तैर्भवनैर्जुष्टं

मानितो मानयामास कुरुसृंजयकेकयान् ॥ सूतमागधगंधर्ववंदिनश्चोपमंत्रिणः ॥२७॥ मृदंगशंखपटहवीणापणवगोमुखैः
ब्राह्मणाश्चारविंदाक्षं तुष्टुवुर्ननृतुर्जगुः ॥३०॥ एवं सुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः ॥ संस्तूयमानो भगवान् विवेशालंकृतं पुरं
पंथानं सिक्तवल्मिकारिणां मदगंधतोयैः विचित्रध्वजैः कनकतोरणपूर्णकुंभैः ॥ मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्च
विराजमानं ॥३१॥ उद्दीप्तदीपवलिभिः प्रतिसद्मजालनिर्यातधूपरुचिरं विलसत्पताकं ॥ मूर्द्धन्यहेमकलशैरजतोरुशृंगैर्जुष्टं ददर्श भ
वनैः कुरुराजधाम ॥३३॥ प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः ॥ सद्यो विसृज्य गृहकर्मपतींश्च तल्पे द्र
ष्टुं ययुर्युवतयः स्म नरेंद्रमार्गे ॥३४॥ तस्मिन् सुसंकुलइभाश्वरथद्विपद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः ॥ नार्यो विकीर्य कुसुमैर्मन
सोपगुह्य सुस्वागतं विदधुरुत्स्मयवीक्षितेन ॥३५॥ ऊचुः स्त्रियः पथि निरीक्ष्य मुकुंदपत्नीस्तारा यथोडुपसहाः किमकारि भूमिः ॥ यच्चक्षु
षा पुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ॥३६॥ तत्र तत्रोपसंगम्य पौरा मंगलपाणयः ॥ चक्रुः सपर्यां कृष्णाय श्रेणीमु

कुरुराजस्य धाम पुरं ददर्श ॥३३॥ नराणां लोचनानि तेषां पानस्य पात्रं वा... पात्रं विषयं किंपुनर्नारीणामित्यर्थः ॥३४॥ सुष्टु स्वाग ख्या हतेनसः ॥३७॥
तत्तस्य आशिकं प्रियं उत्स्मयवीक्षितेनैव विदधुः ॥३५॥ उडुपसहाः चंद्रसहचरा इत्यर्थः अमूभिः किं पुण्यमकारि ॥३६॥ श्रेणयः एकशिल्पोपजीविनां संघाः तेषु
मुख्याश्च ॥३७॥

२०७
दी

अभ्युपेतः अभिगमनेन सत्कृतः ॥३८॥ सस्नुषा द्रौपदीसहिता ॥३९॥ कृत्यप्रकारविशेषं प्रमोदेनोपहृतो ऽभिभूतः ॥४०॥ गुरुस्त्रीणां च कृष्णया द्रौपद्या भगिन्या सुभद्रया ॥४१॥ आनर्च अर्चितवती ॥४२॥ अन्याश्च याः कृष्णपत्न्यः आगताः ताश्चापि ॥४३॥ प्रत्यहं नवं नवं यथा भवति तथा सुखं निवासयामास ॥४४॥

अतःऽरजनैः प्रीत्या उत्कंठोत्फुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतः प्राविशद्राजमंदिरं ॥३८॥ पृथा विलोक्य भ्रात्रेयं कृष्णं त्रिभुवनेश्वरं ॥ प्रीतात्मोत्थाय पर्यंकात्सस्नुषा परिषस्वजे ॥३९॥ गोविंदं गृहमानीय देवदेवेशमादृतः ॥ पूजायां नाविदत्कृत्यं प्रमोदोपहतो नृपः ॥४०॥ पितृष्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेऽभिवादनं ॥ स्वयं च कृष्णया राजन्भगिन्या चाभिवादितः ॥४१॥ श्वश्र्वा संचोदिता कृष्णा कृष्णपत्नीश्च सर्वशः ॥ आनर्च रुक्मिणीं सत्यां भद्रां जांबवतीं तथा ॥४२॥ कालिंदीं मित्रविंदां च शैब्यां नाग्नजितीं सतीं ॥ अन्याश्चाभ्यागता यास्तु वासःस्रङ्मंडनादिभिः ॥४३॥ सुखं निवासयामास धर्मराजो जनार्दनं ॥ ससैन्यं सानुगामात्यं सभार्यं च नवं नवं ॥४४॥ तर्पयित्वा खांडवेन वह्निं फाल्गुनसंयुतं ॥ मोचयित्वा मयं येन राज्ञे दिव्या सभा कृता ॥४५॥ उवास कतिचिन्मासान्राज्ञः प्रियचिकीर्षया ॥ विहरन्रथमारुह्य फाल्गुनेन भटैर्वृतः ॥४६॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकसप्ततितमोऽध्यायः

कथंभूतः यः प्रेमाणानित्यफाल्गुनेन संयुतः ॥ अतएव तस्य सहायेन सता येन खांडवेन वह्निं तर्पयित्वा तत्र च मयं मोचयित्वा तं मयं प्रयुज्य युधिष्ठिराय दिव्या सभा कृता तं श्रीजनार्दनं ॥ अनेन राज्ञः कृष्णोपकारस्मरणादिव्यात्वातम मायायथा मनोरथ सर्वकामसंपादनं च दर्शितं ॥ इति दशमे एकसप्ततितमः

राम
दी

ततो हि सम्यगिति तमेराज्ञाकार्ये निवेदिते ॥ उजयं मागधं तुह्या पीमेनावातप दहरिः ॥ आस्थितः आसनमिति शेषः ॥ १ ॥ शृण्वतामेवेति ॥ यत्र समन्नः कल्मः
करोति न तदन्यः कश्चिदपि कर्तुं समर्थ इति निश्चित्य सर्वाननवताननादृत्य कल्मषमुवाचेत्यर्थः ॥ आभाष्य भो भो कृष्ण भक्तवत्सलेत्येवं संबोध्य ॥ २ ॥ विभूतीः
अंशान् ॥ ३ ॥ एष चक्रवर्तिनां मनोरथः ॥ कथं त्वया क्रियत इति चेत् ॥ अत आह ॥ त्वत्पादुके इति ॥ परिचर्य वरांतीति ॥ यच्छद्व्यवधानमार्षं यत्परिचर्यां तिरे

श्रुक उवाच ॥ एकरात्रं स मामध्ये आस्थितो मुनिभिर्वृतः ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः आर्हमिश्च युधिष्ठिरः ॥ १ ॥ आचार्यैः कुलवृ
द्धैश्च ज्ञातिसंबंधिबांधवैः ॥ शृण्वतामेव चैतेषां आभाष्येदमुवाच ह ॥ २ ॥ युधिष्ठिर उवाच ॥ क्रतुराजेन गोविंद राजसूयेन पा
वनीः ॥ यक्ष्ये विभूतीर्भवतस्तत्संपादय नः प्रभो ॥ ३ ॥ त्वत्पादुके अविरतं परिचर्य वरांति ध्यायंत्यभद्रनशने शुचयो गृणंति ॥ विं
दंति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ॥ ४ ॥ तद्देवदेव भवतश्चरणारविंदसेवानुभावमिह पश्य
तु लोक एषः ॥ ये त्वां भजंति न भजंत्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसृंजयानां ॥ ५ ॥

हेन ॥ ध्यायंति मनसा ॥ अभद्रस्य नशने नाशके गृणंति वाचा ते भवस्यापवर्गं मोक्षं विंदंति ॥ यद्याशासते तर्हि आशिषोपि त एव विंदंति ॥ नान्ये चक्र
वर्तिनोपि ॥ ४ ॥ भगवतो भक्तपक्षपातमाविष्कारयन्नाह ॥ तद्देवदेवेति ॥ तत्र तस्मात्पश्यतु साक्षात् ॥ एवं निश्चितेपि येऽकस्मादिद्विधाना ॥ केचित्कुरु
सृंजया भगवद्भक्तिं न वक्तुमन्यंते तेषां मोहनिवृत्तये ये त्वां भजंति ये इत्वा न भजंति ॥ तेषामुभयेषां निष्ठां स्थितिं प्रदर्शय ॥ ५ ॥

ननु रागादिरहितेन मयि कथमिदं वैषम्यं स्यादत आह तेतीति त्वं पर इति भेदमति त्वं न स्यादेव कृतः ब्रह्मणो निरुपाधेः किंच सर्वस्यात्मनः अतः समदृशः
किंच स्वेच्छया वातन्वतेः अतो रागाद्यभावादिति भावः तथापि मम सेवमानानामेव तत्स्यादीनान्येषां तत्रापि सेवानुरूपफलदः फले न त्वत्र विपर्ययोऽन्य
थाभावः यथा कल्पद्रुमस्य रागादिराहित्येऽपि सेवकेष्वेव फलजननं कर्तृत्वं नान्येषु ॥ ६ ॥ सत्यं सद्भक्तानामेव केवल्यादि नान्येषामित्यत्र मोदमानस्त्वमाह
सम्यगिति ॥ राजकशीनेति सेवा धर्मराजविजयशक्तिं संचारयति भूमौ भविष्यति सर्वलोकव्याप्तो भविष्यतीत्यर्थः ॥ ७ ॥ ॥ ८ ॥ किमेवं मया

ननु ब्रह्मणः स्वपरभेदमतिस्त्वस्यात सर्वात्मनः समदृशः स्वच्छस्वानुभूतेः संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमु
दयो न विपर्ययोऽत्र ॥ ६ ॥ श्रीभगवानुवाच ॥ सम्यग्व्यवसिता राजन् भवता शत्रुकर्शन ॥ कल्याणी येन ते कीर्तिर्लोकाननुभ
विष्यति ॥ ७ ॥ ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो ॥ सर्वेषामपि भूतानां संप्रीतिः क्रतुराडयम् ॥ ८ ॥ विजित्य नृपतीन्सर्वा
न्कृत्वा च जगतीं वशे ॥ संभृत्य सर्वसंभारानाहरस्व महाक्रतुम् ॥ ९ ॥ एते ते भ्रातरो राजँल्लोकपालांशसंभवाः ॥ जितो
स्म्यात्मवता तेऽहं दुर्जयो योऽकृतात्मभिः ॥ १० ॥ न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया ॥ विभूतिभिर्वाभिभवेद्देवोऽपि किमु पार्थिवः

न्येन वा संपादनीयं तत्र च अत्र कश्च वा राजसूय इत्याह विजित्येति जगतीं सर्वां पृथ्वीं संभारान् यज्ञोपस्करान् संभृत्य संपाद्य आहर स्व प्राहर अनुतिष्ठेत्य
र्थः ॥ ९ ॥ ननु नृपतिविजयादिकं यथा कथं स्यादित्यत आह एत इति किंच आत्मवजितेन्द्रियेण त्वया अहं च जितोऽस्मि अकृतात्मभिः अजितेन्द्रियैः ॥ १० ॥ अ
स्तां तावदेवं भूतस्य तव परेरभिभवशंका अकिंचनमपि मत्परं कोऽपि नाभिभवितुं प्रभवतीत्याह न कश्चिदिति तेजसा प्रभावेन विभूतिभिः सैन्यादिसाम
ग्रीभिः ॥ ११ ॥

अयुङ्क्त नियुक्तवान् ॥ विष्णोस्तेजसा उपबृंहितान् संवर्द्धितान् ॥ तेजोपबृंहितानिति संधिरार्षः ॥१२॥ नकुलादीनां मत्स्यादिभिः सहायैर्यथासंख्येन संबंधः ॥१३॥ कथंभूताय यक्ष्यते यागं करिष्यते ॥१४॥ आद्यो हरिः श्रीकृष्णः ॥१५॥ ब्रह्मलिंगधराः ब्राह्मणलिंगधारिणः ॥ यतः यत्र बृहद्रथसुतो जरासंधः ॥१६॥ गृहेषु वर्त्तमानं समाचेरत सम्यक् अयाचंतेत्यर्थः ॥१७॥ न विद्धि कामयामह इति विशेषो निर्दिष्टः पतां ॥ अन्यथा याचकस्य चारदर्वियोगाद्दुःसहः सक

शुक उवाच ॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखांबुजः ॥ भ्रातॄन्दिग्विजयेऽयुङ्क्त विष्णुतेजोपबृंहितान् ॥१२॥ सहदेवं दक्षिणस्यामादिशत्सहसृंजयैः ॥ दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनम् ॥१३॥ प्राच्यां वृकोदरं मत्स्यैः केकयैः सहमद्रकैः ॥ ते विजित्य नृपान्वीरा आजह्रुर्दिग्भ्य ओजसा ॥१४॥ अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥ श्रुत्वाजितं जरासंधं नृपतेर्ध्यायतो हरिः ॥१५॥ आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥ भीमसेनोर्ज्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः ॥१६॥ जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः ॥ ते गत्वातिथ्यवेलायां गृहेषु गृहमेधिनम् ॥१७॥ ब्रह्मण्यं समयाचेरन्राजन्या ब्रह्मलिंगिनः ॥ राजन्विद्ध्यतिथीन्प्राप्तानर्थिनो दूरमागतान् ॥१८॥ तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥ किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः ॥ किं न देयं वदान्यानां कः परः समदर्शिनां ॥१९॥

थं देयः तथा राजमंडनं किरीटादौ देयं यततत मिक्रम्यः कथं देयं तथातिरस्मिन् त्वामरणादिरूपत्रारिपोपं कथं परस्मै देयमिति चेत्तत्राहुः किं दुर्मर्षमित्यादि ॥ अत्र दृष्टांतत्वेनार्थांतरमाहुः किमकार्यमिति ॥ यथा असाधूनामकार्यं नास्ति तथा तितिक्षूणां दुर्मर्षं दुःसहं नास्ति ॥ वदान्यानामदेयं नास्ति ॥ समदर्शिनां परश्च नास्ति ॥ अतः किं विशेषनिर्देशेनेत्यर्थः ॥१९॥

२०३

६२

किंच ॥ अर्थिने धीरेण प्रकृष्टा लारिवत्स्वा प्राणा अपि नवंचनीयाः स्वाशयेनाडुः योः नित्येनेति नाविनोति न संपारयति ॥ सवाच्यः सनिंद्यः ॥ १० ॥ विश्वामित्रस्या न्नपाणय हरिश्चंद्रो भार्यात्मजादि सर्वं विक्रीय स्वयं चांडालतां प्राप्तः अनिर्विण्णः सत्ययोधावाप्ति सिद्धेनैः स्वर्गं गतः ॥ रंतिदेवः सकुटुंबोऽष्टचत्वारि रद्दान्यन्नत्यौरकोऽपि कंथ वित्तस्वान्नादिकाव्यर्थिभ्यो दत्वा ब्रह्मलोकं गतः उंछवृत्तिर्मुद्गलः ॥ षण्मासं मीरलब्धं व्रीह्याप्यातिथ्यदानेन ब्रह्मलोकं गतः शिबिः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्वा दिवं गतः बलिः सर्वं स्वं ब्राह्मणवेषधारिणे हरये दत्वा नमेवात्मसात्कृत्वाय ॥ कपोतश्चातिथये व्याध

योः नित्येन शरीरेणाप्तं तां गेयपयशो ध्रुवं ॥ नाविनोति स्वयं कल्पः सवाच्यः शोच्य एव सः ॥ १० ॥ हरिश्चंद्रो रंतिदेव उंछवृत्तिः शिबिर्बलिः ॥ व्याधः कपोतो बहवो ध्रुवेणाध्रुवं गताः ॥ ११ ॥ शुक उवाच ॥ स्वैरा हुति मिस्तास्व प्रकोष्ठे ज्यौहनेरपि ॥ राजन्यवंधु वितापदष्टपूर्वान विंतयत ॥ १२ ॥ राजन्यवंधवो ह्येते ब्रह्मलिंगानि बिभ्रति ॥ द्दरामि मिन्निंतेत्यं आत्मानमपि दुस्त्यजं ॥ १३ ॥ बले उश्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा ॥ एस्त्वया पीद्गु रितस्यापि विप्रव्याजेन विस्मना ॥ १४ ॥ श्रियं जिहीर्षितेंद्रस्य विष्णवे द्विजरूपिणे ॥ जानन्नपि महीं प्रादात वार्यमाणोपि दैत्यराट् ॥ १५ ॥

यकपोतः महात्मना सः दत्वा विमानेन दिवं गताः ॥ व्याधस्तयोः सत्त्वं वीक्ष्य स्वयमपि निर्विण्णो महाप्रस्थानेन वनाग्निदग्धदेहोऽनिःकल्मषो दिवमारुरोह ॥ एवमन्ये बहवोऽध्रुवेण शरीरेण ध्रुवं लोकं गता इति ॥ ११ ॥ ज्याहृतैः व्याघात किंणांकितैः दृष्टपूर्वान्न ड्रोपरी स्वयं वणिश्य ॥ १२ ॥ इंद्रस्य श्रियं जिहीर्षितो विप्रव्याजेन विष्णुनाऽधिशितस्यापि बलेः ते अहो नेति पाठे न श्रूयते कि अपि तु श्रूयत इति तं श्लाघते ॥ विस्मवशति श्रुक्रेणवार्यमाणोपि ॥ स्त्रुत एव विष्णुरिति जानन्नपि ॥ १५ ॥

राम

६२

पतमानेनपतताक्रूरबंधुनादेहेन ॥ ब्राह्मणार्थायविपुलंयशोनेहतानेहमानेनअत्मपारयताकोन्वर्थः नकोपित्यर्थः ॥ २६ ॥ एवंनिश्चित्यप्राह ॥ हेवि
प्रारति ॥ २७ ॥ राजन्यतामेवप्रपंचयति ॥ अप्राविति ॥ २९ ॥ यतोमद्भयात्समुद्रंशरणंगतः ॥ ३१ ॥ [illegible] वयसापिअतुल्यः नातिसत्वः अनतिबल
स्त्वनवदेहेनमयासमः अतोर्जुनेयोद्धानभवेत ॥ भीमस्तुभवेत ॥ यतोममतुल्यबलः ॥ ३२ ॥ प्राराय दत्वेत्यर्थः ॥ ३३ ॥ समेखलेयुद्धांगणे ॥ ३४ ॥ मंड

जीवताद्ब्राह्मणार्थायकोन्वर्थः क्रूरबंधुना ॥ देहेनपतमानेननेहताविपुलंयशः ॥ २६ ॥ इत्युदारमतिः प्राह कृष्णार्जुनवृकोदरान् ॥ हेवि
प्राव्रियतांकामोदास्याम्यात्मशिरोपिवः ॥ २७ ॥ श्री भगवानुवाच ॥ युद्धंनोदेहिराजेंद्र द्वंद्वशोयदिमन्यसे ॥ युद्धार्थिनोवयंप्राप्ताराजन्यानान्य
कांक्षिणः ॥ २८ ॥ असौवृकोदरः पार्थस्तस्यभ्रातार्जुनोह्ययं ॥ अनयोर्मातुलेयंमांकृष्णंजानीहितेरिपुं ॥ २९ ॥ एवमावेदितोराजाजहा
सोच्चैः समागधः ॥ आहचामर्षितोमंदायुद्धंतर्हिददामिवः ॥ ३० ॥ नत्वयाभीरुणायोत्स्येयुधिविक्लवचेतसा ॥ मथुरांस्वपुरींत्यक्त्वासमु
द्रंशरणंगतः ॥ ३१ ॥ अयंतुवयसातुल्योनातिसत्वोनमेसमः ॥ अर्जुनोनभवेद्योद्धाभीमस्तुल्यबलोमम ॥ ३२ ॥ इत्युक्त्वाभीमसेनायप्रादा
यमहतींगदां ॥ द्वितीयांस्वयमादायनिर्जगामपुराद्बहिः ॥ ३३ ॥ ततः समेखलेवीरौसंयुक्तावितरेतरं ॥ जघ्नतुर्वज्रकल्पाभ्यांगदाभ्यांरणदु
र्मदौ ॥ ३४ ॥ मंडलानिविचित्राणिसव्यंदक्षिणमेवच ॥ चरतोः शुशुभेयुद्धंनटयोरिवरंगिणोः ॥ ३५ ॥ ततश्चटचटाशब्दोवज्रनिष्पेषसन्निभः ग

लानिगदायुद्धगतिभेदान्सव्यंदक्षिणंचयथाभवति ॥ तथारंगिणोरंगगतयोः नटयोरिवेतितिनिर्भयत्वेनो दयोक्षिप्तयोराजन्दंतयोरिवदंतिनोः ॥ ३६ ॥
पमा ॥ ३५ ॥ चटचटेतिगदयोः परस्पराघातशब्दानुकरणं ॥ वज्रस्यनिष्पेषः पातः तत्सदृशः सध्यतेइतिनोदितोघातशब्दइवशुशुभे ॥ ३६ ॥ ॥ रामराम

२०३
द४

ऽंसकट्यादीत्युपेत्यपरीसंज्ञो मत्स्पर्धयोस्तयोर्गजयोरर्कशाखाभ्यां सम्यग्युध्यतोऽहमिति नोस्त्वेयथाचूर्णीभवनमस्त्वित ॥३७॥ अपिष्टां चूर्णीचक्रतुः ॥३८॥ शि
लास्पर्शाः मुष्टिबलेमर्त्वं जः प्रभावः समानि तानि यथा तयोः ॥३९॥ जन्मशकलत्वरूपमृतिः पुनः शकलीभावः ते विद्वान्जानन् राजामगधाङ्गमीनतन्
ते ॥ अचिंतयत कथमसौ शकलीभवेदिति ॥४१॥ विटपं शाखां करे विटपं गृहीत्वा हरिर्भीमस्य यथाहं विटपं पाटयामि तथा त्वमेनं विपाटयेति संज्ञया

ते वै गदे भुजजवेन निपात्यमाने अन्योन्यतोंसकटिपादकरोरुजत्रून् ॥ चूर्णीबभूवतुरुपेत्य यथार्कशाखे संयुध्यतोर्द्विरदयोरिव दीप्त
मन्व्योः ॥३७॥ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टिभिरयस्पर्शैरपिष्टां ॥ शब्दस्तयोः प्रहरतोरिभयोरिवासीन्निर्घातवज्रपरु
षस्तलताडनोत्थः ॥३८॥ तयोरेवं प्रहरतोः समशिक्षाबलौजसोः ॥ निर्विशेषमभूद्युद्धमक्षीणजवयोर्नृप ॥३९॥ एवं तयोर्महाराज युध्य
तोः सप्तविंशतिः ॥ दिनानि निरगुस्तत्र सुहृद्वन्निशि तिष्ठतोः ॥४०॥ एकदा मातुलेयं वै प्राह राजन्वृकोदरः ॥ न शक्तोऽहं जरासंधं निर्जेतुं
युधि माधव ॥४१॥ शत्रोर्जन्ममृती विद्वान्जीवितं च जराकृतम् ॥ पार्थमाप्याययन्स्वेन तेजसाचिंतयद्धरिः ॥४२॥ तद्विज्ञाय महासत्वो
भीमः प्रहरतां वरः ॥ गृहीत्वा पादयोः शत्रुं पातयामास भूतले ॥४३॥ एकं पादं पदाक्रम्य दोर्भ्यामन्यं प्रगृह्य सः ॥ गुदतः पाटयामास शाखा
मिव महागजः ॥४४॥ एकपादोरुवृषणकटिपृष्ठस्तनांसके ॥ एकबाह्वक्षिभ्रूकर्णे शकले ददृशुः प्रजाः ॥४५॥ हाहाकारो महानासीन्नि
हते मगधेश्वरे ॥ पूजयामासतुर्भीमं परिरभ्य जयाच्युतौ ॥४६॥ सहदेवं तत्तनयं भगवान्भूतभावनः ॥ अभ्यषिंचदमेयात्मा मगधानां पतिं प्र
भुः ॥ मोचयामास राजन्यान्संरुद्धा मागधेन ये ॥४७॥ इति श्रीभागवते महापुराणे दशमस्कंधे जरासंधवधो द्विसप्ततितमोऽध्यायः

संकेतेन अरिवधोपायं दर्शयामासेत्यर्थः ॥४३॥ एकैकः पादादिर्ययोः ते शकले ॥४५॥ इदं तत्त्वादरमोहस्तः न राज्याभिलाषोऽस्तीति दर्शयन्नाह ॥ सहदेवमिति ॥४७॥
इति द्विसप्ततितमः ॥ राम

राम
द४

ततो विमुक्तानितमेमोच पित्वा नृपान्हरिः ॥ राजार्हभोगैः स्नानेशानुपभ्रष्टाप्य पुनरागमत ॥ ॥ अत्र त्रयोदशजरासंधवधानन्तरं भूपतीन् ॥ विमोक्ष्य कृपयाक्र-
पयाकल्याणिनिजरूपमदर्शयत ॥ ये निर्जिता जरासंधेन निरुद्धा स्वगिरिद्रोण्यां ते ततो निर्गताः संतो घनश्याममददृशुरित्यन्वयेनाह ॥ ॥ क्षुधा क्षा-
माः कृशाः संरोधेन परिकर्शिताः क्लेशिताः ॥ २ ॥ भ्राजन् भ्राजमानो वरमणिः कौस्तुभो यस्यां ग्रीवायां सा ग्रीवा यस्य तं ॥ निवीतं कण्ठलंबितया मालया पिबंत इव

श्रीशुक उवाच ॥ अयुते द्वे शतान्यष्टौ लीलया युधि निर्जिताः ॥ ते निर्गता गिरिद्रोण्यां मलिना मलवाससः ॥ १ ॥ क्षुत्क्षामाः शुष्कवदनाः
संरोधपरिकर्शिताः ॥ ददृशुस्ते घनश्यामं पीतकौशेयवाससं ॥ २ ॥ श्रीवत्सांकं चतुर्बाहुं पद्मगर्भारुणेक्षणं ॥ चारुप्रसन्नवदनं
स्फुरन्मकरकुंडलं ॥ ३ ॥ पद्महस्तं गदाशंखरथांगैरुपलक्षितं ॥ किरीटहारकटककटिसूत्रांगदांचितम् ॥ ४ ॥ भ्राजद्वरमणिग्रीवं नि-
वीतं वनमालया ॥ पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया ॥ ५ ॥ जिघ्रंत इव नासाभ्यां रंभंत इव बाहुभिः ॥ प्रणेमुर्हतपाप्मानो मूर्द्ध-
भिः पादयोर्हरेः ॥ ६ ॥ कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः ॥ प्रशशंसुर्हृषीकेशं गीर्भिः प्रांजलयो नृपाः ॥ ७ ॥ राजान ऊचुः ॥ नम-
स्ते देवदेवेश प्रपन्नार्तिहराव्यय प्रपन्नान्पाहि नः कृष्ण निर्विण्णान्घोरसंसृतेः ॥ ८ ॥ नैनं नाथानुसूयामो मागधं मधुसूदन ॥ अनुग्रहो यद्भ-

वेत्यादीनां हरेः पादयोः प्रणेमुरित्यन्वयेनाह ॥ ५ ॥ रंभंतः परिरंभमाणा इव ॥ ६ ॥ श्रीकृष्णसंदर्शनाह्लादेन ध्वस्तः संरोधनेन क्लमो ये- वतो राज्ञां राज्यच्युतिर्विभो
षां ते ॥ ७ ॥ संरोधाद्दुःखितानस्मान्घोरायाः संसृतेरपि पाहि मोचय ॥ ८ ॥ ननु भवंतो जरासंधासूयाविष्टा इह भोगासक्ताः कथं संसृतेर्मोचनीया इत्याशंक्य
संसृतिनिर्वेदं तत्राप्यहेतोरित्याहुः नैनमित्यष्टभिः ॥ हे नाथ वयमेनं नानुसूयामः दुःखेन दोषदृष्ट्या न पश्यामः कुतः यतः तत्राहुः अनुग्रह इति यद्यस्मात् ॥ ९ ॥

१०७
६५

एतदेव व्यतिरेकेणोपपादयति ॥ राज्यैश्वर्यैरिति ॥ राज्यैश्वर्याभ्यां मदहस्तिनो नद्धजुष्टं खलेनोनित्याश्च चलाश्च संपदो मन्यते ॥ यद्वाः अनित्याः सतीः अचलाः शाश्वतीर्मन्यते ॥ १० ॥ किंच ॥ अवस्तु सद्वस्तुतया पश्यंतीत्याह ॥ मृगतृष्णेति ॥ वैकारिकीं सृष्टिमिति विकारापन्नां ॥ अयुक्ता अविवेकिनः ॥ ११ ॥ राज्यसंयोगवियोगयोरनर्थावहत्वमस्माभिर्दृष्टमित्याह ॥ वयमिति द्वाभ्यां ॥ श्रीमदेन नष्टदृष्टयः ते अस्याः पृथ्व्याः इतरेतरं स्पृधः परस्परं स्पर्धमानाः ॥ परः परतः त्वां मृत्युमविगणय्य ॥ परोपेतदुर्मदा वयं ॥ १२ ॥ हे कृष्ण त एव वयं अद्य विनष्टदर्पास्तव चरणौ स्मराम स्मरणे पाशाम्यदे

राज्यैश्वर्यमदोन्नद्धो न श्रेयो विंदते नृपः ॥ त्वन्मायामोहितोनित्या मन्यते संपदोऽचलाः ॥ १० ॥ मृगतृष्णां यथा बाला मन्यंत उदकाशयं एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते ॥ ११ ॥ वयं पुरा श्रीमदनष्टदृष्टयो जिगीषयास्या इतरेतरस्पृधः ॥ घ्नंतः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृत्युं पुरस्त्वाविगणय्य दुर्मदाः ॥ १२ ॥ त एव कृष्णाद्य गभीररंहसा दुरंतवीर्येण विचालिताः श्रियः ॥ कालेन तन्वा भवतो नुकंपया विनष्टदर्पाश्चरणौ स्मराम ते ॥ १३ ॥ अथो न राज्यं मृगतृष्णिरूपितं देहेन शश्वत्पतता रुजां भुवा ॥ उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनम् ॥ १४ ॥

कथंभूताः भवतस्तन्वा मृत्युरूपिणा कालेन श्रियो विचालिताः विभ्रंशिताः अतो राज्यप्रतिर्भवरस्तु ग्रहण एवेत्यर्थः ॥ १३ ॥ यत एवं अथो अनंतरं मृगतृष्णिरूपितं राज्यं शश्वत्पतता प्रतिक्षणं हीयमानेन तथा रुजां रोगाणां भुवा जन्मक्षेत्रेण देहेन उपासितव्यं न स्पृहयामहे प्रेत्य परलोके च क्रियाफलं स्वर्गादिकं उपासितव्यं न स्पृहयामहे ॥ कथंभूतं कर्णयोः रोचनं हविजनकमात्रं तत्र गतस्य स्पर्धादीयन पराभव इत्यादि भावादित्यर्थः ॥ १४ ॥ ॥

राम
६५

यदेवं स्तुतापूर्यं तर्हि मम चरणौ स्मरतं ततो नायासेन मुक्तिर्भविष्यतीति किमरपेक्षयेति चेदत आह तत्र इति त्वच्चरणस्मृतिरपि त्वत्प्रसादफ
लमेवेत्यर्थः ॥ १५ ॥ स्वेच्छया मङ्गलया ॥ १७ ॥ यथा भवद्भिराशंसितं तत्तथा वा रंनिश्चितं वो भक्तिर्जायते ज्ञायतामित्यर्थः ॥ १८ ॥ हे नृपाः मद्भजनमेव कर्त्तव्य
मिति भवद्भिर्व्यवसितं संकल्पितं दिष्ट्या भद्रं ॥ भवद्भिर्निश्चितमेव सत्यमेवेत्याह ॥ भवंत इति ॥ श्रीश्वरैश्वर्येण ताभ्यां मदरहितेनोन्नाहं उद्बंधनसेराणारमित्यर्थः

तन्नः समादिशोपायं येन ते चरणाब्जयोः ॥ स्मृतिर्यथा न विरमेदपि संसरतामिह ॥ १५ ॥ कृष्णाय वासुदेवाय हरये परमात्मने
प्रणतक्लेशनाशाय गोविंदाय नमो नमः ॥ १६ ॥ श्रीशुक उवाच ॥ संस्तूयमानो भगवान् राजभिर्मुक्तबंधनैः ॥ तानाह करुणस्तात
शरण्यः श्लक्ष्णया गिरा ॥ १७ ॥ श्रीभगवानुवाच ॥ अद्यप्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे ॥ सुदृढा जायते भक्तिर्बाढमाशंसितं त
था ॥ १८ ॥ दिष्ट्या व्यवसितं भूपा भवंत ऋतभाषिणः ॥ श्रियैश्वर्यमदोन्नाहं पश्य उन्मादकं नृणां ॥ १९ ॥ हैहयो नहुषो वेणो रावणो
नरकोऽपरे ॥ श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः ॥ २० ॥ भवंत एतद्विज्ञाय देहाद्युत्पाद्यमंतवत् ॥ मां यजंतोऽध्वरैर्युक्ताः प्र
जा धर्मेण रक्षथ ॥ २१ ॥ संतन्वंतः प्रजातंतून्सुखं दुःखं भवाभवौ ॥ प्राप्तं प्राप्तं च सेवंतो मच्चित्ता विचरिष्यथ ॥ २२ ॥

परे पर्णामि ॥ १९ ॥ तदेवाह हैहय इति हैहयः कार्तवीर्यश्चक्रवर्ती नरेश्वरः पितुः कामधेनुहरणात्परशुरामेण पश्चाद्धतः नहुषो देवेंद्रतां प्राप्तः अग
स्त्येः शचीसंगाय ब्राह्मणान् शिविकावाहयन् तैरेव ततो भ्रंशितो जगरत्वमवाप ॥ वेणोऽप्युन्मत्तो ब्राह्मणान् अधिक्षिपन् तैरेव हुंकृतैः हतः रावणो गुरुमस्वरः
सीतामभिलषन् रामचंद्रेण हतः नरको देवस्वर्गहारीति कुंडलाद्याहरणान्मयैव हतः अपरे विश्रीमदात्स्थानाद्भ्रंशिताः ॥ २० ॥ यदुत्पाद्यं देहादि तदंतवत् वि

२०३
६६

माद्व्रह्मयास्यथ ॥१३॥ द्विपस्त्वतेषां मज्जनकर्म्मणि अभ्यंगस्नानार्हैश्च यदुक्तं ॥१४॥ स्नातानन्नमपगलंकृतान् भोगैश्च यङ्कारस्वरेणान्नेनमो

उदासीनाश्च देहादावात्मारामा धृतव्रताः ॥ मय्यावेशमनः सम्यक्कमामंतेव्रह्मयास्यथ ॥ श्रीशुक उवाच ॥ इत्यादिश्य नृपान्
कृष्णो भगवान्भुवनेश्वरः ॥ तेषां न्ययुंक्त पुरुषान् स्त्रियो मज्जनकर्म्मणि ॥१४॥ सपर्याकारयामास सहदेवेन भारत नर
देवोचितैर्वस्त्रैर्भूषणैः स्रग्विलेपनैः ॥१५॥ भोजयित्वा वरान्नेन सुस्नातान्समलंकृतान् ॥ भोगैश्च विविधैर्युक्तान्तांबूला
द्यैर्नृपोचितैः ॥१६॥ ते पूजिता मुकुंदेन राजानो मृष्टकुंडलाः ॥ विरेजुर्म्मोचिताः क्लेशात्प्रावृडंते यथा ग्रहाः ॥१७॥ रथान्स
दश्वानारोप्य माणिकांचनभूषितान् ॥ प्रीणय्य सूनृतैर्वाक्यैः स्वदेशान्प्रत्ययापयत ॥१८॥ त एवं मोचिताः कृच्छ्रात्कृष्णेन
सुमहात्मना ॥ ययुस्तमेव ध्यायंतः कृतानि च जगत्पतेः ॥१९॥ जगदुः प्रकृतिभ्यस्ते महापुरुषचेष्टितं ॥ यथान्वशासद्भगवा
न्तथा चक्रुरतंद्रिताः ॥२०॥ श्रीशुक उवाच ॥ जरासंधं घातयित्वा भीमसेनेन केशवः ॥ पार्थाभ्यां संयुतः प्रायात्सहदेवेन पूजि
तः ॥२१॥ गत्वा ते खांडवप्रस्थं शंखान्दध्मुर्जितारयः ॥ हर्षयंतः स्वसुहृदो दुर्हृदां चासुखावहाः ॥२२॥ तच्छ्रुत्वा प्रीतमनस इं
द्रप्रस्थनिवासिनः ॥ मेनिरे मागधं शांतं राजा चाप्तमनोरथः ॥२४॥ अभिवंद्याथ राजानं भीमार्जुनजनार्द्दनाः ॥ सर्वमाश्रावयांच
क्रुः आत्मना यदनुष्ठितं ॥२५॥ निशम्य धर्म्मराजस्तत्केशवेनानुकंपितं ॥ आनंदाश्रुकलां मुंचन्प्रेम्णा नोवाच किंचन ॥२६॥ इति श्र
राम ॥ ध्वजरासंधवधश्रिमप्रतीतमो [illegible] पः भोजयित्वा वरान्नेन सम्यक्सपर्या सहदेवेन कारयामास ॥२६॥ ग्रहा इव इव प्रावृडंते यथा ॥१७॥ प्रीणय्य संदर्शयित्वा ॥१

राम
६६

चतुःसप्ततितमे राजसूयक्रिया द्विजैः ॥ अग्रपूजाप्रसंगेन चैद्यघातोपि वर्ण्यते ॥१॥ राजसूयमुखे हत्वा जरासंधं ततः परं ॥ चैद्यं तरेनेकार्वतं बीजं कालिमिवावपेत् ॥ कृष्णस्य चानुभावमिति चकारात् तस्य ह्वास्तानुविधायित्वं चालक्ष्येत्यर्थः ॥ तदाह ॥ ये स्युरिति ॥ ये त्रैलोक्यस्याधिगुरवः स्युः सनकादयः सर्वे च लोकपालाश्च ते शिरसैव तवानुशासनं वहंति ॥ दुर्लभं लब्ध्वेति भाग्येन तत्तल्लब्धमिति बहुमानेनेत्यर्थः ॥ स भवान् परमेश्वरोऽस्माकमनुशासनं ॥ धत्ते तदत्यं विडंबनं अनुकरणं ॥ स्वतेजोहानिप्रसंगादित्यर्थः ॥३॥ अथवा न तव परिपूर्णस्यास्मत्तापनानाधारणात्मानं तेजोहानिर्वृद्धिः ॥ अतः कृपया

श्रीशुक उवाच ॥ एवं युधिष्ठिरो राजा जरासंधवधं विभोः ॥ कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत् ॥१॥ युधिष्ठिर उवाच ॥ ये स्युस्त्रैलोक्यगुरवः सर्वलोकमहेश्वराः ॥ वहंति दुर्लभं लब्ध्वा शिरसैवानुशासनं ॥२॥ स भवानरविंदाक्षो दीनानामीशमानिनां ॥ धत्तेऽनुशासनं भूमन्नत्यंतविडंबनं ॥३॥ न ह्येकस्याद्वितीयस्य ब्रह्मणः परमात्मनः ॥ कर्मभिर्वर्द्धते तेजो ह्रसते च यथा रवेः ॥४॥ न वै तेऽजित भक्तानां ममाहमिति माधव ॥ त्वं तवेति च नानाधीः पशूनामिव वैकृती ॥५॥

सर्वं संगच्छत इत्याह ॥ न ह्येकस्याद्वितीयस्येति ॥ समानासमानरहितस्य ब्रह्मणः ह्रासो भयं नाथ ॥ परमात्मन इति सर्वजीवनियंतृत्वं नियम्यत्वं हेतरान्न वास्तवं अतः परानुग्रहार्थैरेतैः कर्मभिस्तव तेजो न वर्द्धते न च ह्रसति ॥ रवेरिवोदयास्तमयादिकर्मभिरित्यर्थः ॥ तथा च श्रुतिः न कर्मणा वर्द्धते नो कनीयानिति ॥४॥ न त्वेवमप्यहं परमेश्वरः समदर्शी च कस्मायोग्यमिति मनाधिकयं न भवेदित्यत आह ॥ न वै त इति ॥ हे अजित ते तव भक्तानामेव तावदिदं नानाधीर्भेदमतिर्नास्ति ॥ यथा पशूनां मत्तानां वैकृती शरीरविषयात्तवेत्यनाद्यास्तीति किं पुनस्त्वं कृत्यमित्यर्थः ॥५॥

२०७
६१

यत्तियेयज्ञोचिते वसन्तादिकालेषु क्रान्न ऋत्विग्यज्ञान्मत्त संघिष्ठिरः ऋत्विजो होताध्वर्युप्रभृतीन्वव्रे इत्यन्वयः ॥ ६ ॥ तानाह ॥ द्वैपायन इति त्रिभिः अकृतव्रणः
तानेतान् ऋत्विग्पदृष्ट्यादितिदेववव्रे ॥ ७ ॥ अन्ये चोपहूता यत्तदिदृक्षवस्तद्वेगीरित्यन्वयः ॥ १ ॥ देवयजनं यत्तभूमिं कृष्ट्वा कर्षणादिभिः ॥ संशोध्य हेमलांगलैः

शुक उवाच ॥ इत्थं स्मापत्तियेकाले वद्वे युक्तान्तऋत्विजः ॥ कस्मान्तमाहितः पार्थो ब्राह्मणान्ब्रह्मवादिनः ॥ ६ ॥ द्वैपायनो भरद्वाजः सुमं
तुर्गौतमोऽसितः ॥ वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषस्त्रितः ॥ ७ ॥ विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः ॥ पैलः पराशरो
गर्गो वैशंपायन एव च ॥ ८ ॥ अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः ॥ वीतिहोत्रो मधुच्छंदा वीरसेनोऽकृतव्रणः ॥ ९ ॥ उपहूता
स्तथा चान्ये द्रोणभीष्मकृपादयः ॥ धृतराष्ट्रः सहसुतो विदुरश्च महामतिः ॥ १० ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यज्ञदिदृक्षवः ॥ त
त्रेयुः सर्वराजानो राज्ञां प्रकृतयो नृप ॥ ११ ॥ ततस्ते देवयजनं ब्राह्मणाः स्वर्णलांगलैः ॥ कृष्ट्वा तत्र यथाम्नायं दीक्षयांचक्रिरे नृप ॥ १२ ॥ है
माः किलोपकरणा वरुणस्य यथा पुरा ॥ इंद्रादयो लोकपाला विरिंचभवसंयुताः ॥ १३ ॥ सगणाः सिद्धगंधर्वा विद्याधरमहोरगाः ॥ मुन
यो यक्षरक्षांसि खगकिन्नरचारणाः ॥ राजानश्च समाहूता राजपत्न्यश्च सर्वशः ॥ १४ ॥ राजसूयं समीयुः स्म राज्ञः पाण्डुसुतस्य वै ॥ मेनिरे कृष्ण
भक्तस्य सूपपन्नमविस्मिताः ॥ १५ ॥ अयाजयन्महाराजं याजका देववर्चसः ॥ राजसूयेन विधिवत्प्रचेतसमिवामराः ॥ १६ ॥

स्कारा ब्रह्मसदस्येन उपकरणा उपस्कराः वरुणस्य राजसूये यथा आसन् तथेति शेषः ॥ १२ ॥ किंच इंद्रादय इति ये इंद्रादयो देवगणाः ये च राजादयः समाहू
ताः ते च समीयुः स्म ते तमैश्वर्यं कृष्णभक्तस्य पाण्डुसुतस्य राज्ञो राजसूयं पर्यविस्मिताः सन्तः सूपपन्नं मेनिरे इत्यन्वयः ॥ १५ ॥ याजका ऋत्विजः ॥ १६ ॥

राम
६१

सत्येऽहनि सोमाभिषवदिने ॥ ९ ॥ अग्न्याधेयेणं अयपृजातस्याईयोगं ॥ अनेकांत्यात योगमानां वङ्कत्वेनैकस्यानिश्चयात ॥ ८ ॥ सांख्यज्ञानं योगउपासना
॥ १० ॥ ननु सांख्यं केवलं परं योगः सविशेषणपरः कथमुभयोरेकपरत्वं तत्राह ॥ एकएवाद्वितीयो सोऽयमतः सांख्ये सेवतत्परत्वं उक्तं विशेषणं हृतस्य
वसर्वप्रपंचस्य तन्मयत्वात्तस्य विशेषणाविषयस्य योगस्यापि युक्तमद्वितीयपरत्वमित्याह ॥ एतदात्म्यमिति ॥ एषश्रीकल्पः आत्मायस्यतत्तदेतदात्मतस्यभा

सत्येऽहन्यवनीपालो याज्ञवल्क्यं समस्यतान् ॥ अपृजत्परमहाभागान् यथावत्सुसमाहितः ॥ ९ ॥ तदस्याग्राईहणार्ईवीविमृश्यतः सनातनः
नाधीवान्नु नैकांत्यात्सहदेवस्तथाब्रवीत् ॥ ८ ॥ अद्वैतमिदमतः श्रेष्ठं भगवान्सात्वतांपतिः ॥ एष वै देवताः सर्वा ईशः कालः धनादयः
परात्मकमिदं विश्वं कृतवृक्षपरात्मकः ॥ अग्निरादित्ययोमध्ये सांख्ययोगस्तत्परः ॥ १० ॥ एकएवाद्वितीयोऽसावेतदात्म्यमिदं जगत
आत्मनात्माश्रयः सम्याः सृजत्यवति हंत्यजः ॥ ११ ॥ विविधानीह कर्माणि जनयन्नुपदेवहेया ॥ इह ते परं यत्सर्वं श्रेयो धर्मादिल
क्षणम् ॥ १२ ॥ तस्मात्त्वमायमहतेऽरापतां परमार्हणां ॥ एवं वेत्ति सर्वभूतानामात्मनस्त्वाहणं भवेत ॥ १३ ॥ सर्वभूतात्मभूताय कृष्णायानन्य
दर्शिने ॥ देयं शान्ताय पूर्णाय दत्त्वा स्यानंत्यमिच्छता ॥ १४ ॥

वएतदात्म्यं भावितव्येवभावनिर्देशः एतदात्म्यमिदं सर्वमितिश्रुतेः तत्रहेतुः आत्मनेतिहे
सत्याः आत्माश्रयः अन्यानिरपेक्षः स्वयमजः इदं जगत्सृजति अवतिहंतिवेति ॥ ११ ॥ किंच विविधानीति ॥ यस्यावेक्षयाऽनुग्रहेण विविधानि कर्माणि तपो
योगादीनि जनयन्कुर्वन्यतयस्मात्सर्वं सद्यो पिजेनाधर्मादिलक्षणं श्रेयइहते साधयति ॥ कर्माणि तत्फलानि च परधीनानित्यर्थः ॥ १२ ॥ आत्मनाकिं
यमार्हणमर्हणमात्मनेः ॥ कथंस्यात्तत्राह ॥ सर्वभूतानामात्मभूताय ॥ अनन्यदर्शिने निरस्तभेदमतये ॥ १५ ॥

२०
९८

श्रीकृष्णानुभावविन्महदेवरत्नुक्तात्सर्वमभूत ॥२५॥ द्विजैरितिं माधुमाध्वितिघोषं श्रुत्वा हा ईममिप्रायं ॥ हे हे महत्सुतयः सर्वे बालसुभाषितं मामन्यद्य माजानीतमाशङ्कीतं कितितयतयतः कृष्णो हेलामममतत्वत ॥२६॥ अस्य च बालत्वे वीर्यैः प्रदेवचडुत्रेयः गोपाल इति ॥ वेदस्थयिव्यादिपालकस्त्यर्थः ॥ ज्ञानिनं च

इत्युक्त्वा महदेवो मतत्सर्वीकृष्णानुभावविन्न ॥ तत्कृत्वा ढद्रवः सर्वे माधुमाध्विति मन्नमाः ॥२५॥ श्रुत्वा द्विजेरितां राजा ज्ञात्वा हा ईममामहा ॥ ममहि यत्क्षयी केशं प्रातः प्रणयविह्वलः ॥२६॥ तत्पादरावचनिज्यापः शिरसा लोकपावनीः ॥ समार्यः माज्ञज्ञा भाजितं बीजमर्वे प्राज्ञस्य योजनाः ॥ नमोजयेतिनेमुन्तनिपतः प्रष्यक्षद्धयः ॥२७॥ इत्युक्तं निशाम्य दमघोषस्ततः समीपमुत्थाय कृष्णे वतीश्रुतिः ॥ वृद्धानामपि यद्बुद्धिर्बालवाक्येर्विभिद्यते ॥२८॥ प्रथमपात्र विरोध्येशमामध्ये बाल भाषितं ॥ महत्सुतयः सर्वे कृष्णो यत्तं मतोर्हणः ॥२९॥ तयो विद्याव्रतधराञ्ज्ञानविध्वस्तकल्मषान् ॥ परमर्षीन्ब्रह्मनिष्ठान्लोकपालैश्च पूजितान् ॥३२॥ महत्सुतीनति

इवि परीतं ननमं तीति ज्ञानपाः पाषंडानूतानुक्तं ततेमाघातयतीति तथा च कृष्णगोपालः कुलपांसनः ॥ यथाकाकः पुरोडाशं सपर्यां कथमर्हति ॥३४॥ अकाकः कं च अकं च काके एव खरः खेतेन विद्येते यस्य स अकाकः आप्तकामः इत्यर्थः स यथाआप्तकामत्वात् देवयोग्यं केवलं पुरोडाशमात्रं नार्हति तथ पित्रसर्वीत्वम पितथा यं स्त्री कृष्णो पिवसर्वयोग्यं सपर्यामात्रं कथमर्हति किंत्वात्मसमर्पणमप्यर्हतीत्यर्थः ॥३४॥

राम
९८

वर्णाश्रमकुलेभ्योऽपेतो ब्रह्मत्वात् ॥ अनामागोत्रमिति श्रुतेः ॥ अत एवानधिकारित्वात् सर्वैः धर्म्मैः बहिः कृतः ॥ स्वैरवर्त्ती परमेश्वरत्वात् ॥ अत ए
व निर्गुणः तमआदिरहितः ॥ एवंभूतो जीवानां योग्यतस्तु सपर्यामात्रं कथमर्हतीत्यर्थः ॥ ३५ ॥ अपि च ॥ कथं वर्णानीयामाह शेषां यदूनामहिमाय
स्मारेषां कुलं ययातिना शप्तमपि किं सद्भिर्बहिः कृतं अपि तद्गिरिसाधुतिं किंच ॥ अस्मरादिकुलवाल्लिकं वृथापानरतं अपि तत्तिनिघतावारमित्यर्थः
अहो यदूनामेव तावदीदृशं माहात्म्यं यद्युत तत्कुले वृद्धस्य ययातेः शापो न प्राभूदित्यादि ॥ अयं तु साक्षादीश्वरः अतः सपर्यामात्रं कथमर्हतीत्यर्थः ॥ ३६

वर्णाश्रमकुलापेतः सर्वधर्म्मबहिः कृतः ॥ स्वैरवर्त्ती गुणैर्हीनः सपर्यां कथमर्हति ॥ ३५ ॥ ययातिनैषां हि कुलं शप्तं सद्भिर्ब
हिः कृतः ॥ वृथापानरतं शश्वत् सपर्यां कथमर्हति ॥ ३६ ॥ ब्रह्मर्षिसेवितान्देशान् हित्वैतेऽब्रह्मवर्च्चसं ॥ समुद्रं दुर्गमाश्रित्य
बाधंते दस्यवः प्रजाः ॥ ३७ ॥ एवमादीन्यभद्राणि बभाषे नष्टमंगलः ॥ नोवाच किंचिद्भगवान् यथा सिंहः शिवारुतं ॥ ३८ ॥

किंच ॥ ये राजानो दुष्टास्तु व्रात्यं यांति ते स्वर्थं कीकटादिदेशान् प्राप्याश्रयंति ॥ एते तु ब्रह्मर्षिसेवितानेव देशान् आश्रित्य अब्रह्मवर्च्चसं समुद्रं दुर्गमपि हित्वा ह्यपपिते
त्यर्थः बाधंते ॥ तथापि दस्यवः प्रजाः नाश्यं ॥ अयमर्थः वेदस्तदर्थाभियोगो ब्रह्मवर्च्चसं तत् हित्वा अब्रह्मवर्च्चसं समुद्रं दुर्गमाश्रित्य लिंगात् तन्निहितं समुद्रं वैरी व
द्धलिंगधारिणां पाषंडमित्यर्थः तल्लिंगत्याजयित्वा बाधंते दंडयंति ॥ कथंभूतं दुर्गं धर्म्मविस्मृतानां धर्मात् तया दुर्गमित्यर्थः ॥ तथापि दस्यवः दस्युत्वेन विप्रजावे
णा वर्णमानान्दंडयंति ॥ अतो यदुभ्योऽन्यः को नाम धर्म्मिकोऽस्तीति ॥ पापरूपमेतत्त्वानार्थमेव ॥ ३७ ॥ शिवाफेत्कः तस्मात् तं श्रुत्वा यथा सिंहो न किंचिद्वदति तद्वत् ॥ ३८

२०३
६७

तावदुत्थायेत्यस्यायमभिप्रायः एष मत्पार्षदो मन्त्वल्पबलः सर्वानेतान् हन्यात् अतो मय्येव शीघ्रं हन्तव्य इति तत्क्षणमेवोत्थाय शिरो जहारेति ॥ ४२ ॥ नन्वेवं नि-
रकस्य कथं वासुदेवे प्रवेशः ॥ तत्राह ॥ जन्मत्रयेति ॥ जन्मत्रयेऽनुगुणितमनुवर्तितं यद्वैरं तेन संरब्धया आविष्टया तन्मयतां तत्स्वरूपतां यातः स्वः पार्षदो

भगवन्निंदनं श्रुत्वा दुःसहं तत्सभासदः ॥ कर्णौ पिधाय निर्जग्मुः शापन्तश्चेदिपं रुषा ॥ ३९ ॥ निंदां भगवतः शृण्वन्तत्परस्य जनस्य वा ॥ ततो
नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥ ४० ॥ ततः पांडुसुताः क्रुद्धा मत्स्यकैकयसृंजयाः ॥ उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥ ४१ ॥ ततश्चैद्यस्त्वसंभ्रान्तो जगृहे खड्गचर्मणी ॥ भर्त्सयन्कृष्णपक्षीयान्राज्ञः सदसि भारत ॥ ४२ ॥ तावदुत्थाय भगवान्स्वान्निवार्य
स्वयं रुषा ॥ शिरः क्षुरांतचक्रेण जहार पततो रिपोः ॥ ४३ ॥ शब्दः कोलाहलोऽथासीच्छिशुपाले हते महान् ॥ तस्यानुयायिनो भूपा दुद्रुवु-
र्जीवितैषिणः ॥ ४४ ॥ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् ॥ पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ॥ ४५ ॥ जन्मत्रयानुगुणित-
वैरसंरब्धया धिया ॥ ध्यायंस्तन्मयतां यातो भावो हि भवकारणं ॥ ४६ ॥ ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदात् ॥ सर्वान्संपूज्य विधि-
वच्चक्रेऽवभृथमेकराट् ॥ ४७ ॥ साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः ॥ उवास कतिचिन्मासान्सुहृद्भिरभियाचितः ॥ ४८ ॥ ततोऽनुज्ञाप्य रा-
जानमनिच्छंतमपीश्वरः ॥ ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ॥ ४९ ॥ वर्णितं तदुपाख्यानं मया ते बहुविस्तरं ॥ वैकुंठवासिनोर्जन्म
विप्रशापात्पुनः पुनः ॥ ५० ॥ राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ॥ ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ॥ ५१ ॥ राज्ञा सभाजिताः सर्वे सु-
रमानवखेचराः ॥ कृष्णं क्रतुं च शंसन्तः स्वधामानि ययुर्मुदा ॥ ५२ ॥ वस्तुतस्त्वयमर्थः तत्र हेतुः भावो हीति ॥ भावो भावनानुध्यानं भवस्य ध्येयाकारजन्म

राम
६७

पापं धर्म्मं द्विषं त्रुत्रहेतुः कलिं कलेरंशं ॥ अत एव क्रतुकालस्यामर्षं व्याधिनाशकं ॥ ५२ ॥ चिंतानं यत्तच ॥ इति श्रीमेरुतंत्रे सप्ततितमः ॥ पंचषष्टकुसप्ततितमे
यज्ञाव भृत्थं संभ्रमः दुर्योधनस्य वाक्शांत्या मानभंगो हृशि भ्रमात् ॥ दुर्योधनस्यैकस्यैव दुःखकारणं प्रद्युम्नमत्र वर्णितं ॥ अजातशत्रोरिति ॥ १ ॥

दुर्योधनस्य तेपापं कलिं का हृत्कलामयम् ॥ योनस्येहेष्विर्यस्फीतां दृष्ट्वा पांडुसुतस्य ताम् ॥ ५३ ॥ यदि दं कीर्त्तये द्विप्रोः कार्म्येवैद्यवधारिकं
राजमोक्षं चिंतानं च सर्वपापैः प्रमुच्यते ॥ ५४ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे उत्तरार्धे सप्ततितमोऽध्यायः ॥ राजोवाच ॥ अजात
शत्रोस्तं दृष्ट्वा राजसूयमहोदयं ॥ सर्वे मुमुदिरे ब्रह्मन् नृदेवा ये समागताः ॥ १ ॥ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः ॥ इति श्रुतं
नो भगवंस्तत्र कारणमुच्यताम् ॥ २ ॥ ऋषिरुवाच ॥ पितामहस्य ते यज्ञे राजसूये महात्मनः ॥ बांधवाः परिचर्यायां तस्यासन्प्रेमबंध
नाः ॥ ३ ॥ भीमो महानसाध्यक्षो धनाध्यक्षः सुयोधनः ॥ सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ॥ ४ ॥ गुरुशुश्रूषणे जिष्णुः कृष्णः पा
दावनेजने ॥ परिवेषणे द्रुपदजा कर्णो दाने महात्मनः ॥ ५ ॥ युयुधानो विकर्णश्च हार्दिक्यो विदुरादयः ॥ बाह्लीकपुत्रा भूर्याद्या ये च सं
तर्द्दनादयः ॥ ६ ॥ निरूपिता महायज्ञे नानाकर्म्मसु ते तदा ॥ प्रवर्त्तंते स्म राजेंद्र राज्ञः प्रियचिकीर्षवः ॥ ७ ॥

इति श्रुतं त्वन्मुखाद्देवत्यर्थः ॥ १ ॥ दुर्योधनस्यासहनकारणत्वेन यागमहोत्सवमेव पुनः सिंहावलोकनेन निरूपयति ॥ पितामहस्येत्यादिना ॥ एकादशतः
पूरेतस्य तस्य तः प्राक्तानेन ग्रंथेन प्रेमबंधनाः प्रेमयंत्रिताः ॥ ३ ॥ पूजायां सम्मानने द्रव्यसाधनेनानाविधद्रव्यसंपादने ॥ ४ ॥ शुश्रूषणो चरणालेपनादौ ॥ ५ ॥ निरूपिताः
नियुक्ताः सन्तो नानाकर्म्मसु प्रवर्त्तंते स्म ॥ ७ ॥

२०३
७०

ऋत्विजश्च सदस्याश्च समासदः वस्त्रविरक्षिते ष्ठ सम्पूजिते ष्ठ सत्कृतं प्रियवाक् सम्मर्हणमलंकारारिरक्ष्णिणश्च प्रसिद्धास्ताभिः छन्दयामंगायां ८ विचित्राणि ध्वजपताकाग्राणि येष्ठ तेरिभेद्रैः स्यंदनैः अर्वभिरश्चैर्नरैश्च एवंवत्सरोः सैस्यैस्त्रिर्यष्ठुः ११ यजमानो युधिष्ठिरः पुरः सरो येषांते १२ सदस्या ऋत्विजोन्यैव द्विजश्रेष्ठाः निर्ययुः १३ किंच गंधादिभिः स्वलंकृता नानारीनार्यश्च मिथो विजह्रुः १४ रमानेवाहतैलेति किंच सांद्रकुंकुमादि

ऋत्विक्सदस्यबहुवित्तविहृतैःप्रेष्ठविशिष्टेषु सत्कृतसमर्हणारत्निणाभिः ॥ वैद्येव माल्वत पतेश्चरणां प्रविष्टं वक्त्रस्तनस्त्वचवथमस्त पनद्यनेद्यौ ॥ ८ ॥ मृदंगशंखपणवधुंधुर्यानकगोमुखाः ॥ वादित्राणि विचित्राणि नेदुरावभृथोत्सवे ॥ ९ ॥ नर्त्तक्यो ननृतुर्हृष्टा गायकायूथशोजगुः ॥ वीणावेणुतलोन्नाद स्तेषां स दिवमस्पृशत ॥ १० ॥ चित्रध्वजपताकाग्रैरिभेद्रस्यंदनार्वभिः ॥ स्वलंकृतैर्भटैर्भूपा निर्ययूरुक्ममालिनः ॥ ११ ॥ यदुसृंजयकांबोजकुरुकेकयकोसलाः ॥ कंपयंतो भुवं सैन्यैर्यजमानः पुरःसराः ॥ १२ ॥ सदस्यर्त्विक्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा ॥ देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः ॥ १३ ॥ स्वलंकृता नरा नार्यो गंधस्रग्भूषणांवरैः ॥ विलिंपंत्योभिषिंचंत्यो विजह्रुर्विविधै रसैः ॥ १४ ॥ तैलगोरसगंधोदहरिद्रासांद्रकुंकुमैः ॥ पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः ॥ १५ ॥ गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नरेद्र्यः ॥ ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहास

भिः पुंभिर्लिप्तास्ताश्च तिपंत्यो वारयोषितश्च विजह्रुः १५ नृभिर्गुप्ता रथादिपानैर्द्देव्यो राजपत्न्यो निरगमन् निरगुः एत विकसद्वदना विरेजुः १६ ॥ उपलब्धुं विमानवरैर्देव्यो यथा तद्वत ॥ मातुलेयैः सखिभिश्च परितः सिच्यमानाः सव्रीडेन हासेन विकसितवदनानि यासां ताः ॥ १६ ॥ रामराम

राम
७०

देवान्नृपतिश्रान्हन्उतमस्त्वीन्मस्त्वीनपि ॥ हतीभिः उदकनोदनवर्म्मेर्यथैः ॥ सेवनपोत्रेश्च मनलधियांकामिनां ॥ १७ ॥ क्रियाभिराज्ञिक्रियाभिः क्रतुराट् मशारारो
राजसूयस्य ॥ १८ ॥ पत्नीसंयाजेयागविशेषः ॥ अवभृथसंबंधिश्चावभृथ्यं चैतेश्चरित्वातानन्तष्टाये त्यर्थः ॥ १९ ॥ अहतेन्तृततेश्चानचेवश्चर्वितवान् ॥ १२ ॥ स्तरामा
तादेवरात्तमस्त्वीन्मिषिषुर्हतीभिः क्लिन्नाश्वरविदृतगात्रक्कचोरुमध्याः ॥ श्रोत्ककापुत्रकवरापवमानमाल्याः ज्ञोमंरधुम्मलधियांहवि
र्विहारैः ॥ १७ ॥ ससंभ्रमाङ्गथमात्रूदः मरस्त्रैहरुकममालिनं ॥ व्यरोवतस्वपत्नीभिः क्रियाभिः क्रतुराडिव ॥ १८ ॥ पत्नीसंयाजावभृथ्यैश्चरित्वातेत
मृत्विजः ॥ आचांतंस्नापयावक्रुर्गंगायां सहकृष्णया ॥ १९ ॥ देवदुंदुभयोनेदुर्नरदुंदुभिभिः समं ॥ मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः
१० ॥ सस्नुस्तत्रततः सर्व्वेवर्णाश्रमयुता नराः ॥ महापातक्यपियतः सद्योमुच्येतकिल्विषात् ॥ ११ ॥ अथराजाहतेक्षौमेपरिधायस्वलंकृतः
ऋत्विक्सदस्यविप्रादीनानर्चाभरणांबरैः ॥ १२ ॥ बंधुज्ञातिनृपान्मित्रसुहृदोन्यांश्चसर्व्वशः ॥ अभीक्ष्णं पूजयामास नारायणपरो नृप ॥ १३
सर्वेजनाः सुरुरुचोमणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घ्यहाराः ॥ नार्यश्चकुंडलयुगालकवृंदजुष्टवक्त्रश्रियः कनकमेखलयाविरे
जुः ॥ १४ ॥ अथर्त्विजोमहाशीलाः सदस्याब्रह्मवादिनः ॥ ब्रह्मक्षत्रियविट्शूद्राराजानोयेसमागताः ॥ १५ ॥ देवर्षिपितृभूतानिलोकपालाः सहा
नुगाः ॥ पूजितास्तमनुज्ञाप्यस्वधामानिययुर्नृप ॥ १६ ॥ हरिदासस्यराजर्षेराजसूयमहोदयं ॥ नैवातृप्यन्प्रशंसंतः पिबन्मर्त्योमृतंयथा ॥ १७ ॥ ततोयुधि
ष्ठिरोराजासुहृत्संबंधिबांधवान् ॥ प्रेम्णानिवारयामासकृष्णंचत्यागकातरः ॥ १८ ॥ भगवानपितत्रागन्यवात्सीत्तत्प्रियंकरः ॥ प्रस्थाप्ययदुवीरांश्चसांबा
दींश्चकुशस्थलीं ॥ १९ ॥ इत्थंराजाधर्म्मसुतोमनोरथमहार्णवं ॥ सुदुस्तरंसमुत्तीर्य कृष्णेनासीद्गतज्वरः ॥ २० ॥
मिवरुक्कांतिर्येषांतेमणिकुंडलैः सहिताः स्रगुष्णीषादयोयेषांते ॥ कुंडलयुगेनालकवृंदेन चजुष्टावक्त्रश्रीर्यासांताः ॥ १४ ॥ गतज्वरः निश्चितंआसीत ॥ २० ॥

२०७
७१

अद्भुतेऽस्मात्मायस्मतस्य ॥ २१ ॥ नरेंद्रादीनां लक्ष्मीर्लक्ष्म्या विभूतयः विश्वसृजा मयेन उपकॢप्ताः विरचिताः ताभिः सह ॥ ऊर्णाद् दुर्योधनो तप्यत ॥ २२ ॥ महि
षीमहस्त्वमिमिव कृत्वोपलक्षणं ॥ क्षोणीन्द्रैस्त्रिभिः शोभायमानमध्ये हव्यवाहव्याहमध्यमित्यर्थः ॥ ऊर्ध्वकुंडमेः शोणाहाराय सतत ॥ श्रीमंतिष्ठखानियस्य

एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं ॥ अतप्यद्राजसूयस्य महित्वं वाद्भुतात्मनः ॥ २१ ॥ यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना
विभांति किल विश्वसृजोपकॢप्ताः ॥ ताभिः पतीन्नृपरराजसुतोपतप्ये यस्यां विषण्णहृदयः जगताडतप्यत ॥ २२ ॥ यस्मिन्म
हामखपतेर्महिषी महस्वं श्रोणिभरेणशतकैः क्षोणीन्द्रैस्त्रिभिः शोभं ॥ मध्ये हव्यवाहकुंडकुंकमशोणहारं श्रीमन्मुखं च वलकुंत
लकुंडलाद्यं ॥ २३ ॥ सभायां मयकॢप्तायां क्वापि धर्मसुतो धिया ॥ वृतोनुजैर्द्विजैर्मित्रैश्च कृष्णेनापि स्ववक्षसा ॥ २४ ॥ आसीनः कांच
ने साक्षात् आसने मघवानिव ॥ पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वंदिभिः ॥ २५ ॥ तत्र दुर्योधनो मानी परीतो भ्रातृभिर्नृप ॥ किरीट
माली न्यविशत् असिहस्तः क्षिपन्रुषा ॥ २६ ॥ स्थलेभ्यगृह्णाद्वस्त्रांतं जलं मत्वा स्थले पतत् ॥ जले च स्थलवद्भ्रांत्या मयमायाविमोहितः ॥ २७ ॥

तत ॥ चैलैः कुंतलैश्च आद्यं संपन्नं मशोभतेतिशेषः ॥ २३ ॥ क्वापि करावित्स विरेज इति शेषः स्वस्य वक्षसा हिताहितत्तापकेन ॥ २४ ॥ मानी साहंकार किरी ॥ टाप
रं च माला च विद्येते यस्य सः न्यविशत् ॥ विवेश ॥ क्षिपन् द्वास्थादीन् अधिक्षिपन् ॥ २६ ॥ तत्र स्थले च वस्त्रांतं अभ्यगृह्णात् ॥ आकुंचितवान् ॥ कुतः यस्मिन्
स्थले एव भ्रांत्या जलं मत्वा जले च अपतत् कुतः स्थलवत् भ्रांत्या ॥ २७ ॥

७१

भुवो भारं जिहीर्षुरिति। अद्य मया परिहितेन कलहवीजेन कृष्णं संहारं करिष्यामीति मन्वे इति॥ किं वयस्य दशा दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रांतिं प्राप्य माययाऽनिमित्तमात्रं॥ सः भूभारहरणवीजं दुर्योधनभ्रमेती मा हि हास्येन वत्सस्य परां एवं विधाय तूष्णीमासीदित्यर्थः॥३७॥ दशमे पंचसप्ततितमः

जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयोऽपरे॥ निवार्यमाणा ह्यन्योन्यं राज्ञा कृष्णानुमोदिताः॥३८॥ स व्रीडितोऽवाग्वदनो रुषा ज्वलन् निष्क्रम्य तूष्णीं प्रययौ गजाह्वयम्॥ हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवाभवत्॥३९॥ बभूव तूष्णीं भगवान्भुवो भारं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा॥४०॥ एतत्तेऽभिहितं राजन्यत्पृष्टोऽहमिह त्वया॥ सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ॥४१॥ इति श्रीभागवते महापुराणे दशमस्कंधे दुर्योधनमानभंगः पंचसप्ततितमोऽध्यायः॥ श्रीशुक उवाच॥ अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप॥ क्रीडानरशरीरस्य यथा सौभपतिर्हतः॥१॥ शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः॥ यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा॥२॥ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजां॥ अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत॥३॥ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं॥ आराधयामास नृपः पांसुमुष्टिं सकृद्ग्रसन्॥४॥ संवत्सरांते भगवानाशुतोष उमापतिः॥ वरेणच्छंदयामास शाल्वं शरणमागतं॥५॥

ततः षट्सप्ततितमे वृष्णिशाल्वमहामृधे॥ द्युमद्गदाप्रहारेण रणात्कृष्णस्य निर्गमः॥१॥ संपाद्य धर्म्मराजस्य राजसूयमहोदयं॥ निहत्य सौभराजादीन्योधापारमदच्युतः॥ यत्त्वहं सकृत्पांसुमुष्टिमेकां ग्रसन् भक्षयन्॥ संवत्सरांत इति॥ आशुतोषोऽपि भगवान्वरदानेच्छस्तु वाचेत्यर्थः॥५॥

२०३ तथेतिप्रतितायगिरीशेनाभिदिष्टः अथसप्तयंलोहमयंपुरंसोमहंततंनिर्मायरचयित्वाप्राकारात् ७ ॥ तमसोधकारस्यधामस्थानमथ्यत्रंअन्येईशमहदुःशाप

७१ ॥ ८ ॥ ग्रामाराग्रहाः ॥ अट्टालास्तदुपरिगृहाः ॥ तोलिकास्तल्पर्यंतकुड्यानिताः विहारान्क्रीडास्थानानिवसवंभेज ॥ किंच ॥ विमानान्यातस्याठ्यत्र

देवासुरमनुष्याणांगंधर्वोरगरक्षसां ॥ अभेद्यंकामगंवेधमयानंश्रुधिमीषणम् ६ ॥ तथेतिगिरिशादिष्टोमयः परपुरंजयः
पुरंनिर्मायशाल्वायप्राहात्सौभमयस्मयं ७ ॥ तल्लब्ध्वाकामगंयानंतमोधामदुरासदं ॥ ययौद्वारवतींशाल्वोवैरंकृष्णेनसंस्म
रन् ८ ॥ निरुद्धसेनयाशाल्वोमहत्याभरतर्षभ ॥ पुरींबभंजोपवनान्युद्यानानिचसर्वशः ९ ॥ सगोपुराणिद्वाराणिप्रासादाट्टा
लतोलिकाः ॥ विहारान्सविमानाग्र्यानिपेतुः शस्त्रवृष्टयः १० ॥ शिलाद्रुमाश्चाशनयः सर्पाआसारशर्कराः ॥ प्रचंडश्चक्रवा
तोभूद्रजसाच्छादितादिशः ॥ ११ ॥ इत्यर्द्यमानासौभेनकृष्णस्यनगरीभृशं ॥ नाभ्यपद्यतशंराजंस्त्रिपुरेणयथामही ॥ १२ ॥ प्रद्युम्नो
भगवान्वीक्ष्यबाध्यमानानिजाःप्रजाः ॥ माभैष्टेत्यभ्युवाचाद्वीरोरथारूढोमहारथः १३ ॥ सात्यकिश्चारुदेष्णश्चसांबोक्रूरः महानु
जः ॥ हार्दिक्योभानुविंदश्चगदश्चशुकसारणौ १४ ॥ अपरेचमहेष्वासारथयूथपयूथपाः ॥ निर्ययुर्दंशितागुप्तारथेभाश्वपदातिभिः
१५ ॥ ततः प्रववृतेयुद्धंशाल्वानांयदुभिःसह ॥ यथासुराणांविबुधैस्तुमुलंलोमहर्षणं ॥ १६ ॥ ताश्चसौभपतेर्मायादिव्यास्त्रैरुक्मिणीसु — राम

वक्त्रारयः प्रेतः ॥ १० ॥ आसाराः शर्कराः धाराः संपातवज्जलोपलाः ॥ ११ ॥ शंसुखंनाभ्यपद्यत ॥ १२ ॥ तुमुलं तः क्षणेननाशयामासनैशंतमइवोष्णगुः ॥ १७ ॥ ७१
व्याकुलं ॥ रोमहर्षणंरौद्रं ॥ १६ ॥ नैशंनिशासंबंधितमः उष्णगुः सूर्यइव ॥ १७ ॥

किंच ॥ विव्याधेति ॥ त्वर्णामयानि सुवर्णनिष्टष्टप्राणानि येषां तैः अयोलोहं तन्मयानि विमुखानि पर्याणि येषां तैः ध्वजिनीपालं सेनान्यं संततानि निनिमित्तानि पर्वा
णि ग्रंथयो येषां ॥ १८ ॥ सैनिकान्समरान्नेतृन्नू सारथीन् ॥ १९ ॥ स्वपरसेनयोर्छिद्यमानाः पूजयामासुः सम्मानितवंतः ॥ २० ॥ कदाचिद्रूपं कदाचिदेक
रूपं क्वचिद्दृश्यते क्वचिन्न दृश्यते ॥ एवं दुर्विभाव्यं दुर्वितर्क्यमभूत ॥ किंच ॥ क्वचिदिति ॥ एवं ततद्दूरवस्थितं अनवस्थितं वाभूत ॥ २१ ॥ अग्रिवद्दाहकाः अ

विव्याध पंचविंशत्या स्वर्णपुंखैरयोमुखैः शाल्वस्य ध्वजिनीपालं शरैः संनतपर्वभिः ॥ १८ ॥ शतेनाताडयच्छाल्वमेकैकेनास्य
सैनिकान् ॥ दशभिर्दशभिर्नेतृन्वाहनानि त्रिभिस्त्रिभिः ॥ १९ ॥ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः ॥ दृष्ट्वा तं पूजयामासुः स
र्वे स्वपरसैनिकाः ॥ २० ॥ बहुरूपैकरूपं तत्तद्दृश्येत न च दृश्यते ॥ मायामयं मयकृतं दुर्विभाव्यं परैरभूत ॥ २१ ॥ क्वचिद्भूमौ क्वचिद्व्यो
म्नि गिरिमूर्ध्नि जले क्वचित् ॥ अलातचक्रवद्भ्राम्यत्सौभं तत्तद्दूरवस्थितं ॥ २२ ॥ यत्र यत्रोपलक्ष्येत ससौभः सहसैनिकः ॥ शाल्वस्तत
स्ततो मुंचन्शरान्सात्वतयूथपाः ॥ २३ ॥ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः ॥ पीड्यमानपुरानीकः शाल्वोऽमुह्यत्परेरितैः ॥ २४ ॥
शाल्वानीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः ॥ न तत्यजू रणं स्वं स्वं लोकद्वयजिगीषवः ॥ २५ ॥ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्रक्प

र्कवह्निगपतमर्यैतः संस्पर्शो येषां तैः आशीविषवदेकरेशस्पर्शमात्रेण मारकत्वात् दुरासदैः दुः
सहैः पाद्यमानं पुरं अनीकानि चयस्य सः परैर्यदुभिरीरितैः प्रेरितैः ॥ २४ ॥ भृशार्दिताः अपि स्वं स्वं रणं स्थानं वा हातुं दद्दशुः ॥ २५ ॥ मौर्व्या कार्ष्णायसमयं गदया आहत्य प्रहृत्य २६ पीडितः ॥ आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली ॥ २६ ॥

प्र

२७
७३

अपोवाहश्च न्यतो निनाय ॥ १७ ॥ मतमन्नो विनाशीवं वविन्नं यत्पतेन ॥ १८ ॥ पितरौ नमकस्मादपि संगम्यतत्पार्श्वगत्वा तां स्पृष्टः स्वयोगं किं त्वव्दपामीति ॥ २० ॥ भ्रातृजामयो भ्रातृभार्यां निर्श्रितं मतं क्रौञ्चं कथयिष्यंति तन्कथनमप्युक्तोति ॥ कथं कथमिति ॥ २१ ॥ विमोहे मम थ एतत्स्वरूपमर्प्यगां ॥ धर्म्म माह

प्रद्युम्नं गदया शीर्णवक्त्रस्थलमपि रिंमं ॥ अपोवाहरणात्तु तो धर्म्मविदारुकात्मजः ॥ १७ ॥ लब्धसंज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् अहो असाध्विदं सूत यद्रणान्मेपसर्पणं ॥ १८ ॥ नयदूनां कुले जातः श्रूयते रणविच्युतः ॥ विना मत्क्लीबचित्तेन सूतेन प्राप्तकल्मषात् ॥ १९ ॥ किं नु वक्ष्येभिसंगम्य पितरौ रामकेशवौ ॥ युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमं ॥ २० ॥ व्यक्तं मे कथयिष्यन्ति हसन्त्यो भ्रातृजामयः क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ॥ २१ ॥ सारथिरुवाच ॥ धर्म्मं विजानतायुष्मन् कृतमेतन्मया विभो ॥ सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ॥ २२ ॥ एतद्विदित्वा तु भवान्मयापोवाहितो रणात् ॥ उपसृष्टः परेणेति मूर्च्छितो गदया हतः ॥ २३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे षट्सप्ततितमोऽध्यायः ॥ श्रीशुक उवाच ॥ स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः ॥ नय मां द्युमतः पार्श्वं वीर इत्याह सारथिं ॥ १ ॥ विधमंतं स्वसैन्यानि द्युमन्तं रुक्मिणीसुतः ॥ प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् ॥ २ ॥ चतुर्भिश्चतुरो वाहान् सूतमेकेन चाहनत ॥ द्वाभ्यां धनुश्च केतुं च शरेणान्येन वै शिरः ॥ ३ ॥

सूत इति ॥ २३ ॥ अपोवाहितः अपनीतः उपसृष्टः उपसर्गं पीडां प्राप्त इति कृत्वा यतः परेण शत्रुणा गदया हतः सन्मूर्च्छितो निःसंज्ञतां गतो भवानिति ॥ २३ ॥ इति रामेषट्सप्ततितमः ॥ सप्तसप्ततितमे ताना मायाविवर्त्तनाः कृष्णेनागत्य शाल्वस्त्विहतः यान्सौभं च चूर्णितं ॥ रचितः सन्नद्धः विधमंतं नाशयंतं ॥ प्रतिहत्य प्रतिरुध्य ॥ १ ॥ अशनाविनियोगमाह ॥ चतुर्भिरिति ॥ ३ ॥

याम
७२

सौभेयाः सौभस्थाः ॥४॥ नवानां राष्ट्राणां समाहारो नवराष्ट्रं नवराष्ट्राणां समाहारस्त्रिनवराष्ट्रं सप्तविंशतिराष्ट्राणीत्यर्थः तत्कुलमाकुलं उच्च
णघोरं ॥५॥ परमतत्सुपन्यस्तितेऽ इद्धसंस्थगतः तत्पारिना ॥ आह चेति स्वगतमेव पथि चिंतां विजृंभितभाषणां आर्यमिश्राभिसंगतो बलभद्रसहितः दुर्निमि

गरस्मात्यकिंशां वाद्याज सक्तः सौभपतेर्बलम् ॥ पेतुः सहस्रशः सौभेयाः सर्वे संछिन्नकंधराः ॥४॥ एवं यदूनां शाल्वानां निघ्नतामितरे
तरं ॥ युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणम् ॥५॥ श्रीशुक उवाच ॥ इद्धसंस्थगतः कृष्ण आहूतो धर्मसूनुना ॥ राजसूयेऽथ निर्वृत्ते शि
शुपाले च संस्थिते ॥६॥ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथाम् ॥ निमित्तान्यतिघोराणि पश्यन् द्वारवतीं ययौ ॥७॥ आह चाह
मिहायातः आर्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ॥८॥ वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणम्
सौभं च शाल्वराजं च दारुकं प्राह केशवः ॥९॥ रथं प्रापय मे सूत शाल्वस्यांतिकमाशु वै ॥ संभ्रमस्ते न कर्तव्यो मायावी सौभराडयं ॥
इत्युक्तश्चोदयामास रथमास्थाय दारुकः ॥ विशंतं ददृशुः सर्वे स्वे परे चारुणानुजं ॥११॥ शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः प्रा
हरत्कृष्णसूताय शक्तिं भीमरवां मृधे ॥१२॥ तामापतंतीं नभसि महोल्कामिव रंहसा ॥ भासयंतीं दिशः शौरिः सायकैः शतधाच्छिनत् ॥१३॥

न दर्शनाक्तलविज्ञ एव चिंतयन् द्वारकामागत्य स्वानां कदनं वीक्ष्य सौभं च शाल्वराजं च वीक्ष्य पुरमंडपरक्षणं प्रति निरूप्य निरूप्य दारुकं प्राहेत्यन्वयः ॥९॥ ते त्वयाशु
स्थापय मम गधिष्ठाय ॥ अरुणानुजं ध्वजे च यस्य तं गरुडं ॥११॥ हतप्रायस्वबलस्येश्वरः ॥१२॥

द.उ
७४

तं शाल्वं शरसंदोहैः शरजालैः खं सूर्य इव रश्मिभिरिति ह्न नीलत्वविपुलात्वादिभिराकाशोपमा सौभस्य अचिंत्यवेगत्ववाङ्मल्यादिभिः शरजालं रश्मिसा दृश्यं प्राप्यते नैव रश्मिवत शरजालप्रसारणात सूर्यतुल्यः श्रीकृष्ण इति ॥१४॥ शौर्याङ्गं ॥१५॥ सख्युः शिशुपालस्य ईक्षतामस्माकं प्रमत्तः अनवहितः व्यापा

तं वषोडशभिर्विद्ध्वा बाणैः सौभं चखेभ्रमत ॥ अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः ॥१४॥ शाल्वः शौरेस्तु दोः सव्यं सशार्ङ्गं शार्ङ्ग-
धन्वनः ॥ बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतं ॥१५॥ हाहाकारो महानासीत् भूतानां तत्र पश्यतां ॥ विनद्य सौभराडुच्चैरिदमाह
जनार्दनं ॥१६॥ यत्त्वया मूढ नः सख्युर्भ्रातुर्भार्या हृतेक्षतां ॥ प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा ॥१७॥ तं त्वाद्य निशितैर्बा
णैरपराजितमानिनं ॥ नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥१८॥ श्रीभगवानुवाच ॥ वृथा त्वं कत्थसे मंद न पश्यस्यंतिकेंतक
म् ॥ पौरुषं दर्शयंति स्म शूरा न बहुभाषिणः ॥१९॥ इत्युक्त्वा भगवान् शाल्वं गदया भीमवेगया ॥ तताड जत्रौ संरब्धः स चकंपे वम
न्नसृक् ॥२०॥ गदायां संनिवृत्तायां शाल्वस्त्वंतरधीयत ॥ ततो मुहूर्त्त आगत्य पुरुषः शिरसाच्युतं ॥२१॥ देवक्या प्रहितोस्मीति नत्वा
प्राह वचो रुदन् ॥ कृष्ण कृष्ण महाबाहो पितस्ते पितृवत्सल ॥२२॥ बद्ध्वापनीतः शाल्वेन सौनिकेन यथा पशुः ॥ निशम्य विप्रियं कृ
ष्णो मानुषीं प्रकृतिं गतः ॥ विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा ॥२३॥

दितः निहतः ॥१७॥ अपराजितोहमिति मानवंतं ॥ अपुनरावृत्तिं मृत्युं तिष्ठेः स्थास्यसि ॥१८॥ घृणी दयावान् ॥२३॥

राम
७४

जनिता जनयिता ॥ ईशश्चेत्तर्हि शत्रोः पाहि स्वेन ॥२६॥ स्वबोधः स्वतः सिद्धज्ञानवानपि स्वजनस्नेहतः प्रकृतो मानुषस्वभावे उपप्लुतो निमग्नः आस्ते इति शठनतन त्तन्महं मासुरीं मायामबुध्यत मायेयमिति ज्ञातवान् ॥२८॥ स्वप्नं स्वप्नप्रपंचं यथा ॥२९॥ एवं परमतमुपन्यस्य निराकरोति एवमिति ॥ केचके च न नान्विताः अनन्विताः पूर्वापरानुसंधानरहिताः ॥ तदाह ॥ यत्स्ववाच इति तत्रानुस्मरंतीत्यर्थः ॥ अयमभिप्रायः न तावदज्ञानस्यार्थे रामेण सह गतः श्रीकृष्णः संकर्ष

कथं राममसंभ्रान्तं जित्वाजेयं सुरासुरैः ॥ शाल्वेनाल्पीयसानीतः पिता मे बलवान्विधिः ॥२४॥ इति ब्रुवाणे गोविंदे सौभराट् प्रत्युपस्थितः ॥ वसुदेवमिवानीय कृष्णं चेदमुवाच ह ॥२५॥ एष ते जनिता तातो यदर्थमिह जीवसि ॥ वधिष्ये वीक्षतस्तेमुमीशश्चेत्पाहि बालिश ॥२६॥ एवं निर्भर्त्स्य मायावी खड्गेनानकदुंदुभेः ॥ उत्कृत्य शिर आदाय खस्थं सौभं समाविशत् ॥२७॥ ततो मुहूर्त्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषंगतः ॥ महानुभावस्तदबुध्यदासुरीं मायां स शाल्वप्रसृतां मयोदितां ॥२८॥ न तत्र दूतं न पितुः कलेवरं प्रबुद्ध आजौ समपश्यदच्युतः ॥ स्वाप्नं यथा चांबरचारिणं रिपुं सौभस्थमालोक्य निहंतुमुद्यतः ॥२९॥ एवं वदंति राजर्षे ऋषयः केच नान्विताः ॥ यत्स्ववाचो विरुध्येत नूनं ते न स्मरंत्युत ॥३०॥ क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः ॥ क्व चाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः ॥३१॥

णमनुज्ञाप्येति शङ्खमुक्तत्वात् ॥३०॥ अस्य मायाविततेत्याह ॥ क्वशोकमोहाविति भयं चादुर्निमित्तदर्शनकृतं न त्वं हन्युः पौरा ममेति यदुक्तं यच्च स हस्ताच्छार्ङ्गं न्यपतदिति उक्तं तद्रूपं वा क्वेति ॥ अज्ञेषु संभवो येषां ते ॥ अखंडितानि विज्ञानज्ञानैश्वर्याणि यस्य सः तत्र विज्ञानं स्वरूपविषयं ॥ ज्ञानं बाह्यविषयं ॥३१॥ ॥

२०३
७५

किंच ॥ यस्यपादसेवया ऊर्जिताऽप्यकलाया आत्मविद्यातया ॥ अनादिस्थाप्यावात्मविपर्ययग्रहस्तत्संग्रहं कृशः हाबीडुःखीत्यादिलक्षणाः तर्हि त्वं तिना
शयंतिमतः एषत्वं परव ॥ तस्यममतांगतेः कृतोनुमोहइति श्रुतानेनत्वद्वचनं सत्यमित्यर्थः ॥ २१ ॥ किंतर्हि मत्यं ॥ तदाह ॥ तंशास्त्रपूर्णेगीरिति ॥ वर्म्म कवचं ॥ तदे

यत्पादसेवोर्जितयात्मविद्ययाहि त्वयानाद्यात्मविपर्ययग्रहं ॥ लभंत आत्मीयमनंतमैश्वरं कुतोनुमोहः परमस्य सद्गतेः ॥ २१ ॥ तं
शास्त्रपूर्णैः प्रहरंतमोजसा शाल्वंशरैः शौरिरमोघविक्रमः ॥ विद्धाच्छिनद्वर्म्म धनुःशिरोमणिं सौभंच शत्रोर्गदयारुरोजह ॥ २२ ॥
तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया महत्त्वधा ॥ विसृज्य तद्भूतलमास्थितो गदामुद्यम्य शाल्वोऽच्युतमभ्यगाद्द्रुतं
२४ ॥ आधावतः सगदं तस्य बाहुं भल्लेन छित्वाथ रथांगमद्भुतं ॥ वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इवोदयाचलः
जहार तेनैव शिरः सकुंडलं किरीटयुक्तं पुरमायिनो हरिः ॥ वज्रेण वृत्रस्य यथा पुरंदरो वभूव हाहेति वचस्तदा नृणां ॥ २६ ॥ तस्मि
न्निपतिते पापे सौभे च गदयाहते ॥ नेदुर्दुंदुभयो राजन्दिवि देवगणेरिताः ॥ २७ ॥ सखीनामपचितिं कुर्वन्दंतवक्रो रुषाभ्यगात्
इति श्रीभागवते महापुराणे दशमस्कंधे सौभवधः सप्तसप्ततितमोऽध्यायः ॥ शुक उवाच । शिशुपालस्य शाल्वस्य पौंड्रकस्यापि दुर्म्म
तिः ॥ परलोकगतानां च कुर्वन्पारोक्ष्यसौहृदं ॥ १ ॥ एकः पदातिः संक्रुद्धो गदापाणिः प्रकंपयन् ॥ पद्भ्यामिमां महाराज महासत्वो व्यदृ
श्यत ॥ २ ॥

जवसंज ॥ २५ ॥ प्रलयार्कसन्निभं प्रलयकालीनसूर्यसदृशं ॥ २४ ॥ देवगणेरिताः वादिताः ॥ किंच ॥ सखीनामिति ॥ २७ ॥ २८ सप्तसप्ततितमः
ततः सप्तसप्ततितमे दंतवक्त्रविदूरथौ ॥ हत्वा हरिः पुरे रेमे रामः सन्नंततो वधीत् ॥ सखीनामपचितिं कुर्वन्नित्युक्तं तदेवाह ॥ शिशुपालस्येति ॥ पारोक्ष्यसौहृदं प

एम
७५

प्रत्यधात् प्रतिहतोऽध ॥ ३ ॥ मुकुंदं प्राह दुर्मेधा इत्यादेरधिक्षेपपरता स्फुटैव ॥ परमार्थेन तु ॥ दुर्मेधाः गतमेधाः प्राह ॥ मुकुंदं तं तत्रीये जन्मनि मुक्तिदानार्थमाग
तं ॥ अद्येति ॥ जन्मत्रये प्रविविष्णुमाणोऽयं ब्रह्मशापावमानेन भवान्महत्स्वामी दृष्टिपथं गतः प्राप्तः एतर्हि ध्या महं महं अतिहर्षे वीप्सा ॥ ४ ॥ किंच हे श्रीकृष्ण त्व
मस्माकं मातुलेयो बंधुः एवमपि मित्रध्रुक् मित्राणि घातितवान् ॥ मा वजिघांससि ॥ तस्मादस्माकं त्वत्तो मृत्युः सतन कादाच्युपहप्राप्नोतु नेंदुर्धीरः अत त्वा
मेतावन्मात्रं मह्योवे विक्षितराह ॥ हे अमरमर्द्य महन समर्थं ज्ञात्वधर्मेणमेवितं गरदयात्वां हनिष्येऽहं स्यामि ॥ तामेकवारं महस्वेति ॥ नन्वयं ... तत्स्यां

तं तथा यांतमालोक्य गरदामारायमत्वरः ॥ अवक्रत्वरयात्कोप्मः सिंधुर्वेलेव प्रत्यधात् ॥ ३ ॥ गरादिह्यप्यकाहूषोमुकुंदं प्राह दुर्मेधाः ॥
दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ॥ ४ ॥ त्वं मातुलेयो नः कृष्ण मित्रध्रुक् प्रांजिघांससि ॥ अतस्त्वां गरदयामेऽहं हनिष्ये वज्रकल्पया ॥
॥ ५ ॥ तर्ह्योनृणाप्य मुपैष्यत्र मित्राणां मित्रवत्सलः ॥ बंधुरूपमरिं हत्वा व्याधिरिह वरघ्यथा ॥ ६ ॥ एवं न्रूरैस्तरनवाक्यैः कृष्णमतीतै विद्विषं
गरदयाताडयन्मूर्ध्नि सिंहवद्यमनरत्ववसः ॥ ७ ॥

त्वद्दंदाको वा स्महे तेनैव मित्याह ॥ अवज्रकल्पया उत्पलमालावदतिकोमलयेत्यर्थः ॥ ५ ॥ नन्वेवं हननेन
कस्त्वव पुरुषार्थस्तमाह ॥ तर्हीति ॥ ऋतेन विद्यते ऋणो यस्मात हे मर्द्य तेनेत्यर्थः परमार्थतः स्वामिनं एतर्हि हमं वधेन बंधुत्वं पंचब्रह्मशापेन शत्रुत्वेन घ्नती नं त्वां
हत्वा मित्राणामानृण्यमुपैष्यामि ॥ उपैष्यामि ॥ विशेषेण आधीयते मनसि चित्त्यत इति व्याधिः ॥ ६ ॥ हेतर्ग्यामितया चरतीति तथा तमी श्वरं हत्वा ज्ञात्वधर्मेणारा
ध्य ॥ हंतेर्गत्यर्थस्य ज्ञानार्थत्वात् ज्ञात्वेति वा तेन यथा पित्रादीनामानृण्यमुपयातितद्वदिति ॥ ६ ॥ क्रूरैरित्यादिप्रतीत्यमभिप्रायेण ॥ नीत्रैरंकुशादिभिः ॥ ७ ॥

९.उ.
७६

एवंश्रीकृष्णोमहाबलानपिलीलयाजयत्येवेतिकृत्वामकरध्वजरक्षधादिभिःनिर्जितइतिपश्यदृष्टीनांप्रीयतेनित्यंजयेहेतवः योगेश्वरः भगवा
न्जगदीश्वरइति ॥ विदूरथातमामथ्यपूतनादिनोः कृतं ॥ कृष्णस्तुपारमन्मागदामोहन्सुतवल्वलो ॥ तस्यसंगमाह ॥ कृत्वेति ॥ ५ ॥ प्रतिस्रोतप्रतिलो

गदयाभिहितोप्याजौनवबालयदद्भुत ॥ कृष्णोपितमहन्गुर्व्याकौमोदक्यास्तनांतरे ॥ ६ ॥ गदानिर्भिन्नहृदयउद्वमन्रुधिरंमुखात्
प्रसार्यकेशबाह्वंघ्रीन्धरण्यांन्यपतद्व्यसुः ॥ ७ ॥ ततः सूक्ष्मतरंज्योतिःकृष्णमाविशदद्भुतं ॥ पश्यतांसर्वभूतानांयथाचैद्य
वधेनृप ॥ ८ ॥ विदूरथस्तुतद्भ्राताभ्रातृशोकपरिप्लुतः ॥ आगच्छदसिचर्माभ्यांउच्छ्वसंस्तज्जिघांसया ॥ ९ ॥ तस्यचापततःकृष्णश्चक्रे
णक्षुरनेमिना ॥ शिरोजहारराजेंद्रसकिरीटंसकुंडलं ॥ १० ॥ एवंसौभंचशाल्वंचदंतवक्रंसहानुजं ॥ हत्वादुर्विषहानन्यैरीडितः
सुरमानवैः ॥ ११ ॥ मुनिभिःसिद्धगंधर्वैर्विद्याधरमहोरगैः ॥ अप्सरोभिःपितृगणैर्यक्षैःकिन्नरचारणैः ॥ १२ ॥ उपगीयमानविजयः
कुसुमैरभिवर्षितः ॥ वृतश्चवृष्णिप्रवरैर्विवेशालंकृतांपुरीं ॥ १३ ॥ एवंयोगेश्वरःकृष्णोभगवाञ्जगदीश्वरः ॥ ईयतेपशुदृष्टीनांनि
र्जितोजयती[illegible]ः ॥ १४ ॥ श्रुत्वायुद्धोद्यमंरामः कुरूणांसहपांडवैः ॥ तीर्थाभिषेकव्याजेनमध्यस्थःप्रययौकिल ॥ १ ॥ स्नात्वाप्रभा
सेसंतर्प्यदेवर्षिपितृमानवान् ॥ सरस्वतींप्रतिस्रोतंययौब्राह्मणसंवृतः ॥ २ ॥ पृथूदकंबिंदुसरस्त्रितकूपंसुदर्शनं ॥ विशालंब्र
ह्मतीर्थंचचक्रंप्राचींसरस्वतीं ॥ यमुनामनुयान्येवगंगामनुचभारत ॥ जगामनैमिषंयत्रऋषयःसत्रमासते ॥ ३ ॥

मं ॥ २ ॥ सुदर्शनंतीर्थं ॥ चक्रंतीर्थं ॥ ३ ॥ यमुनामनुयानितानिसर्वाणि ॥ गंगामनुचयानितानिसर्वाणिगत्वानैमिषारण्यंजगाम ॥ ३ ॥ एवमत्र

राम
७६

अभिषेच्य श्रीराम इति ज्ञात्वा ॥ २० ॥ महर्षेर्व्यासस्य ॥ २१ ॥ सूतं प्रतिलोमजं न कृतं प्रह्वणमञ्जलिश्च येन तं ॥ अध्यासीनं च तान् तेभ्योऽप्युच्चैरासीनमित्यर्थः ॥ २२ ॥
अज्ञानेनाध्यास्त इति चेत् ॥ नैवमित्याह ॥ ऋषेरिति ॥ ननु बहुज्ञः कथमेवं कुर्यात् ॥ अदान्तस्येति ॥ गुणाय यथोचितानुष्ठानाय ॥ २४ ॥ विप्रानध्यास्तां अन्यस्य किं

तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अभिनन्द्य यथान्यायं प्रणम्योत्थाय वार्चयन् ॥ २० ॥ सोऽर्चितः सपरीवारः कृतासनपरिग्रहः
रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥ २१ ॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणाञ्जलिम् ॥ अध्यासीनं च तान्विप्रांश्चुकोपोद्वीक्ष्य मा-
धवः ॥ २२ ॥ कस्मादसाविमान्विप्रानध्यास्ते प्रतिलोमजः ॥ धर्मपालांस्तथैवास्मान्वधमर्हति दुर्मतिः ॥ २३ ॥ ऋषेर्भगवतो भू-
त्वा शिष्योऽधीत्य बहूनि च ॥ सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥ २४ ॥ अदान्तस्याविनीतस्य वृथा पण्डितमानिनः ॥ न गुणाय
भवन्ति स्म नटस्येवाजितात्मनः ॥ २५ ॥ एतदर्थो हि लोकेऽस्मिन्नवतारो मया कृतः ॥ वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः ॥ २६ ॥
एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि ॥ भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥ २७ ॥ हाहेतिवादिनः सर्वे मुनयः खिन्नमान-
साः ॥ ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो ॥ २८ ॥ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनन्दन ॥ आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते
अज्ञानतो वाचरितस्त्वया ब्रह्मवधो यथा ॥ ॥

विंकारोतु किं न वेति चेत् ॥ अत आह ॥ एतदर्थ इति ॥ धर्मध्वजिनः उत्तमलिंगधारिणः ॥ २६ ॥ भावित्वादिति नहि
भवितव्यं केनापि परिहर्तुं शक्यत इत्यर्थः अहनत् ॥ अहन् ॥ २७ ॥ नैत्वया ॥ २८ ॥ अधार्मिकप्रतिलोमजवधः कोयमधर्म इति चेत्तत्राहुः अस्येति ॥ प्राणापववनाय
आत्मनः शारीरस्यनातिक्लमो यस्मिन्नतत्तथायुश्च रक्षन्निति ॥ २९ ॥

रा·उ
७७

ब्रह्मवधेपि किं मम भेऽश्वरस्येति चेत॥ सत्यमेवं॥ तथापि प्रायश्चित्तं कर्त्तव्यमित्याशयेनाह॥ योगेश्वरस्येति सार्द्धेन॥ आम्नायो ब्राह्मणो न हन्तव्य इत्यादि लक्षणः
तथाप्येतस्या ब्रह्महत्यायाः पावनं प्रायश्चित्तं॥ हे लोकपावन॥ अनन्यचोदितः स्वयमेव भवान्यदि करिष्यति तर्हि लोकसंग्रहो भविष्यति॥ २१॥ वधस्य निर्द्दे
शः प्रायश्चित्तं प्रथमे मुख्यकल्पे कल्पे विधियतां उपदिश्यतां॥ २२॥ किं च वतहे सुनयः एतस्य दीर्घमायुः सत्वं बलं इंद्रियं तत्पारवं॥ अन्यच्च यद्यत भवद्भिराशा
सितं मयेप्सितं तत्तत्भूतमस्तु॥ २२॥ अहंकारी नाम सत्यता यथा भवेत॥ अस्माकं च वचः सत्यं यथा भवेत्तथा विधीयतामित्यर्थः॥ २४॥ तत्स्य पारयत्राह॥ आत्मा वाइ

योगेश्वरस्य भवतो नाम्नायो पि नियामकः॥ यद्येतद्ब्रह्महत्यायाः पावनं लोकपावन॥ २१॥ चरिष्यति भवाल्लोकसंग्रहो नान्यचोदितः
श्री भगवानुवाच॥ करिष्ये वधनिर्द्देशं लोकानुग्रहकाम्यया॥ नियमः प्रथमे कल्पे यावान्स तु विधीयतां॥ २२॥ दीर्घमायुर्बतैतस्य
सत्वमिंद्रियमेव च॥ आशासितं च यत्तन्मा ध्येयं योगमायया॥ २३॥ ऋषय ऊचुः॥ अत्वस्यतव वीर्यस्य मृत्योरस्माकमेव च॥ यथा भवे
द्वचः सत्यं तथा राम विधीयतां॥ २४॥ श्री भगवानुवाच॥ आत्मा वै पुत्रउत्पन्न इति वेदानुशासनं॥ तस्मादस्य भवेद्वक्ता आयुरिंद्रियस
त्ववान्॥ २५॥ किं वः काम्यो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ॥ अजानतस्त्वपचितिं यथा मे चिन्त्यतां बुधाः॥ २६॥

ति अगारगान्सं भवमिहस्य यारभिजायसे॥ आत्मा वै पुत्रनामासि सजीव शरदः शतमित्यादि वेदानुशासनं वेद वचनं तस्मादस्य रोमहर्षणस्य पुत्र उग्रश्रवाः
भवतापुराणप्रवक्ता भवेत सत्वं आयुरादि मारच भवेत॥ अतः साक्षाज्जीवनार्ह स्वस्य मृत्योश्च सत्यता पुत्ररूपेणावायुरादि सिद्धेश्च भवद्वचनस्यापि सत्यता स्या
दिति भावः॥ २५॥ प्रथमं तावदपचितिं कथयत ततः रहं करिष्यामीत्याह॥ किं च काम इति किं विषयो वः कामो वर्त्तते तद्ब्रूतेति॥ अथानन्तरं ब्रह्मदंडग्रहीत्वा अपचितिं
निःकृतिमजानतो मे हे बुधाः यथावच्चिन्त्यतामयविनिरिति॥ २६॥

राम
७७

प्रथमं तावदपेक्षितं कर्तव्यं कथयन्ति इल्वलस्येति द्वाभ्यां ॥ ३६ ॥ प्रायश्चित्तमाह ततश्चेति ॥ परीत्य प्रदक्षिणीकृत्य समाधानाद्धिरूपाद्विशेषादेकाग्रमा
त्रपुनन्नमित्यविरोधः सुसमाहितः कामक्रोधादिरहितः ॥ चरित्वा संकर्षणि ॥ ४० ॥ दशमेऽष्टसप्ततितमः ॥ ऊनाशीतितमे रामो वल्वलं द्विजतुष्टये निहत्य तीर्थ

क्षयमूढः ॥ इल्वलस्य सुतो घोरो वल्वलो नाम दानवः ॥ स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ॥ ३६ ॥ तं पापं जहि दाशार्ह तन्नः शु
श्रूषणं परं ॥ पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणम् ॥ ३७ ॥ ततश्च भारतं वर्षं परीत्य सुसमाहितः ॥ चरित्वा द्वादशमासांस्तीर्थ
स्नायी विशुद्ध्यसे ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे बलदेवतीर्थयात्रायां सूतवधो नामाष्टसप्ततितमोऽध्यायः ॥ श्रु
क उवाच ॥ ततः पर्वण्युपावृत्ते प्रचण्डः पांशुवर्षणः ॥ भीमो वायुरभूद्राजन्पूयगन्धस्तु सर्वशः ॥ १ ॥ ततोऽमेध्यमयं वर्षं वल्वलेन वि
निर्मितम् ॥ अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक् ॥ २ ॥ तं विलोक्य बृहत्कायं भिन्नाञ्जनचयोपमम् ॥ तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्र
भ्रुकुटीमुखम् ॥ ३ ॥ सस्मार मुशलं रामः परसैन्यविदारणम् ॥ हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ॥ ४ ॥ तमाकृष्य हलाग्रेण वल्वलं ग
गनेचरं ॥ मुशलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः ॥ ५ ॥ सोऽपतद्भुवि निर्भिन्नललाटोऽसृक्समुत्सृजन् ॥ मुञ्चन्नार्त्तस्वरं शैलो यथा वज्रहतो
ऽरुणः ॥ ६ ॥ संस्तुत्य मुनयो रामं प्रयुज्यावितथाशिषः ॥ अभ्यषिञ्चन्महाभागा वृत्रघ्नं विबुधा यथा ॥ ७ ॥ वैजयन्तीं ददुर्मालां श्रीधामाम्लानप
ङ्कजां ॥ रामाय वाससी दिव्ये दिव्यान्याभरणानि च

स्नानाद्यैः सततहत्यामपातुरत ॥ १ ॥ उपावृत्ते प्राप्ते भिन्नो विदीर्णोऽञ्जनचयः उपमा यस्य तं श्मश्रुतिक्ष्णमित्यर्थः ॥
तप्तताम्रवत्शिखाश्मश्रूणि च यस्य तं दंष्ट्राभिरुग्रं भ्रुकुट्या युतं मुखं यस्य तं ॥ ३ ॥ अरुणो रुधिरेण दैत्यः ॥ शैलो यथा ॥ धातुभिः ॥ ६ ॥ श्रियो धामानि अम्लानानि पंकजानि
यस्यां ताम् ॥ ८ ॥

किं तत्स्मरः यत इति आश्रवत उत्स्मात ॥९॥ अनुस्रोतेन अतुलो यतः पुलहाश्रमं हरिक्षेत्रं ॥१०॥ गोमत्यां गंडक्यां विपाशायां च स्नात्वा शोणे च आप्लुतः ॥११॥ दृष्ट्वा

अथैतैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः स्नात्वा सरोवरमगात् यतः सरयूरास्रवत् ॥९॥ अनुस्रोतेन सरयूं प्रयागमुपगम्य सः
स्नात्वा संतर्प्य देवादीन् जगाम पुलहाश्रमं ॥१०॥ गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः गयां गत्वा पितॄनिष्ट्वा गंगासागरसंग
उपस्पृश्य महेन्द्राद्रौ रामं दृष्ट्वाभिवाद्य च ॥११॥ सप्तगोदावरीं वेणां पंपां भीमरथीं ततः ॥१२॥ स्कंदं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयं
द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः ॥१३॥ कामकोष्णीं पुरीं कांचीं कावेरीं च सरिद्वरां श्रीरंगाख्यं महापुण्यं यत्र सन्निहितो हरिः
॥१४॥ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा समुद्रसेतुमगमत् महापातकनाशनं ॥१५॥ तत्राप्लुत महादेवं ब्राह्मणेभ्यो हलायुधः
कृतमालां ताम्रपर्णीं मलयं च कुलाचलम् ॥१६॥ तत्रागस्त्यं समासीनं नमस्कृत्याभिवाद्य च योजितस्तेन चाशीर्भिरनुज्ञातो गतो
र्णवं ॥१७॥ दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं ॥१८॥ विष्णुः सन्निहितो यत्र स्नात्वा
स्पर्शनं गवायुतम् ततोपि व्रज्य भगवान् केरलांस्त्रिगर्त्तकान् ॥१९॥ गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः आर्यां द्वैपाय
नीं दृष्ट्वा शूर्पारकमगाद्बलः ॥२०॥ तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकम् प्रविश्य रेवामगमत् यत्र माहिष्मती पुरी मनुती

संपूज्याश्रीशैलं श्रीपर्वतं कांचीं पुरीं दक्षिणमथुरां फाल्गुनं अनंतपुरं पंचाप्सरसं सरः ॥१८॥ शूर्प र्थमुपस्पृश्य प्रभासं पुनरागमत् ॥२१॥
शिनञ्प्तुस्पृशत ॥१९॥ केरलादीन् देशान् द्वीपमयनं समस्तात्मा ॥२०॥ ॥२१॥

विनाशानं कुरुक्षेत्रं ॥ विवक्षुः वक्तुमिच्छुः किं वदिष्यतीति भियात् तूष्णीमासन्निति ॥ २५ ॥ अन्यः पराजयो वा रणः संग्रामः ॥ २८ ॥ अर्थवद्वाक्यं ॥ २९ ॥ दिष्टं प्राचीनक

श्रुत्वा द्विजैः कथ्यमानं कुरुपांडवसंयुगे ॥ सर्वराजन्यनिधनं भारं मेने हृतं भुवः ॥ २३ ॥ स भीमदुर्योधनयोर्गदाभ्यां युध्यतोर्मृधे ॥ वार
यिष्यन्विनशनं जगाम यदुनंदनः ॥ २४ ॥ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि ॥ अभिवाद्याभवन् तूष्णीं किं विवक्षुरिहागतः ॥ २५ ॥
गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ ॥ मंडलानि विचित्राणि चरंताविदमब्रवीत् ॥ २६ ॥ युवां तुल्यबलौ वीरौ हे राजन् हे वृकोदरः
एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकम् ॥ २७ ॥ तस्मादेकतरस्येह युवयोः समवीर्ययोः ॥ न लक्ष्यते जयोन्यो वा विरमत्वफलो रणः
२८ ॥ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् ॥ अनुस्मरंतावन्योन्यं दुरुक्तं दुःकृतानि च ॥ २९ ॥ दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ
उग्रसेनादिभिः प्रीतैः ज्ञातिभिः समुपागतः ॥ ३० ॥ तं पुनर्नैमिषं प्राप्तमृषयो याजयन्मुदा ॥ क्रत्वंगं क्रतुभिः सर्वैः निवृत्ताखिलविग्र
हम् ॥ ३१ ॥ तेभ्यो विशुद्धं विज्ञानं भगवान्व्यतरद्विभुः ॥ येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः ॥ ३२ ॥ स्वपत्न्यावभृथस्नातो ज्ञातिबं
धुसुहृद्वृतः ॥ रेजे स्वज्योत्स्नयेवेंदुः सुवासाः सुष्ठ्वलंकृतः ॥ ३३ ॥ ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः ॥ अनंतस्याप्रमेयस्य मा
यामर्त्यस्य संति हि ॥ ३४ ॥ योनुस्मरेत रामस्य कर्माण्यद्भुतकर्मणः ॥ सायं प्रातरनंतस्य विष्णोः स दयितो भवेत् ॥ ३५ ॥ इति श्रीभागव
ते महापुराणे दशमस्कंधे एकोनाशीतितमोध्यायः ७९ ॥

र्म ॥ ३० ॥ समुपागतः संगतः ॥ ३१ ॥ क्रत्वंगं यज्ञमूर्त्तिं ॥ ३१ ॥ आत्मनि अधिष्ठाने विश्वगं सर्वा
नुस्यूतं येनैव विदुः पश्यंति तद्विशुद्धं विज्ञानं व्यतरत् ददौ ॥ ३५ ॥ दशमे एकोनशीतितमः ॥ रामराम

२०७ अथाशीतितमेऽध्यायः श्रीरामानंदगृहागतम् । संप्रत्याहद्धदर्थेप्रसंगरुवासकथांतरा ॥१॥ हरादिमारकोहरिः । भावकारशंसता । अतः परं विनैवतंनिजोपका
७९ रमाचरत् ॥ रामचरितानिश्रुत्वा पुनर्मुकुंदवीर्याणिशृच्छति ॥ हे भगवन्श्रोतुमिच्छामेतद्वयः ॥१॥ उन्नमश्लोकस्यसत्यामनोहराः विषयैवैतत्सज्जनिकाः ॥
कथा ॥ विशेषज्ञः सारवित् ॥ विषयाः विषादंप्राप्ताः ॥२॥ कथाश्रवणात्त्वेवनूनंदृष्टांततयान्यार्थनाह ॥ सावागिति ॥ तावेववकरौयोयानतत्कर्मिकर्त्तारौ ॥ तदेवमनः

राजोवाच ॥ भगवन्यानिचान्यानिमुकुंदस्यमहात्मनः ॥ वीर्याण्यनंतवीर्यस्यश्रोतुमिच्छामहेप्रभो ॥१॥ कोनुश्रुत्वासकृद्ब्रह्म
न्नुत्तमश्लोकसत्कथाः ॥ विरमेतविशेषज्ञोविषण्णः काममार्गणैः ॥२॥ सावाग्ययातस्यगुणान्गृणीतेकरौचतत्कर्मकरौ
मनश्च ॥ स्मरेद्वसंतंस्थिरजंगमेषुशृणोतितत्पुण्यकथाः सकर्णः ॥३॥ शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्पश्यतितद्धिच
क्षुः ॥ अंगानिविष्णोरथतज्जनानांपादोदकंयानिभजंतिनित्यं ॥४॥ सूत उवाच ॥ विष्णुरातेनसंपृष्टोभगवान्बादरायणिः ॥ वासु
देवेभगवतिनिमग्नहृदयोब्रवीत् ॥५॥ श्रीशुक उवाच ॥ कृष्णस्यासीत्सखाकश्चिद्ब्राह्मणोब्रह्मवित्तमः ॥ विरक्तइंद्रियार्थेषुप्रशां
तात्माजितेंद्रियः ॥६॥ यदृच्छयोपपन्नेनवर्त्तमानोगृहाश्रमी ॥ तस्यभार्याकुचैलस्यक्षुत्क्षामावतथाविधा ॥७॥

यतास्थिरजंगमेषुवसंतंस्मरेत् ॥ यस्तस्यपुण्याः कथाः शृणोतिसएवकर्णः ॥३॥ उभयलिंगंभवतस्यैवलिंगमितिमत्वाऽऽनमेत्तदेवशिरः । तस्यलिंगमित्येतदाम
वयत्पश्यतितदेवचक्षुः तान्येवांगानियानिपादोदकंभजंतीति ॥४॥ तथाविधाकुचेलाकिंचक्षुत्क्षामायतः किंचित्सपन्नंतस्मैपरिविष्यस्वयंक्षुधातीर्णा ॥ ७९

म्लायता शुष्यता सीदमानानां भर्तृभोगेषु पादेन नाशङ्क्य ऋषिवत्सीदन्ती वेपमाना भयेन कंपमाना ॥ ७ ॥ भोजवृष्ण्यंधकेश्वर इति तत्स्वीकारमात्रेण सर्वे ते दासा इति तो इति
भावः ॥ ११ ॥ नात्यभीष्टान् परिपाकविरसत्वात् ॥ १२ ॥ अप्यस्तीति किमस्तीति विप्रः ॥ १४ ॥ मह्यं मम ॥ १५ ॥ गुल्मानि रक्षार्थं सैन्यस्थानानि कक्षाः प्रतोलीः अग्नी

पतिव्रता पतिं प्राह म्लायता वदनेन सा ॥ दरिद्रं सीदमाना वै वेपमानाभिगम्य च ॥ ७ ॥ ननु ब्रह्मन् भगवतः सखा साक्षाच्छ्रियः पतिः
ब्रह्मण्यश्च शरण्यश्च भगवान् सात्वतर्षभः ॥ ९ ॥ तमुपैहि महाभाग साधूनां च परायणं ॥ दास्यति द्रविणं भूरि सीदते ते कुटुंबिने
१० ॥ आस्ते धुना द्वारवत्यां भोजवृष्ण्यंधकेश्वरः ॥ स्मरतः पादकमलमात्मानमपि यच्छति ॥ ११ ॥ किं न्वर्थकामान् भजतो नात्यभीष्टान्
जगद्गुरुः ॥ स एवं भार्यया विप्रो बहुशः प्रार्थितो मुहुः ॥ १२ ॥ अयं हि परमो लाभ उत्तमश्लोकदर्शनं ॥ इति संचिंत्य मनसा गमनाय
मतिं दधे ॥ १३ ॥ अप्यस्त्युपायनं किंचिद्गृहे कल्याणि दीयतां ॥ याचित्वा चतुरो मुष्टीन् विप्रान् पृथुकतंडुलान् ॥ १४ ॥ चैलखंडेन तान्
बद्ध्वा भर्त्रे प्रादादुपायनं ॥ स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल ॥ कृष्णसंदर्शनं मह्यं कथं स्यादिति चिंतयन् ॥ १५ ॥ त्रीणि गु
ल्मान्यतीयाय तिस्रः कक्षाश्च सद्द्विजः ॥ विप्रोगम्यांधवृष्णीनां गृहेष्वच्युतधर्मिणां ॥ १६ ॥ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्वि
जः ॥ विवेशैकतमं श्रीमत् ब्रह्मानंदं गतो यथा ॥ १७ ॥ तं विलोक्याच्युतो दूरात् प्रियापर्यंकमास्थितः ॥ सहसोत्थाय चाभ्येत्य दोर्भ्यां
पर्यग्रहीन्मुदा ॥ १८ ॥ सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः ॥ प्रीतो व्यमुंचदब्बिंदून् नेत्राभ्यां पुष्करेक्षणः ॥ १९ ॥ ॥

याय अतिक्रम्य जगाम ॥ सद्द्विजः द्विजैः सहितः ततश्च अगम्यान् दुर्गमान् ये ॥ ये कावृष्ण्यपश्च तेषां गृहेषु तथा हरेर्द्व्यष्टसहस्राणां च ये गृहास्तेषां च मध्ये श्रीमत् एकतमं
गृहं विवेश तदा स सद्द्विजो ब्रह्मानंदं गतो यथा तथा अभूदिति शेषः ॥ १७ ॥ पर्यग्रहीत पर्यरंभत ॥ अब्बिंदून् आनंदाश्रूणि ॥ १९ ॥

१०३
८०

समर्हणां उपायनं उपहृत्य समर्प्य पादावनेजनीरपः ॥२०॥ धमनिभिः शिराभिः संततं व्याप्तं ॥२१॥ अवधूतं मलिनं ॥२२॥ विस्मयमाह किमनेनेति द्वाभ्यां संभृतः संमानितः ॥२५॥ मतोः वमतोः गृह्य गृहीत्वा ॥२६॥ भार्या ऊढा परिणीता न वेति गृहस्थलिंगदर्शनात भोगादर्शनाच्च संशयादिवप्रश्नः ॥२७॥ अप्रति

अथोपवेश्य पर्यंके स्वयं सख्युः समर्हणां ॥ उपहृत्यावनिज्यास्य पादौ पादावनेजनीः ॥२०॥ अग्रहीच्छिरसा राजन् भगवाँल्लोकपावनः ॥ व्यलिंपद्दिव्यगंधेन चंदनागुरुकुंकुमैः ॥२१॥ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा ॥ अर्चित्वावेद्य तांबूलं गां च स्वागतमब्रवीत ॥२२॥ कुचैलं मलिनं क्षामं द्विजं धमनिसंततं ॥ देवी पर्यचरत्साक्षाच्चामरव्यजनेन वै ॥२३॥ अंतःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना ॥ विस्मितो योसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः ॥ पर्यंकस्थां श्रियं हित्वा परिष्वक्तोग्रजो यथा ॥२५ कथयां चक्रतुर्गाथाः पूर्वा गुरुकुले सतोः ॥ आत्मनोर्ललिता राजन् करौ गृह्य परस्परं ॥२६॥ श्रीभगवानुवाच ॥ अपि ब्रह्मन् गुरुकुलात् भवता लब्धदक्षिणात् ॥ समावृत्तेन धर्मज्ञ भार्योढा सदृशी न वा ॥२७॥ प्रायो गृहेषु ते चित्तमकामविहितं यथा ॥ नैवातिप्रीयसे विद्वन् धनेषु विदितं हि मे ॥२८॥ २. तोभूदतिप्रीत्या अवधूतं सभाजितं ॥२३॥ किमनेन कृतं पुण्यमवधूतेन भिक्षुणा ॥ श्रिया हीनेन लोकेस्मिन् गर्हितेनाधमेन च ॥२४॥

बंधात् उद्वाहमनुमतं मत्वा हृष्टा पश्यति ॥ ते चित्तं नूनमकामविहितं कामैर्विद्धं तं न भवतीति मे विदितं यतो हि धनेषु वस्त्रादिषु नैवातिप्रीयसे ॥ हे विद्वन् इति विदुषस्त्वैतदुचितमिति भावः ॥ ॥२८॥ ॥गोविंदगोपालरामकृष्णसहाय

राम
८०

कामस्तत्त्वाभावे किं गृहधर्मैः क्लेशेनेत्याशंक्याह केचिदिति ॥ दैवीः ईश्वरमायारचिताः प्रकृतिर्विषयवासनाः त्यजंतः कामैरनाकृष्टचेतसामपि क
र्मकारणे दृष्टांतः यथाहमिति लोकसंग्रहं लोकस्य संग्रहो ग्रहणं यथा भवति तथाऽहमीश्वरोपि कर्माणि यथा करोमि तद्वत् ॥ १९ ॥ नोऽस्माकं वयोः यतो गुरोर्विज्ञेयं
परमात्मतत्त्वं तमसः संसारस्य ॥ २० ॥ तचात्मज्ञानप्रदस्य गुरोः त्यक्तप्रपंचत्वं वर्णाश्रमस्य सर्वानुगृह्णनाह ॥ सर्वाइति ॥ इह संसारे यत्र संभवो जन्ममात्रं स पिता
तावदाद्यः प्रथमो गुरुः पूज्यः ॥ कर्मविद्याप्रदं गुरुमाह ॥ द्विजातेः सतः पुंसः सत्कर्माणां यत्र संभवः उपनीय वेदाध्यापक इत्यर्थः स द्वितीयो गुरुः यथा

केचित्कुर्वंति कर्माणि कामैरहतचेतसः ॥ त्यजंतः प्रकृतीर्दैवीर्यथाहं लोकसंग्रहं ॥ १९ ॥ कश्चित्कुले वा संभूतो ब्रह्मन् स्मराम्यहं नोऽयतः
द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ॥ २० ॥ सैवेसत्कर्मणां साक्षाद्द्विजातेरिह संभवः ॥ आद्यो गुरुर्यथाश्रमिणां यथाहं ज्ञानदो गुरुः
॥ २१ ॥ नत्वर्थकोविदा ब्रह्मन्वर्णाश्रमवतामिह ॥ ये मया गुरुणा वाचा तरंत्यंजो भवार्णवम् ॥ २२ ॥ नाहमिज्याप्रजातिभ्यां तपसोपशमेन
न च ॥ तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥ २३ ॥

हमीश्वरस्तथा प्रथमाश्रपि पूज्य इत्यर्थः ॥ ब्रह्मविद्याप्रदं गुरुमाह ॥ आश्रमिणां सर्वेषामपि ज्ञानदो
यः स गुरुः साक्षादहमेवेति ॥ २१ ॥ अतो ज्ञानप्रदं गुरुरूपं मां मामाश्रित्य ये संसारं तरंति ते बुद्धिमंत इत्याह ॥ नत्विति ॥ हे ब्रह्मन् ते नतु वर्णाश्रमवतां मध्ये अर्थकोवि
दाः इह मनुष्यजन्मनि तत्रापि वर्णाश्रमत्वे सति ये मया गुरुणा गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेणांजः सुखेनैव भवार्णवं तरंति ॥ २२ ॥ ज्ञानप्रदाद्गुरोरधिकः
सेव्यो नास्तीत्युक्तं ॥ अत एव तद्भजनादधिको धर्मश्च नास्तीत्याह ॥ नाहमिति ॥ इज्या गृहस्थधर्मः प्रजापतिः प्रकृष्टजन्म उपनयनं तेन ब्रह्मचारिधर्म उपल
क्ष्यते तपसा वानप्रस्थधर्मः उपशमेन यतिधर्मः एतैरहं परमेश्वरः न तथा तुष्येयं यथा सर्वभूतात्मापि गुरुशुश्रूषयेति ॥ २३ ॥

२०३ ८१

किंच अस्माकं गुरुशुश्रूषणं किमपि दैवादेव समपन्नं तत्किं त्वया स्मर्यत इति पृच्छति अपिन इति गुरो नियमतामस्माकं यत्किमपि वृत्तं तत्कच्चित्कदाचित
२४ अपवृत्ते अपगते ऋतौ अकाल इत्यर्थः वातश्च वर्षं च तयोः समाहारः स्तनयित्नवो गर्जितानि वा भवन् २५ निम्नं कूलं न तत्प्रज्ञातं स्थानं २६ अवृत्ता संप्र
वः यानि श्वभ्राणि यस्मिन्नेवो दकेतु तत्र तस्मिन्वृत्त इत्यर्थः परिवभ्रिम भ्रमणे इत्यस्माद्धातोः परिपरितो वभ्रिम इडागमः आतुरान्दुःखवत इत्यर्थः २७ उवा

अपि नः स्मर्यते ब्रह्मन्वृत्तं नियमतां गुरो । गुहारण्ये स्थितानामिंधनानयने क्वचित २४ प्रविष्टानां महारण्यमपवृत्ते हि महत
द्विज । वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः २५ सूर्यश्चास्तंगतस्तावत्तमसावावृता दिशः । निम्नं कूलं जलमयं न प्राज्ञा
यत किंचन २६ वयं भृशं तत्र महानिलाम्भिर्विहन्यमाना मुहुरंधसंप्लवे । दिशो विदंथो तत परस्परं वने गृहीतहस्ताः परि
वभ्रिमातुराः २७ एतद्विदित्वा उदिते रवौ मां दीपनिर्गतः । अन्वेषमाणो नः शिष्यानाचार्यो पश्यदातुरान् २८ अहो हे पुत्रका
मध्यमस्मदर्थे तिदुःखिताः । आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः २९ एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिःकृतम् यद्वै
विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ३० तुष्टोऽहं वो द्विजश्रेष्ठाः सत्याः संतु मनोरथाः । छंदांस्ययातयामानि भवंत्विह परत्र च ।

वः कृपया स्नेहवशं यथा वयं कृतार्था इत्याह अहो इति आत्मा देहः २९ गुरोर्निःकृतं प्रत्युपकारः सर्वै
छंदोविधानिनेकानि वसतां गुरुवेश्मसु
अर्थाय स्मात्स्वात्मा देहस्तस्यार्पणं विनियोगः ३० अयातयामानि यातो यामो यस्य पक्वस्यान्नस्य तत्कृतसारं भवति तद्वदन्यदपि गतसारं मोणाद्वन्ना
यातयाममित्युच्यते अगतसाराणि छंदांसि मंत्रोः धीयमानानि भवंत्वित्यर्थः छंदोविधानानि एवंप्रकाराणि अनेकानि वृत्तानि किं त्वया स्मर्यंत इति शेषः ३१

राम ८१

फलितमुपसंहरति गुरोरिति ॥ अस्माभिः किमनिर्वृत्तं असंपन्नं येषामस्माकं भवता सत्यकामेन सह ॥४४॥ भवतस्तु सर्वमेतद्विडंबनमात्रमित्याह ॥ यस्येति
छंदोमयं वेदाख्यं ब्रह्म तथा श्रेयसामावपनं उद्भवस्थानं देहो मूर्तिर्यस्य तस्य तव ॥४५॥ २रामे शीतितमः ॥ एकाशीतितमे सख्युर्जीर्णान्पृथुकतंडुलान् ॥ प्रियप्रि

गुरोरनुग्रहेणैव पुमान्पूर्णः प्रशांतये ॥ ब्राह्मण उवाच ॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो ॥ भवता सत्यकामेन येषां वासो गुरोर
भूत ॥४४॥ यस्य छंदोमयं ब्रह्म देह आवपनं विभो ॥ श्रेयसां तस्य गुरुषु वासोत्यंतविडंबनम् ॥४५॥ इति श्रीभागवते महा
पु रा णे द श म स्कंधे भगवद्ब्राह्मणसंवादे अशीतितमोध्यायः ॥ श्रीशुक उवाच ॥ स इत्थं द्विजमुख्येन सह संकथयन्हरिः ॥ सर्वभूतम
नोभिज्ञः स्मयमान उवाच तम् ॥१॥ ब्रह्मण्यो ब्राह्मणं कृष्णो भगवान्प्रहसन्प्रियं ॥ प्रेम्णा निरीक्षणेनैव प्रेक्षन्खलु सतां गतिः ॥२
श्रीभगवानुवाच ॥ किमुपायनमानीतं ब्रह्मन्मे भवता गृहात ॥ अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत ॥३॥ भूर्यप्यभक्तोपहृतं
न मे तोषाय कल्पते ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥४॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ इत्युक्तोपि द्विजस्तस्मै व्री
डितः पतये श्रियः ॥५॥ पृथुकप्रसृतिं राजन्न प्रायच्छदवाङ्मुखः ॥ सर्वभूतात्मदृक् साक्षात्तस्यागमनकारणं ॥६॥ विज्ञायाचिंतयन्ना
यं श्रीकामो माभजत्पुरा ॥ पत्न्याः पतिव्रतायास्तु सखा प्रियचिकीर्षया ॥ प्राप्तो मामस्य दास्यामि संपदोमर्त्यदुर्लभाः ॥७॥

निर्वृत्तवानिंदुर्लभा तदाश्रमे ॥१॥ संकथयन् सखायं गोष्ठी कुर्वन् सर्वभूतानां मनसोभिज्ञः ॥ मदर्थं पृथुकानानीय दातुं लज्जत इति जानन्विचित्य यः प्रहसन्
केलीं कुर्वन् ॥२॥ लज्जयाः कथयतस्तामपास्यन्नाह ॥ अण्वपीति द्वाभ्यां ॥ सर्वभूतानामात्मदृक् अंतःकरणसाक्षी ॥ अमर्त्यानां देवानामपि दुर्लभाः ॥७॥

१०उ
८१

अतिजीर्णत्वाद्वसनस्यखण्डेनस्तन्मध्ये चीरेणावद्धान् ॥ ८ ॥ अंग हे सखे मां विश्वं विश्वात्मानं इति वदन्नेकां मुष्टिं जग्ध्वा ॥ ९ ॥ तत्परेति अयं भावः एतावता पुंसः इहा
मुत्र च मत्करात्कविलासभूतानां सर्वसंपदां समृद्ध्ये अलं ॥ अतः परं द्वितीयमुष्टिहरणेन मा मामेति रुधीनांडवैति त्वत्तोषकारणं भवत्तोषस्य कारणं य

इत्थं विचिन्त्य वसनाच्चीरबद्धान्द्विजन्मनः ॥ स्वयं जहार किमिदमिति पृथुकतंडुलान् ॥ ८ ॥ नन्वेतदुपनीतं मे परमप्रीणनं सखे ॥
तर्प्पयंत्यंगमां विश्वमेते पृथुकतंडुलाः ॥ ९ ॥ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमाददे ॥ तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्टिनः
॥ १० ॥ एतावतालं विश्वात्मन्सर्वसंपत्समृद्धये ॥ अस्मिंल्लोकेथवामुष्मिन्पुंसस्त्वत्तोषकारणं ॥ ११ ॥ ब्राह्मणस्तां तु रजनीमुषित्वा
च्युतमंदिरे ॥ भुक्त्वा पीत्वा सुखं मेने आत्मानं स्वर्गतं यथा ॥ १२ ॥ श्वोभूते विश्वभावेन स्वसुखेनाभिवंदितः ॥ जगाम स्वालयं तात प
थ्यनुव्रज्य नंदितः ॥ १३ ॥ स चालब्ध्वा धनं कृष्णान्न तु याचितवान्स्वयम् ॥ स्वगृहान्व्रीडितोगच्छन्महद्दर्शननिर्वृतः ॥ १४ ॥ अहो ब्रह्मण्य
देवस्य दृष्टा ब्रह्मण्यता मया ॥ यद्दरिद्रमतो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि ॥ १५ ॥ क्वाहं दरिद्रः पापीयान्क्व कृष्णः श्रीनिकेतनः ॥ ब्रह्म

याम्भवेत तथा सर्वसंपत्समृद्धये ॥ यावत्भक्तसमस्तद्विष्टा त्वत्तोषोरित्यर्थः ॥ ११ ॥ स्वर्गतं स्वर्गगावा बंधुरिति स्माहं बाहुभ्यां परिरंभितः ॥ १६ ॥ ॥ नहि
सितं ॥ १३ ॥ श्वोभूते उदिते रवौ विश्वं भावयतीति विश्वभावः तेनेति उरतो भाविनमिडुर्लभं विभवं सूचयति ॥ स्वसुखेन स्वानंदपूर्णेनेति दानेः हीनतां दर्श
यति ॥ न रहितो विनयोक्तिभिः ॥ १४ ॥ व्रीडितः स्वचित्तकार्पण्येन लज्जितः महतः श्रीकृष्णस्य दर्शनेन निर्वृतः ॥ १५ ॥ निर्वृत्तिमेवाह अहो इति चतुर्भिः यत यतः ८१

पूजितश्चंदनलेपनादिभिः ॥ १७ ॥ एवं संपूज्यापि धनस्यादाने कारणं कल्पयति ॥ स्वर्गापवर्गयोरिति द्वाभ्यां स्वर्गादीनां यद्यपि तस्य वरणं दानमेव कारणं ॥ १८ ॥ तथापि कारुणिकत्वात् भूयोपि धनं मत्तोन्मत्तस्मरेदादात् ॥ २० ॥ निजगृहं स्यातिकं तत्स्यांत तस्य विशेषणं स्मर्यति ॥ २१ ॥ विचित्रोपवनादिभिर्वृतं कथं भूतैः कूजद्भिर्द्विजकुलैः पक्षिसमूहैः व्याप्तैः तथा प्रोत्फुल्लानि कमलानि येषु तानि वारीणि येषु तानि तथोक्तैः ॥ २२ ॥ किं च जुष्टमिति हरिणीनामिवाक्षीणि यासां ताभिः

निवासितः प्रियाजुष्टे पर्यंके स्रातरो यथा ॥ महिष्याचीजितः श्रांतो वालव्यजनहस्तया ॥ १७ ॥ शुश्रूषया परमया पादसंवाहनादिभिः ॥ पूजितो देववद्देवेन विप्रदेवेन देववत् ॥ १८ ॥ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदां ॥ सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनं ॥ १९ ॥ अधनोयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् ॥ इति कारुणिको नूनं धनं मेऽभूरि नाददात् ॥ २० ॥ इति तच्चिंतयन्नंतः प्राप्तो निजगृहांतिकम् ॥ सूर्यानलेंदुसंकाशैर्विमानैः सर्वतो वृतम् ॥ २१ ॥ विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः ॥ प्रोत्फुल्लकुमुदांभोजकह्लारोत्पलवारिभिः ॥ २२ ॥ जुष्टं स्वलंकृतैः पुंभिः स्त्रीभिश्च हरिणाक्षिभिः ॥ किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत् ॥ २३ ॥ एवं मीमांसमानं तं नरा नार्योऽमरप्रभाः ॥ प्रत्यगृह्णन् महाभागं गीतवाद्येन भूयसा ॥ २४ ॥ पतिमागतमाकर्ण्य पत्न्युद्धर्षातिसंभ्रमा ॥
निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात्

तदैश्वर्यं दृष्ट्वा वितर्कितवान् ॥ तदाह किमिति प्रथमं तेजःपुंजं दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्य वेति ॥ स्थानं च हीयमिति ज्ञात्वा कथं तदिदं स्थानमिति एवं रूपमभूदिति ॥ २३ ॥ अमरप्रभाः तत्तुल्यकांतयः प्रत्यगृह्णन् उपायनादिभिरादृतवंतः ॥ २४ ॥ उद्गतो हर्षो यस्याः सा आलयात् कमलवनात् रूपधारिणी श्रीरिव ॥ स्वर्गास्तत्र भगवता आनीतत्वात् स्वर्गिणामिव तपोरूपव भूवइति भावः ॥ २५ ॥

२७
८२

उद्यास्यमेवंवंद्यइतिनिश्चयेनमनसासंकल्पेनयत्रमंदिरेपयःफेननिभाःशय्याःआस्तरणानीत्यादिसंपरस्तत्रसर्वसंपदांसमृद्धाविलोकातदीया
माहेतिचतर्थेनान्वयः यत्रवरांताः गजदंतमयाः पर्यंकाः यत्रआसनानिवमृदून्युपस्तरणानितूलादिमयानियेषुनानियत्रवमुक्तादामविलंबवंतिद्यु

पतिव्रतापतिंदृष्ट्वाप्रेमोत्कंठाश्रुलोचना ॥ मीलिताक्ष्यनमद्ग्रीवामनसापरिषस्वजे ॥१६॥ पत्नींवीक्ष्यविस्फुरंतींदेवींवैमानिकीमिव
दासीनांनिष्ककंठीनांमध्येभांतींसविस्मितः ॥१७॥ प्रीतःस्वयंतयायुक्तःप्रविष्टोनिजमंदिरम् ॥ मणिस्तंभशतोपेतंमहेंद्रभव
नंयथा ॥१८॥ पयःफेननिभाःशय्यादांतारुक्मपरिच्छदाः ॥ पर्यंकाहेमदंडानिचामरव्यजनानिच ॥१९॥ आसनानिचहैमानिमृ
दूपस्तरणानिच ॥ मुक्तादामविलंबीनिवितानानिद्युमंतिच ॥२०॥ स्वच्छस्फटिककुड्येषुमहामारकतेषुच ॥ रत्नदीपाभ्राजमा
नाललनारत्नसंयुताः ॥२१॥ विलोक्यब्राह्मणस्तत्रसमृद्धीःसर्वसंपदां ॥ तर्कयामासनिर्व्यग्रःस्वसमृद्धिमहैतुकीं ॥२२॥ नूनं
वतैतन्ममदुर्भगस्यशश्वद्दरिद्रस्यसमृद्धिहेतुः ॥ महाविभूतेरवलोकतोऽन्योनैवोपपद्येतयदूत्तमस्य ॥२३॥ ॥ ॥

मंतिचवितानानि ॥२०॥ निर्व्यग्रःसंस्थितःसन्नहैतुकीमाकस्मिकींस्वस्यसमृद्धिंतर्कयामासकुतएषासमृद्धिरागतेति ॥२२॥ निश्चिनोतिनूनमिति ॥
एतन्ममेति ॥ एषचासावहंचतस्यएतन्मममहतीविभूतिर्यस्यतस्यावलोकनादन्यत ॥२३॥

राम
८२

ननु सखेरवलोकनमात्रेण महदैश्वर्यं दत्तवान्॥ तर्हि रहस्यं दत्तमिति किं नावोचदत आह॥ नन्विति॥ ननु मे सखा समक्षमब्रुवाण एव याचिष्णवे याचकाय भूरिव
ह्वपि दिशते ददाति अत्र हेतुः भूरिभोजः स्वयं तद्देयं पर्जन्यवदीक्षमाण इति॥ अयमर्थः स्वयं तावद्भूरिभोजः बहुभोजः आप्तकामत्वात् लक्ष्मीपतित्वाच्च अतो यथा
पारावारपरिपूरकोऽतिवदान्यः पर्जन्यः कदाचिद्बह्वपि वर्षमल्पमेव मन्यमानो लज्जयेव समक्षमवर्षन् रात्रौ निद्राणे कर्षके तत्क्षेत्रमाप्लावयति॥ एवं श्रीकृष्णोऽपि
स्वभोगापेक्षया तद्देयमिन्द्रादिपदमतितुच्छमल्पं जानन् तस्यैव भजनं बहुमन्यमानः समक्षमब्रुवाण एव ददातीति॥ ३४॥ तदेवाह॥ किंचिदिति॥ उरु बह्वपि स्वदत्तं यत्

नन्वब्रुवाणो दिशते समक्षं याचिष्णवे भूर्यपि भूरिभोजः॥ पर्जन्यवत्तत्स्वयमीक्षमाणो दाशार्हकाणामृषभः सखा मे॥ ३४॥ किंचित्करो
त्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी॥ मयोपनीतं पृथुकैकमुष्टिं प्रत्यग्रहीत्प्रीतियुतो महात्मा॥ ३५॥ तस्यैव मे सौहृदस
ख्यमैत्रीदास्यं पुनर्जन्मनि जन्मनि स्यात्॥ महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषप्रसंगः॥ ३६॥ भक्ताय चित्रा भगवान् हि संप
दो राज्यं विभूतीर्न समर्थयत्यजः॥ अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं धनिनां मदोद्भवं॥ ३७॥

किंचित्करोतीति॥ अल्पं मन्यते सुहृत्कृतं तत्फल्गु अतितुच्छमपि भूरिकारी बहु मन्यत इत्यर्थः॥ अत एव मया उपनीतं समीपं नीतं प्रीतियुतः स्वयमेव गृहीतवान्॥ ३५॥ श्रीह
रेरस्य भक्तत्वात् अल्पं दृष्ट्वा तद्भक्तिं प्रार्थयते॥ तस्यैवेति॥ सौहृदं प्रेम च सख्यं हिताशंसनं वैमैत्री उपकारकत्वं वदास्यं सेवकत्वं तत्समाहारे एकवचनं॥ तस्मात्तत्सं
धिनो मे मम स्यान्न तु विभूतिः किंच॥ महानुभावेन तेनैव विषज्जतो विशेषेण संगं प्राप्नुवतस्तद्भक्तेषु उत्कृष्टः संगः स्यादिति॥ ३६॥ ननु भक्तैः फलं संपदं प्राप्य
पुनर्भक्तिं किमिति प्रार्थयसे अत आह॥ भक्तायेति॥ संपदः कोशादीन् राज्यमैश्वर्यं विभूतीः कलत्रपुत्रादीन् न समर्थयति न ददाति अपितु दृढां भक्तिमेव॥ उ
तः अदीर्घबोधाय॥ अविवेकिनो मम मत्तभक्ताभावादेवं जातं अतस्तद्भक्तिरेव स्यादिति भावः॥ ३७॥

२·३
८४

त्यक्ष्यन्‌शनैः शनैस्त्यागमभ्यस्यन्‌जायया सह बुभुजे ॥ ३८ ॥ श्रीकृष्णस्यैवं ब्रह्मण्यतां नातिविचित्रमित्याह ॥ तस्येति ॥ ३९ ॥ भृत्यैरजितमपि स्वभृत्यैः पराजि-
तं दृष्ट्वा तस्य ध्यानं तस्य वेगः तेनोद्ग्रथितमात्मबंधनमहंकारो यस्य सः गतिमित्याविर्शलिंगं धाम विशेषणं सतां ब्रह्मविदां प्राप्यमित्यर्थः ॥ ४० ॥ एत-
त्पृथुकोपाख्यानं श्रुत्वा तत्र ब्रह्मण्यतां विशेषतः श्रुत्वेति ॥ ४१ ॥ दशमे एकाशीतितमः ॥ द्व्यशीतितमे त्वागत्य कुरुक्षेत्रं रविग्रहे ॥ वृष्णीन्नृ हृष्ट्वा

इत्थं व्यवसितो बुद्ध्या भक्तोऽतीव जनार्दने ॥ विषयान्जायया त्यक्ष्यन्बुभुजे नातिलंपटः ॥ ३८ ॥ तस्यैव देवदेवस्य हरेर्यज्ञपतेः प्रभोः ॥
ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परम् ॥ ३९ ॥ एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृत्यैरजितं पराजितं ॥ तद्ध्यानवेगोद्ग्रथि-
तात्मबंधनस्तद्धाम लेभेऽचिरतः सतां गतिम् ॥ ४० ॥ एतद्ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः ॥ लब्धभावो भगवति कर्मबंधा-
द्विमुच्यते ॥ ४१ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पृथुकोपाख्याने एकाशीतितमोऽध्यायः ॥ श्रीशुक उवाच ॥ अथैकदा द्वा-
रवत्यां वसतो रामकृष्णयोः ॥ सूर्योपरागः सुमहानासीत्कल्पक्षये यथा ॥ १ ॥ तं ज्ञात्वा मनुजा राजन्पुरस्तादेव सर्वतः ॥ सम-
न्तपंचकं क्षेत्रं ययुः श्रेयोविधित्सया ॥ २ ॥ निःक्षत्रियां महीं कुर्वन्रामः शस्त्रभृतां वरः ॥ नृपाणां रुधिरौघेण यत्र चक्रे महाह्रदा-

रान्‌पानुवृत्तः कृष्णकथामियः ॥ १ ॥ श्रीरामस्तु हरे कृष्णः प्रकल्प्येंद्रपदं भुवि ॥ नंदादीन्सुहृदानंदीकुरुक्षेत्रं जगाम सः ॥ १ ॥ कल्पक्षये ॥ २ ॥ ३ ॥
यथा सर्वग्रासस्तथेत्यर्थः ज्योतिर्विद्भिः कथ्यमानमाशावेव ज्ञात्वा समंतपंचकं कुरुक्षेत्रं ब्रह्मण्यक्षत्रियवधस्थानत्वेन परशुरामस्यापि पापनिरासक-
त्वेन च क्षेत्रस्य पापनिराशकत्वमाह ॥ निःक्षत्रियामिति द्वाभ्यां ॥ ३ ॥

राम
८४

अन्योन्यो विद्वान्यथा ॥१॥ आगन् आजग्मुः भारतीः भारत्यः सुचंद्रशुकसारणौः सह ॥६॥ अनिरुद्धो द्वारकायां रक्षायामास्ते ॥ तथा कृतवर्मा च यूथपतिः
सेनानीः देवधिष्ण्याभैः विमानसंकाशैः तरलाः तरंगास्तद्वत्प्लवो गतिर्येषां तैः ॥७॥ विद्याधरद्युभिः विद्याधराणामिव द्युतिर्येषां महातेजाः महातेजसः

ईजेच भगवान्रामो यत्रास्पृष्टोपि कर्मणा ॥ लोकं संग्राहयन्नीशो यथान्योघापनुत्तये ॥४॥ महत्यां तीर्थयात्रायां तत्रागन्भारतीः प्रजाः
वृष्णयश्च तथाक्रूरवसुदेवाहुकादयः ॥५॥ ययुर्भारत तत्क्षेत्रं स्वमघं क्षपयिष्णवः ॥ गदप्रद्युम्नसांबाद्याः सुचंद्रशुकसारणैः ॥६॥ आ
स्तेनिरुद्धो रक्षायां कृतवर्मा च यूथपः ॥ ते रथैर्देवधिष्ण्याभैर्हयैश्च तरलप्लवैः ॥७॥ गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः ॥ व्यरोचंत म
हातेजाः पथि कांचनमालिनः ॥८॥ दिव्यस्रग्वस्त्रसंनाहाः कलत्रैः खेचरा इव ॥ तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ॥९॥ ब्रा
ह्मणेभ्यो ददुर्धेनूर्वासःस्रग्रुक्ममालिनीः ॥ रामह्रदेषु विधिवत्पुनराप्लुत्य वृष्णयः ॥१०॥ ददुः स्वन्नं द्विजाग्र्येभ्यः कृष्णे नो भक्तिरस्त्विति
स्वयं च तदनुज्ञाता वृष्णयः कृष्णदेवताः ॥११॥ भुक्त्वोपविविशुः कामं स्निग्धच्छायांघ्रिपांघ्रिषु ॥ तत्रागतांस्ते ददृशुः सुहृत्संबंधिनो नृपान्
॥१२॥ मत्स्योशीनरकौशल्यविदर्भकुरुसृंजयान् ॥ कांबोजकैकयान्मद्रान्कुंतीनानर्तकेरलान् ॥१३॥ अन्यांश्चैवात्मपक्षीयान्परांश्च शतशो
नृप ॥ नंदादीन्सुहृदो गोपान्गोपीश्चोत्कंठिताश्चिरं ॥१४॥ अन्योन्यसंदर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः ॥ आश्लिष्य गाढं नयनैः
स्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययुर्मुदं ॥१५॥

दिव्याः स्रग्वस्त्रमाः स्रग्वस्त्रसंनाहा येषां ॥९॥ पुनरप्यैन्द्रमाप्लुत्य यद्वा तस्मिन्नेव ह्रदे निविमज्ज्य स्नानं कृत्वा ॥१०॥
स्निग्धा शीतला छाया येषामंघ्रिपानां तेषामंघ्रिषु मूलेषु ॥१२॥ प्रोत्फुल्लैः हृद्वक्त्रसरोरुहैः श्रीः शोभा येषां ते ॥१५॥

२०७
८५

श्रुतिसौहृदेनयास्मितंतेनअमलाअपांगेदृशोर्दृष्टयोयासांताः मिथः संवीक्ष्य दोर्भिरभिरेभिरे आलिंगनंकृतवत्यः ॥ १६ ॥ संकथयामिथः सप्रेमगोष्ठ्या ॥ १७ ॥
तामेववसुदेवदृष्टयोः संकथामाह ॥ आर्येत्यादिचतुर्भिः अकृताशिषंअपूर्णमनोरथं ॥ १८ ॥ यस्सैदैवमदक्षिणांअननुकूलंतत्स्वजनमपिसंतंदूरदारये

ह्रियपश्च संवीक्ष्य मिथोतिसौहृदस्मितामलापांगदृशोऽभिरेभिरे ॥ स्तनैस्तनान्कुंकुमपंकरूषितान्निहत्यदोर्भिः प्रणयाश्रुलोचनाः
१६ ॥ ततोभिवाद्यतेवृद्धान्यविष्टैरभिवादिताः ॥ स्वागतंकुशलंपृष्ट्वाचक्रुः कृष्णकथामिथः ॥ १७ ॥ पृथाभ्रातृन्स्वसृर्वीक्ष्यतत्पुत्रान्पि-
तरावपि ॥ भ्रातृपत्नीर्मुकुंदंचजहौसंकथयाशुचः ॥ १८ ॥ कुंत्युवाच ॥ आर्यभ्रातरहंमन्येआत्मानमकृताशिषं ॥ यद्वाआपत्सुमद्वार्त्तां
नानुस्मरथसत्तमाः ॥ १९ ॥ सुहृदोज्ञातयः पुत्राभ्रातरः पितरावपि ॥ नानुस्मरंतिस्वजनंयस्यदैवमदक्षिणं ॥ २० ॥ वसुदेव उवाच ॥
अंबमास्मानसूयेथादैवक्रीडनकान्नरान् ॥ ईशस्यहिवशेलोकाः कुरुतेकार्यतेथवा ॥ २१ ॥ कंसप्रतापिताः सर्वेवयंयाताद्दिशंदिशं
एतर्ह्येवपुनः स्थानंदैवेनासादिताः स्वसः ॥ २२ ॥ श्रीशुक उवाच ॥ वसुदेवोग्रसेनाद्यैः यदुभिस्तेर्चितानृपाः ॥ आसन्नच्युतसंदर्शपर-
मानंदनिर्वृताः ॥ २३ ॥ भीष्मोद्रोणोंबिकापुत्रोगांधारीससुतातथा ॥ सदाराः पांडवाः कुंतीसंजयोविदुरः कृपः ॥ २४ ॥ कुंतिभोजोविरा-
टस्त्रभीष्मकोनग्नजिन्महान् ॥ पुरुजिद्द्रुपदः शल्योधृष्टकेतुः सकाशिराट् ॥ २५ ॥ दमघोषोविशालाक्षोमैथिलोमद्रकेकयौ ॥ युधा-
मन्युः सुशर्म्माचससुताबाल्हिकादयः ॥ २६ ॥ राजानोयेचराजेंद्रयुधिष्ठिरमनुव्रताः ॥ श्रीनिकेतंवपुः शौरेः सस्त्रीकंवीक्ष्यविस्मिताः
अथतेरामकृष्णाभ्यांसम्यक्प्राप्तसमर्हणाः ॥ प्रशशंसुर्मुदायुक्ताः वृष्णीन्कृष्णपरिग्रहान् ॥ २८ ॥

नानुस्मरंतिअतोममैवदैवंप्रतिकूलंयुष्माकंकोपराधइत्यर्थः ॥ २० ॥ ईशवशत्वमेवाह ॥ कंसप्रतापिताइतिहेस्वसः एतर्ह्येवसंप्रत्येव ॥ २२ ॥ युधिष्ठिरंयेनुव्रता

राम
८५

जन्मभाजः नृणां मध्ये सफलजन्मानः ॥१९॥ किंच न केवलं तत्स्पर्शनमेव अपि त्वत्यंतदुर्लभं वक्ष्यमाणं भवतः संपन्नमित्याह यद्विभूतिरिति द्वाभ्यां
यद्विभूतिरिति हे पृथ्वकाद्यं यस्येत्यर्थः विभूतिः कीर्त्तिः श्रुतिभिर्गीता ख्याता इदं विश्वममलमत्यर्थं पुनाति यस्य पादावनेजनपयो गंगा च ॥ यस्य च वेदा वाक्यानि उपदेशा
श्रुतिर्वेदाख्यो विश्वं पुनाति ॥ किंच ॥ कालेन भर्जितं ध्वस्तं भगं माहात्म्यं यस्याः सा तथाविधापि यस्यांघ्रिपद्मस्पर्शनोत्था आविर्भूता शक्तिर्यस्याः सा ते भूः
कंपविलानर्थानभिमतो वर्षति ॥२०॥ दर्शनं च स्पर्शनं च अनुपथः अनुगतिः प्रजल्पो गोष्ठी च शय्याशयनं च आसनं च अशनं भोजनं च यौनबंधः विवाह

अहोपेते भोज यूयं जन्मभाजो नृणामिह ॥ यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनां ॥१९॥ यद्विश्रुतिः श्रुतिनुतेदमलं पुनाति पादा-
वनेजनपयश्च शास्त्रं ॥ भूः कालभर्जितभगापि यदंघ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोऽखिलार्थान् ॥२०॥ तद्दर्शनस्पर्शनानुपथ-
प्रजल्पशय्यासनाशनसयौनसपिंडबंधः ॥ येषां गृहे निरयवर्त्मनि वर्त्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥२१॥ श्री-
शुक उवाच ॥ नंदस्तत्र यदून्प्राप्तान् ज्ञात्वा कृष्णपुरोगमान् ॥ तत्रागमद्वृतो गोपैरनःस्थार्थैर्दिदृक्षया ॥२२॥ तं दृष्ट्वा वृष्णयो हृष्टा-
स्तन्वः प्राणमिवोत्थिताः ॥ परिषस्वजिरे चैनं चिरदर्शनकातराः ॥२३॥

संबंधः सपिंडबंधः ऐहिकसंबंधः तेन सह दर्शनाद्युपलक्षितः सयौनः सपिंडबंधो येषां वोऽस्ति किंच येषां गृहे वो विष्णुः स्वयमास अभवत् ॥ निरयव-
र्त्मनि प्रवृत्तिमार्गे वर्त्तमानानां स्वर्गापवर्गाभ्यां विरमयति वितृष्णान् करोतीति तथा सः ॥ ते यूयं जन्मभाज इति ॥ यद्वा तदिति सामान्यनिर्देशः स इत्यर्थः सवि-
ष्णुः स्वयं येषां वो निरयवर्त्मनि संसारकारणे गृहे वर्त्तमानानामपि वध्यते संबध्यत इति बंधः दर्शनादिभिः संबंधः सन् स्वर्गापवर्गविरमश्चाशपरमहस्वेश-
रो बभूवेत्यर्थः ॥२१॥ अनःस्थार्थैरिति तत्रैव वासविकार्षयाशकटेषु स्थापितैरर्थैः सहागत इत्यर्थः ॥२२॥

२७
८६

वसुदेवस्तं परिष्वज्य प्रेमविह्वलो बभूवेति शेषः ॥ २४ ॥ तौ सुतौ परिरभ्य नंदो यशोदा च विरहशोकान् विजहतुः तत्यजतुः ॥ यद्वा शुचः अश्रूणि विजहतुः मुमुचुरित्यर्थः ॥ २६ ॥ व्रजेश्वरी यशोदा अनिवृत्तां निवृत्तिकारणे सत्यपि अनुवर्तमानां ॥ ऐंद्रमैश्वर्यं प्राप्यापि यस्याः प्रतिक्रिया कर्तुं न शक्यत इत्यर्थः ॥ २८ ॥ तत्र तां मैत्रीमाहतुः एतावदिति ॥ न दृष्टौ पितरौ याभ्यां तौ वत्सौ तत्तज्जन्मत्वादेवादृष्टपितरौ ॥ हे भवति युवयोः पित्रोर्न्यस्तावेतौ संप्रीणनादीनि प्राप्याकु

वसुदेवः परिष्वज्य संप्रीतः प्रेमविह्वलः ॥ स्मरन्कंसकृतान्क्लेशान्पुत्रन्यासं च गोकुले ॥ २४ ॥ कृष्णरामौ परिष्वज्य पितरावभिवाद्य च ॥ न किंचनोचतुः प्रेम्णा साश्रुकंठौ कुरूद्वह ॥ २५ ॥ तावात्मासनमारोप्य बाहुभ्यां परिरभ्य च ॥ यशोदा च महाभागा सुतौ विजहतुः शुचः ॥ २६ ॥ रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीं ॥ स्मरंत्यौ तत्कृतां मैत्रीं बाष्पकंठ्यौ समूचतुः ॥ २७ ॥ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि ॥ अवाप्याप्यैंद्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥ २८ ॥ एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि ॥ प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्र च भयौ न सतां परः स्वः ॥ २९ ॥ श्रीशुक उवाच ॥ गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति ॥ दृग्भिर्हृदीकृतमलं परिरभ्य सर्वास्तद्भावमापुरपि नित्ययुजां दुरापम् ॥ ४० ॥

गोपालकृष्णमहार

त्र च भयौ क्वचिदपि भयरहितौ भूत्वा वासं चक्रतुः ॥ कथंभूतयोः अक्ष्णोः नेत्रयोः रक्षकं पक्ष्म यद्वत् तथा रक्षकयोः ॥ युक्तं युवयोरेतत् यतः सतां परः स्व इति नास्ति वैषम्यं ॥ २९ ॥ अभीष्टत्वे लिंगं यस्य प्रेक्षणे दृशिषु नेत्रेषु अवधायकपक्ष्मकृतं विधातारं शपंति दृग्भिर्नेत्रद्वारैः हृदीकृतं हृदये प्रवेशितं परिरभ्य तद्भावं तदात्मतां प्रापुः अपि नित्ययुक्तानां योगिनामपि ॥ ४० ॥

राम
८६

विरायितान् विलंबितान् । अत्र हेतुः शत्रूणां पक्षस्य क्षपणे चेतो येषां तान् ॥४१॥ अपि स्विदित्र अस्मान् अवध्यायथा अवजानीथ अकृतज्ञा एते इत्याविशंकया ईदृशं कया न शंकामात्रं निश्चितमेवैतत् परित्यज्य गतत्वादिति चेत् । अत आह । नूनमिति ॥४२॥ एतत्सदृष्टांतमाह । वायुरिति । आक्षिपते पृथक् करोतीत्यर्थः ॥४३ अपि च अति भद्रमिदं यद् भवतीनां मद्वियोगेन मत्प्रेमातिशयो जात इत्याह । मयीति । मयि भक्तिमात्रमेव तावदमृतत्वाय कल्पते यत्तु भवतीनां मत्स्नेह आसीत् तद्दिष्ट्या अतिभद्रं कृतः मदापनः मत्प्रापक इति ॥४४॥ कीदृशस्त्वयं वयं त्वेहेन प्राप्स्याम इत्यपेक्षायामात्मस्वरूपमाह । अहं हीति । हे अंगनाः भौतिकानां शरा

भगवांस्तास्तथाभूता विविक्त उपसंगतः । आश्लिष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥४०॥ अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया गतांश्चिरायितांछत्रुपक्षक्षपणचेतसः ॥४१॥ अप्यवध्यायथास्मान् स्विदकृतज्ञाविशंकया । नूनं भूतानि भगवान् युनक्ति वियुनक्ति च ॥४२॥ वायुर्यथा घनानीकं तृणं तूलं रजांसि च । संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत् ॥४३॥ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते । दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥४४॥ अहं हि सर्वभूतानामादिरंतोंतरं बहिः । भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरंगनाः ॥४५॥ एवं ह्येतानि भूतानि भूतेष्वात्मात्मना ततः । उभयं मय्यथ परे पश्यताभातमक्षरे ॥४६॥ ॥ गोपालकृष्ण सहाय ॥ राम

वघटादीनां यथा आकाशादि पंच महाभूतान्याद्यंतादिरूपाणि एवं सर्वभूतानां जरायुजादीनामहं । अतो व्यापकं मां भवत्यः प्राप्ता एवेति ॥४५॥ ननु चतुर्विधभूतग्रामाणां नेड्राक्षात्मैवाद्यंतादिरूपः तस्मिंश्च सर्वव्यापके सर्वभूतानि वर्त्तंत इति । कृतस्त्वत्ताभिरस्माकमित्यत आह । एवं हीति । अयमर्थः यथा शरावादीनां भौतिकानां महाभूतान्याद्यंतरूपाणि । एवमेवैतानि चतुर्विधानि भूतान्यपि भौतिकत्वाविशेषात्स्वकारणेषु भूतेष्वेव वर्त्तंते तेन तद्भोक्तृ यान्मनि आत्मा आततेषु त्यात्मना भोक्तृरूपेण ततः व्याप्तः न कारणत्वेन अथ तदुभयं भूतानि भौतिकरूपं भोग्यं च भोक्तारं चात्मानं मय्यक्षरे परिपूर्णे आभातं पश्यतेति ॥४६॥

२०३
८२

अध्यात्मशिक्षया स्वस्वरूपोपदेशेन शिक्षिताः बोधिताः तस्यानुस्मरणेन ध्वस्तो जीवकोशो लिंगं यया तां तामेवाध्यगमन् प्रापुः ॥ ४७ ॥ एवं शास्त्रोः पितृह्मः पुन
र्गृहव्यासंगेन मायया विचित तच्चरणस्मरणं प्रार्थयमाना आहुरित्याह ॥ आहुश्चेति ॥ हे नलिननाभ ते पदारविंदं गेहं जुषामस्माकं हे सविनामपि नो मनसि सदा उदिया
त्आविर्भवेत ॥ ४८ ॥ इ २ मे द्व्यशीतितमः ॥ अशीतितम एवं व्रजस्त्रीणां कृष्णकथोत्सवे ॥ द्रौपद्यै कृष्णभार्याभिर्भक्ताः स्वस्वकरग्रहाः ॥ १ ॥ अव्ययं कुशलं
॥ १ ॥ तत्पादेक्षयाहृतमंहो येषां ते ॥ १ ॥ महतामनन्तः सकाशात् मुखद्वारतो निःसृतं क्वचित् कदाचिदेहं हे भर्तां देहधारिणां देहकृद्या माया तस्मात् स्मृतिस्तस्या अवि

श्रु उवाच ॥ अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः ॥ तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन् ॥ ४७ ॥ आहुश्च ते नलिननाभ
पदारविंदं योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबं गेहं जुषामपि मनस्युदियात्सदा नः ॥ ४८ ॥ इति
श्रीभागवते महापुराणे दशमस्कन्धे तीर्थयात्रायां वृष्णिगोपसंगमो द्व्यशीतितमोऽध्यायः ॥ श्रु उवाच ॥ तथानुगृह्य भगवान्गोपी
नां स गुरुर्गतिः ॥ युधिष्ठिरमथापृच्छत्सर्वांश्च सुहृदोऽव्ययम् ॥ १ ॥ त एवं लोकनाथेन परिपृष्टाः सुसत्कृताः ॥ प्रत्यूचुर्हृष्टमनसस्तत्पा
देक्षाहतांहसः ॥ २ ॥ कुतोऽशिवं त्वच्चरणाम्बुजासवं महन्मनस्तो मुखनिःसृतं क्वचित् ॥ पिबन्ति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृदस्मृ तिच्छिदम् ॥ ३ ॥

द्यातां छिनत्तीति तथा ॥ देहकृदीश्वरस्तद्विषयात्तानच्छिदं वाचित्तकः ॥ हे प्रभो त्वच्चरणाम्बुजासवं कर्णपुटैर्ये अलं पिबन्ति तेषां त्वन्नः
दुर्जनशास्तः कालत्रूपात् कुतोऽशिवं भवतीत्यन्वयः ॥ कथंभूतं महात्मनां व्यासादीनां मुखनिःसृतं ॥ क्वचित्कदाचिदपि व्यासादिवाक्ये त्वन्माहात्म्येन ज्ञान
तो नरुः स्वपवतीत्यर्थः ॥ ईश्वरस्यात्मत्वमेव कथं तत्राह ॥ देहंभृतो जीवाः त्वत्कृतेन त्वदेहतल्पेन उच्छ्वसन्ति जीवन्ति ॥ को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आ
नन्दो न स्यादिति श्रुतिः ॥ अथवा त्वन्मुखनिःसृतं त्वच्चरणाम्बुजासवं ये पिबन्ति तेषां महात्मनां कुतोऽशिवमित्यन्वयः ॥ त्वत्कृते भगवन्नमस्कारकरणाय ॥ ३ ॥

दम
८२

हित्वेति परस्य द्वयं ॥ त्वां त्वां हि एव त्वामेव नताः स्मेत्यर्थः कथंभूतं आत्मधाम्ना स्वस्वरूपप्रकाशेन विधुताः निरस्ताः आत्मकृता बुद्धिनिमित्तास्तिस्रोऽवस्था यस्मिंस्तं ॥ अत एवानंदसंप्लवं सद्घानंदकंदरूपं ॥ अखंडं अपरिच्छिन्नं ॥ यतः अकुंठितः बोधश्चिच्छक्तिर्यस्य तं ॥ नन्वेवंरूपता श्रीकृष्णस्य कुतः स्पष्टशरीरत्वेन प्रतीतेः अत आह कालोपसृष्टेति ॥ कालेन उपसृष्टा विलुप्तप्राया ये ते निगमास्तेषामवने रक्षार्थं आत्ता उपात्ता योगमायया आकृतिः शरीराकारा मूर्त्तिर्येन तं परमहंसानां गतिं त्वां अतस्तवैवंरूपत्वादस्माकं च त्वन्मायये वचेतनत्व सर्वं वैपरीत्यान्न त्वामेव नताः स्मेति ॥ यद्वा त्वामिति प्रकरणात्तत्त्वानबध्वा नताः स्मः कि-

हित्वात्मधामविधुतात्मकृतत्र्यवस्थमानंदसंप्लवमखंडमकुंठबोधं ॥ कालोपसृष्टनिगमावन आत्तयोगमायाकृतिं परमहंसगतिं नताः स्म ॥ ४ ॥ ऋषिरुवाच ॥ इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः ॥ समेत्य गोविंदकथा मिथो गृणंत्रिलोकगीताः शृणु वर्णयामि ते ॥ ५ ॥ द्रौपद्युवाच ॥ हे वैदर्भ्यच्युतो भद्रे हे जांबवति कौशले ॥ हे सत्यभामे कालिंदि शैब्ये रोहिणि लक्ष्मणे ॥ ६ ॥ हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान् स्वयं ॥ उपयेमे यथा लोकमनुकुर्वन् स्वमायया ॥ ७ ॥ रुक्मिण्युवाच ॥ चैद्याय मार्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरितांघ्रिरेणुः ॥ निन्ये मृगेंद्र इव भागमजाविंयूथात्तच्छ्रीनिकेतचरणोस्तु ममार्चनाय ॥ ८ ॥

हित्वा हित्वा किं आत्मधाम ॥ आत्मा शरीरं धाम गृहं तच्च ॥ देहे देहे हि कासंगं परित्यज्येत्यर्थः समानमस्य त ॥ ४ ॥ त्रिषु लोकेषु गीताः ॥ ५ ॥ कौशले सत्ये शैब्ये मित्रविंदे ॥ रोहिणी नाम काचित्पट्टमहिषी तुल्या ॥ ६ ॥ हे अन्याः श्रीकृष्णस्य पत्न्यः ॥ ७ ॥ मां मां अर्पयितुं संपादयितुं राजसु जरासंधादिषु उद्यतकार्मुकेषु सत्सु अजेया भटास्तेषां शेखरिताः मुकुटवत्कृताः अंघ्रिरेणवो येन ॥ तेषां मूर्द्धि पदं दधदित्यर्थः ॥ तस्य श्रीनिकेतस्य चरणो मे ममार्चनायास्तु ॥ ८ ॥

सनामेधारुर्द्धेनमिंहकृतेनतन्नग्रहद्यस्पतेनमेततेनलिप्तमपिशायंडुर्यशः अपमार्ष्टुंपरिहर्त्तुंकृराजजित्वारत्नस्यमंतकमुपाजहार। आनीतवा
न् अथअनंतरंमत्पितेरत्नमहरात्॥ तेनत्वापराधेनभीतः समेपिताप्रभेवश्रीकृष्णायमामरिशत्ददौ॥ रत्नाअक्रूरादिभ्यः प्रतिश्रुतामपीत्यर्थः॥ ९
देहकृतमेपिताअमुंश्रीकृष्णंनिजंनाथंत्वामिदंदेवमीश्वरंसीतापतिंज्ञातायअविज्ञायत्रिनवहानिद्ध्रुत्वहृदोलोभेनसप्तविंशतिदिनान्यमुनाः स्य

स भामा वाच॥ योमेसनाभिवधतत्पहृदाततेनलिप्ताभिशापमाययार्ष्टुमुपाजहार॥ जित्वर्क्षराजमथरत्नमदात्सतेनभीतः पिता
दिशतमांप्रभवेऽपिदत्ताम्॥ ९॥ जांबवत्युवाच॥ प्राज्ञायदेहकृदमुंनिजनाथदैवंसीतापतिंत्रिण वहान्यमुनाभ्ययुध्यत्
ज्ञात्वापरीक्षितउपाहरदर्हणंमांपादौप्रगृह्यमणिनाहममुष्यदासी॥ १०॥ कालिन्द्युवाच॥ तपश्चरंतीमाज्ञायस्वपादस्पर्श
काम्यया॥ सख्योपेत्याग्रहीत्पाणिंयोऽहंतद्गृहमार्जनी॥ ११॥ मित्रविन्दोवाच॥ योमांस्वयंवरउपेत्यविजित्यभूपान्निन्येश्वयू
थगामिवात्मबलिंद्विपारिः॥ भ्रातॄंश्चमेऽपकुरुतः स्वपुरंश्रियौकस्तस्यास्तुमेऽनुभवमंघ्र्यवनेजनत्वम्॥ १२॥

युध्यत्॥ परीक्षितः संजातापरीक्षायस्यसः परीक्षितः॥ तंसाक्षात्सीतापतिरेवायमितिज्ञात्वापादौप्रगृह्यमणिनासहमामर्हणमुपाहरत् अर्हणान
यासमर्पितवान्॥ अहोनार्हत्वमतिश्रेष्ठासिनेत्याह॥ अमुष्याहंदासीति॥ १०॥ सख्याः अर्जुनेनतत्सगृहमार्जनीगृहेसंमार्जनकर्त्री॥ ११॥ श्वनांयूथगतंस्वराप
बलिंद्विपारिः सिंहइवेति॥ मेभ्रातॄंश्चापकुर्वतः अपकारंकुर्वतोविजित्यश्रियौकः लक्ष्मीनिवासः तस्याघ्र्यवनेजनत्वंचरणप्रक्षालनकर्तृत्वंजन्मंजन्म
प्रतिजन्मभेदस्तु॥ १२॥

दृष्टवान्गुणाः वृषभान् ॥ बलंवीर्यंचप्रभावश्चतीक्ष्णाश्शृंगाणिचअतिशायितानिएतानियेषांतान्पेपित्राकृतान्संपादितान्बलीयसेमांदातुंक्षिति
पानांवीर्यस्यबलस्यपरीक्षणार्थतानतिप्रसिद्धान्वीराणांदुर्मदंघ्नंतियेतान्स्तरसाशीघ्रमेवनिगृह्यदमयित्वाक्रीडन्अनायासेनैवबबंधअजतोका
न्अजापत्यानि ॥ १३ ॥ वीर्यमेवशुल्कंदेयंयस्यास्तांदारामिभिःस्वहवलाद्गिरीणांगजाश्चादिसेनायुक्तांचरंनिन्ये ॥ १४ ॥ कुलेमेद्रौपदीतस्मिन्नेवचित्तंयस्यास्ता

म वाच ॥ सप्तोक्षणोनिबलवीर्यस्तीक्ष्णशृंगान्पित्राकृतान्क्षितिपवीर्यपरीक्षणाय ॥ तान्वीरदुर्मदहनस्तरसानिगृह्यक्रीडन्बबं
धहयथाशिशवोऽजतोकान् ॥ १३ ॥ यं वीर्यशुल्कममारामभिस्त्वतरंगिणां ॥ पथिनिर्जित्यराजन्यान्निन्येतद्दास्यमर्हत्कमे ॥ १४ ॥
मि वि वाच पितामेमातुलेयायस्वयमाहूयदत्तवान् ॥ कुलेऽस्मायतचित्तामश्रीहिरण्यामसखीजनैः ॥ १५ ॥ अस्यमेपादसं
स्पर्शोभवेत्जन्मनिजन्मनि ॥ कर्मभिर्भ्राम्यमाणायायेनतच्छ्रेयआत्मनः ॥ १६ ॥ ल क्ष्मणा वाच ॥ ममापिराज्ञ्यच्युतजन्मकर्मव
श्रुत्वामुहूर्नारदगीतमासह ॥ चित्तंमुकुंदेकिलपद्महस्तयावृतःसुसंमृश्यविहायलोकपान् ॥ १७ ॥ क्ता

मामकौहिरण्याभिरनयासहसखीजनैस्सह ॥ १५ ॥ येनपादसंस्पर्शेनआत्मनोमेतत्लोकेवल्याख्यंश्रेयोभवेत् ॥ यद्वायेनकारणेनआत्मनोजीवस्यतत्श्रेयः
सएवप्रभुर्वार्यइति ॥ १६ ॥ राज्ञिहेद्रौपदि ॥ यथामित्रविंदायाः तथाममापिचित्तंमुकुंदेविषयमासीत् ॥ सुसंमृश्यसुविचार्य ॥ पद्महस्तयाश्रियावृतःकिल
अतोपिममचित्तंश्रीमुकुंदेस्थापितेति ॥ १७ ॥

२७
८९

तत्र श्रीकृष्णाज्ञां स्वीकृत्य कारयामास ॥१०॥ यथा रात्रि तत्र स्वयंवरे पार्थस्य मयाऽज्ञानमिच्छया कृतः तथा मत्स्यं कारितवान् ॥ पाठांतरे पार्थस्य गुणपाकृतः नहीदमपि अर्जुनं एव विना विध्यते ॥ तत्राह ॥ अयं त्विति समस्तो वहिरेवाच्छत्रो नांतः अंतस्तंभसंलग्नयोर्दृष्ट्या मत्स्यलक्ष्मते अयं तु न तथा किं तु स्तंभमूले निहितकलशजले केवलं दृश्यते ॥ अतो दृष्टिरधस्तादुपरि च लक्ष्यमिति श्रीकृष्णव्यतिरेकेणान्यस्यापि भेद्य इति भावः ॥१९

ज्ञात्वा मम मतं साध्वि पिता ह्यदितवत्सजः ॥ रहस्येन हृति व्यातस्तत्रोपायमचीकरत् ॥१०॥ यथा स्वयंवरे रात्रि मत्स्यः पार्थेन्मयाकृतः ॥ अयं तु बहिराच्छन्नो दृश्यते स जले परम् ॥११॥ अभवेतत्स्वयंवरो भूपानाह्वाययन्मम पितुः पुरं ॥ सर्वे वशास्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः ॥१२॥ पित्रा संपूजिताः सर्वे यथावीर्यं यथावयः ॥ आरेडुः सशरं चापं वेद्धुं पर्यहरिं समहीपयः ॥१३॥ आरोपयन्ने के वितत ज्यं कर्तुमनीश्वराः ॥ आकोटज्यासमुत्क्षिप्य पेतुरेके पुनाहताः ॥१४॥ सज्जं कृत्वा परे वीरा मागधाम्बष्ठचेदिपाः ॥ भीमो दुर्योधनः कर्णो नाविदंस्तदवस्थितिं ॥१५॥ मत्स्याभासं जले वीक्ष्य ज्ञात्वा तदवस्थितिम् ॥ पार्थो यत्तोऽसृजद्बाणं नाच्छिनत्स्पृशोपरम् ॥१६॥ राजन्येषु निवृत्तेषु भग्नमानेषु मानिषु ॥ भगवान्धनुरादाय सज्जं कृत्वाथ लीलया ॥१७॥ तस्मिन्संधाय विशिखं मत्स्यं वीक्ष्य सकृज्जले ॥ छित्त्वेषुणापातयत्तं सूर्ये चाभिजिति स्थिते ॥१८॥

मत्स्यं वेद्धुं पर्यहरिं समहीपयः अप्येव धीर्येयामिति ॥ अन्यादिवत्त्राने वेद्धुं शक्ता इति भावः ॥१३॥ तरेवाह आरोपयेति ॥ अपुनश्चापेन ॥१४॥ नविदंस्तदवस्थितिमिति ॥ मागधांबष्ठानां क्रियाशक्तिरेव नतु लक्ष्याभिज्ञत्वमित्यर्थः ॥१५॥ यत्तोऽयत्नवान् ॥ असृजत् ॥ सोऽपि ॥ स बाणे मत्स्यं नाच्छिनत्परं केवलं पस्पर्शेत्यानवानप्यर्जुनो वलेनापूर्ण इत्यर्थः ॥१६॥ अभिजिति मध्याह्ने वा ये साधके मुहूर्ते ॥१८॥

राम
८९

॥२८॥ भगवत्याप्ते हर्षनिर्भरेणात्मानमेवानुवर्णयत्याह ॥ द्वाभ्यां तद्गमिति ॥ तत्तदा कलौ कलस्वनौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रंगं प्राविशं कनकेनोज्ज्वलां रत्नमा
लां विनीय श्रावृत्य परिधाय नवनीवीबंधेन ॥ कौशिकाग्र्ये उत्तमकौशेयवस्त्रे ॥ सव्रीडो हासो यस्मिन्नु तद्वदनं यस्याः साकवर्यां धृताः स्रजो यया सा ॥२८॥ उत्तरवः कुंत
लाय स्मिन्नं कुंडलयो त्विषा ययोस्ते गंडस्थले यस्मिन्तत्तदेव वक्त्रं ॥ शिशिरः संतापहो हासो येषु तैः कराक्षमोक्षैः अपांगवीक्षणविलासैः अनुरक्तं हृदयं यस्याः

दिवि दुंदुभयो नेदुर्जयशब्दयुता भुवि ॥ देवाश्च कुसुमासारान्मुमुचुर्हर्षविह्वलाः ॥२७॥ तद्गमाविशमहं कलनूपुराभ्यां पद्भ्यां प्रगृह्य कनकोज्ज्वल
रत्नमालां ॥ नूत्ने निवीय परिधाय च कौशिकाग्र्ये सव्रीडहासवदना कवरीधृतस्रक् ॥२८॥ उन्नीय वक्त्रमुरुकुंतलकुंडलत्विड्गंडस्थलं शिशिर
हासकटाक्षमोक्षैः ॥ राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेऽनुरक्तहृदया निदधे स्वमाला ॥२९॥ तावन्मृदंगपटहाः शंखभेर्यानकादयः ॥ निने
दुर्नटनर्तक्यो ननृतुर्गायका जगुः ॥३०॥ एवं वृते भगवति मयेशे नृपयूथपाः ॥ न सेहिरे याज्ञसेनि स्पर्द्धन्तो हृच्छयातुराः ॥३१॥ मां तावद्रथमारोप्य
हयरत्नचतुष्टयं ॥ शार्ङ्गमुद्यम्य सन्नद्धस्तस्थावाजौ चतुर्भुजः ॥३२॥ दारुकश्चोदयामास कांचनोपस्करं रथं ॥ मिषतां भूभुजां राज्ञि मृगाणां मृग
राडिव ॥३३॥ तेऽन्वसज्जत राजन्या निषेद्धुं पथि केचन ॥ संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिम् ॥३४॥

स्राऽहं ॥३०॥ हे याज्ञसेनि द्रौपदि ॥ श्रीकृष्णे ईशे मया वृते सति स्पर्द्धन्तः स्पर्द्धमानाः न सेहिरे परमैश्वर्यं दृष्ट्वा तां कृतः स्पर्द्धावसरस्तत्राह ॥ हृच्छयातुरा इति ॥ हृच्छयेन कामेनातु
राः विवशाः कामविजृंभितात्स्पर्द्धन्तेति भावः ॥३१॥ हयरत्नानां चतुष्टयं यस्मिंस्तं रथं द्वाभ्यां मामालिंग्य द्वाभ्यां धनुर्बाणौ गृहीत्वा चतुर्भुजस्तस्थौ ॥३२॥ मृगाणां मिषतां
मृगराडिव ॥ नरराड् हरिर्जगामेति शेषो ज्ञातव्यः ॥ दारुकस्य च वा मृगराजोपमा ॥३३॥ अन्वसज्जत इष्टतः सक्ता बभूवुः ॥ निषेद्धुं प्रतिबंधं कर्तुं केचन पुरतो गत्वा पथि संयत्ता
बभूवुरित्यर्थः ॥ उद्धृतेष्वासाः ऊर्द्ध्वीकृतचापाः ग्रामसिंहाः श्वानः हरिं सिंहं यथेति ॥३४॥

२०३ रविंछादयतीति रविच्छदाः ध्वजेषु पताकास्तां विचित्राणि तोरणानि यस्यां सैव प्रावृताम् ॥ कुशस्थलीं श्रीयदुपतिः समाविशत् स्वकेतनं मंडलं भूस्ता
ए० वलेवा ॥ ३६ ॥ महार्हैर्वासः प्रभृतिभिः सुहृद्दारान् पूजयामास ॥ ३७ ॥ दासदासीभिः सह आयुधानि पूर्णानि याविद्दरे ॥ ३८ ॥ इमाश्च शेषवयं सर्वसंगानिवृ

तेशार्ङ्गच्युतबाणौघैः छिन्नबाहुशिरोधराः ॥ निपेतुः प्रधने किंचित्तत्रैके त्यज्य दुद्रुवुः ॥ ३५ ॥ ततः श्रीयदुपतिरलंकृतां रवि
च्छदध्वजपरविचित्रतोरणां ॥ कुशस्थलीं दिविषु विचामिसंस्कृतां समाविशन्नरगिरिवस्वकेतनं ॥ ३६ ॥ पितामेपूजयामास
हृष्टस्तं बंधिवांधवान् ॥ महार्हैर्वासोलंकारैः शय्यासनपरिच्छदैः ॥ ३७ ॥ रामाभिः सर्वसंपद्भिर्मंदैरथवाजिभिः ॥ आयुधा
निमहार्हाणि दैत्यपूर्णानि समन्वितः ॥ ३८ ॥ आत्मारामस्ततस्तामावर्यैर्वैश्च गृहदासिकाः सर्वसंगनिवृत्त्याद्यातपमावचभूविभुः ॥ ३९ ॥
भौमं निहत्य सगणां युधि तेन रुद्धा ज्ञात्वाथ नः क्षितिजयेजितराजकन्याः ॥ निर्मुच्य संसृतिविमोक्षमनुस्मरंतीः ॥ पादांबुजं परि
णिनाय य आप्तकामः ॥ ४० ॥

त्यातपमास्वधर्मेणात्मज्ञानमाक्रान्तस्य गृहदासिकावद्भूविभ ॥ ३९ ॥ क्षितिजये दिग्विजये जितानां राजकन्याः नः
अस्मान् ॥ तेन रुद्धाः ज्ञात्वा ततो निर्मुच्य संसृतेर्विमोक्षो यस्मात् तत्पादांबुजं अनुस्मरंतीर्नः परिणिनाय उद्वाहितः आप्तकामोपि यः ॥ ४० ॥ राम
ए०

नवयमिति साम्राज्यादि न कामयामहे ॥ किं त्वेतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामहे इति ॥ नन्वेतस्य गृहिण्यो यूयं सर्वसंपन्नाः किमेवं काम्यते अत आ
हुः ॥ हे साध्वि साम्राज्यं सार्वभौमं पदं स्वाराज्यमैन्द्रं पदं भौज्यं तद्वय भोग भाक्त्वं विविधं राजत इति विराट् तस्य भावो वैराज्यं अणिमादिसिद्धिभाक्त्वमित्यर्थः
पारमेष्ठ्यं ब्रह्मपदं ॥ आनन्त्यं मोक्षो हरेः पदं तत्तल्लोकादि न तु कामयामहे इति ॥ यद्वा बह्वृचब्राह्मणोक्तक्रमेण प्रागादिदिक्चतुष्टयाधिपत्यानि साम्राज्यभोज्य
स्वाराज्यवैराज्यानि व्याख्येयानि ॥ न किंतु त्वत्पादरज एव काम्यते ॥ अत आहुः श्रियः कुचकुंकुमगंधाढ्यमिति ॥ ब्रह्मादिभिरभ्यर्थ्यया श्रियापि सेवितत्वादिति भावः

नवयं साध्वि साम्राज्यं स्वाराज्यं भोज्यमप्युत ॥ वैराज्यं पारमेष्ठ्यं वा आनंत्यं वा हरेः पदं ॥ ४१ ॥ कामयामह एतस्य श्रीमत्पादरजः श्रियः
कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥ ४२ ॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः ॥ गावश्चारयतो गोपाः पादस्पर्शं महा
त्मनः ॥ ४३ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्र्यशीतितमोऽध्यायः ॥ श्रीशुक उवाच ॥ श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी
माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः ॥ कृष्णेऽखिलात्मनि हरौ प्रणयानुबंधं सर्वा विसिस्मुरलमश्रुकलाकुलाक्ष्यः ॥ १ ॥

४३ ॥ ननु तर्हि श्रुतिदुर्लभत्वात्किं तद्वांछया अत आहुः व्रजस्त्रिय इति ॥ यत्र यथा गावः गा महात्मनोपि गाश्चारयतः पादस्पर्शं च गोपा यथा वांछंति तद्वत्
तत्पादरेणुं दुर्लभमिति भावः ॥ ४३ ॥ इति श्री मे … श्राता तमः ॥ चतुर्भिरधिकाशीतितमे मुनिसमागमे ॥ वसुदेवमखोत्साहं वंधुप्रस्थापनादिकं ॥ १ ॥
सुबलपुत्री गांधारी माधवी सुभद्रा क्षितिपानां राज्ञां पत्न्यः स्वगोप्यः कृष्णमहत्त्वं गोप्या विसिस्मयुः विस्मयवत्यः ॥ १ ॥

२०३ आनर्त इति वर्तते ॥ ७ ॥ धर्मगोप्त्री तनुर्यस्य स धर्मगुप्तनुः यता नियता वाग्येषां तस्य सदसः ॥ ८ ॥ जन्मभृतः सफलजन्मानः तत्फलं जन्मफलं किं तत्‌ य
८१ द्योगेश्वरः ॥ ९ ॥ किंच अस्माकं दर्शनमेवालाभः देवानामपि दुःप्रापं अस्माकं तु स्पर्शनादिकमपि कथं घटितमिति विस्मयेनाह ॥ किमिति स्वल्पतपसां

इति संभाष्यमाणास्तु स्त्रीभिः स्त्रीजनवत्सलं ॥ आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया ॥ १ ॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः ॥ विश्वा
मित्रः शतानंदो भारद्वाजोऽथ गौतमः ॥ २ ॥ रामः सशिष्यो भगवान्वसिष्ठो गालवो भृगुः ॥ पुलस्त्यः कश्यपोऽत्रिश्च मार्कंडेयो बृहस्पतिः ॥
द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रास्तथांगिराः ॥ अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ॥ ५ ॥ तान्दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः
पाण्डवाः कृष्णरामौ च प्रणेमुर्विश्ववंदितान् ॥ ६ ॥ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत् ॥ स्वागतासनपाद्यार्घ्यमाल्यधूपानुले
पनैः ॥ ७ ॥ उवाच सुखमासीनान्भगवान्धर्मगुप्तनुः ॥ सदसस्तस्य महतो यतवाचोऽनुशृण्वतः ॥ ८ ॥ श्रीभगवानुवाच ॥ अहो वयं
जन्मभृतो लब्धं कार्त्स्न्येन तत्फलं ॥ देवानामपि दुःप्रापं यद्योगेश्वरदर्शनं ॥ ९ ॥ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषां ॥ दर्शनस्पर्शन
प्रश्नप्रह्वपादार्चनादिकम् ॥ १० ॥ नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥ ११ ॥ नाग्निर्न सूर्यो
न च चंद्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः ॥ उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहूर्तसेवया ॥ १२ ॥

तीर्थस्नानादिमात्रेण यो बुद्धिर्येषां ॥ तथा चार्चायां प्रतिमायां देवबुद्धिरिति चक्षुर्दृष्टिर्येषां तेषां योगेश्वरस्पर्शनादिकमिदं किं असंभावितमित्यर्थः एतत्प्रपंचयति राम
नह्यम्मयानीति त्रिभिः ॥ ११ ॥ वाङ्मनसयोरुपासनाविषयत्वं यो वाचं ब्रह्मेत्युपास्ते यो मनो ब्रह्मेत्युपास्ते इति श्रुतेः ॥ अघं तन्मलमज्ञानं न हरंति अत्र हे ८१
तुर्भेदकृतः भेदकर्त्तारः यद्वा भेदबुद्धिकर्त्तृत्वेन ॥ तमः विपश्चितो ज्ञानिनस्त्वभेदाः तेन मुहूर्तमात्रसेवयैवाघं घ्नंतीति ॥ १२ ॥

श्रुतः साधून् विज्ञायाप्यात्मादिबुद्ध्या सज्जमानोऽतिमंद इत्याह ॥ यस्येति ॥ आत्मबुद्धिरहमिति बुद्धिः त्रयो धातवो वातपित्तश्लेष्माणः घटकत्वेन यस्य तस्मिन्
कुणपे शरीरे ॥ स्वधीः स्वीया इति बुद्धिः भौमे भूविकारे इज्यधीः देवताबुद्धिः यत् यस्य तीर्थबुद्धिः तीर्थमिति बुद्धिः अभिज्ञेषु तत्त्वविज्ञेषु यस्य तादृग्बुद्धिर्यो न भवति
स एव गोष्वपि खरः हाहणा अत्यविवेकी ॥ यद्वा गवां तृणादिभारवाहः खरो गर्दभः इति ॥ १३ ॥ दुरन्वयं अनवरूपं ॥ भ्रमंती अनवस्थिता धीर्बुद्धिर्येषां ते ॥ १४ ॥ ईशित
व्यता अनीश्वरता कर्माधिकारिता जनसंग्रहमात्रमेतदित्यूचुः स्मयंतः हसंतः ॥ १५ ॥ अनन्वयं विचित्रं वितत्याऽऽह हीप्सां यन्मायायेति ॥ तत्त्वविज्ञत्तमा अपि वयं

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ॥ यत्तीर्थबुद्धिः सलिले न कर्हिचित् जनेष्वभिज्ञेषु स एव गोखरः ॥
१३ ॥ श्रीशुक उवाच ॥ निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः ॥ वचो दुरन्वयं विप्रास्तूष्णीमासन् भ्रमद्धियः ॥ १४ ॥ चिरं विमृश्य मुनय ई
श्वरस्येशितव्यतां ॥ जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुं ॥ १५ ॥ मुनय ऊचुः ॥ यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधी
श्वराः ॥ यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितं ॥ १६ ॥ अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा ॥ भौ
मैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनं ॥ १७ ॥

काहो मायायया विमोहिता इति ॥ तामाहुः यदिति ॥ यत् यस्मात् ईहया नरचेष्टितेन गूढः
सन् ईशितव्यायति अनीश्वरवदाचरति भवान् ॥ ननु अहमीश्वरश्चेत्किमित्येवमाचरेयं ॥ तत्राहुः अहो इति भगवतस्तव विचेष्टितं विचित्रं अतर्क्यं ॥ १६ ॥ भगवत्त्व
मेवाहुः अनीह इति अनीहः अक्रिय एव आत्मना स्वरूपमात्रेण ॥ बहुधेत्यत्र दृष्टांतः ॥ यथा भौमैरिति भौमैर्घटादिविकारैरुपलक्षिता वाचारंभणं विकारो
नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ॥ ननु कथमहं जगत्सृष्ट्यादिकर्त्ता वसुदेवपुत्रत्वादिति ॥ तत्राहुः अहो इति विभूम्नः परिपूर्णस्य तव इदं जन्मादिच
रितं विडंबनमनुकरणमात्रं न तु तत्त्वमिति ॥ १७ ॥

२०३
८२

जनमनुग्रहमाह ॥ अथापीति त्रिभिः सत्त्वं शुद्धसत्त्वात्मकं स्वरूपं विभर्षि स्वलीलया स्वाचारेण वेदपथं च विभर्षि ॥ ८ ॥ अत एव ब्राह्मणेषु वर्द्धमान-
पि करोषीति सहेतुकमाह ॥ ब्रह्मेति ॥ ब्रह्म वेदाख्यं शुद्धं सत्त्वं ते हृदयं अतः तद्रूपकृतस्तु श्रुतेः आह ॥ यत्रेति ॥ यत्र ब्रह्मणि व्यक्तं कारणं ततः परं सत्त्वमात्मा-
तं ब्रह्म च तत् यत् आदिभिः स्वरूपलब्धं तत् ब्रह्म ॥ ९ ॥ तस्माद् ब्रह्म हृदयत्वाद् द्विज वर्णैकं ब्राह्मणकुलं शास्त्रयोनेरीदृशप्रमाणकस्य तव सद्भाव संश्रयोपलब्धिस्थानं

अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय च ॥ स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भवान् ॥ ८
ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः ॥ यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परं ॥ ९ ॥ तस्माद् ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः ॥
सभाजयसि सद्धाम तद् ब्रह्मण्याग्रणीर्भवान् ॥ १० ॥ अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः ॥ त्वया संगम्य सद्गत्या यदन्तः श्रेयसां परं ॥ ११ ॥ नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ॥ स्वयोगमाययाच्छन्नमहिम्ने परमात्मने ॥ १२ ॥ न यं विदन्त्यमी भूपा
एकारामाश्च वृष्णयः ॥ मायाजवनिकाच्छन्नमात्मानं कालमीश्वरं ॥ १३ ॥ यथा शयानः पुरुष आत्मानं गुणतत्त्वदृक् ॥ नाममात्रे-

नं सभाजयसि संपूजयसि तत् तस्मादेव कारणात् ब्रह्मण्यानामग्रणीर्मुख्यः तस्य च नैकः सनकादीनां वरमीत्य न्द्रियाभातं न वेद रहितं परं ॥ १४ ॥
धीः ॥ तस्मादीश्वरस्य तवेदं जनसंग्रहमाह ॥ १० ॥ वयं तु तव संगत्या कृतार्था इत्याह ॥ अद्येति षड्भिः सत्याः सत्यातया संगम्य संगः प्राप्य यदन्तः यस्मात् श्रे-
श्रेयसां परोऽवधिः ॥ ११ ॥ एकस्मिन्नेव स्थाने आरामो येषां ते एकारामाः त्रिकालं स्थित्यादिकारणं ईश्वरं नियंतारं ॥ १३ ॥ एतत्स्पष्टीकरोति ॥ यथेति ॥ शयानः स्व-
प्नावस्थायां गुणतत्त्वदृक् स्वप्नविषयेषु तत्त्वदृष्टिः नाममात्राणि इंद्रियाणि मनसा आभातं सिंहव्याघ्रादिरूपमात्मानं वेद तद्रहितं देहादिरूपमात्मानं

राम
८२

एवं त्वा त्वा नाम मात्रेषु स्वप्नादितुल्या विषयेषु इंद्रिये यो ईहा प्रवृत्तिः सैव माया तया विभ्रमच्चित्तो न वेद स्मृतेर्विवेकस्योपप्लवात् नाशात् ॥ १५ ॥ अ
द्योद्यस्य मर्षनाशं करोतीति यद्गंगां ख्यातीर्थं तस्यास्पदमाश्रयं यत्ते छिद्रस्य पक्वयोगैरपि हृदि कृतं केवलं न तु दृष्टं तस्य ते छिद्रदर्शिमदृष्टं वंतो वयं बहुभिः
उपायैः अतोस्मान् भक्ताननुग्रहाण भक्तान् कृत्वानुग्रहं कुर्वित्यर्थः न तु किं भक्त्या यथा पूर्वं तथैव तत्पानामिति नेत्याह ः उत्सिक्ता उद्रिक्ता या भक्ति

एवं त्वा नाम मात्रेषु विषयेष्विंद्रियेहया ॥ मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥ १५ ॥ तस्याद्य ते ददृशिमांघ्रिमघौघमर्ष
तीर्थास्पदं हृदि कृतं सुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथो अनुगृहाण भक्तान् ॥ १६ ॥ सू
त उवाच ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं ॥ राजर्षेस्स्वाश्रमान्गंतुं मुनयो दधिरे मनः ॥ १७ ॥ तद्वीक्ष्य तानुपव्रज्य वसुदे
वो महायशाः ॥ प्रणम्य चोपसंगृह्य वभाषेदं सुयंत्रितः ॥ १८ ॥ वसुदेव उवाच ॥ नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ ॥ क
र्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम् ॥ १९ ॥ नारद उवाच ॥ नापि चित्रमिदं विप्रा वसुदेवो बुभुत्सया ॥ कृष्णं मत्वा
र्भकं यन्नः पृच्छति श्रेय आत्मनः ॥ २० ॥ सन्निकर्षोत्र मर्त्यानामनादरणकारणं ॥ गांगं हित्वा यथान्यांभस्तत्रत्यो याति शुद्धये ॥ २१ ॥

त्सया उपहतश्चाहंतलक्षणो जीवकोशो येषां त एव पूर्वं भवद्गतिमापुः नान्य इति ॥ १६ ॥ उपसंगृह्य चरणौ पाणिभ्यां धृत्वा वभाषेदमिति सुयंत्रितः ॥ १८ ॥
सर्वदेवा येषु तेभ्यः यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंतीति श्रुतेः ॥ येन कर्मणा यथा कृतेन वा कर्मणां निर्हारो निरासो भवति तदुच्य
तां ॥ १९ ॥ श्रीकृष्णं हित्वास्मान् पृच्छतीति विस्मितान् प्रत्याह ॥ नापीति ॥ बुभुत्सया बोद्धुमिच्छया ॥ २० ॥ तत्रत्यः गंगातीरवासी ॥ २१ ॥

द०उ
८२

श्रीकृष्णमेवमेकत्वमात्मनो क्रियाविज्ञंभितमित्याह यस्येति द्वाभ्यां अनुभूतिर्ज्ञानं कुतश्चिदपि न रिष्यति न नश्यति तदेवाह कालेन कर्बुरिकाफलवत् अस्यैव स्वस्य लयोत्पत्त्यादिनापि स्वतश्च विद्युदादिवत् अन्यस्माच्च गुणादिवत् घटादेः गुणतो नानुपाद्यं तत उत्पन्नैः पूर्वरूपादिहान्या देहादिवत् ॥३२॥ तमेवं कुतश्चिदप्यव्याहतानुभवं अत एवेश्वरं किंच अद्वितीयं कश्चिदन्यः प्राकृतः उपगूढमाच्छन्नमात्मानं मन्येत को क्लेशकर्म्मादिभिः तत्र क्लेशा राग द्वेषादयः तत्पूर्वकाणि कर्म्माणि च तत्परिपाके सुखदुःखे विषयसत्वादिगुणानां प्रवाहश्चैतैः प्राणादिभिश्च स्वविभवैः स्वकार्यैः अत्र दृष्टान्तः मेघहि

यस्यानुभूतिः कालेन लयोत्पत्त्यादिनास्य वै ॥ स्वतोऽन्यस्माच्च गुणतो न कुतश्चन रिष्यति ॥३२॥ तं क्लेशकर्म्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयं ॥ प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः ॥३३॥ अथोचुर्मुनयो राजन्नानत्यानकदुन्दुभिं ॥ सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः ॥३४॥ कर्म्मणा कर्मनिर्हार एष साधुनिरूपितः ॥ यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ॥३५॥ चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा ॥ दर्शितः सुगमो योगो धर्म्मश्चात्ममुदावहः ॥३६॥ अयं स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः ॥ यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषः ॥३७॥

मोपरागैः अभ्रतुषारराहुभिः स्वविभवैः सूर्यमिवेति ॥३३॥ चित्तस्योपशमः उपशमहेतोः योगो मोक्षोपायश्च शनैरात्मसुखमावहतीति तथात्ममुदावहः श्रद्ध त्वात् श्रेयस्त्वात् ॥ धर्मश्च आवश्यकः अन्यथा विहिताकरणेन मालिन्यप्रसंगात् ॥३६॥ ननु न कर्म्मणा न प्रजया न धनेन त्यागेनैके अमृतत्वमानशुरित्यादिना त्या गस्यैव विहितत्वात्कथं कर्म्म मोक्षोपाय इत्याशंक्य अरागवतस्त्यागस्यारागवत्त्वादित्याशयेनाह अयमिति सद्गृहमेधिनः स्वस्त्ययनः क्षेमः ईयते अनेनेति तथा श्रद्धया निःकामतया शुद्धेन आप्तेन वित्तेन पूरुषः इज्येतेति यत एष पन्थाः ॥३७॥

राम
८३

त्यथ नत्वमाहुः विनिष्पणामिति ॥ विनिफलभूतैर्यत्नैर्हीनैस्च विनिष्पणां विनिष्ठां विसृजेत ॥ गेहैर्गृहोचितैर्भोगैर्द्वारस्थैस्तैषणां विसृजेत ॥ तदस्तु भवेनैवत
हैस्तकथनिवृत्तेः देहे मृते आत्मनः स्वर्गादिलोकेषणां च कालेन नत्त्यागसंधानेन न विसृजेत ॥ देवदेहेवसदेवयद्वारेव कालेन देवानामपि मृत्युनामृत्यु
हेतुभूतेनेत्यर्थः ॥ ३८ ॥ अन्नाचारं प्रमाणयति ग्राम इति ॥ किं च ऋणोरितितथा वक्ष्यतिः जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येणर्षि

विनिष्पणां यज्ञदानैर्गेहैर्द्वारस्थैतेषणां ॥ आत्मलोकेषणां देवकालेन विसृजेद्बुधः ॥ ३८ ॥ ग्रामेत्यक्तैषणाः सर्वे ययुर्द्वीपं तपोवनं
ऋणो ह्वि(त्रि)भिर्द्विजो जातो देवर्षिपितृणां प्रभो ॥ ३९ ॥ यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पतेत ॥ त्वं विचयमुक्तो ह्यप्राप्वे ऋषि
पित्रोर्महामते ॥ ४० ॥ यत्तैर्दैवर्णाद्धन्मुच्यानिर्ऋणोशरणो भव ॥ वसुदेव भवान्नूनं भक्त्या परमया हरिं ॥ ४१ ॥ जगतामीश्वरं प्रावीः
सयद्वां पुत्रतां गतः ॥ श्रीशुक उवाच ॥ इति तद्वचनं श्रुत्वा वसुदेवो महामनाः ॥ तानृषीनृत्विजो वव्रे मूर्ध्नानम्य प्रसाद्य च ॥ ४२ ॥ त एन
मृषयो राजन्वृता धर्मेण धार्मिकं ॥ तस्मिन्नयाजयन्क्षेत्रे मखैरुत्तमकल्पकैः ॥ ४३ ॥ तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः
स्नाताः सुवाससो राजन्राजानः सुष्ठ्वलंकृताः ॥ ४४ ॥ तन्महिष्यश्च मुदिता निष्ककंठ्यः सुवाससः ॥ दीक्षाशालामुपाजग्मुराली
प्ता वस्तुपाणयः ॥ ४५

ऽयं यत्नेन देवेभ्यः प्रजया पितृभ्य इत्यादि ॥ ३९ ॥ तान्यनिःस्तीर्य तेषामृणान्यनपाकृत्य पतत्यथाव मनुः ॥ ऋणानि त्रीण्यपाकृत्य
मनो मोक्षे निवेशयेत ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यध इति ॥ ४० ॥ निर्ऋणाः निर्मुक्तऋणाः अशरणो भव गृहान्प्रव्रज न किंच ॥ अविशुद्धवित्ता
नामयं क्रमः त्वं तु कृतार्थ एवेत्याहुः वसुदेवेति ॥ प्रावीः अर्चितवान् ॥ यद्यस्मात ॥ वां युवयोः ॥ ४१ ॥ आलिप्ताः कुंकुमादिभिः वस्तुपाणयः गृहीतार्हण
हस्ताः ॥ ४५

२०३
८४

अक्तो नेत्रयोरंजनेनाभ्यक्तः सर्वांगेषु नवनीतेन ॥४७॥ ताभिः सहितो रीतितो विरेजे ॥४९॥ जीवेशो सर्वजीवानामीशो ॥ अनुयदृशतियत ॥५०॥ आम्नातम
वीणाः प्राकृताः ज्योतिष्टोमदर्शपूर्णमासादयः ॥ तेऽभ्यस्त्वोदनालिंगादिभिरतिरेशशास्त्रांगाः वैकृताः सोमसत्रादयः तैः सर्वैर्ईश्वरं परोडाशादिताने

नेदुर्मृदंगपटहाः शंखभेर्यानकादयः ॥ ननृतुश्चैव नर्तक्यस्तुष्टुवुः सूतमागधाः ॥४६॥ जगुः सकंव्योगंधर्वीः संगीतमहमुर्दकाः ॥ त
मभ्यषिंचिद्विधिवत् अक्तमभ्यक्तमृत्विजः ॥४७॥ पत्नीभिरष्टादशभिः सोमराजं इवोडुभिः ॥ ताभिर्दुकूलवलयैर्हारनूपुरकुंडलैः
॥४८॥ स्वलंकृताभिर्विबभौ दीक्षितो जिनसंवृतः ॥ तस्यार्त्विजो महाराज रत्नकौशेयवाससः ॥४९॥ ससदस्या विरेजुस्ते यथा वृत्रहणोऽध्व
रे ॥ तदा रामस्त्वृत्विग्भिः स्वैर्दृष्टुभिरावृतौ ॥५०॥ रेजतुः स्वहस्तेहीरैः जीवेशो स्वविभूतिभिः ॥ ईजे तु यज्ञं विधिनाऽग्निहोत्रादिल
क्षणैः ॥५१॥ प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरं ॥ अथर्त्विग्भ्योददात्काले यथाम्नातं सदक्षिणाः ॥५१॥ स्वलंकृतेभ्यो लक्षत्रयगोभूक
न्यामहाधनाः ॥ पत्नीसंयाजावभृथेष्टिस्वरित्वा ते महर्षयः ॥५२॥ सस्त्रीणां मद्रुदेविप्रा यजमानश्चेरुः ससाः ॥ स्नात्वालंकारवासांसि विवरि
प्योदात्तथा प्रियः ॥५३॥ ततः स्वलंकृतो वर्णानाशभ्योन्नैरपूजयत ॥ वधूनस्वदारान्सखिताञ्चपार्थिवैर्हाणान्यथा ॥५४॥ विदर्भकोशल
लकुरून्काशिकैकेयसृंजयान् ॥ सदस्यार्त्विक्सुरगणान्नृभूतपितृचारणान् ॥ श्रीनिकेतमनुज्ञाप्य शंसंतः प्रययुर्मुतम् ॥५५॥

यंतः ॥ क्रियाकर्मातेषामीश्वरं ॥५१॥ ससुतः स्नानं चक्रुः आमूर्ध्नः स्नानोमिद्याप्य अर्चेनापूजयत्तं ध्याती स्वारणान्नानपरिवर्हणप्रीतिदानेन वापूजयत
तेवसर्वैश्रयपुः ॥५५॥

राम
८४

तथा गोके षां विद्विमेष प्राह ॥ धृतराष्ट्र इति द्वाभ्यां ॥ अत्र जो विदुरः पार्था युधिष्ठिर भीमार्जुनाः ॥ यमौ नकुल सहदेवौ ॥ ५७ ॥ सौहृदेनाश्रितान्निश्चेतासि
येषां ते ॥ ५८ ॥ मनोरथो प्रवृत्त विषयः तमेव महार्णवम् ॥ ६० ॥ शूराणां बलेन योगिनां ज्ञानेनापीत्यर्थः ॥ ६१ ॥ तत्कृतं हलचाह ॥ अस्मात्विति ॥ कृताते ७

धृतराष्ट्रोत्रजः पार्था भीष्मा द्रोणः कृपाश्च यमौ ॥ नारदो भगवान्व्यासः सुहृत्संबंधि बांधवाः ॥ ५७ ॥ वयं न्यायेषु सहदेवोहृदाश्रि
त्य चेतसः ॥ यद्युधिष्ठिर सहकृत्वेणा सुरेशास्त्वापरे जनाः ॥ ५८ ॥ नरसत्तम सहगोपालैः कृहत्यापूजयाश्चितैः ॥ कृष्णप्रपोग्र सेनाद्यैर्न्नि
वासीद्ध्रुव वत्सलः ॥ ५९ ॥ वसुदेवोज मोश्नीयोप्सितमनोरथ महार्णवं ॥ सुहृत्कृतः प्रातमनानंरमाह करोस्पृशान् ॥ ६० ॥ व सु दे
व उ वाच ॥ भ्रातरीशकृतः पाशो नृणां यः स्नेह संमतितः ॥ मेश्रूयप्मितापफलावापि न निवर्त्तेत कर्हिचित् ॥ ६१ ॥ नैतत्यिजम
हं मन्ये भूराणामपि योगिनां ॥ ६१ ॥ अस्मास्वप्रतिकल्पेयं यत्कृतां ज्ञेषु सत्तमैः ॥ ६२ ॥ प्राग कल्पाच्च कशलं भ्रातर्वोनाचराम हि
अधुना श्रीमदांधाक्षा न पश्याम पुरः सतः ॥ ६३ ॥ मारान्यस्त्री रमस्तंभः श्रेयस्कामस्य मानरः ॥ स्वजनानुतनंवध्वा न पश्यति यथा
ध्दक्ष ॥ ६४

कृतमुपकारमजानतं मत्तैमेभवद्भिरप्रतिकल्पाअनुपमा मैत्रीय मर्प्पितां अफलापि सत्युपकारमन्यापि कर्हिचित्पद्यस्मात्रनिव
र्तेत तस्मादीश्वरकृतः पाशोयं भवतामिति गम्यत इत्यर्थः ॥ ६१ ॥ अफलत्वमेवाह ॥ प्रागिति ॥ हे भ्रातः अकल्पात अस्मर्थत्वात वः कुशलं प्रियं न हि आच
राम कृतं तव तो वयं श्रीमदेनांधा नक्षीणियेषां ते ॥ ६३ ॥ राज्यश्री र्न्मदोद्भूतछारमोडागमः ॥ ६४ ॥

२०७
८५

अथ षष्ठ इति प्रातर्निर्गमे येवापराह्ने गमयतामिति अपराह्ने निर्गमस्यागमयतामिति प्रश्नः पुनरेवं मानितः ॥ ६६ ॥ यापितः महता सैन्येन प्रस्थापितः ॥ ६७ ॥ यदुदेव

स्य वसुदेवस्य महोत्सवं यत्ताः दिलक्ष्मणं महदूत्सवं दर्शनादिकं चेति ॥ ७१ ॥ इ ग मे व ठ र शा मि त म ः ॥ पंचाशीतितमे गमकरूपमोमं संप्रार्थितौ तेन ॥ पित्रोस्तानमथो मा

एवं सोऽहं देशे शिल्पवित्तस्मानकडुडुभिः ॥ हरोदतत्कृता मैत्री स्मरत्नश्रुविलोचनः ॥ ६५ ॥ नंदस्त्वमरवृक्षः प्रियकृत देमणगोविंदरामयोः ॥ अ

घस्त्वं इति मामाह्वा वयदुभिर्मानितो वमत ॥ ६६ ॥ ततः कामैः पूर्णमाणास्तव्रजः महत्वाधवाः ॥ पराह्णे मरणां ज्ञोमनानानर्थमपरिष्ठुदेः ॥ ६७ ॥

वसुदेवो अमेना म्यां कृष्णौ द्ववलाशिभिः ॥ स्वमाराघपारि वहेर्यापितो यदुभिर्ययौ ॥ ६८ ॥ नंदगोपास्त्वगोपास्त्वगोविंदचरणात्तजे ॥ मनः

क्षिप्रपुनर्हृतमनीशामपुरायग्रुः ॥ ६९ ॥ वंधुपुप्रतियातेषु कृष्णः कृष्णदेवताः ॥ वीक्ष्याप्रादृषमासश्रोयपुर्दीर्वतांपुनः ॥ ७० ॥ जनेभ्यः

कथयांचक्रे यदुदेवमहोत्सवं ॥ यदा गीर्थयात्रायां महदुत्सवदर्शनादिकं ॥ ७१ ॥ इति श्री ... ते ... पु ... इ ... म ... तीर्थयात्रानुव

र्णनेवतराशी ... तमो ... यः ॥ श्रु ... उ ... व ॥ अथैकदा तस्मिन्नोप्राप्नोत्कृतपारामिं वदनौ ॥ वसुदेवमिनं द्याहृष्ट्यात्यामकर्षणात्युतौ ॥ १ ॥

मुनीनामवचः श्रुत्वाऽपत्रयोर्धमसत्ववकं ॥ तद्वा यैज्ञातविश्रंभः परिभाषामभाषत ॥ २ ॥

तेषुतास्त्वानयतं ॥ १ ॥ नंदयित्वाक्रुतेत्रयात्रायां महदुत्सवं तत्वज्ञानं ततः पित्रोरादिशन्नृतसूनुभिः ॥ १ ॥ यामप्रभावस्तत्सूववकं ज्ञातविश्रंभः ॥

अपत्रविस्वासः परिभाषामंबोध्य ॥ २ ॥

राम
८५

अस्य विश्वस्य यत्साक्षान्निजस्वरूपभूतं कारणं प्रधानपुरुषौ नाम परीतयोरपि कारणत्वेनेश्वरौ साक्षाद्द्वावेव वामिति जाने ॥ ३ ॥ न त्विदं विश्वमनेकैः कारकै
र्जायमानं कुतः प्रधानपुरुषात्मकं कृतत्वं कारणभावयोस्तत्कारणत्वेनेश्वरत्वं तत्राह ॥ यत्रेति ॥ यत्राधिकरणे येन कर्त्रा करणेन च यतोपादानात्
यस्य संबंधेन षष्ठ्यर्थस्याकारकत्वेऽपि निमित्ततोक्ताय यस्मै संप्रदानाय यद्यदिति प्रयोज्यकर्तृकर्मकारके दर्शिते ॥ नन्वेतयोर्नास्ति भेदः यथोक्तं ॥ करो
ति क्रियमाणेन न कश्चित्कर्मणा विना ॥ भवत्यर्थस्य कर्त्तैव करोतेः कर्म जायते ॥ तथा करोत्यर्थस्य यः कर्त्ता भवितुः प्रयोजकः ॥ भविता तमपेक्ष्य

वसुदेव उवाच ॥ कृष्ण कृष्ण महायोगिन्संकर्षण सनातन ॥ जाने वामस्य यत्साक्षात्प्रधानपुरुषौ परौ ॥ ३ ॥ यत्र येन यतो यस्य
यस्मै यद्यद्यथा यदा ॥ स्यादिदं भगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ ४ ॥ एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज ॥ आत्मना
नुप्रविश्यात्मन्प्राणो जीवो बिभर्ष्यज ॥ ५

य प्रयोजकत्वं प्रपद्यत इति च सत्यं तथाप्यवस्थाभेदेन भेदो विवक्षितः स्वरूपेणैवावस्थाभेदः तंउ
लानो दहनं पचति भृत्यं धर्मं करोतीति ॥ तदेवं सप्त विभक्त्यर्था दर्शिताः ॥ यथेति यदेति च क्रियाविशेषणभूतानामन्येषां चाव्ययानामर्थाः स्यादिति
क्रियापदार्थोपलक्षणं एवं सर्वप्रपंचमयं यत्तत्कारणं भगवद्रूपतां विधत्ते इदं साक्षादिति प्रधानं भोग्यं पुरुषो भोक्ता तयोरीश्वरो भगवांस्त्वमेव
साक्षादिति तयोरैक्यमभिप्रेत्यैकवचनं ॥ ४ ॥ किंच ॥ धारणपोषणकर्त्तापि त्वमेवेत्याह ॥ एतदिति ॥ हे आत्मन् ॥ प्राणः क्रियाशक्तिः जीवो ज्ञान
शक्तिश्च सन्स्त्वमेव बिभर्षि ॥ ५ ॥

ननु प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्कथं परमेश्वरस्यैव कारणत्वेन सर्वात्मकत्वमुच्यत इत्याशंक्य प्राणादिशक्तयोपि तस्यैवेत्याह ॥
प्राणादीनामिति ॥ प्राणाः सूत्रं तदादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य परमकारणस्येश्वरस्यैव ॥ कुतः पारतंत्र्यात् ॥ यथा वेधशक्ति
र्बाणस्यापि तदुपष्टंभस्य तद्वदित्यर्थः ननु भगवतः प्राणादिवर्गस्य च द्वयोस्तुल्यमेव किं न स्यात् ॥ अत आह ॥ वैसादृश्यात् द्वयोरिति ॥ चेतनाचेतनत्वेन
विसदृशत्वात् द्वयोरेवं तत्र प्राणादिवर्गस्य चेतनपारतंत्र्यमेव युक्तमित्यर्थः ॥ यद्वा प्राणादिषु द्वयोरेव तावद्विसदृशत्वं विरुद्धक्रियाकारित्वात् ॥ किंच

प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ॥ पारतंत्र्याद्वैसादृश्यात् द्वयोश्चेष्टैव चेष्टताम् ॥ ६ ॥ रामरामा

नर्द्दहनात् तस्मादेकेन सर्वज्ञेन सर्वशक्तिनाधिष्ठितानामेव विशिष्टकार्यारंभकत्वं युक्तं न स्वतंत्राणामिति ॥ तथा चोक्तं ॥ यैरेते संहता भावा भूतेंद्रियमनो
गुणाः ॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः इति तथा नानात्वात्तु
क्रियानीशाः प्रोचुः प्रांजलयो विभुं ॥ मित्यादि ॥ ननु प्राणादीनां क्रियाकारित्वं शक्त्यभावे कुतः स्यात् अत आह ॥ चेष्टैव चेष्टतामिति चेष्टमानानामेषां चेष्टे
व शक्तिः यथा वायोः शक्त्या तृणादीनां चलनं यथा पुरुषस्य शक्त्या शराणां वेग इति ॥ ६ ॥

पारतन्त्र्यमेव प्रपञ्चयति। कान्तिरिति पञ्चभिः। चन्द्रस्य कान्तिः अग्नेस्तेजः अर्कस्य प्रभा ऋक्षविद्युतां सत्ता स्फुरणमात्रेण सत्त्वं। अर्थतो वस्तुतो भवान् तथा वृ-
त्तिः। न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतिश्च। यदादित्यगतं तेजो
जगद्भासयतेऽखिलं। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति। भूमेर्वृत्तिः प्राणिनामाधारत्वेन वर्तनं गन्धश्च भवानेव तवैव शक्तिरित्यर्थः। किंच। हे देव अ-
पां तर्पणं प्रीणनकत्वं प्राणनं जीवनं हे देव त्वं आपस्ताताः सारस्तद्रसश्च त्वमेव। किंच। वायोः ओजः सहा इति तवैव शक्तिः॥ ८॥ दिशां तत्साधिकृताकाशप्रदेशोऽन-

कांतिस्तेजः प्रभा सत्ता चंद्राग्न्यर्कर्क्षविद्युतां। यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गंधोऽर्थतो भवान्॥ ७॥ तर्पणं प्राणनमपां देव त्वं ताश्च तद्रसः।
ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर॥ ८॥ दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः। नादो वर्णस्त्वमोंकार आकृतीनां
पृथक्कृतिः॥ ९॥ इंद्रियं त्विंद्रियाणां त्वं देवाश्च तदनुग्रहः। अवबोधो भवान्बुद्धेर्जीवस्यानुस्मृतिः सती॥ १०॥ भूतानामसि भू-
तादिरिंद्रियाणां च तैजसः। वैकारिको विकल्पानां प्रधानमनुशायिनां॥ ११॥

मवकाशः दिशश्च त्वं खं च सामान्याकाशः तदाश्रयः स्फोटश्च शब्दतन्मात्रं परा वा इत्यर्थः नादः पश्यन्ती ओंकारः मध्यमा। वर्णाश्च आकृतीनां पदा-
र्थानां पृथक्कृतिः पृथक्करणमभिधानं यस्मात् तद्रूपं वर्णा पदाद्यात्मिका वैखरी वाक् त्वमित्यर्थः॥ ९॥ इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिः। देवाश्चेंद्रि-
याधिष्ठातारः तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वं अवबोधोऽध्यवसायशक्तिः अनुस्मृतिः प्रतिसंधानशक्तिः॥ १०॥ भूतानां कारणं भूतादिस्तामसोऽहंका-
रस्त्वमसि। इंद्रियाणां कारणं तैजसोऽहंकारस्त्वं विविधं अधिदैवाध्यात्मभेदेन कल्प्यत इति विकल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकोऽहंकारश्च त्वं। अ-
नुशायिनां जीवानां संसारकारणं प्रधानं त्वं॥ ११॥

अपि वनेश्वरेषु नाशशीलेषु इह एतेषु भावेषु यदनश्वरमवशिष्यमाणं रूपं तत्तत्त्वमपि । इव विकारेषु घटमृत्सुवर्णादिकार्येषु घटं कुंडलादिषु नश्वरेषु द्रव्य
मात्रं मृत्सुवर्णादिमात्रमनश्वरं यथा तद्वत् ॥ ११ ॥ नतु त्रिगुणात्मककार्यं रूपापि तत्त्वमित्युक्तं तत्त्वालक्षणमनश्वरत्वं चाह । तद्दृत्त्नयपत्तन्यपरिणामात्मस्व महदहंकारादयः
सद्वासाराात्विपि परब्रह्मणि कल्पिताः तस्मात्तत्सति । नत्वसत्ता कथं प्रतीतिरित्याह । यदीति । यदा विकल्पितास्तैरेव प्रतीतिमात्रेणापि सत्तेति वेद्य

नश्वरेष्विह भावेषु तत्सदस्तीत्यनश्वरम् । यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितम् ॥ १२ ॥ सत्त्वं रजस्तम इति गुणास्त्रिनयस्वप्याः त्व
प्यद्वा ब्रह्मणि परे कल्पिता योगमायया ॥ १३ ॥ तस्मात्सन्त्यमी भावा यद्यपि विकल्पिताः । त्वं चामीषु विकारेषु ह्यन्यदा व्यावहा
रिकः ॥ १४ ॥ गुणप्रवाह एतस्मिन्नबुधस्त्वखिलात्मनः । गतिं सूक्ष्मामबोधेन संसरंतीह कर्मभिः ॥ १५ ॥ यदृच्छया नृतां प्राप्य सु
कल्याणमिह दुर्लभाम् । स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर ॥ १६ ॥ असावहं ममैवैते देहे चास्यान्वयादिषु । स्नेहपाशैर्निबध्नाति भ
वान्सर्वमिदं जगत् ॥ १७ ॥

मीषु तैरेव कारणतया अनुगतः अन्यदा तु अव्यावहारिके विकल्पाः सत्त्वमेवावशिष्यमाणः स्वरूपम् ॥ १४ ॥ एवंरूपत्वादज्ञानं
निबंधनं संसारमित्याह । गुणप्रवाह इति । सूक्ष्मां लिंगप्रपंचां गतिमबुधाः अविद्वांसः अबुद्धेति वा पाठः । अबोधेन देहाभिमानेन कृतैः कर्मभिः
संसरंतीति ॥ १५ ॥ एवं तयोर्लब्धं निरूप्य तत्प्राप्यानाशोचति । यदृच्छयेति । नृतां मनुष्यतामिह कल्यापदुर्लभेद्रिया ॥ १६ ॥ अहो किमिति प्रमत्तोसि त्वया बद्धापि
पाशैर्निबद्धत्वादित्याह । असावहमिति । देहे अस्य देहस्यान्वयादिषु प्रजादिषु च ममैवैत इति ॥ १७ ॥

अहो त्वत्तश्च योरावयोः किमिह मारोप्यते अत आह ॥ युवामिति ॥ मुमारस्तावत्तत्पराणार्थं अवतीर्णोऽसि तथाह निःश्रितं आस्थिक कथयामि ॥ ९ ॥ तत्र स्मार्दशणशरण
पन्नानां समहति भयमपहंतीति तथा तत्र ॥ न उत्वमति मुखी सुखा किंनिर्विद्यसे ॥ अत आह ॥ एतावतेति ॥ इंद्रियलालसेन इंद्रियार्थेषु लालसयायतयेनेंद्रिय
लालसेन मन्मेशरीरे आत्मा इत्यात्मबुद्धिरहित्वयि वपरे परमेश्वरे अपत्यबुद्धिरस्मितेनालं पर्याप्तमिति ॥ ९ ॥ न उक्तं एतत् अहं परमेश्वर इति तत्राह
स्तीगृहइति ॥ अत्र पृग प्रतियुगं नो आवयोः पराहतपाः स्त्रीरिति युगं परा च कश्यपो रितिश्चेति युगमत्र धनाच च वा हरे वौरेवकी सुयुगमएवं हि
युवानन्नः स्तीगृहाज्ञानप्रधानपुरुषेश्वरो ॥ मुमारस्तत्त्रपराणा अवतीर्णोऽसि तथात्थ ह ॥ ९ ॥ तत्रेगतो सम्परणामद्यपराविरमापत्रसमहति
भयापहमात्त्वं वधो ॥ एतावतालमलमिंद्रियलालसेन मन्मात्मा हकत्वयि परे यदपत्यबुद्धिः ॥ ९ ॥ स्तीगृहे न तु जगाद भवाननोनो
मजतेऽस्यतु युगानि जधर्मिणः ॥ नानात्मकगगनवद्विद्यते धर्महोमिकौ वेदमूत्रमुत्रुगाय विभूतिमायाम् ॥ १० ॥ शुक उवाच ॥ आक
र्ण्यं त्वं पितर्वाक्यं भगवान्सात्वतर्षभः ॥ प्रत्याह प्रश्रयानम्रः प्रहसन्स्त्रिग्धया गिरा ॥ ११ ॥ श्रीभगवानुवाच ॥ वचो वः समवेतार्थं
तातैतदुपमन्महे ॥ यत्र पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः ॥ ११ ॥ अहं यूयमसावार्य इमे च द्वारकौकसः ॥ सर्वेऽप्येवं यदुश्रेष्ठ विमृग्याः
सचराचरम् ॥ १२ ॥
तियुगमत्र जएवाहं सजतत्र अवतीर्णोऽसीति भवानत्तु जगाद ॥ न उनात्मोव वर्मजोरेवशति ॥ तत्राह ॥ नानात्मकरिति ॥ गगनवदसंग
एव त्वं भूत्रः सर्वगतस्य विभूतिरूपां मायां ॥ १० ॥ उपमन्महे उपमन्यामहे ॥ समुद्दिश्य विषयीकृत्य तत्त्वग्राम स्तत्त्वसमूहः उदाहृतः सम्यक्सनिरूपितः ॥ ११ ॥
मामेव दृष्टि सर्वत्र विधत्स्वेत्याह ॥ अहमिति ॥ एवं विमृग्याः ब्रह्मत्वेनैवान्वेषणीयाः किंच ॥ सचराचरं जगदपि ॥ १२ ॥

२०३
५८

ननुनानाविकारवतां कुतो ब्रह्मत्वं न ब्रह्मण एवोपाधिधर्मैर्बहुधा प्रतीतेरिति सदृष्टांतमाह द्वाभ्यां आत्मा हीति ॥ यथा खवादिभूतानि तत्कृतेषु घ
टादिष्वाविस्तिरोभावादि यांति एवमसावात्मापि आत्मसृष्टैर्गुणैः कृत्वा तत्कृतेषु देहेषु बहुधा दृश्यते ॥ पुनश्च यथा खं यथोपाधि आविर्भावति
रोभावादिरूपेण प्रतीयते न वस्तुतः तथैको बहुधा स्वयंज्योतिरिद्रूपत्वेन ॥ नित्यो नित्यत्वेन ॥ अन्योनन्यत्वेन निर्गुणः सगुणत्वेनेत्यादि बहुधा

आत्माह्येकः स्वयंज्योतिर्नित्योन्योनिर्गुणोगुणैः ॥ आत्मसृष्टैस्तत्कृतेषुभूतेषुबहुधेयते ॥ २४ ॥ खंवायुर्ज्योतिरापोभूस्तत्कृतेषुयथा
शयं ॥ आविस्तिरोल्पभूर्य्येकोनानात्वंयात्यसावपि ॥ २५ ॥ श्रीशुकउवाच ॥ एवंभगवताराजन्वसुदेवउदाहृतः ॥ श्रुत्वाविनष्टनानाधीस्तूष्णीं
प्रीतमनाअभूत् ॥ २६ ॥ अथतत्रकुरुश्रेष्ठदेवकीसर्वदेवता ॥ श्रुत्वानीतंगुरोःपुत्रमात्मजाभ्यांसुविस्मिता ॥ २७ ॥ कृष्णरामौसमाश्राव्य
पुत्रान्कंसविहिंसितान् ॥ स्मरंतीकृपणंप्राहवैक्लव्यादश्रुलोचना ॥ २८ ॥ देवक्युवाच ॥ रामरामाप्रमेयात्मन्कृष्णयोगेश्वरेश्वर ॥ वेदाहं
वांविश्वसृजामीश्वरावादिपूरुषौ ॥ २९ ॥ कालविध्वस्तसत्वानांराज्ञामुच्छास्त्रवर्त्तिनां ॥ भूमेर्भारायमाणानामवतीर्णौकिलाद्यमे ॥ ३० ॥
यस्यांशांशांशभागेनविश्वोत्पत्तिलयोदयाः ॥ भवंतिकिलविश्वात्मंस्तंत्वाद्याहंगतिंगता ॥ ३१ ॥ चिरान्मृतसुतादानेगुरुणाकिलचोदितौ

तं प्रपंचनीयं ॥ २५ ॥ सुविस्मिता सती ॥ २७ ॥ समाश्राव्य संबोध्य ॥ २८ ॥ भूमेर्भारायमाणानां हन्तुमर्थे तेषां ॥ आनिन्यथुःपितृस्थानाद्गुरवेगुरुदक्षिणां ॥ ३२ ॥
निधनार्थं मे मय्यपि किलावतीर्णौ ॥ हे आद्य ॥ ३० ॥ यस्यांशः पुरुषस्तस्यांशो माया तस्या अंशा गुणाः तेषां भागेन परमाणुमात्रलेशेन विश्वोत्पत्त्यादयो
भवंतितं त्वां त्वां गतिं शरणं गतास्मि ॥ ३१ ॥ आनिन्यथुः आनीतवंतौ पितृस्थानात् यमसदनात् ॥ ३२ ॥

राम
५८

दैत्यराड् बलिः । कथंभूतो ॥ विश्वस्यात्मभूतं दैवमात्मनश्च । सान्वयः सपरिवारः ॥ २५ ॥ सवृन्दः सपरिजनः । कथंभूतो पादाववनिज्य यत्तद्वयोरवनेजनोदकं आ
ब्रह्म ब्रह्मलोकमभिव्याप्य जगदेतत्पुनाति पवित्रयदद्भुतं तेन ॥ २७ ॥ इन्द्रसेनो बलिः ॥ प्रेमविभिन्नया प्रेमार्द्रया धिया बिभ्रत् धारयन् ॥ २८ ॥ अनन्ताय शेषाय बृह
ते फणैकदेशे विश्वधारणात् बृहते तस्मै कृष्णाय सदानन्दरूपाय वेधसे जगद्विधात्रे ॥ सांख्ययोगवितानायेत्यादि पद्यत्रयमेकाविवक्षया ॥ २९ ॥ योगेश्व

तथाप्येकान्ततः कामं सुवां योगेश्वरेश्वरौ ॥ भोजराजन्यहतान्सुतान्कामये द्रष्टुमागतान् ॥ २३ ॥ श्रीशुक उवाच ॥ एवं संचोदितो मात्रा रामः कृष्ण
श्च भारत ॥ सुतलं संविविशतुर्योगमायामुपाश्रितौ ॥ २४ ॥ तस्मिन्प्रविष्टावुपलभ्य दैत्यराड् विश्वात्मदैवं सुतरां तथात्मनः ॥ तद्दर्शना
ह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ॥ २५ ॥ तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः ॥ दधा
र पादाववनिज्य तज्जलं सवृन्द आब्रह्म पुनद्यदम्बु ह ॥ २६ ॥ समर्हयामास स तौ विभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ॥ ताम्बूलदी
पामृतकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरः ॥ २८ ॥ भक्षणादिभिः ॥ स्वगोत्रवित्तात्मसमर्पणेन च ॥ २७ ॥ स इन्द्रसेनो भगवत्पदाम्बुजं बि
भ्रन्मुहुः प्रेमविभिन्नया धिया ॥ उवाच हानन्दजला ॥ बलिरुवाच ॥ नमोऽनन्ताय बृहते नमः कृष्णाय वेधसे ॥ सांख्ययोगवितानाय ब्रह्म
णे परमात्मने ॥ २९ ॥ दर्शनं वां हि भूतानां दुष्प्रापं चाप्यदुर्लभं । रजस्तमःस्वभावानां यन्नः प्राप्तं यदृच्छया ॥ ३० ॥ दैत्यदानवगन्धर्वाः सिद्ध
विद्याध्रचारणाः ॥ यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ॥ ३१ ॥

योगेश्वराणामपि दुर्दर्शौ युवामस्माभिर्दृष्टाविति एतन्नातिचित्रमित्याह ॥ दर्शनमि
ति । दुःप्रापमपि युष्मत्कृपया केषांचिदुर्लभमपि भवति ॥ तदाह । रजस्तमःस्वभावानामपि ॥ नो दर्शनं प्राप्तौ ॥ ३० ॥ अहो विद्विषं वयं सात्त्विकाभक्तेभ्योऽपि सभाग्या
इत्याह ॥ दैत्यदानवेत्यादि त्रिभिः ॥ ३१ ॥

२०७
८८

उद्धववैरेण या भक्तिस्तया केचनेति वैद्यादयः कामतो भक्त्या गोप्यादयः यथा सन्निकृष्टाः त्वदात्मतां प्राप्ताः न तथा सक्तसंरब्धाः सक्ताविष्टा अपि स्मरादयो न
सन्निकृष्टा इति ॥ ४३ ॥ ननु सात्त्विकेभ्योऽपि राजसादयः सन्निकृष्टा इति चेत्तत्राह इदमित्थमिति इदमिति स्वरूपतः इत्थमिति विशेषतश्च ॥ ४४ ॥ तदेवं
यद्यपि वैरभावेनापि त्वत्प्राप्तिर्भवेत्तथापि मां सात्त्विकं कुर्विति प्रार्थयते तन्न इति तन्नस्त्वं नः प्रसीद यथा निरपेक्षैरात्मकामैरपि विमृग्यं युग्मं पादारवि-
न्दं तदेव धिषणाऽऽश्रय यस्यास्तस्मादन्यद्गृहं तदेवान्धकूपः तस्मान्निष्क्रम्य निर्गत्य विश्वस्य शरणं रक्षितारावङ्घ्री तेषामङ्घ्रिमूलेष्वेव लब्धा वृत्तिः फलादि

विशुद्धसत्त्वधाम्न्यद्धा त्वयीशा त्वच्छरीरिणि ॥ नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ॥ ४२ ॥ केवलेनोद्धवैरेण भक्त्या केचन कामतः ॥
न तथा सक्तसंरब्धाः सन्निकृष्टाः स्मरादयः ॥ ४३ ॥ इदमित्थमिति प्रायस्तव योगेश्वरेश्वर ॥ न विदन्त्यपि योगेशा योगमायां कुतो वयम् ॥ ४४ ॥
तन्नः प्रसीद निरपेक्षविमृग्ययुग्मपादारविन्दधिषणान्यगृहान्धकूपात् ॥ निष्क्रम्य विश्वशरणाङ्घ्र्युपलब्धवृत्तिः शान्तो यथैक
उत सर्वसखैश्चरामि ॥ ४५ ॥ शाध्यस्मानीशितव्येश निष्पापान् कुरु नः प्रभो ॥ पुमान्यच्छ्रद्धयातिष्ठंश्चोदनाया विमुच्यते ॥ ४६ ॥

भिरुपलब्धा प्राप्ता वृत्तिर्जीविका येन सोऽहं शान्तः सन् एक एव चरामि उत अथवा सर्वेषां सखायो ये महान्तस्तैः सह यथा चरामीति ॥ ४५ ॥ कथमल्पपुण्या-
नामेवं वा मोक्षः संभवतीति चेत् तर्हि पवित्रैस्तद्भवेत्तथाऽस्माननुशिक्षयेत्याह शाधीति हे प्रभो ईशितव्याः सर्वे जीवास्तेषामीश यत्त्वदनुशासनमनुति-
ष्ठन् आश्रयन् चोदनाया विधिनिषेधलक्षणायाः सकाशाद्विमुच्यते न खलु त्वदाज्ञो विधिकिंकरः स्यादिति भावः ॥ ४६ ॥

राम
८८

तदुक्तं सर्वं समन्तोऽत्र स्वागमनकारणं सपूर्ववृत्तं कथयति । आसन्निति पञ्चभिः ऊर्णायां भार्यायां प्रथमेऽन्तरे स्वायंभुवमन्वन्तरे । ते देवाः सुतां वाचं यभितुं
उद्यतं उद्युक्तं कं प्रजापतिं जहसुः उपहसितवन्तः ॥४७॥ तेनावद्यकर्मणा पापेन आसुरीं योनिं अगमन् । अगमन् । अधुनातनकर्मणा
हिरण्यकशिपोर्जाता इत्यर्थः । ते च योगमायया ततो नीताः सन्तः ॥४८॥ देवक्या उदरे जाताः हे राजन् बले ते च कंसेन विहिंसिताः सा च तानात्मजान्

श्रीभगवानुवाच ॥ आसन्मरीचेः षट्पुत्रा ऊर्णायां प्रथमेऽन्तरे । देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतं ॥४७॥ तेनासुरीमगन्
योनिमधुनावद्यकर्मणा ॥ हिरण्यकशिपोर्जाता नीतास्ते योगमायया ॥४८॥ देवक्या उदरे जाता राजन्कंसविहिंसिताः
सा तान् शोचत्यात्मजान्स्वांस्त इमेऽध्यासतेऽन्तिके ॥४९॥ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये ॥ ततः शापाद्विनिर्मुक्ता लो-
कं यास्यन्ति विज्वराः ॥५०॥ स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्रभृद्घृणी ॥ षडिमे मत्प्रसादेन पुनर्यास्यन्ति सद्गतिं ॥५१॥ इत्युक्त्वा तान्स-
मादाय इन्द्रसेनेन पूजितौ ॥ पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छतां ॥५२॥ तान्दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी ॥ परिष्वज्यांक-
मारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥५३॥ अपाययत्स्तनं प्रीता सुतस्पर्शपरिस्नुतं ॥ मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते ॥५४॥ पीत्वा-
मृतं पयस्तस्याः पीतशेषं गदाभृतः ॥ नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥५५॥ ते नमस्कृत्य गोविंदं देवकीं पितरं बलं ॥ मिषतां स-

शोचति ते चेमे तवान्तिके ध्यासते ॥४९॥ लोकं देवलोकं ॥५०॥ स्मरोद्गीथः स्मरसहितः उद्गीथः सद्गतिं मोक्षं । र्वभूतानां ययुर्धाम दिवौकसां ॥५६॥
स्मरस्यैव पूर्वं कीर्तिमान इति नाम ज्ञातः कीर्तिमन्तं प्रथमजं कंसायानकदुंदुभिरर्पयामास इत्युक्तेः ॥५१॥ अपयत् तान् अर्पयामास ततः ॥५२॥ अमृतत्वहेतोः

२०३ मृतानामागमनं निर्गमं च ॥ श्रीकृष्णस्य मायया मेने तेनैवापत्यादिरूपेणारचितां ॥५७॥ अमृतकीर्निर्यस्य तस्य व्यासपुत्रैरितिवचनं पूजार्थं ॥ जगतः अ
१०० घमिनक्तीति तथा तत् ॥ अलंतिः शेषं यथा भवति तथा न कृच्छ्रादिविशिति ॥ ततेएवं मोहहेतुत्वं पापक्षयहेतुत्वं चोक्तं ॥ तद्भक्तानां तु सत्कर्णपूरं परमस्तावा
वहं कर्णाभरणमिति स्वयं स्वरूपतामाह ॥ किंच भगवति कृतभावेशितं चित्तं येन स तथाभूत्वा तस्य क्षेमधाम कालादिभयरहितं लोकं यातीति ॥५९॥
॥ दशमे पञ्चाशीतितमः ॥ षडशीतितमे रम्भान्हु सुभद्रामर्जुनो हरत् ॥ गत्वा च मिथिलां कृष्णोऽन्वप विप्रावनंदयत् ॥१॥ पित्रोः स्वतानमादिशायस्य भद्रापा

तं दृष्ट्वा देवकी देवी मृतागमननिर्गमं ॥ मेने सुविस्मिता मायां कृष्णस्य रचितां नृप ॥५७॥ एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः ॥ वीर्या
ण्यनंतवीर्यस्य सन्त्यनंतानि भारत ॥५८॥ सूत उवाच ॥ य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ॥ जगद
घभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥५९॥ इति श्रीभागवते महापुराणे दशमस्कन्धे मृताग्रजानयनं नाम पञ्चा
शीतितमोऽध्यायः ॥ राजोवाच ॥ ब्रह्मन्वेदितुमिच्छामः स्वसारं रामकृष्णयोः ॥ यथोपयेमे विजयो या ममासीत्पितामही ॥१॥ श्रीशुक उवाच ॥ अर्जुन
स्तीर्थयात्रायां पर्यटन्नवनीं प्रभुः ॥ गतः प्रभासमशृणोन्मातुलेयीं स आत्मनः ॥२॥ दुर्योधनाय रामस्तां दास्यतीति न चापरे ॥ तल्लिप्सुः स य
तिर्भूत्वा त्रिदण्डी द्वारकामगात्

स्तुनायच ॥ जगाम मिथिलां कृष्णः स्वभक्तप्रियकृत् ततः देवक्या मृतपुत्रलाभवत् अर्जुनस्य सुभद्रालाभोऽपि रामप्रातिकू
ल्यात् ॥ दुर्घटमिति मन्यमानः प्रसंगात्पृच्छति ब्रह्मन्निति ॥ कथमशृणोत् ॥१॥ दुर्योधनायेति अपरे वसुदेवादयो न दास्यतीति ॥ तल्लिप्सुः तस्यां मातुलेय्यां लि राम
प्सां लिप्सुः रामं च पित्रं तु पूज्य तमतित्रिदण्डवेषं विधाय गतः इत्याह स यतिरिति ॥३॥ १००

स्वार्थसाधकः कन्याप्रेप्सया॥४॥ तमातिथ्येननिमंत्र्यगृहमानीयबलेनयत्नद्वयोपहृतंपरिविष्टंतदेतद्रूपंकिलार्जुनोबुभुजेइत्यन्वयः॥५॥ भावेनरत्यमि
प्रायेणाज्ञभितंमनोरथे॥६॥ व्रीडितापांगीसव्रीडकटाक्षा तस्मिन्नेवन्यस्तहृदयमीक्षांचकारयथासा॥७॥ श्रुतंरहस्त्विमवमंप्रेष्ठः प्राप्तमिष्टः कामेनअप्र
च्छिन्नयस्मतः॥ शांतमाहितसन्माननिमित्तेनहर्षेण॥८॥ आसमंताड्डयतः आवरणांकुर्वतः॥१०॥ पारिबर्हाणिवरवध्वोः प्रीतिदेयानि॥१२॥ अनीहयाअनु

तत्रैवैवार्षिकान्मासान्प्रवात्सीत्स्वार्थसाधकः पौरैःसमाजितोभीमांरामेणाजानताव्रतः॥४॥ एकदागृहमानीयआतिथ्येननिमंत्र्य
तं॥ भद्रद्वयोपहृतंभैक्ष्यंबलेनबुभुजेकिल॥५॥ सोपश्यत्तत्रमहतीकन्यांवीरमनोहराम्॥ प्रीत्युत्फुल्लेक्षणस्तस्यांभावव्यक्तंमनोरथे॥६॥
सापितंवक्रमेवीक्ष्यनारीणांहृदयंगमम्॥ व्रीडितापांगीतन्न्यस्तहृदयेह्यक्षणा॥७॥ तांपरंसमनुध्यायन्नश्रुतंरहःप्रेष्ठअर्जुनः॥ नलेभेशंप्रम
च्छिन्नःकामेनातिबलीयसा॥८॥ महत्यांदेवयात्रायांरथस्थांदुर्गानिर्गतां॥ जहारानुमतःपित्रोःकृष्णस्यचमहारथः॥९॥ रथस्थोध
नुरादायशूरांश्चारुंधतोभयान्॥ विद्राव्यक्रोशतांस्वानांस्वभागंमृगराडिव॥१०॥ तच्छ्रुत्वाक्षुभितोरामःपर्वणीवमहार्णवः॥ गृहीत
पादःकृष्णेनसुहृद्भिश्चानुशाम्यत॥११॥ प्राहिणोत्पारिबर्हाणिवरवध्वोर्मुदाबलः॥ महाधनोपस्करेभरथाश्वनरयोषितः॥१२॥ श्री
का ३ भा च॥ कृष्णस्यासीद्द्विजश्रेष्ठःश्रुतदेवइतिश्रुतः॥ कृष्णैकभक्त्यापूर्णार्थःशांतःकविरलंपटः॥१३॥ सउवासविदेहेषुमिथिलायांगृ
हाश्रमी॥ अनीहयागताहार्यनिर्वर्तितनिजक्रियः॥१४॥ यात्रामात्रंत्वहरहर्दैवादुपनमत्युत॥ नाधिकंतावतातुष्टःक्रियाश्चक्रेयथोचिताः॥१५॥

द्यमेनैवागतंयदाहार्यंभोज्यंतेननिर्वर्तितानिजाक्रियायेनसः॥१४॥ यात्रामात्राशरीरादिनिर्वाहमात्रंभोज्यंउपनमतितंप्रत्यागच्छति॥ १५॥ रामराम

द०उ
१०१

मिथिलस्य जनकस्य वंश्यो मैथिलः ॥ प्रभुरेव स्वयं विदेहान् देशान् प्रययौ ॥ ६ ॥ कण्वो व्यासः रामो भार्गवः अष्टावक्रः एवमादिभिः सह ॥ ७ ॥ आनर्ताधर्णी
नास्तन्नदेशवर्तिन्यो ह्नानार्यः ॥ उदाराहासमत्तिस्निग्धमीक्षणा यस्मिन् तत्तद्दृशिभिर्नेत्रैः स्वीकृता नैव विनष्टतमिश्रा दृग्येषां तेभ्यः क्षेमं अभयं अर्थिदर्शनात्वन्ना

तथा तद्वाष्ट्रपालोंगवङ्गलाम्बु इति श्रुतः ॥ मैथिलो निरहमानउभावप्यस्तुतप्रियो ॥ ६ ॥ तयोः समन्त्रो भगवान् दारुकेणाहृतं रथं ॥ आ
रुह्य प्राक् मुनिभिः र्द्धिर्विदेहान् प्रययौ प्रभुः ॥ ७ ॥ नारदो वामदेवो त्रिः कृष्णो रामो सितो रुणिः ॥ अहं बृहस्पतिः कण्वो मैत्रेयश्च्यवनादयः
॥ ८ ॥ तत्र तत्र तमायान्तं पौरा जानपदा नृप ॥ उपातस्थुः सार्घहस्ता ग्रहैः सूर्यमिवोदितम् ॥ ९ ॥ आनर्तधन्वकुरुजांगलकंकमत्स्यपांचा
लकुंतिमधुकैकयकोशलार्णाः ॥ अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृनार्यः ॥ १० ॥ तेभ्यः स्वीकृतावि
नष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन् ॥ शृण्वन् दिगन्तधवलं स्वयशोऽशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् ॥ ११ ॥
तेऽच्युतं प्राप्तमाकर्ण्य पौरा जानपदा नृप ॥ अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥ ११ ॥ तष्ट्वा तउन्नमश्लोकं प्रीत्युत्फुल्लाननाशयाः ॥ कैर्धृतांजलिभिर्नेमुः श्रुतपूर्वांस्तथा मुनीन् ॥ १२ ॥

नं व ११ अभीयुः प्रत्युज्जग्मुः ॥ १२ प्रीत्या उत्फुल्लानि आननानि आशयाः अन्तःकरणानि च येषां तैः शिरोभिः ॥ ॥ १२ ॥ रामायनमः गोविंद

राम
१०१

तदभिषेकत्यं अंगीकृत्य तत्तदा उभाभ्यामपिताभ्यां महद्भार रभ्यां गेहं यातीत्यलक्षितश्च अविदितः यद्वा उभाभ्यां तदलक्षितः ताभ्यामलक्षित इति ॥ १६ ॥
उद्धर्षं जनतदूर्षहृदयं यत्पश्चात्तेन विलेभिरे द्वाणोयसमः मएवमव ॥ १७ ॥ ईश्वराणां नृस्वरं तत्तुल्यो वेत्यर्थः ॥ १८ ॥ श्रीरामानुजाय नृपं मंस्क्रत्य मदं

द्वा उग्रहाय संप्राप्त मद्यानीतं जगद्गुरुं ॥ मैथिलः श्रुतदेवश्च पादयोः पेततः प्रभोः ॥ १४ ॥ न्यमंत्रयेतां दाशार्हमातिथ्येन सह द्विजैः मैथि
लः श्रुतदेवश्च युगपत्संहताञ्जली ॥ १५ ॥ भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया उभयोराविशद्गेहमुभाभ्यां तदलक्षितः ॥ १६ ॥ श्रोतु
मप्यसतां दूरान् जनकः स्वगृहागतान् आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः ॥ १७ ॥ प्रवृद्धभक्त्या उद्धर्षहृदयास्राविलेक्षणः
नत्वा तदङ्घ्रीन्प्रक्षाल्य तदपो लोकपावनीः ॥ १८ ॥ सकुटुम्बो वहन्मूर्ध्ना पूजयांचक्र ईश्वरान् गंधमाल्यांबराकल्पधूपदीपार्घ्यगोवृषैः
॥ १९ ॥ वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान् पादावंकगतौ विष्णोः संस्पृशन्शनकैर्मुदा ॥ २० ॥ राजोवाच ॥ भवान्हि सर्वभूता
नामात्मा साक्षी स्वदृग्विभो अथ नः त्वत्पदाम्भोजं स्मरतां दर्शनं गतः ॥ २१ ॥ स्ववचस्तदृतं कर्तुमस्मद्दृग्गोचरो भवान् यदात्थैकां
तभक्तान्मे नानन्तः श्रीरजः प्रियः ॥ २२ ॥ कोवतीर्यं पदाम्भोजं नृणां संस्मरतामिह यशो वितेने तच्छान्त्यै त्रैलोक्यवृजिनापहं ॥ २३ ॥ नमस्तु
भ्यं भगवते कृष्णायाकुण्ठमेधसे नारायणाय ऋषये सुशांतं तप ईयुषे ॥ २४ ॥ कोतत्त्व चरणांभोजमेवं विद्विसृजेत्पुमान् निःकिंचना
नां शान्तानां मुनीनां यस्त्वमात्मदः ॥ २५ ॥ दिनानि कतिचिद्भूमन्गृहान्नो निवस द्विजैः समेतः पादरजसा पुनीहीदं निमेः कुलम् ॥ २६ ॥
यन् ॥ २० ॥ आत्मा वेत पिता साक्षी प्रकाशकः स्वदृक् स्वप्रकाशः अथ अतः कारणात् ॥ २१ ॥ अनंतो वंधुरपि श्रीभार्यापि अतः पुत्रोपि ॥ २२ ॥ तच्छान्त्यै संसारोप

॥ ६६ ॥

२०३
१०१

ध्वनन् परिभ्रामयन् ३६ अवनिजे अवनिनिजे प्रक्षालितवान् ३७ फलैः आमलकादिभिः इंगुदीभिः उशीरैः तृणविशेषमूलैः सुवासितैः शिवैः मृतव तत्ताडुभिः खभिः हरस्यापूदाकल्पः प्रसुखयासपर्ययासूजायायथोपपन्नया अनायासेन संपन्नयाभूतानुपडवलघ्वत्वात्सत्वनिवद्धं नयदंधः अत्रैतेनव ४१ अस्य कन्यस्यात्मामूर्त्रित्वस्य निकेते गृहे रघुः सर्वतीर्थास्पदपदरेणुभिः कल्पादिभिर्यैः संगमः समसमकृतो नृभूरिति अत्विति वि

रस्तपामंत्रितोगत्ता भगवान् लोकभावनः उवास कर्त्तु कल्याणं मिथिलानरयोषितान् ३७ श्रुतदेवो श्रुतं प्राप्तं स्वगृहान् जनकोयथा नत्वा मुनीन् सुसंहृष्टो धुन्वन्वासो ननर्त्त ह ३८ तृणपीठवृषिष्वेतानानीतेषुपवेश्य सः स्वागते नाभि नद्यार्ध्यान्महाभागान् अर्ध्यविनिजे मुदा ३९ तदंभसा महाभागमात्मानं सगृहान्वयं स्नापयावक्रउद्धर्षोलब्धसर्वमनोरथः ४० फलार्हणोशीरशिवामृताडुभिः मृदा सुरभ्या तुलसीकुशांबुजैः आराधयामास यथोपपन्नया सपर्यया सत्वविवर्द्धनांधसा ४१ स तर्कयामास कृतो ममाद्य अन्धकूपपतितस्य संगमः ॥ यः सर्वतीर्थास्पदपादरेणुभिः कृष्णेन चास्यात्म[illegible]निकेतभूसुरैः ४१ सुपविष्टान् कृतातिथ्यान् श्रुतदेव उपस्थितः सभार्यः स्वजनापत्य उवाचांघ्र्यभिमर्शनः ४३ श्रु. देव उवाच ॥ नाद्यनो दर्शनं प्राप्तः

स्यायेयद्वा अरतिवितर्केनुइतिविस्मये ४२ उपस्थितः समीपउपविष्टः भार्याभर्त्तृ परपरसपत्नपुषः यदीदंशक्तिभिः सृष्ट्वाप्रविष्टोह्यात्मसत्त्वया ४४ याः स्वजनाअपत्यानि चैतैः सहितः श्रीकृष्णस्यांघ्रिमभिमृशति संमर्दयतीत्यघ्रिमर्शनः ४३ यर्हीदंप्रविश्य तदेव दर्शनं प्राप्तमितिम एवमन्यात्रोद्यन प्राप्तनीनृतत्वमित्यर्थः यदानः अस्मान् अद्यैव प्राप्तइति नकिंतु तदैव प्राप्तः यदीदंविश्वमात्मशक्तिभिः सत्वादिभिः सृष्ट्वा स्वसत्त्वया अनुप्रविश्य तद्दर्शनं ठपरं १०१

मायासृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशौ दृष्टांतनयाह यथेति आत्ममायया स्वाविद्ययेत्यर्थः यद्वा आत्मन एव माययेति ४५ किंच शृण्वतामिति नित्यं श्रवण
कीर्त्तनादिपराणाममलात्मनामपि हृद्येव त्वं भासि मनस्तु लोचनगोचरस्त्वं न्नो भास्यपीति भावः ४६ ननु सर्वेषां हृदि स्थितः कथं केषांचिदेव हृदि
भासि मेघैः सूर्यवत् जीवोपाधिभिरंतरितत्वादिति यद्युच्यते तर्हि न कस्यापि भायादित्यत आह हृदिस्थोपीति कर्म्मभिर्विक्षिप्तचेतो येषां तेषामात्म
शक्तिभिरहंकारादिभिरग्राह्यः व्यवहितोपि उपेतगुणाः प्राप्तश्रवणकीर्त्तनादिसंस्कारा आत्मानो अंतःकरणं येषां तेषामति समीपे अव्यवहितत्वात्त्वमि
त्यर्थः ४७ एतदेव स्वरूपं व्यवत्नमस्यति नमोस्त्विति ते तुभ्यं नमोस्तु अध्यात्मविदां निवृत्तदेहाद्यहंकाराणां परमात्मने परमात्मत्वेन प्रकाशमानाय

यथा शयानः पुरुषो मनसैवात्ममायया सृष्ट्वा लोकं परं स्वाप्नमनुविश्यावभासते ४५ शृण्वतां गदतां शश्वदर्चतां त्वाभिवंदतां
नृणां संवदतामंतर्हृदि भास्यमलात्मनां ४६ हृदिस्थोप्यतिदूरस्थः कर्म्मविक्षिप्तचेतसां आत्मशक्तिभिरग्राह्योप्यंत्युपेतगुणा
त्मनाम् ४७ नमोस्तु तेध्यात्मविदां परात्मने ह्यनात्मने स्वात्मविभक्तमृत्यवे सकारणाकारणलिंगमीयुषे स्वमायया संवृतरुद्ध
दृष्टये ४८

मोक्षप्रकाशमानाय मोक्षप्रदायेत्यर्थः अनात्मने देहाद्यभिमानिने जीवाय परत्वेनाप्रकाशमानत्वात् स्वात्मनः सकाशात् विभक्तः
समर्पितो मृत्युः संसारो येन तस्मै भक्तमेतदेतदाह सकारणं महदादिकार्यं अकारणं प्रकृतिः तदुभयलिंगमुपाधिं नियम्यतया ईयुषे प्राप्तवते अतः उप
यनियंतुः स्वस्मात्प्रकाशात्तदुभयवशाय जीवाय विभक्तमृत्यव इत्यर्थः नित्यत्वे नियम्यत्वे कारणं वदन्नाह स्वमायया संवृतेति अतो लुप्तैश्वर्यतया
नियंत्रे तुभ्यं नमः किंच रुद्धदृष्टये मायाविचारे च अन्येषां रुद्धा आवृता दृष्टिर्येन तस्मै यद्वा स्वमायया स्वस्याः संवृता अन्येषां च रुद्धा दृष्टिर्येन तस्मै इत्यर्थः
परं ४८

२०७ सएवंभूतः परमेश्वरस्त्वं नोस्मान् स्वभृत्याननुशाधि अनुशिक्षय ४९ स्वस्मिन्नादरमत्यधिकं ब्राह्मणेषु मंदमिवालक्ष्य लोकसंग्रहपरो भगवान् मत्तोपि
१०२ ब्राह्मणेषु श्रद्धातिरेकं कर्त्तव्य इत्येवं तमनुशास्ति ब्रह्मन्निति सप्तभिः मयाद्दृष्टेन ५१ देवादिभ्योपि ब्राह्मणाः श्रेष्ठा इत्याह देवा इति ते शनैः पुनंति
एते तु सद्यः किंच देवादीनि यत्पुनंति तदप्यर्हत्तमानामीक्षया ५२ मे मम कलोपमि कलनं मयाप्तिस्तया युतः ५३ किंच ब्राह्मणाधनमेवममप्रि

स त्वं शाधि स्वभृत्यान्नः किं देव करवाम ते एतदंतो नृणां क्लेशो यद्भवानक्षिगोचरः ४९ श्रीशुक उवाच तदुक्तमित्युपाकर्ण्य भगवान्प्रण
तार्तिहा गृहीत्वा पाणिना पाणिं प्रहसंस्तमुवाच ह ५० श्रीभगवानुवाच ब्रह्मंस्तेनुग्रहार्थाय संप्राप्तान्विद्ध्यमून्मुनीन् संचरंति म
या लोकान्पुनंतः पादरेणुभिः ५१ देवाः क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्चनैः शनैः पुनंति कालेन तदप्यर्हत्तमेक्षया ५२ ब्रा
ह्मणो जन्मना श्रेयान्सर्वेषां प्राणिनामिह तपसा विद्यया तुष्ट्या किमु मत्कलया युतः ५३ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजं
सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहं ५४ दुःप्रज्ञा अविदित्वैवमवजानंत्यसूयवः गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः ५५ च
राचरमिदं विश्वं भावा ये चास्य हेतवः मद्रूपाणीति चेतस्याधत्ते विप्रो मदीक्षया ५६ तस्माद्ब्रह्मर्षीनेतान्ब्रह्मन्मच्छ्रद्धयार्चय एवं चे
दर्चितोस्म्यद्धा नान्यथा भूतिभूरिभिः ५७ श्रीशुक उवाच स इत्थं प्रभुनादिष्टः सहकृष्णान्द्विजोत्तमान् आराध्यैकात्मभावेन मैथिलश्चा
प सद्गतिं ५८ एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान् उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात् ५९ इति श्रीभागवते महापुराणे दशम

यं इत्याह नेति हेतुमाह सर्ववेदमयो विप्र इति प्रमाणाधीनत्वात्प्रमेयस्य वेदमयो विप्रो देवमयोहं तस्मान्मद्रूपात्श्रेष्ठ इत्यर्थः अस्मत्स्वकीये षडशीतितमोध्यायः राम
यथा वो दोषदृष्टयः इज्यदृष्टयः प्रत्यग्दृष्टयः ५५ अस्य विश्वस्य हेतवो भावाः महदादयः मदीक्षया मामेव सर्वत्रेक्षया ५६ सन्मार्गमिति वेदानां त्रिकांडविष १०२
याणां प्रवृत्तिप्रकारमादिश्य ५९ दशमे षडशीतितमः ।

व्या

सप्ताशीतितमे नारायणनारदसंवादतः । वेदैः स्तुतिर्निर्गुणत्वं वा निर्गुणत्वविधिवर्णिते ॥ ॐ नमो भगवते वासुदेवाय । वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि । यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ॥१॥ सम्प्रदायविशुद्ध्यर्थं स्वीयनिर्बन्धयन्त्रितः । श्रुतिस्तुतिमितस्त्वां व्याकरिष्यामि यथाविधि ॥ श्रीमद्भागवतं पूर्वैः सारतः संनिषेवितं । मया तदुपसृष्टं तु शिष्टमुपपाद्यते ॥ पूर्वाध्यायान्ते एवं स्वभक्तयो राजन् भगवान् भक्तभक्तिमान् । उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगादित्यत्र सन्मार्गमित्युक्तं तत्र प्रमाणभूतानामप्रमाणे कारणरहितानां वेदानां मार्गं ब्रह्मपरत्वरूपं दिश्य भगवानगादित्युक्तं । तत्र वेदानां ब्रह्मपरत्वमसहमानः पृच्छति ब्रह्मन्निति । तत्र तावच्छब्दस्य मुख्यलक्षणागौणभेदेन त्रिधा शब्दवृत्तिः । मुख्यापि रूढियोगभेदेन द्विधा । तत्र रूढिः स्वरूपेण जातिगुणेन वा निर्देश्यार्थस्य निमित्तमपेक्ष्य संकेतेन प्रवर्तते । यथा डित्थः गौः शुक्ल इति । लक्षणा च तेनैव संकेतेनाभिहितार्थसंबंधि

परीक्षिदुवाच । ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः । कथं चरन्ति श्रुतयः साक्षात्सदसतः परे ॥१॥ गम

नि यथा गंगायां घोष इति । गौणी चाभिहितार्थलक्षितगुणयुक्ते तत्सदृशे यथा सिंहो देवदत्त इति । यथाहुः अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता इति । योगवृत्तिः स्वरूपेण त्रिविधवृत्तिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्वा योगेन यथा पंकजं औपगवः पाचक इत्यादि । तत्र तावद्ब्रह्मणि रूढिवृत्तिर्न संभवतीत्याह साक्षात्कथं चरन्तीति । तत्र हेतुः अनिर्देश्य इति अनिर्देश्यत्वेऽपि हेतुं वदन् गुणवृत्तिं निराकरोति निर्गुणे गुणवृत्तय इति । गौणी वृत्तिर्मा नाम भूदपि निर्गुणे कथं चरन्तीत्यर्थः । निर्गुणत्वे हेतुं वदन् लक्षणां योगं च निराकरोति सदसतः पर इति कार्यकारणाभ्यां परस्मिन् संगाभेन केनचिदपि संबंधाभावात् लक्षणा योगवृत्तिश्च न संभवत इत्यर्थः । एवं पदार्थत्वायोगात्पदार्थस्य वाक्यार्थत्वायोगात् श्रुतिगोचरत्वं ब्रह्मणः कथमिति प्रायः ॥

२०३
१०४

तु

उत्तरमाह । बुद्धीन्द्रियेति । बुद्ध्यादीनुपाधीन् जनानामसृजत् । मात्राद्यर्थं प्रभुरीश्वरः सृजति । मीयन्त इति मात्रा विषयाः तदर्थं भवार्थं भवो जन्म जन्म
कर्म्म तत्प्रभृति कर्म्मकरणार्थमित्यर्थः आत्मने लोकान्तरगामिने आत्मनः तत्तल्लोकभोगायेत्यर्थः । अकल्पनाय कल्पनानिवृत्तये मोक्षायेत्यर्थः । अर्थ
धर्म्मकाममोक्षार्थमिति क्रमेण पदचतुष्टयस्यार्थः । जनानामिति वदन् जीवार्थमीश्वरस्य सृष्ट्यादिप्रवृत्तिरिति दर्शयति । एवं हि तस्येश्वरस्योपाधिव
श्यताभावेन नित्यमुक्ततां दर्शयति । अयमभिप्रायः सगुणमेव ब्रह्म तत्सर्वज्ञत्वं सर्वशक्तित्वं सर्वेश्वरं सर्वनियन्तारं सर्वोपास्यं सर्वकर्म्मफलप्रदा
तारं समस्तकल्याणगुणानिलयं सच्चिदानन्दं भगवन्तं श्रुतयः प्रतिपादयन्ति । यः सर्वज्ञः सर्वविद् । यस्य ज्ञानमयं तपः । सर्वस्य वशी सर्वस्येशानः । यः पृ
थिव्यां तिष्ठन् पृथिव्या अन्तरः । सोऽकामयत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत । सत्यं ज्ञानमनन्तं ब्रह्मेत्याद्याः । तथाप्येतेषु रतानां तावत्त्वमावरणेनाविद्यस्तत्रि
इत्येतत् तत्त्वमसीत्यादिवाक्यानि बोधयन्ति । तच्च तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते । तच्च प्रकारान्तरेणोपरमानं ब्रह्मणि पर्यवसानं गमयति

श्रीशुक उवाच ॥ बुद्धीन्द्रियमनःप्राणान् जनानामसृजत् प्रभुः । मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥ १ ॥ राम ॥

तथाहि न तावदहं ब्रह्मास्मीतिवदुभयोरेकार्थाभिधानेन सामानाधिकरण्यं । यथोक्तं । अभिन्नार्थे वर्तमानावुभौ वर्तेते तद्धितः । अभिन्नार्थपरत्वात्त
थ्यात्मत्वस्वविषयार्पणमिति । कुतः भिन्नार्थत्वात् । न चाजहत्स्वार्थयोर्नीलोत्पलवद्विशेषणविशेष्यभावेन नीलमुत्पलमितिवत [illegible]
यथोक्तं । व्यवच्छेद्यं न युज्यते येन विशेषणं तद्विशेषणमित्यादि । कुतः विरुद्धार्थत्वेन तदयोगात् । न च जहत्स्वार्थत्वेन संबंधलक्षणया गङ्गायामितवद्गङ्गायां गङ्गेतिवत
कुतः एकार्थत्वस्याविवक्षितत्वात् । अतो जहदजहत्स्वार्थलक्षणया सोऽयं देवदत्त इतिवद्विरुद्धांशत्यागेनानुगतविरोधेनैकार्थ्येन सामानाधिकरण्येन निर्गु
णे पर्यवसानं । अस्थूलादिवाक्यानां तु साक्षादुपाधिनिषेधेन । तथा चात्रैवोपक्रमे । त्वमशेषमिदमपि येत्यादिना विशिष्टमात्रं वस्तु नेति । अतस्तन्नय
त्वविधिफलं सत्यं तन्निरसेनेन भवन्निधनादिति सुपसंहरिष्यति । उपासनादिवाक्यानां क्रियार्थप्रवृत्तत्वात् तद्बलेनैव ज्ञानसाधनविधानेन तत्परत्वमि

य
२
श्रीधरी

राम
१०४

अत्र चानादिशिष्टपरंपरागतत्वान्न संदेहोऽप्यत्र इत्याह ॥ सैषेति ॥ सैषा यथोक्ता कालेन ब्राह्मी ब्रह्मपरा श्रद्धया आदरेणैव तं डिकं तर्न्न्योद्यनभिनिवेशेन यः श्र
वणादिना धारयेत् स सम्यक् किंचनः निरस्तदेहाद्युपाधिः सन् परं पदं प्राप्नुयादिति ॥ ३ ॥ एतदेव सर्वं श्रुत्यर्थनिरूपणेन प्रपंचयितुमितिहासमवतारयति ॥ अत्र ते इति
नारायणान्वितां नारायणः प्रवक्तृत्वेनान्वितो यस्यां तां गाथामितिहासं ॥ ४ ॥ ब्रह्मसत्रमिति यथा यजमाना एव समाना ऋत्विगादिरूपेण यत्र कर्म कुर्वंति तत्कर्म सत्रं
प्रसिद्धं ॥ तथा यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्म मीमांसंते तत्र ब्रह्मसत्रं ॥ ९ ॥ अहो तर्हि मया कथं तत्र न ज्ञातमित्यत आह ॥ श्वेतद्वीपमिति ॥ तदीश्वरं तत्रस्थं मामेवा

सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता ॥ श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः ॥ ३ ॥ अत्र ते वर्णयिष्यामि गाथां नारायणान्वितां ॥ नारदस्य च संवादमृषे
र्नारायणस्य च ॥ ४ ॥ एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः ॥ सनातनमृषिं द्रष्टुं ययौ नारायणाश्रमं ॥ ५ ॥ यो वै भारतवर्षेऽस्मिन्क्षेमाय स्वस्तये नृणां ॥
धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः ॥ ६ ॥ तत्रोपविष्टमृषिभिः कलापग्रामवासिभिः ॥ परीतं प्रणतोऽपृच्छदिदमेव कुरूद्वह ॥ ७ ॥ तस्मै ह्यवोचद्भ
गवानृषीणां शृण्वतामिदं ॥ यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनां ॥ ८ ॥ श्रीभगवानुवाच ॥ स्वायंभुव ब्रह्मसत्रं जनलोकेऽभवत्पुरा ॥ तत्रस्थानां मा
नसानां मुनीनामूर्ध्वरेतसां ॥ ९ ॥ श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरं ॥ ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते ॥ तत्र हायमभूत्प्रश्नस्त्वं मां यमनुपृच्छसि ॥ १० ॥
तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः ॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽपरे ॥ ११ ॥ सनंदन उवाच ॥ स्वसृष्टमिदमापीय शयानं सह शक्तिभिः ॥ तदंते
बोधयांचक्रुस्तल्लिंगैः श्रुतयः परं ॥ ११ ॥ यथा शयानं संराजं वंदिनस्तत्पराक्रमैः ॥ प्रत्यूषेऽभेत्य सुश्लोकैर्बोधयंत्यनुजीविनः ॥ १२ ॥

निरुद्धमूर्त्ति ॥ १० ॥ ननु सर्वे तावत्तेन कस्तत्र वक्ता प्रष्टा वा तत्राह ॥ तुल्यश्रुतेति ॥ श्रुतादिभिर्विशेषाः श्रुतिभिर्मित्रोदासीनहीनत्वेन निरूपमकरणाः अतः सर्वे प्रवचनयोग्या अपि केना
पि कौतुकेनैकं प्रवक्तारं कृत्वान्ये पप्रच्छुरित्यर्थः ॥ स्वसृष्टमिति ॥ स्वयं निर्मितमिदं विश्वं प्रलयसमये आपीय संहृत्य शयानं योगेन निद्राणमिव वर्त्तमानं तदंते प्रलयांते तल्लिं
गैस्तत्प्रतिपादकैर्वाक्यैः परं ईश्वरं सृष्टिसमये प्रथमनिःश्वासभूताः श्रुतयः प्रबोधयामासुः ॥ ११ ॥ सुश्लोकैः शोभनाः श्लोकाः कीर्त्तयो येषु तैः पराक्रमैः ॥ १२ ॥

२०३
१०५

जयजयेति। भो अजित जय उत्कर्षमाविःकुरु। आदरे वीप्सा केन व्यापारेण। अगजगदोकसां अगानि स्थावराणि जगंति जंगमानि च ओकांसि शरीराणि येषां
जीवानां तेषामजामविद्यां जहि नाशय। किमिति गुणावृतीहंतव्येत्यत आह। दोषगृभीतगुणां दोषाय आनंदाद्यावरणाय गृहीता गुणा यया तां। हृग्रहोर्भः
छंदसीति भकारः। इयं हि स्वैरिणीव परप्रतारणाय गुणान्गृह्णातीत्यतो हंतव्येति। तर्हि मय्यपि दोषमावहेदिति मम चापि तत्र का शक्तिः स्यात्। अत आह
त्वमिति। यत यस्मात्त्वं आत्मना स्वरूपेणैव समवरुद्धसमस्तभगः। संप्राप्तसमस्तैश्वर्योसि वशीकृतमायत्वादिति भावः। ननु स्वयमेव ते ज्ञानवैराग्यादि
नांकिं न हस्तु रित्यत आह। अखिलशक्त्यवबोधकेति। तेषां त्वमेवांतर्यामी सर्वशक्त्युद्बोधकः। अतो न ते ज्ञानादौ स्वातंत्र्य इति भावः। अहमकुंठज्ञानैश्वर्यो

मूलम्। जय जय जह्यजामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः
अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः ॥ १ ॥ १४

दिगुणो जीवानां कर्म्मज्ञानादिशक्त्यवबोधं नेनाविद्यां हंतेत्यत्र किं प्रमाणमिति चेत्। अहमेव प्रमाणमित्याह निगमः वेदः। ननु एवंभूते मयि कथं श्रुतीनां
प्रवृत्तिः तत्राह। क्वचिदिति। कदाचित्सृष्ट्यादिसमये अजया मायया चरतः क्रीडतः नित्यं चालुप्तभगतया सत्यज्ञानानंतानंदैकरसेनात्मना च चरतो वर्त्त
मानस्य निगमोऽनुचरेत् प्रतिपादयेत्। कर्म्मणि षष्ठी। यतो वा इमानि भूतानि जायंते। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबु राम
द्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये। यश्चात्मनि तिष्ठन्। सत्यं ज्ञानमनंतं ब्रह्म। यः सर्वज्ञः सर्ववित् इत्याद्या आगमकदंबरूपा एवंभूतं प्रतिपादयंतीत्यर्थः। १४ जयज १०५
याजित जह्यगजंगमावृतिमजामुपनीतमृषागुणां। नहि भवंतमृते प्रभवंत्यमी निगमगीतगुणार्णवतानव ॥ १ ॥

न

ननु कथं मामेव प्रतिपादयंति । यत इन्द्रो यातोऽवसितस्य राजेतीत्यादिभिरिन्द्रः यातो जंगमस्य अवसितस्य स्थावरस्य च राजेति प्रतिपाद्यते । तथा अग्नि
र्हीदिव इत्यादिभिरन्यैर्देवैः भूतत्वेनाप्यादयः प्रतिपाद्यंते तत्राह । यदिदमुपलब्धमेतदिति । अयमर्थः एतदुपलब्धं दृष्टमिन्द्रादि सर्वं ब्रह्म तत्र ब्रह्मत्वमिति
वा वदंति जानंति । कथं तत्र एवावशेषतया अवशिष्यमाणत्वेन कुतः यतो ब्रह्मतः सर्वस्योदयास्तमयौ उत्पत्तिलयौ सर्वोपादानत्वात्
तर्हि किं विकारित्वं ब्रह्मतः अविकृतात् विवर्त्ताधिष्ठानत्वेनाविकाराद् इत्यर्थः वा शब्द उपमार्थः । यथा घटादेर्विकृतेर्मृद इव उदयास्तमयौ तद्वत् । वाचा
रंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं । सर्वं खल्विदं ब्रह्मेत्यादिभिस्तथा प्रतिपादनादित्यर्थः । अतः कारणात् ऋषयो मंत्रास्त्वयि ब्रह्मरूपे वा त्वय्येव मनो

यदिदमुपलब्धमेतदेवं तदवशेषतया यत उदयास्तमयौ विकृतेर्मृदिवाविकृतात् । अत ऋषयो दधुस्त्वयि मनोवचनाचरितं कथमयथा भवति भुवि दत्तपदानि नृणाम् ॥ १५ ॥

वचनाचरितं दधुः मनस्याचरितं तात्पर्यं वचनाचरितमभिधानं च धृतवंतः । न पृथग्विकारेष्वित्यर्थः । अत्र निदर्शनं । कथमयथेति । नृणां भुव
ि यत्र क्वापि दत्तानि निक्षिप्तानि पदानि भुवि कथमयथा भवंति अदत्तानि भवंति । अतो यथा मृत्पाषाणेष्टकादिषु दत्तानि पदानि भुवं न व्यभि
चरंति । तथा यत्किमपि विकारजातं तदंतो वेदास्त्वामेव सर्वकारणं परमार्थं प्रतिपादयंतीत्यर्थः ॥ १५ ॥ द्रुहिणवह्निरवींद्रमुखामरा जगदिदं न
भवेत्पृथगुत्थितं । बहुमुखैरपि मंत्रगणैरजस्त्वमुरुमूर्तिरतो विनिगद्यसे ॥ २ ॥ १५ गोपालरामामहा

२७
१०६

त्वमेव सर्वनिगमगोचर इति सतां प्रवृत्त्याद्दर्शयति ॥ इति तवेति ॥ त्वमेव सर्वकारणत्वेन परमार्थ इति ज्ञात्वा भो अधिपते त्रिगुणमायया मृगीनर्त्तक
सूरयो विवेकिन स्तवाखिललोकमलक्षपणकथामृताब्धिं सकलजनवृजिननिरसनहेतुं कीर्त्तिसुधाब्धिं अवगाह्य निषेव्य तपतीति तपांसि
पापानि जहुः त्यक्तवन्तः त्वदीयकथामात्रेण यदा पापत्यागः ॥ तदा किमुत वक्तव्यं ये पुनः स्वधामविधूताशयकालगुणाः ॥ स्वधा
म्ना स्वरूपस्फुरणेन विधूताः त्यक्ता आशयगुणा अन्तःकरणधर्म्मा रागादयः कालगुणा जरादयश्च यैस्ते तथा हे परम तवाजस्रसुखानुभवं

इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः ॥ किमुत पुनः स्व
धामविधूताशयकालगुणाः परम भजन्ति ये पदमजस्रसुखानुभवम् ॥ ३ ॥ ॥ १६ ॥

अखंडानंदानुभवं पदं स्वरूपं भजंति सेवंते ते तथाभूताः दुःखानि त्यजंतीति ॥ तद्यथा पुष्करपलाशमापो न श्लिष्यंते एवमेवंविदि पापं कर्म्म न
श्लिष्यते न कर्म्मणा लिप्यते पापकेनेत्यादि एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमित्यादिश्रुतेः राम
रित्यर्थः ॥ १६ ॥ सकलवेदगणेरितसद्गुणस्त्वमिति सर्वमनीषिजना रताः ॥ त्वयि सुभद्रगुणश्रवणादिभिस्तव पदस्मरणेन गतक्लमाः ॥ ३ ॥ १६ ॥ १०६

य

न

असुर्या नाम ते लोका अंधेन तमसावृताः ॥ तांस्ते प्रेत्यापि गच्छंति ये के चात्महनो जनाः ॥ न चेदवेदी महती विनष्टिरित्याद्याः श्रुतयः ॥ पूर्वश्लोकोक्ते
भयविधभजनहीनाविद्वेदेति ॥ दृतय इवेति ॥ असुभृतो नराः यदि ते अनुविधा अनुविदधतीत्यनुविधाः अनुवर्त्तिनो भक्ताः इति यावत् तर्हि स्वं सति जीवं
ति सफलजीवनो भवति ॥ इत्यत्राह तदेवमस्त्रादेवदृत्याश्वासमात्रमित्यर्थः ॥ न त्वभक्तानामपि कामादिफलमस्त्येव ॥ नैकांतिककारणात्तु ग्राहकत्वेन जीवन
हेतोस्त्वाभक्तनैकृतघ्नानां तदपि न सिद्ध्येदित्याशयेनाह ॥ महदहमादय इति ॥ महानहंकारश्च आदिर्येषां ते यदनुग्रहतः यस्यानुप्रवेशेन लब्धसामर्थ्य
सतः अंडं देहसमष्टिं सृष्टिरूपं सृष्टवंतः ॥ नत्वेवं पंचापि कोशानन्नमयादीनाविश्य तत्तदाकारः सन् यः चेतयते स त्वं न राहं ॥ पुरुषविध इति ॥ पुरुषस्यात्र
मयादेर्विधेव विधा आकारो यस्य स तया ॥ ननु निरेकरसस्य कथं तत्तदाकारता अत आह ॥ अन्वयो त्रेति ॥ अत्र एषु अन्नमयादिष्वेवेतित्यन्वयः अनत्त

दृतय इव श्वसंत्यसुभृतो यदि ते नुविधा महदहमादयोंडमसृजन्यदनुग्रहतः ॥ पुरुषविधोन्वयोत्र चरमोन्नमया
दिषु यः सदसतः परं त्वमथयदेष्ववशेषमृतम् ॥ १७ ॥ गोवर्द्धनधारी ॥

तदाकारतेति ॥ एवं तर्हि सत्यत्वमसंगत्वं च कथं तत्राह ॥ चरमोन्नमयादिषु य इति अन्नमयादिष्वनुप्रविश्यमानेषु यश्चरमो ब्रह्मपुच्छं प्रतिष्ठेति पुच्छत्वेनोक्तः
सत्यमिति संबंधः न तु तथाः पञ्च मयादिष्वाविनत्वेः संगत्वं व्याहतिरेव तत्राह ॥ सदसतः परं त्वमथयदेष्ववशेषमृतमिति ॥ सदसतः स्थूलसूक्ष्मात्कार्यमया
देः परं व्यतिरिक्तं तस्मात्सिद्धे तत्र ॥ अवशेषं अवशिष्यत इत्यवशेषं अबाध्यं अत एव अमृतं सत्यं ॥ तर्हि किमर्थं ते बुद्ध्यपश्रुतः ॥ गावोवंडवच्छेदत्वेनोपलक्षणार्थं तथाहि
सर्वाण्येव पुरुषांतः सर्वमयस्तस्य रसमेव दितिरिस्यादिना स्थूलसूक्ष्मक्रमेण पंचकोशानुपदिश्य तस्य पुरुषविधतामनूपरुषविध इति पुनः पुनरुक्त्वा इत्येवं तत्त्वे
नालस्या ब्रह्मपुच्छं प्रतिष्ठेति सर्वमास्किं प्रस्तुतं स्वरूपनिरूपणं ॥ मित्यनवद्यं ॥ १७ ॥ नरवपुः प्रतिपद्य यदि त्वयि श्रवणवर्णनसंस्मरणादिभिः ॥ नरहरे न भजंति नृणामिदं

तं

२

एवं तावत्सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन भजनीयत्वमुक्त्वा अस्मिन्नन्तर्निरूप्य च ततेदानीमनन्तगात्यमहिमनिरूपयन्तं तावदुपा
ध्यालंबनेनमुपासनमुदरं ब्रह्मेति शार्कराक्ष्या उपासते हृदयं ब्रह्मेत्यारुणयो ब्रह्म हैव ता इत ऊर्ध्वं त्ववीरसर्पत्तन्निष्ठिरोऽश्रयते त्वाद्याः श्रुतयो विद
धतीत्याह ॥ उदरमुपासत इति ॥ ऋषिवर्त्मसु ऋषीणां संप्रदायमार्गेषु ये कूर्पदृशः स्थूलदृशस्ते उदरालंबनं मणिपूरकस्थं ब्रह्मोपासते ध्यायन्ति शार्कराक्ष्या
इति श्रुतिपदस्य प्रतिपदं कूर्पदृश इति ॥ कूर्पशर्करा तज्ज्ञो विद्यते दृक्शुद्धिर्येषां ते तथा रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत् ॥ उदरस्य हृद
यापेक्षया स्थूलत्वात् ॥ यद्वा कूर्पं स्तनं दृशोऽस्य इत्यर्थः ॥ तदा हृदयस्थं सूक्ष्ममेवालक्ष्यं तत्त्वं वेशायग्रयमसुदरस्थं मुपासत इति भावः ॥ आरुणा

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरं ॥ तत उदगादनन्त तव धाम शिरः परमं पुनरिह यत्समेत्य न पतन्ति कृतान्तमुखे ॥ १८ ॥ रामकृष्णाय नमः

यस्त्वा साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते ॥ हृदयविशेषणं परिसरपद्धतिमिति परितः सरन्ति प्रसर्पन्तीति परिसरा नाड्यः तासां पद्धतिं मार्गं
प्रसरणस्थानमित्यर्थः ॥ विशेषणस्य फलमाह ॥ तत इति ॥ ततः हृदयात् भो अनन्त तव धाम उपलब्धिस्थानं सुषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शि
रः मूर्द्धानं प्रति उदगात् ॥ उदसर्पत् मूलाधाराद्ब्रह्मरन्ध्रपर्यन्तं हृदयमध्यात् [illegible] ब्रह्मरन्ध्रं प्रत्युद्गतमित्यर्थः ॥ कथंभूतं धाम यत्समेत्य प्राप्य पुनरिह
कृतान्तमुखे संसारे न पतन्ति ॥ तथा च श्रुतिः शतं चैका च हृदयस्य नाड्यः तासां मूर्द्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति ॥ उदरादिषु यः पुमांश्चिन्तितो मुनिवर्त्मभिः ॥ हन्ति मृत्युभयं देवो हृद्गतं तमुपास्महे ॥ १८ ॥

नत्वीश्वरस्यापि तर्हि जीववत्सुखदुःखादिसंबंधे तत्रानुप्रविष्टस्य च तारतम्ये सति वो न विशेषेणोपास्यत्वमिति नामाशंकां परिहरन्नाह एको देवः सर्व-
भूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेत्याद्याः श्रुतयः स्तावतीत्याह ॥ स्वकृत विचि-
त्रयोनिष्विति ॥ स्वयंकृता स्वउत्पन्ना च समस्ता मायोनिषु अपि व्यक्तिस्थानेषु कार्येषु देहादिषु हेतुतया उपादानतया प्राणेन विद्यमानत्वेन अनुप्र-
वेशात्सम्भवाद्विशन्ति वर्तमानस्तारतम्यतो न्यूनाधिकभावेन च कान्तिमुपभासमे ॥ स्वकृता योनीः करोतीति स्वकृतास्तानुकृतिः अनलवत् अग्नि-

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमश्चकास्त्यनलवत्स्वकृतानुकृतिः ॥ अथ वि-
तथास्वमूष्ववितथं तव धाम समं विरजधियोऽन्वयन्त्यभिविपन्यव एकरसम् ॥ १९ ॥

र्यथा स्वकृततारतम्यहीनोऽपि काष्ठानुसारेण तथा तथा प्रकाशते तद्वत् ॥ अथ अतो वितथासु मिथ्याभूतास्वमूषु योनिष्ववितथं सत्यं यतः स-
ममविशेषमनन्तः सत्यं तव धाम स्वरूपं विरजधियो निर्मलमतयः ॥ अन्वयन्ति जानन्ति ॥ तु इति शब्दः पृथक्परः वा ॥ अत्र हेतुः अभिविपन्यव इति ॥
अभितो विगतव्यवहाराः पनव्यवहारस्तत्स्वरूपं पन्यव इति ॥ ऐहिकामुष्मिकफलेच्छारहिता इत्यर्थः ॥ अविशेषत्वादेवैकरसं समम् तन्मात्रं अत-
स्त्वोपाधिकृततारतम्याभावादप्रच्युतेस्त्वय्यस्योपास्यत्वमिति भावः ॥ १९ ॥ स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितं ॥ सर्वानुस्यूतसन्मात्रं भग-
वन्तं भजामहे ॥ ६ ॥

२०३
१०८

अपिचकुतोऽविषयमाशंकास्यात् भगवतोदेहाद्युपाधिकृतदोषप्रसंगइति ॥ यतोऽविद्याकामकर्म्मभिःसंसरतोजीवस्यापिभगवद्भावेनकृपयाबोधयंत्यस्तद्दोषंनिषेधयंतिसयश्चायंपुरुषेयश्चासावादित्येसएकः तत्त्वमसीत्याद्याःश्रुतयः ननुज्ञात्वर्यस्यात्मनःस्वातिरियमीश्वरत्वेनक्रियतेनततत्तस्येश्वरत्वंबोध्यतेनेतद्युज्यते ॥ यतस्तत्रयस्यदेवेपराभक्तिर्यथादेवेतथागुरौतस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइत्याद्याःश्रुतयः कलावतारस्यभगवतश्चरणभजनमुपायंवदंतीत्याह ॥ स्वकृतपुरेष्विति ॥ स्वकर्म्मोपार्जितेषुपुरेषुदेहेषुनरादिषुभोक्तृत्वेनवर्त्तमानंपुरुषंजीवंअखिलशक्तिधृतःसर्वशक्त्याश्रयस्यपूर्णस्यतवांशकृतंवदंतिश्रुतयःअंशइवांशःकृतइवकृतःत्वद्रूपंवदंतीत्यर्थः ननुकार्यकारण

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणंतवपुरुषंवदंत्यखिलशक्तिधृतोंऽशकृतम् ॥ इतिनृगतिंविविच्य
कवयोनिगमावपनंभवतउपासतेंऽघ्रिमभवंभुविविश्वसिताः ॥ २० ॥ ८ ॥

संबंधस्यकृतएवंभूतत्वंतत्राह ॥ अबहिरंतरसंवरणमिति ॥ बहिःकार्यमंतरंकारणंचतानितत्रावरणमस्पंतयोरसत्वादित्यर्थः ॥ इतिएवंनृगतिंजीवस्यगतिंतत्त्वंविविच्यविशोध्यकवयः अन्यथेदंनप्राप्यतइतिज्ञानंततः निगमावपनंनिगमोक्तकर्मणामावपनंआसमंतादुप्यते।क्षिप्यतेऽस्मिन्नित्यावपनंक्षेत्रंसर्वकर्म्मार्पणविषयमित्यर्थः ॥ यद्वार्पितानिकर्म्माणिमुक्तिंफलंतीतितंभवतोंऽघ्रिमभवंभवनिवर्त्तकंविश्वसिताःकृतविश्वासाःउपासतेऽन्येनवरनारीभिःसेवंतेभुवीतिमर्त्यलोकइदमेवोचितमितिदर्शयति २० ॥ त्वदंशस्यममेशानत्वन्मायाकृतबंधनं ॥ त्वदंघ्रिसेवामादिश्यपरानंद
निवर्त्तय २० ॥

राम
१०८

भक्तिरल्पसाधनमितिवचनमनुचितमिव मत्वा नो भक्तिं तं त्वं करोतीति दुरवगमेति ॥ भो ईश्वर दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञापनाय तवात्तत-
नोराविः कृततनोश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः चरितमेव महानमृताब्धिस्तस्मिन् परिवर्त्तो विगाहस्तेन परिश्रमणाः परिवर्ज्जिताः
श्रमणां श्रमः ॥ गतश्रमाः इत्यर्थः ॥ अपवर्गमपि केचिन्न परिलषंति नेच्छंति कुतोन्यदिंद्रपदादि केचिदिति एवंभूता भक्तिरसिका विरला इति दर्शि-

दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः ॥ न प-
रिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः ॥ २१ ॥ ८ ॥

यति ॥ न केवलमन्यन्नेच्छंति किं तु तेनैव सुखेन पूर्णाः संतः स्वर्गेपि स्निग्धं गृहादिरिक्तत्वमप्युपेक्षंत इत्याह ॥ तव चरणसरोजहंसकुलसंगविसृष्टगृ-
हा इति ॥ तव चरणसरोजे हंसाः सारवरमसाणा ये भक्तास्तेषां कुलं तेन संगस्तेन विसृष्टा गृहा यैस्ते तथा अनेन श्रवणकीर्त्तनेन दर्शितं ॥ श्रुतिश्च
मुक्तेरप्याधिक्यं भक्तेर्दर्शयति ॥ तथाह ॥ यं सर्वे देवा नमंति मुमुक्षवो ब्रह्मवादिनश्चेति ॥ व्याख्यातं च सर्वैस्तैर्मोक्षकाङ्क्षिभिः ॥ मुक्ता अपि लीलाविग्रहं
कृत्वा भजंत इति ॥ ८ ॥ त्वत्कथामृतपाथोधौ विहरंतो महामुदः कुर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमं ॥ २१ ॥

२०३
१०९
त

आत्मानमस्यपश्यंति न तं पश्यति कश्चन ॥ नत्वविद्यायस्मान्ज्ञानान्यद्युष्माकमंतरं बभूव ॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरं
तीत्याद्याः श्रुतयः श्रुत्यंतरोशंत्योजगदात्मनोस्त्वैर्रतिमुपदिशंतीत्याह ॥ त्वद्रूपयथमिति ॥ त्वद्रूपवर्त्मनित्वस्मेवोपाधिकमिदं जलायंकोलाय
तइतिजलायशरीरं आत्मस्थं तद्धृत्प्रियवत्तत्आत्माच तद्धृत्प्रियश्चतद्वत्तचरति स्वाधीनतयावर्त्तते इत्यर्थः ॥ तयोः पितृपुत्रयोरेव हितेप्रिये आत्म

त्वद्रूपं यं जलायमिदमात्मन्हृत्प्रियवच्चरति तन्वयोरन्तु खेत्वयि हितेप्रिय आत्मनिच

अ नबत्तरमन्यहो मदुपासनयात्मन्हनोयदनुशयाधमंतुस्ममयेकुशरीरस्मृतः ॥ १२ ॥

न्निचश्रुप्यर्थेचकारः एवंभूतेत्मस्मेव्येः पित्वपिबतत्मह्योकहंश्चरमंति नमत्व्यादिनामजंति अमदुपासनयादेहाद्युपलालनेनआत्मघ्नः
प्रमादिनः जातः यदनुशयोः यस्मान्मदुपासनायामनुशयोवासनायेषांतेकुशरीरस्मृतः संतः उभये संसारे भ्रमंति परिवर्त्तंते अत आत्म
हन इति भावः ॥ त्वय्यात्मनिजगत्रात्र्यमन्मनोरमतामिह ॥ कदाममेदृशंजन्ममानुषं संभविष्यति ॥ १२ ॥

एम
१०९

इदानीमात्मावाअरेद्रष्टव्यः श्रोतव्योमंतव्योनिदिध्यासितव्यइत्याद्याः श्रुतयोध्यानंमंगत्वेनोपदिशंतीत्याहुः ॥ निभृतमरुन्मनोक्षदृढयोगयु
जइति ॥ मरुत्प्राणः मनश्च अक्षाणींद्रियाणिचनिभृतानिसंयमितानियैस्तैश्चतेदृढंयोगंयुंजंतीतिदृढयोगयुजस्तेतथाभूतामुनयोहृदियन्न
त्वमुपासतेतत्देवारयोऽपितवस्मरणात्ययुःप्रापुः स्त्रियोऽपिकामतः उरगेंद्रभोगभुजदंडविषक्तधियः ॥ अहींद्रदेहसदृशयोर्भुजदंडयोर्वि

निभृतमरुन्मनोक्षदृढयोगयुजोहृदियन्मुनयउपासतेतदरयोपिययुःस्मरणात् ॥ स्त्रिय
उरगेन्द्रभोगभुजदण्डविषक्तधियोवयमपितेसमाःसमदृशोऽङ्घ्रिसरोजसुधाः ॥ २२ ॥ १० ॥

षक्ताधीर्यासांताः परिच्छिन्नदृष्टयः ॥ समदृशः सममपरिच्छिन्नंत्वांपश्यंत्योवयंश्रुत्यभिमानिन्योदेवताअपितेसमाएवकृपाविषयत
याअंघ्रिसरोजसुधाः अंघ्रिसरोजेसुधांधारयंत्यः ॥ अयंभावः इत्थंभूतस्तवस्मरणानुभावः येयोगिनस्त्वांहृद्यावलंबनेनउपासतेयाश्च
वयंत्वांसमंपश्यामः याश्चस्त्रियः कामतः परिच्छिन्नंध्यायंतियेचद्वेषेणसर्वानपितांस्त्वामेवप्रापयंतीति ॥ २२ ॥ चरणस्मरणंप्रेम्णातवदे
वस्यदुर्लभं ॥ यथाकथंचिन्नृहरेममभूयादहर्निशं ॥ १० ॥

२०३ ११०

यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह । को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथ को वेद यत आब
भूव अनेजदेकं मनसो जवीयो नैनं देवा आप्नुवन् पूर्वमर्षत् । तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधातीत्याद्याः श्रुतयः भगवन्तं दु
र्ज्ञेयं वदन्त्यो भक्तिमेवोपदिशन्तीत्याह । क इह न्विति । बत अहो भगवन् इह जगति अग्रसरं पूर्वसिद्धं त्वां अवरजन्मलयः अर्वाचीनोत्पत्तिना
शवान् को उ पुमान् वेद जानाति ईश्वरस्य पूर्वसिद्धावन्यस्य चार्वाचीनत्वे प्रमाणं वदन् ज्ञानकारणाभावमाह । यत उदगादिति । यतः त्वत्तः ऋषि
र्ब्रह्मा उत्पन्नः । यं ब्रह्माणमनु उभये आध्यात्मिका आधिदैविकाश्च देवगणा उत्पन्नाः ततोऽप्यर्वाचीनाः सर्वे यदा तु भवान् सर्वमवकृष्य उपसंहृत्य

क इह नु वेद बतावरजन्मलयोऽग्रसरं यत उदगादृषिर्यमनु देवगणा उभये ॥ तर्हि न सन्न चासद
उभयं न च कालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा ॥ २४ ॥ ॥

शयीत तर्हि तदा अपि शायिना जीवानां ज्ञानसाधनं नास्ति । यतस्तदा न सत् स्थूलं आकाशादि न चासत् सूक्ष्मं महदादि न च उभयं सदसज्जन्म
शरीरं न च कालजवः तन्निमित्तं कालवैषम्यं एवं सति तदा न किमपि इन्द्रियप्राणाद्यपि न च ज्ञापकं शास्त्रमपि । अयमभिप्रायः अर्वा
क्सृष्टितानां देहाद्युपाधिकृतानां कालवशेन च मलिनसत्त्वानां न तावत् भगवज्ज्ञानसामर्थ्यं । तथा च श्रुतिः नतं विदाथ य इमा जजा
नान्यद्युष्माकमन्तरं बभूवेत्याद्याः यदा तु प्रलयसमये न बुद्ध्यादिरूपसाधनाभावात् भगवज्ज्ञानं अतस्त्वदेकशरणतया श्रवणकीर्त ११०
नादिभक्तिरेव सहकारीति । ब्रह्मादिभिरुद्धः सच्च जन्म्य सहस्तव । दीनं वेधो रमासिन्धो भक्तिमेव हरे दिश ॥ २४

इतोपि न त्वान्नं हि शक्नु उपदिशतामपि श्रमबाहुल्यादित्याह ॥ जनिमृतत इति ॥ असतो जगतो जनिमुत्पत्तिं ये वैशेषिकादयो वदंति ॥ असत एव ब्रह्म
त्वस्योत्पत्तिं ये च पातंजलादयः ॥ सत एवैकविंशतिप्रकारस्य दुःखस्य नाशं मोक्षं वदंति ये नैयायिकाः ॥ उत अपि ये च सांख्यादय आत्मनि भिदां भेदं ॥
ये च मीमांसकाः विपणं कर्मफलं व्यवहारमृतं सत्यं स्मरंति वदंति ॥ ते सर्वे आत्रपि ते तारापिते भ्रमैरेवोपदिशंति न तत्त्वदृष्ट्या सेश्वरो मोक्षपरमयत्र आ
मीत ब्रह्मैव सन् ब्रह्माप्येति ॥ अनीशया शोचति मुह्यमानः ॥ अविद्यायामंतरे वर्तमानाः स्वयंधीराः पंडितं मन्यमाना यद्यन्यमाना अपि यंति मूढाः ॥
अंधेनैव नीयमाना यथांधाः ॥ एकमेवाद्वितीयं ब्रह्म एक एव हि भूतात्मा भूते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् इत्यादिश्रुतिविरो

जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विपणमृतं स्मरंत्युपदिशंति त आरुपितैः ॥ त्रि
गुणमयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे ॥ १५ ॥ १२ ॥

धात् ॥ किंच बहुतः पुरुषस्य त्रिगुणमयत्वेन सर्वमिदं संगच्छते न तु तत्त्वत इत्याह ॥ त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयीति ॥ त्रिगुणमयः पु
मानित्यनेन हेतुनाया भिदा उपलक्षणमेतद्द्विर्दा ॥ सा यस्मात् त्वयि विषये अबोधकृता त्वद्विषयाज्ञानविजृंभिता ॥ तर्हि किमज्ञानमस्ति वस्तुतः
पि नैवेत्याह ॥ ततः अबोधात्परत्र परे अमंगेः अवबोधरसे ज्ञानघने सः अबोधो न भवेत् न संभवतीत्यर्थः ॥ १५ ॥ मिथ्यातर्ककर्कशेरितमहावा
दांधकारांतरभ्राम्यन्मंदमतेरमंदमहिमन् त्वज्ज्ञानवर्त्मास्फुटं ॥ श्रीमन्माधव वामन त्रिनयन श्रीशंकर श्रीपते गोविंदेति मुदा वदन्मधुपते मुक्तः क
दा स्यामहं ॥ १२ ॥

२०३
।।।

ननु यद्यपत्रोत्पद्यते यदि च त्रिगुणामयः पुरुषेण भवति । तर्हीदं प्रपंचजातं पुरुषस्य पृथङ्नास्तीत्युक्तं स्यात् । कथं तर्हि तयोः सत्वेन प्रतीतिः तत्रा-
हँ सदिव मन इति । मनः मनोमात्रविलसितमिदं त्रिवृत् त्रिगुणात्मकं प्रपंचजातं मम सदेव सदिव भाति । कथमिति चेत्तत्राह । त्वयीति । त्वय्यधिष्ठाने
अधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः । न केवलमिदं कारास्पदं किंत्वामनुजात् मनुजः पुरुषः अपि विधावाकारः पुरुषं अपि व्याप्नोति । पुरुषस्या-
पि पृथक्सत्वप्रतीतिर्मायामात्रविलसितेत्यर्थः । तथा च श्रुतिः असतोधि मनोऽसृज्यत मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजत तद्वा इ-

सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः । न
हि विकृतिं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितम् ॥ २६ ॥ १३ ॥

दं मनस्येव परमं प्रतिष्ठितं यदिदं किंचेति । नन्वात्मविदामपि विश्वं सदेव स्फुरति अतः कथमसत्त्वं तत्राहँ सदभिमृशंतीति आत्मविदस्त्वशेष-
मिदं भोक्तृभोग्यात्मकं विश्वमात्मतयैव सदभिमृशंति सदितिजानंति । आत्मकार्यत्वात्तत्पृथगित्यर्थः । तथा हि यदुपादानकं यत्कार्यं भवति ।
तत्तेनैव रूपेण प्रतीयते उपादीयते चेति लोकाचारेण दर्शयति । न हि विकृतिमिति । कनकस्य विकृतिं कुंडलादि कनकार्थिनो न हि त्यजंति । अ-
त्रहेतुः तदात्मतया कनकरूपत्वेनेत्यर्थः । अतः स्वकृतमिदं विश्वमनुप्रविष्टं च पुरुषरूपमात्मतयैवावसितं निश्चितं । यस्मात्त्वतः सदा भाति जग-
देतदसत्त्वतः । सदाभासमसत्यस्मिन् भगवंतं भजामहे ॥ २६ ॥ ॥ १३ ॥

राम
।।।

ननु सत्यंज्ञानमनंतंब्रह्म नेहनानास्तिकिंचन मृत्योः समृत्युमाप्नोति यइहनानेवपश्यतीत्यादिश्रुतिभिरेवंभूतस्यभगवतः प्रतिपादनात्तत्ता
न्नमस्कारमेवेतिकृतंभक्त्या अत आह॥ तवपरियेचरंतीति॥ तवेतिकर्मणिषष्ठी त्वांपरियेपरिस्वरंतिछंदसि व्यवहिताश्चेतियच्छब्देनव्यवधानमदोषः
केनरूपेण अखिलसत्त्वनिकेततया अखिलानिसत्त्वानिनिकेतानियस्यतस्यभावस्तया॥ सर्वभूतावासतयेत्यर्थः अतएव अविगणय्यनिर
स्तत्वात्तएवनिर्ऋतेर्मृत्योःशिरः मूर्द्धानंपदापादेनआक्रमंति॥ मृत्योर्मूर्द्धिपदंदधतीतितेतंरतिमुच्यंतइत्यर्थः येपुनर्विमुखास्तेऽभक्तास्तान्गिरावा
चापशूनिवविबुधानपिपरिवयसेबध्नासि॥ कुतः त्वयिकृतसौहृदाः त्वयिकृतंसौहृदंप्रेमयैः॥ तेखलुनिश्चितंपुनंतिपवित्रयंति॥ आत्मानं

तवपरियेचरंत्यखिलसत्त्वनिकेततयातउतपदाक्रमंत्यविगणय्यशिरोनिर्ऋतेः॥ परिवयसेपशूनिव
गिराविबुधानपितांस्त्वयिकृतसौहृदाः खलुपुनंतिनयेविमुखाः॥ ॥२७॥ ॥१४॥ ॥

अन्यानपीतिशेषः नेतरे तथाचश्रुतिः तस्यवाकंतिर्नामानिदामानितदस्येदंवाचातंत्यानामभिर्दामभिः सर्वंसितमिति अयमभिप्रायः सत्यमे
वंभूतमात्मानंश्रुतयःप्रतिपादयंति॥ तच्चयद्यपिवस्तुतोऽपरोक्षत्वादपरोक्षमेवज्ञानमुत्पद्यते॥ तथापिविपरीतभावनाविपरीतभावनातिरस्कृतत्वा
न्मलिनचित्तेषुपरोक्षमिवभवतीति नापरोक्षंसंसारघ्नमनिवृत्तिमतमंथो भगवत्यास्थितैर्ययाहि सम्यगमलचित्तानांतत्सारेनलब्धापरोक्षज्ञाना
नामयत्नतएवकारकलितोमोक्षइति॥ तथाचश्रुतयः देहांतेदेवः परंब्रह्मतारकंव्याचष्टे॥ यमेवैषवृणुतेतेनलभ्यः यस्यदेवेपराभक्तिरित्याद्यः त
पंतुतापैः प्रपतंतुपर्वतादटंतुतीर्थानिपठंतुचागमान्॥ यजंतुयागैर्विवदंतुवादैर्हरिंविनानैवमृतिंतरंति॥ १५॥ ॥२८॥

२०३
११२

नन्वयं यद्यखिलसत्त्वनिकेतत्वेन भगवतः सेव्यत्वमुच्यते तर्हि तत्तत्कारणसंबंधात् कर्तृत्वभोक्तृत्वे प्रसज्येयातां न वक्तान्तस्तथात्वमिति चेत् तर्हि जी
वानामपि तत्तुल्यमिति केन विशेषेणऽसौ नः सेव्यः सेवकत्वमिती मामाशंक्यां परिहरन्त्यः अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ॥
स वेत्ति विश्वं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणमित्याद्याः श्रुतयः स्तुवंतीत्याहुः त्वमकरण इति करणसंबंधरहित एवाखिलकारकशक्ति
धरः अखिलानां प्राणिनां यानि कारकाणि इंद्रियाणि तेषां शक्तीर्धारयती प्रवर्त्तयतीति तथा अतः स्वराट् यतः स्वेनैव राजते दीप्यते न हि स्वतः
सिद्धज्ञानस्य शक्तेरिंद्रियापेक्षेत्यर्थः अतस्तव बलिमुद्वहंति पूजां कुर्वंति अजया अविद्यया सहितास्तया वृता इत्यर्थः अनिमिषा देवा इंद्रादयः

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहंति समदंत्यजयानिमिषाः वर्षभु
जोऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः २८ १५

तत्कृत्या विश्वसृजो ब्रह्मादयोऽपि यथा स्वीकाय एव किंकराः स्वामिनं सेवंते तथा विद्यायुक्ता देवादयस्त्वामिति लोकोक्तिः समदंति च मनुष्ये
रितरैर्हव्यकव्यादिलक्षणां बलिं भक्षयंति अत्र दृष्टांतः वर्षभुजोऽखिलक्षितिपतेरिवेति यथा वर्षभुजः खंडमंडलपतयोऽखिलक्षितिपतेर्महामंडले
श्वरस्य स्वप्रजाहृतं बलिं भुंजानो बलिमुद्वहंति तद्वदिति कथं बलिं वहंतीति तत्राह विदधतीति यत्र ये त्वधिकृता भवतश्चकिता इति त्वत्तो भीताः संतो यस्मि
न् कर्मणि ये नियुक्तास्ते तत्तत्कुर्वंतीति त्वदाज्ञापालनमेव बलिवहनमित्यर्थः तथा च श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्नि
श्चेंद्रश्च मृत्युर्धावति पंचम इति अनिंद्रियोऽपि योऽदेवः सर्वकारकशक्तिधृक् सर्वज्ञः सर्वकर्त्ता च सर्वसेव्यं नमामि तं २८ १५

राम
११२

सर्वेतोका:

तदेवं कारणप्रवर्त्तकमायास्वीकरणपारतंत्र्यान रागप्रजंतीत्युक्तं । न केवलमियदेव कारणात्तत उत्पन्नत्वेनापि तत्परतंत्रत्वादिति विवरिति ॥ यथाग्नेः क्षुद्रा विस्फु
लिंगा व्युच्चरंति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे देवाः ॥ सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंतीत्यादिश्रुतयइत्याह ॥ स्थिरचरजातयइति
हे विभो नित्यमुक्त यदि तव अजया मायया विहारः विहारः क्रीडा भवति ॥ तर्हि स्थिरचरजातयः स्थिराश्च चराश्च जातयः जात्या लिंगिनो देहो येषां
ते जीवाः स्युः भवेयुः कथंभूतस्य ततो जातः परस्य दूरे वर्त्तमानस्याप्यसंगस्येत्यर्थः ॥ कथं विहारः उदीक्षया ईक्षणलेशेन ॥ ननु मयि लीनानां कथं

जीवानां

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्त ततः ॥ नहि परम
स्य कश्चिदपरो न परश्च भवेद्वियत इवापदस्य तव शून्यतुलां दधतः ॥ ३१ ॥

जन्म स्यात्तत्राह ॥ उत्थनिमित्तयुज इति ॥ ईक्षयैव उत्थितानि आविर्भूतानि निमित्तानि कर्माणि तद्युक्तानि लिंगशरीराणि वा तैर्युज्यंत इति तेन त
था ॥ ननु किं निमित्तोत्थानेन भवदिच्छयैव भवंतु नेत्वयि वैषम्याभावात् विषमसृष्टेरयोगादित्याह नहि परमस्येति ॥ तव परमस्य उत्तमस्य
परमकारुणिकस्य वियतइव आकाशसदृशस्य असंगस्येत्यर्थः कश्चिदपरः स्वीयः परो वा पक्षश्च न भवेत् न संभवतीत्यर्थः ॥ अमहाद्वारमग्रस्थामी
न्नतो वैषम्यं नास्तीत्यादिक्रत्याश्रून्यपूर्वं च कृतत्वादिव प्रतीयते तत्रदृष्टं पुनर्हितानष्टि ॥ शून्यतुलां दधतः शून्यसाम्यं भ[illegible] अतः इव

त

इत्यपि तं पुनर्विज्ञितनष्टि ॥ अपदस्येति न पद्यतइत्यपदस्तस्य वाङ्मनसयोरगोचरस्येत्यर्थः ॥ त्वदीक्षणवशक्षोभमायाबोधितकर्मभिः जातान् संसर

स २०३
११२

एवंतावत्परमात्मनः सकाशादविद्याकृतकार्योपाधयस्तदंशा एव जीवा जाताः संसरंतीत्युक्तं। तत्र यद्येकाविद्या तदा जीवस्याप्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसंगः। अथ नानाविद्यास्तर्हि तस्यैवांशांतरेण संसारानपगमादनिर्मोक्ष इत्यादि तर्कबलेन नैव शक्यते एवं नानात्मानः। तत्र च तेषामाणुत्वे देहव्यापि चैतन्यं न स्यात् देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्यत्वं स्यात्। अतः सर्वगता नित्याश्चेति केचन मन्यंते। तत्र नानात्वे उक्तदोषप्रसंगः अविद्याभेदेन तदुपाधिभेदेन वा बद्धमुक्तव्यवस्थासंभवात्। ईश्वरस्य तु नैकेनाप्यंशेन संसारशंकेत्युक्तमेव। इति च सिद्धं चात्मैक्यं सर्वश्रुतिषु। किंचैवं पक्षे तेषां मिथ्याज्ञानमपि न सहत इत्याह। अपरिमिता इति। अपरिमिता बहवस्तत एवानंता ध्रुवास्ते नैव रूपेण नित्याः सर्वगताश्च तनुभृतो जीवा यदि

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा। अजनि च यन्मयं तदविमुच्य नियंतृ भवेत्सममनुजानतां यदमतं मतदुष्टतया॥ ३०॥ ५७॥

स्युः तर्हि तेषां समत्वात् शास्यता न स्यात् इति कृत्वा हे ध्रुव नियमो नियमनं त्वया न स्यात्। इतरथा उद्भवे तु कथं यन्मयं उपाधितो यद्विकारप्रायं जीवाख्यं अजनि जातं तत्तस्य स्वविकारस्य नियंतृ नियामकं भवेत्॥ अविमुच्य कारणतया अपरित्यज्य। किं तत्। सममनुस्यूतं। ननु किं यत्तद्दृष्टं ज्ञायते चेदुच्यतां इदं तदिति। अत आह। अनुजानतां यदमतमिति। जानतां मस्तीति वदतां यदमतमविज्ञातं तत्राप्यविषयत्वात्। तथा च श्रुतिः यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानतामित्यक्षरेणैव प्रावोच स हहत्रुली बभूवेत्यादि। किंच मतस्य ज्ञातस्य दुष्टतया दोषश्रवणात्। तथा च श्रुतिः यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेष्वित्यादि। तस्मादयं तत्त्वविद्यात्मतत्त्वं किमपि सर्वानुस्यूतत्वेन सर्वनियंतृ भवेदित्यर्थः॥ ३०॥ अनयैव नामसर्वलोकस्य गीतः श्री

राम

११२

न्यासतत्त्व एवमेवावसेयः॥ यः सर्वतः सर्वशक्तिर्नृसिंहः श्रीमंतं तं चेतसैवावलंबे॥ ७॥

नन्वपरिपरमात्मनो जीवा जायंत इति नियंतृनियम्यभाव उच्यते तथा सति जीवानामनित्यत्वप्रसंगे नप्रतिदिनं कृतनाशाकृताभ्यागमप्रसं
गः स्यात् किंच नष्टो मोक्षो नाम जीवस्य स्वस्वरूपहानिरेव स्यात् ॥ नचैतद्युक्तं ॥ स्वप्रकाशानंदात्मनो विद्याकृतानर्थनिवृत्तिमात्रस्य मोक्षत्वा
भ्युपगमादित्याशंक्योपाधिजन्मनैव जन्म जीवानामुच्यते न स्वतः घटनादित्याह ॥ नघटत इति ॥ तत्र किं प्रकृतेर्जीवस्वरूपेणोद्भवः स्यात् पुरुष
स्य वा उभयोर्वा आद्ये जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसंगः अत एव न तृतीय इत्याशयेनोक्तं प्रकृतिपुरुषयोरुद्भवो न घट
त इति श्रुत्याः जन्मप्रतिपादनादित्याह ॥ अजयोरिति ॥ तथा च श्रुतिः ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजां जनयंतीं सरूपां अजो ह्येको जु

नघटत उद्भवः प्रकृतिपुरुषयोरजयोरुभययुजा भवंत्यसुभृतो जलबुद्बुदवत् ॥ त्वयि त इमे ततो विविधना
मगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥ ॥ २१ ॥

षमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्य इति उभययुजा हि भवंति ॥ उभयं चेतनं जडं च तयोरिति युक्संबंधः परस्पराध्यासमिति यावत् तेन असुभृतः
प्राणोपाधयो जीवा जायंत इत्यर्थः ॥ जलबुद्बुदवदिति ॥ यथा केवलेनानिलेन वा जलेन वा जलबुद्बुदा न भवंति ॥ किंतु मिलिताभ्यां तद्वत् तत्रैव यथा
निलो निमित्तं जलमुपादानं एवमत्रापि प्रकृतिर्निमित्तं पुरुष उपादानं ॥ तस्माद्वा एतस्मादात्मन आकाशः संभूतः सोऽकामयत बहु स्यां प्रजायेयेति
यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरंतीत्यादि श्रु

२-३ तिष्ठचेतनाच्चेतनप्रपञ्चस्य परमात्मोपादानत्वश्रवणात् ॥ नच विकारित्वं परिणामानंगीकारात् केचित्तु नः परिणाममंगीकृत्यात्मनो विका
११४ रमिय्याविपरीतं निमित्तोपादानभावमिच्छंति सद्रूपया तावत्सृष्टिं तिष्ठत्स्वैकाद्वितीयमिति सिद्धं ॥ तदेकमेवाद्वितीयं ब्रह्म अजामेकां अविनाशी वा
अरेयमात्मेत्यादिश्रुतिबलात् उत्पत्तिश्रवणाच्च जीवानामौपाधिकमेव जन्मनत्वतः इत्युक्तं ॥ उपाधिलयेन परमात्मनि पुनर्लयश्रवणादपि
नवाहत्वं जन्मेत्याह ॥ व्यपितइति ॥ व्यपिकारणात्मनि तदेमे जीवाः तत इति ॥ यतो नवात्त्वं जन्मातस्माद्विविधनामगुणैरनेकप्रकारकार्योपाधि
भिः सह लिप्तः लीना बभूवुः तत्र दृष्टान्तं विपुलयोर्मधुन्यशेषरसाः इव लीयंते यथा मधुनि सकलकुसुमरसा विशेषतो नोपलक्ष्यमाणा
अपि सामान्येनोपलक्ष्यंते ॥ एवं स्वोपाधिविशेषमात्रलयात्कारणस्य विद्यमानत्वात्सामान्यतो वर्तंते ॥ पुनश्च तत्कारणस्यापि लयात्तत्त्वपि
परमेनिरुपाधौ सर्वतः वागीविलीयतइति विवेकः तथा च श्रुतयः ॥ यथा ॥ सोम्य मधु मधुकृतो निस्तिष्ठंति नानात्ययानां वृक्षाणां रसान्स
मवहारमेकतां रसंगमयंति ॥ ते यथा न विवेकं लभंते ~~अमुष्याहं वृक्षस्य रसोस्मि~~ अमुष्याहं वृक्षस्य रसोस्मि एवमेव खलु सोम्येमाः सर्वाः प्रजाः
सति संपद्य न विदुः सति संपद्यामहे इति यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुष
मुपैति दिव्यमित्याद्याः ॥ यस्मिन्नुपाधिलयमपियद्भ्रांतिविश्लेलयाद्दोजीवोपेतं गुरुकरुणायाकेवलात्मावबोधे ॥ अस्तंगतां तत्रजंतिसहमात्मिन्धुवं राम
स्मिंधुमध्ये मध्ये विनिर्जितं भुवनगृहं भावयेतत्रृसिंहं ॥ ॥१८॥ ११४

एवं तावत्परमेश्वरात् जीवा जायंते तद्वशेन च कर्माणि कुर्वंति उन्नतं च लीयंत इति संसारचक्रभ्रमणमुक्तं ॥ इदानीं तन्निवृत्त्यै ये परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ॥ उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेशेत्याद्या भगवदनुवृत्तिं विदधतीत्याह ॥ नृषु तवेति ॥ नृषु जीवेष्वमीषु तव मायया भ्रमम् उत्कर्षापकर्षलक्षणम् अवगत्य ज्ञात्वा सुधियः भृशं त्वयि अभवे भवनिवर्तके भावं स्वभावमनुवृत्तिं दधति कुर्वंति ॥ अनुप्रभवं अनुवृत्तप्रभवो

नृषु तव मायया भ्रमममीष्ववगत्य भृशं त्वयि सुधियोऽभवे दधति भावमनुप्रभवम् ॥ कथमनुवर्तितां भवभयं तव यद्भृकुटिः सृजति मुहुस्त्रिनेमिरभवच्छरणेषु भयम् ॥ ३१ ॥ १७ ॥

यस्मिन्नुत भ्रमं ॥ ततः किमत आह ॥ कथमिति ॥ अनुवर्तितां अनुवर्तमानानां त्वामेव शरणं भजतां भवभयं संसारभयं कथं भवेत् न कथंचिदपीत्यर्थः ॥ कुतः यद्यस्मात्तव भृकुटिः भ्रूभंगरूपा त्रिनेमिस्त्रिनेमयः इव वा वत्सराः शीतोष्णवर्षकालाद्यस्य संवत्सरात्मकस्य कालस्य सः अभवच्छरणेषु न भवांछरणमाश्रिता येषां तेष्वेव भयं जन्ममरणादिलक्षणं सृजति करोति ॥ अत एवंभूतं संसारमाकलय्य तन्निवृत्त्यै ये सुधियस्त्वयि भावं दधतीति ॥ ३१ ॥ संसारचक्रक्रकचैर्विदीर्णमुदीर्णनानाभवतापतप्तम् ॥ कथंचिदापन्नमिह प्रपन्नं त्वामुद्धर श्रीनृहरे नृलोकं ॥ ३१ ॥ १७ ॥

८७
११५
नियंतुं

स्वभगवति भावो मनोनियमे मतिर्भवति सोपि गुरूपसदनादिति गुरूपसदनं विदधति तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं । आचार्यवान् पुरुषो वेद नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्याद्याः श्रुतयः तदाह ॥ विजितहृषीकवायुभिरिति विजितानि हृषीकाणीन्द्रियाणि वायुश्च प्राणो यैः तैरपि अदांतमनस्तुरगं अदांतमदमितं मन एव तुरगः दुर्दमत्वसाम्यात् ॥ तं ये यत्नं यतंति प्रयतंते अतिलोलमतिचंचलं गुरोश्चरणं समवहाय अनाश्रित्य ते उपायेषु खिद्यंते क्लिश्यंतीत्युपायखिदः संतः व्यसन

विजितहृषीकवायुभिरदांतमनस्तुरगं य इह यतंति यंतुमतिलोलमुपायखिदः ॥ व्यसनशतान्विताः समवहाय
गुरोश्चरणं वणिज इवाज संत्यकृतकर्णधरा जलधौ ॥ ३३ ॥

शतान्विताः बहुव्यसनाकुलाः इह संसारसमुद्रे संतीति तिष्ठंति दुःखमेव प्राप्नुवंतीत्यर्थः हे अज ॥ अकृतकर्णधरा अस्वीकृतनाविका वणिजो यथा ॥ इवासन्
तद्वत् ॥ उक्तं चान्यैः देहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं ॥ मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा ॥ प्राकृतैः संस्कृतै
श्चैव गद्यपद्याक्षरैस्तथा । देशभाषादिभिः शिष्यं बोधयेत्स गुरुः स्मृतः ॥ गुरुणोपदर्शितभगवद्भजनसुखानुभूतो स्वत एव मनो निश्चलं भवति नान्यथेति ॥ राम
भावः ॥ यदा परानंद गुरो भवत्पदे पदं मनो मे भगवंल्लभेत ॥ तदा निरस्ताखिलसाधनश्रमः श्रयेय सौख्यं भवतः कृपातः ॥ ३३ ॥ य
११५

परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ॥ तथा यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो
भवत्यत्र ब्रह्म समश्नुते इत्याद्या वैराग्यप्रसंगं विदधतीत्याह ॥ स्वजनसुतेति ॥ आत्मा देहः धाम गृहं असुः प्राणाः स्वजनादिभिः किं सर्वरसे सर्व
र्वे रसाः सुखानि विद्यंते यस्मिन्नत्वयि परमानंदरूपे एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः ॥ त्वां श्रयतैः सेवमानस्य एभिः कः आ

स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे ॥ इति सद
जानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे ॥ ११ ॥

त्मनि सति नृणां तुच्छैरेतैः किं क उपयोगः इति सत् सत्यं परमार्थसुखमजानतां अत एव मिथुनतः स्त्रियामिथुनीभूय रतये मायासुखाय चरतां
प्रवर्त्तमानानां कर्मणि षष्ठ्यौ अजानतः चरतः पुरुषान् को नु अर्थः सुखयति आनंदयति न कोपीत्यर्थः ॥ इह संसारे कथं भूते स्वविहते स्व
तएव गतसारे पाठांतरे तु को न्विह त्वय्येव विशेषणद्वयं अतस्त्वद्भजनमेवोचितमित्यर्थः ॥ ११ ॥ भजतो हि भवान्साक्षात्परमानंदविद्घनः आ
त्मैव किमतः कृत्यं तुच्छदारसुतादिभिः ॥ १२ ॥

स्वत एव न अरे स्त्र
निरस्तभगे २

१०७
॥६
अघभिदंघ्रिजलाः

एवं गुरूपदेशेन तत्त्वमवगम्य सारासारविवेके न च सर्वतो निर्विद्यत एवं महत्संगेन उपपत्तिभिः सम्यगवधारयितुं तीर्थसदनानि तु न यः प
र्यटंतीति श्रोतव्यो मंतव्य इत्यादि श्रुत्यर्थमाह॥ भुवि पुरुपुण्यतीर्थसदनानीति ते उक्तलक्षणा ऋषयो विमदा निरहंकारा यतो भवत्पदांबुजहृदः
भवतः पदांबुजं हृदि येषां ते अतः स्वयमेवं अघभिदंघ्रिजलं येषां ते उत अपि तथाविधा अपि पुरूणि बहूनि पुण्यानि॥ येषु तानि तीर्थानि सदना
नि च देवतागृहाणि तान्येवोपासते सेवंते तेषां प्रसंगेनैव महत्संगो भवतीति॥ अथवा पुरु अधिकं भगवद्भजनलक्षणं पुण्यं येषां तानि तीर्थानि च गुरवः

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत भवत्पदांबुजहृदोऽघभिदंघ्रिजलाः॥ दधति सकृन्म
नस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान्॥ ३५

महांत इत्यर्थः तेषां सदनानि आश्रमान् यथाहामरसिंहः निपानागमयोस्तीर्थमृषिजुष्टे जले गुराविति पुनः पुरुषसारहरावसथानुपासते पु न
रुषाणां सारं विवेकधैर्यक्षमाशांत्यादि सर्वं हरंतीति तथा ते च ते आवसथा गृहाः तान्॥ न च तेषां गृहादि भवद्भक्तिनिरपेक्षेत्याह॥ दधति सकृ
न्मनस्त्वयि य आत्मनि नित्यसुखे दधति सकृदपि ये त्वयि मनो दधति ते पि गृहाद्यासक्ता न भवंति किं पुनरेवंभूता इत्यर्थः॥ मुंचत्यंगतदंगसंगमनिशं त्वा एम
मेव संचिंतयन् संतः संति यतो यतो गतमदास्तानाश्रमानावसन् नित्यं तन्मुखपंकजाद्विगलितत्वत्पुण्यगाथामृतस्रोतः संप्लवसंप्लुतो नरहरे न स्या ॥६
महं देहभृत॥ ३५॥

भिहे

नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तदुक्तानां क्रियार्थेन समन्वय इति तत्र तत्र जैमिनिना वेदस्य क्रियापरत्वाभिधानादुपनिषदामपि त
द्वैयर्थ्यं प्राप्तं यथोक्तं तेन वार्त्तिककृता एतेनैकात्म्यवस्तुप्रतिपादने नोपनिषदां नैराकाङ्क्ष्यं व्याख्यातमिति ॥ नाप्येकमेवाद्वितीयं ब्रह्म ॥ विज्ञानमान
न्दं ब्रह्म ॥ अयमात्मा ब्रह्मेत्येवं तद्विपरीतात्मप्रतिपादनात् ॥ न चाद्वितीयपरमानन्दरूपस्य कर्माङ्गत्वमुपपद्यते ॥ अत एव मतं चैतद्वार्त्तिककृतः कथं ॥ प्रत्यक्षेणैव
द्वितीये विज्ञाने स्वसाक्षात्कारत्वेन गम्यते ॥ पराङ्मुखात्मवित्तानां दृष्टत्वेत्यवधारितामिति तेनैवोक्तत्वात् ॥ एतदर्थमेव मननाय सूत्रनयः पर्यन्ते तेनोक्तं ॥
ननु तावदद्वैतस्य सत्यत्वमेव दृश्यं तत्तेदृगुणं न सम्भवतीति प्रश्नोत्तरात्मामननेन तत्त्वावधारणप्रकारमाह ॥ सत इदमुत्थितं सदिति इदं विश्वं धर्मि
सदिति साध्यो धर्मः सत उत्पन्नत्वात् ॥ यद्यत उत्पन्नं तत्तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कुण्डलादि तदात्मकं तद्वदिति ॥ तत्र यदि सद्भेदः सा

सत इदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्व च क्व च मृषा न तथोभययुक् ॥ व्यवहृतये विकल्प इषितोऽन्धप
रम्परया भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान् ॥ ३६ ॥

ध्यात्तेनोपादानत्वनिर्देशेनैव भेदप्रतीतेर्विरुद्धो हेतुरित्याह ॥ ननु तर्कहतमिति ॥ ननु नाभेदं साधयामः किन्तु तदुत्पन्नत्वेन कुण्डलादिवत् भेदं प्रतिषेधयामः
न तत्र भेद एव स्यादिति चेदित्याशंक्यानैकान्तिकत्वेन दूषयति व्यभिचरति क्व चेति पितृपुत्रादिषु पुत्रस्य घटध्वंसादिषु च तथादर्शनादिति भावः ननु तदुत्पन्न
त्वं नाम तदुपादानत्वं न तु तन्निमित्तत्वं अतो नानैकान्तिकत्वमित्याशंक्य दूषयति क्व च मृषेति ॥ रज्जोरुपादानस्यापि फणिनो न रज्जुत्वं किन्तु मिथ्यात्वं अन्यथा कुण्ड
लादिवद्बाधप्रसंगात् अतः पुनरप्यनैकान्तिकत्वमेवेति भावः ननु तत्र न केवलं रज्जुमात्रं फणिन उपादानं किन्त्वविद्यायुक्तं तथाभूतस्यावस्तुत्वाद्यन्नो
फणिनो मिथ्यात्वमित्याशंक्य तत्रैवाल्पमत्रापीति दूषयति ॥ न तथोभययुगिति अयमर्थः अत्राप्यविद्यायुक्तस्यैव सत उपादानत्वं एवम्भूतस्य च न वस्तुत्वं अतः

त्तदुपादानत्वमसिद्धमिति न वक्तव्यं सत्त्वं प्रपंचस्येति नन्तु मा भूदनेन हेतुना प्रपंचस्य सत्यत्वे हेत्वन्तरेणैतु साधयामः तथाहि सदिदम् अर्थक्रियाकारित्वात् नभ
स्त्वं न तदेवं यथा शुक्तिरजतमिति तत्राह व्यवहृतये विकल्प इष्यत इति व्यवहाराय अर्थक्रियायै विकल्पो भ्रमोऽपि तद्दृष्ट एव कूटकार्षापणादिना
पि कश्चिद्व्यवहारदर्शनात् ननु केवलमतोऽन्यत्रारोपो भ्रमः प्रसिद्धः अत्यंतासत्त्वे कथं प्रपंचो भ्रमः स्यात् सत्त्वे वा नाद्वैतसिद्धिः उक्तं च भेदैः अध्यस्त
तेत्वं पृष्यत्वमसत्त्वं कथमवक्तव्यं निष्ठुरत्तात्तगुणाः सत्त्वाकमध्यारोप्येत वानवेति नेत्याह अंधपरंपरयेति अंधपरंपरया यो विकल्प इत्यन्वयः अयं भावः
संस्कारसिद्धये पूर्वपूर्वप्रतीतिमात्रमपेक्ष्यते न वस्तुसत्त्वं प्रतीतौ सत्यावस्तुसत्यत्वाभावेन अन्वयव्यतिरेकादर्शनात् अतोऽनादित्वात् पूर्वपूर्व
भ्रमसंस्कारोत्तरोत्तरारोपो भविष्यतीत्यंधपरंपरान्यायेनानेनैव च व्यवहारः सेत्स्यतीत्यप्रयोजको हेतुरिति नन्वक्षय्यं ह वै चातुर्मास्ययाजि
नः सुकृतं भवति अपाम सोमममृता अभूमेत्यादिभिः कर्मफलस्य नित्यत्वप्रतिपादनात् सत्त्वं न स्थैर्यं तेन हि नित्यं वस्त्वसद्भवति तस्माद्वैद
प्रतिपादितत्वात् द्वैतं सदेवेत्याशंक्याह भ्रमयतीति हे भगवन् हे तव भारती वेदलक्षणा उरुवृत्तिभिः बह्वीभिर्गौणलक्षणादिभिः उत्थजडाकर्म
श्रद्धाभराक्रान्तमंदमतीन् भ्रमयति मोहयति अयं भावः न हि वेदः कर्मफलं नित्यमभिधत्ते किं तु लक्षणया प्राशस्त्यमात्रं विध्येकवाक्यत्वात्
अन्यथा वाक्यभेदप्रसंगात् तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति न्यायोपबृंहितश्रुत्यन्तरविरोधाच्च अतः
कर्मजडानामिदं भ्रममात्रमिति एतेनैतस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादीनामप्यन्यपरत्वं दर्शितं भवति उक्तं भवतः सतोऽपि
वंशस्त्रैव सर्पः स्रजः उत्पन्न कार्यमपाहकूरकनकं वेदोऽपि नेवपरः अद्वैतं तत्वमसत्यरंतपरमानंदपदं तन्मुदरावदैसंदर्भितिरोचत रे हरे मां कुंचमा
मानत ॥ २६ ॥

तदेवं प्रपंचस्य सत्त्वे साधकं नास्तीत्युक्तं इदानीमसत्त्वे सृष्टिप्रलयश्रुतयः यतो वा इमानि भूतानि जायंते इत्याद्याः तन्मूलत्वात् अनुमानं प्रमाणमित्याह ॥
नयदिदमिति ॥ यत यस्मात् इदं विश्वं अग्रे सृष्टेः पूर्वं न आसत् आसीत् ॥ सदेव सोम्येदमग्र आसीत् आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतेः ॥ न च विध
नात् प्रलयात् ऊर्ध्वं अनंतरं भविष्यत् भविष्यति ॥ नासदासीन्नो सदासीत्तदानीमित्यादिश्रुतेः अतः कारणात् अंतरा मध्येऽपि एकरसे केवले त्वयि
मृषा मिथ्या रूपमेव विभातीति निमित्तं निश्चितं यत एवं अतः श्रुत्या द्रविणजाति विकल्पपथैः द्रविणजातीनां द्रव्यमात्राणां मृल्लोहकार्ष्णायसरूपा
णां विकल्पा भेदाः घटकुंडलादयः तेषां पंथानो मार्गाः प्रकाराः तैः उपमीयते सदृशतया निरूप्यते ॥ यथा तत्र कार्यकारणयोर्नामधेयमात्रता ॥ कारणं स

नयदिदमग्र आस न भविष्यदतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे ॥ अत उपमीयते द्रविणजा
तिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः ॥ ३७ ॥ ॥ ॥ राम ॥ राम

सद्येव सत्यं तथात्राप्याकाशादीनां नाममात्रता ब्रह्मैव सत्यं तथा च श्रुतिः यथा सोम्यैकेन मृत्पिंडेन विज्ञातेन सर्वं मृन्मयं विज्ञातं भवति वाचारंभणं वि
कारो नामधेयं मृत्तिकेत्येव सत्यं यथा एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् ॥ तथा एकेन नखनिकृंतनेन सर्वं कार्ष्णायसमित्यादि ॥ स्मात् सत्य
त्वे प्रमाणस्याविद्यमानत्वात् वितथं मनोविलासं ऋतं सत्यमिति ये अवयंति जानंति ॥ ते अबुधाः अज्ञा इत्यर्थः ॥ अत्रैव प्रयोगः विवादाध्यासितं न सत् आ
द्यंतयोरविद्यमानत्वात् विकारित्वात् दृश्यत्वाच्च शुक्तिरजतादिवत् आलवच्चेति ॥ घटकरकुंडलकंकणकिंकिणीपरिणतं कनकं परमार्थतः महदहंकृति
खप्रमुखं तथा नरहरेर्न परं परमार्थतः ॥ ३७ ॥

प्रमाणाभावादसत्त्वे ३

नो

त

२.७
११८

नन्वेवं परिशिष्टं चेन्नाम मनागप्येवं न चाप्रततातेनैवैतन्न मम संबंधगंधोपि तर्हि किं मया पराद्धं जीवेन यतः अयं संसरति । किं वा बद्धस्य मोक्षरूपस्य पतोतित्यप्रक्तः
किंविषयं तर्हि कर्मकांडमित्यपेक्षायां जीवेश्वरविशेषं द्वाभ्यां परिणामसमुपज्ञासवायाममानेवृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभि
चाकशीति अजामेकां लोहितशुक्लकृष्णां स्याद्यावंतोत्याह ॥ समानेत्यादि । स जीवः यतः अस्मात् अजया मायया अज्ञो अविद्या अनुशयीत आलि
गेन ॥ ततश्च गुणांश्वरैर्हेंदियारीरमेवमानेनात्मतयाः ममेतेतरस्तेतरनेतर समन्नपतीतद्वर्मयोगं वृक्षमयस्अपेतभगः । पिहितानेरास्मिगाः सम
मृतं समारं भजति प्राप्नोति तद्विषयमेव च कर्मकांडमिति भावः ॥ त्वमुत्तं त्वं जहासिता मनो मायां नतु सा मन्येवा ह्लिकं यथा गतत्त्वाह ॥ अहि

समयरजयात्त्वजामनुशयीतगुणांश्च जुषन् भजति समनुपतांतरमस्मत्सुमपेतभगः ॥ त्वमुतमजहासितामहिविवत्त्व

दिवत्त्वचमिति अयं भावः यथा भुजंगः त्वगतमपि वंतुकंगुणाबध्यानाभिमन्यते माननमगोमहमिमहायमेष्यगाीतपरिमेयभगः ॥
तथात्वमजां ॥ नहि निरंतरा ज्ञानादिसविल्कामयेनेद्वपतेरजयाक्तत्यमितिनामुपेसमइति ॥ कृत एतन्नदाह ॥ स्यानभगः नित्यप्राप्तैश्वर्यः
महस्मिपरमैश्वर्येत्तु स्थगत्तिते अतिमाच्चशुगाविभूतिमतिमहीयमेशन्नमेविराजमेकथंभूतः अपरिमेयभगः अपरिमितैश्वर्यः नघनो
षानिवदेशकालादिपरिछिन्नतवाशुगामैश्वर्यंअपितपरिपूर्णंस्वरूपानुबंधित्वादपरिमितमित्यर्थः ॥ ७ ॥ नत्यंतीनववीनुगांगागांगता
कालस्वभावादिभिर्भावानुमत्वरजत्तमोगुणमयान्मीलयंती वहन्तुमामाकुस्मपरागिरस्मतिमेरमसहेयत्मातठमायाते शरगांगतोराम

११८

एवंतावदुक्तसाधनकदंबेन ये भगवंतं भजंति ते मृत्युं तरंति इतरे संसरंतीत्युक्तं इदानीं ये बहिः संगं परित्यज्य भगवन्मार्गे प्रवृत्ता अपि क
यं चिरंतद्वीतरागिनः कामान्न मुंचंति तेन भगवंतं प्राप्नुवंति न चेदं हृद्विलमंते केवलं कुयोगिन एव प्राप्नुवंतीति तान् शोचन् कामान् यः
कामयते मन्यमानः स कर्मभिर्निर्जीयते ततस्तत्र व्याधिस्मृत्यर्थमाह ॥ यदि न समुद्धरंतीति ॥ हे भगवन् ये यतयः हृदि स्थिताः काम
जराः कामस्य जरा मूलानि वासनाः यदि न समुद्धरंति नोत्पाटयंति तेषामसतां भवान् हृदि गतोपि दुरधिगमः दुःप्रापः कथं अस्मृत
कंठमणिर्विस्मृतो यः कंठमणिस्तद्वत् यथा कंठे वर्तमानोप्यस्मृतस्त्वेदप्राप्त इव भवति तद्वदिति ॥ न केवलमेतावत् किंतु असु

यदि न समुद्धरंति यतयो हृदि कामजटा दुरधिगमोसतां हृदि गतोस्मृतकंठमणिः ॥ असुतृपयोगिनामुभयतोप्य

तृपयोगिनामिंद्रियतर्पणपराणां योगिनामुभयतोप्यसुखं वर (सुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ॥ २६ ॥

हा असुखं दुःखमेव ॥ तदाह ॥ अनपगतांतकात् अनिवृत्तान्मृत्योः लोकाद्धनधनार्जनादिक्लेशात् भोगैर्वैभवप्राकाम्ये भयाच्चेह तावदुः
खं भवतस्त्वपारस्पि दुःखं कथं यतस्ततः अनधिरूढपदात् अनधिरूढं पदं स्वरूपं यस्य तस्मात् स्वतत्त्वरूपज्ञानाभावात् विद्यावद्विषयत्वेन प्रा
निजधर्मातिक्रमनिबंधनत्वं दुरूपनरकप्राप्त्याप्यसुखमित्यर्थः ॥ २६ ॥ रेमन्यामसमिधायाक्षं चित्तजनं भोगैकचिंतातुरं संमुत्सृत्य तमहर्निशं
विरचितो योगक्रमे कालांतः ॥ आत्मालंघितनतमतजनतामस्मानननामस्मरंरीनानार्थयरयानि ध्यानपरमानंदप्रमोपादि सं २६

२०३
११९

ननु यतेर्न्न किमपि कृत्यमस्ति । प्रारब्धमेव सुखोपभोगेनोपक्षीयते । अतः किमिति वृथा श्राम्यते उभयतोऽप्यनुकूलमिति । श्रूयते च । एष नित्यो
महिमा ब्राह्मणस्य न कर्म्मणा वर्द्धते नो कनीयानित्यादि । तत्राह । त्वदवगामीति । हे सगुण षड्गुणैश्वर्य्ययुक्त त्वदवगमी त्वदनुभवेन तानेवानुभवदुत्थशु
भाशुभयोः भवतः कर्म्मफलदातुरोषानुग्रहतोः उत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीनपुण्यापुण्यकर्म्मणोः फलभूतान् गुणविगुणान्वयान्
सुखदुःखसंबंधान्न वेत्ति नानुसंधत्ते । नहि तदानीं देहस्मृतौ देहाभिमानिनां प्रवृत्तिनिवृत्तिकारिणीः विधिनिषेधलक्षणा न वेत्ति । विगत
देहाभिमानेन तया कार्याकार्यबोधाभावान्न नियुज्यत इत्यर्थः । युक्तश्चैतत् । यतः कारणान्मनुजैः अन्वहं श्रवणभृतः अनुदिनं श्रवणेन चेतसि

त्वदवगामी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः । अनुयुगमन्वहं सगुण गीतपरंपरया श्र
वणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥ ४० ॥

धृतः त्वं तेषामपवर्गगतिः । अपवर्गरूपा गतिर्भवसि कथं श्रवणभृतः । अनुयुगं प्रतियुगं यामी
न परंपरा उपदेशसंततिः तया मत्सूप्रदेशयात्रमात्रेणेत्यर्थः । एतदुक्तं भवति ये तावत्तत्त्वज्ञानिनः न तेषां कर्म्माधिकारशंकापि येन्वाऽनवरतं त्व
त्कथाश्रवणादिनिष्ठास्तेषामप्यात्मनः सत्परत्वेनानविधिनिषेधबोधः इतरेषां तु योगयुक्तानेंद्रियलालनलालसानां शुभयतोऽप्यशरवामि
ति । अवगमं तव मे दिश माधव स्फुरति यन्न सुखासुखसंगमः । श्रवणवर्णनभावमथापि वा न हि भवामि यथा विधिकिंकरः ॥ ४० ॥ त्वदवगामी राम
न वेत्ति सुखदुःखेन वा विधिनिषेधा वित्युक्तं । तत्र ननु कथमवगन्तुं शक्यं दुरवगमत्वस्योक्तत्वादित्येवमाशंक्यासत्यमेव मत ॥ ४१ ॥

११९

वगाह्यमहिम्नो वाङ्मनसयोरगोचरत्वादविषयत्वे नैव ज्ञानमिति दर्शयन्नुपहृर्ध्वगाम्गिरिहवोपहर्वाकशथिव्यायं तदा द्यावापृथिवी इमे यदन्तं भवन्ने
भविष्यन्नेत्यादिश्रुतिप्रतिपादितमपरिमितमहिमानमाह द्युपतय एवेति ॥ हे भगवन् तेऽन्तं त्वद्युपतयः स्वर्गादिलोकपतयोऽब्रह्मादयोऽपि न ययुः
न प्रापुः तत्कुतः यदंतवद्वस्तु तत्तत्किमपि त्वं न भवसि श्रुत्यात्मा द्युपतयोऽपि न ययुरिति यतयस्मात्त्वमपि श्रुत्यात्मनोऽन्तं न प्राप्सि कुतस्तर्हि सर्वज्ञता म
द्येशक्तितावाश्रुतत्र आह ॥ अनंततयाऽश्रुतभावेन न हि शशविषाणात्तानं प्राप्तं तत्प्राप्त्यवस्थाशक्तिर्वे भवं विदंहति ॥ अनंतत्वमेवाह ॥ यदंतरेति ॥ यस्य
तवश्रुतत्वा मध्येन नन्तु अहो सावरणाः उत्तरोत्तरं दशगुणसप्तावरणयुक्ताश्च अंडनिचया ब्रह्मांड सहस्राः वांति परिभ्रमंति ॥ वयसा कालचक्रेणावरजो

द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः ॥ ख इव रजांसि वांति वयसा सह यच्छ्रुतयस्त्वयि

सीवमहह एवकैरेव न तु पर्यायेण हि यस्मादेवं श्रुतः श्रुतयस्त्वयि फलंति तात्पर्यतस्त्वय्यापर्यवस्य । हि फलंत्यतन्निरसनेन भवन्निधनाः ॥ २८ ॥
तिनवमोक्षाद्वहरिति अयमेतावानिति ॥ सगुणस्य गुणानंत्यात् निर्गुणस्य वागोचरत्वात् ॥ कथं तर्हि परार्थे तात्पर्यमिति ॥ तत्र विधिमुखेन वाको भवेदयं
नियमः ॥ परार्थस्यैव वाक्यार्थत्वमिति निषेधमुखेनैवायं नियम इत्याह अतन्निरसनेनेति अन्यदेव तद्विदितादथो अविदितात् अन्यत्र धर्मादन्यत्रा
धर्मादस्मात्कृताकृतात् अस्थूलमनण्वित्यादिप्रकारेणालक्षणया यावत्त्वमसीत्यादयः पर्यवस्यंति न च वाच्यो निषेधैः शून्यमेव तात्पर्यत इति यतो भव
न्निधनाः भवति त्वयि निधनं समाप्तिर्यासां तास्तथा न हि निरवधिर्निषेधः संभवति अतोऽवधिभूते त्वयि फलंतीत्यर्थः ॥ द्युपतयो विदुरंतमनंततेन न च
भवन्तो गिरः श्रुतिमौलयः त्वयि फलंतीति यतो अतः त्वां जयजयेति भजे न वतं परं ॥ २८ ॥

२०७
१२०

इत्यशेषसमाम्नायपुराणोपनिषद्रसः इति सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः ॥४२॥ ब्रह्मदायादेति ब्रह्मैव दायमिव पुत्रत्वप्राप्यं तन्निसेवत
इति तथा ॥ ब्रह्मभूतेति वा ॥४३॥ पूर्णः कृतकृत्यः श्रुतधरः श्रुतमर्थं मनसि धारयन्वीरव्रतः नैष्ठिकः ॥४४॥ नम इति कृष्णावतारत्वमानारायणांन

श्रीभगवानुवाच ॥ इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं ॥ सनंदनमथानर्चुः सिद्धा ज्ञात्वात्मनो गतिम् ॥४१॥ इत्यशेष
समाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतः पूर्वजातैः व्योमयानैर्महात्मभिः ॥४२॥ त्वं चैतद्ब्रह्मदायाद श्रद्धयात्मानुशासनं
धारयंश्चर गां कामं कामानां भर्जनं नृणाम् ॥४३॥ श्रीसूत उवाच ॥ एवं स ऋषिणादिष्टं गृहीत्वा श्रद्धयात्मवान् ॥ पूर्णः श्रुतधरो
राजन्नाह वीरव्रतो मुनिः ॥४४॥ नारद उवाच ॥ नमस्तस्मै भगवते कृष्णायामलकीर्तये ॥ यो धत्ते सर्वभूतानामभवायोश
तीः कलाः ॥४५॥ इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ॥ ततोऽगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥४६॥ सभाजितो
भगवता कृतासनपरिग्रहः ॥ तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतम् ॥४७॥ इत्येतद्वर्णितं राजन्यन्नः प्रश्नः कृतस्त्वया
यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ॥४८॥

मस्यति उक्तं हि ॥ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति ॥४५॥ साक्षात्पितुरिति
योनिव्यवधानं विना जनकस्य ॥ अग्निमथनावसरे कर्ध्वं विस्फुरणो रेतः पतितं समय व्यासस्तस्यैव तत उत्पन्नः शुक इति हि वदंति ॥४८॥

राम
१२०

मपञ्चवेद[..]तार्थसंगृह्यानुस्मारयति ॥ योस्योत्प्रेक्षक इति यः अस्यविश्वस्यउत्प्रेक्षकः एवमिदमनुशायिनांसमन्तादूहषार्थसिद्धयेसृष्टिस्थिति
प्रलयान्प्रापणीयमित्यालोचकइत्यर्थः ॥ अनेननिमित्तत्वमुक्तं ॥ एवमालोच्यास्यादिमध्यनिधनेष्वादिसृष्टिंमध्येपालनंनिधनेन्तः एतेषुकर्म
सुयोवर्त्ततेअनेनोपादानत्वमुक्तं ॥ ननुप्रकृतिपुरुषयोरुपादाननिमित्तत्वेप्रसिद्धे ॥ सत्यंतयोरपितत्तदुद्बोधकत्वान्मूलकारणंभगवानेवेत्याह योव्यक्त
जीवेश्वर इति ॥ प्रवेशमेवनियमतेरंशयति ॥ पूर्वोक्तप्रकारेणेदंसृष्ट्वायदर्थमेतत्सृष्टं तेनऋषिणासृष्टकार्यमहमितिदर्शनाहंकृतिजीवस्तेनसहान्तःप्रवि
श्यपुनः शरीराणितस्यभोगायतनानिचक्रेतान्पुरः शास्तितस्यभोगंददत्पालयति ॥ उपासकस्यकैवल्यरूपोभवतीत्याह ॥ यंसंपद्येति ॥ यत्सं

योस्योत्प्रेक्षकआदिमध्यनिधनेयोऽव्यक्तजीवेश्वरोयः सृष्ट्वेदमनुप्रविश्यऋषिणाचक्रेपुरः शास्तिताः यंसंपद्यजहात्यजाम
नुशयीसुप्तः कुलायंयथातंकैवल्यनिरस्तयोनिमभयंध्यायेदजस्रंहरिं ॥५०॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्ताशी
तितमोध्यायः

पद्यप्राप्यानुशयीअप्रवन्तुदंडवत्प्रणामैश्वर्यगाम्मूलेशेतइति ॥ तथासजीवअजाकार्यकारणलक्षणामविद्यांत्यजति ॥ ननुवद्ध
संपन्नस्यापिजीवतस्तत्संबंधोदृश्यतेअतआह ॥ तेषुनः कुलायंयथेति ॥ अयंभावः यथास्वप्नशरीरंवतमन्येपश्यंतिसत्तुनात्मानंतथापश्यति ॥ एवंजी
वन्मुक्तमप्यत्येदेहवन्तंपश्यंतिसत्तुनकिंचित्पश्यतीति ॥ तंहरिंअजस्रंअनवरतंध्यायेत्किंभितयतआह ॥ अभयंयस्मात्भयनिवर्त्तकमित्यर्थः ॥ कुतःत
तःकैवल्यनिरस्तयोनिंकैवल्येनअप्रच्युतस्वरूपावस्थानेननिरस्तातिरस्कृतायोनिः मूलकारणंमायायेनतं ॥ सर्वश्रुतिशिरोरत्नवीराजितपदाम्बुजं ॥ भो
गयोगप्रदंवंदेमाधवंकर्मितमर्त्ययोः ॥ श्रीमेसनातीतमः ॥

२७
१२१

अष्टाशीतितमे विष्णुभक्तः कैवल्यमश्नुते ॥ ततोर्वाक्यैरेव भक्तास्त्वाविभूतिमिति च रूप्यते ॥ हरिर्भजतां मुक्तिदः स्तस्मात् तमपध्यायेज्जनस्तं हरिमिति ॥ तत्र शौनके
देवासुरेति ॥ अशिवस्य वधीरितभोगं ॥ भोजाभोगिनः लक्ष्म्याः पतिः सर्वभोगयुक्तः ॥ १ ॥ २ ॥ अन्योन्योपमर्देन नतमतेस्त्रिविधास्त्रिलिंगाः त्रिलिंगात्वमाह ॥ वैका
रिकइति ॥ अहंकारः ३ ॥ विकारा मनइन्द्रियभूतरूपाः षोडशेति इन्द्रियदेवानामभेदविवक्षया ॥ कथनेति यत्किंचिद्विकारोपाधिकं भजन् उपाध्यन्तरूपाणां
विभूतीनां स्वरूपं प्राप्नोतीति ॥ उपद्रष्टा साक्षी मनः ॥ यतः सर्वदृक् सर्वं पश्यति ॥ अतः प्रकृतेः परइति ॥ अत्रैतत्तत्वं स्यात् तां गुणामेवं धेहु पदेष्वभिहिष्यते ॥ त
द्भक्ता योगयोगाभ्यां विवक्तगुणाः सत्वादयः शांतघोरमूढाः स्वभावतः ॥ वक्ष्यविष्णुशिवानां वगुणोपेतस्वरूपिणां ॥ नातिभेदो भवेत्तमेरोगणाधर्म्मैरि

राजोवाच ॥ देवासुरमनुष्येषु ये भजंत्यशिवं शिवं ॥ प्रायस्ते धनिनो भोजा न तु लक्ष्म्याः पतिं हरिं ॥ १ ॥ एतद्वेदितुमिच्छामः संदेहोत्र महान्
हि नः ॥ विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः ॥ २ ॥ श्रीशुक उवाच ॥ शिवः शक्तियुतः शश्वत्त्रिलिंगो गुणसंवृतः ॥ वैकारिकस्तै
जसश्च तामसश्चेत्यहं त्रिधा ३ ॥ ततो विकारा अभवन् षोडशामीषु कंचन ॥ उपधावन् विभूतीनां सर्वासामश्नुते गतिं ॥ ४ ॥ हरिर्हि
निर्गुणः साक्षात्पुरुषः प्रकृतेः परः ॥ स सर्वदृकुपद्रष्टा तं भजन् निर्गुणो भवेत् ॥ ५ ॥

हांशतः सत्वस्यांशात्पानो जातत्वविष्णोर्विरिञ्चेपमूठतेरज
स्तमोगुणाभ्यां भवेतां ब्रह्मरुद्रयोः गुणोपमर्दितो स्वयमस्त्वं शानां वभिन्नता ॥ अतः समग्रसत्वस्यविष्णोर्मोक्षकरो मनिः अशांतो भूतिरेतेश्चैतथानं समयीश्वतः श
न्हारजसं गुणेन ब्रह्मरुद्राहि सैविनां विभूतयो भवत्येवशनैर्मोक्षोप्यमसानतः ६ इमे वाभिप्रेत्यतनवतत्रोच्यते ॥ श्रेयांसितत्र खलुसत्वतनोर्नृणांस्युरिति ॥ तद्यासत्वयुगाम
स्याविद्याभूस्त्रिरिति ॥ तथासत्वं तत्रीर्थसाधनमिति ॥ तथात्रयाणामेकभावानां योऽपश्यति वैभिदामिति ॥ तथानंतमश्नुते ॥ जवभिरामसवेपिवध्नातइत्यादि एवं १२१
वसतिनकिंचिदशान्यंजसं ॥ तद्ब्रह्मानांतु कलहो मोहमात्रमिति ५ ॥

यस्याहमनुगृह्णामीति ॥ अयमर्थः योविषयान्परिजिहीर्षुरपि कथंचिद्विद्यमानेषु मज्जते क्लिश्यति च तस्य विषयापहार एव वास्तवोऽनुग्रह इति यथाकृत
त्वेकवाहीनामैश्वर्यविरोधात् ॥ अथवा प्रथमं विभूतीः कामनानुरूपा दत्वा शनैः विषयभोगावशानेन तस्य निर्वेदमुत्पाद्य हरिष्यामि परमानुग्रहं
करोमीति ॥ तद्धनं भगवत्येव ॥ न मय्यावेशितधियां कामः कामाय कल्पत इति दुःखदुःखितमिति ॥ दुःखादनु पुनर्दुःखितमिव प्रतीयमानमित्यर्थः

निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः ॥ शृण्वन् भगवतो धर्माननपृच्छदिदमच्युतं ॥ ६ ॥ स आह भगवांस्तस्मै प्रीतः शुश्रूषवे प्रभुः
नृणां निःश्रेयसार्थाय योऽवतीर्णो यदोः कुले ॥ ७ ॥ श्रीभगवानुवाच ॥ यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः ॥ ततोऽधनं त्यजंत्य
स्य स्वजना दुःखदुःखितं ॥ ८ ॥ स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया ॥ मत्परैः कृतमैत्रस्य करिष्ये मदनुग्रहं ॥ ९ ॥ तद्ब्रह्म पर
मं सूक्ष्मं चिन्मात्रं सदनंतकं ॥ अतो मां सुदुराराध्यं हित्वान्यान् भजते जनः ॥ १० ॥ ततस्त आशुतोषेभ्यो लब्धराज्यश्रियोद्धताः ॥ मत्ताः प्र
मत्ता वरदान् विस्मयंत्यवजानते ॥ ११ ॥ श्रीशुक उवाच ॥ शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः ॥ सद्यः शापप्रसादोऽङ्ग शिवो ब्रह्मा न
चाच्युतः ॥ १२ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनं ॥ वृकासुराय गिरिशो वरं दत्वाप संकटं ॥ १३ ॥

सः पुनर्धनानामग्रहेणाधनेहया प्रवृत्तोऽपि मदनुग्रहेण यदा निःफलोद्यमो निर्विण्णः स्यात्तदा मदनुग्रहमिति ॥ ममासाधारणमनुग्रहं ॥ ९ ॥ तमेवा
ह ॥ तत्तद्ब्रह्मेति ॥ अतः पश्चादपि मोक्षमरोचयन् ॥ अन्यान् सकामान् भजन्त इत्यर्थः ॥ १० ॥ एतदेवेतिहासेन स्पष्टयितुमाह ॥ शापप्रसादयोरिति ॥ ब्रह्मा चेत्यपन्वयः ॥ १२ ॥

द०उ शकुनेः पुत्रः १४ सुसंकटमाप कैलासोत्पाटनं पुरपालनं च १६ स्वगात्रतः उपाधावत् कथं आत्मक्रव्येण स्वमांसेन जुह्वान इति १७ अवृश्चत् छेत्तुमु
१२२ द्यतः १८ धूर्जटिर्मानन्निरिव देदीप्यमानः वयं च अयुनाननाय यथाभिकं वितरे :खेन मत्तो कामं वारयामः तत्स्पर्शनेन उपस्कृता आकृतिः परिशीर्णदेहो भवन्

वृको नामासुरः पुत्रः शकुनेः पथि नारदं दृष्ट्वाशुतोषं पप्रच्छ देवेषु त्रिषु दुर्मतिः १४ स आह देवं गिरिशमुपाधाव आशु सिध्यसि
योल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति १५ दशास्यबाणयोस्तुष्टः स्तुवतोर्वंदिनोरिव ऐश्वर्यमतुलं दत्वा तत आप सुसंक
टं १६ इत्यादिष्टस्तमसुर उपाधावत्स्वगात्रतः केदार आत्मक्रव्येण जुह्वानोग्निमुखं हरं १७ देवोपलब्धिमप्राप्य निर्वेदात्सप्तमेहनि
शिरोवृश्चत स्वधितिना तत्तीर्थक्लिन्नमूर्द्धजं १८ तदा महाकारुणिकः स धूर्जटिर्यथानिकामं वितरामि ते वरं निगृह्य दोर्भ्यां भुजयो
न्यवारयत्तत्स्पर्शनाद्भूय उपस्कृताकृतिः १९ तमाह चांगालवृणीष्व मे यथाभिकामं वितरामि ते वरं प्रीयेय तोयेन नृणां प्रपद्यतामहो
त्वयात्मा भृशमर्द्यते वृथा २० देवं स वव्रे पापीयान् वरं भूतभयावहं यस्य यस्य करं शीर्ष्णि धास्ये स म्रियतामिति २१ तच्छ्रुत्वा भगवान्
रुद्रो दुर्मना इव भारत ॐमिति प्रहसंस्तस्मै ददेहेरमृतं यथा २२ इत्युक्तः सोसुरो नूनं गौरीहरणलालसः स तद्वरपरीक्षार्थं शंभोर्मूर्ध्नि
किलासुरः २३ स्वहस्तं धातुमारेभे सोबिभ्यत्स्वकृताच्छिवः तेनोपसृष्टः संत्रस्तः पराधावत्सवेपथुः यावदंतं दिवो भूमेः काष्ठानामु राम

न्यवारयन् एवमाह च तोयेनापि मज्जनतः प्रीतः स्यात्त्वया तु देहो वृथा पीड्यत इति २० दातुमनर्हमपि दत्तवान् सर्पाय क्षीरमिव उपसृ दगादुदक् २४ १२२
दृष्टुमुद्गतः सन्तु उदगात् अधावत् उत्तरकृतन्नरतः २४

वैकुंठश्वेतद्वीप॥१५॥तन्नूकाम्हरं॥तथाप्यसनमपश्यत॥वृजिनार्दनः दुःखहृतादूरत एव दृष्ट्वा॥१७॥मेखलादिभिरुपलक्षितः प्रत्युदियात सन्मुख
मागतः॥१८॥सक्त्विनिश्चितं॥किंकिमंथे॥आत्मा देहः सर्वपुरुषार्थहेतुः अतो मापीडयेति॥१९॥प्रायशः पुंभिर्धृतैर्भवान् स्वार्थान्समीहते साधयि

अजानंतः प्रतिविधिं तूष्णीमासन्नरेश्वराः॥ ततो वैकुंठमगमत् भास्वरं तमसः परं॥१५॥ यत्र नारायणः साक्षान्न्यासिनां परमा
गतिः॥ शांतानां न्यस्तदंडानां यतो नावर्तते गतः॥१६॥ तं तथाप्यसनं दृष्ट्वा भगवान् वृजिनार्दनः॥ दूरात्प्रत्युदियाद्भूत्वा वटुको योग
मायया॥१७॥ मेखलाजिनदंडाक्षैस्तेजसाग्निरिव ज्वलन्॥ अभिवादयामास च तं कुशपाणिर्विनीतवत्॥१८॥ श्रीभगवानुवाच॥ शा
कुनेय भवान्व्यक्तं श्रांतः किं दूरमागतः॥ क्षणं विश्रम्यतां पुंस आत्मायं सर्वकामधुक्॥१९॥ यदि नः श्रवणायालं युष्मद्व्यवसितं वि
भो॥ भण्यतां प्रायशः पुंभिर्धृतैः स्वार्थान्समीहते॥२०॥ शुक उवाच॥ एवं भगवता पृष्टो वचसामृतवर्षिणा॥ गतक्लमो ब्रवीत्तस्मै य
थापूर्वमनुष्ठितं॥२१॥ श्रीभगवानुवाच॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि॥ यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट्॥२२॥
यदि वस्तत्र विश्रंभो दानवेंद्र जगद्गुरौ॥ तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयतां॥२३॥ यद्यसत्यं वचः शंभोः कथंचिद्दानवर्षभ॥ तदैनं
जह्यसद्वाचं न यद्वक्तानृतं पुनः॥२४॥ इत्थं भगवतश्चित्रैर्वचोभिः स सुपेशलैः॥ भिन्नधीर्विस्मितः शीर्ष्णि स्वे हस्तं कुमतिर्न्यधात॥२५
न्नमिच्छति॥ अथ वा जनः पुंभिः सहायैः स्वकार्याणि साधयति अतो नः कथ्यतामिति॥२०॥ पैशाच्यं पिशाचानामिव वृत्तिः॥२१॥ यत यथा वक्ता वदिष्यति॥२४
विचित्रैर्भ्रामकैः सुपेशलैः अतिरम्यैर्भिन्नधीर्भ्रांतमतिः॥२५॥

२०७
१२२

किमुवक्तव्यं विश्वेशे त्वयि कृतागाः कृतापराधः इति ॥२९॥ अव्याहृतशक्तुरश्वतः वाङ्मनसागोचरशक्तिमतउद्भसागिरिजेमोक्षं शिवमोचनत्र्यंबरिजंसंस्
तिभिन्नोनाद्रूपमंसारैः ॥४०॥ इति श्रीमेत्र्युष्टाशीतितमः ॥ नवाशीतितमे देवः कोमहानिति संशये ॥ परीक्ष्य विष्णोर्हन्त्वांषेमुनिर्मोवर्णायद्भृगुः ॥१॥ इति ह्यमानर

अथापतद्भिन्नशिरा वज्राहत इव क्रमात ॥ जय शर्वोन्नमः शर्वः माधुशर्वो भवह्निवि ॥२६॥ प्रभुः प्रमुष्यवर्षाणि हतेपापेदृकाहरे
देवर्षिपितृगंधर्व्वमोचितः संकरात शिवः ॥२७॥ मुक्तोगिरिशमभ्याह भगवान्मुहूर्षोन्नमः ॥ अहो देवमहादेवपापोयं त्वनपा
प्मना ॥२८॥ हतः कोत्रमहत्त्वीशजेनह्यैंकृतकिल्बिषः ॥ कोमेसात्किमुविश्वेशेकृतागस्कोजगद्गुरौ ॥२९॥ यएवमव्याकृतश
क्तुरश्वतः परस्मात्परमात्मनो हरेः ॥ गिरिजेमोक्षं कथयेच्छृणोति वा विमुच्यते संसृतिभिन्नर्धारिभिः ॥४०॥ इति श्रीभा
वते महापुराणे श्रामस्कंधे हद्मोक्षणं अष्टाशीतितमोध्यायः ॥ श्रीशुक उवाच ॥ सरस्वत्यास्तटे राजन्नृषयः सत्रमासत ॥ वितर्कः
समभूत्तेषां त्रिष्वधीशेषु कोमहान् ॥१॥ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप ॥ तज्ज्ञप्त्यै प्रेषयामासुः सोभ्यगाद्ब्रह्मणः सभां ॥२
न तस्मै प्रह्वणं स्तोत्रं चक्रे सत्वपरीक्षया ॥ तस्मै चुक्रोध भगवान्प्रज्वलन्स्वेनतेजसा ॥३॥ सआत्मन्युत्थितं मन्युमात्मजायात्मनाप्रभुः
अशीशमद्यथावह्निं स्वयोन्या वारिणात्मभूः ॥४

माह ॥ सरस्वत्या इति ॥१॥ स्वयोन्यास्वस्मिंसेवत्रूपांतरेणाग्निं व्यक्तिस्थानेनस्वकार्येणात्पर्श्चतेनयथा
कश्चिद्वह्निं शमयति तथा स्वकार्येणाक्रेणानिमित्तेन क्रोधं शमयामासेत्यर्थः ॥ ॥४॥

राम
१२२

तीर्थकारिणा तीर्थत्वनिमित्तेन ॥११॥ तस्य मद्वयागम्भीरया गिरा निर्वृतः । तूष्णीं वभूवेति शेषः ॥१३॥ विस्मिता आश्चर्यप्राप्तातिरेकेऽपि निर्विकारत्वेन । भूयांसं
श्रद्दधुः मदनं मनिश्चितवंतः ॥१५॥ यस्मिन्नैवैराग्यं ववर्त्तविध्वमिति पाठे तत्रावार्विध्वमेवं द्रष्टव्यं । विषयान्तरं त्यक्त्वा मशङ्कावतोपि मानेच्छात्यागो नाम

ततः कैलासमगमत्तत्र देवो महेश्वरः । परिरब्धं समारेभे उत्थाय भ्रातरं मुदा ॥५॥ नैच्छत्तत्त्वमसुत्पथगा इति देवस्तु कोपवान् । शूलमुद्यम्य तं
हंतुमारेभे तिग्मलोचनः । पतित्वा पादयोर्देवी मा त्वया मा मतं गिरा ॥६॥ अथो जगाम वैकुंठं यत्र देवो जनार्दनः । शयानं श्रिय उत्संगे परा
वक्षस्यताडयत् ॥७॥ तत उत्थाय भगवान्सह लक्ष्म्या सतां गतिः । स्वतल्पादवरुह्याथ ननाम शिरसा मुनिं ॥८॥ आह ते स्वागतं ब्रह्मन्निषी
दात्रासने क्षणं । अजानतामागतान्वः क्षंतुमर्हथ नः प्रभो ॥९॥ अतीव कोमलौ तात चरणौ ते महामुने । इत्युक्त्वा विप्रचरणौ मर्दयन्
स्वेन पाणिना ॥१०॥ पुनीहि सह लोकं मां लोकपालांश्च मद्गतान् । पादोदकेन भगवंस्तीर्थानां तीर्थकारिणा ॥११॥ अद्याहं भगवल्लक्ष्म्या
आश्रमेकांतभाजनं । वत्स्यत्युरसि मे भूतिर्भवत्पादहतांहसः ॥१२॥ सूत उवाच । एवं ब्रुवति वैकुंठे भृगुस्तन्मंद्रया गिरा । निर्वृतस्तर्पित
स्तूष्णीं भक्त्युत्कंठोऽश्रुलोचनः ॥१३॥ पुनश्च सत्रमाव्रज्य मुनीनां ब्रह्मवादिनां । स्वानुभूतमशेषेण राजन्भृगुरवर्णयत् ॥१४॥ तन्निशम्या
थ मुनयो विस्मिता मुक्तसंशयाः । भूयांसं श्रद्दधुर्विष्णुं यतः शांतिर्यतो भयं ॥१५॥ धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितं । ऐश्वर्यं चाष्टधा

द्यं वैराग्यं । ततो विषयाणां मध्ये लवणादिव्यतिरेकेणापि वृत्तिर्द्वितीयं । तथा वृत्तावपि मनसि रागशैथिल्येन वाह्येन्द्रियेरे यस्माद्यशस्त्वात्मनमलापदं ॥१६॥
वविषयमेवमनंतरतीयं तत्राप्यौदासीन्यं चतुर्थं । यथाहुः वैराग्यमाद्ययतमानसंज्ञं व्यतिरेकसंज्ञं ततः एकेन्द्रियाख्यं महदिरागसौख्यं तस्यापि भावस्तु
वशीकाराख्यमिति ॥१६॥

तस्य भगवत एव यद्यपि त्रिविधा आकृतयस्तथापि तत्र ताः सत्त्वमेव तीर्थसाधनं पुरुषार्थहेतुः ||१९|| इत्थं निश्चित्य सरस्वतीतीरवासिनो विप्राः हरिसेवया तद्गतिं प्राप्ता इति ||२०|| आख्यानमिदं तस्य पुरुषस्य पदपंकजोद्भूतगंधयुक्तं पीयूषं तल्लक्षणं हरेः प्रशस्तयशो यः संसारमेव तेन संसृतिक्लेशो न भवतीति ||२१|| सूतोक्तं लक्षणं भगवानुक्तम्

मुनीनां न्यस्तदंडानां शांतानां समचेतसां || अकिंचनानां साधूनां यमाहुः परमां गतिं ||१७|| सत्त्वं यस्य प्रिया मूर्त्तिर्ब्राह्मणास्त्विष्टदेवताः || भजंत्यनाशिषः शांता यं वा निपुणबुद्धयः ||१८|| त्रिविधाकृतयस्तस्य राक्षसा असुराः सुराः || गुणिन्या मायया सृष्टाः सत्त्वं तत्तीर्थसाधनं ||१९|| श्रीशुक उवाच || एवं सारस्वता विप्रा नृणां संशयनुत्तये || पुरुषस्य पदांभोजसेवया तद्गतिं गताः ||२०|| सूत उवाच || इत्येतन्मुनितनयास्यपद्मगंध पीयूषं भवभयभित्परस्य पुंसः || सुश्लोकं श्रवणपुटैः पिबत्यभीक्ष्णं पांथोध्वभ्रमणपरिश्रमं जहाति ||२१|| श्रीबादरायणिरुवाच || एकदा द्वारवत्यां तु विप्रपत्न्याः कुमारकः || जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत ||२३|| विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः || इदं प्रोवाच विलपन्नातुरो दीनमानसः ||२४|| ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः || क्षत्रबंधोः कर्मदोषात्पंचत्वं मे गतोऽर्भकः ||२५|| हिंसाविहारं नृपतिं दुःशीलमजितेंद्रियं || प्रजा भजंत्यः सीदंति दरिद्रा नित्यदुःखिताः ||२६|| एवं द्वितीयं विप्रर्षिस्तृतीयं त्वेवमेव च || विसृज्य स नृपद्वारि तां गाथां समगायत ||२७|| तामर्जुन उपश्रुत्य कर्हिचित्केशवांतिके || परेते नवमे बाले ब्राह्मणं समभाषत ||२८|| किंस्विद्ब्रह्मंस्त्वन्निवासे इह नास्ति धनुर्द्धरः ||

एवं तीर्थं शोधितमाख्यानांतरमाह || एकदेति ||२२|| ब्रह्मद्विष इत्यादिकां तां गाथां वाक्यं मयि न कश्चिद्दोषः श्रुतो । जन्यबंधुरेते वै ब्राह्मणाः सत्रआसत ||२५|| राजदोषेणैव मत्पुत्रा म्रियंत इति वारं वारं उत्क्रोशेत्यर्थः ||२६|| ब्रह्मन्निति किंस्विदिति किमर्थं वृथा परिदेवयत त्वन्निवासे इह मात्रो राजन्यबंधुरपि नास्ति || ब्राह्मणस्य तव कावार्त्ता || एते ब्रह्मसत्रे याग इव ब्राह्मणा मिलिता भवितुमर्हंतीत्यर्थः ||२७||

तदेवाह ॥ धनदारात्मजानाशङ्काऽइति ॥ धनादिभिर्वियुक्ताः यत्रयेष्टजीवन्तः शोचंति ते जीवंति केवलं जीविकामेव पालयन्ति ॥ १९ ॥ हतकल्मषइति ॥ अग्निप्रवे
शेन ब्राह्मणविलापश्रवणपातकान्मुक्तो भवेयमित्यर्थः ॥ अहृतकल्मषस्त्वेदितिवा ॥ २० ॥ नशक्ष्यध्महे ॥ नमर्षतीमः ॥ २१ ॥ एवं प्रोदिवादैः विश्रमितः ॥ वि

धनदारात्मजाशङ्का यत्र शोचंति ब्राह्मणाः ॥ तैर्वै राजन्यवेषेण न राजीवंत्यहं मताः ॥ १९ ॥ अहं प्रजानां भगवन्नग्निं प्रवेक्ष्ये दीनयोरिह
अनिस्तीर्णप्रतिज्ञोऽग्निं प्रवेक्ष्ये हतकल्मषः ॥ २० ॥ ब्राह्मण उवाच ॥ मैवं कर्षणवाहैरेवः प्रद्युम्नो धन्विनां वरः ॥ अनिरुद्धोऽप्रतिरथो न
त्रातुं शक्ता भवंति यत ॥ २१ ॥ तत्कथं तद्भवान्कर्म्म दुष्करं जगदीश्वरैः ॥ चिकीर्षसि त्वं बालिश्यात्तत्र श्रद्दध्महे वयं ॥ २२ ॥ अर्जुन उवाच
नाहं संकर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव वा ॥ अहं वा अर्जुनो नाम गांडीवं यस्य वै धनुः ॥ २३ ॥ मावमंस्था मम ब्रह्मन्वीर्य्यं त्र्यंबक
तोषणं ॥ मृत्युं विजित्य प्रधने आनेष्ये ते प्रजां प्रभो ॥ २४ ॥ एवं विश्रंभितो विप्रः फाल्गुनेन परंतप ॥ जगाम स्वगृहं प्रीतः पार्थवीर्यं नि
शामयन् ॥ २५ ॥ प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः ॥ पाहि पाहि प्रजां मृत्योरित्याहार्जुनमातुरः ॥ २६ ॥ स उपस्पृश्य शुच्यंभो न
मस्कृत्य महेश्वरं ॥ दिव्यान्यस्त्राणि संस्मृत्य सज्यं गांडीवमाददे ॥ २७ ॥ न्यरुणत्सूतिकागारं शरैर्नानास्त्रयोजितैः ॥ तिर्यगूर्द्ध्वमधः
पार्थश्चकार शरपंजरं ॥ २८ ॥ ततः कुमारः संजातो विप्रपत्न्या रुदन्मुहुः ॥ सद्योऽदर्शनमापेदे सशरीरो विहायसा ॥ २९ ॥

स्वांतं प्रापितः ॥ नेशामयन्नश्रावयन् ॥ २५ ॥ ब्राह्मणोऽपेरुकत्वेन कृष्णावन्तयामहेश्वरं नमस्कृत्य ॥ २७ ॥ न्यरुणत्स्त्राहतवान् ॥ तदेवाह ॥ तिर्यगूर्द्ध्वमिति ॥ २८ ॥
अदर्शनमापेदे होपिनावशिष्टइत्यर्थः ॥ २९ ॥

ह.उ
१२५

यस्यप्रजाःतत्तत्र ४१ प्रवृत्ताःवारिताःउपपत्तिभिःप्रतिषेधंकर्तुंता ४५ मावज्ञमावजानीहि येनेदंततितएवमनुष्याःनःकीर्तिंस्थापयिष्यंति निष्कलं
करिष्यंतिपाशांतरंछेदोभंगमयादागतकमिति ४६ सप्तसप्तस्वाब्धिगिरयोयेषुद्वीपेषुतान् ४८ ज्ञातमितिप्रकृतिपरिणामरूपं नालोकाभावमात्रे ५। वे

तदाहंविप्रोविजयंविनिंदन्कृष्णसंनिधौ मोघंपश्यतमेयोहंग्रस्तधैर्यंक्लीवकात्थनं ५० नप्रद्युम्नोनानिरुद्धोनरामोनचकेशवः यस्यशेकुः
परित्रातुंकोन्यस्तदवितेश्वरः ४१ धिगर्जुनंमृषावादंधिगात्मश्लाघिनोधनुः दैवोपसृष्टंयोमौढ्यादानिनीषतिदुर्मतिः ४२ एवंशं
पतिविप्रर्षौविद्यामास्थायफाल्गुनः ययौसंयमनीमाशुयत्रास्तेभगवान्यमः ४३ विप्रापत्यमचक्षाणस्ततऐंद्रीमगात्पुरीं आग्नेयीनैर्ऋ
तींसौम्यांवायव्यांवारुणीमथ ४४ रसातलंनाकपृष्ठंधिष्ण्यान्यन्यान्युदायुधः ततोलब्धद्विजसुतोह्यनिस्तीर्णप्रतिश्रुतः अग्निंविविक्षुः
कृष्णेनप्रत्युक्तःप्रतिषेधता ४५ दर्शयेद्विजसूनूंस्तेमावज्ञात्मानमात्मना येतेनःकीर्तिंविमलांमनुष्याःस्थापयिष्यंति ४६ इतिसंभा
ष्यभगवानर्जुनेनसहेश्वरः दिव्यंस्वरथमास्थायप्रतीचींदिशमाविशत् सप्तद्वीपान्ससिंधून्सप्तसप्तगिरीनथ लोकालोकंतथाती
त्यविवेशसुमहत्तमः ४७ तत्राश्वाःशैब्यसुग्रीवमेघपुष्पबलाहकाः तमसिभ्रष्टगतयोबभूवुर्भरतर्षभ ४९ तान्दृष्ट्वाभगवान्कृष्णो
महायोगेश्वरेश्वरः सहस्रादित्यसंकाशंस्वचक्रंप्राहिणोत्पुरः तमःसुघोरंगहनंकृतंमहद्विदारयद्भूरितरेणरोचिषा मनोजवंनिर्वि
विशेसुदर्शनंगुणच्युतोरामशरोयथाचमूः ५० द्वारेणचक्रानुपथेनतत्तमःपरंपरंज्योतिरनंतपारं समश्नुवानंप्रसमीक्ष्यफाल्गुनःप्रताडि
ताक्षोपिदधेक्षिणीउभे ५१
कान्तपथेनचक्रमनुगतेनद्वारेणतत्तमःपरंतस्मात्तमसःपरं दूरेवर्तमानंपरंश्रेष्ठंभागवतंज्योतिःसमश्नुवानंव्याप्नुवत्तप्रस
मीक्ष्यप्रताडिताक्षोनेत्रेन्यमीलयदित्यर्थः ५२ ॥ ॥

हम
१२५

एजंतः उच्चलंतः वृहंतः महांत ऊर्म्मयो भूषणं यस्य तत् ॥ तत्र सलिले भवनं महाकालपुरं ॥ द्युमत्तमं द्युतिमत्सु श्रेष्ठं ॥ ५३ ॥ सहस्रं मूर्द्धिभवाः फणाः
तासु मनयः तेषां द्युतिभिः ॥ द्विसहस्रनेत्रैरूर्ज्जितं स्फटिकगिरिसंकाशं शितिकंठजिह्वं ॥ कंठश्च जिह्वाश्च शितयः नीलाः कंठजिह्वा यस्य तं ॥ ५४ ॥

ततः प्रविष्टः सलिलं नभस्वता वलीयसैजद्बृहदूर्म्मिभूषणम् ॥ तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्र-
शोभितं ॥ ५३ ॥ तस्मिन्महाभीममनंतमद्भुतं सहस्रमूर्द्धन्यफणामणिद्युभिः ॥ विभ्राजमानं द्विगुणेक्षणोल्बणं
सिताचलाभं शितिकंठजिह्वं ॥ ५४ ॥ ददर्श तद्भोगसुखासनं विभुं महानुभावं पुरुषोत्तमोत्तमं ॥ सांद्रांबुदाभं सुपिशं-
गवाससं प्रसन्नवक्त्रं रुचिरायतेक्षणं ॥ ५५ ॥ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलं ॥ प्रलंबचार्व-
ष्टभुजं सकौस्तुभं श्रीवत्सलक्ष्मं वनमालयावृतम् ॥ ५६ ॥ सुनंदनंदप्रमुखैः स्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥
पुष्ट्या श्रिया कीर्त्यजयाखिलर्द्धिभिर्निषेव्यमानं परमेष्ठिनां पतिं ॥ ५७ ॥ ववंद आत्मानमनंतमच्युतो जिष्णुश्च तद्दर्शन-
जातसाध्वसः ॥ तावाह भूमा परमेष्ठिनां प्रभुर्वद्धांजली सस्मितमूर्जया गिरा ॥ ५८ ॥

तद्भोगसुखासनं तस्यानंतस्य भोगो देहः सुखकरमासनं यस्य तं ॥ ५५ ॥ महांतो मणिव्राता येषु तेषां किरीटकुंडलानां प्रभातया परिक्षिप्ताः सर्वतः स्फुरं-
तः सहस्रमपरिमिताः कुंतला यस्य तं ॥ ५६ ॥ कीर्त्यजया कीर्त्तिसहितया ॥ जयाखिलर्द्धिभिरणिमादिविभूतिभिः सन्निधयाभिः ॥ ५७ ॥ ऊर्ज्जितया गिरा ॥ ५८ ॥

द०उ
१२६

मेकलावतीर्णाविति संबोधनं ॥ शीघ्रं मे अंतिके प्रकाशयतं आगच्छतं ॥ ५८ ॥ आचरतां आचरतं ॥ ५९ ॥ इदं तु भारतयुद्धानंतरमेव कृतमपि प्रस्थकथन

द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये ॥ कलावतीर्णाववनेर्भरासुरान्हत्वेह भूयस्त्वरयेतमंतिमे ॥ ५८ ॥
पूर्णकामावपि युवां नरनारायणावृषी ॥ धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहं ॥ ५९ ॥ इत्यादिष्टौ भगवता तौ कृष्णौ परमे
ष्ठिना ॥ ॐमित्यानम्य भूमानमादाय द्विजदारकान् ॥ ६० ॥ न्यवर्त्ततां स्वकं धाम संप्रहृष्टौ यथागतं ॥ विप्राय ददतुः पुत्रान्
यथारूपं यथावयः ॥ ६१ ॥ निशाम्य वैष्णवं धाम पार्थः परमविस्मितः ॥ यत्किंचित्पौरुषं पुंसां मेने कृष्णानुकंपितं ॥ ६२ ॥ इति
दृशान्यनेकानि वीर्याणीह प्रदर्शयन् ॥ बुभुजे विषयान्ग्राम्यानीजे चात्यूर्जितैर्मखैः ॥ ६३ ॥ प्रववर्षाखिलान्कामान्प्रजा
सु ब्राह्मणादिषु ॥ यथाकालं यथैवेंद्रो भगवान्श्रैष्ठ्यमास्थितः ॥ ६४ ॥ हत्वा नृपानधर्मिष्ठान्घातयित्वार्जुनादिभिः ॥ अं
जसा वर्तयामास धर्मं धर्मसुतादिभिः ॥ ६५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्विजकुमारहरणो नाम नवाशीतित
मोध्यायः ॥ श्रीशुक उवाच ॥ सुखं स्वपुर्यां निवसन्द्वारकायां श्रियः पतिः ॥ सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः ॥ १ ॥ ॥

प्रस्तावेन सूचितं ॥ ६६ ॥ दशमे नवा शीतितमः ॥ वरमेतत्परमः श्रेष्ठो कृष्णलीला समाप्तः ॥ एवं सप्रस्तावानां मानं तस्य समकारणं ॥ श्रीकृष्णविश्रांति
समासेन दर्शयति सुखं स्वपुर्यामिति ॥ सर्वसंपदादिविशिष्टायां ॥ १ ॥

राम
१२६

श्रियः पतिः षोडशसहस्रपत्नीनामेकवल्लभः सन्नृतास्वांगेहेषु रेमे रत्यर्थमयं ॥५॥ गेहविशेषणं प्रोत्फुल्लेत्यादिश्लोकेन ॥६॥ तथा ह्रदिनीषु वङ्क्षुभो
विगाह्य विजहार महोदयो वै भवं वयस्यमः ॥ योषितां कुचकुंकुमैर्लिप्तांगः यतस्ताभिः परिरब्धः सूतमागधवंदिभिः स्तोत्रोपगीयमानः ॥७॥ ताः स्त्रि

ह्रीभिः स्त्रोत्तमवेषाभिर्नवयौवनकांतिभिः ॥ कंदुकादिभिर्हर्म्येषु क्रीडंतीभिः तडिद्द्युभिः ॥१॥ नित्यं संकुलमार्गायां मदच्युद्भि
र्मतंगजैः ॥ स्वलंकृतैर्भटैरश्वै रथैश्च कनकोज्ज्वलैः ॥२॥ उद्यानोपवनाढ्यायां पुष्पितद्रुमराजिषु ॥ निर्विशद्भृंगविहगैर्नादि
तायां समंततः ॥३॥ रेमे षोडशसाहस्रपत्नीनामेकवल्लभः ॥ तावद्विचित्ररूपोसौ तद्गेहेषु महर्द्धिषु ॥४॥ प्रोत्फुल्लोत्पलकह्लार
कुमुदांभोजरेणुभिः ॥ वासितामलतोयेषु कूजद्द्विजकुलेषु च ॥५॥ विजहार विगाह्यांभो ह्रदिनीषु महोदयः ॥ कुचकुंकुमलि
प्तांगः परिरब्धश्च योषितां ॥६॥ उपगीयमानो गंधर्वैर्मृदंगपणवानकान् ॥ वादयद्भिर्मुदा वीणां सूतमागधवंदिभिः ॥७॥ सि
च्यमानोच्युतस्ताभिर्हसंतीभिः स्म रेचकैः ॥ प्रतिसिंचन् विचिक्रीडे यक्षीभिर्यक्षराडिव ॥८॥ ततः क्लिन्नवस्त्रविवृतोरुकुचप्र
देशाः सिंचंत्य उद्धृतबृहत्कबरप्रसूनाः ॥ कांतं स्म रेचकजिहीर्षयोपगुह्य जातस्मरोत्सवलसद्वदना विरेजुः ॥१०॥

क्लिन्नवस्त्राः अत एव विवृतोरुकुचप्रदेशाः उद्धृतानि विस्रस्तानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः जातेन स्मरेणाय उत्सवः ॥ तेन लसंति
वदनानि यासां ताः ॥१०॥

२०३
१२७

तासामात्तनो मोविषज्जितकुंकुमाम्लानपम्पमतः ॥ क्रीडायास्त्रभिषंगेणाभ्रमिनिवेशेनकृतः कंपितः कुंतलहृद्दंरवंधोयस्पसः ॥ मुकुंदैकधियः समाहि
ताः स्वकृष्णमगिरः सत्यः एनत्तमेवमचितयंत्योऽ ड्डंयथामवतितथायानिवाक्यानिकुतूहलानिमेमकृोगरतः स्मृ त्यित्यर्थः ॥४॥ हे स्मरः श्रीकृष्णः त्वा
पिति त्वंहनिद्राभंगंकुर्वतीविलपसिनशेषेणात्स्वपिषितदहविनमित्यर्थः अथवानापराधत्तिवापीत्याशयेनाऽऽः नलिननयनस्पहासेनमहितंगरा

कृष्णाम्लातनत्तनविषज्जितकुंकुमम्स्वन्मक्रीडाभिषंगश्लथकुंतलबृंदबंधः सिवन्मुदुर्द्धवतिभिः प्रतिषिव्यमानोरेमेकरेणुभिरि
वेभपतिः प्रीतः ॥ ११ ॥ नटानांनर्त्तकीनांवगीतवाद्योपजीविनां ॥ क्रीडालंकारवासांसिकृष्णोदात्तस्पचस्त्रियः ॥ १२ ॥ कृष्णस्पैवंविहर
तोगत्यालापेक्षितस्मितैः नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणांकिलहृताधियः ॥ १३ ॥ ऊचुर्मुकुंदैकधियोगिरउन्मत्तवज्जडं चिंतयंत्योरविंदा
क्षंतानिमेगदतः शृणु ॥ १४ ॥ महिष्य ऊचुः कुररिविलपसित्वंवीतनिद्रानशेषेस्वपितिजगतिरात्र्यामीश्वरोगुप्तबोधः वयमिवसखि
कच्चिद्गाढनिर्भिन्नचेतानलिननयनहासोदारलीलेक्षितेन ॥ १५ ॥ नेत्रेनिमीलयसिनक्तमदृष्टबंधुस्त्वंरोरवीषिकरुणंबतचक्रवा
कि दास्पंगतावयमिवाच्युतपादजुष्टांकिंवास्रजंस्पृहयसेकबरेणवोढुं ॥ १६ ॥ भोभोसदानिष्टनसेउदन्वन्नलब्धनिद्रोधिगतप्रजागरः किं
वामुकुंदापहृतात्मलांछनः प्राप्तांदशांत्वंचगतोदुरत्ययां ॥
रंयद्लीलेक्षिततेनकाचिद्गाढंनिर्भिन्नचेतास्वपिति ॥ १५ ॥ नक्तंरात्रावदृष्टबंधुःसतीरोरवी
षि किंवां नेतावतःअपिचवयमिवस्पृहयसे ॥ १६ ॥ अलब्धनिद्रः सदानिष्टनसे क्रोशसि किंवास्माभिः प्राप्तांदशांत्वमपिगतोसि अहोकष्टयथावयंसंभोगेनमुकुं
दापहृतकुचकुंकुमादिलक्षणाः तथात्वमपियतोपहृतश्रीकौस्तुभादिलांछनोपिलक्ष्यसे ॥ १७ ॥

राम
१२८

पुष्पकंदगारितानि रहस्यानि विस्मृत्य तरेकचिंतया काश्चित्वं स्त्रीणां मित्रवयमिव स्रष्टगीतगीस्त्वं त्वा कृहे इंदोन स्त्वैथैवोपलक्ष्यसे ॥ १८ ॥ अप्रियावर
णाविनास्मरोदीरणेन व्यथाजननमलयानिलतवाउचितमित्यर्थः ॥ १९ ॥ मेद्येति ॥ आतपाग्निहरणारिमाम्पात त्वयारवेदस्पन्नं नंदयितः सखामि
अतो भवात्तं ध्यायति ॥ ध्याने लिंगान्याह ॥ अश्रुत्लकठ इत्यादि ॥ अहो किमिति त्वयातेन मास्वीकृतं यतोऽहं खेदस्तस्त्वमगादिति ॥ २० ॥ हे कोकिल ॥ प्रियतम

त्वंयत्स्मरणाबलवंतामिगृहीतं इंदोह्णीणस्त्वमोननिर्जरीघ्रितिभिः ह्रिणोषि ॥ काश्चित्समुकंदगारितानियच्छावयंत्वंविस्मृत्यमो
स्रष्टगीतगी उपलक्ष्यसे नः ॥ १८ ॥ किं त्वाचरितमस्माभिर्मलयानिलते प्रियम् ॥ गोविंदापरागनिर्मित्रे हृहदीरयसि नः स्मरम् ॥ १९ ॥
मेद्यश्रीमत्त्वमभिरयितो यारवेदस्पन्नं श्रीवत्सांकं वयमिव भवान् ध्यायति प्रेमवद्धः ॥ अश्रुत्लकठः शवलहृदयोः स्मादिग्धो
बाष्पधाराः स्मृत्वा स्मृत्वा विसृजसि मुहुर्दुःखदस्तस्यसंगः ॥ २० ॥ प्रियावपदानि भाषसे मृतसंजीविकयानया गिरा ॥ करवा
णिकिमद्य ते प्रियं वरमेवातकंठकोकिल ॥ २१ ॥ नवलतिनवरस्मृदारत्रुहे क्षितिधरचिंतयसे महांतमर्थीं अपिवत्तवत्स्वेदेवन
इन्नामिव चयमिव कामयसे मत्तेनेर्विधंटे ॥ २२ ॥

स्प्रियंवरस्य श्रीकृष्णस्य पदानीव पदानि शब्दात्त्वं भाषसे मृतानत्संजीवयतीति तथा तयानयाकोम
लया गिरा वलितकंठ मत्याय करमेकथय किं तव प्रियं करवाणीति ॥ २१ ॥ हे क्षितिधरत्वं नवदंष्ट्रितिनवलतिस्वं अतो रुनं महांतमर्थं चिंतयसे वत तर्हि अपि
किं वयं यथा त्वं नेविधत्ते कामयामहे तथा त्वं हस्तिनवल्लोः श्रृंगैर्वा इदं कामयसे ॥ अपिमिति चेन्नर्हि तवाप्यस्मदवस्थानविष्यतीति भावः ॥ २२ ॥

मोमिंधुपत्याः नद्यः संप्रतिग्रीष्मे सिंधुर्मेघद्वारा अस्ततः तृष्या उष्मान्नानंदयति वत अहो कष्टं ॥ अतः अष्यतो ज्ञारायाम्हाताः अपगतकमलसौभाः
कृशाश्च वयं यथा प्रियतमस्य मते मधुपतेः स्मरामिह्रं ॥२३॥ तेदेवदेवारागतं हे सहि तं कस्य इत्याह ॥ हे सेति ॥ नः अस्मात् प्रति उरारहसि उक्तं ॥ किंवाव
लसोहृदः स्मरति ॥ स्मृत्वेवमाश्रम्छापितवानिति चेत ॥ अत आह ॥ हे सौहृद् कृदस्मत्तकस्मादेतं वयमज्ञामः कामार्थमाह्वयति सुम्मराह्नेति चेत ॥ अत आ
हः अहो तर्हि तं इहालापयस्वाकारय उं मितिगच्छतमिवतं पुनराहः याः स्मातवंचयित्वा एकाकिनी रमते तां प्रियसृते तमेवालापय ॥ स्मातरेकनिष्ठाक

मुग्धहृदाः कशितावतसिंधुपत्याः संप्रत्यपास्तकमलश्रियइश्मतेः ॥ यद्दृद्दयं मधुपतेः प्रणयावलोकमप्राप्य मुग्धहृदयाः पुरुव
शिताः स्म ॥२४॥ हे सखागतमास्मतां प्रियपयोद्दृहं गशौरेः कथा हृतेत्वातविरामकाचिरजितः स्वस्त्यात्तउक्तं पुरा ॥ किंवानस्त्वलसोहृदः
स्मरति तं कस्मादज्ञामावयं त्वोडालापयकामदं प्रियसृते तेवेकनिष्ठा स्त्रिया ॥२४॥ इतिदृशेन भावेन कृष्णे योगेश्वरे ह्रुते ॥ क्रियमाणेन
माधव्यो लेभिरे परमां गतिम् ॥२५॥ अतमात्रोपियः स्त्रीणां सहस्त्र्या कषितेमनः ॥ उरुगायो रुगीतोवापश्यंतीनां कुतः पुनः ॥२६॥

यपरि हर्तुं शक्यतः इति चेत् तत्राह ॥ स्त्रियां जाता वेकवचनं ॥ अस्मात् स्त्रीषु मध्ये किं सैवेकनिष्ठा न तु वयमित्यर्थः पाठांतरे तु क्रोडं मधुतद्वन्मधुनाला
पमात्रयस्यतं अकामदं अरतिप्रदं प्रियसृतवयं कस्मादज्ञाम् ॥ किं तु अनादृताः पिसती पुनः पुनः सेवमजत ॥ यतोऽस्मादृश्यो मानितः स्त्रियएकनिष्ठः राम
एकैवेवसत्वसमानसिद्धो निश्चयामास मिति ॥२५॥ नासां कृष्णे एवं भूतो भावो नातिचित्रमित्याह ॥ अतमात्रोऽपीति ॥ उरुतिरीर्यगीतेः उरुधागीतोवायैः केश्चिदपि
गीतेर्यथाकथंचिदपि गीतो वेत्यर्थः ॥२६॥

प॰स्थाने ॥२८॥ याह रुक्मिणीप्रमुखास्ताः श्रेष्ठास्तासु राहृताः प्राक् ॥३०॥ एवमष्टोत्तरशताधिकषोडशसहस्रमहिषीणां पुत्राः लक्षमेकमशीत्युत्तरैकषष्टिसहस्रा णि भवंति ॥३१॥ अनिरुद्धश्चेति अतः पुत्राणां मध्ये प्रद्युम्नः श्रेष्ठो वेत्तेयाः अथवा निरुद्धनामापि कश्चित्पुत्र एवेति ॥३२॥ सहस्राणामपरिमितानां कुमाराणामित्यन्वयः

याः संपर्यवरत्नमणापादसंवाहनादिभिः ॥ जगद्गुरुं पतिं मुग्धानां किं वर्ण्यते तपः ॥२७॥ एवं वेदोदितं धर्ममनुतिष्ठन्सतां गतिः ॥ गृहं धर्मार्थकामानां मुहुश्चादर्शयेत्पदं ॥२८॥ आस्थितस्य परं धर्मं कृष्णस्य गृहमेधिनां ॥ आसन्षोडशसाहस्रमहिष्यश्च शताधिकाः ॥२९॥ तासां स्त्रीरत्नभूतानां श्रेष्ठा याः प्राग्दाहृताः ॥ रुक्मिणीप्रमुखा राजन्सत्यभामाश्चाष्ठपूर्वशः ॥३०॥ एकैकस्यां दशदश कृष्णोऽजीजनदात्मजान् ॥ यावत्य आत्मनो भार्या अमोघगतिरीश्वरः ॥३१॥ तेषामुद्दामवीर्याणामष्टादश महारथाः ॥ आसन्नुदारयशसस्तेषां नामानि मे शृणु ॥३२॥ प्रद्युम्नश्चानिरुद्धश्च दीप्तिमान्भानुरेव च ॥ सांबो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः ॥३३॥ पुष्करो वेदबाहुश्च श्रुतदेवः सुनंदनः ॥ चित्रबाहुर्विरूपश्च कविर्न्यग्रोध एव च ॥३४॥ एतेषामपि राजेंद्र तनुजानां मधुद्विषः ॥ प्रद्युम्न आसीत्प्रथमः पितृवद्रुक्मिणीसुतः ॥३५॥ स रुक्मिणो दुहितरमुपयेमे महारथः ॥ तस्मात्सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ॥३६॥ स चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः ॥ वज्रस्तस्याभवद्यस्तु मौशलादवशेषितः ॥३७॥ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्य चात्मजः ॥ सुबाहोः शांतसेनोऽभूच्छतसेनस्तु तत्सुतः ॥३८॥ न ह्येतस्मिन्कुले जाता अधना अबहुप्रजाः ॥ अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ॥३९॥ यदुवंशप्रसूतानां पुंसां विख्यातकर्मणां ॥ संख्या न शक्यते कर्तुमपि वर्षायुतैरपि ॥४०॥ तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च ॥ आसन्यदुकुलाचार्याः कुमाराणामिति श्रुतिः ॥४१॥ संख्यानं यादवानां कः करिष्यति महात्मनां ॥ यत्रायुतानामयुतलक्षेणास्ते स आहुकः ॥४२॥ देवासुराहवहता दैतेया ये सुदारुणाः ॥ ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे ॥४३॥ तन्निग्रहाय हरिणा प्रोक्ता देवा यदोः कुले ॥ अवतीर्णाः कुलशतं तेषामेकाधिकं नृप ॥४४॥

यदाचार्यैकं बहून्नध्यापयतामाचार्याणामियं संख्या तदापि छात्रमात्रं न तत्समस्पृहतायते तदा कुमाराणामेवं संख्यानकर्तुं शक्यतेऽतः अतः सर्वयादवानामिति ॥४२॥ ते चोत्पन्ना

इति श्रीभागवते महापुराणे [illegible] ॥

२०३
१२८

तस्मात्कृष्णकीर्त्तेः सर्वतीर्थोत्तमत्वं कृष्णस्यैव सर्वदेवोत्तमत्वं न चित्रमित्याह ॥ तीर्थं चक्र इति इतः पूर्वं स्वःसरिदेव सर्वतोधिकं तीर्थमित्यासीत् इदानीं तु यदुषु यदजनि जातं तत्तीर्थं श्रीकृष्णकीर्त्तिरूपं एतत्स्वःसरिद्रूपं पादशौचं तीर्थं ऊनमल्पं चक्रे ॥ स्वयमेव सर्वतीर्थोपरि विराजत इत्यर्थः श्रीकृष्णस्य विद्विषः स्निग्धाश्च तत्साम्यरूपं ययुरित्यपि न चित्रं तस्य परमकारुणिकत्वात् ॥ तथा इदं च न चित्रं ॥ किं तत् अजितपरा अजिता कैश्चिदप्यप्राप्या परा सर्वतः परिपूर्णा श्रीः कृष्णस्यैवनान्यस्येति ॥ तदेवाह ॥ यदर्थे अन्येषां ब्रह्मादीनां यत्न इति ॥ न तु निरपेक्षं तमेव लक्ष्मीः श्रयत इति चित्रमेवेति चेत् ॥ न हि परममंगलनामधेयत्वात्तस्येत्याह यन्नामेति ॥ तदपि नाश्चर्यं स्मरणापेक्षमित्याह ॥ श्रुतमथ गदितमिति ॥ सर्वधर्माश्रयत्वादपीत्याह ॥ यत्कृतो गोत्रधर्म इति गोत्रेषु तत्तदृषिवंशेषु धर्मो यत्कृतः

तेषां प्रमाणं भगवान्प्रभुत्वेनाभवद्धरिः ॥ ये चानुवर्त्तिनस्तस्य ववृधुः सर्वयादवाः ॥ ४५ ॥ शय्यासनाटनालापक्रीडास्नानाशनादिषु ॥ न विदुः संतमात्मानं वृष्णयः कृष्णचेतसः ॥ ४६ ॥ तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वःसरित्पादशौचं विद्विट्स्निग्धाः स्वरूपं ययुरजितपराश्रीर्यदर्थेन्ययत्नः ॥ यन्नामामंगलघ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः ॥ कृष्णस्यैतन्न चित्रं क्षितिभरहरणं कालचक्रायुधस्य ॥ ४७ ॥ जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मं ॥ स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्द्धयन्कामदेवम् ॥ ४८ ॥

येन प्रवर्त्तितः तस्य क्षितिभरहरणं नैव चित्रमित्याह ॥ कृष्णस्यैतदिति कालचक्रायुधस्येति सर्वसंहारककालमूर्त्तेर्विशेषतो ऽनंतप्रभावचक्रायुधस्य क्रियत इत्यर्थः ॥ ४७ ॥ यत एवंभूतः श्रीकृष्णः ततः स एव सर्वोत्तम इत्याह ॥ जयतीति ॥ जनानां जीवानां यो निवासः आश्रयः तेषु वा निवसति अंतर्यामितया तथा स कृष्णो जयति ॥ देवक्यां जन्मेति वादमात्रं यस्य सः यदुवराः पर्षत्सभा सेवकरूपा यस्य ॥ इच्छामात्रेण निरसनसमर्थोपि क्रीडार्थं दोर्भिरधर्ममस्यन् क्षिपन् ॥ स्थिरचरवृजिनघ्नः अधिकारिविशेषानपेक्षमेव वृंदावनगतस्थलतादीनां संसारदुःखहंता ॥ तथा विलासमेवेदं ध्यानापेक्षं व्रजवनितानां पुरवनितानां च सुस्मितेन श्रीमुखेन च कामदेवं वर्द्धयन् ॥ कामस्याभ्यासो दीव्यति विजिगीषति संसारमिति देवं तं भोगद्वारा मोक्षप्रदमित्यर्थः ॥ ४८ ॥

राम
१२८

द०उ
१२०

तत्रतत्कार्यविशेषैः स्वीकृतमत्स्यकूर्म्मादिनानामूर्त्तेर्विशेष तोयदूत्तमस्यातः परमस्यतदनुरूपाणिकारिणीकर्म्मक
षणानिकर्म्माणिचरितानिशृणुयात् श्रोतुमिच्छेदित्यर्थः अनुवृत्तेः फलमाह मर्त्यइति ॥ श्रीमत्याः कथायाश्रवण
इत्थंपरस्यनिजवर्त्मरिरक्षयात्तलीलातनोस्तद नुरूपविडंबनानि कर्म्माणिकर्म्मकषणानियदू
त्तमस्यश्रूयादमुष्यपदयोरनुवृत्तिमिच्छन् ४९ मर्त्यस्तयानुसवमेधितयामुकुंदश्रीमत्कथाश्र
वणकीर्त्तनचिंतयैति ॥ तद्धामदुस्तरकृतांतज वापवर्गंग्रामाद्वनंक्षितिभुजोपिययुर्यदर्थाः ॥ ५०
चित्तेनचैतदुरुगायपवित्रलीलाविधूतकल्म षकदेवकमुक्तिरूप ॥ स्वीणाहृडस्त्सजकृतांतज
वापवर्गंग्रामाद्वनंक्षितिभुजोपिययुर्यदर्थाः ॥ ५१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेश्रीकृष्ण
कीर्त्तनयुक्तयाचिंतयामवर्द्धितयातत्रस्मात्तयातत्रिश्रत्वेननस लीलाचरितानुवर्णनेनवतितमोध्यायः वरलीराम
धामलोकमेति ॥ लोकत्वेपिका लोनाकलितमित्याह दुस्तरेतिदुर्लभपुरुषार्थमाह ग्रामादिति ॥५१॥

राम
१२०

ईशाम॰ उत्तरार्द्धः पत्रे १३०

यानित्यमनुवर्त्ततेसंपदोविगताद्दृशः २

श्रीगणेशाय नमः ॥ ॐ नमः श्रीमत्परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय ॥ १ ॥ जयति श्रीपरानंदकृपा
पांगलसदृशः ॥ १ ॥ उक्ताद्वयो दशाध्यायैर्द्वादशे त्वाश्रयः स्मृतः ॥ अधिष्ठानावधित्वाभ्यामाश्रयः श्रीश्वरः स्मृतः ॥ २ ॥ उक्तो लयावधित्वेन प्राक्ता
त्यंतिके लये ॥ अधिष्ठानतया चोक्तो महापुरुषवर्णने ॥ ४ ॥ तत्रादौ षड्भिरध्यायैः शुकः प्राह परीक्षिते ॥ शेषेष्वत्र विलासान्याह सूतः शौनकादि
भिः ॥ ५ ॥ स्वाश्रयश्रवणोत्कार्यो न विलंबो मनीषिणा ॥ इत्युत्क्वा कालवैषम्यं चतुर्भिस्तावदुच्यते ॥ ६ ॥ तत्र तु प्रथमे भाविमागधान्वयभूमिपान्
कलिप्रभावतः प्राह सकरादिमलीमसान् ॥ ७ ॥ एवंभूते सोमवंशे तु कृष्णं देवैः क्रीडा वर्णिता व्यास एव ॥ वंशो भावी वर्ण्यते तत्स्म भक्तिं श्रुत्वा तु

राजोवाच ॥ स्वधामानुगते कृष्णे यदुवंशविभूषणे ॥ कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥ १ ॥ श्रीशुक उवाच ॥ योंत्यः
पुरंजयो नाम भविष्यो बारहद्रथः ॥ तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजं ॥ प्रद्योतसंज्ञं राजानं कर्ता यत्पाल
कः सुतः ॥ २ ॥

धोवर्त्मना हि तीति वक्ष्म ॥ ७ ॥ तदेवं वैवस्वतमनुवंशे सोमवंशप्रभावेन श्रीकृष्णावतारचरितानि सप्रपंचमनुवर्णिता
अथेदानीं भाविसोमवंशः कलौ विजातीयशकादिमलीमसो वैराग्यद्वारा श्रीकृष्णैकभक्तिनिगमनायानुवर्ण्यते ॥ तत्र तु सोमव
णावाहि चिरकालानुवर्तितया मागधवंशोऽनुक्रम्यते ॥ तत्र पूर्ववंशे उपरिचरो वसुस्तस्य बृहद्रथस्तस्य जरासंधस्तस्य सहदेवः पुत्रो भ
नेव सहदेवो ॥ तत्रैव सहदेवान्मार्जारिस्ततः श्रुतश्रवाः इत्यादयो रिपुंजयांता विंशतिर्भाविनो राजानो निरूपिताः ॥ १ ॥ तदुपरितनं वंश
प्रपंचयति योंत्य इति ॥ रिपुंजय एव पुरंजयः स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्रद्योतं राजानं करिष्यति ॥ यस्य पालको नाम सुतो भवि
ष्यति ॥ २

अद्योतनाः प्रद्योतसंज्ञाः ॥ २६ ॥ नंदो नाम कश्चिन्महापद्मसंख्यायाः सेनायाः धनस्य वा पतिर्भविष्यति ॥ स तएव महापद्मस्तत्पितस्वना
म ७ ॥ एकमेवछत्रं यस्यां तां पृथिवीं शासिष्यति पालयिष्यति ॥ क्षत्रोत्सादने हेष्टोतः भार्गवः परशुराम इव ॥ ८ ॥ समाः संवत्सरान् ॥ ९ ॥ नव

विशाखयूपस्तत्सुतो भविता राजकस्ततः ॥ नंदिवर्द्धनस्तत्सुतः पंचप्रद्योतना इमे ॥ अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृपाः ॥ २ ॥
शिशुनागस्ततो भाव्यः काकवर्णिस्तु तत्सुतः ॥ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥ ४ ॥ विधिसारः सुतस्तस्याजात
शत्रुर्भविष्यति ॥ दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥ ५ ॥ नंदिवर्द्धन आजेयो महानंदिः सुतस्ततः ॥ शिशुनागाद
शैवते षष्ट्युत्तरशतत्रयं ॥ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥ ६ ॥ महानंदिसुतो राजन् शूद्रीगर्भोद्भवो बली ॥ महापद्म
पतिः कश्चिन्नंदः क्षत्रविनाशकृत ॥ ततो नृपा भविष्यंति शूद्रप्रायास्त्वधार्मिकाः ॥ ७ ॥ स एकच्छत्रां पृथिवीमनुल्लंघितशा
सनः ॥ शासिष्यति महापद्मो द्वितीय इव भार्गवः ॥ ८ ॥ तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः ॥ य इमां भोक्ष्यंति म
हीं राजानश्च शतं समाः ॥ ९ ॥ नव नंदान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्या भोक्ष्यंति वै कलौ
स एव चंद्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥ तत्सुतो वारिसारस्तु ततस्त्वशोकवर्द्धनः ॥ ११ ॥ सुयशा भविता तस्य संगतः सुय
नंदान् ॥ नंदं च तत्सुतांश्चेत्येवं नव ॥ प्रपन्नान् विश्वस्तान् विख्यातान्नव ॥ द्विजः कौटि शः सुतः ॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति
ल्यवात्स्यायनादिपर्यायश्चाणक्य उद्धरिष्यति ॥ उन्मूलयिष्यति ॥ मौर्याः मौर्यसंज्ञाः ॥ १० ॥ कथं भोक्ष्यंति तदाह स एवेति ॥ चंद्रगुप्तं मौर्यप्रथमं ॥ १२ ॥

भा० द्वा
१

तेषां प्रथमो दशरथः पराशरादिभिरुक्तोः आप्यन्तु संधेयस्तेन सह मौर्या दश सप्तत्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरं शतं समाः ॥१२॥१४॥१५॥ बृहद्रथस्य सेनापतिः पुष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति ॥ स च शुंगानां प्रथमः ततोग्निमित्रादयो नव ते च शुंगाः दश वर्षशताधिकं द्वादशाधिकं वर्षशत ॥१६॥ कथं काण्वान् यास्यतीत्यत आह शुंगमिति ॥ परस्त्रीकामिनं देवभूतिनामानं शुंगं हत्वा तदमात्यो वसुदेवनामा काण्वो राज्यं

शतधन्वा ततस्तस्य भविता तद्बृहद्रथः ॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं ॥ समा भोक्ष्यन्ति पृथिवीं कलौ कुरुकुलोद्वह ॥

स्त

अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः ॥ वसुमित्रो भद्रकश्च पुलिंदो भविता सुतः ॥१४॥ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ ततो भागवतस्तस्माद्देवभूतिरिति श्रुतः ॥१५॥ शुंगा दशैते भोक्ष्यन्ति भूमिं वर्षशताधिकं ॥ ततः काण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप ॥१६॥ शुंगं हत्वा देवभूतिं काण्वोऽमात्यस्तु कामिनं ॥ स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥१७॥ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥ काण्वायना इमे भूमिं चत्वारिंशच्च पंच च ॥ शतानि त्रीणि भोक्ष्यन्ति वर्षाणां च कलौ युगे ॥१८॥ हत्वा काण्वं सुशर्माणं तद्भृत्यो वृषलो बली ॥ गां भोक्ष्यत्यंध्रजातीयः कंचित्कालमसत्तमः ॥१९॥ कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः ॥ श्रीशांतकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥२०॥ लंबोदरस्तु तत्पुत्रस्तस्माच्चिबिलिको नृपः ॥ मेघस्वातिश्चिबिलिकादटमानस्तु तस्य च ॥२१॥ अनिष्टकर्मा हालेयस्तलकस्तस्य चात्मजः ॥ पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनंदनः ॥२२॥

काण्वः स्यामिति ॥१७॥ काण्वानां चतुर्थः सुशर्मा इमे वसुदेवादयः काण्वायनाः वर्षाणां त्रीणि शतानि पंचचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यंति ॥१८॥ काण्वानामंत्यम

तिमं सुशर्माणं हत्वा बलिहिकनामा तद्भृत्यो गां भोक्ष्यंति ॥१९॥२१॥२२॥

२

पत्रयपङ्कवङ्कुमतस्तेषु अष्टस्तु नवमः शिवस्वातिनामा भविता ॥२२॥२५॥ आवभृत्याः अवभृतिर्नगरी तद्राजानः ॥२६॥७॥ एते अभीरादयो मौनव्यति
रिक्ताः पंचषष्टिर्नृपाः एकोनशताधिकं वर्षसहस्रं पृथिवीं भोक्ष्यंति ॥ ततः पूर्वोक्ता एवैकादश मौनाः त्रीणि पर शतानि क्षितिं भोक्ष्यंति तैः
संस्थिते तेषु मौनेषु मृतेषु ॥२८॥ किलिकिलायां उर्यो नृपतयो भविष्यंति तन्नरेशात्वयः ॥२९॥ अधिकानि वर्षाद्वर्षाणि ॥ तेषां भूतनंदादीनां

वंकोरनवमोपत्रशिवस्वातिरिंदमः ॥ तस्यापि गोमतीपुत्रः पुरीमान् भविता ततः ॥२२॥ मेदःशिराः शिवस्कंधो यज्ञश्रीस्तत्सुत
स्ततः ॥ विजयस्तत्सुतो भाव्यश्चंद्रविज्ञः सलोमधिः ॥२४॥ एते त्रिंशन्नृपतयश्चत्वार्यब्दशतानि च ॥ षट्पंचाशाच्च पृथिवीं भो
क्ष्यंति कुरुनंदन ॥२५॥ सप्ताभीरा आवभृत्या दशगर्दभिनो नृपाः ॥ कंकाः षोडश भूपाला भविष्यंत्यतिलोलुपाः ॥२६॥ त
तोष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः ॥ भूयो दशगुरुंडाश्च मौना एकादशैव तु ॥२७॥ एते भोक्ष्यंति पृथिवीं दशवर्षशता
नि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिं ॥ भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः ॥२८॥ किलिकिलायां नृपतयो
भूतनंदोथ वंगिरिः ॥ शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः ॥ इत्येते वर्षशतं भविष्यंत्यधिकानि षट् ॥२९॥ तेषां त्रयोद
श सुता भवितारश्च बाह्लिकाः ॥ पुष्पमित्रोथ राजन्यो दुर्मित्रोथ तथैव च ॥३०॥ एककाला इमे भूपाः सप्तांध्राः सप्त कौशलाः ॥

यथायथं बाह्लिकास्तत्रामानत्रयोदशसुता भविष्यंति ॥ अथ पुष्पमित्रो नामान्यो राजन्यः वैदूरपतयो भाव्या नैषधास्तत एव हि ॥३१॥
अस्य च दुर्मित्रो नाम पुत्रः ॥३०॥ तथा आंध्राः कौशलाः वैदूरपतयः नैषधाश्च ॥ एते च तत्तद्देशनामभिः प्रख्याता अल्पकालाः खंडमंडलेषु भूपाः
तत एव ते च बाह्लिकेभ्य एव भविष्यंति ॥३१॥

ततश्च मागधानां राजा विश्वस्फूर्जिर्नाम भविता ॥ स च पूर्वोक्तात्पुरंजयात्परः पुरंजय इति प्रसिद्धः स च वर्णान् ब्राह्मणादीन् पुलिंदयदुमद्रकसंज्ञा न्म्लेच्छप्रायान्करिष्यति ॥ अपरानिति पाठे अन्यान् पुलिंदादिसंज्ञान् वर्णान्करिष्यतीत्यर्थः ॥ ३१ ॥ स च एवं कृत्वा अब्रह्मभूयिष्ठा अत्रैव वापि प्रदुराः मतीः प्रजाः स्थापयिष्यति ॥ पालयिष्यति ॥ स च पद्मवत्यां पुरि ॥ अनुगंगां गंगाद्वारमारभ्य प्रयागपर्यंतां गुप्तां पालितां मेदिनीं भोक्ष्यति ॥ ३२ ॥ तत

मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यत्यपरो वर्णान् पुलिंदयदुमद्रकान् ॥ ३२ ॥ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥ वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ अनुगंगामाप्रयागं गुप्तां भोक्ष्यति मेदिनीं ॥ ३३ ॥ सौराष्ट्रावंत्याभीराश्च शूद्रा अर्बुदमालवाः ॥ व्रात्या द्विजा भविष्यंति शूद्रप्राया जनाधिपाः ॥ ३४ ॥ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं ॥ भोक्ष्यंति शूद्रा व्रात्याद्याः म्लेच्छाश्चाब्रह्मवर्चसः ॥ ३५ ॥ तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः ॥ एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ ३६ ॥ स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः ॥ उदितास्तमितप्राया अल्पसत्वाल्पकायुषः ॥ ३७ ॥ असंस्कृताः क्रियाहीना रजसा तमसावृताः ॥ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ॥ ३८ ॥ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योन्यतो राजभिश्च क्षयं यास्यंति पीडिताः ॥ ३९ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे प्रथमोऽध्यायः ॥

ततश्च सौराष्ट्रादिदेशवर्तिनो द्विजाः व्रात्या उपनयनरहिता भविष्यंति ॥ ३४ ॥ अब्रह्मवर्चसः वेदाचारशून्याः ॥ ३५ ॥ इमे च म्लेच्छप्राया भूभृतः तुल्यकाला भविष्यंति ॥ किंच एते सर्वे अधर्मानृतपराः अधर्मे अनृते च परिनिष्ठिताः फल्गुदाः अल्पदातारः ॥ ३६ ॥ उदितास्तमितप्रायाः हर्षशोकादिव्याकुलाः ॥ ३७ ॥ असंस्कृताः गर्भाधानादिसंस्काररहिताः प्रजाः भक्षयिष्यंति ॥ धनाद्यपहारादिना पीडयिष्यंति ॥ ३८ ॥ किंच ॥ तन्नाथाः ते नाथा येषां ते ॥ जनपदाः देशवासिनो मनुष्याः तच्छीलाचारवादिनः ॥ तेषामेव शीलमाचारो वादश्च तत्तद्वतः ॥ ३९ ॥ इति द्वादशे प्रथः ॥

[illegible]पेतकलेर्दोषवृद्धौ कल्क्यवतारतः ॥ अधर्मिष्ठे जने नष्टे पुनः कृतयुगागमः ॥ कलिधर्मान्प्रपंचयतितत्स्थेत्यादि
[illegible] ॥ १ ॥ धर्मन्यायप्रयोर्व्यवस्थायां बलमेव ॥ १ ॥ दांपत्योपतिभावेऽभिरुचिरेव हेतुः ॥ न कुलगोत्रादिः व्यावहारिके च प
विक्रयादौ ॥ स्त्रीत्वे पुंस्त्वे च तयोः श्रेष्ठो रतिकौशलमेव हेतुर्न कुलमाचारो वा ॥ ३ ॥ आश्रमाणां व्योतो लिंगमेव दंडाजि

सु ॥ ३ ॥ च ॥ ततश्चानुदिनं धर्मः सत्यं शौचं क्रमादया ॥ कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः
वित्तमेव कलौ नॄणां जन्माचारगुणोदयः ॥ धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥ २ ॥ दां
पत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ॥ स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥ ३ ॥ लिं
गमेवाश्रमख्यातावन्योन्यापत्तिकारणं ॥ अवृत्त्या न्यायदौर्बल्यं पांडित्ये चापलं वचः ॥ ४

नारिकं ॥ हेतुर्नत्वाचारविशेषः अन्योन्यापत्तिकारणं वस्त्राश्रमादावाश्रमांतरप्राप्तौ च कारणं ॥ यद्वा वहूदकं हंसादीनामन्यो
न्यापत्तौ नमस्कारादिव्यवहारे कारणं ॥ अवृत्त्या मुद्रार्पणादिहानात्सामर्थ्ये न न्यायदौर्बल्यं पराजयः ॥ चापलं वचः बहुभा
षणं ॥ ४

असाधुत्वे वोर्ध्वाद्यभियोगे ॥ प्रसाधनमलंकारः दूरेवर्त्तमानं वार्य्यजनं जलाशयप्रातीर्थं न तगुर्वादिः ॥ स्वार्थः पुरुषार्थः ६

अनाढ्यतैवासाधुत्वे साधुत्वे दंभ एव तु ॥ स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं ॥ ५ ॥ दूरे वार्य्ययनं तीर्थं लावण्यं केशधारणं ॥ उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ॥ ६ ॥ दाक्ष्यं कुटुंबभरणं यशोर्थे धर्मसेवनं ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले ॥ ७ ॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ॥ ८ ॥ आछिन्नदारद्रविणा यास्यंति गिरिकाननं ॥ शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ॥ ९ ॥ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः ॥ शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः ॥ १० ॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव संतप्स्यंते च चिंतया ॥ त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणां ॥ ११ ॥

१ ॥ ८ ॥ आछिन्ना अपहृता दारा द्रविणानि च यासां ता आष्टिर्बीजं ॥ ९ ॥

क्षीयमाणेष्वित्यादिना इत्थंकलौगतप्राय इति पंचमेनान्वयः क्षीयमाणेषु अल्पप्रमाणेषु ॥१२॥ दस्युप्रायेषु चौरतुल्येषु
चौर्यानृतवृथाहिंसायानानावृत्तयोयेषांतेषु ॥१३॥ छागप्रायाः छागप्रमाणाः अतः क्षीरतः छागतुल्याः ॥१४॥ स्थास्नुषु वृ

क्षीयमाणेषुदेहेषुदेहिनांकलिदोषतः ॥ वर्णाश्रमवतांधर्मेनष्टेवेदपथेनृणां ॥१२॥ पाषंड
प्रचुरेधर्मेदस्युप्रायेषुराजसु ॥ चौर्यानृतवृथाहिंसानानावृत्तिषुवैनृषु ॥ ॥१३॥ शूद्रप्राये
षुवर्णेषुछागप्रायासुधेनुषु ॥ गृहप्रायेष्वाश्रमेषुयौनप्रायेषुबंधुषु ॥ ॥१४॥ अणुप्रा
यास्वोषधीषुशमीप्रायेषुस्थास्नुषु ॥ विद्युत्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु ॥ ॥१५॥ इत्थंक
लौगतप्रायेजनेषुखरधर्मिषु धर्मत्राणायसत्त्वेनभगवानवतरिष्यति ॥ ॥१६॥ ॥

क्षेषु ॥ विद्युत्प्रायेषुतडिद्वज्ज्वलेषुशून्यप्रायेषुधर्मादिरहितेषुसद्मसुगृहेषु ॥१५॥ जनेषुखरधर्मिषुदुःसहचेष्टितेषुकलौ
गतप्रायेसमाप्तप्राये ॥१६॥

भा॰ द्वा एतस्य पंचपतिचतुर्भिः ॥ चराचरगुरोः ईश्वरस्यैव ॥ धर्मत्राणे हेतुः ॥ गुरुत्वेश्वरत्वयोरुपपादनं ॥ अखिलस्य विश्वस्या-
५ त्मनः कारणस्येति ॥ पंचभूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय ॥ धर्मत्राणप्रयोजनमाह कर्मापनुत्तये मोक्षाय ॥ ८

चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्म कर्मापनुत्तये ॥ १७ ॥ शंभ- णा
ण लग्राममुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥ १८ ॥ अ-
श्वमाशुगमारुह्य देवदत्तं जगत्पतिः ॥ असिनासाधुदमनमष्टैश्वर्यगुणान्वितः ॥ १९ ॥

शंभलग्राममुख्यस्य प्रधानस्य नाम्ना विष्णुयशसो ब्राह्मणस्य भवने गृहे ॥ १८ ॥ धर्मत्राणप्रकारमाह अश्वमिति ॥ असा-
धवो दम्यते येन तमश्वमारुह्यासिना दस्यून् कोटिशो निहनिष्यतीत्यन्वयः ॥ असाधुदमन इति पाठे कल्किविशेषणं राम
॥ १९ ॥ ५

नृ[illegible]ः ॥ आशुगेनाशुगामिना तेन हयेन ॥ क्षौण्यां विचरन् ॥ अप्रतिमा यष्टैश्वर्य्या द्युतिर्यस्य स तथा सत्यसंकल्पादयः ते ह्विताः नृपलि-
ङ्गच्छदः राजवेषप्रच्छन्नान् ॥ २० ॥ ततश्चाउनः कृतयुगप्रवृत्तिं वक्तुमाह ॥ अथेति सार्द्धाभ्यां तेषां पौरजानपदानां मनांसि विशदानि
भविष्यंति ॥ तत्र हेतुः वासुदेवस्याङ्गरागोऽङ्गरागं चन्दनादि तेन अतिपुण्यगंधोऽनिलः तं स्पृशंतीति तथा तेषां ॥ २१ ॥ स्थविष्ठः स्थूलः ॥ २२ ॥ कृ-
तयुगप्रवृत्तिमाह ॥ यदावतीर्ण इति ॥ प्रजानां सूतिः प्रसूतिः ॥ २३ ॥ तदवतारकालोपलक्षणमाह ॥ यदा चंद्रश्चेति ॥ तिष्यः पुष्यः ॥

विवरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिंगछदो दस्यून् कोटिशो निहनिष्यति ॥ १९ ॥ अथ तेषां भविष्यंति मनां-
सि विशदानि वै ॥ वासुदेवांगरागातिपुण्यगंधानिलस्पृशां ॥ २० ॥ पौरजानपदानां वै हतेष्वखिलदस्युषु ॥ तेषां
प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥ वासुदेवे भगवति सत्त्वमूर्त्तौ हृदि स्थिते ॥ २१ ॥ यदावतीर्णो भगवान्
कल्किर्धर्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सात्त्विकी ॥ २२ ॥ यदा सूर्यश्च चंद्रश्च तथा तिष्यबृह-
स्पती ॥ एकराशौ समेष्यंति तदा भवति तत्कृतं ॥ २४ ॥ येऽतीता वर्त्तमाना ये भविष्यंति च पार्थिवाः ॥ ते त उद्देशतः
प्रोक्ता वंशीयाः सोमसूर्ययोः ॥ २५ ॥

अयमर्थः ॥ चंद्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रयोगः तदा ततः कृतयुगं भविष्यतीति ॥ यद्यपि प्र-
ति द्वादशाब्दे कर्कराशौ बृहस्पतौ वर्त्तमाने द्विवात्वमावास्याहते तेषां त्रयाणामपि पुष्ययोगः संभवति तथापि तेषां सह प्रवेशो-
त्र विवक्षितः समेष्यंतीति वचनात् ॥ अतो नातिप्रसंगः ॥ २४ ॥ एवं नवमस्कंधमारभ्यानुक्रांतं ॥ वैवस्वतमनोर्वंशद्वयं निगमयति ये

कलियुगावान्तरविशेषं वक्तुमाह । आरभ्येत्यादिना वर्षसहस्रं पंचदशोत्तरं शतं चेति कथापि विवक्षयाऽवान्तरसंख्येयं वक्तव्या परीक्षि
त्प्रभृति नन्दाभिषेकान्तं वर्षाणां सार्द्धसहस्रं भवति । यतः परीक्षित्समकाले मागधं मार्ज्जारिमारभ्य रिपुंजयान्ता विंशति राजानः सहस्रं सं
वत्सरं भोक्ष्यन्तीत्युक्तं । नवमे ह्यध्याये बार्हद्रथा भूपालाः भाव्याः सहस्रं वत्सरमिति । ततः पंच प्रद्योतनाः अष्टत्रिंशदुत्तरं शतं शिशुनागाश्च षष्
ट्युत्तरं शतत्रयं । भोक्ष्यन्ति पृथिवीमित्युक्तत्वात् ॥ २६ ॥ कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह । सप्तर्षीणां त्विति । अय
मर्थः । आगस्त्यसकटाकारं ताराष्टकं सप्तर्षिमंडलं किंचिदुत्तरे तेषामग्रस्थानीयो मरीचिः ततः पश्चाद्दाने मत्रिगकं धराकारो वशिष्ठः स

आरभ्य भवतो जन्म यावन्नंदाभिषेचनं । एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं ॥ २६ ॥ सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि । त
योस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥ २७ ॥ तेनैव ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणां । ते त्वदीये द्विजाः काले अधुना चाश्रि
ता मघाः ॥ २८ ॥ विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः । तदाविशत्कलिर्लोकं पापे यद्रमते जनः ॥ २९ ॥ यावत्स पाद
पद्माभ्यां स्पृशन्नास्ते रमापतिः । तावत्कलिर्वै पृथिवीं पराक्रांतुं न चाशकत् ॥ ३० ॥ यदा देवर्षयः सप्त मघासु विचरंति हि । तदा

मार्थ्यः एवं स्थिते तेषां मध्ये यौ पूर्वौ उदयसमये प्रथमं दृदितौ पुलहक्रतू संहितौ तयोस्तु मध्ये प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥ ३१ ॥
दक्षिणोत्तरः समरेखावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते ॥ २७ ॥ तेन नक्षत्रेण युक्ता नृणां मानेन शतं तिष्ठंति
ते त्वदीये काले अधुना मघा आश्रित्य वर्तंते ॥ २८ ॥ तेषु मघास्ववस्थितेषु वर्तमानेषु सत्सु यदा विष्णोर्भानुः भातीति भानुः शुद्धसत्त्वात्मको देहः दिवं वैकुंठम
गात् तदा कलिर्लोकमविशत् । यतो यस्मिन् युगे जनः पापे रमत इति कलियुगस्य लक्षणं ॥ २९ ॥ ननु श्रीकृष्णे पृथिव्यां वर्तमाने विरुद्धाख्यरूपेण कलि
प्रविष्ट एवासीत् । सत्यं । न तथा तावदस्य पराक्रमो नाभवदित्याह । यावदिति । पराक्रान्तुमभिभवितुं ॥ ३० ॥ अतो यथोक्त एव कलिप्रवेशकाल इत्याह । यदा देवर्षय इति
द्वादशाब्दशतात्मक इति दिव्येन मानेन संध्यासंध्यांशाभ्यां सह द्वादशसहस्रात्मकः स कलिः । तदा संध्यामतिक्रम्य प्रवृद्ध इत्यर्थः ॥ ३१ ॥

२·५ तेषामग्रस्थानीयो मरीचिः ततः पश्चाद्वशिष्ठस्ततः अत्रिः तारा स्वपुरुधर अंगिरा ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः ततः उत्तरतः क्रतुः ५

कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह ॥ यदेति ॥ यदा प्रद्योतनात्प्रभृति वृद्धिं गमिष्यतीत्यर्थः ॥ २१ ॥ ननु यदा कलेर्लिंगमुपलब्धं तदैव प्रविष्ट इत्युक्तं ततः ॥ ततः पूर्वमेव प्रवेशः ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह ॥ यस्मिन्निति ॥ प्रतिपन्नं प्रविष्टमिति तेनात ॥ श्रीविदः पूर्वेत्तातारः ॥ २३ ॥ कलेरनंतरं कृतयुगप्रवेशमाह दिव्याब्दानामिति ॥ चतुर्थ्यां कलेः प्रवेशनाद्यपरिमिते नाशेनापि महातीतेषु सत्स्वित्यर्थः ॥ कृतयुगप्रवेशचिह्नमाह ॥ यदा नृणां मनः आत्मप्रकाशकं भविष्यति तदेति ॥ २४ ॥ राजवंशोक्तांछिनिब्राह्मणादिवंशेषु यतिदिश

यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः ॥ तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥ २२ ॥ यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि ॥ प्रतिपन्नं कलियुगमिति प्राहुः श्रीविदः ॥ २३ ॥ दिव्याब्दानां सहस्रांते चतुर्थ्ये तु पुनः कृतं ॥ भविष्यति यदा नृणां मन आत्मप्रकाशकं ॥ २४ ॥ इत्येष मानवो वंशो यथा संख्यायते भुवि ॥ तथा विट्शूद्रविप्राणां तानानेयापुरोगमुगे ॥ २५ ॥ एतेषां नामलिंगानां पूरुषाणां महात्मनां ॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥ २६ ॥ देवापिः शांतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः ॥ कलापग्राममाश्रित्य महायोगबलान्वितौ ॥ २७ ॥ तावहेत्य कलेरंते वासुदेवानुशिक्षितौ ॥ वर्णाश्रमप्रतिष्ठां च धर्मं पूर्ववत्स्थापयिष्यतः ॥ २८ ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं ॥ अनेन क्रमयोगेन भुवि प्राणि भवन्ति ते ॥ २९ ॥

ति इत्येष इति ॥ यथायथापि ह्वनीचावस्थाभिः नानावस्थाः वंश इति वपाठः ॥ २५ ॥ एतत्कीर्तनस्य वैराग्योपयोगितामाह ॥ एतेषामिति ॥ नामैव लिंगं ज्ञापकं येषां तेषां कथामात्रेणावशिष्टानां कीर्तिरेव स्थिता न तु राज्यं पुत्रादयो वा ॥ २६ ॥ कलावुत्सन्नानां राजवंशादीनां पुनः प्रवृत्तिप्रकारमाह ॥ देवापिरिति सोमवंशजः मरुस्तु सूर्यवंशजः ॥ कलापग्रामो नाम योगिनामावासः प्रसिद्धः ॥ २७ ॥ २८ ॥ इममेव प्रकारं

भा॰ द्वा

एतेषां नामलिंगानामित्यादिरियद्दुक्तं तत्प्रपंचयति राजन्निति पंचभिः ॥ ४० ॥ ममत्वं कृत्वेत्यनेन प्रलुब्धितां भूतद्रोहप्रवृत्तिं निरस्ति क्षितीति राजन्नाम्ना राजेति नाम यस्य तस्यापि देहस्यान्ते क्रिमयो विष्ठां भस्मेति वा संज्ञा भविष्यति तत्कृते तदर्थं यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद कुत इत्यपेक्षायां हेतुत्वेन ॥ भूतद्रोहे हि निरयोऽस्ति यतो भूतद्रोहान्निरयो भवतीति ॥ ४१ ॥ ममत्वप्रकारं प्रपंचयति कथमिति सेयमखंडा भूः मे पूर्वजैः ॥ हवैः धनादिसत्ताः इदानीं मत्पूर्वा चसत्ती मत्पुत्रादेः कथं स्यादित्येवं ॥ ४२ ॥ उभौ महीकायं च स्वदर्शनं मृत्यु ॥ ४३ ॥ उपसंहरति येयेऽति तेसर्वे चक्र

राजन्ते ते मया प्रोक्ता नरदेवास्तथापरे ॥ भूमौ ममत्वं कृत्वान्ते हित्वेमां निधनं गताः ॥ ४० ॥ कृमिविड्भस्मसंज्ञान्ते राजनाम्नोऽपि यस्य च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ ४१ ॥ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा ॥ ४२ ॥ तेजोऽबन्नमयं कायं गृहीत्वात्मतयाऽबुधाः ॥ महीं ममतया चोभौ हित्वान्तेऽदर्शनं गताः ॥ ४३ ॥ ये ये भूपतयो राजन् भुंजन्ति भुवमोजसा ॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥ ४४ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे द्वितीयोऽध्यायः ॥ २ ॥ ७ ॥ दृष्ट्वात्मनि जये व्यग्रान्नृपान् हसति भूरियं ॥ अहो मा विजिगीषन्ति मृत्योः क्रीडनका नृपाः ॥ १ ॥ काम एष नरेन्द्राणां मोघः स्याद्विदुषामपि ॥ येन फेनोपमे पिंडे येऽतिविश्रम्भिता नृपाः ॥ २ ॥ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः ॥ ततः सचिवपौराप्तकरीन्द्रानस्य कंटकान् ॥ ३ ॥

राज्ञ क्रियमाणानां कथामात्रा कालेन कृताः ॥ ४४ ॥ इति द्वादशे द्वितीयः ॥ तृतीये भूमिगीतैश्च राज्यदोषादिवर्णिते कलौ च दोषभूयिष्ठे दोषहंत्री ॥ कीर्तिः ॥ दे हे ॥ हेतौ भूमौ ममतां त्याजयितुं तत्त्वप्रश्नो इत्युक्तं तदेव भूमिगीतैः प्रपंचयति दृष्ट्वेत्यादिना आत्मनि स्वविजये व्यग्रान्नृपान् दृष्ट्वा ॥ हास प्रकारं आह अहो इति ॥ १ ॥ येन फेनोपमे पिंडे देहे विश्रम्भिता विश्वासं नीतास्तेषां नरेन्द्राणामेव कामो मोघ एव स्यात् ॥ २ ॥ काममेव दर्शयति द्वा ॥ भिरिति ॥ इंद्रियार्थैः सह स्थितं राज्यं प्राप्नुयामिति ॥ षड्वर्गं निर्जित्य राजमंत्रिणो जेष्यामः वशीकरिष्यामः सचिवामात्याः करीन्द्रा

७

ए[illegible]चिराशाबद्धहृदयाः ॥४॥ एवं केचित्तु नर्माजित्वाप्यातितस्मयाऽब्धिं विशंति ॥ तदेव मिंद्रियजयेनयेराज्यं प्राप्य पितृमिछंति तेति प्रसा
इत्याह किमयरिति ॥५॥ अतः अतः केन पश्यंती तु संकेतदेवाहयामिति ॥ कुहद्वहेति भूमिर्गीतं कथयन्स्तुवः संबोधयति ॥ कुलोद्वह इति पाठः
हगमः ॥६॥ अत्तद्वयइत्युक्तं तत्र पचयति मत्कृते इति ॥७॥ ८॥ रामोनाम कश्चिद्राजा यद्वा लोकदृष्ट्या दाशरथिरेव निर्दिष्टः ॥९॥ लोकं रापयति

एवं क्रमेण राज्येष्वासमः पृथ्वी सागरमेखलां ॥ इत्याशाबद्धहृदया न पश्यंत्यंतिकेंतकं ॥४॥ समुद्रावरणां जित्वा मां विशंत्यब्धिमोजसा
किमयं यात्मजयस्यैतन्मुक्तिरात्मजये फलं ॥५॥ यां विसृज्यैव मनवः तत्सुतास्त्वं कुहद्वह ॥ गता यथागतं मूढैस्तां मां जेष्यंत्यबुद्धयः
मत्कृते पितृपुत्राणां भ्रातृणां चापि विग्रहः ॥ जायतेत्यंतमत्ता राज्ये ममताबद्धचेतसां ॥७॥ ममैवेयं मही कृत्स्ना न ते मूढेति वादिनः
स्पर्धमाना मिथो घ्नंति म्रियंते मत्कृते नृपाः ॥८॥ पृथुः पुरूरवा गाधिर्नहुषो भरतोर्जुनः ॥ मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः
तृणबिंदुर्ययातिश्चाशर्यातिः शंतनुर्गयः ॥ भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः ॥१०॥ हिरण्यकशिपुर्वृत्रो रावणो
लोकरावणः ॥ नमुचिः शंबरो भौमो हिरण्याक्षोऽथ तारकः ॥११॥ अन्ये च बहवो दैत्या राजानो ये महेश्वराः ॥ सर्वे सर्वविदः शूराः स
र्वे सर्वजितोऽजिताः ॥१२॥ ममतामप्यवर्त्तन्त कृत्वा ये मन्यधर्मिणः ॥ कथावशेषाः कालेन ध्वस्तार्थाः कृता विभो ॥१३॥ कथा इमास्ते
कथिता महीयसां वितायलोकेषु यशः परेषां ॥ वितानवैराग्यविवक्षया विभो वचो विभूतीन्न तु पारमार्थ्यं ॥१४॥

ऐरयतीति लोकरावणः ॥१०॥ ममतामिदं ममेति ममतां कृत्वा प्रवर्त्तन्त आवर्त्तयंत ॥ ते कालेन कथावशेषाः कृताः ॥ विभो इति संबोधनं ॥ कुहद्वहेतिवत ॥११॥ राज
वंशानुकथनस्य तात्पर्यमाह कथा इमा इति ॥ वितानं विषयाभावस्तात्तानं ततो वैराग्यं तयोर्विवक्षया परेषां मृतानां वचो विभूतीः ॥ वाग्विलासमात्ररूपाः

भा॰ द्वा॰

कस्तर्हि पुरुषाणामुपादेयः परमार्थस्तमाह॥ यत्त्विति॥ नित्यं प्रत्यहं तत्राप्यभीक्ष्णं॥१५॥ कलिदोषोपचये सति भक्तेरसंभवं मन्यमानः पृच्छ
ति॥ केनोपायेनेति विधमिष्यंति नाशयिष्यंति॥ यथा यथावत्॥१६॥ कलियुगैकः परमो धर्म इति वक्तुं तस्य पृच्छति॥ युगानीति ब्रूहीत्यनुषं
गः॥ आत्यंतिकजिज्ञासया पुनः पृच्छति॥ प्रलयकल्पयोः संहारस्थितिकालयोः॥ नचायं बहिर्मुखैः प्राप्य इत्याह कालस्येति॥१७॥ तत्र युग

यत्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममंगलघ्नः॥ तमेव नित्यं शृणुयादभीक्ष्णां कृष्णेऽमलां भक्तिमभीप्समानः
॥१५॥ राजोवाच॥ केनोपायेन भगवन् कलेर्दोषान् कलौ जनाः॥ विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मुने॥१६॥ युगानि
युगधर्मांश्च मानं प्रलयकल्पयोः॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः॥१७॥ शुक उवाच॥ कृते प्रवर्त्तते धर्मश्च
तुष्पात्तज्जनैर्धृतः॥ सत्यं दया तपो दानमिति पादा विभोर्नृप॥१८॥ संतुष्टाः करुणा मैत्राः शांता दांतास्तितिक्षवः॥ आ
त्मारामाः समदृशः प्रायशः श्रमणा जनाः॥१९॥ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः॥ अधर्मपादैरनृतहिंसासं
तोषविग्रहैः॥२०॥ तदा क्रियातपोनिष्ठा नातिहिंस्रा न लंपटाः॥ त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप॥२१॥ तपः सत्यदया

धर्मांस्तावदाह॥ कृत इति॥ तज्जैर्नृभिस्तत्कालीनैः दानं श्रुणगद्वेष। दानेष्वर्धं ह्रसति द्वापरे॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः॥२२॥
तपाश्रमयदानं॥ तदेव प्रथमसत्त्वे शौचवशादेनोक्तं॥ विभोः संपूर्णस्य धर्मस्य॥१८॥ तदनीतनजनानाह॥ संतुष्टा इति॥ मैत्राः भूतमैत्रीयुक्ताः॥ एम
श्रमणाः आत्माभ्यासवंतः॥१९॥ ब्रह्मोत्तराः ब्राह्मणाधिकाः॥२१॥ अनृतेन सत्यं॥ हिंसया दयां॥ असंतोषेण तपः॥ विग्रहेण दानमिति यथासंख्यं
योज्यं॥ हिंसानुष्ट्यनृतद्वेषैरित्यपक्रमो न विवक्षितः॥ धर्मस्यार्द्धं ह्रसति॥ क्षीयते॥ अधर्मस्य लक्षणैर्लिंगैः पादैरित्यर्थः॥२२॥

८

...हिनः कीर्त्तिप्रियाः ॥ त्रेतायां द्विजोत्तमाः क्षत्रियब्राह्मणप्रधानाः ॥ २२ ॥ कलौ धर्मपादानां त्र्यां शक्षतयैकोवशिष्यते ॥ २४ ॥ शूद्रद
...नराः ॥ शूद्रकैवर्त्तादिप्रधानाः ॥ २५ ॥ युगानामेवंभूतवैषम्ये कारणमाह ॥ सत्वमिति ॥ मनश्च बुद्धिश्चेंद्रियाणि च सत्वे यदा भवंति श

यदाविनो महाशालाः स्वाध्यायाध्ययने रताः ॥ आर्याः कुटुंबिनो हृष्टाः वार्त्ता त्रेतायां द्विजोत्तमाः ॥ २३ ॥ कलौ तथा धर्महेतूनां त
त्थं शेषो धर्मदेहे तमिः ॥ एधमानैः क्षीयमाणो ह्यंते सोपि विविनश्यति ॥ २४ ॥ तस्मिन् लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः दुर्भ
गा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥ २५ ॥ सत्वं रजस्तम इति दृश्यंते पुरुषे गुणाः ॥ कालसंचोदितास्ते वै परिवर्त्तंत आ
त्मनि ॥ २६ ॥ प्रभवंति यदा सत्वे मनोबुद्धींद्रियाणि च ॥ तदा कृतयुगं विद्यात् ज्ञाने तपसि यद्रुचिः ॥ २७ ॥ यदा कर्मसु काम्ये
ष्वभक्तिर्भवति देहिनां ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ॥ २८ ॥ यदा लोभस्त्वसंतोषो मानो दंभोथमत्सरः ॥ कर्मणां
चापि काम्यानां द्वापरं तद्रजस्तमः ॥ २९ ॥ यदा मायानृतं तंद्रा निद्रा हिंसा विषादनं ॥ शोको मोहो भयं दैन्यं स कलिस्तामसः
स्मृतः ॥ ३० ॥ यस्मात् क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ॥ ३१ ॥

तिशयेन वर्त्तंते ॥ २७ ॥ यदा कर्मादिषु भक्तिः प्रीतिस्तदा रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि ॥ २८ ॥ काम्यानां कर्मणां विषयेषु यदा प्रीतिः ॥ तत्र
रजस्तमःप्रधानं द्वापरं जानीहि ॥ २९ ॥ विषादनं दुःखं ॥ ३० ॥ कलिदोषान् प्रपंचयति यस्मादित्यादिना ॥ यस्मात् कलेर्हेतोः क्षुद्रदृशः मंदमतयः क्षुद्रभा
ग्याः अल्पभाग्याः ॥ महाशनाः ॥ बह्वाशः स्वैरिण्यश्च स्वल्पाः असतीः असत्यः ॥ ३१ ॥

भा॰टी॰ दस्यव उत्कृष्टाः अधिका येषु ते ॥२१॥ अव्रता विहिताचारशून्याः शौचशून्याश्च बटवो ब्रह्मचारिणः भविष्यंति कुटुंबिनश्च गृहस्थाः स्वयंभिक्षा
टनपरा न भविष्यंति ॥ तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यंति ॥ न्यासिनो यतयः अतिधनादिलोलुपाः भविष्यंति ॥२३॥ स्त्रीणां स्व
भावमाह ह्रस्वकाया इति ॥ कटुकभाषिण्यः अप्रियवादिन्यः ॥ चौर्यं च माया च वंचकपरं च ताभ्यां साहसं प्राप्ताः ॥२४॥ किंच किराटाः व

दस्यूत्कृष्टा जनपदा वेदाः पाषंडदूषिताः ॥ राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥२२॥ अव्रता बटवो शौचा भि
क्षवश्च कुटुंबिनः ॥ तपस्विनो ग्रामवासा न्यासिनो त्यर्थलोलुपाः ॥२३॥ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः ॥ श
श्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ॥२४॥ पणयिष्यंति वै क्षुद्राः किराटाः कूटकारिणः ॥ अनापद्यपि मंस्यंते
वार्तां साधुजुगुप्सितां ॥२५॥ पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमं ॥ भृत्यं विपन्नं पतयः कौलं गाश्चापयस्वि
नीः ॥२६॥ पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः ॥ ननांदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥२७॥

णिजः पणायिष्यंति क्रयविक्रयव्यवहारं प्रवर्तयिष्यंति ॥ किंच सर्वे जनाः अनापद्यपि जुगुप्सितां निंदितां वार्तां वृत्तिं साधु मंस्यंते
॥२५॥ सर्वोत्तममपि पतिं द्रव्यहीनं भृत्याः त्यक्ष्यंति ॥ पतयश्च विपन्नं रोगादिभिर्व्यापाराक्षमं ॥ कौलं कुलपरंपरया प्राप्तं त्यक्ष्यंति ॥ अप
यस्विनीः दुग्धरहिताः ॥२६॥ सौरतं रतनिमित्तं सौहृदं येषां ते ॥ अत एव ननांदारो भार्याभगिन्यः श्यालाः भार्याभ्रातरः तैः संवादो मंत्रो येषां

इत ॥ ३९ ॥ पिशाचसंदर्शाः पिशाचसदृशाः ॥ ४० ॥ काकणिके विंशतिवराटकमात्रेऽप्यर्थे विषयभूते विगृह्य वैरं कृत्वा ॥ ४१ ॥ ४२ ॥ महांतमनर्थमा
ह ॥ द्वाभ्यां कलाविति ॥ त्रिलोकनाथैरवनतेन मस्तकेन पादपद्मं यस्य तं न यक्ष्यंति न पूजयिष्यंति ॥ पाषंडैर्विभिन्नमन्यथाकृतं चेतो येषां ते ॥ ४३ ॥

शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनं ॥ ३८ ॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरक
र्शिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥ वासोन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाः पिशाचसंदर्शा भ
विष्यंति कलौ प्रजाः ॥ ४० ॥ कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यंति हि प्रियान्प्राणान्हनिष्यंति स्वकानपि ॥ ४१ ॥
न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ॥ ४२ ॥ कलौ न राजन्जगतां परं गुरुं त्रि
लोकनाथानतपादपंकजं ॥ प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पाषंडविभिन्नचेतसः ॥ ४३ ॥ यन्नामधेयं म्रियमाण आतु
रः पतन्स्खलन्वा विवशो गृणन्पुमान् ॥ विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ॥ ४४ ॥ पुंसां कलि
कृतान्दोषान्द्रव्यदेशात्मसंभवान् ॥ सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ॥ ४५ ॥ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतो
पि वा ॥ नृणां धुनोति भगवान्हृत्स्थो जन्मायुताशुभं ॥ ४६ ॥

विवशो गृणन् ॥ विमुक्ताः कर्मरूपाः अर्गलाः प्रतिबंधा यस्मात्सः ॥ ४४ ॥ न केवलं कलि
दोषान्प्रपंच्य प्रक्रांतं तत्परिहारोपायमाह पुंसामिति षड्भिः ॥ द्रव्यदेशात्मभिः संभवो येषां तान् ॥ चित्तस्थः चित्ते स्फुरितः ॥ ४५ ॥ ४६ ॥

भा० द्वा
१०

अयमेवोपायेनान्यः इति सदृष्टांतमाह यथेति ॥ धातुजं ताम्रादिसंश्लेषजातं हेम्नो दुर्वर्णं मालिन्यं तत्राग्निस्थितो वह्निरेव हंति न तु तोयादि ॥ एवं योगि
नामपि विष्णुरेव न तु योगादिकमित्यर्थः ॥ ४७ ॥ एतदेव विवृणोति विद्येति ॥ विद्या देवतोपासना ॥ ४८ ॥ ४९ ॥ आत्मभावं स्वस्वरूपं ॥ ५० ॥ इदानीं कलिं स्तौ
ति द्वाभ्यां कलेर्दोषनिधे राजन्निति ॥ ५१ ॥ तत्सर्वं हरिकीर्त्तनादेव कलौ भवति ॥ ५२ ॥ इति द्वादशे तृतीयः ॥ चतुर्थे च चतुर्द्धा काललया नैमित्तिकादयः ॥ तत्र संप्र

यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति धातुजं ॥ एवमात्मगतो विष्णुर्योगिनामशुभाशयं ॥ ४७ ॥ विद्यातपःप्राणनिरोधमैत्री
तीर्थाभिषेकव्रतदानजप्यैः ॥ नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते ॥ ४८ ॥ तस्मात्सर्वात्मना राजन् हृ
दिस्थं कुरु केशवं ॥ म्रियमाणो ह्यवहितस्ततो यासि परां गतिं ॥ ४९ ॥ म्रियमाणैरभिध्येयो भगवान्परमेश्वरः ॥ आत्मभावं न
यत्यंग सर्वात्मा सर्वसंश्रयः ॥ ५० ॥ कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ॥ कीर्त्तनादेव कृष्णस्य मुक्तसंगः परं व्रजे
त् ॥ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात् ॥ ५२ ॥ इति श्रीभागवते महापुराणे द्वा
दशस्कंधे तृतीयोध्यायः ॥ शुक उवाच ॥ कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप ॥ कथितो युगमानं च शृणु कल्पलयावपि ॥ १ ॥

र्नित्लारो हरिकीर्त्तेर्विवर्ण्यते ॥ १ ॥ कलिदोषनिवर्त्तकं हरिनामसंकीर्त्तनादिकं स एव च कलौ परमो धर्म इति ॥ पश्चार्द्धस्योत्तरस्तुतं ॥ यद्वान्यत
हयोः कल्पयोर्मानं ब्रूहीति तत्रेदानीं तृतीयस्कंधोक्तकालानुवादपूर्वकं निरूपयति काल इति ॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुतामि
त्यादिना ॥ कालः कथितः चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं ॥ संख्यातानि सहस्राणि द्विगुणानि शतानि चेति युगमानं च कथितं ॥ १ ॥

एम
१०

तत्र कल्पस्य मानमाह॥ चतुर्युगेति॥ यत्र चतुर्दश मनवः क्रमेण भवंति॥२॥ प्रलयस्तु चतुर्विधः नैमित्तिकः प्राकृतिकः आत्यंतिको नित्यश्चेति
तत्र नैमित्तिकं प्रलयं प्रमाणसहितमाह तदंत इति द्वाभ्यां॥ तावान् चतुर्युगसहस्रप्रमाणः॥ सैव ब्राह्मी रात्रिः॥३॥ नैमित्तिकत्वं दर्शयति॥ यत्र य
दा विश्वसृक् श्रीनारायणः विश्वमात्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते॥ आत्मभूः ब्रह्मा च तस्मिन् शेते॥ तयोर्भेदविवक्षया वा ब्राह्म

चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते॥ स कल्पो यत्र मनवश्चतुर्दश विशांपते॥२॥ तदंते प्रलयस्तावान् ब्राह्मी रात्रिरुदा
हृता॥ त्रयो लोका इमे तत्र कल्पंते प्रलयाय हि॥३॥ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्॥ शेतेऽनंतासनो विश्व
मात्मसात्कृत्य चात्मभूः॥४॥ द्विपरार्द्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः॥ तदा प्रकृतयः सप्त कल्पंते प्रलयाय वै॥५॥ एष प्रा
कृतिको राजन् प्रलयो यत्र लीयते॥ आंडकोशस्तु संघातो विघात उपसादिते॥६॥ पर्जन्यः शतवर्षाणि भूमौ राजन्न व
र्षति॥ तदा निरन्ने ह्यन्योन्यं भक्ष्यमाणाः क्षुधार्दिताः॥ क्षयं यास्यंति शनकैः कालेनोपद्रुताः प्रजाः॥७॥ सामुद्रं दैहिकं

ण एवानंतासनत्वमुक्तं ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमा भौमं रसं सांवर्तको रविः॥ रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति॥८॥
नो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः॥४॥ प्राकृतिकं प्रलयमाह द्वाभ्यां॥ द्विपरार्द्धे ब्राह्मणआयुषि॥ सप्त प्रकृतयः महदहंकारपंचतन्मा
त्राणि॥५॥ संघातः महदादिकार्यभूतः प्रकृतीनां तत्कार्यब्रह्मांडस्य चलयात्॥ प्राकृतिक इत्यर्थः॥ विघाते विघातकारणे उपसादिते सति॥६॥
तदेवाह पर्जन्य इत्यादिना सार्द्धद्वियादिरूपेणोत्पतः प्राज्ञाने नयग्रंथेन॥७॥ सामुद्रादिकं सर्वं रसं रविः पिबते आकर्षति॥८॥

भा॰ द्वा ॥

अनिलवेगोत्थः वायुवेगोद्भूतः अनिलवेगोवारितिपाठे अनिलेनवेगोपसर्पणः ॥ वाः रविकिरणरश्मिभिः पीतमुदकं चरहतीत्यर्थः ॥ अनिलवेगोवेदि
तिवपाठः स्पष्टः ॥ भूविवरान् पातालादीन् ॥ अन्यान् रविकिरणैः हिकरस्माकर्षणात् प्राप्तिरहितान् ॥ ९ ॥ शिखाभिर्ज्वालाभिः ॥ १० ॥ किंचिद

ततः संवर्तकोवह्निः संकर्षणमुखोत्थितः ॥ दहत्यनिलवेगोत्थः अन्यान् भूविवरानथ ॥ ९ ॥ उप
र्यधः समंताच्च शिखाभिर्वह्निरर्च्चिषः ॥ दह्यमानं विभात्यंडं दग्धगोमयपिंडवत् ॥ १० ॥ ततः प्रचंड
पवनो वर्षाणामधिकं शतं ॥ परः संवर्तकोवातिधूम्रं खं रजसावृतं ॥ ११ ॥ ततोमेघकुलान्यंग चित्र
वर्णान्यनेकशः ॥ शतं वर्षाणि वर्षंति नदंति रभसस्वनैः ॥ ततएकोदकं विश्वं ब्रह्मांडविवरांतरं ॥ १२ ॥ त
तदाभूमेर्गंधगुणं ग्रसंत्याप उपप्लवे ॥ ग्रस्तगंधा तु पृथिवी प्रलयत्वाय कल्पते ॥ १३ ॥

धिकंवर्षाणां शतं संवर्तकं ॥ परोवायुर्वातितदा रजसावृतं खं धूम्रं भवति ॥ ११ ॥ रभसस्वनैरतीवगर्जितैः ब्रह्मांडविवरांतरं ब्रह्मांड
विवरमध्यगतं विश्वं एकोदकं एकार्णवोदकव्याप्तं भवति ॥ १२ ॥ उपप्लवे उदकेनाप्लाविते सति प्रलयत्वाय अभावाय ॥ १३ ॥

राम ॥

॥ ...न्तादिरितामसोऽहंकारः ॥ गुणैस्त्रिभिः सह ॥५॥ अव्याकृतं प्रधानं ॥६॥ तस्मात्तल्लयो नाहीत्याह ॥ न तस्येति ॥ कालावयवैः अहो-
रात्रादिभिः गुणाभावविकारः परिणामः ॥ अव्यक्तं अतीत्वं विकारश्च अन्यस्सर्वदैकरूपं ॥ नित्यं सर्वदैकरूपं वृद्धिरहितमित्यर्थः ॥ अ-
प्रमेयमनुपकृत्यमन्यत् ॥ सर्वत्र हेतुः कारणमिति ॥७॥ किंच ॥ वागादिगोचरस्य सविशेषस्य विकारा भवंति ॥ इदं तु न तथेत्याह ॥ न यत्रेति हा

अपां रसमथो तेजस्तु लीयते स्थनीरसाः ॥ ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा ॥ लीयते चानिले तेजो वायोः खं ग्रस-
ते गुणं ॥१४॥ स वै विशति खं राजं स्तत्तञ्च नभसो गुणं ॥ शब्दं ग्रसति भूतादिर्नभस्तस्मिंस्तु लीयते ॥ तैजसानींद्रियाण्य-
गदेवान्वैकारिको गुणैः ॥१५॥ महांश्च ग्रसत्यहंकारं गुणाः सत्वादयश्च तं ॥ ग्रसते व्याकृतं राजन्गुणान्कालेन
नोदितं ॥१६॥ न तस्य कालावयवैः परिणामादयो गुणाः ॥ अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययं ॥१७॥ न यत्र वाचो न मनो
न सत्वं तमो रजो वा महदादयोऽमी ॥ न प्राणबुद्धींद्रियदेवता वा न सन्निवेशः खलु लोककल्पः ॥१८॥ न स्वप्नजाग्रन्न च तत्
सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ॥ संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनंति ॥१९॥ लयः प्राकृतिको ह्येष पुरु-

म्यां ॥ लोककल्पः लोकरूपः संनिवेशो रचनाविशेषः ॥१८॥ न स्वप्नजाग्रत्न च स्वप्नजाग्र षाव्यक्तयोर्यदा ॥ शक्तयः संप्रलीयंते विवशाः कालविद्रुताः
दवस्था सुषुप्तं ॥ संसुप्तवत् इंद्रियाभावात् ॥ शून्यसादृश्ये हेतुः ॥ अप्रतर्क्यं ॥ मनसः शून्यमेवेत्याह ॥ नरिति ॥१९॥ उपसंहरति ॥ लय इति ॥ शक्तयः
सत्वादयः ॥२०॥

मा०ह्व आत्यंतिकं लयमाह ॥ बुद्धींद्रियेति द्वादशभिः आत्यंतिकलयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपंचलयात्मकः ॥ न च प्रपंचस्यात्मवत्सत्यत्वेन लयः
१२ संभवतीति ॥ ज्ञानरूपत्वात् ॥ ब्रह्मणः पृथक् भूतस्य तस्याः सत्त्वमुपपादयति ॥ बुद्धिश्च इंद्रियाणि च अर्थाश्चेत्येवं ग्राहककरणग्राह्यरूपेण तेषा
माश्रयं ज्ञानमेव भाति न पृथक् ॥ तत्र हेतुमाह ॥ दृश्यत्वाव्यतिरेकाभ्यामिति ॥ अतो यदाद्यंतवत्तत्स्वल्पमत्रैवं प्रयोगः विमतं सत्र भवति दृश्यत्वा
त्कारणाव्यतिरेकात् आद्यंतवत्त्वाच्च रज्जुसर्पादिवदिति ॥ २ ॥ तत्राव्यतिरेकं दृष्टांतेन प्रपंचयति ॥ दीपवत् रूपाणां तेजोविशेषाणां पृथ्यातेजसो नव्य
तिरेकः ॥ तथा धीः कर्त्री खानि करणानि मात्राः विषयाः अनाताद्ब्रह्मणः पृथक् न स्युः ब्रह्मकार्यत्वात् ॥ न चैवं कार्यकारणयोरभेदे कार्यस्य सत्त्वे का

बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयं ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवद्वस्तु यत् ॥ २२ ॥ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृ
रधी थग्भवेत् ॥ एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ॥ २२ ॥ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते ॥ मायामात्रमिदं राज
न्नानात्वं प्रत्यगात्मनि ॥ २४ ॥ यथा जलधरा व्योम्नि भवंति न भवंति च ॥ ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् ॥ २५ ॥

रणस्याप्यसत्त्वप्रसंगोऽत आह अन्यतमादिति ॥ कार्यात्सत्यतत्वान्तिरिक्तात् ब्रह्मणः प्रपंचाद्ब्रह्मणोऽस्त्यव्यतिरेकः प्रपंचस्य न तु ततो नास्त्यव्यतिरेक इत्यर्थः
यदात्तु बुद्धेरसत्त्वं न दृशा तत्र स्वस्थानां हितात्मसत्त्वापित्यापादयेनाह बुद्धेरिति ॥ न उ विश्वतैजसप्राज्ञानां एता अवस्थाः न बुद्धेरित्याशंक्याह मायामा
त्रमिति ॥ इदं विश्वतैजसप्राज्ञरूपं ॥ २२ ॥ आद्यंतवत्त्वादित्यस्य हेतोरसिद्धिमाशंक्य सावयवत्वेन साधयति यथेति ॥ अवयवीति ॥ यस्मादवयवं तदाद्यंत णम
वत् घटादिवदित्यर्थः अत उदयाप्ययात् आद्यंतवत्त्वाद्विश्वं सत्र भवतीत्यर्थः ॥ यद्वा ॥ एवं योगवागमापायित्वाद्विश्वं मिथ्या ॥ ब्रह्म न तथा अपि त्वात् सत्यमित्य १२
नेन साध्यते ॥ दृष्टांतस्तु पूर्वोक्त एव यथा जलधरा व्योम्नीति दृष्टांतत्वागमापायिन स्वधित्वमात्रेण न तु मिथ्यात्वमिति ॥ २४ ॥

अन्यत मारिति प्रतिज्ञातं कारणस्य सत्यत्वमुपपादयति सत्यं हीति ॥ अवयवः कारणं प्रोक्तः ॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्य
मित्यादि श्रुतिभिः ॥ अत्र युक्तिमपि दर्शयति विनेति ॥ अंग हे राजन् ॥ हि यस्मात् अर्थेन अवयविना विना अवयवाः प्रतीयेरन् ॥ यथा पटस्या
वयवाः ॥ तंतवः पटात् पृथक् प्रतीयंते तद्वदिति ॥ २५ ॥ ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो ब्रवीति तत्सत्यं तदपि नातीव सत्यमित्याह यदिति सामा
न्यकारणं विशेषः कार्यं तद्रूपेण अन्योन्यापाश्रयात् परस्परापेक्षत्वेन निरूपणसहत्वादित्यर्थः ॥ अतः कारणत्वमवधित्वं व्यापकत्वमि
त्यादिकमपि परस्परापेक्षत्वाद्दोषं तद्वत् तत्सर्वमवस्त्वित्यर्थः ॥ तत्रैव हेत्वंतरमेव तन ॥ यदुपलभ्येत स भ्रमः सामान्यविशेषरूपत्वान्न ह्यप

सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह ॥ विनार्थेन प्रतीयेरन् पटस्येवांग तंतवः ॥ २५ ॥ यत्सामान्यविशेषाभ्यामुपलभ्ये
त स भ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् ॥ २६ ॥ विकारः ख्याप्यमानोपि प्रत्यगात्मानमंतरा ॥ न निरू

वत ॥ अन्योन्यापाश्रयादितीहमपि हेत्वंतरं ॥ गुणगुणिविशेषणविशेष्यव्याप्यव्यापक ॥ प्योस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् ॥ २७ ॥
न्यादिरूपेण परस्परापेक्षत्वान्न सिद्धत्वात् तथाभूतश्च अवस्तु इति गमनं ॥ अतो यदाद्यंतवत् तत्सर्वमवस्त्विति ॥ २६ ॥ तदेवमनेकैर्हेतुभिः प्रपंचस्या
सत्त्वं प्रसाधितं तत्र शंका ॥ ननु प्रपंचस्यापि प्रकाशमानत्वादात्मवत् सत्त्वं किं न स्यादिति तत्राह विकार इति ॥ ख्याप्यमानः प्रकाश्यमानोपि विका
रः प्रपंचः प्रत्यगात्मप्रकाशं विना अणुमात्रोपि न निरूप्यः ॥ चितं विना न रूप्यः स्याच्चेत् तर्हि सोपि चित्समः स्यात् ॥ चिद्रूपेणात्मसमः स्वप्रका
शो भवेत् ॥ तथा च सति सोप्यात्मवत् स्यात् न एकरूपः स्यादित्यर्थः ॥ २७ ॥

स्या

ञातत्त्यत आह नहीति ॥ ननु सत्यं स्यात् आत्मनो जीवब्रह्मरूपनानात्वमस्त्येव तत्राह ॥ यद्येवं नानात्वं मन्यते तर्हि स अविद्वान् ॥ कथं तर्हि तयोर्भेदव्यवहा
रः उपाधिकृत इत्याह ॥ ननु त्वमिति ॥ न च्छिद्रयोर्घटाकाशमहाकाशयोरिवेति [illegible] परिच्छेदापरिच्छेदे दृष्टांतः ॥ ज्योतिषोः आकाशजलस्थसूर्य
योरिवेत्युपाधिकृतविकारसद्भावे ॥ वातयोर्बाह्यशरीरस्थवाय्वोरिवेति क्रियाभेदे ॥ १८ ॥ ब्रह्मण एव प्रपंचव्यवहारालंबनत्वं दृष्टांतेन स्पष्टय
ति यथेति ॥ क्रियाभिरत्नरचनाभेदैर्बहुधाकारकुंडलादिरूपेण ॥ लौकिकवैदिकैर्वचोभिः जनैः अहंकारोपहितैः ॥ १९ ॥ न त्वहंकारस्य क

न हि सत्यस्य नानात्वमविद्वान्यदि मन्यते ॥ नानात्वं छिद्रयोर्यद्वत् ज्योतिषोर्वातयोरिव ॥ १८ ॥ यथा हिरण्यं बहुधा समीयते
नृभिः क्रियाभिर्व्यवहारवर्त्मसु ॥ एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ॥ १९ ॥ यथा घनोर्क
प्रभवो घनेन दर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः ॥ एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः ॥ २० ॥

य ब्रह्मस्वरूपावरणेन भेदव्यवहारहेतुत्वं तस्य तत्कारणभूतब्रह्मावरकत्वासंभवात् ॥ आवरणे वा तस्यापि प्रकाशाभावादित्याशंक्याह दृष्टा
न्तमाह यथेति ॥ अर्कात् प्रभव एव मेघरूपेण परिणता वर्षंति ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा
इत्यादिवचनात् ॥ तस्मादर्कप्रभवः अर्कांशो वदर्शितः प्रकाशितश्च ॥ तमः स्वरूपभूतार्कदर्शनप्रतिबंधको भवति ॥ अहं अहंकारः ॥ ब्रह्मगुणः
कार्यभूतः तदीक्षितस्तेनैव प्रकाशितश्च आत्मनो जीवस्य आत्मबंधनः ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति ॥ २० ॥

एम
१३

अत एवाहंकारनाशे ह्यन्वरूपदर्शनं भवतीति तेनैव दृष्टांतेनाह घन इति ॥ आत्मन उपाधि ॥ जिज्ञासया विचारेण ॥ तर्हि तदा अनुस्मरेत् ब्रह्माह-
मिति पश्यतीत्यर्थः ॥ २१ ॥ सोयमात्यंतिकः प्रलय इत्युपसंहरति ॥ यदैवमिति ॥ विवेकहेतिना ज्ञानशस्त्रेण ॥ अहंकरणमेवात्मबंधनं ॥ अच्यु-
तं परिपूर्णमात्मानमनुभवतीत्यर्थः ॥ २२ ॥ नित्यप्रलयमाह नित्यदेति ॥ २३ ॥ कुत इत्यत आह कालेति ॥ परिणामिनां नदीप्रवाहदीपज्वालादीना-
या उच्चानीचावस्थाः ताः कालरूपस्रोतसो वेगेनाशु ह्रियमाणस्य देहादेर्दृश्यमानाः ॥ तद्वदेव नित्यदा जन्मप्रलयहेतवो भवंति ॥ देहः

घनोपरार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ॥ यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्म-
रेत् ॥ २१ ॥ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबंधनं ॥ छित्वाच्युतात्मानुभवोवतिष्ठते तमाहुरात्यंति-
कमंग संप्लवं ॥ २२ ॥ नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप ॥ उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥ २३ ॥ कालस्रो-
तोजवेनाशु ह्रियमाणस्य नित्यदा ॥ परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ॥ २४ ॥ अनाद्यंतवतानेन कालेनेश्व-

प्रतिक्षणप्रध्वंसीनि प्रतिक्षणं अवस्थाभेदस्याविद्यमानत्वात् ॥ प्रदीपादिव ॥ रमूर्तिना ॥ अवस्था नैव दृश्यंते वियति ज्योतिषामिव ॥ २५ ॥
दित्यनुमानं ॥ २४ ॥ यदि प्रतिक्षणं अवस्था भवंति तर्हि किं न दृश्यंते अतो हेत्वसिद्ध इत्याशंक्याह अनाद्यंतवता कालेन जायमाना अवस्था नै-
व लक्ष्यंते ॥ आकाशे गच्छतां ज्योतिषां चंद्रादीनां गमनावस्थाविशेषाः यथा नैव लक्ष्यंते तद्वत् ॥ अतो यथा तेषां प्रदेशांतरप्राप्त्या प्रतिक्षणं गत्यव-
स्थाः कल्प्यंते तद्वदत्रापि बाल्यतारुण्यादिदर्शनेन मध्यवर्तिन्योऽवस्थाः कल्प्यंत इति न हेत्वसिद्ध इत्यर्थः ॥ २५ ॥

भा॰द्वा
१४

उपसंहरतिनित्यइति ॥ ३६ ॥ पुराणार्थमुपसंहरति ॥ एताइति ॥ लीलाविषयाः कथाः ॥ अजोब्रह्मापिकार्त्स्न्येनाभिधातुंनेशः ॥ ३७ ॥ ननुयदिसंक
ल्येनाभिधातुंनशक्यंते ॥ तर्हिकितदभिधानेन ॥ तत्राहसंसारेतिविविधंदुःखमेवदवोदावानलस्तेनार्दितस्यपीडितस्य ॥ अतउत्तितीर्षोःपुंसः
भगवतोयालीलातस्याःकथाः तासांरसस्तन्निषेवणमंतरेणान्यःप्लवस्तरणसाधनंनभवेत ॥ उपायांतरासंभवात्तत्कथाश्रवणमेवयथा

नित्योनैमित्तिकश्चैवतथाप्राकृतिकोलयः ॥ आत्यंतिकश्चकथितःकालस्यगतिरीदृशी ॥ ३६ ॥ एताःकुरुश्रेष्ठजगद्विधा
तुर्नारायणस्याखिलसत्वधाम्नः ॥ लीलाकथास्तेकथिताःसमासतःकार्त्स्न्येननाजोऽप्यभिधातुमीशः ॥ ३७ ॥ संसार
सिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यःप्लवोभगवतःपुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमंतरेणपुंसोभवेद्वि
विधदुःखदवार्दितस्य ॥ ३८ ॥ पुराणसंहितामेतामृषिर्नारायणोऽव्ययः ॥ नारदायपुराप्राहकृष्णद्वैपायनायसः
सवैमह्यंमहाराजभगवान्बादरायणः ॥ इमांभागवतींप्रीतःसंहितांवेदसंमितां ॥ ४० ॥ एतांवक्ष्यत्यसौसूतऋषि
भ्योनैमिषालये ॥ दीर्घसत्रेकुरुश्रेष्ठसंपृष्टःशौनकादिभिः ॥ ४१ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेचतुर्थोऽध्यायः ॥

शाक्तिनिषेव्यमित्यर्थः ॥ ३८ ॥ श्रोतृपारंपर्याद्गौरवायसंप्रदायप्रवृत्तिमाहपुराणसंहितामितित्रिभिः ॥ ३९ ॥ सवैबादरायणःप्रीतःसन्मह्यमि
मांसंहितांप्राहेतिपूर्वेणान्वयः ॥ ४० ॥ असौसूतइति ॥ परतःस्थितमंगल्यानिर्दिशन्नाह ॥ नैमिषालयेनैमिषारण्यस्थाने ॥ ४१ ॥ द्वादशेचतुर्थः ॥

राम
१४

एवमेतत् समासेन परब्रह्मोपदेशतः ॥ एतत्तत्त्वकमरे शान्मृत्युभीतिनिवारणं ॥१॥ एतत्पुराणं श्रृणवन्नरः पुण्यं प्राप्नोतीत्यपि शेत्य ॥ पुराणार्थमनु स्मारयति ॥ अयं भावः जगतः कर्ता ब्रह्मापि यस्य प्रसादजः प्रसादोत्र रजोवृत्तिर्हर्षः ततो जातत्वात्तत्परतंत्रः सर्वसंहर्ता रुद्रश्च यस्य क्रोधसंभवो न तत्परतंत्रः स विश्वस्यात्मनियंता भगवानत्रानुवर्ण्यते ॥ अत एवंभूतं भगवंतमश्रृण्वतः कुतोन्यस्माद्भयशंकेति ॥१॥ त्वं पुनः कृतार्थ एवेत्यनुस्मारयति त्वं त्विति ॥ पशुबुद्धिं अविवेकं ॥ यस्मात्त्वं न नंक्ष्यसि ॥ कुत इत्यत आह ॥ न जात इति ॥ यथा देहः प्रागभूत एवाद्य जातो नंक्ष्यति न चैव

शुक उवाच ॥ अत्रानुवर्ण्यतेभीक्ष्णं विश्वात्मा भगवान् हरिः ॥ यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥१॥ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि ॥ न जातः प्रागभूतोद्य देहवत्त्वं न नंक्ष्यसि ॥२॥ न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान् ॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथानलः ॥३॥

त्वं पूर्वं नाभूः न चाद्य जातोसि अतो न नंक्ष्यसि ॥१॥ ननु बीजांकुरवत्तस्मात्पुत्ररूपेणाद्यपमेवं भवति ॥ यथाह श्रुतिः ॥ अंगादंगात्संभवसि ॥ हृदयादधिजायसे ॥ आत्मा वै पुत्रनामासि ॥ स जीव शरदः शतमिति ॥ ततः पुनरंकुराद्बीजमिव पौत्ररूपेणापि त्वयमेव भवति ॥ पिता पुत्रेणापितृमान्योनियोनाविति श्रुतेः ॥ अत इत्येव नश्यन्तु कथं न नंक्ष्यामीति चेत्तत्राह न भविष्यसीति ॥ भूत्वा पुत्रपौत्रादिरूपवान् बीजांकुरवत्र भविष्यसि ॥ यस्माद्देहादेर्व्यतिरिक्तस्त्वं ॥ यथा नलः काष्ठात् ॥ देहाद्देहो जायते नात्मेति भावः ॥३॥

जन्मादीनां धर्मत्वं दृष्टांतेन प्रपंचयति ॥ स्वप्ने यथात्मनः शिरःछेदं स्वयं पश्यति ॥ एवं जागरणेपि यस्मात् देहस्य पंचत्वादिकं पश्यति ततस्तद्द्रष्टैवात्मन
इदं भ्रमप्रमात्रं व्यक्तं तस्मादात्मा अजोमरश्चेत्यर्थः ॥ तदुक्तं ॥ आत्मनः पितृपुत्राभ्यामनुमेयो भवाप्ययौ ॥ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः इत्यादि ॥
॥४॥ यस्मात् देहोपाधिकोयमात्मनो जन्मादिसंसारभ्रमः ॥ तस्मादुपाधिनिवृत्तौ मुच्यत इति सदृष्टांतमाह घट इति ॥ यथाभग्ने घटोपाधेः पूर्वमिव ॥ पुनर्घ
टे भिन्ने तदंतर्वर्त्यवकाशः आकाश एव स्याद्यथा ॥ एवं देहे मृते तत्वज्ञानेन लीने सति ॥५॥ ज्ञानेन लयं प्रभावयितुं मायाकृतमात्मनो देहाद्युपाधि

स्वप्ने यथा शिरश्छेदं पंचत्वाद्यात्मनः स्वयं ॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजोमरः ॥४॥ घटे भिन्ने यथाकाश आकाशः
स्याद्यथा पुरा ॥ एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥५॥ मनः सृजति वै देहान् गुणान् कर्माणि चात्मनः ॥ तन्मनः
सृजते माया ततो जीवस्य संसृतिः ॥६॥ स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ॥ ततो दीपस्य दीपत्वमेवं देहकृ
तो भवः ॥७॥ रजःसत्वतमोवृत्त्या जायतेऽथ विनश्यति ॥ न तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः ॥८॥

संबंधप्रकारमाह ॥ मन इति ॥ मन आत्मनो देहादीन् सृजति तच्च मनो माया सृजति ॥ ततो मायाद्युपाधिसमुदायात् ॥६॥ एतदेव सदृष्टांतमाह ॥ स्नेहेन स्ने
हेति ॥ दीपस्य ज्योतिषः दीपत्वं ज्वालारूपः परिणामः ॥ तत्र तैलस्थानीयं कर्म तदधिष्ठानस्थानीयं मनः वर्तिस्थानीयो देहः ॥ अग्निसंयोगस्थानी
यश्चैतन्याध्यासः दीपस्थानीयः संसार इति योज्यं ॥ देहकृतः ॥ देहनिबंधनः ॥ यद्वा देहकृतो मनसः न चात्मनः ॥७॥ अतो दीपवत्संसार [illegible]
विनश्यति ॥ न त्वात्मा ज्योतिर्विकारीत्याह ॥ नेति ॥ न तत्र प्रतीयमानः आत्माकृत इत्यत आह ॥ य इति व्यक्ताव्यक्तयोः परः अन्यः अतः स्वयंज्योतिः

रत्वंप्रपंचयति ॥ आकाशइवेति ॥ आधारोदेहादेः प्रपंचस्य ध्रुवोनिर्विकारः ॥ नास्त्यंतउपमाचयस्यसोनंतोपमः ॥ ततोविभुः ॥ अतस्त्वमेवंवि
नयेत्याह एवमिति ॥ आत्मस्थं देहाद्युपाधिस्थितं ॥ आमृश विचारय ॥ अनुमानगर्भिण्या दृष्टदृश्याद्वयव्यतिरेकबुद्ध्या ॥ ९ ॥ एवंचसतित
क्षकोनदंदशीत्याह चोदितइति ॥ तत्रहेतवः मृत्यवइति मृत्युहेतवः ॥ १० ॥ विमर्शप्रकारं दर्शयन् तक्षकादर्शनं दर्शयति द्वाभ्यां ॥ योहंसब्रह्मै
वयद्ब्रह्मतदहमेवेति समीक्षन् तत्राहंब्रह्मेतिभावनयाजीवस्यशोकादिनिवृत्तिः ॥ ब्रह्माहमितिभावनयाच ॥ ब्रह्मणः ॥ पारोक्ष्यनिवृत्तिर्भव

आकाशइवचाधारोध्रुवोनंतोपमस्ततः ॥ एवमात्मानमात्मस्थमात्मनैवामृशप्रभो ॥ बुद्ध्यानुमानगर्भिण्यावासुदेवानु
चिंतया ॥ ९ ॥ चोदितोविप्रवाक्येननत्वांधक्ष्यतितक्षकः ॥ मृत्यवोनोपधक्ष्यंतिमृत्यूनांमृत्युमीश्वरं ॥ १० ॥ अहंब्रह्मपरं
धामब्रह्माहंपरमंपदं ॥ एवंसमीक्ष्यन्नात्मानमात्मन्याधायनिष्कले ॥ ११ ॥ दशंतंतक्षकंपादेलेलिहानंविषान
नैः ॥ नद्रक्ष्यसिशरीरंचविश्वंचपृथगात्मनः ॥ १२ ॥ एतत्तेकथितंतातयथात्मापृष्टवान्नृपः ॥ हरेर्विश्वात्मनश्चेष्टांकिं
भूयःश्रोतुमिच्छसि ॥ १३ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेप्रमाणलक्षणंपंचमोध्यायः ॥ ५ ॥

तीतिव्यतिहारोदर्शितः ॥ निष्कलेनिरुपाधौआत्मनिब्रह्मणि ॥ ११ ॥ विषयुक्तैराननैर्दशंतंअग्रेपश्यंतंतक्षकंलेलिहानंसर्पं ॥ यद्वालेलिहानं जिह्वा
ग्रैष्टंप्रांतमनिष्पेषमास्वादयंतं ॥ आत्मनः पृथक् ॥ १२ ॥ हरेश्चेष्टांआत्मात्वंयत्पृष्टवानसितदेतत्तेकथितं ॥ शिष्यस्यकृतार्थतापरीक्षणायपृच्छति ॥ किमिति
॥ १३ ॥ इतिद्वादशेपंचमः

भा०द्वा
१६

षष्ठे परीक्षितो मोक्षः सर्पहोमादि तत्सुतात् ॥ वेदशाखाविभागोक्तो त्रिवेदीव्यासवर्णनं ॥१॥ एतच्छ्रवणं निशम्य ॥ निखिलात्मा हरिस्तत्पदपश्यतीति निखि
लं चात्मनि पश्यतीति तथा तेन ॥ समेन ॥ नतेन अवनतेन मूर्ध्ना ॥ तस्मात्तत्पादमूलमुपसृत्य तस्य पादौ शिरसि निधायेत्यर्थः ॥१॥ सिद्धः कृतार्थोऽस्मि
यतः अनुगृहीतोऽस्मि ॥ अनुग्रहमेवाह ॥ यद्यस्मात् श्रावितः ॥ चराचरात्मा निधनं च ॥२॥ करुणात्मतां पामिनं रति ॥ द्वाभ्यां ॥ नात्यद्भुतमिति ॥३॥ अश्रौ
ष्म श्रुतवन्तः ॥ भवतः सकाशात् ॥४॥ सिद्धोऽस्मीत्युक्तं तदेवाविः करोति भगवन्निति ॥ यतः त्वया दर्शितं ब्रह्म प्रविष्टः ॥ कथंभूतं ॥ अभयं यतो निर्वाणं

एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ॥ तत्पादमूलमुपसृत्य नतेन मूर्ध्ना बद्धां
जलिस्तमिदमाह स विष्णुरातः ॥१॥ राजोवाच ॥ सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना ॥ श्रावितो यच्च मे साक्षादनादि
निधनो हरिः ॥२॥ नात्यद्भुतमहं मन्ये महतामच्युतात्मनां ॥ अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ॥३॥ पुराणसंहितामेतामश्रौ
ष्म भवतो वयं ॥ यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ॥४॥ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं ॥ प्रविष्टो ब्रह्म नि
र्वाणमभयं दर्शितं त्वया ॥५॥ अनुजानीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे ॥ मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून्
अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ॥ भवता दर्शितं क्षेमं परं भगवतः पदं ॥७॥ क्षेमं कैवल्यरूपं ॥५॥ किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्राभि
प्रायं न किंचिच्छ्रोतुमिच्छामि केवलमनुज्ञां देहीत्याह ॥ अनुजानीहीति ॥ वाचमिन्द्रियलक्षणां सर्वेन्द्रियाणां वाचं नियम्य किं करिष्यसि तदाह ॥ मुक्ताः कामा
शयाः तद्वासनाये न तच्चेतः ॥ अधोक्षजे प्रवेश्य असून्विसृजामि ॥६॥ ननु किं प्राणत्यागेन कंचित्कालं ज्ञाननिष्ठो भवेति चेत्तत्राह अज्ञानं चेति ॥ चका
रात्तत्संस्कारश्च तद्बन्धकमपि एवेत्याह ॥ भवतेति ॥७॥ श्रीराम

राम
१६

द॥ आत्मनाऽऽत्मानमात्मानं मनः॥ आत्मनि प्रत्यक्स्वरूपे समाधाय परमात्मानं दध्यौ॥ अस्पंदासुः लीनप्राणः॥ यथा तरुः स्थाणुः॥ ९॥ तमेव
विशिनष्टि॥ प्राक्कूले प्रागग्रे बर्हिषि दर्भे॥ १०॥ तदेवं ब्रह्मभूते तस्मिन् तक्षकागमनादिकं विश्वपेषणमिवाभवदिति दर्शयति तक्षक इति त्रिभिः
हे विप्राः तं विषं चिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनायागच्छंतं॥ ११॥ तत्र स्थालीरवदृक्तस्य भस्मीभूतस्य पुनः संरक्षणादिक्रमेणोत्थापना

सूत उवाच॥ इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः॥ ८॥ परीक्षिदपि रा-
जर्षिरात्मन्यात्मानमात्मना॥ समाधाय परं दध्यावस्पंदासुर्यथा तरुः॥ ९॥ प्राक्कूले बर्हिष्यासीनो गंगाकूल उद-
ङ्मुखः॥ ब्रह्मभूतो महायोगी निःसंगः छिन्नसंशयः॥ १०॥ तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना॥ हंतुकामो
नृपं गच्छन्ददर्श पथि कश्यपं॥ ११॥ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणं॥ द्विजरूपप्रतिच्छन्नः कामरूपोऽदश-
न्नृपं॥ १२॥ ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना॥ बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां॥ १३॥ हाहाकारो महा-
नासीद्भुवि खे दिक्षु सर्वतः॥ विस्मिता ह्यभवन्सर्वे देवासुरनरादयः॥ १४॥ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः॥

द्विषहारिणं॥ तदपेक्षितं द्रविणैः संतर्प्य ततो निवर्त्य द्विजरूपेणागतोऽहितः सन्नदशत्॥ १२॥ तच्च तत्र ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः
कृतमिव जातमित्याह ब्रह्मभूतस्येति॥ १३॥ तत्र कारणं सर्वेषां दुःखं च ततः परमात्मत्वं चाहत्वाऽभ्यां हाहाकार इति॥ १४॥ ॥ १५॥

प्रासंगिकमाह जनमेजय पश्यामि ॥ सर्पाणि विचारसत्रे द्विजैः सह वर्त्तमानः यथा वराङ्गहा वज्रहा वेति वा ॥ सर्वसर्पावाहने कारणमाह संक्रुद्ध इति
१६ ॥१८॥ कस्मान्नतक्षको नदह्यते तक्षकाः संतो द्विजाः ऊचुः तमिति ॥ तेन इंद्रेण ॥ गुप्तो सर्प्पः ॥१९॥ ऋत्विजः प्रतिप्राह ॥ सहेंद्रः इंद्रसहितः किमिति न
पात्यते ॥२०॥ तद्वाह्मणवचः श्रुत्वा आजुहुवुः ॥ प्राङ्गे पश्यान्ह्वानं दर्शयति ॥ तक्षकेति ॥ इहाग्नावाशुपत ॥ मरुत्वता सहकृणवतां इंद्रेण सह ॥२१॥ ब्राह्मणै-

जनमेयः स्वपितरं श्रुत्वा तक्षकभक्षितं ॥ यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः ॥१६॥ सर्प्पसत्रे समिद्धाग्नौ दह्यमानान्महोर-
गान् ॥ दृष्ट्वेंद्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥१७॥ अपश्यंस्तक्षकं तत्र राजा पारिक्षितो द्विजान् ॥ उवाच तक्षकः कस्मान्नदह्येतोरगाध-
मः ॥१८॥ तं गोपायति राजेंद्र शक्रः शरणमागतं ॥ तेन संस्तंभितः सर्प्पस्तस्मान्नाग्नौ पतत्यसौ ॥१९॥ पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः
सहेंद्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥२०॥ तच्छ्रुत्वाजुहुवुर्विप्राः सहेंद्रं तक्षकं मखे ॥ तक्षकाशु पतस्वेह सहेंद्रेण मरुत्वता ॥२१॥ इति
ब्रह्मोदिताक्षेपैः स्थानादिंद्रः प्रचालितः ॥ बभूव संभ्रान्तमतिः सविमानः सतक्षकः ॥२२॥ तं पतंतं विमानेन सह तक्षकमंबरात
स: विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः ॥२३॥ नैष त्वया मनुष्येंद्र वधमर्हति सर्पराट् ॥ अनेन पीतममृतं अथ वा अजरामरः ॥२४॥ जी-
वितं मरणं जंतोर्गतिः स्वेनैव कर्मणा ॥ राजंस्ततोन्यो नास्यास्य प्रदाता सुखदुःखयोः ॥२५॥ सर्प्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप
पंचत्वमृच्छते जंतुर्भुंक्त आरब्धकर्म तत् ॥२६॥ तस्मात्सत्रमिदं राजन्संस्थीयेताभिचारिकं ॥२७॥ ह्मोदिताक्षेपैः प्रहृष्टवाक्यैः सतक्षकः ॥२२॥ आंगिरसः

पुत्रो बृहस्पतिः प्राह ॥२३॥४॥ पवहनामाजरामरः तथापि पितृमारकवधस्यापि तिचेन्नत्राह जीवितमिति ॥ गतिः परलोकः अतो दुर्मरणनिमित्तापितृगी-
ति रनेनकृतेत्यपि रनेनकृतेस्यपि न शंकनीयमित्यर्थः ॥२५॥ कथमन्यः सुखदुःखप्रदाता नास्ति ॥ सर्पादीनामुपलंभ ॥ मानत्वादिति चेन्नत्राह सर्पादि.
...तेः पंचत्वं मृत्युमृच्छति प्राप्नोति ...यतस्तदारब्धं कर्मैव भुंक्ते ॥ सुखमिष्टयुक्ता एवं सर्पादयो निमित्तमात्रा इति भावः ॥२६॥ संस्थीयेत समाप्यतां अभिचारकं हि

रिष्टप्रावीनंकर्म॥ ऋतः सर्पा इष्टुड्डशुद्धस्पतवाप्ययनापराध इति भावः॥२७॥ वाक्पतिं बृहस्पतिं॥२८॥ ननु कथं विदुषामप्येवं संमोहः यतो ब्रह्मकोपात्परीक्षितो मृत्युः जनमेजयकोपात्सर्पाणामित्यादि॥ तत्राह सैषेति॥ तस्या महत्त्वं दर्शयति॥ अलक्षणानलक्ष्यतरत्पलक्षणाश्च प्रतर्क्येत्यर्थः॥ कायाविन्यत आह॥ ययाप्यविष्णोरेवश्चात्मभूताः आत्मारामभूताः ज्ञानिनः गुणावृत्तिभिः क्रोधादिभिः भूतेषु देहेषु युज्यन्ति बाध्यबाधकतां भजंतीत्यर्थः॥ ननु श्रवणादिना बाधितया कुतो मोहः स्यान्नत्याह॥ अबाधयाबाधितमशक्यया॥२९॥ कथं तर्हि मायातत्को पैनिवृत्तिरित्याशंक्याश्रीविष्णुस्वरूपतापूर्वकं तद्भजनात्सर्वानर्थनिवृत्तिरितिशास्त्रार्थमुपसंहरति॥ नयत्रेतिपंचभिः दंभीतियामाया

सर्पाश्च नागा मोहेन धाजनेर्ईष्टहिमुजल्पते॥२७॥ इत्युक्तः सतथेत्याह महर्षेर्मानयन्वचः॥ सर्पसत्रादुपरतः पूजयामास वाक्पतिं॥२८॥ सैषा विष्णोर्महामाया बाधयालक्षणया यया॥ मुह्यंत्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः॥२९॥ न यत्र दंभीत्यभया विराजिता मायात्मवादे सकृदात्मवादिभिः॥ न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्प वृत्तियत॥३०॥

कपटवानयं दुमानित्येवं भूतायां तद्भावमकृत्वा विलीयमानायां मायेत्यर्थः॥ सा चात्मवादे क्रियमाणे आत्मवादिभिर्यत्र न विराजिता न प्रकाशिता॥ किंतु भीतेव स्वकार्यमोहादिकमकुर्वती कथंचित्तवर्त्तत इति प्रतिपादितेत्यर्थः॥ तदुक्तं॥ तस्मै नमो भगवते वासुदेवाय धीमहि॥ यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं॥ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया॥ विमोहिता विकत्थंते ममाहमिति दुर्धियः इति॥ किंच यद्यस्मिन राश्रयो मायाश्रयो विविधो वादोपि नास्ति॥ विशेषविषयत्वाद्विवादानां॥ तस्य च विशेषातीतत्वादिति भावः॥ संकल्पविकल्पात्मकं यो यस्य तन्मनोपि

भा.·द्वा
१८

किंच ॥ सज्यं कर्म सजनताकारकवर्गेण सह उभयोः सज्यसष्टोः परं साध्यं श्रेयः फलमपि ॥ अतः सज्यसष्टफलैरन्वितो जीवश्चाहंकारात्मको

न यत्र सज्यं सजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहं ॥ तदेतदुत्सा
दितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत तत्स्वयं मुनिः ॥ ३१ ॥

यत्र नास्ति ॥ अतउत्सादितो निरस्तो बाध्यबाधकौ यस्मिन् तदेतत्तत्त्वं स्वयं आत्मस्वरूपमित्यर्थः ॥ तत्रास्मिन्नूर्मीनहंकारादीन्निषिध्य वि
रमेत विशेषेण क्रीडेदित्यर्थः ॥ ३१ ॥

राम
१८

नात्मैवं स्वमेव परं धाम मन्वतीत्याह ॥ परमिति ॥ यदेतत्तदेव परं वै स्वमेव परं स्वरूपं धाम मनंतीति केचित् ॥ अतत आत्मव्यतिरिक्तं उत्सिसृक्षवः त्यक्तु
मिच्छवः ॥ यतः अनन्यसौहृदा नास्ति अन्यस्मिन्सौहृदं येषां ते ॥ ततः दौरात्म्यं देहाद्यहंभावं विसृज्य देहे अहंकाराभावादन्यत्र सौ
हृदं नास्ति अत एवात्मन्येव स्थातुमिच्छवः इत्यर्थः ॥ कथं नेतिनेतीत्येवं ॥ अत्र विद्वदनुभवमपि प्रमाणयति ॥ हृदोपगूह्य ध्यानादिना ॥ ततः समाहि

परं पदं वैष्णवमामनंति तत्तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगूह्यावसितं
समाहितैः ॥२१॥ तत एतदधिगच्छंति विष्णोर्यत्परमं पदं ॥ अहं ममेति दौर्जन्यं न येषां देहगेहजं ॥२२॥ अतिवादां
स्तितिक्षेत नावमन्येत कंचन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥२४॥ नमो भगवते तस्मै कृष्णायाकुंठ
मेधसे ॥ यत्पादांबुरुहध्यानात्संहितामध्यगामिमां ॥२५॥

तैरवसितं निश्चितं ॥ यद्वा अवसितं अवबद्धं आत्मतया गृहीतमित्यर्थः ॥२१॥ एवंभूताश्चाधिकारिणो दर्शयन्निति तत एतदिति ॥ देहजमहमितिगेह
जमहमितिगेहजं ममेति ॥२२॥ प्रासंगिकमाह ॥ अतिवादानिति ॥२४॥ शास्त्रसमाप्तौ गुरुं प्रणमति नम इति ॥ कृष्णाय व्यासाय ॥ अध्यगां
अधिगतवानस्मि ॥२५॥

भा.द्वा
१९

स्मात्संहितामध्यगामित्युक्तं ॥ तत्र पुराणसंहिताविभागं विशेषतो वक्तुं वेदविभागमपि प्रसंगात्पृच्छति पैलादिभिरिति ॥ हे सौम्य ॥ ३६ ॥ तत्र प्रथ
मं वेदाविर्भावप्रकारमाह समाहितात्मन इत्यष्टभिः ॥ ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत् यः कर्णपुटपिधाने श्रोत्रवृत्तिनिरोधात्स्व
हृदि सविविभाव्यते वितर्क्यते ॥ ३७ ॥ प्रसंगान्नादोपासकानां मोक्षफलमाह ॥ यस्य नादस्योपासनया आत्मनो मलं धूत्वाऽपोह्य ॥ कथंभू

शौनक उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च कथिता व्यस्ता एतत्सौम्याभिधेहि नः ॥ ३६ ॥ सूत
उवाच ॥ समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ ३७ ॥ यदुपास
नया ब्रह्मन्योगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवं ॥ ३८ ॥ ततोऽभूत्त्रिवृदोंकारो योऽव्य
क्तप्रभवः स्वराट् ॥ यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥

तं मलं तमाह ॥ द्रव्यमधिभूतं क्रियाऽध्यात्मं कारकमधिदैवमेवं त्रिधाभूतं ॥ आत्माय स्येति तथा तं ॥ ३८ ॥ त्रिवृत्त्रिमात्रः ॥ कंठोष्ठादिभिः उच्चा
र्यमानत्वादोंकारस्याक्षरसमाम्नायांतर्भावात् सूक्ष्मतया तं विशिनष्टि ॥ अव्यक्तः प्रभवो यस्य सः ॥ तदेवाह ॥ स्वराट् स्वत एव हृदि प्रकाशमा
नः ॥ तमेव कार्येण लक्षयति ॥ यत्तदिति ॥ नपुंसकत्वं लिंगविशेषणत्वात् ॥ लिंगं गमकं ॥ ३९ ॥

राम
१९

कोसौपरमात्मातमाहश्रृणोतीति ॥ इमंस्फोटं ॥ अव्यक्तमोंकारं ॥ नतुजीवएवतंश्रृणोतीतेत्याह ॥ छन्नश्रोत्रेकर्णपिधानादिना ॥ अवृत्तिकेः
पिश्रोत्रेसति ॥ जीवस्यकरणाधीनज्ञानत्वात्ततदाश्रोता ॥ तदुपलब्धिस्तुतस्यपरमात्मद्वारकैवेतिभावः ॥ ईश्वरस्तुनैवं ॥ यतःअन्य
इकृश्नेःपीन्द्रियवर्गादिकृतज्ञानंयस्य ॥ तथाहि ॥ छन्नोयदाशब्दंश्रुत्वायद्बुध्यतेनतदाजीवःश्रोतालीनेन्द्रियत्वात् ॥ अतोयस्तदाशब्दं
श्रुत्वाजीवंप्रबोधयतिसयथापरमात्मैवतद्वत ॥४॥ कोसावोंकारःतंविशिनष्टिसार्द्धेन ॥ येनवाक्व्यज्यते ॥ यस्यचहृदया

श्रृणोतियइमंस्फोटंछन्नश्रोत्रेचशून्यदृक् ॥४॥ येनवाक्व्यज्यतेयस्यव्यक्तिराकाशआत्मनः ॥ स्व
धाम्नोब्रह्मणःसाक्षाद्वाचकःपरमात्मनः ॥ ससर्वमंत्रोपनिषद्वेदबीजंसनातनं ॥४१॥ ॥

काशेआत्मनःसकाशाद्व्यक्तिःअभिव्यक्तिः ॥ किंच ॥ स्वधाम्नःस्वस्याश्रयःकारणायतद्ब्रह्मतस्य ॥ किंच ॥ परमात्माशभूतसमस्त
देवतावाचकोःपीत्याशयेनाह ॥ सइति ॥ सर्वमंत्राणामुपनिषदांहस्यं ॥ सूक्ष्मरूपमित्यर्थः ॥ तत्रहेतुः ॥ वेदानांबीजंकारणं
बीजत्वेःप्यविकारितामाह ॥ सनातनंसदैकरूपं ॥ तस्यब्रह्मरूपत्वात ॥४१॥

भा॰द्वा॰ १०

इदानीं ततः सर्ववेदप्रवचनोत्पत्तिप्रकारमाह ॥ तस्य हीति ॥ त्रयस्त्रिसंख्याप्रसक्ताः भावाः ॥ येरकारोकारमकारैर्धार्यन्ते तत्कारणत्वात् ॥ तानेवाह ॥ गुणाः
सत्वादयः नामानि ऋगयजुःसामानि अर्था भूर्भुवःस्वर्लोकाः वृत्तयो जाग्रदाद्याः ॥४२॥ ततस्तेभ्यो वर्णेभ्यः ॥ अक्षराणां समाम्नायं समाहारं ॥
तमेवाह ॥ अन्तस्थाः यरलवाः ॥ ऊष्माणः शषसहाः ॥ स्वराः अकाराद्याः स्पर्शाः कादयः ॥ ह्रस्वदीर्घौ च ॥ आदिशब्दाज्जिह्वामूलीयादयः एवं लक्षणं
स्वरूपं यस्य तं ॥४३॥ विभुः चतुर्मुखो ब्रह्मरूपो भगवान् ॥ असृजदिति पूर्वेणैवान्वयः ॥ चातुर्होत्रविवक्षया चत्वारो होत्रोपलक्षिता ऋत्विजश्चतु

तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ॥ धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ॥४२॥ ततोऽक्षरसमाम्नायमसृजद्भगवानजः ॥
अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं ॥४३॥ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ॥ सव्याहृतिकान्सोंकारांश्चातुर्हो
त्रविवक्षया ॥४४॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ॥ ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥४५॥ ते परंपर
याप्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥४६॥ क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य काल

र्होतारः ॥ तैरनुष्ठेयं होत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षया ॥४४॥ पुत्रान् तः वेदान्ब्रह्मर्षयो व्यस्यन्हृदिस्थाच्युतचोदिताः ॥४७॥
मरीच्यादीन् तान्वेदान् ॥ ब्रह्मकोविदान् वेदोच्चारणादिनिपुणान् ॥४५॥ एवं चतुर्युगेषु प्राप्ताः ॥ द्वापरादौ द्वापरमादिर्यस्यान्तरं त्यांशल
क्षणस्य तस्मिन् ॥ द्वापरान्ते वेदविभागप्रसिद्धेः ॥ शतंतु समकालव्यासावतारप्रसिद्धेश्च ॥ व्यस्ता विभक्ताः ॥४६॥ तत्र हेतुः क्षीणायुषो
जनान् ॥ तर्हि शुद्धसत्वबुद्धिप्रभवत्वात् ॥ अनादरणीयं स्यादित्याशंक्याह ॥ हृदिस्थेति ॥४७॥

राम १०

एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतमन्वंतरे विशेषतो निरूपयितुमाह अस्मिन्नपीति ॥ ४८ ॥ अंशो मायातद्यांशः सत्वं तस्य कलया अं
शेन अवतीर्णः सन् ॥ ४९ ॥ चातुर्विध्यमेवाह ऋगिति ॥ ऋगादिमंत्राणां राशीन् वर्गशः तत्तत्प्रकरणभेदेनोद्धृत्य ॥ यथाऽनेकविधमणिराशेर्म
णिर्गणाः पद्मरागादयो विविच्योद्धृत्य तेन दृढ उद्धृत्य तैर्मंत्रैश्चतस्रः ऋगादिसंहिताश्चक्रे ॥ ५० ॥ तासां संहितानां मध्ये एकैकं ॥ ५१ ॥ बह्वृ

अस्मिन्नप्यंतरे ब्रह्मन् भगवान् लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ४८ ॥ पराशरात्सत्यवत्यामंशां
शकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधं ॥ ४९ ॥ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ॥ चतस्रः
संहिताश्चक्रे मंत्रैर्मणिगणा इव ॥ ५० ॥ तासां स चतुरः शिष्यानुपाहूय महामतिः ॥ एकैकां संहितां ब्रह्मन्नेकै
कस्मै ददौ विभुः ॥ ५१ ॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणं ॥ ५२ ॥ साम्नां जै
मिनये प्राह तथा छंदोगसंहितां ॥ अथर्वांगिरसीं नाम स्वशिष्याय सुमंतवे ॥ ५३ ॥ पैलः स्वसंहितामूचे इंद्रप्रमितये मुनिः
बाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकां ॥ ५४ ॥

सघुरायरूपत्वात् ॥ बह्वृचाख्यां ॥ नितरां गद्यश्लेषेणागीयमानत्वान्निगदाख्यं ॥ ५२ ॥ छंदस्सु
गीयमानत्वात् ॥ छंदोगाख्यां संहितां ॥ ५३ ॥ तत्र ऋग्वेदशाखाविभागमाह ॥ पैल इति ॥ स्वसंहितां द्वेधा विभज्य इंद्रप्रमितये बाष्कलाय च अदे

५४

भा.द्वा

स बाष्कलोपि स्वसंहिताश्चतुर्धा व्यस्य बोध्यादिभ्यः शिष्येभ्यस्त्वाह ॥ हे भार्गव ॥ ५५ ॥ इंद्रप्रमितिरप्येवां संहितां स्वसुतं मांडूकेयमध्यापयामास
तस्य मांडूकेयस्य शिष्यो देवमित्रः ॥ ५६ ॥ तत्सुतः मांडूकेयसुतः शाकल्यो वात्स्यादिभ्यश्च पंचस्वधा न तानध्यापयेमासेत्यर्थः ॥ ५७ ॥ त
च्छिष्यः शाकल्यशिष्यः ॥ स्वसंहितां त्रेधा विभज्य ॥ चतुर्थे वैदिकपदार्थव्याख्यानरूपं निरुक्तं च कृत्वा ॥ बलाकादिभिस्त्रिभ्यो ददौ

चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ॥ पराशरायाग्निमात्रे इंद्रप्रमितिरात्मवान् ॥ ५५ ॥ अध्यापयत्संहितां स्वां मां
डूकेयमृषिं कविं ॥ तस्य शिष्यो देवमित्रः सौभर्यादिभ्य ऊचिवान् ॥ ५६ ॥ शाकल्यस्तत्सुतः स्वां तु पंचधा व्यस्य संहि
तां ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात ॥ ५७ ॥ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहितां ॥ बलाकपै
लजाबालविरजेभ्यो ददौ मुनिः ॥ ५८ ॥ बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहितां ॥ चक्रे वालायनिर्भज्यः
काशारश्चैव तां दधुः ॥ ५९ ॥ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमु

५८ ॥ बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः ॥ प्रतिशाखाभ्यः ॥ उक्तसर्वशाखाभ्यः वालायन्यादयस्तां पारदधुः अ्रु च्यते ॥ ६ ॥
धीतवंतः ॥ ५९ ॥ अकृशाखोपहारपूर्वकं ॥ तच्छ्रवणफलमाह ॥ बह्वृचा इति ॥ एतत् छंदसां पतेषां छंदसां ॥ ६ ॥ ॥ ॥

रा.म
११

यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह वैशंपायनशिष्या इत्यादिना । चरकनामनिरुक्तिमाह । यच्चेरुरिति । ब्रह्महत्यारूपमंहः क्षपयती
ति तद्यासौ स्वगुरोरुद्देश्यं व्रतं तच्चरणाच्चरका इत्यर्थः ॥ ६१ ॥ तच्छिष्यः वैशंपायनशिष्यः । अल्पसाराणामेतेषां चरितेन कियत् सुदुश्चरमहं चरि
ष्यामीति ॥ ६२ ॥ विप्रावमंत्रा अवक्ता कर्त्तिमत्तो धीतं मयाऽध्यापितमाशु त्यजेति ॥ ६३ ॥ देवरातसुतो याज्ञवल्क्यः ॥ ६४ ॥ छर्दितस्याददानं विप्ररूपेण
तु चितमिति तित्तिराः । पक्षिविशेषा भूत्वा आददुः । ततस्ते तैत्तिरीया इति प्रसिद्धाः । सुपेशलाः श्रुतिरम्याः । बहुवचनमवांतरभेदविवक्षया

वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन् । यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ॥ ६१ ॥ याज्ञवल्क्यश्च तच्छिष्य
आहाहो भगवन् कियत् । चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरं ॥ ६२ ॥ इत्युक्तो गुरुरप्याह कुपितो याह्य
लं त्वया । विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ॥ ६३ ॥ देवरातसुतः सोऽपि छर्दित्वा यजुषां गणं । ततो गतो
ऽथ मुनयो ददृशुस्तान् यजुर्गणान् ॥ ६४ ॥ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः । तैत्तिरीया इति यजुःशाखा आस
न् सुपेशलाः ॥ ६५ ॥ याज्ञवल्क्यस्ततो ब्रह्मंश्छंदांस्यधिगवेषयन् । गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरं ॥ ६६ ॥

॥ ६५ ॥ का एवमाधर्षेदिना दिशा खाद्यप्रसंगमाह । याज्ञवल्क्य इत्यादिना । गुरोर्वैशंपायनस्याप्यापेन विभज्याध्यक्तत्वादविद्यमानानि । अधिक्य
धिकानि गवेषयन् मृगयन् । सूपतस्थे सम्यक् तुष्टाव । छिन्नवेदानां मीश्वरं कृत्वा । तथा च श्रुतिः । ऋग्भिः । पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे
नोपतिष्ठति मध्ये ऽह्नः । सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यमिति ॥ ६६

एवं स्तुतः प्रसादितस्सु ॥ ७३ ॥ पंचदश शाखाः याः शतैः परिमितैर्यजुर्भिरकरोत् सतैरितिपाठे सएवयातव्रल्क्यस्तैर्यजुर्भिः एकरोदिति ॥ जगृहुः अधीतवंतः एविणाअश्ववरूपेणवाजेभ्यः केसरेभ्यः वाजेनवेगेनवा सन्यस्ताः त्यक्ताः शाखाः वाजसनीसंज्ञास्ताः शाखा इतिपृथक्कृपरंवा ॥ ७४ ॥ सामशाखाविभागमाह ॥ जैमिनेरिति ॥ तत्सुतः सुमंतुसुतः ताभ्यांसुत्वपौत्राभ्यांक्रमेणैकैकांप्राह ॥ ७५ ॥ तच्छिष्यः जैमिनेः

सूत उवाच ॥ एवं स्तुतः स भगवान्वाजिरूपधरो हरिः ॥ यजूंष्ययातयामानि मुनयेदात्प्रसादितः ॥ ७३ ॥ यजुर्भिरकरोच्छाखा दश पंच शतैर्विभुः ॥ जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः ॥ ७४ ॥ जैमिनेः सामगस्यासीत्सुमंतुस्तनयो मुनिः ॥ सुत्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहितां ॥ ७५ ॥ सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् ॥ सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विजः ॥ ७६ ॥ हिरण्यनाभः कौशल्यः पौष्यंजिश्च सुकर्मणः ॥ शिष्यौ जगृहतुश्चान्य आवंत्यो ब्रह्मवित्तमः ॥ ७७ ॥

शिष्यः ॥ महान् अतिमेधावी सहस्रं संहितारूपं भेदं चक्रे साम्नां संहिताभेदं ततस्तदनंतरं ॥ ७६ ॥ सुकर्मणः शिष्यौ एकः कौशल्यो हिरण्यनाभः पौष्यंजिर्नामैकस्तौ जगृहतुः ॥ आवंत्यस्त्वान्यः तस्यैव शिष्यः सोपि जग्राह ॥ ७७ ॥

पौष्यंज्यावंत्ययोरपि च कालाद्धिरण्यनाभस्यापि पंचशतानि शिष्या आसन्नेते तावतीः शाखा अध्याप्य यज्जगृहुः ता उदीच्यानूचतः कालतः
कालेन प्राच्याश्च प्रचक्षते इत्यर्थः ॥ यथोक्तं वैष्णवे ॥ उदीच्याः सामगाः शिष्यास्तस्य पंचशतं स्मृताः ॥ हिरण्यनाभात्तावत्यः संहिता यैर्द्वि-
जोत्तमैः ॥ गृहीतास्तेपि चोच्यंते पंडितैः प्राच्यसामगा इति ॥ ७६ ॥ पुनरप्येतेषां त्रयाणामेककर्मणाः जि[illegible]णाणां ॥ शिष्यांतरैः शाखावहुल्य

उदीच्याः सामगाः शिष्या आसन् पंचशतानि वै ॥ पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान् प्रचक्षते
७६ ॥ लौगाक्षिर्मांगलिः कुल्यः कुशीदः कुक्षिरेव च ॥ पौष्यंजिशिष्या जगृहुः संहितास्ते शतं शतं
७७ ॥ कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः ॥ शिष्य ऊचे स्वशिष्येभ्यः शेषा आवंत्य आत्म-
वान् ॥ ८० ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे वेदशाखाप्रणयनं षष्ठोध्यायः ॥ ॥

दर्शयति लौकाक्षिरिति द्वाभ्यां ॥ ७८ ॥ कृतो नाम हिरण्यनाभस्य शिष्यः स्वशिष्येभ्यः ऊचे शेषाः अन्या अपि याः प्रसिद्धाः शाखाः ता आवंत्यः
स्वशिष्येभ्यः ऊचिवानिति ॥ ८० ॥ इति द्वादशे षष्ठः ॥ सप्तमे त्वथर्वविस्तारः पुराणव्यासनं ततः ॥ पुराणलक्षणादीनि फलं भागवतश्रुतेः ॥ १ ॥ ॥

भा॰ह्म
२४

क्रमप्राप्तमथर्ववेदविभागमाह ॥ शिष्यं कबंधनामानं ॥ एकां एकीयां संहितां ॥ सोपि शिष्यो पितां द्विधा विभज्य ॥ तदुक्तं वैष्णवे ॥ अथर्ववेदं स मुनिः सुमंतुर
मितद्युतिः शिष्यमध्यापयामास कबंधं सोपि तं द्विधा ॥ कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवानिति ॥ १ ॥ २ ॥ तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः
शिष्यानध्यापयामास ॥ पथ्यस्तु त्रिधा विभज्य त्रीनिति सार्धेन ॥ आह शौल्कायनिरिति ॥ १ ॥ अंगिरसः शुनकस्य शिष्यो बभ्रुः सैंधवायनश्च ॥ तदुक्तं

सूत उवाच ॥ अथर्ववित्तमं तस्य शिष्यमध्यापयत् स्वकां ॥ संहितां सोपि पथ्याय वेददर्शाय चोक्तवान् ॥ १ ॥ शौल्कायनिर्ब्रह्मबलि
र्मौदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ॥ कुमुदः शुनको ब्रह्मन् जाजलिस्त्वथर्ववित् ॥ २ ॥ बभ्रुः
शिष्योऽथांगिरसः सैंधवायन एव च ॥ अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथा परे ॥ ३ ॥ नक्षत्रकल्पः शांतिश्च कश्यपांगिरसादि
भिः ॥ एते आथर्वणाचार्याः शृणु पौराणिकान् मुने ॥ ४ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ शिंशपायनहारी
तौ षड्वै पौराणिका इमे ॥ ५ ॥ अधीयंत व्यासशिष्यात् संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगां ॥ ६

शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे ॥ द्वितीयां संहितां प्रादात् सैंधवायनसंज्ञिने इति ॥ सावर्ण्याद्याः सैंधवायनादीनां शिष्याः ॥ २ ॥ नक्षत्र
कल्पः शांतिकल्पश्चेति द्वौ ॥ तदुक्तं ॥ नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचम इति ॥ नक्षत्रकल्पः
दीनां कर्त्ता रक्षत्रनामाभिहच्यते ॥ ४ ॥ ५ ॥ मत्पितुर्मुखादिति ॥ अथ मंव्यासः षट्संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् ॥ तस्माच्च सूतोर
तेत्र्यारुण्यादयः ॥ एकैकां संहितामधीयंत ॥ सूत एषां शिष्यो हंता सर्वाः समधीतवान् ॥ ६ ॥

एम
२४

ण्मशिष्योयोःकृतव्रणः॥ एवंचत्वारोवयं॥ मूलसंहिताइत्यनेनततःसंहितावाहुल्यंसूचितं॥७॥ शुकपरीक्षित्संवादेनिरूपितमपिपुराणल
क्षणं॥ तदिदंकथनादर्शयति पुराणेति॥८॥ अस्यविश्वस्य॥ अत्रसर्गोविसर्गश्चस्थानंपोषणमूतयः॥ मन्वंतरेशानुकथानिरोधोमुक्तिरा
श्रयइत्यत्रोक्तेः॥ स्थानपोषणेवृत्तिरक्षाशब्दाभ्यामुच्यते॥ अंतराणिमन्वंतराणि॥ वंशोवंशानुचरितमितिईशानुकथाः संस्थानिरोधः अनेनै

कश्यपोऽहंचसावर्णीरामशिष्योऽकृतव्रणः॥ अधीमहिव्यासशिष्याच्चत्वारोमूलसंहिताः॥७॥ पुराणलक्षणं
ब्रह्मन्ब्रह्मर्षिभिर्निरूपितं॥ शृणुष्वबुद्धिमाश्रित्यवेदशास्त्रानुसारतः॥८॥ सर्गोऽस्याथविसर्गश्चवृत्तिरक्षां
तराणिच॥ वंशोवंशानुचरितंसंस्थाहेतुरपाश्रयः॥९॥ दशभिर्लक्षणैर्युक्तंपुराणंतद्विदोविदुः॥ केचित्पं
चविधंब्रह्मन्महदल्पव्यवस्थया॥१०॥

वात्यंतिकलयरूपामुक्तिरप्युक्ता हेतुरावेनजीवाश्रयवासनाशरवाच्याः कृतयोगृहीताः
॥९॥ दशभिरेतैर्लक्षणैरर्थैर्युक्तंमहापुराणंविदुः॥ केचित्पंचविधं॥ सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच॥ वंशानुचरितंचेतिपुराणं
पंचलक्षणमिति॥ महत्पुराणं॥ अल्पंचेतिव्यवस्थया॥ यत्रदशापिलक्षणानिपृथक्कानिरूप्यंते॥ तन्महापुराणं॥ यत्रत्वन्येषांपं
चस्वेवांतर्भावस्यविवक्षा॥ तदल्पमपिव्यवस्थयेत्यर्थः॥१०॥

भा० द्वा०
२५

सर्गादिलक्षणानि व्याचष्टे अव्याकृतेत्यादिना ॥ प्रधानस्य गुणानां क्षोभात् यो महान् तस्मात् त्रिवृत् अहंकारस्तस्मात् भूतमात्राणि सूक्ष्माणि इंद्रियाणि च तदर्थानां स्थूलानां तद्देवतानां च संभवः सर्गः कारणसृष्टिः सर्ग इत्यर्थः ॥ उच्यत इति ॥ यथापेक्षमुत्तरत्राप्यनुषंगः ॥११॥ विसर्गं व्याचष्टे ॥ पुरुषेणेश्वरेणानुगृहीतानां ॥ एतेषां महदादीनां पूर्वकर्मवासनाप्रधानो यं समाहारः कार्यभूतश्चराचरप्राणिरूपो

अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ॥ भूतसूक्ष्मेन्द्रियार्थानां संभवः सर्ग उच्यते ॥११॥ पुरुषानुगृहीतानामेतेषां वासनामयः ॥ विसर्गोऽयं समाहारो बीजाद्बीजं चराचरं ॥१२॥ वृत्तिर्भूतानि भूतानां चराणामचराणि च ॥ कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा ॥१३॥ रक्षाऽच्युतावतारेहा विश्वस्यानुयुगे युगे ॥ तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ॥१४॥

बीजाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः ॥१२॥ चराणां भूतानां सामान्यतोऽचराणि विकारात् चराणि विकामाद्वृत्तिः ॥ तत्र तु नृणां स्वेन स्वभावेन कामाच्चोदनयापि वा ॥ या नियता वृत्तिर्जीविका कृता सा वृत्तिरुच्यत इत्यर्थः ॥१३॥ तिर्यङ्मर्त्यर्षिदेवेषु ये अच्युतावतारास्ते षामीहा लीला सा विश्वस्य रक्षोच्यत इत्यर्थः ॥ यैरवतारैरिति समासात् त्रिरूपमाकृष्य वितत्संबंधः ॥ त्रयीद्विषो दैत्याः ॥१४॥

२५

षड्विधं मन्वन्तरमुच्यते ॥ षड्विधत्वमेवाह मन्विति ॥ मन्वादयः षडेते वर्गाः हरेरवताराधिकारेण यत्र प्रवर्तन्ते तन्मन्वन्तरमित्यर्थः ॥ १५ ॥ वंशमाह ॥
ब्रह्मणः सकाशात्प्रसूतिर्येषां तुह्वानामित्यर्थः ॥ तेषामन्वयो वंशः ॥ तत्र भवविश्रुताः तेषां वृत्तं ॥ ये च तद्वंशधरास्तेषां च वृत्तं वंशानुचरित-
मुच्यते ॥ १६ ॥ अस्य विश्वस्य स्वभावतो मायातो निष्पन्नस्य ॥ यद्वा मायातश्चतुर्विधो लय इति ॥ १७ ॥ अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः
सोऽत्र हेतुरुच्यत इत्यर्थः ॥ तस्य निमित्ततामाह ॥ अविद्याकर्मकारकः कर्मकर्त्ता जीवो हि स्वभोक्तृत्वाद्धि स्वसर्गादेः स तत्र हेतुरित्यर्थः ॥

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ॥ ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते ॥ १५ ॥ राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ॥ वंशानुचरितं तेषां वृत्तं वंशधराश्च ये ॥ १६ ॥ नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ॥ संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावतः ॥ १७ ॥ हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ॥ यं चानुशायिनं प्राहुरव्याकृतमुतापरे ॥ १८ ॥ व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ॥ मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥ १९ ॥ ॥ ॥

नन्वनुशयी निमित्तमिति केचित् ॥ अव्याकृतमित्यपरे ॥ तत्राह ॥ यमिति ॥ चैतन्यप्राधान्येनानुशायिनं उपाधिप्राधान्यविवक्षया अव्या-
कृतं ॥ १८ ॥ अपाश्रयमाह व्यतिरेकेति ॥ जाग्रदादिष्ववस्थासु जीवतया वर्तन्त इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु सा-
क्षितयान्वयः समाध्यादौ च व्यतिरेको यस्य तद्ब्रह्म समाश्रयतीति बाधयोरधिष्ठानावधिभूतमपाश्रय उच्यत इत्यर्थः ॥ १९ ॥ ॥

भा० द्वा०
२६

तदेव सदृष्टांतं प्रपंचयति ॥ पदार्थेषु घटादिषु द्रव्यं मृदादि यथा युतमन्वितं अयुतं च बहिरप्यवस्थानात् ॥ रूपनामसु च सन्मात्रं सत्तामात्रं यथा एवं बीजं गर्भाधानमादिर्यासां पंचतांतो यासां तासु देहावस्थासु नवस्वपि ॥ अधिष्ठानत्वेन साक्षित्वेन च युतमयुतं च यत् तदपाश्रय इति १० एवं दशापि लक्षणानि व्याख्यायापवर्णयंति महात्मान इति यदुक्तं तदाह विरमेतेति ॥ यदा सर्गादीनां मायामयत्वानुसंधानेन वामदेवादेरिव स्व

पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु ॥ बीजादिपंचतांतासु ह्यवस्थासु युतायुतं ॥ १० ॥ विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयं ॥ योगेन वा तदात्मानं वेदेहाया निवर्तते ॥ ११ ॥ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ॥ मुनयोष्टादश प्राहुः क्षुल्लकानि महांति च ॥ १२ ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं ॥ नारदीयं भागवतमाग्नेयं स्कांदसंज्ञितं ॥ १३ ॥ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनं ॥ वाराहं मात्स्यं कौर्मं च ब्रह्मांडाख्यमिति त्रिषट् ॥ १४ ॥ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः ॥ शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्द्धनं ॥ १५ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे वेदशाखाविभागो नाम सप्तमोऽध्यायः ॥ ॥

यमेव चित्तं विरमेत ॥ इहैवानुष्ठितेन योगेन वा देवहूत्यादिवत् ॥ तदा विक्षेपाभावादात्मानं वेद ततश्चाविद्यानिवृत्तेरीहायाः संसारव्यापाराः निवर्तंत इत्यर्थः ॥ ११ ॥ पुराणविभागप्रस्तावेन तल्लक्षणादि प्रासंगिकमुक्त्वा प्रकृतमाह ॥ एवंविधैर्लक्षणैर्लक्ष्याणि ॥ १२ ॥ १३ ॥ त्रिषट् अष्टादश ॥ १४ ॥ उपसंहरति ब्रह्मन्निति ॥ मुनेर्व्यासस्य शिष्यादीनां च ॥ ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्द्धनं ॥ श्रोतॄणामिति शेषः ॥ १५ ॥ इति द्वादशे सप्तमः ॥

राम
२६

अथ मेतत्तपश्चर्या मार्कंडेयस्य मोहहेतुः ॥ कामादिभिरसंमोहो नरनारायणप्रसादादिति ॥ १ ॥ पुराणविभागप्रसंगेन पुराणकर्त्तुर्मार्कंडेयस्य च
रितं प्रस्तौतमाह ॥ सूत इति ॥ तमेव वक्तुं योग्य इत्याह ॥ तमसि तिरस्कारे भ्रमतां पारदर्शनः स्तितिवत्तेकः ॥ १ ॥ वक्तव्यमाह ॥ आहुरिति ॥ उर्वरितः
अवशिष्टः ॥ येन कल्पांते न ॥ एतत्कथं घटत इत्येकः प्रश्नः ॥ प्रलयाभावादेतन्न घटत इत्याह सर्वा इति ॥ यतो भार्गवर्षभः ॥ कोपि सा

शौनक उवाच ॥ सूत जीव चिरं साधो वद नो वदतां वर ॥ तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः ॥ १ ॥ आहुश्चिरा
युषमृषिं मृकंडतनयं जनाः ॥ यः कल्पांते उर्वरितो येन ग्रस्तमिदं जगत् ॥ २ ॥ स वा अस्मत्कुलोत्पन्नः कल्पे
ऽस्मिन् भार्गवर्षभः ॥ नैवाधुनापि भूतानां संप्लवः कोपि जायते ॥ ३ ॥ एक एवार्णवे भ्राम्यन् ददर्श पुरुषं कि
ल ॥ वटपत्रपुटे तोकं शयानं त्वेकमद्भुतं ॥ ४ ॥ एष नः संशयो भूयान् सूत कौतूहलं यतः ॥ तं नश्छिंधि महायो
गिन् पुराणेष्वपि संमतः ॥ ५ ॥ सूत उवाच ॥ प्रश्नस्त्वया महर्षे यं कृतो लोकभ्रमापहः ॥ नारायणकथा यत्र गी
ता कलिमलापहा ॥ ६ ॥

कुतिको नैमित्तिको वा ॥ २ ॥ अन्यदप्युद्घाटितमेवेत्याह ॥ एक एवेति ॥ तोकं बालकं ॥ ४ ॥ कौतूहलं श्रोतु
कामं ॥ तं संशयं ॥ न केवलं त्वं महायोगी किंतु पुराणेष्वपि ज्ञातृत्वेन संमतः ॥ ५ ॥ प्रश्नमभिनंदति ॥ हे महर्षे अयं प्रश्नः ॥ तत्र हेतुः नारायणे
ति ॥ यत्र प्रश्नविषये ॥ ६ ॥

भा॰ द्वा ९७

तत्र मार्कंडेयस्तपसा भगवंतमाराध्य मायायाः दर्शनं वव्रे ॥ ततश्च ते भगवन्मायया सप्रलयकल्पा दृष्टाः नान्यैरित्यन्तरवत्क्रमादित आरभ्य तस्य चरितमा
ह प्राप्तेत्यादिना मार्कंडेयो मृत्युं जिग्य इति पंचमश्लोकेनान्वयः ॥ मध्यमग्रंथेन तस्य धर्मः कथ्यते प्राप्तो द्विजातिसंस्कारः उपनयनाख्यो येन सः

प्राप्तद्विजातिसंस्कारो मार्कंडेयो पितुः क्रमात् ॥ छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥ ७ ॥ बृहद्व्रतधरः शांतो जटिलो वल्कलांबरः ॥ बिभ्रत्कमंडलुं दंडमुपवीतं समेखलं ॥ ८ ॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययोर्हरिं ॥ ९ ॥ सायं प्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः ॥ बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ १० ॥ एवं तपःस्वाध्यायपरो वर्षाणामयुतायुतं ॥ आराधयन्हृषीकेशं जिग्ये मृत्युं सुदुर्जयं ॥ ११ ॥ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च ये परे ॥ नृदेवपितृभूतानि तेनासन्नतिविस्मिताः ॥ १२ ॥ इत्थं बृहद्व्रतधरः तपःस्वाध्यायसंयमैः ॥ दध्यावधोक्षजं योगी ध्वस्तक्लेशांतरात्मना ॥ १३ ॥

पितुः सकाशात् गर्भाधानादिक्रमात् ॥ छंदांसि वेदान् ॥ ७ ॥ बृहद्व्रतधरः नैष्ठिकब्रह्मचारी सन् ॥ ८ ॥ नियमर्द्धये धर्मवृद्धये अग्न्यादिरूपं हरिमर्चयन् ॥ ९ ॥ भैक्ष्यं गुरवे समाहृत्य तेनानुज्ञातश्चेत्सकृद्भुंजे नो चेत्तत्कालं दाचिदुपोषितो भवति ॥ १०-११ ॥ तेन मृत्युजयेन ॥ १२ ॥ ध्वस्ताः क्लेशा रागादयो यस्य तेन ॥ अंतरात्मना अयत्नाहृतेन मनसा ॥ १३ ॥

राम ९७

१४ ॥ तस्य तपो निष्ठामिति हासेन वर्णयति एतदित्यादिना ॥ अस्मिन् सप्तमे मन्वंतरे तपसा मत्पदं ग्रहीष्यतीति विशंकितः ॥ १५ ॥ सुनये सु
निभ्रंशयितुं ॥ रजन्तोकं श्रुतिप्रियमप्सरसां लोभः मदश्चैतौ ॥ १६ ॥ १७ ॥ तदाश्रमपदं प्रविष्टो वायुर्वेवासितिनृत्तीये गोत्वनुपः ॥ पुण्यैः पद्मैः
नाभिश्चांचित पूजितं ॥ पुण्यद्विजानामृषीणां कुलैराकीर्णं पुण्यया शुद्धमलाजं जलाशयाय यस्मिन् ॥ १८ ॥ मत्तभ्रमराणां संगीतं यस्मिन्

तस्यैवं युंजतश्चित्तं महायोगेन योगिनः ॥ व्यतीयाय महान्कालो मन्वंतरषडात्मकः ॥ १४ ॥ एतत्पुरंदरो ज्ञात्वा सप्त
मेस्मिन् किलांतरे ॥ तपो विशंकितो ब्रह्मन्वारे मे तद्विघातनं ॥ १५ ॥ गंधर्वाप्सरसः काम वसंत मलयानिलौ
सुनये प्रेषयामास रजन्तोकमदौ तथा ॥ १६ ॥ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्वगह्वरे ॥ पुष्पभद्रा नदी यत्र
चित्राख्या च शिला शिभो ॥ १७ ॥ तदाश्रमपदं पुण्यं पुण्यपद्मलताञ्चितं ॥ पुण्यद्विजकुलाकीर्णं पुण्यामलजला
शयं ॥ १८ ॥ मत्तभ्रमरसंगीतं मत्तकोकिलकूजितं ॥ मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलं ॥ १९ ॥ वायुः प्रविष्टस्तत्रादौ .

मत्तकोकिलानां कूजितं यस्मिन् ॥ मत्तबर्हिणां एव नटानां आटोपः सं ॥ हिमनिर्झरशीकरान् ॥ सुमनोभिः परिष्वक्तो ववावुत्तेजयन्स्मरं ॥ २०
भ्रमो यस्मिन् ॥ मत्तद्विजानां पक्षिणां कुलैराकुलं व्याप्तं ॥ १९ ॥ एवं भूतं तदाश्रमपदं प्रविष्टः सन् वायुर्मलयानिलो ववौ प्रससार ॥ उत्तेजयन् उ
द्दीपयन् ॥ तत्र हेतुः प्रवेशात् आदौ हिमनिर्झरकणानामादानात् शैत्यं पुष्पपरिष्वंगात् सौगंध्यं चोक्तं ॥ २० ॥

भा॰ द्वा
१८

किंच ॥ उद्यंतश्चंद्रो यस्मिन् तत्रिशावक्त्रं रजनीमुखं यस्मिन् रम्ये ॥ प्रवालतल्पकामानालयः श्रेणायोऽयं जतेः ॥ गुप्यंति विटपैः संच्छिद्यंतीति गो
पादपाः लताश्च तेषां जालैः आविर्बभूव ॥ ११ ॥ किंच ॥ नदागीतवादित्रप्रघोषैः गायकादिभिगुराधिपैः गंधर्वैः रंभ्रीयमानः ॥ तथाव ॥ त्रि
योष्फरसहायायाश्रुथयस्सपतिः ॥ आनंचापमिश्चर्येन ससस्मरस्तु तत्राद्दश्यत ॥ १२ ॥ दुराधर्षश्रमिभवितमाशकां ॥ १३ ॥ ४ ॥ शोषणोदीपनं सं

उद्यच्चंद्रनिशावक्त्रः प्रवालस्तबकालिभिः ॥ गोपद्रुमलताजालैः तत्रासीत्कुसुमाकरः ॥ १२ ॥ कूजद्विहंगमालोपगंधर्वैर्गीतवादित्रप्र
घोषैः ॥ अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥ १२ ॥ हुत्वाग्निं समुपासीनं ददृशुः शक्रकिंकराः ॥ मीलिताक्षं दुराधर्षं मूर्ति
मंतमिवानलं ॥ १३ ॥ ननृतुस्तस्य पुरतः स्त्रियोऽथो गायका जगुः ॥ मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमं ॥ १४ ॥ संदधेऽस्त्रं स्वधनुषि
कामः पंचमुखं तदा ॥ मधुर्मनो रजस्तोक इंद्रभृत्या व्यकंपयन् ॥ १५ ॥ क्रीडंत्याः पुंजिकस्थल्याः कंदुकैः स्तनगौरवात् ॥ भृश
मुद्विग्नमध्यायाः केशविस्रंसितस्रजः ॥ १६ ॥ इतस्ततो भ्रमद्दृष्टेश्चलंत्या अनुकंदुकं ॥ वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलं
॥ १७ ॥ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः ॥ १८ ॥

मोहनसंतापोन्मादस्तंभनशोषणाख्यानि पंच मुखानि यस्य तदस्त्रं संदधे ॥ तदेव मधुर्वसंतः ॥ रजस्तोकश्च पुंस्त्वमार्षं अन्ये इंद्रभृत्या तस्य मनो व्यकं
पयन् ॥ १५ ॥ १६ ॥ किंच ॥ वायुर्मलयानिलः पुंजिकस्थल्याः तत्सूक्ष्मं वासो जहार ॥ १७ ॥ सर्वं तेषां कर्म तत्र तस्मिन्मोघं व्यर्थं ॥ अनीशस्य
निर्दैवस्य ॥ १८ ॥

एम
१८

मुनेरपकुर्वतः प्रतिकूलमाचरतः हे मुने ॥ १८ ॥ अहमः अहंकारस्य भावविकारः २० निस्तेजसं म्लानवदनं ख्यापिदं इः २१ ॥ नरनारायणावु
पोहरिः २२ ॥ तावन्तर्वर्णयति ॥ द्वाभ्यां ॥ एवं कल्मा जिनं वल्कलं चीवरं ययोस्तौ ॥ पवित्रे पाणयोर्ययोः तौ ॥ त्रिवृत त्रिगुणान्वर्तं तत्कमिति

न ह्यस्य पपकुर्वतो मुने लज्जे जमा मुने ॥ दह्यमानानिव वृत्तः प्रबोध्याहिमिवार्भकाः ॥ १९ ॥ इतीद्राननुचरै
ब्रह्मन्धर्षितोपि महामुनिः ॥ यन्नागादहमो भावं न तच्चित्रं महत्सुहि ॥ २० ॥ दृष्ट्वा निस्तेजसं कामं सगणं भ
गवान्स्वराट् ॥ श्रुत्वानुभावं ब्रह्मर्षे विस्मयं समगात्परं ॥ २१ ॥ तस्यैवं युञ्जतश्चित्तं तपः स्वाध्यायसंयमैः
अनुग्रहायाविरासीन्नरनारायणो हरिः ॥ २२ ॥ तौ शुक्लकृष्णौ नवकंजलोचनौ चतुर्भुजौ रौरववल्कलांब
रौ ॥ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं ॥ २३ ॥ पद्माक्षमालामुत जंतुमार्जनं वेदं च
साक्षात्तप एव रूपिणौ ॥ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ ॥ २४ ॥ ॥ ॥

वा त्रिवृद्बर्हिः पवमानमित्यादौ नवके प्रयोगादिति नवतंत्वात्मियं २३ वेदं चर्मकुष्टिं किंच साक्षात्तप एव तौ ॥ तत्र हेतुः ॥ तपत्तडिद्वर्ण
दैदीप्यमानविद्युत्संकाशं यत्पिशंगरोचिः तेन रूपिणौ मूर्तिमंतौ ॥ तादृक् तेजो धन्ना मूर्तिमंतं तपो मयत्वेन प्रकाशमानाविव्यर्थः प्रांशू उन्नतौ
॥ २४ ॥

भा॰द्वा॰
१८

उच्चैर्महतादरेण ॥३५॥ तयोः संदर्शनेन य आनंदस्तेन निर्वृत्ता उपशांता आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य सः । न सेहे नाशक्नोत् ॥३६॥ आश्लि-
षन् आलिंगयन्निव ॥३७॥ पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन अर्घ्येण ॥३८॥ पादानम्य गरिष्ठौ पूज्यतमौ तौ प्रति ॥३९॥ अंतर्यामिणं स्तौति यस्यैव प्रे-
र्कत्वादात्मनस्तत्स्तुतावसामर्थ्यं पश्यन्नाह किमिति ॥ हे विभो तव त्वां किं वर्णये कथं स्तौमि यत् येन त्वयैव उदीरितः प्रेरितः असुः प्राणः सं-

ते वै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ॥३५॥ स तत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः
हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं ॥३६॥ उत्थाय प्रांजलिः प्रह्व औत्सुक्यादाश्लिषन्निव ॥ नमो नम इतीशानौ बभा-
षे गद्गदाक्षरः ॥३७॥ तयोरासनमादाय पादयोरवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥३८॥ सुखमासन
आसीनौ प्रसादाभिमुखौ मुनी ॥ पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥३९॥ मार्कंडेय उवाच ॥ किं वर्णये तव वि-
भो यदुदीरितोऽसुः संस्पंदते तमनु वाङ्मनइंद्रियाणि ॥ स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भा-
वबंधुः ॥४०॥

संस्पंदते प्रवर्त्तते ॥ तमनु च वागादयः स्पंदंति ॥ अत्र हेतुः ॥ वै अन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादिश्रुतिभिश्च तत्प्रसिद्धमि-
त्यर्थः ॥ न केवलं प्राकृतानां तनुभृतां किंतु अजशर्वयोश्च ॥ अतः स्वस्य ममापि तथैव एवं यद्यपि न कश्चिदपि कस्यापि स्तोता तथा ॥ अथापि इदाह
यत्र वर्त्तत्वेन प्रवर्त्तितैरपि वागादिभिर्भजतां प्रसंगा ॥ भावबंधुः आत्मबंधुः अपि न तु पित्रादिवद्देहमात्रबंधुः ॥ अहो कपास्तु नाततवेत्यर्थः ॥४०॥

राम
१८

ननु कथमावाभ्यामादिप्रवर्त्तकौ ॥ धर्मपुत्रत्वादावयोरिति चेत्तत्राह पृश्नीरिति ॥ हे भगवन् भगवतस्तव हे मे पृश्नीः त्रिलोक्याः क्षेमाय पालनाय
तापविरमाय दुःखनिवृत्त्यै मृत्युजित्यै मोक्षाय च ॥ न तु त्वं कस्यापि पुत्र इत्यर्थः ॥ अत्र दृष्टांतः यथेदं विश्वमवितुं अन्यास्तनूर्मत्स्यकूर्मादिल-
क्षणाः ॥ नानाऽनेकप्रकारा विभर्षि तत्तद्वत् ॥ न केवलं पालनादिमात्रं ॥ तव कर्म किंतु हृष्टिलयावपीत्याह ॥ हृष्ट्वेति ॥ तथाप्यनन्यानिरपेक्षत्वे

पृश्नीश्मे भगवतो भगवांस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै ॥ नानाविभर्ष्यवितु-
मन्यतनूर्यथेदं हृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ॥ ४१ ॥ तस्यावितुः स्थिरचरेशितुरंघ्रिमूलं
यत्स्थं न कर्मगुणकालरजः स्पृशंति ॥ यद्वै स्तुवंति निनमंति यजंत्यभीक्ष्णं ध्यायंति वेदहृदया
मुनयस्तदाप्त्यै ॥ ४२

दृष्टांतः ऊर्णनाभिरिवेति ॥ ४१ ॥ यस्मादेवंभूतस्त्वं तस्मात्तवांघ्रिमूलं भजामीत्याह तस्येति ॥ तस्यावि-
तुः पालकस्य स्थावरजंगमानामीश्वरस्य ॥ भजामीति तृतीयश्लोकस्यान्वयः ॥ कथंभूतमंघ्रिमूलं यत्स्थं यत्राश्रितं ॥ कर्मगुणकाला-
नां रजो मलं ॥ अन्ये च पूर्वोक्ता महापापादयो न स्पृशंति ॥ रुज इति वा पाठः ॥ यतः वेदो हृदये येषां ते वेदतात्पर्यविदो मुनयः ॥ यदेव स्तुवंति ॥ नि-
नमंति नमंति ॥ तस्याप्यये एवं स्तवनादि कुर्वंति ॥ ४२ ॥

भा.स्कं
३०

यतः अन्यः क्षेमप्रापको नास्तीत्याह नान्यमिति ॥ अंघ्र्युपनयात् श्रीमच्चरणप्राप्तेः अन्यत् क्षेमं न विद्मः ॥ परितः सर्वेषामपि लोकेषु भीर्भयं तस्मात् जनस्य ॥ तदेवाह ॥ द्विपरार्धं धिष्ण्यं स्थानं यस्य सः ब्रह्मापि ते कालस्य त्वद्विजृंभकरूपात् कालात् अलं बिभेति ॥ अतः किमुत वक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ॥ ४३ ॥ यस्मादेवं तस्मात्तव पादमूलं भजामि ॥ कथंभूतस्य ऋतधियः सत्यज्ञानस्वरूपस्य ॥ यद्वा सत्याधी

प

नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितोभिय ईश विद्मः ॥ ब्रह्मा बिभेत्यलमतो द्विपरार्ध धिष्ण्यः ॥ कालस्य ते किमुत तत्कृतभौतिकानां ॥ ४३ ॥ तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्म छदि चात्मगुरोः परस्य ॥ देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थं ॥ ४४ ॥

र्यस्य यस्मिन् वा तस्य आत्मगुरोः जीवस्य नियंतुः अतः कारणात् परस्य किं कृत्वा ॥ आत्मछदि ईत्वा आत्मावरकं अपार्थं च निष्फलं च असच्च अंत्यं च नश्वरं इदं देहादि हित्वा ॥ देहादिभजनं त्यक्त्वा आश्रयेत ॥ कथंभूतं यतेत्राह ॥ अभिज्ञमात्रं नत्यत्वं तमसत किंत्वात्ममात्रं न ततः पृथगाहीत्यर्थः ॥ नन्वपवर्गाय भवत्तमद्भजनं फलानां तर्ह्येतत्तव भजनं कार्यमेवेत्याह तर्हीति ॥ यदि त्वां भजति पुरुषः तर्हि ते त्वत्त एव सर्वमनीषितमर्थं विंदेतेति ॥ ४४ ॥

राप
३०

नन्वब्रह्मरुद्रावपि ममैव मूर्त्ती अतो मामेवं किमत्यंतं त्वमाद्रियसे तत्राह सत्त्वमिति यदपि यद्यपि ते तवैव मायया कृता एता लीलाः तवैव
धृताः तथापि या सत्त्वमयी सैव प्रशांत्यै मोक्षाय न केवलं सुखस्य प्रशांत्यभावमात्रमन्यभजने किंत्वनिष्टं च किंचित्स्यात्त्वेभ
वेदित्याह किं तदनिष्टं भवेत्तत्राह व्यमलेति ४५ तदेव मह्यावारेणोद्दर्शयति तस्मादिति हे भगवन् तव शुक्लां तां तनुं श्रीना

सत्त्वं रजस्तम इतीश तवात्मबंधो मायामयाः स्थितिलयोदयहेतवोऽस्य लीलाधृता यदपि सत्त्वमयी प्रशांत्यै
नान्ये नृणां व्यमलमोहभियश्च याभ्यां ४५ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कु
शला भजंति यत्सात्वताः पुरुषरूपमुशंति सत्त्वं लोको यतोऽभयमुतात्मसुखं न चान्यत् ४६ तस्मै नमो
भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवताय नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगि
रे निगमेश्वराय ४७

रायणाख्यां स्वयं तावकानां च शुक्लां तनुं नराख्यां यद्यस्मात्सात्वताः सत्त्वमेव पुरुषस्येश्वरस्य रूपमुशं
ति मन्यंते न त्वन्यत् रजस्तमश्चेति अत्र हेतुः यतः सत्त्वात् लोको वैकुं[illegible]ः स्वः लोकत्वे सत्यप्यभयं च भोगे सत्यप्यात्मसुखं
च ४६ अतस्तं प्रणमति तस्मै नम इति हंसाय शुद्धाय संयतगिरे नियतवाचे ऋषये च निगमेश्वराय वेदमार्गप्रवर्तकाय ४७

वेदार्थसंप्रदायप्रवर्त्तने हेतुत्वं वदन्नुक्तो नियमविधिरिति ॥ कथं इंद्रियमार्गैर्भ्रमद्धीः विशिष्टबुद्धिः प्रमाणभूतेष्विंद्रियादिषु नियंतृत्वेन संततमपि संतं
न वेद ॥ स्वकार्येषु विषयेषु ॥ बुद्धिविक्षेपे हेतुः तन्मायया तस्य तवैव मायया ॥ आवृता आत्मनिष्ठा मतिर्यस्य ॥ स उ सोपि ब्रह्मादय एव सर्वमतां
तैव मुखविलग्रामाणत्वतत्वप्रवर्तितं वेदं स्वप्रसादात्प्राप्यते तदा साक्षाद्वेद ॥४८॥ वेदेनैव तत्वं तन्नानासितमपरापरं पश्यतीत्याह ॥ यस्य तत्वदर्शन
निगममेव भवति ॥ कथंभूतं आत्मनस्तत्वं रहः रहस्यप्रकाशं ॥ अन्यथाह यस्य तत्वं नाह ॥ अजपरा ब्रह्मरुद्रपर्यवसाना कवयोपि विमोहयोगादिभि

यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वकेष्वसुषु हृद्यपि दृक्पथेषु ॥ तन्मायायावृतमतिः स उ एव साक्षादा
द्यस्तवाखिलगुरोरुपसाद्य वेदं ॥४८॥ यद्दर्शनं निगममात्मरहःप्रकाशं मुह्यंति यत्र कवयोऽजपरा यतंतः
तं सर्ववादविषयप्रतिरूपशीलं वंदे महापुरुषमात्मनिगूढबोधं ॥४९॥ इति श्री भागवते महापुराणे द्वादश
स्कंधे अष्टमोध्यायः ॥८॥

र्यतमानाः ॥ यत्र त्वयि मुह्यंति ॥ कुत इत्यत आह ॥ सर्वेषां वादानां विषया भेदाद्यास्तेषां प्रतिरूपं तत्तदनुसारि शीलं स्वभावो यस्य
तं ॥ कुतः आत्मना देहादिसंघाते न निगूढो बोधो यस्य तं ॥ एवंभूतं महापुरुषं वंदे ॥४९॥ इति श्री भागवते महापुराणे द्वादशे अष्टमः ॥

नवमे भगवन्मायादिदृक्षोर्दर्शनमुक्तः मायाशिशोर्लयाद्बोधस्तु नेमिर्वैशनिर्गमैः ॥ १ ॥ भगवतः परितोषपूर्वकं तदपेक्षितवरदानं कथ-
यितुमाह संस्तुत इत्यादिना ॥ १ ॥ आत्मसमाधिनाविच्छिन्नैकाग्र्येण ॥ २ ॥ वयं ते परितुष्टाः स्मेति बहुवचनं सर्वदेवाभिप्रायेण वरदेशा-
दित्येकवचनं द्वयोरैक्याभिप्रायेण ॥ प्रतीच्छ गृहाण ॥ ३ ॥ वरेण छंदयता त्वया जितं उत्कर्षो दर्शितः ॥ मम तु वराकांक्षा नास्तीत्या-

सूत उवाच ॥ संस्तुतो भगवानित्थं मार्कण्डेयेन धीमता ॥ नारायणो नरसखः प्रीत आह भृगूद्वहं ॥ १ ॥
श्रीभगवानुवाच ॥ भो भो ब्रह्मर्षिवर्योसि सिद्ध आत्मसमाधिना ॥ मयि भक्त्यानपायिन्या तपः-
स्वाध्यायसंयमैः ॥ २ ॥ वयं ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सितं ॥ ३ ॥ ऋ-
षिरुवाच ॥ जितं ते देवदेवेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावतालं नो यद्भवान्समदृश्यत ॥ ४ ॥ गृहीत्वाजादयो य-
स्य श्रीमत्पादाब्जदर्शनं ॥ मनसा योगपक्वेन स भवान्मेक्षिगोचरः ॥ ५ ॥ अथाप्यंबुजपत्राक्ष पुण्यश्लोकशिखामणे ॥
द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदां ॥ ६ ॥

ह वरेणेति ॥ ४ ॥ यत्तव श्रीमत्पादाब्जदर्शनं मनसापि गृहीत्वा प्राप्य प्राकृता अप्यजाद-
यो भवंति ॥ स भवान्मेक्षिगोचरो जातोस्ति किमतः परं वरेणेत्यर्थः ॥ ५ ॥ द्रक्ष्ये द्रष्टुमिच्छामि ॥ लोकपालैर्ब्रह्मादिभिः सहितो यं लोको जनः
सद्भिदां सति वस्तुनि भिदां यया वेत्ति ॥ ६ ॥

१ तथेति इत्युक्त्वा गीतिसर्ईस्वाः स्वयमागात ॥ पाठांतरे क्रियाविशेषणं ॥ ७ ॥ तमेवार्थमायादर्शनरूपं अस्मादिष्टसिद्ध ॥ ८ ॥ भावद्वेष्यमनोमयेई ध्येः ॥ क
वितकदावित ॥ प्रेमप्रसरसंयुतः प्रेमोद्रेकं प्राप्तः ॥ ९ ॥ मायादर्शनमाह तस्येत्यादिना ॥ १० ॥ तदा समुद्रवलाहकाप्रेघास्तु भवन्स्याविर्बभूवुः ॥
तैवतडिद्भिः सहिता उच्चैः स्वनंतोगर्जतः ॥ अक्षोरध्यांगंतद्दमुद्धविष्टाः अमितावर्षधाराः प्रमुमुचुः ॥ ११ ॥ चतुर्दिक्षु वर्धमानाः समुद्राः समार

मूलं ॥ इतीडितोऽर्चितः कामसृषिणो भगवान्मुने ॥ तथेति स स्मयन्प्रागाद्दुर्दर्ग्योग्रमपीश्वरः ॥ ७ ॥ तमेवाचिंतयन्नर्थमृ
षिः स्वाश्रमएवसः ॥ वसन्नन्यर्कसोमांबुभूवायुवियदात्मसु ॥ ८ ॥ ध्यायन्सर्वत्रच हरिं भावद्रव्यैरपूजयन ॥ क्वचित्पूजांविस
स्मारप्रेमप्रसरसंयुतः ॥ ९ ॥ तस्यैकदाभृगुश्रेष्ठपुष्पभद्रातटेमुनेः ॥ उपासीनस्य संध्यायां ब्रह्मन्वायुरभून्महान ॥ १० ॥ तदंड
शब्दं समुदीरयंतं बलाहकाअन्वभवन्कालाः ॥ अक्षस्थविष्ठा मुमुचुस्तडिद्भिः स्वनंतउच्चैरभिवर्षधाराः ॥ ११ ॥ ततोव्यदृश्यंतच
तुः समुद्राः समंततः क्ष्मातलमाग्रसंतः ॥ समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः ॥ १२ ॥ अंतर्बहिश्चाद्भिरति
द्युभिः खरैः शतह्रदाभीरुपतापितंजगत ॥ चतुर्विधं वीक्ष्य सहात्मनामुनिर्जलाप्लुतांक्ष्मांविमनाः समत्रसत ॥ १३ ॥ ॥

वेगेनोर्मयपत्तैर्भूतलं ग्रसंतः ॥ उग्रानक्राद्येषु महाभयाश्चावर्त्तायेषु गंभीरो घोषो येषु ते वतेच ॥ १२ ॥ आत्मनासहजराद्युज्जारिचतुर्विधं जगदंत
र्बहिश्चोपतापितं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः ॥ समत्रसत्भयं प्रापकेनोपतापितं अद्भिः ॥ कथंभूताभिः ॥ अतिद्युभिः ॥ अतिक्रांताद्योर्याभिः ॥ एप
विद्युद्भिः खरैर्याभिर्वातिशेषः ॥ शतह्रदाभिश्चविद्युद्भिर्दीर्घमार्षं छंदोऽवरोधेन ॥ १३ ॥

३१

प्रभंजनेनाघूर्णितं प्रकंपितं वाः उदकं यस्मिन् सः ॥ अप्यधात् छादयामास समं सह ॥ १४ ॥ सक्ष्मांतरिक्षं क्ष्मांतरिक्षस्थप्राणिसहितं
भागणाः ज्योतिर्गणास्तैः सहितं ॥ जटा विक्षिप्य विकीर्य ॥ १५ ॥ परिश्रमेणाईषितः गतः व्याप्त इत्यर्थः ॥ इष्टसर्प्यगोदत्यस्मात ॥ १६ ॥ अ

तमेव चोद्वीक्षितऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणो वरषद्भिरंबुदैः क्ष्मामप्यधात् द्वीपव
र्षाद्रिभिः समं ॥ १४ ॥ सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतं ॥ स एक एवोर्वरितो महामुनि
र्बभ्राम विक्षिप्य जटा जडांधवत् ॥ १५ ॥ क्षुत्तृट्परीतो मकरैस्तिमिंगिलैरुपद्रुतो वीचिनभस्वताहतः ॥ तमस्यपारे पति
तो भ्रमन् दिशो न वेद खं गां च परिश्रमेषितः ॥ १६ ॥ क्वचिन्मग्नो महावर्ते तरलैस्ताडितः क्वचित् ॥ यादोभिर्भक्ष्यते क्वापि
स्वयमन्योन्यघातिभिः ॥ १७ ॥ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयं ॥ क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुता
र्दितः ॥ १८ ॥ अयुतायुतवर्षाणां सहस्राणि शतानि च ॥ व्यतीयुर्भ्रमतस्तस्मिन् विष्णुमायावृतात्मनः ॥ १९ ॥ स कदाचि

वै

द्भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः ॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितं ॥ ॥ २० ॥

मोऽन्यघातिभिः तद्भक्षणाय परस्परं घ्नद्भिः ॥ १७ ॥ १८ ॥ विष्णुमायावृतात्मन इति तथा दृष्टवानित्यर्थः ॥ ककुदि उन्नतप्रदेशे न्यग्रोधपोतं
कोतं कोमलं वटं ॥ २० ॥

भा॰ द्वा

३३

तस्यईशानदिकुशाखायांशिशुमपि ॥ १ ॥ श्रीमतरम्यंवदनपंकजंयस्यतं ॥ कंठवतत्रिरेखाहृतायीवायस्यतं ॥ महोरस्कविशालवक्षस ॥ छनात
शोभनानासायस्यतं ॥ हरंरभुवोयस्यतं ॥ २ ॥ रवापैरेजंतः कंपायमानाञ्जलकान्तिरापातंशोभितं ॥ कंठवतत्रुतवलयेनश्रीयंयोः नोकंठ
श्रियो ॥ नयोः कर्णयोर्दाडिमषष्ठ्येयस्यतं ॥ विद्रुमतल्पाधरभासाईषतशोणायितं ॥ रुधातल्पांस्मितंयस्यतं ॥ २२ ॥ पद्मगर्भवतञ्जाईषत ॥ स्मृह

शाङ्गनराप्यांशाखायांतस्यापिरहृशोशिशु ॥ रायानंपर्णाङ्गरकेयस्तंतंपयातमः ॥ १ ॥ महापरकतरूपामंश्रीमद्वदनपंक
ज ॥ कंठग्रीवंमहोरस्कंछनासंहरंरभ्रुव ॥ २२ ॥ रवापैजलंदेकापातंकंठश्रीकर्णदाडिमं ॥ विद्रुमाधरभासेषच्छोणा
यितस्धास्मितं ॥ २३ ॥ पद्मागर्भहरणापांगंहृद्यहासावलोकनं ॥ रवापेजहृलिपंविप्रनिघ्ननापिरलोरहं ॥ २४ ॥
वाईगलिप्यांपाणिप्याङ्गुलीपवराणोझजं ॥ छुवेनिधायविश्वेशोधयंतंवीक्ष्यविस्मितः ॥ २५ ॥ तद्दर्शनाद्दीतपरिस्र
मोशुदशात्सत्हृतपसविलोचनांबुजः ॥ प्रहृष्टरोमाद्भुतभावशंकितः प्रष्टुंपुरस्तंप्रणनामबालकं ॥ २६ ॥ ॥

णावपाणोनेत्रांतोयस्यतं ॥ हृद्योहासोयास्मिन्नुतदवलोकनंयस्यतं ॥ रवापैरेजंतस्थलंतः वलयांगुलिर्यकनिघ्नरेखांतताभिः संविघ्ना
वंवलानिघ्नागंभीरनाभिर्यस्मिन्नुततदलवदश्वत्थपत्रसंकाशउदरंयस्यतं ॥ २४ ॥ वारवः अंगुलयोययोस्ताभ्यां ॥ अंगुलीयस्त्राह्नष्य
धयंतंपिबंतं ॥ २५ ॥ हृतपसवविलोचनांबुजेवपोत्फुल्लानितानियस्यसः ॥ अद्भुतभावश्चयाच्चर्यंतत्प्रपतेनशंकितः सन्नपितंप्रष्टुंपुरः

प्रणामसमीपगतः ॥ २६ ॥

राम

३३

भ्रमः दृष्टजगत ॥ यथा यशोदायास्तु वेन्यस्तं दृष्ट्वा वक्त्रे तीव विस्मितः सन् चमत्कृत ॥ १७ ॥ कृत्स्नशो दर्शनं प्रपंचयति ॥ खमित्यादिना
वक्त्रे दिशः ज्योतींषि आकाराश्च खेटान् कर्षकग्रामान् व्रजान् गोकुलानि ॥ आश्रमांश्च वर्णांश्च तेषां वृत्तीश्चेत्यर्थः ॥ १८ ॥ नानायुगा
नि कल्पांश्च कल्पयति तेर्वा कल्पितः इति तथा तं कालं च ॥ सदिव परमार्थं इवेत्यवभासितं ॥ तेनेव ॥ १९ ॥ २० ॥ वत्सं च तोकं च ॥ वीक्ष्य तत्स्वपे

तावच्छिशोर्वै श्वसितेन भार्गवः सोऽन्तः शरीरं मशको यथाविशत् ॥ तत्राप्यदोन्यस्तमचष्ट कृत्स्नशो यथा पुरामुह्य
दतीव विस्मितः ॥ १७ ॥ खं रोदसी भगणानद्रिसागरान् द्वीपान्सवर्षान्ककुभः सुरासुरान् ॥ वनानि देशान्सरि
तः पुराकरान् खेटान् व्रजानाश्रमवर्णवृत्तयः ॥ १८ ॥ महान्ति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल्पकल्प
नां ॥ यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितं ॥ १९ ॥ हिमालयं पुष्पवहां च तां नदीं निजाश्रमं तत्र ऋ
षीनपश्यत् ॥ विश्वं विपश्यन्छ्वसितात् शिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ॥ २० ॥ तस्मिन्पृथिव्याः ककुदि प्ररूढं वटं
च तत्पर्णपुटे शयानं ॥ तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपांगनिरीक्षणेन ॥ २१ ॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठि
तं हृदि ॥ अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ॥ २२ ॥
प्रेमसुधास्मितेन युक्तेनापांगनिरीक्षणेन निरीक्षितः सन् ॥ २१ ॥ अथ
तं बालकमधोक्षजं परिष्वक्तुमभ्ययादिति द्वयोरन्वयः ॥ कथंभूतं नेत्राभ्यां हृदि धिष्ठितं ॥ २२ ॥

भा॰ द्वा॰ तावत्परिष्वंगलाभात्पूर्वमेव ऋषेस्तस्मात्तिरोहितो बभूव ॥ तदुद्यमवैफल्ये दृष्टांतः ॥ अनीशोऽनिर्दैवः तेन निर्मिता ईहा क्रीडा यथेति ॥ ३३ ॥ तेनैवांतर्हितं

३४ भगवंतमनुवटः सलिलं लोकसंप्लवश्च तिरोधायि ॥ अंतर्हितः ॥ स च स्वाश्रमएव यथापूर्वं स्थित इति ॥ ३४ ॥ इति द्वादशे नवमः ॥ दशमे शि

वस्यागत्य मुनेः क्लिष्टो वरान्ददात ॥ तेन स्तोकमतिश्रीत्याममा मार्ष्यममाजयन ॥ १ ॥ ज्ञानकाशया ज्ञानवत्प्रकाशमानया त्वद्भजनं विना विमुह्यंतः

तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः ॥ अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता ॥ ३३ ॥ तमन्वथ वटो ब्रह्मन्सलि
लं लोकसंप्लवं ॥ तिरोधायि क्षणादस्मात्स्वाश्रमे पूर्ववत्स्थितः ॥ ३४ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे मायादर
शनं नाम नवमोऽध्यायः ॥ सूत उवाच ॥ स एवमनुभूयेदं नारायणविनिर्मितं ॥ वैभवं योगमायायास्तमेव शरणं ययौ
॥ १ ॥ मार्कंडेय उवाच ॥ प्रपन्नोऽस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे ॥ यन्मायायापि विबुधा मुह्यंति ज्ञानकाशया ॥ २ ॥ सूत उवाच ॥ त
मेवं निभृतात्मानं वृषेण दिवि पर्यटन् ॥ रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥ अथोमा तमृषिं वीक्ष्य गिरिशं समभा
षत ॥ पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाशयं ॥ ४ ॥ निभृतोदझषव्रातो वातापाये यथार्णवः ॥ कुर्वस्य तपसः साक्षात्संसिद्धिं
सिद्धिदो भवान् ॥ ५ ॥

यस्य तव मायया ज्ञानिनोऽपि मोहं कारेण गुह्यंतीत्यर्थः ॥ २ ॥ श्रीनारायणएव स्वमायादर्शनप्रांतं श्रीशिवरूपेण । सिद्धिदो भवान ॥ ५ ॥

त्वया माम ॥ नराह ॥ तमेव पितामहं ॥ निभृतात्मानं समाहितचित्तं ॥ रुद्राण्या भवान्या ॥ ३ ॥ निभृतानि निश्चलानि आत्मा इंद्रियाशयाः देहेंद्रियमनांसि यस्य

यस्य तं ॥ ४ ॥ निभृतं निश्चलमुदकं झषव्रातश्च यस्मिन्स तथा ॥ संसिद्धिं फलं साक्षात्कुरु प्रकटीकुरु ॥ यतो भवान्सिद्धिदः ॥ ५ ॥

राम
३४

६

स्मृताशिषः अस्पृहयन्नज्ञानाः उत विस्मित ॥ अत्र हेतुः ॥ भक्तिमिति ॥ ६ ॥ संवदिष्यामः संवादं करिष्यामः ॥ ७ ॥ सात्वतां सतां गतिस्त्वं हे हेतुः ॥ ६
ध्यानरति ॥ ८ ॥ हृद्धाधियोगः करणाद्यपवृत्तयोगेन तः ॥ ९ ॥ १० ॥ न केवलं बहिरेव आत्मन्यपि प्राप्तं शिवं विचक्ष्य विस्मितः ॥ कथं प्राप्तं सह

श्रीभगवानुवाच ॥ नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ॥ ६ ॥ अथा
पि संवदिष्यामो भवान्येतेन साधुना ॥ अयं हि परमो लाभो नृणां साधुसमागमः ॥ ७ ॥ सूत उवाच ॥ इत्युक्त्वा
तमुपेयाय भगवान्स सतां गतिः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनां ॥ ८ ॥ तयोरागमनं साक्षादी
शयोर्जगदात्मनोः ॥ न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ॥ ९ ॥ भगवांस्तदभिज्ञाय गिरिशो योगमायया ॥ आवि
शत्तद्गुहाकाशं वायुः छिद्रमिवेश्वरः ॥ १० ॥ आत्मन्यपि शिवं प्राप्तं तडित्पिंगजटाधरं ॥ त्र्यक्षं दशभुजं प्रांशुमुद्यंतमिव
भास्करं ॥ ११ ॥ व्याघ्रचर्मांबरं शूलधनुरिष्वसिचर्मभिः ॥ अक्षमालाडमरुककपालपरशुं सह ॥ बिभ्राणं सहसा भात
विचक्ष्य हृदि विस्मितः ॥ १२ ॥

सात्त्विकस्मादेवं हृदि भातं कथंभूतं तडित्पिशंगजटाधारयतीति तथा तं ॥ त्रीण्यक्षीणि यस्य तं ॥ ११ ॥ शूला
दिभिः सहाक्षमालादीन् बिभ्राणं मित्यन्वयः ॥ अक्षमालादीनां द्वंद्वैक्यं ॥ १२ ॥

भा॰ द्वा॰ विस्मयपूर्वकं बहिर्दर्शनमाह किमिदमिति ॥ सोमयाउमया सहागतं रुद्रं ददृशे ॥ १३ ॥ ततो ननाम ॥ १४ ॥ पूर्णाकामस्त्वं अन्निधेनत्वयाजगन्निर्वृ
२५ तं भवतीति ॥ १५ ॥ निर्गुणत्वेन त्रिगुणत्वेन च वनमस्करोतीति ॥ नमः शिवाय ॥ निर्गुणाय सत्त्वाय सत्त्वाधिष्ठात्रे ॥ मूर्त एव ब्रह्म मृडयतीति तथा तस्मै ॥ १६ ॥ नोः

किमिदं कृत एवेति समाधेर्विरतो मुनिः ॥ नेत्रे उन्मील्य ददृशे सगणं सोमयागतं ॥ १३ ॥ रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः
तस्मै सपर्यां व्यदधात्सगणाय सहोमया ॥ स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः ॥ १४ ॥ आह त्वात्मानुभावेन पूर्ण
कामस्य ते विभो ॥ करवाम किमीशान येनेदं निर्वृतं जगत् ॥ १५ ॥ नमः शिवाय शांताय सत्त्वाय प्रमृडाय च ॥ रजोजुषे
म थ घोराय नमस्ते त्वभ्यं तमोजुषे ॥ १६ ॥ सूत उवाच ॥ एवं स्तुतः स भगवानादिदेवः सतां गतिः ॥ परितुष्टः प्रसन्नात्मा प्र
हसंस्तमभाषत ॥ १७ ॥ श्रीभगवानुवाच ॥ वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ॥ अमोघं दर्शनं येषां मर्त्यो यद्विन्दते
मृतं ॥ १८ ॥ ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः ॥ एकांतभक्ता अस्मासु निर्वैराः समदर्शिनः ॥ १९ ॥ सलोकालो
कपालास्तान्वंदंत्यर्चंत्युपासते ॥ अहं च भगवान्ब्रह्मा स्वयं च हरिरीश्वरः ॥ २० ॥

मन्नः त्रयः ब्रह्मविष्णुमहेश्वराः ॥ यतयेभ्यस्ते वयं ॥ १८ ॥ वरदानादिना भवत्सेवैवास्माभिः क्रियते न त्वनुग्रहः ॥ जगद्धि द्युत्वाइवतामिति ब्राह्मणा राम
नतोऽतीति ब्राह्मणादस्यारिना ॥ ये साधवः सदाचाराः शांताः मत्सरादिरहिताः निःसंगाः निःकामाः ॥ १९ ॥ न केवलं त एव किंतु अहं चेत्यादि ॥ २० ॥ २५

नूज्पतनत्वेहे त्वितरमाह ॥ नेति ॥ अत्रेवपि अणुमात्रमपि वस्तु ते पश्यंति ॥ नत्वस्मात् ॥ एवंभूतात्वद्युष्मान्वयमीमहि भजेम ॥ ११ ॥ ब्राह्मणोप्य:
ब्राह्मणान्त्यात्मसमाधानं चित्तैकाग्र्यं ॥ तपश्चालोचनं ॥ स्वाध्याय: अध्ययनं ॥ संयम: वागादिनियम: तै: ॥ १२ ॥ किंच श्रवणादित्या
दि ॥ १४ ॥ चंद्रोललामो भूषणं यस्य तस्य धर्मो रहस्यं तत् अमृतास्पदं वच: कर्णयो: ॥ कर्णाभ्यां पिबन्नात्यस्मिन् स्थलापतितिनामन्यत ॥ कर्णा

नते पश्यंत्युतेजे च पिदामणावपि वस्तु ते ॥ नात्मनश्च जनस्यापि तद्युष्मान् वयमीमहि ॥ ११ ॥ नत्वंप्रयानि तीर्थानि देवा न
श्रुतनोदिता: ॥ तेऽपि नंत्युह कालेन पूर्यंदर्शनमात्रत: ॥ १२ ॥ ब्राह्मणोप्योनमस्याभोयेसम्यदूपं त्रयीमयं ॥ विभ्रंत्यात्मस
माधानतप:स्वाध्यायसंयमै: ॥ १३ ॥ श्रवणाद्दर्शनाद्यापि महापातकिनोऽपि व: ॥ शुद्ध्यंत्येतत्पजाश्चापि किमुतान्यभाष
णादिभि: ॥ १४ ॥ सूत उवाच ॥ इति चंद्रललामस्य धर्मगुह्योपबृंहितं ॥ वचोऽमृतायनं मुनिर्नातिश्यात कर्णयो: पिबन् ॥
१५ ॥ पर्वनिरश्मायवाधाविह्नोर्मामित: काशितोऽप्यग्नि ॥ शिववागमृतधप्तत्नोऽनेशोपुंजनतमत्रवीत् ॥ १६ ॥ अगस्तिरुवाच ॥
अहो ईश्वरचर्योयं दुर्विभाव्या शरीरिणां ॥ यत्रमंतीशितव्यानि भवंति जगदीश्वरा: ॥ १७ ॥

योरमृतायनं इति वाच्वय: ॥ १५ ॥ शिवस्य वागेवामृतं तेन धात: क्लेशपुंजो यस्य स: ॥ १६ ॥ ईश्वलीलादुर्विभाव्यास्त्रवितर्कापद्ययाईशित
व्यानिहीन नियम्यानि यानिभूतानि जगदीश्वरा: ईश्वर्यं न मंति भवंति चेति ॥ १७ ॥

अथवा लोकसंग्रहमात्रमेतदित्याह धर्ममिति ॥ प्रवक्तारोपि यत्स्वयं देहिनां धर्ममाचरंति ॥ १८ ॥ नन्वेतत्त्वत्प्रभावतिरस्कारकं कथं मया क्रियते तत्रा-
हनेति ॥ एतावता लोकसंग्रहमात्रेणार्तैर्नमनादिभिः कथंभूतैः स्वमायामयीवृत्तिविशेषैः ॥ भगवतो मायिनस्तवानुभावो न दुष्येत ॥ यतः अविद्धस-
मायिनः कुहकं यथा कपटं यथा तथैतानि नमनादीनि ॥ अनन्तस्य यथा कुहकैरात्मानुभावो न दुष्यत इति तद्वत् ॥ प्रदुष्येतेति पाठे नकारस्य दृष्टो

धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनां ॥ आचरंत्यनुमोदंते क्रियमाणं स्तुवंति च ॥ १८ ॥ नैतावता भगवतः स्वमायामयवृ-
त्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा ॥ १९ ॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः कुर्वद्भिराभा-
ति कर्तेव स्वप्नदृग् यथा ॥ २० ॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये ॥ २१ ॥ कं
वृणीत परं भूमन् वरं त्वद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामः सत्यकामः पुमान् भवेत् ॥ २२ ॥ वरमेकं वृणेथापि पूर्णा-
त्कामाभिवर्षणात् ॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥ २३ ॥ सूत उवाच ॥ इत्यर्चितोभिष्टुतश्च मुनिना सूक्त-
या गिरा ॥ तमाह भगवान् शर्वः शर्वया चाभिनंदितः ॥ २४ ॥ ॥ ॥ ॥ रामकृष्णमहो

तेनुषंगः ॥ १९ ॥ मायावेष्टितं प्रपंचयति सृष्ट्वेति ॥ स्वप्नदृक् स्वप्नद्रष्टा अविद्यावेष्टितो दृष्टांतः ॥ २० ॥ त्रिगुणायेत्यपि न जीववत्तदभिमानाय किंतु गुणानामात्म-
ने नियंत्रे ॥ २१ ॥ वरं वृणीष्वेति यदुक्तं तत्राह कमिति ॥ वरं दर्शनं यस्य तस्मात्त्वत्तः परं कं वरं वृणे ॥ यस्य तव दर्शनात्पूर्णकामः सर्वानंदसंदोहरूपः ॥ राम
सत्यकामः यथेष्टप्राप्तसर्वानंदः ॥ २२ ॥ २३ ॥ वरदानाय स्वयमेव प्रवृत्तः शर्वया उमया चाभिनंदितः अनुमोदितः तत्राह ॥ २४ ॥ ॥ २६

कामो यस्य वरोऽपि ॥ अन्यच्च शृणु यशः स्यादिति ब्रह्मवर्चस्विनस्ते भूयादिति त्वत्तो ऽपौराणत्वयः ॥ यतस्त्वमधोक्षजे भक्तिमान् ॥ २५ ॥ २६ ॥ तस्य कर्मेति पश्चादि
मुनेः पुरानुभूतं च भगवन्मायावैभवं तच्च कथयन् ॥ २७ ॥ अवाप्तमहायोगमहिमा येन सः ॥ २८ ॥ तन्मार्कण्डेयस्य चरितं तेनानुभूतं च भगव-
न्मायावैभवं ते ऽनुवर्णितं ॥ २९ ॥ न त्वेवमप्यस्मिन्कालेऽत्रास्य सप्तकल्पायुः श्रूयते हन्यमानं विरुद्धमेवेत्यत आह ॥ एतन्मार्कण्डेयेनानुभूतं

कामं ते ऽपि महर्षे ऽस्तु भक्तिमांस्त्वमधोक्षजे ॥ आकल्पान्तं यशः पुण्यमजरामरता तथा ॥ २५ ॥ ज्ञानं त्रैकालिकं ब्रह्मन्वि-
ज्ञानं च विरक्तिमत् ॥ ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तु ते ॥ २६ ॥ सूत उवाच ॥ एवं वरान्स मुनये दत्त्वागात्त्र्य-
क्ष ईश्वरः ॥ देव्यै तत्कर्म कथयन्ननुभूतं पुरामुनेः ॥ २७ ॥ सोऽप्यवाप्तमहायोगमहिमा भार्गवोत्तमः ॥ विचरत्यधुनाप्य-
द्धा हरावेकान्ततां गतः ॥ २८ ॥ अनुवर्णितमेतत्ते मार्कण्डेयस्य धीमतः ॥ अनुभूतं भगवतो मायावैभवमद्भुतं ॥ २९ ॥ एतत्के-
चिदविद्वांसो मायासंसृतिमात्मनः ॥ अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ॥ ३० ॥ य एवमेतद्भृगुवर्य वर्णितं रथाङ्ग-
पाणेरनुभावभावितं ॥ संश्रावयेत्संशृणुयादु तावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ॥ ३१ ॥ इति श्रीभागवते महापुराणे द्वाद-
श स्कन्धे दशमोऽध्यायः

भगवन्मायावैभवं नानाकल्पनारूपं ॥ करालविलासं ईश्वरेच्छया तस्यैवाकस्मिकं न तु सर्वसाधारणं ॥ एतत्केचिदनादिवद्बहुकालमाव-
र्तितं देवगुह्यहृद्भ्यमानेन मुनेः पुनः परिवर्तितं प्रवदन्ति केचित् ॥ नृणां संसृतिः सर्गप्रलयादिलक्षणा आत्मनो भगवतो मायैवेत्यविद्वांसः ॥ विद्वांसस्तु
मायाशिशोः स्वाभोक्तृत्वमभ्यामात्मकल्पत्वस्य उदरप्रवेशनिर्गमनतः सप्तकल्पत्वं तत्कृष्णमायैवेति वदन्ति ॥ अतो न विरोध इत्यर्थः ॥ ३० ॥ संशृणुयादुतेत्यत्रान्व-
येद्वा ये तावुभौ तयोः कर्मवासनाकृता संसृतिर्न भवेदिति ॥ ३१ ॥ हरिरो रामः

भा-द्वा
२७

एकादशे प्रज्ञार्थं महापुरुषवर्णनं ॥ रवेर्व्यूहस्य चाख्यानं प्रतिमासं पृथक् पृथक् ॥ १ ॥ येनामर्त्यत्वमापन्नो मर्त्योसौ भार्गवोत्तमः ॥ तं पृच्छति क्रि-
यायोगं साङ्गोपाङ्गादिकल्पितं ॥ २ ॥ अथेति हे भागवत यतो भवान् समस्ततंत्रराद्धांते तत्त्ववित् ॥ १ ॥ प्रष्टव्यमाह तांत्रिका इति ॥ परिचर्यायां उपास-
नायां विषये ॥ केवलस्यैव तन्यज्ञनस्य ॥ अंगानि पादादीनि उपांगानि गरुडादीनि ॥ आयुधानि सुदर्शनादीनि आकल्पाः कौस्तुभादयः ॥ तेषां
द्वंद्वैक्यं ॥ तद्यथा कल्पयंति येश्च तत्त्वैः कल्पयंति ॥ २ ॥ तन्नो वर्णयेति ॥ ३ ॥ गुरूपदेशागमत्वादस्यार्थस्य तत्र नमस्कारपूर्वकमाह ॥ नमस्कृत्येति

शौनक उवाच ॥ अथेममर्थं पृच्छामो भवंतं बहुवित्तमं ॥ समस्ततंत्रराद्धांते भवान् भागवततत्त्ववित् ॥ १ ॥ तांत्रिकाः प-
रिचर्यायां केवलस्य श्रियः पतेः ॥ अंगोपांगायुधाकल्पं कल्पयंति यथा च यैः ॥ २ ॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभु-
त्सतां ॥ येन क्रियानैपुणेन मर्त्यो यायादमर्त्यतां ॥ ३ ॥ सूत उवाच ॥ नमस्कृत्य गुरून् वक्ष्ये विभूतीर्वैष्णवीरपि ॥ याः
प्रोक्ता वेदतंत्राभ्यामाचार्यैः पद्मजादिभिः ॥ ४ ॥ मायाद्यैर्नवभिस्तत्त्वैः स विकारमयो विराट् ॥ निर्मितो दृश्यते यत्र स
चित्के भुवनत्रयं ॥ ५ ॥

ते ॥ विभूतीः विराड्विग्रहाद्याः ॥ ४ ॥ अंगादिकल्पनां सूरिभिर्दर्शयिष्यन् प्रथमं तावद्यथा कल्पयंतीति प्रश्नस्यैव राजरूपेणोत्तरं वक्तुं विरा-
ड्रूपमाह ॥ मायाद्यैः प्रकृतिसूत्रमहदहंकारपंचतन्मात्रैर्नवभिस्तत्त्वैः विकार एकादशेंद्रियाणि पंच महाभूतानि इति षोडशात्मको यो वि-
राट् सचित्को निर्मितः ॥ यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते ॥ अनेनांगादिकल्पनाप्रयोजनं दर्शितं ॥ ५ ॥ ॥

राम
२७

[illegible]रूपं पुरुषस्यैव राजस्य ॥ रूपमेवेश्वरेणाधिष्ठितत्वान्नरमेश्वरविवक्षया तस्य रूपमुच्यते ॥ अंगकल्पनामाह ॥ भूः पादा
[illegible]यादि त्रिभिः ॥ मृत्युरीश्वरवादेन भगवत्याशादिभावना विधीयते ॥ ६ ॥ प्रजननं मेढ्रं ॥ अपानः पायुः ॥ ७ ॥ ८ ॥ अनुक्तमप्यर्थमेव
स्पष्टयितुमाह ॥ यावानयं व्यष्टिपुरुषः स्वमानतः सप्तवितस्तिः संस्थया अवयवसन्निवेशेन मितः ॥ ९ ॥ भूषणादीन्याह ॥ कौस्तु

एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः ॥ नाभिः सूर्योक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ ६ ॥ प्रजापतिः प्रजननम
पानो मृत्युरीशितुः ॥ तद्बाहवो लोकपाला मनश्चंद्रो भ्रुवौ यमः ॥ ७ ॥ लज्जोत्तरोधरो लोभो दंता ज्योत्स्ना स्मयो भ्रमः ॥ रोमा
णि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः ॥ ८ ॥ यावानयं वै पुरुषो यावत्या संस्थया मितः ॥ तावानसावपि महापुरुषो
लोकसंस्थया ॥ ९ ॥ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः ॥ तत्प्रभाव्यापिनी साक्षात् श्रीवत्समुरसा विभुः ॥ १० ॥
स्वमायां वनमालाख्यां नानागुणमयीं दधत् ॥ वासः छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं ॥ ११ ॥ बिभर्त्ति सांख्यं योगं च
देवो मकरकुंडले ॥ मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरं ॥ १२ ॥ अव्याकृतमनंताख्यमासनं यदधिष्ठितः ॥ कर्मज्ञाना

भव्यादिना ॥ स्वात्मज्योतिः शुद्धजीवचैतन्यं ॥ या तत्प्रभा कौस्तुभस्य ॥ प्रभा तामेव श्रीवत्सं बिभर्ति ॥ १० ॥ दिभिर्युक्तं सत्त्वं पद्ममिहोच्यते ॥ १३ ॥
त्रिवृत्स्वरं त्रिमात्रं प्रणवं ॥ ११ ॥ पारमेष्ठ्यं परं ब्रह्मलोकं ॥ १२ ॥ अव्याकृतं प्रधानं ॥ यत् अधिष्ठितः अधिष्ठाय स्थितः तदासनमनूतं पद्मं सत्त्व
गुणः ॥ १३ ॥

भा॰द्वा
३८

मुख्यं तत्त्वं प्राणतत्त्वं । प्राणो वै मुख्य इति श्रुतेः दरवरं शंखं ॥१४॥१५॥ आकूतिः क्रियाशक्तियुक्तं मनः । अस्य रथस्याभिव्यक्तिं बहिरभिव्यक्तं रूपं मु
द्रया धृतया । अर्थक्रियात्मतां वरदाभयप्रदादिरूपत्वं बिभर्ति । तत्र मुद्रया तथा भावयेदित्यर्थः ॥१६॥ मंडलं देवयजनं देवपूजाभूमिं हृदयमंड
लत्वेन भावयेदित्यर्थः । अत एव द्विजमंडलवादी दीक्षा संस्कार आत्मनः । गृहीतां मंत्रदीक्षामेव आत्मनः पूजापात्रतां भावयेदित्यर्थः । परिचर्यै

ओजःसहोबलयुतं मुख्यतत्त्वं गदां दधत् । अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनं ॥१४॥ नभोनिभं नभस्तत्त्वमसिं चर्म
तमोमयं । कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं ॥१५॥ इंद्रियाणि शरानाहुराकूतीरस्य स्यंदनं । तन्मात्राण्य
स्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां ॥१६॥ मंडलं देवयजनं दीक्षा संस्कार आत्मनः । परिचर्या भगवत आत्मनो
दुरितक्षयः ॥१७॥ भगवान् भगशब्दार्थं लीलाकमलमुद्वहन् । धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् ॥१८॥
आतपत्रं तु वैकुंठं द्विजा धामाकुतोभयं । त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं ॥१९॥

ति भगवतस्तां परिचर्यां स्वस्य सकलपापक्षयाय एवंरूपां भावयेदित्यर्थः ॥१७॥ पूर्वं मासेन पद्मं छत्रं । इदानीं पंतः स्थापयमाह भगवानि
ति । भगवच्छब्दार्थमैश्वर्यादिषाड्गुण्यं ॥१८॥ हे द्विजाः एकवचनं तौ वा पाठः । अकुतोभयं वैकुंठं धाम गृहं स्वमभजन् । यद्वा वैकुंठस्य विशेषणम्
। अकुतोभयं यद्धामेति । त्रिवृत् ऋग्यजुः सामवेदो रूपः सुपर्णो विग्रह■त्मां शिविवित्तैः शिर इत्यादि मंत्रलिंगात् । यज्ञं यज्ञरूपं । यज्ञो वै वि ३८
ष्णुरिति श्रुतेः ॥१९॥

अनपायिनी हरेः शक्तिः तत्र हेतुः साक्षादात्मनः स्वस्वरूपस्य चिद्रूपत्वात्तस्यास्तदभेदादित्यर्थः ॥ तंत्रमूर्त्तिः पंचरात्राद्यागम
प्रवृत्तः ॥ ये अणिमाद्याः ते हरेर्द्वारपालाः नंदादयः ॥ २० ॥ तस्यैव चतुर्व्यूहोपासनमाह ॥ वासुदेवादिशरीरैः पुरुषः श्री
नारायण एव चतुर्धा मूर्त्तिभेदैरुपास्य इत्यभिधीयते ॥ २१ ॥ तस्यैवाध्यात्मनि चतुर्धोपासनमाह ॥ स एव भगवान् विश्वादिशरीरै

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्वक्सेनस्तंत्रमूर्त्तिर्विदितः पार्षदाधिपः ॥ नंदादयोऽष्टौ
द्वाःस्थाश्च तेऽणिमाद्या हरेर्गुणाः ॥ २० ॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं अनिरुद्ध इति ब्रह्मन्
मूर्त्तिर्व्यूहोऽभिधीयते ॥ २१ ॥ स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः ॥ अर्थेन्द्रियाशयज्ञानैर्भगवान् प
रिभाव्यते ॥ २१ ॥ अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं बिभर्त्ति स्म चतुर्मूर्त्तिर्भगवान् हरिरीश्वरः ॥ २२ ॥

र्वृत्तिभिर्जाग्रदाद्यवस्थाभिः परिभाव्यते तत्तदुपाधीनाह ॥ अर्थो बाह्यः इंद्रियं मनः ॥ आशयस्तत्र लयसंस्कारः ज्ञप्तिमात्रं तेनां
तत्रितयसाक्षितैः ॥ २१ ॥ उक्तचतुर्व्यूहहृदयोपासने विपूर्वोक्तमंगाद्युपासनमाह ॥ अंगेति ॥ अंगादिभिरुपलक्षितो भगवान्
हरिर्वासुदेवादिचतुर्मूर्त्तिः सन् विश्वादिचतुष्टयं बिभर्त्ति स्म ॥ विश्वादिभावेऽपि तत्तद्वत्तित्वे न जीवत्वमित्याह ॥ विश्वादिचतु
ष्टयेऽपि स्वयं भगवानीश्वर एवेति ॥ २२ ॥

भा॰द्वा
३८

तस्यब्रह्मादिभिःपूजितांपादाब्जंद्विजऋषभपते ॥ सएषस्वयंभगवान्ब्रह्मयोनिर्वेदस्यकारणमित्यादि हे तत्त्वं एवं बहुतो भेदाभावेऽपि वा तु
गतमायया सृजति हरति ॥ पातीति कृत्वा आख्यया ब्रह्मादिरूपया अनावृताक्षः अनाच्छन्नज्ञानोऽपि विवृत इव मित्र इव निरीहः शान्त
एव न तु मित्रः ॥ अत्र विदुषस्तु भवं प्रमाणयति ॥ यन्नलत्परैरात्मत्वेनैव लभ्यत इति ॥ २४ ॥ यस्य ऋषभपादस्य ऋक्षं तं श्रीकृष्णं प्रार्थयते ॥ कृष्ण

द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्याख्यया
नावृताक्षो विवृत इव निरीहस्तत्परैरात्मलभ्यः ॥ २४ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदह
नानपवर्गवीर्य ॥ गोविंद गोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमंगल पाहि भृत्यान् ॥ २५ ॥ य
इदं कल्य उत्थाय महापुरुषलक्षणं ॥ तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयं ॥ २६ ॥

[illegible]कृष्णस्य सखे वृष्णिश्रेष्ठ ॥ अवनिद्रुहो ये राजन्याः ॥ तेषां वंशस्य दहन ॥ अनपवर्गम् अक्षीणं वीर्यं यस्य ॥ गोपवनितानां व्रजाः
[illegible]ताः भृत्या नारदादयः तैर्गीतं तीर्थभूतं श्रवः कीर्तिर्यस्य ॥ श्रवणमेव मंगलं यस्य ॥ २५ ॥ एतज्जपमात्रस्यापि ब्रह्मज्ञानं फल
[illegible]हारि ॥ कल्य उषःकाले यस्तच्चित्तः प्रयतः शुचिः स्वस्थः सन् जप्त्वा गुहाशयं हरिं ब्रह्म पश्यतीति ॥ २६ ॥

राम
३८

...ष्टुत्वेन नपितृन्याउद्दिमाराताः सूर्निव्यूहः सप्तधाने रविव्यूहोऽत्र पृच्छ्यते ॥१६॥ सूत इति पंचमे पृ... ह ॥ तथाऽन्येष्वप्ययोगं धर्वाप्सर
...मासेषु... धाता देवाः त्वैकैकशो गणाः सप्तैत्यादिना ॥ सौरः सूर्यसंबंधी सप्तानां गणाः ॥१७॥ तेषां सप्तानां अधीश्वरैः
...भिः तन्नामाप्राधिकृतस्सर्वा ॥ व्यूहं विभागं ॥१८॥ तत्र तावत् व्यूहं निरूपयितुं प्रथमं सूर्यस्वरूपमाह ॥ अनाद्ययामायया
सूर्यस्य ॥ लोकतंत्रः लोकयात्राप्रवर्त्तकः ॥१९॥ आत्मतत्त्वस्य क्रियाभेदोपाधिकमेव नानात्वं न स्वतः इत्याह एक एवेति ॥ सूर्य आत्मा

शौनक उवाच ॥ सूतकोपदशाह भगवान् विष्णुरेतानपस्पृशावते ॥ सैरोगणोप्रातिमासि नानावसतिसप्तकः ॥१७॥ तेषां
नामानि कर्माणि संयुक्तानामधीश्वरैः ॥ ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः ॥१८॥ सूत उवाच ॥ अनाद्य
विद्यया विष्णोरात्मनः सर्वदेहिनां ॥ निर्मितो लोकतंत्रोयं लोकेषु परिवर्त्तते ॥१९॥ एक एव हि लोकानां सूर्य
आत्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ॥२०॥ कालो देशः क्रिया कर्त्ता करणं कार्यमागमः
द्रव्यं फलमिति ब्रह्मन्नवधोक्तोऽजया हरिः

जगतस्तस्थुषश्चेति श्रुतेः ॥ जगदात्मा आदिकृत् प्रथमकर्त्ता हरिरेव सूर्यः सच
सर्वासां वेदोक्तक्रियाणां मूलं सन् तेनोपाधिना बहुधोक्तः ॥२०॥ कालरूपधारिणो हरेर्देशादिस्वरूपभेदं क्रियोपाधिकं दर्शयितुं प्रथ
मं सर्वकर्मप्रवृत्तये ॥ मायाकृतं नवधाभेदमाह ॥ काल इति ॥ कालः क्षणादिः देशः समादिः क्रियाऽनुष्ठानं ॥ कर्त्ता ब्राह्मणादिः कार
णं स्रुगादि ॥ कार्यं यागादि ॥ आगमः मंत्रादिः द्रव्यं व्रीह्यादि ॥ फलं स्वर्गादि ॥२१॥

तत्र च कालरूपधारी भगवान् पृथक् चरति । मध्वादिषु चैत्रादिषु । लोकतंत्राय लोकयात्रानिर्वाहाय २१ तानेवाह गणानाह धातेति द्वाद
शभिः धाता सूर्यः कृतस्थली अप्सराः हेतिः राक्षसः वासुकिर्नागः रथकृत यक्षः पुलस्त्य ऋषिः तुंबुरुर्गंधर्वः नयंति चैत्रं नयंति २२
अथौजाः यक्षः प्रहेतो राक्षसः नारदो गंधर्वः कच्छनीरो नागः माधवं वैशाखं २४ मित्रः सूर्यः पौरुषेयो राक्षसः शुक्रमासं ज्येष्ठं २५

मध्वादिषु द्वादशसु भगवान् कालरूपधृक् । लोकतंत्राय चरति पृथक् द्वादशभिर्गणैः २१ धाता कृतस्थली हेतिर्वा
सुकी रथकृन्मुने । पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी २२ अर्यमा पुलहोथौजाः प्रहेतिः पुंजिकस्थली ना
रदः कच्छनीरश्च नयंत्येते स्म माधवं २४ मित्रोत्रिः पौरुषेयोथ तक्षको मेनका हहाः । रथस्वन इति ह्येते शुक्रमासं
नयंत्यमी २५ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हूहूः । शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी २६ इंद्रो विश्वाव
सुः श्रोता एलापत्रस्तथांगिराः । प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी २७ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः

रुणः सूर्यः सहजन्यो यक्षः शुक्रो नागः चित्रस्वनो राक्षसः शुचिमासमाषाढं २६ अनुम्लोचा शंखपालो नभस्याख्यं नयंत्यमी २८
इंद्रः सूर्यः विश्वावसुर्गंधर्वः श्रोता यक्षः एलापत्रो नागः वर्यो राक्षसः रतिविधमेव व्याख्यातो नभोमासं श्रावणं २७ विवस्वान् सूर्यः उग्र
सेनो गंधर्वः व्याघ्रो राक्षसः आसारणो यक्षः शंखपालो नागः नभस्याख्यं भाद्रपदं २८

एम
४

धनंजयो नागः॥ वातो राक्षसः॥ सुषेणो गंधर्वः सुरुचिर्यक्षः॥ तपो माघं माघ मासं क्रमात्तिलघनं॥ कोर्मेक्रारिक्रमाद्रुमारोरण॥ वेदमवेद मासक्रमेणोक्तिः॥ ऋविश्वामस्यत्यपदस्य कल्पभेदेनेति ज्ञेयं॥३९॥ क्रतुर्यक्षः॥ वर्चा राक्षसः॥ पर्जन्यः सूर्यः॥ सेनजित अप्सराः॥ विश्वो गंधर्वः॥ ऐरावतो नागः॥ तपस्याख्यं फाल्गुनं॥४०॥ अंशुः सूर्यः॥ अंशुरिति वा पाठः॥ तार्क्ष्यो यक्षः॥ ऋतसेनो गंधर्वः॥ विद्युच्छत्रुः राक्षसः॥ महा

पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा॥ घृताची गौतमश्चैव तपोमासं नयंत्यमी॥३९॥ क्रतुर्वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा॥ विश्वश्चैरावतश्चैव तपस्याख्यं नयंत्यमी॥४०॥ अंशुः काश्यपतार्क्ष्य ऋतसेनस्तथोर्वशी॥ विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी॥४१॥ भगः स्फूर्जोऽरिष्टनेमिरूर्णायुश्च पंचमः॥ कर्कोटकः पूर्वचित्तिः पुष्यमासं नयंत्यमी॥४२॥ त्वष्टाऋवीकतनयः कंबलश्च तिलोत्तमाः॥ ब्रह्मापेतोऽथ ऋतजित धृतराष्ट्र इषंभराः॥४३॥ विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित॥ विश्वामित्रो मखापेत ऊर्जमासं नयंत्यमी॥४४॥

स्तु:

शंखो नागः॥ सहोमासं मार्गशीर्षं॥४१॥ भगः सूर्यः॥ स्फूर्जो राक्षसः॥ अरिष्टनेमिर्गंधर्वः॥ ऊर्णायुर्यक्षः॥ आयुः आपि: कर्कोटको नागः॥४२॥ ऋवीकतनयो यमदग्निः॥ कंबलो नागः॥ ब्रह्मापेतो राक्षसः॥ ऋतजित यक्षः॥ धृतराष्ट्रो गंधर्वः॥ इषंभराः॥ आश्विनपालकाः॥४३॥ विष्णुरादित्यः॥ अश्वतरो नागः॥ सूर्यवर्चा गंधर्वः॥ सत्यजित यक्षः॥ मखापेतो राक्षसः॥ ऊर्जमासं कार्त्तिकं॥४४॥

तार्क्ष्यश्चारिष्टनेमिश्च ऋतजित्सत्यजित्तथा ।।

एते वा आदित्यादयः कौर्मे विभज्योक्ताः ॥ धातार्यमा च मित्रश्च वरुणश्चेंद्र एव च ॥ विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च ॥ भगस्त्वष्टा च वि
ष्णुश्च आदित्या द्वादश स्मृताः ॥ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोथांगिरा भृगुः ॥ गौतमोथ भरद्वाजः कश्यपः क्रतुरेव च ॥ जमदग्निः कौशिक
श्च मुनयो ब्रह्मवादिनः ॥ रथकृच्चारिष्टनेमिर्ग्रामणीश्च रथस्वनः ॥ रथचित्रस्वनः श्रोता अरुणः सेनजित्तथा ॥ एते यक्षाः समुद्दिष्टाः
एतस्मान विवस्विवः ॥ अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा ॥ वर्यो व्याघ्रस्तथापश्च वायुर्विद्युद्दिवाकरः ॥ ब्रह्मापेतश्च विप्रेंद्र य
ज्ञापेतश्च राक्षसाः ॥ वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः ॥ एलापत्रः शंखपालस्तथैरावतसंज्ञितः ॥ धनंजयो महापद्मस्तथा ॥

एता भगवतो विष्णोरादित्यस्य विभूतयः ॥ स्मरतां संध्ययोर्नॄणां हरंत्यंहो दिने दिने ॥ ४५ ॥ रामराम

कर्कोटको द्विजाः ॥ कंबलोश्वतरश्चैव वहंत्येवं यथाक्रमं ॥ तुंबुरुर्नारदो हाहा हूहूर्विश्वावसुस्तथा ॥ उग्रसेनो वसुरुचिर्विश्वावसुरथाप
रः ॥ चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः ॥ सूर्यवर्चा द्वादशैते गंधर्वा गायतां वराः ॥ कृतस्थल्यप्सरोवर्या तथान्या पुंजिकस्थली
मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः ॥ अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा ॥ अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमा ॥
रंभा चेति द्विजश्रेष्ठास्तथैवाप्सरसः स्मृता इति ॥ ॥४५॥ ॥ ॥ ॥ ॥

[illegible] ध्यानो गोपित्रे रूपयति ॥ द्वादशस्वपीति त्रिभिः ॥ असौ देवः सूर्यः षड्भिर्गंधर्वादिभिः ॥ असज्जनत्समंताच्चरन्नत्र भांमतिं तनु
॥ [illegible] यथार्थोऽनेन स्तुवितः ॥४६॥ तल्लिंगैः सूर्यप्रकाशकैः ॥ ॥४७॥ उन्नह्यंति दृढं बध्नंति ॥ ग्रामण्यो यक्षाः ॥ नैर्ऋताः राक्षसाः ॥

द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै ॥ चरन्समंतात्तनुते परत्रेह च सन्मतिं ॥४६॥ सामर्ग्यजुर्भिस्तल्लिं
गैर्ऋषयः संस्तुवंत्यमुं ॥ गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसोऽग्रतः ॥४७॥ उन्नह्यंति रथं नागा ग्रामण्यो
लि रथयोजकाः ॥ नोदयंति रथं पृष्ठे नैर्ऋता बलशालिनः ॥४८॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयो
ऽमलाः ॥ पुरतोऽभिमुखं यांति स्तुवंति स्तुतिभिर्विभुं ॥४९॥ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः
कल्पे कल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ॥५०॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे एकादशो
ऽध्यायः ॥

किंच ॥ वालखिल्या इति ॥ एतेऽपि तमासंत एव विभुं सूर्यं ॥४९॥ व्यूह्य विभज्य ॥५०॥ इति द्वादशे एकादशः ॥११॥

द्वादशोक्तपुराणोक्ताः सर्वार्थास्तु क्रमः कृतः ॥ प्रथमस्कन्धमारभ्य प्राधान्येन समाहृताः ॥१॥ न देवमासीत् पुराणोक्तानर्थान् संक्षेपतो व
र्णयिष्यन्नु धर्मादीन् प्रणमति नम इति ॥ महते भक्तिलक्षणाय ॥ ब्राह्मणेभ्यः ब्राह्मणान् ॥ सनातनान् धर्मान् नित्यपलक्षणं पुराणोक्ता
र्थानां ॥१॥ प्रत्यक्षत्वेऽपि तं श्रवणादियोग्यं ॥२॥ एतत्स्वयं वदति ॥ अत्रेति ॥ भगवान् ऐश्वर्यादिषड्गुणः ॥ साक्षात्संकीर्तित इति देवताकाण्ड

सूत उवाच ॥ नमो धर्माय महते नमः कृष्णाय वेधसे ॥ ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् ॥१॥ एतद्वः
कथितं विप्रा विष्णोश्चरितमद्भुतं ॥ भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं ॥२॥ अत्र संकीर्तितः साक्षात्सर्वपाप
हरो हरिः ॥ नारायणो हृषीकेशो भगवान्सात्वतां पतिः ॥३॥ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं ॥ ज्ञानं च तदुपा
ख्यानं प्रोक्तं विज्ञानसंयुतं ॥४॥ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयं ॥५॥

र्थः ॥२॥ ब्रह्मकाण्डार्थमाह ॥ अत्र ब्रह्मेति ॥ गुह्यं निर्गुणं ॥ प्रभवाप्ययं प्रभवत्यस्मादिति प्रभवं अप्येत्यस्मिन्निति अप्ययं तच्च तच्च ॥ अनेनाऽ
धिकारार्थो दर्शितः ॥ विज्ञानसंयुतं ॥ अपरोक्षज्ञानपर्यन्तं ज्ञानं ॥ तदुपाख्यानं तत्तज्ज्ञानस्योपाख्यायते प्रकाश्यते येन वा तत्तज्ज्ञानसाधनं ॥
[illegible]र्थः ॥३॥ कर्मकाण्डार्थमाह ॥ भक्तियोगश्च साधनरूपः ॥ तदाश्रयं भक्तियोगेन निष्ठा इति ॥५॥ ॥ ॥ ॥

राम

४२

एवं मामाम्पनो निरूप्येदानीं द्वादशस्कंधप्रकरणार्थानतुक्रामति । पारीक्षितमुपाख्यानं परिक्षिज्जन्मादि । तत्र तत्रावायनारदाख्यानं च
। ५ । ब्रह्मर्षेर्ब्राह्मणान्नमस्य । इति प्रथमस्कंधार्थः । द्वितीयस्कंधार्थमाह । उत्क्रांतिरर्चिरादिगतिः । प्राधानिकः प्रधानकार्यविराट्सर्गः
श्रुयतः श्रारितः महदादिक्रमेणेत्यर्थः । इति द्वितीयार्थः । ७ । तृतीयस्कंधार्थमाह । महापुरुषस्य संस्थितिः प्रलये तत्त्वमीमवस्थानं । ८

पारीक्षितमुपाख्यानं नारदाख्यानमेव च । ५ । प्रायोपवेशोपजर्षेर्विप्रशापात्परीक्षितः । शुकस्यैव च ब्रह्मर्षेः संवादश्च
परीक्षितः । ६ । योगधारणयोत्क्रांतिः संवादो नारदाजयोः । अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः । ७ । विदुरोद्धव
संवादः क्षत्तृमैत्रेययोस्ततः । पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः । ८ । ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च
ये । ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः । ९ । कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः । भुव उद्धरणेंऽभोधेर्हिर
ण्याक्षवधो यथा । १० । ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च । अर्धनारीनरस्याथ यतः स्वायंभुवो मनुः । ११ । शतरूपा
च या स्त्रीणामाद्या प्रकृतिरुत्तमा । संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः । १२ । अवतारो हि देवस्य कपिलस्य महात्म
नः । देवहूत्याश्च संवादः कपिलेन च धीमता । १३

प्राकृतिकः प्रकृतिमवोगुणक्षोभरूपः । वैकृतिका महदादयः चकाराद्वैकारिकाश्चयेतथा
स्तेषां च सर्गः । ९ । गतिः स्वरूप । उद्धरणे उद्धारणे । १० । अर्धीभ्यां नारीनरश्चतस्य । ११ । संतानो धर्मपत्नीनामिति नव ब्रह्मसमुत्पत्तिरित्यस्या
नंतरं द्रष्टव्यं । १२ । १३ । इति तृतीयार्थः ।

चतुर्थस्कंधार्थमाह ॥ नवब्रह्मणामसृष्ट्यादीनां समुत्पत्तिः संतानः इति चतुर्थार्थः ॥ ४ ॥ पंचमस्कंधार्थमाह ॥ ततः प्रैयव्रतं प्रियव्रतस्य चरितं ॥ ५
द्वीपाद्युपवर्णनं षष्ठमस्कंधे पतः ॥ ततो द्वीपादीनां गिरिनद्योनद्यश्च तेषामुपवर्णनं ॥ पातालनरकादीनां च स्थितिः अनेनैव नरके निवर्तक

नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं ॥ ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः ॥ ४ ॥ नारदस्य च संवादस्ततः प्रैयव्रतं द्विज
नाभेस्ततोनुचरितमृषभस्य भरतस्य च ॥ ५ ॥ ततो द्वीपसमुद्रादिवर्षनद्युपवर्णनं ॥ ज्योतिश्चक्रस्य संस्थानं पातालनरक
स्थितिः ॥ ६ ॥ दक्षजन्मप्रचेतोभ्यस्तत्पुत्रीणां च संततिः ॥ यतो देवासुरनरास्तिर्यङ् मृगखगादयः ॥ ७ ॥ त्वाष्ट्रस्य जन्मनिध
नं पुत्रयोश्च दितेर्द्विजाः ॥ दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः ॥ ८ ॥ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं ॥ मन्वंतरावता
राश्च विष्णोर्हयशिरादयः ॥ ९ ॥ कौर्मं मात्स्यं नारसिंहं वामनं च जगत्पतेः ॥ क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां ॥ १० ॥
देवासुरमहायुद्धं राजवंशानुकीर्तनं ॥ इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः ॥ ११ ॥ इलोपाख्यानमत्रोक्तं तारोपाख्या
नमेव च ॥ सूर्यवंशानुकथनं शशादाद्या नृगादयः ॥ १२ ॥ सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः ॥ खट्वांगस्य च मांधातुः
सौभरेः सगरस्य च ॥ १३ ॥ रामस्य कौशलेंद्रस्य चरितं किल्बिषापहं ॥ निमेरंगपरित्यागो जनकानां च संभवः ॥ १४ ॥ रामस्य भा

...गोमितो लोपाख्यानं गृहीतं ॥ ततः प्राचीनं ॥ इति पंचमार्थः ॥ ६ ॥ र्गवेंद्रस्य निःक्षत्रकरणं भुवः ॥ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च ॥ १५ ॥
...र्थमाह दक्षजन्मेति इति षष्ठार्थः ॥ ७ ॥ सप्तमार्थमाह पुत्रयोश्चेति ॥ इति सप्तमार्थः ॥ ८ ॥ अष्टमार्थमाह मन्वंतरानुचरितमिति ॥ हयविक्रम.
...रोक्तिः ॥ वाल्मीकिप्रभृतिभिः रामायणकल्पत्वेनेति द्रष्टव्यं ॥ ९ ॥ १० ॥ इत्यष्टमार्थः ॥ नवमार्थमाह ॥ राजवंशेति ॥ ११ ॥ १२ ॥ १४ ॥ सोमवंशादि— नभेतस्य चरितं

तत्त्वतस्य भीष्मस्य ॥ ९६ ॥ ७ ॥ इति नवमार्थः ॥ दशमार्थमाह ॥ तस्य कर्माणीति ॥ पूतनायाश्च सहितस्य स्तन्यपयसः पानं ॥ १८ ॥ सहभ्रातुः स

रौरव्यं ते भरतस्यापि शंतनोस्तत्सुतस्य च ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोऽनुकीर्तितः ॥ १६ ॥ यत्रावतीर्णो भगवान् कृष्णाख्यो जग
दीश्वरः ॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ॥ १७ ॥ तस्य कर्माण्यपाराणि कीर्तितान्यसुरद्विषः ॥ पूतनासुपयःपानं शकटोच्चा
टनं शिशोः ॥ १८ ॥ तृणावर्तस्य निःपेषस्तथैव बकवत्सयोः ॥ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः ॥ १९ ॥ गोपानां च परित्राणं
दावाग्नेः परिमर्दितः ॥ दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं ॥ २० ॥ व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः ॥ प्रसादो य
ज्ञपत्नीभ्यो विप्राणां चानुतापनं ॥ २१ ॥ गोवर्द्धनोद्धरणं च शक्रस्य सुरभेरथ ॥ यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ॥ २२ ॥
शंखचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः ॥ अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ॥ २३ ॥ व्रजस्त्रीणां विलापश्च मथुरालोक
क नं ततः ॥ गजमुष्टिकचाणूरकंसादीनां च यो वधः ॥ मृतस्यानयनं सूनोः पुनः सांदीपनेर्गुरोः ॥ २४ ॥ मथुरायां निवसता यदुचक्र
स्य यत्प्रियं ॥ कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः ॥ २५ ॥ जरासंधसमानीतसैन्यस्य बहुशो वधः ॥ घातनं यवनेंद्रस्य कुशस्थ
ल्यां निवेशनं ॥ २६ ॥ आदानं पारिजातस्य सुधर्मायाः सुरालयात् ॥ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः ॥ २७ ॥ हरस्य जृंभणं युद्धे
बाणस्य भुजकृंतनं ॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ॥ २८ ॥ चैद्यपौंड्रकशाल्वानां दंतवक्रस्य दुर्मतेः ॥ शंबरो द्विविदः पी
ठो मुरः पंचजनादयः ॥ माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनं ॥ २९ ॥ भारावतरणं भूमेर्निमित्तीकृत्य पांडवान् ॥ ३० ॥

सात्वस्य ॥ १९ ॥ २० ॥ ॥ यज्ञाभिषेकं यतः पूजाश्चाभिषेकश्च तयोर्द्वैकं ॥ २२ ॥ द्विषतः शत्रून् प्रमथ्य ॥ २७ ॥ २८ ॥ ये च शंबरादयस्तेषां माहात्म्यं प्रभावः ॥ २९ ॥ ३० ॥ इति

एकादशार्थमाह विप्रशापेति ॥ ४१ ॥ धर्मविनिर्णयः वर्णाश्रमधर्मनिश्चयः ॥ मर्त्यपरित्यागः मनुष्यत्वस्यांतर्द्धानं ॥ ४२ ॥ इत्येकादशार्थः ॥ द्वा
दशार्थमाह ॥ युगेति ॥ युगलक्षणं ॥ तदनुरूपा वृत्तिश्चेत्यर्थः ॥ त्रिविधा प्राकृतिकी नैमित्तिकी नित्या चेति ॥ ४२ ॥ अशेषश्चासस्य ॥ तत्पदस्य चवि

वि

विप्रशापापदेशेन संहारः स्वकुलस्य च ॥ उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ॥ ४१ ॥ यत्रात्मविद्या ह्यखिला प्रो
क्ता धर्मविनिर्णयः ॥ ततो मर्त्यपरित्याग आत्मयोगानुभावतः ॥ ४२ ॥ युगलक्षणवृत्तिश्च कलौ नॄणामुपप्लवः ॥ चतु
र्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ॥ ४३ ॥ देहत्यागश्च राजर्षेर्विष्णुरतस्य धीमतः ॥ शाखाप्रणयनमृषेर्मार्कंडेयस्य
सत्कथाः ॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ॥ ४४ ॥ इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोऽहमिहास्मि वः ॥ लीलाव
तारकर्माणि कीर्तितानीह सर्व्वतः ॥ ४५ ॥

न्यासः इत्यर्थः ॥ ४४ ॥ इति चोक्तमिति चकारादन्यदपि वः युष्माभिरिह यत्पृष्टोऽस्मि तदुक्तमिति ॥ किमेवं नानार्थकथनेन तत्राह लीला
वेति ॥ सर्वतः तत्तदर्थकीर्तनद्वारेणेत्यर्थः ॥ ४५ ॥

...कीर्त्तने सत्यपि किमित्यपेक्षायां तत्फलमाह ॥ द्वाभ्यां पतितः कूपादिषु स्खलितः सोपानादिषु ॥ आर्त्तः दुःखितः ॥ क्षुत्त्वा क्षुतं कृत्वा
विवशोपि ॥ ४६ ॥ संकीर्त्यमानः ॥ यद्वा ॥ श्रुतः अनुभावो यस्य सः पुंसां चित्तं प्रविश्य व्यसनं निःशेषं दुःखं विधुनोतीति ॥ हीति सततमपञ्चम
वंशमापाययति ॥ अर्को निहारादि ध्वांतं न निवर्त्तयतीत्यपरितोषाद्दृष्टांतांतरमाह ॥ अतिवातः अभ्रमिवेति ॥ ४७ ॥ हरिकीर्त्तनमेव

पतितः स्खलितो चार्त्तः क्षुत्त्वा वा विवशो गृणन् ॥ हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥ ४६ ॥ संकीर्त्यमानो भगवान
नंतः श्रुतानुभावो व्यसनं हि पुंसां ॥ प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोर्कोभ्रमिवातिवातः ॥ ४७ ॥ मृषा
गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदय
॥ ४८ ॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवं ॥ तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ ४९ ॥

महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमिति प्रपंचयति ॥ मृषागिर इति चतुर्भिः ॥ मृषा गिरः मिथ्यावाचः ॥ असतीः
॥ असत्यः ॥ असतां कथा या या हि ताः यत् यासु ॥ उत्तमश्लोकस्य यशोऽनुगीयते इति यत् तदेव सत्यं ॥ तदेव हि मंगलं ह इति हर्षे ॥ भगवद्गु
णानामभ्युदयो यस्मात् तत् ॥ ४८ ॥ नवं नवं यथा भवति तथा हि रुचिरं हि विषदं ॥ महानुत्सवो यस्मात् ॥ ४९ ॥

चित्राणि पदानि यस्मिन् तदपि जगत्पवित्रयतीति तथा न तद्धरेर्यशो न प्रगृणीत न वर्णयेत् तद्वचः ध्वांक्षतीर्थं काकतुल्यानां रतिस्थानं
न तु हंससेवितं निभिः सेवितं ॥ तत्र हेतुः यत्रेति ॥ १० ॥ स वाग्विसर्गः स च वाक्प्रयोगः जनताघविप्लवः जनसमूहाघनाशकः ॥ यद्य
प्यातत्तान्येव ॥ शुभैः कीर्त्यमानानि शृण्वंति श्रोतरि सति गायंति नोचेत् स्वयमेव गृणंति ॥ ११ ॥ इदानीं ज्ञानकर्मादिरहितं भगवत्
कीर्तनादि सेवादरः कर्तव्य इत्याह ॥ नैः कर्म्यं ब्रह्मतत्त्वप्रकाशकं यत् ज्ञानं ॥ यतो निरंजनं उपाधिनिवर्तकं ॥ तदप्यच्युतभक्तिवर्जि

न तद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि सा

घ

धवोऽमलाः ॥ १० ॥ स वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्य यशोंकितानि
यत् शृण्वंति गायंति गृणंति साधवः ॥ ११ ॥ नैः कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं ॥ कुतः
पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणं ॥ १२ ॥ यशः श्रियामेव परिश्रमः परो वर्णाश्रमाचारत
पः श्रुतादिषु ॥ अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ॥ १३ ॥

तं न शोभते नापरोक्षपर्यंतं भवतीत्यर्थः ॥ ईश्वरे न चेदर्पितं तर्हि यत्तु सर्वदा भद्रमपि कर्म तदपि पुनः कुतः शोभते ॥ यतः शश्व
[illegible] साधनकालेऽपि फलकालेऽपि अभद्रं दुःखात्मकं ॥ १२ ॥ किंच वर्णाश्रमाचारादिषु यः परो महान् परिश्रमः तस्य शोभनं [uncertain reading] श्रियामेव

राम
४५

[illegible] केवलं न परः पुरुषार्थ इत्यर्थः ॥ गुणानुवादादिभिः श्रीधरपादपद्मयोरविस्मृतिर्भवति ॥ १३ ॥

तः किम[illegible]ाह अविस्मृतिरिति ॥ शृणोति नाशयति ॥ ५४ ॥ अथेदानीं श्रोतॄनात्मानं चाभिनंदन्नाह यूयमिति द्वाभ्यां ॥ हे द्विजाग्र्याः यद्य
[illegible]त आत्मन्यतः करणो अनारायणो अविवेशपशश्वद्भजतं सभावनायालोरू ॥ अतो भूरिभागाः बहुपुण्याः ॥ कथंभूतं ॥ अखिलात्मभू

अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति च ॥ सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविराग
युक्तं ॥ ५४ ॥ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं ॥ नारायणं देवमदेवमीशमजस्रभावा भजताविवि
वेश्य ॥ ५५ ॥ अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ॥ प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च
शृण्वतां ॥ ५६ ॥ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥ माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ॥ ५७ ॥ य एवं श्रावये
न्नित्यं यामक्षणमनन्यधीः ॥ श्रद्धावान् योनुशृणुयात्पुनात्यात्मानमेव सः ॥ ५८ ॥ द्वादश्यामेकादश्यां वा शृण्वन्नायुष्य
वान्भवेत् ॥ पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ॥ ५९ ॥ पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य संहितामेतां
पठित्वा मुच्यते भयात् ॥ ६० ॥ देवता मुनयः सिद्धाः पितरो मनवो नृपाः ॥ यच्छंति कामान्गृणतः शृण्वतो यस्य कीर्तनात् ॥ ६१

नं सर्वान्तर्यामिणं ॥ सूत एतदेव सर्वोपास्यं ॥ अहं देवं ॥ न देवोऽन्योपास्यतं ॥ भजतः ईशः ॥ यद्वा यस्मात् यूयं भूरिभागाः तपश्चारिसंपन्नाः ततो नारायणं
भजतेति विधिः ॥ ५५ ॥ मे मया श्रुतं ॥ ५६ ॥ एतत्पुराणकीर्तनादिफलं प्रपंचयितुमाह ॥ एतद्वः इत्यष्टभिः ॥ ५७ ॥ यामं क्षणं वेत्यर्थः ॥ आत्मानमेव सः
ज्ञात्वा नातिनश्वत्वानादिवदेहमात्रं ॥ ५८ ॥ ६१ ॥

भा॰ द्वा
९६

ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविंदते तत्फलमेतां पठित्वाऽनुविंदत इति ॥ ६३ ॥ किंच प्रोक्तमिति ॥ ६४ ॥ राजन्य उदधिमेखलां पृथ्वीं ॥ सवि
रार्थः ॥ ६५ ॥ अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह ॥ कलिमलानां संहतिं समूहं कालयति विनाशयतीति ॥ इतरत्र शास्त्रांतरे ॥ ६६ ॥ शास्त्र
प्रतिपादितं भगवंतं नमस्करोति ॥ तमिति द्वाभ्यां ॥ जगदुदयस्थितिसंयमात्मनो रजआद्याः शक्तयो यस्य तं ॥ द्युपतिभिर्देवैरपि दुरवसितः अज्ञातः स्त

ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविंदते ॥ मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं ॥ ६३ ॥ पुराणसंहितामेतामधीत्य प्रयतो
द्विजाः ॥ प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ॥ ६४ ॥ विप्रोऽधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलां ॥ वैश्यो निधिपतित्वं च शूद्रः
शुध्येत पातकात् ॥ ६५ ॥ कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं ॥ इह तु पुनर्भगवानशेषमूर्तिः परिपठि
तोऽनुपदं कथाप्रसंगैः ॥ ६६ ॥ तमहमजमनंतमात्मतत्वं जगदुदयस्थितिसंयमात्मशक्तिं ॥ द्युपतिभिरजशक्रशंकराद्यैर्दुरवसि
तस्तवमच्युतं नतोस्मि ॥ ६७ ॥ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजंगमालयाय ॥ भगवत उपलब्धिमात्रधाम्ने सुर
ऋषभाय नमः सनातनाय ॥ ६८ ॥ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयं ॥ व्यतनुत कृ
पया यस्तत्वदीपं पुराणं ॥ तमखिलवृजिनघ्नं व्याससूनुं नतोस्मि ॥ ६९ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे द्वादशोऽध्यायः ॥

य
र

[illegible]स्तोत्रं यस्य तं ॥ ६७ ॥ उपचिताभिः उद्रिक्ताभिः ॥ नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्व आत्मन्येवोपरचितं स्थिरजंगमं वालयो
[illegible] भगवते ॥ ६८ ॥ श्रीशुकं नमस्करोति ॥ स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः ॥ तेनैव व्युदस्तोऽन्यस्मिन्भावो यस्य तथाभूतोऽपि अजितस्य रुचि
राभिर्लीलाभिः आकृष्टः सारः स्वसुखबोधानंतस्थैर्यं यस्य सः ॥ तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोस्मीति ॥ ६९ ॥ द्वादशो ऽध्यायः ॥

द्वाद
९६

स॰ ... णानामाख्याद्रीरुपपद्यणांप्रियष्ठान् ॥ तस्मातिपाद्यश्च स्वप्रणामति ॥ यमिति ॥ स्तवैर्वेदैश्च स्तावयंति स्तुवंति उपनिषद्भूस्याकारांतनत्वेच्छेदोद्गोधेन ॥ ध्याने
न ... स्थितेन निश्चलेन तद्गतेन तस्मिन्नहितेन ॥ यस्यांतं न विदुः सुरासुरगणाः ॥ १ ॥ २ ॥ क्षीरोदमथनार्थं उद्धृतं यत्स्वमेव प्रदर्शयितुं कूर्मावतारमनुस्मारयन्नाशि
... षयते ॥ पृष्ठे भ्राम्यन्स्वमंदरो गरिष्ठो मंदरगिरिस्तस्य ग्रावाणस्तेषामग्राणि तैः कंडूयनात् तेन सुखेन निद्रालोः निद्राशीलस्य ॥ येषां श्वासानि
... लानां संस्कारात्तेषां कलालेशाः तदनुवर्तनवशात् जलनिधेः समुद्रस्याद्यापि न विश्राम्यति ॥ नयमुद्रं द्वीपादेवतन्तसंस्कारवशात्तन्नाह ॥ वेला

॥ सूत उवाच ॥ यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ॥ ध्यानावस्थिततद्गतेन
मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ १ ॥ पृष्ठे भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयना
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पांतु वः ॥ यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनांभसां ॥ यातायातमतंद्रितं जल
निधेर्नाद्यापि विश्राम्यति ॥ २ ॥ सूत उवाच ॥ पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने ॥ दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ॥ ३ ॥ ब्रा
ह्मं दशसहस्राणि पाद्मं पंचोनषष्टि च ॥ श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकं ॥ ४ ॥ दशाष्टौ श्रीभागवतं नारदं पंचविंशतिः ॥ मार्कंडं
नव वाह्नं च दशपंच चतुः शतं ॥ ५ ॥ चतुर्दश भविष्यं स्यात्तथा पंचशतानि च ॥ दशाष्टौ ब्रह्मवैवर्तं लैंगमेकादशैव तु ॥ ६ ॥ चतुर्विंशति वा
राहमेकाशीतिसहस्रकं ॥ स्कांदं शतं तथा चैकं वामनं दशकीर्तितं ॥ ७ ॥ कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ॥ एकोनविंशत्सौप
र्णं ब्रह्मांडं द्वादशैव तु ॥ ८

ज्ञो भावस्यानिमेनामिषेण ॥ पुराणानां संख्यानां संभूतिं समाहारं च ॥ अस्य तु श्रीभागवतस्य वाच्यं विषयः प्रयोजनं च दानं च
तस्य पाठादेश्च माहात्म्यं च निबोधत ॥ ३ ॥ त्रयोविंशत् त्रयोविंशतिः ॥ चतुर्विंशतिसहस्राणि ॥ शैवकं शिवपुराणं ॥ ४ ॥ वाह्नं तु अग्निपुराणं ॥ दशपंचसहस्रा
णि चत्वारि शतानि ॥ ५ ॥ ६ ॥ स्कांदं शतात् अधिके काशीतिसहस्रं ॥ ७ ॥ सौपर्णं गरुडपुराणं ॥ एकोनविंशत् एकोनविंशतिः ॥ ८ ॥

९१
५५
२३
२४
१८
२५
९
१५१८००
१४१५००
१८
११
२४
१००
१०
१७
१८

भा॰द्वा ४७

महाभारतं त्वितिहासः रामायणं वऋषिप्रोक्तं काव्यं ॥ अतः पुराणानां संदोहः समूहः स्वचतुर्लक्षसंख्याक एव ॥ इदानीमस्य वाच्यप्रयोजनादीनि
दर्शयितुमाह तदेवत्यादिना ॥ ९ ॥ १० ॥ हरिलीलाकथानां व्रातः समूहः स एवामृतं तेनानंदिताः संतः सत्पुरुषा येन तत् ॥ ११ ॥ तन्निष्ठं तद्विषयं ॥

एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः ॥ तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥ ९ ॥ इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे
स्थिताय भवभीताय कारुण्यात्संप्रकाशितं ॥ १० ॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतं ॥ हरिलीलाकथाव्रातामृता
नंदितसत्सुरं ॥ ११ ॥ सर्ववेदांतसारं यत् ब्रह्मात्मैकत्वलक्षणं ॥ वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनं ॥ १२ ॥ प्रौष्ठपद्यां
पौर्णमास्यां हेमसिंहसमन्वितं ॥ ददाति यो भागवतं स याति परमां गतिं ॥ १३ ॥ राजंते तावदन्यानि पुराणानि सतां गणे ॥ या
वन्न दृश्यते साक्षाच्छ्रीमद्भागवतं परं ॥ १४ ॥ सर्ववेदांतसारं हि श्रीमद्भागवतमिष्यते ॥ तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः
क्वचित् ॥ १५ ॥ निम्नगानां यथा गंगा देवानामच्युतो यथा ॥ वैष्णवानां यथा शंभुः पुराणानामिदं तथा ॥ १६ ॥ क्षेत्राणां चैव सर्वे
षां यथा काशी ह्यनुत्तमा ॥ तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥ १७ ॥ श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते ॥ यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविःकृतं तच्छृण्वन्विपठन्वि

२ [illegible]ष्ठपद्यां हेमसिंहसमन्वितं स्वर्णसिंहासनारूढं ॥ १३ ॥ १५ ॥ तद्रस एवामृतं तेन तृप्तस्य निर्वृतस्य चारणपरो भक्त्या विमुच्येन्नरः ॥
भक्त्या न तच्छ्रवणादिपरो विमुच्यते ॥ १८ ॥

राम ४७

कस्मैति ॥ संहारादयप्रवर्तकरूपेण भगवद्ध्यानलक्षणं मंगलमाचरति कस्मै ब्रह्मणेऽतुलः अनुपमः भागवतरूपः पु
[illegible]ारी तद्रूपेण ब्रह्मरूपेण तद्रूपिणा नारदरूपिणा योगीन्द्राय तदात्मना शुकाय तदात्मना शुकरूपेण तत्परं सत्यं श्री
नारायणाख्यं तत्त्वं धीमहीति ॥ गायत्र्यैव यथोपक्रमे तथोपसंहरन् गायत्र्याख्यविद्येयमिति दर्शयति ॥१९॥ नम इति देवतारूपेण वसु

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा ॥ तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ॥ योगीन्द्राय तदा
त्मनाथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥१९॥ नमस्तस्मै भगवते वासु
देवाय साक्षिणे ॥ य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे ॥२०॥ योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ॥ संसार
सर्पदष्टं यो विष्णुरातममूमुचत् ॥२१॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥१३॥

णामतिनमस्करोति व्याचक्षे व्याख्यातवान् ॥२०॥२१॥ भावार्थदीपिकामेतां भगवद्भक्तवत्सला ॥ श्रीपरमानन्दपादाब्जमधुपः श्रीश्रीधरोऽकरोत्
स्वबालचपलालापैः स्वलीलापरिमन्त्रितैः ॥ प्रीयतां परमानन्दनृहरिः सत्सुहृद्वयं ॥१॥ श्रीपरमानन्दसंधीतेयं तत्त्वं भागवतं मया ॥ नत्वा तेन
रमाख्यातेन तत्त्वमस्मति वैभवात् ॥२॥ इति श्रीभागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥१३॥

[OrderDescription]
,CREATED=23.10.19 11:00
,TRANSFERRED=2019/11/13 at 14:21:02
,PAGES=731
,TYPE=STD
,NAME=S0002079
,Book Name=556
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF

FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF

FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF

FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF

FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF

FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF

FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF

FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF

FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF

FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF

FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF

FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF

FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF

FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF

FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF

FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF

FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
,FILE452=00000452.TIF
,FILE453=00000453.TIF

FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF
,FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF
,FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF
,FILE467=00000467.TIF
,FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF
,FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF

FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,FILE478=00000478.TIF
,FILE479=00000479.TIF
,FILE480=00000480.TIF
,FILE481=00000481.TIF
,FILE482=00000482.TIF
,FILE483=00000483.TIF
,FILE484=00000484.TIF
,FILE485=00000485.TIF
,FILE486=00000486.TIF
,FILE487=00000487.TIF
,FILE488=00000488.TIF
,FILE489=00000489.TIF
,FILE490=00000490.TIF
,FILE491=00000491.TIF
,FILE492=00000492.TIF
,FILE493=00000493.TIF
,FILE494=00000494.TIF
,FILE495=00000495.TIF

FILE496=00000496.TIF
,FILE497=00000497.TIF
,FILE498=00000498.TIF
,FILE499=00000499.TIF
,FILE500=00000500.TIF
,FILE501=00000501.TIF
,FILE502=00000502.TIF
,FILE503=00000503.TIF
,FILE504=00000504.TIF
,FILE505=00000505.TIF
,FILE506=00000506.TIF
,FILE507=00000507.TIF
,FILE508=00000508.TIF
,FILE509=00000509.TIF
,FILE510=00000510.TIF
,FILE511=00000511.TIF
,FILE512=00000512.TIF
,FILE513=00000513.TIF
,FILE514=00000514.TIF
,FILE515=00000515.TIF
,FILE516=00000516.TIF

FILE517=00000517.TIF
,FILE518=00000518.TIF
,FILE519=00000519.TIF
,FILE520=00000520.TIF
,FILE521=00000521.TIF
,FILE522=00000522.TIF
,FILE523=00000523.TIF
,FILE524=00000524.TIF
,FILE525=00000525.TIF
,FILE526=00000526.TIF
,FILE527=00000527.TIF
,FILE528=00000528.TIF
,FILE529=00000529.TIF
,FILE530=00000530.TIF
,FILE531=00000531.TIF
,FILE532=00000532.TIF
,FILE533=00000533.TIF
,FILE534=00000534.TIF
,FILE535=00000535.TIF
,FILE536=00000536.TIF
,FILE537=00000537.TIF

FILE538=00000538.TIF
,FILE539=00000539.TIF
,FILE540=00000540.TIF
,FILE541=00000541.TIF
,FILE542=00000542.TIF
,FILE543=00000543.TIF
,FILE544=00000544.TIF
,FILE545=00000545.TIF
,FILE546=00000546.TIF
,FILE547=00000547.TIF
,FILE548=00000548.TIF
,FILE549=00000549.TIF
,FILE550=00000550.TIF
,FILE551=00000551.TIF
,FILE552=00000552.TIF
,FILE553=00000553.TIF
,FILE554=00000554.TIF
,FILE555=00000555.TIF
,FILE556=00000556.TIF
,FILE557=00000557.TIF
,FILE558=00000558.TIF

FILE559=00000559.TIF
,FILE560=00000560.TIF
,FILE561=00000561.TIF
,FILE562=00000562.TIF
,FILE563=00000563.TIF
,FILE564=00000564.TIF
,FILE565=00000565.TIF
,FILE566=00000566.TIF
,FILE567=00000567.TIF
,FILE568=00000568.TIF
,FILE569=00000569.TIF
,FILE570=00000570.TIF
,FILE571=00000571.TIF
,FILE572=00000572.TIF
,FILE573=00000573.TIF
,FILE574=00000574.TIF
,FILE575=00000575.TIF
,FILE576=00000576.TIF
,FILE577=00000577.TIF
,FILE578=00000578.TIF
,FILE579=00000579.TIF

FILE580=00000580.TIF
,FILE581=00000581.TIF
,FILE582=00000582.TIF
,FILE583=00000583.TIF
,FILE584=00000584.TIF
,FILE585=00000585.TIF
,FILE586=00000586.TIF
,FILE587=00000587.TIF
,FILE588=00000588.TIF
,FILE589=00000589.TIF
,FILE590=00000590.TIF
,FILE591=00000591.TIF
,FILE592=00000592.TIF
,FILE593=00000593.TIF
,FILE594=00000594.TIF
,FILE595=00000595.TIF
,FILE596=00000596.TIF
,FILE597=00000597.TIF
,FILE598=00000598.TIF
,FILE599=00000599.TIF
,FILE600=00000600.TIF

FILE601=00000601.TIF
,FILE602=00000602.TIF
,FILE603=00000603.TIF
,FILE604=00000604.TIF
,FILE605=00000605.TIF
,FILE606=00000606.TIF
,FILE607=00000607.TIF
,FILE608=00000608.TIF
,FILE609=00000609.TIF
,FILE610=00000610.TIF
,FILE611=00000611.TIF
,FILE612=00000612.TIF
,FILE613=00000613.TIF
,FILE614=00000614.TIF
,FILE615=00000615.TIF
,FILE616=00000616.TIF
,FILE617=00000617.TIF
,FILE618=00000618.TIF
,FILE619=00000619.TIF
,FILE620=00000620.TIF
,FILE621=00000621.TIF

FILE622=00000622.TIF
,FILE623=00000623.TIF
,FILE624=00000624.TIF
,FILE625=00000625.TIF
,FILE626=00000626.TIF
,FILE627=00000627.TIF
,FILE628=00000628.TIF
,FILE629=00000629.TIF
,FILE630=00000630.TIF
,FILE631=00000631.TIF
,FILE632=00000632.TIF
,FILE633=00000633.TIF
,FILE634=00000634.TIF
,FILE635=00000635.TIF
,FILE636=00000636.TIF
,FILE637=00000637.TIF
,FILE638=00000638.TIF
,FILE639=00000639.TIF
,FILE640=00000640.TIF
,FILE641=00000641.TIF
,FILE642=00000642.TIF

FILE643=00000643.TIF
,FILE644=00000644.TIF
,FILE645=00000645.TIF
,FILE646=00000646.TIF
,FILE647=00000647.TIF
,FILE648=00000648.TIF
,FILE649=00000649.TIF
,FILE650=00000650.TIF
,FILE651=00000651.TIF
,FILE652=00000652.TIF
,FILE653=00000653.TIF
,FILE654=00000654.TIF
,FILE655=00000655.TIF
,FILE656=00000656.TIF
,FILE657=00000657.TIF
,FILE658=00000658.TIF
,FILE659=00000659.TIF
,FILE660=00000660.TIF
,FILE661=00000661.TIF
,FILE662=00000662.TIF
,FILE663=00000663.TIF

FILE664=00000664.TIF
,FILE665=00000665.TIF
,FILE666=00000666.TIF
,FILE667=00000667.TIF
,FILE668=00000668.TIF
,FILE669=00000669.TIF
,FILE670=00000670.TIF
,FILE671=00000671.TIF
,FILE672=00000672.TIF
,FILE673=00000673.TIF
,FILE674=00000674.TIF
,FILE675=00000675.TIF
,FILE676=00000676.TIF
,FILE677=00000677.TIF
,FILE678=00000678.TIF
,FILE679=00000679.TIF
,FILE680=00000680.TIF
,FILE681=00000681.TIF
,FILE682=00000682.TIF
,FILE683=00000683.TIF
,FILE684=00000684.TIF

FILE685=00000685.TIF
,FILE686=00000686.TIF
,FILE687=00000687.TIF
,FILE688=00000688.TIF
,FILE689=00000689.TIF
,FILE690=00000690.TIF
,FILE691=00000691.TIF
,FILE692=00000692.TIF
,FILE693=00000693.TIF
,FILE694=00000694.TIF
,FILE695=00000695.TIF
,FILE696=00000696.TIF
,FILE697=00000697.TIF
,FILE698=00000698.TIF
,FILE699=00000699.TIF
,FILE700=00000700.TIF
,FILE701=00000701.TIF
,FILE702=00000702.TIF
,FILE703=00000703.TIF
,FILE704=00000704.TIF
,FILE705=00000705.TIF

FILE706=00000706.TIF
,FILE707=00000707.TIF
,FILE708=00000708.TIF
,FILE709=00000709.TIF
,FILE710=00000710.TIF
,FILE711=00000711.TIF
,FILE712=00000712.TIF
,FILE713=00000713.TIF
,FILE714=00000714.TIF
,FILE715=00000715.TIF
,FILE716=00000716.TIF
,FILE717=00000717.TIF
,FILE718=00000718.TIF
,FILE719=00000719.TIF
,FILE720=00000720.TIF
,FILE721=00000721.TIF
,FILE722=00000722.TIF
,FILE723=00000723.TIF
,FILE724=00000724.TIF
,FILE725=00000725.TIF
,FILE726=00000726.TIF

FILE727=00000727.TIF
,FILE728=00000728.TIF
,FILE729=00000729.TIF
,FILE730=00000730.TIF
,FILE731=00000731.TIF
,